Rinsen Buddhist Text Series VI-1

SAMMATITARKA-PRAKARAṆAM

By

Siddhasena Divākara

With

Abhayadevasūri's Commentary,
Tattvabodhavidhāyinī

Vol. I

SAMMATITARKA-PRAKARAṆAM

By

Siddhasena Divākara

With

Abhayadevasūri's Commentary,
Tattvabodhavidhāyinī

Vol. I



1984

RINSEN BOOK CO.

Reprinted from the original edition published
in 5 vols., 1924～1931.

ISBN4-653-01083-8

L 257831

REPRODUCED BY
RINSEN BOOK CO., KYOTO 1984

गुजरात
पुरातत्त्वमन्दिर
ग्रन्थावली

ग्रन्थाङ्क १०

गुजरातपुरातत्त्वमन्दिरग्रन्थावली

आचार्यश्रीसिद्धसेनदिवाकरप्रणीतं

संमतितर्कप्रकरणम् ।

जैनश्वेताम्बर-राजगच्छीय-प्रद्युम्नसूरिशिष्य-तर्कपञ्चानन-
श्रीमदभयदेवसूरिनिर्मितया तत्त्वबोधविधायिन्या
व्याख्यया विभूषितम् ।

प्रथमो विभागः ।

(प्रथमगाथात्मकः)

गुजरातविद्यापीठप्रतिष्ठितपुरातत्त्वमन्दिरस्थेन
संस्कृतसाहित्य-दर्शनशास्त्राध्यापकेन
पं० सुखलाल संघविना

प्राकृतवाङ्मयाध्यापकेन जैनन्याय-व्याकरणतीर्थ-
पं० बेचरदास दोशिना च

पाठान्तर-टिप्पण्यादिभिः परिष्कृत्य संशोधितम् ।

गुजरातपुरातत्त्वमन्दिर
अमदावाद.

प्रथमावृत्तिः, प्रतिसं० ५००] संवत् १९८० [मूल्यम्-१० रूप्यकाणि.

प्रकाशकः—विठ्ठलदास मगनलाल कोठारी, गुजरातविद्यापीठ कार्यालय, **अमदावाद.**

मुद्रकः—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस, नं. २३, कोलभाट लेन, **मुंबई.**

प्रकाशकनुं निवेदन

पुरातत्त्वमंदिरनी प्रबन्धसमितिए संवत् १९७९ ना भादरवा वद १३ ना दिवसे निर्णीत करेला (ठराव पहेलाना परिशिष्ट १ मां सूचवेला) कार्यक्रम प्रमाणे संमतितर्कप्रकरणनो आ पहेलो भाग प्रकट थाय छे.

आ ग्रन्थने आवा रूपमां प्रकाशित करवानो मूळ संकल्प अने उपक्रम पं. श्रीसुखलालजी द्वारा आगराना आत्मानन्द जैन पुस्तकप्रचारक मंडळे करेलो. पण, ज्यारे पं. सुखलालजीए पुरातत्त्वमंदिरमां जोडाई, पोतानी सेवा विद्यापीठने समर्पित करी, त्यारे तेमणे ए ग्रन्थ पाछळ, पूर्वे उठावेला मोटा श्रमनो खयाल करी, तेमज संस्कृत साहित्यना दर्शनशास्त्रोमांना एक महान् अने अमूल्य गणाता ग्रन्थरत्ननो उद्धार थाय ते विद्यापीठने इष्टकृत्य जणायाथी आ ग्रन्थना संशोधन अने प्रकाशननो भार उपाडवानी पुरातत्त्वमंदिरने अनुमति आपवामां आवी.

मंदिरे आ काम हाथमां लीधां पहेलां, पं. श्रीसुखलालजी हस्तक, आगराना उक्त मंडळना संचालक **बाबू श्रीदयालचंदजी** झवेरीए एना अंगे लगभग ११०० रुपिआ जेटलो खर्च कर्यो हतो, ते तथा, जे जातना आवा सरस अने मजबुत कागळो उपर आ ग्रन्थ मुद्रित थाय छे ते कागळो रु. १००० रूपीया एक हजारनी किंमतना पण उक्त मंडळे भेट आपेलां छे, के जे रकम ए मंडळने अमदावादना **शेठ वाडीलाल वखतचंद झवेरी** तरफथी प्रस्तुत ग्रन्थना प्रकाशन-कार्यमाटे दान करवामां आवी हती ए उपरांत, गया वर्षमां आ ग्रन्थनी केटलीक हस्तलिखित प्रतिओना पाठांतरो वगेरे संग्रहवानी शीघ्र आवश्यकता भासवाथी पं. सुखलालजीए पोताना मददगार तरीके एक त्रीजा विद्वानने केटलोक समय रोकेला हता अने ते माटे तेमने ४१६ रुपिआ वेतनना आपवामां आव्या हता. वेतननी आ वधारानी रकम **रा. रा. श्रीकेशवलाल प्रेमचंद मोदी** मारफत अपाई हती.

आ रीते आ कार्यमां आगराना उक्त मंडळ अने तेना सहायक गृहस्थोनी आर्थिक उदारतानो जे लाभ विद्यापीठने मळ्यो छे ते माटे ते बधानो उपकार मानवामां आवे छे.

श्रावण वद ५, सं. १९८०]
गुजरात विद्यापीठ कार्यालय]

प्रकाशक

संशोधनोपयुक्तानां लिखितादर्शानां संकेताः ।

अ०	अनन्तनाथजैनमन्दिरभाण्डागारीया	प्रतिः
आं० (वि०)	श्रीमद्विजयानन्दसूरिपुस्तकसंग्रहगता	,,
कां०	प्रवर्त्तकश्रीकान्तिविजयपुस्तकसंग्रहगता	,,
गु०	पं० न्यासश्रीगुलाबविजयपुस्तकसंग्रहगता	,,
ग०	पं० न्यासश्रीगम्भीरविजयपुस्तकसंग्रहगता	,,
[2]चं०	चञ्चलबेनभाण्डागारीया	,,
डे०	डेलाभाण्डागारीया	,,
पू०	पूर्णचन्द्रनाहरभाण्डागारीया	,,
बा०	बालूचरग्रामस्थभाण्डागारीया	,,
भा०	भावनगरसंघभाण्डागारीया	,,
भां०	भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरीया	,,
मां०	माण्डलग्रामस्थभाण्डागारीया	,,
वा०	वाडीपार्श्वनाथभाण्डागारीया	,,
वृ०	श्रीमद्वृद्धिचन्द्रपुस्तकसंग्रहगता	,,
सा०	साणन्दग्रामस्थभाण्डागारीया	,,
हा०	हालाभाईभाण्डागारीया	,,

१ श्रीमद्विजयानन्दसूरिपुस्तकसंग्रहगतं पुस्तकद्वयम्, तत्र प्राचीनं 'आ०' इति नाम्ना निरदेशि, नवीनं च 'वि०' इति नाम्ना ।

२ चञ्चलबेनभाण्डागारीयं पुस्तकद्वयम्, तत्र पूर्णं 'चं० पू०' इति नाम्ना, अपूर्णं तु 'चं० ल०' इति नाम्ना व्यपादेशि ।

टीकागतानामुल्लेखानां स्थानसंकेताः ।

(१)

आचा०	आचाराङ्गसूत्रम् ।
ऋग्वेद-अष्ट०	ऋग्वेद-अष्टकानि ।
जैमि०	जैमिनिसूत्रम् (मीमांसादर्शनम्)
तत्त्वार्थ० तत्त्वा० त०	तत्त्वार्थाधिगमसूत्रम् ।
ध० न्या०	धर्मकीर्तिकृतन्यायबिन्दुः ।
न्यायद०	न्यायदर्शनम् (गौतमसूत्रम्)
न्यायवा०	न्यायवार्तिकम् ।
प्रशमर० प्र०	प्रशमरतिप्रकरणम् ।
बृह०	बृहदारण्यकम् ।
भग० गी०	भगवद्गीता ।
महाभा० आदिप०	महाभारतआदिपर्व ।
मीमां० मीमांसाद०	मीमांसादर्शनम् (जैमिनिसूत्रम्)
योगद० पात०	पातञ्जलयोगदर्शनम् ।
वाक्यप०	वाक्यपदीयम् ।
वात्स्या० भा० वा० भा०	वात्स्यायनभाष्यम् । (न्यायभाष्यम्)
व्यासभा०	व्यासभाष्यम् । (योगदर्शनभाष्यम्)
वैशेषिकद०	वैशेषिकदर्शनम् । (कणादसूत्रम्)
शाबरभा० शाब०	शाबरभाष्यम् । (जैमिनिसूत्रभाष्यम्)
श्लो० वा०	श्लोकवार्तिकम् । (कुमारिलकृतम्)
श्वेताश्वत०	श्वेताश्वतरम् ।
सूत्र०	सूत्रकृताङ्गसूत्रम् ।
स्थाना०	स्थानाङ्गसूत्रम् ।
हे०	हेमचन्द्रशब्दानुशासनम् ।

(२)

अ०	अधिकरणम् । अध्यायः । अध्ययनम् ।
अर्था०	अर्थापत्तिपरिच्छेदः ।
आ०	आह्निकम् ।
उ०	उद्देशः । उपनिषत् ।

उपनि०	उपनिषत् ।
उपमान०	उपमानपरिच्छेदः ।
का०	काण्डम् । / काशीया आवृत्तिः ।
गा०	गाथा ।
टि०	टिप्पनम् ।
द्वि०	द्वितीयपार्श्वम् ।
प०	पद्यम् । / परिच्छेदः ।
पा०	पादः ।
पृ०	पृष्ठम् ।
पं०	पङ्क्तिः ।
प्र०	प्रथमः । / प्रथमम् । / प्रथमपार्श्वम् ।
प्रथमस्था०	प्रथमस्थानम् ।
प्रमेय० टि०	प्रमेयकमलमार्तण्डटिप्पनम् ।
प्रमेय० / प्रमेय० मा० / प्रमेयक०	प्रमेयकमलमार्तण्डे ।
प्रश्नव्या० टी	प्रश्नव्याकरणसूत्रटीका ।
प्र० पृ०	प्रस्तुतपृष्ठम् ।
ब०	बहिर्गतः–लिखितायां प्रतौ ऊर्ध्वम् अधः पार्श्वे वा लिखितः–पाठः ।
ब्रा०	ब्राह्मणम् ।
मं०	मन्त्रः ।
लि०	लिखिता प्रतिः ।
शून्य०	शून्यवादपरिच्छेदः ।
श्रु०	श्रुतस्कन्धः ।
श्लो०	श्लोकः ।
सू०	सूक्तम् । / सूत्रम् ।

विषयानुक्रमः ।

विषयाः	पृष्ठम्	पङ्क्तिः
टीकाया मङ्गलं प्रयोजनं च ।	१	७
पातनिका ।	१	१३
प्रथमा गाथा ।	१	२७
प्रामाण्यवादः ।	२–२९	
स्वतःप्रामाण्यपक्षः ।	२	२
परतःप्रामाण्यपक्षः ।	२	८
उत्पत्तौ प्रामाण्यस्य स्वतस्त्वसाधनम् ।	२	१८
कार्ये प्रामाण्यस्य स्वतस्त्वसाधनम् ।	४	२५
निश्चये प्रामाण्यस्य स्वतस्त्वसाधनम् ।	५	१५
उत्पत्तौ प्रामाण्यस्य स्वतस्त्वनिरसनम् ।	८	२९
कार्ये प्रामाण्यस्य स्वतस्त्वनिरसनम् ।	१२	२
निश्चये प्रामाण्यस्य स्वतस्त्वनिरसनम् ।	१३	३४
प्रेरणाबुद्धेः प्रामाण्याभावः ।	१९	१७
ज्ञातृव्यापारस्यैवाऽसिद्धिः ।	२०	२
अभावप्रमाणनिरसनम् ।	२३	३७
वेदापौरुषेयत्वपरीक्षणम् ।	२९–४३	
शब्दनित्यत्वसाधनम् ।	३२	२७
शब्दनित्यत्वनिरसनम् ।	३३	२५
सर्वज्ञवादः ।	४३–६९	
सर्वज्ञसत्तानिरसनम् ।	४३	२५
सर्वज्ञसत्तासाधनम् ।	५३	२३
ईश्वरस्वरूपवादः ।	६९–१३३	
परलोके प्रत्यवस्थानम् ।	६९	३२
परलोकस्य व्यवस्थापनम् ।	७२	४
जगत ईश्वरकृतत्वस्थापनम् ।	९३	१३
जगत ईश्वरकृतत्वनिराकरणम् ।	१०२	७
समवायनिरसनम् ।	१०६	१०

सत्तापदार्थनिरसनम्।	११०	९
संयोगनिरसनम्।	११३	४३
आत्मपरिमाणवादः।	**१३३–१४९**	
आत्मनो विभुत्वस्थापनम्।	१३३	३४
आत्मनो विभुत्वं निरस्य देहमात्रत्वव्यवस्थापनम्।	१३४	३२
शब्दस्य द्रव्यात्मकत्वसाधनम्।	१३६	१४
मुक्तिस्वरूपवादः।	**१५०–१६६**	
मुक्तौ आत्यन्तिकविशेषगुणोच्छेदस्य स्थापनम्।	१५०	७
मुक्तौ आत्यन्तिकविशेषगुणोच्छेदस्य निरसनम्।	१५६	२

संपादकीय निवेदन

अनेक उपयोगी विषयोनो ऊहापोह करती विस्तृत प्रस्तावना तो प्रस्तुत ग्रंथ संपूर्ण छपाई रह्या पछीज लखी शकाय. अत्यारे तो आ संक्षिप्त निवेदनमां मुख्य बे बाबतोनुं सूचन करवानुं छे **(क) ग्रंथनुं विशिष्टत्व** अने **(ख) प्रकाशननी योजना.**

(क) ग्रंथनी विशिष्टता निम्नलिखित बे बाबतोथी जाणी शकाशे **(१) ग्रंथकार** अने **(२) ग्रंथनुं बाह्याभ्यन्तर स्वरूप.**

(१) ग्रंथकार (मूळकार)

समयः मूळना कर्ता आचार्य सिद्धसेन दिवाकर छे. जैनपरंपरा प्रमाणे तेओ विक्रमनी पहेली शताब्दीमां थई गएला मनाय छे. तेओ दिगम्बराचार्य कुन्दकुन्द अने समंतभद्र ए बन्नेना पहेलां थया होय तेवी संभावनानां केटलांक कारणो छे तेमज श्वेताम्बर अने दिगम्बरनो पंथभेद थया पहेलां पण तेओ थया होय तेम मानवानां केटलांक कारणो छे. तेथी विक्रमनी पहेली शताब्दीमां तेओ थयानी जैनपरंपरा उपर गम्भीरपणे ऐतिहासिकोए विचार करवो जोईए. अत्यारे केटलाक ऐतिहासिको तेओने विक्रमनी पांचमी शताब्दीमां मूके छे.

स्थान, जाति अने धर्मः तेओनुं जन्मस्थान विदित नथी, पण उज्जयिनी अने तेनी आजुबाजुए तेओए जीवन गाळ्युं होय एम जणाय छे, तेथी तेओना ग्रंथोनी रचना पण तेज प्रदेशमां थयानो संभव छे. तेओ जाते ब्राह्मण अने कुलधर्मे वैदिक हता, पण पाछळथी तेमणे जैनाचार्य वृद्धवादीनी पासे जैनदीक्षा लीधी हती.

योग्यताः दिवाकर असाधारण जैन दार्शनिक अने संस्कृत प्राकृत भाषाना विद्वान् हता एटलुंज नहि पण तेओ मध्यकालीन प्रधान भारतीय दार्शनिक विद्वानोमांना एक हता, एम तेओनी कृतिओज कही आपे छे. तेमनी विचारमां उदारता, प्रतिभामां स्वतन्त्रता, ज्ञानमां स्पष्टता, गद्यपद्यलेखनमां सिद्धहस्तता अने वस्तुस्पर्शमां सूक्ष्मता तथा विविध दर्शनोना मौलिक स्वरूपमां निष्णातता, ए बधुं तेओनी थोडी पण उपलब्ध कृतिओमां वाक्यवाक्यमां जोनारने नजरे पडशे.

कृतिओः उपलब्ध कृतिओमां **संमति** मूळ प्राकृत छे. **एकवीस बत्रीसीओ, न्यायावतार** तथा **कल्याणमंदिर** संस्कृत छे. कल्याणमंदिरमां तीर्थंकर पार्श्वनाथनी स्तुति छे. न्यायावतार ए संस्कृत जैन साहित्यमां पद्यबंध आदि तर्कग्रंथ होई समस्त जैन तर्कसाहित्यना पाया रूपे छे. बत्रीसीओ स्तुतिरूप होवा छतां तेमां दार्शनिक विषयो छे. वैदिक, बौद्ध अने जैन ए समकालीन समग्र भारतीय दर्शनोनुं स्वरूप ते बत्रीसीओमां छे. आ बत्रीसीओज षड्दर्शनसमुच्चय अने सर्वदर्शनसंग्रहनी प्राथमिक भूमिका छे. सिद्धसेननुं बीजुं नाम 'गन्धहस्ती' हतुं; तेओए आचारांगना प्रथम अध्ययन उपर विवरण लख्युं हतुं, जे 'गन्धहस्तिविवरण' कहेवाय छे, आजे ते उपलब्ध नथी.

टीकाकार

टीकाकार अभयदेव, श्वेताम्बरीय राजगच्छमां थएल प्रद्युम्नसूरिना शिष्य होई दशमा सैकामां थई गया छे. तेओनी जाति, जन्मस्थान आदि ज्ञात नथी; तेओनी बीजी कृति उपलब्ध के

श्रुत नथी. अलबत तेओ वादमहार्णवना कर्ता कहेवाय छे, पण संमति उपरनी टीकाना विस्तृत वादो जोतां केटलाक एम पण माने छे के 'तत्त्वबोधविधायिनी' टीकानुंज बीजुं नाम वादमहार्णव हशे. गमे तेम होय पण अभयदेवसूरि दार्शनिक विषयना असाधारण विद्वान् हता, तेमां जराए संदेह नथी.

(२) ग्रंथनुं बाह्याभ्यन्तरस्वरूप

बाह्यस्वरूपः प्रस्तुत ग्रंथमां मूळ अने टीका ए बे अंशो छे. मूळनुं नाम संमति अने टीकानुं नाम तत्त्वबोधविधायिनी छे. मूळ प्राकृत भाषामां अने टीका संस्कृत भाषामां छे.

मूळनी रचना आर्यापद्यमय अने ते त्रण भागो (काण्डो) मां वहेंचाएली छे. टीकानी रचना गद्यमय छे. मूळनुं परिमाण १६७ गाथाओ जेटलुं छे. पहेला काण्डमां ५४, बीजामां ४३ अने त्रीजामां ७० गाथाओ छे. टीकानुं परिमाण २५००० श्लोक जेटलुं छे.

आभ्यन्तरस्वरूपः मूळ अने टीका बन्नेना विषयो दार्शनिक छे, परंतु ते बधा दार्शनिक विषयोनी चर्चा तेमां अनेकान्तदृष्टिए करवामां आवी छे. ते रीतेज अनेकान्तदृष्टिनुं स्वरूप, तेनी व्याप्ति तथा तेनी उपयोगिता सिद्ध करवामां आवी छे. तेथी प्रस्तुत ग्रंथने अनेकान्तदृष्टिनो दार्शनिक ग्रंथ कहेवो जोईए.

मूळनी प्रतिपादनसरणी आगमाश्रित छतां तर्कसंगत छे. तेमां जैनआगमप्रसिद्ध नय, सप्तभंगी, ज्ञान, दर्शन, द्रव्य, पर्याय विगेरे पदार्थोनुं तार्किक पद्धतिए पृथक्करण करी अनेकान्तनुं स्वरूप बतावबामां आव्युं छे अने ते पण प्रधानपणे आगमिक प्राचीन जैनाचार्योंने अभिलक्षीने. टीकानी शैली बिलकुल जूदी छे. तेमां अन्य दर्शनोना निरसननी दृष्टि मुख्य छे. मूळ जेटलुं टुंकुं छे, तेटलीज टीका विशाळ छे. टीकाकारे जे जे विषयना वादो लख्या छे, ते ते विषय उपर ते वखते भारतीय समग्र दर्शनोमां जेटला मत मतान्तरो अने पक्ष प्रतिपक्षो हता, ते बधानी विस्तृत नोंध करी छे. **तेथी आ टीकाने विक्रमनी दशमी शताब्दी सुधीना दर्शनविषयक वादोनुं संग्रहस्थान कही शकाय.**

ग्रंथनी मुख्य दृष्टि अनेकान्तनुं महत्त्व विचारीने टीकाकारे वादपद्धति विद्वत्तापूर्वक एवी गोठवी छे के, जे विषयमां वाद शरू करवानो होय, ते विषयमां सौथी पहेलां सिद्धान्तथी वधारे वेगळो एवो पहेलो पक्षकार आवी पोतानो मत स्थापे छे, त्यारबाद सिद्धान्तथी ओछो वेगळो एवो बीजो पक्षकार आवी पोताना मतने स्थापी प्रथम पक्षनी भ्रान्तिओ दूर करे छे; त्यारबाद सिद्धान्तनी कंईक समीपे रहेलो त्रीजो पक्षकार आवी बीजा पक्षनी भूलो सुधारे छे, अने ए क्रमे आगळ वधतां छेवटे अनेकान्तवादी सिद्धान्ती आवी छेल्ला प्रतिपक्षीनुं मन्तव्य शोधी अनेकान्त दृष्टिए ते विषय केवो मानवो जोईए, ते बतावे छे. आवी वादपद्धति गोठवेली होवाथी कोई पण विषयमां प्रत्येक पक्षकारनुं शुं मानवुं छे, अने एक बीजा पक्षकार वच्चे शो शो मतभेद छे, अने तेमां केटकेटलुं वजूद छे, ए बधुं तुलनात्मक दृष्टिए जाणी शकाय. तेथी टीकाकारनी प्रतिपादन सरणीने अनेक वादीओनी चर्चापरिषद् साथे सरखावी शकाय के, जेमां कोई पण विषय उपर दरेक वादी पोतपोतानुं पूर्ण मन्तव्य स्वतंत्रतापूर्वक अनुक्रमे रजु करता होय, अने छेवटे जेमां एक सर्वविषयग्राही सभापति द्वारा समन्वयभरेलुं छेवट लवातुं होय.

जो के टीकामां सेंकडो दार्शनिक ग्रंथोनुं दोहन जणाय छे, छतां सामान्य रीते मीमांसक कुमारिलभट्टनुं श्लोकवार्तिक, नालन्दा विश्वविद्यालयना आचार्य शांतिरक्षितकृत तत्त्वसंग्रह उपरनी कमलशीलकृत पंजिका अने दिगम्बराचार्य प्रभाचंद्रना प्रमेयकमलमार्तंड अने न्यायकुमुदचंद्रोदय विगेरे ग्रन्थोनुं प्रतिबिम्ब मुख्यपणे आ टीकामां छे, तेवी रीते वादिदेवसूरिनो स्याद्वादरत्नाकर, मल्लिषेणसूरिनी स्याद्वादमंजरी, उपाध्याय यशोविजयजीनी नयोपदेश उपरनी नयामृततरंगिणी टीका अने शास्त्रवार्तासमुच्चयनी टीका आदि पाछळनी कृतिओमां संमतिनी टीकानुं प्रतिबिम्ब छे; तेथी संमतिना अभ्यासके संमतिटीकामां प्रतिबिम्ब पाडनार अने संमतिटीकानुं प्रतिबिम्ब झीलनार उपर्युक्त बन्ने प्रकारना ग्रन्थो जोवा घटे.

(ख) प्रकाशननी योजना

मध्यम कालीन दर्शनसाहित्यमां संमति मूळ अने तेनी टीका, ए बन्नेनुं आकर्षक स्थान छे; तेमज टीकामां दार्शनिक साहित्यना इतिहास अने दार्शनिक विद्वानोना इतिहासनी पुष्कळ सामग्री मळी शके तेम छे. आ बधी विशिष्टताने लीधेज आ संस्थाए प्रस्तुत ग्रन्थनी शुद्ध आवृत्ति तैयार करवा विचार करेलो छे.

जोके संमति उपर घणी टीकाओ होवानो उल्लेख छे, छतां एक श्वेताम्बराचार्य मल्लवादिकृत अने बीजी दिगम्बराचार्य सुमतिकृत होवानुं निश्चित प्रमाण मळे छे. पण अत्यारे तो तेमांनी एके उपलब्ध नथी. तेथी अने विस्तृत छतां महत्त्वनी होवाथी अभयदेवनी टीकाज प्रसिद्ध करवानुं संस्थाए पसंद कर्युं छे.

प्रस्तुत टीका घणी विस्तृत, गहन अने संस्कृत भाषामां होवाथी, मूळ ग्रंथ टुंको, प्रसन्न अने ग्राह्य छतां साधारण जिज्ञासुओथी पण अपरिचित रह्यो छे, अने दरेक पोताने तेनो अधिकारी मानतां अचकाय छे; खरी हकीकत तेवी नथी. जो संक्षिप्त पण सरल टीका होय, अगर भाषामां विवेचक अनुवाद होय तो संमति मूळ कोई पण साधारण अभ्यासिने ग्राह्य थई शके तेवुं छे; आ हेतुथी संमतिनो अनुवाद करवानी कल्पना मंदिरे पसंद करी, पण ते अनुवाद कर्या पहेलां तेनुं अने तेनी टीकानुं संशोधन करी नाखवुं, ए पण उचित जणायुं. आ कारणथी अत्यारे मंदिरे नीचे प्रमाणे योजना विचारी राखी छेः—

सटीक मूळ ग्रंथनुं त्रण भागमां प्रकाशन करवुं; चोथा भागमां मूळ ग्रंथनो अनुवाद, अने समग्र सटीक ग्रंथने लगतां उपयोगी परिशिष्टो, प्रस्तावना, विस्तृत अनुक्रमणिका विगेरे आपवां. आ योजना प्रमाणे आजे अढी वर्ष थयां काम चालतां पहेलो भाग प्रकाशित थाय छे.

प्रुफ जोवाना दृष्टिदोषथी के कंपोझिटरोना दोषथी जे भूलो रही गई हशे ते बधी बराबर जोई शुद्धिपत्रमां आपवानुं तो आगळ बनशे, छतां जे जे भूलो अनायासे नजरे पडी गई छे, मात्र तेज शुद्धिपत्रमां आपेली छे; तेथी आ शुद्धिपत्र अधुरुंज छे. अमे अभ्यासिओने विनवीए छीए के तेओ जे नानी मोटी कोई पण भूल जूए, तेनी पृष्ठपङ्क्तिवार अमने सूचना आपे. अमे तेओनी तेवी सूचनाने साभार प्रकट करशुं.

आ संशोधन कार्यमां उपयोगी थाय ते माटे अनेक हस्तलिखित प्रतिओ हिंदुस्तानना जूदा जूदा भागोमांथी मळी छे. ताडपत्रनी पण खंडित प्रतिओ छे. आ बधी प्रतिओनुं विगतवार वर्णन, तेओनी तुलना विगेरे बाबतो भविष्यनी दीर्घ प्रस्तावनामां ज नोंधाशे. अत्यारे तो ते ते प्रति आप-

नार तेना मालिकोने धन्यवाद आपीए छीए. प्राप्त प्रतिओमांथी केटलीकनां नाम वाचक तेओना संकेतपरिशिष्टमां जोई शकशे.

प्रस्तुत विभागमां टीकाकारे ग्रंथना के ग्रंथकारना, नामपूर्वक अगर नाम सिवाय, अपूर्ण के पूर्ण जे जे उल्लेखो कर्या छे ते बधानां स्थानो अमे इच्छा अने प्रयत्न छतां संपूर्ण रीते आपी शक्या नथी. छतां उल्लेखोनां जे स्थानो अमे नोंध्यां छे, तेना संकेतोनुं स्पष्टीकरण आ भाग साथे आपवामां आवे छे. जे उल्लेखोनां मूळस्थानो नथी मळ्यां तेओनी पासे खुल्लां चोरस कोष्टको राखेलां छे. अभ्यासिओने विनंती छे के, अमे उल्लेखोनां जे जे स्थानो आप्यां छे तेमां तेओ सुधारवा जेवुं जूए अगर नहि मळेल स्थानवाळा उल्लेखोनां स्थानो तेओना ध्यानमां आवे तो तेओ अमने ए बधुं लखी जणावे. अमे तेओना श्रमनी बहुज कींमती नोंध लईशुं.

प्रस्तुत भागमां पहेली गाथा अने तेनी संपूर्ण टीका आवे छे. तेनुं परिमाण लगभग साडासात हजार श्लोक जेटलुं हशे. तेमां जेटला मुख्य विषयो आव्या छे ते बधानो विस्तृत अनुक्रम तो छेवटेज अपाशे. अत्यारे तो आ भागमां आवेला मुख्य वादो अने तेने अंगे कराएला विभागोनी अने वच्चे वच्चे प्रसंगथी आवेला ध्यान देवा योग्य खास विषयोनी नोंध विषयानुक्रममां आपेली छे. एटले आ विषयानुक्रम, ए टीकागत मुख्य मुख्य वादो अने तेना अन्तर्गत मुख्य मुख्य विभागो तथा प्रासंगिक उपयोगी विषयोनी नोंध मात्र छे.

पाठांतर विगेरेनी समजः आ ग्रंथना संशोधन माटे अमे लगभग २५ प्रतिओ भेगी करी हती, तेमांथी १७ प्रतिओनो उपयोग करेलो छे, एनां नामो प्रतिओना संकेतोने स्पष्ट करतां जणावेलां छे. ए प्रतिओमांनी चारेक प्रतिओमां कोईनां करेलां टिप्पणो पण हतां, ते टिप्पणो, पाठांतरो अने अमे पण केटलेक स्थळे टिप्पणो आपेलां छे ते बधुं अमे प्रत्येक पानानी नीचे लींटी दोरीने आपेलुं छे.

जे जे प्रतिमांथी टिप्पण लीधेलां छे ते ते प्रतिनां नाम ए टिप्पणो साथे आपेलां छे. प्रतिनां टिप्पणो " " आ निशान वच्चे मूकेलां छे. जूओ ग्रंथनुं पृ० २ पं० ३८ आ० टि० एटले आत्मारामजीनी प्रतिमां आवेलुं टिप्पण.

पाठांतरो मोटा अक्षरमां (चालु अक्षरमां) मूकेलां छे.

क्यांय क्यांय अमे केवळ अशुद्ध पाठांतरो पण मूकेलां छे ते एटला माटे के, लेखक के वाचक विगेरे फक्त अक्षरोनी समानताथी अने पोतानी असावधानता विगेरेनां कारणोथी केवी केवी जातनां पाठांतरो वधारी मूके छे ए जाणी शकाय. संभव छे के, 'ग्रंथमां क्या क्या प्रकारे अशुद्धिओ वधे छे अने केवा केवा पाठभेदो थाय छे' तेनो इतिहास लखनारने आवां अशुद्ध पाठांतरोनो पण उपयोग थाय.

जे टिप्पणो अमे करेलां छे ते माटे कशुं निशान करेलुं नथी.

बधी प्रतिओमां टीकानो पाठ लेखक (लहिया) विगेरेना दोषथी अशुद्ध थई गयो छे एम ज्यां ज्यां अर्थानुसंधान के वाक्यरचना आदिथी जणायुं त्यां त्यां ते पाठ कायम राखी सुधारवा जेटलो भाग (पाठ के अक्षर) ( ) आवा निशानमां मूकेलो छे. अमे एवा केटलाक पाठोने शुद्ध करवामां 'प्रमेयकमलमार्तंड' नो उपयोग विशेष करेलो छे. अने क्यांय क्यांय प्रशमरतिप्रकरण,

वात्स्यायनभाष्य के एवा बीजा पण ग्रंथनो आश्रय लीधेलो छे. जे जे स्थळे ए पाठ सुधारेलो छे ते बधे स्थळे ए सुधारो जे ग्रंथने आधारे करवामां आव्यो छे ते ग्रंथनो पाठ " " आ निशानमां नाना अक्षरोमां मूकेलो छे अने साथे ते ते ग्रंथनां पृष्ठ पंक्ति पण आपेलां छे.

जे विशेष अशुद्ध पाठोने अमे सुधारी नथी शक्या ते पाठो पासे ? आवुं शंकाचिह्न मूकेलुं छे अने केटलाक खंडित पाठोनी नीचे 'ए पाठो लगभग खंडित लागे छे' एवी नोंध पण करेली छे.

आ टीकाना दरेक वादस्थळमां पहेलां वीगतवार पूर्वपक्ष करवामां आवेलो छे अने पछी उत्तरपक्षमां ते पूर्वपक्षनी प्रत्येक दलीलनुं खंडन करवामां आवेलुं छे. उत्तरपक्षमां ज्यां ज्यां पूर्वपक्षनी जे जे दलीलनुं खंडन करवामां आवेलुं छे ए दरेक दलील पूर्वपक्षमां क्यां क्यां आवेली छे तेनुं स्थळ सूचववा अमे दरेक उत्तरपक्षना पानानी नीचे लींटी दोरीने पूर्वपक्षनी ते ते दलीलोनां पृष्ठ पंक्तिओ आपेलां छे, जेने जोवाथी प्रत्येक जिज्ञासु उत्तरपक्षने वांचती वखते पूर्वपक्षनी ए ए खंडनीय दलीलोने सहेलाईथी बराबर समजी शकशे.

आ उपरांत ज्यां ज्यां टीकाकारे 'अमे आ वात पहेलां कही छे' एवुं लखेलुं छे, त्यां जे स्थळे ए वातने टीकाकारे कहेली होय ते स्थळनां पण पृष्ठ पंक्तिओ यथाशक्य आपेलां छे.

केटलेक स्थळे अमे प्रतिपाद्य विषयनी आदिमां { आवा चिह्नो अने अंतमां } आवा चिह्नो उपयोग करेलो छे अने ए बन्नेनुं एटले { } आ निशाननुं नाम 'दूरान्वयसूचक' चिह्न राखेलुं छे. ते एटला माटे के, ज्यां ज्यां कोई विषयना प्रतिपादनमां वच्चे बीजी पण लांबी टुंकी चर्चाओ चाले छे त्यां ते प्रसंगे चालेली चर्चाओनां आदि अंत जाणी शकाय. जूओ ग्रंथनुं पृ० ५७ पं० १४–पृ० ५९ पं० ३२.

आ पहेलो भाग तैयार करवामां अमने प्रवर्तक श्रीकांतिविजयजीना विद्याप्रिय अने सुशील प्रशिष्य **श्रीपुण्यविजयजीए** घणीज किंमती सहायता करी छे ते माटे अमे तेओना ऋणी छीए.

सुखलाल

अने

बेचरदास.

संपादकीयं निवेदनम्

विवेचितविविधविषया विस्तृता प्रस्तावना तु न प्राप्तकाला समग्रस्य ग्रन्थस्य प्रकाशनात् प्राक्, अतः साम्प्रतमिह (क) **ग्रन्थस्य विशिष्टता** (ख) **प्रकाशनस्य योजना** चेति वस्तुद्वयमेव प्राधान्येन प्रदर्शयितुं समीहामहे ।

(क) तत्र (१) **ग्रन्थस्य कर्तृन्** (२) **बाह्याभ्यन्तरस्वरूपं** च वर्णयित्वैव तदीया विशिष्टता प्रतिपाद्यते ।

(१) ग्रन्थस्य कर्तारः (मूलकाराः)

समयः—मूलस्य प्रणेतारस्तत्रभवन्त आचार्याः सिद्धसेनदिवाकरा विक्रमीयप्रथमशताब्दीवर्तिन इत्यवगम्यते पारम्परिकप्रवादेन । आचार्यसिद्धसेना दिगम्बराचार्याभ्यां कुन्दकुन्द-समन्तभद्राभ्यां प्राक्, श्वेताम्बर-दिगम्बरसम्प्रदाययोः पार्थक्याच्च प्राग् बभूवांस इति सम्भावनायाः साधारत्वेन पारम्परिकप्रवादो गवेषणाप्रियैरैतिहासिकैर्नोपेक्षणीयः । इदानीन्तनास्तु केचिदैतिहासिकास्तानाचार्यान् विक्रमीयपञ्चमशताब्दीगतत्वेन सम्प्रधारयन्ति ।

स्थान-जाति-धर्माः—यद्यपि आचार्याणां नाद्यापि जन्मादिस्थानानि परिनिश्चितानि तथाऽपि मालवदेशः तदीया च प्राच्या राजधानी उज्जयिनी तेषां विहारभूमिरिति परम्परातः श्रवणात् तदीयाः कृतयोऽपि तत्रैव प्रदेशे क्वचिल्लब्धजन्मान इति सम्भाव्यते । आचार्यसिद्धसेना यद्यपि जात्या ब्राह्मणाः, कुलधर्मेण च वैदिकास्तथाऽपि ते बहुश्रुतत्वप्राप्तिसमनन्तरमाचार्यवृद्धवादिनामन्तेवासित्वेन जैनीं दीक्षामङ्गीचक्रुः ।

प्रतिभाप्रकर्षः—आचार्यसिद्धसेना जैनदर्शनरहस्यवेदित्वेन विश्रुतेषु सर्वेष्वपि विद्वत्सु मूर्धन्यतां गता इति तु निर्विवादमेव, परंतु समकालीनवैदिक-बौद्ध-जैनादिसमस्तभारतीयदर्शनपारदर्शिविद्वद्गण-नायामपि ते लब्धावकाशा इत्यत्र तदीयाः कृतय एव साक्षिण्यः । तेषां संस्कृत-प्राकृतभाषाविशारदता, बहुमुखी प्रतिभा, अस्खलत्प्रवाहा कल्पना, वस्तुस्पर्शाभिमुखी तार्किकता, स्पृहणीया दर्शनोपनिषद्वेदिता, प्रकृष्टपरिपाका च गद्यपद्यरचनाचातुरी साक्षात्कर्तुं शक्या प्रतिवाक्यं तदीयासु कृतिषु ।

कृतयः—आचार्यसिद्धसेनीयाः काश्चिदेव कृतय उपलब्धिपथमायान्ति । तत्र **संमतिप्रकरणं** प्राकृतोपनिबद्धम्, **न्यायावतारः, कल्याणमन्दिरम्, एकविंशतिश्च द्वात्रिंशिकाः** संस्कृतपद्यबद्धाः । तत्र सर्वस्मिन्नपि जैनसंस्कृतवाङ्मये प्राथमिकपद्यात्मकप्रमाणग्रन्थत्वेन प्रसिद्धं न्यायावतारं जैनतर्क-साहित्यविकासस्य प्रथमसोपानत्वेनावधारयन्तु तर्कप्रियाः । कल्याणमन्दिरं तीर्थकरपार्श्वनाथस्य स्तुतित्वेनोपलक्षयन्तु स्तुतिप्रियाः । द्वात्रिंशिकाः स्तुतिगर्भा अपि विविधदर्शनस्वरूपवर्णनात्वेन निश्चिन्वन्तु तत्त्वज्ञानप्रियाः । तासु च कतिपयाः प्रातिस्विकदर्शनविषया द्वात्रिंशिका एवानुकरोति हरिभद्राचार्यकर्तृकः षड्दर्शनसमुच्चयो माधवाचार्यकर्तृकश्च सर्वदर्शनसंग्रहः । आचार्यसिद्धसेना 'गन्धहस्ती' इति नाम्नाऽपि प्रख्यायन्ते । तत्कृतं चाचाराङ्गसूत्रीयप्रथमाध्ययनविवरणं 'गन्धहस्तिवि-वरणम्' इत्यभिधीयते । तच्च विवरणं न संप्रति सुलभम् ।

टीकाकाराः

टीकाया रचयितारः श्रीमदभयदेवसूरयः श्वेताम्बरराजगच्छीयप्रद्युम्नसूरिशिष्यत्वेन प्रसिद्धा विक्रमीयदशमशताब्दीभाजः । तेषां जन्मस्थान-जातिप्रभृति नैव विदितम्, अन्यास्तु तत्कृतयो न श्रूयन्ते । यद्यपि वादमहार्णवस्तत्कृतित्वेन क्वचिदुल्लिखितो भाति तथाऽपि दीर्घातिदीर्घवादमालाजटिलां प्रस्तुतां टीकामेव वादमहार्णवत्वेन कल्पयन्ति केचिदित्यास्तां तावत् । किंतु श्रीमदभयदेवसूरीणामसाधारणे दार्शनिकवैदुष्ये नैव विद्यते संशयलेशः ।

(२) ग्रन्थस्य बाह्याऽभ्यन्तरस्वरूपम्

बाह्यं स्वरूपम्—मूलं संमतिसंज्ञकं प्राकृतार्यापद्यमयं काण्डत्रयविभक्तं सप्तषष्ट्युत्तरशत-संख्यकगाथापरिमितम् । टीका च 'तत्त्वबोधविधायिनी' संज्ञिता संस्कृतगद्यमयी पञ्चविंशतिसहस्र-संख्यकश्लोकपरिमिता वर्तते ।

आभ्यन्तरं स्वरूपम्— विषयोऽस्य ग्रन्थस्यानेकान्तप्रधानो दार्शनिको वेदितव्यः ।

मूलकारैर्जैनदर्शनमात्रप्रसिद्धान् नय-सप्तभङ्गी-ज्ञान-दर्शन-द्रव्य-पर्यायादिपदार्थान् व्यवस्था-पयितुं तार्किकपद्धत्या तानेव पदार्थान् विशदीकृत्यानेकान्तस्वरूपं प्रतिष्ठापितम्, तच्च प्रधानतया स्वतीर्थ्यान् पुरातनान् आगमिकानभिलक्ष्यीकृत्यैवेति मूलकारीया शैली । टीकाकारीया चान्यैव, तैस्तु प्राधान्येन दर्शनान्तरीयप्रवादनिरसनमुद्दिश्य दार्शनिकवादसंग्रहालयप्रख्यैव टीका निरमायि । तत्र च यदा कश्चिदपि दार्शनिको विषयश्चर्चयितुमुपक्रम्यते तदा तद्विषयावलम्बिनः सर्वेऽपि पक्षकाराः क्रमेणोपतिष्ठमानाः स्वं स्वं पक्षं स्थापयितुकामाः पूर्वपूर्ववादिस्थापितं पक्षं दूषयन्ति । पर्यवसाने च सिद्धान्ती स्याद्वादी प्रागुपन्यस्तान् सर्वानेव पक्षान् यथासंभवं समीक्ष्य सिद्धान्तं प्रादुष्करोति । ईदृश्या च प्रतिपादनभङ्ग्या प्रस्तुता टीका सर्वविषयस्पर्शिनिर्णायकसभापतिसमलंकृतामनेकसभ्य-भूषितां स्वतन्त्रां चर्चापरिषदं स्मारयति ।

मीमांसककुमारिलभट्टकृतश्लोकवार्तिक—नालन्दाविश्वविद्यालयप्रधानाचार्यशान्तिरक्षितकृततत्त्वसं-ग्रहीयकमलशीलकृतपञ्जिका—दिगम्बराचार्यप्रभाचन्द्रकृतप्रमेयकमलमार्तण्ड—न्यायकुमुदचन्द्रोदयद्वयप्रभृ-तीन् स्वपूर्ववर्तिनो ग्रन्थान् बिम्बत्वेनाश्रयमाणैषा टीका स्वोत्तरवर्तिभिः वादिदेवसूरिकृतस्याद्वादरत्ना-कर—मल्लिषेणसूरिकृतस्याद्वादमञ्जरी—वाचकयशोविजयकृतनयोपदेशीय—शास्त्रवार्तासमुच्चयीयवृत्तिद्वयप्र-भृतिभिर्ग्रन्थैर्बिम्बत्वेनाश्रितेति टीकामेनां दिदृक्षुभिरुभयेऽपि ते ग्रन्था अवश्यद्रष्टव्याः ।

(ख) प्रकाशनयोजना ।

सुलभदर्शनेतिहाससामग्रीकतया स्पृहणीयमध्यमकालीनदार्शनिकग्रन्थान्यतमतया च सटीकस्यास्य ग्रन्थरत्नस्य संशोध्य प्रकाशनं चिकीर्षितमनया संस्थया ।

अनुपलभ्यमानासु बह्वीषु संमतिटीकासु एकस्याः श्वेताम्बराचार्यमल्लवादिकृतत्वेन, द्वितीयस्याश्च दिगम्बराचार्यसुमतिकृतत्वेन संसूचका उल्लेखा लभ्यन्ते नान्यासाम् । उपलभ्यते चाभयदेवसूरिरचितैव टीकेति सैव प्रकाशनीयत्वेन निर्धारिता ।

संक्षिप्तटीकान्तरस्य दुर्लभत्वात् लभ्यमानटीकायाश्च जटिलत्वात् सुगममपि मूलग्रन्थं दुर्गमम-भिमन्यमानाः सर्वेऽपि जिज्ञासवः प्रायशः स्वं तदनधिकारिणं मत्वा तमभ्यसितुं नोत्सहन्ते । तस्य

च मूलग्रन्थस्योपादेयता पाठ्यक्रमप्रवेशनयोग्यता च न लौकिकभाषानुवादमन्तरेण संभवतीति संप्रधार्य तदनुवादोऽपि विधित्सितः ।

परंतु पूर्वं सटीकः सम्पूर्णोऽपि ग्रन्थस्त्रिभिर्भागैः प्रकाशयितुमुचितः, तदनन्तरं च चतुर्थेन भागेन प्रस्तावना-विषयानुक्रम-परिशिष्टादिसहितो मूलमात्रानुवाद इति निर्णीतं संस्थया । तदनुसृत्य सार्धवर्षद्वयं यावत् प्रयत्न प्रकाश्यतेऽद्य सटीकसंपूर्णप्रथमगाथात्मकः प्रथमो भागः ।

अत्र प्रान्ते यत् संक्षिप्तं शुद्धिपत्रकं निवेशितम्, तत्र चानायासेन दृष्टिपथमागता एव अशुद्धयो दर्शिता न पुनः सर्वाः । सर्वासां प्रदर्शनं तु ग्रन्थसमाप्तावेव करिष्यते । ये च महानुभावा यां कामपि अशुद्धिमत्र दृष्ट्वा सूचयिष्यन्ति तैर्वयमुपकृता भविष्याम इति ।

अस्य ग्रन्थस्य संशोधनाय आदर्शानां (प्रतीनां) पञ्चविंशतिर्लब्धा, तत्र सप्तदशैव एव आदर्शा अत्रास्माभिरुपयोजिताः, तेषां च सप्तदशानामपि संकेतितानि नामानि तत्संकेतसूचनायां स्पष्टितानि । यैश्च महाशयैरस्य संशोधनकर्मणि निजनिजसंग्रहसत्का आदर्शा दत्तास्तान् वयं भृशं धन्यवादयाम इति ।

टीकाकारोऽत्र संवादत्वेन चर्चाविषयत्वेन वा अनेकान् ग्रन्थान्, ग्रन्थकारांश्च नामग्राहमनामग्राहं वा प्रदर्शितवान्, तेषां सर्वेषां नामानि तु प्रयतमाना अपि नोपालप्स्महि; किन्तु यानि नामानि उपलभ्य तत्तत्स्थले [ ] ईदृशचिह्ने संक्षिप्य संकेतितानि तानि सर्वाण्यपि तत्संकेतसूचनायां स्पष्टीकृतानि । यानि च तानि नोपलब्धानि तदर्थं [ ] एतदेव चिह्नं रिक्तं स्थापितम् । ये च महाशया अस्माभिरत्राऽनिर्दिष्टानां ग्रन्थानाम्, ग्रन्थकाराणां वा नामानि जानीयुस्ते सकृपमस्मान् सूचयेयुः, अस्मन्निर्दिष्टे वा तत्तत्स्थले यत् स्यात् शोध्यं तदपि दर्शयेयुरिति ।

अस्मिन् प्रथमे भागे एकैव प्रथमा गाथा, तस्याश्च समग्रा टीका समपूरि । टीकापरिमाणं प्रायः सार्धसप्तसहस्री श्लोकानाम् । तत्र ये मुख्यमुख्यवादाः, तदीयाः पूर्वपक्षोत्तरपक्षाः, तदन्तर्गता मुख्यमुख्यविषयविभागाः, विशेषतया चर्चिताश्च विशिष्टा विषयाः सन्ति तेषां संक्षिप्तोऽनुक्रमोऽत्र समदर्शि; सविस्तरस्तु सोऽस्य ग्रन्थस्य समाप्तिं यावत् प्रतीक्षणीय इति ।

पाठान्तरप्रभृतेः सूचनम्—अत्रोपयोजितेष्वादर्शेषु आदर्शचतुष्टये केनचित् कृतानि टिप्पणान्यासन्, तानि आदर्शगतानि टिप्पणानि, पाठान्तराणि, क्वचित् क्वचिच्च स्वकृतानि टिप्पणानि प्रतिपत्रमधस्ताद् निर्दिष्टानि । तत्र—

आदर्शगतानि टिप्पणानि यस्माद्यस्मादादर्शाद् गृहीतानि तत्तन्नामपूर्वकं " " एतच्चिह्नान्तः सूक्ष्माक्षरेषु स्थापितानि । तथाहि—पृ० २ पं० ३८ आ० टि०—आत्मारामजीसत्कप्रतिगतं टिप्पणमिति ।

पाठान्तराणि स्थूलेष्वक्षरेषु दर्शितानि ।

'लेखकदोषाद् वाचकभ्रमादक्षरसाम्याद् वा कीदृशकीदृशानि पाठान्तराणि, ग्रन्थाशुद्धयो वाऽभिवर्धन्ते' इति ज्ञानसौकर्याय क्वचिद् वयं सर्वथाऽशुद्धान्येव पाठान्तराणि दर्शितवन्त इति ।

स्वकृतानि टिप्पणानि केवलं सूक्ष्माक्षरैरेवोपन्यस्तानीति ।

सर्वासु प्रतिषु अशुद्ध एव पाठो यत्रास्माकं प्रतिभातस्तत्र ग्रन्थान्तरमाश्रित्यानाश्रित्य वा तस्याशुद्धस्य पाठस्य पार्श्वे ( ) एतच्चिह्नान्तः शुद्धं पाठांशं समतिष्ठिपाम, पाठसंशोधनकर्मणि च विशेषतो दिगम्बरीय'प्रमेयकमलमार्तण्ड'नामानं ग्रन्थं समाशिश्रियाम, क्वापि क्वापि प्रशमरतिप्रकरणम्, वात्स्यायनभाष्यम्, ईदृशमेव वा ग्रन्थान्तरमुपयोजितवन्तः । यत्र च यं ग्रन्थमाश्रित्य

संशोधितः पाठस्तत्र सर्वत्र पत्रस्याधस्ताद् ग्रन्थनामग्राहं तद्ग्रन्थपृष्ठ-पङ्क्तिदर्शनपूर्वकं चोपयुक्ततद्ग्रन्थपाठं " " एतच्चिह्नान्तः सूक्ष्माक्षरैः समददर्शाम ।

यांश्चात्यन्तमशुद्धान् पाठान् संस्कर्तुं नालमभूम, तत्र तदशुद्धपाठनिकटे ? ईदृशं चिह्नं कृतवन्तः; क्वचिच्च खण्डितप्रायपाठस्याधः 'एष पाठः खण्डितप्रायः' इत्यपि प्रदर्शितवन्त इति ।

प्रस्तुतटीकायां तेषु तेषु वादस्थलेषु पूर्वं तावत् प्रतिवादस्थलं सविस्तरं पूर्वपक्षो निक्षिप्तः, तदनन्तरं च तत्प्रतिविधानरूपे उत्तरपक्षे पूर्वपक्षमण्डिताः सर्वा युक्तयो निरस्ताः । 'यत्र चोत्तरपक्षे या पूर्वपक्षदर्शिता युक्तिर्दलिता सा पूर्वपक्षे क्व क आयाता' इति निरूपणाय तत्तत्पत्रस्याधस्तात् तत्तत्पूर्वपक्षस्य पृष्ठं पङ्क्तिं च निरदिक्षाम यतो जिज्ञासवो जना उत्तरपक्षखण्डितास्तास्ताः पूर्वपक्षयुक्तीः सरलतया समवबुध्येरन् ।

टीकाकृता च यत्र यत्र 'तदुक्तमस्माभिः' इत्यादि निर्दिष्टं तत्र तत्र तानि तानि तदुक्तपूर्वस्थलानि सपृष्ठपङ्क्तिकं यथाशक्ति समदीदृशामेति ।

क्वचिच्च कस्यचिदेकस्य विषयस्य प्रतिपादने अन्तराऽन्तरा अन्या अपि प्रसङ्गप्राप्ता लघीयस्यो द्राघीयस्यो वा चर्चाश्चर्चिताः टीकाकृता, तासां च अन्तरागतानां चर्चानामाद्यन्तौ ज्ञातुं प्रतिचर्चमादौ {एतादृशं चिह्नम्, अन्ते च} एतादृशं चिह्नं निरटङ्क्ष्महि, तस्य च{} एतादृशस्य समग्रस्य चिह्नस्य 'दूरान्वयसूचकं चिह्नम्' इति संज्ञां व्यधिष्महि । एतदर्थं पश्यत पृ० ५७ पं १४—पृ० ५९ पं० ३२ इति ।

अस्य प्रथमस्य भागस्य संशोधनकर्मणि प्रवर्तकश्रीकान्तिविजयानां विद्याप्रियैः सुशीलैः प्रशिष्यैः श्रीपुण्यविजयमुनिभिर्बहुमूल्यं साहायकमनुष्ठितं तदर्थं तेषां कृतज्ञा वयम् ।

सुखलालः
बेचरदासश्च ।

॥ अर्हम् ॥

श्रीसिद्धसेनदिवाकररचितं

संमतितर्क-प्रकरणम् ।

राजगच्छीय-तर्कपञ्चानन-न्यायचक्रवर्त्ति-श्रीअभयदेवसूरिनिर्मितया

तत्त्वबोधविधायिन्याख्यया व्याख्यया सहितम् ।

प्रथमः काण्डः ।

स्फुरद्वागंशुविध्वस्तमोहान्धतमसोदयम् ।
वर्धमानार्कमभ्यर्च्य यते सम्मतिवृत्तये ॥ १ ॥
प्रज्ञावद्भिर्यद्यपि सम्मतिटीकाः कृताः सुबह्वर्थाः ।
ताभ्यस्तथाऽपि न महानुपकारः स्वल्पबुद्धीनाम् ॥ २ ॥
शेमुष्युन्मेषलवं तेषामाधातुमाश्रितो यत्नः ।
मन्दमतिना मयाऽप्येष नात्र संपत्स्यते विफलः ॥ ३ ॥

'इह च शारीर-मानसानेकदुःखदारिद्र्योपद्रवविद्रुतानां निरुपमाऽनतिशयानन्तशिवसुखानन्यसमाऽवन्ध्यकारणसम्यग्ज्ञान-दर्शन-चारित्रात्मकपरमरत्नत्रयजिघृक्षया अतिगम्भीरजिनवचनमहोदधिमवतरीतुकामानां तदवतरणोपायमविदुषां भव्यसत्त्वानां तद्दर्शनेन तेषां महानुपकारः प्रवर्त्तताम्, तत्पूर्वकश्चात्मोपकारः' इति मन्वान आचार्यो दुष्षमा[1]ऽरसमाश्यामासमयोद्भूतसमस्तजनताहार्दसंतमसविध्वंसकत्वेनावाप्तयथार्थाभिधानः सिद्धसेनदिवाकरः तदुपायभूतसम्मत्याख्यप्रकरणकरणे प्रवर्त्तमानः "शिष्टाः क्वचिदभीष्टे वस्तुनि प्रवर्त्तमाना अभीष्टदेवताविशेषस्तवविधानपुरस्सरं प्रवर्त्तन्ते" इति तत्समयपरिपालनपरस्तद्विधानोद्भूतप्रकृष्टशुभभावानल्पज्वलदनलनिर्दग्धप्रचुरतरक्लिष्टकर्माविभूतविशिष्टपरिणतिप्रभवां प्रस्तुतप्रकरणपरिसमाप्तिं चाऽऽकलयन् 'अर्हतामप्यर्हत्ता शासनपूर्विका, पूजितपूजकश्च लोकः, विनयमूलश्च स्वर्गा-ऽपवर्गादिसुखसुमनःसमूहानन्दामृतरसोद्गस्वरूपप्राप्तिस्वभावफलप्रदानप्रत्यलो धर्मकल्पद्रुमः' इति प्रदर्शनपरैर्भुवनगुरुभिरप्यवाप्तामलकेवलज्ञानसंपद्भिस्तीर्थकृद्भिः शासनार्थाभिव्यक्तिकरणसमये विहितस्तवत्वात् 'शासनमतिशयतः स्तवार्हम्' इति निश्चिन्वन् 'असाधारणगुणोत्कीर्तनस्वरूप एव च पारमार्थिकस्तवः' इति च संप्रधार्य शासनस्याभीष्टदेवताविशेषस्य प्रधानभूतसिद्धत्व-कुसमयविशासित्वा-ऽर्हत्प्रणीतत्वादिगुणप्रकाशनद्वारेण स्तवाभिधायिकां गाथामाह-

सिद्धं सिद्धत्थाणं ठाणमणोवमसुहं उवगयाणं ।
कुसमयविसासणं सासणं जिणाणं भवजिणाणं ॥ १ ॥

अस्याश्च समुदायार्थ एतत्पातनिकयैव प्रकाशितः, अवयवार्थस्तु प्रकाश्यते—शास्यन्ते जीवादयः पदार्था यथावस्थितत्वेन अनेनेति 'शासनं' द्वादशाङ्गम्, तच्च 'सिद्धं' प्रतिष्ठितम्—निश्चितप्रामाण्यमिति यावत्—स्वमहिम्नैव, नातः प्रकरणात् प्रतिष्ठाप्यम् ।

---

१ दुष्षमसम(मा)श्यामा-वा० । २—प्रतिपालन-वा०, कां० ।

[स्वतःप्रामाण्यपक्षः]

अत्राहुर्मीमांसकाः—अर्थतथात्वप्रकाशको ज्ञातृव्यापारः प्रमाणम्, तस्यार्थतथाभावप्रकाशकत्वं प्रामाण्यम्, तच्च स्वतः उत्पत्तौ, स्वकार्ये यथावस्थितार्थपरिच्छेदलक्षणे, स्वज्ञाने च; विज्ञानोत्पादकसामग्रीव्यतिरिक्तगुणादिसामग्र्यन्तर-प्रमाणान्तर-स्वसंवेदनग्रहणानपेक्षत्वात् । अपेक्षात्रयरहितं च प्रामाण्यं स्वत उच्यते इति । अत्र च प्रयोगः—ये यद्भावं प्रत्यनपेक्षास्ते तत्स्वरूपनियताः, यथाऽविकला कारणसामग्री अङ्कुरोत्पादने, अनपेक्षं च प्रामाण्यमुत्पत्तौ, स्वकार्ये, ज्ञप्तौ च इति ॥

[परतःप्रामाण्यपक्षः]

अत्र परतःप्रामाण्यवादिनः प्रेरयन्ति—अनपेक्षत्वमसिद्धम् । तथाहि-उत्पत्तौ तावत् प्रामाण्यं विज्ञानोत्पादककारणव्यतिरिक्तगुणादिकारणान्तरसापेक्षम्, तदन्वय-व्यतिरेकानुविधायित्वात् । तथाच प्रयोगः-यत् चक्षुराद्यतिरिक्ताभावा-ऽभावानुविधायि तत् तत्सापेक्षम्, यथाऽप्रामाण्यम्; चक्षुराद्यतिरिक्ताभावा-ऽभावानुविधायि च प्रामाण्यम् इति स्वभावहेतुः; तस्मादुत्पत्तौ परतः, तथा स्वकार्ये च सापेक्षत्वात् परतः । तथाहि-ये प्रतीक्षितप्रत्ययान्तरोदया न ते स्वतोव्यवस्थितधर्मकाः, यथाऽप्रामाण्यादयः, प्रतीक्षितप्रत्ययान्तरोदयं च प्रामाण्यं तत्र इति विरुद्धव्याप्तोपलब्धिः । तथा ज्ञप्तौ च सापेक्षत्वात् परतः । तथाहि-ये सन्देह-विपर्ययाऽध्यासिततनवस्ते परतोनिश्चितयथावस्थितस्वरूपाः, यथा स्थाण्वादयः, तथा च सन्देह-विपर्ययाऽध्यासितस्वभावं केषाञ्चित् प्रत्ययानां प्रामाण्यमिति स्वभावहेतुः ॥

[पूर्वपक्षः-(१) उत्पत्तौ प्रामाण्यस्य स्वतस्त्वसाधनम्]

अत्र यत्तावदुक्तम्-'प्रामाण्यं विज्ञानोत्पादककारणव्यतिरिक्तगुणादिकारणसव्यपेक्षमुत्पत्तौ' तदसत्, तेषामसत्त्वात्; तदसत्त्वं च प्रमाणतोऽनुपलब्धेः । तथाहि-न तावत् प्रत्यक्षं चक्षुरादीन्द्रियगतान् गुणान् ग्रहीतुं समर्थम्, अतीन्द्रियत्वेनेन्द्रियाणां तद्गुणानामपि प्रतिपत्तुमशक्तेः । अथानुमानमिन्द्रियगुणान् प्रतिपद्यते, तदप्यसम्यक्; अनुमानस्य प्रतिबद्धलिङ्गनिश्चयबलेनोत्पत्त्यभ्युपगमात् । प्रतिबन्धश्च किं प्रत्यक्षेणेन्द्रियगतगुणैः सह गृह्यते लिङ्गस्य? आहोस्विदनुमानेन? इति वक्तव्यम् । तत्र यदि प्रत्यक्षमिन्द्रियाश्रितगुणैः सह लिङ्गस्य सम्बन्धग्राहकमभ्युपगम्यते, तदयुक्तम्; इन्द्रियगुणानामप्रत्यक्षत्वे तद्गतसम्बन्धस्याप्यप्रत्यक्षत्वात्

"द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात्" [ ] इति वचनात् । अथानुमानेन प्रकृतसम्बन्धः प्रतीयते, तदप्ययुक्तम्; यतस्तदप्यनुमानं किं गृहीतसम्बन्धलिङ्गप्रभवम्? उतागृहीतसम्बन्धलिङ्गसमुत्थम्?। तत्र यद्यगृहीतसम्बन्धलिङ्गप्रभवम्, तदा किं प्रमाणम्? उताप्रमाणम्? । यद्यप्रमाणम्, नातः सम्बन्धप्रतीतिः । अथ प्रमाणम्, तदपि न प्रत्यक्षम्-अनुमानस्य बाह्यार्थविषयत्वेन प्रत्यक्षत्वानभ्युपगमात्, प्रत्यक्षपक्षोक्तदोषाच्च—किंतु अनुमानम्, तच्चानवगतसम्बन्धं न प्रवर्त्तत इत्यादि वक्तव्यम् । अथावगतसम्बन्धम्, तस्यापि सम्बन्धः किं तेनैवानुमानेन गृह्येत? उतान्येन?। यदि तेनैव गृह्यत इत्यभ्युपगमः-स न युक्तः, इतरेतराश्रयदोषप्रसङ्गात् । तथाहि-गृहीतप्रतिबन्धं तत् स्वसाध्यप्रतिबन्धग्रहणाय प्रवर्त्तते, तत्प्रवृत्तौ च स्वोत्पादकप्रतिबन्धग्रह इत्यन्योऽन्यसंश्रयो व्यक्तः । अथान्येनानुमानेन प्रतिबन्धग्रहाभ्युपगमः-सोऽपि न युक्तः, अनवस्थाप्रसङ्गात् । तथाहि-तदप्यनुमानमनुमानप्रतिबन्धग्राहकमनुमानान्तराद् गृहीतप्रतिबन्धमुदयमासादयति, तदप्यन्यतोऽनुमानाद् गृहीतप्रतिबन्धमित्यनवस्था । किंच, तदनुमानं स्वभावहेतुप्रभावितम्? कार्यहेतुसमुत्थम्? अनुपलब्धिलिङ्गप्रभवं वा प्रतिबन्ध-

---

१ उच्यते । अत्र-गु० । २ "यस्य भावो यद्भाव इति व्युत्पत्त्या 'यद्भाव'पदेन यदुत्पत्तिर्लभ्यते, तथाच यदुत्पत्तिं प्रति ये अनपेक्षाः—इतरनैरपेक्ष्येण समर्थाः"—गु०भा०गतं टिप्पणम् । ३ "गुणादि"-आ० टि० । ४ "यत्र यत्र दोषादि तत्र तत्र अप्रामाण्यम्"-आ० टि० । ५ "ये अपेक्षितकारणान्तरोदयाः"-आ० टि० । ६ अस्मिन् पृष्ठे ९ पङ्क्तौ । ७ "द्वयोः स्वरूपग्रहणे सति संबन्धवेदनम्" इत्युत्तरार्धम्-इति भां० टि० । ८ गृह्यते-भां० । ९ "समुत्पादितम्"-भां० टि० ।

ग्राहकं स्यात्? । अन्यस्य साध्यनिश्चायकत्वेन सौगतैरनभ्युपगमात् । तदुक्तम्-"त्रिरूपाणि च त्रीण्येव लिङ्गानि" । "अनुपलब्धिः, स्वभावः, कार्यं च" इति [ध० न्या० सू० ११-१२] "त्रिरूपाल्लिङ्गाल्लिङ्गिविज्ञानमनुमानम्" [ ] इति च । तत्र स्वभावहेतुः प्रत्यक्षगृहीतेऽर्थे व्यवहारमात्रप्रवर्त्तनफलः, यथा शिंशिपात्वादिर्वृक्षादिव्यवहारप्रवर्त्तनफलः । न चैवं अत्यक्षाश्रितगुणलिङ्गसम्बन्धः प्रत्यक्षतः प्रतिपन्नः, येन स्वभावहेतुप्रभवमनुमानं तत्सम्बन्धव्यवहारमारचयति । नापि कार्यहेतुसमुत्थम् अक्षाश्रितगुणलिङ्गसम्बन्धग्राहकत्वेन तत् प्रभवति, कार्यहेतोः सिद्धे कार्य-कारणभावे कारणप्रतिपत्तिहेतुत्वेनाभ्युपगमात्; कार्य-कारणभावस्य च सिद्धिः प्रत्यक्षा-ऽनुपलम्भप्रमाणसम्पाद्या; न च लोचनादिगतगुणाश्रितलिङ्गसम्बन्धग्राहकत्वेन प्रत्यक्षप्रवृत्तिः, येन तत्कार्यत्वेन कस्यचिल्लिङ्गस्य प्रत्यक्षतः प्रतिपत्तिः स्यात्; तत्र कार्यहेतोरपि प्रतिबन्धप्रतिपत्तिः । अनुपलब्धेस्त्वेवंविधे विषये प्रवृत्तिरेव न सम्भवति, तस्या अभावसाधकत्वेन व्यापाराभ्युपगमात् । न चान्यल्लिङ्गमभ्युपगम्यत इत्युक्तम् । न च प्रत्यक्षा-ऽनुमानव्यतिरिक्तं प्रमाणान्तरमिति नेन्द्रियगतगुणप्रतिपत्तिः । यन्न क्वचिदपि प्रमाणेन प्रतिभाति न तत् सद्व्यवहारावतारि, यथा शशशृङ्गम्; न प्रतिभान्ति च क्वचिदपि प्रमाणेनातीन्द्रियेन्द्रियगुणा भवदभ्युपगता इति कुतस्तेषां विज्ञानोत्पादककारणव्यतिरिक्तानां प्रामाण्योत्पादकत्वम्? ।

अथ कार्येण यथार्थोपलब्ध्यात्मकेन तेषामधिगमः, तदप्ययुक्तम्; यथार्थत्वा-ऽयथार्थत्वे विहाय यदि कार्यस्य उपलब्ध्याख्यस्य स्वरूपं निश्चितं भवेत् तदा यथार्थत्वलक्षणः कार्यस्य विशेषः पूर्वस्मात् कारणकलापादनिष्पद्यमानो गुणाख्यं स्वोत्पत्तौ कारणान्तरं परिकल्पयति, यदा तु यथार्थैवोपलब्धिः स्वोत्पादककारणकलापानुमापिका तदा कथमुत्पादकव्यतिरेकेण गुणसद्भावः?। अयथार्थत्वं तूपलब्धेः कार्यस्य विशेषः पूर्वस्मात् कारणसमुदायादनुपपद्यमानः स्वोत्पत्तौ सामग्र्यन्तरं कल्पयति, अत एव परतोऽप्रामाण्यमुच्यते, तस्योत्पत्तौ दोषापेक्षत्वात् । न चेन्द्रियनैर्मल्यादि गुणत्वेन वक्तुं शक्यम्, नैर्मल्यं हि तत्स्वरूपमेव, न पुनरौपाधिको गुणः; तथाव्यपदेशस्तु दोषाभावनिबन्धनः । तथाहि-कामलादिदोषासत्त्वान्निर्मलमिन्द्रियमुच्यते, तत्सत्त्वे सदोषम्। मनसोऽपि मिद्धाद्यभावः स्वरूपम्, तत्सद्भावस्तु दोषः । विषयस्यापि निश्चलत्वादिः स्वभावः, चलत्वादिकस्तु दोषः । प्रमातुरपि क्षुदाद्यभावः स्वरूपम्, तत्सद्भावस्तु दोषः । तदुक्तम्-"इयती च सामग्री प्रमाणोत्पादिका" [ ] तदुत्पद्यमानमपि प्रामाण्यं स्वोत्पादककारणव्यतिरिक्तगुणानपेक्षत्वात् स्वत उच्यते । नाप्येतद् वक्तव्यम्-तज्ज्ञानकानां स्वरूपमयथार्थोपलब्ध्या समधिगतम्, यथार्थत्वं तु पूर्वस्मात् कार्यावगतात् कारकस्वरूपादनिष्पद्यमानं किमिति गुणाख्यं सामग्र्यन्तरं न कल्पयति?। प्रक्रियाया विपर्ययेणापि कल्पयितुं शक्यत्वात्। यतो न लोकः प्रायशो विपर्ययज्ञानात् स्वरूपस्थं कारणमप्यनुमिनोति किंतु सम्यग्ज्ञानात्; तथाविधे च कारकानुमानेऽशक्यप्रतिषेधा पूर्वोक्तप्रक्रिया । नापि तृतीयं कार्यमस्तीत्युक्तम्।

अपि चार्थतथाभावप्रकाशनरूपं प्रामाण्यम्, तस्य चक्षुरादिकारणसामग्रीतो विज्ञानोत्पत्तावप्यनुत्पत्त्यभ्युपगमे विज्ञानस्य किं स्वरूपं भवद्भिरपरमभ्युपगम्यते? इति वक्तव्यम् । न च तद्रूपव्यतिरेकेण विज्ञानस्वरूपं भवन्मतेन सम्भवति, येन प्रामाण्यं तत्र विज्ञानोत्पत्तावप्यनुत्पन्नमुत्तरकालं तत्रैवोत्पत्तिमदभ्युपगम्येत; भित्ताविव चित्रम्। किंच, यदि स्वसामग्रीतो विज्ञानोत्पत्तावपि न प्रामाण्यं समुत्पद्यते, किंतु तद्व्यतिरिक्तसामग्रीतः पश्चाद् भवति, तदा विरुद्धधर्माध्यासात् कारणभेदाच्च भेदः स्यात्; अन्यथा "अयमेव भेदो भेदहेतुर्वा, यदुत विरुद्धधर्माध्यासः, कारणभेदश्च; स चेन्न भेदको विश्वमेकं स्यात्" [ ] इति वचः परिक्षवेत ।

---

१ न चाक्षाश्रित-कां, गु० । २ "अक्षाश्रितगुणलिङ्गसंबन्ध"(मू)-भां० टि० । ३ "गुण"-(गुणकार्यत्वेन)-भां० टि० । ४ अस्मिन् पृष्ठे १ पङ्क्तौ । ५ उपलब्ध्याख्यस्व-भां० । ६ व्यतिरेकिगुण-भा० । ७-समूहादनु-वा० । ८ मिन्द्राद्य०-भां० । "मिद्धं निद्रा"-गु० टि० । ९ प्रमाणं-कां० । १० "यथार्थत्वा-ऽयथार्थत्वे विहाय"-भां० टि० । ११ अस्मिन् पृष्ठे १६ पङ्क्तौ । १२ "प्रमाणस्य कारणं चक्षुरादि, प्रामाण्यस्य कारणं गुणः-इति कारणभेदात्"—आ०टि० ।

तस्माद्यत एव गुणविकलसामग्रीलक्षणात् कारणाद् विज्ञानमुत्पद्यते तत एव प्रामाण्यमपीति 'गुणवच्चक्षुरादिभावाभावानुविधायित्वात्' इत्यसिद्धो हेतुः । अत एवोत्पत्तौ 'सामग्र्यन्तरानपेक्षत्वं' नासिद्धम्, अनपेक्षत्वविरुद्धस्य सापेक्षत्वस्य विपक्षे सद्भावात् ततो व्यावर्त्तमानो हेतुः स्वसाध्येन व्याप्यते इति विरुद्धा-ऽनैकान्तिकत्वयोरप्यभाव इति भवत्यतो हेतोः स्वसाध्यसिद्धिः ।

अर्थतथात्वपरिच्छेदरूपा च शक्तिः प्रामाण्यम् । शक्तयश्च सर्वभावानां स्वत एव भवन्ति, नोत्पादककारणकलापाधीनाः । तदुक्तम्—

"स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् ।
नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्य्यते" ॥ [श्लो० वा० सू० २, श्लो० ४७]

एतच्च नैव सत्कार्यदर्शनसमाश्रयणादभिधीयते, किंतु यः कार्यधर्मः कारणकलापेऽस्ति स एव कारणकलापादुपजायमाने कार्ये तत एवोदयमासादयति; यथा मृत्पिण्डे विद्यमाना रूपादयो घटेऽपि मृत्पिण्डादुपजायमाने मृत्पिण्डरूपादिद्वारेणोपजायन्ते । ये पुनः कार्यधर्माः कारणेष्वविद्यमाना न ते कारणेभ्यः कार्ये उदयमासादयंति तत एव प्रादुर्भवन्ति, किंतु स्वतः; यथा घटस्यैवोदकाहरणशक्तिः, तथा विज्ञानेऽप्यर्थतथात्वपरिच्छेदशक्तिः चक्षुरादिषु विज्ञानकारणेष्वविद्यमाना न तत एव भवति, किंतु स्वत एव प्रादुर्भवति । किंचोक्तम्—

"आत्मलाभे हि भावानां कारणापेक्षिता भवेत् ।
लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु" ॥ [श्लो० वा० सू० २, श्लो० ४८]

तथाहि— "मृत्पिण्ड-दण्ड-चक्रादि घटो जन्मन्यपेक्षते ।
उदकाहरणे तस्य तदपेक्षा न विद्यते" ॥ [ ] इति ।

अथ चक्षुरादेर्विज्ञानकारणादुपजायमानत्वात् प्रामाण्यं परत उपजायत इति यद्यभिधीयते, तदभ्युपगम्यत एव । प्रेरणाबुद्धेरपि अपौरुषेयविधिवाक्यप्रभवायाः प्रामाण्योत्पत्त्यभ्युपगमात् । तथाऽनुमानबुद्धिरपि गृहीताविनाभावान्यापेक्षलिङ्गादुपजायमाना तत एव गृहीतप्रामाण्या उपजायत इति 'सर्वत्र विज्ञानकारणकलापव्यतिरिक्तकारणान्तरानपेक्षमुपजायमानं प्रामाण्यं स्वत उत्पद्यते' इति नोत्पत्तौ परतः प्रामाण्यम् ॥

[पूर्वपक्षः-(२) कार्ये प्रा माण्यस्य स्वतस्त्वसाधनम्]

नापि 'स्वकार्येऽर्थतथाभावपरिच्छेदलक्षणे प्रवर्त्तमानं प्रमाणं स्वोत्पादककारणव्यतिरिक्तनिमित्तापेक्षं प्रवर्त्तते' इत्यभिधातुं शक्यम्; यतस्तन्निमित्तान्तरमपेक्ष्य स्वकार्ये प्रवर्त्तमानं किं संवादप्रत्ययमपेक्ष्य प्रवर्त्तते ? आहोस्वित् स्वोत्पादककारणगुणानपेक्ष्य प्रवर्त्तते ? इति विकल्पद्वयम् । तत्र यद्याद्यो विकल्पोऽभ्युपगम्यते, तदा चक्रकलक्षणं दूषणमापतति । तथाहि-प्रमाणस्य स्वकार्ये प्रवृत्तौ सत्यामर्थक्रियार्थिनां प्रवृत्तिः, प्रवृत्तौ चार्थक्रियाज्ञानोत्पत्तिलक्षणः संवादः, तं च संवादमपेक्ष्य प्रमाणं स्वकार्येऽर्थतथाभावपरिच्छेदलक्षणे प्रवर्त्तत इति यावत् प्रमाणस्य स्वकार्ये न प्रवृत्तिर्न तावदर्थक्रियार्थिनां प्रवृत्तिः, तामन्तरेण नार्थक्रियाज्ञानसंवादः, तत्सद्भावं विना प्रमाणस्य तदपेक्षस्य स्वकार्ये न प्रवृत्तिरिति स्पष्टं चक्रकलक्षणं दूषणमिति । न च भाविनं संवादप्रत्ययमपेक्ष्य प्रमाणं स्वकार्ये प्रवर्त्तत इति शक्यमभिधातुम्, भाविनोऽसत्त्वेन विज्ञानस्य स्वकार्ये प्रवर्त्तमानस्य सहकारित्वासंभवात् । अथ द्वितीयः, तत्रापि किं गृहीताः स्वोत्पादककारणगुणाः सन्तः प्रमाणस्य स्वकार्ये प्रवर्त्तमानस्य सहकारित्वं प्रपद्यन्ते ? आहोस्विदगृहीताः ? इत्यत्रापि विकल्पद्वयम् । तत्र यद्यगृहीता इति पक्षः, स न युक्तः; अगृहीतानां सत्त्वस्यैवासिद्धेः सहकारित्वं दूरोत्सारितमेव । अथ द्वितीयः, सोऽपि न युक्तः; अनवस्थाप्रसङ्गात् । तथाहि-गृहीतस्वकारणगुणापेक्षं प्रमाणं स्वकार्ये प्रवर्त्तते, स्वकारणगुणज्ञानमपि स्वकारणगुणज्ञानापेक्षं प्रमाणकारणगुणपरिच्छेदलक्षणे स्वकार्ये प्रव-

१ ग्रन्थाग्रम्-श्लो० १००। २ अयं हेतुः पृ० २, पं० ९। ३ एतच्च 'सामग्र्यन्तरानपेक्षत्वम्' पृ० २, पं० ४। ४ "सांख्य" (दर्शनसमाश्रयणात्) गु०टि०। ५ वा० विना सर्वत्र-**मासादयन्ति न तत एव**—इत्यादिपाठः। ६ "सर्वे हि भावाः स्वात्मलाभायैव स्वकारणमपेक्षन्ते, घटो हि मृत्पिण्डादिकं स्वजन्मनि एव अपेक्षते, नोदकाहरणेऽपि; तथा ज्ञानमपि स्वोत्पत्तौ गुणवत्, इतरद् वा कारणमपेक्षतां नाम, स्वकार्ये तु विषयनिश्चये अनपेक्षमेव" इति-श्लोकवा० टीकायाम्-(श्लो० वा० सू० २, श्लो० ४८)। ७ **इत्यभिधानं शक्यम्**-भां०। ८ **तदपेक्षस्वकार्ये**-गु०।

र्त्तते, तदपि स्वकारणगुणज्ञानापेक्षमित्यनवस्थासमवतारो दुर्निवार इति । अथ प्रमाणकारणगुणज्ञानं स्वकारणगुणज्ञानानपेक्षमेव प्रमाणकारणगुणपरिच्छेदलक्षणे स्वकार्ये प्रवर्त्तते, तर्हि प्रमाणमपि स्वकारणगुणज्ञानानपेक्षमेवार्थपरिच्छेदलक्षणे स्वकार्ये प्रवर्त्तिष्यत इति व्यर्थं प्रमाणस्य स्वकारणगुणज्ञानापेक्षणमिति न स्वकार्ये प्रवर्त्तमानं प्रमाणमन्यापेक्षम् । तदुक्तम्—

"जातेऽपि यदि विज्ञाने तावन्नार्थोऽवधार्यते ।
यावत् कारणशुद्धत्वं न प्रमाणान्तरादू गतम् ॥
तत्र ज्ञानान्तरोत्पादः प्रतीक्ष्यः कारणान्तरात् ।
यावद्धि न परिच्छिन्ना शुद्धिस्तावदसत्समा ॥
तस्यापि कारणाशुद्धेर्न ज्ञानस्य प्रमाणता ।
तस्याप्येवमितीत्थं तु न क्वचिद्व्यवतिष्ठते" ॥ इति [श्लो० वा० सू० २, श्लो० ४९-५१]

तेन 'ये प्रतीक्षितप्रत्ययान्तरोदयाः' इति प्रयोगे हेतोरसिद्धिः । तस्मात्—'स्वसामग्रीत उपजायमानं प्रमाणमर्थयाथात्म्यपरिच्छेदशक्तियुक्तमेवोपजायत इति स्वकार्येऽपि प्रवृत्तिः स्वतः इति स्थितम् ॥

[पूर्वपक्षः-(३) निश्चये प्रामाण्यस्य स्वतस्त्वसाधनम्]

नापि प्रमाणं प्रामाण्यनिश्चयेऽन्यापेक्षम् । तच्चापेक्षमाणं किं स्वकारणगुणानपेक्षते ? आहोस्वित् संवादम् ? इति विकल्पद्वयम् । तत्र यदि स्वकारणगुणानपेक्षत इति पक्षः कक्षीक्रियते, सोऽसंगतः; स्वकारणगुणानां प्रत्यक्ष-तत्पूर्वकानुमानाग्राह्यत्वेनासत्त्वस्य प्रागेव प्रतिपादनात् । अथाभिधीयते-यो यः कार्यविशेषः स स गुणवत्कारणविशेषपूर्वकः, यथा प्रासादादिविशेषः, कार्यविशेषश्च यथावस्थितार्थपरिच्छेद इति स्वभावहेतुरिति, एतदसम्बद्धम्; परिच्छेदस्य यथावस्थितार्थपरिच्छेदत्वासिद्धेः । तथाहि-परिच्छेदस्य यथावस्थितार्थपरिच्छेदत्वं किं शुद्धकारकजन्यत्वेन ? उत संवादित्वेन ? आहोस्विद् बाधारहितत्वेन ? उतस्विद् अर्थतथात्वेन ? इति विकल्पाः । तत्र यदि गुणवत्कारणजन्यत्वेनेति पक्षः, स न युक्तः; इतरेतराश्रयदोषप्रसङ्गात् । तथाहि-गुणवत्कारणजन्यत्वेन परिच्छेदस्य यथावस्थितार्थपरिच्छेदत्वम्, तत्परिच्छेदत्वाच्च गुणवत्कारणजन्यत्वमिति परिस्फुटमितरेतराश्रयत्वम् । अथ संवादित्वेन ज्ञानस्य यथावस्थितार्थपरिच्छेदत्वं विज्ञायते, एतदप्यचारु; चक्रकप्रसङ्गस्यात्र पक्षे दुर्निवारत्वात् । तथाहि-न यावद् विज्ञानस्य यथावस्थितार्थपरिच्छेदलक्षणो विशेषः सिध्यति, न तावत् तत्पूर्विका प्रवृत्तिः संवादार्थिनाम्, यावच्च न प्रवृत्तिर्न तावदर्थक्रियासंवादः, यावच्च न संवादो न तावद् विज्ञानस्य यथावस्थितार्थपरिच्छेदत्वसिद्धिरिति चक्रकप्रसङ्गः प्रागेव प्रतिपादितः । अथ बाधारहितत्वेन विज्ञानस्य यथार्थपरिच्छेदत्वमध्यवसीयते, तदप्यसङ्गतम्; स्वाभ्युपगमविरोधात् । तदभ्युपगमविरोधश्च-बाधाविरहस्य तुच्छस्वभावस्य सत्त्वेन, ज्ञापकत्वेन वाऽनङ्गीकरणात्; पर्युदासवृत्त्या तदन्यज्ञानलक्षणस्य तु विज्ञानपरिच्छेदविशेषाविषयत्वेन तद्व्यवस्थापकत्वानुपपत्तेः । अथार्थतथात्वेन यथावस्थितार्थपरिच्छेदलक्षणो विशेषो विज्ञानस्य व्यवस्थाप्यते, सोऽपि न युक्तः; इतरेतराश्रयदोषप्रसङ्गात् । तथाहि-सिद्धेऽर्थतथाभावे तद्विज्ञानस्यार्थतथाभावपरिच्छेदत्वसिद्धिः, तत्सिद्धेश्चार्थतथाभावसिद्धिरिति परिस्फुटमितरेतराश्रयत्वम् । तन्न कारणगुणापेक्षा प्रामाण्यज्ञप्तिः । अथ संवादापेक्षः प्रामाण्यविनिश्चयः, सोऽपि न युक्तः; यतः संवादकं ज्ञानं किं समानजातीयमभ्युपगम्यते ? आहोस्विद् भिन्नजातीयम् ? इति पुनरपि विकल्पद्वयम् । तत्र यदि समानजातीयं संवादकमभ्युपगम्यते, तदाऽत्रापि वक्तव्यम्-किमेकसन्तानप्रभवम् ? भिन्नसन्तानप्रभवं वा ? । यदि भिन्नसन्तानप्रभवं समानजातीयं ज्ञानान्तरं संवादकमित्यभ्युपगमः, अयमप्यनुपपन्नः; अतिप्रसङ्गात् । अतिप्रसङ्गश्च-देवदत्तघटविज्ञानं प्रति यज्ञदत्तघटान्तरविज्ञानस्यापि संवादकत्वप्रसक्तेः । अथ समानसन्तानप्रभवं समानजातीयं ज्ञानान्तरं संवादकमभ्युपगम्यते, तदात्रापि वक्तव्यम्-किं तत् पूर्वप्रमाणाभिमतविज्ञानगृहीतार्थविषयम् ? उत भिन्नविषयम् ?

१ प्रयोगश्चायम्-पृ० २, पं० १२। २ पृ० २-पं० २०। ३-**वस्थितपरिच्छेदत्वम्**—वा०, भां०, कां०, गु०। ४ पृ० ४-पं० २८। ५ **चाऽ**-भां०।

इति । तत्र यद्येकार्थविषयमिति पक्षः, सोऽनुपपन्नः; एकार्थविषयत्वे संवाद्य-संवादकयोरविशेषात् । तथाहि-एकविषयत्वे सति यथा प्राक्तनमुत्तरकालभाविनो विज्ञानस्यैकसन्तानप्रभवस्य समानजातीयस्य न संवादकं तथोत्तरकालभाव्यपि न स्यात् । किंच, तदुत्तरकालभावि समानजातीयमेकविषयं कुतः प्रमाणत्वेन[1] सिद्धम्-येन प्रथमस्य-प्रामाण्यं निश्चाययति? तदुत्तरकालभाविनोऽन्यस्मात् तथाविधादेवेति चेत्, तर्हि तस्याप्यन्यस्मात् तथाविधादेव इत्यनवस्था । अथोत्तरकालभाविनस्तथाविधस्य प्रथमप्रमाणात् प्रामाण्यनिश्चयः, तर्हि प्रथमस्योत्तरकालभाविनः प्रमाणात् तन्निश्चयः, उत्तरकालभाविनोऽपि प्रथमप्रमाणादिति तदेवेतरेतराश्रयत्वम् । अथ प्रथमो-त्तरयोरेकविषयत्व-समानजातीयत्वै-कसन्तानत्वाविशेषेऽप्यस्त्यन्यो विशेषः, यतो विशेषाद् उत्तरं प्रथमस्य प्रामाण्यं निश्चाययति, न पुनः प्रथममुत्तरस्य; स च विशेषः-उत्तरस्य कारणशुद्धिपरिज्ञानानन्तरभावित्वम् । ननु कारणशुद्धिपरिज्ञानमर्थक्रियापरिज्ञानमन्तरेण न सम्भवति, तत्र च चक्रकदोषः प्राक्[2] प्रतिपादित इति नार्थक्रियाज्ञानसम्भवः; सम्भवे वा तत एव प्रामाण्यनिश्चयस्य संजातत्वाद् व्यर्थमुत्तरकालभाविनः कारणशुद्धिज्ञानविशेषसमन्वितस्य पूर्वप्रामाण्यावगमहेतुत्वकल्पनम्; तन्न समानजातीयमेकसन्तानप्रभवमेकार्थमुत्तरज्ञानं पूर्वज्ञानप्रामाण्यनिश्चायकम् । अथ भिन्नार्थं तद् ज्ञानं पूर्वज्ञानप्रामाण्यनिश्चायकम्, तदप्ययुक्तम्; एवं सति शुक्तिकायां रजतज्ञानस्य तथाभूतं शुक्तिकाज्ञानं प्रामाण्यनिश्चायकं स्यात्; तन्न समानजातीयमुत्तरज्ञानं पूर्वज्ञानस्य प्रामाण्यनिश्चायकम् । अथ भिन्नजातीयं प्रामाण्यनिश्चायकमिति पक्षः, तत्रापि वक्तव्यम्-किम् अर्थक्रियाज्ञानम्? उत अन्यत्?। तत्रान्यदिति न वक्तव्यम्, घटज्ञानस्यापि पटज्ञानप्रामाण्यनिश्चायकत्वप्रसङ्गात् । अथार्थक्रियाज्ञानं संवादकमित्यभ्युपगमः, अयमपि न युक्तः; अर्थक्रियाज्ञानस्यैव प्रामाण्यनिश्चयाभावे प्रवृत्त्याद्यभावतश्चक्रकदोषेणासम्भवात्। अथ प्रामाण्यनिश्चयाभावेऽपि संशयादपि प्रवृत्तिसम्भवान्नार्थक्रियाज्ञानस्यासम्भवः, तर्हि प्रामाण्यनिश्चयो व्यर्थः[3]। तथाहि-प्रामाण्यनिश्चयमन्तरेण प्रवृत्तः 'विसंवादभाग् मा भूवम्' इत्यर्थक्रियार्थी प्रामाण्यनिश्चयमन्वेषते, सा च प्रवृत्तिस्तन्निश्चयमन्तरेणापि संजातेति व्यर्थः प्रामाण्यनिश्चयप्रयासः। किंच, अर्थक्रियाज्ञानस्यापि प्रामाण्यनिश्चायकत्वेनाभ्युपगम्यमानस्य कुतः प्रामाण्यनिश्चयः? तदन्यार्थक्रियाज्ञानादिति चेत्, अनवस्था । पूर्वप्रमाणादिति चेत्, अन्योऽन्याश्रयदोषः प्राक्[4] प्रदर्शितोऽत्रापि । अथार्थक्रियाज्ञानस्य स्वत एव प्रामाण्यनिश्चयः, प्रथमस्य तथाभावे प्रद्वेषः किंनिबन्धनः? । तदुक्तम्—

"यथैव प्रथमं ज्ञानं तत्संवादमपेक्षते ।
संवादेनापि संवादः पुनर्मृग्यस्तथैव हि ॥ [ ]
कस्यचित्तु यदीष्येत स्वत एव प्रमाणता ।
प्रथमस्य तथाभावे प्रद्वेषः केन हेतुना? ॥ [श्लो० वा० सू० २, श्लो० ७६]
संवादस्याथ पूर्वेण संवादित्वात् प्रमाणता ।
अन्योऽन्याश्रयभावेन न प्रामाण्यं प्रकल्पते" ॥ [ ] इति ।

अथापि स्यादर्थक्रियाज्ञानमर्थाभावे न दृष्टमिति न तत् स्वप्रामाण्यनिश्चयेऽन्यापेक्षम्, साधनज्ञानं तु अर्थाभावेऽपि दृष्टमिति तत् प्रामाण्यनिश्चयेऽर्थक्रियाज्ञानापेक्षमिति, एतदप्यसङ्गतम्; अर्थक्रियाज्ञानस्याप्यर्थमन्तरेण स्वप्नदशायां दर्शनात्; न च स्वप्न-जाग्रद्दशाऽवस्थयोः[5] कश्चिद्विशेषः प्रतिपादयितुं शक्यः । अथार्थक्रियाज्ञानं फलावाप्तिरूपत्वान्न स्वप्रामाण्यनिश्चयेऽन्यापेक्षम्, साधनविनिर्भासि पुनर्ज्ञानं नार्थक्रियावाप्तिरूपं भवति तत् स्वप्रामाण्यनिश्चयेऽन्यापेक्षम्। तथाहि-जलावभासिनि ज्ञाने समुत्पन्ने पाना-ऽवगाहनाद्यर्थिनः 'किमेतज्ज्ञानावभासि जलमभिमतं फलं साधयिष्यति, उत न' इति जाताशङ्काः तत्प्रामाण्यविचारं प्रत्याद्रियन्ते; पाना-ऽवगाहनार्थावाप्तिज्ञाने तु समुत्पन्नेऽवाप्तफलत्वान्न तत्प्रामाण्यविचारणाय मनः प्रणिदधति, नैतत् सारम्; 'अवाप्तफलत्वात्' इत्यस्यानुत्तरत्वात्। तथाहि-यथा ते विचारकत्वाज्जलज्ञानावभासिनो जलस्य 'किं सत्त्वम्? उतासत्त्वम्?' इति विचारणायां प्रवृत्तास्तथा फलज्ञाननिर्भासिनोऽप्यर्थस्य सत्त्वाऽसत्त्वविचारणायां प्रवर्त्तन्ते; अन्यथा तदप्रवृत्तौ तदवभासिनोऽर्थस्यासत्त्वाशङ्कया तज्ज्ञानस्याऽवस्तुविषयत्वेनाप्रमाणतया शङ्क्यमानस्य[6] न तज्जलावभासिप्रवर्त्तकज्ञानप्रामाण्यव्यवस्थापकत्वम् । ततश्चान्यस्य तत्समानरूपतया प्रामाण्यनिश्चयाभावात् कथम् 'अर्थक्रियार्था प्रवृत्तिर्निश्चितप्रामाण्याद् ज्ञानात्' इत्यभ्युपगमः शोभनः? । किंच, भिन्नजातीयं संवादकज्ञानं पूर्वस्य प्रामाण्यनिश्चायकमभ्युपगम्यमानमेकार्थम्? भिन्नार्थं वा? । यद्येकार्थमित्यभ्युपगमः-स न युक्तः, भवन्मतेनाघटमानत्वात्। तथाहि-रूपज्ञानाद् भिन्नजातीयं स्पर्शादिज्ञानम्, तत्र च स्पर्शादिकमाभाति न रूपम्, रूपज्ञाने तु रूपम्-न स्पर्शादिकम्-आभाति, रूप-स्पर्शयोश्च परस्परं भेदः; न चावयवी रूप-स्पर्शज्ञानयोरेको विषयतयाऽभ्युपगम्यते, येनैकविषयं भिन्नजातीयं पूर्वज्ञानप्रामाण्यव्यवस्थापकं भवेत्। अपि च, एकविषयत्वेऽपि किं येन स्वरूपेण व्यवस्थाप्ये ज्ञाने सोऽर्थः प्रतिभाति, किं तेनैव व्यवस्थापके? उतान्येन?। तत्र यदि तेनैवेत्यभ्युपगमः, स न युक्तः; व्यवस्थापकस्य तावद्धर्मार्थविषयत्वेन स्मृतिवदप्रमाणत्वेन व्यवस्थापकत्वासम्भवात्। अथ रूपान्तरेण सोऽर्थस्तत्र विज्ञाने प्रतिभाति; नन्वेवं संवाद्य-संवादकयोरेकविषयत्वं न स्यादिति द्वितीय एव पक्षोऽभ्युपगतः स्यात्, स चायुक्तः; सर्वस्यापि[7] भिन्नविषयस्यैकसन्तानप्रभवस्य विजातीयस्य प्रामाण्यव्यवस्थापकत्वप्रसङ्गात्। तथा किं तत् समानकालमर्थक्रियाज्ञानं पूर्वज्ञानप्रामाण्यनिश्चायकम्? आहोस्विद् भिन्नकालम्?। यदि समानकालम्-किं साधननिर्भासिज्ञानग्राहि? उत तदग्राहि? इति पुनरपि विकल्पद्वयम् । यदि तद्ग्राहि, तदसत्; ज्ञानान्तरस्य चक्षुरादिज्ञानेष्वप्रतिभासनात्, प्रतिनियतरूपादिविषयत्वेन चक्षुरादिज्ञानानामभ्युपगमात्। अथ तदग्राहि, न तर्हि तज्ज्ञानप्रामाण्यनिश्चायकम्, तदग्रहे तद्गतधर्माणामप्यग्रहात्। अथ भिन्नकालम्, तदप्ययुक्तम्; पूर्वज्ञानस्य क्षणिकत्वेन नाशादुत्तरकालभाविविज्ञानेऽप्रतिभासनात्, भासने चोत्तरविज्ञानस्यासद्विषयत्वेनाप्रामाण्यप्रसक्तिस्तद्ग्राहकत्वेन न तत्प्रामाण्यनिश्चायकत्वम्। तदग्राहकं तु भिन्नकालं सुतरां न तन्निश्चायकमिति न भिन्नकालमप्येकसन्तानजं भिन्नजातीयं प्रामाण्यनिश्चायकमिति न संवादापेक्षः पूर्वप्रमाणप्रामाण्यनिश्चयः । तेन ज्ञातावपि 'ये यद्भावं प्रत्यनपेक्षाः' इति प्रयोगे[8] हेतोर्नासिद्धिः। व्याप्तिस्तु साध्यविपक्षाऽतन्नियतत्वव्यापकात् सापेक्षत्वान्निवर्त्तमानमनपेक्षत्वं तन्नियतत्वेन व्याप्यते इति प्रमाणसिद्धैव[9]। यतश्च न पूर्वोक्तेन प्रकारेण परतःप्रामाण्यनिश्चयः सम्भवति, ततो 'ये सन्देह-विपर्ययविषयीकृतात्मतत्त्वाः' इति प्रयोगे[10] व्याप्त्यसिद्धिः। हेतोश्चासिद्धता सर्वप्राणभृतां प्रामाण्ये सन्देह-विपर्ययाभावात् । तथाहि-ज्ञाने समुत्पन्ने सर्वेषाम् 'अयमर्थः' इति निश्चयो भवति, न च प्रामाण्यस्य सन्देहे, विपर्यये वा सत्येष युक्तः। तदुक्तम्-

"प्रामाण्यग्रहणात् पूर्वं स्वरूपेणैव संस्थितम्[11]।
निरपेक्षं स्वकार्ये च" [श्लो० वा० सू० २, श्लो० ८३] इति ।

स्वार्थनिश्चयो हि प्रमाणकार्यम्-न च तत् प्रमाणान्तरग्रहणं चापेक्षत इति गम्यते-न चैतत् संशय-विपर्ययविषयत्वे सम्भवतीति ।

अथ प्रमाणा-ऽप्रमाणयोरुत्पत्तौ तुल्यं रूपमिति न संवाद-विसंवादावन्तरेण तयोः प्रामाण्या-ऽप्रामाण्यनिश्चयः, तदसत्; अप्रमाणे तदुत्तरकालमवश्यंभाविनौ[11] बाधक-कारणदोषप्रत्ययौ, तेन तत्राप्रामाण्यनिश्चयः; प्रमाणे तु तयोरभावात् कुतोऽप्रामाण्याशङ्का? । अथ तत्तुल्यरूपे तयोर्दर्शनात् तत्रापि तदाशङ्का, साऽपि न युक्ता; त्रि-चतुरज्ञानापेक्षामात्रतस्तत्र तस्या निवृत्तेः । न च तदपेक्षातः स्वतःप्रामाण्यव्याहतिः, अनवस्था वेत्याशङ्कनीयम्, संवादकज्ञान-

---

१ **प्रमाणमेव** गु० । २ पृ० ५-पं० २५। ३ ग्रन्थाग्रम् श्लो० २००। ४ अस्मिन्नेव पृष्ठे पं० ७। ५ स्याद्वादरत्नाकरे तत्प्रणेत्रा एतदेव श्लोकत्रयं "यदाह भट्टः"-(पृ० १२४ पङ्क्तौ ५) इति निर्दिश्य उदलेखि, तथापि मुद्रिते कुमारिलभट्टकृते श्लोकवार्तिके एक एव मध्यमः श्लोको लब्धः। ६-**वस्थायाः**-कां०, गु०। ७ **पुनर्ज्ञानमर्थक्रियावाप्तिरूपं न भवति तत्**-हा०।

१ **न जलाव**-वा०, कां०। २ अत्रैव पृष्ठे ८ पङ्क्तौ उक्तः-'भिन्नार्थम्' इति पक्षः। ३ **पूर्वस्यापि**-आ०, गु०, भा०। ४ प्रयोगोऽयम्-पृ० २, पं० ५। ५ "व्याप्तिः प्रमाणसिद्धैव-इति संटङ्कः"—भां० टि०। ६ अयमपि प्रयोगः-पृ० २, पं० १४। ७ **प्रामाण्यं ग्रहणात् पूर्वम्**—वा०। ८ मुद्रितश्लोकवार्तिके तु एतद् एवं संपूर्णम्—"निरपेक्षं स्वकार्येषु गृह्यते प्रत्ययान्तरैः"। ९ **न च तत्र प्रमाणान्तरं ग्रहणमपेक्षते**—वा०, गु०। १० "निरपेक्षं स्वकार्ये" इत्यस्यैतत् तात्पर्यम्। ११-**भाविबाधक**-गु०।

स्याप्रामाण्याशङ्काव्यवच्छेदे एव व्यापारात्—अपरज्ञानानपेक्षणाच्च । तथाहि—अनुत्पन्नबाधके ज्ञाने परत्र बाध्यमानप्रत्ययसाधर्म्यादप्रामाण्याशङ्का, तस्यां सत्यां तृतीयज्ञानापेक्षा, तच्चोत्पन्नं यदि प्रथमज्ञानसंवादि, तदा तेन न प्रथमज्ञानप्रामाण्यनिश्चयः क्रियते, किंतु द्वितीयज्ञानेन यत् तस्याऽप्रामाण्यमाशङ्कितं तदेव तेनापाक्रियते; प्रथमस्य तु स्वत एव प्रामाण्यमिति । एवं तृतीयेऽपि कथञ्चित् संशयोत्पत्तौ चतुर्थज्ञानापेक्षायामयमेव न्यायः । तदुक्तम्—

"एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः ।
प्रार्थ्यते तावतैवैकं स्वतः प्रामाण्यमश्नुते" ॥ इति [श्लो० वा० सू० २, श्लो० ६१]

यत्र च दुष्टं कारणम्, यत्र च बाधकप्रत्ययः-स एव मिथ्याप्रत्ययः-इत्यस्याप्ययमेव विषयः । चतुर्थज्ञानापेक्षा त्वभ्युपगमवादत उक्ता, नतु तदपेक्षाऽपि भावतो विद्यते । अथ तृतीयज्ञानं द्वितीयज्ञानसंवादि, तदा प्रथमस्याप्रामाण्यनिश्चयः—स तु—तत्कृतोऽभ्युपगम्यते एव; किंतु द्वितीयस्य यदप्रामाण्यमाशङ्कितं तत् तेनाऽपाक्रियते, न पुनस्तस्य द्वितीयप्रामाण्यनिश्चायकत्वे व्यापारः । यत्र त्वभ्यस्ते विषयेऽर्थतथात्वशङ्का नोपजायते तत्र बलादुत्पाद्यमाना शङ्का तत्कर्तुरनर्थकारिणीत्यावेदितं वार्त्तिककृता—

"आशङ्कते हि यो मोहादजातमपि बाधकम् ।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत्" ॥ [ ] इति ।

न चैतदभिशापमात्रम्, यतोऽशङ्कनीयेऽपि विषयेऽभिशङ्किनां सर्वत्रार्था-ऽनर्थप्राप्तिपरिहारार्थिनामिष्टा-ऽनिष्टप्राप्ति-परिहारसमर्थप्रवृत्त्यादिव्यवहारासम्भवाद् न्यायप्राप्त एव क्षयः, स्वोत्प्रेक्षितनिमित्तनिबन्धनाया आशङ्कायाः सर्वत्र भावात् ।

प्रेरणाजनिता तु बुद्धिरपौरुषेयत्वेन दोषरहितात् प्रेरणालक्षणाच्छब्दादुपजायमाना लिङ्गा-ऽऽप्तोक्ता-ऽक्षबुद्धिवत् प्रमाणं सर्वत्र स्वतः । तदुक्तम्—

"चोदनाजनिता बुद्धिः प्रमाणं दोषवर्जितैः ।
कारणैर्जन्यमानत्वाल्लिङ्गा-ऽऽप्तोक्ता-ऽक्षबुद्धिवत्" ॥ [श्लो० वा० सू० २, श्लो० १८४] इति ।

तस्मात् स्वतः प्रामाण्यम्, अप्रामाण्यं परत इति व्यवस्थितम् । अतः सर्वप्रमाणानां स्वतः सिद्धत्वाद् युक्तमुक्तम्—'स्वतः सिद्धं शासनं नातः प्रकरणात् प्रामाण्येन प्रतिष्ठाप्यम्' । इदं त्वयुक्तम्—'जिनानाम्' इति, जिनानामसत्त्वेन शासनस्य तत्कृतत्वानुपपत्तेः; उपपत्तावपि परतः प्रामाण्यस्य निषिद्धत्वादिति ॥

[उत्तरपक्षः—(१) उत्पत्तौ प्रामाण्यस्य स्वतस्त्वनिरसनम्]

अत्र प्रतिविधीयते, यत्तावदुक्तम्—'अर्थतथाभावप्रकाशको ज्ञातृव्यापारः प्रमाणम्', तदयुक्तम्; पराभ्युपगतज्ञातृव्यापारस्य प्रमाणत्वेन निषेत्स्यमानत्वात् । यदप्यन्यदभ्यधायि—'तस्य यथार्थप्रकाशकत्वं प्रामाण्यम्, तच्चोत्पत्तौ स्वतः, विज्ञानकारणचक्षुरादिव्यतिरिक्तगुणानपेक्षत्वात्' तत्र प्रामाण्यस्योत्पत्तिरविद्यमानस्यात्मलाभः, सा चेन्निर्हेतुका, "देश-काल-स्वभावनियमो न स्यात्" इत्यन्यत्र प्रतिपादितम् । किंच, गुणवच्चक्षुरादिसद्भावे सति यथावस्थितार्थप्रतिपत्तिर्दृष्टा, तदभावे न दृष्टा इति तद्धेतुका व्यवस्थाप्यते, अन्वय-व्यतिरेकनिबन्धनत्वादन्यत्रापि हेतुफलभावस्य, अन्यथा दोषवच्चक्षुराद्यन्वय-व्यतिरेकानुविधायिनी मिथ्याप्रतिपत्तिरपि स्वतः स्यात् । तथाऽभ्युपगमे

"वस्तुवाद् द्विविधैस्यात्र संभवो दुष्टकारणात्" [श्लो० वा० सू० २, श्लो० ५४]

इति वचो व्याहतमनुषज्येत । यदपि 'अत्यक्षाऽक्षाश्रितगुणसद्भावे प्रत्यक्षाप्रवृत्तेः तत्पूर्वकानुमानस्यापि तद्ग्राहकत्वेनाव्यापारात् चक्षुरादिगतगुणानामसत्त्वात् तदन्वय-व्यतिरेकानुविधायित्वं

१ अथ तत् तृतीय-भां० । २-तथात्वा-ऽतथात्वाशङ्का-भां० । ३-नर्थप्राप्ति-परिहारसमर्थ-गु० । ४ पृ० १, पं० ३० । ५ पृ० २, पं० २ । ६ पृ० २, पं० २ । ७ "द्विविधस्य-इति मिथ्यात्व-संशयरूपस्य—" भां० टि० । ८ "अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वा-ऽज्ञान-संशयैः' इति पूर्वार्धम् (अस्य)—भां० टि०

प्रामाण्यस्योत्पत्तावयुक्तम्' इत्युक्तम्, तदप्यसङ्गतम्; अप्रामाण्योत्पत्तावप्यस्य दोषस्य समानत्वात् । तथाहि-'अतीन्द्रियलोचनाद्याश्रिता दोषाः किं प्रत्यक्षेण प्रतीयन्ते, उतानुमानेन? न तावत् प्रत्यक्षेण, इन्द्रियादीनामतीन्द्रियत्वेन तद्गतदोषाणामप्यतीन्द्रियत्वेन तेषु प्रत्यक्षस्याप्रवृत्तेः । नाप्यनुमानेन, अनुमानस्य गृहीतप्रतिबन्धलिङ्गप्रभवत्वाभ्युपगमात्, लिङ्गप्रतिबन्धग्राहकस्य च प्रत्यक्षस्यानुमानस्य चात्र विषयेऽसम्भवात्, प्रमाणान्तरस्य चात्रानन्तर्भूतस्यासत्त्वेन प्रतिपादयिष्यमाणत्वात्' इत्यादि सर्वमप्रामाण्योत्पत्तिकारणभूतेषु लोचनाद्याश्रितेषु दोषेष्वपि समानमिति तेषामप्यसत्त्वात् तदन्वय-व्यतिरेकानुविधानस्यासिद्धत्वाद्प्रामाण्यमप्युत्पत्तौ स्वतः स्यात् । यदपि 'अथ कार्येण यथार्थोपलब्ध्यात्मकेन तेषामधिगमः' इत्यादि 'यतो न लोकः प्रायशो विपर्ययज्ञानादुत्पादकं कारणमात्रमनुमिनोति किंतु सम्यग्ज्ञानात्' इत्यन्तमभ्यधायि, तदप्यसङ्गतम्; यतो यदि लोकव्यवहारसमाश्रयणेन प्रामाण्याऽप्रामाण्ये व्यवस्थाप्येते तदाऽप्रामाण्यवत् प्रामाण्यमपि परतो व्यवस्थापनीयम् । तथाहि—लोको यथा मिथ्याज्ञानं दोषवच्चक्षुरादिप्रभवमभिदधाति तथा सम्यग्ज्ञानमपि गुणवच्चक्षुरादिसमुत्थमिति तदभिप्रायादप्रामाण्यवत् प्रामाण्यमप्युत्पत्तौ परतः कथं न स्यात् ? तथाहि—तिमिरादिदोषावष्टब्धचक्षुष्को विशिष्टौषधोपयोगावाप्ताक्षिनैर्मल्यगुणः केनचित् सुहृदा 'कीदक्षे भवतो लोचने वर्त्तेते' इति पृष्टः सन् प्राह—'प्राक् सदोषे अभूतामिदानीं समासादितगुणे संजाते' इति । न च नैर्मल्यं दोषाभावमेव लोको व्यपदिशति इति शक्यमभिधातुम्, तिमिरादेरपि गुणाभावरूपत्वव्यपदेशप्राप्तेः; तथाच अप्रामाण्यमपि प्रामाण्यवत् स्वतः स्यात् । यदप्यभ्यधायि 'न च तृतीयं कार्यमस्ति' इति, तदप्यसम्यक्; तृतीयकार्याभावेऽपि पूर्वोक्तन्यायेन प्रामाण्यस्योत्पत्तौ परतः सिद्धत्वात् । यच्च 'अपि चार्थतथाभावप्रकाशनलक्षणं प्रामाण्यम्' इत्यादि 'विश्वमेकं स्यादिति वचः परिप्लवेत' इतिपर्यवसानमभिहितम्, तदपि अविदितपराभिप्रायेण; यतो न परस्यायमभ्युपगमः—विज्ञानस्य चक्षुरादिसामग्रीत उत्पत्तावप्यर्थतथाभावप्रकाशनलक्षणस्य प्रामाण्यस्य नैर्मल्यादिसामग्र्यन्तरात् पश्चादुत्पत्तिः, किंतु गुणवच्चक्षुरादिसामग्रीत उपजायमानं विज्ञानमागृहीतप्रामाण्यस्वरूपमेवोपजायत इति । ज्ञानवत् तदव्यतिरिक्तस्वभावं प्रामाण्यमपि परत इति गुणवच्चक्षुरादिसामग्र्यपेक्षत्वादुत्पत्तौ प्रामाण्यस्यानपेक्षत्वलक्षणस्वभावहेतुरसिद्धोऽनपेक्षत्वस्वरूप इति 'तस्माद्यत एव गुणविकलसामग्रीलक्षणात्' इत्याद्ययुक्तमभिहितम् । 'अर्थतथात्वपरिच्छेदरूपा च शक्तिः प्रामाण्यम्, शक्तयश्च सर्वभावानां स्वत एव भवन्ति' इत्यादि यदभिधानम्, तदप्यसमीचीनम्; एवमभिधानेऽयथावस्थितार्थपरिच्छेदशक्तेरप्यप्रामाण्यरूपाया असत्याः केनचित् कर्तुमशक्तेस्तदपि स्वतः स्यात् । यदपि 'एतच्च नैव सत्कार्यदर्शनसमाश्रयणादभिधीयते' इत्यादि 'तदपेक्षा न विद्यते' इतिपर्यन्तमभिहितम्, तदपि प्रलापमात्रम्; यतोऽनेन न्यायेनाप्रामाण्यमपि प्रामाण्यवत् स्वत एव स्यात् । तदपि हि विपरीतार्थपरिच्छेदशक्तिलक्षणं न तिमिरादिदोषसङ्गतिमत्सु लोचनादिषु अस्तीति । अपि च, ज्ञानरूपतामात्मन्यसंतीमाविर्भावयन्तीन्द्रियादयो न पुनर्यथावस्थितार्थपरिच्छेदशक्तिमिति न किंचिन्निमित्तमुत्पश्यामः । कुतश्चैतदैश्वर्यं शक्तिभिः प्राप्तं यत इमाः स्वत एवोदयं प्रत्यासादितमाहात्म्याः, न पुनस्तदाधाराभिमता भावविशेषा इति ? न च तास्तेभ्यः प्राप्तव्यतिरेकाः, यतः स्वाधाराभिमतभावकारणेभ्यो भावस्योत्पत्तावपि न तेभ्य एवोत्पत्तिमनुभवेयुः । व्यतिरेके, स्वाश्रयैस्ततोऽभवन्त्यो न सम्बन्धमाप्नुयुः, भिन्नानां कार्यकारणभावव्यतिरेकेणापरस्य सम्बन्धस्याभावात्, आश्रयाश्रयिसम्बन्धस्यापि जन्यजनकभावाभावेऽतिप्रसङ्गतो

१ पृ० २ पं० १९ । २ वाऽत्र कां० । ३ पृ० ३ पं० १५ । ४ पृ० ३ पं० २९ । ५ ग्रन्थाग्रम् ३०० श्लो० । ६ प्रभवमित्यभि-गु० । ७-दप्यप्रामाण्य-गु० । ८ पृ० ३ पं० ३० । ९ पृ० ३ पं० ३१ । १० पृ० ३ पं० ३६ । ११-लक्षणभाव-भां०, कां०, गु० । १२ नैतद् ग्रन्थकारवचनम्, किंतु 'प्रामाण्यस्यानपेक्षत्वलक्षणस्वभावहेतु' इति वाक्यान्तर्गतस्य 'अनपेक्षत्वलक्षण' इति पदस्य केनचित् 'अनपेक्षत्वस्वरूप' इत्येवं कृतं विवरणं लेखकभ्रमेण ग्रन्थकारवचनमिव जातमिति अस्माकं भाति । १३ पृ० ४ पं० १ । १४ पृ० ४ पं० ५ । १५ सत्कार्यप्रदर्शन-वा०, वि०, हा०, अ० विना सर्वत्र । १६ पृ० ४ पं० ९ । १७ पृ० ४ पं० १८ । १८ "ज्ञाने"-गु० टि० । १९ "पूर्वमिति शेषः" गु० टि० । २० ऐश्वर्यम् 'ङे' प्रतावेव, अन्यत्र क्वचित् (वा०, भां०, हा०, वि०) आश्वर्यम्, क्वचित् (कां०, अ०, आ०) आश्चर्यम् । २१ "ज्ञानविशेषाः-खोदयं प्रत्यासादितमाहात्म्या इति शेषः" गु० टि० । २२-जनकभावभावे वा० ।

निषेत्स्यमानत्वात्। धर्मत्वाच्छक्तेराश्रय इत्यप्ययुक्तम्, असति पारतन्त्र्ये परमार्थतस्तदयोगात्। पारतन्त्र्यमपि न सतः, सर्वनिराशंसत्त्वात् । असतोऽपि व्योमकुसुमस्येव न, तत्त्वादेव । अनिमित्ताश्चेमा न देश-काल-द्रव्यनियमं प्रतिपद्येरन्; तद्धि किञ्चित् क्वचिदुपलीयेत न वा यद् यत्र कथञ्चिदायत्तमनायत्तं वा । सर्वप्रतिबन्धविवेकिन्यश्चेच्छक्तयो नेमाः कस्यचित् कदाचिद् विरमेयुरिति प्रतिनियतशक्तियोगिता भावानां प्रमाणप्रमिता न स्यात् । व्यतिरेकाऽव्यतिरेकपक्षस्तु शक्तीनां विरोधाऽनवस्थोभयपक्षोक्तदोषादिपरिहाराद् विनाऽनुद्धोष्यः । अनुभयपक्षस्तु न युक्तः, परस्परपरिहारस्थितरूपाणामेकनिषेधस्यापरविधाननान्तरीयकत्वात्। न च विहितस्य पुनस्तस्यैव निषेधः, विधि-प्रतिषेधयोरेकत्र विरोधात् । ये त्वाहुः—"उत्तरकालभाविनः संवादप्रत्ययान्न जन्म प्रतिपद्यते शक्तिलक्षणं प्रामाण्यमिति स्वत उच्यते न पुनर्विज्ञानकारणान्नोपजायते" इति, तेऽपि न सम्यक् प्रचक्षते; सिद्धसाध्यतादोषात्, अप्रामाण्यमपि चैवं स्वतः स्यात्, नहि 'तदप्युत्पन्ने ज्ञाने विसंवादप्रत्ययादुत्तरकालभाविनः तन्नोत्पद्यते' इति कस्यचिदभ्युपगमः। यदा च गुणवत्कारणजन्यता प्रामाण्यस्य शक्तिरूपस्य प्राक्तनन्यायादवस्थिता तदा कथमौत्सर्गिकत्वं तस्य दुष्टकारणप्रभवेषु मिथ्याप्रत्ययेष्वभावात्, परस्परव्यवच्छेदरूपाणामेकत्रासम्भवात्? तस्माद् "गुणेभ्यो दोषाणामभावस्तदभावाद् अप्रामाण्यद्वयासत्त्वेनोत्सर्गोऽनपोदित एवास्ते" इति वचैः परिफल्गुप्रायम्। इतश्चैतद्वचोऽयुक्तम्, विपर्ययेणाप्यस्योद्घोषयितुं शक्यत्वात्। तथाहि—दोषेभ्यो गुणानामभावस्तदभावात् प्रामाण्यद्वयासत्त्वेनाप्रामाण्यमौत्सर्गिकमास्त इति ब्रुवतो न वक्त्रं वक्रीभवति ।

किंच, 'गुणेभ्यो दोषाणामभाव' इति न तुच्छरूपो दोषाभावो गुणव्यापारनिष्पाद्यः। तत्र व्यतिरिक्ताऽव्यतिरिक्तविकल्पद्वारेण कारकव्यापारस्यासम्भवात् भवद्भिरनभ्युपगमाच्च । तुच्छाभावस्याभ्युपगमे वा—

"भावान्तरविनिर्मुक्तो भावोऽत्रानुपलम्भवत्।
अभावः संमतस्तस्य हेतोः किं न समुद्भवः?" ॥ [ ]

इति वचो न शोभेत । तस्मात् पर्युदासवृत्त्या प्रतियोगिगुणात्मक एव दोषाभावोऽभिप्रेतः, ततश्च 'गुणेभ्यो दोषाभावः' इति ब्रुवता 'गुणेभ्यो गुणाः' इत्युक्तं भवति ।

न च गुणेभ्यो गुणाः कारणानामात्मभूता उपजायन्ते इति, स्वात्मनि क्रियाविरोधात् स्वकारणेभ्यो गुणोत्पत्तिसद्भावाच्च । तदभावादप्रामाण्यद्वयासत्त्वमपि प्रामाण्यमभिधीयते; ततश्च गुणेभ्यः प्रामाण्यमुत्पद्यत इत्यभ्युपगमात् परतः प्रामाण्यमुत्पद्यत इति प्राप्तम्। ततश्च स्वार्थावबोधशक्तिरूपप्रामाण्यात्मलाभे चेत् कारणापेक्षा, काऽन्या स्वकार्ये प्रवृत्तिर्या स्वयमेव स्यात्? तेनायुक्तमुक्तम्—

"लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु" इति।

घटस्य जलोद्वहनव्यापारात् पूर्वं रूपान्तरेण स्वहेतोरुत्पत्तेर्युक्तं मृदादिकारणनिरपेक्षस्य स्वकार्ये प्रवृत्तिरिति, अतो विसदृशमुदाहरणम्। उत्पत्त्यनन्तरमेव च विज्ञानस्य नाशोपगमात् कुतो लब्धात्मनो वृत्तिः स्वयमेव? तदुक्तम्—

"नहि तत् क्षणमप्यास्ते जायते वाऽप्रमाऽऽत्मकम्।
येनार्थग्रहणे पश्चाद्व्यापृियेतेन्द्रियादिवत् ॥
तेन जन्मैव विषये बुद्धेर्व्यापार उच्यते।
तदेव च प्रमारूपं तद्वती करणं च धीः" ॥ [श्लो० वा० सू० ४, श्लो० ५५-५६] इति।

---

१ **सर्वत्र प्रति**- अ० । २-**निषेधस्य पर**-गु० । ३ समानमेतत् शब्दशः, अर्थशोऽपि अनेन पद्येन—"तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः । अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः" [श्लो० वा० सू० २, श्लो० ६५] ४ "पदार्थान्तरेण विनिर्मुक्तः—त्यक्तः—भिन्न इति यावत्; इत्थंभूतो भाव एव अभावः—न पुनर्भावादतिरिच्यते इत्यर्थः । तत्र दृष्टान्तोऽनुपलम्भः, यथा घटानुपलम्भो घटातिरिक्तस्य पटादेरुपलम्भे पर्यवस्यति, तथा दोषा (ऽभावो) भावान्तरे पर्यवसायी वाच्यः इत्याशय इति" गु० टि० । ५ "अयमाशयः—न हि गुणेभ्यः प्रामाण्यमुपजायते, किं तर्हि? दोषाभावः, तेन हि अप्रामाण्यरूपद्वयासत्त्वेन प्रामाण्यं स्वत एवोपजायते, विरोध्यपगमे स्वतस्त्वे लाघवाद् बाधकाभावाच्चेति" गु० टि० । ६ **स्वकार्यप्र**-गु० । ७ पृ० ४ पं० १६ ।

तस्माज्जन्मव्यतिरेकेण बुद्धेर्व्यापाराभावात् तत्र च ज्ञानानां सगुणेषु कारणेष्वपेक्षावचनात् कुतः स्वातन्त्र्येण प्रवृत्तिरिति किं तद् ज्ञानस्य कार्यं यत्र लब्धात्मनः प्रवृत्तिः स्वयमेवेत्युच्यते? स्वार्थपरिच्छेदश्चेत्, न; ज्ञानपर्यायत्वात् तस्यात्मानमेव करोतीत्युक्तं स्यात्, तच्चायुक्तम्। 'प्रमाणमेतद्' इत्यनन्तरं निश्चयश्चेत्, न; भ्रान्तिकारणसद्भावेन क्वचिदनिश्चयात् विपर्ययदर्शनाच्च। तस्माज्जन्मापेक्षया गुणवच्चक्षुरादिकारणप्रभवं प्रामाण्यं परतःसिद्धमिति 'अथ चक्षुरादिज्ञानकारण—' इत्याद्ययुक्ततया स्थितम्।

अपौरुषेयविधिवाक्यप्रभवायास्तु बुद्धेः स्वतःप्रामाण्योत्पत्त्यभ्युपगमो न युक्तः, अपौरुषेयत्वस्य प्रतिपादयिष्यमाणतद्ग्राहकप्रमाणाविषयत्वेनासत्त्वात्, सत्त्वेऽपि भवदीया तस्यैव गुणत्वात् तथाभूतप्रेरणाप्रभवाया बुद्धेः कथं न परतःप्रामाण्यम्? किंच, अपौरुषेयत्वे प्रेरणावचसो गुणवत्पुरुषप्रणीतलौकिकवाक्येषु तत्त्वेन निश्चितं प्रामाण्यं गुणाश्रयपुरुषप्रणीतत्वव्यावृत्त्या तत् तत्र न स्यात्। तथा च—

"प्रेरणाजनिता बुद्धिः प्रमाणं दोषवर्जितैः।
कारणैर्जन्यमानत्वाल्लिङ्गा ऽऽप्तोक्ता ऽक्षबुद्धिवत्" ॥ [श्लो० वा० सू० २,१८४] इति।

इत्ययं श्लोक एवं पठितव्यः—

प्रेरणाजनिता बुद्धिरप्रमा गुणवर्जितैः।
कारणैर्जन्यमानत्वादलिङ्गाऽऽप्तोक्तबुद्धिवत् ॥

अथ प्रेरणावाक्यस्यापौरुषेयत्वे पुरुषप्रणीतत्वाश्रया यथा गुणा व्यावृत्तास्तथा तदाश्रिता दोषा अपि; ततश्च तद्व्यावृत्तावप्रामाण्यस्यापि प्रेरणाया व्यावृत्तत्वात् स्वतः सिद्धमुत्पत्तौ प्रामाण्यम्। नन्वेवं सति गुण-दोषाश्रयपुरुषप्रणीत(तत्व)व्यावृत्तौ प्रेरणायां प्रामाण्याऽप्रामाण्ययोर्व्यावृत्तत्वात् प्रेरणाजनिता बुद्धिः प्रामाण्याऽप्रामाण्यरहिता प्राप्नोति। ततश्च—

प्रेरणाजनिता बुद्धिर्न प्रमाणं न चाप्रमा।
गुण-दोषविनिर्मुक्तकारणेभ्यः समुद्भवात् ॥

इत्येवमपि प्राक्तनः श्लोकः पठितव्यः। अत एव यथा—

"दोषाः सन्ति न सन्तीति पौरुषेयेषु चिन्त्यते।
वेदे कर्तुरभावात्तु दोषाशङ्कैव नास्ति नः" ॥ [ ]

इत्ययं श्लोक एवं पठितस्तथैवमपि पठनीयः—

गुणाः सन्ति न सन्तीति पौरुषेयेषु चिन्त्यते।
वेदे कर्तुरभावात्तु गुणाशङ्कैव नास्ति नः ॥

न च यत्रापि गुणाः प्रामाण्यहेतुत्वेनाऽऽशङ्क्यन्ते तत्रापि गुणेभ्यो दोषाभाव इत्यादि वक्तव्यम्, विहितोत्तरत्वात्। अपि च, अपौरुषेयत्वेऽपि प्रेरणाया न स्वतः स्वविषयप्रतीतिजनकव्यापारः—सदा सन्निहितत्वेन ततोऽनवरतप्रतीतिप्रसङ्गात्—किंतु पुरुषाभिव्यक्तार्थप्रतिपादकसमयाविर्भूतविशिष्टसंस्कारसव्यपेक्षायाः। ते च पुरुषाः सर्वे रागादिदोषाभिभूता एव भवताऽभ्युपगताः, तत्कृतश्च संस्कारो न यथार्थः—अन्यथा पौरुषेयमपि वचो यथार्थं स्यात्—अतोऽपौरुषेयत्वाभ्युपगमेऽपि समयकर्तृपुरुषदोषकृताप्रामाण्यसद्भावात् प्रेरणायामपौरुषेयत्वाभ्युपगमो गजस्नानमनुकरोति। तदुक्तम्—

"असंस्कार्यतया पुम्भिः सर्वथा स्यान्निरर्थता।
संस्कारोपगमे व्यक्तं गजस्नानमिदं भवेत्" ॥ [ ]

यदप्यभाषि 'तथाऽनुमानबुद्धिरपि गृहीताविनाभावानन्यापेक्ष'—इत्यादि, तदप्यचारु; अविनाभावनिश्चयस्यैव गुणत्वात्, तदनिश्चयस्य विपरीतनिश्चयस्य च दोषत्वात्। तदेवम् उत्पत्तौ प्रामाण्यं गुणापेक्षत्वात् परतः इति स्थितम् ॥ ४०

---

१ पृ० ४ पं० १९ । २ श्लोकवार्तिकगतद्वितीयसूत्रसंबन्धिना ६८ श्लोकेन समोऽस्य भावः । ३ पृ० १० पं० १७ । ४ पृ० ४ पं० २१ ।

[उत्तरपक्षः-(२) कार्ये प्रामाण्यस्य स्वतस्त्वनिरसनम्]

यदप्युक्तम् 'नापि स्वकार्ये प्रवर्तमानं प्रमाणं निमित्तान्तरापेक्षम्' इति, तदप्यसंगतम्; यतो यदि कार्योत्पादनसामग्रीव्यतिरिक्तनिमित्तानपेक्षं प्रमाणमित्युच्यते तदा सिद्धसाधनम् । अथ सामग्र्येकदेशलक्षणं(ण)प्रमाणं(ण)निमित्तान्तरानपेक्षम्, तदप्यचारु; एकस्य जनकत्वासंभवात्—"न ह्येकं किंचिज्जनकम्, सामग्री वै जनिका" [ ] इति न्यायस्यान्यत्र व्यवस्थापितत्वात् । किंच, नार्थपरिच्छेदमात्रं प्रमाणकार्यम्, अप्रमाणेऽपि तस्य भावात् । किं तर्हि? अर्थतथात्वपरिच्छेदः, स च[1] न ज्ञानस्वरूपकार्यः; भ्रान्तज्ञानेऽपि स्वरूपस्य भावात् तत्रापि सम्यगर्थपरिच्छेदः स्यात् । अथ स्वरूपविशेषकार्यो यथावस्थितार्थपरिच्छेदः इति नातिप्रसङ्गस्तर्हि स स्वरूपविशेषो वक्तव्यः—किमपूर्वार्थविज्ञानत्वम्, उत निश्चितत्वम्, आहोस्विद् बाधारहितत्व[3]म्, उतस्विद् अदुष्टकारणारब्धत्वम्, किं वा संवादित्वम् इति ? तत्र यद्यपूर्वार्थविज्ञानत्वं विशेषः, स न युक्तः; तैमिरिकज्ञानेऽपि तस्य भावात् । अथ निश्चितत्वम्, सोऽप्ययुक्तः; परोक्षज्ञान[4]वादिनो भवतोऽभिप्रायेणासंभवात् । अथ बाधारहितत्वं विशेषः, सोऽपि न युक्तः; यतो बाधाविरहस्तत्कालभावी विशेषः, उत्तरकालभावी वा? न तावत् तत्कालभावी, मिथ्याज्ञानेऽपि तत्कालभाविनो बाधाविरहस्य भावात् । अथोत्तरकालभावी, तत्रापि वक्तव्यम्—किं ज्ञातः स विशेषः, उत अज्ञातः ? तत्र न अज्ञातः, अज्ञातस्य सत्त्वेनाप्यसिद्धत्वात् । अथ ज्ञातोऽसौ विशेषः, तत्रापि वक्तव्यम्—उत्तरकालभावी बाधाविरहः किं पूर्वज्ञानेन ज्ञायते, आहोस्विदुत्तरकालभाविना ? तत्र न तावत् पूर्वज्ञानेनोत्तरकालभावी बाधाविरहो ज्ञातुं शक्यः, तद्धि स्वसमानकालं संनिहितं नीलादिकमवभासयतु, न पुनः 'उत्तरकालमप्यत्र बाधकप्रत्ययो न प्रवर्त्तिष्यते' इत्यवगमयितुं शक्नोति; पूर्वमनुत्पन्नबाधकानामप्युत्तरकालबाध्यत्वदर्शनात् । अथोत्तरज्ञानेन ज्ञायते, ज्ञायताम्, किंतूत्तरकालभावी बाधाविरहः कथं पूर्वज्ञानस्य विनष्टस्य विशेषो भिन्नकालस्य विनष्टं प्रति विशेषत्वायोगात् ? किंच, ज्ञायमानत्वेऽपि केशोण्डुकादेरसत्यत्वदर्शनाद् बाधाऽभावस्य ज्ञायमानत्वेऽपि कथं सत्यत्वम् ? तज्ज्ञानस्य सत्यत्वादिति चेत्, तस्य कुतः सत्यत्वम् ? न प्रमेयसत्यत्वात्, इतरेतराश्रयदोषप्रसङ्गात् । अपरबाधाऽभावज्ञानादिति चेत्, तत्राप्यपरबाधाऽभावज्ञानादित्यनवस्था । अथ संवादादुत्तरकालभावी बाधाविरहः सत्यत्वेन ज्ञायते तर्हि संवादस्याप्यपरसंवादज्ञानात् सत्यत्वसिद्धिः, तस्याप्यपरसंवादज्ञानादित्यनवस्था । किंच, यदि संवादप्रत्ययादुत्तरकालभावी बाधाऽभावो ज्ञायमानो विशेषः पूर्वज्ञानस्याभ्युपगम्यते तर्हि ज्ञायमानस्वविशेषापेक्षं प्रमाणं स्वकार्ये यथावस्थितार्थपरिच्छेदलक्षणे प्रवर्त्तत इति कथमनपेक्षत्वात् तत्र स्वतःप्रामाण्यम् ? अपि च बाधाविरहस्य भवदभ्युपगमेन पर्युदासवृत्त्या संवादरूपत्वम्, 'बाधावर्जितं च ज्ञानं स्वकार्येऽन्यानपेक्षं प्रवर्त्तते' इति ब्रुवता संवादापेक्षं तत् तत्र प्रवर्त्तत इत्युक्तं भवति । किंच, किं विज्ञानस्य स्वरूपं बाध्यते, आहोस्वित् प्रमेयम्, उतार्थक्रिया इति विकल्पत्रयम् । तत्र यदि विज्ञानस्य स्वरूपं बाध्यत इति पक्षः, स न युक्तः; विकल्पद्वयानतिवृत्तेः । तथाहि—विज्ञानं बाध्यमानं किं स्वसत्ताकाले बाध्यते, उत उत्तरकालम्? तत्र यदि स्वसत्ताकाले बाध्यत इति पक्षः, स न युक्तः; तदा विज्ञानस्य परिस्फुटरूपेण प्रतिभासनात् । न च विज्ञानस्य परिस्फुटप्रतिभासिनोऽभावस्तदैवेति वक्तुं शक्यम्, सत्याभिमतविज्ञानस्याप्यभावप्रसङ्गात् । अथोत्तरकालं बाध्यत इति पक्षः, सोऽपि न युक्तः; उत्तरकालं तस्य स्वत एव नाशाभ्युपगमाद् न तत्र बाधकव्यापारः सफलः—"दैवरक्ता हि किंशुकाः[5]" । अथ प्रमेयं बाध्यते इत्यभ्युपगमः, सोऽप्ययुक्तः; यतः प्रमेयं बाध्यमानं किं प्रतिभासमानेन रूपेण बाध्यते, उताप्रतिभासमानरूपसहचारिणा[6] स्पर्शादिलक्षणेन इति विकल्पनाद्वयम् । तत्र यदि प्रतिभासमानेन

१ पृ० ४ पं० २५ । २ **स च ज्ञानस्वरूप**—भां०, कां०, हा०, मां० । ३ ग्रन्थाग्रम् ४०० श्लो० । ४ "वैदैकदेशविधितो यद् ज्ञानमुपजायते । अतः परोक्षं तत् सर्वं प्रमाणं दोषवर्जितम् ॥ पौरुषेयत्वाद् अतोऽन्यद् विचिकित्सात्मकं भवेदित्याशयः" गु० टि० । ५ "रञ्जनव्यापृतिं मा त्वं कुरु रञ्जक ! रञ्जने । बहवः सन्ति सुलभा दैवरक्ता हि किंशुकाः ॥ इत्यादि इदं रञ्जकं प्रति विरहिणीवाक्यम्" गु० टि० । ६ पृ० १३ पं० २ लिखितं **'अथ अप्रतिभासमानेन रूपेण'** इत्युल्लेखम्, केवलं 'वा०' प्रतौ च **'उत प्रतिभासमानरूपसहचारिणा'** इति लभ्यमानं पाठं समीक्ष्य ज्ञायतेऽस्माभिर्यदत्र **'अप्रतिभासमानेन प्रतिभासमानरूपसहचारिणा'** इति पाठो भवेत्-स एव च पाठोऽत्र सुसंगतः ।

रूपेण, तदयुक्तम्; प्रतिभासमानस्य रूपस्यासत्त्वासंभवात्, अन्यथा सम्यग्ज्ञानावभासिनोऽप्यसत्त्वप्रसङ्गः । अथाप्रतिभासमानेन रूपेण बाध्यत इति मतम्, तदप्ययुक्तम्; अप्रतिभासमानस्य रूपस्य प्रतिभासमानरूपादन्यत्वात्, न चान्यस्याभावेऽन्यस्याभावः, अतिप्रसङ्गात् । अथार्थक्रिया बाध्यते, ननु साऽपि किमुत्पन्ना बाध्यते, उतानुत्पन्ना ? यद्युत्पन्ना, न तर्हि बाध्यते; तस्याः सत्त्वात् । अथानुत्पन्ना, साऽपि न बाध्या; अनुत्पन्नत्वादेव । किंच, अर्थक्रियाऽपि पदार्थादन्या, ततश्च तस्या अभावे कथमन्यस्यासत्त्वमतिप्रसङ्गादेव ? व्यवच्छेद्यासंभवे च 'बाधावर्जितम्' इति विशेषणस्याप्ययुक्तत्वान्न बाधाविरहोऽपि विज्ञानस्य विशेषः । अथादुष्टकारणारब्धत्वं विशेषः, सोऽपि न युक्तः; यतस्तस्याप्यज्ञातस्य विशेषत्वमसिद्धम्, ज्ञातत्वे वा कुतोऽदुष्टकारणारब्धत्वं ज्ञायते ? अन्यस्माददुष्टकारणारब्धाद् विज्ञानादिति चेत्, अनवस्था । संवादादिति चेत्, ननु संवादप्रत्ययस्याप्यदुष्टकारणारब्धत्वं विशेषोऽन्यस्माददुष्टकारणारब्धात् संवादप्रत्ययाद् विज्ञायत इति सैवानवस्था भवतः संपद्यत इति । किंच, ज्ञानसव्यपेक्षमदुष्टकारणारब्धत्वविशेषमपेक्ष्य स्वकार्ये ज्ञानं प्रवर्त्तमानं कथं न तत् तत्र परतः प्रवृत्तं भवति ? तथा, कारणदोषाभावः पर्युदासवृत्त्या भवदभिप्रायेण कारणगुणः, ततश्च 'अदुष्टकारणारब्धम्' इति वदता 'गुणवत्कारणारब्धम्' इत्युक्तं भवति । कारणगुणाश्च प्रमाणेन स्वकार्ये प्रवर्त्तमानेनापेक्ष्यमाणनिश्चायकप्रमाणापेक्षा अपेक्ष्यन्ते, तदपि प्रमाणं स्वकारणगुणनिश्चयापेक्षं स्वकार्ये प्रवर्तत इत्यनवस्थादूषणं "ज्ञातेऽपि यदि विज्ञाने तावन्नार्थोऽवधार्यते[7]" इत्यादिना ग्रन्थेन परपक्षे आसञ्ज्य[8]मानं स्ववधाय कृत्योत्थापनं[9] भवतः प्रसक्तम् । अथादुष्टकारणजनितत्वनिश्चयमन्तरेणापि ज्ञानं स्वार्थनिश्चये स्वकार्ये प्रवर्त्तिष्यते, तदसत्; संशयादिविषयीकृतस्य प्रमाणस्य स्वार्थनिश्चायकत्वासंभवात्, अन्यथाऽप्रमाणस्यापि स्वार्थनिश्चायकत्वं स्यात् । तन्नादुष्टकारणारब्धत्वमपि विशेषो भवन्नीत्या संभवति । अथ संवादित्वं विशेषः, सोऽभ्युपगम्यत एव; किंतु 'संवादप्रत्ययोत्पत्तिनिश्चयमन्तरेण स न ज्ञातुं शक्यते' इति प्रतिपादयिष्यमाणत्वात् तदपेक्षं प्रमाणं स्वकार्ये प्रवर्तत इति तत् तत्र परतः स्यात् । अत एव निरपेक्षत्वस्य असिद्धत्वात् पूर्वोक्तन्यायेन 'ये प्रतीक्षितप्रत्ययान्तरोदयाः' इति प्रयोगे[1] नासिद्धो हेतुः । एतेनैव यदुक्तम्—

"तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम् ।
अदुष्टकारणारब्धं प्रमाणं लोकसंमतम्" ॥ [ ] इति,

तदपि निरस्तम् । यच्चोक्तम् 'यदि संवादापेक्षं प्रमाणं स्वकार्ये प्रवर्त्तते तदा चक्रकप्रसङ्गः' तदसङ्गतम्; 'यथावस्थितपरिच्छेदस्वभावमेतत् प्रमाणम्' इत्येवंनिश्चयलक्षणे स्वकार्ये यथा संवादापेक्षं प्रमाणं प्रवर्त्तते न च चक्रकदोषस्तथा प्रतिपादयिष्यमाणत्वात् । यदपि 'अथ गृहीताः कारणगुणाः' इत्याद्यभिधानं[2], तदपि परसमयानभिज्ञतां भवतः ख्यापयति; 'कारणगुणग्रहणापेक्षं प्रमाणं स्वकार्ये प्रवर्त्तते' इति परस्यानभ्युपगमात् । यच्चोक्तम् 'उपजायमानं प्रमाणमर्थपरिच्छेदशक्तियुक्तम्' इति, तत्राविसंवादित्वमेव अर्थतथात्वपरिच्छेदशक्तिः—तच्च परतो ज्ञायते—तदपेक्षं प्रमाणं स्वकार्ये प्रवर्त्तते इति तत् तत्र परतः स्थितम् ॥

[उत्तरपक्षः-(३) निश्चये प्रामाण्यस्य स्वतस्त्वनिरसनम्]

'नापि प्रामाण्यं स्वनिश्चयेऽन्यापेक्षम्' इत्युक्तं यत्, तदप्यसत्; यतो निश्चयस्तत्र भवन् किं निर्निमित्तः, उत सनिमित्तः इति कल्पनाद्वयम् । तत्र न तावन्निर्निमित्तः, प्रतिनियतदेश-काल-स्वभावाभावप्रसङ्गात् । सनिमित्तत्वेऽपि किं स्वनिमित्तः, उत स्वव्यतिरिक्तनिमित्तः ? न तावत् स्वनिमित्तः, स्वसंविदितप्रमाणानभ्युपगमाद् मीमांसकस्य । अथ स्वव्यतिरिक्तनिमित्तः, तत्रापि वक्तव्यम्—तन्निमित्तं किं प्रत्यक्षम्, उतानुमानम् अन्यस्य तन्निश्चायकस्यासम्भवात् ? तत्र यदि प्रत्यक्षम्, तदयुक्तम्; प्रत्यक्षस्य तत्र व्यापारायोगात्-तद्धीन्द्रियसंयुक्ते विषये तद्व्यापारादुदयमासादयत् प्रत्यक्षव्यपदेशं लभते, न चेन्द्रियाणामर्थापरोक्षतालक्षणेन फलेन, तत्संवेदनस्वरूपेण वा सम्प्र-

१ 'वा०' विना सकलेष्वपि आदर्शेषु **'प्रमाणं स्वकारणगुणनिश्चायकं स्वकारणगुणनिश्चयापेक्षं स्वकार्ये'** इति पाठः । २ पृ० ५ पं० ५ । ३ **आसज्यमानं** कां० । ४ **कृत्वोत्थापनं** भां०, वा० । ५ पृ० २ पं० १२ । ६ पृ० ४ पं० २८ । ७ पृ० ४ पं० ३७ । ८ पृ० ५ पं० ११ । ९ पृ० ५ पं० १५ ।

योगो येन तयोर्यथार्थत्वस्वभावं प्रामाण्यमिन्द्रियव्यापारजनितेन प्रत्यक्षेण निश्चीयते; नापि मनोव्यापारजेन प्रत्यक्षेण, एवंविधस्यानुभवस्याभावात्; नापि तयोरुत्पादकस्य ज्ञातृव्यापाराख्यस्य यथार्थत्वनिश्चायकत्वं प्रामाण्यं बाह्येन्द्रियजन्येन मनोजन्येन वा प्रत्यक्षेण निश्चीयते, तेन सहेन्द्रियाणां सम्बन्धाभावात् । न चेन्द्रियासम्बद्धे विषये ज्ञानमुपजायमानं प्रत्यक्षव्यपदेशमासादयतीत्युक्तम् । नाप्यनुमानतः प्रामाण्यनिश्चयः, पूर्वोक्तस्य फलद्वयस्य यथावस्थितार्थत्वलक्षणप्रामाण्यनिश्चये लिङ्गाभावात् । ज्ञातृव्यापारस्य तु पूर्वोक्तफलद्वयस्वभावस्वकार्यलिङ्गसम्भवेऽपि न यथार्थनिश्चायकत्वलक्षणप्रामाण्यनिश्चायकत्वम्; यतस्तल्लिङ्गं संवेदनाख्यं यथार्थत्वविशिष्टं तन्निश्चये व्याप्रियेत, निर्विशेषणं वा? प्रथमपक्षे तस्य यथार्थत्वविशेषणग्रहणे प्रमाणं वक्तव्यम्, तच्च न सम्भवतीति प्रतिपादितम्[1]। निर्विशेषणस्य फलस्य प्रामाण्यप्रतिपादकत्वे मिथ्याज्ञानफलमपि प्रामाण्यनिश्चायकं स्यादित्यतिप्रसङ्गः । तत्रैतत् स्यात् पूर्वोक्तं फलद्वयमर्थसंवेदन-अर्थप्रकटतालक्षणमनुभवान्निश्चीयते, यथा तस्य स्वतः पूर्वोक्तस्वरूपनिश्चयस्तथा यथार्थत्वस्यापि, यथा हि तत् संवेद्यमानं नीलंसंवेदनतया संवेद्यते तथा यथार्थत्वविशिष्टस्यैव तस्य संवित्तिः; नहि नीलसंवेदनादन्या यथार्थत्वसंवित्तिः। यद्येवम्, शुक्तिकायां रजतज्ञानेऽपि अर्थसंवेदनस्वभावत्वाद् यथार्थत्वप्रसक्तिः। स्मृतिप्रमोषादयस्तु निषेत्स्यन्ते इति नानुमानादपि तत्प्रामाण्यनिश्चयः। किंच, प्रत्यक्षाऽनुमानयोः प्रामाण्यनिश्चयनिमित्तत्वेऽभ्युपगम्यमाने स्वतःप्रामाण्यनिश्चयव्याहतिप्रसङ्गः; तन्नान्यनिमित्तोऽपि प्रामाण्यनिश्चयः। यदुक्तम् 'नापि प्रामाण्यं स्वनिश्चयेऽन्यापेक्षम्, तद्ध्यपेक्षमाणं किं कारणगुणानपेक्षते' इत्यादि, तदनभ्युपगमोपालम्भमात्रम्; न ह्यस्मदभ्युपगमः—यदुत स्वकारणगुणज्ञानात् प्रामाण्यं विज्ञायते, कारणगुणानां संवादप्रत्ययमन्तरेण ज्ञातुमशक्यत्वात्, संवादप्रत्ययात् तु कारणगुणपरिज्ञानाभ्युपगमे तत एव प्रामाण्यनिश्चयस्यापि सिद्धत्वाद् व्यर्थं गुणनिश्चयपरिकल्पनम्, प्रामाण्यनिश्चयोत्तरकालं गुणज्ञानस्य भावात् तन्निश्चयस्य प्रामाण्यनिश्चयेऽनुपयोगाच्च। नाप्येकदा संवादाद् गुणान् निश्चित्य अन्यदा संवादमन्तरेणापि गुणनिश्चयादेव तत्प्रभवस्य ज्ञानस्य प्रामाण्यनिश्चयः इति वक्तुं शक्यम्, अत्यन्तपरोक्षेषु चक्षुरादिषु कालान्तरेऽपि निश्चितप्रामाण्यस्वकार्यदर्शनमन्तरेण गुणानुवृत्तेर्निश्चेतुमशक्यत्वात्। न च क्षणक्षयिषु भावेषु गुणानुवृत्तिरेकरूपैव सम्भवति, अपरापरसहकारिभेदेन भिन्नरूपत्वात्। संवादप्रत्ययाच्चार्थक्रियाज्ञानलक्षणात् प्रामाण्यनिश्चयोऽभ्युपगम्यत एव—"प्रमाणमविसंवादिज्ञानम्" [ ] इति प्रमाणलक्षणाभिधानात्। न च संवादित्वलक्षणं प्रामाण्यं स्वत एव ज्ञायत इति शक्यमभिधातुम्, यतः संवादित्वं संवादप्रत्ययजननशक्तिः प्रमाणस्य; न च कार्यदर्शनमन्तरेण कारणशक्तिर्निश्चेतुं शक्या। यदाह-"न ह्यप्रत्यक्षे कार्ये कारणभावगतिः" [ ] इति । तस्मादुत्तरसंवादप्रत्ययात् पूर्वस्य प्रामाण्यं व्यवस्थाप्यते। न च संवादप्रत्ययात् पूर्वस्य प्रामाण्यावगमे संवादप्रत्ययस्याप्यपरसंवादात् प्रामाण्यावगम इत्यनवस्याप्रसङ्गात् प्रामाण्यावगमाभाव इति वक्तुं युक्तम्, संवादप्रत्ययस्य संवादरूपत्वेनापरसंवादापेक्षाऽभावतोऽनवस्थाऽनवतारात्। न च प्रथमस्यापि संवादापेक्षा मा भूदिति वक्तव्यम्, यतस्तस्य संवादजनकत्वमेव प्रामाण्यम्; तदभावे तस्य तदेव न स्यात्। अर्थक्रियाज्ञानं तु साक्षादविसंवादि, अर्थक्रियालम्बनत्वात्; तस्य स्वविषयसंवेदनमेव प्रामाण्यम्—तच्च-स्वतः सिद्धमिति नान्यापेक्षा। तेन 'कस्यचित्तु यदीष्येत' इत्यादि परस्य प्रलापमात्रम्। न चार्थक्रियाज्ञानस्याप्यवस्तुवृत्तिशङ्कायामन्यप्रमाणापेक्षयाऽनवस्थाऽवतारः इति वक्तव्यम्, अर्थक्रियाज्ञानस्यार्थक्रियानुभवस्वभावत्वेनार्थक्रियामात्रार्थिनां 'भिन्नार्थक्रियात एतद् ज्ञानमुत्पन्नम्, उत तद्व्यतिरेकेण' इत्येवंभूतायाश्चिन्तायाः निष्प्रयोजनत्वात्। तथाहि—यथा 'अर्थक्रिया किमवयवव्यतिरिक्तेनावयविनाऽर्थेन निष्पादिता, उताऽव्यतिरिक्तेन, आहोस्विदुभयरूपेण, अथानुभयरूपेण, किंवा त्रिगुणात्मकेन, परमाणुसमूहात्मकेन वा, अथ ज्ञानरूपेण, आहोस्वित् संवृतिरूपेण' इत्यादिचिन्ताऽर्थक्रियामात्रार्थिनां निष्प्रयोजनात्वाद् वाञ्छितफलस्य—तथेयमपि 'किं वस्तुसत्यामर्थक्रियायां तत्संवेदनज्ञानमुपजायते, आहोस्विदवस्तुसत्याम्' इति, तृड्-दाहविच्छेदादिकं हि फलमभिवाञ्छितम्, तच्चाभिनिष्पन्नं तद्वियोगज्ञानस्य स्वसंविदितस्योदये इति तच्चिन्ताया निष्फलत्वम्; अवस्तुनि ज्ञानद्वयासंभवाच्च ।

१ पृ० १३ पं० ३९। २ पृ० १३ पं० ४०। ३ मिथ्याज्ञाने फलमपि भा०, मां०, कां०। ४ नीलं संवेदन- गु०, भा०, हा०। ५ पृ० ५ पं० १५। ६ ग्रन्थाग्रम् ५००। ७ स्वविषयं गु० विना सर्वत्र। वि० प्रतौ तु 'स्वविषयसंवेदन-' इति परिष्कृतम्। ८ पृ० ६ पं० २९।

यत्र हि साधनज्ञानपूर्वकमर्थक्रियाज्ञानमुत्पद्यते तत्रावस्तुशंका नैवास्ति, न ह्यनग्नावग्निज्ञाने संजाते प्रवृत्तस्य दाह-पाकाद्यर्थक्रियाज्ञानस्य संभव इत्यागोपालाङ्गनाप्रसिद्धमेतत्। न च स्वप्नार्थक्रियाज्ञानमर्थक्रियाऽभावेऽपि दृष्टमिति जाग्रदर्थक्रियाज्ञानमपि तथाऽऽशङ्काविषयः, तस्य तद्विपरीतत्वात्। तथाहि—स्वप्नार्थक्रियाज्ञानमप्रवृत्तिपूर्वं व्याकुलमस्थिरं च; तद्विपरीतं तज्जाग्रद्दशाभावि, कुतस्तेन व्यभिचारः? यदि चार्थक्रियाज्ञानमप्यर्थमन्तरेण जाग्रद्दशायां भवेत् कतरदन्यज्ञानमर्थाव्यभिचारि स्याद् यद्बलेनार्थव्यवस्था क्रियेत? परतःप्रामाण्यवादिनो बौद्धस्य प्रतिकूलमाचरामीत्यभिप्रायवता तस्यानुकूलमेवाचरितम्। स हि 'निरालम्बनाः सर्वे प्रत्ययाः, प्रत्ययत्वात्, स्वप्नप्रत्ययवत्' इत्यभ्युपगच्छत्येव, भवता तु जाग्रद्दशा-स्वप्नदशयोरभेदं प्रतिपादयता तत्साहाय्यमेवाचरितम्; न हि तद्व्यतिरिक्तः प्रत्ययोऽस्ति यस्यार्थसंसर्गः। न चावस्थाद्वयतुल्यताप्रतिपादनं त्वया क्रियमाणं प्रकृतोपयोगि । तथाहि—सांव्यवहारिकस्य प्रमाणस्य लक्षणमिदमभिधीयते-"प्रमाणमविसंवादि ज्ञानम्" [ ] इति। तच्च सांव्यवहारिकं जाग्रद्दशाज्ञानमेव, तत्रैव सर्वव्यवहाराणां लोके परमार्थतः सिद्धत्वात्; स्वप्नप्रत्ययानां तु निर्विषयतया लोके प्रसिद्धानां प्रमाणतया व्यवहाराभावात् 'किं स्वतः प्रामाण्यमुत परतः' इति चिन्तायाः अनवसरत्वात् तत्र जाग्रज्ज्ञाने द्वितीयदर्शनात् 'किं प्रमाणम्, किं वाऽप्रमाणम्, तथा किं स्वतः प्रमाणम्, किं वा परतः' इति चिन्तायाः पूर्वोक्तलक्षणे 'जाग्रत्प्रत्ययत्वे सति' इति विशेषणाभिधाने स्वप्नप्रत्ययेन व्यभिचारचोदनं प्रस्तावाभिज्ञतां परस्य सूचयति। अपि च, "अर्थक्रियाऽधिगतिलक्षणफलविशेषहेतुर्ज्ञानं प्रमाणम्" इति लक्षणे 'तत्फलं नैवं प्रमाणलक्षणानुगतमिति कथं तस्यापि प्रामाण्यमवसीयते' इति चोद्यानुपपत्तिः। यथा 'अङ्कुरहेतुर्बीजम्' इति बीजलक्षणे नाङ्कुरस्यापि बीजरूपताप्रसक्तिः, ततो न विदुषामेवं प्रश्नः 'कथमङ्कुरे बीजरूपता निश्चीयते' इति । यथा चाङ्कुरदर्शनाद् बीजस्य बीजरूपता निश्चीयते तथाऽत्राप्यर्थक्रियाफलदर्शनात् साधनज्ञानस्य प्रामाण्यनिश्चयः। न चार्थक्रियाज्ञानस्याप्यन्यतः प्रामाण्यनिश्चयादनवस्था, अर्थक्रियाज्ञानस्य तद्रूपतया स्वत एव सिद्धत्वात्। तदुक्तम्—"स्वरूपस्य स्वतोगतिः" [ ] इति। न च स्वरूपे ज्ञानस्य भ्रान्तयः संभवन्ति, स्वरूपाभावे स्वसंवित्तेरप्यभेदेनाभावप्रसङ्गात्। व्यतिरिक्तविषयमेव हि प्रमाणमधिकृत्योक्तम्—"प्रमाणमविसंवादि ज्ञानम्, अर्थक्रियास्थितिरविसंवादनम्" [ ] इति, तथा "प्रामाण्यं व्यवहारेणार्थक्रियालक्षणेन" [ ] इति च। तस्माद् यत् प्रमाणस्यात्मभूतमर्थक्रियालक्षणपुरुषार्थाभिधानं फलं यदर्थोऽयं प्रेक्षावतां प्रयासः, तेन स्वतःसिद्धेन फलान्तरं प्रत्यनङ्गीकृतसाधनान्तरात्मतया 'प्रमाणमविसंवादि ज्ञानम्' इति प्रमाणलक्षणविरहिणा साधनानिर्भासिज्ञानस्यानुक्तान्तरूपफलप्रापणशक्तिस्वरूपप्रामाण्याधिगमेऽनवस्थाप्रेरणा क्रियमाणा परस्यासङ्गतैव लक्ष्यते। अत एवेदमपि निरस्तं यदुक्तम् 'अनिश्चितप्रामाण्यादपि साधनज्ञानात् प्रवृत्तावर्थक्रियाज्ञानोत्पत्ताववाप्तफला अपि प्रेक्षावन्तो यथा साधनज्ञानप्रामाण्यविचारणायां मनः प्रणिदधति—अन्यथा तत्समानरूपापरसाधनज्ञानप्रामाण्यनिश्चयपूर्विकाऽन्यदा प्रवृत्तिर्न स्यात्—तथाऽर्थक्रियाज्ञानस्यापि प्रामाण्यविचारणायां प्रेक्षावत्तयैव ते आद्रियन्ते; अन्यथाऽसिद्धप्रामाण्यादर्थक्रियाज्ञानात् पूर्वस्य प्रामाण्यनिश्चय एव न स्यात्' इति। 'अवाप्तफलत्वमनर्थकम्' इति, तदप्ययुक्तम्; 'अर्थक्रियाज्ञानस्य स्वत एव प्रामाण्यम्, साधनज्ञानस्य तु तज्जनकत्वेन प्रामाण्यम्' इति प्रतिपादितत्वात्। यदभ्यधायि-"यदि संवादात् पूर्वस्य प्रामाण्यं निश्चीयते तदा—

१ तत्र वस्तु-कां०, गु०। २ डे०, अ० इत्युभयप्रतौ 'त्परतः' इति, एतच्च 'तत् परतः' इति संभाव्यते-सुघटं चैतत्। ३ चिन्तायाः पूर्वोक्तलक्षणे अनव—डे०। ४ तत्र जा-गु०। तत्राऽजा-भा०। ५ द्वितीय-भा०, कां०, गु०। ६ चिन्तायां पूर्वोक्त—वा०। "अनवसर इत्यनुषङ्गः" गु० टि०। ७ सति निर्विशेषणाभिधाने अ०। सतीति विशेषणाभिधानस्वप्न—वा०। ८ प्रस्तावाभिज्ञतां सूचय-वा०। ९-हेतुबीज-भां०, कां०, हा०। १० तत्राप्यर्थ—वा०, विना सर्वत्र। ११ स्वरूपज्ञान-कां०, गु०, अ०, आ०,। १२ "यथाऽऽह धर्मकीर्तिः" इत्युल्लिख्य श्लोकवार्तिकटीकायां पार्थसारथिमिश्रो वचनमेतद् उद्धृतवान्-(श्लो० वा० सू० २, श्लो० ७६) १३-कृतासाधना-वा०। १४ साधनानिर्भासिज्ञानस्य-हा०, वि०, आ०। १५ पृ० ६ पं० २४। १६ पृ० ७ पं० २। १७ पृ० ७ पं० २। १८ साधनस्य तु गु०। १९ पृ० १५ पं० २०।

श्रोत्रधीरप्रमाणं स्यादितराभिरसङ्गतेः" [श्लो० सू० २, श्लो० ७७] इति,

तदप्ययुक्तम्; गीतादिविषयायाः श्रोत्रबुद्धेरर्थक्रियानुभवरूपत्वेन स्वत एव प्रामाण्यसिद्धेः । तथा चित्रगतरूपबुद्धेरपि स्वत एव प्रामाण्यसिद्धिः, अर्थक्रियाऽनुभवरूपत्वात् । गन्ध-स्पर्श-रसबुद्धीनां त्वर्थक्रियानुभवरूपत्वं सुप्रसिद्धमेव । यदप्युक्तम् 'किमेकविषयम्, भिन्नविषयं वा संवादज्ञानं पूर्वस्य प्रामाण्यनिश्चायकम्' इत्यादि, 'तत्रैकसङ्घातवर्त्तिनो विषयद्वयस्य रूप-स्पर्शादिलक्षणस्यैकसामग्र्यधीनतया परस्परमव्यभिचारात् स्पर्शादिज्ञानं जाग्रदवस्थायामभिवाञ्छितस्पर्शादिव्यतिरेकेण असंभवदू भिन्नविषयमपि स्वविषयाभावेऽप्याशङ्क्यमानरूपज्ञानस्य प्रामाण्यं निश्चाययतीति न तत्संगत एवम् (गतमेव)। अत एव रूपाद्यर्थाविनाभावित्वादू ध्वनीनां तद्विशेषशङ्कायां क्वचिदू वीणादिरूपप्रतिपत्तौ तद्विशेषशङ्काव्यावृत्तेस्तदूपदर्शनसंवादादपि प्रामाण्यनिश्चयः सिद्धो भवति । यच्चोक्तम् 'किं संवादज्ञानं साधनज्ञानविषयं तस्य प्रामाण्यं व्यवस्थापयति, उत भिन्नविषयम्' इत्यादि, तदप्यविदितपराभिप्रायस्याभिधानम्; न हि संवादज्ञानं तद्ग्राहकत्वेन तस्य प्रामाण्यं व्यवस्थापयति, किन्तु तत्कार्यविशेषत्वेन; यथा धूमोऽग्निम् इति पराभ्युपगमः । यच्च संवादज्ञानात् साधनज्ञानप्रामाण्यनिश्चये चक्रकदूषणमभ्यधायि, तदप्यसङ्गतम्; यदि हि प्रथममेव संवादज्ञानात् साधनज्ञानस्य प्रामाण्यं निश्चित्य प्रवर्त्तेत तदा स्यात् तद् दूषणम्, यदा तु वह्निरूपदर्शने सत्येकदा शीतपीडितोऽन्यार्थं तद्देशमुपसर्पंस्तत्स्पर्शमनुभवति, कृपालुना वा केनचित् तद्देशं वह्नेरानयने; तदाऽसौ वह्निरूपदर्शन-स्पर्शनज्ञानयोः संबन्धमवगच्छति—'एवंस्वरूपो भावः एवंभूतप्रयोजननिर्वर्त्तकः' इति—सोऽवगतसंबन्धोऽन्यदाऽनभ्यासदशायामनुमानात् 'ममायं रूपप्रतिभासोऽभिमतार्थक्रियासाधनः, एवंरूपप्रतिभासत्वात्, पूर्वोत्पन्नैवंरूपप्रतिभासवत्' इत्यस्मात् साधननिर्भासिज्ञानस्य प्रामाण्यं निश्चित्य प्रवर्त्तत इति कुतश्चक्रकचोद्यावतारः? "अभ्यासदशायामपि साधनज्ञानस्यानुमानात् प्रामाण्यं निश्चित्य प्रवर्त्तते" इत्येके । न च तदृशायामन्वय-व्यतिरेकव्यापारस्यासंवेदनान्नानुमानव्यापार इत्यभिधातुं शक्यम्, अनुपलक्ष्यमाणस्यापि तद्व्यापारस्याभ्युपगमनीयत्वात् अकस्माद् धूमदर्शनात् परोक्षाग्निप्रतिपत्ताविव; अन्यथा गृहीतविस्मृतप्रतिबन्धस्यापि तदृर्शनादकस्मात् तत्प्रतिपत्तिः स्यात् । न चाध्यक्षैव साधनज्ञानस्य फलसाधनशक्तिरिति कथमध्यक्षेऽनुमानप्रवृत्तिः इति चोद्यम्, दृश्यमानप्रदेशपरोक्षाग्निसङ्गतेरिव तज्जननशक्तेरप्रत्यक्षत्वेन अनुमानप्रवृत्तिमन्तरेण निश्चेतुमशक्यत्वात् । तदुक्तम्—

"तदूदृष्टावेवं दृष्टेषु संवित्सामर्थ्यभाविनः ।
स्मरणादभिलाषेण व्यवहारः प्रवर्त्तते" [ ] इति ।

अपरे तु मन्यन्ते "अभ्यासावस्थायामनुमानमन्तरेणापि प्रवृत्तिः सम्भवति" । अथ अनुमाने सति प्रवृत्तिर्दृष्टा, तदभावे न दृष्टा इत्यनुमानकार्या सा; नन्वेवं सत्यभ्यासदशायां विकल्पस्वरूपानुमानव्यतिरेकेणापि प्रत्यक्षात् प्रवृत्तिर्दृश्यते इति तदा तत्कार्या सा कस्मान्न भवति? तथाहि-प्रतिपादोद्धारं न विकल्परूपानुमानव्यापारः संवेद्यते, अथ च प्रतिभासमाने वस्तुनि प्रवृत्तिः सम्पद्यत इति । अथादावनुमानात् प्रवृत्तिर्दृष्टेति तदन्तरेण सा पश्चात् कथं भवति? नन्वेवमादौ पर्यालोचनादू व्यवहारो दृष्टः, पश्चात् पर्यालोचनमन्तरेण कथं पुरःस्थितवस्तुदर्शनमात्रादू भवति इति वाच्यम्? यदि पुनरनुमानव्यतिरेकेण सर्वदा प्रवृत्तिर्न भवतीति प्रवर्त्तकमनुमानमेवेत्यभ्युपगमः, तथासति प्रत्यक्षेण लिङ्गग्रहणाभावात् तत्राप्यनुमानमेव तन्निश्चयव्यवहारकारणम्, तदप्यपरलिङ्गनिश्चयव्यतिरेकेण नोदयमासादयतीत्यनवस्थाप्रसङ्गतोऽनुमानस्यैवाप्रवृत्तेर्न क्वचित् प्रवृत्तिलक्षणो

---

१ 'वा०' विना सर्वत्र 'अपि'। २ पृ० ७ पं० ८। ३ -शङ्क्यमानस्य रूप-भां०, कां०। ४ पृ० ७ पं० १८। ५ साधनविषयं तस्य गु०। ६ साधनप्रामाण्य—गु०। ७ पृ० ५ पं० २५। ८ साधनस्य प्रामाण्यं—गु०। ९ अत्र 'स्पर्शमनुभवति' इति पूर्वोक्तमन्वेयम्। १० साधनस्य फल—गु०। ११ तदू दृष्ट्वा चे (चै) व वा०। १२ ग्रन्थाग्रम्—श्लो० ६००।

व्यवहार इत्यभ्यासावस्थायां प्रत्यक्षं स्वत एव व्यवहारकृदू अभ्युपेयम्। अनुमानं तु तादात्म्य-तदुत्पत्ति-प्रतिबन्धलिङ्गनिश्चयबलेन स्वसाध्यादुपजायमानत्वादेव तत्प्रापणशक्तियुक्तं संवादप्रत्ययोदयात् प्रागेव प्रमाणाभासविवेकेन निश्चीयतेऽतः स्वत एव । तथाहि—यदू यत उपजायते तत् तत्प्रापणशक्तियुक्तम्, तद्यथा-प्रत्यक्षं स्वार्थस्य, अनुमेयादुत्पन्नं चेदं प्रतिबद्धलिङ्गदर्शनद्वारायातं लिङ्गिज्ञानमिति तत्प्रापणशक्तियुक्तं निश्चीयत इति । मूढं प्रति विषयदर्शनेन विषयी व्यवहारोऽत्र साध्यते, सङ्केतविषयख्यापनेन समये प्रवर्त्तनात् । तथाहि—प्रत्यक्षेऽप्यर्थाव्यभिचारनिबन्धन एवानेन प्रामाण्यव्यवहारः प्रतिपन्नः, अव्यभिचारश्च नान्यस्तदुत्पत्तेः, सैव च ज्ञानस्य प्रापणशक्तिरुच्यते । तदुक्तम्—

"अर्थस्यासम्भवेऽभावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयम्" ॥ [ ] इति ।

तस्मात् मूढं प्रति परतःप्रामाण्यव्यवहारः साध्यते । अनुमाने प्रामाण्यस्य प्रतिबद्धलिङ्गनिश्चयानन्तरं स्वसाध्याव्यभिचारलक्षणस्य तत उत्पन्नत्वेन प्रत्यक्षसिद्धत्वादू न परतःप्रामाण्यनिश्चये चक्रकचोद्यस्यावतारः । प्रत्यक्षे तु संवादात् प्रागर्थादुत्पत्तिः अशक्यनिश्चया इति संवादापेक्षैवानभ्यासदशायां तस्य प्रामाण्याध्यवसितिर्युक्ता । अत उत्पत्तौ, स्वकार्ये, ज्ञप्तौ च सापेक्षत्वस्य प्रतिपादितत्वादू 'ये यद्भावं प्रत्यनपेक्षाः' इति प्रयोगे हेतोरसिद्धिः । यतश्च सन्देह-विपर्ययविषयप्रत्ययप्रामाण्यस्य परतो निश्चयो व्यवस्थितोऽतः 'ये सन्देह-विपर्ययाध्यासिततनवः' इति प्रयोगे न व्याप्त्यसिद्धिः । यदप्युक्तम् 'सर्वप्राणभृतां प्रामाण्यं प्रति सन्देह-विपर्ययाभावादसिद्धो हेतुः' इत्यादि, तदप्यसत्; यतः प्रेक्षापूर्वकारिणः प्रमाणाऽप्रमाणचिन्तायामधिक्रियन्ते नेतरे, ते च कासाञ्चिद् ज्ञानव्यक्तीनां विसंवाददर्शनाज्जाताशङ्का न ज्ञानमात्रात् 'एवमेवायमर्थः' इति निश्चिन्वन्ति, नापि तज्ज्ञानस्य प्रामाण्यमध्यवस्यन्ति; अन्यथैषां प्रेक्षावत्त्वैव हीयत इति सन्देहविषये कथं न सन्देहः? तथा कामलादिदोषप्रभवे ज्ञाने विपर्ययरूपताऽप्यस्तीति तद्बलाद् विपर्ययकल्पनाऽन्यज्ञानेऽपि सङ्गतैवेति प्रकृते प्रयोगे नासिद्धो हेतुरिति भवत्यतो हेतोः परतःप्रामाण्यसिद्धिः ।

यदपि 'प्रमाण-तदाभासयोस्तुल्यं रूपम्' इत्याद्याशङ्क्य 'अप्रमाणे अवश्यंभावी बाधकप्रत्ययः, कारणदोषज्ञानं च' इत्यादिना परिहृतम्, तदपि न चारु; यतो बार्ध-कारणदोषज्ञानं मिथ्याप्रत्यये अवश्यंभावि, सम्यक्प्रत्यये तदभावो विशेषः प्रदर्शितः; स तु किं बाधकाग्रहणे, तदभावनिश्चये वा? पूर्वस्मिन् पक्षे भ्रान्तदृशस्तद्भावेऽपि तदग्रहणं दृष्टं कञ्चित् कालम्, एवमत्रापि तदग्रहणं स्यात् । तत्रैतत् स्याद् भ्रान्तदृशः कञ्चित् कालं तदग्रहेऽपि कालान्तरे बाधकग्रहणम्, सम्यग्दृष्टौ तु कालान्तरेऽपि तदग्रहः; नन्वेतत् सर्वविदां विषयः, नार्वागदृशां व्यवहारिणामस्मादृशाम्। बाधकाभावनिश्चयोऽपि सम्यग्ज्ञाने किं प्रवृत्तेः प्राग् भवति, उत प्रवृत्युत्तरकालम् ? यदि पूर्वः पक्षः, स न युक्तः; भ्रान्तज्ञानेऽपि तस्य सम्भवात् प्रमाणत्वप्रसक्तिः स्यात् । अथ प्रवृत्युत्तरकालं बाधकाभावनिश्चयः, सोऽपि न युक्तः; बाधकाभावनिश्चयमन्तरेणैव प्रवृत्तेरुत्पन्नत्वेन तन्निश्चयस्याकिञ्चित्करत्वात् । न च बाधकाभावनिश्चये प्रवृत्युत्तरकालभाविनि किञ्चिन्निमित्तमस्ति । अनुपलब्धिर्निमित्तमिति चेत्, न; तस्या असम्भवात्। तथाहि—बाधकानुपलब्धिः किं प्रवृत्तेः प्राग्भाविनी बाधकाभावनिश्चयस्य प्रवृत्युत्तरकालभाविनो निमित्तम्, अथ प्रवृत्युत्तरकालभाविनी इति विकल्पद्वयम्। तत्र यदि पूर्वः पक्षः, स न युक्तः; पूर्वकालाया बाधकानुपलब्धेः प्रवृत्युत्तरकालभाविबाधकाभाव-

---

१ "अनुमानम् अनुमितिः, स्वसाध्यात् स्वविषयीभूतवह्नेः उपजायमानत्वाद् एव प्रापणशक्तियुक्तं वह्निव्यवहारनिरूपितसंकेतवद् इति । कस्मात्? अत आह 'तदुत्पत्ति-' इति—तस्य वह्नेः भेदाभेदरूपतादात्म्यं च, तदुत्पत्तिश्च (तत्) कारणकत्वम्, प्रतिबन्धश्च व्याप्यत्वं च इत्यर्थः-एतेषामन्यतमविषयकलिङ्गनिश्चयबलेन इत्यर्थः, अतः संवादप्रत्ययं नापेक्षत इत्याह 'संवाद'-इति । अतः स्वत एव वह्निव्यवहारकृत् इत्यर्थः । अत्र दृष्टान्तमाह 'तद्यथा' इति । अयमाशयः—प्रत्यक्षं यथा इन्द्रियसन्निकर्षबलेन स्वार्थीभूतरूपादित उत्पद्यते, अतो रूपम् 'रूपम्' इति शब्दप्रयोगनिरूपितशब्दवद् इति" गु० टि० । २ "प्रत्यक्षस्य इत्यर्थः-एतेन प्रत्यक्षस्य अर्थप्रभवत्वम्" गु० टि० । ३ पृ० २ पं० ५। ४ पृ० २ पं० १४। ५ पृ० ७ पं० २८। ६ पृ० ७ पं० ३५। ७ पृ० ७ पं० ३६। ८ बाधक-कारण- गु०।

निश्चयनिमित्तत्वासम्भवात्, न ह्यन्यकाला अनुपलब्धिरन्यकालमभावनिश्चयं विदधाति अतिप्रसङ्गात् । नापि प्रवृत्त्युत्तरकालभाविनी बाधकानुपलब्धिस्तन्निश्चयनिमित्तम्, प्राक् प्रवृत्तेः 'उत्तरकालं बाधकोपलब्धिर्न भविष्यति' इति अर्वाग्दर्शिना निश्चेतुमशक्यत्वेन तस्या असिद्धत्वात् । नापि प्रवृत्त्युत्तरकालभाविन्यनुपलब्धिस्तदैव निश्चीयमाना तत्कालभाविबाधकाभावनिश्चयस्य निमित्तं भविष्यतीति वक्तुं शक्यम्, तत्कालभाविनो निश्चयस्याकिञ्चित्करत्वप्रतिपादनात्[1]। किंच, बाधकानुपलब्धिः सर्वसम्बन्धिनी किं तन्निश्चयहेतुः, उताऽऽत्मसम्बन्धिनी इति पुनरपि पक्षद्वयम् । यदि सर्वसम्बन्धिनीति पक्षः, स न युक्तः; तस्या असिद्धत्वात्–न हि 'सर्वे प्रमातारो बाधकं नोपलभन्ते' इति अर्वाग्दर्शिना निश्चेतुं शक्यम् । अथात्मसम्बन्धिनीत्यभ्युपगमः, सोऽप्ययुक्तः; आत्मसम्बन्धिन्या अनुपलब्धेः परचेतोवृत्तिविशेषैरनैकान्तिकत्वात् । तन्न बाधाऽभावनिश्चयेऽनुपलब्धिर्निमित्तम् । नाऽपि संवादो निमित्तम्, भवदभ्युपगमेनानवस्थाप्रसङ्गस्य प्रतिपादितत्वात्[2]। न च बाधाऽभावो विशेषः सम्यक्प्रत्ययस्य सम्भवति इति प्रागेव प्रतिपादितम्[3]। कारणदोषाभावेऽप्ययमेव न्यायो वक्तव्य इति नासावपि तस्य विशेषः । किंच, कारणदोष–बाधकाभावयोर्भवदभ्युपगमेन कारणगुण–संवादकप्रत्ययरूपत्वस्य प्रतिपादनात्[4] तन्निश्चये तस्य[5] विशेषेऽभ्युपगम्यमाने परतः प्रामाण्यनिश्चयोऽभ्युपगत एव स्यात्, न च सोऽपि युक्तः; अनवस्थादोषस्य भवदभिप्रायेण प्राक् प्रतिपादितत्वात्[6]। यदप्युक्तम्[7] 'एवं त्रिचतुरज्ञान'–इत्यादि, तत्रैकस्य ज्ञानस्य प्रामाण्यम्, पुनरप्रामाण्यम्, पुनः प्रामाण्यम् इत्यवस्थात्रयदर्शनाद् बाधके, तद्बाधकादौ वाऽवस्थात्रयमाशङ्कमानस्य कथं परीक्षकस्य नापराऽपेक्षा येनानवस्था न स्यात्? यदप्युक्तम् 'अपेक्षार्तः[8]' इत्यादि, तदप्यसङ्गतम्; यतो नायं छलव्यवहारः प्रस्तुतो येन कतिपयप्रत्ययमात्रं निरूप्यते । न हि प्रमाणमन्तरेण बाधकाशङ्कानिवृत्तिः, न चाशङ्काव्यावर्तकं प्रमाणं भवदभिप्रायेण सम्भवतीत्युक्तम् । तथा कारणदोषज्ञानेऽपि पूर्वेण जाताशङ्कस्य कारणदोषज्ञानान्तरापेक्षायां कथमनवस्थानिवृत्तिः? कारणदोषज्ञानस्य तत्कारणदोषग्राहकज्ञानाभावमात्रतः प्रमाणत्वाद् नात्रानवस्था । यदाह–

"यदा स्वतः प्रमाणत्वं तदाऽन्यन्नैव मृग्यते ।
निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः" ॥ [श्लो० वा० सू० २, श्लो० ५२] इति,

एतच्चानुद्घोष्यम्; प्रागेव विहितोत्तरत्वात् । न च दोषाज्ञानाद् दोषाभावः, सत्स्वपि दोषेषु तदज्ञानस्य सम्भवात् । सम्यग्ज्ञानोत्पादनशक्तिवैपरीत्येन मिथ्याप्रत्ययोत्पादनयोग्यं हि रूपं तिमिरादिनिमित्तमिन्द्रियदोषः, स चातीन्द्रियत्वात् सन्नपि नोपलक्ष्यते । न च दोषा ज्ञानेन व्याप्ताः येन तन्निवृत्त्या निवर्त्तेरन्। दोषाभावज्ञाने तु संवादाद्यपेक्षायां सैवानवस्था प्राक् प्रतिपादिता । एतेनैतदपि निराकृतं यदुक्तं भट्टेन—

"तस्मात् स्वतः प्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम् ।
बाध-कारणदुष्टत्वज्ञानाभ्यां तदपोद्यते ॥ [ ]
पराधीनेऽपि चैतस्मिन्नानवस्था प्रसज्यते ।
प्रमाणाधीनमेतद्धि स्वतस्तच्च प्रतिष्ठितम् ॥ [ ]
प्रमाणं हि प्रमाणेन यथा नान्येन साध्यते ।
न सिध्यत्यप्रमाणत्वमप्रमाणात् तथैव हि" ॥ [ ] इति ।

स्यान्मतम् "यदप्यन्यानपेक्षप्रमितिभावो बाधकप्रत्ययस्तथाऽप्यबाधकतया[9] प्रतीत एवान्यस्याप्रमाणतामाधातुं क्षमो नान्यथेति, सोऽयमदोषः; यतः—

---

१ पृ० १७ पं० ३१ । २ पृ० १२ पं० २५ । ३ पृ० १३ पं० ७ । ४ पृ० १२ पं० २८ तथा पृ० १० पं० २२ । ५ **तद्विशेषेऽभ्युपग**—भां० । ६ पृ० ८ पं० ६ । ७ **अपेक्षतेत्यादि** कां०, गु०, वि०, हा० । **अपेक्ष्यतेत्यादि** आ०, डे०, भां०, भा० । ८ पृ० ७ पं० ३९ । ९–**प्यज्ञानापेक्ष**—गु०, भा०, डे० । १० "नास्ति बाधकं यस्मिन् तद् अबाधकम्–तत्ता, तया इत्येवमत्र बहुव्रीहिः" भां० टि० । ११–**न्यस्य प्रमाणता**–कां०, डे० ।

बाधकप्रत्ययस्तावदर्थान्यत्वावधारणम् ।
सोऽनपेक्षप्रमाणत्वात् पूर्वज्ञानमपोहते ॥ [ ]
तत्रापि त्वपवादस्य[1] स्यादपेक्षा क्वचित् पुनः ।
जाताशङ्कस्य पूर्वेण साऽप्यन्येन निवर्तते ॥ [ ]
बाधकान्तरमुत्पन्नं यद्यस्यान्विच्छतोऽपरम् ।
ततो मध्यमबाधेन पूर्वस्यैव प्रमाणता ॥ [ ]
अथान्यदप्रयत्नेन सम्यगन्वेषणे कृते ।
मूलाभावान्न विज्ञानं भवेद् बाधकबाधनम् ॥ [ ]
ततो निरपवादत्वात् तेनैवाद्यं बलीयसा ।
बाध्यते तेन तस्यैव प्रमाणत्वमपोद्यते ॥ [ ]
एवं परीक्षकज्ञानत्रितयं नातिवर्तते ।
ततश्चाजातबाधेन नाशङ्क्यं बाधकं पुनः ॥ [ ] इति । तथाहि—अनेन[2]

सर्वेणापि ग्रन्थेन स्वतःप्रामाण्यव्याहतिः परिहृता, परीक्षकज्ञानत्रितयाधिकज्ञानानपेक्षयाऽनवस्था च" एतद्[3] द्वितयमपि परपक्षे प्रदर्शितं प्राक्तनन्यायेन । यच्चान्यत् पूर्वपक्षे परतःप्रामाण्ये दूषणमभिहितं तच्चानभ्युपगमेन निरस्तमिति न प्रतिपदमुच्चार्य दूष्यते ।

[प्रेरणाबुद्धेः प्रामाण्याभावः]

प्रेरणाबुद्धेस्तु प्रामाण्यं न साधननिर्भासिप्रत्यक्षस्येव संवादात्, तस्य तस्यामभावात्। नाप्यव्यभिचारिलिङ्गनिश्चयबलात् स्वसाध्यादुपजायमानत्वादनुमानस्येव । किंच, प्रेरणाप्रभवस्य चेतसः[4] प्रामाण्यसिद्ध्यर्थं स्वतःप्रामाण्यप्रसाधनप्रयासोऽयं भवताम्, चोदनाप्रभवस्य च ज्ञानस्य न केवलं प्रामाण्यं न सिध्यति, किंत्वप्रामाण्यनिश्चयोऽपि तव न्यायेन सम्पद्यते । तथाहि–यद् दुष्टकारणजनितं ज्ञानं न तत् प्रमाणम्, यथा तिमिराद्युपद्रवोपहतचक्षुरादिप्रभवं ज्ञानम्, दोषवत्प्रेरणावाक्यजनितं च 'अग्निहोत्रं जुहुयात्' इत्यादिवाक्यप्रभवं ज्ञानमिति कारणविरुद्धोपलब्धिः । न चासिद्धो हेतुः, भवदभिप्रायेण प्रेरणायां गुणवतो वक्तुरभावे तद्गुणैरनिराकृतैर्दोषैर्जन्यमानत्वस्य प्रेरणाप्रभवे ज्ञाने सिद्धत्वात्। अथ स्यादयं दोषो यदि वक्तृगुणैरेव प्रामाण्यापवादकदोषाणां निराकरणमभ्युपगम्यते, यावता वक्तुरभावेनापि निराश्रयाणां दोषाणामसद्भावोऽभ्युपगम्यत एव । तदुक्तम्—

"शब्दे दोषोद्भवस्तावद् वक्त्रधीन इति स्थितम् ।
तदभावः क्वचित् तावद् गुणवद्वक्तृकत्वतः ॥
तद्गुणैरपकृष्टानां शब्दे संक्रान्त्यसम्भवात् ।
यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः" ॥ [श्लो०वा०सू०२,६२–६३ श्लो०] इति । भवेदप्येवम्, यद्यपौरुषेयत्वं कुतश्चित् प्रमाणात् सिद्धं स्यात्, तच्च न सिद्धम्; तत्प्रतिपादकप्रमाणस्य निषेत्स्यमानत्वात्। अत एव चेदमप्यनुद्घोष्यम्—

"तत्रापवादनिर्मुक्तिर्वक्त्रभावाल्लघीयसी[5] ।
वेदे तेनाप्रमाणत्वं नाशङ्कामपि गच्छति" ॥ [श्लो० वा० सू० २, ६८ श्लो०] ।

तेन गुणवतो वक्तुरनभ्युपगमाद् भवद्भिः अपौरुषेयत्वस्य चासम्भवाद् अनिराकृतैर्दोषैर्जन्यमानत्वं हेतुः प्रेरणाप्रभवस्य चेतसः सिद्धः; दोषजन्यत्व–अप्रामाण्ययोरविनाभावस्यापि मिथ्याज्ञानेऽन्यत्र निश्चितत्वात् तद्विरुद्धत्व–अनैकान्तिकत्वयोरप्यभाव इति भवत्यतो हेतोः प्रेरणाप्रभवे ज्ञाने प्रामाण्याभावसिद्धिः ।

---

१ **चापवादस्य** गु० । २ **एतेन** गु० । ३ "व्याहतं तत् (इति) शब्दार्थः" । ४ "बुद्धेरित्यर्थः" । ५ "सुलभा" गु० टि० । ६ ग्रन्थाग्रम् ७०० श्लो० ।

[ज्ञातृव्यापारस्यैवाऽसिद्धिः]

किंच, प्रमाणे[1] सिद्धे सति 'किं तत्प्रामाण्यं स्वतः, परतो वा' इति चिन्ता युक्तिमती, भवद्भ्युपगमेन तु तदेव न सम्भवति । तथाहि—ज्ञातृव्यापारः प्रमाणं भवताऽभ्युपगम्यते[2], न चासौ युक्तः; तद्ग्राहकप्रमाणाभावात् । तथाहि—प्रत्यक्षं वा तद्ग्राहकम्, अनुमानम्, अन्यद्वा प्रमाणान्तरम्? तत्र यदि प्रत्यक्षं तद्ग्राहकमभ्युपगम्येत तदाऽत्रापि वक्तव्यम्—स्वसंवेदनम्, बाह्येन्द्रियजम्, मनःप्रभवं वा ? न तावत् स्वसंवेदनं तद्ग्राहकम्, भवता तद्ग्राह्यत्वानभ्युपगमात् तस्य । नापि बाह्येन्द्रियजम्, इन्द्रियाणां स्वसंबद्धेऽर्थे ज्ञानजनकत्वाभ्युपगमात्; न च ज्ञातृव्यापारेण सह तेषां संबन्धः, प्रतिनियतरूपादिविषयत्वात् । नापि मनोजन्यं प्रत्यक्षं ज्ञातृव्यापारलक्षणप्रमाणग्राहकम्, तथाप्रतीत्यभावात् अनभ्युपगमाच्च । अथानुमानं तद्ग्राहकमभ्युपगम्यते, तदप्ययुक्तम्; यतोऽनुमानमपि "ज्ञातसंबन्धस्यैकदेशदर्शनादसन्निकृष्टेऽर्थे[3] बुद्धिः" इत्येवंलक्षणमभ्युपगम्यते । संबन्धश्चान्यसंबन्धव्युदासेन नियमलक्षणोऽभ्युपगम्यते[4] । यत उक्तम्- "संबन्धो हि न तादात्म्यलक्षणो गम्यगमकभावनिबन्धनम् । यर्योहि तादात्म्यं न तयोर्गम्यगमकभावः, तस्य भेदनिबन्धनत्वात्; अभेदे वा साध्यनप्रतिपत्तिकाल एव साध्यस्यापि प्रतिपन्नत्वात् कथं गम्यगमकभावः ? अप्रतिपत्तौ वा यस्मिन् प्रतीयमाने यन्न प्रतीयते तत् ततो भिन्नम्, यथा घटे प्रतीयमानेऽप्रतीयमानः पटः; न प्रतीयते चेत् साधनप्रतीतिकाले साध्यं तदा तत् ततो भिन्नमिति कथं तयोस्तादात्म्यम् ? किंच, यदि तादात्म्याद् गम्यगमकभावोऽभ्युपगम्यते तदा तादात्म्याऽविशेषाद् यथा प्रयत्नानन्तरीयकत्वमनित्यत्वस्य गमकम्, तथाऽनित्यत्वमपि प्रयत्नानन्तरीयकत्वस्य गमकं स्यात्। अथ प्रयत्नानन्तरीयकत्वमेवानित्यत्वनियतत्वेन निश्चितम्, नानित्यत्वं तन्नियतत्वेन; निश्चयापेक्षश्च गम्यगमकभाव इति, तर्हि 'यस्मिन्निश्चीयमाने यन्न निश्चीयते' इत्यादि पूर्वोक्तमेव दूषणं पुनरापतति । अपि च, प्रयत्नानन्तरीयकत्वमेव अनित्यत्वनियतत्वेन निश्चितमिति वदता स एवास्मदभ्युपगतो नियमलक्षणः संबन्धोऽभ्युपगतो भवति । नापि तदुत्पत्तिलक्षणः संबन्धो गम्यगमकभावनिबन्धनम्, तथाऽभ्युपगमे वक्तृत्वादेरप्यसर्वज्ञत्वं प्रति गमकत्वं स्यात् । अथ सर्वज्ञत्वे वक्तृत्वादेर्बाधकप्रमाणाभावात् सर्वज्ञत्वादिभ्यो वक्तृत्वादेर्व्यावृत्तिः सन्दिग्धेति संदिग्धविपक्षव्यावृत्तिकत्वान्नायं गमकस्तर्हि धूमस्याप्यनग्नौ बाधकप्रमाणाभावात् ततो व्यावृत्तिः सन्दिग्धेति सन्दिग्धविपक्षव्यावृत्तिकत्वादग्निं प्रति गमकत्वं न स्यात् । अथ "कार्यं धूमो हुतभुजः, कार्यधर्मानुवृत्तितः; स तदभावेऽपि भवन् कार्यमेव न स्यात्" इत्यनग्नौ धूमस्य सद्भावबाधकं प्रमाणं विद्यत इति नासौ सन्दिग्धविपक्षव्यावृत्तिकस्तर्ह्येतत् प्रकृतेऽपि वक्तृत्वादौ समानमिति तस्याप्यसर्वज्ञत्वं प्रति गमकत्वं स्यात्। किंच, कार्यत्वे सत्यपि वक्तृत्वादेः सन्दिग्धविपक्षव्यावृत्तिकत्वेनासर्वज्ञत्वं प्रत्यनियतत्वाद् यद्यगमकत्वं तर्हि स एवास्मदभ्युपगतो नियमलक्षणः संबन्धोऽभ्युपगतो भवति । अपि च, तादात्म्य—तदुत्पत्तिलक्षणसंबन्धाभावेऽपि नियमलक्षणसंबन्धप्रसादात् कृत्तिकोदय-चन्द्रोद्गमन-अद्यतनसवित्रुद्गम-गृहीताण्डपिपीलिकोत्सर्पण-एकाम्रफलोपलभ्यमानमधुररसस्वरूपाणां हेतूनां यथाक्रमं भाविशकटोदय-समानसमयसमुद्रवृद्धि-श्वस्तनभानूदय-भाविवृष्टि-तत्समानकालसिन्दूरारुणरूपस्वभावेषु साध्येषु गमकत्वं सुप्रसिद्धम् । संयोगादिलक्षणस्तु संबन्धो भवतैव साध्यप्रतिपादनाङ्गत्वेन निरस्त इति तं प्रति न प्रयस्यते ।

"एवं परोक्तसंबन्धप्रत्याख्याने कृते सति ।
नियमो नाम संबन्धः स्वमतेनोच्यतेऽधुना ॥ [ ]

---

१ **प्रामाण्ये** गु०, हा०, वि०, आ० । २ **अभ्युपगतो न चा**—भां०, वा०, वि० । ३ "लिङ्ग-लिङ्गिसमुदायरूपस्य" । ४ "लिङ्गम्" (एकदेशः) गु० टि० । ५ वाक्यं चैतत् शाबरभाष्ये पञ्चमसूत्रव्याख्याने (पृ० ८–पं० ९. का०) । ६ **अभ्युपगतो यत** भां०, वा०, वि० । ७ अत्र 'संबन्धो हि न तादात्म्यलक्षणः' इत्यत आरभ्य 'न किञ्चिन्नानुमीयते' इत्यादि (पृ० २१ पं० ४) पर्यन्तं 'यत उक्तम्' अवसेयम् । ८ अत्र "तथाहि" (इति योज्यम्) गु० टि० ।

कार्यकारणभावादिसंबन्धानां द्वयी गतिः ।
नियमाऽनियमाभ्यां स्यादनियमादतद्गता ॥ [ ]
सर्वेऽप्यनियमा ह्येते नानुमोत्पत्तिकारणम् ।
नियमात् केवलादेव न किञ्चिन्नानुमीयते" ॥ [ ] इत्यादि ।

स च संबन्धः किमन्वयनिश्चयद्वारेण प्रतीयते, उत व्यतिरेकनिश्चयद्वारेण इति विकल्पद्वयम् । तत्र यदि प्रथमो विकल्पोऽभ्युपगम्यते, तत्रापि वक्तव्यम्—किं प्रत्यक्षेणान्वयनिश्चयः, उतानुमानेन इति ? न तावत् प्रत्यक्षेणान्वयनिश्चयः, अन्वयस्य हि रूपम् 'तद्भावे एव भावः', न च ज्ञातृव्यापारस्य प्रमाणत्वेनाभ्युपगतस्य प्रत्यक्षेण सद्भावः शक्यते ग्रहीतुम्, तद्ग्राहकत्वेन प्रत्यक्षस्य पूर्वमेव निषिद्धत्वात् त्वयाऽनभ्युपगमाच्च । नापि ज्ञातृव्यापारसद्भावे एवार्थप्रकाशनलक्षणस्य हेतोः सद्भावः प्रत्यक्षेण ज्ञातुं शक्यः, तस्यापीन्द्रियव्यापारजेन प्रत्यक्षेण प्रतिपत्तुमशक्तेः; तदशक्तिश्च-अक्षाणां तेन सह संबन्धाभावात् । नापि स्वसंवेदनलक्षणेन प्रत्यक्षेण पूर्वोक्तस्य हेतोः सद्भावः शक्यो निश्चेतुम्, भवदभिप्रायेण तत्र तस्याव्यापारात्, तन्न प्रत्यक्षेण साध्यसद्भावे एव हेतुसद्भावलक्षणोऽन्वयो निश्चेतुं शक्यः । नाप्यनुमानेन तन्निश्चयः, अनुमानस्य निश्चितान्वयहेतुप्रभवत्वाभ्युपगमात् । न च तस्यान्वयः प्रत्यक्षसमधिगम्यः, पूर्वोक्तदोषप्रसङ्गात्[5] । अनुमानात् तन्निश्चयेऽनवस्थेतरेतराश्रयदोषावनुषञ्जयेते इति प्रागेव प्रतिपादितम्[6] । न च प्रत्यक्षाऽनुमानव्यतिरिक्तं प्रमाणान्तरं सम्भवति । तन्न अन्वयनिश्चयद्वारेण ज्ञातृव्यापारे साध्ये पूर्वोक्तस्य हेतोर्नियमलक्षणः संबन्धो निश्चेतुं शक्यः । नापि व्यतिरेकनिश्चयद्वारेण, यतो व्यतिरेकः 'साध्याभावे हेतोरभाव एव' इत्येवंस्वरूपः; न च प्रकृतस्य साध्यस्याभावः प्रत्यक्षेण समधिगम्यः, तस्याभावविषयत्वविरोधात्, अनभ्युपगमात्, अभावप्रमाणवैयर्थ्यप्रसङ्गाच्च । नाप्यनुमानादिसद्भावग्राहकप्रमाणनिश्चेयः, अत एव दोषात् । अथादर्शननिश्चेय इति पक्षः, सोऽपि न युक्तः; यतोऽदर्शनं किमनुपलम्भरूपम्, आहोस्विद् अभावप्रमाणस्वरूपम् इति वक्तव्यम् ? तत्र यद्याद्यः पक्षः, स न युक्तः; यतोऽत्रापि वक्तव्यम्-अनुपलम्भः किं दृश्यानुपलम्भोऽभिप्रेतः, आहोस्विद् अदृश्यानुपलम्भः इति ? तत्र यद्यदृश्यानुपलम्भः प्रकृतसाध्याभावनिश्चायकोऽभिप्रेतः, तदाऽत्रापि कल्पनाद्वयम्—किं स्वसंबन्धी अनुपलम्भस्तन्निश्चायकः, उत सर्वसंबन्धी ? यद्यात्मसंबन्धी तन्निश्चायकः, स न युक्तः; परचेतोवृत्तिविशेषैस्तस्यानैकान्तिकत्वात् । अथ सर्वसंबन्धी अनुपलम्भस्तन्निश्चायक इत्यभ्युपगमः, अयमप्ययुक्तः; सर्वसंबन्धिनोऽनुपलम्भस्यासिद्धत्वात्[7] । अथ दृश्यानुपलम्भस्तन्निश्चायक इति पक्षः, सोऽप्यसङ्गतः; यतो दृश्यानुपलम्भश्चतुर्धा व्यवस्थितः—स्वभावानुपलम्भः, कारणानुपलम्भः, व्यापकानुपलम्भः, विरुद्धविधिश्चेति । तत्र यदि स्वभावानुपलम्भस्तन्निश्चायकत्वेनाभिमतः, स न युक्तः; स्वभावानुपलम्भस्यैवंविधे विषये व्यापारासंभवात् । तथाहि—एकज्ञानसंसर्गिणस्तुल्ययोग्यतास्वरूपस्य भावान्तरस्याभावव्यवहारसाधकत्वेन पर्युदासवृत्त्या तदन्यज्ञानस्वभावोऽसावभ्युपगम्यते; न च प्रकृतस्य साध्यस्य केनचित् सहैकज्ञानसंसर्गित्वं संभवतीति नात्र स्वभावानुपलम्भस्य व्यापारः । नापि कारणानुपलम्भः प्रकृतसाध्याभावनिश्चायकः, यतः सिद्धे कार्यकारणभावे कारणानुपलम्भः कार्याभावनिश्चायकत्वेन प्रवर्त्तते; न च प्रकृतस्य साध्यस्य केनचित् सह कार्यत्वं निश्चितम्, तस्यादृश्यत्वेन प्रागेव प्रतिपादनात्[8]। 'प्रत्यक्षाऽनुपलम्भनिबन्धनश्च कार्यकारणभावः' इति कारणानुपलम्भोऽपि न तन्निश्चायकः । व्यापकानुपलम्भस्तु सिद्धे व्याप्य-व्यापकभावे व्याप्याभावसाधकोऽभ्युपगम्यते । न च प्रकृतसाध्यव्यापकत्वेन कश्चित् पदार्थो निश्चेतुं शक्यः, प्रकृतसाध्यस्यादृश्यत्वप्रतिपादनात्; तन्न व्यापकानुपलम्भोऽपि तन्निश्चायकः। विरुद्धोपलब्धिरप्यत्र विषये न प्रवर्त्तते । तथाहि—एको विरोधोऽविकलकारणस्य भवतोऽन्यभावेऽभावात् सहानवस्थानलक्षणो निश्चीयते शीतोष्णयोरिव विशिष्टात् प्रत्यक्षात् । न च प्रकृतं साध्यमविकलकारणं कस्यचिद् भावे निवर्त्तमानमुपलभ्यते तस्यादृश्यत्वादेव । द्वितीयस्तु परस्परपरिहार-

---

१ पृ० २० पं० ५ । २ **तस्यान्वयनिश्चयः प्रत्य**– भां०, कां० । ३ प्र० पृ० पं० ७ । ४ पृ० २ पं० ३२–३४ । ५ पृ० २० पं० ५ । ६ "अनेन हि सिद्धावस्थाऽभिहिता, तेन साध्यावस्थायां विरोधो न संभवति इति सूचितम्; एतेन कारणस्यैव विरोधः प्रदर्शित इति न भ्रमितव्यम्" गु० टि० ।

स्थितिलक्षणः, सोऽपि लक्षणस्य स्वरूपव्यवस्थापकधर्मरूपस्य दृश्यत्वाभ्युपगमनिष्ठो दृश्यत्वाभ्युपगमनिमित्तप्रमाणनिबन्धनो न प्रकृतसाध्यविषये संभवति, तन्न ततोऽपि प्रस्तुतसिद्धिः । तन्न साध्यस्याभावनिश्चयोऽनुपलम्भनिबन्धनः । साधनाभावनिश्चयोऽपि नादृश्यानुपलम्भनिमित्तः, उक्तदोषत्वात्; दृश्यानुपलम्भनिमित्तत्वेऽपि न स्वभावानुपलम्भस्तन्निमित्तम्, उद्दिष्टविषयाभावव्यवहारसाधकत्वेन तस्य व्यापाराभ्युपगमात् । अनुद्दिष्टविषयत्वेऽपि 'यत्र यत्र साध्याभावस्तत्र तत्र साधनाभावः' इत्येवं न ततः साधनाभावनिश्चयः; तन्निश्चयश्च नियमनिश्चयहेतुरिति न स्वभावानुपलम्भोऽपि तन्नियमहेतुः । नापि कारणानुपलम्भः, यतः कारणं ज्ञातृव्यापार एवार्थप्रकटतालक्षणस्य हेतोर्भवताऽभ्युपगम्यते, न चासौ प्रत्यक्षसमधिगम्य इति कुतस्तस्य सम्प्रति (तं प्रति) कारणत्वावगमः ? इति न कारणानुपलम्भोऽपि तदभावनिश्चयहेतुः । व्यापकानुपलम्भेऽप्ययमेव न्यायः, यतो व्यापकत्वमपि पूर्वोक्तहेतुं प्रति ज्ञातृव्यापारस्यैवाभ्युपगन्तव्यम्; अन्यथाऽन्यस्य व्यापकत्वे साध्यविपक्षाद् व्यापकनिवृत्तिद्वारेण निवर्तमानमपि साधनं न साध्यनियतं स्यात् । अथ यथा सत्त्वलक्षणो हेतुः क्षणिकत्वलक्षणसाध्यव्यतिरिक्तक्रम-यौगपद्यस्वरूपपदार्थान्तरव्यापकनिवृत्तिद्वारेणाऽक्षणिकलक्षणाद् विपक्षाद् व्यावर्त्तमानः स्वसाध्यनियतस्तथा प्रकृतोऽपि हेतुर्भविष्यति, असम्यगेतत्; यतस्तत्रापि यद्यर्थक्रियालक्षणसत्त्वव्यापके क्रम-यौगपद्ये कुतश्चित् प्रमाणात् क्षणिके सिद्धे भवतस्तदा तन्निवृत्तिद्वारेण विपक्षाद् व्यावर्त्तमानोऽपि सत्त्वलक्षणो हेतुः स्वसाध्यनियतः स्यात्, अन्यथा तत्र[3] व्यापकवृत्त्यनिश्चये राश्यन्तरे क्षणिकाऽक्षणिकरूपे तस्याशङ्क्यमानत्वेन तद्व्याप्यस्यापि नैकान्ततः[4] क्षणिकनियतत्वनिश्चयः । न च प्रकृतसाध्येऽयं न्यायः, तस्यात्यन्तपरोक्षत्वेन हेतुव्यापकभावान्तराधिकरणत्वासिद्धेः; तन्न व्यापकानुपलम्भनिमित्तोऽपि विपक्षे साधनाभावनिश्चयः । नापि विरुद्धोपलब्धिनिमित्तः, प्रकृतसाध्यस्यात्यन्तपरोक्षत्वेन तदप्रतिपत्तौ तदभावनियतविपक्षस्याप्यप्रतिपत्तितस्तेन सहार्थप्रकाशनलक्षणस्य हेतोः सहानवस्थानलक्षणविरोधासिद्धेः । परस्परपरिहारस्थितलक्षणस्तु विरोधोऽन्योन्यव्यवच्छेदरूपयोरर्थप्रकाशनाऽप्रकाशनयोः सम्भवति, न पुनरर्थप्रकाशन-अज्ञातृव्यापारयोः, अन्योन्यव्यवच्छेदरूपत्वाभावात् । नापि ज्ञातृव्यापारनियतत्वादर्थप्रकाशनस्य साध्यविपक्षेण विरोध इति शक्यमभिधातुम्, अन्योन्याश्रयदोषप्रसक्तेः । तथाहि-सिद्धे तन्नियतत्वे तद्विपक्षविरोधसिद्धिः, तत्सिद्धेश्च तन्नियतत्वसिद्धिरिति स्पष्ट एवेतरेतराश्रयो दोषः । तन्न विरुद्धोपलब्धिनिमित्तोऽपि विपक्षे साधनाभावनिश्चयः । अथादर्शनशब्देन अभावाख्यं प्रमाणं व्यतिरेकनिश्चयनिमित्तमभिधीयते, तदप्यनुपपन्नम्; तस्य तन्निमित्तत्वासम्भवात् । तथाहि-निषेध्यविषयप्रमाणपञ्चकस्वरूपतयाऽऽत्मनोऽपरिणामरूपं वा तदभ्युपगम्येत, तदन्यवस्तुविषयज्ञानरूपं वा गत्यन्तराभावात् ? तदुक्तम्—

"प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
साऽऽत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनि" ॥ [श्लो०वा०सू०५, अभावप०श्लो० ११]

तत्र यदि 'निषेध्यविषयप्रमाणपञ्चकरूपत्वेनात्मनोऽपरिणामलक्षणमभावाख्यप्रमाणं साधनाभावनियतसाध्याभावस्वरूपव्यतिरेकनिश्चयनिमित्तम्' इत्यभ्युपगमः, स न युक्तः; तस्य समुद्रोदकँपलपँरिमाणेनानैकान्तिकत्वात् । अथान्यवस्तुविषयविज्ञानस्वरूपमभावाख्यं प्रमाणं व्यतिरेकनिश्चयनिमित्तमिति पक्षः, सोऽपि न युक्तः; विकल्पानुपपत्तेः । तथाहि-किं तत् साध्यनियतसाधनस्वरूपादन्यद् वस्तु, यद्विषयं ज्ञानं तदन्यज्ञानमित्युच्यते ? यदि यथोक्तसाधनस्वरूपव्यतिरिक्तं पदार्थान्तरं तदा वक्तव्यम्-तद् एकज्ञानसंसर्गि साधनेन सह, उतान्यथा इति ? यदि यथोक्तसाधनेनैकज्ञानसंसर्गि तदा तद्विषयँज्ञानात् सिध्यति यथोक्तसाधनस्याभावनिश्चयः प्रतिनियतविषयः, किन्तु 'यत्र यत्र साध्याभावस्तत्र तत्रावश्यंतया साधनस्याप्यभावः' इत्येवंभूतो व्यतिरेकनिश्चयो न ततः सिध्यति; सर्वोपसंहारेण साधनाभावनियतसाध्याभावनिँश्चयश्च हेतोः साध्यनियतत्वलक्षणनियमनिश्चायक इति नैक-

---

१ पृ० २१ पं० २२ । २ अन्यथा तद्व्यापकवृत्त्य-गु० । ३ अन्थाग्रम्-श्लो० ८०० । ४ 'समुद्रोदकं कति पलानि'? इत्येवं समुद्रोदकपलपरिमाणेन । ५ समुद्रोदकपरिणामेन-डे० । ६ "एकसंबन्धिज्ञानमपरसंबन्धिस्मारकम्" (इति नियमेन) गु० टि० । ७-'निश्चयस्य हेतोः' वा०, बा० विना सर्वत्र । -निश्चयहेतोः अ०

ज्ञानसंसर्गिपदार्थान्तरोपलम्भादभावाख्यात् प्रमाणात् व्यतिरेकनिश्चयः । अथ तदसंसर्गिपदार्थान्तरोपलम्भस्वरूपमभावाख्यं प्रमाणं साध्याभावे साधनाभावनिश्चयनिमित्तम्, तदप्यसम्बद्धम्; अतिप्रसङ्गात्-न हि पदार्थान्तरोपलम्भमात्रादन्यस्य तदतुल्ययोग्यतारूपस्य तेन सहैकज्ञानासंसर्गिणः पदार्थान्तरस्याभावनिश्चयः, अन्यथा सह्योपलम्भाद् विन्ध्याभावनिश्चयः स्यात् । अथ तथाभूतसाधनादन्यस्तदभावः, तद्विषयं ज्ञानं तदन्यज्ञानम्, तद् विपक्षे साधनाभावनिश्चयनिमित्तम्; ननु तदपि ज्ञानं किं 'यत्र यत्र साध्याभावस्तत्र तत्र साधनाभावः' इत्येवं प्रवर्त्तते, उत 'क्वचिदेव साध्याभावे साधनाभावः' इत्येवम्? तत्र यद्याद्यः कल्पः, स न युक्तः; यथोक्तसाधनविविक्तसर्वप्रदेश-कालप्रत्यक्षीकरणमन्तरेण एवंभूतज्ञानोत्पत्त्यसम्भवात् । सर्वदेशप्रत्यक्षीकरणे च कालादिविप्रकृष्टानन्तप्रदेशप्रत्यक्षीकरणवत् स्वभावादिव्यवहितसर्वपदार्थसाक्षात्करणात् स एव सर्वदर्शी स्यादित्यनुमानाश्रयणं सर्वज्ञाभावप्रसाधनं चानुपपन्नम् । अथ द्वितीयपक्षाभ्युपगमः, तदा भवति ततः प्रतिनियते प्रदेशे साध्याभावे साधनाभावनिश्चयः-घटविविक्तप्रत्यक्षप्रदेश इव घटाभावनिश्चयः-किंतु तथाभूतात् साध्याभावे साधनाभावनिश्चयान्न व्यतिरेको निश्चितो भवति । साधनाभावनियतसाध्याभावस्य सर्वोपसंहारेण निश्चये व्यतिरेको निश्चितो भवति; अन्यथा—यत्रैव साध्याभावे साधनाभावो न भवति तत्रैव साधनसद्भावेऽपि न साध्यमिति-न साधनं साध्यनियतं स्यादिति व्यतिरेकनिश्चयनिमित्तो न हेतोः साध्यनियमनिश्चयः स्यात्; तन्न द्वितीयोऽपि पक्षः । अथ न प्रकृतसाधनाभावज्ञानं तद्विविक्तसमस्तप्रदेशोपलम्भनिमित्तम्-येन पूर्वोक्तो दोषः-किन्तु तद्विषयप्रमाणपञ्चकनिवृत्तिनिमित्तम् । तदुक्तम्—

"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता" ॥ [श्लो० वा० सू० ५, अभावप० श्लो० १]

नन्वत्रापि वक्तव्यम्-किं सर्वदेश-कालावस्थितसमस्तप्रमातृसंबन्धिनी तन्निवृत्तिस्तथाभूतसाधनाभावज्ञाननिमित्तम्, उत प्रतिनियतदेश-कालावस्थितात्मसम्बन्धिनी इति कल्पनाद्वयम् । तत्र यद्याद्या कल्पना, सा न युक्ता; तथाभूतायास्तन्निवृत्तेरसिद्धत्वात् । न चासिद्धाऽपि तथाभूतज्ञाननिमित्तम्, अतिप्रसङ्गात्-सर्वस्यापि तथाभूतज्ञाननिमित्तं स्यात् केनचित् सह प्रत्यासत्ति-विप्रकर्षाभावात्; अनभ्युपगमाच्च—नहि परेणापि प्रमाणपञ्चकनिवृत्तेरसिद्धाया अभावज्ञाननिमित्तताऽभ्युपगंता, कृतयत्नस्यैव प्रमाणपञ्चकनिवृत्तेरभावसाधनत्वप्रतिपादनात्—

"गत्वा गत्वा तु तान् देशान् यद्यर्थो नोपलभ्यते ।
तदाऽन्यकारणाभावादसन्नित्यवगम्यते" ॥ [श्लो० वा० सू० ५, अर्था० प० श्लो० ३८]

इत्यभिधानात् ।

न चेन्द्रियादिवदज्ञाताऽपि प्रमाणपञ्चकनिवृत्तिरभावज्ञानं जनयिष्यतीति शक्यमभिधातुम्, प्रमाणपञ्चकनिवृत्तेस्तुच्छरूपत्वात् । न च तुच्छरूपाया जनकत्वम्, भावरूपताप्रसक्तेः-एवंलक्षणस्य भावत्वात्; तन्न सर्वसंबन्धिनी प्रमाणपञ्चकनिवृत्तिर्विपक्षे साधनाभावनिश्चयनिबन्धनम् । नाप्यात्मसंबन्धिनी तन्निमित्तम्, यतः साऽपि किं तादात्विकी, अतीताऽनागतकालभवा वा ? न पूर्वा, तस्या गङ्गापुलिनरेणुपरिसंख्यानेनानैकान्तिकत्वात् । नोत्तरा, तादात्विकस्यात्मनस्तन्निवृत्तेरसंभवात् असिद्धत्वाच्च; तन्न आत्मसंबन्धिन्यपि प्रमाणपञ्चकनिवृत्तिस्तज्ज्ञानोत्पत्तिनिमित्तम्; तन्न अन्यवस्तुविज्ञानलक्षणमप्यभावाख्यं प्रमाणं व्यतिरेकनिश्चयनिमित्तम् ।

[प्रसङ्गवशाद् अभावप्रमाणनिरसनम्]

यच्च—

"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया" ॥ [श्लो०वा०सू०५, अभावप०श्लो० २७]

---

१ -भ्युपगम्यते गु० ।

इत्यभावप्रमाणोत्पत्तौ निमित्तप्रतिपादनम्, तत्र किं वस्त्वन्तरस्य प्रतियोगिसंसृष्टस्य ग्रहणम्, आहोस्विद् असंसृष्टस्य ? तत्र यद्याद्यः पक्षः, स न युक्तः; प्रतियोगिसंसृष्टवस्त्वन्तरस्य प्रत्यक्षेण ग्रहणे प्रतियोगिनः प्रत्यक्षेण वस्त्वन्तरे ग्रहणाद् नाभावाख्यप्रमाणस्य तत्र तदभावग्राहकत्वेन प्रवृत्तिः; प्रवृत्तौ वा प्रतियोगिसत्त्वेऽपि तदभावग्राहकत्वेन प्रवृत्तेर्विपर्यस्तत्वान्न प्रामाण्यम् । अथ प्रतियोग्यसंसृष्टवस्त्वन्तरग्रहणं तदा प्रत्यक्षेणैव प्रतियोग्यभावस्य गृहीतत्वात् तत्राभावाख्यं प्रमाणं प्रवर्त्तमानं व्यर्थम् । अथ प्रतियोग्यसंसृष्टताऽवगमो वस्त्वन्तरस्याभावप्रमाणसंपाद्यस्तर्हि तदप्यभावाख्यं प्रमाणं प्रतियोग्यसंसृष्टवस्त्वन्तरग्रहणे सति प्रवर्त्तते, तदसंसृष्टतावगमश्च पुनरप्यभावप्रमाणसंपाद्य इत्यनवस्था । तथा, प्रतियोगिनोऽपि स्मरणं किं वस्त्वन्तरसंसृष्टस्य, अथासंसृष्टस्य ? यदि संसृष्टस्य तदा नाभावप्रमाणप्रवृत्तिरिति पूर्ववद्वाच्यम् । अथासंसृष्टस्य स्मरणम्, ननु प्रत्यक्षेण वस्त्वन्तरासंसृष्टस्य प्रतियोगिनो ग्रहणे तथाभूतस्य तस्य स्मरणं नान्यथा; प्रत्यक्षेण च पूर्वप्रवृत्तेन वस्त्वन्तरासंसृष्टप्रतियोगिग्रहणे पुनरप्यभावप्रमाणपरिकल्पनं व्यर्थम्—

"वस्त्वसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रया" ॥ [श्लो० वा० सू० ५, अभावप० श्लो० २]

इत्यभिधानात् तदर्थं तस्य परिकल्पनम्, तच्च प्रत्यक्षेणैव कृतमिति तस्य व्यर्थता । अथात्राप्यभावप्रमाणसंपाद्यः प्रतियोगिनो वस्त्वन्तरासंसृष्टताग्रहस्तर्हि तथाभूतप्रतियोगिग्रहणे तथाभूतस्य[2] तस्य स्मरणम्, तत्सद्भावे चाभावप्रमाणप्रवृत्तिः, तत्प्रवृत्तौ च तस्यासंसृष्टताग्रहः, तद्ग्रहे च स्मरणमित्येवं चक्रकचोद्यं भवन्तमनुबध्नाति । नापि वस्तुमात्रस्य प्रत्यक्षेण ग्रहणमित्यभिधातुं शक्यम्, तथाऽभ्युपगमे तस्य[3] वस्त्वन्तरत्वासिद्धेः प्रतियोगिनोऽपि प्रतियोगित्वस्य, इति न प्रतियोगिनो नियतरूपस्य स्मरणमिति सुतरामभावप्रमाणोत्पत्त्यभावः । किंच, यदि अभावाख्यं प्रमाणमभावग्राहकमभ्युपगम्यते तदा तमेव[4] प्रतिपादयतु, प्रतियोगिनस्तु निवृत्तिः कथं तेन प्रतिपादिता स्यात् ? अथाभावप्रतिपत्तौ तन्निवृत्तिप्रतिपत्तिः; ननु साऽपि निवृत्तिः प्रतियोगिस्वरूपासंस्पर्शिनी, ततश्च तत्प्रतिपत्तौ पुनरपि कथं प्रतियोगिनिवृत्तिसिद्धिः ? तन्निवृत्तिसिद्धेरपरतन्निवृत्तिसिद्ध्यभ्युपगमे अपरा तन्निवृत्तिस्तथाऽभ्युपगमनीयेत्यनवस्था । किंच, अभावप्रतिपत्तौ प्रतियोगिस्वरूपं किमनुवर्त्तते, व्यावर्त्तते वा ? अनुवृत्तौ कथं प्रतियोगिनोऽभावः ? व्यावृत्तौ कथं प्रतिषेधः प्रतिपादयितुं शक्यः ? तद्विविक्तप्रतिपत्तेस्तत्प्रतिषेध इति चेत्, न; तद्प्रतिभासने तद्विविक्तताया एव प्रतिपत्तुमशक्तेः । प्रतियोगिप्रतिभासाद् नायं दोष इति चेत्, क्व तर्हि विज्ञाने तस्य प्रतिभासः ? यदि प्रत्यक्षे, न युक्तः; तत्सद्भावसिद्ध्या तन्निवृत्त्यसिद्धेः । स्मरणे तस्य प्रतिभास इति चेत्, न; तत्रापि येन रूपेण प्रतिभाति न तेनाभावः, येन न प्रतिभाति न तेन निषेधः, तदेवं यदि प्रतियोगिस्वरूपादन्योऽभावस्तथापि तत्प्रतिपत्तौ न तन्निवृत्तिसिद्धिः । अनन्यत्वेऽपि तत्प्रतिपत्तौ प्रतियोगिनः प्रतिपन्नत्वाद् न निषेधः । अपि च, तद् अभावाख्यं प्रमाणं निश्चितं सत् प्रकृताभावनिश्चयनिमित्तत्वेनाभ्युपगम्यते, आहोस्विद् अनिश्चितम् इति विकल्पद्वयम् । यद्यनिश्चितमिति पक्षः, स न युक्तः; स्वयमव्यवस्थितस्य खरविषाणादेरिव अन्यनिश्चायकत्वायोगात् । इन्द्रियादेस्त्वनिश्चितस्यापि रूपादिज्ञानं प्रति कारणत्वान्निश्चायकत्वं युक्तम्, न पुनरभावप्रमाणस्य, तस्यापरज्ञानं प्रति कारणत्वासम्भवात्; तदसम्भवश्च-प्रमाणाभावात्मकत्वेनावस्तुत्वात्; वस्तुत्वेऽपि तस्यैव प्रमेयाभावनिश्चयरूपत्वेनाभ्युपगमार्हत्वात् । नापि द्वितीयः पक्षः, यतस्तन्निश्चयोऽन्यस्मादभावाख्यात् प्रमाणाद्[5] अभ्युपगम्येत, प्रमेयाभावाद् वा ? तत्र यदि प्रथमपक्षः, स न युक्तः; अनवस्थाप्रसङ्गात् । तथाहि-अभावप्रमाणस्याभावप्रमाणान्निश्चितस्याभावनिश्चायकत्वम्, तस्याप्यन्याभावप्रमाणाद् इत्यनवस्था । अथ प्रमेयाभावात् तन्निश्चयः, सोऽपि न युक्तः; इतरेतराश्रयदोषप्रसङ्गात् । तथाहि-प्रमेयाभावनिश्चयात् प्रमाणाभावनिश्चयः, सोऽपि प्रमाणाभावनिश्चयाद् इति इतरेतराश्रयत्वम् । नापि स्वसंवेदनात् प्रमाणाभावनिश्चयः, तस्य भवताऽनभ्युपगमात्; तन्न अभावाख्यं प्रमाणं सम्भवति । सम्भवेऽपि न तत् प्रमाणचिन्तार्हमिति प्रतिपादितम्, प्रतिपादयिष्यते च प्रमाणचिन्ताऽवसरे अत्रैव; तन्नाभावप्रमाणादपि विपक्षे साधनाभावनिश्चयः; अतो न अदर्शननिमित्तोऽपि प्रकृतव्यतिरेकनिश्चयः; तदभावाद् न प्रकृतसाध्ये प्रकृतहेतोर्नियमलक्षणसंबन्धनिश्चयः ।

न चान्वय-व्यतिरेकनिश्चयव्यतिरेकेणान्यतः कुतश्चित् तन्निश्चयः, नियमलक्षणस्य संबन्धस्य यथोक्तान्वय-व्यतिरेकव्यतिरेकेणासम्भवात् । तथाहि—य एव साधनस्य साध्यसद्भावे एव भावः अयमेव तस्य साध्ये नियमः, साध्याभावे साधनस्यावश्यतयाऽभाव एव यः अयमेव वा तस्य तत्र नियमः । अतो यदेवान्वय-व्यतिरेकयोर्यथोक्तलक्षणयोर्निश्चायकं प्रमाणं तदेव नियमस्वरूपसम्बन्धनिश्चायकम्, तन्निश्चायकं च प्रकृतसाध्यसाधने हेतोर्न सम्भवतीति प्रतिपादितम्; तन्नानुमानादपि ज्ञातृव्यापारलक्षणप्रमाणसिद्धिः ।

अथापि स्यात् बाह्येषु कारकेषु व्यापारवत्सु फलं दृष्टम्—अन्यथा सिद्धस्वभावानां कारकाणामेकं धात्वर्थं साध्यमनङ्गीकृत्य कः परस्परं सम्बन्धः—अतस्तदन्तरालवर्तिनी सकलकारकनिष्पाद्याऽभिमतफलजनिका व्यापारस्वरूपा क्रियाऽभ्युपगन्तव्या इति प्रकृतेऽपि व्यापारसिद्धिरिति, एतदसम्बद्धम्; विकल्पानुपपत्तेः । तथाहि—व्यापारोऽभ्युपगम्यमानः किं कारकजन्योऽभ्युपगम्यते, आहोस्विद् अजन्यः इति विकल्पद्वयम् । तत्र यद्यजन्य इति पक्षः, सोऽयुक्तः; यतोऽजन्योऽपि किं भावरूपोऽभ्युपगम्यते, आहोस्विद् अभावरूपः ? यद्यभावरूप इत्यभ्युपगमः, सोऽप्ययुक्तः; यतोऽभावरूपत्वे तस्यार्थप्रकाशलक्षणफलजनकत्वं न स्यात्, तस्य फलजनकत्वविरोधात्; अविरोधे वा फलार्थिनः कारकान्वेषणं व्यर्थं स्यात्, तत एवाभिमतफलनिष्पत्तेर्विश्वमदरिद्रं च स्यात्; तन्नाभावरूपो व्यापारोऽभ्युपगन्तव्यः । अथ भावरूपोऽभ्युपगमविषयः, तदाऽत्रापि वक्तव्यम्—किमसौ नित्यः, आहोस्विद् अनित्यः इति ? तत्र यदि नित्य इति पक्षः, सोऽसङ्गतः; नित्यभावरूपव्यापाराभ्युपगमेऽन्धादीनामप्यर्थदर्शनप्रसङ्गः, सुप्ताद्यभावः, सर्वसर्वज्ञताभावप्रसङ्गश्च; कारकान्वेषणवैयर्थ्यं तु व्यक्तम् । अथानित्य इत्यभ्युपगमः, सोऽप्यलौकिकः; अजन्यस्य भावस्यानित्यत्वेन केनचिदनभ्युपगमात् । अथ वदेत्-मयैवाभ्युपगतः, तत्रापि वक्तव्यम्—किं कालान्तरस्थायी, उत क्षणिकः ? यदि कालान्तरस्थायी, तदा "क्षणिका हि सा न कालान्तरमवतिष्ठते" [ ] इति वचः परिप्लवेत । कारकान्वेषणं चात्रापि पक्षे फलार्थिनामसङ्गतम्, कियत्कालस्थाय्यजन्यभावरूपव्यापाराभ्युपगमे तत्कालं यावत् तत्फलस्यापि निष्पत्तेः आव्यापारविनाशमर्थप्रकाशलक्षणकार्यसद्भावादन्धत्व-मूर्छादीनामभावः स्यात् । अथ क्षणिक इति पक्षः, सोऽपि न युक्तः; क्षणानन्तरं व्यापारासत्त्वेनार्थप्रतिभासाभावाद् अपगतार्थप्रतिभासं सर्वं जगत् स्यात् । अथ स्वत एव द्वितीयादिक्षणेषु व्यापारोत्पत्तेर्नायं दोषः, अजन्यत्वं तु तस्यापरकारकजन्यत्वाभावेन, नैतदस्ति; कारकानायत्तस्य देश-काल-स्वरूपप्रतिनियमाभावस्वभावतायाः प्रतिपादनात् । किंच, अनवरतक्षणिकाजन्यव्यापाराभ्युपगमे तज्जन्यार्थप्रतिभासस्यापि तथैव भावात् सुप्ताद्यभावदोषस्तदवस्थः; तन्नाजन्यव्यापाराभ्युपगमः श्रेयान् । अथ जन्यो व्यापारः इति पक्षः कक्षीक्रियते, तदाऽत्रापि विकल्पद्वयम्—किमसौ जन्यो व्यापारः क्रियाऽऽत्मकः, उत तदनात्मकः इति ? तत्र यदि प्रथमः पक्षः, स न युक्तः; अत्रापि विकल्पद्वयानतिवृत्तेः । तथाहि—साऽपि क्रिया किं स्पन्दात्मिका, उत अस्पन्दात्मिका ? यदि स्पन्दात्मिका तदाऽऽत्मनो निश्चलत्वादन्येषां कारकाणां व्यापारसद्भावेऽपि व्यापारो न स्यात्; यदर्थोऽयं प्रयासस्तदेव त्यक्तं भवतैवमभ्युपगच्छता । अथापरिस्पन्दात्मिका क्रिया व्यापारस्वभावा, न; तथाभूतायाः परिस्पन्दाभावरूपतया फलजनकत्वायोगात् अभावस्य जनकत्वविरोधात् । न च क्रिया कारण-फलाऽपान्तरालवर्तिनी परिस्पन्दस्वभावा तद्विपरीतस्वभावा वा प्रमाणगोचरचारिणी इति न तस्याः सद्व्यवहारविषयत्वमभ्युपगन्तुं युक्तमिति न क्रियाऽऽत्मको व्यापारः । नापि तदनात्मको व्यापारोऽङ्गीकर्तुं युक्तः, तत्रापि विकल्पद्वयप्रवृत्तेः । तथाहि—किमसावक्रियाऽऽत्मको व्यापारो बोधस्वरूपः, अबोधस्वभावो वा ? यदि बोधस्वरूपः, प्रमातृवन्न प्रमाणान्तरगम्यताऽभ्युपगन्तुं युक्ता । अथाबोधस्वभावः, नायमपि पक्षः; बोधात्मकज्ञातृव्यापारस्याबोधात्मकत्वासम्भवात्—न हि चिद्रूपस्याचिद्रूपो व्यापारो युक्तः—'जानाति' इति च ज्ञातृव्यापारस्य बोधात्मकस्यैवाभिधानात्; तन्न अबोधस्वभावोऽपि व्यापारः । किंच, असौ ज्ञातृव्यापारो धर्मि-

---

१ "प्रतियोगिशब्देन संसृष्टत्वम्" गु० टि० । २ तथाभूतस्य स्मरणम् कां०, हा०, आ०, अ० । ३ तस्य वस्त्वन्तरत्वासिद्धो (द्धौ) न प्रतियोगिनो नियतरूपस्य स्मर—उ० । ४ अत्र 'असिद्धेः' इति अध्याहार्यम् । ५ अभावमेव ।

१ अयं च विकल्पः पृ० २० दशमपङ्क्तित आरब्धः । २ पृ० १० पं० २ ।

स्वभावः, उत धर्मस्वभावः इति पुनरपि कल्पनाद्वयम्। धर्मिस्वरूपत्वे ज्ञातृवन्न प्रमाणान्तरगम्यत्वमित्युक्तम्। धर्मस्वभावत्वेऽपि धर्मिणो ज्ञातुर्व्यतिरिक्तो व्यापारः, अव्यतिरिक्तः, उभयम्, अनुभयं चेति चत्वारो विकल्पाः। न तावद्व्यतिरिक्तः, तत्त्वे संबन्धाभावेन 'ज्ञातुर्व्यापारः' इति व्यपदेशायोगात्। अव्यतिरेके[2] ज्ञातैव, तत्स्वरूपवद् नापरो व्यापारः। उभयपक्षस्तु विरोधमपरिहृत्य
५ नाभ्युपगमनीयः। अनुभयपक्षस्तु अन्योऽन्यव्यवच्छेदरूपाणामेकविधानेनापरनिषेधादयुक्त इति प्रतिपादितम्[3]। किंच, व्यापारस्य कारकजन्यत्वाभ्युपगमे तज्जनने प्रवर्तमानानि कारकाणि किम् अपरव्यापारभाञ्जि प्रवर्त्तन्ते, उत तन्निरपेक्षाणि इति विकल्पद्वयम्। यद्याद्यो विकल्पः, तदा तद्व्यापारजननेऽपि तैरपरव्यापारभाग्भिः प्रवर्त्तितव्यम्, तज्जननेऽप्यपरव्यापारयुग्भिः प्रवर्त्तितव्यमित्यनवस्थितेर्न फलजननव्यापारोद्भूतिरिति तत्फलस्याप्यनुत्पत्तिप्रसङ्गाद् न व्यापारपरिकल्पनं
१० श्रेयः। अथ अपरव्यापारमन्तरेणापि फलजनकव्यापारजनने प्रवर्त्तन्ते इति नायं दोषः, तर्हि प्रकृतव्यापारमन्तरेणापि फलजनने प्रवर्त्तिष्यन्त इति किमनुपलभ्यमानव्यापारकल्पनप्रयासेन? किंच, असौ व्यापारः फलजनने प्रवर्त्तमानः किमपरव्यापारसव्यपेक्षः, अथ निरपेक्षः इत्यत्रापि कल्पनाद्वयम्। तत्र यद्याद्या कल्पना, सा न युक्ता; अपरापरव्यापारजननक्षीणशक्तित्वेन व्यापारस्यापि फलजनकत्वायोगात्। अथ व्यापारान्तरानपेक्ष एव फलजनने प्रवर्त्तते, तर्हि कारकाणामपि
१५ व्यापारनिरपेक्षाणां फलजनने प्रवृत्तौ न कश्चिच्छक्तिव्याघातः सम्भाव्यते। अथ व्यापारस्य व्यापारस्वरूपत्वान्नापरव्यापारापेक्षा, कारकाणां त्वव्यापाररूपत्वात् तदपेक्षा; का पुनरियं व्यापारस्य व्यापारस्वभावता? यदि फलजनकत्वम्, तद् विहितप्रतिक्रियम्। अथ कारकाश्रितत्वम्, तदपि भिन्नस्य तज्जन्यत्वं विहाय न सम्भवतीत्युक्तम्[4]। अथ कारकपरतन्त्रत्वम्, तदपि न; अनुत्पन्नस्यासत्त्वात्, नाप्युत्पन्नस्य, अन्यानपेक्षत्वात्; तथापि तत्परतन्त्रत्वे कारकाणामपि व्यापारपरतन्त्रता
२० स्यात्। अथैवं पर्यनुयोगः सर्वभावप्रतिनियतस्वभावव्यावर्तक इत्ययुक्तः, तथाहि—एवमपि पर्यनुयोगः सम्भवति-वह्नेर्दाहकस्वभावत्वे आकाशस्यापि स स्यात्, इतरथा वह्नेरपि स न स्यादिति। स्यादेतत् यदि प्रत्यक्षसिद्धो व्यापारस्वभावो भवेत्, स च न तथेति प्रतिपादितम्[5]। तत एवोक्तम्—

"स्वभावेऽध्यक्षतः सिद्धे यदि पर्यनुयुज्यते।
२५ तत्रोत्तरमिदं युक्तं न दृष्टेऽनुपपन्नता" ॥ [ ]

तन्न व्यापारो नाम कश्चिद् यथाऽभ्युपगतः परैः।

अथानुमानग्राह्यत्वे स्यादयं दोषः, अत एवार्थापत्तिसमधिगम्यता तस्याभ्युपगता। ननु दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यदृष्टकल्पनाऽर्थापत्तिः, तत्र कः पुनरसौ भावो व्यापारव्यतिरेकेण नोपपद्यते यो व्यापारं कल्पयति? अर्थ इति चेत्, का पुनरस्य तेन विनाऽनुपपद्यमानता?
३० नोत्पत्तिः, स्वहेतुतस्तस्याः भावात्। किंच, असावर्थः किम् एकज्ञातृव्यापारमन्तरेणानुपपद्यमानस्तं कल्पयति, उत सर्वज्ञातृव्यापारमन्तरेण इति वक्तव्यम्। तत्र यदि सकलज्ञातृव्यापारमन्तरेणेति पक्षः, तदा अन्धानामपि रूपदर्शनं स्यात् तद्व्यापारमन्तरेणार्थाभावात् सर्वज्ञताप्रसङ्गश्च। अथ एकज्ञातृव्यापारमन्तरेणानुपपत्तिस्तर्हि यावदर्थसद्भावस्तावत् तस्यार्थदर्शनमिति सुप्ताद्यभावः। अथ अर्थधर्मोऽर्थप्रकाशतालक्षणो व्यापारमन्तरेणानुपपद्यमानस्तं कल्पयति; ननु साऽप्यर्थप्रकाशताऽर्थधर्मो
३५ यद्यर्थ एव तदाऽर्थपक्षोक्तो दोषः। अथ तद्व्यतिरिक्तः, तदा तस्य स्वरूपं वक्तव्यम्। तस्यानुभूयमानता सा इति चेत्, न; पर्यायमात्रमेतत्, न तत्स्वरूपप्रतिपत्तिरिति स एव प्रश्नः। किंच, प्रकाशोऽनुभवश्च ज्ञानमेव, तदनवगमे तत्कर्मतायाः सुतरामनवगम इत्यर्थप्रकाशता-अनुभूयमानते स्वरूपेणानवगते कथं ज्ञातृव्यापारपरिकल्पिके? किंच, अर्थप्रकाशतालक्षणोऽर्थधर्मोऽन्यथानुपपन्नत्वेनानिश्चितस्तं कल्पयति, आहोस्विद् निश्चित इति? तत्र यद्याद्यः कल्पः, स
४० न युक्तः; अतिप्रसङ्गात्। तथाहि—यद्यनिश्चितोऽपि तथात्वेन स तं परिकल्पयति तर्हि यथा तं

१ पृ० २५ पं० ४०। २ वा०, पू०, बा० विना सर्वत्र **अव्यतिरिक्ते**। ३ पृ० १० पं० ६। ४ वा०, पू०, बा० विना **प्रवर्तन्ते नायं**। ५ **व्यापारजननिरपेक्षाणां** आ०, गु०, डे०, भा०, हा०। ६ पृ० २५ पं० १५। ७ पृ० ९ पं० ३४। ८ पृ० २० पं० ५। ९ वा०, पू०, बा० विना सर्वत्र **तदन्धाना-**। १० **स्वप्राद्यभावः** भां०। ११ **'तदा यथा तं परिकल्पयति'** इत्ययं पाठः वा०, पू०, बा० विना न क्वापि।

परिकल्पयति तथा येन विनाऽपि स उपपद्यते तमपि किं न कल्पयति विशेषाभावात्? अथानिश्चितोऽपि तेन विनाऽनुपपद्यमानत्वेन निश्चितः स तं परिकल्पयति तर्हि लिङ्गस्यापि नियतत्वेनानिश्चितस्यापि स्वसाध्यगमकत्वं स्यात्, तथा च अर्थापत्तिरेव परोक्षार्थनिश्चायिका नानुमानमिति षट्प्रमाणवादाभ्युपगमो विशीर्येत। अथ अन्यथानुपपद्यमानत्वेन निश्चितः स धर्मस्तं परिकल्पयति, तदा वक्तव्यम्-क्व तस्यान्यथानुपपन्नत्वनिश्चयः? यदि दृष्टान्तधर्मिणि तदा लिङ्गस्यापि तत्र नियतत्व- ५
निश्चयोऽस्तीत्यनुमानमेवार्थापत्तिः स्यात्, एवं चार्थापत्तिरनुमानेऽन्तर्भूतेति पुनरपि प्रमाणषट्काभ्युपगमो विशीर्येत। अथ साध्यधर्मिणि तन्निश्चय इत्यनुमानात् पृथगर्थापत्तिः, तदात्रापि वक्तव्यम्—कुतः प्रमाणात् तस्य तन्निश्चयः? यदि विपक्षेऽनुपलम्भात्, तन्न युक्तम्; सर्वसम्बन्धिनोऽनुपलम्भस्यासिद्धत्वप्रतिपादनात्, आत्मसंबन्धिनस्तु अनैकान्तिकत्वादिति नान्यथाऽनुपपद्यमानत्वनिश्चयः। किंच, अर्थापत्युत्थापकस्यार्थानुभूयमानतालक्षणस्यार्थधर्मस्य य एव स्वप्रकल्प्यार्थाभावेऽ- १०
वश्यंतयाऽनुपपद्यमानत्वनिश्चयः स एव स्वप्रकल्प्यार्थसद्भावे एवोपपद्यमानत्वनिश्चय इत्यर्थापत्युत्थापकस्यार्थस्य, स्वसाध्यानुमापकस्य च लिङ्गस्य न कश्चिद्विशेष इत्यनुमाननिरासेऽर्थापत्तेरपि निरासः कृत एवेति नार्थापत्तेरपि ज्ञातृव्यापारलक्षणप्रमाणनिश्चायकत्वम्। येऽपि "संवित्त्याख्यं फलं ज्ञातृव्यापारसद्भावे सामान्यतोदृष्टं लिङ्गम्" आहुः, तन्नतमप्यसम्यक्; यतः संवेदनाख्यस्य लिङ्गस्य किम् अर्थप्रतिभासस्वभावत्वम्, उत तद्विपरीतत्वम् इति कल्पनाद्वयम्। तत्रार्थप्रति- १५
भासस्वभावत्वे किमपरेण ज्ञातृव्यापारेण कथितेन इति वक्तव्यम्। तदुत्पत्तिस्तेन विना न सम्भवतीति चेत्, न; इन्द्रियादेस्तदुत्पादकस्य सद्भावाद् व्यर्थं तत्परिकल्पनम्। क्रियामन्तरेण कारककलापात् फलानिष्पत्तेः तत्कल्पनेति चेत्, नन्विन्द्रियादिसामग्र्यस्य क्व व्यापारः इति वक्तव्यम्। क्रियोत्पत्ताविति चेत्, साऽपि क्रिया क्रियान्तरमन्तरेण कथं कारककलापादुपजायते इति पुनरपि तदेव चोद्यम्। क्रियान्तरकल्पनेऽनवस्था प्राक् प्रतिपादितैव[6]; तन्नार्थप्रतिभास- २०
स्वभावत्वेऽन्यो व्यापारः कल्पनीयः, निष्प्रयोजनत्वात्। अथ द्वितीया कल्पनाऽभ्युपगम्यते, साऽपि न युक्ता; यतोऽर्थस्य संवेदनं तद् भवज् ज्ञातृव्यापारलिङ्गतां समासादयति, सा च तदसंवेदनस्वभावस्य कथं सङ्गता? शेषं तु पूर्वमेव निर्णीतमिति न पुनरुच्यते। किंच, अर्थप्रतिभासस्वभावं संवेदनम्, ज्ञाता, तद्व्यापारश्च बोधात्मको नैतत् त्रितयं क्वचिदपि प्रतिभाति। अथ 'घटमहं जानामि' इति प्रतिपत्तिरस्ति, न चैषा निह्नोतुं शक्या, नाप्यस्याः किञ्चिद् बाधकमुपलभ्यते, तत् २५
कथं न त्रितयसद्भावः? तथाहि—'अहम्'इति ज्ञातुः प्रतिभासः, 'जानामि' इति संवेदनस्य, 'घटम्'इति प्रत्यक्षस्यार्थस्य, व्यापारस्य त्वपरस्य प्रमाणान्तरतः प्रतिपत्तिरित्यभ्युपगमः, अयुक्तमेतत्; यतः कल्पनोद्भूतशब्दमात्रमेतत्, न पुनरेष वस्तुत्रयप्रतिभासः। अत एवोक्तमाचार्येण—"एकमेवेदं संविद्रूपं हर्ष-विषादाद्यनेकाकारविवर्त्तं समुत्पश्यामः तत्र यथेष्टं संज्ञाः क्रियन्ताम्" [ ]
किंच, व्यापारनिमित्ते कारकसंबन्धे विकल्पद्वयम्—किं पूर्वं व्यापारः पश्चात् संबन्धः, उत पूर्वं संबन्धः ३०
पश्चाद् व्यापारः? पूर्वस्मिन् पक्षे न व्यापरार्थः संबन्धः, पूर्वमेव व्यापारसद्भावात्। उत्तरस्मिन् पुनर्विकल्पद्वयम्-संबन्धे सति किं परस्परसापेक्षाणां स्वव्यापारकर्तृत्वम्, उत निरपेक्षाणाम्? सापेक्षत्वे स्वव्यापारकर्तृत्वानुपपत्तिः, अनेकजन्यत्वात् तस्य। निरपेक्षत्वे किं मीलनेन? तत्रश्च संसर्गावस्थायामपि स्वव्यापारकरणादनवरतफलसिद्धिः, न चैतद् दृष्टमिष्टं वा; तन्न युक्तं व्यापारस्याप्रतीयमानस्य कल्पनम्। को ह्यन्यथा संभवति फलेऽप्रतीयमानकल्पनेनात्मानमायासयति? ३५
अन्यथासंभवश्च-इन्द्रियादिषु सत्सु फलस्य प्रागेव दर्शितः, इन्द्रियादेस्तवाभ्युपगमनीयत्वात्।

इतोऽपि संवेदनाख्यं फलमपरोक्षं व्यापारानुमापकमयुक्तम्, स्वदर्शनव्याघातप्रसक्तेः। तथाहि—भवता शून्यवाद-परतःप्रामाण्यप्रसक्तिभयात् स्मृतिप्रमोषोऽभ्युपगतः, विपरीतख्यातौ तयोरवश्यंभावित्वात्। तथाहि—तस्यामन्यदेश-कालोऽर्थस्तद्देश-कालयोरसन् प्रतिभाति; न च

१ ग्रन्थाग्रम् श्लो० १००० । २ पृ० १८ पं० ७। ३ पृ० १८ पं० ८। ४ **लक्षणार्थधर्म**-कां०। ५ पृ० २६ पं० ९। ६ अर्थानुसारेण विचारणाद् अत्र 'ततश्चाऽसंसर्गा-' इति पाठो युक्तः, 'वि०' प्रतावपि पश्चात् परिष्कृतः एष पाठो दृष्टः। ७ प्र० पृ० पं० १७। ८ अयं 'तथाहि' शब्दः इत आरभ्य 'प्रतिभासाभावः प्रसक्तः' (पृ० २८ पं० ३२) इतिपर्यन्तं योज्यः।

तद्देशाद्यसत्त्वस्यात्यन्तासत्त्वस्य चासत्प्रतिभासे कश्चिद्विशेषः, यथाऽन्यदेशाद्यवस्थितमाकारं कुतश्चिद् भ्रमनिमित्ताद् ज्ञानं दर्शयति तथा अविद्यावशादत्यन्तासन्तमपि किं न दर्शयति? तथा च कथं शून्यवादाद् मुक्तिः? तथा परतःप्रामाण्यमपि मिथ्यात्वाशङ्कायां कस्यचिज्ज्ञानस्य बाधकाभावान्वेषणाद् वक्तव्यम्, तदन्वेषणे च सापेक्षत्वं प्रमाणानामपरिहार्यं विपरीतख्यातौ, ततो न कस्यचिद् ज्ञानस्य मिथ्यात्वम्; तदभावाज्ज्ञान्यदेश-कालाकारार्थप्रतिभासः; नापि बाधकाभावापेक्षा। भ्रान्ताभिमतेषु तु तथाव्यपदेशः स्मृतिप्रमोषात्। तथाहि—'इदं रजतम्' इति प्रतीतौ 'इदम्' इति पुरोव्यवस्थितार्थप्रतिभासम्, 'रजतम्' इति पूर्वावगतरजतस्मरणं सादृश्यादेः कुतश्चिन्निमित्तात्, तच्च स्मरणमपि स्वरूपेण नावभासत इति स्मृतिप्रमोष उच्यते। यत्र 'स्मरामि' इति प्रत्ययस्तत्र स्मृतेरप्रमोषः, यत्र तु स्मृतित्वेऽपि 'स्मरामि' इति रूपाप्रवेदनं कुतश्चित् कारणात् तत्र स्मृतिप्रमोषोऽभिधीयते। अस्मिन् मते 'रजतम्' इति यत् फलसंवेदनं तत् किं प्रत्यक्षफलस्य सतः, किं वा स्मृतेः? यदि प्रत्यक्षफलस्य तदा यथा 'इदम्' इति प्रत्यक्षफलं प्रतिभाति तथा 'रजतम्' इत्यपि, ततश्च तुल्ये प्रतिभासे 'एकं प्रत्यक्षम्, अपरं स्मरणम्' इति किंकृतो विशेषः? अथोक्तम्—'स्मरणस्यापि सतस्तद्रूपानवगमात् तेनाकारेणावगमः' तत् किं 'रजतम्' इत्यत्राप्रतिपत्तिरेव? तस्यां चाभ्युपगम्यमानायां कथं स्मृतिप्रमोषः? अन्यथा मूर्छाद्यवस्थायामपि स्यात्। अथ 'इदम्' इति तत्र प्रत्ययाभावान्नासौ, ननु 'इदम्' इत्यत्रापि वक्तव्यम्—किमाभाति? पुरोऽवस्थितं शुक्तिशकलमिति चेत्, ननु किं प्रतिभासमानत्वेन तत् तत्र प्रतिभाति, उत सन्निहितत्वेन? प्रतिभासमानत्वेन तथाऽभ्युपगमे न स्मृतिप्रमोषः, शुक्तिकाशकले हि स्वगतधर्मविशिष्टे प्रतिभासमाने कुतो रजतस्मरणसंभावना? नहि घटग्रहणे पटस्मरणसंभवः। अथ शुक्तिका-रजतयोः सादृश्यात् शुक्तिप्रतिभासे रजतस्मरणम्, न; तस्य विद्यमानत्वेऽप्यकिंचित्करत्वात्। यदा ह्यसाधारणधर्माध्यासितं शुक्तिस्वरूपं प्रतिभाति तदा कथं सदृशवस्तुस्मरणम्? अन्यथा सर्वत्र स्यात्। सामान्यमात्रग्रहणे हि तत् कदाचिद् भवेदपि, नासाधारणस्वरूपप्रतिभासे; तत्र 'इदम्' इत्यत्र शुक्तिकाशकलस्य प्रतिभासनात् तथाव्यपदेशः। सन्निहितत्वेनाप्रतिभासमानस्यापि तद्विषयत्वाभ्युपगमे इन्द्रियसंबद्धानां तद्देशवर्त्तिनामण्वादीनामपि प्रतिभासः स्यात्। न चाप्रतिभासमानानामिन्द्रियादीनामिव प्रतीतिजनकानामपि तद्विषयता सङ्गच्छते; तत्र 'इदम्' इत्यत्र शुक्तिकाशकलप्रतिभासः। नापि 'रजतम्' इत्यत्र स्मृतित्वेऽपि तस्याः स्वरूपेणानवगमात् 'प्रमोषः' इत्यभ्युपगमो युक्तः। अथ स्मृतिरप्यनुभवत्वेन प्रतिभातीति तत्प्रमोषोऽभ्युपगम्यते, नन्वेवं सैव शून्यवाद-परतःप्रामाण्यभयादनभ्युपगम्यमाना विपरीतख्यातिरापतिता। न चात्राप्रतिपत्तिरेव, 'रजतम्' इत्येवं स्मरणस्यानुभवस्य वा प्रतिभासनात्। इदमत्रैदंपर्यम्—अर्थसंवेदनमपरोक्षं सामान्यतोदृष्टं लिङ्गं यदि ज्ञातृव्यापारानुमापकमभ्युपगम्यते तदा स्मृतिप्रमोषे 'रजतम्' इत्यत्र संवेदनम्, उतासंवेदनम्? प्रतिभासोत्पत्तेः संवेदनेऽपि रजतमनुभूयमानतया न संवेद्यते, स्मृतिप्रमोषाभावप्रसङ्गात्। नापि स्मर्यमाणतया, प्रमोषाभ्युपगमात्। विपरीतख्यातिस्तु नाभ्युपगम्यते, तद् 'रजतम्' इत्यत्र संवेदनस्यापरोक्षत्वाभ्युपगमेऽपि प्रतिभासाभावः प्रसक्तः। किंच, स्मृतिप्रमोषः पूर्वोक्तदोषद्वयभयादभ्युपगतः, तच्च तदभ्युपगमेऽपि समानम्। तथाहि-सम्यग्रजतप्रतिभासेऽपि आशङ्कोत्पद्यते—'किमेष स्मृतावपि स्मृतिप्रमोषः, उत सम्यगनुभवः' इति सापेक्षत्वाद् बाधकाभावो(वा)न्वेषणे परतःप्रामाण्यम्। तत्र च भवन्मतेनानवस्था प्रदर्शितैव। यत्र हि स्मृतिप्रमोषस्तत्रोत्तरकालभावी बाधकप्रत्ययः, यत्र तु तदभावस्तत्र स्मृतिप्रमोषासम्भव इति कथं न बाधकाभावापेक्षायां परतःप्रामाण्यदोषभयस्यावकाशः? शून्यवाददोषभयमपि स्मृतिप्रमोषाभ्युपगमेऽवश्यंभावि। तथाहि—ध्वस्तश्रीहर्षाद्याकारः, अनुत्पन्नशङ्खचक्रवर्त्याद्याकारश्च ज्ञाने यः प्रतिभाति सोऽवश्यं ज्ञानरचितोऽसन् प्रतिभाति; रजतादिस्मृतेरप्यसन्निहितरजताकारप्रतिभासस्वभावत्वात् तत्सत्त्वं तदुत्पत्तावसन्निहितं नोपयुज्यत इति असदर्थविषयत्वे ज्ञानस्य कथं शून्यवादभयाद् भवतः स्मृतिप्रमोषवादिनो मुक्तिः? तन्न स्मृतिप्रमोषः। कश्चायं स्मृतिप्रमोषः? किं स्मृतेरभावः, उतान्यावभासः, आहोस्विद् अन्याकारवेदित्वम् इति विकल्पाः। तत्र नासौ स्मृतेरभावः, प्रतिभासाभावप्रसङ्गात्।

१ अत्यन्तासत्त्वमपि गु०। २ प्र० पृ० पं० ८। ३ "सादृश्यस्य"। ४ "यथार्थज्ञानस्थलेऽपि" गु० टि०। ५ **बाधकान्वेषणे** वा०, पू०, बा० विना सर्वत्र। ६-**स्वभावत्वात् सत्त्वं तदु**-वा०, वि०, चं०, पू०, बा०।-**स्वभावत्वात् तत् सत्यं तदु**-डे०, आ०, गु०, भा०।

अथान्यावभासोऽसौ, तदाऽत्रापि वक्तव्यम्—किं तत्कालोऽन्यावभासोऽसौ, अथोत्तरकालभावी? यदि तत्कालभावी अन्यावभासः स्मृतेः प्रमोषस्तदा घटादिज्ञानं तत्कालभावि तस्याः प्रमोषः स्यात्। अथोत्तरकालभाव्यसौ तस्याः प्रमोषः, तदप्ययुक्तम्; अतिप्रसङ्गात्—यदि नामोत्तरकालमन्यावभासः समुत्पन्नः, पूर्वज्ञानस्य स्मृतिप्रमोषत्वेनाभ्युपगतस्य तत्त्वे किमायातम्? अन्यथा सर्वस्य पूर्वज्ञानस्य स्मृतिप्रमोषत्वप्रसङ्गः। अथान्याकारवेदित्वं तस्या असौ, तदा विपरीतख्यातिः स्यात् न स्मृतिप्रमोषः। कश्चासौ विपरीत आकारस्तस्याः? यदि स्फुटार्थावभासित्वम्, तदसौ प्रत्यक्षस्याकारः कथं स्मृतिसम्बन्धी? तत्सम्बन्धित्वे वा तस्याः प्रत्यक्षरूपतैव स्यात् न स्मृतिरूपता। अत एव शुक्तिकायां रजतप्रतिभासस्य न स्मृतिरूपता तत्प्रतिभासेन व्यवस्थाप्यते, तस्य प्रत्यक्षरूपतया प्रतिभासनात्। नापि बाधकप्रत्ययेन तस्याः स्मृतिरूपता व्यवस्थाप्यते, यतो बाधकप्रत्ययः तत्प्रतिभातस्यार्थस्यासद्रूपत्वमावेदयति, न पुनस्तज्ज्ञानस्य स्मृतिरूपताम्। तथाहि—बाधकप्रत्यय एवं प्रवर्त्तते-'न इदं रजतम्', न पुनः 'रजतप्रतिभासः प्रकृतः स्मृतिः' इति। तन्न स्मृतिप्रमोषरूपता भ्रान्तदशामभ्युपगन्तुं युक्ता; अतो नायमपि सत्पक्षः। तन्नार्थसंवेदनस्वरूपमप्यपरोक्षं सामान्यतोदृष्टं लिङ्गं प्रामाकरैरभ्युपगम्यमानं ज्ञातृव्यापारलक्षणप्रमाणानुमापकमिति मीमांसकमतेन प्रमाणस्यैवासिद्धत्वात् कथं यथावस्थितार्थपरिच्छेदशक्तिस्वभावस्य प्रामाण्यस्य स्वतः सिद्धिः? न हि धर्मिणोऽसिद्धौ तद्धर्मस्य सिद्धिर्युक्ता, अतो न सर्वत्र स्वतः प्रामाण्यसिद्धिरिति स्थितम्॥

[वेदाऽपौरुषेयत्वपरीक्षणम्]

शब्दसमुत्थस्य तु अभिधेयविषयज्ञानस्य यदि प्रामाण्यमभ्युपगम्यते तदा अपौरुषेयत्वस्यासम्भवाद् गुणवत्पुरुषप्रणीतस्तदुत्पादकः शब्दोऽभ्युपगन्तव्यः; अथ तत्प्रणीतत्वं नाभ्युपगम्यते तदा तत्समुत्थज्ञानस्य प्रामाण्यमपि न स्यादित्यभिप्रायवानाचार्यः प्राह-'जिनानाम्' राग-द्वेषमोह-लक्षणान् शत्रून् जितवन्त इति जिनास्तेषां 'शासनं' तदभ्युपगन्तव्यमिति प्रसङ्गसाधनम्।

न चात्रेदं प्रेर्यम्-यदि जिनशासनं जिनप्रणीतत्वेन सिद्धं निश्चितप्रामाण्यमभ्युपगमनीयम्—अन्यथा प्रामाण्यस्याप्यनभ्युपगमनीयत्वादिति प्रसङ्गसाधनमत्र प्रतिपाद्यत्वेनाभिप्रेतम्—तत्किमिति बौद्धयुक्त्याऽऽर्हतेन त्वया स्वतःप्रामाण्यनिरासोऽभिहितः? यतः सर्वसमयसमूहात्मकत्वमेव आचार्येण प्रतिपादयितुमभिप्रेतम्। यद् वक्ष्यत्यस्यैव प्रकरणस्य परिसमाप्तौ। यथा—

'भद्दं मिच्छद्दंसणसमूहमइयस्स अमयसारस्स।
जिणवयणस्स भगवओ संविग्गसुहाहिगम्मस्स'॥ [तृतीयकाण्डे गाथा ७०]
इत्यादि।

अयमेवार्थो बौद्धयुक्त्युपन्यासेन समर्थितः। अन्यत्राप्यन्यमतोपक्षेपेणान्यमतनिरासेऽयमेवाभिप्रायो द्रष्टव्यः, सर्वनयानां परस्परसापेक्षाणां सम्यग्मतत्वेन, विपरीतानां विपर्ययत्वेनाचार्यस्येष्टत्वात्। अत एवोक्तमनेनैव द्वात्रिंशिकायाम्—

"उदधाविव सर्वसिन्धवः समुदीर्णास्त्वयि नाथ! दृष्टयः।
न च तासु भवान् प्रदृश्यते, प्रविभक्तासु सरित्स्विवोदधिः"॥ [चतुर्थद्वात्रिंशिकायां श्लो० १५]

अथापि स्यात्, यदि प्रामाण्यापवादकदोषाभावो गुणनिमित्त एव भवेत् तदा स्यादेतत् प्रसङ्गसाधनम्, यावताऽपौरुषेयत्वेनापि तस्य सम्भवात् कथं प्रसङ्गसाधनस्यावकाशः? असदेतत्; अपौरुषेयत्वस्यासिद्धत्वात्। तथाहि—किमपौरुषेयत्वं शासनस्य प्रसज्यप्रतिषेधरूपमभ्युपगम्यते, उत पर्युदासरूपम्? तत्र यदि प्रसज्यरूपं तदा किं सदुपलम्भकप्रमाणग्राह्यम्, उत अभावप्रमाणवेद्यम्? यदि सदुपलम्भकप्रमाणग्राह्यम्, तदयुक्तम्; सदुपलम्भकप्रमाणविषयस्याभावत्वानुपपत्तेः, अभावत्वे वा न तद्विषयत्वम्, तस्य तद्विषयत्वविरोधाद् अनभ्युपगमाच्च। अभाव-

१ प्रमेयकमलमार्तण्डे (पृ० १६, प्रथम पृ०-पं० १) अत्र स्थले एवं पाठः—"समुत्पन्नस्तर्हि पूर्वज्ञानस्य स्मृतिप्रमोषत्वेन असौ नाभ्युपगमनीयः"। २-**नाभ्युपगम्य तत्त्वे (म्यत्वे)** वा०, पू०, बा०।-**नाभ्युपगतत्वे किमा**-अ०। ३ ग्रन्थाग्रम्-११००। ४ **मीमांसकमते प्रमाण**-कां०, वि०। ५ 'तद्' इति प्रमाणम्।

प्रमाणग्राह्यत्वाभ्युपगमेऽपि वक्तव्यम्—किमभावप्रमाणं ज्ञानविनिर्मुक्तात्मलक्षणम्, उत अन्यज्ञानस्वरूपम्? प्रथमपक्षेऽपि किं सर्वथा ज्ञानविनिर्मुक्तात्मस्वरूपम्, आहोस्विद् निषेध्यविषयप्रमाणपञ्चकविनिर्मुक्तात्मलक्षणम् इति? प्रथमपक्षे नाऽभावपरिच्छेदकत्वम्, परिच्छेदस्य ज्ञानधर्मत्वात्; सर्वथा ज्ञानविनिर्मुक्तात्मनि च तदभावात्। निषेध्यविषयप्रमाणपञ्चकविनिर्मुक्तात्मनोऽपि नाभाव-
५ व्यवस्थापकत्वम्, आगमान्तरेऽपि तस्य सद्भावेन व्यभिचारात्। तदन्यज्ञानमपि यदि तदन्यसत्ताविषयं स्यान्नाभावप्रमाणं स्यात्, तस्य सद्विषयत्वविरोधात्। 'पौरुषेयत्वादन्यस्तदभावस्तद्विषयज्ञानं तदन्यज्ञानम्' अभावप्रमाणमिति चेत्, अत्रापि वक्तव्यम्—किमस्योत्थापकम्? प्रमाणपञ्चकाभावश्चेत्, नन्वत्रापि वक्तव्यम्—किमात्मसंबन्धी, सर्वसंबन्धी वा प्रमाणपञ्चकाभावस्तदुत्थापकः? न सर्वसंबन्धी, तस्यासिद्धत्वात्। नात्मसंबन्धी, तस्यागमान्तरेऽपि सद्भावेन व्यभिचारित्वात्।
१० आगमान्तरे परेण पुरुषसद्भावाभ्युपगमात् प्रमाणपञ्चकाभावो नाभावप्रमाणसमुत्थापक इति चेत्, न; पराभ्युपगमस्य भवतोऽप्रमाणत्वात्। प्रमाणत्वे वा वेदेऽपि नाभावप्रमाणप्रवृत्तिः, परेण तत्रापि कर्तृपुरुषसद्भावाभ्युपगमात्; प्रवृत्तौ वाऽऽगमान्तरेऽपि स्यात्, अविशेषात्। न च वेदे पुरुषाभ्युपगमः परस्य मिथ्या, अन्यत्रापि तन्मिथ्यात्वप्रसक्तेः। किंच, प्रमाणपञ्चकाभावः किं ज्ञातोऽभावप्रमाणजनकः, उताज्ञातः? यदि ज्ञातस्तदा न तस्यापरप्रमाणपञ्चकाभावाद् ज्ञप्तिः, अनवस्था-
१५ प्रसङ्गात्। नापि प्रमेयाभावात्, इतरेतराश्रयदोषात्। अथाज्ञातस्तज्जनकः, न; समयानभिज्ञस्यापि तज्जनकत्वप्रसङ्गात्; न चाज्ञातः प्रमाणपञ्चकाभावोऽभावज्ञानजनकः, 'कृतयत्नस्यैव प्रमाणपञ्चकाभावोऽभावज्ञापकः' इत्यभिधानात्। न च इन्द्रियादेरिव अज्ञातस्यापि प्रमाणपञ्चकाभावस्याभावज्ञानजनकत्वम्, अभावस्य सर्वशक्तिरहितस्य जनकत्वविरोधात्; अविरोधे वा भावेऽपि 'अभावः' इति नाम कृतं स्यात्। न तुच्छात् तदभावात् तदभावज्ञानम्, किन्तु प्रमाणपञ्चकरहितादात्मन इति
२० चेत्, न; आगमान्तरेऽपि तथाभूतस्यात्मनः सम्भवाद् अभावज्ञानोत्पत्तिः स्यात्। प्रमेयाभावोऽपि तद्धेतुस्तदभावान्नागमान्तरेऽभावज्ञानमिति चेत्, न; अभावाभावः प्रमेयसद्भावः, तस्य प्रत्यक्षाद्यन्यतमप्रमाणेनानिश्चये कथमभावाभावप्रतिपत्तिः? अभावज्ञानाभावात् तत्प्रतिपत्तिर्न सदुपलम्भकप्रमाणसद्भावादिति चेत्, न; अभावज्ञानस्य प्रमेयाभावकार्यत्वात् तदभावान्नाभावाभावावगतिः, कार्याभावस्य कारणाभावव्यभिचारात्, अप्रतिबद्धसामर्थ्यस्याभावप्रतीतावपि नेष्ट-
२५ सिद्धिः। क्वचित् प्रदेशे घटाभावप्रतिपत्तिस्तु न घटज्ञानाभावात् किन्त्वेकज्ञानसंसर्गिपदार्थान्तरोपलम्भात्। न च पुरुषाभावाभावप्रतिपत्तावयं न्यायः, तदेकज्ञानसंसर्गिणः कस्यचिदप्यभावात्। न पुरुष एव तदेकज्ञानसंसर्गी, पुरुषभावाऽभावयोर्विरोधेनैकज्ञानसंसर्गित्वासम्भवात्; सम्भवेऽपि न पुरुषोपलम्भभावात् तदभावाभावप्रतिपत्तिः, तदुपलम्भस्यैव तत्प्रतिपत्तिरूपत्वात्; अत एव विरुद्धविधिरप्यत्र न प्रवर्त्तत इति। किंच, कस्याभावज्ञानाभावात्
३० प्रमेयाभावाभावः—वादिनः, प्रतिवादिनः, सर्वस्य वा? यदि वादिनोऽभावज्ञानाभावान्नागमान्तरे प्रमेयाभावः, वेदेऽपि मा भूत्, तत्रापि प्रतिवादिनोऽभावज्ञानाभावस्याविशेषात्। अथागमान्तरे वादि-प्रतिवादिनोरुभयोरप्यभावज्ञानाभावान्न प्रमेयाभावः, वेदे तु प्रतिवादिनोऽभावज्ञानाभावेऽपि वादिनोऽभावज्ञानसद्भावात्, न; वादिनो यदभावज्ञानं तत् साङ्केतिकम्, नाभावबलोत्पन्नम् आगमान्तरे प्रतिवादिनः अप्रामाण्याभावज्ञानवत्; न च साङ्केतिकादभावज्ञानादभा-
३५ वसिद्धिः, अन्यथाऽऽगमान्तरेऽपि ततोऽप्रामाण्याभावसिद्धिप्रसङ्गः; तन्नागमान्तरे वादिनोऽभावज्ञानाभावाद् गतिः। नापि प्रतिवादिनोऽभावज्ञानाभावात् तत्र तद्गतिः, वेदेऽपि तत्प्रसङ्गात्।

---

१ जैन-बौद्ध-स्मृत्यादिशास्त्रान्तरे। २ **सद्विषयत्वस्य विरोधात्** गु०। ३—**ज्ञाने जनकः** कां०, गु०। ४ पृ० २३ पं० २५। ५ प्रमाणपञ्चकाभावात् पौरुषेयत्वाभावज्ञानम्। ६ **प्रमेयाभावान्नाभावाभावगतिः** सा०, गं०। **प्रमेयाभावकार्यत्वात् तदभावाभावगतिः** हा०। ७—**ज्ञाभावाभावगतिः** भां०, कां०, चं०, डे०, गु०, आ०, मां०।—**ज्ञाभावगतिः** वि०, बृ०, भा०।—**ज्ञाभावानगतिः** वा०, पू०, बा०। ८ **कार्यभावस्य** वा०, पू०, मां०, बा०। **कार्यभावस्याकारणाभावव्यभिचारात्** सा०, गं०। ९—**ज्ञानासंसर्गी** वि०, बृ०। १० **तत्रापि वादिनोऽभाव**—वा०, पू०, बा०। ११ अत्र 'न प्रमेयाभावाभावः' इति पूरणीयम्। १२ जैनशास्त्रे। १३—**भावादगतिः** भां०, कां०, गु०। १४ प्रमेयाभावाभावगतिः।

अत एव न सर्वस्याभावज्ञानाभावात्, असिद्धश्च सर्वस्याभावज्ञानाभावः, तन्नात्मा प्रमाणपञ्चकविनिर्मुक्तोऽभावज्ञानजनकः। अथ वेदाऽनादिसत्त्वमभावज्ञानोत्थापकम्, नन्वत्रापि वक्तव्यम्—ज्ञातमज्ञातं वा तत् तदुत्थापकम्? न ज्ञातम्, तज्ज्ञानासम्भवात्, प्रत्यक्षादेस्तज्ज्ञापकत्वेनाप्रवृत्तेः; प्रवृत्तौ वा तत एव पुरुषाभावसिद्धेरभावप्रमाणवैयर्थ्यम्, अनादिसत्त्वसिद्धेः पुरुषाभावज्ञाननान्तरीयकत्वात्। नाप्यज्ञातं तत् तदुत्थापकम्, अगृहीतसमयस्यापि तत्र तदुत्पत्तिप्रसङ्गात् ५
केनचित् प्रत्यासत्ति-विप्रकर्षाभावात्; तन्न अनादिसत्त्वमपि तदुत्थापकमिति नाभावप्रमाणात् पुरुषाभावसिद्धिः। न चाभावप्रमाणस्य प्रामाण्यम्, प्राक् प्रतिषिद्धत्वात् प्रतिषेत्स्यमानत्वाच्च। अथ पर्युदासरूपमपौरुषेयत्वम्, किं तत् पौरुषेयत्वादन्यत् सत्त्वम्? तस्यास्माभिरप्यभ्युपगमात्। नाऽनादिसत्त्वम्, तद्ग्राहकप्रमाणाभावात्। तथाहि—न तावत् तद्ग्राहकं प्रत्यक्षम्, अक्षानुसारितया तथाव्यपदेशात्, अक्षाणां च अनादिकालसङ्गत्यभावेन तत्सम्बद्धतत्सत्त्वेनाप्यसंबन्धाद् न तत्पूर्वक- १०
प्रत्यक्षस्य तथाप्रवृत्तिः; प्रवृत्तौ वा तद्वद् अनागतकालसम्बद्धधर्मस्वरूपग्राहकत्वेनापि प्रवृत्तेर्न धर्मज्ञनिषेधः। तथा "सत्संप्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तम्, विद्यमानोपलम्भनत्वात्" [जैमिनीय सू० १-१-४] इति सूत्रम्,

"भविष्यति न दृष्टं च, प्रत्यक्षस्य मनागपि।
सामर्थ्यम्" [श्लो० वा० सू० २, श्लो० ११५] १५

इति च वार्त्तिकं व्याहतं स्यादिति न प्रत्यक्षात् तत्सिद्धिः। नाप्यनुमानात्, तस्याभावात्। अथ—

"अतीतानागतौ कालौ वेदकारविवर्जितौ।
कालत्वात्; तद्यथा कालो वर्त्तमानः समीक्ष्यते" ॥ [ ]

इत्यतोऽनुमानात् तत्सिद्धिः, न; अस्य हेतोरागमान्तरेऽपि समानत्वात्। किंच, किं यथाभूतो वेदकरणासमर्थपुरुषयुक्त इदानीं तत्कर्तृपुरुषरहितः काल उपलब्धः, अतीतोऽनागतो वा तथाभूतः २०
कालत्वात् साध्यते, उत अन्यथाभूतः? यदि तथाभूतस्तदा सिद्धसाध्यता। अथान्यथाभूतस्तदा सन्निवेशादिवदप्रयोजको हेतुः। तथाहि—यथाभूतानामभिनवकूप-प्रासादादीनां सन्निवेशादि बुद्धिमत्कारणपूर्वकत्वेन व्याप्तमुपलब्धं तथाभूतानामेव जीर्णकूप-प्रासादादीनां तद् बुद्धिमत्कारणत्वप्रयोजकत्वानन्यथाभूतानाम्। यदि पुनरन्यथाभूतस्याप्यतीतस्यानागतस्य कालस्य तद्रहितत्वं साधयेत् कालत्वम्, तदाऽन्यथाभूतानामपि भूधरादीनां सन्निवेशादि बुद्धिमत्कारणपूर्वकत्वं २५
साधयेत्; न तस्य सर्वज्ञगज्ज्ञातुः कर्तुश्चेश्वरस्य सिद्धेश्चान्यथाभूतकालभावसिद्धिरितीवाऽपौरुषेयत्वसाधनं च वेदानामनवसरम्। अथ तथाभूतस्यैवातीतस्यानागतस्य वा कालस्य तद्रहितत्वं साध्यते, न च सिद्धसाध्यता, अन्यथाभूतस्य कालस्याऽभावात्, न; 'अन्यथाभूतः कालो नास्ति' इति कुतः प्रमाणादवगतम्? यद्यन्यतः तत एवापौरुषेयत्वसिद्धिः किमनेन? अतोऽनुमानाच्चेत्, न; अन्यथाभूतकालाभावात् 'अतोऽनुमानात् तद्रहितत्वसिद्धिस्तत्सिद्धेस्तत्सिद्धिः' ३०
इतीतरेतराश्रयदोषप्रसङ्गात्। तदेवमन्यथाभूतकालस्याभावासिद्धेस्तथाभूतस्य तद्रहितत्वसाधने सिद्धसाधनमिति। नापि शब्दात् तत्सिद्धिः, इतरेतराश्रयदोषप्रसङ्गः। तदेवमन्यथा कथं वेदवचन-

---

१ पृ० २३ पं० ३६। २ 'नानुमानादेर्लिङ्गादिरहिते क्वचित्' इति पूर्तिः। ३ वेदकरणाऽसमर्थपुरुषयुक्ततया अन्यथाभूते अतीते अनागते च काले सत्यपि वेदकरणासमर्थपुरुषयुक्ततया वर्तमानसदृशे क्वचित् तस्मिन् तत्कर्तृरहितत्वस्य अस्माकमपि इष्टत्वात्। ४ अत्र 'बुद्धिमत्कारणत्वप्रयोजकम्, न त्वन्यथाभूतानाम्' इति अयं पाठः सुघटः। **बुद्धिमत्कारणत्वयोजकत्वानन्यथा**—चं०, पू०, मां०, बा०, वा०, बृ०। ५ अत्र अयं पाठः सुबोधः 'तेन तस्य सर्वज्ञगज्ज्ञातुः कर्तुश्चेश्वरस्य सिद्धेश्चान्यथाभूतकालाभावसिद्धिरिति अतीतादावपौरुषेयत्वसाधनं च वेदानामनवसरम्'। ६—**कालाभावसिद्धिरिति अतीतापौरुषेयत्वसाधनं च वेदानामनवसरम्** वि०। ७ **वेदातावसरम्**—गु०। **वेदानानवसरम्** मां०, वा०, हा०। "अवदातावसरम्" गु० टि०। ८ प्र० पृ० तृतीयं टिप्पणं द्रष्टव्यम्। ९ **प्रसङ्गात्** गु० बहिर्गतः पाठः। १० केवलम् अ० प्रतौ अयं पाठः। **अन्यथा दर्कं वेद**—भां०, कां०। **अन्यथावदर्कं वेद**—गु०। अत्र स्थले प्रमेयकमलमार्तण्डे लभ्यमानः पाठ एवम्—"न चाऽपौरुषेयत्वप्रतिपादकं वेदवाक्यमस्ति। नाऽपि विधिवाक्यादपरस्य परैः प्रामाण्यमिष्यते" पृ० ११५, पं० ६-७।

मस्ति? नापि विधिवाक्यादपरस्य भवद्भिः प्रामाण्यमभ्युपगम्यते; अभ्युपगमे वा पौरुषेयत्वमेव स्यात्। तथाहि तत्प्रतिपादकानि वेदवचांसि श्रूयन्ते—

"हिरण्यगर्भः समवर्त्तताग्रे" [ऋग्वेद अष्ट० ८, मं० १०, सू० १२१]
"तस्यैव चैतानि निःश्वसितानि" [बृह० उ० अ० २, ब्रा० ४, सू० १०]
"याज्ञवल्क्य इतिहोवाच" [बृह० उ० अ० २, ब्रा० ४, सू० १]

तत्र शब्दादपि तत्सिद्धिः। नाप्युपमानात् तत्सिद्धिः, यदि हि चोदनासदृशं वाक्यमपौरुषेयत्वेन किंचित् सिद्धं स्यात् तदा तत्सादृश्योपमानेन वेदस्यापौरुषेयत्वमुपमानात् सिद्धं स्यात्; न च तत् सिद्धम्, इत्युपमानादपि न तत्सिद्धिः। नाप्यर्थापत्तेः, अपौरुषेयत्वव्यतिरेकेणानुपपद्यमानस्य वेदे[2] कस्यचिद्धर्मस्याभावात्। नाऽप्रामाण्याभावलक्षणो धर्मोऽनुपपद्यमानो वेदस्यापौरुषेयत्वं परिकल्पयति, आगमान्तरेऽपि तस्य धर्मस्य भावादपौरुषेयत्वं स्यात्। न चासौ तत्र मिथ्या, वेदेऽपि तन्मिथ्यात्वप्रसङ्गात्। अथागमान्तरे पुरुषस्य कर्तुरभ्युपगमात् पुरुषाणां च सर्वेषामपि आगमादिषु रक्तत्वात् तद्[3]द्वेषजनितस्याऽप्रामाण्यस्य तत्र संभवाद् नाऽप्रामाण्याभावलक्षणो धर्मस्तत्र सत्यः, वेदे त्वप्रामाण्यजनकदोषास्पदस्य पुरुषस्य कर्तुरभावादप्रामाण्याभावलक्षणो धर्मः सत्यः। कुतः पुनस्तत्र पुरुषाभावो निश्चितः? अन्यतः प्रमाणादिति चेत्, तदेवोच्यताम्, किमर्थापत्त्या? अर्थापत्तितश्चेत्, न; इतरेतराश्रयदोषप्रसङ्गात्। तथाहि—अर्थापत्तितः पुरुषाभावसिद्धावप्रामाण्यासिद्धिः, एतत्सिद्धौ चार्थापत्तितः पुरुषाभावसिद्धिरितीतरेतराश्रयत्वम्। चक्रकचोद्यं चात्रापि। तथाहि—यद्यप्रामाण्याभावलक्षणो धर्मोऽनुपपद्यमानो वेदेऽपौरुषेयत्वं कल्पयति, आगमान्तरेऽप्यसौ धर्मस्तत् किं न कल्पयति? तत्र पुरुषदोषसम्भवादसौ धर्मो मिथ्या तेन तत्र तन्न कल्पयति। वेदे कुतः पुरुषाभावः? अर्थापत्तेश्चेत्, तदाऽऽगमान्तरे[4] सौ स्याद् इत्यादि तदेवावर्त्तत इति चक्रकानुपरमः। नाप्यतीन्द्रियार्थप्रतिपादनलक्षणो धर्मोऽनुपपद्यमानो वेदे पुरुषाभावं कल्पयति, आगमान्तरेऽपि समानत्वात्। न चाप्रामाण्याभावे पुरुषाभावः सिध्यति, कार्याभावस्य कारणाभावं प्रति व्यभिचारित्वेनान्यथानुपपन्नत्वासम्भवात्। अ[5]प्रतिबद्धासमर्थस्य पुरुषस्याभावसिद्धावपि न सर्वथा पुरुषाभावसिद्धिः, पुरुषमात्रस्यापि निराकरणादिष्टसिद्धिश्च अप्रामाण्यक[6]रणस्य तर्क[7]र्तृत्वेनास्माकमप्यनिष्टत्वात्। नापि प्रामाण्यधर्मोऽन्यथाऽनुपपद्यमानो वेदे पुरुषाभावं साधयति, आगमान्तरेऽपि तुल्यत्वात्। शेषमत्र चिन्तितमिति न पुनरुच्यते।

[पूर्वपक्षः—शब्दनित्यत्वसाधनम्]

परार्थवाक्योच्चारणान्यथाऽनुपपत्तेस्तत्प्रतिपत्तिरिति चेत्, अयमर्थः-स्वार्थेनावगतसंबन्धः शब्दः स्वार्थं प्रतिपादयति, अन्यथाऽगृहीतसंकेतस्यापि पुंसस्ततो वाच्यार्थप्रतिपत्तिः स्यात्। स च संबन्धावगमः प्रमाणत्रयसंपाद्यः। तथाहि—यदैको वृद्धोऽन्यस्मै[8] प्रतिपन्नसङ्गतये प्रतिपादयति—'देवदत्त! गामभ्याज एनां शुक्लां दण्डेन' इति—तदा पार्श्वस्थितोऽभ्युत्पन्नसङ्केतः शब्दाऽर्थौ प्रत्यक्षतः प्रतिपद्यते, श्रोतुश्च तद्विषयक्षेपणादिचेष्टादर्शनाद् अनुमानतो गवादिविषयां प्रतिपत्तिमवगच्छति, तत्प्रतीत्यन्यथाऽनुपपत्त्या शब्दस्य च तत्र वाचिकां शक्तिं स एव परिकल्पयति। स[9] च प्रमाणत्रयसंपाद्योऽपि सङ्गत्यवगमो न सकृद्वाक्यप्रयोगात् संभवति, वाक्यात् संमुग्धार्थप्रतिपत्ताववयवशक्तेरवापाऽपोद्धा[10]राभ्यां निश्चयात्। न चास्थिरस्य पुनः पुनरुच्चारणं संभवति, तदभावे नान्वय-व्यतिरेकाभ्यां वाचकशक्त्यवगमः, तदसत्त्वाद् न प्रेक्षावद्भिः परावबोधाय वाक्यमुच्चार्यम्, उच्चार्यते च परावबोधाय वाक्यम्; अतः परार्थवाक्योच्चारणान्यथानुपपत्त्या निश्चीयते धूमादिरिव

१ ग्रन्थाग्रम्-१२००। २ **सिद्धवेदे** अ०। **सिद्धे वेदे** आ०। ३ अत्र 'तद्दोषजनितस्याऽप्रामाण्यस्य' इति पाठः सुयोग्यः। ४-**गमान्तरे समानमित्यादि** वा०, पू०, बा० विना सर्वत्र। ५ सः-पुरुषाभावः-स्यात्। ६ **प्रतिबद्धासमर्थस्य** वा०, पू०, बा०। ७-**कारणस्य** वि०। ८ अप्रामाण्यकारणस्य कस्यचित् पुरुषस्य वेदकर्तृत्वेन। ९ प्रत्यक्ष-अनुमान-अर्थापत्तिरूपप्रमाणत्रयसंपाद्यः, एतच्च 'गामभ्याज एनां शुक्लां दण्डेन' अत्र वाक्ये एव दर्शयति। १० **स एव** गु०। ११ **आवापो-द्धाराभ्याम्** वि०। **अवापो-द्धाराभ्याम्** आ०, चं०, डे०, कां०। **आवापो-द्वापाभ्याम्** भा०, गु०, सा० गं०।

गृहीतसम्बन्धोऽर्थप्रतिपादकः शब्दो नित्यः। तदुक्तम्-"दर्शनस्य परार्थत्वान्नित्यः शब्दः[1]" इति। अथ मतम्-भूयो भूय उच्चार्यमाणः शब्दः सादृश्यादेकत्वेन निश्चीयमानोऽर्थप्रतिपत्तिं विदधाति, न पुनर्नित्यत्वात्; तन्न किंचिन्नित्यत्वपरिकल्पनेन प्रमाणबाधितेन, तद[2]युक्तम्; सादृश्येन शब्दादर्थाप्रतिपत्तेः—नहि सदृशतया शब्दः प्रतीयमानो वाचकत्वेनाध्यवसीयते किन्त्वेकत्वेन। तथा ह्येवं प्रतिपत्तिः—'य एव संबन्धग्रहणसमये मया प्रतिपन्नः शब्दः स एवायम्' इति। किंच, सादृश्यादर्थप्रतिपत्तौ भ्रान्तः शब्दादर्थप्रत्ययः स्यात्। न ह्यन्यस्मिन् गृहीतसङ्केतेऽन्यस्मादर्थप्रत्ययोऽभ्रान्तः, यथा गोशब्दे गृहीतसंबन्धेऽश्वशब्दाद् गवार्थप्रत्ययः। न च भूयोऽवयवसामान्ययोगस्वरूपं सादृश्यं शब्दे संभवति, विशिष्टवर्णात्मकत्वाच्छब्दस्य; वर्णानां च निरवयवत्वात्। न च समानस्यान[3]-करणजन्यत्वलक्षणं सादृश्यं प्रतिपत्तुं शक्यम्, परकीयस्थान-करणादेरतीन्द्रियत्वेन तज्जन्य(न्यत्व)स्याप्य[4]प्रतिपत्तेः। न च गत्वादिविशिष्टानां गादीनां वाचकत्वमभ्युपगन्तुं युक्तम्, गत्वादिसामान्यस्याभावात्; तदभावश्च गादीनां नानात्वायोगात्, तदयोगश्च प्रत्यभिज्ञया गादीनामेकत्वनिश्चयात्। अत एव न सामान्यनिबन्धना गादिषु प्रत्यभिज्ञा, भेदनिबन्धनस्य सामान्यस्यैव गादिष्वभावात् कुतस्तन्निबन्धना गादिषु प्रत्यभिज्ञा? किंच, किं गत्वादीनां वाचकत्वम्, उत गादिव्यक्तीनाम्? न तावद् गत्वादीनाम्, नित्यत्वेनास्मदभ्युपगमाश्रयणप्रसङ्गात्। नापि गादीनां वाचकत्वम्, विकल्पानुपपत्तेः। तथाहि-किं गत्वादिविशिष्टं व्यक्तिमात्रं वाचकम्, उत गादिव्यक्तिविशेषः? तत्र न तावद् गादिव्यक्तिविशेषः, सामान्ययुक्तस्यापि तस्यानन्वयात्; अनन्विताच्च नार्थप्रतिभासः। नापि गादिव्यक्तिमात्रम्, यतस्तदपि व्यक्तिमात्रं किं सामान्यान्तर्भूतम्, उत व्यक्त्यन्तर्भूतम् इति कल्पनाद्वयम्। यदि सामान्यान्तःपाति तदा पुनरपि नित्यस्य वाचकत्वम् इत्यस्मत्पक्षप्रवेशः। अथ व्यक्त्यन्तर्भूतमिति पक्षस्तदाऽनन्वयदोषस्तदवस्थित इति। किंच, यद्यनित्यः शब्दस्तदाऽऽलम्बनरहिताच्छब्दप्रतिभासमात्रादर्थप्रतिपत्तिरभ्युपगता स्यात्। तथाहि—शब्दश्रवणम्, ततः सङ्केतकालानुभूतस्मरणम्, ततः तत्सदृशत्वेनाध्यवसायः, न चैतावन्तं कालं शब्दस्यावस्थानं भवत्परिकल्पनया, तद् वाचकशून्यात् तत्प्रतिभासादर्थप्रतिपत्तिः स्यात्। अतोऽर्थप्रतिभासाभावप्रसङ्गाद् नानित्यत्वं शब्दस्य॥

[उत्तरपक्षः—शब्दनित्यत्वनिरसनम्]

अत्र प्रतिविधीयते, यदुक्तं[5]'दर्शनस्य परार्थत्वान्नित्यः शब्दः', अनित्यत्वे पुनः पुनरुच्चारणासंभवाद् न समयग्रहः, तदभावे शब्दादर्थप्रतिपत्तिर्न स्यादिति परार्थशब्दोच्चारणान्यथाऽनुपपत्तेर्नित्यः शब्दः' तदयुक्तम्; अनित्यस्यापि धूमादेरिवावगतसंबन्धस्यार्थप्रत्यायकत्वसंभवात् शब्दस्य; न हि धूमादीनामप्येकैव व्यक्तिरङ्गयादिप्रतिपादिका किन्त्वन्यैव। न चानाश्रितसमानपरिणतीनां सर्वधूमादिव्यक्तीनामर्वाग्दृशा स्वसाध्येन संबन्धः शक्यो ग्रहीतुम्, असाधारणरूपेण सर्वधूमादिव्यक्तीनामदर्शनात्। न च लिङ्गाऽनुमेयसामान्ययोस्तत्र संबन्धग्रहणम्, शब्देऽप्यस्य न्यायस्य समानत्वात्। न च 'धूमत्वाद् मया प्रतिपन्नोऽग्निः' इति प्रतिपत्तिः किन्तु धूमादिति। सा च लिङ्गाऽनुमेययोः सामान्यविशिष्टव्यक्तिमात्रयोः संबन्धग्रहणे सति सामान्यविशिष्टान्निव्यक्त्यवगमे युक्ता, न च धूमसामान्यादग्निसामान्यस्य। यथा च सामान्यविशिष्टस्य विशेषस्य अनुमेयत्वम् वाच्यत्वं वाऽभ्युपगमनीयम्—अन्यथा सामान्यमात्रस्य दाहाद्यर्थक्रियाऽजनकत्वे ज्ञानाद्यर्थक्रियायाश्च सामान्यसाध्यायास्तदैव समुद्भूतेर्दाहाद्यर्थिनामनुमेय-वाच्यप्रतिभासात् प्रवृत्त्यभावेन लिङ्गि-वाच्यप्रतिभासयोरप्रामाण्यप्रसङ्गः—तथा धूम-शब्दयोस्तद्विशिष्टयोः तत्त्वमभ्युपगन्तव्यम्, न्यायस्य समानत्वात्। न चानुमेयत्व-वाच्यत्वसामान्यं व्यक्तिव्यतिरेकेणानुपपद्यमानं तां लक्षयतीति लक्षणया प्रवृत्तिर्भविष्यतीति वक्तुं शक्यम्, क्रमप्रतीतेरभावात्-नहि लिङ्ग-वाचकज-

१ "वेदस्य" गु० टि०। २ "नित्यस्तु स्याद् दर्शनस्य परार्थत्वात्" मीमांसादर्शने १-१-१८। ३ **तदप्ययुक्तम्** भां०। ४ स्थानानि उच्चारणस्थानानि, करणानि उच्चारणप्रयत्नाः। ५ **तज्जन्यतस्याऽपि** डे०, चं-पू०, आ०। ६ पृ० ३२ पं० ३६। ७ (वा) "समुच्चायकः गु० भा० टि०। ८ **वाच्यत्वं सामान्यं** वा०, पू०, मां०, बा०।

नितलिङ्गि-वाच्यप्रतिभासे प्राक् सामान्यप्रतिभासः पश्चाद् व्यक्तिप्रतिभास इति क्रमप्रतीत्यनुभवः। 'न च लक्षणा संभवति'इति प्रपञ्चतः प्रतिपादयिष्याम इत्यास्तां तावत्। एवं सामान्यविशिष्ट-धूमादिलिङ्गस्य गमकत्ववद् गत्वादिविशिष्टगादिवाचकत्वे न किञ्चिन्नित्यत्वेन, तदभावेऽपि धूमादिभ्य इवार्थप्रतिपत्तिसंभवात्। अथ धूमादौ सामान्यस्य संभवात् पूर्वोक्तेन न्यायेन गमकत्वमस्तु, शब्दे तु न किंचित् सामान्यमस्ति यद्विशिष्टस्य शब्दस्य वाचकभावः। शब्दत्वमिति चेत्, न; गोशब्दस्य शब्दत्वविशिष्टस्य स्ववाच्ये न संबन्धग्रहः। न च शब्दत्वमपि गादिषु विद्यते गोशब्दत्व-गत्वादीनां तु सत्त्वे का कथा। शब्दत्वादीनां त्वभावो वर्णान्तरग्रहणे वर्णान्तरानुसन्धानाभावात्; यत्र सामान्यमस्ति तत्रैकग्रहणेऽपरस्यानुसन्धानं दृष्टम् यथा शाबलेयग्रहणे बाहुलेयस्य, वर्णान्तरे च गादौ गृह्यमाणे न कादीनामनुसन्धानम्, तन्न तत्र शब्दत्वादिसंभवः, एतदयुक्तम्; यतः किमिदमनुसन्धानं भवतोऽभिप्रेतं यद् वर्णान्तरे गृह्यमाणे वर्णान्तरस्य नास्तीति प्रतिपाद्यते? यदि गादौ वर्णान्तरे गृह्यमाणे 'अयमपि वर्णः' इत्यनुसन्धानाभावः, तदयुक्तम्; एवंभूतानुसन्धानस्यानुभूयमानत्वेनाभावासिद्धेः। अथ गादौ वर्णान्तरे गृह्यमाणे 'अयमपि कादिः' इत्यनुसन्धानाभावान्न सामान्यसद्भावस्तदाऽल्पमिदमुच्यते, शाबलेयादावपि व्यक्त्यन्तरे गृह्यमाणे 'अयमपि बाहुलेयः' इत्यनुसन्धानाभावाद् गोत्वस्याप्यभावः प्रसक्तः। अथ तत्र 'गौर्गौः' इत्यनुगताकारप्रत्ययस्याबाधितस्य सद्भावाद् न गोत्वासत्त्वम्, एतद् गादिष्वपि समानम्—तत्रापि 'वर्णो वर्णः' इत्यनुगताकारस्याबाधितस्य प्रत्ययस्य सद्भावात् कथं न वर्णेषु वर्णत्वस्य, गादिषु गत्वादेः, शब्दे शब्दत्वस्य संभवो निमित्तस्य समानत्वात्? तथाहि—समानाऽसमानरूपासु व्यक्तिषु क्वचित् 'समाना' इति प्रत्ययोऽन्वेति, अन्यत्र व्यावर्त्तते; यत्र च प्रत्ययानुवृत्तिस्तत्र सामान्यव्यवस्थानान्यत्र, सा च प्रत्ययानुवृत्तिर्गादिष्वपि समाना इति कथं न तत्र सामान्यव्यवस्था? यदि पुनर्गादिष्वनुगताकारप्रत्ययसत्त्वेऽपि न गत्वादिसामान्यमभ्युपगम्यते तर्हि शाबलेयादिष्वपि न गोत्वसामान्यमभ्युपगमनीयम्, न हि तत्रापि तथाभूतप्रत्ययानुवृत्तिमन्तरेण सामान्याभ्युपगमेऽन्यद् निमित्तमुत्पश्यामः। अक्षजन्यत्वम् अबाधितत्वादि च प्रत्ययस्योभयत्रापि विशेषः समानः। यदि चानुगताऽबाधिताऽक्षजप्रत्ययविशेषविषयत्वे सत्यपि गत्वादेरभावः, गादेरपि व्यावृत्ततथाभूतप्रत्ययविषयस्याभावः स्यात्, ततश्च कस्य दर्शनस्य परार्थत्वान्नित्यत्वं साध्येत? अथ गादौ श्रोत्रग्राह्यत्वनिमित्तोऽनुगतः प्रत्ययो न सामान्यनिमित्तः, तदप्ययुक्तम्; श्रोत्रग्राह्यत्वस्यातीन्द्रियत्वेनानवगमे निमित्ताग्रहणे तद्ग्रहणनिमित्तानुगतप्रत्ययस्य गादावभावप्रसङ्गात्। न च प्रत्यभिज्ञया गादीनामेकत्वसिद्धेर्भेदनिबन्धनस्य तेषु गत्वादिसामान्यस्याभाव इति युक्तमभिधानम्, गाद्येकत्वग्राहिकाया लूनपुनर्जातकेश-नखादिष्विव तस्या भ्रान्तत्वात्। अथ दलितपुनरुदिते नखशिखरादौ प्रत्यभिज्ञाया बाधितत्वेन भ्रान्तत्वं न पुनर्गादौ, ननु तत्र प्रत्यभिज्ञायाः किं बाधकम्? अन्तरालेऽदर्शनमिति चेत्, ननु गादावप्यन्तरालेऽदर्शनं समानम्। अथ दलितपुनरुदिते नखशिखरादावभावनिमित्तमन्तरालेऽदर्शनम्, न गादावभावनिमित्तम्; किं पुनरत्रादर्शननिमित्तमिति वक्तव्यम्। किमत्र वक्तव्यम् अभिव्यक्तेरभावः।

अथ केयमभिव्यक्तिर्यदभावादन्तराले गाद्यप्रतिपत्तिः? वर्णादिसंस्कारः। अथ कोऽयं वर्णादिसंस्कारः? आत्म-मनःसंयोगपूर्वकप्रयत्नप्रेरितेन कोष्ठ्येन वायुना तालवादिसंयोग-विभागवशात् प्रतिनियतवर्णाद्यभिव्यञ्जकत्वेन भेदमासादयंता[1] वक्त्रमुखसमीपगतैः[2] स्पर्शनेन्द्रियप्रत्यक्षेण, तद्देशस्य च तूलादेः प्रेरणात् कार्यानुमानेन, देशान्तरे शब्दोपलब्ध्यन्यथाऽनुपपत्त्या च प्रतीयमानेन नित्यसर्वगतस्य गकारादेर्वर्णस्य, श्रोत्रस्य, उभयस्य चाऽऽवारकाणां वायूनामपनयनं यथाक्रमं वर्णसंस्कारः, श्रोत्रसंस्कारः, उभयसंस्कारश्चेति चेत्, ननु 'वर्णसंस्कारोऽभिव्यक्तिः' इत्यभ्युपगमे आवारकवायुभिर्विज्ञानजननशक्तिप्रतिघाताद् वर्णोऽपान्तराले ज्ञानं न जनयतीति अभ्युपगन्तव्यम्; सा च शक्तिर्वर्णस्वरूपात् कथञ्चिदभिन्नाऽभ्युपगन्तव्या, एकान्तभेदे ततो वर्णादनुपकारे 'तस्य शक्तिः' इति संबन्धानुपपत्तेः; उपकारे वा तदुपकारिका अपरा शक्तिरभ्युपगन्तव्या, तस्या अपि ततो भेदेऽनवस्था; अभेदे प्रथमैव शक्तिः कथञ्चिदभिन्नाऽभ्युपगमनीया; एवं हि पारम्पर्यपरिश्रमः परिहृतो भवति। तथाभ्युपगमे च तच्छक्तिप्रतिघाते वर्णस्वरूपमेव तदभिन्नमावारकेण प्रतिहतं भवति; ततश्च कथं नानित्यत्वम्? व्यञ्जकेनापि शक्तिप्रतिबन्धापनयनद्वारेण विज्ञानजननशक्त्याविर्भावेन वर्णस्वरूपमेवाविर्भावितं भवतीति कथं न वर्णस्य व्यञ्जकजन्यत्वम्? व्यञ्जकावासविज्ञानजननस्वरूपो वर्णो यदि तेनैव स्वरूपेणावतिष्ठते तदा सर्वदा तदवभासिज्ञानप्रसङ्गः, सर्वदा तज्जननस्वभावस्य भावात्; 'सहकार्यपेक्षा च नित्यस्य न भवति' इति प्रतिपादयिष्यामः। अजनने वा न तत्स्वभावतेति प्रथममपि ज्ञानं न जनयेत्, यो हि यन्न जनयति न स तज्जननस्वभावः, यथा शालिबीजं यवाङ्कुरमजनयन्न तज्जननस्वभावम्, न जनयति च वर्णो व्यञ्जकाभिमतवाय्वभिव्यक्तोऽपि सर्वदा स्वप्रतिभासिज्ञानमिति न सर्वदा तज्जननस्वभावः। तत्स्वभावाभावे चोत्तरकालं तदेवानित्यत्वमिति व्यर्थमभिव्यक्तिकल्पनम्। अपि च, वर्णाभिव्यक्तिपक्षे कोष्ठ्येन वायुना यावद्देशमभिसर्पता यावान् वर्णविभागोऽपनीतावरणः कृतस्तावत एव श्रवणं स्यात् न समस्तस्य वर्णस्येति खण्डशस्तस्य प्रतिपत्तिः स्यात्। अथ वर्णस्य निरवयवत्वादेकत्रोत्सारितावरणः सर्वत्रापनीतावरण इति नायं दोषस्तर्हि निर्विभागत्वादेवैकत्रानपनीतावरणः सर्वत्र तथेति मनागपि श्रवणं न स्यात्। सर्वत्र सर्वात्मना वर्णस्य परिसमाप्तत्वात् सामस्त्येन श्रवणाभ्युपगमे वर्णस्याव्यापकत्वम् अनेकत्वं च दुर्निवारम्। यदि चैकत्राभिव्यक्तो निर्विभागत्वेन सर्वत्राभिव्यक्तस्तदा सर्वदेशावस्थितैस्तस्य श्रवणं स्यात्। यदप्युच्यते—यथैवोत्पद्यमानोऽयमुत्पत्तिवादिनां पक्षे दिगादीनामविभागादविभक्तदिगादिसंबन्धित्वेन स्वरूपेणासर्वगतोऽपि सर्वान् प्रति भवन्नपि न सर्वैरवगम्यते किन्तु यच्छरीरसमीपवर्त्ती वर्ण उत्पन्नस्तेनैवासौ गृह्यते तथाऽस्मत्पक्षेऽपि स्वतः सर्वगतोऽपि वर्णो न सर्वैर्दूरस्थैरवगम्यते किन्तु यच्छरीरसमीपस्थोऽभिव्यक्तस्तैरेवेति व्यञ्जकध्वनिसन्निधानाऽसन्निधानकृतं वर्णस्य श्रवणम् अश्रवणं च युक्तम्। एतदेवाह—

"यथैवोत्पद्यमानोऽयं न सर्वैरवगम्यते ॥
दिग्देशाद्यविभागेन सर्वान् प्रति भवन्नपि।
तथैव यत्समीपस्थैर्नादैः स्याद् यस्य संस्कृतिः ॥
तैरेव गृह्यते शब्दो न दूरस्थैः कथञ्चन"। इति, [श्लो० वा० सू० ६, श्लो० ८४-८६]

तदपि प्रलापमात्रम्; यतो यदि व्यञ्जका वायवो यत्रैव संनिहितास्तत्रैव वर्णसंस्कारं कुर्युस्तदा स्यादप्येतत्, किन्तु तथाभ्युपगमे वर्णस्य सावयवत्वम् अनभिव्यक्तस्वरूपादभिव्यक्तस्वरूपस्य च भेदादनेकत्वं च स्यात्। सर्वात्मना तु संस्कारे—

"यच्छरीरसमीपस्थैर्नादैः स्याद् यस्य संस्कृतिः।
तैर्यथा श्रूयते शब्दस्तथा दूरगतैर्न किम्"? ॥ [ ]

उत्पत्तिपक्षे तु अव्यापकत्वाद् यत्समीपवर्त्ती वर्ण उत्पन्नस्तेनैवासौ गृह्यते न दूरस्थैरिति युक्तम्। "दिग्देशाद्यविभागेन"इति चातीवासङ्गतम्, अविभागस्य कस्यचिद् वस्तुनोऽसंभवेनानभ्युपगमात्। किंच, व्यापकत्वेन वर्णानामेकवर्णाऽऽवरणापाये समानदेशत्वेन सर्वेषामनावृतत्वाद् युगपत् सर्ववर्णश्रुतिश्च स्यात्। अथापि स्यात् प्रतिनियतवर्णश्रवणान्यथाऽनुपपत्त्या व्यञ्जकभेदसिद्धेः प्रतिनियतैर्व्यञ्जकैः प्रतिनियताऽऽवारकनिराकरणद्वारेण प्रतिनियतवर्णसंस्काराद् न युगपत्सर्ववर्णश्रुतिदोषः, स्यादेतद् यदि व्यञ्जकानां वायूनां भेदः स्यात्, स चावारकभेदनिबन्धनः, अन्यथा तदभेदेऽभिन्नावारकापनेतृत्वेन कुतो व्यञ्जकभेदः? आवारकभेदोऽपि वर्णदेशभेदनिबन्धनः, अन्यथा समानदेशानां यदेवैकस्यावारकं तदेवापरस्यापि इत्यावारकभेदो न स्यात्। देशभेदोऽपि वर्णानामव्यापकत्वे सति स्यात्, व्यापकत्वे तु परस्परदेशपरिहारेण वर्णानामवस्थानाभावान्न देशभेदः। न चाव्यापकत्वं वर्णानामभ्युपगम्यते भवद्भिरिति न देशभेदः, तदभावान्नावारकभेदः, तदसत्त्वान्न व्यञ्जकभेद इति युगपत्सर्ववर्णश्रुतिरिति तदवस्थो दोषः। नाप्यावारकाणां न वर्णापि-

---

१ ग्रन्थाग्रम् १३००। २-यता बहुमुखसमीपगतैः वा०, पू०, बा०।

१-शस्तत्प्रतिप-गु०। २ ईदृशस्तु पाठः वा०, पू०, बा०, चं-ल० प्रतिष्वेव, अन्यत्र सर्वत्र—काणां वर्णपिधायक-इति। किन्तु डे०, भा० प्रतौ 'पूर्वोक्तदोषाभाव इति वक्तुं शक्यम्' इत्यस्य स्थाने 'पूर्वोक्तदोषाभाव इति वक्तुं न शक्यम्' इति पाठः।

धायकत्वेनावारकत्वं किन्तु वर्णे दृश्यस्वभावखण्डनात्; व्यञ्जकानामपि न तदावारकापनेतृत्वेन व्यञ्जकत्वं किन्तु वर्णे दृश्यस्वभावाधानादिति पूर्वोक्तदोषाभाव इति वक्तुं शक्यम्, यत एवमभिधाने स्ववाचैव तस्य परिणामित्वमभिहितं स्यादित्यविप्रतिपत्तिप्रसङ्गः; तन्न वर्णसंस्कारोऽभिव्यक्तिरिति पक्षो युक्तः। नापि श्रोत्रसंस्कारोऽभिव्यक्तिरिति पक्षो युक्तः, तस्मिन्नपि पक्षे सकृत् संस्कृतं श्रोत्रं सर्ववर्णान् युगपत् शृणुयात्; नह्यञ्जनादिना संस्कृतं चक्षुः संनिहितं स्वविषयं किञ्चित् पश्यति किञ्चिन्नेति दृष्टम्। अथ व्यञ्जकानां वायूनां भिन्नेषु कर्णमूलावयवेषु वर्त्तमानानां संस्काराधायकत्वेनार्थापत्त्या प्रतिनियतवर्णश्रवणान्यथाऽनुपपत्तिलक्षणया प्रतिनियतवर्णग्राहकत्वेन संस्काराधायकत्वस्य प्रतीतेर्नैकवर्णग्राहकत्वेन संस्कृतं श्रोत्रं सर्ववर्णान् युगपद् गृह्णातीति। तथाहि—वायवीयशब्दपक्षे यथा गकारादेर्निष्पत्त्यर्थं प्रयत्नप्रेरितो वायुर्नान्यं वर्णमुत्पादयति तथाऽसत्पक्षेऽप्यन्यवर्णग्राहकश्रोत्रसंस्कारे समर्थो नान्यवर्णग्राहकश्रोत्रसंस्कारं विधास्यति। येषां तु ताल्वादिसंयोग-विभागनिमित्तः शब्द इति पक्षस्तेषां यथाऽन्यगकारादिजनकैः संयोग-विभागैर्नान्यो वर्णो जन्यते तथाऽसत्पक्षेऽपि नान्यवर्णग्राहकश्रोत्रसंस्काराधायकव्यञ्जकप्रेरकैरन्यवर्णग्राहकश्रोत्रसंस्काराधायकवायुप्रेरणं क्रियत इत्युत्पत्त्य-भिव्यक्तिपक्षयोः कार्यदर्शनान्यथाऽनुपपत्त्या समः सामर्थ्यभेदः प्रयत्न-विवक्षयोः सिद्धः। अतश्च यदुक्तं कैश्चित् "समानेन्द्रियग्राह्येष्वर्थेषु व्यञ्जकेषु न दृष्टो नियमः" इति, एतदयुक्तम्; अर्थापत्तेर्दृष्टान्तानपेक्षत्वात्, दृष्टश्च तैलाभ्यक्तस्य मरीचिभिः, भूमेस्तूदकसेकेन गन्धाभिव्यक्तिभेद इति कथं न व्यञ्जकनियमः? तदुक्तम्—

"व्यञ्जकानां हि वायूनां भिन्नावयवदेशता ॥
जातिभेदश्च तेनैव संस्कारो व्यवतिष्ठते।
अन्यार्थं प्रेरितो वायुर्यथाऽन्यं न करोति वैः ॥
तथाऽन्यवर्णसंस्कारशक्तो नान्यं करिष्यति।
अन्यैस्ताल्वादिसंयोगैर्नान्यो वर्णो यथैव हि ॥
तथा ध्वन्यन्तराक्षेपो न ध्वन्यन्तरसारिभिः।
तस्मादुत्पत्त्य-भिव्यक्तयोः कार्यार्थापत्तितः समः ॥
सामर्थ्यभेदः सर्वत्र स्यात् प्रयत्न-विवक्षयोः"। इति, [श्लो० वा० सू० ६, श्लो० ७९—८३]

एतदसंबद्धम्; इन्द्रियसंस्कारकाणां व्यञ्जकानां समानदेश-समानेन्द्रियग्राह्येष्वर्थेषु प्रतिनियतविषयग्राहकत्वेनेन्द्रियसंस्कारकत्वस्य कदाचिददर्शनात्; नह्यञ्जनादिना संस्कृतं चक्षुः सन्निहितं स्वविषयं किञ्चित् पश्यति, किञ्चिन्नेत्युपलब्धम्। तथा बाधिर्यनिराकरणद्वारेण वैलातैलादिना संस्कृतं श्रोत्रं स्वग्राह्यान् गकारादीन् वर्णानविशेषेणैवोपलभमानमुपलभ्यते; एवं घ्राणादीनीन्द्रियाणि स्वव्यञ्जकैः संस्कृतानि स्वविषयग्राहकत्वेनाविशेषेण प्रवर्त्तमानानि प्रतीयन्त इति प्रकृतेऽप्ययमेव न्यायो युक्तः। यश्च तैलाभ्यक्तस्य मरीचिभिः, भूमेस्तूदकसेकेन गन्धाभिव्यक्तिरिति व्यञ्जकं प्रति नियमो दर्शितः सोऽपि विषयसंस्कारकव्यञ्जकप्रतिनियमः नेन्द्रियसंस्कारकव्यञ्जकप्रतिनियमः। विषयसंस्कारकेष्वप्ययं नियमो भिन्नदेशेषु दर्शितः न समानदेश-समानेन्द्रियग्राह्येषु। तत इन्द्रियसंस्कारकेषु समानेन्द्रियग्राह्ये समानदेशेऽर्थे प्रतिनियतविषयग्राहकत्वेन इन्द्रियान्तरविषयग्राहकत्वेन च इन्द्रियसंस्कारकत्वस्यादर्शनाद् अत्यन्तासंभविनो नार्थापत्तिसामर्थ्यात् कल्पना युक्ता; कारकाणां तु प्रतिनियतकार्यकर्तृत्वस्यान्यत्राप्युपलब्धेः प्रतिनियतवर्णोत्पादनसामर्थ्यभेदस्य ताल्वादिष्वर्थापत्तितः कल्पना संभाव्यत एव। किंच, इन्द्रियं संस्कुर्वद् व्यञ्जकं यदि यथावस्थितवर्णग्राहकत्वेनेन्द्रियसंस्कारं विदध्यात् तदा सकलनभस्तलव्यापिनो गादेः प्रतिपत्तिः स्यात्, न चासौ दृष्टा; अथान्यथा, न तर्हि वर्णस्वरूपप्रतिभास इति न तत्स्वरूपसिद्धिः; तन्न श्रोत्रसंस्कारोऽप्यभिव्यक्तिः। नाप्युभयसंस्कारोऽभिव्यक्तिः, प्रत्येकपक्षोक्तदोषप्रसङ्गात्। न चान्यप्रकारः संस्कारोऽभिव्यक्तिः संभवति, तद् अभिव्यक्तेरसंभवाद् नानभिव्यक्तिनिमित्तोऽन्तराले गादीनाम-

१ च कां०, गु०। २ बला-गु०। ३ प्र० पृ० पं० १६।

नुपलम्भः किन्तु दलितनखशिखरादिष्विवाभावनिमित्त इति लूनपुनर्जातनखादिष्विवापान्तरालादर्शनेन गादिप्रत्यभिज्ञाया बाध्यमानत्वादप्रामाण्यम्।

अथ खण्डितपुनरुदितकरुहसमूहविषयाया अपि प्रत्यभिज्ञायास्तत्सामान्यविषयत्वेन नाप्रामाण्यम्, तस्यास्तद्विषयतयाऽबाध्यमानत्वात्; न चायं प्रकारो गादिविषयप्रत्यभिज्ञायाः सम्भवति, तथाभूतकेशादिष्विव गादिभेदविषयाबाधितप्रतिभासाभावेन तद्भेदासिद्धौ[1] समानानां भावः सामान्यम्' इति कृत्वा तत्र सामान्यस्यैवासम्भवात्, असदेतत्; गादिष्वपि 'पूर्वोपलब्धगादेः सकाशाद् अयमल्पः महान् कर्कशः मधुरो वा गादिः' इत्यबाधिताक्षजप्रतिभाससद्भावेन भेदनिबन्धनसामान्यसम्भवस्य न्यायानुगतत्वात्। न च यथा तुरगजवस्य पुरुषेऽध्यारोपात् 'पुरुषो याति' इति प्रत्ययः व्यपदेशश्च तथा व्यञ्जकध्वनिगतस्याल्प-कर्कशादेर्गादावुपचारात् तथाप्रत्ययः व्यपदेशश्चेत्यभ्युपगन्तुं शक्यम्, तथाऽभ्युपगमे वाहीके गोप्रत्ययवद् गादिप्रत्ययस्य भ्रान्तत्वेन गादिस्वरूपासिद्धिप्रसङ्गात्; नहि भ्रान्तप्रत्ययसंवेद्या द्विचन्द्रादयः स्वरूपसंगतिमनुभवन्ति। न चाल्प-महत्त्वप्रत्यययोर्भ्रान्तत्वे अल्प-महत्त्वे एव गादिविषये अव्यवस्थितस्वरूपे न पुनर्गादिको वर्णः, तत्प्रत्ययस्याभ्रान्तत्वात्; न चान्यविषयप्रत्ययस्य भ्रान्तत्वेऽन्यस्य तथाभावोऽतिप्रसङ्गादिति वक्तुं युक्तम्, यतो यदल्प-महत्त्वादिधर्मव्यतिरिक्तस्य गादेर्द्वित्वरहितस्येव निशीथिनीनाथस्य प्रत्ययविषयत्वं स्यात् तदैव तदू युज्येतापि वक्तुम्; न च स्वप्नेऽपि तद्धर्मानध्यासितो गादिः केनचित् प्रतीयत इति कथं तस्य महत्त्वादिधर्मरहितस्य स्वरूपव्यवस्था? अत एव महत्त्वादिधर्मयुक्तस्य सर्वदा प्रतीयमानत्वादू गादेर्न तद्धर्मयुक्ततया प्रतीयमानस्य उपचरितप्रत्ययविषयता। तदुक्तम्—

"यो ह्यन्यरूपसंवेद्यः संवेद्येतान्यथाऽपि वा।
स भ्रान्तो न तु तेनैव यो नित्यमुपलभ्यते" ॥ [ ] इति।

तन्न व्यञ्जकधर्माध्यारोपादुपचरितप्रत्ययविषयत्वं तथाभूतस्य गादेः, सर्वभावानामुपचरितप्रत्ययविषयत्वेन स्वरूपाभावप्रसङ्गात्। न च व्यञ्जकस्य प्रदीपादेरल्प-महत्त्वभेदाद् व्यङ्ग्यस्य घटादेरल्प-महत्त्वभेदप्रतिभासो दृष्टः। अथ व्यञ्जकधर्मानुकारित्वं व्यङ्ग्ये उपलभ्यते। तथाहि—एकस्वरूपमपि मुखं खड्गे प्रतिबिम्बितं दीर्घम्, आदर्शे वर्तुलम्, नीलकाचे गौरमपि श्यामं व्यञ्जकधर्मानुकारितया प्रतिभासविषयमुपलभ्यत इति प्रकृतेऽपि तथा स्यात्, एतदप्यसङ्गतम्; दृष्टान्तमात्रादर्थासिद्धेः, तस्य हि साध्य-साधनप्रतिबन्धसाधकप्रमाणविषयतया साध्यसिद्धावुपयोगो न स्वतन्त्रस्य, अन्यथा—

"एक एव हि भूतात्मा भूते भूते व्यवस्थितः" [अमृतबिन्दु-उपनि० प० १२, पृ० १५]

इत्यादिदृष्टान्तमात्रतोऽद्वैतवादिनोऽपि पुरुषाद्वैतसिद्धेः शब्दस्वरूपस्याप्यभावात् कस्योपचाराद् महत्त्वादिप्रतिभास इत्युच्यते? मुखादीनां च छाया खड्गादौ संक्रान्ता तद्धर्मानुकारिणी प्रतिभाति न मुखादयः। न च गादीनां छाया व्यञ्जकध्वनिसंक्रान्ता तद्धर्मानुकारिणी प्रतिभातीति शक्यं वक्तुम्, शब्दस्य भवताऽमूर्त्तत्वेनाभ्युपगमात्, अमूर्त्तस्य च मूर्त्तध्वनौ छायाप्रतिबिम्बनाऽसंभवात्; मूर्त्तानामेव हि मुखादीनां मूर्त्ते आदर्शादौ छायाप्रतिबिम्बनं दृष्टं नामूर्त्तानामात्मादीनाम्। अदृष्टे च ध्वनौ छाया प्रतिबिम्बिताऽपि न गृह्येत कथं तद्धर्मानुकारितया प्रतीतिविषयः? न च ध्वनेः शब्दप्रतिभासकाले श्रवणप्रतिपत्तिविषयत्वम्, उभयाकारप्रतिपत्तेरसंवेदनात्; तन्न व्यञ्जके ध्वनौ प्रतिबिम्बिता गकारादिच्छाया प्रतिभाति। नाप्यमूर्त्ते गादौ ध्वनिच्छायाप्रतिबिम्बनं युक्तम्, अमूर्त्ते आकाशादौ घटादिच्छायाप्रतिबिम्बनानुपलब्धेः। तदयुक्तमुक्तम् 'खड्गादौ दीर्घमुखादिप्रतिभासवद् अल्प-महत्त्वादियुक्तशब्दप्रतिभासः' इति, दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यात्। अतोऽबाधितमहत्त्वादिभेदभिन्नगादिप्रतिभासाद् गादिभेदसिद्धेस्तन्निबन्धनस्य सामान्यस्य गादौ सद्भावात् तन्निबन्धना प्रत्यभिज्ञा दलितोदितनखशिखरादिष्विव गादावभ्युपगमनीया। अत एव धूमादीनामिवानित्यत्वेऽपि गादीनां सामान्यसद्भावतः सङ्गत्यवगमस्य संभवाद्

१ अन्यथाग्रम् १४०० । २ "सामान्यविषयत्वप्रयोज्याबाध्यमानत्वप्रयोज्याप्रामाण्याभावरूपः" गु० टि०। ३-भ्रान्तित्वे कां०, गु०। ४ प्रतिबिम्बसाधक कां०, गु०। ५ अत्र 'इति' अध्याहार्यम्। ६ प्र० पृ० पं० २३।

न परार्थशब्दोच्चारणान्यथाऽनुपपत्त्या तन्नित्यत्वकल्पना युक्ता, तद् गत्वादिविशिष्टस्य गादेरविवक्षितविशेषस्य स्वार्थेन[1] सङ्गत्यवगमेन न किञ्चिन्नित्यत्वेन। यथा गोत्वादिविशिष्टस्य गोव्यक्तिमात्रस्य वाच्यत्वे न कश्चिद्दोषस्तद्वद् वाचकत्वेऽपि, तद् अर्थप्रतिपादकत्वस्य अन्यथापि सम्भवात् 'दर्शनस्य परार्थत्वाद् नित्यः शब्दः' इत्ययुक्तमभिहितम्[2]। यत् पुनरुक्तम्[3] 'सदृशत्वेनाग्रहणाद् न सादृश्यादर्थप्रतिपत्तिः' इति, तत्र यदि सदृशपरिणामलक्षणं सामान्यं व्यक्तेः सादृश्यमभिप्रेतं तदा तस्य यथा व्यक्तिविशेषणस्य[4] वाचकत्वं तथा प्रतिपादितम्[5]। अथ अन्यथाभूतं सादृश्यमत्र विवक्षितं तदा तस्य वाचकत्वानभ्युपगमात् स एव परिहारः। यत्तूक्तम्[6] 'वर्णानां निरवयवत्वाद् न भूयोऽवयवसामान्ययोगलक्षणस्य सादृश्यस्य सम्भवः' तदत्यन्तासङ्गतम्; वर्णानां भाषावर्गणारूपपरिणतपुद्गलपरिणामस्यैव[7] सावयवत्वात्।

अथ पौद्गलिकत्वे वर्णानां महती अदृष्टकल्पना प्रसज्यते। तथाहि-शब्दस्य श्रवणदेशाऽऽगमनम्, मूर्त्ति-स्पर्शादिमत्त्वं च अनुपलभ्यमानं परिकल्पनीयम्; तेषां च मूर्त्ति-स्पर्शानां सतामप्यनुद्भूतता कल्पनीया, त्वगग्राह्यत्वं च परिकल्पनीयम्; ये चान्ये सूक्ष्मा भागास्तस्य कल्प्यन्ते तेषां च शब्दकरणवेलायां सर्वथाऽनुपलभ्यमानानां कथं रचनाक्रमः क्रियताम्? उपलभ्यमानत्वेऽपि कीदृशाद् रचनाभेदाद् गकारादिवर्णभेदः? द्रवत्वेन च विना कथं वर्णावयवानां परस्परतः संश्लेषो वर्णनिष्पादकः? यद्यपि च कथञ्चित् कर्त्रा निष्पादिता वर्णास्तथापि आगच्छतां कथं न वायुना विश्लेषः? लघूनां तदवयवानामुदकादिनिबन्धनाभावात् निबद्धानामप्यागच्छतां वृक्षाद्यभिहतानां विश्लेषो लोष्टवत्। न चैकशब्दस्यैकश्रोत्रप्रवेशे मूर्त्तत्वेन प्रतिबद्धत्वादन्येषां श्रोतृणां तद्देशव्यवस्थितानामपि श्रवणमुपपद्यते, प्रयत्नान्तरस्यासत्त्वेन पुनर्निष्क्रमणासम्भवात्। न चैकगोशब्दापेक्षयाऽवान्तरवर्णनानात्वकल्पनायामस्ति प्रयोजनम्, एकस्मादेव गोशब्दादर्थप्रतीतेः; अतो गकारादिवर्णनानात्वमदृष्टं परिकल्पनीयम्। न चैकस्यैव गोशब्दावयविनः सर्वासु दिक्षु गमनं युज्यत इत्यनेकाऽदृष्टपरिकल्पना स्यात्। तदुक्तम्—

"शब्दस्याऽऽगमनं तावददृष्टं परिकल्प्यते ॥
मूर्त्ति-स्पर्शादिमत्त्वं च तेषामभिभवः सताम्।
त्वगग्राह्यत्वमन्ये च सूक्ष्मा भागाः प्रकल्पिताः ॥
तेषामदृश्यमानानां कथं च रचनाक्रमः?।
कीदृशाद् रचनाभेदाद् वर्णभेदश्च जायताम्? ॥
द्रवत्वेन विना चैषां संश्लेषः कल्प्यतां कथम्?।
आगच्छतां च विश्लेषो न भवेद् वायुना कथम्? ॥
लघवोऽवयवा ह्येते निबद्धा न च केनचित्।
वृक्षाद्यभिहतानां तु विश्लेषो लोष्टवद् भवेत् ॥
एकश्रोत्रप्रवेशे च नान्येषां च पुनः श्रुतिः।
न चावान्तरवर्णानां नानात्वस्यास्ति कारणम् ॥
न चैकस्यैव सर्वासु गमनं दिक्षु युज्यते"। [श्लो० वा० सू० ६, श्लो० १०७-११३] इति,

एतद् भवत्पक्षेऽपि सर्वं समानम्। तथाहि-'वायोरागमनं तावददृष्टं परिकल्प्यते' इत्याद्यपि वक्तुं शक्यत एव, केवलं वर्णस्थाने वायुशब्दः पठनीय इति कथं न भवत्पक्षेऽपि भूयस्यदृष्टपरिकल्पना? अपि च, भवत्पक्षेऽयमपरः परिकल्पनागौरवदोषः सम्पद्यते—वर्णस्य पूर्वाऽपरकोट्योः सर्वत्र देशेऽनुपलभ्यमानस्य सत्त्वं परिकल्पनीयम्, तस्य चावारकाः स्तिमिता वायवः प्रमाणतोऽनुपलभ्यमानास्तदपनोदकाश्चान्ये तथाभूता एव व्यञ्जकाः परिकल्पनीयाः, तेषां चोभयरूपाणामपि शक्तिनानात्वं परिकल्पनीयम्। असत्पक्षे तत् सर्वमपि नास्तीति कथमदृष्टपरिकल्पना गुर्वी?

---

१ **स्वार्थे संगत्यवगमे न** वा०, पू०, बा०। २ पृ० ३३ पं० १। ३ पृ० ३३ पं० ३। ४ **शक्तिविशेषणस्य** वा०, पू०, बा० विना सर्वत्र। ५ पृ० ३४ पं० ३। ६ पृ० ३३ पं० ८। ७ **-मलस्येव (-मत्वेनैव)** वा०, बा०, पू०।

पौद्गलिकत्वं च शब्दस्य अम्बरगुणप्रतिषेधप्रस्तावे प्रमाणोपपन्नं करिष्यत इत्यास्तां तावत्। यत् पुनर्भ्रान्तत्वं शब्दादर्थप्रत्ययस्याभिहितं तद् धूमाल्लिङ्गाल्लिङ्गिप्रत्ययेन प्रत्युक्तम्। 'गत्वादिविशिष्टस्य गादेर्वाचकत्वमयुक्तम्, गत्वादेः सामान्यस्यासम्भवात्'; तद् अनन्तरं निराकृतम्। यत् पुनरुक्तम्[1] 'गादिव्यक्तिमात्रं गत्वादिविशिष्टं नोपपद्यते, तस्य सामान्य-विशेषयोरन्यतरत्रान्तर्भावे एकत्र वाचकस्य नित्यत्वासङ्गात्, अन्यत्रानन्वयात् वाचकत्वायोगात्' एतदसारम्; व्यक्तिमात्रस्य सामान्यविशिष्टस्य पूर्वं[2] वाचकत्वव्यवस्थापनात्, ता एव व्यक्तयोऽविवक्षितासाधारणविशेषाः सामान्यविशिष्टव्यक्तिमात्रशब्दाभिधेयाः।

किंच, किं वर्णानां नित्यत्वमभ्युपगम्यते, उत वर्णक्रमस्य, आहोस्विद् वर्णाभिव्यक्तेः, किं वा तत्क्रमस्य? तत्र न तावदभिव्यक्तेर्नित्यत्वम्, तस्या निषिद्धत्वात्; अनिषेधेऽपि पुरुषप्रयत्नप्रेरितवायुजन्यत्वेनापौरुषेयत्वासम्भवात्। नाप्यभिव्यक्तिक्रमस्य, अभिव्यक्त्यभावे तत्क्रमस्याप्यभावात्, तत्पौरुषेयत्वे तस्यापि पौरुषेयत्वात्। अथैवं पौरुषेयत्वस्यानादिसिद्धस्य केनचिदादावकृतस्य सर्वपुरुषैः परिग्रहात् पुरुषाणां स्वातन्त्र्याभावादपौरुषेयत्वमुच्यते। तदुक्तम्—

"वक्ता नहि क्रमं कश्चित् स्वातन्त्र्येण प्रपद्यते।
यथैवास्य परैरुक्तः तथैवैनं विवक्षति ॥
परोऽप्येवं ततश्चास्य संबन्धवदनादिता।
तेनेयं व्यवहारात् स्यादकौटस्थ्येऽपि नित्यता ॥
यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता"। [श्लो० वा० सू० ६, श्लो० २८८-२९०] इति,

एतदसंबद्धम्; अपौरुषेयत्वप्रतिपादकप्रमाणस्यासिद्धत्वात्। अथ वर्णक्रमस्यापौरुषेयत्वमभ्युपगम्यते, तदप्यचारु; वर्णानां नित्यत्वेन कालकृतस्य तन्तुपटवद्, व्यापकत्वेन देशकृतस्य मुक्तावलीमुक्ताफलमालावद् अस्यासंभवात्।

अथ वर्णानामपौरुषेयत्वमङ्गीक्रियते, तदप्यसङ्गतम्; "य एव लौकिकाः शब्दास्त एव वैदिकाः" इत्यभिधानाद् वेदवल्लोकायतशास्त्रमपि प्रमाणं स्यादिति तदर्थानुष्ठानं भवतः प्रसज्यते। लौकिके च वाक्ये यो विसंवादः क्वचिदुपलभ्यते स भवन्नीत्या न प्राप्नोति। अथ लौकिक-वैदिकशब्दयोर्भेदोऽभ्युपगम्यते, तथा (तदा) रागादिसमन्वितत्वाभ्युपगमात् सर्वपुरुषाणां न तेषां यथावस्थितवेदार्थपरिज्ञानम्; स्वयं वेदोऽपि न भवतां वेदार्थं प्रतिपादयति; नापि वेदार्थप्रतिपादकमपौरुषेयं वेदव्याख्यानमवगतार्थं सिद्धं येन ततो वेदार्थप्रतिपत्तिः; लौकिकशब्दानुसारेण वेदशब्दार्थप्रकल्पनमपि तद्भेदाभ्युपगमेऽनुपपन्नमिति न वेदार्थप्रसिद्धिः स्यादिति न वैदिक-लौकिकशब्दयोर्भेदाभ्युपगमः श्रेयानिति लौकिकवद् वैदिकस्यापि पौरुषेयत्वमभ्युपगन्तव्यम्। न च लौकिक-वैदिकशब्दयोः शब्दस्वरूपाविशेषे, सङ्केतग्रहणव्यपेक्षत्वेनार्थप्रतिपादकत्वे, अनुच्चार्यमाणयोश्च पुरुषेणाश्रवणे सम्यते (समाने) अपरो विशेषो विद्यते यतो वैदिका अपौरुषेयाः, लौकिकाः पौरुषेयाः स्युः। तथा नियोगे[9] चार्थप्रत्यायनमुभयोरपि। न च नित्यत्वे पुरुषेच्छावशादर्थप्रतिपादकत्वं युक्तम्, उपलभ्यन्ते च यत्र पुरुषैः सङ्केतितास्तमर्थमविगानेन प्रतिपादयन्तः; अन्यथा नियोगाद्यर्थभेदपरिकल्पनमसारं स्यात्[10]। अतः पौरुषेयत्वमनुमानादवसीयते। तथाहि—ये नररचितरचनाऽविशिष्टास्ते पौरुषेयाः, यथाऽभिनवकूप-प्रासादादिरचनाऽविशिष्टा जीर्णकूप-प्रासादादयः, नररचितवचनरचनाऽविशिष्टं[11] च वैदिकं वचनमिति प्रयोगः। न चात्राऽऽश्रयासिद्धो हेतुः, वैदिकीनां रचनानां प्रत्यक्षत उपलब्धेः। नाप्यप्रसिद्धविशेषणः पक्षः, अभिनव-

---

१ पृ० ३३ पं० ६। २ पृ० ३३ पं० २७। ३ पृ० ३३ पं० १०। ४ पृ० ३४ पं० ३। ५ पृ० ३३ पं० १८। ६ पृ० ३४ पं० ३। ७ पृ० ३४ पं० ३३। ८ वा०, पू०, बा०, मां० विना सर्वत्र **सत्यते। सत्यतो** भा०, गु०। प्रमेयकमलमार्तण्डे अत्र स्थले एवं पाठः-"न च लौकिक-वैदिकशब्दयोः शब्दस्वरूपाविशेषे, संकेतग्रहणसव्यपेक्षत्वेन अर्थप्रतिपादकत्वे, अनुच्चार्यमाणयोश्च पुरुषेण अश्रवणे समाने अन्यो विशेषो विद्यते यतो वैदिका अपौरुषेयाः शब्दाः, लौकिकास्तु पौरुषेयाः स्युः"-(पृ० ११६, पं० ६-७)। ९ नियोगः संकेतः। **नियोगं** भा०, गु०, वि०, कां० विना। १० **वियोगाद्यर्थ**-वा०, गु०, भा० विना। ११ **नररचितरचना**- गु०।

कूप-प्रासादादिषु पुरुषपूर्वकत्वेऽस्य साध्यधर्मलक्षणस्य विशेषणस्य सिद्धत्वात्। न च हेतोः स्वरूपासिद्धत्वम्, वैदिकीषु वचनरचनासु विशेषग्राहकप्रमाणाभावेन तस्याभावात्। न चाऽप्रामाण्याभावलक्षणो विशेषस्तत्र इति शक्यमभिधातुम्, तथाभूतस्य विशेषस्य विद्यमानस्यापि पौरुषेयत्वानिराकरणात्; यादृशो हि विशेष उपलभ्यमानः पौरुषेयत्वं निराकरोति तादृशस्य विशेषस्याभावादविशिष्टत्वमुच्यते, न पुनः सर्वथा विशेषाभावात्; एकान्तेनाविशिष्टस्य कस्यचिदभावात्। अप्रामाण्याभावलक्षणश्च विशेषो दोषवन्तमप्रामाण्यकारणं पुरुषं निराकरोति, न च गुणवन्तमप्रामाण्यनिवर्त्तकम्। न च गुणवतः पुरुषस्याभावात् अन्यस्य च तेन विशेषेण निवर्त्तितत्वात् सिद्धमेवापौरुषेयत्वं वेदे इत्यभ्युपगमनीयम्, अपौरुषेयत्वस्य निराकृतत्वाद्; गुणवत्पुरुषाभावेऽप्रामाण्याभावलक्षणस्य विशेषस्याभावप्रसङ्गात्। न च गुणवतः पुरुषस्यान्येन विशेषेण निराकरणमिति तथाभूतविशेषस्याभावाद् नासिद्धो नररचितवचनरचनाऽविशिष्टत्वलक्षणो हेतुः। पौरुषेयेषु प्रासादादिषु नररचितरचनाऽविशिष्टत्वदर्शनादपौरुषेयेष्वाकाशादिष्वदर्शनाच्च नानैकान्तिकः। अथापौरुषेयेष्वदृष्टमपि नररचितरचनाऽविशिष्टत्वं तत्र विरोधाभावादाशङ्क्यमानं सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकम्, न; अपौरुषेयेष्वपि नररचितरचनाऽविशिष्टत्वस्य भावे पौरुषेयत्वेन निश्चितेषु प्रासादादिषु सकृदपि तस्य सद्भावो न स्यात्, अन्यहेतुकस्य ततः कदाचिदप्यभावात्; भावे वा तद्धेतुक एवासाविति नापौरुषेये तस्य सद्भावः शङ्कनीयः। अत एव न विरुद्धः, पक्षधर्मत्वे सति विपक्ष एव वृत्तिर्यस्य स विरुद्धः, न चास्य विपक्षे वृत्तिरिति प्रतिपादितम्। नापि कालात्ययापदिष्ट-प्रकरणसमाऽप्रयोजकत्वानि हेतोर्दोषाः सम्भवन्ति। तथाहि—प्रत्यक्षाऽऽगमबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वं हेतोः कालात्ययापदिष्टत्वमुच्यते, न च यत्र स्वसाध्याविनाभूतो हेतुर्धर्मिणि प्रवर्त्तमानः स्वसाध्यं व्यवस्थापयति तत्रैव प्रमाणान्तरं प्रवृत्तिमासादयत् तमेव धर्मं व्यावर्त्तयति; एकस्यैकदैकत्र विधि-प्रतिषेधयोर्विरोधात्। तन्न बाधाऽविनाभावयोः सम्भव इति न कालात्ययापदिष्टत्वमविनाभूतस्य हेतोर्दोषः संभवति। प्रकरणसमत्वमपि प्रतिहेतोर्विपरीतधर्मसाधकस्य प्रकरणचिन्ताप्रवर्त्तकस्य तत्रैव धर्मिणि सद्भाव उच्यते, न च स्वसाध्याविनाभूतहेतुसाधितधर्मणो धर्मिणो विपरीतत्वं संभवतीति न विपरीतधर्माधायिनो हेत्वन्तरस्य तत्र प्रवृत्तिरिति न प्रकरणसमत्वमविनाभूतस्य हेतोर्दोषः। अप्रयोजकत्वं तु पक्षधर्मान्वय-व्यतिरेकाणामन्यतमरूपाभावः, न च प्रकृते हेतौ तदभाव इति दर्शितम्। अथाऽनुमानलक्षणयुक्तस्य प्रत्यनुमानस्यापौरुषेयत्वसाधकस्य सद्भावात् प्रकरणसमता प्रकृतस्य हेतोः, अनुमानबाधितत्वं वा पक्षस्य दोषः; प्रत्यनुमानं च दर्शितम्—

"वेदाध्ययनमखिलं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनवाच्यत्वादधुनाऽध्ययनं यथा"॥ [श्लो० वा० सू० ७, श्लो० ३६६] इति।

न चैतदाशङ्कनीयम्—एवंविधे प्रत्यनुमानेऽभ्युपगम्यमाने कादम्बर्यादीनामप्यपौरुषेयत्वसिद्धिः, यतस्तेषु बाणादीनां कर्तॄणां निश्चयः; तथाहि—कालिदासकृतत्वेन कुमारसंभवादीनि काव्यानि अविगानेन स्मर्यन्ते। अथ वेदेऽपि कर्त्तृस्मरणमस्ति, तथा च केचिद् हिरण्यगर्भं वेदानां कर्त्तारं स्मरन्ति, अपरे अष्टकादीन् ऋषीन्, सत्यम्, अस्ति न त्वविगीतं यथा भारतादिषु, तथा छिन्नमूलं च। स्मरणस्यानुभवो मूलम्, न च वेदे कर्तृस्मरणस्य केनचित् प्रमाणेन मूलानुभवो व्यवस्थापयितुं शक्यः; यदपि कर्तृसद्भावप्रतिपादकं वचनं कैश्चित् कृतम्—"हिरण्यगर्भः समवर्त्तताग्रे" [ऋग्वेद अष्ट० ८ मं० १०, सू० १२१] इत्यादि, तदपि मन्त्राऽर्थवादानां श्रूयमाणेऽर्थे प्रामाण्यायोगाद् न तत्सद्भावावेदकम्। तदुक्तम्—

"भारतेऽपि भवेदेवं कर्तृस्मृत्या तु बाध्यते।
वेदे तु तत्स्मृतिर्या तु साऽर्थवादनिबन्धना"॥ [श्लो० वा० सू० ७, श्लो० ३६७],

एतदप्ययुक्तम्; यतः किमत्र प्रतिसाधनत्वेन विवक्षितम्? किमध्ययनशब्दवाच्यत्वम्, उत कर्तुस्मरणम्? पूर्वस्मिन् पक्षे निर्विशेषणो वा हेतुरपौरुषेयत्वप्रतिपादकः, कर्त्रस्मरणविशिष्टो वा? निर्विशेषणस्य निश्चितकर्तृकेषु भारतादिष्वपि भावादनैकान्तिकत्वम्। किंच, किं यथाभूतानां पुरुषाणामध्ययनपूर्वकं दृष्टं तथाभूतानामेवाध्ययनवाच्यत्वमध्ययनपूर्वकत्वं साधयति, उत अन्यथाभूतानाम्? यदि तथाभूतानां तदा सिद्धसाधनम्। अथान्यथाभूतानां तदा सन्निवेशादिवदप्रयोजको हेतुः। अथ तथाभूतानामेव साधयति न च सिद्धसाधनम्, सर्वपुरुषाणामतीन्द्रियार्थदर्शनशक्तिवैकल्येन अतीन्द्रियार्थप्रतिपादकप्रेरणाप्रणेतृत्वासामर्थ्येनेदृशत्वात्; स्यादेतद् यदि प्रेरणायास्तथाभूतार्थप्रतिपादनेऽप्रामाण्याभावः सिद्धः स्यात्, यावता गुणवद्धक्तृकत्वाभावे तद्गुणैर्निराकृतैर्दोषैरपोदितत्वात् सापवादं प्रामाण्यमित्युक्तम्। तथाभूतां च प्रेरणामतीन्द्रियदर्शनशक्तिविकला अपि कर्तुं समर्था इति कुतस्तथाभूतप्रेरणाप्रणेतृत्वासामर्थ्येन सर्वपुरुषाणामीदृशत्वसिद्धिर्यतः सिद्धसाधनं न स्यात्? अथ न गुणवद्धक्तृकत्वेन चोदनाया अप्रामाण्यनिवृत्तिः किन्त्वपौरुषेयत्वेन, ततो नायं दोषः; ननु कुतः पुनरपौरुषेयत्वं चोदनाया अवगतम्? यद्यन्यतोऽनुमानात् तदा तत एवापौरुषेयत्वसिद्धेर्व्यर्थं प्रकृतमनुमानम्। अत एवानुमानाच्चेत्, नन्वतोऽनुमानादपौरुषेयत्वसिद्धौ प्रेरणाया अप्रामाण्याभावः, तदभावाच्च तथाभूतप्रेरणाप्रणेतृत्वासामर्थ्येन सर्वपुरुषाणामीदृशत्वसिद्धिरितीतरेतराश्रयदोषसद्भावः। अतः स्थितमेतत्–तथाभूतानां तथाभूताध्ययनसाधने सिद्धसाधनम्; तन्न निर्विशेषणो हेतुः प्राक्तनोऽपौरुषेयत्वं साधयति। अथ सविशेषणो हेतुः पूर्वोक्तः प्रकृतसाध्यगमकस्तदा विशेषणस्यैव केवलस्य गमकत्वाद् विशेष्योपादानमनर्थकम्।

भवतु विशेषणस्यैव गमकत्वं सर्वथा अपौरुषेयत्वसिद्ध्या नः प्रयोजनमिति चेत्, असदेतत्; यतः कर्त्रस्मरणं विशेषणं किमभावाख्यं प्रमाणम्, अर्थापत्तिः, अनुमानं वा? यद्यभावाख्यमिति पक्षः, स न युक्तः; अभावप्रमाणस्य प्रामाण्याभावात्। किंच, सदुपलम्भकप्रमाणपञ्चकनिवृत्तिनिबन्धना अस्य प्रवृत्तिरभ्युपगम्यते भवता "प्रमाणपञ्चकं यत्र" [श्लो० वा० सू० ५, अभाव० श्लो० १] इत्याद्यभिधानात्, न च प्रमाणपञ्चकस्य वेदे पुरुषसद्भावाऽऽवेदकस्य निवृत्तिः, नररचितरचनाऽविशिष्टत्वस्य पौरुषेयत्वप्रतिपादकत्वेनानुमानस्य प्रतिपादनात्। न चास्याऽप्रामाण्यमभिधातुं शक्यम्, यतोऽस्याऽप्रामाण्यं किम् अभावप्रमाणबाधितत्वेन, उत स्वसाध्याविनाभावित्वाभावेन? तत्र न तावदभावप्रमाणबाधितत्वेन, चक्रकदोषप्रसङ्गात्। तथाहि—न यावदभावप्रमाणप्रवृत्तिर्न तावत् प्रस्तुतानुमानबाधा, यावच्च न तस्य बाधा न तावत् सदुपलम्भकप्रमाणनिवृत्तिः, यावच्च न तस्य निवृत्तिर्न तावत् तन्निबन्धना अभावाख्यप्रमाणप्रवृत्तिः, तदप्रवृत्तौ च नानुमानबाधेति दुरुत्तरं चक्रकम्; तन्नाभावप्रमाणबाधितत्वात् प्रस्तुतानुमानस्याप्रामाण्यम्। न चाबाधितत्वमनुमानप्रामाण्यनिबन्धनम्—तथाऽभ्युपगमे तस्य प्रामाण्यमेव न स्यात्; तस्य निश्चेतुमशक्यत्वात्। तथाहि–बाधाऽभावो नानुपलम्भान्निश्चीयते, विद्यमानबाधकेष्वपि बाधानुपलम्भस्य भावात्। नापि बाधकाभावज्ञानात्, यतस्तदपि ज्ञानं यदि तदैव बाधकाभावं निश्चाययति तदा न तत् प्रामाण्यनिबन्धनम्; तथाभूतज्ञानस्य संभवद्बाधकेष्वपि भावात्। अथ सर्वदा तद् बाधकाभावं निश्चाययति, तदसत्; 'न पूर्वं बाधकमत्र प्रवृत्तम्, नाप्युत्तरकालं प्रवर्त्तिष्यते' इत्येवंभूतस्य ज्ञानस्यार्वागदृशामभावात्; भावे वा तस्यैव सर्वज्ञत्वाद् न 'प्रेरणैव धर्मे प्रमाणम्' इत्यन्ययोगव्यवच्छेदेन तद्विषयतत्प्रामाण्यावधारणोपपत्तिः स्यात्—किन्तु निश्चितस्वसाध्याविनाभूतलिङ्गप्रभवत्वम्। स्वसाध्याविनाभावनिश्चायकं च प्रकृतस्य हेतोः पौरुषेयत्वेन कार्यकारणभावनिश्चायकम्, तदेव च स्वसाध्यविपर्यये तस्य सद्भावबाधकम्, तस्य च प्रकृते हेतौ सत्त्वेन दर्शितत्वाद् न तत्प्रभवस्यानुमानस्याप्रामाण्यम्; अत एव स्वसाध्याविनाभावित्वाभावेन तस्य अप्रामाण्यम् इति द्वितीयोऽपि पक्षो न युक्तः; तन्नाभावाख्यं कर्त्रस्मरणलक्षणं प्रमाणम् अपौरुषेयत्वसाधकम्, नापि पौरुषेयत्वबाधकम्। अथ अर्थापत्तिः कर्त्रस्मरणम्, तदप्यसङ्गतम्; अर्थापत्तेरनुमानेऽन्तर्भावस्य प्रतिपादयिष्यमाणत्वात्; तद्दूषणैश्चास्य पक्षस्य दूषितत्वात्। अथानुमानम्, तदप्यसङ्गतम्; 'अपौरुषेयो वेदः कर्त्रस्मरणात्' इत्येवंप्रयोगे हेतोर्व्यधिकरणत्वदोषात्। अथ 'अस्मर्यमाणकर्तृकत्वात्' इति हेतुप्रयोगान्न व्यधिकरणत्वदोषस्तर्हि अस्मर्यमाणकर्तृकत्वं भारतादिषु निश्चितकर्तृकेष्वपि विद्यत इत्यनै-

---

१ न च प्रामाण्याभावलक्षणो वा०, बा०, पू० विना सर्वत्र। २ निश्चितेषु एषु प्रासा–गु०। ३ प्र० पृ० पं० ११। ४ धर्मिणि गु०। ५ पृ० ३९ पं० २६।

१ 'अध्ययनम्' इति शेषः। २ पृ० १९ पं० २३। ३ पृ० ३९ पं० ३५। ४ संभवाद् बाधके-भां०, कां०, गु०। ५-कृतहेतौ भां०, मां०, अ०। ६ पृ० ४० पं० १३।

कान्तिकत्वम्। अथ आगमान्तरे परैः कर्तुः स्मरणात् ततो व्यावृत्तमस्मर्यमाणकर्तृकत्वमपौरुषेयत्वेन व्याप्यत इति नानैकान्तिकत्वम्, न; परकीयस्य कर्तुः स्मरणस्य भवता प्रमाणत्वेनानभ्युपगमात्, अभ्युपगमे वा परैर्वेदेऽपि कर्तुः स्मरणात् 'अस्मर्यमाणकर्तृकत्वात्' इति प्रतिवाद्यसिद्धो भवन् भवतोऽप्यसिद्धः स्यात्। अथ वेदे सविगानं कर्तृविशेषविप्रतिपत्तेः कर्तृस्मरणमसत्यम्। तथाहि—केचिद् हिरण्यगर्भम्, अपरेऽष्टकादीन् वेदस्य कर्तॄन् स्मरन्तीति कर्तृविशेषविप्रतिपत्तिः। नन्वेवं कर्तृविशेषविप्रतिपत्तेस्तद्विशेषस्मरणमेवासत्यं स्यात् तत्र, न कर्तृमात्रस्मरणम्; अन्यथा कादम्बर्यादीनामपि कर्तृविशेषविप्रतिपत्तेः कर्तृमात्रस्मरणस्यासत्यत्वेन तत्राप्यस्मर्यमाणकर्तृकत्वस्य सद्भावात् पुनरप्यनैकान्तिकत्वं प्रकृतहेतोः। अथ वेदे कर्तृविशेषविप्रतिपत्तिवत् कर्तृमात्रेऽपि विप्रतिपत्तिरिति तत्र कर्तृस्मरणमसत्यम्, कादम्बर्यादीनां तु कर्तृविशेषे एव विप्रतिपत्तिर्न कर्तृमात्रे, तेन तत्र कर्तुः स्मरणस्य विरुद्धस्य सत्यत्वाद् नास्मर्यमाणकर्तृकत्वं तेषु वर्त्तत इति नानैकान्तिकत्वम्। ननु 'वेदे सौगताः कर्तृमात्रं स्मरन्ति न मीमांसकाः' इत्येवं कर्तृमात्रेऽपि विप्रतिपत्तेर्यदि कर्तृस्मरणं मिथ्या तदा कर्तृस्मरणवद् अस्मर्यमाणकर्तृकत्वमप्यसत्यं स्यात्, विप्रतिपत्तेरविशेषात्; तथा च पुनरप्यसिद्धो हेतुः। एतेन 'सत्यम्, वेदे कर्तृस्मरणमस्ति न त्वविगीतं, यथा भारतादिषु' इति निरस्तम्। यदप्युक्तम् 'तथा छिन्नमूलं च वेदे कर्तृस्मरणम्। तस्यानुभवो मूलम्, न चासौ तत्र तद्विषयत्वेन विद्यते' इति, तदप्यसङ्गतम्; यतः किं प्रत्यक्षेण तदनुभवाभावात् तत्र तच्छिन्नमूलत्वम्, उत प्रमाणान्तरेण? तत्र यदि प्रत्यक्षेणेति पक्षस्तदा वक्तव्यम्—किं भवत्संबन्धिना प्रत्यक्षेण तत्र तदनुभवाभावः, उत सर्वसंबन्धिना तत्र तदनुभवाभावः? यदि भवत्संबन्धिना, तदाऽऽगमान्तरऽपि तत्कर्तृग्राहकत्वेन भवत्प्रत्यक्षस्याप्रवृत्तेस्तत्कर्तृस्मरणस्य छिन्नमूलत्वेनास्मर्यमाणकर्तृकत्वस्य भावादनैकान्तिकः पुनरपि हेतुः। अथ सर्वसंबन्धिना प्रत्यक्षेणानुभवः, असावसिद्धः; न ह्यर्वागदृशा 'सर्वेषामत्र तद्ग्राहकत्वेन प्रत्यक्षं न प्रवृत्तिमत्' इति निश्चेतुं शक्यमिति तत्र तत्स्मरणस्य छिन्नमूलत्वासिद्धेः 'अस्मर्यमाणकर्तृकत्वात्' इत्यसिद्धो हेतुः। अथ प्रमाणान्तरेण तदनुभवाभावः—तत्रापि वक्तव्यम्—आगमलक्षणं किं तत् प्रमाणान्तरमभ्युपगम्यते, उत अनुमानस्वरूपम् अपरस्य प्रामाण्यासम्भवात्? तत्र यद्यागमलक्षणेन तदनुभव इति पक्षः, स न युक्तः; "हिरण्यगर्भः समवर्त्तताग्रे" [ऋग्वेद अष्ट० ८, मं० १०, सू० १२१] इत्यादेरागमस्य तत्र तत्सद्भावाऽऽवेदकस्य संभवात्। न च मन्त्रार्थवादानां स्वरूपार्थं प्रामाण्याभाव इति वक्तुं शक्यम्, यतो मन्त्रार्थवादानां स्वाभिधेयप्रतिपादनद्वारेण कार्यार्थोपयोगिता; तेषां तत्राप्रामाण्ये विध्यर्थाङ्गताऽपि न स्यात्। अथानुमानेन तत्र तदननुभवः, सोऽपि न युक्तः; अनुमानेन तत्र तदनुभवस्य प्रतिपादितत्वात्। अथानुपलम्भपूर्वकमस्मर्यमाणकर्तृकत्वं यद्यस्माभिर्हेतुत्वेनोच्येत तदा पूर्वोक्तप्रकारेणासिद्धत्वाऽनैकान्तिकत्वे स्याताम्, न तु तत्कर्त्रनुपलम्भपूर्वकमस्मर्यमाणकर्तृकत्वं हेतुः किन्तु तदभावपूर्वकम्। नन्वत्रापि यदि तदभावः प्रमाणान्तरात् सिद्धस्तदाऽस्यानुमानस्य वैयर्थ्यम्। न च तदभावग्राहकमन्यत् प्रमाणमस्तीत्युक्तम्। अस्मादेव अनुमानात् तदभावसिद्धिस्तदाऽतोऽनुमानात् तदभावसिद्धौ तत्पूर्वकमस्मर्यमाणकर्तृकत्वं सिध्यति, तत्सिद्धौ चातोऽनुमानात् तदभावसिद्धिरितीतरेतराश्रयदोषात् तदवस्थं सविशेषणस्याप्यस्य हेतोरसिद्धत्वम्। {अथ मतं यत्र सिद्धकर्तृकेषु भावेष्वस्मर्यमाणकर्तृकत्वं तत्र कर्तुः स्मरणयोग्यता नास्तीति निर्विशेषणस्यानैकान्तिकत्वम्; वैदकीनां तु रचनानां सति पौरुषेयत्वेऽवश्यं पुरुषस्य कर्तुः तदर्थानुष्ठानसमयेऽनुष्ठातॄणां स्मरणं स्यात्, ते हि अदृष्टफलेषु कर्मस्वेवं निर्विचिकित्साः प्रवर्त्तन्त यदि तेषां तद्विषयः सत्यत्वनिश्चयः, तस्याप्येवंभावो यदि तदुपदेष्टुः स्मरणम्, यथा पित्रादिप्रामाण्यवशात् स्वयमदृष्टफलेष्वपि कर्मसु तदुपदेशात् प्रवर्त्तन्ते-पित्रादिभिरेतदुपदिष्टं तेनानुष्ठीयते—एवं वैदिकेष्वपि कर्मस्वनुष्ठीयमानेषु तत्र स्मरणं स्यात्; न चाभियुक्तानामपि वेदार्थानुष्ठातॄणां त्रैवर्णिकानां कर्तुः स्मरणमास्त, अतः स्मरणयोग्यस्य कर्तुरस्मरणात् अपौरुषेयो वेदः; एवं चायं हेत्वर्थः-कर्तुः स्मरणयोग्यत्वेऽपि सति अस्मर्यमाणकर्तृकत्वात् अपौरुषेयो वेदः। न चैवंविधस्य हेतोः सिद्धकर्तृकेषु भावेषु वृत्तिः, अतो नानैकान्तिकः; यत्र पौरुषेयत्वं तत्र सविशेषणो हेतुर्न संभवतीति विरुद्धत्वमपि न विद्यते, विपक्षे वर्त्तमानः

१ पृ० ४० पं० ३३। २ पृ० ४० पं० ३३। ३ स्वरूपेऽर्थे भां०। ४ पृ० ३९ पं० ३५। ५ पृ० ३९ पं० ३८–पृ० ३१ पं० ९। ६ "ब्राह्मण-वैश्य-क्षत्रियाणाम्" गु०, भा० टि०।

सपक्षेऽसन् विरुद्ध उच्यते, अस्य तु सविशेषणस्य प्रसिद्धपौरुषेये वस्तुन्यप्रवृत्तिः, नापि सपक्षे आकाशादौ असत्त्वम्; अतः परिशुद्धान्वय-व्यतिरेकहेतुसद्भावात् कर्तृस्मरणयोग्यत्वे सति अस्मर्यमाणकर्तृकत्वात् अपौरुषेयो वेदः सिध्यति} तदप्यसंबद्धम्; आगमान्तरेऽपि 'कर्तुः स्मरणयोग्यत्वे सति अस्मर्यमाणकर्तृकत्वात्' इत्यस्य हेतोः सद्भावबाधकप्रमाणाभावेन सद्भावसंभवात् संदिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकत्वस्य तदवस्थत्वात्। किंच, विपक्षविरुद्धं हि विशेषणं विपक्षाद् व्यावर्त्तमानं स्वविशेष्यमादाय निवर्त्तत इति युक्तम्, न च पौरुषेयत्वेन सह कर्तुः स्मरणयोग्यत्वस्य सहानवस्थानलक्षणः, परस्परपरिहारस्थितिलक्षणो वा विरोधः सिद्धः; सिद्धौ वा तत एव साध्यसिद्धेः 'अस्मर्यमाणकर्तृकत्वात्' इति विशेष्योपादानं व्यर्थम्। यदप्युक्तम् 'तदर्थानुष्ठानसमयेऽवश्यंतया त्रैवर्णिकानामनिश्चिततत्प्रामाण्यानामप्रवृत्तिप्रसङ्गात् सति कर्तरि तत्स्मरणं स्यात्, न चाभियुक्तानामपि तदस्ति' इति, तद् आगमान्तरेऽपि समानं नवेति चिन्त्यतां स्वयमेव। न चायं नियमः—अनुष्ठातारोऽभिप्रेतार्थानुष्ठानसमये तत्कर्तारमनुस्मृत्यैव प्रवर्त्तन्ते, न हि पाणिन्यादिप्रणीतव्याकरणप्रतिपादितशाब्दव्यवहारानुष्ठानसमये तदनुष्ठातारोऽवश्यंतया व्याकरणप्रणेतारं पाणिन्यादिकमनुस्मृत्यैव प्रवर्त्तन्त इति दृष्टम्; निश्चिततत्समयानां कर्तृस्मरणव्यतिरेकेणाप्यविलम्बेन 'भवति' आदिसाधुशब्दोच्चारणदर्शनात्। तत् स्थितमेतत्—सविशेषणस्यापि 'अस्मर्यमाणकर्तृकत्वात्' इति हेतोर्वादिसंबन्धिनोऽनैकान्तिकत्वम्, प्रतिवादिसंबन्धिनोऽसिद्धत्वम्, सर्वसंबन्धिनोऽपि तदेवेति नास्माद्धेतोरपौरुषेयत्वसिद्धिः। अतोऽपौरुषेयत्वप्रसाधकप्रमाणाभावाच्छासनस्यापौरुषेयत्वासम्भवे यदि सर्वज्ञप्रणीतत्वं नाभ्युपगम्यते तदा प्रामाण्यमपि न स्यात्; तथा च 'धर्मे प्रेरणा प्रमाणमेव' इत्ययोगव्यवच्छेदेनावधारणमनुपपन्नम्। अथ प्रेरणाप्रामाण्यसिद्ध्यर्थं सर्वज्ञः प्रेरणाप्रणेताऽभ्युपगम्यते तदा "चोदनैव च भूतम्, भवन्तम्, भविष्यन्तम्, सूक्ष्मम्, व्यवहितम्—एवंजातीयकमर्थमवगमयितुमलम्, नान्यत् किञ्चनेन्द्रियम्" इत्याद्यभिधानमसङ्गतं प्राप्नोतीत्युभयतः पाशारज्जुर्मीमांसकस्य। तत् स्थितमेतद् आचार्येण मीमांसकापेक्षया प्रसङ्गसाधनमेतदुपन्यस्तम्-यदि सिद्धं शासनमभ्युपगम्यते भवद्भिस्तदा जिनानां तत्-जिनप्रणीतम्-अभ्युपगन्तव्यमिति॥

[सर्वज्ञवादः]

[पूर्वपक्षः—सर्वज्ञसत्तानिरसनम्]

अथ भवतु प्रेरणाप्रामाण्यवादिनां मीमांसकानामेतत् प्रसङ्गसाधनम्, ये तु तदप्रामाण्यवादिनश्चार्वाकास्तान् प्रति, स्वप्रतिपत्तौ वा भवतः किं प्रमाणम्? न च प्रमाणाविषयस्य सद्व्यवहारविषयत्वं युक्तम्। तथाहि—ये देश-काल-स्वभावविप्रकर्षवन्तः सदुपलम्भकप्रमाणविषयभावमनापन्ना भावा न ते प्रेक्षावतां सद्व्यवहारपथावतारिणः, यथा नाकपृष्ठादयस्तथात्वेनाभ्युपगमविषयाः, तथा च समस्तवस्तुविस्तारव्यापिज्ञानसंपत्समन्वितः पुरुष इति सद्व्यवहारप्रतिषेधफलाऽनुपलब्धिः। न चासिद्धो हेतुः। तथाहि—सकलपदार्थसाक्षात्कारिज्ञानाङ्गनालिङ्गितः पुरुषः प्रत्यक्षसमधिगम्यो वा अभ्युपगम्येत, अनुमानादिसंवेद्यो वा? न तावदध्यक्षगोचरः, प्रतिनियतसंनिहितरूपादिविषयनियमितसाक्षात्करणस्वभावा हि चक्षुरादिकरणव्यापारसमासादितात्मलाभा ज्ञप्तयो न परस्थं संवेदनमात्रमपि तावदालम्बितुं क्षमाः किमङ्ग! पुनरनाद्यनन्तातीताऽनागतवर्त्तमान-सूक्ष्मादिस्वभावसकलपदार्थसाक्षात्कारिसंवेदनविशेषम्, तदध्यासितं वा पुरुषम् अविषये चक्षुरादिकरणप्रवर्त्तितस्य ज्ञानस्य प्रवृत्त्यसम्भवात्? सम्भवे वाऽन्यतमकरणप्रवर्त्तितस्यापि ज्ञानस्य रूपादिसकलविषयग्राहकत्वेन संभवात् शेषेन्द्रियपरिकल्पना व्यर्था। न च सूक्ष्मादिसमस्तपदार्थग्रहणमन्तरेण प्रत्यक्षेण तत्साक्षात्करणप्रवृत्तज्ञानग्रहणम्, ग्राह्याग्रहणे तद्ग्राहकत्वस्यापि तद्गतस्य तेनाग्रहणात्। तदग्रहे च तद्धर्माध्यासितसंवेदनसमन्वितस्यापि न प्रत्यक्षतः प्रतिपत्तिः। नाप्यनुमानतः सकलपदार्थज्ञप्रतिपत्तिः, अनुमानं हि निश्चितस्वसाध्यधर्म-धर्मिसंबन्धाद् हेतोरुदयमासादयत् प्रमाणतामाप्नोति; प्रतिबन्धश्च समस्तपदार्थज्ञसत्त्वेन स्वसाध्येन हेतोः किं प्रत्यक्षेण

१ पृ० ४२ पं० ३५। २-प्यविलम्बित 'भवति'-वा०, पू०, बा०, गु०। ३ सूक्ष्ममव्यवहित—भां०, कां०, गु०। ४ "चोदना हि भूतम्, भवन्तम्, भविष्यन्तम्, सूक्ष्मम्, व्यवहितम्, विप्रकृष्टम्-इत्येवंजातीयकमर्थं शक्नोत्यवगमयितुं नान्यत् किञ्चनेन्द्रियम्"-मीमां० शाब० सू० २, पृ० ३, पं० १२।

गृह्यते, उतानुमानेन ? न तावदध्यक्षेण, अध्यक्षस्यात्यक्षज्ञानवत्सत्त्वसाक्षात्करणाक्षमत्वेन तदवगतिनिमित्तहेतुप्रतिबन्धग्रहणेऽप्यक्षमत्वात्; न ह्यनवगतसंबन्धिना तद्वतसंबन्धावगमो विधातुं शक्यः। नाप्यनुमानेन तद्वतसंबन्धावगमः, तथाभ्युपगमेऽनवस्थे-तरेतराश्रयदोषद्वयानतिवृत्तेः। न चाऽगृहीतप्रतिबन्धाद्धेतोरुपजायमानमनुमानं प्रमाणतामासादयति। तथा, धर्मिसंबन्धावगमोऽपि न प्रत्यक्षतः, अनक्षज्ञानवत्प्रत्यक्षेऽक्षप्रभवस्याध्यक्षस्याप्रवृत्तेः; प्रवृत्तौ वाऽध्यक्षेणैव सर्वविदः संवेदनाद् अनुमाननिबन्धनहेतुव्यापारणं व्यर्थम्। न चानुमानतोऽप्यनक्षज्ञानवतोऽवगमः, हेतुपक्षधर्मतावगममन्तरेणानुमानस्यैव धर्मिग्राहकस्याप्रवृत्तेः; न चाप्रतिपन्नपक्षधर्मत्वो हेतुः प्रतिनियतसाध्यप्रतिपत्तिहेतुरिति नानुमानतोऽपि सर्वज्ञप्रतिपत्तिः। किंच, सर्वज्ञसत्तायां साध्यायां त्रयीं दोषजातिं हेतुर्नातिवर्त्तते असिद्ध-विरुद्धाऽनैकान्तिकलक्षणाम्। तथाहि—[1]सकलज्ञसत्त्वे साध्ये किं भावधर्मो हेतुः, उताभावधर्मः, आहोस्विदुभयधर्मः? तत्र यदि भावधर्मस्तदाऽसिद्धः। अथाभावधर्मस्तदा विरुद्धः, भावे साध्येऽभावधर्मस्याभावाव्यभिचारित्वेन विरुद्धत्वात्। अथोभयधर्मस्तदोभयाव्यभिचारित्वेन सत्तासाधनेऽनैकान्तिकत्वमिति न सकलज्ञसत्त्वसाधने कश्चित् सम्यग् हेतुः सम्भवति। अपि च, यद्यनियतः कश्चित् सकलपदार्थज्ञः साध्योऽभिप्रेतस्तदा तत्कृतप्रतिनियतागमाश्रयणं नोपपन्नं भवताम्। अथ प्रतिनियत एक एवार्हन् सर्वज्ञोऽभ्युपगम्यते तदा तत्साधने प्रयुक्तस्य हेतोरपरसर्वज्ञस्याभावेन दृष्टान्तानुवृत्त्यसंभवादसाधारणानैकान्तिकत्वादसाधकत्वम्। किंच, यत एव हेतोः प्रतिनियतोऽर्हन् सर्वज्ञस्तत एव बुद्धोऽपि स स्यादिति कुतः प्रतिनियतसर्वज्ञप्रणीतागमाश्रयणमुपपत्तिमत्? इति न कश्चित् सर्वज्ञसाधको हेतुः। अथ सर्वे पदार्थाः कस्यचित् प्रत्यक्षाः प्रमेयत्वात् अश्यादिवदिति तत्साधनहेतुसद्भावः, तदसत्; यतोऽत्र किं सकलपदार्थसाक्षात्कार्येकज्ञानप्रत्यक्षत्वं सर्वपदार्थानां साध्यत्वेनाऽभिप्रेतम्, आहोस्विद् प्रतिनियतविषयानेकज्ञानप्रत्यक्षत्वमिति कल्पनाद्वयम्। यद्याद्यः पक्षः, स न युक्तः; प्रतिनियतरूपादिविषयग्राहकानेकप्रत्ययप्रत्यक्षत्वेन व्याप्तस्याश्यादिदृष्टान्तधर्मिणि प्रमेयत्वलक्षणस्य हेतोरुपलम्भाद् हेतुविरुद्धत्व-साध्यविकलदृष्टान्तदोषद्वयाघ्रातत्वात्। अथ द्वितीयः, सोऽप्यसङ्गतः; सिद्धसाध्यतादोषप्रसङ्गात्। तथा, प्रमेयत्वमपि हेतुत्वेनोपन्यस्यमानं किमशेषज्ञेयव्यापिप्रमाणप्रमेयत्वव्यक्तिलक्षणमभ्युपगम्यते, उत अस्मदादिप्रमाणप्रमेयत्वव्यक्तिस्वरूपम्, आहोस्वित् उभयव्यक्तिसाधारणसामान्यस्वभावम् इति विकल्पाः। तत्र यदि प्रथमः पक्षः, स न युक्तः; विवादाध्यासितपदार्थेषु तथाभूतप्रमाणप्रमेयत्वस्यासिद्धत्वात्; सिद्धत्वे वा साध्यस्यापि हेतुवत् सिद्धत्वाद् व्यर्थं हेतूपादानम्, तथाभूतप्रमाणप्रमेयत्वस्य दृष्टान्तेऽश्यादिलक्षणेऽसिद्धेः संदिग्धान्वयश्च हेतुः स्यात्। अथ अस्मदादिप्रमाणप्रमेयत्वं हेतुस्तदा तथाभूतप्रमाणप्रमेयत्वस्य विवादगोचरेष्वतीन्द्रियेष्वसंभवादसिद्धो हेतुः; सिद्धौ वा ततस्तथाभूतप्रत्यक्षत्वसिद्धिरेव स्यात् तत्र चाविवाद इति न हेतूपन्यासः सफलः। अथोभयप्रमेयत्वव्यक्तिसाधारणं प्रमेयत्वसामान्यं हेतुरिति पक्षः, सोऽप्यसङ्गतः; अत्यन्तविलक्षणातीन्द्रिय-इन्द्रियविषयप्रमाणप्रमेयत्वव्यक्तिद्वयसाधारणस्य सामान्यस्यासम्भवात्; न हि शाबलेय-[2]कर्कव्यक्तिद्वयसाधारणमेकं गोत्वसामान्यमुपलब्धमिति प्रमेयत्वसामान्यलक्षणो हेतुरसिद्ध इति नानुमानादपि सर्वज्ञसिद्धिः। नापि शब्दात्, यतः शब्दोऽपि तत्प्रतिपादकोऽभ्युपगम्यमानः किं नित्यः, उतानित्य इति कल्पनाद्वयम्। न तावद् नित्यः, सर्वज्ञबोधकस्य नित्यस्याऽऽगमस्याभावात्; भावेऽपि तत्प्रतिपादकत्वेन तस्य प्रामाण्यासम्भवात्; कार्येऽर्थे तत्प्रामाण्यस्य व्यवस्थापितत्वात्। अथानित्यस्तत्प्रतिपादक इति पक्षः, सोऽपि न युक्तः; यतोऽनित्योऽपि किं तत्प्रणीतः स तदवबोधकः, अथ पुरुषान्तरप्रणीत इति विकल्पद्वयम्। तत्र न सर्वज्ञप्रणीतः स तदवबोधक इति पक्षो युक्तः, इतरेतराश्रयदोषप्रसङ्गात्। तथाहि—तत्प्रणीतत्वे तस्य प्रामाण्यम्, ततः तस्य तत्प्रतिपादकत्वमिति व्यक्तमितरेतराश्रयत्वम्। नापि पुरुषान्तरप्रणीतस्तदवबोधकः, तस्योन्मत्तवाक्यवदप्रमाणत्वात्; तन्न शब्दादपि तस्य सिद्धिः। नाप्युपमानात् तत्सिद्धिः, यत उपमानोपमेययोरध्यक्षत्वे सादृश्यालम्बनं तदभ्युपगम्यते; न चोपमानभूतः कश्चित् सर्वज्ञत्वेन प्रत्यक्षतः सिद्धो येन तत्सादृश्यादन्यस्य सर्वज्ञत्वमुपमानात् साध्यते; सिद्धौ वा प्रत्यक्षत एव सर्व-

१ प्रमेयकमलमार्तण्डे तु "सर्वज्ञसत्त्वे साध्ये भावधर्मो हेतुः, अभावधर्मो वा स्यात्, उभयधर्मो वा ? प्रथमपक्षे असिद्धः, भावे असिद्धे तद्धर्मस्य सिद्धिविरोधात्"–पृ० ६८ पं० १५। २ साध्यत्वेऽभि–भां०। ३ कर्कः श्वेतोऽश्वः।

ज्ञस्य सिद्धत्वान्नोपमानादपि तत्सिद्धिः। सर्वज्ञसद्भावमन्तरेणानुपपद्यमानस्य प्रमाणषट्कविज्ञातस्यार्थस्य कस्यचिदभावाद् नार्थापत्तेरपि सर्वज्ञसत्त्वसिद्धिः। न चागमप्रामाण्यलक्षणस्यार्थस्य तमन्तरेणानुपपद्यमानस्य तत्परिकल्पकत्वम्, अतीन्द्रिये स्वर्गाद्यर्थे तत्प्रणीतत्वनिश्चयमन्तरेण तस्य प्रामाण्यानिश्चयात्; अपौरुषेयत्वादपि तत्प्रामाण्यसंभवात् कुतस्तस्य तमन्तरेणानुपपद्यमानता? तन्नार्थापत्तितोऽपि तत्सिद्धिः। अभावाख्यस्य तु प्रमाणस्याभावसाधकत्वेन व्यापाराद् न तत्सद्भावसाधकत्वम्। न चोपमानाऽर्थापत्त्य-भावप्रमाणानां भवता प्रामाण्यमभ्युपगम्यते इति न तेभ्यस्तत्सिद्धिः। तदुक्तम्—

"सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत्॥
न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधकः।
न च मन्त्रार्थवादानां तात्पर्यमवकल्पते॥
न चागमेन सर्वज्ञस्तदीयेऽन्योन्यसंश्रयात्।
नरान्तरप्रणीतस्य प्रामाण्यं गम्यते कथम्?॥" [श्लो० वा० सू० २, श्लो० ११७-११९-११८]

ततो 'ये देश-काल-' इत्यादिप्रयोगे नासिद्धो हेतुः। सद्व्यवहारनिषेधश्च अनुपलम्भमात्रनिमित्तः अनेकधाऽनेन अन्यत्र प्रवर्तित इति अत्रापि तन्निमित्तसद्भावात् प्रवर्त्तयितुं युक्तः।

{अथ 'यथाऽस्माकं तत्सद्भावाऽऽवेदकं प्रमाणं नास्ति तथा भवतां तदभावाऽऽवेदकमपि नास्तीति सद्व्यवहारवदभावव्यवहारोऽपि न प्रवर्त्तयितव्यः। तथाहि-सर्वविदोऽभावः किं प्रत्यक्षसमधिगम्यः, प्रमाणान्तरगम्यो वा? तत्र न तावत् प्रत्यक्षसमधिगम्यः' यतः प्रत्यक्षं सर्वज्ञाभावाऽऽवेदकमभ्युपगम्यमानं 'किं सर्वत्र सर्वदा सर्वः सर्वज्ञो न' इत्येवं प्रवर्त्तते, उत 'क्वचित् कदाचित् कश्चित् सर्वज्ञो नास्ति' इत्येवम् इति कल्पनाद्वयम्। तत्र यदि 'सर्वत्र सर्वदा सर्वः सर्वज्ञो न' इति प्रत्यक्षस्य प्रवृत्तिस्तर्हि न सर्वज्ञाभावः, तज्ज्ञानवत एव सर्वज्ञत्वात्; नहि सकलदेश-कालव्यवस्थितपुरुषपरिषत्साक्षात्करणमन्तरेण तदाधारमसर्वज्ञत्वमवगन्तुं शक्यम्, तत्साक्षात्करणे च कथं न तज्ज्ञानवतः सर्वज्ञत्वम्? इति नाद्यः पक्षः। द्वितीयेऽपि पक्षे न सर्वथा सर्वज्ञाभावसिद्धिरिति न प्रत्यक्षात् सर्वज्ञाभावसिद्धिः। अथ न प्रवर्त्तमानं प्रत्यक्षं सर्वज्ञाभावसाधकं किंतु निवर्त्तमानम्; ननु यदि निखिलदेश-कालाधारसकलपुरुषपरिषदाश्रितानन्तपदार्थसंविद्व्यापकम् कारणं वा तत् स्यात् तदा तन्निवर्त्तमानं तथाभूतं सर्वज्ञत्वं व्यावर्त्तयेद् नान्यथा, अतथाभूतनिवृत्तौ तन्निवृत्तेरसिद्धेः, तथाऽभ्युपगमे वा स एव सर्वज्ञ इति न तेन तन्निषेधः। किंच, प्रत्यक्षनिवृत्तिर्यदि प्रत्यक्षमेव तदा स एव दोषः। अथ प्रत्यक्षादन्या तदाऽसौ प्रमाणम्, अप्रमाणं वा? अप्रमाणत्वे नातः सर्वज्ञाभावसिद्धिः। प्रमाणत्वे नानुमानत्वम्, सर्वाऽऽत्मसंबन्धिन्यास्तन्निवृत्तेर्यथासङ्ख्यमसिद्धाऽनैकान्तिकत्वदोषद्वयसद्भावात्। न च तुच्छा तन्निवृत्तिस्तदभावज्ञापिका, तुच्छायाः केनचित् सह प्रतिबन्धाभावेन सर्वसामर्थ्यविरहेण च ज्ञापकत्वासम्भवात्। तन्न प्रवर्त्तमानम्, निवर्त्तमानं वा प्रत्यक्षं तदभावं साधयति। प्रमाणान्तरगम्यत्वेऽपि तदभावो न तावदनुमानगम्यः, तदभावसाधकानुमानाभावात्। अथ 'विवादाध्यासितः पुरुषः सर्वज्ञो न भवति, वक्तृत्वात्, रथ्यापुरुषवत्' इत्यनुमानं तदभावसाधकम्, नन्वत्र किं प्रमाणान्तरसंवादिनोऽर्थस्य वक्तृत्वं हेतुः, उत तद्विपरीतस्य, आहोस्वित् वक्तृत्वमात्रमिति वक्तव्यम्। यदि 'प्रमाणान्तरसंवाद्यर्थस्य वक्तृत्वात्' इति हेतुस्तदा विरुद्धो हेतुः, तथाभूतवक्तृत्वस्य सर्वज्ञे एव भावात्। अथ 'प्रमाणान्तरविसंवादिनोऽर्थस्य वक्तृत्वात्' इति हेतुस्तदा सिद्धसाधनम्, तथाभूतस्य वक्तुरसर्वज्ञत्वेनास्माभिरप्यभ्युपगमात्। अथ वक्तृत्वमात्रं हेतुः, न; तस्य साध्यविपर्ययेण सर्वज्ञत्वेनानुपलब्धेन सहानवस्थानलक्षणस्य, तदव्यवच्छेदस्वभावेन च परस्परपरिहारस्वरूपस्य च विरोधस्याभावाद् न ततो व्यावृत्तिसिद्धिरिति न स्वसाध्यनियतत्वम्; तदभावान्न स्वसाध्यसाधकत्वम्। अथ सर्वज्ञो वक्ता नोपलब्ध इति ततो व्यावृत्तिसिद्धिः, न; सर्वसंबन्धिनोऽनुपलम्भस्यासंभवात्-सर्वज्ञ एव वक्तृत्वमा-

१ पृ० ४३ पं० २६। २ तथाभूत भां०, वा०।

त्मन्युपलप्स्यते सर्वज्ञान्तरेण वा तत् तत्र संवेदिष्यते इति न सम्भवः सर्वसंबन्धिनोऽनुपलम्भस्य। अथ सर्वज्ञस्य कस्यचिदभावात् सर्वसंबन्धिनोऽनुपलम्भस्य संभवः; ननु सर्वज्ञाभावः कुतः सिद्धः? अन्यतः प्रमाणात् चेत्, तत एव तदभावसिद्धेरस्य वैयर्थ्यम्। 'अत एवानुमानात्' इति न वक्तव्यम्, इतरेतराश्रयदोषप्रसङ्गात्—सिद्धेऽतोऽनुमानात् सर्वज्ञाभावे सर्वसंबन्ध्यनुपलम्भसंभवसामर्थ्याद् हेतोर्विपक्षतो व्यावृत्तिः स्यात्, तस्य च विपक्षाद् व्यावृत्तस्य तत्साधकत्वमिति व्यक्तमितरेतराश्रयत्वम्। भवतु वा सर्वसंबन्ध्यनुपलम्भसंभवस्तथापि सकलपुरुषचेतोवृत्तिविशेषाणामसर्वज्ञेन ज्ञातुमशक्तेरसिद्धः सर्वसंबन्ध्यनुपलम्भ इति न ततो विपक्षव्यावृत्तिनिश्चयो वक्तृत्वस्येति कुतः संदिग्धविपक्षव्यावृत्तिकाद् हेतोस्तदभावसिद्धिः? नापि स्वसंबन्धिनोऽनुपलम्भात् तद्व्यतिरेकनिश्चयः, तस्य स्वपितृव्यपदेशहेतुनाऽप्यनैकान्तिकत्वात्। न चैवंभूतादपि हेतोः साध्यसिद्धिः; तथाऽभ्युपगमे 'न कश्चित् सर्वज्ञाभावमवबुध्यते, वक्तृत्वात्, रथ्यापुरुषवत्' इति तदभावावगमाभावस्यापि सिद्धिः स्यात्। अथान्यत्रापि हेतावयं दोषः समान इति सर्वानुमानोच्छेदः, तदयुक्तम्; अन्यत्र विपक्षव्यावृत्तिनिमित्तस्यानुपलम्भव्यतिरेकेण बाधकप्रमाणस्य सद्भावात्। न चात्रापि तस्य सद्भाव इति शक्यं वक्तुम्, तदभावस्य हेतुलक्षणप्रस्तावे वक्ष्यमाणत्वात्। किंच, सर्वज्ञप्रतिपादकप्रमाणाभावे तस्यासिद्धत्वात् तदभावसाधनायोपन्यस्यमानः सर्वोऽपि हेतुराश्रयासिद्ध इति न तस्मादभावसिद्धिः। अथ तद्ग्राहकत्वेन प्रमाणं प्रवर्त्तत इत्याश्रयासिद्धत्वाभावस्तर्हि तत्साधकप्रमाणबाधितत्वात् पक्षस्य न तत्साधनाय हेतुप्रयोगसाफल्यमिति नानुमानावसेयः सर्वज्ञाभावः। अपौरुषेयत्वस्य प्राक्तनन्यायेनासिद्धत्वात् सर्वज्ञप्रणीतत्वानभ्युपगमे शब्दस्य पुरुषदोषसंक्रान्त्याऽप्रामाण्याद् न ततोऽपि तदभावसिद्धिः। न च तदभावाभिधायकं किञ्चिद् वेदवाक्यं श्रूयते, केवलं तद्भावाऽऽवेदकवेदवचनोपलब्धिरविगानेन समस्ति—

"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः।
स वेत्ति विश्वं नहि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्" ॥ [श्वेताश्वत० ३-१९]

तथा हिरण्यगर्भं प्रकृत्य "सर्वज्ञः" [ ] इत्यादि। न च स्वरूपेऽर्थे तस्याप्रामाण्यम्, तत्र तत्प्रामाण्यस्य प्रतिपादयिष्यमाणत्वात्; तन्न शब्दादपि तदभावसिद्धिः। नाप्युपमानात् तदभावावगमः, यत उपमानमुपमानोपमेययोरध्यक्षत्वे सादृश्यालम्बनमुदेति; अन्यथा—

"तस्माद् यत् स्मर्यते तत् स्यात् सादृश्येन विशेषितम्।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम्" ॥ [श्लो० वा० सू० ५, उपमान० श्लो० ३७]

इत्यभिधानात् प्रत्यक्षेणोपमानोपमेययोरग्रहणे उपमेयस्मरणासंभवात् कथं स्मर्यमाणपदार्थविशिष्टं सादृश्यम् सादृश्यविशिष्टं वा स्मर्यमाणं वस्तु उपमानविषयः स्यात्? तस्मादिदानींतनोपमानभूताशेषपुरुषप्रत्यक्षत्वम्, उपमेयाशेषान्यकालमनुष्यवर्गसाक्षात्करणं चावश्यमभ्युपगमनीयम्; तदभ्युपगमे च स एव सर्वज्ञ इति कथं उपमानात् तदभावावगमो युक्तः? अतो यदुक्तम्—

"यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम्।
दृष्टं संप्रति लोकस्य तथा कालान्तरेऽप्यभूत्" ॥ [श्लो० वा० सू० २, श्लो० ११३],

तन्निरस्तम्; उपमानस्योक्तन्यायेनात्र वस्तुन्यप्रवृत्तेः। नाप्यर्थापत्तितस्तदभावावगमः, तस्याः प्रमाणत्वेऽनुमानेऽन्तर्भूतत्वात्। तथाहि—"दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यदृष्टार्थकल्पनाऽर्थापत्तिः" [मीमां० शाबर० सू० ५, पृ० ८, पं० १७] नं चासावर्थोऽन्यथानुपपद्यमानत्वानवगमे अदृष्टार्थपरिकल्पनानिमित्तम्—अन्यथा स येन विनोपपद्यमानत्वेन निश्चितस्तमपि परिकल्पयेत् येन विना नोपपद्यते तमपि वा न कल्पयेत्—अनवगतस्य अन्यथाऽनुपपन्नत्वेन अर्थापत्युत्थापकस्यार्थस्य अन्यथाऽनुपपद्यमानत्वे सत्यप्यदृष्टार्थपरिकल्पकत्वासंभवात्; संभवे वा लिङ्गस्याप्यनिश्चितनियमस्य परोक्षार्थानुमापकत्वं स्यादिति तदपि नार्थापत्युत्थापकादर्थाद् भिद्येत। स चान्यथाऽनु-

१ अनुपलम्भस्य सर्व—आत्मसंबन्धिरूपपूर्वोक्तविकल्पद्वयद्वारा विपक्षव्यावृत्त्यसाधकत्वे संदिग्धविपक्षव्यावृत्तिकत्वरूपो दोषः। २ **-मेये स्मर-**भां०। ३ प्र० पृ० पं० २४। ४ **नास्त्यसावर्थो-** कां०।

पपद्यमानत्वावगमस्तस्यार्थस्य न भूयोदर्शननिमित्तः सपक्षे, अन्यथा 'लोहलेख्यं वज्रम्, पार्थिवत्वात्, काष्ठवत्' इत्यत्रापि साध्यसिद्धिः स्यात्। नापि विपक्षे तस्यानुपलम्भनिमित्तोऽसौ—व्यतिरेकनिश्चायकत्वेनानुपलम्भस्य पूर्वमेव निषिद्धत्वात्—किन्तु विपर्यये तद्बाधकप्रमाणनिमित्तः; तच्च बाधकं प्रमाणमर्थापत्तिप्रवृत्तेः प्रागेवानुपपद्यमानस्यार्थस्य तत्र प्रवृत्तिमदभ्युपगन्तव्यम्, अन्यथाऽर्थापत्त्या तस्यान्यथाऽनुपपद्यमानत्वावगमेऽभ्युपगम्यमाने यावत् तस्यान्यथाऽनुपपद्यमानत्वं नावगतं न तावदर्थापत्तिप्रवृत्तिः, यावच्च न तत्प्रवृत्तिर्न तावदर्थापत्युत्थापकस्यार्थस्यान्यथाऽनुपपद्यमानत्वावगम इतीतरेतराश्रयत्वान्नार्थापत्तिप्रवृत्तिः। अत एव यदुक्तम्—

"अविनाभाविता चात्र तदैव परिगृह्यते।
न प्रागवगतेत्येवं सत्यप्येषा न कारणम्॥
तेन संबन्धवेलायां संबन्ध्यन्यतरो ध्रुवम्।
अर्थापत्त्यैव मन्तव्यः पश्चादस्त्वनुमानता" ॥ [श्लो० वा० सू० ५, अर्थापत्ति० श्लो० ३०-३३] इत्यादि,

तन्निरस्तम्; एवमभ्युपगमेऽर्थापत्तेरनुत्थानस्य प्रतिपादितत्वात्। स च तस्य पूर्वमन्यथाऽनुपपद्यमानत्वावगमः किं दृष्टान्तधर्मिप्रवृत्तप्रमाणसंपाद्यः, आहोस्वित् स्वसाध्यधर्मिप्रवृत्तप्रमाणसंपाद्य इति? तत्र यद्याद्यः पक्षस्तदाऽत्रापि वक्तव्यम्—किं तत् दृष्टान्तधर्मिणि प्रवृत्तं प्रमाणं साध्यधर्मिण्यपि साध्यान्यथाऽनुपपन्नत्वं तस्यार्थस्य निश्चाययति, आहोस्वित् दृष्टान्तधर्मिण्येव? तत्र यद्याद्यः पक्षस्तदाऽर्थापत्युत्थापकस्यार्थस्य लिङ्गस्य वा स्वसाध्यप्रतिपादनव्यापारं प्रति न कश्चिद् विशेषः। अथ द्वितीयः, स न युक्तः; नहि दृष्टान्तधर्मिणि निश्चितस्वसाध्यान्यथाऽनुपपद्यमानत्वोऽर्थोऽन्यत्र साध्यधर्मिणि तथा भवति। न च तथात्वेनानिश्चितः स साध्यधर्मिणि स्वसाध्यं परिकल्पयतीति युक्तम्, अतिप्रसङ्गात्। अथ लिङ्गस्य दृष्टान्तधर्मिप्रवृत्तप्रमाणवशात् सर्वोपसंहारेण स्वसाध्यनियतत्वनिश्चयः, अर्थापत्युत्थापकस्य त्वर्थस्य स्वसाध्यधर्मिण्येव प्रवृत्तात् प्रमाणात् सर्वोपसंहारेणादृष्टार्थान्यथाऽनुपपद्यमानत्वनिश्चय इति लिङ्गाऽर्थापत्युत्थापकयोर्भेदः। नास्माद् भेदादर्थापत्तेरनुमानं भेदमासादयति। अनुमानेऽपि स्वसाध्यधर्मिण्येव विपर्ययाद्धेतुव्यावर्त्तकत्वेन प्रवृत्तं प्रमाणं सर्वोपसंहारेण स्वसाध्यनियतत्वनिश्चायकमभ्युपगन्तव्यम्; अन्यथा 'सर्वमनेकान्तात्मकम्, सत्त्वात्' इत्यस्य हेतोः पक्षीकृतवस्तुव्यतिरेकेण दृष्टान्तधर्मिणोऽभावात् कथं तत्र प्रवर्त्तमानं बाधकं प्रमाणमनेकान्तात्मकत्वनियतत्वमवगमयेत् सत्त्वस्य। न च साध्यधर्मिणि दृष्टान्तधर्मिणि च प्रवर्त्तमानेन प्रमाणेनार्थापत्युत्थापकस्यार्थस्य लिङ्गस्य च यथाक्रमं प्रतिबन्धो गृह्यत इत्येतावन्मात्रेणार्थापत्त्यनुमानयोर्भेदोऽभ्युपगन्तुं युक्तः, अन्यथा पक्षधर्मत्वसहितहेतुसमुत्थादनुमानात् तद्रहितहेतुसमुत्थमनुमानं प्रमाणान्तरं स्यादिति प्रमाणषट्कवादो विशीर्येत। नियमवतो लिङ्गात् परोक्षार्थप्रतिपत्तेरविशेषाद् 'न ततस्तद् भिन्नम्' इत्यभ्युपगमे स्वसाध्याविनाभूतादर्थादर्थप्रतिपत्तेरविशेषादनुमानादर्थापत्तेः कथं नाभेदः? तदेवं प्रमाणत्वेऽर्थापत्तेरनुमानेऽन्तर्भावात् अनुमानस्य च सर्वज्ञाभावप्रतिपादकस्य निषेधात् तन्निषेधे चार्थापत्तेरपि तदभावग्राहकत्वेन निषेधान्नार्थापत्तिसमधिगम्योऽपि सर्वज्ञाभावः। अभावाख्यं तु प्रमाणमप्रमाणत्वादेव न तदभावसाधकम्; प्रमाणत्वेऽपि किमात्मनोऽपरिणामलक्षणं तत्, आहोस्विदन्यवस्तुविज्ञानलक्षणमिति? तत्र यद्यात्मनोऽपरिणामलक्षणं तदभावसाधकमिति पक्षः, स न युक्तः; तस्य सत्त्वेनाभ्युपगते परचेतोवृत्तिविशेषेऽपि सद्भावेनानैकान्तिकत्वात्। अथान्यविज्ञानलक्षणमिति पक्षः, सोऽप्यसंबद्धः; यतः सर्वज्ञत्वादन्यद् यदि किञ्चिज्ज्ञत्वं तद्विषयं ज्ञानं तदन्यज्ञानं तदाऽत्रापि वक्तव्यम्—किं सकलदेश-कालव्यवस्थितपुरुषाधारं किञ्चिज्ज्ञत्वम् अभ्युपगम्यते, आहोस्वित् कतिपयपुरुषव्यक्तिसमाश्रितमिति? तत्र यदि समस्तदेश-कालाश्रितपुरुषाधारं किञ्चिज्ज्ञत्वं तद्विषयं ज्ञानं तदन्यज्ञानं तत् सर्वज्ञाभावप्रसाधकम्, तदयुक्तम्; सकलदेश-कालव्यवस्थितपुरुषपरिषत्साक्षात्करणव्यतिरेकेण तदाधारस्य किञ्चिज्ज्ञत्वस्य विषयीकर्तुमशक्तेर्न तद्विषयस्य तदन्यज्ञानस्य सर्वज्ञाभावावगमनिमित्तत्वं युक्तम्; सर्वदेश-कालव्यवस्थि-

१ पृ० २१ पं० २१। २ **संबन्धान्यतरो** कां०, गु०। ३ प्र० पृ० पं० ७। ४—त्मकनिय-गु०। ५ पृ० ४५ पं० ३३।

ताशेषपुरुषसाक्षात्करणे च स एव सर्वदर्शी इति न तदभावाभ्युपगमः श्रेयान्। अथ कतिपयपुरुषव्यक्तिव्यवस्थितं किञ्चिज्ज्ञत्वं तदन्यत् तद्विषयं ज्ञानं तदन्यज्ञानं सर्वज्ञाभावावेदकम्, तदप्ययुक्तम्; तज्ज्ञानात् तदभावावगमे कतिपयपुरुषव्यक्तिव्यवस्थितस्यैव सर्वज्ञत्वस्याभावः सिध्येत्, न सर्वत्र सर्वदा सर्वपुरुषेषु; तथा च सिद्धसाधनम्, अस्माभिरपि कुत्रचित् कस्यचिद् रथ्यापुरुषादेः सर्वज्ञत्वेनाभ्युपगमात्। अथ सर्वज्ञत्वादन्यस्तदभावस्तद्विषयं ज्ञानं तदन्यज्ञानं तदाऽत्रापि किं 'सर्वदा सर्वत्र सर्वः सर्वज्ञो न' इत्येवं तत् प्रवर्त्तते, उत 'कुत्रचित् कदाचित् कश्चित् सर्वज्ञो न' इत्येवम्? तत्र नाद्यः पक्षः, सकलदेश-कालपुरुषासाक्षात्करणे तदाधारस्य तदभावस्यावगन्तुमशक्यत्वात् प्रदेशाप्रत्यक्षीकरणे तदाधारस्य घटाभावस्येव, तत्साक्षात्करणे च तदेव सर्वज्ञत्वम् इति न तदभावसिद्धिः। अथ द्वितीयः पक्षस्तदा न सर्वत्र सर्वदा सर्वज्ञाभावसिद्धिरिति तदेव सिद्धसाधनम्। 'प्रमाणपञ्चकनिवृत्तेस्तदभावज्ञानम्' इत्यादि सर्वं प्रतिविहितमिति नाभावप्रमाणादपि तदभावावगमोऽभ्युपगन्तुं युक्तः} इत्यादि यत् तदप्यविदितपराभिप्रायस्य सर्वज्ञवादिनोऽभिधानम्।

यतो नास्माकम् 'अतीन्द्रियसर्वज्ञादिपदार्थबाधकं प्रत्यक्षादिप्रमाणं स्वतन्त्रं प्रवर्त्तते' इत्यभ्युपगमः—अतीन्द्रियेषु स्वतन्त्रस्य प्रत्यक्षादिप्रमाणस्य भवदभिहितप्राक्तनदोषदुष्टत्वेन प्रवृत्त्यसंभवात्—किन्तु प्रसङ्गसाधनाभिप्रायेण सर्वमेव सर्वज्ञप्रतिक्षेपप्रतिपादकं युक्तिजालमभिहितं यथार्थमभिधानमुद्बहद्भिर्मीमांसकैः। अत एव तदभिप्रायप्रकाशनपरं भगवतो जैमिनेः सूत्रम्—"सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम्" [जैमि० सू० १-१-४] इति, यतो नानेनापि सूत्रेण स्वातन्त्र्येण प्रत्यक्षलक्षणमभ्यधायि भगवता किन्तु लोकप्रसिद्धलक्षणलक्षितप्रत्यक्षानुवादेन तस्य धर्मं प्रत्यनिमित्तत्वं विधीयते। {न चैतदत्रापि वक्तव्यम्—कतरस्य प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वं विधीयते अस्मदादिप्रत्यक्षस्य, सर्वज्ञप्रत्यक्षस्य वा? अस्मदादिप्रत्यक्षस्य तदनिमित्तत्वप्रतिपादने सिद्धसाधनम्। सर्वज्ञप्रत्यक्षस्य भवन्मतेनाप्रसिद्धत्वाच्छशविषाणस्येव कथं तं प्रत्यनिमित्तताविधिः? अथापि स्यात् परेण तस्याभ्युपगतत्वात् तं प्रत्यनिमित्तत्वं तत्प्रसिद्ध्यैवोच्यते, तदयुक्तम्; परीक्षापूर्वकत्वेनाभ्युपगमस्य स्थितत्वात्, तत्पूर्वकश्चेत् परस्याभ्युपगमस्तदा भवतोऽपि तस्य तद्भावः, परीक्षायाः प्रमाणरूपत्वात्; प्रमाणसिद्धं च न परस्यैव सिद्धम्, प्रमाणसिद्धस्य सर्वैरेवाभ्युपगमनीयत्वात्। अथ प्रमाणव्यतिरेकेण परेण सर्वज्ञप्रत्यक्षमभ्युपगतं तदाऽसौ प्रमाणाभावादेव नाभ्युपगमो युक्तः। न च प्रमाणाभ्युपगतस्यास्मदादिप्रत्यक्षविलक्षणस्य सर्ववित्प्रत्यक्षस्य तं प्रत्यनिमित्तत्वं विधातुं युक्तम्, यतोऽस्मदादिप्रत्यक्षविलक्षणत्वं सर्ववित्प्रत्यक्षस्य धर्मादिग्राहकत्वेनैव; तच्चेत् प्रमाणतोऽभ्युपगतम्, कथं तस्य तं प्रत्यनिमित्तत्वमुपपद्येत तद्ग्राहकप्रमाणबाधितत्वात्? किञ्च, अयं परस्परविरुद्धोऽपि वाक्यार्थः स्यात्-प्रमाणतो धर्मादिग्राहकं सर्ववित्प्रत्यक्षं यत् प्रसिद्धं तद् धर्मादिग्राहकं न भवतीति} यतो न प्रसङ्गसाधने आश्रयासिद्धत्वादिदूषणं क्षमते; नहि प्रमाणमूलपराभ्युपगमपूर्वकमेव प्रसङ्गसाधनं प्रवर्त्तते, किं तर्हि? 'यदि'अर्थाभ्युपगमदर्शनपूर्वकम्। अत एव 'प्रसङ्गसाधनस्य विपर्ययफलत्वम्, विपर्ययस्य च अतीन्द्रियपदार्थविषयप्रत्यक्षनिषेधफलत्वम्, तन्निषेधे च किं प्रत्यक्षस्य धर्मिणो निषेधः, अथ तद्धर्मस्य प्रत्यक्षत्वस्येति? पूर्वस्मिन् पक्षे हेतूनामाश्रयासिद्धतेति प्रतिपादितम्। उत्तरत्र प्रत्यक्षत्वनिषेधे प्रमाणान्तरत्वप्रसक्तिः, विशेषप्रतिषेधस्य शेषाभ्यनुज्ञानलक्षणत्वात्' इति न प्रेर्यम्, यतो विशेषनिषेधे तस्य विशेषरूपत्वेन सत्त्वस्यैव प्रतिषेधः। न च धर्म्यसिद्धत्वादिदोषः, 'यदि'अर्थस्याभ्युपगतत्वात्। कथं पुनरत्र प्रसङ्गः विपर्ययो वा क्रियते इति चेत्, तदुच्यते-'सार्वज्ञं प्रत्यक्षं यद्यभ्युपगम्यते तदा तद् धर्मग्राहकं न भवति, विद्यमानोपलम्भनत्वात्। न चासिद्धो हेतुः। तथाहि—विद्यमानोपलम्भनमतीन्द्रियार्थजप्रत्यक्षम्, सत्संप्रयोगजत्वात्। अस्याप्यसिद्धतोद्भावने एवं वक्तव्यम्—'विवादगोचरं प्रत्यक्षं सत्संप्रयोगजम्, प्रत्यक्षत्वात् तच्छब्दवाच्यत्वाद् वा, अस्मदादिप्रत्यक्षम् सर्वत्र दृष्टान्तः' इति प्रसङ्गः। विपर्ययस्त्वेवम्—'तद् धर्मग्राहकं चेत् न विद्यमानोपलम्भनम्, अविद्यमानत्वाद् धर्मस्य। अविद्यमानोपलम्भनत्वे न सत्संप्रयोगजम्। अस-

१-त्वस्याप्यभावः कां०। २ कुत्रचिद् रथ्या-गु०। ३ पृ० ४३ पं० २६—पृ० ४५ पं० ७। ४ पृ०४७ पं० ३३। ५ "वृत्ति-सर्ग-तायने (हे० ३-३-४८) इत्यात्मनेपदम्" मां० टि०। ६ "'यदि'अङ्कितकारिकाप्रतिपादितार्थाभ्युपगमदर्शनपूर्वकम्" भा०, गु० टि०। ७ पृ० ४६ पं० १४। ८ सर्वस्यैव गु०, वि०, अ०। ९ चेत् तर्हि अविद्यमा-वि०, आ०, बृ०। १० "भविष्यत्तया वर्तमानकाले अविद्यमानत्वम्" भां० टि०।

त्संप्रयोगजत्वे न प्रत्यक्षम्, नापि तच्छब्दवाच्यम्'। प्रसङ्गसाधनाभिप्रायेणैव 'यदि'अर्थोपक्षेपेण वार्त्तिककृताऽप्यभिहितम्—

"यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः केन वार्यते ॥
एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते।
नूनं स चक्षुषा सर्वत्रसादीन् (सर्वान् रसादीन्) प्रतिपद्यते ॥
यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम्।
दृष्टं संप्रति लोकस्य तथा कालान्तरेऽप्यभूत्" ॥ [श्लो० वा० सू० २, श्लो० १११-११३]

पुनरप्युक्तम्—

"येऽपि सातिशया दृष्टाः प्रज्ञा-मेधादिभिर्नराः।
स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनात् ॥ [ ]
यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्।
दूर-सूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितः" ॥ [श्लो० वा० सू० २, श्लो० ११४] इत्यादि।

तेनात्रापि 'स्वतन्त्रानुमानाभिप्रायेणाश्रयासिद्धत्वादिदूषणम्' 'उपमानोपन्यासबुद्ध्या वाऽशेषोपमानोपमेयभूतपुरुषपरिषत्साक्षात्करणे उपमानं प्रवर्त्तते' इत्यादि दूषणाभिधानं च सर्वज्ञवादिनः स्वजात्याविष्करणमात्रकमेव। अतः 'अतीन्द्रियसर्वविदो न प्रत्यक्षं प्रवृत्तिद्वारेण निवृत्तिद्वारेण वाऽभावसाधनम्' इत्यादि सर्वमभ्युपगमवादान्निरस्तम्।

यच्चानुमानेन सर्वज्ञाभावसाधने दूषणमभिहितम् 'किं प्रमाणान्तरसंवाद्यर्थस्य वक्तृत्वात्' इत्यादि, तद् धूमादग्न्यनुमानेऽपि समानम्। {तथाहि—तत्रापि वक्तुं शक्यते—किं साध्यधर्मिसंबन्धी धूमो हेतुत्वेनोपन्यस्तः, उत दृष्टान्तधर्मिसंबन्धी? तत्र यदि साध्यधर्मिसंबन्धी हेतुस्तदा तस्य दृष्टान्तेऽसंभवादनन्वयदोषः। अथ दृष्टान्तधर्मिसंबन्धी, सोऽसिद्धः; दृष्टान्तधर्मिधर्मस्य साध्यधर्मिण्यसंभवात्। अथोभयसाधारणं धूमत्वसामान्यं हेतुस्तदा तस्य विपक्षेऽनग्नौ विरोधासिद्धेः सन्दिग्धविपक्षव्यावृत्तिकत्वेन स्वसाध्यागमकत्वम्। अथ विपक्षेऽनग्नौ धूमस्यानुपलम्भाद् विरोधसिद्धेर्न सन्दिग्धविपक्षव्यावृत्तिकत्वम्; नन्वत्रापि वक्तुं शक्यम्—सर्वसंबन्धिनोऽनुपलम्भस्यासंभवात् अनग्नौ देशान्तरे कालान्तरे वा केनचिद् धूमस्योपलम्भात्। तदुपलब्धिमतः कस्यचिदभावात् सर्वसंबन्धिनोऽनुपलम्भस्य संभव इति चेत्, केन पुनः प्रमाणेनानग्नौ धूमसत्त्वग्राहकपुरुषाभावः प्रतिपन्नः? यद्यन्यतः प्रमाणात्, तत एवानग्नेर्धूमस्य व्यावृत्तिसिद्धेर्व्यर्थं सर्वसंबन्ध्यनुपलम्भलक्षणस्य विपक्षे धूमविरोधसाधकस्य प्रमाणस्याभिधानम्। अथ तथाभूतानुपलम्भात् तदभावावगमः; ननु तथाभूतपुरुषाभावे तदनुपलम्भसंभवः, तत्संभवाच्च तथाभूतपुरुषाभावसिद्धिरितीतरेतराश्रयत्वाद् न सर्वसंबन्धिनोऽनुपलम्भस्य संभवः; संभवेऽपि तस्यासिद्धेर्न विपर्यये विरोधसाधकत्वम्। अथात्मसंबन्धिनोऽनुपलम्भस्य धूमत्वलक्षणहेतोर्विपक्षाद् व्यावृत्तिसाधकत्वम्, न; तस्य परचेतोवृत्तिविशेषैरनैकान्तिकत्वात्। अथानुपलम्भव्यतिरिक्तं धूमलक्षणस्य हेतोर्विपर्यये बाधकं प्रमाणमस्ति न तु वक्तृत्वलक्षणस्य, किं पुनस्तदिति वक्तव्यम्? अग्नि-धूमयोः कार्यकारणभावलक्षणप्रतिबन्धग्राहकमिति चेत्, कः पुनरसौ कार्यकारणभावः, किं वा तद्ग्राहकं प्रमाणम्? अग्निभावे एव धूमस्य भावस्तदभावे चाभाव एव असौ, तद्ग्राहकं च प्रमाणं प्रत्यक्षाऽनुपलम्भस्वभावम्। ननु किञ्चिज्ज्ञत्वस्य तद्व्यापकस्य वा रागादिमत्त्वस्य भावे एव वक्तृत्वस्य भावः स्वात्मन्येव दृष्टः, तदभावे चाऽभाव एवोपलादावविगानेनानुपलम्भतो ज्ञात इति कथं न विपर्यये सर्वज्ञत्वे वीतरागत्वे वा वक्तृत्वलक्षणस्य हेतोर्बाधकं कार्यकारणभावलक्षणप्रतिबन्धग्राहकं प्रत्यक्षानुपलम्भाख्यं प्रमाणं दर्शनादर्शनशब्दवाच्यं

१ -ता भा०। २ पृ० ४६ पं० १४। ३ पृ० ४६ पं० २४-३१। ४ पृ० ४५ पं० ३२। ५ पृ० ४५ पं० ३५। ६ विपर्ययविरोधसा-मां०। ७ -क्षाव्यावृत्ति-भां०, मा०।

युक्तम्? न च दर्शनादर्शनशब्दवाच्यस्यास्मदभ्युपगतप्रमाणस्य प्रत्यक्षानुपलम्भशब्दवाच्यस्य वा भवदभिप्रेतस्य कश्चिद्विशेषः प्रकृतहेतु-साध्यप्रतिबन्धसाधने उपलभ्यते। अथ किञ्चिज्ज्ञत्व-रागादिमत्त्वसद्भावेऽपि स्वात्मनि न तद्धेतुकं वक्तृत्वं प्रतिपन्नम् किन्तु वक्तुकामताहेतुकम्; रागादिसद्भावेऽपि वक्तुकामताऽभावेऽभावाद् वचनस्य। नन्वेवं व्यभिचारे विवक्षाऽपि न वचने निमित्तं स्यात्, तत्राप्यन्यविवक्षायामन्यशब्ददर्शनात्; अन्यथा गोत्रस्खलनादेरभावप्रसङ्गात्। अथार्थविवक्षाव्यभिचारेऽपि शब्दविवक्षायामव्यभिचारः, न; स्वप्नावस्थायाम् अन्यगतचित्तस्य वा शब्दविवक्षाऽभावेऽपि वक्तृत्वसंवेदनात्। न च व्यवहिता विवक्षा तस्य निमित्तमिति परिहारः, एवमभ्युपगमे प्रतिनियतकार्यकारणभावाभावप्रसङ्गात् सर्वस्य तत्प्राप्तेः। तन्न वक्तुकामतानिमित्तमप्येकान्ततो वचनं सिद्धम्, व्यतिरेकासिद्धेः। अन्वयस्तु किञ्चिज्ज्ञत्वेन रागादिमत्त्वेन वा वचनस्य सिद्धो न वक्तुकामतया। अथ किञ्चिज्ज्ञत्वाद्यभावे सर्वत्र वक्तृत्वं न भवतीत्यत्र प्रमाणाभावान्नासर्वज्ञ-वक्तृत्वयोः कार्यकारणभावलक्षणः प्रतिबन्धः सिध्यति, तर्हि वह्न्यभावे धूमः सर्वत्र न भवतीत्यत्रापि प्रमाणाभावस्तुल्य इति न प्रतिबन्धग्रहः। अथाग्न्यभावेऽपि यदि धूमः स्यात् तदाऽसौ तद्धेतुक एव न भवेदिति सकृदप्यहेतोरग्नेस्तस्य न भावः स्यात्, दृश्यते च महानसादावग्नित इति नाग्नेर्धूमसद्भाव इति प्रतिबन्धसिद्धिः। ननु यथेन्धनादेरेकदा समुद्भूतोऽपि वह्निरन्यदाऽरणितो मण्यादेर्वा भवन्नुपलभ्यते, धूमो वा वह्नित उपजायमानोऽपि गोपालघटिकादौ पावकोद्भूतधूमादप्युपजायते इत्यवगमस्तथा कदाचिदग्न्यभावेऽपि भविष्यतीति कुतः प्रतिबन्धसिद्धिः? अथ यादृशो वह्निरिन्धनादिसामग्रीत उपजायमानो दृष्टो न तादृशोऽरणितो मण्यादेर्वा, धूमोऽपि यादृशोऽग्नित उपजायते न तादृश एव गोपालघटिकादावग्निप्रभवधूमात्। अन्यादृशात् तादृशभावे तादृशत्वमहेतुकमिति न तस्य क्वचिदपि प्रतिनियमः स्यात्, अहेतोर्देश-काल-स्वभावनियमायोगादिति नाग्निजन्यधूमस्य तत्सदृशस्य वाऽनग्नेर्भावः; भावे वा तादृशधूमजनकस्याग्निस्वभावतैवेति न व्यभिचारः। तदुक्तम्–

"अग्निस्वभावः शक्रस्य मूर्द्धा यद्यग्निरेव सः।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत्"॥ [ ] इत्यादि।

तदेतद् वक्तृत्वेऽपि समानम्। तथाहि-यदि सर्वज्ञे वीतरागे वा वचनं स्याद् असर्वज्ञाद् रागादियुक्ताद् वा कदाचिदपि न स्यात्, अहेतोः सकृदप्यसंभवात्; भवति च तत् ततः। अतो न सर्वज्ञे तस्य तत्सदृशस्य वा संभव इति प्रतिबन्धसिद्धिः। अथ देशान्तरे कालान्तरे वाऽसर्वज्ञकार्यमेव वचनं न सर्वज्ञप्रभवमिति न दर्शनाऽदर्शनप्रमाणगम्यम्—दर्शनस्येयद्यापारासंभवात् अदर्शनस्य च प्रागेवैवंभूतार्थग्राहकत्वेन निषिद्धत्वात्–तर्हि सर्वदाऽग्निप्रभव एव धूमोऽन्यभावे कदाचनापि न भवतीत्यत्रापि प्रत्यक्षस्य सन्निहितवर्त्तमानार्थग्राहकत्वेनाप्रवृत्तेः, अनुपलम्भस्यापि तद्विविक्तप्रदेशविषयप्रत्यक्षस्वभावस्यात्र वस्तुनि व्यापारासंभवाद् न कार्यकारणभावलक्षणः प्रतिबन्धः प्रत्यक्षानुपलम्भसाधनः स्यात्। नाप्यनुमानतोऽपि प्रकृतः प्रतिबन्धः सिद्धिमासादयति, इतरेतराश्रयाऽनवस्थादोषप्रसङ्गस्य प्रदर्शितत्वात्। न चान्यत् प्रतिबन्धप्रसाधकं प्रमाणमस्तीति प्रसिद्धानुमानस्यापि सर्वज्ञाभावाऽऽवेदकानुमाननिरासयुक्त्युपक्षेपमिच्छतोऽत्राभावः प्रसक्तः। अथ प्रसिद्धानुमाने साध्यसाधनयोः प्रतिबन्धः तत्प्रसाधकं च प्रमाणं किञ्चिदस्ति तर्हि स एव प्रतिबन्धः किञ्चिज्ज्ञत्व-वक्तृत्वयोः तत्प्रसाधकं च तदेव प्रमाणं भविष्यतीति सिद्धः प्रतिबन्धः किञ्चिज्ज्ञत्व-वक्तृत्वयोरग्नि-धूमयोरिव } अत एव 'व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयको यत्र दर्श्यते तत् प्रसङ्गसाधनम्' इति तल्लक्षणस्य युष्मदभ्युपगमेनात्र सद्भावाद् भवत्येवातोऽनुमानात् सर्वज्ञाभावसिद्धिः। पक्षधर्मताऽभावप्रतिपादनं च यत् प्रकृतप्रसङ्गसाधने प्रतिपादितं तद् अभ्युपगमवादान्निरस्तम्, तत्र पक्षधर्मताया हेतोरभावेऽपि गमकत्वस्य सिद्धत्वात्। शेषस्तु पूर्वपक्षग्रन्थोऽनभ्युपगमान्निरस्त इति न प्रत्युच्चार्य दूषितः। अतोऽयुक्तमुक्तम् 'सर्वज्ञवादिनां यथा तत्साधकप्रमाणाभावाद् न तद्विषयः सद्व्यवहारस्तथा तदभाववादिनां मीमांसकादीनां तदभावग्राहकप्रमाणाभावादेव न तदभावव्यवहारः' इति, प्रसङ्गसाधनस्य तदभावसाधकस्य समर्थितत्वात्।

१ ज्ञत्वे रागा-कां०। २ वा भाव इति शु०, आ०, वि०। ३ पृ० २१ पं० २०। ४ पृ० २१ पं० १५। ५ पृ० ४५ पं० १७।

अथ यद् अभ्यासविकलचक्षुरादिजनितं प्रत्यक्षं तद् धर्मादिग्राहकं न भवतीति प्रसङ्गसाधनात् सिध्यति न पुनरन्यादृग्भूतम्, चोदनावदन्यादृशस्य धर्मग्राहकत्वाविरोधात्। ननु किं तज्ज्ञानं प्रतिनियतचक्षुरादिजनितं धर्मादिग्राहकम्, उताभ्यासजनितम्, आहोस्वित् शब्दजनितम्, किंवाऽनुमानप्रभावितम्? तत्र यदि चक्षुरादिप्रभवम्, तदयुक्तम्; चक्षुरादीनां प्रतिनियतरूपादिविषयत्वेन तत्प्रभवस्य तज्ज्ञानस्य धर्मादिग्राहकत्वायोगात्। अत एव "यदि षड्भिः" इत्यादुक्तं दूषणमत्र पक्षे। अथाभ्यासजनितं तदिति पक्षः-तथाहि-ज्ञानाभ्यासात् प्रकर्षतरतमादिप्रक्रमेण तत्प्रकर्षसम्भवे तदुत्तरोत्तराभ्याससमन्वयात् सकलभावातिशयपर्यन्तं संवेदनमवाप्यत इति, तदपि मनोरथमात्रम्; यतोऽभ्यासो हि नाम कस्यचित् प्रतिनियतशिल्पकलादौ प्रतिनियतोपदेशसद्भाववतो जन्मतो जनस्य संभाव्यते न तु सर्वपदार्थविषयोपदेशसंभवः। न च सर्वपदार्थविषयानुपदेशज्ञानसंभवो येन तज्ज्ञानाभ्यासात् सकलज्ञानप्राप्तिः, तत्संभवे वा सकलपदार्थविषयज्ञानस्य सिद्धत्वात् किमभ्यासप्रयासेन? किंच, तदभ्यासप्रवर्त्तकं ज्ञानं यदि चक्षुरादिप्रतिनियतकरणप्रभवमप्यन्येन्द्रियविषयरसादिगोचरम् अतीन्द्रियार्थगोचरं च स्यात् तदा पदार्थशक्तेः प्रतिनियतत्वेन प्रमाणसिद्धाया अभावात् प्रतिनियतकार्यकारणभावाभावप्रसक्तिसद्भावात् सकलव्यवहारोच्छेदप्रसक्तिः। अथाभ्याससहायानां चक्षुरादीनामपि सर्वज्ञावस्थायामतीन्द्रियदर्शनशक्तिर्न च व्यवहारोच्छेदः, अस्मदादिचक्षुरादीनामनभ्यासदशायां शक्तिप्रतिनियमाद् अस्मदादय एव व्यवहारिण इति, एतदप्यसमीचीनम्; न खल्वभ्यासे सत्यप्यन्यतो वा हेतोः कस्यचिदतीन्द्रियदर्शनं चक्षुरादिन्य उपलभ्यते; दृष्टानुसारिण्यश्च कल्पना भवन्तीति। किंच, सर्वपदार्थवेदने चक्षुरादिजनितज्ञानात् तदभ्यासः, तत्सहायं च चक्षुरादिकं सर्वज्ञावस्थायां सर्वपदार्थसाक्षात्कारिज्ञानं जनयतीति कथमितरेतराश्रयमेतत् कल्पनागोचरचारि चतुरचेतसो भवत इति न द्वितीयोऽपि पक्षो युक्तिक्षमः। अथ शब्दजनितं तज्ज्ञानम्, ननु शब्दस्य तत्प्रणीतत्वेन प्रामाण्ये सर्वपदार्थविषयज्ञानसंभवः, तज्ज्ञानसंभवे च सर्वज्ञस्य तथाभूतशब्दप्रणेतृत्वमितीतरेतराश्रयदोषानुषङ्गः। अत एवोक्तम्—

"नतं तदागमात् सिध्येद् न च तेनागमो विना"। [श्लोक० वा० सू० २, श्लो० १४२] इति।

न च शब्दजनितं स्पष्टाभमिति न तज्ज्ञानवान् सकलज्ञ इत्यभ्युपगम्यते, एवं च प्रेरणाजनितज्ञानवतो धर्मज्ञत्वम्; अत एवोक्तम्—"चोदना हि भूतं भवन्तम्" इत्यादि, तन्न तृतीयपक्षोऽपि युक्तिसङ्गतः। अनुमानजनितज्ञानेन तु सर्ववित्त्वे न धर्मज्ञत्वम्, धर्मादेरतीन्द्रियत्वेन तज्ज्ञापकलिङ्गत्वेनाभ्युपगम्यमानस्यार्थस्य तेन सह संबन्धासिद्धेः; असिद्धसंबन्धस्य चाऽज्ञापकत्वान्न ततो धर्माद्यनुमानम् इत्यनुमानजनितं ज्ञानं न सकलधर्मादिपदार्थाऽऽवेदकम्। किंच, तथाभूतपदार्थज्ञानेन यदि सर्ववित्त्वमभ्युपगम्यते तदा अस्मदादीनामपि सर्ववित्त्वमनिवारितप्रसरम्, 'भावाभावोभयरूपं जगत्, प्रमेयत्वात्' इत्यनुमानस्यास्मदादीनामपि भावात्; अस्पष्टं चाऽनुमानमिति तज्जनितस्याप्यवैशद्यसंभवान्न तज्ज्ञानवान् सर्वज्ञो युक्तः। अथानुमानज्ञानं प्रागविशदमपि तदेवाशेषपदार्थविषयं पुनःपुनर्भाव्यमानं भावनाप्रकर्षपर्यन्ते योगिज्ञानरूपतामासादयद् वैशद्यभाग् भवति, दृष्टं चाभ्यासबलाद् ज्ञानस्यानक्षजस्यापि काम-शोक-भयो-न्माद-चौरस्वप्नाद्युपप्लुतस्य वैशद्यम्; नन्वेवं तज्ज्ञानवद् अतीन्द्रियार्थविद्विज्ञानस्याप्युपप्लुतत्वं स्यादिति तज्ज्ञानवतः कामाद्युपप्लुतपुरुषवद् विपर्यस्तत्वम्। अथ यथा रजो-नीहाराद्यावरणावृतवृक्षादिदर्शनमविशदं तदावरणापाये वैशद्यमनुभवति एवं रागाद्यावारकाणां विज्ञानावैशद्यहेतूनामपाये सर्वज्ञज्ञानं विशदतामनुभविष्यतीति, असदेतत्; रागादीनामावरणत्वासिद्धेः, कुड्यादीनामेव ह्यावारकत्वं लोके प्रसिद्धं न रागादीनाम्। तथाहि-रागादिसद्भावेऽपि कुड्याद्यावारकाभावे विज्ञानमुत्पद्यमानं दृष्टम्, रागाद्यभावेऽपि कुड्याद्यावारकसद्भावे न विज्ञानोदय इत्यन्वय-व्यतिरेकाभ्यां कुड्यादीनामेवाऽऽवरणत्वावगमो न रागादीनामिति न रागादय आवारका इति न तद्विगमोऽपि सर्वविद्विज्ञानस्य वैशद्यहेतुः।

१ ग्रन्थाग्रम्-२००० । २ पृ० ४९ पं० ३। ३ तदाऽर्थशक्तेः मां। ४ पृ० ४३ गतं ४ टिप्पणं द्रष्टव्यम्। ५-वरका-मां०।-वरणका-गु०।

किंच, सर्ववेदनं सर्वज्ञज्ञानेन किं समस्तपदार्थग्रहणम्, उत शक्तियुक्तत्वम्, आहोस्वित् प्रधानभूतकतिपयपदार्थग्रहणम्? तत्र यद्याद्यः पक्षस्तत्रापि वक्तव्यम्–किं क्रमेण तद्ग्रहणम्, आहोस्विद् यौगपद्येन? तत्र यदि क्रमेण तद्ग्रहणम्, तदयुक्तम्; अतीताऽनागतवर्त्तमानपदार्थानामपरिसमाप्तेस्तज्ज्ञानस्याप्यपरिसमाप्तितः सर्वज्ञताऽयोगात्। अथ युगपद् अनन्तातीताऽनागतपदार्थसाक्षात्कारि तद्वेदनमभ्युपगम्यते, तदप्यसत्; परस्परविरुद्धानां शीतोष्णादीनामेकज्ञाने प्रतिभासासंभवात्; संभवे वा न कस्यचिदर्थस्य प्रतिनियतस्य तद् ग्राहकं स्यादिति तज्ज्ञानेन अस्मदादिभ्योऽपि व्यवहारिभ्यो हीनतर इति कथं सर्वज्ञः? किंच, यदि युगपत् सर्वपदार्थग्राहकं तज्ज्ञानम् तदैकक्षणे एव सर्वपदार्थग्रहणाद् द्वितीयक्षणेऽकिञ्चिज्ञ एव स्यात्; ततश्च किं तेन तादृशाऽकिञ्चिज्ञेन सर्वज्ञत्वेन? न चानाद्यनन्तसंवेदनस्य परिसमाप्तिः, परिसमाप्तौ वा कथमनाद्यनन्तता? किंच, सकलपदार्थसाक्षात्करणे परस्थरागादिसाक्षात्करणमिति रागादिमानपि स स्याद् विट इव। अथ रागादिसंवेदनमेव नास्ति न तर्हि सकलपदार्थसाक्षात्करणम्; तन्न प्रथमः पक्षः। अथ शक्तियुक्तत्वेन सकलपदार्थसंवेदनं तज्ज्ञानमभ्युपगम्यते, तदपि न युक्तम्; सर्वपदार्थाऽवेदने तच्छक्तेर्ज्ञातुमशक्तेः; कार्यदर्शनानुमेयत्वाच्छक्तीनाम्। किंच, सर्वपदार्थज्ञानपरिसमाप्तावपि 'इयदेव सर्वम्' इति कथं परिच्छेदशक्तिः? अथ वेदनाऽभावादभावोऽपरस्येति सर्वसंवेदनम्, अवेदनादभावोऽपरस्येति कुतो निश्चयः? तदपेक्षया तस्योपलब्धिलक्षणप्राप्तत्वात् तथाभूतानुपलब्ध्याऽभावनिश्चय इति चेत्, एवं सति स एवेतरेतराश्रयदोषः–सर्वज्ञत्वनिश्चये तदभावनिश्चयः, तदभावनिश्चये च सर्वज्ञत्वनिश्चय इति नैकस्यापि सिद्धिः; तन्न द्वितीयोऽपि पक्षः। अथ यावदुपयोगि प्रधानभूतपदार्थजातं तावदसौ वेत्तीति तत्परिज्ञानात् सकलज्ञः, तदपि सर्वपदार्थाऽवेदने नियमेन न संभवति; 'सकलपदार्थव्यवच्छेदेन तेषामेव प्रयोजननिवर्त्त[1](वर्त)कत्वम्' इति सकलपरिज्ञानमन्तरेणाशक्यसाधनमिति न तृतीयोऽपि पक्षो युक्तः।

किंच, नित्यसमाधानसंभवे विकल्पाभावात् कथं वचनम्? वचने वा विकल्पसंभवात् समाधानविरोधान्न समाहितत्वमिति भ्रान्तश्छाद्मस्थिकज्ञानयुक्तः स स्यात्। कथं वाऽतीतानागतग्रहणम् अतीतादेः स्वरूपस्यासंभवात्? असदाकारग्रहणे च तैमिरिकज्ञानवत् प्रमाणत्वं न स्यात्। अथातीतादिकमप्यस्ति, एवं सत्यतीतादित्वादेरप्यभाव एवेति सर्वज्ञव्यवहारोच्छेदः। अथ प्रतिपाद्यापेक्षया तस्याभावः, तदप्ययुक्तम्; नहि विद्यमानमेवापेक्षया तदैवाविद्यमानं भवति। तस्यानुपलब्धेरविद्यमानत्वमेवेति चेत्, तदनुपलब्धिरेवास्तु कथमविद्यमानम्? न ह्यन्यस्याभावेऽन्यस्याप्यभावः, अतिप्रसङ्गात्। तस्यासावविद्यमानत्वेन प्रतिभातीति चेत्, स तर्हि भ्रान्तः, असद्विकल्पसंभवात्; तस्यासद्विकल्पस्य विषयीकरणात् सर्वज्ञोऽपि भ्रान्त एवेति कथं सर्ववित्? अथ विकल्पस्यापि स्वरूपेऽभ्रान्तत्वमेव तेन तस्य वेदनं सर्वज्ञज्ञानमभ्रान्तम्, एवं तर्हि स्वरूपसाक्षात्करणमेव केवलम् कथमतीताद्यविद्यमानसाक्षात्करणम्? ततश्चातीतानागतपदार्थाभावात् तत्साक्षात्करणासंभवान्न तद्ग्रहणात् सर्वज्ञः। किंच, स्वरूपमात्रवेदने तन्मात्रस्यैव विद्यमानत्वात् तद्वेदनेऽद्वैतवेदनाद् न सर्वज्ञव्यवहारः तद्भावे वा सर्वः सर्ववित् स्यात्। अथापि स्यात् सत्यस्वप्नदर्शनवद् अतीतानागतादिदर्शनम् ततो व्यवहारः इति, तदप्ययुक्तम्; सत्यस्वप्नदर्शनस्य स्वरूपमात्रवेदने न सत्यासत्यविभागः किन्त्वानुमानिकः, सत्यस्वप्नस्वरूपसंवेदनस्य तन्मात्रपर्यवसितत्वात्। किंच, अतीतानागतकालसंबन्धित्वात् पदार्थानामतीतानागतत्वम् तद्धि भवत् किमपरातीतानागतकाल[2]संबन्धाद् अभ्युपगम्यते, आहोस्वित् स्वत एव? यद्यपरातीतानागतकालसंबन्धात् कालस्यातीतानागतत्वं तदा तस्याप्यपरातीतानागतकालसंबन्धादतीतानागतत्वम्, तस्याप्यपरस्मादित्यनवस्था। अथातीतानागतपदार्थक्रियासंबन्धात् कालस्यातीतानागतत्वं तेनायमदोषः; ननु पदार्थक्रियाणामपि कुतोऽतीतानागतत्वम्? यद्यपरातीतानागतपदार्थक्रियासद्भावात् तदाऽत्रापि

१–विरुद्धार्थानां भां, मां०, वा०। २–दिति किं तज्ज्ञा–भां०, कां०, गु०, आ०। ३ प्रमेयकमलमार्तण्डे एतत्स्थले एवं पाठः–"नाऽपि प्रधानभूतकतिपयार्थग्रहणम्, 'इतरार्थव्यवच्छेदेन एतेषामेव प्रयोजननिष्पादकत्वात् प्राधान्यम्' इति निश्चयो हि सकलार्थज्ञाने सत्येव घटते नान्यथा" –पृ० ७० प्रथ० पृ० पं० ५। ४–च्छद्म–वा० विना सर्वत्र। ५ सद्भावे वा वा० विना सर्वत्र। ६–लसंबन्धादतीताभ्युपगम्यते वा० विना सर्वत्र। –लसंबन्धादतीताऽनागतत्वमभ्युपगम्यते कां०। ७ अत्र 'कालस्य' इत्यध्याहार्यम्।

सैवानवस्था। अतीतानागतकालसंबन्धात् पदार्थक्रियाणामतीतानागतत्वं तर्हि कालस्याप्यतीतानागतपदार्थक्रियासंबन्धादतीतानागतत्वमिति व्यक्रमितरेतराश्रयत्वम्, तन्न प्रथमः पक्षः। अथ स्वरूपत एव कालस्यातीतानागतत्वं[3] तदा पदार्थानामपि स्वत एवातीतानागतत्वमस्तु किमतीतानागतकालसंबन्धित्वेन? तच्च पदार्थस्वरूपमस्मदादिज्ञानेऽपि प्रतिभातीति नातीतानागतपदार्थग्राहित्वेनास्मदादिभ्यः सर्वज्ञस्य विशेषः। अपि च, संबन्धस्यान्यत्र विस्तरतो निषिद्धत्वान्न कस्यचित् केनचित् संबन्ध इत्यतीतानागतादिसंबद्धपदार्थग्राहिज्ञानमसदर्थविषयत्वेन भ्रान्तं स्यादिति न भ्रान्तज्ञानवान् सर्वज्ञः कल्पयितुं युक्तः। भवतु वा सर्वज्ञस्तथाप्यसौ तत्कालेऽप्यसर्वज्ञैर्ज्ञातुं न शक्यते, तदग्राह्यपदार्थाज्ञाने तद्ग्राहकज्ञानवतः केनचित् प्रमाणेन प्रतिपत्तुमशक्तेः। तदुक्तम्–

"सर्वज्ञोऽयमिति ह्येतत् तत्कालेऽपि बुभुत्सुभिः।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम्?॥
कल्पनीयास्तु सर्वज्ञा भवेयुर्बहवस्तव।
य एव स्यादसर्वज्ञः स सर्वज्ञं न बुध्यते"॥ [श्लो० वा० सू० २, श्लो० १३४–१३५]

न च तदपरिज्ञाने तत्प्रणीतत्वेनागमस्य प्रामाण्यमवगन्तुं शक्यम्; तदनवगमे च तद्विहितानुष्ठाने प्रवृत्तिरप्यसङ्गता। तदुक्तम्–

"सर्वज्ञो नावबुद्धश्चेद् येनैव स्यान्न तं प्रति।
तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेन[4] वाक्यवत्"॥ [श्लो० वा० सू० २, श्लो० १३६]
इति।

तदेवं सर्वज्ञसद्भावग्राहकस्य प्रमाणस्याभावात् तत्सद्भावबाधकस्य चानेकधा प्रतिपादितत्वात् सर्वज्ञाभावव्यवहारः प्रवर्त्तयितुं युक्तः। तथाहि–ये बाधकप्रमाणगोचरतामापन्नास्ते 'असद्' इति व्यवहर्त्तव्याः, यथा अङ्गुल्यग्रे करियूथादयः, बाधकप्रमाणगोचरापन्नश्च भवदभ्युपगमविषयः सकलपदार्थसार्थसाक्षात्कारीत्यसद्व्यवहारविषयत्वं सर्वविदोऽभ्युपगन्तव्यमिति पूर्वपक्षः॥

[उत्तरपक्षः–सर्वज्ञसत्तासाधनम्]

अत्र प्रतिविधीयते—यत्तावदुक्तम्[1] 'ये देश-काल-स्वभावव्यवहिताः प्रमाणविषयतामनापन्ना न ते सद्व्यवहारगोचरचारिणः' इत्यादि, तदयुक्तम्; सर्वविदि प्रमाणविषयत्वस्य प्रतिपादयिष्यमाणत्वाद् असिद्धो हेतुस्तद्विषयत्वलक्षणः। यदप्यभ्यधायि 'न तादृक्षसंभवज्ञानसंवेद्यस्तद्भावः, अक्षाणां प्रतिनियतविषयत्वेन तत्साक्षात्करणव्यापारासंभवात्' तत् सिद्धमेव साधितम्। यदप्युक्तम्[2] 'नाप्यनुमानस्य तत्र व्यापारः, तद्धि प्रतिबन्धग्रहणे पक्षधर्मताग्रहणे च हेतोः प्रवर्त्तते; न च प्रतिबन्धग्रहणं प्रत्यक्षतस्तत्र संभवति' इत्यादि, तद् धूमादेरग्न्यादिप्रभवत्वानुमानेऽपि समानम्। अथाग्न्यादेः प्रत्यक्षत्वात् तत एव तत्प्रभवत्व–कार्यविशेषत्वयोर्धूमादौ प्रतिबन्धसिद्धिः, ननु धूमस्य किमग्निस्वरूपग्राहकप्रत्यक्षेण पावकपूर्वकत्वमवगम्यते, उत धूमस्वभावग्राहिणेति कल्पनाद्वयम्। तत्र न तावदाद्यः पक्षः, पावकरूपग्राहि प्रत्यक्षं तत्स्वभावमात्रग्रहणपर्यवसितमेव न धूमरूपप्रवेदनप्रवणम्, तदप्रवेदने च न तदपेक्षया तेन वह्नेः कारणत्वावगमः; नहि प्रतियोगिस्वरूपाग्रहणे तं प्रति कस्यचित् कारणत्वमन्यद्वा धर्मान्तरं ग्रहीतुं शक्यम्, अतिप्रसङ्गात्। अथ धूमस्वरूपप्रतिपत्तिमता प्रत्यक्षेण तस्य चित्रभानुं प्रति कार्यत्वस्वभावं तत्प्रभवत्वं गृह्यते, ननु तस्यापि पावकस्वरूपग्राहकत्वेनाप्रवृत्तेस्तदग्रहणे तदपेक्षं कार्यत्वं धूमस्य कथमवगमविषयः? अथाग्नि–धूमद्वयस्वरूपग्राहिणा प्रत्यक्षेण तयोः कार्यकारणभावनिश्चयः, तदप्यसङ्गतम्; द्वयग्राहिण्यपि ज्ञाने तयोः स्वरूपमेव भाति न पुनरग्नेर्धूमं प्रति कारणत्वम् धूमस्य वा तं प्रति कार्यत्वम्; न हि पदार्थद्वयस्य[6] स्वस्वरूपनिष्ठस्यैकज्ञानप्रतिभासमात्रेण कार्यकारणभावप्रतिभासः; अन्यथा घट–पटयोरपि स्वस्वरूपनिष्ठयोरेकज्ञानप्रतिभासः क्वचिदस्तीति तयोरपि कार्यकारणभावावगमप्रसङ्गः। अथ यस्य प्रतिभासानन्तरं

१–त्वमिति प–वा०, मां०। २ मूलज्ञानेऽज्ञवाक्यवत् वा०। ३ पृ० ४३ पं० २७। ४ पृ० ४३ पं० ३१। ५ पृ० ४३ पं० ३९। ६–स्य स्वरूप– मां०।

यत्प्रतिभास एकज्ञाननिबन्धनस्तयोस्तदवगम इति नायं दोषः, तदपि घटप्रतिभासानन्तरं पटप्रतिभासे क्वचिद् ज्ञाने समानम्। न च क्रमभाविपदार्थद्वयप्रतिभासमन्वय्येकं ज्ञानमिति शक्यं वक्तुम्, प्रतिभासभेदस्य भेदनिबन्धनत्वात्; अन्यत्रापि तद्भेदव्यवस्थापितत्वाद् भेदस्य, स च क्रमभाविप्रतिभासद्वयाध्यासितज्ञाने समस्तीति कथं न तस्य भेदः? न चैकमेव ज्ञानं जन्मानन्तरक्षणादिकालमास्त इति भवतामभ्युपगमः। तदुक्तम्—"क्षणिका हि सा, न कालान्तरमास्ते" [ ] इति। अथ वह्नि-धूमस्वरूपद्वयग्राहिज्ञानद्वयानन्तरभाविस्मरणसहकारि इन्द्रियं सविकल्पकज्ञानं जनयति तत्र तद्द्वयस्य पूर्वापरकालभाविनः प्रतिभासात् कार्यकारणभावनिश्चयो भविष्यति, तदप्यसङ्गतम्; पूर्वप्रवृत्तप्रत्यक्षद्वयस्य तत्राव्यापारात् तदुत्तरस्मरणस्य च पदार्थमात्रग्रहणेऽप्यसामर्थ्याच्चक्षुरादीनां च तदवगमज्ञानजननेऽशक्तेः; शक्तौ वा प्रथमाक्षसन्निपातवेलायामेव तदवगमज्ञानोत्पत्तिप्रसङ्गात् अकिञ्चित्करस्य स्मरणादेरनपेक्षणीयत्वात् परिमलस्मरणसव्यपेक्षस्य लोचनस्य 'सुरभि चन्दनम्' इत्यविषये गन्धादौ ज्ञानजनकत्वस्येव तत्रापि तज्जनकत्वविरोधात्। अथ तत्स्मरणसव्यपेक्षलोचनव्यापारानन्तरं 'कार्यकारणभूते एते वस्तुनी' इत्येतदाकारज्ञानसंवेदनात् कार्यकारणभावावगमः सविकल्पकप्रत्यक्षनिबन्धनो व्यवस्थाप्यते; नन्वेवं परिमलस्मरणसहकारिचक्षुर्व्यापारानन्तरभावी 'सुरभि मलयजम्' इति प्रत्ययः समनुभूयत इति परिमलस्यापि चक्षुर्जप्रत्ययविषयत्वं स्यात्। अथ परिमलस्य लोचनाविषयत्वाद् नायं प्रत्ययस्तज्जः किन्तु गन्धसहचरितरूपदर्शनप्रभवानुमानस्वभावः, तदेतत् प्रकृतेऽपि कार्यकारणभावे लोचनाविषयत्वं समानम्; प्रत्ययस्य तु तदध्यवसायिनोऽपरं निमित्तं कल्पनीयम्; तच्च प्रत्यक्षतः सविकल्पकादपि धूम-पावकयोः कार्यकारणत्वावगमः। मानसप्रत्यक्षं तु तदवगमनिमित्तं भवता नाभ्युपगम्यते। अपि च, कार्यकारणभावः सर्वदेश-कालावस्थिताखिलधूम-पावकव्यक्तिक्रोडीकरणेन अवगतोऽनुमाननिमित्ततामुपगच्छति, न च प्रत्यक्षस्येयति वस्तुनि सविकल्पकस्य निर्विकल्पकस्य वा व्यापारः संभवतीत्यसकृत् प्रतिपादितम्। किंच, न कारणस्य प्राग्भावित्वमात्रमेव बौद्धानामिव कारणत्वम्—येन तस्य कारणस्वरूपाभेदात् तत्स्वरूपग्राहिणा प्रत्यक्षेण तदभिन्नस्वभावस्य कारणत्वंस्याऽप्यवगमः, केवलं कार्यदर्शनादुत्तरकालं तन्निश्चीयते—किन्तु कारणस्य कार्यजननशक्तिः कारणत्वम्; सा च शक्तिर्न प्रत्यक्षावसेया अपि तु कार्यदर्शनसमवगम्या भवता परिकल्पिता। तदुक्तम्—

"शक्तयः सर्वभावानां कार्याऽर्थापत्तिगोचराः"। [श्लो०वा०सू० ५, शून्य० श्लो० २५४]

ततः कथं प्रत्यक्षात् कारणस्य कारणत्वावगमः? अथ कार्यादेव कारणस्य कारणत्वावगमो भवतु किं नश्छिन्नम्; ननु कार्यात् कारणस्य कारणत्वावगमेऽनुमानाच्छक्त्यवगमः, तत्र च तदपि कार्यं लिङ्गभूतं यदि कारणशक्तिमवगमयति तदा शक्ति-कार्ययोः प्रतिबन्धग्रहणमभ्युपगन्तव्यम्; स च प्रतिबन्धावगमो न प्रत्यक्षादिति प्रतिपादितम्। अनुमानात् तदवगमे इतरेतराश्रयाऽनवस्थादोषावतारोऽत्रापि समानः। अर्थापत्तेस्त्वनुमानेऽन्तर्भावः प्रतिपादित इति न प्रसिद्धानुमानस्यापि प्रवृत्तिर्भवदभिप्रायेण। अथ वह्निगतधर्मानुविधानाद् धूमस्य तत्पूर्वकत्वं कुतश्चित् प्रमाणात् प्रसिद्धमिति धूमत्वस्य तत्पूर्वकत्वव्याप्तिसिद्धिः—अन्यथा धूमादग्निसिद्धेः सकललोकप्रसिद्धव्यवहाराभावः, अनुमानाभावे प्रत्यक्षतोऽपि व्यवहारासम्भवात्—तर्हि वचनविशेषस्यापि यदि विशिष्टकारणपूर्वकत्वं तत एव प्रमाणात् प्रसिद्धं विवादाध्यासिते वचने वचनविशेषत्वात् साध्येत तदा कोऽपराधः?

यदप्युक्तम् 'पक्षधर्मत्वनिश्चये सति हेतोरनुमानं प्रवर्त्तते, न च सर्ववित् कुतश्चित् प्रमाणात् सिद्धः' इत्यादि, तदप्ययुक्तम्; यतो यदि सर्ववेदो धर्मित्वं क्रियेत तदा तस्यासिद्धत्वात् स्यादप्यपक्षधर्मत्वलक्षणं दूषणम्; यदा तु वचनविशेषस्य धर्मित्वं तस्य विशिष्टकारणपूर्वकत्वं साध्यत्वेनोपक्षिप्तं तदा तत्र तद्विशेषत्वादिलक्षणो हेतुरुपादीयमानः कथमपक्षधर्मः स्यात्? न चापक्षधर्मादपि हेतोरुपजायमानमनुमानं प्रमाणं भवताऽभ्युपगच्छता पक्षधर्मत्वाभावलक्षणं दूषणमासञ्जयितुं युक्तम्। अन्यथा—

१ अयमर्थः शाबरभाष्ये एवं प्रदर्शितः "क्षणिका हि सा, न बुद्धयन्तरकालमवस्थास्यते इति"-पृ० ७ पं० २४ का०। २ पृ० ३३ पं० २९ तथा पृ० ४३ पं० ३२। ३-त्वस्यावगमः वा०, बा०, पू० विना सर्वत्र। ४ कारणे वा०, बा०, पू०। ५-६ पृ० ३ पं० २५-३५। ७ पृ० ४६ पं० ३६। ८ पृ० ४४ पं० ६।

"पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणताऽनुमा।
सर्वलोकप्रसिद्धा न पक्षधर्ममपेक्षते"॥ [ ]

इत्याद्यपक्षधर्महेतुसमुत्थानुमानप्रामाण्यप्रतिपादनं भवतोऽप्ययुक्तं स्यात्। यदप्यभ्यधायि 'सर्वज्ञसत्तायां साध्यायां त्रयीं दोषजातिं हेतुर्नातिवर्त्तते' इत्यादि, तत्र स्यादप्ययं दोषः यदि तत्सत्ता साध्यत्वेनाभ्युपगम्यते; यावता पूर्वोक्तप्रकारेण वचनविशेषस्य विशिष्टकारणपूर्वकत्वं साध्यमित्युक्तम्, तत्र चास्य दोषस्योपक्षेपोऽयुक्त एव। यदप्यभ्यधायि 'यद्यनियतः कश्चित् सकलपदार्थज्ञः साध्योऽभिप्रेतः' इत्यादि, तदप्यसङ्गतमेव; यतो नास्माभिः प्रतिनियत एव कश्चित् सर्वज्ञोऽनुमानात् साध्यते किन्तु विशिष्टकारणपूर्वकत्वं विशिष्टशब्दस्य; तच्च स्वसाध्यव्याप्तहेतुबलात् साध्यधर्मिणि सिद्धिमासादयद् हेतुपक्षधर्मत्वबलात् प्रतिनियतसर्वज्ञपूर्वकत्वेनैव सिद्धिमासादयति। न च 'तत एव हेतोरन्यस्यापि सर्वज्ञस्य सिद्धेरन्यागमाश्रयणमपि भवतां प्रसज्यते' इति दूषणम्, अन्यागमानां दृष्टविषय एव प्रमाणविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यस्य व्यवस्थापयिष्यमाणत्वात् कथं तत्प्रणेतॄणामपि सर्वज्ञत्वसिद्धिः। यच्चान्यदभिहितम् 'न कश्चित् सर्वज्ञप्रतिपादकः सम्यग् हेतुः संभवति', तदप्यसङ्गतम्; तत्प्रतिपादकस्य सम्यग्धेतोर्वचनविशेषत्वादेः प्रतिपादयिष्यमाणत्वात्। यच्चान्यदभिहितम् 'सर्वे पदार्थाः कस्यचित् प्रत्यक्षाः, प्रमेयत्वात्, अश्यादिवत्' इत्यत्र 'यदि सकलपदार्थग्राहिप्रत्यक्षत्वं साध्यम्' इत्यादि, तदप्यसङ्गतम्; एवं साध्यविकल्पनेऽश्यादेरप्यनुमानान्न सिद्धिः स्यात्। तथाहि-अत्राप्येवं वक्तुं शक्यते-यदि प्रतिनियतसाध्यधर्मिधर्मो वह्निः साध्यत्वेनाभिप्रेतस्तदा तद्विरुद्धेन दृष्टान्तधर्मिणि तद्धर्मिधर्मेण पावकेन व्याप्तस्य धूमलक्षणस्य हेतोरसिद्धत्वाद् विरुद्धो हेतुः स्यात् साध्यविकलश्च दृष्टान्तः। अथ दृष्टान्तधर्मिधर्मः साध्यधर्मिणि साध्यते तदा प्रत्यक्षादिविरोधः। अथोभयगतं वह्निसामान्यं तदा सिद्धसाध्यतादोषः। 'तथा प्रमेयत्वमपि हेतुत्वेनोपन्यस्यमानम्' इत्यादि यदुक्तं तद् धूमलक्षणेऽपि हेतौ समानम्। तथाहि-अत्रापि किं साध्यधर्मिधर्मो हेतुत्वेनोपात्तः, उत दृष्टान्तधर्मिधर्मः, अथोभयगतं सामान्यम्? तत्र यदि साध्यधर्मिधर्मो हेतुः, स दृष्टान्तधर्मिणि नान्वेतीत्यनन्वयो हेतुदोषः। अथ दृष्टान्तधर्मिधर्मः, स साध्यधर्मिण्यसिद्ध इत्यसिद्धताहेतुदोषः। अथोभयगतं सामान्यम्, तदपि प्रत्यक्षाऽप्रत्यक्षमहानसपर्वतप्रदेशविलक्षणव्यक्तिद्वयाश्रितं न संभवतीति हेतोरसिद्धता तदवस्थिता। अथ पर्वतप्रदेशाश्रिताग्नितद्धूमव्यक्तेरुत्तरकालभाविप्रत्यक्षप्रतीयमानत्वेन न महानसोपलब्धधूमव्यक्त्याऽत्यन्तवैलक्षण्यमिति नोभयगतसामान्याभावः; ननूभयगतसामान्यप्रतिपत्तौ ततोऽनुमानप्रवृत्तिः, तत्प्रवृत्तौ च तदर्थक्रियार्थिनस्तत्र प्रवर्तमानस्य प्रत्यक्षप्रवृत्तिः, तस्यां च सत्यामत्यन्तवैलक्षण्याभावस्तद्व्यक्तेः, तत्सद्भावे चोभयगतसामान्यसिद्धितस्तदनुमानप्रवृत्तिरिति चक्रकदूषणावकाशः। अथ कण्ठक्षीणतादिलक्षणधर्मकलापसाधर्म्यान्न महानस-पर्वतप्रदेशसङ्गतधूमव्यक्त्योरत्यन्तवैलक्षण्यमित्युभयगतसामान्यसिद्धौ न धूमानुमाने हेत्वसिद्धतादिदोषस्तर्हि वाच्याविसंवादादिधर्मकलापसाधर्म्यस्य वचनविशेषव्यक्तिद्वयेऽप्यत्यन्तवैलक्षण्यनिवर्त्तकस्य सद्भावेन कथं न तद्विशेषत्वसामान्यसंभवः? प्रमेयत्वं तु यथा प्रकृतसाध्ये हेतुर्भवति तथा प्रतिपादयिष्यामः, आस्तां तावत्। यत्तु 'नापि शब्दात् तत्सिद्धिः' इत्यादि प्रतिपादितं तत् सिद्धसाध्यतादोषाद्यातत्वान्निरस्तम्। यदप्युक्तम् 'ये देश-काल-इत्यादिप्रयोगे नासिद्धो हेतुः' इति, एतदप्ययुक्तम्; अनुमानस्य तदुपलम्भस्वभावस्य प्रतिपादयिष्यमाणत्वेनानुपलम्भलक्षणस्य हेतोः परप्रयुक्तस्यासिद्धत्वात्। अत एव 'सद्व्यवहारनिषेधश्चानुपलम्भनिमित्तोऽनेन' इत्याद्यसारतया स्थितम्। 'अथ यथाऽस्माकं तत्सद्भावाऽऽवेदकं प्रमाणं नास्ति तथा भवतां तदभावाऽऽवेदकमपि नास्ति' इत्यादि यावत् 'प्रसङ्गसाधनाभिप्रायेण सर्वमेव सर्वज्ञप्रतिक्षेपप्रतिपादकं युक्तिजालमभिहितम्' इति यदुक्तम्, तदप्यचारु; यतः "सर्वज्ञो दृश्यते तावन्नेदानीम्" [श्लो० वा० सू० २, श्लो० ११७] इत्यादिना तत्सद्भावोपलम्भकप्रमाणपञ्चकनिवृत्तिप्रतिपादनद्वारेण यद् अभावाख्यप्रमाण-

१ पृ० ४४ पं० ८। २ पृ० ४४ पं० १३। ३ पृ० ४४ पं० १६। ४ पृ० ४४ पं० १३। ५ पृ० ४४ पं० १७। ६ पृ० ४४ पं० १८। ७-साध्यधर्मो भां०, बा०, मां० विना। ८ पृ० ४४ पं० २३। ९ धूमत्वलक्षणे भां०, का० वा०, मां०। १० पृ० ४४ पं० ३३। ११ पृ० ४५ पं० १५। १२ पृ० ४५ पं० १५-१६। १३ पृ० ४५ पं० १७। १४ पृ० ४८ पं० १४। १५ पृ० ४५ पं० ८।

प्रवृत्तिप्रतिपादनं तत् तदभावावेदकस्वतन्त्राभावाख्यप्रमाणाभ्युपगमव्यतिरेकेणासंभवद् भवतां मिथ्यावादितां सूचयति। यदप्यवादि 'तथा च प्रसङ्गसाधनाभिप्रायेण भगवतो जैमिनेः सूत्रम्' इत्यादि, तदप्यसङ्गतम्; यतः प्रसङ्गसाधनस्य तत्पूर्वकस्य च विपर्ययस्य व्याप्यव्यापकभावसिद्धौ यत्र व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः व्यापकनिवृत्तितो व्याप्यनिवृत्तिरवश्यंभाविनी च प्रदर्श्यते तत्र यथाक्रमं प्रवृत्तिः, अत्र तु प्रत्यक्षत्वस्य सत्संप्रयोगजत्वेन, तस्य च विद्यमानोपलम्भनत्वेन, तस्यापि धर्मादिकं प्रत्यनिमित्तत्वेन क्व व्याप्यव्यापकभावावगमो येन प्रसङ्ग-तद्विपर्ययोः प्रवृत्तिः स्यात्? ननूक्तमेवैतत् 'स्वात्मन्येव' सत्यम्; उक्तं नतु युक्तमुक्तम्। अयुक्तता च-सर्वं चक्षुरादिकरणग्रामप्रभवं प्रत्यक्षं सन्निहितदेश-काल-पदार्थान्तरस्वभावाविप्रकृष्टप्रतिनियतरूपादिग्राहकं सर्वत्र सर्वदा चेति न व्याप्यव्यापकभावग्राहकं प्रमाणमस्ति, विपर्ययश्चोपलभ्यते—योजनशतविप्रकृष्टस्यार्थस्य ग्राहकं संपातिगृध्रराजप्रत्यक्षं रामायण-भारतादौ भवत्प्रमाणत्वेनाभ्युपगते श्रूयते, तथेदानीमपि गृध्र-वराह-पिपीलिकादीनां चक्षुः-श्रोत्र-घ्राणजस्य प्रत्यक्षस्य यथाक्रमं रूप-शब्द-गन्धादिषु देशविप्रकृष्टेषु प्रवृत्तिरुपलभ्यते, तथा कालविप्रकृष्टस्याप्यतीतकालसंबन्धित्वस्य पूर्वदर्शनसंबन्धित्वस्य च स्मरणसव्यपेक्षलोचनादिजन्यप्रत्यभिज्ञाप्रत्यक्षग्राह्यत्वं पुरोव्यवस्थितेऽर्थे भवताऽभ्युपगम्यते; अन्यथा—

"देश-कालादिभेदेन तदाऽस्त्यवसरो मितेः"। [श्लो० वा० सू० ४, श्लो० २३३]
"इदानींतनमस्तित्वं नहि पूर्वधिया गतम्"। [श्लो० वा० सू० ४, श्लो० २३४]

इत्यादिवचनसंदर्भेण प्रत्यभिज्ञाप्रत्यक्षस्यागृहीतार्थाधिगन्तृत्वं पूर्वापरकालसंबन्धित्वलक्षणनित्यत्वग्राहकत्वं च प्रतिपाद्यमानमसङ्गतं स्यात्। अथातीतातीन्द्रियकालसंबन्धित्वं पूर्वदर्शनसंबन्धित्वं वा वर्त्तमानकालसंबन्धिनः पुरोव्यवस्थितस्यार्थस्य यदि चक्षुरादिप्रभवप्रत्यभिज्ञानेन गृह्यते तदा—

"संबद्धं वर्त्तमानं च गृह्यते चक्षुरादिभिः"। [श्लो० वा० सू० ४ श्लो० ८४]

इति वचनं विरुद्धार्थं स्यात्, तथाऽतीन्द्रियकाल-दर्शनादेर्वर्त्तमानार्थविशेषणत्वेन ग्रहणेऽतीन्द्रियधर्मादेरपि ग्रहणप्रसङ्गात् प्रसङ्गसाधन-तद्विपर्ययययोरप्रवृत्तिः स्वयमेव प्रतिपादिता स्यात्; नन्वयमेवात्र दोषः कालविप्रकृष्टार्थग्राहकत्वेन इन्द्रियजप्रत्यक्षस्य प्रतिपादयितुमस्माभिरभिप्रेत इति कस्यात्रोपालम्भः। अथ वर्त्तमानकालसंबद्धे विशेष्ये पुरोवर्त्तिनि व्यापारवच्चक्षुस्तद्विशेषणभूतेऽतीन्द्रियेऽपि पूर्वकालदर्शनादौ प्रवर्त्तते, अन्यथा चक्षुर्व्यापारानन्तरं 'पूर्वदृष्टं पश्यामि' इति विशेष्यालम्बनं प्रत्यभिज्ञानं नोपपद्येत, नागृहीतविशेषणा विशेष्ये बुद्धिरुपजायते दण्डाग्रहण इव दण्डिबुद्धिः; न च धर्मादावयं न्यायः संभवतीति चेत्, ननु धर्मादेः किमतीन्द्रियत्वाच्चक्षुरादिनाऽग्रहणम्, उत अविद्यमानत्वात्, आहोस्विद् अविशेषणत्वात्? तत्र नाद्यः पक्षः, अतीन्द्रियस्याप्यतीतकालादेर्ग्रहणाभ्युपगमात्। नाप्यविद्यमानत्वात्, भाविधर्मादेरिवातीतकालादेरविद्यमानत्वेऽपि प्रतिभासस्य भावात्। अथाविशेषणत्वाद्धर्मादेरप्रतिभासः, तदप्यसङ्गतम्; सर्वदा पदार्थजनकत्वेन द्रव्य-गुण-कर्मजन्यत्वेन च धर्मादेः सर्वपदार्थविशेषणभावसंभवाद् अतीतातीन्द्रियकालादेरिव तस्यापि विशेष्यग्रहणप्रवृत्तचक्षुरादिना ग्रहणसंभव इति कथं धर्मे प्रत्यनिमित्तत्वप्रसङ्गसाधनस्य तद्विपर्ययस्य वा संभवः? तथा, प्रश्नादि-मन्त्रादिद्वारेण संस्कृतं चक्षुर्यथा कालविप्रकृष्टपदार्थग्राहकमुपलभ्यते तथा धर्मादेरपि यदि ग्राहकं कस्यचित् स्यात् तदा न काश्चिद्दोषः। अपि च, अनालोकान्धकारव्यवहितस्य मूषिकादेर्नक्तंचरवृषदंशादेश्चक्षुर्यथा ग्राहकमुपलभ्यते तथा यद्यतीन्द्रियातीताऽनागतधर्मादिपदार्थसाक्षात्कारि कस्यचित् तदेव स्यात् तदाऽत्रापि को दोषः? न च जात्यन्तरस्यान्धकारव्यवहितरूपादिग्राहकं चक्षुर्दृष्टं न पुनर्मनुष्यधर्मेण इति प्रतिसमाधानमत्राभिधातुं युक्तम्, मनुष्यधर्मणोऽपि निर्जीविकादेर्द्रव्यविशेषादिसंस्कृतं चक्षुः समुद्रजलादिव्यवहितपर्वतादि-

१ तद्भावा—वा०, बा०, मां० विना। २ पृ० ४८ पं० १५। ३ पृ० ४९ पं० ३८। ४ तत्राऽ—वा०, बा०। ५ तथा— आ०। ६ प्रश्नादि—वा०, बा०। प्रश्नादि—कृ०। अत्र स्थले प्रमेयक०मार्तण्डेऽपि एतदेव "प्रश्नादिमन्त्रादिना"—पृ० ७१, द्वि० पृ० पं० २। "प्रश्नाः विद्याविशेषाः"—प्रश्नव्या० टी० पृ० १। अथवा प्रश्निः—औषधीविशेषः। ७ निजीविका वि०, आ०, कृ०। निजावका—बा०। निजीवका—वा०। "निर्जीविका"—प्रमेय० पृ० ७१ द्वि० पृ० पं० २। "निजावकः कर्णधारः" प्रेमय० टि०।

ग्रहणे समर्थमुपलभ्यत इति धर्मादेरपि देश-काल-स्वभावविप्रकृष्टस्य कस्यचित् पुरुषविशेषस्य पुण्यादिसंस्कृतं चक्षुरादि ग्राहकं भविष्यतीति न कश्चित् दृष्टस्वभावव्यतिक्रमः। अथ चक्षुरादेः करणस्य प्रतिनियतरूपादिविषयत्वेनान्यकरणविषयग्राहकत्वे स्वार्थातिक्रमो व्यवहारविलोपी स्यात्; ननु श्रूयत एव चक्षुषा शब्दश्रवणं प्राणिविशेषाणाम्—'चक्षुःश्रवसो भुजङ्गाः' इति लोकप्रवादात्। मिथ्या स प्रवाद इति चेत्, नैतत्; प्रवादबाधकस्याभावात् कर्णच्छिद्रानुपलब्धेश्च। न च 'दन्दशूकचक्षुषो जात्यन्तरत्वात्' इत्युत्तरमत्रोपयोगि, अन्यत्रापि प्रकृष्टपुण्यसंभारजनितसर्वविच्चक्षुषि समानत्वात्। तदेवं धर्मादिसमस्तपदार्थग्राहकत्वेन चक्षुरादिजनितप्रत्यक्षस्याऽविरोधाद् न प्रत्यक्षत्व-सत्संप्रयोगजत्वादेर्व्याप्यव्यापकभावसिद्धिरिति न प्रसङ्ग-विपर्ययययोः प्रवृत्तिरिति न तत्तत्प्रतिक्षेपः। एतेन "यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः" [श्लो० वा० सू० २, श्लो० १११] इत्यादि वार्त्तिककृत्प्रतिपादितं प्रसङ्गसाधनाभिप्रायेण युक्तिजालमखिलं निरस्तम्, व्याप्तिप्रतिषेधस्य पूर्वोक्तप्रकारेण विहितत्वात्। यच्च 'किं प्रमाणान्तरसंवाद्यर्थस्य वक्तृत्वात् इत्यादि तद् धूमादन्यनुमानेऽपि समानम्। तथाहि-अत्रापि वक्तुं शक्यम्-किं साध्यधर्मिसंबन्धी धूमो हेतुत्वेनोपन्यस्तः' इत्यादि यावत् 'सिद्धः प्रतिबन्धोऽसर्वज्ञत्व-वक्तृत्वयोरग्नि-धूमयोरिव' इति पर्यन्तम्, तदप्ययुक्तम्; यतोऽसर्वज्ञत्व-वक्तृत्वयोरिव नाग्नि-धूमयोः कार्यकारणत्वप्रतिबन्धस्य तद्ग्राहकप्रमाणस्य वाऽभावः {नहि वह्निसद्भावे धूमो दृष्टस्तदभावे च न दृष्ट इत्येतावता धूमस्याग्निकार्यत्वमुच्यते किन्तु

"कार्यं धूमो हुतभुजः कार्ये धर्मानुवृत्तितः" [ ]।

न चासौ दर्शनाऽदर्शनमात्रगम्यः किन्तु विशिष्टात् प्रत्यक्षाऽनुपलम्भाख्यात् प्रमाणात्।

प्रत्यक्षमेवं प्रमाणं प्रत्यक्षाऽनुपलम्भशब्दाभिधेयम्, तदेव कार्यकारणाभिमतपदार्थविषयं प्रत्यक्षम्, तद्विविक्तान्यवस्तुविषयमनुपलम्भशब्दाभिधेयम्; कदाचिदनुपलम्भपूर्वकं प्रत्यक्षं तद्भावसाधकम्, कदाचित् प्रत्यक्षपुरःसरोऽनुपलम्भः। तत्राद्येन येषां कारणाभिमतानां सन्निधानात् प्रागनुपलब्धं सद् धूमादि तत्सन्निधानादुपलभ्यते तस्य तत्कार्यता व्यवस्थाप्यते। तथाहि-एतावद्भिः प्रकारैर्धूमोऽग्निजन्यो न स्यात्—यद्यग्निसन्निधानात् प्रागपि तत्र देशे स्यात्, अन्यतो वाऽऽगच्छेत्, तदन्यहेतुको वा भवेत्। तदेतत् सर्वमनुपलम्भपुरस्सरेण प्रत्यक्षेण निरस्तम्। एतेन प्रागनुपलब्धस्य रासभस्य कुम्भकारसन्निधानानन्तरमुपलभ्यमानस्य तत्कार्यता स्यादिति निरस्तम्। तथाहि—तत्रापि यदि रासभस्य तत्र प्रागसत्त्वम्, अन्यदेशादनागमनम्, अन्याकारणत्वं च निश्चेतुं शक्येत तदा स्यादेव कुम्भकारकार्यता, केवलं तदेव निश्चेतुमशक्यम्। एवं तावदनुपलम्भपुरस्सरस्य प्रत्यक्षस्य तत्साधनत्वमुक्तम्। तथा, प्रत्यक्षपुरस्सरोऽनुपलम्भोऽपि तत्साधनः—येषां सन्निधाने प्रवर्त्तमानं तत् कार्यं दृष्टं तेषु मध्ये यदैकस्याप्यभावो भवति तदा नोपलभ्यते, तत् तस्य कारणमितरत् कार्यम्। न चाग्नि-काष्ठादिसन्निधाने भवतो धूमस्यापनीते कुम्भकारादावनुपलम्भोऽस्ति, अग्न्यादौ त्वपनीते भवत्यनुपलम्भः। एवं परस्परसहितौ प्रत्यक्षानुपलम्भावभिमतेष्वेव कार्यकारणेषु निःसन्दिग्धं कार्यकारणभावं साधयतः।

सर्वकालं चाग्निसन्निधाने भवतो धूमस्यानग्निजन्यत्वं कदाचित् सदसतोरजन्यत्वेन, अहेतुकत्वेन, अदृश्यहेतुकत्वेन वा भवेत्? तत्र न तावत् प्रथमः पक्षः, असतो जन्यत्वात्, "सदेव न जन्यते" [ ] इति त्वदभिप्रायात् सत एव जन्यमानत्वानुपपत्तेः; कार्यत्वस्य च कादाचित्कत्वेन सिद्धत्वात्। नाप्यहेतुकत्वम्, कादाचित्कत्वेनैव; अहेतुत्वे तदयोगात्। नाप्यदृश्यहेतुकत्वम्, धूमस्याग्न्यादिसामग्र्यन्वय-व्यतिरेकानुविधानात्। अथापि स्याद् अदृश्यस्यायं स्वभावो यदग्न्यादिसन्निधान एव धूमम्, कर्पूरोर्णादिदाहकाले सुगन्धादियुक्तं च करोति नान्यदेति, तत् किमग्निमन्तरेण कदाचिद् धूमोत्पत्तिर्दृष्टा येनैवमुच्यते? नेति चेत्, कथं नाग्निकार्यो धूमस्तद्भावे भावात्? धूमोत्पत्तिकाले च सर्वदा प्रतीयमानोऽग्निः काकतालीयन्यायेन व्यवस्थित इत्यलौकिकम्। अथ स एवादृश्यस्य स्वभावो यदग्निसन्निधान एव धूमं करोति; ननु यद्यग्निना नासावुपक्रियते किमग्निसन्निधानाद् न पूर्वं पश्चाद् वा धूमं विदधाति? न चान्यदा करोतीति तस्य तज्जन्यस्वभावसव्यपेक्षस्य धूमजनने तदेव

१ पृ० ४९ पं० ३। २ पृ० ४९ पं० १९। ३ पृ० ५० पं० ३५। ४ कार्यधर्मानुवृत्तितः वा०। ५ -व च प्रमाणं भां०, मां०। ६ कार्यस्य च वा०, बा० विना। ७-वादृश्यस्वभावो भां०। ८ तदेवं भा०, गु०।

पारंपर्येणाग्निजन्यत्वं धूमस्य। किंच, यथा देश-कालादिकमन्तरेण धूमस्यानुत्पत्तेस्तदपेक्षा प्रतीयते तथाऽग्निमन्तरेणापि धूमस्यानुत्पत्तिदर्शनात् तदपेक्षा केन वार्यते? तदपेक्षा च तत्कार्यतैव। यथा चादृश्यभावे एव धूमस्य भावात् तज्जन्यत्वमिष्यते तथा सर्वदाऽग्निभावे एव धूमस्य भावदर्शनात् तज्जन्यता किं नेष्यते? यावतां च सन्निधाने भावो दृश्यते तावतां हेतुत्वं सर्वेषामित्यश्यादिसामग्रीजन्यत्वाद् धूमस्य कुतोऽग्निव्यभिचारः?

न चायं प्रकारोऽसर्वज्ञत्व-वक्तृत्वयोः संभवति, असर्वज्ञत्वधर्मानुविधानस्य वचने अदर्शनात्। तथाहि—यदि सर्वज्ञत्वादन्यत् पर्युदासवृत्त्या किञ्चिज्ज्ञत्वमसर्वज्ञत्वमुच्यते तदा तद्धर्मानुविधानाऽदर्शनान्न तज्जन्यता वचनस्य। नहि किञ्चिज्ज्ञत्वतरतमभावात् वचनस्य तरतमभाव उपलभ्यते। तथाहि—किञ्चिज्ज्ञत्वं प्रकृष्टम् अत्यल्पविज्ञानेषु कृम्यादिषु, न च तेषु वचनप्रवृत्तेरुत्कर्ष उपलभ्यते। अथ प्रसज्यप्रतिषेधवृत्त्या सर्वज्ञत्वाभावोऽसर्वज्ञत्वं तत्कार्यं तु वचनं तदा ज्ञानरहिते मृतशरीरे तस्योपलम्भः स्यात्, न च कदाचनापि तत् तत्रोपलभ्यते।

ज्ञानातिशयवत्सु च सकलशास्त्रव्याख्यातृषु वचनस्यातिशयभावो दृश्यते इति ज्ञानप्रकर्षतरतमाद्यनुविधानदर्शनात् तत्कार्यता तस्य—धूमस्येवाग्न्यादिसामग्रीगतसुरभिगन्धाद्यनुविधायिनो-यथोक्तप्रत्यक्षाऽनुपलम्भाभ्यां व्यवस्थाप्यते। अत एव कारणगतधर्मानुविधानमेव कार्यस्य तत्कार्यतावगमनिमित्तम् न पुनरन्वय-व्यतिरेकानुविधानमात्रम्। तदुक्तम्—

"कार्यं धूमो हुतभुजः कार्ये धर्मानुवृत्तितः"। [ ] इति।

यच्च यत्कार्यत्वेन निश्चितं तत् तदभावे न कदाचिदपि भवति, अन्यथा तद्धेतुकमेव तन्न स्यादिति सकृदपि ततो न भवेत्; भवति च यद् यत्र निश्चितविसंवादं वचनं तत् तदविसंवादिज्ञानविशेषाद् इत्यात्मन्येवासकृन्निश्चितमिति नान्यतस्तस्य भावः; तेन—

"यद् यस्यैव गुण-दोषान् नियमेनानुवर्त्तते।
तन्नान्तरीयकं तत् स्यादतो ज्ञानोद्भवं वचः"॥ [ ]

अथ यदि नामाविसंवादिज्ञानधर्मानुकरणतोऽविसंवादि वचनमेकं तत्प्रभवं यथोक्तप्रत्यक्षाऽनुपलम्भतोऽवगतं तदन्यतो न भवति, तथाप्यन्यवचनस्य तद्धर्मानुकरणतो न तत्कार्यत्वसिद्धिरिति तस्यान्यतोऽपि भावसंभवात् कुतोऽव्यभिचारः? न; ईदृग्भूतं वचनमीदृक्षज्ञानतः सर्वत्र भवतीति सकृत्प्रवृत्तप्रत्यक्षतोऽवगमात्। ननु सकलव्यक्त्यनुगततिर्यक्सामान्यानभ्युपगमे यावन्ति तथाभूतवचांसि तानि सर्वाणि प्रत्यक्षीकरणीयानि तथाभूतज्ञानकार्यतया, अन्यथैकस्यापि वचसस्तद्व्यासतयाऽप्रत्यक्षीकरणे तेनैव व्यभिचारी हेतुः स्यात्; न चैतावत्प्रत्यक्षीकरणसमर्थं प्रत्यक्षम्, तस्य सन्निहितविषयत्वात्; न चान्येषां स्वलक्षणानामनुमानात् साध्यधर्मेण व्याप्तिग्रहणम्, अनवस्थाप्रसङ्गत्; तदयुक्ताम्; यतः प्रत्यक्षं तथाभूतज्ञानसन्निधान एव तथाभूतवचनभेदात् (दान्) प्रतिपद्य एषु'अतथाभूतवचनव्यावृत्तं रूपमतथाभूतज्ञानव्यावृत्तज्ञानजन्यम्'इत्यवधारयति, यथाऽत्र तथाऽन्यत्रापि देश-कालादौ 'तथाभूतज्ञानजन्यमेव'इत्यप्यवधारयति; अन्यथाऽत्रापि तथाभूतज्ञानजन्यतया न प्रत्यक्षेणावधार्येत। एवं हि तथाभूताऽतथाभूतज्ञानजन्यतया तथाभूतवचनस्य प्रतीतिः स्यात् न तथाभूतज्ञानजन्यतयैव; प्रतीयते च तथाभूतज्ञानजन्यतया तथाभूतं वचनम्; तस्मादन्यत्रान्यदा च तथाभूतज्ञानादेव तथाभूतवचनमिति कुतो व्यभिचारः? यश्च तद्रूपमन्यतो व्यावृत्तमवधारयितुं शक्नोति तस्यैव तदनुमानम्, यथा बाष्पादिवि लक्षणधूमावधारणेऽग्न्यनुमानम्। किंच, तिर्यक्सामान्यवादिनोऽपि गोपालघटिकादौ धूमसामान्यस्याग्निमन्तरेणापि दर्शनाद् व्यभिचाराशङ्क्याऽग्निनियतधूमसामान्यावधारणेनैव तदनुमानम्; अग्निनियतधूमसामान्यावधारणं चाग्निसंबद्धधूमव्यक्त्यवधारणपुरस्सरमेव; न च सर्वदेशादावग्निसंबद्धधूमव्यक्तिविशिष्टस्य धूमसामान्यस्य केनचित् प्रमाणेनावधारणं संभवति; न च महानसादावग्निनियतधूमव्यक्तिविशिष्टं धूमसामान्यं प्रतिपन्नमन्यत्रानुयायि, व्यक्तेरनन्वयात्; यच्च धूमसामान्यमनुयायि तदनाश्रयव्यभिचारि; तस्मात् सामान्यव्याप्तिग्रहणवादिनामपि कथं विशिष्टधूमसामान्यं सर्वत्राग्निना व्याप्तं प्रतिपन्नमिति तुल्यं चोद्यम्। अथ विशिष्टधूमस्यान्यत्राग्निजन्यत्वे न किञ्चिद् बाधकमस्ति, 'तदेवेदम्' इति च प्रतीतेः तत्सामान्यं प्रतीतमिष्यते; अस्माकमपि 'तदेवेदं वचनम्' इति प्रत्ययस्योत्पत्तेस्तत् प्रतिपन्नमिति सदृशपरिणामलक्षणसामान्यवादिनो जैनस्य भवतो वा को विशेषोऽत्र वस्तुनि? इति

१-त्र प्रभवती-बा०, मां०, वा०। २ तथाभूतातथाभूतवचनस्य मां०, कां०, मां०। ३ तथाभूतवचनम् गु०

यत्किञ्चिदेतत्। तेनाग्निगमकत्वेन धूमस्य यो न्यायः सोऽत्रापि समान इति विशिष्टज्ञानगमकत्वं विशिष्टशब्दस्याभ्युपगन्तव्यम्।

अथ ज्ञानविशेषग्रहणे प्रवृत्तं सविकल्पकं निर्विकल्पकं वा ततो भिन्नमभिन्नं वा ज्ञानं न वचनविशेषे प्रवर्त्तते, तस्य तदानीमनुत्पन्नत्वेनासत्त्वात्; तदप्रवृत्तेन च ज्ञानविशेषस्वरूपमेव तेन गृह्यते न तदपेक्षया तस्य कारणत्वम्, वचनविशेषग्राहकेणापि तत्स्वरूपमेव गृह्यते न पूर्वं प्रति कार्यत्वम्, कारणस्यातीतत्वेनाग्रहणात्; नाप्युभयग्राहिणा, भिन्नकालत्वेन तयोरेकज्ञाने प्रतिभासनाऽयोगात्; अत एव स्मरणमपि न तयोः कार्यकारणभावावेदकम्, अनुभवानुसारेण तस्य प्रवृत्त्युपपत्तेः, अनुभवस्य चात्र वस्तुनि निषिद्धत्वात्; असदेतत्; यतः कार्यस्य न तावदसावनुत्पन्नस्यैव कार्यत्वं धर्मः, असत्त्वात् तदानीम्; नाप्युत्पन्नस्यात्यन्तभिन्नं तत्, तद्धर्मत्वादेव। तथा, कारणस्यापि कारणत्वं कार्यनिष्पन्नाऽनिष्पत्त्यवस्थायां न भिन्नमेव। नापि तयोः कार्यकारणभावः संबन्धोऽन्योऽस्ति, भिन्नकालत्वादेव; संबन्धस्य च द्विष्ठत्वाभ्युपगमात्। ततस्तत्स्वरूपग्राहिणा प्रत्यक्षेण तदभिन्नस्वभावधर्मरूपं कारणत्वं कार्यत्वं च गृह्यते एव क्षयोपशमवशात्; यत्र तु स नास्ति तत्र कार्यदर्शनादपि न तन्निश्चीयते, यतो नाकार्य-कारणयोः कार्यकारणभावः संभवति। नापि तेनाभिन्ना उत्तरकालं तयोः कार्यकारणता कर्त्तुं शक्या, विरोधात्। नापि भिन्ना, तयोः स्वरूपेणाकार्यकारणताप्रसङ्गात्। नापि स्वरूपेण कार्य-कारणयोरर्थान्तरभूतकार्यकारणभावस्वरूपसंबन्धपरिकल्पनेन प्रयोजनम्, तद्व्यतिरेकेणापि स्वरूपेणैव कार्यकारणरूपत्वात्। न च भिन्नपदार्थग्राहि प्रत्यक्षद्वयं द्वितीयाग्रहणे तदपेक्षं कार्यत्वं कारणत्वं वा ग्रहीतुमशक्तमिति वक्तुं युक्तम्, क्षयोपशमवतां धूममात्रदर्शनेऽपि वह्निजन्यतावगमस्य भावात्; अन्यथा बाष्पादिवैलक्षण्येन तस्यानवधारणात् ततोऽनलावगमाभावेन सर्वव्यवहारोच्छेदप्रसङ्गात्। कारणाभिमतपदार्थग्रहणपरिणामाऽपरित्यागवता कार्यस्वरूपग्राहिणा च प्रत्यक्षेण कार्यकारणभावावगमे न कश्चिद् दोषः। न च कारणस्वभावावभासं प्रत्यक्षं न कार्यस्वरूपावभासयुक्तं प्रतिभासभेदेन भेदोपपत्तेरिति प्रेरणीयम्, चित्रप्रतिभासिज्ञानस्य नीलप्रतिभासाऽपरित्यागप्रवृत्तपीतादिप्रतिभास्येकत्ववत् प्रकृतज्ञानस्यापि तदविरोधात्। न च चित्रज्ञानस्याप्येकत्वमसिद्धमिति वक्तुं युक्तम्, तथाऽभ्युपगमे नीलप्रतिभासस्यापि प्रतिपरमाणुभिन्नप्रतिभासत्वेन भिन्नत्वात् एकपरमाण्ववभासस्य चाऽसंवेदनात् प्रतिभासमात्रस्याप्यभावप्रसङ्गात् सर्वव्यवहाराभावः स्यात्। अतः प्रत्यक्षमेव यथोक्तप्रकारेण सर्वोपसंहारेण प्रतिबन्धग्राहकमनुमानवादिनाऽभ्युपगन्तव्यम्; अन्यथा प्रसिद्धानुमानस्याप्यभावः स्यात्। अथेयतो व्यापारान् प्रत्यक्षं कर्तुमसमर्थम् तस्य सन्निहितविषयबलोत्पत्त्या तन्मात्रग्राहकत्वात् तर्हि प्रत्यक्षेण प्रतिबन्धग्रहणाभावेऽनुमानेन तद्ग्रहणेऽनवस्थे-तरेतराश्रयदोषसद्भावादनुमानाप्रवृत्तिप्रसङ्गतो व्यवहारोच्छेदभयादवश्यमनुमानप्रवृत्तिनिबन्धनाविनाभावनिश्चायकप्रमाणान्तरमभ्युपगन्तव्यम्; अन्यथा 'सर्वमुभयात्मकं वस्तु' इति कुतोऽनुमानप्रवृत्तिर्मीमांसकस्य? ततोऽसर्वज्ञत्व-रागादिमत्त्वसाधने वक्तृत्वलक्षणस्य हेतोः प्रतिबन्धस्य तत्साधकप्रमाणस्य च प्रसिद्धानुमाने इवाभावान्न प्रसङ्गसाधनानुमानप्रवृत्तितः सर्वज्ञाभावसिद्धिः। विपर्ययेण वचनविशेषस्य व्याप्तत्वदर्शनाद् विपर्ययसिद्धिरेव ततो युक्ता।}

यच्च 'सर्वज्ञज्ञानं किं चक्षुरादिजनितम्' इत्यादि पक्षचतुष्टयमुत्थाप्य 'चक्षुरादिजन्यत्वेन चक्षुरादीनां प्रतिनियतरूपादिविषयत्वेन धर्मादिग्राहकत्वायोगस्तज्ज्ञानस्य' दूषणमभ्यधायि, तदप्यसङ्गतम्; धर्मादिग्राहकत्वाविरोधस्य चक्षुरादिज्ञाने प्राक् प्रतिपादितत्वात्। अभ्यासपक्षे तु यद् दूषणमभ्यधायि 'न सकलपदार्थविषय उपदेशः संभवति, नापि समस्तविषयोऽभ्यासः' इति, तदपि न सम्यक्; "उत्पाद-व्यय-ध्रौव्ययुक्तं सत्" [त० अ० ५, सू० २९] इति सकलपदार्थविषयस्योपदेशस्य सामान्यतः संभवात्। न चास्याऽप्रामाण्यम्, अनुमानादिप्रमाणसंवादतः प्रामाण्यसिद्धेः। अनुमानादिप्रवर्त्तनद्वारेण चैतदर्थाभ्यासे कथं न सकलविषयाभ्याससंभवः? यदपि 'न च समस्तपदार्थविषयमनुपदेशज्ञानं संभवति' इत्युक्तम्, तदप्यचारु; 'सर्वमनेकान्तात्मकम्, सत्त्वात्' इत्यनुमाननिबन्धनव्याप्तिप्रसाधकप्रमाणस्य सकलपदार्थविषयस्य संभवात्; अन्यथाऽनुमानाभावस्य प्रतिपादितत्वात्। न च तज्ज्ञानवत एव सर्वज्ञत्वाद् व्यर्थोऽभ्यासः, सामान्यविषयत्वेनास्पष्टरूपस्यैवास्य ज्ञानस्य भावात्, अभ्यासजस्य च सकलतद्गतविशेषविषयत्वेन स्पष्टत्वान्न तदभ्यासो विफलः। यदपि 'तदभ्यासप्रवर्त्तकं चक्षुरा-

१-दपि तन्निश्चीयते मां०। २ पृ० ५१ पं० ३। ३ पृ० ५६ पं० ३३। ४ पृ० ५१ पं० ९। ५ पृ० ५१ पं० १०। ६ प्र० पृ० पं० २५।

दिजनितं यद्यतीन्द्रियविषयम्[1] इत्याद्यवादि, तदपि प्रतिक्षिप्तम्; अतीन्द्रियार्थग्राहकत्वस्यान्येन्द्रिय-विषयग्राहकत्वस्य च प्राक् प्रतिपादनात्[2] व्यवहारोच्छेदाभावस्य च दर्शितत्वात्[3]। अतीन्द्रियेऽपि च कालादौ विशेषणभूते चक्षुरादेः प्रवृत्तिप्रतिपादनाच्च[4] इतरेतराश्रयत्वदोषस्याप्यनवकाशः पूर्वपक्षप्रतिपादितस्य[5]। शब्दज्ञानजनितज्ञानपक्षे तु इतरेतराश्रयदोषप्रसङ्गापादनमप्ययुक्तम्, कारणपक्षे तद्-
५ संभवात्; अन्यसर्वज्ञप्रणीतागमप्रभवत्वेन ज्ञानस्य कथमितरेतराश्रयत्वम्? तदागमप्रणेतुरप्यन्य-सर्वज्ञप्रणीतागमपूर्वकत्वेऽनवस्था स्यात् सा चेष्यत एव; अनादित्वादागम-सर्वज्ञपरम्परायाः। यदप्यवादि 'शब्दजनितं ज्ञानमस्पष्टाभम्, तज्ज्ञानवतः कथं सकलज्ञत्वम्' इति, तदप्यसङ्गतम्; नहि शब्दजनितेन ज्ञानेनाभ्यासानासादितवैशद्येन सकलज्ञोऽभ्युपगम्यते—येनायं दोषः स्यात्—किन्त्व-भ्यासासादितसकलविशेषसाक्षात्कारित्वलक्षणनैर्मल्यवता। अत एव 'प्रेरणाजनितं ज्ञानमस्मदादीनाम-
१० प्यतीताऽनागत-सूक्ष्मादिपदार्थविषयमस्तीति सर्वज्ञत्वं स्यात्' इति यदुक्तम्, तदपि निरस्तम्; अभ्यास-जस्य स्पष्टविज्ञानस्य सकलपदार्थविषयस्यास्मदादीनामभावात्। 'लिङ्गजनितत्वेऽपि तज्ज्ञानस्यातीन्द्रि-यधर्मादिपदार्थसंबन्धानवगमाद् लिङ्गस्यानवगतसाध्यसंबन्धस्य च तस्य धर्मादिसाध्यानुमापकत्वा-संभवात्' इत्यादि[6] यत्, तदप्यसङ्गतम्; अवगतधर्माद्यतीन्द्रियसाध्यसंबन्धस्य हेतोः प्रसिद्धत्वात्। तथाहि—स्वविषयग्रहणक्षमस्य ज्ञानस्य तदग्राहकत्वं विशिष्टद्रव्यसंबन्धपूर्वकं पीतहृत्पूरपुरुषज्ञानस्येव;
१५ 'सर्वमनेकान्तात्मकम्' इति सकलसामान्यविषयस्य च ज्ञानस्य तदगताशेषविशेषाग्राहकत्वं सुप्रसिद्धमिति भवति पौद्गलिकाऽतीन्द्रियधर्मादिसिद्धिरतो हेतोः। यदप्युक्तम्[7] 'अनुमानज्ञानेन सकलज्ञत्वाभ्युपग-मेऽस्मदादीनामपि तत् स्यात्, भावनाबलात् तद्वैशद्ये तु कामादिविप्लुतविशदज्ञानवत इवासर्वज्ञत्वम्; तज्ज्ञानस्य तद्वद् उपप्लुतत्वप्राप्तेः' इति, तदप्यचारु; यतो भावनाबलाज्ज्ञानं वैशद्यमनुभवतीत्येतावन्मा-त्रेण दृष्टान्तस्योपात्तत्वाद् न सकलदृष्टान्तधर्माणां साध्यधर्मिण्यासञ्जनं युक्तम्; तथाऽभ्युपगमे सकला-
२० नुमानोच्छेदप्रसक्तेः। न चानुमानगृहीतस्यार्थस्य भावनाबलाद् वैशद्यं तत्प्रतिभासिन्यभ्यासजे ज्ञानेऽनु-भवतो वैपरीत्यसंभवो येन तदवभासिनो ज्ञानस्य कामाद्युपप्लुतज्ञानस्येवोपप्लुतत्वं स्यात्। यदप्यभ्यधायि 'रजो-नीहाराद्यावरणापाये वृक्षादिदर्शनवद् रागाद्यावरणाभावे सर्वज्ञज्ञानं वैशद्यभाग् भविष्यति' 'न च रागादीनामावारकत्वं सिद्धम्' इत्यादि, तदप्यसङ्गतम्; कुड्यादीनामप्यन्वय-व्यतिरेकाभ्यामावार-कत्वासिद्धेः। तथाहि—सत्यस्वप्नप्रतिभासस्यार्थग्रहणे न कुड्यादीनामावारकत्वम्, निश्छिद्रापवरकम-
२५ ध्यस्थितेनापि भाव्यतीन्द्रियाद्यर्थस्यान्तरावरणाभावे प्रमाणान्तरसंवादिन उपलम्भात्; कुड्यादीनां त्वावरणत्वे तद्दर्शनमसंभव्येव स्यात्, तथाप्रतिभासेनादृष्टार्थेऽपि कुड्यादीनां नावारकत्वम्। यच्च प्रातिभं ज्ञानं जाग्रदवस्थायां शब्द-लिङ्गाऽक्षव्यापाराभावेऽपि 'श्वो भ्राता मे आगन्ता' इत्याद्याकार-मुत्पद्यमानमुपलभ्यते तत्र कुड्यादीनां कथमावारकत्वम्? कथं वा विज्ञानस्य नातीन्द्रियविशेषणभूत-श्वस्तनकालाद्यवभासकत्वम् अनिन्द्रियजस्य च ज्ञानस्य बाह्य-सूक्ष्मादिपदार्थसाक्षात्कारित्वं न सिद्धम्
३० येन 'सर्वज्ञज्ञानस्यानक्षजत्वे बाह्याऽतीन्द्रियादिसकलपदार्थसाक्षात्करणं स्पष्टत्वं च न स्यात्' इत्यादि प्रेर्येत? । अत एव सकलपदार्थग्रहणस्वभावस्य ज्ञानस्य इन्द्रियादिजन्यत्वकृत एव प्रतिनियतरूपादिग्रा-हकत्वनियमोऽवसीयते, प्रातिभादौ तदजन्ये तस्याभावात्। सकलज्ञज्ञानं चातीन्द्रियमिति कथं "येऽपि सातिशया दृष्टाः"[8] इत्यादि तथा "यत्राप्यतिशयो दृष्टः" [श्लो० वा० सू० २, श्लो० ११४][9] इत्यादि च दूषणं तत्र क्रमते? न हि[10] ज्ञानस्याशेषज्ञेयज्ञानस्वभावस्य कश्चित् प्रतिनियतो रूपादिकः स्वार्थः
३५ संभवति इत्यसकृदावेदितम्।

अथ रागादीनामावारकत्वेऽपि कथमात्यन्तिकः क्षयः, कथं वाऽभ्यस्यमानमप्यविशदं ज्ञानं लङ्घनोदकतापादिवत् प्रकृष्टप्रकर्षावस्थाम् वैशद्यं चाऽवाप्नोतीति? नैतत् प्रेर्यम्; यतो यदि रागादीना-मावारकत्वादिस्वरूपं न ज्ञायेत, नित्यत्वमाकस्मिकत्वं वा तेषां स्यात्, तद्धेतूनां वा स्वरूपापरिज्ञानं

---

१ पृ० ५१ पं० ११। २ पृ० ५६ पं० ३५–पृ० ५७ पं० ४। ३ पृ० ५१ पं० १५। ४ पृ० ५६ पं० २४। ५ पृ० ५१ पं० १९। ६ पृ० ५१ पं० २१। ७ पृ० ५१ पं० २५। ८ पृ० ५१ पं० २५। ९ पृ० ५१ पं० २७। १०–कत्वं च भां०, बा०, गु०। ११–प्रतीत–कां०। १२ पृ० ५१ पं० ३०–३५। १३ पृ० ५१ पं० ३६। १४–न्द्रियार्थस्या–गु० १५–भासे नादृष्टार्थेऽपि कुड्यादीनामावारकत्वम् मां०। १६–विशेषभूत–बा० विना। १७ पृ० ४९ पं० १०। १८ पृ० ४९ पं० १२। १९ हि शब्दज्ञा–भा०, वि०। २०–मावरणत्वे मां०।

नित्यत्वं वा संभाव्येत, तद्विपक्षस्य वा स्वरूपतोऽज्ञानं अनभ्यासश्च स्यात् तदेतन्न स्यादपि; यावता रागादीनां ज्ञानावरणहेतुत्वेनावरणस्वरूपत्वं सिद्धम्। न च तेषां नित्यत्वम्, तत्सद्भावे सर्वज्ञज्ञानस्य प्रतिपादयिष्यमाणप्रमाणनिश्चितस्याभावप्रसङ्गात्। नाप्याकस्मिकत्वम्, अत एव। न चैषामुत्पादको हेतुर्नावगतः, मिथ्याज्ञानस्य तज्जनकत्वेन सिद्धत्वात्। न च तस्यापि नित्यत्वम्, अन्यथाऽविक-लकारणस्य मिथ्याज्ञानस्य भावे प्रबन्धप्रवृत्तरागादिदोषसद्भावात् तदावृतत्वेन सर्वविद्विज्ञानस्याभावः
५ स्यादिति स एव दोषः। आकस्मिकत्वेऽपि मिथ्याज्ञानस्य हेतुव्यतिरेकेणापि प्रवृत्तेस्तत्कार्यभूतरा-गादीनामपि प्रवृत्तिरिति पुनरपि सर्वज्ञज्ञानाभावः; अहेतुकस्य च मिथ्याज्ञानस्य देश-काल-पुरु-षप्रतिनियमाभावोऽपि स्यादिति न चेतनाऽचेतनविभागः। न च तत्प्रतिपक्षभूतस्योपायस्याप-रिज्ञानम्, मिथ्यात्वविपक्षत्वेन सम्यग्ज्ञानस्य निश्चितत्वात्। तदुत्कर्षे मिथ्याज्ञानस्यात्यन्तिकः
१० क्षयः। तथाहि—यदुत्कर्षतारतम्याद् यस्यापचयतारतम्यं तस्य विपक्षप्रकर्षावस्थागमने भवत्यात्य-न्तिकः क्षयः, यथोष्णस्पर्शस्य तथाभूतस्य प्रकर्षगमने शीतस्पर्शस्य तथाविधस्यैव, सम्यग्ज्ञानोप-चयतारतम्यानुविधायी च मिथ्याज्ञानापचयतरतमादिभाव इति तदुत्कर्षेऽस्याऽऽत्यन्तिकक्षयसद्भा-वात् तत्कार्यभूतरागाद्यनुत्पत्तेरावरणाभावः सिद्धः। रागादिविपक्षभूतवैराग्याभ्यासाद् वा रागा-दीनां निर्मूलतः क्षय इति कथं नावरणाभावः?

न च लङ्घनोदकतापादिवदभ्यस्यमानस्यापि सम्यग्ज्ञान-वैराग्यादेर्न परप्रकर्षप्राप्तिरिति
१५ कुतस्तद्विषये मिथ्याज्ञानाभावाद् रागादेरात्यन्तिकोऽनुत्पत्तिलक्षणः क्षयलक्षणो वाऽभाव इति वक्तुं युक्तम्, यतो लङ्घनं हि पूर्वप्रयत्नसाध्यं यदि व्यवस्थितमेव स्यात् तदोत्तरप्रयत्न-स्यापरापरलङ्घनातिशयोत्पत्तौ व्यापारात् भवेल्लङ्घनस्याप्यनपेक्षितपूर्वातिशयसद्भावप्रयत्नान्तरस्य प्रकर्षावाप्तिः; न चैवम्, अपरापरप्रयत्नस्य पूर्वपूर्वातिशयोत्पादने एवोपक्षीणशक्तित्वात्। अथैतत् स्यात्—यदि तत्रापि पूर्वप्रयत्नोत्पादितोऽतिशयो न व्यवस्थितः स्यात्, तत्किमिति प्रथममेव
२० यावल्लङ्घयितव्यं तावन्न लङ्घयति? तल्लङ्घनाभ्यासापेक्षणात् पूर्वप्रयत्नाहितातिशयसद्भावेऽपि न लङ्घनप्रकर्षप्राप्तिरिति यथा तस्य व्यवस्थितोत्कर्षता तथा ज्ञानस्यापि भविष्यति, न; यतः श्लेष्मादिना प्राक् शरीरस्य जाड्याद् यावल्लङ्घयितव्यं न तावद् व्यायामानपनीतश्लेष्माऽनासा-दितपटुभावः कायो लङ्घयति; अभ्यासासादितश्लेष्मक्षय-पटुभावस्तु यावल्लङ्घयितव्यं तावल्लङ्घ-यतीत्यभ्यासस्तत्र सप्रयोजनः। ज्ञानस्य तु योऽभ्याससमासादितोऽतिशयः सोऽतिशयान्तरोत्पत्तौ
२५ पुनः प्राक्तनाभ्यासापेक्षो न भवतीत्युत्तरोत्तराभ्यासानामपरापरातिशयोत्पादने व्यापाराद् न व्यव-स्थितोत्कर्षतेति भवति ज्ञानस्य परप्रकर्षकाष्ठा। उदकतापे त्वतिशयेन क्रियमाणे तदाश्रयस्यैव क्षयाद् नातिताप्यमानमप्युदकमग्निरूपतामासादयति; विज्ञानस्य त्वाश्रयोऽत्यभ्यस्यमानेऽपि तस्मिन् न क्षयमुपयातीति कथं तस्य व्यवस्थितोत्कर्षता? न च विज्ञानमपि प्राक्तनाभ्यासादासादितातिशयं पूर्वमेव विनष्टम् अपराभ्यासादन्यदतिशयवदुत्पन्नमिति कथं पूर्वाभ्याससमासादितोऽतिशयो
३० नाभ्यासान्तरापेक्षो येन व्यवस्थितोत्कर्षता तस्यापि न स्यादिति वक्तुं युक्तम्, तत्र पूर्वाभ्यासजनि-तसंस्कारस्योत्तरत्रानुवृत्तेः; अन्यथा शास्त्रपरावर्त्तनादिवैयर्थ्यप्रसङ्गात्। नापि 'यदुपचयतारतम्या-नुविधायी यदपचयतरतमभावस्तस्य तद्विपक्षप्रकर्षगमनादात्यन्तिकः क्षयः' इत्यत्र प्रयोगे श्लेष्मणा व्यभिचार उद्भावयितुं शक्यः किल—निम्बाद्यौषधोपयोगात्[11] प्रकर्षतारतम्यानुभववतस्तरतम-भावापचीयमानस्यापि श्लेष्मणो नात्यन्तिकक्षय इति—यतस्तत्र निम्बाद्यौषधोपयोगस्यैव नोत्कर्ष-
३५ निष्ठा आपादयितुं शक्या, तदुपयोगेऽपि श्लेष्मपुष्टिकारणानामपि तदैवाऽऽसेवनात्, अन्यथौषधोप-योगाधारस्यैव विनाशः स्यात्। चिकित्साशास्त्रस्य च धातुदोषसाम्यापादनाभिप्रायेणैव प्रवृत्तेस्त-त्प्रतिपादितौषधोपयोगस्योद्रिक्तधातुदोषसाम्यविधाने एव व्यापारो न पुनस्तस्य निर्मूलने; अन्यथा दोषान्तरस्यात्यन्तक्षये मरणावाप्तेरिति न श्लेष्मणा तथाभूतेनानैकान्तिको हेतुः। न च सम्यग्ज्ञा-नसात्मीभावेऽपि पुनर्मिथ्याज्ञानस्यापि संभवो भविष्यति तदुत्कर्ष इव सम्यग्ज्ञानस्येति वक्तुं युक्तम्,
४० यतो मिथ्याज्ञाने रागादौ वा दोषदर्शनात्, तद्विपक्षे च सम्यग्ज्ञान-वैराग्यलक्षणे गुणदर्शनात् तत्र

---

१ तदेतन्न बा०, पू०, बा०। २–त्पादहेतु–मां०। ३–लक्षय वि०। ४–तव्यं तन्न लङ्घयति बा०, बा०, पू०। ५–षधोपचारयो–भा०, गु०, ६–कः क्षयः भां०। ७–न्यदा कां० मां०। ८–न-स्यात्मी–मां०।

पुनरभ्यासप्रवृत्तिसंभवात् प्रकृष्टेऽपि मिथ्याज्ञान-रागादावुत्पद्येते एव सम्यग्ज्ञान-वैराग्ये; नैवं तयोः प्रकर्षावस्थायां दोषदर्शनं तत्र तद्विपर्यये वा गुणदर्शनं येन पुनस्तत्सात्मीभावेऽपि मिथ्याज्ञान-रागादेरुत्पत्तिः संभाव्येत। न चानक्षजस्य ज्ञानस्य सर्ववित्संबन्धिनः कथं प्रत्यक्षशब्दवाच्यतेति वक्तुं युक्तम्, यतोऽक्षजत्वं प्रत्यक्षस्य शब्दव्युत्पत्तिनिमित्तमेव न पुनः शब्दप्रवृत्तिनिमित्तम्; तन्निमित्तं हि तदेकार्थाश्रितमर्थसाक्षात्कारित्वम्। अन्यद्धि शब्दस्य व्युत्पत्तौ निमित्तम् अन्यच्च प्रवृत्तौ, यथा गोशब्दस्य गमनं व्युत्पत्तौ, गोपिण्डाश्रितगोत्वं प्रवृत्तौ निमित्तम्—अन्यथा यदि यदेव व्युत्पत्तिनिमित्तं तदेव प्रवृत्तावपि तदा गच्छन्त्यामेव गवि गोशब्दप्रवृत्तिः स्यात् न स्थितायाम्, महिष्यादौ च गमनपरिणामवति गोशब्दः प्रवर्त्तेत—तथाऽत्रापि प्रवृत्तिनिमित्तसद्भावात् प्रत्यक्षव्यपदेशः संभवत्येव। यद्वा यदेव व्युत्पत्तिनिमित्तं तदेव प्रवृत्तावप्यस्तु तथापि तच्छब्दवाच्यतायास्तत्र नाभावः। तथाहि—'अश्नुते' सर्वपदार्थान् ज्ञानात्मना व्याप्नोतीति व्युत्पत्तिशब्दसमाश्रयणाद् अक्षः आत्मा, तमाश्रितम् उत्पाद्यत्वेन तं प्रति गतमिति प्रत्यक्षमिति व्युत्पत्तेः। अभ्युपगमवादेन चाभ्यासवशात् प्राप्तप्रकर्षेण ज्ञानेन सर्वज्ञ इति प्रतिपादितम्। न त्वस्माकमयमभ्युपगमः किन्तु ज्ञानाद्यावारकघातिकर्मचतुष्टयक्षयोद्भूताशेषज्ञेयव्याप्यनिन्द्रियशब्दलिङ्गसाक्षात्कारिज्ञानवतः सर्वज्ञत्वमभ्युपगम्यते।

यच्चोक्तम् 'यद्यतीतानागतवर्त्तमानाशेषपदार्थसाक्षात्कारिज्ञानेन सर्वज्ञस्तदा क्रमेणातीतानागतपदार्थवेदने पदार्थानामानन्त्याद् न ज्ञानपरिसमाप्तिः' इति, तदयुक्तम्; तथाऽनभ्युपगमात्; शास्त्रार्थे क्रमेणानुभूतेऽप्यत्यन्ताभ्यासान्न क्रमेण संवेदनमनुभूयते तद्वदत्रापि स्यात्। यदप्यभ्यधायि 'अथ युगपत्सर्वपदार्थवेदकं तज्ज्ञानमभ्युपगम्यते तदा परस्परविरुद्धानां शीतोष्णादीनामेकज्ञाने प्रतिभासासंभवात्; संभवेऽपि' इत्यादि, तदप्ययुक्तम्; यतः परस्परविरुद्धानां किमेकदाऽसंभवः, किंवा संभवेऽप्येकज्ञानेऽप्रतिभासनं भवता प्रतिपादयितुमभिप्रेतम्? तत्र यद्याद्यः पक्षः, स न युक्तः; जलाऽनलादीनां छायाऽऽतपादीनां चैकदा विरुद्धानामपि संभवात्। अथैकत्र विरुद्धानामसंभवस्तदाऽसंभवादेव नैकत्र ज्ञाने तेषां प्रतिभासो न पुनर्विरुद्धत्वात्, विरुद्धानामपि तेषामेकज्ञाने प्रतिभाससंवेदनात्। एतेन 'विरुद्धार्थग्राहकस्य च तज्ज्ञानस्य न प्रतिनियतार्थग्राहकत्वं स्यात्' इत्याद्यपि निरस्तम्, छायाऽऽतपादिविरुद्धार्थग्राहिणोऽपि ज्ञानस्य प्रतिनियतार्थग्राहकत्वसंवेदनात्। यच्चोक्तम् 'यदि युगपत्सर्वपदार्थग्राहकं तज्ज्ञानं तदैकक्षण एव सर्वपदार्थवेदनात् द्वितीयादिक्षणे किञ्चिज्ज्ञ एव स स्यात्' इत्यादि, तदप्यत्यन्तासंबद्धम्; यतो यदि द्वितीयक्षणे पदार्थानाम् तज्ज्ञानस्य चाभावः स्यात् तदा स्यादप्येतत्; न चैतत्संभवति, तथाऽभ्युपगमे द्वितीयक्षणे सर्वपदार्थाभावात् सकलसंसारोच्छेदः स्यात्। यदप्यभ्यधायि 'अनाद्यनन्तपदार्थसंवेदने तत्संवेदनस्यापरिसमाप्तिः' इत्यादि, तदप्ययुक्तम्; अत्यन्ताभ्यस्तशास्त्रार्थज्ञानस्येव युगपदनाद्यनन्तार्थग्राहिणस्तज्ज्ञानस्यापि परिसमाप्तिसंभवात्; अन्यथा भूत-भविष्यत्-सूक्ष्मादिपदार्थग्राहिणः प्रेरणाजनितज्ञानस्यापि कथं परिसमाप्तिः? तत्राप्यपरिसमाप्त्यभ्युपगमे "चोदना भूतं भवन्तं भविष्यन्तम्" ईत्यादिवचनस्य नैरर्थक्यं स्यादिति। यदपि 'परस्थरागादिसंवेदने सरागः स्यात्' इत्यादि, तदप्यसङ्गतम्; नहि परस्थरागादिसंवेदनाद् रागादिमान् भवति; अन्यथा श्रोत्रियद्विजस्यापि स्वप्नज्ञानेन मद्यपानादिसंवेदनाद् मद्यपानदोषः स्यात्। अथाप्यरसनेन्द्रियजं तज्ज्ञानमिति नायं दोषस्तर्हि सर्वज्ञज्ञानमपि नेन्द्रियजमिति कथमशुचिरसास्वाददोषस्तत्रासज्येत? न च रागादिसंवेदनाद् 'रागी' इति लोके व्यवहारः किन्त्वङ्गनाकामनाद्यभिलाषस्वसंविदितस्याशिष्टव्यवहारकारिणः स्वात्मस्वभावस्योत्पत्तेः; न चासौ तत्रेति कथं स रागादिमान्? यदपि 'अथ शक्तियुक्तत्वेन सर्वपदार्थवेदनम्' इत्यादि, तदप्यचारु; यथा उपलब्धिलक्षणप्राप्ते सन्निहितदेशादावनुपलब्धेः 'अपरमत्र नास्ति' इति इदानींतनानामियत्तानिश्चयस्तथा सर्वज्ञस्यापि स्वशक्तिपरिच्छेदात्; अन्यथा घटादीनामपि क्वचित् प्रदेशेऽभावनिश्चयेऽपरप्रकारासंभवात् सकलव्यवहारविलोपः

१ ततोऽत्रा-वा०, पू०, बा०, मां०। २ पृ० ५२ पं० ३। ३ पृ० ५२ पं० ४। ४ पृ० ५२ पं० ६। ५ पृ० ५२ पं० ७। ६ पृ० ५२ पं० ९। ७-दनाद्यन्तार्थ-मां०। ८ पृ० ४३ पं० ४२। ९ पृ० ५२ पं० १०। १०-लाषत्वं स्व-कां०। ११ स्वात्मकं स्वभा-गु०। १२ पृ० ५२ पं० ११।

स्यात्। 'अथ यावदुपयोगिप्रधानपदार्थजातम्' इत्यादि अपि अयुक्तम्, सकलपदार्थज्ञत्वप्रतिपादनात्। अत एव—

"ज्ञो ज्ञेये कथमज्ञः स्याद् असति प्रतिबन्धरि।
सत्येव दाह्ये न ह्यग्निः क्वचिद् दृष्टो न दाहकः॥" [ ]

इत्यत्र यदुक्तम् "किं सर्वज्ञत्वात्, अथ किञ्चिज्ज्ञत्वाद् इति, नोभयथापि हेतुः। यदि तावत् सर्वज्ञत्वादिति हेत्वर्थः परिकल्प्यते तदा प्रतिज्ञार्थैकदेशो हेतुरसिद्ध एव; कथं हि तदेव साध्यम् तदेव हेतुः। अथ किञ्चिज्ज्ञत्वादिति हेतुस्तदा विरुद्धता स्यात्; कथं हि किञ्चिज्ज्ञत्वं सर्वज्ञत्वेन विरुद्धं सर्वज्ञत्वं साधयेत्? अथ ज्ञत्वमात्रं हेतुस्तदाऽनैकान्तिकः, ज्ञत्वमात्रस्य किञ्चिज्ज्ञत्वेनाप्यविरोधात्' इति, तदपि निरस्तम्; सामान्येन 'सर्वज्ञत्वात्' इत्यस्य हेतुत्वात् विशेषेण तज्ज्ञत्वस्य साध्यत्वात् सामान्य—विशेषयोश्च भेदस्य कथञ्चित् प्रतिपादयिष्यमाणत्वात् सामान्येन सर्वज्ञत्वस्य चानुमानव्यवहारिणं प्रति साधितत्वात्। एतेन 'सूक्ष्माऽन्तरितदूरार्थाः कस्यचित् प्रत्यक्षाः प्रमेयत्वात्' इत्यत्र प्रयोगे प्रमेयत्वहेतोर्यद् दूषणमुपन्यस्तं पूर्वपक्षवादिना तदपि निरस्तम्, सर्वसूक्ष्माऽन्तरितपदार्थानां व्याप्तिप्रसाधकेनानुमानप्रमाणेन वा एकेन सामान्यतः प्रमेयत्वस्य प्रसाधितत्वात्।

यच्च 'प्रधानपदार्थपरिज्ञानं न सकलपदार्थज्ञानमन्तरेण संभवति' इति, तत् सर्वज्ञवचनामृतलवास्वादसंभवो भवतोऽपि कथञ्चित् संपन्न इति लक्ष्यते। तथाहि तद्वचः—

"जे एगं जाणइ" [आचा० प्र० श्रु० अध्य० ३, उ० ४ सू० १२२] इत्यादि।

तन्मतानुसारिभिः पूर्वाचार्यैरप्ययमर्थो न्यगादि—

"एको भावस्तत्त्वतो येन दृष्टः सर्वे भावाः सर्वथा तेन दृष्टाः।
सर्वे भावाः सर्वथा येन दृष्टा एको भावस्तत्त्वतस्तेन दृष्टः॥" [ ]

अस्यायमर्थः—न ह्यसर्ववित्ता कश्चिदेकोऽपि पदार्थस्तत्त्वतो द्रष्टुं शक्यः, एकस्यापि पदार्थस्यानुगतव्यावृत्तधर्मद्वारेण साक्षात् पारंपर्येण वा सर्वपदार्थसंबन्धिस्वभावत्वात्; तत्स्वभावाऽवेदने च तस्याऽवेदनमेव परमार्थतः ततस्तज्ज्ञानं स्वप्रतिभासमेव वेत्तीति नार्थो विदितः स्यात्, केवलं तत्राभिमानमात्रमेव लोकस्य। अथ संबन्धिस्वभावता पदार्थस्य स्वरूपमेव न भवति, यत् केवलं प्रत्यक्षप्रतीतं सन्निहितमात्रं स एव वस्तुस्वभावः; संबन्धिता तु तत्र परिकल्पितैव पदार्थान्तरदर्शनसंभवतया। तथा चोक्तम्—

"निष्पत्तेरपराधीनमपि कार्यं स्वहेतुना।
संबध्यते कल्पनया, किमकार्यं कथञ्चन?" ॥ [ ] इति,

तदेतदयुक्तम्; एवं हि परिकल्प्यमाने स्वरूपमात्रसंवेदनाद् अद्वैतमेव प्राप्तम्, ततः सर्वपदार्थाभावे व्यवहाराभावः। अथ व्यवहारोच्छेदभयात् पदार्थसद्भावोऽभ्युपगम्यते तर्हि सर्वपदार्थसंबन्धिताऽपि साक्षात् पारंपर्येण च पदार्थस्वभावोऽभ्युपगन्तव्यः; अन्यथा साक्षात् पारंपर्येण वाऽन्यपदार्थजन्यजनकतालक्षणसंबन्धिताऽनभ्युपगमे तद्व्यावृत्त्यनुगतिसंबन्धिताऽनभ्युपगमे च पदार्थस्वरूपस्याप्यभावः। तत्पदार्थपरिज्ञाने च तद्विशेषणभूता तत्संबन्धिताऽपि ज्ञातैव, अन्यथा तस्य तत्परिज्ञानमेव न स्यात्; तत्परिज्ञाने च सकलपदार्थपरिज्ञानमस्मदादीनामनुमानतः, सर्वज्ञस्य च साक्षात् तज्ज्ञानेन सकलपदार्थज्ञानम्। लोकस्तु प्रत्यक्षेण कथञ्चित् कस्यचित् प्रतिपत्ता। तथाहि—धूमस्याप्यग्निजन्यतया प्रतिपत्तौ बाष्पादिव्यावृत्तधूमस्वरूपप्रतिपत्तिः; अन्यथा व्यवहाराभावः। तथा नीलादिप्रतिभासस्यापि बाह्यार्थसंबन्धितयाऽप्रतिपत्तौ बाह्यार्थाप्रतिपत्तिरेव स्यात्। तस्मात् संबन्धितयैव पदार्थस्वरूपप्रतिपत्तिः; तच्च संबन्धित्वं प्रमेयमनुमानेन प्रतीयतेऽभ्यासदशायामस्मदादिभिः; यत्र क्षयोपशमलक्षणोऽभ्यासस्तत्र तस्य प्रत्यक्षतोऽपि प्रतिपत्तिरिति कथं न प्रधानभूतपदार्थवेदने सकलपदार्थवेदनम् एकवेदनेऽपि सकलवेदनस्य प्रतिपादितत्वात्?

१ पृ० ५२ पं० १७। २-क्तम् "ज्ञत्वात् सर्वज्ञ इति किं सर्व-मां०। ३ पृ० ४४ पं० १८। ४-यत्वस्य हे-मां०। ५ पृ० ५५ पं० ३९। ६ पृ० ५२ पं० १८। ७ नयचक्रस्य प्रान्तभागे तु एवमुपलभ्यते "एको भावः सर्वभावस्वभावः सर्वे भावा एकभावस्वभावाः। एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः" इति—(हा० लि० पृ० ४७३) ८-तस्तज्ज्ञानं कां०, गु०। ९-ण चाऽ-मां०। १०-स्य बाष्पबाह्या-मां०। -स्य प्रामाण्यबाह्या-वा०।-स्य प्राप्यबाह्या-मां०। ११ यत्र तु क्ष-मां०। १२ प्र० पृ० पं० १८।

विकल्पाभावेऽपि मन्त्राविष्टकुमारिकादिवचनवन्नित्यसमाहितस्यापि वचनसंभवाद् 'विकल्पाभावे कथं वचनम्' इत्यादि निरस्तम्। दृश्यते चात्यन्ताभ्यस्ते विषये व्यवहारिणां विकल्पनमन्तरेणापि वचनप्रवृत्तिरिति कथं ततः सर्वज्ञस्य छाद्मस्थिकज्ञानासङ्गनं युक्तम्? यदप्युक्तम् 'अतीतादेरसत्त्वात् कथं तज्ज्ञानेन ग्रहणम्, ग्रहणे वाऽसदर्थग्राहित्वात् तज्ज्ञानवान् भ्रान्तः स्यात्' इत्यादि, तदप्ययुक्तम्; यतः किमतीतादेरतीतादिकालसंबन्धित्वेनासत्त्वम्, उत तज्ज्ञानकालसंबन्धित्वेन? यद्यतीतादिकालसंबन्धित्वेनेति पक्षः, स न युक्तः; वर्त्तमानकालसंबन्धित्वेन वर्त्तमानस्येव तत्कालसंबन्धित्वेनातीतादेरपि सत्त्वसंभवात्। अथातीतादेः कालस्याभावात् तत्संबन्धिनोऽप्यभावः, तदसत्त्वं च प्रतिपादितं पूर्वपक्षवादिनाऽनवस्थे-तरेतराश्रयादिदोषप्रतिपादनेन; सत्यम्, प्रतिपादितं न च सम्यक्; तथाहि—नास्माभिरपरातीतादिकालसंबन्धित्वादस्यातीतादित्वमभ्युपगम्यते—येनानवस्था स्यात्—नापि पदार्थानामतीतादित्वेन कालस्यातीतादित्वम्—येनेतरेतराश्रयदोषः-किन्तु स्वरूपत एवातीतादिसमयस्यातीतादित्वम्। तथाहि-अनुभूतवर्त्तमानत्वः समयोऽतीत इत्युच्यते, अनुभविष्यद्वर्त्तमानत्वश्चानागतः; तत्संबन्धित्वात् पदार्थस्याप्यतीताऽनागतत्वे अविरुद्धे। 'अथ यथाऽतीतादेः समयस्य स्वरूपेणैवातीतादित्वं तथा पदार्थानामपि तद्भविष्यतीति व्यर्थस्तदभ्युपगमः' एतच्चात्यन्तासङ्गतम्, न ह्येकपदार्थधर्मस्तदन्यत्राप्यासञ्जयितुं युक्तः; अन्यथा निम्बादेस्तिक्तता गुडादावप्यासञ्जनीया स्यात्। न च साऽत्रैव प्रत्यक्षसिद्धा इत्यन्यत्रासञ्जने तद्विरोध इत्युत्तरम्, प्रकृतेऽप्यस्योत्तरस्य समानत्वात्। भवतु पदार्थधर्म एवातीतादित्वं तथापि नास्माकमभ्युपगमक्षतिः, विशिष्टपदार्थपरिणामस्यैवातीतादिकालत्वेनेष्टेः—

"परिणाम-वर्त्तना-दिवि-(वर्तना-विधि-) पराऽपरत्व"-[प्रशमर० प्र० श्लो० २१८]

इत्याद्यागमात्। तथाहि-स्मरणविषयत्वं पदार्थस्यातीतत्वमुच्यते, अनुभवविषयत्वं वर्त्तमानत्वम्, स्थिरावस्थादर्शनलिङ्गबलोत्पद्यमान'कालान्तरस्थाय्ययं पदार्थः' इत्यनुमानविषयत्वं धर्मोऽनागतकालत्वमिति। तेन यदुच्यते 'यदि स्वत एव कालस्यातीतादित्वं पदार्थस्यापि तत् स्वत एव स्यात्' इति, परेण तत् सिद्धं साधितम्। तद् अतीतादिकालस्य सत्त्वान्न तत्कालसंबन्धित्वेनातीतादेः पदार्थस्याऽसत्त्वम्, वर्त्तमानकालसंबन्धित्वेन त्वतीतादेरसत्त्वप्रतिपादनेऽभिमतमेव प्रतिपादितं भवति; न ह्यतीतकालसंबन्धित्वसत्त्वमेवैतज्ज्ञानकालसंबन्धित्वमस्माभिरभ्युपगम्यते। न चैतत्कालसंबन्धित्वेनासत्त्वे स्वकालसंबन्धित्वेनाप्यतीतादेरसत्त्वं भवति; अन्यथैतत्कालसंबन्धित्वस्याप्यतीतादिकालसंबन्धित्वेनासत्त्वात् सर्वाभावः स्यादिति सकलव्यवहारोच्छेदः। अथापि स्यात्-भवत्वतीतादेः सत्त्वं तथापि सर्वज्ञज्ञाने न तस्य प्रतिभासः, तज्ज्ञानकाले तस्यासन्निहितत्वात्; सन्निधाने वा तज्ज्ञानावभासिन इव वर्त्तमानकालसंबन्धिनोऽतीतादेरपि वर्त्तमानकालसंबन्धित्वप्राप्तेः। न हि वर्त्तमानस्यापि सन्निहितत्वेन तत्कालज्ञानप्रतिभासित्वं मुक्त्वाऽन्यद् वर्त्तमानकालसंबन्धित्वम्; एवमतीतादेस्तज्ज्ञानावभासित्वे वर्त्तमानत्वमेवेति वर्त्तमानमात्रपदार्थज्ञानवानस्मदादिवन्न सर्वज्ञः स्यात्। किंच, अतीतादेस्तज्ज्ञानकालेऽसन्निहितत्वेन तज्ज्ञानेऽप्रतिभासः; प्रतिभासे वा स्वज्ञानसंबन्धित्वेन तस्य ग्रहणात् तज्ज्ञानस्य विपरीतख्यातिरूपताप्रसक्तिः, एतदसंबद्धम्; यतो यथाऽस्मदादीनामसन्निहितकालोऽप्यर्थः सत्यस्वप्नज्ञाने प्रतिभाति—न चासन्निहितस्य तस्यातीतादिकालसंबन्धिनो वर्त्तमानकालसंबन्धित्वम्; नापि स्वकालसंबन्धित्वेन सत्यस्वप्नज्ञाने तस्य प्रतिभासनात् तद्ग्राहिणो ज्ञानस्य विपरीतख्यातित्वम्। यत्र ह्यन्यदेश-कालोऽर्थोऽन्यदेश-कालसंबन्धित्वेन प्रतिभाति सा विपरीतख्यातिः। अत्र त्वतीतादिकालसंबन्धी अतीतादिकालसंबन्धित्वेनैव प्रतिभातीति न तत्प्रतिभासिनोऽर्थस्य तत्कालसंबन्धित्वेन वर्त्तमानत्वम्; नापि तद्ग्राहिणो विज्ञानस्य विपरीतख्यातित्वम्—तथा सर्वज्ञज्ञानेऽपि यदाऽतीतादिकालोऽर्थोऽतीतादिकालसंबन्धित्वेन प्रतिभाति तदा कथं तस्यार्थस्य वर्त्तमानकाल-

१ पृ० ५२ पं० २१। २ पृ० ५२ पं० २२। ३ पृ० ५२ पं० ३८–पृ० ५३ पं० २। ४ पृ० ५३ पं० ३। ५ प्रशमरतिप्रकरणे "परिणाम–वर्तना–विधि–पराऽपरत्वगुणलक्षणः कालः" श्लो० २१८। तत्त्वार्थसूत्रे "वर्तना परिणामः क्रिया परत्वाऽपरत्वे च कालस्य" अ० ५, सू० २२। "परिणाम–वर्तना–परत्वाऽपरत्वादयो वस्तुधर्माः स एव च कालः" भां० मां० टि०। ६ एष पाठः वा०, बा०, पू०। अन्यत्र सर्वत्र **–ना-दि-परा–**। ७ पृ० ५३ पं० ३।

संबन्धित्वम्, कथं वा तज्ज्ञानस्य विपरीतख्यातित्वमिति? यथा वा विशिष्टमन्त्रसंस्कृतचक्षुषामङ्गुष्ठादिनिरीक्षणेनान्यदेशा अपि चौरादयो गृह्यमाणा न तद्देशा भवन्ति, नापि तज्ज्ञानं तद्देशादिसंबन्धित्वमनुभवति, तथा सर्वविद्विज्ञानमप्यसन्निहितकालं यद्यर्थमवभासयति स्वात्मना तत्कालसंबन्धित्वमननुभवदपि तदा को विरोधः, कथं वा तस्यातीतादेरर्थस्य तज्ज्ञानकालत्वमिति? न च सत्यस्वप्नज्ञानेऽप्यतीताद्यर्थप्रतिभासे समानमेव दूषणमिति न तद्दृष्टान्तद्वारेण सर्वज्ञज्ञानमतीताद्यर्थग्राहकं व्यवस्थापयितुं युक्तमिति वक्तुं युक्तम्, अविसंवादवतोऽपि ज्ञानस्य विसंवादविषये विप्रतिपत्त्यभ्युपगमे स्वसंवेदनमात्रेऽपि विप्रतिपत्तिसद्भावाद् अतिसूक्ष्मेक्षिकया तस्यापि तत्स्वरूपत्वासंभवात् सर्वशून्यताप्रसङ्गात्; तन्निषेधस्य च प्रतिपादयिष्यमाणत्वात्। अतो न युक्तमुक्तम् 'अथ प्रतिपाद्यापेक्षया' इत्यादि 'न भ्रान्तज्ञानवान् सर्वज्ञः कल्पयितुं युक्तः' इतिपर्यन्तम्। यदप्युक्तम् 'भवतु वा सर्वज्ञस्तथाप्यसौ तत्कालेऽप्यसर्वज्ञैर्ज्ञातुं न शक्यते' इत्यादि, तदप्यसंगतम्; यतो यथा सकलशास्त्रार्थापरिज्ञानेऽपि व्यवहारिणा 'सकलशास्त्रज्ञः' इति कश्चित् पुरुषो निश्चीयते तथा सकलपदार्थापरिज्ञानेऽपि यदि केनचित् कश्चित् सर्वज्ञत्वेन निश्चीयते तदा को विरोधः? युक्तं चैतत्; अन्यथा युष्माभिरपि सकलवेदार्थापरिज्ञाने कथं जैमिनिरन्यो वा वेदार्थज्ञत्वेन निश्चीयते? तदनिश्चये च कथं तद्व्याख्यातार्थानुसरणादग्निहोत्रादावनुष्ठाने प्रवृत्तिः? इति यत्किञ्चिदेतत् "सर्वज्ञोऽयमिति ह्येतत्" इत्यादि। तदेवं सर्वज्ञसद्भावग्राहकस्य प्रमाणस्य ज्ञत्व-प्रमेयत्व-वचनविशेषत्वादेर्दर्शितत्वात् तदभावप्रसाधकस्य च निरस्तत्वात् 'ये बाधकप्रमाणगोचरतामापन्नास्ते 'असत्' इति व्यवहर्त्तव्याः' इति प्रयोगे हेतोरसिद्धत्वात् ये सुनिश्चितासंभवद्बाधकप्रमाणत्वे सति सदुपलम्भकप्रमाणगोचरास्ते 'सत्' इति व्यवहर्त्तव्याः, यथोभयवाद्यविप्रतिपत्तिविषया घटादयः, तथाभूतश्च सर्वैवित् इति भवत्यतः प्रमाणात् सर्वज्ञव्यवहारप्रवृत्तिरिति।

अथापि स्यात्—स्वविषयाविसंवादिवचनविशेषस्य तद्विषयाविसंवादिज्ञानपूर्वकत्वमात्रमेव भवता प्रसाधितम्, न चैतावताऽनन्तार्थसाक्षात्कारिज्ञानवान् सर्वज्ञः सिद्धिमासादयति, सकलसूक्ष्मादिपदार्थसार्थसाक्षात्कारिज्ञानविशेषपूर्वकत्वे हि वचनविशेषस्य सिद्धे तज्ज्ञानवतः सर्वज्ञत्वसिद्धिः स्यात्। न च तथाभूतज्ञानपूर्वकत्वं वचनविशेषस्य सिद्धम्, अनुमानादिज्ञानादपि स्वविषयाविसंवादिवचनविशेषस्य संभवात्; न च तथाभूतज्ञानवान् सर्वज्ञो भवद्भिरभ्युपगम्यत इत्येतद् हृदि कृत्वाऽऽह सूरिः-**'कुसमयविसासणं'** इति। सम्यक्—प्रमाणान्तराविसंवादित्वेन—ईयन्ते परिच्छिद्यन्ते इति समयाः–नष्ट–मुष्टि–चिन्ता–लाभाऽलाभ–सुखाऽसुख–जीवित–मरण–ग्रहो–पराग–मन्त्रौ–षधशक्तयादयः पदार्थाः—तेषां विविधम्—अन्यपदार्थकारणत्वेन कार्यत्वेन चानेकप्रकारम्—शासनम् प्रतिपादकम् यतः शासनम् कुः पृथ्वी तस्या इव।

अयमभिप्रायः—ज्ञत्व-प्रमेयत्वादेरनेकप्रकारस्य प्रतिपादितन्यायेन सर्वज्ञसत्त्वप्रतिपादकस्य हेतोः सद्भावेऽपि तत्कृततत्त्वेन शासनप्रामाण्यप्रतिपादनार्थं सर्वज्ञोऽभ्युपगम्यते; तस्य चान्यतो हेतोः प्रतिपादनेऽपि तदागमप्रणेतृत्वं हेत्वन्तरात् पुनः प्रतिपादनीयं स्यादिति हेत्वन्तरमुत्सृज्य प्रतिपादनगौरवपरिहारार्थं वचनविशेषलक्षण एव हेतुस्तत्सद्भावावेदक उपन्यसनीयः, स चानेन गाथासूत्रावयवेन सूचितः। अत एव संस्कृत्य हेतुः कर्त्तव्यः। तथाहि—यो यद्विषयाऽविसंवाद्यलिङ्गानुपदेशानन्वयव्यतिरेकपूर्वको वचनविशेषः स तत्साक्षात्कारिज्ञानविशेषप्रभवः, यथाऽस्मदादिप्रवर्त्तितः पृथ्वीकाठिन्यादिविषयस्तथाभूतो वचनविशेषः, नष्ट—मुष्टिविशेषादिविषयाविसंवाद्यलिङ्गानुपदेशानन्वयव्यतिरेकपूर्वकवचनविशेषश्चायं शासनलक्षणोऽर्थ इति।

न चात्राविसंवादित्वं वचनविशेषत्वलक्षणस्य हेतोर्विशेषणमसिद्धम्, नष्ट-मुष्ट्यादीनां वचनविशेषप्रतिपादितानां प्रमाणान्तरतस्तथैवोपलब्धेरविसंवादसिद्धेः। योऽपि क्वचिद् वचनविशेषस्य तत्र विसंवादो भवता परिकल्प्यते सोऽपि तदर्थस्य सम्यगपरिज्ञानात् सामग्रीवैकल्यात्; न पुनर्वचनविशेषस्यासत्यार्थत्वात्। न च सामग्रीवैकल्यादेकत्रासत्यार्थत्वे सर्वत्र तथात्वं परिकल्पयितुं युक्तम्; अन्यथा प्रत्यक्षस्यापि द्विचन्द्रादिविषयस्य सामग्रीवैकल्येनोपजायमानस्यासत्यत्वसंभवात्

१ पृ० ५२ पं० २५। २ पृ० ५३ पं० ६। ३ पृ० ५३ पं० ७। ४ पृ० ५३ पं० ९। ५ पृ० ५३ पं० १९। ६–**सुख–दुःख–जी**–मां०।

समग्रसामग्रीप्रभवस्याप्यसत्यत्वं स्यात् । अथाविकलसामग्रीप्रभवं प्रत्यक्षं विकलसामग्रीप्रभवात् तस्माद् विलक्षणमिति नायं दोषः, तदत्रापि समानम्। तथाहि—सम्यगज्ञाततदर्थाद् वचनाद् यद् नष्ट-मुष्ट्यादिविषयं विसंवादिज्ञानमुत्पद्यते तत् सम्यगवगततदर्थवचनोद्भवाद् विलक्षणमेव। यथा च विशिष्टसामग्रीप्रभवस्य प्रत्यक्षस्य न क्वचिद् व्यभिचार इति तस्याविसंवादित्वं तथाऽव-
५ गतसम्यगर्थवचनोद्भवस्यापि नष्ट-मुष्ट्यादिविषयविज्ञानस्येति सिद्धमत्राविसंवादित्वलक्षणं विशेषणं प्रकृतहेतोः।

नाप्यलिङ्गपूर्वकत्वं विशेषणमसिद्धम्, नष्ट-मुष्ट्यादीनामस्मदादीन्द्रियाविषयत्वेन तल्लिङ्गत्वेनाभिमतस्याप्यर्थस्यास्मदाद्यक्षाविषयत्वान्न तत्प्रतिपत्तिः; प्रतिपत्तौ वाऽस्मदादीनामपि तल्लिङ्गदर्शनाद् वचनविशेषमन्तरेणापि ग्रहो-परागादिप्रतिपत्तिः स्यात् । न हि साध्यव्याप्तलिङ्गनिश्च-
१० येऽन्यादिप्रतिपत्तौ वचनविशेषापेक्षा दृष्टा; न भवति चास्मदादीनां वचनविशेषमन्तरेण कदाचनापि प्रतिनियतदिक्-प्रमाण-फलाद्यविनाभूतग्रहो-परागादिप्रतिपत्तिरिति तथाभूतवचनप्रणेतुरतीन्द्रियार्थविषयं ज्ञानमलिङ्गमभ्युपगन्तव्यमित्यलिङ्गपूर्वकत्वमपि विशेषणं प्रकृतहेतोर्नासिद्धम्।

नाप्ययमुपदेशपरम्परयाऽतीन्द्रियार्थदर्शनाभावेऽपि प्रमाणभूतः प्रबन्धेनानुवर्तत इत्यनुपदेशपूर्वकत्वविशेषणासिद्धिरिति वक्तुं युक्तम्, उपदेशपरम्पराप्रभवत्वे नष्ट-मुष्ट्यादिप्रतिपादकवचन-
१५ विशेषस्य वक्तुरज्ञान-दुष्टाभिप्राय-वचनाकौशलदोषैः श्रोतुर्वा मन्दबुद्धित्व-विपर्यस्तबुद्धित्व-गृहीतविस्मरणैः प्रतिपुरुषं हीयमानस्यानादौ काले मूलतश्चिरोच्छेद एव स्यात्। तथाहि—इदानीमपि केचिद् ज्योतिःशास्त्रादिकमज्ञानदोषादन्यथोपदिशन्त उपलभ्यन्ते, अन्ये सम्यगवगच्छन्तोऽपि दुष्टाभिप्रायतया, अन्ये वचनदोषाद्व्यक्तमन्यथा चेति; तथा श्रोतारोऽपि केचिद् मन्दबुद्धित्वदोषादुक्तमपि यथावन्नावधारयन्ति, अन्ये विपर्यस्तबुद्धयः सम्यगुपदिष्टमप्यन्यथाऽवधारयन्ति, केचित् पुनः
२० सम्यक्परिज्ञातमपि विस्मरन्तीत्येवमादिभिः कारणैः प्रतिपुरुषं हीयमानस्यैतावन्तं कालं यावदागमनमेव न स्याच्चिरोच्छिन्नत्वेन, आगच्छति च; तस्मादन्तराऽन्तरा विच्छिन्नः सूक्ष्मादिपदार्थसाक्षात्कारिज्ञानवता केनचिदभिव्यक्त इयन्तं कालं यावदागच्छतीत्यभ्युपगमनीयमिति नानुपदेशपूर्वकत्वविशेषणासिद्धिः।

नाप्यन्वय-व्यतिरेकाभ्यां नष्ट-मुष्ट्यादिकं ज्ञात्वा तद्विषयवचनविशेषप्रवर्त्तनं कस्यचित्
२५ संभवति येनानन्वय-व्यतिरेकपूर्वकत्वविशेषणासिद्धिः स्यात्, यतो नान्वय-व्यतिरेकाभ्यां ग्रहो-परागौ-षधशत्यादयो ज्ञातुं शक्यन्ते, प्रावृट्समये शिलीन्ध्रोद्भेदवद् ग्रहो-परागादीनां दिक्-प्रमाण-फल-कालादिषु नियमाभावात्। द्रव्यशक्तिपरिज्ञानाभ्युपगमेऽन्वय-व्यतिरेकाभ्यां यावन्ति जगति द्रव्याणि तान्येकत्र मीलयित्वैकस्य रस-कल्कादिभेदेन, कर्षादिमात्राभेदेन, बाल-मध्यमाद्यवस्थाभेदेन, मूल-पत्राद्यवयवभेदेन प्रक्षेपो-द्वाराभ्यामेकोऽपि योगो युगसहस्रेणापि न
३० ज्ञातुं पार्यते किमुतानेक इति कुतस्ताभ्यामौषधशतत्यवगमः? तेन नानन्वय-व्यतिरेकपूर्वकत्वविशेषणस्यासिद्धिः। नापि नष्ट-मुष्ट्यादिविषयवचनविशेषस्यापौरुषेयत्वाद् विशिष्टज्ञानपूर्वकत्वस्यासिद्धेरसिद्धः प्रकृतो हेतुः, अपौरुषेयस्य वचनस्य पूर्वमेव निषिद्धत्वात्।

नाप्यसाक्षात्कारिज्ञानपूर्वकत्वेऽपि प्रकृतवचनविशेषस्य संभवादनैकान्तिकः, सविशेषणस्य हेतोर्विपक्षे सत्त्वस्य प्रतिषिद्धत्वात्। अत एव न विरुद्धः, विपक्ष एव वर्त्तमानो विरुद्धः; न चास्य पूर्वोक्त-
३५ प्रकारेणावगतस्वसाध्यप्रतिबन्धस्य विपक्षे वृत्तिसंभवः। अथ भवतु ग्रहो-परागाभिधायकवचनस्य तत्पूर्वकत्वसिद्धिरतो हेतोः, तत्र तस्य संवादात्; धर्मादिपदार्थसाक्षात्कारिज्ञानपूर्वकत्वसिद्धिस्तु कथं तत्र तस्य संवादाभावात्? न, तत्रापि तस्य संवादात्। तथाहि—ज्योतिःशास्त्रादेर्ग्रहो-परागादिकं विशिष्टवर्ण-प्रमाण-दिग्विभागादिविशिष्टं प्रतिपद्यमानः प्रतिनियतानां प्रतिनियतदेशवर्त्तिनां प्राणिनां प्रतिनियतकाले प्रतिनियतकर्मफलसंसूचकत्वेन प्रतिपद्यते। उक्तं च तत्र—

४० "नक्षत्र-ग्रहपञ्जरमहर्निशं लोककर्मविक्षिप्तम्।
भ्रमति शुभाशुभमखिलं प्रकाशयत् पूर्वजन्मकृतम्" ॥ [ ]

अतो ज्योतिःशास्त्रं ग्रहो-परागादिकमिव धर्माऽधर्मावपि प्रमाणान्तरसंवादतोऽवगमयति तेन ग्रहो-परागादिवचनविशेषस्य धर्माऽधर्मसाक्षात्कारिज्ञानपूर्वकत्वमपि सिद्धम्; तत्सिद्धौ सकलपदार्थसा-

१-चिरोत्सन्न-मां० ब०।

क्षात्कारिज्ञानपूर्वकत्वमपि सिद्धिमासादयति। नहि धर्माऽधर्मयोः सुख-दुःखकारणत्वसाक्षात्करणं सहकारिकारणाशेषपदार्थ-तदाधारभूतसमस्तप्राणिगणसाक्षात्करणमन्तरेण संभवति, सर्वपदार्थानां परस्परप्रतिबन्धादेकपदार्थसर्वधर्मप्रतिपत्तिश्च सकलपदार्थप्रतिपत्तिनान्तरीयका प्राक् प्रतिपादिता। अतो भवति सकलपदार्थसाक्षात्कारिज्ञानपूर्वकत्वसिद्धिरतो हेतोर्वचनविशेषस्य; तत्सिद्धौ च तत्प्रणेतुः सूक्ष्माऽन्तरितदूरानन्तार्थसाक्षात्कार्यतीन्द्रियज्ञानसम्पत्समन्वितस्य कथं न सिद्धिः? ५

नाप्येतद् वक्तव्यम्-साध्योक्ति-तदावृत्तिवचनयोरनभिधानाद् न्यूनता नामाऽत्र साधनदोषः, प्रतिज्ञावचनेन प्रयोजनाभावात्। { अथ विषयनिर्देशार्थं प्रतिज्ञावचनम्; ननु स एव किमर्थः? साधर्म्यवत्प्रयोगादिप्रतिपत्त्यर्थः। तथाहि-असति साध्यनिर्देशे 'यो वचनविशेषः स साक्षात्कारिज्ञानपूर्वकः' इत्युक्ते किमयं साधर्म्यवान् प्रयोगः, उत वैधर्म्यवानिति न ज्ञायेत, उभयं ह्यत्राशङ्क्येत-वचनविशेषत्वेन साक्षात्कारिज्ञानपूर्वकत्वे साध्ये साधर्म्यवान्, असाक्षात्कारिज्ञानपूर्वकत्वेन १०
वचनाविशेषत्वे साध्ये वैधर्म्यवानिति। हेतु-विरुद्धाऽनैकान्तिकप्रतीतिश्च न स्यात्। प्रतिज्ञापूर्वके तु प्रयोगे शब्दविशेषः साक्षात्कारिज्ञानपूर्वकः, शब्दविशेषत्वाद् इति हेतुभावः प्रतीयते; असाक्षात्कारिज्ञानपूर्वको वचनविशेषत्वाद् इति विरुद्धता; चक्षुरादिकरणजनितज्ञानपूर्वको वचनविशेषत्वाद् इत्यनैकान्तिकत्वम्। हेतोश्च त्रैरूप्यं न गम्येत, तस्य साध्यापेक्षया व्यवस्थितेः। सति प्रतिज्ञानिर्देशेऽवयवे समुदायोपचारात् साध्यधर्मी इति पक्ष इति तत्र प्रवृत्तस्य वचनविशेषत्वस्य पक्षधर्म- १५
त्वम्, साध्यधर्मसामान्येन च समानोऽर्थः सपक्ष इति तत्र वर्त्तमानस्य सपक्षे सत्त्वम्, न सपक्षोऽसपक्ष इत्यसपक्षेऽप्यसत्त्वं प्रतीयते } तदिदमनालोचिताभिधानम्; तथाहि—यो वचनविशेषः स साक्षात्कारिज्ञानपूर्वक इत्येतावन्मात्रमभिधाय नैव कश्चिदास्ते किन्तु हेतोर्धर्मिण्युपसंहारं करोति। तत्र यदि वचनविशेषश्चायं नष्ट-मुष्ट्यादिविषयो वचनसंदर्भ इति ब्रूयात् तदा साधर्म्यवत्प्रयोग-
प्रतीतिः, अथासाक्षात्कारिज्ञानपूर्वकश्चेत्यभिदध्यात् तदा वैधर्म्यवत इति संबन्धवचनपूर्वकात् २०
पक्षधर्मत्ववचनात् प्रयोगद्वयावगतिः विवक्षितसाध्यावगतिश्च। हेतु-विरुद्धाऽनैकान्तिका अपि पक्षधर्मवचनमात्रेण न प्रतीयन्ते, यदा तु संबन्धवचनमपि क्रियते तदा कथमप्रतीतिः? तथाहि—यो वचनविशेषः स साक्षात्कारिज्ञानपूर्वक इत्युक्ते हेतुरवगम्यते, विधीयमानेनानूद्यमानस्य व्याप्तेः। यो वचनविशेषः सोऽसाक्षात्कारिज्ञानपूर्वक इत्युक्ते विरुद्धः, विपर्ययव्याप्तेः। यो वचनविशेषः स चक्षुरादिजनितज्ञानपूर्वक इति अनैकान्तिकाध्यवसायः, व्यभिचारात्। तथा, त्रैरूप्यमपि हेतोर्गम्यत २५
एव, यतो व्याप्तिप्रदर्शनकाले व्यापको धर्मः साध्यतया अवगम्यते; यत्र तु व्याप्यो धर्मो विवादास्पदीभूते धर्मिण्युपसंह्रियते स समुदायैकदेशतया पक्ष इति तत्रोपसंहृतस्य व्याप्यधर्मस्य पक्षधर्मत्वावगतिः। सा च व्याप्तिर्यत्र धर्मिण्युपदर्श्यते स साध्यधर्मसामान्येन समानोऽर्थः सपक्षः प्रतीयत इति सपक्षे सत्त्वमप्यवगम्यते। सामर्थ्याच्च व्यापकनिवृत्तौ व्याप्यनिवृत्तिर्यत्रावसीयते सोऽसपक्ष इति असपक्षेऽप्यसत्त्वमपि निश्चीयते इति नार्थः प्रतिज्ञावचनेन। तदाह धर्मकीर्त्तिः—"यदि प्रती- ३०
तिरन्यथा न स्यात् सर्वं शोभेत, दृष्टा च पक्षधर्मसंबन्धवचनमात्रात् प्रतिज्ञावचनमन्तरेणापि प्रतीतिरिति कस्तस्योपयोगः"? [ ] यदा च प्रतिज्ञावचनं नैरर्थक्यमनुभवति तदा तदावृत्तिवचनस्य निगमनलक्षणस्य सुतरामनुपयोग इति न प्रतिज्ञाद्यवचनमपि प्रकृतसाधनस्य न्यूनतादोषः; केवलं तत्प्रतिपाद्यस्यार्थस्य स्वसाध्याविनाभूतस्य हेतोः साध्यधर्मिण्युपसंहारमात्रादेव सिद्धत्वाद् अर्थादापन्नस्य स्वशब्देन पुनरभिधानं निग्रहस्थानमिति प्रतिज्ञादिवचनं वादकथायां क्रियमाणं ३५
तद्वक्तुर्निग्रहमापादयति। उपनयवचनं तु हेतोः पक्षधर्मत्वप्रतिपादनादेव लब्धमिति तस्यापि ततः पृथक् प्रतिपादने पुनरुक्तालक्षण एव दोष इति न तदनभिधानेऽपि न्यूनं साधनवाक्यम्; ततः सर्वदोषरहितत्वात् साधनवाक्यस्य भवत्यतः प्रकृतसाध्यसिद्धिः।

स्वसाध्याविनाभूतश्च हेतुः साध्यधर्मिण्युपदर्शयितव्यो वादकथायामित्यभिप्रायवता आचार्येण गाथासूत्रावयवेन तथाभूतहेतुप्रदर्शनं कृतमिति। तथाहि—'समयविशासनम्' इत्यनेन गाथा- ४०
सूत्रावयववचनेन स्वसाध्यव्याप्तस्य हेतोः साध्यधर्मिण्युपसंहारः सूचितः। हेतोश्च स्वसाध्यव्याप्तिः

१ पृ० ६३ पं० १८। २-धर्मी पक्ष इति तत्र प्रवृत्त इति प्रवृ-वा०। ३ सामर्थ्याद्धि कां०। ४-वचनमेव नै-भां०।

प्रमाणतः सर्वोपसंहारेण प्रदर्शनीया। तच्च प्रमाणं व्याप्तिप्रसाधकं कदाचित् साध्यधर्मिण्येव प्रवृत्तं तां तस्य साधयति कदाचित् दृष्टान्तधर्मिणि। यत्र हि 'सर्वमनेकान्तात्मकम्, सत्त्वात्' इत्यादौ प्रयोगे न दृष्टान्तधर्मिसद्भावस्तत्र व्याप्तिप्रसाधकं प्रमाणं प्रवर्त्तमानं साध्यधर्मिण्येव सर्वोपसंहारेण हेतोः स्वसाध्यव्याप्तिं प्रसाधयति। यत्र तु प्रकृतप्रयोगादौ दृष्टान्तधर्मिणोऽपि सत्त्वं तत्र दृष्टान्तधर्मिण्यपि प्रवृत्तं तत् प्रमाणं सर्वोपसंहारेणैव तस्याः प्रसाधकमभ्युपगन्तव्यम्; अन्यथा दृष्टान्तधर्मिणि हेतोः स्वसाध्यव्याप्तावपि साध्यधर्मिणि तस्य तदव्याप्तौ न ततस्तत्र तत्प्रतिपत्तिः स्यात्, दृष्टान्तधर्मिण्येव तेन तस्य व्याप्तत्वात्; बहिर्व्याप्तेर्विद्यमानाया अपि साध्यधर्मिणि साध्यप्रतिपत्तावनुपयोगात् सादृश्यमात्रस्याकिञ्चित्करत्वात्; अन्यथा 'शुक्लं सुवर्णम्, सत्त्वात्, रजतवत्' इत्यत्रापि शुक्लत्वप्रतिपत्तिः स्यात्। अथात्र पक्षस्य प्रत्यक्षबाधनम्, प्रत्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन हेतोः कालात्ययापदिष्टत्वं वा दोषः, तदयुक्तम्; बाधाऽविनाभावयोर्विरोधात्। तथाहि—सत्येव साध्यधर्मिणि साध्ये हेतुर्वर्त्तत इति तस्य तदविनाभावः, तत्प्रतिपादितसाध्यधर्माभावश्च प्रमाणतो बाधा, साध्यधर्मभावाऽभावयोश्चैकत्र धर्मिण्येकदा विरोध इति नैतद्दोषादस्य साधनस्य दुष्टत्वं किन्तु साध्यधर्मिणि साध्यधर्माविनाभूतत्वेनाऽनिश्चयः। स च बहिर्व्याप्तिमात्रेण हेतोः साध्यसाधकत्वाभ्युपगमेऽन्यत्रापि समान इति नानुमानात् क्वचिदपि साध्यनिश्चयः स्यात्। अतो दृष्टान्तधर्मिणि प्रवृत्तेन प्रमाणेन व्याप्त्या हेतोः स्वसाध्याविनाभावो निश्चेयः। स च निश्चिताविनाभावो यत्र धर्मिण्युपलभ्यते तत्र स्वसाध्यमविद्यमानप्रमाणान्तरबाधनं निश्चाययति, यथाऽत्रैव सर्वज्ञमात्रलक्षणे साध्ये वचनविशेषलक्षणे साध्यधर्मिणि तद्विशेषत्वलक्षणो हेतुः। प्रतिबन्धप्रसाधकं चास्य हेतोः प्रागेव दृष्टान्तधर्मिणि प्रमाणं प्रदर्शितमित्यभिप्रायवतैव आचार्येणापि **'कुसमयविसासणं'** इति सूत्रे 'कुः' इत्यनेन दृष्टान्तसूचनं विहितम्, न च पक्षवचनाद्युपक्षेपः सूचितः।

ननु भवत्वस्माद्धेतोर्यथोक्तप्रकारेण सर्वज्ञमात्रसिद्धिर्न पुनस्तद्विशेषसिद्धिः। तथाहि—यथा नष्ट-मुष्ट्यादिविषयवचनविशेषस्य अर्हत्सर्वज्ञप्रणीतत्वं वचनविशेषत्वात् सिध्यति तथा बुद्धादिसर्वज्ञपूर्वकत्वमपि तत एव सेत्स्यतीति कुतस्तद्विशेषसिद्धिः? न च नष्ट-मुष्ट्यादिप्रतिपादको वचनविशेषोऽर्हच्छासन एवेति वक्तुं युक्तम्, बुद्धशासनादिष्वपि तस्योपलम्भात् इत्याशङ्क्याह सूरिः **'सिद्धत्थाणं'** इति। अस्यायमभिप्रायः—प्रत्यक्षाऽनुमानादिप्रमाणविषयत्वेन प्रतिपादिताः शासनेन ये ते तद्विषयत्वेनैव तैर्निश्चिता इति सिद्धाः, ते च 'अर्यन्ते' इति अर्था उच्यन्ते, तेषां शासनं प्रतिपादकम् अर्हत्सर्वज्ञशासनमेव न बुद्धादिशासनम्। अतो वचनविशेषत्वलक्षणस्य हेतोस्तेष्वसिद्धत्वात् कुतस्तेषामपि सर्वज्ञत्वं येन विशेषसर्वज्ञत्वसिद्धिर्न स्यात्? यथा चागमान्तरेण प्रत्यक्षादिविषयत्वेन प्रतिपादितानामर्थानां तद्विषयत्वं न संभवति तथाऽत्रैव यथास्थानं प्रतिपादयिष्यते।

अथवा 'सिद्धार्थानाम्' इत्यनेन हेतुसंसूचनं विहितमाचार्येण–सिद्धाः प्रमाणान्तरसंवादतो निश्चिताः, येऽर्था नष्ट-मुष्ट्यादयः, तेषां शासनं प्रतिपादकं यतो द्वादशाङ्गं प्रवचनमतो जिनानां कार्यत्वेन संबन्धि; तेनायं प्रयोगार्थः सूचितः—प्रयोगश्च—प्रमाणान्तरसंवादियथोक्तनष्ट-मुष्ट्यादिसूक्ष्मान्तरितदूरार्थप्रतिपादकत्वान्यथाऽनुपपत्तेर्जिनप्रणीतं शासनम्। अत्र च सूक्ष्माद्यर्थप्रतिपादकत्वान्यथाऽनुपपत्तिलक्षणस्य हेतोर्जिनप्रणीतत्वलक्षणेन स्वसाध्येन व्याप्तिः साध्यधर्मिण्येव निश्चितेति तन्निश्चायकप्रमाणविषयस्येह दृष्टान्तस्य प्रदर्शनमाचार्येण न विहितम्, तदर्थस्य तद्व्यतिरेकेणैव सिद्धत्वात्। यथा चार्थापत्तेः साध्यधर्मिण्येव व्याप्तिनिश्चयाद् दृष्टान्तव्यतिरेकेणापि तदुत्थापकादर्थादुपजायमानायाः सर्वज्ञप्रतिक्षेपवादिभिर्मीमांसकैः प्रामाण्यमभ्युपगम्यते तथा प्रकृतादन्यथाऽनुपपत्तिलक्षणाद्धेतोरुपजायमानस्याऽस्याऽनुमानस्य तत् किं नेष्यते? प्रतिपादितश्चार्थापत्तेरनुमानेऽन्तर्भावः प्रागिति भवत्यतो हेतोः प्रकृतसाध्यसिद्धिः। अत एव पूर्वाचार्यैर्हेतुलक्षणप्रणेतृभिरेकलक्षणो हेतुः

१–तद्धर्मनि–भां०, कां०। २ सर्वज्ञलक्षणे बा०, पू०, वा० विना। ३ तद्विशेषलक्षणो भां०, कां०, चं०, गु०। ४ प्र० पृ० पं० ४। ५ पृ० ६५ पं० २९। ६ पृ० ४६ पं० ३६।

"अन्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम्?
नान्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम्?" ॥ [ ]

इत्यादिवचनसंदर्भेण प्रतिपादित इति मन्वानेन आचार्येणापि न दृष्टान्तसूचनं विहितमत्र प्रयोगे। 'कुसमयविशासनम्' इति च अत्र व्याख्याने बुद्धादिशासनानामसर्वज्ञप्रणीतत्वप्रतिपादकत्वेन व्याख्येयम्। तथाहि—कुत्सिताः प्रमाणबाधितैकान्तस्वरूपार्थप्रतिपादकत्वेन, समयाः कपिलादिप्रणीतसिद्धान्तास्तेषाम् "सन्ति पञ्च महाभूया" [सूत्रकृ० प्र० श्रु०, प्र० अ०, प्र० उ०, गा० ७] इत्यादिवचनसंदर्भेण दृष्टेष्टविषये विरोधाद्युद्भावकत्वेन 'विशासनम्' विध्वंसकं यतः अतो द्वादशाङ्गमेव जिनानां शासनमिति भवत्यतो विशेषणात् सर्वज्ञविशेषसिद्धिरिति स्थितमेतज्जिनशासनं द्वादशाङ्गं तत्त्वादेव सिद्धं निश्चितप्रामाण्यमिति॥

[ईश्वरस्वरूपवादः]

अत्र ईश्वरकृतजगद्वादिनः प्राहुः–युक्तमुक्तम् 'सर्वज्ञप्रणीतं शासनम्, तत्प्रणीतत्वाच्च तत् प्रमाणम्' इति। इदं त्वयुक्तम् 'राग-द्वेषादिकान् शत्रून् जितवन्त इति जिनाः'। सामान्ययोगिन एवेश्वरव्यतिरिक्ता एतल्लक्षणयोगिनः न पुनः शासनादिसर्वजगत्स्रष्टा ईश्वरः। तथा च पतञ्जलिः—

"क्लेश-कर्म-विपाकाऽऽशयैरपरामृष्टः पुरुषविशेष ईश्वरः" [योगद० पा० १, सू० २४] इति।

अनेन सूत्रेण रागादिलक्षणक्लेशशत्रुरहितत्वं सहजमीश्वरस्य प्रतिपादितम् न पुनर्विपक्षभावनाद्यभ्यासव्यापारात् क्लेशादिक्षयस्तस्य, येन 'रागादीन् स्वव्यापारेण जितवन्तः' इति वचः सार्थकं तद्विषयत्वेन स्यात्। तथा चान्यैरप्युक्तम्—

"ज्ञानमप्रतिघं यस्य ऐश्वर्यं च जगत्पतेः।
वैराग्यं चैव धर्मश्च सह सिद्धं चतुष्टयम्" ॥ [ ]

इत्याशङ्क्याह– **'भवजिणाणं'** इति, भवन्ति नारक-तिर्यग्-नराऽमरपर्यायत्वेनोत्पद्यन्ते प्राणिनोऽस्मिन्निति भवः संसारः; तद्धेतुत्वाद् रागादयोऽत्र 'भव'शब्देनोपचाराद् विवक्षिताः, तं जितवन्त इति जिनाः। उपचाराश्रयणे च प्रयोजनम्—न ह्यविकलकारणे रागादौ अध्वस्ते तत्कार्यस्य संसारस्य जयः शक्यो विधातुमिति प्रतिपादनम्। भवकारणभूतरागादिजये चोपायः प्रतिपादितः प्राक्; तदुपायेन च विपक्षरागादिजयद्वारेण तत्कार्यभूतस्य भवस्य जयः संभवति नान्यथेति। न ह्युपायव्यतिरेकेणोपेयसिद्धिः; अन्यथोपेयस्य निर्हेतुकत्वेन देश-काल-स्वभावप्रतिनियमो न स्यादिति सर्वप्राणिनामीश्वरत्वम्, न वा कस्यचित् स्यात्। प्रतिपादितश्चायमर्थः—

"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात्।
अपेक्षातो हि भावानां कादाचित्कत्वसंभवः" ॥ [ ]

इत्यादिना ग्रन्थेन धर्मकीर्त्तिना। तन्न रागादिक्लेशविगमः स्वभावत एवेश्वरस्येति युक्तम्।

[प्रासङ्गिकी परलोकचर्चा]

[पूर्वपक्षः–परलोके प्रत्यवस्थानम्]

अत्र बृहस्पतिमतानुसारिणः स्वभावसंसिद्धज्ञानादिधर्मकलापाध्यासितस्य स्थाणोरभावप्रतिपादनं जैनेन कुर्वताऽस्माकं साहाय्यमनुष्ठितमिति मन्वानाः प्राहुः–युक्तमुक्तं यत् 'स्वभावसंसिद्धज्ञानादिसंपत्समन्वितस्येश्वरस्याभावः' 'नारक-तिर्यग्-नराऽमररूपपरिणतिस्वभावतया उत्पद्यन्ते प्राणिनोऽस्मिन्निति' एतच्चायुक्तमभिहितम्, परलोकसद्भावे प्रमाणाभावात्। तथाहि–परलोकसद्भावेदकं प्रमाणं प्रत्यक्षम् अनुमानम् आगमो वा जैनेनाभ्युपगमनीयः, अन्यस्य प्रमाणत्वेन तेनानिष्टेः। न चात्रैतद् वक्तव्यम्–भवतोऽपि किं तत्प्रतिक्षेपकं प्रमाणम्? यतो नास्माभिस्तत्प्रतिक्षेपकप्रमाणात् तदभावः प्रतिपाद्यते किन्तु परोपन्यस्तप्रमाणपर्यनुयोगमात्रमेव क्रियते। अत एव

"सर्वत्र पर्यनुयोगपराण्येव सूत्राणि बृहस्पतेः" [ ] इति चार्वाकैरभिहितम्।

---

१ प्र० पृ० पं० ८। २ पृ० २९ पं० २०। ३ पृ० ६१ पं० १०। ४ प्र० पृ० पं० २९। ५ प्र० पृ० पं० २०।

स च परोपन्यस्तप्रमाणपर्यनुयोगः तदभ्युपगमस्य प्रश्नादिद्वारेण विचारणा न पुनः स्वसिद्धप्रमाणोपन्यासः, येन 'अतीन्द्रियार्थप्रतिक्षेपकत्वेन प्रवर्त्तमानं प्रमाणमाश्रयासिद्धत्वादिदोषदुष्टत्वेन कथं प्रवर्त्तते' इत्यस्मान् प्रति भवताऽपि पर्यनुयोगः क्रियेत । अत एव परलोकप्रसाधकप्रमाणाभ्युपगमं परेण ग्राहयित्वा तदभ्युपगमस्यानेन प्रकारेण विचारः क्रियते–

तत्र न तावत् परलोकप्रतिपादकत्वेन चक्षुरादिकरणव्यापारसमासादितात्मलाभं सन्निहितप्रतिनियतरूपादिविषयत्वात् प्रत्यक्षं प्रवर्त्तते । नाप्यतीन्द्रियं योगिप्रत्यक्षं तत्र प्रवर्त्तत इति वक्तुं शक्यम्, परलोकादिवत् तस्याप्यसिद्धेः ।

नाप्यनुमानं प्रत्यक्षपूर्वकं तत्र प्रवृत्तिमासादयति, प्रत्यक्षाप्रवृत्तौ तत्पूर्वकस्यानुमानस्यापि तत्राप्रवृत्तेः । अथ यद्यपि प्रत्यक्षावगतप्रतिबन्धलिङ्गप्रभवमनुमानं न तत्र प्रवर्त्तते तथापि सामान्यतोदृष्टं तत्र प्रवर्त्तिष्यते, तदपि न युक्तम्; यतस्तदपि सामान्यतोदृष्टमवगतप्रतिबन्धलिङ्गोद्भवम्, आहोस्वित् अनवगतप्रतिबन्धलिङ्गसमुत्थम्? यद्यनवगतप्रतिबन्धलिङ्गोद्भवमिति पक्षः, स न युक्तः; तथाभूतलिङ्गप्रभवस्य स्वविषयव्यभिचारेण अश्वदर्शनानन्तरोद्भूतराज्यावाप्तिविकल्पस्येवाप्रमाणत्वात् । अथ प्रतिपन्नसंबन्धलिङ्गप्रभवं तत् तत्र प्रवर्त्तत इति पक्षः, सोऽपि न युक्तः; प्रतिबन्धावगमस्यैव तत्र लिङ्गस्यासंभवात् । तथाहि–प्रत्यक्षस्य तत्र लिङ्गसंबन्धावगमनिमित्तस्याभावेऽनुमानं लिङ्गसंबन्धग्राहकमभ्युपगन्तव्यम् । तत्र यदि तदेव परलोकसद्भावावेदकमनुमानं स्वविषयाभिमतेनार्थेनात्मोत्पादकलिङ्गसंबन्धग्राहकं तदेतरेतराश्रयत्वदोषः । अथानुमानान्तराद् गृहीतप्रतिबन्धाल्लिङ्गादुपजायमानं तद्विषयं तदभ्युपगम्यते तदाऽनवस्था । तथा, सर्वमप्यनुमानमस्मान् प्रत्यसिद्धम् । तथाहि—बृहस्पतिसूत्रम्–

"अनुमानमप्रमाणम्" [ ] इति ।

अनेन प्रतिज्ञाप्रतिपादनं कृतम्, अनिश्चितार्थप्रतिपादकत्वा(त्वात्)सिद्धप्रमाणाभासवदिति हेतुदृष्टान्तावभ्यूह्यौ ।

विषयविचारेण वाऽनुमानप्रामाण्यमयुक्तम्—धर्म–धर्म्युभयस्वतन्त्रसाधने सिद्धसाध्यता यतः, अतो विशेषणविशेष्यभावः साध्यः । प्रमेयविशेषविषयां प्रमां कुर्वत् प्रमाणं प्रमाणतामश्नुते । इतरेतरावच्छिन्नश्च समुदायोऽत्र प्रमेयः; तदपेक्षया च पक्षधर्मत्वादीनामन्यतमस्यापि रूपस्याप्रसिद्धिः । नहि समुदायधर्मता हेतोः, नापि समुदायेनान्वयो व्यतिरेको वा, धर्मिमात्रापेक्षया पक्षधर्मत्वे साध्यधर्मापेक्षया च व्याप्तौ गौणतेति । उक्तं च–

"प्रमाणस्यागौणत्वादनुमानादर्थनिश्चयो दुर्लभः" [ ] इति ।

धर्मिधर्मतायाग्रहणेऽपि न गौणतापरिहारः, प्रतीयमानापेक्षया गौण–मुख्यव्यवहारस्य चिन्त्यत्वात्; समुदायश्च प्रतीयते । एकदेशाश्रयणेनापि त्रैरूप्यमयुक्तम्, व्याप्त्यसिद्धेः । नहि सत्तामात्रेणाविनाभावो गमकः अपि त्ववगतः, अन्यथाऽतिप्रसङ्गात् । स च सकलसपक्ष–विपक्षाप्रत्यक्षीकरणे दुर्विज्ञानोऽसर्वविदा । न चात्र भूयोदर्शनं शरणम्, सहस्रशोऽपि दृष्टसाहचर्यस्य व्यभिचारात् । अत एवं न दर्शनादर्शनमपि । तदुक्तम्—

"गोमानित्येव मर्त्येन भाव्यमश्ववताऽपि किम्?" [ ] इति ।

देश–कालाऽवस्थाभेदेन च भावानां नानात्वावगमादनाश्वासः । तदुक्तम्—

"अवस्था–देश–कालानाम्" [वाक्यप० प्र० का० श्लो० ३२] इत्यादि । आह च–

"अविनाभावसंबन्धस्य ग्रहीतुमशक्यत्वात्" [ ]

यच्च 'सामान्यस्य तद्विषयस्याभावात्, स्वार्थ–परार्थभेदासंभवात्, विरुद्धाऽनुमान–विरोधयोः सर्वत्र

१–त्वादसिद्ध—वा०, बा०, मां०, भां० । २–**स्य गौण**–भां०, मां० । स्याद्वादरत्नाकरेऽपि "प्रमाणस्य गौणत्वात्" इत्यादि मुद्रितम्, एतच्च 'पौरन्दरं सूत्रम्' इति उदलेखि तत्रैव पृ० १३१ पं०३–४ । ३–**धर्मत्वग्र**–गु० । ४ **एव दर्शना**–कां०, गु० । ५ भां०, मां०, वा०, बा०, पू० विना सर्वत्र पूर्णःश्लोकः–

अवस्था–देश–कालानां भेदाद् भिन्नासु शक्तिषु । भावानामनुमानेन प्रतीतिरतिदुर्लभा ॥

प्रतीतिरपि दुर्लभा कां० । "प्रतीतिरिह दुर्लभा" मां० टि० ।

संभवात्, क्वचिच्च विरुद्धाव्यभिचारिणः' इत्यादि दूषणजालं तद् अनुद्घोषणीयमेव, यतोऽनिश्चितार्थप्रतिपादकत्वाद् "अनुमानमप्रमाणम्" इत्यनुमानाऽप्रमाणताप्रतिपादने कृते शेषदूषणजालस्य मृतमारणकल्पत्वात् । ततोऽनुमानस्याप्रमाणत्वादतीन्द्रियपरलोकसद्भावप्रतिपादने कुतस्तस्य प्रवृत्तिः?

अथेदमेव जन्म पूर्वजन्मान्तरमन्तरेण न युक्तमिति जन्मान्तरलक्षणस्य परलोकस्य सिद्धिरिष्यते, तत् किमियमर्थापत्तिः, अथानुमानं वा? न तावदर्थापत्तिः, तल्लक्षणाभावात्,

"दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते" [मीमांसाद० अ०१, पा०१, सू०५ शाबरभा०]

इति हि तस्या लक्षणं विचक्षणैरिष्यते । न तु जन्मान्तरमन्तरेण नोपपत्तिमदिदं जन्मेति सिद्धम्, मातापितृसामग्रीमात्रकेण तस्योपपत्तेः, तन्मात्रहेतुकत्वे चान्यपरिकल्पनायामतिप्रसङ्गात् ।

अथ प्रज्ञा–मेधादयो जन्मादावभ्यासपूर्वका दृष्टाः कथमतत्पूर्वका भवेयुः, न वह्निपूर्वको धूमस्तत्पूर्वकतामन्तरेण कदाचिदपि भवन्नुपलब्धः, तदप्यसत्; अविनाभावसंबन्धस्य देश–कालव्याप्तिलक्षणस्य प्रत्यक्षेण प्रतिपत्तुमशक्तेः—सन्निहितमात्रप्रतिपत्तिनिमित्तं हि प्रत्यक्षमुपलभ्यते 'नहि सकलदेश–कालयोर्विना वह्निमसंभव एव धूमस्य' इति प्रत्यक्षतः प्रतीतिर्युक्ता; अतो न धूमोऽपि वह्निपूर्वकः सर्वत्र प्रत्यक्षाऽनुपलम्भाभ्यां सिद्ध इति कुतस्तेन दृष्टान्तेन जन्मान्तरस्वरूपपरलोकसाधनम्? तस्मात् केचित् प्रज्ञा–मेधादयस्तथाभूताभ्यासपूर्वकाः, केचिद् मातापितृशरीरपूर्वका इति । न च प्रज्ञादयः शरीरतो व्यतिरिच्यमानस्वभावाः संवेदनविषयतामुपयान्ति, शरीरं च तदन्वय–व्यतिरेकानुवृत्तिमदेव दृष्टमिति कथमन्यथा व्यवस्थामर्हति?

अथ पूर्वोपात्तादृष्टमन्तरेण कथं मातापितृविलक्षणं शरीरम्? नन्वेतेनैव व्यभिचारो दृश्यते, नहि सर्वदा कारणानुरूपमेव कार्यम्, तेन विलक्षणादपि मातापितृशरीराद् यदि प्रज्ञा–मेधादिभिर्विलक्षणं तदपत्यस्य शरीरमुपजायेत, कदाचित् तदाकारानुकारि तत् क एवाऽत्र विरोधः? यथा कश्चित् शालूकादेव शालूकः, कश्चिद् गोमयात् तथा कश्चिदुपदेशाद् विकल्पः, कश्चित् तदाकारपदार्थदर्शनात् । अथ दर्शनादपि विकल्पः पूर्वविकल्पवासनामन्तरेण कथं भवेत्? तर्हि गोमयादपि शालूकः कथं शालूकमन्तरेणेति एतदपि प्रष्टव्यम् । तस्मात् कार्यकारणभावमात्रमेवैतत् । तत्र च नियमाभावादविज्ञानादपि मातापितृशरीराद् विज्ञानमुपजायताम्; अथवा यथा विकल्पाद् व्यवहितादपि विकल्प उपजायते तथा व्यवहितादपि मातापितृशरीरत एवेति न भेदं पश्यामः । यथा चैकमातापितृशरीरादनेकापत्योत्पत्तिस्तथैकस्मादेव ब्रह्मणः प्रजोत्पत्तिरिति न जात्यन्तरपरिग्रहः कस्यचिदिति न परलोकसिद्धिः । नहि मातापितृसंबन्धमात्रमेव परलोकः, तथेष्टावभ्युपगमविरोधात् ।

अथानाद्यनन्त आत्माऽस्ति तमाश्रित्य परलोकः साध्यते, न ह्येकानुभवितृव्यतिरेकेणानुसन्धानं संभवति, भिन्नानुभवितर्यनुसन्धानादृष्टेः, तदयुक्तम्;

"परलोकिनोऽभावात् परलोकाभावः" [ ] इति वचनात् ।

न ह्यनाद्यनन्त आत्मा प्रत्यक्षप्रमाणप्रसिद्धः । अनुमानेन चेतरेतराश्रयदोषप्रसङ्गः–सिद्धे आत्मन्येकरूपेणानुसन्धानविकल्पस्याविनाभूतत्वे आत्मसिद्धिः, तत्सिद्धेश्चानुसन्धानस्य तदविनाभूतत्वसिद्धिरितीतरेतराश्रयसद्भावान्नैकस्यापि सिद्धिः । न चासिद्धमसिद्धेन साध्यते । किंच, दर्शनाऽनुसन्धानयोः पूर्वापरभाविनोः कार्यकारणभावः प्रत्यक्षसिद्धः, तत् कुतोऽनुसन्धानस्मरणादात्मसिद्धिः? अपि च, शरीरान्तर्गतस्य ज्ञानस्यामूर्तत्वेन कथं जन्मान्तरशरीरसंचारः? अथान्तराभवशरीरसन्तत्या संचरणमुच्यते, तदपि परलोकान्न विशिष्यते । संचारश्च न दृष्टो जीवत इह जन्मनि, मरणसमये भविष्यतीति दुरधिगममेतत् न परलोकसिद्धिः । अथवा सिद्धेऽपि परलोके प्रतिनियतकर्मफलसंबन्धासिद्धेर्व्यर्थमेवानुमानेन परलोकास्तित्वसाधनम् । अथागमात् प्रतिनियतकर्मफलसंबन्धसिद्धिः, तथासति परलोकास्तित्वमप्यागमादेव सिद्धमिति किमनुमानप्रयासेन?

न चागमादपि परलोकसिद्धिः, तस्य प्रामाण्यासिद्धेः । न चाप्रमाणसिद्धं परलोकादिकमभ्युपगन्तुं युक्तम्, तदभावस्यापि तथाऽभ्युपगमप्रसङ्गात् । तन्न परलोकसाधकप्रमाणप्रतिपादनमकृत्वा

१–त्रमेव तत् कां०, गु० । २ **प्रत्यक्षप्रसिद्धः** गु० ।

'भव' शब्दव्युत्पत्तिरर्थसंस्पर्शिन्यभिधातुं युक्ता। डित्थादिशब्दव्युत्पत्तितुल्या तु यदि क्रियेत तदा नास्माभिरपि तत्प्रतिपादकप्रमाणपर्यनुयोगे मनः प्रणिधीयत इति पूर्वपक्षः॥

[उत्तरपक्षः–परलोकस्य व्यवस्थापनम्]

अत्रोच्यते–यदुक्तम् 'पर्यनुयोगमात्रमस्माभिः क्रियते' इति, तत्र वक्तव्यम्–पर्यनुयोगोऽपि क्रियमाणः किं प्रमाणतः क्रियते, उताप्रमाणतः? यदि प्रमाणतस्तदयुक्तम्, यतस्तत्कार्यपि प्रमाणं किं प्रत्यक्षम्, उतानुमानादि? यदि प्रत्यक्षम् तदयुक्तम्, प्रत्यक्षस्याविचारकत्वेन पर्यनुयोगस्वरूपविचाररचनाऽचतुरत्वात्।

न च प्रत्यक्षस्यापि प्रमाणत्वं युक्तम्, भवदभ्युपगमेन तल्लक्षणासंभवात्। तदसंभवश्च स्वरूपव्यवस्थापकधर्मस्य लक्षणत्वात्। तत्र प्रत्यक्षस्य प्रामाण्यस्वरूपव्यवस्थापको धर्मोऽविसंवादित्वलक्षणोऽभ्युपगन्तव्यः। तच्चाविसंवादित्वं प्रत्यक्षप्रामाण्येनाविनाभूतमभ्युपगम्यम्, अन्यथाभूतात् ततः प्रत्यक्षप्रामाण्यासिद्धेः; सिद्धौ वा यतः कुतश्चिद् यत् किञ्चिदनभिमतमपि सिध्येदित्यतिप्रसङ्गः। स चाविनाभावस्तस्य कुतश्चित् प्रमाणादवगन्तव्यः, अनवगतप्रतिबन्धादर्थान्तरप्रतिपत्तौ नालिकेरद्वीपवासिनोऽप्यनवगतप्रतिबन्धाद् धूमाद् धूमध्वजप्रतिपत्तिः स्यात्। अविनाभावावगमश्चाखिलदेश-कालव्याप्त्या प्रमाणतोऽभ्युपगमनीयः; अन्यथा यस्यामेव प्रत्यक्षव्यक्तौ संवादित्व-प्रामाण्ययोरसावववगतस्तस्यामेवाविसंवादित्वात् तत् सिध्येत् न व्यक्त्यन्तरे, तत्र तस्यानवगमात्। न चावगतलक्ष्यलक्षणसंबन्धा व्यक्तिर्देश-कालान्तरमनुवर्त्तते, तस्याः प्रत्यक्षव्यक्तेस्तदैव ध्वंसाद् व्यक्त्यन्तरानुगमात्। अनुगमे वा व्यक्तिरूपताविरहात्[2] अनुगतस्य सामान्यरूपत्वात् तस्य च भवताऽनभ्युपगमात्[3] अभ्युपगमे वा न सामान्यलक्षणानुमानविषयाभावप्रतिपादनेन तत्प्रतिक्षेपो युक्तः। स च प्रमाणतः प्रत्यक्षे लक्ष्य-लक्षणयोर्व्याप्त्याऽविनाभावावगमो यदि प्रत्यक्षादभ्युपगम्यते तदयुक्तम्, प्रत्यक्षस्य सन्निहितस्वविषयप्रतिभासमात्र एव भवता व्यापाराभ्युपगमात्। अथैकत्र व्यक्तौ प्रत्यक्षेण तयोरविसंवादित्व-प्रामाण्ययोरविनाभावावगमादन्यत्रापि 'एवंभूतं प्रत्यक्षम् प्रमाणम्' इति प्रत्यक्षेणापि लक्ष्य-लक्षणयोर्व्याप्त्या प्रतिबन्धावगमस्तर्ह्यन्यत्रापि 'एवंभूतं ज्ञानलक्षणं कार्यम् एवंभूतज्ञानकार्यप्रभवम्' इति तेनैव कथं न सर्वोपसंहारेण कार्यलक्षणहेतोः स्वसाध्याविनाभावावगमः। येन 'अनुमानमप्रमाणम्, अविनाभावसंबन्धस्य व्याप्त्या ग्रहीतुमशक्यत्वात्' इति दूषणमनुमानवादिनं प्रति भवताऽऽसज्यमानं शोभते। किंच, अविसंवादित्वलक्षणो धर्मः प्रत्यक्षप्रामाण्यलक्ष्यव्यवस्थापकः प्रत्यक्षप्रतिबद्धत्वेन निश्चेयः; अन्यथा तत्रैष ततः प्रामाण्यलक्षणलक्ष्यव्यवस्था न स्यात्, असंबद्धस्य केनचित् सह प्रत्यासत्ति-विप्रकर्षाभावात्[4] तद्वदन्यत्रापि ततस्तद्व्यवस्थाप्रसङ्गः। तथाऽभ्युपगमे च यथा संवादित्वलक्षणो धर्मो लक्ष्यानवगमेऽपि प्रत्यक्षधर्मिसंबन्धित्वेनावगम्यते तथा धूमोऽपि पर्वतैकदेशे अनलानवगतावपि प्रदेशसंबन्धितयाऽवगम्यत इति कर्थम् 'समुदायः साध्यः, तदपेक्षया च पक्षधर्मत्वं हेतोरवगन्तव्यम्, न च पक्षधर्मत्वाप्रतिपत्तौ साध्यधर्मानलविशिष्टतत्प्रदेशप्रतिपत्तिः; प्रतिपत्तौ वा पक्षधर्मत्वाद्यनुसरणं व्यर्थम्, तत्प्रतिपत्तेः प्रागेव तदुत्पत्तेः। समुदायस्य साध्यत्वेनोपचारात् तदेकदेशधर्मिधर्मत्वावगमेऽपि पक्षधर्मत्वावगमाद्दोषे उपचरितं पक्षधर्मत्वं हेतोः स्यादित्यनुमानस्य गौणत्वापत्तेः प्रमाणस्यागौणत्वादनुमानादर्थनिर्णयो दुर्लभः' इति चोद्यावसरः? प्रत्यक्षप्रामाण्यलक्षणेऽपि क्रियमाणेऽस्य सर्वस्य समानत्वेन प्रतिपादितत्वात्। यदा चाविसंवादित्वलक्षण-प्रत्यक्षप्रामाण्यलक्ष्ययोः सर्वोपसंहारेण व्याप्तिरभ्युपगम्यते, अविसंवादित्वलक्षणश्च प्रामाण्यव्यवस्थापको धर्मस्तत्राङ्गीक्रियते पूर्वोक्तन्यायेन तदा कथमनुमानं नाभ्युपगम्यते प्रमाणतया? तथाहि–'यत् किञ्चिद् दृष्टं तस्य यत्राविनाभावस्तद्विदस्तस्य तद् गमकं तत्र' इत्येतावन्मात्रमेवानुमानस्यापि लक्षणम्। तच्च प्रत्यक्षप्रामाण्यलक्षणमभ्युपगच्छताऽभ्युपगम्यते देवानांप्रियेण[5]। तथा, प्रामाण्यमप्यनुमानस्याभ्युपगतमेव, यतो यदेवाविसंवादित्वलक्षणं प्रत्यक्षस्य प्रामाण्यम् अनुमानस्यापि तदेव। तदुक्तम्—

---

१ पृ० ६९ पं० ३८। २-**रहानुगतस्य** वा०, बा०, मां० विना सर्वत्र। ३-**भावमवगत्याऽन्य**-वा०, मां०, बा०। ४ पृ० ७० पं० १९-३५। ५-**वात् तदन्यत्रा**-मां० विना। ६ "कथं नोद्यावसरः? इति दूरस्थः संबन्धः" मां० भां० टि०। ७ पृ० ७० पं० २३। ८ प्र० पृ० पं० ८। ९-**गतमेव देवा**-मां०।

"अर्थस्यासंभवेऽभावात् प्रत्यक्षेऽपि प्रमाणता।
प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयम्"॥ [ ] इति।

अर्थासंभवेऽभावः प्रत्यक्षस्य संवादस्वभावः प्रामाण्ये निमित्तम्, स च साध्यार्थाभावेऽभाविनो लिङ्गादुपजायमानस्यानुमानस्यापि समान इति कथं न तस्यापि प्रामाण्याभ्युपगमः?

किंच, अयं चार्वाकः प्रत्यक्षैकप्रमाणवादी यदि परेभ्यः प्रत्यक्षलक्षणमनवबुध्यमानेभ्यस्तत् प्रतिपादयति तदा तेषां ज्ञानसंबन्धित्वं कुतः प्रमाणादवगच्छति? न तावत् प्रत्यक्षात्-परचेतोवृत्तीनां प्रत्यक्षतो ज्ञातुमशक्यत्वात्-किं तर्हि स्वात्मनि ज्ञानपूर्वकौ व्यापार-व्याहारौ प्रमाणतो निश्चित्य परेष्वपि तथाभूततद्दर्शनात् तत्संबन्धित्वमवबुध्यते ततस्तेभ्यस्तत् प्रतिपादयति। तथाऽभ्युपगमे च व्यापार-व्याहारादेर्लिङ्गस्य ज्ञानसंबन्धित्वलक्षणस्वसाध्याव्यभिचारित्वं पक्षधर्मत्वं चाभ्युपगतं भवतीति कथमनुमानोत्थापकस्यार्थस्य त्रैरूप्यमसिद्धम्-येन 'नास्माभिरनुमानप्रतिक्षेपः क्रियते किंतु त्रिलक्षणं यदनुमानवादिभिर्लिङ्गमभ्युपगतं तन्न लक्षणभाग् भवतीति प्रतिपाद्यते' इति वचः शोभामनुभवति-प्रत्यक्षलक्षणप्रतिपादनार्थं परचेतोवृत्तिपरिज्ञानाभ्युपगमे त्रिलक्षणहेत्वभ्युपगमस्यावश्यंभावित्वप्रतिपादनात्? अथ नास्माभिः प्रत्यक्षमपि प्रमाणत्वेनाभ्युपगम्यते-येन 'तल्लक्षणप्रणयनेऽवश्यंभावी अनुमानप्रामाण्याभ्युपगमः' इत्यस्मान् प्रति भवद्भिः प्रतिपाद्येत-यत्तु "प्रत्यक्षमेवैकं प्रमाणम्" [ ] इति वचनं तत् तान्त्रिकलक्षणालक्षितलोकसंव्यवहारिप्रत्यक्षापेक्षया, अत एव लक्षणलक्षितप्रत्यक्षपूर्वकानुमानस्य "अनुमानमप्रमाणम्" इत्यादिग्रन्थसन्दर्भेणाप्रामाण्यप्रतिपादनं विधीयते न पुनर्गोपालाद्यङ्गलोकव्यवहाररचनाचतुरस्य धूमदर्शनमात्राविर्भूतानलप्रतिपत्तिरूपस्य, नैतच्चारु; तस्यापि महानसादिदृष्टान्तधर्मिप्रवृत्तप्रमाणावगतस्वसाध्यप्रतिबन्धनिश्चितसाध्यधर्मिधर्मधूमबलोद्भूतत्वेन तान्त्रिकलक्षणलक्षितप्रत्यक्षपूर्वकत्वस्य वस्तुतः प्रदर्शितत्वात्। 'एतत् पक्षधर्मत्वम्' 'इयं चास्य धूमस्य व्याप्तिः' इति साङ्केतिकव्यवहारस्य गोपालादिमूर्खलोकासंभविनोऽकिञ्चित्करत्वात्। प्रत्यक्षस्य चाविसंवादित्वं प्रामाण्यलक्षणम्, तद् यथा संभवति तथा परतःप्रामाण्यं व्यवस्थापयद्भिः 'सिद्धं' इत्येतत्पदव्याख्यायां दर्शितं न पुनरुच्यते। तत् स्थितमेतत्-न प्रत्यक्षस्य भवदभिप्रायेण प्रामाण्यव्यवस्थापकलक्षणसंभवः; तद्भावे वाऽनुमानस्यापि प्रामाण्यप्रसिद्धिरिति न प्रत्यक्षं पर्यनुयोगविधायि।

नाऽप्यनुमानादिकं पर्यनुयोगकारि, अनुमानादेः प्रमाणत्वेनानभ्युपगमात्। अथास्माभिर्यद्यप्यनुमानादिकं न प्रमाणतयाऽभ्युपगम्यते तथापि परेण तत् प्रमाणतयाऽभ्युपगतमिति तत्प्रसिद्धेन तेन परस्य पर्यनुयोगो विधीयते; ननु परस्य तत् प्रमाणतः प्रामाण्याभ्युपगमविषयः, अथाप्रमाणतः? यदि प्रमाणतः तदा भवतोऽपि प्रमाणविषयस्तत् स्यात्; नहि प्रमाणतोऽभ्युपगमः कस्यचिद् भवति कस्यचिन्नेति युक्तम्। अथाप्रमाणतोऽनुमानादिकं प्रमाणतयाऽभ्युपगम्यते परेण तदाऽप्रमाणेन न तेन पर्यनुयोगो युक्तः, अप्रमाणस्य परलोकसाधनवत् तत्साधकप्रमाणपर्यनुयोगेऽप्यसामर्थ्यात्। अथ तेन प्रमाणलक्षणापरिज्ञानात् तत्प्रामाण्यमभ्युपगतमिति तत्सिद्धेनैव तेन परलोकादिसाधनाभिमतप्रमाणपर्यनुयोगः क्रियते; नन्वज्ञानात् तत् परस्य प्रमाणत्वेनाभिमतम्, न चाज्ञानादन्यथात्वेनाभिमन्यमानं वस्तु तत्साध्यामर्थक्रियां निर्वर्त्तयति; अन्यथा विषत्वेनाज्ञैर्मन्यमानं महौषधादिकमपि तान् मारयितुकामेन दीयमानं स्वकार्यकरणक्षमं स्यात्। अथ नास्माभिः परलोकप्रसाधकप्रमाणपर्यनुयोगोऽनुमानादिना स्वतन्त्रप्रसिद्धप्रामाण्येन, पराभ्युपगमावगतप्रामाण्येन वा क्रियते किं तर्हि 'यदि परलोकादिकोऽतीन्द्रियोऽर्थः परेणाभ्युपगम्यते तदा तत्प्रतिपादकं प्रमाणं वक्तव्यम्, प्रमाणनिबन्धना हि प्रमेयव्यवस्थितिः, तस्य च प्रमाणस्य तल्लक्षणाद्यसंभवेन तद्विषयाभिमतस्याप्यभावः' इत्येवंविचारणालक्षणः पर्यनुयोगः क्रियत इति न स्वतन्त्रानुमानोपन्यासपक्षधर्म्यसिद्ध्यादिलक्षणदोषावकाशो बृहस्पतिमतानुसारिणाम्; नन्वेवमप्यनया भङ्ग्या भवता परलोकाद्यतीन्द्रियार्थप्रसाधकप्रमाणपर्यनुयोगे प्रसङ्गसाधनाख्यमनुमानम् तद्विपर्ययस्वरूपं च स्ववाचैव प्रतिपादितं भवति। तथाहि–'प्रमा

१-**न्धित्वलक्षणम**-वि०। २-**लक्षणलक्षि**-वा०। ३ पृ० ७० पं० १९-पृ० ७१ पं० ३। ४ पृ० १५ पं० १०। ५ **चाऽ**-मां०, कां०, मां०।

णनिबन्धना प्रमेयव्यवस्थितिः' इत्येवंवदता प्रमेयव्यवस्था प्रमाणनिमित्तैव प्रतिपादिता भवति; एतच्च प्रसङ्गसाधनम्, तच्च 'व्याप्यव्यापकभावे सिद्धे यत्र व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः प्रदर्श्यते' इत्येवंलक्षणम्, तेन प्रमेयव्यवस्था प्रमाणप्रवृत्त्या व्याप्ता प्रमाणतो भवता प्रदर्शनीया; अन्यथा प्रमाणप्रवृत्तिमन्तरेणापि प्रमेयव्यवस्था स्यात्। ततश्च कथं परलोकादिसाधकप्रमाणपर्यनुयोगेऽपि परलोकव्यवस्था न भवेत्? व्याप्यव्यापकभावग्राहकप्रमाणाभ्युपगमे च कथं कार्यहेतोः स्वभावहेतोर्वा परलोकादिप्रसाधकत्वेन प्रवर्त्तमानस्य प्रतिक्षेपः व्याप्तिप्रसाधकप्रमाणसद्भावेऽनुमानप्रवृत्तेरनायाससिद्धत्वात्? प्रमाणाभावे तन्निबन्धनायाः प्रमेयव्यवस्थाया अप्यभाव इति प्रसङ्गविपर्ययः; स च 'व्यापकाभावे व्याप्यस्याप्यभावः' इत्येवंभूतव्यापकानुपलब्धिसमुद्भूतानुमानस्वरूपः। एतदपि प्रसङ्गविपर्ययरूपमनुमानं प्रमाणतो व्याप्यव्यापकभावसिद्धौ प्रवर्तत इति व्याप्तिप्रसाधकस्य प्रमाणस्य तत्प्रसादलभ्यस्य चानुमानस्य प्रामाण्ये स्ववाचैव भवता दत्तः स्वहस्त इति नानुमानादिप्रामाण्यप्रतिपादनेऽस्माभिः प्रयस्यते। अतो यदुक्तम् 'सर्वत्र पर्यनुयोगपराण्येव सूत्राणि बृहस्पतेः' इति, तद् अभिधेयशून्यमिव लक्ष्यते उक्तन्यायात्।

यत् तूक्तम् 'प्रत्यक्षं सन्निहितविषयत्वेन चक्षुरादिप्रभवं परलोकादिग्राहकत्वेन न प्रवर्तते' तत्र सिद्धसाधनम्। यच्चोक्तम् 'नाप्यतीन्द्रियं योगिप्रत्यक्षम्, परलोकवत् तस्यासिद्धेः' इति, तद् विस्मरणशीलस्य भवतो वचनम्, अतीन्द्रियार्थप्रवृत्तिप्रवणस्य योगिप्रत्यक्षस्यानन्तरमेव प्रतिपादितत्वात्।

यत् पुनरिदमुच्यते 'नापि प्रत्यक्षपूर्वकमनुमानं तदभावे प्रवर्त्तते' तदसङ्गतम्, प्रत्यक्षेण हि संबन्धग्रहणपूर्वं परोक्षे पावकादौ यथाऽनुमानं प्रवर्तमानमुपलभ्यते स एव न्यायः परलोकसाधनेऽप्यनुमानस्य किमित्यदृष्टो दुष्टो वा। तथाहि–यत् कार्यं तत् कार्यान्तरोद्भूतम्, यथा पटादिलक्षणं कार्यम्, कार्यं चेदं जन्म इति भवत्यतो हेतोः परलोकसिद्धिः। तथाहि–

"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात्।
अपेक्षातो हि भावानां कादाचित्कत्वसंभवः"॥ [ ] इति।

न तावत् कार्यत्वमिहजन्मनो न सिद्धम्, अकार्यत्वे हेतुनिरपेक्षस्य नित्यं सत्त्वाऽसत्त्वप्रसङ्गात्। अथ स्वभावत एव कादाचित्कत्वं पदार्थानां भविष्यति, नहि कार्यकारणभावपूर्वकत्वं प्रत्यक्षत उपलब्धं येन तदभावान्निवर्तेत, प्रत्यक्षतः कार्यकारणभावस्यैवासिद्धेः। यद्येवं बाह्येनाप्यर्थेन सह कार्यकारणभावस्यासिद्धेः स्वसंवेदनमात्रत्वे सति अद्वैतम्, विचारतस्तस्याप्यभावे सर्वशून्यत्वमिति सकलव्यवहारोच्छेदप्रसक्तिः। तस्माद् यथा प्रत्यक्षेण बाह्यार्थप्रतिबद्धत्वमात्मनः प्रतीयते—अन्यथेहलोकस्याप्यप्रसिद्धेः, प्रत्यक्षतः तज्जन्यस्वभावत्वानवगमे तस्य तद्ग्राहकत्वासंभवात्; तथा चेहलोकसाधनार्थमङ्गीकर्त्तव्यं प्रत्यक्षं स्वार्थेनात्मनः प्रतिबन्धसाधकम्—तथा परलोकसाधनार्थमपि तदेव साधनमिति सिद्धः परलोकोऽनुमानतः। यथा च बाह्यार्थप्रतिबद्धत्वं प्रत्यक्षस्य कादाचित्कत्वेन साध्यते, धूमस्यापि वह्निप्रतिबद्धत्वम्, तथेहजन्मनोऽपि कादाचित्कत्वेन जन्मान्तरप्रतिबद्धत्वमपि। ततोऽनल-बाह्यार्थवत् परलोकेऽपि सिद्धमनुमानम्।

अथेहजन्मादिभूतमातापितृसामग्रीमात्रादप्युत्पत्तेः कादाचित्कत्वं युक्तमेवेहजन्मनः; नन्वेवं प्रदेश-समनन्तरप्रत्ययमात्रसामग्रीविशेषादेव धूम-प्रत्यक्षसंवेदनयोः कादाचित्कत्वमिति न सिध्यति वह्नि-बाह्यार्थप्रतीतिरिति सकलव्यवहाराभावः। अथाकारविशेषादेवानन्यथात्वसंभविनोऽनल-बाह्यार्थसिद्धिस्तर्हीहजन्मनोऽपि प्रज्ञा-मेधाद्याकारविशेषत एव मातापितृव्यतिरिक्तनिजजन्मान्तरसिद्धिः। तथा, यथाऽऽकारविशेष एवायं तैमिरिकादिज्ञानव्यावृत्तः प्रत्यक्षस्य बाह्यार्थमन्तरेण न भवतीति निश्चीयते—अन्यथा बाह्यार्थासिद्धेर्बौद्धाभिमतसंवेदनाद्वैतमेवेति पुनरपि व्यवहाराभावः-तथेहजन्मादिभूतप्रज्ञाविशेषाद् इहजन्मविशेषाकारो निजजन्मान्तरप्रतिबद्ध इति निश्चीयतामनुमानतः। अथ प्रत्यक्षमेव सविकल्पकं परमार्थतः प्रतिपत्तुः "ततः परं पुनर्वस्तु धर्मैः" [ऋ० वा० सू० ४, ऋ०१२०] इत्यादि मीमांसकादिप्रसिद्धं साधकं वह्नि–बाह्यार्थपूर्वकत्वस्य धूम-जाग्रत्पुरोवृत्ति-

१-स्वरूपम् वा० विना। २-व्यापकसिद्धौ कां०। ३ पृ० ६९ पं० ३९। ४ पृ० ७० पं० ५। ५ पृ० ७० पं० ६। ६ सर्वज्ञसिद्धिप्रस्तावे। ७ पृ० ७० पं० ८। ८-कार्यस्य कारण-कां०, गु०। ९-भवतो-गु०। १०-षादिजन्म-वा० विना। ११-पुरोवर्ति-मां०।

स्तम्भादिप्रत्ययस्य, अत्राभ्युपगमे परलोकवादिनः स्वपक्षमनायाससिद्धमेव मन्यन्ते; "नहि दृष्टेऽनुपपन्नम्" इति न्यायात्। यथैव हि निश्चयरूपा मातापितृ-जन्मप्रतिबद्धत्वसिद्धिस्तथैवेहजन्मसंस्कारव्यावृत्तादिहजन्मप्रज्ञाद्याकारविशेषान्निजजन्मान्तरप्रतिबद्धत्वसिद्धिरपि प्रत्यक्षनिश्चिता स्यादिति न परलोकक्षतिः। न च निश्चयप्रत्ययोऽनभ्यासदशायामनुमानतामतिक्रामति, "पूर्वरूपसाधर्म्यात् तत् तथाप्रसाधितं नानुमेयतामतिपतति" [ ] इति न्यायात् अन्वय-व्यतिरेक-पक्षधर्मताऽनुसरणस्यानभ्यासदशायामुपलब्धेः; अभ्यासदशायां च पक्षधर्मत्वाद्यनुसरणस्यान्यत्राप्यसंवेदनात् सिद्धमनुमानप्रतीतत्वं परलोकस्य।

अथेतरेतराश्रयदोषादनुमानं नास्त्येवैवंविधे विषये इत्युच्येत; नन्वेवं सति सर्वभेदाभावतो व्यवहारोच्छेद इति तदुच्छेदमनभ्युपगच्छता व्यवहारार्थिनाऽवश्यमनुमानमभ्युपगन्तव्यम्। एतेन प्रत्यक्षपूर्वकत्वाभावेऽप्यनुमानस्य प्रामाण्यं प्रतिपादितम्। न चानुमानपूर्वकत्वेऽपीतरेतराश्रयदोषानुषङ्गः, तस्यैवेतरेतराश्रयदोषस्य व्यवहारप्रवृत्तितो निराकरणात्।

यदप्युक्तम् 'अनुमानपूर्वकत्वेऽनवस्थाप्रसङ्गान्नानुमानप्रवृत्तिः' इति, तदप्यसङ्गतम्; एवं हि सति प्रत्यक्षगृहीतेऽप्यर्थे विप्रतिपत्तिविषये नानुमानप्रवृत्तिमन्तरेण तन्निरास इति बाह्येऽर्थे प्रत्यक्षस्याव्यापारात् पुनरप्यद्वैतापत्तेः शून्यतापत्तेर्वा व्यवहारोच्छेद इति व्यवहारबलात् सैवानवस्था परिहियत इति। अभ्युपगमवादेन चैतदुक्तम्; अन्यथा बाह्यार्थव्यवस्थापनाय प्रत्यक्षं प्रवर्तते। तथा, प्रदर्शितहेतोर्व्याप्तिप्रसाधनार्थं केषांचिद् मतेन निर्विकल्पम्, अन्येषां तु सविकल्पकं चक्षुरादिकरणव्यापारजन्यम्, अपरेषां मानसम्, केषाञ्चिद् व्यावृत्तिग्रहणोपयोगि ज्ञानम्, अन्येषां प्रत्यक्षानुपलम्भबलोद्भूताऽलिङ्गजोहाख्यं परोक्षं प्रमाणं तत्र व्याप्रियत इति कथमनुमानेन प्रतिबन्धग्रहणेऽनवस्थेतरेतराश्रयदोषप्रसक्तिः परलोकवादिनः प्रति भवता प्रेर्येत?

यदप्युक्तम् 'सर्वमप्यनुमानमस्मान् प्रति प्रमाणत्वेनासिद्धम्' इत्यादि, तदप्यसङ्गतम्; यतः किमनुमानमात्रस्याप्रामाण्यं भवता प्रतिपादयितुमभिप्रेतम् "अनुमानमप्रमाणम्" इत्यादिग्रन्थेन, अथ तान्त्रिकलक्षणक्षेपः, अतीन्द्रियार्थानुमानप्रतिक्षेपो वा? न तावदनुमानमात्रप्रतिषेधो युक्तः, लोकव्यवहारोच्छेदप्रसङ्गात्। यतः प्रतियन्ति कोविदाः कस्यचिदर्थस्य दर्शने नियमतः किञ्चिदर्थान्तरं न तु सर्वस्मात् सर्वस्यावगमः। उक्तं चान्येन–

"स्वगृहान्निर्गतो भूयो न तदाऽऽगन्तुमर्हति"। [ ]

अतः किञ्चिद् दृष्ट्वा कस्यचिदवगमे निमित्तं कल्पनीयम्। तच्च नियतसाहचर्यमविनाभावशब्दवाच्यं नैयायिकादिभिः परिकल्पितम्। तदवगमश्च प्रत्यक्षाऽनुपलम्भसहायमानसप्रत्यक्षतः प्रतीयते। सामान्यद्वारेण प्रतिबन्धावगमाद् देशादिव्यभिचारो न बाधकः, नापि व्यक्त्यानन्त्यम्, उभयत्रापि सामान्यस्यैकत्वात्। सामान्याकृष्टाशेषव्यक्तिप्रतिभानं च मानसे प्रत्यक्षे यथा शतसङ्ख्याऽवच्छेदेन 'शतम्' इति प्रत्यये विशेषणाकृष्टानां पूर्वगृहीतानां शतसङ्ख्याविषयपदार्थानाम्। तथाहि— 'एते शतम्' इति प्रत्ययो भवत्येव। सामान्यस्य च सत्त्वमनुगताऽबाधितप्रत्ययविषयत्वेन व्यवस्थापितम्। तदेवं नियतसाहचर्यमर्थान्तरं प्रतिपादयदुपलब्धं सत् प्रतिपादयति। उपलम्भश्चावश्यं क्वचित् स्थितस्य, सैव पक्षधर्मता, ततः सम्बन्धानुस्मृतौ ततः साध्यावगमः। यस्तु प्रतिबन्धं नोपैति तस्यापि कथं न सर्वस्मात् सर्वप्रतिपत्तिः अभ्युपगमे वाऽप्रतिपन्नेऽपि संबन्धे प्रतिपत्तिप्रसङ्गः?। प्रमातृसंस्कारकारकाणां पूर्वदर्शनानामभावात् इत्यनुत्तरम्, संबन्धाप्रतिपत्तौ प्रमातृसंस्कारानुपपत्तेः। दर्शनजः संस्कारोऽप्यनभिव्यक्तः सत्तामात्रेण न प्रतिपत्त्युपयोगी; न च स्मृतिमन्तरेण तत्सद्भावोऽपि। न चानुभवप्रध्वंसनिबन्धना स्मृतिः क्वचिद्विषये, संस्कारमन्तरेण तदनुपपत्तेः प्रध्वंसस्य च निर्हेतुकत्वासंभवात्। यत्राप्यभ्यस्ते विषये वस्त्वन्तरदर्शनादव्यवधानेन वस्त्वन्तरप्रतिपत्तिस्तत्रापि प्राक्तनक्रमाश्रयणेन वस्त्वन्तरावगमः। इयांस्तु विशेषः—एकत्रानभ्यस्तत्वादन्तराले स्मृतिसंवेदनम्, अन्यत्राभ्यासाद् विद्यमानाया अप्यसंवित्तिः। केचित्तु "योगिप्रत्यक्षं

१ मातृपितृ-मां०, कां०। २-प्रसाधितां कां०, गु०। ३ पृ० ७० पं० १७। ४ पृ० ७४ पं० १९। ५ व्यासिग्र-मां० ब०। ६ पृ० ७० पं० १७। ७ पृ० ७० पं० १९-पृ० ७१ पं० ३। ८-णाक्षेपः वा०। ९ 'लौकिकाः' मां० टि०। कोकिलाः वा०। १०-गमेति (गम इति) निमित्तं वा०, बा०। ११-चर्यमर्थमर्थान्तरं आ०, सा०, क्र०, वृ० विना। १२-केषु- चित्तु आदर्शेषु-न्धेऽप्रतिपत्ति-। १३-कतासंभवात् वा०, मां०, भां०।

संबन्धग्राहकमाहुः व्याप्तेः सकलाक्षेपेणावगमात्" तथा च यत्र यत्रेति देशकालविक्षिप्तानां व्यक्तीनामनवभासाऽनुपपत्तिः, अत एकत्र क्षणे योगित्वं प्रतिबन्धग्राहिणः। एतत् पूर्वस्मादविशिष्टम्, तद् लोके अर्थान्तरदर्शनात् अर्थान्तरसुदृढप्रतीतौ तार्किकाणां निमित्तचिन्तायां पक्षधर्मत्वाद्यभिधानम्। अतो न तान्त्रिकलक्षणप्रतिक्षेपोऽपि।

उत्पन्नप्रतीतीनामस्तु प्रामाण्यम्, उत्पाद्यप्रतीतीनां तु अतीन्द्रियाऽदृष्ट-परलोक—सर्वज्ञाद्यनुमानानां प्रतिक्षेप इति चेत्, तदसत्; यद्यनवगतसंबन्धान् प्रतिपत्तॄनधिकृत्यैतदुच्यते तदा धूमादिष्वपि तुल्यम्। अथ गृहीताविनाभावानामप्यतीन्द्रियपरलोकादिप्रतिभासानुत्पत्तेरेवमुच्यते, तदसत्; ये हि कार्यविशेषस्य तद्विशेषेण गृहीताविनाभावास्ते तस्मात् परलोकाद्यवगच्छन्त्येव; अतो न ज्ञायते केन विशेषेणातीन्द्रियार्थानुमानप्रतिक्षेपः? साहचर्याविशेषेऽपि व्याप्यगता नियतता प्रयोजिका न व्यापकगता, अतः समव्याप्तिकानामपि व्याप्यमुखेनैव प्रतिपत्तिः। नियतताऽवगमे चार्थान्तरप्रतिपत्तौ न बाधा, न प्रतिबन्धः, एकस्य रूपभेदानुपपत्तेः। ततो न विशेषविरुद्धसंभवः नापि विरुद्धाव्यभिचारिण इति यदुक्तम् 'विरुद्धाऽनुमान—विरोधयोः सर्वत्र संभवात् क्वचिच्च विरुद्धाव्यभिचारिणः' इति, एतदप्यपास्तम्। 'अविनाभावसंबन्धस्य ग्रहीतुमशक्यत्वात्, अवस्था-देश-कालादिभेदात्' इत्यादेश्च पूर्वनीत्याऽनुमानप्रमाणत्वेऽनुपपत्तिः।

परोक्षस्यार्थस्य सामान्याकारेणान्यतः प्रतिपत्तौ लोकप्रतीतायां बौद्धैस्तु कार्यकारणभावादिलक्षणः प्रतिबन्धस्तन्निमित्तत्वेन कल्पितः। तदुक्तम्—

"कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्" ॥ [ ] इत्यादि।

तथा—

"अवश्यंभावनियमः कः परस्यान्यथा परैः।
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत्" ॥ [ ] इति च।

तथाहि—क्वचित् पर्वतादिदेशे धूम उपलभ्यमानो यद्यग्निमन्तरेणैव स्यात् तदा पावकधर्मानुवृत्तिस्तस्य तत्कार्यत्वं यन्निश्चितं विशिष्टप्रत्यक्षाऽनुपलम्भाभ्यां तदेव न स्यादित्यहेतोस्तस्यासत्त्वात् क्वचिदप्युपलम्भो न स्यात्, सर्वदा सर्वत्र सर्वाकारेण वोपलम्भः स्यात्; अहेतोः सर्वदा सत्त्वात्। स्वभावश्च यदि भावव्यतिरेकेण स्यात् ततो भावस्य निःस्वभावत्वापत्तेः स्वभावस्याप्यभावापत्तिः। तत्प्रतिबन्धसाधकं च प्रमाणं कार्यहेतोर्विशिष्टप्रत्यक्षाऽनुपलम्भशब्दवाच्यं प्रत्यक्षमेव सर्वज्ञसाधकहेतुप्रतिबन्धनिश्चयप्रस्तावे प्रदर्शितम्। स्वभावहेतोस्तु कस्यचिद् विपर्यये बाधकं प्रमाणं व्यापकानुपलब्धिस्वरूपम्, कस्यचित् तु विशिष्टं प्रत्यक्षमभ्युपगतम्। सर्वथा सामान्यद्वारेण व्यक्तीनाम् अतद्रूपपरावृत्तव्यक्तिरूपेण वा तासां प्रतिबन्धोऽभ्युपगन्तव्यः; अन्यथाऽप्रतिबद्धादन्यतोऽन्यप्रतिपत्तावतिप्रसङ्गात्। प्रतिबन्धप्रसाधकं च प्रमाणमवश्यमभ्युपगमनीयम्; अन्यथाऽगृहीतप्रतिबन्धत्वादन्यतोऽन्यप्रतिपत्तावपि प्रसङ्गस्तदवस्थ एव। यत्र गृहीतप्रतिबन्धोऽसावर्थ उपलभ्यमानः साध्यसिद्धिं विदधाति तद्धर्मता तस्य पक्षधर्मत्वस्वरूपा, तद्ग्राहकं च प्रमाणं प्रत्यक्षमनुमानं वा। तदुक्तं धर्मकीर्तिना—

"पक्षधर्मतानिश्चयः प्रत्यक्षतोऽनुमानतो वा" [ ]

अतो लोकप्रसिद्ध-तान्त्रिकलक्षणलक्षितानुमानयोर्भेदाभावादतीन्द्रियपरलोकाद्यर्थसाधकत्वमपि तस्यैवेति तत्प्रामाण्यानभ्युपगमे इहलोकस्यापि अभ्युपगमाभावप्रसङ्गः। न च 'किमत्र निर्विकल्पकम्, मानसम्, योगिप्रत्यक्षम्, ऊहो वा प्रतिबन्धनिश्चायकम्; प्रतिबन्धोऽपि नियतसाहचर्यलक्षणः कार्यकारणभावादिर्वा' इति चिन्ताऽत्रोपयोगिनी, धूमादग्निप्रतिपत्तिवत् प्रज्ञा-मेधादिविज्ञानकार्यविशेषान्निजजन्मान्तरविज्ञानस्वभावपरलोकप्रतिपत्तिसिद्धेः। अतोऽनुमानाप्रामाण्यप्रतिपादनाय

१ पृ० ७५ पं० २७। २ पृ० ७० पं० ३६। ३ पृ० ७० पं० ३३-३५। ४ परे कां०। ५-रनिमित्तेऽथा-अ०। ६ पृ० ५७ पं० १८।

पूर्वपक्षवादिना यद् युक्तिजालमुपन्यस्तं तन्निरस्तं द्रष्टव्यम्; प्रतिपदमुच्चार्य न दूष्यते ग्रन्थगौरवभयात्।

यदप्युक्तम् 'परलोके प्रत्यक्षस्याप्रवृत्तेरर्थापत्तिरेवेयम् इहजन्मान्यथाऽनुपपत्त्या परलोकसद्भावः' इति, तदपि न सम्यक्; पूर्वानुसारेण सर्वस्य नियतप्रत्ययस्य प्रवृत्तेरनुमानत्वप्रतिपादनात्। अविनाभावसंबन्धस्य ग्रहीतुमशक्यत्वान्नात्रानुमानमिति चेत्; नन्वेवं तदेवाद्वैतं शून्यत्वं वा कस्य केन दोषाभिधानम्। तस्मात् संव्यवहारकारिणा प्रत्यक्षेण ऊहेन वा प्रतिबन्धसिद्धिरिति कथं नानुमानात् परलोकसिद्धिः?

यदप्युक्तम् 'मातापितृसामग्रीमात्रेणेहजन्मसंभवान्न तज्जन्मव्यतिरिक्तभूतपरलोकसाधनं युक्तम्' इति, तदपि प्रतिविहितमेव; समनन्तरप्रत्ययमात्रेण प्रत्ययप्रत्यक्षस्य भावात् स्वप्नादिप्रत्ययवन्न प्रत्यक्षाद् बाह्यार्थसिद्धिरपि इति बौद्धाभिमतपक्षसिद्धिप्रसङ्गोऽनवस्थत्वात्। यदपि प्रत्यादि 'न सन्निहितमात्रविषयत्वात् प्रत्यक्षस्य देश-कालव्याप्त्या प्रतिबन्धग्रहणसामर्थ्यम्' इति, तदपि न किञ्चित्; एवं सति अतिसन्निहितविषयत्वेन प्रत्यक्षस्य स्वरूपमात्र एव प्रवृत्तिप्रसङ्ग इति तदेव बौद्धाद्यभिमतं स्वसंवेदनमात्रं सर्वव्यवहारोच्छेदकारि प्रसक्तमिति प्रतिपादितत्वात्। तस्माल्लोकव्यवहारप्रवर्त्तनक्षमसविकल्पकप्रत्यक्षबलाद् ऊहाख्यप्रमाणाद् वा देश-कालव्याप्त्या यथोक्तलक्षणस्य हेतोः प्रतिबन्धग्रहणे प्रवृत्तिरनुमानस्येति न व्याहतिः प्रकृतस्येति एतदपि निरस्तम् 'केचित् प्रज्ञादयः' इत्यादि। न च 'प्रज्ञा-मेधादयः शरीरस्वभावान्तर्गताः' इत्यादि चोद्यं युक्तम्, तदन्तर्गतत्वेऽपि परिहारसंभवादन्वय-व्यतिरेकाभ्यां तेषां मातापित्रोः पितृशरीरजन्यत्वस्य पितृशरीरं (?) तर्हि हेतुभेदान्न भेदो मातापितृशरीरादपत्यप्रज्ञादीनाम्। अयमपरो बृहस्पतिमतानुसारिण एव दोषोऽस्तु यः कार्यभेदेऽपि कारणभेदं नेच्छति। अस्माकं तु हर्ष-विषादाद्यनेकविरुद्धधर्माक्रान्तस्य विज्ञानस्यान्तर्मुखाकारतया वेद्यस्य रूपरसगन्धस्पर्शादियुगपद्भावि—बालकुमारयौवनवृद्धावस्थाद्यनेकक्रमभाविविरुद्धधर्माध्यासिततच्छरीरादेर्बाह्येन्द्रियप्रभवविज्ञानसमधिगम्याद् भेदः सिद्ध एव। विरुद्धधर्माध्यासः, कारणभेदश्च पदार्थानां भेदकः; स च जलाऽनलयोरिव शरीर-विज्ञानयोर्विद्यत एवेति कथं न तयोर्भेदः? तद्भेदादप्यभेदे ब्रह्माद्वैतवादापत्तेस्तदवस्थ एव पृथिव्यादितत्त्वचतुष्टयाभावापत्त्या व्यवहारोच्छेदः। अथवा मातापितृ-पूर्वजन्मैकसामग्रीजन्यमेतत् कार्यम्, एतन्न (तन्न) दोषोऽव्यतिरिक्तपक्षेऽपि विज्ञान-शरीरयोः। पूर्वमप्युक्तम् 'विलक्षणादप्यन्वय-व्यतिरेकाभ्यां मातापितृशरीराद् विज्ञानमुपजायताम्; नहि कारणाकारमेव सकलं कार्यम्' इति, तदप्यसत्; यतो नहि कारणविलक्षणं कार्यं न भवतीत्युच्यते, अपि तु तदन्वय-व्यतिरेकानुविधानात् तत्कार्यत्वम्। तथाहि—यद् यद्विकारान्वय-व्यतिरेकानुविधायि तत् तत्कार्यमिति व्यवस्थाप्यते, यथा अगुरु-कर्पूरोर्णादिदाह्यदाहकपावकगतसुरभिगन्धाद्यन्वयव्यतिरेकानुविधायी धूमस्तत्कार्यतया व्यवस्थितः, एकसन्तत्यनुपतितशास्त्रसंस्कारादिसंस्कृतप्राक्तनविज्ञानधर्मान्वयव्यतिरेकानुविधायि च प्रज्ञा-मेधाद्युत्तरविज्ञानमिति कथं न तत्कार्यमभ्युपगम्यते? तदनभ्युपगमे धूमादेरपि प्रसिद्धवह्न्यादिकार्यस्य तत्कार्यत्वाप्रसिद्धिरिति पुनरपि सकलव्यवहारोच्छेदः।

"तस्माद्यस्यैव संस्कारं नियमेनानुवर्त्तते।
तन्नान्तरीयकं चित्तमतश्चित्तसमाश्रितम्" ॥ [ ]

प्रतिपादितश्च प्रमाणतः प्रतिनियतः कार्यकारणभावः सर्वज्ञसाधने 'कुसमयविसासणं' इतिपदव्याख्यां कुर्वद्भिर्न पुनरिहोच्यते।

योऽपि शालूकदृष्टान्तेन व्यभिचारः 'यथा गोमयादपि शालूकः, कश्चित् समानजातीयादपि शालूकादेव तथा केचित् प्रज्ञा-मेधादयस्तदभ्यासात्, केचित् तु रसायनोपयोगात्,

१ पृ० ७० पं० २१। २ पृ० ७१ पं० ४। ३ पृ० ७४ पं० २४। ४ पृ० ७१ पं० ८। ५ पृ० ७४ पं० ३२। ६ पृ० ७१ पं० ११। ७ पृ० ७४ पं० २४। ८ प्रज्ञादय इति इत्यादि भां०, कां०, गु०, मां०। ९ पृ० ७१ पं० १४। १० पृ० ७१ पं० १४। ११-न्यत्वेस्य अ०। -न्यत्वस्यापि-मां०। १२-णाभेदं वा०। १३-तन्न दोषो-गु०। १४ एत न दोषो-वा०, बा०। १५-ऽव्यतिरेकपक्षेऽपि वा०, बा०। १६ पृ० ७१ पं० १८। १७-गम्येत मां०। १८ पृ० ५७ पं० ३९।

अपरे मातापितृशुक्रशोणितविशेषादेव' इति, सोऽपि न सम्यग्; तत्रापि समानजातीय-पूर्वाभ्याससंभवात्; अन्यथा समानेऽपि रसायनाद्युपयोगे यमलकयोः कस्यचित् क्वापि प्रज्ञा-मेधादिकमिति प्रतिनियमो न स्यात्, रसायनाद्युपयोगस्य साधारणत्वादिति । न च प्रज्ञादीनां जन्मादौ रसायनाभ्यासे च विशेषः, शालूक-गोमयजन्यस्य तु शालूकादेस्तदन्यस्माद् विशेषो दृश्यते । क्वचिज्जातिस्मरणं च दर्शनमिति न युक्ता दृष्टकारणादेव मातापितृशरीरात् प्रज्ञा-मेधादिकार्यविशेषोत्पत्तिः । न च गोमय-शालूकादेर्व्यभिचारविषयत्वेन प्रतिपादितस्यात्यन्तवैलक्षण्यम्, रूप-रस-गन्ध-स्पर्शवत्पुद्गलपरिणामत्वेन द्वयोरपि अवैलक्षण्यात् । विज्ञान-शरीरयोश्चान्तर्बहिर्मुखाकारविज्ञानग्राह्यतया स्व-परसंवेद्यतया स्वसंवेदन-बाह्यकरणादिजन्यप्रत्ययानुभूयमानतया च परस्परानुयाय्यनेकविरुद्धधर्माध्यासतोऽत्यन्तवैलक्षण्यस्य प्रतिपादितत्वाद् नोपादानोपादेयभावो युक्तः ।

यस्तु शरीरवृद्ध्यादेश्चैतन्यवृद्ध्यादिलक्षण उपादानोपादेयभावधर्मोपलम्भः प्रतिपाद्यतेऽसौ महाकायस्यापि मातङ्गाऽजगरादेश्चैतन्याल्पत्वेन व्यभिचारीति न तद्भावसाधकः । यस्तु शरीरविकाराच्चैतन्यविकारोपलम्भलक्षणस्तद्धर्मभावः प्रतिपाद्यतेऽसावपि सात्त्विकसत्त्वानाम् अन्यगतचित्तानां वा छेदादिलक्षणशरीरविकारसद्भावेऽपि तच्चित्तविकारानुपलब्धेरसिद्धः । दृश्यते च सहकारिविशेषादपि जल-भूम्यादिलक्षणाद् बीजोपादानस्याङ्कुरादेर्विशेष इति सहकारिकारणत्वेऽपि शरीरादेर्विशिष्टाहाराद्युपयोगादौ यौवनावस्थायां वा शास्त्रादिसंस्कारोपात्तविशेषपूर्वज्ञानोपादानस्य विज्ञानस्य विवृद्धिलक्षणो विशेषो नासंभवी ।

यदप्युक्तम् 'अनादिमातापितृपरम्परायां तथाभूतस्यापि बोधस्य व्यवहितमातापितृगतस्य सद्भावात् ततो वासनाप्रबोधेन युक्त एव प्रज्ञा-मेधादिविशेषस्य संभवः' इति, तदप्ययुक्तम्; अनन्तरस्यापि मातापितृपाण्डित्यस्य प्रायः प्रबोधसंभवात्; ततश्चक्षुरादिकरणजनितस्य स्वरूपसंवेदनस्य चक्षुरादिज्ञानस्य वा युगपत् क्रमेण चोत्पत्तौ 'मयैवोपलब्धमेतत्' इति प्रत्यभिज्ञानं सन्तानान्तरतदपत्यज्ञानानामपि स्यात्, न च मातापितृज्ञानोपलब्धेस्तदपत्यादेः कस्यचित् प्रत्यभिज्ञानमुपलभ्यते । अनेन 'एकस्माद् ब्रह्मणः प्रजोत्पत्तिः' प्रत्युक्ता, एकप्रभवत्वे हि सर्वप्राणिनां परस्परं प्रत्यभिज्ञाप्रसङ्गः एकसन्तानोद्भूतदर्शन-स्पर्शनप्रत्ययोरिव ।

यत्तूक्तम् 'आत्मनोऽदृष्टेर्नात्मानमाश्रित्य परलोकः' इति, तदयुक्तम्; तदृष्टस्यसिद्धेः । तथाहि—देहेन्द्रिय-विषयादिव्यतिरिक्तोऽहंप्रत्ययप्रत्यक्षोपलभ्य एवात्मा । न च चक्षुरादेः करणग्रामस्यातीन्द्रियात्मविषयत्वेन ज्ञानजननाव्यापारात् कथं तज्जन्यप्रत्यक्षज्ञानविषय इति वक्तुं युक्तम्, स्वसंवेदनप्रत्यक्षग्राह्यत्वाभ्युपगमात् । तथाहि—उपसंहृतसकलेन्द्रियव्यापारस्य अन्धकारस्थितस्य च 'अहम्' इति ज्ञानं सर्वप्राणिनामुपजायमानं स्वसंविदितमनुभूयते, तत्र च शरीराद्यनवभासेऽपि तद्व्यतिरिक्तमात्मस्वरूपं प्रतिभाति । न चैतद् ज्ञानमनुभूयमानमप्यपह्नोतुं शक्यम्, अनुभूयमानस्याप्यपलापे सर्वापलापप्रसङ्गात् । नाप्येतन्नोत्पद्यते, कादाचित्कत्वविरोधात् । नापि बाह्येन्द्रियव्यापारप्रभवम्, तद्व्यापाराभावेऽप्युपजायमानत्वात् । नापि शब्द-लिङ्गादिनिमित्तोद्भूतम्, तदभावेऽप्युत्पत्तिदर्शनात् । न चेदं बाध्यत्वेनाप्रमाणम्, तत्र बाधकसद्भावस्यासिद्धेः । न चेदं सविकल्पकत्वेनाप्रमाणम्, सविकल्पकस्यापि ज्ञानस्य प्रमाणत्वेन प्रतिपादयिष्यमाणत्वात् । कदाचिच्च बाह्येन्द्रियव्यापारकालेऽपि यदा 'घटमहं जानामि' इत्येवं विषयमवगच्छति तदा स्वात्मानमपि । तथाहि—तत्र यथा विषयस्यावभासः कर्मतया तथाऽऽत्मनोऽप्यवभासः कर्तृतया । न च शरीरादीनां ज्ञातृता, यथा हि शरीरादेर्व्यतिरिक्ता घटादयः प्रतीतिकर्मतया प्रतिभान्ति-'मम घटादयः, अहं घटादीनां ज्ञाता' एवं 'मम शरीरादयः, अहं शरीरादीनां ज्ञाता' इत्येवं च प्रतीतिकर्मत्वेन घटादिभिस्तुल्यत्वान्न शरीरादिसंघातस्य ज्ञातृता । न च ज्ञात्रप्रतिभासः, तदप्रतिभासे हि 'ममैते भावाः प्रतिभान्ति नान्यस्य' इत्येवं प्रतिभासो न स्यात्; तदवभासापह्नवे च घटादेरपि कथं प्रतीतिः? इयांस्तु विशेषः—एकस्य प्रतीतिकर्मता अपरस्य तत्प्रतीतिकर्तृता न त्वनवभासः; अतो लिङ्गाद्यनपेक्ष आत्माऽवभासोऽप्यस्तीति

१ पृ० ७१ पं० १९ । २-तिस्मरणादर्शन-वा० बा० । ३ पृ० ७१ पं० १९ । ४ पृ० ७७ पं० १८ । ५ युक्तः । शरीर-कां०, गु० । ६-पयोगाद् यौ-मां० । ७ पृ० ७१ पं० २४ । ८ पृ० ७१ पं० २५ । ९ पृ० ७१ पं० २९-३० । १०-यादिवि-मां० । ११-सकलव्यापार-मां० । १२-दात्मानमपि । तत्र गु० ।

कथं तस्यादृष्टिः? न चास्य प्रत्ययस्य बाधारहितस्यापूर्वार्थविषयस्याक्षजविषयावभासस्येवासन्दिग्धरूपस्य निश्चितरूपत्वेन प्रतिभासमानस्य स्मृतिरूपता अप्रामाण्यं वा प्रतिपादयितुं युक्तम् । अतोऽस्यामपि प्रतीताववभासमानस्यापरोक्षतैव युक्ता न प्रमाणान्तरगम्यता ।

यदप्यत्राहुः-{अस्त्ययमवभासः किन्त्वस्य प्रत्यक्षता चिन्त्या । प्रत्यक्षं हीन्द्रियव्यापारजं ज्ञानम् । तथाचोक्तं भवद्भिः—"इन्द्रियाणां सत्संप्रयोगे बुद्धिजन्म प्रत्यक्षम्" [जैमि० अ० १-१-४] प्रत्यक्षविषयत्वात् तदर्थस्य प्रत्यक्षता न तु साक्षात्, अनिन्द्रियजत्वेन । तत्र घटादेर्बाह्येन्द्रियज्ञानविषयत्वेन सर्वलोकप्रतीताऽध्यक्षता नत्वेवमात्मनः ।

अथैवमुच्येत—नात्मनो घटादितुल्या प्रत्यक्षता, घटादेर्हि इन्द्रियजज्ञानविषयत्वेन सा व्यवस्थाप्यते, न त्वात्मा कस्यचित् प्रमाणस्य विषयः । कथं तर्हि प्रत्यक्षः? न ज्ञानविषयत्वात् प्रत्यक्षः अपि त्वपरोक्षत्वेन प्रतिभासनात् प्रत्यक्ष उच्यते; तच्च केवलस्य घटादिप्रतीत्यन्तर्गतस्य वाऽपरसाधनं प्राक् प्रतिपादितम्, एतदप्यसत्; यतः अपरसाधनमिति कोऽर्थः—किं चिद्रूपस्य सत्ता, आहोस्वित् स्वप्रतीतौ व्यापारः? यदि चिद्रूपस्य सत्तैवात्मप्रकाशनमुच्यते तदा दृष्टान्तो वक्तव्यः । न चात्राऽऽशङ्कनीयम्—अपरोक्षे दृष्टान्तान्वेषणं न कर्त्तव्यम्, यतस्तथाविधे विवादविषये सुप्रसिद्धं दृष्टान्तान्वेषणं दृश्यते । न च दीपादि दृष्टान्तः, तत्र हि सजातीयालोकानपेक्षत्वेन स्वप्रतीतौ स्वप्रकाशकत्वं व्यवस्थापितं कैश्चित् न त्विन्द्रियाग्राह्यत्वम्; तदग्राह्यत्वे 'स्वप्रकाशाः प्रदीपादयः' इति चक्षुष्मतामिवान्धानामपि तत्प्रतीतिप्रसङ्गः; तस्मान्न स्वप्रकाशाः प्रदीपादयः । यत्तु आलोकान्तरनिरपेक्षत्वं तत् कस्यचिद्विषयस्य काचित् सामग्री प्रकाशिका इति नैकत्र दृष्टत्वेनान्यत्रापि प्रसक्तिश्चोद्यते । अथ द्वितीयः पक्षः, सोऽप्ययुक्तः; अदर्शनादेव—नहि कश्चित् पदार्थः कर्तृरूपः करणरूपो वा स्वात्मनि कर्मणीव सव्यापारो दृष्टः । कथं तर्ह्यनुमेयत्वेऽप्यात्मप्रतीतिः प्रमात्रन्तराभावात्? एकस्यैव लिङ्गादिकरणमपेक्ष्य(क्षया)वस्थाभेदेन भेदे सति अदोषः ।

किंच, प्रमाणाविषयत्वेऽप्यपरोक्षतेत्यस्य भाषितस्य कोऽर्थः? ज्ञातृतया स्वरूपेणावभासनमिति चेत्, घटादयोऽपि किं पररूपतया प्रतीतिविषयाः? अतो यद् यस्य रूपं तत् प्रमाणविषयत्वेऽप्यवसीयते इति न ज्ञानाविषयता प्रमातुः । तथाहि—तस्य ज्ञातृता प्रमातृताऽऽत्मस्वरूपता, घटादेः प्रमेयतां ज्ञेयता घटादिरूपता; अतो यथा तस्य स्वरूपेणावभासनान्नाऽप्रत्यक्षता तद्वदात्मनोऽपि । अभ्युपगमनीयं चैतत्, अन्यथाऽऽत्मादिस्वसंवेदनस्य प्रत्यक्षस्यापि प्रत्यक्षादिलक्षणव्यतिरिक्तं लक्षणान्तरं वक्तव्यम्; तथा च प्रमाणेयत्ताव्याघातः, केनचित् प्रत्यक्षादिलक्षणेनात्मादिविषयस्य स्वसंवेदनस्यासंग्रहात् । इतोऽप्युक्तं प्रमातृवत् फलेऽपि संवेदनाभ्युपगमप्रसङ्गात् । तथाऽभ्युपगमाददोष इति चेत्, तथा चोक्तम्—

"संवित्तिः संवित्तितयैव संवेद्या न संवेद्यतया" [ ] इति ।

एतत् प्राक् प्रतिक्षिप्तम्, न स्वरूपावभासे प्रमाणाविषयता । किंच, एवं कल्प्यमाने बोधद्वयमान्तरम् स्वसंविद्रूपं च कल्पितं स्यात्, तथा चायुक्तम्, एकस्मादेव विषयावभाससिद्धेः किं द्वयकल्पनया? अथोच्येत-कल्पना ह्यनवभासमानस्य, बोधद्वये तु घटादिवदवभासोऽस्तीति न कल्पना । यदीदृशाः प्रतिभासाः प्रमाणत्वेन व्यवस्थाप्यन्ते तदा 'घटमहं चक्षुषा पश्यामि'इति करणप्रतीतिरपि प्रमातृफलप्रतीतिवत् कल्पनीया ।

याऽपि कैश्चित् करणप्रतीतिः प्रत्यक्षत्वेनोक्ता साऽपि नातीव संगच्छते । तथाहि-'घटमहं चक्षुषा पश्यामि'इत्यस्यामवगतौ किं गोलकस्य चक्षुष्ट्वम्, आहोस्वित् तद्व्यतिरिक्तस्य? गोलकस्य चक्षुष्ट्वे न कश्चिदन्धः स्यात् । तद्व्यतिरिक्तस्य च रश्मेरनभ्युपगमः; अभ्युपगमे वा न प्रतीतिविषयः, केवलं शब्दमात्रमुच्चारयति घटप्रतीतिकाले । एवं च प्रमातृ-फलविषयं शब्दोच्चारणमात्रमवसीयते, न च तयोः प्रतीतिगोचरता करणस्येव तथाहि-इन्द्रियव्यापारे सति शरीराद् व्यवच्छिन्नस्य विषयस्यैव केवलस्यावभासनमिति न्यायविदः प्रतिपन्नाः । 'किं तस्याव-

१-यविषय-मां० । २ पृ० ७८ पं० ३४ । ३ तस्य हि मां० । ४-न प्रतीतौ प्रकाश-कां०, गु० । ५ सुप्रकाशाः वा०, बा० विना सर्वत्र । ६-क्षावस्था मां० विना सर्वत्र । ७-ता घटादेर्ज्ञेयता घटा-गु० । ८ इतोऽप्ययुक्तम् भां० मां० ब० । ९-नाऽभ्युपगमदोष इति चेत् तथा चोक्तम् बा०, वा०, पू० । १०-णविषयता मां० । ११-चिनैवं वा०, बा० । १२ तथायुक्तमे-वा०, बा० । १३ बोद्धयहेतुघ-वा०, बा० ।

भासनम्' इति पर्यनुयोगे[1] मूकत्वं परिहारमाहुः, व्यपदेष्टुमशक्यत्वात्। अतः प्रमात्रवभासानुपपत्तिः।

ननु 'अहम्' इति प्रत्ययः सर्वलोकसाक्षिको नैवापह्नोतुं शक्यः। अनपह्नवे सविषयः, निर्विषयो वा? निर्विषयता प्रत्ययानामबाधितरूपाणां कथम्? सविषयत्वेऽपि प्रमात्रप्रतिभासे किंविषयोऽयं प्रत्ययः? न प्रत्ययापह्नवः न चास्य निर्विषयता किन्तु देहादिव्यतिरिक्तो विषयत्वेनावभासमान आत्माऽस्य[2] न विषयः न च ज्ञातृत्वेनावभासमान इत्युच्यते। कस्तर्हि विषयः? शरीरमिति ब्रूमः। तथाहि—'कृशोऽहम् स्थूलोऽहम् गौरोऽहम्'इति शरीराद्यालम्बनैः प्रत्ययैरस्य समानाधिकरणताऽवसीयते।

नन्वेवं सुख्यादिप्रत्ययैरप्यहङ्कारस्य समानाधिकरणता—सुख्यहं दुःख्यहमिति वा, अतो न देहविषयता। यच्चोच्यते 'गौरोऽहमित्यादिसामानाधिकरण्यदर्शनाच्छरीरालम्बनत्वम्' इति, तत्राप्येतद्विचार्यम्—गौरादीनां शरीरादिव्यतिरिक्तानामनहङ्कारास्पदत्वं दृष्टं तद्वच्छरीरादिगतानामपि युक्तं व्यवस्थापयितुम्। तथा च वार्त्तिककृतोक्तम्—"न ह्यस्य द्रष्टुर्यदेतद् मम गौरं रूपं सोऽहमिति भवति प्रत्ययः, केवलं मतुब्लोपं कृत्वैवं निर्दिशति" [न्यायवा० पृ० ३४१ पं० २३]

अयमर्थः—शरीरेऽहङ्कार औपचारिको न तात्त्विकः, यथाऽन्यस्मिंस्तत्कार्यकारिण्यत्यन्तनिकटेऽहङ्कारो गौणः 'योऽयं सोऽहम्' इति, एवं शरीरेऽपि। यतो निमित्ताद् अयमेतस्मिंस्तूभयसंप्रतिपन्नेऽनात्मरूपे इदंताप्रत्ययविषयेऽहङ्कारस्तत एव शरीरेऽपि। आत्मविषयस्त्वहङ्कारो नौपचारिकः, इदंप्रत्ययासंभिन्नाहंप्रत्ययप्रतिभासित्वात् प्रमाता शरीरादिव्यतिरिक्तः।

एतदेव कथम्? 'ममेदं शरीरम्' इति प्रत्ययोपादानात् 'ममायमात्मा'इति प्रत्ययाभावाच्च। ननु 'ममायमात्मा' इति किं न भवति प्रत्ययः? न भवतीति ब्रूमः। कथं तर्ह्येवमुच्यते? केवलं शब्द उच्चार्यते न तु प्रत्ययस्य संभवः। अत्रापि ममप्रत्ययप्रतिभासस्यादर्शनात् शब्दोच्चारणमात्रं केन वार्यते। किमिदानीं सुखादियोगः शरीरस्येष्यते? नैवम्, सुखादियोगाभावात् मिथ्याप्रत्ययोऽयं 'सुख्यहम्'इति न त्वेतदालम्बनः। अतो व्यवस्थितम्—ज्ञातृप्रतिभासादर्शनात् प्रतिभासे वा शरीरस्य ज्ञातृत्वेनावभासनान्न देहादिव्यतिरिक्तस्याहंप्रत्ययविषयता; शरीरस्य च ज्ञातृत्वेनावभासमानस्यापि प्रमाणसिद्धाँ बुद्धियोगनिषेधान्मिथ्याप्रत्ययालम्बनता; न तु तस्याचैतन्येऽन्यः कश्चिद् ज्ञाता प्रत्यक्षप्रमाणविषयः सिध्यतीत्यादि} तदप्यसङ्गतम्; यतो भवतु जैमिनीयानां "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म प्रत्यक्षम्" [जैमि० अ० १-१-४] इतिलक्षणलक्षितेन्द्रियप्रत्यक्षवादिनाम् 'अहम्' इत्यवभासप्रत्ययस्यानिन्द्रियजत्वेनात्राऽप्रत्यक्षत्वदोषो नास्माकं जिर्नमतानुसारिणाम्, न ह्यस्माकमिन्द्रियजमेव प्रत्यक्षं किंतु यद् यत्र विशदं ज्ञानमिन्द्रियानिन्द्रियनिमित्तं तत् तत्र प्रत्यक्षमित्यभ्युपगमात्, "तद् इन्द्रियानिन्द्रियनिमित्तम्" [तत्त्वार्थ० अ० १, सू० १४] इति वाचकमुख्यवचनात्। तेन यथा प्रत्यक्षविषयत्वेन घटादेः प्रत्यक्षता तथाऽऽत्मनोऽपि स्वसंवेदनाध्यक्षतायां को विरोधः? अत एव यदुच्यते 'घटादेर्भिन्नज्ञानग्राह्यत्वेन प्रत्यक्षता व्यवस्थाप्यते; आत्मनस्त्वपरोक्षत्वेन प्रतिभासनात् प्रत्यक्षत्वम्। तच्च केवलस्य घटादिप्रतीत्यन्तर्गतस्य वाऽपरसाधनं प्राक् प्रतिपादितमित्यत्र अपरसाधनमिति कोऽर्थः—किं चिद्रूपस्य सत्ता, आहोस्वित् स्वप्रतीतौ व्यापारः? इति पक्षद्वयमुत्थाप्य प्रथमपक्षे चिद्रूपस्य सत्तैवात्मप्रकाशनं यद्युच्यते तदा दृष्टान्तो वक्तव्यः' इति, तन्निरस्तम्; अध्यक्षप्रतीतेऽर्थे दृष्टान्तान्वेषणस्यायुक्तत्वात्।

अथ विवादगोचरेऽध्यक्षप्रतीतेऽपि दृष्टान्तान्वेषणं लोके सुप्रसिद्धमिति सोऽत्रापि वक्तव्यस्तदाऽस्त्येव प्रदीपादिलक्षणो दृष्टान्तोऽपि ज्ञानस्य प्रकाशं प्रति सजातीयापरापेक्षणे साध्ये। तथाहि—यथा प्रदीपाद्यालोको न स्वप्रतिपत्तावालोकान्तरमपेक्षते तथा ज्ञानमपि स्वप्रतिपत्तौ न समानजातीयज्ञानापेक्षम्। एतावन्मात्रेणाऽऽलोकस्य दृष्टान्तत्वं न पुनस्तस्यापि ज्ञानत्वमासाद्यते। येन 'इन्द्रियाग्राह्यत्वाच्चक्षुष्मतामिवान्धानामपि तत्प्रतीतिप्रसङ्गः' इति प्रेर्यते। न हि दृष्टान्ते साध्य-धर्मि-धर्माः सर्वेऽपि आसञ्जयितुं युक्ताः; अन्यथा घटेऽपि शब्दधर्माः शब्दत्वादयः प्रसज्येरन्निति तस्यापि श्रोत्रग्राह्यत्वप्रसङ्गः। न च साधर्म्यदृष्टान्तमन्तरेण प्रमाणप्रतीतस्यार्थस्याप्रसिद्धिरिति शक्यं वक्तुम्, अन्यथा जीवच्छरीरस्यापि सात्मकत्वे साध्ये तोद्वन्तत्प्र(तद्वत् तत्प्र)सिद्धदृष्टान्तस्याभावात् प्राणादिमत्त्वादेस्तत्सिद्धिर्न स्यात्।

अथ साधर्म्यदृष्टान्ताभावेऽपि दृष्टवैधर्म्यदृष्टान्तस्य घटादेः सद्भावात् केवलव्यतिरेकिबलात् तत्र

१-गेन मूकत्वं वा०, बा०। २-स्य विषयः वा०, बा०। ३ सुखादि-भां०। ४-स्तु रूपसंप्रति-भां०मां० ब०। ५ प्रत्यक्षः भां०, मां०। ६ अथापि वा०, बा०। ७-द्धाद् मां०। ८ जैन-कां०। ९ पृ० ७९ पं० ६। १० पृ० ७९ पं० १५। ११-साध्यतोद्वन्तत्प्र-गु०। साध्यनोच्चतत्प्र-गु० ब०। साध्ये बोधंतत्प्र-चं०। १२-व्यतिरेकिवत् तत्र वा०, बा०।

तत्सिद्धिस्तर्हि यत्र स्वप्रकाशकत्वं नास्ति तत्रार्थप्रकाशकत्वमपि नास्ति, यथा घटादाविति व्यतिरेकदृष्टान्तसद्भावादर्थप्रकाशकत्वलक्षणाद्धेतोः स्वप्रकाशकत्वं विज्ञानस्य किमिति न सिद्धिमासादयति? यत्तूक्तम् 'कस्यचिदर्थस्य काचित् सामग्री, तेन प्रकाशः प्रकाशान्तरनिरपेक्ष एव स्वग्राहिणि ज्ञाने प्रतिभाति' तद् युक्तमेव, यथा हि स्वसामग्रीत उपजायमानाः प्रदीपालोकादयो न समानजातीयमालोकान्तरं स्वग्राहिणि ज्ञाने प्रतिभासमाना अपेक्षन्ते तथा स्वसामग्रीत उपजायमानं विज्ञानं स्वार्थप्रकाशस्वभावं स्वप्रतिपत्तौ न ज्ञानान्तरमपेक्षते; प्रतिनियतत्वात् स्वकारणायत्तजन्मनां भावशक्तीनाम्। यत्तु प्रदीपालोकादिकं सजातीयालोकान्तरनिरपेक्षमपि स्वप्रतिपत्तौ ज्ञानमपेक्षते तत् तस्याज्ञानरूपत्वात् ज्ञानस्य च तद्विपर्ययस्वभावत्वाद्[3] युक्तियुक्तमिति 'नैकत्र दृष्टः स्वभावोऽन्यत्रासञ्जयितुं[4] युक्तः' इति पूर्वपक्षवचो निःसारतया व्यवस्थितम्।

अथालोकस्य तदन्तरनिरपेक्षा प्रतिपत्तिरुपलब्धेति न तद्दृष्टान्तबलाद् ज्ञानस्यापि ज्ञानान्तरनिरपेक्षा प्रतिपत्तिः, अदृष्टत्वात् स्वात्मनि क्रियाविरोधाच्च; नन्वेवमुपलभ्यमानेऽपि वस्तुनि यदृष्टत्वम् विरोधश्चोच्येत तदा स्वात्मवद् घटादेरपि बाह्यस्य न ग्राहकं ज्ञानम्, अदृष्टत्वात् जडस्य प्रकाशायोगाच्चेत्यपि वदतः सौगतस्य न वक्रवक्रता समुपजायते। {तथाह्यसावप्येवं वक्तुं समर्थः—जडं वस्तु न स्वतः प्रकाशते, विज्ञानवत्, जडत्वहानिप्रसङ्गात्। नापि परतः प्रकाशमानम्, नील-सुखादिव्यतिरिक्तस्य विज्ञानस्यासंवेदनेनासत्त्वात्।

अथ 'नीलस्य प्रकाशः' इति प्रकाशमाननीलादिव्यतिरिक्तस्तत्प्रकाशः, अन्यथा भेदेनास्यां प्रतिपत्तौ संवेदनस्य तत्प्रतिभासो न स्यात्; ननु न नील-तद्वेदनयोः पृथगवभासः प्रत्यक्षसंभवी, प्रकाशविविक्तस्य नीलादेरननुभवात् तद्विवेकेन च बोधस्याप्रतिभासनात्। न चाध्यक्षतो विवेकेनाप्रतीयमानयोर्नील—तत्संविदोर्भेदो युक्तः, विवेकादर्शनस्य भेदविपर्ययाश्रयत्वात्; नील-तत्स्वरूपवत्। अथापि कल्पना नील-तत्संविदोर्भेदमुल्लिखति—'नीलस्यानुभवः' इति; नन्वभेदेऽपि भेदोल्लेखो दृष्टो यथा-'शिलापुत्रकस्य वपुः' 'नीलस्य वा स्वरूपम्' इति। अथ तत्र प्रत्यक्षारूढोऽभेदो बाधक इति न भेदोल्लेखः सत्यः स तर्हि नील-संविदोरपि प्रत्यक्षारूढोऽभेदोऽस्तीति न भेदकल्पना सत्या। तदेवं नीलादिकं सुखादिकं च स्वप्रकाशवपुः प्रतिभातीति स्थितम्, तद्व्यतिरिक्तस्य प्रकाशस्याप्रतिभासनेनाभावात्।

भवतु वा व्यतिरिक्तो बोधस्तथापि न तद्ग्राह्या नीलादयो युक्ताः। तथाहि—तुल्यकालो वा बोधस्तेषां प्रकाशकः, भिन्नकालो वा? तुल्यकालोऽपि परोक्षः, स्वसंविदितो वा? न तावत् परोक्षः, यतः "अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति" [ ] इत्यादिना स्वसंविदितत्वं ज्ञानस्य प्रसाधयन्त एतत्पक्षं निराकरिष्यामः। नापि ज्ञानान्तरवेद्यः, अनवस्थादिदूषणस्यात्र पक्षे प्रदर्शयिष्यमाणत्वात्। स्वसंवेदनपक्षे तु यथाऽन्तर्निलीनो बोधः स्वसंविदितः प्रतिभाति तथा तत्काले स्वप्रकाशवपुषो नीलादयो बहिर्देशसंबन्धितया प्रतिभान्ति इति समानकालयोर्नील-तत्संवेदनयोः स्वतन्त्रयोः प्रतिभासनात् सव्येतरगोविषाणयोरिव न वेद्यवेदकभावः। समानकालस्यापि बोधस्य नीलं प्रति ग्राहकत्वे नीलस्यापि[5] तं प्रति ग्राहकताप्रसङ्गः।

समानकालप्रतिभासाऽविशेषेऽपि बुद्धिर्नीलादीनां ग्रहणमुपरचयतीति ग्राहिका, नीलादयस्तु ग्राह्याः, नैतदपि युक्तम्; यतो नील-बोधव्यतिरिक्ता न ग्रहणक्रिया प्रतिभाति। तथाहि—बोधः सुखास्पदीभूतो हृदि, बहिः स्फुटमुद्भासमानतनुश्च नीलादिराभाति नत्वपरा ग्रहणक्रिया प्रतिभासविषयः। तदनवभासे च न तया व्याप्यमानतया नीलादेः कर्मता युक्ता। भवतु वा नील-बोधव्यतिरिक्ता क्रिया तथापि किं तस्या अपि स्वतः प्रतीतिः, यद्वाऽन्यतः? तत्र यदि स्वतो ग्रहणक्रिया प्रतिभाति तथा सति बोधः नीलम् ग्रहणक्रिया चेति त्रयं स्वरूपनिमग्नमेककालं प्रतिभातीति न कर्तृ-कर्म-क्रियाव्यवहृतिः। अथान्यतो ग्रहणक्रिया प्रतिभाति; ननु तत्राप्यपरा ग्रहणक्रिया उपेया-अन्यथा तस्या ग्राह्यताऽसिद्धेः-पुनस्तत्राप्यपरा कर्मतानिबन्धनं क्रिया उपेयेत्यनवस्था; तन्न ग्रहणक्रियाऽपराऽस्ति, तत्स्वरूपाऽनवभासनात्। ततश्चान्तःसंवेदनम् बहिर्नीलादिकं च स्वप्रकाशमेवेति।

१ पृ० ७९ पं० १७। २-त्वाद् युक्तमि—भा०। ३ पृ० ७९ पं० १७। ४-नाऽस्या प्रतिपत्तौ मां० विना सर्वत्र। ५-कं वस्तु प्रकाश—हा०, पृ०। ६-पि संप्रति वा०, बा०, मां० विना सर्वत्र।

स्वसंवित्तिमात्रवादः साधीयान् यदि तर्ह्यन्तर्निलीनो बोधो नीलादेर्न बोधकः किन्तु स्वप्रकाश एवासौ; तथा सति 'नीलमहं वेद्मि' इति कर्म-कर्तृभावाभिनिवेशी प्रत्ययो न भवेत्, विषयस्य कर्म-कर्तृभावस्याभावात्। ननु विषयमन्तरेणापि प्रत्ययो दृष्ट एव, यथा शुक्तिकायां रजतावगमः। अथ बाधकोदयात् पुनर्भ्रान्तिरसौ, नीलादौ तु कर्मतादेर्न बाधाऽस्तीति सत्यता। नन्वत्रापि बोध-नीलादेः स्वरूपासंसक्तस्य द्वयस्य स्वातन्त्र्योपलम्भोऽस्ति बाधकः कर्म-कर्तृभावोल्लेखस्य। अथ किमस्या भ्रान्तेर्निबन्धनम्? नहि भ्रान्तिरपि निर्बीजा भवति; ननु पूर्वभ्रान्तिरेवोत्तरकर्म-कर्तृभावावगतेर्निबन्धनम्; पूर्वभ्रान्तिकर्मतादेरपि अपरा पूर्वभ्रान्तिरित्यनादिर्भ्रान्तिपरम्परा, कर्मतादिर्न तत्त्वम्।

अथवा 'नीलम्' इति प्रतीतिस्तावन्मात्राध्यवसायिनी पृथक्, 'अहम्' इत्यपि मतिरन्तरुल्लेखमुद्वहन्ती भिन्ना, 'वेद्मि' इत्यपि प्रतीतिरपरैव; ततश्च परस्परासंसक्तप्रतीतित्रितयं क्रमवत् प्रतिभाति न कर्म-कर्तृभावः, तुल्यकालयोस्तस्यायोगात् भिन्नकालयोरप्यनवभासनान्न कर्मतादिगतिः कथञ्चित् संभविनी।

अथापि दर्शनात् प्राक् सन्नपि नीलात्मा न भाति तदुदये च भातीति कर्मता तस्य, नैतदपि साधीयः; यतः प्राग् भावोऽर्थस्य न सिद्धः। दर्शनेन स्वकालावधेरर्थस्य ग्रहणाद् दर्शनकाले हि नीलमाभाति न तु ततः प्राक्, तत् कथं पूर्वभावोऽर्थस्य सिध्येत् तस्य दर्शनस्य पूर्वकाले विरहात्? न च तत्काले दर्शनं प्रागर्थसन्निधिं व्यनक्ति, सर्वदा तत्प्रतिभासप्रसङ्गात्। अथाऽन्येन दर्शनेन प्रागर्थः प्रतीयते, ननु तद्दर्शनादपि प्राक् सद्भावोऽर्थस्यान्येनावसेय इत्यनवस्था। तस्मात् सर्वस्य नीलादेर्दर्शनकाले प्रतिभासनान्न तत्पूर्वं सत्ता सिध्यति।

अथापि 'पूर्वदृष्टं पश्यामि' इति व्यवसायात् प्रागर्थः सिध्यति, प्रागर्थसत्तां विना दृश्यमानस्य पूर्वदृष्टेन एकत्वगतेरयोगात्। केन पुनरेकत्वं तयोर्गम्यते—किमिदानीन्तनदर्शनेन, पूर्वदर्शनेन वा? न तावत् पूर्वदर्शनेन, तत्र तत्कालावधेरेवार्थस्य प्रतिभासनात्। नहि तेन स्वप्रतिभासिनोऽर्थस्य वर्त्तमानकालदर्शनव्याप्तिरवसीयते, तत्काले साम्प्रतिकदर्शनादेरभावात्। न चासत् प्रतिभाति, दर्शनस्य वितथत्वप्रसङ्गात्। नापीदानीन्तनदर्शनेन पूर्वदर्शनादिव्याप्तिर्नीलादेरवसीयते, तद्दर्शनकाले पूर्वदृक्कालस्यास्तमयात्। न चास्तमितपूर्वदर्शनादिसंस्पर्शमवतरति प्रत्यक्षम्, वितथत्वप्रसङ्गादेव। तस्माद् 'अपास्ततपूर्वदृगादियोगं सर्वं वस्तु दृशा गृह्यते, पूर्वदृष्टतां तु स्मृतिरुल्लिखति' तदपास्तम्, दृष्टतोल्लेखाभावात्। न च 'स एवायम्' इति प्रतीतिरेका, 'सः' इति स्मृतिरूपम्, 'अयम्' इति तु दृशः स्वरूपम्; तत्परोक्षाऽपरोक्षाकारत्वान्नैकस्वभावौ प्रत्ययौ, तत् कुतस्तत्त्वसिद्धिः?

अथानुमानात् प्रागभावोऽर्थस्य सिध्यति प्राक् सत्तां विना पश्चाद्दर्शनायोगादिति, तदप्यसत्; यतः पश्चाद्दर्शनस्य प्राक्सत्तायाः संबन्धो न सिद्धः, प्राक्सत्तायाः कथञ्चिदप्यसिद्धेः। न चासिद्धया सत्तया व्याप्तं पश्चाद्दर्शनं सिध्यति येन ततस्तत्सिद्धिः। अथ यदि प्रागर्थमन्तरेण दर्शनमुदयमासादयति तथा सति नियामकाभावात् सर्वत्र सर्वदा सर्वाकारं तद् भवेत्, नायमपि दोषः, नियतवासनाप्रबोधेन संवेदननियमात्। तथाहि—स्वप्नावस्थायां वासनाबलाद्दर्शनस्य देशकालाऽऽकारनियमो दृष्ट इति जाग्रद्दशायामपि तत एवासौ युक्तः। अर्थस्य तु न सत्ता सिद्धा नापि तद्भेदात् संवित्तिनियम इति तन्न ततः संविद्भेदचिन्त्यम्, तस्मान्न कथञ्चिदपि नीलादेः प्राक् सत्तासिद्धिः।

अथ पूर्वसत्ताविरहे किं प्रमाणम्? नन्वनुपलब्धिरेव प्रमाणम्—यदि नीलं पूर्वकालसंबन्धिस्वरूपं स्यात् तेनैव रूपेणोपलभ्येत, न च तथा; दर्शनकालभुवः सर्वदा प्रतिभासनात्। यच्च येनैव रूपेण प्रतिभाति तत् तेनैव रूपेणास्ति, यथा नीलं नीलरूपतयाऽवभासमानं तथैव सत् न पीतादिरूपतया, सर्वं चोपलभ्यमानं रूपं वर्त्तमानकालतयैव प्रतिभाति न पूर्वादितया, तन्न पूर्वं सत्ताऽर्थस्य।

१-स्तपूर्व-बा०, वा०, भां०, मां०। २ तदपास्ते, मां०, चं०, हा०, भां०। तदप्य (तदप्यपास्तम्) दृष्टतो-वा०, बा०। ३-सयायां (सत्तायां) वा०, वा०।

अथ नीलं तद्दर्शनविरतावपि परदृशि प्रतिभातीति साधारणतया ग्राह्यम्। विज्ञानं त्वसाधारणतया प्रकाशकम्, नैतदपि युक्तम्; यतो नीलस्य न साधारणतया सिद्धः प्रतिभासः, प्रत्यक्षेण स्वप्रतिभासितायाः एवावगतेः। नहि नीलं परदृशि प्रतिभातीत्यत्र प्रमाणमस्ति, परदृशोऽनधिगमे नीलादेस्तद्वेद्यताऽनधिगतेः।

अथानुमानेन नीलादीनां साधारणता प्रतीयते—यथैव हि स्वसन्ताने नीलदर्शनात् तदादानार्था प्रवृत्तिस्तथाऽपरसन्तानेऽपि प्रवृत्तिदर्शनात् तद्विषयं दर्शनमनुमीयते, नैतदप्यस्ति; अनुमानेन स्व-परदर्शनभूतो नीलादेरेकताऽसिद्धेः; तद्धि सदृशव्यवहारदर्शनादुपजायमानं स्वदृष्टसदृशतां परदृष्टस्य प्रतिपादयेत्, यथाऽपरधूमदर्शनात् पूर्वसदृशं दहनमधिगन्तुमीशो न तु तमेव पूर्वदृष्टम्, सामान्येनान्वयपरिच्छेदात्। तन्नानुमानतोऽपि ग्राह्याकारस्यैकता।

ननु भेदोऽप्यस्य न सिद्ध एव। प्रतिभासभेदे सति कथमसिद्धः परप्रतिभासपरिहारेण स्वप्रतिभासान्, स्वप्रतिभासपरिहारेण च परप्रतिभासान्, विवेकस्वभावान् व्यतिरेचयति अन्यथा तस्यायोगात्? ततः स्व-परदृष्टस्य नीलादेः प्रतिभासभेदाद् व्यवहारे तुल्येऽपि भेद एव; इतरथा रोमाञ्चनिकरसदृशकार्यदर्शनात् सुखादेरपि स्व-परसन्तानभुवस्तत्त्वं भवेत्।

अथापि सन्तानभेदात् सुखादेर्भेदः; ननु सन्तानभेदोऽपि किमन्यभेदात्? तथा चेदनवस्था। अथ तस्य स्वरूपभेदाद् भेदः सुखादेरपि तर्हि स एवास्तु, अन्यथा भेदासिद्धेः। न ह्यन्यभेदादन्यद् भिन्नम्, अतिप्रसङ्गात्। नीलादेरपि स्व-परप्रतिभासिनः प्रतिभासभेदोऽस्तीति नैकता।

अथ देशैर्कत्वादेकत्वम्, ननु देशस्यापि स्व-परदृष्टस्यानन्तरोक्तन्यायाद् नैकता युक्ता। तस्माद् ग्राहकाकारवत् प्रतिपुरुषमुद्भासमानं नीलादिकमपि भिन्नमेव। तँच्चैककालोपलम्भाद् ग्राहकवत् स्वप्रकाशम्।

अथ ग्राहकाकारश्चिद्रूपत्वाद् वेदको नीलाकारस्तु जडत्वाद् ग्राह्यः, अत्रोच्यते—किमिदं बोधस्य चिद्रूपत्वम्? यद्यपरोक्षं स्वरूपं नीलादेरपि तर्हि तदस्तीति न जडता। अथ नीलादेरपरोक्षस्वरूपमन्यस्माद् भवतीति ग्राह्यम्, ननु बोधस्यापि स्वस्वरूपमिन्द्रियादेर्भवतीति ग्राह्यं स्यात्। अथ यद् इन्द्रियादिकार्यं न तद् वेद्यम्, नीलादिकमपि तर्हि नयनादिकार्यमस्तु न तु ग्राह्यम्।

अथापि बोधो बोधस्वरूपतया नित्यो नीलादिकस्तु प्रकाश्यरूपतयाऽनित्य इति ग्राह्यः, तदप्यसत्; स्तम्भादेर्नयनादिबलादुदेति रूपमपरोक्षत्वम्, तद् अनित्यः स्तम्भादिर्भवतु, ग्राह्यस्तु कथम्? न हि यद् यस्मादुत्पद्यते तत् तस्य वेद्यम्, अतिप्रसङ्गात्। तस्मादपरोक्षस्वरूपाः स्तम्भादयः स्वप्रकाशाः बोधस्तु नित्योऽनित्यो वा तत्काले केवलमुद्भाति न तु वेदकः, द्वयोरपि परस्परं ग्राह्य-ग्राहकतापत्तेः।

अथ नीलोन्मुखत्वाद् बोधो ग्राहकः, किमिदं तदुन्मुखत्वं नाम बोधस्य? यदि नीलकाले सत्ता सा नीलस्यापि तत्काले समस्तीति नीलमपि बोधस्य वेदकं स्यात्। अथान्यदुन्मुखत्वम् तत् तर्हि स्वरूपनिमग्नं चकासत् तृतीयं स्वरूपं भवेत्। तथाहि—तस्य तदुन्मुखत्वं तद्व्यापारः, स च व्यापारो यदि नीले व्याप्रियते तदा तत्राप्यपरो व्यापार इत्यनवस्था। अथ न व्याप्रियते न तद्बलाद् बोधस्य ग्राहकत्वं नीलादेस्तु ग्राह्यत्वम्। अथ व्यापारस्यापरव्यापारव्यतिरेकेणापि नीलं प्रति व्यापृतिरूपता, तस्य तद्रूपत्वात्; ननु नीलस्यापि स्वं स्वरूपं विद्यत इति बोधं प्रति ग्रहणव्यापृतिः स्यात्।

किञ्च, बोधेन यदि नीलं प्रति ग्रहणक्रिया जन्यते सा नीलाद् भिन्ना, अभिन्ना वा? भिन्ना चेत्, न तया तस्य ग्राह्यत्वम्, भिन्नत्वादेव। अथाभिन्ना तर्हि नीलादेर्ज्ञानरूपता, ज्ञानजन्यत्वादुत्तरज्ञानक्षणवत्। अथ ज्ञानस्यैवंभूता शक्तिर्येन तस्य नीलं प्रति ग्राहकता नीलादेस्तु तं प्रति ग्राह्यता। ननु बोधस्य ग्राहकत्वे नीलादेस्तु ग्राह्यत्वे सिद्धे शक्तिपरिकल्पना युक्ता, शक्तेः कार्यानुमेयत्वात्; तदसिद्धौ

१-मानस्वदृष्ट-हा०। २-सात् कां०, गु०, चं-अ०। ३-सात् कां०, गु०, चं-अ०। ४-वात् वा०, बा०। ५-सभेदाद् भेदो-भां०, मां०। ६-कत्वात् तदेक-भां०, मां०। ७ तथैक-गु०। ८-दं चिद्रूपत्वं बोधस्य य-भां०, मां०। ९ अन्यदुन्मु-भां०, मां०। १० तृतीयस्वरू-कां०, गु०। ११-पि स्वरू-भां०, मां०।

तु तत्परिकल्पनमयुक्तम्, इतरेतराश्रयप्रसङ्गात् । तथाहि—बोधस्य शक्तिविशेषसिद्धेर्नीलं प्रति ग्राहकत्वसिद्धिः, तत्सिद्धेश्च तच्छक्तिसिद्धिरिति व्यक्तमितरेतराश्रयत्वम् । तन्न बोधस्य नीलं प्रति ग्राहकत्वसिद्धिः; तस्माद् व्यतिरिक्तेऽपि बोधेऽभ्युपगते सहोपलम्भनियमात् स्वसंवेदनमेव युक्तम् ।

परमार्थतस्तु सुखादयो नीलादयश्चापरोक्षा इत्येतावदेव भाति, निराकारस्तु बोधः स्वप्नेऽपि नोपलभ्यत इति न तस्य सद्भाव इति कथं तस्यार्थग्राहकत्वम्? अत एव ते प्रमाणयन्ति—इह खलु यत् प्रतिभाति तदेव सद्यवहृतिपथमवतरति, यथा हृदि प्रकाशमानवपुः सुखम्, न तत्काले पीडाऽनुद्भासमाना समस्ति, विज्ञप्तिरेव च नीलादिरूपतया सकलतनुभृतामाभातीति स्वभावहेतुः । तदेवमर्थग्राहकत्वस्याप्यसिद्धेः जडस्य प्रकाशविरुद्धत्वाच्च नार्थग्राहकत्वमपि बौद्धदृष्ट्या युक्तम् } ।

अथ बहिर्देशसंबद्धस्य जडस्यापि नीलादेरनुभवान्न नीलादिप्रकाशस्य तद्ग्राहकत्वमसिद्धम्, नाप्यनुभूयमाने स्तम्भादिके जडे प्रकाशविषयत्वविरोधोद्भावनं युक्तिसंगतम्; प्रत्यक्षसिद्धस्वभावे वस्तुनि तद्विरुद्धस्वभावावेदकस्यानुमानस्य प्रत्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तकालात्ययापदिष्टस्वदोषदुष्टहेतुप्रभवत्वेनानुमानाभासत्वात् । न च प्रत्यक्षसिद्धे स्वभावे विरोधः सिध्यति; अन्यथा ज्ञानस्यापि ज्ञानत्वविरोधप्राप्तिः । नन्वेवं नीलादिसंवेदनस्यापि हृदि स्वसंवेदनविषयतयाऽनुभवान्न स्वसंविदितत्वमसिद्धम्, नापि स्वात्मनि क्रियाविरोधोद्भावनं युक्तियुक्तम्; अनुभूयमाने विरोधासिद्धेः । अस्वसंवेदनज्ञानसाधकत्वेनोपन्यस्यमानस्य च हेतोः प्रत्यक्षनिराकृतपक्षविषयत्वेन न साध्यसाधकत्वमित्यपि समानम् ।

किंच, स्वसंविदितज्ञानानभ्युपगमे 'प्रतीयतेऽयमर्थो बहिर्देशसंबन्धितया' इत्यत्र प्रतीतेर्व्यवस्थापिकाया अप्रतीतत्वेनाऽव्यवस्थितौ व्यवस्थाप्यस्यार्थस्य न व्यवस्थितिः स्यात्; नहि स्वयमव्यवस्थितं खरविषाणादि कस्यचिद् व्यवस्थापकमुपलब्धम् । अथ प्रतीतेरसंविदितत्वेऽपि एकार्थसमवेतानन्तरप्रतीतिव्यवस्थापितत्वेन नाव्यवस्थितत्वं तर्हि तदेकार्थसमवेतानन्तरप्रतीतेरपि अपरतथाभूतप्रतीत्यव्यवस्थापितत्वे नाऽर्थव्यवस्थापनप्रतीतिव्यवस्थापकत्वमिति पुनरपि तथाभूताऽपरा प्रतीतिः प्रतीतिव्यवस्थापिकाऽभ्युपगन्तव्येत्यनवस्था । अथ प्रतीतिव्यवस्थापिका प्रतीतिः स्वसंविदितत्वेन स्वयमेव व्यवस्थितेति नायं दोषस्तर्ह्यर्थव्यवस्थापिकाऽपि प्रतीतिस्तथा किं नाभ्युपगम्यते न्यायस्य समानत्वात्? अथ प्रतीतिरप्रतीताऽपि प्रतीत्यन्तरव्यवस्थापिका तर्हि प्रथमप्रतीतिरप्यव्यवस्थिताऽप्यर्थव्यवस्थापिका भविष्यतीति "नागृहीतविशेषणा विशेष्ये बुद्धिः" [ ] इति वचः कथं न परिप्लवेत? 'प्रतीतोऽर्थः' इति विशेष्यप्रतिपत्तौ प्रतीतिविशेषणानवगमेऽपि विशेष्यप्रतिपत्त्यभ्युपगमात् ।

अपि च, यदि तदेकार्थसमवेतज्ञानान्तरग्राह्यं ज्ञानमर्थग्राहकमभ्युपगम्यते तदा पूर्वपूर्वज्ञानोपलम्भनस्वभावानामुत्तरोत्तरज्ञानानामनवरतमुत्पत्तेर्विषयान्तरसंचारो ज्ञानानां न स्यात्, विषयान्तरसंनिधानेऽपि पूर्वज्ञानलक्षणस्य तदेकार्थसमवेतस्यान्तरङ्गत्वेनातिसंनिहिततरस्य विषयस्य सद्भावात् । यस्त्वाह—'विषयोपलम्भनिमित्तमात्रप्रतिपत्तौ प्रतीतिविशेषणस्यार्थस्य सिद्धत्वाद् नानवस्था' तदेतदेव न संगच्छते, स्वसंवेदनज्ञानानभ्युपगमात्; एतच्च प्रतिपादितम् ।

अपि च, प्रमाणसंप्लववादिना नैयायिकेन प्रत्यक्ष-शाब्दज्ञानयोरेकविषयत्वमभ्युपगतम्, तथा चाध्यक्षज्ञानवत् शाब्देऽपि तस्यैवान्यूनानतिरिक्तस्य विषयस्याधिगमे न प्रतिपत्तिभेद इति अध्यक्षवच्छाब्दमपि स्पष्टप्रतिभासं स्यात् । अथैकविषयत्वे सत्यपि इन्द्रियसंबन्धाभावाच्छब्दविषये प्रतिपत्तिभेदः; नन्वक्षैरपि विषयस्वरूपमुद्भासनीयम्, तच्च यदि शाब्देनापि प्रदर्श्यते तथा सति इन्द्रियसंबन्धाभावेऽपि किमिति न स्पष्टावभासः शाब्दस्य? नहि विषयभेदमन्तरेण ज्ञानावभासभेदो युक्तः; अन्यथा ज्ञानावभासभेदाद् विषयभेदव्यवस्था न स्यात् । नहि बहिरपि तदवभासभेदसंवेदनव्यतिरेकेणान्यद् भेदव्यवस्थानिबन्धनमुत्पश्यामः । अन्यच्च प्रत्यक्षेऽपि साक्षादिन्द्रियसंबन्धोऽस्तीति न स्वरूपेण ज्ञातुं शक्यः—तस्यातीन्द्रियत्वात्—किन्तु स्वरूपप्रतिभासात् कार्यात्; तच्चाविकलं यदि शाब्देऽपि वस्तुस्वरूपं प्रतिभाति तदा तत एवेन्द्रियसंबन्धस्तत्रापि

१-धे च सति त-मां०, भां०, वा०, बा० विना । २-षयोऽप्रति-कां०, गु० । ३-दि शब्दे-मां०, भां०, वा०, बा० ।

किं नाभ्युपगम्यते? अथ तत्र स्पष्टप्रतिभासाभावान्नासावनुमीयते; ननु तदभावस्तदक्षसंगतिविरहात्, तदभावश्च स्फुटप्रतिभासाभावादिति सोऽयमितरेतराश्रयदोषः । तस्माद् विषयभेदनिबन्धन एव ज्ञानप्रतिभासभेदावसायोऽभ्युपगन्तव्यः; स चैकविषयत्वे शाब्दाऽध्यक्षज्ञानयोर्न संगच्छते ।

अथ शाब्दे वस्तुरूपावभासेऽपि न सकलतद्गतविशेषावभास इत्यस्पष्टप्रतिभासं तत्; नन्वेवं प्रत्यक्षावभासिनो विशेषस्यार्थक्रियाक्षमस्य तत्राप्रतिभासनात् तदेव भिन्नविषयत्वं शाब्दाऽध्यक्षयोः प्रसक्तम् । अथोभयत्रापि व्यक्तिस्वरूपमेकमेव नीलादित्वं प्रतिभाति विशदाऽविशदौ चाकारौ ज्ञानात्मभूतौ; नन्वेवमक्षसंबद्धे विषये प्रतिभासमाने तत्कालः स्पष्टत्वावभासो ज्ञानावभास इति प्राप्तम्, विशिष्टसामग्रीजन्यस्य ज्ञानस्य विशदत्वात्, तदवभासव्यतिरेकेण तु अक्षसंबद्धनीलप्रतिभासकालेऽन्यस्य भवदभ्युपगमेन वैशद्यप्रतिभासनिमित्तस्यासंभवात् ।

अथ च भवतु विशदज्ञानप्रतिभासनिमित्त एव तत्र वैशद्यप्रतिभासव्यवहारस्तथापि न स्वसंविदिततज्ज्ञानसिद्धिः, तदेकार्थसमवेतज्ञानान्तरवेद्यत्वेऽपि तद्व्यवहारस्य संभवात्; एककालावभासव्यवहारस्तु लघुवृत्तित्वान्मनसः क्रमानुपलक्षणनिमित्तः उत्पलपत्रशतव्यतिभेदवत् । नन्वेवं सत्यङ्गुलिपञ्चकस्यैकज्ञानावभासोऽपि क्रमावभासे सत्यपि तत एव क्रमप्रतिभासानुपलक्षणकृत इति 'सदसद्धर्मः सर्वैः कस्यचिदेकज्ञानप्रत्यक्षः, प्रमेयत्वात्, पञ्चाङ्गुलिवत्' इति सर्वज्ञसाधकप्रयोगे दृष्टान्तस्य साध्यविकलताप्रसक्तिः । तथा, समस्तसदसद्धर्मग्राहकेण सर्वविज्ञानेन ज्ञानात्मा गृह्यते, उत नेति ? यदि न गृह्यते तदा तस्य प्रमेयत्वे सति तेनैव प्रमेयत्वलक्षणो हेतुर्व्यभिचारी, अप्रमेयत्वे तस्य भागासिद्धो हेतुः । अथ सर्वज्ञज्ञानेन सर्वपदार्थग्राहिणा आत्माऽपि गृह्यत इति नानैकान्तिकः; नन्वेवं सति यथेश्वरज्ञानं ज्ञानत्वेऽप्यात्मानं स्वयं गृह्णाति न च तत्र स्वात्मनि क्रियाविरोधः तथाऽस्मदादिज्ञानमप्येवं भविष्यतीति न कश्चिद् विरोधः किञ्च, एवमभ्युपगमे 'ज्ञानं ज्ञानान्तरग्राह्यम्, प्रमेयत्वात्, घटवत्' इत्यत्र प्रयोगे ईश्वरज्ञानस्य प्रमेयत्वे सत्यपि ज्ञानान्तरग्राह्यत्वाभावात् तेनैवानैकान्तिकः 'प्रमेयत्वात्' इति हेतुः । तस्मात् ज्ञानस्य ज्ञानान्तरग्राह्यत्वेऽनेकदोषसंभवात् स्वसंविदितं ज्ञानमभ्युपगन्तव्यम् ।

ज्ञानस्वरूपश्चात्मा, अन्यथा भिन्नज्ञानसद्भावादाकाशस्येव तस्य ज्ञातृत्वं न स्यात् । न चाकाशव्यतिरेकेण ज्ञानमात्मन्येव समवेतमिति तस्यैव ज्ञातृत्वं नाकाशादेरिति वक्तुं युक्तम्, समवायस्य निषेत्स्यमानत्वात् । ज्ञानस्य च स्वसंविदितत्वे सिद्धे आत्मनोऽपि तदव्यतिरिक्तस्य तत् सिद्धमिति कथं न स्वसंवेदनप्रत्यक्षसिद्धत्वमात्मनः? तन्न प्रथमपक्षस्य दुष्टत्वम् ।

द्वितीयपक्षेऽपि यदुक्तम् 'नहि कश्चित् पदार्थः कर्तृरूपः करणरूपो वा स्वात्मनि कर्मणीव सव्यापारो दृष्टः' इति, तदप्यसङ्गतम्; भिन्नव्यापारव्यतिरेकेणापि आत्मनः कर्तुः प्रमाणस्य च ज्ञानस्य स्वसंविदितत्वप्रतिपादनात् । एकस्यैव च लिङ्गादिकरणमपेक्ष्यावस्थाभेदेन यथा प्रमातृत्वं प्रमेयत्वं च भवद्भिरविरुद्धत्वेनाभ्युपगम्यते तथैकदाऽप्येकस्यात्मनः अनेकधर्मसद्भावात् प्रमातृत्व-प्रमाणत्व-प्रमेयत्वान्यविरुद्धानि किं नाभ्युपगम्यन्ते तत्तद्धर्मयोगात् तत्तत्स्वभावत्वस्य प्रमाणनिश्चितत्वेनाविरोधात्? यच्चोक्तम् 'प्रमाणाविषयत्वेऽप्यपरोक्षतेत्यस्य भाषितस्य कोऽर्थः' इत्यादि, तदप्यसारम्; ज्ञातृतया प्रमाणत्वेन च स्वरूपावभासनस्य प्रतिपादितत्वात् । न च घटादेः स्वरूपस्य भिन्नज्ञानग्राह्यत्वात् प्रमातुः प्रमाणस्य च स्वरूपं भिन्नज्ञानग्राह्यम्, तयोश्चिद्रूपत्वेन घटादेस्तु तद्विपर्ययेण स्वरूपस्य सिद्धत्वात् । न च प्रमाण-प्रमातृस्वरूपग्राहकस्य प्रत्यक्षस्य तल्लक्षणेनासंग्रहः, तत्संग्राहकस्य लक्षणस्य प्रदर्शितत्वात् । यदपि 'घटमहं चक्षुषा पश्यामि' इत्यनेनातिप्रसङ्गापादनं कृतम्, तदप्यसङ्गतम्; नहि चक्षुषो जडरूपस्यास्वसंविदितत्वे प्रमातृ—प्रमित्योरपि चिद्रूपयोरस्वसंविदितत्वं युक्तम्; अन्यस्वभावत्वानुपपत्तेः । यत्तूक्तम् 'इन्द्रियव्यापारे सति शरीराद् व्यवच्छि-

१ शब्दैर्वस्तु-वा०, बा० विना । २ शब्दा-कां०, गु० । ३ अथ भवतु कां०, भां०, मां० । ४-व ज्ञाना-गु० । ५-सद्भर्गः स-मां०, भां०, वा०, बा० विना । ६-सद्भर्गग्रा-मां०, भां०, वा०, बा० विना । ७-नरूपश्चा-मां०, भां०, वा०, बा० । ८ पृ० ७९ पं० ११ गतस्य 'किं चिद्रूपस्य सत्ता' इति पक्षस्य । ९ पृ० ७९ पं० १८ । १० पृ० ८४ पं० १७—प्र० पृ० पं० २६ । ११ पृ० ७९ पं० २१ । १२ पृ० ७९ पं० २१ । १३ पृ० ८० पं० २६ । १४ पृ० ७९ पं० ३४ । १५ पृ० ७९ पं० ३९ ।

न्नस्य विषयस्यैव केवलस्यावभासनम्' इति, तदत्यन्तमसङ्गतम्; विषयस्येव तदवभाससंवेदनस्यापि व्यवस्थापितत्वात् तदभावे विषयावभास एव न स्यादित्यस्य च। अतः प्रमात्रवभास उपपन्न एव।

न च 'कृशोऽहं स्थूलोऽहम्' इति शरीरसामानाधिकरण्येनास्य प्रत्ययस्योपपत्तेस्तदालम्बनता, चक्षुरादिकरणव्यापाराभावे शरीरस्याग्रहणेऽपि 'अहम्' इतिप्रत्ययस्य सुखादिसमानाधिकरणत्वेन परिस्फुटप्रतिभासविषयत्वेनोत्पत्तिदर्शनाद् न शरीरालम्बनत्वमस्य व्यवस्थापयितुं युक्तम्। न च 'कृशोऽहम्' इति प्रत्ययस्य भ्रान्तत्वे 'ज्ञानवानहम्' इति ज्ञानसामानाधिकरण्येनोपजायमानस्यापि प्रत्ययस्य भ्रान्तत्वं युक्तम्; अन्यथा 'अग्निर्माणवकः' इति माणवकेऽग्निप्रत्ययस्योपचरितविषयस्य भ्रान्तत्वेऽग्नावपि तत्प्रत्ययस्योपचरितत्वेन भ्रान्तत्वं स्यात्। अथ तत्र पाटव-पिङ्गलत्वादिलक्षणस्योपचारनिमित्तस्य सद्भावाद् भवति तत्रोपचरितः प्रत्ययः न चात्रोपचारनिबन्धनं किञ्चिदस्ति, तदप्यसङ्गतम्; संसार्यात्मनः शरीराद्युपकृतत्वेन तदनुबद्धस्योपभोगाश्रयत्वेनोपभोगकर्तृत्वस्यात्राप्युपचारनिमित्तस्य सद्भावात्। दृष्टश्च शरीरादिव्यतिरिक्तेऽप्यत्यन्तोपकारके स्वभृत्यादावुपचरितस्तन्निमित्तः 'योऽयं भृत्यः सोऽहम्' इति प्रत्ययः।

न च सुखादिसामानाधिकरण्येनोपजायमानस्यैवाहंप्रत्ययस्योपचरितविषयतेति वक्तुं शक्यम्, अग्नावग्निप्रत्ययवदबाधितत्वेनास्खलद्रूपत्वेन चास्याऽत्र मुख्यत्वात्; गौरत्वादेस्तु पुद्गलधर्मत्वेन बाह्येन्द्रियग्राह्यतया अन्तर्मुखाकारानिन्द्रियाहंप्रत्ययविषयत्वासंभवात्। न च गौरत्वादिरूपाश्रयभूतस्य प्रतिक्षणविशरारुत्वेनाभ्युपगमविषयस्य शरीरस्य 'य एवाहं प्राग् मित्रं दृष्टवान् स एवाहं वर्षपञ्चकादिव्यवधानेन स्पृशामि'इति स्थिरालम्बनत्वेनानुभूयमानप्रत्ययविषयत्वं युक्तम्; अन्यथा रूपविषयत्वेनानुभूयमानस्य तस्य रसाद्यालम्बनत्वं स्यात्। न च सुखादिविवर्त्तात्मकात्मालम्बनत्वे किञ्चिद् बाधकमुत्पश्यामः येन तद्विषयत्वेनास्य भ्रान्तत्वं स्यात्। नापि तत्र तस्य स्खलद्रूपता येन वाहीके गोप्रत्ययस्येवोपचरितत्वकल्पना युक्तिमती स्यात्। तस्मादबाधितास्खलद्रूपाऽहंप्रत्ययग्राह्यत्वादात्मनो नासिद्धिः। शेषस्तु पूर्वपक्षग्रन्थो निःसारतया न प्रतिसमाधानमर्हतीत्युपेक्षितः॥

न चात्र बौद्धमतानुसारिणैतद् वक्तुं युज्यते—अहंप्रत्ययस्य सविकल्पकत्वेनाप्रत्यक्षत्वेन न तद्ग्राह्यत्वमात्मन इति, सविकल्पकस्यैव प्रत्यक्षस्य प्रमाणत्वेन व्यवस्थापयिष्यमाणत्वात्; प्रत्यक्षविषयत्वेऽपि विप्रतिपत्तिसंभवेऽनुमानस्यावतारः। न च 'सिद्धे आत्मन एकत्वे तत्प्रतिबद्धोऽनुसन्धानप्रत्ययः सिध्यति, तत्सिद्धौ च ततस्तस्यैकत्वम्' इतीतरेतराश्रयदोषावतारः; 'य एवाहं घटमद्राक्षं स एवेदानीं तं स्पृशामि' इति प्रत्ययात् प्रत्यभिज्ञाप्रत्यक्षेस्वरूपादात्मन एकत्वसिद्धेः।

न चात्रैतत् प्रेर्यम्—द्रष्टृरूपमात्मनः स्प्रष्टृरूपानुप्रवेशेन प्रतिभासते, आहोस्विदननुप्रवेशेन ? यद्यनुप्रवेशेन तदा द्रष्टृरूपस्य स्प्रष्टृरूपेऽनुप्रवेशात् स्प्रष्टृरूपतैवेति न द्रष्टृरूपता; तथा च 'अहं द्रष्टा स्पृशामि' इति कुत उभयावभासोल्लेख्येकं प्रत्यभिज्ञानं यतस्तदेकत्वसिद्धिः ? अथाननुप्रवेशेन तदा दर्शन-स्पर्शनावभासयोर्भेदात् कुत एकं प्रत्यभिज्ञानम् ? नहि प्रतिभासभेदे सत्यप्येकत्वम्, अन्यथा घट-पटप्रतिभासयोरपि तत् स्यात्। अथ प्रतिभासस्यैवात्र भेदो न पुनस्तद्विषयस्यात्मनः, कुतः पुनस्तस्याभेदः ? न तावत् प्रतिभासाभेदात्, तस्य भिन्नत्वेन व्यवस्थापितत्वात्। नापि स्वतः, स्वतोऽद्यापि विवादविषयत्वात्। अथ दर्शन-स्पर्शनावस्थाभेदेऽपि चिद्रूपस्य तदवस्थातुरभिन्नत्वान्नायं दोषः, तदप्यसङ्गतम्; यतो दर्शनावस्थाप्रतिभासेन तत्संबद्धमेवावस्थातृरूपं गृहीतं न स्पर्शनज्ञानसंबन्धि, तत्र तदवस्थाया अनुत्पन्नत्वेनाप्रतिभासनात्; तदप्रतिभासने च तद्व्यापित्वेनावस्थातुरप्यप्रतिभासनात्। नापि स्पर्शनप्रतिभासेन दर्शनावस्थाव्याप्तिरवस्थातुरवगम्यते, स्पर्शनज्ञाने दर्शनस्य विनष्टत्वेनाप्रतिभासनात्; प्रतिभासने चाऽनाद्यवस्थापरम्पराप्रतिभासप्रसङ्गः। न च प्रागवस्थाऽप्रतिभासने तदवस्थाव्याप्तिरवस्थातुरवगन्तुं शक्या। यच्च येन रूपेण प्रतिभाति तत् तेनैव सदित्यभ्युपगन्तव्यम्, यथा नीलं नीलरूपतया प्रतिभासमानं तेनैव रूपेणाभ्युपगम्यते। दर्शन-स्पर्शनज्ञानाभ्यां च स्वसंबन्धित्वमेवावस्थातुर्गृह्यते इति तद्रूप एवासावभ्युपगन्तव्य इति कुतोऽवस्थातृसिद्धिः ?

यतो नीलप्रतिभासेऽप्येवं वक्तुं शक्यम्—किमेकनीलज्ञानपरमाण्ववभासोऽपरतन्नीलज्ञानपरमाण्ववभासानुप्रवेशेन प्रतिभाति, उताननुप्रवेशेन ? यद्यनुप्रवेशेन तदैकतन्नीलज्ञानपरमाण्ववभासानामनुप्रवेशान्नीलज्ञानसंवेदनस्यैकपरमाणुरूपत्वम्; तस्य चाननुभवात् कुतो नीलज्ञानसंवेदनसिद्धिः ? अथाननुप्रवेशेन तदा नीलज्ञानपरमाण्ववभासानामयःशलाकाकल्पानां प्रतिभासनात् कुतः स्थूलमेकनीलज्ञानसंवेदनं प्रतिनीलज्ञानपरमाण्ववभासं भिन्नत्वात् ? अथ स्वसंवेदनावभासभेदे सत्यपि न तत्प्रतिभासस्य नीलज्ञानस्य भेदः; ननु कुतो नीलज्ञानस्याभेदः किं तत्स्वसंवेदनाभेदात्, स्वतो वा ? यदि स्वसंवेदनाभेदात्, तदयुक्तम्; तद्भेदस्य व्यवस्थापितत्वात्। अथ स्वत एव तदभेदः, तदप्ययुक्तम्; तस्याद्याप्यसिद्धत्वात्।

तथा, यदि दर्शनावस्थायां स्पर्शनावस्था न प्रतिभातीति तदवस्थाव्याप्तिर्दर्शनज्ञानेनावस्थातुर्न ग्रहीतुं शक्या; नन्वेवं तदप्रतिभासनेन तेन तदव्याप्तिरपि कथं ग्रहीतुं शक्या ? तदप्रतिभासने 'तत इदमवस्थातृरूपं व्यावृत्तम्' इत्येतदपि ग्रहीतुमशक्यमेव। न च तद्विविक्तप्रतिभासादेव तदव्याप्तिर्गृहीतैवेति वक्तुं युक्तम्, तदप्रतिभासने तद्विविक्तस्यैवाग्रहणात्। न च 'तदव्याप्तिस्तस्य स्वरूपमेव' इति दर्शनज्ञानेन तत्स्वरूपग्राहिणा तदभिन्नस्वरूपा तदव्याप्तिरपि गृहीतैवेति युक्तम्, तद्व्याप्तावप्यस्य सर्वस्य समानत्वात्। न चाबाधितैकप्रत्ययविषयस्यात्मन एकत्वमसिद्धम्। न चास्यैकत्वाध्यवसायस्य किञ्चिद्बाधकमस्ति, तद्बाधकत्वेन संभाव्यमानस्य प्रमाणस्य यथास्थानं निषेत्स्यमानत्वात्।

भवतु वाऽनुसन्धानप्रत्ययलक्षणाद्धेतोस्तदेकत्वसिद्धिस्तथापि नेतरेतराश्रयदोषः, यतो नैकत्वप्रतिबद्धमनुसन्धानमन्वयिदृष्टान्तद्वारेण निश्चीयते—येनायं दोषः स्यात्—अपि त्वनेकत्वेऽनुसन्धानस्यासंभवात् ततो व्यावृत्तमनुसन्धानं तदेकत्वेन व्याप्यत इत्येकसन्ताने स्मरणाद्यनुसन्धानदर्शनादनुमानतोऽपि तत्सिद्धिः। न च भेदे दर्शन-स्मरणादिज्ञानानामनुसन्धानं संभवति; अन्यथा देवदत्तानुभूतेऽर्थे यज्ञदत्तस्य स्मरणाद्यनुसन्धानं स्यात्।

अथ देवदत्त-यज्ञदत्तयोरेकसन्तानाभावान्नानुसंधानम्, यत्र त्वेकः सन्तानस्तत्र पूर्वाऽपरज्ञानयोरत्यन्तभेदेऽपि भवत्येवानुसन्धानम्; ननु सन्तानस्य यदि सन्तानिभ्यो भेदः एकत्वं च तदा शब्दान्तरेण स एवात्माऽभिहितो यत्प्रतिबद्धमनुसन्धानम्। अथ सन्तानिभ्योऽभिन्नः सन्तानस्तदा पूर्वोत्तरज्ञानक्षणानां सन्तानिशब्दवाच्यानां देवदत्त—यज्ञदत्तज्ञानवदत्यन्तभेदात् तदभिन्नस्य सन्तानस्यापि भेद इति कुतोऽनुसन्धाननिमित्तत्वम् ? अथैकसन्ततिपतितानां पूर्वोत्तरज्ञानसन्तानिनां कार्यकारणभावाद् भेदेऽप्येकसन्तानत्वम् तन्निबन्धनश्चानुसन्धानप्रत्ययो युक्तः, न पुनर्देवदत्त-यज्ञदत्तज्ञानयोः कार्यकारणभावः, अतस्तन्निबन्धनसन्तानाभावनिमित्तस्तत्रानुसन्धानाभावः; ननु देवदत्तज्ञानं यज्ञदत्तेन यदा व्यापार-व्याहारादिलिङ्गबलादनुमीयते तदा तद् यज्ञदत्तानुमानजनकं भवतीति कार्यकारणभावनिमित्तैकसन्ताननिबन्धनाऽनुसन्धानप्रसक्तिः स्यात्।

अथ स्वसन्ततावुपादानोपादेयभावेन ज्ञानानां जन्यजनकभावः भिन्नसन्ततौ तु सहकारिभावेन तद्भाव इति नाऽयं दोषः; ननु किं पुनरिदमुपादानत्वं यदभावाद् भिन्नसन्तानेऽनुसन्धानाभावः ? यत् स्वसन्ततिनिवृत्तौ कार्यं जनयति तदुपादानकारणम्, यथा मृत्पिण्डः स्वयं निवर्त्तमानो घटमुत्पादयतीति स घटोत्पत्तावुपादानकारणम्; अथवाऽपरम्—अनेकस्मादुत्पद्यमाने कार्ये स्वगतविशेषाधायकं तत्, नत्वेवं निमित्तकारणम्। ननु प्रतिक्षणविशरारुष्वेकस्वभावपौर्वापर्यावस्थितज्ञानस्वभावेषु क्षणेषूपादानोपादेयभाव एव न व्यवस्थापयितुं शक्यः। तथाहि—उत्तरज्ञानं जनयत् पूर्वज्ञानं किं नष्टं जनयति, उतानष्टम्, उभयरूपम्, अनुभयरूपं वा ? न तावन्नष्टम्, चिरतरनष्टस्येवानन्तरनष्टस्याप्यविद्यमानत्वेनोत्पादकत्वविरोधात्। नाप्यनष्टम्, क्षणभङ्गभङ्गप्रसङ्गात्। नाप्युभयरूपम्, एकस्वभावस्य विरुद्धोभयरूपासम्भवात्। नाप्यनुभयरूपम्, अन्योन्यव्यवच्छेदरूपाणामेकनिषेधस्य तदपरविधानानान्तरीयकत्वेनानुभयरूपताया अयोगात्।

अथ यदि व्यापारयोगात् कारणं कार्योत्पादकमभ्युपगम्येत तदा स्यादयं दोषः—यदुत नष्टस्य व्यापारासम्भवात् कथं कार्योत्पादकत्वम्, यदा तु प्राग्भावमात्रमेव कारणस्य कार्योत्पादकत्वं तदा कुत एतद्दोषावसरः ? नन्वेतस्मिन्नभ्युपगमे प्राग्भाविनोऽनेकस्मादुपजायमाने कार्ये कुतोऽयं विभागः—

१-म् गौरोऽहम्' इ-मां०, भां०। २-क्षरूपा-मां०, भां०, बा०, वा०। ३-पतैव न मां०, भां०, बा०, वा०। ४-भासात् त-मां०, भां०।

१ एकनीलज्ञानपरमाण्ववभासे अपरतन्नीलज्ञानपरमाण्ववभासानामित्यर्थः। २-सनेन तद्-मां०, भां० विना। -सनेति तद्-वा०, बा०। ३-त्तस्मर-मां०, भां०। ४-कसंताने पति-गु०। ५-र्ये सकलस्वगत-वा० बा० विना सर्वत्र। ६ चिरंतर-कां०, गु०।

इदमत्रोपादानकारणम् इदं च सहकारिकारणम् इति, द्वयोरपि कार्येणानुविहितान्वय-व्यतिरेकत्वात्? अथ सत्यप्यन्वय-व्यतिरेकानुविधाने एकस्योपादानत्वेन जनकत्वमपरस्यान्यथेति; नन्वेतदेवोपादानभावेन जनकत्वं कस्यचिद् रूपस्यानुगमे प्राग्भावित्वमात्रेण दुरवसेयम्। अथाभिहितमेवोपादानकारणत्वस्य लक्षणं तदवगमात् कथं तद् दुरवसेयम्। सत्यम्, उक्तम् न तु कस्यचिद् रूपस्यानुगमे तत् संभवति। नाप्यवसातुं शक्यम्।

तथाहि—यत् स्वगतविशेषाधायकत्वमुपादानत्वमुक्तं तत् किं स्वगतकतिपयविशेषाधायकत्वम्, आहोस्वित् सकलविशेषाधायकत्वम् इति? तत्र यदि प्रथमः पक्षः, स न युक्तः; सर्वज्ञज्ञाने स्वाकारार्पकस्यास्मदादिविज्ञानस्य तं प्रत्युपादानभावप्रसङ्गात्। तथा, रूपस्यापि रूपज्ञानं प्रत्युपादानभावप्रसक्तिः, तस्यापि स्वगतकतिपयविशेषाधायकत्वात्; अन्यथा निराकारस्य बोधस्य सर्वान् प्रत्यविशेषाद् 'रूपस्यैवायं ग्राहको न रसादेः' इति ततः प्रतिकर्मव्यवस्था न स्यात्। रूपोपादानत्वे च ज्ञानस्य परलोकाय दत्तो जलाञ्जलिः स्यात्। किञ्च, कतिपयविशेषाधायकत्वेनोपादानत्वे एकस्यैवं ज्ञानक्षणस्य तत्कार्यानुगत-व्यावृत्तानेकधर्मसम्बन्धित्वाभ्युपगमे विरुद्धधर्माध्यासोऽभ्युपगतो भवति; तथा च यथा युगपद्भाव्यनेकविरुद्धधर्माध्यासेऽप्येकं विज्ञानं तथा क्रमभाव्यनेकतद्धर्मयोगे किमित्येकं नाभ्युपगम्येत?

अथ सकलविशेषाधायकत्वेन, न तर्हि निर्विकल्पकात् सविकल्पकोत्पत्तिः। न च निर्विकल्पकयोरप्युपादानोपादेयत्वेनाभ्युपगतयोस्तद्भावः स्यात्, तथा च कुतो रूपाकारात् समनन्तरप्रत्ययात् कदाचिद् रसाद्याकारस्याप्युपादेयत्वेनाभिमतस्योत्पत्तिः?

अथ विज्ञानसन्तानबहुत्वाभ्युपगमाद् नाऽयं दोषः—तेन सर्वस्य स्वसदृशस्योत्पत्तिः—तर्ह्यस्मिन् दर्शने एकस्मिन्नपि सन्ताने प्रमातृनानात्वप्रसङ्गः; तथा च गवाऽश्वदर्शनयोर्भिन्नसन्तानवर्त्तिनोरेकेन दृष्टेऽर्थेऽपरस्यानुसन्धानं न स्यात्, देवदत्त-यज्ञदत्तसन्तानगतयोरिवान्येनानुभूतेऽन्यस्य। दृश्यते च—

"गामहं ज्ञातवान् पूर्वमश्वं जानाम्यहं पुनः" [श्लो० वा० सू० ५, आत्म० श्लो० १२२]।

किञ्च, सकलस्वगतविशेषाधायकत्वे सर्वात्मनोपादेयज्ञानक्षणे तस्योपयोगाद् अनुपयुक्तस्यापरस्वभावस्याभावाद् योगिविज्ञानम् रूपादिकं चैकसामग्र्यन्तर्गतं प्रति न सहकारित्वं तस्येति सहकारिकारणाभावे नोपादेयक्षणव्यतिरिक्तकार्यान्तरोत्पादः।

अथ येषां कारणमेव कार्यतया परिणमति तेषां भवत्वयं दोषो नैत्वस्माकं प्राग्भावमात्रं कारणत्वमभ्युपगच्छताम्। नन्वत्रापि मते येन स्वरूपेण विज्ञानमुपादेयं विज्ञानान्तरं जनयति किं तेनैव रूपमेकसामग्र्यन्तर्गतम्, उत स्वभावान्तरेण? तत्र यदि तेनैव तदा रूपमपि ज्ञानमुपादेयभूतं स्यात्, तत्स्वभावजन्यत्वात्; तदुत्तरज्ञानक्षणवत्। अथ स्वभावान्तरेण तदोपादानाभिमतं ज्ञानं द्विस्वभावमासज्यते। यथा चोपादान-सहकारिस्वभावरूपद्वययोगस्तथा त्रैलोक्यान्तर्गतान्यजन्यकार्यान्तरापेक्षया तस्याजनकत्वमपि स्वभावः; ततश्चैकत्वं ज्ञानक्षणस्य यथोपादान-सहकार्यऽजनकत्वानेकविरुद्धधर्माध्यासितस्याभ्युपगम्यते तथा हर्ष-विषादाद्यनेकविवर्त्तात्मनस्तत्सन्तानस्याप्यभ्युपगन्तव्यम्। अथोपादान-सहकार्यऽजनकत्वादयो धर्मास्तत्र कल्पनाशिल्पिकल्पिताः; एकत्वं तु तस्य स्वसंवेदनाध्यक्षसिद्धमिति न तैस्तदपनीयत इति मतिस्तर्ह्यात्मनोऽप्येकत्वं सन्तानशब्दाभिधेयतया प्रसिद्धस्य स्वसंवेदनाध्यक्षसिद्धस्य क्रमवद्धर्ष-विषादादिकार्यदर्शनाऽनुमीयमानतदपेक्षजनकत्वाऽजनकत्वधर्मापनेयं न स्यात्। तन्न स्वगतसकलधर्माधायकत्वमुपादानत्वं भवदभ्युपगमेन सङ्गतम्। नापि सन्ताननिवृत्त्या कार्योत्पादकत्वस्वभावम्, तथाऽभ्युपगमे ज्ञानसन्ताननिवृत्तेः परलोकाभावप्रसङ्गः।

अथ समनन्तरप्रत्ययत्वमुपादानत्वमुच्यते। तथाहि—समस्तुल्यः, अनन्तरोऽव्यवहितः,

---

१–स्यानुगमे कां०, भां०। २ पृ० ८७ पं० ३१। ३ पृ० ८७ पं० ३२। ४ सर्वज्ञाने स्वा–मां०, भां०। ५–व च ज्ञा–मां०, भां०। ६–वृत्त्याने–मां०, भां०। ७ तर्हि निर्विकल्पकोत्पत्तिः। वा०, बा०। ८–ल्पक-सविकल्पकयो—वा०, बा० विना। ९–ज्ञानरूपा–मां०, भां०। १० नास्माकं भां०,गु०, वा०, बा०, मां०। ११–जन्मत्वा–मां०, भां०। १२ हर्षादिविव–वा०, बा०। १३–नुमीयमानं तदपेक्ष–वा०, बा० विना सर्वत्र।–नुनीयमानं तदपेक्ष–कां०।

प्रत्ययोः जनकः। न चैतद् भिन्नसन्तानादिति न तत्रानुसन्धानसंभवः। नन्वत्रापि समत्वं कार्येण यद्युपादानत्वं प्रत्ययस्य तदा वक्तव्यम्—किं सर्वथा समत्वम्, उतैकदेशेन? यदि सर्वथा तदसत्, कार्य-कारणयोः सर्वथा तुल्यत्वे यथा कारणस्य प्राग्भावित्वं तथा कार्यस्यापि स्यात्; तथा च कार्य-कारणयोरेककालत्वाद् न कार्यकारणभावः, न ह्येककालयोः कार्यकारणभावः सव्येतरगोविषाणवत्। तथा, कारणाभिमतस्यापि स्वकारणकालता, तस्यापि स्वकारणकालतेति सकलसन्तानशून्यमिदानीं समस्तं जगत् स्यात्। अथ कथञ्चित् समानता, तथा सति 'योगिज्ञानस्याप्यस्मदादिज्ञानालम्बनस्य तदाकारत्वेनैकसन्तानत्वं स्यात्' इत्यादि दूषणं पूर्वोक्तमेव। अथानन्तरत्वमुपादानत्वम्, ननु क्षणिकैकान्तपक्षे सर्वजगत्क्षणानन्तरं विवक्षितक्षणे जगद् जायत इति सर्वेषामुपादानत्वमित्येकसन्तानत्वं जगतः। देशानन्तर्ये तत्रानुपयोगि, देशव्यवहितस्यापीहजन्ममरणचित्तस्य भाविजन्मचित्तोपादानत्वाभ्युपगमात्। प्रत्ययत्वं तु नोपादानत्वम्, सहकारित्वेऽपि प्रत्ययत्वस्य भावात्। तन्न समनन्तरप्रत्ययत्वमप्युपादानत्वम्। 'न च प्रतिक्षणविशरारुषु भावेषु कथञ्चिद् एकान्वयमन्तरेण जनकत्वमपि संगच्छते किमुतोपादानादिविभागः' इति क्षणभङ्गभङ्गप्रतिपादनावसरेऽभिधास्यामः।

अत्र केचित् तुल्येऽपि जनकत्वे स्व-परसन्तानगतयोर्विज्ञानयोरुपादानत्वे कारणमाहुः—"स्वसन्ततौ चेतितं ज्ञानं ज्ञानान्तरजनकम्, न त्वेवं परसन्ततौ; अतो जनकत्वव्यतिरिक्तस्योपादानकारणत्वे निमित्तस्य संभवादित्थंभूताद्धेतुफलभावाद् व्यवस्था"। अस्यापि व्यवस्थानिमित्तत्वमयुक्तम्, नहि ज्ञानमसंवेदितं व्यवस्थां लभते। संवेदनं हि ज्ञानानां स्वत एवेष्यते, तच्च स्वसन्ततिपतिते इव परसन्ततिपतितेऽपि तुल्यम्। ज्ञानान्तरवेद्यत्वं तु न शाक्यैरभ्युपगम्यते ज्ञानस्य नियमत इति नायमप्यतिप्रसङ्गपरिहारः। न च स्वसन्तताविप स्वसंविदितज्ञानपूर्वकता ज्ञानस्य सिद्धा, मूर्छाद्यवस्थोत्तरकालभाविज्ञानस्य तथात्वानवगमात्; यतो विज्ञानपूर्वकत्वेऽपि तत्र विप्रतिपन्ना वादिनः कुतः पुनः संविदितज्ञानपूर्वकत्वम्? तत्रैतत् स्यात्—विज्ञानपूर्वकत्वस्यानुमानेन निश्चयात् कथं विप्रतिपत्तिः? तच्च दर्शितम् 'तज्जातीयात् तज्जातीयोत्पत्तिः' इति, एतदसत्; अतज्जातीयादपि भावानामुत्पत्तिदर्शनात्, यथा धूमादेः।

येऽप्यत्राहुः—"सदृश-तादृशभेदेन भावानां विजातीयोत्पत्त्यसंभवादेतद्दूषणम्" तेषामपि सदृश-तादृशविवेको नार्वागृदृक्प्रमातृगोचरः, कार्यनिरूपणायामपि तयोर्विवेको दुर्लभस्तस्मादयमपरिहारः। यैः पुनरुच्यते—"सर्वस्य समानजातीयादुपादानादुत्पत्तिः, आद्यस्यापि धूमक्षणस्योपादानत्वेन व्यवस्थापिताः काष्ठान्तर्गता अणवः" तत्रापि सजातीयत्वं न विद्मः। रूपादीनां हि रूपादिपूर्वकत्वेन वा सजातीयत्वम्, धूमत्वोपलक्षितावयवपूर्वकत्वेन वा? प्राच्ये विकल्पे नेदानीं विजातीयादुत्पत्तिर्गोरप्यश्वादुपजायमानस्य। उत्तरविकल्पेऽपि काष्ठान्तर्गतानामवयवानां धूमत्वं लौकिकम्, पारिभाषिकं वा? परिभाषायास्तावदयमविषयः। लोकेऽपि तदाकारव्यवस्थितानामवयवानां नैव धूमत्वव्यवहारः। तार्किकेणापि लोकप्रसिद्धव्यवहारानुसरणं युक्तं कर्तुम्। तस्मान्न सजातीयादुत्पत्तिः।

यच्चात्रोच्यते—'तस्यामवस्थायां विज्ञानाभावे तदवस्थातः प्रच्युतस्योत्तरकालमीदृशी संवित्तिर्न भवेत् 'न मया किञ्चिदपि चेतितम्' 'स्मृतिर्हीयमनुभवपूर्विका, अतो येनानुभवेन सता न किञ्चिच्चेत्यते तस्यामवस्थायां तस्यावश्यं सद्भावोऽभ्युपगन्तव्यः' एतत् सुव्याहृतम्, 'न किञ्चिच्चेतितं मया' इति ब्रुवता वस्त्ववेदनं वोच्येत, स्वरूपावेदनं वा? वस्त्ववेदने सकलप्रतिषेधो न युक्तः। स्वरूपावेदनं तु स्वसंवेदनाभ्युपगमे दूरोत्सारितम्। तस्मादिदानीमेव मनोव्यापारात् तदवस्थाभावी सर्वानवगमः संवेद्यते।

अस्तु वा तस्यामवस्थायां विज्ञानं तथापि जनकत्वातिरिक्तव्यापारविशेषाभावः, समनन्तरप्रत्ययत्वे जनकत्वातिरिक्तेऽभ्युपगम्यमाने तयोस्तात्त्विकभेदप्रसङ्गः; तथा च 'यदेवैकस्यां ज्ञानसन्ततौ समनन्तरप्रत्ययत्वं तदेव परसन्तताववलम्बनत्वेन जनकत्वम्' इत्येतन्न स्यात्। अथ जनकत्व-समनन्तरत्वादयो धर्माः काल्पनिकाः, अकल्पितं तु यत् स्वरूपं तत् तात्त्विकम्, तच्च बोधरूपम्; किमिदानीं सांवृताद् रूपाद् भावानामुत्पत्तिः? नेत्युच्यते, कथं वा काल्पनिकत्वम्? अथ जनकत्वा-

---

१ पृ० ८८ पं० ७। २–मसंचेति–वा०, बा०। ३–पत्तावादितः कां०, गु०। ४ पृ० ७४ पं० ३८–पृ० ७८ पं० १। ५–नात् तदु–वा०, बा० विना। ६–स्त्वसंवेदनं चोच्ये–भां०, मां०। ७–यत्वेन जनकत्वातिरिक्ताभ्यु–वा०, बा०। ८–तावालम्बनजनकत्वम्' इत्येतत् स्यात्। वा०, बा०। ९–चाकाल्प–भां०। १०–त्वमजनकत्वाति–भां०।

तिरिक्तस्य समनन्तरप्रत्ययत्वस्यैवमुच्यते कथं तन्निबन्धना व्यवस्था? तथाहि—एकस्यां सन्ततौ परसन्ततिगतेन विज्ञानेन तुल्येऽपि जनकत्वे समनन्तरप्रत्ययत्वेन[1] जननविशेषमङ्गीकृत्यैकसन्तान-व्यवस्था क्रियते, यदा तु व्यवस्थानिबन्धनस्यापि सांवृतत्वं ततस्तत्कृताया व्यवस्थायाः परमार्थसत्त्वं दुर्भणमिति। अयमपि सौगतानां दोषो न जैनानाम्, यतो 'ज्ञानपूर्वकत्वं ज्ञानस्य, स्वसंवेदनं च ज्ञानस्य स्वरूपम्' इत्येतत् प्राक् प्रतिसाधितम्।

यच्चोक्तम् 'अतज्जातीयादपि भावानामुत्पत्तिदर्शनाद्, यथा धूमादेः'[3] इत्यपि न संगतम्, यतो नास्माभिरतज्जातीयोत्पत्तिर्नाभ्युपगम्यते—विलक्षणादपि पावकात् धूमोत्पत्तिदर्शनात्—किन्तु कारण-गतधर्मानुविधानं कार्यत्वाभ्युपगमनिबन्धनम्; तच्च ज्ञानस्य प्रदर्शितं प्राक्। न च काय-विज्ञानयो-रिवानल-धूमयोः सर्वथा वैलक्षण्यम्, पुद्गलविकारत्वेन द्वयोरपि सादृश्यात्। सर्वथा सादृश्ये च कार्यकारणभावाभावप्रसङ्गः एकत्वप्राप्तेः। यत्तु 'सदृशतादृशविवेकः कार्यनिरूपणायामपि दुर्लभः' तत्र यः कार्यदर्शनादपि विवेकं नावधारयितुं क्षमस्तस्यानुमानव्यवहारेऽनधिकार एव। तदुक्तम्–

"सुविवेचितं कार्यं कारणं न व्यभिचरति, अतस्तदवधारणे यत्नो विधेयः" [ ]

अत एव 'रूपादीनां हि रूपादिपूर्वकत्वेन वा' इत्यादि अनभिमतोपालम्भमात्रम्, कथञ्चित् सादृश्यस्य कार्य-कारणयोर्दर्शितत्वात्; तस्य च प्रकृते प्रमाणसिद्धत्वात्।

यच्च 'सुप्त-मूर्च्छिताद्यवस्थासु विज्ञानाभावेन तत्पूर्वकत्वमुत्तरज्ञानस्य न संभवति'[7] इत्यभ्यधायि, तदसत्; तदवस्थायां विज्ञानाभावग्राहकप्रमाणासंभवात्। तथाहि-न तावत् सुप्त एव तदवस्थायां विज्ञानाभावं वेत्ति, तदा विज्ञानानभ्युपगमात्; तदवगमे च तस्यैव ज्ञानत्वाद् न तदवस्थायां तदभावः। नापि पार्श्वस्थितोऽन्यस्तदभावं वेत्ति, कारण-व्यापक-स्वभावानुपलब्धीनां विरुद्धविधेर्वाऽत्र विषयेऽव्यापारात् अन्यस्य तदभावावभासकत्वायोगात्। न चाभाववत् तद्भावस्यापि तस्यामवस्थायामप्रतिपत्तिः, स्वात्मनि[11] स्वसंविदितविज्ञानाविनाभूतत्वेन निश्चितस्य प्राणाऽपानशरीरोष्ण-ताकारविशेषादेस्तदवस्थायामुपलभ्यमानलिङ्गस्य सद्भावेनानुमानप्रतीत्युत्पत्तेः। जाग्रदवस्थायामपि परसन्ततिपतितचेतोवृत्तेरस्मदादिभिर्यथोक्तलिङ्गदर्शनोद्भूतानुमानमन्तरेणाप्रतिपत्तेः। 'न किञ्चिच्चे-तितं मया इति स्मरणादुत्तरकालभाविनस्तदवस्थायामनुभवानुमाने किं वस्त्वसंवेदनम्, स्वरूपासंवेदनं वा' इत्यादि यद् दूषणमभिहितम्[13], तदप्यसारम्; जाग्रदवस्थाभाविस्वसंविदितगच्छत्तृणस्पर्शज्ञानाऽश्व-विकल्पसमयगोदर्शनादिषूत्तरकालभावि 'न मया किञ्चिदुपलक्षितम्' इति स्मरणलिङ्गबलोद्भूतानुमा-नविषयेष्वप्यस्य समानत्वात्। न च स्वसंविदितविज्ञानवादिनोऽत्रापि समानो दोष इति वक्तुं युक्तम्, "यस्य यावती मात्रा" [ ] इति स्वसंविदितज्ञानस्याभ्युपगमात्।

यच्च 'समनन्तरसहकारित्वाद्यनेकधर्मयुक्तत्वमेकक्षणे ज्ञानस्यासञ्जयते' इति प्रतिपादितम्[14] तद-भ्युपगम्यमानत्वेनादूषणम्। अतः पौर्वापर्यव्यवस्थितहर्ष-विषादाद्यनेकपर्यायव्याप्येकात्मव्यतिरेकेण ज्ञानयोः स्वसन्तानेऽप्यनुसन्धाननिमित्तोपादानोपादेयभावासंभवाद् न परसन्तानवदनुसंधानप्रत्ययः स्यात्, दृश्यते च; अतोऽनेकत्वव्यावृत्तादनुसन्धानप्रत्ययादपि लिङ्गादात्मसिद्धिः।

अथापि स्याद् गमकत्वं हि हेतोः स्वसाध्याविनाभावग्रहणपूर्वकम्, तद्ग्रहणं च धर्म्यन्तरे, न चात्रैककर्तृकत्वेन साध्यधर्मिव्यतिरिक्ते धर्म्यन्तरे प्रतिसन्धानस्य व्याप्तिः येन प्रतिसन्धानादेकः कर्त्ताऽनुमीयेत। अथ ब्रूषे क्षणिकतासाधकस्य सत्ताख्यस्य हेतोर्यथा धर्म्यन्तरे व्याप्त्यग्रहणेऽपि गमकता तद्वदस्यापि, एतदचारु; तस्य हि क्षणिकतायां प्राक् प्रत्यक्षेण निश्चयान्निश्चयविषयेण च व्याप्तेर्दर्शनाद् विपक्षात् प्रच्यावितस्य बाधकप्रमाणेन साध्यधर्मिणि यदवस्थानं तदेव स्वसाध्येन व्याप्तिग्रहणम्। अत एवास्य हेतोः साध्यधर्मिण्येव व्याप्तिनिश्चयमिच्छन्ति। ननु व्याप्ति-साध्यनिश्चय-योर्नियमेन पौर्वापर्यमभ्युपगन्तव्यम्, व्याप्तिनिश्चयस्य साध्यप्रतिपत्त्यङ्गत्वात्; अत्र तु साध्यधर्मिणि व्याप्तिनिश्चयाभ्युपगमे साध्यप्रतिपत्तिकालोऽन्योऽभ्युपगन्तव्यः, न चासावन्योऽनुभूयते; अस्त्येतत्

१–यत्वे जननं वि–वा०, बा०। २ पृ० ८९ पं० २१। ३ इत्यादि, तदपि न मां० ब०। ४ पृ० ७७ पं० २८। ५ ८९ पं० २४। ६ पृ० ८९ पं० २६। ७ संभवीत्यभिधायि वि०, भा०, कां०, गु०। संभवतीत्यभिधा-मां०, भां०। ८ पृ० ८९ पं० १८। ९–वोऽपि। मां०। १० पार्श्वे स्थितो–गु०। ११–नि संवि–मां०। १२–रोत्तानाकार–कां०। १३ पृ० ८९ पं० ३४। १४ पृ० ८८ पं० ३१। १५–पत्तेः का–कां०।

कार्यहेतोः, कस्यचित् स्वभावहेतोरपि; अस्य तु बाधकात् प्रमाणाद् विपक्षात् प्रच्युतस्य यदेव साध्य-धर्मिणि स्वसाध्यव्याप्ततया ग्रहणं तदेव साध्यग्रहणम्। न चास्यैवं द्वैरूप्यम्, यतो विपक्षाद् व्यावृ-त्तिरेवान्वयमाक्षिपति। इयांस्तु विशेषः-कस्यचिद् हेतोर्व्याप्तिविषयप्रदर्शनाय धर्मिविशेषः प्रदर्श्यते, अस्य तु 'यत् सत् तत् क्षणिकम्' इति धर्मिविशेषाप्रदर्शनेऽपि धर्मिमात्राक्षेपेण व्याप्तिप्रदर्शनम्। तच्च सत्त्वं क्वचिद् व्यवस्थितमुपलभ्यमानं क्षणिकतापरिपत्त्यङ्गम्, अतः पक्षधर्मताऽप्यत्रास्ति, न चात्रैवम्।

अत्राप्येनमेव न्यायं केचिदाहुः। कथम्? तत्र हि व्यापकस्य क्रमयौगपद्यस्य निवृत्त्या विपक्षात् तन्निवृत्तिः; अत्रापि प्रमातृनियततायाः व्यापिकायाः अभावाद् विपक्षात् प्रतिसन्धानलक्षणस्य हेतो-र्निवृत्तिः। अथ तत्र बाधकप्रमाणस्य व्याप्तिः प्रत्यक्षेण निश्चीयते—क्रम-यौगपद्याभ्यामर्थक्रियाकरणस्य प्रत्यक्षेण निश्चयात्—अत्र तु कथम्? अत्रापि प्रमातृनियमपूर्वकत्वेन स्वसन्तान एव प्रतिसन्धानस्य व्याप्तिनिश्चयात् कथं न तुल्यता?

अथ ब्रूयात् 'प्रमातृनियतता' इत्यस्य भाषितस्य कोऽर्थः? यदि परं भङ्ग्यन्तरेणैककर्तृकत्वं साध्यं व्यपदिश्यते तस्य प्रत्यक्षेण निश्चयाभ्युपगमे कथं बाधकप्रमाणावसेयता व्याप्तेः? नैतत्, प्रमातृनियत-ताग्रहणं नैककर्तृकत्वग्रहणम्; सर्वे एव हि भावा देशादिनियततयाऽवसीयमाना व्यवहारगोचरतामु-पयान्ति, प्रमातुरप्यवसाय एवमेव दृश्यते—'इदानीमत्राहम्'। एवं देशाद्यसंसर्गवत् प्रमात्रन्तरासंस-र्गोऽपि निश्चीयते। तथाहि—देश-कालनिबन्धननियमवद् व्यतिरिक्तपदार्थासंसर्गस्वभावनियतप्रति-भासोऽपि घटादेरिव, अत्रैकत्वानेकत्वनिश्चयाभावः। पूर्वपाक्षिकमते तस्य नानाकर्तृकेषु सन्तानान्तरेषु व्यापकस्याभावाद् विपक्षात् प्रच्युतस्य प्रतिसन्धानस्य क्वचिदुपलभ्यमानस्यैककर्तृकत्वेन व्याप्तिः। यथा क्रम-यौगपद्याभ्यामर्थक्रियाकरणदर्शने नैवं निश्चयः—'किं क्षणिकैः क्रम-यौगपद्याभ्यां सा क्रियते, आहोस्विदन्यथा' इति, अथ च प्रत्यक्षेण बाधकस्य व्याप्त्यवसाये पश्चाद् व्यापकानुपलब्ध्या मूल-हेतोर्व्याप्तिसिद्धिः एवमेककर्तृकत्वानवसायेऽपि प्रमातृनियततया प्रतिसन्धानस्य स्वसन्ततौ व्याप्ति-निश्चये सत्युत्तरकालं विपक्षे व्यापकस्य प्रमातृनियतत्वस्याभावादेककर्तृकत्वेन प्रतिसन्धानस्य व्याप्ति-सिद्धिः। एवमनभ्युपगमे 'अहम् अन्यो वा' इति प्रमात्रनिश्चये प्रमेयानिश्चयाद् अन्धमूकं जगत् स्यात्। औपचारिकस्य प्रमातृनियततया प्रतिभासविषयत्वेऽनात्मप्रत्यक्षत्वं दोषः।

तत्रैतत् स्यात्—अस्त्ययं प्रमातृनियमनिश्चयः; स तु स्वसन्ततौ किमेककर्तृकत्वकृतः, उतस्वि-न्निमित्तान्तरकृतो युक्तः? तच्चैकस्यां सन्ततौ हेतु-फलभावलक्षणं प्राक् प्रदर्शितम्। सत्यम्, प्रदर्शितं ननु साधितम्। तथाहि—तत्कृतः प्रमातृनियमो नान्यकृत इति नैतावत्प्रत्यक्षस्य विषयः; न च प्रमाणा-न्तरस्यापि। तद्धि अस्मिन् विषये उच्यमानम् अनुमानमुच्येत, तदपि प्रत्यक्षनिषेधान्निषिद्धम्। न च क्षणिकत्वव्यवस्थापने हेतु-फलभावकृतो नियम इत्यभ्युपगन्तुं युक्तम्, तस्योपरिष्टात् निषेत्स्यमानत्वात्। न चात एव दोषाद् एककर्तृकत्वकृतोऽपि न नियम इति वक्तुं शक्यम्, स्वसंवेदनप्रत्यक्षसिद्धत्वस्य तत्पूर्वकानुमानसिद्धत्वस्य चात्मनि प्राग् व्यवस्थापितत्वात्। अभ्युपगमवादेन तु क्षणिकत्वव्यवस्थापक-सत्त्वहेतुतुल्यत्वमनुसन्धानप्रत्ययहेतोः प्रदर्शितम्; न तु क्षणिकत्ववद् आत्मैकत्वस्य प्रत्यक्षासिद्धत्वम् येनानुमानात् तत्प्रसिद्ध्यभ्युपगमे इतरेतराश्रयदोषप्रसङ्गः प्रेर्येत। अतोऽध्यक्षानुमानप्रमाणसिद्धत्वात् परलोकिनः "परलोकिनोऽभावात् परलोकाभावः" इति सूत्रं निःसारतया व्यवस्थितम्।

यदप्युच्यते 'शरीरान्तर्गतं संवेदनं कथं शरीरान्तरसंचारि; जीवतस्तावन्न शरीरान्तरसंचारो दृष्टः; परस्मिन् मरणसमये भविष्यतीति दुरन्वयमेतत्' तदपि न युक्तम्; यतः कुमारशरीरान्तर्गताः पाण्डि-त्यादिविकल्पा वृद्धावस्थाशरीरसंचारिणो दृश्यन्ते जीवत एव, चपलतादिशरीरावस्थाविशेषाः वागू-विकाराश्च; तत् कथं न जीवतः शरीरान्तरसंचारः? अथैकमेवेदं शरीरं बाल-कुमारादिभेदभिन्नम्, जन्मान्तरशरीरं तु मातापित्रन्तरशुक्र-शोणितप्रभवम्-शरीरान्तरप्रभवम्, एतदप्ययुक्तम्; बाल-कुमा-रशरीरस्यापि भेदात्; यथा च बाल-कुमारशरीरचपलताभेदस्तरुणादिशरीरसञ्चारी उपलभ्यते तथा

१ क्रमस्य यौगप–वा०, बा०, गु०, कां०। २–मानव्यव–कां०, गु०। ३–कत्वे नि–वृ०, आ०। ४–श्रयभावः वा०, बा०। ५–मातृनि–मां०। ६–मातुर्नियत–मां० ब०।–मातृर्नियत–वा०, बा०। ७–क्ष-त्वदोषः वा०, बा० विना। ८ पृ० ९१ पं ६। ९ तत्प्रतिसि–वा०, बा० विना। १० पृ० ७१ पं० २९। ११ पृ० ७१ पं० ३४।

निजजन्मान्तरशरीरप्रभवश्चपलतादिभेदः परभवभाविजन्मशरीरसंचारी भविष्यतीति ततो न मातापितृशुक्र-शोणितान्वयि जन्मादिशरीरम् अपि तु स्वसन्तानशरीरान्वयमेव, वृद्धादिशरीरवत्; अन्यथा मातापितृशरीरचपलतादिविलक्षणशरीरचेष्टावन्न स्यात्। अथेहजन्मबाल-कुमाराद्यवस्थाभेदेऽपि प्रत्यभिज्ञानाद् एकत्वं सिद्धं शरीरस्य तदवस्थाव्यापकस्य तेन न तद्दृष्टान्तबलादत्यन्तभिन्ने जन्मान्तरशरीरादौ ज्ञानसंचारो युक्तः, तदसत्; पूर्वोत्तरजन्मशरीरज्ञानसंचारकारिणः कार्मणशरीरस्यात एव कथञ्चिदेकत्वसिद्धेः। तथाहि—ज्ञानं तावदिहजन्मादावन्यनिजजन्मज्ञानप्रभवं प्रसाधितम्, तस्य चेहजन्मबाल-कुमाराद्यवस्थाभेदेषु 'तदेवेदं शरीरम्' इत्यबाधितप्रत्यभिज्ञाप्रत्ययावगतैकरूपान्वयिषु संचारदर्शनात् पूर्वोत्तरजन्मावस्थास्वपि तथाभूतानुगामिरूपसमन्वितासु तस्य संचारोऽनुमीयते। न चासदादीन्द्रियसंवेद्यरूपाद्याश्रयस्यौदारिकशरीरस्य जन्मान्तरशरीराद्यवस्थाऽनुगमः संभवति, तस्य तदैव च दाहादिना ध्वंसोपलब्धेः। अतो जन्मद्वयावस्थाव्यापकस्योष्मादिधर्मानुगतस्य कार्मणशरीरस्य विज्ञानसंचारकारिणः सद्भावः सिद्धः। पूर्वोत्तरजन्मावस्थाव्यापकस्यावस्थातुस्तदवस्थाभ्यः कथञ्चिद्भेदाद् मातापितृशरीरविलक्षणनिजशरीरावस्थाचपलताद्यनुविधाने उत्तरावस्थायाः कथं नावस्थातृधर्मानुविधानम्?

"तस्माद् यस्यैव संस्कारं नियमेनानुवर्त्तते।
शरीरं पूर्वदेहस्य तत् तदन्वयि युक्तिमत्" ॥ [ ]

'अथ पूर्वापरयोः प्रत्यक्षस्याप्रवृत्तेर्न कार्यकारणभावः, अनुमानसिद्धावितरेतराश्रयदोषः' इति, तदपि प्रतिविहितम्, एवं हि सर्वशून्यत्वमायातमिति कस्य दूषणं साधनं वा केन प्रमाणेन? इहलोकस्याप्यभावप्रसक्तेरिति प्रतिपादितत्वात्।

अथ कार्यविशेषस्य विशिष्टकारणपूर्वकत्वसिद्धौ यथोक्तप्रकारेण भवतु पूर्वजन्मसिद्धिः, भाविपरलोकसिद्धिस्तु कथम् भाविनि प्रमाणाभावात्? तत्रापि कार्यविशेषादेवेति ब्रूमः। तथाहि-कार्यविशेषो विशिष्टं सत्त्वमेव, तच्च न सत्तासंबन्धलक्षणम्; तस्य निषेत्स्यमानत्वात्। नाप्यर्थक्रियाकारित्वलक्षणम्, सन्ततिव्यवच्छेदे तस्याभावप्रसङ्गात्। तथाहि—शब्द-बुद्धि-प्रदीपादिसन्तानानां यद्युच्छेदोऽभ्युपगम्यते तदा तत्सन्ततिचरमक्षणस्यापरक्षणाजननादसत्त्वम्, तदसत्त्वे च पूर्वपूर्वक्षणानामर्थक्रियाऽजननादसत्त्वमिति सकलसन्तत्यभावः। अथ सन्तत्यन्तक्षणः सजातीयक्षणान्तराजननेऽपि सर्वज्ञसन्ताने स्वग्राहिज्ञानजनकत्वेन सन्निति नायं दोषः, तदसत्; स्वसन्ततिपतितोपादेयक्षणाजनकत्वे परसन्तानवर्त्तिस्वग्राहिज्ञानजनकत्वस्याप्यसंभवात्। नह्युपादानकारणत्वाभावे सहकारिकारणत्वं क्वचिदप्युपलब्धम्; तत्सद्भावे वा एकसामग्र्यधीनस्य रूपादे रसतस्तत्समानकालभाविनोऽव्यभिचारिणी प्रतिपत्तिर्न स्यात्, रूपक्षणस्य स्वोपादेयक्षणान्तराजननेऽपि रससन्ततौ सहकारिकारणत्वेन रसक्षणजनकत्वाभ्युपगमात्; तत्सद्भावेऽपि तत्समानकालभाविनो रूपादेरभावात्। तन्नोपादानकारणत्वाभावे सहकारित्वस्यापि संभव इति स्वसन्तत्युच्छेदाभ्युपगमेऽर्थक्रियालक्षणस्य सत्त्वस्यासम्भव इति उत्पाद-व्यय-ध्रौव्यलक्षणमेव सत्त्वमभ्युपगन्तव्यमिति कार्यविशेषलक्षणाद्धेतोर्यथोक्तप्रकारेणातीतकालवदनागतकालसंबन्धित्वमप्यात्मनः सिद्धम्।

यदप्युक्तम् 'यद्यागमसिद्धत्वमात्मनः, तस्य वा प्रतिनियतकर्मफलसंबन्धस्तत्सिद्धोऽभ्युपगम्यते तदाऽनुमानवैयर्थ्यम्' इति, तदपि मूर्खेश्वरचेष्टितम्; नहि व्यर्थम् इति निजकारणसामग्रीबलायातं वस्तु प्रतिक्षेप्तुं युक्तम्; नहि आगमसिद्धाः पदार्थाः इति प्रत्यक्षस्यापि प्रतिक्षेपो युक्तः। यदपि प्रत्यक्षाऽनुमानाविषये चार्थे आगमप्रामाण्यवादिभिस्तस्य प्रामाण्यमभ्युपगम्यते—तदुक्तम्—

"आम्नायस्य क्रियाऽर्थत्वादानर्थक्यमतदर्थानाम्—" [जैमि० १-२-१] इति,

तदप्ययुक्तम्; यतो यथा प्रत्यक्षप्रतीतेऽप्यर्थे विप्रतिपत्तिविषयेऽनुमानमपि प्रवृत्तिमासादयतीति प्रतिपादितं तथा प्रत्यक्षाऽनुमानप्रतिपन्नेऽप्यात्मलक्षणेऽर्थे तस्य वा प्रतिनियतकर्मफलसंबन्धलक्षणे

१-लक्षणं शरीरं चे-गु०। २-बाधितैकप्र-मां०। ३ तस्यैव च दाहा-वा०, बा०। ४ अनुमानभावसिद्धावि-वा०, बा० विना। ५ एवं हि सति सर्व-भां०, मां०। ६ पृ० ७४ पं० २६। ७ पृ० ७१ पं० ३७। ८-यातवस्तु कां०। ९ पृ० ७५ पं० १३। १०-यते क-कां०।

किमित्यागमस्य प्रवृत्तिर्नाभ्युपगमस्य विषयः? न चागमस्य तत्राप्रामाण्यमिति वक्तुं युक्तम्, सर्वज्ञप्रणीतत्वेन तत्प्रामाण्यस्य व्यवस्थापितत्वात्। प्रतिनियतकर्मफलसंबन्धप्रतिपादकश्चागमः—

"बह्वारम्भपरिग्रहत्वं च नारकस्य" [तत्त्वा० अ० ६, सू० १६]

इत्यादिना वाचकमुख्येन सूत्रीकृतोऽस्यैवानुमानविषयत्वं प्रतिपादयितुकामेन। यथा च कर्मफलसंबन्धोऽप्यात्मनोऽनुमानादवसीयते तथा यथास्थानमिहैव प्रतिपादयिष्यामः। आत्मस्वरूपप्रतिपादकः प्रतिनियतकर्मफलसंबन्धप्रतिपादकश्चागमः—

"एगे आया" [स्थाना० प्रथमस्था० सू० १]
"पुव्विं दुच्चिण्णाणं दुप्पडिकंताणं कडाणं कम्माणं—" [ ]

इत्यादिकः सुप्रसिद्ध एव। तदेवं प्रत्यक्षाऽनुमानाऽऽगमप्रमाणप्रसिद्धत्वाद् नारक-तिर्यग्-नराऽमरपर्यायानुभूतिस्वभावस्यात्मनः, न 'भवशब्दव्युत्पत्तिः अर्थाभावात् डित्थादिशब्दव्युत्पत्तितुल्या' इति स्थितम्॥

[पूर्वपक्षः—जगतः ईश्वरकृतत्वस्थापनम्]

अत्राहुर्नैयायिकाः—क्लेश-कर्म-विपाकाऽऽशयाऽपरामृष्टपुरुषाभ्युपगमे "नित्यं सत्त्वमसत्त्वं वा" इति दूषणमभ्यधायि तत्र तन्नित्यसत्त्वप्रतिपादने नास्माकं काचित् क्षतिः, प्रमाणतो नित्यज्ञानादिधर्मकलापान्वितस्य तस्याभ्युपगमात्।

ननु युक्तमेतद् यदि तथाभूतपुरुषसद्भावप्रतिपादकं किञ्चित् प्रमाणं स्यात्, तच्च नास्ति। तथाहि-न प्रत्यक्षं तथाविधपुरुषसद्भावावेदकमस्मदादीनाम्। अस्मद्विलक्षणयोगिभिस्तस्यावसाय इत्यत्रापि न किञ्चित् प्रमाणमस्ति। यदा न तत्स्वरूपग्रहणे प्रत्यक्षप्रमाणप्रवृत्तिस्तदा तद्गतधर्माणां नित्यज्ञानादीनां सद्भावावार्त्तैव न संभवति।

नानुमानमपि युक्तम् एतत्स्वरूपावेदकम्, प्रत्यक्षनिषेधे तत्पूर्वकस्य तस्यापि निषेधात्। सामान्यतोदृष्टस्यापि नात्र विषये प्रवृत्तिः, लिङ्गस्य कस्यचित् तत्प्रतिपादकस्याभावात्; कार्यत्वस्य पृथिव्याद्याश्रितस्य केषाञ्चिन्मतेनासिद्धेः। न च संस्थानवत्त्वस्य तत्साधकत्वम्, प्रासादादिसंस्थानेभ्यः पृथिव्यादिसंस्थानस्यात्यन्तवैलक्षण्यात् संस्थानशब्दवाच्यत्वेन चातिप्रसक्तिर्दर्शिता

"वस्तुभेदप्रसिद्धस्य शब्दसाम्यादभेदिनः" [ ]

इत्यादिना। तस्मान्नानुमानं तत्साधनायालम्।

नाप्यागमः, नित्यस्यात्र दर्शनेऽनभ्युपगमात्; अभ्युपगमे वा कार्यार्थप्रतिपादकस्य सिद्धे वस्तुन्यव्यापृतेः। नापीश्वरपूर्वकस्य प्रामाण्यम्, इतरेतराश्रयदोषप्रसङ्गात्। अनीश्वरपूर्वकस्यापि संभाव्यमानदोषत्वेन प्रमाणताऽनुपपत्तेः। तस्यान्येश्वरपूर्वकत्वे तस्यापि सिद्धिः कुत इति वक्तव्यम्, तदसिद्धौ न तस्य प्रामाण्यम्, अनेकेश्वरप्रसङ्गदोषश्च। भवतु, को दोषः यत एकस्यापि साधने वयमतीवोत्सुकाः किं पुनर्बहूनामिति चेत्, न कश्चित् प्रमाणाभावं मुक्त्वा। तन्नागमतोऽपि तत्प्रतिपत्तिः। एवं स्वरूपासिद्धौ कथं तस्य कारणता?

अत्राहुः—यदुक्तम् 'न तत्र प्रत्यक्षं प्रमाणम्' तदेवमेव। यदपि 'सर्वप्रकारस्यागमस्य न तत्स्वरूपावेदने व्यापृतिः' तत्रोच्यते-आगमाव्यापारेऽपि तत्स्वरूपसाधकमनुमानं विद्यते। आगमस्यापि सिद्धेऽर्थे लिङ्गदर्शनन्यायेन यथा व्यापृतिस्तथा प्रतिपादयिष्यामः। प्रत्यक्षपूर्वकानुमाननिषेधे सिद्धसाधनम्, सामान्यतोदृष्टानुमानस्य तत्र व्यापाराभ्युपगमात्। नन्वनुमानप्रमाणतायामयं विचारो युक्तारम्भः, तस्यैव तु प्रामाण्यं नानुमन्यन्ते चार्वाका इति, एतच्चानुद्घोष्यम्; अनुमानप्रामाण्यस्य व्यवस्थापितत्वात्।

यत्तूक्तम् 'पृथिव्यादिगतस्य कार्यत्वस्याप्रतिपत्तेर्न तस्मादीश्वरावगमः' तत्र पृथिव्यादीनां बौद्धैः कार्यत्वमभ्युपगतं ते कथमेवं वदेयुः? येऽपि चार्वाकाद्याः पृथिव्यादीनां कार्यत्वं नेच्छन्ति तेषामपि

---

१ पृ० ६९ पं० ९। २ प्रतिग्रहत्वं नार-मां०। ३ "पुरा पोराणाणं दुच्चिण्णाणं दुप्पडिक्कंताणं कडाणं पावाणं कम्माणं" इत्यादि-ज्ञाताधर्मकथासूत्रे पृ० २०४ प्र०, पं० १-विपाकसूत्रे पृ० ३८ द्वि०, पं० १। ४ पृ० ६९ पं० २७। ५-द्भावे वा-मां०, बा०, बा०। ६ प्र० पृ० पं० १७। ७ प्र० पृ० पं० २६। ८ प्र० पृ० पं० २१।

विशिष्टसंस्थानयुक्तानां कथमकार्यता? सर्वं संस्थानवत्, कार्यम्, तच्च पुरुषपूर्वकं दृष्टम्। येऽप्याहुः—"संस्थानशब्दवाच्यत्वं केवलं घटादिभिः समानं पृथिव्यादीनाम् न तत्त्वतोऽर्थः कश्चिद् द्वयोरनुगतः समानो विद्यते"। तेषामपि न केवलमत्रानुगतार्थाभावः किन्तु धूमादावपि पूर्वापरव्यक्तिगतो नैव कश्चिदनुगतोऽर्थः समानोऽस्ति।

अथ तत्र वस्तुदर्शनायातकल्पनानिमित्तमुक्तम्, अत्र तथाभूतस्य प्रतिभासस्याभावान्नानुगतार्थकल्पना। तथाहि-कस्यचिद् घटादेः क्रियमाणस्य विशिष्टां रचनां कर्तृपूर्विकां दृष्ट्वाऽदृष्टकर्तृकस्यापि घट-प्रासादादेस्तस्य रचनाविशेषस्य कर्तृपूर्वकत्वप्रतिपत्तिः, पृथिव्यादेस्तु संस्थानं कदाचिदपि कर्तृपूर्वकं नावगतम्; नापि तादृशं धर्म्यन्तरे दृष्टकर्तृकं इव पटादौ; तत् पृथिव्यादिगतस्य संस्थानस्य वैलक्षण्यात् ततो न ततः कर्तृपूर्वकत्वप्रतिपत्तिः; एवं हेतोरसिद्धत्वेन नैतत् साधनम्, अयुक्तमेतत्; यतो यद्यनवगतसंबन्धान् प्रतिपत्तॄन् अधिकृत्य हेतोरसिद्धत्वमुच्यते तदा धूमादिष्वपि तुल्यम्। अथ गृहीताविनाभावानामपि कार्यत्वदर्शनात् तन्वादिषु ईश्वरादिकृतत्वप्रतिभासानुत्पत्तेरेवमुच्यते, तदसत्; ये हि कार्यत्वादेर्बुद्धिमत्कारणपूर्वकत्वेन गृहीताविनाभावास्ते तस्मादीश्वरादिपूर्वकत्वं तेषामवगच्छन्त्येव। तस्माद् व्युत्पन्नानामस्त्येव पृथिव्यादिसंस्थानवत्त्व-कार्यत्वादेर्हेतोर्धर्मिधर्मताऽवगमः, अव्युत्पन्नानां तु प्रसिद्धानुमाने धूमादावपि नास्ति।

अपि च, भवतु प्रासादादिसंस्थानेभ्यः पृथिव्यादिसंस्थानस्य वैलक्षण्यं तथापि कार्यत्वं शाक्यादिभिः पृथिव्यादीनामिष्यते, कार्यं च कर्तृ-करणादिपूर्वकं दृष्टम्; अतः कार्यत्वाद् बुद्धिमत्कारणपूर्वकत्वानुमानम्। अथ कर्तृपूर्वकस्य कार्यत्वस्य संस्थानवत्त्वस्य च तद्वैलक्षण्यान्न ततः साध्यावगमः। अत एवाधिष्ठातृभावाभावानुवृत्तिमद् यत् संस्थानं तदर्शनात् कर्त्रदर्शिनोऽपि तत्प्रतिपत्तिर्युक्तेत्यस्य दूषणस्य कार्यत्वेऽपि समानत्वात् कथं गमकता? यद्येवमनुमानोच्छेदप्रसङ्गः; धूमादिकमपि यथाविधमग्न्यादिसामग्रीभावाभावानुवृत्तिमत् तथाविधमेव यदि पर्वतोपरि भवेत् स्यात् ततो वह्न्याद्यवगमः। अथाधूमव्यावृत्तं तथाविधमेव धूमादि तर्हि कार्यत्वाद्यपि तथाविधं पृथिव्यादिगतं किं नेष्यते? अथ पृथिव्यादिगतकार्यत्वादिदर्शनात् कर्त्रदर्शिनां तदप्रतिपत्तिः, एवं शिखर्यादिगतवह्न्याद्यदर्शिनां धूमादिभ्योऽपि तदप्रतिपत्तिरस्तु। न चात्र शब्दसामान्यं वस्त्वनुगमो नास्तीति वक्तुं युक्तम्, धूमादावपि शब्दसामान्यस्य वक्तुं शक्यत्वात्। तन्न शाक्यदृष्ट्या कार्यत्वादेरसिद्धता।

नापि चार्वाक-मीमांसकदृष्ट्या, तेषामपि संस्थानवदवश्यं कार्यं घटादिवत् पृथिव्यादि स्वावयवसंयोगैरारब्धमवश्यंतया विश्लेषाद् विनाशमनुभविष्यति; एवं विनाशाद् वा संभावितात् कार्यत्वानुमानम् रचनास्वभावत्वाद् वा। यथोक्तं भाष्यकृता—

"येषामप्यनवगतोत्पत्तीनां भावानां रूपमुपलभ्यते तेषां तन्तुव्यतिषङ्गजनितं रूपं दृष्ट्वा तद्व्यतिषङ्गविमोचनात् तद्विनाशाद् वा विनङ्क्ष्यतीत्यनुमीयते" [ ]

अनेन संस्थानवतोऽनुपलभ्यमानोत्पत्तेः समवाय्यसमवायिकारणविनाशाद् विनाशमाह। तथा, पृथिव्यादेः संस्थानवतोऽदृष्टजन्मनो रूपदर्शनाद् नाशसम्भावना भविष्यति; सम्भावितात्च नाशात् कार्यत्वानुमितौ कर्तृप्रतिपत्तिः। यथोक्तं न्यायविद्भिः—

"तत्त्वदर्शनं प्रत्यक्षतोऽनुमानतो वा" [ ]

कार्यत्व-विनाशित्वयोश्च समव्याप्तिकत्वादेकेनापरस्यानुमानमिष्टम् "तेन यत्राप्युभौ धर्मौ" [श्लो० वा० अनु० श्लो० ९] इत्यत्र। अतो जैमिनीयानां न कार्यत्वादेरसिद्धता।

नापि चार्वाकमतेऽसिद्धत्वम्; तेषां रचनावत्त्वेनावश्यंभाविनी कार्यताप्रतिपत्तिरदृष्टोत्पत्तीनामपि क्षित्यादीनाम्, अन्यथा वेदरचनाया अपि कर्तृदर्शनाभावान्न कार्यता, यतस्तत्राप्येतावच्छक्यं वक्तुम्-न रचनात्वेन वेदरचनायाः कार्यत्वानुमानम्, कर्तृभावाऽभावानुविधायिनी तदर्शनाल्लौकिकेयेव रचना तत्पूर्विकाऽस्तु मा भूद् वैदिकी। अथ तयोर्विशेषानुपलम्भाल्लौकिकीव

१-त्रावस्तु-हा०। २-यातत्कल्प-वा०, बा०, मां०, भां०। ३ इति प-वि०। ४ घटा-मां०। ५-त् यतो वि०। ६-नदय-कां०। ७-क्षतो वाऽनु-वा०, बा०।

वैदिकयपि कर्तृपूर्विका तर्हि प्रासादादिसंस्थानवत् पृथिव्यादिसंस्थानवत्त्वस्यापि तद्रूपताऽस्तु, विशेषानुपलक्षणात्। तन्न हेतोरसिद्धता।

{ मा भूदसिद्धत्वं तथाऽप्यस्मात् साध्यसिद्धिर्न युक्ता, नहि केवलात् पक्षधर्मत्वाद् व्याप्तिशून्यात् साध्यावगमः। ननु किं घटादौ कर्तृ-कर्म-करणपूर्वकत्वेन कार्यत्वादेर्व्याप्त्यनवगमः? अस्त्येवं घटगते कार्यत्वे प्रतिपत्तिस्तथापि न व्याप्तिः, सा हि सकलाक्षेपेण गृह्यते, अत्र तु व्याप्तिग्रहणकाल एव केषाञ्चित् कार्याणामकर्तृपूर्वकाणां कार्यत्वदर्शनान्न सर्वं कार्यं कर्तृपूर्वकम्, यथा वनेषु वनस्पतीनाम्। अथ तत्र न कर्त्रभावनिश्चयः किंतु कर्त्रग्रहणम्, तच्च विद्यमानेऽपि कर्त्तरि भवतीति कथं साध्याभावे हेतोर्दर्शनम्? क्व पुनर्विद्यमानकर्तृकाणां तदप्रतिपत्तिः? यथा घटादीनामनवगतोत्पत्तीनाम्। युक्ता तत्र कर्तुरप्रतिपत्तिः, उत्पादकालानवगमात्; तत्काले च तस्य तत्र सन्निधानम्, अन्यदाऽस्य सन्निधानाभावाद्ग्रहणम्; वनगतेषु च स्थावरेषूपलभ्यमानजन्मसु कर्तृसद्भावे तदवगमोऽवश्यंभावी, यथोपलभ्यमानजन्मनि घटादौ; अत उपलब्धिलक्षणप्राप्तस्य कर्तुस्तेष्वभावनिश्चयात् तत्र व्याप्तिग्रहणकाल एव कार्यत्वादेर्हेतोर्दर्शनान्न कर्तृपूर्वकत्वेन व्याप्तिः।

इतश्च दृष्टहान्यदृष्टपरिकल्पनासम्भवात्-दृष्टानां क्षित्यादीनां कारणत्वत्यागः अदृष्टस्य च कर्तुः कारणत्वकल्पना न युक्तिमती। अथ न क्षित्यादेः कारणत्वनिराकरणं कर्तृकल्पनायामपि, तत्सद्भावेऽपि तस्यापरकारणत्वक्लृप्तेः, तदसत्; यतो यद् यस्यान्वय-व्यतिरेकानुविधायि तत् तस्य कारणम् इतरत् कार्यम्; क्षित्यादीनां त्वन्वय-व्यतिरेकावनुविधत्ते तत्राकृष्टजातं वनस्पत्यादि नापरस्य, कथमतो व्यतिरिक्तं कारणं भवेत्? एवमपि कारणत्वकल्पनायां दोष उक्तः "चैत्रस्य व्रणरोहणे" [ ] इत्यादिना। तस्मात् पक्षधर्मत्वेऽपि व्याप्त्यभावादगमकत्वं हेतोः।

अथ तेषां पक्षेऽन्तर्भावान्न तैर्व्यभिचारः, तदसत्; तात्त्विकं विपक्षत्वं कथमिच्छाकल्पितेन पक्षत्वेनापोद्येत? व्याप्तौ सिद्धायां साध्य-तदभावयोरग्रहणे वादीच्छापरिकल्पितं पक्षत्वं कथ्यते। सपक्ष-विपक्षयोर्हेतोः सदसत्त्वनिश्चयाद् व्याप्तिसिद्धिः। एवमपि साध्याभावे दृष्टस्य हेतोर्व्याप्तिग्रहणकाले व्यभिचाराशङ्कायां निश्चये वा व्यभिचारविषयस्य पक्षेऽन्तर्भावेन गमकत्वकल्पने न कश्चिद्धेतुर्व्यभिचारी भवेत्। तस्मान्नेश्वरसिद्धौ कश्चिद् हेतुरव्यभिचार्यस्ति }।

अत्राहुः-नाकृष्टजातैः स्थावरादिभिर्व्यभिचारः व्याप्त्यभावो वा, साध्याभावे वर्त्तमानो हेतुर्व्यभिचारी उच्यते, तेषु तु कर्त्रग्रहणम् न सकर्तृकत्वाभावनिश्चयः। ननूक्तम् 'उपलब्धिलक्षणप्राप्तत्वे कर्तुरभावनिश्चयस्तत्र युक्तः' नैतद् युक्तम्; उपलब्धिलक्षणप्राप्तताया कर्तुस्तेष्वनभ्युपगमात्। यत्तूक्तम् 'क्षित्याद्यन्वय-व्यतिरेकानुविधानदर्शनात् तेषाम् तद्व्यतिरिक्तस्य कारणत्वकल्पनेऽतिप्रसङ्गदोषः' इति, एतस्यां कल्पनायां धर्माधर्मयोरपि न कारणता भवेत्। न च तयोरकारणतैव, तयोः कारणत्वप्रसाधनात्-नहि किञ्चिज्जगत्यस्ति यत् कस्यचिन्न सुखसाधनम् दुःखसाधनं वा। न च तत्साधनस्यादृष्टनिरपेक्षस्योत्पत्तिः। इयांस्तु विशेषः-शरीरादेः प्रतिनियताऽदृष्टाक्षिप्तत्वं प्रायेण, सर्वोपभोग्यानां तु साधारणाऽदृष्टाक्षिप्तत्वम्। एतत् सर्ववादिभिरभ्युपगमादप्रत्याख्येयम्; युक्तिश्च प्रदर्शितैव। चार्वाकैरप्येतदभ्युपगन्तव्यम्, तान् प्रति पूर्वमेतत्सिद्धौ प्रमाणस्योक्तत्वात्। प्रमाणसिद्धं तु न कस्यचिन्न सिद्धम्। अथादृष्टस्य कार्येणान्वय-व्यतिरेकाननुविधानेऽपि नाकारणता, न तर्हि वक्तव्यं भूम्यादिव्यतिरेकेण स्थावरादिना कार्येणेश्वरस्यान्वय-व्यतिरेकाननुविधानादकारणत्वम्। अथ जगद्वैचित्र्यमदृष्टस्य कारणत्वं विना नोपपद्यते इति तत् कल्प्यते, सर्वान् उत्पत्तिमतः प्रति भूम्यादेः साधारणत्वादतोऽदृष्टाख्यविचित्रकारणकृतं कार्यवैचित्र्यम्; एवमदृष्टस्य कारणत्वकल्पनायामीश्वरस्यापि कारणत्वप्रतिक्षेपो न युक्तः; यथा कारणगतं वैचित्र्यं विना कार्यगतं वैचित्र्यं नोपपद्यते इति तत् परिकल्प्यते तथा चेतनं कर्त्तारं विना कार्यस्वरूपानुपपत्तिरिति किमिति तस्य नाभ्युपगमः? न चाकृष्टजातेषु स्थावरादिषु तस्याग्रहणेन प्रतिक्षेपः, अनुपलब्धिलक्षणप्राप्तत्वाददृष्टवत्। न च सर्वा कारणसामग्युपलब्धिलक्षणप्राप्ता। अत एव दृश्यमानेष्वपि

१-व घट-भां०, वा०, बा०, मां० विना। २-त्वेऽपि प्र-भां०, गु०, मां०। ३-यात् द्द-वा०, बा०। ४-कृतेः भां०, कां०, गु०। ५-"वनवनस्पत्यादीनाम्" वि० टि०। ६-क्षयोश्च हे-भां०, मां०। ७ प्र० पृ० पं० ११। ८ प्र० पृ० पं० १६। ९ पृ० ९३ पं० २।

कारणेषु कारणत्वमप्रत्यक्षम्, कार्येणैव तस्योपलम्भात्। सहकारिसत्ता दृश्यमानस्य कारणता, केषाञ्चित् सहकारिणां दृश्यत्वेऽप्यदृष्टादेः सहकारिणः कार्येणैव प्रतिपत्तिः; एवमीश्वरस्य कारणत्वेऽपि न तत्स्वरूपग्रहणं प्रत्यक्षेणेति स्थितम्। ततोऽनुपलब्धिलक्षणप्राप्तत्वात् कर्तुरुपलभ्यमानजन्मसु स्थावरेषु हेतोर्वृत्तिदर्शनान्न व्याप्त्यभावः यतो निश्चितविपक्षवृत्तिर्हेतुर्व्यभिचारी।

ननु निश्चितविपक्षवृत्तिर्यथा व्यभिचारी तथा सन्दिग्धव्यतिरेकोऽपि, उक्तेषु स्थावरेषु कर्त्रग्रहणं किं कर्त्रभावात्, आहोस्विद् विद्यमानत्वेऽपि तस्याग्रहणमनुपलब्धिलक्षणप्राप्तत्वेन? एवं सन्दिग्धव्यतिरेकत्वे न कश्चिद्धेतुर्गमकः। धूमादेरपि सकलव्यक्त्याक्षेपेण व्याप्त्युपलम्भकाले न सर्वा वह्निव्यक्तयो दृश्याः; तासु चाऽदृश्यासु धूमव्यक्तीनां दृश्यत्वे सन्दिग्धव्यतिरेकाशङ्का न निवर्त्तते–यत्र वह्नेरदर्शने धूमदर्शनं तत्र किं वह्नेरदर्शनमभावात्, आहोस्विद् अनुपलब्धिलक्षणप्राप्तत्वात् इति न निश्चयः। अतो धूमोऽपि सन्दिग्धव्यतिरेकत्वान्न गमकः।

अथ धूमः कार्यं हुतभुजः, तस्य तदभावे स्वरूपानुपपत्तेरदृष्टत्वेऽप्यनलस्य सद्भावकल्पना; ननु तत् कार्यमत्रोपलभ्यमानं किमिति कारणमन्तरेण कल्प्यते? अथ दृष्टशक्तेः कारणस्य कल्पनाऽस्तु मा भूद् बुद्धिमतः, वह्न्यादेर्धूमादीन् प्रति कथं दृष्टशक्तिता? प्रत्यक्षानुपलम्भाभ्यामिति चेत्, बुद्धिमतोऽपि ताभ्यां कारणत्वकृतौ वह्न्यादिभिस्तुल्यता; यथा वह्न्यादिसामग्र्या धूमादिर्जन्यमानो दृष्टः स तामन्तरेण कदाचिदपि न भवति–स्वरूपहानिप्रसङ्गात्–तद्वत् सर्वमुत्पत्तिमत् कर्तृ–कर्म–करणपूर्वकं दृष्टम्, तस्य सकृदपि तथादर्शनात् तज्जन्यतास्वभावः, तस्यैवंस्वभावनिश्चितावन्यतमाभावेऽपि कथं भावः?

किंच, अनुपलभ्यमानकर्तृकेषु स्थावरेषु कर्तुरनुपलम्भः शरीराद्यभावात् नत्वसत्त्वात्, यत्र शरीरस्य कर्तृता तत्र कुलालादेः प्रत्यक्षेणैवोपलम्भः, अत्र तु चैतन्यमात्रेणोपादानाद्यधिष्ठानात् कथं प्रत्यक्षव्यापृतिः? नाप्येतद् वक्तव्यम् शरीराद्यभावात् तर्हि कर्तृताऽपि न युक्ता, कार्यस्य शरीरेण सह व्यभिचारदर्शनात्—यथा स्वशरीरस्य प्रवृत्ति-निवृत्ती सर्वश्चेतनः करोति, ते च कार्यभूते; न च शरीरान्तरेण शरीरप्रवृत्ति—निवृत्तिलक्षणं कार्यं चेतनः करोति तेन तस्य व्यभिचारः। अथ शरीरेण एव दृष्टत्वात् करोतु नान्यत्र, तन्न; यतः कार्यं शरीरेण विना करोतीति नः साध्यम्; तत् स्वशरीरगतमन्यशरीरगतं वेति नानेन किञ्चित्। एतेनैतदपि पराकृतं यदाहुरेके—

"अचेतनः कथं भावस्तदिच्छामनुवर्त्तते" [ ]

अचेतनस्य शरीरादेरात्मेच्छानुवर्त्तित्वदर्शनात्। न चाचेतनस्य तदिच्छाननुवर्त्तिनोऽपि प्रयत्नप्रेर्यत्वं परिहार इति वक्तव्यम्, यत ईश्वरस्यापि प्रयत्नसद्भावे न काचित् क्षतिः। न च शरीराभावात् कथं प्रयत्न इति वक्तुं युक्तम्, शरीरान्तराऽभावेऽपि शरीरस्य प्रयत्नप्रेर्यत्वदर्शनात्। तत् कर्तुः शरीराभावादकृष्टोत्पत्तिषु स्थावरेष्वग्रहणम्, न तत्रादर्शनेन हेतोर्व्यभिचारः। येऽपि "प्रत्यक्षाऽनुपलम्भसाधनं कार्यकारणभावम्" आहुस्तेषामपि कस्यचित् कार्यकारणभावस्य तत्साधनत्वे यथेन्द्रियाणाम् अदृष्टस्य च तौ विना कारणत्वंसिद्धिस्तथेश्वरस्यापि। अतो न व्याप्त्यभावः।

अत एव न सत्प्रतिपक्षताऽपि, नैकस्मिन् साध्यान्विते हेतौ स्थिते द्वितीयस्य तथाविधस्य तत्रावकाशः; वस्तुनो द्वैरूप्यासंभवात्।

नापि बाधः, अबुद्धिमत्कारणपूर्वकत्वस्य प्रमाणेनाग्रहणात्; साध्याभावे हेतोरभावः स्वसाध्यव्याप्तत्वादेव सिद्धः।

नापि धर्म्यसिद्धता, कार्यकारणसङ्घातस्य पृथिव्यादेर्भूतग्रामस्य च प्रमाणेन सिद्धत्वात्। तदाश्रयत्वेन हेतोर्यथा प्रमाणेनोपलम्भस्तथा पूर्वं प्रदर्शितम्। अतोऽस्मादीश्वरावगमे न तत्सिद्धौ प्रमाणाभावः।

नापि हेतोर्विशेषविरुद्धता, तद्विरुद्धत्वे हेतोर्विशेषणेऽभ्युपगम्यमाने न कश्चिद्धेतुरविरुद्धो भवेत्, प्रसिद्धानुमानेऽपि विशेषविरुद्धादीनां सुलभत्वात्। यथाऽयं धूमो दहनं साधयति तथैतद्देशावच्छिन्नवह्न्यभावमपि साधयति। नहि पूर्वधूमस्यैतद्देशावच्छिन्नेन वह्निना व्याप्तिः। एवं कालाद्यवच्छेदेन हेतोर्विरुद्धता वक्तव्या। अथ देश-कालादीन् विहाय वह्निमात्रेण हेतोर्व्याप्तेर्न

१ सप्रति–मां०, बा०, वा०। २ पृ० ९४ पं० १५।

विरुद्धता तर्हि तद्वत् कार्यमात्रस्य बुद्धिमत्कारणपूर्वकत्वेन व्याप्तेर्यद्यपि दृष्टान्तेऽनीश्वरोऽसर्वज्ञः कृत्रिमज्ञानसम्बन्धी सशरीरः क्षित्याद्युपविष्टः कर्त्ता तथापि पूर्वोक्तविशेषणानां धर्मिविशेषरूपाणां व्यभिचारात् तद्विपर्ययसाधकत्वेऽपि न विरुद्धता। विरुद्धो हि हेतुः साध्यविपर्ययकारित्वाद् भवति। न चैतेषां साध्यता, बुद्धिमत्कारणपूर्वकत्वमात्रस्यास्माद्धेतोः साध्यत्वेनेष्टत्वात्। यथा च विशेषविरुद्धादीनामदूषणत्वं तथा

"सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः" [न्यायद० अ० १, आ० २, सू० ६]

इत्यत्र सूत्रे निर्णीतम्।

इतश्चैतददूषणम्—पूर्वस्माद्धेतोः स्वसाध्यसिद्धावुत्तरेण पूर्वसिद्धस्यैव साध्यस्य किं विशेषः साध्यते, उत पूर्वहेतोः स्वसाध्यसिद्धिप्रतिबन्धः क्रियते? न तावत् पूर्वो विकल्पः, यदि नाम तत्रापरेण हेतुना विशेषाधानं कृतं किं तावता पूर्वस्य हेतोः साध्यसिद्धिविघातः? यथा कृतकत्वेन शब्दस्यानित्यत्वसिद्धौ हेत्वन्तरेण गुणत्वसिद्धावपि न पूर्वस्य क्षतिस्तद्वदत्रापि। अथोत्तरो विकल्पस्तथापि स्वसाध्यसिद्धिप्रतिबन्धो व्याप्त्यभावप्रदर्शनेन क्रियते; व्याप्त्यभावश्च हेतुरूपाणामन्यतमाभावेन। न च धर्मिविशेषविपर्ययोद्भावनेन कस्यचिदपि रूपस्याभावः कथ्यते। न च हेतुरूपाभावासिद्धावगमकत्वम्। तन्न विशेषविरुद्धता।

विशेषास्तु धर्मिणः स्वरूपसिद्धावुत्तरकालं प्रमाणान्तरप्रतिपाद्या न तु पूर्वहेतुबलादभ्युपगम्यन्ते। तच्च प्रमाणान्तरमागमः पूर्वहेतोर्हेत्वन्तरं च। "तच्चान्वयव्यतिरेकिपूर्वकंकेवलव्यतिरेकिसंज्ञम्। यथा गन्धाद्युपलब्ध्या तत्साधनकरणमात्रप्रसिद्धौ प्रसक्तप्रतिषेधे करणविशेषसिद्धिः केवलव्यतिरेकिनिमित्ता तथेहापि कार्यत्वात् बुद्धिमत्कारणमात्रप्रसिद्धौ प्रसक्तप्रतिषेधात् कारणविशेषसिद्धिः केवलव्यतिरेकिनिमित्ता। तथाहि—कार्यत्वाद् बुद्धिमत्कारणमात्रसिद्धौ प्रसक्तानां कृत्रिमज्ञान-शरीरसंबद्धत्वादीनां धर्माणां प्रमाणान्तरेण बाधोपपत्तौ विशिष्टबुद्धिमत्कारणसिद्धिर्व्यतिरेकिबलात्" इति केचित्।

अन्ये मन्यन्ते–"यत्रान्वयव्यतिरेकिणो हेतोर्न विशेषसिद्धिस्तत्र तत्पूर्वकात् केवलव्यतिरेकिणो विशेषसिद्धिर्भवतु, यथा घ्राणादिषु, अत्र तु पूर्वस्माद्धेतोर्विशेषसिद्धौ न हेत्वन्तरपरिकल्पना। यथा धूमस्य वह्निनाऽन्वय-व्यतिरेकसिद्धौ 'अत्र देशे वह्निः' इति पक्षधर्मत्वबलात् प्रतिपत्तिर्नान्वयाद् व्यतिरेकाद्वा, तयोर्ह्येतद्देशावच्छिन्नेन वह्निनाऽसंभवात्—यद्यपि व्याप्तिकाले सकलाक्षेपेण तद्देशस्याप्याक्षेपः अन्यथाऽत्र व्याप्तेरसंभवात्, तथापि व्याप्तिग्रहणवेलायां सामान्यरूपतया तदाक्षेपः न विशेषरूपेणेति विशेषावगमो नान्वय-व्यतिरेकनिमित्तः, अपि तु पक्षधर्मत्वकृतः। अत एव "प्रत्युत्पन्नकारणजन्यां स्मृतिमनुमानम्" आहुः। प्रत्युत्पन्नं च कारणं पक्षधर्मत्वमेव—तथा कार्यत्वाद्धेर्बुद्धिमत्कारणमात्रेण व्याप्तिसिद्धावपि कारणविशेषप्रतिपत्तिः पक्षधर्मत्वसामर्थ्यात्। य इत्थंभूतस्य पृथिव्यादेः कर्त्ता नियमेनासावकृत्रिमज्ञानसंबन्धी शरीररहितः सर्वज्ञ एकः" इति, एवं यदा पक्षधर्मत्वबलाद् विशेषसिद्धिस्तदा न विशेषविरुद्धादीनामवकाशः।

"अन्वयसामर्थ्यादपि विशेषसिद्धिम्" अन्ये मन्यन्ते। तथा, धूममात्रस्य वह्निमात्रेण व्याप्तिः एवं धूमविशेषस्य वह्निविशेषेण इति धूमविशेषप्रतिपत्तौ न वह्निमात्रेणान्वयानुस्मृतिः किन्तु वह्निविशेषेण, एवंविशिष्टकार्यत्वदर्शनान्न कारणमात्रानुस्मृतिः किन्तु तथाविधकार्यविशेषजनककारणविशेषानुस्मृतिः। तदनुस्मृतावत्रान्वयसामर्थ्यादेव कारणविशेषप्रतिपत्तिरिति न विशेषविरुद्धावकाशः।

एतेषां पक्षाणां युक्तायुक्तत्वं सूरयो विचारयिष्यन्तीति नास्माकमत्र निर्बन्धः; सर्वथा विशेषविरुद्धस्यादूषणत्वमस्माभिः प्रतिपाद्यते तद्विरुद्धलक्षणपर्यालोचनया। प्रसक्तानां च विशेषाणां प्रमाणान्तरबाधया, अन्वयव्यतिरेकिमूलकेवलव्यतिरेकिबलाद्वा, पक्षधर्मत्वसामर्थ्येन वा, कार्यविशेषस्य कारणविशेषान्वितत्वेन वा नात्र प्रयत्यते; सर्वथा प्रस्तुतहेतौ न व्याप्त्यसिद्धिः।

१–त्तात्। मां०। २ यथा मां० ब०। ३ "त्रयाणां पूर्वोक्तानाम्" वि० टि०। ४–नां विशे–भां०, गु०, वा०, बा०।

प्रसक्तानां विशेषाणां प्रमाणान्तरबाधया विशेषविरुद्धताऽनवकाश इत्युक्तं तत्र कतमस्य प्रसक्तस्य विशेषस्य केन प्रमाणेन निराकृतिः ? शरीरसंबन्धस्य तावद्व्याप्यभावेन, शरीरान्तररहितस्याप्यात्मनः स्वशरीरधारण-प्रेरणक्रियासु यथा[1]। अथात्मनः प्रयत्नवत्त्वाद् धारणादिक्रियासु शरीराद्याधारासु कर्तृत्वं युक्तम् नेश्वरस्य, तद्रहितत्वात्; तथा च भवतां मुख्यं कर्तृलक्षणम्—

"ज्ञान-चिकीर्षा-प्रयत्नानां समवायः कर्तृता" [ ] इति।

केनेश्वरस्य तद्रहितत्वात् प्रयत्नप्रतिषेधः कृतः ? आत्म-मनःसंयोगजन्यत्वात् प्रयत्नस्य ईश्वरस्य तदसंभवात् कारणाभावात् तन्निषेधः। बुद्धिस्तर्हीश्वरे कथं तस्या अपि मनःसंयोगजन्यतैव ? साऽपि मा भूत् का नः क्षतिः ? ननु तदसत्तैव न त्वन्या काचित्। साऽपि भवतु, तदभावे कस्य विशेषः शरीरादिसंयोगलक्षणः साध्यते ? अत एवान्यैरुक्तम्—

"नातीन्द्रियार्थप्रतिषेधो विशेषस्य कस्यचित् साधनेन निराकरणेन वा कार्यः-तदभावे विशेषसाधनस्य तन्निराकरणहेतोर्वाऽऽश्रयासिद्धत्वात्-किन्त्वतीन्द्रियमर्थमभ्युपगच्छंस्तत्सिद्धौ प्रमाणं प्रष्टव्यः। स चेत् तत्सिद्धौ प्रयोजकं हेतुं दर्शयति 'ओम्' इति कृत्वाऽसौ प्रतिपत्तव्यः। अथ न दर्शयति प्रमाणाभावादेवासौ नास्ति, न तु विशेषाभावात्" [ ] तस्माद् ज्ञान-चिकीर्षा-प्रयत्नानां समवायोऽस्तीश्वरे, ते तु ज्ञानादयोऽस्मदादिज्ञानादिभ्यो विलक्षणाः, वैलक्षण्यं च नित्यत्वादिधर्मयोगात्। तन्नेश्वरशरीरस्य कर्तृविशेषस्य व्याप्यभावात् सिद्धिः।

नाप्यसर्वज्ञत्वं विशेषः कुलालादिषु दृष्टस्तत्र साध्यते, तत्सिद्धावपि विशेषविरुद्धस्य व्याप्यभाव एव; न ह्यसर्वविदा कर्त्रा कुलालादिना किञ्चित् कार्यं क्रियते। ननु कुलालादेः सर्ववित्वे नेदानीं कश्चिदसर्ववित्, एवमेव—यद् यः करोति स तस्योपादानादिकारणकलापम् प्रयोजनं च जानाति; अन्यथा तत्क्रियाऽयोगात्। सर्वज्ञत्वं च प्रकृतकार्यतन्निमित्तापेक्षम्, अतः कुलालादिर्यथा कर्त्ता स्वकार्यस्य सर्वं जानात्युपादानादि एवमीश्वरोऽपि सर्वकर्त्ता सर्वस्य करणप्रयोजनम् विवादविषयस्य सर्वस्योपादानकारणादि च कर्तृत्वादेव जानाति; अतः कथमसावसर्ववित् ?

अन्ये त्वाहुः—"क्षेत्रज्ञानां नियतार्थविषयग्रहणं सर्वविदधिष्ठितानाम्, यथा प्रतिनियतशब्दादिविषयग्राहकाणामिन्द्रियाणामनियतविषयसर्वविदधिष्ठितानां जीवच्छरीरे। तथा च इन्द्रियवृत्युच्छेदलक्षणं केचिद् मरणमाहुश्चेतनानधिष्ठितानाम्। अस्ति च क्षेत्रज्ञानां प्रतिनियतविषयग्रहणम् तेनाप्यनियतविषयसर्वविदधिष्ठितेन भाव्यम्। योऽसौ क्षेत्रज्ञाधिष्ठायकोऽनियतविषयः स सर्वविदीश्वरः। नन्वेवं तस्यैव सकलक्षेत्रेष्वधिष्ठायकत्वात् किमन्तर्गडुस्थानीयैः क्षेत्रज्ञैः कृत्यम् ? न किञ्चित् प्रमाणसिद्धतां मुक्त्वा। नन्वेवमनिष्ठा—यथेन्द्रियाधिष्ठायकः क्षेत्रज्ञस्तदधिष्ठायकश्चेश्वरः-एवमन्योऽपि तदधिष्ठायकोऽस्तु, भवत्वनिष्ठा यदि तत्साधकं प्रमाणं किञ्चिदस्ति; न त्वनिष्ठासाधकं किञ्चित् प्रमाणमुत्पश्यामः तावत एवानुमानसिद्धत्वात्।

आगमोऽप्यस्मिन् वस्तुनि विद्यते—तथा च भगवान् व्यासः—

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" ॥ [भग० गी० अ० १५, श्लो० १६-१७] इति।

तथा श्रुतिश्च तत्प्रतिपादिका उपलभ्यते—

"विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एक आस्ते" [श्वेताश्वत० उ० अ० ३, ३] इत्यादि।

१—**या नु यथा** वा०, बा०। २ अत्र उत्तरपक्षपाठानुरोधेन **'यथा व्यापारस्तथा ईश्वरस्यापि क्षित्यादिकार्ये'** इति अधिकं योज्यम्। ३ "नैयायिकः समाधत्ते—प्रागुक्तप्रकारेण बुद्ध्यादेर्निषेधे तस्येश्वरस्य असत्तैव क्षतिर्नान्या काचित्" भां० मां० टि०। ४ "परः पुनः प्राह—**साऽपि भवतु** इति" मां० टि०। ५ **कारणप्र**—वा०, बा०।

न च स्वरूपप्रतिपादकानामप्रामाण्यम्, प्रमाणजनकत्वस्य सद्भावात्। तथाहि—प्रमाजनकत्वेन प्रमाणस्य प्रामाण्यं न प्रवृत्तिजनकत्वेन तच्चेहास्त्येव। प्रवृत्ति-निवृत्ती तु पुरुषस्य सुख-दुःखसाधनत्वाध्यवसाये समर्थस्यार्थित्वाद् भवत इति। अथ विधावङ्गत्वादमीषां प्रामाण्यं न स्वरूपार्थत्वादिति चेत्, तदसत्; स्वार्थप्रतिपादकत्वेन विध्यङ्गत्वात्। तथाहि—स्तुतेः स्वार्थप्रतिपादकत्वेन प्रवर्त्तकत्वम्, निन्दायास्तु निवर्त्तकत्वमिति। अन्यथा हि तदर्थापरिज्ञाने विहित-प्रतिषिद्धेष्वविशेषेण प्रवृत्तिर्निवृत्तिर्वा स्यात्। तथा विधिवाक्यस्यापि स्वार्थप्रतिपादनद्वारेणैव पुरुषप्रेरकत्वं दृष्टम् एवं स्वरूपपरेष्वपि वाक्येषु स्यात्, वाक्यस्वरूपताया अविशेषात् विशेषहेतोश्चाभावादिति। तथा, स्वरूपार्थानामप्रामाण्ये "मेध्या आपः, दर्भाः पवित्रम्, अमेध्यमशुचि" इत्येवंस्वरूपापरिज्ञाने विध्यङ्गतायामप्यविशेषेण प्रवृत्ति-निवृत्तिप्रसङ्गः, न चैतदस्ति; मेध्येष्वेव प्रवर्त्तते अमेध्येषु च निवर्त्तत इत्युपलम्भात्। तदेवं स्वरूपार्थेभ्यो वाक्येभ्योऽर्थस्वरूपावबोधे सति इष्टे प्रवृत्तिदर्शनात् अनिष्टे च निवृत्तेरिति ज्ञायते—स्वरूपार्थानां प्रमाजनकत्वेन प्रवृत्तौ निवृत्तौ वा विधिसहकारित्वमिति, अपरिज्ञानात्तु प्रवृत्तावतिप्रसङ्गः। अथ स्वरूपार्थानां प्रामाण्ये "ग्रावाणः प्लवन्ते" इत्येवमादीनामपि यथार्थता स्यात्, न; मुख्ये बाधकोपपत्तेः। यत्र हि मुख्ये बाधकं प्रमाणमस्ति तत्रोपचारकल्पना, तदभावे तु प्रामाण्यमेव। न चेश्वरसद्भावप्रतिपादनेषु किञ्चिदस्ति बाधकमिति स्वरूपे प्रामाण्यमभ्युपगन्तव्यमित्यागमादपि सिद्धप्रामाण्यात् तदवगमः। ईश्वरस्य च सत्तामात्रेण स्वविषयग्रहणप्रवृत्तानां क्षेत्रज्ञानामधिष्ठायकता यथा स्फटिकादीनामुपधानाकारग्रहणप्रवृत्तानां सवितृप्रकाशः। यथा तेषां सावित्रं प्रकाशं विना नोपधानाकारग्रहणसामर्थ्यं तथेश्वरं विना क्षेत्रविदां न स्वविषयग्रहणसामर्थ्यमित्यस्ति भगवानीश्वरः सर्ववित्" । [ ]

इतश्चासौ सर्ववित्—ज्ञानस्य सन्निहितसदर्थप्रकाशकत्वं नाम स्वभावः, तस्यान्यथाभावः कुतश्चिद्दोषसद्भावात्। एतत् तावद् रूपं चक्षुराद्याश्रयाणां ज्ञानानाम्। यत् पुनश्चक्षुरनाश्रितं न च रागादिमलावृतं तस्य विषयप्रकाशनस्वभावस्य विषयेषु किमिति प्रकाशनसामर्थ्यविघातः यथा दीपादेरपवरकान्तर्गतस्य ? ननु रागादेरावरणस्य कथं तत्राभावोऽवगतः तत्प्रतिपादकप्रमाणाभावात् ? प्रमाणस्याभावे संशयोऽस्तु रागादीनाम् न त्वभावः। विपर्यासकारणा रागादयः, एषां कारणाभावे कथं तत्र भावः ? विपर्यासश्चाधर्मनिमित्तः, न च भगवत्यधर्मः, तत्सद्भावे वा इत्थंविधस्यास्मदादिभिश्चिन्तयितुमप्यशक्यस्य कार्यस्य कथं तस्मादुत्पादः अनेकादृष्टकल्पनाप्रसङ्गात् ? किञ्च, रागादय इष्टानिष्टसाधनेषु विषयेषूपजायमाना दृष्टाः। न च भगवतः कश्चिदिष्टानिष्टसाधनो विषयः, अवाप्तकामत्वात्।

या तु प्रवृत्तिः शरीरादिसर्गे सा कैश्चित् क्रीडार्थमुक्ता; सा चावाप्तप्रयोजनानामेव भवति नत्वन्येषाम्। अतो यदुक्तं वार्त्तिककृता—

"क्रीडा हि रतिमविन्दताम्; न च रत्यर्थी भगवान्, दुःखाभावात्" [न्यायवा० पृ० ४६२] तत् प्रतिक्षिप्तम्। न हि दुःखिताः क्रीडासु प्रवर्त्तन्ते, तस्मात् क्रीडार्था प्रवृत्तिः।

अन्ये मन्यन्ते—"कारुण्याद् भगवतः प्रवृत्तिः। नन्वेवं केवलः सुखरूपः प्राणिसर्गोऽस्तु, नैवम्; निरपेक्षस्य कर्तृत्वेऽयं दोषः, सापेक्षत्वे तु कथमेकरूपः सर्गः ? यस्य यथाविधः कर्माशयः पुण्यरूपोऽपुण्यरूपो वा तस्य तथाविधफलोपभोगाय तत्साधनान् शरीरादींस्तथाविधांस्तत्सापेक्षः सृजति" [ ] इति। "न चेश्वरत्वव्याघातः सापेक्षत्वेऽपि, यथा सवितृप्रकाशस्य स्फटिकाद्यपेक्षस्य, यथा वा करणाधिष्ठायकस्य क्षेत्रज्ञस्य, सापेक्षत्वेऽपि तेषु तस्येश्वरता ह्यदत्रापि (तद्वदत्रापि) नेश्वरताविषं (विसं) घातः" [ ] इति केचित्।

अन्ये मन्यन्ते—"यथा प्रभुः सेवाभेदानुरोधेन फलभेदप्रदो नाप्रभुस्तथेश्वरोऽपि कर्माशयापेक्षः फलं जनयतीति 'अनीश्वरः' इति न युज्यते वक्तुम्" [ ]

भाष्यकारः कारुण्यप्रेरितस्य प्रवृत्तिमाह। तन्निमित्तायामपि प्रवृत्तौ न वार्त्तिककारीयं

---

१ **प्रमाणजन**—वा०, बा० विना। २—**त्रविदो न** भां०, कां०, गु०। ३ **तस्येश्वरताऽविघात इति के**—वि०। **तस्येश्वरताविघात इति के**—सर्वत्र अन्यत्र। **तस्य नेश्वरत्वविघात इति के**—मां० ब०। ४ वा०, बा० विना नान्यत्र। ५ अत्र न्यायद० अ० ४, आ० १, सू० २१ संबन्धि भाष्यं द्रष्टव्यम्।

दूषणम्—"संसृजेत् शुभमेवैकमनुकम्पाप्रयोजितः" [श्लो० वा० सू० ५, संबन्धा० श्लो० ५२] इत्येवमादि, यतः कर्माशयानां कुशलाऽकुशलरूपाणां फलोपभोगं विना न क्षय इति भगवान-वगच्छंस्तदुपभोगाय प्राणिसर्गं करोति। उपभोगः कर्मफलस्य शरीरादिकृतः, कस्यचित्तु अशुभस्य कर्मणः प्रायश्चित्तात् प्रक्षयः। तत्रापि स्वल्पेन दुःखोपभोगेन दीर्घकालदुःखप्रदं कर्म क्षीयते, न तु फलमदत्त्वा कर्मक्षयः। येषामपि मतं सम्यग्ज्ञानाद् विपर्यासनिवृत्तौ तज्जन्यक्लेशक्षये कर्माशयानां सद्भावेऽपि सहकार्यभावान्न शरीराद्याक्षेपकता, तत्रापि कुशलं कर्म समाधि वाऽन्तरेण न तत्त्वज्ञानोत्पत्तिः; तयोस्तु संचये प्रवृत्तस्य यम—नियमानुष्ठानेऽनेकविधदुःखोत्पत्तिः, अतः कथं केवलसुखिरूपः प्राणिसर्गः? नारक—तिर्यगादिसर्गोऽपि अकृतप्रायश्चित्तानां तत्रत्यदुःखानुभवे पुनर्विशिष्टस्थानावाप्तावभ्युदयहेतुरिति सिद्धं दुःखिप्राणिसृष्टावपि करुणया प्रवर्त्तनम्। तन्नासर्वज्ञत्वं विशेषः।

नापि कृत्रिमज्ञानसंबन्धित्वम्, तज्ज्ञानस्य प्रत्यर्थनियमाभावात्। यद् ज्ञानमनित्यं तत् शरीरादिसापेक्षं प्रत्यर्थनियतम् तज्ज्ञानस्य तु शरीराद्यभावे कुतः प्रत्यर्थनियतता? भवतु तज्ज्ञानं प्रतिनियतविषयम् न तस्य प्रतिनियतविषयत्वेऽस्माकं पक्षक्षतिः। कथं न क्षतिः? तस्य तथाविधत्वे युगपत् स्थावरानुत्पादप्रसङ्गः, तदनुत्पादे च कर्तृत्वासिद्धिः, तदसिद्धौ कस्य कृत्रिमज्ञानसंबन्धितविशेषः? अथ युगपत्कार्यान्यथानुपपत्त्या प्रत्यर्थनियतामनेकां बुद्धिमीश्वरे प्रतिपद्येत तत्रापि सन्तानेन वा तथाभूता बुद्धयः, युगपद्वा भवेयुः? प्राच्ये विकल्पे पुनरपि युगपत्कार्यानुत्पादप्रसङ्गः। युगपदुत्पत्तौ वा बुद्धीनां शरीरादियोगस्तस्यैषितव्यः, स च पूर्वं प्रतिक्षिप्तः। अथ कार्यस्य बहुत्व-महत्त्वाभ्यां बहवो बुद्धिमन्तः कर्त्तारो भवन्तु, न त्वेकः सर्वज्ञः सर्वशक्तियुक्तः; नन्वेतस्मिन्नपि पक्षे ईश्वरानेकत्वप्रसङ्गः, भवतु, को दोषः? व्याहतकामानां स्वतन्त्राणामेकस्मिन्नर्थेऽप्रवृत्तिः। अथ तन्मध्येऽन्येषामेकायत्तता तदा स एवेश्वरः, अन्ये पुनस्तदधीना अनीश्वराः। अथ स्थपत्यादीनां महाप्रासादादिकरणे यथैकमत्यं तद्वदत्रापि, नैतदेवम्; तत्र कस्यचिदभिप्रायेण नियमितानामैकमत्यम्; न त्वत्र बहूनां नियामकः कश्चिदस्ति। सद्भावे वा स एवेश्वरः। एवं यस्य यस्य विशेषस्य साधनाय वा निराकृतये वा प्रमाणमुच्यते तस्य तस्य पूर्वोक्तेन न्यायेन निराकरणं कर्त्तव्यम्। तन्न विशेषविरुद्धता ईश्वरसाधकस्य।

प्रसङ्ग-विपर्ययोरप्यनुपपत्तिः। प्रसङ्गस्य व्याप्यभावात्, तन्मूलत्वात् तद्विपर्ययस्य; तथेष्टविघातकृतश्च। यच्च नित्यत्वादकर्तृकत्वमुच्यते शाक्यैस्तदपि क्षणभङ्गभङ्गे प्रतिक्षिप्तम्। यदपि व्यापारं विना न कर्तृत्वं तदपि ज्ञान-चिकीर्षा-प्रयत्नलक्षणस्य व्यापारस्योक्तत्वान्निराकृतम्।

वार्त्तिककारेणापरं प्रमाणद्वयमुपन्यस्तं तत्सिद्धये—

"महाभूतादिव्यक्तं चेतनाधिष्ठितं प्राणिनां सुख-दुःखनिमित्तम्, रूपादिमत्त्वात्, तुर्यादिवत्। तथा, पृथिव्यादीनि महाभूतानि बुद्धिमत्कारणाधिष्ठितानि स्वासु धारणाद्यासु क्रियासु प्रवर्त्तन्ते, अनित्यत्वात्, वास्यादिवत्" [न्यायवा० पृ० ४६७] इति।

अविद्धकर्णस्तु तत्सिद्धये इदं प्रमाणद्वयमाह—

"द्वीन्द्रियग्राह्याग्राह्यं विमत्यधिकरणभावापन्नं बुद्धिमत्कारणपूर्वकम्, स्वारम्भकावयवसन्निवेशविशिष्टत्वात्, घटादिवत्; वैधर्म्येण परमाणवः" [ ] इति। तत्र द्वाभ्यां दर्शन-स्पर्शनेन्द्रियाभ्यां ग्राह्यं महद्-अनेकद्रव्यवत्त्व-रूपाद्युपलब्धिकारणोपेतं पृथिव्युदकज्वलनसंज्ञकं त्रिविधं द्रव्यं द्वीन्द्रियग्राह्यम्। अग्राह्यं वाय्वादि, यस्माद् महत्त्वमनेकद्रव्यवत्त्वं रूपसमवायादिश्चोपलब्धिकारणमिष्यते, तच्च वाय्वादौ नास्ति। यथोक्तम्—

"महत्यनेकद्रव्यवत्त्वाद् रूपाच्चोपलब्धिः" [वैशेषिकद० अ० ४-१-६]

"रूपसंस्काराभावाद् वायावनुपलब्धिः" [वैशेषिकद० अ० ४-१-७] रूपसंस्कारो रूपसमवायः, द्व्यणुकादीनां त्वनुपलब्धिरमहत्त्वादिति। अन्ये तु "वायोरपि स्पर्शनेन्द्रिय-

१ पृ० ९८ पं० २। २-**घातकृतकृतश्च** भां०। ३-**णभङ्गे प्र**-भां०, गु०, वा०। ४ अत्र दर्शितम् अविद्धकर्णोक्तं प्रमाणद्वयं तत्त्वसंग्रहेऽपि (पृ० ४१ श्लो० ४७-४८) ईश्वरपरीक्षाप्रकरणे समायातम्। ५-**ग्राह्यविम**-भां०।

प्रत्यक्षग्राह्यत्वम्" इच्छन्ति। द्वीन्द्रियग्राह्यत्वापेक्षया तु रूपसमवायाभावादनुपलब्धिरित्युक्तम्। तत्र सामान्येन द्वीन्द्रियग्राह्याग्राह्यस्य बुद्धिमत्कारणपूर्वकत्वसाधने सिद्धसाध्यतादोषः, घटादिषु उभयसिद्धेर्विवादाभावात्; अभ्युपेतबाधा च, अण्वाकाशादीनां तथाऽनभ्युपगमात्, तेषां च नित्यत्वात् प्रत्यक्षादिबाधा। अतस्तदर्थं विमत्यधिकरणभावापन्नग्रहणम्। विविधा मतिर्विमतिर्विप्रतिपत्तिरिति यावत्, तस्या अधिकरणभावापन्नं विवादास्पदीभूतमित्यर्थः। एवं च सति शरीरेन्द्रियभुवनादय एवात्र पक्षीकृता इति नाण्वादिप्रसङ्गः। कारणमात्रपूर्वकत्वेऽपि साध्ये सिद्धसाध्यता मा भूदिति बुद्धिमत्कारणग्रहणम्। साङ्ख्यं प्रति मतुबर्थानुपपत्तेर्न सिद्धसाध्यता अव्यतिरिक्ता हि बुद्धिः प्रधानात् साङ्ख्यैरुच्यते, न च तेनैव तदेव तद्वद् भवति। स्वारम्भकाणामवयवानां सन्निवेशः-प्रचयात्मकः संयोगः-तेन विशिष्टं व्यवच्छिन्नं तद्भावस्तस्मात्। अवयवसन्निवेशविशिष्टत्वं गोत्वादिभिर्व्यभिचारीत्यतः स्वारम्भकग्रहणम्। गोत्वादीनि तु द्रव्यारम्भकावयवसन्निवेशेन विशिष्यन्ते न तु स्वारम्भकावयवसन्निवेशेनेति। तेन योऽसौ बुद्धिमान् स ईश्वर इत्येकम्। द्वितीयं तु तनु-भुवन-करणोपादानानि [2]चेतनाचेतनानि चेतनाधिष्ठितानि स्वकार्यमारभन्त इति प्रतिजानीमहे, रूपादिमत्त्वात्, यद् यद् रूपादिमत् तत् तत् चेतनाधिष्ठितं स्वकार्यमारभते, यथा तन्त्वादि, रूपादिमच्च तनु-भुवन-करणादिकारणम्, तस्माच्चेतनाधिष्ठितं स्वकार्यमारभते। योऽसौ चेतनस्तनु-भुवन-करणोपादानादेरधिष्ठाता स भगवानीश्वर इति।

उद्द्योतकरस्तु प्रमाणयति—

"भुवनहेतवः प्रधान-परमाण्व-दृष्टाः स्वकार्योत्पत्तावतिशयबुद्धिमन्तमधिष्ठातारमपेक्षन्ते; स्थित्वा प्रवृत्तेः, तन्तु-तुर्यादिवत्" [न्यायवा० पृ० ४५७] इति।

प्रशस्तमतिस्त्वाह—

"सर्गादौ पुरुषाणां व्यवहारोऽन्योपदेशपूर्वकः, उत्तरकालं प्रबुद्धानां प्रत्यर्थनियतत्वात्, अप्रसिद्धवाग्व्यवहाराणां कुमाराणां गवादिषु[3] प्रत्यर्थनियतो वाग्व्यवहारो यथा मात्राद्युपदेशपूर्वकः" [ ] इति। प्रबुद्धानां प्रत्यर्थनियतत्वादिति प्रबुद्धानां सतां प्रत्यर्थं नियतत्वादित्यर्थः। यदुपदेशपूर्वकश्च स सर्गादौ व्यवहारः स ईश्वरः प्रलयकालेऽप्यलुप्तज्ञानातिशय इति सिद्धम्।

तथाऽपराण्यपि उद्द्योतकरेण तत्सिद्धये साधनान्युपन्यस्तानि—

"बुद्धिमत्कारणाधिष्ठितं महाभूतादिकं व्यक्तं सुख-दुःखनिमित्तं भवति, अचेतनत्वात्, कार्यत्वात्, विनाशित्वात्, रूपादिमत्त्वात्, वास्यादिवत्" [न्यायवा० पृ० ४५९] इति।

अथ भवत्वस्माद्धेतुकदम्बकादीश्वरस्य सर्वजगद्धेतुत्वसिद्धिः सर्वज्ञत्वं तु कथं तस्य सिद्धम् येनासौ निःश्रेयसाभ्युदयकामानां भक्तिविषयतां यायात्? जगत्कर्तृत्वसिद्धेरेवेति ब्रूमः। तथा चाहुः प्रशस्तमतिप्रभृतयः—

"कर्तुः कार्योपादानोपकरण-प्रयोजन-संप्रदानपरिज्ञानात्" [ ] इह हि यो यस्य कर्त्ता भवति स तस्योपादानादीनि जानीते, यथा कुलालः कुण्डादीनां कर्त्ता, तदुपादानं मृत्पिण्डम्, उपकरणानि चक्रादीनि, प्रयोजनमुदकाहरणादि, कुटुम्बिनं च संप्रदानं जानीत इत्येतत् सिद्धम्; तथेश्वरः सकलभुवनानां कर्त्ता, स तदुपादानानि परमाण्वादिलक्षणानि, तदुपकरणानि धर्म[4]-दिक्-कालादीनि, व्यवहारोपकरणानि सामान्य-विशेष-समवायलक्षणानि, प्रयोजनमुपभोगम्, संप्रदानसंज्ञकांश्च पुरुषान् जानीत इति; अतः सिद्धमस्य सर्वज्ञत्वमिति। अत एव नात्रैतत् प्रेरणीयम्—सर्वज्ञपूर्वकत्वे क्षित्यादीनां साध्ये साध्यविकलो दृष्टान्तः, हेतुश्च विरुद्धः, असर्वज्ञकर्तृपूर्वकत्वेन कुम्भादेः कार्यस्य व्याप्तिदर्शनात्, किञ्चिज्ज्ञपूर्वकत्वे साध्येऽभ्युपेतबाधा, कारणमात्रपूर्वकत्वे साध्ये कर्मणा सिद्धसाधनमिति, यतः सामान्येन स्वकार्योपादानोपकरण-संप्रदानाभिज्ञकर्तृपूर्वकत्वं साध्यते तत्र चास्त्येव वस्त्रादिदृष्टान्तः। तस्य ह्युपादानोपकरणाद्यभिज्ञकर्तृपूर्वकत्वं सकललोक-

१ पृ० १०० पं० ३८। २ **चेतनानि चे**-वा०, बा०, गु०, हा०। वि० प्रतौ तु **'चेतनाचेतनानि'** इति पाठः सन्नपि छिन्नः। प्रमेयकमलमार्तण्डे तु अत्र स्थले "तनु-करण-भुवनोपादानानि चेतनाधिष्ठितानि स्वकार्यमारभन्ते"—पृ० ७५ प्रथ० पं० ४। ३-**षु च प्रत्य**-भां०, वा०, बा०, मां० विना। ४ **धर्माऽधर्म-दिक्**-गु०। ५-**ज्ञपूर्वक**-कां०, गु०।

प्रसिद्धं कथमन्यथाकर्तुं शक्यते अपह्नोतुं वा ? न तु कर्मणा सिद्धसाध्यता, तस्य सकलजगल्लक्षण-कार्योपादानाद्यनभिज्ञत्वात्; तदभिज्ञत्वे वा तस्यैव भगवतः 'कर्म' इति नामान्तरं कृतं स्यात्। शेषं त्वत्र चिन्तितमेव। तदेवं सकलदोषरहितादुक्तहेतुकलापाद् ज्ञानाद्यतिशयवद्गुणयुक्तस्य सिद्धेः तस्य च शासनप्रणेतृत्वं नान्येषां योगिनामिति 'भवजिनानां शासनम्' इति अयुक्तमुक्तमिति स्थितम् इति पूर्वपक्षः ॥

[उत्तरपक्षः—जगतः ईश्वरकृतत्वनिराकरणम्]

अत्र प्रतिविधीयते-यत् तावदुक्तम्[1]-'सामान्यतोदृष्टानुमानस्य तत्र व्यापाराभ्युपगमात् प्रत्यक्षपूर्वकानुमाननिषेधे सिद्धसाधनम्' इति, तदसङ्गतम्; सामान्यतोदृष्टानुमानस्यापि तत्साधकत्वेनाप्रवृत्तेः। तथाहि-तनु-भुवन-करणादिकं बुद्धिमत्कारणपूर्वकम्, कार्यत्वात्, घटादिवत् इत्यत्र धर्म्यसिद्धेराश्रयासिद्धस्तावत् कार्यत्वलक्षणो हेतुः।

{तथाहि-अवयविरूपं तावत् तन्वादि अवभासमानतनु न युक्तम्; देशादिभिन्नस्य तन्वादेः स्थूलस्यैकस्यानुपपत्तेः। न ह्यनेकदेशादिगतमेकं भवितुं युक्तम्, विरुद्धधर्माध्यासस्य भेदलक्षणत्वात्-देशादिभेदस्य च विरुद्धधर्मरूपत्वात्। तथाप्यभेदे सर्वत्र भिन्नत्वेनाभ्युपगते घट-पटादावपि भेदोपरतिप्रसङ्गात्; नहि भिन्नत्वेनाभ्युपगते तत्राप्यन्यद् भेदनिबन्धनमुत्पश्यामः। प्रतिभासभेदात् तत्र भेद इति चेत्, न; विरुद्धधर्माध्यासं भेदकमन्तरेण प्रतिभासस्यापि भेदानुपपत्तेः।

अथ 'अवयवी एको न भवति, विरुद्धधर्माध्यासितत्वात्' इत्येतत् किं स्वतन्त्रसाधनम्, उत प्रसङ्गसाधनमिति? न तावत् स्वतन्त्रसाधनं युक्तम्, अवयविनः प्रमाणासिद्धत्वेन हेतोराश्रयासिद्धत्वदोषात्; प्रमाणसिद्धत्वे वा तत्प्रतिपादकप्रमाणबाधितपक्षनिर्देशानन्तरप्रयुक्तत्वेन तस्य कालात्ययापदिष्टत्वदोषदुष्टत्वात्। न च परस्यावयवी सिद्ध इति नाश्रयासिद्धत्वदोष इति वक्तुं युक्तम्, यतः परस्य किं प्रमाणतोऽसौ सिद्धः, उताप्रमाणतः? प्रमाणतश्चेत् तर्हि भवतोऽपि किं न सिद्धः प्रमाणसिद्धस्य सर्वान् प्रत्यविशेषात्? तथा च तदेव कालात्ययापदिष्टत्वं हेतोः। अथाऽप्रमाणतस्तदा न परस्यापि सिद्ध इति पुनरप्याश्रयासिद्धत्वम्। तन्न प्रथमः पक्षः। नाऽपि द्वितीयः, यतः व्याप्याभ्युपगमो यत्र व्यापकाभ्युपगमनान्तरीयकः प्रदर्श्यते तत् प्रसङ्गसाधनम्। न च परस्य भेद-विरुद्धधर्माध्यासयोर्व्याप्यव्यापकभावः सिद्धः, देशादिभेदलक्षणविरुद्धधर्माध्यासाभावेऽपि रूप-रसयोर्भेदाभ्युपगमात्। तद्भावेऽपि सामान्यादावभेदस्य प्रमाणसिद्धत्वादिति न वक्तव्यम्।

यतः प्रथमः पक्षस्तावद् अनभ्युपगमादेव निरस्तः। प्रसङ्गसाधनपक्षे तु यद् दूषणमभिहितम्[3]-'देशभेदलक्षणविरुद्धधर्माध्यासाभावेऽपि रूप-रसयोर्भेदः' इति, तद् व्याप्यव्यापकभावापरिज्ञानं सूचयति न पुनर्व्याप्यव्यापकभावाभावम्, यतो देशभेदे सति यद्यभेदः क्वचित् सिद्धः स्यात् तदा व्यापकाभावेऽपि विरुद्धधर्माध्यासस्य भावान्न तस्य तेन व्याप्तिः स्यात्; यदा तु देशाभेदेऽपि रूप-रसयोर्भेदस्तदा देशभेदो भेदव्यापको न स्यात्। न पुनरेतावता भेदो विरुद्धधर्माध्यासव्यापको न स्यात्। यदि हि भेदव्यावृत्तावपि देशादिभेदो न व्यावर्त्तेत तदा व्यापकव्यावृत्तावपि व्याप्यस्याव्यावृत्तेर्न भेदेन देशादिविरुद्धधर्माध्यासो व्याप्येत; न चैतत् क्वचिदपि सिद्धम्। यत् तु 'सामान्यादावभेदस्य प्रमाणतः सिद्धेर्भेदव्यावृत्तावपि न देशादिभेदलक्षणस्य विरुद्धधर्माध्यासस्य निवृत्तिः' इति, तदयुक्तम्; सामान्यादेः प्रमाणतोऽभिन्नरूपस्यासिद्धेः। उक्तं च—

"यदि विरुद्धधर्माध्यासः पदार्थानां भेदको न स्यात् तदाऽन्यस्य तद्भेदकस्याभावाद् विश्वमेकं स्यात्" [ ] प्रतिभासभेदस्यापि तमन्तरेण भेदव्यवस्थापकस्याभावादिति व्याप्यव्यापकभावसिद्धेः कथं न प्रसङ्गसाधनस्यावकाशः?

अथैकत्वप्रतिभासाद् देशादिभेदेऽपि तन्वादेरेकता, न; देशभेदेन व्यवस्थितानामवयवानां प्रतिभासभेदेन भेदात्; न ह्येकरूपा भागा भासन्ते, पिण्डस्याणुमात्रताऽऽपत्तेः; तद्व्यतिरिक्तस्य चापरस्य तन्वाद्यवयविनो द्रव्यस्योपलब्धिलक्षणप्राप्तस्यानुपलम्भेनासत्त्वात्। न च तस्योपलब्धिलक्षणप्राप्तता परैर्नाभ्युपगम्यते।

१ पृ० ६९ पं० २०। २ पृ० ९३ पं० ३५। ३ प्र० पृ० पं० २४। ४ "विरुद्धधर्माध्यासस्य" मां० टि०। ५ "भेदेन" मां० टि०। ६ प्र० पृ० पं० २५।

"महत्यनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः" [वैशेषिकद० अ० ४-१-६] इति वचनात्। तत् सिद्धमनुपलब्धेः 'उपलब्धिलक्षणप्राप्तस्य' इति विशेषणम्। न च मध्यो-र्ध्वादिभागव्यतिरिक्तवपुर्बहिर्ग्राह्याकारतां विभ्राणस्तन्वादिर्द्रव्यात्मा दर्शने चकास्तीत्यनुपलब्धिरपि सिद्धा। न च समानदेशत्वादवयविनोऽवयवेभ्यः पृथगनुपलक्षणमिति वक्तुं शक्यम्, समानदेशत्वादिति विकल्पानुपपत्तेः। तथाहि-समानदेशत्वमवयवाऽवयविनोः किं पारिभाषिकम्, लौकिकं वा? यदि पारिभाषिकम्, तदनुद्घोष्यम्; परिभाषाया अत्रानधिकारात्। न च तत् तत्र भवदभिप्रायेण सिद्धम्। तथाहि-अन्य एव पाण्यादय आरम्भका देशास्तन्वाद्यवयविनो भवद्भिः परिभाष्यन्ते, अन्ये च पाण्यादीनां तदवयवानामारम्भका देशाः, आरभ्यारम्भकवादनिषेधात्। तन्न पारिभाषिकं समानदेशत्वम्। नापि लौकिकम्, आकाशस्य लोकप्रसिद्धस्य समानदेशस्यात्मान् प्रति असिद्धत्वात्। प्रकाशादिरूपस्य च देशस्य तत्सिद्धस्य समानत्वेऽपि भिन्नानां वाताऽऽतपादीनां भेदेनोपलब्धेः। तथाहि-समानदेशा अपि भावा वाताऽऽतपादयो भिन्नतनवः पृथक् प्रथन्ते; न चैवमवयविनिर्भासः। तन्नावयवी तन्वादिर्भिन्नोऽस्ति।

अथ मन्दमन्दप्रकाशे अवयवप्रतिभासमन्तरेणाप्यवयविनि प्रतिभास उपलभ्यते तत् कथं प्रतिभासाभावात् तस्याभावः? असदेतत्; नहि तथाभूतोऽस्पष्टप्रतिभासोऽवयविस्वरूपव्यवस्थापको युक्तः, तत्प्रतिभासस्यास्पष्टरूपस्य स्पष्टज्ञानावभासितस्वरूपेण विरोधात्। अथ स्वरूपद्वयमेतदवयविनः-स्पष्टम् अस्पष्टं च। तत्रास्पष्टं मन्दालोकज्ञानविषयः; स्पष्टं तु सालोकज्ञानभूमिः। नन्वेतत् स्वरूपद्वयं केनावयविनो गृह्यते? न तावद् मन्दालोकज्ञानेन, तत्र सालोकज्ञानविषयस्पष्टरूपानवभासनात्; अस्पष्टतत्स्वरूपप्रतिभासं हि तदनुभूयते। नापि सालोकज्ञानेन स्पष्टतत्स्वरूपावभासिना, तत्र मन्दालोकज्ञानावभासितत्स्वरूपानवभासनात्; नहि परिस्फुटप्रतिभासवेलायामविशदरूपाकारोऽवयव्यर्थः प्रतिभाति तत् कथमसाववयविनः स्वरूपम्? अथ 'मन्दालोकदृष्टमवयविनः स्वरूपं परिस्फुटमिदानीं पश्यामि' इति तयोरेकता; ननु किमपरिस्फुटरूपतया परिस्फुटं रूपमवगम्यते, आहोस्वित् परिस्फुटतयाऽपरिस्फुटम्? तत्र यद्याद्यः पक्षः, तदाऽपरिस्फुटरूपसंबन्धित्वमेवावयविनः प्राप्नोति, परिस्फुटस्य रूपस्यास्फुटरूपताऽनुप्रवेशेन प्रतिभासनात्। अथ द्वितीयः पक्षः, तथासति स्पष्टस्वरूपसंबन्धित्वमेव, अस्पष्टस्य विशदस्वरूपानुप्रविष्टत्वेन प्रतिभासनात्। तन्न स्वरूपद्वयावगमोऽवयविनः। एकत्वप्रतिभासनं तु प्रतिभासरहितमभिमानमात्रं स्पष्टास्पष्टरूपयोः; अन्यथा सालोकज्ञानवद् मन्दालोकज्ञानमपि परिस्फुटप्रतिभासं स्यात्। अथाऽऽलोकभावाभावकृतस्तत्र स्पष्टास्पष्टप्रतिभासभेदः; नन्वालोकेनाप्यवयविस्वरूपमेवोद्भासनीयम्, तच्चेद् अविकलं मन्दालोके प्रतिभाति कथं न तत्र तदवभासकृतः स्पष्टावभासः? अन्यथा विषयावभासव्यतिरेकेणापि ज्ञानप्रतिभासभेदे न ज्ञानावभासभेदो रूप-रसयोरपि भेदव्यवस्थापकः स्यात्। अथावयविस्वरूपमेकमेवोभयत्र प्रतीयते, व्यक्ताऽव्यक्ताकारौ तु ज्ञानस्यात्मानावित्युच्येत-तदप्यसत्; यतो यदि ज्ञानाकारौ तौ कथमवयविरूपतया प्रतिभातः? तद्रूपतया च प्रतिभासनादवयव्याकारौ तावभ्युपगन्तव्यौ। नहि व्यक्तरूपताम् अव्यक्तरूपतां च मुक्त्वा अवयविस्वरूपमपरमाभाति। तत् तस्यानवभासादभाव एव। व्यक्ताऽव्यक्तैकात्मनश्चावयविनो व्यक्ताऽव्यक्ताकारवद् भेदः। नहि प्रतिभासभेदेऽप्येकता, अतिप्रसङ्गात्। तन्न अस्पष्टप्रतिभासमन्धकारेऽवयविनो रूपमवयवाप्रतिभासेऽपि प्रतिभातीति वक्तुं युक्तम्, उक्तदोषप्रसङ्गात्।

किंच, किं कतिपयावयवप्रतिभासे सति अवयवी प्रतिभातीत्यभ्युपगम्यते, आहोस्वित् समस्तावयवप्रतिभासे? यद्याद्यः पक्षः, स न युक्तः; जलमग्नमहाकायस्तम्भादेरुपरितनकतिपयावयवप्रतिभासेऽपि समस्तावयवव्यापिनः स्तम्भाद्यवयविनोऽप्रतिभासनात्। अथ द्वितीयः पक्षः, सोऽपि न युक्तः; मध्य-परभागवर्त्तिसमस्तावयवप्रतिभासासंभवेनावयविनोऽप्रतिभासप्रसङ्गात्। अथ भूयोऽवयवग्रहणे सति अवयवी गृह्यत इत्यभ्युपगमः, सोऽपि न युक्तः; यतोऽर्वाग्भागभाव्यवयवग्राहिणा प्रत्यक्षेण परभागभाव्यवयवाग्रहणाद् न तेन तद्व्याप्तिरवयविनो ग्रहीतुं शक्या; व्याप्याग्रहणे तेन तद्व्यापकत्वस्यापि ग्रहीतुमशक्तेः; ग्रहणे वाऽतिप्रसङ्गः। तथाहि—यद् येन रूपेण अवभाति

१ वा कां०। २-भासिततत्स्व-मां०।

तत् तेनैव रूपेण सदिति व्यवहारविषयः—यथा नीलं नीलरूपतया प्रतिभासमानं तेनैव रूपेण तद्विषयः, अर्वाग्भागभाव्यवयवसंबन्धितया चाऽवयवी प्रतिभातीति स्वभावहेतुः। न च परभागभाविव्यवहितावयवाऽप्रतिभासनेऽप्यव्यवहितोऽवयवी प्रतिभातीति वक्तुं शक्यम्, तदप्रतिभासने तद्वतत्वेनाप्रतिभासनात्। यस्मिंश्च प्रतिभासमाने यद् रूपं न प्रतिभाति, तत् ततो भिन्नम्—यथा घटे प्रतिभासमानेऽप्रतिभासमानं पटस्वरूपम्। न प्रतिभाति च अर्वाग्भागभाव्यवयवसंबन्ध्यवयविस्वरूपे प्रतिभासमाने परभागभाव्यवयवसंबन्ध्यवयविस्वरूपम् इति कथं न तत् ततो भिन्नम्? तथाऽप्यभेदेऽतिप्रसङ्गः प्रतिपादितः। नापि परभागभाव्यवयवाऽवयविग्राहिणा प्रत्यक्षेण अर्वाग्भागभाव्यवयवसंबन्धित्वं तस्य गृह्यते, तत्र तदवयवानां प्रतिभासात् तत्संबन्ध्येवावयविस्वरूपं प्रतिभासेत नार्वाग्भागभाव्यवयवसंबन्धि; तेषां तत्राप्रतिभासनात्। तदप्रतिभासने च तत्संबन्धिरूपस्याप्यप्रतिभासनात्, व्याप्याप्रतिपत्तौ तद्व्यापकत्वस्याप्यप्रतिपत्तेः। नापि स्मरणेन अर्वाक्-परभागभाव्यवयवसंबन्ध्यवयविस्वरूपग्रहः, प्रत्यक्षानुसारेण स्मरणस्य प्रवृत्त्युपपत्तेः; प्रत्यक्षस्य च तद्ग्राहकत्वनिषेधात्। नाप्यात्मा अर्वाक्-परभागावयवव्यापित्वमवयविनो ग्रहीतुं समर्थः—सत्तामात्रेण तस्य तद्ग्राहकत्वानुपपत्तेः; अन्यथा स्वाप-मद-मूर्च्छाद्यवस्थास्वपि तत्प्रतिपत्तिप्रसङ्गात्—किन्तु दर्शनसहायः; तच्च दर्शनं न अवयविनोऽवयवव्याप्तिग्राहकं प्रत्यक्षादिकं संभवतीति प्रतिपादितम्। अथार्वाग्भागदर्शने सत्युत्तरकालं परभागदर्शनेऽनन्तरस्मरणसहकारीन्द्रियजनितं 'स एवायम्' इति प्रत्यभिज्ञाज्ञानमध्यक्षमवयविनः पूर्वापरावयवव्याप्तिग्राहकम्, तदयुक्तम्; प्रत्यभिज्ञाज्ञानस्यैतद्विषयस्य प्रत्यक्षत्वानुपपत्तेः। अक्षानुसारि हि प्रत्यक्षम्, न चाक्षाणामर्वाक्-परभागभाव्यवयवग्रहणे व्यापारः संभवति, व्यवहिते तेषां व्यापारासंभवात्; संभवे वाऽतिव्यवहितेऽपि मेरुपृष्ठादौ व्यापारः स्यात्। तन्न तदनुसारिणोऽध्यक्षरूपस्य प्रत्यभिज्ञाज्ञानस्य तत्र व्यापारः। न च स्मरणसहायस्यापीन्द्रियस्याविषये व्यापारः संभवति, यद् यस्याऽविषयः न तत् तत्र स्मरणसहायमपि प्रवर्त्तते—यथा परिमलस्मरणसहायमपि लोचनं गन्धादौ, अविषयश्च व्यवहितोऽक्षाणां परभागभाव्यवयवसंबन्धित्वलक्षणोऽवयविनः स्वभाव इति नाक्षजस्य प्रत्यभिज्ञाज्ञानस्यावयविस्वरूपग्राहकत्वम्। न च 'स एवायम्' इति प्रतीतिरेका, 'सः' इति स्मृतेः रूपम्, 'अयम्' इति तु दृशः स्वरूपम्। तत् परोक्षाऽपरोक्षाकारत्वाद् नैकस्वभावावेतौ प्रत्ययौ। अथ 'स एवायम्' इत्येकाधिकरणतया एतौ प्रतिभात इति एकं प्रत्यभिज्ञाज्ञानम्, न; आकारभेदे सति दर्शन-स्मरणयोरिव सामानाधिकरण्याध्यवसायेऽप्येकत्वानुपपत्तेः। अन्यत्राप्याकारभेद एव भेदः, स चात्रापि विद्यत इति कथमेकत्वम्? किञ्च, 'सः' इत्याकारः 'अयम्' इत्याकारानुप्रवेशेन प्रतिभाति, आहोस्विद् अननुप्रवेशेनेति? यदि अनुप्रवेशेन, 'सः' इत्याकारस्य 'अयम्' इत्याकारे अनुप्रविष्टत्वादभाव इति 'अयम्' इत्याकार एव केवलः प्राप्त इति कुतः 'सोऽयम्' इत्येका प्रत्यभिज्ञा? अथ 'अयम्' इत्याकारः 'सः' इत्येतस्मिन्ननुप्रविष्टस्तदा 'सः' इत्येव प्राप्तो न 'अयम्' इत्यपि इति कथमेका प्रत्यभिज्ञा? अथ 'स एव' 'अयम्' इत्याकारौ परस्परानुप्रविष्टौ प्रतिभातस्तथापि भिन्नाकारौ भिन्नविषयौ च द्वौ प्रत्ययाविति कथमेकार्था एका प्रत्यभिज्ञा प्रतिभासभेदस्य विषयभेदव्यवस्थापकत्वात्? न च प्रतिभासभेदेऽपि विषयाभेदः, प्रतिभासाभेदव्यतिरेकेण विषयाभेदव्यवस्थायां प्रमाणं विना प्रमेयाभ्युपगमः स्यात्; तथा च सर्वं सर्वस्य सिध्येत्। तन्न प्रत्यभिज्ञातोऽप्यवयव्येकत्वग्रहः। अनुमानस्य च अवयविस्वरूपग्राहकस्य प्रत्यक्षनिषेधे तत्पूर्वकस्य निषेधः कृत एव। सामान्यतोदृष्टस्य चावयविप्रतिषेधप्रस्तावे निषेधो विधास्यत इत्यास्तां तावत्।

अथ 'एको घटः' इति द्रव्यप्रतीतिरस्ति तदवयवव्यतिरेकिणी तत् कथमभावोऽवयविनः? न; घटावसायेऽपि तदवयवाध्यवसायः नामोल्लेखश्चाध्यवसीयते नावयवि द्रव्यम्, वर्णाकृत्यक्षराकारशून्यस्य तद्रूपस्य केनचिदप्यननुभवात्। वर्णाकृत्यक्षराकारशून्यं चावयविस्वरूपमभ्युपगम्यते। न च तेन रूपेण कल्पनाज्ञानेऽपि तत् प्रतिभाति, न चान्याकारः प्रतिभासोऽन्याकारस्य वस्तुस्वरूपस्य व्यवस्थापकः; अन्यथा नीलप्रतिभासः पीतस्य व्यवस्थापकः स्यादिति न वस्तुव्यवस्था स्यात्।

---

१ -स्याप्रति-कां०, गु०। २ पृ० १०३ पं० ४१। ३ पृ० १०३ पं० ४१। ४-सारि हि तत् प्रत्य -कां०, गु०, हा०। ५-नम् आका-वा०, बा० विना।

तस्माद् न कल्पनोल्लिख्यमानबपुरप्यवयवी बहिरस्ति, केवलमनादिरयमेकव्यवहारो मिथ्यार्थः। न च व्यवहारमात्राद् बहिरेकं वस्तु सिध्यति, 'नीलादीनां स्वभावः' इत्यत्रापि व्यवहाराभेदादेकताप्राप्तेः स्वभावस्य। अथ तत्र प्रतिनीलादिस्वभावं दर्शनभेदादेकत्वं बाध्यते, इहापि तर्हि बहीरूपस्योर्द्धाऽधो-मध्यादिनिर्भासस्य भेदादेकता तन्वादीनां प्रतिदलतु। तन्नावयविरूपो बाह्योऽर्थोऽस्ति।

अथावयविनोऽभावे तदवयवानामपि पाण्यादीनां दिग्भेदादिविरुद्धधर्माध्यासाद् भेदः, तदवयवानामप्यङ्गुल्यादीनां तत एव भेदात् तावद् भेदो यावत् परमाणवः, तेषां च स्थूलप्रतिभासविषयत्वानुपपत्तिः। स्थूलतनुश्च बहिर्नीलादिरूपः प्रतिभासः स्फुटमुद्भाति। न च स्थूलरूपं प्रत्येकं परमाणुषु संभवति, तथात्वे परमाणुत्वायोगात्। नापि समुदितेषु स्थूलरूपसंभवः, समुदितावस्थायामप्यणूनां स्वरूपेण सूक्ष्मत्वात्। न च तद्व्यतिरिक्तः समुदायोऽस्ति, तथात्वे द्रव्यवादप्रसङ्गात्; तत्र चोक्तो दोषः। तन्न स्थूलता परमाणुषु कथञ्चिदपि संभवति। न चान्याद्दग् निर्भासोऽन्याद्दक्षस्यार्थस्य प्रकाशकः, नीलदर्शनस्यापि पीतव्यवस्थापकत्वापत्तेः; तथा च नियतविषयव्यवस्थोच्छेदः। किञ्च, परमाणोरपि नानादिक्कसंबन्धादेकता नोपपन्नैव। तथा चाह—

"षट्केन युगपद्योगात् परमाणोः षडंशता" [ ] इति।

पुनस्तदंशानामपि नानादिक्कसंबन्धात् सांशताऽऽपत्तिः, तथा चानवस्था। तस्मान्न परमाणूनामपि सत्त्वम् इत्यवयव्यग्रहणे सर्वाग्रहणप्रसङ्ग इति प्रतिभासाभावापत्तेर्न प्रसङ्गसाधनस्यावकाशः।

असदेतत्।

अवयव्यभावेऽपि निरन्तरोत्पन्नानां घटाद्याकारेण परमाणूनां सद्भावात् तद्ग्राहकाणामपि ज्ञानपरमाणूनां तथोत्पन्नानां तद्ग्राहकत्वाद् न बहिरर्थाभावः, नापि तत्प्रतिभासाभाव इति कथं प्रसङ्गसाधनस्य नावकाशः स्थूलैकरूपावयव्यभावेऽपि? यदि चावयविनोऽभावे परमाणूनामप्यभावप्रसक्तेः प्रतिभासाभावेन प्रसङ्गसाधनानवकाशः प्रतिपाद्येत तदा सुतरां परमाणुरूपस्य ज्ञानरूपस्य चार्थस्याभावे कार्यत्वादिलक्षणस्य हेतोराश्रयासिद्धतादोषः।

बाह्यार्थनयेन चास्माभिराश्रयासिद्धतादोषात् कार्यत्वलक्षणाद्धेतोर्नेश्वरसिद्धिरिति प्रतिपादयितुमभिप्रेतम्, यदि पुनर्विज्ञान-शून्यवादानुकूलं भवताऽप्यनुष्ठीयते तदा साध्य-दृष्टान्तधर्मि-साध्य-साधनधर्मादीनामनुमित्यङ्गभूतानां सर्वेषामप्यसिद्धेः कुत उपन्यस्तप्रयोगादीश्वरसिद्धिः? तदेवं तन्वादिलक्षणस्य कार्यत्वादिहेत्वाश्रयस्यावयविनोऽसिद्धेराश्रयासिद्धो हेतुः।}

{ तथा, 'बुद्धिमत्कारणम्' इति साध्यनिर्देशे 'बुद्धिमत्' इति मतुबर्थस्य साध्यधर्मविशेषणस्यानुपपत्तिः, तज्ज्ञानस्य ततो व्यतिरेके अकार्यत्वे च 'तस्य' इति संबन्धानुपपत्तेः। तद्गुणत्वात् तत् तस्येति चेत्, न; अकार्यत्वे व्यतिरेके च 'तस्यैव तद्गुणो नाकाशादेः' इति व्यवस्थापयितुमशक्तेः। समवायो व्यवस्थाकारीति चेत्, न; तस्यापि ताभ्यामर्थान्तरत्वे स एव दोषः-व्यतिरेके समवायस्यापि सर्वत्राविशेषान्न ततोऽपि तद्व्यवस्था। अथेश्वरात्मकार्यत्वाद् ईश्वरात्मगुणस्तज्ज्ञानम्, कुत एतत्? तस्मिन् सति भावादिति चेत्, आकाशादावपि सति तस्य भावात् तत्कार्यता किं न स्यात्? अथ तदभावेऽभावात् तत्कार्यत्वम्, तन्न; नित्य-व्यापित्वाभ्यां तस्य तदयोगात्। तदात्मन्युत्कलितस्य तस्य दर्शनात् तत्कार्यतेति, किमिदं तस्य तत्रोत्कलितत्वम्? तत्र समवेतत्वं तस्येति चेत्, नन्विदमेव पृष्टं किमिदं समवेतत्वं नाम? तत्र समवायेन वर्त्तनमिति चेत्, ननु किं व्याप्या समवायेन तत्र वर्त्तनम्, आहोस्विदव्याप्या? यदि व्याप्या तदाऽस्मदादिज्ञानवैलक्षण्यं यथा तज्ज्ञानस्यादृष्टस्यापि कल्प्यते तथाऽकृष्टोत्पत्तिषु वने वनस्पत्यादिषु घटादौ कर्म-कर्तृ-करणनिर्वर्त्यं कार्यत्वमुपलब्धमपि चेतनकर्तृरहितमपि भविष्यतीति कार्यत्वलक्षणो हेतुर्बुद्धिमत्कारणपूर्वकत्वे साध्ये स्थावरैर्व्यभिचारीति लाभमिच्छतो मूलक्षतिरायातेति। अथ अव्याप्या तत् तत्र वर्तते तदा देशान्तरोत्पत्तिमत्सु तन्वादिषु तस्याऽसन्निधानेऽपि यथा व्यापारस्तथाऽदृष्टस्याप्यन्यादिदेशेष्वसन्निहितस्यापि ऊर्ध्वज्वलनादिविषयो व्यापारो भविष्यतीति।

"अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यक्पवनम्, अणु-मनसोश्चाद्यं कर्माऽदृष्टकारितम्" [वैशेषिक-द० अ० ५-२-१३]

---

१ पृ० १०२ पं० ११।

इत्यनेन सूत्रेण सर्वगतात्मसाधकहेतुसूचनं यत् कृतं तदसङ्गतं स्यात्, ज्ञानादिविशेषगुणवद्दृष्ट-गुणस्य तत्रासन्निहितस्याप्यन्यायद्यूर्द्ध्वज्वलनादिकार्येषु व्यापारसंभवात्। न च सामान्यगुण-विशेषगुणत्वलक्षणोऽपि विशेषो गुण-गुणिनोर्भेदे संभवति। किंच, समवायस्य सर्वत्राविशेषे 'तत्रैव तेन वर्त्तनं नान्यत्र' इति कुतोऽयं विभागः? अथ तत्राऽऽधेयत्वं समवेतत्वं तदा आत्मवद् गगनादेरपि सर्वगतत्वे 'तदात्मन्येव तदाधेयत्वं नान्यत्र' इति दुर्लभोऽयं विभागः। ततस्तज्ज्ञानस्य तदात्मनो व्यतिरेके 'तस्यैव तज्ज्ञानम्' इति संबन्धानुपपत्तिः।

अथ ततस्तज्ज्ञानस्य भेदेऽपि संबन्धस्य समवायरूपस्य भावान्नायं दोषः' असदेतत्; समवायस्यानुपपत्तेः।

[प्रसङ्गवशात् समवायनिरसनम्]

तथाहि—किं सतां समवायः, आहोस्विद् असतामिति? तत्र यदि असतामिति पक्षः, स न युक्तः; शशविषाण-व्योमोत्पलादीनामपि तत्प्रसङ्गात्। अथात्यन्तासत्त्वात् तेषां न तत्प्रसङ्गः, ननु तदात्म-तज्ज्ञानयोरत्यन्तासत्त्वाभावः कुतः? तत्समवायादिति चेत्, इतरेतराश्रयत्वम्—सिद्धे तत्समवाये तयोरत्यन्तासत्त्वाभावः, तदभावाच्च तत्समवाय इति व्यक्तमितरेतराश्रयत्वम्। अथ सतां समवायः, ननु तेषां समवायात् प्राक् कुतः सत्त्वम्? यदि अपरसमवायात्, तदसत्; तस्यैकत्वाभ्युपगमात्। अनेकत्वेऽपि यदि अपरसमवायात् प्राक् तेषां सत्त्वम्, सेम(तत्सम)वायादपि प्रागपरसमवायात् तेषां सत्त्वमभ्युपगन्तव्यमित्यनवस्था। अथ समवायात् प्राक् तेषां स्वत एव सत्त्वमिति नानवस्था तर्हि समवायव्यतिरेकेणापि सत्त्वाभ्युपगमे व्यर्थं समवायपरिकल्पनमिति 'सत्तासंबन्धात् पदार्थानां सत्ता' इत्युच्यमानं न शोभामावहति।

अथ समवायात् प्राक् पदार्थानां न सत्त्वम् नाप्यसत्त्वम् सत्तासमवायः सत्त्वम्, असदेतत्; यतो यदि तत्समवायात् प्राक् पदार्था योगिज्ञानमपि न जनयन्ति तदा कथं तेषां नासत्त्वम्? अथ तद् जनयन्ति तदा कथं तेषां न सत्त्वम्? किंच, अन्योऽन्यव्यवच्छेदरूपाणामेकनिषेधस्यापरसद्भावनान्तरीयकत्वात् कथमसत्त्वनिषेधे न सत्त्वविधानम्? तद्विधाने वा कथं नासत्त्वनिषेधः? इत्ययुक्तमुक्तमुद्द्योतकरेण—"गोत्वसंबन्धात् प्राग् न गौः, नाप्यगौः, गोत्वयोगाद् गौः" [न्यायवा० पृ० ३१८ पं० २१] इति। अपि च, समवायाद् यदि पदार्थानां सत्त्वम् समवायस्य कुतः सत्त्वमिति वक्तव्यम्। यदि अपरसमवायात्, अनवस्था। अथ स्वत एव समवायस्य सत्त्वम्, पदार्थानामपि तत् स्वत एवास्तु, पुनरपि व्यर्थं सत्तासमवायकल्पनम्। अथ यदि नाम समवायस्य स्वतः सत्त्वमिति रूपम् कथमन्यपदार्थानामपि तदेव रूपमिति सचेतसा वक्तुं युक्तम्? नहि लवणस्य स्वतो लवणत्वे सूपादेरपि तद्व्यतिरेकेण तद् भवति, असदेतत्; यतोऽध्यक्षतः सिद्धे पदार्थस्वभावे युज्येतैतद् वक्तुम्; न च समवायादेः स्वरूपतः सत्त्वम् अन्यपदार्थानां तु तत्सद्भावात् सत्त्वमित्यध्यक्षात् सिद्धम्।

अपि च, अयं समवायः किं समवायिनोः परिकल्प्यते, उतासमवायिनोरिति विकल्पद्वयम्। तत्र यद्यसमवायिनोरिति पक्षः, स न युक्तः; घट-पटयोरत्यन्तभिन्नयोस्तत्प्रसङ्गात्। न चासमवायिनोर्भिन्नसमवायेन समवायित्वं तदभिन्नं विधातुं शक्यम्, विरुद्धधर्माध्यासेन ताभ्यां तस्य भेदप्रसङ्गात्। नापि भिन्नम्, तत्करणे तयोः तत्संबन्धित्वानुपपत्तेः; भिन्नस्योपकारमन्तरेण तदयोगात्। उपकारेऽपि तद्भिन्नसमवायित्वकरणे पुनरपि तयोरसमवायित्वम्; अन्यान्योपकारकरणेत्वनवस्था। स्वत एव तु समवायिनोः किं समवायेन तद्धेतुना परिकल्पितेन? अथ समवायेन तयोस्तद्व्यवहारः क्रियते, ननु यदि समवायिनोः स्वरूपं प्रत्यक्षादिप्रमाणगोचरस्तदा तत एव तद्व्यवहारस्यापि सिद्धेर्व्यर्थमेव तदर्थं तत्परिकल्पनम्।

अथ प्रत्यक्षप्रमाणसिद्धत्वात् समवायस्य एवं विकल्पनमयुक्तम्, तदसत्; यदि हि तत्सिद्धत्वं

१-गुणत्व-वि-गु०। २ "गगनादौ" वि० टि०। ३-नुपपत्तेः वा०, बा० विना। ४ न प्रसङ्गः वा०, बा०, कां०, गु०। ५ समवायादपि तत्सपरपरसमवायात् वा०, बा०। ६ "समवाय" (सद्भावात्) वि० टि०। ७ प्रमेयकमलमार्तण्डे तु "स्वत एव तु समवायिनोः समवायित्वे किं समवायेन?" इत्यादिपाठः-पृ० १८८ द्वि० पृ० पं० ८।

तस्य स्यात् तदा युक्तमेतत्, न च प्रत्यक्षप्रमाणे तत्स्वरूपावभासः-नहि तदात्मा, ज्ञानम् तत्समवायश्चेति त्रितयमिन्द्रियजाध्यक्षगोचरः, नापि स्वसंवेदनाध्यक्षविषयः, तस्य भवताऽनभ्युपगमात्। नाप्येकार्थसमवेतानन्तरमनोऽध्यक्षविषयः, तस्य प्रागेव निषिद्धत्वात्। न च बाह्येष्वपि घट-रूपादिष्वर्थेषु 'अयं घटः, एते च तत्समवेता रूपादयः, अयं च तदन्तरालवर्त्ती भिन्नः समवायः' इति त्रितयमध्यक्षप्रतीतौ विभिन्नस्वरूपं प्रतिभाति। तत्प्रतिभाने वा द्रव्य-गुण-समवायानामध्यक्षसिद्धत्वाद् विभिन्नस्वरूपतया न गुणगुणिभावे समवाये वा कस्यचिद् विवादः स्यात्, नाप्येकत्वविभ्रमो घट-रूपादीनाम्, ततश्च तन्निराकरणार्थं शास्त्रप्रणयनमपार्थकं स्यात्। ननु यथा प्रत्यक्षेण प्रतिपन्नेऽप्यनेकान्ते जैनेन, स्वलक्षणे वा बौद्धेन स्वदुरागमाहितवासनाबलाल्लोकस्य तेन तदप्रतिपन्नताविभ्रमः तन्निराकरणार्थं च शास्त्रप्रणयनम् तथाऽत्रापि स्यादिति तर्हि तथाविधशास्त्ररहितानामबला-बालादीनां न समवायप्रत्यक्षताविभ्रम इति तेषां 'शुक्लः पटः' इति प्रतीतिर्न स्यात्, अपि तु 'अयं पटः, एते शुक्लादयो गुणाः, अयं च तदन्तरालवर्त्ती अपरः समवायः' इति प्रतीतिः स्यात्। अथ समवायस्य सूक्ष्मत्वात् प्रत्यक्षत्वेऽप्यनुपलक्षणात् तत्रस्थत्वेन रूपादीनामुपचारात् 'शुक्लः पटः' इति प्रतिपत्तिः स्यात्, नैतत्; एवं दण्डेऽपि 'पुरुषः' इति प्रतिपत्तिः स्यात्। उपचाराच्चेयं प्रतिपत्तिरुपजायमाना स्खलद्रूपा स्याद् वाहीके गोबुद्धिवत्। न च 'समवेतमिदं वस्तु अत्र' इति प्रतिपत्तौ विशेषणभूतः समवायः प्रतिभातीति वक्तुं युक्तम्, बहिष्प्रतिभासमानरूपादिव्यतिरेकेण अन्तश्चाभिजल्पमन्तरेणापरस्य वर्णाकृत्यक्षराकारशून्यस्य ग्राह्याकारतां बिभ्राणस्य बहिः समवायस्वरूपस्याप्रतिभासनात्। वर्णाद्याकाररहितं च परैः समवायस्वरूपमभ्युपगम्यते। न च तत्कल्पनाबुद्धावपि प्रतिभाति। न चान्यादृशः प्रतिभासोऽन्यादृक्षस्यार्थस्य व्यवस्थापकः, अतिप्रसङ्गात्। तन्न समवायोऽध्यक्षप्रमाणगोचरः।

यस्त्वाह–"नित्यानुमेयत्वात् समवायस्यानुमानगोचरता, तेनायमदोष इति। तच्चानुमानम्—'इह तन्तुषु पटः' इति बुद्धिस्तन्तु-पटव्यतिरिक्तसंबन्धपूर्विका, 'इह' इति बुद्धित्वात्, इह कंसपात्र्यां जलबुद्धिवत्" [ ] इत्येतत्, सोऽप्ययुक्तवादी; 'समवायस्यान्यस्य वा पदार्थस्य नित्यैकरूपस्य कारणत्वासंभवात् क्वचिदपि' इति प्रतिपादयिष्यमाणत्वात्। न च 'तन्तुषु पटः, शृङ्गे गौः, शाखायां वृक्षः' इति लौकिकी प्रतीतिरस्ति, 'पटे तन्तवः, गवि शृङ्गम्, वृक्षे शाखा' इत्याकारेण प्रतीत्युत्पत्तेः संवेदनात्, तस्याश्च समवायनिबन्धनत्वे तन्त्वादीनां पटाद्यारब्धत्वप्रसङ्गः।

किंच, समवायस्य समवायिभिरनभिसंबन्धे तस्य तत्र "संबद्धबुद्धिजननं तेषां संबन्ध एव च" [ ] इति च न युक्तम्, न हि दण्ड-पुरुषयोः संयोगः सह्य-विन्ध्याभ्यामनभिसंबन्ध्यमानस्तत्र संबन्धबुद्धिहेतुः तैत्संबन्धो वा। तैस्तदभिसंबन्धे वा स्वतः द्रव्य-गुण-कर्मणां स्वाधारैः स्वतः संबन्धः किं न स्यात् यतः समवायपरिकल्पनाऽऽनर्थक्यमभ्युवीत? 'इह समवायिषु समवायः' इति च बुद्धिरपरनिमित्तिका प्रकृतस्य हेतोरनैकान्तिकत्वं कथं न साधयेत् स्वतस्तत्संबन्धाभ्युपगमे? समवायान्तरेण तस्य तदभिसंबन्धेऽनवस्थालता गगनतलावलम्बिनी प्रसज्येत। विशेषणविशेष्यभावलक्षणसंबन्धबलात् तस्य तदभिसंबन्धे तस्यापि तैः संबन्धोऽपरविशेषणविशेष्यभावलक्षणसंबन्धबलाद् यदि सैवानवस्था। समवायबलात् तस्य तत्संबन्धे व्यक्तमितरेतराश्रयत्वम्। स्वतस्तैस्तस्याभिसंबन्धे बुद्ध्यादीनामपि स्वत एव स्वाधारैः संबन्धो भविष्यतीति व्यर्थं संबन्धपरिकल्पनम्। तन्न समवायः कस्यचित् प्रमाणस्य गोचरः। पुनरपि चैनं यथास्थानं निषेत्स्याम इति आस्तां तावत्।

तदेवं बुद्धेस्तदात्मनो व्यतिरेके संबन्धासिद्धेर्मतुबर्थानुपपत्तिः।

अथ अव्यतिरिक्ता तदात्मनस्तद्बुद्धिस्तथाऽपि तदनुपपत्तिः, न हि तदेव तेनैव तद्वद् भवति किंच, तदात्मनस्तद्बुद्धेरव्यतिरेके यदि तदात्मनि तद्बुद्धेरनुप्रवेशस्तदा बुद्धेरभावाद् बुद्धिविकलो गगनादिवद् जडस्वरूपस्तदात्मा कथं जगत्स्रष्टा स्यात्? बुद्ध्यादिविशेषगुणगणवैकल्ये च तदात्मनोऽसदाद्यात्मनोऽप्यात्मत्वेन तद्वैकल्याद् मुक्तात्मन इव संसारित्वं न स्यात्, नवानां विशेषगुणानामात्यन्तिकक्षयोपेतस्यात्मनो मुक्तत्वाभ्युपगमात् तस्य चासदाद्यात्मस्वपि समानत्वात्

---

१ पृ० ८४ पं० २०। २-कताचि—भां०। ३-पत्तिः, नैत-कां०, गु०, वा०, बा०। ४ "पदार्थे" वि० टि०। ५-संबन्ध-गु०, वि०। ६ एव वचनं युक्तम्। नहि दण्ड-भां०, मां०। ७ तत्संबुद्धौ वा०, बा० विना।

भवदभ्युपगमेन। अथ आत्मत्वाविशेषेऽपि तदात्मा अस्मदाद्यात्मभ्यो विशिष्टोऽभ्युपगम्यते तर्हि कार्यत्वाविशेषेऽपि घटादिकार्येभ्यः स्थावरादिकार्यमकर्तृकत्वेन विशिष्टं किं नाभ्युपगम्यते? तथा च न कार्यत्वादिलक्षणो हेतुरनुपलभ्यमानकर्तृकैः स्थावरादिभिरव्यभिचारी स्यात्। अथ तद्बुद्धौ तदात्मनोऽनुप्रवेशस्तदा बुद्धिमात्रमाधारशून्यमभ्युपगन्तव्यं भवति। तथा चास्मदादिबुद्धेः
५ रपि तद्वदाधारविकलत्वेन मतुबर्थासंभवाद् घटादावपि बुद्धिमत्कारणत्वस्यासिद्धत्वात् साध्यविकलो दृष्टान्तः। अथ अस्मदादिबुद्धिभ्यो बुद्धित्वे समानेऽपि तद्बुद्धेरेवानाश्रितत्वलक्षणो विशेषोऽभ्युपगम्यते तर्हि घटादिकार्येभ्यः पृथिव्यादिकार्यस्य कार्यत्वे समानेऽपि अकर्तृपूर्वकत्वलक्षणो विशेषोऽभ्युपगन्तव्य इति पुनरपि कार्यत्वलक्षणो हेतुस्तैरेव व्यभिचारी।

किंच, असौ तद्बुद्धिः क्षणिका, अक्षणिका वा इति वक्तव्यम्। यदि क्षणिकेति पक्षः,
१० तदाऽऽत्मानं समवायिकारणम्, आत्म-मनःसंयोगं चाऽसमवायिकारणम्, तच्छरीरादिकं च निमित्तकारणमन्तरेण कथं द्वितीयक्षणे तस्या उत्पत्तिः? तदनुत्पत्तौ च अचेतनस्याप्वादेश्चेतनानधिष्ठितस्य कथं भूधरादिकार्यकरणे प्रवृत्तिः वास्यादेरिवाचेतनस्य चेतनानधिष्ठितस्य प्रवृत्त्यनभ्युपगमात्? ततश्चेदानीं भूरुहादीनामनुत्पत्तिप्रसङ्गात् कार्यशून्यं जगत् स्यात्। अथ समवाय्यादिकारणमन्तरेणापि तद्बुद्धेरस्मदादिबुद्धिवैलक्षण्यादुत्पत्तिरभ्युपगम्यते; नन्वेवं घटादिकार्यवैलक्षण्यं
१५ भूधरादिकार्यस्य किं नाभ्युपगम्यते इति तेदेव चोद्यम्। किंच, यदीशबुद्धिः समवाय्यादिकारणनिरपेक्षैवोत्पत्तिमासादयति तर्हि मुक्तानामप्यानन्दादिकं शरीरादिनिमित्तकारणादिव्यतिरेकेणाप्युत्पत्स्यते इति न बुद्धि-सुखादिविकलं जडात्मस्वरूपं मुक्तिः स्यात्।

अथ अक्षणिका तद्बुद्धिः; नन्वेवमस्मदादिबुद्धिरप्यक्षणिका किं नाभ्युपगम्यते? अथ प्रत्यक्षादिप्रमाणविरोधान्नास्मदादिबुद्धिरक्षणिका तर्हि तद्विरोधादेव अकृष्टोत्पत्तिषु स्थावरेषु कार्यत्वं
२० बुद्धिमत्कारणपूर्वकं नाभ्युपगन्तव्यम्। अथास्मदादिबुद्धेः क्षणिकत्वसाधकमनुमानमक्षणिकत्वाभ्युपगमबाधकं प्रवर्त्तते न पुनरकृष्टोत्पत्तिषु स्थावरेषु, किं पुनस्तदनुमानम्? अथ क्षणिका बुद्धिः, अस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात्, शब्दवत् इत्येतत्। ननु यथा अस्यानुमानस्यास्मदादिबुद्ध्यक्षणिकत्वाभ्युपगमबाधकस्य संभवस्तथाऽकृष्टोत्पत्तिषु स्थावरेषु कर्तृपूर्वकत्वाभ्युपगमबाधकस्य तस्य संभवः प्रतिपादयिष्यत इति नात्र वस्तुनि भवतौत्सुक्यमास्थेयम्। यथा च
२५ बुद्धिक्षणिकत्वानुमानस्यानेकदोषदुष्टत्वं तथा शब्दस्य पौद्गलिकत्वविचारणायां प्रतिपादयिष्यत इत्येतदप्यास्तां तावत्। यथा वा बुद्धित्वाविशेषेऽपि ईशाऽस्मदादिबुद्ध्योरयमक्षणिकत्व-क्षणिकत्वलक्षणो विशेषस्तथा भूरुह-घटादिकार्ययोरप्यकर्तृ-कर्तृपूर्वकत्वलक्षणो विशेषः किं नाभ्युपगम्यते? इति पुनरपि तेदेव दूषणं कार्यत्वादेर्हेतोरनैकान्तिकत्वलक्षणं प्रकृतसाध्ये।} तदेवं बुद्धिमत्कारणपूर्वकत्वलक्षणे साध्ये मतुबर्थासंभवात् तन्वादीनामनेकधा प्रमाणबाधासंभवाच्च
३० शास्त्रव्याख्यानादिलिङ्गानुमीयमानपाण्डित्यगुणस्य देवदत्तस्येव मूर्खत्वलक्षणे साध्येऽनुमानबाधितकर्मनिर्देशानन्तरप्रयुक्तस्य कार्यत्वादेर्हेतोः कालात्ययापदिष्टत्वेन तत्पुत्रत्वादेरिवागमकत्वम् अनुमानबाधितत्वं वा पक्षस्येति स्थितम्।

तथा, 'कार्यत्वात्' इति हेतुरप्यसिद्धः। {तथाहि—किमिदं तन्वादीनां कार्यत्वम्-प्रागसतः स्वकारणसमवायः सत्तासमवायो वेति चेत्, कुतः प्रागिति? कारणसमवायादिति चेत्; ननु
३५ तत्समवायसमये प्रागिव स्वरूपसत्त्ववैधुर्ये 'प्राक्' इति विशेषणमनर्थकम्, सति संभवे व्यभिचारे च विशेषणमुपादीयमानमर्थवद् भवति; अत्र तु व्यभिचार एव, न संभवः। तथाहि—यदि कारणसमवायसमये स्वरूपेण सद् भवति तन्वादि तदा तत्काल इव तस्य प्रागपि सत्त्वे कार्यत्वं न स्यादिति विशेषणमुपादीयते 'प्रागसतः' इति। यदा पुनः प्रागिव कारणसमवायवेलायामपि स्वरूपसत्त्वविकलता तदा 'प्राक्'ति विशेषणं न कञ्चिदर्थं पुष्णाति, 'असतः' इत्येवास्तु।

४० न चासतः कारणसमवायोऽपि युक्तः, शशविषाणादेरपि तत्प्रसङ्गात्। तस्य कारणविरहान्न तत्प्रसङ्ग इति चेत्, कुत एतत्? असत्त्वात्, तनु-करणादेरपि तद्वदसत्त्वे किं कृतोऽयं विभागः—अस्य कारणमस्ति न शशशृङ्गादेरिति? तन्वादेः कारणमुपलभ्यते नेतरस्येत्यपि नोत्तरम्, यतः

१-कर्तृत्वेन वा०, बा० विना। २ प्र० पृ० पं० २। ३ प्र० पृ० पं० २।

कार्य-कारणयोरुपलम्भे सति एतत् स्यात् 'इदमस्य कारणम् कार्यं चेदमस्य' इति। न च परस्य तदुपलम्भः प्रत्यक्षतः, उपलम्भकारणमुपलम्भविषय इति नैयायिकानां मतम्—"अर्थवत् प्रमाणम्" [वात्स्या० भा० पृ० १, पं० २] इत्यत्र भाष्ये "प्रमातृ-प्रमेयाभ्यामर्थान्तरमव्यपदेश्याव्यभिचारिव्यवसायात्मकज्ञाने कर्त्तव्येऽर्थः सहकारी विद्यते यस्य तद् अर्थवत् प्रमाणम्" [ ] इति व्याख्यानात्। न चाजनकं सहकारि, 'सह करोतीति सहकारि' इति व्युत्पत्तेः। न चासत् शशविषाणसमं ज्ञानस्यान्यस्य वा कारणम्, विरोधात्। अपि च, इन्द्रियार्थसन्निकर्षात् प्रत्यक्षं ज्ञानमुत्पत्तिमत्, कार्य-कारणादिना च इन्द्रियसन्निकर्षः संयोगः, सोऽपि कथं तेनासता जन्यते इति चिन्त्यम्। संयोगाभावे च रूपादिनेन्द्रियस्य संयुक्तसमवायः, रूपत्वादिना तु संयुक्तसमवेतसमवाय इति सर्वं दुर्घटम्। एतेन द्रव्यत्वादिसामान्यसंबन्धोऽपि तस्य निरूपितः। तन्न तन्वादिविषयमध्यक्षम्। अत एव नानुमानमपि। तदेवं खरविषाणादिवत् कार्य-कारणादेरनुपलम्भान्न युक्तमेतत्-शरीरादेः १० कारणमस्ति, न शशशृङ्गादेरिति।

यदि पुनस्तनु-करणादिः सन् वन्ध्यासुतादिपरिहारेणेति मतिः, तत्र कुतः स एव सन्? कारणसमवायात्, सोऽपि कुतः? सत्त्वात्, अन्योऽन्यसंश्रयः—तत्समवायात् सत्त्वम् अतश्च तत्समवाय इति। प्रागसतः सत्तासमवायात् स एव सन्निति चेत्, कुतः प्राक्? सत्तासमवायात्; ननु तत्समवायकाले प्रागिव स्वरूपसत्त्वविरहे 'प्राग्' इति विशेषणमनर्थकमित्यादि सर्वं वक्तव्यम्। १५ असतश्च सत्तासमवाये खरशृङ्गादेरपि संभवेत् अविशेषात्। 'प्राग्' इति च विशेषणं शशशृङ्गादिव्यवच्छेदार्थं परेणोक्तम्, सत्तासंबन्धसमये च तन्वादेः स्वरूपसत्त्वाभावे कस्ततो विशेषः? अयमस्ति विशेषः—कूर्मरोमादिकमत्यन्तासत्, इतरत् पुनः स्वयं न सत् नाप्यसत्; अत एव सत्तासंबन्धात् 'तदेव सत्' इत्युच्यत इति, तदेतज्जडात्मनो भवतः कोऽन्यो भाषते। तथाहि—'न सत्' इतिवचनात् तस्य सत्तासंबन्धात् प्रागभाव उक्तः, सत्प्रतिषेधलक्षणत्वादस्य। 'नाप्यसत्' इत्यभिधानाद् भावः, २० असत्त्वनिषेधरूपत्वाद् भावस्य रूपान्तराभावात्। तथैव वैयाकरणानां न्यायः—"द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः" [ ] इति, कथमन्यथा 'नेदं निरात्मकं जीवच्छरीरम्, प्राणादिमत्त्वात्' इत्यत्र नैरात्म्यनिषेधः सात्मकः सिध्येत्?

अत्र केचित् ब्रुवते—"नैवं प्रयोगः क्रियतेऽपि तु 'सात्मकं जीवच्छरीरम्, प्राणादिमत्त्वात्" इति। तैरप्येवं प्रयोगं कुर्वद्भिः सात्मकत्वाभावो नियमेन प्राणादिमत्त्वाभावेन व्याप्तोऽभ्युपगन्तव्यः— २५ अन्यथा व्यभिचाराशङ्का न निवर्त्तेत—तदभ्युपगमे चेदमवश्यं वक्तव्यम्—जीवच्छरीरे प्राणादिमत्त्वं प्रतीयमानं स्वाभावं निवर्त्तयति, स च निवर्त्तमानः स्वव्याप्यं सात्मकत्वाभावमादाय निवर्त्तते, इतरथा तेनासौ व्याप्तो न स्यात्। यस्मिन्निवर्त्तमाने यन्न निवर्त्तते न तेन तद् व्याप्तम्, यथा निवर्त्तमानेऽपि प्रदीपे अनिवर्त्तमानः पटादिर्न तेन व्याप्तः, न निवर्त्तते च प्राणादिमत्त्वाभावे निवर्त्तमानेऽपि सात्मकत्वाभाव इति। निवर्त्तते इति चेत्, तन्निवृत्तावपि यदि सात्मकत्वं न सिध्यति न तर्हि तद्- ३० भावो निवर्त्तते, सात्मकत्वाभावाभावेऽपि तदभावस्य तदवस्थत्वात्। सिध्यतीति चेत्, आयातमिदम्—"द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः" [ ] इति। तथा चेदमपि युक्तम्-'नेदं निरात्मकं जीवच्छरीरम्, प्राणादिमत्त्वात्' इति।

अन्ये तु मन्यन्ते—"अन्यत्र दृष्टो धर्मः क्वचिद्धर्मिणि विधीयते, निषिध्यते च" [ ] इति वचनात् केवलं घटादौ नैरात्म्यमप्राणादिमत्त्वेन व्याप्तं दृष्टम्, तदेव निषिध्यते जीवच्छरीरेऽप्रा- ३५ णादिमत्त्वाभावेन, न पुनः सात्मकत्वं विधीयते; तस्यान्यत्रादर्शनात्" इति। तेषां घटादौ नैरात्म्यं प्रतिपन्नं प्रतिषिध्यते इति भवतु सूक्तम्, तथापि तन्निषेधसामर्थ्याद् यदि जीवच्छरीरे सात्मकत्वं न स्यात् न तर्हि तत्र तन्निषेधः—यदा हि नैरात्म्यनिषेधो न सात्मकः—किन्तु यथाऽऽत्मनोऽभावो नैरात्म्यं तथाऽस्याऽभावोऽपि तुच्छरूपः आत्मनोऽन्यत्वाद् भङ्ग्यन्तरेण नैरात्म्यमेव, पुनस्तन्निषेद्धव्यम्, पुनरपि तन्निषेधस्तुच्छरूपो नैरात्म्यमित्यपरस्तन्निषेधो मृग्यः, तथा च सति अनवस्थानान्न नैरात्म्य- ४० निषेधः। किंच, यदि नाम घटादौ नैरात्म्यमुपलब्धं किमित्यन्यत्र निषिध्यते? इतरथा देवदत्ते पाण्डित्यमुपलब्धं यज्ञदत्तादौ निषिध्येत। तत्र प्राणादिमत्त्वदर्शनादिति चेत्, युक्तमेतद् यदि प्राणादिमत्त्वं नैरात्म्यविरुद्धं स्याद् अग्निरिव शीतविरुद्धः, न चैवम्; अन्यथा सर्वमशेषविरुद्धं भवेत्। प्राणादिमत्त्वेन

१ पृ० १०८ पं० ३५।

स्वाभावो नैरात्म्यव्यापको विरुद्धः, ततः प्राणादिमत्त्वभावात् तदभावो निवर्त्तते, वह्निभावादिव शीतम्, स च निवर्त्तमानः स्वव्याप्यं नैरात्म्यमादाय निवर्त्तते, यथा धूमाभावः पावकाभावमिति । दत्तमत्रोत्तरम्–यदि नैरात्म्याभावः सात्मको न भवेत् तदवस्थं नैरात्म्यमिति । भवतु तर्हि नैरात्म्य-निषेधः सात्मकः, तथा सति 'सत्तासंबन्धात् प्राक् तन्वादिना (दि ना) सत्' इति वचनात् तदा तस्य सत्त्वमुक्तम्, 'न सत्' इत्यभिधानादसत्त्वमिति विरोधः । ततोऽसदेव तदभ्युपगन्तव्यमिति न वन्ध्यासुतादेस्तनु–करणादेर्विशेषः । भवत्वेवं तथापि तन्वादेरेव सत्तासंबन्धात् सत्त्वम् न खरशृङ्गादेः तथादर्शनादिति चेत्, उक्तमत्र तथादर्शनोपायाभावादिति ।

[प्रासङ्गिकं सत्तापदार्थनिरसनम्]

अपि च, सत्ताऽपि यदि असती कथं ततो वन्ध्यासुतादेरिवापरस्य सत्त्वम्? सती चेद् यदि अन्यसत्तातः, अनवस्था । स्वतश्चेत्, पदार्थानामपि स्वत एव सत्त्वं स्यादिति व्यर्थं तत्परिकल्पनम् । किञ्च, यदि स्वत एव सत्ता सती उपेयते तदा प्रमाणं वक्तव्यम् । अथ स्वतः सत्ता सती–तत्संबन्धात् तन्वादीनां सत्त्वान्यथाऽनुपपत्तेः–तर्ह्यन्योन्यसंश्रयः–तत्संबन्धात् तन्वादिसत्त्वे सिद्धे सत्तासत्त्व-सिद्धिः, ततस्तत्संबन्धात् तन्वादिसत्त्वसिद्धिरिति व्यक्तमितरेतराश्रयत्वम् । अथ सत्ता स्वतः सती, सदभिधानप्रत्ययविषयत्वात्, अवान्तरसामान्यादिवत्; नः; द्रव्यादिना व्यभिचारः–द्रव्यादिरपि 'सद् द्रव्यम्, सन् गुणः, सत् कर्म' इत्येवं सदभिधानप्रत्ययविषयो भवति, न चासौ परेण स्वतः सन्नभ्युपगतः सत्ताप्रकल्पनवैफल्यप्रसङ्गात् । न च द्रव्यादौ तद्विषयत्वं परापेक्षं न सत्तायामिति वक्तुं युक्तम्, तस्यामपि तदपेक्षत्वसंभवात् । अथ तत्र तस्य तदपेक्षत्वे किं तदपरमिति वक्तव्यम्; नन्वेतद् द्रव्यादावपि समानम् । तत्र सत्तेति चेत्, अत्रापि द्रव्यादिकम् इति तुल्यम्–यथैव हि सत्तासंबन्धात् द्रव्यादिकं सत् न स्वतः तथा द्रव्यादिस्वरूपसत्त्वसंबन्धात् सत्ता सती न स्वतः । द्रव्यादेः स्वरूपसत्त्वं नास्ति तेनायमदोषः, तदस्तित्वे को दोष इति वाच्यम् । ननु तस्या (तस्यं) स्वतः सत्त्वेऽवान्तरसामान्याभावप्रसङ्गो दोषः, ननु स्वतोऽसत्त्वे खरविषाणादेरिव सुतरां तदभाव-दोषः । अपि च, यो हि तत्र सत्तासंबन्धं नेच्छति स कथमवान्तरसामान्यसंबन्धमिच्छेत् ? न चात्र प्रमाणं स्वतोऽसन्तो द्रव्यादयो नावान्तरसामान्यमिति । अथैतत्—द्रव्यादयो न स्वतः सन्तः, अवान्तरसामान्यवत्त्वात्, यत् पुनः स्वतः सत् न तद् अवान्तरसामान्यवत्, यथा सामान्य–विशेष–समवाया इति व्यतिरेकी हेतुः, नैतत्; यदि हि द्रव्यादयो धर्मिणः कुतश्चित् प्रतीतिगोचर-चारिणेत्सन्तो भवन्ति [सँ कथमवान्तरसामान्यसंबन्धमिच्छेत्? न चात्र प्रमाणं स्वतोऽसन्तो द्रव्यादयो नावान्तरसामान्यमिति । अथैतत्–द्रव्यादयो न स्वतः सन्तोऽवान्तरसामान्यवत्त्वात्, यत् पुनः स्वतः सत् न तदवान्तरसामान्यवत्, यथा] सामान्यप्रतीतिः सत्त्वं साधयन्ती स्वत ईति प्रतिज्ञाम् तदसत्त्वविषयाबाधने चेद (चारिणस्सन्तो भवन्ति तदा कथं न तत्प्रतीतिः स्वतस्सत्त्वं साधयन्ती 'न स्वतस्सन्तस्ते' इति प्रतिज्ञां तदसत्त्वविषयां बाधते । न चेद) मत्रोत्तरम्–न स्वतः सन्तस्ते प्रतीतिविषयाः किन्तु सत्तासंबन्धादिति, यतो 'न स्वयमसन्तस्तत्संबन्धात् तद्विषया भवन्ति' इत्युक्तम् । किंच, द्रव्यादेरेकान्तेन यस्य भिन्नान्यवान्तरसामान्यानि कथं तस्य तानि स्युः यतोऽवान्तरसामान्यवत्त्वादिति हेतुः सिद्धः स्यात्? अथ तथापि तँस्यादि (तस्येति), नः; परस्परमपि स्युरिति सामान्यसमवायात् परिशेषवत् (सामान्य-समवाय-विशेषवत्) इति वैधर्म्यनिदर्शनम-युक्तम् । यदि मतम्—द्रव्यादौ तानि समवेतानि ततस्तस्य तानि न सामान्यादेर्विपर्ययादिति, तन्न सम्यक्; 'तत्र समवेतानि' इति समवायेन संबद्धानीति यद्यर्थः, स न युक्तः; समवायस्य निषिद्धत्वान्निषेत्स्यमानत्वाच्च । भवतु वा समवायः तथापि यत्र द्रव्ये, गुणे, कर्मणि च द्रव्यत्वम्, गुणत्वम्, कर्मत्वं चाऽवान्तरसामान्यं तत्रैव पृथिवीत्वादीनि, रूपत्वादीनि, गमनत्वादीनि च तथाविधानि सामान्यानि, समवायोऽपि तत्रैव सामान्यवत् तस्य सर्वगतत्वाच्च द्रव्यादिवदन्योन्यसत्तानीति न

१ पृ० १०९ पं० ३८ । २ **तन्वादिर्नाऽसन्निति व**–वा०, बा० विना । ३ पृ० १०९ पं० १८ । ४ पृ० १०९ पं० २ । ५ **तदभावा (वो) दोषः** भां० । ६–**तद् यथा सामा**– मां०, भां० । ७ [ ] एतच्चिह्नान्तर्गताः पङ्क्तयः केनाऽपि कारणेन द्विरुक्ता जाता इति प्रतिभाति । ८ **इति प्रति प्रतिज्ञा**–गु० । ९–**ज्ञातम्** मां० । १०–**षयं बाध**–वा०, बा० । ११ **तस्यापि** वा०, बा० विना । १२ पृ० १०६ पं० १० ।

द्रव्यादेः स्वतः सत्त्वबाधनमित्याशङ्का न निवर्त्तते–'किं द्रव्यादिसंबन्धात् सत्ता सती किं वा तया द्रव्यादिकं सत्' इति । तन्न सत्तातः तन्वादेः सत्त्वम्, तस्या एवासिद्धत्वात् ।

{ सत्ताप्रत्यक्षादिप्रमाणसिद्धत्वात् सत्तायाः प्रत्यक्षबाधितविषयत्वेन एवमुपन्यस्यमानस्य प्रसङ्ग-साधनस्यानवकाशः । न च द्रव्यप्रतिभासवेलायां प्रत्यक्षबुद्धौ परिस्फुटरूपेण व्यक्तिविवेकेन सत्ता न प्रतिभातीति शक्यं वक्तुम्, अनुगताकारस्य व्यावृत्ताकारस्य च प्रत्यक्षानुभवस्य संवेदनात् । न चानु-गत–व्यावृत्तवस्तुव्यतिरेकेण द्व्याकारा बुद्धिर्घटते । न हि विषयव्यतिरेकेण प्रतीतिरुत्पद्यते, नीलादिस्व-लक्षणप्रतीतेरपि तथाभावप्रसङ्गात् । अथ तैमिरिकस्य बाह्यार्थसन्निधिव्यतिरेकेणापि केशोण्डुकादिप्र-तीतिरुदेति तथैवानुगतरूपमन्तरेणापि भिन्नवस्तुष्वनुगताकारा बुद्धिरुदेष्यतीति न ततः सत्ताव्यवस्था, तदयुक्तम्; तैमिरिकप्रतीतौ हि प्रतिभासमानस्य केशोण्डुकादेर्बाधक–कारणदोषपरिज्ञानादतत्त्वम्; सत्तादर्शने तु न बाधकप्रत्ययोदयः नापि कारणदोषपरिज्ञानमिति न तद्ग्राहिणो विज्ञानस्य मिथ्यात्वम् । तथाहि—विभिन्नेष्वपि घट–पटादिष्वर्थेषु 'सत् सत्' इति अभेदमुल्लिखन्ती प्रतीतिरुदयमासादयति; न चासौ कालान्तरादौ विपर्ययमुपगच्छन्ती लक्ष्यते, सर्वदा सर्वेषां घट–पटादिषु 'सत् सत्' इति व्याहृतेः । व्यवहारमुपरचयन्ती च प्रतीतिः परैरपि प्रमाणमभ्युपगम्यते । यथोक्तं तैः–"प्रामाण्यं व्यवहारेण" [ ] इति । तदेवमवस्थितम्–अनुगताकारा हि बुद्धिर्व्यावृत्तरूपप्रतीत्यनधिगतं साधारणरूपमुल्लिखन्ती मु(सु)परिनिश्चितरूपा बाधाऽयोगात् प्रमाणम् । सा च अक्षान्वय–व्यतिरेका-नुसारितया प्रत्यक्षम् । तथाहि–विस्फारितलोचनस्य घट–पटादिषु रूपमारूढां सत्तामुल्लिखन्ती 'सत् सत्' इति प्रतीतिः, तदभावे च न भवतीति तदन्वय–व्यतिरेकानुविधायितया कथं न प्रत्यक्षम्? तस्माद् बहुषु व्यावृत्तेषु तुल्याकारा बुद्धिरेकतामवस्यति । यच्चात्र विभिन्नेषु घटादिषु प्रतिनियतमेक-मनुगतस्वरूपं सैव जातिः ।

अथ व्यक्तिव्यतिरिक्ता जातिरुपेयते न च व्यक्तिदर्शनवेलायां तद्रूपसंस्पर्शविषयव्यतिरिक्तवपुर-परमनुगतिरूपं प्रतिभाति तत् कथं तत् सामान्यम्? नैतदस्ति; यस्मादगृहीतसङ्केतस्यापि तनुभृतः प्रथममुद्भाति वस्तु; द्वितीये तुल्यरूपतामनुसरति बुद्धिः क्वचिदेव न सर्वत्र । प्रतिपत्त्यन्यता च सर्वत्र भेदव्यवहारनिबन्धनं तुल्यदेश–कालेऽपि रूप–रसादौ च, प्रतिपत्त्यन्यता जातावपि विद्यत इति कथं न सा भिन्नाऽस्ति? तथाहि—व्यक्त्याकारविवेकेन विशदमनुगतिरूपता भाति तद्विवेकेन च व्यावृ-त्तरूपतेति कथं व्यक्तिस्वरूपाद् भिन्नावभासिनी जातिर्भिन्ना नाभ्युपगमविषयः?

अथैकेन्द्रियावसेयत्वाद् जाति–व्यक्त्योरेकता रूप–रसादौ तु भिन्नेन्द्रियग्राह्यत्वाद् भेदः, तद-प्यसङ्गतम्; यत एकेन्द्रियग्राह्यमपि वाताऽऽतपादिकं समानदेशं च भिन्नं प्रतिभातीति भिन्नवपुर-भ्युपेयते तथा प्रतिनियतेन्द्रियविषयमपि जाति–व्यक्तिद्वयं भिन्नम्; भिन्नप्रतिभासादेव । तथाहि—घटमन्तरेणापि पटग्रहणे 'सत् सत्' इति पूर्वप्रतिपन्ना सत्ताऽवगतिर्दृष्टा; यदि तु व्यक्तिरेव सती न जातिः तत्सत्त्वेऽपि तदव्यतिरिक्ता च, तथा सति व्यक्तिरूपवत् तदननुगतिरपि व्यक्त्यन्तरे प्रस-ज्येत । प्रतीयते च सद्रूपता युगपद् घट–पटादिषु परस्परविविक्ततनुष्वपि सर्वदा । तेनैकरूपैव जातिः, प्रत्यक्षे तथाभूताया एव तस्याः प्रतिभासनात्; शब्द–लिङ्गयोरपि तस्यामेव संबन्धग्रहणमिति ताभ्यामपि सा प्रतीयते । तदेवं प्रत्यक्षादिप्रमाणावसेयत्वात् सत्तायाः न तन्निराकरणाय प्रसङ्गसा-धनानुमानप्रवृत्तिरिति । }

असदेतत् ।

यतो न व्यक्तिदर्शनवेलायां स्वरूपेण बहिर्ग्राह्याकारतया प्रतीतिमवतरन्ती जातिरुद्भाति, नहि घट–पटवस्तुद्वयप्रतिभाससमये तदैव तद्व्यवस्थितमूर्त्तिर्भिन्नाऽभिन्ना वा जातिराभाति, तदाकारस्या-परस्य ग्राह्यतया बहिस्तत्राप्रतिभासनात् । बहिर्ग्राह्यावभासश्च बहिरर्थव्यवस्थाकारी, नान्तरावभासः । यदि तु सोऽपि तद्व्यवस्थाकारी स्यात्, तथा सति हृदि परिवर्त्तमानवपुषः सुखादेरपि प्रतिभासाद् बहिस्तद्व्यवस्था स्यात्; तथा च 'सुखाद्यात्मकाः शब्दादयः' इति साङ्ख्यदर्शनमेव स्यात् । अथ सुखा-दिराकारो बाह्यरूपतया न प्रतिभातीति न बहिरसौ, जातिरपि तर्हि न बहीरूपतया प्रतिभातीति न बहीरूपाऽभ्युपगन्तव्या, यतः कल्पनामतिरपि दर्शनदृष्टमेव घटादिरूपं बहिरुल्लिखन्ती तद्विरं च अन्तः

१–**क्षसामान्यबा**–मां० । **-क्षाबा**–भां० । २–**स्य च प्रत्य**–वा०, बा० विना ।

प्रतिभाति, न तु तद्व्यतिरिक्तवपुषं जातिमुद्द्योतयति। तन्न तदवसेयाऽपि बहिर्जातिरस्ति। तैमिरिकज्ञाने बहिष्प्रकाशमानवपुषोऽपि हि केशोण्डुकादयो न तथाऽभ्युपेयन्ते, बाध्यमानज्ञानविषयत्वात्। जातिस्तु न बहीरूपतया क्वचिदपि ज्ञाने प्रतिभातीति कथं सा सत्त्वाभ्युपगमविषयः? बुद्धिरेव केवलं घट-पटादिषु प्रतिभासमानेषु 'सत् सत्' इति तुल्यतनुराभाति। यदि तर्हि[1] न बाह्या जातिरस्ति, बुद्धिरपि कथमेकरूपा प्रतिभाति नहि बहिर्निमित्तमन्तरेण तदाकारोत्पत्तिमती सा युक्ता? ननु केनोच्यते बहिर्निमित्तनिरपेक्षा जातिमतिरिति, किन्तु बहिर्जातिर्न निमित्तमिति, बाह्यास्तु व्यक्तयः काश्चिदेव जातिबुद्धेर्निमित्तम्। ननु यदि व्यक्तिनिबन्धनाऽनुगताकारा मतिः, तथा सति यथा खण्ड-मुण्डव्यक्तिदर्शने 'गौर्गौः' इति प्रतिपत्तिरुदेति तथा गिरिशिखरादिदर्शनेऽपि 'गौर्गौः' इत्येतदाकारा प्रतिपत्तिर्भवेत् व्यक्तिभेदाविशेषात्, तदयुक्तम्; भेदाविशेषेऽपि खण्ड-मुण्डादिव्यक्तिषु 'गौर्गौः' इत्याकारा मतिरुदयमासादयन्ती समुपलभ्यत इति ता एव तामुपजनयितुं समर्था इत्यवसीयते, न पुनर्गिरिशिखरादिषु 'गौर्गौः' इति मतिर्दृष्टेति न ते तन्निबन्धनम्। यथा च आमलकीफलादिषु यथाविधानमुपयुक्तेषु व्याधिविरतिलक्षणं फलमुपलभ्यत इति तान्येव तद्विधौ समर्थानीत्यवसीयते, भेदाविशेषेऽपि न पुनस्त्रपुष-दध्यादीनि। अथ भिन्नेष्वपि भावेषु 'सत् सत्' इति मतिरस्ति, विभिन्नेषु च भावेषु यदेकत्वं तदेव जातिः, तत्रोच्यते—तदेकत्वं घट-पटादिषु किमन्यत्, उतानन्यत्? न तावदन्यत्, तस्याप्रतिभासनादित्युक्तेः। नाप्यनन्यत्, एकरूपाऽप्रतिभासनात्; न हि घटस्य पटस्य चैकमेव रूपं प्रतिभाति, सर्वात्मना प्रतिद्रव्यं भिन्नरूपदर्शनात्। तस्मादप्रतीतेरभिन्नाऽपि जातिर्नास्ति, बुद्धिरेव तुल्याकारप्रतिभासा 'सत् सत्' इति शब्दश्च दृश्यत इति तदन्वय एव युक्तः न जात्यन्वयः, तस्यादर्शनात्। न च बुद्धिस्वरूपमप्यपरबुद्धिस्वरूपमनुगच्छति इति न तदपि सामान्यमित्येकानुगतजातिवादो मिथ्यावादः।

अपि च, अनेकव्यक्तिव्यापि सामान्यं तद्वादिभिरभ्युपगम्यते। न च तद्व्यापित्वं तस्य केनचित् ज्ञानेन व्यवस्थापयितुं शक्यम्। तथाहि—सन्निहितव्यक्तिप्रतिभासकाले जातिस्तद्व्यक्तिसंस्पर्शिनी स्फुटमवभाति न व्यक्त्यन्तरसंबन्धितया, तस्यास्तथाऽसन्निधानेन प्रतिभासायोगात्। तदप्रतिभासे च तन्मिश्रताऽपि नावगतेति कथमसन्निहितव्यक्त्यन्तरसंबद्धशरीरा जातिरवभाति। यदेव हि परिस्फुटदर्शने प्रतिभाति रूपं तदेव तस्या युक्तम्, दर्शनासंस्पर्शिनः स्वरूपस्यासंभवात्; संभवे वा तस्य दृश्यस्वभावाद् भेदप्रसङ्गात्, तदेकत्वे सर्वत्र भेदप्रतिहतेः अनानैकं जगत् स्यात्। दर्शनगोचरातीतं च व्यक्त्यन्तरसंबद्धं जातिस्वरूपमप्रतिभासनादसत्; प्रतिभासने वा तस्य तत्संबद्धानां व्यवहितव्यक्त्यन्तराणामपि प्रतिभासप्रसङ्ग इति सकलजगत्प्रतिभासः स्यात्। अथ मतम्—सन्निहितव्यक्तिदर्शनकाले व्यक्त्यन्तरसंबन्धिनी जातिर्न भाति; यदा तु व्यक्त्यन्तरं दृश्यते तदा तद्दर्शनवेलायां तद्गतत्वेन जातिराभातीति साधारणस्वरूपपरिच्छेदः पश्चात् संभवतीति, ततश्च पश्चादर्थान्वयदर्शने कथं न तस्यास्तद्व्यापिताग्रहः? असदेतत्; यतो व्यक्त्यन्तरदर्शनकालेऽपि तत्परिगतमेव जातेः स्वरूपं प्रतिभाति न पूर्वव्यक्तिसंस्पर्शितया; तस्याः प्रत्यक्षगोचरातिक्रान्ततया तत्संबद्धस्यापि रूपस्य तदतिक्रान्तत्वात्। तत् कथं सन्निहिताऽसन्निहितव्यक्तिसंबद्धजातिरूपावगमः?

अथ प्रत्यभिज्ञानादनेकव्यक्तिसंबन्धित्वेन जातिः प्रतीयते, ननु केयं प्रत्यभिज्ञा? यदि प्रत्यक्षम्, कुतस्तदवसेया जातिरेकानेकव्यक्तिव्यापिनी प्रत्यक्षा? अथ नयनव्यापारानन्तरं समुपजायमाना प्रत्यभिज्ञा कथं न प्रत्यक्षम्? निर्विकल्पकस्याप्यक्षान्वय-व्यतिरेकानुविधानात् प्रत्यक्षत्वं तदत्रापि तुल्यम्, असदेतत्; यदि अक्षजा प्रत्यभिज्ञा तथा सति प्रथमव्यक्तिदर्शनकाल एव समस्तव्यक्तिसंबद्धजातिरूपपरिच्छेदोऽस्तु। अथ तदा स्मृतिसहकारिविरहान्न तत्त्वावगतिः, यदा तु द्वितीयव्यक्तिदर्शनं तदा पूर्वदर्शनाहितसंस्कारप्रबोधसमुपजातस्मृतिसहितमिन्द्रियं तत्त्वदर्शनं जनयति, तदप्यसत्; यतः स्मरणसचिवमपि लोचनं पुरःसन्निहितायामेव व्यक्तौ तत्स्थजातौ च प्रतिपत्तिं जनयितुमीशम्; न पूर्वव्यक्तौ, असन्निधानात्। तन्न तत्स्थितां जातिं दर्शनं परिदृश्यमाने व्यक्त्यन्तरे संधत्ते।

अथेन्द्रियवृत्तिर्न स्मरणसमवायिनी करणत्वादिति नासौ संधानकारिणी, पुरुषस्तु कर्तृतया

१ तर्हि बाह्या भां०, मां०, बा०, बा० विना। २ पृ० १११ पं० ३८।

स्मृतिसमवायीति चक्षुषा परिगतेऽर्थे तदुपदर्शितपूर्वव्यक्तिगतां जातिं संधास्यतीति, तदसत्; यतः सोऽपि न स्वतन्त्रतयाऽर्थग्राहकः किन्तु दर्शनसहायः। यदि पुनः स्वतन्त्र एवार्थग्राहकः स्यात् तथा सति स्वाप-मद-मूर्छादिष्वपि सर्वव्यक्त्यनुगतजातिप्रतिपत्तिः स्यात्। तस्मादात्माऽपि दर्शनसहाय एवार्थवेदी। दर्शनं च पुरःसन्निहितं व्यक्तिस्वरूपमनुसरति, नहि स्मृतिगोचरमपि पूर्वदृष्टव्यक्तिगतं जात्यादिकमिति न दर्शनसहायोऽपि तदनुसंधानसमर्थ आत्मा। अथ स्मरणोपनीतं जातिरूपमात्मा तत्र संधास्यति; नन्वत्रापि स्मृतिः परिहृतपुरोवर्त्तिव्यक्तिदर्शनविषया पूर्वदृष्टमर्थमनुसरन्ती संलक्ष्यते। तत् कथं पुरोवर्त्तिनि अप्रवर्त्तमाना स्वविषयान् सामान्यादींस्तत्र संघटयितुं क्षमा? तदस्मृतं च संघटनं कथमात्माऽपि कर्तुं क्षमः? तथाहि—दर्शने सति द्रष्टरि तस्य स्वरूपे जाते तन्निमग्नं न स्मृतिकृतं स्मर्तृरूपं भाति। यदि तु भाति तथा सति द्रष्टृरूप एवासौ, न स्मर्त्ता। अथ स्मर्तृरूपे द्रष्टृस्वरूपमनुप्रविष्टं प्रतिभाति, तथापि स्मर्त्तैवाऽसौ न द्रष्टा। अथ द्रष्टृ-स्मर्तृस्वरूपे विविक्ते भातः, तथा सति तयोर्भेद इति नैकत्वम्। तथाहि—द्रष्टृस्वरूपं दृग्विषयावभासि प्रतिभाति, स्मर्तृस्वरूपमपि पुंसः स्मृतिविषयमवतीर्णमवभाति; तत् कुतः पूर्वापरयोर्जाति-रूपयोः संधानम्?

यत् पुनरुक्तम् 'स्मरतः पूर्वदृष्टार्थानुसंधानादुत्पद्यमाना मतिश्चक्षुःसंबद्धत्वे प्रत्यक्षम्' इति, एतदप्यसत्; नेन्द्रियमतिः स्मृतिगोचरपूर्वरूपग्राहिणी, तत् कथं सा तत्संधानमात्मसात्करोति? पूर्वदृष्टसंधानं हि तत्प्रतिभासनम्, तत्प्रतिभाससंबन्धे चेन्द्रियमतेः परोक्षार्थग्राहित्वात् परिस्फुटप्रतिभासनम् असन्निहितविषयग्रहणं च, तत् कुतस्तयोरैक्यम्? अथ परोक्षग्रहणं स्वात्मना नेन्द्रियमतिः संस्पृशति, एवं तर्हि तद्विविक्तेन्द्रियमतिरिति कथं तत्संधायिका सामग्री अभ्युपेयते? यदि च स्मृतिविषयस्वभावतया दृश्यमानोऽर्थः प्रत्यक्षबुद्धिभिरवगम्यते, तथा सति स्मृतिगोचरः पूर्वस्वभावो वर्त्तमानतया भातीति विपरीतख्यातिः सर्वं दर्शनं भवेत्। अथ यत् तदा तत्राविद्यमानमर्थमवैति ज्ञानं तत्र विपरीतख्यातिः, प्रत्यक्षप्रतीतिस्तु पूर्वसंधानादप्युपजायमाना पुरः सदेव वस्तु गृह्णती कथं विपरीतख्यातिर्भवेत्? ननु पूर्वरूपग्राहितया तस्याः सदर्थग्रहणमेव न संभवति; स्मरणोपनेयं हि रूपं प्रतियती वर्तमानतया प्रत्यक्षबुद्धिर्न प्रतिभासमानवपुषः सत्तां साधयितुमलम्, प्रत्यस्तमितेऽपि रूपे स्मृतेरवतारात्। तदनुसारिणी चाक्षमतिरपि तदेवानुसरन्ती न सत्ताऽऽस्पदम्। तस्मादिन्द्रियमतिः सकला पूर्वरूपग्रहणं परिहरन्ती वर्त्तमाने परिस्फुटे वर्त्तत इति तदैव तद्गतां जातिमुद्भासयितुं प्रभुरिति न पूर्वापरव्यक्तिगता जातिः समस्ति। यदेव हि द्वितीयव्यक्तिगतं रूपं भाति तदेव सत्, पूर्वव्यक्तिगतं तु रूपं न भातीति न तत् सत्। ततश्चानेकव्यक्तिव्यापिकाया जातेरसिद्धिरिति न तत्र लिङ्ग-शब्दयोरपि प्रवृत्तिरिति न ताभ्यामपि तत्प्रतिपत्तिः। यथा च व्यक्तिभिन्नाऽनुस्यूता जातिर्न संभवति तथा यथास्थानं प्रतिपादयिष्यत इत्यास्तां तावत्।

तदेवं सत्ता-समवाययोः परपरिकल्पितयोरसिद्धेः 'प्रागसतः कारणसमवायः सत्तासमवायो वा कार्यत्वम्' इति कार्यत्वस्यासिद्धत्वात् स्वरूपासिद्धोऽपि कार्यत्वलक्षणो हेतुः }।

अथ स्यादेष दोषो यदि यथोक्तलक्षणं कार्यत्वं हेतुत्वेनोपन्यस्तं स्यात्, यावताऽभूत्वा भवनलक्षणं कार्यत्वं हेतुत्वेनोपन्यस्तं तेनायमदोषः। नन्वेवमपि भू-भूधरादेः कथमेवंभूतं कार्यत्वं सिद्धम्? अथ यदि अत्र विप्रतिपत्तिविषयता तदाऽनुमानतस्तेषु कार्यत्वं साध्यते, तच्चानुमानम्—'भू-भूधरायः कार्यम्, रचनावत्त्वात्, घटादिवत्' इति कथं न तेषु कार्यत्वलक्षणो हेतुः सिद्धः? असदेतत्; यतोऽत्रापि प्रयोगे भू-भूधरादेरवयविनोऽसिद्धेराश्रयासिद्धः 'रचनावत्त्वात्' इति हेतुः, तदसिद्धत्वं च प्राक् प्रतिपादितम्[3]।

किञ्च, { किमिदं रचनावत्त्वम्? यदि अवयवसन्निवेशो रचना तद्वत्त्वं च पृथिव्यादेस्तदुत्पाद्यत्वम् तदाऽवयवसन्निवेशस्य संयोगापरनाम्नोऽसिद्धत्वादसिद्धविशेषणो रचनावत्त्वादिति हेतुः। तथा, पृथिव्यादिषु संयोगजन्यत्वस्य विशेष्यस्यासिद्धत्वादसिद्धविशेष्यश्च प्रकृतो हेतुः।

कथं संयोगासिद्धत्वम् येनोक्तदोषदुष्टः प्रकृतो हेतुः स्यात्? उच्यते, तद्ग्राहकप्रमाणाभावात् बाधकप्रमाणोपपत्तेश्च। तथाहि—

[प्रासङ्गिकं संयोगस्य निरसनम्]

"संख्या-परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वाऽपरत्वे कर्म च रूपि(द्रव्य)समवायाच्चाक्षुषाणि" [वैशेषिकद० ४-१-११]

१-यमाने परो-गु०। २-श्चाति पतर्हि त-गु०। ३ पृ० १०२ पं० ११।

इति वचनात् दृश्यवस्तुसमवेतस्य संयोगस्य परेण प्रत्यक्षग्राह्यत्वमभ्युपगतम्। न च निरन्तरोत्पन्नवस्तुद्वयप्रतिभासकालेऽध्यक्षप्रतिपत्तौ तद्व्यतिरेकेणापरः संयोगो बहिर्ग्राह्यरूपतां बिभ्राणः प्रतिभाति, नापि कल्पनाबुद्धौ वस्तुद्वयं यथोक्तं विहाय शब्दोल्लेखं चान्तरम् अपरं वर्णाकृत्यक्षराकाररहितं संयोगस्वरूपमुद्भाति। तदेवमुपलब्धिलक्षणप्राप्तस्य संयोगस्यानुपलब्धेरभावः, शशविषाणवत्।

तेन यदाह उद्योतकरः—

"यदि संयोगो नार्थान्तरं भवेत् तदा क्षेत्र-बीजोदकादयो निर्विशिष्टत्वात् सर्वदैवाङ्कुरादिकार्यं कुर्युः, न चैवम्, तस्मात् सर्वदा कार्याऽनारम्भात् क्षेत्रादीन्यङ्कुरोत्पत्तौ कारणान्तरसापेक्षाणि, यथा मृत्पिण्डादिसामग्री घटादिकरणे कुलालादिसापेक्षा; योऽसौ क्षेत्रादिभिरपेक्ष्यः स संयोग इति सिद्धम्। किञ्च, असौ संयोगो द्रव्ययोर्विशेषणभावेन प्रतीयमानत्वात् ततोऽर्थान्तरत्वेन प्रत्यक्षसिद्ध एव। तथाहि—कश्चित् केनचित् 'संयुक्ते द्रव्ये आहर' इत्युक्तो ययोरेव द्रव्ययोः संयोगमुपलभते ते एवाहरति न द्रव्यमात्रम्। किञ्च, दूरतरवर्त्तिनः पुंसः सान्तरेऽपि वने निरन्तररूपावसायिनी बुद्धिरुदयमासादयति, सेयं मिथ्याबुद्धिः मुख्यपदार्थानुभवमन्तरेण न क्वचिदुपजायते। न ह्यननुभूतगोदर्शनस्य गवये 'गौः' इति विभ्रमो भवति। तस्मादवश्यं संयोगो मुख्योऽभ्युपगन्तव्यः। तथा, 'न चैत्रः कुण्डली' इत्यनेन प्रतिषेधवाक्येन न कुण्डलं प्रतिषिध्यते, नापि चैत्रः, तयोरन्यत्र देशादौ सत्त्वात्। तस्माच्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते। तथा, 'चैत्रः कुण्डली' इत्यनेनापि विधिवाक्येन न चैत्र-कुण्डलयोरन्यतरविधानम्, तयोः सिद्धत्वात्; पारिशेष्यात् संयोगविधानम्। तस्मादस्त्येव संयोगः" [न्यायवा० पृ० २१९] इति, तन्निरस्तं द्रष्टव्यम्; संयुक्तद्रव्यस्वरूपावभासव्यतिरेकेणापरस्य संयोगस्य प्रत्यक्षे निर्विकल्पके सविकल्पके वाऽप्रतिभासस्य प्रतिपादितत्वात्।

न च संयुक्तप्रत्ययान्यथानुपपत्त्या संयोगकल्पनोपपत्तेः, निरन्तरावस्थयोरेव भावयोः संयुक्तप्रत्ययहेतुत्वात्। यावच्च तस्यामवस्थायां संयोगजनकत्वेन संयुक्तप्रत्ययविषयौ ताविष्येते तावत् संयोगमन्तरेण संयुक्तप्रत्ययहेतुत्वेन तद्विषयौ किं नेष्येते किं पारम्पर्येण? न च सान्तरे वने निरन्तरावभासिनी बुद्धिर्मुख्यपदार्थानुभवपूर्विका, अस्खलत्प्रत्ययत्वेनानुपप्लवरितत्वात्। 'न चैत्रः कुण्डली' इत्यादौ चैत्रसंबन्धिकुण्डलं निषिध्यते विधीयते वा न संयोगः। न च संबन्धव्यतिरेकेण चैत्रस्य कुण्डलसंबन्धानुपपत्तिरिति वक्तुं शक्यम्, यतश्चैत्र-कुण्डलयोः किं संबन्धिनोः स संबन्धः, उतासंबन्धिनोः? नासंबन्धिनोः, हिमवद्विन्ध्ययोरिवासंबन्धिनोः संबन्धानुपपत्तेः; न चासंबन्धिनोर्भिन्नसंबन्धेन तदभिन्नं संबन्धित्वं शक्यं विधातुम्, विरुद्धधर्माध्यासेन भेदात्। नापि भिन्नम्, तत्सद्भावेऽपि तयोः स्वरूपेणासंबन्धित्वप्रसङ्गात्; भिन्नस्य तत्कृतोपकारमन्तरेण तत्संबन्धित्वायोगात्; ततोऽपरोपकारकल्पनेऽनवस्थाप्रसङ्गात्। संबन्धिनोस्तु संबन्धपरिकल्पनं व्यर्थम्, संबन्धमन्तरेणापि तयोः स्वत एव संबन्धिस्वरूपत्वात्।

यत्तूक्तम् 'विशिष्टावस्थाव्यतिरेकेण क्षिति-बीजोदकादीनां नाङ्कुरजनकत्वम्, सा च विशिष्टावस्था तेषां संयोगरूपा शक्तिः, तदसारम्; यतो यथा विशिष्टावस्थायुक्ताः क्षित्यादयः संयोगमुत्पादयन्ति तथा तदवस्थायुक्ता अङ्कुरादिकमपि कार्यं निष्पादयिष्यन्तीति व्यर्थं संयोगशक्तेस्तदन्तरालवर्त्तिन्याः परिकल्पनम्। अथ संयोगशक्तिव्यतिरेकेण न कार्योत्पादने कारणकलापः प्रवर्त्तत इति निर्बन्धस्तर्हि संयोगशक्त्युत्पादनेऽप्यपरसंयोगशक्तिव्यतिरेकेण नासौ प्रवर्त्तत इत्यपरा संयोगशक्तिः परिकल्पनीया, तत्राप्यपरेत्यनवस्था। अथ तामन्तरेणापि शक्तिमुत्पादयन्ति तर्हि कार्यमपि तामन्तरेणैवाङ्कुरादिकं निर्वर्त्तयिष्यन्तीति व्यर्थं संयोगशक्तेस्तदन्तरालवर्त्तिन्याः कल्पनम्। न च विशिष्टावस्थाव्यतिरेकेण पृथिव्यादयः संयोगशक्तिमपि निर्वर्त्तयितुं क्षमाः; तथाऽभ्युपगमे सर्वदा तन्निर्वर्त्तनप्रसङ्गादङ्कुरादेरप्यनवरतोत्पत्तिप्रसङ्गः। न चान्यतरकर्मादिसव्यपेक्षाः संयोगमुत्पादयन्ति क्षित्यादय इति नायं दोषः, कर्मोत्पत्तावपि संयोगपक्षोक्तदूषणस्य सर्वस्य तुल्यत्वात्। तस्मादेकसामग्र्यधीनविशिष्टोत्पत्तिमत्पदार्थव्यतिरेकेण नापरः संयोगः, तस्य बाधकप्रमाण-

१ प्र० पृ० पं० १। २ अत्र पृ० १०६ पं० ३४ गतपाठानुरोधेन 'उपकारेऽपि तद्भिन्नसंबन्धित्वकरणे पुनरपि तयोः असंबन्धित्वम्' इत्यर्थोऽनुसन्धेयः। ३ प्र० पृ० पं० ६।

विषयत्वात् साधकप्रमाणाभावाच्च। यत्तु 'संयुक्ते द्रव्ये एते' इति, 'अनयोर्वाऽयं संयोगः' इति व्यपदेशः स भेदान्तरप्रतिक्षेपाप्रतिक्षेपाभ्यां तथाऽवस्थोत्पन्नवस्तुद्वयनिबन्धन एव, नातोऽपरस्य संयोगस्य सिद्धिः। न चाक्षणिकत्वे तयोः स संबन्धी युक्तः। तत्संबन्धस्य समवायस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च। न च तज्जन्यत्वादसौ तत्संबन्धी, अक्षणिकत्वे जनकत्वविरोधस्य प्रतिपादयिष्यमाणत्वात्। क्षणिकत्वेऽपि तयोरेकसामग्र्यधीना नैरन्तर्योत्पत्तिरेव, नापरः संयोग इति 'रचनावत्त्वात्' इत्यत्र हेतोर्विशेषणस्य संयोगविशेषस्य रचनालक्षणस्याऽसिद्धेस्तद्वतो विशेष्यस्याप्यसिद्धिरिति स्वरूपासिद्धत्वम्}।

अथ पृथिव्यादेः कार्यत्वं बौद्धैरभ्युपगम्यत एवेति नासिद्धत्वं तैरस्य हेतोः प्रेरणीयम्। नन्वत्रापि यादृग्भूतं बुद्धिमत्पूर्वकत्वेन देवकुलादिष्वन्वय-व्यतिरेकाभ्यां व्याप्तं कार्यत्वमुपलब्धम्–यदक्रियादर्शिनोऽपि जीर्णदेवकुलादावुपलभ्यमानं लौकिकपरीक्षकादेस्तत्र कृतबुद्धिमुत्पादयति–तादृग्भूतस्य क्षित्यादिषु कार्यत्वस्याऽनुपलब्धेरसिद्धः कार्यत्वलक्षणो हेतुः। उपलम्भे वा तत्र ततो जीर्णदेवकुलादिष्वाऽक्रियादर्शिनोऽपि कृतबुद्धिः स्यात्; न ह्यन्वय-व्यतिरेकाभ्यां सुविवेचितं कार्यं कारणं व्यभिचरति, तस्याऽहेतुकत्वप्रसङ्गात्। अतः क्षित्यादिषु कार्यत्वदर्शनादक्रियादर्शिनः कृतबुद्ध्यनुपपत्तेर्यद् बुद्धिमत्कारणत्वेन व्याप्तं कार्यत्वं देवकुलादिषु निश्चितं तत् तत्र नास्तीत्यसिद्धो हेतुः; केवलं कार्यत्वमात्रं प्रसिद्धं तत्र। न च प्रकृत्या परस्परमर्थान्तरत्वेन व्यवस्थितेऽपि धर्मः शब्दमात्रेणाऽभेदी हेतुत्वेनोपादीयमानोऽभिमतसाध्यसिद्धये पर्याप्तो भवति, साध्यविपर्ययेऽपि तस्य भावाविरोधात्; यथा वल्मीके धर्मिणि कुम्भकारकृतत्वसिद्धये मृद्विकारमात्रं हेतुत्वेनोपादीयमानमिति। यद् बुद्धिमत्कारणत्वेन व्याप्तं देवकुलादौ कार्यत्वं प्रमाणतः प्रसिद्धं तच्च क्षित्यादावसिद्धम्; यच्च क्षित्यादौ कार्यत्वमात्रं हेतुत्वेनोपन्यस्यमानं सिद्धं तत् साध्यविपर्यये बाधकप्रमाणाभावात् संदिग्धव्यतिरेकत्वेनानैकान्तिकम्; न ततोऽभिमतसाध्यसिद्धिः।

नन्वेतत् कार्यसमं नाम जात्युत्तरम्। तथाहि–'कृतकत्वादनित्यः शब्दः' इत्युक्ते जातिवाद्यत्रापि प्रेरयति–किमिदं घटादिगतं कृतकत्वं हेतुत्वेनोपन्यस्तम्, किं वा शब्दगतम्, अथोभयगतमिति? आद्ये पक्षे हेतोरसिद्धिः, न ह्यन्यधर्मोऽन्यत्र वर्तते। द्वितीयेऽपि साधनविकलो दृष्टान्तः। तृतीयेऽप्येतावेव दोषाविति। एतच्च कार्यसमं नाम जात्युत्तरमिति प्रतिपादितम्; यथोक्तम्–"कार्यत्वान्यत्वलक्षणेन यत् साध्यासिद्धिदर्शनं तत् कार्यसमम्" [ ] इति, कार्यत्वसामान्यस्यानित्यत्वसाधकत्वेनोपन्यासेऽभ्युपगते धर्मिभेदेन विकल्पनवद् बुद्धिमत्कारणत्वे क्षित्यादेः कार्यत्वमात्रेण साध्येऽभीष्टे धर्मिभेदेन कार्यत्वादेर्विकल्पनात्, असदेतत्; यतः सामान्येन कार्यत्वानित्यत्वयोर्विपर्यये बाधकप्रमाणबलाद् व्याप्तिसिद्धौ कार्यत्वसामान्यं शब्दादौ धर्मिण्युपलभ्यमाननित्यत्वं साधयतीति कार्यत्वमात्रस्यैव तत्र हेतुत्वेनोपन्यासे धर्मविकल्पनं यत् तत्र क्रियेत तत् सर्वानुमानोच्छेदकत्वेन कार्यसमजात्युत्तरतामासादयति; न त्वेवं क्षित्यादेर्बुद्धिमत्कारणत्वे साध्ये कार्यत्वसामान्यं हेतुत्वेन संभवति, तस्य विपर्यये बाधकप्रमाणाभावात् सन्दिग्धविपक्षव्यावृत्तिकत्वेनाऽनैकान्तिकत्वात्। यच्च बुद्धिमत्कारणपूर्वकत्वेन व्याप्तं देवकुलादौ कार्यत्वं प्रतिपन्नम्–यदक्रियादर्शिनोऽपि जीर्णप्रासादादौ कृतबुद्धिमुत्पादयति–तत् तत्रासिद्धमिति प्रतिपादितम्।

अपि च, यदि अत्र व्यापकनित्यैकबुद्धिमत्कारणं क्षित्यादेः कारणत्वेनाऽभिप्रेतं कार्यत्वलक्षणाद्धेतोः तथा सति घटादौ दृष्टान्तधर्मिणि तत्पूर्वकत्वेन कार्यत्वस्यानिश्चयात् साध्यविकलो दृष्टान्तः, विरुद्धश्च हेतुः स्यात्, अनित्यबुद्ध्याधाराव्यापकाऽनेककर्तृपूर्वकत्वेन व्याप्तस्य कार्यत्वस्य घटादौ निश्चयात्। अथ बुद्धिमत्कारणत्वमात्रं साध्यत्वेनाभिप्रेतं क्षित्यादौ तर्हि नित्यबुद्ध्याधार-व्यापकैककर्तृपूर्वकत्वलक्षणस्य विशेषस्य क्षित्यादावसिद्धेर्नेश्वरसिद्धिः। अथ बुद्धिमत्कारणत्वसामान्यमेव क्षित्यादौ साध्यते, तच्च पक्षधर्मताबलाद् विशिष्टविशेषाधारं सिध्यति निर्विशेषस्य सामान्यस्यासंभवात्, अनित्यज्ञानवतः शरीरिणः क्षित्यादिविनिर्माणसामर्थ्यरहितत्वेन घटादावुपलब्धस्य विशेषस्य बुद्धिमत्कारणत्वसामान्याधारस्य तत्रासंभवात्। नन्वेवं सामान्याश्रयत्वेन यद् घटादौ व्यक्तिस्वरूपं

१-दान्तरप्रतिक्षेपाभ्यां हा०। –भेदातरं प्रतिक्षेपाभ्यां आ०। २–न्धो यु-आ०, बृ०, कां०। ३ पृ० १०६ पं० १०। ४–कारत्वमा–भां०, मां० ब०। ५–व्यतिरेकि–भां०। ६ न्यायदर्शने पञ्चमाध्याये प्रथमाह्निके सू० ३७–३८ विवृतमेतत् कार्यसमम्। ७ प्र० पृ० पं० १८।

प्रतिपन्नं तस्य क्षित्यादावसंभवात्, अन्यस्य च व्यक्तिस्वरूपस्य विवक्षितसामान्याश्रयत्वेनाप्रसिद्धत्वात्, निराधारस्य च सामान्यस्यासंभवात्, बुद्धिमत्कारणत्वसामान्यस्यैव क्षित्यादौ न सिद्धिः स्यात्; न हि क्वचिद् गोत्वाधारस्य खण्डादिव्यक्तिविशेषस्याऽसंभवेऽन्यरूपमहिष्यादिव्यक्तिसमाश्रितं गोत्वं कुतश्चिद्धेतोः सिद्धिमासादयति।

अथ कार्यत्वस्य क्षित्यादौ बुद्धिमत्कारणत्वाभावेऽभावप्रसङ्गाद् विलक्षणव्यक्त्याश्रितस्यापि तत्सामान्यस्य तत्र सिद्धिर्भवत्येव; यथा महानसविलक्षणगिरिशिखराद्याधारस्याग्निसामान्यस्य धूमात् प्रसिद्धिः। स्यादेतत्, यदि अधूमव्यावृत्तं धूममात्रमनग्निव्यावृत्तेनाग्निना व्याप्तं यथा प्रत्यक्षाऽनुपलम्भलक्षणात् प्रमाणात् प्रसिद्धं तथाऽत्राप्यबुद्धिमत्कारणव्यावृत्तेन बुद्धिमत्कारणत्वमात्रेणाऽकार्यव्यावृत्तस्य कार्यमात्रस्य कुतश्चित् प्रमाणाद् व्याप्तिः सर्वोपसंहारेण निश्चिता स्यात्, यावता सैव न सिद्धा। अथ यथा कार्यधर्मानुवृत्तेः कार्यं हुतभुजो धूमः, स तदभावेऽपि भवन् हेतुमत्तां विलङ्घयेत् इति नाग्नियतिरेकेण धूमस्य सद्भाव इति सर्वोपसंहारेण व्याप्तिसिद्धिस्तथाऽत्रापि भूधरादि कार्यधर्मानुवृत्तितो बुद्धिमत्कारणकार्यम्, तदभावे तद् भवद् निर्हेतुकं स्यादिति सर्वोपसंहारेण व्याप्तिसिद्धिः। ननु घटादिलक्षणः कार्यविशेषो बुद्धिमदन्वय-व्यतिरेकानुविधायी य उपलभ्यमानस्तत्समानेषु पदार्थेष्वक्रियादर्शनोऽपि कृतबुद्धिमुत्पादयति, स एव बुद्धिमत्कारणकार्यत्वात् तदभावे भवन् निर्हेतुकः स्यादिति वक्तुं शक्यम्, न पुनः कार्यत्वमात्रं कारणमात्रहेतुकं बुद्धिमत्कारणाभावे भवन्निर्हेतुकमासज्यते, तद्धि कारणमात्राभावे भवद् निर्हेतुकं स्यात्। न च कार्यविशेषः कर्तारमन्तरेण नोपलब्ध इति कार्यत्वमात्रमपि कर्तृविशेषानुमापकमिति न्यायविदा वक्तुं युक्तम्; अन्यथा धूमविशेषस्तत्कालवह्नयव्यभिचरितो महानसादावुपलब्ध इति धूपघटिकादौ धूममात्रमपि तत्कालवह्नयनुमापकं स्यात्। अथ तत्र तत्कालवह्नयनुमाने ततः प्रत्यक्षविरोधः, स तर्हि भूरुहादावप्यकृष्टजाते कर्त्रनुमाने कार्यत्वलक्षणाद्धेतोः समानः। अथ तत्कर्तुरतीन्द्रियत्वाभ्युपगमाद् न प्रत्यक्षविरोधः, धूपघटिकादावपि वह्नेरतीन्द्रियत्वाभ्युपगमे को दोषो येन प्रत्यक्षविरोध उद्भाव्येत? अथ 'यदि तत्र तत्कालसंबन्ध्यनलो भवेत् तदा भास्वररूपसंबन्धित्वात् प्रत्यक्षः स्यात्' इत्यप्रत्यक्षत्वलक्षणो दोषः; ननु भास्वररूपसंबन्धित्वादनलो यदि तत्कालं स्यात् प्रत्यक्ष एव भवेदित्येतदेव कुतोऽवसितम्? महानसादौ तथाभूतस्यैव तस्य दर्शनादिति चेत्; नन्वेवं भूरुहादावपि यदि कर्ता स्यात् तदा शरीरवान् दृश्य एव स्यात्, घटादौ कर्तुस्तथाभूतस्यैव तस्योपलम्भात् इति समानं पश्यामः।

अथ वृक्षशाखाभङ्गादिकार्यस्याऽदृश्यः पिशाचादिः कर्ता यथाऽभ्युपगतः, स्वशरीराऽवयवानां[1] वाऽपरशरीरव्यतिरेकेणापि यथा वा प्रेरको देवदत्तादिः, तथा भूरुहादिकार्यकर्ताऽदृश्यः शरीरादिरहितश्च यदि स्यात् को दोषः? न कश्चिद् दृष्टव्यतिक्रमव्यतिरेकेण। तथाहि-देवदत्तादेरपि स्वशरीरावयवप्रेरकत्वं विशिष्टशरीरसंबन्धव्यतिरेकेण नोपलब्धमित्येतावन्मात्रमेव तत्र तस्य कर्तृत्वनिबन्धनम्, नापरशरीरसंबन्धस्तत्र तस्योपयोगी इति भूरुहादिकर्तुरपि शरीरसंबद्धस्यैव कार्यकरणे[3] व्यापारो युक्तः नान्यथा। तत्संबन्धश्च तस्य यदि तत्कृतोऽभ्युपगम्यते तदा शरीरसंबन्धरहितस्य तदकरणसामर्थ्यमित्यपरशरीरसंबन्धोऽभ्युपगन्तव्यः; अन्यथा शरीरसंबन्धरहितस्य कथं प्रस्तुतकार्यकरणम्? तथा, तदभ्युपगमे वाऽपरापरशरीरनिर्वर्तने क्षीणव्यापारत्वादीशस्य न भूरुहादिकार्यनिर्वर्तनम्। अथ तदनिर्वर्तितं तच्छरीरं तदाऽत्रापि वक्तव्यम्-किं तत् कार्यम्, उत नित्यमिति? यद्याद्यः पक्षः, तदा तस्य कार्यत्वे सत्यपि न कर्तृपूर्वकत्वम्, ततस्तेनैव कार्यत्वलक्षणो हेतुर्व्यभिचारी। अथ नित्यम्, तदा यथा तच्छरीरस्य शरीरत्वे सत्यपि नित्यत्वलक्षणः स्वभावातिक्रमोऽभ्युपगम्यते तथा भूरुहादेः कार्यत्वे सत्यप्यकर्तृपूर्वकत्वमभ्युपगन्तव्यमिति पुनरपि तैर्हेतुर्व्यभिचारी प्रकृतः।

पिशाचादेस्तु शरीरसंबन्धरहितस्य कार्यकर्तृत्वं मुक्तात्मन इवानुपपन्नम्। अथास्त्येव तस्य शरीरसंबन्धः, किन्त्वदृश्यशरीरसंबन्धादसावदृश्यः कर्ताऽभ्युपगम्यते; ननु कुलालादेरपि शरीरसंबन्ध एव दृश्यत्वं नापरम्, स्वरूपेणात्मनोऽदृश्यत्वात्। अथ दृश्यशरीरसंबन्धात् तस्य दृश्यत्वम्; ननु पिशाचादिशरीरस्य शरीरत्वे सत्यपि कथमदृश्यत्वम्? अस्मदादिचक्षुर्व्यापारेण तस्यानुपलम्भादिति चेत्; ननु यथा शरीरत्वे सत्यप्यस्मदादिशरीरविलक्षणं पिशाचादिलक्षणं शरीरमनुपलभ्यत्वेनाभ्युपगम्यते तथा घटादिविलक्षणं भूरुहादि कार्यत्वे सत्यप्यकर्तृकत्वेन किं नाभ्युपगम्यते? तथाऽभ्युपगमे च पुनरपि प्रकृतो हेतुर्व्यभिचारी। तदेवमसिद्धत्वाऽनैकान्तिकत्व-विरुद्धत्वदोषदुष्टत्वाद् नास्माद्धेतोः प्रस्तुतसाध्यसिद्धिः। तेन यदुक्तम् 'पृथिव्यादिगतस्य कार्यत्वस्याप्रतिपत्तेर्न तस्मादीश्वरावगमः' इति, तद् युक्तमेवोक्तम्।

यत्तूक्तम् 'पृथिव्यादीनां बौद्धैः कार्यत्वमभ्युपगतम् ते कथमेवं वदेयुः' इति, तदसारम्; प्रकृतसाध्यसिद्धिनिबन्धनस्य कार्यत्वस्य तेष्वसिद्धत्वप्रतिपादनात्[3]। यच्चाभाँषि 'येऽपि चार्वाकास्तेषां कार्यत्वं नेच्छन्ति तेषामपि विशिष्टसंस्थानयुक्तानां कथमकार्यता' इति, तदप्ययुक्तम्; संस्थानयुक्तत्वस्यासिद्धत्वादिदोषदुष्टत्वप्रतिपादनात्[4]। यच्च 'संस्थानशब्दवाच्यत्वं केवलं घटादिभिः सामान्यं पृथिव्यादीनाम्, न त्वर्थः कश्चिद् द्वयोरनुगतः समानो विद्यते' तदेवमेव; यत्तूक्तम् 'धूमादावपि पूर्वापरव्यक्तिगतो नैव कश्चिदनुगतोऽर्थः समानोऽस्ति' इत्यादि, तदसङ्गतम्; घटादिसंस्थानेभ्यः पृथिव्यादिसंस्थानस्य वैलक्षण्येन हेतोरसिद्धत्वप्रतिपादनात्।

यदप्युक्तम् 'व्युत्पन्नानामस्त्येव पृथिव्यादिसंस्थानवत्त्व-कार्यत्वादेर्हेतोर्धर्मिधर्मताऽवगमः, अव्युत्पन्नानां तु प्रसिद्धानुमाने धूमादावपि नास्ति' इति, तदप्यचारु; यतो यद्यनुमाननिमित्तहेतुपक्षधर्मत्व-प्रतिबन्धलक्षणां व्युत्पत्तिमाश्रित्य व्युत्पन्ना अभिधीयन्ते तदा पृथिव्यादिगतसंस्थान-कार्यत्वादौ घटादिसंस्थानवैलक्षण्ये प्रकृतसाध्यसाधके व्युत्पत्तिर्न केषाञ्चिदपि भवति, यथोक्तसाध्यव्याप्तस्य पृथिव्यादौ संस्थानादेरभावात्। भावे वा शरीरादिमतोऽस्मदादीन्द्रियग्राह्यस्यानित्यबुद्ध्यादिधर्मकलापोपेतस्य घटादौ संस्थानादिहेतुव्यापकत्वेन प्रतिपन्नस्य कर्तुः पृथिव्यादौ ततः प्रतिपत्तिः स्यात्, न हि हेतुव्यापकमपहायाऽव्यापकस्य विरुद्धधर्माक्रान्तस्याऽपरस्य साध्यधर्मस्य प्रतिपत्तिः साध्यधर्मिणि यथोक्तलक्षणलक्षितहेतुबलसमुत्थेत्यनुमानविदां व्यवहारः। कारणमात्रप्रतिपत्तौ तु ततः तत्र न विप्रतिपत्तिरिति सिद्धसाध्यता। अथ हेतुलक्षणव्युत्पत्तिव्यतिरिक्तां व्युत्पत्तिमाश्रित्य 'व्युत्पन्नानाम्' इत्युच्यते तदा 'केनचित् स्रष्ट्रा जगत् सृष्टम्' इति निर्मूलदुरागमाहितवासनानामस्त्येव पृथिव्यादिसंस्थानवत्त्व-कार्यत्वादेर्हेतोर्धर्मिधर्मताऽवगमादिः; न च तथाभूतधर्मिधर्मताद्यवगमात् साध्यसिद्धिः, वेदे मीमांसकस्याऽस्मर्यमाणकर्तृकत्वादेः धर्मिधर्मताऽवगमादेर्यथाऽपौरुषेयत्वस्य। 'अव्युत्पन्नानां तु प्रसिद्धानुमाने धूमादावपि नास्ति' इति युक्तमेव, अस्माभिरप्यभ्युपगमात्।

यत्तु[5] 'प्रासादादिसंस्थानादेर्वैलक्षण्येऽपि पृथिव्यादिसंस्थानादेः कार्यत्वादि पृथिव्यादीनामिष्यते, कार्यं च कर्तृ-करण-कर्मपूर्वकं दृष्टम्' इत्यादि, तदप्यसङ्गतम्; यतो यदि नाम घटादेर्विशिष्टकार्यस्य कर्तृपूर्वकत्वमुपलब्धं नैतावताऽविशिष्टस्यापि भूरुहादिकार्यस्य कर्तृपूर्वकत्वमभ्युपगन्तुं युक्तम्; अन्यथा पृथिवीलक्षणस्य कार्यस्य रूप-रस-गन्ध-स्पर्शगुणयोगित्वमुपलब्धं भूतत्वे सति, वायोरपि तद्योगित्वमभ्युपगमनीयं स्यात्, तत्त्वादेव। अथात्र प्रत्यक्षादिबाधः, स भूरुहादिकार्येष्वपि समान इति प्राक् प्रतिपादितम्[6]। यत्तूक्तम्[7] 'कर्तृपूर्वकस्य कार्यत्वादेस्तद्वैलक्षण्याद् न ततः साध्यावगमः' इत्यादि, तत् सत्यमेव; तद्वैलक्षण्यस्य प्रसाधितत्वात्[8]। अत एव सिद्धम् 'यादृगधिष्ठातृभावाभावानुवृत्तिमत् सन्निवेशादि' इत्यादिग्रन्थप्रतिपादितस्य[9] दूषणस्य कार्यत्वादौ सर्वस्मिन्नीश्वरसाधके हेतौ समानत्वाद् न कस्यचित् तत्साधकता। 'यद्येवमनुमानोच्छेदप्रसङ्गः, धूमादि यथाविधमदृश्यादिसामग्रीभावाभावानुवृत्तिमत् तथाविधमेतद् यदि पर्वतोपरि भवेत् स्यात् ततो वह्न्याद्यवगमः' इत्यादिकस्तु पूर्वपक्षग्रन्थः[10] पूर्वमेव विहितोत्तरः[11]।

यथा यथाभूतोऽधूमव्यावृत्तो धूमोऽनग्निव्यावृत्तेनाऽग्निना व्याप्तो विपर्यये बाधकप्रमाणबलादवसितो गिरिशिखरादावुपलभ्यमानस्तदेशमग्निसामान्यमनियततार्ण-पार्णाद्यग्निव्यक्तिसमाश्रि-

---

१-नां चाऽपर-मां०। २-करणव्या-कां०।

१ पृ० ९३ पं० ३८। २ पृ० ९३ पं० ३८। ३ पृ० ११५ पं० ११। ४ पृ० ९३ पं० ३९। ५ पृ० ११३ पं० ३८। ६ पृ० ९४ पं० २। ७ पृ० ९४ पं० ३। ८ पृ० ११५ पं० ११। ९ पृ० ९४ पं० १३। १० पृ० ९४ पं० १५। ११ पृ० १०८ पं० १९। १२ पृ० ९४ पं० १७। १३ पृ० ९४ पं० ६। १४ पृ० ९४ पं० १८। १५ पृ० ९४ पं० १९। १६ पृ० ११६ पं० ७।

तमनुमापयति; नैवं कार्यत्वमात्रं बुद्धिमत्कारणत्वसामान्येन व्याप्तं विपर्यये बाधकप्रमाणबलाद् निश्चितं किन्तु कारणत्वमा(णमा)त्रेण व्याप्तं तत् तद्बलाद् निश्चितम्, तच्चोपलभ्यमानं क्षित्यादौ कारणमात्रमनुमापयति यथा गिरिशिखरादावुपलभ्यमानो धूमस्तत्संबद्धमग्निमात्रमनियतव्यक्तिनिष्ठम्, तेन 'पृथिव्यादिगतकार्यत्वदर्शनात् कर्त्रदर्शिनस्तदप्रतिपत्तिवत् शिखर्यादिगतवह्न्याद्यदर्शिनां धूमादपि तदप्रतिपत्तिरस्तु' इति कोऽन्योऽनुमानस्वरूपविदो भवतो वक्तुं क्षमः। यदि हि कार्यविशेषाद्धूमलक्षणादुपलभ्यमानाद् गृहीताविनाभावस्य पुंसोऽग्निलक्षणकारणविशेषप्रतिपत्तिर्गिरिशिखरादौ भवति तदा कार्यमात्रात् पृथिव्यादावुपलभ्यमानाद(नाद्)बुद्धिमत्कारणविशेषस्य तत्र प्रतिपत्तौ किमायातम्? कारणमात्रप्रतिपत्तिस्तु ततस्तत्र भवत्येव, "सुविवेचितं कार्यं कारणं न व्यभिचरति"[ ]इति न्यायात्। अत एवान्यस्य संबद्धस्यान्यतः प्रतिपत्तौ कार्यकारणावगमादौ प्रयत्नः कार्यः; अन्यथा तदुत्थप्रमाणस्य प्रमाणाभासता स्यात्। यच्चुं 'न चात्र शब्दसामान्यं वस्त्वनुगमो नास्तीति युक्तं वक्तुम्, धूमादावपि शब्दसामान्यस्य वक्तुं शक्यत्वात्' इति, तदप्यसङ्गतम्; धूमादिवैलक्षण्येन पृथिव्यादौ कार्यत्वस्य बुद्धिमत्कारणत्वाव्याप्तेः शब्दसामान्यस्य साधितत्वात्।

यच्च 'घटादिवत् पृथिव्यादि स्वावयवसंयोगैरारब्धमवश्यं तद्विश्लेषाद् विनाशमनुभविष्यति' इत्यादि, तदप्यसङ्गतम्; अवयवसंयोगवत् तद्विश्लेषस्यापि विभागलक्षणस्य विनाशं प्रति हेतुत्वेनोपन्यस्तस्यासिद्धत्वात्; तदसिद्धत्वं च संयोगवद् वक्तव्यम्। 'एवं विनाशाद् वा संभावितात् कार्यत्वानुमानं रचनास्वभावत्वाद् वा' इत्यादि सर्वं निरस्तं द्रष्टव्यम्। यत्तु चार्वाकं प्रति कार्यत्वसाधनायोक्तम्–'यथा लौकिक-वैदिकयो रचनयोरविशेषात् कर्तृपूर्वकत्वं तथा प्रासादादि-पृथिव्यादिसंस्थानयोरपि तद्रूपताऽस्तु, अविशेषात्' तदप्यचारु; तद्विशेषस्य प्रतिपादितत्वात्; ततः कार्यत्वादिलक्षणस्य हेतोरसिद्धतैव। यच्चाभाँषि 'सिद्धत्वेऽपि नासाद्धेतोः साध्यसिद्धिर्युक्ता; न हि केवलात् पक्षधर्माद् व्याप्तिशून्यात् साध्यावगमः' तत् सत्यमेव, व्याप्तिरहिताद्धेतोः साध्यसिद्धेरसंभवात्।

यच्च 'घटादौ कर्तृपूर्वकत्वेन कार्यत्वावगमेऽपि केषाञ्चित् कार्याणामकर्तृपूर्वकाणां कार्यत्वदर्शनान्न सर्वं कार्यं कर्तृपूर्वकम् यथा वनेषु वनस्पत्यादीनाम्' इति, तदपि सत्यमेव 'तस्माद् नेश्वरसिद्धौ कश्चिद्धेतुरव्यभिचार्यस्ति' इत्येतत्पर्यन्तम्। यदप्युक्तम् 'नाकृष्टजातैः स्थावरादिभिर्व्यभिचारो व्याप्यभावो वा, साध्याभावे हेतुर्वर्तमानो व्यभिचार्युच्यते; तेषु कर्त्रग्रहणं न कर्त्रभावनिश्चयः' इति, तदप्यसारम्; सर्वप्रमाणाविषयत्वेऽपि यदि स्थावरादिषु कर्त्रभावनिश्चयो न भवति तथा सति आकाशादौ रूपाद्यभावनिश्चयो मा भूत्। अथ तत्र रूपादिसद्भावबाधकप्रमाणसद्भावात् तदभावनिश्चयः, सोऽत्रापि समानः। तच्च प्रमाणं प्रदर्शयिष्यामोऽनन्तरमेव।

यत्तूक्तम् 'क्षित्याद्यन्वय-व्यतिरेकानुविधानदर्शनात् तेषाम् तदतिरिक्तस्य कारणत्वकल्पनेऽतिप्रसङ्गदोष इति, एतस्यां कल्पनायां धर्माधर्मयोरपि न कारणता भवेत्' इत्यादि, तदयुक्तम्; धर्मादेः कारणत्वं जगद्वैचित्र्यान्यथाऽनुपपत्त्या व्यवस्थाप्यते। तथाहि—सर्वान् उत्पत्तिमतः प्रति भूम्यादेः साधारणत्वात् तदन्यादृष्ट्याख्यविचित्रकारणकृतं कार्यवैचित्र्यम्। न चैवमीश्वरस्य कारणत्वपरिकल्पनायां किञ्चिन्निमित्तं संभवति, तद्व्यतिरेकेण कस्यचिदर्थस्यानुपपद्यमानस्यादृष्टेः। न च चेतनं कर्तारं विना कार्यस्वरूपानुपपत्तिरिति शक्यं वक्तुम्; (अ)दृष्टस्यैव सुगतसुतैश्चैतन्यस्य जगद्वैचित्र्यकर्तृकत्वेनाभ्युपगमात्; तदा तद्व्यतिरिक्ताऽन्येश्वरस्य कल्पनायां निमित्ताभावात्।

न चादृष्टस्य (?) चेतनेष्वपि सकलजगदुपादानोपकरणसंप्रदानाद्यभिज्ञाता न संभवतीति तद्व्यतिरिक्तोऽपरो महेशस्तज्ज्ञः कल्पनीय इति वक्तुं युक्तम्, तज्ज्ञानवत्त्वेन तस्याप्यसिद्धेः। न च सकलजगत्कर्तृत्वादेव तज्ज्ञत्वं तस्य सिद्धम्; इतरेतराश्रयदोषप्रसङ्गात्। तथाहि—सिद्धे सकलजगदुपादानाद्यभिज्ञत्वे सकलजगत्कर्तृत्वसिद्धिः, तत्सिद्धौ च तस्य तदभिज्ञत्वसिद्धिरिति व्यक्तमितरे-

---

१ पृ० ९४ पं० २२। २ पृ० ९४ पं० २३। ३ पृ० ९४ पं० २७। ४ पृ० ११३ पं० ४३ गत–संयोगनिरसनप्रकरणोक्तयुक्त्या विश्लेषस्यापि असिद्धत्वं वाच्यम्। ५ पृ० ९४ पं० २७। ६ पृ० ९४ पं० ४०। ७ पृ० ९५ पं ३। ८ पृ० ९५ पं० ६। ९ पृ० ९५ पं० २३। १० पृ० ९५ पं० २४। ११ पृ० ९५ पं० २७। १२–**तनस्य** वा०, बा०।

तराश्रयत्वम्। अथ यद् यत् कार्यं तत् तद् उपादानाद्यभिज्ञकर्तृपूर्वकमुपलब्धं घटादिवत्; पृथिव्याद्यपि कार्यम्, तेन तदपि तदभिज्ञकर्तृपूर्वकं युक्तमिति नेतरेतराश्रयदोषः। ननु घटादिकार्यकर्तुरपि कुलालादेर्यदपि सर्वथा घटाद्युपादानाद्यभिज्ञत्वं सिद्धं स्यात् तदा युज्येताप्येतद् वक्तुम्; न च तस्याऽपि घटाद्युपादानोपकरणादेः परिमाणाऽवयवसंख्येयत्वाद्यनेकधर्मसाक्षात्करणज्ञानमस्ति, तत्त्वं सिद्धम् (?)। (किं) चिन्मात्रपरिज्ञानं तु चेतनत्वेऽदृष्टस्यापि तदाधारस्य वा सत्त्वस्य तददृष्टनिर्वर्तितफलोपभोक्तुः प्रतिनियतशरीराधिष्ठायकस्य विद्यते इति व्यर्थं व्यतिरिक्तापरज्ञानवतो महेशस्य परिकल्पनम्। न चायमेकान्तः–सर्वं कार्यं तदुपादानाद्यभिज्ञेनैव कर्त्रा निर्वर्त्यत इति; स्वाप-मदावस्थायां शरीराद्यवयवप्रेरणस्य कार्यस्य तदुपादानाभिज्ञानाऽभावेऽपि तत्कृतत्वेनोपलब्धेः।

यच्चोक्तम्–'न चाकृष्टजातेषु स्थावरादिषु तस्याग्रहणेन प्रतिक्षेपः, अनुपलब्धिलक्षणप्राप्तत्वाददृष्टवत्' इति, तदप्यचारु; यतो यदि तस्य शरीरसंबन्धरहितस्य कर्तृत्वमभ्युपेयते तन्न युक्तिसङ्गतम्, तत्संबन्धरहितस्य मुक्तात्मन इव जगत्कर्तृत्वानुपपत्तेः। अथ ज्ञान-प्रयत्न-चिकीर्षा-समवायाभावाद् मुक्तात्मनोऽकर्तृत्वं न पुनः शरीरसंबन्धाभावादिति विषमो दृष्टान्तः, तदयुक्तम्; ज्ञानादिसमवायस्य कर्तृत्वेनाभ्युपगतस्यँ तत्राऽपि निषिद्धत्वात्। तस्माच्छरीरसंबन्धादेव तस्य जगत्कर्तृत्वमभ्युपगन्तव्यम् कुलालस्येव घटकर्तृत्वम्। तत्संबन्धश्चेदभ्युपगम्यते कथं न तस्योपलब्धिलक्षणप्राप्तत्वम्? कुलालादेरपि शरीरसंबन्धादेव उपलब्धिलक्षणप्राप्तत्वम् न पुनः तत्संबन्धरहितस्यात्मनो दृश्यत्वम्। तच्चेश्वरेऽपि शरीरसंबन्धित्वं कर्तृत्वादभ्युपगन्तव्यमित्युपलब्धिलक्षणप्राप्तस्यानुपलब्धेस्तत्कर्तुः स्थावरादिष्वभावः सिद्ध इति कथं न तैः कार्यत्वलक्षणो हेतुर्व्यभिचारी?

अथादृश्यं तच्छरीरमतस्तत्र सदपि नोपलभ्यत इत्ययमदोषः; नन्वेवमपि 'अस्मिन् सति इदं स्थावरादिकं जातम्' इति प्रतिपत्तिर्मा भूत्, तथाँऽन्य(ऽप्यन्य)कारणभावेऽपि यथाऽतीन्द्रियस्येन्द्रियस्याऽभावे रूपादिज्ञानं नोपजायते तथा पृथिव्यादिकारणसाकल्येऽपि कदाचित् तच्छरीरविरहे तत्स्थावरादिकार्यं नोपजायत इति व्यतिरेकात् प्रतीतिः किं न स्यात्? यदी यत्रतच्छरीरं नियमेन संनिहितमिति चा(ना)स्यं दोषस्तर्हि युगपद्भाविषु त्रिलोकाधिकरणेषु भावेषु का वार्ता? न ह्येकस्य मूर्तस्य सावयवस्य महेश्वरवपुषोऽपि युगपत्सकलव्याप्तिः संभवति। अमूर्तत्वे निरंशप्रसङ्गादाकाशमेव तच्छरीरम्, तस्य तच्छरीरत्वेनाद्याप्यसिद्धत्वात्। अथ यावन्ति क्रमभावीन्यङ्कुरादिकार्याणि तावन्ति तथाविधानि तच्छरीराणि कल्प्यन्ते तर्हि तच्छरीरैः सकलं जगदापूरितमिति नाङ्कुरादिकार्यैरुत्पत्तव्यम् तदुत्पत्तिदेशाभावाद्, नापि माहेश्वरैः क्वचित् प्रवर्तितव्यम्, कुतश्चिद्वा निवर्तितव्यम्; तच्छरीराणां पादाद्यभिघातभयात्। अपि च, तान्यपि कार्याणि, सावयवत्वात्, कुम्भवत्; ततस्तत्करणे तावन्त्येवाऽपराणि तस्य शरीराणि कल्पनीयानि, पुनस्तत्करणेऽपि (इति) नानवस्थातो मुक्तिः। तन्न शरीरव्यापारसहायोऽप्यसौ स्थावरादिकार्यं करोतीति कल्पयितुं युक्तम्, अनेकदोषप्रसङ्गात्।

नाऽपि सत्तामात्रेणाऽसौ स्वकार्यं करोतीति कल्पयितुं युक्तम्, शरीरकल्पनवैयर्थ्यप्रसङ्गात्। अथ सर्वोत्पत्तिमताभीश्वरो निमित्तकारणम्, तस्य तत्कारणत्वं सकलकार्यकारणपरिज्ञाने नान्यथा, तत्परिज्ञान(ज्ञानं)वा(चा)नित्य(त्यं)स्ये(से)न्द्रियशरीरमन्तरेणानुपपत्तेः (पञ्चम्) अतस्तदर्थं तत्परिकल्पनमिति चेत्, न; सकलहेतुफलविषयं तस्या(तस्याऽनित्यं)स्ये(से)न्द्रियशरीरजं ज्ञानं न संभवति, इन्द्रियाणां युगपत्सर्वार्थसन्निकर्षाभावात्; इन्द्रियार्थसन्निकर्षजं च नैयायिकैः प्रत्यक्षमभ्युपगम्यते, तदुक्तम्—

"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" [न्यायद० अ० १, आ० १, सू० ४]।

१–**क्षात्कारण** वा०, बा०। २ **यथोक्त**–वा०, बा० विना। ३ पृ० ९५ पं० ३९। ४–**स्य तवा**–वा०, बा०। ५–**त्वम्–न पुनः** वा०, बा० विना। ६–**स्मिन् सर्वमिदं** वा०, बा० विना। ७–**था नान्य**–वा०, बा०। ८–**का प्रती**–वा०, बा०। ९ अत्र '**यदा यत्र**' स्थाने 'तदा तत्र' इति उचितम्। अथवा पूर्वपक्षव्यनुसारेण 'यदा यत्र पृथिव्यादिकारणसाकल्यं तदा तत्र' इत्यादिको भावोऽत्र अनुसंधेयः। १०–**ति–चो**–वा०, बा०। ११–**त्परिनं वा नित्यस्येन्द्रिय**–वा०, बा०। १२–**पत्तेमत**–बा०, वा०। १३ **तस्यासेन्द्रिय**–वा०, बा०।

सामग्री-फल-स्वरूपविशेषणपक्षत्रयेऽपीन्द्रियार्थसंनिकर्षजस्य तस्य प्रामाण्याभ्युपगमात्; तथा, "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्" [वात्स्या० भा० पृ० १] इत्यत्र भाष्यम् "प्रमातृ-प्रमेयाभ्यामर्थान्तरं प्रमितिलक्षणे फले साधकतमवद् इति अर्थः सहकारि प्रमाणं प्रतिपादितम्, सहकारित्वं चाऽर्थस्य प्रमाणस्य फलजनने व्याप्रियमाणस्य फलजनकत्वेन तस्यापि सहायभावः, 'सह करोतीति सहकारि' इति व्युत्पत्तेः। न चासन्निहितस्यार्थस्याऽतीतस्याऽनागतस्य वा प्रमितिलक्षणफलजननं प्रति व्यापारः संभवति। न च प्रमित्यजनकोऽर्थः, तदभ्युपगमे न प्रमाणविषयतान्यतः (तेत्यतः) सेन्द्रियशरीरजनितप्रत्यक्षज्ञानवत्त्वाभ्युपगमे महेशस्य न सकलकार्यकारणविषयज्ञानसंभवः; इति शरीरसंबन्धात् तस्य जगत्कर्तृत्वाभ्युपगमे तदकर्तृत्वमेव प्रसक्तम्, इति न तस्यादृश्यशरीरसंबन्धोऽभ्युपगन्तुं युक्तः।

अपि च, घटादि कार्यं दृश्यशरीरसंबद्धपुरुषपूर्वकमुपलब्धम् इत्यङ्कुरादि कार्यमपि तथा कल्पनीयम्। अथ तत्परिकल्पने प्रत्यक्षबाधाऽनवस्थादिदोषादङ्कुरादिकार्यस्य कर्तृपूर्वकतैव विशीर्यत इति न तथाकल्पनम्। ननु तद्विव(तद्विश)रणे को दोषः? अथाङ्कुरादेः कार्यता अनेकंकरणमात्राभावे समुपजायमानस्य तस्य अकार्यताप्रसक्तिः, न पुनः कर्तृभावे; अन्यथा गोपालघटिकादौ तत्कालाद्दृश्यभावे धूमस्याप्यभावप्रसक्तिः, न पुनः कर्तृभावेनाऽनलपूर्वकत्वं व्याप्तिग्रहणकाले धूमस्य प्रतिपन्नम्, तेन ततस्तत्र तत्कारणमनलाऽनुमानम्(?)। नन्वेवं कार्यमात्रं कारणमात्रपूर्वकत्वेन व्याप्तं व्याप्तिग्रहणकाले प्रतिपन्नमङ्कुरादावुपलभ्यमानं कारणमात्रमिदमनुमापयतु न पुनर्बुद्धिमत्कारणविशेषम्, तेन कार्यमात्रस्य व्याप्तेरनिश्चयात्। न च दृश्यशरीरसंबद्धबुद्धिमत्कारणपूर्वकत्वं कार्यविशेषस्योपलब्धमङ्कुरादौ तु कार्यत्वमुपलभ्यमानं तथाभूतकर्तृपूर्वकत्वानुमाने तत्र प्रत्यक्षविरोध इत्यदृश्यसंबद्धशरीरकर्तृपूर्वकत्वमनुमापयतीति वक्तुं शक्यम्; तथाऽभ्युपगमे गोपालघटिकादावपि तत्कालादृश्याऽनलानुमापको धूमः किं न स्यात्? न च वह्निरदृश्यो न संभवतीति वक्तुं शक्यम्, नायनरश्मिष्वदृश्यस्य तस्य सद्भावाभ्युपगमात्। अथान्यवहितरूपोपलब्ध्यन्यथानुपपत्त्या तस्य तथाभूतस्य परिकल्पनम्; नन्वेवं धूमसद्भावान्यथाऽनुपपत्त्या तत्र तस्य तथाभूतस्य किं न परिकल्पनम्? अपि च, यथाऽनलस्य भास्वररूपसंबन्धित्वे सत्यपि तस्योद्भूतत्वाऽनुद्भूतत्वाभ्यां दृश्यत्वाऽदृश्यत्वे परिकल्प्येते तथा प्रासादाऽङ्कुरादीनां कार्यत्वे किं न परिकल्प्येते न्यायस्य समानत्वात्? तन्नादृश्यशरीरसंबन्धात् तस्याङ्कुरादिकार्योत्पादकत्वं युक्तम्। दृश्यशरीरसंबन्धात् तत्कर्तृत्वे उपलभ्यानुपलम्भात् कथं तस्य नाऽभावः? यत्तूक्तम् 'न च सर्वा कारणसामग्युपलब्धिलक्षणप्राप्ता' इत्यादि, तत् सत्यमेव; इदं त्वसत्यम्-'ईश्वरस्य कारणत्वेऽपि न तत्स्वरूपग्रहणं प्रत्यक्षेण, अदृष्टवत् कार्यद्वारेण तत्प्रतिपत्तेः' इति; अदृष्टप्रतिपत्ताविवेश्वरप्रतिपत्तौ कार्यत्वादेर्हेतोर्निर्दोषस्याऽसंभवादिति प्रतिपादितत्वात्।

यत्तूक्तम् 'स्थावरेषु कर्त्रग्रहणं कर्त्रभावात्, आहोस्विद् विद्यमानत्वेऽपि तस्याग्रहणमनुपलभ्यस्वभावत्वेन, एवं संदिग्धव्यतिरिक्तत्वे न कश्चिद्धेतुर्गमकः, धूमादेरपि सकलव्यक्त्याक्षेपेण व्याप्त्युपलम्भकाले न सकला वह्निव्यक्तयो दृश्याः' इत्यादि यावत् 'सर्वमुत्पत्तिमत् कर्तृ-करणपूर्वकं दृष्टम्, तस्य सकृदपि तथादर्शनात् तज्जन्यतास्वभावः, तस्यैवं स्वभावनिश्चितावन्यतमाभावेऽपि कथं स्वभावः' इति, तदप्यसंगतम्; यतो यादृग्भूतमेव घटादिकार्यं तत्पूर्वकमुपलब्धं तस्य सकृदपि तथादर्शनात् तज्जन्यः स्वभावो व्यवस्थित इति तदन्यतमाभावेऽपि तस्य भावे सकृदपि ततस्तद्भावो न स्यादिति युक्तं च वक्तुम् न पुनस्तद्विलक्षणं भूरुहादिकं कर्तृ-करणपूर्वकं कदाचनाप्युपलब्धम् किन्तु कारणमात्रपूर्वकम्, अतस्तद्भा(तदभा)वे तस्य भवतोऽहेतुकत्वप्राप्ते-

---

१ अत्र पृ० १०९ पं० ३ गतपाठानुरोधेन 'भाष्ये' इति बोध्यम्। भाष्य-वा०, बा०। २-न्तरे प्र-हा०, गु०, डे०, वि०, अ०। ३-स्य प्रमाणं ति प्रमा-हा० विना। ४-ति व्युत्पत्तेः मां०, भां०। ५-भ्युपगमने प्र-अ०, डे०, मां०, हा०, भां०।-भ्युपगमा न प्र-वा०, बा०।-भ्युपगमेने प्र-आ०, बृ०, गु०। ६-ता यतः से-अ०।-तायन्यतः से-डे०, चं०।-तात्यतः से-वा०, मां०, भां०। ७-कप्रमाकरणामा-गु०। ८ पृ० ९५ पं० ४०। ९ पृ० ९६ पं० २। १० पृ० ११७ पं० ४। ११ पृ० ९६ पं० ५। १२ पृ० ९६ पं० १५। १३-ऽपि सकृदपि तत-कां०, मां०। १४-तदभावो-मां०। १५-त्वाप्राप्ते-वा०, बा० विना।

स्तदेव तद् गमयतीत्यसकृदावेदितम्। यथा(यच्चै) 'अनुपलभ्यमानकर्तृकेषु स्थावरेषु कर्तुरनुपलम्भः शरीराद्यभावात्, न त्वसत्त्वात्' इत्यादि, तदपि प्रतिक्षिप्तम्; उक्तोत्तरत्वात्। यदप्युक्तम् 'चैतन्यमात्रेणोपादानाद्यधिष्ठानात् कथं प्रत्यक्षव्यापृतिः'? तदसंगतम्; तथोपादानाद्यधिष्ठायकत्वस्य क्वचिदप्यदर्शनात्, अदृष्टस्यापि तस्य कल्पने बुद्ध्यनधिष्ठितस्यापि भूरुहाद्युपादानस्य तत्कर्तृत्वं किं न कल्प्यते अदर्शनाविशेषात्?

यच्चाभ्यधायि 'कार्यस्य शरीरेण सह व्यभिचारो दृश्यते, स्वशरीरावयवानां हि शरीरान्तरमन्तरेणापि प्रवृत्ति-निवृत्ती केवलो विदधाति' इति, तदप्ययुक्तम्; यतः शरीरसंबन्धव्यतिरेकेण चेतनस्य स्वशरीरावयवेष्वन्यत्र वा कार्यनिर्वर्तकत्वं न दृष्टमित्यन्यत्रापि तत् तस्य न कल्पनीयमित्येतावन्मात्रमेव प्रतिपाद्यते, न त्वपरशरीरसंबन्धपरिकल्पनमत्रोपयोगि। यदि च शरीररहितस्यापि तस्य भूरुहादिकार्ये व्यापारः परिकल्प्यते तर्हि मुक्तस्यापि तदन्तरेण ज्ञानसमवायिकारणत्वपरिकल्पनं किं न क्रियते? तथाऽभ्युपगमे न ज्ञान-सुखादिगुणरहितात्मस्वरूपावस्थितिर्मुक्तिः संभवति इति तदर्थमीश्वराऽऽराधनमसंगतमासज्येत। यँदपि 'कार्यं शरीरेण विना करोतीति नः साध्यम्, तत् स्वशरीरगतम्, अन्यगतं वेति नानेन किञ्चित्' इति, तदप्यसारम्; शरीरव्यतिरेकेण कार्यकरणादर्शनात्; स्वशरीरप्रवृत्तिस्वरूपेऽपि कार्ये तच्छरीरसंबद्धस्यैव व्यापारात्, अतः "अचेतनः कथं भावस्तदिच्छामनुवर्त्तते" [ ] इति दूषणं व्यवस्थितमेव, अचेतनस्य शरीरादेः शरीरासंबद्धेच्छामात्रानुवर्तनाऽदर्शनात्। तदसंबद्धस्येच्छाया अप्यभावात् मुक्तस्येव कुतस्तदनुवर्तनमचेतनकार्येण? अथ अदृष्टाऽपि इच्छा अशरीरस्य स्थाणोः परिकल्प्यते, किमिति भूरुहादिकं कार्यं कर्तृविकलं दृष्टमपि न कल्प्यते? एतेन 'ईश्वरस्यापि प्रयत्नसद्भावे न काचित् क्षतिः' इति निरस्तम्, शरीराभावे मुक्तात्मन इव प्रयत्नासंभवात्। अपरशरीररहितस्वशरीरावयवप्रेरणप्रयत्नसद्भावोऽपि न शरीराभावे प्रयत्नसद्भावाऽऽवेदकः, सर्वथा शरीररहितस्य तस्य क्वचिदप्यदर्शनात्; दृष्टानुसारिण्यश्च कल्पना भवन्ति। ततः स्थावरेषु शरीराभावाद् न तत्कर्तुरनुपलब्धिः किन्तु कर्तुरभावादिति कथं न तैः कार्यत्वादेर्हेतोर्व्यभिचारः?

न च यथाऽदृष्टस्येन्द्रियस्य चाऽन्वय-व्यतिरेकयोः कार्यकारणभावव्यवस्थापकयोरभावेऽपि कारणत्वसिद्धिर्व्यतिरेकमात्रात् तथा महेश्वरस्यापि ततस्तत्सिद्धिः, तस्य नित्यव्यापकत्वाभ्युपगमेन व्यतिरेकासंभवात्। अतो न व्याप्तिसिद्धिः कार्यत्वादेस्तत्साधकत्वेनोपन्यस्तस्य हेतोः। 'अत एव न सत्प्रतिपक्षताऽपि, नैकस्मिन् साध्यान्विते हेतौ स्थिते द्वितीयस्य तथाविधस्य तत्रावकाशः' इति सत्यम्, किन्तु स्थाणुसाधकस्य कार्यत्वादेः साध्यान्वितत्वमेव न संभवतीति प्रतिपादितम्। यच्चोक्तम् 'नाऽपि बाधा, अबुद्धिमत्कारणपूर्वकत्वस्य प्रमाणेनाऽग्रहणात्' इति, तदसांप्रतम्; बुद्धिमत्कारणपूर्वकत्वाभावप्रतिपादकस्य प्रमाणस्याऽङ्कुरादावकृष्टोत्पत्तौ सद्भावात्। अथाङ्कुरादिकर्तुरतीन्द्रियत्वाद् न प्रत्यक्षात् तदभावसिद्धिः, न; प्रत्यक्षात् तदभावाऽसिद्धावप्यनुमानस्य तत्र तदभावग्राहकस्य भावात्। तथाहि—यद् यस्यान्वय-व्यतिरेकौ नानुविधत्ते न तत् तत्कारणम्, यथा न पटादयः कुलालकारणाः, नानुविदधति चाङ्कुरादयो बुद्धिमत्कारणान्वय-व्यतिरेकाविति व्यापकानुपलब्धिः; यच्च यत्कारणं तत् तस्यान्वय-व्यतिरेकावनुविधत्ते, यथा घटादयः कुलालस्य। न चोपलब्धिमत्कारणसन्निधाने प्रागनुपलब्धस्याङ्कुरादेरुपलम्भस्तदभावे चाऽपरकारणसाकल्येऽपि तस्यानुपलम्भ इत्यन्वय-व्यतिरेकानुविधानमङ्कुरादिकार्याणाम्।

अथाङ्कुरादिकर्तुरुपलब्धिलक्षणप्राप्तत्वस्याऽभावाद् न प्रत्यक्षेण सद्भावाऽभावप्रतीतिरिति नाङ्कुरादेस्तदन्वय-व्यतिरेकानुविधानस्योपलब्धिर्युक्ता। ननु मा भूत् तदन्वय-व्यतिरेकानुविधानोपलब्धिः, व्यतिरेकानुविधानोपलब्धिस्तु युक्ता, यथा रूपाऽऽलोक-मनस्कारसाकल्येऽपि कदाचिद् विज्ञानकार्यानुत्पत्त्या कारणान्तरस्यापि तत्र सामर्थ्यमवसीयते, यच्च तत्कारणान्तरं सा इन्द्रियशक्तिः, तदभावाद् रूपज्ञानं न संजातमित्यनुपलभ्यस्वभावस्यापि कारणस्य व्यतिरेकः कार्येणानुविधी-

---

१ पृ० ११६ पं० १६। २ पृ० ९६ पं० १७। ३-'त्' एतदपि प्र-कां०। ४ पृ० ११९ पं० १३। ५ पृ० ९६ पं० १८। ६ पृ० ९६ पं० २०। ७ पृ० ९६ पं० २२। ८ पृ० ९६ पं० २४। ९ पृ० ९६ पं० २६। १० पृ० ९६ पं० ३१। ११ प्र० पृ० पं० २५। १२ पृ० ९६ पं० ३३। १३-यस्य श-मां०, भां०।

यमान उपलभ्यते; न चेहोपलब्धिमत्कारणस्य व्यतिरेकोऽङ्कुरादिकार्येणानुविधीयमान उपलभ्यते, बुद्धिमत्कारणव्यतिरिक्तपृथिव्यादिसामग्रीसकला(ग्रीसाकल्ये)ऽङ्कुरादेरवश्यंभावदर्शनात्। इन्द्रियशक्तेरनित्यत्वाव्यापकत्वेन व्यतिरेकसंभवात् तद्व्यतिरेकानुविधानस्योपलब्धिर्युक्ता, न बुद्धिमत्कारणव्यतिरेकानुविधानस्य; तस्य नित्यत्वव्यापकत्वेन व्यतिरेकानुविधानाभावादिति चेत्, अस्तु नामैवम्, तथाऽपीश्वरस्य ज्ञान-प्रयत्न-चिकीर्षासमवायोऽङ्कुरादिकार्यकरणे व्यापारः, तस्य सर्वदा सर्वत्राऽभावात् तदनुविधानं स्यात्।

अथ तत्समवायस्यापि सर्वत्र सर्वदा भावाद् नायं दोषः, न; तस्य नित्यत्वव्यापकत्वे सत्यपि तद्विशेषणानामीश्वरज्ञान-प्रयत्न-चिकीर्षादीनामनित्यत्वात् अव्यापकत्वाच्च व्यतिरेकानुविधानमुपलभ्येत। अथ तज्ज्ञानादेरपि नित्यत्वाद् नायं दोषः सर्वदा तर्ह्यङ्कुरादिकार्योत्पत्तिः स्यात्। सर्वदा सहकारिणामसन्निधानाद् नेति चेत्, ननु तेऽपि तज्ज्ञानाद्यायत्तजन्मानः किं न सर्वदा सन्निधीयन्ते? अथ नैव ते तदायत्तोत्पत्तयस्तर्हि तैरेव कार्यत्वादिहेतुरनैकान्तिकः। तत्सहकारिणामपि सर्वदा स्वोत्पत्तिहेतूनां सकार्याणामसन्निधानाद् न सर्वदोत्पद्यन्त इति चेत्, अनवस्था; तथा च अपरापरसहकारिप्रतीक्षायामेवोपक्षीणशक्तित्वात् तज्ज्ञानादेः प्रकृतकार्यकर्तृत्वं न कदाचिदपि स्यात्। अतः सुदूरमपि गत्वा क्वचिदवस्थामिच्छता नित्यत्वं सहकारिणाम् अतदायत्तोत्पत्तिकत्वं वाऽभ्युपगमनीयम्, तदायत्तोत्पत्तिकार्यस्याऽपि तज्ज्ञानादिव्यतिरेकेणाऽप्युत्पत्तिरभ्युपगन्तव्या इति वृथा तत्परिकल्पना। नित्यत्वे वा पुनरपि सहकारिणां तज्ज्ञानादीनां च नित्यत्वात् सर्वदा कार्योत्पत्तिप्रसङ्गः। तदेवं तज्ज्ञानादीनां च नित्यत्वात् सर्वदा कार्यस्योत्पत्तिरनुत्पत्तिर्वा स्यात् इत्यनित्यास्तज्ज्ञानादयोऽभ्युपगन्तव्याः; तथा च सति तदन्यसामग्रीसाकल्येऽप्यङ्कुराद्यनुत्पत्तिः कदाचित् स्यात्। सकलतदन्यसामग्रीसन्निधानानन्तरमेव तज्ज्ञानाद्युत्पत्तेर्न कार्यानुत्पत्तिः कदाचित् सामग्रीसाकल्येऽपीति चेत्, सहकारिकारणसंभवास्तर्हि तज्ज्ञानादयः प्राप्ताः; अन्यथा तदनन्तरोत्पत्तिनियमाभावात् सहकारिषु सत्स्वपि कदाचिदङ्कुराद्यनुत्पत्तिः स्यात्। ते तु सहकारिणस्तज्ज्ञानाद्यप्रेरिता एव तज्ज्ञानादि जनयन्तोऽङ्कुरादि जनयन्ति किमन्तर्गडुतज्ज्ञानादिकल्पनया? तज्ज्ञानादिसहकृता एव तज्ज्ञानादिकं जनयन्तीत्यभ्युपगमे तज्ज्ञानाद्यन्तरं सहकारिकारणजन्यमजन्यात्वा (?) तदनन्तरमनुत्पद्यमानं कार्यमपि तज्ज्ञानादिकं तदनन्तरं नोत्पादयति, इत्यायातः स एव कारणान्तरसाकल्येऽप्यङ्कुरादिकार्याद्यनुत्पत्तिप्रसङ्गः, सहकारिभ्यस्तज्ज्ञानाद्यन्तरोत्पत्तौ स एव प्रसङ्गः अनवस्था च। तस्यां चाऽपरापरज्ञानोत्पादन एव सहकारिणां सर्वदोपयोगान्न कार्ये कदाचिदप्युपयोगो भवेत्। सहकारिभिः सह तज्ज्ञानादिकं नियमेनोत्पत्तिमदिति चेत् तर्हि सहकारिणां तज्ज्ञानादेश्चैकसामग्र्यधीनत्वमभ्युपगन्तव्यम्; अन्यथाऽसहभावात् तथैकसामग्रीलक्षणं कारणं तज्ज्ञानादिभिरन्यैर्जनितमजनितं वा तज्जनयति? [न चाजनितम्, तथैव कार्यत्वादेर्हेतोर्व्यभिचारित्वप्रसङ्गात् जनितं तज्ज्ञानादिकमभ्युपगन्तव्यम्, तच्च तेन जन्येन सह नियमेनोत्पद्यमानं तदेकसामग्र्यधीनत्वमभ्युपनन्तरं सामग्र्यधीनं स्यात्। सा च सामग्री तज्ज्ञानान्तरेणोत्पादितेति च इति विकल्पद्वये पूर्वोक्तदोषद्वयप्रसङ्गः। प्रागनन्तरोत्पत्तिनियमाभ्युपगमे सहकारिहेतुभिरेकसामग्र्यधीनतया स्यात् तत्रापि सैकसामग्री तज्ज्ञानाद्यन्तरेण प्रेरिता जनयतीत्यभ्युपेयम्; अन्यथाऽचेतनस्याचेतनानधिष्ठितस्य वास्यादेरिव जनकत्वासंभवात्, ज्ञानाद्यन्तरं च प्रेर्यात् सामग्रीविशेषात् प्रागन्तरं नियमेनोत्पद्यमानं तद्धेतुभिरेकसामग्र्यधीनं स्यात्; अन्यथा प्रागनन्तरं नियमेनोत्पत्तिर्न स्यात्। सामग्र्यन्तरं च प्रेरितमप्रेरितं वा जनयतीति विकल्पद्वये दोषद्वयप्रसङ्गः, तेनेमं दोषं परिजिहीर्षता न तज्ज्ञानाद्युत्पत्तिः तदनन्तरं सह प्राग्वाऽनन्तरमभ्युपगन्तव्या, तदनन्तरं सह प्राग्वाऽनन्तरमुत्पत्तिनियमाभावेऽपि] चाऽङ्कुरादिकार्यस्य तद्व्यतिरेकानुविधानमुपलभ्येत; न चोपलभ्यते, क्षित्युदक-बीजादिकारणसामग्रीसंनिधाने प्रतिबन्धे

१-भ्यते तथेहो-वा०, बा० विना। २-कार्ये नानुवि-वा०, बा० विना। ३-मजन्यस्वो त-वा०, बा०। ४-यन्ति इ-वा०, बा० विना। ५ [ ] एतच्चिह्नान्तर्गतः पाठः खण्डितप्रायः। ६-म्, नतैव वा०, बा०। ७-ग्र्यधीनं त्वमभ्युपनंरंतारं सा०। ८-पव्यं नन्त-कां०। ९-तावेति वा०, बा०। १० प्रागतरं नि-वा०, बा०। ११-गन्तरं नि-वा०, बा०। १२ च प्रेरितं वा ज-हा०, वा०, गु०। १३-नवरं सह प्रा-वा०, बा०।

चाऽसति अङ्कुरादिकार्यस्यावश्यंभावदर्शनात्। अतस्तज्ज्ञानाद्यनुविधानस्य तत्कारणत्वव्यापकस्यानुपलम्भात् तत्कारणत्वाभावोऽङ्कुरादिकार्यस्यानुमीयते। अतो बाधा व्यापकानुपलब्ध्या बुद्धिमत्कारणानुमानस्य।

बुद्धिमत्कारणानुमानेनैव व्यापकानुपलब्धिः कस्मान्न बाध्यते? लोहलेख्यं वज्रम्, पार्थिवत्वात्, काष्ठवदित्यनुमानेन प्रत्यक्षं तस्य तदलेख्यत्वग्राहकं किं न बाध्यते इति समानम्। प्रत्यक्षेण तद्विषयस्य बाधितत्वान्न तेन तद् बाध्यत इति चेद्, बुद्धिमत्कारणत्वानुमानस्यापि तर्हि व्यापकानुपलब्ध्या विषयस्य बाधितत्वात् कथं तद्बाधकत्वम्? बुद्धिमत्कारणत्वानुमानेनैव व्यापकानुपलब्धेर्विषयस्य बाधितत्वान्न तद्बाधकत्वमिति चेत्, न; पार्थिवत्वानुमानेन तदलेख्यत्वग्राहकस्य प्रत्यक्षस्य बाधितविषयत्वान्न तद्बाधकत्वमित्यपि वक्तुं शक्यत्वात्। अथ तदनुमानस्य तदाभासत्वाद् न प्रकृतप्रत्यक्षविषयबाधकत्वम्, नैतत्; इतरेतराश्रयदोषप्रसङ्गात्। तथाहि–प्रत्यक्षबाधितविषयत्वात् तदनुमानस्य तदाभासत्वम्, तस्य तदाभासत्वात् प्रत्यक्षस्य तद्बा(दबा)धितविषयत्वेनाऽतदाभासत्वात् तद्विषयबाधकत्वम् इति व्यक्तमितरेतराश्रयत्वम्। अथानुमानाबाधितविषयत्वनिबन्धनं न तत्प्रत्यक्षस्याऽतदाभासत्वम् किं तर्हि स्वपरिच्छेद्याव्यभिचारनिबन्धनम्? नन्वेवमनुमानस्यापि स्वसाध्याऽव्यभिचारनिबन्धनं किं नाऽतदाभासत्वमप्यभ्युपगमविषयः? अथाऽबाधितविषयत्वे सति तस्य तदेव स्वसाध्याऽव्यभिचारित्वं परिसमाप्यते। नन्वेवमबाधितविषयत्वस्य प्रतिपत्तुमशक्तेर्न क्वचिदपि स्वसाध्याऽव्यभिचारित्वस्यानुमानेऽतदाभासत्वनिबन्धनस्य प्रसिद्धिः; न हि बाधाऽनुपलम्भाद् बाधाऽभावः, तस्य विद्यमानबाधकेष्वप्यनुत्पन्नबाधकप्रतिपत्तिषु भावात्। अथ यत्र बाधकसद्भावस्तत्र प्राग् बाधकानुपलम्भेऽप्युत्तरकालमवश्यंभाविनी बाधकोपलब्धिः, यत्र तु न कदाचिद् बाधकोपलब्धिस्तत्र न तद्भावः, असदेतत्; न ह्यर्वागदृशा बाधकाऽनुपलम्भमात्रेण 'न कदाचनाप्यत्र बाधकोपलब्धिर्भविष्यति' इति ज्ञातुं शक्यम्, स्वसंबन्धिनोऽनुपलम्भस्यानैकान्तिकत्वात्, सर्वसंबन्धिनोऽसिद्धत्वात्; न ह्यसर्ववित् 'सर्वेणाप्यत्र बाधकं नोपलभ्यते उपलप्स्यते वा' इत्यवसातुं क्षमः। नाऽपि बाधकाभावोऽभावग्राहिप्रमाणावसेयः, तस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च। न चाऽज्ञातो बाधकाभावोऽनुमानाङ्गं पक्षधर्मत्वादिवत्। न च स्वसाध्याव्यभिचारित्वनिश्चयादेव बाधकाभावनिश्चयः, तन्निश्चयमन्तरेण त्वदभिप्रायेण स्वसाध्याव्यभिचारित्वस्याऽपरिसमाप्तत्वेन निश्चययायोगात्। तस्मात् पक्षधर्मत्वाऽन्वय-व्यतिरेकनिश्चयलक्षणस्वसाध्याविनाभावित्वस्य प्रकृतानुमानेऽपि सद्भावात् प्रत्यक्षवद् न तस्यापि तदाभासत्वम्। अथ विपर्यये बाधकप्रमाणाभावात् पार्थिवत्वानुमानस्य नान्तर्व्याप्तिरिति तदाभासत्वम्, एवं तर्हि कार्यत्वानुमानेऽपि विपर्यये बाधकप्रमाणाभावाद् व्याप्यभावतस्तदाभासत्वमिति न व्यापकानुपलब्धिविषयबाधकता। अथ प्रत्यक्षं नानुमानेन बाध्यत इति लोहलेख्यत्वानुमानस्य न तदलेख्यत्वग्राहकप्रत्यक्षबाधकता, कथं तर्हि देशान्तरप्राप्तिलिङ्गजनिताऽनुमानेन स्थिरचन्द्राऽर्कग्राहिप्रत्यक्षस्य बाधा? अथ तस्य प्रत्यक्षाभासत्वादनुमानेन बाधा, ननु कुतस्तस्य तदाभासत्वम्? अनुमानेन बाधितविषयत्वादिति चेत्, ननु तदेवेतरेतराश्रयत्वम्-अनुमानेन बाधितविषयत्वात् तस्य तदाभासत्वम्, तस्य तदाभासत्वे च तेन अबाधितविषयत्वादनुमानस्याऽतदाभासत्वेन तद्विषयबाधकत्वम् इति व्यक्तमितरेतराश्रयत्वम्। तस्मात् स्वग्राह्याव्यभिचार एव सर्वत्र प्रामाण्यनिबन्धनम्। स च व्यापकानुपलब्धौ पक्षधर्माऽन्वयव्यतिरेकस्वरूपः प्रमाणपरिनिश्चितो विद्यते इति तस्या एव स्वसाध्यप्रतिपादकत्वेन प्रामाण्यम् न पुनर्बुद्धिमत्कारणानुमानस्य, तत्र स्वसाध्याव्यभिचाराभावस्य प्रदर्शितत्वात्।

न च व्यापकानुपलब्धावपि पक्षधर्मत्वाऽन्वय-व्यतिरेकनिश्चयस्य स्वसाध्याव्यभिचारित्वनिश्चयलक्षणस्याभाव इति वक्तुं युक्तम्, यतो व्यापकानुपलब्धेस्तावत् पक्षव्यापकत्वनिश्चयः प्रागेवोक्तः। विपक्षे बाधकप्रमाणसद्भावाद् अन्वय-व्यतिरेकावपि तत्राऽवगम्येते, तत्कारणेषु हि कुम्भादिषु तदन्वय-व्यतिरेकानुविधानस्योपलब्धिस्तदनुपलब्धेर्बाधकं प्रमाणम्। अथवा तत्कारणत्वं तदन्वय-व्यतिरेकानुविधानेन व्याप्तम्, तदभावे तत्कारणत्वासंभवात्; तदभावेऽपि भवतस्तत्कारणत्वे सर्वं

१ पृ० २३ पं० ३६। २ पृ० १०८ पं० ८। ३ पृ० १२१ पं० ३२। ४-त्वेऽपि स-कां०।

सर्वस्य कार्यं कारणं च स्यात्, न क्वचिद् कार्यकारणभावव्यवस्था; अन्वय-व्यतिरेकानुविधानं हि कार्यकारणभावव्यवस्थानिबन्धनम्, तदभावेऽपि कार्यकारणभावं कल्पयतः किमन्यत् तद्व्यवस्थानिबन्धनं स्याद् इति? अतोऽतिव्याप्तिपरिहारेण क्वचिदेव कार्यकारणभावव्यवस्थामिच्छता तदभावे कार्यकारणभावो नाभ्युपगन्तव्य इत्यन्वयव्यतिरेकानुविधानेन कार्यकारणभावो व्याप्तः, स यत्रोपलभ्यते तत्रान्वय-व्यतिरेकानुविधानसंनिधापनेन तदभावं बाधत इत्यनुमानसिद्धो व्यतिरेकः; तत्सिद्धेश्चान्वयोऽपि सिद्धः। तथाहि-य एवं सर्वत्र साध्याभावे साधनाभावलक्षणो व्यतिरेकः स एव साधनसद्भावेऽवश्यंतया साध्यसद्भावस्वरूपोऽन्वय इति व्यापकानुपलब्धेः पक्षधर्मत्वान्वयव्यतिरेकलक्षणः साध्याव्यभिचारः प्रमाणतः सिद्धः। न चैवं कार्यत्वादेरयमविनाभावः संभवति, पक्षव्यापकत्वे सत्यन्वय-व्यतिरेकयोरभावस्य विपर्यये बाधकप्रमाणाभावतः प्रतिपादितत्वात्।

अपि च, बुद्धिमत्कारणत्वे तन्वादीनां साध्ये तद्विपर्ययोऽबुद्धिमत्कारणाः परमाण्वादयः, न च तेभ्यो बुद्धिमत्कारणसाध्यव्यावृत्तिनिमित्तकार्यत्वादिनिवृत्तिप्रतिपादकप्रमाणप्रवृत्तिः सिद्धा, घटादेरवयवित्वनिराकरणेन विशिष्टावस्थाप्राप्तपरमाणुरूपत्वात्। न च तेभ्यो बुद्धिमत्कारणव्यावृत्तिकृता कार्यत्वव्यावृत्तिः प्रत्यक्षतः सिद्धा, बुद्धिमत्कारणनिमित्तकार्यत्वग्राहकत्वेन प्रत्यक्षस्य प्रत्यक्षानुपलम्भशब्दवाच्यस्य तत्र प्रवृत्तेः, परमाण्वन्तरासंसृष्टपरमाणूनां च प्रत्यक्षबुद्धावप्रतिभासनान्न ततः साध्यव्यावृत्तिप्रयुक्ता साधनव्यावृत्तिप्रतिपत्तिः। नाप्यबुद्धिमत्कारणेषु कार्यत्वादेरदर्शनात् साकल्येन ततो व्यतिरेकसिद्धिः, स्वसंबन्धिनोऽदर्शनस्य परचेतोवृत्तिविशेषैरनैकान्तिकत्वात् सर्वसंबन्धिनोऽसिद्धत्वात्; न ततो विपक्षाद्धेतोर्व्याप्त्या व्यतिरेकसिद्धिः। नाऽपि परमाण्वादीनामनुमानान्नित्यत्वसिद्धेरकार्यत्वस्य कार्यत्वविरुद्धस्य तेषु सद्भावात् ततो व्यावर्तमानः कार्यत्वलक्षणो हेतुर्बुद्धिमत्कारणत्वेनाऽन्वितः सिध्यति, कार्यत्वस्याबुद्धिमत्कारणत्वेन विरोधासिद्धेरङ्कुरादिष्वबुद्धिमत्कारणनिष्पाद्येष्वपि तस्य संभवात्। अथ नित्येभ्योऽकृतत्वादेव कार्यत्वं व्यावृत्तम्, उत्पत्तिमतां चाङ्कुरादीनां बुद्धिमत्कारणपूर्वकत्वेन पक्षीकृतत्वान्न तैर्हेतोर्व्यभिचार आशङ्कनीय इति तेषु वर्तमानः कार्यत्वलक्षणो हेतुर्बुद्धिमत्कारणत्वेनान्वितः सिद्धः। स्यादेतत् यदि पक्षीकरणमात्रेणैवाऽबुद्धिमत्कारणत्वाभावस्तेषु सिद्धः स्यात्, तथाऽभ्युपगमे वा पक्षीकरणादेव साध्यसिद्धेर्हेतूपादानं व्यर्थम्। अथ तत्सहितात् साध्यनिर्देशात् तदभावसिद्धिः, कथं साकल्येनाऽनिश्चितव्यतिरेकात् कार्यत्वान्नित्यव्यतिरिक्तानां सर्वेषामङ्कुरादीनामबुद्धिमत्कारणत्वाभावसिद्धिः? तदभावासिद्धौ च न साकल्येन व्यतिरेकनिश्चय इति इतरेतराश्रयदोषः कथं न स्यात्? तदेवं व्याप्त्या व्यतिरेकासिद्धौ न साकल्येनान्वयसिद्धिः, तदसिद्धौ च न व्यतिरेकसिद्धिरिति न कार्यत्वादेर्हेतोः प्रकृतसाध्यसाधकत्वम्। न च सर्वानुमानेष्वेष दोषः समानः, अन्यत्र विपर्यये बाधकप्रमाणबलादन्वय-व्यतिरेकसिद्धेः। न च प्रकृते हेतौ तदस्तीत्यसकृदावेदितम्। तेन 'साध्याभावे हेतोरभावः स्वसाध्यव्याप्तत्वादेव सिद्धः' इति निरस्तम्, यथोक्तप्रकारेण स्वसाध्यव्याप्तत्वस्य प्रकृतहेतोरसंभवात्। 'नाऽपि धर्म्यसिद्धतां' इति, एतदपि निरस्तम्; धर्म्यसिद्धत्वस्य प्राक् प्रतिपादितत्वात्। 'कार्यकारणसङ्घात' इत्यादिर्कस्तु ग्रन्थोऽयुक्तत्वेन प्रतिपादितः। अत एवेश्वरागमे प्रमाणाभावः, तत्प्रतिपादकप्रमाणस्य समानदोषत्वेनान्यस्याऽप्यचेतनोपादानत्वादेर्निराकृतत्वात्।

यच्चोक्तम् 'नाऽपि हेतोर्विशेषविरुद्धता' इत्यादि, तदप्यसङ्गतम्; यतो यदि कार्यमात्रात् कारणमात्रं तन्वादेः साध्यते तदा व्याप्तिसिद्धेर्न विरुद्धावकाशः। अथ बुद्धिमत्कारणपूर्वकत्वं साध्यते तदा तत्र व्याप्तेरसिद्धत्वं प्रतिपादितमेव। यदि पुनर्घटादौ कार्यत्वं बुद्धिमत्कारणसहचरितमुपलब्धमिति पृथिव्यादावपि तत् साध्यते; तथा सति दृष्टान्तेऽनीश्वराऽसर्वज्ञ-कृत्रिमज्ञानशरीरसंबन्धिकर्तृपूर्वकत्वं कार्यत्वस्योपलब्धमिति ततस्तादृग्भूतमेव क्षित्यादौ सिद्धिमासादयति न तु तत्सहचरितत्वेनाऽदृष्टमीश्वरत्वादिविरुद्धधर्मकलापोपेतबुद्धिमत्कारणपूर्वकत्वम्; न हि महा-

१-व पूर्वत्र सा-वा०, बा०। २-धकसद्भा-वा०, बा०। ३-द्धिः? तदसिद्धौ च वा०, बा०। ४ प्र० पृ० पं० १२। ५ पृ० ९६ पं० ३३। ६ पृ० ९६ पं० ३५। ७ पृ० १०२ पं० ११। ८ पृ० ९६ पं० ३५। ९ पृ० ९६ पं ३८।

नसप्रदेशेऽग्निसहचरितमुपलब्धं धूममात्रं गिरिशिखरादावुपलभ्यमानमग्निविरुद्धधर्माध्यासितोदकगमकं युक्तम्, अतिप्रसङ्गात्। यच्चोक्तम् 'पूर्वोक्तविशेषणानां धर्मिविशेषरूपाणां व्यभिचारात्' इत्यादि, तदप्यसङ्गतम्; यादृग्भूतं हि कार्यत्वं घटादावनीश्वरादिधर्मोपेतबुद्धिमत्कारणत्वेन व्याप्तमुपलब्धं तादृग्भूतं तदन्यत्रापि जीर्णप्रासादादावुपलभ्यमानमक्रियादर्शिनोऽपि तथाभूतकर्तृपूर्वकत्वप्रतिपत्तिं जनयति। न च तत्र केनचिदनीश्वरत्वादिधर्मेण व्यभिचारः कदाचित् केनाऽप्युपलभ्यते। तथाभूतसाध्यव्याप्तहेतूपलम्भ एव तत्र तदव्यभिचारः, स चेदस्ति कथमनीश्वरत्वादिधर्माणां व्यभिचारादसाध्यत्वं सचेतसा वक्तुं युक्तम्; अन्यथा धूमादग्निप्रतिपत्तावपि भास्वररूपसंबन्धादिधर्माणां व्यभिचारात् तथाभूतस्याग्नेरसाध्यत्वं स्यात्। एतेन 'पूर्वस्माद्धेतोः स्वसाध्यसिद्धावुत्तरेण पूर्वसिद्धस्यैव साध्यस्य किं विशेषः साध्यते, आहोस्वित् पूर्वहेतोः स्वसाध्यसिद्धिप्रतिबन्धः क्रियते'? इत्यादि सर्वं निरस्तम्, यतो यदि कार्यत्वमात्रं हेतुत्वेन क्षित्यादौ साध्यसाधकत्वेनोपादीयते तदा तस्य संदिग्धविपक्षव्यावृत्तिकत्वेन बुद्धिमत्कारणपूर्वकत्वाऽसाधकत्वम्। अथ घटादौ बुद्धिमत्कारणत्वेन व्याप्तं यत् कार्यत्वं तत् तत्र हेतुत्वेनोपादीयते, तत् तत्रासिद्धमिति कथं तत् तत्र बुद्धिमत्कारणत्वस्यापि गमकम्? इत्यविशिष्टस्य कार्यत्वस्य व्याप्त्यभावादेवापरविशेषसाधकहेतुव्यापारमन्तरेणाऽपि कार्यत्वस्य हेतोः स्वसाध्यसाधकत्वव्याघातः संभवत्येव, कार्यत्वविशेषस्य तु तत्रासिद्धत्वादेव साध्यासिद्धिलक्षणस्तद्विघातः।

यत्तु 'शब्दस्य कृतकत्वादनित्यत्वसिद्धौ हेत्वन्तरेण गुणत्वसिद्धावपि न पूर्वस्य क्षतिः' इति, तदप्यचारु; गुणत्वं हि द्रव्याश्रितत्वादिधर्मयुक्तत्वमुच्यते, तच्चेच्छब्दे सिद्धिमासादयति तदा पूर्वहेतुसाधितमनित्यत्वं तत्र व्याहन्यत एव; न ह्यनुत्पन्नस्य तस्याऽसत्त्वादेव द्रव्याश्रितत्वम् गुणत्वसमवायो वा संभवति; उत्पन्नस्याप्युत्पत्त्यनन्तरध्वंसित्वेन तन्न संभवति। न च तदाश्रितस्य उत्पत्त्यादिकमेव तत्, खरविषाणादेरपि तत्त्वप्रसङ्गादित्यादि आश्रयादावसिद्धत्वं हेतोः प्रतिपादयिष्यामः। द्वितीये तु विकल्पे 'न च धर्मिविशेषविपर्ययोद्भावनेन कस्यचिदपि रूपस्याभावः कथ्यते' इति यदुक्तम्, तदप्यसङ्गतम्; यतो यद्यन्यादृशस्य धर्मिणः कुतश्चिद्धेतोः क्षित्यादौ सिद्धिः स्यात् तदा युज्येताऽपि वक्तुम्-धर्मिविशेषविपर्ययोद्भावनेन न कस्यचिद्धेतुरूपस्याभाव इति, तथाभूतस्य तु धर्मिणो न प्रकृतसाधनादवगम इति प्रतिपादितम्। अत एवागमाद् हेत्वन्तराद् वा न तत्र विशेषसिद्धिः, बुद्धिमत्कारणस्यैव धर्मिणः क्षित्यादिकर्तृत्वेनासिद्धत्वात्। ततः 'तच्चाऽन्वयव्यतिरेकिपूर्वं केवलव्यतिरेकिसंज्ञकं तदेव चान्वयव्यतिरेकिलक्षणं पक्षधर्मताप्रसादाद् विशेषसाधनम्' इति प्रतिपादनं दूरापास्तम्, धर्म्यसिद्धौ तद्विशेषसिद्धेर्दूरोत्सारितत्वात्। अत एव 'य इत्थम्भूतस्य पृथिव्यादेः कर्त्ता नियमेनाऽसावकृत्रिमज्ञानसंबन्धी शरीररहितः सर्वज्ञ एक इत्येवं यदा विशेषसिद्धिस्तदा न विशेषविरुद्धानामवकाशः' इति निःसारतया व्यवस्थितम्।

यत्तूक्तम् 'शरीरसंबन्धस्य तावद् व्याप्त्यभावेन तत्र निराकृतिः, शरीरान्तररहितस्याऽप्यात्मनः शरीरधारण-प्रेरणक्रियासु यथा व्यापारस्तथेश्वरस्यापि क्षित्यादिकार्ये' इति, तदप्ययुक्तम्; अपरशरीररहितत्वेऽप्यात्मनः शरीरसंबद्धस्यैव तद्धारणादिकर्तृत्वोपलब्धेरीश्वरस्यापि शरीरसंबद्धस्यैव कार्यकर्तृत्वमभ्युपगन्तव्यमिति प्रतिपादितत्वात्। यदि च शरीरसंबन्धाभावेऽपि तस्य क्षित्यादिकार्यकर्तृत्वं तदा वक्तव्यम्-किं पुनस्तत् तत्र? ज्ञान-चिकीर्षा-प्रयत्नानां समवायः तत् तत्रोक्तमेवेति चेत्, न; समवायस्य निषिद्धत्वात्। न च कुम्भकारादौ शरीरसंबन्धव्यतिरेकेणाऽन्यत् कर्तृत्वमुपलब्धमितीश्वरेऽपि तदेव परिकल्पनीयम्, दृष्टानुसारित्वात् कल्पनायाः। न च शरीरव्यतिरेकेण ज्ञान-चिकीर्षा-प्रयत्नानामपि सद्भावः क्वचिदप्युपलब्ध इति नेश्वरेऽपि तदभावेऽसावभ्युपग-

१ पृ० ९७ पं० २। २ पृ० ९७ पं० ८। ३ पृ० ९७ पं० १०। ४-णव्यतिरिक्तस्य वा०, बा०। ५ पृ० ९७ पं० १३। ६ धर्मविशेषस्य वि-वा०, बा०। ७-तस्य ध-वा०, बा०। ८ पृ० ९७ पं० १६-२९। ९-पूर्वकेव-वा०, बा०, हा०। १० पृ० ९७ पं० २९। ११ पृ० ९८ पं० २। १२ पृ० ११६ पं० २५-३१। १३ पृ० १०६ पं० १०।

न्तव्यः। तथाहि–ज्ञानादीनामुत्पत्तावात्मा समवायिकारणम्, आत्म-मनःसंयोगोऽसमवायिकारणम्, शरीरादि निमित्तकारणम्; न च कारणत्रयाभावे परेण कार्योत्पत्तिरभ्युपगम्यते। न चाऽसमवायिकारणात्म-मनःसंयोगादिसद्भाव ईश्वरेऽभ्युपगत इति न ज्ञानादेरपि तत्र भावः।

अथासमवायिकारणादेरभावेऽपि तत्र ज्ञानाद्युत्पत्तिस्तर्हि निमित्तकारणेश्वरव्यतिरेकेणाङ्कुरादेः किमिति नोत्पत्तिर्युक्ता? अथ ज्ञानाद्यभावे तदनधिष्ठितानां कथमचेतनानां तदुपादानादीनां प्रवृत्तिः वास्यादिवदचेतनस्य चेतनानधिष्ठितस्य प्रवृत्त्यदर्शनात्? प्रवृत्तावपि निरभिप्रायाणां देश-कालाऽऽकारनियमो न स्यात्, तदधिष्ठितस्यैव तस्य तन्नियतत्वदर्शनात्। नन्वेवं चेतनस्यापि चेतनान्तरानधिष्ठितस्य कर्मकरादेरिव स्वाम्यनधिष्ठितस्य कथं प्रवृत्तिः? अथ स्वामिन एवान्यानधिष्ठितस्य चेतनस्य प्रवृत्तिरुपलभ्यते, किमङ्कुरादेरकृष्टोत्पत्तेरुपादानस्य तदनधिष्ठितस्य सा नोपलभ्यते? अथ घटादेरुपादानस्य तदनधिष्ठितस्य तत्करणे प्रवृत्तिर्नोपलभ्यत इत्यङ्कुराद्युपादानस्यापि तदधिष्ठितस्यैव सा प्रसाध्यते तर्हि कर्मकरादेरपि स्वाम्यनधिष्ठितस्य सा नोपलभ्यत इति स्वामिनोऽप्यपरचेतनान्तराधिष्ठितस्य सा साध्यताम्। यदि पुनः स्वामिनोऽप्यधिष्ठाता चेतनो महेशः परिकल्प्यते तर्हि तस्याप्यपर इत्यनवस्था।

न च चेतनस्याप्यपरचेतनाधिष्ठितस्य प्रवृत्त्यभ्युपगमे 'अचेतनं चेतनाधिष्ठितम्' इति प्रयोगे 'अचेतनम्' इति धर्मिविशेषणस्य 'अचेतनत्वादेः' इति हेतोश्चाव्यर्थमुपादानम्[3], अचेतनवच्चेतनस्यापि चेतनाधिष्ठितस्य प्रवृत्त्यभ्युपगमे व्यवच्छेद्याभावात्। न चाचेतनानामपि स्वहेतुसन्निधिसमासादितोत्पत्तीनां चेतनाधिष्ठातृव्यतिरेकेणापि देश-कालाऽऽकारनियमोऽनुपपन्नः, तन्नियमस्य स्वहेतुबलायातत्वात्; अन्यथाऽधिष्ठातृज्ञानकृतोऽपि स न स्यात्। तज्ज्ञानस्य सर्वाऽचेतनाधिष्ठायकत्वे क्षणिकत्वे च–तज्ज्ञेयत्वमेव तदधिष्ठितत्वम्—तेषां सर्वकालभाविकार्ये तदैव प्रवृत्तिरिति एकक्षण एवोत्तरकालभाविकार्योत्पत्तिप्रसङ्गः, अपरक्षणेऽपि तथाभूततज्ज्ञानसद्भावे पुनरप्यनन्तरकालकार्योत्पत्तिः सदैव, इति योऽयं क्रमेणाङ्कुरादिकार्यसद्भावः स विशीर्येत। कतिपयाचेतनविषयत्वे च तज्ज्ञानादेः तदविषयाणां स्वकार्ये प्रवृत्तिर्न स्यात् इति तत्कार्यशून्यः सकलः संसारः प्रसक्तः, न हि तज्ज्ञानादिविषयत्वव्यतिरेकेणापरं तेषां तदधिष्ठितत्वं परेणाभ्युपगम्यते। अथ नित्यं तज्ज्ञानादि; नन्वेवं 'क्षणिकं ज्ञानम्, अस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात्, शब्दवत्' इत्यत्र प्रयोगे महेशज्ञानेन हेतोर्व्यभिचारः।

अथ 'तज्ज्ञानादिव्यतिरेके सति' इति विशेषणान्नायं दोषः, न; विपक्षविरुद्धविशेषणं हेतोस्ततो व्यावर्तकं भवति; अन्यथा तद्व्यावर्त्तकत्वायोगात्। न चाक्षणिकत्वेन तद्व्यतिरिक्तत्वं विरुद्धम्, द्विविधस्यापि विरोधस्यानयोरसिद्धेः। न च विपक्षाविरुद्धविशेषणोपादानमात्रेण हेतोर्व्यभिचारपरिहारः; अन्यथा न कश्चिद् हेतुर्व्यभिचारी स्यात्, सर्वत्र व्यभिचारविषये 'एतद्व्यतिरिक्तत्वे सति' इति विशेषणस्योपादातुं शक्यत्वात्। न च नैयायिकमतेनाक्षणिकं ज्ञानं संभवति' "अर्थवत् प्रमाणम्" [वात्स्या० भा० पृ० १] इति वचनात् अर्थकार्यं ज्ञानं तद्विषयमभ्युपगतम्, अर्थश्च क्रमभावी अतीतोऽनागतश्च। यच्च क्रमवज्ज्ञेयविषयं ज्ञानं तत् क्रमभावि, यथा देवदत्तादिज्ञानं ज्वालादिगोचरम्, क्रमवद्विज्ञेयविषयं चेश्वरज्ञानमिति स्वभावहेतुः।

प्रसङ्गसाधनं चेदम्, तेनाश्रयासिद्धता हेतोर्नाशङ्कनीया। न च विपर्यये बाधकप्रमाणाभावाद् व्याप्यव्यापकभावासिद्धेर्न प्रसङ्गसाधनावकाशोऽत्रेति वक्तव्यम्, तस्य भावात्। तथाहि—यदि क्रमवता विषयेण तद् ईश्वरज्ञानं स्वनिर्भासं जन्यते तदा सिद्धमेव क्रमित्वम्। अथ न जन्यते तदा प्रत्यासत्तिनिबन्धनाभावाद् न तद् जानीयात्, विषयमन्तरेणापि च भवतः प्रामाण्यमभ्युपगतं हीयेत, अतीतानागते विषये निर्विषयत्वप्रसङ्गादिति विपर्ययबाधकसद्भावः सिद्धः।

तज्ज्ञानादेश्च नित्यत्वे तद्विषयत्वमन्तरेणापरस्य चेतनाधिष्ठितत्वस्याभावादविकलकारणस्य जगतो युगपदुत्पत्तिप्रसङ्गः। तथाहि–यद् अविकलकारणं तद् भवत्येव, यथाऽन्त्यावस्थाप्राप्तायाः सामग्र्या अविकलकारणो भवन्नङ्कुरः, अविकलकारणं च सर्वदा सर्वमीश्वरज्ञानादिहेतुकं जगत् इति

१ अत्र स्थले प्रमेयकमलमार्तण्डे एतादृशः पाठः–"चेतनस्यापि अपरचेतनाधिष्ठितस्य प्रवृत्त्यभ्युपगमे च 'अचेतनं चेतनाधिष्ठितम्' इत्यत्र प्रयोगे 'अचेतनम्' इति धर्मिविशेषणस्य 'अचेतनत्वात्' इति हेतोश्चाऽपार्थकत्वं व्यवच्छेद्याभावात्"–पृ० ७८ प्र०, पं० १३। २ पृ० १०१ पं० २५। ३–**अव्यर्थ**–वा०, बा० विना।

युगपद् भवेत्। { स्यादेतत्, नेश्वरबुद्ध्यादिकमेव केवलं कारणम् अपि तु धर्माऽधर्मादिसहकारिकारणमपेक्ष्य तत् तत् करोति, निमित्तकारणत्वादीश्वरबुद्ध्यादेः; अतो धर्मादेः सहकारिकारणस्य वैकल्यादविकलकारणत्वमसिद्धम्, असदेतत्; यदि हि तस्य सहकारिभिः कश्चिदुपकारः क्रियेत तदा स्यात् सहकारिसव्यपेक्षता, यावता नित्यत्वात् परैरनाधेयातिशयस्य न किञ्चित् तस्य सहकारिभ्यः प्राप्तव्यमस्ति किमिति तत् तथाभूतान् अनुपकारिणोऽपेक्षेत? किञ्च तेऽपि सहकारिणः किमिति सततं न सन्निहिता भवन्ति यदि तज्जन्याः? अपरस्वसन्निधिहेतुसहकारिवैकल्यादिति नोत्तरम्, तेषामपि तत्संनिधिसहकारिणां तदायत्तोत्पत्तीनां तदैव सन्निधिप्रसक्तेः कथमसिद्धता हेतोः? अथ नित्यत्वे तद्बुद्ध्यादिकं सहकारिकारणमुत्पाद्य पश्चादङ्कुरादिकार्यमुपजनयतीत्यभ्युपगमस्तर्ह्यपरापरसहकारिजनने एवोपक्षीणशक्तित्वात् तस्य नाङ्कुरादिकार्यजननम्। अथातज्जन्या एव धर्माऽधर्मादिसहकारिणः अतोऽयमदोषः; नन्वेवं तैरेव 'अचेतनोपादानत्वात्' इति हेतुरनैकान्तिकः स्यात्, अतस्तदायत्तसंनिधयो धर्मादिसहिकारिण इति नाविकलकारणत्वाख्यो हेतुरसिद्धः।

न चानैकान्तिकोऽपि, अविकलकारणत्वहानिप्रसङ्गात्, अविकलकारणस्याप्यनुत्पत्तौ सर्वदैवानुत्पत्तिप्रसङ्गाच्च विशेषाभावात्। एतेन यदपि उद्द्योतकरेणोक्तम्[1]–"यद्यपि नित्यमीश्वराख्यं कारणमविकलं भावानां सन्निहितं तथापि न युगपदुत्पत्तिः, ईश्वरस्य बुद्धिपूर्वकारित्वात्। यदि हीश्वरः सत्तामात्रेणैवाऽबुद्धिपूर्वं भावानामुत्पादकः स्यात् तदा स्यादेतच्चोद्यम्; यदा तु बुद्धिपूर्वं करोति तदा न दोषः तस्य स्वेच्छया कार्येषु प्रवृत्तेः, अतोऽनैकान्तिकतैव हेतोः" [ ] इति, तदपि निरस्तम्; न हि कार्याणां कारणस्येच्छाभावाभावापेक्षया प्रवृत्ति-निवृत्ती भवतः येनाऽप्रतिबद्धसामर्थ्येऽपीश्वराख्ये कारणे सदा सन्निहिते तदीयेच्छाऽभावाद् न प्रवर्तेरन्, किं तर्हि कारणगतसामर्थ्यभावाभावानुविधायिनो भावाः। तथाहि-इच्छावतोऽपि कर-चरणादिव्यापाराक्षमात् कुलालादेरसमर्थाद् नोत्पद्यन्ते घटादयो भावाः, समर्थाच्च बीजादेरनिच्छावतोऽपि समुत्पद्यमाना उपलभ्यन्तेऽङ्कुरादयः। तत्र यदीश्वराख्यं कारणं कार्योत्पादकालवदप्रतिहतशक्ति सदैवावस्थितं भावानां तत् किमिति तदीयामनुपकारिणीं तामिच्छामपेक्षन्ते येनोत्पादकालवद् युगपन्नैवोत्पद्येरन्? एवं हि तैरविकलकारणत्वमात्मनो दर्शितं भवेत् यदि युगपद् भवेयुः। न चापीश्वरस्य परैरनुपकार्यस्य काचिदपेक्षाऽस्ति येनेच्छामपेक्षेत। न च बुद्धिविशेषव्यतिरेकेणापरेच्छा तस्य संभवति।

बुद्धिश्चेश्वरस्य यदि नित्या व्यापिकैका चाऽभ्युपगम्येत तदा सैवाऽचेतनपदार्थाधिष्ठात्री भविष्यतीति किमपरतदाधारेश्वरात्मपरिकल्पनया? अथानाश्रितं तज्ज्ञानं न संभवतीति तदात्मपरिकल्पना; ननु तदात्माऽप्यनाश्रितो न संभवतीति अपरापराश्रयपरिकल्पनयाऽनन्तेश्वरप्रसङ्गः। अथ द्रव्यत्वात् तस्याऽनाश्रितस्यापि सद्भावः न बुद्धेः गुणत्वात् इति नायं दोषः। ननु कुतस्तस्या गुणत्वम्? तत्र समवेतत्वादिति नोत्तरम्, तस्यैवानिश्चयात्। तदाधेयत्वात् तस्याः तत्समवेतत्वमिति चेत्, ननु केनैतत् प्रतीयते? न तावदीश्वरेण, तेनात्मनः ज्ञानस्य चाऽग्रहणात् 'इदमत्र समवेतम्' इति तस्य प्रतीतेरयोगात्। तज्ज्ञानस्य तत्र समवेतत्वमेव तद्ग्रहणमित्यपि नोत्तरम्, अन्योन्यसंश्रयात्–सिद्धे हि 'इदमत्र' इति ग्रहणे तत्र समवेतत्वसिद्धिः, अस्याश्च तद्ग्रहणसिद्धिरित्यन्योन्याश्रयः। तन्नेश्वरस्तज्ज्ञानमात्मनि समवेतमवैति, यश्चात्मीयमपि ज्ञानमात्मनि व्यवस्थितं न वेत्ति स सर्वजगदुपादान-सहकारिकारणादिकमवगमयिष्यतीति कः श्रद्धातुमर्हति? नापि तज्ज्ञानमवैति 'स्थाणावहं समवेतम्' इति, तेनात्मनोऽवेदनात् आधारस्य च। न च तद्ग्रहणे 'इदं मम रूपमत्र स्थितम्' इति प्रतीतिः संभवति। न च तत् आत्मानमप्यवैति, अस्वसंविदितत्वाभ्युपगमात्। न चापरं तद्ग्राहकं नित्यं ज्ञानं तस्येश्वरस्यापि संभवति—येनैकेन सकलं पदार्थजातमवगमयति, अपरेण तु तज्ज्ञानम्—समानकालं यावद्द्रव्यभाविसजातीयगुणद्वयस्यान्यत्रानुपलब्धेस्तत्रापि तत्कल्पनाऽसंभवात्। तत्कल्पने वाऽकर्तृकमङ्कुरादिकार्यं किं न कल्प्येत? अस्तु वा तत्र यथोक्तं ज्ञानद्वयम् तथापि तयोर्ज्ञानयोरन्यतरेण स्वग्रहणविधुरेण न स्वाधारस्य, न सहचरस्य ज्ञानस्य, नाप्यन्यस्य गोचरस्य ग्रहणम्। तथाहि–यत् स्वग्रहणविधुरं तन्नान्यग्रहणम्, यथा घटादि, स्वग्रहणविधुरं च प्रकृतं ज्ञानम्, ततोऽनेन सहचरस्याग्रहणात् कथं तेनास्य ग्रहणम्? तेनापि ग्रहणविरहितेनाऽस्य वेदने तदेव वक्तव्यम् इति न कस्यचिद् ग्रहणम् इति न तत्समवेतत्वेन तद्बुद्धेर्गुणत्वम्, नापि तदाधारस्य द्रव्यत्वं सिद्धिमुपग-

१ उक्तमेतद् न्यायवार्तिके "तत्स्वाभाव्यात् सततप्रवृत्तिः इति चेत्" इति पक्षस्य चर्चावसरे पृ० ४६३ पं० ७।

च्छति। तस्मान्नित्यबुद्धिपूर्वकत्वेऽङ्कुरादीनां किमिति युगपदुत्पादो न भवेत् ईश्वरवत् तद्बुद्धेरपि सदा सन्निहितत्वात्? अनित्यबुद्धिसव्यपेक्षस्यापीश्वरस्याचेतनाधिष्ठायकत्वेन जगद्विधातृत्वे तस्य नित्यत्वेन तद्बुद्धेरपि सदा सन्निहितत्वम्, अविकलकारणयोः सर्वदा सन्निहितत्वात् युगपदङ्कुरादिकार्योत्पत्तिप्रसङ्गः। तस्मात् 'बुद्धिमत्त्वात्' इति विशेषणमकिञ्चित्करमेव; इति नाऽनैकान्तिकता हेतोः।

न चापि विरुद्धता, सपक्षे भावात्।} न चैवं भवति तस्माद् विपर्ययप्रयोगः-यद् यदा न भवति न तत् तदानीमविकलकारणम्, यथा कुशूलावस्थितबीजावस्थायामनुपजायमानोऽङ्कुरः, न भवति चैकपदार्थोत्पत्तिकाले सर्वं विश्वम् इति व्यापकानुपलब्धिः। न च सिद्धसाध्यता, ईश्वरस्य तज्ज्ञानादेर्वा कारणत्वे विकलकारणत्वानुपपत्तेः प्रसाधितत्वात्। तन्न नित्यज्ञान-प्रयत्न-चिकीर्षाणां तत्समवायस्य वा नित्यस्य कर्तृत्वं युक्तम्।

तस्माच्छरीरसंबन्धस्यैव कुम्भकारादौ कर्तृत्वव्यापकत्वेन प्रतीतेस्तदभावे कर्तृत्वस्याऽपि व्याप्यस्याभावप्रसङ्गः। तच्च क्वचित् करादिव्यापारेण कारकप्रयोक्तृत्वलक्षणम्—यथा कुम्भकारस्य दण्डादिकारणप्रयोक्तृत्वम्, अपरं वाग्व्यापारेण—यथा स्वामिनः कर्मकरादिप्रयोक्तृत्वस्वरूपम्, अन्यच्च प्रयत्नव्यापारेण-यथा जाग्रतः स्वशरीरावयवप्रेरकत्वस्वभावम्, किञ्चिच्च निद्रा-मद-प्रमादविशेषेण ताल्वादि-करादिप्रेरकत्वम्, सर्वथा शरीरसंबन्ध एव कर्तृत्वस्य व्यापकः; स चेदीश्वरान्निवर्तते स्वव्याप्यमपि कर्तृत्वमादाय निवर्तते इति न तस्य कर्तृत्वमभ्युपगन्तव्यमिति प्रसङ्गः। अथ तस्य जगत्कर्तृत्वमभ्युपगम्यते तदा शरीरसंबन्धः कर्तृत्वव्यापकोऽभ्युपगन्तव्य इति प्रसङ्गविपर्ययः। न च कारकशक्तिपरिज्ञानलक्षणं तस्य कर्तृत्वम्-येन प्रसङ्ग-विपर्ययव्यौर्व्यास्यसिद्धेरभावः स्यात्—कुम्भकारादौ मृद्दण्डादिकारकशक्तिपरिज्ञानेऽपि शरीरव्यापाराभावे घटादिकार्यकर्तृत्वादर्शनात् सुप्त-प्रमत्तादौ च ताल्वादिकारणपरिज्ञानाभावेऽपि तद्व्यापारे प्रयत्नलक्षणे सति तत्प्रेरणकार्यदर्शनात्। यद्प्यभिधानमात्रेण विषापहारादिकार्यकर्तृत्वम् तदपि न ज्ञानमात्रनिबन्धनम् किन्तु शरीरसंबन्धाऽविनाभूतविशिष्टात्मप्रयत्नहेतुकमेव।

अपि च, विशिष्टधर्माऽधर्माद्युपदेशविधायीश्वरः सर्वज्ञत्वेन मुमुक्षुभिरुपास्यः; अन्यथा अज्ञोपदेशानुष्ठाने तेषां विप्रलम्भशङ्कया तत्र प्रवृत्तिर्न स्यात्। तदुक्तम्—

"ज्ञानवान् मृग्यते कश्चित् तदुक्तप्रतिपत्तये।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः" ॥ [ ]

तस्य च सर्वज्ञत्वे सत्यप्यशरीरिणो वक्त्राभावादुपदेष्टृत्वाऽसंभव इति तत्कृतत्वेन तदुपदेशस्य प्रामाण्याऽसिद्धेर्न मुमुक्षूणां तत्र प्रवृत्तिः स्यादिति उपदेशकर्तृत्वे तस्य शरीरसंबन्धोऽप्यवश्यमभ्युपगन्तव्यः, व्याप्याभ्युपगमस्य व्यापकाभ्युपगमनान्तरीयकत्वात्। शरीरसंबन्धाभावे तु व्याप्यस्याप्युपदेशविधातृत्वस्याभाव इति प्रसङ्ग-विपर्ययौ। व्याप्यव्यापकभावप्रसाधकं च प्रमाणं ताल्वादिव्यापाराभावेऽप्युपदेशस्य सद्भावे तस्य तद्धेतुकत्वं न स्यादिति कार्यकारणभावप्रसाधकं प्रागेव प्रदर्शितमिति न पुनरुच्यते। तत् स्थितमेतत्-न शरीराभावे महेशस्य कर्तृत्वमिति। तेन शरीर-मनःसंबन्धाभावे प्रयत्न-बुद्ध्यादेरभावादीश्वरसत्तैवासिद्धा। अतः 'तदभावे कस्य विशेषः शरीरादियोगलक्षणः साध्यते?' इत्यादिपूर्वपक्षवचनं निःसारतया व्यवस्थितम्, प्रसङ्ग-विपर्ययव्यौर्निमित्तभूतव्याप्तिप्रदर्शनस्य विहितत्वात्। यद्प्युक्तम् 'ज्ञान-चिकीर्षा-प्रयत्नानां समवायोऽस्तीश्वरे, ते तु ज्ञानादयस्तत्र नित्याः' इति, तदप्ययुक्तत्वेन प्रतिपादितम्। यच्चोक्तम् 'तत्र शरीरसंबन्धस्य व्याप्यभावादसिद्धिः', तदप्यसत्; शरीरसंबन्धस्य कर्तृत्वव्यापकत्वप्रतिपादनात्।

यदप्युक्तम् 'नाप्यसर्वज्ञत्वं विशेषः कुलालादिषु दृष्टस्तत्र साध्यते' इत्यादि, तदप्ययुक्तम्; कुलालादेर्घटादिकार्यस्योपादानाद्यभिज्ञत्वे कर्मादिनिमित्तकारणाभिज्ञत्वप्राप्तेः सर्वज्ञत्वप्रसक्तिः इति व्यर्थमपरेश्वरसर्वज्ञपरिकल्पनम्, तन्निवर्तकातीन्द्रियाऽदृष्टपरिज्ञानवत् तस्यापि सकलपदार्थपरिज्ञानप्रसक्तेः। अथादृष्टापरिज्ञानेऽपि कुलालो मृत्पिण्डदण्डादिकतिपयकारकशक्तिपरिज्ञानादेव घटादिलक्षणं स्वकार्यं निर्वर्तयतीति, तर्हीश्वरोऽप्यतीन्द्रियाशेषपदार्थपरिज्ञानमन्तरेणापि कतिपयकारकशक्तिपरिज्ञानादेव स्वकार्यं निर्वर्तयिष्यति इति न सकलकार्यकर्तृत्वान्यथाऽनुपपत्त्या तस्यातीन्द्रि-

१ पृ० ५७ पं० १८। २ पृ० ९८ पं० ८। ३ पृ० ९८ पं० १३। ४ पृ० १२६ पं० २३। ५ पृ० ९८ पं० १५। ६ प्र० पृ० पं० १४। ७ पृ० ९८ पं० १६।

याद्यशेषपदार्थज्ञत्वलक्षणसर्वज्ञत्वसिद्धिः। यच्चोक्तम् 'क्षेत्रज्ञानां नियतार्थविषयग्रहणं सर्वविदधिष्ठितानाम्, यथा प्रतिनियतशब्दादिविषयग्राहकाणामनियतविषयसर्वविदधिष्ठितानां जीवच्छरीरे' इत्यादि, तदप्यसङ्गतम्; यतः शब्दादिविषयग्राहकाणामिति दृष्टान्तत्वेनोपन्यासो यदीन्द्रियाणां तदा तेषां करणत्वाद् वेदनलक्षणक्रियाऽनाश्रयत्वात् कथं नियतशब्दादिविषयग्रहणम्? अथ ग्रहणाधारत्वेन न तेषां नियतशब्दादिविषयग्रहणं किन्तु करणत्वेन; नन्वेवं क्षेत्रज्ञानामपि विषयग्रहणे करणत्वम् न कर्तृत्वमिति घटादि कुलालकर्तृकं तत्कारणशक्तिपरिज्ञानेन न सिद्धमिति कुतस्तद्दृष्टान्तात् क्षित्यादेर्ज्ञानाधारकर्तृकत्वं सिद्धिमुपगच्छति? यदि पुनर्ज्ञानसमवायेन चक्षुरादीनां नियतविषयाणां कर्तृत्वेऽप्यनियतविषयाऽपरक्षेत्रज्ञकर्त्रधिष्ठितत्वमङ्गीक्रियते तर्हि चेतनानामपि क्षेत्रज्ञानां नियतविषयाणां यथा परोऽनियतविषयश्चेतनोऽधिष्ठाता तथा तस्याऽपि प्रतिनियतविषयत्वकल्पनायामपरोऽनियतविषयस्तदधिष्ठाताऽभ्युपगन्तव्यः, तस्याप्यपर इत्यनवस्थाप्रसक्तिः। तथा, चेतनानामपि क्षेत्रज्ञानां यदा चेतनोऽधिष्ठाताऽभ्युपगम्यते तदा 'अचेतनं चेतनाधिष्ठितं प्रवर्तते, अचेतनत्वात्, वास्यादिवत्' इति प्रयोगेऽचेतनग्रहणं धर्मि-हेतुविशेषणं नोपादेयं स्यात्, व्यवच्छेद्याऽभावात्।

यत्तूक्तम् 'भवत्वनिष्टा यदि तत्प्रसाधकं प्रमाणं किञ्चिदस्ति, तावत एवाऽनुमानसिद्धत्वात्' इति, तदप्यसङ्गतम्; यतः प्रमाणमन्तरेण हेत्वाभासाद् यद्येकस्य सिद्धिरभ्युपगम्यते अपरस्यापि तत एव सा किं नाभ्युपगम्यते? प्रमाणसिद्धत्वं तु तावतोऽपि नास्ति, अनिष्टया तत्प्रसाधकस्य प्रमाणस्याप्रामाण्याऽऽसञ्जनाद्। यदप्युक्तम् 'आगमोऽप्यस्मिन् वस्तुनि विद्यते' इत्यादि, तदप्ययुक्तम्; आगमस्य तत्प्रणीतत्वेन प्रामाण्यम्, तत्प्रामाण्याच्च ततस्तत्सिद्धिरितीतरेतराश्रयप्रसक्तेः। नित्यस्य त्वागमस्य प्रामाण्यं वैशेषिकैर्नाभ्युपगतम्, ईश्वरकल्पनावैयर्थ्यप्रसङ्गात्। नाप्यन्येश्वरकृततदागमात् तत्सिद्धिः, तत्रापि तत्कृतत्वेन प्रामाण्ये इतरेतराश्रयदोषात्। अपरेश्वरप्रणीताऽपरागमकल्पनेऽपि तदेव वक्तव्यमित्यनिष्टाप्रसक्तिः। तदेवं स्वरूपेऽर्थे आगमस्य प्रामाण्येऽपि न तत ईश्वरसिद्धिः।

यत्तूक्तम् 'तस्य च सत्तामात्रेण स्वविषयग्रहणप्रवृत्तानां क्षेत्रज्ञानामधिष्ठायकता यथा स्फटिकादीनामुपधानाकारग्रहणप्रवृत्तानां सवितृप्रकाशः' तदयुक्तम्; सत्तामात्रेण सवितृप्रकाशस्यापि स्फटिकाद्यधिष्ठायकत्वाऽसंभवात्-तदसंभवश्चाकाशादेरपि सत्तामात्रस्य सद्भावात् तदधिष्ठायकता स्यात्-किन्तु सवितृप्रकाशस्य तद्विशिष्टावस्थाजनकत्वेन तदधिष्ठायकत्वम्, तच्चेत् क्षेत्रज्ञेष्वीश्वरस्य परिकल्प्यते तदा तेषां तत्कार्यताप्रसक्तिः; तथा च यथा क्षेत्रज्ञानामात्मत्वेऽविशिष्टेऽपि कार्यता तथेश्वरस्यात्मत्वाऽविशेषात् कार्यतेति तदधिष्ठायकोऽपरस्तत्कर्ताऽभ्युपगन्तव्यः, तत्राप्यपर इत्यनवस्था। अथ तस्य कार्यत्वे सत्यप्यनधिष्ठितस्यैव स्वकार्ये प्रवृत्तिस्तर्हि जगदुपादानादेरपि तदनधिष्ठितस्य प्रवृत्तिरिति व्यभिचारी अधिष्ठातृसाधकत्वेनोपन्यस्यमानस्तेनैव हेतुः।

अपि च, सत्तामात्रेण तस्य तदधिष्ठायकत्वे गगनस्येव न सर्वज्ञत्वम् इति सर्वज्ञत्वसाधकहेतोस्तद्विपर्ययसाधनाद् विरुद्धत्वम्। न च सर्वविषयज्ञानसमवायात् तत्र तस्यैव सर्वज्ञत्वं नाऽऽकाशादेरिति वक्तुं युक्तम्, समवायस्य निषिद्धत्वात्। सत्त्वेऽपि नित्यव्यापकत्वेनाकाशादावपि भावप्रसङ्गात्। न च समवायाऽविशेषेऽपि समवायिनोर्विशेष इति वक्तुं शक्यम्, तद्विशेषस्यैवासिद्धत्वात्। सिद्धत्वेऽपि समवायपरिकल्पनावैयर्थ्यप्रसङ्गादिति प्रतिपादयिष्यमाणत्वात्। न च सत्तामात्रेण तस्य तदधिष्ठायकत्वे ज्ञानमात्रमप्युपयोगि, आस्तां सकलपदार्थसार्थकारकपरिज्ञानम्। यद्प्युक्तम् 'ज्ञानस्य स्वविषयसदर्थप्रकाशत्वं नाम स्वभावः, तस्याऽन्यथाभावः कुतश्चिद्दोषसद्भावात्' तत् सत्यमेव। यच्चोक्तम् 'यत् पुनश्चक्षुराद्यनाश्रितं न च रागादिमलाऽऽवृतं तस्य विषयप्रकाशनस्वभावस्य' इत्यादि, तदप्यसङ्गतम्; यतो न चक्षुराद्यनाश्रितं ज्ञानं परस्य सिद्धम्, तत्सिद्धौ चक्षुराद्यनाश्रितस्य ज्ञानस्येव सुखस्यापि सिद्धेरानन्दरूपता कथं मुक्तानां न संगच्छते-येन 'सुखादिगुणरहितमात्मनः स्वरूपं मुक्तिः' इत्यभ्युपगमः शोभेत? न च रागादेरावरणस्याभावो महेशे सिद्धः-येन तज्ज्ञानमनावृतमशेषपदार्थविषयं तत्र सिद्धिमुपगच्छेत्, तत्स्वरूपस्यैवासिद्धत्वात्, तत्र रागाद्यभावप्रतिपादकस्याव्यभिचरितस्य हेतोस्त्वदभ्युपगमविचारणया दूरापास्तत्वाच्च।

१ पृ० ९८ पं० २२। २ पृ० १०१ पं० १२-२५। ३ पृ० ९८ पं० २८। ४ पृ० ९८ पं० ३०। ५ पृ० ९९ पं० १५। ६ पृ० ९९ पं० १९। ७ पृ० ९९ पं० २०।

यत्तूक्तम् 'विपर्यासकारणा रागादयः, विपर्यासश्चाधर्मनिमित्तः, न च भगवत्यधर्मः' इति, तदप्यसारम्; अधर्मवद् धर्मस्यापि तद्धेतोश्च सम्यग्ज्ञानादेस्तत्रासंभवस्य प्रतिपादितत्वात्। यच्चोक्तम् 'रागादय इष्टानिष्टसाधनेषु विषयेषूपजायमाना दृष्टाः, न च भगवतः कश्चिदिष्टानिष्टसाधनो विषयः, अवाप्तकामत्वात्' इति, तदप्यसारम्; यतो यदि इष्टानिष्टसाधनो न तस्य कश्चिद्विषयः कथं तर्हि असाविष्टाऽनिष्टोपादान-परिवर्जनार्थं प्रवर्तते बुद्धिपूर्विकायाः प्रवृत्तेर्हेयोपादेयजिहासोपादित्सापूर्वकत्वेन व्याप्तत्वात्? तदभावेऽपि प्रवृत्तावुन्मत्तकप्रवृत्तिवद् न बुद्धिपूर्विकेश्वरप्रवृत्तिः स्यात् हेयोपादेयजिहासोपादित्से अप्यनाप्तकामत्वेन व्याप्ते, अवाप्तकामस्य हेयोपादेयजिहासोपादित्साऽनुपपत्तेः। अनाप्तकामत्वमप्यनीश्वरत्वेन व्याप्तम्, ईश्वरस्यानाप्तकामत्वायोगाद् इति यत्र बुद्धिपूर्विका प्रवृत्तिरिष्यते तत्र हेयोपादेयजिहासोपादित्से अवश्यमङ्गीकर्तव्ये, यत्र च ते तत्रानाप्तकामत्वम्, यत्र च तत् तत्रानीश्वरत्वम् इति प्रसङ्गसाधनम्। ईश्वरत्वे चावाप्तकामत्वम्, अवाप्तकामत्वाच्च न हेयोपादेयविषये तद्धानोपादानेच्छा, तदभावे न बुद्धिपूर्विका प्रवृत्तिरिति प्रसङ्गविपर्ययः। अत एव स्वतन्त्रसाधनपक्षे यद् आश्रयासिद्धत्वादिहेतुदोषोद्भावनम् तदसंगतम्, व्याप्तिप्रसिद्धिमात्रस्यैवात्रोपयोगात्; सा च प्रतिपादिता। 'या तु प्रवृत्तिः शरीरादिसर्गे सा क्रीडार्था, अवाप्तकामानामेव च क्रीडा भवति' इति यदुक्तम् तदसंगतम्, 'रतिमविन्दतामेव क्रीडा भवति, न च रत्यर्थी भगवान्, दुःखाभावात्' इति वार्तिककृतैव प्रतिपादितत्वात्। यच्चोक्तम् 'न हि दुःखिताः क्रीडासु प्रवर्तन्ते' इति, तत् प्रक्रमानपेक्षं वचनम्; दुःखाभावेऽपि क्रीडावतां रागाद्यासक्तिनिमित्तेष्टसाधनविषयव्यतिरेकेण तस्यासंभवात्।

यच्च 'कारुण्यात् तस्य तत्र प्रवृत्तिः' इत्यादि, तदप्यनालोचिताभिधानम्; नहि करुणावतां यातनाशरीरोत्पादकत्वेन प्राणिगणदुःखोत्पादकत्वं युक्तम्। न च तथाभूतकर्मसव्यपेक्षस्तथा तेषां दुःखोत्पादकोऽसौ निमित्तकारणत्वात् तस्येति वक्तुं युक्तम्, तत्कर्मणामीश्वरानायत्तत्वे कार्यत्वे च तेनैव कार्यत्वलक्षणस्य हेतोर्व्यभिचारित्वप्रसङ्गात्। तत्कृतत्वे वा कर्मणोऽभ्युपगम्यमाने प्रथमं कर्म प्राणिनां विधाय पुनस्तदुपभोगद्वारेण तस्यैव क्षयं विदधतो महेशस्याऽप्रेक्षाकारिताप्रसक्तिः, न हि प्रेक्षापूर्वकारिणो गोपालादयोऽपि प्रयोजनशून्यं विधाय वस्तु ध्वंसयन्ति। तन्न करुणाप्रवृत्तस्य कर्मसव्यपेक्षस्यापि प्राणिदुःखोत्पादकत्वं युक्तम्। किञ्च, प्राणिकर्मसव्यपेक्षो यद्यसौ प्राणिनां दुःखोत्पादक इति न कृपालुत्वव्याघातस्तर्हि कर्मपरतन्त्रस्य प्राणिशरीरोत्पादकत्वे तस्याभ्युपगम्यमाने वरं तत्फलोपभोक्तृसत्त्वस्य तत्सव्यपेक्षस्य तदुत्पादकत्वमभ्युपगन्तव्यम्, एवमदृष्टेश्वरपरिकल्पना परिहृता भवति। 'यथा प्रभुः सेवाभेदानुरोधात् फलप्रदो नाऽप्रभुस्तथा महेश्वरोऽपि कर्मापेक्षफलप्रदो नाप्रभुः' इत्यप्ययुक्तम्; यतो यथा राज्ञः सेवाऽऽयत्तफलप्रदस्य रागादियोगः नैर्घृण्यम् सेवाऽऽयत्तता च प्रतीता तथेशस्याप्येतत् सर्वमभ्युपगमनीयम्; अन्यथाभूतस्यान्यपरिहारेण क्वचिदेव सेवके सुखादिप्रदत्वानुपपत्तेः। तदेवं कर्मपरतन्त्रत्वे तस्यानीशत्वम्, करुणाप्रेरितस्य कर्तृत्वे "सृजेच्च शुभमेव सः" इति वार्त्तिककारीयदूषणस्य व्यवस्थितत्वम्। यच्च 'नारक-तिर्यगादिसर्गोऽप्यकृतप्रायश्चित्तानां तत्तत्पदुःखानुभवे पुनर्विशिष्टस्थानावाप्तौ अभ्युदयहेतुरिति सिद्धं दुःखिप्राणिसृष्टावपि करुणया प्रवर्तनमीशस्य' इति, तदपि प्रतिविहितमेव; यतः कर्म प्राणिनां दुःखप्रदं विधाय तत्फलोपभोगविधानद्वारेण क्षयनिमित्तं प्राणिनामभ्युदयं विदधतस्तस्याऽशुचिस्थानपतितगृहीतप्रक्षालितमोदकत्यागविधायिनो नसमानबुद्धित्वप्रसक्तिः। अपि च, यदि प्राणिकर्मपरवशास्तेषां दुःखादिकं तत्क्षयनिमित्तप्रायश्चित्तकल्पमुपजनयतीत्यभ्युपगमस्तदा तत्कर्मकार्यत्वं तस्य प्रसक्तम्-तत्कृतोपकाराभावे तदपेक्षाया अयोगात्; उपकारस्य च तत्कृतस्य तद्भेदे तेन संबन्धायोगात्, अभिन्नस्य तत्करणे तस्यैव करणमिति कथं न तत्कार्यत्वम्?

अथ यद् यदा यत्र कर्मादिकं सहकारिकारणमासादयति तेन सह संभूय तत् तदा तत्र सुखादिकं कार्यं जनयति, एककार्यकारित्वमेव सहकारित्वमिति न कार्यत्वलक्षणस्तस्य दोषः; ननु कर्मादिसहकारिसव्यपेक्षः कार्यजननस्वभावस्तस्य कर्मादिसहकारिसन्निधानाद् यदि प्रागप्यस्ति तदा—

१ पृ० ९२ पं० २३। २ पृ० ९९ पं० २६। ३ प्र० पृ० पं० ७। ४ पृ० ९२ पं० २८। ५ पृ० ९९ पं० ३०। ६ पृ० ९९ पं० ३१। ७ पृ० ९९ पं० ३२। ८-कर्मणं ई-(ण ई-) वा०, बा० विना। ९ पृ० ९९ पं० ३८। १० पृ० १०० पं० १। ११ पृ० १०० पं० ८। १२ प्र० पृ० पं० २२।

सहकारिसन्निधानेऽपि स्वरूपेणैवाऽसौ कार्यं निर्वर्तयति, पररूपेण जनकत्वे सर्वस्य स्वरूपेणाजनकत्वात् कार्याऽनुत्पादप्रसङ्गः, तस्य चाविकलस्य तज्जननस्वभावस्य भावादुत्तरकालभाविसमस्तकार्योत्पत्तिस्तदैव स्यात्। तथाहि—यद् यदा यज्जननसमर्थं तत् तदा तद् जनयत्येव, यथाऽन्त्यावस्थाप्राप्तं बीजमङ्कुरम्, अजनने वा तदा तस्य तद् जननस्वभावमेव न स्यात्, तज्जननस्वभावश्च कर्मादिसामग्र्यसन्निधानेऽप्येकस्वभावतयाऽभ्युपगम्यमानो महेश इति स्वभावहेतुः। अथ कर्मादिसामग्र्यभावे तत्स्वभावोऽप्यसौ विवक्षितकार्यं न जनयति, न तर्हि तज्जनकस्वभावः-यो हि यदा यन्न जनयति स तज्जनकस्वभावो न भवति; यथा शालिबीजं यवाङ्कुरस्य, अतज्जनकस्यापि तत्स्वभावत्वेऽतिप्रसङ्गः, न जनयति च कर्मादिसामग्र्यभावे विवक्षितं कार्यमीश इति व्यापकाऽनुपलब्धिः। अथ कर्मादिसामग्र्यभावे स स्वभावस्तदपेक्षकार्यजनकत्वलक्षणो नास्ति तर्हि स्वभावभेदात् कथं न तस्य भेदः अपरस्य तन्निबन्धनस्याभावात्? तथा च क्रमवर्त्यनेकमङ्कुरादिकार्यं नाक्रमैकेश्वरविहितम् इति नैकत्वं तस्य सिद्धिमासादयति। तन्न सर्वज्ञत्वाऽशरीरित्वैकत्वादिधर्मयोगस्तस्य सिद्धिमुपढौकते। 'नापि कृत्रिमज्ञानसंबन्धित्वं तज्ज्ञानस्य प्रत्यर्थनियमाभावात्' इत्यादि यदुक्तम्, तदपि निरस्तम्; नित्यसर्वपदार्थविषयज्ञानसंबन्धित्वस्य तत्र प्रतिषिद्धत्वात्।

यच्च 'यथा स्थपत्यादीनां महाप्रासादादिकरणे एकाभिप्रायनियमितानामेकमत्यं तद्वदत्रापि यदि क्षित्याद्यनेककार्यकरणे बहूनां नियामकः कश्चिदेकोऽस्ति, स एवेश्वरः' इत्युक्तम्, तदप्यसङ्गतम्; यतो न ह्ययं नियमः-एकेनैव सर्वं कार्यं निर्वर्तनीयम्, एकनियमितैर्वा बहुभिरिति; अनेकधा कार्यकर्तृत्वदर्शनात्। तथाहि-क्वचिदेक एवैककार्यस्य विधाता उपलभ्यते यथा कुविन्दः कश्चिदेकस्य पटस्य, क्वचिदेक एव बहूनां कार्याणाम् यथा घट-शरावोदञ्चनानामेकः कुलालः, क्वचिदनेकोऽप्यनेकस्य यथा घट-पट-शकटादीनां कुलालादिः, क्वचिदनेकोऽप्येकस्य यथा शिबिकोद्वहनादेरनेकः पुरुषसङ्घातः। न च प्रासादादिलक्षणेऽप्यनेकस्थपत्यादिनिर्वर्त्येऽवश्यंतयैकसूत्रधारनियमितानां तेषां तत्र व्यापार उपलब्धः, प्रतिनियताभिप्रायाणामप्येकसूत्रधाराऽनियमितानां तत्करणाऽविरोधात् इति नैकः कर्ता क्षित्यादीनां सिद्धिमासादयति। अत एव न तन्निबन्धना सर्वज्ञत्वसिद्धिरपि तस्य युक्ता। तदेवं नित्यत्वादिविशेषसाकल्यसाधकानुमानाऽसंभवात् तद्विपर्ययसाधकस्य च प्रसङ्गसाधनस्य तत्र भावात् कथं न विशेषविरुद्धावकाशः? अथ शरीरादिमद्बुद्धिमत्कारणत्वव्याप्तं यदि क्षित्यादौ कार्यत्वमुपलभ्येत तदा ततस्तत्र तत् सिद्धिमासादयत् तथाभूतमेव सिध्येदिति भवेत् कार्यत्वादेर्विरुद्धत्वम्, साध्यविपर्ययसाधनात्; न च तथाभूतं तत् तत्र विद्यते इति कथं विरुद्धता? नः; परप्रसिद्धपक्षधर्मत्वम् विपर्ययव्याप्तिं वाऽऽश्रित्य विरुद्धताभिधानात्। परमार्थतस्तु कार्यत्वविशेषस्य क्षित्यादावसिद्धत्वम् तत्सामान्यस्य त्वनैकान्तिकत्वम् इति प्रतिपादितम्। सर्वेषु चेश्वरसाधनायोपन्यस्तेष्वनुमानेष्वसिद्धत्वादिदोषः समानः इति कार्यत्वदूषणेनैव तान्यपि दूषितानि इति न प्रत्युच्चार्य दूष्यन्ते। महेश्वरस्य च नित्यत्वं तद्वादिभिरभ्युपगम्यते; न चाक्षणिकस्य सत्त्वं संभवति इति प्रतिपादयिष्यामः।

यच्च 'पृथिव्यादिमहाभूतानि स्वासु क्रियासु बुद्धिमत्कारणाधिष्ठितानि प्रवर्तन्ते, अनित्यत्वात्, वास्यादिवत्' इति, तत्र कुलालादिबुद्धावप्यनित्यत्वलक्षणस्य हेतोः सद्भावात् तत्राप्यपरबुद्धिमत्कारणाधिष्ठितत्वप्रसक्तिः, तथाऽभ्युपगमे महेशबुद्धेरप्यनित्यत्वस्य प्रसाधनात् तस्याप्यपरबुद्धिमदधिष्ठितत्वम्, तद्बुद्धावप्येवम् इत्यनवस्था। अथ बुद्धेरनित्यत्वे सत्यपि न बुद्धिमदधिष्ठितत्वं तदा व्यभिचारी हेतुः; अपरं चात्र प्रतिविहितत्वान्नाशङ्क्यते। यच्च कार्यत्वहेतोर्दूषणमसिद्धत्वादि तदत्रापि समानम्। तथाहि-यादृशमनित्यत्वं बुद्धिमदधिष्ठितं (त) वास्यादौ सिद्धं तादृशं तन्वादिष्वसिद्धम्। अनित्यत्वमात्रस्य प्रतिबन्धासिद्धेर्व्यभिचारः। प्रतिबन्धाभ्युपगमे सतीष्टविपरीतसाधनाद् विरुद्धत्वम्। साधर्म्यदृष्टान्तस्य साध्यविकलता, नित्यैकबुद्धिमदधिष्ठितत्वेन साध्यधर्मेणान्वयासिद्धेः। सामान्येन साध्ये सिद्धसाध्यता, विशेषेण व्यभिचारः, घटादिष्वन्यथादर्शनादिति। एवं सर्वेषु प्रकृतसाध्यसाधनायोपन्यस्तेषु हेतुषु योज्यम्।

१ पृ० १०० पं० ११। २ पृ० १२६ पं० २३। ३ पृ० १०० पं० २१। ४-सिद्धं प-भां०। ५-सिं चाऽऽभि-भां०। ६ पृ० ११५ पं० ११-३०। ७ पृ० १०० पं० ३१।

यच्च 'स्थित्वा प्रवृत्तेः' इति साधनमुक्तम्, तत्रान्यदपि दूषणं वाच्यम्–सर्वभावानामुदयसमनन्तराऽपवर्गितया क्षणमात्रमपि न स्थितिरस्ति इति कुतः स्थित्वा प्रवृत्तिः? तस्मात् प्रतिवाद्यसिद्धो हेतुः अनैकान्तिकश्चेश्वरेणैव; यतः सोऽपि क्रमवत्सु कार्येषु स्थित्वा प्रवर्तते अथ च नासौ चेतनावताऽधिष्ठितः अनवस्थाप्रसङ्गात्। अथ 'अचेतनत्वे सति' इति सविशेषणो हेतुरुपादीयते यथा प्रशस्तमतिनोपन्यस्तस्तथापि संदिग्धविपक्षव्यावृत्तिकतयाऽनैकान्तिकत्वमनिवार्यम्–यदेव हि विशेषणं विपक्षाद्धेतुं निवर्तयति तदेव न्याय्यम्, यत् पुनर्विपक्षे संदेहं न व्यावर्तयति तदुपादानमप्यसत्कल्पम्, पूर्वोक्तश्चासिद्धतादोषः सविशेषणत्वेऽपि तदवस्थ एव। यच्चोक्तम् 'सर्गादौ व्यवहारश्च' इत्यादि, तत्रापि 'उत्तरकालं प्रबुद्धानाम्' इत्येतद् विशेषणमसिद्धम्। तथाहि–नास्मन्मते प्रलयकाले प्रलुप्तज्ञान–स्मृतयो वितनु–करणाः पुरुषाः संतिष्ठन्ते किन्त्वाभास्वरादिषु स्पष्टज्ञानातिशययोगिषु देवनिकायेषूत्पद्यन्ते; ये तु प्रतिनियतनिरयादिविपाकसंवर्तनीयकर्माणस्ते लोकधात्वन्तरेषूत्पद्यन्ते इति मतम्। विवर्तकालेऽपि तत एव आभास्वरादेश्च्युत्वा इहालुप्तज्ञान–स्मृतय एव संभवन्ति तस्मात् 'उत्तरकालं प्रबुद्धानाम्' इति विशेषणमसिद्धम्। अनैकान्तिकश्च हेतुः संदिग्धविपक्षव्यावृत्तिकत्वात्।

किञ्च, अन्योपदेशपूर्वकत्वमात्रे साध्ये सिद्धसाध्यता, अनादेर्व्यवहारस्य सर्वेषामेवान्योपदेशपूर्वकत्वस्येष्टत्वात्। अथेश्वरलक्षणपुरुषोपदेशपूर्वकत्वं साध्यते तदाऽनैकान्तिकता, अन्यथाऽपि व्यवहारसंभवात्, दृष्टान्तस्य च साध्यविकलता। एतच्चान्यहेतुसामान्यं दूषणं पूर्वमुक्तम्। विरुद्धश्च हेतुः अभ्युपेतबाधा च प्रतिज्ञायाः, निर्मुखस्योपदेष्टृत्वासंभवात्–यदि ईश्वरोपदेशपूर्वकत्वं व्यवहारस्य संभवेत् तदा स्यादविरुद्धता हेतोः यावताऽसौ विगतमुखत्वादुपदेष्टा न युक्तः, तच्च विमुखत्वं वितनुत्वेन, तदपि धर्माधर्मविरहात्, तथा च उद्द्योतकरेणोक्तम्–"यथा बुद्धिमत्तायामीश्वरस्य प्रमाणसंभवः, नैवं धर्मादिनित्यत्वे प्रमाणमस्ति" [न्यायवा० पृ० ४६४ पं० १४] इति। तस्मादीश्वरस्योपदेष्टृत्वासंभवात् तदुपदेशपूर्वकत्वं व्यवहारस्य न सिध्यति किन्त्वीश्वरव्यतिरिक्तान्यपुरुषोपदेशपूर्वकत्वम्; अत इष्टविघातकारित्वाद् विरुद्धो हेतुः। अथेश्वरस्योपदेष्टृत्वमङ्गीक्रियते तदा विमुखत्वमभ्युपेतं हीयत इत्यभ्युपेतबाधः। एवमन्येष्वपि सर्वज्ञत्वादितद्विशेषसाधकेषु हेतुष्वसिद्धत्वाऽनैकान्तिकत्व–विरुद्धत्वादिदोषजालं स्वमत्याऽभ्यूह्यं दिङ्मात्रदर्शनपरत्वात् प्रयासस्य। अत एव "सप्त भुवनान्येकबुद्धिनिर्मितानि, एकवस्त्वन्तर्गतत्वात्, एकावसथान्तर्गतानेकापवरकवत्; यथैकावसथान्तर्गतानामपवरकाणां सूत्रधारैकबुद्धिनिर्मितत्वं दृष्टं तथैकस्मिन्नेव भुवनेऽन्तर्गतानि सप्त भुवनानि, तस्मात् तेषामप्येकबुद्धिनिर्मितत्वं निश्चीयते; यद्बुद्धिनिर्मितानि चैतानि स भगवान् महेश्वरः सकलभुवनैकसूत्रधारः" [ ] इत्यादिकाः प्रयोगाः प्रशस्तमतिप्रभृतिभिरुपन्यस्तास्तेष्वपि हेतुरसिद्धः, न ह्येकं भुवनम् आवसथादिर्वाऽस्ति, व्यवहारलाघवार्थं बहुष्वियं संज्ञा कृता, अत एव दृष्टान्तोऽपि साधनविकलः; एकसौधाद्यन्तर्गतानामपवरकादीनामनेकसूत्रधारघटितत्वदर्शनाच्चानैकान्तिको हेतुः।

यच्च "एकाधिष्ठाना ब्रह्मादयः पिशाचान्ताः, परस्परातिशयवृत्तित्वात्; इह येषां परस्परातिशयवृत्तित्वं तेषामेकायत्तता दृष्टा, यथेह लोके गृह–ग्राम–नगर–देशाऽधिपतीनामेकस्मिन् सार्वभौमनरपतौ, तथा च भुजग–रक्षो–यक्षप्रभृतीनां परस्परातिशयवृत्तित्वम्; तेन मन्यामहे तेषामप्येकस्मिन्नीश्वरे पारतन्त्र्यम्" इति, तदेतद् यदि 'ईश्वराख्येनाधिष्ठायकेनैकाधिष्ठानाः' इत्ययमर्थः साधयितुमिष्टस्तदाऽनैकान्तिकता हेतोः, विपर्यये बाधकप्रमाणाभावात् प्रतिबन्धाऽसिद्धेः। दृष्टान्तस्य च साध्यविकलता। अथाधिष्ठायकमात्रेण साधिष्ठाना इति साध्यते तदा सिद्धसाध्यता, यत इष्यत एव सुगतसुतैर्भगवता संबुद्धेन सकललोकचूडामणिना सर्वमेव जगत् करुणावशादधिष्ठितम्, यत्प्रभावाद्याप्यभ्युदय–निःश्रेयससंपदमासादयन्ति साधुजनसार्थाः। सर्वेष्वपि च सर्वज्ञसाधनेषु परोपन्यस्तेषु यदि सामान्येन 'कश्चित् सर्वज्ञः' इति साध्यमभिप्रेतं तदा नाऽस्मान् प्रति भवतामिदं साधनं राजते सिद्धसाध्यतादोषात् किन्तु ये सर्वज्ञाऽपवादिनो जैमिनीयाश्चार्वाका वा तेष्वेव

१ पृ० १०१ पं० १७। २ पृ० १०१ पं० २०। ३–मतेन प्र–भां०। ४ पृ० ११५ पं० ३५। ५–था भु–बा०, बा०।

शोभते। अथेश्वराख्यः सर्वज्ञः साध्येत तदोक्तप्रकारेण प्रतिबन्धासिद्धेर्हेतूनामनैकान्तिकता, दृष्टान्तस्य च साध्यविकलतेति। शेषस्तु पूर्वपक्षग्रन्थो निःसारतयोपेक्षितः। अत ईश्वरसाधकस्य तन्नित्यत्वादिधर्मसाधकस्य च प्रमाणस्याभावात् "क्लेश-कर्म-विपाकाऽऽशयैरपरामृष्टः पुरुषविशेष ईश्वरः" [योगद० पा० १, सू० २४] इत्यादि सर्वमयुक्ततया स्थितम्। अतो भवहेतुरागादिजयात् शासनप्रणेतारो जिनाः सिद्धाः। अतः सुव्यवस्थितमेतद् भवजिनानां शासनमिति।

ननु यदि तेषां भवनिबन्धनरागादिजेतृत्वं तदा शासनप्रणेतृत्वानुपपत्तिः, तज्जयानन्तरमेवापवर्गप्राप्तेः शरीराभावे वक्तृत्वासंभवात्। अथ रागादिक्षयानन्तरं नापवर्गप्राप्तिस्तर्हि रागादिजयो न भवक्षयलक्षणापवर्गप्राप्तिकारणम्; न हि यस्मिन् सत्यपि यन्न भवति तत् तदविकलकारणं व्यवस्थापयितुं शक्यम्, यवबीजमिव शाल्यङ्कुरस्य। अथ निरवशेषरागाद्यजयाद् अपवर्गप्राप्तेः प्रागेव तत्प्रणेतृत्वाददोषः; नन्वेवं तच्छासनस्य रागलेशाऽऽश्लिष्टपुरुषप्रणीतत्वेन नैकान्तिकं प्रामाण्यं, कपिलादिपुरुषप्रणीतस्येव इत्याशङ्क्याह सूरिः–'ठाणमणोवमसुहमुवगयाणं' इति। अस्याभिप्रायः–यद्यपि सर्वज्ञतामतिबन्धिघातिकर्मचतुष्टयक्षयाविर्भूतकेवलज्ञानसम्पदो जिनास्तथापि भवोपग्राहिशरीरनिबन्धनस्य कर्मणः सद्भावादल्पस्थितिकस्य न शरीराद्यभावात् शासनप्रणेतृत्वानुपपत्तिः, नापि रागादिलेशसद्भावात् तत्प्रणीतागमस्याऽप्रामाण्यम्, विपर्यासहेतोर्घातिकर्मणोऽत्यन्तक्षयात्। न च कर्मक्षयादपरस्याप्रवृत्तिनिमित्तत्वम्, भवोपग्राहिणोऽद्यापि सामस्त्येनाक्षयात् तत्क्षये चापवर्गस्यानन्तरभावित्वात् कर्मक्षयस्यैवापवर्गप्राप्तावविकलकारणत्वादिति। अवयवार्थस्तु–तिष्ठन्ति सकलकर्मक्षयावाप्तानन्तज्ञानसुखरूपाध्यासिताः शुद्धात्मानोऽस्मिन्निति स्थानं लोकाग्रलक्षणं विशिष्टक्षेत्रम्, न विद्यते उपमा स्वाभाविकात्यन्तिकत्वेन सकलव्याबाधारहितत्वेन च सर्वसुखातिशायित्वाद् यस्य तत् सुखमानन्दरूपं यस्मिंस्तत् तथा, तत् 'उप' इति कालसामीप्येन गतानां प्राप्तानाम्, यद्वा 'उप' इत्युपसर्गः प्रकर्षेऽप्युपलभ्यते, यथा "उपोढरागेण" [ ] इति। तेन स्थानमनुपमसुखं प्रकर्षेण गतानामिति। "परार्थे प्रयुज्यमानाः शब्दा वतिमन्तरेणापि तमर्थं गमयन्ति" [ ] इति न्यायादनुभूयमानतीर्थकृन्नामकर्मलेशसद्भावेऽपि तद् गता इव गता इत्युक्तास्तेन शासनप्रणेतृत्वं तस्यामवस्थायां तेषामुपपन्नमेव॥

यद्वा "मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत् तापवर्जिताः" [ ] इत्येतस्य दुर्नयस्य निरासार्थमाह सूरिः– 'ठाणमणोवमसुहमुवगयाणं' अत्र च स्थानमनुपमसुखम्–प्रकर्षेण अपुनरावृत्त्या गतानाम्–उपगतानामिति व्याख्येयम्।

अथवा "बुद्ध्यादीनां नवानां विशेषगुणानामात्यन्तिकः क्षय आत्मनो मुक्तिः" [ ] इति मतव्यवच्छेदार्थमाचार्येण–'ठाणमणोवमसुहमुवगयाणं' इति सूत्रमुपन्यस्तम्। अस्य चायमर्थः–स्थितिः स्थानं स्वरूपप्राप्तिस्तद् अनुपमसुखम् 'उप' इति सकलकर्मक्षयानन्तरमव्यवधानेन गतानां प्राप्तानाम्–शैलेश्यवस्थाचरमसमयोपादेयभूतमनन्तसुखस्वभावमात्मनः कथञ्चिदनन्यभूतं स्वरूपं प्राप्तानामिति यावत्।

[आत्मपरिमाणवादः]

[पूर्वपक्षः–आत्मनो विभुत्वस्थापनम्]

अत्राहुर्वैशेषिकाः—सर्वमेतदनुपपन्नम्, आत्मनो विभुत्वेन विशिष्टस्थानप्राप्तिनिमित्तगत्यसंभवात्, कर्मक्षये च शरीराद्यभावे मुक्तात्मनां सुखस्य तद्धेतुनिमित्तासमवायिकारणाभावेनोत्पत्त्यसंभवात्, नित्यस्य चानन्दस्यावैषयिकस्यानुपलम्भेनासत्त्वात्।

न चात्मनो विभुत्वमसिद्धम्, अनुमानात् तत्सिद्धेः। तथाहि–बुद्ध्यधिकरणं द्रव्यं विभु, नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वात्; यद् यद् नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानं तत् तद् विभु, यथा आकाशम्, तथा च बुद्ध्यधिकरणं द्रव्यम्, तस्माद् विभु। { न च

१–तारो जिना भवन्ति जिनाः बा०, बा० विना। २–दल्पविधि(ल्पावधि)कस्य न बा०, बा०।

बुद्धेर्गुणत्वासिद्धेर्हेतुविशेषणासिद्धया हेतोरसिद्धिरभिधातुं शक्या, बुद्धिगुणत्वस्यानुमानात् सिद्धेः। तथाहि-गुणो बुद्धिः, प्रतिषिध्यमानद्रव्य-कर्मभावे सति सत्तासंबन्धित्वात्; यो यः प्रतिषिध्यमान-द्रव्य-कर्मभावे सति सत्तासंबन्धी स स गुणः यथा रूपादिः, तथा च बुद्धिः, तस्माद् गुणः। न च प्रतिषिध्यमानद्रव्य-कर्मत्वमसिद्धं बुद्धेः। तथाहि-बुद्धिर्द्रव्यं न भवति, एकद्रव्यत्वात्, यद् यद् एकद्रव्यं तत् तद् द्रव्यं न भवति यथा रूपादि, तथा च बुद्धिः, तस्माद् न द्रव्यम्। न चायमसिद्धो हेतुः। तथाहि-एकद्रव्या बुद्धिः, सामान्य-विशेषवत्त्वे सत्येकेन्द्रियप्रत्यक्षत्वात्, यद् यत् सामान्य-विशेषवत्त्वे सत्येकेन्द्रियप्रत्यक्षं तत् तद् एकद्रव्यम्, यथा रूपादि, तथा बुद्धिः, तस्मादेकद्रव्या। न च 'एकेन्द्रियप्रत्यक्षत्वात्' इत्युच्यमाने आत्मना व्यभिचारः, तस्यैकेन्द्रियप्रत्यक्षत्वे विवादात्। नापि वायुना, तत्रापि तत्प्रत्यक्षत्वस्य विवादास्पदत्वात्। तथापि रूपत्वादिना व्यभिचारः, तन्निवृत्त्यर्थं 'सामान्य-विशेषवत्त्वे सति' इति विशेषणोपादानम्। न च रूपस्यान्तःकरणग्राह्यतया द्वीन्द्रियग्राह्यता, चक्षुरिन्द्रियस्यैव 'चक्षुषा रूपं पश्यामि' इति व्यपदेशहेतोस्तत्र करणत्वसिद्धिः, मनसस्त्वान्तरार्थप्रतिपत्तावेवाऽसाधारणकरणत्वात्। अथवा एकद्रव्या बुद्धिः, सामान्य-विशेषवत्त्वे अगुणवत्त्वे च सत्यचाक्षुषप्रत्यक्षत्वात्, शब्दवत्। तथा, न कर्म बुद्धिः, संयोग-विभागाकारणत्वात्, यद् यत् संयोगविभागाकारणं तत् तत् कर्म न भवति, यथा रूपादि, तथा च बुद्धिः, तस्माद् न कर्म। तस्मात् सिद्धः प्रतिषिध्यमानद्रव्य-कर्मभावो बुद्धेः। न च सत्तासंबन्धित्वमसिद्धं बुद्धेः, तत्र 'सत्' इति प्रत्ययोत्पादात्। न च सत्ता भिन्ना न सिद्धा, तद्भेदप्रतिपादकप्रमाणसद्भावात्। तथाहि-यस्मिन् भिद्यमानेऽपि यन्न भिद्यते तत् ततोऽर्थान्तरम्, यथा भिद्यमाने वस्त्रादावभिद्यमानो देहः, भिद्यमाने च बुद्ध्यादौ न भिद्यते सत्ता, द्रव्यादौ सर्वत्र 'सत् सत्' इति प्रत्ययाभिधानदर्शनात्; अन्यथा तदयोगात्। सा च बुद्धिसंबद्धा, ततस्तत्र विशिष्टप्रत्ययप्रप्रतीतेः। तथाहि—यतो यत्र विशिष्टप्रत्ययः स तेन संबद्धः, यथा दण्डो देवदत्तेन, भवति च बुद्ध्यादौ सत्तातस्तत्प्रत्ययः, ततस्तया संबद्धेति। 'प्रतिषिध्यमानद्रव्य-कर्मत्वात्' इत्युच्यमाने सामान्यादिना व्यभिचारस्तन्निवृत्त्यर्थं 'सत्तासंबन्धित्वात्' इति वचनम्। 'सत्तासंबन्धित्वात्' इत्युच्यमाने द्रव्य-कर्मभ्यामनेकान्तस्तन्निवृत्त्यर्थं 'प्रतिषिध्यमानद्रव्य-कर्मभावे सति' इति विशेषणम्। तदेवं भवत्यतोऽनुमानाद् बुद्धेर्गुणत्वसिद्धिः। } अस्मदाद्युपलभ्यमानत्वं च बुद्धेस्तदेकार्थसमवेतानन्तरज्ञानप्रत्यक्षत्वाद् नासिद्धम्। नित्यत्वं चात्मनः 'अकार्यत्वात्, आकाशवत्' इत्यनुमानप्रसिद्धम्। अतो 'नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वात्' इति हेतुर्नासिद्धः।

नाप्यनैकान्तिकः, विपक्षेऽस्याऽप्रवृत्तेः। नापि विरुद्धः, विभुन्याकाशेऽस्य वृत्त्युपलम्भात्। नापि बाधितविषयः, प्रत्यक्षाऽऽगमयोरात्मन्यविभुत्वप्रदर्शकयोरसम्भवात्। नापि प्रकरणसमः, प्रकरणचिन्ताप्रवर्तकस्य हेत्वन्तरस्याभावात्। इति भवति सकलदोषरहितादतो हेतोः सर्वगतात्मसिद्धिः।

[उत्तरपक्षः–आत्मनो विभुत्वं निरस्य देहमात्रत्वव्यवस्थापनम्]

असदेतत्, बुद्धेर्गुणत्वासिद्धावात्मनस्तदधिष्ठानत्वासिद्धेरसिद्धो हेतुः। यच्च 'प्रतिषिध्यमानद्रव्य-कर्मत्वे सति सत्तासंबन्धित्वात्' इति गुणत्वं बुद्धेः प्रसाध्यते तत्र सत्तायाः तत्समवायस्य च निषिद्धत्वात् निषेत्स्यमानत्वाच्च 'सत्तासंबन्धित्वात्' इति तत्र हेतुरसिद्धः।

समवायाभावे च बुद्धेरात्मनो व्यतिरेके तेन तस्याः सम्बन्धाभावात् 'आत्मनो द्रव्यत्वं गुणाश्रयत्वेन, तस्याश्च तदाश्रितत्वेन गुणत्वम्' इति दूरोत्सारितम्। भवतु वा समवायसंबन्धस्तथापि आत्मगुण(णत्व)वत् तस्या अन्यगुणत्वस्याप्यप्रतिषेधात् तस्यास्तद्गुणत्वस्यैवासिद्धिः। व्यतिरेकाविशेषेऽपि 'आत्मन एव गुणो ज्ञानम् नाकाशादेः' इति किंकृतोऽयं विभागः? न समवायकृतः, तस्यापि ताभ्यां व्यतिरेके 'तयोरेवासौ समवायः नाकाशादेः' इति विभागो दुर्लभः स्यात्, तस्य

१-त्वसिद्धिर्न मनस्त्वान्त-वा०, बा०। २-त्तावेव साधारणत्वात्। अ०, भा०, डे०। ३ पृ० १३३ पं० ३८। ४ प्र० पृ० पं० २। ५ पृ० १०६ पं० १०–पृ० ११० पं० ९। ६-गुणत्वस्यात्वस्याप्यप्रति-वा०, बा०।

स्वरूपेण सर्वत्राविशेषात्। अथात्मकार्यत्वादात्मगुणो बुद्धिः, कुत एतत्? आत्मनि सति भावात्, आकाशादावपि सति भावात् तस्यास्तत्कार्यताप्रसक्तिः। नाप्यात्मनोऽभावेऽभावात् तस्याः तत्कार्यत्वम्, तन्नित्यत्व-व्यापित्वाभ्यां तत्र तस्यायोगात्। नापि तत्र तस्याः प्रतीतेः तत्कार्यैवासौ नाकाशादिकार्या, तत्र तत्प्रतीतेरसिद्धेः। तथाहि-न तावद् आत्मा आत्मनि बुद्धिं प्रत्येति, तस्य स्वसंविदितत्वानभ्युपगमात्। ज्ञानान्तरप्रत्यक्षत्वेऽपि विवादात्। तन्न तेनात्मस्वरूपमपि गृह्यते, दूरत एव स्वात्मव्यवस्थितत्वं बुद्धेः। नापि बुद्धया तद्व्यवस्थितत्वं स्वात्मनो गृह्यते, तया आत्मनः स्वकीयरूपस्य वाऽग्रहणात्, बुद्ध्यन्तरग्राह्यत्वासम्भवात्, स्वसंविदितत्वस्य चानिष्टेः, अज्ञातायाश्च घटादेरिवापरग्राहकत्वानुपपत्तेर्न तयाप्यात्मनि व्यवस्थितं स्वरूपं गृह्यते। न च तदुत्कलितत्वम्, तदाधेयत्वम्, तत्समवेतत्वं वा आकाशादिपरिहारेणात्मगुणत्वनिबन्धनम्, सर्वस्य निषिद्धत्वात्। न च कार्येणाननुकृतव्यतिरेकं नित्यमात्मलक्षणं वस्तु कस्यचित् कारणं सिध्यति, अतिप्रसङ्गात्। यथा च नित्यस्यैकान्तत आत्मनोऽन्यस्य वा न कारणत्वं संभवति तथा प्रतिपादयिष्यते। तन्न बुद्धेरात्मनो व्यतिरेके 'तस्यैवासौ गुणो नाकाशादेः' इति व्यवस्थापयितुं शक्यम्।

अव्यतिरेके च ततः तद्वदेव तस्या अपि द्रव्यत्वमिति 'प्रतिषिध्यमानद्रव्यत्वे सति' इति विशेषणमसिद्धम्। अपि च बुद्धेर्गुणत्वसिद्धावनाधारस्य गुणस्यासंभवात् तदाधारभूतस्यात्मनो द्रव्यत्वसिद्धिः, तत्सिद्धेश्च द्रव्य-कर्मभावप्रतिषेधे सति तदाश्रितत्वेन तस्या गुणत्वसिद्धिरितीतरेतराश्रयत्वम्।

किञ्च, आत्मनोऽप्रत्यक्षत्वे बुद्धेस्तद्विशेषगुणत्वेऽस्मदाद्युपलभ्यमानत्वविरोधः। तथाहि-येऽत्यन्तपरोक्षगुणिगुणा न तेऽस्मदादिप्रत्यक्षाः, यथा परमाणुरूपादयः, तथा च परेणाभ्युपगम्यते बुद्धिः, तस्माद् नास्मदादिप्रत्यक्षा। न च वायुस्पर्शेन व्यभिचारः, वायोः कथञ्चित् तदव्यतिरेकेण तद्वत् प्रत्यक्षत्वात्; स्पर्शविशेषस्यैव तत्त्वात्। अस्मदादिप्रत्यक्षत्वे च बुद्धेरत्यन्तपरोक्षात्मविभुद्रव्यविशेषगुणत्वविरोधः। तथाहि-यद् अस्मदादिप्रत्यक्षं न तद् अत्यन्तपरोक्षगुणिगुणः, यथा घटरूपादि, तथा च बुद्धिः। न च वायुस्पर्शेन व्यभिचारः, पूर्वमेव[3] परिहृतत्वात्। ततोऽस्मदादिप्रत्यक्षत्वे बुद्धेर्नात्यन्तपरोक्षात्मविशेषगुणत्वम्। तत्त्वे वा नास्मदादिप्रत्यक्षत्वमित्यसिद्धोऽस्मदाद्युपलभ्यमानलक्षणविशेषणोऽपि हेतुः। अथ आत्मनः प्रत्यक्षत्वाभ्युपगमाद् नायं दोषः, नन्वेवं तस्य प्रत्यक्षत्वाभ्युपगमे हर्ष-विषादाद्यनेकविवर्तात्मकस्य देहमात्रव्यापकस्य स्वसंवेदनप्रत्यक्षसिद्धत्वाद् न युगपत् सर्वदेशावस्थिताशेषमूर्तद्रव्यसंबन्धलक्षणस्य विभुत्वस्य साधनमनुमानतो युक्तम्; अन्यथा घटादिभिर्मैर्वादेस्तेन[3] च घटादीनां तथा संयोगः किं नेष्यते यतः सांख्यदर्शनं न स्यात्? प्रत्यक्षबाधनाद् नैवमिति चेत्, किमत्र प्रत्यक्षबाधनं काकैर्भक्षितम्? अथात्र पक्षधर्मान्वयव्यतिरेकलक्षणयुक्तहेतुसद्भावात् तथाभ्युपगमः अन्यत्र विपर्ययाद् नेति चेत् तर्हि 'पक्वान्येतानि फलानि, एकशाखाप्रभवत्वात्, उपयुक्तफलवत्' इत्यत्र तथाविधहेतुसद्भावात् तथाभ्युपगमः किं न स्यात्? पक्षस्य प्रत्यक्षबाधा हेतोर्वा कालात्ययापदिष्टत्वमन्यत्रापि समानम्। न च स्वसंवेदनप्रत्यक्षमेवानुमानेन प्रकृतेन बाध्यत इति वक्तुं युक्तम्, प्रत्यक्षपूर्वकत्वाभ्युपगमादनुमानस्य प्रत्यक्षप्रामाण्ये तस्याप्रवृत्तिप्रसङ्गात्। न च तथाभूतात्मग्राहकस्य स्वसंवेदनाध्यक्षस्याप्रामाण्यनिबन्धनमपरमुत्पश्यामः। न चान्यादृक्षस्यात्मनो विभुत्वसाधनाय हेतूपन्यासः सफलः, तस्य प्रमाणाविषयत्वेनासिद्धत्वाद् हेतोराश्रयासिद्धताप्रसङ्गात्। तदेवमस्मदाद्युपलभ्यत्वे बुद्धिलक्षणस्य गुणस्य हेतोः कालात्ययापदिष्टत्वम्, अनुपलभ्यत्वे विशेषणासिद्धत्वम्।

परमाणूनां च नित्यत्वे सत्यस्मदाद्युपलभ्यमानपाकजगुणाधिष्ठानत्वे सत्यपि न विभुत्वमिति व्यभिचारः। परमाणुपाकजगुणानामस्मदाद्यप्रत्यक्षत्वे 'विवादास्पदं बुद्धिमत्कारणम्, कार्यत्वात्, घटादिवत्' इत्यत्र प्रयोगे व्याप्तिग्रहणं दुर्लभमासज्येत। तथाहि-कार्यत्वेनाभिमतानां परमाणुपाकजरूपादीनां व्याप्तिज्ञानेनाविषयीकरणे बुद्धिमत्कारणत्वेन व्याप्तिसिद्धिर्न स्यात्, तथा चैतेरेव कार्यत्वहेतोर्व्यभिचाराशङ्का स्यात्। अथ 'नित्यत्वे सत्यस्मदादिबाह्येन्द्रियोपलभ्यमानगुणाधिष्ठानत्वात्' इति हेतुरभिधीयते तर्हि बाह्येन्द्रियोपलभ्यमानत्वस्य बुद्धावसिद्धेः पुनरपि

१ पृ० १०५ पं० ३३। २ प्र० पृ० पं० १९। ३-न वा घ-वा०, बा०। ४-क्षस्य प्रा-वा०, बा०।

विशेषणासिद्धो हेतुः प्रसक्तः। साध्य-साधनधर्मविकलश्चाकाशलक्षणः साधर्म्यदृष्टान्तः, नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वस्य साधनधर्मस्य, विभुत्वलक्षणसाध्यधर्मस्य तत्रासिद्धेः।

अथ 'शब्दाधिकरणं द्रव्यं विभु, नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वात्, आत्मवत्' इत्यतो हेतोस्तत्र विभुत्वस्य सिद्धेर्न साध्यविकलो दृष्टान्तः। नापि साधनविकलः, अस्मदादिप्रत्यक्षशब्दगुणाधिष्ठानत्वस्य तत्र सिद्धत्वात्—न च शब्दस्यास्मदादिप्रत्यक्षत्वम् गुणत्वं वाऽसिद्धम्, श्रोत्रव्यापारेणाध्यक्षबुद्धौ शब्दस्य परिस्फुटरूपतया प्रतिभासनात् निषिध्यमानद्रव्यकर्मत्वे सति सत्तासंबन्धित्वात्, पृथिव्यादिवृत्तिबाधकप्रमाणसद्भावे सति गुणस्याऽऽश्रितत्वेनाकाशाऽऽश्रितत्वसिद्धेश्च न साधनविकलताप्याकाशस्य। असदेतत्; सिद्धे ह्यात्मनो विभुत्वे तन्निदर्शनादाकाशस्य विभुत्वसिद्धिः, तत्सिद्धेश्चात्मनो विभुत्वसिद्धिरितीतरेतराश्रयदोषप्रसङ्गात् नाप्याकाशस्य विभुत्वसिद्धिरिति साध्यविकलता तदवस्थैव। यच्च शब्दस्य गुणत्वसाधकमनुमानं तत्र 'सत्तासंबन्धित्वात्' इति हेतौ सत्तायाः तत्संबन्धित्वहेतोः समवायस्य चासिद्धत्वादसिद्धता, 'प्रतिषिध्यमानद्रव्यत्वे सति' इति विशेषणस्य चासिद्धता, शब्दस्य द्रव्यत्वात्।

[प्रासङ्गिकं शब्दस्य द्रव्यात्मकत्वसाधनम्]

तथाहि-द्रव्यं शब्दः, क्रियावत्त्वात्, यद् यत् क्रियावत् तत् तद् द्रव्यम्, यथा शरः, तथा च शब्दः, तस्माद् द्रव्यम्। निष्क्रियत्वे श्रोत्रेणाग्रहणप्रसङ्गः, तेनानभिसंबन्धात्। तथापि ग्रहणे श्रोत्रस्याप्राप्यकारित्वप्रसक्तिः। तथा च 'प्राप्यकारि चक्षुः, बाह्येन्द्रियत्वात्, त्वगिन्द्रियवत्' इत्यस्य श्रोत्रेणानैकान्तिकत्वप्रसक्तिः। संबन्धकल्पनायां वा श्रोत्रं वा शब्ददेशं गत्वा शब्देनाभिसंबन्ध्येत, शब्दो वा श्रोत्रदेशमागत्य तेनाभिसंबन्ध्येत? न तावत् प्रथमः पक्षः, स्वधर्माऽधर्माभिसंस्कृतकर्णशष्कुल्यवरुद्धनभोदेशलक्षणश्रोत्रस्य शब्दोत्पत्तिदेशे निष्क्रियत्वेन तथाप्रतीत्यभावेन च गत्यसम्भवात्। गत्यभ्युपगमे वा विवक्षितशब्दापान्तरालवर्तिनामन्यान्यशब्दानामपि ग्रहणप्रसङ्गः, संबन्धाविशेषात्। अनुवात-प्रतिवात-तिर्यग्वातेषु च प्रतिपत्त्यप्रतिपत्तीषत्प्रतिपत्तिभेदाभावप्रसङ्गश्च, श्रोत्रस्य गच्छतस्तत्कृतोपकाराद्ययोगात्। नापि शब्दस्य श्रोत्रदेशागमनसम्भवः, गुणत्वेन तस्य निष्क्रियत्वोपगमात् आगमने वा सक्रियत्वाद् द्रव्यत्वमेव।

अथापि स्यात् न आद्य एवाकाशतद्देणुमुखसंयोगात् समवाय्यऽसमवायि-निमित्तकारणादुद्भूतः शब्दः श्रोत्रेणागतः संबन्ध्यते येनायं दोषः स्यात्, अपि तु जलतरङ्गन्यायेनापरापर एवाकाश-शब्दादिलक्षणात् समवाय्यऽसमवायि-निमित्तकारणादुपजातस्तेनाभिसंबन्ध्यत इति। नन्वेवं बाणादयोऽपि पूर्वपूर्वसमानजातीयक्षणप्रभवा अन्ये एव लक्ष्येणाभिसंबन्ध्यन्त इति किं नाभ्युपगम्यते? तथा च क्रियायाः सर्वत्राभाव इति 'क्रियावद् द्रव्यम्' इति द्रव्यलक्षणं न क्वचिद् व्यवतिष्ठेत। अथ प्रत्यभिज्ञानाद् बाणादौ नित्यत्वसिद्धेर्नेयं कल्पना। नन्वेवं शब्देऽपि मा भूदियम्, तत्राप्येकत्वग्राहिणः प्रत्यभिज्ञानस्य 'देवदत्तोच्चारितं शब्दं शृणोमि' इत्येवमाकारेणोपजायमानस्याऽबाधितस्वरूपस्यानुभवात्। न च लूनपुनर्जातकेश—नखादिष्विव सदृशापरापरोत्पत्तिनिबन्धनमेतत् प्रत्यभिज्ञानमिति वक्तुं शक्यम्, बाणादावपि तस्य तथात्वाविशेषात्।

अथ शब्दे बाधकसद्भावात् तथा तत्परिकल्पनम् न बाणादौ, विपर्ययात्। ननु न शब्दैकत्वविषयं प्रत्यक्षं तावदस्य बाधकम्, समानविषयत्वेन तस्य तद्बाधकत्वायोगात्। क्षणिकत्वविषयं तु शब्देऽन्यत्र वा विवादगोचरचारीति न तद्बाधकं युक्तम्। न चानुमानं प्रत्यभिज्ञानबाधकम्, प्रत्यभिज्ञानस्य मानसप्रत्यक्षत्वाभ्युपगमात्; तदेव ह्यनुमानस्यैकशाखाप्रभवत्वादेर्बाधकमुपलब्धम्, न पुनरनुमानं तस्य। अथ शब्दैकत्वग्राहकप्रत्यभिज्ञाप्रत्यक्षस्य तदाभासत्वादनुमानं स्थिरचन्द्राऽर्कादिग्राहकस्येव देशान्तरप्राप्तिलिङ्गजनितानुमानवद् बाधकं भविष्यति, कथं पुनरस्य प्रत्यक्षाभासत्वम्? अनुमानेन बाधनादिति चेत्, अनेनाप्यनुमानस्य बाधनादनुमानाभासत्वं किं न स्यात्? अथानुमानबाधितविषयत्वाद् नैतदनुमानबाधकम्; अनुमानमप्येतद्बाधितविषयत्वाद् नास्य बाधकमिति प्रसक्तम्। अथ साध्याविनाभाविलिङ्गजनितत्वान्नानुमानमेतद्बाध्यम् एकशाखाप्रभवत्वानुमानमपि तर्ह्यमताग्राहिप्रत्यक्षबाध्यं न स्यात्। अथ पक्षे एव व्यभिचाराद् न साध्याविनाभूतहेतुप्रभवत्वमेकशाखाप्रभवत्वानुमानस्य, तत् शब्दक्षणिकत्वानुमानेऽपि समानम्।

१-नभिसंधानात्। वा०, बा० विना। २-३-बध्य-वा०, वा०, मां०। ४ पृ० १३५ पं० २९।

न च शब्दक्षणिकत्वप्रसाधकमनुमानं पराभ्युपगमे संभवति। यच्च 'क्षणिकः शब्दः, अस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात्, यो योऽस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणः स स क्षणिकः, यथा ज्ञानादिः, तथा च शब्दः, तस्मात् क्षणिकः' इत्यनुमानम्, तदेकशाखाप्रभवत्वानुमानवद् मानसप्रत्यक्षाभिमतप्रत्यभिज्ञानबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वात् कालात्ययापदिष्टहेतुप्रभवत्वाद् न साध्यसिद्धिनिबन्धनम्। किञ्च, धर्मादेर्विभुद्रव्यविशेषगुणत्वेऽपि न क्षणिकत्वमिति हेतोर्व्यभिचारः। तस्यापि पक्षीकरणे सर्वत्र व्यभिचारविषये पक्षीकरणाद् न कश्चिद् हेतुर्व्यभिचारी स्यात् 'अस्मदादिप्रत्यक्षत्वे सति' इति च विशेषणमनर्थकम्, व्यवच्छेद्याभावात्। धर्मादेः क्षणिकत्वे च स्वोत्पत्तिसमयानन्तरमेव ध्वस्तत्वाद् न ततो जन्मान्तरफलप्राप्तिः। शब्दात् शब्दोत्पत्तिवद् धर्मादेर्धर्माद्युत्पत्तावभ्युपगमबाधा 'परस्य अनुकूलेष्वनुकूलाभिमानजनितोऽभिलाषोऽभिलषितुरर्थाभिमुखक्रियाकारणमात्मविशेषगुणमाराधयति, अनुकूलेष्वनुकूलाभिमानजनिताभिलाषत्वात्, आत्मनोऽनुकूलाभिमानजनिताभिलाषवत्' इत्यस्य च विरोधः, यतो योऽसौ परस्यानुकूलेष्वनुकूलाभिमानजनिताभिलाषोत्पादित आत्मविशेषगुणो नासावभिलषितुरर्थाभिमुखक्रियाकारणम्, तत्समानेतत्कारणत्वात्, यश्च तत्क्रियाकारणम् नासौ यथोक्ताभिलाषेणारब्ध इति। तथा, 'प्रवर्तक-निवर्तकाविच्छा-द्वेषनिमित्तौ धर्माऽधर्मौ, अव्यवधानेन हिताहितविषयप्राप्ति-परिहारहेतोः कर्मणः कारणत्वे सत्यात्मविशेषगुणत्वात्, प्रवर्तक-निवर्तकप्रयत्नवत्' इत्यत्र हेतोर्व्यभिचारश्च, जन्मान्तरफलप्रदयोर्धर्माधर्मयोरव्यवधानेन हिताहितप्राप्ति-परिहारहेतोः कर्मणः कारणत्वे सत्यात्मविशेषगुणत्वेऽपीच्छा-द्वेषजनितत्वाभावात्। किञ्च, धर्मादिवद् अपरापरतत्कार्योत्पत्तिप्रसङ्गश्च। ततो न शब्दात् शब्दोत्पत्तिवद् धर्मादेर्धर्माद्युत्पत्तिः; तस्य क्षणिकत्वे न जन्मान्तरे ततः फलमित्यक्षणिकत्वं तस्याभ्युपगन्तव्यमतस्तेन व्यभिचारी हेतुः।

अथास्मदादिप्रत्यक्षत्वविशेषणविशिष्टस्य विभुद्रव्यविशेषगुणत्वस्य धर्मादावसंभवाद् न व्यभिचारः, असदेतत्; विपक्षविरुद्धं हि विशेषणं ततो हेतुं निवर्तयति, यथाऽहेतुकत्वविरुद्धं ततः कादाचित्कत्वं निवर्तयति। न चास्मदादिप्रत्यक्षत्वमक्षणिकत्वविरुद्धम्, अक्षणिकेष्वपि सामान्यादिषु भावात्, ततो यथाऽस्मदादिप्रत्यक्षा अपि केचित् क्षणिकाः प्रदीपादयः, अपरेऽक्षणिकाः सामान्यादयस्तथाऽस्मदादिप्रत्यक्षा अपि विभुद्रव्यविशेषगुणाः केचित् क्षणिकाः, अपरेऽक्षणिका भविष्यन्तीति संदिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिको हेतुः। न चास्मदादिप्रत्यक्षत्वविशेषणविशिष्टस्य विभुद्रव्यविशेषगुणत्वस्याक्षणिकेऽदर्शनात् ततो व्यावृत्तिसिद्धिः, अदर्शनस्यात्मसंबन्धिनः परलोकादिनाऽनैकान्तिकत्वात्, सर्वसंबन्धिनोऽसिद्धत्वात्। न च कृतकत्वादावप्ययं दोषः समानः, तत्र विपक्षे हेतोः सद्भावबाधकप्रमाणभावात् प्रकृतहेतोश्च तस्याभावात्। यदि पुनर्विपक्षे हेतोरदर्शनमात्रादेव ततो व्यावृत्तिस्तथा सति

"वेदाध्ययनं सर्वं तदध्ययनपूर्वकम्।
वेदाध्ययनवाच्यत्वात् अधुनाऽध्ययनं यथा" [श्लो० वा०, अ० ७ श्लो० ३६६]

इत्यस्यापि विपक्षेऽदर्शनात् ततो व्यावृत्तिसिद्धिरित्यपौरुषेयत्वसिद्धेर्न तस्येश्वरप्रणीतत्वं स्यात्।

धर्माधर्मादेश्चास्मदाद्यप्रत्यक्षत्वे 'देवदत्तं प्रत्युपसर्पन्तः पश्वादयो देवदत्तगुणाकृष्टाः, देवदत्तप्रत्युपसर्पणवत्त्वात्, यद् यद् देवदत्तं प्रत्युपसर्पणवत् तत् तद् देवदत्तगुणाकृष्टम्, यथा ग्रासादिः, तथा च पश्वादयः, तस्माद् देवदत्तगुणाकृष्टाः' इत्यनुमानमसंगतं स्यात्, व्याप्तेरग्रहणात्। तथाप्यनुमाने यतः कुतश्चिद् यत् किञ्चिदवगम्येत। ग्रासादेर्देवदत्तं प्रत्युपसर्पणस्य देवदत्तप्रयत्नगुणाकृष्टत्वेन व्याप्तिप्रदर्शनात् तस्यैव तत्पूर्वकत्वानुमानं स्यात्, तस्य च वैयर्थ्यम्। अथ पश्वादेरपि देवदत्तं प्रत्युपसर्पणस्य देवदत्तप्रयत्नसमानगुणाकृष्टत्वेन व्याप्तिः प्रतीयते तर्हि प्रयत्नसमानगुणस्य पश्वादेर्देवदत्तं प्रत्युपसर्पणस्य वाऽप्रतिपत्तौ कथं तदाकृष्टत्वेन व्याप्तिसिद्धिः न हि प्रयत्नाप्रतिपत्तौ तदाकृष्टत्वेन प्रतिपन्नस्य ग्रासादेर्देवदत्तं प्रत्युपसर्पणस्य व्याप्तिप्रतिपत्तिः? तत्प्रतिपत्त्यभ्युपगमश्च

१-कृतत्व(त्वेन)का-वा०, बा०। २-नतत्वात्, यश्च-वा०, बा०। ३-कृतं वि-वि०, भा०।

यदि तेनैवानुमानेन, अन्योन्याश्रयदोषः–व्याप्तिसिद्धावनुमानम्, ततश्च व्याप्तिसिद्धिरिति। अनुमानान्तरेण तत्प्रतिपत्तावनवस्था। प्रमाणान्तरेण च तत्प्रतिपत्तौ वैशेषिकस्य द्वे प्रमाणे, नैयायिकस्य चत्वारि प्रमाणानि इति प्रमाणसंख्याव्याघातः। ततो मानसप्रत्यक्षेण व्याप्तिर्गृह्यत इत्यभ्युपगन्तव्यम्; तथा च प्रयत्नसमानगुणस्य समाकर्षकस्य, तत्समाकृष्यमाणस्य च पश्चादेस्तत्प्रत्यक्षत्वमित्यस्मदादि-
५ प्रत्यक्षत्वं धर्मादेरपि परैरभ्युपगन्तव्यम्। यदि पुनः 'बाह्येन्द्रियप्रभवास्मदादिप्रत्यक्षत्वे सति' इति हेतुर्विशिष्यते तदा साधनविकलता दृष्टान्तस्य, सुखादेस्तथाऽप्रत्यक्षत्वात्। विभुद्रव्यं च यदि अत्राकाशमस्मदाद्यप्रत्यक्षं विवक्षितं तदा तद्वत् तद्गुणस्याप्यस्मदाद्यप्रत्यक्षत्वमिति 'अस्मदादि-प्रत्यक्षत्वे सति' इति विशेषणासिद्धिर्हेतोः, गुणिनोऽप्रत्यक्षत्वे तद्विशेषगुणस्याप्यप्रत्यक्षत्वेन प्रतिपादितत्वात्।

१० किञ्च, सिद्धे हि शब्दे गुणे तदाधारसिद्धिः–गुणस्याधारमन्तरेणानवस्थानात्—तत्सिद्धौ च तदाधारस्य नित्यत्वे सत्यस्मदादिप्रत्यक्षशब्दगुणाधारत्वेन विभुद्रव्यत्वसिद्धिः, तत्सिद्धेश्च शब्दस्य क्षणिकत्वसिद्धिः क्रियावत्त्वप्रतिषेधेन द्रव्यत्वाभावं साधयेत्, ततश्च गुणत्वम्, ततो विभुद्रव्याश्रितत्वम्, ततोऽपि क्षणिकत्वम्, इति चक्रकमासज्येत। साधनशून्यश्च साधर्म्यदृष्टान्तः, बुद्धेरपि विभ्वात्मविशेषगुणत्वासिद्धेः। न च शब्ददृष्टान्तेन तत् साध्यते, तस्याद्याप्यसिद्धत्वात्
१५ इतरेतराश्रयदोषप्रसङ्गतः। न च 'विभ्वात्मविशेषगुणो ज्ञानम्, तत्कार्यत्वात्, शब्दवत्' इत्यतोऽनुमानात् तस्य तद्विशेषगुणत्वसिद्धिः, कार्यत्वस्येश्वरनिराकरणे परप्रसिद्धस्यासिद्धत्वेन प्रतिपादितत्वात्[1] इतरेतराश्रयदोषस्य च तदवस्थत्वात्–सिद्धे हि शब्दस्य विभुद्रव्यविशेषगुणत्वे दृष्टान्तत्वम्, ततो ज्ञानस्य तत्सिद्धिः, ततश्च शब्दस्य तत् इति कथं नेतरेतराश्रयदोषः इति साधनविकलो दृष्टान्तः। तथा साध्यविकलश्च, बुद्धेः क्षणिकत्वासंभवात्; तथात्वे वा तस्याः न ततः संस्कारः,
२० तदभावाद् न स्मरणम्, तदभावाच्च न प्रत्यभिज्ञादिव्यवहारः। न हि विनष्टात् कारणात् कार्यम्, अन्यथा चिरतरविनष्टादपि ततस्तत्प्रसङ्गात्। अनन्तरस्य कारणत्वे सर्वमनन्तरं तत्कारणमासज्येत।

अथैकार्थसमवायिज्ञानमनन्तरं तत्कारणम्, न; ज्ञानस्यात्मनो भेदे समवायस्य सर्वत्राविशेषात् प्रतिषिद्धत्वाच्च 'एकार्थसमवायि' इत्यसिद्धम्। विनष्टाच्च कारणात् कथमनन्तरं कार्यम् येनानन्तर्यं कार्यकारणभावनिबन्धनत्वेन कल्प्येत? न हि तत् कारणम् नापि तत् तस्य कार्यम्,
२५ तदभाव एव भावात्। न हि यदभावेऽपि यद् भवति तत् तस्य कार्यमितरत् कारणमिति व्यवस्था, अतिप्रसङ्गात्। विनश्यदवस्थं कारणमिति चेत्, न; साऽपि विनश्यदवस्था यदि ततो भिन्ना तर्हि तया तदभिसंबन्धाभावादनुपकाराद् 'विनश्यदवस्थम्' इति कुतो व्यपदेशः अतिप्रसङ्गादेव? उपकारे वा सोऽपि यदि ततो व्यतिरिक्तः, अतिप्रसङ्गोऽनवस्थाकारी। अव्यतिरेके विनश्यदवस्थैव तेन कृता स्यात्। तामपि यद्यविनश्यदवस्थमेव कारणमुत्पा-
३० दयेत् किं प्रकृतेऽपि विनश्यदवस्थाकल्पनेन? विनश्यदवस्थं चेत् तां कुर्यात् अन्या तर्हि ततोऽर्थान्तरभूता विनश्यदवस्था कल्पनीया। तया तदभिसंबन्धाभावः, अनुपकारात्। उपकारे वा तदवस्थः प्रसङ्गः अनवस्था च। तथा चापरापरविनश्यदवस्थोत्पादनेनोपक्षीणशक्तित्वात् प्रकृतकार्योत्पादनमनवसरं प्रसक्तम्। विनश्यदवस्थायास्तत्र समवायात् तद् विनश्यदवस्थमित्यपि वार्तम्, विहितोत्तरत्वात्[2]। अथाभिन्ना तर्हि विनश्यदवस्थाकारणैकसमय-
३५ संगता, एवं च विनश्यदवस्थं कारणं कार्यं करोतीति कोऽर्थः? स्वोत्पत्तिकाल एव करोतीत्यर्थः समायातः। तथा च कार्य—कारणयोः सव्येतरगोविषाणवदेककालत्वाद् न कार्यकारणभावः। तथापि तद्भावे सकलकार्यप्रवाहस्यैकक्षणवर्तित्वम्।

अथ न सौगतस्येवाऽणोरप्यनन्तरव्यतिक्रमलक्षणेन क्षणेन क्षणिकत्वम्—येनायं दोषः—किन्तु षट्समयस्थित्यनन्तरनाशित्वं तत्; ननु कालान्तरस्थायिनि तथा व्यवहारं कुर्वन् सहस्रक्षण-
४० स्थायिन्यपि तत्र तं किं न कुर्यात्? अपि च, पूर्वपूर्वक्षणसत्तात उत्तरोत्तरक्षणसत्ताया भेदाभ्युपगमे तदेव सौगतप्रसिद्धं क्षणिकत्वमायातम्। अभेदाभ्युपगमे पूर्वक्षणसत्तायामेवो-

---

१ पृ० १३५ पं० १७। २ पृ० १०५ पं० ३१। ३ प्र० पृ० पं० २२। ४-मवायसं-गु०। ५-वस्थका- भां०।

त्तरक्षणसत्तायाः प्रवेशादेकक्षणस्थायित्वमेव, न षट्क्षणस्थायित्वं बुद्धेः परपक्षे संभवति। भेदेतरपक्षाभ्युपगमे चानेकान्तसिद्धिः, षट्क्षणस्थानानन्तरं च निरन्वयविनाशे न ततः किञ्चित् कार्यं संभवतीत्युक्तम्।

न चैवं बुद्धिक्षणिकत्ववादिनः क्वचित् कालान्तरावस्थायित्वं सिध्यति, तद्ग्रहणाभावात्। तथाहि–पूर्वकालबुद्धेस्तदैव विनाशाद् नोत्तरकालेऽस्तित्वमिति न तेन तया सांगत्यं कस्यचित् ५
प्रतीयते, अतिप्रसङ्गात्। उत्तरबुद्धेश्च पूर्वमसंभवाद् न पूर्वकालेन तत् तयाऽपि प्रतीयते। उभयत्रात्मनः सद्भावात् ततस्तत्प्रतीतिरित्यपि नोत्तरम्, आकाशसद्भावात् तत्प्रतीतिरित्यस्यापि भावात्। तस्याचेतनत्वाद् नेति चेत्, स्वयं चेतनत्वे आत्मनः स येन स्वभावेन पूर्वं रूपं प्रतिपद्यते न तेनोत्तरम्; न हि नीलस्य ग्रहणमेव पीतग्रहणम्, तयोरभेदप्रसङ्गात्। अथान्येन स्वभावेन पूर्वमवगच्छति, अन्येनोत्तरमिति मतिस्तथा सत्यनेकान्तसिद्धिः। स्वयं चात्मनश्चेतनत्वे किमन्यया १०
बुद्ध्या यस्याः क्षणिकत्वं साध्यते? अथ स्वयं न चेतन आत्मा अपि तु बुद्धिसंबन्धाच्चेतयत इति, अत्राप्यचेतनस्वभावपरित्यागेऽनित्यता आत्मनोऽन्यबुद्धिकल्पनावैफल्यं च, स्वयमपि तत्संबन्धात् प्रागपि तथाविधस्वभावाविरोधात्। तत्संबन्धेऽपि तत्स्वभावापरित्यागे 'ज्ञानसंबन्धादात्मा चेतयते' इत्यपि विरुद्धमेव। अथ तत्समवायिकारणत्वात् चेतयते न स्वयं चेतनस्वभावोपादानादिति तर्हि येन स्वभावेन पूर्वज्ञानं प्रति समवायिकारणमात्मा तेनैव यद्युत्तरं १५
प्रति तथा सति पूर्वमेव तत्कार्यं ज्ञानं सकलं भवेत्; न ह्यविकले कारणे सति कार्यानुत्पत्तिर्युक्ता, तस्याऽतत्कार्यत्वप्रसङ्गात्। अथ पूर्वं सहकारिकारणाभावाद् न तत् कार्यम्, किं पुनः स्वयमसमर्थस्याकिञ्चित्करेण सहकारिणा? किञ्चित्करत्वेऽपि यदि तत् ततो भिन्नं क्रियते प्रतिबन्धासिद्धिः अनवस्था वा। अभिन्नस्य करणेऽप्यात्मन एव करणमिति कार्यता। कथञ्चिदभिन्नस्य करणे तद्बुद्धिरपि ततः कथञ्चिदभिन्नेति नैकान्तेन तस्याः क्षणिकता। तदेवं पक्ष-हेतु-दृष्टान्तदोष- २०
दुष्टत्वाद् नातोऽनुमानात् शब्दस्य क्षणिकत्वमिति सक्रियत्वं सिद्धम्, अतोऽपि द्रव्यत्वम्।

गुणवत्त्वाच्च द्रव्यं शब्दः–'गुणवान् ध्वनिः, स्पर्शवत्त्वात्, यो यः स्पर्शवान् स स गुणवान्, यथा लोष्टादिः, तथा च ध्वनिः, तस्माद् गुणवान्' इति। स्पर्शवत्त्वाभावे कंसपात्र्यादिध्वानाभिसंबन्धेन कर्णशष्कुल्याख्यस्य शरीरावयवस्याभिघातो न स्यात्, न ह्यस्पर्शवताऽऽकाशेनाभिसंबन्धात् तदभिघातो दृष्टः; भवति च तच्छब्दाभिसम्बन्धे तदभिघातः, तत्कार्यस्य बाधिर्यस्य २५
प्रतीतेः। ननु स्पर्शवता शब्देन कर्णविवरं प्रविशता वायुनेव तद्द्वारलग्नतूलांशुकादेः प्रेरणं स्यात्, न; धूमेनानेकान्तात्–धूमो हि स्पर्शवान्, तदभिसम्बन्धे पांशुसम्बन्धवच्चक्षुषोऽस्वास्थ्योपलब्धेः, न च तेन चक्षुष्प्रदेशं प्रविशता तत्पक्ष्ममात्रस्यापि प्रेरणमुपलभ्यते। न च स्पर्शवत्त्वे शब्दस्य वायोरिव प्रदेशान्तरेण ग्रहणप्रसङ्गः, धूमस्यापि चक्षुरादिप्रदेशव्यतिरिक्तशरीरप्रदेशेन ग्रहणप्रसक्तेः। धूमवच्चक्षुषा तस्य ग्रहणं स्यादिति चेत्, न; जलसंयुक्तेनानलेन व्यभिचारात्– ३०
तस्योष्णस्पर्शोपलम्भेऽपि चक्षुषा भास्वररूपानुपलम्भात्। अनुद्भूतत्वमुभयत्र समानम्। जलसहचरितेनाऽनलेनोष्णस्पर्शवता शरीरप्रदेशदाहवत् तथाविधेन शब्दसहचरितेन वायुना श्रवणाख्यशरीरावयवाभिघात इति चेत्, न; शब्देन[3] तदभिघाते को दोषः येनेयमदृष्टपरिकल्पना समाश्रीयते? न च तस्य गुणत्वेन निर्गुणत्वात् स्पर्शाभावाद् न तदभिघातहेतुत्वमिति वक्तुं युक्तम्, चक्रकदोषप्रसङ्गात्। तथाहि–गुणत्वमद्रव्यत्वे, तदप्यस्पर्शत्वे, तदपि गुणत्वे, तदप्यद्रव्यत्वे, तदप्यस्पर्शत्वे, ३५
तदपि गुणत्व इति दुरुत्तरं चक्रकम्। शब्दाभिसम्बन्धान्वय–व्यतिरेकानुविधाने तदभिघातस्यान्यहेतुत्वकल्पनायां तत्रापि कः समाश्वासः? शक्यं हि वक्तुम् न वाय्वभिसंबन्धात् तदभिघातः किन्त्वन्यतः, न ततोऽपि अपि त्वन्यत इत्यनवस्थाप्रसक्तिर्हेतूनाम्। तस्मात् सिद्धं स्पर्शवत्त्वाच्छब्दस्य गुणवत्त्वम्।

अल्प–महत्त्वाभिसंबन्धाच्च, स च 'अल्पः शब्दः महान् शब्दः' इति प्रतीतेः। न च शब्दे ४०
मन्द–तीव्रताग्रहणम् इयत्तानवधारणात्–यथा द्रव्येषु 'अणुः शब्दोऽल्पो मन्दः' इत्येतस्य धर्मस्य मन्दत्वस्य ग्रहणम्, 'महान् शब्दः पटुस्तीव्रः' इत्येतस्य तीव्रत्वस्य धर्मस्य ग्रहणं न पुनः परिमाणस्य,

---

१ न तस्य या सां–आ०। न तेन तस्य या सां–कां०, गु०। २ तत्संभवत्वेऽपि भां०, मां०। ३–न च त–गु०। ४–षु गुणः श–वा०, बा०।

इयत्तानवधारणात्; न हि अयं 'महान् शब्दः' इत्यवस्यन् 'इयान्'इत्यवधारयति यथा द्रव्यान्तराणि बदराऽऽमलक-बिल्वादीनि इति वक्तुं शक्यम्; यतो वक्तव्यमत्र का पुनरियं शब्दस्य मन्दता तीव्रता वा? अवान्तरजातिविशेषः, कथम्? गुणवृत्तित्वात् शब्दत्ववत्। एतदेवोक्तं भगवता परमर्षिणोलूक्येन "गुणे भावाद् गुणत्वमुक्तम्" [वैशेषिकद० अ० १, आ० २, सू० १३]
५ अस्यायमर्थः—'यो यो गुणे वर्तते स स जातिविशेषः यथा गुणत्वमिति, असदेतत्; यतः कथं शब्दस्य गुणत्वसिद्धिर्येन तत्र वर्तमानत्वाज्जातिविशेषत्वं मन्दत्वादेः? अद्रव्यत्वादिति चेत्, तदपि कथम्? अल्प-महत्त्वपरिमाणाऽसंबन्धात्, सोऽपि गुणत्वात्। ननु तदेव पूर्वोक्तं चक्रकमेतत्। न गुणत्वात् तस्याल्प-महत्त्वपरिमाणासंबन्धं ब्रूमः–येनायं दोषः स्यात्–अपि तु द्रव्यान्तरवदियत्तानवधारणादिति चेत्, न; वायोरियत्तानवधारणेऽप्यल्प-महत्त्वपरिमाणसंबन्धसंभवादनेकान्तः,
१० न हि बिल्व-बदरादेरिव वायोरियत्ताऽवधार्यते। वायोरप्रत्यक्षत्वात् इयत्ता सत्यपि नावधार्यते, न शब्दस्य विपर्ययात्, न; उक्तमत्र 'स्पर्शविशेषस्य वायुत्वात्, तस्य च प्रत्यक्षत्वात्' इति। इयत्ता चेयं यदि परिमाणादन्या कथमन्यस्यानवधारणेऽन्यस्याभावः? न हि घटानवधारणे पटाभावो युक्तः। परिमाणं चेत् तर्हि 'इयत्तानवधारणात् परिमाणं नास्ति' इति किमुक्तम्? परिमाणं नास्ति परिमाणानवधारणात्। तस्मिन्नल्प-महत्त्वपरिमाणावधारणे कथं न तदवधारणम् बिल्वादावपि
१५ तत्प्रसङ्गात्? मन्द-तीव्राभिसंबन्धादल्प-महत्त्वप्रत्ययसंभवे मन्दवाहिनि गङ्गानीरे 'अल्पमेतत्' इति प्रत्ययोत्पत्तिः स्यात्, तीव्रवाहिगिरिसरिन्नीरे 'महत्' इति च प्रतीतिप्रसङ्गः; न चैवम्, तस्मान्न मन्द-तीव्रतानिबन्धनोऽयं प्रत्ययः अपि त्वल्प-महत्त्वपरिमाणनिमित्तः; अन्यथा घटादावपि तन्निबन्धनो न स्यात्। घटादीनां द्रव्यत्वेन तन्निबन्धनत्वे परिमाणसंभवात् तत्प्रत्ययस्य शब्दस्यापि तथाविधत्वेन स तथाविधोऽस्तु, विशेषाभावात्। कारणगतस्याल्प-महत्त्वपरिमाणस्य शब्दे
२० उपचारात् तथा संप्रत्यय इत्यपि वैलक्ष्यभाषितम्, घटादावपि तथा प्रसङ्गात्। अपरे मन्यन्ते–"यथा अश्वजवस्य पुरुषे उपचारात् 'पुरुषो याति' इति प्रत्ययस्तथा व्यञ्जकगतस्याल्प-महत्त्वादेः शब्दे उपचारात् 'शब्दोऽल्पो महान्' इति च व्यपदेशः", तदप्यसारम्; शब्दाभिव्यक्तेरपौरुषेयत्वनिराकरणे प्रतिषिद्धत्वात्[3]। ततो घटादाविवाल्प-महत्त्वपरिमाणसंबन्धः पारमार्थिकः शब्दे इति सिद्धं गुणवत्त्वम्।

२५ संयोगाश्रयत्वाच्च, तदपि वायुनाऽभिघातदर्शनात्–संयुक्ता एव हि पांश्वादयो वायुनाऽन्येन वाऽभिहन्यमाना दृष्टाः, तेन च तदभिघातः पांश्वादिवदेव देवदत्तं प्रत्यागच्छतः प्रतिकूलेन वायुना प्रतिनिवर्तनात्, तदप्यन्यदिगवस्थितेन श्रवणात्। ननु गन्धादयो देवदत्तं प्रत्यागच्छन्तस्तेन निवर्त्यन्ते, न च तेषां तेन संयोगः निर्गुणत्वात् गुणत्वेन, न; तद्वतो द्रव्यस्यैव तेन निवर्तनम्, केवलानां तेषामागमन-प्रतिनिवर्तनाऽसंभवात् निष्क्रियत्वेनोपगमात्। केवलागमन-प्रतिनिव-
३० र्तनसंभवे वा द्रव्याश्रितत्वमेतेषां गुणलक्षणं व्याहन्येत। न चात्रापि तद्वतो निवर्तनम्, आकाशस्यामूर्तत्व-सर्वगतत्वेन तदसंभवात् अन्यस्य चानभ्युपगमात्। तस्माच्छब्द एव तेन संयुज्यते साक्षादित्यभ्युपेयम्। गुणत्वेन चासंयोगे चक्रकमुक्तम्। न चासंयुक्तस्यैव तेन निवर्तनम्, सर्वस्य निवर्तनप्रसङ्गात्। प्रतिक्षणं शब्दाच्छब्दोत्पत्तिः पूर्वमेव निरस्ता।

एकादिसंख्यासंबन्धित्वाच्च गुणवत्त्वम्, तदपि 'एकः शब्दः द्वौ शब्दौ बहवः शब्दाः' इति
३५ प्रत्ययदर्शनात्। न चाधारसंख्यायास्तत्रोपचारात् तथा व्यपदेश इति वक्तुं युक्तम्, आकाशस्याधारत्वाभ्युपगमात् तस्य चैकत्वात् 'एकः शब्दः' इति सर्वदा प्रत्ययप्रसङ्गात्। कारणमात्रस्य संख्योपचारे 'बहवः' इति प्रत्ययः स्यात्, तस्य बहुत्वात्। विषयसंख्योपचारे 'गगनाऽऽकाश-व्योम'शब्दा बहुव्यपदेशभाजो न स्युः, गगनादिलक्षणस्य विषयस्यैकत्वात्, पश्वादिलक्षणस्य विषयस्य बहुत्वात् 'एको गोशब्दः' इति स्वप्नेऽपि प्रत्ययः व्यपदेशो वा न स्यात्। यथाऽविरोधं
४० संख्योपचार इति बालजल्पितम्, स्वयं संख्यावत्तयैवाविरोधात्। अत्रापि गुणत्वं विरुध्यत इति

१ पृ० १३९ पं० ३५। २ पृ० १३५ पं० २०। ३ पृ० ३४ पं० ३३। ४–तद्धेतोर्द्र–वि०, कां०। ५–तद्धेतोर्नि–वि०, कां०। ६ पृ० १३९ पं० ३५। ७ पृ० १३६ पं० २७।

न वक्तव्यम्, इष्टत्वात्। ततः क्रियावत्त्वाद् गुणवत्त्वाच्च शब्दो द्रव्यम् इत्यसिद्धं 'प्रतिषिध्यमानद्रव्यभावे' इति हेतुविशेषणम्।

ननूक्तम् 'शब्दो न द्रव्यम्, एकद्रव्यत्वात्, रूपादिवत्' इति। सत्यम्, उक्तम् किन्तु नोक्तिमात्रेण तत् सिध्यति, अतिप्रसङ्गात्। 'एकद्रव्यत्वात्' इति च तत्र हेतुरसिद्धः। तथाहि–यदि 'एकं द्रव्यं संयोगि अस्येत्येकद्रव्यः शब्दः' इत्येकद्रव्यत्वं हेतुत्वेनोपादीयते तदा विरुद्धो हेतुः, ५ संयोगित्वस्य द्रव्य एव भावात्। अथ 'एकं द्रव्यं समवायि अस्य इत्येकद्रव्यस्तद्भाव एकद्रव्यत्वम्' तदाऽसिद्धो हेतुः, समवायस्य–निषिद्धत्वात्[4] निषेत्स्यमानत्वाच्च–अभावेनैकद्रव्यसमवायित्वस्यासिद्धत्वात्। अपि च, गुणत्वे सिद्धे गगने एकत्र समवायेन तस्य वृत्तिः सिध्यति, तत्सिद्धेश्च द्रव्यत्वनिषेधे सति गुणत्वसिद्धिरितीतरेतराश्रयत्वम्।

यत् पुनरुक्तम् 'एकद्रव्यः शब्दः, सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वात्, १० रूपादिवत्' इति, तदपि प्रत्यनुमानेन बाधितम्–अनेकद्रव्यः शब्दः, अस्मदादिप्रत्यक्षत्वे सति स्पर्शवत्त्वात्, घटादिवत्। स्पर्शवत्त्वं साधितत्वाद् नासिद्धम्। 'स्पर्शवत्त्वात्' इत्युच्यमाने परमाणुभिरनेकान्त इति तन्निरासार्थम् 'अस्मदादिप्रत्यक्षत्वे सति' इति विशेषणोपादानम्। 'अस्मदादिप्रत्यक्षत्वात्' इत्युच्यमाने रूपादिभिर्व्यभिचार इत्युभयमुक्तम्।

तथा, सामान्यविशेषवत्त्वे सति बाह्यैकेन्द्रियप्रत्यक्षत्वेऽपि वायुर्नैकद्रव्य इति व्यभिचारश्च, १५ तस्य तदप्रत्यक्षत्वे न किञ्चिद् बाह्येन्द्रियप्रत्यक्षं स्यात्। दर्शन-स्पर्शनग्राह्यं घटादिकं तदिति चेत्, न; वायुना कोऽपराधः कृतः येन स्पर्शनेन्द्रियग्राह्यत्वेऽपि प्रत्यक्षो न भवेत्? स्पर्श एव तेन प्रतीयते इति चेत् तर्हि दर्शन-स्पर्शनाभ्यामपि रूप-स्पर्शावेव प्रतीय(ये)ते इति न द्रव्यप्रत्यक्षता नाम। अथ 'यदेवाहमद्राक्षं तदेव स्पृशामि' इति प्रतीतेस्तत्प्रत्यक्षता, 'खरो मृदुरुष्णः शीतो वायुर्मे लगति' इति प्रतीतेस्तत्प्रत्यक्षता कल्प्यताम्, अविशेषात्। चक्षुषैकेन चास्मदादिभिः प्रतीयमाना- २० श्चन्द्रार्कादयः सामान्यविशेषवत्त्वेऽपि नैकद्रव्याः। अस्मदादिविलक्षणैर्बाह्येन्द्रियान्तरेण तत्प्रतीतौ शब्देऽपि तथा प्रतीतिः किं न स्यात्? अत्र तथाऽनुपलम्भोऽन्यत्रापि समानः। 'देशान्तरे कालान्तरे सत्त्वान्तरे च बाह्यैकेन्द्रियग्राह्यः शब्दः, बाह्येन्द्रियग्राह्यत्वे सति विशेषगुणत्वात्, रूपादिवत्' इति चेत्, असदेतत्; शब्दस्य गुणत्वेन निषिद्धत्वात्[5] 'विशेषगुणत्वात्' इति हेतुरसिद्धः। चन्द्रादेरस्मदाद्यप्रत्यक्षत्वे प्रतीतिविरोधः इत्यास्तामेतत्। २५

'सत्तासंबन्धित्वात्' इत्यत्र च यदि 'स्वरूपसत्तासंबन्धित्वात्' इति हेतुस्तदाऽनैकान्तिकः सामान्य-समवायादिभिः, एषां प्रतिषिध्यमानद्रव्य-कर्मभावे सति तथाभूतसत्तासंबन्धित्वेऽपि गुणत्वासिद्धेः। न च सामान्यादेः स्वरूपसत्ताऽभावः, खरविषाणादेरविशेषप्रसङ्गादिति प्रतिपादितत्वात्। अथ 'भिन्नसत्तासंबन्धित्वात्' इति हेतुस्तदाऽसिद्धः, भिन्नसत्ताऽभावेन खरविषाणादेरिव शब्दस्यापि तत्संबन्धित्वाऽसिद्धेः। यत्तु भिन्नसत्तासद्भावे तत्संबन्धात् सत्प्र- ३० त्ययविषयत्वे[11] च शब्दादेः प्रयोगद्वयमुपन्यस्तम्[12]। तत्र यदेव चेतनस्य सत्त्वं तदेव यच्चेतनस्यापि स्यात् तदा चेतनाचेतनेषु सत्प्रत्ययविषयत्वात् स्याद् भिन्नसत्तासंबन्धित्वम्, न च यदेव चेतनस्य सत्त्वं तदेवाचेतनस्य, तत्सदृशस्याऽपरस्यान्यत्र भावादिति सदृशपरिणामलक्षणं सामान्यं प्रतिपादयिष्यन्तो निर्णेष्यामः। तदेवं शब्दस्य गुणत्वासिद्धेः नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वासिद्धेरम्बरस्य, साधनविकलो दृष्टान्त इति स्थितम्। ३५

एतेनेदमपि प्रत्युक्तम् 'ज्ञानं परममहत्त्वोपेतद्रव्यसमवेतम्, विशेषगुणत्वे सति प्रदेशवृत्तित्वात्, शब्दवत्'। अत्रापि ज्ञानस्य परममहत्त्वोपेतद्रव्यसमवेतत्वे सति ततः शब्दस्य तत्सिद्धिः, तत्सिद्धेश्च ज्ञानस्य परममहत्त्वोपेतद्रव्यसमवेतत्वसिद्धिरितीतरेतराश्रयदोषः। न च दृष्टान्तान्तरमस्ति यतोऽन्यतरप्रसिद्धेरयमदोषः स्यात्। ज्ञानस्य चात्मनोऽव्यतिरेकित्वे तद्व्यापित्वम्, 'यद् यस्मादव्यतिरिक्तं तत् तत्स्वभावं यथाऽऽत्मस्वरूपम्, आत्माऽव्यतिरिक्तं चैतत्, ततस्तद्व्यापि' इति न ४०

१ पृ० १३६ पं० १२। २ पृ० १३४ पं० ४। ३ पृ० १०६ पं० १०। ४ पृ० १३४ पं० ६। ५ पृ० १३९ पं० २३। ६–यमान इ–गु०। ७ पृ० १३६ पं० १४। ८ पृ० ११० पं० २१। ९–द्भावासद्भावे त–वि०। १०–यत्वे च गु०, भा०। ११–षयाविषयत्वे च वि०।–षयविषयत्वे च कां०। १२ पृ० १३४ पं० १७–२०।

प्रदेशवृत्तित्वम्। तथापि तद्वृत्तित्वे ज्ञानेतरस्वभावतयाऽऽत्मनः अनेकान्तसिद्धिः। व्यतिरेके आत्मगुणत्ववदन्यगुणत्वस्याप्यप्रतिषेधाद् विशेषगुणत्वासिद्धिः। व्यतिरेकाविशेषेऽप्यात्मन एव गुणो ज्ञानं नाकाशादेरिति किंकृतोऽयं विशेषः ? समवायकृत इति चेत्, न; तस्यापि ताभ्यामर्थान्तरत्वे तदवस्थो दोषः, व्यतिरेके समवायस्य सर्वत्राविशेषाद् न ततोऽपि विशेषः। अव्यतिरेके तस्यैव अभाव इति न ततो विशेषः। न च समवायः संभवति इति प्रतिपादितम्। न चात्मनो व्यापित्वे नित्यत्वे च ज्ञानादिकार्यकारित्वमपि संभवति। तन्न तत्कार्यत्वादपि तद्विशेषगुणो ज्ञानम्। न चात्मनः प्रदेशाः सन्ति येन प्रदेशवृत्तित्वं ज्ञानस्य सिद्धं स्यात्। कल्पिततत्प्रदेशाभ्युपगमे च तद्वृत्तित्वमपि हेतुः कल्पित इति न कल्पितात् साधनात् साध्यसिद्धिर्युक्ता, सर्वतः सर्वसिद्धिप्रसङ्गात्। सन्दिग्धविपक्षव्यावृत्तिकत्वं च हेतोः विपर्यये बाधकप्रमाणावृत्त्याऽत्रापि समानमिति।

तथा, स्वदेहमात्रव्यापकत्वेन हर्ष–विषादाद्यनेकविवर्तात्मकस्य 'अहम्' इति स्वसंवेदनप्रत्यक्षसिद्धत्वादात्मनो विभुत्वसाधकत्वेनोपन्यस्यमानः सर्व एव हेतुः प्रत्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टः। सप्रतिपक्षश्चायं हेतुरित्यसत्प्रतिपक्षत्वमप्यस्य लक्षणमसिद्धम्। स्वदेहमात्रात्मप्रसाधकश्च प्रतिपक्षहेतुरत्रैव प्रदर्शयिष्यते। तन्नातोऽपि हेतोरात्मनो विभुत्वसिद्धिः।

यदप्यात्मनो विभुत्वसाधनं कैश्चिदुपन्यस्तम्–"अदृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते, एकद्रव्यत्वे सति क्रियाहेतुगुणत्वात्, यो य एकद्रव्यत्वे सति क्रियाहेतुगुणः स स स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते यथा वेगः, तथा चादृष्टम्, तस्मात् तदपि स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते इति। न चासिद्धं क्रियाहेतुगुणत्वम्, 'अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यक्पवनम्, अणु–मनसोश्चाद्यं कर्म देवदत्तविशेषगुणकारितम्, कार्यत्वे सति देवदत्तस्योपकारकत्वात्, पाण्यादिपरिस्पन्दवत्, एकद्रव्यत्वं चैकस्यात्मनस्तदाश्रयत्वात्, एकद्रव्यमदृष्टम्, विशेषगुणत्वात्, शब्दवत्'। 'एकद्रव्यत्वात्' इत्युच्यमाने रूपादिभिर्व्यभिचारस्तन्निवृत्त्यर्थम् 'क्रियाहेतुगुणत्वात्' इत्युक्तम्। 'क्रियाहेतुगुणत्वात्' इत्युच्यमाने मुशलहस्तसंयोगेन स्वाश्रयाऽसंयुक्तस्तम्भादिचलनहेतुना व्यभिचारः, तन्निवृत्त्यर्थम् 'एकद्रव्यत्वे सति' इति विशेषणम्। 'एकद्रव्यत्वे सति क्रियाहेतुत्वात्' इत्युच्यमाने स्वाश्रयासंयुक्तलोहादिक्रियाहेतुनाऽयस्कान्तेन व्यभिचारः, तन्निवृत्त्यर्थम् 'गुणत्वात्' इत्यभिधानम्" [ ]

एतदपि प्रत्यक्षबाधितप्रतिज्ञासाधकत्वेन एकशाखाप्रभवत्वानुमानवदनुमानाभासम्। 'एकद्रव्यत्वे' इति च विशेषणं किमेकस्मिन् द्रव्ये संयुक्तत्वात्, उत तत्र समवायात्? तत्र यद्याद्यः पक्षः, स न युक्तः; संयोगगुणेनादृष्टस्य गुणवत्त्वाद् द्रव्यत्वप्रसक्तेः 'क्रियाहेतुगुणत्वात्' इत्येतस्य बाधाप्रसङ्गात्। अथ द्वितीयः तदा द्रव्येण सह कथञ्चिदेकत्वमदृष्टस्य प्राप्तम्, न ह्यन्यस्यान्यत्र समवायः, घट रूपादिषु तस्य तथाभूतस्यैवोपलब्धेः। न हि घटाद् रूपादयः, तेभ्यो वा घटः, तदन्तरालवर्ती समवायश्च भिन्नः प्रतीतिगोचरः, अपि तु कथञ्चिद् रूपाद्यात्मकाश्च घटादयः तदात्मकाश्च रूपादयः प्रतीतिगोचरचारिणोऽनुभूयन्ते; अन्यथा गुण–गुणिभावेऽतिप्रसङ्गाद् घटस्यापि रूपादयः पटस्य स्युः। 'तेषां तत्राप्यप्रतीतेरितरेषां तु प्रतीतेः' इत्यादिकं प्रतिविहितत्वाद् नात्रोद्घोष्यम्। तेन समवायेनैकत्रात्मनि वर्तनादृष्टस्यैकद्रव्यत्वं वादि–प्रतिवादिनोरसिद्धम्, एकान्तभेदे समवायाभावेनैकद्रव्यत्वस्यासिद्धेः।

अथ गुणिनो गुणानामनर्थान्तरत्वे गुण—गुणिनोरन्यतर एव स्यात्, अर्थान्तरत्वे परपक्ष एव समर्थितः स्यादिति समवायः सिद्धः। कथञ्चिद्वादोऽपि न युक्तः अनवस्थादिदोषप्रसङ्गात्, अयुक्तमेतत्; पक्षान्तरेऽप्यस्य समानत्वात्। तथाहि—द्वित्वसंख्या–संयोगादिकमनेकेन द्रव्येणाभिसंबध्यमानं यदि सर्वात्मनाऽभिसंबध्यते द्वित्वसंख्यादिमात्रम् द्रव्यमात्रं वा स्यात्, एकेनैव वा द्रव्येण सर्वात्मनाऽभिसंबन्धाद् न द्रव्यान्तरेण तत्प्रतीतेः। अथैकेन देशेनैकत्र वर्ततेऽन्येनाऽन्यत्र, तेऽपि देशा यदि ततो भिन्नास्तेष्वपि स तथैव वर्तते इत्यनवस्था। अभिन्नाश्चेत् उक्तो दोषः। कथञ्चित्पक्षे परवाद एव समर्थितः स्यादित्यात्मना सहादृष्टस्य कथञ्चिदनन्यभाव एव एकद्रव्यत्वमित्यविभुत्वाद् गुणानां तदव्यतिरिक्तस्यात्मनोऽप्यविभुत्वमिति विपक्षसाधकत्वादेकद्रव्यत्वलक्षणस्य हेतुविशेषणस्य विरुद्धत्वम्।

'क्रियाहेतुगुणत्वात्' इत्यत्रापि यदि देवदत्तसंयुक्तात्मप्रदेशे वर्तमानमदृष्टं द्वीपान्तरवर्तिषु मुक्ताफलादिषु देवदत्तं प्रत्युपसर्पणवत्सु क्रियाहेतुः, तदयुक्तम्; अतिदूरत्वेन द्वीपान्तरवर्तिभिस्तैस्तस्यानभिसंबन्धित्वेन तत्र क्रियाहेतुत्वायोगात्, तथापि तद्धेतुत्वे सर्वत्र स्यात्, अविशेषात्। अथानभिसंबन्धाविशेषेऽपि यदेव योग्यं तदेव तेनाकृष्यते न सर्वमिति नातिप्रसङ्गः, न; चक्षुषोऽप्राप्यकारित्वेऽपि यदेव योग्यं तदेव तद्ग्राह्यमिति यदुक्तं परेण–"अप्राप्यकारित्वे चक्षुषो दूरव्यवस्थितस्यापि ग्रहणप्रसङ्गः" [ ] इत्ययुक्तं स्यात्। अथ स्वाश्रयसंयोगसंबन्धसम्भवात् 'अनभिसम्बन्धात्' इत्यसिद्धम्। तथाहि–यमात्मानमाश्रितमदृष्टं तेन संयुक्तानि देशान्तरवर्तिमुक्ताफलादीनि देवदत्तं प्रत्याकृष्यमाणानि, न; सर्वस्याऽऽकर्षणप्रसङ्गात् तेनाभिसम्बन्धाविशेषात्। न च यददृष्टेन यज्जन्यते तत् तेनाकृष्यत इति कल्पना युक्तिमती, देवदत्तशरीरारम्भकपरमाणूनां तददृष्टाजन्यत्वेनाऽनाकर्षणप्रसङ्गात्; तथाप्याकर्षणेऽतिप्रसङ्गः प्रतिपादित एव। यथा च कारणत्वाविशेषे घटदेशादौ सन्निहितमेव दण्डादिकं घटादिकार्यं जनयति अदृष्टं त्वन्यथेत्यभ्युपगमस्तथा बाह्येन्द्रियत्वाविशेषेऽपि त्वगिन्द्रियं प्राप्तमर्थमवभासयति लोचनं त्वन्यथेत्यभ्युपगमः किं न युक्तः ?

नापि द्वीपान्तरवर्तिमुक्तादिसंयुक्तात्मप्रदेशे वर्तमानं तं प्रत्युपसर्पणहेतुः, विकल्पानुपपत्तेः। तथाहि–यथा वायुः स्वयं देवदत्तं प्रत्युपसर्पणवान् अन्येषां तृणादीनां तं प्रत्युपसर्पणहेतुस्तथा यदृष्टमपि तं प्रत्युपसर्पत् स्वयमन्येषां तं प्रत्युपसर्पणहेतुः, तथा सत्यदृष्टस्येव मुक्तादेरपि तथैव तं प्रत्युपसर्पणाविरोधाद् व्यर्थमदृष्टपरिकल्पनम्। तथाभ्युपगमे च 'यद् देवदत्तं प्रत्युपसर्पति तद् देवदत्तगुणाकृष्टं तं प्रत्युपसर्पणात्' इति हेतुरनैकान्तिकः अदृष्टेनैव। वायुवच्च सक्रियत्वमदृष्टस्य गुणत्वं बाधते। शब्दवच्चापरापरस्योत्पत्तावपरमदृष्टं निमित्तकारणं तदुत्पत्तौ प्रसक्तम्, तत्राप्यपरमित्यनवस्था; अन्यथा शब्देऽपि किमदृष्टलक्षणनिमित्तपरिकल्पनया? अदृष्टान्तरात् तस्य तं प्रत्युपसर्पणे तदप्यदृष्टान्तरं तं प्रत्युपसर्पत्यदृष्टान्तरात्, तदपि तदन्तरादित्यनवस्था।

अथ तत्रस्थमेव तत् तेषां तं प्रत्युपसर्पणे हेतुः, तदपि न युक्तम्; अन्यत्र प्रयत्नादावात्मगुणे तथाऽदर्शनात्, न हि प्रयत्नो ग्रासादिसंयुक्तात्मप्रदेशस्थ एव हस्तादिसंचलनहेतुर्ग्रासादिकं देवदत्तमुखं प्रति प्रापयन् दृष्टः, अन्तरालप्रयत्नवैफल्यप्रसङ्गात्। अथ प्रयत्नवैचित्र्यदृष्टेरदृष्टेऽप्यन्यथा कल्पनम्। तथाहि-कश्चित् प्रयत्नः स्वयमपरापरदेशवानपरत्र क्रियाहेतुर्यथाऽनन्तरोदितः; अपरश्चान्यथा यथा शरासनाऽध्यासपदसंयुक्तात्मप्रदेशस्थ एव शरीरा(शरा)दीनां लक्ष्यप्रदेशप्राप्तिक्रियाहेतुः। यद्येवम्, इयं चित्रता एकद्रव्याणां क्रियाहेतुगुणानां स्वाश्रयसंयुक्तासंयुक्तद्रव्यक्रियाहेतुत्वेन किं नेष्यते विचित्रशक्तित्वाद् भावानाम्? तथाऽदृष्टेरिति नोत्तरम्, अयस्कान्तभ्रामकस्पर्शगुणस्यैकद्रव्यस्य स्वाश्रयाऽसंयुक्तलोहद्रव्यक्रियाहेतुत्वेऽप्याकर्षकाख्यद्रव्यविशेषव्यवस्थितस्य तथाविधस्यैव तस्य स्वाश्रयसंयुक्तलोहद्रव्यक्रियाहेतुत्वदर्शनात्। अथ द्रव्यं क्रियाकारणम् न स्पर्शादिगुणः, द्रव्यरहितस्य क्रियाहेतुत्वादर्शनात्, न; वेगस्य क्रियाहेतुत्वम्, क्रियायाश्च संयोगनिमित्तत्वम् तस्य च द्रव्यकारणत्वं तत एव न स्यात्, तथा च 'वेगवत्' इति दृष्टान्तासिद्धिः। अथ द्रव्यस्य तत्कारणत्वे वेगादिरहितस्यापि तत्प्रसक्तिः, स्पर्शादिरहितस्यायस्कान्तस्यापि स्पर्शस्याकारणत्वेऽन्यत्र क्रियाहेतुत्वप्रसक्तिः। तद्रहितस्य तस्यादृष्टेर्नायं दोषस्तर्हि लोहद्रव्यक्रियोत्पत्तावुभयं दृश्यत इत्युभयं तदस्तु, अविशेषात्। एवं सति 'एकद्रव्यत्वे सति क्रियाहेतुगुणत्वात्' इति व्यभिचारी हेतुः।

---

१ पृ० १०६ पं० १०। २ स्तम्भादौ दृढसंलग्नं किमपि द्रव्यं हस्तेनाऽऽकृष्य ततो विभज्यमानं तस्यैव स्तम्भादेश्चलननिमित्तीभवति इत्यनुभवसिद्धम्। ३–**ख्यायोगा**–वा०, बा० विना। ४ **सर्वेणात्म**–वा०, बा०, आ०, वि०।

१–**ष्वपि तथै**–गु०। २ अस्य परकीयवाक्यस्य आशयः न्यायवार्तिके पृ० ३३ पं० २४। ३–**कारि च**–वि०। ४ प्र० पृ० पं० १२। ५–**स एव सं**–वि०। ६ अत्र स्थले प्रमेयकमलमार्तण्डेऽपि "यथा शरासनाध्यासपदसंयुक्तात्मप्रदेशस्थ एव शरीरादीनां लक्ष्यप्रदेशप्राप्तिहेतुरिति" इत्येव पाठः–पृ० १७२ द्वि०, पं० १५। तथापि 'शरादीनाम्' इति सम्यग् भाति, वि० प्रतावपि संशोधितः पाठः तथैव उपलभ्यते। ७ अयस्कान्तगतो यो भ्रामकः स्पर्शगुणस्तस्येत्यर्थः। ८–**स्य तस्य क्रि**–कां०। ९ अत्र 'तर्हि' पदमध्याहार्यम्।

एतेन यदुक्तं परेण-"अदृष्टमेवायस्कान्तेनाकृष्यमाणलोहदर्शने सुखवत्पुंसो निःशल्यत्वेन तत्क्रियाहेतुः" [ ] इति तन्निरस्तम्, सर्वत्र कार्यकारणभावेऽस्य न्यायस्य समानत्वात् अदृष्टमेव कारणं स्यात्, यस्य शरीरं सुखं दुःखं चोत्पादयति तददृष्टमेव तत्र हेतुरिति न तदारम्भकावयवक्रियासंयोगादयः। अपि च, तददृष्टस्य कथं तद्धेतुत्वम्? तस्य भावे भावादभावेऽभावादिति चेत्, किं पुनरयस्कान्तस्पर्शाद्यभाव एव तत्क्रिया दृष्टा येनैषां तत्र कारणत्वाकृप्तिः? ततो न दृष्टानुसारेण तत्रस्थस्यैवादृष्टस्य तं प्रति तत्क्रियाहेतुत्वम्। प्रयत्नवैचित्र्याभ्युपगमे च हेतोरनैकान्तिकत्वम्।

अथ सर्वत्रादृष्टस्य वृत्तिस्तर्हि सर्वद्रव्यक्रियाहेतुत्वम्। यददृष्टं यद् द्रव्यमुत्पादयति तत् तत्रैव क्रियामुपरचयतीत्यभ्युपगमे शरीरारम्भकेषु परमाणुषु ततः क्रिया न स्यादित्युक्तम्। न च गुणत्वमप्यदृष्टस्य सिद्धमिति 'क्रियाहेतुगुणत्वात्' इत्यसिद्धो हेतुः। अथ 'अदृष्टं गुणः, प्रतिषिध्यमानद्रव्य-कर्मभावे सति सत्तासंबन्धित्वात्, रूपादिवत्' न च प्रतिषिध्यमानद्रव्यत्वमसिद्धम्। तथाहि—'न द्रव्यमदृष्टम्, एकद्रव्यत्वात्, रूपादिवत्' इति, असदेतत्; एकद्रव्यत्वस्यासिद्धताप्रतिपादनात्, सत्तासंबन्धित्वस्य चेति। यदपि तद्गुणत्वसाधनमुक्तम् 'देवदत्तं प्रत्युपसर्पन्तः पश्वादयो देवदत्तविशेषगुणाकृष्टाः, तं प्रत्युपसर्पणवत्त्वात्, ग्रासादिवत्' इति, तदप्ययुक्तम्; यतो यथा तद्विशेषगुणेन प्रयत्नाख्येन समाकृष्टास्तं प्रत्युपसर्पन्तो ग्रासादयः समुपलभ्यन्ते तथा नयनाञ्जनादिद्रव्यविशेषेणापि समाकृष्टाः स्त्र्यादयस्तं प्रत्युपसर्पन्तः समुपलभ्यन्ते एव, ततः 'किं प्रयत्नसधर्मणा केनचिदाकृष्टाः पश्वादयः, उत नयनाञ्जनादिसधर्मणा' इति संदेहः, शक्यते ह्येवमनुमानमारचयितुं परेणापि-'नयनाञ्जनादिसधर्मणा विवादगोचरचारिणः पश्वादयः समाकृष्टाः देवदत्तं प्रत्युपसर्पन्ति, तं प्रत्युपसर्पणवत्त्वात्, स्त्र्यादिवत्'। अथ तदभावेऽपि प्रयत्नादपि तद्दृष्टेरनैकान्तिकत्वम्, प्रयत्नसधर्मणो गुणस्याभावेऽप्यञ्जनादेरपि तद्दृष्टेर्भवदीयहेतोरनैकान्तिकत्वम्। न चात्रानुमीयमानस्य प्रयत्नसधर्मणो हेतोः सद्भावाद्व्यभिचारः, अन्यत्राप्यञ्जनादिसधर्मणोऽनुमीयमानस्य सद्भावेनाव्यभिचारप्रसङ्गात्। तत्र प्रयत्नसामर्थ्यादस्य वैफल्येऽन्यत्राप्यञ्जनादिसामर्थ्याद् वैफल्यं समानम्। अथाञ्जनादेरेव तद्धेतुत्वे सर्वस्य तद्वतः स्त्र्याद्याकर्षणप्रसक्तिः, न चाञ्जनादौ सत्यप्यविशिष्टे तद्वतः सर्वान् प्रति तदागमनम्, ततोऽवसीयते 'तदविशेषेऽपि यद्वैकल्यात् तन्नेति तदपि कारणम् नाञ्जनादिमात्रम्' इति। तदेतत् प्रयत्नकारणेऽपि समानम्; न हि सर्वं प्रयत्नवन्तं प्रति ग्रासादय उपसर्पन्ति, तदपहारादिदर्शनात्। ततोऽत्राप्यन्यत् कारणमनुमीयताम्; अन्यथा न प्रकृतेऽपि, अविशेषात्। ततः प्रयत्नवदञ्जनादेरपि तं प्रति तदाकर्षणहेतुत्वात् कथं न संदेहः? अञ्जनादेः स्त्र्याद्याकर्षणं प्रत्यकारणत्वे गन्धादिवत् तदर्थिनां न तदुपादानम्। न च दृष्टसामर्थ्यस्याप्यञ्जनादेः कारणत्वकृप्तिपरिहारेणान्यकारणत्वकल्पने भवतोऽनवस्थामुक्तिः। अथाञ्जनादिकमदृष्टसहकारित्वात् तत्कारणं न केवलमिति; नन्वेवं सिद्धमदृष्टवदञ्जनादेरपि तत्र कारणत्वम्, ततः संदेह एव 'किं ग्रासादिवत् प्रयत्नसधर्मणाऽऽकृष्टाः पश्वादयः, किं वा स्त्र्यादिवदञ्जनादिसधर्मणा तत्संयुक्तेन द्रव्येण' इति संदिग्धं 'गुणत्वात्' इत्येतत् साधनम्। सपरिस्पन्दात्मप्रदेशमन्तरेण ग्रासाद्याकर्षणहेतोः प्रयत्नस्यापि देवदत्तविशेषगुणस्य परं प्रत्यसिद्धत्वात् साध्यविकलता चात्र दृष्टान्तस्य।

यच्च 'यद् देवदत्तं प्रत्युपसर्पति' इत्युक्तं तत्र कः पुनरसौ देवदत्तशब्दवाच्यः? यदि शरीरम्, तदा शरीरं प्रत्युपसर्पणात् शरीरगुणाकृष्टाः पश्वादय इत्यात्मविशेषगुणाकृष्टत्वे साध्ये शरीरगुणाकृष्टत्वस्य साधनाद् विरुद्धो हेतुः। अथात्मा, तस्य समाकृष्यमाणपदार्थदेश-कालाभ्यां सदाऽभिसंबन्धाद् न तं प्रति कस्यचिदुपसर्पणम्, अन्यदेशं प्रत्यन्यदेशस्योपसर्पणदर्शनात् अन्यकालं प्रत्यन्यकालस्य च, यथाङ्कुरं प्रत्यपरापरशक्तिपरिणामप्राप्तेर्बीजादेः। न चैतदुभयं नित्यव्यापित्वाभ्यामात्मनि सर्वत्र सर्वदा सन्निहिते संभवति अतो 'देवदत्तं प्रत्युपसर्पन्तः' इति धर्मिविशेषणम्, 'देवदत्तगुणाकृष्टाः' इति साध्यधर्मः, 'देवदत्तं प्रत्युपसर्पणवत्त्वाद्' इति साधनधर्मः परस्य स्वरुचिरुचितमेव। न च शरीरसंयुक्त आत्मा सः, तस्यापि नित्यव्यापित्वेन तत्र सन्निधानेनानिवार-

१-यस्यास-वा०, बा०। २-त्राहे-वा०, बा०। ३ पृ० १४३ पं० १४। ४ पृ० १४१ पं० ४। ५ पृ० १४१ पं० २९। ६ पृ० १३७ पं ३५। ७ पृ० १३७ पं० ३६। ८-रूपविधिरुचि-वा०, बा०। ९—चिविरचि-मां०, भां०।

णात्; न हि घटयुक्तमाकाशं मेर्वादौ न सन्निहितम्। अथ शरीरसंयुक्त आत्मप्रदेशो देवदत्तः, स काल्पनिकः, पारमार्थिको वा? काल्पनिकत्वे 'काल्पनिकात्मप्रदेशगुणाकृष्टाः पश्वादयः, तथाभूतात्मप्रदेशं प्रत्युपसर्पणवत्त्वात्' इति तद्गुणानामपि काल्पनिकत्वं साधयेत्। तथा च सौगतस्येव तद्गुणकृतः प्रेत्यभावोऽपि न पारमार्थिकः स्यात्, न हि कल्पितस्य पावकस्य रूपादयः तत्कार्यं वा दाहादिकं पारमार्थिकं दृष्टम्। पारमार्थिकाश्चेदात्मप्रदेशाः, तेऽपि यदि ततोऽभिन्नास्तदात्मैव ते इति न पूर्वोक्तदोषपरिहारः। भिन्नाश्चेत् तर्हि तद्विशेषगुणाकृष्टाः पश्वादय इति तेषामेवात्मत्वप्रसक्तिरित्यन्यात्मपरिकल्पना व्यर्था। तेषां च न द्वीपान्तरवर्तिभिर्मुक्तादिभिः संयोग इति 'अदृष्टं स्वाश्रयसंयुक्तेऽन्यत्र क्रियाहेतुः' इति व्याहतम्। संयोगे वा आत्मवत् इत्यनिवृत्तो व्याघातः। अथ तेषामप्यपरे शरीरसंयुक्ताः प्रदेशाः देवदत्तशब्दवाच्याः, तत्राप्यनन्तरदूषणमनवस्थाकारि। अथात्मानमन्तरेण कस्य ते प्रदेशाः स्युरिति तत्प्रदेश्यपर आत्मेत्यभ्युपगमनीयम्। नन्वर्थान्तरभूतत्वे आत्मनः कथं 'तस्य ते' इति व्यपदेशः? अथ तेषु तस्य वर्तनात् तथा व्यपदेशः, न सदेतत्; तथाऽभ्युपगमेऽवयविपक्षभाविदूषणावकाशात्। यथा च तेषां सदूषणत्वं तथा प्रतिपादितम् प्रतिपादयिष्यते चेत्यास्तां तावत्। तन्न परस्य देवदत्तशब्दवाच्यः कश्चिदस्ति यं प्रत्युपसर्पणवन्तः पश्वादयः स्वक्रियाहेतोर्गुणत्वं साधयेयुः। अतो नैतदपि साधनमात्मनो विभुत्वप्रसाधकम्।

यदपि 'सर्वगत आत्मा, सर्वत्रोपलभ्यमानगुणत्वात्, आकाशवत्' इति साधनम्, तदप्यचारु; यतो यदि 'स्वशरीरे सर्वत्रोपलभ्यमानगुणत्वात्' इति हेतुस्तथा सति तत्रैव ततस्तस्य सर्वगतत्वसिद्धेर्विरुद्धो हेत्वाभासः। अथ स्वशरीरवत् परशरीरे अन्यत्र वोपलभ्यमानगुणत्वं हेतुस्तदाऽसिद्धः, तथोपलम्भाभावात्—न हि बुद्ध्यादयस्तद्गुणास्तथोपलभ्यन्ते, अन्यथा सर्वसर्वज्ञताप्रसङ्गः। अथैकनगरे उपलब्धा बुद्ध्यादयो नगरान्तरेऽप्युपलभ्यन्ते, मनुष्यजन्मवज्जन्मान्तरेऽपीति कथं न सर्वत्रोपलभ्यमानगुणत्वम्? न; वायोरपि स्पर्शविशेषगुण एकत्रैकदोपलब्धोऽन्यत्रान्यदोपलभ्यमानस्तस्यापि सर्वगतत्वं प्रसाधयेत्, अन्यथा तेनैव हेतोर्व्यभिचारः। अथ तांस्तान् देशान् क्रमेण गतस्य तस्य तेन उपलभ्यते, आत्मनोऽपि तथैव तद्गुणस्योपलम्भः इति समानं पश्यामः। न च तद्वत् तस्यापि सक्रियत्वप्रसक्तेरयुक्तमेवं कल्पनमिति वाच्यम्, इष्टत्वात्।

अथ लोष्टवत् ततो मूर्तत्वप्रसङ्गस्तस्य दोषः। ननु केयं मूर्तिः? असर्वगतद्रव्यपरिमाणं सेति चेत् नायं दोषः, असर्वगतात्मवादिनोऽभीष्टत्वात्। रूप-रस-गन्ध-स्पर्शवत्त्वं सेति चेत्, न तादृशीं मूर्तिमात्मनः सक्रियत्वं साधयति, व्याप्त्यभावात्; रूपादिमन्मूर्त्यभावे सक्रियत्वात्। 'यो यः सक्रियः स रूपादिमन्मूर्तिमान्, यथा शरः, तथा चात्मा, तस्माद् रूपादिमन्मूर्तिमान्' इति कथं न व्याप्तिसंभवः? असदेतत्; मनसाऽपि व्यभिचारात्। न च तस्यापि पक्षीकरणम्, 'रूपादिविशेषगुणानधिकरणं सद् मनोऽर्थं प्रकाशयति, शरीराद्यर्थान्तरत्वे सति सर्वत्र ज्ञानकारणत्वात्, आत्मवत्' इत्यनुमानविरोधप्रसङ्गात्। न च सक्रियत्वं रूपादिमन्मूर्त्यभावेन विरुद्धं यतः ततस्तन्निवर्तमानमात्मनि तथाविधां मूर्तिं साधयेत्। न च तथाविधमूर्तिरहितेऽम्बरादौ तददर्शनात् सिद्धो विरोधः, एकशाखाप्रभवत्वस्याप्यन्यत्र पक्षेऽदर्शनाद् विरोधसिद्धिप्रसक्तेः। पक्ष एव व्यभिचारदर्शनात् सा तत्र नेति चेत्, न; सक्रियत्वस्यापि तथा व्यभिचारः समानः, पक्षीकृत एवात्मनि रूपादिमन्मूर्तिरहिते तद्दर्शनात्। अनेनैव तत्साधनाद् न व्यभिचार इत्येकशाखाप्रभवत्वानुमानेऽपि समानम्। प्रत्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टत्वमुभयत्र तुल्यम्। तन्न सक्रियत्वमात्मनो रूपादिमन्मूर्तित्वं साधयतीति व्यवस्थितम्।

अथ सक्रियत्वे तस्यानित्यत्वम्। तथाहि—'यत् सक्रियं तद् अनित्यम्, यथा लोष्टादि, तथा चात्मा, तस्मादनित्यः' इति, एतदपि न सम्यग्; परमाणुभिरनैकान्तिकत्वात्; कथञ्चिदनित्यत्वस्ये-

१ पृ० १४४ पं० ४१। २ पृ० १४२ पं० १५। ३ प्र० पृ० पं० २। ४ पृ० १०२ पं० ११। ५-भावेऽपि न भां०, मां०। ६-तः तन्निव-आ०, वि०, हा०। ७-रहितास्व-आ०, वि०, हा०, कां०, अ०। ८-न्यथा प-मां०, भां०।-न्यत्राप-वि०। ९-धशक्तिप्र-वा०, बा० विना।

ष्टत्वात् सिद्धसाधनं च। सर्वात्मनाऽनित्यत्वस्य लोष्टादावप्यसिद्धत्वात् साध्यविकलता दृष्टान्तस्य। तन्न सर्वत्रोपलभ्यमानगुणत्वमात्मनः सिद्धम्।

अपरे सर्वत्रोपलभ्यमानगुणत्वमात्मनोऽतोऽनुमानात् साधयन्ति—"देवदत्तोपकरणभूतानि मणि-मुक्ताफलादीनि द्वीपान्तरसंभूतानि देवदत्तगुणकृतानि, कार्यत्वे सति देवदत्तोपकारकत्वात्, शकटादिवत्। न च तद्देशेऽसन्निहिता एव तद्गुणास्तान् व्युत्पादयितुं समर्थाः, न हि पटदेशेऽसन्निधानवन्तस्तन्तु-तुरि-कुविन्दादयः पटमुत्पादयितुं क्षमाः। आत्मगुणानां च तद्देशसन्निधानं न तद्गुणिसन्निधिमन्तरेण संभवि, अगुणत्वप्राप्तेः, ततस्तस्यापि तद्देशत्वम्" [ ]असदेतत्, तत्कार्यत्वेऽपि तेषां न 'अवश्यतया कार्यदेशसन्निधिमद् निमित्तकारणम्' इति नियम उपलब्धिगोचरः, अन्यदेशस्यापि ध्यानादेर्न्यस्थितविषाद्यपनयनकार्यकर्तृत्वस्योपलब्धिविषयत्वात्। तन्नातोऽपि सर्वत्रोपलभ्यमानगुणत्वसिद्धिरित्यसिद्धो हेतुः।

एतेन 'विभुत्वाद् महानाकाशः तथा चात्मा' इति निरस्तम्, विभुत्वस्यात्मन्यसिद्धेः। तथाहि–सर्वैर्मूर्त्तैर्युगपत्संयोगो विभुत्वम्। न च सर्वमूर्त्तिमद्भिर्युगपत्संयोगस्तस्य सिद्धः। अथैकदेशवृत्तिविशेषगुणाधारत्वात् तस्य सर्वमूर्त्तैर्युगपत्संयोग आकाशस्येव सिद्धः, असदेतत्; एकदेशवृत्तिविशेषगुणाधिष्ठानत्वस्य साधनस्य सर्वमूर्त्तिमत्संयोगाधारत्वस्य च साध्यस्याकाशेऽप्यसिद्धेरुभयविकलो दृष्टान्तः। न चात्मदृष्टान्तादाकाशे साध्य-साधनोभयधर्मसम्बन्धित्वं सिद्धमिति शक्यं वक्तुम्, इतरेतराश्रयदोषप्रसङ्गात्।

यदपि 'विभुरात्मा, अणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वात्, यद् यद् अणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यं तत् तद् विभु, यथाऽऽकाशम्, तथा चात्मा, तस्माद् विभुः' इति, तदप्यसारम्; तन्नित्यत्वासिद्धेर्हेतोरसिद्धत्वात्, अणुपरिमाणानधिकरणत्वस्य च विशेषणस्यात्मनो द्रव्यत्वासिद्धेरसिद्धिः, तदसिद्धिश्च इतरेतराश्रयदोषप्रसक्तेः। तथाहि–अणुपरिमाणान्यगुणस्य गुणत्वे सिद्धेऽनाधारस्य तस्यासम्भवादात्मनो गुणवत्त्वेन द्रव्यत्वसिद्धिः, तत्सिद्धौ च तदाश्रितत्वेनाणुपरिमाणान्यगुणस्य गुणत्वसिद्धिरिति व्यक्तमितरेतराश्रयत्वम्। न चाकाशस्याप्यणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वं विभुत्वं च सिद्धमिति साध्य-साधनविकलो दृष्टान्तः। न चात्मदृष्टान्तबलात् तस्य तदुभयधर्मयोगित्वं सिद्धमिति वक्तुं युक्तम्, अत्रापीतरेतराश्रयदोषप्रसङ्गस्य व्यक्तत्वात्। अपि च, अणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वं च भविष्यत्यविभुत्वं च, विपक्षे हेतोर्बाधकप्रमाणासत्त्वेन ततो व्यावृत्त्यसिद्धेः सन्दिग्धानैकान्तिकश्च हेतुः। न च विपक्षे हेतोरदर्शनं बाधकं प्रमाणम्, सर्वाऽऽत्मसम्बन्धिनस्तस्यासिद्धाऽनैकान्तिकत्वप्रतिपादनात्।

अपि च, आत्मनः स्वदेहमात्रव्यापकत्वेन सुख-दुःखादिपर्यायाक्रान्तस्य स्वसंवेदनाध्यक्षसिद्धत्वात् तद्विभुत्वसाधकस्य हेतोरध्यक्षबाधितपक्षानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टत्वम्। अन्यस्य च 'अहम्' इत्यध्यक्षसिद्धस्य प्रमाणाविषयत्वेनाऽसत्त्वादाश्रयासिद्धो हेतुरिति। अनया दिशाऽन्येऽपि तद्विभुत्वसाधनायोपन्यस्यमाना हेतवो निराकर्त्तव्याः, अस्य निराकरणप्रकारस्य सर्वेषु तत्साधकहेतुषु समानत्वात्। तन्नात्मनः कुतश्चिद्विभुत्वसिद्धिः।

अथापि स्यात् यथास्माकं तद्विभुत्वसाधकं प्रमाणं न सम्भवति तथा भवतामपि तदविभुत्वसाधकप्रमाणाभाव इति नानुपमसुखस्थानोपगतिस्तेषां सिद्धेति तदवश्यं चोद्यम्; न हि परपक्षे दोषोद्भावनमात्रतः स्वपक्षाः सिद्धिमुपगच्छन्ति अन्यत्र स्वपक्षसाधकत्वलक्षणपरप्रयुक्तहेतुविरुद्धतोद्भावनात्, न चासौ भवता प्रदर्शितेति, न सम्यगेतत्; तदभावासिद्धेः। तथाहि–'देवदत्तात्मा देवदत्तशरीरमात्रव्यापकः, तत्रैव व्याप्योपलभ्यमानगुणत्वात्, यो यत्रैव व्याप्योपलभ्यमानगुणः स तन्मात्रव्यापकः, यथा देवदत्तस्य गृहे एव व्याप्योपलभ्यमानभास्वरत्वादिगुणः प्रदीपः, देवदत्तशरीर एव व्याप्योपलभ्यमानगुणस्तदात्मा' इति। तदात्मनो हि ज्ञानादयो गुणास्ते च तद्देह एव व्याप्योपलभ्यन्ते, न परदेहे, नाप्यन्तराले।

अत्र केचिद्धेतोरसिद्धतामुद्भावयन्तः "शरीरान्तरेऽपि तदङ्गनासम्बन्धिनि तद्गुणा उपलभ्यन्ते इत्यभिदधति। तथाहि–'देवदत्ताङ्गनाङ्गं देवदत्तगुणपूर्वकम्, कार्यत्वे सति तदुपकारकत्वात्,

१–तत् कार्य–वा० बा० विना। २–रव्यवस्थित–वा०, बा०। ३ चान्यद–कां०।

प्रासादिवत्'। कार्यदेशे च सन्निहितं कारणं तज्जनने व्याप्रियतेऽन्यथाऽतिप्रसङ्गादिति तदङ्गनाङ्गप्रादुर्भावदेशे तत्कारणतद्गुणसिद्धिः। तथा, तदन्तराले च प्रतीयन्ते। तथाहि–अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यक् पवनं तद्गुणपूर्वकम्, कार्यत्वे सति तदुपकारकत्वात्, वस्त्रादिवत्। यत्र च तद्गुणास्तत्र तद्गुण्यप्यनुमीयत इति 'स्वदेह एव देवदत्तात्मा' इति प्रतिज्ञा अनुमानबाधिता। ततोऽनुमानबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टो हेतुः" [ ]

ननु केऽत्र देवदत्तात्मगुणा ये तदङ्गनाङ्गे तदन्तराले च प्रतीयन्ते? यदि ज्ञान-दर्शन-सुख-वीर्यस्वभावाः–"सहवर्तिनो गुणाः" [ ] इति वचनात्–इति पक्षः, स न युक्तः; ज्ञान-दर्शन-सुखानि संवेदनरूपाणि न तदङ्गनाङ्गजन्मनि व्याप्रियमाणानि प्रतीयन्ते; नापि सत्तामात्रेण तद्देशे प्रतीतिगोचराणि। वीर्यं तु शक्तिः क्रियानुमेया; साऽपि तद्देह एवानुमीयते, तत्रैव तल्लिङ्गभूतपरिस्पन्ददर्शनात्। तस्याश्च तदङ्गनादेहनिष्पत्तौ देवदत्तस्य भार्या दुहिता स्यात्। ततस्तज्ज्ञानादेस्तद्देह एव तत्कार्यजननविमुखस्य प्रतीतेः प्रत्यक्षतः तद्बाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टः 'कार्यत्वे सति तदुपकारकत्वात्' इति हेतुः।

अथ धर्माऽधर्मौ तदङ्गनादिकार्यनिमित्तं तद्गुणः, तदयुक्तम्; न धर्माऽधर्मौ तदात्मनो गुणौ, अचेतनत्वात्, शब्दादिवत्। न सुखादिना व्यभिचारः, तत्र हेतोरवर्तनात्–तद्विरुद्धेन स्वसंवेदनलक्षणचैतन्येन तस्य व्याप्तत्वात् अभिमतपदार्थसम्बन्धसमय एव स्वसंवेदनरूपाह्लादस्वभावस्य तदात्मनोऽनुभवात्, अन्यथा सुखादेः स्वयमननुभवात् अनवस्थादोषप्रसङ्गात् अन्यज्ञानेनाप्यनुभवे सुखस्य परलोकप्रख्यताप्रसक्तिः। प्रसाधितं चैतत् प्राक्।

न चासिद्धता 'अचेतनत्वात्' इति हेतोः। तथाहि–अचेतनौ तौ, अस्वसंविदितत्वात्, कुम्भवत्। न बुद्ध्याऽस्य व्यभिचारः, अस्याः स्वसंवेदनसाधनात्–'स्वग्रहणात्मिका बुद्धिः, अर्थग्रहणात्मकत्वात्, यत् स्वग्रहणात्मकं न भवति न तद् अर्थग्रहणात्मकम्, यथा घटः' इति व्यतिरेकी हेतुः।

न च धर्माऽधर्मयोर्ज्ञानरूपत्वाद् बौद्धदृष्ट्या ज्ञानस्य च स्वग्रहणात्मकत्वादसिद्धो हेतुरिति वक्तव्यम्, तयोः स्वरूपग्रहणात्मकत्वे सुखादाविव विवादाभावप्रसक्तेः। अस्ति चासौ अनुमानोपन्यासान्यथानुपपत्तेस्तत्र। न च लौकिक-परीक्षकयोः 'प्रत्यक्षं कर्म' इति व्यवहारेऽसिद्धम्। न चाविकल्पबोधविषयत्वात् स्वग्रहणात्मकत्वेऽपि तयोर्विवादः क्षणिकत्वादिवत्, तथाऽनिश्चयात् तद्विषयेऽतिप्रसङ्गात्। तथाहि–अविकल्पकाध्यक्षविषयं जगत् जन्तुमात्रस्य; तथाऽनिश्चयस्तु क्षणिकत्ववत् निर्विकल्पकाध्यक्षविषयत्वात्। न च मूषिकालर्कविषविकारवत् तदनन्तरं तत्फलादर्शनान्न तद्दर्शनव्यवहार इति, स्वसत्तासमये स्वकार्यजननसामर्थ्यं तस्य तदैव तत्कार्यमिति तदनन्तरं तद्दृष्टिप्रसक्तेः अन्यदा तु स एव नास्तीति कुतस्ततस्तस्य भावः?

अथ तयोरचेतनत्वेऽपि तदात्मगुणत्वे को विरोधः? अचेतनस्य चेतनात्मगुणत्वमेवं। चेतनश्च तदात्मा स्वपरप्रकाशकत्वात् अन्यथा तदयोगात् कुड्यादिवत्। न च धर्माऽधर्मयोरभावादाश्रयासिद्धो हेतुः, अनुमानतस्तयोः सिद्धेः। तथाहि–चेतनस्य स्वपरज्ञस्य तदात्मनो हीनमातृगर्भस्थानप्रवेशः तत्सम्बद्धान्यनिमित्तः, अनन्यनेयत्वे सति तत्प्रवेशात्, मत्तस्याशुचिस्थानप्रवेशवत्, योऽसावन्यः स द्रव्यविशेषो धर्मादिरिति।

न च कस्यचित् पूर्वशरीरत्यागेन शरीरान्तरगमनाभावात् तत्प्रवेशोऽसिद्धः, अनुमानात् तत्सिद्धेः। तथाहि–तदहर्जातस्य स्तनादौ प्रवृत्तिस्तदभिलाषपूर्विका, तत्त्वात्, मध्यदशावत्। यथा च परलोकाऽऽगाम्यात्मा अनुमानात् सिद्धिमुपगच्छति तथा प्राक् प्रतिपादितम्। सुखसाधनजलादिदर्शनानन्तरोद्भूतस्मरणसहायेन्द्रियप्रभवप्रत्यभिज्ञानकमोपजायमानाभिलाषादेर्व्यवहारस्यैक-

१ पृ० १४६ पं० ३७। २ तद्देशप्र–बा०, वा०। ३–त्मगुणौ गु०। ४–रुद्धत्वेन वा०, बा० विना। ५–नुभावात् कां०, गु०, वि०। ६–रप्रसिद्धिः। भां०, मां०। ७–लर्कविका–गु०, वा०, बा०, हा०। ८–ननासामर्थ्ये त–गु०, भा०। –ननसमये त–वा०, बा०। ९–नात्मागु–वि०। –नागु–भा०, गु०। १०–व अचेतनश्च वा०, बा०। ११–नन्याने–वा०, बा०। १२ पृ० ७४ पं १९–पृ० ९२ पं० २०।

कर्तृपूर्वकत्वेन प्राक् प्रसाधितत्वात् नात्र प्रयोगे व्याप्त्यसिद्धिः। अत एव स्तनादिप्रवृत्तेरभिलाषः सिद्धिमासादयन् सङ्कलनाज्ञानं गमयति तदपि स्मरणम्, तच्च सुखादिसाधनपदार्थदर्शनम्। 'कारणव्यतिरेकेण कार्योत्पत्तौ तस्य निर्हेतुकत्वप्रसक्तिः' इति अत्र विपर्ययबाधकं प्रमाणं व्याप्तिनिश्चायकं प्रदर्शितम्। अपूर्वप्राणिप्रादुर्भावे च सर्वोऽप्ययं व्यवहारः प्रतिप्राणिप्रसिद्धः उत्सीदेत्, तज्जन्मनि सुखसाधनदर्शनादेरभावात्; न हि मातुरुदर एव स्तनादेः सुखसाधनत्वेन दर्शनं यतः प्रत्यग्रजातस्य तत्र स्मरणादिव्यवहारः सम्भवेदिति पूर्वशरीरसम्बन्धोऽप्यात्मनः सिद्धः।

न च मध्यावस्थायां सुखसाधनदर्शनादिक्रमेणोपजायमानोऽपि प्रवृत्यन्तो व्यवहारो जन्मादावन्यथा कल्पयितुं शक्यः विजातीयादपि गोमयादेः कारणाच्छालूकादेः कार्यस्योत्पत्तिदर्शनादिति वक्तुं शक्यम्, जलपाननिमित्ततृड्विच्छेदादावप्यनलनिमित्तत्वसम्भावनया तदर्थिनः पावकादौ प्रवृत्तिप्रसङ्गात् सर्वव्यवहारोच्छेदप्रसक्तेः।

अथ 'देहिनो देहाद् देहान्तरानुप्रवेशस्तदभिलाषपूर्वकः, गृहाद् गृहान्तरानुप्रवेशवत्' इत्यतोऽन्यथासिद्धो हेतुरिति न द्रव्यविशेषं साधयति। तदुक्तं सौगतैः—

"दुःखे विपर्यासमतिस्तृष्णा वाऽवन्ध्यकारणम्।
जन्मिनो यस्य ते न स्तो न स जन्माधिगच्छति" [ ]

इति, असदेतत्; इह जन्मनि प्राणिनां तदभिलाषस्य परलोकेऽभावान्न ततः स इति युक्तम्। नापि मनुष्यजन्मा हीनशुन्यादिगर्भसम्भवमभिलषति यतस्तत्र तत्सम्भवः स्यात्। तदेवं धर्माऽधर्मयोस्तदात्मगुणत्वनिषेधात् तन्निषेधानुमानबाधितमेतत् 'पावकाद्यूर्ध्वज्वलनादि देवदत्तगुणकारितम्' इति।

यत् पुनरुक्तम् 'गुणवद् गुणी अप्यनुमानतस्तद्देशेऽस्तीत्यनुमानबाधितस्वदेहमात्रव्यापकात्मकर्मनिर्देशानन्तरप्रयुक्तत्वेनाद्यो हेतुः कालात्ययापदिष्टः' इति, तदपि निरस्तम्; तत्र तत्सद्भावासिद्धेः। यच्चान्यत् 'कार्यत्वे सति तदुपकारकत्वात्' इति, तत्र किं तद्गुणपूर्वकत्वाभावेऽपि तदुपकारकत्वं दृष्टं येन 'कार्यत्वे सति' इति विशेषणमुपादीयेत सति सम्भवे व्यभिचारे च विशेषणोपादानस्यार्थवत्त्वात्? कालेश्वरादौ दृष्टमिति चेत्, न; कालेश्वरादिकमतद्गुणपूर्वकमपि यदि तदुपकारकम्, कार्यमपि किञ्चिदन्यपूर्वकं तदुपकारकं स्यादिति सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिको हेतुः। सर्वज्ञत्वाभावसाधने वागादिवन्निर्विशेषणस्यैव तस्याभिधाने को दोषः? व्यभिचारः कालेश्वरादिनेति चेत्, न; नित्यैकस्वभावात् कस्यचिदुपकाराभावात्। अपि च, शत्रुशरीरप्रध्वंसाभावस्तद्विपक्षस्योपकारको भवति सोऽपि तद्गुणनिमित्तः स्यात्। तदभ्युपगमे वा तत्र कार्यत्वासम्भवेन सविशेषणस्य हेतोरवर्त्तनाद् भागासिद्धो हेतुः। अतद्गुणनिमित्तत्वे तस्यान्यदप्यतद्गुणपूर्वकं तदुपकारकं तद्वदेव स्यादिति न तद्गुणसिद्धिः।

यत् पुनः 'प्रासादिवत्' इति निदर्शनम्, तत्र यदि तदात्मगुणो धर्मादिर्हेतुः, साध्यवत्प्रसङ्गः। प्रयत्नश्चेत्, न; तत्स्वरूपासिद्धेः–शरीराद्यवयवप्रविष्टानामात्मप्रदेशानां परिस्पन्दस्य चलनलक्षणक्रियारूपत्वान्न गुणत्वम्, तत्त्वे वा गमनादेरपि तत्त्वात् न कर्मपदार्थसद्भावः क्वचिदपीति न युक्तं 'क्रियावत्'इति द्रव्यलक्षणम्। निष्क्रियस्यात्मनो न स इति चेत्, कुतस्तस्य निष्क्रियत्वम्? अमूर्त्तत्वादिति चेत्, प्रत्यक्षनिराकृतमेतत्–प्रत्यक्षेण हि देशादेशान्तरं गच्छन्तमात्मानमनुभवति लोकः। तथा च व्यवहारः–'अहमद्य योजनमात्रं गतः' न च मनः शरीरं वा तद्व्यवहारविषयः, तस्याहंप्रत्ययावेद्यत्वात्। तदेवं परस्य साध्यविकलं निदर्शनमिति स्थितम्।

तेन यदुक्तम् 'यस्मात् तदात्मनो गुणा अपि दूरदेशभाविनि तदङ्गनाङ्गे अन्तराले चोपलभ्यन्ते तस्मात् सिद्धं तस्य सर्वत्रोपलभ्यमानगुणत्वम्, अतः 'सर्वगत आत्मा, सर्वत्रोपलभ्यमानगुणत्वात् आकाशवत्' इत्यनुमानबाधिता तदात्मस्वशरीरमात्रप्रतिज्ञा' इति, तन्निरस्तम्; सर्वेषां सर्वगतात्मप्रसाधकहेतूनां पूर्वमेव निरस्तत्वात्। अतो न स्वदेहमात्रव्यापकात्मप्रसाधकहेतोरसिद्धिः। नाप्यनुमानेन तत्पक्षबाधा। न च तद्देहव्यापकत्वेनैवोपलभ्यमानगुणोऽपि

१ पृ० ७६ पं० २२। २ न तु म–मां०, भां०। ३ पृ० १४७ पं० ३३। ४ पृ० १४७ पं० २। ५ पृ० १४७ पं० ४। ६ पृ० १४६ पं० ३७। ७ पृ० १४६ पं० ४२। ८ पृ० १४७ पं० १। ९ पृ० १४७ पं० ४।

तदात्मा सर्वगतो निजदेहैकदेशवृत्तिर्वा स्यात् अविरोधात् सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिको हेतुः इति युक्तम्; वाय्वादावपि तथाभावप्रसङ्गतः प्रतिनियतदेशसम्बद्धपदार्थव्यवहारोच्छेदप्रसक्तेः। तथाहि–यद् यथा प्रतिभाति तत् तथैव सद्व्यवहारपथमवतरति, यथा प्रतिनियत देश कालाऽऽकारतया प्रतिभासमानो घटादिकोऽर्थः, अन्यथा प्रतिभासमाननियतदेश कालाऽऽकारस्पर्शविशेषगुणोऽपि वायुः सर्वगतः स्यात्। न चात्र प्रत्यक्षबाधः, परेण तस्य परोक्षत्वोपवर्णनात्।

यदि च स्वदेहैकदेशस्थितः, कथं तत्र सर्वत्र सुखादिगुणोपलब्धिः? इतरथा सर्वत्रोपलभ्यमानगुणोऽपि वायुरेकपरमाणुमात्रः स्यात्। न च क्रमेण सर्वदेहभ्रमणात् तस्य तथा तत्रोपलब्धिः, युगपत् तत्र सर्वत्र सुखादेर्गुणस्योपलम्भात्। न चाशुवृत्तेर्यौगपद्याभिमानः, अन्यत्रापि तथाप्रसक्तेः–शक्यं हि वक्तुं घटादिरप्येकावयववृत्तिः आशुवृत्तेर्युगपत् सर्वेष्ववयवेषु प्रतीयते इति। अत एव सौगतोऽपि तत्रैकं निरंशं ज्ञानं कल्पयन्निरस्तः, प्रत्यवयवमनेकसुखादिकल्पने सन्तानान्तरवत् परस्परमसङ्कमात् अनुस्यूतैकप्रतीतिविलोपः 'सर्वत्र शरीरे मम सुखम्' इति। अथ युगपद्भाविभिरेकशरीरवर्त्तिभिरनेकनिरंशक्षणिकसुखसंवेदनैरेकपरामर्शविकल्पजननादयमदोषः, असदेतत्; अनेकोपादानस्य परामर्शविकल्पस्यैकत्वसम्भवे चार्वाकाभिमतैकशरीरव्यपदेशभागनेकपरमाणूपादानानेकविज्ञानभावेऽपि तद्विकल्पसम्भवात्। ततो यदुक्तं धर्मकीर्त्तिना तं प्रति "अनेकपरमाणूपादानमनेकं चेद् विज्ञानं सन्तानान्तरवदेकपरामर्शाभावः" [ ] इति, तत् तस्य न सुभाषितं स्यात्।

यच्च 'सावयवं शरीरम् प्रत्यवयवमनुप्रविशंस्तदात्मा सावयवः स्यात्, तथा, पटवत् समानजातीयारब्धत्वाच्च तद्वद् विनाशवांश्च स्यात्' इति, तदपि न सम्यक्; घटादिना व्यभिचारात्–घटादिर्हि सावयवोऽपि न तन्तुवत् प्राक्प्रसिद्धसमानजातीयकपालसंयोगपूर्वकः, मृत्पिण्डात् प्रथममेव स्वावयवरूपाद्यात्मनः प्रादुर्भावादिति निरूपयिष्यमाणत्वात्। अपि च, यदि तदात्मनः कथञ्चिद्विनाशः प्रतिपादयितुमिष्टः समानजातीयावयवारब्धत्वात् तदा सिद्धसाधनम्, तदभिन्नसंसार्यवस्थाविनाशेन तद्रूपतया तस्यापि नष्टत्वात्। अथ सर्वात्मना सर्वथा नाशः, स घटादावप्यसिद्ध इति साध्यविकलो दृष्टान्तः। यदि च तदहर्जातबालात्मा प्रागेकान्तेनाऽसंस्तथाऽवयवैरारभ्येत तदा स्तनादौ प्रवृत्तिर्न स्यात्, तदभिलाष–प्रत्यभिज्ञान–स्मरण–दर्शनादेरभावात्। तदारम्भकावयवानां प्राक्सतां विषयदर्शनादिकमिति चेत् तर्हि तेषामेव तदहर्जातवेलायां तन्वन्तराणामिव तत्र प्रवृत्तिः स्यान्नात्मनः, स्मरणाद्यभावात्। कारणगमने तस्यापि सर्वत्र सा स्यात्, "कारणसंयोगिना कार्यमवश्यं संयुज्यते" [ ] इति वचनात् न तस्य विषयानुभवाभावः; भेदैकान्ते चास्याः प्रक्रियायाः समवायनिषेधेन निषेधात्।

अथ कारणगुणप्रक्रमेण तत्र दर्शनादयो गुणा वर्ण्यन्ते, तेऽपि प्रागसन्त एव जायन्त इति, एवमपि न किंचित् परिहृतम्। एतेन "अवयवेषु क्रिया, क्रियातो विभागः, ततः संयोगविनाशः, ततोऽपि द्रव्यविनाशः" [ ] इति परस्याँकूतं पूर्वभवान्ते तथा तद्विनाशे आदिजन्मनि स्मरणाद्यभावप्रसङ्गान्निरस्तम्। न चायमेकान्तः—कटकस्य केयूरभावे कुर्तश्चिद् भागेषु क्रिया, विभागः, संयोगविनाशः, द्रव्यनाशः, पुनस्तदवयवाः केवलाः; तदनन्तरं कर्म–संयोगक्रमेण केयूरभावः प्रमाणगोचरचारी। केवलं सुवर्णकारव्यापारात् कटकस्य केयूरीभावं पश्यामः, अन्यथाकल्पने प्रत्यक्षविरोधः। न हि पूर्वं विभागः ततः संयोगविनाश इति, तद्भेदानुपलक्षणाच्चैतन्य–बुद्धिवत्।

१–म्बन्ध– वा०, बा०। २–भिरेव श–मां,० भां०। ३–ज्ञानाभावे–मां०, भां०। ४–वः पट–कां०, आ० विना। अत्र स्थले प्रमेयक०मार्तण्डे एवं पाठः–"यदप्युक्तम् सावयवं शरीरम् प्रत्यवयवमनुप्रविशंस्तदात्मा सावयवः स्यात् तथा च घटादिवत् समानजातीयावयवारभ्यत्वम्, समानजातीयत्वं चावयवानामात्मत्वाभिसंबन्धादित्येकत्राऽऽत्मन्यनन्तात्मसिद्धिः; यथा च अवयवक्रियातो विभागात् संयोगविनाशाद् घटविनाशस्तथाऽऽत्मविनाशोऽपि स्यात्"–पृ० १७६ प्र०, पं० ४। ५–ध्यविकलता दृष्टान्तस्य आ०, कां०, गु०। ६ परिवृतम्। वा०, बा०। ७ परस्याकूतमेतत् प्रशस्तपादभाष्ये इत्थमुपवर्णितम्—"पार्थिवपरमाणुरूपादीनां पाकजोत्पत्तिविधानम्–घटादेरामद्रव्यस्याग्निना संबद्धस्य अग्न्यभिघाताद्–तदारम्भकेष्वणुषु कर्माण्युत्पद्यन्ते, तेभ्यो विभागाः, विभागेभ्यः संयोगविनाशाः, संयोगविनाशेभ्यश्च कार्यद्रव्यं विनश्यति" –पृ० १८२ पं० १। ८ –तश्चिद्भावेषु क्रि–भा०, वा०, बा०।

न चैकान्तेन तस्याऽक्षणिकत्वे सुखसाधनदर्शनादयः सम्भवन्तीत्यसकृदावेदितमावेदयिष्यते चेत्यास्तां तावत् । ततो नानैकान्तिको हेतुः, विपक्षेऽसम्भवात् । अत एव न विरुद्धोऽपि इति भवत्यतः सर्वदोषरहितात् केशनखादिरहितशरीरमात्रव्यापकस्य विवादाध्यासितस्यात्मनः सिद्धिरिति साधूक्तम्– **'ठाणमणोवमसुहमुवगयाणं'** इति ॥

[मुक्तिस्वरूपवादः]

[पूर्वपक्षः—मुक्तौ आत्यन्तिकविशेषगुणोच्छेदस्य स्थापनम्]

यदपि 'आत्यन्तिकबुद्ध्यादिविशेषगुणोच्छेदविशिष्ट आत्मा मुक्तिः' इति, तदप्यप्रमाणकम्; अथ तथाभूतमुक्तिप्रतिपादकं प्रमाणं विद्यते । तथाहि—नवानामात्मविशेषगुणानां सन्तानोऽत्यन्तमुच्छिद्यते, सन्तानत्वात्, यो यः सन्तानः स सोऽत्यन्तमुच्छिद्यते, यथा प्रदीपसन्तानः, तथा चायं सन्तानः, तस्मादत्यन्तमुच्छिद्यते इति । सन्तानत्वस्य च व्याप्त्या बुद्ध्यादिषु सम्भवात् पक्षधर्मतयाऽसिद्धताऽभावः । तत्समानधर्मिणि धर्मिणि प्रदीपादावुपलम्भादविरुद्धत्वम् । न च विपक्षे परमाण्वादावस्तीत्यनैकान्तिकत्वाभावः, विपरीतार्थोपस्थापकयोः प्रत्यक्षाऽऽगमयोरनुपलम्भात् न कालात्ययापदिष्टः, न चायं सत्प्रतिपक्ष इति पञ्चरूपत्वात् प्रमाणम् ।

न च निर्हेतुकविनाशप्रतिषेधात् सन्तानोच्छेदे हेतुर्वाच्यः यतः समुच्छिद्यते इति, तत्त्वज्ञानस्य विपर्ययज्ञानव्यवच्छेदक्रमेण निःश्रेयसहेतुत्वेन प्रतिपादनात् । उपलब्धं च सम्यग्ज्ञानस्य मिथ्याज्ञाननिवृत्तौ सामर्थ्यं शुक्तिकादौ–न च मिथ्याज्ञानेनाप्युत्तरकालभाविना सम्यग्ज्ञानस्य विरोधः सम्भवति, सन्तानोच्छित्तेर्विवक्षितत्वात्। यथा हि सम्यग्ज्ञानाद् मिथ्याज्ञानसन्तानोच्छेदः नैवं मिथ्याज्ञानात् सम्यग्ज्ञानसन्तानस्य, तस्य सत्यार्थत्वेन बलीयस्त्वात्–निवृत्ते च मिथ्याज्ञाने तन्मूलत्वाद् रागादयो न भवन्ति कारणाभावे कार्यस्यानुत्पादात्, रागाद्यभावे च तत्कार्या प्रवृत्तिर्व्यावर्तते, तदभावे च धर्माधर्मयोरनुत्पत्तिः, आरब्धकार्ययोश्चोपभोगात् प्रक्षय इति सञ्चितयोश्च तयोः प्रक्षयस्तत्त्वज्ञानादेव । तदुक्तम्—

"यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते क्षणात् ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा" ॥ [भग० गी० अ० ४, श्लो० ३७]

अथोपभोगादपि प्रक्षये "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" [ ] इत्यागमोऽस्ति, तथा च विरुद्धार्थत्वादुभयोरेकत्रार्थे कथं प्रामाण्यम् ? उपभोगाच्च प्रक्षयेऽनुमानोपन्यासमपि कुर्वन्ति–'पूर्वकर्माण्युपभोगादेव क्षीयन्ते, कर्मत्वात्, यद् यत् कर्म तत् तद् उपभोगादेव क्षीयते, यथाऽऽरब्धशरीरं कर्म, तथा चैतत् कर्म, तस्मादुपभोगादेव क्षीयते' इति । न चोपभोगात् प्रक्षये कर्मान्तरस्यावश्यंभावात् संसारानुच्छेदः, समाधिबलादुत्पन्नतत्त्वज्ञानस्यावगतकर्मसामर्थ्योत्पादितयुगपदशेषशरीरद्वारावाप्ताशेषभोगस्य कर्मान्तरोत्पत्तिनिमित्तमिथ्याज्ञाननिजतानुसन्धानविकलस्य कर्मान्तरोत्पत्त्यनुपपत्तेः । न च मिथ्याज्ञानाभावेऽभिलाषस्यैवासम्भवाद् भोगानुपपत्तिः, तदुपभोगं विना कर्मणां प्रक्षयानुपपत्तेर्ज्ञानतोऽपि तदर्थितया प्रवृत्तेः वैद्योपदेशादातुरस्येवौषधाद्याचरणे, ज्ञानमप्येवमशेषशरीरोत्पत्तिद्वारेणोपभोगात् कर्मणां विनाशे व्यापारादग्निरिवोपचर्यत इति व्याख्येयम्, न तु साक्षात् । न चैतद् वाच्यम्–तत्त्वज्ञानिनां कर्मविनाशस्तत्त्वज्ञानात् इतरेषां तूपभोगादिति, ज्ञानेन कर्मविनाशे प्रसिद्धोदाहरणाभावात् । न च मिथ्याज्ञानजनितसंस्कारस्य सहकारिणोऽभावात् विद्यमानान्यपि कर्माणि न जन्मान्तरशरीराण्यारभन्ते इत्यभ्युपगमः श्रेयान्, अनुत्पादितकार्यस्य कर्मलक्षणस्य कार्यवस्तुनोऽप्रक्षयान्नित्यत्वप्रसक्तेः ।

अथ अनागतयोर्धर्माधर्मयोरुत्पत्तिप्रतिषेधे तज्ज्ञानिनो नित्य–नैमित्तिकानुष्ठानं कथम् ? प्रत्यवायपरिहारार्थम् । तदुक्तम्—

"नित्य–नैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत् ॥ [ ]

१–**कान्तिकेन** वा०, बा० । २ पृ० १३३ पं० २५ । ३ पृ० १३३ पं० २७ । ४–न्यायद० अ० १, आ० १, सू० १–२ । ५–**क्तेः** । **अनाग**–वा० बा०, मां०, भां० विना । ६–**प्रतिबन्धे तज्ज्ञा**–आ०, कां० ।

"अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः ।
केवलं काम्ये निषिद्धे च प्रवृत्तिप्रतिषेधतः" ॥ [ ]

तदुक्तम्—

"नित्य–नैमित्तिके कुर्यात् प्रत्यवायजिहासया ।
मोक्षार्थी न प्रवर्त्तेत तत्र काम्य–निषिद्धयोः" ॥ [ ] ५

अत एव विपर्ययज्ञानध्वंसादिक्रमेण विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्त्यभ्युपगमे न तत्त्वज्ञानकार्यत्वादनित्यत्वं वाच्यम्, विशेषगुणोच्छेदस्य प्रध्वंसत्वात् तदुपलक्षितात्मनश्च नित्यत्वादिति; कार्यवस्तुनश्चानित्यत्वम् । न च बुद्ध्यादिविनाशे गुणिनस्तथाभावः, तस्य तत्तादात्म्याभावात् ।

अथ मोक्षावस्थायां चैतन्यस्याप्युच्छेदान्न कृतबुद्धयस्तत्र प्रवर्त्तन्त इत्यानन्दरूपात्मस्वरूप एव मोक्षोऽभ्युपगन्तव्यः । यथा तस्य चित्स्वभावता नित्या तथा परमानन्दस्वभावताऽपि । न चात्मनः १० सकाशाच्चित्स्वभावत्वमानन्दस्वभावत्वं वाऽन्यत्, अनन्यत्वेन श्रुतौ श्रवणात् "विज्ञानमानन्दं ब्रह्म" [बृहदा० उ० अ० ३, ब्रा० ९, मं० २८] इति । तस्य तु परमानन्दस्वभावत्वस्य संसारावस्थायामविद्यासंसर्गादप्रतिपत्तिरात्मनोऽव्यतिरिक्तस्यापि, यथा रज्वादेर्द्रव्यस्य तत्त्वाग्रहणाऽन्यथाग्रहणाभ्यां स्वरूपं न प्रकाशते यदा त्वविद्यानिवृत्तिस्तदा तस्य स्वरूपेण प्रकाशनम्, एवं ब्रह्मणोऽपि तत्त्वाग्रहाऽन्यथाग्रहाभ्यां भेदप्रपञ्चसंसर्गादानन्दादिस्वरूपं न प्रकाशते मुमुक्षुयत्नेन तु यदाऽनाद्यविद्याव्यावृत्तिस्तदा स्वरूपप्रतिपत्तिः, सैव मोक्षः । अत एवोक्तम्— १५

"आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते" । [ ] इति, 'ब्रह्मणः' इति च सुखस्य षष्ठ्या व्यतिरेकाभिधानेऽपि न भेदस्तन्महत्त्ववत्, संसारावस्थायां त्वप्रतिभासात् तया तस्य व्यतिरेकाभिधानम् । यथा आत्मनो महत्त्वं निजो गुणो न च संसारावस्थायामात्मग्रहणेऽपि प्रतिभाति तद्वन्नित्यं सुखमविद्यासंसर्गात् मुक्तेः पूर्वमात्माऽव्यतिरिक्तं तद्धर्मो वा न प्रतिभाति । २० महत्त्ववत् सर्वैश्वर्यत्वं सदा प्रबुद्धत्वं सत्यसङ्कल्पादित्वं च ब्रह्मस्वभावमपि न प्रकाशते अविद्यासंसर्गात् । अनाद्यविद्योच्छेदे तु स्वरूपावस्थे ब्रह्मणि तेषां प्रतिभासस्तद्वत् परमानन्दस्वभावत्वस्यापीति ।

असदेतत् अप्रमाणकत्वात् । तथाहि–न तावदेवंविधोऽभ्युपगमः प्रेक्षावताऽप्रमाणकोऽङ्गीकर्तुं युक्तः अतिप्रसङ्गात् । प्रमाणवत्त्वे च प्रत्यक्षाऽनुमानाऽऽगमेभ्योऽन्यतमद् वक्तव्यम् । तत्र न तावत् प्रत्यक्षम् एतदर्थव्यवस्थापकम्, अस्मदादीन्द्रियजन्यप्रत्यक्षस्यात्र वस्तुनि व्यापारानुपलम्भात् । 'योगिप्रत्यक्षं त्वेवं प्रवर्त्तते उतान्यथा' इति अद्यापि विवादगोचरम् । २५

किञ्च, नित्यस्य सुखस्य तस्यामवस्थायाममिव्यक्तिरवश्यं संवेदनम्–अन्यथाऽभिव्यक्त्यभावात्–तत्र च विकल्पद्वयम्–नित्यमनित्यं वा तद् भवेत् ? नित्यत्वे तस्य मुक्ति–संसारावस्थयोरविशेषप्रसङ्गः–संसारावस्थस्याऽपि नित्यसुखसंवेदनस्य नित्यत्वात् मुक्तावस्थायामपि तत्संवेदनादेव मुक्तत्वम्, तच्च संसार्यवस्थायामप्यविशिष्टम् । अपि च, करणजन्येन सुखेन साहचर्यं संसार्यवस्थायां ३० तस्य गृह्येत ततश्च सुखद्वयोपलम्भः सर्वदा भवेत् । अथ धर्माधर्मफलेन सुखादिना नित्यसुखसंवेदनस्य संसारावस्थायां प्रतिबद्धत्वान्नानुभवः, शरीरादिना वा प्रतिबन्धात् तन्नानुभूयते तेन न द्वयोरवस्थयोरविशेषः । नापि युगपत् सुखद्वयोपलम्भः, अयुक्तमेतत्; शरीरादेर्भोगार्थत्वान्न तदेव नित्यसुखानुभवप्रतिबन्धकारणम्; न हि यद् यदर्थं तत् तस्यैव प्रतिबन्धकं दृष्टम् । न च वैषयिकसुखानुभवेन नित्यसुखानुभवप्रतिबन्धः सम्भवति । तथाहि–न तावत् सुखस्य नापि तदनुभवस्य प्रतिबन्धोऽनुत्पत्तिलक्षणो विनाशलक्षणो वा युक्तः, द्वयोरपि नित्यत्वाभ्युपगमात् । नापि संसारावस्थायां बाह्यविषयव्यासङ्गाद् विद्यमानस्याप्यनुभवस्यासंवेदनम् तदभावात्तु मोक्षावस्थायां संवेदनमित्यप्यस्ति विशेषः, नित्यसुखे ह्यनुभवस्यापि नित्यत्वाद् व्यासङ्गानुपपत्तेः । तथाहि–आत्मनो रूपादिविषयज्ञानोत्पत्तौ विषयान्तरे ज्ञानानुत्पत्तिर्व्यासङ्गः, एवमिन्द्रियस्याप्येकस्मिन् विषये ज्ञानजनकत्वेन प्रवृत्तस्य विषयान्तरे ज्ञानाजनकत्वं व्यासङ्गः । न चैवमात्मनो रूपादिविषय- ४० ज्ञानोत्पत्तौ नित्यसुखे ज्ञानानुत्पत्तिः, तज्ज्ञानस्यापि नित्यत्वात् । शरीरादेस्तु सुखप्रतिबन्धकत्वा-

---

१–**प्रतिषेधः** वि०, वा०, बा० विना । २–**पगमो न** वा०, बा० । ३–**दा तस्याः स्व**–मां० । ४–**मात्मव्यति**–वा०, बा० । ५–**भवनप्रति**–मां० । ६–**क्तः तद्व**–(तद्व–) मां०, भां० ।

भ्युपगमे तदपहन्तुर्हिंसाफलं न स्यात् । तथाहि-प्रतिबन्धविघातकृदुपकारक एवेति दृष्टान्तेन नित्यसुखसंवेदनप्रतिबन्धकस्य[1] शरीरादेर्हन्तुर्हिंसाफलस्याभावः ।

अथानित्यं तत्संवेदनं तदा तदवस्थायां तस्योत्पत्तिकारणं वाच्यम् । अथ योगजधर्मापेक्षः पुरुषान्तःकरणसंयोगोऽसमवायिकारणम्, न; योगजधर्मस्याप्यनित्यतया विनाशे अपेक्षाकारणाभावात्[2] । अथाद्यं योगजधर्मादुपजातं विज्ञानमपेक्ष्योत्तरं विज्ञानं तस्माच्चोत्तरमिति सन्तानत्वम्, तन्न; प्रमाणाभावात् । तथा च शरीरसम्बन्धानपेक्षं विज्ञानमेवात्मान्तःकरणसंयोगस्यापेक्षाकारणमिति न दृष्टम्; न च दृष्टविपरीतं शक्यमनुज्ञातुम् । आकस्मिकं तु कार्यं न भवत्येव । अथ मतम्-शरीरादिरहितस्यापि तस्यामवस्थायां योगजधर्मानुग्रहात् सुखसंवेदनमुत्पद्यते । तथाहि-मुमुक्षुप्रवृत्तिरिष्टाधिगमार्था, प्रेक्षापूर्वकारिप्रवृत्तित्वात्, कृषीबलादिप्रेक्षापूर्वकारिप्रवृत्तिवत्, एवम् तेषां शास्त्रीय उपदेश इष्टाधिगमार्थः, उपदेशत्वात्, तदन्योपदेशवत्, तदेतत् प्रतिपादितम्-"नोभयमनर्थकम्[3]" [ ] इति, मोक्षसुखसंवेदनानभ्युपगमे प्रवृत्त्युपदेशयोर्न किञ्चित् फलं भवेत्, एतच्चायुक्तम्; प्रवृत्त्युपदेशयोरन्यथासिद्धत्वात् । भवेत् साध्यसिद्धिर्यथोक्ताद्धेतुद्वयात् यद्येकान्तेनैव प्रवृत्तेरुपदेशस्य च इष्टाधिगमार्थत्वं भवेत्, तयोस्त्वन्यथाऽपि दर्शनात् नाभिमतसाध्यसाधकत्वम् । तथाहि-आतुराणां चिकित्साशास्त्रार्थानुष्ठायिनामनिष्टप्रतिषेधार्था प्रवृत्तिर्दृश्यते उपदेशश्च, अतः कथमिष्टप्राप्त्यर्थता प्रवृत्त्युपदेशयोः? किञ्च, इष्टानिष्टयोः साहचर्यमवश्यम्भावि, अतो यदीष्टाधिगमार्था प्रवृत्तिस्तदा बलात् तस्यामवस्थायामनिष्टसंवेदनमापतति, न हीष्टमनिष्टाननुषक्तं क्वचिदपि विद्यते । तस्मादनिष्टहानार्थायामपि प्रवृत्ताविष्टं हातव्यम्, तयोर्विवेकहानस्याशक्यत्वात् । किञ्च, दृष्टबाधश्च तुल्यः । तथाहि-यथा मुक्त्यवस्थायामनित्यं सुखमतिक्रम्य नित्यमुपेयते प्रमाणशून्यं तद्विरुद्धं च तथा शरीरादीन्यपि नित्यसुखभोगसाधनानि वरं कल्पितानि, एवं मुक्तस्य नित्यसुखप्रतिपत्तिः साध्वी स्यात् । अथ शरीरादीनां कार्यत्वात् कथं नित्यता प्रमाणबाधितत्वाच्छरीरादीनां नित्यत्वमशक्यं साधयितुम्? नन्वेतत् सुखेऽपि समानम्, दृष्टस्य सुखस्योपजनाऽपायधर्मकस्य तद्वैकल्यं प्रमाणबाधितत्वात् कथं परिकल्पयितुं शक्यम्? अथ स्यादेष दोषः यदि दृष्टस्यैव सुखस्य नित्यत्वमस्माभिरुपेयेत यावता दृष्टसुखव्यतिरिक्तमात्मधर्मत्वेनाभिमतं नित्यं ततश्च कथं दृष्टविरोधः? असदेतत्; तत्र प्रमाणाभावादित्युक्तत्वात्[4] । यदप्यनुमानं तत्सिद्धये प्रदर्शितं तदपि प्रवृत्तेरनिष्टप्रतिषेधार्थत्वान्नैकान्तेनाभिमतसाध्यसाधकम् ।

मा भूदनुमानम्, आगमस्तु नित्यसुखसाधकस्तस्यामवस्थायां भविष्यति, तथा च पूर्वमुक्तम् "विज्ञानमानन्दं ब्रह्म" इति, असदेतत्; तदागमस्यैतदर्थत्वासिद्धेः । अथापि कथञ्चिद् नित्यसुखप्रतिपादकत्वं तस्याभ्युपगम्यते तथाप्यात्यन्तिके संसारदुःखाभावे सुखशब्दो गौणः, न तु नित्यसुखप्रतिपादकत्वाद् मुख्यः । अथ कथं दुःखाभावे सुखशब्द उपेयते? लोकव्यवहाराद्धि शब्दार्थसम्बन्धावगमः, सुखशब्दश्च दुःखाभावे लोके अनवगतसम्बन्धः कथमागमे दुःखाभावं प्रतिपादयति? नैष दोषः; न हि लोके मुख्य एवार्थे प्रयोगः शब्दानां किन्तु गौणेऽपि । तथाहि-दुःखाभावेऽपि सुखशब्दं प्रयुञ्जाना लोका उपलभ्यन्ते; यथा ज्वरादिसन्तप्ता यदा ज्वरादिभिर्विमुक्ता भवन्ति तदाऽभिदधति 'सुखिनः संवृत्ताः स्मः' इति । किञ्च, इष्टार्थाधिगमार्थायां च मुमुक्षोः प्रवृत्तौ रागनिबन्धना तस्य प्रवृत्तिर्भवेत्; ततश्च न मोक्षावाप्तिः, क्लेशानां बन्धहेतुत्वात् ।

{अथ वदेत् यथा सुखरागनिबन्धनायां प्रवृत्तौ रागस्य बन्धनहेतुत्वाद् मोक्षाभावस्तथा दुःखाभावार्थायामपि, तत्रापि दुःखे तत्साधने वा दोषदर्शनाद् द्विष्टस्तदभावाय प्रवर्त्तते । यथा च रागक्लेशो बन्धनहेतुस्तथा द्वेषोऽपीत्यविशेषः । यच्चोक्तम् 'दुःखाभावे सुखशब्दप्रयोगात् तदभाव एव सुखम्' तदयुक्तम्; युगपत् सुख-दुःखयोरनुभवात् यथा ग्रीष्मे सन्तापतप्तस्य क्वचिच्छीते ह्रदे निमग्नार्द्धकायस्यार्द्धे निमग्ने सुखमन्यत्र दुःखम् । अथ मतम्-यत् तदर्द्धे निमग्ने तद् दुःखाभावः सुखम् अन्यत्र दुःखमिति, तर्हि नारकाणां सुखित्वप्रसङ्गः, क्वचिन्नरके दुःखानुभवादन्यनरकसम्बन्धिदुःखाभावाच्च । तथा, अनेकेन्द्रियद्वारस्य दुःखस्य केनचिदिन्द्रियेण दुःखोत्पादेऽन्येनाजनने सुखित्व-

१-कशारी-भां०, मां०, वा०, बा० । २ वा० भा० अ० १, आ० १, सू० २२ । ३-त्वसुखप्रतिपत्तिरुपे-वि० गु० । ४ पृ० १५१ पं० २५ । ५ प्र० पृ० पं० ९ । ६ पृ० १५१ पं० ११ । ७ प्र० पृ० पं० ३१ ।

प्रसङ्गः, अपि च, अदुःखितस्यापि विशिष्टविषयोपभोगात् सुखं दृष्टं तत्र कथं दुःखाभावः सुखम्? यत्रापि दुःखसंवेदनपूर्वं यथा क्षुदुःखे भोजनप्राप्तौ तृषस्य तद्विनिवृत्तेः तत्राप्यन्न-पानयोर्विशेषात् सुखविशेषो न भवेत्, दृश्यते च लौकिकानां तदर्थमन्नादिविशेषोपादानम्; अन्यथा येन केनचिद् अन्नमात्रेण च क्षुदुःखनिवृत्तौ नान्न-पानविशेषं लौकिका उपाददीरन् । सुखस्य च भावरूपत्वात् सातिशयत्वे तत्साधनविशेषो युज्यते, दुःखाभावस्य तु सर्वोपाख्याविरहलक्षणत्वात् किं साधनविशेषेण? ५

येप्येवमुपागमन् "यदाऽपि पूर्वं दुःखं नास्ति तदाप्यभिलाषस्य दुःखस्वभावत्वात् तन्निबर्हणस्वभावं सुखम्" [ ] तेऽपि न सम्यक् प्रतिपन्नाः; यतोऽनभिलाषस्य विषयविशेषसंवित्तौ न सुखिता स्यात्, दृश्यते तस्यामप्यवस्थायां रमणीयविषयसम्पर्के ह्लादोत्पत्तिः ।

तत्रैतत् स्यात् यत्रैवाभिलाषः स एव विषयोपभोगेन सुखी नान्यः, तदभिलाषनिवृत्त्यैव विषयाः सुखयितारोऽन्यथा यदेकस्य सुखसाधनं तदविशेषेण सर्वेषां स्यात् । यदा तु कामनिवृत्त्या सुखित्वं तदा यस्यैवाभिलाषो यत्र विषये स एव तस्य सुखसाधनं नान्यः, अतश्च यदुक्तम् 'अकामस्यापि क्वचिद्विषयोपभोगे सुखित्वदर्शनान्न कामाख्यदुःखनिवृत्तिरेव सुखम्' तदयुक्तम्; तत्राकामस्यापि विशिष्टविषयोपभोगात् कामाभिव्यक्तौ तन्निवृत्तेरेव सुखत्वादिति ।

एतदप्ययुक्तम्;
यतो नावश्यं विषयोपभोगोऽभिलाषनिबर्हणः । यथोक्तम्— १५

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥ [महाभा० आदिप० अ० ७९, श्लो० १२]

तथा तत्र भगवता पतञ्जलिनाऽप्युक्तम्-"भोगाभ्यासमनुवर्धन्ते रागाः, कौशलानि चेन्द्रियाणाम्" [पात० यो० पा० २, सू० १५ व्यासभा०] इति । अपि च, अन्यथाप्यभिलाषनिवृत्तिर्दृष्टा यथा विषयदोषदर्शनात्, तत्रापि भवतां मते विषयोपभोगतुल्यं सुखं भवेत् तुल्ये चाभिमतार्थलाभे सुखविशेषो न स्यात् अभिलाषनिवृत्तेरविशेषात् । २०

अथ वदेत् अभिलाषातिरेके तन्निवृत्तौ सुखातिरेकाभिमानोऽन्यत्रान्यथेति, तदप्यसाम्प्रतम्; यतोऽभिलाषातिरेकात् प्रयस्यन्तं प्राप्तोऽर्थो न तथा प्रीणयति यथाऽप्रार्थितो विना प्रयासादुपनतः । एवमेव च लोकव्यवहारः-यत्नशतावाप्तेऽर्थे क्लेशप्राप्तोऽयमिति न तेन तथा सुखिनो भवन्ति यथाऽनाशंसितप्राप्तेन । तत्र दुःखाभावमात्रं सुखं किन्तु तद्व्यतिरेकेण स्वरूपतः सुखमस्तीति} । २५

तदसमीचीनम्; न हि अस्माकं दुःखाभाव एव सुखम्-तथा च भाष्यकृता तत्र तत्राभिहितम्—"न सर्वलोकसाक्षिकं सुखं प्रत्याख्यातुं शक्यम्[4]" [ ] । तथाऽन्यत्राप्युक्तम्-"न प्रत्यात्मवेदनीयस्य सुखस्य प्रतीतेः प्रत्याख्यानम्" [ ] । एवं चानभ्युपगतस्य पक्षस्योप (पा) लम्भः, प्रकृते तु सुखे प्रतिपाद्यते दुःखाभावमात्रे सुखशब्दो न तु सुखे एव, तस्य प्रमाणतोऽनुपपत्तेः । तथा च मुक्तस्य नित्यसुखाभिव्यक्तौ प्रत्यक्षाऽनुमानयोर्निषेधे आगममात्रमवशिष्यते तस्य च गौणत्वे- ३०
नाप्युपपत्तेर्न मुख्यस्य सुखस्य सम्भवः ।

नित्यसुखाभ्युपगमे च विकल्पद्वयम्-किं तद् आत्मस्वरूपं स्वप्रकाशम्, उतस्वित् तद्व्यतिरिक्तं प्रमाणान्तरप्रमेयम्? पूर्वस्मिन् विकल्पे आत्मस्वरूपवत् स्वप्रकाशसुखसंवित्तिः सर्वदा भवेत्; ततश्च बद्ध-मुक्तयोरविशेषः । तत्रैतत् स्यात्-अनाद्यविद्याच्छादितत्वात् स्वप्रकाशानन्दसंवित्तिर्न संसारिणः, यदा तु यत्नादनादेरविद्यातत्त्वस्यापगमस्तदाच्छादकाभावात् स्वप्रकाशानन्दसंवेदनम्, ३५
एतदपेशलम्; आच्छाद्यते ह्यप्रकाशस्वभावम्; यत्तु स्वप्रकाशरूपं तत् कथमन्येनाच्छाद्येत?

येऽपि प्रतिपेदिरे "मेघादिना सवितृप्रकाशः सविता वा स्वप्रकाश एवाऽऽच्छाद्यते"[ ] तेऽपि न सम्यक् संचक्षते; न स्वप्रकाशस्य मेघादिनाऽऽवरणम्, आवृतत्वे हि तेनाहोरात्रयोरविशेषो भवेत्, दृश्यते च विशेषः तस्मान्न कस्यचित् स्वप्रकाशस्यावृतिः । अपि च, मेघादेस्ततोऽ-

१ अपि वा दुः-वि०, वा०, बा० विना । २-षदुःखस्य स्व-आ० ।-षादुःखस्य स्व-वि० । ३ प्र० पृ० पं० ७ । ४ अयमर्थो भाष्ये वार्तिके चैवं दर्शितः "सुखं प्रत्यात्मवेदनीयं शरीरिणाम्, तदशक्यं प्रत्याख्यातुम्" इति-वा० भा० अ० ४, आ० १, सू० ५६ । "न हि प्रत्यक्षं सुखं शक्यं प्रत्याख्यातुम्"-न्यायवा० अ० १, आ० १, सू० २१ पृ० ८४ पं० ३ । ५ प्रतिपद्य-कां० । ६-थमनेना-वि० ।

र्थान्तरत्वादावारकत्वं युक्तम्, अविद्यायास्तु तत्त्वान्यत्वेनानिर्वचनीयत्वेन तुच्छस्वभावत्वात् न स्वप्रकाशस्वभावे आनन्दे आवरणशक्तिः । तत् सर्वदा स्वप्रकाशानन्दानुभवप्राप्तिः धर्माऽधर्मजनिताभ्यां च सुख-दुःखाभ्यां सह युगपत् संवेदनं प्रसक्तम् न चैतद् दृश्यते तस्मान्न पूर्वो विकल्पः ।

नाप्युत्तरः, तत्प्रतिपादकस्य प्रत्यक्षादेर्निषिद्धत्वात् बाधकस्य च प्रदर्शितत्वात् । अतस्तत्प्रतिपादक आगमः प्रमाणविरुद्धार्थप्रतिपादकत्वाद्गौणत्वेन व्याख्यायते शास्त्रदृष्टविरुद्धान्यवाक्यवत् । एतच्चाभ्युपगम्योक्तम्, न तु सुखस्य बोधस्वभावतोऽपि विद्यते तत्स्वभावतानिराकरणात् ।

यच्चोक्तम् 'सुखरागेण प्रवृत्तस्य मुमुक्षोर्यथा बन्धप्रसङ्गस्तथा द्वेषनिबन्धनायामपि प्रवृत्ताववश्यम्भावी बन्धः' तदयुक्तम्; मुमुक्षोर्द्वेषाभावात्; स हि विषयाणां तत्त्वदर्शी तेष्वारोपितं सुखत्वं तत्साधनत्वं वा तत्त्वज्ञानाभ्यासादन्यथा प्रतिपद्यते । एवं च तस्याऽऽरोपिताकारमिथ्याज्ञानव्यावृत्तावुत्तरोत्तरकार्याभावादपवर्ग उच्यते, न तु तस्य दुःखसाधने द्वेषः किन्त्वारोपिते सुखे तत्साधने वा तत्त्वज्ञानाभ्यासाद् रागाभावः न च स एव द्वेषः, तस्य रागाभावसव्यतिरेकेण प्रत्यक्षेण स्वरूपसंवित्तेः, अन्यथोपेक्षणीये वस्तुनि रागाभावे द्वेषः स्यात् न चैतद् दृष्टम्, तस्मान्न मुमुक्षोर्द्वेषनिबन्धना प्रवृत्तिः ।

भवतु वा, तथापि न तस्य बन्धः, द्वेषो हि स बन्धहेतुर्य उत्पन्नः स्वविषये वाग्-मनः-कायलक्षणां शास्त्रविरुद्धां पुरुषस्य प्रवृत्तिं कारयति; तस्य शास्त्रविरुद्धार्थाचरणेऽधर्मोत्पत्तिद्वारेण शरीरादिग्रहणम् तन्निबन्धनं च दुःखम् । अयं तु मुमुक्षोर्विषयेषु द्वेषः सकलप्रवृत्तिप्रतिपन्थित्वाद्धर्माधर्मयोरनुत्पत्तौ शरीराद्यभावान्न केवलं न बन्धाय किन्तु स्वात्मघाताय कल्पते । तदिदमुक्तम्–"प्रहाणे नित्यसुखरागस्याप्रतिकूलत्वम् । नास्य नित्यसुखाभावः (नित्यसुखभावः) प्रतिकूल इत्यर्थः । यद्येवं मुक्तस्य नित्यं सुखं भवति अथापि न भवति, नास्योभयोः पक्षयोर्मोक्षाधिगमाभावः" [वात्स्या० भा० अ० १, आ० १, सूत्र २२, पृष्ठ ४४]

अनेन च भाष्यवाक्येन न मुक्तस्य नित्यसुखसंवित्तिरुपेयते–तस्याः प्रमाणबाधितत्वात्–किन्तु सर्वथा यदर्थं शास्त्रमारब्धं तस्योपपत्तिरनेन प्रतिपाद्यते, वाक्यस्वाभाव्यात् । तद्धि किञ्चिद्वस्त्वभिधानवृत्त्या प्रतिपादयदपि तात्पर्यशक्तेरन्यत्र भावान्न श्रूयमाणार्थपरं परन्यायविद्भिः परिगृह्यते, विषभक्षणादिवाक्यवत् । तन्न परमानन्दप्राप्तिर्मोक्षः ।

नापि विशुद्धज्ञानोत्पत्तिः, रागादिमतो विज्ञानात् तद्रहितस्य तस्योत्पत्तेरयोगात् । तथाहि-यथा बोधाद् बोधरूपता ज्ञानान्तरे तद्वद् रागादिरपि स्यात्, तादात्म्यात्, विपर्यये तदभावप्रसङ्गात् । न च विलक्षणादपि कारणाद् विलक्षणकार्यस्योत्पत्तिदर्शनात् बोधाद् बोधरूपतेति प्रमाणमस्ति, अत एव ज्ञानस्य ज्ञानान्तरहेतुत्वे न पूर्वकालभावित्वं समानजातीयत्वमेकसन्तानत्वं वा हेतुः, व्यभिचारात् । तथाहि-पूर्वकालत्वं तत्समानक्षणैः समानजातीयत्वं च सन्तानान्तरज्ञानैर्व्यभिचारीति । तेषां हि पूर्वकालत्वे तत्समानजातीयत्वेऽपि न विवक्षितज्ञानहेतुत्वमिति । एकसन्तानत्वं चान्त्यज्ञानेन व्यभिचरतीति ।

अथ नेष्यत एवान्त्यज्ञानं सर्वदाऽऽरम्भात् । तथाहि-मरणशरीरज्ञानमपि ज्ञानान्तरहेतुः, जाग्रदवस्थाज्ञानं च सुषुप्तावस्थाज्ञानस्येति । नन्वेवं मरणशरीरज्ञानस्यान्तराभवशरीरज्ञानहेतुत्वे गर्भशरीरज्ञानहेतुत्वे वा सन्तानान्तरेऽपि ज्ञानजनकत्वप्रसङ्गः, नियमहेतोरभावात् । अथेष्यत एवोपाध्यायज्ञानं शिष्यज्ञानस्य, अन्यस्य कस्मान्न भवतीति? अथ कर्मवासना नियामिकेति चेत्, न; तस्या विज्ञानव्यतिरेकेणासम्भवात् । तथाहि-तादात्म्ये सति विज्ञानं बोधरूपतयाऽविशिष्टं बोधाच्च बोधरूपतेत्यविशेषेण विज्ञानं विदध्यात् ।

यच्चेदम् 'सुषुप्तावस्थाज्ञानस्य जाग्रदवस्थाज्ञानं कारणम्' इति, (अ) सदेतत्; सुषुप्तावस्थायां हि ज्ञानसद्भावे जाग्रदवस्थातो न विशेषः स्यात्; उभयत्रापि स्वसंवेद्यज्ञानस्य सद्भावाविशेषात्।

---

१ पृ० १५१ पं० २५ । २ पृ० १५१ पं० २७ । ३ **न सुख**–वा बा० । ४ पृ० १५२ पं० ३५ । ५–**भावस्य प्रत्यति**–वा०, बा० । ६ **न बाधाय** वि० । ७ वात्स्यायनभाष्यानुरोधेन अर्थानुरोधेन चात्र 'नित्यसुखरागः' इत्येव सम्यक्, अथवा भावपदमेव रागपरं ज्ञेयम् । ८ **प्रतिपादयिष्यदपि** वि० । ९–**णार्थपरं न्याय**–वा०, बा० । १० **रागादेरपि** वि० । प्रमेय०मा० "रागादेरपि" इत्येव पाठः– पृ० ८९ द्वि०, पं० २ । १ अत्र स्थले प्रमेय० मा० "न च बोधादेव बोधरूपतेति प्रमाणमस्ति, विलक्षणादपि कारणात् विलक्षणकार्यस्योत्पत्तिदर्शनात्" इति पाठः–पृ० ८९ द्वि०, पं० ३ । १२–**न्तरे हे**–वा०, बा० । १३ प्र० पृ० पं० ३२ ।

भिद्धेनाभिभूतत्वं विशेष इति चेत्, असदेतत्; तस्यापि तद्धर्मतया तादात्म्येनाभिभावकत्वायोगात् । व्यतिरेके तु रूपादिपदार्थानामेव सत्त्वात् तत्स्वरूपं निरूप्यम्, अभिभवश्च यदि विनाशः, न विज्ञानस्य सत्त्वम् विनाशस्य वा निर्हेतुकत्वम् । अथ तिरोभावः, न; विज्ञानस्य सत्त्वेन 'तत्सत्त्वैव संवेदनम्' इत्यभ्युपगमे तस्यानुपपत्तेः । अतः सुषुप्तावस्थायां विज्ञानासत्त्वेनान्त्यज्ञानस्य सद्भावादेकज्ञानसन्तानत्वं व्यभिचारीति ।

यच्चेदम् 'विशिष्टभावनावशाद् रागादिविनाशः' इति, असदेतत्; निर्हेतुकत्वात् विनाशस्याभ्यासानुपपत्तेश्च । अभ्यासो ह्यवस्थिते ध्यातरि अतिशयाधायकत्वादुपपद्यते न क्षणिके ज्ञानमात्रे इति । अत एव न योगिनां सकलकल्पनाविकलं ज्ञानमुत्पद्यते । न च सन्तानापेक्षयाऽतिशयः, तस्यैवासम्भवाद् अविशिष्टाद् विशिष्टोत्पत्तेरयोगाच्च । तथाहि-पूर्वस्मादविशिष्टादुत्तरोत्तरं सातिशयं कथमुपजायत इति चिन्त्यम् । यच्च 'संतानोच्छित्तिर्निःश्रेयसम्' इति, तत्र निर्हेतुकतया विनाशस्योपायवैयर्थ्यम्, अयत्नसिद्धत्वादिति ।

अन्ये तु "अनेकान्तभावनातो विशिष्टप्रदेशेऽक्षयशरीरादिलाभो निःश्रेयसम्" [ ] इति मन्यन्ते । तथा च नित्यभावनायां ग्रहः, अनित्यत्वे च द्वेष इत्युभयपरिहारार्थमनेकान्तभावना इति, एवं सदादिष्वपि योज्यम् । प्रत्यक्षं च स्वदेश-काल-कारणाधारतया सत्त्वम् परदेशादिष्वसत्त्वमित्युभयरूपता । तथा, घटादिर्मृदादिरूपतया नित्यः सर्वावस्थासूपलम्भात्, घटादिरूपतया चानित्यस्तदपायात्, एवमात्माप्यात्मादिरूपतया नित्यः सर्वदा सद्भावात्, सुखादिपर्यायरूपतया चानित्यस्तद्विनाशात् । एवं सर्वत्र स्वकार्येषु कर्तृत्वम् कार्यान्तरेषु चाकर्तृत्वमित्यूह्यम् स्वशब्दाभिधेयत्वम् शब्दान्तरानभिधेयत्वं चेति ।

तदेतदसाम्प्रतम्, मिथ्याज्ञानस्य निःश्रेयसकारणत्वेन प्रतिषेधात् । अनेकान्तज्ञानं च मिथ्यैव, बाधकोपपत्तेः । तथाहि-नित्यानित्यत्वयोर्विधिप्रतिषेधरूपत्वादभिन्ने धर्मिणि अभावः । एवं सदसत्त्वादेरपीति । यच्चेदम् 'घटादिर्मृदादिरूपतया नित्यः' इति, असदेतत्; मृद्रूपतायास्ततोऽर्थान्तरत्वात् । तथाहि-घटादर्थान्तरं मृद्रूपता मृत्त्वं सामान्यम्, तस्य तु नित्यत्वे न घटस्य तथाभावस्ततोऽन्यत्वात्; घटस्य तु कारणाद् विलयोपलब्धेरनित्यत्वमेव । यच्चेदम् 'स्वदेशादिषु सत्त्वं परदेशादिष्वसत्त्वम्' तदिष्यत एव, इतरेतराभावस्याभ्युपगमात् । तथाहि-इतरस्मिन् देशादावितरस्य घटस्याभावो नानुत्पत्तिर्न प्रध्वंसः, तत्र तस्य सर्वदाऽसत्त्वात् । द्वैरूप्ये तु स्वदेशादिष्वप्यनुपलम्भप्रसङ्गः । एवमात्मनोऽपि नित्यत्वमेव, सुख-दुःखादेस्तद्गुणत्वेन ततोऽर्थान्तरस्य विनाशेऽप्यविनाशात् । 'कार्यान्तरेषु चाकर्तृत्वम्' न प्रतिषिध्यते । तथाहि-यद् यस्यान्वयव्यतिरेकाभ्यामुत्पत्तौ व्याप्रियत इत्युपलब्धं तत् तस्य कारणं नान्यस्येत्यभ्युपगम्यत एव । एवं शब्दानभिधेयत्वेऽपि 'न सर्वं सर्वशब्दाभिधेयम्' इत्यभ्युपगमात् । न चानेकान्तभावनातो विशिष्टशरीरादिलाभेऽस्ति प्रतिबन्धः । न चोत्पत्तिधर्मणां शरीरादीनामक्षयत्वं न्याय्यम् । तथा, मुक्तावप्यनेकान्तो न व्यावर्त्तत इति मुक्तो न मुक्तश्चेति स्यात् । एवं च सति स एव मुक्तः संसारी चेति प्रसक्तम् । एवमनेकान्तेऽप्यनेकान्ताभ्युपगमो दूषणम्, वस्तुनः सदसद्रूपताऽनेकान्तः, तस्यानेकान्ताभ्युपगमे रूपान्तरमपि प्रसक्तम् । एवं नित्यानित्यरूपताव्यतिरिक्तं च रूपान्तरमित्यादि वाच्यम् ।

अन्ये तु "आत्मैकत्वज्ञानात् परमात्मनि लयः संपद्यते इति ब्रुवते । तथाहि-आत्मैव परमार्थसन्, ततोऽन्येषां भेदे प्रमाणाभावात्; प्रत्यक्षं हि पदार्थानां सद्भावग्राहकमेव न भेदस्य इत्यविद्यासमारोपित एवायं भेदः" [ ] इति मन्यन्ते, तदप्यसत्; आत्मैकत्वज्ञानस्य मिथ्यारूपतया निःश्रेयससाधकत्वानुपपत्तेः, मिथ्यात्वं चात्माधिकार एव वक्ष्यामः । एवं शब्दाद्वैतज्ञानमपि मिथ्यारूपतया न निःश्रेयससाधनमिति द्रष्टव्यम् । यथा चैतेषां मिथ्यारूपता तथा प्रतिपादयिष्यामः । तन्नानुपमसुखावस्थान्तरप्राप्तिलक्षणात्मस्वरूपं मुक्तिः, तत्सद्भावे बाधकप्रमाणप्रदर्शनात्; विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्तिसद्भावे च प्रदर्शितं प्रमाणमिति ॥ ४०

१–**नसद्भा**–वि०, मां०, भां० । २–**शयोगाभ्यासा**–आ०, कां० ।–**शयोभ्यासा**–वि० । ३ प्र० पृ० पं० १५ । ४ प्र० पृ० पं० १४ । ५ प्र० पृ० पं० १७ ।

[उत्तरपक्षः—मुक्तौ आत्यन्तिकविशेषगुणोच्छेदस्य निरसनम्]

अत्र प्रतिविधीयते—यत् तावदुक्तम्[1] 'नवानामात्मविशेषगुणानां संतानोऽत्यन्तमुच्छिद्यते, सन्तानत्वात्' इति, अत्र बुद्ध्यादिविशेषगुणानां प्राक् प्रतिषिद्धत्वात्[2] तत्सन्तानस्याभावादाश्रयासिद्धो हेतुः। तथा, बुद्ध्यादीनां विशेषगुणानां परेण स्वसंविदितत्वेनानभ्युपगमाद् ज्ञानान्तरग्राह्यत्वे[3] वाऽनवस्थादिदोषप्रसक्तेरवेद्यत्वमित्यज्ञातस्य सत्त्वासिद्धेः पुनरप्याश्रयासिद्धः 'सन्तानत्वात्' इति हेतुः।

किञ्च, सन्तानत्वं हेतुत्वेनोपादीयमानं यदि सामान्यमभिप्रेतं तदा बुद्ध्यादिविशेषगुणेषु प्रदीपे च तेजोद्रव्ये सत्तासामान्यव्यतिरेकेणापरसामान्यस्यासंभवात् स्वरूपासिद्धः। सत्तासामान्यरूपत्वे वा सन्तानत्वस्य 'सत् सत्' इति प्रत्ययहेतुत्वमेव स्यात्, न पुनः सन्तानप्रत्ययहेतुत्वम्; अन्यथा द्रव्य-गुण-कर्मस्वरूपादेव 'सत् सत्' इति प्रत्ययसंभवात् सत्तापरिकल्पनावैयर्थ्यम्। अथ विशेषगुणाश्रिता जातिः सन्तानत्वं हेतुत्वेनोपन्यस्तम् तदा द्रव्यविशेषे प्रदीपलक्षणे साधर्म्यदृष्टान्ते तस्यासम्भवात् साधनविकलो दृष्टान्तः। न च सत्तादिलक्षणं सामान्यमेकं स्वाधारसर्वगतं वा प्रतिवादिनः प्रसिद्धमिति प्रतिवाद्यसिद्धो हेतुः। न च सन्तानत्वं सामान्यं व्याख्या बुद्ध्यादिषु वृत्तिमत् सिद्धम्, तद्वृत्तेः समवायस्य निषिद्धत्वात्; तत्सत्त्वेऽपि तद्बलात् सन्तानत्वस्य बुद्ध्यादिसम्बन्धित्वे तस्य सर्वत्राविशेषादाकाशादिष्वपि नित्येषु सन्तानत्वस्य वृत्तेरनैकान्तिकत्वम्। न च समवायस्याविशेषेऽपि समवायिनोर्विशेषात्[4] सन्तानत्वं बुद्ध्यादिष्वेव वर्त्तते नाकाशादिष्विति वक्तुं युक्तम्, इतरेतराश्रयप्रसक्तेः—सिद्धे हि सन्तानत्वस्याकाशादिव्यवच्छेदेन बुद्ध्यादिवृत्तित्वे विशेषत्वसिद्धिः, तत्सिद्धेश्चान्यपरिहारेण तद्वृत्तित्वसिद्धिरितीतरेतराश्रयत्वम्। अपि च, यदि समवायस्य सर्वत्राविशेषेऽपि बुद्ध्यादिविशेषगुण-सन्तानत्वयोः प्रतिनियताधाराधेयरूपता सिद्धिमासादयति तदा व्यर्थः समवायाभ्युपगमः, तद्व्यतिरेकेणापि तयोस्तद्रूपतासिद्धेः।

{अथ प्रमाणपरिदृष्टत्वात् समवायस्याभ्युपगमः न पुनः समवायिविशेषरूपताऽन्यथाऽनुपपत्तेः, असदेतत्; तद्ग्राहकप्रमाणस्यैवाभावात्। तथाहि—स सर्वसमवाय्यनुगतैकस्वभावो वाऽभ्युपगम्येत, तद्व्यावृत्तस्वभावो वा? न तावत् तद्व्यावृत्तस्वभावः समवायः, सर्वतो व्यावृत्तस्वभावस्यान्यासम्बन्धित्वेन नीलस्वरूपवत् समवायित्वानुपपत्तेः। नापि तदनुगतैकस्वभावः, सामान्यवत् तत्समवायत्वायोगात्-नित्यस्य सतोऽनेकत्रवृत्तेः सामान्यस्य परेण समवायत्वानभ्युपगमात्। न च समवायस्वरूपस्यापि ग्राहकत्वेन निर्विकल्पकं सविकल्पकं वाऽध्यक्षं प्रवर्त्तते किमुत तस्यानेकसमवाय्यनुगतैकतद्विशेषरूपस्य, तदग्रहणे तदनुगतैकरूपस्यापि अप्रतिभासनादिति सामान्यप्रतिषेधप्रस्तावे प्रतिपादितत्वात्। नापि तत्र प्रत्यक्षाप्रवृत्तौ तत्पूर्वकस्यानुमानस्यापि प्रवृत्तिः।

अथ सम्बन्धत्वेनासावध्यवसीयते, तदयुक्तम्; यतः किं 'सम्बन्धः' इति बुद्ध्याऽध्यवसीयते, आहोस्विद् 'इह' इति बुद्ध्या, उत 'समवायः' इति प्रतीत्या?

तद् यदि सम्बन्धबुद्ध्या तदा वक्तव्यम्-कोऽयं सम्बन्धः? किं सम्बन्धत्वजातियुक्तः, आहोस्विदनेकोपादानजनितः, अनेकाश्रितो वा, सम्बन्धबुद्धिविषयो वा, सम्बन्धबुद्ध्युत्पादको वा? तद् यदि सम्बन्धत्वजातियुक्तः स न युक्तः, समवायासम्बन्धत्वप्रसङ्गात्। अथानेकोपादानजनितस्तदा घटादेरपि सम्बन्धत्वप्रसङ्गः। अथानेकाश्रितस्तदा घटजात्यादौ सम्बन्धत्वप्रसङ्गः। अथ सम्बन्धबुद्ध्युत्पादकस्तदा लोचनादेरपि सम्बन्धत्वप्रसक्तिः। अथ सम्बन्धबुद्ध्यवसेयस्तदा घटादिष्वपि सम्बन्धशब्दव्युत्पादने सम्बन्धज्ञानविषयत्वे सम्बन्धत्वप्रसङ्गः; तथा, सम्बन्धेतरयोरेकज्ञानविषयत्वे इतरस्य सम्बन्धरूपतापसक्तिः। अथ सम्बन्धाकारः, सम्बन्धः, संयोगाभेदप्रसङ्गः; अन्तरालाकारभेदश्च न भेदकः, तस्याऽप्रसिद्धेः।

अथेहबुद्ध्याऽवसेयः[11] समवायः, न; इहबुद्धेरधिकरणाध्यवसायरूपत्वात्। न चान्यस्मिन्नाकारे प्रतीयमानेऽन्याकारोऽर्थः कल्पयितुं युक्तः, अतिप्रसङ्गात्।

---

१ पृ० १५० पं० ८। २ पृ० १३८ पं० १६। ३-ह्यत्वेनाऽनवस्था-वा०, बा०। ४-यिनो विशे-आ०, कां०। ५-यस्यानु-मां०, भां०। ६-कतद्विशेषस्य रूपस्य गु०।-कविशेषरूपस्य आ०, कां०।-कविशेषस्य रूपस्य वि०। ७ पृ० ११२ पं० २३। ८-त्यादेः सं-भां०, मां०। ९ संयोगभे-भां०, मां०। १० अवान्तरा-आ०, कां०। अथान्तरा-वि०। ११-यः, नः आ०, वि०, कां०।

अथ समवायबुद्ध्या समवायः प्रतीयत इत्यभ्युपगमः, सोऽप्यनुपपन्नः; समवायबुद्धेरनुपपत्तेः; न हि 'एते तन्तवः, अयं पटः, अयं समवायः' इति परस्परविविक्तं त्रितयं बहिर्ग्राह्याकारतया कस्यांचित् प्रतीतावुद्भाति तथानुभवाभावात्।

अथानुमानेन प्रतीयते, अयुक्तमेतत्; प्रत्यक्षाभावे तत्पूर्वकस्यानुमानस्याप्यवृत्तेः। सामान्यतोदृष्टमपि नात्र वस्तुनि प्रवर्त्तते, तत्प्रभवकार्यानुपलब्धेः। न च इहबुद्धिरेव समवायज्ञापिका— 'इह तन्तुषु पटः' इति प्रत्ययः सम्बन्धनिमित्तः, अबाधितेहप्रत्ययत्वात्, 'इह कुण्डे दधि' इति प्रत्ययवत् इति, विकल्पानुपपत्तेः। तथाहि-किं निमित्तमात्रमनेन प्रतीयते, उत सम्बन्धः? यदि निमित्तमात्रं तदा सिद्धसाध्यता। अथ सम्बन्धः, स संयोगः, समवायो वा? संयोगप्रतिपत्तावभ्युपगमबाधा। समवायानुमाने सम्बन्धव्यतिरेकः। न चान्यस्य सम्बन्धे सत्यन्यस्य गमकत्वम्, अतिप्रसङ्गात्। नहि देवदत्तेन्द्रिय-घटसम्बन्धे यज्ञदत्तेन्द्रियं रूपादिकमर्थं करणत्वात् प्रकाशयदृष्टम्। तन्न समवायः कस्यचित् प्रमाणस्य गोचरः। न च तस्य समवायिभ्यामसम्बद्धस्य सम्बन्धरूपता। न च तत्सम्बन्धनिमित्तोऽपरः समवायोऽभ्युपगम्यते; अभ्युपगमे वाऽनवस्थाप्रसङ्गः। विशेषणविशेष्यभावस्यापि तत्सम्बन्धनिमित्तस्य सम्बन्धाभ्युपगमेऽनवस्थादिकं दूषणं समानम्। न चासम्बन्धस्यापि तस्य सम्बन्धरूपत्वादपरपदार्थसम्बन्धकत्वमिति वाच्यम्, विहितोत्तरत्वात्। न च समवायस्यान्यस्य वा एकान्तनित्यस्य कार्यजनकत्वं सम्भवति, नित्ये क्रम-यौगपद्याभ्यामर्थक्रियाविरोधस्य प्रतिपादयिष्यमाणत्वात्। न च तदभावे पदार्थानां सत्त्वम्, सत्तासम्बन्धित्वेन तस्य निषिद्धत्वान्निषेत्स्यमानत्वाच्च।} तदेवं समवायस्याभावात् सन्तानत्वं बुद्ध्यादिसन्तानेषु न वृत्तिमत् सिद्धमिति सन्तानत्वलक्षणो हेतुः कथं नाऽसिद्धः?

अथोपादानोपादेयभूतबुद्ध्यादिलक्षणं प्रवाहरूपमेव सन्तानत्वं हेतुत्वेन विवक्षितम्; नन्वेवं तस्य तथाभूतस्यान्यत्रानुवृत्तेरसाधारणानैकान्तिकत्वम् अभ्युपगमविरोधश्च। न हि परेण बुद्धिक्षणोपादानोऽपरः सर्व एव बुद्धिक्षणोऽभ्युपगम्यते एकसन्तानपतितः। तथाभ्युपगमे वा मुक्तावस्थायामपि पूर्वपूर्वबुद्ध्युपादानक्षणादुत्तरोत्तरोपादेयबुद्धिक्षणस्य संभवान्न बुद्धिसन्तानस्यात्यन्तोच्छेदः साध्यः सम्भवति, यथोक्तहेतुसद्भावबाधितत्वात्।

अथ पूर्वापरसमानजातीयक्षणप्रवाहमात्रं सन्तानत्वं तेनायमदोषः; नन्वेवमपि हेतोरसाधारणत्वं तदवस्थम्। नह्येकसन्तानरूपमन्यानुयायि, व्यक्तेर्व्यक्त्यन्तराननुगमात्; अनुगमे वा सामान्यपक्षभावी पूर्वोक्तो दोषस्तदवस्थः; अनैकान्तिकश्च पाकजपरमाणुरूपादिभिः तथाविधसन्तानत्वस्य तत्र सद्भावेऽप्यत्यन्तोच्छेदाभावात्। अपि च, सन्तानत्वमपि भविष्यति अत्यन्तानुच्छेदश्चेति विपर्यये हेतोर्बाधकप्रमाणाभावेन सन्दिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकः। विपक्षेऽदर्शनं च हेतोर्बाधकं प्रमाणं प्रागेव प्रतिक्षिप्तम्।

विरुद्धश्चायं हेतुः, शब्द-बुद्धि-प्रदीपादिष्वप्यत्यन्तानुच्छेदवत्स्वेव सन्तानत्वस्य भावात्। न ह्येकान्तनित्येष्विवानित्येष्वप्यर्थक्रियाकारित्वलक्षणं सत्त्वं सम्भवतीति प्रतिपादयिष्यमाणत्वात्। न च प्रदीपादीनामुत्तरः परिणामो न प्रत्यक्षः इत्येतावता 'ते तथा न सन्ति' इति व्यवस्थापयितुं शक्यम्; अन्यथा परमाणूनामपि पारिमाण्डल्यगुणाधारतया प्रत्यक्षतोऽप्रतिपत्तेस्तद्रूपतयाऽसत्त्वप्रसङ्गः। अथ तेषां तद्रूपतयाऽनुमानात् प्रतिपत्तेर्नायं दोषः; ननु सा अनुमानात् प्रतिपत्तिः प्रकृतेऽपि तुल्या। यथा हि स्थूलकार्यप्रतिपत्तिस्तदपरसूक्ष्मकारणमन्तरेणाऽसम्भविनी परमाणुसत्तामवबोधयति तथा मध्यस्थितिदर्शनं पूर्वापरकोटिस्थितिमन्तरेणासम्भवि तां साधयतीति प्रतिपादयिष्यते। न च ध्वस्तस्यापि प्रदीपस्य विकारान्तरेण स्थित्यभ्युपगमे प्रत्यक्षबाधा, वारिस्थे तेजसि भास्वररूपाभ्युपगमेऽपि तद्बाधोपपत्तेः। अथोष्णस्पर्शस्य भास्वररूपाधिकरणतेजोद्रव्याभावेऽसम्भवादनुद्भूतस्य तत्र परिकल्पनमनुमानतस्तर्हि प्रदीपादेरप्यनुपादानोत्पत्तिवन्न सन्तति-विपर्ययभावमन्तरेण विपत्तिः सम्भवतीत्यनुमानतः किं न कल्प्यते तत्सन्तत्यनुच्छेदः अन्यथा सन्तानचरमक्षणस्य क्षणान्तराजनकत्वेनासत्त्वे पूर्वपूर्वक्षणानामपि तत्त्वान्न विवक्षितक्षणस्यापि सत्त्वमिति प्रदीपादेर्दृष्टान्तस्य बुद्ध्यादिसाध्यधर्मिणश्चाभाव इति नानुमानप्रवृत्तिः स्यात्? तस्मा-

---

१ प्र० पृ० पं० ११। २ पृ० ११० पं० ८। ३ मुक्त्यव-आ०, कां०। ४ पृ० १५६ पं० ६। ५-क्षबाधः आ०, कां०, मां०।

च्छब्द-बुद्धि-प्रदीपादीनामपि सत्त्वे नात्यन्तिको व्युच्छेदोऽभ्युपगन्तव्यः–अन्यथा विवक्षितक्षणेऽपि सत्त्वाभावः–इति सर्वत्रात्यन्तानुच्छेदवत्येव सन्तानत्वलक्षणो हेतुर्वर्त्तत इति कथं न विरुद्धः ?

विपरीतार्थोपस्थापकस्यानुमानान्तरस्य सद्भावादनुमानबाधितः पक्षः, हेतोर्वा कालात्ययापदिष्टत्वम्। यथा चानुमानस्य पक्षबाधकत्वम् अनुमानबाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वेन हेतोर्वा कालात्ययापदिष्टत्वं तथाऽसकृत् प्रतिपादितमिति न पुनरुच्यते।

अथ किं तदनुमानं प्रकृतप्रतिज्ञाया बाधकं येनात्रायमुक्तदोषः स्यात्? उच्यते, पूर्वापरस्वभावपरिहारावाप्तिलक्षणपरिणामवान् शब्द-बुद्धि-प्रदीपादिकोऽर्थः, सत्त्वात् कृतकत्वाद्वा, यावान् कश्चित् भाव[3]स्वभावः स सर्वैः तादृशभाव[4]स्वभाववितर्तमन्तरेण न सम्भवति———— तथाहि—न तावत् क्षणिकस्य निरन्वयविनाशिनः सत्त्वसम्भवोऽस्ति, स्वाकारानुकारि ज्ञानमन्यद्वा कार्यान्तरमप्राप्याऽऽत्मानम् संहरतः सकलशक्तिविरहितस्य व्योमकुसुमादेरिव सत्त्वानुपपत्तेः। तादृशस्य नहि कार्यकालप्राप्तिः, क्षणभङ्गभङ्गप्रसक्तेः। नापि फलसमयमात्मानमप्रापयतस्तज्जननसामर्थ्यं चिरतरविनष्टस्येव सम्भवति। न च समनन्तरभाविनः कार्यस्योत्पादने कारणं स्वसत्ताकाल एव सामर्थ्यमाप्नोति, कार्यकाले तस्य स्व[5]भाव (वा) विशेषात् ततः प्रागपि कार्योत्पत्तिप्रसङ्गात्। तस्मिन् सत्यभवन्नसति स्वयमेव भवन् अयं भावः तत्कार्यव्यपदेशमपि न लभते; न हि समर्थे कारणे प्रादुर्भावमप्राप्नुवत् कार्यमितरद्वा कारणम् अतिप्रसङ्गात्। न च समनन्तरभावविशेषमात्रेण तत्कार्यत्वं युक्तम्, समनन्तरप्रभवत्वस्यैवासम्भवात्–इतरेतराश्रयप्रसक्तेः–इति प्रतिपादित[6]त्वात्।

उपचरितं चैवं तस्य कार्यत्वमितरस्य च कारणत्वं स्यात् अक्षणिकवत्। तत्कारणभावे सत्यभवन्तं प्रति पुनः कारणस्य भावाभावयोर्न कश्चिद्विशेषः ततोऽक्षणिकादिव क्षणिकादपि सत्त्वादिर्व[7]स्तुस्वभावो व्यावर्त्तत एव। न ह्यक्षणिके एव क्रम-यौगपद्याभ्यामर्थक्रियाविरोधः किं तर्हि क्षणभङ्गेऽपि। तथाहि-न तावत् कार्य-कारणयोः क्रमः सम्भवति, कालभेदात् जन्यजनकभावविरोधात्, चिरतरोपरतोत्पन्नपितापुत्रवत्। न हि तादृशस्यापेक्षापि सम्भवति, अनाधेयाऽप्रहेयातिशयत्वात्, अक्षणिकवत् न हि[8] किञ्चिदतिशयं ततो नासादर्यत् भावान्तरमपेक्षते यतः क्रमः स्यात्, जन्य-जनकयोराधेयविशेषत्वेऽपि न क्रमसम्भवः, क्रमिणोः कालभेदात् तत्त्वानुपपत्तेः। यौगपद्यं तु तयोर्हेतुफलभावतयैवासम्भवि, समानकालयोर्हि न हेतुफलभावः सव्येतरगोविषाणवदपेक्षानुपपत्तेः।

अत एव कृतकत्वादयोऽपि हेतवो वस्तुस्वभावाः परिणामानभ्युपगमवादिनां न सम्भवन्ति। तथाहि-अपेक्षितपरव्यापारो हि भावः स्वभावनिष्पत्तौ कृतक उच्यते, सा च परापेक्षा एकान्तनित्यवदेकान्ताऽनित्येऽप्यसम्भविनी; तदपेक्षाकारणकृतस्वभावविशेषेण विवक्षितवस्तुनः सम्बन्धोऽपि नोपपद्येत, स्वभावभेदप्रसक्तेः। अभेदे वाऽपेक्ष्यमाणादपेक्षकस्य सर्वथाऽऽत्मनिष्पत्तिप्रसङ्गात्। अतः स्वभावभिन्नयोः प्रत्यस्तमितोपकार्योपकारकस्वभावयोर्भावयोः सम्बन्धानुपपत्तेः 'अस्येदम्' इति व्यपदेशस्यानुपपत्तिः। यदि पुनरपेक्षमाणस्य तदपेक्ष्यमाणेन व्यतिरिक्तमुपकारान्तरं क्रियेत, तत्सम्बन्धव्यपदेशार्थं तत्राप्युपकारान्तरं कल्पनीयमित्यनवस्था सकलव्योमतलावलम्बिनी प्रसज्येत। तस्मान्नित्याऽनित्यपक्षयोरर्थक्रियालक्षणं सत्त्वम् कृतकत्वं वा न सम्भवतीति यत् किञ्चित् सत् कृतकं वा तत् सर्वं परिणामि, इतरथाऽकिञ्चित्करस्यावस्तुत्वप्रसङ्गान्नभस्तलारविन्दिनीकुसुमवत्———— सन् कृतको वा शब्द-बुद्धि-प्रदीपादिरिति सिद्धः परिणामी। सत्त्वं चार्थक्रियाकारित्वमेव, अन्यस्य निषिद्धत्वात्, तच्चात्यन्तोच्छेदवत्सु न सम्भवत्येव, ततो व्यावर्त्तमानो हेतुः अनत्यन्तोच्छेदवत्स्वेव संभवतीति कथं न प्रकृतहेतुपक्षबाधकत्वमाशङ्कनीयं प्रकृतसाध्यसाधकस्य हेतोरनेकदोषदुष्टत्वप्रतिपादनात्?

न चासत्प्रतिपक्षत्वमप्यस्य। तथाहि—'बुद्ध्यादिसन्तानो नात्यन्तोच्छेदवान्, सर्वप्रमाणानुपलभ्यमानतथोच्छेदत्वात्, यो हि सर्वप्रमाणानुपलभ्यमानतथोच्छेदो न स तत्त्वेनोपेयः, यथा

१–न्तिको वि–भां०, मां०। २–वश्चाभावः वा०, बा०। ३–वविवर्त्त–आ०। ४–भावाभाविवि–आ०, कां०। –भावाभावावि–वा०, बा०, मां०, भां०। ५–षमन्तरेण त–भां०, मां०। ६ पृ० १३८ पं० २३। ७ हि कश्चि–वा०, बा०। ८–यन् भा–भां०, मां०। ९–पद्यते भां०, मां०।

पार्थिवपरमाणुपाकजरूपादिसन्तानः, तथाच बुद्ध्यादिसन्तानः, तस्मान्नात्यन्तोच्छेदवान्' इति कथं न सत्प्रतिपक्षत्वं 'सन्तानत्वात्' इत्यनुमानस्य? न च प्रस्तुतानुमानत एव सन्तानोच्छेदस्य प्रतीतौ सर्वप्रमाणानुपलभ्यमानतथोच्छेदत्वमसिद्धम्, सन्तानत्वसाधनस्य सत्प्रतिपक्षत्वात्। न चास्य प्रतिपक्षसाधनस्य प्रमाणत्वे सिद्धे सन्तानत्वसाधनस्य सत्प्रतिपक्षत्वम् अस्य च सत्प्रतिपक्षत्वे विवक्षितानुपलब्धेः प्रतिपक्षसाधनस्य प्रमाणत्वमिति वाच्यम्, भवद्भिप्रायेण सत्प्रतिपक्षत्वदोषस्योद्भावनात्; परमार्थतस्तु यथाऽयं दोषो न भवति तथा प्रतिपादितम् प्रतिपादयिष्यते च। सन्तानत्वहेतोस्त्वसिद्धाऽनैकान्तिक-विरुद्धत्वान्यतमदोषदुष्टत्वेनासाधनत्वम्, तच्च प्रतिपादि[1]तमित्यलमतिप्रसङ्गेन, दिङ्मात्रप्रदर्शनपरत्वात् प्रयासस्य।

यच्च[2] 'निर्हेतुकविनाशप्रतिषेधात् सन्तानोच्छेदे हेतुर्वाच्यः' इत्यादि, तदसङ्गतम्; सम्यग्ज्ञानाद् विपर्ययज्ञानव्यावृत्तिक्रमेण धर्माऽधर्मयोस्तत्कार्यस्य च शरीरादेरभावेऽपि सकलपदार्थविषयसम्यग्ज्ञानानन्तानिन्द्रियजप्रशमसुखादिसन्तानस्य निवृत्त्यसिद्धेः। न च शरीरादिनिमित्तकारणमात्ममनःसंयोगं चासमवायिकारणमन्तरेण न ज्ञानोत्पत्तिः, परलोकसाधनप्रस्तावे

"तं[3]स्माद्यस्यैव संस्कारं नियमेनानुवर्तते।
तन्नान्तरीयकं चित्तमतश्चित्तसमाश्रयम्" ॥ [ ]

इति न्यायेन ज्ञानस्य ज्ञानोपादानत्वप्रतिपादनात्; अन्यथा परलोकाभावप्रसङ्गात्; नित्यस्यात्मन समवायिकारणत्वेन ज्ञानादिकं प्रति निषिद्ध[4]त्वात् आत्ममनःसंयोगस्य वाऽसमवायिकारणस्य प्रतिषेत्स्यमानत्वात् निषिद्ध[5]त्वाच्च संयोगस्य निमित्तकारणस्य वा; प्रतिनियतत्वेन शरीराद्यभावेऽपि देश-कालादेरात्मनो ज्ञानादिस्वभावस्योत्तरज्ञानाद्यवस्थारूपतया परिणमतः सहकारित्वसम्भवात्। ईश्वरज्ञानं च शरीरादिनिमित्तकारणविकलमप्यभ्युपगच्छति—तज्ज्ञानेऽपि नित्यत्वस्य प्रतिषिद्ध[6]त्वात्—न पुनर्मुक्त्यवस्थायामात्मनस्तत्स्वभावस्येति सुस्थितम् नैयायिकत्वं परस्य।

यत्तूक्त[7]म् 'आरब्धकार्ययोर्धर्माधर्मयोरुपभोगात् प्रक्षयः संचितयोश्च तत्त्वज्ञानात्' इत्यादि, तदपि न सङ्गतम्; उपभोगात् कर्मणः प्रक्षये तदुपभोगसमयेऽपरकर्मनिमित्तस्याभिलाषपूर्वकमनोवाक्-कायव्यापारस्वरूपस्य सम्भवादविकलकारणस्य च प्रचुरतरकर्मणः सद्भावात् कथमात्यन्तिकः कर्मक्षयः? सम्यग्ज्ञानस्य तु मिथ्याज्ञाननिवृत्त्यादिक्रमेण पापक्रियानिवृत्तिलक्षणचारित्रोपबृंहितस्याऽऽगामिकर्मानुत्पत्तिसामर्थ्यवत् सञ्चितकर्मक्षयेऽपि सामर्थ्यं संभाव्यत एव—यथोष्णस्पर्शस्य भाविशीतस्पर्शानुत्पत्तौ समर्थस्य पूर्वप्रवृत्ततत्स्पर्शादिध्वंसेऽपि सामर्थ्यमुपलब्धम्—किन्तु परिणामिजीवाजीवादिवस्तुविषयमेव सम्यग्ज्ञानं न पुनरेकान्तनित्यानित्यात्मादिविषयम्; तस्य विपरीतार्थग्राहकत्वेन मिथ्यात्वोपपत्तेः। यथा चैकान्तवादिपरिकल्पित आत्माद्यर्थो न संभवति तथा यथास्थानं निवेदयिष्यते। मिथ्याज्ञानस्य च मुक्तिहेतुत्वं परेणापि नेष्यत एव अतो यदुक्तम् "यथैधांसि" इत्यादि, तत्[8] सर्वसंवररूपचारित्रोपबृंहितसम्यग्ज्ञानाग्नेरशेषकर्मक्षये सामर्थ्यमभ्युपगम्यते, तत् सिद्धमेव साधितम्।

यच्चोपभोगादशेषकर्मक्षयेऽनुमानमुपन्यस्तम्[9], तत्र यदेवाऽऽगामिकर्म[10]प्रतिबन्धे समर्थं सम्यग्ज्ञानादि तदेव सञ्चितक्षयेऽपि परिकल्पयितुं युक्तमिति प्रतिपादितं सर्वज्ञसाधनप्रस्तावे। उपभोगात्तु प्रक्षये स्तोकमात्रस्य कर्मणः प्रचुरतरकर्मसंयोगे[11]संचयोपपत्तेर्न तदशेषक्षयो युक्तिसङ्गतः। 'कर्मत्वात्' इति च हेतुः सन्तानत्ववदसिद्धाद्यनेकदोषदुष्टत्वान्न प्रकृतसाध्यसाधकः। असिद्धत्वादिदोषोद्भावनं च सन्तानत्वहेतुदूषणानुसारेण स्वयमेव वाच्यं न पुनरुच्यते ग्रन्थगौरवभयात्।

यच्च[12] 'समाधिबलादुत्पन्नतत्त्वज्ञानस्य' इत्यादि, तदप्ययुक्तम्; अभिलाषरूपरागाद्यभावे

१–वक्षितत्वा–वा०, बा०। २ पृ० १५६ पं० ३–पृ० १५७ पं० ३०। ३ पृ० १५० पं० १४। ४ पृ० ७७ पं० ३२। ५ प्रतिषिद्धत्वा–वि० विना। ६ पृ० ११३ पं० ४२। ७ पृ० १२६ पं० २३। अत्र स्थले प्रमेयकमलमार्तण्डे "नित्यत्वं चेश्वरज्ञानस्य ईश्वरनिराकरणे प्रतिषिद्धम्, शरीराद्यपायेऽप्यस्य ज्ञानाद्यभ्युपगमेऽन्यात्मनोऽपि सोऽस्तु तत्स्वभावत्वात्"–पृ० ९१ प्र०, पं० १२। ८ पृ० १५० पं० २०। ९ पृ० १५० पं० २२। १०–त् सर्वं संव–भां०। ११–मवगम्यते सिद्ध–वा०। १२ पृ० १५० पं० २६। १३–कर्मसामर्थ्यप्रति–वि०। १४–ग योप–वा०। १५ पृ० १५० पं० २८।

रुयाद्युपभोगासम्भवात्, सम्भवेऽपि चावश्यंभावी ऋद्धिमतो भवदभिप्रायेण योगिनोऽपि प्रचुरतर-धर्माधर्मसंभवोऽतिभोगिन इव नृपत्यादेः, वैद्योपदेशप्रवर्तमानातुरदृष्टान्तोऽप्यसङ्गतः, तस्यापि निरुग्भावाभिलाषेण प्रवर्त्तमानस्यौषधाद्याचरणे वीतरागत्वासिद्धेः। न च मुमुक्षोरपि मुक्तिसुखाभिलाषेण प्रवर्तमानस्य सरागत्वम्, सम्यग्ज्ञानप्रतिबन्धकरागविगमस्य सर्वज्ञत्वान्यथानुपपत्त्या प्राक् प्रसाधितत्वात्[3]। भवोपग्राहिकर्मनिमित्तस्य तु वाग्-बुद्धि-शरीराऽऽरम्भप्रवृत्तिरूपस्य सातजनकस्य शैलेश्यवस्थायां मुमुक्षोरभावात् प्रवृत्तिकारणत्वेनाभ्युपगम्यमानस्य सुखाभिलाषस्याप्यसिद्धेर्न मुमुक्षो रागित्वम्। प्रसिद्धश्च भवतां प्रवृत्त्यभावो भाविधर्माधर्मप्रतिबन्धकः। यश्च भाविधर्माधर्माभ्यां विरुद्धो हेतुः स एव सञ्चितँतत्क्षयेऽपि युक्त इति प्रतिपादितम्।

अत एव सम्यग्ज्ञान-दर्शन-चारित्रात्मक एव हेतुर्भावि-भूतकर्मसम्बन्धप्रतिघातकत्वाद् मुक्तिप्राप्त्यवन्ध्यकारणं नान्य इति। तेन यँदुक्तम् 'तत्त्वज्ञानिनां कर्मविनाशस्तत्त्वज्ञानात्' इति, तद्युक्तमेव। यँत्तु 'इतरेषामुपभोगात्' इति, तदयुक्तम्; उपभोगात् तत्क्षयानुपपत्तेः प्रतिपादितत्वात्[4]। यँत्तु 'नित्य-नैमित्तिकानुष्ठानं केवलज्ञानोत्पत्तेः प्राक् काम्यनिषिद्धानुष्ठानपरिहारेण ज्ञानावरणादिदुरितक्षयनिमित्तत्वेन केवलज्ञानप्राप्तिहेतुत्वेन च प्रतिपादितम्' तदिष्टमेवास्माकम्। केवलज्ञानलाभोत्तरकालं तु शैलेश्यवस्थायामशेषकर्मनिर्जरणरूपायां सर्वक्रियाप्रतिषेध एवाभ्युपगम्यत इति न तन्निमित्तो धर्माधर्मफलप्रादुर्भावः, प्रवृत्तिनिवृत्तेरात्यन्तिक्यास्तत्क्षयहेतुत्वँसिद्धेः।

यँच्चोक्तम् 'विपर्ययज्ञानध्वंसादिक्रमेण विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्त्यभ्युपगमे न तत्त्वज्ञानकार्यत्वादनित्यत्वं वाच्यम्' इत्यादि, तदप्ययुक्तम्; विशेषगुणोच्छेदविशिष्टात्मनो मुक्तिरूपतया प्रतिषिद्धँत्वात्, बुद्ध्यादेर्विशेषगुणत्वस्यात्यन्तिकतत्क्षयस्य च प्रमाणबाधितत्वात्। गुणव्यतिरिक्तस्य च गुणिन आत्मलक्षणस्यैकान्तनित्यस्य निषेत्स्यमानत्वात् तस्य बुद्ध्यादिविशेषगुणतादात्म्याभावोऽसिद्धः।

यच्च[13] 'मोक्षावस्थायां चैतन्यस्याप्युच्छेदान्न कृतबुद्ध्यस्तत्र प्रवर्त्तन्त इत्यानन्दरूपात्मस्वरूप एव मोक्षोऽभ्युपगन्तव्यः' इति, एतत् सत्यमेव। यच्च[14] 'यथा तस्य चित्स्वभावता नित्या तथा परमानन्दस्वभावताऽपि' इत्यादि, तदयुक्तम्; चित्स्वभावतायाः अप्येकान्तनित्यतानभ्युपगमात्; आत्मस्वरूपता तु चिद्रूपताया आनन्दरूपतायाश्च कथंचिदभ्युपगम्यत एव। यँच्च[15] 'अनन्यत्वेन श्रुतौ श्रवणम् 'विज्ञानमानन्दं ब्रह्म' इति, तदपि नास्मदभ्युपगमबाधकम्, समस्तज्ञेयव्यापिनो ज्ञानस्यावैषयिकस्य चानन्दस्य स्वसंविदितस्य मुक्त्यवस्थायां सकलकर्मरहितात्मब्रह्मरूपाभेदेन कथंचिदभीष्टत्वात्।

यँदपि[16] 'यदाऽविद्यानिवृत्तिः तदा स्वरूपप्रतिपत्तिः सैव मोक्षः' इति, तदपि युक्तमेव, अष्टविधपारमार्थिककर्मप्रवाहरूपानाद्यविद्यात्यन्तिकनिवृत्तेः स्वरूपप्रतिपत्तिलक्षणमोक्षावाप्तेरभीष्टत्वात्। अत एव 'आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते' इँत्येतदपि नास्मत्पक्षक्षतिमुद्वहति, अभिव्यक्तेः स्वसंविदितानन्दस्वरूपतया तदवस्थायामात्मन उत्पत्तेरभ्युपगमात्। यच्च 'यथात्मनो महत्त्वं निजो गुणः' इँत्यादि, तदसारम्; नित्यसुख—महत्त्वादेरात्माऽव्यतिरिक्तत्वेन तद्धर्मत्वेन वा प्रमाणबाधितत्वादनभ्युपगमार्हत्वात्। अत एव 'संसारावस्थायामपि नित्यसुखस्य तत्संवेदनस्य च सद्भावात् संसार-मुक्त्यवस्थयोरविशेषः' इत्यादिँ[19] यदूषणमत्र पक्षे उपन्यस्तं तदनभ्युपगमादेव निरस्तम्।

यच्चानित्यत्वपक्षेऽपि 'तस्यामवस्थायां सुँखोपपत्तावपेक्षाकारणं वक्तव्यम्, न ह्यपेक्षाकारणशून्यः आत्ममनःसंयोगः कारणत्वेनाभ्युपेयते' इँत्यादि, तदप्यसङ्गतम्; ज्ञान-सुखादेश्चैतन्योपादेयत्वेन तद्धर्मानुवृत्तितः प्राक् प्रतिपादितत्वात्[22], सेन्द्रियशरीरादेस्तु तदुत्पत्तावपेक्षाकारणत्वेनाभ्युपगम्यमानस्याव्यापकत्वात्। तथाहि—सेन्द्रियशरीराद्यपेक्षाकारणव्यापाररहितं विज्ञानमुपलभ्यत एव

१ अत्र प्रमेय० मा० "गृद्धिमतो भवदभि"-इत्येव पाठः, स एव च सम्यक्-पृ० ९१ द्वि०, पं० २। २ पृ० १५० पं० ३१। ३ पृ० ६१ पं० २। ४-**तक्षये**-मां०। ५ पृ० १५९ पं० २४। ६ पृ० १५० पं० ३३। ७ पृ० १५० पं० ३३। ८ पृ० १५९ पं० ३४। ९ पृ० १५० पं० ३९। १०-**त्वसिद्धः** वि०। ११ पृ० १५१ पं० ६। १२ पृ० १५६ पं० ३। १३ पृ० १५१ पं० ९। १४ पृ० १५१ पं० १०। १५ पृ० १५१ पं० ११। १६ पृ० १५१ पं० १५। १७ पृ० १५१ पं० १७। १८ पृ० १५१ पं० १९। १९ पृ० १५१ पं० २८। २० **सुखोत्पत्ता**-मां०। २१ पृ० १५२ पं० ३। २२ पृ० १५९ पं० १५।

समस्तज्ञेयविषयत्वेनानियतविषयम्, यथाऽव्यापृतचक्षुरादिकरणग्रामस्य, 'सदसती तत्त्वम्' इति ज्ञानं सकलाक्षेपेण व्याप्तिप्रसाधकं वा। न चात्राप्यात्माऽन्तःकरणसंयोगस्य शरीराद्यपेक्षाकारणसहकृतस्य व्यापार इति वक्तुं युक्तम्, अन्तःकरणस्याणुपरिमाणद्रव्यरूपस्य प्रमाणबाधितत्वेनानभ्युपगमार्हत्वात् संयोगस्य च निषिद्धत्वात्[1]। शरीरादीनां तु ज्ञानोत्पत्तिवेलायां सन्निधानेऽपि तद्गुण-दोषाऽन्वय-व्यतिरेकानुविधानस्य तज्ज्ञानेऽनुपलम्भान्नापेक्षाकारणत्वं कल्पयितुं युक्तम्, तथापि तत्कल्पनेऽतिप्रसङ्गः। देश-कालादिकं च विशुद्धज्ञानक्षणस्यान्वयिनः ज्ञानान्तरोत्पादने प्रवर्तमानस्यापेक्षाकारणं न प्रतिषिध्यते मुक्त्यवस्थायामपि, शरीरादिकं तु तस्यामवस्थायां कारणाभावादेवानुत्पन्नं नापेक्षाकारणं भवितुमर्हति। यदि च सेन्द्रियशरीरापेक्षाकारणमन्तरेण ज्ञानादेरुत्पत्तिर्नाभ्युपेयेत तदा तथाभूतापेक्षाकारणजन्यज्ञानस्य चक्षुरादिज्ञानस्येव प्रतिनियतविषयत्वं स्यादिति 'सदसद्गर्गः कस्यचिदेकज्ञानालम्बनः, प्रमेयत्वात्, पञ्चाङ्गुलिवत्' इत्यतोऽनुमानादनुमीयमानं सर्वज्ञज्ञानमपि प्रतिनियतविषयत्वान्न सर्वविषयं स्यात्। यदि पुनस्तज्ज्ञानं सकलपदार्थविषयत्वात् तज्जन्यं "अर्थवत् प्रमाणम्" [वात्स्या० भा० पृ० १, पं० २] इति वचनात् सेन्द्रियशरीरापेक्षाकारणाऽजन्यं वाभ्युपगम्यते अन्यथा सर्वविषयत्वं न स्यादिति तर्हि मुक्त्यवस्थायामपि देहाद्यपेक्षाकारणाऽजन्यं किं नाभ्युपगम्यते? प्रसाधितं चानिन्द्रियजं सकलपदार्थविषयमध्यक्षं ज्ञानं सर्वज्ञसाधनप्रस्तावे इति न सेन्द्रियशरीरापेक्षाकारणजन्यत्वाभावे तज्ज्ञानस्य प्रतिनियतविषयत्वाभावादभाव एवाभ्युपगन्तुं युक्तः।

अपि च, सकलपदार्थप्रकाशकत्वं ज्ञानस्य स्वभावः, स च सेन्द्रियदेहाद्यपेक्षाकारणस्वरूपावरणेनाच्छाद्यतेऽपवरकावस्थितप्रकाश्यपदार्थप्रकाशकस्वभावप्रदीप इव तदावारकशरावादिना, तदपगमे तु प्रदीपस्येव स्वप्रकाश्यप्रकाशकत्वं ज्ञानस्यायत्नसिद्धमिति कथमावरणभूतसेन्द्रियदेहाद्यभावे तदवस्थायां ज्ञानस्याप्यभावः प्रेर्येत? अन्यथा प्रदीपावारकशरावाद्यभावे प्रदीपस्याप्यभावः प्रेरणीयः स्यात्। न च शरावादेरावारकस्य प्रदीपं प्रत्यजनकत्वमाशङ्कनीयम्, तथाभूतप्रदीपपरिणतिजनकत्वाच्छरावादेः, अन्यथा तं प्रत्यावारकत्वमेव तस्य न स्यात्, परिणामस्य च प्रसाधयिष्यमाणत्वात्। उपलभ्यते च संसारावस्थायामपि वासीचन्दनकल्पस्य मुमुक्षोः सर्वत्र समवृत्तेर्विशिष्टध्यानादिव्यवस्थितस्य सेन्द्रियशरीरव्यापाराजन्यः परमाह्लादरूपोऽनुभवः, तस्यैव भावनावशादुत्तरोत्तरावस्थामासादयतः परमकाष्ठागतिरपि सम्भाव्यत एवेत्येतदपि सर्वज्ञसाधनप्रस्तावे प्रतिपादितमिति न पुनरुच्यते।

परमार्थतस्त्वानन्दरूपताऽऽत्मनः स्वरूपभूता तद्विबन्धककर्मक्षयात् तस्यामवस्थायामुत्पद्यते। एकान्तनित्यस्य त्वविचलितरूपस्यात्मनो वैषयिकसुख-दुःखोपभोगोऽप्यनुपपन्नः, एकस्वभावस्य तत्स्वभावापरित्यागे भिन्नसुख-दुःखसंवेदनोत्पादेऽप्याकाशस्येव तदनुभवाभावात्। तत्समवेत-तदुत्पत्त्यादिकं तु प्रतिक्षिप्तत्वान्न वक्तव्यम्, 'ज्ञानं चोत्तरज्ञानोत्पादनस्वभावम्, यच्च यत्स्वभावम् न तत् तदुत्पादनेऽन्यापेक्षम्, यथान्त्या बीजादिकारणसामग्री अङ्कुरोत्पादने, तत्स्वभावश्च पूर्वो ज्ञानक्षण उत्तरज्ञानक्षणोत्पादने' इति स्वभावहेतुः; अन्यथाऽसौ तत्स्वभाव एव न स्यात्। न च संसारावस्थाज्ञानान्त्यक्षणस्योत्तरज्ञानजननस्वभावत्वमसिद्धम्, तथाभ्युपगमे सत्तासंबन्धादेः सत्त्वस्य निषिद्धत्वात् तदजनकत्वेन तस्यानर्थक्रियाकारित्वात् अवस्तुत्वापत्तेस्तज्जनकस्येत्येवमशेषचित्तसन्तानस्यावस्तुत्वप्रसङ्गः।

अथ स्वसन्तानवर्त्तिचित्तक्षणस्याजनकत्वेऽपि सन्तानान्तरवर्त्तियोगिज्ञानस्य जननान्नाशेषचित्तक्षणावस्तुत्वप्रसक्तिः; नन्वेवं रसादेरेककालस्य रूपादेरव्यभिचार्यनुमानं साश्रवचित्तसन्ताननिरोधलक्षणमुक्तिवादिनो बौद्धस्य न स्यात्, रूपादेरन्त्यक्षणवद् विजातीयकार्यजनकत्वेऽपि सजातीयकार्यानारम्भसंभवात्। एकसामग्र्यधीनत्वेन रूप-रसयोर्नियमेन कार्यद्वयारम्भकत्वेऽन्यत्रापि कार्यद्वयारम्भकत्वं किं न स्यात् योगिज्ञानान्त्यक्षणयोरपि समानकारणसामग्रीजन्यत्वात्? कथमेकत्रानुपयोगिनश्चान्यत्रोपयोगश्चरमक्षणस्य? उपयोगे वा ज्ञानान्तरप्रत्यक्षवादिनोऽपि नैयायि-

१ पृ० ११३ पं० ४२। २ पृ० ८५ पं० १४। ३ **चाऽभ्यु**-आ०। ४ पृ० ६५ पं० ३३-पृ० ६७ पं० ४। ५ **परिमाणस्य** मां०। ६ पृ० ६१ पं० २५। ७ पृ० १३५ पं० ९। ८-**दस्वभा**-आ०, वि०। ९ पृ० ११० पं० ९। १० **योगिनां ज्ञाना**-हा०, कां०, गु०। ११ **वा ज्ञानज्ञानान्तर**-मां०, भां०।

कस्य स्वविषयज्ञानजननासमर्थस्यापि ज्ञानस्यार्थज्ञानजननसामर्थ्यं किं न स्यात्? तथा च नार्थचिन्तनमुत्सीदेत्। अथ स्वसन्तानवर्त्तिकार्यजननसामर्थ्यवद् भिन्नसन्तानवर्त्तिकार्यजननसामर्थ्यमपि नेष्यते तर्हि सर्वथार्थक्रियासामर्थ्यरहितत्वेनान्त्यक्षणस्यावस्तुत्वप्रसक्तिः। तथाविधस्यापि वस्तुत्वे सर्वथाऽर्थक्रियारहितस्य अक्षणिकस्यापि वस्तुत्वप्रसक्तिः। तथा च सत्त्वादयः क्षणिकत्वं न साधयेयुः अनैकान्तिकत्वात्। तस्मात् साश्रवचित्तसन्ताननिरोधलक्षणाऽपि मुक्तिर्विशेषगुणरहितात्मस्वरूपेवाऽनुपपन्ना।

निराश्रवचित्तसन्तत्युत्पत्तिलक्षणा त्वभ्युपगम्यत एव, केवलं सा चित्तसंततिः सान्वया युक्ता; बद्धो हि मुच्यते नाबद्धः। न च निरन्वये चित्तसन्ताने बद्धस्य मुक्तिः संभवति, तत्र ह्यन्यो बद्धोऽन्यश्च मुच्यते, सन्तानैक्याद् बद्धस्यैव मुक्तिरत्रापीति चेत्, यदि सन्तानार्थः परमार्थसंस्तदाऽऽत्मैव सन्तानशब्देनोक्तः स्यात्, अथ संवृतिसन् तदैकस्य परमार्थसतोऽसत्त्वादन्यो बद्धोऽन्यश्च मुच्यत इति बद्धस्य मुक्त्यर्थं न प्रवृत्तिः स्यात्। अथात्यन्तनानात्वेऽपि दृढरूपतया क्षणानामेकत्वाध्यवसायात् 'बद्धमात्मानं मोचयिष्यामि' इत्यभिसन्धानवतः प्रवृत्तेर्नायं दोषः तर्हि न नैरात्म्यदर्शनमिति कुतस्तन्निबन्धना मुक्तिः? अथास्ति नैरात्म्यदर्शनं शास्त्रसंस्कारजम्, न तर्ह्येकत्वाध्यवसायोऽस्खलद्रूप इति कुतो बद्धस्य मुक्त्यर्थं प्रवृत्तिः स्यात्? तथा च "मिथ्याध्यारोपहानार्थं यत्नोऽसत्यपि मोक्तरि" [ ] इत्येतत् प्लवते। तस्मादसति विज्ञानक्षणान्वयिनि जीवे बन्ध-मोक्षयोस्तदर्थं वा प्रवृत्तेरनुपपत्तेः सान्वया चित्तसन्ततिरभ्युपगन्तव्या।

न च 'यस्मिन् व्यावर्त्तमाने यदनुवर्त्तते तत् तत एकान्ततो भिन्नम्, यथा घटे व्यावर्त्तमानेऽनुवर्त्तमानः पटः, व्यावर्त्तमाने च ज्ञानक्षणेऽनुवर्त्तते चेज्जीवस्ततस्ततो भिन्न एव'-अन्यथा विरुद्धधर्माध्यासेऽपि यद्येकान्ततो भेदो न स्यादन्यस्य भेदलक्षणस्याभावादभिन्नं सकलं जगत् स्यात्—इत्यतोऽनुमानात् व्यावृत्ताऽनुवृत्तयोर्भेदसिद्धेर्न सान्वया निरास्रवचित्तसन्ततिर्मुक्तिरिति वक्तुं युक्तम्, असति तत्र पूर्वापरज्ञानक्षणव्यापके आत्मनि स्वसंविदितैकत्वप्रत्ययस्य प्रत्यक्षस्यानुपपत्तेः। अथात्मन्यसत्यप्यध्यारोपितैक(-कत्व-)विषयः प्रत्ययः प्रादुर्भविष्यति, अयुक्तमेतत्; स्वात्मन्यनुमानात् क्षणिकत्वं निश्चिन्वतः समारोपितैकत्वविषयस्य विकल्पस्य निवृत्तिप्रसङ्गात् निश्चयाऽऽरोपमनसोर्विरोधात्, अविरोधे वा सविकल्पकप्रत्यक्षवादिनोऽपि सर्वात्मना प्रत्यक्षेणार्थनिश्चयेऽपि समारोपविच्छेदाय प्रवर्त्तमानं न प्रमाणान्तरमनर्थकं स्यात्। निवर्त्तत एवैकत्वविषयो विकल्पोऽनुमानात् क्षणिकत्वं निश्चिन्वत इति चेत्, तर्हि सहजस्याऽऽभिसंस्कारिकस्य च सत्त्वदर्शनस्याभावात् तदैव तन्मूलरागादिनिवृत्तेर्मुक्तिः स्यात्।

न चायमेकत्वविषयः प्रत्ययः प्रतिसङ्ख्यानेन निवर्त्तयितुमशक्यत्वान्मानसो विकल्पः। तथाहि—अनुमानबलात् क्षणिकत्वं विकल्पयतोऽपि नैकत्वप्रत्ययो निवर्त्तते, शक्यन्ते तु प्रतिसङ्ख्यानेन निवारयितुं कल्पनाः न पुनः प्रत्यक्षबुद्धयः। तस्माद् यथा अश्वं विकल्पयतोऽपि गोदर्शनान्न गोप्रत्ययो विकल्पस्तथा क्षणिकत्वं विकल्पयतोऽप्येकत्वदर्शनान्नैकत्वप्रत्ययो विकल्पः। नाप्ययं भ्रान्तः, प्रत्यक्षस्याशेषस्यापि भ्रान्तत्वप्रसङ्गात्। बाह्याभ्यन्तरेषु भावेष्वेकत्वग्राहकत्वेनैवाशेषप्रत्यक्षेणानुत्पत्ति(-प्रत्यक्षाणामुत्पत्ति-)प्रतीतेः, तथा च प्रत्यक्षस्याभ्रान्तत्वविशेषणमसम्भव्येव स्यात्। तस्मादेकत्वग्राहिणः स्वसंवेदनप्रत्यक्षस्याऽभ्रान्तस्य कथञ्चिदेकत्वमन्तरेणानुपपत्तेर्नानुगतरूपाभावः।

नाप्यनुगत-व्यावृत्तरूपयोरैकान्तिको भेदः, तद्भेदप्रतिपादकस्यानुमानस्य तदभेदग्राहकप्रत्यक्षप्रत्ययबाधितत्वात्। न च प्रतीयमानस्य रूपस्य विरोधः, अन्यथा ग्राह्य-ग्राहक—संवित्तिलक्षणविरुद्धरूपत्रयाध्यासितस्य ज्ञानस्याप्येकत्वविरोधः स्यात्। तथा, एकनीलक्षणस्याप्येकदा स्वपरकार्यजनकत्वाजनकत्वविरुद्धधर्मद्वयाध्यासितस्यैकत्वविरोधप्रसक्तिः। नैयायिकेनापि प्रतीयमाने वस्तुनि न विरोधोद्भावनं विधेयम्; अन्यथा 'स्थाणुरयं पुरुषो वा' इत्याकारद्वयसमुल्लेखिसंशयप्रत्ययस्याप्येकत्वं विरुद्धमासज्येत।

१-राश्रव-मां०, भां०। २-मारोपिवि-आ०, हा०। ३ अत्र स्थले प्रमेय० मा० ईदृशः पाठः "बाह्याऽध्यात्मिकभावेषु एकत्वग्राहकत्वेनैव अशेषप्रत्यक्षाणां प्रवृत्तिप्रतीतेः" पृ०९२ प्र०, पं० ८।

यच्चोक्तम् 'यदि योगजो धर्म आत्ममनःसंयोगस्यापेक्षाकारणम्' इत्यादि, तदपि निरस्तम्; सर्वस्यास्मान् प्रत्यनभ्युपगतोपालम्भमात्रत्वात्। यच्च 'मुमुक्षुप्रवृत्तिरिष्टाधिगमार्था, प्रेक्षापूर्वकारिप्रवृत्तित्वात्' इत्यनुमाने 'चिकित्साशास्त्रार्थानुष्ठायिनामातुराणामनिष्टप्रतिषेधार्था प्रवृत्तिर्दृश्यते' इत्यनैकान्तिकोद्भावनं तत्रानिष्टनिषेधेनाऽऽरोग्यसुखप्राप्तिलक्षणेष्टाधिगमार्थित्वेन तेषां तत्र प्रवृत्तेर्दर्शनान्नानैकान्तिकत्वम्। न चास्माकमयं पक्षः—मोक्षसुखरागेण मुमुक्षवो वीतरागाः सन्तः प्रवर्तन्ते, "मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तमः" [ ] इत्यभ्युपगमात्।

यच्च 'विज्ञानमानन्दं ब्रह्म इत्याद्यागमस्य गौणार्थप्रतिपादनपरत्वम्' अभ्यधायि, तदत्यन्तमसङ्गतम्; मुख्यार्थबाधकसद्भावे तदर्थकल्पनोपपत्तेः। न च तत्र किञ्चिद् बाधकमस्तीति प्रतिपादितम्। यच्च 'किंच, इष्टार्थाधिगमायां च' इत्याद्युक्तं तदपि सिद्धसाध्यतादोषान्निःसारतया चोपेक्षितम्। यदपि 'नित्यसुखाभ्युपगमे च विकल्पद्वयम्' इत्याद्यभिहितं तदप्यनभ्युपगमादेव निरस्तम्; नित्यस्य सुखस्यान्यस्य वा पदार्थस्यानभ्युपगमात्। यथाभूतं च स्वसंविदितं सुखं मोक्षावस्थायामात्मनस्तद्रूपतया परिणामिनः कथञ्चिदभिन्नमभ्युपगम्यते तथाभूतं प्राक् प्रसाधितमिति। यच्च 'न रागादिमतो विज्ञानात् तद्रहितस्योत्पत्तिर्युक्ता' इत्यादि, तदप्यसारम्; रागादिरहितस्य सकलपदार्थविषयस्य ज्ञानोपादानस्य ज्ञानस्य सर्वज्ञसाधनप्रस्तावे प्रतिपादितत्वात्।

यच्च 'विलक्षणादपि कारणाद् विलक्षणकार्योत्पत्तिदर्शनाद् बोधाद् बोधरूपतेति न प्रमाणमस्ति' इत्यादि, तदपि प्रतिविहितम् अचेतनाच्चेतनोत्पत्त्यभ्युपगमे चार्वाकमतप्रसक्तेः परलोकाभावप्रसक्त्या। परलोकसद्भावश्च प्राक् प्रसाधितः। यच्च 'ज्ञानस्य ज्ञानान्तरहेतुत्वे न पूर्वकालभावित्वं समानजातीयत्वम् एकसन्तानत्वं वा हेतुर्व्यभिचारात्' इत्यादि, तदपि प्रतिविहितमेव "तस्माद् यस्यैव संस्कारं नियमेनानुवर्तते" इत्यादिना। तेन 'मरणशरीरज्ञानस्य गर्भशरीरज्ञानहेतुत्वे सन्तानान्तरेऽपि ज्ञानजनकत्वप्रसङ्गः; नियमहेतोरभावात्' इत्येतदपि स्वप्नायितमिव लक्ष्यते, नियमहेतोस्तत्संस्कारानुवर्तनस्य प्रदर्शितत्वात्।

यच्च 'सुषुप्तावस्थायां विज्ञानसद्भावे जाग्रदवस्थातो न विशेषः स्यात्' इत्यादि, तदपि प्रतिविहितम् 'यस्य यावती मात्रा' इत्यादिना। तथाहि—निद्रादिसामग्रीविशेषाद् विशिष्टं सुषुप्ताद्यवस्थायां गच्छत्तृणस्पर्शज्ञानतुल्यं बाह्याध्यात्मिकपदार्थानेकधर्मग्रहणविमुखं ज्ञानमस्ति; अन्यथा जाग्रत्-प्रबुद्धज्ञानप्रवाहयोरप्यभावप्रसक्तिरिति प्रतिपादितत्वात् परिणतिसमर्थनेन। यथा च अश्वविकल्पनकाले प्रवाहेणोपजायमानमपि गोदर्शनं ज्ञानान्तरवेद्यमपि भवदभिप्रायेणानुपलक्षितमास्ते—अन्यथा अश्वविकल्पप्रतिसंहारावस्थायाम् 'इयत्कालं यावत् मया गौर्दृष्टो न चोपलक्षितः' इति ज्ञानानुत्पत्तिप्रसक्तेः प्रसिद्धव्यवहारोच्छेदः स्यात्—तथा सुषुप्तावस्थायां स्वसंविदितज्ञानवादिनोऽप्यनुपलक्षितं ज्ञानं भविष्यतीति न तदवस्थायां विज्ञानासत्त्वात् तत्सन्तत्युच्छेदः। न च युगपज्ज्ञानानुत्पत्तेरश्वविकल्पकाले ज्ञानान्तरवेद्यगोदर्शनासंभवः, सविकल्पाविकल्पयोर्ज्ञानयोर्युगपद्वृत्तेरनुभवात्; अन्यथा प्रतिनिवृत्ताश्वविकल्पस्य तावत्कालं यावद् गोदर्शनस्मरणाध्यवसायो न स्यात्। क्रमभावेऽपि च तयोर्विज्ञानयोर्विज्ञानं ज्ञानान्तरविदितमप्यनुपलक्षितमवश्यं तस्यामवस्थायां परेणाभ्युपगमनीयम्, तदभ्युपगमे च यदि स्वापावस्थायां स्वसंविदितं यथोक्तं ज्ञानमभ्युपगम्यते तदा न कश्चिद्विरोधः। शेषस्तु पूर्वपक्षग्रन्थोऽनभ्युपगमान्निरस्तः।

यदपि 'अनेकान्तभावनातः इत्याद्यभ्युपगमे तज्ज्ञानस्य निःश्रेयसकारणत्वं प्रतिषिद्धम्, अनेकान्तज्ञानस्य बाधकसद्भावेन मिथ्यात्वोपपत्तेः' इत्यभिहितम्, तदप्यसम्यक्; अनेकान्तज्ञानस्यैवाऽबाधितत्वेन सम्यक्त्वेन प्रतिपादितत्वात्। यच्च 'नित्यानित्ययो(-त्वयो-)र्विधि-प्रतिषेधरूपत्वादभिन्ने

---

१ पृ० १५२ पं० ३। २ पृ० १५२ पं० ९। ३ पृ० १५२ पं० १४। ४ पृ० १५२ पं० २८। ५ पृ० १५२ पं० ३३। ६ पृ० १५३ पं० ३२। ७ पृ० १५९ पं० १८। ८ पृ० १५४ पं० २४। ९ पृ० ६१ पं० १४। १० पृ० १५४ पं० २६। ११ पृ० ७४ पं० १८। १२ पृ० १५४ पं० २७। १३ पृ० ७७ पं० ३२। १४ पृ० १५४ पं० ३२। १५ पृ० ७७ पं० ३२। १६ पृ० १५४ पं० ३८। १७ पृ० ९० पं० २७। १८ तयोर्विज्ञानं आ०, वि०, हा०। १९ पृ० १५५ पं० १२–पृ० १५५ पं० १९। २० पृ० १५९ पं० २७। २१ पृ० १५५ पं० २०।

धर्मिण्यभावः' इत्यनेकान्तपक्षस्य बाधकमुपन्यस्तं तद् अबाधकमेव, प्रतीयमाने वस्तुनि विरोधासिद्धेः। न च येनैव रूपेण नित्यत्वविधिस्तेनैव प्रतिषेधविधिः—येनैकत्व(कत्र)विरोधः स्यात्—किं तर्ह्यनुस्यूताकारतया नित्यत्वविधर्व्यावृत्ताकारतया च तस्य प्रतिषेधः। न चान्यधर्मनिमित्तयोर्विधि-प्रतिषेधयोरेकत्र विरोधः, अतिप्रसङ्गात्। न चानुगतव्यावृत्ताकारयोः सामान्यविशेषरूपतया[1]ऽऽत्यन्तिको भेदः, पूर्वोत्तरकालभाविस्वपर्यायतादात्म्येन स्थितस्यानुगताकारस्य बाह्याऽऽध्यात्मिकस्यार्थस्याबाधितप्रत्यक्षप्रतिपत्तौ प्रतिभासनात्।

यच्चेदम् 'घटादिर्मृदादिरूपतया नित्य इत्यत्र मृद्रूपतायास्ततोऽर्थान्तरत्वान्न ततो घटो नित्यः, मृद्रूपता हि मृत्त्वं सामान्यमर्थान्तरम्, तस्य नित्यत्वे न घटस्य तथाभावस्ततोऽन्यत्वात् घटस्य च कारणाद् विलयोपलब्धेरनित्यत्वमेव' इति, अयुक्तमेतत्; सामान्यस्य विशेषादर्थान्तरत्वानुपपत्तेः समानासमानपरिणामात्मको घटाद्यर्थोऽभ्युपगन्तव्यः। तथाहि—न तावत् स्वाश्रयादर्थान्तरभूता मृत्त्वजातिः सत्ता वा, स्वाश्रयैः संबन्धाभावात्-स्वसंबन्धात् प्रागसद्भिरपि स्वाश्रयैः संबन्धेऽतिप्रसङ्गात्; स्वत एव सद्भिः सत्तासंबन्धकल्पनावैयर्थ्यात्। समवायस्य सर्वगतत्वाद् व्यक्त्यन्तरपरिहारेण व्यक्त्यन्तरैरेव सर्वगतस्यापि सामान्यस्य संबन्धेऽतिप्रसङ्गपरिहारायाभ्युपगम्यमाना च प्रत्यासत्तिः प्रत्येकं परिसमाप्त्या[3] व्यक्त्यात्मभूता वाभ्युपगम्यमाना कथं समानपरिणामातिरिक्तस्य सामान्यस्य कल्पनां न निरस्येत् शुक्लादिवच्च स्वाश्रये स्वानुरूपप्रत्ययादिहेतोः सामान्यात् सदादिप्रत्ययादिवृत्तिर्न भवेत्? सामान्यस्य तु स्वत एव सदादिप्रत्ययादिविषयत्वे द्रव्यादिषु कः प्रद्वेषः? परतश्चेदनवस्था। अनध्यारोपिततद्रूपे च तत्प्रत्ययादिवृत्तावतिप्रसङ्गः स्यात्। तद्रूपाध्यारोपेऽपि तत्प्रत्ययादिश्चान्यत्र भ्रान्त एव प्रसक्तः।

समवायमपि च तादूप्यमेव समवायिनोः पश्यामः; अन्यथा तस्याप्याश्रिततया संबन्धान्तरकल्पनाप्रसङ्गात् तत्र चानवस्थायाः प्रदर्शितत्वात्[4]। विशेषणविशेष्यभावसंबन्धेऽप्यपरतत्कल्पनेऽनवस्था। समवायात् तत्संबन्धकल्पने इतरेतराश्रयत्वम्। अनाश्रितस्य तत्संबन्धत्वेऽप्यतिप्रसङ्गः। तस्य स्वतः संबन्धे वा सामान्यस्यापि तथाऽस्तु विशेषाभावात्। सति च वस्तुद्वये सन्निहिते 'इदं सदिदं[6] च सत्' इति सर्मुच्चयात्मकः प्रत्ययोऽनुभूयते, न पुनः 'इदमेवेदम्' इति; संभवद्विवक्षितैकव्यक्त्याधेयरूपस्य च सामान्यस्याशेषाश्रयग्रहणासंभवान्न कदाचनापि तस्य संपूर्णस्य ग्रहणं स्यात्। तद् व्यक्त्यनाधेयरूपासंभवे तद्वतरूपादिवत् तन्मात्रमेव स्यात्। स्वाश्रयसर्वगतसामान्यवादस्तु परिणामसामान्यवादान्न विशिष्यते, प्रत्याश्रयं परिसमाप्तत्वस्यान्यथानुपपत्त्या सामान्यसंबन्धशून्येष्वपि द्रव्यादिषु पदार्थादिप्रत्ययाद्यन्वयदर्शनाच्च।

नाप्यन्यस्य व्यावृत्तिः, स्वलक्षणगतायाः प्रत्येकपरिसमाप्तायाः परिणामसामान्यादभिन्नत्वात् व्यावृत्तेः। तदाश्रयान्यानेकव्यक्तिसाधारणी बुद्धिपरिकल्पिताऽतज्जातीयव्यावृत्तिः सामान्यमिष्यते, तस्मिंश्चावस्तुभूते शब्दप्रतिपादिते तथाविधे सामान्येऽस्वलक्षणविवक्षितेऽर्थक्रियार्थिनां[11] स्वलक्षणे[12] वृत्तिरपरिकल्पितरूपे कथं स्यात्?। दृश्य-विकल्प (ल्प्य) योरेकीकरणेन प्रवृत्तौ गोबुद्ध्याऽप्यश्वे प्रवर्तेत। न च विकल्पितस्य सामान्यस्यावस्तुभूततया केनचिद् दृश्येन सारूप्यमस्ति, सद्भावे वा सारूप्यस्य किं दृश्य-विकल्प्यैकीकरणवाचोयुक्त्या[13]? तदेव दृश्यं सामान्यज्ञाने प्रतिभासते, तत्प्रतिभासाच्च तत्रैव वृत्तिरिति किं न स्फुटमेवाभिधीयते अवस्त्वाकारस्य वस्तुना सारूप्यासंभवात्?

किञ्च, दृश्य-विकल्प्ययोरेकीकरणं दृश्ये विकल्प्यस्याध्यारोपः; स च गृहीतयोरगृहीतयोर्वा? यदि गृहीतयोस्तदा दृश्य-विकल्प्ययोर्भेदेन[14] प्रतिपत्तेर्न दृश्ये विकल्प्याध्यारोपः; नहि घट-पटयो-

---

१ पर्यायाता-आ०, वि०, हा०, कां०, गु०। प्रमेयकमलमार्तण्डे-पर्यायतादा-इत्येव पाठो दृश्यते-पृ० ९३ द्वि०, पं० ४। २ पृ० १५५ पं० २२। ३-मात्ता व्य-कां०। ४ चाऽभ्यु-इति वि० प्रतौ संशोधितम्। ५-ध्यारोपितत्र-भां०।-ध्यारोपपेति तत्र-वा०, बा०। ६ पृ० १५७ पं० १२। ७-दं वा स्व-आ०।-दं चास-कां०। ८-मुदया-वा०। ९-न्धश्चन्ये-वा०, बा०, भां०, मां०। १०-वक्षितेऽर्थे क्रि-भां०, मां०।-११-र्थितां स्व-मां०, वा०, बा० विना। १२-क्षणे प्रवृत्तिः परि-इति वि० प्रतौ संशोधितम्।-क्षणे वृत्ति परि-आ०, हा०,।-क्षणे वृत्तिः परि-डे०, वि०। १३-कल्पैकी-वि०। १४-कल्पयो-भां०, मां०।

र्भिन्नस्वरूपतया प्रतिभासमानयोरेकस्याऽपरत्राध्यारोपः, अतिप्रसङ्गात्। नाप्यगृहीतयोः स संभवति, अतिप्रसङ्गादेव। न च दृश्यबुद्धौ विकल्प्यं प्रतिभाति, नापि विकल्प्यबुद्धौ दृश्यम्। न चैकबुद्धावप्रतिभासमानयो रूप-रसयोरिव परस्पराध्यारोपः, सादृश्यनिबन्धनश्चान्यत्राध्यारोपः उपलब्धो वस्त्ववस्तुनोश्च नील-खरविषाणयोरिव सारूप्याभावतो नाध्यारोप इति प्रतिपादितम्। न च दृश्याध्यवसायिविकल्प्यबुद्ध्युत्पाद एव तदध्यारोपः, तद्बुद्धेः सदृशपरिणामसामान्यव्यवस्थापकत्वोपपत्तेरनन्तरमेव तस्या वस्तुस्वरूपग्राहिसविकल्पकाध्यक्षरूपत्वेन व्यवस्थापितत्वात्। तथा, अनुमानेनापि परिच्छिद्यमानेऽर्थान्तरव्यावृत्तिरूपेऽनर्थरूपे सामान्ये बहिष्प्रवृत्त्ययोग एव। नातद्रूपव्यावृत्तिमात्रविषयमनुमानम्, अतद्रूपपरावृत्तवस्तुमात्रविषयत्वादिति चेत्, किं तद् वस्तुमात्रमन्यत्र[3] समानपरिणामात्? अनुभूयते च सामान्यम्-अलिङ्गजत्वान्नानुमानेन—अविसंवादित्वात् प्रत्यक्षप्रमाणेन प्रमाणान्तरानभ्युपगमात्। तथाहि-प्रत्यक्षेणैव ज्ञानेन शाखादिविभागमपरिच्छिन्दताऽपि दवीयसि देशे वृक्षादिमात्रप्रतिपत्तिदर्शनम् तन्निराकरणे चानुभवविरोधः। न च सादृश्यम्, समानपरिणामाभावे तदसंभवात्। ननु च यदि समानपरिणामः सामान्यम्, तस्य वस्तुनः सजातीयादपि परिणामाद् विभक्ततयाऽन्यत्रानन्वयात् क्वचिद् गृहीतसंबन्धेन शब्देन लिङ्गेन वाऽन्यस्य तज्जातीयस्य प्रतिपादनं न प्राप्नोति, नैष दोषः, विभक्तेऽपि वस्तुतस्तस्मिन्ननाश्रितदेशादिभेदे समानपरिणाममात्रे शब्दस्य लिङ्गस्य वा तावन्मात्रस्यैव संकेतितत्वात् संबन्धं गृहीतवतोऽन्यत्रापि तत्परिणाममात्रेण भेदप्रतिपत्तेरजन्यत्वात् तत्तया प्रतिपत्त्यविरोधान्न दोषः। प्रतिपादयिष्यते च नित्यानित्याद्यनेकान्तरूपं वस्त्वेकान्तवादप्रतिषेधेनेति नानेकान्तज्ञानं मिथ्याज्ञानम्।

यदपि 'स्वदेशादिषु सत्त्वं परदेशादिष्वसत्त्वं वस्तुनोऽभ्युपगम्यत एव इतरेतराभावस्याभ्युपगमात्' इत्यादि, तदप्ययुक्तम्; इतरेतराभावस्य घटवस्त्वभेदे घटविनाशे पटोत्पत्तिप्रसङ्गात् पटाद्यभावस्य विनष्टत्वात्। अथ घटाद् भिन्नोऽभावस्तदा घटादीनां परस्परं भेदो न स्यात्। यदा हि घटाभावरूपः पटो न भवति तदा पटो घट एव स्यात्, यथा वा घटस्य घटाभावाद् भिन्नत्वाद् घटरूपता तथा पटादेरपि स्यात् घटाभावाद् भिन्नत्वादेव। नाप्येषां परस्पराभिन्नानामभावेन भेदः शक्यते कर्तुम्, तस्य भिन्नाऽभिन्नभेदकरणेऽकिञ्चित्करत्वात्। न चाभिन्नानामन्योन्याभावः संभवति। नापि परस्परभिन्नानामभावेन भेदः क्रियते, स्वहेतुभ्य एव भिन्नानामुत्पत्तेः। नापि भेदव्यवहारः क्रियते, यतो भावानामात्मीयरूपेणोत्पत्तिरेव स्वतोभेदः; स च प्रत्यक्षे प्रतिभासनादेव भेदव्यवहारहेतुः, तेन "वस्त्वसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रिता" [ ] इति निरस्तम्। किञ्च, भावाभावयोर्भेदो नाभावनिबन्धनः, अनवस्थाप्रसङ्गात्। अथ स्वरूपेण भेदस्तदा भावानामपि स स्यादिति किमपरेणाभावेन भिन्नेन विकल्पितेन? तन्नैकान्तभिन्नोऽभिन्नो वेतरेतराभावः संभवति।

न चाभाव एवान्यापोहस्य, घटादेः सर्वात्मकत्वप्रसङ्गात्। तथाहि-यथा घटस्य स्वदेश-कालाऽऽकारादिना सत्त्वं तथा यदि परदेश-कालाऽऽकारादिनाऽपि, तथा सति स्वदेशादित्ववत् परदेशादित्वप्रसक्तेः कथं न सर्वात्मकत्वम्? अथ परदेशादित्ववत् स्वदेशादित्वमपि तस्य नास्ति तदा सर्वथाऽभावप्रसक्तिः। अथ यदेव स्वसत्त्वं तदेव परासत्त्वम्; नन्वेवमपि यदि परासत्त्वे स्वसत्त्वानुप्रवेशस्तदा सर्वथाऽसत्त्वम्; अथ स्वसत्त्वे परासत्त्वस्य तदा परासत्त्वाभावात् सर्वात्मकत्वम्—यथा हि स्वासत्त्वासत्त्वात् स्वसत्त्वं तस्य तथा परासत्त्वासत्त्वात् परसत्त्वप्रसक्तिर्निवारितप्रसरा, अविशेषात्। न च परासत्त्वं कल्पितरूपमिति न तन्निवृत्तिः परसत्त्वात्मकेति वाच्यम्, स्वासत्त्वेऽप्येवंप्रसङ्गात्।

अथ नाभावनिवृत्त्या पदार्थो भावरूपः प्रतिनियतो वा भवति, अपि तु स्वहेतुसामग्रीत उपजायमानः स्वस्वभावनियत एवोपजायते; तथैवार्थसामर्थ्यभाविनाऽध्यक्षेण विषयीक्रियमाणो व्यवहारपथमवतार्यते किमितरेतराभावकल्पनया? न किञ्चित्, केवलं स्वसामग्रीतः स्वस्वभावनि-

---

१-रूपाभा-वा०। २-मानतोऽपि वि०। ३-त्र सामान्यपरि-भां०, मां०। ४-प्रतिपत्तिर्दर्श-मां०। ५-णामभा-वा०। ६-स्तुनस्त-मां०, भां०। ७-मात्रेणामे-वा०। ८ पृ० १५५ पं० २४। ९-स्य पटाभा-वा०, बा०। १० यदा मां०, भां०।

यतोत्पत्तिरेव परासत्त्वात्मकत्वव्यतिरेकेण नोपपद्यते, स्वस्वरूपनियतप्रतिभासनं च पराभावात्मकत्वप्रतिभासनमेव। अत एव "स्वकीयरूपानुभावान्नान्यतोऽन्यनिराक्रिया" [ ] इत्येतदपि सदसदात्मकवस्तुप्रतिभासमन्तरेणानुपपन्नमेव। यदा हि पारमार्थिकपररूपव्यावृत्तिमत् तत्स्वरूपमध्यक्षे प्रतिभाति तदा स्वरूपमेव परतस्तस्य भेदः, तद्ग्रहणमेव चाध्यक्षतस्तद्भेदग्रहणम्; अन्यथा पारमार्थिकपरासत्त्वाभावे स्वसत्त्ववत् परसत्त्वात्मकत्वप्रसङ्गान्न तत्स्वरूपमेव भेदः, नापि सत्प्रतिभासनमेव भेदप्रतिभासनं स्यात्।

अत एवान्यापोहस्य पदार्थात्मकत्वेऽपरापराभावकल्पनया नानवस्था। नापि परग्रहणमन्तरेण तद्भेदग्रहणाभावादितरेतराश्रयत्वाद् भेदाग्रहणम्। न चाऽभावस्य तुच्छतया सहकारिभिरनुपकार्यस्य ज्ञानाजनकत्वम्; नापि भावाऽभावयोरनुपकार्योपकारकतयाऽसंबन्धः, भावाभावात्मकस्य पदार्थस्य स्वसामग्रीत उत्पन्नस्य प्रत्यक्षे तथैव प्रतिभासनात्। न चाऽसदाकारावभासस्य मिथ्यात्वम्, सदाकारावभासेऽपि तत्प्रसङ्गात्। न चाऽसदवभासस्याभावः, अन्यविविक्तावभासस्यानुभवसिद्धत्वात्; विविक्तता चास्याऽभावरूपत्वात्, तस्याश्च स्वसत्त्वात् कथञ्चिदभिन्नतया तद्वद् ज्ञानजनकत्वेनाध्यक्षे प्रतिभासमानाया अन्यपरिहारेण तत्रैव प्रवृत्त्यादिव्यवहारहेतुत्वाद् भेदाऽभेदैकान्तपक्षस्योक्तदोषत्वात् कथञ्चिद्भेदाभेदपक्षस्य परिहृतविरोधत्वान्न सदसद्रूपत्वे स्वदेशादावप्यनुपलब्धिप्रसङ्गादिदोषः।

यच्चोक्तम् 'एवमात्मनोऽपि नित्यत्वमेव सुख-दुःखादेस्तद्गुणत्वेन ततोऽर्थान्तरस्य विनाशेऽप्यविनाशात्' इत्यादि, तत् प्राक् प्रतिक्षिप्तम्। यदपि 'कार्यान्तरेषु चाकर्तृत्वं न प्रतिषिध्यते' इत्यादि, तदप्यसारम्; एकान्तपक्षे कार्यकर्तृत्वस्यैवासम्भवात्। यच्च 'न चानेकान्तभावनातो विशिष्टशरीरलाभे प्रतिबन्धः' इत्यादि, तन्न प्रतिसमाधानमर्हति अनभ्युपगतोपालम्भमात्रत्वात्। यच्च 'मुक्तावप्यनेकान्तो न व्यावर्तते' इति, तदिष्यते एव; स्वसत्त्वादिना मुक्तत्वेऽप्यन्यसत्त्वादिना अमुक्तत्वस्येष्टत्वात्; अन्यथा तस्य मुक्तत्वमेव न स्यात् इति प्रतिपादितत्वात्।

यदपि 'अनेकान्त' इत्यादि, तदप्यसङ्गतम्; अनन्तधर्माध्यासितवस्तुस्वरूपमनेकान्तः। न च स्वरूपमपरधर्मान्तरापेक्षमभ्युपगम्यते येन तत्र रूपान्तरोपक्षेपेणानवस्था प्रेर्येत; तदपेक्षत्वे पदार्थस्वरूपव्यवस्थैवोत्सीदेत्, अपरापरधर्मापेक्षत्वेन प्रतिनियतापेक्षधर्मस्वरूपस्यैवाव्यवस्थितेः। ततश्चैकान्तस्यापि कथं व्यवस्था? तथाहि—सदादिरूपतैवैकान्तः तत्रैकान्ताभ्युपगमेऽपरं सदादिरूपं प्रसक्तम्, तत्राप्यपरमिति परेणापि वक्तुं शक्यम्। अथ पररूपानपेक्षं सत्त्वादित्वमेवैकान्तः तर्ह्यनन्तधर्माध्यासितवस्तुस्वरूपमप्यनेकान्तः किं न स्यात्? न चापरतद्रूपाभावे वस्तुनः स्वरूपमन्यथा भवति; अन्यथा अपरसत्त्वाद्यभावे सत्त्वादेरप्यन्यथात्वप्रसक्तिरित्यलं दुर्मतिविस्पन्दितेषूत्तरप्रदानप्रयासेन। 'आत्मैकत्वज्ञानात्' इत्यादिग्रन्थस्तु सिद्धसाध्यतया न समाधानमर्हति। यथोक्तमुक्तिमार्गज्ञानादेरपरस्य तदुपायत्वेनाभ्युपगम्यमानस्य प्रमाणबाधितत्वेन मिथ्यारूपत्वान्न तत्साधकत्वमित्यलमतिप्रसङ्गेन।

तत् स्थितमेतत् 'अनुपमसुखादिस्वभावामात्मनः कथञ्चिदव्यतिरिक्तां स्थितिमुपगतानाम्' इति॥

१–नुभवा–मां०, भां०। २–सनम–वा०। ३–रूपस्य व्या–वि० ४–दा स्वस्वरू–मां०, भां०। ५ न चासाव–आ०, हा०। ६ ज्ञानज–मां०, भां०। ७–श्च सत्त्वा–आ०, वि०, हा०। ८ ज्ञानाज–आ०, वि०, हा०। ९ पृ० १५५ पं० २६। १० पृ० १६० पं० २०। ११ पृ० १५५ पं० २७। १२ पृ० १५५ पं० २९। १३ पृ० १५५ पं० ३१। १४ पृ० १५५ पं० ३२। १५ पृ० १५५ पं० ३४।

शुद्धिपत्रम्।

शुद्धिः	पृष्ठे	पङ्क्तौ
प्रामाण्यस्य	४	२४
वस्तुत्वाद्	८	३६
–तथात्वातथात्वाशङ्का–	८	३९
–नर्थप्राप्ति–परिहारसमर्थ–	८	३९
ऋग्वेद–अष्ट०	३२	३
११६ द्वि०, पं० ५–६	३९	४२
श्लो० वा० अ० ७	४०	२९
श्लो० वा० अ० ७	४०	३९
ऋग्वेद–अष्ट०	४२	२४
अश्यादौ	५७	३०
व्यायामा–	६१	२३
केषुचित्तु	७५	४४
कार्यत्वम्?	१०८	३३
–माभावेऽपि	१२०	३५
–स्तद्भावो	१२०	३६
–प्रत्ययप्रती–	१३४	२०
इति,	१४४	२
--त्मनः	१५९	१५

गूजरात
पुरातत्त्वमन्दिर
ग्रन्थावली



ग्रन्थाङ्क १६

गूजरातपुरातत्त्वमन्दिरग्रन्थावली

आचार्यश्रीसिद्धसेनदिवाकरप्रणीतं

संमतितर्क-प्रकरणम् ।

जैनश्वेताम्बर-राजगच्छीय-प्रद्युम्नसूरिशिष्य-तर्कपञ्चानन-
श्रीमद्-अभयदेवसूरिनिर्मितया तत्त्वबोधविधायिन्या
व्याख्यया विभूषितम् ।

द्वितीयो विभागः ।

(द्वितीय-तृतीय-चतुर्थगाथात्मकः)

गूजरातविद्यापीठप्रतिष्ठितपुरातत्त्वमन्दिरस्थेन
संस्कृतसाहित्य-दर्शनशास्त्राध्यापकेन
पं० सुखलालसंघविना
प्राकृतवाङ्मयाध्यापकेन जैनन्याय-व्याकरणतीर्थ-
पं० बेचरदासदोशिना च
पाठान्तर-टिप्पण्यादिभिः परिष्कृत्य संशोधितम् ।

गूजरातपुरातत्त्वमन्दिर
अमदावाद.

प्रथमावृत्तिः, प्रतिसं० ५००] संवत् १९८२ [मूल्यम्-१० रूप्यकाणि.

प्रकाशकः—विठ्ठलदास मगनलाल कोठारी, गूजरातविद्यापीठकार्यालय, अमदावाद.

मुद्रकः—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस, नं. २६-२८, कोलभाट लेन, मुंबई.

टीका-टिप्पणयुपयुक्तावतरणस्थानानां संकेताः ।

अनेका०	अनेकान्तजयपताका ।
अनेका० टी०	अनेकान्तजयपताकाटीका ।
अनेकान्तज० अम०	अनेकान्तजयपताका अमदावाद-आवृत्तिः ।
अनेकान्तज० टी० लि०	अनेकान्तजयपताकाटीका लिखिता ।
अन्नंभ० मिता०	अन्नंभटमिताक्षरा ।
अपोहसि० / अपोहसिद्धि०	अपोहसिद्धिप्रकरणम् ।
अमरकोशः ।	
अष्ट० टी० लि० भां०	अष्टसहस्रीटीका (यशोविजयोपाध्यायकृता) लिखिता भाण्डारकरप्राच्यविद्यासंशोधन-मंदिरसत्का ।
अष्टशती (अष्टसहस्र्यन्तर्गता)	
अष्टस० / अष्टसह०	अष्टसहस्री ।
आचारा० शीतोष्णीयअ०	आचाराङ्गसूत्रम् शीतोष्णीयाध्ययनम् ।
आव० हारि०	आवश्यकसूत्रं हारिभद्रवृत्तियुतम् ।
ऋग्वे० मं० ऋ०	ऋग्वेदः मन्त्राः ऋक् ।
ऋक्सं० मण्ड०	ऋक्संहिता मण्डलम् ।
कठो०	कठोपनिषत् ।
कात० व्या०	कातन्त्रव्याकरणम् ।
काशि० / काशिका०	काशिकावृत्तिः ।
गणर०	गणरत्नमहोदधिः ।
गीता ।	
गौडपा० अलात० प्र०	गौडपादकारिका अलातशान्त्याख्यं प्रकरणम् ।
गौडपा० वैतथ्याख्यप्र०	गौडपादकारिका वैतथ्याख्यं प्रकरणम् ।
गौडपा० का०	गौडपादकारिका ।
चान्द्रव्या०	चान्द्रव्याकरणम् ।
जैने० व्या०	जैनेन्द्रव्याकरणम् ।
तत्त्वसं० का०	तत्त्वसंग्रहकारिका ।
तत्त्वसं० पञ्जि०	तत्त्वसंग्रहपञ्जिका ।
तत्त्वसंग्रहशब्दार्थपरीक्षा ।	
तत्त्वसंग्रहसामान्यपरीक्षा ।	
तत्त्वार्थभाष्यम् (कल०)	कलकत्ता-आवृत्तिः ।
तत्त्वार्थभाष्यव्याख्या यशोविजयोपाध्यायकृता (अम०)	अमदावाद-आवृत्तिः ।
तत्त्वार्थभाष्यव्याख्या सिद्धसेनसूरिकृता (अम०)	
तत्त्वार्थराजवार्तिकम् ।	
तत्त्वार्थश्लो० वा०	तत्त्वार्थश्लोकवार्तिकम् ।
तत्त्वार्थसूत्रम् (मेसा०)	मेसाणा-आवृत्तिः ।
तृ० का० गा०	संमतितृतीयकाण्डगाथा ।
तन्त्रवार्तिकम् ।	
देशीना० व०	देशीनाममाला-वर्गः ।

द्वादशारनय० नयचक्र० आ० लि०	द्वादशारनयचक्रम्-श्रीआत्मारामजीपुस्तक-संग्रहसत्कं लिखितम् ।
धर्मसं० वृ०	धर्मसंग्रहणीवृत्तिः ।
नयोप० यशो० भा०	नयोपदेशः श्रीयशोविजयोपाध्यायकृतः-भावनगर-आवृत्तिः ।
न्यायकु० लि०	न्यायकुमुदचन्द्रोदयः लिखितः ।
न्यायद०	न्यायदर्शनसूत्रम् ।
न्यायद० वात्स्या०	न्यायदर्शनवात्स्यायनभाष्यम् ।
न्यायवा०	न्यायवार्तिकम् ।
न्यायाव० टिप्प०	न्यायावतारटिप्पणम् ।
पाइअ० ना०	पाइअलच्छीनाममाला ।
पाणि० पाणि० व्या०	पाणिनीयव्याकरणम् ।
पाणि० सिद्धान्तकौ० सिद्धान्तकौ०	पाणिनीयसिद्धान्तकौमुदी ।
पाणि० वार्ति०	पाणिनीयव्याकरणवार्तिकम् ।
पाणि० महाभा० महाभा०	पाणिनीयव्याकरणमहाभाष्यम् ।
पातञ्ज० यो० वाच० टी०	पातञ्जलयोगदर्शनवाचस्पतिमिश्रटीका ।
पुण्यरा० टी०	पुण्यराजकृता वाक्यपदीयटीका ।
प्रमेयक०	प्रमेयकमलमार्तण्डः ।
प्रमेयक० टि०	प्रमेयकमलमार्तण्डटिप्पणम् ।
प्रमेयर० को०	प्रमेयरत्नकोषः ।
प्राकृ० पिं०	प्राकृतपिङ्गलम् ।
प्राकृतप्र० षष्ठप०	प्राकृतप्रकाशषष्ठपरिच्छेदः ।
प्राकृतम०	प्राकृतमञ्जरी ।
प्राकृतरूपा०	प्राकृतरूपावतारः ।
बृहदा० उ०	बृहदारण्यकोपनिषत् ।
बृहदा० उ० भा०	बृहदारण्यकोपनिषद्भाष्यम् ।
बृहदा० उ० भाष्यवार्ति०	बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ।
बङ्गीयविश्व०	बङ्गीयविश्वकोषः ।
ब्रह्मसू० शाङ्क० भा०	ब्रह्मसूत्रशाङ्करभाष्यम् ।
,, ,, ,, भा०	,, भामतीटीका ।
भामहालं० परि०	भामहालंकारपरिच्छेदः ।
मध्यमकवृत्तिः ।	
माठरवृ० माठर०	साङ्ख्यकारिकामाठरवृत्तिः ।
योगद० समा० पा०	योगदर्शनसमाधिपादः ।
रत्नाकरा०	रत्नाकरावतारिका प्रमाणनयतत्त्वालोकालंकारवृत्तिः ।
ललितवि० वृ०	ललितविस्तरा चैत्यवन्दनवृत्तिः ।
लङ्कावतारसू०	लङ्कावतारसूत्रम् ।
वाक्यप० का०	वाक्यपदीयम्-काण्डम् ।
वाक्यप० टी०	वाक्यपदीयटीका ।

वाक्यप० तृ० का०	वाक्यपदीये तृतीयं काण्डम् ।
वात्स्या० भा०	वात्स्यायनभाष्यम् ।
वार्ति०	महाभाष्यवार्तिकम् ।
शाक० व्या०	शाकटायनव्याकरणम् ।
शाश्वत०	शाश्वतकोशः ।
शास्त्रवा० स्त०	शास्त्रवार्तासमुच्चये स्तबकः ।
शास्त्रवार्ता०	शास्त्रवार्तासमुच्चयः ।
शास्त्रवा० स्याद्वादक०	शास्त्रवार्तासमुच्चयस्याद्वादकल्पलता टीका ।
श्वेताश्व० उ० श्वेताश्वत० उ०	श्वेताश्वतरोपनिषत् ।
श्लो० वा० अपो०	श्लोकवार्तिकम्-अपोहवादः ।
श्लो० वा० अभाव०	,, अभावपरिच्छेदः ।
श्लो० वा० आकृ०	,, आकृतिवादः ।
श्लो० वा० वन०	,, वनवादः ।
श्लो० वा० पार्थ० व्या०	,, पार्थसारथिमिश्रव्याख्या ।
षड्भा० च०	षड्भाषाचन्द्रिका ।
सर्वदर्शनसं० द०	सर्वदर्शनसंग्रहे दर्शनम् ।
सर्वार्थसिद्धिः (तत्त्वार्थसूत्रव्याख्या)	
सार० व्या०	सारस्वतव्याकरणम् ।
संक्षेपशा०	संक्षेपशारीरकम् ।
संयुत्तनि० निदानसं० गहपतिव० अं० भा०	संयुत्तनिकायो निदानसंगहो गहपतिवग्गो अंको भागो ।
साङ्ख्यका०	साङ्ख्यकारिका ।
साङ्ख्य० कौ०	साङ्ख्यतत्त्वकौमुदी ।
साङ्ख्यद०	साङ्ख्यदर्शनम् ।
साङ्ख्यप्र० भा०	साङ्ख्यप्रवचनभाष्यम् ।
साङ्ख्यस० तत्त्वयाथा०	साङ्ख्यसंग्रहे तत्त्वयाथार्थ्यप्रकरणम् ।
स्याद्वा०	स्याद्वादमञ्जरी ।
स्याद्वादर०	स्याद्वादरत्नाकरः ।
हेतु०	हेतुमुखम् ।
हेतु० टी० ता० लि०	हेतुबिन्दुतर्कटीका ताडपत्रलिखिता ।
हेलाराजटी०	हेलाराजकृता वाक्यपदीयटीका ।
हैम० अनेका०	हैम-अनेकार्थकोशः ।
हैमच्छन्दो०	हैमच्छन्दोऽनुशासनम् ।
हैमतत्त्व०	हैमतत्त्वप्रकाशिका बृहन्न्यासः ।
हैमधातुपा० हैम० धातुपारा०	हैमधातुपारायणम् ।
हैमप्रा० व्या०	हैमप्राकृतव्याकरणम् ।
हैम० बृ० वृ०	हैमव्याकरणबृहद्वृत्तिः ।
हैमसूत्र०	हैमशब्दानुशासनसूत्रम् ।
हैम० हैम० हैमव्या० हैमश०	सिद्धहेमनामकं हैमव्याकरणम् ।

विषयानुक्रमः ।

विषयः	पृष्ठम्	पङ्क्तिः
द्वितीयगाथाव्याख्या ।	१६९–२७०	
आदिवाक्योपन्याससमीक्षा ।	१६९–१७३	
आदिवाक्योपन्यासस्य वैयर्थ्यप्रदर्शनम् ।	१६९	२६
आदिवाक्योपन्यासस्य सार्थकत्वसमर्थनम् ।	१७२	६
शब्दार्थ–तत्संबन्धयोर्मीमांसा ।	१७३–२७०	
'अपोह एव शब्दस्यार्थः' इति बौद्धमतस्य संक्षिप्य स्थापनम् ।	१७३	१२
'विधिरेव शब्दस्यार्थः' इति विधिवादिमतस्य संक्षिप्य प्रतिस्थापनम् ।	१७३	२०
विधिवादिमतं सविस्तरं दूषयताम् अपोहवादिनां मतस्य निर्देशः ।	१७४	१
तत्र—		
संकेतासंभवसाधनाय स्वलक्षणाद्यर्थभेदेन विकल्पपञ्चकविधानम् ।	१७४	२२
स्वलक्षणे संकेतासंभवसाधनम् ।	१७५	४
(पदवाच्यविषयकस्य न्यायसूत्रकारमतस्य भाष्यकार–वार्तिककाराभिप्रायेण विशिष्य निरूपणम्)	१७७	१८
२–४ जाति-तद्योग-तद्वत्सु संकेतासंभवप्रदर्शनम् ।	१७८	२४
(पदवाच्यविषयाणि वात्स्यायन–व्याडि–पाणिनीनां मतानि)	१७९	१
५ बुद्ध्याकारे समयासंभवसाधनम् ।	१७९	४
अस्त्यर्थपदार्थवादिमतम् ।	१७९	१२
समुदायपदार्थवादिमतम् ।	१८०	४
असत्यसंबन्धपदार्थवादिमतम् ।	१८०	१२
असत्योपाधिसत्यपदार्थवादिमतम् ।	१८०	१७
अभिजल्पपदार्थवादिमतम् ।	१८०	२१
बुद्ध्यारूढाकारपदार्थवादिमतम् ।	१८१	३
प्रतिभापदार्थवादिमतम् ।	१८२	६
अस्त्यर्थपदार्थवादिमतनिरसनम् ।	१८३	३
समुदायपदार्थवादिमतनिरसनम् ।	१८३	१४
असत्यसंबन्ध–असत्योपाधिसत्यपदार्थवादि-मतद्वयनिरसनम् ।	१८३	१७
अभिजल्प-बुद्ध्यारूढाकारपदार्थवादिमतद्वयनिरसनम् ।	१८४	१
प्रतिभापदार्थवादिमतनिरसनम् ।	१८४	११
विवक्षापदार्थवादिमतमुल्लिख्य तन्निरसनम् ।	१८५	१
वैभाषिकमतं निर्दिश्य तन्निरसनम् ।	१८५	१५
'निषेधमात्रमेव अन्यापोहः' इति मत्वा कुमारिलादि-कृतानामाक्षेपाणामुपन्यासः ।	१८५	२२

विषयः	पृष्ठम्	पङ्क्तिः
विकल्पप्रतिबिम्बपदार्थवादिमतमुल्लिख्य तन्निरसनम् ।	१९९	१२
अपोहपक्षे उद्द्योतकरकृतानामाक्षेपाणामुपन्यासः ।	२००	१
अपोहपदार्थवादिकृतं स्वमतरूपष्टीकरणम् ।	२०२	१
'निषेधमात्रमेव अन्यापोहः' इति मत्वा अपोहपक्षमा-क्षिप्तवतः कुमारिलादेर्निराकरणम् ।	२०३	१०
(उद्द्योतकरदूषितस्य दिग्नागकथनस्य अभिप्रायमुद्घाट्य कण्टकोद्धारः)	२०४	१
उद्द्योतकरोक्तानामाक्षेपाणां प्रतिविधानम् ।	२२९	१३
संविद्भपुरन्यापोहपदार्थवादिप्राज्ञाकरमतस्य उपन्यासः ।	२३३	१
'सामान्य-विशेषात्मक एव शब्दार्थः' इति प्रतिपादनपरः सविस्तरं स्याद्वादिसिद्धान्तोपन्यासः ।	२३७	९
प्राज्ञाकरमतस्य निरसनम् ।	२६५	२४
नयमीमांसा		
तृतीयगाथाव्याख्या ।	२७१–३१४	
द्रव्यास्तिकनयनिरूपणम् ।	२७१–२८५	
१ सदद्वैतप्रतिपादकः शुद्धद्रव्यास्तिकनयः ।	२७१	३
२ सांख्यमतप्रतिपादकः अशुद्धद्रव्यास्तिकनयः ।	२८०	२१
पर्यायास्तिकनयनिरूपणम् ।	२८५–३१०	
१ सदद्वैतप्रतिक्षेपकः पर्यायास्तिकनयः ।	२८५	६
२ सांख्यमतप्रतिक्षेपकः पर्यायास्तिकनयः ।	२९६	८
नयलक्षणानि ।	३१०–३१४	
संग्रह–नैगमनयस्वरूपम् ।	३१०	८
व्यवहारनयस्वरूपम् ।	३१०	२९
ऋजुसूत्रनयस्वरूपम् ।	३११	१५
शब्दनयस्वरूपम् ।	३१२	२३
समभिरूढनयस्वरूपम् ।	३१३	१४
एवंभूतनयस्वरूपम् ।	३१४	१
चतुर्थगाथाव्याख्या ।	३१५–३१६	
द्रव्यास्तिकैकप्रकृतिकयोः संग्रह–व्यवहारयोः शुद्धाशुद्धतया भेदनिरूपणम् ।	,,	
संग्रहस्य सत्तामात्रविषयकत्वसाधनम् ।	३१५	१२
व्यवहारस्य विशेषमिश्रितसत्ताविषयकत्वसाधनम् ।	३१६	९

संपादकीय निवेदन।

संमतितर्कनो पहेलो भाग प्रसिद्ध थयांने बे वर्ष वीती गयां. एटला वखतमां तैयार थई आ बीजो भाग आजे विद्वानो समक्ष उपस्थित थाय छे.

आ भागमां बीजी, त्रीजी अने चोथी ए त्रण मूळ गाथाओ टीकासहित आवी जाय छे.

आ भागनी तैयारीनी विशेषताः अशुद्धिनुं बाहुल्य, नवीन साधननो उपयोग अने बीजो विशिष्ट प्रयत्न.

बीजी अने त्रीजी गाथानी टीका बहु मोटी छे. त्रीजीनी करतां बीजीनी टीका लगभग बमणी हशे. जेम टीका मोटी तेम अशुद्धि घणी. हजुसुधी संमतिनी एवी एक पण प्रति अमने उपलब्ध नथी थई के, जेने विश्वस्त रीते शुद्ध मानी मुद्रणमां मूळ आधार तरीके राखी शकाय. तेमां य ज्यां बौद्धादि दर्शनोनी चर्चा आवे छे त्यां तो अशुद्धिओ पुष्कळ ज छे. दरेक प्रतिमां अशुद्धिनी आ समानता जोई एम मानवाने कारण मळे छे के, आ ग्रंथनुं अध्ययन, अध्यापन घणा सैकाओथी विच्छिन्नप्राय थई गयेलुं होवुं जोईए; सांगोपांग शुद्ध करवानो प्रयत्न पण पूर्वे नहि थएलो; अने थयो होय तो तेनुं परिणाम आजे उपलब्ध नथी. अशिक्षित वाचको अने लेखको तथा अव्युत्पन्न अभ्यासीओनी वाचनलेखनविषयक तथा अर्थकल्पनाविषयक भ्रान्तिओ दरेक प्रतिमां भिन्नभिन्न रूपे नजरे पडे छे. आ कारणथी बीजी गाथानी टीकाए शुद्धीकरणमां वधारे वखत लीधो. छतां यथावत् संतोष तो थयो ज न हतो. संशोधनना विविध साधनोनी शोध चालती हती, ते दरमियान सद्भाग्ये एक महत्त्वपूर्ण ग्रंथ तरफ अमारुं ध्यान गयुं.

आ महान् ग्रंथ ते बीजो कोई नहि पण बौद्धाचार्य आर्य शान्तिरक्षितनो तत्त्वसंग्रह. ए ग्रंथनुं अवलोकन करतां जणायुं के, टीकाकार अभयदेवे बीजी गाथानी टीकानो बौद्धमतविषयक पूर्वपक्ष ए तत्त्वसंग्रहनी कमलशीलकृत पञ्जिकाने सामे राखीने ज लख्यो छे. एटले बीजी गाथानी टीकानो अपोहविषयक समग्र अंश उक्त पञ्जिकानी लगभग अक्षरशः नकल छे. आ वस्तु ध्यानमां आववाथी तत्त्वसंग्रहनुं ए प्रकरण बीजी गाथानी टीका साथे मेळवी लीधुं. अने ते पछी अशुद्ध भागने शुद्ध करवा तथा बीजी अनेक विशेषताओ दाखल करवा माटे फरी नवेसर विशिष्ट प्रयत्न शरू कर्यो, जेनुं फळ विद्वानो ओछा वधता प्रमाणमां प्रस्तुत पुस्तकमां जोई शकशे.

पहेला भाग करतां बीजा भागना संशोधनमां विशिष्ट प्रयत्न थवानुं कारण तत्त्वसंग्रहनी उपलब्धि अने तेनो उपयोग ए छे. ज्यारे अनुभवे जणायुं के, त्रीजी गाथानी टीकानुं सांख्यमत (अशुद्धद्रव्यास्तिकनय) निरूपण प्रकरण तथा तेना खंडननुं बौद्धमत (पर्यायास्तिकनय) प्रतिपादक प्रकरण प्रायः अक्षरशः कमलशीलनी पञ्जिकानी नकल छे, त्यारे संशोधनमां तत्त्वसंग्रहनो अनेक दृष्टिए उपयोग करवानी कल्पना आवी अने तदनुसार प्रयत्न पण थयो. आ प्रयत्नने लीधे ज विलम्ब बेवडायो. पण अमने आशा छे के आ प्रयत्ननुं परिणाम समजनारने ए विलम्ब नहि खटके. प्रस्तुत कार्यमां तत्त्वसंग्रहनो उपयोग केवी रीते कर्यो छे ए अहीं जणावी देवुं आवश्यक छे.

शब्दना अर्थनी मीमांसा तेम ज शब्द अने अर्थ ए बंनेना संबंधनी मीमांसाना अतिदीर्घ प्रकरणमां पूर्वपक्षरूपे बौद्धसंमत अपोहचर्चा टीकाकारे मूकेली छे. प्रस्तुत पुस्तकनो पृ० १७३ थी २३२ सुधीनो ए चर्चानो भाग तत्त्वसंग्रहनी ८६७ थी १२१२ सुधीनी एटले एकंदर ३४६ कारिकाओ उपरनी गद्य पञ्जिका ज छे. तेवी ज रीते त्रीजी गाथानी टीकाना सांख्यमतनिरूपण अने तेना खंडननो प्रस्तुत पुस्तकनो पृ० २८०–२८४ तथा पृ० २९६–३०७ सुधीनो भाग तत्त्वसंग्रहनी ७ थी ४५ सुधीनी एटले कुल ३९ कारिकाओ उपरनी पञ्जिका ज छे. पञ्जिकाना प्रायः अक्षरशः ए उतारने लीधे तत्त्वसंग्रहनो उपयोग प्रस्तुत संशोधनमां मुख्यपणे त्रण दृष्टिथी करवामां आव्यो छेः (१) शुद्धिनी दृष्टि (२) ते ते गद्यभागनी मूळभूत कारिका बतावनारी दृष्टि अने (३) शान्तिरक्षिते पोताना मूळ ग्रंथमां कया कया पूर्ववर्ती आचार्योनी कारिकाओ लीधेली छे ते बतावनारी दृष्टि.

(१) ज्यां संमतिनी टीका अशुद्ध के त्रुटित जणाई त्यां तेने कोष्ठकमां शुद्ध अने पूर्ण करी तेना संवादखातर पञ्जिकानो जरूरी भाग अक्षरशः नीचे टिप्पणमां आपेलो छे. उदाहरणार्थे जूओः पृ० १७४ टिप्पण २. पृ० १८१ टिप्पण १६ वगेरे.

(२) संमतिनी टीकानो अमुक गद्यभाग तत्त्वसंग्रहनी कई कारिकानी व्याख्यारूपे छे ए जणाववा खातर ते गद्यभागनी नीचे टिप्पणमां तत्त्वसंग्रहनी ते ते कारिका अंक साथे आपवामां आवी छे, जेथी अभ्यासीओ तत्त्वसंग्रहनी मूळ कारिका अने तेनी पञ्जिका साथे अर्थशः तथा शब्दशः संमतिनी टीकाना ते ते गद्यभागने सरखावी शके. अने तत्त्वसंग्रहना अभ्यासीओ पोताने जोईतुं स्थळ संमतिनी टीकामांथी अनायासे मेळवी शके. उदाहरण तरीके जूओः पृ० १७३ टिप्पण ९ वगेरे.

(३) मूळ तत्त्वसंग्रहमां ज्यां ज्यां अन्य पूर्वाचार्योनी कारिकाओ दाखल थएली जणाई छे त्यां त्यां यथासंभव ते ते पूर्वाचार्यनी कृतिमांथी ज ते कारिकानो अंक आपी साथे ज तत्त्वसंग्रहनो चालु कारिका अंक पण आपेलो छे. जेथी तत्त्वज्ञ अभ्यासीओ जाणी शके के, ए मूळ कारिका वस्तुतः कया आचार्यनी कई कृतिना कया प्रसङ्गनी छे. तेम ज ऐतिहासिको ए क्रमनो उपयोग कालनिर्णयमां पण करी शके. जूओ पृ० १७९ टिप्पण ८. पृ० १८६ टिप्पण २. पृ० १८७ टिप्पण ६ वगेरे.

आ सिवाय बीजी पण एक सामान्य रीते तत्त्वसंग्रहनो उपयोग कर्यो छे अने ते ए के, संमतिनी टीकामां केटलांक पद्यो कर्ताना नामनिर्देश विना आवे छे ते ज पद्यो ज्यां ज्यां पञ्जिकामांथी मळी आव्यां त्यां त्यां ते ज रीते टिप्पणमां दर्शाववामां आव्यां छे. अने आ समग्र उपयोग करवामां आवश्यक जणायुं त्यां संमतिनी टीका उपर भामहालंकार, वाक्यपदीय, श्लोकवार्तिक, तत्त्वसंग्रह, प्रमेयकमलमार्तंड, स्याद्वादरत्नाकर, शास्त्रवार्तासमुच्चयटीका इत्यादिमांथी पाठान्तरो आप्यां छे अने बीजी रीते पण सविशेष उपयोग कर्यो छे. उदाहरणः पृ० १७४ टिप्पण ५. पृ० १८१ टिप्पण १६. पृ० १८६ टिप्पण २, ४, ५. पृ० १८२ टिप्पण ४. पृ० १८६ टिप्पण १२, ३. पृ० १७३ टिप्पण १०. पृ० १७६ टिप्पण २. पृ० २४८ टिप्पण १९. पृ० १८२ टिप्पण ६ वगेरे.

उतारो चालु होवा छतां क्यांय क्यांय पञ्जिकानी वाक्यरचनाथी संमतिटीकानी वाक्यरचना जूदी पडे छे; तेवा स्थळे ए भिन्नता जणाववा खातर नीचे टिप्पणमां पञ्जिकानो गद्यभाग पण

आपेलो छे. ज्यां पञ्जिका के कारिका त्रुटित के अशुद्ध जणाई त्यां तेने पूर्ण के शुद्ध करी ते अंश मोटा अक्षरोमां मूकेलो छे. जूओ पृ० १७७ टिप्पण ८, १०. पृ० १८४ टिप्पण १. पृ० २१७ टिप्पण १५. पृ० २२१ टिप्पण १२. पृ० २२८ टिप्पण १५ वगेरे.

खरेखर आ संमतिटीकानुं संशोधन तत्त्वसंग्रह ग्रंथनुं ऋणी छे पण तत्त्वसंग्रहना संशोधको धारे तो ए ऋणने व्याजसहित संमतिटीकाना आ संस्करणमांथी वसूल करी शके.

तत्त्वसंग्रहनी उपलब्धिथी अनेक अज्ञातपूर्व आचार्योनां तथा तेओनी कृतिओनां नामो अने अनेक अनुपलब्ध ग्रंथोनां अवतरणो जाणवामां आव्यां छे तेनो उपयोग यथास्थाने आगला भागोमां थशे.

पाठोने शुद्ध करवामां, सरखाववामां, अर्थनुं स्पष्ट ज्ञान करवामां अने पूर्वापर प्रसंग समजवामां परिशिष्टमां आपेला ग्रंथोथी बहु ज कींमती मदद मळी छे. लगभग ए बधा ग्रंथोनां उपयुक्त स्थळो अमे ते ते स्थाने बताव्यां छे.

तत्त्वसंग्रहनी प्राप्ति अने तेना उपयोगना लाभथी अमे बीजा पण नवीन ग्रंथोनी गवेषणाना लोभमां पड्या; जेने लीधे अमने केटलाक अप्राप्तपूर्व ग्रंथो प्राप्त थया अने केटलाक प्राप्त छतां अदृष्टपूर्व ग्रंथोनुं अवलोकन करवानी तक मळीः

बौद्धाचार्य धर्मकीर्तिकृत हेतुबिंदुनुं विवरण, जयराशिभट्टकृत तत्त्वोपप्लव अने दिगम्बराचार्य अकलंककृत सिद्धिविनिश्चय ए त्रण ग्रंथो तो अत्यार सुधी सर्वथा अनुपलब्ध ज हता. तेमां तत्त्वोपप्लवनुं तो नाम पण भाग्ये ज ज्ञात हतुं. पहेला बे ग्रंथो ताडपत्र उपर छे. दिगम्बराचार्य प्रभाचंद्रकृत न्यायकुमुदचंद्रोदय अने वादिराजकृत न्यायविनिश्चयालंकार ए बे महान् जैन ग्रंथो मेळवी तेनुं अवलोकन करवानी प्राप्त थएली तक आ संमतिना संशोधनने ज आभारी छे.

आ संशोधन करतां मळी आवेली नवीन सामग्री अने तेना उपयोगने लीधे थतो विलम्ब तथा ग्रंथना कदनुं वधी जतुं महत्त्व ए त्रण बाबतो प्रथम भाग प्रकाशित करती वखते ध्यानमां न हती तेथी ते प्रकाशित करती वेळाए तेना निवेदनमां जणावेलुं के, सटीक मूळ ग्रंथनुं त्रण भागमां प्रकाशन करवुं. पण ए विचार बदली मूळ ग्रंथने पांच भागमां प्रसिद्ध करवानी धारणा राखीए छीए, जेथी ग्राहकोने आगला भागो शीघ्रताथी मळे अने दरेक भागनुं कद पण परिमित रहे.

प्रस्तुत भागमां पण प्रवर्तक कान्तिविजयजीना प्रशिष्य विद्याप्रिय सुशील **मुनि पुण्यविजयजीए** पाठान्तरादिकार्योमां वखते वखते सहर्ष सहायता आपी ते बदल अमे तेमना कृतज्ञ छीए.

सुखलाल
अने
बेचरदास.

संपादकीयं निवेदनम्

संमतितर्कस्य प्रथमं भागं प्रकाश्य वर्षद्वयेनाद्य द्वितीयं भागं प्रकाशयितुं वयं पुनर्लब्धावसरा भवामः। सटीकया द्वितीयया तृतीयया चतुर्थ्या च गाथयाऽयं भागो भूषितः।

अशुद्धिबाहुल्यम् नव्यसाधनोपयोगः अपरश्च विशिष्टः प्रयत्न इत्येतद् विशेषतात्रयं प्रस्तुतसंपादनगतं सविशेषमत्र समुल्लेखनीयं प्रतिभाति।

यद्यपि द्वितीय–तृतीययोर्द्वयोरपि गाथयोष्टीका विस्तारवती तथापि द्वितीयस्याष्टीका तृतीयामपेक्ष्य द्विगुणप्राया विद्यते। अशुद्धिवृद्धिष्टीकाविस्तारवृद्धिमनुगच्छन्ती लक्ष्यते। तत्रापि बौद्धादिदर्शनवस्तु चर्चास्थलेषु भूयस्योऽशुद्धयो दृश्यन्ते। सर्वथा विश्वस्ततया मुद्रणकर्मणि मूलाधारत्वेन स्थापयितुं योग्यः संमतेरेकोऽप्यादर्शोऽस्माभिरिदानीं यावत् नावापि। सर्वेषामादर्शानामशुद्ध्या समानतामवलोक्य ग्रन्थस्यास्याध्ययनाऽध्यापनयोश्चिरादेव विच्छिन्नप्रायत्वं यथावत् संशोधनप्रयासाभावं च कल्पयामः। जातस्यापि तादृशस्य पूर्वप्रयासस्य फलं नेदानीमुपलब्धिगोचरीभवति। असंस्कृतवाचक-लेखक-पाठकानां वाचन-लेखनार्थकल्पनागोचरा भ्रान्तयः सर्वेष्वप्यादर्शेषु नानाविधतया दृष्टिपथमायान्ति। अत एव बहुतरसमयव्ययेन कृतस्यापि द्वितीयगाथाटीकासंशोधनस्य पूर्वं यथावत् संतोषाजनकतया विशिष्य संशोधनयोग्यानि साधनानि गवेषयितुं प्रवृत्तवतामस्माकं दृष्टिपथमेको महान् ग्रन्थः समापतितः।

स च ग्रन्थो बौद्धाचार्य-आर्यशान्तिरक्षितकर्तृकस्तत्त्वसंग्रह एव नापरः कश्चित्। तत्त्वसंग्रहावलोकनेन द्वितीयगाथाटीकागतबौद्धमताश्रितपूर्वपक्षांशस्य बौद्धाचार्यकमलशीलकृतया तत्त्वसंग्रहपञ्जिकया प्रायेणाक्षरशो बिम्बप्रतिबिम्बभावं परिज्ञाय संमति–तत्त्वसंग्रहवृत्त्योस्तावतोरंशयोस्सर्वात्मना तुलना व्यधायि। अशुद्धं भागं शोधयितुम् अपराननेकान् विशेषान् अन्तःसंस्कर्तुं च विशिष्टः प्रयत्नोऽपि प्रारम्भि।

तत्त्वसंग्रहस्योपलब्ध्युपयोगावेव अस्मिन् संशोधनगोचरे विशिष्टप्रयत्ने निमित्ततामुपगतौ। तृतीयगाथाटीकागतस्य सांख्यमतनिरूपण-तत्खण्डनात्मकस्य कियन्मात्रस्य अंशस्य कमलशीलीयपञ्जिकाप्रतिबिम्बप्रायत्वेन परिज्ञानादपि संशोधनकर्मण्यनेकधा तत्त्वसंग्रहोपयोगकल्पना तदनुसारी च प्रयत्नोऽजनिष्ट। तदेव च विलम्बद्वैगुण्यनिमित्तम्। तथापि वयमाशास्महे नैष विलम्बः परिणामदर्शिनां शल्यायिष्यते। तत्त्वसंग्रहोपयोगप्रकारोऽप्यत्रैव प्रदर्शयितुं समुचित आवश्यकश्च भाति।

शुद्धिविधानेन, संमतिटीकागततत्तद्वद्यांशसम्बन्धिमूलकारिकाप्रदर्शनेन, तत्त्वसंग्रहान्तःप्रविष्टपूर्वाचार्यकर्तृककारिकासत्कग्रन्थ-तद्गतस्थलसंसूचनेन च प्रधानतया त्रेधा तत्त्वसंग्रहोऽत्रोपयोजितः।

अशुद्धं त्रुटितं वा संमतिटीकांशं कोष्ठके शोधयित्वा पूरयित्वा वा तत्संवादायावश्यकः पञ्जिकांशोऽधस्तात् टिप्पणिकायामक्षरशो निर्दिष्टः। यथा—पृ० १७४ टिप्पणं २। पृ० १८१ टिप्पणं १६ प्रभृति।

संमत्यभ्यासिनः शब्दशोऽर्थशश्च संमति-तत्त्वसंग्रहयोस्तुलनां कर्तुं तत्त्वसंग्रहाभ्यासिनश्च स्वापेक्षितं स्थलं संमतिटीकातोऽनायासेनावाप्तुं शक्नुयुरित्युद्दिश्य संमतिटीकागतः कस्कोंऽशः कस्याः कस्यास्तत्त्वसंग्रहकारिकाया व्याख्यात्मक इति प्रदर्शनाय तत्तद्वद्यांशस्याधस्तात् टिप्पणिकायां तत्त्वसंग्रहीया मूलकारिका क्रमाङ्कपुरःसरं निरदेशि। यथा—पृ० १७३ टिप्पणं ९ प्रभृति।

तत्त्वज्ञा अभ्यासिनस्तत्तन्मूलकारिकायाः कर्तारम् आधारभूतां कृतिम् प्रकरणं च यथावदवगन्तुम् ऐतिहासिकाश्च तं क्रमं कालनिर्णायायोपयोक्तुं पारयेयुरित्युद्दिश्य पूर्वाचार्यान्तरकर्तृकाः कारिका मूलत-

त्त्वसंग्रहीये प्रस्तुतप्रकरणे यत्र यत्र संनिविष्टा दृष्टास्तत्र तत्र यथासंभवं तत्तत्पूर्वाचार्यकृतित एव तत्तत्कारिकाक्रमाङ्कप्रदर्शनपुरःसरं तत्त्वसंग्रहीयकारिकासम्बन्धी प्रचलितः क्रमाङ्कोऽपि निदर्शितः। यथा—पृ० १७९ टिप्पणं ८। पृ० १८६ टिप्पणं २। पृ० १८७ टिप्पणं ६ प्रभृति।

एतद्व्यतिरिक्तयाऽन्ययाऽपि साधारणरीत्या तत्त्वसंग्रह इत्थमुपायोजि—यानि यानि संमतिटीकागतान्यनिर्दिष्टकर्तृकानि निर्दिष्टकर्तृकानि वा गद्य-पद्यानि पञ्जिकायामुपलब्धिगोचरतां गतानि तानि तान्यधस्तात् टिप्पणिकायां तथैव प्रदर्शितानि। किंच, आवश्यकेषु स्थलेषु भामहालङ्कार-वाक्यपदीय-श्लोकवार्तिक-तत्त्वसंग्रह-प्रमेयकमलमार्तण्ड-स्याद्वादरत्नाकर-शास्त्रवार्तासमुच्चयटीकादिग्रन्थेभ्यः पाठान्तराणि गृहीत्वा न्यस्तानि, तथा तेषां ग्रन्थानामन्यप्रकारेणापि सविशेषमुपयोगः कृतः। यथा—पृ० १७४ टिप्पणं ५। पृ० १८१ टिप्पणं १६। पृ० १८६ टिप्पणं २,४,५। पृ० १८२ टिप्पणं ४। पृ० १८६ टिप्पणं १२, ३। पृ० १७३ टिप्पणं १०, पृ० १७६ टिप्पणं २। पृ० २४८ टिप्पणं १९। पृ० १८२ टिप्पणं ६ प्रभृति।

पञ्जिका-संमतिटीकयोर्वाक्यरचनाविषयकः क्वाचित्को भेदोऽपि टिप्पणिकान्यस्तेन पञ्जिकांशेन प्रादर्शि। अशुद्धां त्रुटितां वा पञ्जिकां कारिकां च शोधयित्वा पूरयित्वा वा शुद्धः पाठः बृहत्सु सीसकाक्षरेषु दर्शितः। यथा पृ० १७७ टिप्पणं ८,१०, पृ० १८४ टिप्पणं १, पृ० २१७ टिप्पणं १५, पृ० २२१ टिप्पणं १२, पृ० २२८ टिप्पणं १५ प्रभृति।

एतच्च संमतिटीकासंशोधनं तत्त्वसंग्रहग्रन्थस्याधमर्णायते। किंतु यदि तत्त्वसंग्रहस्य संशोधकाः काङ्क्षेयुस्तदा तदृणं सवृद्धि प्रस्तुतात् संस्करणात् प्रतिग्रहीतुं प्रभविष्यन्ति।

तत्त्वसंग्रहोपलब्ध्याऽनेकेषामज्ञातपूर्वाणामाचार्याणां तत्कृतीनां च नामानि अनेकान्यनुपलब्धपूर्वग्रन्थावतरणानि चावगतानि तेषामुपयोगो यथास्थानमग्रेतनेषु प्रकाशयिष्यमाणेषु भागेषु करिष्यते।

पाठानां शुद्धौ तुलनायां स्पष्टार्थज्ञप्तौ च कर्तव्यायां परिशिष्टनिर्दिष्टेभ्यो ग्रन्थेभ्यो बहुमूल्यं साहायकं समासादि। प्रायेण तेषां सर्वेषां ग्रन्थानामुपयुक्तानि स्थलान्यस्माभिर्यथास्थानं दर्शितान्येव।

तत्त्वसंग्रहलाभेन लोभिता वयं नव्यं साहित्यान्तरं गवेषयितुं प्रवर्तमानाः कांश्चिदप्राप्तपूर्वान् ग्रन्थमणीन् प्रा ुम् कांश्चिच्च श्रुतपूर्वानप्यनवलोकितान् ग्रन्थमणीन् संगृह्यावलोकयितुमशकाम।

बौद्धाचार्यधर्मकीर्तिकर्तृकहेतुबिन्दोर्विवरणं जयराशिभट्टकृतस्तत्त्वोपप्लवो दिगम्बराचार्याकलङ्ककर्तृको रविभद्रशिष्यानन्तवीर्यकृतटीकोपेतः सिद्धिविनिश्चयश्चैतद्ग्रन्थत्रयमप्राप्तपूर्वमेव प्राप्ति। तत्रापि तत्त्वोपप्लवस्य तु नामापि प्रायेणाज्ञातमेवासीत्। प्राच्यौ द्वौ ग्रन्थौ ताडपत्रस्थौ स्तः। दिगम्बराचार्यप्रभाचन्द्रकर्तृकन्यायकुमुदचन्द्रोदय-वादिराजकृतन्यायविनिश्चयालंकारनामकबृहत्तरव्याख्यासहितयोरकलङ्ककृतमूलयोर्जैनन्यायग्रन्थयोः श्रुतपूर्वयोः संग्रहपुरःसरमवलोकनं प्रस्तुतेन संशोधनकर्मणैवोपकृतम्।

नव्यग्रन्थसामग्रीगवेषण-तदुपयोगजन्यविलम्ब-परिमाणमहत्त्वानामलक्षिततया प्रथमभागप्रकाशनसमयेऽस्माभिर्निर्दिष्टम्—'सटीकः संपूर्णोऽपि ग्रन्थस्त्रिभिर्भागैः प्रकाशयितुमुचितः इत्यादि'—किंतु साम्प्रतं सम्पूर्णं मूलग्रन्थं पञ्चभिर्भागैः प्रकाशयितुं सम्प्रधारयामः यतो ग्राहकाः परिमितपरिमाणतामजहतोऽग्रेतनान् भागान् शीघ्रमेव समासादयितुं शक्नुयुः।

अस्यापि भागस्य पाठान्तरादिकार्येषु प्रवर्तकश्रीकान्तिविजयानां विद्याप्रियैः सुशीलैः प्रशिष्यैः **श्रीपुण्यविजयमुनिभिः** सहर्षं साहायकमनुष्ठितम् तदर्थं तेषां कृतज्ञा वयमिति।

सुखलालः
बेचरदासश्च।

संमति-तर्कप्रकरणम्।

द्वितीयो विभागः।

द्वितीयगाथाव्याख्या।

[आदिवाक्योपन्याससमीक्षा]

एवमिष्टदेवतानमस्कारकरणध्वस्तप्रकरणपरिसमाप्तिविबन्धकृत्क्लिष्टकर्म्मान्तरायः सूरिर्जिनप्र-५
णीतत्वेन शासनस्य प्रकरणमन्तरेणापि स्वतः सिद्धत्वात् तदभिधेयस्य निष्प्रयोजनतामाशङ्कमानः
'समयपरमत्थ' इत्यादिगाथासूत्रेण प्रकरणाभिधेयप्रयोजनमाह—

समयपरमत्थवित्थरविहाडजणपज्जुवासणसयंन्नो।
आगममलारहियओ जह होइ तमत्थमुन्नेसुं॥ २॥

तदेव चास्या गाथायाः समुदायार्थः। तच्च श्रोतृप्रवृत्त्यर्थम् प्रयोजनस्य प्रतिपत्तिमन्तरेण प्रेक्षा-१०
वतां प्रवृत्त्यनुपपत्तेः अनभिहितप्रयोजनस्य शास्त्रस्य प्रेक्षापूर्वकारिभिः काकदन्तपरीक्षादेरिवानाश्रयणीयत्वात्। अतः प्रयोजनप्रदर्शनेन तेषां प्रवर्त्तनाय शास्त्रस्यादौ वाक्यं तत्प्रतिपादनपरमुपादेयम्। तदुक्तम्—

"सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते"॥ [श्लो० वा० सू० १ श्लो० १२] १५

पुनरप्युक्तम्—

"अनिर्दिष्टफलं सर्वं न प्रेक्षापूर्वकारिभिः।
शास्त्रमाद्रियते तेन वाच्यमग्रे प्रयोजनम्"॥ [ ]
"शास्त्रस्य तु फले दृष्टे तत्प्राप्त्याशावशीकृताः।
प्रेक्षावन्तः प्रवर्त्तन्ते तेन वाच्यं प्रयोजनम्"॥ [ ] २०
"यावत् प्रयोजनेनास्य सम्बन्धो नाभिधीयते।
असम्बद्धप्रलापित्वाद् भवेत् तावदसङ्गतिः"॥ [श्लो० वा० सू० १ श्लो० २०]
"तस्माद् व्याख्याङ्गमिच्छद्भिः सहेतुस्सप्रयोजनः।
शास्त्रावतारसम्बन्धो वाच्यो नान्यस्तु निष्फलः"॥ [श्लो० वा० सू० १ श्लो० २५]

इत्यादि। २५

[पूर्वपक्षः—आदिवाक्योपन्यासस्य वैयर्थ्यप्रदर्शनम्]

अत्र च केचित् प्रेरयन्ति—यदि प्रेक्षावतां प्रवृत्त्यर्थं प्रयोजनप्रतिपादनाय आदिवाक्यमुपादी-

---

१-यण्हो गु० मूले। २ होति गु० मूले। ३-मुन्नेसु कां० आ० वि० विना। अत्र 'उन्नेष्ये'इतिटीकाकारप्रदर्शितव्याख्यानुरोधेन 'उन्नेस्सं' इति स्यात्। लेखकभ्रमकल्पनायां तु 'उन्नेमु' इति स्यात् यतो नास्ति प्राकृतप्रक्रियायामस्मत्पुरुषैकवचने 'सु'प्रत्ययः 'सु'प्रत्ययो वा 'मु'प्रत्ययस्तु वर्तमानाबहुवचने, विध्याज्ञयोश्चैकवचने वर्तत एव। ४-जनप्रति-भां० मां०। ५-रिव नाश्रय-भां० मां० वा० बा० विना। ६-प्रदर्शने तेषां कां० गु० वा० बा०। ७ इदमेकमेव पद्यं दृश्यते हेतु० टी० ता० लि० पृ० १ प्र० पं० ५। ८ तत्त्वेन भां० वा० बा०। ९ वाद्यम-आ० गु० भा० डे०। १०-ले ज्ञाते त-भां० मां०। एवमेव दृश्यते प्रमेयक० पृ० १ द्वि० पं० ५, स्याद्वादर० पृ० ७ प्र० पं० १४। ११ एतानि पञ्चापि पद्यानि प्रमेयक० पृ० १ द्वि० पं० ४-७ द्रष्टव्यानि। १२ अत्र केचित् वा० बा०।

यते तदा ते प्रेक्षापूर्वकारित्वादेव अप्रमाणके नैव प्रवृत्तिं विदधति। न च प्रयोजनप्रतिपादकमादिवाक्यं तत्प्रभवं वा ज्ञानं प्रमाणम् अनक्षजत्वेनाध्यक्षत्वायोगात्।

नाप्यनुमानं स्वभाव-कार्यलिङ्गसमुत्थम् तद्भावत्वेन तत्कारणत्वेन वा तत्प्रत्याय्यप्रयोजनस्य प्रमाणतोऽप्रतिपत्तेस्तदुत्थापकस्य लिङ्गस्य तत्स्वभाव-तत्कार्यत्वानवगमात्, अन्यस्य च स्वसाध्याप्रतिबन्धात् अप्रतिबद्धस्य च स्वसाध्यव्यभिचारेणागमकत्वात्, तत्त्वे वाऽतिप्रसङ्गात्; तत्प्रतिबद्धत्वेऽप्यनिश्चितप्रतिबन्धस्यातिप्रसङ्गत एव अगमकत्वात्।

न च वाक्यमिदं प्रवर्त्तमानं स्वमहिम्नैव स्वार्थं प्रत्याययतीति शब्दप्रमाणरूपत्वात् स्वाभिधेयप्रयोजनप्रतिपादने प्रमाणम्, शब्दस्य बाह्येऽर्थे प्रतिबन्धासम्भवेनाप्रामाण्यात्; विवक्षायां प्रामाण्येऽपि तस्या बाह्यार्थाविनाभावित्वायोगात्। नापि ये यमर्थं विवक्षन्ति ते तथैव तं प्रतिपादयन्ति, अन्यविवक्षायामप्यन्यशब्दोच्चारणदर्शनात् विवक्षायाश्च बाह्यार्थप्रतिबद्धत्वानुपपत्तेरेकान्ततः। तन्न शब्दादपि प्रमाणादादिवाक्यरूपात् प्रयोजनविशेषोपायप्रतिपत्तिः तदप्रतिपत्तौ च तेषां ततः प्रवृत्तौ प्रेक्षापूर्वकारिताव्यावृत्तिप्रसङ्गात्।

प्रयोजनविशेषोपायसंशयोत्पादकत्वेन प्रवृत्यङ्गत्वादादिवाक्यस्य सार्थकत्वम्। तथाहि-अर्थसंशयादपि प्रवृत्तिरुपलभ्यते, यथा कृषीबलादीनां कृष्यादावनवगतशस्यावाप्तिफलानाम्। अथ अबीजादिविवेकेनावधृतबीजादिभावतया निश्चितोपायाः तदुपेयसस्यावाप्त्यनिश्चयेऽपि तत्र तेषां प्रवृत्तिर्युक्ता न पुनः शास्त्रश्रवणादौ उपेयप्रयोजनविशेषानिश्चयवत् तदुपायाभिमतादिवाक्यप्रत्याय्योपायनिश्चयस्याप्यसम्भवात्, अयुक्तमेतत्; यतो यथा सस्यसम्पत्त्यादौ फले कृषीबलादेः सन्देहस्तथा तदुपायाभिमतबीजादावपि, अनिर्वर्तितकार्यस्य कारणस्य तथाभावनिश्चयायोगात्। तत्र यथा कृष्यादिकं संशय्यमानोपायभावं प्रवृत्तिकारणं तथा शास्त्रमप्यादिवाक्यादनिश्चितोपायभावं किं न प्रवृत्तिकारणमभ्युपगम्येत इति चेत्, असदेतत्; आदिवाक्योपन्यासः शास्त्रप्रयोजनविषयसंशयोत्पादनार्थम् संशयोऽपि च निश्चयविरुद्धः—अनुत्पन्ने च निश्चये—तत्राप्रतिबद्धप्रवृत्तिहेतुतया प्रादुर्भवन् केन वार्यते आदिवाक्योपन्यासमन्तरेणापि ?

अथाश्रुतप्रयोजनवाक्यानां प्रयोजनसामान्ये तत्सत्त्वेतराभ्यां संशयो जायते—'किमिदं चिकित्साशास्त्रवत् सप्रयोजनमुत काकदन्तपरीक्षावन्निष्प्रयोजनम्'—ततश्च संशयादनुपन्यस्ते प्रयोजनवाक्ये प्रयोजनसामान्यार्थिनः प्रवर्त्तन्ताम् प्रयोजनविशेषे तु कथमश्रुतप्रयोजनवाक्यानां संशयोत्पत्तिः ? प्रायेण च प्रयोजनविशेषविषयस्यैव संशयस्य प्रवृत्तिकारणत्वात् तदुत्पादनायादिवाक्यमुपादेयम् अतश्च प्रयोजनसामान्य-विशेषेषु संशयानाः 'किमिदं सप्रयोजनमुत निष्प्रयोजनम् सप्रयोजनत्वेऽपि किमभिलषितेनैव प्रयोजनेन तद्वत्' इति पक्षपरामर्शं कुर्वाणाः प्रवर्त्तन्ते, असदेतत्; कुतश्चिच्छास्त्रादनुभूतप्रयोजनविशेषं श्रोतारं प्रति प्रयोजनवाक्यस्यानुपयोगात्—स हि किञ्चिच्छास्त्रमुपलभ्य प्रागनुभूतप्रयोजनविशेषेण शास्त्रेणास्य वाक्यात्मकत्वेन साधर्म्यमवधार्य 'इदमपि निष्प्रयोजनम् उतानभिमतप्रयोजनवत् उताभीष्टप्रयोजनवद्वा' इत्याशङ्कमानः प्रयोजनवाक्यमन्तरेणापि प्रवर्तत एव अननुभूतप्रयोजनविशेषस्तु प्रयोजनवाक्यादपि नैव प्रवर्तते, तं प्रति तस्यापि तदुत्पादकत्वायोगात्—न हि प्रागननुभूतशास्त्रप्रयोजनविशेषः 'प्रयोजनप्रतिपादकं वाक्यमेतदर्थम्' इत्यपि प्रतिपत्तुं समर्थोऽपरयत्नमन्तरेण। नाप्यनुभूतविस्मृतप्रयोजनविशेषः प्रयोजनवाक्यात् संस्मृत्य तद्विशेषं संशयानः प्रवर्त्तते, तद्रहितशास्त्रादपि तद्विशेषे स्मृतिसम्भवात्। नियमेन तु नोभाभ्यामपि तदनुस्मरणं भवति, तथापि प्रयोजनवाक्यस्य ततः स्मृतिहेतुत्वत उपन्यासेऽन्यस्यापि तद्धेतोः किं नोपन्यासः ? सामान्य-विशेषयोश्च दर्शनाऽदर्शनाभ्यां विशेषस्मरणसहकारिभ्यां संशयः, न च प्रयोजनवाक्यं प्रयोजनविशेषस्य भावाऽभावयोः सामान्यम्। अथ विवक्षापरतन्त्रत्वात् स्वार्थतथाभावाऽतथाभावयोरपि प्रयोगसम्भवात् सामान्यमेव वाक्यम्, शास्त्रमपि तर्हि शास्त्रान्तरादृश्यात् प्रयोजननिर्वृत्युपायत्वाऽनुपायत्वयोः सामान्यम्—अन्यतरनिश्चयनिमित्ताभावात्—ततः

१ तद्भाव-गु० डे० भां० वा० बा०। २ अप्रतिबन्धस्य स्व-कां० डे० गु० भा०। ३-नानुभूतबी-कां० आ०। ४-पाया दुपे-वा० बा०। अत्र "संशयितसस्यसंपत्त्यादिफलानां कृषीबलादीनां कृष्यादाविव ते तत्र प्रवर्तमानानाम्" इति स्याद्वादर० पृ० ७ द्वि० पं० ११। "ततोऽपि च संशयतः सस्यसंपत्त्यादिफले कृष्यादौ कृषीबला इव ते तत्र प्रवर्तन्ते" इति रत्नाकरा० पृ० ९ पं० १४। ५-त्तिर्न पुनः आ० हा०। ६ न प्रतिपत्तिका-भां० मां०। ७ एवमेव दृश्यते स्याद्वादर० पृ० ७ द्वि० पं० १४। ८ वार्येत भां० मां०। ९-जनानिर्वृ-भां० मां०।

संशयानः प्रवर्त्तताम् किमकिञ्चित्करप्रयोजनवाक्येन ? न च सामान्यस्य विशेषस्य च दर्शनाऽदर्शनाभ्यामेव यथोक्ताभ्यां संशयः, किन्तु साधक-बाधकप्रमाणाप्रवृत्तावपि; सा च प्रयोजनवाक्योपन्यासाऽनुपन्यासयोरपि सम्भवत्येव।

मा भूत् संशयोत्पादनेन वाक्यस्य शास्त्रश्रवणादिप्रवृत्तौ सामर्थ्यम्, किन्तु प्रकरणारम्भप्रतिषेधाय 'नारब्धव्यमिदं प्रकरणम्, अप्रयोजनत्वात्, काकदन्तपरीक्षावत्' इति व्यापकानुपलब्धेरसिद्धतोद्भावनाय तदुपन्यास इति चेत्, एतदप्यसत्; यतः शास्त्रप्रयोजनं वाक्येनाप्रदर्शयता तदसिद्धिरुद्भावयितुमशक्या, वाक्यस्याप्रमाणतया प्रयोजनविशेषसद्भावप्रकाशनसामर्थ्याभावात्। न च सप्रयोजनत्वेतरयोः परस्परपरिहारस्थितयोः कुतश्चित् प्रमाणादेकभावाप्रतिपत्तावितराभावप्रतिपत्तिः—अतिप्रसङ्गात्—येन वाक्यमात्रस्योपक्षेपेण हेतोरसिद्धिः स्यात्। नापि कुतश्चित् प्रयोजनविशेषमुपलभ्य(भ)मानेन स्वयमुपलब्धप्रयोजनविशेषोपलम्भोपायमप्रदर्शयता कर्तुं शक्या असिद्धतोद्भावना, वाक्यस्याप्रमाणस्य हेतुप्रतिपक्षभूतार्थोपस्थापनाऽशक्तस्योपन्यासमात्रेणासिद्धेरयोगात्। नाप्यनिबन्धना प्रतिपत्तिः, अतिप्रसङ्गात्।

अथ यद्यप्यप्रमाणत्वाद् विपरीतार्थोपस्थापनमुखेनासिद्धतामिदं नोद्भावयति तथापि शास्त्रस्य निष्प्रयोजनता सन्दिग्धाऽतः, सन्दिग्धनिष्प्रयोजनत्वस्य शास्त्रस्य प्रयोजनाभावं निश्चितं प्रेक्षावदारम्भप्रतिषेधहेतुं प्रयुञ्जानोऽनेन वाक्येन प्रतिक्षेप्तुमिष्टः न पुनः प्रयोजनविषयनिश्चय एवोत्पादयितुमिष्टः, न हि प्रतिपक्षोपक्षेपेणैव साधनधर्माणामसिद्धिः अपि तु स्वग्राहिज्ञानविकलतया सन्दिग्धधर्मिसम्बन्धित्वमप्यसिद्धत्वमेव, तस्मात् सन्दिग्धासिद्धतोद्भावनाय वाक्यप्रयोग इति, तदप्यनुपपन्नम्; यथा हि सप्रयोजनत्वे सन्देहोत्पादने वाक्यस्यानुपयोगित्वम्—शास्त्रमात्रादपि भावात्—तथा निष्प्रयोजनत्वेऽपि; एवं ह्यनेन वाक्येन हेतोरसिद्धतोद्भाविता भवति यदि तत्सत्तासन्देहनिबन्धनानि कारणान्यपि तदैव प्रकाशितानि भवन्ति। न च विपर्यस्तपुरुषसन्देहोत्पादने तद् वाक्यं प्रभवति, अदर्शनात्। न च प्रस्तुतशास्त्रस्य प्रयोजनवच्छास्त्रान्तरेण कथञ्चित् साम्यात् साधक-बाधकप्रमाणाप्रवृत्तिताश्रान्यानि सन्देहकारणानि सम्भवन्ति, वाक्यमप्येतावन्मात्रप्रकाशनपरं हेतोः सन्दिग्धासिद्धतामुद्भावयेत्, तच्च तथाप्रकाशनमनुपन्यस्तेऽपि वाक्ये शास्त्रमात्रादपि दर्शनात् प्रमाणद्वयावृत्तेश्च भवतीति कस्तस्योपयोगः? अनुपन्यस्ते कथं तत् इति चेत्, उपन्यस्तेऽपि कथम् न हि तदुपन्यासानुपन्यासावस्थयोः सन्दिग्धत्वात् प्रस्तुतात् कथञ्चन विशेषं पश्यामः? असिद्धतोद्भावनमनेन न्यायेन सर्वमेवासङ्गतमिति चेत्, नैतत्; न ह्यनेन प्रकारेणासिद्धतोद्भावनमेव प्रतिक्षिप्यते, किन्तु प्रमाणरहिताद् वाङ्मात्रादसिद्धता नोद्भावयितुं शक्येति प्रदर्श्यते। तन्न प्रयोजनवाक्यं हेत्वसिद्धतोद्भावनार्थमपि युक्तम्।

न च परोपन्यस्ते साधने प्रयोजनवाक्येनासिद्धतामुद्भाव्य 'कथमसिद्धिः साधनस्य' इति प्रत्यवस्थानवन्तं शास्त्रपरिसमाप्तेः प्रयोजनमवगमयेन् शास्त्रं श्रावयति ततः समधिगते प्रयोजने तदुपन्यस्तस्य

१ अत्र अर्थानुसंधानबलात् '-प्रतिषेधाय प्रयुज्यमानायाः' इत्येव पाठो बोद्धव्यः। "यत् प्रयोजनरहितं वाक्यम् तदर्थो वा न तत् प्रेक्षावता आरभ्यते कर्तुम् प्रतिपादयितुं वा। तद्यथा 'दशदाडिमा'दिवाक्यं काकदन्त-× × × प्रकरणम् तदर्थो वेति व्यापकानुपलब्ध्या प्रत्यवतिष्ठमानस्य तदसिद्धतोद्भावनार्थमादौ प्रयोजनवाक्योपन्यासस्तत्र"-हेतु० टी० ता० लि० पृ० २ प्र० पं० १-२। " 'किन्तु यत् प्रयोजनरहितम् अनर्थकं वा तद् नारब्धव्यम्, यथा काकदन्तपरीक्षोन्मत्तादिवाक्यम्; प्रयोजनरहितं चेदं शास्त्रम् अतो न श्रोतुं कर्तुं वा प्रारब्धव्यम्' इत्येवं व्यापकानुपलब्ध्या यः प्रत्यवतिष्ठते तस्य हेतोरसिद्धतोद्भावनार्थमादौ प्रयोजनादिवाक्योपन्यास इति" तत्त्वसं० पञ्जि० पृ० ६ पं० ९। "व्यापकानुपलब्ध्या प्रत्यवतिष्ठमानान् प्रति व्यापकानुपलब्धेरसिद्धतोद्भावनार्थं प्रयोजनवाक्यम्"-तत्त्वार्थश्लोकवा० पृ० ४ पं० १९-२०। "शास्त्रप्रारम्भप्रतिषेधाय प्रयुज्यमानायाः व्यापकानुपलब्धेरसिद्धतोद्भावनार्थम्" इति स्याद्वादर० पृ० ८ द्वि० पं० ६। २-णादेकाभावाप्र-वा० बा० विना। "कुतश्चित् प्रमाणादेकभावाप्रतीतावितराभावप्रतिपत्तिः" इति स्याद्वादर० पृ० ८ द्वि० पं० ९। ३ अत्र "नापि कुतश्चित् प्रयोजनविशेषं स्वयं प्रतिपन्नवता परस्य तत्प्रकाशनोपायमनुपदर्शयता" इति स्याद्वादर० पृ० ८ द्वि० पं० १०। ४-मानोन डे० गु० भा०। ५-नाऽशक्य-भां०। ६-पनामुखे-वा० बा०। ७-ष्टः तर्हि भां० मां०। ८-ताद्भवति आ० कां० गु० डे० भा०। ९-त्सत्वासन्देह-भां०। १०-जनाच्छा-भां० मां०। ११-नि भवन्ति मां०। १२-यत् शा-भां० मां०। "प्रत्यवतिष्ठमानं परं शास्त्रपरिसमाप्तिः प्रयोजनमनुगमयिष्यन् शास्त्रं श्रावयति" इति स्याद्वादर० पृ० ९ प्र० पं० ७।

साधनस्यासिद्धिरिति वक्तुं शक्यम्, शास्त्रश्रवणतः प्रयोजनावगमे शास्त्रस्यादौ तद्वाक्योपन्यासस्य वैयर्थ्यप्रसक्तेः। अत एव "शास्त्रार्थप्रतिज्ञाप्रतिपादनपरः आदिवाक्योपन्यासः" [ ] इत्याद्यपि प्रतिक्षिप्तम्, अप्रमाणादादिवाक्यात् तदसिद्धेः। तथा, सम्बन्धाऽभिधेयप्रत्यायनपराण्यपि वाक्यानि शास्त्रादौ वाङ्मात्रेण निश्चयायोगान्निष्प्रयोजनानि प्रतिक्षिप्तान्येव, उक्तन्यायस्य समानत्वात्। तदयुक्तम् 'समय'—इत्यादि—अभिधेयप्रयोजनप्रतिपादकम्—गाथासूत्रम्।

[उत्तरपक्षः—आदिवाक्योपन्यासस्य सार्थकत्वसमर्थनम्]

अत्र प्रतिविधीयते—यदुक्तम् 'न प्रत्यक्षमनुमानं वा शब्दः' तत्र सिद्धसाध्यता, प्रत्यक्षानुमानलक्षणायोगात् तत्र। यच्च 'नापि शब्दः प्रमाणम् बहिरर्थे तस्य प्रतिबन्धवैकल्येन, विवक्षायां तु प्रतिबन्धेऽपि यथाविवक्षमर्थासम्भवात्' तदप्यसारम्; बाह्यार्थेन शब्दप्रतिबन्धस्य प्रसाधयिष्यमाणत्वात् तत्रैव च प्रतिपत्ति-प्रवृत्यादिव्यवहारस्योपलभ्यमानत्वाद् बाह्यार्थ एव शब्दस्य प्रामाण्यमभ्युपगन्तव्यं प्रत्यक्षवत्।

नन्वाप्तार्थाध्यभिचारित्वप्रामाण्यनिश्चयवतां ततः प्रवर्त्तमानानां प्रेक्षापूर्वकारिताक्षतिः। न चानाप्तप्रणीत'सरित्तटपर्यस्तगुडशकट' वाक्यविशिष्टतानवगमाद् नातः प्रवृत्तिः, प्रत्यक्षाभासात् प्रत्यक्षस्येवानाप्तप्रणीतवाक्यादस्य विशिष्टतावसायात्; यस्य तु न तद्विशिष्टावसायो नासावतः प्रवर्त्तते अनवधृतहेत्वाभासविवेकाद्धेतोरिवानुमेयार्थक्रियार्थी। न चाप्तानां परहितप्रतिबद्धप्रयासानां प्रमाणभूतत्वात् स्ववाङ्मात्रेण प्रवर्तयितुं प्रभवतां प्रयोजनवाक्योपन्यासवैयर्थ्यम्, सुनिश्चितात्प्रणीतवाक्यादपि प्रतिनियतप्रयोजनार्थिनां तदुपायानिश्चये तत्र प्रवृत्त्ययोगात्। न च प्रयोजनविशेषप्रतिपादकवाक्यमन्तरेणाप्तप्रणीतशास्त्रस्यापि तद्विशेषप्रतिपादकत्वनिश्चयः येन तत एव तदर्थिनां तत्र प्रवृत्तिः स्यात्, तदनभिमतप्रयोजनप्रतिपादकानामपि तेषां संभवात्।

अतः "यत्र खल्वाप्तैः 'इदं कर्तव्यम्' इति पुरुषाः प्रतीततदाप्तभावा नियुज्यन्ते तत्रावैधारितत्प्रेरणाऽतथाभावविषयविचारास्तदभिहितं वाक्यमेव बहु मन्यमाना अनादृतप्रयोजनपरिप्रश्ना एव प्रवर्त्तन्ते, विनिश्चिततदाप्तभावानां प्रत्यवस्थानासंभवात्" [ ] इति निरस्तम्, आप्तप्रवर्त्तितप्रतिनियतप्रयोजनार्थिजनप्रेरणावाक्यस्यैव प्रयोजनवाक्यत्वनिश्चयात् अन्यथाऽभिमतफलार्थिजनप्रेरकवाक्यस्याप्तप्रयुक्तत्वमेवानिश्चितं स्यात् अनभिमतार्थप्रेरकस्यावगताप्तवाक्यत्वे चातिप्रसङ्गः; न चाप्तवाक्यादपि प्रतिनियतप्रयोजनार्थिनस्तदवगमे तत्र प्रवर्त्तितुमुत्सहन्ते, अतिप्रसङ्गादेवेति सुप्रसिद्धम्।

अर्थसंशयोत्पादकत्वेन चादिवाक्यस्य प्रवर्तकत्वप्रतिक्षेपे सिद्धतासाधनम्, व्यापकानुपलब्धेस्त्वसिद्धतोद्भावनमादिवाक्यान्निश्चितबाह्यार्थप्रामाण्याद् युक्तमेव, यथा च तत्र तस्या (तस्य) प्रामाण्यं तथा प्रतिपादयिष्यामः। अत एव "आप्ताभिहितत्वासिद्धेरविसंवादकत्वायोगादप्रमाणत्वाभावनिश्चयनिमित्ताभावादप्रवर्त्तकत्वं प्रयोजनवाक्यस्य प्रेक्षापूर्वकारिणः प्रति" [ ] इति यदुच्यते तदपि प्रतिव्यूढं द्रष्टव्यम्। एतेनैव सम्बन्धाभिधेयाभिधानस्यापि सार्थकत्वं प्रतिपादितम्। तत् स्थितमभिधेयप्रयोजनप्रतिपादकत्वं समुदायार्थः 'समय'—इत्यादिगाथासूत्रस्य।

अत्र च 'आगममलारहृदय' इत्यनुवादेन 'समयपरमार्थविस्तरविहाटजनपर्युपासनसकर्णो यथा भवति तमर्थमुन्नेष्ये' इति विधिपरा पदघटना कर्त्तव्या।

---

१ "एतेन शास्त्रप्रतिज्ञाख्यापनफलः संक्षेपतः शास्त्रशरीरख्यापनफलश्च तदादौ वाक्योपन्यास इत्येवमादयोऽसत्कल्पनाः ××× निर्वर्णितोत्तराः" इति स्याद्वादर० पृ० ९ द्वि० पं० ६। २ पृ० १६९ पं० ८। ३ पृ० १७० पं० १–३। ४ पृ० १७० पं० ८। ५ **यदा**–आ० कां०। ६ **न चार्थव्य**–वा० बा० विना। ७–**वधारिततत्प्रेरणातथाभाव**–आ० वा० बा०। ८–**र्थिना ज**–आ० गु० हा० भा० डे०।–**र्थिनो ज**–वि० कां०। ९–**त्वे वा**–भा० डे० गु० आ०। १० **अथ**–आ० कां० डे० गु० भा०। ११ वि० प्रतौ **'तस्य प्रामाण्यम्'** इत्येव संशोधितम्। अथवा **'तस्याऽप्रामाण्यम्'** इत्यस्यैव पाठस्य प्राह्यतायां **'न'** पदं पूरयित्वा **'यथा च न तत्र तस्याऽप्रामाण्यम्'** इति पाठो बोद्धव्यः। ११ **प्रतीतिर्यदु**–वा० बा० विना। १३–**नवाक्यस्य प्रति**–भां० मां०।

पदार्थस्तु मलमिव आरा प्राजनकविभागो यस्यासौ मलारो गौर्गली आगमे तद्वत् कुण्ठं हृदयं यस्य—तदर्थप्रतिपत्त्यसामर्थ्यात्—असौ तथा मन्दधीः, सम्यगीयन्ते परिच्छिद्यन्तेऽनेनार्था इति समय आगमः तस्य परमोऽकल्पितश्चासावर्थः समयपरमार्थः तस्य विस्तरो रचनाविशेषः—शब्दार्थयोश्च भेदेऽपि पारमार्थिकसम्बन्धप्रतिपादनायाऽभेदविवक्षया "ग्रन्थने वावशब्दे" [पाणि० ३, ३,३३] इति घञ् न कृतः—तस्य विहाटं इति दीप्यमानान् श्रोतृबुद्धौ प्रकाशमानानर्थान् दीपयति प्रकाशयतीति विहाटश्चासौ जनश्च चतुर्दशपूर्ववेदादिलोकः तस्य पर्युपासनम्—कारणे कार्योपचारात्—सेवाजनिततद्व्याख्यानं तत्र सह कर्णाभ्यां वर्त्तत इति सकर्णः तद्व्याख्यातार्थावधारणसमर्थः यथा इति येन प्रकारेण भवति तं तथाभूतमर्थमुन्नेष्ये लेशतः प्रतिपादयिष्ये।

यथाभूतेनार्थेन प्रतिपादितेनातिकुण्ठधीरपि श्रोतृजनो विशिष्टागमव्याख्यातृप्रतिपादितार्थावधारणपटुः सम्पद्यते तमर्थमनेन प्रकरणेन प्रतिपादयिष्यामीति यावत्।

[शब्दार्थ—तत्संबन्धयोर्मीमांसा—पूर्वपक्षः]

['अपोह एव शब्दस्यार्थः' इति बौद्धमतस्य संक्षिप्य स्थापनम्]

ननु च 'समयपरमार्थविस्तर'-इत्यनेनागमस्याकल्पितो बाह्यार्थः प्रतिपाद्यत्वेन शब्दार्थयोश्च वास्तवः सम्बन्धो निर्दिष्टः, द्वितयमप्येतदयुक्तम्; प्रमाणबाधितत्वात् इति बौद्धाः। तथाहि–शब्दानां न परमार्थतः किञ्चिद् वाच्यं वस्तुस्वरूपमस्ति; सर्वे एव हि शाब्दप्रत्ययो भ्रान्तः, भिन्नेष्वर्थेष्वभेदाकाराध्यवसायेन प्रवृत्तेः। यत्र तु पारम्पर्येण वस्तुप्रतिबन्धस्तत्रार्थसंवादो भ्रान्तत्वेऽपि, तत्र यत् तदारोपितं विकल्पबुद्ध्याऽर्थेष्वभिन्नं रूपं तद् अन्यव्यावृत्तपदार्थानुभवबलायातत्वात् स्वयं चान्यव्यावृत्ततया प्रतिभासनात् भ्रान्तैश्चान्यव्यावृत्तार्थेन सहैक्येनाध्यवसितत्वात् अन्यापोढपदार्थाधिगतिफलत्वाच्च अन्यापोह इत्युच्यते, अतः अपोहः शब्दार्थः इति प्रसिद्धम्।

['विधिरेव शब्दस्यार्थः' इति विधिवादिमतस्य संक्षिप्य प्रतिस्थापनम्]

अत्र विधिवादिनः प्रेरयन्ति–यदि भवतां द्रव्य-गुण-कर्म्म-सामान्यादिलक्षणानि विशेषणानि शब्दप्रवृत्तिनिमित्तानि परमार्थतो न सन्ति कथं लोके 'दण्डी' इत्याद्यभिधानप्रत्ययाः प्रवर्त्तन्ते द्रव्यादयुपाधिनिमित्ताः? तथाहि–'दण्डी' 'विषाणी' इत्यादिधी-ध्वनी लोके द्रव्योपाधिकौ प्रसिद्धौ, 'शुक्लः' 'कृष्णः' इति गुणोपाधिकौ, 'चलति' 'भ्रमति' इति कर्म्मनिमित्तौ, 'अस्ति' 'विद्यते' इति सत्तानिमित्तकौ, 'गौः' 'अश्वः' इति सामान्यविशेषोपाधी, 'इह तन्तुषु पटः' इति समवायनिमित्तः (स्तौ)। तत्रैषां द्रव्यादीनामभावे 'दण्डी' इत्यादिप्रत्यय-शब्दौ निर्विषयौ स्याताम्। न चानिमित्तावेतौ युक्तौ, सर्वत्र सर्वदा तयोरविशेषेण प्रवृत्तिप्रसङ्गात्। न चाविभागेन तयोः प्रवृत्तिरस्ति, तस्मात् सन्ति द्रव्यादयः पारमार्थिकाः प्रस्तुतप्रत्यय-शब्दविषयाः।

प्रमाणयन्ति चैत्र—ये परस्परासङ्कीर्णप्रवृत्तयस्ते सनिमित्ताः, यथा श्रोत्रादिप्रत्ययाः, असङ्कीर्णप्रवृत्तयश्च 'दण्डी' इत्यादिशब्द-प्रत्ययाः इति स्वभावहेतुः। अनिमित्तत्वे सर्वत्राविशेषेण प्रवृत्तिप्रसङ्गो बाधकं प्रमाणम्।

---

१ "मट्ठ–मराला य अलसम्मि"–देशीना० व० ६ श्लो० ११२ पृ० २२२। "मंदं अलसं जडं मरालं च"–पाइअ० ना० श्लो० १५ पृ० ३। २ "वेरशब्दे प्रथने" इति हैमं सूत्रम्–५, ३, ६९। ३ "हट दीप्तौ" है० धातुपारा० १, १८८ पृ० २७। ४ **कार्ये कारणोपचारात्** भां० मां०। ५ शब्दश एवेदं संपूर्णमपोहप्रकरणमविकलतया तत्त्वसंग्रहपञ्जिकायां दृश्यते पृ० २७४ का० ८६७–पृ० ३६६ का० १२१२। ६ **यदारो**–वि०। ७–**यं वा**–वा० बा०। ८–**नाभ्रान्तेश्चा**–भां०।

९ "यदि नोपाधयः केचिद् विद्यन्ते (परमार्थतः)। (दण्डी शुक्लश्चलत्यस्ति गौ) रिहेत्यादिधी (ध्वनी)॥ (स्यातां) किंविषयावेतौ नाऽनिमित्तौ च तौ मतौ। सर्वस्मिन्नविभागेन तयोर्वृत्तिरसंभवी" (?)॥ तत्त्वसं० का० ८६७, ८६८ पृ० २७४।

१० " 'इहात्मनि ज्ञानम्' इत्यादिकौ संबन्धोपाधिकौ" प्रमेयक० पृ० १२८ द्वि० पं० ८–९। ११–**ण वृत्ति**–भां० मां०। १२ प्रयोगोऽयं विद्यते प्रमेयक० पृ० १२८ द्वि० पं० ७।

[विधिवादिमतं सविस्तरं दूषयताम् अपोहवादिनां मतस्य निर्देशः]

अत्र यदि पारमार्थिकबाह्यविषयभूतेन निमित्तेन[1] सन्नि(सनि)मित्तत्वमेषां साधयितुमिष्टं तदा अनैकान्तिकता हेतोः; साध्यविपर्यये बाधकप्रमाणाभावात्। अथ येन केनाचिन्निमित्तेन[3] सनिमित्तत्व-मिष्यते तदा सिद्धसाध्यता। तथाहि-अस्माभिरपीष्यते एवैषामन्तर्जल्पवासनाप्रबोधो निमित्तं न तु विषयभूतम्[4], भ्रान्तत्वेन सर्वस्य श(शा)ब्द प्रत्ययस्य निर्विषयत्वात्। तदुक्तम्[5]—

"येन[6] येन हि नाम्ना वै यो यो धर्म्मोऽभिलप्यते[7]।
न सः[8] संविद्यते तत्र धर्म्माणां सा हि धर्म्मता" ॥ [ ] इति।

न च शाब्दप्रत्ययस्य भ्रान्तत्वाऽविषयत्वयोः किं प्रमाणमिति वक्तव्यम्, भिन्नेष्वभेदाध्यवसायेन प्रवर्त्तमानस्य प्रत्ययस्य भ्रान्तत्वात्। तथाहि-यः 'अतस्मिंस्तत्' इति प्रत्ययः स भ्रान्तः, यथा मरीचि-कायां जलप्रत्ययः, तथा चायं भिन्नेष्वर्थेष्वभेदाध्यवसायी शाब्दः प्रत्यय इति स्वभावहेतुः। न च सामान्यं वस्तुभूतं ग्राह्यमस्ति येनासिद्धताऽस्य हेतोः स्यात्, तस्य निषिद्धत्वात्[9]। भवतु वा सामा-न्यम् तथापि तस्य भेदेभ्योऽर्थान्तरत्वे भिन्नेष्वभेदाध्यवसायो भ्रान्तिरेव, न[11] ह्यन्येनान्ये समाना युक्ता-स्तद्वन्तो नाम स्युः। अनर्थान्तरत्वेऽपि सामान्यस्य सर्वमेव विश्वमेकं वस्तु परमार्थत इति तत्र सामान्यप्रत्ययो भ्रान्तिरेव; न चैकवस्तुविषयः समानप्रत्ययः[12], भेदग्रहणपुरस्सरत्वात् तस्य। भ्रान्त-त्वे च सिद्धे निर्विषयत्वमपि सिद्धम्, स्वाकारार्प्पणेन जनकस्य कस्यचिदर्थस्यालम्बनलक्षणस्य प्राप्तस्याभावात्।

अन्यथा वा निर्विषयत्वम्। तथाहि-यत्रैव कृतसमया ध्वनयः स एव तेषामर्थो युक्तो नान्यः, अतिप्रसङ्गात्; न च क्वचिद् वस्तुन्येषां परमार्थतः समयः संभवतीति निर्विषया ध्वनयः। प्रयोगः-ये यत्र भावतः कृतसमया न भवन्ति न ते परमार्थतस्तमभिदधति, यथा सौस्नादिमति[13] पिण्डेऽश्व-शब्दोऽकृतसमयः, न भवन्ति च भावतः कृतसमयाः सर्वस्मिन् वस्तुनि सर्वे ध्वनयः इति व्यापकानु-पलब्धिः कृतसमयत्वेनाभिधायकत्वस्य व्याप्तत्वात् तस्य चेहाभावः।

[संकेतासंभवसाधनाय स्वलक्षणाद्यर्थभेदेन विकल्पपञ्चकविधानम्]

न चायमसिद्धो हेतुः। तथाहि-गृहीतसमयं[14] वस्तु शब्दार्थत्वेन व्यवस्थाप्यमानं स्वलक्षणं वा व्यवस्थाप्येत, जातिर्वा, तद्योगो वा, जातिमान् वा पदार्थः[15], बुद्धेर्वा आकार इति विकल्पाः। सर्वेष्वपि समयासंभवान्न युक्तं शब्दार्थत्वं तत्त्वतः; सांवृतस्य तु शब्दार्थत्वस्य[16] न निषेध इति न स्ववचनविरोधः प्रतिज्ञायाः। एवं ह्यसौ स्यात्—स्वलक्षणादीन् शब्देनाप्रतिपाद्य न शक्यमशब्दार्थत्वमेषां प्रतिपाद-यितुम्, तत्प्रतिपिपादयिषया च शब्देन स्वलक्षणादीनुपदर्शयता शब्दार्थत्वमेषामभ्युपेयं स्यात् पुनश्च तदेव प्रतिज्ञया प्रतिषिद्धमिति स्ववचनव्याघातः; न चासावभ्युपगम्यत इति। एतेन यदुक्तमुद्योत-

---

१ "उच्यते विषयोऽमीषां धी-ध्वनीनां न कश्चन। अन्तर्मात्रानिविष्टं तु बीजमेषां निबन्धनम्" ॥
तत्त्वसं० का० ८६९ पृ० २७५।

२ "तत्र यदि मुख्यतो बाह्येन विषयभूतेन सनिमित्तत्वमेषां साधयितुमिष्टं तदाऽनैकान्तिकता हेतोः" तत्त्वसं० पञ्जि० पृ० २७५ पं० १९। ३-**न संनि**-कां०। ४-**भूतत्वम् भ्रा**-भां० मां० विना। ५ "तन्नेदमुक्तं तायिना" इति निर्दिश्य श्लोकोऽयं समुद्धृतस्तत्त्वसंग्रहपञ्जिकायाम् पृ० १२ पं० १२। ६-**भिलष्यते** आ० भां० मां० बा०। ७ **स स वि**-आ० वि० कां०।

८ "यस्य यस्य हि शब्दस्य यो यो विषय उच्यते। स स (संविद्य) ते नैव वस्तूनां सा हि धर्मता" ॥
तत्त्वसं० का० ८७० पृ० २७५।

९-**त्ययभ्रान्त**-भां० मां० वा० बा० विना। १० पृ० ११० पं० ९। ११ " नहि अनेन अन्ये समाना भ-वन्ति तद्वन्तो हि तथा स्युः" इति सामान्यपदार्थविचारप्रस्तावे न्यायकु० लि० पृ० १६१ प्र० पं० १०। १२ "सामा-न्यप्रत्ययः"-तत्त्वसं० पञ्जि० पृ० २७६ पं० १०। १३ **सास्नामति** आ० कां० गु० डे० भा० वा० बा०।

१४ "यतः स्वलक्षणं जातिस्तद्योगो जातिमांस्तथा। बुद्ध्याकारो न शब्दार्थे घटामञ्चति तत्त्वतः" ॥
तत्त्वसं० का० ८७१ पृ० २७६।

१५ "पदार्थबुद्धेर्वा आकारः"-तत्त्वसं० पञ्जि० पृ० २७६ पं० २३। १६-**ब्दार्थस्य** डे० गु०। १७ "शब्दार्थत्वमेषामभ्युपेतं स्यात्"-तत्त्वसं० पञ्जि० पृ० २७६ पं० २७।

करेण-"अवाचकत्वे शब्दानां प्रतिज्ञा-हेत्वोर्व्याघातः" [अ० २, आ० २, सू० ६७ न्यायवा० पृ० ३२७ पं० ६-७] इति, तदपि प्रत्युक्तं भवति; न हि सर्वथा शब्दार्थोपवादोऽस्माभिः क्रियते—आ गोपाले-भ्योऽपि प्रतीतत्वात् तस्य—किन्तु तात्त्विकत्वं धर्म्मः परैर्[2]यस्तत्रारोप्यते तस्यैव निषेधो न तु धर्म्मिणः।

[१ स्वलक्षणे संकेतासंभवसाधनम्]

तत्र[3] स्वलक्षणे न तावत् समयः संभवति शब्दस्य, समयो हि व्यवहारार्थं क्रियते न व्यसनितया, तेन यस्यैव सङ्केत-व्यवहारकालव्यापकत्वमस्ति तत्रैव स व्यवहर्तृणां युक्तो नान्यत्र; न च स्वलक्षणस्य सङ्केत-व्यवहारकालव्यापकत्वमस्ति तस्मान्न तत्र समयः। सङ्केत-व्यवहारकालव्यापकत्वं च शाबले-यादिव्यक्तीनां देशादिभेदेन परस्परतोऽत्यन्तव्यावृत्ततयाऽनन्वयात् तत्रैकत्र कृतसमयस्य पुंसोऽन्यै-र्व्यवहारो न स्यादिति तत्र समयाभावान्नासिद्धता हेतोः।

न चाप्यनैकान्तिकत्वम्, व्याप्तिसिद्धेः। तथाहि-यद्यगृहीतसङ्केतमर्थं शब्दः प्रतिपादयेत् तदा गोशब्दोऽप्यश्वं प्रतिपादयेत् सङ्केतकरणानर्थक्यं च स्यात्, तस्मादतिप्रसङ्गापत्तिर्बाधकं प्रमाणमिति कथं न व्याप्तिसिद्धिः?

अयमेवं[4] वा 'अकृतसमयत्वात्' इति हेतुराचार्यदिग्नागेन "न जातिशब्दो भेदानां वाचकः, आन-न्त्यात्[5]" [ ] इत्यनेन निर्दिष्टः। तथाहि-'आनन्त्यात्' इत्यनेनैं समयासंभव एव दर्शितः।

तेन यदुक्तमुद्द्योतकरेण-"यदि शब्दान् पक्षयसि तदा 'आनन्त्यात्' इत्यस्य वस्तुधर्म्मत्वाद् व्यधिकरणो हेतुः, अथ भेदा एव पक्षीक्रियन्ते तदा नान्वयी न व्यतिरेकी दृष्टान्तोऽस्तीत्यहेतुरा-नन्त्यम्" [अ० २, आ० २, सू० ६७ न्यायवा० पृ० ३२३ पं० १६] इति, तत् प्रत्युक्तम्। यत् पुनः स एवाह-"यस्य निर्विशेषणा भेदाः शब्दैरभिधीयन्ते तस्याऽयं दोषः, अस्माकं तु सत्ताविशेषणानि द्रव्य-गुण-कर्म्माण्यभिधीयन्ते। तथाहि-यत्र यत्र सत्तादिकं सामान्यं पश्यति तत्र तत्र सदादिशब्दं प्रयुङ्क्ते, एकमेव च सत्तादिकं सामान्यम्, अतः सामान्योपलक्षितेषु भेदेषु समयक्रियासम्भवादकार-णमानन्त्यम्" [अ० २, आ० २, सू० ६७ न्यायवा० पृ० ३२३ पं० ११] इति, असदेतत्; यतो न सत्ता-दिकं वस्तुभूतं सामान्यं तेभ्यो भिन्नमभिन्नं वाऽस्तीति। भवतु वा तत् तथाप्येकस्मिन् भेदेऽनेक-सामान्यसंभवादसाङ्कर्येण सदादिशब्दयोजनं न स्यात्। न च शब्देनानुपदर्श्य सत्तादिकं सामान्यं सत्तादिना भेदानुपलक्षयितुं समयकारः शक्नुयात्, न चाकृतसमयेषु सत्तादिषु शब्दप्रवृत्तिरस्तीति इतरेतराश्रयदोषप्रसक्तिः।

अथापि स्यात् स्वयमेव प्रतिपत्ता व्यवहारोपलम्भादन्वय-व्यतिरेकाभ्यां सदादिशब्दैः समयं प्रतिपद्यते, असदेतत्; अनन्तभेदविषयनिःशेषव्यवहारोपलम्भस्य कस्यचिदसंभवात्। एकदा सत्तादि-मत्सु[10] भेदेष्वसकृद् व्यवहारमुपलभ्याऽदृष्टेष्वपि तज्जातीयेषु तान् शब्दान् प्रतिपद्यत इति चेत्, न;

१-**ज्ञा-हेतुर्व्या**-भां० मां० वा० बा० विना। २-**र्यत्रारो**-वि०।

३ "तत्र स्वलक्षणं तावन्न शब्दैः प्रतिपाद्यते। संकेतव्यवहाराप्तकालव्याप्तिवियोगतः" ॥
तत्त्वसं० का० ८७२ पृ० २७७।

४ "व्यक्त्यात्मानोऽनुयन्त्येते न परस्परूपतः। देश-काल-क्रिया-शक्ति-प्रतिभासादिभेदतः ॥
तस्मात् संकेतदृष्टोऽर्थो व्यवहारे न दृश्यते। न चाऽगृहीतसंकेतो (बोध्येता) न्य इव ध्वनेः" ॥
तत्त्वसं० का० ८७३-८७४ पृ० २७७।

५-**व चा**-वि०। ६ "यत् पुनरेतत्-आनन्त्यान्न जातिशब्दो भेदानां वाचकः" इति न्यायवा० पृ० ३२३ पं० २। एतादृश एवाऽयं पाठः तत्त्वसं० पञ्जि० पृ० २७७ पं० २८। "यत्तु भिक्षुणा" इति निर्दिश्य श्लोकवार्तिकव्याख्यायां पार्थसारथिमिश्र एतत्समानमेनं श्लोकमुद्धरति—

"न जातिशब्दो भेदानामानन्त्य-व्यभिचारतः। वाचको योग-जात्योर्वा भेदार्थैरपृथक्श्रुतैः" ॥
श्लो० वा० पृ० ५९६ पं० २०।

"अयमेवाभिप्रायः 'न जातिशब्दो भेदानां वाचकः, आनन्त्यात्' इति वदत आचार्यदिग्नागस्य"-शास्त्रवा० **स्याद्वादक०** पृ० ३९९ द्वि० पं० ६। ७-**न संभव ए**-वा० बा० गु० भा० डे०। ८ **शब्दा प**-भां० मां०। ९-**रानन्त-मिति** भां०।-**रात्यन्तमिति** वा० बा०।-**रानन्त्यंतमिति** वि०। १०-**मत्स्वभेदेषु**-भां० मां० विना।

अदृष्टत्वात्, न ह्यदृष्टेष्वतीतादिभेदभिन्नेष्वनन्तेषु भेदेषु समयः संभवति अतिप्रसङ्गात्। विकल्पबुद्ध्या(ऽध्या)हृत्य तेषु तत्प्रतिपत्त्याभ्युपगमे विकल्पसमारोपितार्थविषय एव शब्दसङ्केतः प्राप्तः। तथाहि—अतीतानागतयोरसत्त्वेनासन्निहितत्वात् तत्र विकल्पबुद्धिर्भवन्ती निर्विषयैव, तत्र भवन् समयः कथं परमार्थवस्तुविषयो भवेदिति? सपक्षे भावाद् नापि हेतोर्विरुद्धतेति सिद्धं स्वलक्षणाविषयत्वं शब्दानाम्।

अथ स्थिरैकरूपत्वाद्धिमाचलादिभावानां देशादिभेदाभावात् सङ्केतव्यवहार-कालव्यापकत्वेन समयसंभवात् पक्षैकदेशासिद्धता प्रकृतहेतोः, नैतत्; हिमाचलादीनामप्यनेकाणुप्रचयस्वभावतया उदयानन्तरापवर्गितया च नाशेषावयवपरिग्रहेण समयकालपरिदृष्टस्वभावस्य व्यवहारकालानुयायित्वेन च समयः संभवतीति नासिद्धता हेतोः। अत उक्तन्यायेन समयवैयर्थ्यप्रसङ्गान्न स्वलक्षणे समयः संभवति।

अशक्यक्रियत्वाच्च न तत्र समयः। तथाहि-उदयाऽनन्तरापवर्गिषु भावेषु समयः क्रियमाणः अनुत्पन्नेषु वा क्रियेत, उत्पन्नेषु वा? न तावदनुत्पन्नेषु परमार्थतः समयो युक्तः, असतः सर्वोपाख्यारहितस्याधारत्वानुपपत्तेः, अपारमार्थिकवँस्त्वजातेऽपि पुत्रादौ समय उपलभ्यत इति न दृष्टविरोधः, विकल्पनिर्म्मितार्थविषयत्वेन तस्यापारमार्थिकत्वात्। नाप्युत्पन्ने समयो युक्तः, तस्मिन्ननुभवोत्पत्तौ तत्पूर्वके च शब्दभेदस्मरणे सति समयः संभवति नान्यथा—अतिप्रसङ्गात्—शब्दभेदस्मरणकाले च चिरनिरुद्धं स्वलक्षणमिति अजातवज्जातेऽपि कथं समयः समयक्रियाकाले द्वयोरप्यसन्निहितत्वात्? तथाहि-अनुभवावस्थायामपि तावत् तत्कारणतया स्वलक्षणं क्षणिकं न सन्निहितसत्ताकं भवति किं पुनरनुभवोत्तरकालभाविनामभेदाभोगस्मरणोत्पादकाले भविष्यति?

नापि तज्जातीये तत्सामर्थ्यबलोपजाते समयक्रियाकालभाविनि क्षणे समयः सम्भवति, तस्याऽन्यत्वात्। यद्यपि समयक्रियाकाले सन्निहितं क्षणान्तरमस्ति तथापि तत्र समयाभोगासम्भवान्न समयो युक्तः; न ह्यश्वमुपलभ्य तन्नामस्मरणोपक्रमपूर्वकं समयं कुर्वाणस्तत्कालसन्निहिते गवादावाभोगाविषयीकृते 'अश्वः' इति समयं समयकृत् करोति। अथापि स्यात् सर्वेषां स्वलक्षणानां सादृश्यमस्ति तेनैक्यमध्यवस्य समयः करिष्यते, असदेतत्; यतो विकल्पबुद्ध्याऽध्यारोपितं सादृश्यम्, तस्य च ध्वनिभिः प्रतिपादने स्वलक्षणमवाच्यमेवेति न स्वलक्षणे समयः।

१-षु सम-भां० मां० विना। २ "विकल्पबुद्धया व्याहृत्य तेषु"-तत्त्वसं० पञ्जि० पृ० २७८ पं० १८। "विकल्पबुद्धावध्याहृत्य तेषु संकेताभ्युपगमे विकल्पसमारोपितार्थविषय एव शब्दसंकेतः"-प्रमेयक० पृ० १२८ द्वि० पं० १२। ३ अत्र 'तत्प्रतिपत्त्यभ्युपगमे' इति पाठः सुचारुः, वि० प्रतावपि तथैव संशोधितो दृष्टः। ४-वतीति नि-वि० गु० कां० डे०।

५ "हिमाचलादयो येऽपि देश-कालाद्यभेदिनः। (दृष्टास्तेष्वणवो भिन्नाः) क्षणिकाश्च प्रसाधिताः" ॥
तत्त्वसं० का० ८७५ पृ० २७८।

६ "अशक्यं समय(स्यास्य जातेऽजाते च कल्पनम्।) नाऽजाते समयो युक्तो भाविकोऽश्वविषाणवत्" ॥
तत्त्वसं० का० ८७६ पृ० २७९।

७-वस्तु जा-भां० मां०।

८ "उप(नापि?)जाते गृहीता(नां पूर्वं)वाचामनुस्मृतौ। क्रियते समयस्तत्र चिरातीते (कथं नु तत्)" ॥
तत्त्वसं० का० ८७७ पृ० २७९।

९ "यश्चापि (तत्सजातीयस्तद्व) लेन तदापरः। न तत्र समयाभोगः सादृश्यं च विकल्पितम्" ॥
तत्त्वसं० का० ८७८ पृ० २७९।

१०-मयः भां० मां० विना।

नापि शब्दस्वलक्षणस्य। तथाहि-समयकृत् स्मृत्युपस्थापितमेव नामभेदमर्थेन योजयति, न च स्मृतिर्भावतोऽनुभूतमेवाभिलापमुपस्थापयितुं शक्नोति तस्य चिरनिरुद्धत्वात्, यं चोच्चारयति तस्य पूर्वमननुभूतत्वान्न तत्र स्मृतिः, न चाविषयीकृतस्तया समुत्थापयितुं शक्यः, अतः स्मृत्युपस्थापितमनुसन्धीयमानं विकल्पनिर्म्मितत्वेनास्वलक्षणमेवेति न स्वलक्षणत्वेऽस्य समयः। तस्मादव्यपदेश्यं स्वलक्षणमिति सिद्धम्।

इतश्च स्वलक्षणमव्यपदेश्यम् शब्दबुद्धौ तस्याप्रतिभासनात्। यथा हि उष्णाद्यर्थविषयेन्द्रियबुद्धिः स्फुटप्रतिभासाऽनुभूयते न तथोष्णादिशब्दप्रभवा, न ह्युपहतनयनादयो मातुलिङ्गादिशब्दश्रवणात् तद्रूपाद्यनुभाविनो भवन्ति यथाऽनुपहतनयनादयोऽक्षबुद्ध्याऽनुभवन्तः। यथोक्तम्—

"अन्यथैवाग्निसम्बन्धाद् दाहं दग्धोऽभिमन्यते।
अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते" ॥ [वाक्यप० द्वि० का० श्लो० ४२५] १०

न च यो यत्र न प्रतिभाति स तद्विषयोऽभ्युपगन्तुं युक्तः अतिप्रसङ्गात्। तथा च प्रयोगः-यो यत्कृतप्रत्यये न प्रतिभासते न स तस्यार्थः, यथा रूपशब्दजनिते प्रत्यये रसः, न प्रतिभासते च शाब्दप्रत्यये स्वलक्षणम् इति व्यापकानुपलब्धिः। अत्र चातिप्रसङ्गो बाधकं प्रमाणम्। तथाहि-शब्दस्य तद्विषयज्ञानजनकत्वमेव तद्बाधकत्वमुच्यते नान्यत्, न च यद्विषयं ज्ञानं यदाकारशून्यं तत् तद्विषयं युक्तम् अतिप्रसङ्गात्। न चैकस्य वस्तुनो रूपद्वयमस्ति—स्पष्टमस्पष्टं च येनास्पष्टं वस्तुगतमेव रूपं शब्दैरभिधीयते—एकस्य द्वित्वविरोधात् भिन्नसमयस्थायिनां च परस्परविरुद्धस्वभावप्रतिपादनान्न शब्दगोचरः स्वलक्षणम्।

[पदवाच्यविषयकस्य न्यायसूत्रकारमतस्य भाष्यकार-वार्तिककाराऽभिप्रायेण विशिष्य निरूपणम्]

नैयायिकास्तु "व्यक्त्याकृतिजातयस्तु पदार्थः" [न्यायद० अ० २ आ० २ सू० ६५] इति प्रतिपन्नाः। तत्र व्यक्तिशब्देन द्रव्य-गुणविशेष-कर्म्माण्यभिधीयन्ते। तथा च सूत्रम्—"व्यक्तिर्गुणविशेषाश्रयो मूर्तिः" [न्यायद० अ० २ आ० २ सू० ६६] इति।

अस्यार्थो वार्त्तिककारमतेन-"विशिष्यत इति विशेषः गुणेभ्यो विशेषो गुणविशेषः कर्म्माभिधीयते, द्वितीयश्चात्र गुणविशेषशब्द एकशेषं कृत्वा निर्दिष्टः तेन गुणपदार्थो गृह्यते—गुणाश्च ते विशेषाश्च गुणविशेषाः—विशेषग्रहणमाकृतिनिरासार्थम्। तथाहि-आकृतिः संयोगविशेषस्वभावा, संयोगश्च गुणपदार्थान्तर्गतः ततश्चासति विशेषग्रहणे आकृतेरपि ग्रहणं स्यात्, न च तस्या व्यक्तावन्तर्भाव इष्यते पृथक् स्वशब्देन तस्या उपादानात्। आश्रयशब्देन द्रव्यमभिधीयते-तेषां गुणविशेषाणामाश्रयस्तदाश्रयो द्रव्यमित्यर्थः। सूत्रे 'तत्'शब्दलोपं कृत्वा निर्देशः कृतः, एवं च विग्रहः कर्त्तव्यः-गुणविशेषाश्च गुणविशेषाश्चेति गुणविशेषाः तदाश्रयश्चेति गुणविशेषाश्रयः, समाहारद्वन्द्वश्चायम् "लोकाश्रयत्वात् लिङ्गस्य" [अ० २ पा० २ सू० २९ महाभाष्ये पृ० ४७१ पं० ८] इति नपुंसक-

---

१ यच्चोच्चा-आ० कां०।

२ "(उष्णादिप्रतिपत्तिर्या) नामादिध्वनिभाविनी। विस्पष्टा (भासते नैषा) तदर्थेन्द्रियबुद्धिवत्" ॥
तत्त्वसं० का० ८७९ पृ० २८०।

३-नुभविनो कां०। ४ अनेकान्तज० पृ० ४५ द्वि० पं० ४ अम०। शास्त्रवा० स्त० ११ श्लो० २४। प्रमेयक० पृ० १२९ प्र० पं० ७। स्याद्वादर० पृ० ३४९ प्र० पं० ९।

५ "न स तस्य च शब्दस्य युक्तो योगो न तत्कृते। प्रत्यये सति भात्यर्थो रूपबोधे तथा? रसः" ॥
तत्त्वसं० का० ८८० पृ० २८०।

६-सङ्गात् अथ प्रयो-वि० डे०।-सङ्गात् प्रयो-भां० मां० वा० बा० हा०। ७ "यो यत्कृते प्रत्यये"-प्रमेयक० पृ० १२९ प्र० पं० ६। "यत्कृते ज्ञाने"-स्याद्वादर० पृ० ३४९ प्र० पं० ११। ८ "तद्वाचकत्वमुच्यते"-तत्त्वसं० पञ्जि० पृ० २८० पं० २८। ९ अन्तर्गतः पाठः कां० प्रतावेव। गुणा विशेषाश्चेति गुणविशेषाश्च तदाश्रयश्चेति गुणविशेषाश्रयः भां० मां०। गुणविशेषाश्चेति गुणविशेषाः तदाश्रयश्चेति गुणविशेषाश्रयः वा० बा० आ० हा० वि० गु०। १० "गुणविशेषाश्च गुणविशेषाश्चेति गुणविशेषाः, गुणविशेषाश्च तदाश्रयश्चेति गुणविशेषाश्रयः"-तत्त्वसं० पञ्जि० पृ० २८१ पं० १५। ११ "लिङ्गमशिष्यम्" इति पूर्तिः।

लिङ्गाऽनिर्देशः। तेनायमर्थो भवति-योऽयं गुणविशेषाश्रयः सा व्यक्तिश्चोच्यते मूर्त्तिश्चेति। तत्र यदा द्रव्ये मूर्त्तिशब्दस्तदाऽधिकरणसाधनो द्रष्टव्यः-मूर्च्छन्त्यस्मिन्नवयवा इति मूर्त्तिः, यदा तु रूपादिषु तदा कर्तृसाधनः-मूर्च्छन्ति द्रव्ये समवयन्तीति रूपादयो मूर्त्तिः। व्यक्तिशब्दस्तु द्रव्ये कर्म्मसाधनः रूपादिषु करणसाधनः" [अ० २ आ० २ सू० ६८ न्यायवा० पृ० ३३२ पं० ३-२४]।

५ भाष्यकारमतेन च यथाश्रुति सूत्रार्थः-गुणविशेषाणामाश्रयो द्रव्यमेव व्यक्तिर्मूर्त्तिश्चेति तस्येष्टम्। यथोक्तम्-"गुणविशेषाणां रूप-रस-गन्ध-स्पर्शानाम् गुरुत्व-द्रवत्व-घनत्व-संस्काराणाम् अव्यापिनश्च परिमाणविशेषस्याश्रयो यथासम्भवं तद् द्रव्यं मूर्त्ति (मूर्त्तिः) मूर्च्छितावयवत्वात्" [न्यायद० वात्स्या० भा० पृ० २२४] इति।

आकृतिशब्देन प्राण्यवयवानां पाण्यादीनाम् तदवयवानां चाङ्गुल्यादीनां संयोगोऽभिधीयते। १० तथा च सूत्रम्-"आकृतिर्जातिलिङ्गाख्या" [न्यायद० अ० २ आ० २ सू० ६७] इति।

अस्य भाष्यम्—"यया जातिर्जातिलिङ्गानि च व्याख्यायन्ते तामाकृतिं विद्यात् सा च सत्त्वावयवानाम्। तदवयवानां च नियतो व्यूहः" [न्यायद० वात्स्या० भा० पृ० २२५] व्यूहशब्देन संयोगविशेष उच्यते, नियतग्रहणेन कृत्रिमसंयोगनिरासः, तत्र जातिलिङ्गानि प्राण्यवयवाः शिरः-पाण्यादयः तैर्हि गोत्वादिलक्षणा जातिर्लिङ्ग्यते, आकृत्या तु कदाचित् साक्षाज्जातिर्व्यज्यते यदा शिरः-पा- १५ ण्यादिसन्निवेशदर्शनाद् गोत्वं व्यज्यते, कदाचिज्जातिलिङ्गानि यदा विषाणादिभिरवयवैः पृथक् पृथक् स्वावयवसन्निवेशाभिव्यक्तैर्गोत्वादिर्व्यज्यते; तेन जातेस्तल्लिङ्गानां च प्रख्यापिका भवत्याकृतिः।

जातिशब्देनाभिन्नाभिधान-प्रत्ययप्रसवनिमित्तं सामान्याख्यं वस्तूच्यते। तथा च सूत्रम्—"समानप्रत्ययप्रसवात्मिका जातिः" [न्यायद० अ० २ आ० २ सू० ६८] इति समानप्रत्ययोत्पत्तिकारणं जातिरित्यर्थः।

२० तत्र व्यक्त्याकृत्योः एतेनैव स्वलक्षणस्य शब्दार्थत्वनिराकरणेन शब्दार्थत्वं निराकृतम्। तथाहि-यथा स्वलक्षणस्याकृतसमयत्वादशब्दार्थत्वं तथा तयोरपीति 'अकृतसमयत्वात्' इत्यस्य हेतोर्नासिद्धिः, नाप्यनैकान्तिकता। अपि च, व्यक्तिर्द्रव्य-गुणविशेष-कर्म्मलक्षणा, आकृतिश्च संयोगात्मिका, एते च द्रव्यादयः प्रतिषिद्धत्वाद् असन्तः कथं शब्दार्थतामुपयान्ति ?

[२–४ जाति-तद्योग-तद्वत्सु संकेतासंभवप्रदर्शनम्]

२५ एवं स्वलक्षणवज्जाति-तद्योग-जातिमत्स्वपि—जात्यादेरसम्भवात्—समयासम्भवः। यथा च जातेस्तद्योगस्य च समवायस्यासम्भवस्तथा प्रागेव प्रतिपादितम्, जाति-तद्योगयोश्चाभावे तद्वतोऽप्यसम्भव एव तत्कृतत्वात् तद्व्यपदेशस्य, तद्वतश्च स्वलक्षणात्मकत्वात् तत्पक्षभावी दोषः समान एव।

१–**धना** आ० वि० कां० गु०। २ नेदं वार्तिकं शब्दशो न्यायवार्तिके। ३ "यथा श्रोत्रेऽक्षराणि पतन्ति तथा सूत्रार्थः" वि० टि०। ४ **व्यक्तिर्मूर्ति**-आ० वि० कां०। ५–**वैः पृथक् पृथग् न स्वाव**-भां० मां०। **-वैः पृथग् न स्वाव**–आ० हा० गु०। ६ **प्रख्यायिका** वा० बा०। **प्रत्याख्यातिका** आ० हा० वि० गु०। ७ सूत्रं तु "समानप्रसवात्मिका जातिः" इति दृश्यते न्यायदर्शने, न्यायवार्तिके, तत्त्वसंग्रहपञ्जिकायां च।

८ "एतेनैव प्रकारेण व्यक्त्याकृत्योर्निराकृतिः। स्वलक्षणात्मतैवेष्टा तयोरपि यतः परैः" ॥
तत्त्वसं० का० ८८१ पृ० २८२।

९ "द्रव्यादियोगयोः प्राक् तु प्रतिषेधाभिधानतः। न तात्त्विकी तयोर्युक्ता शब्दार्थत्वव्यवस्थितिः" ॥
तत्त्वसं० का० ८८२ पृ० २८२।

१० "जाति-संबन्धयोः पूर्वं व्यासतः प्रतिषेधनात्। नानन्तराः प्रकल्प्यन्ते शब्दार्थास्त्रिविधाः परे" ॥
"तद् व्यक्त्याकृतिजातीनां पदार्थत्वं यदुच्यते। तदसंभवि सर्वासामपि नीरूपता यतः" ॥
तत्त्वसं० का० ८८३-८८४ पृ० २८२-२८३।

११ पृ० ११० पं० ९ तथा पृ० १०६ पं० १०।

[पदवाच्यविषयाणि वाजप्यायन–व्याडि–पाणिनीनां मतानि]

"जातिः पदार्थः" इति[2] वाजप्यायनः। "द्रव्यम्" इति व्याडिः[3]। "उभयम्" पाणिनिः[4]। तदप्यनेनैव निरस्तम् जातेरयोगाद् द्रव्यस्य च स्वलक्षणात्मकत्वात् तत्पक्षभाविदोषानतिवृत्तेः।

[बुद्ध्याकारे समयासंभवसाधनम्]

बुद्ध्याकारेऽपि[6] न समयः सम्भवति, तस्य बुद्धितादात्म्येन व्यवस्थितत्वाद् नासौ तद्बुद्धिस्वरूपवत् प्रतिपाद्यमर्थं बुद्ध्यन्तरं वाऽनुगच्छति; ततश्च सङ्केत-व्यवहारकालाव्यापकत्वात् स्वलक्षणवत् कथं तत्रापि समयः? भवतु वा तस्य व्यवहारकालान्वयस्तथापि न तत्र समयो व्यवहर्तॄणां युक्तः। तथाहि—'अपि नामेतः शब्दादर्थक्रियार्थी पुमानर्थक्रियाक्षमानर्थान् विज्ञाय प्रवर्त्तिष्यते' इति मन्यमानैर्व्यवहर्तृभिरभिधायका ध्वनयो नियोज्यन्ते न व्यसनितया; न चासौ विकल्पो बुद्ध्याकारोऽभिप्रेतशीताऽपनोदादिकार्यं तदर्थिनः सम्पादयितुमलम् तदनुभवोत्पत्तावपि तदभावात्, तेन तत्रापि समयाभावान्नासिद्धः 'अकृतसमयत्वात्' इति हेतुः।

['अस्त्यर्थादयः शब्दार्थाः' इति वादिनां पक्षसप्तके निरूपयितव्ये प्रथमम् अस्त्यर्थवादिमतम्]

अथ अस्त्यर्थादयोऽपरे शब्दार्थाः सन्ति, ततश्च तत्र समयसम्भवादसिद्धतैव हेतोः। तथाहि-'अस्त्यर्थः' इति यदेतत् प्रतीयते तदेव सर्वशब्दानामभिधेयं न विशेषः, यथैव ह्यपूर्व-देवतादिशब्दा नार्थाकारं विशेषं बुद्धिषु सन्निवेशयन्ति केवलं तत्रैतावत् प्रतीयते-'सन्ति केऽप्यर्थाः येष्वपूर्वादयः

---

१ "आकृत्यभिधानाद्वा एकं विभक्तौ वाजप्यायनः"। "आकृत्यभिधानाद्वा एकं शब्दं विभक्तौ वाजप्यायन आचार्यो न्याय्यं मन्यते। एका आकृतिः, सा चाभिधीयते" इति अ० १ पा० २ सू० ६४ महाभा० पृ० ९० पं० ५। "जातिशब्दार्थवाचिनो वाजप्यायनस्य मते गवादयः शब्दा भिन्नद्रव्यसमवेतजातिमभिदधति"–सर्वदर्शनसं० द० १३ पं० २३७। "तदित्थं वाजप्यायनाचार्यमतेन सार्वत्रिकी जातिपदार्थव्यवस्थोपपद्यते"–वाक्यप० तृ० का० श्लो० २ हेलाराजटी० पृ० ६ पं० २८ जातिस०। २–**ति व्याजध्यायनः** गु० डे० भा० वि०। "वाजा(का?)त्यायनः"–तत्त्वसं० पञ्जि० २८२ पं० २५।

इदं च रूपं 'वाजध्य'प्रकृतेरायनणि प्रत्यये निष्पन्नम्। किन्तु अस्य प्रकृतिः क्वचित् 'वाजव्य' इति, क्वचिच्च 'वाजप्य' इति दृश्यते। तद्यथा–"वाजव्य" चान्द्रव्या० अ० २ पा० ४ सू० ३५, गणर० म० पृ० १५० का० २३६। "वाजप्य" अ० ४ पा० १ सू० ९९ काशिका तथा सिद्धान्तकौ०। "वाजप्यायन" बङ्गीयविश्वकोषे बकारादिवर्गे। "व्याज(वाज)व्यतिकेत्येके" हैमश० अ० ६ पा० १ सू० ५३। चान्द्रे 'वाजव्य' 'व्यतिक' इति प्रकृतिद्वयम्। काशिका–कौमुद्योः 'वाजप्य' 'तिक' इति प्रकृतिद्वयम्। गणरत्नमहोदधौ च का० २३५–२३६ 'तिक' 'वाजव्य' इति प्रकृतिद्वयं दृश्यते। यद्यपि हैमशब्दानुशासने 'व्याज(वाज)' इत्येव मुद्रितमस्ति तथापि तत्र चान्द्रादिपाठानुरोधेन 'वाजव्यायन' इति रूपानुरोधेन च 'वाजव्य' इत्येव प्रकृतिः साध्वी।

अत्र Pro. Dr. E. Windisch इत्यनेन सम्पादितस्य चान्द्रव्याकरणस्य पृ० १६१ गतं द्वितीयं टिप्पनकं द्रष्टव्यम्।

३ "द्रव्याभिधानं व्याडिः" "द्रव्याभिधानं व्याडिराचार्यो न्याय्यं मन्यते द्रव्यमभिधीयते" इति अ० १ पा० २ सू० ६४ महाभा० पृ० ९४ पं० १४। "द्रव्यपदार्थवादिव्याडिनये शब्दस्य व्यक्तिरेवाभिधेयतया प्रतिभासते"–सर्वदर्शनसं० द० १३ पं० २४४। "व्याडिमते तु सर्वशब्दानां द्रव्यमर्थः"–वाक्यप० तृ० का० श्लो० २ हेलाराजटी० पृ० ६ पं० २९ जातिस०।

४ "उभयमित्याह" "कथं ज्ञायते?" "उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा × × × द्रव्यं पदार्थं मत्वा × × ×" अ० १ पा० १ आ० १ जातिव्यक्तिपदार्थनि० महाभा० पृ० ५२ पं० १४। "पाणिन्याचार्यस्योभयं संमतम्"–सर्वदर्शनसं० द० १३ पं० २४६।

५ "बुद्ध्याकारश्च बुद्धिस्थो नार्थबुद्ध्यन्तरानुगः। नाभिप्रेतार्थकारी च सोऽपि वाच्यो न तत्त्वतः" ॥
"येऽन्येऽन्यथैव शब्दार्थमस्त्यर्थादीन् प्रचक्षते। निरस्ता एव तेऽप्येतैस्तथापि पुनरुच्यते" ॥
तत्त्वसं० का० ८८५-८८६ पृ० २८३।

तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० प्र० पं० २। ६–**पि समयः** भां० मां० गु० डे० भा०। ७ **शब्दार्थक्रिया**-गु०। **शब्दार्थः क्रिया**-भां० मां०।

८ "अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्। अपूर्व–देवता–स्वर्गैः सममाहुर्गवादिषु" ॥
तत्त्वसं० का० ८८७ पृ० २८३।
"अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्। अपूर्व–देवता–स्वर्गैः सममाहुर्गवादिषु" ॥
वाक्यप० का० २ श्लो० १२१ पृ० १३२ तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० प्र० पं० ३।

९ **'नार्थाकारविशेषम्'** वि० सं०। "नार्थाकारविशेषम्"–तत्त्वसं० पञ्जि० पृ० २८३ पं० २८।

शब्दाः प्रयुज्यन्ते' तथा दृष्टार्थेष्वपि गवादिशब्देष्वेतत् तुल्यम्, यतस्तेभ्योऽप्येवं प्रतीतिरुपजायते–'अस्ति कोऽप्यर्थो यो गवादिशब्दाभिधेयो गोत्वादिः' यस्तु तत्राकारविशेषपरिग्रहः केषाञ्चिदुपजायते स तेषां सिद्धान्तबलात् न तु शब्दात्।

[२ समुदायार्थवादिमतम्]

अपरे "ब्राह्मणादिशब्दैस्तपो-जाति-श्रुतादिसमुदायो विना विकल्प-समुच्चयाभ्यामभिधीयते, यथा वनादिशब्दैर्धवादयः" इत्याहुः। तथाहि–'वनम्' इत्युक्ते 'धवो (वो वा) खदिरो वा' इति न विकल्पेन प्रतीतिरुपजायते, नापि 'धवश्च खदिरश्च' इति समुच्चयेन; अपि तु सामस्त्येन प्रतीयन्ते धवादयः तथा 'ब्राह्मणः' इत्युक्ते 'तपो वा जातिर्वा श्रुतं वा' 'तपश्च जातिश्च श्रुतं च' इति न प्रतिपत्तिर्भवति; अपि तु साकल्येन सम्बन्ध्यन्तरव्यवच्छिन्नास्तपःप्रभृतयः संहताः प्रतीयन्त इति। बहुष्वनियतैकसमुदायिभेदावधारणं विकल्पः, एकत्र युगपदभिसम्बन्ध्यमानस्य नियतस्यैकस्य (तस्यानेकस्य) स्वरूपभेदावधारणं समुच्चयः, तद्व्यतिरेकेणात्र प्रतिपत्तिर्लोकप्रतीतैव।

[३ असत्यसंबन्धपदार्थवादिमतम्]

अपरे "द्रव्यत्वादिभिरनिर्धारितरूपैर्यः सम्बन्धो द्रव्यादीनां स शब्दार्थः; स च सम्बन्धिनां शब्दार्थत्वेनासत्यत्वादसत्य इत्युच्यते। यद्वा तपः-श्रुतादीनां भेचकवर्णवदैक्येन भासनादेषामेव परस्परमसत्यः संसर्गः"। तथाहि–एते प्रत्येकं समुदिता वा न स्वेन रूपेणोपलभ्यन्ते किन्त्वलातचक्रवदेषां समूहः स्वरूपमुत्क्रम्यावभासत इति।

[४ असत्योपाधिसत्यपदार्थवादिमतम्]

अन्ये त्वाहुः–"यद् असत्योपाधि सत्यं स शब्दार्थः" इति। तत्र स (?) शब्दार्थत्वेनाऽसत्या उपाधयो विशेषा वलयाऽङ्गुलीयकादयो यस्य सत्यस्य सर्वभेदानुयायिनः सुवर्णादिसामान्यात्मनस्तत् सत्यमसत्योपाधि शब्दप्रवृत्तिनिमित्तमभिधेयम्।

[५ अभिजल्पपदार्थवादिमतम्]

अन्ये तु ब्रुवते–"शब्द एवाभिजल्पत्वमागतः शब्दार्थः" इति। स चाभिजल्पः 'शब्द एवार्थः'

---

१ "प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः। न स शब्दस्य विषयः स हि यत्नान्तराश्रयः" ॥
वाक्यप० का० २ श्लो० १२२ पृ० १३३।

२ "समुदायोऽभिधेयो वाऽप्यविकल्प-समुच्चयः"। तत्त्वसं० का० ८८८ पृ० २८४। "समुदायोऽभिधेयः स्याद्-विकल्प-समुच्चयः"। वाक्यप० का० २ श्लो० १२८ पृ० १३५। तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० प्र० पं० ५।

३–**तादिः समु**–आ० कां० डे० भा०। ४ "धवो वा खदिरो वा पलाशो वेति"–तत्त्वसं० पञ्जि० पृ० २८४ पं० १०। शास्त्रवा० स्याद्वादक० पृ० ४०० प्र० पं० ६। ५–**तस्यैव(क)स्य स्व**–वा० बा०।–**तस्यैव स्व**–आ० हा० वि० डे० भा० कां० गु०। "युगपदभिसंबध्यमानस्य नियतस्यानेकस्य स्वरूपभेदावधारणम्"–तत्त्वसं० पञ्जि० पृ० २८४ पं० १५।

६ "असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदुच्यते" ॥ तत्त्वसं० का० ८८८ पृ० २८४। "असत्यो वाऽपि संसर्गः शब्दार्थः कैश्चिदिष्यते"। वाक्यप० का० २ श्लो० १२८ पृ० १३५। तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० प्र० पं० १०।

७–**मुक्तस्याव**–वा० बा०।

८ "असत्योपाधि यत् सत्यं तद् वा शब्दनिबन्धनम्"। तत्त्वसं० का० ८८९ पृ० २८४। "असत्योपाधि यत् सत्यं तद् वा शब्दनिबन्धनम्"। वाक्यप० का० २ श्लो० १२९ पृ० १३६। तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० प्र० पं० १२।

९–**त्यं शब्दा**–भां० मां० विना। १० "तत्र शब्दार्थत्वेनाऽसत्या उपाधयः"–तत्त्वसं० पञ्जि० पृ० २८४ पं० २३।

११ "शब्दो वाऽप्यभिजल्पत्वमागतो याति वाच्यताम्" ॥
"सोऽयमित्यभिसंबन्धाद् रूपमेकीकृतं यदा। शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते" ॥
तत्त्वसं० का० ८८९–८९० पृ० २८४–२८५।
"शब्दो वाऽप्यभिजन्य(ल्प)त्वमागतो याति वाच्यताम्" ॥
"सोऽयमित्यभिसंबन्धाद् रूपमेकीकृतं यदा। शब्दस्यार्थेन तं शब्दमभिजल्पं प्रचक्षते" ॥
"तयोरपृथगर्थत्वे रूढेरन्यभिचारिणि। किंचिदेव क्वचिद् द्रव्यं प्राधान्येनाऽवतिष्ठते" ॥
"लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते। शास्त्रे तूभयरूपत्वं प्रविभक्तं विवक्षया" ॥
वाक्यप० का० २ श्लो० १२९–१३२ पृ० १३६–१३७। तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० प्र० पं० १३।

इत्येवं शब्देऽर्थस्य निवेशनम् 'सोऽयम्' इत्यभिसम्बन्धः, तस्माद् यदा शब्दस्यार्थेन सहैकीकृतं रूपं भवति तं स्वीकृतार्थाकारं शब्दमभिजल्पमित्याहुः।

[६ बुद्ध्यारूढाकारपदार्थवादिमतम्]

अन्ये तु "बुद्ध्यारूढमेवाकारं बाह्यवस्तुविषयं बाह्यवस्तुतया गृहीतं बुद्धिरूपत्वेनाविभावितं शब्दार्थम्" आहुः। तथाहि–यावद् बुद्धिरूपमर्थेष्वप्रत्यस्तं 'बुद्धिरूपमेव' इति तत्त्वभावनया गृह्यते तावत् तस्य शब्दार्थत्वं नावसीयते तत्र क्रियाविशेषसम्बन्धाभावात्, न हि 'गामानय' 'दधि खाद' इत्यादिकाः क्रियास्तादृशि बुद्धिरूपे सम्भवन्ति, क्रियायोगसम्भवी चार्थः शब्दैरभिधीयते, अतो बुद्धिरूपतया गृहीतोऽसौ न शब्दार्थः; यदा तु बाह्ये वस्तुनि प्रत्यस्तो भवति तदा तस्मिन् प्रतिपत्ता बाह्यतया विपर्यस्तः क्रियासाधनसामर्थ्यं तस्य मन्यत इति भवति शब्दार्थः।

ननु चापोहवादिपक्षादस्य को विशेषः? तथाहि—अपोहवादिनाऽपि बुद्ध्याकारो बाह्यरूपतया गृहीतः शब्दार्थ इतीष्यत एव। यथोक्तम्—

"तद्रूपारोपमन्यान्यव्यावृत्त्याधिगतैः पुनः। शब्दार्थोऽर्थः स एवेति वचनेन विरुध्यते" ॥ [ ] इति,

नैतदस्ति; अयं हि बुद्ध्याकारवादी बाह्ये वस्तुन्यभ्रान्तं सविषयं द्रव्यादिषु पारमार्थिकेष्वध्यस्तं बुद्ध्याकारं परमार्थतः शब्दार्थमिच्छति न पुनरा(न तु निरा)लम्बनं भिन्नेष्वभेदाध्यवसायेन प्रवृत्तेर्भ्रान्तमितरेतरभेदनिबन्धनमभ्युपैति; यदा तु यथाऽस्माभिरुच्यते—

"सर्वो (सर्वो) मिथ्यावभासोऽयम्—
मर्थ इतीष्यत एव यथोक्तेष्वेका(मर्थेष्वेका)त्मकग्रहः।
इतरेतरभेदोऽस्य
वीजं संज्ञा यदर्थिका" ॥ [ ] इति तदा सिद्धसाध्यता। यद् वक्ष्यति—
"इतरेतरभेदोऽस्य वीजं चेत् पक्ष एष नः" ॥ [तत्त्वसं० का० ९०५] इति।

न चापोहवादिना परमार्थतः किञ्चिद् वाच्यं बुद्ध्याकारोऽन्यो वा शब्दानामिष्यते। तथाहि–

१–**कारश**–वा० भां०।

२ "यो वाऽर्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः। स बाह्यं वस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते" ॥
तत्त्वसं० का० ८९१ पृ० २८५।
"यो वाऽर्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः। स बाह्यवस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते" ॥
वाक्यप० का० २ श्लो० १३४ पृ० १३७। तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० द्वि० पं० १।

३–**नाविर्भावि**–भां० मां०। "बुद्धिरूपत्वेनाविर्भावितम्"–तत्त्वसं० पञ्जि० पृ० २८५ पं० ७। ४–**त्ययस्तं** भां० मां०। ५–**ति तत्र भा**–भां० मां०।–**ति त्वच्च भा**–हा०। ६–**'धि च खाद'** वि० ब०। ७ **बाह्यवस्तुनि** कां०। ८–**धनासा**–वा० बा०। ९–**स्य स मन्य**–वा० बा०। १० **गृहीतः शब्दार्थो इतीष्य–(र्थोऽभीष्य–)** वा० बा०। **गृहीतशब्दार्थो इतीष्य**–आ० कां० गु०। "अपोहवादिनाऽपि बुद्ध्याकारो बाह्यरूपतया गृहीतः शब्दार्थ इति भाष्यत एव"–तत्त्वसं० पञ्जि० पृ० २८५ पं० २०। "अपोहवादिनापि बुद्ध्याकारो बाह्यरूपतयाऽध्यवसितः शब्दार्थोऽभीष्ट एव"–प्रमेयक० पृ० १२९ द्वि० पं० १।

११ **तद्रूपारोपमस्यान्यव्यावृत्त्यं विगतः पुनः। शब्दार्थोऽर्थः स एवेति वचनेतिरुध्यते** ॥ वा० बा०।
तद्रूपारोपगत्यान्यव्यावृत्त्यधिगतेः पुनः। भां० मां०।
"तद्रूपारोपगत्याऽन्यव्यावृत्त्यधिगतेः पुनः। शब्दार्थोऽर्थः स एवेति वचने न विरुध्यते" ॥
तत्त्वसं० पञ्जि० पृ० २८५ पं० २१।

१२–**वादो वा**–कां० वि०। १३–**न्तं संबन्धविषयं** वा० बा०। १४ "ननु (तु) निरालम्बनं भिन्नेष्वभेदाध्यवसायेन"–तत्त्वसं० पञ्जि० पृ० २८५ पं० २४। १५–**वृत्तेभ्रान्त**–वा० बा०।–**वृत्तेभ्रान्तमितरभेद**–आ० वि०। १६ **यथा तु** भां० मां० विना। **यया तु** हा०। "यदि तु यथाऽस्माभिरुच्यते–
सर्वो मिथ्यावभासोऽयमर्थेष्वेकात्मना ग्रहः। इतरेतरभेदोऽस्य बीजं संज्ञा यदर्थिका" ॥
तत्त्वसं० पञ्जि० पृ० २८५ पं० २५।

१७ अत्र **'सः'** इत्यस्य **'इतीष्यत एव यथोक्ते'** इत्यस्य चार्थानुसारिणः पाठस्य लिपिकारदोषेण प्रवेशाद् इदं तत्त्वसंग्रहपञ्जिकागतपद्यमपि गद्यमिव जातम्। १८ **–रभेदेस्य** भां० मां० हा० वि० गु०। **–रभेद स्य** आ० कां०। १९ शास्त्रवा० स्याद्वादक० पृ० ४०० द्वि० पं० ७। २०–**तराभेदोऽस्य** आ० कां० गु० वा०।

यदेव शाब्दे प्रत्ययेऽध्यवसीयमानतया प्रतिभासते स शब्दार्थः, न च बुद्ध्याकारः शाब्दप्रत्ययेनाध्यवसीयते किं तर्हि? बाह्यमेवार्थक्रियाकारि वस्तु; न चापि तेन बाह्यं परमार्थतोऽध्यवसीयते, यथातत्त्वमनध्यवसायाद् यथाध्यवसायमतत्त्वात् अतः समारोपित एव शब्दार्थः। यच्च समारोपितं तन्न किञ्चिद् भावतोऽभिधीयते शब्दैः। यत् पुनरुक्तम्–'शब्दार्थोऽर्थः स एवेति', तत् समारोपितमेवार्थमभिसन्धाय, बुद्ध्याकारवादिना तु बुद्ध्याकारः परमार्थतो वाच्य इष्यत इति महान् विशेषः।

[७ प्रतिभापदार्थवादिमतम्]

अन्ये त्वाहुः–"अभ्यासात् प्रतिभाहेतुः शब्दः न तु बाह्यार्थप्रत्यायकः" इति। शब्दस्य क्वचिद् विषये पुनः पुनः प्रवृत्तिदर्शनमभ्यासः, नियतसाधनावच्छिन्नक्रियाप्रतिपत्त्यनुकूला प्रज्ञा प्रतिभा सा प्रयोगदर्शनावृत्तिसहितेन शब्देन जन्यते, प्रतिवाक्यं प्रतिपुरुषं च सा भिद्यते; यथैव ह्यङ्कुशादिघातादयो हस्त्यादीनामर्थप्रतिपत्तौ क्रियमाणायां प्रतिभाहेतवो भवन्ति तथा शब्दार्थ-(सर्वेऽर्थ)वत्त्वसंमता वृक्षादयः शब्दा यथाभ्यासं प्रतिभामात्रोपसंहारहेतवो भवन्ति न त्वर्थ

१–द् भवतो हा० वि० गु०।–द् भवता–आ० कां०। २ पृ० १८१ पं० १२। ३–मतिसंधाय गु०।–मभिधाय वा०।

४ "अभ्यासात् प्रतिभाहेतुः सर्वैः शब्दः समासतः। बालानां च तिरश्चां च यथाऽर्थप्रतिपादने" ॥
तत्त्वसं० का० ८९२ पृ० २८६।
तथा, शास्त्रवा० स्याद्वादक० पृ० ४०० द्वि० पं० ३।
"अभ्यासात् प्रतिभाहेतुः शब्दः सर्वोऽपरैः स्मृतः। बालानां च तिरश्चां च यथार्थप्रतिपादने" ॥
"अनागमश्च सोऽभ्यासः समयः कैश्चिदिष्यते। अनन्तरमिदं कार्यमस्मादित्युपदर्शनम्" ॥
"अथ प्रतिभास्वरूपमेव पूर्वोपक्रान्तमनुबध्नन्नाह"—
"विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते। वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम्" ॥
"कीदृशीं ताम्? इत्याह"–
"इदं तदिति साऽन्येषामनाख्येया कथंचन। प्रत्यात्मवृत्तिसिद्धा सा कर्त्राऽपि न निरूप्यते" ॥
"किंस्वभावाऽसौ? इत्याह"–
"उपश्लेषमिवाऽर्थानां सा करोत्यविचारिता। सार्वरूप्यमिवाऽऽपन्ना विषयत्वेन वर्तते" ॥
"तां च न किंचित् प्राणिमात्रमतिवर्तते–अतिक्रम्य तिष्ठति–इत्याह"—
"साक्षाच्छब्देन जनितां भावनानुगमेन वा। इतिकर्तव्यतायां तां न कश्चिदतिवर्तते" ॥
"प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति। समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात्" ॥
"सिद्धैव चेयं सर्वस्य प्रतिभेत्युपपादयितुमाह"–
"यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः। मन्दादिशक्तयो दृष्टाः प्रतिभास्तद्वतां तथा" ॥
"सनिदर्शनमुपपादयितुमाह"–
"स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः। जन्त्वादयः कुलायादिकरणे केन शिक्षिताः"? ॥
"आहार-प्रीत्यभिद्वेष-स्रवनादिक्रियासु कः। जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम्"? ॥
"प्रतिभायाश्च शब्द एव मूलमित्याह"—
"भावनानुगतादेतदागमादेव जायते। आसत्ति–विप्रकर्षाभ्यामागमस्तु विशिष्यते" ॥
"तस्याश्च निमित्तभेदेन षाड्विध्यं दर्शयितुमाह"–
"स्वभाव–चरणाऽभ्यास–योगा-ऽदृष्टोपपादिता। विशिष्टोपहिता चेति प्रतिभां षड्विधां विदुः" ॥ वाक्यप० का० २ श्लो० ११९–१२०–१४५–१५४ पृ० १३१–१३२–१४१–१४३ पुण्यरा० टी०।

५–**वृत्तिसंहि**–वा० बा०।–**वृत्तिसहि**–भां० मां०।

६ "यथैव ह्यङ्कुशाभिघातादयो हस्त्यादीनामर्थप्रतिपत्तौ"–तत्त्वसं० पञ्जि० पृ० २८६ पं० १७। "यथा कशाभिघातमात्रसमनन्तरमेव वाजिनोऽभियान्ति, अङ्कुशाभिघातेन च गजाः"–वाक्यप० का० २ श्लो० १२० पुण्यरा० टी० पृ० १३२। "यथैव ह्यङ्कुशादिघातादयो हस्त्यादीनामर्थप्रतिपत्तौ"–शास्त्रवा० स्याद्वादक० पृ० ४०० द्वि० पं० ३। ७–**भासाहे**–आ० कां० गु०। ८ **शब्दार्थसंबन्धसम्मता** आ० हा० वि० कां०। **शब्दार्थसंबन्धसंगता** भां० मां०। "तथा सर्वेऽर्थवत्संमता वृक्षादयः शब्दाः"–तत्त्वसं० पञ्जि० पृ० २८६ पं० १८।

साक्षात् प्रतिपादयन्ति; अन्यथा हि कथं परस्परव्याहताः प्रवचनभेदा उत्पाद्यकथाप्रबन्धाश्च स्वविकल्पोपरचितपदार्थभेदद्योतकाः स्युरिति?

[प्रागुक्ते पक्षसप्तके प्रतिविधातव्ये प्रथमम् अस्त्यर्थवादिमतनिरसनम्]

अत्र प्रतिविदधति–यद्यस्त्यर्थः पूर्वोदितस्वलक्षणादिस्वभाव इष्यते तदा पूर्वोदितदोषप्रसङ्गः। किञ्च, अनिर्धारितविशेषरूपत्वादस्त्यर्थस्य तस्मिन् केवले शब्दैः प्रतिपाद्यमाने 'गौः' 'गवयः' 'गजः' इत्यादिभेदेन व्यवहारो न स्यात्, तस्य शब्दैरप्रतिपादितत्वात्। न च गोशब्दात् गोत्वविशिष्टस्यार्थस्य सत्तामात्रस्य शाबलेयत्वादिभेदरहितस्य प्रतीतेर्भेदेन व्यवहारो भविष्यतीति प्रतिपादयितुं शक्यम्, अभ्युपगमविरोधात्–गोशब्दादस्त्यर्थमात्रपरित्यागेन गवादिविशेषस्य प्रतिपत्त्यभ्युपगमात्। अथ विषाणादेर्विशेषस्य गोशब्दादप्रतीतेरस्त्यर्थवाचकत्वं शब्दस्याभिप्रेतम्; नन्वेवं यदा गोत्वादिना विशिष्टमर्थमात्रमुच्यत इति मतं तदा तद्वतोऽर्थस्याभिधानमङ्गीकृतं स्यात्, तत्र च जातेस्तत्समवायस्य च निषेधात् तद्वतोऽर्थस्यासम्भव इति पूर्वोक्तो दोषः। किञ्च, तद्वतोऽर्थस्य स्वलक्षणात्मकत्वादशक्यसमयत्वमव्यवहार्यत्वमस्पष्टावभासप्रसङ्गश्च पूर्ववदापद्यत एव; स्वलक्षणादिव्यतिरेकेणान्योऽस्त्यर्थो निरूप्यमाणो न बुद्धौ प्रतिभातीत्यस्यासत्त्वमेव।

[२ समुदायपदार्थवादिमतनिरसनम्]

समुदायाभिधानपक्षे तु जातेर्भेदानां च तपःप्रभृतीनामभिधानमङ्गीकृतमिति प्रत्येकाभिधानपक्षभाविनो दोषाः सर्वे युगपत् प्राप्नुवन्तीति न तत्पक्षाभ्युपगमोऽपि श्रेयान्।

[३–४ असत्यसंबन्ध–असत्योपाधिसत्यपदार्थवादिमतद्वयनिरसनम्]

'असत्यसंबन्ध'–'असत्योपाधिसत्य' इति पक्षद्वये च संयोग-समवायलक्षणस्य सम्बन्धस्य निषिद्धत्वात् सामान्यस्य च त्रिगुणात्मकस्य सत्यस्याव्यतिरिक्तस्य, व्यतिरिक्तस्याप्यसम्भवात् नासत्यः संयोगः। नाप्यसत्योपाधि सामान्यं शब्दवाच्यं सम्भवति।

१–**कथं प्र**–गु०। २–**बन्धाश्च विक**–भां० मां० वा० बा० विना। ३ पृ० १७९ पं० १३।
"तत्राऽस्त्यर्थोऽभिधेयोऽयं किं स्वलक्षणमिष्यते। जातिर्योगोऽथ यद्वाऽन्य (त्)? बुद्धेर्वा प्रतिबिम्बकम्" ॥
"एते स्व(स)दोषाः पूर्वोक्ता अस्त्यर्थे केवलेऽपि च। प्रतिपाद्ये न भेदेन व्यवहारोऽवकल्पते" ॥
तत्त्वसं० का० ८९३–८९४ पृ० २८६।
४ पृ० १७४ पं० २३। ५ पृ० १७४ पं० २५। ६ **केवलशब्दैः** वि० विना०। ७ **शब्दैरपि प्र**–गु०।
८ "गोत्वशब्दविशिष्टार्थसत्तामात्रगतेर्भवेत्। विषाणाकृतिनीलादिभेदाख्यातेस्तु तन्मतम्" ॥
तत्त्वसं० का० ८९५ पृ० २८७।
९ **प्रतीतिर**–भां० मां० विना।
१० "नन्वेवं तद्वतोऽर्थस्य भेदानां चाभिधा भवेत्। तद्भावे तत्र दोषश्च नान्योऽस्त्यर्थश्च दृश्यते" ॥
तत्त्वसं० का० ८९६ पृ० २८७।
११–**द्यमर्थमात्रमुष्यते** वा० बा०।–**द्यधर्ममात्रमिष्यते** –कां० आ०।–**'द्यधर्मिमात्रमिष्यते'** वि० सं०।
१२–**द्वतोऽर्थस्य स्वलक्षणात्मकत्वादस्याभिधान**–वि०। १३–**तत्त्वं च** आ० हा० वि० गु०। १४ पृ० १७८ पं० २७। १५–**दशब्दस**–वा० बा०। १६ पृ० १७६ पं० ११–पृ० १७७ पं० ६। १७ पृ० १८० पं० ५।
"समुदायाभिधानेऽपि जातिभेदाभिधा स्फुटा। तपोजातिक्रियादीनां सामस्त्येनाभिधानतः" ॥
तत्त्वसं० का० ८९७ पृ० २८७।
१८ पृ० १८० पं० १३।
"निर्धारितस्वरूपाणां द्रव्यादीनां तु योगतः। संबन्धो यश्च सामान्यं सत्यं तद् वारितं पुरा" ॥
तत्त्वसं० का० ८९८ पृ० २८७।
१९ पृ० १८० पं० १८।
"भेदजात्यादिरूपेण शब्दार्थानुपपत्तितः। अर्थेनैकीकृतं रूपं न शब्दस्योपपद्यते ॥
तत्त्वसं० का० ८९९ पृ० २८७।
२० सांख्यसंमतस्य। २१ न्यायसंमतस्य।

[५-६ अभिजल्प–बुद्ध्यारूढाकारपदार्थवादिमतद्वयनिरसनम्]

अभिजल्पपक्षेऽपि यदि शब्दस्य कश्चिदर्थः सम्भवेत् तदा तेन सहैकीकरणं भवेदपि, स्वलक्षणादिस्वरूपस्य च शब्दार्थत्वासम्भवः प्राक् प्रदर्शित इति कथं तेनैकीकरणम्? अपि चायमभिजल्पो बुद्धिस्थ एव। तथाहि–बाह्यार्थयोः (बाह्ययोः) शब्दार्थयोर्भिन्नेन्द्रियग्राह्यत्वादिभ्यो भेदस्य सिद्धेस्तयोरेकयापादनं परमार्थतोऽयुक्तमेवेति बुद्धिस्थयोरेव शब्दार्थयोरेकबुद्धिगतत्वादेकीकरणं युक्तम्। तथाहि–उपगृहीताभिधेयाकारतिरोभूतशब्दस्वभावो बुद्धौ विपरिवर्त्तमानः शब्दात्मा स्वरूपानुगतमर्थमविभागेनान्तः सन्निवेशयन्नभिजल्प उच्यते; स च बुद्धेरात्मगत एवाकारो युक्तो न बाह्यः, तस्यैकान्तेन परस्परं विविक्तस्वभावत्वात्; ततश्च बुद्धिशब्दार्थपक्षादनन्तरोक्तादस्य न कश्चिद् भेदः, उभयत्रापि बौद्ध एवार्थः। एतावन्मात्रं तु भिद्यते–'शब्दार्थावेकीकृतौ' इति। दोषस्तु समान एव–

"ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत्"? [ ] इति।

[७ प्रतिभापदार्थवादिमतनिरसनम्]

प्रतिभापक्षे तु यदि सा परमार्थतो बाह्यार्थविषया तदैकत्र वस्तुनि शब्दादौ विरुद्धसमयावस्थायिनां विचित्राः प्रतिभा न प्राप्नुवन्ति, एकस्यानेकस्वभावासम्भवात्। अथ निर्विषया तदार्थे प्रवृत्ति-प्रतिपत्ती न प्राप्नुतः, अतद्विषयत्वाच्छब्दस्य। अथ स्वप्रतिभासो(से)ऽनर्थेऽर्थाध्यवसायेन भ्रान्त्या ते प्रवृत्ति-प्रतिपत्ती भवतस्तदा भ्रान्तः शब्दार्थः प्राप्नोति, तस्याश्च बीजं वक्तव्यम्; अन्यथा सा सर्वत्र सर्वदा भवेत्। यदि पुनर्भावानां परस्परतो भेद एव बीजमस्यास्तदाऽसत्पक्ष एव समर्थितः स्यादिति सिद्धसाध्यता। किञ्च, सर्वमेतत् स्वलक्षणादिकं शब्दविषयत्वेनाभ्युपगम्यमानं क्षणिकम् अक्षणिकं वेति? आद्यपक्षे सङ्केतकालदृष्टस्य व्यवहारकालानन्वयान्न तत्र समयः सप्रयोजनः। अक्षणिकपक्षे च

"नाक्रमात् क्रमिणो भावः" [ ]

इति शब्दार्थविषयस्य क्रमिज्ञानस्याभावप्रसक्तिः।

---

१ पृ० १८० पं० २२।

"जल्पो बुद्धिस्थ एवायं बाह्ययोगविभेदतः। ततः को भेद एतस्य वृत्ति(बुद्धि) पक्षादनन्तरात्"? ॥

"बुद्ध्याकारोऽपि शब्दार्थः प्रागेव विनिवारितः। ज्ञानादव्यतिरिक्तस्य व्यापकत्ववियोगतः" ॥

तत्त्वसं० का० ९००–९०१ पृ० २८८।

२ "सहैकीकरणं भवेत् यावता स्वलक्षणादिरूपस्य शब्दार्थत्वाऽसंभवः पूर्वं प्रतिपादितः"–तत्त्वसं० पञ्जि० पृ० २८८ पं० ९।

३ **भवेदयमपि** आ० हा० वि०। ४ पृ० १७५ पं० ५–पृ० १७९ पं० ११। ५ "तथाहि–बाह्ययोः शब्दार्थयोः"–तत्त्वसं० पञ्जि० पृ० २८८ पं० ११। ६ **तथा गृहीता**–आ० वि०। ७ **स्वभाववुद्धौ** आ० हा० वि०। ८ पृ० १८१ पं० ४।

९ "व्यक्तयो नानुयान्त्यन्यदनुयायि न भासते। ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत्"? ॥

तत्त्वसं० पञ्जि० पृ० २८९ पं० २२।

१० पृ० १८२ पं० ८।

"प्रतिभाऽपि च शब्दार्थो बाह्यार्थविषया यदि। एकात्मनियते बाह्ये विचित्राः प्रतिभाः कथम्"? ॥

"अथ निर्विषया एता वासनामात्रभावतः। प्रतिपत्तिः प्रवृत्तिर्वा बाह्यार्थेषु कथं भवेत्"? ॥

"बाह्यरूपाधिमोक्षेण स्वाकारे यदि ते मते। शब्दार्थोऽतात्त्विकः प्राप्तस्तथाभ्रान्त्या प्रवर्तनात्" ॥

"निर्बीजा न च सा युक्ता सर्वत्रैव प्रसङ्गतः। इतरेतरभेदोऽस्य बीजं चेत् पक्ष एष नः" ॥

तत्त्वसं० का० ९०२–९०५ पृ० २८८।

११ **स्वविषयप्रतिभासोऽनर्थेऽर्थाध्यवसा**–वि० गु० भा०। –**'स्वविषयप्रतिभासेऽनर्थेऽर्थव्यवसायेन'** वि० सं०। "स्वप्रतिभासेऽनर्थेऽर्थाध्यवसायेन"–तत्त्वसं० पञ्जि० पृ० २८९ पं० ४। "यदि च निर्विषया कथं तर्हि तदर्थे प्रवृत्ति–प्रतिपत्ती? अनर्थेऽर्थाध्यवसायेन भ्रान्त्या चेत्"–शास्त्रवा० स्याद्वादक० पृ० ४०० द्वि० पं० ६।

१२ "यदि वा सर्वमेवेदं क्षणिकं स्यान्न वा तथा। क्षणिकत्वेऽन्वयायोगः क्रमिज्ञानं च नान्यथा" ॥

तत्त्वसं० का० ९०६ पृ० २८९।

१३ **आद्ये पक्षे** भां० मां०। १४–**नन्वये न त**–आ० वि० गु०। १५ उक्तिरेषा तत्त्वसं० पञ्जि० पृ० २८९ पं० १४। १६–**स्य व्यवहारक्रमि**–वि०।–**स्य व्यवहारः क्रमि**–गु०।

[विवक्षापदार्थवादिमतमुल्लिख्य तन्निरसनम्]

अन्ये त्वाहुः–"अर्थविवक्षां शब्दोऽनुमापयति" इति। यथोक्तम्–

"अनुमानं विवक्षायाः शब्दादन्यन्न विद्यते" [ ] इति।

अत्रापि यदि परमार्थतो विवक्षा पारमार्थिकशब्दार्थविषयेष्यते तदसिद्धम्, स्वलक्षणादेः शब्दार्थस्य कस्यचिदसम्भवात्; अतो न क्वचिदर्थे परमार्थे विवक्षाऽस्ति, अन्वयिनोऽर्थस्याभावात्। नापि तत्प्रतिपादकः शब्दः सम्भवति। यदाहुः–

"क्व वा श्रुतिः" [तत्त्वसं० का० ९०७] इति।

न च विवक्षायां प्रतिपाद्यायां शब्दाद् बहिरर्थे प्रवृत्तिः प्राप्नोति, तस्याप्रेरितत्वात् अर्थान्तरवत्। नं च विवक्षापरिवर्तिनो बाह्यस्य च सारूप्यादप्रेरितेऽपि तत्र ततः प्रवृत्तिर्यमलकवत्, सर्वदा बाह्ये प्रवृत्तेरयोगात् कदाचिद् विवक्षापरिवर्तिन्यपि प्रेरिते प्रवृत्तिप्रसक्तेर्यमलकयोरिव। अथ परमार्थतः स्वप्रतिभासानुभवेऽपि वकुरेवमध्यवसायो भवति 'मयाऽसौ बाह्य एवार्थः प्रतिपाद्यते' श्रोतुरप्येवमध्यवसायः 'ममायं बाह्यमेव प्रतिपादयति' इति; अतस्तैमिरिकद्वयद्विचन्द्रदर्शनवदयं शाब्दो व्यवहार इति। यद्येवमसत्पक्ष एव समाश्रित इति कथं न सिद्धसाध्यता? शब्दस्तु लिङ्गभूतो विवक्षामनुमापयतीत्यभ्युपगम्यत एव यथा धूमोऽग्निम्।

[वैभाषिकमतं निर्दिश्य तन्निरसनम्]

एतेन वैभाषिकोऽपि शब्दविषयं नामाख्यमर्थचिह्नरूपं विप्रयुक्तं संस्कारमिच्छन्निरस्तः। तथाहि—तन्नामादि यदि क्षणिकं तदाऽन्वययोगः। अक्षणिकत्वे क्रमिज्ञानानुपपत्तिः, बाह्ये च प्रवृत्त्यभावः; सारूप्यात् प्रवृत्तौ न सर्वदा बाह्य एव प्रवृत्तिः।

"अशक्यसमयो ह्यात्मा नामादीनामनन्यभाक्। तेषामतो न चान्यत्वं कथञ्चिदुपपद्यते"॥ [ ]

इत्यादेः सर्वस्य समानत्वात्। तदेवम् 'अशक्यसमयत्वात्' इत्यस्य हेतोर्नासिद्धता। नाप्यनैकान्तिकत्व-विरुद्धत्वे। तत् सिद्धम् अपोहकृच्छब्द इति।

['निषेधमात्रमेव अन्यापोहः' इति मत्वा कौमारिलकृतानामाक्षेपाणामुपन्यासः]

अत्र परो निषेधमात्रमेव किलान्यापोहोऽभिप्रेत इति मन्यमानः प्रतिज्ञायाः प्रतीत्यादिविरोधमुद्भावयन्नाह–

"नन्वन्यापोहकृच्छब्दो युष्मत्पक्षे तु वर्णितः।
निषेधमात्रं नैवेह प्रतिभासेव (सेऽव) गम्यते" ॥ [तत्त्वसं० का० ९१०]

---

१ तत्त्वसं० पञ्जि० पृ० २८९ पं० १७। शास्त्रवा० स्याद्वादक० पृ० ४०० द्वि० पं० ७। २ तत्त्वसं० पञ्जि० पृ० २८९ पं० १७। शास्त्रवा० स्याद्वादक० पृ० ४०० द्वि० पं० ८। ३–**दन्यत्र वि**–हा० वि० विना।

४ "एतेनैव विवक्षाऽपि शब्दगम्या निराकृता। शब्दार्थासंभवे हीत्थं क्व विवक्षा क्व वा श्रुतिः" ॥

तत्त्वसं० का० ९०७ पृ० २८९।

५ **परमार्थवि**-वि० विना। ६–**ह–कदा श्रु**–बा०।

७ "(सारूप्याच्च) श्रुतेर्वृत्तिः कथं वा(ऽशब्द) चोदिते। सारूप्या(द्यमलकव)न्नामाद्येतेन दूषितम्" ॥

तत्त्वसं० का० ९०८ पृ० २८९।

८ "विवक्षानु(मितिश्लिष्टमाकारं बाह्यभावतः। व्यवस्यतोः प्रवृत्ति)श्चेत् तदेवाऽसन्मतं पुनः" ॥

तत्त्वसं० का० ९०९ पृ० २९०।

९–**नुभावे**–बा० हा० वि०। १०–**नुत्पत्तिः** भां० मां० विना। ११ तत्त्वसं० पञ्जि० पृ० २९० पं० ८। १२–**षामतो न वाक्यत्वम्** भां० मां०।–**षामतो नाव्यत्वम्** वा० बा०। "तथा मतो न वाच्यत्वम्"–तत्त्वसं० पञ्जि० पृ० २९० पं० ८। १३–**कत्वावि**–भां० वा० बा०। १४ प्रमेयक० पृ० १२५ द्वि० पं० ४-७। '"ननु ज्ञानफलाः शब्दाः" इत्यादि कुमारिलवचनम्' इति निर्दिष्टं सम्मतिटीकाकारेणाऽस्य निरसनावसरे। "एतेन यदुक्तं कुमारिलेन" इत्युल्लिख्य श्लोकपञ्चकमेतन्निरदेशि श्रीयशोविजयैः शास्त्रवा० स्याद्वादक० पृ० ४०२ प्र० पं० ५–१०। १५ "युष्माभिः कथमुच्यते"–तत्त्वसं० का० ९१० पृ० २९०। १६–**भासे व**–भां० मां०।–**भासैव**–वा०।–"भासेऽवगम्यते"–तत्त्वसं० का० ९१०। प्रमेयक० पृ० १२५ द्वि० पं० ५।

"किन्तु गौर्गवयो हस्ती वृक्ष इत्यादिशब्दतः।
विधिरूपावसायेन मतिः शाब्दी प्रवर्त्तते" ॥ [तत्त्वसं० का० ९११]
"यदि गौरित्ययं शब्दः समर्थोऽन्यनिवर्तने।
जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनिः" ॥ [भामहालं० परि० ६ श्लो० १७]
"ननु ज्ञानफलाः शब्दा न चैकस्य फलद्वयम्।
अपवाद-विधिज्ञानं फलमेकस्य वः कथम्" ? ॥ [भामहालं० परि० ६ श्लो० १८]
"प्रागगौरिति विज्ञानं गोशब्दश्राविणो भवेत्।
येनागोः प्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः" ॥ [भामहालं० परि० ६ श्लो० १९]

यदि गोशब्दोऽन्यव्यवच्छेदप्रतिपादनपरस्तदा तस्य तत्रैव चरितार्थत्वात् सास्नादिमति पदार्थे गोशब्दात् प्रतीतिर्न प्राप्नोति, ततश्च सास्नादिमत्पदार्थविषयाया गोबुद्धेर्जनकोऽन्यो ध्वनिरन्वेषणीयः। अथैकेनैव गोशब्देन बुद्धिद्वयस्य जन्यमानत्वान्नापरो ध्वनिर्मृग्यः, नैकस्य विधिकारिणः प्रतिषेधकारिणो वा शब्दस्य युगपद्विज्ञानद्वयलक्षणं फलमुपलभ्यते, नापि परस्परविरुद्धमपवाद-विधिज्ञानं फलं युक्तम्; यदि च गोशब्देनागोनिवृत्तिर्मुख्यतः प्रतिपाद्यते तदा गोशब्दश्रवणानन्तरं प्रथमं 'अगौः' इत्येषा श्रोतुः प्रतिपत्तिर्भवेत्। यत्रैव ह्यव्यवधानेन शब्दात् प्रत्यय उपजायते स एव शाब्दोऽर्थः; न चाव्यवधानेनागोव्यवच्छेदे मतिः, अतो गोबुद्ध्यनुत्पत्तिप्रसङ्गात् प्रथमतरमगोप्रतीति-प्रसङ्गाच्च नापोहः शब्दार्थः।

अपि च, अपोहलक्षणं सामान्यं वाच्यत्वेनाभिधीयमानं कदाचित् पर्युदासलक्षणं वाऽभिधीयेत, प्रसज्यलक्षणं वा? तत्र प्रथमपक्षे सिद्धसाध्यता प्रतिज्ञादोषः, अस्माभिरपि गोत्वाख्यं सामान्यं गोशब्दवाच्यमित्यभ्युपगम्यमानत्वात्-यदेव ह्यगोनिवृत्तिलक्षणं सामान्यं गोशब्देनोच्यते भवता तदेवाऽस्माभिर्भावलक्षणं सामान्यं तद्वाच्यमभिधीयते, अभावस्य भावान्तरात्मकत्वेन स्थितत्वात्। तदुक्तम्—

"क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते" [श्लो० वा० अभा० परि० श्लो० २]
"नास्ति वा (स्तिता) पयसो दध्नि प्रध्वंसाभावलक्षणम्।
गवि योऽश्वाद्यभावश्च सोऽन्योन्याभाव उच्यते" ॥
"शिरसोऽवयवा निम्ना वृद्धि-काठिन्यवर्जिताः।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते" ॥ [श्लो० वा० अभा० परि० श्लो० ३-४]
"न चावस्तुन एते स्युर्भेदास्तेनाऽस्य वस्तुनि (वस्तुता)"। [श्लो० वा० अभा० परि० श्लो० ८]

एतेन क्षीरादय एव दध्यादिरूपेण अविद्यमानाः प्रागभावादिव्यपदेशभाज इत्युक्तं भवति।

---

१ "वृक्षश्चे(त्या)दिशब्दतः"–तत्त्वसं० का० ९११। २ " 'यदि गौः' इत्यादिना श्लोकत्रयेण भामहस्य मतेन प्रतीत्यादिबाधामुद्भावयति"–तत्त्वसं० पञ्जि० पृ० २९१ पं० ८। "यदि गौ(रिति शब्दोऽयं भवेद)न्यनिराकृतौ"–तत्त्वसं० का० ९१२। "यदि गौरित्ययं शब्दः कृतार्थोऽन्यनिराकृतौ"–भामहालं० परि० ६ श्लो० १७। ३ "गोबुद्धेर्दृश्यतामपरो ध्वनिः"–तत्त्वसं० का० ९१२। ४ "न तु ज्ञानफलाः (शब्दा न चैकस्य फलद्व)यम्"–तत्त्वसं० का० ९१३। "अर्थज्ञानफलाः शब्दाः"–भामहालं० परि० ६ श्लो० १८। ५-**विधिर्ज्ञान**–भां० मां०। "विधिज्ञाने फले चैकस्य"–भामहालं० परि० ६ श्लो० १८। "विधि(ज्ञानं फलमेकस्य वा कथम्)"–तत्त्वसं० का० ९१३। ६-**शब्दश्रावणो** वि०।-**शब्द-श्रवणाद्** आ० कां०। "पुरा(ऽ)गौरिति विज्ञानं गोशब्दश्रवणाद् भवेत्"–भामहालं० परि० ६ श्लो० १९। तत्त्वसं० का० ९१४। ७-**नागौप्रति**–आ० कां०। "येनागोप्रतिषेधाय"–भामहालं० परि० ६ श्लो० १९। ८-**व शब्दोर्थः** भां० मां० विना।

९ "अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम्। गोत्वं वस्त्वेव तैरुक्तमगोऽपोहगिरा स्फुटम्" ॥
श्लो० वा० अपो० श्लो० १। तत्त्वसं० का० ९१५ पृ० २९२।

१० "भावान्तरमभावो हि पुरस्तात् प्रतिपादितः"। श्लो० वा० अपो० श्लो० २। तत्त्वसं० का० ९१६ पृ० २९२।

११ तत्त्वसं० का० १६५१-१६५२-१६५३-१६५५ पृ० ४७१-४७२। तत्त्वसं० पञ्जि० पृ० २९२ पं० १४-१७।

१२ "नास्तिता"–श्लो० वा० पृ० ४७३ पं० ७। तत्त्वसं० का० १६५१ पृ० ४७१।

अगोनिवृत्तिश्चान्योन्याभावः तस्या अश्वादिव्यवच्छेदरूपत्वात्, तस्मात् सा वस्तु। तत्रैवमभावस्य भावान्तरात्मकत्वे कोऽयं भवद्भिरश्वादिनिवृत्तिस्वभावोऽभावोऽभिप्रेत इति।

अथ गवादिस्वलक्षणात्मैवासौ, न; तत्र सर्वविकल्पप्रत्ययास्वमयात् (प्रत्यस्तमयात्) विकल्पज्ञानगोचरः सामान्यमेवेष्यते, असाधारणस्त्वर्थः सर्वविकल्पानामगोचरः। यथोक्तम्—

"स्वसंवेद्यमनिर्देश्यं रूपमिन्द्रियगोचरः" । [ ] इति। ५

यथैव हि भवतामसाधारणो विशेषोऽश्वादिनिवृत्त्यात्मा गोशब्दाभिधेयो नेष्टस्तथैव शाबलेयादिः शब्दवाच्यतया नेष्टः, असामान्यप्रसङ्गतः। यदि हि गोशब्दः शाबलेयादिवाचकः स्यात् तदा तस्यानन्वयान्न सामान्यविषयः स्यात्; यतश्चाश्वादिनिवृत्त्यात्मा भावोऽसाधारणो न घटते तस्मात् सर्वेषु सजातीयेषु शाबलेयादिपिण्डेषु यत् प्रत्येकं परिसमाप्तं तन्निबन्धना गोबुद्धिः, तच्च गोत्वाख्यमेव सामान्यम् तस्मागोऽपोहशब्देनाभिधानात् केवलं नामान्तरमिति सिद्धसाध्यता १० प्रतिज्ञादोषः।

तथाऽऽह कुमारिलः—

"अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम्।
गोत्वं वस्त्वेव तैरुक्तमगोपोहगिरा स्फुटम्" ॥ [श्लो० वा० अपो० श्लो० १]
"भावान्तरात्मकोऽभावो येन सर्वो व्यवस्थितः। १५
तत्राश्वादिनिवृत्त्यात्माऽभावः क इति कथ्यताम्?" ॥ [श्लो० वा० अपो० श्लो० २]
"नेष्टोऽसाधारणस्तावद् विशेषो निर्विकल्पनात्।
तथा च शाबलेयादिरसामान्यप्रसङ्गतः" ॥ [श्लो० वा० अपो० श्लो० ३]
"तस्मात् सर्वेषु यद्रूपं प्रत्येकं परिनिष्ठितम्।
गोबुद्धिस्तन्निमित्ता स्याद् गोत्वादन्यच्च नास्ति तत्" ॥ [श्लो० वा० अपो० श्लो० १०] २०

अथ प्रसज्यलक्षणमिति पक्षस्तदा पुनरप्यगोऽपोहलक्षणाभावस्वरूपा शून्यता गोशब्दवाच्या प्रसक्ता वस्तुस्वरूपापह्नवात्, तत्र च शाब्दबुद्धीनां स्वांशग्रहणं प्रसक्तम् बाह्यवस्तुरूपाग्रहात्; तत-

---

१ **स व**-आ० हा० वि०। २ **स्वभावोऽभि**-आ० वि०।

३ "तत्राऽश्वादिनिवृत्त्यात्मा भावः क इति कथ्यताम्"॥
श्लो० वा० अपो० श्लो० २। तत्त्वसं० का० ९१६ पृ० २९२।

४-**त्ययासमयात्** कां०।-**त्ययमयात्** वा० बा०। "तत्र सर्वविकल्पप्रत्यस्तमयात् विकल्पज्ञानगोचरः"–तत्त्वसं० पञ्जि० पृ० २९२ पं० २८।

५ तत्त्वसं० पञ्जि० पृ० २९३ पं० २।

६ "नेष्टोऽसाधारणस्तावद् विषयो निर्विकल्पनात्। तथा च शाबलेयादेरसामान्यप्रसङ्गतः" ॥ श्लो० वा० अपो० श्लो० ३।
"(नेष्टोऽसाधारणात्मा वो)विशेषो निर्विकल्पनात्। तथा च शाबलेयादिरसामान्यप्रसङ्गतः"॥ तत्त्वसं०का०९१७पृ०२९२।

७-**वृत्तात्मा** भां० मां०। ८ "शाबलेयादिशब्दवाच्यतया"–तत्त्वसं० पञ्जि० पृ० २९३ पं० ६।

९ "तस्मात् सर्वेषु यद्रूपं प्रत्येकं परिनिष्ठितम्। गोबुद्धिस्तन्निमित्ता स्याद् गोत्वादन्यच्च नास्ति तत्" ॥
श्लो० वा० अपो० श्लो० १०। तत्त्वसं० का० ९१८ पृ० २९२।

१० **तस्य गो**-आ० वि० कां०। ११ **गोत्वव**–भां० मां०। १२ तत्त्वसं० का० ९१५ पृ० २९२। १३ "भावान्तरमभावो हि"–श्लो० वा० अपो० श्लो० २। १४ तत्त्वसं० का० ९१६ पृ० २९२। १५ "(नेष्टोऽसाधारणात्मा वो) वि"–तत्त्वसं० का० ९१७ पृ० २९२। १६-"स्तावद् विषयो निर्वि"–श्लो० वा० पृ० ५६६ पं० ७। १७ "शाबलेयादेर"–श्लो० वा० पृ० ५६६ पं० ८। १८ तत्त्वसं० का० ९१७ पृ० २९२। १९ तत्त्वसं० का० ९१८ पृ० २९२। २०-**च्याऽथ प्र**-भां० मां०। २१-**स्तुरूपा**-भां० मां० वा० बा०।

"निषेधमात्ररूपश्च शब्दार्थौ (**र्थो**) यदि कल्प्यते। अभावशब्द (वाच्या स्याच्छून्यताऽन्यप्रकारिका)" ॥
तत्त्वसं० का० ९१९ पृ० २९३।

"अपोहशब्दवाच्याऽथ शून्यताऽन्यप्रकारिका" ॥ श्लो० वा० अपो० श्लो० ३६। २२ **च शब्दे बु**–आ० कां० गु०। **च शब्दबु**–वि०।

"तस्यां चाश्वादिबुद्धीनामात्मांशग्रहणं भवेत्। तत्रान्यापोहवाच्यत्वं मुधैवाऽभ्युपगम्यते" ॥
"सामान्यं वस्तुरूपं हि बुद्ध्याकारो भविष्यति। शब्दार्थोऽर्थानपेक्षो हि वृथाऽपोहः प्रकल्पितः" ॥
श्लो० वा० अपो० श्लो० ३७-३८। तत्त्वसं० का० ९२०-९२१ पृ० २९३।

श्चापोहस्य वाच्यत्वं मुधैवाभ्युपगतं परेण [1]बुद्ध्याकारस्याम(न)पेक्षितबाह्यार्थालम्बनस्य विधिरूपस्यैव शब्दार्थत्वापत्तेः। इत्यभ्युपगमबाधा प्रतिज्ञायाः परस्य।

अथ [2]बुद्ध्याकारालम्बनाऽपि सा [3]बुद्धिर्विजातीयाऽगवा(यगवा)दिबुद्धिभ्यो व्यावृत्तरूपा प्रवर्तते तेनापोहकल्पना युक्तैव, असदेतत्; [4]यतो यद्यपि बुद्धिर्बुद्ध्यन्तराद् व्यवच्छिन्ना तथापि सा
५ न बुद्ध्यन्तरव्यवच्छेदावसायिनी जायते, किं तर्हि? अश्वादिष्वर्थेषु विधिरूपाऽध्यवसायिनी; तेन वस्त्वेव विधिरूपं वाच्यं कल्पयितुं युक्तिमत् नापोहः, बुद्ध्यन्तरस्य बुद्ध्यन्तरानपोहकत्वात्। किञ्च, योऽयं भवद्भिरपोहः पदार्थत्वेन कल्पितः स वाक्यादपोह्य[5]मुत्य कल्पितस्य पदस्यार्थः इष्टः—वाक्यार्थस्तु प्रतिभा[6]लक्षण एव। यथोक्तम्-

"[7]अपोद्धारपदस्यायं वाक्यादर्थो विवेचितः।
१० वाक्यार्थः प्रतिभाख्योऽयं तेनादावुपजन्यते" ॥ [ ] इति,

—स चायुक्तः; शब्दार्थस्य विधिरूपताप्रसक्तेः, [8]तथापि वाह्येऽर्थे शब्दवाच्यत्वेनासत्यपि वाक्यार्थो भवद्भिः प्रतिभालक्षण एव वर्ण्यते नापोहस्तदा पदार्थोऽपि वाक्यार्थवत् प्रतिभालक्षण एव प्रसक्त इति द्वयोरपि पद-वाक्यार्थयोर्विधिरूपत्वम्। अथ प्रतिभायाः प्रतिभान्तराद् विजातीयाद् व्यवच्छेदोऽस्तीत्यपोहरूपता, न सम्यगेतत्; [9]यतो यद्यपि बुद्धेर्बुद्ध्यन्तराद् व्यावृत्तिरस्ति तथापि[10] न च
१५ तत्र शब्दव्यापारः। तथाहि-शब्दादसावुत्पद्यमाना न स्वरूपोत्पादव्यतिरेकेणान्यं बुद्ध्यन्तरव्यवच्छेदलक्षणं शब्दादवसीयमानमंशं बिभ्राणा [11]लक्ष्यते किं तर्हि? विधिरूपावसायिन्येवोत्पत्तिमती। न च शब्दादनवसीयमानो वस्त्वंशः शब्दार्थो युक्तः अतिप्रसङ्गादिति प्रतीतिबाधितत्वं प्रतिज्ञायाः।

अपि च, [12]ये भिन्नसामान्यवचना गवादयः, ये च विशेषवचनाः शाबलेयादयस्ते भवदभिप्रायेण पर्यायाः प्राप्नुवन्ति, अर्थभेदाभावात्, [13]वृक्ष-पादपादिशब्दवत्। [14]सँ च अवस्तुत्वात्, [15]वस्तु-
२० न्येव हि [16]संसृष्टत्व-एकत्व-नानात्वादिविकल्पाः सम्भवन्ति, नावस्तुन्येवापोहा[17]ख्ये परस्परं संसृष्टतादिविकल्पो युक्त इति कथमेषां भेदः? तदभ्युपगमे वा नियमेन वस्तुत्वापत्तिः। तथाहि-'ये [18]परस्परं भिद्यन्ते ते वस्तुरूपाः, यथा स्वलक्षणानि, परस्परं भिद्यन्ते चापोहाः' इति स्वभावहेतुः, इति विधिरेव शब्दार्थः। एतेनानुमानबाधितत्वं प्रतिज्ञायाः प्रतिपादितम्।

अथावस्तुत्वमभ्युपगम्यतेऽपोहानां तदा नानात्वाभावात् पर्यायत्वप्रसङ्गः[19] इत्येकान्त एषः।

---

१ "बुद्धयाकारस्यानपेक्षितबाह्यार्थावलम्बनस्य"-तत्त्वसं० पञ्जि० पृ० २९३ पं० २४। २ **बुद्ध्यालम्ब**-भां० मां० वा० बा० विना। ३ "बुद्धिर्विजातीयगवादिबुद्धिभ्यो व्यावृत्तरूपा"-तत्त्वसं० पञ्जि० पृ० २९४ पं० ३।

४ "वस्तुरूपा च सा बुद्धिः शब्दार्थेषूपजायते। तेन वस्त्वेव कल्प्येत वाच्यं बुद्ध्यनपोहकम्" ॥
श्लो० वा० अपो० श्लो० ३९। तत्त्वसं० का० ९२२ पृ० २९४।

५-**भासल**-आ० वि० कां० गु०। ६ "अपोद्धारे"-तत्त्वसं० पञ्जि० पृ० २९४ पं० १७।

७ "असत्यपि च बाह्येऽर्थे वाक्यार्थप्रतिभा यथा। पदार्थोऽपि तथैव स्यात् किमपोहः प्रकल्प्यते" ॥
श्लो० वा० अपो० श्लो० ४०। तत्त्वसं० का० ९२३ पृ० २९४।

८-**हस्तथा प**-भां० मां०। "नापोहलक्षणस्तथा पदार्थोऽपि"-तत्त्वसं० पञ्जि० पृ० २९४ पं० २३।

९ "बुद्ध्यन्तराद् व्यवच्छेदो न च बुद्धेः प्रतीयते। स्वरूपोत्पादमात्राच्च नान्यमंशं बिभर्ति सा" ॥
श्लो० वा० अपो० श्लो० ४१। तत्त्वसं० का० ९२४ पृ० २९४।

१०-**पि न तत्र** आ० कां०। "तथापि तस्यां न शब्दव्यापारोऽस्ति"-तत्त्वसं० पञ्जि० पृ० २९५ पं० ३। ११ **लभ्यते** वा०।

१२ "भिन्नसामान्यवचना विशेषवचनाश्च ये। सर्वे भवेयुः पर्याया यद्यपोहस्य वाच्यता" ॥
श्लो० वा० अपो० श्लो० ४२। तत्त्वसं० का० ९२५ पृ० २९५।

१३ "वृक्ष-पादपादिशब्दवत्। वस्तुन्येव हि संसृष्ट"-तत्त्वसं० पञ्जि० पृ० २९५ पं० १२-१६। १४ अर्थभेदाभावश्च।

१५ "संसृष्टैकत्वनानात्वविकल्परहितात्मनाम्। अवस्तुत्वादपोहानां तव स्याद् भिन्नता कथम्"? ॥
श्लो० वा० अपो० श्लो० ४५। तत्त्वसं० का० ९२६ पृ० २९५।

१६ **संसृष्टत्व**-आ० वि० कां० गु०। १७-**ख्ये परस्परसं**-वा० बा०।-**ख्ये परसं**-आ० वि० कां० गु०।

१८ "यदि वा भिद्यमानत्वाद् वस्त्वसाधारणांशवत्। अवस्तुत्वे त्वनानात्वात् पर्यायत्वान्न मुच्यते" ॥
श्लो० वा० अपो० श्लो० ४६। तत्त्वसं० का० ९२७ पृ० २९५।

१९ प्र० पृ० पं० १९।

न चापोह्यभेदात् [1]स्वतो भेदाभावेऽपि तस्य भेदादपर्यायत्वम्, [2]स्वतस्तस्य नानात्वाभावेऽभावैकरूपत्वात् परतोऽप्यसौ भवन् काल्पनिकः स्यात्; न हि स्वतोऽसतो भेदस्य परतः सम्भवो युक्तः। यथा हि संसर्गिणः शाबलेयादयः आधारतयाऽन्तरङ्गा अपि तं स्वरूपतो भेत्तुमशक्ताः—बहुष्वपि शाबलेयादिष्वेकस्यागोव्यवच्छेदलक्षणस्यापोहस्य तेष्वभ्युपगमात्—तथा बहिरङ्गभूतैरश्वादिभिरपोह्यैरसौ भिद्यत [3]इत्यपि साहसम्; न हि यस्यान्तरङ्गोऽप्यर्थो न भेदकस्तस्य बहिरङ्गो भविष्यति ५
बहिरङ्गत्वहानिप्रसङ्गात्।

अथान्तरङ्गा एवाधारास्तस्य भेदकाः, असदेतत्; अ[4]वस्तुनः सम्बन्धिभेदाद् भेदानुपपत्तेः, वस्तुन्यपि हि सम्बन्धिभेदाद् भेदो [5]नोपलभ्यते किमु[6]तावस्तुनि निःस्वभावोक्तहा हि-देवदत्तादिकमेकमपि (निःस्वभावे। तथाहि-देवदत्तादिकमेकमपि) वस्तु युगपत् क्रमेण वाऽनेके(कै)रासनादिभिर(रभि) सम्बध्यमानमनासादितभेदमेवोपलभ्यते किं पुनर्यदन्यव्यावृत्तिरूपमवस्तु, तत्त्वादेव च क्वचिद्- १०
सम्बद्धं विजातीयाच्चाऽव्यावृत्तम् अत एवानधिगतविशेषांशं तादृशं सम्बन्धिभेदादपि कथमिव भेदमश्नुवीत? किञ्च, भवतु नाम सम्बन्धिभेदाद् भेदस्तथापि वस्तुभूतसामान्यानभ्युपगमे भवतां स एवापोहाश्रयः सम्बन्धी न सिद्धिमासादयति [7]यस्य भेदात् तद्भेदोऽवकल्प्यते। तथाहि-[8]यदि गवादीनां वस्तु[9]भूतं सारूप्यं प्रसिद्धं भवेत् तदाऽश्वाद्यपोहाश्रयत्वमेषामविशेषेण सिद्ध्येत (त्) नान्यथा, १५
अतोऽपोहविषयत्वमेषामिच्छताऽवश्यं सारूप्यमङ्गीकर्तव्यम्, तदेव च सामान्यं वस्तुभूतं शब्दवाच्यं भविष्यतीत्यपोहकल्पना [10]व्यर्थैव।

[11]अपोह्यभेदेनापोहभेदोऽपि वस्तुभूतसामान्यमन्तरेण न सिद्धिमासादयति। तथाहि-यद्यश्वादीनामेकः कश्चित् सर्वव्यक्तिसाधारणो धर्म्मोऽनुगामी स्यात् तदा ते सर्वे गवादिशब्दैरविशेषेणापोह्येरन् नान्यथा, विशेषापरिज्ञानात्। साधारणधर्माभ्युपगमे चापोहकल्पनावैयर्थ्यम्।

अपि च, अपोहः शब्द-लिङ्गाभ्यामेव प्रतिपाद्यत इति भवद्भिरिष्यते, शब्द-लिङ्गयोश्च वस्तु- २०
भूतसामान्यमन्तरेण प्रवृत्तिरनुपपन्नेति नातोऽपोहप्रतिपत्तिः। तथाहि-[12]अनुगतवस्तुव्यतिरेकेण न

---

१ "ननु चापोह्यभेदेन भेदोऽपोहस्य सेत्स्यति। न विशेषः स्वतस्तस्य परतश्चौपचारिकः" ॥
श्लो० वा० अपो० श्लो० ४७। तत्त्वसं० का० ९२८ पृ० २९६।

२ **स्वतस्य** आ० बा०।

३ "संसर्गिणोऽपि चाधारा यं न भिन्दन्ति रूपतः। अपोह्यैः स बहिर्भूतैर्भिद्येतेत्यतिकल्पना ॥
श्लो० वा० अपो० श्लो० ५२। तत्त्वसं० का० ९२९ पृ० २९६।

४ **इत्यभि(ति)सा** वा० बा०। "इत्यतिसाहसम्"-प्रमेयक० पृ० १२६ प्र० पं० ८।

५ "तेनैवाऽऽधारभेदेनाप्यस्य भेदो न युज्यते। न हि संबन्धिभेदेन भेदो वस्तुन्यपीष्यते" ॥
"किमुताऽवस्त्वसंसृष्टमन्यतश्चाऽनिवर्तितम्। अनवाप्तविशेषांशं यत् किमप्यनिरूपितम्" ॥
श्लो० वा० अपो० श्लो० ४८-४९। तत्त्वसं० का० ९३०-९३१ पृ० २९६।

६ **नोपलभ्यते किं पुनर्यदन्य**-वा० बा० विना०। ७ "किमुताऽवस्तुनि। तथाहि-देवदत्तादिकमेकमेव वस्तु युगपत् क्रमेण वाऽनेकैराभरणादिभिरभिसंबध्यमानमनासादितभेदमेवोपलभ्यते"-प्रमेयक० पृ० १२६ प्र० पं० ९। तत्त्वसं० पञ्जि० पृ० २९६ पं० २७-२८। ८-**मवस्तुत्वा**-आ० हा० वि० कां० गु०। ९-**याद्यावृत्तम्** वा० बा०।
१०-**ति तस्य** वा० बा०। ११-**कल्पते** वा० बा०। १२ **यथा ग**-भां० मां० वा० बा० विना।

"न चाप्रसिद्धसारूप्याऽनपोहविषयात्मना। शक्तः कश्चिदपि ज्ञातुं गवादीनविशेषतः" ॥
श्लो० वा० अपो० श्लो० ७१। तत्त्वसं० का० ९३२ पृ० २९७।

१३-**भूतं शब्दसारू**-भां० मां०। १४ "विषयशब्दोऽत्राश्रयवचनः, जलविषया मत्स्या इति यथा"-तत्त्वसं० पञ्जि० पृ० २९७ पं० १३। १५-**ना व्यर्थिता** भां० मां०।-**ना व्यर्थिका** आ० वि० कां० गु०।

१६ "अपोह्यानपि चाश्वादीनेकधर्मान्वयाद्यते। न निरूपयितुं शक्तिस्तत्राऽपोहो न सिध्यति" ॥
श्लो० वा० अपो० श्लो० ७२। तत्त्वसं० का० ९३३ पृ० २९७।

१७-**पन्नेति नानापोह**-आ० कां०।-**पन्नेति नापोह**-गु० भा०।

१८ "न चान्वयविनिर्मुक्ते प्रवृत्तिर्लिङ्ग-शब्दयोः। ताभ्यां च न विनाऽपोहो न चाऽसाधारणेऽन्वयः" ॥
श्लो० वा० अपो० श्लो० ७३। तत्त्वसं० का० ९३४ पृ० २९७।

१९-**ण च** भां० मां०।

शब्दलिङ्गाभ्यां (न शब्द-लिङ्गयोः प्रवृत्तिः, न च शब्द-लिङ्गाभ्यां) विनाऽपोहप्रतिपत्तिः, [1]न चासाधारणस्यान्वयः, तदेवमपोहकल्पनायां शब्द-लिङ्गयोः प्रवृत्तिरेव न प्राप्नोति; प्रवृत्तौ वा प्रामाण्यमभ्युपगतं हीयेत। तथाहि—[2]प्रतिपाद्यार्थाव्यभिचारित्वं तयोः प्रामाण्यम्, अपोहश्च प्रतिपाद्यत्वेन भवताऽभ्युपगम्यमानोऽभावरूपत्वान्निःस्वभाव इति क्व तयोरव्यभिचारित्वम्? न च [3]विजातीयादर्शनमात्रेणैव शब्द-लिङ्गे अगृहीतसाहचर्ये एव स्वमर्थं गमयिष्यतः, विजातीयादर्शनमात्रेण गमकत्वाभ्युपगमे [4]स्वार्थः परार्थ इति विशेषानुपपत्तेः; तथा च स्वार्थमपि न गमयेत् तत्र अदृष्टत्वात् परार्थवत्। तदेवं शब्द-लिङ्गयोरप्रामाण्याभ्युपगमप्रसङ्गान्नापोहः शब्दार्थो युक्तः।

यदि वा असत्यपि सारूप्ये शाबलेयादिष्वगोऽपोहकल्पना तदा गवाश्वस्यापि [6]कस्मान्न [7]कल्प्येतासौ अविशेषात्। तदुक्तं कुमारिलेन—

"अथासत्यपि सारूप्ये स्यादपोहस्य कल्पना।
गवाश्वयोरयं कस्मादगोपोहो न कल्प्यते" ॥ [श्लो० वा० अपो० श्लो० ७६]

'गवाश्वयोः' इति "गवाश्वप्रभृतीनि च" [पाणि०-२-४-११ सिद्धान्तकौ० पृ० २०४] इत्येकवद्भावलक्षणास्मरणादुक्तम्। अविशेषप्रतिपादनार्थं स एव पुनरप्युक्तवान्—

"शाबलेयाच्च भिन्नत्वं बाहुलेयाश्वयोः समम्।
सामान्यं नान्यदिष्टं चेत् कागोऽपोहः [10]प्रवर्त्तताम्"? ॥ [श्लो० वा० अपो० श्लो० ७७]

यथैव हि शाबलेयाद् वैलक्षण्यादश्वे न प्रवर्त्तते तथा बाहुलेयस्यापि ततो वैलक्षण्यमस्तीति न तत्राप्यसौ [11]प्रवर्तेत; एवं शाबलेयादिष्वपि योज्यम्, सर्वत्र वैलक्षण्याविशेषात्।

अपि च, [12]यथा स्वलक्षणादिषु समयासम्भवान्न शब्दार्थत्वम् तथाऽपोहेऽपि। तथाहि-[13]निश्चितार्थो हि समयकृत् समयं करोति; न चापोहः केनचिदिन्द्रियेणाव्यवसीयते, व्यवहारात् पूर्वं तस्यावस्तुत्वात् इन्द्रियाणां च वस्तुविषयत्वात्। न चान्यव्यावृत्तं स्वलक्षणमुपलभ्य शब्दः प्रयोक्ष्यते, अन्यापोहादन्यत्र शब्दवृत्तेः प्रवृत्त्यनभ्युपगमात्। [15]नाप्यनुमानेनापोहाध्यवसायः,

"न चान्वयविनिर्मुक्ता प्रवृत्तिः शब्द-लिङ्गयोः"

[16]इत्यादिना तत्प्रतिषेधस्य तत्रोक्तत्वात्। तस्मात् 'अकृतसमयत्वात्' इत्यस्य हेतोरनैकान्तिकत्वमपोहेन, अकृतसमयत्वेऽप्यपोहे शब्दप्रवृत्त्यभ्युपगमात्।

इतश्चापोहे [17]सङ्केतासम्भवः अतिप्रसक्तेः। तथाहि-[18]कथमश्वादीनां गोशब्दानभिधेयत्वम्?

---

१ **न वासा**-आ० कां०।

२ "अपोहश्चाप्यनिष्पन्नः साहचर्यं क्व दृश्यताम्। तस्मिन्नदृश्यमाने च न तयोः स्यात् प्रमाणता" ॥
श्लो० वा० अपो० श्लो० ७४। तत्त्वसं० का० ९३५ पृ० २९८।

३ "न चाऽदर्शनमात्रेण ताभ्यां प्रत्यायनं भवेत्। सर्वत्रैव ह्यदृष्टत्वात् प्रत्याय्यं नावशिष्यते" ॥
श्लो० वा० अपो० श्लो० ७५। तत्त्वसं० का० ९३६ पृ० २९८।

४-**चर्येण ए**-वा० बा०। ५ **स्वार्थ इति** वा० बा०। ६-**स्यापि कस्यापि कस्मा**-आ० कां०। ७ **कल्पेता**-वा० बा० विना। ८ तत्त्वसं० का० ९३७ पृ० २९८। ९ "गवाश्वादिः" हैम० ३-१-१४४। १० तत्त्वसं० ९३८ पृ० २९९। ११ **प्रवर्तत ए**-आ० वि० कां० गु० वा० बा०। १२ शास्त्रवा० स्याद्वादक० पृ० का० ४०३ प्र० पं० १३।

१३ "इन्द्रियैर्नाप्यगोपोहः प्रथमं व्यवसीयते। नान्यत्र शब्दवृत्तिश्च किं दृष्ट्वा स प्रयुज्यताम्" ॥
श्लो० वा० अपो० श्लो० ७८। तत्त्वसं० का० ९३९ पृ० २९९।

१४ "संज्ञासंज्ञिसंबन्धकाले"-तत्त्वसं० पञ्जि० पृ० २९९ पं० १३।

१५ "पूर्वोक्तेन प्रबन्धेन नानुमाऽप्यत्र विद्यते। संबन्धानुभवोऽप्यस्य तेन नैवोपपद्यते ॥
श्लो० वा० अपो० श्लो० ७९। तत्त्वसं० का० ९४० पृ० २९९।

१६ पृ० १८९ पं० २१ तथा ४२। १७-**श्चापोहसं**-वा० बा० विना।

१८ "अगोशब्दाभिधेयत्वं गम्यतां च कथं पुनः। न दृष्टो यत्र गोशब्दः संबन्धानुभवक्षणे" ॥
श्लो० वा० अपो० श्लो० ८१। तत्त्वसं० का० ९४१ पृ० २९९।

सम्बन्धानुभवक्षणेऽश्वादेस्तद्विषयत्वेनादृष्टेरिति चेत्, असदेतत्; यतो [1]यदि यद् गोशब्दसङ्केतकाले उपलब्धं ततोऽन्यत्र गोशब्दप्रवृत्तिर्नेष्यते तदैकस्मात् सङ्केतेन विषयीकृताच्छाबलेयादिकाद् गोपिण्डादन्यद् बाहुलेयादि गोशब्देनापोह्यं भवेत्, ततश्च सामान्यं वाच्यमित्येतन्न सिद्ध्येत्। इतरेतराश्रयदोषप्रसक्तेश्चापोहे सङ्केतोऽशक्यक्रियः। तथाहि-[2]अगोव्यवच्छेदेन गोः प्रतिपत्तिः, स चागौर्गोनिषेधात्मा; ततश्च 'अगौः' इत्यत्रोत्तरपदार्थो वक्तव्यः यो 'न गौरगौः' इत्यत्र नञा प्रतिषिध्येत, न ह्यनिर्ज्ञातस्वरूपस्य निषेधः शक्यते विधातुम्। अथापि स्यात् किमत्र वक्तव्यम्-[3]अगोनिवृत्त्यात्मा गौः, नन्वेवमगोनिवृत्तिस्वभावत्वाद् गोरगोप्रतिपत्तिद्वारेणैव प्रतीतिः, अगोश्च गोप्रतिषेधात्मकत्वाद् गोप्रतिपत्तिद्वारिकैव प्रतीतिरिति स्फुटमितरेतराश्रयत्वम्।

अथाप्यगोशब्देन यो [4]गौर्निषिध्यते स विधिरूप एव [5]अगोव्यवच्छेदमल(दल)क्षणापोहसिद्ध्यर्थम् तेनेतरेतराश्रयत्वं न भविष्यति। [6]यद्येवं 'सर्वस्य शब्दस्यापोहार्थः' इत्येवमपोहकल्पना वृथा, विधिरूपस्यापि शब्दार्थस्य [7]भावात्। अतः (अतो न) कश्चिद् विधिरूपः शब्दार्थः प्रसिद्धोऽङ्गीकर्तव्यः; तदनङ्गीकरणे चेतरेतराश्रयदोषो दुर्निवारः। तदुक्तम्—

"सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः।
तत्र गौरेव वक्तव्यो नञा यः [10]प्रतिषिध्यते" ॥
"स चेदगोनिवृत्त्यात्मा भवेदन्योऽन्यसंश्रयः।
सिद्धश्चेद् गौरपोहार्थं [11]वृथाऽपोहप्रकल्पनम्" ॥
"गव्यसिद्धे त्वगौर्नास्ति [12]तदभावेऽपि गौः [13]कुतः।"
[श्लो० वा० अपो० श्लो० ८३-८४-८५] इति।

"नीलोत्पलादिशब्दा अर्थान्तरनिवृत्तिविशिष्टानर्थानाहुः" [ ] इत्याचार्यदिग्नागेन [14]विशेष्यविशेषणभावसमर्थनार्थं यदुक्तं तदयुक्तमिति दर्शयन्नाह भट्टः—

"नाधाराधेयवृत्त्यादिसम्बन्धश्चाप्यभावयोः" ॥ [श्लो० वा० अपो० श्लो० ८५]

यस्य हि येन सह कश्चिद् वास्तवः सम्बन्धः सिद्धो भवेत् तत् तेन विशिष्टमिति युक्तं वक्तुम्। न च नीलोत्पलयोरनीलानुत्पलव्यवच्छेदरूपत्वेनाभावरूपयोराधाराधेयादिः सम्बन्धः सम्भवति, [17]नीरूपत्वात्। [18]आदिग्रहणेन संयोगसमवायैकार्थसमवायादिसम्बन्धग्रहणम्। न चासति वास्तवे सम्बन्धे तद्विशिष्टस्य प्रतिपत्तिर्युक्ता, अतिप्रसङ्गात्। अथापि स्यात् नैवासाकमनीलादिव्यावृत्त्या विशिष्टोऽनुत्पलादिव्यवच्छेदोऽभिमतः यतोऽयं दोषः स्यात्; किं तर्हि? अनीलानुत्पलाभ्यां व्यावृत्तं वस्त्वेव तथाव्यवस्थितं [19]तदर्थान्तरनिवृत्त्या विशिष्टं शब्देनोच्यत इत्ययमर्थोऽत्राभिप्रेतः, असदेतत्;

---

१ "एकस्मात् तर्हि गोपिण्डाद् यदन्यत् सर्वमेव तत्। भवेदपोह्यमित्येवं न सामान्यस्य वाच्यता" ॥
श्लो० वा० अपो० श्लो० ८२। तत्त्वसं० का० ९४२ पृ० ३००।

२-**हि अगोशब्देन छेदेन गोः** वा० बा०।

३ "सिद्धश्चाऽगौरपोह्येत गोनिषेधात्मकश्च सः। तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते" ॥
श्लो० वा० अपो० श्लो० ८३। तत्त्वसं० का० ९४३ पृ० ३००।

४ "स चेदगोनिवृत्त्यात्मा भवेदन्योन्यसंश्रयः। सिद्धश्चेद् गौरपोह्यार्थं वृथाऽपोहप्रकल्पना" ॥
श्लो० वा० अपो० श्लो० ८४। तत्त्वसं० का० ९४४ पृ० ३००।

५ "गौर्निषेध्यते"-तत्त्वसं० पञ्जि० पृ० ३०० पं० २१। ६ **'अगोव्यवच्छेदलक्षणापोह'**-वि०सं०। "अगोव्यवच्छेदलक्षणापोहसिद्ध्यर्थम्"-तत्त्वसं० पञ्जि० पृ० ३०० पं० २२। ७ "यद्येवं सर्वस्य शब्दस्यापोहोऽर्थ इत्येवमपोहकल्पनं वृथा"-तत्त्वसं० पञ्जि० पृ० ३०० पं० २३। प्रमेयक० पृ० १२६ द्वि० पं० ८-९। ८-**हार्थमित्येव**-वा० बा० गु० भा० विना। ९ "भावात् तस्मान्न कश्चिद् विधिरूपः शब्दार्थः"-तत्त्वसं० पञ्जि० पृ० ३०० पं० २४। १० तत्त्वसं० का० ९४३ पृ० ३००। ११ तत्त्वसं० का० ९४४ पृ० ३००। १२ तदभावेऽप्यगौः कुतः"-प्रमेयक० पृ० १२६ द्वि० पं० ११। शास्त्रवा० स्याद्वादक० पृ० ४०३ द्वि० पं० १०। १३ तत्त्वसं० का० ९४५ पृ० ३००। १४ तत्त्वसं० पञ्जि० पृ० ३०१ पं० २। प्रमेयक० पृ० १२६ द्वि० पं० ११। शास्त्रवा० स्याद्वादक० पृ० ४०३ द्वि० पं० ११। **१५ विशिष्यवि**-भां० मां०। १६ तत्त्वसं० का० ९४५ पृ० ३००। १७ **नीलरूपत्वात्** वा० बा० विना०। १८ प्र० पृ० पं० २१। १९ **तदर्था**-वा० बा०। "तच्चार्थान्तरव्यावृत्त्या"-प्रमेयक० पृ० १२७ प्र० पं० ३। शास्त्रवा० स्याद्वादक० पृ० ४०३ द्वि० पं० १३।

[1]स्वलक्षणस्यावाच्यत्वात् तत्पक्षभाविदोषप्रसङ्गाच्च । न च स्वलक्षणस्यान्यनिवृत्त्या विशिष्टत्वं [2]सा(सि)ध्यति यतो न वस्त्वपोहः, असाधारणं तु वस्तु । न च वस्त्ववस्तुनोः सम्बन्धो युक्तः, वस्तुद्वयाधारत्वात् तस्य ।

भवतु वा सम्बन्धस्तथापि विशेषणत्वमपोहस्यायुक्तम्; न हि [3]सत्तामात्रेणोत्पलादीनां नीलादि विशेषणं भवति, किं तर्हि? ज्ञातं सद् यत् स्वाकारानुरक्त[4]या बुद्ध्या विशेष्यं रञ्जयति तद् विशेषणम्, न चापोहेऽयं प्रकारः सम्भवति, न [5]ह्यश्वादिबुद्ध्याऽपो[6]हो ऽध्यवसीयते, किं तर्हि? वस्त्वेव, अतोऽपोहस्य बोधासम्भवाद् न तेन स्वबुद्ध्या रज्यतेऽश्वादि । न चाज्ञातोऽप्यपोहो विशेषणं भवति, न ह्यगृहीतविशेषणा विशेष्ये बुद्धिरुपजायमाना दृष्टा; भवतु वाऽपोहज्ञानम् तथापि वस्तुनि तदाकारबुद्ध्यभावात् तस्य तद्विशेषणत्वमयुक्तम्, स[7]वैमेव हि विशेषणं [8]स्वाकारानुरूपां विशेष्ये बुद्धिं जनयद् दृष्टम्, न त्वन्यादृशं विशेषणमन्यादृशीं बुद्धिं विशेष्ये जनयति; न हि नीलमुत्पले 'रक्तम्' इति प्रत्ययमुत्पादयति, दण्डो वा 'कुण्डली' इति; न चात्राश्वादिष्व[9]भावानुरक्ता शाब्दी बुद्धिरुपजायते, किं तर्हि? भावाकाराध्यवसायिनी । यं[10]दि पुनर्विशेषण[11]ननुरूपतयाऽन्यथा व्यवस्थितेऽपि विशेष्ये साध्वी विशेषणकल्पना तथासति सर्वमेव नीलादि सर्वस्य विशेषणमित्यव्यवस्था स्यात् । [12]नाप्यपोहेनापि स्वबुद्ध्या विशेष्यं वस्त्वनुरज्यते इति वक्तव्यम्, तथाऽभ्युपगमे अभावरूपेण वस्तुनः प्रतीतेर्वस्तुत्वमेव न स्यात् भावाभावयोर्विरोधात् । एतदेवाह—

"न चासाधारणं वस्तु गम्यतेऽपोहवत्तया[13] ।
[14]कथं वा परिकल्प्येत सम्बन्धो वस्त्ववस्तुनोः ॥"
"स्वरूपसत्त्वमात्रेण न स्यात् किञ्चिद् विशेषणम् ।
स्वबुद्ध्या रज्यते येन विशेष्यं तद् विशेषणम् ॥"
"न चाप्यश्वादिशब्देभ्यो जायतेऽपोहबोधनम् ।
विशेष्यबुद्धिरिष्टेह न चाज्ञातविशेषणा ॥"
"न चान्यरूपमन्यादृक् कुर्याज् ज्ञानं विशेषणम् ।
[15]कथं चान्यादृशे ज्ञाने तदुच्येत विशेषणम् ॥"

---

१ " न चासाधारणं वस्तु गम्यतेऽपोहवत्तया । कथं वा परिकल्प्येत संबन्धो वस्त्ववस्तुनोः" ॥
श्लो० वा० अपो० श्लो० ८६ । तत्त्वसं० का० ९४६ पृ० ३०१ ।

२ "सिध्यति"–तत्त्वसं० पञ्जि० पृ० ३०१ पं० १६ ।

३ "स्वरूपसत्त्वमात्रेण न च किञ्चिद् विशेषणम् । स्वबुद्ध्या रज्यते येन विशेष्यं तद् विशेषणम्" ॥
श्लो० वा० अपो० श्लो० ८७ । तत्त्वसं० का० ९४७ पृ० ३०१ ।

४ **रक्तबु**–वि० गु० ।

५ "न चाप्यश्वादिशब्देभ्यो जायतेऽपोहबोधनम् । विशेष्यबुद्धिरिष्टेह न चाऽज्ञातविशेषणा" ॥
श्लो० वा० अपो० श्लो० ८८ । तत्त्वसं का० ९४८ पृ० ३०१ ।

६–**हो व्यव**–वा० बा० ।

७ "न चान्यरूपमन्यादृक् कुर्याज् ज्ञानं विशेषणम् । कथं चाऽन्यादृशे ज्ञाते तदुच्येत विशेषणम्" ॥
श्लो० वा० अपो० श्लो० ८९ । तत्त्वसं० का० ९४९ पृ० ३०२ ।

८ "स्वाकारानुरूपं विशेष्ये"–तत्त्वसं० पञ्जि० पृ० ३०२ पं० ९ ।

९–**भावात् रक्ता** वि० विना ।

१० "अथाऽन्यथा विशेष्येऽपि स्याद् विशेषणकल्पना । तथासति हि यत् किञ्चित् प्रसज्येत विशेषणम्" ॥
श्लो० वा० अपो० श्लो० ९० । तत्त्वसं० का० ९५० पृ० ३०२ ।

११–**णानुरूप**–वा० बा० ।

१२ "अभावरूपगम्ये च न विशेष्येऽस्ति वस्तुता । विशेषितमपोहेन वस्तु वाच्यं न तेऽस्त्यतः" ॥
श्लो० वा० अपो० श्लो० ९१ । तत्त्वसं० का० ९५१ पृ० ३०२ ।

१३ इतः श्लोकषट्कमेतत् प्रमेयक० पृ० १२७ प्र० पं० १० । शास्त्रवा० स्याद्वादक० पृ० ४०४ प्र० पं० ४–९ ।

१४ अनुक्रमेण तत्त्वसं० का० ९४६–९४७–९४८–९४९–९५०–९५१ पृ० ३०१–३०२ ।

१५ **कथं वान्या**–वा० बा० ।

"अथान्यथा विशेष्येऽपि स्याद् विशेषणकल्पना ।
तथासति हि यत् किञ्चित् प्रसज्येत विशेषणम्" ॥
"अभावगम्यरूपे च न विशेष्येऽस्ति वस्तुता ।
विशेषितमपोहेन वस्तु वाच्यं न तेऽस्त्यतः" ॥
[श्लो० वा० अपो० श्लो० ८६–८७–८८–८९–९०–९१] इति ।

अथान्यव्यावृत्ते एव वस्तुनि शब्द–लिङ्गयोः प्रवृत्तिर्दृश्यते नापोहरहिते अतोऽपोहः शब्द–लिङ्गाभ्यां प्रतिपाद्यत इत्यभिधीयते न प्रसज्यप्रतिषेधमात्रप्रतिपादनात् अत एव न प्रतीत्यादिविरोधोद्भावनं युक्तम्, असदेतत्; [1]यतो यदि नाम तद् वस्त्वन्यतो व्यावृत्तं तथापि तत्रोत्पद्यमानः शब्द–लिङ्गोद्भवो बोधोऽन्यव्यावृत्तिं सतीमपि नावलम्बते, किं तर्हि? वस्त्वंशमेवाभिधावति, तत्रैवानुरागात् । य [2]एव चांशो वस्तुनः शाब्देन लैङ्गिकेन वा प्रत्ययेनावसीयते स एव तस्य विषयः नानवसीयमानः सन्नपि; न हि मालतीशब्दस्य गन्धादयो विद्यमानतया वाच्या व्यवस्थाप्यन्ते । [3]न चाप्येतदु(द्यु)क्तम् यद् अन्यव्यावृत्ते वस्तुनि शब्द–लिङ्गयोः प्रवृत्तिः; यतोऽ[4]न्यव्यावृत्तं वस्तु भवतां मतेन स्वलक्षणमेव भवेत् न च तत् शब्द–लिङ्गजायां बुद्धौ विपरिवर्त्तत इति, तस्य निर्विकल्पकबुद्धिविषयत्वात् भवदभिप्रायेण शब्द–लिङ्गजबुद्धेश्च सामान्यविषयत्वात् । न चासाधारणं वस्तु शब्द–लिङ्गजप्रत्ययाधिगम्यम्, तत्र विकल्पानां प्रत्यस्तमयात् । तथाहि—विकल्पो जात्यादिविशेषणसंस्पर्शेनैव प्रवर्त्तते [5]न शुद्धवस्तूपग्रहणे, न च शब्देनागम्यमानमप्यसाधारणं वस्तु व्यावृत्त्या विशिष्टमित्यभिधातुं शक्यम् । यतः—

"शब्देनागम्यमानं च विशेष्यमिति साहसम् ।
तेन सामान्यमेष्टव्यं विषयो बुद्धि-शब्द[6]योः" ॥ [श्लो० वा० अपो० श्लो० ९४]

इतश्च सामान्यं वस्तुभूतं शब्दविषयः यं[7]तो व्यक्तीनामसाधारणवस्तुरूपाणामवाच्यत्वा[8]न्नापोह्यता अनुक्तस्य निराकर्तुमशक्यत्वात्, अपोह्येत सामान्यम् तस्य वाच्यत्वात्; अपोहानां त्व[9]भावरूपतयाऽपोह्यत्वासम्भवात् तत्त्वे वा वस्तुत्वमेव स्यात्—तथाहि-यं[10]द्यपोहानामपोह्यत्वं भवेत् तदैषामभावरूपत्वं विप्रतिषिद्धं भवेत्; [11]प्रतिषेधे च सति अभावैरभावरूपत्वं त्यक्तं स्यात्; ततश्चाभावानामपोहलक्षणानामभाव[12]रूपत्या[13]गाद् वस्तुत्वमेव भवेत्, तच्च न शब्दविषयः—यद्वाऽभावानामभावाभा[14]वात् न ह्यभावस्व[15]भावा अपोहा अपोह्या युज्यन्ते, वस्तुविषयत्वात् प्रतिषेधस्य; तस्मा[16]दश्वादौ गवादेरपोहो [17]भवन् सामान्य[18]स्यैवेति निश्चीयत इति सिद्धमपोह्यत्वाद् वस्तुत्वं सामान्यस्य । तदुक्तम्—

---

१ "यद्यप्यपोहनिर्मुक्ते न वृत्तिः शब्द-लिङ्गयोः । युक्ता तथापि बुद्धिस्तु ज्ञातुर्वस्त्ववलम्बते" ॥
श्लो० वा० अपो० श्लो० ९२ । तत्त्वसं० का० ९५२ पृ० ३०३ ।

२ **एवांशो** वा० बा० भां० मां० विना । ३–**न चाप्ये**–भां० मां० । "न चाप्येतदुक्तम्"–तत्त्वसं० पञ्जि० पृ० ३०३ पं० ११ । वि० प्रतौ तथैव सं० ।

४ "न चासाधारणं वस्तु बुद्धौ विपरिवर्तते । न चापि निर्विकल्पत्वात् तस्य युक्ता विशेष्यता" ॥
श्लो० वा० अपो० श्लो० ९३ । तत्त्वसं० का० ९५३ पृ० ३०३ ।

५ **न शुद्धवस्तुरूप**–वि० । "न च शुद्धवस्तुपरिग्रहेण"–तत्त्वसं० पञ्जि० पृ० ३०३ पं० २० । ६ तत्त्वसं० का० ९५४ पृ० ३०३ ।

७ "यदा चाऽशब्दवाच्यत्वान्न व्यक्तीनामपोह्यता । तदाऽपोह्येत सामान्यं तस्यापोहाच्च वस्तुता" ॥
श्लो० वा० अपो० श्लो० ९५ । तत्त्वसं० का० ९५५ पृ० ३०३ ।

८–**त्वान्नपोह्यतां अनु**–भां० मां० ।–**त्वान्नापोह्येत अनु**–आ० ।–**त्वान्नापोह्येता अनु**–वि० गु० । "यतो व्यक्तीनामसाधारणवस्तुरूपाणामशब्दवाच्यत्वान्न व्यक्तीनामपोह्येत अनु–"प्रमेयक० पृ० १२७ द्वि० पं० ४ ।

९–**भावतयाऽ**–भां० मां० वा० बा० विना ।

१० "नाऽपोह्यत्वमभावानामभावाभाववर्जनात् । व्यक्तोऽप्यपोहान्तरेऽपोहस्तस्मात् सामान्यवस्तुनः" ॥
श्लो० वा० अपो० श्लो० ९६ । तत्त्वसं० का० ९५६ पृ० ३०४ ।

११–**प्रतिषेधेन स**–वा० बा० । १२–**त्यागे व**–भां० मां० । १३ नापोह्यत्वमिति शेषः । १४–**भावाऽपोहा**– वा० बा० । १५–**दन्यादौ** वा० बा० । १६ **भवेत्** भां० मां० वा० बा० विना । १७–**न्यमेवेति** आ० कां० ।

"यदा वा शब्दवाच्यत्वान्न व्यक्तीनामपोह्यता ।
तदाऽपोह्येत सामान्यं तस्यापोहाच्च वस्तुता[1]" ॥
"नापोह्यत्वमभावानामभावाभाववर्जनात् ।
व्यक्तोऽपोहान्तरेऽपोहस्तस्मात् सामान्यवस्तुनः" ॥
[श्लो० वा० अपो० श्लो० ९५-९६] इति ।

अपि च, अपोहानां[2] परस्परतो वैलक्षण्यमवैलक्षण्यं वा? तत्राद्ये पक्षे अभावस्य[3] गोशब्दस्याभिधेयस्याभावो गोशब्दाभिधेयः, स चेत् पूर्वोक्तादभावाद् विलक्षणस्तदा भाव एव भवेत् अभावनिवृत्तिरूपत्वाद् भावस्य । न चेद् विलक्षणस्तदा गौरप्यगौः प्रसज्येत, तदवैलक्षण्येन तादात्म्यप्रतिपत्तेः । स्यादेतत् गवाश्वादिशब्दैः स्वलक्षणान्येव परस्परतो व्यावृत्तान्यपोह्यन्ते नाभावः[4]; तेनापोह्यत्वेन वस्तुत्वप्रसङ्गापादनं नानिष्टम्, असदेतत्; यद्यपि सच्छब्दादन्येषु गवादिशब्देषु वस्तुन[5] (नः) पर्वतादेरपोह्यता सिद्ध्यति, सच्छब्दस्य त्वभावाख्यादपोह्यान्नान्यदपोह्यमस्ति असद्व्यवच्छेदेन सच्छब्दस्य प्रवृत्तत्वात्; ततश्च पूर्ववदभावाभाववर्जनाद् असतोऽपोहे वस्तुत्वमेव स्याद् इत्यपोहवादिनोऽभ्युपगमविरुद्धाऽसद्वस्तुत्वप्रसक्तिः ।

अर्थास्त्वभावस्यापि वस्तुत्वम्, न; अभावस्यापि सि[6](स्याऽसि)द्धौ कस्यचिद् भावस्यैवासिद्धेः, अभावव्यवच्छेदेन तस्य भवन्मतेन स्थितलक्षणत्वात् । अभावस्य[7] वाऽपोह्यत्वे सति वस्तुत्वप्रसङ्गेन स्वरूपासिद्धेरसत्त्वमपि न सिद्ध्यति; तस्य सत्त्वव्यवच्छेदरूपत्वात्, सत्त्वस्य च यथोक्तेन प्रकारेण[8]योगात् । न[9] चात्र—

"अपोह्यैः स बहिःसंस्थितैर्भिद्यते"
[10]इत्यादौ
"अवस्तुत्वादपोहानां नैव भेदः"
[11]इत्यादौ च 'न[12] खल्वपोह्यभेदादाधारभेदाद् वाऽपोहानां भेदः, अपि त्वनादिकालप्रवृत्तविचित्रवित-

१ क्रमेण तत्त्वसं० का० ९५५-९५६ पृ० ३०३-३०४ ।
२ "अभावस्य च योऽभावः स चेत् तस्माद् विलक्षणः । भाव एव भवेन्नो चेद् गौरगौस्ते प्रसज्यते" ॥
श्लो० वा० अपो० श्लो० ९७ । तत्त्वसं० का० ९५७ पृ० ३०४ ।
३ "अभावस्य अगोशब्दाभिधेयस्याभावः"—तत्त्वसं० पञ्जि० ३०४ पं० २१ । "पक्षे भावस्याऽगोशब्दाभिधेयस्याभावः"—प्रमेयक० पृ० १२७ द्वि० पं० ८ ।
४ "नाभावाः; तेनापोह्यत्वेन तेषां वस्तुत्वप्रसङ्गापादनं नानिष्टम्"—तत्त्वसं० पञ्जि० पृ० ३०४ पं० २६ ।
५ "यद्यप्यन्येषु शब्देषु वस्तुनः स्यादपोह्यता । सच्छब्दस्य त्वभावाख्यान्नापोह्यं भिन्नमिष्यते" ॥
श्लो० वा० अपो० श्लो० ९८ । तत्त्वसं० का० ९५८ पृ० ३०४ ।
६ **वस्तुनष्पर्वतादे**—भां० मां० । **वस्तुन शर्वतादे**—वा० बा० । "वस्तुनः पर्वतादेः"—तत्त्वसं० पञ्जि० पृ० ३०५ पं० २ । ७—**रुद्धासत् वस्तु**—आ० हा० वि० । ८—**थास्तु भा**—वा० बा० ।
"तत्राऽसतोऽपि भावत्वमिति क्लेशो महान् भवेत् । तदसिद्धौ न सत्ताऽस्ति न चाऽसत्ता प्रसिध्यति" ॥
श्लो० वा० अपो० श्लो० ९९ । तत्त्वसं० का० ९५९ पृ० ३०५ ।
९—**स्तुत्वम् भा**—भां० मां० विना । १० " 'तदसिद्धौ' तस्याऽभावस्यासिद्धौ"—तत्त्वसं० पञ्जि० पृ० ३०५ पं० १० । ११—**स्य भावापोह्यत्वे** आ० । १२—**कारेण यो**—वा० बा० आ० । १३ **न चात्रापोह्यैस्सदू बहिः संस्थितैर्भिद्यते त्यादाववस्तुत्वादपोहानाम्** भां० मां० । **न चात्र पोह्येऽस्सबहिसंस्थितैर्भिद्यते त्यादानवतः वस्तुत्वादपोहानाम्** कां० । **न चात्रापोह्यैऽस्स बहि संस्थितैर्भिद्यते त्यादानवतः वस्तुत्वादपोहानाम्** गु० भा० डे० । **न चात्रापोह्येस्सद्भिः संस्थितैर्भिद्यतेयादवः वस्तुत्वादपोहीनां नैवे भेदः** वा० बा० । **न थान्नपोह्येऽस्स बहि संस्थितै भिद्यतेत्यादातवनः वस्तुत्वादपोहानाम्** आ० । १४ पृ० १८९ पं० ३ तथा २५ । १५ पृ० १८८ पं० १९ तथा ४० । १६ "यत् पूर्वमुक्तम्—'अपोह्यैः स बहिः संस्थैर्भिद्यते' इत्यादि, यच्चोक्तम्—'अवस्तुत्वादपोहानां नैव भेदः' इत्यादि, तत्र केचिद् बौद्धाः परिहारमाहुः—न खल्वपोह्यभेदा(दा)धारभेदाद् वा अपोहानां भेदः" इत्यादि सर्वमक्षरशः तत्त्वसं० पञ्जि० पृ० ३०५ पं० १४-१९ ।

थार्थविकल्पवासनाभेदान्वयैस्तत्त्वतो [1]निर्विषयैरप्यभिन्नविषयालम्बिभिर्भिन्नैरिव प्रत्ययैर्भिन्नेष्वर्थेषु बाह्येषु भिन्ना इवार्थात्मान इवास्वभावा[2] अप्यपोहाः समारोप्यन्ते; ते[3] चैवं तथा तैः समारोपिता भिन्नाः सन्तश्च प्रतिभासन्ते येन वासनाभेदाद् भेदः सद्रूपता वाऽपोहानां भविष्यति' इत्ययं परिहारो वक्तुं युक्तः; यतो[4] न ह्यवस्तुनि वासना सम्भवति, वासनाहेतोर्निर्विषयप्रत्ययस्यायोगात्; तदभावाद् वितथार्थानां विकल्पानामसम्भवात्[5] आलम्बनभूते वस्तुन्यसति निर्विषयज्ञानायोगेन वासनाधायकविज्ञानाऽभावतो न वासना; ततश्च वासनाऽभावात् कुतो वासनाकृतोऽपोहानां भेदः सद्रूपता वा? अतो वाच्याभिमतापोहाभावः ।

तथा, वाचकाभिमतस्यापि तस्याभाव एव, तथापि शब्द[6]दानां भिन्नसामान्यवाचिनां विशेषवाचिनां च परस्परतो भेदो वासनाभेदनिमित्तो वा स्यात् वाच्यापोहभेदनिमित्तो वा? ननु प्रत्यक्षत एव शब्दानां कारणभेदाद् विरुद्धधर्माध्यासाच्च भेदः प्रसिद्ध एवेति प्रश्नानुपपत्तिः, असदेतत्; यतो वाचकं शब्दमङ्गीकृत्य प्रश्नः, न च [11]श्रोत्रज्ञानावसेयः स्वलक्षणात्मा शब्दो वाचकः, सङ्केतकालानुभूतस्य व्यवहारकाले चिरविनष्टत्वात् तस्य न तेन व्यवहार इति न स्वलक्षणस्य वाचकत्वं भवदभिप्रायेण, अविवादश्चात्र । यथोक्तम्—

"नार्थशब्दविशेषस्य वाच्यवाचकतेष्यते ।
तस्य पूर्वमदृष्टत्वात् सामान्यं तूपदेक्ष्यते[13]" ॥ [ ] इति । [14]

तस्माद् वाचकं शब्दमधिकृत्य प्रश्नकरणाददोषः ।

"तत्र शब्दान्तरापोहे सामान्ये परिकल्पिते ।
तथैवावस्तुरूपत्वाच्छब्दभेदो न कल्प्यते[16]" ॥ [श्लो० वा०अपो०श्लो० १०४]

यथा [17]पूर्वोक्तेन विधिना 'संसृष्टैकत्वनानात्व'—इत्यादिना वाच्यापोहानां परस्परतो भेदो न घटते तथा शब्दापोहानामपि नीरूपत्वान्नासौ युक्तः, [18]यथा च वाचकानां परस्परतो भेदो न सङ्गच्छते एवं वाच्यवाचकयोरपि मिथो भेदोऽनुपपन्नः, निःस्वभावत्वात् । न चापोह्यभेदा[19]द् भेदो भविष्यति, 'न [20]विशेषः स्वतस्तस्य' इत्यादिना [21]प्रतिविहितत्वात्[22] । तदेवं प्रतिज्ञायाः प्रतीत्यभ्युपेतबाधा व्यवस्थिता ।

साम्प्रतं वाच्यवाचकत्वाभावप्रसङ्गापादनादभ्युपेतबाधादिदोषं प्रतिपिपादयिषुः प्रमाणयति—
[23]ये अवस्तुनी न तयोर्गम्यगमकत्वमस्ति, यथा खपुष्प-शशशृङ्गयोः, अवस्तुनी च वाच्यवाचकापोहौ

१ **निर्विषयैरपि भेदान्न विषयालम्बिभिन्नप्रत्ययैर्भिन्नेष्वबाह्येषु भिन्ना इवार्थात्मान**—वा० बा० ।
२—**न्नेष्वर्थेष्वबाह्येषु** आ० हा० वि० । ३—**वा अपोहाः** आ० हा० वि० कां० । ४ **ते च तथा** मां० । **ते चैव तथा** वा० बा० ।
५ "न चापि वासनाभेदाद् भेदः सद्रूपताऽपि वा । अपोहानां प्रकल्प्येत न ह्यवस्तुनि वासना" ॥
श्लो० वा० अपो० श्लो० १०० । तत्त्वसं० का० ९६० पृ० ३०५ ।
६—**मसंभव एवात आ**—भां० मां० । ७—**ज्ञानयो**—भां० मां० । ८—**नाभावोतो**—वि० । ९ "तथाहि"—प्रमेयक० पृ० १२७ द्वि० पं० १० ।
१० "भवद्भिः शब्दभेदोऽपि तन्निमित्तो न लभ्यते । न ह्यसाधारणः शब्दो वाचकः प्रागदृष्टितः" ॥
श्लो० वा० अपो० श्लो० १०२ । तत्त्वसं० का० ९६१ पृ० ३०६ ।
११ **श्रोतृ**—आ० हा० वि० । १२ **शब्दोऽवाच**—भां० मां० । १३—**न्यं रूपदेष्यते** आ० हा० वा० बा० । —**न्यं रूपं नेष्यते** वि० । "सामान्यं तूपदेक्ष्यते"—तत्त्वसं० पञ्जि० पृ० ३०६ पं० १७ । द्वादशारनय० लि० प्र० पृ० २८४ द्वि० पं० ८ आ० । "सामान्यं तूपदिश्यते"—प्रमेयक० पृ० १२८ प्र० पं० ३ । १४ तत्त्वसं० पञ्जि० पृ० ३०६ पं० १६ । १५—**अव्याकरणा**—आ० । १६ तत्त्वसं० का० ९६२ पृ० ३०६ । १७ पृ० १८८ पं० २० तथा ४० ।
१८ "वाचकानां यथा चैवं वाच्य-वाचकयोर्मिथः । न चाप्यपोह्यभेदेन भेदोऽस्तीत्युपपादितम्" ॥
श्लो० वा० अपो० श्लो० १०५ । तत्त्वसं० का० ९६३ पृ० ३०६ ।
१९—**दादभेदो** आ० हा० वि० । २० **विशेषः स्ततस्त**—भां० । २१ पृ० १८९ पं० १ तथा २२ । २२—**त्यभ्युपेत्य बा**—भां० मां० ।
२३ "न गम्यगमकत्वं स्यादवस्तुत्वादपोहयोः । भवत्पक्षे यथा लोके खपुष्प-शशशृङ्गयोः" ॥
श्लो० वा० अपो० श्लो० १०८ । तत्त्वसं० का० ९६४ पृ० ३०६ ।

भवतामिति व्यापकविरुद्धोपलब्धिः। ननु च मेघाभावाद् वृष्ट्यभावप्रतीतेर्हेतोरनैकान्तिकता, अयुक्तमेतत्; यस्मात् तद्विविक्ताकाशाऽऽलोकात्मकं च वस्तु मत्पक्षेऽत्रापि प्रयोगो(गे)ऽस्त्येव, अभावस्य वस्तुत्वप्रतिपादनात्। भवत्पक्षे तु न केवलमपोहयोर्विवादास्पदीभूतयोर्गम्यगमकत्वं न युक्तम् अपि त्वेतदपि वृष्टिमेघाभावयोर्गम्यगमकत्वमयुक्तमेव। किञ्च, यदेतद् भवद्भिरन्वयोपसर्जनयोर्व्यतिरेकप्रधानयोः स्वविषयप्रतिपादकत्वं शब्द-लिङ्गयोर्वर्ण्यते, यच्च—

"अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात्।
श्रुतेः सम्बन्धसौकर्ये न चास्ति व्यभिचारिता"॥ [ ]

इत्यादि वर्णितम् तदप्यपोहाभ्युपगमेऽसङ्गतम्, यतः—

"विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते।
न भवेद् व्यतिरेकोऽपि तस्य तत्पूर्वको ह्यसौ" ॥ [श्लो० वा० अपो० श्लो० ११०]

विधिनिवृत्तिलक्षणत्वाद् व्यतिरेकस्येति भावः।

किञ्च, नीलोत्पलादिशब्दानां विशेषणविशेष्यभावः सामानाधिकरण्यं च यदेतल्लोकप्रतीतं तस्यापह्नवोऽपोहवादिनः प्रसक्तः। यच्चेदं विशेषणविशेष्यभाव-सामानाधिकरण्यसमर्थनार्थमुच्यते–

"अपोह्यभेदाद् भिन्नार्था स्वार्थभेदगतौ जडा।
एकत्वाभिन्नकार्यत्वाद् विशेषणविशेष्यता" ॥ [ ]
"तन्मात्राकाङ्क्षणाद् भेदः स्वसामान्येन नोज्झितः।
नोपात्तः संशयोत्पत्तेः सैव चैकार्थता तयोः" ॥ [ ] इति,

तदप्यनुपपन्नम्; यतः परस्परं व्यवच्छेदा(द्य)व्यवच्छेदकभावो विशेषणविशेष्यभावः; स च बाह्य (वाक्य) एव व्यवस्थाप्यते यथा 'नीलो(नीलमु)त्पलम्' इति। व्यधिकरणयोरपि यथा 'राज्ञः पुरुषः' इत्यादौ। भिन्ननिमित्तप्रयुक्तयोस्तु शब्दयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्; तच्च 'नीलोत्पलम्' इत्यादौ वृत्तावेव व्यवस्थाप्यते। न च नीलोत्पलादिशब्देषु शबलार्थाभिधायिषु तत्सिद्धिः, शबलार्थाभिधायित्वं च तेषाम्—

"न हि तत् केवलं नीलं न च केवलमुत्पलम्।
समुदायाभिधेयत्वात्" [ ]

इत्यादिना प्रतिपादितम्। यतः नीलत्वव्युदासेऽनुत्पलव्युदासो नास्ति, नाप्यनुत्पलप्रच्युता-

१ "वृष्टिमेघासतोर्दृष्ट्वा यद्यनैकान्तिकं वदेत्। वस्त्वेवाऽत्रापि मत्पक्षे भवत्पक्षेऽप्यदः कुतः" ॥
श्लो० वा० अपो० श्लो० १०९। तत्त्वसं० का० ९६५ पृ० ३०७।

२ "प्रयोगे"–प्रमेयक० पृ० १२८ प्र०पं० ५। "मत्पक्षेऽत्रापि वृष्टिमेघाभावप्रयोगे"–तत्त्वसं० पञ्जि० पृ० ३०७ पं० १०।

३ **यथा** आ०। ४ **अदृष्टेरन्यशब्दार्थस्वार्थ**–हा०। **अदृष्टेरन्यशब्दार्थे** कां०। **अदृष्टैरन्यशब्दार्थे स्वा**–वि०। **अदृष्टेऽप्यन्यशब्दार्थस्वा**–वा० बा०। ५ **श्रुते संबन्धसौकार्ये** आ० हा० वि० कां०। **श्रुतोः संबन्धसौकर्यम्** वा० बा०। ६ तत्त्वसं० पञ्जि० पृ० ३०७ पं० १७। ७–**रूपस्य श**–वा० बा०। ८ तत्त्वसं० का० ९६६ पृ० ३०७। ९ **भिन्नार्थाः** हा० वि०। **भिन्नार्थाऽस्वा**–आ०। १० **एकत्राभि**–आ० हा० वि०।

११ "अपोह्यभेदाद् भिन्नार्थाः स्वार्थभेदगतौ जडाः। एकत्राभिन्नकार्यत्वाद् विशेषणविशेष्यकाः" ॥
तत्त्वसं० पञ्जि० पृ० ३०७ पं० २५।

१२–**न चोज्झितः** वि०। १३–**पात्तसं**–वा० बा०। १४–**शयोत्पत्तिः** वि०। १५–**व वैका**–आ०।

१६ "साम्ये चैकार्थता तयोः"–तत्त्वसं० पञ्जि० पृ० ३०७ पं० २७। श्लो० वा० पार्थ० व्या० पृ० ६०८ पं० २४।

१७ "अपोहमात्रवाच्यत्वं यदि चाऽभ्युपगम्यते। नीलोत्पलादिशब्देषु शबलार्थाभिधायिषु" ॥
"विशेषणविशेष्यत्व–सामानाधिकरण्ययोः। न सिद्धिर्न ह्यनीलत्वव्युदासेऽनुत्पलच्युतिः" ॥
"नापि तत्रेतरस्तस्मान्न विशेष्य–विशेषणे। शब्दयोर्नापि ते स्यातामभिधेयाऽनपेक्षयोः" ॥
श्लो० वा० अपो० श्लो० ११५–११६–११७। तत्त्वसं० का० ९६७–९६८–९६९ पृ० ३०८।

१८–**स्परं व्यवच्छेदकभा**–भां० मां० विना। १९ "स च वाक्य एव"–तत्त्वसं० पञ्जि० पृ० ३०८ पं० ९।

२० "यथा नीलमुत्पलमिति"–तत्त्वसं० पञ्जि० पृ० ३०८ पं० १०। २१ तत्त्वसं० पञ्जि० ३०८ पं० १४। शास्त्रवा० स्याद्वादक० पृ० ४०६ प्र० पं० ३। २२–**नीलव्यु**–आ०।

वनीलव्युदास इति नानयोः परस्परमाधाराधेयसम्बन्धोऽस्ति नीलरूप(नीरूप)त्वात्; न चासति सम्बन्धे विशेषणविशेष्यभावो युक्तः अतिप्रसङ्गात्; अतो युष्मन्मतेनाभाववाचित्वाच्छबलार्थाभिधायित्वासम्भवान्न विशेषणविशेष्यभावो युक्तः। अभिधेयद्वारेणैव हि तदभिधायिनोः शब्दयोर्विशेषणविशेष्यभाव उपचर्यते, अभिधेये च तस्यासम्भवेऽभिधानेऽपि कुतस्तदारोपः?

सामानाधिकरण्यमपि नीलोत्पलशब्दयोर्न सम्भवति, तद्वाच्ययोरनीलानुत्पलव्यवच्छेदलक्षणयोरपोहयोर्भिन्नत्वात्। तच्च भवद्भिरेव

'अपोह्यभेदाद् भिन्नार्था'

इत्यभिधानादवसीयते। प्रयोगः–न नीलोत्पलादिशब्दाः समानाधिकरणव्यवहारविषयाः, भिन्नविषयत्वात्, घटादिशब्दवत्। न च यत्रैव ह्यर्थेऽनुत्पलव्युदासो वर्त्तते तत्रैवानीलव्युदासोऽपीति नीलोत्पलशब्दवाच्ययोरपोहयोरेकस्मिन्नर्थे वृत्तेः अर्थद्वारकं सामानाधिकरण्यं शब्दयोरपीति वक्तुं युक्तम्, अपोहयोर्नीरूपत्वेन क्वचिदवस्थानासम्भवतो वास्तवाधेयतायोगाद् वन्ध्यासुतस्येव।

भवतु वा नीलोत्पलादिष्वर्थेषु तयोराधेयता तथापि सा विद्यमानापि न शब्दैः प्रतिपाद्यते, यतस्तदेवासाधारणत्वान्नीलोत्पलादि वस्तु न शब्दगम्यम्, स्वलक्षणस्य सर्वविकल्पातीतत्वात् तद्प्रतिपत्तौ च तदधिकरणयोरपोहयोस्तदाधेयता कथं ग्रहीतुं शक्या धर्म्मिग्रहणनान्तरीयकत्वाद् धर्मग्रहणस्य? न चासाधारणवस्तुव्यतिरेकेण तयोरन्यदधिकरणं सम्भवति भवदभिप्रायेण। न चाप्रतीयमानं सदपि सामानाधिकरण्यव्यवहाराङ्गम् अतिप्रसङ्गात्। न च व्यावृत्तिमद् वस्तु शब्दवाच्यम्—यतो व्यावृत्तिद्वयोपाधिकयोः शब्दयोरेकस्मिन्नपोहवति वस्तुनि वृत्तेः सामानाधिकरण्यं भवेत्—परतन्त्रत्वाद् नीलादिशब्दस्येतरभेदानाक्षेपकत्वात्; स हि व्यावृत्त्युपसर्जनं तद्वन्तमर्थमाह न साक्षात् ततश्च साक्षादनभिधानात् तद्वतभेदाक्षेपो न सम्भवति, यथा–मधुरशब्देन शुक्लादेः। यद्यपि शुक्लादीनां मधुरादिभेदत्वमस्ति तथापि शब्दस्य साक्षादभिहितार्थगतस्यैव भेदस्याक्षेपे सामर्थ्यम् न तु पारतन्त्र्येणाभिहितार्थगतस्य; ततश्च नीलादिशब्देन तद्वतभेदानाक्षेपात् उत्पलादीनामतद्भेदत्वं स्यात्; अतद्भेदत्वे च न सामान्याधिकरण्यम्; तेन जातिमन्मात्रपक्षे यो दोषः प्रतिपादितो भवता "तद्वतो न वाचकः शब्दः, अस्वतन्त्रत्वात्" [ ] इति स व्यावृत्तिमन्मात्रपक्षेऽपि तुल्यः। तथाहि–जातिमन्मात्रे शब्दार्थे सच्छब्दो जातिस्वरूपोपसर्जनं द्रव्यमाह न साक्षादिति तद्वतघटादिभेदानाक्षेपात् अतद्भेदत्वे सामानाधिकरण्याभावप्रसङ्ग उक्तः; स व्यावृत्तिमन्मात्रपक्षेऽपि समानः—तत्रापि हि सच्छब्दो व्यावृत्त्युपसर्जनं द्रव्यमाह न साक्षादिति तद्वतभेदानाक्षेपोऽत्रापि समान एव; को ह्यत्र विशेषः जातिव्या(र्या)वृत्तिर्जातिमद्या(र्जातिमान् व्या)वृत्तिमानिति।

न च लिङ्ग-सङ्ख्या-क्रिया-कालादिभिः सम्बन्धोऽपोहस्यावस्तुत्वाद् युक्तः, एषां वस्तुधर्म्मत्वात्। न च लिङ्गादिविविक्तः पदार्थः शक्यः शब्देनाभिधातुम्, अतः प्रतीतिबाधाप्रसङ्गः प्रतिज्ञायाः।

१ "नीरूपत्वात्"–तत्त्वसं० पञ्जि० पृ० ३०८ पं० १८। वि० प्रतावपि तथैव संशोधितं दृश्यते।

२ "सामानाधिकरण्यं च न भिन्नत्वादपोहयोः। अर्थतश्चैतदिष्येत कीदृश्याधेयता तयोः" ॥
श्लो० वा० अपो० श्लो० ११८। तत्त्वसं० का० ९७० पृ० ३०८।

३ **भिन्नार्थैत्यभि**–भां० मां० विना। ४ पृ० १९६ पं० १४। ५–**नीलरूप**–वा० बा० विना। ६–**गाद्व-स्तुतस्यैव**–भां० मां० वा० बा० विना।

७ "न चासाधारणं वस्तु गम्यतेऽन्यच्च नास्ति ते। अगम्यमानमैकार्थ्यं शब्दयोः क्वोपयुज्यते" ॥
श्लो० वा० अपो० श्लो० ११९। तत्त्वसं० का० ९७१ पृ० ३०९।

८ "अथान्यापोहवद्वस्तु वाच्यमित्यभिधीयते। तत्रापि परतन्त्रत्वाद् व्याप्तिः शब्देन दुर्लभा" ॥
श्लो० वा० अपो० श्लो० १२०। तत्त्वसं० का० ९७२ पृ० ३०९।

९–**दानापेक्षक**–भां० मां०। १०–**त्वात् न हि** वा० बा०। ११ "अतद्भेदत्वे च सामानाधिकरण्यं न प्राप्नोति"–तत्त्वसं० पञ्जि० पृ० ३१० पं० ६। १२ तत्त्वसं० पञ्जि० पृ० ३१० पं० ७। "जातिमदभिधानेऽपि 'तद्वतो नाऽस्वतन्त्रत्वात्' इत्यादिना सामानाधिकरण्यानुपपत्तिर्भिक्षुणा दर्शिता"–श्लो० वा० पार्थ० व्या० पृ० ५९८ पं० ७।

१३ **जातिव्यावृत्तिजातिमद्व्यावृत्तिमानिति** वि०। **जातिमद्व्यावृत्तिमानिति** आ०। **जातिमाव्यामावृत्तिमानिति** वा० बा०। "को ह्यत्र विशेषः जातिर्व्यावृत्तिर्जातिमान् व्यावृत्तिमानिति"–तत्त्वसं० पञ्जि० पृ० ३१० पं० १२।

१४ "लिङ्ग–संख्यादिसंबन्धो न वाऽपोहस्य विद्यते। व्यक्तेरव्यपदेश्यत्वात् तद्वारेणापि नास्त्यसौ" ॥
श्लो० वा० अपो० श्लो० १३५। तत्त्वसं० का० ९७३ पृ० ३१०।

न च व्यावृत्त्याधारभूताया[1] व्यक्तेर्वस्तुत्वाल्लिङ्गादिसम्बन्धात् तद्द्वारेणापोहस्याप्यसौ व्यवस्थाप्यः, व्यक्तेर्निर्विकल्पकज्ञानविषयत्वाल्लिङ्ग-सङ्ख्यादिसम्बन्धेन व्यपदेष्टुमशक्यत्वात् अपोहस्य तद्द्वारेण तद्व्यवस्थाऽसिद्धेः।

अव्यापित्वं चापोहशब्दार्थव्यवस्थायाः, 'पचति' इत्यादिक्रियाशब्देष्वन्यव्यवच्छेदाप्रतिपत्तेः। यथा हि घटादिशब्देषु निष्पन्नरूपं पटादिकं निषेध्यमस्ति न तथा 'पचति' इत्यादिषु; प्रतियोगिनो निष्पन्नस्य कस्यचिदप्रतीतेः। अथ मा भूत् पर्युदासरूपं निषेध्यम्, 'न पचति' इत्येवमादि प्रसज्यरूपं 'पचति' इत्यादेर्निषेध्यं भविष्यति, असदेतत्; 'तन्न (न न) पचति' इत्येवमुच्यमाने प्रसज्यप्रतिषेधस्य निषेध एवोक्तः स्यात्, ततश्च प्रतिषेधद्वयस्य विधिविषयत्वाद् विधिरेव शब्दार्थः प्रसक्तः। किञ्च, 'पचैति' इत्यादौ साध्यत्वं प्रतीयते; यस्यां हि क्रियायां केचिदवयवा निष्पन्नाः केचिदनिष्पन्नाः सा पूर्वापरीभूतावयवा क्रिया साध्यत्वप्रत्ययविषयः, तथा, 'अभूत्' 'भविष्यति' इत्यादौ भूतादिकालविशेषप्रतीतिरस्ति, न चापोहस्य साध्यत्वादिसम्भवः निष्पन्नत्वादभावैकरसत्वेन; तस्मादपोहशब्दार्थपक्षे साध्यत्वप्रत्ययो भूतादिप्रत्ययश्च निर्निमित्तः प्राप्नोतीति प्रतीतिबाधा। नँ च विध्यादावन्यापोहप्रतिपत्तिरस्ति, पर्युदासरूपस्य निषेध्यस्य तत्राभावात्। 'न न पचति देवदत्तः' इत्यादौ च नञा(ञो)ऽपरेण नञा योगे नैवापोहः, प्रतिषेधद्वयेन विधेरेव संस्पर्शात्। अपि च, चादीनां निपातोपसर्गकर्मप्रवचनीयानां पदत्वमिष्टम्, न चैषां नञा सम्बन्धोऽस्ति असम्बन्धवचनत्वात्। तथाहि—यथा हि घटादिशब्दानाम् 'अघटः' इत्यादौ नञा सम्बन्धेऽर्थान्तरस्य पटादेः परिग्रहात् तद्व्यवच्छेदेन नञा रहितस्य घटशब्दस्यार्थोऽवकल्पते न तथा चादीनां नञा सम्बन्धोऽस्ति, न चासम्बन्ध्यमानस्य नञाऽपोहनं युक्तम्; अतश्चादिष्वपोहाभावः। अपि च, कल्माषवर्णवच्छबलैकयरूपो वाक्यार्थ इति नान्यनिवृत्तिस्तत्त्वेन व्यपदेष्टुं शक्या, निष्पन्नरूपस्य प्रतियोगिनोऽप्रतीतेः। यो तु 'चैत्र! गामानय' इत्यादावचैत्रादिव्यवच्छेदरूपाऽन्यनिवृत्तिरवयवपरिग्रहेण वर्ण्यते सा पदार्थ एव स्यात् न वाक्यार्थः; तस्यावयवस्येत्थं विवेक्तुमशक्यत्वादित्यव्यापिनी शब्दार्थव्यवस्था।

१—**वृत्ताधारभूतायां** वा० बा० आ० हा० वि०।

२ "आख्यातेषु च नान्यस्य निवृत्तिः संप्रतीयते। न पर्युदासरूपं हि निषेध्यं तत्र विद्यते" ॥
श्लो० वा० अपो० श्लो० १३९। तत्त्वसं० का० ९७४ पृ० ३१०।

३ "प्रसज्यरूपं 'पचति' इत्यादेर्निषेध्यं भविष्यतीत्याह—'न न पचति' इत्येवमुच्यमाने"—तत्त्वसं० पञ्जि० पृ० ३११ पं० ४—१०।

४ "न नेति ह्युच्यमानेऽपि निषेधस्य निषेधनम्। पचतीत्यनिषिद्धं तु स्वरूपेणावतिष्ठते" ॥
श्लो० वा० अपो० श्लो० १४०। तत्त्वसं० का० ९७५ पृ० ३११।

५ "साध्यत्वप्रत्ययश्चात्र तथा भूतादिरूपणम्। निष्पन्नत्वादपोहस्य निर्निमित्तं प्रसज्यते" ॥
श्लो० वा० अपो० श्लो० १४१। तत्त्वसं० का० ९७६ पृ० ३११।

६ "यस्याः क्रियायाः"—तत्त्वसं० पञ्जि० पृ० ३११ पं० १३।

७ "विध्यादावर्थराशौ च नान्यापोहनिदर्शनम्। नञश्चापि नञा युक्तादपोहः कीदृशो भवेत्" ॥
श्लो० वा० अपो० श्लो० १४२। तत्त्वसं० का० ९७७ पृ० ३११।

८ "आदिशब्देन निमन्त्रणाऽऽमन्त्रणादीनां ग्रहणम्"—तत्त्वसं० पञ्जि० पृ० ३११ पं० २६। "निमन्त्रणादीनां विभक्त्यर्थानां च कर्मादीनामादिशब्देन ग्रहणमिति"—श्लो० वा० पार्थ० व्या० पृ० ६०५ पं० ८। ९ **निषेध्यस्य** मां०। १० "नञोऽपरेण नञा"—तत्त्वसं० पञ्जि० पृ० ३११ पं० २८। शास्त्रवा० स्याद्वादक० पृ० ४०७ द्वि० पं० ९। ११ **—न विधिरेव** वा० विना०। १२ **असंबद्धव**—भां० मां०। "असत्त्ववचनत्वात्"—तत्त्वसं० पञ्जि० पृ० ३१२ पं० ३। शास्त्रवा० स्याद्वादक० पृ० ४०७ द्वि० पं० १४। १३—**दे नञा** भां० मां० विना। १४—**स्यार्थो विकल्प्यते** भां० मां०।

१५ "चादीनामपि नञ्योगो नैवास्तीत्यनपोहनम्। वाक्यार्थोऽन्यनिवृत्तिश्च व्यपदेष्टुं न शक्यते" ॥
श्लो० वा० अपो० श्लो० १४३। तत्त्वसं० का० ९७८ पृ० ३११।

१६ "न तथा चादीनाम् 'न च'इत्यादिनञा"—तत्त्वसं० पञ्जि० पृ० ३१२ पं० ६। १७ **चासंबध्यमान**—वा० बा०। १८ "किञ्च, वाक्यार्थः कल्माषवर्णवच्छबलैकरूप इष्यते"—तत्त्वसं० पञ्जि० पृ० ३१२ पं० ७। शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ३। १९ **यत्तु** भां० मां०। शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ३। २० "तस्यानवयवस्येत्थं विवेक्तुमशक्यत्वात्"—तत्त्वसं० पञ्जि० पृ० ३१२ पं १०।

किञ्च, 'न अन्यापोहः अनन्यापोहः' इत्यादौ शब्दे विधिरूपादन्यद् वाच्यं नोपलभ्यते, प्रतिषेधद्वयेन विधेरेवावसायात्। अत्र च 'नञश्चापि नञा योगे' इत्यनेनार्थस्य गतत्वेऽपि 'अन्यापोहः शब्दार्थः' इत्येवंवादिनां स्ववचनेनैव विधिरिष्ट इति ज्ञापनार्थं पुनरुक्तम्। तथाहि—अनन्यापोहशब्दस्यान्यापोहः शब्दार्थो व्यवच्छेद्यः; स च विधेर्नान्यो लक्ष्यते। ये च प्रमेय-ज्ञेयाऽभिधेयादयः शब्दास्तेषां न किञ्चिदपोह्यमस्ति, सर्वस्यैव प्रमेयादिस्वभावत्वात्। तथाहि—यन्नाम किञ्चिद् व्यवच्छेद्यमेषां कल्प्यते तत् सर्वं व्यवच्छेद्याकारेणालम्ब्यमानं ज्ञेयादिस्वभावमेवावतिष्ठते, न ह्यविषयीकृतं व्यवच्छेत्तुं शक्यम्; अतोऽपोह्याभावाद्व्यापिनी व्यवस्था।

ननु हेतुमुखे निर्दिष्टम् "अज्ञेयं कल्पितं कृत्वा तद्व्यवच्छेदेन ज्ञेयेऽनुमानम्" [हेतु०] इति तत् कथमव्यापित्वं शब्दार्थव्यवस्थायाः, नैतत्; यतो यदि ज्ञेयमप्यज्ञेयत्वेनापोह्यमस्य कल्प्यते तदा वरं वस्त्वेव विधिरूपं शब्दार्थत्वेन कल्पितं भवेत् यदध्यवसीयते लोकेन; एवं ह्यदृष्टाध्यारोपो दृष्टापलापश्च न कृतः स्यात्।

[विकल्पप्रतिबिम्बार्थवादिमतमुल्लिख्य तन्निरसनम्]

ये त्वाहुः—"विकल्पप्रतिबिम्बमेव सर्वशब्दानामर्थः, तदेव चाभिधीयते व्यवच्छिद्यत इति च" [ ] तेऽपि न युक्तकारिणः। निराकारा बुद्धिः आकारवान् बाह्योऽर्थः—

"स बहिर्देशसम्बन्धो विस्पष्टमुपलभ्यते" [ ]

इत्यादिना ज्ञानाकारस्य निषिद्धत्वात् आन्तरस्य बुद्ध्यारूढस्याकारस्यासत्त्वात् तदवसायकत्वं शब्दानामयुक्तम्; अत एव तस्यापोह्यत्वमप्यनुपपन्नम्।

ये चैं 'एवम्' 'इत्थम्' इत्यादयः शब्दास्तेषामपि न किञ्चिदपोह्यम्, प्रतियोगिनः पर्युदासरूपस्य कस्यचिदभावात्। अथ 'नैवम्' इत्यादिप्रसज्यरूपं प्रतिषेध्यमत्रापि भविष्यति, न; उक्तोत्तरत्वात्।

"न नैवमिति निर्देशे निषेधस्य निषेधनम्।
एवमित्यनिषेध्यं तु स्वरूपेणैव तिष्ठति ॥" [ ]

इति न्यायात्।

---

१ "अनन्यापोहशब्दादौ वाच्यं न च निरूप्यते। प्रमेय-ज्ञेयशब्दादेरपोह्यं कुत एव तु" ॥
श्लो० वा० अपो० श्लो० १४४। तत्त्वसं० का० ९७९ पृ० ३११।

२ **नान्यापोह इत्यादौ** वा० बा०। प्रमेयक० पृ० १२८ प्र० पं० ८। शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ५। ३ **अनन्यापोहः शब्दार्थो व्यवच्छेद्यः** आ०। "अन्यापोहशब्दस्य अनन्यापोहशब्दार्थो व्यवच्छेद्यः"—तत्त्वसं० पञ्जि० पृ० ३१२ पं० १६। ४ प्रमेयक० पृ० १२६ प्र० पं० ५। शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ७। ५ "अव्यापिन्यपोहव्यवस्था"—शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ७। ६—**तुमुखेन नि**—कां०। हेतुमुखनामा ग्रन्थः। ७ "यत्तु अत्र दिङ्नागेनोक्तम्—"अज्ञेयं कल्पितं कृत्वा ज्ञेयशब्दः प्रवर्तते" इति"—श्लो० वा० पार्थ० व्या० पृ० ६०५ पं० ९। ८ "अपोह्यकल्पनायां तु वरं वस्त्वेव कल्पितम्"। श्लो० वा० अपो० श्लो० १४५। तत्त्वसं० का० ९८० पृ० ३१२। ९ **कल्पते** आ० हा०। १०—**रूपशब्दा**—भां० मां० विना। ११—**व वाभि**—भां० मां० विना। १२ तत्त्वसं० पञ्जि० पृ० ३१३ पं० ३। १३ "ज्ञानाकारनिषेधाच्च नान्तरार्थाभिधेयता" ॥ श्लो० वा० अपो० श्लो० १४५। तत्त्वसं० का० ९८० पृ० ३१२।

१४ "स बहिर्देशसंबद्ध इत्यनेन निरूप्यते। ग्राह्याकारस्य संवित्तिर्ग्राहकानुभवादृते"॥ श्लो० वा० शून्य० श्लो० ७९।

१५—**स्यासंभवत्वात् तद्**—कां०।

१६ "न चाप्यपोह्यता तस्मान्नापोहस्तेषु सिध्यति। एवमित्यादिशब्दानां नवाऽपोह्यं निरूप्यते" ॥
श्लो० वा० अपो० श्लो० १४६। तत्त्वसं० का० ९८१ पृ० ३१२।

१७ "न हि अनेवं नामेति किञ्चिदस्ति, प्रकारवचनत्वाद् 'एवं'शब्दस्य; सर्वस्य च प्रकारभाक्त्वे नैवंभावाऽयोगादिति"—श्लो० वा० पार्थ० व्या० पृ० ६०५ पं० १५। १८ पृ० १९८ पं० ७ तथा पं० २७। १९ "एतत् सर्वं कुमारिलोक्तमुपन्यस्तम्"—तत्त्वसं० पञ्जि० पृ० ३१३ पं० १३।

[अपोहपक्षे उद्द्योतकरकृतानामाक्षेपाणामुपन्यासः]

उद्द्योतकरस्त्वाह–"अपोहः शब्दार्थः इत्ययुक्तम् अव्यापकत्वात्। यत्र द्वैराश्यं भवति तत्रेतरप्रतिषेधादितरः प्रतीयते, यथा–'गौः' इति पदाद् गौः प्रतीयमानः [3]अगौर्निषिध्यमानः; न पुनः सर्वपद एतदस्ति, न ह्यसर्वं नाम किञ्चिदस्ति यत् सर्वशब्देन निवर्तेत। अथ मन्यसे एकादि असर्वं तत् सर्वशब्देन निवर्त्तत इति, तन्न; स्वार्थापवाददोषप्रसङ्गात्। एवं ह्येकादिव्युदासेन प्रवर्त्तमानः सर्वशब्दोऽङ्गप्रतिषेधादङ्गव्यतिरिक्तस्याङ्गिनोऽनभ्युपगमादनर्थकः स्यात्। अङ्गशब्देन ह्येकदेश उच्यते; एवं सति सर्वे समुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्त्तमानाः समुदायिव्यतिरिक्तस्यान्यस्य समुदायस्याऽनभ्युपगमादनर्थकाः प्राप्नुवन्ति। द्व्यादिशब्दानां तु समुच्चयविषयत्वादेकादिप्रतिषेधे प्रतिषिध्यमानार्थानामसमुच्चयत्वादनर्थकत्वं स्यात्" [अ० २ आ० २ सू० ६७ न्यायवा० पृ० ३२९ पं० १२–२३]

"यश्चायमगोऽपोहोऽगौर्न भवतीति गोशब्दस्यार्थः; स किञ्चिद् भावः, अथाभावः? भावोऽपि सन् किं गौः, अथागौरिति। यदि गौः नास्ति विवादः। अथागौः, गोशब्दस्यागौरर्थ इत्यतिशब्दार्थकौशलम्। अथाभावः, तन्न युक्तम्; प्रैष-सम्प्रतिपत्त्योरविषयत्वात्; न हि शब्दश्रवणादभावे प्रैषः—प्रतिपादकेन श्रोतुरर्थे विनियोगः—प्रतिपादकधर्म्मः, सम्प्रतिपत्त(त्ति)श्च—[9]श्रोतृधर्म्मो—भवेत्। अपि च, शब्दार्थः प्रतीत्या प्रतीयते, न च गोशब्दादभावं कश्चित् प्रतिपद्यते" [न्यायवा० पृ० ३२९ पं० ५–११]

किञ्च, "क्रियारूपत्वादपोहस्य विषयो वक्तव्यः। तत्र 'अगौर्न भवति' इत्ययमपोहः किं गोविषयः, अथागोविषयः? [11]यदि गोविषयः कथं गोर्गव्येवाऽभावः? अथागोविषयः कथमन्यविषयादपोहादन्यत्र प्रतिपत्तिः, न हि खदिरे छिद्यमाने पलाशे छिदा भवति। [12]अथागोर्गवि प्रतिषेधो 'गौरगौर्न भवति' इति, केनागोत्वं प्रसक्तं यत् प्रतिषिध्यत इति" [न्यायवा० पृ० २०३२९ पं० २४–पृ० ३३० पं० ४]

---

१ "साम्प्रतं 'सर्वशब्दस्य' इत्यादिनोद्द्योतकरोक्तमपोहदूषणमाशङ्कते"–तत्त्वसं० पञ्जि० पृ० ३१३ पं० १३।

"सर्वशब्दस्य कश्चार्थो व्यवच्छेद्यः प्रकल्प्यते। नाऽसर्व(र्वं)नाम किञ्चिद्धि भवेद् यस्य निराक्रिया" ॥
"एकाद्यसर्वमिति चेदर्थापोहः प्रसज्यते। अज्ञानां प्रतिषिद्धत्वादनिष्टेश्चाज्ञिनः पृथक्" ॥
"एवं समूहशब्दार्थे समुदायिव्यपोहतः। अन्यानिष्टेश्च सर्वेऽपि प्राप्नुवन्ति निरर्थकाः" ॥
"द्व्यादिशब्दा इहेष्टाश्च ये समुच्चयगोचराः। एकादिप्रतिषेधेन न भवेयुस्तथाविधाः" ॥
"नागौरिति च योऽपोहो गोशब्दस्यार्थ उच्यते। स किं भावोऽथवाऽभावो भावो गौर्वाऽथवाऽप्यगौः" ॥
"गौश्चेन्नास्ति विवादोऽयमर्थस्तु विधिलक्षणः। अगौर्गोशब्दवाच्यश्चेदतिशब्दार्थकौशलम्" ॥
"अभावोऽपि न युक्तोऽयं प्रैषादीनामसंभवात्। न हि गोशब्दतः कश्चिदभावं प्रतिपद्यते" ॥
तत्त्वसं० का० ९८२–९८३–९८४–९८५–९८६–९८७–९८८ पृ० ३१३।

२ "तत्रेतरप्रतिषेधादितरत् प्रतीयते"–तत्त्वसं० पञ्जि० पृ० ३१४ पं० ३। ३ "अगौर्निषेध्यमानः"–तत्त्वसं० पञ्जि० पृ० ३१४ पं० ३। ४–**वर्त्यत** भां० मां०। ५–**यत्वादाकाशा(देकदेशा)दि**–वा० बा० विना। **–यत्वादाकाशादिप्रतिषिध्यमाना**–भां० मां० विना। ६–**स्यार्थः किञ्चि (किंस्वित्)** आ० हा०। ७ "स किं भावः अथाऽभावः"–न्यायवा० पृ० ३२९ पं० ६। तत्त्वसं० पञ्जि० पृ० ३१४ पं० १२। ८ **इत्यतिसंशब्दा**–मां०। **इत्यादिशब्दा**–बा०। ९ "संप्रतिपत्तिः श्रोतृधर्मः"–तत्त्वसं० पञ्जि० पृ० ३१४ पं० १७। १० **श्रोत्रध**–भां० मां० विना। **श्रौत्रध**–वि०। ११ "यदि गौर्विषयः"–तत्त्वसं० पञ्जि० पृ० ३१४ पं० २१।

१२ "नागौर्गौरिति शब्दार्थः कस्माच्चापोह इष्यते। केन ह्यगोत्वमासक्तं गौ(गो)र्यैनैतदपोह्यते" ॥
तत्त्वसं० का० ९८९ पृ० ३१४।

"इतश्चायुक्तोऽपोहः विकल्पानुपपत्तेः। तथाहि–योऽयमगोरपोहो गवि स किं गोव्यतिरिक्तः, आहोश्विदव्यतिरिक्तः? यदि व्यतिरिक्तः स किमाश्रितः, अथानाश्रितः? यद्याश्रितस्तदाऽऽश्रितत्वाद् गुणः प्राप्तः; ततश्च—गोशब्देन गुणोऽभिधीयते 'न गौः' इति—'गौस्तिष्ठति' 'गौर्गच्छति' इति न सामानाधिकरण्यं प्राप्नोतीति। अथानाश्रितस्तदा केनार्थेन 'गोरगोपोहः' इति षष्ठी स्यात्? अथाव्यतिरिक्तस्तदा गौरेवासाविति न किञ्चित् कृतं भवति" [न्यायवा० पृ० ३३० पं० ८–१४] ५

"[4]अयं चापोहः प्रतिवस्त्वेकः, अनेको वेति वक्तव्यम्। यद्येकस्तदानेकगोद्रव्यसम्बन्धी गोत्वमेवासौ भवेत्। अथानेकस्ततः पिण्डवदानन्त्याद्याख्यानानुपपत्तेरवाच्य एव स्यात्" [न्यायवा० पृ० ३३० पं० १५–१७] किञ्च, "इदं तावत् प्रष्टव्यो भवति भवान्–किमपोहो वाच्यः, अथावाच्य इति। वाच्यत्वे विधिरूपेण वाच्यः स्यात्, अन्यव्यावृत्त्या वा? तत्र यदि विधिरूपेण तदा नैकान्तिकः शब्दार्थः 'अन्यापोहः शब्दार्थः' इति। अथान्यव्यावृत्त्येति पक्षस्तदा तस्याप्यन्यव्यवच्छेदस्यापरेणा- १० न्यव्यवच्छेदरूपेणाभिधानम् तस्याप्यपरेणेत्यव्यवस्था स्यात्। अथावाच्यस्तदा 'अन्यशब्दार्थापोहं शब्दः करोति' इति व्याहन्येतँ" [न्यायवा० पृ० ३३० पं० १८–२२]

आचार्यदिग्नागोक्तम्—"सर्वत्राभेदादाश्रयस्यानुच्छेदात् कृत्स्नार्थपरिसमाप्तेश्च यथाक्रमं जातिधर्म्मा एकत्व-नित्यत्व-प्रत्येकपरिसमाप्तिलक्षणा अपोह एवावतिष्ठन्ते; तस्माद् गुणोत्कर्षादर्थान्तरापोह एव शब्दार्थः साधुः" [ ] इत्येतदाशङ्क्य कुमारिल उपसह(संहर)न्नाह— १५

"अपि चैकत्व-नित्यत्व-प्रत्येकसमवायित्वाः (ताः)।
निरूपाख्येष्वपोहेषु कुर्वतोऽसूत्रकः पटः" ॥
"तस्माद् येष्वेव शब्देषु नञ्योगस्तेषु केवलम्।
भवेदन्यनिवृत्त्यंशः स्वात्मैवान्यत्र गम्यते" ॥ [श्लो० वा० अपो० श्लो० १६३–१६४]

'स्वात्मैव' इति स्वरूपमेव विधिलक्षणम्। 'अन्यत्र' इति नञा रहिते। तन्नापोहः शब्दार्थ इति २० भट्टोद्द्योतकरादयः।

---

१ "अगौरपोहो यश्चायं गवि शब्दार्थ उच्यते। स किं गोर्व्यतिरिक्तो वाऽव्यतिरिक्त उपेयते" ॥
"विभिन्नोऽप्याश्रितो वा स्यादथवा स्यादनाश्रितः। आश्रितत्वे गुणः प्राप्तो न द्रव्यवचनं ततः" ॥
"अतो(ऽ)गौरिति शब्देन गुणमात्राभिधानतः। सामानाधिकरण्यं स्यान्न गौर्गच्छति तिष्ठति" ॥
"अथाऽनाश्रित एवायं यद्यर्थ(षष्ठ्यर्थ)स्तस्य को भवेत्। येनासौ प्रतिषेधाय गौरिति व्यपदिश्यते" ॥
"अथ चाऽव्यतिरिक्तोऽयमन्यापोहस्त्वयेष्यते। गौरेवायमतः प्राप्तः किमुक्तमधिकं ततः" ॥
तत्त्वसं० का० ९९०–९९१–९९२–९९३–९९४ पृ० ३१४–३१५।

२–**युक्तेऽपोह्ये विकल्पा**–वा० बा० विना। ३–**यते तेनागौरिति**–बा०। ४–**स्तथा** भां० मां० विना।

५ "प्रतिभावमपोहोऽयमेकोऽनेकोऽपि वा भवेत्। यद्येकोऽनेकगोयुक्तो गोत्वमेव भवेदसौ" ॥
"अनेकत्वेऽपि चानन्त्यं पिण्डवत् संप्रयुज्यते। तेन भेदवदेवास्य वाच्यता नोपयुज्यते" ॥
तत्त्वसं० का० ९९५–९९६ पृ० ३१५।

६ "अन्यापोहश्च किं वाच्यः किं वाऽवाच्योऽयमिष्यते। वाच्योऽपि विधिरूपेण यदि वाऽन्यनिषेधतः" ॥
"विध्यात्मनाऽस्य वाच्यत्वे त्याज्यमेकान्तदर्शनम्। सर्वत्राऽन्यनिरासोऽयं शब्दार्थ इति वर्णितम्" ॥
"अथाऽपोहव्युदासेन यद्यपोहोऽभिधीयते। तत्र तत्रैवमिच्छायामनवस्था भवेत् ततः" ॥
"अथाऽप्यवाच्य एवायं यद्यपोहस्त्वयेष्यते। तेनाऽन्यापोहकृच्छब्द इति बाध्येत ते वचः" ॥
तत्त्वसं० का० ९९७–९९८–९९९–१००० पृ० ३१५–३१६।

७ "एतत् सर्वमुद्द्योतकरेणोक्तमुपन्यस्तम् तत्राचार्यदिग्नागेनोक्तम्"–तत्त्वसं० पञ्जि० पृ० ३१६ पं० १२।

८ "योऽपि जातिधर्मातिदेशोऽपोहे कृतः "जातिधर्मव्यवस्थितेः" इति, सोऽयुक्तः"–श्लो० वा० पार्थ० व्या० पृ० ६११ पं० १४।

९ **उपहसन्नाह** भां० मां०। "उपसंहरन्नाह"–तत्त्वसं० पञ्जि० पृ० ३१६ पं० १५। "उपसंहरति"–श्लो० वा० पार्थ० व्या० पृ० ६११ पं० १५। १०–**मवायिनि**। वा० बा० विना। ११ तत्त्वसं० का० १००१ पृ० ३१६। १२ तत्त्वसं० का० १००२ पृ० ३१६।

[स्वपक्षाक्षेपेषु प्रतिविधातव्येषु पूर्वम् अपोहवादिकृतं स्वमतस्पष्टीकरणम्]

अत्र सौगताः प्रतिविदधति—द्विविधोऽस्माकमपोहः पर्युदासलक्षणः प्रसज्यप्रतिषेधलक्षणश्च । पर्युदासलक्षणोऽपि द्विविधः–बुद्धिप्रतिभासोऽर्थेष्वनुगतैकरूपत्वेनाध्यवसितो बुद्ध्यात्मा, विजातीयव्यावृत्तस्वलक्षणार्थात्मकश्च । तत्र यथा हरीतक्यादयो बहवोऽन्तरेणापि सामान्यलक्षणमेकमर्थं ज्वरादिशमनं कार्यमुपजनयन्ति तथा शाबलेयादयोऽप्यर्थाः सत्यपि भेदे प्रकृतैकाकारपरामर्शहेतवो भविष्यन्त्यन्तरेणापि वस्तुभूतं सामान्यम् । तदनुभवबलेन यदुत्पन्नं विकल्पज्ञानं तत्र यदर्थाकारतयाऽर्था(र्थ)प्रतिबिम्बकं ज्ञानादभिन्नमाभाति तत्र 'अन्यापोहः' इति व्यपदेशः । न चासावर्थाभासो ज्ञानतादात्म्येन व्यवस्थितः सन् बाह्यार्थाभावेऽपि तस्य तत्र प्रतिभासनाद् बाह्यकृतः ।

न चापोहव्यपदेशस्तत्र निर्निमित्तः, मुख्य-गौणभेदभिन्नस्य निमित्तस्य सद्भावात् । तथाहि—विकल्पान्तरारोपितप्रतिभासान्तरोद्भावन(प्रतिभासान्तराद् भेदेन) स्वयं प्रतिभासनात् मुख्यस्तत्र तद्व्यपदेशः 'अपोह्यत इत्यपोहः अन्यस्मादपोहः अन्यापोहः' इति व्युत्पत्तेः । उपचारात् तु त्रिभिः कारणैस्तत्र तद्व्यपदेशः–(१)कारणे कार्यधर्म्मारोपाद् वा अन्यव्यावृत्तवस्तुप्राप्तिहेतुतया, (२) कार्ये वा कारणधर्मोपचारात् अन्यविविक्तवस्तुद्वारायाततया, (३) विजातीयापोढपदार्थेन सहैक्येन भ्रान्तैः प्रतिपत्तृभिरध्यवसितत्वाच्चेति । अर्थस्तु विजातीयव्यावृत्तत्वाद् मुख्यतस्तद्व्यपदेशभाक् ।

प्रसज्यप्रतिषेधलक्षणस्त्वपोहः—

"प्रसज्यप्रतिषेधस्तु गौरगौर्न भवत्ययम् ।
इति विस्पष्ट एवायमन्यापोहोऽवगम्यते" ॥ [तत्त्वसं० का० १०१०]

---

१ "तथाहि–द्विविधोऽपोहः पर्युदास–निषेधतः । द्विविधः पर्युदासोऽपि बुद्ध्यात्माऽर्थात्मभेदतः" ॥
तत्त्वसं० का० १००४ पृ० ३१६ ।

२ **प्रसज्य–कां०** । ३ **व्यावृत्त्यस्व**–वा० बा० विना । ४–**स्वलक्षणमोत्मकश्च** वा० बा० । "विजातीयव्यावृत्तमर्थस्वलक्षणमित्यर्थः"–तत्त्वसं० पञ्जि० पृ० ३१७ पं० ४ । "विजातीयव्यावृत्तसर्वस्वलक्षणम्"–स्याद्वादर० पृ० ३४९ द्वि० पं० १ । शास्त्रवा० स्याद्वादक० पृ० ४०१ द्वि० पं० ९ ।

५ "एकप्रत्यवमर्शस्य य उक्ता हेतवः पुरा । अभयादिसमा अर्थाः प्रकृत्यैवान्यभेदिनः" ॥
"तानुपाश्रित्य यद् ज्ञाने भात्यर्थप्रतिबिम्बकम् । कल्पकेऽर्थात्मताऽभावेऽप्यर्था इत्येव निश्चितम्" ॥
तत्त्वसं० का० १००५–१००६ पृ० ३१७ ।

६ "प्रकृत्यैकाकारप्रत्यवमर्शस्य हेतवः"–तत्त्वसं० पञ्जि० पृ० ३१७ पं० १३ । ७–**याऽर्थापत्तिर्बिंबकं** वा० बा० ।–**याऽर्थप्रतिबन्धकं** भां० मां० ।–**याऽर्थाप्रतिबन्धकं** हा० वि० । "तत्र यदर्थाकारतयाऽर्थप्रतिबिम्बकमर्थाभासो भाति"–तत्त्वसं० पञ्जि० पृ० ३१७ पं० १६ । प्रमेयक० पृ० १२८ द्वि० पं० १ । स्याद्वादर० पृ० ३४९ द्वि० पं० ३ । शास्त्रवा० स्याद्वादक० पृ० ४०१ द्वि० पं० १२ । ८ **न चासामर्थ्याभावो ज्ञानावतदात्म्येनाव्यवस्थितः सन्नाह्यार्थाभावेऽपि तस्य तत्र प्रतिभासनाद्बाह्यकृतः** वा० बा० ।

९ "प्रतिभासान्तराद् भेदादन्यव्यावृत्तवस्तुनः । प्राप्तिहेतुतयाऽश्लिष्टवस्तुद्वारा गतेरपि ॥
"विजातीयपरावृत्तं तत् फलं यत् स्वलक्षणम् । तस्मिन्नध्यवसायाद्वा तादात्म्येनाऽस्य विद्धतेः" ॥
"तत्राऽन्यापोह इत्येषा संज्ञोक्ता सनिबन्धना । स्वलक्षणेऽपि तद्धेतावन्यविश्लेषभावतः" ॥
तत्त्वसं० का० १००७–१००८–१००९–पृ० ३१७–३१८ ।

१०–**प्रतिभासान्तरोद्भावनं स्वयं** हा० वि० । "विकल्पान्तरारोपितप्रतिभासान्तराद् भेदेन स्वयं प्रतिभासनाद् मुख्यः"–तत्त्वसं० पञ्जि० पृ० ३१७ पं० २७ । स्याद्वादर० पृ० ३४९ द्वि० पं० ५ । ११ **उपचारस्तु** बा० । १२ **अन्यन्यवि**–आ० कां० । १३–**यापोहपदार्थे**–मां० । "विजातीयापोहपदार्थेन"–तत्त्वसं० पञ्जि० पृ० ३१८ पं० ६ । १४–**तत्वास्येति** आ० हा० वि० वा० बा० । १५ **अच्चस्तु** बा० । १६–**सह्य**–मां० । स्याद्वादर० पृ० ३४९ द्वि० पं० ७ । शास्त्रवा० स्याद्वादक० पृ० ४०१ द्वि० पं० १३ । १७ **विशिष्ट** वा० बा० विना । १८ तत्त्वसं० पृ० ३१८ शब्दार्थपरीक्षा ।

तत्र य एव हि शाब्दे ज्ञाने साक्षाद् भासते स एवं शब्दार्थो युक्तः । न चात्र प्रसज्यप्रतिषेधावसायः, वाच्याध्यवसितस्य बुद्ध्याकारस्य शब्दजन्यत्वात् । नापीन्द्रियज्ञानवद् वस्तुस्वलक्षणप्रतिभासः, किं तर्हि ? बाह्यार्थाध्यवसायिनी केवलशाब्दी बुद्धिरुपजायते तेन तदेवार्थप्रतिबिम्बकं शाब्दे ज्ञाने साक्षात् तदात्मतया प्रतिभासनाच्छब्दार्थो युक्त इति अपोहत्वये प्रथमोऽपोहव्यपदेशमासादयति । ५

यश्चापि शब्दस्यार्थेन सह वाच्यवाचकभावलक्षणसम्बन्धः प्रसिद्धो नासौ कार्यकारणभावादन्योऽवतिष्ठते, बाह्यरूपतयाऽध्यवसितस्य बुद्ध्याकारस्य शब्दजन्यत्वाद् वाच्यवाचकलक्षणसम्बन्धः कार्यकारणभावात्मक एव; तथा च शब्दस्तस्य प्रतिबिम्बात्मनो जनकत्वाद् वाचक उच्यते प्रतिबिम्बं च शब्दजन्यत्वाद् वाच्यम् ।

['निषेधमात्रमेव अन्यापोहः' इति मत्वा अपोहपक्षमाक्षिप्तवतः कौमारिलस्य निराकरणम्] १०

तेन यदुक्तम्—

'निषेधमात्रं नैवेह शाब्दे ज्ञानेऽवभासते' । इति,

तदसङ्गतम्; निषेधमात्रस्य शब्दार्थत्वानभ्युपगमात् । एवं तावत् प्रतिबिम्बलक्षणोऽपोहः साक्षाच्छब्दैरुपजन्यत्वाद् मुख्यः शब्दार्थो व्यवस्थितः; शेषयोरप्यपोहयोर्गौणं शब्दार्थत्वमविरुद्धमेव । तथाहि— १५

"साक्षादपि च एकस्मिन्नेवं च प्रतिपादिते ।
प्रसज्यप्रतिषेधोऽपि सामर्थ्येन प्रतीयते" ॥ [तत्त्वसं० का० १०१३]

सामर्थ्यं च गवादिप्रतिबिम्बात्मनोऽपरप्रतिबिम्बात्मविविक्तत्वात् तदसंयुक्तया प्रतीयमानत्वम्, तथा तत्प्रतीतौ प्रसज्यलक्षणापोहप्रतीतेरप्यवश्यं सम्भवात्; अतस्तस्यापि गौणशब्दार्थत्वम् । स्वलक्षणस्यापि गौणशब्दार्थत्वमुपपद्यत एव । तथाहि–प्रथमं यथावस्थितवस्त्वनुभवः, ततो विवक्षा, ततस्ताल्वादिपरिस्पन्दः, ततः शब्द इत्येवं परम्परया यदा शब्दस्य बाह्यार्थेष्वभिसम्बन्धः स्यात् तदा २०
विजातीयव्यावृत्तस्यापि वस्तुनोऽर्थापत्तितोऽधिगम इत्यन्यव्यावृत्तवस्त्वात्माऽपोहशब्दार्थ इत्युपचर्यते । तदुक्तम्—

"न तदात्मा परात्मेति सम्बन्धे सति वस्तुभिः ।
व्यावृत्तेर्वस्त्वधिगमोऽप्यर्थादेव भवत्यतः" ॥ [तत्त्वसं० का० १०१४]
"तेनायमपि शब्दस्य स्वार्थ इत्युपचर्यते । २५
न च साक्षादयं शब्दैर्द्वि(द्वैर्द्वि)र्विधोऽपोह उच्यते" ॥ [तत्त्वसं० का० १०१५]

इति ।

---

१ "तत्रायं प्रथमः शब्दैरपोहः प्रतिपाद्यते । बाह्यार्थाध्यवसायिन्या बुद्धेः शब्दात् समुद्भवात्" ॥
तत्त्वसं० का० १०११ पृ० ३१८ ।

२ **हि शब्दे** आ० हा० वि० विना । ३–**क्षात् प्रतिभासते** भां० मां० । ४–**व शब्दोऽर्थो** आ० हा० । **–व शाब्दार्थो** वा० बा० ।–**व शाब्दोऽर्थो** कां० । "स एव शब्दार्थो युक्तः"–तत्त्वसं० पञ्जि० पृ० ३१८ पं० २३ । स्याद्वादर० पृ० ३४९ द्वि० पं० ९ । ५ **न चाद्य** मां० । "न चात्र प्रसज्यप्रतिषेधाध्यवसायः"–तत्त्वसं० पञ्जि० पृ० ३१८ पं० २३ । ६–**तबुद्ध्या**–वा० बा० ।

७ "तद्रूपप्रतिबिम्बस्य धियः शब्दाच्च जन्मनि । वाच्यवाचकभावोऽयं जातो हेतुफलात्मकः ॥
तत्त्वसं० का० १०१२ पृ० ३१८ ।

८–**क्षणः सम्ब**–कां० । ९ **बाह्यरूपतया वाचकलक्षणसंबन्धः कार्यकारणभावात्मक एव** भां० मां० विना । स्याद्वादर० पृ० ३४९ द्वि० पं० १२ । १०–**णस्संबन्धः** भां० मां० । ११–**प्रतिबिम्बस्य जनक**–भां० मां० । तथैव तत्त्वसं० पञ्जि० पृ० ३१९ पं० ७ । १२ पृ० १८५ पं० २६ । १३–**मात्रमैवैद शा**–वा० बा० ।–**मात्रमेवेह** आ० हा० वि० । १४–**जन्यमानत्वाद् मुख्यः** भां० मां० । तथैव तत्त्वसं० पञ्जि० पृ० ३१९ पं० १० । १५–**गौणश**–वा० बा० । १६ "साक्षादाकार एतस्मिन्नेवं च"–तत्त्वसं० पृ० ३१९ पं० १३ । १७–**स्मिन्नेव च** बा० कां० । १८–**पाद्यते** वा० बा० विना । १९–**प्रसह्य**–मां० । २०–**त्वान्न संयु**–वि० । २१ **बाहोर्थेषुभिः संबन्धः** वा० बा० । **बार्ह्येष्वभिसंबन्धः** वि० । **बाह्यैर्वस्तुभिः संबन्धः** भां० मां० । "यदा शब्दस्य वस्तुभिर्बाह्यैरभ्यादिभिः संबन्धः"–तत्त्वसं० पञ्जि० पृ० ३१९ पं० २५ । २२–**तीयाव्यावृ**–वा० बा० विना । २३–**स्तुनोऽर्थोपपत्तितो** कां० । २४–**पवर्याते** हा० । **–पवर्जते** मां० । २५–**वस्त्वभिग**–बा० । २६ शास्त्रवा० स्याद्वादक० पृ० ४०२ प्र० पं० ४ । २७ **शब्दे द्वि**–आ० हा० वि० । "शाब्दो द्विविधोऽपोह उच्यते"–तत्त्वसं० पृ० ३१९ पं० १८ । २८–**विधापोह** बा० ।

[उद्द्योतकरदूषितस्य दिग्नागकथनस्य अभिप्रायमुद्घाट्य कण्टकोद्धारः]

तेनाचार्यदिग्नागस्योपरि यद् उद्द्योतकरेणोक्तम्—

"यदि शब्दस्यापोहोऽभिधेयोऽर्थस्तदाऽभिधेयार्थव्यतिरेकेणास्य स्वार्थो वक्तव्यः, अथ स एव स्वार्थस्तथापि व्याहतमेतत् अन्यशब्दार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यते इति, अस्य हि वाक्यस्यायमर्थस्तदानीं भवत्यभिदधानाभिधत्त इति" [अ० २ आ० २ सू० ६७ न्यायवा० पृ० ३३० पं० २२–पृ० ३३१ पं० ३] तदेतद् वाक्यार्थापरिज्ञानादुक्तम्। तथाहि–स्वलक्षणमपि शब्दस्योपचारात् स्वार्थ इति प्रतिपादितम्; अतः स्वलक्षणात्मके स्वार्थेऽर्थान्तरव्यवच्छेदं प्रतिबिम्बान्तराद् व्यावृत्तं प्रतिबिम्बात्मकमपोहं कुर्वती श्रुतिरभिधत्ते इत्युच्यते इत्येतदाचार्यीयं वचनमविरोधि।

अयमाचार्यस्याशयः–न शब्दस्य बाह्यार्थाध्यवसायिविकल्पप्रतिबिम्बोत्पादव्यतिरेकेणान्यो बाह्याभिधानव्यापारः, निर्व्यापारत्वात् सर्वधर्म्माणाम्; अतो बाह्यार्थाध्यवसायेन प्रवृत्तं विकल्पप्रतिबिम्बं जनयन्ती श्रुतिः स्वार्थमभिधत्त इत्युच्यते, न तु विभेदिनं सजातीयविजातीयव्यावृत्तं स्वलक्षणमेषा स्पृशति, तथाविधप्रतिबिम्बजनकत्वव्यतिरेकेण नापरा श्रुतेरभिधा क्रियाऽस्तीत्यर्थः। एवंभूते चापोहस्य स्वरूपे न परोक्तदूषणावकाशः। तेन यदुक्तम्—

'यदि गौरिति शब्दश्च' इत्यादि।

तत्र गोबुद्धिमेव हि शब्दो जनयति, अन्यविश्लेषस्तु सामर्थ्याद् गम्यते न तु शब्दात् तस्य गोप्रतिबिम्बस्य प्रतिभासान्तरात्मरहितत्वात्—अन्यथा नियतरूपस्य प्रतिपत्तिरेव न स्यात्—तेनापरो ध्वनिर्गोबुद्धेर्जनको न मृग्यते, गोशब्देनैव गोबुद्धेर्जन्यमानत्वात्।

यदपि–'ननु ज्ञानफलाः शब्दाः' इत्यादि कुमारिलेवचनम्,

तदप्यसारम्; यतो यथा 'दिवा न भुङ्क्ते पीनो देवदत्तः' इत्यस्य वाक्यस्य साक्षाद् दिवाभोजनप्रतिषेधः स्वार्थः, अभिधानसामर्थ्यगम्यस्तु रात्रिभोजनविधिर्न साक्षात्; तद्वत् 'गौः' इत्यादेरन्वयप्रतिपादकस्य शब्दस्यान्वयज्ञानं साक्षात् फलम् व्यतिरेकगतिस्तु सामर्थ्यात्; यस्मादन्वयो

---

१ "यदि च शब्दस्याऽपोहो नाभिधेयार्थः"–न्यायवा० पृ० ३३० पं० २२। २ "भवत्यन्यदनभिदधानोऽभिधत्त इति"–न्यायवा० पृ० ३३१ पं० २। ३ **वाच्यार्था**–भां० मां०।

४ "अर्थान्तरव्यवच्छेदं कुर्वती श्रुतिरुच्यते। अभिधत्त इति स्वार्थमिलेतदविरोधि तत्" ॥
तत्त्वसं० का० १०१६ पृ० ३२०।

५ पृ० २०३ पं० २५। ६–**भिवर्तत इत्यु**–आ० हा० वि०। ७–**चार्यायं** आ० हा० वि०।

८ "बाह्यार्थाध्यवसायेन प्रवृत्तं प्रतिबिम्बकम्। उत्पादयति येनेयं तेनाहेत्यपदिश्यते" ॥
तत्त्वसं० का० १०१७ पृ० ३२०।

९ "न तु स्वलक्षणात्मानं स्पृशत्येषा विभेदिनम्। तन्मात्रांशातिरेकेण नास्त्यस्या अभिधा क्रिया" ॥
तत्त्वसं० का० १०१८ पृ० ३२०।

१० **विभेदनं** आ० वा० बा०। ११ **सजातीयव्यावृत्तं** आ० हा० वि०। १२ **श्रुतिरभिधा** भां० मां०। १३ पृ० १८६ पं० ३।

१४ "तस्य च प्रतिबिम्बस्य गतावेवानुगम्यते। सामर्थ्यादन्यविश्लेषो नास्यान्यात्मकता यतः" ॥
तत्त्वसं० का० १०१९ पृ० ३२०।

१५ **तस्यागोप्रतिप्रभासान्त**–आ०। **तस्य गोप्रतिभासान्त**–हा० वि०। **तस्य गोशप्रतिभासान्त**–वा० बा०। १६–**रूपस्याप्रति** भां० मां० विना। "नियतरूपस्य तस्य प्रतिपत्तिरेव न स्यात्"–तत्त्वसं० पञ्जि० पृ० ३२० पं० २८। १७ **तेन परो** भां० मां० विना। १८ पृ० १८६ पं० ५। पृ० १८५ गतं चतुर्दशतमं टिप्पणं विलोकनीयम्। १९ मुद्रिते श्लोकवार्तिके नैतत् कुमारिलवचनं दृश्यते, तत्त्वसंग्रहे तु मूलकारिकासु दृश्यते, किन्तु तत्पञ्जिकाकारेण कमलशीलेन तत् पद्यं भामहकर्तृकत्वेन परिचायितम्, उपलभ्यते चैतत् भामहालंकारे।

२० "दिवाभोजनवाक्यादेरिवाऽस्यापि फलद्वयम्। साक्षात् सामर्थ्यतो यस्मान्नान्वयोऽव्यतिरेकवान्" ॥
तत्त्वसं० का० १०२० पृ ३२१।

२१–**दत्तस्य वाक्यस्य** भां० मां० वा० बा० विना। २२–**कशब्दस्या**–भां० मां० वा० बा० विना।

विधिरव्यतिरेकवान्नास्ति विजातीयव्यवच्छेदाव्यभिचारित्वात् तस्य; इत्येकज्ञानस्य फलद्वयमविरुद्धमेव। यतो यदि साक्षादेकस्य शब्दस्य विधि-प्रतिषेधज्ञानलक्षणं फलद्वयं युगपदभिप्रेतं स्यात् तदा भवेद् विरोधः; यदा तु दिवाभोजनवाक्यवदेकं साक्षात् अपरं सामर्थ्यलभ्यं फलमभीष्टं तदा को विरोधः?

यच्चोक्तम्–'प्रागगौरिति ज्ञानम्' इत्यादि,

तदपि निरस्तम्; अनभ्युपगमात्—न ह्यगोप्रतिषेधभाभिमुख्येन गोशब्दः करोतीत्यभ्युपगतमस्माभिः, किं तर्हि? सामर्थ्यादिति।

यच्चोक्तम्—'अगोनिवृत्तिः सामान्यम्' इत्यादि,

तदप्यसत्; बाह्यरूपतयाऽध्यस्तो बुद्ध्याकारः सर्वत्र शाबलेयादौ 'गौर्गौः' इति समानरूपतयावभासनात् सामान्यमित्युच्यते। बाह्यवस्तुरूपत्वमपि तस्य भ्रान्तप्रतिपत्तृवशाद् व्यवह्रियते न परमार्थतः। १०

ननु च यदि कदाचित् मुख्यं वस्तुभूतं सामान्यं बाह्यवस्त्वाश्रितमुपलब्धं भवेत् तदा तत्साधर्म्यदर्शनात् तत्र सामान्यभ्रान्तिर्भवेत् यावता मुख्यार्थासम्भवे सैव भवतामनुपपन्ना, असदेतत्; साधर्म्यदर्शनाद्यनपेक्षद्विचन्द्रादिज्ञानवत् अन्तरुपप्लवादपि तज्ज्ञानसम्भवात्; न हि सर्वा भ्रान्तयः साधर्म्यदर्शनादेव भवन्ति, किं तर्हि? अन्तरुपप्लवादपीत्यदोष इति सिद्धेः साध्यतादोषो न भवति। सैव बुद्ध्याकारो बाह्यतयाऽध्यस्तोऽपोहो बाह्यवस्तुभूतं सामान्यमिवोच्यते वस्तुरूपत्वेनाध्यवसा- १५
यात्, शब्दार्थत्वाऽपोहरूपत्वयोः प्रागेव कारणमुक्तम्—

'बाह्यार्थाध्यवसायिन्या बुद्धेः शब्दात् समुद्भवात्'

'प्रतिभासान्तराद् भेदात्' इत्यादिना।

कस्मात् पुनः परमार्थतः सामान्यमसौ न भवति? बुद्धेरव्यतिरिक्तत्वेनार्थान्तरानुगमाभावात्। तदुक्तम्— २०

'ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत्'।

न च भवद्भिर्बुद्ध्याकारो गोत्वाख्यं सामान्यं वस्तुरूपमिष्टम्, किं तर्हि? बाह्यशाबलेयादिगतमेकमनुगामि गोत्वादि सामान्यमुपकल्पितम्; अतः कुतः सिद्धसाध्यता। यच्चोक्तम्—

'निषेधमात्ररूपश्च' इत्यादि,

तस्यानभ्युपगतत्वादेव न दोषः। यच्चेदमुक्तम्— २५

'तस्यां चाश्वादिबुद्धीनाम्' इत्यादि,

---

१ "नाभिमुख्येन कुरुते यस्माच्छब्द इदं द्वयम्। स्वार्थाभिधानमन्यस्य विनिवृत्तिं च वस्तुनः" ॥
तत्त्वसं० का० १०२१ पृ० ३२१।

२ पृ० १८६ पं० ७। ३ पृ० १८६ पं० १७ तथा ३९।

४ "तादृशः प्रतिभासश्च सामान्यं गोत्वमिष्यते। सर्वत्र शाबलेयादौ समानत्वावसायतः" ॥
तत्त्वसं० का० १०२२ पृ० ३२१।

५ "वस्त्वित्यध्यवसायाच्च वस्त्वित्यपि तदुच्यते। झटित्येव हि तज्ज्ञानं भ्रान्तं जातं स्वबीजतः ॥
तत्त्वसं० का० १०२३ पृ० ३२२।

६ **बाह्यं वस्त्वा**–बा०। **बाह्यवस्तुरूपत्वं निश्चितमुप**–वि०। ७ "सामान्यं भ्रान्तिर्भवेत्"–तत्त्वसं० पञ्जि० ३२२ पं० ५। ८ **सर्वभ्रान्त**–आ०। ९ पृ० १८७ पं० १०।

१० "स एव च तदाकारशब्दार्थोऽपोह उच्यते। सामान्यं वस्तुरूपं च तथा भ्रान्त्याऽवसायतः" ॥
तत्त्वसं० का० १०२४ पृ० ३२२।

११–**च्यतेऽवस्तु**–बा०। १२ **बाह्यार्थव्यवसा**–आ० हा० वि०। १३–**मुद्भेदात्** आ०। १४ पृ० २०३ पं० १ तथा २७। १५ पृ० २०२ पं० १० तथा ३१। १६–**मार्थतत्सामा**–आ० हा० वि०।

१७ "सामान्यवस्तुरूपत्वं न युक्तं त्वस्य भाविकम्। बुद्धेरनन्यरूपं हि यायादर्थान्तरं कथम्" ॥
तत्त्वसं० का० १०२५ पृ० ३२२।

१८ पृ० १८४ पं० १० तथा ३१। १९–**कारे गो**–आ० हा०।–**कारगो** वि०। २०–**मान्यवस्तु**–बा०। २१ **तर्हि शाब**–वि०। २२–**न्यमनुपकल्पित**–आ० कां० बा०।–**न्यमनुकल्पित**–हा०।–**न्यमसावुपकल्पित**–वि०। २३ पृ० १८७ पं० २१ तथा ३९। २४–**रूपाश्च** आ०। २५ पृ० १८७ पं० २२ तथा ४३। २६ **तस्यां वाश्वा**–वा० बा० विना।

तदप्यसत्; यतः—

"यद्यप्यव्यतिरिक्तोऽयमाकारो बुद्धिरूपतः।
तथापि बाह्यरूपत्वं भ्रान्तैस्तस्यावसीयते" ॥ [तत्त्वसं० का० १०२६]

यद्[1]पि 'शब्दार्थो[2]ऽर्थानपेक्षः' इति,

५ [3]तत्र, यत्र हि पारम्पर्याद् व[4]स्तुनि प्रतिबन्धोऽस्ति तस्य भ्रान्तस्यापि सतो विकल्पस्य मणिप्रभायां मणिबुद्धिवन्न बाह्यार्थानपेक्ष[5]त्वमस्ति; अतोऽसिद्धं बाह्यार्थानपेक्ष[6]त्वम्।

यच्च-'व[7]स्तुरूपावभासा (रूपा च सा) बुद्धिः' इत्यादि,

तत्र यद्यपि वस्तुरूपा सा बुद्धिस्तथापि तस्यास्तेन बाह्यात्मना बुद्ध्यन्तरात्मनो[8] च वस्तुत्वं नास्तीति प्रति[9]पादि[10]तम्। तेन 'बुद्धेर्बुद्ध्यन्तरापोहो[11] न गम्यते' [12]इत्यसिद्धम् सामर्थ्येन गम्यमानत्वात्।

१० 'असत्यपि च बाह्येऽर्थे' [13]इति,

अत्र य[14]थैव हि प्रतिबिम्बात्म[15]कः प्रतिभाख्योऽपोहो [16]वाक्यार्थोऽस्माभिरुपवर्णितस्तथैव पदार्थोऽपि, यस्मात् पदादपि प्रतिबिम्बात्मकोऽपोह उत्पद्यत एव, पदार्थोऽपि स एव; अतो न केवलं [17]वाक्यार्थ इति[18] विप्रतिप[19]त्तेरभावाद् नोप(पा)लम्भो युक्तेः[20]।

'बुद्ध्यन्तराद् व्यवच्छेदो न बुद्धेः प्रतीयते' [21]इत्यादावपि

१५ यत[22] एव हि स्वरूपोत्पादने[23]मात्रादन्य[24]मंशं सा न बिभर्ति तत [25]एव स्वभावव्यवस्थितत्वाद् बुद्धेर्बुद्ध्यन्तराद् व्यवच्छेदः प्रतीयते; अन्यथा[26]ऽन्यस्वरूपं बिभ्रती कथं ततो व्यवच्छिन्ना प्रतीयते?

'भिन्नसामान्यवचनाः' [27]इत्यादावपि

यथै[28]व ह्यपोहस्य निःस्वभावत्वाद्[29]रूपस्य परस्परतो भेदो नास्तीत्युच्यते तथैवाऽभेदोऽपि इति कथमभिन्नार्थाभावे पर्यायत्वासञ्जनं क्रियते? [30]अभेदो ह्येकरूपत्वम्; तच्च नीरूपेष्वेकरूपत्वं नास्ति न

---

१ पृ० १८७ पं० ४४ तथा पृ० १८८ पं० १। **२-र्थोऽनपेक्ष**-हा०।

३ "तस्य नार्थानपेक्षत्वं पारम्पर्यात् तदागतेः। तेनात्मना च वस्तुत्वं नैवास्तीत्युपपादितम्" ॥
तत्त्वसं० का० १०२७ पृ० ३२३।

४-**स्तुने प्रतिबिम्बोऽस्ति तस्याभ्रान्त**-बा०। ५-**क्षमस्ति** हा०। ६-**क्षं यच्च** भां० मां० विना। ७ पृ० १८८ पं० ४ तथा पं० २७। ८ **वस्तुरूपावसा सा बुद्धिः** वा० बा०। **वस्तुत्वरूपावभासबुद्धिः** भां० मां०। ९-**द्यत्रापि** मां०। १०-**ना वस्तु**-बा०। ११ पृ० २०३ पं० २३। "बाह्यात्मना बुद्ध्यन्तरात्मना च वस्तुत्वं नास्तीत्युपपादितम् 'न तदात्मा परात्मा' इत्यादिना"-तत्त्वसं० पञ्जि० पृ० ३२३ पं० ९। १२-**तं न बु**-वा० बा० विना। १३-**हो नागम्य**-बा०। १४ पृ० १८८ पं० १४ तथा पं० ३३। १५ पृ० १८८ पं० ११ तथा ३०।

१६ "प्रतिबिम्बात्मकोऽपोहः पदादप्युपजायते। प्रतिभाख्यो झटित्येव पदार्थोऽप्ययमेव नः" ॥
तत्त्वसं० का० १०२८ पृ० ३२३।

१७-**त्मकं प्र**-मां०। १८ **वा स्वार्थो**-मां०। "बाह्यार्थो"-तत्त्वसं० पञ्जि० पृ० ३२३ पं० १५। १९ "बाह्यार्थ इति"-तत्त्वसं० पञ्जि० पृ० ३२३ पं० १७। २०-**ति प्रति**-हा०। २१-**पत्तिरभावतोपलम्भो** बा०। २२ "नोपालम्भो युक्तः"-तत्त्वसं० पञ्जि० ३२३ पं० १८। २३ पृ० १८८ पं० १४ तथा पं० ३३।

२४ "स्वरूपोत्पादमात्राद्धि नान्यमंशं बिभर्ति सा। बुद्ध्यन्तराद् व्यवच्छेदस्तेन बुद्धेः प्रतीयते" ॥
तत्त्वसं० का० १०२९ पृ० ३२३।

२५-**दमात्रादन्यमावां सा** वा० बा०। २६-**न्यमशं** आ० हा०। **-न्यमात्रां** वि०। २७ **एव व्यव**-बा०। २८-**था स्वरूपं** भां० मां०। **-थान्येस्वरूपं** आ० हा० वि०। २९ पृ० १८८ पं० १८ तथा पं० ३७।

३० "यथैवाविद्यमानस्य न भेदः पारमार्थिकः। अभेदोऽपि तथैवेति तेन(येन)पर्यायता भवेत्" ॥
तत्त्वसं० का० १०३० पृ० ३२३।

३१-**रूपस्यापरस्परतो** हा०।

३२ "अभेदो ह्येकरूपत्वं नीरूपेषु च तत् कुतः। एकत्वेऽर्थस्य पर्यायाः प्राप्नुवन्ति च वाचकाः" ॥
तत्त्वसं० का० १०३१ पृ० ३२४।

पर्यायता। स्यादेतत् यदि नाम नीरूपेष्वेकरू[1]पत्वं भावो नास्ति तथापि काल्पनिकं[2]स्य तस्य भावात् पर्यायतासञ्जनं युक्तमेव[3]। न[4]न्वेवं पर्यायाऽपर्यायव्यवस्था शब्दानां कथं युक्ता? उक्तं च—

"रूपाभावेऽपि[5] चैकत्वं कल्पनानिर्मितं यथा।
विभेदोऽपि तथैवेति कुतः पर्यायता ततः"? ॥ [तत्त्वसं० का० १०३२]
"भावतस्तु न पर्याया न[6] पर्यायश्च (नापर्यायाश्च) वाचकाः। ५
न[7] ह्येकं वाच्यमेतेषामनेकं चेति वर्णितम्[8]" ॥ [तत्त्वसं० का० १०३३] इति।

यदि परमार्थतो भिन्नमभिन्नं वा किञ्चिद् [9]वाच्यं वस्तु शब्दानां स्यात् तदा पर्यायापर्यायता भवेत् यावता—'स्वलक्षणं जातिस्तद्योगो जातिमांस्तथा' [10]इत्यादिना वर्णितम्—यथैषां न किञ्चिद् वाच्यमस्तीति। [11]पर्यायादिव्यवस्था तु अन्तरेणापि सामान्यम् सामान्यादिशब्दत्वस्य व्यवस्थापनात्। तस्य चेदं निब[12]न्धनं यद् बहूनामेकार्थक्रियाकारित्वम्-प्रकृत्या केचिद् भावा बहवोऽप्येकार्थ- १०
क्रियाकारिणो भवन्ति; तेषामेकार्थक्रियासामर्थ्यप्रतिपादनाय व्यवहर्तृभिर्लाघवार्थमेकरूपाध्यारोपेणैका श्रुतिर्निवेश्यते, य[13]था-बहुषु रूपादिषु मधूदकाद्याहरणलक्षणैकार्थक्रियासमर्थेषु 'घटः' इत्येका श्रुतिर्निवेश्यते। कथं पुनरेकेनानुगामिना विना बहुष्वेका श्रुतिर्नियोक्तुं [14]शक्या? इति न वक्तव्यम्, [15]इच्छामात्रप्रतिबद्धत्वात् [16]शब्दानामर्थप्रतिनियमस्य। तथाहि-[17]चक्षू-रूपाऽऽलोक-मनस्कारेषु रूपविज्ञानैकफलेषु यदि कश्चिद् विनाप्येकेनानुगामिना सामान्येनेच्छावशादेकां श्रुतिं निवे[18]शयेत् तत् १५
किं तस्य कश्चित् प्रतिरोद्धा भवेत्? न हि तेषु लोचनादिष्वेकं चक्षुर्विज्ञानजनकत्वं सामान्यमस्ति यतः सामान्य-[19]समवाय-विशेषा अपि भवद्भिः चक्षुर्ज्ञानजनका अभ्युपगम्यन्ते, न च तेषु[20] सामान्यसमवायोऽस्ति निःसामान्यत्वात् सामान्यस्य, समवायस्य च द्वितीयसमवायाभावात्।

न [21]च घटादिकार्यस्योदकाहरणादेस्तज्ज्ञानस्य च स्वलक्षणरूपत्वेन भिन्नत्वात् कथमेककार्यकारित्वम्? इति वक्तव्यम्, यतो य[22]द्यपि स्वलक्षणभेदात् तत्कार्यं भिद्यते तथापि ज्ञानाख्यं तावत् कार्य- २०
मेका[23]र्थाध्यवसायिपरामर्शप्रत्ययहेतुत्वादेकम्; तज्ज्ञानहेतुत्वाच्चा[24]र्था घटादयोऽभेदिन इत्यु[25]च्यन्ते।

१-**पत्वं भवतो नास्ति** वा० बा०। "भावतो नास्ति"-तत्त्वसं० पञ्जि० पृ० ३२४ पं० ९। २-**कस्य भावा**-बा०। **-कस्य तस्य तावत् पर्याय**-मां०। ३ एतदेव पर्यायतासञ्जनं 'रूपाभावेऽपि' इत्यादिश्लोकेन प्रत्युक्तम्-प्र० पृ० पं० ३। ४ 'नन्वेवम्' इत्यादिनाऽऽशङ्कितं तु 'भावतस्तु न' इत्यादिना श्लोकेन समाहितम्-प्र० पृ० पं० ५।
५ **पर्यायव्यव**-वा० बा० आ०। ६-**पि वैकत्वं** आ० हा०। ७ **न पर्यायस्य** मां० वा० बा० विना। "नापर्यायाश्च"-तत्त्वसं० का० १०३३ पृ० ३२४। ८ **न ह्येवं वा**-बा०। **न ह्येक वा**-भां० मां०। "न ह्येकं वाच्यम्"-तत्त्वसं० का० १०३३ पृ० ३२४। ९-**षां मनेकं चेति** आ०। **-षां मते किञ्चिद्विवर्णि**-वि०। **-षामनेकान्तवर्णिताम्** बा०। १० श्लोकद्वयमेतत् शास्त्रवा० स्याद्वादक० पृ० ४०२ द्वि० पं० १२-१३।

११ **वाच्यवस्तु शब्दानां वाच्यं स्यात्** मां०। १२ पृ० १७४ पं० २३ तथा ४०।

१३ "किन्त्वनेकोऽपि यद्येककार्यकारी य ईक्ष्यते। तत्रैकधर्मारोपेण श्रुतिरेका निवेश्यते" ॥
तत्त्वसं० का० १०३४ पृ० ३२४।

१४-**पन्नस्य चे**-आ० हा० वि०। **-पन्ना तस्य चे**-वा० बा०। "सामान्यशब्दत्वव्यवस्थाया इदं निबन्धनम्"-तत्त्वसं० पञ्जि० पृ० ३२४ पं० २३। १५-**न्धनं बहू**-वा० बा० विना। १६-**था चहुषु रू**-बा०। **-था बाहुषु रू**-हा० वि०। **-था बाहुरू**-आ०। १७ **शक्यते न वक्त**-भां० मां०। **शक्यते ति (इति) न वक्त**-वा० बा०।

१८ "लोचनादौ यथा रूपविज्ञानैकफले क्वचित्। कश्चिद् यदि श्रुतिं कुर्याद् विनैकेनानुगामिना" ॥
तत्त्वसं० का० १०३५ पृ० ३२५।

१९ **शब्दार्थानामर्थ**-मां०। २० **चक्षुरूपालोकनमस्कारे**-भां० मां० विना। २१-**शयेन्न किं** आ० वा० बा०। **-शयेत्त किं** भां० मां०। २२ **समवायिविशे**-आ० वि०। **समवास्मिविशे**-हा०। **समायिवि**-वा० बा०। २३-**षा पि** भां०। २४-**षु असामा**-भां०। २५ **च षटादि**-वा० बा०।

२६ "घटादीनां च यत् कार्यं जलादेर्धारणादिकम्। यच्च तद्विषयं ज्ञानं भिन्नं यद्यपि तद् द्वयम्" ॥
"एकप्रत्यवमर्शस्य हेतुत्वादेकमुच्यते। ज्ञानं तथापि तद्धेतुभावादर्था अभेदिनः" ॥
तत्त्वसं० का० १०३६-१०३७ पृ० ३२५।

२७-**र्थावसायपरा**-भां० मां०। **-र्थाध्यवसायिपरा**-वा० बा०। २८-**च्चार्था पटाद्**-भां० मां०। २९ **-च्युच्यते** बा०।

न च योऽसौ परामर्शप्रत्ययस्तस्यापि[1] स्वलक्षणरूपतया भिद्यमानत्वादेकत्वासिद्धेरपरापरैकाकारपरामर्शप्रत्ययकार्यानुसरणतोऽनवस्थाप्रसङ्गतो ने(नै)ककार्यतया क्वचिदेकश्रुतिनिवेशो बहुषु सिद्धिमुपगच्छतीति वाच्यम्; यतो न[3] परामर्शप्रत्ययस्यैककार्यकारितयैकत्वमुच्यते, किं तर्हि? एकाध्यवसायितया। स्वयमेव परामर्शप्रत्ययानामेकत्वसिद्धेर्नानवस्थाद्वारेणैकश्रुतिनिवेशाभावः, अत[4]
५एकाकारपरामर्शहेतुत्वाद् ज्ञानाख्यं कार्यमेकम्[5]; तद्धेतुत्वाद्[6] घटादय एकत्वव्यपदेशभाजः[7]। तेन विनापि वस्तुभूतं सामान्यं[8] सामान्यवचना[9] घटादयः सिद्धिमासादयन्ति। तथा, कश्चिदेकोऽपि प्रकृत्यैव[10] सामर्थ्यन्तरान्तःपातवशादनेकार्थक्रियाकारी भवति[12] व्यतिरेकेणापि वस्तुभूतसामान्यधर्मभेदम्[13], तत्रातत्कार्यपदार्थभेदभूयस्त्वात्[14] अनेकश्रुतिसमावेशः अनेकधर्मसमारोपात्, यथा–
स्वदेशे परस्योत्पत्तिप्रतिबन्धकारित्वाद् रूपं सप्रतिघम्[16]—सह[17] निदर्शनेन चक्षुर्ज्ञानजनकत्वेन वर्तत
१०इति–सनिदर्शनं[18] च तदेवोच्यते, यथा वा शब्द एकोऽपि प्रयत्नानन्तरज्ञानफलतया 'प्रयत्नानन्तरः' इत्युच्यते, श्रोत्रज्ञानफलत्वाच्च श्रावणः—श्रुतिः[22] श्रवणं श्रोतृ (त्र) ज्ञानम्[23] तत्प्रतिभासतया तत्र भवः श्रावणः, यद्वा श्रवणेन गृह्यत इति श्रावणः—एवमतत्कार्यभेदेनैकस्मिन्नप्यनेका श्रुतिर्निवेश्यमानाऽविरुद्धा। अतत्कारणभेदेनापि क्वचित् तन्निवेशः, यथा[24]-भ्रामरं मधु क्षुद्रादिकृतमधुनो व्यावृत्त्या। तथा[24] तत्कार्यकारणपदार्थव्यवच्छेदमात्रप्रतिपादनेच्छया अन्तरेणापि सामान्यं श्रुतेर्भेदेन निवेशनं
१५सम्भवति—

"अश्रावणं[25] यथा रूपं विद्युद्वाऽयत्नजा यथा" ॥ [तत्त्वसं० का० १०४२]
"इत्यादिना प्रभेदेन विभिन्नार्थनिबन्धनाः[26]।

१–**पि विलक्षणरूप**–बा०। २–**हुष्(ष्व)भिसिद्धिमु**–वा० बा०।–**हुषु शुद्धिमु**–भां० मां०। ३ "न हि प्रत्यवमर्शप्रत्ययस्यैककार्यतयैकत्वमुच्यते, किं तर्हि? एकार्थाध्यवसायितया। तेन नानवस्था भविष्यति"–तत्त्वसं० पञ्जि० पृ० ३२५ पं० २४। ४ **अत एव एकापरा**–वा० बा०। ५ **कार्यमेत्येकम्** बा०। ६–**तु भावात् घटा**–भां० मां०। ७ **सामान्यं वचनाद् घटा**–वा० बा०। **सामान्यं चना घटा**–आ०। **सामान्यं चन घटा**–कां०। **सामान्यं सामान्यवता घटा**–हा०। वि० प्रतौ तु हा० समानोऽपि पाठः **'सामान्यं सामान्यवन्तो घटा'**–इति पश्चात् संशोधितो दृश्यते।

८ "तत्र सामान्यवचना उक्ताः शब्दा घटादयः। विजातीयव्यवच्छिन्नप्रतिबिम्बैकहेतवः" ॥
तत्त्वसं० का० १०३८ पृ० ३२६।

९ "तथाऽनेकार्थकारित्वादेको नैक इवोच्यते। अतत्कार्यपरावृत्तिबाहुल्यपरिकल्पितः" ॥
तत्त्वसं० का० १०३९ पृ० ३२६।

१०–**कोऽपो प्रकृत्येव** आ० हा० वि०।–**कोऽपोहः प्रकृत्येव** कां०। ११–**रान्तपात**–आ०। **रातः परवशब्देने**–बा०। १२ "भवति। तत्रान्तरेणापि वस्तुभूतसामान्यादिधर्मभेदम्"–तत्त्वसं० पञ्जि० पृ० ३२६ पं० ११। १३–**दाम्** बा०। अत्र "गौणात् समयानिकषाहाधिगन्तरान्तरेणातियेनतेनैर्द्वितीया"—इति हैं० अ० २ पा० २ सू० ३३ गतेन बहुवचनेन 'व्यतिरेकेण' इत्यस्य योगेऽपि द्वितीया समाधेया। १४ **तत्रा न कार्यपदार्थभेदभूतत्वा**–वा० बा०। **तत्र तत्कार्यपदार्थभेदभूयत्वा**–आ० कां०। **तत्र तत्कार्यपदार्थभेदभूयस्त्वा**–वि०। **तत्र तत्कार्यभेदभूयस्त्वा**–हा०।

१५ "यथा सप्रतिघं रूपं सनिदर्शनमित्यपि। प्रयत्नानन्तरज्ञातो यथा वा श्रावणो ध्वनिः" ॥
तत्त्वसं० का० १०४० पृ० ३२६।

१६–**प्रतिपं** आ० हा० वि०। १७ **सह दर्श**–आ० हा० वि०। १८–**ति संनिदर्शनं तदे**–भां० मां०। १९–**नं तदे**–आ० हा० वि०। २० **श्रोतृज्ञा**–वा० बा० विना। २१ **श्रुतिः श्रोतृ**–भां० मां०। २२ **तत्र प्रति**–भां० मां०। २३–**ऋप्येका** मां०।

२४ "अतत्कारणभेदेन क्वचिच्छब्दो निवेश्यते। प्रयत्नोत्थो यथा शब्दो भ्रामरं वा यथा मधु" ॥
तत्त्वसं० का० १०४१ पृ० ३२६।

२५ **तथाऽतत्का**–वा० बा० विना। "इदानीं तत्कार्यकारणपदार्थव्यवच्छेदमात्रप्रतिपादनेच्छया"–तत्त्वसं० पञ्जि० पृ० ३२६ पं० २७। २६ **अस्य** पूर्वार्धं तु–"तत्कार्य-हेतुविश्लेषात् क्वचिच्छ्रुतिरिहोच्यते"—तत्त्वसं० पृ० ३२७ पं० २। २७–**ना** वा० बा० विना।

व्यावृत्तयः प्रकल्प्यन्ते तन्निष्टाः (ष्ठाः) श्रुतयस्तथा" ॥ [तत्त्वसं० का० १०४३]
"यथासङ्केतमेवातोऽसङ्कीर्णार्थाभिधायिनः[3]।
शब्दा विवेकतो वृत्ताः[3] पर्याया न भवन्ति[4] न (नः)" ॥ [तत्त्वसं० का० १०४४]

श्रोत्रज्ञानफलशब्दव्यवच्छेदेन 'अश्रावणं रूपम्' इत्युच्यते, प्रयत्नकारणघटादिपदार्थव्यवच्छेदेन 'विद्युदप्रयत्नजा' इत्यभिधीयते। अन्तरेणापि[5] सामान्यादिकं वस्तुभूतम् व्यावृत्तिकृतमेव शब्दानां ५
भेदेन निवेशनं सिद्धम्, पर्यायत्वप्रसङ्गाभावश्च विभिन्नार्थनिबन्धनव्यावृत्तिनिष्ठ(ष्ठ)त्वे श्रुतीनां सिद्धः।

स्यादेतत् मा भूत् पर्यायत्वमेषाम् अर्थभेदस्य कल्पितत्वात्; सामान्यविशेषवाच्यत्वव्यवस्था तु विना सामान्य-विशेषाभ्यां कथमेषाम्? उच्यते—

"बह्वल्पविषयत्वेन तत्सङ्केतानुसारतः।
सामान्य-भेदवाच्यत्वमप्येषां न विरुध्यते" ॥ [तत्त्वसं० का० १०४५] १०

वृक्षशब्दो हि सर्वेष्वेव धव-खदिर-पलाशादिष्ववृक्षव्यवच्छेदमात्रानुस्यूतं[7] प्रतिबिम्बकं जनयति; तेनास्य बहुविषयत्वात् सामान्यं वाच्यमुच्यते, धवादिशब्दस्य तु खदिरादिव्यावृत्तकतिपयपादपाध्यवसायिविकल्पोत्पादकत्वाद् विशेषो वाच्य उच्यते। यदुक्तम्[12]—

'अपोह्यभेदेन[13]' इत्यादि,
तत्र[13]— १५

"ताश्च व्यावृत्तयोऽर्थानां कल्पनाशिल्पिनिर्मिताः।
नापोह्याधारभेदेन भिद्यन्ते परमार्थतः" ॥
"तासां हि बाह्यरूपत्वं कल्पितं न तु वास्तवम्।
भेदाभेदौ च तत्त्वेन वस्तुन्येव व्यवस्थितौ" ॥
"स्वबीजानेकविश्लिष्टवस्तुसङ्केतशक्तितः[14]।
विकल्पास्तु विभिद्यन्ते तद्रूपाध्यवसायिनः[15]" ॥ २०
"नैकात्मतां[16] प्रपद्यन्ते न भिद्यन्ते च खण्डशः।
स्वलक्षणात्मका अर्था विकल्पः प्लवते त्वसौ[17]" ॥
[तत्त्वसं० का० १०४६–१०४७–१०४८–१०४९]

अस्य सर्वस्याप्ययमभिप्रायः–यदि हि पारमार्थिकोऽपोह्यभेदेनाधारभेदेन वाऽपोहस्य भेदोऽभीष्टः २५
स्यात्[18] तदेतद् दूषणं स्यात् यावता कल्पनया[19] सजातीयविजातीयपदार्थभेदैरिव[20] व्यावृत्तयो भिन्नाः कल्प्यन्ते[21] न परमार्थतः[22]; ततः ताश्च कल्पनावशादव्यतिरिक्ता इव वस्तुनो भासन्ते न परमार्थतः। परमार्थतस्तु विकल्पा एव भिद्यन्ते अनादिविकल्पवासनाऽन्यविविक्तवस्तुसङ्केतादेर्निमित्ताद् व्यावृत्तवस्त्वध्यवसायिनः न त्वर्थाः। तथाहि-वृक्षत्वादिसामान्यरूपेण[23] नैकात्मतां[24] धवादयः प्रतिपद्यन्ते, नापि क्षणिकाऽनात्मकादिधर्मभेदेन खण्डशो भिद्यन्ते, केवलं विकल्प एव तथा प्लवते; न त्वर्थः। ३०

---

१ **तन्निद्याः** वा० बा०। २–**वातेऽ**–बा०। ३ **वृत्ता प**–वा०। **वृत्तौ प**–आ० कां०। ४ **'भवन्ति नः'** इति वि० सं०। ५–**लव्यव**–आ० हा० वि०। ६ "एवमन्तरेणापि सामान्यादिकम्"—तत्त्वसं० पञ्जि० पृ० ३२७ पं० ८। ७–**श्च भिन्ना**–भां० मां०। ८ शास्त्रवा० स्याद्वादक० पृ० ४०३ प्र० पं० १। ९ **हि स्वेष्वेव** भां० मां०। १०–**त्रास्यूतं** आ० हा० वि०। ११ पृ० १८९ पं० १ तथा २२। १२ **अपोहते भेदेन त्यादि** वा० बा०। **अपोह्यभेदनेत्यादि** आ० हा० वि०। १३ **तत्र तोश्च** आ० वा० बा०। **तत्र वोश्च** हा०। **तत्र वो यैश्च** वि०। १४–**जान्तेन विशिष्ट**–वा० बा०। १५–**सायिनी** मां०। १६–**त्मनां** आ० हा० वि०। १७ शास्त्रवा० स्याद्वादक० पृ० ४०३ प्र० पं० ६–९। १८ **तदेतद्** वा० बा०। १९ "कल्पनया सजातीयविजातीयपदार्थभेदनिबन्धना व्यावृत्तयो भिन्नाः कल्प्यन्ते"–तत्त्वसं० पञ्जि० पृ० ३२८ पं० ५। २०–**दार्थाभेदोरव्यावृ**–बा०।–**दार्थाभेदैरिव व्यावृ**–आ०। २१ **कल्पन्ते** भां० मां०। २२–**मार्थतस्तश्च कल्पना**–बा०।–**मार्थतः स्ततः श्च कल्पना**–आ०। २३ **वृक्षादि**–वा० बा०। २४–**त्मनां** वा० बा० आ० हा० वि०।

यथोक्तम्—

"[1]संसृज्यन्ते [2]न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः ।
रूपमेकमनेकं वा तेषु [3]बुद्धेरुपप्लवः" ॥ [ ] इति ।

[4]यच्चोक्तम्—'न चाप्रसिद्धसारूप्य'-इत्यादि ।

५ तत्र—

"एकधर्मान्वयासत्त्वेऽप्यपोह्याऽपोहगोचराः ।
वैलक्षण्येन गम्यन्तेऽभिन्नप्रत्यवमर्शकाः" ॥ [तत्त्वसं० का० १०५०]

अपोह्याश्च अपोहगोचराश्चेति विग्रहः । तत्रापोह्या अश्वादयः गोशब्दस्य तदपोहेन प्रवृत्तत्वात्, अपोहगोचराः शाबलेयादयः तद्विषयत्वाद् अगोपोहस्य; तेन यद्यप्येकस्य सामान्यरूपस्यान्वयो
१० नास्ति तथाप्यभिन्नप्रत्यवमर्शहेतवो ये ते प्रसिद्धसारूप्या भवन्ति, ये तु विपरीतास्ते विपरीता इति ।
स्यादेतत् [5]तस्यैवैकप्रत्यवमर्शस्य हेतवोऽन्तरेण सामान्यमेकं कथमर्था भिन्नाः सिद्ध्यन्ति? उच्यते—

"एकप्रत्यवमर्शे हि केचिदेवोपयोगिनः ।
प्रकृत्या [7]भेदवन्तोऽपि नान्य [8]इत्युपपादितम्" ॥ [तत्त्वसं० का० १०५१]

प्रतिपादितमेतत् सामान्यपरीक्षायाम्—[9]'यथा धान्यादयोऽन्तरेणापि सामान्यमेकार्थक्रियाका-
१५ रिणो भवन्ति तथैकप्रत्यवमर्शहेतवो भिन्ना अपि भावाः केचिदेव भविष्यन्ति' इति ।

[10]'न चान्वयविनिर्मुक्ता' इत्यादौ [11]वाह-[12]यद्यपि सामान्यं वस्तुभूतं नास्ति तथापि विजातीयव्यावृत्त-स्वलक्षणमात्रेणैवान्वयः क्रियमाणो [13]न विरुध्यते ।

"यस्मिन्नधूमतो भिन्नं विद्यते हि स्वलक्षणम् ।
तस्मिन्ननग्नितोऽप्यस्ति परावृत्तं स्वलक्षणम्" ॥
२० "यथा महानसे [14]वेह [15]विद्यतेऽधूमभेदि तत् ।
तस्मादनग्नितो भिन्नं विद्यतेऽत्र स्वलक्षणम्" ॥ [तत्त्वसं० का० १०५३-१०५४]

अवयवपञ्चकमपि स्वलक्षणेनान्वये क्रियमाणे शक्योपदर्शनमित्येवं प्रयोगप्रदर्शनं कृतम्, इदं च कार्यहेतावुदाहरणम् । स्वभावहेतावपि-[16]यद् असतो व्यावृत्तं स्वलक्षणं तत् सर्वं स्थिरादपि व्यावृत्तम्, यथा बुद्ध्यादि, तथा चेदं शब्दादि स्वलक्षणमसद्रूपं न भव[17]तीति । अमुना न्यायेन विशे-

---

१ **संयुज्यन्ते** भां० मां० । २ **न विद्य**-वि० । ३-**षु बुद्धिरूप**-वा० बा० ।-**षु वृद्धे रूप**-मां० । **-षु वृद्धेरुप**-भां० । ४ तत्त्वसं० पञ्जि० पृ० ३२८ पं० २१ । शास्त्रवा० स्याद्वादक० पृ० ४०३ प्र० पं० १० । ५ **यथोक्तं नवा** बा० । ६ पृ० १८९ पं० १३ तथा ३५ । ७-**यत्वादऽगो**-हा० ।-**यत्वात् गो**-आ० । **-यत्वाद् गो**-वि० । ८ **तस्यैकैक**-वा० बा० । ९-**ज्यन्ति एक**-वा० बा० । १० "भेदवत्त्वेऽपि"-तत्त्वसं० ।
११ पृ० २०२ पं० ४ तथा २३ । १२ तत्त्वसंग्रहे सामान्यपरीक्षा पृ० २३६-२६२ का० ७०८-८१२ ।

१३ "यथा धान्यभयादीनां नानारोगनिवर्तने । प्रत्येकं सह वा शक्तिर्नानात्वेऽप्युपलभ्यते" ॥
"एवमत्यन्तभेदेऽपि केचिन्नियतशक्तितः । तुल्यप्रत्यवमर्शादेर्हेतुत्वं यान्ति नापरे ॥
तत्त्वसं० का० ७२३-७२६ पृ० २३९ ।

१४ **नवा**-वा० बा० भां० मां० । १५ पृ० १८९ पं० २० तथा ४२ ।
१६ "अतद्रूपपरावृत्तं वस्तुमात्रं स्वलक्षणम् । यत्नेन क्रियमाणोऽयमन्वयो न विरुध्यते" ॥
तत्त्वसं० का० १०५२ पृ० ३२९ ।

१७ "न विरुध्यते । कथम्? इत्याह"-तत्त्वसं० पञ्जि० पृ० ३२९ पं० १५-१६ । १८ "चेह"-तत्त्वसं० ।
१९-**द्यते धूम**-आ० हा० वि० ।
२० "असतो नरशृङ्गादेर्यच्च भिन्नं स्वलक्षणम् । बुद्धि-दीपादिवत् सर्वं व्यावृत्तं तत् स्थिरादपि" ॥
"असद्रूपं तथा चेदं न शब्दादिस्वलक्षणम् । इत्थं निर्दिष्टभेदेन भवत्येवाऽन्वयोऽमुना" ॥
तत्त्वसं० का० १०५५-१०५६ पृ० ३२९ ।

२१-**वतीत्यनुमा नायेन** वा० बा० ।-**तीत्यमुना नायेन** आ० ।

षाऽसंस्पर्शात् स्वलक्षणेनान्वयः क्रियमा[1]णो न विरुध्यते । यदि [2]तर्हि स्वलक्षणेनैवान्वयः कथं सामान्यलक्षणविषयमनुमानम्? [3]तदेव हि स्वलक्षणमविवक्षितभेदं सामान्यलक्षणमित्युक्तम् 'सामान्येन भेदापरामर्शेन [5]लक्ष्यतेऽध्यवसीयते' इति कृत्वा । तदुक्तम्—

"अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात्[4] ।
सामान्यविषयं प्रोक्तं [6]लिङ्गं भेदाप्रतिष्ठितेः" ॥ [ ] इति । ५

तेन साहचर्यमपि लिङ्ग-शब्दयोः स्वलक्षणेनैव कथ्यते । न चाप्यदर्शनमात्रेणास्माभिर्विपक्षे लिङ्ग-स्याभावोऽवसीयते, किं तर्हि? अनुपलम्भविशेषादेव ।

यच्चोक्तम्—'शाबलेय'-इत्यादि,

तत्रेदं भवान् वक्तुमर्हति-'शाबलेयाद् [10]बाहुलेयाऽश्वयोस्तुल्येऽपि [11]भेदे [12]किमिति तुरङ्गमपरिहारेण गोत्वं शाबलेयादौ वर्तते नाश्वे' इति? स्यादेतत् किमत्र वक्तव्यम्? गोत्वस्याभिव्यक्तौ शाब- १०
लेयादिरेव समर्थो नाश्वादिः; अतस्तत्रैव तद् वर्तते नान्यत्र । न चायं पर्यनुयोगो युक्तः 'कस्मात् तस्याभिव्यक्तौ शाबलेयादिरेव समर्थः'? यतो वस्तुस्वभावप्रतिनियमोऽयम्; [13]न हि वस्तूनां स्वभावाः पर्यनुयोगमर्हन्ति तेषां स्वहेतुपरम्पराकृतत्वात् स्वभावभेदप्रतिनियमस्येति । नन्वेवं यथा शाबले-यादिरेव गोत्वाभिव्यक्तौ समर्थस्तथा सत्यपि भेदे सामान्यमन्तरेणापि तुल्यप्रत्यवमर्शोत्पादने शाब-लेयादिरेव शक्तो न तुरङ्गम इत्यसत्पक्षो न विरुध्यत एव । तेन— १५

"तादृक् प्रत्यवमर्शश्च विद्यते यत्र वस्तुनि ।
[14]तत्राभावेऽपि गोजातेरगोपोहः प्रवर्तते" ॥ [तत्त्वसं० का० १०६०]

[15]यच्चोक्तम्-'इन्द्रियैः' इत्यादि, तदसिद्धम्; तथाहि-[16]स्वलक्षणात्मा तावदपोह इन्द्रियैरवगम्यत एव, यश्चार्थप्रतिबिम्बात्माऽपोहः स परमार्थतो बुद्धिस्वभावत्वात् स्वसंवेदनप्रत्यक्षत एव सिद्धः,

---

१-**णो विरु**-भां० मां० विना । २ **तहि** वा० बा० । ३ **तदेवं** कां० ।
"अविवक्षितभेदं च तदेव परिकीर्तितम् । सामान्यलक्षणत्वेन नानिष्टेरपरं पुनः" ॥
तत्त्वसं० का० १०५७ पृ० ३३० ।

४-**वक्षितं भे**-आ० हा० वि० ।-**वक्षितमविवक्षितभे**-वा० बा० । "अविवक्षितभेदस्य स्वलक्षणस्यैव सामान्य-लक्षणत्वात्"-शास्त्रवा० स्याद्वादक० पृ० ४०३ प्र० पं० १३ । ५ "लक्ष्यते व्यवसीयते"-तत्त्वसं० पञ्जि० पृ० ३३० पं० ११ ।

६ "यदुक्तं धर्मकीर्तिना—
अतद्रूपपरावृत्तवस्तुमात्रप्रवेदनात् । सामान्यविषयं प्रोक्तं लिङ्गं भेदाप्रतिष्ठितेः" ॥ इति
अष्टस० पृ० २८ पं० १५ ।
" 'भेदाप्रतिष्ठितेः' भेदाप्रतिष्ठितेर्विशेषागोचरत्वात्"-वाचकयशोवि० अष्ट० टी० लि० प्र० पृ० १८ द्वि० पं० १० भाण्डा० ।
"अतद्रूपपरावृत्तवस्तुमात्रसमाश्रयात्"-तत्त्वसं० पञ्जि० पृ० ३३० पं० १३ ।
७ **लिङ्गभेदाप्रतिष्ठतेरिति** आ० । ८-**ष्ठितैरिति** कां० । ९ पृ० १९० पं० १४ ।
१० "शबलापत्यतो भेदे बाहुलेयाऽश्वयोः समे । तुरङ्गपरिहारेण गोत्वं किं तत्र वर्तते" ॥
तत्त्वसं० का० १०५८ पृ० ३३० ।

११-**दे पि कि**-आ० हा० । १२ **किमपि** वा० बा० विना ।
१३ "न च पर्यनुयोगोऽस्ति वस्तुशक्तेः कदाचन" ॥
"वह्निर्दहति नाऽऽकाशं कोऽत्र पर्यनुयुज्यताम्" ।
श्लो० वा० आकृ० श्लो० २८-२९ पृ० ५५२ ।
१४ "तस्य व्यक्तौ समर्थोऽत्मा स एवेति यदीष्यते । तुल्यप्रत्यवमर्शेऽपि स शक्तो न तुरङ्गमः" ॥
तत्त्वसं० का० १०५९ पृ० ३३० ।
१५-**त्राभेदेऽपि** भां० मां० विना । १६ पृ० १९० पं० १९ तथा ३५ ।
१७ "अगोभिन्नं च यद् वस्तु तदक्षैर्व्यवसीयते । प्रतिबिम्बं तदध्यस्तं स्वसंवित्त्याऽवगम्यते" ॥
"इदं दृष्ट्वा च लोकेन शब्दस्तत्र प्रयुज्यते । संबन्धानुभवोऽप्यस्य व्यक्तं तेनोपपद्यते" ॥
तत्त्वसं० का० १०६१-१०६२ पृ० ३३१ ।

प्रसह्यात्माऽपि सामर्थ्यात् प्रतीयत एव 'न तदात्मा परात्मा' इति न्यायात्; अतः स्वलक्षणादिरूपमपोहं दृष्ट्वा लोकः शब्दं प्रयुङ्क्ते एव न वस्तुभूतं सामान्यम्; तस्याऽसत्त्वात् अप्रतिभासनाच्च। यदेव च दृष्ट्वा लोकेन शब्दः प्रयुज्यते तेनैव तस्य सम्बन्धोऽवगम्यते नान्येन अतिप्रसङ्गात्।

यच्च—'अगोशब्दाभिधेयत्वं गम्यतां च कथं पुनः' इति,

अत्र—

"तादृक् प्रत्यवमर्शश्च यत्र नैवास्ति वस्तुनि।
अगोशब्दाभिधेयत्वं विस्पष्टं तत्र गम्यते" ॥ [तत्त्वसं० का० १०६३]

यच्चोक्तम्—

'सिद्धश्चागौरपोह्येत' इत्यादि,

तत्र, स्वत एव हि गवादयो भावाः भिन्नप्रत्यवमर्शं जनयन्तो विभागेन सम्यग् निश्चिताः, तेषु व्यवहारार्थं व्यवहर्तृभिर्यथेष्टं शब्दः सिद्धः प्रयुज्यते। तथाहि-यदि भिन्नं वस्तु स्वरूपप्रतिपत्त्यर्थमन्यपदार्थग्रहणमपेक्षते तदा स्यादितरेतराश्रयदोषः यावताऽन्यग्रहणमन्तरेणैव भिन्नं वस्तु संवेद्यते; तस्मिन् भिन्नाकारप्रत्यवमर्शहेतुतया विभागेन 'गौर्गौः' इति च सिद्धे यथेष्टं सङ्केतः क्रियते इति कथमितरेतराश्रयत्वं भवेत्?

यच्चोक्तम्—'नाधाराधेय'-इत्यादि,

तत्र, न हि परमार्थतः कश्चिदपोहेन विशिष्टोऽर्थः शब्दैरभिधीयते। तेनैव यतः प्रतिपादितमेतत्-'यथा न किञ्चिदपि शब्दैर्वस्तु संस्पृश्यते, क्वचिदपि समयाभावात्' इति। तथाहि-शाब्दी बुद्धिरबाह्यार्थविषयाऽपि सती स्वाकारं बाह्यार्थतयाऽध्यवस्यन्ती जायते, न परमार्थतो वस्तुस्वभावं स्पृशति यथातत्त्वमनध्यवसायात्। यद्येवम् कथमाचार्येणोक्तम्—

"नीलोत्पलादिशब्दा अर्थान्तरनिवृत्तिविशिष्टानर्थानाहुः" [ ] इति।
"अर्थान्तरनिवृत्याह विशिष्टानिति यत् पुनः।
प्रोक्तं लक्षणकारेण तत्रार्थोऽयं विवक्षितः" ॥
"अन्यान्यत्वेन ये भावा हेतुना करणेन वा।
विशिष्टा भिन्नजातीयैरसङ्कीर्णा विनिश्चिताः" ॥
"वृक्षादीनाह तान् ध्वानस्तद्भावाध्यवसायिनः।
ज्ञानस्योत्पादनादेतज्ज्ञात्यादेः प्रतिषेधनम्" ॥
"बुद्धौ येऽर्था विवर्तन्ते तानाह जननादयम्।
निवृत्या च विशिष्टत्वमुक्तमेषामनन्तरम्" ॥
[तत्त्वसं० का० १०६८-१०६९-१०७०-१०७१]

---

१ **न व त**–बा०। २ पृ० २०३ पं० २३। ३–**पस्यापो**–बा०। ४ **यथा गो**–वि० वा० बा०। ५ पृ० १९० पं० २५ तथा ४१। ६ पृ० १९१ पं० ४–१३ तथा ३१। ७–**रपोहेत** बा०।

८ "गावोऽगावश्च संसिद्धा भिन्नप्रत्यवमर्शतः। शब्दस्तु केवलोऽसिद्धो यथेष्टं संप्रयुज्यते" ॥
"न ह्यन्यग्रहणं वस्तु भिन्नं वित्तावपेक्षते। अन्योन्याश्रयदोषोऽयं तस्मादस्मिन्निरासदः" ॥
तत्त्वसं० का० १०६४-१०६५ पृ० ३३१।

९ **शब्दसिद्धः** मां०। "शब्दोऽसिद्धः"–तत्त्वसं० पञ्जि० पृ० ३३२ पं० ३। १०–**मपेक्ष्यते** भां० मां० आ० कां०। ११–**इति सि**–वा० बा०। १२–**सङ्केतक्रिय ति(येति)क**–वा० बा०। १३ पृ० १९१ पं० ८ तथा ३३। १४ पृ० १९१ पं० २१। १५ **तन्न न हि** वा० बा०।

१६ "अवेद्यबाह्यतत्त्वाऽपि प्रकृष्टोपप्लवादियम्। स्वोल्लेखं बाह्यरूपेण शब्दधीरध्यवस्यति" ॥
"एतावत् क्रियते शब्दैर्नार्थं शब्दाः स्पृशन्त्यपि। नापोहेन विशिष्टश्च कश्चिदर्थोऽभिधीयते" ॥
तत्त्वसं० का० १०६६-१०६७ पृ० ३३२।

१७–**तः क्वचिद**–भां० मां० विना। १८–**यते तेनैव च तपादित**–वा० बा०।–**यते तेनैवं यंतः प्रतिपादित**–आ०। "अभिधीयते। यतः प्रतिपादितमेतत्"–तत्त्वसं० पृ० ३३२ पं० १३। १९ पृ० १९१ पं० १९। २० शास्त्रवा० स्याद्वादक० पृ० ४०४ द्वि० पं० ५। २१ **नाहुरित्यार्था**–आ० हा०। २२ "अर्थान्तरनिवृत्त्याहुर्वि"–तत्त्वसं०। २३ शास्त्रवा० स्याद्वादक० पृ० ४०४ द्वि० पं० ९। २४–**तास्तुन सद्धा**–वा० बा०। २५ "तानाहाभ्यन्तरानयम्"–तत्त्वसं०।

अस्य तात्पर्यार्थः द्विविधो ह्यर्थः——बाह्यो बुद्ध्यारूढश्च। तत्र बाह्यस्य न परमार्थतोऽभिधानं शब्दैः, केवलं तदध्यवसायिविकल्पोत्पादनादुपचारादुक्तम् 'शब्दोऽर्थानाह' इति। उपचारस्य च प्रयोजनं जात्यभिधाननिराकरणमिति। अवयवार्थस्तु-'अन्यान्यत्वेन' इति अन्यस्मादन्यत्वं व्यावृत्तिस्तेनान्यान्यत्वेन हेतुना करणेन वा ये वृक्षादयो भावा विशिष्टा निश्चिता अन्यतो व्यावृत्ता निश्चिता इति यावत्; एतेन 'अर्थान्तरनिवृत्तिविशिष्टान्' इत्यत्र पदे 'निवृत्ता' इति ('निवृत्या' इति) तृतीयार्थो व्याख्यातः। 'ध्वानः' इति शब्दः। यस्तु बुद्ध्यारूढोऽर्थस्तस्य मुख्यत एव शब्दैरभिधानम्। 'अयम्' इति ध्वानः। अर्थान्तरनिवृत्तिविशिष्टत्वं कथमेषां योजनीयमित्याशङ्क्य 'निवृत्या विशिष्टत्वमुक्तमेषामनन्तरम्' इत्युक्तम्। एषामपि बुद्धिसमारूढानामर्थानामन्यतो व्यावृत्ततया प्रतिभासनादित्यभिप्रायः।

ननु यदि न कश्चिदेव वस्त्वंशः शब्देन प्रतिपाद्यते तत् कथमुक्तमाचार्येण–"अर्थान्तरनिवृत्या कश्चिदेव वस्तुनो भागो गम्यते" [ ] इति, अर्थान्तरपरावृत्तदर्शनद्वारायातत्वात् बुद्धिप्रतिबिम्बकमर्थान्तरपरावृत्ते वस्तुनि भ्रान्तैस्तादात्म्येनाऽऽरोपितत्वाच्चोपचाराद् 'वस्तुनो भागः' इति व्यपदिष्टम्। ननु चार्थान्तरनिवृत्तिर्वाह्यवस्तुगतो धर्मः; सा कथं प्रतिबिम्बाधिगमे हेतुभावं करणभावं वा प्रतिपद्यते येन 'निवृत्ता' इति ('निवृत्या' इति) उच्यत इति, उच्यते; यदि हि विजातीयाद् व्यावृत्तं वस्तु न स्यात् तदा न तत्प्रतिबिम्बकं विजातीयपरावृत्तवस्त्वात्मनाऽध्यवसीयते तस्मादर्थान्तरपरावृत्तेर्हेतुभावः करणभावश्च युज्यत एव।

'न चान्यरूपमन्यादृक् कुर्याद् ज्ञानं विशेषणम्' इत्यादावपि,

यदि ह्यन्यव्यावृत्तिरभावरूपा वस्तुनो विशेषणत्वेनाभिप्रेता स्यात् तदेतत् (तदैतत्) सर्वं दूषणमुपपद्येत यावता वस्तुस्वरूपैवान्यव्यावृत्तिर्विशेषणत्वेनोपादीयते तेन विशेषणानुरूपैव विशेष्ये बुद्धिर्भवत्येव। तथाहि-अगोनिवृत्तिर्यो गौरभिधीयते सोऽश्वादिभ्यो यदन्यत्वं तत्स्वभावैव नान्या; ततश्च यद्यप्यसौ व्यतिरेकेणागोनिवृत्तिः 'गौः' इत्यभिधीयते भेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायाम् तथापि परमार्थतो गोरात्मगतैव सा——यथाऽन्यत्वम्, न हि अन्य (अन्यत्वं) नाम अन्यस्माद् वस्तुनोऽन्यत्——अन्यथा तद् वस्तु ततो भिन्नमित्येतन्न सिद्ध्येत्। तस्मात् विशेषणभावेऽ-

---

१–**र्थः स द्वि**–वि० कां०।–**र्थः सि द्वि**–आ० हा०। २ **शब्दो नार्थानाह** वा० बा०। ३–**नान्यत्वे**–भां० मां० कां० विना। ४–**ना कारणे**–वा० बा०। ५ पृ० २१२ पं० २०। ६–**शिष्टमित्य**–वा० बा०। ७ "'निवृत्त्या' इति तृतीयार्थो व्याख्यातः"–तत्त्वसं० पञ्जि० पृ० ३३३ पं० ५। ८ "अथार्थान्तरनिवृत्तिविशिष्टत्वम्"–तत्त्वसं० पञ्जि० पृ० ३३३ पं० ११। ९ पृ० २१२ पं० २८। १०–**त्यपि भि**–वा० बा०।

११ "अर्थान्तरपरावृत्त्या गम्यते तस्य वस्तुनः। कश्चिद् भाग इति प्रोक्तं तदेव प्रतिबिम्बकम्" ॥
"अर्थान्तरपरावृत्तवस्तुदर्शनसंश्रयात्। आगतेस्तत्र चारोपात् तस्य भागोऽपदिश्यते" ॥
"हेत्वर्थः करणार्थश्च पूर्ववत् तेन वाऽऽत्मना। यदि वस्तु विजातीयान्न स्याद् भिन्नं न तत् तथा" ॥
तत्त्वसं० का० १०७२-१०७३-१०७४ पृ० ३३३।

१२–**त्वाद्वापचा**–वा० बा०। १३ **न चा**–वा० बा०। १४–**भावं कारण**–वा० बा० कां० विना। १५–**प्रतिपाद्य**–भां० मां० वा० बा० विना। १६–**वृत्तोत्यु**–वा० बा०। १७–**वसीयेत** भां० मां०। १८–**श्च प्रयु**–वा० बा०। १९ पृ० १९२ पं० ९–२२ तथा ३३।

२० "अगोनिवृत्तिरन्यत्वं तस्य चात्मगतैव सा। भेदोक्तावप्यभावस्तु केवलो न निवर्तते" ॥
"तद्विशेषणभावेऽपि वस्तुधीर्न विहीयते। कल्पनानिर्मितं चेदमभेदेऽपि विशेषणम्" ॥
"सोऽपकृष्य ततो धर्मः स्थापितो भेदवानिव। येन दण्डादिवत् तस्य जायते हि विशेषणम्" ॥
तत्त्वसं० का० १०७५-१०७६-१०७७ पृ० ३३४।

२१ "यदि ह्यन्यव्यावृत्तिर्भावरूपा वस्तुनो विशेषणत्वेनाभिप्रेता स्यात् तदैतत्"–तत्त्वसं० पञ्जि० पृ० ३३४ पं० १५। २२ "अगोनिवृत्तिर्या गोरभिधीयते साऽश्वादिभ्यः"–तत्त्वसं० पञ्जि० पृ० ३३४ पं० १७। २३–**यते साश्वा**–वा० बा०। २४–**भावेव** वा० बा०। २५ **यदप्य**–वा० बा० हा० वि०। **यदिप्य**–आ०। २६–**तो गौरा**–आ० हा० कां० विना। २७–**त्वम् नामान्यस्मा**–भां० विना। "यथाऽन्यत्वम्, न हि अन्यत्वं नाम अन्यस्माद् वस्तुनोऽन्यत्"–तत्त्वसं० पञ्जि० पृ० ३३४ पं० २०। २८–**न्यद् स्तु ततो** वा० बा०।

प्यन्यव्यावृत्तेर्विशेष्ये वस्तुधीर्भवत्येव। अथ व्यतिरिक्तमेव विशेषणं लोके प्रसिद्धम्; यथा–दण्डः पुरुषस्य, व्यावृत्तिश्चाव्यतिरिक्ता वस्तुनः; तत् कथमसौ तस्य विशेषणम्? असदेतत्; न हि परमार्थेन किञ्चित् कस्यचिद् विशेषणम् अनुपकारकस्य विशेषणत्वायोगात्, उपकारकत्वे चाङ्गीक्रियमाणे कार्यकाले कारणस्यानवस्थानाद् अयुगपत्कालभाविनोर्विशेषणविशेष्यभावोऽनुपपन्नः, युगपत्कालभावित्वेऽपि तदानीं सर्वात्मना परिनिष्पत्तेर्न परस्परमुपकारोऽस्तीति न युक्तो विशेषणविशेष्यभाव इति सर्वभावानां स्वस्वभावव्यवस्थितेरयःशलाकाकल्पत्वात् कल्पनया अमीषां मिश्रीकरणम्। अतः परमार्थतो यद्यपि व्यावृत्ति–तद्वतोरभेदस्तथापि कल्पनारचितं भेदमाश्रित्य विशेषणविशेष्यभावोऽपि भविष्यति।

यच्चोक्तम्—'यदा वाऽशब्दवाच्यत्वान्न व्यक्तीनामपोह्यता' इत्यादि,

तत्र 'व्यक्तीनामवाच्यत्वात्' इत्यसिद्धम्। तथाहि–यद् व्यक्तीनामवाच्यत्वमस्माभिर्वर्णितं तत् परमार्थचिन्तायाम् न पुनः संवृत्यापि; तया तु व्यक्तीनामेव वाच्यत्वमविचारितरमणीयतया प्रसिद्धमिति कथं नासिद्धो हेतुः? अथ पारमार्थिकमवाच्यत्वं हेतुत्वेनोपादीयते तदाऽपोह्यत्वमपि परमार्थतो व्यक्तीनां नेष्टमिति सिद्धसाध्यता।

यच्चोक्तम्—'तदापोह्येत सामान्यम्' इत्यादि,

तत्रापि 'अपोह्यत्वात्' इत्यस्य हेतोरसिद्धत्वमनैकान्तिकत्वं च, व्यक्तीनामेवापोहस्य प्रतिपादितत्वात्। न चापोहेऽपि वस्तुता, साध्यविपर्यये हेतोर्बाधकप्रमाणाभावात्।

यदपि—'अभावानामपोह्यत्वं न' इत्यादि,

तत्र, "नाभावोऽपोह्यते ह्येवं नाभावो भाव इत्ययम्।
भावस्तु न तदात्मेति तस्येष्टैवमपोह्यता"॥
"यो नाम न यदात्मा हि स तस्यापोह्य उच्यते।
न भावोऽभावरूपश्च तदपोहे न वस्तुतः"॥ [तत्त्वसं० का० १०८१–१०८२]

'नाभावः' इत्येवमभावो नापोह्यते येनाभावरूपतायास्त्यागः स्यात्, किं तर्हि? भावो यः स विधिरूपत्वादभावरूपविवेकेनावस्थित इति सामर्थ्यादपोह्यत्वं तस्याभावस्येष्टत्वम् (एम्) तदेव स्पष्टीकृतम् 'यो नाम' इत्यादिश्लोकेन। 'तदपोहे' इति तस्याभावस्यैवमपोहे सति न वस्तुता प्राप्नोति। अत्रोभयपक्षप्रसिद्धोदाहरणप्रदर्शनेनानैकान्तिकतामेव स्फुटयति—

"प्रकृतीशादिजन्यत्वं न हि वस्तु प्रसिद्ध्यति"॥
"नातोऽसतोऽपि भावत्वमिति क्लेशो न कश्चन"। [तत्त्वसं० का० १०८३–१०८४]

१–**कत्वे वाङ्गी**–भां० मां० विना। २–**कारो नास्ति** बा०। ३–**द्धतोऽभेद**–वि०।–**द्धतो भेद**–आ० हा० कां०। ४ पृ० १९३ पं० २० तथा ३६। ५–**दा चाऽ**–भां० मां०। ६ पृ० १९३ पं० २०।

७ "प्रतिभासश्च शब्दार्थ इत्याहुस्तत्त्वचिन्तकाः। दृश्य–कल्पा(ल्प्या)विभागज्ञो लोको बाह्यं तु मन्यते"॥
"तस्यातोऽध्यवसायेन व्यक्तीनामेव वाच्यता। तत्त्वतश्च न शब्दानां वाच्यमस्तीति साधितम्"॥
तत्त्वसं० का० १०७८–१०७९ पृ० ३३५।

८–**चारितमरम**–आ०। ९–**वाच्यं हे**–भां० मां० वा० बा० विना। १० पृ० १९३ पं० २१ तथा ३६। ११ **तदपो**–भां० मां०। १२ पृ० १९३ पं० २६। १३–**मनेका**–वा० बा०।

"इत्थं च शब्दवाच्यत्वाद् व्यक्तीनामस्त्यपोह्यता। सामान्यस्य तु नापोहो न चापोहेऽपि वस्तुता"॥
तत्त्वसं० का० १०८० पृ० ३३५।

१४–**माणभा**–आ० हा० वि०। १५ **यद्यपिऽभा**–वा० बा०। पृ० १९३ पं० २२ तथा ४१। १६–**दिना च ना भावो पोह्य**–आ० हा० वि०।–**दिना भावो पोह्यमिति नाभावोह्यते त्येवं** वा० बा०। १७ "तस्यापोह उच्यते"–तत्त्वसं०। १८ शास्त्रवा० स्याद्वादक० पृ० ४०५ प्र० पं० ८–९। १९ **न भाव**–वा० बा०। २०–**भावास्पष्टत्वम्** भां० मां०।–**भावं स्येष्टत्वं** हा०। वा० बा० प्रतौ तु नैष पाठः। "तस्याभावस्येष्टम्"–तत्त्वसं० पञ्जि० पृ० ३३५ पं० २८। २१ पृ० २१४ पं० २०। २२–**हे ईति** भां० मां०। २३ शास्त्रवा० स्याद्वादक० पृ० ४०५ प्र० पं० १०।

अस्य पूर्वार्धं तु–"प्रकृतीशादिजन्यत्वं वस्तूनां नेति चोदिते"–तत्त्वसं०।

२४ उत्तरार्धं त्वस्य–"तस्य सिद्धौ च सत्ताऽस्ति सा चाऽसत्ता प्रसिद्ध्यति"–तत्त्वसं०।

तथाहि–प्रकृति-ईश्वर-कालादिकृतत्वं भावानां भवद्भिर्मीमांसकैरपि नेष्यत एव, तस्य च प्रतिषेधे सत्यपि यथा न वस्तुत्वमापद्यते तथा अपोह्यत्वेऽप्यभावस्य वस्तुत्वापत्तिर्न भविष्यतीत्यनेकान्तः।

यदुक्तम्—'तत्रासतोऽपि वस्तुत्वमिति क्लेशो महान् भवेत्' इति,

तदप्यनेनैवानैकान्तिकत्वप्रतिपादनेन प्रतिविहितमिति दर्शयति 'नातोऽसतोऽपि' इत्यादिना।

'तदसिद्धौ न सत्ताऽस्ति न चासत्ता प्रसिद्ध्यति'॥ इति।

अत्र अभावस्य यथोक्तेन प्रकारेणासिद्धावपि भावस्य सत्ता सिद्ध्यत्येव, तस्य स्वस्वभावव्यवस्थितत्वात्। या च भावस्य यथोक्तेन प्रकारेण सिद्धिः सैव सत्तेति प्रसिद्ध्यति। एतदेवोक्तम्—

"अगोतो विनिवृत्तश्च गौर्विलक्षण इष्यते।
भाव एव ततो नायं गौरगौर्मे प्रसज्यते"॥ [तत्त्वसं० का० १०८५]

'भाव एव भवेत्' इति, एतन्नानिष्टापादनम् इष्टत्वात्। तथाहि–अगोरूपादश्वादेर्गौर्भावविशेषरूप एव विलक्षण इष्यते नाभावात्मा; तेन भाव एव भवेत्, अगोतश्च गोर्वैलक्षण्यस्येष्टत्वादगोर्न गोत्वप्रसङ्गः। एतेन यदुक्तम्—

'अभावस्य च योऽभावः' इत्यादि, तत् प्रतिविहितम्।

यच्चोक्तम्— 'न ह्यवस्तुनि वासना' इति, तत् असिद्धमनैकान्तिकं च। यतः—

"अवस्तुविषयेऽप्यस्ति चेतोमात्रविनिर्मिता।
विचित्रकल्पनाभेदरचितेष्विव वासना"॥
"ततश्च वासनाभेदाद् भेदः सद्रूपतापि वा।
प्रकल्प्यतेऽप्यपोहानां कल्पनारचितेष्विव"॥ [तत्त्वसं० का० १०८६–१०८७]

'अवस्तुविषयं चेतो नास्ति' इति, एतदसिद्धम्। तथाहि—उत्पाद्यकथाविषयसमुद्भूतवस्त्वाकारसमारोपेण प्रवर्तत एव चेतः तथा(च्चा)ऽनागतसजातीयविकल्पोत्पत्तये अनन्तरचेतसि वासनां माधत्त एव; यतः पुनरपि सन्तानपरिपाकवशात् प्रबोधकप्रत्ययमासाद्य तथाविधमेव चेतः समुपजायते, तद्वदपोहानामपि परस्परतो भेदः सद्रूपता च कल्पनावशाद् भविष्यतीत्यनैकान्तिकता।

यच्च–

'शब्दभेदोऽप्यपोहनिमित्तो न युक्तः' इति,

अत्र–

"यादृशोऽर्थान्तरापोहः प्रतिबिम्बात्मको
वाच्योऽयं प्रतिपादितः।

---

१ शास्त्रवा० स्याद्वादक० पृ० ४०५ प्र० पं० ४। २ पृ० १९४ पं० १४ तथा ३२। ३ पृ० २१४ पं० २७। ४ **न व स**–वा० बा०। **न वा स**–आ० हा० वि०। ५ पृ० १९४ पं० १४ तथा ३२। ६ "प्रकारेण सिद्धौ सत्यामपि भावस्य सत्ता सिद्ध्यत्येव तस्य स्वस्वभावव्यवस्थितत्वात्। या चाऽभावस्य"–तत्त्वसं० पञ्जि० पृ० ३३६ पं० १८। ७ **आगोतो** आ० हा० वि० वा० बा०। **अगौतो** मां०। "अगोतो विनिवृत्तिश्च"–तत्त्वसं०। "अगोतो विनिवृत्तेश्च"–शास्त्रवा० स्याद्वादक० पृ० ४०५ प्र० पं० १३। ८–**श्च गोर्वि**–आ० हा० वि० कां०। ९ पृ० १९४ पं० ७ तथा २३। १० **गोर्विलक्षण्यस्ये**–आ० हा० वि० कां०। **गो वैलक्षण्यस्ये**–वा० बा०। ११ पृ० १९४ पं० ६ तथा २३। १२–**वश्व व यो**–वा० बा०। १३ पृ० १९५ पं० ४ तथा २८। १४–**वस्तुनिविष**–आ० हा० वि०। १५–**तापि च** कां०। "–पि च–" तत्त्वसं०। शास्त्रवा० स्याद्वादक० पृ० ४०५ द्वि० पं० १। १६ शास्त्रवा० स्याद्वादक० पृ० ४०५ प्र० पं० १४ तथा द्वि० पं० १। १७ पृ० १९५ पं० ४ तथा २८। १८–**थाह्युत्पोह्यक**–भां० मां०। **–थाह्युपोह्यक**–आ०हा० वि०।–**थाह्यपोह्यक**–कां०। "तथाहि–उत्पाद्यकत्वा(ल्प?)विषय"–तत्त्वसं० पञ्जि० पृ० ३३७ पं० ८। "अपोहभेद–सत्तयोश्च तथाविधवासनामूलविकल्पविषयत्वात् कल्पितवृत्तान्तार्थाद्युपस्थित्यनुरोधेनाऽवस्तुन्यपि वासनोपगमात्"–शास्त्रवा० स्याद्वादक० पृ० ४०५ प्र० पं० १२। १९–**षयासमु**–वा० बा०। २० **एव चेतस्तुच्चाऽनाग**–आ०। **एव चेतस्तुत्वाऽनाग**–हा० वि०। **एव चेतस्तच्चाऽनाग**–कां०। **एवस्तुत्वाऽनाग**–वा० बा०। "एव चेतः तच्चाऽनागतसजातीयविकल्पोत्पत्तये"–तत्त्वसं० पञ्जि० पृ० ३३७ पं० ९। २१–**ना समाध**–भां० मां०। २२–**वशा अबोधप्रत्यय**–आ० हा० वि० वा० बा०।–**वशाद् अबोधप्रत्यय**–कां०। २३–**थाविध एव** आ० हा० वि०।२४–**दपोह्याना**–वा० बा०। २५ पृ० १९५ पं० १८। २६–**रापोहप्रति**–भां० मां०।

शब्दान्तरव्यपोहोऽपि
तादृगेव प्रतिबिम्बात्मक एवावगम्यते" ॥ [तत्त्वसं० का० १०८८]

इति वाचकापोहपक्षेऽपि दूषणं विस्तरतः प्रतिपादितमयुक्तं द्रष्टव्यम्।

'अगम्यगमकत्वं स्यात्' इति,

अत्र प्रयोगेऽपि यदि 'अवस्तुत्वात्' इति सामान्येनोपादीयते तदा हेतुरसिद्धः यतः प्रतिबिम्बात्मनोर्वाच्य-वाचकापोहयोर्वाह्यवस्तुत्वेन भ्रान्तैरवसितत्वात् सांवृतं वस्तुत्वमस्त्येव। अथ पारमार्थिकमवस्तुत्वमाश्रित्य हेतुरभिधीयते तदा सिद्धसाध्यता; नहि परमार्थतोऽस्माभिः किञ्चिद् वाच्यं वाचकं चेष्यते। यत उक्तम्—

"न वाच्यं वाचकं चास्ति परमार्थेन किञ्चन।
क्षणभङ्गिषु भावेषु व्यापकत्ववियोगतः" ॥ [तत्त्वसं० का० १०९०]

क्षणिकत्वेन सङ्केतव्यवहारासकालव्यापकत्वाभावात् स्वलक्षणस्येति भावः। स्यादेतत् नास्माभिस्तात्त्विको वाच्यवाचकभावो निषिध्यते, किं तर्हि? तात्त्विकीमपोहयोरवस्तुतामाश्रित्य सांवृतमेव गम्यगमकत्वं निषिध्यते नैं भाविकम्; तेन (तेन न) हेतोरसिद्धतापि (ता, नापि) सिद्धसाध्यता प्रतिज्ञादोषो भविष्यति; द्वयोरपि हि सांवृतत्वे तात्त्विकत्वे वाऽऽश्रीयमाणे स्यादेतद् दोषद्वयमिति, नैवम्; हेतोरनैकान्तिकताप्रसक्तेः कल्पनारचितेषु हि महाश्वेतादिष्वर्थेषु तद्वाचकेषु च शब्देषु परमार्थतो वस्तुत्वाभावेऽपि सांवृतस्य वाच्यवाचकभावस्य दर्शनात्। स्यादेतत् तत्रापि महाश्वेतादिषु सामान्यं वाच्यं वाचकं च परमार्थतोऽस्त्येव ततो न तैर्व्यभिचारः, असदेतत्; सामान्यस्य विस्तरेण निरस्तत्वात् नं तेषु सामान्यं वाच्यं वाचकं वा महाश्वेतादिष्वस्तीति कथं नानैकान्तिकता हेतोः? स्यादेतत् यद्यपि तत्र वस्तुभूतं नास्ति सामान्यं वाच्यम् वाचकं (कं तु) महाश्वेतादिशब्दस्वलक्षणमस्त्येव, न; सर्वपदार्थव्यापिनः क्षणभङ्गस्य प्रसाधितत्वान्न शब्दस्वलक्षणस्य वाचकत्वं युक्तम्, क्षणभङ्गित्वेन तस्य सङ्केतासम्भवात् व्यवहारकालानन्वयाच्चेति प्रतिपादितत्वात्।

"तस्मात् तद् द्वयमेष्टव्यं प्रतिबिम्बादि सांवृतम्।
तेषु तद् व्यभिचारित्वं दुर्निवारमतः स्थितम्" ॥ [तत्त्वसं० का० १०९४]

१-**रद्यपो**-वा० बा०।

२ "यादृशोऽर्थान्तरापोहो वाच्योऽयं प्रतिपादितः। शब्दान्तरव्यपोहोऽपि तादृगेवावगम्यताम्" ॥
तत्त्वसं० का०।

३-**तमुक्तं द्र**-भां० मां० विना। ४ **अगम्यं** भां० मां० विना। ५ पृ० १९५ पं० २४ तथा ४३।

६ "वस्त्वित्यध्यवसायत्वान्नाऽवस्तुत्वमपोहयोः। प्रसिद्धं सांवृते मार्गे तात्त्विके त्विष्टसाधनम् ॥
तत्त्वसं० का० १०८९ पृ० ३३७।

७-**मस्त्वेवाप पर**-वा० बा०। ८-**कं वेष्य**-भां०। ९-**कं वास्ति** वा० बा०। १० शास्त्रवा० स्याद्वादक० पृ० ४०५ द्वि० पं० १०। ११-**हारऽसका**-वा० बा०। १२ **नाभाविक**-आ० हा० वि०। "न भाविकम्, तेन न हेतोरसिद्धता, नापि सिद्धसाध्यता प्रतिज्ञादोषः"-तत्त्वसं० पञ्जि० पृ० ३३८ पं० ५। १३-**ति नैव हे**-आ० हा०।

१४ "तद् गम्यगमकत्वं चेत् सांवृतं प्रतिषिध्यते। तात्त्विकीं समुपाश्रित्य विनिवृत्त्योरवस्तुताम्" ॥
"तथापि व्यभिचारित्वं दुर्वारमनुषज्यते। विकल्परचितैरर्थैः शब्दैस्तद्वाचकैरपि" ॥
तत्त्वसं० का० १०९१-१०९२ पृ० ३३८।

१५ शास्त्रवा० स्याद्वादक० पृ० ४०५ द्वि० पं० ११। १६ पृ० ११० पं० ८-पृ० ११३ पं० २८।

१७ "नहि तेष्वस्ति सामान्यं वाच्यं तस्य च वाचकम्। न वाचकत्वं शब्दस्य क्षणभङ्गि स्वलक्षणम्" ॥
तत्त्वसं० का० १०९३ पृ० ३३८।

१८ **वाचकं च महा**-वा० बा० विना। "वाचकं तु"-तत्त्वसं० पञ्जि० पृ० ३३८ पं० २१। १९ **शब्दलक्षणवाच**-भां० मां० विना। २०-**ङ्गित्वे च तस्य संकेतनासंभ**-वा० बा०। २१ पृ० १७५ पं० ५ तथा ३०। २२ शास्त्रवा० स्याद्वादक० पृ० ४०५ द्वि० पं० १३।

'द्वयम्' इति वाच्यं वाचकं च, 'प्रतिबिम्बादि' इति आदिशब्देन निराकारज्ञानाभ्युपगमेऽपि स्वगतं किञ्चित् प्रतिनियतमनर्थेऽर्थाध्यवसायिरूपत्वं विज्ञानस्यावश्यमङ्गीकर्तव्यमिति दर्शयति, 'तेषु' इति कल्पनोपरचितेष्वर्थेषु, 'तद्' इति तस्मात् तस्य वा हेतोर्व्यभिचारित्वं तद्व्यभिचारित्वम्। 'विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते' इति, अत्रापि न ह्यस्माभिः सर्वथा विधिरूपः शब्दार्थो नाभ्युपगम्यते—येनैतद् भवताऽनिष्टत्वप्रसङ्गापादनं क्रियते—किन्तु शब्दार्था(ब्दादर्था)ध्यवसायिनश्चेतसः समुत्पादात् संवृतो (सांवृतो) विधिरूपः शब्दार्थोऽभ्युपगम्यत एव। तत्त्वतस्तु न किञ्चिद् वाच्यमस्ति शब्दानामिति विधिरूपस्तात्त्विको निषिध्यते; तेन सांवृतस्य विधिरूपस्य शब्दार्थस्येष्टत्वात् स्वार्थाभिधाने विधिरूपे सत्यन्यव्यतिरेकस्य सामर्थ्यादधिगंते वि(तेर्वि)धिपूर्वको व्यतिरेको युज्यत एव। स्यादेतत् यदि विधिरूपः शब्दार्थोऽभ्युपगम्यते कथं तर्हि हेतुमुखे लक्षणकारेण "असम्भवो विधेः" [हेतु०] इत्युक्तम्? सामान्यलक्षणादेर्वाच्यस्य वाचकस्य वा असम्भवात् परमार्थतः, शब्दानां विकल्पानां च परमार्थतो विषयासम्भवात् परमार्थमाश्रित्य विधेरसम्भव उक्त आचार्येण इत्यविरोधः।

'अपोहमात्रवाच्यत्वम्' इत्यादावपि
एकमेवानीलानुत्पलव्यावृत्तार्थाकारमुभयरूपं प्रतिबिम्बकं नीलोत्पलशब्दादुदेति नाभावमात्रम्; अतः शाबलार्थाऽध्यवसायित्वमध्यवसायवशान्नीलोत्पलादिशब्दानामस्त्येवेति तदनुरोधात् सामानाधिकरण्यमुपपद्यत एव। यच्चोक्तम्—

'अथान्यापोहवद् वस्तु वाच्यमित्यभिधीयते' इति,

तत्रापि यदि हि व्यावृत्ताद् भावाद् व्यावृत्तिर्नामान्या भवेत् स्यात् तदा तद्वदपक्षोदितदोषप्रसङ्गः यावता नान्यतो व्यावृत्ताद् भावादन्या व्यावृत्तिरस्ति अपि तु व्यावृत्त एव भावो भेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायां तथाऽभिधीयते; तेन यथा जातौ प्राधान्येन वाच्यायां पारतन्त्र्येण

१-**र्थाध्यवसा**-भां० मां० विना। "प्रतिनियतमनर्थेऽर्थाध्यवसायिरूपस्य विज्ञानस्य"-तत्त्वसं०पञ्जि० पृ०३३९ पं०२। २ पृ० १९६ पं० ९।

३ "विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते। तदाभं जायते चेतः शब्दादर्थावसायि हि" ॥
"स्वार्थाभिधाने शब्दानामर्थादन्यनिवर्तनम्। तद्योगो व्यतिरेकोऽपि मम तत्पूर्वको ह्यसौ" ॥
तत्त्वसं० का० १०९५-१०९६ पृ० ३३९।

४ **क्रियेत** आ०। "क्रियते यावता शब्दादर्थाध्यवसायिनश्चेतसः समुत्पादात् सांवृतो विधिरूपः शब्दार्थोऽभीष्यत एव"-तत्त्वसं० पञ्जि० पृ० ३३९ पं० ११। ५-**म्यते तत्त्व**-मां० वा० बा० विना। ६-**गतिर्वि**-वा० बा० विना। "सामर्थ्यादधिगतेर्विधिपूर्वको व्यतिरेकः"-तत्त्वसं० पञ्जि० पृ० ३३९ पं० १४। ७-**मुखेन ल**-कां०। ८ "विधेः"-तत्त्वसं० पञ्जि० पृ० ३३९ पं० १७।

९ "असंभवो विधेरुक्तः सामान्यादेरसंभवात्। शब्दानां च विकल्पानां वस्तुनो(तोऽ)विषयत्वतः" ॥
तत्त्वसं० का० १०९७ पृ० ३३९।

१० "च"-तत्त्वसं० पञ्जि० पृ० ३३९ पं० २०। ११ पृ० १९६ पं० १८ तथा ३७।

१२ "नीलोत्पलादिशब्देभ्य एक एवा(**एकमेवा**)वसीयते। अनीलानुत्पलादिभ्यो व्यावृत्तं प्रतिबिम्बकम्" ॥
तत्त्वसं० का० १०९८ पृ० ३३९।

१३ "सबलार्थाभिधायित्वमध्यवसायवशात्"-तत्त्वसं० पञ्जि० पृ० ३३९ पं० २७। १४ पृ० १९७ पं० १८ तथा ३७।

१५ "न त्वन्यापोहवद् वस्तु वाच्यमस्माभिरिष्यते।
व्यावृतादन्यतोऽभा(**तो भा**)वान्नान्याद्वया (**न्या व्या**) वृत्तिरस्ति नः" ॥
"तत् पारतन्त्र्यदोषोऽयं जातावि न संगतः। अवदातमिति(**तमति**)प्रोक्ते शब्दस्यार्थेऽपृथक्त्वतः" ॥
" 'अवदातमिति(**तमति**)प्रोक्ते' इति विशुद्धधिया आचार्यदिङ्नागेन प्रोक्ते"-तत्त्वसं० पञ्जि० पृ० ३४० पं० १५।
"विशेषणविशेष्यत्व-सामानाधिकरण्ययोः। तस्मादपोहे शब्दार्थे व्यवस्था न विरुध्यते" ॥
तत्त्वसं० का० १०९९-११००-११०१ पृ० ३४०।

१६ **तद्यत्पक्षो**-मां०। १७-**तन्त्रेण** भां० मां० विना।

तद्व्यतोऽभिधानात् तद्व्यतभेदानाक्षेपात् तैः सह सामानाधिकरण्यादेरभावप्रसङ्ग उक्तः[1] तद्व्यदपोहपक्षे नावतरति, व्यतिरिक्तान्यापोहवतोऽनभिधानात्। न ह्यस्मन्मते परपक्ष इव सामानाधिकरण्याभावः। तथाहि–'नीलम्' इत्युक्ते पीतादिव्यावृत्तपदार्थाध्यवसायिभ्रमर-कोकिलाऽञ्जनादिषु संशय्यमानरूपं विकल्पप्रतिबिम्बकमुदेति, तच्चोत्पलशब्देन कोकिलादिभ्यो व्यवच्छिद्यानुत्पलव्यावृत्तवस्तुविषये व्यवस्थाप्यमानं परिनिश्चितात्मकं प्रतीयते; तेन परस्परं यथोक्तबुद्धिप्रतिबिम्बकापेक्षया व्यवच्छेद्यव्यवच्छेदकभावान्नीलोत्पलशब्दयोर्विशेष्यविशेषणभावो न विरुध्यते, द्वाभ्यां वाऽनीलानुत्पलव्यावृत्तैकप्रतिबिम्बात्मकवस्तुप्रतिपादनादेकार्थवृत्तितया सामानाधिकरण्यं च भवतीति; परपक्षे तु तद्व्यवस्था दुर्घटा। तथाहि-विधिशब्दार्थवादिपक्षे नीलादिशब्देन नीलादिस्वलक्षणेऽभिहिते 'किमुत्पलम् आहोस्विद् अञ्जनम्' इत्येवमज्ञानं विशेषान्तरे न प्राप्नोति सर्वात्मना तस्य वस्तुनः प्रतिपादितत्वात्। एकस्यैकदैकप्रतिपत्रपेक्षया ज्ञाताऽज्ञातत्वविरोधान्न धर्मान्तरे संशय-विपर्यासावित्युत्पलादिशब्दान्तरप्रयोगाकाङ्क्षा प्रयोक्तुरपि न प्राप्नोति—यदर्थमुत्पलादिशब्दोच्चारणम्—तस्य नीलशब्देनैव कृतत्वात्। अथापि स्यात् तद् वस्त्वेकदेशेनाभिहितं नीलशब्देन न सर्वात्मना; तेन स्वभावान्तराभिधानायापरः शब्दोऽन्वेष्यते, असदेतत्; न ह्येकस्य वस्तुनो देशाः सन्ति येनैकदेशेनाभिधानं स्यात् एकत्वानेकत्वयोः परस्परपरिहारस्थितलक्षणत्वात्, इति यावन्तस्त एकदेशास्तावन्त्येव भवता वस्तूनि प्रतिपादितानीति नैकमनेकं सिद्ध्येत्।

स्यादेतत् न नीलशब्देन द्रव्यमभिधीयते किं तर्हि? नीलाख्यो गुणः तत्समवेता वा नीलत्वजातिः, उत्पलशब्देनाप्युत्पलजातिरेवोच्यते न द्रव्यम्; तेन भिन्नार्थाभिधानादुत्पलादिशब्दान्तराकाङ्क्षा युज्यत एव। नन्वेवं परस्परभिन्नार्थप्रतिपादकत्वेन नितरां नीलोत्पलशब्दयोर्न सामानाधिकरण्यम् बकुलोत्पलशब्दयोरिवैकस्मिन्नर्थे वृत्त्यभावात्। अथ नीलशब्दो यद्यपि गुणविशेषवचनस्तथापि तद्वारेण नीलगुण-तज्जातिभ्यां सम्बद्धं द्रव्यमप्याह, तथोत्पलशब्देनापि जातिद्वारे (द्वारेण) तदेव द्रव्यमभिधीयत इति तयोरेकार्थवृत्तिसम्भवात् सामानाधिकरण्यं भविष्यति न बकुलोत्पल-

---

१–**दानां क्षेयात्** आ०। २ पृ० १९७ पं० २३ तथा ४०। ३ **नाहरति** वा० बा०।

४ "केवलान्नीलशब्दादेर्विशिष्टं प्रतिबिम्बकम्। कोकिलोत्पलभृङ्गादौ ध्रुवमानं प्रवर्तते" ॥
"पिकाऽञ्जनाद्यपोहेन विशिष्टविषयं पुनः। तदिन्दीवरशब्देन स्थाप्यते परिनिश्चितम्" ॥
"सामानाधिकरण्यादिरेवमस्मिन्न बाधितः। परपक्षे तु सर्वेषां तद्व्यवस्थाऽतिदुर्घटा" ॥
तत्त्वसं० का० ११०२-११०३-११०४ पृ० ३४०। शास्त्रवा० स्याद्वादक० पृ० ४०६ प्र० पं० ४।

५ **संसह्य**–वा० बा०। **संसज्य**–भां० मां०। ६–**शब्देनाकोकि**–वा० बा०। ७–**लादिभ्योऽव्यवच्छि**–मां०। ८–**या व्यवच्छेद्यव्यवस्थाभावा**–वा० बा०।–**या व्यवच्छेदकव्यवस्थाभावा**–आ० हा० वि०। ९–**एयं भव**–वा० बा०।

१० "तथाद्येन शब्देन सर्वथोक्तं स्वलक्षणम्। तथा चाभिहिते तस्मिन् कस्माद् भेदान्तरेऽमतिः" ॥
तत्त्वसं० का० ११०५ पृ० ३४१। शास्त्रवा० स्याद्वादक० पृ० ४०६ प्र० पं० ८।

११–**शब्दे नीला**–भां० मां०। १२–**न्तरेण प्रा**–आ०।

१३ "यदर्थमपरः शब्दः प्रयुज्येताऽत्र वस्तुतः। सर्वथाऽभिहिते नो चेत् तदनेकं प्रसज्यते" ॥
तत्त्वसं० का० ११०६ पृ० ३४१।

१४ **वस्तुन एकदेशाः सन्ति** मां०। मां०पाठवत् तत्त्वसं० पञ्जि० पृ० ३४१ पं० २२। "एकस्य वस्तुनो देशानुपपत्तेः"–शास्त्रवा० स्याद्वादक० पृ० ४०६ प्र० पं० १०। १५–**न नीलोत्पलमभि**–आ०।–**न मभि**–वा० बा० हा० वि०। "न नीलशब्देन द्रव्यमभिधीयते"–तत्त्वसं० पञ्जि० पृ० ३४१ पं० २६।

१६ "नीलजातिर्गुणो वाऽपि नीलशब्देन चेद् गतः। अन्येन्दीवरजातिस्तु व्यवसेयोत्पलश्रुतेः" ॥
"एवं सति तयोर्भेदाद् बकुलोत्पलशब्दवत्। सामानाधिकरण्यादि सुतरां नोपपद्यते" ॥
तत्त्वसं० का० ११०७–११०८ पृ० ३४२।

१७–**न नातरां** वा० बा०।–**न नन्तरं** आ० हा० वि०। १८–**योरेवैक**–भां० मां० आ०। वा० बा० प्रतौ नायं पाठांशः। १९–**न्नर्थे नीलोत्पलशब्दयोर्वृ**–भां० मां०। २० "जाति–गुणविशेषवचनः"–तत्त्वसं० पञ्जि० पृ० ३४२ पं० १०। २१ **जातिरवो त**–वा० बा०। "जातिद्वारेण"–तत्त्वसं० पञ्जि० पृ० ३४२ पं० ११।

शब्दयोरिति, असदेतत्; नीलगुण-तज्जातिसम्बद्धस्य द्रव्यस्य नीलशब्देन प्रतिपादनात् सर्वात्मना उत्पलश्रुतेर्वैयर्थ्यप्रसङ्गात्। स्यादेतत् यद्यपि नीलशब्देन गुण-तज्जातिमद् द्रव्यमभिधीयते तथापि नीलशब्दस्यानेकार्थवृत्तिदर्शनात् प्रतिपत्तुरुत्पलार्थ(र्थै)निश्चितरूपा न बुद्धिरुपजायते—कोकिलादेरपि नीलत्वात्—अतोऽर्थान्तरसंशयव्यवच्छेदायोत्पलश्रुतेः प्रयोगः सार्थक एव, तदप्यसम्यक्; प्रकृतार्थानभिज्ञतयाभिधानात्। विधिशब्दार्थपक्षे हि सामानाधिकरण्यं न सम्भवतीत्येतदत्र प्रकृतम्, यदि चोत्पलशब्दः संशयव्यवच्छेदायैव व्याप्रियते न द्रव्यप्रतिपत्तये न तर्हि विधिः शब्दार्थः स्यात् उत्पलशब्देन भ्रान्तिसमारोपिताकारव्यवच्छेदमात्रस्यैव प्रतिपादनात्, परस्परविरुद्धं चेदमभिधीयते–'नीलशब्देनोत्पलादिकं द्रव्यमभिधीयते अथ च प्रतिपत्तुस्तत्र निश्चयो न जायते' इति; न हि यत्र संशयो जायते स शब्दार्थो युक्तः अतिप्रसङ्गात्, नापि निश्चयेन विषयीकृते वस्तुनि संशयोऽवकाशं लभते निश्चयाऽऽरोपमनसोर्बाध्यबाधकभावात्। स्यादेतत् यद्यपि नीलोत्पलशब्दयोरेकस्मिन्नर्थे वृत्तिर्नास्ति तदर्थयोस्तु जाति-गु(योस्तु गु)णजात्योरेकस्मिन् द्रव्ये वृत्तिरस्तीत्यतोऽर्थद्वारकमनयोः सामानाधिकरण्यं भविष्यति, तदेतदयुक्तम् अतिप्रसङ्गात्; एवं हि रूप-रसशब्दयोरपि सामानाधिकरण्यं स्यात् तदर्थयो रूप-रसयोरेकस्मिन् पृथिव्यादिद्रव्ये वृत्तेः। किञ्च, तर्हि 'नीलोत्पलम्' इत्येकार्थविषया बुद्धिर्न प्राप्नोति एकद्रव्यसमवेतयोर्गुण-जात्योर्द्वाभ्यां पृथक् पृथगभिधानात्; न चैकार्थविषयज्ञानानुत्पादे शब्दयोः सामानाधिकरण्यमस्तीत्यलमतिप्रसङ्गेन। अथापि स्यात् यदेव नीलगुण-तज्जातिभ्यां सम्बद्धं वस्तु न तदेवोत्पलशब्देनोच्यते; तेनोत्पलश्रुतिर्व्यर्था न भविष्यति। नन्वेवं भिन्नगुणजात्याश्रयद्रव्यप्रतिपादकत्वान्नीलोत्पलशब्दयोः कुतः सामानाधिकरण्यम्? अथ यद्यपि यदेव द्रव्यं नीलशब्देनोच्यते उत्पलशब्देनापि तदेव तथापि नीलशब्दो नोत्पलजातिसम्बन्धिरूपेण द्रव्यमभिधत्ते, किं तर्हि? नीलगुण-तज्जातिसम्बन्धिरूपेणैव; तेनोत्पलत्वजातिसम्बन्धिरूपत्वमस्याभिधातुमुत्पलश्रुतिः प्रवर्तमाना नां(ना)नार्थिका भविष्यति, असदेतत्; न हि नीलगुण-तज्जातिसम्बन्धिरूपत्वादन्यदेवोत्पलत्वजातिसम्बन्धिरूपत्वं येन नील-तज्जातिसम्बन्धिरूपत्वाभिधाने द्रव्यस्योत्पलत्वजातिसम्बन्धिरूपत्वाभिधानं (नं न) भवेत्, एकस्माद् द्रव्याद् द्वयोरपि सम्बन्धिरूपत्वयोरव्यतिरेकात् तयोरप्येकत्वमेवेत्ययुक्तमेकरूपाभिधानेऽपररूपस्यानभिधानम्। भवतु वोत्पलत्वसम्बन्धिरूपत्वं नीलतज्जातिसम्बन्धिरूपत्वादन्यत् तथा-

---

१ "गुण-तज्जातिसंबद्धं द्रव्यं चेत् प्रतिपाद्यते। नीलशब्देन यद्येवं व्यर्था स्यादुत्पलश्रुतिः" ॥
"ताभ्यां यदेव संबद्धं तदेवोत्पलजातिमत्। नीलश्रुत्यैव तत्रोक्तं व्यर्था नीलोत्पलश्रुतिः" ॥
तत्त्वसं० का० ११०९–१११० पृ० ३४२।

२ **गुण-जातिम**–आ० हा०। **गुण-तज्जातिद्र**–वा० बा०। ३ "प्रतिपत्तुरुत्पलार्थे निश्चितरूपा"–तत्त्वसं० पञ्जि० पृ० ३४२ पं० २२। ४ "सामानाधिकरण्यादि"–तत्त्वसं० पञ्जि० पृ० ३४२ पं० २४। ५–**व च व्या**–वि०। ६–**यते तद्व्यप्र**–भां० मां०। ७ **जायेत इ**–भां० मां० विना। ८ "तदर्थयोस्तु गुण-जात्योरेकस्मिन्"–तत्त्वसं० पञ्जि० पृ० ३४३ पं० ४। ९–**ण-जाति**–आ० हा० वि० वा० बा०।

१० "गुण-तज्जातिसंबद्धादन्यदुत्पलजातिमत्। यदि भिन्नाश्रये स्यातां पुनर्नीलोत्पलश्रुती" ॥
तत्त्वसं० का० ११११ पृ० ३४३।

११–**शब्देनो**–भां० मां० विना। १२–**म्बन्धरू**–भां० मां० विना। १३–**ना नर्थिका** आ० विना।–**ना नानर्थिका** वि० सं०। "प्रवर्तमाना नानर्थिका"–तत्त्वसं० पञ्जि० पृ० ३४३ पं० २०।

१४ "अथोत्पलत्वसंबन्धिरूपत्वेन न चोदयेत्। गुण-तज्जातिसंबद्धं द्रव्यं नीलमिति ध्वनिः" ॥
तत्त्वसं० का० ११११२ पृ० ३४३।

१५ "स्यान्नामोत्पलतायोगिरूपत्वमतदात्मकम्। उत्पलत्वेन संबद्धं त्वाभ्यां संबद्धमेव तत्" ॥
"नीलश्रुत्या च तत् प्रोक्तं शाब्द्याऽत्र विषयीकृतम्। बुद्ध्या सर्वात्मना नांशैस्तदनर्थोत्पलश्रुतिः" ॥
तत्त्वसं० का० ११११३–११११४ पृ० ३४३।

१६ "येन नीलोत्पलादिसंबन्धि"–तत्त्वसं० पञ्जि० पृ० ३४४ पं० ३। १७–**त्वाभिधा न भ**–वा० बा०।–"त्वाभिधानं न भवेत्" तत्त्वसं० पञ्जि० पृ० ३४४ पं० ४। १८ **द्रव्या द्रव्ययोरपि** आ० हा० वि०। **द्रव्याद्द्वयोरपि** भां० मां०। १९–**पत्वयोः व्य**–आ०।–**पत्वयो व्य**–हा०।–**पत्वाव्यतिरेकात् तयो**–वा० बा०। "संबन्धिरूपत्वयोरव्यतिरेकात् तद्वत् तयोरपि"–तत्त्वसं० पञ्जि० पृ० ३४४ पं० ४। २०–**रप्येकान्तयोरप्ये**–वि०। २१–**स्याभिधान**–वा० बा०। २२–**तु चो**–वा० बा० भां० मां०।

प्युत्पलश्रुतिरनर्थिकैव । तथाहि-यत् तद् अनंशं वस्तु उत्पलजात्या सम्बद्धं तदेव नीलगुण-तज्जातिभ्यां सम्बध्यते, तच्चानंशत्वात् सर्वात्मना नीलश्रुत्यैवाभिहितम् किमपरमनभिहितमस्य स्वरूपमस्ति यदभिधानायोत्पलश्रुतिः सार्थिका भवेत् ।

उद्द्योतकरस्त्वाह—" 'निरंशं वस्तु सर्वात्मना विषयीकृतं नांशेन' इत्येवं विकल्पो नावतरति, सर्वशब्दस्यानेकार्थविषयत्वात् एकशब्दस्य चावयववृत्तित्वात्" [ ] इति,

असदेतत्; वाक्यार्थापरिज्ञानत एवमभिधानात् । तथाहि-'प्रथमेनैव नीलशब्देन सर्वात्मना तत् प्रकाशितम्' इत्यस्यायमर्थो विवक्षितः-यादृशं तद् वस्तु तादृशमेवाभिहितम् न तस्य कश्चित् स्वभावस्त्यक्तः यदभिधानायोत्पलश्रुतिर्व्यापृयेत निरंशत्वात् तस्य, इति वाक्छलमेतत्-'कृत्स्नैक-देशविकल्पानुपपत्तिस्तत्र' इति, एवमन्येषामप्यनित्यादिशब्दानां प्रयोगोऽनर्थकः, प्रयोगे वा पर्या-यत्वमेव स्यात् तरु-पादपादिशब्दवत् । उक्तं च—

"अन्यथैकेन शब्देन व्याप्त एकत्र वस्तुनि ।
बुद्ध्या वा नान्यविषय इति पर्यायता भवेत्" ॥ [ ] इति ।

अथ भवत्पक्षेऽप्येकेन शब्देनाभिहिते वस्तुनि भेदान्तरे संशय-विपर्यासाभावप्रसङ्गः शब्दान्तरा-प्रवृत्तिप्रसङ्गश्च कस्मान्न भवति? संवृत्या शब्दार्थाभ्युपगमान्नास्माकमयं दोषः । तथाहि-नील-शब्देनानीलपदार्थव्यावृत्तमुत्पलादिषूपप्लवमानरूपतया तेषामप्रतिक्षेपकमध्यवसितबाह्यरूपं विकल्पप्र-तिबिम्बकमुपजायते पुनरुत्पलश्रुत्या तदेवानुत्पलव्यावृत्तमारोपितबाह्यैकवस्तुस्वरूपमुपजन्यते; तदेवं क्रमेणानीलानुत्पलव्यावृत्तमध्यवसितबाह्यैकरूपं भ्रान्तं विकल्पप्रतिबिम्बकमुपजन्यत इति तदनु-रोधात् सांवृतं सामानाधिकरण्यं युज्यत एव ।

यदुक्तम्—

'लिङ्ग-सङ्ख्यादिसम्बन्धो न चापोहस्य विद्यते' इति,

अत्र वस्तुधर्मत्वं लिङ्ग-सङ्ख्यादीनामसिद्धम् स्वतन्त्रेच्छाविरचितसङ्केतमात्रभावित्वात् । प्रयोगः-यो

१-**म्बन्ध्यते** भां० मां० विना । २ तत्त्वसं० पञ्जि० पृ० ३४४ पं० ११ । शास्त्रवा० स्याद्वादक० पृ० ४०६ द्वि० पं० १ ।

"न चेद् भेदविनिर्मुक्ते कात्स्न्र्ये-भेदविकल्पनम् । न वाक्यार्थाऽपरिज्ञानादिदं ह्यत्र विवक्षितम्" ॥
तत्त्वसं० का० १११५ पृ० ३४४ ।

३-**क्यार्थपरि**-भां० मां० विना ।

४ "प्रथमेनैव शब्देन सर्वथा तत् प्रकाशितम् । नात्मा कश्चित् परित्यक्तो यादृशं तत् तथोदितम्" ॥
तत्त्वसं० का० १११६ पृ० ३४४ । शास्त्रवा० स्याद्वादक० पृ० ४०६ द्वि० पं० २ ।

५-**तं तस्य न क**-वा० बा० विना ।

६ "एतेनैव प्रकारेण नान्येषामप्युदीरणम् । सफलं तत्र शब्दानामुक्तौ पर्यायता ध्रुवम्" ॥
तत्त्वसं० का० १११७ पृ० ३४४ ।

७ **बुद्ध्यावा** वा० बा० । ८-**यतो भ**-आ० हा० वि० । ९ तत्त्वसं० पञ्जि० पृ० ३४५ पं० २ । शास्त्रवा० स्याद्वादक० पृ० ४०६ द्वि० पं० ६ । १०-**विपर्ययाभावः प्रस**-आ० हा० वि० ।-**विपर्ययाभावाप्रस**-वा० बा० । ११-**न्तरप्रवृ**-वा० बा० ।

१२ "अस्माकं तु न शब्देन बाह्यार्थः प्रतिपाद्यते । शब्दान्न चापि विज्ञानं बाह्यार्थविषयं मतम्" ॥
"यतः सर्वात्मना ताभ्यां विषयीकरणात् परम् । शब्दज्ञानान्तरं तत्र पर्यायत्वं प्रयास्यति" ॥
तत्त्वसं० का० १११८-१११९ पृ० ३४५ ।

१३ "प्रतिबिम्बं तु शब्देन क्रमेणैवोपजन्यते । एकत्वेन च तद् भाति बाह्यत्वेन च विभ्रमात्" ॥
"सामानाधिकरण्यादि प्रतिबिम्बानुरोधतः । परमार्थेन शब्दास्तु मता निर्विषया इमे" ॥
तत्त्वसं० का० ११२०-११२१ पृ० ३४५ ।

१४-**लादिप्लव**-वा० बा० । १५-**रूपभ्रान्तिवि**-वा० बा० । १६-**धात् संवृ**-आ० हा० वि० । १७ पृ० १९७ पं० २८ तथा ४४ । १८-**धर्मलिङ्ग**-वा० बा० ।

"लिङ्ग-संख्यादियोगस्तु व्यक्तीनामपि नास्त्ययम् । इच्छारचितसंकेतनिमित्तो न हि वास्तवः" ॥
तत्त्वसं० का० ११२२ पृ० ३४५ । शास्त्रवा० स्याद्वादक० पृ० ४०६ द्वि० पं० ९ ।

यदन्वय-व्यतिरेकौ नानुविधत्ते नासौ तद्धर्मः, यथा शीतत्वमग्नेः, नानुविधत्ते च लिङ्ग-सङ्ख्यादिर्वस्तुनोऽन्वय-व्यतिरेकाविति व्यापकानुपलब्धिः । न चायमसिद्धो हेतुः; यतो यदि लिङ्गं वस्तुतो वस्तु स्यात् तदैकस्मिंस्तटाख्ये वस्तुनि 'तटः' 'तटी' 'तटम्' इति लिङ्गत्रययोगिशब्दप्रवृत्तेरेकस्य वस्तुनस्त्रैरूप्यप्रसक्तिः स्यात् । न चैकस्य स्त्री-पुं-नपुंसकाख्यं स्वभावत्रयं युक्तम् एकत्वहानि-प्रसङ्गात्, विरुद्धधर्माध्यासितस्याप्येकत्वे सर्वविश्वमेकमेव वस्तु स्यात्; ततश्च सहोत्पत्ति-विनाश-प्रसङ्गः । किञ्च, सर्वस्यैव वस्तुन एकशब्देन शब्दान्तरेण वा लिङ्गत्रयप्रतिपत्तिदर्शनात् तद्विषयाणां सर्वचेतसां मेचकादिरत्नवच्छबलाभासताप्रसङ्गः । अथ सत्यपि लिङ्गत्रययोगित्वे सति सर्ववस्तूनां यदेव रूपं वक्तुमिष्टं प्रतिपादकेन तन्मात्रावभासान्येव विवक्षावशाच्चेतांसि भविष्यन्ति न शबला-भासानि; ननु यदि 'विवक्षावशादेकरूपाणि चेतांसि भवन्ति' इत्यङ्गीक्रियते तदा तानि व्यात्मक-वस्तुविषयाणि न प्राप्नुवन्ति तदाकारशून्यत्वात्, चक्षुर्विज्ञानवत् शब्दविषये । योऽपि मन्यते "संस्थान-प्रसव-स्थितिषु यथाक्रमं स्त्री-पुं-नपुंसकव्यवस्थाति (स्था" [ ] इति) तस्यापि तन्न युक्तम्; यतो यदि स्थित्याद्याश्रया लिङ्गव्यवस्था तदा तट-शृङ्खलादिवत् सर्वपदार्थेष्व-विभागेन त्रिलिङ्गताप्रसक्तिः स्थित्यादेर्विद्यमानत्वात्—अन्यथा 'तटः' 'तटी' 'तटम्' इत्यादावपि लिङ्गत्रयं न स्यात् विशेषाभावात्—इत्यतिव्यापिता लक्षणदोषः । व्यभिचारदर्शनाद् वाऽव्यापिता च—असत्यपि हि स्थित्यादिके शशविषाणादिष्वसद्रूपेषु (षु) 'अभावः' 'निरुपाख्यम्' 'तुच्छता' इत्यादिभिः शब्दैः लिङ्गत्रयप्रतिपत्तिदर्शनात् । इतश्चाव्यापिनी—स्थित्यादिष्वेव प्रत्येकं लिङ्गत्रययोगि-शब्दप्रवृत्तिदर्शनात् । तथाहि-प्रसव उत्पादः, संस्त्यानं विनाशः, आत्मस्वरूपं च स्थितिः; तत्र प्रसवे स्थिति-संस्त्यानयोरभावात् कथं 'उत्पादः' 'उत्पत्तिः' 'जन्म' इत्यादेः स्त्री-पुं-नपुंसकलिङ्गस्य शब्दस्य प्रवृत्तिर्भवेत्? तथा, संस्त्याने स्थिति-प्रसवयोरभावात् कथं 'तिरोभूतिः' 'विनाशः' 'तिरोभवनम्' इत्यादिभिः शब्दैर्व्यपदिश्येत 'संस्त्यानम्' इत्यनेन च? तथा, स्थितौ संस्त्यान-प्रसवयोरसम्भवात्

१-**ङ्ख्यादि व**-आ० । २-**ङ्गं वस्तु स्यात्** आ० ।

"तटस्तटी तटं चेति नै(त्रै)रूप्यं न च वस्तुनः । शबलाभासताप्राप्तेः सर्वेषां तत्र चेतसाम्" ॥
तत्त्वसं० का० ११२३ पृ० ३४६ ।

३ "सर्वं विश्वमेकमेव"-तत्त्वसं० पञ्जि० पृ० ३४६ पं० ११ । ४-**णं च लि**-आ० । ५-**सनाप्र**-भां० मां० विना । ६ **असत्यपि** वि० गु० । **अवसत्यपि** आ० । ७ **'सति'** वस्तुभूते, तथा च 'वस्तुभूते लिङ्गत्रयसंबन्धे सत्यपि' इत्यर्थः ।

८ "विवक्षानुगतत्वे वा न स्युस्तद्विषयाणि ते । तद्वशादेकरूपाणि नैकरूपं च वस्तु तत्" ॥
तत्त्वसं० का० ११२४ पृ० ३४६ ।

९-**दात्मानि** वा० बा० विना । १० "शब्दविषयम्"-तत्त्वसं० पञ्जि० पृ० ३४६ पं० २१ । ११-**वस्थितित**-वि० गु० ।-**वस्थेतिति त**-हा० ।-**वस्थातिति त**-आ० ।-**वस्थितेति त**-भां० मां० । "यथोक्तस्त्री-पुं-नपुंसकत्व-व्यवस्थेति"-तत्त्वसं० पञ्जि० पृ० ३४६ पं० २२ । स्त्री-पुं-नपुंसकव्यवस्था"-शास्त्रवा० स्याद्वादक० पृ० ४०६ द्वि० पं० १४ ।

१२ "स्थिति-प्रसव-संस्त्यानसंश्रया लिङ्गसंस्थितिः । यदि स्यादविभागेन वि(त्रि)लिङ्गत्वं प्रसज्यते" ॥
तत्त्वसं० का० ११२५ पृ० ३४६ । शास्त्रवा० स्याद्वादक० पृ० ४०७ प्र० पं० १ ।

१३-**वच्छद्प**-वा० बा० । १४-**नाद्या व्या**-भां० मां० ।-**नात्वा व्या**-वा० बा० ।

१५ अभावो निरूपाख्यत्वं तुच्छतेति यदुच्यते । तत्र स्थित्यादिसंबन्धः कोऽसत्सु परिकल्प्यते" ॥
तत्त्वसं० का० ११२६ पृ० ३४७ ।

१६-**द्रूपो स्व**-वा० बा० । "शशविषाणादिषु असद्रूपेषु"-तत्त्वसं० पञ्जि० पृ० ३४७ पं० ५ । शास्त्रवा० स्याद्वा-दक० पृ० ४०७ प्र० पं० १-२ । १७ **निरूपा**-भां० मां० विना । १८-**त्यादिशब्दैः** आ० कां० ।

१९ "उत्पादः प्रसवश्चैषां नाशः संस्त्यानमिष्यते । आत्मरूपं तु भावानां स्थितिरित्यभिधीयते" ॥
"तत्रोत्पादे न नाशोऽस्ति तद् किमुत्पत्तिरुच्यते । नात्माकारा स्थितिश्चास्ति तत् कथं जन्म गीयते" ॥
"संस्त्याने न द्वयं चान्यत् तत् कथं व्यपदिश्यते । तिरोभावश्च नाशश्च तिरोभवनमित्यपि" ॥
"स्थितौ स्थितिः स्वभावश्च हेतुना केन वोच्यते । अथाऽविभक्तमेवैषां रूपं स्यादेकलिङ्गता" ॥
तत्त्वसं० का० ११२७-११२८-११२९-११३० पृ० ३४७ ।

२०-**नात् इतश्चाव्यापिनी तथाहि** आ० हा० वि० । २१-**स्य प्रवृ**-वा० बा० ।

'स्थितिः' 'स्थानम्' 'स्वभावः' चेत्यादिभिः शब्दैः कथमुच्येत? अथ स्थित्यादीनां परस्परमविभक्तरूपत्वात् प्रत्येकमेषु लिङ्गत्रययोगिता; ननु यद्येषां परस्परमविभक्तं रूपं तदैकमेव परमार्थतो लिङ्गं स्यात् न लिङ्गत्रयम्।

अन्यस्त्वाह–"स्त्रीत्वादयो गोत्वादय इव सामान्यविशेषाः" [ ]। तत्र पक्षे सामान्यविशेषाणामभावा(वात्)स्त्रीत्वादीनामपि तद्रूपाणामभाव इत्यसम्भवि लक्षणम्। किञ्च, तेष्वेव सामान्यविशेषेष्वन्तरेणाप्यपरं सामान्यविशेषं 'जातिः' 'भावः' 'सामान्यम्' इत्यादेः स्त्री-पुं-नपुंसकलिङ्गस्य प्रवृत्तिदर्शनात् अव्यापिता च लक्षणस्य, न हि सामान्येष्वपराणि सामान्यानि "निःसामान्यानि सामान्यानि" [ ] इति वैशेषिकसिद्धान्तात्। यदा तु सामान्यस्याप्यपराणि सामान्यानीष्यन्ते वैयाकरणैः—यथोक्तम्—

"अर्थजात्यभिधानेऽपि सर्वे जातिविधायिनः।
व्यापारलक्षणा यस्मात् पदार्थाः समवस्थिताः" ॥ [वाक्यप० तृ० का० श्लो० ११]

न हि शास्त्रान्तरपरिदृष्टा जातिव्यवस्था नियोगतो वैयाकरणैरभ्युपगन्तव्या, प्रत्ययाभिधानाऽन्वयव्यापारकार्योन्नीयमानरूपा हि जातयः न हि तासामियत्ता काचित्; अतो यथोदितकार्यदर्शनात् सामान्याधारा जातिः सम्प्रतिज्ञायते तथाभूतप्रत्यय-शब्दनिबन्धनम्। 'व्यापारलक्षणा' इति अभिधानप्रत्ययव्यापारतो व्यवस्थितलक्षणा इत्यर्थः तेदाऽनन्तरोक्तमेव दूषणम्—'सामान्यस्याभावात्' इत्यादि। अपि च, न हि असत्सु शशविषाणादिषु जातिरस्ति वस्तुधर्मत्वात् तस्याः; इति तेषु 'अभावआदिशब्दप्रयोगो न स्यात्। तस्मादव्यापिनी लिङ्गव्यवस्थेतीच्छारचितसङ्केतमात्रभाविन्येवेयं लिङ्गत्रयव्यवस्थेति स्थितम्।

सङ्ख्याया अपि वस्तुगतान्वयव्यतिरेकानुविधानाभावो नासिद्धः। तथाहि–सा मायिक्येव (क्येव) न वास्तवी दारादिष्वसत्यपि वास्तवे भेदे विवक्षावशेनोपकल्पितत्वात्; अन्यथा बहुत्वैकत्वादिसङ्ख्या वस्तुगतभेदाभेदलक्षणा यदि स्यात् तदा 'आपः' 'दाराः' 'सिकताः' 'वर्षाः' इत्यादावसत्यपि वस्तुनो भेदे बहुत्वसङ्ख्या कथं प्रवर्तते? तथा, 'वनम्' 'त्रिभुवनम्' 'जगत्' 'षण्णगरी' इत्यादिष्वसत्यप्यभेदेऽर्थस्यैकत्वसङ्ख्या न व्यपदिश्येत; अतो नासिद्धता हेतोः। नाप्यनेकान्तिकः सर्वस्य सर्वधर्मत्वप्रसङ्गात्, सपक्षे भावाच्च न विरुद्धः।

१–**मुच्यते** भां० मां०विना। २–**कमेवं प**–भां० मां०।–**कमेक प**–वा० बा०।
३ "गोत्वादय इवैतेऽपि यदि स्त्रीत्वादयो मताः। सामान्यस्य निरासेन तेऽपास्ता एव तादृशाः" ॥
तत्त्वसं० का० ११३१ पृ० ३४७। शास्त्रवा० स्याद्वादक० पृ० ४०७ प्र० पं० २।
४–**भाव स्त्री**–भां०।–**भावा स्त्रीत्वानाना**–आ०। '**भावात्**' वि० सं०। "सामान्यविशेषाणां निरस्तत्वात्"–तत्त्वसं० पञ्जि० पृ० ३४८ पं० २।
५ "जातिर्भावश्च सामान्यमिति वा तेषु संमतम्। न सामान्यानि युज्यन्ते सामान्येष्वपराणि हि" ॥
तत्त्वसं० का० ११३२ पृ० ३४८।
६ वाक्यप० तृ० का० पृ० १७ पं० ८। ७ "सर्वे जात्यभिधायिनः"–वाक्यप० तथा तत्त्वसं० पञ्जि० पृ० ३४८ पं० ११। ८ शास्त्रवा० स्याद्वादक० पृ० ४०७ प्र० पं० ६। ९ "सामान्याधारा जातिः सती 'जातयः' इत्यस्याः श्रुतेर्निबन्धनमिति। 'व्यापारलक्षणा' इति"–तत्त्वसं० पञ्जि० पृ० ३४८ पं० १५। **१०–म्प्रति जा**–भां०। ११–**यते यथा** वि०। १२ **तथा**–भां० मां०। १३ प्र० पृ० पं० ५।
१४ "अभावो निरुपाख्यत्वं तुच्छतेत्यादि वा कथम्। सा मायिक्येव तेनैषा लिङ्गत्रितयसंस्थितिः" ॥
तत्त्वसं० का० ११३३ पृ० ३४८।
१५ वाक्यप० तृ० का० श्लो० ६७ पृ० ५४। १६ **तथापि सा** वा० बा० विना।
१७ "संख्याऽपि सा मायिक्येव कल्प्यते हि विवक्षया। भेदाभेदविवेकेऽपि दारादि–विपिनादिवत्" ॥
तत्त्वसं० का० ११३४ पृ० ३४८।
१८ **सापि सा मायिक्येव न वा**–भां० मां०। **सा सायि सामायिक्येन व न वा**–वा० बा०।
१९–**रादिषु स**–आ० हा० वि०। २०–**वे च भे**–वि०। २१ शास्त्रवा० स्याद्वादक० पृ० ४०७ प्र० पं० १०।
२२ **वस्तुतो भे**–वा० बा० विना। २३–**देऽपि ब**–आ० हा० वि०। २४–**कत्वं स**–आ० बा०।

अत्र च कुमारिलो हेतोरसिद्धतां प्रतिपादयन्नाह–दारादिशब्दः कदाचित् जातौ प्रयुज्यते कदाचित् व्यक्तौ; तत्र यदा जातौ तदा व्यक्तिगतां सङ्ख्यामुपादाय वर्तते व्यक्तयश्च बह्व्यो योषितः, यदा तु व्यक्तौ प्रयुज्यते तदा तद्व्यक्त्यवयवानां पाणि–पादादीनां बहुत्वसङ्ख्यामादाय वर्तते। वनशब्देन तु धव-खदिर-पलाशादिलक्षणा व्यक्तयस्तत्सम्बन्धिभूतवृक्षत्वजातिगतसङ्ख्याविशिष्टाः प्रतिपाद्यन्ते तेन 'वनम्' इत्येकवचनं भवति जातिगतैकसंख्याविशिष्टद्रव्याभिधानात् अथवा धवादिव्यक्तिसमाश्रिता जातिरेव 'वन'शब्देनोच्यते; तेनैकवचनं भवति जातेरेकत्वादिति।

नन्वेवं 'वृक्षः' 'घटः' इत्यादावप्येकवचनमुच्छिन्नं स्यात् सर्वत्रैवास्य न्यायस्य तुल्यत्वात्। तथाहि–अत्रापि शक्यमेवं वक्तुम्–'जातौ व्यक्तौ वा वृक्षादिश्चेत् प्रयुज्यते' इत्यादि। अथ मतम्–वृक्षादौ व्यक्तेरवयवानां च सङ्ख्याविवक्षा नास्ति; यद्येवं न तर्हि वस्तुगतान्वयाद्यनुविधायिनी सङ्ख्या, विवक्षाया एवान्वय-व्यतिरेकानुविधानात्; ततश्च सैव 'दाराः' इत्यादिषु बहुवचनस्य निबन्धनमस्तु भेदाभावेऽप्येकमपि वस्तु बहुत्वेन विवक्ष्यते इति नासिद्धता हेतोः।

यद्योक्तम्—'वनशब्दो जातिसङ्ख्याविशेषिता व्यक्तीराह' इति,

तत्र, न जातेः सङ्ख्याऽस्ति द्रव्यसमाश्रितत्वादस्याः। अथ वैशेषिकप्रक्रिया नाश्रीयते तदा भावे सङ्ख्यायास्तया कथं धवादिव्यक्तयो विशेषिताः सिद्ध्यन्ति? स्यादेतत् सम्बद्धसम्बन्धात् तत्सम्बन्धतो वा सिद्ध्यन्ति। तथाहि–यदा जातेर्व्यतिरेकिणी सङ्ख्या तदैकत्वसङ्ख्यासम्बद्धया जात्या धवादिव्यक्तीनां सम्बन्धात् पारम्पर्येण तया धवादिव्यक्तयो विशेष्यन्ते; यदा तु जातेरव्यतिरिक्तैव सङ्ख्या तदा साक्षादेव सम्बन्धात् तया विशेष्यन्त इति जातिसङ्ख्याविशेषिताः सिद्ध्यन्ति, असदेतत्; यतो यदि सम्बद्धसम्बन्धात् सम्बन्धतो वा धवादिव्यक्तिषु वनशब्दस्य प्रवृत्तिस्तदैकोऽपि पादपो 'वनम्' इत्युच्येत प्रवृत्तिनिमित्तस्य विद्यमानत्वात्। तथाहि–बहवोऽपि धवादयो जातिसङ्ख्यासम्बन्धादेव 'वनम्' इत्युच्यते नान्यतः; स च सम्बन्धः एकस्मिन्नपि पादपेऽस्तीति किमिति न तथोच्येत अथवा 'धवादिव्यक्तिसमाश्रिता' इत्यत्र पक्षे एकस्यापि तरोः 'वनम्' इत्यभिधानं स्यात्। तथाहि–यैवासौ वनशब्देन जातिर्बहुव्यक्त्याश्रिताऽभिधीयते सैवैकस्यामपि धवादिव्यक्तौ व्यवस्थिता; ततश्च वनधियो निमित्तस्य सर्वत्र तुल्यत्वाद् एकत्रापि पादपे किमिति वनधीर्न भवेत्?

---

१ "तत्र व्यक्तौ च जातौ च दारादिश्चेत् प्रयुज्यते" ॥
"व्यक्तेरवयवानां च संख्यामादाय वर्तते। वनशब्दः पुनर्व्यक्तीर्जातिसंख्याविशेषिताः ॥
बह्वीराहाऽथवा जातिं बहुव्यक्तिसमाश्रयाम्"।
श्लो० वा० वन० श्लो० ९१–९२–९३ पृ० ६३७। तत्त्वसं० का० ११३५–११३६ पृ० ३४९।
२–**तां न स**–आ० हा० वि०। ३–**क्षणव्य**–वा० बा०। ४ **जात्योरे**–वा० बा०।
५ "ननु चैतेन विधिना सर्वमेकं वचो हतम्। नान्यत्राऽस्ति विवक्षा चेत् सैवास्त्वस्य निबन्धनम्" ॥
तत्त्वसं० का० ११३७ पृ० ३४९।
६–**यिनीं स**–भां० मां०। ७ प्र० पृ० पं० ४ तथा २५।
८ "जातेरपि न संख्याऽस्ति भावे वा तद्विशेषिताः। कथं संबद्धसंबन्धाद् यदि संबन्धतोऽपि वा" ॥
तत्त्वसं० का० ११३८ पृ० ३५०।
९–**ख्यादि द्रव्यमाश्रित**–भां० मां० विना। १० **भावस**–वा० बा०। ११–**न्ति तस्यादे**–भां० मां० वा० बा० विना। १२–**तत्संबन्धसंबन्धात् तत्सं**–आ० बा०।–**तत्संबन्धात् तत्सं**–हा० वि०।
१३ "यद्येवमभिधीयेत वनमेकोऽपि पादपः। बहवोऽपि हि कथ्यन्ते संबन्धादेव सोऽस्ति च" ॥
तत्त्वसं० का० ११३९ पृ० ३५०।
१४ **संबन्धसं**–आ० हा०। १५–**त्युच्यते** भां० मां० विना। १६–**हवो ध**–भां० मां० वा० बा० विना।
१७–**थोच्यते** आ०। १८ **अथ ध**–वा० बा० विना।
"बहुव्यक्त्याश्रिता या च सैवैकस्यामपि स्थिता। तन्निमित्तस्य तुल्यत्वात् तत्रापि वनधीर्भवेत्" ॥
"अन्वय–व्यतिरेकाभ्यामेकादिवचसस्ततः। नियमोऽयं विवक्षातो नार्थात् तद्व्यभिचारतः" ॥
तत्त्वसं० का० ११४०–११४१ पृ० ३५०।
१९ प्र० पृ० पं० ५। २० **पदे** भां०।

क्रिया-कालादीनां त्वसत्त्वादेवायुक्तं वस्तुधर्मत्वम्, भवतु वा वस्तुधर्मत्वमेषां तथापि प्रतिबिम्बलक्षणस्यापोहस्य भ्रान्तैर्वा(न्तैर्बा)ह्यव्यक्तिरूपत्वेनावसितत्वादध्यवसायवशाद् व्यक्तिद्वारको लिङ्ग-सङ्ख्यादिसम्बन्धो भविष्यति, तेन यदुक्तम्—

'व्यक्तेश्चाव्यपदेश्यत्वात् तद्वारेणापि नास्त्यसौ' इति,

तदनैकान्तिकम्, संवृतिपक्षे चासिद्धम्—

"व्यक्तिरूपावसायेन यदि वाऽपोह उच्यते ।
तत्र लिङ्गाद्यभिसम्बन्धो व्यक्तिद्वारोऽस्य विद्यते" ॥ [तत्त्वसं० का० ११४३] इति ।

'अपोह उच्यते' इति 'शब्देन' इति शेषः, 'तद्' इति तस्मात्, 'अस्य' इत्यपोहस्य ।

'आख्यातेषु न च' इति,

अत्र आख्यातेष्वन्यनिवृत्तिर्न सम्प्रतीयते इत्यसिद्धम् । तथाहि-जिज्ञासिते कस्मिंश्चिदर्थे श्रोतुर्बुद्धि(द्धे)र्निवेशाय शब्दः प्रयुज्यते व्यवहर्तृभिः न व्यसनितया; तेनाभीष्टार्थप्रतिपत्तौ सामर्थ्यादनभीष्टव्यवच्छेदः प्रतीयत एव, अभीष्टानभीष्टयोरन्योन्यव्यवच्छेदरूपत्वात् । सर्वमेवाभीष्टं यदि स्यात् तदा प्रतिनियतशब्दार्थो न प्राप्नोति इति या च कस्यचिदर्थस्य परिहारेण श्रोतुः क्वचिदर्थे शब्दात् प्रवृत्तिः सा न प्राप्नोति; तस्मात् 'सर्वमेवाभीष्टम्' इत्येतदयुक्तम्, अतः 'पचति' इत्यादिशब्दानामनभीष्टव्यवच्छेदः सामर्थ्यात् स्फुटमवगम्यत एव—

"तथाहि-पचतीत्युक्ते नोदासीनोऽवतिष्ठते ।
भुङ्क्ते दीव्यति वा नेति गम्यतेऽन्यनिवर्तनम्" ॥ [तत्त्वसं० का० ११४६]

तेन 'पर्युदासरूपं हि निषेध्यं तत्र न विद्यते' इति यदुक्तम् तदसिद्धम् ।

यच्च—'पचतीत्यनिषिद्धं तु स्वरूपेणैव तिष्ठति' । इति ।

२० तत्र स्ववचनव्याघातः । तथाहि-'पचति' इत्येतस्यार्थं 'स्वरूपेणैव' इत्यनेनावधारणेनावधारित-

---

१ पृ० १९७ पं० २८ तथा ४४ ।
"क्रिया-कालादियोगोऽपि पूर्वमेव निराकृतः । तस्मात् सांकेतिका एते न व्यक्तिष्वपि भाविनः" ॥
तत्त्वसं० का० ११४२ पृ० ३५१ ।

२-**थापि चेति बि**-भां० मां० ।-**थापि विति बि**-आ० हा० वि० । ३ **भ्रान्तिर्बा**-वा० बा० विना । "भ्रान्तैर्बाह्यव्यक्तिरूपत्वेन"-तत्त्वसं० पञ्जि० पृ० ३५१ पं० ८ । ४ पृ० १९७ पं० ४४-पृ० १९८ पं० २ । ५ 'अपोह उच्यते' अत्र वाक्ये । ६-**ति विशेषः** भां० मां० वा० बा० । ७ पृ० १९८ पं० ४ तथा २३ । ८ **इति सि**-वा० बा० विना । ९ **जिज्ञासते** आ० ।

१० "अभिप्रेते निवेशार्थं बुद्धेः शब्दः प्रयुज्यते । अनभीष्टव्युदासोऽतः सामर्थ्येनैव सिद्ध्यति" ॥
तत्त्वसं० का० ११४४ पृ० ३५१ ।

"श्रोतुर्बुद्धेर्निवेशाय"-तत्त्वसं० पञ्जि० पृ० ३५१ पं० २० । ११ **यदि य स्या**-आ० । **यदीयं स्या**-हा० वि० । **'यदीदं स्या'**-वि० सं० ।
"सर्वमेव न चाभीष्टं सर्वार्थानियमाश्रितः । तत् पचत्यादिशब्दानां विनिवर्त्यं परिस्फुटम्" ॥
तत्त्वसं० का० ११४५ पृ० ३५१ ।

१२ "प्रतिनियतः शब्दार्थः"-तत्त्वसं० पञ्जि० पृ० ३५१ पं० २६ । १३-**तदुक्तम्** वि० । १४-**क्तेऽतो दा**-आ० वि० । १५ शास्त्रवा० स्याद्वादक० पृ० ४०७ द्वि० पं० ४ ।

१६ अतः परम्—
"औदासीन्यमतश्चैवमस्त्यन्यच्च क्रियान्तरम् । पर्युदासात्मकाऽपोह्यं नियतं यद्यदिष्यते" ॥
तत्त्वसं० का० ११४७ पृ० ३५२ ।

१७ **निषेध्यं ति तत्र न** हा० वि० । **निषेध्य ति तत्र न** आ० । १८ पृ० १९८ पं० ६ तथा २३ । १९ पृ० १९८ पं० ७ तथा २७ ।

२० "पचतीत्यनिषिद्धं तु स्वरूपेणैव तिष्ठति । इत्येतच्च भवद्वाक्यं परस्परपराहतम्" ॥
"अन्यरूपनिषेधोऽयं स्वरूपेणैव तिष्ठति । इत्यन्यथा निरर्थं स्यात् प्रयुक्तमवधारणम्" ॥
तत्त्वसं० का० ११४८-११४९ पृ० ३५२ ।

रूपं दर्शयता 'पचति' इत्येतस्यान्यरूपनिषेधेनात्मस्थितिरिति दर्शितं भवति; अन्यथा 'स्वरूपेणैव' इत्येतदवधारणं भवत्प्रयुक्तमनर्थकं स्यात् व्यवच्छेद्याभावात् ।

'साध्यत्वप्रत्ययश्च' इति,

अत्रापि यद्यपोहो भवता निरू(रु)पाख्यस्वभावतया गृहीतस्तत्कथमिदमुच्यते 'निष्पन्नत्वात्' इति, न ह्याकाशोत्पलादीनां काचिदस्ति निष्पत्तिः सर्वोपाख्याविरहलक्षणत्वात् तेषाम् । स्यादेतत् यद्यप्यसौ निरुपाख्यः परमार्थतस्तथापि भ्रान्तैः प्रतिपत्तृभिर्बाह्यरूपतयाऽध्यवसितत्वादसौ सोपाख्यत्वेन ख्याति; ननु यद्यसौ सोपाख्यत्वेन ख्याति तथापि किमत्र प्रकृतार्थानुकूलं जातम्? वस्तुभिस्तुल्यधर्मत्वम्, एतेन यथा वस्तु निष्पन्नरूपं प्रतीयते तथापोहोऽपि वस्तुभिस्तुल्यधर्मतया ख्याते (तो) निष्पन्न इव प्रतीयत इति सिद्धं 'निष्पन्नत्वात्' इति वचनम् । यद्येवं भवत्यै(ति)व साध्य(ध्यत्व)-प्रत्ययस्य भूतादिप्रत्ययस्य च निमित्तमुपदर्शितमिति न वक्तव्यमेतत् 'निर्निमित्तं प्रसज्यते' इति ।

यदपि 'विध्यादावर्थराशौ च नान्यापोहनिरूपणम्' इति परेणोक्तम्,

तत्र विध्यादेरर्थस्य निषेध्यादपि व्यावृत्ततयाऽवस्थितत्वात् तत्प्रतिपत्तौ सामर्थ्यादविवक्षितं नास्तितादि निषिध्यत इत्यस्त्येवात्र 'अन्यापोहनिरूपणम्' ।

'नञश्चापि नञा युक्तौ' इति,

अत्रापि—

"नासौ न पचतीत्युक्ते गम्यते पचतीति हि ।
औदासीन्यादियोगश्च तृतीये नञि गम्यते" ॥
"तुर्ये तु तद्विविक्तोऽसौ पचतीत्यवसीयते ।
तेनात्र विधिवाक्येन सममन्यनिवर्तनम्" ॥ [तत्त्वसं० का० ११५७-११५८]

'तुर्ये' इति चतुर्थे "चतुरश्छयतौ आद्यक्षरलोपश्च" [पाणि० अ० ५ पा० २ सू० ५१ वार्ति० २०

१-**त सामान्यरू**-वा० बा० । २ पृ० १९८ पं० ९ तथा २९ ।
३ "निष्पन्नत्वमपोहस्य निरुपाख्यस्य कीदृशम् । गगनेन्दीवरादीनां निष्पत्तिर्नहि काचन" ॥
तत्त्वसं० का० ११५० पृ० ३५२ ।

४ पृ० १९८ पं० ११ तथा २९ ।
५ "वस्त्विञ्चध्यवसायाच्चेत् सोपाख्यत्वेन भास्यसौ । ततः किं तुल्यधर्मत्वं वस्तुभिश्चास्य गम्यते" ॥
तत्त्वसं० का० ११५१ पृ० ३५२ ।

६ **निरूपा**-भां० मां० विना । ७ **भ्रान्तिः** भां० मां० विना । ८ "सोपाख्यत्वेन भातीति । यदि नामासौ सोपाख्यत्वेन भाति तथापि"-तत्त्वसं० पञ्जि० पृ० ३५३ पं० ३-४ । ९ **ख्यातेर्निष्पन्न इति** वा० बा० विना । "ख्यातो निष्पन्न इव"-तत्त्वसं० पञ्जि० पृ० ३५३ पं० ६ । १०-**नं निष्पन्नत्वादौ यद्येवं** वा० बा० विना । "इति सिद्धं निष्पन्नत्वादिति वचनम् । यद्येवम्"-तत्त्वसं० पञ्जि० पृ० ३५३ पं० ६ ।

११ "साध्यत्वप्रत्ययस्तस्मात् तथाभूतादिरूपणम् । वस्तुभिस्तुल्यरूपत्वात् तन्निमित्तं प्रसज्यते" ॥
तत्त्वसं० का० ११५२ पृ० ३५३ ।

१२ **भवत्येव** वा० बा० विना । **भवतैव** वि० सं० । "भवतैव साध्यत्वप्रत्ययस्य"-तत्त्वसं० पञ्जि० पृ० ३५३ पं० ८ । १३-**मित्वमु**-हा० वि० ।-**मित्तत्वमु**'-वि० सं० । १४ पृ० १९८ पं० १२ तथा २९ । १५-**वर्थारा**-भां० मां० । १६ पृ० १९८ पं० १३ तथा ३२ ।

१७ "विध्यादावर्थराशौ च नास्तितादि निषिध्यते । सामर्थ्यान्न तु शब्देन यदेव न विवक्षितम्" ॥
तत्त्वसं० का० ११५३ पृ० ३५३ ।

१८ "निषेधादिव्यावृत्ततया"-तत्त्वसं० पञ्जि० पृ० ३५३ पं० १८ । १९-**र्थादिवि**-भां० मां० । २० **निषेध्य**-वा० बा० । २१ पृ० १९८ पं० १४ तथा पृ० ३२ ।

२२ "नञश्चापि नञा युक्तावपोहस्तादृशो भवेत् । तच्चतुष्टयसद्भावे यादृशः संप्रतीयते" ॥
"नञा योगे नञो ह्यर्थो गम्यते कस्यचिद् विधिः । तृतीयेन नञा तस्य विरहः प्रतिपाद्यते" ॥
"निषेधायापरस्तस्य तुरीयो यः प्रयुज्यते । तस्मिन् विवक्षिते तेन ज्ञाप्यतेऽन्यनिवर्तनम्" ॥
तत्त्वसं० का० ११५४-११५५-११५६ पृ० ३५३ ।

२३ शास्त्रवा० स्याद्वादक० पृ० ४०७ द्वि० पं० १२-१३ । २४ "येषौ चलुक् च" हैम० अ० ७ पा० १ सू० १६४ ।

सिद्धान्त० पृ० २९९] इत्यनेन पूरणार्थे 'यत्'प्रत्ययविधानात्। 'तद्विविक्तोऽसौ' इति औदासिन्या-[1]दिविविक्त(क्तः), 'विधिवाक्येन सममन्यनिवर्तनम्' इति यथा 'पचति' इत्यादौ विधिवाक्ये सामर्थ्या-दौदासीन्यादिनिवृत्तिर्गम्यते तथा द्वितीयेऽपि नञि इति सिद्धमत्राप्यन्यनिवर्तनम्। स्पष्टार्थं तु नञ्चतुष्टयोदाहरणम्[2]।

५ 'चा[3]दीनां नञ्योगो नास्ति' [4]इति, अत्र—

"समुच्चयादिर्यश्चार्थः कश्चिच्चादेरभीप्सितः।
तदन्यस्य विकल्पादेर्भवेत् तेन व्यपोहनम्" ॥ [तत्त्वसं० का० ११५९]

[5]आदिशब्देना(न) 'वा'शब्दस्य विकँल्पोऽर्थः, 'अपि'शब्दस्य पँदार्थासम्भवानाऽ(र्थसम्भावनाऽ)न्ववसर्गादयः, 'तु'शब्दस्य विशेषणम्, 'एव'कारस्यावधारणमित्यादेर्ग्रहणम्। 'तदन्यस्य' इति
१० तस्मात् [8]समुच्चयादन्यस्य, 'तेन' इति चादिना।

'वाक्यार्थेऽन्यनिवृत्तिश्च व्यपदेष्टुं न शक्यते' [9]इति,

अत्रापि [10]कार्यकारणभावेन सम्बद्धा एव पदार्था वाक्यार्थः यतो न पदार्थव्यतिरिक्तो निरवयवः शबलात्मा वा कल्माषवर्णप्रख्यो [11]वाक्यार्थोऽस्ति, उपलब्धिलक्षणप्राप्तस्य तादृशस्यानुपलब्धेः पदार्थस्य चापोहरूपत्वं सिद्धमेव। तथाहि-'चैत्र[12]! गामानय' इत्यादिवा[13]क्ये चैत्रादिपदार्थव्यतिरेकेण बुद्धौ
१५ नान्योऽर्थः परिवर्तते चैत्राद्यर्थगतौ च सामर्थ्यादचैत्रादिव्यवच्छेदो गम्यते; अन्यथा यद्यन्यकर्त्रादि-व्यवच्छेदो नाभीष्टः स्यात् तदा चैत्रादीनामुपादानमनर्थकमेव स्यात्; ततश्च न किञ्चित् कञ्चिद् व्यवहरेदिति निरीहमेव जगत् स्यात्।

'अनन्यापोहशब्दादौ वाच्यं न च निरूप्यते' [14]इति,

१-दिविक्तः वा० बा०। दिव्यक्त-भां० मां०। २ पृ० २२५ पं० ४०। ३ **वादी**-आ० विना। ४ पृ० १९८ पं० १७ तथा ३९। ५ शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० २। ६ **आदिशब्दे वा** वा० बा० विना। "आदिशब्देन 'वा' शब्दस्य"-तत्त्वसं० पञ्जि० पृ० ३५४ पं० १९। ७ **कल्पार्थः** भां० मां०। ८ **पदार्थासंभवानान्वसर्गा**-आ०। **पदार्थासंभवीनाच्चसर्गा**-हा०। **पदार्थासंभवनाच्चसर्गा**-वि०। ९-**नात्वयसर्गा**-वा० बा०।

"अपिः पदार्थ-संभावनाऽन्ववसर्ग-गर्हा-समुच्चयेषु"-पाणि अ० १ पा० ४ सू० ९५ महाभा० पृ० २९६। काशि० अ० १ पा० ४ सू० ९६ पृ० ८१। "'अपि' शब्दस्य पदार्थ-संभावनान्ववसर्गादयः"-तत्त्वसं० पञ्जि० पृ० ३५४ पं १९।

"गर्हा-समुच्चय-प्रश्न-शङ्का-संभावनास्वपि"-अमर० का० ३, श्लो० २४८।

"अपि पदार्थाऽनुवृत्त्यपेक्षा-समुच्चयाऽन्ववसर्ग-गर्हाऽऽशीः-संभावन-भूषण-संवरण-प्रश्नाऽवमर्शेषु"
-है० तत्त्वप्र० महा० न्या० पृ० ६५ पं० ४-१०।

"अपि संभावनाशङ्कागर्हणासु समुच्चये ॥
प्रश्ने युक्तपदार्थेषु कामचारक्रियासु च"। है० अनेका० का० ७ श्लो० ३३-३४।

"गर्हा-समुच्चय-प्रश्न-शङ्का-संभावनास्वपि" ॥ शाश्वत० श्लो० ७८२।

"अपि संभावना-प्रश्न-शङ्का-गर्हा-समुच्चये। तथा युक्तपदार्थेषु कामचारक्रियासु च" ॥
बङ्गीयविश्व० अपिशब्दे।

१० "समुच्चयादेरन्यस्य"-तत्त्वसं० पञ्जि० पृ० ३५४ पं० २१। ११ पृ० १९८ पं० १७ तथा ३९।

१२ "वाक्यार्थेऽन्यनिवृत्तिश्च सुज्ञातैव तथा ह्यसौ। पदार्था एव सहिताः केचिद् वाक्यार्थ उच्यते" ॥
"तेषां च ये विजातीयास्तेऽपोह्याः सुपरिस्फुटाः। वाक्यार्थस्याऽपि ते चैव तेभ्योऽन्यो नैव सोऽस्ति हि" ॥
तत्त्वसं० का० ११६०-११६१ पृ० ३५४।

१३ **वाच्यार्थो**-भां० मां०। "वाक्यार्थो"-तत्त्वसं० पञ्जि० पृ० ३५५ पं० ३। "तद्व्यतिरिक्तनिरवयवस्य शबलात्मनः कल्माषवर्णप्रख्यस्य वाक्यार्थस्याऽनुपलब्धेः"-शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ५।

१४ "चैत्र! गामानयेत्यादिवाक्यार्थेऽधिगते सति। कर्तृ-कर्मान्तरादीनामपोहो गम्यतेऽर्थतः" ॥
तत्त्वसं० का० ११६२ पृ० ३५५। शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ४।

१५ पृ० १९८ पं० २०। १६ पृ० १९९ पं० १ तथा २३।

अत्र, नह्यत्र भवदभिमतो जात्यादिलक्षणो विधि[1]रूपः शब्दार्थः परमार्थतोऽवसीयते जात्यादेर्निषिद्धत्वा[2]त्।

"किन्तु विधि[3]र्यवसाय्यस्माद् विकल्पो जायते ध्वनेः।
पश्चादपोहशब्दार्थनिषेधे जायते मतिः" ॥ [तत्त्वसं० का० ११६४]

यद्यनपोहशब्दादपोहशब्दार्थनिषेधे मतिर्जायते इतीष्यते न तर्ह्यपोहशब्दार्थोऽभ्युपगन्तव्यः तस्य निषिद्धत्वात्, असदेतत्;

"स[4] त्वसंवादकस्तादृग्वस्तुसम्बन्धहानितः।
न शाब्दाः प्रत्ययाः सर्वे भूतार्थाध्यवसायिनः" ॥ [तत्त्वसं० का० ११६५]

'सः' इति अनन्यापोहशब्दादिः, 'असंवादकः' इति न संवदतीत्यसंवादकः, न विद्यते [5]आ(वा) संवादो (संवादोऽस्येत्यसंवा)दकः। कस्मात्? 'वस्तुसम्बन्धहानितः' तथाभूतवस्तुसम्बन्धाभावात् पूर्वं हि जात्यादिलक्षणस्य शब्दार्थवस्तुनो निषिद्धत्वात्। यद्येवं तर्हि कथमनन्यापोहशब्दादिभ्योऽ- १०
पोहशब्दार्थनिषेधे मतिरुपजायत इति, उच्यते; [6]वितथविकल्पाभ्यासवासनाप्रभवतया हि केचन शाब्दाः प्रत्यया असद्भूतार्थनिवेशिनो जायन्त एव इति न तद्वशाद् वस्तूनां सदसत्ता सिद्ध्यति।

[7]यँच्च 'प्रमेय-ज्ञेयशब्दादेः' [8]इति,

अत्र [9]कँस्य प्रमेयादिशब्दस्यापोह्यं नास्तीत्यभिधीयते? यदि तावद्[10]वाँक्यस्थप्रमेयादिशब्दमाश्रित्योच्यते तदा सिद्धसाध्यता, केवँलस्य प्रयोगाभावादेव निरर्थकत्वात् यतः श्रोतृजनानुग्रहाय प्रेक्षा- १५
वद्भिः शब्दः प्रयुज्यते न व्यसनितया, न च केवलेन प्रयुक्तेन श्रोतुः कश्चित् सन्देह-विपर्यासनिवृत्ति-लक्षणोऽनुग्रहः कृतो भवेत्। तथाहि-[11]यँदि श्रोतुः क्वचिदर्थे समुत्पन्नौ संशय-विपँर्यासौ निवर्त्य [12]निस्सन्दिग्धप्रत्ययमुत्पादयेत् प्रतिपादकः; एवं तेनास्यानुग्रहः कृतो भवेत् नान्यथा। न च केवलेन शब्देन प्रयुक्तेन तथाऽनुग्रहः शक्यते कर्तुम्, तस्मात् संशयादिनि[13]वँर्त्तने निश्चयोत्पादने च श्रोतुरनुग्रहात् शब्दप्रयोगसाफल्यमिति वाक्यस्थ[14]स्यैवास्य प्रयो[15]गः। अथ वा[16]क्यस्थमेव ज्ञेयादिशब्दमधि- २०
कृत्योच्यते, तद् असिद्धम्; [17]तँत्र हि वाक्यस्थेन प्रमेयादिशब्देन यदेव मूढ[18]मँतिभिः संशयस्थानमिष्यते

---

१ "अनन्यापोहशब्दादौ न विधिर्यवसीयते। परैरभिमतः पूर्वं जात्यादेः प्रतिषेधनात्" ॥
तत्त्वसं० का० ११६३ पृ० ३५५।

२-**रूपश**-भां० विना। ३ पृ० १७४ पं० २४। ४-**ध्यवशाय्यस्माद्वि**-भां० मां०। ५ **यद्यनपोह-शब्दार्थनिषेधे** आ० हा० वि०। **यद्यन्यपोहशब्दार्थनिषेधे** वा० बा०। "यद्यपोहशब्दार्थनिषेधे मतिर्जायते"-तत्त्वसं० पञ्जि० पृ० ३५५ पं० २०। ६ **सर्वऽसं**-आ०। ७-**दक इति न संवादकः कस्मात्** आ० हा०। ८ **दकः कस्मात्** वा० बा० विना। "न संवदतीत्यसंवादकः, न विद्यते वा संवादोऽस्येत्यसंवादकः"-तत्त्वसं० पञ्जि० पृ० ३५५ पं० २४। ९ **विवक्षाविक**-वा० बा०। "वितथविकल्पवासनावशात् तत्र तथाविधार्थविकल्पकमेणो(णा)न्यापोहनिषेधमतिप्रवृत्तेः"—शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ६। १० **यच्च ज्ञेय-प्रमेयश**-भां० मां० वा० बा० विना। "यदपि ज्ञेय-प्रमेयादिशब्दानां न किञ्चिदपोह्यमस्ति"-शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ७। ११ पृ० १९९ पं० ४ तथा २३।

१२ "प्रमेय-ज्ञेयशब्दादौ कस्याऽपोह्यं न विद्यते। न ह्यसौ केवलोऽकाण्डे प्रेक्षावद्भिः प्रयुज्यते" ॥
तत्त्वसं० का० ११६६ पृ० ३५६।

१३-**वद् वाक्यस्थप्र**-आ० हा० वि०। १४-**वाक्यार्थप्र**-वा० बा०। १५-**बलप्रयोगा**-भां० मां०।

१६ "किन्त्वारेक-विपर्याससंभवे सति कस्यचित्। क्वचित् तद्विनिवृत्त्यर्थं धीमद्भिः स प्रयुज्यते" ॥
"निस्संदेहविपर्यासप्रत्ययोत्पादनादतः। तेनैव तैः प्रयुक्तेन साफल्यमनुभूयते" ॥
तत्त्वसं० का० ११६७-११६८ पृ० ३५६।

१७-**पर्ययौ** भां० मां०। १८ **निस्संदिग्धं प्र**-भां० मां०। १९-**वर्तनेन नि**-भां० मां०। २०-**स्थस्यैव प्र**-भां० मां० वा० बा० विना। २१-**गः आद्यवा**-भां० मां०। २२-**क्यस्तुमेव** आ० हा० वि०।

२३ "यत् तत्र जडचेतोभिराशङ्कास्पदमिष्यते। तदेव क्षिप्यते तेन विफलोच्चारणाऽन्यथा" ॥
"किञ्चिज्यशङ्कमानोऽसौ किमर्थं परिपृच्छति। अतत्संस्कारकं शब्दं ब्रुवन् वा स्वस्थधीः कथम्" ॥
"चक्षुर्ज्ञानादिविज्ञेयं रूपादीति यदुच्यते। तेनाऽऽरोपितमेतद्धि केनचित् प्रतिषिध्यते" ॥
"न चक्षुराश्रितेनैव रूपं नीलादि वेद्यते। किन्तु श्रोत्राश्रितेनापि निस्सैनैकेन चेतसा" ॥
तत्त्वसं० का० ११६९-११७०-११७१-११७२ पृ० ३५६-३५७।

२४-**मतिभिः संशायास्था**-वा० बा०।-**मतिभिराशङ्कास्था**-मां०।-**मतिभिराशङ्क्यस्था**-भां०।

तदेव निवर्त्यत इत्यतोऽसिद्धमेतत् 'प्रमेयादिशब्दानां निवर्त्यं नास्ति' इति; अन्यथा यदि श्रोता न क्वचिदर्थे संशेते तत् किमिति परस्मादुपदेशमपेक्षते? निश्चयार्थी हि परं पृच्छति अन्यथोन्मत्तः स्यात्। यदि नाम श्रोतुराशङ्कास्थानमस्ति तथापि शब्देन तन्न निवर्त्यत इत्येतच्च न वक्तव्यम्, श्रोतृसंस्कारायैव शब्दानां प्रयोगात् तदसंस्कारकं वदतो वक्तुः—अन्यथा—उन्मत्तताप्रसक्तिः। तथाहि–
५ 'किं[3] क्षणिकाऽनात्मादिरूपेण ज्ञेया भावाः, आहोश्विन्न' 'किं सर्वज्ञचेतसा ग्राह्याः उत न' इत्यादिसंशयोद्भूतौ 'क्षणिकत्वादिरूपेण ज्ञेयाः सर्वेधर्माः' तथा 'सर्वज्ञज्ञानविज्ञेयाः' इतिसंशयव्युदासार्थं शब्दाः प्रयुज्यन्त इति। यदि(द)क्षणिकत्वाऽज्ञेयत्वादि समारोपितं तद् निवर्त्यते, क्षणिकत्वादिरूपेण तेषां प्रमाणसिद्धत्वात्। अथ 'किमनित्यत्वेन शब्दाः प्रमेयाः' इति 'आहोश्विन्न' इति प्रस्तावे 'प्रमेयाः' इति प्रयोगे प्रकरणानभिज्ञस्यापि प्रतिपत्तुः 'प्रमेयाः' इति केवलं शब्दश्रवणात् ध्रुवमानरूपा शब्दा-
१० दिबुद्धिरुपजायत एव। तद् यदि केवलस्य शब्दस्यार्थो नास्त्येव तत् कथमर्थप्रतिपत्तिर्भवति? नैष केवलशब्दश्रवणादर्थप्रतिपत्तिः [12]किमिति वाक्येषूपलब्धस्यार्थवतः शब्दस्य सादृश्येनापहृतबुद्धेः केवलशब्दश्रवणादर्थप्रतिपत्त्यभिमानः। तथाहि–येष्वेव वाक्येषु 'प्रमेय'शब्दमुपलब्धवान् श्रोता तदर्थेष्वेव सा बुद्धिरप्रतिष्ठितार्था ध्रुवमानरूपा समुपजायते, तच्च घटादिशब्दानामपि तुल्यम्। तथाहि–'किं[13] घटेनोदकमानयामि उताञ्जलिना' इति प्रयोगे प्रस्तावानभिज्ञस्य यावत्सु वाक्येषु तेन
१५ 'घटेन' इति प्रयोगो दृष्टस्तावत्स्वर्थेषु आकाङ्क्षावती [15]पूर्ववाक्यानुसारादेव प्रतिपत्तिर्भवतीति घटादिशब्दा (शब्दा इव) विशिष्टार्थवचनाः[16] प्रमेयादिशब्दाः।

[17]यदुक्तम्—'अपोहकल्पनायां च' इत्यादि,

तत्र, [18]वस्त्वेव ह्यध्यवसायवशाच्छब्दार्थत्वेन कल्पितं यद् [19]विवक्षितं नावस्तु; तेन तत्प्रतीतौ सामर्थ्यादविवक्षितस्य व्यावृत्तिरधिगम्यत एवेति नाव्यापिनी शब्दार्थव्यवस्था। यदेव च मूढमते-
२० राशङ्कास्थानं तदेवाधिकृत्योक्तमाचार्येण—

"ज्ञे(अज्ञे)यं कल्पितं कृत्वा तद्व्यवच्छेदेन [20]ज्ञेयेऽनुमानम्[21]" [हेतु०] इति।

१–वर्तत इ–भां० मां०। २ **श्रोतुः सं**–भां० मां०।

३ "क्षणिकत्वादिरूपेण वि (किं) ज्ञेया इति विभ्रमे। सर्वज्ञज्ञानविज्ञेया धर्माश्चैते भवन्ति किम्"? ॥
अभावा अपि किं ज्ञेया न ज्ञानं जनयन्ति ये। इत्यादिविभ्रमोद्भूतौ विज्ञेयपदमुच्यते" ॥
तत्त्वसं० का० ११७३–११७४ पृ० ३५७।

४–**ब्दाः युज्य**–भां० मां०। ५ **यदक्षणिकत्वा**–वि० सं०। "अत्र यदक्षणिकत्वादिना ज्ञेयत्वादिरूपमारोपितम्"–तत्त्वसं० पञ्जि० पृ० ३५८ पं० ३। "'क्षणिकत्वेन ज्ञेया भावाः'इत्यादिवाक्यस्थेन तेन क्षणिकत्वादिनाऽज्ञेयत्वादेः समारोपितस्य व्यावर्तनात्"–शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० ९। ६–**वर्तते** वा० बा०।

७ "तादृग् ज्ञेयत्वमस्ते(स्त्ये)षां क्षणिकत्वादिसाधनात्। ज्ञेयोऽभावोऽपि संवृत्त्या(त्या)स्थापनादमुनाऽऽत्मना" ॥
तत्त्वसं० का० ११७५ पृ० ३५८।

८–**इति आहोस्विन्न** भां० मां०।–**इति अहोश्विन्न** हा० वि०।–**इति अहोस्विन्न** वा० बा०। ९–**प्रयोग प्र** वा० बा० भां० मां० विना। "इति प्रस्तावे 'प्रमेयाः' इति प्रयोगे प्रकरणानभिज्ञस्यापि प्रतिपत्तुः केवलशब्दश्रवणात् ध्रुवमानरूपा शाब्दी धीः"–शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० १०। १०–**वलशब्द**–आ०।

११ "प्रमेय–ज्ञेयशब्दादेः प्रतिपत्तिनिमित्तताम्। इत्थं वाक्यस्थितस्यैव दृष्ट्वा कालान्तरेष्वपि" ॥
"केवलस्योपलम्भे या प्रतीतिरुपजायते। ध्रुवमाणाऽर्थभेदेषु सा तद्वाक्यानुसारतः" ॥
"घटादिभ्योऽपि शब्देभ्यः साऽस्त्येव च तथाविधा। तस्माद् घटादिशब्देन ज्ञेयादिष्वनयः समाः" ॥
तत्त्वसं० का० ११७६–११७७–११७८ पृ० ३५८।

१२ "किन्तु"–तत्त्वसं० पञ्जि० पृ० ३५८ पं० २२। १३ शास्त्रवा० स्याद्वादक० पृ० ४०८ प्र० पं० १२। १४–**नयस्युता**–हा० वि०। १५ "पूर्ववाक्यानुसारादेव प्रतिपत्तिर्भवति (इति)। तस्माद् यथाऽर्थवा(**घटा**)दिशब्दाविशिष्टार्थवचनास्तथा प्रमेयादिशब्दा अपि"–तत्त्वसं० पञ्जि० पृ० ३५८ पं० २७। १६–**ष्टार्थाव**–वा० बा०। १७ पृ० १९९ पं० ९ तथा ३०।

१८ "अपोह्यकल्पनायां च वरं वस्त्वेव कल्पितम्। इत्येतद् व्याहतं प्रोक्तं नियमेनान्यवर्जनात्" ॥
"वस्त्वेव कल्प्यते तत्र यदेव हि विवक्षितम्। क्षेपो विवक्षितस्यातो न तु सर्वं विवक्षितम्" ॥
तत्त्वसं० का० ११७९–११८० पृ० ३५९।

१९–**वक्षिता वस्तु** वा० बा० भां० मां० विना। २० **ज्ञेयानु**–वा० बा०। २१ पृ० १९९ पं० ८ तथा २९।

'ज्ञानाकारनिषेधाच्च' इत्यादौ

ज्ञानाकारस्य स्वसंवेदनप्रत्यक्षसिद्धत्वात् कथमभावः? तथाहि–स्वप्नादिषु अर्थमन्तरेणापि निरालम्बनमागृहीतार्थाकारसमारोपकं ज्ञानमागोपालमतिस्फुटं स्वसंवेदनप्रत्यक्षसिद्धम्। न च देश-कालान्तरावस्थितोऽर्थस्तेन रूपेण संवेद्यत इति युक्तं वक्तुम्, तस्य तद्रूपाभावात्; न चान्येन रूपेणान्यस्य संवेदनं युक्तम् अतिप्रसङ्गात्। किञ्च, अवश्यं भवद्भिर्ज्ञानस्यात्मगतः कश्चिद् विशेषोऽर्थकृतोऽभ्युपगन्तव्यः येन बोधरूपतासाम्येऽपि प्रतिविषयं 'नीलस्येदं संवेदनम् न पीतस्य' इति विभागेन विभज्यते ज्ञानम्; तदभ्युपगमे च सामर्थ्यात् साकारमेव ज्ञानमभ्युपगतं स्यात् आकारव्यतिरेकेणान्यस्य स्वभावविशेषत्वेनावधारयितुमशक्यत्वात्, अतो भवता 'स्वभावविशेषः' इति स एव शब्दान्तरेणोक्तः अस्माभिस्तु 'आकारः' इति केवलं नास्ति विवादः।

'एवमित्थम्' [11]इत्यादावपि 'एवमेतन्नैवम्' इति वा 'प्रकारान्तरमारोपितमेवम्' इत्यादिशब्दैर्व्यवच्छिद्यमानं स्फुटतरमवसीयते[12] चेति नाव्यापिता शब्दार्थव्यवस्थायाः। एवं कुमारिलेनोक्तं दूषणं प्रतिविहितम्।

[उद्द्योतकरोक्तानामाक्षेपाणां प्रतिविधानम्]

इदानीमुद्द्योतकरेणोक्तं प्रतिविधीयते-तत्र यदुक्तम्[13]—

'सर्वशब्दस्य कश्चार्थो व्यवच्छेद्यः प्रकल्प्यते' इति,

अत्रापि ज्ञेयादिपदवत् केवलस्य सर्वशब्दस्याप्रयोगात् वाक्यस्थस्यैव नित्यं प्रयोग इति यदेव मूढमतेराशङ्कास्थानं तदेव [16]निवर्त्यमस्ति। तथाहि—

" 'सर्वे धर्मा निरात्मानः' 'सर्वे वा पुरुषा गताः'।
सामस्त्यं गम्यते तत्र कश्चिदंशस्त्वपोह्यते" ॥ [तत्त्वसं० का० ११८६]

कोऽसावंशोऽपोह्यतेऽत्र इति चेत्, उच्यते—

"केचिदेव निरात्मानो बाह्या इष्टा घटादयः।
गमनं कस्यँचिच्चैव भ्रान्तैस्तद्विनिवर्त्यते" ॥ [तत्त्वसं० का० ११८७]

'एकाद्यसर्वम्' [19]इत्यादावपि

यदि हि सर्वस्याङ्गस्य प्रतिषेधो वाक्यस्थे सर्वशब्दे विवक्षितः स्यात् तदा स्वार्थोऽपोहः प्रसज्यते यावता यदेव मूढधिया शङ्कितं तदेव निषिध्यत इति कुतः स्वार्थापवादित्वदोषप्रसङ्गः? एवं [21]द्यादिशब्देष्वपि वाच्यम्।

यच्चोक्तम्—'किं भावोऽथाभावः' [22]इत्यादि,

---

१ पृ० १९९ पं० १४ तथा ३२। २–**क्षप्रत्ययसि**–भां० मां०।

३ "ज्ञानाकारनिषेधस्तु स्ववेद्यत्वान्न शक्यते। विद्यते हि निरालम्बमारोपकमनेकधा" ॥
"ज्ञानस्यात्मगतः कश्चिन्नियतः प्रतिगोचरम्। अवश्याऽभ्युपगन्तव्यः स्वभावश्च स एव च" ॥
"अस्माभिरुक्त आकारः प्रतिबिम्बं तदाभता। उल्लेखः प्रतिभासश्च संज्ञाभेदस्त्वकारणम्" ॥
तत्त्वसं० का० ११८१–११८२–११८३ पृ० ३५९।

४–**पज्ञान**–वा० बा०। ५–**लमभिस्फु**–भां० मां०।–**लमितिस्फु**–आ०।–**लमि स्फु**–वा० बा०। ६–**साम्ये ति प्रति**–हा० वा० बा०।–**साम्येति विष**–आ०। ७–**भज्येते** आ० भां०। ८–**वलनाग्नि** भां० मां० विना। ९ **एवमित्यादा**–भां० मां०। १० १९९ पं० १८ तथा ३६।

११ "एवमित्यादिशब्दानां नैवमित्यादि विद्यते। अपोह्यमिति विस्पष्टं प्रकारान्तरलक्षणम्" ॥
तत्त्वसं० का० ११८४ पृ० ३६०।

'एवमेतन्नैवमिति प्रकारान्तर–' तत्त्वसं० पञ्जि० पृ० ३६० पं० ४। १२–**ते वेति** भां० मां०। १३ पृ० २०० पं० २ तथा २१–२२। १४–**च्छेद्यः प्रकल्प**–आ०। **च्छेदः प्रकल्प**–हा० वि०।

१५ "व्यवहारोपनीते च सर्वशब्देऽपि विद्यते। व्युदास्यं तस्य चार्थोऽयमन्यापोहोऽभिधित्सितः" ॥
तत्त्वसं० का० ११८५ पृ० ३६०।

१६ **निर्वर्त्य**–हा० वि०। १७–**स्याच्चैवं** आ० वि०। १८ **भ्रान्तैस्त**–आ०। १९ पृ० २०० पं० ५ तथा २३। २० "सर्वाज्ञप्रतिषेधश्च नैव तस्मिन् विवक्षितः। स्वार्थापोहप्रसङ्गोऽयं तस्मादज्ञतयोच्यते" ॥
तत्त्वसं० का० ११८८ पृ० ३६०।

२१ **एव द्यादि**–वा० बा०। **एवमद्यादि** भां० मां० आ० हा०। २२ पृ० २०० पं० ११ तथा २६।

तत्रापि यथाऽसौ बाह्यरूपतया भ्रान्तैरवसीयते न तथा स्थित इति बाह्यरूपत्वाभावान्न भावः, न चाभावो बाह्यवस्तुतयाऽव्य(ध्य)वसितत्वात् इति कथं 'यदि भावः स किं गौः' इत्यादि(दे)र्भावपक्षभाविनः 'प्रैष-सम्प्रतिपत्त्योरभावः' इत्यादेश्चाभावपक्षभाविनो दोषस्यावकाशः? अथ पृथक्त्वैकत्वादिलक्षणः कस्मान्न भवति? व्यतिरेको(काऽ)व्यतिरेकाऽऽश्रिताऽनाश्रितत्वादिवस्तुगतधर्माणां कल्पनाशिल्पिघटितविग्रहेऽपोहेऽसम्भवात्।

यच्चोक्तम्—'क्रियारूपत्वादपोहस्य विषयो वक्तव्यः' इति,
तदसिद्धम्; शब्दवाच्यस्यापोहस्य प्रतिबिम्बात्मकत्वात्। तच्च प्रतिबिम्बकम् अध्यवसितबाह्यवस्तुरूपत्वाद् न प्रतिषेधमात्रम्; अत एव 'किं गोविषयः अथाऽगोविषयतः (षयः)' इत्यस्य विकल्पद्वयस्यानुपपत्तिः गोविषयत्वेनैव तस्य विधिरूपतयाऽध्यवसीयमानत्वात्।

यच्चोक्तम्—'केन ह्यगोत्वमासक्तं गोर्येनैतदपोह्यते' इति,
अत्रापि, यदि हि प्राधान्येनान्यनिवृत्तिमेव शब्दः प्रतिपादयेत् तदैतत् स्यात् यावतार्था(र्थ)प्रतिबिम्बकमेव शब्दः करोति, तद्बलौ च सामर्थ्यादन्यनिवर्त्तनं गम्यत इति सिद्धान्तानभिज्ञतया यत् किञ्चिदभिहितम्। व्यतिरेकाव्यतिरेकादिविकल्पः पूर्वमेव निरस्तः।

यदुक्तम्—'किमयमपोहो वाच्यः' इत्यादि,
तत्रान्यापोहे 'वाच्यत्वम्' इति विकल्पो यद्यन्यापोहशब्दमधिकृत्याभिधीयते तदा विधिरूपेणैवासौ तेन शब्देन वाच्य इत्यभ्युपगमान्नानिष्टापत्तिः। तथाहि-'किं विधिः शब्दार्थः आहोश्विदन्यापोहः' इति प्रस्तावे 'अन्यापोहः शब्दार्थः' इत्युक्ते प्रतिपत्तुर्यथोक्तप्रतिबिम्बलक्षणान्यापोहाध्यवसायी प्रत्ययः समुपजायते अर्थानु(र्थात् तु)विधिरूपशब्दार्थनिषेधः। अथ घटादिशब्दमधिकृत्य, तत्रापि यथोक्तप्रतिबिम्बलक्षणोऽपोहः साक्षाद् घटादिशब्दैरुपजन्यमानत्वाद् विधिरूप एव तैः प्रतिपाद्यते, सामर्थ्यात् त्वन्यनिवृत्तेरधिगम इति नानिष्टापत्तिः। न चाप्यनवस्थादोषः, सामर्थ्यादन्यनिवृत्तेर्गम्यमानत्वात् न तु वाच्यतया। अवाच्यपक्षस्यानङ्गीकृतत्वादेव न तत्पक्षभाविदोषोदयावकाशः।

'अपि चैकत्व-नित्यत्व'–इत्यादावपि,
यदि पारमार्थिकैकत्वाद्युपवर्णनं कृतं स्यात् तदा हास्यकरणं भवतः स्यात्; यदा तु भ्रान्तप्रतिपन्नानुरोधेन काल्पनिकमेव तद् आचार्येणोपवर्णितं तदा कथमिव हास्यकरणमवतरति विदुषः किन्तु भवानेव विवक्षितमर्थमविज्ञाय दूषयन् विदुषामतीव हास्यास्पदमुपजायते।

'तस्माद् येष्वेव शब्देषु नञ्योगः' इत्यादावपि,
'नं केवलं यत्र नञ्योगस्तत्रान्यैविनिवृत्त्यंशोऽवगम्यते, यत्रापि हि नञ्योगो नास्ति तत्रापि गम्यत एव' इति स्ववाचैवैतद् भवता प्रतिपादितम् 'स्वात्मैव गम्यते' इत्यवधारणं कुर्वता; अन्यथाऽवधारणवैयर्थ्यमेव स्यात् यतः 'अवधारणसामर्थ्यादन्यापोहोऽपि गम्यते' इति स्फुटतरमेवावसीयते।
नं च वन्ध्यासुतादिशब्दस्य बाह्यं सुतादिकं वस्त्वन्यव्यावृत्तमपोहाश्रयो नास्तीति किमधिष्ठानोऽपोहो वाच्य इति वक्तव्यम्, यतो न तद्विषयाः शब्दा जात्यादिवाचकत्वेनाशङ्क्याः 'वस्तुवृत्तीनां हि शब्दानां किं रूपमभिधेयम्, आहोश्वित् प्रतिबिम्बम्' इत्याशङ्का स्यादपि, अभावस्तु वस्तुविवेकलक्षण एवेति तद्वृत्तीनां शब्दानां कथमिव वस्तुविषयत्वाशङ्का भवेत् इति निर्विषयत्वं स्फुटमेव तत्र शब्दानां प्रतिबिम्बकमात्रोत्पादादवसीयत एव।

अत एव ये सङ्केतसव्यपेक्षास्तेऽर्थशून्याभिजल्पाऽऽहितवासनामात्रनिर्मितविकल्पप्रतिबिम्बमात्रावद्योतकाः, यथा वन्ध्यापुत्रादिशब्दाः, कल्पितार्थाभिधायिनः सङ्केतसव्यपेक्षाश्च विवादास्पदीभूता घटादिशब्दा इति स्वभावहेतुः। यद्वा परोपगतपारमार्थिकजात्याद्यर्थाभिधायका न भवन्ति घटादिशब्दाः, सङ्केतसापेक्षत्वात्, कल्पितार्थाभिधानवत्। न च हेतोरनैकान्तिकता, क्वचित् साध्य-

---

१ "न भावो नापि चाभावोऽपृथगेकत्वलक्षणः। नाश्रिताऽनाश्रितोऽपोहो नैकानेकश्च वस्तुतः" ॥
"तथाऽसौ नास्ति तत्त्वेन यथाऽसौ व्यवसीयते। तन्न भावो न चाभावो वस्तुत्वेनाऽवसायतः" ॥
तत्त्वसं० का० ११८९–११९० पृ० ३६०–३६१।

२ **भ्रान्तेर**-वा० बा०। ३-**न्न भावो बाह्यवस्तुतया** आ० वा० बा०।-**न्न भावो बाह्यवस्तु तथाऽव्यवस्थितत्वा**-हा० वि०। ४ "बाह्यरूपतया दर्शितत्वात्"-तत्त्वसं० पञ्जि० पृ० ३६१ पं० ७।

५-**त्यादिभाव**-भां० मां० हा० वि० विना। पृ० २०० पं० १२ तथा २६। ६ पृ० २०० पं० १३ तथा २८। ७-**ति व्यतिरेकाश्रि**-भां० मां० विना।

८ "भेदाभेदादयः सर्वे वस्तुसत्परिनिष्ठिताः। निःस्वभावश्च शब्दार्थस्तस्मादेते निरास्पदाः" ॥
तत्त्वसं० का० ११९१ पृ० ३६१।
"व्यतिरेकाव्यतिरेकादयः"-तत्त्वसं० पञ्जि० पृ० ३६१ पं० ११।

९ पृ० २०० पं० १६। १० **क्रियाया रू**-आ० हा० वि०। ११-**दपोह्यस्य** भां० मां० विना। १२ **विषय इ**-कां०। "-विषयः"-तत्त्वसं० पञ्जि० पृ० ३६१ पं० १५। १३ पृ० २०० पं० १७। १४ पृ० २०० पं० १९ तथा ३६। १५-**क्तं गौर्येनै**-आ० हा० विना।

१६ "अन्यार्थविनिवृत्तिं च साक्षाच्छब्दः करोति नः। कृते स्वार्थाभिधाने तु सामर्थ्यात् साऽवगम्यते" ॥
"न तदात्मा परात्मेति विस्तरेणोपपादितम्। (पृ० २०३ पं० २३) परपक्षानभिज्ञेन तस्मादेतदिहोच्यते" ॥
"केन ह्यगोत्वमासक्तं गोर्येनैतदपोह्यते। इति नैवाभिमुख्येन शब्देनैतदपोह्यते" ॥
तत्त्वसं० का० ११९२–११९३–११९४ पृ० ३६१।

१७ "यावताऽर्थप्रतिबिम्बकमेव"—तत्त्वसं० पञ्जि० पृ० ३६१ पं० २५। १८ प्र० पृ० पं० ५। १९ पृ० २०१ पं० ८।

२० "कतमेन च शब्देन वाच्यत्वं परिपृच्छयते। अपोहस्य किमेतेन यदि वा किं घटादिना" ॥
"शब्दार्थः किमपोहो वा विधिर्वेति निरूपणे। अपोह इति भाख्येतद् यत् तदेवं प्रतीयते" ॥
"प्रतिबिम्बं हि शब्दार्थ इति साक्षादियं मतिः। जात्यादिविधिहानिस्तु सामर्थ्यादवगम्यते" ॥
"घट-वृक्षादिशब्दाश्च तदेव प्रतिबिम्बकम्। ब्रुवन्ति जननात् साक्षादर्थादन्यत् क्षिपन्ति तु" ॥
"तस्मान्न विधिदोषोऽस्ति नानिष्टा च प्रसज्यते। अवाच्यपक्षदोषस्तु तदनङ्गीकृतेर्न नः" ॥
तत्त्वसं० का० ११९५–११९६–११९७–११९८–११९९ पृ० ३६२।

२१-**न्यापोह्यवा**-वा० बा०। २२-**च्यत्वमिति** ऽकल्पे आ० हा० वि०।-**च्यत्वविकल्पे** भां० मां०। "तत्रान्यापोहवाच्यत्वविकल्पः"-तत्त्वसं० पञ्जि० पृ० ३६२ पं० १४। २३ **आहोश्विद**-हा० वि०। **आहेतेस्विद**-वा० बा०।

१ **अथानु** आ० हा० वि० विना। "अर्थात् तु"-तत्त्वसं० पञ्जि० पृ० ३६२ पं० १७। २ पृ० २०१ पं० १० तथा ३४। ३-**त्वान्न वाच्य**-भां० मां०। ४-**या वाच्य**-आ० हा० वि०। ५ पृ० २०१ पं० १६।

६ "एकत्व-नित्यतादिश्च कल्पितो न तु तात्त्विकः। तदत्र हासकरणं महाविद्वत्त्वसूचकम्" ॥
तत्त्वसं० का० १२०० पृ० ३६२।

७ पृ० २०१ पं० १८। ८-**पि केव**-भां० मां० वा० बा० विना।

९ "अवधारणसामर्थ्यादन्यापोहोऽपि गम्यते। स्वात्मैव गम्यते यत्र विफलो नियमोऽन्यथा" ॥
तत्त्वसं० का० १२०१ पृ० ३६३।

१०-**न्यनि**-भां० मां०। ११ पृ० २०१ पं० १९।

१२ "यस्य तर्हि न बाह्योऽर्थोऽप्यन्यथावृत्त इष्यते। वन्ध्यासुतादिशब्दस्य तेन क्वाऽपोह उच्यते" ॥
तत्त्वसं० का० १२०२ पृ० ३६३।

१३ "रूपाभावादभावानां शब्दा जात्यादिवाचकाः। नाऽऽशङ्क्या एव सिद्धास्ते निर्भासस्यैव सूचकाः" ॥
अर्थशून्याभिजल्पोत्थवासनामात्रनिर्मितम्। प्रतिबिम्बं यदाभाति तच्छब्दैः प्रतिपाद्यते" ॥
तत्त्वसं० का० १२०३–१२०४ पृ० ३६३।

१४-**वृत्तानां** वा० बा०। १५-**भावस्तु वस्तूविवेक**-वा० बा०।-**भावस्तु विवेक**-आ०।-**भाववस्तुविवेक**-वि०।

१६ "तन्मात्रद्योतकाश्चेमे साक्षाच्छब्दाः ससंशयाः। संकेतसव्यपेक्षत्वात् कल्पितार्थाभिधानवत्" ॥
तत्त्वसं० का० १२०५ पृ० ३६४।

१७-**तवैकल्प**-भां० मां० वा० बा० विना।

१८ "परोपगतभेदादिविधानप्रतिपादकाः। न चैते ध्वनयस्तस्मात् तद्वदेवेति गम्यताम्" ॥
तत्त्वसं० का० १२०६ पृ० ३६४।

१९-**वत् हे**-आ० हा० वि०।

२० संकेतासंभवो ह्यत्र भेदादौ साधितः पुरा। वैफल्यं च न तद्धेत्वोः संदिग्धव्यतिरेकिता" ॥
तत्त्वसं० का० १२०७ पृ० ३६४।

विपर्ययेऽनुपलम्भात् अशक्यसमयत्वात् अनन्यभाक्त्वाच्चेति। पूर्वं स्वलक्षणादौ सङ्केतासम्भवस्य सङ्केतवैफल्यस्य च प्रसाधितत्वान्न हेतोः सन्दिग्धविपक्षव्यतिरेकता।

अथ यथा स्वलक्षणादौ सङ्केतासम्भवः वैफल्यं च तथाऽपोहपक्षेऽपि, ततश्चाकृतसमयत्वात् तन्मात्रद्योतकत्वमपि शब्दानां न युक्तमित्यनैकान्तिकता प्रथमहेतोः। तथाहि-न प्रतिबिम्बात्मकोऽपोहः वक्तृ-श्रोत्रोरेकः सिद्ध्यति, न ह्यन्यदीयं ज्ञानमपरोऽर्वाग्दर्शनः संवेदयते प्रत्यात्मवेद्यत्वा(त्वाद्) ज्ञानस्य, अज्ञानव्यतिरिक्तश्च परमार्थतः प्रतिबिम्बात्मलक्षणोऽपोहः; ततश्च वक्तृ-श्रोत्रोरेकस्य सङ्केतविषयस्यासिद्धेः कुत्र सङ्केतः क्रियेत गृह्येत वा? न ह्यसिद्धे वस्तुनि वक्ता सङ्केतं कर्तुमीशः, नापि श्रोता ग्रहीतुम् अतिप्रसङ्गात्। तथाहि-श्रोता यत् प्रतिपद्यते स्वज्ञानारूढमर्थप्रतिबिम्बकं न तद् वक्ता संवेद्यते यच्च वक्ता संवेद्यते न च तत् श्रोत्रा; द्वाभ्यामपि स्वावभासस्यैव संवेदनात्, आनर्थक्यं च तत्र सङ्केतस्य। तथाहि-यत् सङ्केतकाले प्रतिबिम्बकमनुभूतं श्रोत्रा वक्त्रा वा न तद् व्यवहारकालेऽनुभूयते तस्य क्षणक्षयित्वेन चिरनिरुद्धत्वात् यच्च व्यवहारकालेऽनुभूयते न तत् सङ्केतकाले दृष्टम् अन्यस्यैव तदानीमनुभूयमानत्वात्, न चान्यत्र सङ्केतादन्येन व्यवहारो युक्तः अतिप्रसङ्गात्, असदेतत्; यतो न परमार्थतो ज्ञानाकारोऽपि शब्दानां वाच्यतयाऽभीष्टः येन तत्र सङ्केतासम्भवो दोषः प्रेर्यते; यतः सर्व एवायं शाब्दो व्यवहारः स्वप्रतिभासानुरोधेन तैमिरिकद्वयद्विचन्द्रदर्शनवद् भ्रान्त इष्यते, केवलमर्थशून्याभिजल्पवासनाप्रबोधाच्छब्देभ्योऽर्थाध्यवसायिविकल्पमात्रोत्पादनात् तत्प्रतिबिम्बकं शब्दानां वाच्यमित्यभिधीयते जननात् न त्वभिधेयतया। तत्र यद्यपि स्वस्यैवावभासस्य वक्तृ-श्रोतृभ्यां परमार्थतः संवेदनम् तथापि तैमिरिकद्वयस्येव भ्रान्तिबीजस्य तुल्यत्वात् द्वयोरपि वक्तृ-श्रोत्रोर्बाह्यार्थव्यवस्थाध्यवसायः तुल्य एव। तथाहि-वक्तुरयमभिमानो वर्तते 'यमेवाहमर्थं प्रतिपद्ये तमेवायं प्रतिपाद्यते' एवं श्रोतुरपि योज्यम्। एकार्थाध्यवसायित्वं कथं वक्तृ-श्रोत्रोः परस्परं विदितम् इति न वाच्यम्, यतो यदि नाम परमार्थतो न विदितम् तथापि भ्रान्तिबीजस्य तुल्यत्वादस्त्येव परमार्थतः स्वसंविदितं प्रतिबिम्बकम्। स्वप्रतिभासानुरोधेन च तैमिरिकद्वयवद् भ्रान्त एव व्यवहारोऽयमिति निवेदितम्; तेनैकार्थाध्यवसायवशात् सङ्केतकरणमुपपद्यत एव न चाप्यानर्थक्यं सङ्केतस्य, सङ्केतव्यवहारकालव्यापकत्व (त्वं) प्रतिबिम्बे वक्तृ-श्रोत्रोरध्यवसायात् न परमार्थतः। यदुक्तम्—

"व्यापकत्वं च तस्येदमिष्टमाध्यवसायिकम्।
मिथ्यावभासिनो ह्येते प्रत्ययाः शब्दनिर्मिताः" ॥ [तत्त्वसं० का० १२१२]

ततः स्थितमेतद् न शब्दस्याकल्पितोऽर्थः सम्भवति।

---

१ पृ० १७४ पं० २३ ।-**पूर्वस्वल**-आ० वा० बा० विना।

२ "ननु चापोहपक्षेऽपि कथं संकेतसंभवः। साफल्यं च कथं तस्य न द्वयोः स हि सिध्यति" ॥
"वक्तृ-श्रोत्रोर्न हि ज्ञानं वेद्यते तत् परस्परम्। संकेते न च तद् दृष्टं व्यवहारे समीक्ष्यते" ॥
तत्त्वसं० का० १२०८–१२०९ पृ० ३६४।

३-**त्वमिति श**-भां० मां० विना। ४-**त्यात्मसंवेद्य**-भां० मां०। "प्रत्यात्मसंवेदनीयमेवाऽर्वाग्दर्शनानां ज्ञानम्। न ह्यन्यदीयज्ञानमपरोऽपरदर्शनः संवेदयते। ज्ञानादव्यतिरिक्तश्च"-तत्त्वसं० पञ्जि० पृ० ३६५ पं० ३। ५-**त्मकल**-भां० मां०। ६ **कुत** वा० बा०। ७ **क्रियते** भां० मां०। ८ **श्रोत्रा यत् प्रतिपाद्यते** आ०। **श्रोता यत् प्रतिपाद्यते** वि० हा०। ९-**त्वात् व्यव**-आ० हा० वि०।

१० "स्वस्य स्वस्यावभासस्य वेदनेऽपि स वर्तते। बाह्यार्थाध्यवसाये यद् द्वयोरपि समो यतः" ॥
"तिमिरोपहताक्षो हि यथा प्राह शशिद्वयम्। स्वसमाय तथा सर्वा शाब्दी व्यवहृतिर्मता" ॥
तत्त्वसं० का० १२१०–१२११ पृ० ३६५–३६६।

११-**म्भवे दो**-आ० हा० वि०। १२-**यं शब्दो** भां० मां० विना। १३-**त्पादात्** भां० मां०। १४-**यस्यैव** वा० बा० हा० वि०। १५ "प्रतिपद्यते"-तत्त्वसं० पञ्जि० पृ० ३६५ पं० २४। १६-**वदभ्रान्त**-भां० मां० विना। १७ प्र० पृ० पं० १४। १८-**कयं संकेतव्यवहार**-भां० मां० विना। १९ **व्यापकत्वस्य प्रति**-भां० मां० वा० बा०। "संकेतव्यवहाराप्तकालव्यापकत्वं च"-तत्त्वसं० पञ्जि० पृ० ३६६ पं० १०। २०-**बिम्बं व**-आ०। २१-**पकं च** वा० बा० आ० हा० वि०। २२ **तस्येवमि**-वा० बा०। **तस्यैवमि** आ० हा० वि०।

[संविद्वपुरन्यापोहवादिप्राज्ञाकरमतस्य उपन्यासः]

अपरस्त्वन्यथा प्रमाणयति—इह खलु यद् यत्र प्रतिभाति तत् तस्य विषयः, यथाऽक्षजे संवेदने परिस्फुटं प्रतिभासमानवपुरर्थात्मा नीलादिस्तद्विषयः, शब्द-लिङ्गान्वये च दर्शनप्रसवे बहिरर्थस्वतत्त्वप्रतिभासरहितं स्वरूपमेव चकास्ति तत् तदेव तस्य विषयः। पराकृतबहिरर्थस्पर्शं च संविद्वपुरन्यापोहः वस्तुनि शब्द-लिङ्गवृत्तेरयोगात्। तथाहि–जातिर्वा तयोर्विषयः, व्यक्तिर्वा तद्विशिष्टा? तत्र न तावदाद्यः पक्षः, जातेरेवासम्भवात्। तथाहि–दर्शने व्यक्तिरेव चकास्ति, पुरः परिस्फुटतयाऽसाधारणरूपानुभवात्। अथ साधारणमपि रूपमनुभूयते 'गौर्गौः' इति, तदसत्; शाबलेयादिरूपविवेकेनाऽप्रतिभासनात्। न च शाबलेयादिरूपमेव साधारणमिति शक्यं वक्तुम्, तस्य प्रतिपत्तिव्यक्ति(प्रतिव्यक्ति)भिन्नरूपोपलम्भात्। तथा च पराकृतमिदम्—

"सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका।
जायते ह्यात्मकत्वेन विना सा च न युज्यते" ॥
"न चात्रान्यतरा भ्रान्तिरुपचारेण वेष्यते।
दृढत्वात् सर्वथा बुद्धेर्भ्रान्तिस्तद् भ्रान्तिवादिनाम्" ॥ [श्लो० वा० आकृ० श्लो० ५-७] इति।

'ह्यात्मिका बुद्धिः' इति यदीन्द्रियबुद्धिमभिप्रेत्योच्यते तदयुक्तम्; तस्या असाधारणरूपत्वात्, नहि द्वयोर्बहिर्ग्राह्याकारतया परिस्फुटमुद्भासमानयोस्तदभिन्नं भिन्नं वा दर्शनारूढं साधारणं रूपमाभाति। अथ कल्पनाबुद्धिर्ह्याकारा अभिधीयते। तथाहि-यदि नाम अपास्तकल्पने दर्शने न जातिरुद्भाति कल्पना तु तामुल्लिखन्ती व्यवसीयते 'गौर्गौः' इति, एतदप्यसत्; कल्पनाज्ञानेऽपि जातेरनवभासनात्। तथाहि-कल्पनाऽपि पुरः परिस्फुटमुद्भासमानं व्यक्तिंस्वरूपं व्यवस्यन्ती हृदि चाभिजल्पाकारं प्रतीयते, न च तद्व्यतिरिक्तः वर्णाकृत्यक्षराकारशून्यः प्रतिभासो लक्ष्यते वर्णादिस्वरूपरहितं च जातिस्वरूपमभ्युपगम्यते, तन्न कल्पनावसेयाऽपि जातिः। यच्च क्वचिदपि ज्ञाने नावभाति तदसत्, यथा शशविषाणम्, जातिश्च क्वचिदपि ज्ञाने परिस्फुटव्यक्तिप्रतिभासवेलायां स्वरूपेण नाभाति तन्न सती।

अथापि शब्द-लिङ्गजे ज्ञाने स्वरूपेण सा प्रतिभाति तत्र सम्बन्धप्रतिपत्तेः, स्वलक्षणस्य च तत्रासाधारणरूपतया प्रतिभासनावसायात् सम्बन्धग्रहणासम्भवाच्च तत्र शब्द-लिङ्गभूमिः। ननु तत्रापि परिस्फुटतरो व्यक्तेरेवाकारः शब्दस्य वा प्रतिभाति न तु वर्णाकाररहितोऽनुगतैकस्वरूपः प्रयोजनसामर्थ्यव्यतीतः कश्चिदाकारः केनचिदपि लक्ष्यते, शब्द-लिङ्गान्वयं हि दर्शनमर्थक्रियासमर्थं तथाऽस्फुटदहनाकारमाददानं प्रवर्तयति जैनम्, तत् कथमन्यावभासस्य दर्शनस्याऽन्याकारो जात्यादिविषयः? यदि च जात्यादिरेव लिङ्गादिविषयः तथा सति जातेरर्थक्रियासामर्थ्यविरहादधिगमेऽपि शब्द-लिङ्गाभ्यां न बहिरर्थे प्रवृत्तिर्जनस्येति विफलः शब्दादिप्रयोगः स्यात्। अथ जातेरर्थक्रियासामर्थ्यविरहेऽपि स्वलक्षणं तत्र समर्थमिति तदर्था प्रवृत्तिरर्थिनाम्, ननु तत् स्वलक्षणं लिङ्गादिजे दर्शने सदपि न प्रतिभाति, न चात्मानमनारूढेऽर्थे विज्ञानं प्रवृत्तिं विधातुमलम् सर्वस्य सर्वत्र प्रवर्तकत्वप्रसङ्गात्। यत् तु तत्र प्रतिभाति सामान्यं न तद् दाहादियोग्यम्, यदपि ज्ञानाभिधानं तस्य फलं मतं तदपि पूर्वमेवोदितमिति न तदर्थाऽपि प्रवृत्तिः साध्वी।

१-**लादि स तद्विष**-भां० मां० विना। २-**र्थास्वतत्त्वप्रतिभासारहि**-वा० बा०। ३-**र्थसंस्पर्शं** भां० मां०। ४-**नुभा**-आ० हा० वि०। ५-**सनात्तच्च शाब**-भां० मां०।-**सनानुब शाब**-आ० हा० वि०। ६ **तस्य प्रतिव्यति प्रतिव्यक्ति भिन्न**-वा० बा। **तस्य प्रतिपत्ति भिन्न**-वि०, **तस्य प्रतिव्यक्ति भिन्न**-वि० सं०। **तस्य प्रतिपत्तिः व्यक्तिभिन्न**-मां०। ७ **बुद्धे भ्रा**-वा० बा०। ८-**ति बुद्ध्यात्मि**-आ० हा० वि०। ९-**नामुल्लि**-भां० मां० विना। १०-**क्तिरू**-आ० हा० वि०। ११-**दि वाऽभि**-आ० हा० भां०। १२-**तिरिक्तैः वर्णा**-भां० मां०।-**तिरिक्तवर्णा**-आ० हा० वि०। १३ **जाते स्व**-आ० हा० वि०। १४-**हणसम्भ**-आ० विना। १५ **तत्र श**-भां० मां० विना। १६-**तया स्फुट**-भां० मां० वा० बा० विना। १७ **जलम्** वा० बा०। १८-**रहाधिग**-आ० हा० वि०। १९-**नां तत्** आ०। २०-**ति तद्**-आ० हा० वि०। २१-**र्था प्र**-आ०।

अथ प्रथमं शब्द-लिङ्गाभ्यां जातिरवसीयते ततः पश्चात् तया स्वलक्षणं लक्ष्यते तेन विना तस्या अयोगादिति लक्षितलक्षणया प्रवृत्तिर्भवेत्, नैतदपि सम्यक्; न ह्यत्र क्रमवती प्रतीतिः—पूर्वं जातिराभाति पश्चात् स्वलक्षणमिति। किञ्च, जात्यापि स्वलक्षणं प्रतिनियतेन वा रूपेण लक्ष्येत, साधारणेन वा? तत्र न तावदाद्यः पक्षः, प्रतिनियतरूपस्य स्वलक्षणस्य प्रतिपत्तेरसम्भवात्; न हि शब्दानुमानवेलायां जातिपरिमितं प्रतिनियतं स्वलक्षणमुद्भाति सर्वतो व्यावृत्तरूपस्यानुभवात्, अनुभवे वा प्रत्यक्षप्रतिभासाविशेषः स्यात्। न च प्रतिनियतरूपमन्तरेण जातिर्न सम्भवति, तत् कुतस्तया तस्य लक्षणम्? अथापि साधारणेन रूपेण तया स्वलक्षणं लक्ष्यते 'दाहादियोग्यं वह्निमात्रमस्ति' इति, तदप्यसत्; साधारणस्यापि रूपस्यार्थक्रियाऽसम्भवात् प्रतिनियतस्यैव रूपस्य तत्र सामर्थ्योपलब्धेः; ततश्च तत्प्रतिपत्तावपि कथं प्रवृत्तिः? पुनस्तेनापि साधारणेनापरं साधारणं रूपं प्रत्येतव्यम् तेनाप्यपरमिति साधारणरूपप्रतिपत्तिपरम्परा निरवधिर्भवेत्; तथा चार्थक्रियासमर्थरूपानधिगतेर्वृत्त्यभाव एव। किञ्च, यदि नाम जातिराभाति शब्द-लिङ्गाभ्याम् व्यक्तेः किमायातम् येन सा तां व्यनक्ति? तयोः सम्बन्धादिति चेत्, सम्बन्धस्तयोः किं तदा प्रतीयते, उत पूर्वं प्रतिपन्नः? न तावत् तदा भात्यसौ व्यक्तेरनधिगतेः; केवलैव हि तदा जातिर्भाति यदि तु व्यक्तिरपि तदा भासेत तदा किं लक्षितलक्षणेन? सैव शब्दार्थः स्यात्; तदनधिगमे न तत्सम्बन्धाधिगतिः। अथ पूर्वमसौ तत्र प्रतीतः तथापि तदैवासौ भवतु; नह्येकदा तत्सम्बन्धेऽन्यदापि तथैव भवति अतिप्रसङ्गात्। अथ जातेरिदमेव रूपम्, यदुत विशेषनिष्ठता? ननु 'सर्वदा सर्वत्र जातिर्विशेषनिष्ठा' इति किं प्रत्यक्षेणावगम्यते, यद्वाऽनुमानेन? तत्र न तावत् प्रत्यक्षेण सर्वव्यक्तीनां युगपदप्रतिभासनान्नैकदा तन्निष्ठता तेन गृह्यते, क्रमेणापि व्यक्तिप्रतीतौ निरवधेर्व्यक्तिपरम्परायाः सकलायाः परिच्छेत्तुमशक्यत्वात् तन्निष्ठता न जातेरधिगन्तुं शक्या। कादाचित्के तु जातेर्व्यक्तिनिष्ठताऽधिगमे 'सर्वदा न तन्निष्ठता' इत्युक्तम्। तन्न प्रत्यक्षेण जातेस्तन्निष्ठता प्रतिपत्तुं शक्या। नाप्यनुमानेन, तत्पूर्वकत्वेन तस्य तदभावेनाप्रवृत्तेः। तन्न जात्यापि तदभावे व्यक्तेरधिगमः कर्तुं शक्यः।

किञ्च, यदि जातिरभिधानगोचरः तथा सति नीलत्वजातिरुत्पलत्वजातिश्च द्वयमपि परस्परभिन्नं प्रतीतमिति न सामानाधिकरण्यं भवेत्; न हि परस्परविभिन्नार्थप्रतीतौ तद्व्यवस्था 'घटः पटः' इति दृश्यते। अथ गुण-जाती प्रतिनियतमेकमधिकरणं बिभ्राते ततस्तद्वारेणैकाधिकरणता शब्दयोः। ननु गुणजातिप्रतीतौ शब्दजायां न तदधिकरणमाभाति तस्य शब्दागोचरत्वात्, न चानुद्भासमानवपुरधिकरणं सन्निहितमिति न समानाधिकरणताव्यवस्था अतिप्रसङ्गात्, पुनरपि तदेव वक्तव्यम्—'शब्दैरनभिधीयमानमधिकरणं तदभिहितैर्जात्यादिभिराक्षिप्यमाणं तद्व्यवस्थाकारि' इति। तत्र च समाधिर्न सामर्थ्यायातमधिकरणं (मधिकरणमेकाधिकरणतां) शब्दयोः कर्तुमलम्, घट-पटशब्दयोरपि ताभ्यामभिहिताभ्यामेकस्य भूतलादेराधारस्याऽऽक्षेपादेकार्थताप्रसङ्गात्। तथा, जातिपक्षे धर्मधर्मिभावोऽप्यनुपपन्न एव, यदि हि व्यक्तावाश्रिता जातिः प्रतीयेत तदा तद्धर्मः स्यात्, यदा तु व्यक्तिः सत्यपि नाभाति शब्दजे ज्ञाने तदा जातेरेव केवलायाः प्रतिभासनात् कथं जाति-जातिमतोर्धर्मधर्मिभावः? नहि नीलादिः केवलं प्रतीयमानः कस्यचिद्धर्मो धर्मी वा; यदापि प्रत्यक्षे द्वयं प्रतिभाति तदाऽपि भेदप्रतिभासे सति न धर्मधर्मिभावः, सर्वत्र तथाभावप्रसङ्गात्। अथ प्रत्यक्षे तादूप्यं प्रतिभाति जाति-व्यक्त्योः तेनायमदोष इति चेत्, अत्रोच्यते-तादूप्येण विज्ञानमिति किं व्यक्तिरूपतया जातेरधिगतिः, अथ जातिरूपतया व्यक्तेरिति? तत्र यद्याद्यः पक्षः तथा सति व्यक्तिरेव गृहीता न जातिः। द्वितीयेऽपि जातिरूपाधिगतिरेव न व्यक्तिरिति न सर्वथा धर्मिधर्मभावः। तन्न जातिः शब्द-लिङ्गयोर्विषयः।

---

१ तस्य अयोगा-आ०। तस्या योगा-भां० मां०। २ लक्षिते लक्षणाया प्र-वा० बा०। लक्षितलक्षणयोः प्र-आ० हा० वि०। ३-मुद्भवति वा० बा०। ४-भासवि-वा० बा०। ५-सा व्यन-भां० मां० विना। ६ न भवेत् तदा आ०। न सावेत् तदा वि०। न सावच्छदा हा०। न च तदा वा० बा०। ७-दा प्रतिभा-भां० मां०। ८ यदि त व्य-वा० बा०। यदि व्य-आ० हा० वि०। ९ तचैव वा० बा०। तदैव वि०। १०-स्परतो भि-भां० मां०। ११-समाधिकरणं बिभाते ततस्तद्वारेणैकाधिकरणमेकाधिकरणतां शब्दयोः कर्तुमलम्, घट-वा० बा०। १२-र्थायत-आ० वि०। १३ प्रतीयते भां० मां० विना।

अथाकृतिविशिष्टा व्यक्तिस्तयोरर्थः, तदप्यसत्; तस्याः प्रतिभासाभावात्, न हि शब्द-लिङ्गप्रसवे विज्ञाने व्यक्ति(क्त)रूपतया प्रतिभाति, तदभावेऽपि तस्योदयात् अव्यक्ताकारानुभावाच्च। अथापि व्यक्तेरेवाकारद्वयमेतत्—व्यक्तरूपमव्यक्तरूपं चेति। तत्र व्यक्तरूपमिन्द्रियज्ञानभूमिः, अव्यक्तं च शब्दपथः। ननु रूपद्वयं व्यक्तेः केन गृह्यते? न तावदभिधानजेन ज्ञानेन, तत्र स्पष्टरूपानवभासनात् अस्पष्टरूपं हि तदनुभूयते। नापीन्द्रियज्ञानेन व्यक्तेराकारद्वयं प्रतीयते, तत्र व्यक्ताकारस्यैव प्रतिभासनात्; न हि परिस्फुटप्रतिभासवेलायामविशदरूपाकारो व्यक्तिमारूढः प्रतिभाति; तत् कथं व्यक्तेरसावात्मा? अथ 'श्रुतं पश्यामि' इति व्यवसायाद् दृश्य-श्रुतयोरेकता; ननु किं दृश्यरूपतया श्रुतमवगम्यते, श्रुतरूपतया वा दृश्यम्? तत्राद्ये पक्षे दृश्यरूपावभास एव न श्रुतगतिर्भवेत्। द्वितीयेऽपि पक्षे श्रुतरूपावगतिरेव व्यक्तेः न दृश्यरूपसम्भवः; तस्मात् प्रतिभासरहितमभिमानमात्रमिन्द्रिय-शब्दार्थयोरध्यवसानम् न तत्त्वम्; अन्यथा दर्शनवच्छाब्दमपि स्फुटप्रतिभासं स्यात्। अथ तत्रेन्द्रियसम्बन्धाभावाद् व्यक्तिस्वरूपावभासेऽपि प्रतिपत्तिविशेषः स्यात्; नन्वक्षैरपि स्वरूपमुद्भासनीयम्, तत्र यदि शब्द-लिङ्गाभ्यामपि तदेव दर्श्यते तथा सति तस्यैवान्यूनातिरिक्तस्य स्वरूपस्याधिगमे कथं प्रतिपत्तिभेदः? अन्यच्च, प्रत्यक्षेऽपि साक्षादिन्द्रियसम्बन्धोऽस्तीति न स्वरूपेण ज्ञातुं शक्योऽसौ तस्यातीन्द्रियत्वात्, किन्तु स्वरूपप्रतिभासात् कार्या(र्यात्)। तच्च वस्तुस्वरूपं यद्यनुमानेऽपि भाति तथा सति तत एवेन्द्रियसम्बन्धः समुन्नीयताम्। अथ तत्र परिस्फुटप्रतिभासाभावान्नासावनुमीयते; ननु तदभावस्तत्राक्षसङ्गतिविरहात् प्रतिपाद्यते तदभावश्च स्फुटप्रतिभासाभावादिति सोऽयमितरेतराश्रयदोषः। अथ व्यक्तिरूपमेकमेव नीलादित्वमुभयत्र प्रतीयते व्यक्ताव्यक्ताकारौ तु ज्ञानस्यात्मानौ, तत्रोच्यते-यदि तौ ज्ञानस्याकारौ कथं नीलप्रभृतिरूपतया प्रतिभातः? तद्रूपतया च प्रतिभासनान्नीलाद्याकारावेतौ; नहि व्यक्तरूपतामव्यक्तरूपतां च मुक्त्वा नीलादिकमपरमाभाति; तदनवभासात् तस्याभाव एव। व्यक्ताव्यक्तैकात्मनश्च नीलस्य व्यक्ताकारवद् भेदः; नहि प्रतिभासभेदेऽप्येकता अतिप्रसङ्गात्। तन्नाक्ष-शब्दयोरेको विषयः। किञ्च, यदि व्यक्तिः शब्द-लिङ्गयोरर्थः तथा सति सम्बन्धवेदनं विनैव ताभ्यामर्थप्रतीतिर्भवेत्; नहि तत्र तत् तयोः सम्भवति। व्यक्तिर्हि नियतदेशकालादशा(लदशा)परिगता न देशान्तरादिकमनुवर्तते नियतदेशादिरूपाया एव तस्याः प्रतीतेः; तथा चैकत्रैकदा सम्बन्धानुभवेऽन्यस्यार्थस्य कथं प्रतीतिः? अथ व्यक्तीनामेकजात्युपलक्षिते रूपे सम्बन्धादनन्तरा भविष्यति, तदपि न युक्तम्; यतो जात्युपलक्षितमपि रूपं तासां भिन्नमेव लिङ्गादिगोचरः, तस्याभेदे पूर्वोक्तदोषात्; तथा च सम्बन्धाननुभव एव स्यात्।

किञ्च, व्यक्तौ सम्बन्धवेदनं प्रत्यक्षेण, अनुमानेन वा भवेत्? न तावत् प्रत्यक्षेण, तस्य पुरःस्थितरूपमात्रप्रतिभासनात् शब्दस्य वचनयोर्वाच्यवाचकसम्बन्धस्तेन गृह्यते। अथेन्द्रियज्ञानारूढे एव रूपे सम्बन्धव्युत्पत्तिर्दृश्यते—'इदमेतच्छब्दवाच्यम्' 'अस्य वेदमभिधानम्' इति, अत्र विचारः—'अस्येदं वाचकम्' इति कोऽर्थः—किं प्रतिपादकम्, यदि वा कार्यम्, कारणं वेति? तत्र यदि प्रतिपादकम्, तत् किमधुनैव, यद्वाऽन्यदा? तत्र यद्यधुनोच्यते शब्दरूपमर्थस्य प्रतिपादकं विशदेनाकारेणेति, तदयुक्तम्; अक्षव्यापारेणाधुना विशदाकारेण नीलादेरवभासनात्; ततश्चाक्षव्यापार एवाधुना प्रकाशकोऽस्तु न शब्दव्यापारः, तस्य तत्र सामर्थ्यानधिगतेः। अथान्यदा लोचनपरिस्पन्दाभावे शब्दोऽर्थानुद्भासयति तदा किं तेनैवाकारेणासौ तानर्थानवभासयति, यद्वा आकारान्तरेणेति विकल्पद्वयम्। यदि विशदेनाकारेण प्रतिपादयतीत्युच्यते, तदसत्; यतस्तदाप्यसौ चक्षुरादिभिरेव विशदेनाकारेणोद्भास्यते न शब्देन, तस्य तत्र सामर्थ्यादर्शनात् दर्शनाकाङ्क्षणाच्च। यदि

१-सन् भां० मां० वा० बा० हा०। २ व्यक्तयरूपम-भां० मां०। व्यक्तम-वि०। ३-मव्यक्तं चे-भां० मां०। ४-पथम् आ० कां०। ५ व्यक्ते न भां० मां० वा० बा०। ६-स्वभावाव-वि०। ७ तदाभाव-भां० मां०। ८ व्यक्तिस्वरूप-भां० मां०। ९-पमेव आ० कां०। १० व्यक्तिरू-भां० मां०। ११-सभेदोऽप्ये-वि० विना। १२-कालदेशपरि-आ०।-कालादर्शापरि वा० बा०। १३ प्र० पृ० पं० २३। १४-न्धानुभव-वा० बा०। १५ शब्दस्य च तयोर्वाच्य-भां० मां०। शब्दस्य च न तयोर्वाच्य-वा० बा०। १६-स्य चे-भां० मां० आ०। १७-णं चे-भां० मां० वा० बा० विना। १८-रभास-वा० बा० आ० वि०। १९ शब्दार्थानुद्भा-वा० बा०। शब्दानुद्भा-आ०।

तु शब्देनैव सोऽर्थः स्वरूपेणैव प्रतिपाद्यते तदाऽस्य सर्वथा प्रतिपन्नत्वात् किमर्थं प्रवृत्तिः? नहि प्रतिपन्न एव तावन्मात्रप्रयोजना[3] वृत्तिर्युक्ता, वृत्तेरविरामप्रसङ्गात्। अथ किञ्चिदप्रतिपन्नं रूपं तदर्थं प्रवर्तनम्; ननु यदप्रतिपन्न[4] व्यक्तिरूपं प्रवृत्तिविषयः तत् तर्हि न शब्दार्थः, तदेव च पारमार्थिकम् ततोऽर्थक्रियादर्शनात्, नाव्यक्तम् सर्वार्थक्रियाविरहात्। अथ कालान्तरे स्फुटेतरेणाकारेण व्यक्ती-[6]
५ रुद्द्योतयन्ति शब्दाः; नन्वसावाकारस्तदा सम्बन्धव्युत्पत्तिकाले कालान्तरे वा नेन्द्रियगोचरस्तत् कथं तत्र शब्दाः प्रवर्तमाना नयनादिगोचरेऽर्थे वृत्ता भवन्ति? तन्नाध्यक्षतः सम्बन्धवेदनम्[8]। नाप्यनुमानेन, तदभावे तदनवतारात्। अथाप्यर्थापत्त्या सम्बन्धवेदनम्। तथाहि-व्यवहारकाले शब्दार्थौ प्रत्यक्षे प्रतिभातः, श्रोतुश्च शब्दार्थप्रतीतिं[7] चेष्टया प्रतिपद्यन्ते व्यवहारिणः तदन्यथानुपपत्त्या तयोः सम्बन्धं विदन्ति। अत्रोच्यते-सिद्ध्यत्येवं काल्पनिकः सम्बन्धः। तथाहि-श्रोतुः प्रतिपत्तिः
१० सङ्केतानुसारिणी दृश्यते, [9]के(क)लि-मार्यादिशब्देभ्यो हि द्रविडाऽऽर्ययोर्विपरीततत्प्रतिपत्तिदर्शनान्न नियतः सम्बन्धो युक्तः। [10]संवेगते च तस्मिन् सिद्धेऽपि न नियतार्थप्रतिपत्तिर्युक्ता। प्रकरणादिकमपि नियमहेतुः नियतार्थसिद्धौ सर्वमनुपपन्नम्। तथाहि-[12]प्रकरणादयः शब्दधर्मः, अर्थधर्मः, प्रतिपत्ति-[13]धर्मो वा? शब्दधर्मे तस्मिन् शब्दरूपं नियतार्थप्रतिपत्तिहेतुरिष्टं स्यात्, तच्च सर्वार्थान् प्रति तुल्यत्वात् न युक्तम्। अर्थोऽपि[13] न नियतरूपः सिद्ध इति[14] न तद्धर्मोऽपि प्रकरणादिः। प्रतिपत्तिधर्मस्तु यदी-[16]
१५ ष्यतेऽसौ तदा काल्पनिक एवार्थनियमः न तात्त्विकः स्यात्। तस्मात् सर्वं परदर्शनं ध्यान्ध्यविजृम्भितम् मनागपि विचाराक्षमत्वात्। तदेवम्[17]वस्थितं विचारात् 'न वस्तु शब्दार्थः' इति, किन्तु शब्देभ्यः कल्पना बहिरर्थासंस्पर्शिन्यः [18]प्रसूयन्ते, ताभ्यश्च शब्दा इति। शब्दानां च कार्यकारणभाव-मात्रं तत्त्वम् न वाच्यवाचक[19]भावः। तथाहि-न जाति-व्यक्त्योर्वाच्यत्वम्, पूर्वोक्तदोषात्। नापि ज्ञान-तदाकारयोः, तयोरपि स्वेन [20]रूपेण स्वलक्षणत्वात् अभिधानकार्यत्वाच्च। शब्दाद् विज्ञानमुत्पद्यते
२० न तु [21]तत् तेन प्रतीयते, बहिरर्थाध्यवसायात्। कथं तर्ह्यन्यापोहः शब्दवाच्यः [22]कल्प्यते? लोकाभि-मान[23]मात्रेण शब्दार्थोऽन्यापोह इष्यते, लौकिकानां हि शब्दश्रवणात् प्रतीतिः, प्रवृत्तिः, प्राप्तिश्च बहिरर्थे दृश्यते। यदि लोकाभिप्रायोऽनुवर्त्[24]यते बहिरर्थस्तर्हि शब्दार्थोऽस्तु तदभिमानात् नान्या-पोहः तदभावात्। अत्रोच्यते-बहिरर्थ एवान्यापोहः तथा[25] चाह-"य एव व्यावृत्तः सैव व्यावृत्तिः"
[ ][26] नैन्वेवं सति स्वलक्षणं शब्दार्थः स्यात्, तदेव विजातीयव्यावृत्तेन
२५ रूपेण शब्दभूमिरिष्यते—सजातीयव्यावृत्तस्य[27] रूपस्य शाब्दे[28] प्रतिभासाभावात्—यदि तर्हि विजातीय-व्यावृत्तं शब्दैर्विकल्पैश्चोल्लिख्यते तथा सति तदव्यतिरेकात् सजातीयव्यावृत्तमपि रूपमधिगतं भवेत्, न; विकल्पानामविद्यास्वभावत्वान्न हि ते स्वलक्षणसंस्पर्शभाजः; यतस्ते[29] (?) सर्वाकारप्रतीति-

---

१ **प्रतिपद्य**-वा० बा०। २-**जनतावृत्ति**-भां० मां०।-**जन्यावृत्ति**-हा०। ३ **यदि प्रति**-भां० मां०। ४-**पन्नव्यक्ति**-वा० बा०। ५ **स्फुटतरे**-कां०। ६-**नम्। न ह्यनु**-आ० हा० वि०। ७-**प्रतीतिचेष्टया प्रतिपाद्य**-वि०। ८-**न्धं वद**-भां० मां०। ९ **केवलि-नार्यादिशब्देभ्यो हि द्रावि**-भां० मां० विना।

"समर्थान्तरभावे च कलि-मार्यादिशब्दवत्। नान्यार्थबोधकत्वं स्याद् ध्वनेर्नियतशक्तितः" ॥

"यथा कलि-मार्यादिशब्दानां द्रविदा(डा)र्यदेशयोर्यथाक्रममन्तकालवर्षोपसर्गाद्यभिधायिनाम्"-तत्त्वसं० का० २६५४ पृ० ७०९, पञ्जि० पृ० ७१० पं० १२। १० **सर्वं ग**-आ०। **संवे ग**-वा० बा०।

११ प्रकरणादयस्त्विमे—

"संसर्गो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः" ॥

वाक्यप० का० २ श्लो० ३१७ पृ० २१४।

१२-**पत्तृध**-वा० बा० विना। १३-**पि नियत**-हा० वि०।-**पि नियतः सि**-आ०। १४-**ति नातद्धर्मो**-भां० मां० विना। १५-**णादि। प्रति**-भां० मां०। १६-**पत्तुं ध**-वा० बा०। १७-**मनवस्थितं** वा० बा० आ०। १८ **प्रश्नयन्ते** भां० मां० विना। १९-**चकाभा**-भां० मां० विना। २०-**रूपेणास्व**-वा० बा०। २१ **तत्त्वेन** भां० मां० हा० विना। २२ **कल्पते** भां० मां० विना। २३-**मात्रेणाश**-भां० मां० विना। २४-**वर्तते** वा० बा०। २५-**था शब्दः य एव** वा० बा०। २६ **नत्वेवं** मां०। २७-**स्य शाब्दे** भां० मां० विना। २८-**शब्दे** वा० बा०। २९-**तस्तैः** भां० मां०।-**तस्तेः** वा० बा०।

दोषाः। केवलमभिमानमात्रं बहिरर्थाध्यवसायस्तदभिप्रायेण वाच्यवाचकभावः शब्दार्थयोरित्यन्या-[3]पोहः शब्दभूमिरिष्टः। परमार्थतस्तु शब्द-लिङ्गाभ्यां बहिरर्थसंस्पर्शव्यतीतः प्रत्ययः केवलं क्रियत इति तत्संस्पर्श(र्शा)भावेऽपि च पारम्पर्येण[6] वस्तुप्रतिबन्धादविसंवादः। तथाहि-पदार्थस्यास्तित्वात्[7] प्राप्तिः न दर्शनात्, [8]केशोन्दुकादेर्दर्शनेऽपि प्राप्त्यभावात्। अथ प्रतिभासमन्तरेण कथं प्रवृत्तिः? ननु प्रतिभासेऽपि कथं प्रवृत्तिः? तस्मिन्नप्यनर्थित्वे तदभावात्, अर्थित्वे च सति दर्शनविरहेऽपि [11]भ्रान्तेः
५ सद्भावात्; प्रतिबन्धाभावात् तु तत्र विसंवादः। यदा तु विकल्पानां स्वरूपनिष्ठत्वान्नान्यत्र प्रति-[12]बन्धसिद्धिस्तदा स्वसंवेदनमात्रं परमार्थसतत्त्वम्, तथापि कथं 'समयपरमार्थविस्तरः'[14] इति सत्यम्?

['सामान्य-विशेषात्मक एव शब्दार्थः' इति प्रतिपादनपरः सविस्तरं स्याद्वादसिद्धान्तोपन्यासः]

अत्र प्रतिविधीयते—यदुक्तम्[15]-'यः 'अतस्मिंस्तत्' इति प्रत्ययः स भ्रान्तः, यथा मरीचिकायां
१० जलप्रत्ययः, तथा चायं भिन्नेष्वभेदाध्यवसायी शाब्दः प्रत्ययः' इति, तत्र भिन्नेष्वभेदाध्यवसा-यित्वलक्षणो हेतुरसिद्धः [16]भेदेस्व(ष्व)भेदाध्यवसायित्वस्य तत्रानुपपत्तेः। न[17] च सामान्यस्याभिन्नस्य वस्तुरूपस्याभावान्नासिद्धता हेतोः, 'गौर्गौः' इत्यबाधितप्रत्ययविषयत्वेन तस्याभावासिद्धेः। अथा-बाधितप्रत्ययविषयस्यापि तस्याभावस्तर्हि विशेषस्याप्यभावप्रसक्तिः, तथाभूतप्रत्ययविषयत्वव्यतिरे-केणापरस्य तद्व्यवस्थानिबन्धनस्य तत्राप्यभावात्। यथा हि पुरोव्यवस्थितं[20] गोवर्गे व्यावृत्ताकारा[21]
१५ बुद्धिरुपजायमाना संलक्ष्यते तथा 'गौर्गौः' इत्यनुगताकारेणाप्युपजायमाना सैव लक्ष्यते। न चानु-गतव्यावृत्ताकारा बुद्धिर्ह्यात्मकवस्तुव्यतिरेकेण घटते, अबाधितप्रत्ययस्य विषयव्यतिरेकेणापि सद्भा-वाभ्युपगमे ततो वस्तुव्यवस्थाऽभावप्रसक्तेः। न चानुगताकारत्वं बुद्धेर्बाध्यत इति वक्तुं युक्तम्, सर्वत्र देशादावनुगतप्रतिभासस्याऽस्खलद्रूपस्य तथाभूता[23]कारव्यवहारहेतोर्दर्शनात्। अतो व्यावृत्ता-कारानुभवांशाऽनधिगतमनुगताकारमवभासयन्त्यक्षान्वयव्यतिरेकानुविधायिन्यबाधितरूपा बुद्धि-
२० रनुभूयमानाऽनुगताकारं वस्तुभूतं[24] सामान्यं व्यवस्थापयति।

न च शाबलेयादिप्रतिनियतव्यक्तिरूपविवेकेन साधारणरूपस्यापरस्य भेदेनाप्रतिभासनाद् व्यक्तिरूपाद् भिन्नमभिन्नं वा सामान्यं नाभ्युपगन्तुं युक्तमिति शक्यं वक्तुम्, यतः [25]समानदेशसमा-नेन्द्रियग्राह्याणामपि वाताऽऽतप-घट-पटादीनां प्रतिभासभेदान्नापरं भेदव्यवस्थापकम्; स च शाबले-यादिव्यक्ति[26]-जात्योरपि समस्ति, शाबलेयादिव्यक्तिप्रतिभासाभावे[27]ऽपि बाहुलेयादिव्यक्तिप्रतिभासे
२५ 'गौर्गौः' इति साधारणावभासस्य तद्व्यवस्थानिबन्धनस्य संवेदनात्। एकान्ततो व्यक्त्यभेदे तु सामान्यस्य[28] शाबलेयादिव्यक्तिस्वरूपस्येव तदभिन्नसाधारणरूपस्यापि बाहुलेयादिव्यक्त्यन्तरे प्रति-भासो न स्यात्, अस्ति च व्यक्त्यन्तरेऽपि 'गौर्गौः' इति साधारणरूपानुभा(भ)वः अतः कथं न भिन्नसामान्यसद्भावः?

१-**र्थाव्यव**-वा० बा०। २-**त्यन्योपो**-वि०। ३-**मार्थस्तु** भां० मां०। ४ **तत्सत्यंरूप**-आ०। ५-**रूपर्श-तोवे**-वा० बा०। ६-**णा**-वा० बा०। ७-**दपि सं**-वा० बा०। ८-**स्यास्थित्वात् प्रा**-भां० मां०। **स्यार्थत्वा प्रा**-वा० बा०। ९ **केशान्दुकादे**-वा० बा० हा०। **केशादुकादे**-आ०। **केशाण्डकादे**-भां० मां०। १०-**प्यर्थित्वे**-भां० मां० वा० बा० विना। ११ **भ्रान्तैः** भां० मां० विना। १२-**त्वान्नान्यथा प्रति**-वा० बा०। **-त्वान्न प्रति**-वि०। १३-**स्तथा** वा० बा०। १४ पृ० १७३ पं० १३। १५ पृ० १७४ पं० ९। १६ **'भिन्नेष्व'** वि० सं०। १७ **न वा सा**-हा०। **न चासा**-वि०। १८-**स्यापि भि**-वि०। १९-**स्याभा**-भां० मां० वा० बा० विना। "विशेषस्याप्यसत्त्वप्रसङ्गः"-प्रमेयक० पृ० १३६ द्वि० पं० १०। २०-**स्थिते गो**-भां० मां०। २१ **वृत्याका**-वा० बा०। २२-**भूतस्य व्यव**-भां० मां०। "सर्वत्र देशादावनुगतप्रतिभासस्याऽस्खलद्रूपस्य तथा-भूतव्यवहारहेतोरुपलम्भात्"- प्रमेयक० पृ० १३६ द्वि० पं० ११। २३-**भूतसा**-वि०। "वस्तुभूतं सामान्यं"-प्रमेयक० पृ० १३६ द्वि० पं०१२। २४ **सामान्यदे**-वा० बा०। २५-**दानापरभेद**-हा० वि०। २६-**क्ति-ज्ञात्यो**-मां०। "स च सामान्य-विशेषयोरप्यस्ति"-प्रमेयक० पृ० १३७ प्र० पं० २। २७-**वे बाहु**-वि०। २८-**स्य साब**-भां० मां०। २९-**न्तरे गौ**-हा०।

न च व्यक्तिदर्शनवेलायां स्वेन वपुषा बुद्धिग्राह्याकारतया प्रतिपदमवतरन्ती जातिर्नाभाति व्यक्तिव्यतिरेकेणापरस्य बहिर्ग्राह्यावभासस्याभावादिति वक्तुं शक्यम्, व्यक्त्याकारेऽप्यस्य समानत्वात्। नँ च बुद्धिरेव 'गौर्गौः' इति समानाकारा बहिः साधारणनिमित्तनिरपेक्षा प्रतिभाति, तथाभ्युपगमे प्रतिनियतदेशकालाकारतया तस्याः प्रतिभासाभावप्रसङ्गात्। न चासाधारणा व्यक्तय एव तद्बुद्धिनिमित्तम्, व्यक्तीनां भेदरूपतयाऽविशिष्टत्वात् कर्कादिव्यक्तीनामपि 'गौर्गौः' इति बुद्धिनिमित्तत्वापत्तेः। नँ च व्यक्तीनां भेदाऽविशेषेऽपि यास्वेव 'गौर्गौः' इति बुद्धिरुपजायमाना समुपलभ्यते ता एव तामुपजनयितुं प्रभवन्ति, यथा यास्वेवं गुडूच्यादिद्योषधिषु भेदाविशेषेऽपि ज्वरादिशमनलक्षणं कार्यमुपलभ्यते ता एव तन्निमित्तं नान्या इति वक्तुं युक्तम्, साधारणनिमित्तव्यतिरेकेणापि देशकालादिनियतसाधारणप्रत्ययस्य तत्रोत्पत्त्यभ्युपगमेऽसाधारणप्रत्ययस्यापि तन्निमित्तमन्तरेणापि तासूत्पत्तिप्रसक्तेर्न स्वलक्षणस्यापि व्यवस्था स्यात्। तथाहि—परेणाप्येवं वक्तुं शक्यम्–अभेदाविशेषेऽप्येकमेवं ब्रह्मादिस्वरूपं प्रतिनियतानेकनीलाद्याभासनिबन्धनं भविष्यतीति किमपररूपादिस्वलक्षणपरिकल्पनया? अथ रूप-रसाद्याभासज्ञानस्य तद्रूपस्वलक्षणमन्तरेणापि सम्भवेऽपरस्यार्थक्रियानिबन्धनार्थव्यवस्थापकस्याभावान्न प्रवृत्त्यादिलक्षणो व्यवहार इति स्वलक्षणाकारज्ञानस्य तन्निमित्तत्वेन तद्व्यवस्थापकत्वम्, एतत् सदृशाकारज्ञानेऽपि समानम्। नहि सामान्यमन्तरेणापि भिन्नानामेककार्यकर्तृत्वं न सम्भवतीति तत् परिकल्प्यते किन्तु समानाकारप्रत्ययोऽबाधितरूपः तथाभूतविषयव्यतिरेकेणोपजायमानो मिथ्यारूपः प्राप्नोतीति विशेषप्रत्ययस्येवाऽबाधितरूपस्य समानप्रत्ययस्यापि सामान्यमालम्बनभूतं निमित्तमभ्युपगन्तव्यमित्यस्ति वस्तुभूतं सामान्यम्; अन्यथा समानप्रतिभासायोगात्। एककार्यतासादृश्यैनैकत्वाध्यवसायादेकप्रतिभास इति चेत्, वाह-दोहादिकार्यस्य प्रतिव्यक्तिभेदात् कथमभेदः कार्याणाम्? इति तत्राप्यपरैककार्यतासादृश्यैनैकत्वाध्यवसायेऽनवस्थाप्रसक्तेः, एककार्यतया भावानामप्रतीतेः कथमभेदाध्यवसायादेकः प्रतिभासः येनैककार्यकारित्वम् अतत्कारिपदार्थविवेको वा सामान्यं तद्व्यवहारनिबन्धनं स्यात्? एकसाधनतयाऽभेदोऽप्यत एव न सामान्यम्, वाह-दोहादेरर्थक्रियात्वाभावेऽप्येकविज्ञानजनकत्वेनाभेदाध्यवसाये तद्विज्ञानस्यापि प्रतिव्यक्तिभिन्नत्वात्। एकाकारपरामर्शज्ञानजनकत्वेनाभेदाध्यवसाये तत्परामर्शस्यापि प्रतिव्यक्तिभिन्नत्वात् अपरपरामर्शजनकत्वेनाभेदाध्यवसायेऽनवस्था। अथैकाकारपरामर्शज्ञानस्य स्वत एवाभेदाध्यवसायरूपत्वादेकत्वमिति नानवस्था, तज्जनकानुभवानां त्वेकाकारपरामर्शज्ञानहेतुत्वादेकत्वम् अनुभवनिमित्तव्यक्तीनां च तथाभूतानुभवजनकत्वेनोपचरितं तत्। नन्वेवं व्यक्तीनामेवान्यवहितैकाकारपरामर्शहेतुत्वं वस्तुभूतं सामान्यमभ्युपगन्तव्यम् किं पारम्पर्यपरिश्रमेण? यैया हि प्रत्यासत्त्या प्रतिव्यक्ति भिन्नानुभवा एकं परामर्शज्ञानं जनयन्ति तयैव प्रतिनियता व्यक्तयः स्वैगतसमानाकारार्पकत्वेन तद् जनयिष्यन्तीति न कश्चिद् दोषः। यथा ह्यनुभवज्ञानं भिन्नमपि परामर्शज्ञानं प्रतिनियतैकाकारतया

१ व्यक्तिदर्शनवपुषा वि०। २–लायां स्थेन वा० बा०।–लायास्तेन आ० हा०। ३ बुद्धिर्ग्रा–वा० बा० विना। ४ "न चानुगतप्रतिभासो बहिः साधारणनिमित्तनिरपेक्षो घटते प्रतिनियतदेशकालाकारतया तस्य प्रतिभासाभावप्रसङ्गात्"–प्रमेयक० पृ० १३७ प्र० पं० ८। ५ "न चाऽसाधारणा व्यक्तय एव तन्निमित्तम्, तासां भेदरूपतयाऽऽविष्टत्वात्"–प्रमेयक० पृ० १३७ प्र० पं० ९। ६ "कर्कः श्वेताश्वः"–प्रमेयक० टि० पृ० १३७ प्र० पं० १४। ७ न व्य–आ० हा०। ८–दादिवि–आ० हा०। ९–व गडूच्या–हा० वि०। १०–च्याद्यौष–आ०। ११ तास्वत्प–वा० बा०। १२–व बुद्ध्यादि–भां० मां० वा० बा० विना। "अभेदाविशेषेऽप्येकमेव ब्रह्मादिरूपं प्रतिनियतानेकनीलाद्याभासनिबन्धनम्"–प्रमेयक० पृ० १३७ द्वि० पं० ३। १३–म्भवे पर–आ० हा० वि०। १४–नाधिकार–आ० हा० वि०। १५–यो बाधि–भां० मां०। १६–रूपतथा–हा० वि०। १७–भूतनिमि–मां०। १८–त्यतिवस्तु–वा० बा०। १९–तत्कापि प–आ० वि० वा० बा०। तत्कापि प–हा०। तत्कोपि प–कां०। २०–या भेदो–हा० वि०। २१–कात्वा–वि०। २२–पि परिव्य–भां० मां०। २३–नुभावानां वा० बा० विना। २४ यथा हि मां०। २५–त्याप्रत्या प्र–आ० हा० वि०। २६–ज्ञा एव भवा–वा० बा०। २७ स्वगतं समानाकारार्थकत्वेन भां० मां० विना। २८–नाधिकारा–वा० बा०। २९–व्यतीति भां० मां०। ३० कारविल–भां० मां० वा० बा० विना।

विलक्षणं चिद्रूपतया तु समानं जनयदपि समानासमानजनकाकारद्वयाध्यासितमप्येकम् तथा व्यक्तयोऽपि समानासमानाकाराध्यवसायिप्रत्ययजनकं रूपद्वयं बिभ्राणा नैकरूपतया विरोत्स्यन्त इति।

{अथ सामान्यस्यानुगताकारज्ञानजनकत्वैकस्वभावत्वात् सर्वदा तज्ज्ञानप्रसक्तिः अनपेक्षस्यापेक्षाऽयोगात्, सहकार्यपेक्षजनकत्वे वा सहकारिकृतोपकारस्य ततोऽभेदे तद्वत् कार्यत्वेनाऽनित्यताप्रसक्तिः, भेदे वा सम्बन्धासिद्धिः। एककार्यकर्तृत्वलक्षणमपि सहकारित्वं नित्यानामसम्भवि तदवस्थाभाविनः स्वभावस्य प्राग् ऊर्ध्वं च तदवस्थानसद्भावात्, अभावे वाऽनित्यत्वम् स्वभावभेदलक्षणत्वात् तस्य। अजनकस्वभावत्वेन न कदाचिदपि तज्ज्ञानम्, यो ह्यजनकस्वभावः सोऽन्यसहितोऽपि न तद् जनयति, यथा शालिबीजं क्षित्याद्यविकलसामग्रीयुक्तमपि कोद्रवाङ्कुरम्, अजनकस्वभावं चेत् सामान्यम् परामर्शज्ञाने न प्रतिभासेत जनकाकारार्पकस्यैव ज्ञानविषयत्वात्, ज्ञानलक्षणमपि कार्यमनुपजनयदवस्तु स्यात् अर्थक्रियाकारित्वलक्षणत्वाद् वस्तुनः। तदेवं सामान्यस्य नित्यत्वेन तद्विषयस्य ज्ञानस्य बाध्यमानतयाऽबाधितज्ञानविषयत्वमसिद्धम्।

यैथा, यदि तत् सर्वसर्वगतमभ्युपगम्यते तदा व्यैक्त्यन्तरालेऽप्युपलम्भप्रसक्तिः, न चाभिव्यक्तिहेतुव्यक्त्यभावात् तत्रानुपलम्भः प्रथमव्यक्तिप्रतिभासवेलायां तदभिव्यक्तस्य सामान्यस्य ग्रहणेऽभेदात् तस्य सर्वत्र सर्वदाभिव्यक्तत्वात्; अन्यथाऽभिव्यक्तानभिव्यक्तस्वभावभेदादनेकत्वप्रसक्तेरसामान्यरूपत्वापत्तितः तदन्तरालेऽवश्यंभाव्युपलम्भ इति उपलब्धिलक्षणप्राप्तत्वेनाभ्युपगतस्य तत्रानुपलम्भादसत्त्वमिति न सर्वसर्वगतं तत्। अँथ स्वव्यक्तिसर्वगतं तदिति नायं दोषः, नन्वेवं प्रतिव्यक्ति तस्य परिसमाप्तत्वाद् व्यक्तिस्वरूपवत् तस्य भेद एव, अभेदे एकव्यक्तावभिव्यक्तस्य ग्रहणेऽन्यव्यक्तिस्थस्यापि तस्य तत्स्वरूपत्वात् प्रतिभासे—तदाधारप्रतिभासमन्तरेण तदाधेयताप्रतिभासस्यानुपपत्तेः–सर्वव्यक्तीनां युगपत् प्रतिभासप्रसक्तिः।

कृत्स्नैकदेशवृत्तिविकल्पानुपपत्तेश्चासत्त्वम्। किञ्च, (१) एकव्यक्तिसमवेतं तद् अभिनवोत्पन्नव्यक्तौ निष्क्रियत्वान्न याति (२) न च तद् व्यक्त्युत्पत्तेः प्राक् तत्रासीत् व्यक्तिरहितस्य तस्यावस्थानानभ्युपगमात् व्यक्त्युत्पत्त्युत्तरकालं तु व्यक्त्यन्तरादनागतस्यापि तस्य तत्र सद्भावः सामान्य-

१–पि समानजन–आ० हा०। २–कारव्यव–वा० बा०। ३–नपेक्ष्यस्या–आ० वि०। ४ ततोऽभेदो तत्कार्य–वा० बा०। ततोऽभेदो तद्वेत् कार्य–आ० हा० वि०। 'ततोऽभेदो तदभेदात् कार्य'–वि० सं०। ५ वा असम्बन्धा–वा० बा०। वा ससम्बन्धा–आ०। ६ "अभावे चाऽनित्यत्वम्"–प्रमेयक० पृ० १३८ प्र० पं० ७। ७ "कार्याजननस्वभावत्वे वाऽस्य सर्वदा कार्याजनकत्वप्रसङ्गः–" प्रमेयक० पृ० १३८ प्र० पं० ८। ८–न्यऽहितो–आ० हा० वि०।–'न्यसंनिहितो'–वि० सं०। ९–भाव चेत् सा–भां०। भाववत् सा–आ० हा० वि० वा० बा०। १०–कारिलक्ष–भां० मां० विना। "अर्थक्रियाकारित्वलक्षणत्वाद् वस्तुनः"–प्रमेयक० पृ० १३८ प्र० पं० ९। ११–त्यत्वे तद्वि–भां० मां०। १२–स्य बाधमान–आ० हा० वि०।–स्य वाच्यंमान–वा० बा०। १३–याऽव्यधित–वा० बा०।–याऽव्यथित–आ० वि०।–या व्यधि ज्ञा–हा०।

१४ "सर्वत्र वृत्तिभाजो वा भवेयुः परजातिवत्" ॥ तत्त्वसं० का० ८०५ पृ० २६०।
"तथा तत् सर्वसर्वगतं स्वव्यक्तिसर्वगतं वा"–प्रमेयक० पृ० १३८ प्र० पं० ९।

१५ "स्वाश्रयेन्द्रिययोगादेरेकस्मिंस्तद्ग्रहे सति। सर्वत्रैवोपलभ्येरंस्तत्स्वरूपाविभागतः" ॥
ज्ञातादव्यतिरिक्तं चेत् तस्यापि ग्रहणं भवेत्। तद्वदेव न वा तस्य ग्रहणं भेद एव वा" ॥
तत्त्वसं० का० ८०८–८०९ पृ० २६१।

१६–तं सर्वं तत् भां० मां०।
१७ "घटादिजातिभेदाश्च स्वाश्रयेष्वेव भाविनः"। तत्त्वसं० का० ८०५ पृ० २६०।
१८–भासत–आ०।
१९ "संयोगदूषणे सर्वं यदेषोक्तं प्रबाधकम्" ॥ तत्त्वसं० का० ८११ पृ० २६२।
"एकस्यानेकवृत्तिश्च न युक्तेति प्रबाधकम्" ॥ तत्त्वसं० का० ६७४ पृ० २२३।
२० "तत्र देशान्तरे वस्तुप्रादुर्भावे कथं नु ते। दृश्यन्ते वृत्तिभाजो वा तस्मिन्निति न गम्यते" ॥
"न हि तेन सहोत्पन्ना नित्यत्वान्नाप्यवस्थिताः। तत्र प्रागविभुत्वेन न चाऽऽयान्त्यन्यतोऽक्रियाः" ॥
तत्त्वसं० का० ८०६–८०७ पृ० २६०–२६१।
२१ व्यक्त्युत्तरका–हा०। २२–पि तत्र तत्र स–वि०।

शून्याया व्यक्तेरसत्त्वाभ्युपगमात् (३) न चांशवत् तत् एकेनांशेन प्रागुत्पन्नव्यक्तिव्यवस्थितमप्यपरेणांशेनोत्पद्यमानव्यक्तिसम्बन्धमनुभवति (४) न च निरंशत्वेऽपि प्राक्तनाधारपरित्यागेनाधारान्तरे वृत्तिमत् तत्परित्यक्तव्यक्तेरसत्त्वप्रसङ्गात् (५) न च यत्र प्रदेशे व्यक्तिर्व्यवस्थिता तद्देशेन तस्य सम्बन्धस्तद्व्यक्त्यानुसम्बन्ध्यते इत्याद्यनेकबाधकसद्भावा(वाद्) व्यक्तिभिन्नसामान्यपक्षे कथमबाधितप्रत्ययविषयत्वात् तत्सत्त्वम् ।

यैरपि—

"कस्मात् साद्यादिमत्स्वेवं गोत्वं यस्मात् तदात्मकम् ।
तादात्म्यमस्य कस्मात् चेत् स्वभावादिति गम्यताम्" ॥ [श्लो०वा०आकृ०श्लो० ४७]

इति वचनाद् व्यक्तिस्वभावं सामान्यमभ्युपगतं तेषामपि व्यक्तिवत् तस्याऽसाधारणरूपत्वं व्यक्त्युदय-विनाशयोश्च तद्योगित्वं प्रसक्तम् इति न सामान्यरूपता । अथाऽसाधारणत्वमुत्पादविनाशयोगित्वं च तस्य नाभ्युपगम्यते तर्हि विरुद्धधर्माध्यासतो व्यक्तिभ्यस्तस्य भेदप्रसक्तिः । आह च—

"तादात्म्यं चेद् मतं जातेर्व्यक्तिजन्मन्यजातता ।
नाशेऽनाशश्च केनेष्टस्तद्वत्त्वान त्वयो न किम्" (?) ॥
"व्यक्तिजन्मन्यजाता चेदागतौ नाश्रयान्तरात् ।
प्रागासीद् न च तद्देशे सा तया सङ्गता कथम्" ॥
"व्यक्तिनाशेन चेन्नष्टा गता व्यक्त्यन्तरं न च ।
तत् शून्ये न स्थिता देशे सा जातिः क्वेति कथ्यताम्" ॥
"व्यक्ति(क्ते)र्जात्यादियोगेऽपि यदि जातेः स नेष्यते ।
तादात्म्यं कथमिष्टं स्यादनुपप्लुतचेतसाम्" ॥ [ ]

अत एव—

"सामान्यं नान्यदिष्टं चेत् तस्य वृत्तेर्नियामकम् ।
गोत्वेनापि विना कस्माद् गोबुद्धिर्न नियम्यते" ॥
"यथा तुल्येऽपि भिन्नत्वे केषुचिद् वृत्त्यवृत्तिता ।
गोत्वादेरनिमित्तोऽपि तथा बुद्धेर्भविष्यति" ॥ [श्लो० वा० आकृ० श्लो० ३५-३६]

इति पूर्वपक्षयित्वा यदुक्तं कुमारिलेन—

"विषयेण हि बुद्धीनां विना नोत्पत्तिरिष्यते ।
विशेषादन्यदिच्छन्ति सामान्यं तेन तद् ध्रुवम्" ॥
"ता हि तेन विनोत्पन्ना मिथ्याः स्युर्विषयादृते ।
न त्वन्येन विना वृत्तिः सामान्यस्येह दुष्यति" ॥ [श्लो०वा०आकृ०श्लो०३७-३८।] इति,

---

१ नवांश-वा० बा० । २-क्तिसंचरम-वा० बा० । ३-धारोप-भां० मां० विना । "किञ्च पूर्वपिण्डपरित्यागेन तत् तत्र गच्छेत्, अपरित्यागेन वा? न तावत् परित्यागेन प्राक्तनपिण्डस्य गोत्वपरित्यक्तस्यागोरूपताप्रसङ्गात् । नाप्यपरित्यागेन अपरित्यक्तप्राक्तनपिण्डस्यास्यानंशस्य रूपादेरिव गमनासम्भवात् । न ह्यपरित्यक्तपूर्वाधाराणां रूपादीनामाधारान्तरसंक्रान्तिर्दृष्टा"-प्रमेयक० पृ० १३८ द्वि० पं० ६ । ४ यत्प्र-भां० मां० । यत्र यत्र प्र-वा० बा० । ५-नुसंबध्य-आ० भां० ।-नुबन्ध्य-वा० बा० । ६ "व"-श्लो० वा० । ७-स्वभावसा-हा० । ८-त्वं तस्य आ० । ९-भ्यस्तद्भेद-आ० । १०-ष्टस्तद्वत्वान ध्वयो न किम् वा० बा० ।-ष्टस्तद्वत्वानध्वयो न किम् आ० । -ष्टस्तद्वत्वात्तध्वयो न किम् हा० ।-"ष्टस्तद्वत्त्वानन्वयो न किम्"-प्रमेयक० पृ० १३८ द्वि० पं० १४ । 'तद्वत्' "व्यक्तिवत्" 'अनन्वयः' "असाधारणता" न "किन्तु स्यादेव"-प्रमेयक० टि० पृ० १३८ द्वि० पं० १९ । ११-ता वाश्र-हा० वि० । १२ नवा वि० । १३ "व्यक्तेर्जात्यादियोगेऽपि"-प्रमेयक० पृ० १३९ प्र० पं० २ । "जातिः जन्म" "आदिना विनाशग्रहणम्" स "जात्यादियोगः" नेष्यते "तहींति शेषः" तादात्म्यं "जातिव्यक्त्योः" अनुपप्लुतचेतसाम् "अभ्रान्तचेतसाम्"-प्रमेयक० टि० पृ० १३९ प्र० पं० १३ । १४ यद्यजा-भां० मां० विना । १५ वृत्तिर्नि-भां० मां० । १६-बुद्धि न यिम्यते वा० बा० ।-बुद्धिनय गम्यते आ० हा० वि० ।-'बुद्धिर्न च गम्यते' वि० सं० । १७ "वृत्त्यपेक्षिता"-श्लो० वा० । "वृत्त्यवृत्तिता" इति तु तत्र पाठान्तरत्वेन गृहीतम् । १८-"तेऽपि"-श्लो० वा० । १९ बुद्धेभिविष्यति हा० वि० । बुद्धि भविष्यति वा० बा० । २०-ति निर-आ० हा० वि० ।

तन्निरस्तम् बाधकप्रत्ययनिबन्धनस्य मिथ्यात्वस्य सामान्यबुद्धौ प्रतिपादितत्वात् । असदेतत् } यतो यदि नित्यम् व्यापकं च व्यक्तिभ्य एकान्ततो भिन्नमभिन्नं वा सामान्यमभ्युपगम्येत तदा स्याद् यथोक्तबाधकावकाशः यदा तु सदृशपरिणामलक्षणं सामान्यम्, विसदृशपरिणतिलक्षणस्तु विशेषः तदात्मकं चैकं वस्तु तदाऽत्यन्तभेदाभेदपक्षभाविदोषानुषङ्गोऽनास्पद एव ।

अथ साधारणासाधारणरूपस्यैकत्वविरोधोऽत्रापि बाधकम् । तथाहि—यद् यदाकारपरिहारावस्थितस्वरूपं तत् ततो भिन्नम्, यथा घटरूपपरिहारावस्थितस्वरूपः पटः, असाधारणरूपपरिहारावस्थितं च साधारणं रूपमिति कुतस्तयोरभेदः? तथाप्यभेदे न किञ्चिदपि भिन्नं स्यात् अन्यस्य भेदव्यवस्थाहेतोरभावात् । कथञ्चिद्भेदाभेदाभ्युपगमेऽपि तयोर्येनाकारेण भेदस्तेन भेद एव येनं चाभेदस्तेनाप्यभेद एव, नैकं साधारणासाधारणधर्मद्वयात्मकं वस्तु, विरोधात् । अथ येन रूपेण भेदस्तेनापि नैकान्तेन भेद एव किं तर्हि? भेदाभेदः । ननु तत्रापि 'येनाकारेण भेदस्तेन भेद एव इत्यादिवचनादनवस्थाप्रसक्तिरित्यादि न कथं बाधकम्? असदेतत्; समानासमानाकारतया बहिःशाबलेयादेः परिस्फुटप्रतिपत्तौ प्रतिभासमानस्यैकत्वेन विरोधासिद्धेः; अन्यथा ग्राह्य-ग्राहक-संवित्तित्रितयाध्यासितं कथमेकं संवेदनं स्यात्, चित्रज्ञानं वा परस्परविरुद्धनीलाद्यनेकाकारं कथमेकमभ्युपगम्येत येनेदं वचः शोभेत-"चित्रप्रतिभासाऽप्येकैव बुद्धिः, बाह्यचित्रविलक्षणत्वात्" [ ] इति? अथ—"किं स्यात् सा चित्रतैकस्यां न स्यात् तस्यां मतावपि" [ ] इति वचनात् साप्यनेकाकारैका नेष्यते इति नायं दोषः । नन्वेवमभ्युपगच्छता ग्राह्यग्राहकाकारविविक्ता साऽभ्युपगता भवति; स्वसंवेदने च सा यदि तथैवावभाति तदा ग्राह्यग्राहकाकारप्रतिभासः क्वचिदपि ज्ञाने न प्रतिभासते इत्यप्रवृत्तिकं जगत् स्यात् । अथ ग्राह्यग्राहकविनिर्मुक्तमात्मानं प्रच्छाद्य संवित्तिरियं स्वसंवेदने चैतन्यलक्षणं स्वभावमादर्शयति कथं तर्ह्यनेकान्तं सा प्रतिक्षिपेत्? प्रतिभासमानाप्रतिभासमानयोश्च चैतन्य-ग्राह्यग्राहकाकारविवेकलक्षणयोर्धर्मयोरविरोधं च कथं न प्रकाशयेत्? अपि च, द्विविधो वो विरोधः-सहानवस्थानलक्षणः, परस्परं परिहारस्थितिलक्षणश्च । स च द्विविधोऽप्येकोपलम्भेऽपरानुपलम्भाद् व्यवस्थाप्यते, साधारणासाधारणाकारयोस्त्वध्यक्षेण भेदाभेदात्मतया प्रतीतेः कथं विरोधः? तद्रूपाऽतद्रूपाकारते हि तयोर्भेदाभेदौ, तथावभासनमेव च तयोर्भेदाभेदग्रहणमिति कथं विरोधाऽनवस्थानादिदूषणावकाशः? न च तयोः परस्परपरिहारस्थितलक्षणता सम्भवति अव्यवच्छेदरूपतया प्रत्यक्षे प्रतिभासनात् । न च सामान्य-विशेषयोराकारनानात्वेऽप्यनानात्वेऽन्यत्राप्यन्यतोऽन्यस्यान्यत्वं न स्यात् इति वक्तुं युक्तम्, सामान्य-विशेषवत् तादात्म्येनान्यत्र प्रत्यक्षतोऽग्रहणात् ग्रहणे वा भवत्येवाकारनानात्वेऽपि नानात्वाभावः । न चाकारनानात्वेऽपि सामान्य-विशेषयोरभेदप्रतिपत्तिर्मिथ्या, बाधकाभावात् । न च 'स्वभावभेदात् सामान्य-विशेषयोर्घट-पटादिवद् भेद एव' इत्यनुमानं बाधकं प्रत्यक्षस्य, प्रत्यक्षेण बाधितत्वादत्रानुमानाप्रवृत्तेः । अथानुमानविषये न प्रमाणान्तरबाधा; नन्वेवं ध्वनेरश्रावणत्वेऽपि साध्ये सत्त्वादेर्यथोक्तलक्षणतया प्रमाणान्तराबाधितत्वेन प्रतिपत्तिः स्यात्, सपक्षे घटादौ सत्त्वाऽश्रावणत्वयोस्तादात्म्यस्याध्यक्षेणाधिगमात् । अथान्तर्व्याप्त्यभावान्नानयोर्व्याप्यव्यापकभावः तत् प्रकृतानुमानेऽपि तुल्यम् । पक्षस्याध्यक्षविरुद्धत्वादश्रावणत्वानुमानाप्रवृत्तिरिति चेत्, न तर्हि स्वभावभेदानुमानेऽपि

१-धकावशो य-हा० वि० ।-धकवशो य-वा० बा० । २-दृश्यप-भां० वा० बा० । ३ अथ साधारणरूपस्यैक-भां० मां० विना । ४-राव्यव-भां० मां० । ५-रूपप-हा० वि० । ६-रणरूप-आ० हा० वि० । ७ कथञ्चिद्भेदाभ्युप-भां० मां० हा० विना । ८-न वाऽभे-आ० । ९-दाभेदौ हा० वि० । १०-दि कथं न बाध-भां० मां० ।-दि न कथं तर्हि बाध-वि० । ११-यादिपरि-भां० मां० । १२-त्तितृप्तया-हा० वि० । -त्तित्वतया-भां० ।-त्तित्वंतया-मां० । १३-स्याच्चित्तज्ञा-वा० बा० । स्या त्रिज्ञा-हा० वि० । १४-कस्या न भां० । १५ संवृत्ति-भां० मां० । संवित्ति-वा० बा० । १६-त् प्रतिभासमानयोश्च आ० हा० वि० । १७ -म्भाद् वावस्थाप्यते भां० ।-म्भाद्व्यवस्थाप्यते हा० वि० ।-म्भाद्व्यव्यवस्थाप्यते आ० । १८-शः क च हा० ।-शः क्व च वि० । १९-भासन्न सामा-हा० वि० ।-भासन्न च सामा-आ० ।-भासन्ना य सामा—वा० बा० । २०-त्वेऽन्यत्राऽप्यन्यतो-आ० हा० ।-त्वे नानात्वेऽन्यत्रा—वि० । २१-नात्र भां० मां० विना । २२ कं पक्षस्य भां० मां० विना । २३ प्रवृत्तिः स्यात् भां० मां० । २४-त्वयोस्तयोस्तदात्म्य-आ० । २५-पकाभावः भां० मां० विना । २६ चे त्तर्हि भां० मां० विना ।

प्रमाणान्तरबाधाविरहः, लक्षणयुक्ते बाधासम्भवेऽन्यत्रापि तत्सम्भवाद्धेतोरसाध्येन श्रावणत्वेन विरोधाभावात् संशयितव्यतिरेकस्यायथोक्तत्वेऽन्यत्रापि कथञ्चित् स्वभावभेदस्याभेदेन(ना)विरोधात् समानमुत्पश्यामः। सर्वथा स्वभावभेदस्य चाभेदविरोधिनो दृष्टान्तेऽप्यभावाद् घटादेरपि केनचिदाकारेण सदृशत्वेनाभेदात्। यदि पुनः 'तादात्म्यरहिताऽत्यन्तस्वभावभेदात्' इति हेत्वर्थो विवक्षितस्तदाऽसिद्धो हेतुः, सामान्य-विशेषयोस्तादात्म्येनापि प्रत्यक्षतः प्रतीतेः। न च प्रकृतानुमानबाधनात् तत्तादात्म्यप्रतीतिर्भ्रान्तिरिति नासिद्धो हेतुः इतरेतराश्रयदोषप्रसङ्गात्। तथाहि—प्रकृतानुमानस्य प्रवृत्तौ तन्मिथ्यात्वेन पक्षधर्मतानिश्चयः, तन्निश्चये चानुमानस्य प्रवृत्तिरिति व्यक्तमितरेतराश्रयत्वम्। प्रमाणान्तरेण तद्बाधने प्रकृतसाधनवैफल्यम्, तत एव तद्भेदसिद्धेः। 'सामान्य-विशेषयोर्भेद एव, भिन्नयोगक्षेमत्वात्, हिमवद्-विन्ध्ययोरिति(रिव)' इत्येतदपि साधनं प्राक्प्रदर्शितसाधनदोषं नातिवर्तते इत्ययुक्तमेव, भिन्नयोगक्षेमत्वस्य विपक्षेण साक्षादविरोधिनोऽनिश्चितव्यतिरेकस्य भेदेन व्याप्त्यसिद्धेश्च। अथाऽसाध्यस्य साधनविरुद्धैकयोगक्षेमत्वेनव्याप्तत्वाद् विरोधः पारम्पर्येण सिद्ध एव, भवेदेतत् यदि तत्रापि व्याप्यस्य व्यापकविरोधिना विरोधः सिद्ध्येत्; स चासिद्धः, विरोधद्वयस्याप्यसिद्धेः। भिन्नयोगक्षेमस्याप्यभेदाभ्युपगमे भेदः क्वचिदपि न सिद्ध्येदिति विश्वमेकं स्यादिति चेत्, स्यादेतत् यद्याभ्यां भेदाभेदव्यवहारव्यवस्था भवेत्; सा तु भेदाभेदप्रतिभासवशादिति सामान्यविशेषयोरसहोत्पादविनाशेऽप्यभेदप्रतिभासाद्भेदो न विरुद्ध इति कथं न वस्तुभूतसामान्यसद्भावः? न च यदेव शाबलेयव्यक्तौ सदृशपरिणतिलक्षणं सामान्यं तदेव बाहुलेयव्यक्तावपि, व्यापकस्यैकस्य सर्वगोव्यक्त्यनुयायिनस्तस्यानभ्युपगमात्, तदनभ्युपगमश्च शाबलेयादिव्यक्तीनां बाहुलेयादिव्यक्तिसदृशतया प्रतिभासेऽप्येकानुगतसामान्यक्रोडीकृतैक्येनाप्रतिभासनात्। परेणापि हि—

"समाना इति तद्ग्रहात्" [ ]

इति ब्रुवता स्वहेतुभ्य एव केचिच्छाबलेयादिव्यक्तिविशेषाः सदृशा उत्पन्ना इत्यभ्युपगतमेव केवलं सदृशपरिणतिलक्षणस्तासां धर्मः कथञ्चिदभिन्नो वस्तुभूतोऽभ्युपगन्तव्यः; अन्यथाऽपारमार्थिकविजातीयव्यावृत्तिनिबन्धनत्वे सादृश्यपरिणतेः सजातीयव्यावृत्तिनिबन्धनस्याप्यत्यन्तभिन्नरूपस्यापारमार्थिकत्वात् तत्परिणतिव्यतिरेकेण चापरस्य स्वलक्षणस्यासम्भवात् तदाकारज्ञानस्वलक्षणस्याप्यभाव इति सर्वशून्यताप्रसक्तिः। न च 'सैवास्तु' इति वक्तुं युक्तम्, अप्रमाणिकायास्तस्या अप्यनभ्युपगमनीयत्वात्। तस्मात् समानासमानपरिणामात्मनः शाबलेयादिवस्तुनोऽबाधिताकारप्रत्यक्षप्रतिपत्तौ प्रतिभासनाद् विशेषवन्न सामान्याभावः। एतेन—

"सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः।
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति" ॥
"अथास्त्यतिशयः कश्चिद् येन भेदेन वर्तते।
स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम्" ॥ [ ]

इत्यादि यदुक्तं धर्मकीर्तिना तदपि पराकृतं द्रष्टव्यम्। न ह्यस्माभिर्दध्युष्ट्रयोरेकं तिर्यक् सामान्यं वस्तुत्वादिकं व्यक्त्यभेदेन व्यवस्थितं तथाभूतप्रतिभासाभावादभ्युपगम्यते, यादृग्भूतं तु प्रतिव्यक्ति

१-व भेदस्याऽभेदेनावरोधात् वा० बा०।-व भेदेन वि-आ० हा० वि०। २-वैस्वभा-हा० वि०। ३-स्य वाभे-हा० वा० बा०। ४-तीतिभ्रा-भां० मां० विना। ५ पक्षिध-भां० मां०। पक्षे ध-आ०। ६-द्वाधके प्र-भां० मां० विना। ७ एतद्भेद-आ० हा० वि०। एवद्भेद-वा० बा०। ८-रित्येतद-भां० मां०। 'रिवेत्येतद'-वि० सं०। ९-धनं दोषं भां० मां०। १०-मस्य भां० मां०। ११ व्याप्यसि-भां० मां०। १२ -त्वव्यापत्वा-मां०। १३-त य-मां०। १४ सिद्ध्येत स भां० मां० विना। १५-नाशोप्य-आ० हा० वि०। १६ विद्धः मां०। १७-हुबलेय-मां०। १८-हुबलेया-मां०। १९-तत्वेन प्रति-भां० मां० विना। २० समान इति भां० मां०। २१-षाः परादृशा-आ० हा० वि०। २२-गत के-भां० मां० विना। २३-वलस-वि०। २४ वस्तूभू-मां०। २५-थापर-भां० मां० विना। २६-व्यावृत्तनि-आ०। २७-नत्वे सदृशप-भां० मां०। २८-पस्य पा-वा० बा०। २९-ण वा-वा० बा०। ३०-ति शून्य-भां० मां० विना। ३१ अप्रमाणकाया-वा० बा०। अप्रामाणिकाया-वि०। ३२-भासाद् वि-आ० हा० वि०।-भानाद् वि-वा० बा०। ३३ अनेका० पृ० १८ पं० ६। ३४-भयप-हा० वि०। ३५-भूताप्र-वा० बा०।

भिन्नं 'समानाः' इति प्रत्ययविषयभूतमभ्युपगम्यते तथाभूतस्य तस्य शब्देनाभिधाने किमित्यन्यत्र प्रेरितोऽन्यत्र खादनाय धावेत यद्युन्मत्तो न स्यात्। अत एव—

" "वर्णाकृत्यक्षराकारशून्यं गोत्वं हि गीयते"। [ ]

न च निर्विकल्पकेऽक्षप्रभवे प्रत्यक्षे पुरोव्यवस्थिततद्व्यक्तिद्वयप्रतिभासव्यतिरेकेण परो यथाव्यावर्णितस्वरूपः सामान्याकारः प्रतिभाति, नापि सविकल्पके 'गौर्गौः' इत्युल्लेखवति व्यक्तिस्वरूपं बहिरुद्भासमानमन्तश्चाभिजल्पाकारमपहायान्यः सामान्यात्मा यथाव्यावर्णितस्वरूपः प्रतिभाति, न चान्यावभासमन्याकारार्थव्यवस्थापकं ज्ञानं तद् भवति अतिप्रसङ्गात्' इत्येतदपि निरस्तम्, अवर्णाकृत्याद्याकारव्यतिरेकेण सादृश्यपरिणामात्मनः सामान्यस्याक्षजप्रतिपत्तिविषयस्य व्यक्त्यात्मतया दाहाद्यर्थक्रियाकारिणोऽभ्युपगमात्। न च शाबलेयादेः सादृश्यं बाहुलेयाद्यपेक्षमिति तदप्रतीतौ तदपेक्षस्य तस्याप्यप्रतिपत्तिरिति वक्तुं शक्यम्, अशेषपदार्थवैलक्षण्यप्रतिपत्तावप्यस्य समानत्वात्। न च सर्वतो व्यावृत्तिः व्यावृत्तपदार्थस्वरूपमेवेति तत्प्रतिपत्तौ साऽपि प्रतीयते व्यावृत्त्या(वर्त्या)र्थप्रतिपत्तिमन्तरेणापीति वक्तव्यम्, सादृश्यप्रतिपत्तावप्यस्य समानत्वात्। अथ सजातीयविजातीयव्यावृत्तं निरंशं वस्तु तत्सामर्थ्या(र्थ्य)भाविनि च प्रत्यक्षे तत् तथैव प्रतिभाति, तदुत्तरकालभाविनस्त्वेवंवस्तुसंस्पर्शिनो विकल्पाः व्यावर्त्यवस्तुवशविभिन्नव्यावृत्तिनिबन्धनात्(नान्) सामान्यभेदान् व्यावृत्ते वस्तुन्युपकल्पयन्तः समुपजायन्ते न तद्वशात् तद्व्यवस्था युक्ता, अतिप्रसङ्गात्। तदुक्तम्—

"सर्वभावाः स्वभावेन स्वस्वभावव्यवस्थितेः।
स्वभाव-परभावाभ्यां यस्माद् व्यावृत्तिभागिनः" ॥
"तस्माद् यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः।
"जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः" ॥ [ ] इत्यादि।

ननु 'स्वस्वभावव्यवस्थितेः' इत्येतस्य हेतोः स्वसाध्येन व्याप्तिः किं प्रत्यक्षेण प्रतीयते, आहोस्विदनुमानेन? न तावदनुमानेन, प्रत्यक्षाविषयत्वेन सर्वभावानां धर्मिणोऽसिद्धेस्तदनुत्थानात्, व्याप्तिप्रसिद्धौ चानुमानं प्रवर्तते। न च साध्य-साधनयोः सर्वोपसंहारेण व्याप्तिरन्यतोऽनुमानात् सिद्ध्यति, तत्राप्यनुमानान्तरापेक्षणेनानवस्थाप्रसक्तेः। नापि प्रत्यक्षेण, तस्य सन्निहितविषयग्राहकत्वेन देशादिविप्रकृष्टाशेषपदार्थालम्बनत्वानुपपत्तेः। अथ पुरोऽवस्थितेषु भावेष्वक्षजप्रत्ययेन 'स्वस्वभा-

१ धावते-भां० मां०।
२ "वर्णाकृत्यक्षराकारशून्या जातिस्तु वर्ण्यते"-तत्त्वसं० का० ७३९ पृ० २४३।
"वर्णाकृत्यक्षराकारशून्यं गोत्वं हि कथ्यते"-अपोहसि० पृ० १२ पं० ५।
३-ण पुरो भां० मां०। ४-रूपसा-वा० बा०। ५-था वर्णित-हा० वि०। ६-पः सामान्याकारः प्रति-भां० मां०। ७ इति यतदपि भां० मां०। ८-ण सदृशप-भां० मां० वा० बा० विना। ९ व्यक्तात्म-भां० मां० वा० बा०। १० तदप्रतिपत्तौ भां० मां०। तदप्रतीतौ तदापेक्षस्य तस्याप्यप्रतिपत्तौ तदापेक्षस्य वा० बा०। तत्प्रतीतौ आ०। ११ व्यावृत्तार्थ-वि०। व्यावर्गार्थ-वा० बा०। १२-रंशव-आ०। १३-त्ववसंस्पर्शि-वा० बा० विना। १४-कल्प्याः भां० मां०। १५-वर्तिवस्तु-आ०। १६-दा व्या-आ० हा०। १७-वृत्तिव-आ०। १८-यतः स-आ० हा०। १९ न तत्तद्दशा-आ०। २० सर्वे भा-वि०। इदं पद्यद्वयम् अनेकान्तजयपताकाटीकायाम् "आह च" इत्युक्त्वा उद्धृतम्-पृ० ५२ पं० १४। अष्टसह० पृ० १७३ पं० ५। प्रमेयक० पृ० १४१ प्र० पं० ३। श्लो० वा० पार्थ० व्या० पृ० ५७८ पं० १९। २१ उत्तरार्धमिदं "यदधिकृत्याह न्यायवादी" इत्युल्लिख्य व्याख्यातमनेकान्तजयपताकाटीकायाम् पृ० ३१५ पं० ५। "न्यायवादी धर्मकीर्तिः" इत्यपि व्याख्यातं तत्रैव पृ० ३१५ पं० १५। २२-भावापर-भां० मां०। २३-न्धना जा-भां० मां०। "व्यावृत्तिस्तन्निबन्धना। जातिभेदाः" इति श्लो० वा० पार्थ० व्या० पृ० ५७८ पं० १९। अस्य व्याख्या प्रमेयक० टिप्पण्यामित्थम्-"व्यावृत्तिर्निबन्धनम् येषां ते" "सामान्यभेदाः"-पृ० १४१ प्र० पं० १५। २४-दात् प्र-वा० बा०। २५-होस्विद-भां० मां० वा० बा०। २६-मानेन तावदनुमानेन प्रत्यक्ष-भां० मां०।-मानेन प्रत्यक्ष-आ० हा० वि०। २७-त्यक्षवि-वा० बा० विना।

वंव्यवस्थितेः' इत्यस्य हेतोः सर्वोपसंहारेण भेदेन व्याप्तिं प्रतिपद्यत इति प्रत्यक्षव्यापार एवायम्, असदेतत्; यतो यत्रैव स्वव्यापारानुसारिणमनन्तरं विकल्पमाविर्भावयत्यध्यक्षं तत्रैवास्य प्रामाण्यं भवद्भिरभ्युपगम्यते, सर्वतो व्यावृत्तात्मनि त न द्व(न तद्व)लात् तदुत्पत्तिः, सर्वदा अनुवृत्तव्यावृत्ताकारावसायिन एव तस्योत्पत्तेः; अन्यथा 'सजातीयाद् भेदः' इत्यभिधानानर्थक्यापत्तेः, क्षणक्षयानुमानस्य च वैयर्थ्यम् अक्षणिकादिव्यावृत्तेः स्वलक्षणानुभवप्रभवविकल्पेनाध्यवसायात्, स्वलक्षणविषयत्वं च विकल्पानां सर्वतो व्यावृत्ताकाराध्यवसायिनां प्रसज्येत। तथाहि-इदमेव स्वलक्षणगोचरत्वमध्यक्षस्य यत् तस्य नियतरूपानुकरणम्, सर्वतो व्यावृत्ताकारग्राहिणां विकल्पानामपि चेद् इदमस्ति कथं न स्वलक्षणविषयत्वम्? अथाविशदावभासित्वादस्यास्वलक्षणविषयत्वम्, ननु दूरव्यवस्थितपादपादिस्वरूपग्राह्यध्यक्षमप्यविशदावभासमिति स्वलक्षणविषयत्वं तस्यापि न स्यात्। अथाऽयथार्थाकारग्राहिणस्तस्य भ्रान्तत्वादिष्टमेवास्वलक्षणविषयत्वम्, न; तस्य प्रमाणान्तरत्वप्रसक्तेः। तथाहि-अनधिगतार्थाधिगमाऽविसंवादाभ्यां तस्य प्रामाण्यम्, न च प्रत्यक्षत्वम्, भ्रान्तत्वाभ्युपगमात्। नाप्यनुमानत्वम्, अलिङ्गजत्वात्। प्रत्यक्षाऽनुमानव्यतिरिक्तस्य चापरस्य प्रमाणस्यानिष्टेः कथं नास्य प्रमाणान्तरत्वम्? न च विकल्पः—येनाधिगतार्थाधिगमादप्रमाणम्—विकल्पकारणमन्तरेणापि बाह्यार्थसन्निधिबलेनोपजायमानत्वात्। न चाध्यक्षविषयीकृतस्वलक्षणाध्यवसायित्वादस्याप्रामाण्यम्, तथाऽभ्युपगमेऽध्यक्षेक्षितशब्दविषये क्षणक्षयानुमानस्याप्यप्रामाण्यप्रसक्तेः। अथानिश्चितार्थाध्यवसायादनुमानस्यानधिगतार्थाधिगन्तृत्वात् प्रामाण्यम्, निश्चितो ह्यध्यक्षविषयः, क्षणक्षयस्य चानिश्चयादध्यक्षतो न तद्विषयत्वम्। नन्वेवमध्यक्षानुसारिविकल्पस्याप्यनिश्चितार्थाध्यवसायित्वात् क्षणक्षयानुमानवत् प्रामाण्यप्रसक्तिः। अपि च, विकल्पाऽनुमानविषयार्थयोः समः विषमो वा प्रतिभासोऽभ्युपगम्येत? यदि विषमः, कथमसदृशप्रतिभासयोस्तयोरभेदः? भिन्नाकारावभासि च कथं शब्दस्य रूपम्? अथ समः, विकल्पेषु को विद्वेषस्तानविषयीकुर्वतः। अथ यत्रांशे निश्चयोत्पादनसमर्थं प्रत्यक्षं तत्र प्रतिभासाविशेषेऽपि प्रत्यक्षगृहीतांशग्राहितया विकल्पो न प्रमाणम्, अनुमानं त्वगृहीतार्थाधिगन्तृत्वात् प्रमाणम्, तद्विषयेऽर्थेऽध्यक्षस्य निश्चयोत्पादनासामर्थ्यात्। ननु कथमेकमनुभवज्ञानं स्वार्थे निश्चयोत्पत्तौ समर्थमसमर्थं चोपपद्यते विरोधात् एकार्थाकाराविशेषाच्च? न चाविशेषेऽपि तस्यैकत्र सामर्थ्यमेवापरत्राऽसामर्थ्यम्, परेण सन्निकर्षेऽप्येवं वक्तुं शक्यत्वात्। तथाहि-सर्वात्मनेन्द्रियार्थसन्निकर्षवादिनापि शक्यमेवं वक्तुम्-सन्निकर्षस्याविशेषेऽपि सर्वात्मना न भावस्य ग्रहणम् क्वचिदेवांशे सामर्थ्यात् एकत्र सामर्थ्यमेवान्यत्रासामर्थ्यमिति। न च समारोपव्यवच्छेदकत्वेनानुमानस्य प्रामाण्यम् न पुनः प्रत्यक्षपृथग्भाविनो विकल्पस्येति वक्तुं युक्तम्, तस्य तद्व्यवच्छेदकत्वानुपपत्तेः। तथाहि-क्षणिकेऽक्षणिकज्ञानं समारोपः, तच्चानुमानप्रवृत्तेः प्रागिव पश्चादप्यविकलमिति कथं तथापि तस्य प्रामाण्यम्? पश्चादस्खलत्प्रवृत्तेः समारोपस्याप्रवृत्तेरस्त्येव तद्वैकल्यमिति चेत्, न; तदा स्खलद्वृत्तेरक्षणिकप्रत्ययात् स्वपुत्रादौ प्रवृत्तिर्न स्यात्। समारोपप्रतिषेधश्चाभावत्वेनाहेतुकः, स कथमनुमानेनान्येन वा क्रियते ज्ञाप्यते वा अभावेन सह कस्यचित्

१-वस्यवस्थितेः वा० बा०।-वस्य व्यवस्थितेः आ० हा० वि०। २-नन्तरवि-भां० मां०। ३- नि च तद्बला-वा० बा० विना। ४-वृत्याका-वा० बा०। ५-राध्यवसा-भां० मां०। ६-स्य वै-भां० मां० वा० बा० विना। ७-भवप्रभवे विक-वा० बा०।-भवविक-आ० हा० वि०। ८-सायानां वा० बा०। ९ य त्वनियतरूपानुकारणं वा० बा०। १०-शब्दाव-वा० बा०। ११ न प्र-वा० बा०। १२ अलिङ्गत्वात् वा० बा०। १३ बाह्यार्थासन्निधिब-वा० बा०। बाह्यार्थासन्निधाधिब-आ० हा० वि०। १४ न वा-वा० -बा०। १५-नस्याधिग-वा० बा० विना। १६-स्य वा-वा० बा० आ० हा०। १७-सो नाभ्यु-वा० बा०। -सो नभ्यु-आ० हा० वि०। १८-त नु यदि वा० बा०। १९-स्तावदि-वा० बा०।-स्ताऽनवि-आ० हा० वि०। २०-क्षतागू-वा० बा०। २१-तया विषया विक-आ०। २२-नात् सा-वा० बा०। २३-नुभयज्ञा-आ०। २४-मर्थं वोप-वा० बा०। २५-र्थाविशे-वा० बा०। २६ न वा-आ० हा०। न त्वा-वा० बा०। २७-वांशेऽसा-आ०।-वांशै सा-हा०।-वांशैत् सा-वा० बा०। २८-न्यत्र सा-वा० बा० आ० हा० वि०। २९-नस्याप्रा-आ०। ३०-तस्य व्यव-वा० बा०। तस्य द्यव-भां० मां०। ३१-ज्ञानसमा-भां० मां० विना। ३२-स्खलद्वृत्तेः भां० मां०।-स्खलितप्रवृत्तेः आ०।-स्खलतप्रवृत्तेः वि०। ३३-मारोप्यस्या-भां० मां। ३४-तद्विकल्पमि-आ० हा० वि० वा० बा०। ३५-नाहेतुः स भां० मां० वा० बा० विना। ३६ कस्यचित् तस्य सम्ब-भां० मां० वा० बा० विना।

सम्बन्धाभावात् तस्य तथाऽप्रतिपत्तेश्च? अथ प्रवृत्तसमारोपस्य स्वत एवाभावात् अनुमानात् क्षणिकत्वनिश्चये भाविनश्चाक्षणिकसमारोपस्यानुत्पत्तेः समारोपव्यवच्छेदकत्वं क्षणिकानुमानस्योच्यते, न; साक्षाद्भूतसमारोपनिषेधात् कथमविकले समारोपे प्रबन्धेनोपजायमाने क्षणविवेकनिश्चयः येन ततोऽक्षणिर्कसमारोपस्य भाविनोऽनुत्पत्तिः स्यात्? निश्चयाऽऽरोपमनसोर्विरोधाभ्युपगमात्; अन्यथा प्रत्यक्षपृष्ठभाविनः क्षणिकनिश्चयस्याप्युत्पत्तिप्रसङ्गः। तथा, परस्यापि निश्चयात्मना प्रत्ययेन सर्वात्मनाऽर्थस्वरूपनिश्चयेऽपि समारोपप्रवृत्तौ तद्व्यवच्छेदाय प्रवर्त्तमानं प्रमाणान्तरमनर्थकं न स्यात्। तन्न क्षणविवेकनिश्चयः, निश्चये वा विरोधादेव नाक्षणिकसमारोपः। दृढरूपस्याक्षणिकसमारोपस्यास्त्येव व्यावृत्तिः, सादृश्यनिमित्तस्तु स्खलद्रूपारोपः स्थायीति चेत्, असदेतत्; अवधारितविशेषस्यानवधारितविशेषलक्षणसादृश्यासम्भवात् कथं समारोपः तन्निबन्धनोऽपि स्थायी युक्तः? समारोपनिमित्तसादृश्यविरोधिविवेकावधारणसद्भावात् वह्निसन्निधानाद् रोमहर्षादिविशेषवद् यथार्थनिश्चये विपर्यासानुपलम्भेश्च। अथ यथा निश्चितैकत्वस्यापि पुंसो द्विचन्द्रादिभ्रान्तिरक्षजत्वान्न निवर्त्तते तथा(थाऽ)क्षणिकभ्रान्तिरपि। नन्वेवमक्षणिकभ्रान्तेरक्षजत्वे न किञ्चिदपि प्रत्यक्षमभ्रान्तं स्यात्।

"पश्यन्नपि न पश्यति" [ ]

इति च धर्मकीर्तिवचनं विरुद्ध्येत। अथाऽक्षणिकत्वभ्रान्तिर्मानसी मरीचिकाचक्रे तोयादिभ्रान्तिवत् तथापि नावधारितविशेषस्योत्पद्येत, अनवधारितविशेषस्यैव तदुत्पत्तेः। अक्षणिकावभासस्य मानसत्वे वस्त्वन्तरस्मरणसमये उत्पत्तिश्च न स्यात्; विकल्पद्वयस्य युगपदनुत्पत्तेः उत्पत्तौ वाऽयं विकल्पयतोऽपि गोदर्शनाद् दर्शने कल्पनाविरहसिद्धिरयुक्ता स्यादिति क्षणविवेकनिश्चयेऽवश्यंभाव्यक्षणिकसमारोपाभावः। तत्सद्भावे च न क्वचिदनुमानान्निश्चितनानात्वस्यात्माऽऽत्मीयभावयोः प्रवृत्तिर्युक्ता। न ह्यात्मनाऽनुमानान्नानात्वनिश्चयलक्षणे नैरात्म्यदर्शने सति एकप्रत्ययलक्षणमात्मदर्शनं सम्भवति विवेकाविवेकग्रहणयोरेकत्वविरोधात्; तदभावान्नात्मीयग्रहः; तदभावे च तत्पूर्वकस्य रागादेरनुत्पत्तेः कथमभिलषिताऽनभिलषितसाधनयोस्तदध्यवसायेन प्राप्ति-परिहाराय प्रवृत्तिरुपपद्येत? अनाश्रवचित्तोत्पत्तिप्रबन्धलक्षणमुक्तिहेतौ च मुमुक्षोर्यत्नो विफलः स्यात् नैरात्म्याभ्यासमन्तरेणाप्यनुमानात् क्षणिकत्वनिश्चयमात्रेणैव मुक्तिसिद्धेः। आत्मदर्शनस्य सहजस्याहानेस्तन्निमित्ताऽऽत्माऽऽत्मीयस्नेहपूर्वकसुखाभिलाषवतः सुख-दुःखसाधनेष्वादान-परिहारार्था प्रवृत्तिः अविरुद्धेति चेत्, स्यादेतत् यदि तत्सहजमात्मदर्शनमेकप्रत्ययलक्षणं न स्यात् तद्रूपत्वे त्वात्मनोऽनुमानात् क्षणविवेकनिश्चयमात्रेणैव तस्य निरुद्धत्वान्न तन्निमित्ता संसारकारणेषु प्रवृत्तिः। अथैकप्रत्ययलक्षणं सहजमात्मदर्शनं न भवति न तर्हि नैरात्म्याभ्यासादप्यविरोधात् तन्निवृत्तिरिति व्यर्थो नैरात्म्याभ्यासः स्यात्। अतो न साक्षात् पारम्पर्येण वाऽक्षणिकसमारोपव्यवच्छेदकत्वात् क्षणिकानुमानस्य प्रामाण्यम्, अध्यक्षप्रभवविकल्पेऽपि चैतत् समानम् निश्चिते तत्रापि समारोपाभावात्। न च प्रवृत्तसमारोपाव्यवच्छेदकत्वाद् विकल्पस्याप्रामाण्यमिति वक्तुं युक्तम्, प्रवृत्तसमारोपव्यवच्छेदकत्वेन प्रामाण्य(ण्ये) विशेषतो दृष्टानुमानस्यापि प्रामाण्यप्रसक्तिः तस्यापि तद्रूपत्वात्। न च प्रवृत्तिः समारोपो व्यवच्छेत्तुं शक्यः अभावस्य निर्हेतुकत्वाभ्युपगमात्। न च प्रत्यक्षपृष्ठभाविविकल्प-

१-ना क्ष-भां० मां० विना। २-नश्च क्ष-भां० मां० विना। ३-नुपपत्तेः भां० मां० वि०। ४-क्षणिकस्यानु-भां० मां०। ५-मारोपिनि-वा० बा०। ६ प्रतिबन्धेनो-भां० मां० वा० बा० विना। ७ क्षणे विवेक-वि०। ८-करोपस्य आ०। ९-थापि पर-वा० बा०। १०-पारोपस्था-वा० बा० हा० वि०। ११ अवधारितविशेषलक्षणसाद-आ० हा० वि०। १२-द्भावबह्नि-भां० मां० विना। १३-दपि भ्रान्तं आ० हा० वि०। १४ गोर्दर्शनात् दर्शनादर्शने आ०। गोदर्शने वा० बा०। १५-मारोप्याभा-भां० मां०। १६-ना नि-वा० बा०। १७-क्षणनै-भां० मां० वा० बा०। १८-पद्यते आ०। १९-त नाश्रव-भां०। २०-रात्म्याव्यत्यास-भां० मां०।-रात्म्याभ्यास-वि०।-रात्माभ्यास-हा०। २१-ना क्षणिकत्वानिश्च-हा० वि०। २२-त्तात्मीय-मां०। २३-त्मीयं स्नेह-भां० मां०विना। २४-पूर्वेसु-आ० हा० वि०। २५-धनेष्वादा -भां० मां०। २६-रार्थप्र-वा० बा०। २७-त्मन्यनुमा-भां० मां० विना। २८-स्य विरु-भां० मां० विना। २९-वृत्तेः भां० मां० वा० बा०। ३०-वृत्तेः आ०। ३१-क्षपृष्टिभावि-आ० हा० वि०।-क्षपृष्टिकाभावि-वा० बा०।

[1]मपहायाऽनुमानस्यैव प्रामाण्यम् तस्य लिङ्गजत्वात् इतरस्य च तद्विपर्ययादिति वाच्यम्, विशेषतो दृष्टानुमानस्य लिङ्गजत्वेन प्रा[2]माण्यप्रसक्तेः। न चानुभवविषयमात्रा[3]ध्यवसायित्वेऽध्यक्षपृष्ठभाविविकल्पानामभ्युपगम्यमाने व्याप्तिसिद्धिरपि परस्योपपद्यते, सन्निहितमात्रप्रतिग्राहित्वेनाध्यक्षस्य तद्व्यापारानुसारिणो विकल्पस्यापि सर्वाक्षेपेण साध्य-साधनयोर्व्याप्तिग्राहकत्वासम्भवात्। तथा च देशा-
५ न्तरादावुपलभ्यमानं साधनमनिश्चितसाध्यप्रतिबन्धं तत्र साध्यं न गमयेत्। अथ कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितो निश्चितः स देशान्तरादावप्यनलाभावे भवंस्तत्कार्यतामेवातिक्रामेदित्याकस्मिकोऽग्निनिवृत्तौ न क्वचिदपि निर्व[4]र्त्तेत, नाप्यवश्यंतयाऽग्निसद्भाव एव तस्य भाव उपलभ्येत। तथा, व्यापकाभावेऽपि तदात्मनो व्याप्यस्या(स्य)भावे न कदाचित् साधनं तत्स्वभावतया प्रतीयेतेति। नन्वेवं व्याप्तिसिद्धावपि[5] तन्निश्चयकालोपलब्धेनैव स्यात् व्यापकेनास्य व्याप्तिः तस्यैव तथानिश्चयात्,
१० न; तादृशस्यापि साध्यव्याप्तग्रहणे तद्ग्रा[6]हिणो विकल्पस्यागृहीतग्राहित्वं कथं न स्यात्? यदेव हि प्रत्यक्षेण तद्व्याप्तत्वेनोपलब्धं ततस्तस्यैवानुमानं विशेषतो दृष्टम् तच्चानुमानं स्यात्, अन्यदेशादिस्थेनाव्याप्तेः[12] पारिशेष्यात् ता[13]दृशव्यापकेनान्यत्र ता[14]दृशस्य व्याप्तिसिद्धिरिति न वक्तव्यम्, पारिशेष्यासिद्धेः। तथाहि—तत् पारिशेष्यं किं प्रत्यक्षम्, उतानुमानम्? न तावत् प्रत्यक्षम्, देशान्तरस्थस्यानुमेयस्य प्रत्यक्षेणाप्रतिपत्तेः प्रतिप[15]त्तौ वाऽनुमानवैयर्थ्यप्रसक्तिः। अथानुमानम्, ननु तत्रापि कथं
१५ साध्य-साधनयोः प्रतिबन्धसिद्धिः? न प्रत्यक्षेण, तस्य व्याप्तिग्राहकत्वेनाप्रवृत्तेः। नानुमानान्तरेण, अनवस्थाप्रसक्तेः। न तेनैवानुमानेन, इतरेतराश्रयप्रसङ्गात्। तस्मादनुमानप्रामाण्यवादिना सर्वोपसंहारेण व्याप्तिग्राही प्रत्यक्षजन्मा स्वविषयाविसंवादी वि[16]कल्पः प्रमाणयितव्यः। स[17] चाभिनिबोधिकं ज्ञानमस्मद्[18]दर्शने प्रसिद्धमस्पष्टतया श्रुतं वा ऊहशब्दविशेषवाच्यतया न प्रत्यक्ष-परोक्षप्रमाणद्वयव्यतिरिक्तं तत् प्रमाणान्तरम्। प्रत्यक्षानुमानवादिनां तु व्याप्तिग्राहकं प्रमाणान्तरं प्र[19]सक्तम् प्रत्यक्षानु-
२० मानाभ्यां व्याप्तिग्रहणासम्भवात्। न च प्रतिबन्धग्राहकस्य प्रमाणस्य स्वार्थे व्यभिचारः प्रतिबन्धाभावात् इति वक्तव्यम्, तत्र योग्यतालक्षणप्रतिबन्धसद्भावात्। प्रत्यक्षेऽपि हि स्वार्थपरिच्छेदो योग्य[20]तांत एव न पुनस्तदुत्पत्त्यादेः। तदुत्पत्तिप्रतिबन्धात् प्रत्यक्षस्य स्वार्थपरिच्छेदकत्वे इन्द्रियस्यापि तत्परिच्छेद्यत्वप्रसक्तिः। तत्सारूप्यात् त[21]स्य तत्परिच्छेदकत्वे नीलक्षणोऽपरनीलक्षणस्य परिच्छेदकः स्यात् परिच्छेदस्य ज्ञानधर्मत्वात्, अप्रसङ्गे नील[22][23]ज्ञानमपरनील[24]ज्ञानपरिच्छेदकं स्यात्। तदुत्पत्ति-
२५ सारूप्याभ्यां समुदिताभ्यां प्रत्यक्षस्य स्वार्थपरिच्छेदकत्वे नीलज्ञानं समनन्तरनीलज्ञानस्य परिच्छेदकं स्यात्। तदुत्पत्ति-सारूप्यसद्भावेऽपि समानार्थसमनन्तरप्रत्ययस्य न तद्ग्राहकं व्यवस्थाप्यते तदध्यवसायाभावादिति चेत्, ननु 'तदुत्पत्त्यादिके प्रतिबन्धे समानेऽप्यर्थे एव तस्य तदध्यवसायो न पुनः समनन्तरप्रत्यये' इति पृष्टेन भवता[25] सैव योग्यता नियामिका वक्तव्या। अपि च, 'विषयेन्द्रिय[26][27]मनस्कारेषु विज्ञानकारणत्वेनाविशिष्टेषु विषयस्यैवाकारं बिभर्ति विज्ञानं नेन्द्रियादेः' तथा, 'नीला-
३० द्यर्थसारूप्याविशेषेऽपि नील[28]ज्ञानं [29]योग्यतादेशस्थमेव नीलाद्यर्थं विषयीकरोति नान्यम्' इत्यत्रापि योग्यतैव शरणम्। अतोऽस्या एव तत्सारूप्य[30]दिविशेषेऽप्यवश्यमभ्युपगमनीयत्वात् अर्थप्रतिनियमः [31]सर्वत्राभ्युपगमनीय इति प्रत्यक्षवदूहोऽपि योग्य[32]तायाः [33]प्रतिबन्धसाधकोऽभ्युपगन्तव्यः; अन्यथा अनु-

---

१-मवहा-भां० मां० विना। २-माण्याप्र-भां० मां०। ३-त्राध्यव-भां० मां० विना। ४-मात्रे प्रति-वा० बा०। ५-प्रतिबिम्बं त-भां० मां० विना। ६-वर्तते ना-भां० मां० विना। ७-नोप्यस्य भा-वा० बा०। ८-पि निश्च-वा० बा०। ९-स्यातादृशस्यापि भां०। १०-ह्राहिणा वा० बा०। ११-ष्टं न चानु-वा० बा०।-ष्टं न त्वानु-हा० वि०। १२-सेः परिशेष्यात् वा० बा०।-सेः पारिशेषात् आ० हा०।-सेः परिशेषात् वि०। १३ तादृशाव्या-मां० वा० बा०। तादृशांऽव्या-भां०। १४-न्यत्रातादृ-वा० बा० हा० वि०। १५-शस्याव्या-वा० बा०। १६-पत्तौ चानु-आ०। १७-कल्पवृप्रमा-हा०।-कल्पवृक्षप्रमा-वि०। १८ स त्वाभि-वा० बा०। १९-र्दर्शनप्रसि-भां० मां० विना। २०-प्रशक्तम् हा०। प्रशस्तम् आ०। २१-ताऽत एव आ० हा० वि०।-ता एव वा० बा०। २२ तस्यातत्प-वा० बा०। २३-ज्ञानपरि-आ० हा० वि०। २४-ज्ञानामपरि-वा० बा०। २५-तास्यैव मां० वा० बा०।

२६ रूपाऽऽलोक-मनस्कार-चक्षुर्भ्यः संप्रवर्तते। विज्ञानं मणि-सूर्यांऽशु-गोशकृज्ज्व इवाऽनलः" ॥
अनेका० टी० पृ० २०६ पं० १९।

२७-यनमस्का-वा० बा०। २८-ज्ञानयो-आ० हा०। २९ 'योग्यदेश'-वि० सं०। ३०-प्याविशे-आ०। ३१ सन्नाभ्यु-आ० हा० वि०। 'सन्नभ्यु-' वि० सं०। ३२-ताया प्रति-वा० बा०। ३३ प्रतिबिम्बसा-वा० बा०।

मानादिव्यवहारोच्छेद[1] एव। न[2] चात्राप्यनवस्था, न हि प्र[3]तिबन्धनिश्चयापेक्षो लिङ्गवदयं गमकः, प्रत्यक्षव[4]द् योग्यतयैव स्वार्थप्रकाशनात् स्वहेतोरेव नियतार्थप्रकाशनयोग्यस्योत्पत्तेः। न च स्वलक्षणदर्शनानन्तरभाविनो विकल्पस्यास्पष्टावभासित[5]या न सामान्यग्राहकत्वम्, उन्मीलितचक्षुषः पुरोऽवस्थिते समानाका[6]रेऽर्थे स्पष्टतया तस्यावभासनात्। अथ 'सविकल्पाऽविकल्पयोर्युगपद्वृत्तेर्विमूढस्तयोरैक्यमध्यवस्यति' इति स्पष्टतावभासः, असदेतत्; सविकल्पाऽविकल्पयोः किमेकविषयत्वम्, उतान्यतरेणान्यतरस्य विषयीकरणम्, आहोस्विदपरत्रेतरस्याध्यारोपस्तयोरेकत्वाध्यवसाय इति विकल्पै[7]रनुपपत्तेः। तत्र न तावदेकविषयत्वं तयोः सम्भवति, विकल्प(ल्पस्य) पूर्वानन्तरप्र[8]त्यया-ग्राह्यतत्समानकालवस्तुविषयत्वात्। अन्यतरस्यान्यतरेण विषयीकरणमपि समानकालभाविनोरपारतन्त्र्यादनुपपन्नम्। अविषयीकृतस्यान्यस्यान्यत्राध्यारोपोऽप्य[9][10]सम्भवी। तदनन्तरभावि ज्ञा[11]नं तौ विषयीकृत्यापरमन्यत्राध्यारोपयतीत्यपि वक्तुमशक्यम्, तयोर्विवेकेनोपलम्भप्रसङ्गात्। तथा च नाध्यारोपाद[12]प्येकत्वाध्यवसायः। किञ्च, यद्यविकल्पकं विकल्पेऽध्या[13]रोप्य विकल्पकमविकल्पतयाऽध्यवसीयते तदा समानाकारस्य विकल्पविषयतयाऽभ्युपगतस्य न तत्र तद्रूपतयाऽध्यवसायः स्यात्, विकल्पावभासस्य तद्विषयत्वेन व्यवस्थितस्य विकल्पस्वरूपवदविकल्परूपतयाऽध्यवसितत्वात्। अथ विकल्पमविकल्पेऽध्यारोप्याऽविकल्पो विकल्परूपतयाऽध्यवसीयते तदा सुतरामस्पष्टप्रतिभास एव स्यात्, लघुवृत्तेरपि क्रमभाविनोर्विकल्पाऽविकल्पयोर्न विच्छेदानुपलक्षणम् वर्णद्वयादि[14]नाऽनेकान्तात्। विकल्पात्मनोत्पत्ति[15]रेवेन्द्रियजस्यात्मन्यपरसमारोपश्चेत्, नन्वेवं सर्वेन्द्रियजा बुद्धिर्विकल्पकत्वेनासत्या स्यात्। विकल्पस्यापि नाविकल्परूपेणोत्पत्तिरेकत्वाध्यव[16]सायः, विकल्प[17]त्मनो वैशद्याभावात्। युगपद्वृत्तेश्चाभेदाध्यवसाये दीर्घशष्कुलीभक्षणादौ रू[18]पादिज्ञानपञ्चकस्यापि सहोत्पत्तेरेकत्वाध्यवसायः किं नाभ्युपगम्येत? भिन्नविषयत्वात् तेषां स नेष्यत इति चेत् तर्हि प्रकृतेऽपि स [19]मा भूत्, क्ष[20]ण-सन्तानविषयत्वेनाविकल्प-सविकल्पकयोर्भिन्नविषयत्वात्। न हि विकल्पे निरंशै-
कक्षणावभासो लक्ष्यते[21], तल्लक्षणे क्षणक्षयानुमानवैयर्थ्यप्रसक्तेः। क्षणविषयत्वेऽपि वा न तयोरेकविषयत्व[22]म्, स्वोपादानविषय-तत्समानसमयक्षणगोचरत्वात्। एकसन्तानसमाश्रयेण द्वयोरप्येकविषयत्वे दर्शन-स्मरणयोरभिन्नसन्तानाधिकरणयोरपि स्यात्। वर्तमानार्थतयाऽप्रवृत्तेर्न दर्शन-स्मरणयोरेकत्वाध्यवसाय इति चेत्, न; शब्दादिस्वलक्षणेऽध्यक्षगोचरे क्षणक्षयमनुमानान्निश्चिन्वतोऽनुभव-विकल्पयोर्युगपद्भावेऽप्यभेदाध्यवसायाभावात् मरीचिकायां जलभ्रान्तेः विशदाव-
भासे च निमित्तं वक्तव्यम्, विकल्पाऽविकल्पयोर्युगपद्भावनिमित्तस्य तत्राभावात् तदोपलब्धिलक्षणप्राप्तस्यानुपलम्भाद् दर्शनस्याभावात् तत्स[23]द्भावे वा न जलाकारं दर्शनम् जलभ्रान्तेरक्षजत्वानभ्युपगमात्। नापि मरीचिकाविषयम् भिन्नाधिकरणतया तयोरेक्यीकरणासम्भवात्, सम्भवे वा घटानुभवस्य पटस्मरणादावपि प्रसङ्गः। प्रत्यक्षासन्नवृत्तित्वाद् वैशद्यभ्रमेऽन्यत्रापि सैवास्तु किं युगपज्ज्ञानोत्पत्तिकल्पनया? प्रकृतिविभ्रमादेवाऽस्य त[24]थाभावे सिद्धं विकल्पात्मकज्ञानस्य वैशद्यम्। न च जलभ्रान्तेरवैशद्यम्, जलभ्रान्त्याधारसमानदेशजलप्रतिभासाविशेषात्।

न च युगपद्वृत्तिर्ज्ञानयोः सिद्धा, सकृद्भावे हि ज्ञानयोर्युगपद्वृत्तिः स्यात्। न चैकस्मात् सामग्रीविशेषादर्थेन्द्रियादिलक्षणाद् युगपत् कार्यद्वयस्य विकल्पाऽविकल्पस्योदयो युक्तः, यतः सामग्रीभेदात् कार्यस्य तत्प्रभवस्य भेदो युक्तः; अन्यथा निर्हेतुकः स स्यात्। अथ कार्यव्यतिरेकात् कारणस्य तत्र

१-च्छेदः। न वा० बा०। २ न वा-आ०। ३ प्रसङ्गनि-वा० बा०। ४-क्षत्ववद् मां० विना०। -क्षत्वद् वा० बा०। ५-दर्शनान्तर-वि०। ६-या सा-वा० बा०। ७-कारार्थे स्प-मां०।-कारेर्थास्प-वा० बा०।-कारेर्थास्पृ-हा०। ८-दृत्तेर्निर्मू-वा० बा०। ९-त्ययग्रा-आ० वि० विना। १०-ह्यवत् स-वा० बा० हा०। ११-प्यसंभवतीति तद्-आ० वि०। १२ ज्ञानतो विष-वि०। १३-ध्यारोप्य विकल्प्यतया-आ० वि०।-ध्यारोपविकल्पतया-वा० बा० हा०। १४-नाऽनैका-भां० मां०। १५-त्पत्तिरेकेन्द्रि-भां० मां०। १६-साये वि-भां० मां० वा० बा० विना। १७-ल्पात्मानो वै-आ० वि०।-ल्पात्मनौ वै-वा० बा० हा०। १८-पादिना ज्ञान-वि०। १९ मा भूत क्षण-आ० वि०। २०-णसन्तान-भां० मां०। २१-तेऽतल्ल-वा० बा०। २२ त्वंष्टोयतः पादान-वा० बा०। २३-त्सदभावे आ० हा० वि०। २४-तदाभा-भां० मां०।

सामर्थ्यावधारणम् । अर्थादिव्यतिरेकाच्च नर्वि(न वि)कल्पव्यतिरेकः एतत्समानजातीयानामतीतादिविकल्पानामर्थाद्यभावेऽपि भावादित्यविकल्पोत्पादन एवार्थेन्द्रियादेः सामर्थ्यमवसीयते इत्यभ्युपगमादस्त्येव सामग्रीभेदः ततः कार्यभेदोऽपि सङ्गत एव, असदेतत्; तिमिरपरिकरितचक्षुषोऽर्थव्यतिरेकेणाप्यविकल्पकस्य कस्यचिदुत्पत्तिदर्शनादपरस्यापि तज्जातीयतयाऽविकल्पदर्शनस्य विकल्पवदनर्थजन्यत्वप्रसक्तेः । अथ तैमिरिकानुभवादनुपहतेन्द्रियजाध्यक्षस्य भेदान्नानन्तरोक्तप्रसङ्गः, नन्वेतत् सविकल्पकेऽपि समानम् । न चैकत्र विकल्पेऽवैशद्यदर्शनात् तज्जातीयतया सर्वत्र तथाभावसिद्धिः, अविकल्पस्यापि दूरार्थग्राहिणः कस्यचिदवैशद्योपलब्धेः तदन्यस्यापि तद्भावप्रसक्तेः । तत् स्थितमक्षभाविनो विकल्पस्यार्थसाक्षात्करणलक्षणं वैशद्यम्; तेन 'स्वव्यापारमेवमादर्शयतो विकल्पस्योत्पत्तेः स्वव्यापारमुत्प्रेक्षात्मकं तिरस्कृत्य दर्शनव्यापारानुसरणाद् विकल्पः प्रमाणं न भवति' इत्येतन्निरस्तं द्रष्टव्यम् । विकल्पश्चैक एवार्थग्राह्युपलक्ष्यते नापरं दर्शनम् यद्व्यापारानुसारिणो विकल्पस्याप्रामाण्यं भवद्भिः गृहीतग्राहितया प्रतिपाद्येत । विकल्पाऽविकल्पयोर्लघुवृत्तेर्विकल्पव्यतिरेकेणाविकल्पस्यानुपलक्षणेऽङ्गीक्रियमाणे वर्णयोरपि लघुवृत्तेरितरेतरव्यतिरेकेणानुपलक्षणप्रसक्तिः । न च वर्णयोस्तथाभूतलघुवृत्तेरभावात् परस्परव्यतिरेकेणोपलक्षणसद्भावः, युगपज्ज्ञानानुत्पत्तिवादिनोऽपि ताभ्यां व्यभिचाराभावप्रसक्तेः । नापि सादृश्याद् विकल्पाऽविकल्पयोर्भेदेनानुपलक्षणम्, सन्तानतरविषयत्वेन तयोरेकविषयत्वकृतसादृश्याभावात् । ज्ञानरूपतया सादृश्ये नीलाऽनीलाकारज्ञानयोरपि ज्ञानात्मना सादृश्यान्न स्याद् भेदेनोपलक्षणम् । तन्नाऽविकल्पकज्ञानसद्भावः । अथ यदि प्रथमाक्षसन्निपात एव सविकल्पकं दर्शनमुदयमासादयति तद्ग्राह्यस्त्वर्थात्मा; तथा सत्यर्थग्रहणाभाव एव प्रसक्तः । तथाहि–अर्थदर्शने सति तत्सन्निधाने दृष्टे तद्वाचके स्मृतिः, तत्स्मृतौ च तेनार्थं योजयति, तद्योजितं चार्थं विकल्पिका बुद्धिरध्यवस्यति । न च सविकल्पकप्रत्यक्षवादी अशब्दकमर्थं पश्यति, तद्दर्शनमन्तरेण च (न) तद्वचःस्मृतिः, तामन्तरेण च न वचनपरिष्वक्तार्थदर्शनम् इत्यर्थदर्शनाभाव एव प्रसक्तः, असदेतत्; यतो यदि 'अशब्दकमर्थं विकल्पो नावगच्छति' इत्यभ्युपगम्येत तदा स्यादयं दोषः; न चास्माभिः शब्दसंयोजितार्थग्रहणं विकल्पोऽभ्युपगम्यते किं तर्हि? निरंशक्षणिकानेकपरमाणुविलक्षणस्थिरस्थूरार्थग्रहणम्; तच्च प्रथमाक्षसन्निपातवेलायामप्यनुभूयते । तथा,

१–**व्यतिरेकत्वा न वि**–हा० वा० बा० ।–**व्यतिरेकत्वेन वि**–आ० वि० । **व्यतिरेकाच्च नर्वि**–भां० । अत्र 'अर्थादिव्यतिरेकाच्च न विकल्पव्यतिरेक एव तत्समानजातीयानामतीतादिविकल्पाना–' इति पाठः संभाव्यते । २ **तत्कार्य**–भां० मां० । ३–**क्षजस्य** भां० मां० । ४–**कल्पे वै**–भां० मां० विना० । ५ **सवैत्रात**–वा० बा० । ६–**पि विदूरा**–भां० मां० । ७–**णं भवति** भां० मां० विना । ८–**पाद्यते** वि० । ९–**त विकल्पयोर्ल**–आ० वा० बा० । १०–**वृत्तिवैकल्प**–वा० बा० हा० । ११–**सक्तेः** वि० । १२ **परस्य व्यति**–वा० बा० । १३–**पलक्षणोपलक्षणसद्भा**–भां० मां० । १४–**भावः** आ० । १५–**दृश्याद्विकल्पाद्वि**–हा० ।–**दृश्याद्विकल्पयोर्भे**–वा० बा० वि० । १६ **सादृश्ये नीलाकारज्ञान**–वा० बा० हा० । १७ **तन्न वि**–वा० बा० । १८–**त्मा सत्य**–आ० वि० ।

१९ "सति ह्यर्थदर्शनेऽर्थसन्निधौ दृष्टे शब्दे ततः स्मृतिः स्यात् अग्निधूमवत् । न चायमशब्दमर्थं पश्यति, अपश्यन् न शब्दविशेषमनुस्मरति, अननुस्मरन्न योजयति, अयोजयन्न प्रत्येति इत्यायातमान्ध्यमशेषस्य जगतः"–अनेका० पृ० १२२ पं० ३ ।

"न चायमित्यादि । न खल्वयं सविकल्पकप्रत्यक्षवादी शब्दरहितमर्थं पश्यति, स्वाभिधानविशेषणापेक्षा एवार्था विज्ञानैर्व्यवसीयन्त इति नियमात् । ततः को दोष इत्याह–अपश्यन् न शब्दविशेषमनुस्मरति 'नियमेन' इति शेषः"–अनेका० टी० पृ० १२२ पं० २४ ।

"तथाहि-नीलादिकमर्थमनिरीक्षमाणस्तत्र प्रतिपन्नसमयं तद्वाचकं शब्दं नानुस्मरत्युपयोगाभावात्, अननुस्मरंश्च पुरश्चारिणि नीलादिवस्तुनि न तं संघटयति स्मृतिदर्पणप्रतिबिम्बनमन्तरेण तत्संघटनासामर्थ्यात्, असंघटयंश्च शब्दं त्वदाकूतेन न निरीक्षत एव नीलादिकमर्थमिति सुषुप्तप्रायं जगज्जायेतेति"–स्याद्वादर० पृ० ३६ द्वि० पं० ८ ।

२० **दृष्टा त**–हा० वा० बा० । २१–**चकस्मृ**–वि० । २२–**कल्पका बु**–वा० बा० हा० वि० ।–**कल्पबु**–आ० । २३ **अशब्दकर्म पश्यति तद्दर्शनमन्तरेण च तद्वचस्मृतिः** आ० । **'अशब्दं कर्म पश्यति तद्दर्शनमन्तरेण च न तत्स्मृतिः'** वि० सं० । २४–**ण न च वचन**–भां० मां० । २५–**ब्दसंयोगिता**–वा० बा० ।

संहृतसकलविकल्पावस्थायामपि न निरंशक्षणिकानेकपरमाणुप्रतिभासः, स्थिरस्थूलरूपस्य बहिः स्तम्भादेर्ग्राह्यरूपतां बिभ्राणस्य प्रतिभासनात्, अश्वविकल्पकालेऽपि पुरो व्यवस्थितस्य गवादेस्तथाभूतानुभवविषयत्वेन प्रतिभासनात् । यदि पुनरभिलापसंसृष्टार्थाध्यवसाय्येव विकल्पोऽभ्युपगम्येत तदा तदनुत्पत्तिरेव प्रसक्ता । तथाहि–यावत् पुरो व्यवस्थितं वस्तु नीलादित्वे(त्वेन) न निश्चितं न तावत् तत्सन्निधानोपलब्धतद्वाचकस्मृत्यादिक्रमेण तत्परिष्वक्तार्थनिश्चयः, यावच्च न तन्निश्चयो न तावत् तद्वाचकस्मृत्यादिः, क्षणक्षयादाविवाऽनिश्चिते वाचकस्मृत्यादेरयोगात् । योगे वा शब्दानुभवानन्तरं 'क्षणिकः' इति वाचकस्मृत्यादिक्रमेण तन्निश्चयोत्पत्तेः क्षणक्षयानुमानमपार्थकं स्यात् । अपि च, 'तद्वाचकस्यापि स्मरणमपरतद्वाचकयोगमन्तरेण भवद्भ्युपगमेन न सम्भवति, तद्योजनमपि स्मरणमन्तरेण, स्मरणमप्यपरतद्वाचकयोजनादिव्यतिरेकेण' इत्यनवस्थानान्नात्र क्वचिदपि निश्चयः स्यादिति । तस्मादभिलापसंसर्गयोग्यस्थिरस्थूरार्थप्रतिभासं ज्ञानं प्रथमाक्षसन्निपातोद्भवं सविकल्पकं तथाभूतार्थव्यवस्थापकमभ्युपगन्तव्यम्; अन्यथा सकलव्यवहारोच्छेदप्रसङ्गः । अतः साधारणासाधारणरूपे वस्तुनि प्रमाणप्रवृत्तिः नासाधारणात्मनि, निर्विकल्पकस्याप्यसाधारणात्मनि विषये विकल्पानुत्पादकत्वादग्राहकत्वमेव । ग्राहकत्वे वा तत्र क्षणक्षयानुमानस्याप्रामाण्यप्रसक्तिः । तस्मात् 'स्वस्वभावव्यवस्थितेः' इत्यस्य हेतोर्भेदेन सर्वपदार्थानां प्रत्यक्षेण व्याप्तिग्रहणाभावान्न व्याप्तिग्राहकप्रमाणफलमेतत्–'स्वस्वभावव्यवस्थितेः सर्वभावानां सर्वतो भेदः' इति । अतो न धर्मविशेषाभावः । व्यावर्त्यभेदाद् व्यावृत्तिभेदः तद्भेदाच्च धर्मभेदे यथा अमूर्ताद् व्यावर्तमानो घटो मूर्तस्तथा मूर्तान्तराद् व्यावर्त्तमानः प्रत्ययोऽमूर्तोऽपि मूर्तः स्यात् । अमूर्तात्मना तयोरभेदे कथं नोभयात्मकत्वं भावानाम्? न च कल्पितो धर्मभेदः, तथाभ्युपगमे यथा परसत्त्वाद् व्यावर्त्तमानस्य घटादेः परविविक्तं स्वसत्त्वं कल्प्यते तथा स्वसत्त्वाद् व्यावर्त्तमानस्य स्वासत्त्वप्रकृप्तिप्रसङ्गः । अथ परसत्त्वादेव तस्य व्यावृत्तिः न स्वसत्त्वात्, नन्वेवं कथं न पारमार्थिकोऽन्यव्यावृत्तिधर्मभेदोऽभ्युपगतः स्यात्? न च 'एकः संवृतिसन्नपि कल्प्यतेऽन्यो न' इति विभागो युक्तः, कल्पनायाः सर्वत्र निरङ्कुशत्वात् । तदेवं सदृशपरिणामसामान्यस्याबाधितप्रत्ययविषयत्वेन सत्त्वादसिद्धो हेतुरिति स्थितम् ।

स्वसंवेदनप्रत्यक्षस्यानिश्चयरूपताभ्युपगमे शब्दप्रत्ययस्यासिद्धत्वादाश्रयासिद्धश्च हेतुः । न ह्यनिश्चितं ज्ञानस्य स्वरूपं स्वर्गप्रापणसामर्थ्यवद् दानचित्तस्य सिद्धं भवति प्रतिभासमात्रेण सिद्धत्वे वा तत्र विप्रतिपत्तिर्न स्यात्, क्षणक्षयादेरपि च प्रतिभासमात्रेणैव सिद्धत्वात् तदनुमानवैयर्थ्यप्रसक्तिश्च ।न च स्वसंवेदनेनाऽनिश्चयात्मनाऽपि निश्चयात्मज्ञानस्वरूपं गृह्यते न पुनस्तस्य स्वर्गप्रापणसामर्थ्यादिकम् अतो न विप्रतिपत्त्याद्यभाव इति वक्तव्यम्, तस्मिन् गृह्यमाणे गृह्यमाणस्य तस्य ततो भेदप्रसङ्गात् । न च तस्मिन् सर्वात्मना स्वसंविदितेऽप्यभ्यासपाटवादेर्निमित्तात् क्वचिदेवांशे निश्चयो न सर्वत्र, स्वसंवेदनस्य तदंशनिश्चयजननसमर्थस्यापि तदंशान्तरे तदसामर्थ्याद् द्विरूपतापत्तेः । न चैकत्र सामर्थ्यमेव परत्रासामर्थ्यम्, विहितोत्तरत्वात् । न च निश्चयसंवेदनस्याप्यनिश्चयात्मकत्वेन स्वतो निश्चितस्य निश्चयव्यवस्थापकत्वम्, क्षणिकत्वादेरिवानिश्चितस्याऽन्यव्यवस्थाप-

१–**भासस्थितस्थू**–वा० बा० । २–**स्थूररू**–वा० बा० हा० वि० । ३–**वादिस्त**–आ० वि० । ४–**लाषसं**–वा० बा० हा० विना । ५–**संस्पृष्टा**–भां० । ६–**सायो विकल्पेभ्युप**–वा० बा० । ७–**त्परिपृक्ता**–भां० मां० । ८–**क्तार्थानि**–वा० बा० । ९–**दिलक्षण**–भां० मां० विना । १०–**गे व श**–वा० बा० । ११–**नुभावा**–भां० मां० विना । १२–**कयोजनमन्त**–भां० मां० । १३–**स्थानान्न क्वचि**–भां० मां० । १४–**लाषसं**–वा० बा० हा० विना । १५–**भासज्ञा**–भां० मां० वा० बा० हा० विना । १६–**रूपवस्तु**–वा० बा० । १७–**त्तिः न साधा**–आ० वि० । १८–**त्मनि विक**–वा० बा० । १९ पृ० २४३ पं० १७ । २०–**धर्मभेदो य**–वि० । २१–**वर्त्यभा**–भां० मां० । २२–**थाऽमू**–आ० वि० विना । २३ **संवृत्तिसन्नपि** मां० वा० बा० हा० वि० । **संवृत्तिः सन्नपि** भां० । २४–**स्थित संवे**–आ० । २५–**मे शाब्द**–भां० मां० । २६–**श्चितज्ञा**–वा० बा० । २७–**नाऽपिज्ञानस्व**–भां० मां० । २८–**निश्चिया**–आ० हा० वा० बा० । २९–**त्मस्व**–वा० बा० । ३०–**माणागृह्य**–वा० बा० । ३१ **सर्वदा** वा० बा० । ३२–**मर्थाद्वि**–आ० वि० । ३३ पृ० २४४ पं० २४ । ३४–**त्मकत्वे स्व**–भां० मां० ।–**त्मकत्वेनास्व**–वा० बा० । ३५–**तोऽनिश्चि**–भां० मां० ।

कत्वायोगात्। न च स्वसंवेदनेनानिश्चयात्मनाऽनिश्चितो निश्चयः प्रत्ययव्यवस्थापकः, इति निर्विकल्पकस्वसंवेदनवादिनः प्रत्ययासिद्धेः कथं नाश्रयासिद्धः प्रकृतो हेतुः?

यदपि 'भवतु वा सामान्यं तथापि तस्या(स्य) भेदेभ्योऽर्थान्तरत्वे भिन्नेष्वभेदाध्यवसायो भ्रान्तिरेव' इत्यादि, तदप्ययुक्तम्; एकान्तभिन्नस्य सामान्यस्य भिन्नेष्वभेदप्रत्ययहेतुत्वेनानभ्युपगमात्। न ह्यन्येनान्ये समाना अभ्युपगम्यन्ते किन्तु स्वहेतुभ्य एव केचित् समाना उत्पन्नास्तथैव गवादिप्रत्ययविषयाः।

यदपि 'अनर्थान्तरत्वेऽपि सामान्यस्य' इत्यादि, तदप्यसत्; अनर्थान्तरत्वेनैकान्तेन तस्यानभ्युपगमान्न तत्पक्षभावी भ्रान्तत्वादिदोषः प्रत्ययस्य।

यदर्पि 'यत्रैव हि कृतसमया ध्वनयः स एव तेषामर्थः, न च समयः शब्दानां परमार्थतः सम्भवति,' तदप्ययुक्तम्; सामान्य-विशेषरूपस्य वस्तुनः पारमार्थिकस्य सङ्केत-व्यवहारकालव्यापकस्य प्रमाणसिद्धत्वात्। यद्यपि शाबलेयादयो व्यक्तिविशेषाः परस्परं नानुयन्ति तथापि समानपरिणामस्वरूपतया क्षयोपशमविशेषाविर्भूतप्राक्प्रदर्शितव्याप्तिग्रहणस्वरूपज्ञाने तथैव प्रतिभासमानाः सङ्केतविषयतामुपयान्त्येव, अगोरूपव्यावृत्तेषु सङ्केत-व्यवहारकालव्याप्तिमत्सु भावेष्वगोशब्दव्यावृत्तगोशब्दस्वरूपस्य सङ्केतितत्वाद् देशान्तरे कालान्तरे च ततः शब्दात् तदर्थप्रतिपत्तिरर्थाव्यभिचारिण्युपजायत एव। एकत्वं तु शब्दाऽर्थयोः शब्दप्रतिपत्तावनङ्गमेव, तदन्तरेणापि सङ्केतस्य कर्तुं शक्यत्वात् सार्थकत्वाच्च।

तेन 'ये यत्र भावतः' इत्यादिप्रयोगे 'न शक्नन्ति च भावतः कृतसमयाः सर्वेस्मिन् वस्तुनि सर्वे ध्वनयः' इत्यसिद्धो हेतुः, यथोक्तवस्तुनि समयस्य प्रतिपादितत्वात्।

यदपि 'हिमाचलादिषु सङ्केतव्यवहारकालव्यापकेषु सङ्केतः सम्भविष्यति' इत्याशङ्क्य 'तेष्वप्यनेकपरमाणुरूपत्वान्न सङ्केतः' इति, तदप्ययुक्तम्; समानासमानैकपरिणतिरूपस्य वस्तुनः साधितत्वात्।

यदपि 'उदयानन्तरापवर्गिषु स्वलक्षणेषु सङ्केत उत्पन्नानुत्पन्नेष्वशक्यक्रियतः(क्रियः)' इति, तदप्यसङ्गतम्; एकान्तेनोदयानन्तरापवर्गित्वस्य भावेष्वसिद्धेः। अथान्ते क्षयदर्शनात् प्रागपि तत्स्वभावसिद्धेस्तत्सिद्धिः, नन्वेवमादौ स्थितिदर्शनादन्तेऽपि स्थास्नुतासिद्धेर्विपर्ययसिद्धिप्रसङ्गः। अथान्ते स्थैर्यानुपलब्धेर्न विपर्ययसिद्धिः, आदौ क्षणक्षयानुपलक्षणात् क्षणक्षयसिद्धिरपि न स्यात्। सदृशापरापरोत्पत्तिविप्रलम्भात् क्षणक्षयस्यादावनुपलक्षणमिति चेत्, स्यादेतत् यदि कुतश्चित् क्षणिकत्वं सिद्धं स्यात्, तच्चासिद्धम् तत्र साधकहेत्वभावात्। कृतकत्वात् तत्सिद्धिरिति चेत्, न; साध्यसाधनधर्मभेदात् सिद्धौ (भेदाऽसिद्धौ) ततस्तत्सिद्धेरयोगात्, योगे वा स्वात्मनोऽप्यात्मना सिद्धिः स्यात्। न च व्यावृत्तिभेदात् कृतकत्वाऽनित्यत्वयोर्भेदः, यतस्तद्भेदः स्वतो वा, व्यवच्छेद्याद् वा, आरोपाद् वा, बुद्धिप्रतिभासभेदाद् वा भवेत्? न तावत् स्वतः, स्वतो भेदे भेदस्य वस्तुत्वम्, वस्तुत्वे च कथं न वस्तुत्वपक्षभावी दोषः? वस्तुनश्चानेकान्तात्मनो भेदाभेदात्मकतया सिद्धेः सिद्धो नः सिद्धान्तः। व्यवच्छेद्यभेदादपि न व्यवच्छेदभेदः, अनित्या(त्यत्वा)दिव्यवच्छेद्यस्य नित्यादेर्व्यवच्छेद्यस्य वस्तुनोऽभावाद् भेदाभावप्रसक्तेः। कल्पितव्यवच्छेद्यव्यवच्छेदेन तद्भेदाभ्युपगमे तत्र कल्पनाऽपि इतरव्यवच्छेदेन इत्यन्योन्यव्यवच्छेदेन व्यवच्छेदयोर्व्यवस्थितस्वरूपत्वात् कथं नेतरेतराश्रयदोषः?

---

१ निश्चितः प्र–वि०। २ पृ० १७४ पं० १२। ३ तस्याऽभे–भां० मां०। पूर्वपाठानुसारेण 'तस्य भेदेभ्योऽर्थान्तरत्वे' इति संस्कारः। ४–नाभ्यु–आ०। ५–गम्यते वि०। ६ पृ० १७४ पं० १३। ७ पृ० १७४ पं० १७। ८–पि तत्रैव वा० बा०। ९ नानुपपत्तिस्तथा–भां० मां०। १०–णामः स्वरू–आ०। ११–विभूतिप्रा–भां० मां०। १२ पृ० २४६ पं० १६–३२। १३ पृ० १७४ पं० १९। १४ पृ० १७४ पं० २०। १५ प्र० पृ० पं० १०। १६ पृ० १७६ पं० ६। १७ पृ० १७६ पं० ७। १८ पृ० २४२ पं० २१। १९ पृ० १७६ पं० ११। २०–त्वं स्यात् आ० वि०। २१ तथात्सि–वा० बा० हा०। तथा सि–आ० वि०। २२–दाप्यात्म सि–वा० बा० हा० विना। २३–स्वात्मनोप्यात्मनो सि–भां० मां०। स्वात्मनाप्यात्मना सि–आ०। स्वात्मना सि–वा० बा०। २४–तो व्य–वा० बा० विना। २५–थं वस्तु–वा० बा०। २६ अनित्यत्वादिव्यवच्छेदस्य नित्यादेर्व्यवच्छेदस्य वस्तुनो–वा० बा० हा०। अनित्यत्वादिव्यवच्छेद्यस्य वस्तुनोऽभावात्–आ० वि०।

अनित्यत्वादिव्यवच्छेदेन नित्यादिव्यवच्छेद्यस्य व्यवस्थायामनित्यादिव्यवच्छेदस्यापि नित्यादिव्यवच्छेद्याद् व्यवच्छेदेन बुद्धिप्रतिभासभेदादेव भेदोऽस्तु किं व्यवच्छेदस्य व्यवच्छेद्यभेदाद् भेदकल्पनया? तथैव भेदाद् व्यवच्छेदस्य साध्यसाधनभावे शब्दत्वादेरपि बुद्धिप्रतिभासभेदेन भेदात् साध्यसाधनभावः स्यात्। तथा च न कश्चित् प्रतिज्ञार्थैकदेशासिद्धो हेतुः स्यात्। न च शब्दाच्छब्दत्वस्य न प्रतिभासभेदः; अन्यथा धर्मिधर्मव्यवस्थाऽभावप्रसक्तेः। अथ प्रतिभासभेदेऽपि व्यवच्छेद्यभेदाभावात् शब्दत्वस्य प्रतिज्ञार्थैकदेशत्वम्, नन्वेवं भाव-द्रव्याभिधायिनोरभिधानयोरपर्यायता न स्यात् 'शब्द'शब्देन शब्दत्वस्याप्यभिधानात्; अन्यथा प्रतिज्ञार्थैकदेशताऽपि न स्यात्।

नाप्यारोपभेदाद् व्यवच्छेदस्य भेदः, सत्त्वादावसत्त्वाद्यारोपस्याभावात् भावे वा सत्त्वमप्यनित्यत्ववत् साध्यमनुषज्येत। तत्साधने च तद्धेतोरसिद्ध-विरुद्धाऽनैकान्तिकदोषत्रयानतिवृत्तिर्भवदभिप्रायेण। तन्न कृतकत्वाऽनित्यत्वयोः साध्यसाधनभावः भवदभिप्रायेण भेदाभावात्। अथ तयोः परमार्थतोऽभेदेऽपि निश्चयवशाद् गम्यगमकभाव इति कृतकत्वं कृतकत्वाध्यवसायिना निश्चयप्रत्ययेन भेदेन निश्चीयमानमनित्यत्वस्य गमकम्, ननु ययोर्वस्तुगतयोः कृतकत्वाऽनित्यत्वयोस्तादात्म्यप्रतिबन्धः न तयोर्निश्चय इति न गम्यगमकत्वम्, ययोश्च विकल्पबुद्धिप्रतिभासिनोर्भेदेन निश्चयः न तयोस्तादात्म्यनिबन्धनो गम्यगमकभावः, बुद्ध्यारूढयोरवस्तुत्वेन प्रतिबन्धाभावात्। अथ भेद एव तयोः कल्पनानिर्मितः न पुनर्वस्तुस्वरूपमपि, शब्दस्वलक्षणस्याकृतकनित्यव्यावृत्तिनिरंशैकस्वभावत्वात् तद्गतकृतकत्वादिभिन्नधर्माद्यध्यवसायिनश्च कृतकत्वादिविकल्पास्तथाभूतस्वलक्षणानुभवद्वारायातत्वेन तत्प्रतिबद्धास्तेन तत्प्रतिभासिनोर्धर्मयोः साध्यसाधनभावः अव्यभिचारश्च पारम्पर्येण वस्तुप्रतिबन्धादुपपद्यत एव। स्यादेतत् यदि तथाभूतं स्वलक्षणं प्रत्यक्षत एव सिद्धं स्यात्, न च तत् ततः सिद्धम् स्वप्नेऽपि निरंशक्षणिकानेकपरमाणुरूपस्य तस्यासंवेदनात्। यादृग्रूपं तु तत् प्रत्यक्षे प्रतिभाति कृतकत्वाद्यनेकधर्माध्यासितं तन्न निरंशम्, यतस्तदनुभवद्वारायातकृतकत्वादिविकल्पप्रतिभासिनां धर्माणामव्यभिचारात् साध्यसाधनभाव उपपद्येत। न चानुमानविकल्पत एव तस्य तथासिद्धिः, प्रतिबन्धासिद्धावनुमानस्यैवाप्रवृत्तेः। सविकल्पकप्रत्यक्षस्य साध्यसाधनधर्मप्रतिबन्धग्राहकस्य धर्मिस्वरूपग्राहकस्य च प्रामाण्याभ्युपगमे शब्दादिधर्मिणः कृतकत्वाद्यनेकधर्मात्मकस्य सिद्धत्वाद् विवादाभाव एव। भवतु वा परपक्षे साध्यसाधनभेदः तथापि न साध्यसाधनभावः, तयोरविनाभावसाधकप्रमाणाभावात्।

अथ 'निर्हेतुकत्वाद् विनाशस्य विनाशस्वभावनियतो भावः तद्भावे भावस्यान्यानपेक्षणात् अन्त्यकारणसामग्रीविशेषवत् स्वकार्योत्पादने' इत्यादिसाधनसद्भावात् कथं नाविनाभावः प्रकृतसाध्य-साधनयोः? असदेतत् तयोरविनाभावसाधनम्, अनैकान्तिकत्वात्। तथाहि—अनपेक्षाणामपि शाल्यङ्कुरोत्पादने यवबीजादीनां तदुत्पादेनसामग्रीसन्निधानावस्थायां तद्भावनियमाभावात्। अथ यवबीजादीनां तत्स्वभावाभावात् तत्स्वभावापेक्षयाऽनपेक्षत्वमसिद्धम् तर्हि विनाशस्वभावापेक्षत्वात् कृतकानामपि केषाञ्चित् तत्स्वभावाभावादनपेक्षत्वमसिद्धं स्यात्। अथ हेतुस्वभावभेदाभावात् सर्वसामग्रीप्रभवाणां विनाशसिद्धेस्तदनपेक्षत्वान्नानपेक्षत्वमसिद्धम्, ननु विचित्रशक्तयो हि सामग्र्यो दृश्यन्ते, तत्र काचित् स्यादपि सामग्री या नश्वरात्मानं जनयेत् शृङ्गादिकेव शरादिकम्। अथ

१–च्छेद्यस्य वा० बा०। २–च्छेद्यस्य वा० बा०। ३–भासभेदात् वा० बा०। ४–धनाभा–भां० मां०। –धनः भा–वा० बा० हा०। ५–स्थाभा–भां० मां० वा० बा० हा० विना। ६–कत्वाव्यवसा–वा० बा०। ७–योस्तदात्मप्रति–आ०। ८–न्धनयो ग–वा० बा०। –न्धनयोर्ग–आ० हा० वि०। ९–स्तुरूप–वा० बा०। १०–सिनो ध–आ० वि० वा० बा०। –सिना ध–हा०। ११–यदि यथाभूतं आ० वि०। १२–तं न तन्निरस्यं (रंशं) वा० बा० हा०। १३–सिनाद्ध–भां० मां०।

१४ "शाल्यङ्कुरोत्पादनसामग्रीसन्निधानावस्थायां तदुत्पादनेऽन्यानपेक्षाणामप्येषां तद्भावनियमाभावात्। द्वितीयपक्षे तु विशेष्यासिद्धो हेतुस्तत्स्वभावत्वे सत्यप्यन्यानपेक्षत्वासिद्धेः। न ह्यन्या कारणसामग्री स्वकार्योत्पादनस्वभावाऽपि द्वितीयक्षणानपेक्षा तदुत्पादयति। दहनस्वभावो वा वह्निः करतलादिसंयोगानपेक्षो दाहं विदधाति। भागे विशेषणासिद्धं च तत्स्वभावत्वे सत्यन्यानपेक्षत्वं शृङ्गोत्थशरादीनां क्षणिकस्वभावाभावात्"–प्रमेयक० पृ० १४५ प्र० पं० ५।

१५–दकं सा–भां० मां० विना। १६–धानाव्यव–वि०। १७–जानां भां० मां० विना। १८–वात् तत्स्वभावापेक्षत्वमसिद्धम् वि०। १९–स्तदान्यापेक्ष–वा० बा० हा०।

विनाशित्वेनोपलब्धानां प्रतिक्षणं विनाशाभावे विनाशप्रतीतिरेव न स्यात्, द्वितीयेऽपि क्षणे भावस्य स्थितौ सर्वदा स्थितिप्रसङ्गात्, द्विक्षणावस्थायित्वे[1] हि द्वितीयेऽपि क्षणे क्षणद्वयस्थितिस्वभावत्वात्—अतत्स्वभावत्वे स्वभावभेदेन क्षणिकत्वप्रसङ्गात्—तृतीयेऽपि क्षणेऽवस्थानं स्यात् तदाऽपि तत्स्वभावत्वात् चतुर्थेऽपि। एवमुत्तरेष्वपि[3] क्षणेष्ववस्थानादासंसारं भावस्य स्थितेरविनाशाद् विनाश-
५ प्रतीतिर्न स्यात्। भवति च विनाशप्रतीतिः अतस्तत्प्रतीत्यन्यथाऽनुपपत्त्या प्रतिक्षणविनाशानुमानं दृश्यात्मकस्य कार्यस्य अदृश्यात्मनोऽप्याद्ये क्षणे यः स्वभावः प्रागभूत्वा भवनलक्षणः स एव चेत् द्वितीयेऽपि क्षणे प्रागभूत्वा भावस्य भावात् क्षणिकत्वम्। अथ प्रथमे क्षणे जन्मैव[8] न स्थितिः, द्वितीये[9] क्षणे स्थितिरेव न जन्म तथापि जन्मजन्मिनोः स्थितिस्थितिमतोश्चाभेदात् तयोश्च व्यतिरेकात् प्रतिक्षणमनवस्थायित्वमिति सिद्धा विनाशं प्रत्यनपेक्षा भावस्य, असदेतत्; स्वहेतोरेवानेकक्षणस्थायी
१० भावो भूतक्षणेष्वभवन्, तिष्ठन् वर्तमानक्षणेषु, भविष्यत्क्षणेषु स्थास्यंश्चान्त्यपश्चिमे प्रथमक्षण एव जात इति कालेनाऽनागतादिनाऽसताऽपि[13] विशेष्यत्वं भावस्याविरुद्धं कारणसामर्थ्यवत्[14] द्वितीयेऽपि क्षणे न—अन्यथा कार्यकारणयोरेकदैवोत्पत्तेरेकक्षणस्थायि जगत् स्यात्—इति प्रागुत्पत्तेरभूत्वा भावेऽपि भावस्य द्वितीयादिक्षणे न क्षणिकत्वम्। वस्तुतस्तु भावक्षणात् पूर्वक्षणेषु भूत्वा भावी स्वभावो
१५ भावस्य सर्वत्रानान्यक्षणेनापि (?) विशिष्टेऽनन्तरातीतक्षण एव, प्रथमक्षणे तादृशस्वभावस्य भावे द्वितीयादिक्षणेऽपि न क्षणिकत्वम्, अक्षणिकत्वाविरोधात् भावक्षणात् पूर्वक्षणेष्वभूत्वा भावस्य द्वितीयादिक्षणेऽपि प्रथमक्षणस्वभावस्य भावे तत्स्वभावत्वेऽप्येकान्ततः क्षणिकत्वासम्भवात्। अथाभूत्वा भावश्च प्रागसतः सत्त्वम्, तस्य द्वितीयेऽपि क्षणे भावान्न पूर्वापरक्षणयोः स्थित्युत्पत्तिमत्त्वेन स्वभावभेदाद् भावस्य क्षणिकत्वम्। नाप्यपरापरकालसम्बन्धोऽप्यपरापरस्वभावो भवति परमाणु-
२० षट्कसम्बन्धेऽप्येकपरमाणुवत्। परमाणूनामयःशलाकाकल्पत्वात् परस्परमसम्बन्धः इति चेत्, असदेतत्; सम्बन्धे[18] प्रतीयमाने असम्बन्धकल्पनाऽयोगात्। कृत्स्नैकदेशसम्बन्धविकल्पयोगाद्-सम्बन्धः। तथाहि–सर्वात्मना परमाणूनामभिसम्बन्धेऽणुमात्रं[25] पिण्डः स्यात्। एकदेशेनाभिसम्बन्धे त एकदेशाः परमाण्वात्मन आत्मभूताः, परभूता वा? आत्मभूताश्चेत्, नैकदेशेनाभिसम्बन्धः तेषा-
मभावात्। परभूताश्चेत्, परमाणुभिरेकदेशानां सर्वात्मनाऽभिसम्बन्धेऽभेदादेकदेशैकदेशिनोरेक-
२५ देशाभावान्नैकदेशेनाभिसम्बन्धः परमाणूनाम्[27]। एकदेशेनैकदेशानामेकदेशिनाऽभिसम्बन्धश्चेत्, तदेकदेशानां ततो भेदाभेदकल्पनायां तदवस्थः[29] पर्यनुयोगोऽनवस्था च; न च प्रकारान्तरं दृष्टं येनाणूनां सम्बन्धः स्यात् अतोऽनुपलभ्यमानस्यापि परमाण्वसम्बन्धस्य[30] कल्पना, असम्यगेतत्[31]; असम्बन्धवत् सम्बन्धप्रकारान्तरस्यैवादृष्टस्यापि कल्पनाप्रसक्तेः[32]। सर्वात्मनैकदेशेन[33] वाऽणूनाम-

---

१–त्वे द्वि–आ०। २ क्षणाऽव–भां० मां०। ३ एवमुत्तरोत्तरेष्वपि क्षणेषु स्थानादा–भां० मां०। ४ क्षणेषु स्थाना–वा० बा० हा०। ५–मानं दृश्यात्मनोऽप्या–आ० वि०। ६–व भावस्य न भां० मां०। ७–येऽपि क्ष–भां० मां०। ८–मवस्थायित्व–वा० बा०। ९–क्षणास्था–हा०। १०–क्षणेषु भ–वा० बा०। ११–श्चात्यपश्चि–वा० बा०। –श्चात्पश्चि–आ०। १२–ना सता–आ० वि०। १३–रुद्धकार–वा० बा०। १४–र्थंव द्वि–वि० विना।–र्थं वद्वि–आ०। १५–तीयपक्षे नान्यथा वा० बा०। १६–यादिलः क्ष–आ०। १७ सर्वत्र नान्त्य–भां० मां०। १८–शिष्टो अनन्त–वा० बा०। १९–दृशः स्व–वा० बा० हा०।–दृशास्व–आ० वि०। २०–कत्वाद्वि–आ० वि०। २१ अभूत्वा मां०। २२–म्बन्धेऽप्य–भां० मां०। २३–स्वभावोभावो भ–भां० मां०। २४ "कथं च सम्बन्धे प्रतीयमानेऽप्रतीयमानस्याप्यसम्बन्धस्य कल्पना प्रतीतिविरोधात्"–प्रमेयक० पृ० १५२ प्र० पं० ४।

२५ "किंचासौ रूपश्लेषः सर्वात्मनैकदेशेन वा स्यात्? सर्वात्मना रूपश्लेषेऽणूनां पिण्डा(?)णुमात्रः स्यात्। एकदेशेन तच्छ्लेषे किमेकदेशास्तस्यात्मभूताः परभूता वा? आत्मभूताश्चेन्नैकदेशेन रूपश्लेषस्तदभावात्। परभूताश्चेत् तैरप्यणूनां सर्वात्मनैकदेशेन वा रूपश्लेषे स एव पर्यनुयोगोऽनवस्था च स्यात्"–प्रमेयक० पृ० १४९ प्र० पं० ४।

२६–मात्रः पि–भां० मां०।–मात्र पि–वि०। २७–कदेशिनोऽभि–वा० बा०। २८–वस्था प–वा० बा०। २९–माणूसम्ब–आ०।–माणुसम्ब–वि०। ३० तत्सम्ब–वा० बा० विना। ३१–रस्येवा–भां० मां० वा० बा० हा० विना। ३२–नायां प्र–भां० मा० वा० बा० हा० विना। ३३–न चाणू–आ० हा०। ३४–णूनां सम्ब–आ० वि०।

सम्बन्धात् सम्बन्धस्य च प्रतीतेः प्रकारान्तरेण एषां सम्बन्ध इति कल्पना युक्तियुक्तैव, प्रतीतिविरोधश्चैवं न स्यात्। अथ विकल्पिका प्रतीतिरारोपितगोचराऽसत्यपि सम्बन्धे सम्बन्धमादर्शयति, न तद्वशात् सम्बन्धव्यवस्था येन प्रतीतिविरोधः स्यादसम्बन्धवादिनः। कथं तर्हि सम्बन्धप्रतीतेर्वैशद्यम् विकल्पस्य वैशद्यानिष्टेः? युगपद्वृत्तेर्विकल्पाविकल्पयोरेकत्वाध्यवसायाद् वैशद्यभ्रमे सहभाविनोर्गोदर्शनाश्वविकल्पयोरप्येकत्वाध्यवसायाद् वैशद्यविभ्रमः स्यात्। अथासम्बद्धैरपि परमाणुभिः सम्बन्धग्राहीन्द्रियज्ञानं तज्जन्यते ततोऽयमदोषः। नन्वेवमसम्बद्धानपि परमाणून् सम्बद्धानिवाध्यक्षबुद्धिरधिगच्छन्ती कथं भ्रान्ता प्रत्यक्षत्वमश्नुवीत? प्रत्यक्षत्वे वा कथमतो न परमाणुसम्बन्धसिद्धिः यतोऽसम्बन्धवादिनः प्रतीतिविरोधो न स्यात्? परमाणूनामसम्बद्धानां जलधारणाद्यर्थक्रियाकारित्वानुपपत्तेः।

अर्थक्रियाविरोधश्चासम्बन्धवादिनः वंशादीनां चैकदेशाकर्षणे तदपरदेशाकर्षणं च न स्यात्, वर्तमानविज्ञप्तिक्षणवत् पूर्वापरक्षणयोगेऽपि वा न स्वभावभेदः। अभावाव्यवधानलक्षणं हि नैरन्तर्यम्, तल्लक्षणश्च सम्बन्धः परेणाभ्युपगन्तव्य एव, तस्याऽभावे कार्योत्पत्तिरहेतुका स्यात् अनवरतसत्त्वोपलम्भेनाभेदभ्रान्तिश्च न स्यात् केवलादेव सादृश्याद् भ्रान्तेरुत्पत्तावतिप्रसङ्गः सर्वत्र सादृश्यात् तदुत्पत्तिप्रसक्तेः। सत्त्वोपलम्भश्चाभावाव्यवधानलक्षणमेव नैरन्तर्यम् तस्यास्तित्वे तल्लक्षणोऽस्त्येव सम्बन्धः। न चानेकाकारयोगेऽपि पीताद्यनेकाकारचित्रज्ञानवदेकान्ततो भेदः परार्थस्य प्रतीयमानेऽभेदे एकान्तभेदानुपपत्तेः। अतः क्षणिकस्वभावापेक्षाऽक्षणिकभावसम्भवात् सम्भविनी भावानाम्।

अथाऽनश्वरात्मनः क्रम-यौगपद्याभ्यामर्थक्रियाविरोधात् ततोऽर्थक्रियानिवृत्तौ तन्नियता सत्ताऽपि निवर्त्तते, न चासतः कार्यत्वमिति कार्यात्मनः सर्वस्य क्षणिकत्वादनपेक्षत्वसिद्धिरिति साध्य-साधनयोरविनाभावसिद्धिः। ननु किमनया परम्परया अविनाभावस्य व्यापकानुपलब्धेरेव सिद्धिरस्तु? यतः प्रकारान्तराभावाद् व्यापकानुपलब्धेः सत्त्वलक्षणं कृतकत्वमक्षणिकाद् व्यावर्त्तमानं क्षणिकेष्वेवावतिष्ठते वस्तुधर्मस्य सतो गत्यन्तराभावात्। भवत्वेवमेवेति चेत्, न; प्रकारान्तरसद्भावे कथमविनाभावस्य व्यापकानुपलब्धेरपि प्रसिद्धिः नित्याऽनित्यात्मकेऽपि भावे सति कृतकत्वस्य क्षणिकत्वेनैव व्याप्तयोगात्?

भागासिद्धं चानपेक्षत्वम् क्षणिकस्वभावापेक्षया कृतकानामपि केषाञ्चिदुभयात्मकत्वेन क्षणिकस्वभावाभावात्। विपक्षाद् व्यापकानुपलब्धेर्व्यावृत्तस्य हेतोरभीष्ट एव साध्याव्यभिचार इति चेत्, अक्षणिकवादिनोऽक्षणिकाव्यभिचारः किमेवं न स्यात्? तेनापि शक्यमेवमभिधातुम्–क्रमयौगपद्याभ्यां क्षणिकेऽर्थक्रियाविरोधः। तथाहि–एकसामग्र्यन्तर्गतयुगपदनेककार्यकारिण एकस्य स्वभावभेदमन्तरेण कार्यस्य भेदायोगात् स्वभावभेदवाऽ(देचाऽ)नेकत्वप्रसङ्गान्नैकस्य युगपदनेककार्यकारित्वम्। कारणस्वभावशक्तिभेदमन्तरेणापि कार्यस्योपादानभेदाद् भेदमिच्छता शक्तिभेदोऽभ्युपगत एव उपादान-सहकारिभावेनानेककार्यजन्मन्येकस्य वस्तुक्षणस्योपयोगाभ्युपगमात् उपादान-सहकारिभावयोश्च परस्परं भेदात्। न चैकत्रोपादानभाव एवान्यत्र सहकारिभावः, कारणक्षणस्य

१–ना बुद्धियुक्ते–वा० बा० हा०।–ना युक्ते–आ० वि०। २ अर्थ वि–वा० बा० हा०। ३ विनो गो–वा० बा० हा० विना। ४ अर्थ स–वा० बा०। ५–म्बन्धैरपि भां० मां० विना। ६–ज्ञानं न जन्य–भां०मां०।–ज्ञानं जन्य–वा० बा० हा०। ७–म्बन्धान–भां० मां० वा० बा० हा० विना। ८–म्बन्धानि–भां० मां० वा० बा० हा० विना। ९–न्तीति क–भां० मां०।

१० "अर्थक्रियाविरोधश्चाणूनामन्योन्यमसम्बन्धतो जलधारणाहरणाद्यर्थक्रियाकारित्वानुपपत्तेः। रज्जुवंशदण्डादीनामेकदेशाकर्षणे तदन्याकर्षणं चासम्बन्धवादिनो न स्यात्"–प्रमेयक० पृ० १५२ प्र० पं० ५।

११–वादिनां आ० वि०।–वादिना चेक–वा० बा०। १२–णस्य स–वा० बा० हा०। १३–सत्तोप–वा० बा०। १४–लादेवासा–वा० बा०। १५–क्षणोऽस्त्य सम्ब–आ० वि०। १६–म्भविना भा–वा० बा०। १७–वर्तेत न भां०मां०। १८ न वा–वा० बा०। १९–या विना–बा० हा० विना। २०–स्य ततो वि०। २१–न्तरास–भां० मां० विना। २२–द्धं वा–मां० आ०। २३–र्यस्याभेदा–वा० बा०। २४–गात् अभावभेद वा–भां० मां०।–गात् स्वभावभेदे वा वि० सं०। २५–नभेदाभेदमि–वा० बा० हा०।–नभेदमि–आ० वि०। २६–नानैक–भां० मां० विना। २७–स्परभेदा–भां० मां०।

तथाभ्युपगमे सहकार्युपादानभावयोरभेदात् तत्कारणं सहकारि उपादानं वा यतः प्रसज्येत यद्युपादानं न तर्ह्युपादानभेदात् कार्यभेदः सर्वं प्रत्युपादानत्वात्। सहकारित्वे चोपादानस्यैवाभावात् कुतस्तद्भेदात् कार्यभेदः? एवमपि यदि क्षणस्यैकत्रोपादानभाव एवान्यत्र सहकारिभाव इति न शक्तिभेदस्तर्ह्यक्षणिकस्याप्येकदैककार्यकारित्वमेवान्यदाऽन्यकार्यकारित्वमिति क्रमेणानेककार्यकारिणो न स्यात् शक्तिभेदः। न च पूर्वापरकार्यकारित्वयोरभेदादुत्तरकार्यकारित्वस्य प्रागेव सम्भवात् तदैवोत्तरकार्योत्पत्तिः स्यादिति वक्तव्यम्, क्षणिकत्वेऽप्यस्य समानत्वात्। तथाहि–कारणसत्ताकाले तदनन्तरभाविकार्यकारित्वस्य सद्भावात् तदैव तत्कार्योत्पत्तिः स्यादिति कार्य–कारणयोरेककालता-प्रसक्तिः। न चोपादानभेदादेव कार्यस्य भेदः, गोदर्शनसमयेऽश्वं विकल्पयतो मनस्कारलक्षणोपादानभेदाभावेऽपि सविकल्पाऽविकल्पयोः परेण भेदाभ्युपगमात्, तद्भेदेऽपि च तदुत्तरकालभाविनोऽनुसन्धानस्याभेदान्नोपादानभेदाद् भेद एवोपादेयस्य। अतः शक्तिभेदादेव भेदः कार्यस्य, शक्तिश्च भिन्नाऽभिन्ना शक्तिमतः–तद्ग्रहणेऽप्यग्रहणाद् भिन्ना, कार्याऽन्यथानुपपत्त्या च तत्रैव प्रतीयमाना सा ततोऽभिन्ना।

व्यतिरेके शक्तिमतः शक्तेः अशक्तात् कार्यानुपपत्तेः। न च व्यतिरिक्तायाः शक्तेरेव कार्योत्पत्तिर्भविष्यति, शक्तिमतोऽकारकत्वेनावस्तुत्वप्रसङ्गात्। न च शक्तिमतोऽपि कारकत्वम्, तस्याऽसामर्थ्यात्। न च शक्तियोगात् तस्य शक्तत्वम्, अशक्तस्य भिन्नशक्तियोगेऽपि शक्तत्वानुपपत्तेः शक्तेस्तत्रानुपयोगात्; तदुपयोगे वा शक्तितः शक्तिमत उत्पत्तिरभ्युपगता स्यात्। तथा च स्वहेतोरेव शक्तस्योत्पत्तिरभ्युपगन्तव्या किमर्थान्तरभूतशक्तिपरिकल्पनया? शक्तस्य च स्वहेतोरेव तस्योत्पत्तौ किं शक्तियोगपरिकल्पनेन?

नापि शक्तिमतः शक्तिरभिन्नैव शक्तिमद्ग्रहणेऽपि अगृहीतत्वात्, शक्तिः गृहीतैव तद्ग्रहणे केवलमतत्फलसाधर्म्यात् विप्रलब्धो न तां व्यवस्यति, असदेतत्; सर्वतो व्यावृत्तवस्तुवादिनां विप्रलम्भनिमित्तस्य वस्तुभूतसाधर्म्यस्याभावात्। न चैकपरामर्शप्रत्ययहेतुत्वेन साधर्म्यमभ्युपगन्तव्यम्, चक्षूरूपाऽऽलोक–मनस्कारेष्वपि तस्य प्रसक्तेः। तस्माद् भ्रान्तिनिमित्ताभावाद् यदि शक्तिरनुभूता तदा तथैव निश्चीयेत; अनिश्चयान्नानुभूतेत्यवसीयते, अतस्ततः कथञ्चिदभिन्नापि। न च भेदाभेदयोर्विरोधः, अबाधिताकारप्रत्ययविषयत्वात् तयोः यथा परपक्षे एकक्षणस्य स्व–परकार्यकरणाऽकरणयोः। न चैकक्षणस्य स्वकार्यकरणमेव परकार्याकरणमित्यादि वक्तव्यम्, विहितोत्तरत्वात्। निरंशे च क्षणे शक्तिभेदादपि न कार्यस्य भेदः, शक्तिभेदाभावात् निरंशत्वादेव। तन्न क्षणिकस्याक्रमेकारित्वम्। नापि क्रमेणकार्यकारित्वं तस्य युक्तम्, द्वितीयक्षणे क्षणिकस्याभावात्। अनेककालभाविकार्यकारित्वं ह्येकस्य क्रमकारित्वम् तच्चैकक्षणस्थायिनि भावे कथमुपपद्येत? क्रमवत्क्षणापेक्षया स्वतोऽक्रमस्यापि क्रमकारित्वे क्षणिकस्य अक्षणिकस्यापि क्रमवत्सहकार्यपेक्षयाऽक्रमस्यापि क्रमकारित्वं किं नेष्यते? स्वतोऽक्षणिकस्याऽक्रमत्वेऽक्रमेणैव किं न कार्योत्पत्तिः अनाधेयातिशयस्याक्षणिकस्य कालान्तरसहकारिप्रतीक्षाऽयोगादिति? न, अक्षणिकस्यानाधेयातिशयस्यापि कार्यकारित्वस्य कालान्तरनियतत्वात् क्षणिकस्यैव सहकारित्वस्य चैककार्यकारित्वलक्षणत्वाद् युक्ता सहकारिप्रत्ययापेक्षाऽक्षणिकस्य। क्षणिकस्यापि ह्यनतिशयत्वात् सहकारिणि कालान्तरे वा नातिशयाधायकत्वेना-

१–दान्न का–वि०। २ न नह्युपा–वा० बा०। ३–नस्य चाभा–वि०। ४–त् कृतस्त–वा० बा०। ५–दा कारि–आ० वि०। ६–णान्येका–वा० बा०। ७–त्वयोर्भे–भां० मां० वा० बा० हा० विना। ८–कत्वे वास्य समा–वा० बा० हा०। ९–लत्वप्र–भां० मां०।–लप्र–वा० बा० हा०। १०–गोर्द–भां० मां०। ११–यतो नमस्का–भां० मां० विना। १२–मतः तग्रहणाद्धि–भां० मां० विना। १३ व्यतिरेकिके शक्ति–भां० मां० वा० बा० हा० विना। १४ असत्कार्या–वा० बा०। १५–स्तुप्रस–आ० वि०। १६–पत्तिः भां० मां०। १७–क्तस्य हे–वा० बा०। १८–व प्रशक्तिमद्ग्रहणेऽपि अगृहीतत्वा शक्तेः ऽगृहीतैव वा० बा०। १९–लब्धे न आ०।–लब्धौ न वि०। २०–स्तुरूपसा–भां० मां०। २१–श्चीयते हा० विना। २२–भूते ब्यव–आ० वि०। २३ अतः स्वतः कथ–वा० बा०। अतस्तत् कथ–भां० मां०। २४ एव लक्ष–वा० बा०। २५ प्र० पृ० पं० ४। २६–मपकारि–वा० बा० हा०। २७–मकारि–आ०। २८–पद्यते भां० मां० विना। २९–क्रमवत्वे–भां० मां०।–क्रमाव क्र–आ०। ३०–कारितप्र–वा० बा०। ३१–कस्यैव सह–वा० बा० हा०। ३२–त्वस्य वैक–आ० वा० बा०।–त्वस्यैवैक–वि०। ३३–णस्याशुक्ता भां० मां०।

पेक्षा—क्षणस्याविवेकात्—किन्तु कालान्तरभाव्येककार्यकारित्वेन सहकारिसहायस्यैव च सामर्थ्यात् अन्यथा सामग्री न ज्ञ (न ज) निका स्यात्, एकस्मादेव कार्योत्पत्तेः द्वितीयक्षणापेक्षा च न स्यात्, आद्यक्षण एव कार्यस्योत्पत्तेः। परस्परोपकारित्वं च सन्ताने एककार्यकारित्वमेव, क्षणात् सहकारिणः क्षणस्यापि कारिणोऽनुपकारात् सर्वत्रैकार्थकारित्वमेव सहकारित्वम्, अतोऽनुपकारिण्यपि सहकारिणि कालान्तरे वाऽपेक्षासम्भवात् क्रमवत्सहकार्यपेक्षयाऽक्रमस्यापि क्रमकारित्वं किं न भवेत्? न चानेकस्मात् क्रमेणानेककार्योत्पत्तौ क्रमकारित्वं युक्तम्, अतिप्रसङ्गात्। अक्षणिकेऽपि चानेककालभाविन्यस्य प्रसङ्गस्य समानत्वात्। न चैकत्वाध्यवसायेनैकस्यैव क्षणप्रबन्धस्य क्रमकारित्वं युक्तम्, भिन्नानामभेदाध्यवसाये निमित्ताभावात्। न सादृश्यं तन्निबन्धनम्, सर्वथा सादृश्यस्य पूर्वोत्तरक्षणेष्वभावात्, भावे वोत्तरक्षणस्य सर्वथा पूर्वक्षणसदृशत्वात् पूर्वक्षणवत् पूर्वकालताप्रसक्तिरिति सर्वस्या(स्याऽपि) क्षणप्रबन्धस्यैककालत्वान्न कार्यकारणभावः। कथञ्चित् सादृश्येऽनेकान्तसिद्धिः, नाभाद्यर्थयोरपि सादृश्यनिमित्तैकत्वाध्यवसायश्च स्यात्, ततोऽभेदाध्यवसायाभावात् तदवस्थ एवातिप्रसङ्गः। तदेवं क्षणिके क्रम–यौगपद्याभ्यामर्थक्रियाविरोधात् ततोऽर्थक्रियालक्षणसत्त्वविशिष्टं कृतकत्वं निवर्तमानं गत्यन्तराभावादक्षणिकाद्यवकाशमिति साध्यविपर्ययसाधनाद् विरुद्धं स्यात्।

अनैकान्तिकं च क्रम–यौगपद्याभ्यामनर्थक्रियाकारिणोऽपि कार्यत्वसम्भवात्। तथाहि—शब्द–विद्युत्–प्रदीपादिचरमक्षणानामन्यत्रानुपयोगेऽप्यवस्तुत्वेन नाकार्यत्वम् अशेषतत्सन्तानस्यावस्तुत्वप्रसङ्गात्। न च समानजातीयकार्याऽनारम्भेऽपि योगिविज्ञानलक्षणविजातीयकार्यका(क)रणान्न सर्वथाऽनर्थक्रियाकारित्वं शब्दादिचरमक्षणानाम्, सजातीयानुपयोगे विजातीयेऽपि तेषामनुपयोगात्, उपयोगे वा न रसादेरेककालस्य रूपादेरव्यभिचार्यनुमानं स्यात्, रूपादेरपि शब्दाद्यन्तक्षणवत् सजातीयकार्यानारम्भसम्भवाद् रूप–रसयोरेकसामग्र्यधीनत्वेन नियमेन कार्यद्वयारम्भकत्वेऽन्यत्रापि प्रसङ्गः योगिविज्ञान–शब्दाद्यन्तक्षणयोरपि समानकारणसामग्रीजन्यत्वात्। न चैकत्रानुपयोगिनश्चरमस्यान्यत्रोपयोगो युक्तः; अन्यथा ज्ञानान्तरप्रत्यक्षज्ञानवादिनोऽपि स्वज्ञानानुपयोगेऽपि ज्ञानस्यार्थज्ञाने उपयोगसम्भवात् स्वज्ञानजननासमर्थस्य ज्ञानस्यार्थज्ञानजनने सामर्थ्यसम्भवान्नैवार्थचिन्तनमुत्सीदेत्। ततोऽनर्थक्रियाकारिणोऽक्षणिकस्य यद्यवस्तुत्वेनाकार्यत्वम् चरमक्षणस्यापि तत् स्यात् सर्वथाऽनर्थक्रियाकारित्वात्। अथानर्थक्रियाकारिणोऽपि चरमक्षणस्य कार्यत्वम् न तर्ह्यक्षणिके कृतकत्वं क्षणिकवादिना प्रतिक्षेप्तव्यम् न्यायस्य समानत्वात्।

सन्दिग्धव्यतिरेकश्च 'कृतकत्वात्' इति हेतुः, विपक्षे बाधकप्रमाणाभावात्। व्यापकानुपलब्धिर्हि विपक्षे बाधकं प्रमाणम्, तस्याश्च विपक्षे क्षणिकत्वलक्षणे प्रत्यक्षवृत्तिर्बाधकं प्रमाणम्। न च विपक्षे क्षणिकत्वे प्रत्यक्षवृत्तिः सिद्धा, क्षणक्षयात्मनि प्रत्यक्षनिश्चिते क्रम–यौगपद्याभ्यामर्थक्रियोपलब्धेरनिश्चयात्। नं चाक्षणिकस्यासत्त्वात् प्रकारान्तरस्य चाभावात् क्षणिकेष्वेवार्थक्रियोपलब्धिरिति वक्तुं शक्यम्, अक्षणिकस्याद्याप्यभावासिद्धेः। व्यापकानुपलब्धेस्तदभावसिद्धिश्चेत्, न; विपक्षे प्रत्यक्षवृत्तौ व्यतिरेकसिद्धेरनुपलब्धेरक्षणिकाभावगतिः तत्प्रतिपत्तौ च गत्यन्तराभावाद् विपक्षे प्रत्यक्षप्रवृत्तिरितीतरेतराश्रयदोषप्रसक्तेः। अथाक्षणिकस्यासत्त्वसाधने सत् (सन्) विपक्षो भवति न क्षणिकः, सति च विपक्षेऽध्यक्षवृत्तिरस्त्येव, नैतत् सारम्; यतो द्वैराश्ये कोऽपरो भावः क्षणिकव्यतिरिक्तः सन् योऽक्षणिकाभावसाधने विपक्षः स्यात्? गत्यन्तरसद्भावे वा कथं प्रकारा-

१–कार्याकारि–वा० बा०। २–मश्री त जनिका वि०।–मश्रीतः जनिका आ०।–मश्री जनिका वा० बा० हा०। ३ स्यादेककार्यो–वा० बा०। ४–या क्रम–भां० मां० विना। ५ भावे चोत्तर–भां०। ६ सर्वस्य क्षण–वि० सं०। ७–यश्च ततो आ० वि०। ८ तदेतदेवं वा० बा० हा०। ९–क्षणं स–आ० भां० मां०।–क्षणसत्त्वं निवर्त–हा०। १०–नत्वे नि–भां० मां० वा० बा० विना। ११ कार्यत्वया–आ० हा० वि०। कार्यतया–वा० बा०। १२–ज्ञानदर्शनवा–आ० हा० वि०। १३–पयोगि पि ज्ञा–वा० बा० हा०।–पयोगिज्ञा–आ० वि०। १४–त्वादि हे–वा० बा०। १५ न वा–भां० मां० विना। १६–सिद्धानु–आ०। १७–लब्धे क्ष–वा० बा०। १८ सन् विपक्षे भव–वि०। सत्र विपक्षे भव–आ०। सन्धिक्षेपो भव–वा० बा०। १९–ति न क्षणिक सति वा० बा०।–ति न क्षणिके सति वि०।–ति तत्क्षणिके सति आ०। २०–क्तः सत् योऽक्ष–वि०।

म्तराभावाद् व्यापकानुपलब्धेरक्षणिकाद् व्यावर्त्तमानं सत्त्वमनित्यत्वं व्याप्नुयात् तदन्यस्यापि सत्त्वात् ?

अथ क्षणिक एव भावः प्रतिक्षणमनुपलक्षितविनाशः सत्त्वमात्रेणोपलक्ष्यमाणो विपक्षः, तत्र क्रम-यौगपद्याभ्यामर्थक्रियोपलब्धिरस्तीति । ननु कथं क्षणिकत्वेन विपक्षस्यानिश्चये तत्रैवार्थक्रियोपलब्धिर्नान्यत्रेत्यवसीयते तयोर्विशेषानुपलक्षणात् अक्षणिकत्वप्रतीतेरुभयत्राविशेषात् ? पारिशेष्यादत्रैवार्थक्रियोपलब्धिश्चेत्, कुतः पारिशेष्यसिद्धिः ? यदि व्यापकानुपलब्धेस्तदेतरेतराश्रयत्वं प्रतिपादितम् । अतो विपक्षे बाधकप्रमाणाभावात् सन्दिग्धव्यतिरेकः 'कृतकत्वात्' इति हेतुः । न चाक्षणिके क्रम-यौगपद्याभ्यामर्थक्रियाकारिण्यर्थक्रियाविरोधः, तत्रैव क्रमाऽक्रमजन्मनां कार्याणां जननात् । अथाक्षणिकजन्मनां कार्याणामक्रमेणैव स्याज्जन्म तज्जननस्वभावस्याक्षणिकस्य सर्वदा भावात् अविकारिणोऽन्यानपेक्षत्वादविरतिप्रसङ्गश्च अन्यथा द्वितीयादिक्षणेऽजननादवस्तुत्वप्रसक्तिः, तस्मिन्नपि क्षणे स एव प्रसङ्गः तदैव तज्जन्मनां सर्वेषामप्युत्पत्तिः तदुत्पादेनस्वभावस्य प्रागपि सद्भावादित्यतो न कथञ्चिदक्षणिकस्यार्थक्रिया, असदेतत्; क्षणवदक्षणिकस्याविकारिणोऽपि न विरोधः सहकार्यपेक्षया, नहि क्षणस्यापि विकारोऽस्ति, अपेक्षणीयात् तस्य विभागाभावात् विभागित्वे वा क्षणस्य न क्षणः स्यात् । न वा विभागिनोऽपि क्षणस्य विकारित्वम्, तथाभ्युपगमेऽक्षणिकस्याप्यपेक्षणीयकृतो विकारोऽक्षणिकविरोधी न भवेत् । अविकारिणोऽपि क्षणस्य सापेक्षत्वे पराऽपेक्षाऽविकारिणोऽप्यपेक्षणीयादक्षणिकस्यापि स्यात् । ततश्च कथमक्षणिकस्याविकारिणोऽपेक्षणीयात् क्रम-यौगपद्याभ्यामर्थक्रियाविरोधो भवेत् ? सापेक्षत्वे हि यथाप्रत्ययं क्रम-यौगपद्याभ्यामर्थक्रियाकारित्वमक्षणिकस्य युक्तमेव । अत एव नाविच्छेदेन जनकः, सर्वदा सहकारिप्रत्ययसन्निधानायोगात् ।

केवलस्यैव सामर्थ्यं सहकार्यपेक्षया न किञ्चिदिति केवल एव कार्यं कुर्यात् । असामर्थ्येऽन्यसाहित्येऽपि न सामर्थ्यम् अनाधेयातिशयत्वेन पूर्वापरस्वभावपरित्यागोपादानाभावात् उभयथापि व्यर्थमक्षणिकस्यार्थान्तरापेक्षणमिति चेत् क्षणिकेऽपि समानोऽयं प्रसङ्गः । तथाहि—क्षणयोरपि प्रत्येकमसामर्थ्ये एककालयोः सहितयोरपि तयोरसामर्थ्यम् अप्रच्युताऽनुत्पन्नपूर्वापररूपत्वात् । समर्थयोरपि किं परस्परापेक्षयेति तयोरन्यतरत् केवलमेव जनयेत् नापरम्, तद्देशावस्थानेऽपि वैयर्थ्यात् कार्यनिष्पत्तेरन्यतरेणैव कृतत्वात् । अतो न सामग्रीजनिका भवेत् । तथा चैकस्मादेव कार्यस्योत्तरोत्तरपरिणामात्मतयोत्पत्तेर्न परिणामेऽपि कारणान्तरापेक्षा भवेत्, अनपेक्षै(क्ष्ये)व कारणान्तराणि परिणामान्तराणि जनयेत् केवलस्यैव सर्वत्र सामर्थ्यात् । असामर्थ्येऽविभागस्यान्येनापि न किञ्चित् क्रियत इत्यकिञ्चित्करोऽपि तदेककार्यकरणादन्यो यदि तदुपकार्यभ्युपगम्येत तदाऽक्षणिकस्याप्येवं किमुपकारि सहकारिकारणं न भवेत् ? परस्परमेकसामग्र्यधीनतोपकारस्तदुपकारवतोः क्षणयोः, तदेव स्वकार्योपयोगित्वं तयोरिति चेत्, तर्हि अन्त्यक्षणस्यापि स्वविषयसर्वज्ञज्ञानोत्पादनेनैकसामग्र्यधीनतालक्षण उपकारोऽस्तीति सजातीयकार्योपयोगित्वं किं न स्यात् ? अथैकसामग्र्यधीनतोपकारित्वेऽप्यसामर्थ्यान्न सजातीयकार्योपयोगित्वं चेत्, नन्वेवमेकत्रासमर्थस्यान्यत्र योगिविज्ञाने स्वग्राहिणि कथं सामर्थ्यमिति वक्तव्यम् ? इत्थंभूतस्यापि सामर्थ्ये नैयायिकस्यापि स्वग्राहिज्ञानजननाऽसमर्थस्यार्थज्ञाने सामर्थ्यं किं न स्यात्—येना(येन ना)र्थचिन्तनमुत्सीदेदिति

१ पृ० २५५ पं० ३२ । २-त्वादिहे-भां० मां० ।-त्वादिहे-वा० बा० । ३ **न वा**-वा० बा० आ० हा० । ४ **तथैव** भां० मां० । ५-**दनास्व**-वा० बा० । ६-**तत् क्षणिकस्या**-वा० बा० । ७-**र्यपेक्षणे न हि** भां० मां० । ८ **क्षणकस्या**-भां० मां० वा० बा० विना । ९ **क्षणिकस्य** वि० । **क्षणिस्य** हा० । १०-**क्षया कृतो** वा० बा० । ११-**कारो न भ**-भां० मां० विना । १२-**पि सर्वस्य सा**-वा० बा० । १३-**कस्य वि**-वा० बा० हा० ।-**कस्यो वि**-आ० । १४-**त्यये क्र**-वा० बा० । १५-**मर्थ्ये इन्यसा**-हा० ।-**मर्थ्ये इत्यसा**-आ० वि० । १६ **क्षणेकयोरपि** वा० बा० । १७-**कसा**-आ० हा० वि० । १८-**मर्थ्यं** वा० बा० । १९-**क्षयोपि तयो**-वा० बा० । २०-**तरत्वात् के**-आ० ।-**तरत्वत् के**-वि० ।-**तरथेत् के**-हा० । २१-**त् परं** भां० मां० वा० बा० विना । २२-**क्षाभावात्** भां० मां० । २३-**नपेक्षोष का**-वा० बा० ।-**नपेक्षेव का**-हा० । २४ **तदेवकार्यकारणा**-वा० बा० । २५-**कारिकरणं** वा० बा० । २६ **अन्तक्ष**-वा० बा० । २७-**ज्ञानोपादानेनैक**-भां० मां० वा० बा० । २८-**त्वं न** भां० मां० वा० बा० विना । २९-**कस्य सा**-वा० बा० ।

तस्य दूषणं स्यात्—इत्येकत्र समर्थस्यान्यत्रापि सामर्थ्यमभ्युपगन्तव्यम् अन्यथैकत्रापि न स्यादित्यवस्तुत्वं तस्य भवेत् । न च सर्वत्रैकसामग्र्यधीनतोपकारः, भिन्नदेशकारणकलापसमवधानहेतूनामेकसामग्र्यधीनतोपकाराभावेऽपि स्वकार्योपयोगोपलब्धेः । न च तेषामप्येकसामग्र्यधीनतोपकारः सम्भवति, अन्वय-व्यतिरेकाभ्यां परस्परोत्पादने सामर्थ्यानवधारणात् तेषाम्; नहि कुशूलादिस्थस्य बीजादेरुदकादिभावानुविधानेन प्रतिसन्धानमनुभूयते तथापि तत्कल्पनायामतिप्रसङ्गः ततो नैकसामग्र्यधीनताप्युपकारः इत्यनपेक्षोऽनुपकारी स्यात्, अपेक्षत्वे अक्षणिकस्याप्यपेक्षाप्रतिक्षेपोऽयुक्तः स्यात् । अथ क्षणयोः पृथक् सामर्थ्यं नास्ति, स्वहेतोः सहितयोरेवोत्पन्नयोः पृथगसमर्थयोरपि सामर्थ्यमभ्युपगम्यते, नन्वेवमक्षणिकस्यापि तदन्यसहायस्यैव सामर्थ्यं किं नाभ्युपगम्यँते ? स्वहेतुप्रतिनियमाद् युक्तं क्षणिके सामर्थ्यम् नाक्षणिक इति चेत्, नन्वेवमक्षणिकेऽपि स्वहेतुप्रतिनियमात् सामर्थ्यं को विरोधः ? स्वहेतोस्तदन्यापेक्षया समर्थस्योत्पन्नस्याक्षणिकस्यान्यसन्निधिकाल एवाऽक्षेपेण कार्यकारित्वं स्यात् । अन्यानपेक्षत्वादपेक्षणीयस्यापि सन्निहितत्वादुत्तरोत्तरपरिणामस्याप्येकत्वेनासत्त्वादिति चेत्, न; कालान्तरभाविकार्यकारित्वलक्षणस्याक्षणिकस्यान्यानपेक्षत्वेऽपि कालान्तरापेक्षत्वात् क्षणवदक्षेपेण न कार्योत्पादकत्वम् । यथा हि अन्यसहायस्याद्ये क्षणे समुत्पन्नस्य क्षणस्यान्यानपेक्षत्वेऽपि द्वितीयक्षणापेक्षत्वान्न प्रथमक्षण एव कार्यारम्भकत्वम् अन्यथा कार्य-कारणयोरेकदैवोत्पत्तेर्द्वितीयक्षणे जगद् वस्तुशून्यम् अक्षणिकं वा स्यात् तथाऽक्षणिकस्यापि कालान्तरापेक्षत्वान्नोत्तरपरिणामापेक्षकार्योऽक्षेपोत्पादकत्वम् । अथ प्रागकारकस्वभावस्य पश्चादपि कथं कारकत्वम् अक्षणिकस्य कारकाकारकावस्थाभेदादेकत्वहानेः ? न; अस्यान्यत्रापि समानत्वात् । तथाहि—आत्मसत्ताकालेऽकारकस्वभावस्यापि क्षणस्य द्वितीये क्षणे कारकत्वम् अन्यथैककालत्वं कार्यकारणयोः स्यादित्युक्तम् । न चैकदा कारकत्वमेवान्यदाऽकारकत्वं तत्रेति युक्तम्, अक्षणिकेऽप्यस्य समानत्वात् । नापि क्रमेणाऽक्षणिकस्यानेककार्यकारित्वमयुक्तं तत्स्वभावभेदेनैकत्वहानिप्रसक्तेरिति वक्तव्यम्, यतो नाक्षणिकस्योत्तरकालभाविकार्यकारित्वमन्यैर्देककार्यकारित्वात् यतः स्वभावभेदादेकत्वं न स्यात् अक्रमेणानेककार्यकारि एकक्षणवत्, क्षणे ह्येकत्रोपादानभाव एवान्यत्र सहकारिभाव इत्यनेककार्यकारित्वेऽपि न स्वभावभेदः । पूर्वापरकार्यकारित्वयोरभेदेऽप्यक्षणिके न तद्भावभाविकार्याणामक्रमेणोत्पत्तिर्युक्ता, तदुत्पत्तिप्रत्ययवैकल्यात् । तथाहि—यँद् यदोत्पित्सु कार्यं तत् तँदैव तदुत्पत्तिप्रत्ययापेक्षयाँ, अक्षणिकस्य कर्तुं सामर्थ्यं प्रागेवास्तीति न स्वभावभेदः अक्रमेणँ कार्योत्पत्तिर्वा । तदुक्तम्—

"यद् यदा कार्यमुत्पित्सु तत् तदोत्पादनात्मकम् ।
कारणं शक्तिभेदेऽपि न भिन्नं क्षणिकं यथा" ॥ [ ]

अथ विद्यमानोऽपि कार्यकारणभावोऽक्षणिके दुरवसेयः व्यतिरेकाभावात्, असदेतत्; उत्पत्तिमतोऽव्यापिनोऽक्षणिकस्योत्पत्तेः प्रागन्यत्र वा सतो देशकालव्यतिरेकात् कथं व्यतिरेकाभावः ? कालव्यापिनोऽपि च नित्यस्य देशव्यतिरेकात् सर्वत्र चायमेव व्यतिरेको न व्यतिरेकान्तरमस्ति । यतो न कश्चिदश्यादिकारणसामान्यव्यतिरेकी कालो विद्यते, कालव्यतिरेकिणो विशेषस्यैव कारण-

१-**कार भि**-भां० मां० वा० । २-**स्परोपदाने** वा० बा० । ३ **कुसूला**-वा० बा० । ४ **नैका सा**-वा० बा० । ५-**स्यापे**-वि० । ६-**पो युक्तः** हा० वि० । ७-**म्यते स्या स्व**-वा० बा० । ८ **नन्वक्ष**-भां० मां० विना । ९-**न्नस्याऽन्यसन्नि**-वा० बा० । १०-**कन्यसन्नि**-आ० हा० वि० । ११-**स्यादतोऽन्या**-वा० बा० । १२-**न्यापक्ष**-वा० बा० । १३-**क्षत्वे का**-आ० हा० वि० । १४-**राक्षेपत्वा**-वा० बा० । १५-**स्यात्मानपे**-भां० मां० विना । १६ **द्वितीयक्षणत्वान्न** वा० बा० । १७-**णापेक्षान्न** आ० हा० वि० । १८-**तीये क्ष**-भां० मां० । १९-**त्तरोत्तरा(र)परि**-वा० बा० । २०-**कार्येऽपेक्षोत्पाद**-भां० मां० । २१-**आत्मन स**-वा० बा० । २२-**स्या क्ष**-आ० हा० वि० । २३ प्र० पृ० पं० १५ । २४-**न्यदैक**-वा० बा० विना । २५-**णां क्र**-वा० बा० । २६-**यविकल्प्यात्** आ० वि० ।-**यविकल्पात्** हा० । २७ "यथैव हि क्षणिकं कारणं यद् यदा यत्र यथोत्पित्सु कार्यं तत् तदा तत्र तथोत्पादयति, तस्यैवंविधसामर्थ्यसद्भावात् तत्सामर्थ्यापेक्षिणः कार्यस्य स्वकालनियमः सिध्यतीति कल्प्यते तथा नित्यमपि कारणं यद् यदा यत्र यथा फलमुत्पित्सु तत् तदा तत्र तथोपजनयति, तस्य तादृशसामर्थ्ययोगात् तत्सामर्थ्यापेक्षिणः फलस्य कालनियमः किं न कल्पयितुं शक्यः ?"—अष्टस० पृ० ९० पं० ८ । २८ **तदेव** भां० मां० । २९-**या क्ष**-भां० मां० वा० बा० विना । ३०-**ण वा कार्योत्पत्तिः तदु**-भां० मां० । ३१-**त्र चासतोपदेश**-भां० मां० ।

त्वेऽपि सामान्योपादानम् सामान्य एव प्रतिबन्धावधारणाद् अन्यथा व्याप्त्यसिद्धिः। यतो यदेव प्रतिबन्धावधारणकाले प्रतिबद्धस्य प्रतिबन्धविषयतयाऽवधार्यते तस्यैव कालव्यतिरेकोऽन्यो वा दर्शनीयः। न चास्ति तथाभूतस्य कालव्यतिरेक इति सर्वत्र देशव्यतिरेक एव युक्तः अस्य सर्वत्र सम्भवात्, व्यापिनोऽपि नित्यस्याव्यतिरेकात् सामर्थ्यानवधारणेऽपि तत्सम्भवाविरोधात् सन्दि-
५ग्धासिद्धोऽक्षणिको हेतुः स्यात्। अथान्वयादपि सामर्थ्यं निश्चीयते न केवलादेव व्यतिरेकात् अतिप्रसङ्गात् न चात्रान्वयोऽस्ति, प्रागविकलेऽपि कारणे कार्यानुत्पत्तेः अविकले च कारणे कार्यमनुत्पन्नं तस्याजनकात्मकत्वं सूचयति, पश्चादपि जनकत्वविरोधात् तस्यैकस्वभावत्वात्, न; अस्य दूषणस्यान्यत्रापि समानत्वात्। तथाहि-प्रथमे क्षणेऽविकलेऽप्यन्त्यकारणसामग्रीविशेषे कार्यानुत्पत्तेरविशेषात् द्वितीयेऽपि क्षणे कार्योत्पत्तिविरोधः स्यात्। एवमन्वय-व्यतिरेकाभ्यामव्यापिनि
१०नित्येऽक्षणिके च सामर्थ्यसिद्धेः असिद्धोऽर्था(र्थ)क्रियाविरोध इत्यर्थक्रियालक्षणसत्त्वविशिष्टं कृतकत्वं न निवर्तयितुमलम्। एतेन सामान्यस्य नित्यत्वादनर्थक्रियाकारित्वेन निरस्तमवस्तुत्वम्। न च सामान्यभाविनः कार्यस्यैवासम्भवात् तस्यानर्थक्रियाकारित्वम्, न नित्यत्वात् न हि जातिर्वाहदोहादिकार्यकारिणी अविशेषेऽपि तस्याः कार्यविशेषात् विशिष्टे वा तदेकत्वहानेरिति वक्तुं युक्तम्, यतो न वाह-दोहादिकमज्ञानरूपमेव कार्यम् यतस्तदभावादवस्तुत्वं स्यात् यावता विज्ञानलक्षणमपि
१५कार्यमर्थानामस्तीति कथं तत्करणेऽपि सामान्यस्यावस्तुत्वम् शब्दाद्यन्तक्षणवत्? अथ केवलादेव सामान्यात् तद्ग्राहिज्ञानसद्भावे तदेव तेन गृह्यते न कदाचिद् व्यक्तिरिति व्यक्तेस्तत्सम्बन्धित्वेनाग्रहणात् न व्यक्तौ ततः प्रवृत्तिः स्यात्, व्यक्तिसहायात् सामान्यात् तज्ज्ञानोत्पत्तौ कथं व्यक्तीनामेकज्ञाने प्रत्येकं तासामभावेऽपि सामान्यसद्भावभाविनि सामर्थ्यावधारणम्? इत्युभयथापि ज्ञानक्रियाऽसम्भवात् कथं तथापि तद्वस्तुत्वम्? असदेतत्; व्यक्तीनामन्यतमव्यक्तिसव्यपेक्षस्यैव सामा-
२०न्यस्य तत्र सामर्थ्यात् कुविन्दादेरिवान्यतमवेमाऽपेक्षस्य, नहि प्रत्येकं वेमाऽभावे कुविन्दः पटं करोतीति कुविन्दादेव पटोत्पत्तिः, वेमरहितादनुत्पत्तेः। एवमेकैकव्यक्त्यपाये विज्ञानोत्पत्तावपि न केवलमेव सामान्यं तद्धेतुः अन्यतमव्यक्त्यपेक्षस्यैव सामर्थ्यात्, अनुपकारकस्यानपेक्षणीयत्वात्। सामान्योपकारे तत्तस्तज्ज्ञानस्यैवोपकारः किं नेष्यते? किं सामान्योपकारेण?

भिन्नानामेकार्थक्रिया न सम्भवतीति सामान्यमेकमिष्टम्, ताश्चेद् व्यक्तयो नानात्वेऽप्येकं
२५सामान्यमुपकुर्वन्ति कस्तर्ह्यासां तज्ज्ञानेनापराधः कृतः यतस्तास्तज्ज्ञानमेव नोपकुर्वन्ति? कार्यश्च तासां प्राप्तः सामान्यात्मा ततो लभ्यस्यातिशयस्यानर्थान्तरत्वात्, अर्थान्तरत्वे सम्बन्धानुपपत्तिरित्यप्यचोद्यम्, यतो न भिन्नानामेकार्थक्रियाविरोधात् सामान्यमिष्टम् किन्तु भिन्नेष्वभिन्नाभासात् साक्षादर्पिततदाकारा बुद्धिः सामान्यमन्तरेणेन्द्रियबुद्धिवन्न सम्भवतीत्यभिन्नसामान्यवादिभिः सामान्यमिष्टम्। यदि वा (चा)ऽऽधिपत्यमात्रेणेन्द्रियादीनां रूपत्वाभावेऽपि रूपज्ञानजननवदिहापि
३०व्यक्तीनामाधिपत्यमात्रेणोपयोगोऽभ्युपगम्यते तदा व्यक्तिष्विन्द्रियादिवदर्पिततदाकारा बुद्धिरभिन्नप्रतिभासिनी न स्यात्। न च स्वलक्षणस्य विकल्पबुद्धावप्रतिभासनात् नैवार्पिततदाकारा बुद्धिरभिन्नप्रतिभासिनीति वक्तव्यम्, 'विकल्पाः स्वलक्षणविषया न सन्ति' इत्यस्यासिद्धेः। स्पष्टाकार-

---

१ व्याप्यसि-वा० बा० हा०। व्याप्तसि-मां०। २ सिद्धेः भां० मां०। ३ न वा-मां० वि० विना। ४-वा विशेषात् आ०। ५-सिद्धेः क्ष-भां० मां०। ६-णिकहेतुः आ० हा० वि०।-णिके हेतुः वा० बा०। ७ न वान्वयो-भां० मां० वा० बा० विना। ८-नुपपतेः वि०। ९-कल्पे च आ०। १०-रणका-भां० मां०। ११-कात्मतां भां० मां०। १२-ध्यास्त-आ० हा० वि०। १३-त्पत्तिर-वा० बा०। १४ नित्ये क्ष-आ०। १५ सामर्थ्यासिद्धे सिद्धोऽर्थः क्रियाविशेष इत्यर्थ-आ० हा० वि०। सामर्थ्यसिद्धोऽर्थक्रियाविशेष इत्यर्थ-वा० बा०। १६-शिष्ट कृत-आ०। १७-कत्वं नि-भां० मां० विना। १८-स्यैव स-वा० बा०। १९-हानिरि-भां० मां०। २०-यन्त्यक्ष-भां० मां०। २१ गृह्येत मां०। २२-नान्यग्र-भां० मां०। २३-स्तु मस-भां० मां० विना। २४ प्रत्येकंमेवमा-वा० बा०। २५-वमेकैक्य-भां० मां० वा० बा० विना। २६-कारणस्या-आ० हा० वि०। २७ ततस्वज्ञा-वा० बा०। २८-नस्येवो-वा० बा० विना। २९-रत्वे सम्बन्धा-आ० हा० वि०। ३०-यं ततो आ० हा० वि०। ३१-ज्ञासाभो साक्षादर्पित-वा० बा०।-ज्ञाभासासापक्षादर्पित-आ० हा०।-ज्ञाभासापक्षादर्पित-वि०। ३२-बुद्धिव न आ० हा० वि०। ३३ व्यक्तेष्विन्द्रिया-हा०। ३४-नी स्यात् वा० बा०।

विवेकात् ते तद्विषया न सम्भवन्तीति चेत्, दृश्यमपि स्पष्टाकारं प्रतिक्षिपन् विकल्पेषु प्रतीत्यपलापित्वादयमुपेक्षामर्हतीति न भिन्नानामेकज्ञानोपकारशक्तिरेकसामान्योपकारशक्तिवदभ्युपगन्तुं युक्ता, न वा व्यक्तीनां सामान्योपकारशक्तिः सामान्यस्याऽनाधेयातिशयत्वात्। कथं तर्हि तस्य तत्रापेक्षा इति चेत्, क्षणवत् तदेककार्यकारित्वेन; इति कथमेकसामान्योपकारबलात् सामान्यज्ञानोपकारकसामान्यवादी व्यक्तीनां साधयेत् व्यक्तिकार्यत्वं वा सामान्यस्येति ज्ञानलक्षणकार्य-५
कारिणः सामान्यस्य नावस्तुत्वम्। न वाऽभिधेयत्वात् सामान्यस्यावस्तुत्वम्, अस्य हेतोर्विपक्षाद् व्यावृत्त्यसिद्धेः। अथ वस्तुनोऽभिधेयत्वे साक्षाच्छब्दादेव वस्तुनो ज्ञानादिन्द्रियसंहतेर्वैफल्यं स्यात्, न चैवम्, अतो विपक्षाद् व्यावृत्तिसिद्धिः प्रकृतहेतोः, असदेतत्; शब्दाद् वस्तुनोऽस्पष्टाकारप्रतीतस्य स्पष्टाकारप्रतीत्यर्थमिन्द्रियसंहतिरुपजायते इति कथमिन्द्रियसंहतेर्वैफल्यम् यतो वस्तुनोऽनभिधेय-
१०त्वं सिद्ध्येत्? एकस्यापि वस्तुनः स्पष्टास्पष्टप्रतिभासभेदः सामग्रीभेदात् दूरासन्नादिभेदेन स्पष्टास्पष्टप्रतिभासादिभेदवत्। एकस्मिन् वृक्षादिस्वलक्षणे स्पष्टेऽस्पष्टावभासिनोऽपि शाब्दज्ञानस्य काचाभ्रकादिव्यवहितवस्तुप्रतिभासिज्ञानवत् दूरस्थेवृक्षादिदर्शनवद् वा न भ्रान्तत्वम्। निदर्शनज्ञानस्यापि भ्रान्तत्वे प्रमाणद्वयानन्तभूतस्यास्याज्ञातवस्तुप्रकाश-संवादाभ्यां प्रमाणान्तरभावः स्यात्।

न वा स्पष्टवृक्षादिप्रतिभासस्य—

"ममैवं प्रतिभासो यो न संस्थानवर्जितः (?)। १५
एवमन्यत्र दृष्टत्वादनुमानं तथा सति" ॥ [ ]

इत्येवमनुमानेऽन्तर्भावान्न प्रमाणान्तरत्वम् अनुमानस्य च स्वप्रतिभासिन्यनर्थेऽर्थाध्यवसायेन प्रवृत्तेर्भ्रान्तत्वम् भ्रान्तस्यापि च तस्य पारम्पर्येण वस्तुप्रतिबन्धात् प्रामाण्यमिति वक्तव्यम्, निर्विकल्पकज्ञानप्रतिक्षेपप्रस्तावेनाऽस्य विचारयिष्यमाणत्वात्। न चासद्भूत-भविष्यतोरपि सामान्यनिबन्धनशब्दप्रवृत्तेः सामान्यस्यावस्तुधर्मत्वेनावस्तुत्वम्, भूत-भविष्यत्कालसम्बन्धितया तयोर्भावात्। न २०
चेदानीं तयोरभावादवस्तुत्वम्, स्वज्ञानकालेऽध्यक्षविषयस्याप्यसम्भवादवस्तुत्वप्रसक्तेः। अथ यदि नामातीताऽनागतयोस्तत्कालसम्बन्धितया भावाद् वस्तुत्वम् तथापि कथं कालविप्रकृष्टस्यातीतादेरसम्बन्धात् ध्वनिर्गमको भवेत्? न; पारम्पर्येणातीतादिना तद्दर्शनद्वारायातस्य शब्दस्य प्रतिबन्धाद् व्याप्तिग्रहणायाऽतीतादिविषयानुमानस्येव। न चैवमतिप्रसङ्गः, अनुमानेऽपि प्रसङ्गात् 'आसीदग्निः' इत्यादिश्रुतेः। अविसंवादोऽपि विशिष्टभस्मादिकार्यदर्शनोत्पन्नानुमानप्रवृत्तिलक्षणः २५
क्वचिदस्त्येव, अनागतार्थविषये तु (तु) वाक्ये चन्द्रग्रहणोपदेशादौ प्रत्यक्षप्रमाणे(प्रमाण)प्रवृत्तिलक्षणोऽनुभूयत एव, 'अभूद् राजा श्रीहर्षादिः' 'भविष्यति शङ्खश्चक्रवर्ती' इत्यादिश्रुतेर्न प्रतिबन्धाभावोऽविसंवादाभावेऽपि तदुपदेष्टुस्तद्दर्शनस्याभावासिद्धेः। भावोऽपि कथं सिद्ध इति चेत्, अत एव संशयोऽस्तु, न चैतावता प्रतिबन्धाभावः सिद्ध्यति, संशयस्तु स्यात् यथा अनर्थित्वादप्रवृत्तस्य प्रथमोत्पन्नप्रत्यक्षे। न चैकत्र संशये सर्वत्र संशयः, प्रत्यक्षेऽपि प्रसङ्गात्। संशयितप्रतिबन्धात् तु ३०
वाक्यात् संशयादपि प्रवृत्तिः यथा अनभ्यासावस्थायां प्रत्यक्षात्, अभ्यस्तविषये तु चन्द्रग्रहणोपदेशादिर्निश्चयादेव तृतीयादिप्रवृत्ताविवाध्यक्षात्। क्वचिद् विसंवादाच्छब्दस्य सर्वत्राप्रामाण्येऽध्य-

---

१-का तद्धि-आ० हा०।-कात् तद्धि-वि०। २-यान्न भवन्ती चेत् वा० बा०।-या न संभवन्ती चेत् आ० हा० वि०। ३-वत् तदपि कार्य-वा० बा०। ४-पकारशक्तिः सामान्य-आ०।-पकारसामान्य-वा० बा०। ५-कारसामान्य-आ० हा० वि०। कारमत्सामान्य-वा० बा०। ६-वादि-आ०। ७-त्वं सा-आ० वि०। ८ नवाऽभिधेयात् आ० हा०। न चा-वि०। ९ व्यावृत्तिसि-वा० बा०। १०-च्छब्दादेर्वस्तु-भां० मां०। ११-तीतस्पष्टा-भां० मां० विना। १२-स्थक्षणादिदर्श-वा० बा०। १३ वा भ्रान्त-आ० हा० वि। १४ ज्ञानवस्तु-वा० बा० मां० आ०। ज्ञानं वस्तु-हा०। १५-काशन सं-भां० मां०। १६ न च स्पष्ट-भां० मां०। न चा स्पष्ट-वि०। १७-वृक्षाणां प्र-वा० बा०। १८-वमत्र आ० हा० वि०। १९ तस्यापा-भां० मां०। २० न वा-भां० मां० वि० विना। २१-तस्य सादृश्यप्र-वा० बा०। २२-नस्यैव वा० बा०। २३-क्वचिदेवाऽनाग-वा० बा०। २४-षये वा-भां० मां० विना। २५ वात्ये च-भां०। वाक्यच-आ०। २६-क्षप्रामाणे वा० बा०। २७-भावो वि-भां० मां० विना। २८-षये च-वा० बा०। २९-शादिन्नि-भां० मां०। ३०-यापि दि-भां० मां०।

क्षस्यापि क्वचिद् विसंवादात् सर्वत्राप्रामाण्यप्रसक्तिः। न चास्पष्टावभासित्वात्[1] भूतादेरवस्तुत्वम्, अध्यक्षविषयस्यापि कस्यचित् तथाभावेनावस्तुत्वप्रसक्तेः। तन्[2] न सामान्यस्यावस्तुत्वम्।

अभ्युपगमवादेन च नित्यसामान्यपक्षभाविदोषपरिहारः कृतः, परमार्थतस्तु[3] नैकान्ततः किञ्चिद् वस्तु नित्यमनित्यं वा, बहिः नव-पुराणाद्यनेकक्रमभाविपर्यायाक्रान्तस्य समानाऽसमानपरिणामात्मकस्यैकस्य घटादेः अन्तश्च हर्ष-विषादाद्यनेकविवर्त्तात्मकस्य चैतन्यस्याबाधितप्रतीतिविषयस्य व्यवस्थितत्वात्। तन्[4]नैकान्ततः क्षणिकत्वं व्यक्तीनामिति सङ्केतव्यवहारकालव्यापकत्वस्य भावान्न तत्र शब्दसङ्केतासम्भवः नापि सङ्केतवैयर्थ्यम्। अत एव 'उत्पन्नाऽनुत्पन्नेषु स्वलक्षणेषु शब्दसङ्केतस्याशक्यक्रियत्वात् स्वलक्षणस्य(स्या)वाच्यत्वम्' इति यदुक्तं[5] तद् निरस्तम्।

'यो यत्कृते प्रत्यये न प्रतिभासते' इत्यादिप्रयोगे 'न प्रतिभासते च शाब्दे प्रत्यये स्वलक्षणम्' इत्यसिद्धो हेतुः, स्वलक्षणप्रतिभासस्य शाब्दे प्रत्यये व्यवस्थापितत्वात् दूरव्यवस्थितपादपग्राह्यध्यक्षप्रत्यय इवास्पष्टप्रतिभासेऽपि। अत एव—

"अन्यदेवेन्द्रियग्राह्यं[6] अन्यच्छब्दस्य गोचरः।
शब्दात् प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते"॥ [ ]
"अन्यथैवाग्निसम्बन्धाद् दाहं दग्धोऽभिमन्यते।
अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते[7]"॥

तथा

"शब्देनाभ्यर्थिताक्षस्य[8] बुद्धावप्रतिभासनात्[9]।
अर्थस्य दृष्टाविव तदनिर्देशस्य वेदकम्"॥ [ ]

इत्यादि शब्दबुद्धावस्पष्टप्रतिभासमुपलभ्य यदुच्यते परेण तन्निरस्तम्, प्रत्यक्षबुद्धावप्यस्पष्टस्वलक्षणप्रतिभासस्य प्रतिपादितत्वात्। यत्र हि विशेषोपसर्जनसामान्यप्रतिभासो ज्ञाने तद् अस्पष्टं व्यवहियते, यत्र च सामान्योपसर्जनविशेषप्रतिभासः सामग्रीविशेषात्[10] तदस्प(तत् स्प)ष्टमुच्यते। सामान्यविशेषात्मकत्वं च वस्तुनः प्रतिपादितम् प्रतिपादयिष्यते च यथावसरम्। तेन 'न चैकवस्तुनो रूपद्वयमस्ति, एकस्य द्वित्वविरोधात्' इत्यादि[11] असङ्गतमेव। न चाशेषविशेषाध्यासितवस्तुप्रतिभासविकल्प(कल)स्य शाब्दप्रत्ययस्यान्यथाभूते वस्तुन्यन्यथाभूतावभासित्वेन प्रवृत्तेर्भ्रान्तत्वम्[12], प्रत्यक्षस्यापि तथाऽवभासित्वेन भ्रान्तत्वप्रसक्तेः; न ह्यस्मदादिप्रत्यक्षे क्षणिक-नैरात्म्याद्यशेषधर्माध्यासितसंख्योपेतघटाद्याकारपरिणतसमस्तपरमाणुप्रतिभासः तथैवानिश्चयात्। अत एव—

१–त्वात् कृतादे–वा० बा०। २ **तत्र सा**–भां० मां० विना। ३–**मार्थस्तु** भां० मां० विना। ४ **तत्रैकान्ततः क्षणिकत्व व्य**–भां० मां०। ५–**सङ्केता नापि** आ० हा० वि०। ६ पृ० १७६ पं० ११। ७ पृ० १७७ पं० ११। ८ **अन्यशब्द**–भां० मां० वा० बा० विना। ९ पृ० १७७ पं० ६। अनेकान्तज० पृ० ४५ द्वि० पं० ४ अम०। आचार्यहरिभद्रेणायं श्लोक एवं व्याख्यातः–"'अन्यदेव' इत्यादि, प्रत्यक्षमिति योगः, अन्यदेव स्वलक्षणमिन्द्रियग्राह्यम् अन्यत् सामान्यलक्षणं शब्दस्य गोचरः, कथमेतदेवम्? इत्याह–'शब्दात् प्रत्येति भिन्नाक्षः" सामान्यलक्षणाध्यवसायेन 'न तु प्रत्यक्षमीक्षते' वस्तु। अनेकान्तज० टी० लि० प्र० पृ० ६० द्वि० पं० ७ तथा अनेकान्तज० टी० पृ० १७१ पं० २७। शास्त्रवा० स्त० ११ श्लो० २३। तत्र चोपाध्याययशोविजयेनाऽपि व्याख्यातोऽयं श्लोकः। न्यायकुमुद० लि० प्र० पृ० २८० द्वि० पं० १२। १० पृ० १७७ पं० ९ तथा ३३–३४। अनेकान्तज० पृ० ४५ द्वि० पं० ४ अम०। व्याख्या चास्यैवम्–"'अन्यथा दाहसम्बन्धात्' स्वलक्षणानुभवेन 'दाहं दग्धोऽभिमन्यते' पुमान् 'अन्यथा दाहशब्देन' सामान्यलक्षणाध्यवसायेन 'दाहार्थः संप्रतीयते' अनेकान्तज० टी० लि० प्र० पृ० ६० द्वि० पं० ८। शास्त्रवा० स्त० ११ श्लो० २४ व्याख्याऽप्यस्य यशोविजयकृता द्रष्टव्या। न्यायकुमुद० लि० प्र० पृ० २८० द्वि० पं० १२। ११ पण्डितरत्नकीर्तिना स्वापोहसिद्धिप्रकरणे 'यच्छास्त्रम्' इति निर्दिश्य समुद्धृतोऽयं श्लोकः पादत्रिकप्रमाणः–अपोहसि० पृ० ६ पं० १६। १२ **व्यावृताक्षस्य** हा०। **व्यावृत्ताक्षस्य** आ० वि०। **"व्यापृताख्यस्य"** अपोहसि०। १३–**षात् त ष्ट**–वा० बा०। १४ पृ० १७७ पं० १५। १५ "न चाशेषविशेषाध्यासितवस्तुप्रतिभासवैकल्यादप्यस्य तथात्वमाशङ्कनीयम्, प्रत्यक्षेऽपि तथात्वप्रसक्तेः"–शास्त्रवा० स्याद्वादक० पृ० ४१४ प्र० पं० १३।–**'विकलस्य'** वि० सं०। १६–**भ्रान्तित्वं**–आ०। १७ **भ्रान्तित्व**–आ०। १८ **क्षणिके नैरा**–भां० मां० वा० बा० विना। १९ एतदेव अक्षरशः शास्त्रवा० स्याद्वादक० पृ० ४१४ द्वि० पं० १।

"मति-श्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु" [तत्त्वार्थ० अ० १ सू० २७]

इति समानविषयत्वमध्यक्ष-शाब्दयोः तत्त्वार्थसूत्रकृता प्रतिपादितम्। यदा च प्रधानोपसर्जनभावेनानेकान्तात्मकं वस्तु प्रमाणविषयस्तदा यत्रैव सङ्केतः प्रत्यक्षविषये स एव सामान्य-विशेषात्मकः शब्दार्थ इति केवलस्वलक्षण-जाति-तद्योग-जातिमत्-पदार्थ-बुद्धितदाकारपक्षभाविनो दोषा अनास्पदा एव; न ह्येकान्तपक्षभाविदोषाः अनेकान्तवादिनं समाश्लिष्यन्ति। अस्त्यर्थादि-शब्दार्थपक्षेष्वपि सामान्य-विशेषैकान्तपक्षसमाश्रयणात् यदूषणम् तदप्यस्मत्पक्षासङ्गतमेव उक्तन्यायात्।

यदपि 'विजातीयव्यावृत्तान्यपदार्थानाश्रित्यानुभवादिक्रमेण यदुत्पन्नं विकल्पकं ज्ञानं तत्र यत् प्रतिभाति ज्ञानात्मभूतं विजातीयव्यावृत्तपदार्थाकारतयाध्यवसितमर्थप्रतिबिम्बकं तत्र 'अन्यापोहः' इति संज्ञा' तत्रापि विजातीयव्यावृत्तपदार्थानुभवद्वारेण शाब्दं विज्ञानं तथाभूतपदार्थाध्यवसाय्युत्पद्यते इत्यत्राविसंवाद एव, किन्तु तत् तथाभूतपारमार्थिकार्थग्राह्यभ्युपगन्तव्यम् अध्यवसायस्य ग्रहणरूपत्वात्। विजातीयव्यावृत्तेस्तु समानपरिणतिरूपतया वस्तुधर्मत्वेन व्यवस्थापितत्वाद् अन्यापोहशब्दवाच्यताऽपि तत्राऽऽसज्यमाना नास्मन्मतक्षतिमावहति, सङ्केतविशेषसव्यपेक्षस्य तच्छब्दस्य तत्रापि प्रवृत्त्यविरोधात्।

यच्च 'तत्प्रतिबिम्बकं शब्देन जन्यमानत्वात् तस्य कार्यमेव इति कार्यकारणभाव एव वाच्यवाचकभावः' तदसङ्गतम्; शब्दाद् विशिष्टसङ्केतसव्यपेक्षाद् बाह्यार्थप्रतिपत्तेस्तत्पूर्वकप्रवृत्त्यादिव्यवहारस्यापि तत्रैव भावात् स एव बाह्यः शब्दार्थो युक्तः न तु विकल्पप्रतिबिम्बकमात्रम्, शब्दात् तस्य वाच्यतया(याऽ)प्रतिपत्तेः। तथाभूतशब्दात् तथाभूतपारमार्थिकबाह्यार्थाध्यवसायि ज्ञानमुत्पद्यत इत्यत्राविवाद एव।

यच्च 'प्रतिबिम्बस्य मुख्यमन्यापोहत्वं विजातीयव्यावृत्तस्वलक्षणस्यान्यव्यावृत्तेश्चौपचारिकम्' इति, तदप्यसङ्गतम्; शब्दवाच्यस्य वस्तुस्वरूपस्य यद्यपोहत्वं तदाऽनन्तधर्मात्मके वस्तुन्युपसर्जनीकृतविशेषस्य पारमार्थिकवस्त्वात्मकसामान्यधर्मकलापस्य शब्दवाच्यत्वात् कथमन्यव्यावृत्तस्वलक्षणस्योपचारेणापोहत्वम्?

तुच्छस्वरूपायाश्च व्यावृत्तेः अन्यव्यावृत्तविकल्पाकारस्य चापोहत्वे सामान्य-सामानाधिकरण्य-विशेषणविशेष्यभावादिव्यवहारश्च सर्व एवाघटमानकः। न च सामान्याभावात् सामान्यव्यवहारस्याऽघटमानत्वं न दोषायेति वक्तव्यम्, तत्सद्भावस्य प्रसाधितत्वात्। सामानाधिकरण्यव्यवहारश्च धर्मद्वययुक्तस्यैकस्य धर्मिणो बहिर्भूतस्याऽसद्भावादयुक्तः स्यात्। न च बाह्यार्थासंस्पर्शि-

---

१ सर्वार्थसिद्धि–राजवार्तिक–श्लोकवार्तिकप्रभृतिषु जैनदिगम्बरसंप्रदायसम्मतेषु तत्त्वार्थसूत्रव्याख्यापुस्तकेषु एतादृशमेव सूत्रमेतत्। श्वेताम्बरीयोपाध्याययशोविजयकृतशास्त्रवार्तासमुच्चयव्याख्यापुस्तकेऽपि अस्य सूत्रस्य एवमेव पाठ इति तु प्रदर्शितम्। जैनश्वेताम्बरसंप्रदायसम्मते सिद्धसेनसूरिकृततत्त्वार्थभाष्यव्याख्यापुस्तके (अम०), यशोविजयोपाध्यायकृत–तत्त्वार्थभाष्यव्याख्यापुस्तके (अम०) तत्त्वार्थसूत्रपुस्तके (मेसा०) तत्त्वार्थभाष्योपेतपुस्तके च (कल०) सूत्रपाठे 'सर्वद्रव्येषु' इत्येवमधिकं 'सर्व' पदं दृश्यते। २ **यदि च** वा० बा०। ३ पृ० १७४ पं० २३। ४–**माश्रिष्यन्ति** वा० बा०।–**माश्रयिष्यन्ति** आ० हा० वि०। ५ पृ० १७९ पं० १२–पृ० १८२ पं० ६। ६–**माश्रयात् य**–आ०।–**माश्रयणे य**–वा० बा०।–**माश्रयेण य**–भां० मां०। ७ पृ० १८३ पं० ४। ८ पृ० २०२ पं० ३–७। प्रमेयक० पृ० १२८ प्र० पं० ९। ९–**नुभावादि**–वा० बा०। १०–**त्पन्नवि**–वा० बा०। ११–**वृत्तिप**–भां० मां०।–**वृतं प**–वि०। १२–**प्रतिबन्धकं** वा० बा०। १३ प्रमेयक० पृ० १२८ द्वि० पं० १। १४–**साय्युपपद्य**–भां० मां०। १५–**त्रापिसं**–वि०। १६–**क्षस्य तत्रापि** आ० हा० वि०।–**क्षस्य तच्छस्य तत्रापि** वा० बा०। १७ पृ० २०३ पं० ६। प्रमेयक० पृ० १२८ द्वि० पं० ३। १८ **तस्य कार्यकारणभाव**–आ० हा० वि०। १९ प्रमेयक० पृ० १२८ द्वि० पं० ४। २० "शब्दात् तस्य वाच्यतयाऽप्रतीतेः"–प्रमेयक० पृ० १२८ द्वि० पं० ५। २१ पृ० २०३ पं० १४। २२–**बिम्बकस्य** भां० मां०। प्रमेयक० पृ० १२८ द्वि० पं० ५। २३–**तीयव्यावृत्तेश्चौप**–आ० हा० वि०। २४ "संबन्धिन्याः" प्रमेयक० टि० पृ० १२८ द्वि० पं० १४। २५–**स्तुत्वस्व**–आ० हा० वि०। २६–**मन्यथावृत्त**–वा० बा०।–**मन्यथाव्यावृत्त**–आ० हा० वि० मां०।–**'मन्यथा व्यावृत्त–'** भां० सं०। २७–**च्छरू**–भां० मां० वा० बा० विना। २८–**वात् सामानव्य**–वा० बा०।–**वात् समानव्य**–आ० हा० वि०। २९ **न बा**–वा० बा०।

विकल्पप्रतिबिम्बकेऽयं युक्तः । अथ धर्मद्वयानुरक्तैकधर्मिविकल्पेऽप्ययमुपपत्स्यते, अयुक्तमेतत्; तथाभूतविकल्पाभ्युपगमे एकान्तवादिनामनेकाकारैकविकल्पाभ्युपगमादनेकान्तवादप्रसक्तेः । न चाऽतात्त्विकमनेकत्वमिति नायं दोषः, तथाभ्युपगमे ज्ञानात्मन्यविद्यमानस्यानेकत्वस्य स्वसंवेदनेनापरिच्छेदप्रसक्तेः; वेदने वा स्वसंवेदनस्याप्रत्यक्षत्वप्रसङ्गः । अविद्यमानाकारग्राहित्वेन सदसतोरेकत्वाऽनेकत्वयोर्ज्ञानतादात्म्यविरोधादनात्मभूतं च वैचित्र्यं कथमतदाकारं ज्ञानवेदनं साकारज्ञानवादिनां परिच्छिनत्ति? परिच्छेदे वाँ परिच्छेदसत्तायाः सर्वत्राऽविशेषात् सर्वैकवेदनप्रसक्तिः । निराकारविज्ञानाभ्युपगमे च बहिरर्थसिद्धेर्विज्ञानवादानवतारप्रसङ्गः । अथ तदपि साकारमभ्युपगम्यते तदा तत्रापि कथमनेकाकारमेकम्? अनेकत्वस्याऽतात्त्विकत्वे पुनरपि स एव प्रसङ्गोऽनवस्थाकारी, पारमार्थिकानेकाकारज्ञानाभ्युपगमे स्यात् संवेदनात् तस्य सिद्धिः किन्त्वनेकान्तवादोऽभ्युपगतः स्यात् । अपि च, अनेकत्वस्य बुद्धावप्यतात्त्विकत्वाभ्युपगमेऽन्तर्बहिरविद्यमानस्य तस्य वैशद्यावभासिता न स्यात्, अर्थनिराकृतये द्वैरूप्यसाधनं च बुद्धेर्निराकारत्वादसङ्गतमेव स्यात् । अथ पूर्वमर्थनिराकृतये तस्या द्वैरूप्यसाधनम् पश्चादेकस्यानेकत्वायोगात् द्वैरूप्यस्यापि निराकरणाद्दोषः, असदेतत्; पूर्वमेव द्वैरूप्यप्रतिघातिन्यायोपनिपातसम्भवात् । अथैतद्दोषपरिजिहीर्षया वैचित्र्यं बुद्धिमाश्लिष्यतीत्यभ्युपगम्यते, ननु बहिर्भूतेनाऽर्थेन वैचित्र्यस्य कोऽपराधः कृतः यत् तन्नाश्लिष्यतीति । अथैकत्व-नानात्वयोर्विरोधः एवापराधः, नन्वयं विज्ञानेऽपि समानः । न च बुद्धेर्नीलादिप्रतिभासानामेकयोगक्षेमत्वात् तदेकत्वम्, एकयोगक्षेमत्वेन स्वभावभेदानिराकरणात् सहभाविनां चित्त-चैत्तानां नानात्वेऽप्येकयोगक्षेमत्वस्य भावात् । अथ चित्तादावभिन्नयोगक्षेमस्य नियमवतोऽभावः असहभाविनां तेषामभिन्नयोगक्षेमत्वस्याभावात्, न; नीलादिप्रतिभासेष्वपि नानाश्रयेषु तस्याभावात् । अभिन्नाश्रयेष्वभिन्नयोगक्षेमनियमसद्भावो नीलादिप्रतिभासेष्विति चेत्, न; सहभाविचित्त-चैत्तेष्वप्यस्य समानत्वात् सहभाविनां तेषां तथैवानुभवात् । सर्वथैकत्वं च नीलादिप्रतिभासानामध्यक्षविरुद्धम् प्रतिभासभेदाद् भेदसिद्धेः । न च भ्रान्तोऽयं भेदप्रतिभासः अबाधितत्वात् । न चाऽभिन्नयोगक्षेमत्वादिति बाधकम्, अस्याऽसाध्याव्यतिरेकिणोऽयथोक्तलक्षणत्वात् प्रतीयमानयोश्चैकत्वानेकत्वयोः को विरोधः? न चेयं प्रतीतिर्मिथ्या बाधकाभावात् । न च विरोध एवास्या बाधकः विरोधासिद्धेरितरेतराश्रयत्वात् । तथाहि—अस्याः प्रतीतेर्बाधायां विरोधः सिद्ध्यति, तत्सिद्धौ चातस्तस्या बाधेति परिस्फुटमितरेतराश्रयत्वम् । न च प्रतीतेरन्यदस्ति विरोधसाधकमित्यस्तु बहिरेवं सामानाधिकरण्यव्यवहारः, तथैवास्योपलब्धेः । } अथ विकल्पस्यायं विभ्रमः बहिः सामानाधिकरण्यादेरयोगात् नानाफलयोर्नीलोत्पलादिशब्द-विकल्पयोरेकस्मिन्नर्थे वृत्तिविरोधात्, धर्म-धर्मिणोरेकान्तभेदाऽभेदयोर्गत्यन्ताभावात्-तयोश्चाव्यतिरेकाभ्युपगमे शब्देन विकल्पेन चैकेन स्वलक्षणस्य विषयीकरणेऽशेषस्वभावाक्षेपादपरस्य शब्दादेस्तदेकवृत्तेस्तद्भिन्नफलत्वाभावात् तद्भेदे सकृद् ग्रहणस्यावश्यंभावित्वात् तल्लक्षणत्वादभेदस्य अन्यथा गृहीतागृहीतयोर्भेदप्रसक्तेः, धर्म-धर्मिणोर्भेदपक्षेऽपि घट-पटादिशब्दवदेकत्रावृत्तेर्भवेदुपाधिद्वारेणैकत्रोपाधिमति शब्दविकल्पयोः प्रवृत्तिः यदि तयोरुपकार्योपकारकभावः स्यात् तदभावे पारतन्त्र्यासिद्धेः तयोरुपाध्यु-

१-धर्मिकल्पे वा० बा०। २-कल्प्येऽप्य-भां० मां० ३-मनेकमनेकत्वमिति भां०।-मनेकमिति वा० बा०। ४-सङ्गो वि-भां० मां० विना। ५-रोधना-आ० हा० वि०। ६-भूतं वै-आ०। ७ वा सत्तायाः वा० बा०। ८ सर्वैकावे-भां० आ० हा० वि०। ९-दनाप्र-आ०। १०-गमे स्या सं-आ० हा० वि०।-गमे त् सं-वा० बा०। ११-नान् तस्य भां० मां०। १२-कस्य आ० हा० वि०।-कत्वे कस्य वा० बा०। १३-तस्या वै-वा० बा०। १४-तस्याः द्वै-वा० बा०। १५-ऽयस्योपरा-आ० हा० वि०। १६-धः, नन्वयं वा० बा०। १७-राक्रमणात् वा० बा०। १८-मभवतो-आ० हा० वि०। १९ वात् तन्नी-वि०।-वात् त नी-हा०।-वात्पनी-वा० बा०। २०-भागेषुपि वा० बा०।-भासेष्यपि मां०।-भासेद्यवि आ०। २१-भातेष्वि-भां० मां०। २२-चित्तचैत्ते-वा० बा०। २३-णो यथोक्त-भां० मां०। २४-वास्याः बा-भां० मां०।-वा स्यात् बा-आ०। २५-त्यवस्तु वा० बा०। २६-व हि सा-आ० हा० वि०। २७-हारस्यैवास्योप-वा० बा०। २८-लयो नी-वा० बा० विना। २९-तयोश्च व्य-आ०। ३०-वापक्षेपा-भां० मां०।-वाक्षवावप-वा० बा०। ३१-पावप-आ० हा० वि०। ३२ शब्दादेक-वा० बा०। ३३-स्तद्भिन्नाफलभावात् वा० बा०। ३४ तद्भेद स-भां० मां० विना। ३५-धर्मिणो पक्षेपि वा० बा०। ३६ यदेत-आ०। ३७ तदाभावे मां०। ३८-तन्यसि-वा० बा०।

पाधिमद्भावाभावान्न तद्द्वारेणापि तयोस्तद्वृत्तिर्युक्ता तयोरुपकार्योपकारकभावे उपाध्युपकारिका शक्तिरुपाधिमतो यद्यभिन्ना तदैकोपाधिद्वारेणाप्युपाधिमतः प्रतिपत्तौ सर्वोपाध्युपकारकस्वरूपस्यैव तस्य निश्चयादुपकार्यस्योपाधिकलापस्याप्यशेषस्य निश्चयप्रसक्तिः उपकारकनिर्णीतेरुपकार्यनिश्चयनान्तरीयकत्वात् उपाधिमतो भेदे तच्छक्तेः सम्बन्धाभावः ततस्तासामनुपकारात् उपकारे वा तदुपकारशक्तीनामप्युपाधिमतो भेदाभेदकल्पनायामनवस्था सर्वात्मना ग्रहणं च प्रसज्यते इति {एतदप्ययुक्तम्; यतः स्याँदभेदे सकृद् ग्रहणं यदि तल्लक्षणोऽभेदः स्यात् यावतां नाभेदस्यैतल्लक्षणम् घटाद्याकारपरिणतेष्वनेकपरमाणुषु सकृद् ग्रहणस्य भावेनाऽतिव्यापकत्वात् । अव्यापकं चैतत् अभेदेऽपि सत्त्वाऽनित्यत्वयोरभावात्, भावे वा सत्त्वप्रतिपत्तौ क्षणक्षयस्यापि प्रतिपत्तेरनुमानवैफल्यप्रसक्तिः यथाऽनुभवं निश्चयोत्पत्तेः सत्त्ववत् क्षणिकत्वस्यापि तदैव निश्चयात् । अनादिभवाभ्यस्ताऽक्षणिकादिवासनाजनितमन्दबुद्धेः पूर्वोत्तरक्षणयोर्विवेकनिश्चयाभावात् स्वलक्षणस्य सर्वात्मनानुभवेनाधिगमेऽपि क्षणिकत्वे निश्चयानुत्पत्तेरनुमानस्य साफल्यमिति चेत्, नः घट-कपोलक्षणयोरप्यविवेकनिश्चयप्रसक्तेः । अथात्र सदृशापरापरोत्पत्तेर्विप्रलम्भनिमित्तस्याभावान्न प्रसङ्गस्तर्हि ह्रस्वर्णद्वयोच्चारणे तत्प्रसक्तिः । तयोरनानन्तर्याद् वर्णद्वयान्तराले सत्त्वोपलम्भाभावात् तदप्रसङ्गे लघुवृत्तिर्विभ्रमनिमित्तं स्यात्—अन्यथा संयुक्ताङ्कुल्योरप्यविवेकनिश्चयः स्यात्—देशनैरन्तर्य-सादृश्ययोर्भावात् । सादृश्यनिमित्ता च न सर्वदा भ्रान्तिः स्यात्, उपलभ्यते च सर्वदा । न चान्त्यक्षणदर्शिनां विवेकनिश्चयसद्भावादयमदोषः पूर्वमभावात् । सादृश्यनिमित्ता हि भ्रान्तिरवस्थित एव सादृश्ये निवर्त्तमाना उपलभ्यते अनिवृत्तौ वा नामाद्यर्थयोरपि न कदाचिद् भ्रान्तिनिवृत्तिः स्यात् सर्वदा तयोः सादृश्यात् । न चान्यापोहवादिनां भ्रान्तिनिमित्तं सादृश्यं वस्तुभूतमस्ति, सामान्यवादप्रसक्तेः । एकविज्ञानजनका एव क्षणाः सादृश्यमुच्यन्त इति चेत्, न; ततो विवेकानिश्चये रूपाऽऽलोक-मनस्कारादीनामपि सादृश्यमेकविज्ञानजनकत्वेनास्तीत्येकत्वनिश्चयस्तेष्वपि स्यात् । न च तेषां तत्राप्रतिभासनान्नासाविति वक्तव्यम्, यतः किमिति तेषां तत्राप्रतिभासनम् इति निमित्तमभिधानीयम्, असारूप्यं तन्निमित्तमिति चेत्, न; मनस्कारस्य सारूप्यात् तत्र प्रतिभासप्रसक्तेः । विलक्षणानां च कथं सारूप्यम्? नैकविज्ञानजनकत्वाद् रूपादावपि तत्प्रसङ्गात् । अथेष्यत एव तत् तेषाम्, न; रूपविज्ञानजनकत्वेन यत् तेषां सारूप्यं तदस्तु तस्यास्माभिरपि सदादिप्रत्ययहेतुत्वेन सदादित्वस्येष्टत्वात्, किं तर्हि रूपात्मना रूपादीनां रूपप्रत्ययहेतुत्वात् शाबलेयादीनामिव गोत्वात्मना सारूप्यं गोप्रत्ययहेतूनां किं न स्याद् इति प्रेर्यते पारम्पर्येणैकपरामर्शप्रत्ययहेतुत्वस्यापि तेषु भावात्? तद्धेतुत्वेऽपि न तेनात्मना सारूप्यं तेषामतद्विषयत्वादिति चेत्, ननु तदेव तदविषयत्वं कुतस्तेषाम्? न सारूप्यादिति वक्तव्यम्, चक्रकप्रसक्तेः । अथ सत्यपि सारूप्ये रूपादीनां सत्त्वोपलम्भाभावान्न भ्रान्तिः, ननु सत्त्वोपलम्भः किं देशनैरन्तर्यमभिधीयते, आहोस्वित् कालनैरन्तर्यम्, यद्वा उभयनैरन्तर्यमिति विकल्पाः ।

तत्र न तावद् देशनैरन्तर्यं यथोक्तभ्रान्तिनिमित्तम्, संयुक्ताङ्कुल्योस्तद्भावेऽपि भ्रान्तेरभावात् । कालनैरन्तर्यं च लघुवृत्तिरेव, न चासौ भ्रान्तिनिमित्तम्, ह्रस्वर्णद्वयोच्चारणे तद्भावेऽप्यभावात् । नाप्युभयं तन्निमित्तम्, संयुक्ताङ्कुल्योः पूर्वापरक्षणयोरपि सद्भावेनोभयसद्भावेऽपि अभावादित्यान्तरेतरभ्रान्तिकारणाभावात् किं न यथानुभवं विकल्पोत्पत्तिः? सहकारिणोऽभ्यासादेरभावान्नो-

१-मद्भावान्न आ० हा०। २-पकारिणा श-वा० बा०। ३ तदेको-वा० बा० वि०। ४ तस्य तन्नि-भां० मां० वा० बा० विना। ५-य शक्तिः आ०। ६ तदयुक्तम् वा० बा०। ७-स्याद्भेदे वा० बा०। ८-क्षणो भेदः भां० मां० वा० बा० विना। ९-ता नाम भेदः स्यात् यावता नामभेदस्यैतल्ल-वा० बा०। १०-णम् घंटा-मां०। ११-त भे-आ०। १२-स्याप्र-वा० बा०। १३-भव नि-भां० मां० वा० बा० विना। १४ कस्यापि आ०। १५-पाटलक्षण-आ० वा० बा०। १६-वादप्र-भां० मां०। १७-वृत्तिवि-वा० बा०। १८-दृश्यमितिनिमि-भां० मां०। १९ न वान्त्य-वि० विना। २०-वान्। भां० मां०। २१-मुच्यत इ-भां० मां० वा० बा० विना। २२-कानिश्चयो रू-वा० बा०। २३ अतारूप्यं भां० मां० आ० हा०। अश्वारूप्यं-वा० बा०। २४-दवस्तु वि०। २५-त्वस्य चेष्ट-वि०।-त्वस्यै वेष्ट-आ०। २६ तदेव विषयत्वं आ० हा० वि०। तदेव तदाविषयत्वं वा० बा०। २७ सत्तोप-वा० बा०। २८-आहोश्चित् भां० मां० वा० बा० विना। २९ कालनैरन्तर्यमिति विकल्पाः वा० बा० विना। ३० काले नै-भां० मां० विना। ३१-न्तर्यं ल-आ०। ३२-वृत्ति एव वा० बा०।

त्पत्तिरिति चेत्, ननु कोऽयमभ्यासः यदभावाद् यथानुभवं निश्चयानुत्पत्तिः? दर्शनस्य पुनः पुनरुत्पत्तिरिति चेत्, ननु सत्त्वादेः क्षणिकत्वादेरभेदे तदनुभवस्य पुनः पुनरनुत्पत्तिरेव क्षणिकत्वदर्शनावृत्तिरिति कथं न दर्शनावृत्तिलक्षणोऽभ्यासः? अनुभवानन्तरभावी विकल्पोऽभ्यास इति चेत्, ननु 'तदभावाद् विकल्पोत्पत्त्यभावे यथानुभवं कस्मान्निश्चयानुत्पत्तिः' इति प्रश्ने 'निश्चयाभावानि(न्नि)श्चयानुत्पत्तिः' इत्युत्तरं कथं सङ्गतं स्यात्? अन्त्यक्षणदर्शिनां चानित्यविकल्पोत्पत्तेस्तदभावोऽसिद्धश्च। न च क्षणिकत्वप्रतिपादकागमाऽऽहितसंस्कारस्यानित्यविकल्पावृत्तिरभ्यासः, तदागमानुसारिणां तदुत्पत्तावपि यथानुभवं विकल्पाभावात्। दर्शनपाटवमपि सत्त्वादिविकल्पोत्पत्तेरेवावसीयते पाटवाऽपाटवलक्षणविरुद्धधर्मद्वयस्यैकत्रायोगात् शब्दानित्यत्वजिज्ञासायां प्रकरणादीनामपि भावात्। सर्वात्मना चेत् स्वलक्षणस्यानुभवस्तथैव निश्चयोत्पत्तिः स्यात्, तदनुत्पत्तेर्न सर्वात्मनाऽनुभवो भवस्येत्यवसीयते। अतो नानाफलत्वभेदेऽप्युपाधि-तद्वतोः शब्द-विकल्पयोरविरुद्धम्।

भेदपक्षेऽप्येकार्थवृत्तिस्तयोर्घटत एव, तद्द्वारेण शब्द-विकल्पयोरेकस्मिन् धर्मिणि वृत्तेः सामानाधिकरण्यादिव्यवहारसिद्धिः। न चोपाधि-तद्वतोरुपकार्योपकारकभावात् सर्वात्मनैकोपाधिद्वारेणाप्युपाधिमतः प्रतिपत्तेः शब्दादेरेकफलत्वम्, उपकार्योपकारकप्रतीत्योरन्योन्याविनाभावित्वाभावात् तद्भावे वा कथञ्चित् सर्वस्यापि परस्परमुपकार्योपकारकभावाद् एकपदार्थप्रतिपत्तौ तदाधारादिभावेनोपकारकभूतस्य भूतलादेस्तत्कार्यभूतसन्तानान्तरवर्तिज्ञानस्य वा ग्रहणम्, ततोऽपि तदुपकारिणः तस्मादप्यपरस्य तदुपकारिण इति पारम्पर्येण सकलपदार्थाक्षेपात् सर्वैः सर्वदर्शी स्यात्। अथ सम्बन्धवादिनः स्यादयं दोषः—तस्य सम्बन्धिभ्यः सम्बन्धस्य व्यतिरेकेऽनवस्थाप्रसङ्ग इत्येकोपाधिद्वारेणाप्युपाधिमतः समस्तोपाधिसम्बन्धात्मकस्यैवावगमात् सम्बन्धिनो धर्मकलापस्याशेषस्यापि ग्रहणप्रसक्तिः, सम्बन्धिग्रहणमन्तरेण सम्बन्धप्रतिपत्तेरभावात् अङ्गुलिद्वयप्रतिपत्तौ तत्संयोगप्रतिपत्तिवत्। सम्बन्धिष्वेकसम्बन्धानभ्युपगमवादिनामस्माकं नायं दोषः, नहि प्राग्भावोत्तरभावावन्तरेणापरः कार्यकारणभावादिरेकः सम्बन्धोऽस्माभिरभ्युपगम्यते येन समस्तावगमात् सर्वैः सर्वदर्शी स्यात्, असदेतत्; यतो न सम्बन्धवादिनः समस्तोपाधिसम्बन्धानामुपाधिमतोऽव्यतिरेकेऽपि तदेकोपाधिसम्बन्धात्मकस्यैव तस्य ज्ञानात् सम्बन्धिनोऽशेषस्योपाधि(धे)रपि ग्रहणम्। सम्बन्धाभाववादिनोऽपि यद्युपकारकप्रतिपत्तावपि नोपकार्यस्यावगतिरेकसम्बन्धाभावात् तदा कथं हेतुधर्मानुमानेन रूपादे रसतो गतिः उपकार्यविशिष्टस्योपकारकस्याप्रतिपत्तेः? प्रतिपत्तौ कथं न भवन्मतेन सर्वैः सर्वविद् भवेत्? न चोपाधि-तद्वत्प्रतीत्योरितरेतराश्रयत्वात् तत्प्रतीत्यभावादुपाधि-तद्भावाभावः, युगपद् अध्यक्षे तयोः प्रतिभासनात्। क्रमप्रतिभासेऽपि न तत्प्रतिपत्त्योरितरेतराश्रयत्वम्, वृक्षत्वविशिष्टस्य दूरादध्यक्षेण प्रतीतस्य प्रत्यासन्नादाम्रादिविशेषणविशिष्टस्य तस्यैवावसायात्। शाब्दप्रतिभासेऽपि गोशब्दाद् गोत्वमात्रोपाधेरेवंभास(भात)स्य शुक्लशब्दात् तदुपाधिविशिष्टस्य तस्यैवावभासनान्न तत्प्रतीत्योरितरेतराश्रयत्वम्। न च गुणग्रहणमन्तरेण गुणिनो गवादेरग्रहः तदग्रहे च गुणाग्रह इति चोद्यावकाशः, गोशब्दाद् विशेषण-विशेष्ययोर्युगपदेव प्रतिपत्तेः। परस्यापि च समानोऽयं दोषः परस्परविशिष्टोपकार्योपकारकप्रत्यययोरन्योन्यापेक्षित्वात्। अनपेक्षत्वे न रसादेरेककालस्य रूपादेरनुमानं स्यात्। अथोपकारकादिप्रतिपत्तेरेवेतरज्ञानाविनाभावित्वान्नात्र

१ ननु युक्तोऽयम–आ० हा० वि०। न युक्तोयम–वा० बा०। २ यदभा–भां० मां०। ३–त्पत्ति द वा० बा०। ४–त्तिः चेत् आ० हा० वि०। ५ सत्वादे क्ष–भां०। सत्वादक्ष–वा० बा०। ६–वान्तर–वा० बा०। ७ तद्भा–भां० मां०। ८–प्रश्ने निश्चयानुत्पत्तिरित्युक्तं कथं वा० बा०। ९–भावानुत्पत्तिरित्युत्तरं आ० हा० वि०। १०–नां वा–वि० विना। ११–फलम–वा० बा०। १२–मभेद अभ्युपा–वा० बा०। १३–त्मनोपाधि–वा० बा०। १४–एकभूतला–वि०। १५–भूतं आ० हा० वि०। १६–पात् सर्वैद–भां० मां० विना। १७–मतः समस्तोपाधिमतः समस्तोपाधिसम्ब–भां० मां०। १८–सक्तेः वा० बा०। १९–भावान्तरेण–भां० मां० वा० बा० विना। २०–मात् सर्वैद–वा० बा०। २१–ना स–भां० मां०। २२–हण स–वा० बा०। २३–माना रू–वा० बा०। २४–कार्यवशिष्ट–मां०। २५–त्वात्प्रती–हा० वि०। २६–तद्भावो यु–वा० बा०। २७–रभातस्य भां० मां०। २८–वा भा–भां० मां०। २९ तद्ग्रहे भां० मां० विना। ३० गुणग्र–भां० मां० विना। ३१–क्षत्वादनपेक्षत्वादनपेक्षत्वे रसा–वा० बा०। ३२–पत्तेरेकेर–वा० बा०। ३३–भावत्वा–आ०। ३४–त्वान्न दोष–भां० मां० आ०।–त्वान्न चादोष–वा० बा०।

दोषद्वयसद्भावः। नन्वेवं परस्परविशिष्टत्वाविशेषेऽपि यदि कार्यबुद्धिः कारणबुद्ध्यनपेक्षा कारणबुद्धिरपीतरबुद्ध्यनपेक्षेति न रूपादेः समानकालस्यावगतिः स्यात्। अपि चोपकारकस्यादृष्टौ नोपकार्यस्येतरविशिष्टतया दृष्टिः तददृष्टौ चोपकारकस्येतरविशिष्टत्वेनादृष्टिरिति परस्यापीदं चोद्यं समानम्।

अथ सविकल्पप्रत्यक्षवादिनां स्यादयं दोषः उपाधिविशिष्टस्योपाधिमतो निश्चयादुपाधि-तद्वतोश्च परस्परसव्यपेक्षत्वात्। निर्विकल्पकप्रत्यक्षवादिनां तु सर्वोपाधिनिरपेक्षनिरंशस्वलक्षणसामर्थ्यभाविना तद्रूपमेवानुकुर्वता निर्विकल्पकाध्यक्षेणान्यनिरपेक्षस्वलक्षणग्रहणाभ्युपगमान्नायं दोषः, असदेतत्; सकलोपाधिशून्यस्वलक्षणग्राहिणो निर्विकल्पकस्याभावप्रतिपादनात् पुनरपि प्रतिपादयिष्यमाणत्वाच्च। तदेवं भिन्ननिमित्तयोरेकविषयत्वाविरोधात् कथं न बहिरर्थे सामानाधिकरण्यव्यवहारः?

विशेषणविशेष्यभावोऽपि बाह्यवस्तुसमाश्रित एव। न च विशेषण-विशेष्ययोरुपकार्योपकारकभूतत्वेनाऽसमानकालयोस्तद्भावानुपपत्तेस्तथाभूतविकल्पाश्रय एवायं व्यवहार इति वक्तव्यम्, उपकार्योपकारकयोः पितापुत्रयोरिव समानकालत्वाविरोधात् एकान्तानित्यपक्षस्य च निषिद्धत्वात् निषेत्स्यमानत्वाच्च।

लिङ्ग-सङ्ख्यादियोगोऽप्यनन्तधर्मात्मकबाह्यवस्त्वाश्रित एव। न चैकस्य 'तटस्तटी तटम्' इति स्त्री-पुं-नपुंसकाख्यं स्वभावत्रयं विरुद्धम् विरुद्धधर्माध्यासस्य भेदप्रतिपादकत्वेन निषिद्धत्वात् अनन्तधर्माध्यासितस्य च वस्तुनः प्रतिपादितत्वात्। न चैकस्मादेव शब्दादेर्मेचकादिरत्नवच्छबलाभासताप्रसङ्गः, प्रतिनियतोपाधिविशिष्टवस्तुप्रतिभासस्य प्रतिनियतक्षयोपशमविशेषनिमित्तस्य साधितत्वात्। 'गोत्वादिवत् सामान्यविशेषाः स्त्रीत्वादयः, न च सामान्येष्वपराणि सामान्यानि विद्यन्ते, अथ च जातिर्भावः सामान्यमिति तेष्वपि स्त्री-पुं-नपुंसकलिङ्गत्रयदर्शनाद्व्यापिता लक्षणस्य' इत्येष दोषोऽनेकधर्मात्मकैकवस्तुवादिनो नैनान् प्रत्याश्लिष्यति, गोत्वादेरपि भिन्नस्य समवायबलाद् वस्तुनि सम्बद्धस्यानभ्युपगमात् येन तेष्वप्यपरसामान्यभूतलिङ्गत्रयमन्तरेण जात्यादिशब्दप्रवृत्तिर्न स्यात्। अत एव दारादिष्वर्थेषु बहुत्वसङ्ख्या वन-सेनादिषु चैकत्वसङ्ख्याऽविरुद्धा, यथाविवक्षमनन्तधर्माध्यासिते वस्तुनि कस्यचिद्धर्मस्य केनचिच्छब्देन प्रतिपादनाविरोधात्।

[प्राज्ञाकरमतस्य निरसनम्]

सामान्यविशेषात्मकवस्तुनः शब्दलिङ्गविषयत्वे च केवलजातिपक्षे यद् दूषणम्–'यद् यत्र ज्ञाने प्रतिभाति तत् तस्य विषयः' इत्यादिप्रयोगरचनापूर्वकं प्रज्ञाकरमतानुसारिणाऽभिहितम्–'यथा न प्रतिभाति निर्विकल्पक-सविकल्पकाध्यक्षशब्दलिङ्गप्रभवज्ञानेषु क्वचिदपि विज्ञाने स्वरूपेण वर्णाकृत्यक्षराकारशून्या दाहपाकाद्यर्थक्रियासमर्था जातिः, प्रतिभासमानाऽप्यनर्थक्रियाकारित्वेन न प्रवृत्तिहेतुः लक्षितलक्षणयाऽपि जाति-व्यक्त्योः सम्बन्धाभावात्, भावेऽपि तस्य प्रत्यक्षादिना प्रतिपत्तुमशक्तेः न व्यक्तौ प्रवृत्तिः' इत्यादि सर्वं प्रतिक्षिप्तम् अनभ्युपगमादेव। नहि जाति-व्यक्त्योरेकान्तभेदोऽभ्युपगम्यते येन प्रत्यक्षे शाब्दे वा जाति-व्यक्त्योरन्यतरप्रतिभासेऽप्यपरस्याप्रतिभासनान्न सम्बन्धप्रतिपत्तिः स्यात्——

"द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात्" [ ] इति

न्यायात्——किन्तु सामान्यविशेषात्मकं वस्तु सर्वस्यां प्रतिपत्तौ प्रतिभाति, केवलं 'प्रधानोपसर्जनभा-

१–प्रत्ययवा–वा० बा०। २ स्या यं द्येष उ–भां०। स्या यं द्वेष उ–भां०। ३–न्यल–वा० बा०। –र्यं स्व–भां० मां०। ४–तत्वेन स–भां० मां० विना। ५–स्तदभा–आ० हा० वि० वा० बा०। ६–योरिकविषयाविरोधात् वा० बा०।–योरेकस–आ० हा० वि०। ७ एकान्तनित्य–वा० बा०। ८–निषेध्यमान–भां० मां०। ९–वस्तुश्रित–वा० बा०। १०–काख्य स्व–भां० मां०।–कादीना स्व–वा० बा०। ११–वच्छायाभास–वा० बा०। १२–शिष्टं वस्तु–भां० मां०। १३ अथ वा जा–वि०। १४ पृ० २२२ पं० ४–८। १५ न जैनः प्र–आ० हा०। न जैनाः प्र–वि०। १६–ष्यन्ति वि०। १७–स्बन्धस्या–वि०। १८–कसङ्ख्या–भां० मां० विना। १९–यत्वेन विकलजा–वा० बा०। २० यत्र आ० वा० बा०। २१ पृ० २३३ पं० २। २२–पाचका–आ० हा० वि०।–पावका–भां० मां०। २३ पृ० २३३ पं० ५–पृ० २३४ पं० ३७। २४–गतो येन भां० मां०।

वेन जाति–व्यक्त्योः सामग्रीभेदात् प्रत्यक्षादिबुद्धौ प्रतिभासभेदात् वैशद्याऽवैशद्यावभासभेदस्तत्र' इति प्रतिपादितम्। 'क्रमेण यौगपद्येन वा आनन्त्याद् व्यक्तीनां प्रत्यक्षेऽप्रतिभासनान्न तासां जात्या तेन सम्बन्धवेदनम्' इत्यादिकमप्यस्माकमदूषणं यथाप्रदर्शितवस्त्वभ्युपगमवादिनां न प्रतिसमाधानमर्हति।

शब्दार्थयोस्तु साक्षात् तदुत्पत्ति–तादात्म्यलक्षणसम्बन्धमन्तरेणापि सम्बन्धः परेणाभ्युपगन्तव्यः अन्यथा 'यत् सत् तत् सर्वं क्षणिकम्, अक्षणिके क्रम–यौगपद्याभ्यामर्थक्रियाविरोधात्, संश्च शब्दः' इति, 'यत् किञ्चित् सत् तत् सर्वमक्षणिकम्, क्षणिकेऽर्थक्रियानुपलब्धेः, संश्च ध्वनिः' इति साधनवाक्ययोः स्वपराभिप्रेतार्थसूचकयोः स्वलक्षणासंस्पर्शित्वेन भेदाभावात् साधन–तदाभासव्यवस्थानुपपत्तिप्रसक्तिः। अथान्यतरसाधनवाक्यस्य पारम्पर्येण स्वलक्षणप्रतिबन्धादितरस्माद् विशेषस्तर्ह्यनिष्टमपि वाच्य–वाचकयोः सम्बन्धान्तरं हेतुफलभावविलक्षणं सामर्थ्यप्राप्तं परेणाभ्युपगतं भवति। न च शब्दस्य क्वचिद् व्यभिचारदर्शनात् सर्वत्राऽनाश्वासादप्रामाण्यकल्पना युक्तिमती, प्रत्यक्षस्यापि तथाभावप्रसक्तेः। अपि च, अन्यविवक्षायामन्यशब्ददर्शनाद् विवक्षायामपि क्वचिद् व्यभिचारात् सर्वत्राऽनाश्वासात् कथं विवक्षाविशेषसूचका अपि ते स्युः? अथ

"सुविवेचितं कार्यं कारणं न व्यभिचरति" [ ]

इति न्यायाद् विवक्षासूचकत्वं शब्दविशेषाणां न विरुध्यते तर्हि येनैव प्रतिबन्धेन शब्दविशेषो विवक्षाविशेषसूचकस्तत एवार्थविशेषप्रतिपादकोऽसौ किं नाभ्युपगम्यते? अथ स्वाभिधित्सितार्थप्रतिपादनशक्तिवैकल्यादन्यथापि प्रायशोऽभिधानवृत्तिदर्शनाद् विचित्राभिसन्धित्वात् पुरुषाणां विसंवादशङ्कया वक्त्रभिप्रायेऽपि तेषां प्रामाण्यं नाभ्युपगम्यत इति न तेन्यायेन बाह्येऽप्यर्थे एषां प्रामाण्यप्रसक्तिः, नन्वेवमप्रामाण्ये सर्वव्यवहारोच्छेदप्रसक्तिः। तथाहि—यज्जातीयात् क्वचित् कदाचिद् यथाभूतं दृष्टं तादृशादेव सर्वदा सर्वत्र तथाभूतमेव भवतीति निरभिप्रायेष्वपि पदार्थेषु नियमो नोपलभ्यते, इन्धनादिसामग्रीतोऽनलप्रादुर्भावदर्शनेऽप्येकदा मण्यादिप्रभवत्वेनापि तस्य समीक्षणात् कथं कार्यहेतावप्यव्यभिचारित्वनिबन्धनं प्रामाण्यं परेणाभ्युपगन्तुं युक्तम्? तथा, यद्यपि बहुलं वृक्षस्यैव भू(चू)तस्योपलम्भस्तथापि क्वचित् कदाचिल्लतात्मतयाऽप्याम्रस्य दर्शनात् शिंशपा वृक्षस्वभावमेव बिभर्तीति कथं प्रेक्षापूर्वकारिणां निःशङ्कं चेतो भवेत्? यतो 'लता च स्यात् शिंशपा च' नैवात्र कश्चिद् विरोध इति 'वृक्षोऽयम् शिंशपात्वात्' इति स्वभावहेतोरप्यव्यभिचारनिबन्धनप्रामाण्याभ्युपगमः परस्य विशीर्यते। अथ स्वभावस्य भावाभावेऽपि भवतो भावस्य निःस्वभावतापत्तेरव्यभिचारलक्षणं प्रामाण्यम् तादात्म्यात्, कार्यस्यापि कारणाभावे भवतः कार्यत्वाभावापत्तेस्तदुत्पत्तिस्वरूपाव्यभिचारनिबन्धनं प्रामाण्यं विद्यत इत्यनुमानस्य प्रामाण्यम्। नन्वेवं यादृशं यादृग्भूतं स्वसन्ताने विवक्षाज्ञानमुत्पन्नं तादृग्भूतमेव श्रोतृसन्ताने ज्ञानमुत्पादयितुकामो वचनमुच्चारयन् परार्थं वाऽनुमानं तदभ्युपगच्छन् शब्दानां बहिरर्थे सम्बन्धनिमित्तं प्रामाण्यं कथं प्रतिक्षिपेत्?

अथानुमानस्यापि प्रामाण्यमव्यभिचाराप्रतिपत्तित एव नाभ्युपगम्यते कुतस्तर्हि तत्त्वव्यवस्था? न प्रत्यक्षात्, तत्रापि स्वार्थाव्यभिचारित्वस्य प्रामाण्यनिबन्धनस्यासम्भवात् भवदभिप्रायेण सम्भ-

---

१–सनाद् वैशद्यावभासभेदस्त–भां० मां० विना। २ पृ० २३४ पं० १७। ३–थानन्तरसा–वा० बा०। ४ सर्वथा ना–आ० हा० वि०। सर्वदा ना–वा० बा०। ५–ना तद् वि–वा० बा०। ६ कथं विवक्षाविवक्षाविशेषसूत्रका–वा० बा०। ७–थापि थात्मनोभिधान–वा० बा०। ८ न च श्यायेन वा० बा०। ९ प्र० पृ० पं० १३। १० "न चैवंवादिनः किञ्चिदनुमानं नाम, निरभिसन्धीनामपि बहुलं कार्यस्वभावानियमोपलम्भात्, सति काष्ठादिसामग्रीविशेषे क्वचिदुपलब्धस्य तदभावे प्रायशोऽनुपलब्धस्य मण्यादिकारणकलापेऽपि संभवात्। 'यज्जातीयो यतः संप्रेक्षितस्तज्जातीयात् तादृग्' इति दुर्लभनियमतायां धूम–धूमकेत्वादीनामपि व्याप्य–व्यापकभावः कथमिव निर्णीयेत? 'वृक्षः, शिंशपात्वात्' इति लताचूतादेरपि क्वचिदेव दर्शनात् प्रेक्षावतां किमिव निःशङ्कं चेतः स्यात्?"–(अष्टशती) अष्टस० पृ० ७१ पं० १६–पृ० ७२ पं० २। नन्वेवं प्रामा- वि०। नन्वेव प्रामा–आ० हा० वा० बा०। ११ यथा जाती–वि०। १२–चारित्वं नि–आ०। १३–हुलवृ–आ०। १४–क्षस्यैवंभू–वि०।–क्षस्येव भू–हा०। १५–णां निश–भां० मां० वा० बा०। १६ लता द स्या–भां० मां० वा० बा० विना। १७ स्वभावाभावेऽपि आ०। स्वभावेऽपि वि०। १८–रूपां व्य–हा० वि०।–रूपं व्य–आ०। १९ नन्वेवं यादृग्भूतं स्व–भां०। नन्वेवं यादृशं यादृग्भूतस्व–वि०। २०–रार्थं चा–भां० मां० हा०। २१–चारप्र–भां० मां० वा० बा० विना। २२ स्वार्थव्य–वा० बा० मां० वि०।

वेऽपि प्रत्यक्षादिना प्रतिपत्तुमशक्तेः प्रामाण्यासिद्धेः। नापि स्वसंवेदनमात्रात्, तस्यापि ग्राह्य–ग्राहकाकारशून्यस्य यथातत्त्वमभ्युपगतस्याननुभूयमानत्वेन स्वत एवाव्यवस्थितत्वात् कुतस्तत्त्वव्यवस्थापकत्वम्? अथ प्रतिभासोपप्लवत्वं सर्वभावानामिति न किञ्चित् तत्त्वमिति न कुतश्चित् तद्व्यवस्थाऽस्माभिरभ्युपगम्यते येन तदव्यवस्थालक्षणं दूषणं युक्तं भवेत्, असम्यगेतत्; शून्यतायां निषेत्स्यमानत्वात्। तस्मात् प्रमाणव्यवहारिणा यदि प्रत्यक्षादिकं प्रमाणमभ्युपगम्यते तदा शब्दोऽपि बहिरर्थे प्रमाणतयाऽभ्युपगन्तव्यः, प्रामाण्यनिबन्धनस्य सामान्यविशेषात्मकबाह्यार्थप्रतिबन्धस्य परम्परया तत्रापि सद्भावात् तत्रैव च शब्दाच्चक्षुरादेरिव नियमेन प्रतिपत्ति–प्रवृत्ति–प्राप्तिलक्षणव्यवहारदर्शनात् गुणदोषयोश्चोभयत्रापि समानत्वात्। न चासाभिर्मीमांसकैरिवापौरुषेयः शब्दार्थयोः सम्बन्धोऽभ्युपगम्यते येन 'विकल्पनिर्मितस्य तस्य नृत्यादिक्रियादेरिव कथमपौरुषेयत्वं स्यात्? स्वत एव शब्दस्यार्थप्रतिपादनयोग्यतायां सङ्केतादर्शिनोऽपि शब्दादर्थप्रतिपत्तिश्च स्यात् ततोऽनर्थकः सङ्केतः, स्वाभाविकसम्बन्धाभिव्यञ्जकत्वोपयोगकल्पनायां च सङ्केतस्य यथेष्टं शब्दानामर्थेषु सङ्केतो न स्यात्, न ह्यभिव्यञ्जकसन्निधिर्नियमेनाभिव्यङ्ग्यस्योपलब्धिं जनयति प्रदीपादिरिव घटस्य, शब्दाभिव्यक्तिसाङ्कर्यवत् सम्बन्धाभिव्यक्तिसाङ्कर्यमपि प्रसज्येत, ततश्च सङ्केतात् सम्बन्धाभिव्यक्तिप्रतिनियमाभावात् तद्विवक्षितार्थप्रतिपत्तिनियमस्याप्यभाव इति सर्वस्माद् वाचकात् सर्वस्यार्थस्य प्रतिपत्तिः सकृदेव प्रसज्येत; ततः सङ्केतकरणं विवक्षितार्थप्रतिपत्त्यर्थं न भवेत्, न ह्येकान्तनित्येषु शब्देषु तत्सम्बन्धे वा तालवादिव्यापारः सङ्केतो वा कदाचिदभिव्यञ्जकः कदाचिन्न इति युक्तमुत्पश्यामः, तदर्थस्यापि सामान्यस्य नित्यत्वे तदवस्थः प्रसङ्गः, तत् पुनः सामान्यं व्यक्त्या क्वचित् कदाचिद् व्यज्यते न वेति व्यक्ताव्यक्तस्वभावाभिन्नं नित्यत्वैकान्तमतिवर्त्तते, सामान्यानां च सर्वगतत्वे शब्दतत्सम्बन्धवदभिव्यक्तिसाङ्कर्यमासज्यते, इदमस्यां व्यक्तौ वर्त्तते नेतरस्याम् इति विशेषाभावात् कुतः समवायिनियमः स्यात्, संस्थानादिव्यतिरिक्तं सामान्यं क्वचिदप्यनुपलभ्यमानं कथं शब्दसङ्केतविषयो भवेत् येन तत् तच्छब्दाभिधेयं स्यात्' इत्यादिकमपि दूषणमस्मन्मतानुपाति स्यात्। न च समानासमानपरिणामात्मकव्यक्तीनामानन्त्यात् तिर्यक्सामान्यस्य चैकस्य सर्वव्यक्तिव्यापिनो व्यक्त्युपलक्षणभूतस्यानभ्युपगमात् तदभ्युपगमेऽपि तद्योगात् तासामानन्त्याविनिवृत्तेर्न सङ्केतस्तासु सम्भवतीति वक्तव्यम्, अतद्रूपपरावृत्ताग्निधूमव्यक्तीनामानन्त्येऽपि यथा प्रतिबन्धः परस्परं निश्चीयते—अन्यथानुमानोत्थानाभावप्रसक्तेर्न क्षणिकत्वादितत्त्वव्यवस्था स्यात् अन्यस्य तद्व्यवस्थापकस्यासम्भवात्—तथा यथोक्तव्यक्तीनामानन्त्येऽपि सङ्केतसम्भवो युक्त एव। स च सम्बन्धोऽग्निधूमव्यक्तीनां प्रत्यक्षेणैव ग्रहीतव्यः परेण, अनुमानेन ग्रहणेऽनवस्थेतरेतराश्रयदोषप्रसङ्गात्। न च दर्शनपृष्ठभाविना विकल्पेन तत्सामर्थ्यबलोद्भूतेन स्वव्यापारोत्प्रेक्षाख्यातिरस्कारेण दर्शनव्यापारानुसारिणा लौकिकानां प्रत्यक्षाभिमानविषयत्वेन स्थितेन प्रतिबन्धग्रहणादेरुपपत्तेरनुमानप्रवृत्तिर्भविष्यति; तज्जनकं वा दर्शनं तथाविधविकल्पे स्वव्यापारारोपकत्वेन विकल्परूपतामापन्नं पूर्वोक्तकार्यजनकत्वाद्दनुमानप्रवृत्तिनिमित्तम्, विकल्पस्यैव प्रामाण्यप्रसक्तेः। तथाहि–प्रत्यक्षे निर्विकल्पके सत्यपि यत्रैव यथोक्तो विकल्पस्तत्रैव प्रवृत्त्यादिव्यवहारकर्तृत्वेन तस्य प्रामाण्यं नान्यत्र, अनुमानविकल्पे च प्रत्यक्षाभावेऽपि प्रवृत्त्यादिव्यवहारविधायकत्वेन प्रामाण्यमित्यन्वय–व्यतिरेकाभ्यां विकल्पस्यैव प्रामाण्यमिति प्रत्यक्षाऽनुमानप्रमाणद्वयवादिना व्याप्तिग्राहको विकल्पः प्रत्यक्षं प्रमाणमभ्युपगन्तव्यः। तत्र यथा व्यक्तीनामानन्त्येऽपि प्रतिबन्धसिद्धिस्तथा सङ्केतविषयत्वमपि तासां तत एव

१–दनामा–भां० मां०। २–पगत्वं हा०। ३–न्यतया भां० मां० विना। ४–या निषेध्यमा–भां० मां०। ५–माण्यव्य–वि०। ६ तस्याऽनृत्यादि–आ० हा०। तस्याऽवृत्यादि–वि०। तस्य नित्यादि–वा० बा०। ७–सम्बन्धाभिव्यञ्जकसम्बन्धाभिव्यञ्जकत्वोप–भां० मां०। ८–भावात् तद्विवक्षितार्थप्रतिनियमाभावात् तद्विवक्षितार्थप्रतिपत्ति–हा० वि०। ९–स्यार्थप्र–भां० मां० वा० बा० विना। १० सङ्केततो वा कदाचिन्नेति आ० हा० वि०। सङ्केततो कदाचिद्–वा० बा०। ११–वनिमित्तं नित्य–वि०। १२ शब्दसम्बन्ध–वा० बा०। १३ शब्दवि–भां० मां०। १४–भूतस्यानभ्युपगमेऽपि तद्यो–भां० मां० विना०। १५–बन्धनं प–आ०। १६ सम्बन्धाग्नि–भां० मां०। १७–क्षातिर–वा० बा०। १८–रुत्पत्तेरनु–भां० मां०। १९ स्वपरारोप–आ० हा० वि०। २०–त्वानुमा–भां० मां० विना। २१–वृत्तिनिमित्तकल्प–वा० बा०। २२ प्रतिसम्बन्ध–भां० मां० वा० बा० विना।

सेत्स्यति, अत एवानुमान[1]–शाब्दयोः सामग्रीभेदाद् भेदेऽपि प्रत्यक्षेण सहैकविषयत्वम् अन्यथा—अपरस्य प्रतिबन्धग्राहकस्य[2] पराभ्युपगमेनासम्भवात्—तयोरप्रवृत्तिप्रसक्तिः। विकल्पस्य प्रतिबन्धग्राहकत्वे तद्विषयस्याऽवस्तुत्वान्न[3] केनचित् कार्यकारणभावस्तादात्म्यं वा। न च विकल्पविषययोर्दर्शनविषयत्वेन स्थितयोः कार्यकारणभावस्तादात्म्यं वा, विकल्पविषयस्य वस्तुदर्शनबलोद्भूतविकल्पप्रदर्शितस्य तद्रूपत्वं तत्त्वतोऽन्यथाभूतस्याप्यारोप्यत इति कृत्वा 'यतो यत्र व्याप्तिग्रहणं न तत्र तात्त्विकः प्रतिबन्धः यत्र त्वसौ न तत्र प्रतिबन्धग्रहणम्' इत्यनुमानप्रवृत्तिमभ्युपगच्छता प्रत्यक्षविषयत्वं तस्याभ्युपगन्तव्यम्। अनुमानतुल्यविषयत्वं च शाब्दप्रत्ययस्य परेण[6]ाप्यभ्युपगम्यत एव, तस्य परार्थानुमानत्वाभ्युपगमात्। यदि पुनर्विकल्पप्रतिभासिन्यवस्तुनि सङ्केतः पुनश्च तत्र प्रतिपत्तिः कथं वस्तु–तत्सामान्यसङ्केतादस्य विशेषः स्यात्? विकल्पानामभावविषयत्वैकान्ते[7] तत्त्वमिथ्यात्वव्यवस्थितेरनुपपत्तिश्च। अपि च, 'शब्दैर्विकल्पैर्वा यद्यभावः प्रतीयते भावो न प्रतीयेत' इति क्रियाप्रतिषेधान्न किञ्चित् कृतं स्यात्। यदि पुनरभिप्रायाऽविसंवादात् सत्यार्थत्वव्यवस्थितिः, कथम् 'एकं शास्त्रं युक्तं नापरम्' इति व्यवस्था युज्येत विपक्षवादिनामपि स्वाभिप्रायप्रतिपादनाऽविसंवादनात्? न चायमेकान्तः–'शब्दैर्बहिरर्था न प्रतिपाद्यन्ते,' तद्व्यवहारोच्छित्तिप्रसक्तेः। दृश्यन्ते च स्वयमदृष्टेषु नदी–देश–पर्वत–द्वीपादिष्वाप्तप्रणीतत्वेन[8] निश्चितात् तच्छब्दात् तत्त्वप्रतिपत्तिं कुर्वाणाः। न च दृष्टेष्वपि विशेषेषु संप्रदायमन्तरेण मणि–मन्त्रौषधादिषु बहुलं तत्त्वनिर्णी(र्णी)तिः। न च तद्विशेषाऽविनिश्चयेऽपि कथञ्चिन्निर्णीतिर्नोपपद्यते, प्रत्यक्षस्यापि स्वविषयप्रतिपत्तेः कथञ्चिदेव सम्भवात्। तत् असाधारणं वस्तुस्वरूपमविकल्पविषयभूतं परमार्थसत् विकल्पानां प्रत्यक्षपृष्ठभाविनाम् वाच्यविषयाणामन्येषां च सर्वथा निर्विषयत्वं व्यवस्थापयन्नविकल्प एव सौगतः[11]। यतः प्रत्यक्षं स्वलक्षणं[13] विषयलक्षणं वा तत्त्वं न निश्चिनोति विकल्पकं पुनः साकल्येनाऽवस्त्वेव निश्चिनोतीति निश्चयक्रियाप्रतिषेधान्न[14] किञ्चित् केनचिन्निश्चेयम्[15] अनिश्चितेन च स्वरूपेण न तत्त्वव्यवस्थिति[16] प्रत्यक्षवच्छाब्दस्याप्युभयात्मकवस्तुनिश्चायकत्वेन प्रामाण्यमभ्युपेयम्। न च प्रत्यक्षे पुरोव्यवस्थितं घटादिकं चक्षुर्जन्ये श्रोत्रप्रभवे शब्दस्वरूपं च प्रतिभाति नापरो[17] वाच्यवाचकभावस्तयोरिति वक्तुं युक्तम्, यतो नास्माभिरेकान्ततस्तयोर्भिन्नो वाच्यवाचकभावोऽभ्युपगम्यते—येन तस्य पृथक् प्रतिभासः स्यात्—किन्तु सङ्केतसव्यपेक्षस्य शब्दस्य वाचकत्वं कथञ्चिदभिन्नो धर्मः तदपेक्षया[18] चार्थस्यापि वाच्यत्वं तथाभूत एव धर्मः; तच्च द्वयमपि शब्दार्थप्रतिभाससमये क्षयोपशमविशेषाविर्भूते क्वचिज्ज्ञाने प्रतिभासत एव। तथाहि–'इदमस्य वाच्यम्' 'इदं[19] वाऽस्य वाचकम्' इत्युल्लेखवत्[20] तद्ग्राहिविशिष्टेन्द्रियादिसामग्रीप्रभवं ज्ञानमनुभूयत एव सङ्केतसमये[22]। न च ''अस्येदं वाचकम्' इति[23] किं प्रतिपादकम् यद्वा कार्यम्, कारणं[24] वा' इति पक्षत्रयोद्भावनं कर्तुं युक्तम्, प्रतिपादकत्वस्य वाचकत्वप्रदर्शनात्[25]। 'प्रतिपादकत्वेऽप्यधुनाऽन्यदा वा विशदेन रूपेणेन्द्रियप्रभव एव ज्ञाने तद् वस्तु प्रतिभाति, न[26] शाब्देन; शब्दस्य तत्र सामर्थ्यानवधारणात्' इति[27], एतदप्यसङ्गतम्; विहितोत्तरत्वात्[28]–दूरस्थवृक्षाद्यर्थग्राहिणोऽविशदस्यापि प्रत्यक्षत्वप्रतिपादनात् शाब्दस्यापि तत्प्रतिभासाविशिष्टस्य तत्र प्रामाण्येन तदुत्था-

१–न–शब्द–भां० मां०। २ प्रतिसम्बन्ध–वि०। ३–न्न किमचित् वा० बा०।–न्न किंचित् हा०।–न्न किञ्चित् आ० वि०। ४–कल्पाविषययोर्द–वा० बा०।–कल्पां विषयोर्द–भां०।–कल्पाविषयोद–मां०।–कल्पविषयोर्द– आ० वि०। ५–त्विक प्र–भां० मां० विना०। ६ परेणाभ्यु–भां० मां० वा० बा० विना। ७–षयत्वैकान्ते आ० वा० बा०।–षयेत्वैकान्ते वि०।–षयेत्वेकान्ते हा०। ८–प्रतिषेधे न भां० मां०। ९–न निश्चिताच्छब्दात्तशब्दात्तच्चप्रति–आ०।–न निश्चितात्वदात्तत्वप्रति–वा० बा०। १०–हुलं तत्तत्वनि–भां० मां०।–हुलं तत्तनि–आ० वा० बा०। ११ सौमतः वा० बा०। १२–त्यक्षस्व–हा०। १३–लक्षणं वा भां० मां० वा० बा० विना। १४–प्रतिषेधात् किञ्चि–वा० बा०। १५ च रूपेण वा० बा०। १६–व स्थिति भां० मां०। १७ नापुरो भां० मां०। १८–यावार्थ– आ० हा० मां०।–यार्थ–वा० बा०। १९ इदं चास्य भां० मां०। इदं वाच्यस्य आ० हा० वि०। २०–खवद्ग्राहि–भां० मां०।–खवयत् ग्राहि–वा० बा०। २१ सङ्केधानसम–वा० बा०। २२ इति प्रति–भां० मां०। २३–रणं चेति भां० मां० वा० बा० वि०। २४ पृ० २३५ पं० ३०। २५–कप्र–आ० वा० बा० विना। २६ न शब्दा (शाब्दे) शब्दस्य वा० बा०। २७ पृ० २३५ पं० ३१। २८ पृ० २६४ पं० २७–२९। २९–ग्राहिणा वि–हा० वि०।–ग्राहिणाऽवि–आ०।

पकशब्दस्य तत्र सामर्थ्याधिगतेः[3]। न च 'यदि शब्देनैवासावर्थः स्वरूपेण प्रतिपाद्यते तदास्य[3] सर्वथा प्रतिपन्नत्वात् प्रवृत्तिर्न स्यात्' इति[4] युक्तम्, प्रत्यक्षेऽप्यस्य दूषणस्य समानत्वात्। तथाहि–प्रत्यक्षेणापि यदि नीलादिः[6] सर्वात्मना प्रतिपन्नः किमर्थं तत्र प्रवर्तेत[7]? तथापि प्रवृत्तौ प्रवृत्तेरविरतिप्रसक्तिः। 'अथाप्रतिपन्नं किञ्चिद् रूपमस्ति यदर्थं प्रवृत्तिः' इत्यादिकमपि प्रत्यक्षेऽपि समानम्। तत्रापि हि शक्यत एवं वक्तुम्–यद्यर्थक्रियार्थं प्रत्यक्षेण प्रतिपन्नेऽपि नीलादिके प्रवर्तते तदा तदेवार्थः अर्थक्रियाक्षमत्वात्[10] न प्रत्यक्षप्रतिभातं नीलादिकम् तस्यार्थक्रियासामर्थ्यरहितत्वात्। अथ तदपि नीलादिकमर्थक्रियाक्षमं तथापि तदर्थक्रियार्थी तदादानाय प्रवर्तते, ननु शाब्दप्रतिभासेऽप्येतत् समानमुत्पश्यामः। यदपि[13] 'अथाऽविशदेनाकारेण शब्दास्तमर्थं प्रकाशयन्ति तदाऽसावस्पष्ट आकारो नेन्द्रियगोचरः,' तदप्यसङ्गतम्; तस्येन्द्रियविषयत्वेन प्रतिपादितत्वात्[13]। तत्र प्रवृत्ताः शब्दाः कथं[14] नेन्द्रियगोचरे प्रवृत्ता भवन्ति? यदपि 'श्रुतं पश्यामि' इत्येकत्वाध्यवसाये दृष्टरूपतया श्रुताध्यवसाये दृष्टमेव[16], श्रुतरूपतया दृष्टस्य ग्रहणे श्रुतमेव, न तयोस्तत्त्वम्' इति[17], एतच्चित्रपतङ्गेऽपि समानम्। तथाहि–यदि तत्रापि नीलाद्याकारः पीताद्याकारतया गृह्यते चित्रपतङ्गज्ञानेन तदा पीताद्याकार एवासौ न नीलाद्याकारः, अथ नीलाद्याकारतया पीताद्याकारो गृह्यते तदा नीलाद्याकार एवासौ कुतश्चित्र एकः? तथा, तत्प्रतिभासेऽपि ज्ञाने नीलाद्याभासो यदि पीताद्याभासतया संवेद्यते तदा पीताभासमेव तद् ज्ञानं[19] न नीलाद्याभासमित्यादिकल्पनया न चित्रप्रतिभासमेकं ज्ञानम्। तथा, नीलसंवेदनेऽपि प्रतिपरमाण्वेवंकल्पनया नैकं नीलप्रतिभासं ज्ञानम्, विव(वि)क्तस्य च ज्ञानपरमाणोरसंवेदनात् सर्वशून्यतापत्तेः सर्वव्यवहारोच्छेद इति न किञ्चिद् वक्तव्यम्। अथानेकनीलपरमाणुसमूहात्मकमेकत्वेन संवेदनादेकं नीलज्ञानम् तर्हि दृष्ट–श्रुतरूपमबाधितैकत्वप्रतिभासादेकं बहिर्वस्तु किं नाभ्युपगम्यते? यथा युगपद्[21]द्व्याद्यनेकनीलज्ञानपरमाण्ववभासानां स्वसंवेदने[21] एकत्वाविरोधस्तथा क्रमेणाऽपि दृष्ट–श्रुतावभासयोरेकत्वेनाविरोधः 'दृष्टं शृणोमि' इति ज्ञानेन भविष्यतीत्येकत्वावभासिना[23] दर्शनशब्दविषयस्यार्थस्यैकत्वं निश्चीयत इति परमार्थत एवं[26] तत् तत्त्वमिति। एतेन 'भिन्नविज्ञानप्रतिभासिनोर्न विशेषणविशेष्यभावः एकविज्ञानप्रतिभासिनोरपि युगपत् स्वातन्त्र्येण द्वयोः प्रतिभासनाद् घट–पटयोरिव नासौ युक्तः। तादृप्येण[27] प्रतिभासने[28] विशेष्यरूपता विशेषणरूपता वा केवला, द्वयोः प्रतिभासाभावात् न विशेषणविशेष्यभावः क्वचिदपि ज्ञाने प्रतिभाति' इत्येतदपि निरस्तम्; अनेकनीलपरमाणुप्रतिभासज्ञाने तत्त्वसंवेदने वाऽस्य समानत्वात्। न च नीलपरमाणूनां तत्प्रतिभासपरमाणूनां वा परस्परविविक्तानां प्रत्यक्षे स्वसंवेदने च प्रतिभास इति नायं दोषः, तत्र परमाणुपरिमाण्डल्यादेः बहिरन्तश्चाप्रतिभासनात् स्थूलस्यैकस्य[31] संहृतविकल्पावस्थायामपि बहिरन्तश्च वेद्यवेदकाकारविनिर्भासवतः प्रतिभासनात्। परमाणुरूपं बहिरनंशं[32] संवेदनं वा प्रत्यक्षं प्रतिजानानः कथं सर्वज्ञत्वमात्मनो न प्रतिजानीते? शक्यं हि वक्तुम्–संवेदनं[33] संवेद्यं सकलं विषयीकरोति—देश–काल–स्वभावविप्रकृष्टेष्वपि भावेषु संवेदनस्य निरङ्कुशत्वात्—किन्तु कुतश्चिन्निश्चयप्रबोधहेतोर्विकल्पानामियमशक्तिः यतो यथार्थस्वभावं[34] प्रत्यक्षेण विषयीकृतमपि न निश्चिन्वन्तीति।

१–गमैर्न भां० मां०।–गमनेर्न वा० बा०। २ यदि शाब्दे–मां०। ३–दा तस्य भां० मां० विना। ४–पन्नात् वा० बा०। ५ पृ० २३६ पं० १। ६ नीलतो स–वा० बा०। ७ प्रवर्तते भां० मां०। ८–पन्न किञ्चि–आ० मां०। ९ पृ० २३६ पं० २। १०–याभूतमत्वा–भां० मां० विना। ११–भास्येप्ये–मां०। १२ पृ० २३६ पं० ४। १३ पृ० २६० पं० १९। १४ कथं मिन्द्रिय–वा० बा० विना। 'कथमिन्द्रियगोचरे न प्रवृत्ता–' वि० सं०। १५–साये दृष्टरूपताध्यवसायो दृष्टरूपतया श्रुताध्यवसायो दृष्टमेव वा० बा०। १६ दृष्टमिव मां०। १७ पृ० २३५ पं० ७–१०। १८ ज्ञानं नी–भां० मां० वा० बा० विना। १९–समेकज्ञानं–भां० मां० विना।–समेव ज्ञानं न नीलाद्यं वेदने–वा० बा०। २०–पद्व्याद्यनेक–वा० बा०।–पदाद्यनेक–आ० हा० वि०। २१–दनं वा० बा०। २२–स्तत्रा क्र–वा० बा०। २३–णादृष्ट–भां० मां० वा० बा० विना। २४ ज्ञाने भ–वि०। २५–कत्वभासि–भां० मां० वा० बा० विना। २६–व तत्त्व–भां० मां० वा० बा० विना। २७ तादूपाण्या प्र–वा० बा०। २८–सते आ०। २९ पृ० २३४ पं० २२–२३। ३० वाऽध्य स–आ० हा०। वाऽध्यव स–वि०। ३१ संहत–भां० मां०। संद्वति न वि–वा० बा०। ३२–बहिरनंशं वेद–आ० हा० वा० बा०।–बहिरन्तसंवेद–वि०। ३३–दनसंवे–आ० हा०। ३४–भाव प्र–भां० मां० विना। ३५–मपि निश्चि–वा० बा०।

प्रत्यक्षबुद्धेस्तथाप्रतिभासाभावात् सर्वज्ञत्वमयुक्तमिति चेत्, परमाणुपरिमाण्डल्यादेरप्यप्रतिभासनं समानं संपश्यामः। यदपि 'काल्पनिकः शब्दार्थयोः सम्बन्धः न नियतः' इति, तदप्ययुक्तम्; प्रतिनियतसङ्केतानुसारिणो नियताच्छब्दात् प्रतिनियतार्थप्रतिपत्तिदर्शनात्। तेन 'न शब्दस्वरूपं नियतार्थप्रतिपत्तिहेतुः, तस्य सर्वार्थान् प्रत्यविशिष्टत्वात्' इति न वक्तुं युक्तम् नियतसङ्केतसहकृतस्य शब्दस्य सर्वार्थान् प्रत्यविशिष्टत्वासिद्धेः। कार्यगम्यं हि वस्तूनां नियतत्वम् अन्यद् वा–यदा च नियतं तत्कार्यमुपलभ्यते तदा तस्य नियतत्वं व्यवस्थाप्यते, यदा चान्यथा तदाऽन्यथात्वमिति 'कुतः पुनरेतत् स्वरूपं शब्दादेः' इति पर्यनुयोगे 'स्वहेतुप्रतिनियमः' इत्युत्तरं न्यायविदः सर्वत्र युक्तियुक्तम् दृष्टानुमितानां नियोग-प्रतिषेधानुपपत्तेः। 'प्रतिपत्तिधर्मस्तु नियमहेतुः काल्पनिक एव स्यात्' इति, एतदप्ययुक्तम्; अबाधिताकारप्रतिपत्तेस्तात्त्विकार्थधर्मव्यवस्थापकत्वात्, शब्दार्थसम्बन्धप्रतिपत्तेस्त्वबाधितप्रतिपत्तित्वं साधितमेव; बाधितत्वे वा तत्प्रतिपत्तेस्तत्प्रभवशाब्दज्ञानस्याप्रामाण्यप्रसक्तिर्विपरीतप्रतिबन्धग्राहिज्ञानप्रभवानुमानाभासस्यैवम् (स्येव)। तत् सौगतदर्शनमेव ध्यान्ध्यविजृम्भितम्। यदपि 'शब्देभ्यः कल्पना बहिरर्थासंस्पर्शिन्यः प्रसूयन्ते, ताभ्यश्च शब्दाः' इति, तदप्यचारु; शब्दजनितविकल्पानां बहिरर्थाऽसंस्पर्शित्वासिद्धेः इन्द्रियजज्ञानस्यैव तासां तत्प्राप्तिहेतुत्वादिति प्रतिपादितत्वात्। परसन्तानवर्तितथाभूतविकल्पजनकत्वं तद्विकल्पादृष्टावपि शब्दानां प्रत्येति, न पुनः प्रत्यक्षाद्युपलभ्यमानबहिरर्थवाचकत्वमिति विपरीतप्रज्ञो देवानांप्रियः। न चार्थाभावेऽपि शाब्दप्रतिभासस्याऽप्रच्युतेर्न शब्दस्य बाह्यार्थवाचकत्वम्, विकल्पेऽप्यस्य समानत्वात्—विसदृशसङ्केतस्य श्रोतुस्तच्छब्दसद्भावेऽपि तथाभूतविकल्पानुत्पत्तेः शब्दाभावेऽपि च कुतश्चित् कारणात् तथाभूतविकल्पप्रतिभासाप्रच्युतेश्च। अथ समानसङ्केतस्य श्रोतुस्तत्तत् समुत्पद्यत एव, शब्दाभावे तु यद् विकल्पकज्ञानं तादृगवभासं कारणान्तरप्रभवं न प्रच्यवते; तद् अतादृशमेवेत्यतो न व्यभिचारः। नन्वेवं तद् बाह्यार्थावभासिशाब्दे प्रतिभासेऽपि समानम्–'यो ह्यर्थाभावेऽपि शाब्दः प्रतिभासः स तत्प्रतिभासमानो न भवति' इत्यादेः प्राक् प्रदर्शितत्वात्। यदपि 'शब्दाद् बाह्यार्थाध्यवसायिज्ञानोत्पत्त्यादितत्प्राप्ति-पर्यवसानव्यवहारसद्भावेऽपि बाह्यार्थासंस्पर्शित्वाद् विकल्पानां न सर्वात्मनाऽर्थग्रहणदोषः' तदप्यसङ्गतम्; प्रत्यक्षवदर्थसंस्पर्शित्वेऽपि सर्वात्मना अग्रहणस्य प्रतिपादितत्वात्। यदपि 'अप्रतिभासेऽप्यर्थस्य शब्दात् भ्रान्तेः प्रवृत्तिः,' तदप्ययुक्तम्; भ्रान्ताऽभ्रान्तप्रवृत्त्योर्विशेषसद्भावात्–यत्रार्थप्राप्तिर्नोपजायते प्रवृत्तौ तत्र भ्रान्तिः प्रवृत्तेर्व्यवस्थाप्यते अन्यत्र त्वभ्रान्तिरिति कस्य विज्ञानस्य प्रामाण्यमभ्युपगच्छता नाऽप्रतिभासेऽप्यर्थस्य प्रवृत्त्यादिव्यवहारः कदाचनाप्यभ्युपगन्तुं युक्तः। प्रतिबन्धस्तु तदविसंवादे शाब्दस्याप्यर्थप्रतिबन्धनिबन्धनः; तत्र संवादोऽस्तीति प्रत्यक्षवत् तत्र तस्य प्रामाण्यं युक्तम्, न च प्रतिबन्धः परपक्षे सम्भवतीति प्रतिपादयिष्यते, स्वसंवेदनमात्रं च परमार्थसत् तत्त्वेरूपं निरस्तप्रतिबन्धादिपदार्थं यथा न संभवति इत्येतदपि प्रतिपादयिष्यते। शेषस्त्वत्र पूर्वपक्षग्रन्थः प्रतिपदमुच्चार्य न प्रतिविहितः ग्रन्थगौरवभयात् दिग्मात्रप्रदर्शनपरत्वाच्च प्रयासस्य। इति स्थितमेतत्–'समयपरमत्थवित्थर' इति ॥ २ ॥

---

१ पृ० २३५ पं० २१–पृ० २३६ पं० ११। २–**तार्थाप्र**–वा० बा० विना। ३ **तेन श**–वा० बा०। ४–**त्वादिति नि य वक्तुं** वा० बा०। ५ पृ० २३६ पं० १३। ६ **अन्यथा** वा० बा० विना। ७–**ति तत् कु**–वि०। ८–**त्तरन्याय**–वा० बा० विना। ९–**तार्या नियो**–वा० बा०। १० पृ० २३६ पं० १४। ११–**बाधिकाकार**–भां० मां०। १२–**त्वं प्रसा**–भां० मां०। १३ **तत्त्वेना तत्प्र**–आ० हा० वि०। **तत्त्वेनाऽतत्प्र**–भां० मां०। १४–**नाभ्यास**–भां० मां० वा० बा० विना। १५–**सत सौ**–वा० बा०। १६ पृ० २३६ पं० १७। १७–**नस्यैव** वा० बा०। १८ **तद्विकल्पदृष्टा**–वा० बा०। १९–**ति प**–भां०। २०–**च्युते न** भां० मां० वा० बा०। २१ **विशसङ्केत**–आ० हा० वि०। **विशब्दसङ्केत**–वा० बा०। २२–**नुपपत्तेः** वा० बा०। २३–**कल्पज्ञा**–भां० मां०। २४ **नन्वेवद् बा (नन्वेतद् बा)** वा० बा०। २५ **शाब्दप्र**–भां० मां० वा० बा० विना। २६ पृ० २३७ पं० २। २७ पृ० २३७ पं० ५। २८ **वृत्तेर्वि**–भां० मां० वा० बा० विना। २९–**नौ जा**–भां० मां० विना। ३०–**वृत्ते व्य**–वा० बा० मां०। ३१–**नाभ्यु**–भां० मां० वा० बा० विना। ३२ **प्रतिबन्धास्तु** हा० वि०। **प्रतिबन्धात् तु** भां० मां०। **प्रति विषास्तु** वा० बा०। ३३–**त्वस्वरू**–वि०। ३४–**ष्यमाणम्। शे**–भां० मां० वा० बा०। ३५ पृ० १६९ पं० ८।

तृतीयगाथाव्याख्या।

[द्रव्यास्तिकनयनिरूपणम्]

[१ सद्द्वैतप्रतिपादकः शुद्धद्रव्यास्तिकनयः]

अत्र च कुण्ठधियोऽप्यन्तेवासिनो योगित्वा(ता)प्रतिपादनार्थः प्रकरणारम्भः प्रतिपादितः; सा च विशिष्टसामान्य-विशेषात्मकतदुपायभूतार्थप्रतिपादनमन्तरेणातः प्रकरणान्न सम्पद्यत इति प्रकरणाभिधेयं योगितोपायभूतमर्थम्—

तित्थयरवयणसंगह-विसेसपत्थारमूलवागरणी।
दव्वट्ठिओ य पज्जवणओ य सेसा वियप्पा सिं ॥ ३ ॥

इत्यनया गाथया निर्दिशति। अस्याश्च समुदायार्थः पातनिकयैव प्रतिपादितः।

अवयवार्थस्तु—तरन्ति संसारार्णवं येन तत् तीर्थम्—द्वादशाङ्गम् तदाधारो वा सङ्घः—तत् कुर्वन्ति उत्पद्यमानमुत्पादयन्ति तत्स्वाभाव्यात् तीर्थकरनामकर्मोदयाद् वेति "हेत्वाद्यर्थे टच्" [ ] **तीर्थकराणां वचनम्**–आचारादि अर्थतस्तस्य तदुपदिष्टत्वात्—तस्य **सङ्ग्रह-विशेषौ** द्रव्य-पर्यायौ सामान्य-विशेषशब्दवाच्यावभिधेयौ तयोः **प्रस्तारः**—प्रस्तीर्यते येन नयराशिना सङ्ग्रहादिकेन स प्रस्तारः—तस्य संग्रह-व्यवहारप्रस्तारस्य **मूलव्याकरणी** आद्यवक्ता ज्ञाता वा **द्रव्यास्तिकः**–द्रुतिर्भवनं द्रव्यम्–सत्तेति यावत्–तत्र 'अस्ति' इति मतिरस्य द्रव्यास्तिकः "सह सुपा" [अ० २, पा० १, सू० ४ पाणि० व्या० पृ० १६० अं० ६४९] इत्यत्र 'सुपा सह' इति योगविभागात् मयूरव्यंसकादित्वाद् वा द्रव्य-आस्तिकशब्दयोः समासः, द्रव्यमेव वाऽर्थोऽस्येति द्रव्यार्थिकः द्रव्ये वा स्थितो द्रव्यस्थितः। परि समन्तात् अवनम् अवः–पर्यवो विशेषः तज्ज्ञाता वक्ता वा, नयनं नयः नीतिः **पर्यवनयः** अत्र छन्दोभङ्गभयात् 'पर्यायास्तिकः' इति वक्तव्ये 'पर्यवनयः' इत्युक्तम्

१–**त्र कुण्ठ**–भां० मां०। २ **योग्यताप्र**–भां० मां०। **योगित्वप्र**–आ० हा० वि०। ३ **योग्यतोपा**–भां० मां०। ४ "कृञो हेतु-ताच्छील्याऽऽनुलोम्येषु"। ३, २, २० पाणि० व्या० पृ० ४९२ अं० २९३४। ३, २, २० अनंभ० मिता० पृ० २२४ पं० ४। "कृञो हेतु-ताच्छील्याऽऽनुलोम्येषु अशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदेषु"। ४, ३, २२ कात० व्या० पृ० ३४८ पं० १। "कृञो हेतु-शीलाऽनुलोमेषु"। १, २, ७ चान्द्रव्या० पृ० ३२ पं० २१। "कृञो हेतु-शीलाऽऽनुलोम्ये अशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदे"। २, २, २५ जैने० व्या० पृ० २६५ पं० ४। "हेतु-तच्छीलाऽनुकूले अशब्द-श्लोक-कलह-गाधा (था) वैर-चाटु-सूत्र-मन्त्र-पदात्"। ४, ३, १३३ शाक० व्या० पृ० २९५ अं० ८९। "हेतु-तच्छीलाऽनुकूले अशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदात्"। ५, १, १०३ हैम० व्या० पृ० ८ प्र० पं० २। "अ-टौ" सार० व्या० पृ० ४०७ पं०३१। एषु सर्वेषु व्याकरणेषु हेत्वाद्यर्थे 'ट' प्रत्यय एव विधीयते न तु 'टच्'। ५ 'आचारादि'शब्देन आचाराङ्गप्रभृतीनि द्वादश अङ्गसूत्राणि। तद्यथा—आचाराङ्गम्, सूत्रकृताङ्गम्, स्थानाङ्गम्, समवायाङ्गम्, व्याख्याप्रज्ञप्ति-भगवती-अङ्गम्, ज्ञाताधर्मकथाङ्गम्, उपासकदशाङ्गम्, अन्तकृद्दशाङ्गम्, अनुत्तरौपपातिकदशाङ्गम्, प्रश्नव्याकरणाङ्गम्, विपाकश्रुताङ्गम्, दृष्टिवादाङ्गम्। ६ **प्रस्तार्य**–भां० मां०। ७–**कः द्रविर्भ**–आ० वि०। ८–**स्य ग्रहद्रव्या**–वा० बा०। ९ "द्रव्येण अर्थो द्रव्यार्थः द्रव्यमर्थोऽस्य इति वा। अथवा द्रव्यार्थिकः—द्रव्यमेव अर्थो यस्य सोऽयं द्रव्यार्थः—स्वार्थिकोऽयम् 'उत्' प्रत्ययः—द्रव्यार्थिकः। एवं पर्यायार्थः पर्यायार्थिको वा"–नयच० आ० लि० पृ० ३ द्वि० पं० ६। १० योगविभागोल्लेखश्च पात०महाभाष्ये खं० २ पृ० ३५८ पं० १६। ११ "मयूरव्यंसकादयश्च"। २, १, ७२ पाणि० व्या० पृ० १७९ अं० ७५४। "मयूरव्यंसकेत्यादयः"। ३, १, ११६ हैम० व्या० पृ० २४ द्वि० पं० १०। १२ **अत्र च च्छ**–आ० हा० वि०। १३ छन्दोभङ्गभयं च 'पज्जायत्थिओ' इति निर्दिष्टे मात्राद्वयाधिक्यात् "गाहाइ सत्तावणिअ" इति वचनात्–प्राकृ० पि० पृ० १०३ पं० ३। "आर्षेव संस्कृतेतरभाषासु 'गाथा' संज्ञा" इति हैम० छन्दो० पृ० २६ द्वि० पं० १८। १४ प्र० पृ० पं० ८।

तेनात्रापि पर्याय एव 'अस्ति' इति मतिरस्येति द्रव्यास्तिकवत् व्युत्पत्तिर्द्रष्टव्या; स च विशेषप्रस्तारस्य-ऋजुसूत्रशब्दादेः-आद्यो वक्ता। ननु च 'मूलव्याकरणी' इत्यस्य द्रव्यास्तिक-पर्यायनयावभिधेयाविति द्वित्वाद् द्विवचनेन भाव्यम्, न; प्रत्येकं वाक्यपरिसमाप्तेः, अत एव चकारद्वयं सूत्रे निर्दिष्टम्। शेषास्तु नैगमादयो विकल्पा भेदाः अनयोर्द्रव्यार्थिक-पर्यायार्थिकयोः। 'सिं' इति प्राकृतशैल्या।

"बहुवयणेण दुवयणं" [ ] इति द्विवचनस्थाने बहुवचनम्।

तथाहि-परस्परविविक्तसामान्य-विशेषविषयत्वाद् द्रव्यार्थिक-पर्यायार्थिकावेव नयौ, न च तृतीयं प्रकारान्तरमस्ति यद्विषयोऽन्यस्ताभ्यां व्यतिरिक्तो नयः स्यात्। तृतीयविषयस्य चासम्भवो भेदाभेदविनिर्मुक्तस्य भावस्वभावस्यापरस्यानुपपत्तेः। ताभ्यामन्य एकस्तद्वानर्थोऽस्तीति चेत्, न; स्वभावान्तराभावात् प्रकृतविकल्पानतिवृत्तेः तत्स्वभावातिक्रमे वा खपुष्पसदृशत्वप्रसक्तेः। ताभ्यां तद्वतोऽर्थान्तरमिस्यं(न्तरस्य) सर्वथा सम्बन्धप्रतिपादनोपायासम्भवात् समवायस्य तैरसम्बन्धे तद्व्यपदेशानुपपत्तेः, समवायान्तरकल्पनायामनवस्थाप्रसक्तेः विशेषणविशेष्यसम्बन्धकल्पनायामप्यपरापरतत्कल्पनाप्रसक्तेर्न सम्बन्धसिद्धिः। ततः स्थितमेतद् न किञ्चिन्नयद्वयबहिर्भावि भावस्वभावान्तरविकल्पनावलम्बि प्ररूपणान्तरमिति। केवलं तयोरेव शुद्ध्यशुद्धिभ्यामनेकधा वस्तुस्वभावनिरूपणविकल्पाभिधानवृत्तयो व्यवतिष्ठन्ते।

तत्र शुद्धो द्रव्यास्तिको नयः संग्रहनयाभिमतविषयप्ररूढकः। तथा च संग्रहनयाभिप्रायः-सर्वमेकं सत्, अविशेषात्। तथाहि-भावाः स्वरूपेण प्रतिभान्ति तच्च स्वरूपमेषां सल्लक्षणमविकल्पकप्रत्यक्षग्राह्यम्, भेदोऽन्यापेक्ष इति न तेषां स्वरूपम्-यद् अन्यानपेक्षया झगित्येव प्रतीयते तत् स्वरूपम्, भेदस्य तु विकल्पविषयत्वादन्यापेक्षत्वेन काल्पनिकत्वम्; काल्पनिकं च अपरमार्थसदुच्यते। तथाहि-एवमेव भेदप्रतीतिः—'इदमस्माद् व्यावृत्तम्' एतच्चाध्यक्षस्यागोचरः, अत एव सर्वावस्थासु यद् अनुगतं रूपं तदेव तात्त्विकम्, यथा सर्पादिविकल्पेषु बोधमात्रं सर्वेष्वनुगच्छत् तथाभूतम्—सर्पाद्याकारास्तु व्यावृत्ताः परस्परतो भिन्नरूपा बाध्यन्ते, न पुनर्बाधकेन बोधमात्रस्य बाधा—तथा घटादिषु विभिन्नेषु मृद्रूपतावृत्तिः (?) यावद्द्रव्यवस्था तावदनुगतायां(याः) मृद्रूपतायाः सत्त्वम्, घटादीनां तु कञ्चित् कालं प्रतीयमानानामप्यर्थक्रियां च साधयतां स्वप्नदृष्टपदार्थवन्न सत्त्वम्। यथा स्वभेदेष्वनुगताया मृद्रूपतायास्तात्त्विकत्वम् एवं मृद्रूपत्वादीनामपि सत्त्वापेक्षया भेदरूपत्वान्न तात्त्विकत्वम्। अत एव तत्त्वविद्भिरुक्तम्—

१-**ति द्रव्या**-भां० मां०। २ पृ० २७१ पं० ७। ३-**ति द्विवच**-आ० हा० वि०। ४-**कं च वा**-वा० बा०। ५ **'दव्वट्ठिओ य पज्जवणओ य'** इति सूत्रे यद् **'य'**द्वयं तदेव संस्कृतशैल्या **'च'**कारद्वयम्- पृ० २७१ पं० ८। ६-**कल्प्या भे**-भां० मां०। ७ "आमा सिं"। प्राकृतप्र० षष्ठप० सू० १२ पृ० ७१ पं० ४।" "वेदंतदेतदो ङसाम्भ्यां सेसिमौ"। ८, ३, ८१ हे० प्रा० व्या० पृ० ९७ पं० १५।

८ "बहुवयणेण दुवयणं छट्ठिविभत्तीए भण्णइ चउत्थी। जह हत्था तह पाया नमोऽत्थु देवाहिदेवाणं" ॥

इति एतत् संपूर्णं पद्यं "उक्तं च" इत्युल्लिख्य निर्दिष्टम्-ललितवि० वृ० पृ० १२ द्वि० पं० १२। "दुव्वयणे बहुवयणं" इत्याद्यपि तथैव निर्दिष्टम्-आव० हारि० वृ० पृ० ११ द्वि० पं० ३। मलयगिरिसूरिस्तु "यदाह पाणिनिः" इति निर्दिश्य "द्विवचनं बहुवचनेन" इति सूत्रमुल्लिखति—धर्मसं० वृ० पृ० १०७ प्र० पं० ११। "द्विवचनस्य बहुवचनम्"। प्राकृतप्र० षष्ठप० सू० ६३ पृ० ८१ पं० १७। ८, ३, १३० हैम० प्रा० व्या० पृ० १०७ पं० ११। प्राकृतरूपा० पृ० ७ पं० १८ सू० ८। २, ३, ३४ षड्भा० च० पृ० २० पं० २३। "द्विवचने बहुवचनम्" प्राकृतम० पृ० ९२ पं० ५ सू० १०६। ९-**क्त भा**-आ०। १० **भावस्याप**-वि०। ११-**र इत्यस्य सर्वे**-वा० बा० विना। १२-**रूपकः** भां० मां०। -**रूढः** आ०। १३ **तत्र स्व**-वा० बा०। **तत्व स्व**-आ० हा० वि०। १४-**पां स्वलक्ष**-वा० बा०। -**षां स्वलक्षणविक**-आ० हा० वि०। १५-**ति ते**-वा० बा० विना। १६-**गतरू**-भां० मां०। १७ **मृद्रूपताप्रवृत्तिः** वा० बा०। **मृद्रूपेतावृत्तिः** हा०। **मृद्रूपे नावृत्तिः** वि०। १८-**तायां सत्त्वं** आ० हा० वि०। -**तायाः सत्त्वं** वा० बा०। १९-**त्वमेव मृ**-वा० बा० हा० वि० विना।

"आदावन्ते च यन्नास्ति वर्तमानेऽपि तत् तथा। वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः" ॥
[गौडपा० का० ६ पृ० ७० वैतथ्याख्यप्र०]

वितथैस्तु सादृश्यमवितथत्वाभिमतानां कालत्रयाव्यापित्वम् तत् प्रत्यक्षेण प्रतीयमानस्य सद्रूपताया ग्रहणात् "सर्वमेकं सल्लक्षणं च ब्रह्म" [ ] इत्याहुः। आगमश्चाऽभेदप्रतिपादकः। तथा च मन्त्रः-"इन्द्रो मायाभिः पर(पुरु)रूप ईयते" [ऋग्वे० मण्ड० ६ सू० ४७ ऋ० १८] इत्यनेनाऽभिन्नस्य मायाकृतो भेदो दर्श्यते। तथा, ब्राह्मणेऽपि भेदनिषेध उक्तः-

"नेह नानास्ति किञ्चन" [बृहदा० उ० अ० ४ ब्रा० ४ मं० १९]

तथा, भेददर्शिनो निन्दार्थवादः श्रूयते—

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"
[बृहदा० उ० अ० ४ ब्रा० ४ मं० १९]

'इव' शब्देनौपचारिकत्वं भेदस्य दर्शितम्। तथा, "एकमेवाऽद्वितीयम्" [छान्दो० उ० अ० ६ खं० २ मं० १] इत्यवधारणाऽद्वितीयशब्दाभ्यामयमेवार्थः स्फुटीकृतः—

"पुरुष एवेदं सर्वं यद् भूतम्" [ऋक्सं० मण्ड० १० सू० ९० ऋ० २]

इत्यादिकश्चानेकस्तदद्वैतप्रतिपादक आम्नायः।

न चागमस्याऽभेदप्रतिपादकस्य प्रत्यक्षबाधा, तस्याऽनुगतरूपग्राहकत्वेनाभ्युपगमात् तथाऽविरोधित्वात्। तदुक्तम्—

"आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः।
नैकत्वे आगमस्तेन प्रत्यक्षेण विरुध्यते" ॥ [ ] इति।

न चैतद् वचनमात्रम् यतो भेदः प्रत्यक्षप्रतीतिविषयत्वेनाभ्युपगम्यमानः किं देशभेदादभ्युपगम्यते, आहोश्चित् कालभेदात्, उत आकारभेदात्? तत्र न तावद् देशभेदाद् भेदो युक्तः, स्वतोऽभिन्नस्यान्यभेदेऽपि भेदानुपपत्तेः-न ह्यन्यभेदोऽन्यत्र सङ्क्रामति। किञ्च, देशस्यापि यद्यपरदेशभेदाद् भेदः तथासति तद्देशस्यापि अपरदेशभेदाद् भेदः इत्यनेनानवस्था। स्वत एव चेद् देशभेदस्तर्हि भावभेदोऽपि स्वत एवास्तु किं देशभेदाद् भेदकल्पनया? अपि च, यावद्वस्तुभौ देशौ भिन्नौ भावयोर्भेदकौ नेतोद्गातः (नैवोद्गातः) तत् कुतस्तद्भेदाद् भेदो ज्ञातुं शक्यः स्वतोऽव्यवस्थित-

---

१ गौडपा० का० ३१ पृ० १८० अलात० प्र०।
"जस्स नत्थि पुरा पच्छा मज्झे तस्स कुओ सिया?"-आचारा० शीतोष्णीयअ० ४, उ० ४।
"आदावन्ते च यन्नास्ति मध्येऽपि हि न तत् तथा"-नयोप० श्लो० १४ यशो० भा० पृ० १०६।

२-**नस्यासद्रूपतया ग्र**-वा० बा०। ३ **सर्वमिदं स**-आ० हा० वि०। ४-**मस्याऽभे**-भां० मां० विना। ५ बृहदा० उ० अ० २ ब्रा० ५ मं० १९। गौडपा० का० ७ टी० पृ० ३५ पं० २०। गौडपा० का० २४ टी० पृ० ३१ पं० २४। संक्षेपशा० अ० २ श्लो० १२५ टी० पृ० ८० पं० २०। "इन्द्रः परमेश्वरः, मायाभिः × × × पुरुरूपः बहुरूपः, ईयते गम्यते× × ×"-बृहदा० उ० भा० अ० २, ब्रा० ५ पृ० ३८४ पं० १०।
"मायाभिः प्रत्यगज्ञानैर्यदि वाऽनृतबुद्धिभिः। गम्यते पुरुरूपोऽज्ञैरेकोऽपि जलसूर्यवत्" ॥
बृहदा० उ० भाष्यवार्ति० अ० २, ब्रा० ५ श्लो० १२७ पृ० ११३१।

६-**था ब्रह्मणेऽपि** आ० हा० वि०।-**था ब्रह्मणोऽपि** भां० मां०।

७ "मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" ॥
बृहदा० उ० अ० ४ ब्रा० ४ मं० १९।
"मनसैवेदमाप्तव्यं नेह नानाऽस्ति किञ्चन। मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति" ॥
कठो० अ० २, वल्ली ४ श्लो० ११।

८ गौडपा० का० १३ टी० पृ० ११८ पं० ७ तथा का० २४ टी० पृ० १३२ पं० ९। ९ " सदेव सोम्येदमग्र आसीद् एकमेवाऽद्वितीयम्" इत्यादि।

१० "पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम्। उताऽमृतत्वस्येशानो यदन्नेनातिरोहति" ॥ श्वेताश्व० उ० अ० ३ मं० १५।

११-**कस्वानेक**-वा० बा०।-**कस्वनेक**-हा० वि०।-**कस्त्वनेक**-वि० सं०। १२-**था वि**-भां० मां० विना। १३ "प्रत्यक्षेण प्रबाध्यते"-प्रमेयक० पृ० १७ द्वि० पं० १२। १४ प्रमेयक० पृ० १७ द्वि० पं० १३। १५-**पर-भेदा**-भां० मां०। १६-**त्यनवस्था** भां० मां०।-**त्यनेन वस्था** वा० बा०। १७-**भिन्नोर्भा**-वा० बा० आ०। १८-**दकौ न तौ भातः** भां० मां०।-**दकौ न तौ भावः** हा० वि०।

योरन्यव्यवस्थापकत्वायोगात्? यश्चाऽनवष्टब्धो देशः प्रतिभाति नासौ भेदकः अतिप्रसङ्गात्। तन्न देशभेदाद् भावभेदः समस्तीति नासौ प्रत्यक्षग्राह्यः।

नापि कालभेदात् प्रत्यक्षतो भिन्नं वस्तु प्रत्येतुं शक्यम् सन्निहितमात्रवृत्तित्वात् तस्य। तथाहि-यदा आद्यं दर्शनं मृत्पिण्डमुपलभते न तदा भाविनं घटम्, तदप्रतीतौ तदपेक्षया न स्वविषयस्य भेदं प्रत्यक्षं प्रत्येतुं समर्थम् प्रतियोगिग्रहणमन्तरेण 'ततो भिन्नमिदम्' इत्यनवगतेः। तत्र हि दर्शने मृदः स्वरूपं प्रतिभातीति तदधिगतिर्युक्ता; तत्राऽप्रतिभासमानं तु भाविघटादिरूपं भविष्यतीति नात्र प्रमाणमस्ति; नापि तस्माद् भेदः। अथ उत्तरकालभावि दर्शनं भिन्नं घटं मृत्पिण्डाद् दर्शयतीत्यभ्युपगमः सोऽप्ययुक्तः, यतः तदपि दर्शनं पुरःस्थितार्थप्रतिभासनान्न पूर्वदृष्टार्थग्रहणक्षमम्, तदग्रहणे च न तस्माद् भेदमादर्शयितुं क्षमं वर्तमानार्थस्य। तस्मान्न तेनापि भेदगतिः।

अथ पूर्वदृष्टार्थस्य स्मृत्या ग्रहणात् वर्तमानस्य च दर्शनेन प्रतिभासनाद् भेदाधिगतिः नहि केवलं दर्शनं भेदाऽऽवेदकं किन्तु स्मृतिसचिवम्, असदेतत्; यतः स्मृतिरपि पूर्वमनुभूतमवैति न च पूर्वं भिन्नमवगतम्, तत् कथं साऽपि प्रतियोगिनं भिन्नमादर्शयितुं क्षमा? तन्न तयाऽपि भेदाधिगतिः। किञ्च, स्वरूपनिमग्नत्वान्न भावभेदमवगन्तुं सा समर्था। तथाहि-स्मर्यमाणेन वा रूपेण स्मृतिस्तमर्थमवतरेत्, दृश्यमानेन वा? न तावद् दृश्यमानेन रूपेणार्थमवतरति स्मृतिः तस्य तत्राप्रतिभासनात्। नापि स्मर्यमाणेन रूपेण तमर्थमवतरति, स्मर्यमाणस्य रूपस्य तत्राभावात्—परिस्फुटं दर्शनारूढं हि रूपं तस्य पूर्वमधिगतम् न च तत् स्मृतौ प्रतिभाति। तन्नार्थस्वरूपग्राहिणी स्मृतिः सम्भवतीति न ततो भेदग्रहः।

अथोत्तरदर्शने स्मृतौ वा यदि पूर्वरूपं नाभाति तदा तदप्रतिभासनमेव भेदवेदनम्। तथा चाह—

"विशिष्टरूपानुभवान्नान्यतोऽपि निराकिया" [ ] इति,

एतदप्यसङ्गतम्; यतः पूर्वरूपविविक्तता प्रत्यक्षप्रतिपत्तेः स्मृतेर्वा कुतोऽवगता? तादृक् स्मृतिश्च द्वयमपि स्वार्थनिमग्नं न पूर्वरूपमधिगन्तुमीशम्, तदनवगमे च न तद्विविक्ताधिगतिः तदप्रतिभासनमपि तदप्रतीतेरेवासिद्धम्। तस्मात् 'पूर्वरूपमासीत्' इति न काचित् प्रतिपत्तिः प्रतिपत्तुं क्षमा।

अथ भावरूपमेव भेदः तत्प्रतिभासे सोऽपि प्रतिपन्न एव, तदप्यसत्; यतो न भावरूपमेव भेदः, प्रतियोगिनमपेक्ष्य 'ततो भिन्नमेतत्' इति भेदव्यवस्थापनात्। यदि च स्वरूपमेव भेदस्तदाऽर्थस्यात्मापेक्षयापि भेदः स्यात्। परापेक्षया स्वरूपभेदः नात्मापेक्षयेति चेत्, न; पररूपाप्रतिपत्तौ तदपेक्षया स्वरूपभेदो न प्रतिपत्तुं शक्य इति न पूर्वापरकालभेदः पदार्थसम्भवी।

अर्थे आकारभेदाद् भेदः समानकालयोर्नील-पीतयोरवभासमानवपुरस्ति, यत्रापि देश-कालभेदस्तत्रापि तद्रूपेण स्वरूपे भेद एवोपलक्ष्यते न पुनः स्वरूपभेदादपरो भेदः सम्भवति अन्यस्यान्यभेदेन भेदायोगात् तस्मात् स्वभावभेद एवास्ति प्रतिभासनात्, इत्यप्ययुक्तम्; यतः स्वरूपभेदो द्वयोरुद्द्योतमानवपुषोः किं स्वत एव प्रतिभाति, उत व्यतिरिक्तप्रतिभासावसेयः? तत्र न तावद् बोधात्मा पुरस्थयोर्नील-पीतयोर्भेदमवगमयितुं प्रभुः तस्यापरोक्षनीलाद्याकारव्यतिरिक्तवपुषः सुखादिव्यतिरिक्ततनोश्चाप्रतिभासमानत्वेनासत्त्वात्। तथाहि-बहिर्नीलादिः सुखादिश्चान्तः परिस्फुटं द्वयमाभाति न तद्व्यतिरिक्तो बोधात्मा स्वप्नेऽप्युपलभ्यत इति कथमसावस्ति? अथ 'अहम्'-प्रत्ययेन बोधात्माऽवसीयते, न; तत्र शुद्धस्य बोधस्याऽप्रतिभासनात्। स खलु 'अहं सुखी दुःखी स्थूलः कृशो वा' इति सुखादि शरीरं वाऽऽलम्बमानः प्रसूयते न तद्व्यतिरिक्तं बोधस्वरूपम्, तत्र तद्विषयोऽप्यसौ स्वरूपेण वाऽप्रतिभासमानवपुर्बोधः कथं भावान् व्यवस्थापयितुं प्रभुः? नहि शशविषाणं कस्यचिद् व्यवस्थापकं युक्तम्। भवतु वा व्यतिरिक्तो बोधः प्रकाशमानवपुस्तथाऽप्यसौ

१ प्रमेयक० पृ० १७ द्वि० पं० १४। २ **भेदे अ**-वा० बा० भां० मां०। ३-**नस्य द**-भां० मां० विना। ४-**दाभेद**-आ० हा०।-**दावेकं** भां० मां०। ५-**भावे भे**-वा० बा०। ६-**पा भावा**-आ० हा० वि०। -**पानुभवा ना**-वा० बा०। ७-**तोऽन्यनि**-वा० बा०। ८-**ता या दृक्** वा० बा०। अत्र **'सा दृक्'** इति स्यात्। ९-**दनधिग**-भां० मां० वा० बा०। १०-**दनुप्र**-वा० बा०। ११-**रूपे भे**-हा० वि०। १२-**दार्थस्य स**-भां० मां०। १३ प्रमेयक० पृ० १८ प्र० पं० १। १४ **बोधात्मपु**-आ० ह० वि०। १५-**शरीरं चा**-वि०। "शरीरं चावलम्बमानोऽनुभूयते न पुनस्तदव्यतिरिक्तं बोधस्वरूपम्"-प्रमेयक० पृ० १८ प्र० पं० ३। १६ **तन्न त**-हा० वि० विना। १७-**रूपेणे वा**-वा० बा०।-**रूपेण चा**-वि०। १८-**क्तं भवति। भवतु** भां० मां०।

स्वरूपनिमग्नत्वान्न नीलादेर्भिन्नस्य ग्राहको युक्तः; नहि बोधकाले नीलादिकमाभातीति तस्य बोधो ग्राहको भवेत् नीलादेरपि बोधं प्रति ग्राहकतापत्तेः।

अथ बोधात्मा पुरःस्थेषु नीलादिषु प्रत्यक्षतां प्रति व्याप्रियमाण उपलभ्यत इति ग्राहकः नीलादिस्तु तद्विषयत्वाद् ग्राह्यः, तदप्यसत्; व्यापारस्य तद्व्यतिरिक्तस्यानुपलम्भेनासत्त्वात्—नहि प्रकाशमाननील-सुखादिरूपबोधाभ्यामन्यो व्यापार उपलभ्यते; उपलम्भे वा तस्य तत्राप्यपरो व्यापारो बोधस्याभ्युपगन्तव्यः पुनस्तत्राप्यपरो व्यापार इत्यनवस्था। अथ स्वत एवासौ व्यापार उपलभ्यते; नन्वेवं तस्य स्वातन्त्र्येणोपलम्भाद् व्यापारताऽनुपपत्तिः, न हि बोधावभाससमये स्वतन्त्रतनुरुद्भासमानः पदार्थबोधव्यापार इति युक्तम्, बोधस्यापि तद्व्यापारताप्रसङ्गात्। बोधपरतन्त्रत्वाद् व्यापारस्तद्यावृत्तिरिति चेत्, न; समानकालावभासिनस्तस्य पारतन्त्र्यायोगात्। न हि स्वरूपेण बोधकाले प्रतीयमानतनु तत् परतन्त्रं भवितुं युक्तम्, बोधस्यापि व्यापारपरतन्त्रतापत्तेः। अनिष्पन्नरूपस्तु व्यापारः सुतरां न परतन्त्रः, नहि खरविषाणं तथाव्यवहारभाग् लोके प्रसिद्धम्। तस्मादुभयथाप्यसत् पारतन्त्र्यम्। तन्न कस्यचिद् व्यापारः। किञ्च, असावपि व्यापारः किमर्थं व्याप्रियते न वा इति कल्पनाद्वयम्। यदि न व्याप्रियते कथं तस्मिन् सत्यप्यर्थस्य ग्राह्यता बोधस्य च ग्राहकता? अथ व्याप्रियते तदा तत्राप्यपरो व्यापारोऽभ्युपगन्तव्यः तत्राप्यपर इति सैवानवस्था। अथ व्यापारस्य स्वरूपमेव व्यापारः; ननु नीलादेरपि व्यापृतिकाले स्वरूपमस्तीति तत् तस्य व्यापारः स्यात्। तस्माद् बोध-नील-व्यापारलक्षणस्य त्रितयस्यैककालमुपलम्भान्न कर्तृ-कर्म-क्रियाव्यवहृतिः सम्भवतीति न ग्राह्य-ग्राहकभावः समस्ति तत्त्वतः। भिन्नकालयोस्तु ज्ञान-ज्ञेययोः परस्परसन्निधिनिरपेक्षोपलम्भप्रवर्तनान्न वेद्य-वेदकतासम्भवः। तन्न बोधात्मा तुल्यकालयोर्नील-पीतयोर्भेदस्य साधकः तस्य स्वरूपनिष्ठत्वात्। किञ्च, सोऽपि नीलादेर्भिन्नः प्रत्येतव्यः तदप्रतीतौ तेन नील-पीतादेर्भेदवेदनायोगात्। नहि भिन्नेनात्मनाऽप्रतीयमानो बोधोऽर्थान् भिन्नान् प्रतिपादयितुं समर्थः, शशविषाणादेरपि व्यवस्थापकत्वप्रसङ्गात्। भिन्नस्तु बोधात्मा प्रत्ययान्तरेण किं प्रतीयते, उत स्वात्मनैव? यदि 'प्रत्ययान्तरेण' इति पक्षः, सोऽनुपपन्नः; यतस्तदपि प्रत्ययान्तरमन्येन प्रत्ययान्तरेण भिन्नं प्रत्येतव्यम् तदप्यन्येनेत्यनवस्थाप्रसक्तिः स्यात्। अथात्मनैव, तदा स्वरूपनिमग्नत्वान्न नीलावभासं भिनत्ति तत् कुतो भेदसंवित्?

अथ स्वत एव नीलादेर्भेदवेदनम्, तदपि न युक्तम्; यतो यदि स्वत एव नीलादयः प्रकाशन्ते तदा स्वप्रकाशास्ते प्रसज्जन्ति; स्वप्रकाशत्वे च नीलादेर्नीलस्वरूपं स्वात्मनि निमग्नं न पीतरूपसंस्पर्शि पीतस्वरूपं च स्वस्वरूपावभासं न नीलरूपसंस्पर्शि, तत् कुतः परस्परासंवेदनात् स्वरूपतोऽपि भेदसंवित्तिः? भेदो हि द्विष्ठो द्वयसंवेदने सति विदितो भवेत्, नीलस्वरूपे वा परोक्षे नीलं न पीतमाभाति तथात्वे सत्येकतापत्तेः। अथ अप्रतिभासनमेव भेदवेदनम्; ननु नीलस्वरूपप्रतिभासे नीलं विदितम् पीतादिकं त्वनवभासमानं तत्र नास्तीति न शक्यं वक्तुम्, नास्तित्वावेदने च कुतो भेदसिद्धिः स्वरूपमात्रस्य प्रतिभासनात्?

किञ्च, नीलादेरपि स्थूलावभासिनोऽनेकदिक्सम्बन्धात् परमाणुरूपतया व्यवस्थापनात् स्वरूपभेदः स्यात् पुनर्नीलादिपरमाणूनामपि भिन्नदिक्सम्बन्धात् स्वरूपभेदो भवेत् तथा चानवस्थानान्न भेदस्थितिः। भेदो हि कस्मिंश्चिदेकरूपे सिद्धे तद्विपर्ययात् स्वरूपस्थितिमासादयेत्, न चानन्तरेण न्यायेन किञ्चिदप्येकं सिद्धम् परमाणोरप्यभेदासिद्धेर्भवदभ्युपगमेन। न च नीलस्वरूपं सुखाद्यात्मतया नानुभूयत इति भेदवद् अभेदस्यापि प्रत्यक्षतोऽप्रसिद्धिः, यतो नीलादिप्रतिभासस्य भेदाऽवेदनमेवाऽभेदवेदनम्। अथ नीलादीनामात्मस्वरूपावेदनमेव भेदवेदनमिति परेणापि वक्तुं शक्यत एव,

१-**त्वान्नीला**-आ० हा० वि०। २-**हकापत्तेः** आ० हा० वि०। ३-**दार्थः बो**-भां० मां०। ४-**पारास्त**-आ० हा० वि०।-**'पारस्य तद्या'**-वि० सं०। ५ **अनुत्पन्न**-भां० मां० वा० बा०। ६ प्र० पृ० पं० ६। ७-**रस्व**-आ० हा० वि० वा० बा०। ८-**नात्माऽप्र**-वा० बा०।-**नात्मा प्र**-आ० हा० वि०। ९-**प्यपरेणेत्यन**-आ० हा० वि०। १०-**सज्जन्ति** वा० बा०। ११-**स्पर्शि तत् कुतः** आ० हा० वि०। १२-**स्परसं**-वा० बा०। १३ **नीलं पी**-वा० बा०। १४-**स्तितावे**-आ० वि०। १५-**दसिद्धिः स्वरूपसिद्धिः स्वरूपमात्र**-आ० हा० वि०। १६-**स्था नात्र भे**-भां० मां०। १७-**रूपे स्थि**-आ० वि०। १८-**प्यभेदसि**-भां० मां० विना। १९-**भेदावे**-वा० बा०।

ततश्च कः स्व-परपक्षयोर्विशेषः? तथाहि—न देश-काल-सन्तानाकारैरेकत्वं जगतः प्रतीयते परस्परोपलम्भपरिहारेण देशादीनां प्रतिभासनात्, असदेतत्; अन्योन्यपरिहारेणोपलब्धेरद्वैतवादिनोऽप्रसिद्धत्वात्। न च परस्परानुप्रवेशोपलब्धिरपि भेदवादिनोऽसिद्धेति वक्तुं शक्यम्, सन्मात्रोपलब्धेः सर्वत्र सद्भावेन परस्परानुप्रवेशोपलब्धेरनुप्रसिद्धेः। तथाहि-अस्ति तावदयं प्रतिभासः अत एवाद्वैतमस्तु, न ह्यत्र भेदप्रतिभासः, नापि भेदाभेदप्रतिभासः, अपि त्वभेदप्रतिभास एव बहिर्नीलादेर्भिन्नस्य भिन्नाभिन्नस्य चाऽयोगात्। अथ अभिन्नस्यापि बहिर्नीलादेरयोगः तर्ह्यस्तु ज्योतिर्मात्रं प्रकृतिपरिशुद्धं परमार्थसत् तत्त्वम्। न च नीलादेर्बहीरूपतया प्रतिभासमानस्यापि असत्त्वे ज्योतिर्मात्रस्यापि परमार्थसंतत्त्वरूपस्यासत्त्वमस्तु इति वक्तुं शक्यम्, नीलादेरविद्यावेद्यत्वेनाऽतत्त्वरूपव्यवस्थितेः ज्योतिर्मात्रस्य तु विद्यावेद्यत्वेन तद्विपर्ययरूपत्वेनावस्थानात्। तन्न प्रत्यक्षतः कथमपि भेदवेदनम्, स्मरणाद् वा उक्तन्यायेन।

अथ सामग्री सा तादृशी दर्शन-स्मरणरूपा यतः प्रत्येकावस्थाऽसम्भवि भेदवेदनाख्यं कार्यमुदयमासादयति, असदेतत्; यतः सामग्र्यपि कार्यजनने समर्था नात्मस्वरूपप्रादुर्भावे भेदवेदनलक्षणे। न च स्मरण-प्रत्यक्षव्यतिरिक्तमपरं भेदग्रहणम् येन सामग्री तद् जनयेत्। अथ भेदनिश्चयजनने द्वयं व्याप्रियते, तदयुक्तम्; ग्रहणमन्तरेण निश्चयस्यायोगात्। ग्रहणं (?) च न भेदव्यापारवत् स्मरणसहायं ग्रहणम् कथं ग्रहण एव व्यापारवद् युक्तम् न च निश्चयस्यापि स्मरणादन्यस्तन्निश्चयः ततो निश्चयात् स्मरणभेदानिश्चय इति न न्यायसङ्गतमेतत्। तस्मान्न पूर्वाऽपरयोर्भेदग्रहणं दर्शन-स्मरणसामग्रीविशेषादपि।

न च समानकालप्रतिभासयोर्नील-पीतयोरितरेतराभावग्रहणे भेदग्रहणं सम्भवति अभावप्रमाणस्येतरेतराश्रयत्वेनानवतारात्। तथाहि—

"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया॥"
[श्लो० वा० सू० ५ श्लो० २७ अभावप०] इति तस्य लक्षणम्।

न च ग्रहणमन्तरेण प्रतियोगिस्मरणम्, न च प्रतियोगिस्मरणमन्तरेण भेदसाधकाभावप्रमाणावतार इति कथं नेतरेतराश्रयदोषः? भेदग्राहकप्रत्यक्षाभावेऽनुमानस्यापि न भेदग्राहकत्वेन प्रवृत्तिः तस्य प्रत्यक्षपूर्वकत्वात्, अनुमानपूर्वकत्वे इतरेतराश्रयदोषप्रसक्तेः। तन्न कुतश्चित् प्रमाणाद् भेदसिद्धिः। न च(चा)प्रामाणिका वस्तुव्यवस्था अतिप्रसङ्गात्।

न चात्रेदं प्रेरणीयम्–सल्लक्षणमेकं ब्रह्म विद्यास्वभावं चेत् न किञ्चिन्निवर्त्तयम् अवाप्तव्यं वा भवेत् ततश्च तदर्थानि शास्त्राणि प्रवृत्तयश्च तत्प्रयोजना व्यर्थाः स्फुरद्विद्यायाः (?) प्रभावात् द्वितीयस्या अविद्यास्वभावत्वे वा न सत्त्वम् नापि ब्रह्मरूपता, यतो नाऽविद्यास्वभावं ब्रह्म, नापि विद्यास्वभावत्वे शास्त्राणां प्रवृत्तीनां च वैयर्थ्यम्, अविद्याया व्यापारनिवर्त्यत्वात्। न त्व(न्व)विद्या नैव ब्रह्मणोऽन्या तत्त्वतोऽस्ति अतः कथमसौ यत्ननिवर्त्तनीयस्वरूपा? अत एव तस्यास्तत्त्वतः सद्भावे कः स्वरूपं निवर्त्तयितुं शक्नुयात्? न चास्माकमेव पुरुषप्रयत्नोऽविद्यानिवर्तको मुमुक्षूणाम् किन्तु सर्वत्र प्रवादेष्वतात्त्विकाऽनाद्यविद्योच्छेदार्थो मुमुक्षुयत्नः।

१-**हारोप**-वि०। २-**क्यं तन्मा**-वा० बा० विना। ३-**लब्धिसि**-भां० मां०। ४-**सत्व**-आ० वि०। ५-**द्यत्वेन तद्विप**-आ० हा० वि०। ६-**तः सा साम**-आ० हा० वि०। ७-**मर्थनात्मस्व**-आ०। **मर्थनात्मस्व**-हा० वि०। ८-**रस्मर**-वा० बा०। ९-**त् गृही**-भां० मां०। १०-**गिनः स्म**-भां० मां०। ११-**कत्वेन इत**-वा० बा० विना। १२-**दसिद्धिः तदा प्रा**-भां० मां०। १३ "अथ एकरूपब्रह्मणो विद्यास्वभावत्वे तदर्थानां शास्त्राणां प्रवृत्तीनां च वैयर्थ्यम् निवर्त्य-प्राप्तव्यस्वभावाभावात्, अविद्यास्वभावत्वे च असत्यत्वप्रसङ्गः"–प्रमेयक० पृ० १८ प्र० पं० ४। १४ **स्फुरविद्याया अभावा**-भां० मां०। **स्फुरतिविद्यायाः प्रभावा**-आ० वि०। **स्फुरतिविद्याया प्रभावा**-हा०। अत्र-'र्थाः स्युः अविद्याया अभावात्। द्वितीयेऽस्याऽविद्यास्वभावत्वे वा (च) न सत्त्वम्' इत्ययं पाठः प्रेक्षावद्भिः कल्पयित्वा विचार्यः। १५-**यतो नो वि**-भां० मां०। १६ प्रमेयक० पृ० १८ प्र० पं० ५-७। १७-**त् न च वि**-आ०।-**त् तत्ववि**-भां० मां०। १८-**स्यासत्व**-वा० बा०। १९ **रूपं विनि**-भां० मां०। २० **सर्वप्र**-भां० मां० वा० बा०। २१-**त्विकोऽना**-वा० बा० विना।

अथापि स्यात् न ब्रूमोऽनादेर्नोच्छेदः किन्तु नित्यस्य ब्रह्मणः किमविद्या स्वभावः, आहोस्विद् अन्यथा? न तावत् स्वभावः ब्रह्मणस्तद्विपरीतविद्यास्वभावत्वात्, अर्थान्तरत्वे तस्यास्तत्त्वतः सद्भावे नोच्छेदः द्वैतप्रसङ्गश्च। अथ मतम्-अग्रहणमविद्या; सा कथमर्थान्तरम्? न चाऽनिवर्त्या सर्वप्रमाणव्यापाराणामग्रहणनिवृत्त्यर्थत्वात्, तदयुक्तम्; तत्त्वाऽग्रहणस्वभावा अविद्या तत्त्वग्रहणस्वभावया विद्यया निवर्त्यते; सा तु नित्या ब्रह्मणि, न च ब्रह्मणोऽन्योऽस्ति यस्य तत्त्वाऽग्रहणं ब्रह्मणि प्रयत्नलभ्यया विद्यया निवर्त्यते; ब्रह्मणि तु युगपद् ग्रहणाऽग्रहणे विप्रतिषिद्धे अविरोधे वा न विद्यया तत्त्वाऽग्रहणव्यावृत्तिः। यस्य त्वन्यथाग्रहोऽविद्या तस्य ब्रह्मणः तदतत्स्वभावत्वे उक्तं दूषणम्—तत्स्वभावत्वे तद्रूपनिवृत्तिः, अर्थान्तरत्वे द्वैतापत्तिः। नित्यप्रबुद्धत्वे च ब्रह्मणः कस्यान्यथात्वग्रह इति वाच्यम् तद्व्यतिरिक्तस्यान्यस्याऽसत्त्वात्, तस्य च विद्यास्वभावत्वान्न तद्विपरीताऽविद्यास्वभावता विरुद्धधर्मसमावेशायोगात्, अविरोधे विद्यया नाविद्याव्यावृत्तिः।

अत्राहुः-नाविद्या ब्रह्मणोऽनन्या, नापि तत्त्वान्तरम्, न चैकान्तेनाऽसती एवमेव इयमविद्या माया मिथ्याभास इत्युच्यते। वस्तुत्वे तत्त्वाऽन्यत्वविकल्पावसरः, अत्यन्तासत्त्वेऽपि खपुष्पवद् व्यवहारानङ्गम्; अतोऽनिर्वचनीया सर्वप्रवादिभिश्चैवमेवाभ्युपगन्तव्या। तथाहि-शून्यवादिनो यथादर्शनं सत्त्वे नाऽविद्या, खपुष्पतुल्यत्वे न व्यवहारसाधनम्, सदसत्पक्षस्तु विरोधाद्यात इत्यनिर्वचनीयाऽविद्या। ज्ञानमात्रवादिनो यथाप्रतिभासज्ञानसद्भावे न बाह्यार्थापह्नवः घटादेरर्थाकारस्य ग्राहकाकाराद् विच्छेदेनावभासमानस्यापह्नवायोगात्, अत्यन्तासत्त्वे बहिरवभासाभावात् खपुष्पादेरिव, उभयपक्षस्य चासत्त्वम् विरोधात्। बाह्यार्थवादिनामपि रजतादिभ्रान्तयोऽवभासमानरूपसद्भावान्नाऽविद्यात्वमश्नुवीरन्, अत्यन्तासत्त्वे न तन्निबन्धनः कश्चिद् व्यवहारः स्यात्, सदसत्पक्षस्तु कुतोत्तरः। तत्रैतत् स्यात्-अवभासमानं रूपं तत्र मा भूत् ग्राहकाकारस्तु सत्त्वेन नासाविद्या, असदेतत्; ग्राह्याकारासत्त्वे च तदवभासोऽपि ग्राहकाकारः सत्यतया न निरूपयितुं शक्यः, न च प्रतिभासस्य शून्यः प्रतिभासो नाम कश्चित्। तस्मान्नाऽविद्या सती, नाप्यसती, नाप्युभयरूपा। अत एव निवृत्तिरस्या अदृढस्वभावत्वेन मायामात्रत्वात् अन्यथा दृढस्वरूपत्वेऽवस्थितायाः कथमन्यथा-स्व(त्वं) स्वभावापरित्यागात् शून्यत्वेऽपि स्वयं निवृत्तत्वात्। एवं च नाद्वैतहानम्, नापि निवर्त्तनीयाभावः।

यच्च कस्यासाविद्येति चोद्यम् तत्र जीवानामिति ब्रूमः; ननु तेषामपि न ब्रह्मणोऽर्थान्तरता, सत्यम्; न परमार्थतः काल्पनिकस्तु भेदस्तेषां ततो न प्रतिषिध्यते, ननु कल्पनापि कस्य भेदिका? न तावद् ब्रह्मणः तस्य विद्यास्वभावत्वेन सकलविकल्प्या(ल्पा)तीतत्वात्, नापि जीवानाम् कल्पनायाः प्राक् तेषामसत्त्वात् इतरेतराश्रयप्रसङ्गाच्च-'कल्पनातो जीवविभागः तद्विभागे सति कल्पना' इति।

अत्र ब्रह्मवादिनोऽभिदधति—"वस्तुत्वे सत्येष दोषः स्यात् नासिद्धं वस्तु वस्त्वन्तरसिद्धये सामर्थ्यमासादयतीति, मायामात्रे तु नेतरेतराश्रयदोषप्रसङ्गः। नहि मायायाः कथञ्चिदनुपपत्तिः-

---

१-**त् न च यु**-भां० मां०। २-**वर्तते** वा० बा०। ३-**वर्त्यते** वा० बा०। ४-**प्रतिषेधे अ**-वा० बा० वि०। ५ **तदसतत्**-भां० मां० वा० बा० विना। ६-**बुद्धस्य च** वा० बा०। ७-**स्या स**-आ० हा० वि०। ८ **अविरोधे विद्याव्या**-वा० बा०। **अविरोधे विद्यया विद्या विद्याव्या**-हा०। **अविरोधे विद्यया विद्यव्या**-आ०। ९ प्रमेयक० पृ० १८ प्र० पं० ९। १० **तथान्य**-वा० बा०। ११-**वमत्राभ्यु**-भां०।-**वमेत्वाभ्यु**-वा० बा०। १२ प्र० पृ० पं० १४-१७। १३-**व भासा**-आ० हा० वि०। १४-**कारस**-वि०। १५-**कारस**-वि०।

१६ "नासद्रूपा न सद्रूपा माया नैवोभयात्मिका। सदसद्भ्यामनिर्वाच्या मिथ्याभूता सनातनी"॥
'सौरादि'वाक्यत्वेन निर्दिष्टोऽयं श्लोकः-साङ्ख्यप्र० भा० अ० १ सू० २६ पृ० २५ पं० ३।

१७-**स्या द्द**-वि० हा०।-**स्याऽदृष्ट**-वा० बा०। १८ **दृष्टस्व**-वा० बा०। १९-**रूपेऽव**-वा० बा०। २०-**थार्थस्वभा**-भां० मां०।-**था स्वभा**-हा०।-**था स्वं स्वभावात् प**-आ०। २१-**षां भावा न** भां० मां०। २२ **सकल्पाती**-आ० हा०। **सङ्कल्पाती**-वि०। २३-**त् न त्व सिद्धं**- आ०।-**त् निसिद्धं** वा० बा०।-**त् न सिद्धं** हा०।

अनुपपद्यमानार्थैव हि माया लोके प्रसिद्धा उपपद्यमानार्थत्वे तु यथार्थभावान्न माया" [ ] इति केचित्।

अन्ये तु वर्णयन्ति—"अनादित्वात् मायायाः जीवविभागस्य च बीजाङ्कुरसन्तानयोरिव नेतरेतराश्रयदोषप्रसक्तिरत्र। तथा चाहुः—"अनादिरप्रयोजनाऽविद्या, अनादित्वादितरेतराश्रयदोषपरिहारः, निष्प्रयोजनत्वे न भेदप्रपञ्चसंसर्गप्रयोजनपर्यनुयोगावकाशः" [ ] अतोऽपरैर्यत् प्रेर्यते—"दुःखरूपत्वान्नानुकम्पया प्रवृत्तिः अवाप्तकामत्वान्न क्रीडार्था" [ ] इत्येतदपि परिहृतमविद्यात्वेन, यतो नासौ प्रयोजनमपेक्ष्य प्रवर्त्तते, नहि गन्धर्वनगरादिविभ्रमाः समुद्दिष्टप्रयोजनानां प्रादुर्भवन्ति" [ ]।

न च भवतु कल्पनातो जीवविभागः किन्तु तेऽपि तत्त्वतो ब्रह्मतत्त्वादव्यतिरिक्तत्वाद् विशुद्धस्वभावा इति तेष्वपि नाऽविद्यावकाशं लभत इति वक्तव्यम्, यतो विशुद्धस्वभावादपि बिम्बात् कल्पनाप्रदर्शितं कृपाणादिषु यत् प्रतिबिम्बं तत्र श्यामतादिरशुद्धिरवकाशं लभत एव। अथ विभ्रमः स इति न दोषः, असदेतत्; जीवात्मस्वप्यस्य तुल्यत्वात्–तेष्वप्यशुद्धिर्विभ्रम एव अन्यथा तेष्वपि विशुद्धिर्दुरापैव स्यात्। अथ मुखात् कृपाणादीनामर्थान्तरत्वे भ्रान्तिहेतुता युक्तैव अत्र पुनर्ब्रह्मव्यतिरिक्तस्य निमित्तस्याभावात् कथं विभ्रमो युक्त इति, एतदप्यनालोचिताभिधानम्; अनादित्वेन परिहृतत्वात्। अनादित्वेऽपि चोच्छेदः शक्यत एव विधातुम् यथा भूमेरूषरस्य। अथ तत्र भूव्यतिरिक्तेन संस्कारान्तरेण स्वाभाविकस्यापि तस्य निवृत्तिः, न त्वेकात्मवादिनां तद्व्यतिरिक्तः आगन्तुको विलक्षणप्रत्ययोपनिपातः सम्भवति द्वैतापत्तेः। नन्वात्मन एव विद्यास्वभावत्वात् कथमनाद्यविद्याविलक्षणप्रत्ययोपनिपातो नास्तीति उच्यते, उक्तमत्र तेन तथाभूतेनात्मस्वभावेनाविद्याया विरोधाभावात् विरोधे वा नित्यमुक्तं जगद् भवेत्। नहि निवर्त्तकविरोधिसमवधाने विरोधिनः कदाचिदपि सम्भवः विरोधाभावप्रसङ्गात्। न चात्मव्यतिरिक्तं विद्यान्तरमागन्तुकमविद्यानिवृत्तिसाधनम् एकात्मवादिनस्तस्यायोगात्। तदुक्तम्—

"स्वाभाविकीमविद्यां तु नोच्छेत्तुं कश्चिदर्हति।
विलक्षणोपपाते हि नश्येत् स्वाभाविकं क्वचित्" ॥ [ ]
"न त्वेकात्मन्युपेयानां हेतुरस्ति विलक्षणः"। [ ]

परिहृतमेतत्—"जीवानामविद्यासम्बन्धः न परात्मनः असौ सदा प्रबुद्धो नित्यप्रकाशो नागन्तुकार्थः अन्यथा मुक्त्यवस्थायामपि नाविद्यानिवृत्तिः। यतोऽस्मिन् दर्शने ब्रह्मैव संसरति मुच्यते च अत्रैकमुक्तौ सर्वमुक्तिप्रसङ्गः अभेदात् परमात्मनः, यतस्तस्य भेददर्शनेन संसारः अभेददर्शनेन च मुक्तिः, अत एकस्यैव परमात्मनः परमस्वास्थ्यमापतितम्। तस्मान्न ब्रह्मणः संसारः। जीवात्मान एवाऽनाद्यविद्यायोगिनः संसारिणः कथञ्चिद् विद्योदये विमुच्यन्ते तेषां स्वाभाविकाऽविद्याकलुषीकृतानां विलक्षणप्रत्ययविद्योदये नाऽविद्यानिवृत्तेरनुपपत्तिः यतो न तेषु स्वाभाविकी विद्या अविद्यावत् अतस्तया निवृत्तिः स्वाभाविक्या अप्यविद्यायाः" [ ] इत्येवं केचित्।

अन्ये तु "ब्रह्म–जीवात्मनामभेदेऽपि बिम्ब–प्रतिबिम्बवत् विद्याऽविद्याव्यवस्थां वर्णयन्ति। कथं पुनः संसारिषु विद्याया आगन्तुक्याः सम्भवः श्रवण–मनन–ध्यानाऽभ्यास–तत्साधनयम–नियम–ब्रह्मचर्यादिसाधनत्वात्, तस्य पूर्वमसत्त्वादविद्यावत्। स च श्रवण–मननपूर्वकध्यानाभ्या-

---

१–**नार्थे तु** भां० मां०। २–**स्य वा बी**–वि०। ३–**नादिप्रयोजनाऽविद्या** आ० हा० वि०। –**नादिप्रयोजना च विद्या** भां० मां०। ४–**श्चसंसप्र**–आ० हा० वि०। –**श्चवर्त्रप्र**–वा० बा०। ५–**मविद्यत्वे**–वा० बा० आ०। ६ "नहि द्विचन्द्रालातचक्रगन्धर्वनगरादिविभ्रमाः समुद्दिष्टप्रयोजना भवन्ति"–ब्रह्मसू० अ० २ पा० १ सू० ३३ शाङ्क० भा० भाम० पृ० ४८२ पं० ७। ७–**भाव इति** वा० बा०। –**भावादिति** भां० मां०। ८ **नापि वि**–आ० हा० वि०। ९–**त्मस्वरूप्य**–वा० बा० मां०। १०–**शुद्धिवि**–वा० बा०। –**शुद्धेर्वि**–हा०। –**शुद्धे वि**–आ० वि०। ११–**त् प्रमाणा**–वा० बा०। १२–**स्य विपर्ययनि**–भां० मां०। १३ **भूमेपुरुषस्याथ**–भां० मां०। १४ **तत्र भूतव्य**–वा० बा०। **तत्र व्य**–आ० हा० वि०। १५ **न चैका**–भां० मां०। १६ **न स्वात्म**–वा० बा०। १७–**द्यालक्षण**–वा० बा०। १८ **न नि**–भां० मां० विना। १९–**क वि**–आ० हा० वि०। २०–**त् उक्तं च** वा० बा०। २१ **परमात्म**–भां० मां०। २२–**दये न वि**–आ० हा० वि०। २३–**द्या वि**–आ० हा० वि०।

सोऽखिलभेदप्रतियोगी सुव्यक्तमेव वेदे दर्शितः–"स एष नेति नेति" [बृहदा० उ० अ० ३, ब्रा० ९, मं० २६] इत्यादिना सप्रतियोगित्वाद् भेदप्रपञ्चं निवर्त्तयताऽऽत्मनापि प्रलीयते, यतः श्रोतव्यादीनामभावे न श्रवणादीनामुपपत्तिः, स तु तथाभूतोऽभ्यस्यमानः स्वविषयं प्रविलापयन्नात्मोपघाताय कल्पते तदभ्यासस्य परिशुद्धात्मप्रकाशफलत्वात् यथा रजःसम्पर्ककलुषे उदके द्रव्यविशेषचूर्णरजः प्रक्षिप्तं रजोऽन्तराणि संहरत् स्वयमपि संह्रियमाणं स्वैस्थां स्वरूपावस्थामुपनयति एवं श्रवणादिभिर्भेदतिरस्कारविशेषात् स्वगतेऽपि भेदे समुच्छिन्ने स्वरूपे संसार्यवतिष्ठते यतोऽविद्ययैव परमात्मनः संसार्यात्मा भिद्यते तन्निवृत्तौ कथं न परमात्मस्वरूपता यथा घटादिभेदे व्योम्नः परमाकाशतैव भवत्यवच्छेदकव्यावृत्तौ? तत्रैतत् स्यात्—श्रवणादिर्भेदविषयत्वादविद्यास्वभावः कथं वा अविद्यैव अविद्यां निवर्त्तयति? उक्तमत्र यथा रजसा रजसः प्रशमः एवं भेदातीतब्रह्मश्रवण मनन-ध्यानाऽभ्यासानां भेददर्शनविरोधित्वाद्विद्याया अप्यविद्यानिवर्त्तकत्वम्। तथा च तत्त्वविद्धिरत्नार्थे निदर्शनान्युक्तानि—"यथा पयः पयो जरयति स्वयं च जीर्यति, यथा विषं विषान्तरं शमयति स्वयं च शाम्यति" [ ] एवं श्रवणादिषु द्रष्टव्यम्"। [ ]

स्यादेतत् अभेदस्य तात्त्विकत्वे भेदस्यासत्यता, असत्यरूपश्च भावः कथं सत्यप्राप्तिसाधनम्? यथा बाष्पादिभावेन सन्दिह्यमानात् 'धूमः' इति गृहीताद् न तात्त्विकी दहनप्रतिपत्तिः।

अत्राभिदधति—नायं नियमः—असत्यं न किञ्चित् सत्यं कार्यं जनयति यथा मायाकारप्रदर्शिता माया प्रतीतेर्भयस्य च निमित्तं तथा रेखा कादीनाम्, तत्रै(त्रै)तद् भवेत्—रेखाकादि स्वरूपेण सद् न खपुष्पसदृशम्, अभेदवादिनस्तु भेदस्य खपुष्पतुल्यत्वात् कथं सत्योपायता? नैष दोषः, सन्तु स्वरूपेण रेखाकादयः येन तु रूपेण गमकास्तदसत्यम्। तथाहि—कादिरूपेण ते गमकाः तच्च तेषामसत्यम्–कार्योपयोगरहिता तु स्वरूपसत्यता व्यर्था। किञ्च; अभेददृष्ट्युपायोऽपि न स्वरूपेणाऽसन् यतो ब्रह्मैवास्य रूपम् तत्र ब्रह्मैवाविद्यानुबद्धं स्वात्मप्रतिपत्युपायः यथा रेखाकादयः 'ककारोऽयम्' 'गवयोऽयम्' इत्यविद्यारूपेणैव कादीनां गमकाः। येऽप्याहुः—"न रेखाकादयः कादित्वेन कादीनां गमकाः, एवं रेखागवयादयोऽपि न गवयत्वेन सत्यगवयादीनाम्; अपि तु सारूप्यात् एवंरूपा गवयादयः सत्याः, वर्णप्रतिपत्त्युपाया अपि रेखाकादयः पुरुषसमयात् वर्णानां स्मारकाः न तु तेषां वर्णत्वेन वर्णप्रतिपादकत्वम्, रेखादिरूपेण च सत्त्वाद् गृहीतसमयानां पुनरुपलभ्यमानाः समयं स्मारयन्ति समयग्रहणाद् यथैव व्युत्पन्नानां बालादिषु प्रवृत्तिः" [ ], तेऽपि न सम्यगाचक्षते; लोकविरोधात् बाला हि रेखासु व्युत्पन्नैर्वर्णत्वेनैव व्युत्पाद्यन्ते, तथैवोपदेष्टृणां व्यपदेशः—'अयं गकारादिः' इति, प्रतिपत्तुश्च प्रतिपत्तिरभेदेनैव, एवं रेखागवयादिष्वपि द्रष्टव्यम्। त(य)थाऽसत्यात् (असत्यात् प्रतिबिम्बात् सत्यस्य) प्रतिबिम्बहेतोर्विशिष्टदेशावस्थस्यानुमानं न मिथ्या तथा शब्दादपि नित्यादसत्यदीर्घा-

---

१–**प्रतियोगीमुव्य**–हा०। –**प्रतियोगीतुव्य**–आ०। –**प्रतियोगीपुव्य**–भां० मां०। २–**ष ते नित्यादि**–वा० बा०। ३ बृहदा० उ० अ० ४ ब्रा० २ मं० ४, ब्रा० ४ मं० २२, ब्रा० ५ मं० १५। गौडपा० का० २६ पृ० १३५। ४ **स्वच्छां** भां०।

५ "घटादिषु प्रलीनेषु घटाकाशादयो यथा। आकाशे संप्रलीयन्ते तद्वज्जीवा इहात्मनि" ॥
गौडपा० का० ४ पृ० १०७अद्वैताख्यप्र०।

६–**कस्य व्यावृत्त्या** भां० मां०। ७ **तत्रैतस्या**–वा० बा० आ० हा०। ८ **कथं चा**–भां० मां०। ९–**त्त्वविद्वद्भि**–भां० मां०। १०–**नि पयो यथा पयो** आ० हा० वि०। ११ "यथा पयः पयोऽन्तरं जरयति स्वयं च जीर्यति, यथा विषं विषान्तरं शमयति, स्वयं च शाम्यति, यथा वा कतकरजो रजोऽन्तराविले पाथसि प्रक्षिप्तं रजोऽन्तराणि भिन्दत् स्वयमपि भिद्यमानमनाविलं पाथः करोति एवं कर्म अविद्यात्मकमपि अविद्यान्तराणि अपगमयत् स्वयमपि अपगच्छति"—ब्रह्मसू० अ० १ पा० १ सू० १ शाङ्क० भा० भाम० पृ० ५८ पं० १३–१६। १२–**जीर्यते** आ० वि०। १३–**था मायाप्रती**–वा० बा०। १४–**त्तं रे**–भां० मां० विना। "तथा अकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः"–ब्रह्मसू० अ० २ पा० १ सू० १४ शाङ्क० भा० पृ० ४६० पं० ७। १५ **सत्तु** भां० मां०। **सत्त** हा०। १६–**न्तु सरू**–वा० बा०। १७–**कारं ग**–भां० मां०। १८ **स ग**–भां० मां० विना। १९ **गवाद्**–भां० मां०। २०–**यान्** आ० हा० वि०।

दिविशिष्टादर्थविशेषप्रतिपत्तिर्नासत्या। अलीका अहिदंशादयः सत्यमरणहेतवस्तत्त्वविद्भिरुदाहृता एव–यथा–सत्याद् दंशाद् मरण–मूर्च्छादि कार्यं तथा कल्पितादपि, न तयोर्विशेषः तस्माद् यथा दंशादेरसत्यात् सत्यकार्यनिष्पत्तिस्तथा भेदविषयात् श्रवण–मनन–ध्यानाऽभ्यासादेरसत्यादपि क्षेमप्राप्तिः।

नन्वेवम् अभेदे व्यवस्थिते कथं सुख–दुःखोपलम्भव्यवस्था कथं वा बद्ध–मुक्तव्यवस्थेति? नैष दोषः; समारोपितादपि भेदात् सुखादेर्व्यवस्थादर्शनात्–यथा–द्वैतिनां शरीरे एक एवात्मा सर्वगतो वा शरीरपरिमाणो वा; तस्य समारोपितभेदनिमित्ता व्यवस्था दृश्यते—'पादे मे वेदना' 'शिरसि वेदना' इति, न च वक्तव्यम्—पादादीनामेव वेदनाधिकरणत्वात् तेषां च भेदाद् व्यवस्था युक्तेति, यतस्तेषामज्ञत्वेन कथं भोक्तृत्वम्? भोक्तृत्वे वा सुरगुरुमतानुप्रवेशः आत्मनः सद्भावेऽपि कर्मफलस्य सुखादेरनुपलम्भात्। तत्रैतत् स्यात्—अद्वैतपक्षे यथैकभेदाश्रितस्यात्मनः कालान्तरे भोगानुसन्धानम् तथा देहान्तरोपभोगस्य भेदान्तरे अनुसन्धानं भवेत्, एतदपि न किञ्चित्; यतो द्वैतिनामपि पादादिप्रदेशो न प्रदेशान्तरवेदनामनुसन्दधाति तथा क्षेत्रज्ञोऽपि कुतश्चिन्निमित्तात् समारोपितभेदो न क्षेत्रज्ञान्तरवेदनामनुसन्धास्यति। तथा, मणि–कृपाण–दर्पणादिषु प्रतिबिम्बानां वर्णसंस्थानान्यत्वं दृश्यते भेदाभावेऽपि, मुक्त–संसारिव्यवहारोप्युपपद्यते अभेदपक्षेऽपि। तथाहि–द्वैतिनामप्यात्मा कल्पितैः प्रदेशैः सुखादिभिर्युज्यमानः क्वचित् सुखादियोगाद् बन्धः (द्धः) क्वचित् तद्वियोगाद् मुक्त इति दृश्यते, यथा मलीमसादर्शे मुखं मलीमसम् विशुद्धे विशुद्धम् दर्पणरहितं च गम्यमानं तदुपाधिदोषासंयुक्तम्। तत्रैतत् स्यात्—कल्पना प्रतिपत्तुः प्रत्ययस्य धर्मो न वस्तुव्यवहारव्यवस्थानिबन्धनम्, न खलु वस्तूनि पुरुषेच्छामनुरुन्धते, न चोपचरितात् कार्यं दृश्यते, नोपचरिताग्नित्वो माणवकः पाकादिष्व(षू)पयुज्यते, एतत् परिहृतं भ्रान्तीनामपि सत्यहेतुत्वं प्रदर्शयद्भिः—"प्रतिसूर्यश्च काल्पनिकः प्रकाशक्रियां कुर्वन् दृष्ट एव" [ ]इति 'सर्वमेकं सत्, अविशेषात्' इति शुद्धद्रव्यास्तिकाभिप्रायः

[२ सांख्यमतप्रतिपादकः अशुद्धद्रव्यास्तिकनयः]

अशुद्धस्तु द्रव्यार्थिको व्यवहारनयमतार्थावलम्बी एकान्तनित्यचेतनाऽचेतनवस्तुद्वयप्रतिपादकसाङ्ख्यदर्शनाश्रितः। अत एव तन्मतानुसारिणः साङ्ख्याः प्राहुः—

"अशेषशक्तिप्रचितात् प्रधानादेव केवलात्।
कार्यभेदाः प्रवर्तन्ते तद्रूपा एव भावतः॥" [तत्त्वसं० का० ७]

यद् अशेषाभिर्महदादिकार्यग्रामजनिकाभिरात्मभूताभिः शक्तिभिः प्रचितं युक्तं सत्त्व–रजस्–तमसां साम्यावस्थालक्षणं प्रधानम् तत एव महदादयः कार्यभेदाः प्रवर्तन्त इति कापिलाः। 'प्रधानादेव' इत्यवधारणं काल–पुरुषादिव्यवच्छेदार्थम्। 'केवलात्' इति वचनं सेश्वरसाङ्ख्योपकल्पितेश्वरनिराकरणार्थम्। 'प्रवर्तन्ते' इति साक्षात् पारम्पर्येणोत्पद्यन्ते इत्यर्थः। तथाहि—तेषां प्रक्रिया——प्रधानाद् बुद्धिः प्रथममुत्पद्यते, बुद्धेश्चाहङ्कारः, अहङ्कारात् पञ्च तन्मात्राणि शब्द–स्पर्श–रूप–रस–गन्धात्मकानि——इन्द्रियाणि चैकादशोत्पद्यन्ते–पञ्च बुद्धीन्द्रियाणि श्रोत्र–त्वक्–चक्षुर्जिह्वा–घ्राणलक्षणानि, पञ्च कर्मेन्द्रियाणि वाक्–पाणि–पाद–पायु–उपस्थसंज्ञकानि, एकादशं मनश्चेति——पञ्चभ्यस्तन्मात्रेभ्यः पञ्चभूतानि—शब्दाद् आकाशः, स्पर्शाद् वायुः, रूपात् तेजः, रसाद् आपः, गन्धात् पृथिवीति। तदुक्तमीश्वरकृष्णेन—

१–**काऽहि**–भां० मां०। "कथं तु असत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपपद्येत? न हि रज्जुसर्पेण दष्टो म्रियते नापि मृगतृष्णिकाम्भसा पानाऽवगाहनादिप्रयोजनं क्रियत इति, नैष दोषः; शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः, स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात्"— ब्रह्मसू० अ० २ पा० १ सू० १४ शाङ्क० भा० पृ० ४५८ पं० १२। २–**षयश्च**–आ० हा० वि०। ३ **नै दो**–वा० बा०। **न दो**–आ० हा० वि०। ४–**रे एवा**–वा० बा०। ५ **यदेक**–वा० बा०। ६ अत्र 'तथा' 'एवं' इत्यादेः कस्यचित् पदस्याध्याहारः समुचितो भाति। ७–**मसादर्शे मुखं विशुद्धे** हा० वि०।–**मसा मुखं विशुद्धे** वा० बा०।–**मसे दर्पणतले मलीमसं मुखं विशुद्धे** भां० मां०। ८–**श्च कादि काल्प**–वा० बा०। ९ पृ० २७२ पं० १७। १०–**शुद्धद्र**–आ० हा० वि०। ११–**णः संख्याः** भां० हा० विना। १२ इदं संपूर्णं सांख्यप्रकरणं तत्त्वसंग्रहपञ्जिकायां वर्तते–का० ७–१५, पृ० १६–२२ प्रकृतिपरीक्षा। १३ तत्त्वसं० पञ्जि० पृ० १६ पं० १७। १४ तत्त्वसं० पञ्जि० पृ० १६ पं० १७। १५ "'प्रवर्तन्ते' इति साक्षात् पारम्पर्येण वा उत्पद्यन्ते इत्यर्थः"–तत्त्वसं० पञ्जि० पृ० १६ पं० १८। १६–**णोत्पाद्य**–भां० मां० विना।

"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि" ॥ [साङ्ख्यका० २२]

अत्र च 'महान्' इति बुद्ध्यभिधानम्, बुद्धिश्च 'घटः' 'पटः' इत्यध्यवसायलक्षणा। अहङ्कारस्तु 'अहं सुभगः' 'अहं दर्शनीयः' इत्याद्यभिधानस्वरूपः। मनस्तु सङ्कल्पलक्षणम्—तद्यथा—कश्चिद् बटुः शृणोति—'ग्रामान्तरे भोजनमस्ति' इति, तत्र तस्य सङ्कल्पः स्यात्—'यास्यामि' इति, 'किं तत्र दधि स्यात्, उतस्विद् दुग्धम्' इत्येवं सङ्कल्पवृत्ति मन इति। तदेवं बुद्ध्यहङ्कार–मनसां परस्परं विशेषोऽवगन्तव्यः। महदादयः प्रधान–पुरुषौ चेति पञ्चविंशतिरेषां तत्त्वानि। यथोक्तम्—

"पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः।
शिखी मुण्डी जटी वाऽपि मुच्यते नात्र संशयः" ॥ [ ] इति।

महदादयश्च कार्यभेदाः प्रधानात् प्रवर्तमाना न कारणादत्यन्तभेदिनो भवन्ति बौद्धाद्यभिमता इव कार्यभेदाः; किन्तु प्रधानरूपात्मान एव त्रैगुण्यादिना प्रकृत्यात्मकत्वात्। तथाहि—यदात्मकं कारणम् कार्यमपि तदात्मकमेव, यथा कृष्णैस्तन्तुभिरारब्धः पटः कृष्णः, शुक्लैः शुक्ल उपलभ्यते एवं प्रधानमपि त्रिगुणात्मकम्। तथा, बुद्ध्यहङ्कारतन्मात्रेन्द्रियभूतात्मकं व्यक्तमपि त्रिगुणात्मकमुपलभ्यते तस्मात् तद्रूपम्। किञ्च, अविवेके(कि)। तथाहि—'इमे सत्त्वादयः' 'इदं च महदादिकं व्यक्तम्' इति पृथक् न शक्यते कर्तुम्; किन्तु ये गुणास्तद् व्यक्तम् यद् व्यक्तं ते गुणा इति। तथा, उभयमपि विषयः भोग्यस्वभावत्वात्। सामान्यं च सर्वपुरुषाणां भोग्यत्वात् पण्यस्त्रीवत्। अचेतनात्मकं च सुख–दुःख–मोहोऽवेदकत्वात्। प्रसवधर्मि च। तथाहि—प्रधानं बुद्धिं जनयति; साऽप्यहङ्कारम्; सोऽपि तन्मात्राणि—इन्द्रियाणि चैकादश—तन्मात्राणि महाभूतानि जनयन्तीति। तस्मात् त्रैगुण्यादिरूपेण तद्रूपा एव कार्यभेदाः प्रवर्तन्ते। यथोक्तम्—

"त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्" ॥ [साङ्ख्यका० ११] इति।

अथ यदि तद्रूपा एव कार्यभेदाः कथं शास्त्रे व्यक्ताऽव्यक्तयोर्वैलक्षण्योपवर्णनम्—

"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्" ॥ [साङ्ख्यका० १०]

इति क्रियमाणं शोभेत? {अत्र ह्ययमर्थः—हेतुमत् कारणवद् व्यक्तमेव। तथाहि—प्रधानेन

---

१ "प्रकृतिः प्रधानमधिकुरुते। ब्रह्म अव्यक्तम् बहुधात्मकम् माया इति पर्यायाः"–माठर० पृ० ३६ पं० १०। २ "महान् बुद्धिः मतिः प्रज्ञा संवित्तिः ख्यातिः चितिः स्मृतिः आसुरी धृतिः हरः हिरण्यगर्भ इति पर्यायाः"–माठर० पृ० ३६ पं० १२। ३ "अध्यवसायो बुद्धिः"–साङ्ख्यका० २३। ४ "तस्माद् महतः अहङ्कार उत्पद्यते, तस्य इमे पर्यायाः–वैकृतः तैजसः भूतादिः अभिमानः अस्मिता इति। चतुष्षष्टिवर्णैः परादिवैखरीपर्यन्ताभिधेयैर्यत् किमपि अभिधीयते बुद्ध्या समर्थ्यं तत् सकलम् आद्यन्ताऽकार–हकारवर्णद्वयग्रहणेन उपरिस्थितपिण्डीकृतानुकारिणा बिन्दुना भूषितः प्रत्याहारन्यायेन अ–हंकार इत्यभिधीयते"–माठर० पृ० ३६ पं० १३–१७। ५ अभिमानोऽहङ्कारः"–साङ्ख्यका० २४ तथा माठर० पृ० ४१ पं० १५। ६ "मनः संकल्पकम्"–साङ्ख्यका० २७। ७ "किं तत्र गुडदधि स्यात्, उतस्विद् दधि इति"–तत्त्वसं० पञ्जि० पृ० १६ पं० २८। ८ "जटी मुण्डी शिखी"–माठरवृ० पृ० ३८ पं० ३, शास्त्रवा० स० स्त० ३ श्लो० ३७ पृ० ११३ प्र० पं० ८, तत्त्वसं० पञ्जि० पृ० १७ पं० ४, "तथा चोक्तं पञ्चशिखेन प्रमाणवाक्यम्" इति निर्दिश्य श्लोकोऽयं समुद्धृतः—साङ्ख्यस० तत्त्वयाथा० पृ० ६१ पं० ४ तत्र अस्येत्थं पाठः–"यत्र कुत्राश्रमे रतः। जटी मुण्डी शिखी वाऽपि"–न्यायाव० टिप्प० पृ० १४ पं० १७। ९ "यथा कृष्णतन्तुः कारणम् पटः कार्यमपि कृष्णमेव भवति"–माठरवृ० पृ० १९ पं० २४। १० "शुक्लैस्तु शुक्लः"–तत्त्वसं० पञ्जि० पृ० १७ पं० ९। ११ "किञ्च, अन्यत्–अविवेकि व्यक्तम्।" 'अमी गुणाः इदं व्यक्तम्' इति विवेक्तुं न पार्यते"–माठरवृ० पृ० २० पं० २। "किञ्च, अविवेकि"–तत्त्वसं० पञ्जि० पृ० १७ पं० ११। १२ "किञ्च, द्वयमपि व्यक्तमव्यक्तं च विषयः"–तत्त्वसं० पञ्जि० पृ० १७ पं० १३। १३ "गणिकावत्"–माठरवृ० पृ० २० पं० ७। "मल्लदासीवत्"–तत्त्वसं० पञ्जि० पृ० १७ पं० १४। १४ "सुख–दुःख–मोहान् न चेतयति"–माठरवृ० पृ० २० पं० ८। १५–**हावे**–आ० हा० वि०। १६ "ननु यदि तद्रूपा एव कार्यभेदाः तत् कथं शास्त्रे"–तत्त्वसं० पञ्जि० पृ० १७ पं० १९। १७ –"क्षण्यमुपवर्णितम्? तथाहि–ईश्वरकृष्णोक्तम्–तत्त्वसं० पञ्जि० पृ० १७ पं० २०। १८ पृ० २८२ पं० ६। "सक्रियम्"–माठरवृ० पृ० १९ पं० २। तत्त्वसं० पञ्जि० पृ० १७ पं० २०। १९ अत्रत्यो भावो माठरवृत्तावपि तथैव व्यावर्णितो दृश्यते।

हेतुमती बुद्धिः, अहङ्कारो बुद्ध्या हेतुमान्, पञ्च तन्मात्राणि एकादश चेन्द्रियाणि हेतुमन्ति अहङ्कारेण, भूतानि तन्मात्रैः। न त्वेवमव्यक्तम् कुतश्चित् तस्यानुत्पत्तेः। तथा, व्यक्तमनित्यम् उत्पत्तिधर्मकत्वात्, तद्विपर्ययाद् न त्वेवमव्यक्तम्। प्रधान-पुरुषौ दिवि भुवि चान्तरिक्षे च सर्वत्र व्याप्तितया यथा वर्तेत(ते) न तथा व्यक्तं वर्तते इति तदव्यापि। यथा च संसारकाले त्रयोदशविधेन बुद्ध्यहङ्कारेन्द्रियलक्षणेन करणेन संयुक्तं सूक्ष्मशरीराश्रितं व्यक्तं संसारि न त्वेवमव्यक्तम् तस्य विभुत्वेन सक्रियत्वायोगात्। बुद्ध्यहङ्कारादिभेदेन चानेकविधं व्यक्तमुपलभ्यते नाव्यक्तम् तस्यैकस्यैव सर्वास्त्रिलोकीकारणत्वात्। आश्रितं च व्यक्तम्—यद् यस्मादुत्पद्यते तस्य तदाश्रितत्वात्, न त्वेवमव्यक्तम् अकार्यत्वात् तस्य। 'लयं गच्छति' इति कृत्वा लिङ्गं च व्यक्तम्। तथाहि—प्रलयकाले भूतानि तन्मात्रेषु लीयन्ते; तन्मात्राणि इन्द्रियाणि चाहङ्कारे; सोऽपि बुद्धौ; साऽपि प्रधाने। न त्वेवमव्यक्तं क्वचिदपि लयं गच्छतीति। लीनं वा अव्यक्तलक्षणमर्थं गमयति व्यक्तं कार्यत्वाल्लिङ्गम्, न त्वेवमव्यक्तम् अकार्यत्वात् तस्य। सावयवं च व्यक्तम् शब्द-स्पर्श-रूप-रस-गन्धात्मकैरवयवैर्युक्तत्वात्, न त्वेवमव्यक्तम् तत्र शब्दादीनामनुपलब्धेः। अपि च, यथा पितरि जीवति पुत्रो न स्वतन्त्रो भवति तथा व्यक्तं सर्वदा कारणायत्तत्वात् परतन्त्रम्, नैवमव्यक्तम् अकारणाधीनत्वात् सर्वदा तस्येति {न; परमार्थतस्तादृप्येऽपि प्रकृतिविकारभेदेन तयोर्भेदाविरोधात्। तथाहि—स्वभावतस्त्रैगुण्यरूपेण प्रकृतिरूपा एव प्रवर्तन्ते विकाराः, सत्त्व-रजस्-तमसां त्त(तू)त्कटाऽनुत्कटत्वविशेषात् सर्गवैचित्र्यं महदादिभेदेन न विरोत्स्यत इति कारणात्मनि कार्यमस्तीति प्रतिज्ञातं भवति। नन्वेवं कुतो ज्ञायते प्रागुत्पत्तेः सत् कार्यमिति? हेतुकदम्बकसद्भावात्। तत्सद्भावश्च—

"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्" ॥ [साङ्ख्यका० ९] इति ईश्वरकृष्णेन प्रतिपादितः।

अत्र च 'असदकरणात्' इति प्रथमो हेतुः—सत्कार्यसाधनायोपन्यस्तः—एवं समर्थितः—यदि हि कारणात्मनि उत्पत्तेः प्राक् कार्यं नाभविष्यत् तदा न तत् केनचिदकरिष्यत, यथा गगनारविन्दम्। प्रयोगः—यद् असत् तद् न केनचित् क्रियते, यथा नभोनलिनम्, असत्त्व(च्च) प्रागुत्पत्तेः परमतेनकार्यमिति व्यापकविरुद्धोपलब्धिप्रसङ्गः, न चैवं भवति, तस्मात् यत् क्रियते तिलादिभिस्तैलादि कार्यं तत् तस्मात् प्रागपि सत् इति सिद्धं शक्तिरूपेणोत्पत्तेः प्रागपि कारणे कार्यम्, व्यक्तिरूपतया च तत् तदा कापिलैरपि नेष्यते।

'उपादानग्रहणात्' इति द्वितीयहेतुसमर्थनम्—यदि असद् भवेत् कारणे कार्यम् तदा पुरुषाणां प्रतिनियतोपादानग्रहणं न स्यात्, शालिफलार्थिनस्तु शालिबीजमेवोपाददते न कोद्रवबीजम्। तत्र यथा शालिबीजादिषु शाल्यादीनामसत्त्वम् तथा यदि कोद्रवबीजादिष्वपि; किमिति तुल्ये सर्वत्र शालिफलादीनामसत्त्वे प्रतिनियतान्येव शालिबीजानि गृह्णन्ति न कोद्रवबीजादिकम्, यावता कोद्रवादयोऽपि शालिफलार्थिभिरुपादीयेरन् असत्त्वाविशेषात्। अथ तत्फलशून्यत्वात् तैस्ते नोपादीयन्ते,

---

१ "व्यापितया यथा वर्तेते"–तत्त्वसं० पञ्जि० पृ० १७ पं० २६। २–**तस्त्रैलोक्यका**–आ०। ३ माठरवृत्तौ तत्त्वसंग्रहपञ्जिकायां च नैषा व्युत्पत्तिर्दृश्यते। ४–**कारा भे**–भां० मां० वा० बा०। "प्रकृतिविकारभेदेन"–तत्त्वसं० पञ्जि० पृ० १८ पं० १०। ५ "अथवा 'भावतः' इति स्वभावतस्त्रैगुण्यरूपेण"–तत्त्वसं० पञ्जि० पृ० १८ पं० ११। ६ "सत्त्व-रजस्-तमसां तूत्कटाऽनुत्कटत्वविशेषात्"–तत्त्वसं० पञ्जि० पृ० १८ पं० ११। ७–**रोध्य**–भां० मां०। ८–**ति ज्ञातं** आ० वा० बा०। ९ **नन्वेतत् कु**–भां० मां०। १० **तत्स्वभा**–वा० बा० हा०। **ततश्च स्वभा**–आ० वि०। ११ माठरवृ० पृ० १६ पं० २५।

१२ "यदि त्वसद् भवेत् कार्यं कारणात्मनि शक्तितः। कर्तुं तन्नैव शक्येत नैरूप्याद् वियदब्जवत्" ॥
तत्त्वसं० का० ८ पृ० १८।

१३–**सत्त्वा प्रा**–भां० मां० विना।–**सच्च प्रा**–वि० सं०। "असच्च प्रागुत्पत्तेः परमतेन कार्यमिति"–तत्त्वसं० पञ्जि० पृ० १८ पं० २१। १४–**या तत् तदा** आ० हा० वि०। १५ माठरवृ० पृ० १७ पं० ४।

१६ "कस्माच्च नियतान्येव शालिबीजादिभेदतः। उपादानानि गृह्णन्ति तुल्यसत्त्वेऽपरं न तु" ॥
तत्त्वसं० का० ९ पृ० १८।

१७–**त्वेति प्र**–आ०। १८–**जादीनि** भां० मां०।

यद्येवं शालिबीजमपि शालिफलार्थिना तत्फलशून्यत्वान्नोपादेयं स्यात् कोद्रवबीजवत्, न चैवं भवति, तस्मात् तत्र तत् कार्यमस्तीति गम्यते।

'सर्वसम्भवाभावात्' इति तृतीयो हेतुः—यदि हि असदेव कार्यमुत्पद्यते तदा सर्वस्मात् तृणपांश्वादेः सर्वं स्वर्ण-रजतादिकार्यमुत्पद्येत, सर्वस्मिन्नुत्पत्तिमति भावे तृणादिकारणभावात्तावविरहस्याऽविशिष्टत्वात्। पूर्वं कारणमुखेन प्रसङ्ग उक्तः सम्प्रति तु कार्यद्वारेणेति विशेषः। न च सर्वं सर्वतो भवति, तस्मादयं नियमः 'तत्रैव तस्य सम्भवात्' इति गम्यते।

स्यादेतत् कारणानां प्रतिनियतेष्वेव कार्येषु शक्तयः प्रतिनियताः तेन कार्यस्यासत्त्वेऽपि किञ्चिदेव कार्यं क्रियते-न गगनाम्भोरुहम्—किञ्चिदेव चोपादानमुपादीयते तदेव समर्थं न तु सर्वम् किञ्चिदेवं च कुतश्चिद् भवति न तु सर्वं सर्वस्मादिति, असदेतत्; यतः शक्ता अपि हेतवः कार्यं कुर्वाणाः शक्यक्रियमेव कुर्वन्ति नाशक्यम्।

ननु केनैतदुक्तम्—'अशक्यं कुर्वन्ति' इति येनैतत् प्रतिषिध्यते भवता किन्तु 'असदपि कार्यं कुर्वन्ति' इत्येतावदुच्यते। तच्च तेषां शक्यक्रियमेव, असदेतत्; असत्कार्यकारित्वाभ्युपगमादेव अशक्यक्रियं कुर्वन्ति। तथाहि—यद् असत् तत् नीरूपम् यच्च नीरूपं तत् शशविषाणादिवद् अनाधेयातिशयम् यच्च अनाधेयातिशयं तद् आकाशवद् अविकारि; तथाभूतं चाऽसमासादितविशेषरूपं कथं केनचिच्छक्येत कर्तुम्? अथ सदवस्थाप्रतिपत्तेर्विक्रियत एव तत्, एतदप्यसत्; विकृतावात्महानिप्राप्तेः—यतो विकृतावित्थमाणायां यस्तस्यात्मा निरूपाख्यो वर्ण्यते तस्य हानिः प्रसज्येत न ह्यसतः स्वभावापरित्यागे सद्रूपतापत्तिर्युक्ता परित्यागे वा नासदेव सद्रूपतां प्रतिपन्नमिति सिद्ध्येत्-अन्यदेव हि सद्रूपम् अन्यच्च असद्रूपम् परस्परपरिहारेण तयोरवस्थितत्वात्। तस्मात् यद् असत् तद् अशक्यक्रियमेव, अतस्तथाभूतपदार्थकारित्वाभ्युपगमे कारणानामशक्यकारित्वमेवाभ्युपगतं स्यात्। न चाशक्यं केनचित् क्रियते यथा गगनाम्भोरुहम्, अतः 'शक्तिप्रतिनियमात्' इत्यनुत्तरमेतत्। एतेन 'शक्तस्य शक्यकरणात्' इति चतुर्थोऽपि हेतुः समर्थितः।

"कार्यस्यैवमयोगाच्च किं कुर्वत् कारणं भवेत्।
ततः कारणभावोऽपि बीजादेर्नावकल्पते ॥" [तत्त्वसं० का० १३]

इति पञ्चमहेतुसमर्थनम्। अस्यार्थः—एवं यथोक्ताद्धेतुचतुष्टयाद् असत्कार्यवादे सर्वथाऽपि कार्यस्यायोगात् किं कुर्वद् बीजादि कारणं भवेत्? ततश्चैवं शक्यते वक्तुम्—न कारणं बीजादिः, अविद्यमानकार्यत्वात्, गगनाब्जवत्, न चैवं भवति, तस्माद् विपर्ययः इति सिद्धं प्रागुत्पत्तेः सत् कार्यमिति।

स्यादेतत् यदि नाम 'सत् कार्यम्' इत्येवं सिद्धम्, 'प्रधानादेव महदादिकार्यभेदाः प्रवर्तन्ते' इत्येतत् तु कथं सिद्धिमासादयति? उच्यते—

---

१ माठरवृ० पृ० १७ पं० ९।

२ "सर्वं च सर्वतो भावाद् भवेदुत्पत्तिधर्मकम्। तादात्म्यविगमस्येह सर्वस्मिन्नविशेषतः" ॥
तत्त्वसं० का० १० पृ० १९।

३–**त्मना वि**–आ० हा० विना। ४ द्वितीयहेतुसमर्थनावसरे पृ० २८२ पं० २७। ५ "यदेव समर्थं न तु यत् किञ्चित् किञ्चिदेव तु कुतश्चिद् भवति"–तत्त्वसं० पञ्जि० पृ० १९ पं० २०। ६–**र्थं किञ्चि**–भां० मां० विना। ७–**च कु**–भां० मां० विना।

८ "शक्तीनां नियमादेषां नैवमित्यप्युत्तरम्। शक्यमेव यतः कार्यं शक्ताः कुर्वन्ति हेतवः" ॥
तत्त्वसं० का० ११ पृ० १९।

९ "अकार्यातिशयं यत् तु नीरूपमविकारि च। विकृतावात्महान्याप्तेस्तत् क्रियेत कथं नु तैः?" ॥
तत्त्वसं० का० १२ पृ० २०।

१०–**तच्च शश**–भां० मां० विना। ११–**योरेव स्थि**–भां० मां० विना। १२ प्र० पृ० पं० ७। १३–**क्यका**–भां० मां० विना। १४–**जादे न विक**–भां० मां० हा० वि०।–**जादे न च क**–आ०।–"जादेर्न वि"–तत्त्वसं०। १५ **तस्यैवं** भां० मां० विना।

१६ "सुखाद्यन्वितमेतच्च व्यक्तं व्यक्तं समीक्ष्यते। प्रसाद-ताप-दैन्यादिकार्यस्येहोपलब्धितः ॥
"ततस्तन्मयसंभूतं तज्जात्यन्वयदर्शनात्। कुटादिभेदवत् तच्च प्रधानमिति कापिलाः" ॥
तत्त्वसं० का० १४-१५ पृ० २०-२२।

"भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य" ॥ [साङ्ख्यका० १५]
"कारणमस्त्यव्यक्तम्" [साङ्ख्यका० १६]

इति पञ्चभ्यो वीतप्रयोगेभ्यः ।

तथाहि—अस्ति प्रधानम्, भेदानां परिमाणात्, इह लोके यस्य सत्ता भवति तस्य परिमाणं दृष्टम्, यथा कुलालः परिमितात् मृत्पिण्डात् परिमितं घटमुत्पादयति प्रस्थग्राहिणम् आढकग्राहिणं वा, इदं च महदादि व्यक्तं परिमितमुपलभ्यते—एका बुद्धिः एकोऽहङ्कारः पञ्च तन्मात्राणि एकादशेन्द्रियाणि पञ्च भूतानि—ततोऽनुमानेन साधयामः—अस्ति प्रधानम् यत् परिमितं व्यक्तमुत्पादयति यदि च प्रधानं न स्यात् निष्परिमाणमिदं व्यक्तं स्यात् ।

इतश्चास्ति प्रधानम्, भेदानामन्वयदर्शनात्, यज्जातिसमन्वितं हि यदुपलभ्यते तत् तन्मयकारणसम्भूतम्, यथा घट-शरावादयो भेदा मृज्जात्यन्विता मृदात्मककारणसम्भूताः, सुख-दुःख-मोहादिजातिसमन्वितं चेदं व्यक्तमुपलभ्यते प्रसाद-ताप-दैन्यादिकार्योपलब्धेः । तथाहि—प्रसाद-लाघवाऽभिष्वङ्गोद्धर्ष-प्रीतयः सत्त्वस्य कार्यम् सुखमिति च सत्त्वमेवोच्यते । ताप-शोष-भेद-स्तम्भोद्वेगा रजसः कार्यम् रजश्च दुःखम् । दैन्याऽऽवरण-सादन-वध्वंस-बीभत्स-गौरवाणि तमसः कार्यम् तमश्च मोहशब्देनोच्यते । एषां च महदादीनां सर्वेषां प्रसाद-ताप-दैन्यादि कार्यमुपलभ्यते इति सुख-दुःख-मोहानां त्रयाणामेते सन्निवेशविशेषा इत्यवसीयते; तेन सिद्धमेतेषां प्रसादादिकार्यतः सुखाद्यन्वितत्वम्; तदन्वयाच्च तन्मयप्रकृतिसम्भूतत्वं सिद्धिमासादयति; तत्सिद्धौ च सामर्थ्याद् याऽसौ प्रकृतिः तत् प्रधानमिति सिद्धम्—अस्ति प्रधानम् भेदानामन्वयदर्शनात् ।

इतश्चास्ति प्रधानम्, शक्तितः प्रवृत्तेः । इह लोके यो यस्मिन्नर्थे प्रवर्त्तते स तत्र शक्तः यथा तन्तुवायः पटकरणे अतः प्रधानस्यास्ति शक्तिर्यया व्यक्तमुत्पादयति; सा च शक्तिर्निराश्रया न सम्भवति तस्मादस्ति प्रधानं यत्र शक्तिर्वर्तते इति ।

इतश्चास्ति प्रधानम् कारणकार्यविभागात् । इह लोके कार्य-कारणयोर्विभागो दृष्टः, तद्यथा—मृत्पिण्डः कारणम् घटः कार्यम् स च मृत्पिण्डाद् विभक्तस्वभावः । तथाहि—घटो मधू-दक-पयसां धारणसमर्थः न मृत्पिण्डः एवमिदं महदादिकार्यं दृष्ट्वा साधयामः—अस्ति प्रधानं कारणम् यस्मादिदं महदादिकार्यमिति ।

इतश्चास्ति प्रधानम् वि(वै)श्वरूप्यस्याविभागात् । 'वैश्वरूप्यम्' इति त्रयो लोका उच्यन्ते, एते हि प्रलयकाले क्वचिदविभागं गच्छन्ति । तथाहि—पञ्च भूतानि पञ्चसु तन्मात्रेषु अविभागं गच्छन्ति, तन्मात्राणि इन्द्रियाणि चाहङ्कारे, अहङ्कारस्तु बुद्धौ, बुद्धिः प्रधाने तदेवं प्रलयकाले त्रयो लोका अविभागं गच्छन्ति । अविभागोऽविवेकः यथा-क्षीरावस्थायाम् 'अन्यत् क्षीरम्' 'अन्यद् दधि' इति विवेको न शक्योऽभिधातुम् तद्वत् प्रलयकाले 'इदं व्यक्तम्' 'इदमव्यक्तम्' इति विवेकोऽशक्यक्रिय इति मन्यामहे—अस्ति प्रधानम् यत्र महदादिलिङ्गमविभागं गच्छतीति । सत्त्व-रजस्तमोलक्षणं सामान्यमेकमचेतनं द्रव्यम् अनेकं च चेतनं द्रव्यमर्थोऽस्तीति द्रव्यार्थिकैः-अशुद्धो व्यवहारनयाभिप्रेतार्थाभ्युपगमस्वरूपः-बोद्धव्यः । वक्ष्यति चाचार्यः—

---

१ कार्यकारणवि-भां० मां० । २ "तत्र प्रथमम्-अनुमानम्-तावद् द्विविधम्-वीतम् अवीतं च । अन्वयमुखेन प्रवर्तमानं विधायकं वीतम् । व्यतिरेकमुखेन प्रवर्तमानं निषेधकम् अवीतम्××वीतं द्वेधा-पूर्ववत् सामान्यतोदृष्टं च"-साङ्ख्य० कौ० पृ० ३० पं० ५ तथा पृ० ३१ पं० ४ । ३ माठरवृ० पृ० २५ पं० २४ । ४ "लोके यत्र कर्ताऽस्ति तस्य परिमाणं दृष्टम्"-माठरवृ० पृ० २५ पं० २५ । "इह लोके यस्य कर्ता भवति तस्य परिमाणं दृष्टम्"-तत्त्वसं० पञ्जि० पृ० २१ पं० २ । ५ माठरवृ० पृ० २६ पं० ७ । ६-"साधना-ध्वंस"-तत्त्वसं० पञ्जि० पृ० २१ पं० १२ । ७ माठरवृ० पृ० २६ पं० १२ । ८ माठरवृ० पृ० २३ पं० १६ । ९-क्तस्तथा-आ० हा० वि० । १० माठरवृ० पृ० २६ पं० २२ । ११ "विश्वरूपस्य भावो वैश्वरूप्यम्-बहुरूपमित्यर्थः"-माठरवृ० पृ० २६ पं० २३ । तत्त्वसं० पञ्जि० पृ० २१ पं० २३ । १२ "प्रकर्षेण धीयते स्थाप्यते अत्र अखिलम् इति प्रधानम्"-माठरवृ० पृ० २७ पं० ६ । १३ माठरवृ० पृ० २७ पं० १६ । १४-नं अनेकं च भां० मां० । १५ पृ० २७१ पं० १५ ।

'जं काविलं दरिसणं एयं दव्वट्ठियस्स वत्तव्वं' । [तृ० का० गा० ४८] इति ।

नैगमनयाभिप्रायस्तु द्रव्यास्तिकः शुद्धाऽशुद्धतया आचार्येण न प्रदर्शित एव नैगमस्य सामान्यग्राहिणः संग्रहेऽन्तर्भूतत्वात् विशेषग्राहिणश्च व्यवहारे इति नैगमाभावादिति द्रव्यप्रतिपादकनयप्रत्ययराशिमूलव्याकरणी द्रव्यास्तिकः शुद्धाऽशुद्धतया व्यवस्थितः ।

[पर्यायास्तिकनयनिरूपणम्]

[१ सद्द्वैतप्रतिक्षेपकः पर्यायास्तिकनयः]

अत्र पर्यायास्तिक ऋजुसूत्र-शब्द-समभिरूढैवंभूतनयप्रत्ययराशिमूलव्याकरणी शुद्धाऽशुद्धतया व्यवस्थितः पर्यायलक्षणविषयव्यवस्थापनपरो द्रव्यास्तिकनयाभिप्रेतवस्तुव्यवस्थापनयुक्तिं प्रतिक्षिपति—यदुक्तं द्रव्यास्तिकेन 'सर्वमेकं सत् अविशेषात्' तत् किं भेदस्य प्रमाणबाधितत्वादेकमुच्यते, आहोश्चिदभेदे प्रमाणसद्भावात्? न तावद् भेदस्य प्रमाणबाधितत्वम् यतः प्रमाणं प्रत्यक्षादिकं भेदमुपोद्बलयति न पुनस्तद्बाधया प्रवर्त्तते, भेदमन्तरेण प्रमाणेतरव्यवस्थितेरेवाभावात् । प्रमाणं च प्रत्यक्षानुमानादिभेदेन भिन्नं सद् भेदसाधकमेव न पुनस्तद्बाधकम् । तथाहि—प्रत्यक्षं तावच्चक्षुर्व्यापारसमनन्तरभावि वस्तुभेदमधिगच्छत् उत्पद्यते यतो भेदो भाव एव तं चाधिगच्छताऽध्यक्षेण कथं भेदो न अधिगतः? यच्चोक्तम्-'भेदस्य कल्पनाविषयत्वम् 'इदमस्माद् व्यावृत्तम्' इत्येवं तस्य व्यवस्थापनात् अभेदस्तु निरपेक्षाध्यक्षधीसमधिगम्यः' इति, तदयुक्तम्; 'इदमनेन समानम्' इत्यनुगतार्थप्रतिभासस्यैवेतरसव्यपेक्षस्य कल्पनाज्ञानमन्तरेणानुपपत्तेरभेद एव कल्पनाज्ञानविषयः भेदस्तु परस्पराऽसंमिश्रवस्तुबलोद्भूततदाकारसंवेदनाधिगम्यः तदाभासाध्यक्षस्यानुभवसिद्धत्वात्, अध्यक्षस्य भावग्रहणरूपत्वाच्च । भावाश्च स्वस्वरूपव्यवस्थितयो नात्मानं परेण कल्पनाज्ञानमन्तरेण योजयन्ति, एवं परस्परासङ्कीर्णरूपप्रतिभासतो भावानां व्यवहाराङ्गता नान्यथा । तदुक्तम्—"अनलार्थनलं पश्यन्नपि न तिष्ठेत् नापि प्रतिष्ठेत" [ ] । पुनरप्युक्तम्-"तत् परिच्छिनत्ति अन्यद् व्यवच्छिनत्ति प्रकारान्तराभावं च सूचयति" [ ] इति । एतेन 'आहुर्विधातृ प्रत्यक्षम्' इत्यादि पराकृतम् । यतो विधातृत्वं किं प्रत्यक्षस्य भावस्वरूपग्राहित्वम्, आहोश्चिदन्यत्? यदि भावस्वरूपग्राहित्वम् न तर्हि भेदग्रहणस्य विरोधः भेदस्य तद्रूपत्वात् । अथान्यत्, तन्न; तस्य स्वभावानिर्देशात् । अथ वस्त्वन्तराद् वस्त्वन्तरस्यान्यत्वं प्रत्यक्षं न प्रतिपादयति, तदप्यसत्; भावानां सर्वतो व्यावृत्तत्वात् तथैव चाध्यक्षे प्रतिभासनात् । तथाहि-पुरोव्यवस्थिते घट-पटादिके वस्तुनि चक्षुर्व्यापारसमुद्भूतप्रतिनियतार्थप्रतिभासादेव सर्वस्मादन्यतो भेदः प्रतिपन्नोऽध्यक्षेण अन्यथा प्रतिनियतप्रतिभासायोगात् । न ह्यघटरूपतयाऽपि प्रतिभासमानो घटः प्रतिनियतप्रतिभासो भवति, अघटरूपपदार्थाप्रतिभासने च तत्र कथं न ततो भेदप्रतिभासः स्यात्? नहि तदात्मा भवति, स्वस्वभावव्यवस्थितेः सर्वभावानाम्; अन्यथा सर्वस्य सर्वत्रोपयोगादिप्रसङ्ग इति अन्याप्रतिभासनमेव घटादेः प्रतिनियतरूपपरिच्छेदः । यदि पुनः प्रतिनियतरूपपरिच्छेदेऽपि नान्यरूपपरिच्छेदस्तदा प्रतिनियतैकस्वरूपस्याप्यपरिच्छेदप्रसङ्गः । तथाहि-घटरूप-(प)प्रतिनियताध्यक्षप्रत्ययेनाप्यघटरूपविवेको नाधिगतो यदि तदाऽघटरूपमपि घटरूपं स्यादिति न

१-यप्रस्तरमूल-आ० । २ पृ० २७२ पं० १७ । ३ प्रमेयक० पृ० १८ प्र० पं० १५ । ४ भावस्वभाव एवं (एतं) चाधि-वा० बा० विना । ५ पृ० २७२ पं० १९ । ६-इत्येव त-मां० । ७-मभिग-वा० बा० । -मभिगम्यत इति आ० हा० वि० । ८-सस्य वेत-हा० । ९-क्षक-भां० मां० विना । १०-स्तु परासंमि-आ० हा० वि० । ११-च्छिनदन्य-भां० मां० हा० वि० । -च्छिदन्य-आ० । १२ पृ० २७३ पं० १७ । १३-त्याद्यपि प-भां० मां० । १४-दस्यात-वा० बा० । १५-ततस्त तस्य भां० मां० । १६-स्मादेवमन्य- मां० आ० हा० वि० । -स्मादेकमन्य-भां० । १७-क्षेणा प्र-आ० हा० वि० । १८-या प्र-भां० मां० । १९ कथं ततो भेदः प्रति-वा० बा० । कथं भेदप्रति-हा० वि० । कथं भेदः प्रति-आ० । २०-ति स्वभा-आ० वा० बा० । २१ सर्वत्राप्रयो-भां० मां० । २२-नः प्रतिनियतरूपपरिच्छेदस्तदा वा० बा० आ० । २३-दः सदा भां० मां० । २४ घटादिरूपं वा० बा० विना । २५-ना घ-वा० बा० ।

प्रतिनियतघटरूपप्रतिपत्तिः स्यात्। ततश्च य एष कस्यचित् प्रतिनियतपदार्थदर्शनात् क्वचित् प्राप्ति-परिहारार्थो व्यवहारः स न स्यात्। न च तत्राऽसतो रूपस्य प्रतिभासो युक्तः अप्रतिभासने च कथं न ततः प्रतिभासमानरूपस्य विवेकप्रतिभासः? न च भेदः कल्पनाज्ञानविषयः अबाधितानुभव-गोचरत्वात्; अत एव 'इतरेतराभावरूपत्वान्न भेदः प्रत्यक्षविषयः' इति प्रत्युक्तम् भावस्वरूपग्रहणे इतरेतराभावरूपस्य भेदस्य प्रतिभासनात्।

अनुमानागमयोः स्वरूपस्य तु भेदनिबन्धनत्वान्न भेदबाधकता। एवं प्रमेयभेदनिश्चये प्रमाणादपि प्रमेयस्य भेदो निश्चित एव भवतीति न प्रमाणनिश्चये भेदेऽबाधितत्वाद् भेदस्याभेदाभ्युपगमो युक्तः।

यदपि 'देश-कालाऽऽकारभेदैर्भेदो न प्रत्यक्षादिभिः प्रतीयते' इत्याद्युक्तम्, तदप्यसङ्गतमेव; अभेदप्रतिपत्तावप्यस्य समानत्वात्। तथाहि–अभेदोऽपि पदार्थानां यदि देशाभेदात् तदाऽनवस्था-दिदूषणं समानम्। किञ्च, भिन्नदेशसम्बन्धितया प्रतिभासमानानां घट-पटादीनां सद्रूपतया सर्वेषां प्रतिभासनात् तस्याश्च सर्वत्र सर्वदाऽप्रत्यपायादबाधितप्रत्ययविषयत्वेन पारमार्थिकत्वम् घटादिभेदानां च प्रच्यवनाद् देशान्तरादौ बाधितप्रत्ययगम्यत्वादपारमार्थिकत्वमभ्युपगतम्, तत्रैकदेशस्थघटादिभेदाध्यक्षप्रतिपत्तिकाले यत(त्) स्वरूपं तद्भेदपरिष्वक्तवपुः परिस्फुटमध्यक्षे प्रति-भाति न तद् देशान्तरस्थघटादिभेदपरिगतमूर्तितया प्रतिभाति, तत्र तद्भेदानामसन्निधानेन प्रति-भासायोगात् तदप्रतिभासने च तत्परिष्वक्तताऽपि तस्य नाधिगतेति कथं देशान्तरस्थभेदानुगतत्वं तस्य भातम्? यदेव हि स्पष्टदृगवगतं तद्भेदनिष्ठं तस्य रूपं तदेवाभ्युपगन्तुं युक्तम् अन्यदेशभेदानु-गतस्य तदर्शनासंस्पर्शिनः स्वरूपस्यासम्भवात् सम्भवे वा तस्य दृश्यस्वभावाभेदप्रसङ्गात्, तदेकत्वे सर्वत्र भेदप्रतिहतेरनानैकं जगत् स्यात्। दर्शनपरिगतं च तद्देशभेदक्रोडीकृतं सद्रूपं न भेदान्तर-परिगतमिति न तदस्ति। यदि तु तदपि भेदान्तरपरिगतं सद्रूपमाभाति तथासति सकलदेशपरिगता भेदाः प्रतिभासन्ताम्। अथ न प्रथमदेशभेदप्रतिभासकाले देशान्तरपरिगतभेदसम्बन्धिसद्रूपत्व-माभाति किन्तु यदा भेदान्तरमुपलभ्यते तदा तद्गतं सद्रूपत्वमाभातीत्यभेदप्रतिपत्तिः पश्चाद् भव-तीति, एतदप्ययुक्तम्; यतो भेदान्तरप्रतिभासेऽपि तत्क्रोडीकृतमेव सद्रूपत्वमिति न पूर्वभेदसंस्प-र्शितया तस्याधिगतिः, पूर्वभेदस्याऽसन्निहिततयाऽप्रतिभासने तत्परिष्वक्तवपुषः सद्रूपस्यापि दर्शना-तिक्रान्तत्वात् कथमपरापरदेशभेदसमन्वयिसद्रूपत्वावगमः सम्भवी?

अथ प्रत्यभिज्ञानादन्वयि सद्रूपत्वं भिन्नदेशभेदेषु प्रतीयते तदा वक्तव्यं केयं प्रत्यभिज्ञा? यदि प्रत्यक्षम् तत् कुतस्तदवसेयं सद्रूपत्वमपरापरदेशघट-पटादिष्वेकं सिद्ध्यति? अथाक्षव्यापा-रादुपजायमाना प्रत्यभिज्ञा कथं न प्रत्यक्षम्? भेदग्राहिणो विकल्पव्यतिक्रान्तमूर्त्तेर्विशददर्शन-स्याप्यक्षप्रभवत्वेनैवाऽध्यक्षत्वं भेदवादिभिरप्यभ्युपगम्यते तदत्रापि समानम्, असदेतत्; यद्यक्ष-व्यापारसमासादितवपुरेषा प्रतीतिः तथासति प्रथमभेददर्शनकाल एवापरदेशभेदसमन्वयिसद्रू-पपरिच्छेदोऽस्तु। अथ तदा स्मृतिविरहान्नैकत्वावगतिः, यदा त्वपरदेशभेददर्शनमुपजायते तदा पूर्वदर्शनाऽऽहितसंस्कारप्रबोधप्रभवस्मृतिसहकृतमिन्द्रियमभेददेशमुपजनयति, तदप्यसत्; यतः स्मृतिसहायमपि लोचनं पुरः सन्निहित एव घटादिभेदे तत्क्रोडीकृतसद्रूपत्वे च प्रतिपत्तिं जन-यितुमलम् न पूर्वदर्शनप्रतिपन्ने भेदान्तरे, तस्याऽसन्निधानेनाऽतद्विषयत्वात् गन्धस्मृतिसहकारिलोचनवत् 'सुरभि द्रव्यम्' इति प्रतिपत्तिं गन्धवद्द्रव्ये। तन्न सद्रूपत्वप्रतिपत्तिरत्र भेदे स्फुट-वपुः प्रतिपत्तिमभिसन्धत्ते। अथेन्द्रियवृत्तिर्न स्मरणसमवायिनी करणत्वात् इति नासौ

१–निश्चिते वि० सं०। २–त्वाद्भेदस्याभ्युप–वा० बा०। ३ पृ० २७३ पं० १९–पृ० २७४ पं० २७। ४ तन्नैक–आ०। ५–काले त्स्वरूपं तद्भेद–वा० बा०। ६ यत् सद्रूपत्वं त–भां० मां०। ७–स्थपटादि–भां० मां० वा० बा०। ८–श्यत्वस्व–आ०। ९–लदेशाप–भां० मां०। १०–पत्वं नाभा–हा० वि०। ११–त्वमाभाति न भां० मां०। १२–पत्वभिन्नदेश–भां० मां०।–पत्वं देश–आ० हा० वि०। १३–क्षं कु–आ० हा० वि०। १४ स्मृतिसहकारिवि–भां० मां०। १५–दा च प–भां० मां०। १६–ददर्शनमुप–भां० मां०। १७–दे न क्रो–आ०। १८–पन्नभे–भां० मां० वा० बा०। १९ तस्य सन्नि–भां० मां० विना। २०–सहायलो–भां० मां०। २१–पत्तिग–भां० मां० विना। २२ तत्र स–वा० बा० आ० विना। २३–पन्नमभिसं–भां०।–पत्तिमतिसं–आ० हा० वि० वा० बा०।

प्रतिसन्धानविधायिनी पुरुषस्तु कर्तृतया स्मृतिसमवायी तेन चक्षुषा परिगतेऽर्थे तद्दर्शि-तपूर्वभेदात्मसात्कृतसद्रूपत्वं संधास्यति, तदप्यसत्; यतः सोऽपि न स्वतन्त्रतयैकत्वं प्रतिपत्तुं समर्थः किन्तु दर्शनसव्यपेक्षः दर्शनं च न प्रत्यक्षं पूर्वापरकालभाव्यपरापरदेशव्यवस्थितघट-पटादि-भेदक्रोडीकृतसन्मात्राभेदग्रहणमिति न तदुपायतः आत्माप्यभेदप्रतिपत्तिसमर्थः। यदि पुनः दर्शन-निरपेक्ष एवात्मा अभेदग्राहकः स्यात् तदा स्वाप-मद-मूर्च्छाद्यवस्थायामपि तस्य सद्भावाभ्युपगमा-दभेदप्रतिपत्तिर्भवेत्, न च स्मरणसव्यपेक्षोऽसौ तद्ग्राहकः स्मरणस्य बहिरर्थे प्रामाण्यानुपपत्तेः। गृहीतार्थाध्यवसायि हि स्मरणम्, न चाभेदः पूर्वापराध्यक्षाधिगत इति न स्मरणस्यापि तत्र प्रवृत्ति-र्युक्तिमती। न च प्रत्यभिज्ञानसव्यपेक्षोऽसौ तत्र प्रवर्त्तत इति कल्पना सङ्गता, प्रत्यभिज्ञाज्ञानस्य देशभिन्नघट-पटादिपरिष्वक्तसद्रूपाभेदावगमहेतुत्वेन निषिद्धत्वात्। न चात्मनोऽपि व्यापित्वं सिद्धम्, तस्य पूर्वं निषिद्धत्वात्। तन्न देशाभेदादभेदः सन्मात्रस्य कुतश्चित् प्रमाणादवगन्तुं शक्यः।

नापि पूर्वापरकालसम्बन्धित्वं सन्मात्रस्याभेदः प्रत्यक्षविषयः। तथाहि–प्रत्यक्षं पूर्वापरविविक्त-वर्तमानमात्रपरिच्छेदस्वभावं न कालान्तरपरिगतिमुद्द्योतयितुं प्रभुरि(भु इ)ति न तदवसेयोऽभेदः। अध्यक्षमात्रपरिगतमेव वस्तुरूपं गृह्यत इति तदेवास्तु। तथाहि—उपलम्भः सत्तोच्यते उपलब्धिश्च सर्वाक्षान्वया वर्त्तमानमेव रूपमुद्भासयति अक्षस्य वर्त्तमान एव व्यापारोपलम्भात् तदनुसारिणी चाध्यक्षप्रतीतिरक्षगोचरमेव पदार्थस्वरूपमुद्भासयितुं प्रभुरिति दर्शनविषयो वर्तमानमात्रं सदिति स्थितम्। अथापि स्यात् यद्यप्यक्षानुसारिणि दर्शनोद्भेदे साम्प्रतिकरूपप्रतिभासस्तथापि कथमध्यक्षाव-सेयः पूर्वापरक्षणभेदः? मध्यमक्षणस्य परमाणोरण्वन्तरात्ययकालतुलितमूर्तिः क्षणभेदः स चाध्यक्षस्य मध्यक्षणदर्शित्वेऽपि न तद्गम्यः सिद्ध्यति, न सदेतत्; यतो यस्य न पूर्वत्वम् नाप्यपरकालसम्बन्धः समस्ति स पराकृतपूर्वापरविभागः क्षणभेदव्यवहारमासादयति, न हि पूर्वापरकालस्थायितयाऽगृह्य-माणो भावोऽभेदव्यपदेशभाग् भवति। कालान्तरव्यापितामनुभवन्तो हि भावा 'नित्याः' 'अभेदिनो वा' इति व्यपदेशभाक्त्वमासादयन्ति। न च तत्राध्यक्षप्रत्ययः प्रवर्तते, भावि-भूतकालतायामनुमान-स्मृत्योरेव व्यापारदर्शनात्। तथाहि—'इदं पूर्वं दृष्टम्' इति स्मरन्नध्यवस्यति जनस्तथास्थिरावस्था-दर्शनात्, भाविकालस्थितिमधिगच्छत्यनुमानात् दर्शनपथमवतरतोऽर्थस्येति न परिस्फुटसंवेदनप-रिच्छेद्यः कालभेदः। न हि भूतावस्था भाविकालता वा स्फुटदृशां विषय इति कथमध्यक्षगम्योऽभेदः? ननु क्षणभेदोऽपि न संविदोल्लिख्यत इति कथं तद्ग्राह्यः? असदेतत्; यतोऽभेदविपर्यासः क्षणभेद उच्यते, कालान्तरस्थितिविपर्यासे च मध्यक्षणसत्त्वमेव गृह्णता प्रत्यक्षेण कथं न क्षणभेदोऽधिगतः? अथ यदि नामाध्यक्षधीरभेदं नाधिगच्छति तदुत्थापितमनुमानं तुं प्रत्याययिष्यति। तथाहि–स्थिरा-वस्थामर्थानामुपलभ्य वर्षादिस्थितिमधिगच्छन्ति व्यवहारिणः 'यतो यदि ध्वंसहेतुरस्य न सन्नि-हितो भवेत् तदा वर्षादिकमेष स्थास्यति' इति अतो यस्य सहेतुको विनाशस्तस्य तद्धेतुसन्निधानम-न्तरेण स्थितिसद्भाव इति कालाभेदः यस्य तु मन्दरादेर्नाशहेतुर्न विद्यते स सर्वदा स्थितिमनुभवती-त्युभयथाप्यभेदोऽनुमानावसेयः, असदेतत्; यतो यत्राध्यक्षं न प्रवृत्तम् नापि प्रवर्त्तते नापि प्रवर्त्ति-ष्यते अभेदे न तत्रानुमितिः प्रवर्त्तते। न च कालान्तरस्थायी भावोऽक्षजप्रत्ययेनावगतः यदि पुनर्वर्त्तमानकालतावभास्यक्षजप्रत्ययः कालान्तरस्थितिमवभासयति तदा स्पष्टदृगवगत एवाभेद इति किमनुमानेन? अथ कालान्तरभाविनाऽध्यक्षेण कालान्तरस्थितिरधिगम्यते, तदप्ययुक्तम्; यत उत्त-रकालभाव्यपि दर्शनं तत्कालमेवार्थमधिगन्तुं प्रभुर्न (भु न) पूर्वसत्तावगाहीति कथं तदप्यभेदाव-

१–नं न च प्र–भां० मां० विना। २–हणप्रवणमिति भां० मां०। ३ पृ० २८६ पं० २५। ४ पृ० १३४ पं० ३२। ५ तत्र दे–वा० बा० विना। ६–भेदाः सन्मात्रस्य–भां० मां० विना। ७ शक्याः भां० मां० विना। ८–न परि–आ० हा० वि०। ९–गतमु–भां० मां०। १० वस्तुस्वरू–भां० मां०। ११–थाप्युप–आ० हा० वि०।–थाभ्युप–वा० बा०। १२–णी वाध्य–वि० विना। १३–मात्रमिति स्थि–भां० मां० विना। १४–णस्याप–भां० मां०। १५ क्षणाभेदः स चाध्य–वा० बा०। क्षणभेदा वाध्य–आ०। क्षणभेदात् स चाध्य–हा० वि०। १६–या गृ–वा० बा०। १७ भावो भेदव्यपदेशभाग् न भ–आ०। १८ पूर्वद–भां० मां०। १९ तु भेदमर्थानां प्र–भां० मां०। २०–ते अभेदेन न तत्रा–भां० मां०।–ते भेदेन न तत्रा–आ० हा० वि०। २१–भावय–भां० मां० विना।

भासि? न च वर्त्तमानाध्यक्षेण प्रतिभाति वस्तुनि अतीतादिकालसम्बन्धिताधिगमं विना तदभेदावगमः सम्भवति, न चाध्यक्षं पूर्वाऽपरसमयसमन्वयमर्थसत्त्वम्-अविषयत्वाद्-अधिगन्तुमक्षममिति न तद् उद्भासयतीति सन्देह एव तत्र युक्तः नासत्त्वमिति वक्तव्यम्, यत उभयावलम्बी सन्देह उभयदर्शने सत्युपजायते यथा ऊर्ध्व(ध्वं)तावगमात् पूर्वदृष्टौ एव स्थाणु-पुरुषौ परामृशत्(न्) सन्देहः प्रतिभाति, न च कालान्तरस्थायित्वं कदाचिदप्यवगतम्, तत् कुतस्तत्र सन्देहः? यः पुनर्भवतां 'कालान्तरस्थायी' इति सन्देहः स सदृशापराऽपरार्थक्रियाकारिपदार्थान् संस्पृशति, 'ते च तथा क्वचिद् दृष्टाः क्वचिन्न' इत्युभयावलम्बी सन्देहो युक्तस्तत्र। इति यत् प्रतिभाति तत् सकलं क्षणान्तरस्थितिविरहितमिति पदार्थानां सिद्धः क्षणभेदः। अथ ध्वंसहेतुसन्निधिविकलोऽध्यक्षगोचरातिक्रान्तोऽपि पदार्थस्तिष्ठतीति कथं क्षणभेदः? तथाहि—यद्यपि अध्यक्षोदयो न पूर्वापरकालसंस्पर्शी तथापि तस्यैव तत्रापि सामर्थ्यान्न क्षणाभेदग्राहित्वम् तदभावस्तु नाभ्युपगन्तुं युक्तः न हि ग्रहणाभावादेव अर्था न सन्ति अतिप्रसङ्गात्, असदेतत्; यतः 'किं स्थिरमस्थिरतया वस्तु अक्षजे प्रतिभासे प्रतिभाति उताऽस्थिरम्' इति सन्देह एव युक्तः। अपि च, स्थिरमूर्तिर्यद्यसौ भावः कथमस्थिरतया दृक्प्रभवे दर्शनेऽवभासेत? नहि शुक्लं वस्तु पीततया परिस्फुटेऽदुष्टाक्षजे प्रत्यये प्रतिभाति तयोः परस्परविरोधात्। एवं न स्थिरमस्थिरतया परिस्फुटदर्शने प्रतिभासेत तोऽ(अतोऽ)स्थिरतया प्रतिभासनाद्-ध्यक्षगृहीत एव क्षणभेदो भावानाम्। न चापेक्षितहेतुसन्निधिर्भावानां विनाशस्तदभावे न भवतीति 'स्थायिनो भावाः' इति वक्तुं युक्तम्, यतो न नाशहेतुस्तेषां सम्भवति अदर्शनस्यैवाभावरूपत्वात्। आह च-"अनुपलब्धिरसत्ता" [ ] इति। प्रतिभासमाने च पुरोव्यवस्थिते वस्तुनि पूर्वापररूपयोरदर्शनमस्तीति कथं ध्वंसस्य मुद्गरादिहेतुत्वम् मुद्गराद्यन्तरेणाप्यदर्शनस्य सम्भवात्? न च तदानीमदर्शनमेव नाभाव इति, मुद्गरव्यापारानन्तरं तु घटादेरभावः नादर्शनमात्रम्। यतः कोऽयमभावो नाम-अस्तमयः, अर्थक्रियाविरहो वा? यद्यस्तमयः तदा पर्यायभेद एव 'अदर्शनम्' 'अभावः' इति। अर्थक्रियाविरहोऽप्यभाव एव, स च परिदृश्यमानस्य 'नास्ति' इत्यदर्शनयोग्य एव विद्यते। तथा चादर्शनमेवाभावः भावादर्शनस्वरूपो नाशः मुद्गरादिव्यापारात् प्रागपि भावस्यास्तीतिं न तज्जन्यो ध्वंस इति 'अदृश्यमानोऽप्यस्ति' इतिं विरुद्धमभिहितं स्यात्। यदपि 'मुद्गरपातानन्तरमदर्शने न पुनः केनचिद् दृश्यते घटादिः अक्षव्यापाराभावे तुं नरान्तरदर्शने प्रतिभाति तथा स्वयमप्यक्षव्यापारे पुनरुपलभ्यते मुद्गरव्यापारवेलायां तु चक्षुरुन्मीलनेऽपि न स्वयम् पुरुषान्तरेण वा गृह्यत इति तदैव तस्य नाशः' इति, तदप्यसङ्गतम्; यतः पुनर्दर्शनं किं पूर्वदृष्टस्य, उतान्यस्येति कल्पनाद्वयम्। यदि पूर्वाधिगतस्यैवोत्तरकालदर्शनम् तदा सिद्ध्यत्यभेदः किन्तु 'तस्यैवोत्तरदर्शनम्' इत्यत्र न प्रमाणमस्ति। अथापरस्य दर्शनम् न तर्ह्यभेदः। अथ यदनवरतमविच्छेदेन ग्रहणं तदेव स्थायित्वग्रहणम्; नन्वविच्छेददर्शनं नामानन्यदर्शनम् तच्चासिद्धम्, परस्पराऽसङ्गटितवर्त्तमानसमयसम्बद्धपदार्थप्रतिभासनात्। अथ वर्तमानदर्शने पूर्वरूपग्रहणम्; ननु न प्रत्यक्षेण पूर्वरूपग्रहणम् तत्र वर्त्तमाने ग्रहणप्रवृत्तस्य तस्य पूर्वत्राऽप्रवर्तनात्। न चाऽप्रवर्त्तमानं तत् तत्र तदविच्छेदं स्वावभासिनोऽवगमयितुं समर्थम् येन नित्यताधिगतिर्भवेत्। वर्तमानग्रहणपर्यवसितं ह्यध्यक्षं तत्कालार्थपरिच्छेदकमेव, न पूर्वाऽपरयोस्तेन एकताऽधिगन्तुं शक्या। न स्मृतिरेव पूर्वरूपतां तत्र सङ्घटयति, सा च स्वग्रहणपर्यवसितव्यापारत्वाद् बहिरर्थमनुद्भासयन्ती न पूर्वापरयोस्तत्त्वसङ्घटनक्षमा। तत्र निरन्तरदर्शनेऽप्यभेदावगतिरध्यक्षतः। न च पूर्वाऽपरदर्शनयोरभेदप्रतिपत्तावसामर्थे(र्थे)ऽप्यात्मा वर्तमानसमयसङ्गतस्य पूर्वकालतामधिगच्छति, दर्शनरहितस्य स्वापाद्यवस्थास्विव तस्याप्यभेदप्रतिपत्तिसामर्थ्यविकलत्वात्। प्रत्यक्षा च संविद् न पूर्वापरयोर्वर्त्तते तदप्रवृत्तौ चानुमानमपि न तत्र प्रवर्तितुमुत्सहते, स्मरणस्य च प्रामाण्यमतिप्रसङ्गतोऽनुपपन्नमिति नात्मापि स्थायितामधिगच्छति। न चात्मनोऽप्यात्मा कालान्तरानुगतिमवगमयति, वर्तमानकालपरिगतस्यैव परिस्फु-

१-ध्यक्षे प्र-वा० बा० विना। २-यथार्थता-वा० बा० विना। ३ पूर्वं द्द-आ०। ४-न्तरास्था-भां० मां० विना। ५-हः सद्द-भां० मां० विना। ६-न्ति इति प्र-भां० मां० विना। ७-र्यायाभेद-भां० मां० विना। ८-ति तज्ज-आ० हा० वि०। ९-ति वदता ध्वंश्रस्तीति विरुद्ध-भां० मां०। १०-केचि-आ० हा० वि० वा० बा०। ११ तु दर्श-आ० हा० वि०। १२-स्तत्वनसं-आ० हा० वि०। १३-वसामर्थ्याऽप्या-वा०बा०। १४-पत्यसा-भां० मां०।

टरूपतया तस्यापि प्रतिभासनात्। न च स्वसंविदेव आत्मनः स्थायितामुद्भासयति, अतीताऽनागतसकलदशावेदनप्रसक्तेः अतीताऽनागतजन्मपरम्परापरिच्छेदः स्यात्। न चातीताऽनागतावस्थाः तत्संवेदनेन प्रतिभाति तत्सम्बन्धी तु पुमांस्तत्रावभासत इति वक्तुं क्षमम्, यतस्तदवस्थाऽनवगमे तद्व्यापितया तस्याप्यनवगमात्। वर्तमानदशा हि स्वसंवेदने प्रतिभातीति तत्परिष्वक्तमेवात्मस्वरूपं तद्विषयः भूत-भाविदशानां तु तत्राप्रतिभासने तद्व(द्वत)त्वेनात्मनोऽप्यप्रतिभासनमिति न स्वसंवेदनादपि तदभेदप्रतिपत्तिः।

अथ प्रत्यभिज्ञा पदार्थानां स्थायितालक्षणमभेदमवगमयति। ननु केयं प्रत्यभिज्ञा? अथ 'स एवायम्' इति निर्णयः; नन्वयमपि प्रत्यक्षम् अनुमानं वा? न तावत् प्रत्यक्षम्, विकल्परूपत्वात्। नाप्यनुमानम्, अवगतप्रतिबन्धलिङ्गानुद्भूतत्वात्। न चाक्षव्यापारे सति 'स एवायम्' इति पूर्वापरतामुल्लिखन् प्रत्ययः समुपजायत इति कथं नाक्षजः इति वक्तव्यम्, अक्षाणां पौर्वापर्येऽप्रवृत्तेः—पूर्वापरसम्बन्धविकले वर्तमानमात्रेऽर्थेऽक्षं प्रवर्त्तत इति तदनुसार्यपि दर्शनं तत्रैव प्रवृत्तिमत् नातीताऽनागतयोरिति न ततस्तद्भेदनम्। न च 'पूर्वदृष्टमिदं पश्यामि' इत्यध्यवसायादतीतसमयपरिष्वक्तभाववेदनमिति युक्तम्, यतः 'वर्तमानमेव पश्यामि' इत्युल्लेखस्तत्र स्यात् दर्शने तस्य प्रतिभासनात् पूर्वरूपता तु न तत्र प्रतिभातीति—कथमध्यक्षोल्लेखं बिभर्ति? इति—न तदवसेया भवेत्। यदि तु पूर्वरूपताऽपि तदवसेया तदा स्मृतिमन्तरेणापि प्रतिभासताम् यतो न पूर्वरूपतैव स्मृतिमपेक्षते न वर्तमानतेति वक्तुं क्षमम् तयोरभेदात्। यदि पूर्वता-वर्तमानतयोर्भेदो भवेत् तदा वर्तमानतावभासेऽपि पूर्वरूपता न प्रतिभाता इति स्वप्रतिपत्तौ सा स्मृत्यपेक्षा भवेत्। यदा तु यदेव वर्तमानं तदेव पूर्वरूपम् तदा तद्दर्शने तदपि दृष्टमिति न स्मरणं फलवत् तत्र स्यात्—नहि दृश्यमाने स्मृतिः फलवती, स्मृतिर्हि व्यवहारप्रवर्तकत्वेन सप्रयोजना, दृश्यमाने चार्थे दर्शनमेव व्यवहारमुपरचयतीति किं तत्र स्मृत्या? न च पूर्वरूपता अध्यक्षे न प्रतिभासत इति स्मृतिस्तत्र सार्थिका; यतः पूर्वरूपताया अध्यक्षाप्रतिभासे सद्भाव एव न सिद्ध्येत्, सद्भावे वा कथं तत्र साधनं (सा न) प्रतिभासेत? अपि च, इदानीन्तनाक्षजप्रत्ययावभासिनी यदि न पूर्वरूपता स्मृतिरपि कथं तामवभासयितुं क्षमा दर्शनविषयीकृत एव हि रूपे स्मृतेः प्रवृत्युपलम्भात्? पूर्वरूपता तु सती अपि नेदानीन्तनदर्शनावभातेति न स्मृतिगोचरमुपगन्तुमीशेतिं न दृष्टमात्रमेव स्मृतिपथमुपयाति। अथ पूर्वदर्शनेन पूर्वरूपता विषयीकृतेति स्मृतिरपि तां परामृशति, असदेतत्; पूर्वरूपतायाः पूर्वदर्शनेनाप्यपरिच्छेदात्, यतः सकलमेवाध्यक्षं वर्तमानमात्रावभासं परिस्फुटं संवेद्यत इति वर्तमानतामात्रमध्यक्षविषयः। ननु यदि पूर्वरूपता नाध्यक्षगोचरः कथं स्मर्यते? न ह्यदृष्टे स्मृतिरुपपन्ना, नैतत्; दृष्टमेव हि सकलं नीलादिकं स्मृतिरुल्लिखति स्मर्यमाणं स्फुटं चाकारमपहाय नान्या काचित् पूर्वरूपता स्मृतौ भाति अन्यत्र वा संवेदने, केवलं स्मर्यमाणोऽर्थः 'पूर्वैः' इति नाममात्रमनुभवति वर्तमानमपेक्ष(क्ष्य) 'पूर्वैः' इति नाममात्रकरणात्। न च यथा स्फुटाध्यक्षप्रतिभासिन्यपि क्षणभेदे तत्र व्यवहारप्रवर्तकमनुमानं फलवत् तथा पूर्वरूपे दृश्यमानेऽपि वर्तमानदर्शने तत्र व्यवहारकारितया स्मृतिः फलवतीति वक्तुं युक्तम्, यतो विद्युदादावध्यक्षेऽपि प्रतिक्षणं त्रुट्यत्प्रतिभासोऽनुभूयते पूर्वरूपता तु स्मृतिमन्तरेण न क्वचित् प्रतिभाति येन क्षणिकत्ववदनुभवविषयत्वेऽपि प्रतिक्षणं स्मृतिर्व्यवहारमुपरचयन्ती तत्र सफला भवेत्। किञ्च, वर्तमानवस्तुनि दर्शनाद् यदि पूर्वरूपतायां स्मृतिर्भवेत् भाविरूपतायामपि भवेत् अभेदात्। तथाहि—भिन्नवस्तुनि तस्योपलम्भो नास्तीति तत्र स्मृतिर्न भवेदिति युक्तम्, अभिन्ने तु पूर्वरूपतेव भाविरूपता दर्शनेनाऽनुभूतेति पूर्वरूपतायामिव मरणावधिसकलभाविरूपतायामपि स्मृतिर्भवन्ती केन वार्येत अभेदेनानुभूतत्वाविशेषात्? न च पूर्वमनुभूतमपि पुनर्दर्शनोदये स्मृतिपथमुपयातीति पुनर्दर्शनसङ्गतं स्मृतिहेतुः, पूर्वदृष्टे गिरिशिखरादाविदानीमनुभवाभावेऽपि स्मृतेरुदयदर्शनात्। यदि पुनः स्मृतिरिदानीन्तना-

१-त्मनि स्था-भां० मां०। २-स्थास्तत्सं-भां० मां० विना। ३-ने प्र-वा० बा०। ४-मानमनव-आ०। ५-रमु-भां० मां० वा० बा०। ६-णां पूर्वा-भां० मां० वा० बा०। ७ यतो वर्तमानता स्मृतिमपेक्षते स्वप्रतीतौ नेदानींतनरूपतेति वक्तुम् भां० मां०। यतो न वर्तमानता स्मृतिमपेक्षा न च पूर्वरूपतैव स्मृतिमपेक्षते इति वक्तुम् वा० बा०। ८ सा ध न प्रतिभासेवापि च वा० बा०। ९ स्मृतिप्र-भां० मां०। १०-ति द्द-वा० बा०। ११-नपेक्ष-आ०। १२ दर्शनानु-आ०।

नुभवाभावेऽप्युपजायते तर्हि भाविदर्शनपरिगतेऽपीदानीन्तनदृक्संस्पर्शभाजि स्मृतिरुदीयताम्। अथापि पूर्वरूपता पूर्वमनुभूतेति इदानीन्तनदर्शनाभावेऽपि पूर्वतामात्रे स्मृत्युदयः; नन्वेवं पूर्वतामात्रमेव पूर्वदर्शनावगतम् नेदानीन्तनरूपव्यापितयापि तद् अवगतं स्यात्। तन्न पूर्वाऽपररूपतयोरेकतावगमः सिद्धः। न च पुनर्दर्शने सति 'स एवायं मया यः प्राक् परिदृष्टः' इति प्रतिपत्तेरभेदावगमः पूर्वाऽपरयोः यतः पूर्वाऽपराभ्यां प्रत्ययाभ्यां न पूर्वापररूपग्रहणम् सर्वस्य स्वकालावधिपदार्थस्वरूपग्राहकत्वाद् दर्शनस्य। न च तत्कालभाविस्वरूपं पूर्वं परं वा भवितुमर्हति, साम्प्रतिकरूपव्यवहारोच्छेदप्रसक्तेः। न च 'साम्प्रतिकरूपं पूर्वं मया परिदृष्टम्' इति निश्चयो युक्तः तस्य वैतथ्यप्रसङ्गात्। नन्वेवं पूर्वरूपता वर्त्तमाने रूपे कथमवसीयते 'इदं मया पूर्वं दृष्टम्' इति भेदसङ्गावात्? तर्ह्यभेदेऽपि कथं वर्त्तमानस्य रूपस्य पूर्वदृष्टताऽवगमः? पूर्वदृष्टत्वात् इति न वक्तव्यम्; यतो दृष्टता पूर्वदर्शनगोचरीकृतं रूपम् तद्दर्शनं चेदानीमतीततयाऽसत् तद्दृष्टताप्युपरतेति नाऽसती वर्तमानदर्शनपथमवतरतीति। न च तद्दर्शने प्रच्युते तद्दृश्यमानताप्युपरतेति न सा साम्प्रतिकदर्शनावसेया, दृष्टता तूत्पन्नेति वर्तमानदर्शनावसेया, यतो यदि दृष्टता पदार्थानां तदात्वे सन्निहिता तदा यथा नीलता सन्निहिता तदानीमनुत्पन्नेऽपि पूर्वदर्शने प्रतिभाति तथा दृष्टतापि सकलतनुभृतामनुत्पन्नेऽपि पूर्वदर्शने स्फुटवपुषि दर्शने प्रतिभासताम् न किञ्चित् पूर्वदर्शनस्मरणेन? एवं च येनाप्यसावर्थः पूर्वान्नावगतः सोऽपि दृष्टतामवगच्छेत्। ततो 'नीलादिकमेतत्' इति पश्यति 'पूर्वदृष्टम्' इत्येतच्च स्मरणाद्ध्यवस्यति नं तु 'पूर्वदृष्टमेतत्' इत्येका प्रतीतिः। ननु 'इदं प्रतिभासमानमतीतसमये मया दृष्टम्' इत्येवं स्मृतिरनुभूयते न च पूर्वदृष्टताऽनुभवव्यतिरेकेण दृश्यमानस्य स्मृतिः सम्भवत्येवमाकारा, असदेतत्; यतो 'दृष्टम्' इति मतिः स्मृतिरूपमासादयन्ती तत्कालावधि दर्शनविषयमध्यवस्यन्ती लक्ष्यते न नु (न तु) वर्तमानकालपरिगतमर्थस्वरूपमधिगच्छति; वर्तमानकालतां तु दर्शनमनुभवति पूर्वरूपासङ्गतामिति न काचित् प्रतिपत्तिरस्ति या वर्तमानं 'पूर्वं दृष्टम्' इत्यवगच्छति। तन्न प्रत्यभिज्ञाऽपि पूर्वापरयोरभेदमधिगन्तुं समर्था।

अथ अस्मद्दर्शनविरतावप्युपलभ्यते वज्रोपलादिरर्थो नरान्तरेणेत्यभिन्नः, नैतत् सारम्; मद्दर्शनानु(नाप)गमे नरान्तरदर्शनमवतरतीति नात्र किञ्चित् प्रमाणमस्ति। तथाहि-न प्रत्यक्षं परदृग्गोचरमर्थमवगमयितुमलम् परदृशोऽनवगमात्, तदनवगमे च तत्प्रतिभासितत्वस्याप्यनवगतेः। न च तद्विषयव्यवहारदर्शनात् परोऽपि 'इदमर्थजातं पश्यति' इत्यनुमानात् परदृष्टतां स्वदर्शनविषयस्य प्रतिपद्यते जनः अनुमानेनाभेदाऽप्रतिपत्तेः। तद्धि सदृशव्यवहारदर्शनादुदयमासादयत् स्वदृष्टतुल्यतां परदृग्विषयस्यावगन्तुमीशं न पुनरभेदम्, यथा धूमान्तरदर्शनादुद्भवन्त्यनुमितिः पूर्वदृष्टसदृशं दहनान्तरमध्यवस्यति न पुनस्तमेव दहनविशेषम् सामान्येनान्वयपरिच्छेदात्। यदि पुनः सदृशव्यवहारदर्शनात् स्व-परदृष्टयोरभेदावगमस्तदा रोमाञ्चलक्षणतुल्यकार्यदर्शनात् स्व-परमु(सु)खाभेदानुमितिप्रसक्तिः। अथ पुलकोद्गमादौ तुल्येऽपि सन्तानभेदात् भेदः स्व-परस्त्रीप्रीतेः; ननु सन्ततेरपि कुतो भेदः? यद्यपरसन्ततिभेदात् तदाऽनवस्था। अथ स्वभावभेदात् सन्तानभेदः तथासति सुखमपि स्वरूपभेदाद् भिद्यताम्, यथा च स्वरूपभेदात् स्व—परसन्ततिवर्तिनः सुखस्य भेदः तथा कालभेदात् स्व-परदृष्टस्यार्थस्य किं न भेदः? न च परस्परपरिहारेणोपलम्भप्रवृत्तेः स्व-परसन्ततिवर्तिन्याः प्रीतेर्भेदः, अर्थस्यापि स्व-परदृष्टस्याऽयुगपदन्योन्यपरिहारेणोपलम्भवृत्तेर्भेदप्रसक्तेः। यतो यदा स्वदृग्गोचरचारी न तदा परदृशि प्रतिभाति यदा चोत्तरसमये परसंवेदनमवतरति न तदा स्वसंवेदनमिति कथं न भेदः? अतो विच्छिन्नदर्शनस्यार्थस्य पुनर्दर्शने दलितोद्गतनखशिखरदर्शन

१ पूर्वरूपता-भां० मां०। २-स्य च तत्-भां० मां० विना। ३ पूर्वप-आ० हा० वि०। ४ पूर्वद-भां० मां० विना। ५-ष्टत्वादिति दर्श-आ० हा० वि०। ६ प्रच्यवते आ०। ७-ति न साम्प्र-वा० बा०।-ति ता साम्प्र-हा० वि०।-ति साम्प्र—आ०। ८-रणेनैवं वा ये-आ०। ९-तस्वस्म-वा० बा०। १० न नु भां० मां० हा० विना। ११ नत्विदं प्रतीभा-वि०। नत्विदं प्रतीतिभा-भां० मां०। १२-क्ष्यते तनु व-हा०। १३ सार मर्दृशनानुगमे च न-हा० वि०। १४ नगरा-भां० मां०। १५ दृष्टगो-भां० मां०। १६-गमे तत्-आ० हा० वि०। १७-द्यते यथो नु-वा० बा०। १८-यत् तदृष्ट-आ० हा० वि०। १९-र्शनाद् भ-आ० हा० वि०। २०-हनं वि-भां० मां० विना। २१-नः सादृश्यव्य-भां० मां०। २२-पि समान-भां० मां० विना। २३-स्थतातेः वा० बा०।-स्थप्रतेः हा० वि०।-स्थर्थतेः आ०। २४ यथा स्व-वा० बा० आ०।

इव प्रतिभासभेदाद् भेदः। प्रत्यभिज्ञा त्वभेदाध्यवसायिनी प्रतिभासभेदेन बाध्यमाना लूनपुनर्जातकेशादिष्विव भ्रान्तेति न तत्प्रतिपाद्योऽभेदः पारमार्थिकः। न च यत्राऽविच्छिन्नं दर्शनं बहिरर्थमवतरति तत्र प्रतिभासभेदाभावात् कथं पौर्वापर्या(र्य)भेदावगम इति वक्तव्यम्, यतः प्रतिभासमानतैव पदार्थानां सत्ता। यदाह—"उपलब्धिः सत्ता सा चोपलभ्यमानवस्तुयोग्यता तदाश्रया वा ज्ञानवृत्तिः" [ ] इति। तत्र यदि क्षणिकं दर्शनम् तथासति तत्र स्फुटप्रतिभासस्यार्थस्य क्षणभेद एवाऽवभाति न क्षणाभेदावगमः। यतः क्षणिकं दर्शनं स्वकालमर्थमवगन्तुं क्षमम् न कालान्तरपरिष्वक्तम्, तस्य तदानीमभावात्। न हि यदा यन्नास्ति तदा तत् तत्कालमर्थमवगच्छति, सकलातीतपदार्थग्रहणप्रसङ्गात्। अतोऽविच्छिन्नदर्शनेऽपि प्रतिक्षणमपरापरज्ञानप्रसवैरवगतस्याप्यर्थस्य भेदः। न च दृगेव प्रतिक्षणमपरापरा अर्थवस्त्व(र्थस्व)भिन्न एवेति वक्तव्यम्, दृग्भेदादेव दृश्यमानस्यार्थस्य भेदसिद्धेः। तथाहि-यदैका दृक् स्वकालावधिमर्थसत्तां वेत्ति न तदा परा यदा चापरोत्तरकालमर्थमवगमयति न तदा पूर्वेति न तत्प्रतिभासितत्वम्—यतो वर्तमानसंविदस्तीति तदुपलभ्यमानतैवास्तु न तु पूर्वदृगुपलभ्यमानता—अतश्चोपलम्भभेदादुपलभ्यमानताभेदः। न च पूर्वाऽपरदर्शनोपलभ्यमानता भिन्नैव उपलभ्यमानं तु रूपमभिन्नम्, यतो यदा पूर्वोपलभ्यमानतायुक्तोऽर्थः प्रतिभाति न तदोत्तरोपलभ्यमानतासङ्गतः, यदा चोत्तरोपलभ्यमानर्ता(त)या परिगतो वेद्यते न तदा पूर्वोपलभ्यमानतयेति कथं पूर्वापरोपलम्भोपलभ्यमानस्य रूपस्य न भेदः? न चोपलभ्यमानताऽतिरिक्तमुपलभ्यमानं रूपमस्ति, तथाऽननुभवात्। अतः कथं नोपलभ्यमानताभेदादपि तद्भेदः? तत् स्थितमविच्छिन्नविशददर्शनपरम्परायामपि प्रतिक्षणमर्थभेदः। प्रत्यभिज्ञानात्तत्त्व(नात् त्व)भेदोऽध्यारोप्यमाणो दलितपुनरुदितनखशिखरादिष्विव प्रतिभासभेदेनापाक्रियमाणो न वास्तवः। नं चापरापरसंविन्मात्रव्यतिरिक्ताभिन्नात्मनोऽभावे क्रमवत्संवेदनाभावादर्थक्रमस्याप्यभाव इति, यतोऽनेकत्वे सति यथा पूर्वाऽपरयोरप्यक्रमस्तथा दर्शनयोरप्यनेकत्वमस्तीति कथं न क्रमः? न चानेकत्वं न प्रतीतिविषयः एकत्वप्रतिभासाभावप्रतिभासस्यानेकत्वप्रतिभासरूपत्वात् तस्य च संवेदनसिद्धत्वात्। न च कालमन्तरेण पौर्वापर्याभावादनेकत्वमात्रमवशिष्यत इति कथं क्रम इति वक्तुं युक्तम्, यतो भेदाविशेषेऽपि दृश्यमानस्मर्यमाणतया पौर्वापर्यसद्भावात् क्रमसङ्गतिरविरुद्धैव। यद्वा हेतुसन्निधानाऽसन्निधानाभ्यां क्रमः कार्याणाम् तत्सन्निधानाऽसन्निधानेऽपि हेतुसन्निधानाऽसन्निधानात् इत्यनादिर्हेतुपरम्परा अतस्तत्स्वभावविशेष एव क्रम इति न किञ्चित् कालेन तस्याप्यन्यकालापेक्षे क्रमेऽनवस्था, स्वतः क्रमे पदार्थानामपि स स्वत एव युक्तः। तदेवं क्रमेणोपलभ्यमानमपरापरस्वभावमिति सिद्धः स्वभावभेदः। न च क्षणिकेऽपि संवेदने युगपत् पदार्थजातं प्रतिभाति न क्रमेणेति न क्षणभेदः यतोऽनेकक्षणस्थितिः कालाभेदलक्षणं नित्यत्वमुच्यते, न चानेकक्षणस्थितिर्युगपदवभाति, यतो यदैका क्षणस्थितिरवभासते यदि तदैव द्वितीयक्षणस्थितिरपि तद्विविक्ता प्रतिभाति तथासति क्षणद्वयस्य परस्परविविक्तस्य युगपत् प्रतिभासनात् कथं नित्यतालक्षणः कालाभेदः? अथ तद्द्रव्यव्यतिरिक्ता क्षणान्तरस्थितिः प्रतिभासते, तत्राप्याद्यक्षणस्थितिरूपतया वा द्वितीया प्रतिभाति, यद्वा द्वितीयक्षणस्थितिरूपतया आद्यक्षणस्थितिरिति कल्पनाद्वयम्। तत्राद्ये पक्षे प्रथमक्षणस्थितिरेव प्रतिभातीति न पूर्वापरक्षणाभेदः। द्वितीयेऽपि विकल्पे क्षणान्तरस्थितिरेव प्रतिभाति नाद्यक्षणस्थितिप्रतिपत्तिर्भवेत्। अथैकक्षणस्थितिर्नावभाति सर्वदा स्थितेरवभासनात्; नन्वेकक्षणस्थितिप्रतिपत्त्यभावे कथमनेकक्षणस्थितिसङ्गतरूपप्रतिपत्तिरिति क्षणिके दर्शने क्षणावस्थानमेव प्रतिभातीति तदेव सैंदनु(दस्तु) न कालान्तरस्थि-

१ यत्र वि-भां० मां०। २-च्छिन्नं च द्-वा० बा० हा० वि०। ३ अतो वि-आ० हा० वि०। ४-तिसकलपरा-आ० हा० वि०।-तिकमलपरापरप्रभवैरव-वा० बा०। ५-वधिसर्वसत्तां आ० हा० वि०। ६-सित्वम् वा० बा०। ७-नताभे-आ० हा० वि०।-नताऽतस्वोपलम्भभेदादुपलभ्यमानभे-वा० बा०। ८-तापरि-भां० मां० विना। ९-तो विद्य-आ० हा० वि०। १०-परोपलभ्यमानस्य वा० बा०। ११-मानरू-आ० हा० वि०। १२-स्ति यथाऽनुभ-वा० बा०। १३-ज्ञाततत्त्वभेदाध्या-आ० हा० वि०। १४-न चापरसं-वा० बा० आ०। १५-त्मनोऽविक्र-भां० मां० विना। १६-वादेकत्व-आ० हा० वि०। १७-तस्तत्सदभा-आ० हा० वि०। १८-तदैव क्र-हा० वि०। तथैवं क्र-वा० बा०। १९-क्षणिकेस्य सं-भां० मां०। २० तद्द्रव्यति-हा०। तद्द्रव्यति-वा० बा०। २१-स्थितिरेव-वा० बा० विना। २२-सद न भां० मां०। सद न आ० हा० वि०।

तिः। अथापि स्यात् न क्षणिकं दर्शनम्—येन तद्भेदात् तदग्राह्यस्यापि भेदः—किन्तु तदपि कालान्तरस्थितिमत् कालान्तरानुषक्तमर्थमवगमयति, असदेतत्; यतः स्थिरं दर्शनमनेककालतां युगपदवभासयति, आहोस्वित् क्रमेणेति? तत्र न तावद् युगपदवभासयति। तथाहि—यदा दर्शनं घटिकाद्वयारम्भपरिगतमर्थमनुभवति न तदैव तदवभासेनसम्बन्धिनम्, तदनुभवे च तस्य वर्तमानतापत्तेर्न कालान्तरता। यदि च प्रथमदर्शनमेव भाविरूपतामवगच्छति तथासति ग्रहणविरतौ किमिति न जानाति 'पदार्थस्तिष्ठति' इति? न च तदा ग्रहणमुपरतमिति नावगच्छति, यतः तदर्थग्रहणमुदितमिति कथमसत्? अथ पूर्वमुदितं तद् अधुना प्रच्युतमिति न गृह्णाति ननु तदा ग्रहणाभावे कथं तत्कालत्वं परिगृहीतं भवति? अथ यदा दर्शनं विरमति न तदा तद्रूपं प्रतिभाति किन्तु यदा तदुदितं विद्यते तदा भाविरूपपरिच्छेदः, तदप्यसत्; यतस्तथापि तत्कालतैव तेन परिगृह्यते न भाविरूपम् असन्निहितत्वात्; सन्निधाने वा भाविरूपतानुपपत्तेः। यदि हि तद् दर्शनकाले प्रतिभासमानमस्ति स्वरूपेण तथासति वर्तमानतैवेति तदपि प्रत्युत्पन्नम् न भाविरूपम्; भावित्वे वा तदाऽसन्निधेः कथमसत् प्रतिभाति? यदि त्वसन्निहितमपि तद् भाति तथासति सकलभाविभावरूपपरम्परा प्रतिभासताम् इति धर्मादेरपि सर्वस्य भविष्यद्रूपस्य प्रतिपत्तिरस्तु। न च प्रतिभासमानाऽव्यतिरिक्तं भाविरूपमाभाति धर्मादिकं तु तद्व्यतिरिक्तमिति न तद्ग्रहः, यतोऽत्रापि यदि भाविरूपं वर्तमानतया प्रतिभाति तथासति वर्तमानमेव तद् इति कथं कालान्तरस्थायिता? अथ वर्तमानं भाविरूपतया गृह्यते; नन्वेवं भाविरूपमेव तद् भवति न च वर्तमानं किञ्चिन्नाम, तथा चाऽवर्तमानमपि भाविरूपं वर्तमानतया प्रत्यक्षे प्रतिभातीति सर्वं दर्शनं विपरीतख्यातिर्भवेत्, ततो विशदतया यत् प्रतिभासते वस्तु सर्वं तद् वर्तमानमेवेति कथं स्थायितालक्षणः पौर्वापर्याभेदः?

अथ क्रमेण कालान्तरस्थायि दर्शनं स्थायितां प्रत्येष्यति; नन्वेवमपि वर्तमानताप्रकाशकाले कालान्तरस्थितिर्न प्रतिभाति, तदवभासकाले तु न पूर्वकालताप्रतिपत्तिरिति परस्परासंस्पर्शिनी दर्शनमवतरन्ती क्षणपरम्परैव स्यात्। यदि पूर्वरूपता सम्प्रति दर्शने प्रतिभाति तथासति प्रथममागँतस्तावगच्छत् (स्तामवगच्छेत्)। न च तत्र पूर्वदर्शनं नोदितमिति सामग्र्यभावान्न तद्ग्रहणम्, यतः पूर्वदर्शनासन्निधिस्तदा निरन्तरदर्शनेऽपि समान इति कथमभेदग्रहणं प्रति सहकारी? अथ निरन्तरदर्शिनः 'तदेवं(व) दर्शनम्' इत्यभेदप्रतिपत्तिर्भविष्यति; ननु यदि नाम तदेव दर्शनम् तथापि तत् प्रतिभातं पूर्वम् अधुना न प्रतिभाति। तथाहि-दृश्यमानाद् रूपात् तादूप्यं भिन्नमाभाति, अभिन्नं वा इति कल्पनाद्वयम्। यदि भिन्नम् तदा न तद्रूपाऽभेदः। अथाभिन्नं भाति, तदापि दृश्यमानतया वा पूर्वरूपम्, पूर्वरूपतया वा दृश्यमानं भातीति वक्तव्यम्। तत्र यदि पूर्वरूपता(त)या दृश्यमानं प्रतिभाति तथासति पूर्वरूपानुभव एव. न वर्तमानरूपाधिगतिरिति सर्वाऽध्यक्षमतिः स्मृतिरूपतामासादयेत्। अथ दृश्यमानतया पूर्वरूपाधिगतिः तत्रापि स्फुटमनुभूयमानमेव रूपम् न पूर्वरूपता, न हि सा तिरोहिताऽप्रतिभासमानमूर्तिरस्तीति शक्यं वक्तुम्, यदेव हि तत्र दृशि प्रतिभाति वर्तमानं रूपं तदेव सद् युक्तम्।

न च पूर्वरूपताऽपि तत्र भात्येवेति वक्तव्यम् यतः सा किं तस्यामेव दृशि प्रतिबद्धा प्रतिभाति, यद्वा पूर्वस्याम्, अथ स्मृतौ इति कल्पनात्रयम्। तत्राद्यकल्पनायां पूर्वरूपतामसन्निहितामधिगच्छन्ती दृग् अनृता भवेत्। अथ पूर्वकालता सन्निहितैव; नन्वेवंसति सापि सन्निहिता तत्र प्रकाशमाना वर्तमानैव भवेत् नातीतौ(ता), तथा च न पूर्वापररूपभेदं(दः) यदि तत् स्मरणाध्यक्षं रूपं दर्शनं वर्तमानरूपतां(तां) पूर्वरूपतां च पदार्थस्य प्रत्येति तथासति सन्निहितासन्निहितस्वरूपग्राहि संविद्वयं परस्परमिन्नं भवेत्। तथाहि—वर्तमानतासाक्षात्कारि संवित्स्वरूपं न पूर्वरूपग्राहिस्वरूपतया भाति, नापि पूर्वरूपतावेदकं साम्प्रतिकरूपसाक्षात्कारिरूपतया चकास्ति कथं न भेदः संवेदनस्य

१-**राननुषक्त**-आ० वि०।-**रानयुक्त**-हा०। २-**भासान**-वा० बा०। ३-**भवे त**-भां० मां० विना०। ४-**कं तद्वय**-भां० मां० वा० बा० विना। ५-**सर्वद**-भां० मां०। ६-**प्रत्येति** भां० मां०। ७-**गमस्तमेव-गच्छेत्**-वा० बा० विना। ८ **अथानि**-वा० बा०। ९ **तदेदं द**-वा० बा०। १० **रूपात् तादूपं भि**-आ० हा० वि०। **रूपादूपं भि**-वि०। **रूपतादूपं भि**-वा० बा०। ११ **तायां द**-वा० बा० विना। १२-**क्षमिति-स्मृ**-वा० बा० विना। १३ **पूर्वता** वा० बा०। १४ **भवेन्नानीतैव** कां०। १५ **दर्शनव**-वा० बा० आ० विना। १६-**पता पूर्वरूपता च पदा**-आ०।-**पतामर्थरूपतां च पदा**-भां०।-**पतां च पदा**-वा० बा०।

अन्यथासर्वत्र भेदोपरतिप्रसक्तिः? नापि द्वितीयकल्पना, यतः तत्रापि पूर्वदृगधुना नास्तीति कथमसती सा ग्राहिका भवेत्? अथ पूर्वं तया गृहीतमित्युच्यते तत्रापि किं वर्तमानं रूपं तया गृहीतम्, उतान्यत्? यद्यन्यत् कथमेकता? अथ तदेव, तत्रापि न प्रमाणमस्ति, पूर्वाऽपरदृशोरसंस्पर्शस्तु प्रतिभासभेदात् प्रतिभास्यमपि भिनत्ति। नापि तृतीया कल्पना, यतः स्मृतिरेव पूर्वरूपतां निरन्तरदर्शिनोऽवभासयति न दृगिति प्राप्तम्; तच्चेष्टमेव। तथाहि—यस्य स्मृतिर्नास्ति तदैवागतस्य नासौ मासादिपरिगतमर्थमध्यवस्यति। ननु च स्मृतावपि पूर्वरूपता यदि चकास्ति तथापि सत्येव "उपलब्धिः सत्ता" [ ] इति वचनात्, असदेतत्; यतः स्मृतिरपि न वर्तमानकालपरिगतमवर्तरति तमनवतरन्ती च त(न त)र्दभिन्नं पूर्वं रूपमादर्शयितुं समर्थेति न साप्यभेदग्रहदक्षा। तस्मात् पूर्वदृगनुसारिणी स्मृतिरपि वर्तमानदृशो भिन्नविषयैव।

अथ 'तदेवेदम्' इति दर्शनसमानाधिकरणतया स्मृत्युत्पत्तेः पूर्वापराभिन्नार्थता; ननु किमिदं सामानाधिकरण्यम्? यदि दर्शन-स्मृत्योरभिन्नावभासिता, तदयुक्तम्; प्रतिभासभेदात्। तथाहि—दर्शनं स्फुटप्रतिभासं वर्तमानार्थविषयतयाऽवभाति, स्मरणमप्यस्पष्टप्रतिभासं बिभ्राणं परोक्षोल्लेखवदा(दाभा)ति तत् कथमेकः प्रतिभासः? प्रतिभासवभेदाव(भासनभेदे च) रूप-स्पर्शसंविदोरिव विषयभेदः, तत एवैकत्वं न क्वचिदपि भातीति न वस्तु सत्। भवतु वा कल्पनोल्लेखविषयोऽभेदः तथापि प्रतिभासभेदान्नाभेद इत्युक्तम्।

अनेनैव न्यायेन दर्शनस्याप्यभेदो निषेद्धव्यः। तथाहि—दर्शनमपि निरस्तबहिरर्थप्रतिभासमात्मानमेवोद्द्योतयितुं समर्थम् तत्रैव पर्यवसितत्वात् न बहिरर्थम् नापि त(न)रान्तरसंवेदनम्; तदवेदनेन च न ततोऽभिन्नमात्मानमाख्यातुमलम्। न च ततो भेदावेदनमेवाभेदवेदनम् विपर्ययेऽप्यस्य समानत्वात्। तथाहि—भेदवादिनाऽप्येतच्छक्यते वक्तुम्-अन्यतोऽभेदावेदनमेव भेदवेदनं संवेदनस्य। किञ्च, स्वसंवेदनेऽन्यानुद्भासनमेव ततो भेददर्शनम्। तथाहि—यद् यथा प्रतिभाति तत् तथाऽभ्युपगन्तव्यम्, यथा नीलं नीलरूपतया प्रतिभासमानं तथैवाभ्युपगमविषयः बहिरर्थनरान्तरसंवेदनविविक्ततया च दर्शनं स्वसंवित्तौ प्रतिभातीति तथैव तद्व्यवहारविषयः अन्यथा सकलव्यवहारोच्छेदप्रसङ्गात्। न च स्वदर्शनमेवाऽपरोक्षतया स्ववपुषि प्रतिभातीति तदेव सदस्तु परसंविदादयस्तु न निर्भान्ति कथं ता (ताः) सत्याः? कथं वा ततः स्वसंविदो भेदः? अनुमानेनापि न तासामधिगतिः प्रत्यक्षाप्रवृत्तौ तत्रानुमानानवतारात् तदवतारेऽपि न तद् वस्तुसत्तां साधयितुं क्षमम् व्यवहारमात्रेणैव तस्य प्रामाण्यादिति वक्तव्यम्, यतो यदि स्वदर्शनं परदर्शनसंविदादौ(परसंविदादौ) न प्रवर्तते परसंवेदनमपि स्वदर्शनादौ न प्रवर्तत इति कथं स्वदर्शनस्यापि सत्यता? अथ स्वदर्शनमपरोक्षतया स्ववपुषि प्रतिभातीति सत्यम्; नन्वेवं परदर्शनमपि तथैव प्रतिभातीति कथं न सत्यम्? नहि स्वविषयं प्रतिभासमाबिभ्राणा भावा अन्यत्रान्यथा प्रतिभासमनवतरन्तः स्वरूपेणाप्यसन्तो नाम। यथा च परसंविदादीनामसत्यत्वे न ततः स्वदर्शनस्य भेदसिद्धिः तथाऽभेदस्यापीत्युक्तम्। परसंवेदने च प्रत्यक्षानवतारेऽप्यनुमानप्रवृत्तिरुपपन्नैव, स्वसन्ततौ निश्चितसंवेदनप्रतिबन्धव्यापारव्याहारादेर्लिङ्गस्य परसन्ततावुपलम्भात् परसंवेदनप्रसिद्धिरनुमान-

---

१-**तीया क**-भां०। २ **पूर्वतया** कां०। ३-**ता तथा तदे**-भां०।-**ता तथा तत्रा**-भां०। ४-**पि प्र**-वा० बा०। ५-**म् नवेष्ट**-भां० मां०।-**म् नन्वेष्ट**-वा० बा०। ६-**तदेवा**-वा० बा०। ७-**तरर्पित तमनव**-भां० मां०। ८-**दभिन्नं सर्वरू**-वा० बा०।-**दभिन्नपूर्वरू**-आ० हा० वि०। ९ **तदैवे**-भां० मां०। **तदेवमि**-वा० बा०। १०-**भास विभ्राण प**-भां०। ११-**खद्। भाति** वा० बा०। १२-**भासेव भेदाव रूप**-हा०।-**भासे च भेदाच्च रूप**-भां० मां० आ० वि०। १३ **तत एव कत्वं**-भां० मां० हा०। **तत एकत्वं**-वा० बा० आ०। १४ प्र० पृ० पं० ४। १५-**पि ररा**-वा० बा०। १६-**दने च ततो**-वा० बा०। **-दने व नं ततो**-हा० वि०।-**दने व ने ततो** भां० मां०। १७ **किञ्चास्वे सं**-वा० बा०। **किञ्च खे सं**-भां० मां०। १८ **नीलनी**-भां० मां० हा०। १९ **बहिरर्थान्तरान्तर**-वा० बा० विना। २०-**र्भाति** वा० बा० हा० वि०। २१-**थं नास**-कां०। २२-**पत्तिः** भां० मां०। २३ **यदि स्वदर्शनं संविदादौ न प्र**-भां० मां०। **यदि परदर्शनं संविदादौ ननु वर्त**-वा० बा०। **यदि स्वदर्शनं परदर्शनसंविदादौ न प्र**-कां०। **य स्वदर्शनपरदर्शनं संविदादौ न प्र**-आ०। २४-**क्षया** वा० बा० विना।-**क्षया वपु**-आ०। २५-**वा अन्यथा** वा० बा०। २६ **स्वसंवित्तौ नि**-वा० बा०। २७-**दप्र**-भां० कां० विना०।

निबन्धना युक्तैव, अतिसूक्ष्मेक्षिकया सन्तानान्तरप्रतिपत्त्यभावाभ्युपगमे स्वसंविन्मात्रस्याप्यभावप्रसक्तेः ज्ञानाद्वैतवादस्य दत्त एव जलाञ्जलिः। तदेवं संविदो देशाभेदो नावगन्तुं शक्यः।

नापि काल(ला)भेदोऽवगमार्हः। तथाहि—यदा संविद् वर्तमाना भाति तदा न पूर्विका; तदनवभासे च न तदपेक्षया 'अभिन्ना' इत्यवसातुं शक्या। अथ पूर्वसंवित् स्मरणे प्रतिभातीति प्रकाशमान-स्मर्यमाणयोः संविदोरभेदावगमः, अयुक्तमेतत्; यतः स्मृतावपि संविद् वर्तमाना न प्रथते पूर्वदर्शनमेव(न एव) स्मृतेर्व्यापारात्। सा हि पूर्वदर्शनमेवाध्यवस्यन्ती प्रतिभातीति कथमप्रतिभासमानं वर्तमानसंवेदनं पूर्वसंविदाऽभिन्नमा(पूर्वसंविदात्मानमभिन्नमा)दर्शयितुं प्रभुः? अपि च, स्मरणमपि स्वतत्त्वमुद्भासयत् तत्रैवोपरतव्यापारं प्रतिभाति, न तु तत्र पूर्वं दर्शनं स्वरूपेण चकास्ति प्रच्युतस्वरूपत्वात् तस्य। न चोपरतस्वरूपमपि पूर्वदर्शनं स्मृतौ प्रतिभातीति युक्तम् चकासतो रूपस्य स्मृतावपायात्। चकासद्रूपसम्भवे च वर्तमानं तद् दर्शनं स्यात् नातीतम् यत इदमेवातीतस्यातीतत्वं यत् चकासद्रूपविरहः। तथात्वाभ्युपगमे च न ग्रहणमिति कथमभेदावगमः? अथ यदा स्मृतौ न पूर्वदर्शनावभासः तथासति प्रतिभासविरहात् स्मृतिरेव स्वरूपेणाऽऽभाति; सा च स्वरूपेणाभिन्नयोगक्षेमत्वादभिन्नेति कथं नाभेदप्रतिभासः? असदेतत्; अन्यानुप्रवेशेन प्रतिभासे सति तदपेक्षयाऽभेदव्यवस्थितेः। यदा च स्मृतौ पूर्वदर्शनं नावभाति तदा तदपेक्षया कथं तस्याऽभेदावगतिः इति न कालाभेदोऽपि संविदः प्रत्येतुं शक्यः। भेदस्त्वेकस्मिन्नेव काले बहिर्नीलात्मा प्रतिभासमानवपुः अन्तश्च सुखादिसंवेदनं स्वप्रकाशतनु प्रतिभातीति कथं न प्रतीतिगोचरः? तथा, मधुर-शीतादिसंवेदनमनेकं स्वप्रकाशवपुर्युगपत् सर्वप्राणिनां प्रसिद्धमिति न तद्भेदः पराकर्तुं शक्यः यतः सुखादिसंवेदनमात्मनि पर्यवसितम्—तदात्मकत्वात्—न नीलनिर्भासमवैति नीलनिर्भासोऽपि-अप्रत्यक्षनीलात्मकत्वात्-तत्रैव परिनिष्ठित इति कथं परस्परूपानवभासने सुख-नीलसंविदोर्न भेदावगतिः? अभेदो ह्यन्यापेक्ष इत्यन्यानवगमेऽवगन्तुमशक्यः भेदस्तु सकलान्यपदार्थव्यावृत्तभावस्वरूपः; सोऽन्यप्रतिभासरहितस्वरूपप्रतिभाससंवेदनादेवावगत इति कथं न स्वप्रतिभासेऽपरसंवेदनाऽप्रतिभासनमेव स्वसंविदो भेदवेदनम्?

पूर्वाऽपरसंवेदनादपि स्वसंवेदनस्य भेदोऽवगम्यत एव। तथाहि-तदपि वर्तमानाऽपरोक्षाकारं स्वसंवेदने प्रतिभाति न पूर्वापररूपतया; संनिहितग्रहणं हि पूर्वापररूपग्रहणम्। न च तत् संनिहितस्वरूपसाक्षात्कारणस्वभावं स्वसंवेदनमात्मसात्करोति तयोर्विरोधात्। तदेवं स्वसंवेदनमपि न पूर्वापरभावे वृत्तिमदिति सर्वं विशदप्रतिभाससङ्गतं वर्तमानमेव। यच्च मनागपि न पूर्वापरभावसंस्पर्शि तत् क्षणभेदसङ्गतिमनुभवतीति सिद्धः संविदोऽपि कालभेदः। तथा, एकक्षणनियतोऽपि प्रतिभासः प्रतिपरमाणुभिन्नः इतरेतरसंवित्परमाण्वननुप्रवेशे वा एकाणुमात्रः संवित्परमाणुपिण्डः स्यात्। ततश्च पुनरप्यपरसंवित्परमाणोरभावेनाप्रतिभासने भेदावगम एव। तदेवं देश-कालाऽऽकारैर्जगतः परस्परपरिहारेणोपलम्भप्रवृत्तेर्भेदाधिगतिर्व्यवस्थिता। न वा(चा)ऽभेदवादिनः परस्परपरिहारेण देशादीनामुपलम्भोऽसिद्धः अध्यक्षसिद्धे असिद्धतोद्भावनस्य वैय(या)त्यप्रकटनपरत्वात्। भेदवादिनोऽपि परस्परं तदनुप्रवेशः स्यादित्यभिहितत्वाच्च।

यदपि 'अथाकारा(र)भेदाद् भेदः स च समानासमानसमयभिन्नसंवेदनाग्राह्योऽभिन्नसंवेदनानवसेयश्च' इत्यादि दूषणमभ्यधायि, तदपि प्रतीतिबाधितत्वादनुद्घोष्यम्, विज्ञान-शून्यवा-

१-भिन्ने सत्य-वा० बा० विना। २ पूर्वं सं-भां० मां०। ३ प्रवर्तते वा० बा०। प्रथमाते वि०। प्रथमते हा०। ४-ते पूर्वदर्शनमेवाध्यवस्यती प्रतिभातीति भां० मां०। ५-मानसंवेदनसंवेदनं चिदात्मानमभिन्नं वा दर्श-भां० मां०।-मानसंवेदनं विदात्मानमभिन्नं वा दर्श-आ० हा० वि०। ६ पूर्वदर्शनस्वा-भां० मां० विना। ७-सद्रूपं संभवे वर्त-भां० मां० हा०। ८ तत्वाभ्यु-वा० बा० विना। ९-गमो घ टादा स्मृतो न पूर्व-वा० बा० विना। १०-हा स्मृ-वा० बा०। ११ सा च स्वरूपनवा स्वरूपेण भिन्नयोग-वा० बा०। १२-प्रवेशनप्र-वा० बा० वि० विना। १३ -संवेदं स्व-वा० बा०। १४-त्वाद् नील-वा० बा० विना। १५-समवेति भां० मां० हा० वि०। १६ परिनिश्चित-वा० बा०। १७-हितास्व-वा० बा०। १८-वसंवे-वा० बा०। १९-पराभावे वा० बा० विना। २०-ति पूर्वं वा० बा०। २१-भास प्र-वा० बा० विना। २२-भावेन प्रति-वि०। २३ वैयावृत्य-वा० बा० विना। २४-दवेदिनो-मां०। २५-काराद् भेदाद् भेदः आ०।-काराद् भेदः वि०। २६ पृ० २७४ पं० २७।

दानुकूलतया च पर्यायास्तिकमतानुसारिणो न क्षतिमावहति। यदपि 'ग्राम्याऽऽरामादिभेदप्रतिभासोऽविद्याविरचितत्वादपारमार्थिकः' इत्यभिधानम्, तदप्यसम्यक्; इतरेतराश्रयप्रसक्तेः। तथाहि-अविद्याविरचितत्वं भेदप्रतिभासस्य अपारमार्थिकस्वरूपसङ्गत्यधिगतेः तत्सद्भावाच्च अविद्यानिर्मितत्वप्रतिपत्तिरिति स्फुटमितरेतराश्रयत्वम्। अभेदप्रतिभासेऽपि कुतः पारमार्थिकत्वम् इति च वक्तव्यम्, यदि विद्यानिर्मितत्वात् इत्युच्येत तदाऽत्रापीतरेतराश्रयत्वं तदवस्थमित्यलमतिप्रसङ्गेन। तन्न भेदे प्रमाणबाधा। तत्सद्भावप्रतिपादकप्रमाणभावस्तु दर्शितः। अभेदस्तु न प्रमाणावसेय इत्यपि दर्शितम्। अपि च, अद्वैते प्रमाण-प्रमेयव्यवहारस्य प्रत्यस्तमयान्न तदभ्युपगमो ज्यायान्, यतस्तद्व्यवहारश्चतुष्टयाक्षेपपूर्वकः। तदुक्तम्—"चतसृषु भेदविधासु तत्त्वं परिसमाप्यते यदुत प्रमाता प्रमेयम् प्रमाणम् प्रमितिः" [ ] इति कुतोऽद्वैतस्य प्रमाणाधिगम्यता? यश्चागमो मन्त्र-ब्राह्मणरूपो भेदनिषेधायोदाहृतः तस्यार्थवादत्वेन प्रतीयमानार्थे प्रामाण्यमागमप्रमाणवादिनाऽभ्युपगन्तव्यम् अन्यथा प्रमाणविरुद्धत्वेन तदाभासत्वप्रसङ्गात्। यच्चाभेदपक्षे दूषणमाशङ्क्योत्तरमभ्यधायि 'अद्वैते किल शास्त्राणाम् मुमुक्षुप्रवृत्तीनां च वैयर्थ्यम्' इत्याशङ्क्य परिहाराभिधानम्—'अविद्यानिवर्त्तकत्वात् मुमुक्षुप्रवृत्तेः तस्याश्चातथ्यरूपत्वान्न द्वैतापत्तिः नाप्यनिवर्त्यत्वम् वस्तुसत्त्वे ह्येतद् द्वयं भवेत्' इति, तदप्यसारम्; यतो यदि अवस्तुसती अविद्या कथमेषा प्रयत्ननिवर्त्तनीया स्यात्? न ह्यवस्तुसन्तः शशशृङ्गादयो यत्ननिवर्त्तनीयत्वमनुभवन्तो दृष्टाः। अथ सत्त्वेऽपि कथं निवृत्तिः? तदनिवृत्तौ वा कथं मुक्तिः? न सदेतत्; नहि सतां घटादीनां(नाम)निवृत्तिः तथाऽविद्याया अपि भविष्यति। अथ घटादीनामपि न परमार्थसत्त्वम् तेषामतादवस्थ्यात्, असदेतत्; यतोऽतादवस्थ्यात् तेषामनित्यताऽस्तु नासत्त्वम् अन्यथा तेषां व्यवहाराङ्गता न स्यात्। अथ न तेषां परमार्थसत्त्वाद् व्यवहाराङ्गता किन्तु संवृत्येति व्यवहाराङ्गत्वेऽपि घटादयोऽपि न परमार्थसद्रूपभाजः, असदेतत्; संवृतेः स्वभावासंवेदनात्। तथाहि—सांवृतमुपचरितं काल्पनिकं रूपमभिधीयते, यच्च कल्पनानिर्मितं रूपं तद् बाधकप्रत्ययेन व्यावर्त्यत इति कथं व्यवहाराङ्गतामश्नुवीत? यच्च अपरमार्थसतामपि सत्यकार्यनिर्वर्त्तकत्वमुपदर्शितम् तत् स्वरूपसङ्गतेर्द्वैतपक्षे कथञ्चिदुपपत्तिमत् स्यात्। अभेदपक्षे तु सत्यव्यतिरिक्तस्यासत्यस्याभावात् न कथञ्चित् कार्यसाधकत्वमुपपत्तिमत्। यदप्यभ्यधायि 'भेदविषयाणामुपायानां ब्रह्मरूपेण सत्त्वात् कार्यका(क)रणम्', एतदप्ययुक्तम्; यतो येन रूपेण सत्त्वं तेन कार्यसामर्थ्यम् यच्च कार्योपयोगं रूपं तेषाम् तदसदेवेति न ब्रह्मरूपेणापि सन्त उपायाः(याः) कार्यकरणक्षमाः ततः सकलव्यवहारप्रच्युतेरभेदस्य न प्रमाणगम्यता। यदपि 'सर्वमेकं सत्, अविशेषात्' इत्युक्तम्, अन्यत्रापि(अत्रापि) किमयमध्यक्षव्यापारो निर्दिष्टः, आहोस्विदनुमानम्? यदि प्रथमः पक्षः, स न युक्तः; सकलाद्वैतग्राहकत्वेनाध्यक्षस्य प्रतिषिद्धत्वात्। द्वितीयोऽप्ययुक्त एव, यतोऽनुमानं दृष्टान्त-दार्ष्टान्तिकभेदे सति प्रवृत्तिमासादयति; स चेत् पारमार्थिकः कुतोऽद्वैतम्? अपारमार्थिकश्चेत् कथं ततः पारमार्थिकाद्वैतसिद्धिः? तथा, हेतुरपि तत्साधको यदि भिन्नस्तदाऽपि कथमद्वैतम् असतो भेदानुपपत्तेः शशविषाणादिवत्? अभिन्नश्चेत् न ततः साध्यसिद्धिः प्रतिज्ञार्थैकदेशासिद्धत्वेनागमकत्वात्। न च कल्पितभेदादपि ततस्तत्सिद्धिः, कल्पनाविरचितस्य कार्यनिर्वर्त्तनाऽक्षमत्वात्। कल्पिताऽहिदंश-रेखागवयादीनामपि यत् असत्त्वे मरणादिकार्यकर्तृत्वं प्रतिपादितम्, तदपि न युक्तिक्षमम्; तेषामपि केनचिद् रूपेण पारमार्थिकत्वसङ्गतेः अत्यन्तासतस्तु षष्ठभूतस्यै(स्ये)व कार्यकारितानुपलब्धेः। तथा, वादि-प्रतिवादि-प्राश्निकानामभावे नाद्वैतवादावतारः सम्भवी; तत्सद्भावे वाऽद्वैतविरोधो न्यायानुगत

१ पृ० २७६ पं० ८। २-सम्मत्यधिगतिस्तत्स-वा० बा०। ३-माणाभाव-भां० मां० आ०। ४ "प्रमाता ××× प्रमाणम् ××× प्रमेयम् ××× प्रमितिः चतसृषु चैवंविधासु अर्थतत्त्वं परिसमाप्यते"—वात्स्या० भा० पृ० २ पं० २। ५-ति कुतोऽद्वैतस्य प्रमाणं प्रमितिरिति कुतोऽद्वैतस्य प्रमाणाधिगम्यता भां० मां०। ६ पृ० २७३ पं० ५-६। ७-णत्ववादिना-आ० वि०। ८ यच्च भे-भां० मां० आ०। यत्वभेद-वि०। ९ पृ० २७६ पं० २७-पृ० २७७ पं० २। १० अधीते किल वा० बा०। ११-सत्ये ह्ये-वा० बा० विना। १२-वर्त्तत-भां० विना। १३-सत्ताम-वा० बा० विना। १४-कमु-वा० बा० विना। १५ पृ० २७९ पं० १५। १६ पृ० २७९ पं २०। १७-त्वात् कारणं-वा० बा० विना। १८-पयोगरूपं आ० वि०। १९ कार्यकार-वा० बा०। २० पृ० २८० पं० १९।-क्त्यन्त्रापि वा० बा०। २१ पृ० २८० पं० १।

इति न तत्पक्षोऽभ्युपगमार्हः । यच्च 'भेदाः सत्तातो यदि भिन्नाः खरविषाणवदसन्तः प्रसक्ताः अभिन्नाश्चेत् सत्तामात्रकमेव न विशेषा नाम । तथाहि—यद् यतोऽव्यतिरिक्तम् तत् तदेव, यथा सत्तास्वरूपम्, अव्यतिरिक्ताश्च ते सत्तातः, तथासति सत्तामात्रकमेव' इत्यभ्यधायि, तद् भेदवादिनोऽपि समानम्; यतस्तेनाप्येतत् शक्यं वक्तुम्—यदि विशेषेभ्यो व्यतिरिक्ता सत्ता खरविषाणवदसती प्राप्ता, अव्यतिरिक्ता चेत् विशेषा एव न सा इति न्यायस्य समानत्वात् । तदेवमभेदे प्रमाणाभावात्—भेदस्य वा (चा)ऽबाधितप्रमाणविषयत्वात्—न तदभ्युपगमो ज्यायानिति शुद्धद्रव्यास्तिकमतप्रतिक्षेपिपर्यायास्तिकाभिप्रायः ।

[२ सांख्यमतप्रतिक्षेपकः पर्यायास्तिकनयः]

अशुद्धद्रव्यास्तिकसाङ्ख्यमतप्रतिक्षेपकस्तु पर्यायास्तिकः प्राह–यदुक्तं कापिलैः 'प्रधानादेव महदादिकार्यविशेषाः प्रवर्तन्ते' इति, तत्र यदि महदादयः कार्यविशेषाः प्रधानस्वभावा एव कथमेषां कार्यतया ततः प्रवृत्तिर्युक्ता? न हि यद् यतोऽव्यतिरिक्तं तत् तस्य कार्यम् कारणं वेति व्यपदेष्टुं युक्तम्, कार्य-कारणयोर्भिन्नलक्षणत्वात् अन्यथा हि 'इदं कारणम् कार्यं च' इत्यसङ्कीर्णव्यवस्थोत्सीदेत् । ततश्च यदुक्तं प्रकृतिकारणिकैः–"मूलप्रकृतेः कारणत्वमेव, भूतेन्द्रियलक्षणस्य षोडशकगणस्य कार्यत्वमेव, महदहंकारतन्मात्राणां च पूर्वोत्तरापेक्षया कार्यत्व-कारणत्वे च" [ ] इति तत् सङ्गतं न स्यात् । आह चेश्वरकृष्णः—

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति-विकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥" [साङ्ख्यका० ३] इति ।

यतः सर्वेषां परस्परमव्यतिरेकात् कार्यत्वम् कारणत्वं वा प्रसज्येत, अन्यापेक्षित्वाद् वा कार्यकारणभावस्य अपेक्षणीयस्य रूपान्तरस्य चाभावात् पुंरुषवन्न प्रकृतित्वम् विकृतित्वं वा सर्वेषां वा स्यात् अन्यथा पुरुषस्यापि प्रकृतिविकारव्यपदेशप्रसक्तिः । उक्तं च–

"यदेव दधि तत् क्षीरं यत् क्षीरं तद् दधीति च ।
वदता विन्ध्यवासित्वं ख्यापितं विन्ध्यवासिना ॥" [ ] इति ।

'हेतुमत्त्वादिति(मत्त्वादि)धर्माऽऽसङ्गि विपरीतमव्यक्तम्' इत्येतदपि बालप्रलापमनुकरोति, न हि यद् यतोऽव्यतिरिक्तस्वभावं तत् ततो विपरीतं युक्तम् वैपरीत्यस्य रूपान्तरलक्षणत्वात् अन्यथा भेदव्यवहारोच्छेदप्रसङ्ग इति सत्त्व-रजस्-तमसाम् चैतन्यानां च परस्परभेदाभ्युपगमो निर्निमित्तो भवेत् ततश्च विश्वस्यैकरूपत्वात् सहोत्पत्तिविनाशप्रसङ्गः अभेदव्यवस्थितेरभिन्नयोगक्षेमलक्षणत्वादिति । व्यक्तरूपाऽव्यतिरेकाद् अव्यक्तमपि हेतुमदादिधर्माऽऽसङ्गि प्रसक्तम् व्यक्तस्वरूपवत्, अहेतुमत्त्वादिधर्मकलापाध्यासितं वा व्यक्तम् अव्यक्तरूपाव्यतिरेकात् तत्स्वरूपवत् अन्यथातिप्रसक्तिः ।

अपि च, अन्वयव्यतिरेकनिबन्धनः कार्यकारणभावः प्रसिद्धः, न च प्रधानादिभ्यो महदाद्युत्पत्त्यवगमनिबन्धनः अन्वयः व्यतिरेको वा प्रतीतिगोचरः सिद्धः, यतः 'प्रधानाद् महान् महतोऽहङ्कारः' इत्यादिप्रक्रिया सिद्धिसौधशिखरमध्यास्त । तस्मान्निर्बन्धन एवायं प्रधानादिभ्यो महदाद्युत्पत्तिप्रक्रमः । न च नित्यस्य हेतुभावः सङ्गतः यतः प्रधानाद् महदादीनामुत्पत्तिः स्यात् नित्यस्य क्रम-यौगपद्याभ्यामर्थक्रियाविरोधादिति प्रतिपादयिष्यमाणत्वात् ।

अथ नास्माभिरपूर्वस्वभावोत्पत्त्या कार्यकारणभावोऽभ्युपगतः यतो रूपाभेदादसौ विरुद्ध्यते किन्तु प्रधानं महदादिरूपेण परिणतिमुपगच्छति सर्पः कुण्डलादिरूपेणेवेति 'प्रधानं महदादिकारणम्' इति व्यपदिश्यते महदादयस्तु तत्परिणामरूपत्वात् तत्कार्यव्यपदेशमासादयन्ति न च परिणामोऽभेदेऽपि विरोधमनुभवति एकवस्त्वधिष्ठानत्वात् तस्येति, असम्यगेतत् परिणामासिद्धेः । तथाहि–असौ पूर्वरूपप्रच्युतेर्भवेत्, अप्रच्युतेर्वेति कल्पनाद्वयम् । तत्र यदि अप्रच्युतेरिति पक्षः तदा अवस्थासाङ्कर्याद् वृद्धाद्यवस्थायामपि युवत्वाद्यवस्थोपलब्धिप्रसङ्गः । अथ प्रच्युति(ते)रिति पक्षः तदा स्वरूपहानिप्रसक्तिरिति पूर्वकं स्वभावान्तरं निरुद्धम् अपरं च तदुत्पन्नमिति न कस्यचित् परिणामः सिद्ध्येत् ।

अपि च, तस्यैवान्यथाभावः परिणामो भवद्भिर्वर्ण्यते; स चैकदेशेन, सर्वात्मना वा? न तावत् एकदेशेन, एकस्यैकदेशासम्भवात् । नापि सर्वात्मना, पूर्वपदार्थविनाशेन पदार्थान्तरोत्पादप्रसङ्गात् । अतो न तस्यैवान्यथात्वं युक्तम्, तस्य स्वभावान्तरोत्पादनिबन्धनत्वात् । व्यवस्थितस्य धर्मिणो धर्मान्तरनिवृत्तौ धर्मान्तरप्रादुर्भावलक्षणः परिणामोऽभ्युपगम्यते न तु स्वभावान्यथात्वमिति चेत्, असदेतत्; यतः प्रच्यवमानः उत्पद्यमानश्च धर्मो धर्मिणोऽर्थान्तरभूतोऽभ्युपगन्तव्यः अन्यथा धर्मिण्यवस्थिते तस्य तिरोभावाऽऽविर्भावासम्भवात् । तथाहि—यस्मिन् वर्तमाने यो व्यावर्त्तते स ततो भिन्नः, यथा घटेऽनुवर्तमाने ततो व्यावर्त्यमानः पटः, व्यावर्त्तते च धर्मिण्यनुवर्तमानेऽप्याविर्भावतिरोभावाऽऽसङ्गी धर्मकलाप इति कथमसौ ततो न भिन्न इति धर्मी तदवस्थ एवेति कथं परिणतो नाम? यतो नार्थान्तरभूतयोः कट-पटयोरुत्पाद-विनाशेऽचलितरूपस्य घटादेः परिणामो भवति अतिप्रसङ्गात्; अन्यथा चैतन्यमपि परिणामि स्यात् । तत्सम्बद्धयोर्धर्मयोरुत्पाद-विनाशात् तस्यापि सावभ्युपगम्यते नान्यस्येति चेत्, न; सदसतोः सम्बन्धाभावेन तत्सम्बन्धित्वायोगात् । तथाहि–सम्बन्धो भवत्(न्) सतो वा भवेत्, असतो वा भवेदिति कल्पनाद्वयम् । न तावत् सतः समधिगताऽशेषस्वभावस्यान्यानपेक्षतया क्वचिदपि पारतन्त्र्यासम्भवात् । नाप्यसतः, सर्वोपाख्याविरहलक्षणतया तस्य क्वचिदाश्रितत्वानुपपत्तेः; नहि शशविषाणादिः क्वचिदप्याश्रित उपलब्धः । न च व्यतिरिक्तधर्मान्तरोत्पाद-विनाशे सति परिणामो भवद्भिर्व्यवस्थापितः, किं तर्हि? यत्रात्मभूतैकस्वभावानुवृत्तिः अवस्थाभेदश्च तत्रैव तद्व्यवस्था । न च धर्मिणः सकाशाद् धर्मयोर्व्यतिरेके सति एकस्वभावानुवृत्तिरस्ति, यतो धर्म्येव तयोरेक आत्मा; स च व्यतिरिक्त इति नात्मभूतैकस्वभावानुवृत्तिः । न च निरुद्ध्यमानोत्पद्यमानधर्मद्वयव्यतिरिक्तो धर्मी उपलब्धिलक्षणप्राप्तो दृग्गोचरमवतरति कस्यचिदिति तादृशोऽसद्व्यवहारविषयतैव । अथ अनर्थान्तरभूत इति पक्षः कक्षीक्रियते तथाप्येकस्माद् धर्मिस्वरूपाद्व्यतिरिक्तत्वात् तिरोभावाऽऽविर्भाववतोर्धर्मयोर्द्वयोरप्येकत्वम् धर्मिस्वरूपवदिति केन रूपेण धर्मी परिणतः स्यात् धर्मो वा? अवस्थातुश्च धर्मिणः सकाशादव्यतिरेकाद् धर्मयोरवस्थातृस्वरूपवन्न निवृत्तिः नापि प्रादुर्भावः धर्माभ्यां च धर्मिणोऽनन्यत्वात् धर्मस्वरूपवत् । अपूर्वस्य चोत्पादः पूर्वस्य च विनाश इति नैकस्य कस्यचित् परिणतिः सिद्ध्येदिति न परिणामवशादपि साङ्ख्यानां कार्यकारणव्यवहारः सङ्गच्छते । न च परिणामप्रसाधकं प्रमाणं क्षणिकम् अक्षणिकं वा सम्भवतीति प्रतिपादितमभेदनिराकरणं कुर्वद्भिः ।

यच्च असत्कार्यवादे 'असदकरणात्' इत्यादि दूषणमभ्यधायि तत् सत्कार्यवादेऽपि तुल्यम् । तथाहि—असत्कार्यवादिनाऽपि शक्यमिदमित्थमभिधातुम्—

न सदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥ इति ।

अत्र च 'न सत् कार्यम्' इति व्यवहितेन सम्बन्धो विधातव्यः, कस्मात्? 'सदकरणात्' 'उपादानग्रहणात्' इत्यादिहेतुसमूहात् । उभययोः(भयो)र्यश्च दोषस्तमेकः प्रेर्यो न भवति । तथाहि—यदि दुग्धा-

---

१ यच्चाभेदाः भां० मां० ।
२ इदं सांख्यप्रक्रियाप्रतिविधानं तत्त्वसंग्रहगतं का० १६–४५, पृ० २२–४० । ३ पृ० २८० पं० २४ ।
४ तदत्र सुधियः प्राहुस्तुल्या सत्त्वेऽपि चोदना । यत् तस्मामुत्तरं वः स्यात् तत् तुल्यं सुधियामपि ॥
तत्त्वसं० का० १६ पृ० २२ ।
५ माठरवृ० पृ० ९ पं० १८ । ६–**रव्य**–वा० बा० । ७ "पुरुषवन्न प्रकृतित्वं नापि विकृतित्वं स्यात्"–तत्त्वसं० पञ्जि० पृ० २२ पं० २६ । ८ "वदता रुद्रिलेनैव ख्यापिता विन्ध्यवासिता"–तत्त्वसं० पञ्जि० पृ० २२ पं० २८ । ९ "यच्चेदम् 'हेतुमत्त्वादिधर्मयोगि व्यक्तम् विपरीतमव्यक्तम्' "–तत्त्वसं० पञ्जि० पृ० २३ पं० १ । १० पृ० २८१ पं० २३ । ११ "हेतुमत्त्वादिधर्मयोगि"–तत्त्वसं० पञ्जि० पृ० २३ पं० ७ । १२ पृ० २८१ पं० १ । १३–**न्निबन्धन**– वा० बा० । १४–**पारूपाभे**–वा० बा० ।

१ **प्रसक्तिः** वि० । २ "अथ परित्यागात्"–तत्त्वसं० पञ्जि० पृ० २३ पं० १८ । ३–**रहितया** वा० बा० विना । "सर्वोपाख्याविरहलक्षणतया"–तत्त्वसं० पञ्जि० पृ० २४ पं० ५ । ४–**नाशि स**–भां० मां० ।–**नाश मति** वा० बा० । ५ षष्ठ्यन्तम् । ६ "केन आश्रयेण"–तत्त्वसं० पञ्जि० पृ० २४ पं० १३ । ७–**व्यतिरिक्तात्** भां० मां० वा० बा० विना । ८–**णोऽन्यत्वा**–वा० बा० ।–**णोऽन्यनन्यद्वात्** भां० मां० । ९–**स्य क्वचित्** वि० । १० पृ० २८२ पं० १८ । ११ तत्त्वसं० पञ्जि० पृ० २४ पं० २१ । १२ **उर्भये यश्चादो**–वा० बा० । **उभयोश्चदो**–वि० डे० । **उभययाश्चदो**–हा० । "यश्चोभयोर्दोषः"–तत्त्वसं० पञ्जि० पृ० २४ पं० २४ ।
१३ "यदि दध्यादयः सन्ति दुग्धाद्यात्मसु सर्वथा । तेषां सतां किमुत्पाद्यं हेत्वादिसदृशात्मनाम्" ॥
तत्त्वसं० का० १७ पृ० २५ ।

दिषु दध्यादीनि कार्याणि रस-वीर्यविपाकादिना विभक्तेन रूपेण मध्यावस्थावत् सन्ति तदा तेषां किमपरमुत्पाद्यं रूपमवशिष्यते यत् तैर्जन्यं स्यात्? [1] न हि विद्यमानमेव कारणायत्तोत्पत्तिकं भवति प्रकृति-चैतन्यरूपवत्। अत्र प्रयोगः—यत् सर्वात्मना कारणे सत् न तत् केनचिज्जन्यम्, यथा प्रकृतिश्चैतन्यं वा, तदेव वा मध्यावस्थायां [2] कार्यम्, सत् तत् सर्वात्मना परमतेन क्षीरादौ दध्यादि इति व्यापकविरुद्धोपलब्धिप्रसङ्गः। न च हेतोरनैकान्तिकता, अनुत्पाद्याऽतिशयस्यापि जन्यत्वे सर्वेषां जन्यत्वप्रसक्तिः अनवस्थाप्रसक्तिश्च—विपर्यये बाधकं प्रमाणम्—जनितस्यापि पुनर्जन्यत्वप्रसङ्गात्। तदेवं कार्यत्वाभिमतानामकार्यत्वप्रसक्तिः सत्कार्यवादाभ्युपगमे। कारणाभिमतानामपि मूलप्रकृति-बीज-दुग्धादीनां पदार्थानां विवक्षितमहदादि-अङ्कुर-दध्यादिजनकत्वं न प्राप्नोति अविद्यमानसाध्यत्वात् मुक्तात्मवत्। प्रयोगः—[3] यद् अविद्यमानसाध्यं न तत् कारणम्, यथा चैतन्यम्, [4] विं(अवि)द्यमानसाध्यश्चाभिमतः पदार्थ इति व्यापकानुपलब्धिः। प्रसङ्गसाधनं चैतद् द्वयमपि अतो नोभयसिद्धोदाहरणेन प्रयोजनम्। [5] भोगं प्रत्यात्मनोऽपि कर्तृत्वाभ्युपगमे मुक्तात्मा उदाहर्तव्यः। [6] न च प्रथमप्रयोगे [7] अभिव्यक्ता(क्त्या)दिरूपेणापि संविशेषणे हेतावु(बु)पादीयमाने असिद्धता न ह्यस्माभिरभि[8]व्यक्त्यादिरूपेणापि सत्त्वमिष्यते कार्यस्य किं तर्हि? शक्तिरूपेण निर्विशेषणे तु तस्मिन्ननैकान्तिकता यतोऽभि[9]व्यक्त्यादिलक्षणस्यातिशयस्योत्पद्यमानत्वान्न सर्वस्य(स्या)कार्यत्वप्रसङ्गो भविष्यति अत [10] एव द्वितीयोऽपि हेतुरसिद्धः विद्यमानत्वात् [11] साध्यस्याभिव्यक्त्युद्रेकानुद्रेकाद्यवस्थाविशेषस्येति वक्तव्यम्, यतोऽत्र विकल्पद्वयम्-किमसावतिशयोऽभिव्यक्त्याद्यवस्थातः प्रागासीत्, आहोश्चिन्नेति? यद्यासीत् न तर्ह्यसिद्धतादिदूषणं प्रयोगद्वयोपन्यस्तहेतुद्वयस्य। अथ नासीत् एवमप्यतिशयः कथं हेतुभ्यः प्रादुर्भावमश्नुवीत? 'असदकरणात्' इति भवद्भिरभ्युपगतत्वात्। तत् स्थितम्-सदकरणान्न सत् कार्यम्। [12] यथोक्तनीत्या सत्कार्यवादे सा[13]ध्यस्य(स्या)भावादुपादानग्रहणमप्यनुपपन्नं स्यात् तत्साध्यफलवाञ्छयैव प्रेक्षावद्भिरुपादानपरिग्रहात्, नियतादेव च क्षीरादेर्दध्यादीनामुद्भव इत्येतदप्यनुपपन्नं [14] स्यात् साध्यस्यासम्भवादेव; यतः सर्वस्मात् सम्भवाभाव एव नियताज्जन्मेत्युच्यते तच्च सत्कार्यवादपक्षे न घटमानकम्। तथा, 'शक्तस्य शक्यकरणात्' [15] इत्येतदपि सत्कार्यवादे न युक्तिसङ्गतम् साध्याभावादेव, यतो यदि किञ्चित् केनचिदभिनिर्वर्त्येत तदा निर्वर्तकस्य शक्तिर्व्यवस्थाप्येत [16] निर्व-

१ "हेतुजन्यं न तत् कार्यं सत्तातो हेतुवित्तिवत्। अतो नाभिमतो हेतुरसाध्यत्वात् परात्मवत्" ॥
तत्त्वसं० का० १८ पृ० २५।

२ **कार्यं सर्वं (सच्च) सर्वात्मना** वा० बा०। "सदेव च कार्यं मध्यावस्थायाम्, सच्च सर्वात्मना परमतेन दध्यादि"-तत्त्वसं० पञ्जि० पृ० २५ पं० १७। ३ **यदि विद्यमानसाध्यं तत् कार**-वा० बा०। ४ "अविद्यमानसाध्यश्चाभिमतः पदार्थः"-तत्त्वसं० पञ्जि० पृ० २६ पं० २। ५ "यस्तु मन्यते साङ्ख्यः पुरुषस्यापि प्रतिबिम्बोदयन्यायेन भोगं प्रति कर्तृत्वमस्तीति। तं प्रत्येवं व्याख्या-परश्चासावात्मा च—(प्र० पृ० पं० २४) मुक्त इत्यर्थः"-तत्त्वसं० पञ्जि० पृ० २६ पं० ३।

६ "अथास्त्यतिशयः कश्चिदभिव्यक्त्यादिलक्षणः। यं हेतवः प्रकुर्वाणा न यान्ति वचनीयताम्" ॥
तत्त्वसं० का० १९ पृ० २६।

७ प्र० पृ० पं० ३। ८ प्र० पृ० पं० १२। ९ **सविशेषणो हेतोरुपादीयमानऽसिद्ध्यत। ना ह्य**-वा० बा०। १० **हेतावपादीयमानोऽसिद्धता न ह्य**-आ०। ११-**भिव्यक्तादि**-वा० बा० विना। १२ **व्यक्तादि**-वा० बा०। १३ प्रसङ्गश्चायम्-प्र० पृ० पं० ५। १४ **एव वं द्वि**-वि० डे०। **एवं द्वि**-हा०। १५ प्र० पृ० पं० ९। १६ **साध्यस्यापि व्यक्त्यु**-वा० बा०। **साध्यस्यापि भिव्यक्त्यु**-वि० डे०।
१७ "प्रागासीद् यद्यसावेषं न किञ्चिद् दत्तमुत्तरम्। नो चेत् सोऽसत् कथं तेभ्यः प्रादुर्भावं समश्नुते?" ॥
तत्त्वसं० का० २० पृ० २६।

१८ पृ० २८२ पं० १८।

१९ "नातः साध्यं समस्तीति नोपादानपरिग्रहः। नियतादपि नो जन्म न च शक्तिर्न च क्रिया" ॥
तत्त्वसं० का० २१ पृ० २६।

२०-**ध्यक्षाभावा**-वा० बा०। २१ **स्यात् तत्साध्यकस्यासंभवादेव** हा०। **स्यात् साध्यसासंभवाभाव एव** वा० बा०। **स्यात् तत्साधकस्यासंभवादेव** वि०। २२ पृ० २८२ पं० १९। २३ "निव(र्व)र्त्यस्य च करणं सिध्येत्"-तत्त्वसं० पञ्जि० पृ० २७ पं० ६।

र्त्यस्य च का(क)रणं सिद्धिमध्यासीतेति, नान्यथा। [1] कारणभावोऽपि भावानां साध्याभावादेव सत्कार्यवादे न युक्तिसङ्गतः न चैतद् दृष्टमिष्टं च। तस्मान्न सत् कार्यं कारणावस्थायामिति प्रसङ्गविपर्ययः पञ्चस्वपि प्रसङ्गसाधनेषु योज्यः।

अपि च, [2] सर्वमेव हि साधनं स्वविषये प्रवर्त्तमानं द्वयं विदधाति-स्वप्रमेयार्थविषये उत्पद्यमानौ संशय-विपर्यासौ निवर्त्तयति, स्वसाध्यविषयं च निश्चयमुपजनयति। न चैतत् सत्कार्यवादे युक्त्या सङ्गच्छते। तथाहि-सन्देह-विपर्यासौ भवद्भिः किं चैतन्यस्वभावावभ्युपगम्येते, आहोश्विद् बुद्धिमनःस्वरूपौ? तत्र यदि प्रथमः पक्षः, स न युक्तः; चैतन्यरूपतया तयोर्भवद्भिरनभ्युपगमात्, अभ्युपगमे वा मुक्त्यवस्थायामपि चैतन्याभ्युपगमात् तत्स्वभावयोस्तयोरप्युत्पत्त्यनिवृत्तेरनिर्मोक्षप्रसङ्गः, साधनव्यापारात् तयोरनिवृत्तिश्च चैतन्यवन्नित्यत्वात्। द्वितीयपक्षोऽपि न युक्तः, बुद्धि-र्म(म)नसोर्नित्यत्वेन तयोरपि नित्यत्वान्निवृत्त्ययोगात्। न च निश्चयोत्पत्तिरपि साधनात् सम्भवति तस्या अपि सर्वदाऽवस्थितेः अन्यथा सत्कार्यवादो विशीर्येत इति साधनोपन्यासप्रयासो विफलः कापिलानाम्।

स्ववचनविरोधश्च प्राप्नोति-तथाहि-निश्चयोत्पादनार्थं [3] साधनं ब्रुवता निश्चयस्य असत उत्पत्तिरङ्गीकृता भवेत् 'सत् कार्यम्' इति च प्रतिज्ञया सा निषिद्धेति स्ववचनविरोधः स्पष्ट एव। [4] अथ साधनप्रयोगवैयर्थ्यं ना(मा) प्रापदिति निश्चयोऽसन्नेव साधनादुत्पद्यत इत्यङ्गीक्रियते तर्हि 'असदकरणात्' इत्यादेर्हेतुपञ्चकस्यानैकान्तिकता स्वत एवाभ्युपगता भवति निश्चयवत् कार्यस्याप्यसत उत्पत्त्यविरोधात्। तथाहि-यथा निश्चयस्य असतोऽपि करणम् तदुत्पत्तिनिमित्तं च यथा विशिष्टसाधनपरिग्रहः-न च यथा तस्य सर्वस्मात् साधनाभासादेः सम्भवः-यथा चासन्नप्यसौ शक्तैर्हेतुभिर्निर्वर्त्यते, यथा च कारणभावो हेतूनां समस्ति तथा कार्येऽपि भविष्यति इति कथं नानैकान्तिका निश्चयेन 'असदकरणात्' [5] इत्यादिहेतवः। [6] न च यद्यपि प्राक् साधनप्रयोगात् सन्नेव निश्चयस्तथापि न साधनवैयर्थ्यम् यतः प्रागनभिव्यक्तो निश्चयः पश्चात् साधनेभ्यो व्यक्तिमासादयतीत्यभिव्यक्त्यर्थं साधनप्रयोगः सफल इति नानर्थक्यमेषामिति वक्तव्यम्, व्यक्तेरसिद्धत्वात्। तथाहि-किं स्वभावातिशयोत्पत्तिरभिव्यक्तिरभिधीयते, आहोश्वित् तद्विषयं ज्ञानम्, उत तदुपलम्भावारकापगमः इति पक्षाः। तत्र न तावत् स्वभावातिशयोत्पत्तिरभिव्यक्तिः यतोऽसौ स्वभावातिशयो निश्चयस्वभावाद्व्यतिरिक्तः स्यात्, व्यतिरिक्तो वा? यदि अव्यतिरिक्तस्तदा निश्चयस्वरूपवत् तस्य सर्वदैवावस्थितेर्नोत्पत्तिर्युक्तिमती। अथ व्यतिरिक्तस्तथापि 'तस्यासौ' इति सम्बन्धानुत्पत्तिः। तथाहि-[7] आधाराधेयलक्षणः, जन्यजनकस्व[8]भावो(वो वाऽ)सौ भवेत्? न तावत् प्रथमः, परस्परमनुपकार्योपकारकयोस्तदसम्भवात्, उपकाराभ्युपगमे चोपकारस्यापि पृथग्भावे सम्बन्धासिद्धिः—अपरोपकारकल्पनायां चानवस्थाप्रसक्तिः—[9] अपृथग्भावे च साधनोपन्यासवैयर्थ्यम् निश्चयादेवोपकारा[10]पृथग्भूतस्या-

१ "सर्वात्मना च निष्पत्तेर्न कार्यमिह किञ्चन। कारणव्यपदेशोऽपि तस्मान्नैवोपपद्यते" ॥
तत्त्वसं० का० २२ पृ० २७।

२-**ष्टं वा त**-आ०।
३ "सर्वं च साधनं वृत्तं विपर्यासनिवर्तकम्। निश्चयोत्पादकं चेदं न तथा युक्तिसंगतम् ॥
न संदेह-विपर्यासौ निवर्त्यौ सर्वदा स्थितेः। नापि निश्चयजन्माऽस्ति तत एव वृथाऽखिलम् ॥
तत्त्वसं० का० २३-२४ पृ० २७।
४ "चैतन्य-बुद्धि-मनसां नित्यत्वेन"-तत्त्वसं० पञ्जि० पृ० २७ पं० २५। ५-**नार्थसाध**-आ० हा०।
६ "अथापि निश्चयोऽभूतस्समुत्पद्येत साधनात्। ननु तेनैव सर्वेऽमी भवेयुर्व्यभिचारिणः" ॥
तत्त्वसं० का० २५ पृ० २८।
७ पृ० २८२ पं० १८।
८ "अव्यक्तो व्यक्तिभाक् तेभ्य इति चेद् व्यक्तिरस्य का?। न रूपातिशयोत्पत्तिरविभागादसंगतेः" ॥
तत्त्वसं० का० २६ पृ० २८।
९ "आधाराधेयलक्षणो वा संबन्धो भवेत्, जन्यजनकभावलक्षणो वा?"-तत्त्वसं० पञ्जि० पृ० २८ पं० २२।
१०-**भावाऽसौ** वि० डे०। ११ **अथ पृथग्भू**-वा० बा० विना०। १२-**कारपृथ**-वा० बा० विना।

तिशयस्योत्पत्तेः। न चातिशयस्य कश्चिदाधारो युक्तः अमूर्त्तत्वेनाधः प्रसर्पणाभावात् अधोगतिप्रतिबन्धकत्वेनाधारस्य व्यवस्थानात्। जन्यजनकभावलक्षणोऽपि न सम्बन्धो युक्तः; सर्वदैव सम्बन्धाख्यस्य (निश्चयाख्यस्य) कारणस्य सन्निहितत्वान्नित्यमतिशयोत्पत्तिप्रसक्तेः। न च साधनप्रयोगापेक्षया निश्चयस्यातिशयोत्पादकत्वं युक्तम् अनुपकारिण्यपेक्षाऽयोगात्, उपकाराभ्युपगमे वा दोषः पूर्ववद् वाच्यः। अपि च, अतिशयोऽपि पृथग्भूतः क्रियमाणः किमसन् क्रियते, आहोस्वित् सन् इति कल्पनाद्वयम्। असत्त्वे पूर्ववत् साधनानामनैकान्तिकता वाच्या, सत्त्वे च साधनवैयर्थ्यम् तत्रापि अभिव्यक्त्यभ्युपगमे 'केयमभिव्यक्तिः' इत्याद्यनवस्थाप्रसङ्गो दुर्निवार इति व्यतिरेकपक्षोऽपि सङ्गत्यसम्भवादसम्भवी। अतो न स्वभावातिशयोत्पत्तिरभिव्यक्तिः।

नापि तद्विषयज्ञानोत्पत्तिस्वरूपा अभिव्यक्तिर्युक्तिसंगता, तद्विषयज्ञानस्य भवदभिप्रायेण नित्यत्वात्। तथाहि—तद्विषयाऽपि संवित्तिः सत्कार्यवादिमतेन नित्यैव किमुत्पाद्यं तस्याः स्यात्? अपि च, एकैक(कैव) भवन्मतेन संविद्—"आ सर्ग-प्रलयादेका बुद्धिः" [ ] इति कूटताता(न्ता)त्—सैव च निश्चयः तत्र कोऽपरस्तदुपलम्भोऽभिव्यक्तिस्वरूपो यः साधनैः सम्पाद्येत? न च त(न च न त)द्बुद्धिस्वभावा तद्विषया संवित्तिः किन्तु मनःस्वभावेति वक्तव्यम्, 'बुद्धिः' 'उपलब्धिः' 'अध्यवसायः' 'मनः' 'संवित्तिः' इत्यादीनामनर्थान्तरत्वेन प्रदर्शयिष्यमाणत्वात् तद्विषयोपलम्भाऽऽवरणक्षयलक्षणाप्यभिव्यक्तिर्न घटां प्राञ्चति द्वितीयस्योपलम्भस्यासम्भवेनोपलम्भावरणस्याप्यभावात् न ह्यसत आवरणं युक्तिसंगतम् तस्य वस्तुसद्विषयत्वात्। न चासतस्तदावरणस्य कुतश्चित् क्षयो युक्तः। सत्त्वेऽपि तदावरणस्य नित्यत्वान्न क्षयः सम्भवी, तिभा(तिरोभा)वलक्षणोऽपि क्षयस्तस्याऽयुक्तः अपरित्यक्तपूर्वरूपस्य तिरोभावानुपपत्तेः तद्विषयोपलम्भस्या(स्य) सत्त्वेऽपि नित्यत्वान्नावरणसम्भव इति कुतस्तत्क्षयोऽभिव्यक्तिः? न चाप्यावरणक्षयः केनचिद् विधातुं शक्यः तस्य निःस्वभावत्वात्। ततोऽभिव्यक्तेरघटमानत्वात् सत्कार्यवादपक्षे साधनोपन्यासवैयर्थ्यम्।

एवं बन्ध-मोक्षाभावप्रसङ्गश्च तत्पक्षे। तथाहि—प्रधान-पुरुषयोः कैवल्योपलम्भलक्षणतत्त्वज्ञानप्रादुर्भावे सति अपवर्गः कापिलैरभ्युपगम्यते, तत्र(तच्च) तत्त्वज्ञानं सर्वदा व्यवस्थितमेवेति सर्व एव देहिनोऽपवृक्षाः(वृक्ताः) स्युः। अत एव न बन्धोऽपि तत्पक्षे सङ्गतः मिथ्याज्ञानवशाद्धि बन्ध इष्यते तस्य च सर्वदाऽव्य(दा व्य)वस्थितत्वात् सर्वेषां देहिनां बद्धत्वमिति कुतो मोक्षः?

---

१ "सर्वदैव निश्चयाख्यस्य कारणस्य"–तत्त्वसं० पञ्जि० पृ० २८ पं० २७। २ पृ० २९९ पं० २८। ३ पृ० २९९ पं० २२। ४–**दसम्भवो अतो** डे०।–**दसम्भवा अतो** हा०।–**दसम्भवे अतो** वि०।

५ "न तद्विषयसंवित्तिर्नोपलम्भावृतिक्षयः। नित्यत्वादुपलम्भस्य द्वितीयस्याऽप्यसंभवात्" ॥
तत्त्वसं० का० २७ पृ० २९।

६ **तद्विषयस्यापि** वा० बा० विना। ७–**त्पाद्य तं स्यादपि** वि० हा०।–**त्पाद्यं त स्यादपि** आ०।–**त्पाद्यं ते स्यात् अपि** वा० बा०। "सत्कार्यवादिनो मतेन नित्यैवेति किं तस्या उत्पाद्यम्"–तत्त्वसं० पञ्जि० पृ० २९ पं० १०। ८ **एक व भवन्म**–वा० बा०। "एकैव भवतां मतेन"–तत्त्वसं० पञ्जि० पृ० २९ पं० १३। ९ **–द्विरिकृता तात् सौव** वि० हा०।–**द्विरिति कृतिरित्याद्यव** वा० बा०। १० " 'आ सर्ग-प्रलयादेका बुद्धिः' इति सिद्धान्तात्"–तत्त्वसं० पञ्जि० पृ० २९ पं० १३। ११"न बुद्धिस्वभावा तद्विषयसंवित्तिः किं तर्हि? मनःस्वभावेति, तदसम्यक्"–तत्त्वसं० पञ्जि० पृ० २९ पं० १५। १२ **न वाऽसत**–वि० विना। १३–**णनित्य**–वा० बा०। १४–**वीति विरोधाभावल**–वा० बा०। "नापि तिरोभावलक्षणः क्षयो युक्तः अत्यक्तपूर्वरूपस्य तिरोभावासंभवात्"–तत्त्वसं० पञ्जि० पृ० २९ पं० १९। १५ "अथवा 'नित्यत्वात्' इति, तद्विषयायाः संवित्तेर्नित्यत्वान्नावरणं संभवति तदसंभवान्न क्षयो युक्तः"–तत्त्वसं० पञ्जि० पृ० २९ पं० २२। १६–**म्यते न च तत्त्वज्ञानं सर्वदाऽव्यवस्थितमेवेति सर्व एव देहिनोऽपवृक्षाः** भां० मां०।–**म्यते त च तत्त्वज्ञानं सर्वदा वेस्थितमेवेति सर्व एव देहिनोऽपवृक्षाः** वा० बा०। "तत्त्वज्ञानस्योत्पत्तौ सत्यां मोक्षो भवद्भिरिष्यते, तच्च तत्त्वज्ञानं सर्वदाऽवस्थितमेवेति मुक्ताः सर्व एव देहिनः स्युः"–तत्त्वसं० पञ्जि० पृ० २९ पं० २६। १७ "तस्य च सर्वदाऽवस्थितत्वेन"–तत्त्वसं० पञ्जि० पृ० २९ पं० २७।

लोकव्यवहारोच्छेदश्च सत्कार्यवादाभ्युपगमे। तथाहि—हिताऽहितप्राप्ति-परिहाराय लोकः प्रवर्त्तते, न च तत्पक्षे किञ्चिदप्राप्यम् अहेयं वा समस्तीति निर्व्यापारमेव सकलं जगत् स्यादिति कथं न सकलव्यवहारोच्छेदप्रसङ्गः?

निषिद्धे च सत्कार्यवादे 'असत् कार्यं कारणे' इति सिद्धमेव—सदसतोः परस्परपरिहारस्थितत्वेन प्रकारान्तरासम्भवात्—तथापि परोपन्यस्तदूषणस्य दूषणाभासताप्रतिपादनप्रकारो लेशतः प्रदर्श्यते—तत्र यत् तावदुक्तं परेण 'असत् कर्तुं नैव शक्यते, निःस्वभावत्वात्' इति, तदसिद्धम्; वस्तुस्वभावस्यैव विधीयमानत्वाभ्युपगमात् तस्य च नैरूप्यासिद्धेः। अथ प्राग् उत्पत्तेर्निःस्वभावमेव तत्, न; तस्यैव निःस्वभावत्वायोगात्। न यतः सस्वभाव एव निःस्वभावो युक्तः वस्तुस्वभावप्रतिषेधलक्षणत्वान्निःस्वभावत्वस्य। न च क्रियमाणं वस्तु उत्पादात् प्रागस्ति येन तदेव निःस्वभावं सिद्ध्येत्। न च वस्तुविरहलक्षणमेव धर्मिणं निरूपं पक्षीकृत्य 'नैरूप्यात्' इति हेतुः प(क)क्षीक्रियत इति वक्तव्यम्, सिद्धसाध्यताप्रसङ्गात् यतो न वस्तुविरहः केनचिद् विधीयमानतयाऽभ्युपगतः। अनैकान्तिकश्चायं हेतुः विपक्षे बाधकप्रमाणाऽप्रदर्शनात् कारणशक्तिप्रतिनियमाद्धि किञ्चिदेवासत् क्रियते यस्योत्पादको हेतुर्विद्यते; यस्य तु शशशृङ्गादेर्नात्यु(नास्त्यु)त्पादकः तन्न क्रियत इति अनेकान्त एव, यतो न सर्वं सर्वस्य कारणमिष्टम्। न च 'यद् असत् तत् क्रियत एव' इति व्याप्तिरभ्युपगम्यते किं तर्हि? यद् विधीयते उत्पत्तेः प्राक् तत् असदेवेत्यभ्युपगमः। अथ तुल्येऽपि असत्कारित्वे हेतूनां किमिति सर्वैः सर्वस्यासतो हेतुर्न भवतीत्यभिधीयते, असदेतत्, भवत्पक्षेऽप्यस्य चोद्यस्य समानत्वात्। तथाहि—तुल्ये सत्कारित्वे किमिति सर्वैः सर्वस्य सतो हेतुर्न भवतीत्यसत्कार्यवादिनाऽप्येतदभिधातुं शक्यत एव। न च भवन्मतेन किञ्चिदसदस्ति येन तन्न क्रियते, न च कारणशक्तिनियमात् सदपि नभोऽम्बुरुहादि न क्रियते इत्युत्तरमभिधानीयम्, इतरत्राप्यस्य समानत्वात्। तदुक्तम्—

"त्रैगुण्यस्याविशेषेऽपि न सर्वं सर्वकारकम्"।
[तत्त्वसं० का० २८]

अभ्युपगमे(म)वादेन च 'यद्वत् तद्वत्' इति साम्यमुक्तम् न पुनस्तदस्ति। तथाहि—सत्यपि कार्य-कारणयोर्भेदे कस्यचित् किञ्चित् कारणं भवति—स्वहेतुपरम्परायातत्वात् तथाभूतस्वभावप्रतिनियमस्य—अभेदे च तयोरेकस्यैकत्रैकस्मिन्नेव काले हेतुकर्त्वं चान्योन्यविरुद्धं कथं सम्भवेत् विरुद्धधर्माध्यासनिबन्धनत्वात् वस्तुभेदस्य? तदुक्तम्—

"भेदे हि कारणं किञ्चिद् वस्तुधर्मतया भवेत्।
अभेदे तु विरुद्ध्येते तस्यैकस्य क्रियाऽक्रिये" ॥
[ ]

अथ असत्कार्यवादिनः कारणानां प्रतिनियताः शक्तयो न घटन्ते कार्यात्मकानामवधीनामनिष्पत्तेः न ह्यवधिमन्तरेणावधिमतः सद्भावः सम्भवति। प्रयोगश्चात्र—ये सद्भूतकार्यावधिशून्याः न ते नियतशक्तयः, यथा शशशृङ्गादयः, सद्भूतकार्यावधिशून्याश्च शालिबीजादयो भावा इति व्यापकानुपलब्धिः। सत्कार्यवादे तु कार्यावधिसद्भावाद् युक्तः कारणप्रतिनियमः। उक्तं च—

---

१ पृ० २८२ पं० २२ तथा ३८। २ "प्राग् उत्पत्तेस्तन्निःस्वभावमेवेति चेत्, न; तस्यैव निःस्वभावत्वायोगात्। न हि स्वभाव एव निःस्वभावो युक्तः"—तत्त्वसं० पञ्जि० पृ० ३० पं० १२। ३–**त् नियतः सस्व**–मां०। ४ "नीरूपं धर्मिणं पक्षीकृत्य 'नैरूप्यात्' इति हेतुः क्रियते"–तत्त्वसं० पञ्जि० पृ० ३० पं० १५। ५ –**दको स्तन्न क्रि**–वा० बा०। अत्र 'नास्त्युत्पादको हेतुस्तत्र' इति पाठः संभाव्यते। "यस्य तु वियदब्जादेर्नास्ति कारणं तन्न क्रियते"–तत्त्वसं० पञ्जि० पृ० ३० पं० १८। ६ **असत्तुल्येऽपि** वा० बा० विना। ७–**पि सत्**–वा० बा०। ८ **सर्वस्य सतो हेतुर्भव**–वा० बा०। ९–**ति सर्वस्य सतो हेतु भव**–वा० बा०। १०–**दिनोऽप्येत**–वा० बा० विना।

११ "त्रैगुण्यस्याविभेदेऽपि सर्वं सर्वकारकम्। यद्वत् तद्वदसत्त्वेऽपि न सर्वं सर्वकारकम्" ॥
तत्त्वसं० का० २८ पृ० ३०।

१२ "एतच्च अभ्युपगम्योक्तम्–'यद्वत् तद्वत्' इति, न पुनः साम्यमस्ति"–तत्त्वसं० पञ्जि० पृ० ३० पं० २७। १३ **काले नुतमहे कत्वं चान्यो**–वा० बा०। "काले हेतुत्वमहेतुत्वं च परस्परविरुद्धम्"–तत्त्वसं० पञ्जि० पृ० ३१ पं० ३। १४ तत्त्वसं० पञ्जि० पृ० ३१ पं० ४।

"अवधीनामनिष्पत्तेर्नियतास्ते न शक्तयः ।
सत्त्वे च नियमस्तासां (युक्तः) सावधिको ननु" ॥
[तत्त्वसं० का० २९]

इति, असदेतत्; हेतोरनैकान्तिकत्वात् । तथाहि-अवधीनामनिष्पत्तौ 'क्षीरस्य दध्युत्पादने शक्तिः' इति व्यपदेशः केवलं मा भूत्, यत् पुनरनध्यारोपितं सर्वोपाधिनिरपेक्षं वस्तुस्वरूपम्-यदनन्तरं पूर्वमदृष्टमपि वस्त्वन्तरं प्रादुर्भवति-तस्याप्रतिषेध एव । न च शब्द-विकल्पानां यत्र व्यावृत्तिस्तत्र वस्तुस्वभावोऽपि निवर्त्तते, यतो व्यापकः स्वभावः कारणं वा व्यावर्त्तमानं स्वं व्याप्यं स्वकार्यं वाऽऽदाय निवर्त्तते इति युक्तम् तयोस्ताभ्यां प्रतिबन्धात् नान्यः अतिप्रसङ्गात् । न च 'पयसो दधि शक्तिः' इत्यादिव्यपदेशः विकल्पो वा भावानां व्यापकः स्वभावः कारणं वा येनासौ निवर्तमानः स्व(स्वं) भावं निवर्त्तयेत् तद्व्यतिरेकेणापि भावसद्भावात् । यतो व्यपदेशाः विकल्पाश्च निरंशैकस्वभावे वस्तुनि यथाभ्यासमनेकप्रकाराः प्रवर्त्तमाना उपलभ्यन्ते-एकस्यैव शब्दादेर्भावस्य अनित्यादिरूपेण भिन्नसमयस्थायिभिर्वादिभिः व्यपदेशात् विकल्पनाच्च-तत्तादात्म्ये वस्तुनश्चित्रत्वप्रसक्तिः व्यपदेशविकल्पवत्, शब्दविकल्पानां वस्तुस्वरूपवेद(वदे)कत्वप्रसङ्गः । न ह्येकं चित्रं युक्तम् इ(अ)तिप्रसङ्गात् । ततः शक्तिप्रतिनियमात् किञ्चिदेव असद् विधीयते न सर्वमित्यनैकान्तिकोऽपि 'नैरूप्यात्' इति हेतुः । 'उपादानग्रहणात्' इत्यादिहेतुचतुष्टयस्य अत एवानैकान्तिकत्वम् । तथाहि-यदि कार्यसत्त्वकृतमेव प्रतिनियतोपादानग्रहणं क्वचित् सिद्धं भवेत् तदैतत् स्यात् यावता कारणशक्तिप्रतिनियमकृतमपि प्रतिनियतोपादानग्रहणं घटत एव, सर्वस्मात् सर्वस्य सम्भवोऽपि-कारणशक्तिप्रतिनियमादेव-च न भवति सर्वस्य सर्वार्थक्रियाकारिभावत्वस्यासिद्धेः । यदपि 'अकार्यातिशयम्' इत्याद्युक्तम्, तदप्यभिप्रायापरिज्ञानादेव; यतो नास्माभिः 'अभाव उत्पद्यते' इति निगद्यते—येन विकारापत्तौ तस्य स्वभावहानिप्रसक्तिरापद्येत-किन्तु वस्त्वेव समुत्पद्यते इति प्राक् प्रतिपादितम्, तच्च वस्तु प्रागुत्पादात् 'असत्'—उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः निष्पन्नस्यातिप्रसङ्गतः कार्यत्वानुपपत्तेश्च—इत्युच्यते, यस्य च कारणस्य सन्निधानमात्रेण तत् तथाभूतमुदेति तेन तत् 'क्रियते' इति व्यपदिश्यते, न व्यापारसमावेशात् किञ्चित् केनचित् क्रियते, सर्वधर्माणामव्यापारत्वात् । नाप्यसत् किञ्चिदस्ति यन्नाम क्रियते असत्त्वस्य वस्तुस्वभावप्रतिबन्धलक्षणत्वात् । अपि च, यदि अकार्यातिशयवत् तदसन्न क्रियत इत्यभिधीयते, सदपि सर्वस्वभावनिष्पत्तेरकार्यातिशयमेवेति कथं क्रियते ? ततः 'शक्तस्य शक्यकरणात्' इत्ययमप्यनैकान्तिकः । सत्कार्यवादे च कारणभावस्याऽघटमानत्वात् 'कारणभावात्' इत्ययमप्यनैकान्तिकः ।

अथवा कार्यत्वासम्भवस्य सतः प्राक् प्रतिपादितत्वात् असत्कार्यवाद एव चोपादानग्रहणादिनियमस्य युज्यमानत्वात् 'उपादानग्रहणात्'इत्यादिहेतुचतुष्टयस्य साध्यविपर्ययसाधनाद् विरु-

---

१-**वधिनो ननु** वा० बा० ।

२ "नैवं तेषामनिष्पत्त्या मा भूच्छब्दस्तथाऽपरम् । सर्वोपाधिविविक्तस्य वस्तुरूपस्य न क्षतिः" ॥
तत्त्वसं० का० ३० पृ० ३१ ।

३-**वल मा भूत्** वा० बा० विना । ४ **य पुन**-वा० बा० विना । ५ **न श**-वि० ।

६ "न नाम रूपं वस्तूनां विकल्पा वाचकाश्च यत् । विश्वकल्पाः प्रवर्तन्ते यथाभ्यासमभेदिनि" ॥
तत्त्वसं० का० ३१ पृ० ३१ ।

७-**पकाः स्वभावाः कार**-वा० बा० विना । ८-**र्यं चादाय** डे० । ९-**मानः स्वभावः स्वभावं निव**-हा० वि० । "येन तन्निवर्तमानं तथाविधं वस्तु निवर्तयेत्"-तत्त्वसं० पञ्जि० पृ० ३१ पं० २७ । १०-**मये स्थायि**-भां० मां० विना । ११-**नाच्चातत्तादा**-वा० बा० । १२ "वस्तुस्वरूपवदेव वा शब्दविकल्पानामेकरूपत्वप्रसङ्गः"-तत्त्वसं० पञ्जि० पृ० ३२ पं० ७ । १३ **न ह्येकचित्रव्यक्तमि**-भां० । **न ह्येकं चित्रशक्तमि**-आ० हा० वि० । **न ह्येकं चिदशक्तमि**-मां० । "न ह्येकं चित्रमिति युक्तम् अतिप्रसङ्गात्"-तत्त्वसं० पञ्जि० पृ० ३२ पं० ८ । १४ पृ० २८२ पं० १८ । १५-**सर्वस्यासम्भ**-वा० बा० विना । १६ पृ० २८३ पं० १२ तथा ३८ । १७-**त्पाद्य इति** वा० बा० विना । १८ पृ० ३०१ पं० ७-११ । १९-**ण च तत्** वा० बा० विना । २०-**मादेशा**-वा० बा० ।

२१ "अपि च, यदि अकार्यातिशयत्वाद् असन्न क्रियते"-तत्त्वसं० पञ्जि० पृ० ३२ पं० २० ।

द्धता । अथ यदि 'असदेवोत्पद्यते' इति भवतां मतम् तत् कथं सदसतोरुत्पादः सूत्रे प्रतिषिद्धः ? उक्तं च तत्र-"अनुत्पन्नाश्च महामते सर्वधर्मा(र्माः) सदसतोरनुत्पन्नत्वात्" [ ] इति, न; वस्तूनां पूर्वापरकोटिशून्यक्षणमात्रावस्थायी स्वभाव एव उत्पाद उच्यते भेदान्तरप्रतिक्षेपेण तन्मात्रजिज्ञासायाम्, न पुनर्वैभाषिकपरिकल्पिता जातिः संस्कृतलक्षणा प्रतिषेत्स्यमानत्वात् तस्याः । नापि वैशेषिकादिपरिकल्पित(तः) सत्तासमवायः स्वकारणसमवायो(यो वा, तयो)रपि निषेत्स्यमानत्वात्, नित्यत्वात् तयोः परमतेन, नित्यस्य च जन्मानुपपत्तेः । उक्तं च—

"सत्ता-स्वकारणाऽऽश्लेषकरणात् कारणं किल ।
सा सत्ता स च सम्बन्धो नित्यौ कार्यमथेह किम्" ॥ [ ] इति ।

स एवमात्मक उत्पादो नाऽसना(ता) तादात्म्येन सम्बध्यते, सदसतोर्विरोधात्-न हि असत् सद् भवति । नापि सता पूर्वभाविना सम्बध्यते तस्य पूर्वमसत्त्वात्; कल्पनाबुद्ध्या तु केवलमसता वस्तु सम्बध्यते, न ह्यसन्नाम किञ्चिदस्ति यद् उत्पत्तिमाविशेत् 'असदुत्पद्यते' इति तु कल्पनाविरचितव्यवहारमात्रम् । कल्पनाबीजं तु प्रतिनियतपदार्थाऽनन्तरोपलब्धस्य रूपस्योपलब्धिलक्षणप्राप्तस्योत्पत्त्यवस्थातः प्रागनुपलब्धिः । तदेवमुत्पत्तेः प्राक् कार्यस्य न सत्त्वं धर्मः, नाप्यसत्त्वम् स्यैवा(त्त्वम् तस्यैवा)भावात् । अपि च, पयःप्रभृतिषु कारणेषु दध्यादिकं कार्यमस्तीति यद्युच्यते तदा वक्तव्यम्—किं व्यक्तिरूपेण तत् तत्र सत्, अथ शक्तिरूपेण ? तत्र यदि व्यक्तिरूपेणेति पक्षः, स न युक्तः; क्षीराद्यवस्थायामपि दध्यादीनां स्वरूपेणोपलब्धिप्रसङ्गात् । नापि शक्तिरूपेण, यतस्तद्रूपं दध्यादेः कार्यानु(दु)पलब्धिलक्षणप्राप्तात् किमन्यत्, आहोस्विद् तदेव ? यदि तदेव तदा पूर्वमेवोपलब्धिप्रसङ्गो दध्यादेः । अथ अन्यदिति पक्षस्तदा कारणात्मनि कार्यमस्तीत्यभ्युपगमस्त्यक्तो भवेत् कार्याद् भिन्नतनोः शक्त्यभिधानस्य पदार्थान्तरस्य सद्भावाभ्युपगमात् । तथाहि—यदेव आविर्भूतविशिष्टरस-वीर्यविपाकादिगुणसमन्वितं पदार्थस्वरूपं तदेव दध्यादिकं कार्यमुच्यते; क्षीरावस्थायां च तद् उपलब्धिलक्षणप्राप्तमनुपलभ्यमानमसद्व्यवहारविषयत्वमवतरति, यच्चान्यच्छक्तिरूपम् तत् कार्यमेव न भवति; न च अन्यस्य भावेऽन्यत् सद् भवति अतिप्रसङ्गात् । न च उपचारकल्पनया तद्व्यपदेशसद्भावेऽपि वस्तुव्यवस्था, शब्दस्य वस्तुप्रतिबन्धाभावात् तद्भावेऽपि वस्तुसद्भावासिद्धेः ।

यदपि 'भेदानामन्वयदर्शनात् प्रधानास्तित्वम्' उक्तम् तत्र हेतोरसिद्धत्वम्, न हि शब्दादि-

---

१ **ततः क**-भां० मां० । २-**मतेः** भां० मां० वा० बा० । ३ **सर्वाधर्मा सदसतोरनु**-हा० वि० । **सर्वधर्मात्सदनु**-वा० बा० । "सर्वधर्माः सदसतोरनुत्पन्नत्वात्"-तत्त्वसं० पञ्जि० पृ० ३२ पं० २७ । "पुनरपरं महामते ! क्रियाकारणरहिताः सर्वधर्मा न उत्पद्यन्ते अकारकत्वेन । उच्यन्ते अनुत्पन्नाः सर्वधर्माः निःस्वभावाश्च"-लङ्कावतारसू० पृ० ११५ पं० ५ ।

४ "उत्पादो वस्तुभावस्तु सोऽसता न सता तथा । संबध्यते कल्पिकया केवलं त्वसता धिया" ॥
तत्त्वसं० का० ३२ पृ० ३३ ।

५-**कल्पितसत्तासमवायो वा वरपि निषेत्स्य**-हा० वि० ।-**कल्पितसत्तासमवायो वा रपि निषेत्स्य**-भां० मां० । "नापि वैशेषिकपरिकल्पितः सत्तासमवायः" तत्त्वसं० पञ्जि० पृ० ३३ पं० ६ । ६ "स्वकारणसमवायो वा तयोरपि निषेत्स्यमानत्वात्"-तत्त्वसं० पञ्जि० पृ० ३३ पं० ७ । ७ तत्त्वसं० पञ्जि० पृ० ३३ पं० ८ । ८ **नानः तादा**-वा० बा० विना । "नासता"-तत्त्वसं० पञ्जि० पृ० ३३ पं० १० ।

९ "यदिदं वस्तुनो रूपमेकानन्तरमीक्ष्यते । प्रागासीन्नेति तद्बीजं प्राग्भूते त्विदमस्ति न" ॥
तत्त्वसं० का० ३३ पृ० ३३ ।

१०-**सत्त्व स्यैवा**-वा० बा० विना ।

११ "क्षीरादिषु च दध्यादि शक्तिरूपेण यन्मतम् । का शक्तिस्तत्र दध्यादि यदि दृश्येत दुग्धवत्" ॥
तत्त्वसं० का० ३४ पृ० ३३ ।

१२ **यदुच्य**-वि० । १३ "दध्यादेः कार्यरूपात्"-तत्त्वसं० पञ्जि० पृ० ३४ पं० ४ ।

१४ "अन्यच्चेत् कथमन्यस्य भावेऽभक्ष्याऽन्यदुच्यते । न हि सत्त्वस्य सद्भावः सद्भावो दुःख-मोहयोः" ॥
तत्त्वसं० का० ३५ पृ० ३४ ।

१५-**न्यस्याभावेऽसद् भव**-वि० । १६ पृ० २८४ पं० १० ।

१७ सत्त्वाद्यनुगतं व्यक्तं न सिद्धं नः कथंचन । आन्तरत्वात् सुखादीनां व्यक्तत्वात् तत्स्वसंविदः" ॥
तत्त्वसं० का० ३६ पृ० ३४ ।

लक्षणं व्यक्तं सुखाद्यन्वितं सिद्धम् सुखादीनां ज्ञानरूपत्वात् शब्दादीनां च तद्रूपविकलत्वात् न सुखाद्यन्वितत्वम्। तथा च प्रयोगः—ये ज्ञानरूपविकलाः न ते सुखाद्यात्मकाः, यथा परोपगत आत्मा, ज्ञानरूपविकलाश्च शब्दादय इति व्यापकानुपलब्धिः। अथ ज्ञानमयत्वेन सुखादिरूपत्वस्य व्याप्तिर्यदि सिद्धा भवेत् तदा तन्निवर्तमानं सुखादिमयत्वमादाय निवर्त्तेत; न च सा सिद्धा पुरुषस्यैव संविद्रूपत्वेनेष्टेरिति, असदेतत्; सुखादीनां स्वसंवेदनरूपतया स्पष्टमनुभूयमानत्वात्। तथाहि—स्पष्टेयं सुखादीनां प्रीति-परितापादिरूपेण शब्दादिविषयसन्निधानेऽसन्निधाने च प्रकाशान्तरनिरपेक्षा प्रकाशात्मिका स्वसंवित्तिः। यच्च प्रकाशान्तरनिरपेक्षं सातादिरूपतया स्वयं सिद्धिमवतरति तत् 'ज्ञानम्' 'संवेदनम्' 'चैतन्यम्' 'सुखम्' इत्यादिभिः पर्यायैरभिधीयते। न च सुखादीनामन्येन संवेदनेनानुभा(भ)वादनुभवरूपता प्रथते, तत्संवेदनस्याऽसातादिरूपताप्रसक्तेः स्वयमतदात्मकत्वात्। तथाहि—योगिनः अनुमानवतो वा परकीयं सुखादिकं संवेदयतो न सातादिरूपता अन्यथा योग्यादयोऽपि साक्षात् सुखाद्यनुभाविन इवातुरादयः स्युः योग्यादिवद् वा अन्येषामप्यनुग्रहोपघातौ न स्याताम् अविशेषात्। संवेदनस्य च सातादिरूपत्वाभ्युपगमे संविद्रूपत्वं सुखादेः सिद्धम्। इदमेव हि सुखं दुःखं च नः 'यत् सातमसातं च संवेदनम्' इति नानैकान्तिकता हेतोः। नाप्यसिद्धता, सर्वेषां बाह्यार्थवादिनां संविद्रूपरहितत्व(त्वस्य) शब्दादिषु सिद्धत्वात्। विज्ञानवादिमताभ्युपगमोऽन्यथा प्रसज्येत तथा चेष्टसिद्धिरेव। विरुद्धताऽप्यस्य हेतोर्न सम्भवति सपक्षे भावात्। न च यथा बहिर्देशावस्थितनीलादिसन्निधानवशाद् अनीलादिस्वरूपमपि संवेदनं नीलनिर्भासं संवेद्यते तथा बाह्यसुखाद्युपधानसामर्थ्याद् असातादिरूपमपि त्सा(सा)तादिरूपं लक्ष्यते तेन संवेदनस्य सातादिरूपत्वेऽपि न सुखादीनां संविद्रूपत्वं सिद्ध्यति अतोऽनैकान्तिकता हेतोरिति वक्तव्यम्, अभ्यास-प्रकृतिविशेषत एकस्मिन्नपि त्रिगुणात्मके वस्तुनि प्रीत्याद्याकारप्रतिनियतगुणोपलब्धिदर्शनात्। तथाहि—भावनावशेन मद्याऽङ्गनादिषु कामुकादीनाम् जातिविशेषाच्च करभादीनां केषाञ्चित् प्रतिनियताः प्रीत्यादयः सम्भवन्ति न सर्वेषाम्, एतच्च शब्दादीनां सुखादिरूपत्वान्न युक्तम्, सर्वेषामभिन्नवस्तुविषयत्वान्नीलादिविषयसंवित्तिवत् प्रत्येकं चित्रा संवित् प्रसज्येत। अथ यद्यपि त्र्यात्मकं वस्तु तथाप्यदृष्टादिलक्षणसहकारिवशात् किञ्चिदेव कस्यचिद् रूपमाभाति न सर्वं सर्वस्य, असदेतत्; तदाकारशून्यत्वादवस्त्वालम्बनप्रतीतिप्रसक्तेः। तथाहि—व्याकारं तद् वस्तु एकाकाराश्च संविदः संवेद्यन्त इति कथं अनालम्बनास्ता न भवन्ति? प्रयोगः—यद् यदाकारं संवेदनं न भवति न तत् तद्विषयम्, यथा चक्षुर्ज्ञानं न शब्दविषयम्, व्यात्मकवस्त्वाकारशून्याश्च यथोक्ताः संविद इति व्यापकानुपलब्धिः तथापि तद्विषयत्वेऽतिप्रसङ्गापत्तिर्विपर्यये

१–**यसन्निधाने च प्रका**–वा० बा० विना०। २–**दनेनाभवा**–वा० बा० विना। ३–**त् यथा हि** बा० बा०। ४ "शब्दादिषु संविद्रूपरहितत्वस्य सिद्धत्वात्। अन्यथा विज्ञानवादिमतमेवाऽङ्गीकृतं स्यात्"–तत्त्वसं० पञ्जि० पृ० ३५ पं० ११। ५–**पि तत्साता**–कां०। "बाह्यसुखाद्युपधानवशाद् असातादिरूपमपि सातादिरूपमिव लक्ष्यते"–तत्त्वसं० पञ्जि० पृ० ३५ पं० १५।

६ "एकत्रैव च शब्दादौ भावना–जातिभेदतः। सङ्गादयः संभविनो लक्ष्यन्ते नियताः स्फुटम्" ॥
तत्त्वसं० का० ३७ पृ० ३५।

७ "एतच्च शब्दादीनां सुखादिरूपत्वे सति न युक्तम्। कस्मात्? इत्याह"–तत्त्वसं० पञ्जि० पृ० ३५ पं० २५।

८ "एकवस्त्वनुपातित्वे चित्रा संवित् प्रसज्यते। अदृष्टादिवशान्नो चेन्न स्याद् वस्त्वनुयायिनी" ॥
तत्त्वसं० का० ३८ पृ० ३५।

९ "आदिशब्देन भावना–जाति–भेद–जिघृक्षादीनां ग्रहणम्"–तत्त्वसं० पञ्जि० पृ० ३६ पं० ४।

१० "व्याकारं वस्तुनो रूपमेकाकाराश्च तद्विदः। ताः कथं तत्र युज्यन्ते भाविन्यस्तद्विलक्षणाः" ॥
तत्त्वसं० का० ३९ पृ० ३६।

११–**पर्यये वा बा**–वा० बा० विना।

बाधकं प्रमाणम्। न च यथा प्रत्यक्षेण गृहीतेऽपि सर्वात्मना वस्तुनि अभ्यासादिवशात् क्वचिदेव क्षणिकत्वादौ निश्चयोत्पत्तिर्न सर्वत्र तद्वद् अदृष्टादिबलाद् एकाकारा संविद् उदेष्यतीत्यभिधातुं क्षमम्, क्षणिकादिविकल्पस्यापि परमार्थतो वस्तुविषयत्वानभ्युपगमात्, वस्तुनो विकल्पागोचरत्वात् परम्परया वस्तुप्रतिबन्धात् तथाविधतत्प्राप्तिहेतुतया तु तस्य प्रामाण्यम्। उक्तं च—

"लिङ्ग–लिङ्गिधियोरेवं पारंपर्येण वस्तुनि।
प्रतिबन्धात् तदाभासशून्ययोरप्यबन्धनम्" ॥ [ ] इति।

परैस्तु परमार्थत एव वस्तुविषयत्वमिष्टं प्रीत्यादिप्रतिपत्तीनाम्; अन्यथा सुखाद्यात्मनां शब्दादीनामनुभवात् सुखानुभवख्यातिरित्येतदसङ्गतं स्यात्। सुखादिसंविदां च सविकल्पकत्वान्न किञ्चिदनिश्चितं रूपमस्तीति सर्वात्मनाऽनुभवख्यातिप्रसक्तिः यतः स्वार्थप्रतिपत्ति(त्तिः) निश्चयानामियमेव यत् तन्निश्चयनं नाम।

यदपि 'प्रसाद–ताप–दैन्याद्युपलम्भात् सुखाद्यन्वितत्वं सिद्धं शब्दादीनाम्' इत्यभिहितम्, तदनैकान्तिकम्। तथाहि—योगिनां प्रकृतिव्यतिरिक्तं पुरुषं भावयतां तमालम्ब्य प्रकर्षप्राप्तयोगानां प्रसादः प्रादुर्भवति प्रीतिश्च, अप्राप्तयोगानां त(च) द्रुततरमपश्यतामुद्वेग आविर्भवति, जडमतीनां च प्रकृत्यावरणं प्रादुर्भवति। न च परैः पुरुषस्त्रिगुणात्मकोऽभीष्ट इति 'प्रसाद–ताप–दैन्यादिकार्योपलब्धेः' इत्यस्यं कथं नानैकान्तिकता? न च सङ्कल्पात् प्रीत्यादीनि प्रादुर्भवन्ति न पुरुषादिति वाच्यम्, शब्दादिष्वप्यस्य समानत्वात्; सङ्कल्पमात्रभावित्वे च सुखादयो बाह्या न स्युः सङ्कल्पस्य संविद्रूपत्वात्। बाह्यविषयोपधानमन्तरेणापि पुरुषदर्शने प्रीत्याद्युत्पत्तिदर्शनात् 'बाह्यसुखाद्युपधानबलात् सातादिरूपं संवेदनस्य' इत्यपि सव्यभिचारमेव इष्टानिष्टविकल्पादनावाश्रित(दनाश्रित)-बाह्यविषयसन्निधानं प्रसिद्धमेव हि सुखादिवेदनं कथं तत् परोपधानमेव युक्तम्? न च मनोऽपि त्रिगुणं तदुपधानवशात् तदाविर्भवतीति वक्तव्यम्, 'यदेव हि प्रकाशान्तरनिरपेक्षं स्वयं सिद्धम्' इत्यादिना संविद्रूपत्वस्य तत्र साधितत्वात् अतः 'समन्वयात्' इत्यसिद्धो हेतुः। नैकान्तिकश्च प्रधानाख्येन कारणेन हेतोः क्वचिदप्यन्वयासिद्धेः। तथाहि—व्यापि नित्यमेकं त्रिगुणात्मकं कारणं साधयितुमिष्टम्, न चैवंभूतेन कारणेन हेतोः प्रतिबन्धः प्रसिद्धः। न चायं नियमः—यदात्मकं कार्यं कारणमपि तदात्मकमेव, तयोर्भेदात्। तथाहि—हेतुमदादिभिर्धर्मैर्युक्तं व्यक्तमभ्युपगम्यते तद्विपरीतं चाव्यक्तमिति कथं न कार्य-कारणयोर्भेदादनैकान्तिको हेतुः? धर्मिविशेषविपरीतसाधनाद् विरुद्धोऽप्ययं हेतुः। तथाहि—एको नित्यस्त्रिगुणात्मकः कारणभूतो धर्मी साधयितुमिष्टः तद्विपरीतश्च अनेकोऽनित्यश्च ततः सिद्धिमासादयति, यतो व्यक्तं नैकया त्रिगुणात्मिकया स्वात्मभूतया जात्या समन्वितमुपलभ्यते किं तर्हि? अनेकत्वाऽनित्यत्वादिधर्मकलापोपेतमेव अतः कार्यस्याऽनि-

---

१ 'वचनम्'–तत्त्वार्थश्लोकवा० अ० १ सू० ११ श्लो० १३। २ "सुखाद्यनु–" तत्त्वसं० पञ्जि० पृ० ३६ पं० २२। ३ "इयमेव हि निश्चयानां स्वार्थप्रतिपत्तिः यत् तन्निश्चयनं नाम"–तत्त्वसं० पञ्जि० पृ० ३६ पं० २३। ४ पृ० २८३ पं० ४३ तथा पृ० २८४ पं० ११।

५ "प्रसादोद्वेगवरणान्येकस्मिन् पुंसि योगिनाम्। जायन्ते न च तद्रूपः पुमानभिमतः परैः" ॥
तत्त्वसं० का० ४० पृ० ३६।

६ "अजितयोगानां क्षिप्रतरमपश्यतामुद्वेगः, ये च प्रकृत्या जडमतयस्तेषां वरणमुपजायते"–तत्त्वसं० पञ्जि० पृ० ३७ पं० ३। ७–**नां तदद्भुतर**–कां०। ८ "गुरु वरणकमेव तमः"–माठरवृ० का० १३ पृ० २३। ९ पृ० २८४ पं० १२। १० पृ० ३०४ पं० १७। ११ "यच्च इष्टानिष्टविकल्पादनपेक्षितबाह्यविषयसन्निधानं सुखादिसंवेदनं प्रसिद्धं तत् कथं परोपधानात् स्यात्?"–तत्त्वसं० पञ्जि० पृ० ३७ पं० १०। १२ पृ० ३०४ पं० ७। १३ पृ० २८४ पं० १०।

१४ "सिद्धेऽपि त्रिगुणे व्यक्ते न प्रधानं प्रसिध्यति। एकं तत्कारणं नित्यं नैकजात्यन्वितं हि तत्" ॥
तत्त्वसं० का० ४१ पृ० ३७।

१५ **धर्मी वि**–भां० मां० वा० बा०। **धर्मविशेष**–वि० डे०। "धर्मविशेषविपरीतभावनात्"–तत्त्वसं० पञ्जि० पृ० ३७ पं० २३। १६ "एको नित्यस्त्रिगुणात्मकः कारणभूतो धर्मः साधयितुमिष्टः"–तत्त्वसं० पञ्जि० पृ० ३७ पं० २४।

त्यत्वाऽनेकत्वादिधर्मान्वयदर्शनात् कारणमपि तथैवानुमीयता(ते) । क्रम-यौगपद्याभ्यामर्थक्रिया-विरोधान्न नित्यस्य कारणत्वम् कारणभेदकृतत्वाच्च कार्यवैचित्र्यस्य अन्यथा निर्हेतुकत्वप्रसङ्गान्नैक-रूपस्यापि कारणत्वमिति विपर्ययसिद्धिप्रसक्तेर्न नित्यैकरूपप्रधानसिद्धिः । यदि तु अनित्याऽनेकरूपे कारणे 'प्रधानम्' इति संज्ञा क्रियते तदा अविवाद एव । यद्यपि 'सत् सत्' इत्येकरूपेण 'स एवायम्' इति च स्थिरेण स्वभावेनानुगता अध्यवसीयन्ते कल्पनाज्ञानेन भावास्तथापि नैषामेक-जात्यन्वयः स्वस्वभावव्यवस्थिततया देश-काल-शक्ति-प्रतिभासादिभेदात्, नापि स्थैर्यम् क्रमो-त्पत्तिमतां तथैव प्रतिभासनात् । 'प्रतिभासभेदश्च भावाद्(न्) भिनत्ति' इत्यसकृत् प्रतिपादितम् । 'मृद्विकारादिवत्' इति दृष्टान्तोऽपि साध्यसाधनविकलः एकजात्यन्वयस्य एककारणप्रभवत्वस्य च तत्राप्यसिद्धत्वात् । नैकं मृत्पिण्डादिकं कारणं मृदादिजातिश्चैकानुगता तत्र सिद्धेति वक्तव्यम्, यतो नैकोऽवयवी मृत्पिण्डादिरस्ति एकदेशावरणे सर्वावरणप्रसङ्गात्, नाप्येका जातिः, प्रति-व्यक्तिप्रतिभासभेदादिति प्रतिपादितत्वात् प्रतिपादयिष्यमाणत्वाच्च ।

'समन्वयात्' इत्यस्य हेतोः पुरुषैश्चानैकान्तिकत्वम् । तथाहि—चेतनत्वादिधर्मैरन्विताः पुमांसोऽभीष्टाः न च तथाविधैककारणपूर्वकास्त इष्यन्ते । न च चेतनाद्यन्वितत्वं पुरुषाणां गौणम् यतः अचेतनादिव्यावृत्ताः सर्वे एव पुरुषाः अतोऽर्थान्तरव्यावृत्तिरूपा चैतन्यादिजातिस्तदनुगामिनी कल्पिता न तु तात्त्विकी समस्तीति वक्तव्यम्, अन्यत्रापि समानत्वात्—यतः शब्दादिष्वपि अमुख्यं सुखाद्यन्वितत्वमसत्यप्येककारणपूर्वकत्वे पुरुषेष्विव भविष्यतीति कथं नानैकान्तिकत्वं हेतोः । मूलप्रकृत्यवस्थायां च सत्त्वरजस्तमोलक्षणा गुणाः गुणत्वाऽचेतनाऽभोक्तृत्वादिभिरन्विताः प्रधा-नपुरुषाश्च नित्यत्वादि(दिभि)रन्वितास्तथाभूतैककारणपूर्वकाश्च न भवन्तीत्यनैकान्तिकत्वमेव । तदेवं 'समन्वयात्' इत्यस्य हेतोरसिद्ध-विरुद्धाऽनैकान्तिकदोषदुष्टत्वान्न प्रधानसाधकत्वम् । अनेन-नैव न्यायेन 'परिमाणात्' 'शक्तितः प्रवृत्तेः' 'कार्यकारणभावात्' 'वैश्वरूप्यस्याविभागात्' इत्यादि-कानामपि न प्रधानास्तित्वसाधकत्वम् । तथाहि—साध्यविपर्यये च बाधकप्रमाणाप्रदर्शनात् सर्वेऽ-प्येतेऽनैकान्तिकाः । नहि प्रधानाख्यस्य हेतोरभावेन परिमाणादीनां विरोधः सिद्धः । तथाहि—यदि तावत् कारणमात्रस्यास्तित्वमत्र साध्यते तदा सिद्धसाध्यता; न ह्यस्माकं कारणमन्तरेण कार्य-स्योत्पादोऽभीष्टः, न च कारणमात्रस्य 'प्रधानम्' इति नामकरणे किञ्चिद् बाध्यते । अथ प्रेक्षावत् कारणमस्ति यद् व्यक्तं नियतपरिमाणमुत्पादयति शक्तितश्च प्रवर्तत इति साध्यते तदाऽनैकान्ति-कता, विनाऽपि हि प्रेक्षावता विधात्रा स्वहेतुसामर्थ्यात् प्रतिनियतपरिमाणादियुक्तस्योत्पत्त्यवि-रोधात् । न च प्रधानं प्रेक्षावत् कारणं युक्तम्, अचेतनत्वात् तस्य प्रेक्षायाश्च चेतनापर्यायत्वात् । अपि च, 'शक्तितः प्रवृत्तेः' इत्यनेन किमव्यतिरिक्तशक्तिमत् कारणं साध्यते, आहोस्विद् व्यतिरिक्ता-नेकशक्तिसम्बन्धि तदेकत्वादिधर्मकलापाध्यासितमिति कल्पनाद्वयम् । तत्र यद्याद्या कल्पना तदा सिद्धसाधनं कारणमात्रस्य ततः सिद्ध्यभ्युपगमात् । द्वितीयायां हेतोरनैकान्तिकता, तथाभूतेन क्वचिदप्यन्वयासिद्धेर्हेतुश्चासिद्धः यतो न विभिन्नशक्तियोगात् कस्यचित् क्वचित् कार्ये कारणस्य

१-नुमायताम् । भां० मां० विना० ।

२ "अयःशलाकाकल्पा हि क्रमसंगतमूर्तयः । दृश्यन्ते व्यक्तयः सर्वाः कल्पनामिश्रितात्मिकाः" ॥
तत्त्वसं० का० ४२ पृ० ३८ ।

३ पृ० २८४ पं० ११ । ४–**प्रसवत्वस्य** हा० वि० ।

५ "मृद्विकारादयो भेदा नैकजात्यन्विता स्तथा । सिद्धा नैकनिमित्ताश्च मृत्पिण्डादेर्विभेदतः" ॥
तत्त्वसं० का० ४३ पृ० ३८ ।

६ **चैकमृ**–वा० बा० विना ।

७ "चैतन्याद्यन्वितत्वेऽपि नैकपूर्वत्वमिष्यते । पुरुषाणाममुख्यं चेत् तदिहापि समं न किम्" ॥
तत्त्वसं० का० ४४ पृ० ३९ ।

८ "गुणत्वाऽचेतनत्वाऽभोक्तृत्वादिभिरन्विताः प्रधानपुरुषाश्च नित्यत्वादिभिर्युक्ताः"–तत्त्वसं० पञ्जि० पृ० ३९ पं० १२ ।

९ "प्रधानहेत्वभावेऽपि ततः सर्वं प्रकल्पते । शक्तेर्भेदेन वैचित्र्यं कार्यकारणतादिकम्" ॥
तत्त्वसं० का० ४५ पृ० ३९ ।

१० पृ० २८४ पं० १ । ११ पृ० २८४ पं० १ ।

प्रवृत्तिः सिद्धा स्वात्मभूतत्वाच्छक्तीनाम् । निरन्वयविनाशावष्टब्धत्वात् सर्वभावानां क्वचिदपि लयासिद्धेः 'अविभागाद् वैश्वरूप्यस्य' इत्ययमपि हेतुरसिद्धः लयो हि भवन् पूर्वस्वभावापगमे वा भवेत्, अनपगमे वा? यद्याद्यः पक्षः तथा(दा) निरन्वयविनाशप्रसङ्गः । अथ द्वितीयः तदा लयानु-पपत्तिः यतो नाविकलं स्वरूपं बिभ्रतः कस्यचिल्लयो नाम अतिप्रसङ्गात्–अतिविरुद्धमिदं परस्परतः 'अविभागः' 'वैश्वरूप्यं च' इति । विरुद्धा वा एते हेतवः प्रधानहेत्वभाव (भाव एव) स्वकार-णशक्तिभेदतः कार्यस्य परिमाणादिरूपेण वैचित्र्यस्य कार्यकारणभावादिना(दीनां) चोपपद्यमान-त्वात् । तथाहि—प्रधानं यदि व्यक्तस्य कारणं भवेत् तदा सर्वमेव विश्वं तत्स्वरूपवत् तदात्मकत्वा-देकमेव द्रव्यं स्यात्, ततश्च 'बुद्धिरेका एकोऽहङ्कारः पञ्च तन्मात्राणि' इत्यादिकः परिमाणविभा-गोऽसङ्गतः स्यादिति निष्परिमाणमेव जगत् स्यात् । तथा, प्रधानहेत्वभावे एव-प्राक्तनन्यायेन 'अभेदे न शक्तिर्न क्रिया' इत्यादिना-घटादिकरणे कुम्भकारादीनां शक्तितः प्रवृत्तिरुपपद्यते, कार्यकारणविभागोऽपि प्रधानहेत्वभावे एव युक्तो न तु तत्सद्भावे इति प्राक् प्रतिपादितम् । प्रधानसद्भावे वैश्वरूप्यमनुपपत्तिकमेव, सर्वस्य जगतः तन्मयत्वेन तत्स्वरूपवदेकत्वप्रसक्तेस्तदवि-भागो दूरोत्सारित एवेति न कुतश्चिद्धेतोः प्रधानसिद्धिः ।

यदपि प्रधानविकारबुद्धिव्यतिरिक्तं चैतन्यमात्मनो रूपं कल्पयन्ति "चैतन्यं पुरुषस्य स्वरूपम्" [ ] इत्यागमात् पुरुषश्च शुभाशुभकर्मफलस्य प्रधानोपनीतस्य भोक्ता न तु कर्ता सकलजगत्परिणतिरूपायाः प्रकृतेरेव कर्तृत्वाभ्युपगमात् । प्रमाणयन्ति चात्र—यत् सङ्घातरूपं वस्तु तत् परार्थं दृष्टम्, यथा शयनाऽऽसनाद्यङ्गादि, सङ्घातरूपाश्च चक्षुरादय इति स्वभावहेतुः, यश्चासौ परः स आत्मेति सामर्थ्यात् सिद्धम् । अत्र च 'चैतन्यं पुरुषस्य स्वरूपम्' इत्यादि वदता चैतन्यं नित्यैकरूपमिति प्रतिज्ञातम् तस्य नित्यैकरूपात् पुरुषादव्यतिरिक्तत्वात्, अध्यक्षविरुद्धं चेदम् रूपादिसंविदां स्फुटं स्वसंवित्त्या भिन्नस्वरूपावगमात् एकरूपत्वे त्वात्मनोऽनेकविधार्थस्य भोक्तृत्वाभ्युपगमो विरुद्ध आसज्येत अभोक्तृवस्थाव्यतिरिक्तत्वात् भोक्तृवस्थायाः, न च दिदृक्षादि-योगादविरोधः दिदृक्षा-शुश्रूषादीनां परस्परतोऽभिन्नानामुत्पादैरात्मनोऽप्युत्पादप्रसङ्गः तासां तद-व्यतिरेकात्, व्यतिरेके च 'तस्य ताः' इति सम्बन्धानुपपत्तिः उपकारस्य तन्निबन्धनस्याभावात्, भावे वा तत्रापि भेदाभेदविकल्पाभ्यामनवस्था-तदुत्पत्तिप्रसङ्गतो दिदृक्षाद्यभावान्न भोक्तृत्वम् । प्रयोगः—यस्य यद्भावव्यवस्थानिबन्धनं नास्ति नासौ प्रेक्षावता तद्भावेन व्यवस्थाप्यः, यथा आकाशं मूर्तत्वेन, नास्ति च भोक्तृत्वव्यवस्थानिबन्धनं पुरुषस्य दिदृक्षादि इति कारणानुपलब्धिः । न चायमसिद्धो हेतुरिति प्रतिपादितम् । कर्तृत्वाभावाद् भोक्तृत्वमपि तस्य न युक्तम् न ह्यकृतस्य कर्मणः फलं कश्चिदुपभुङ्क्ते अकृताभ्यागमप्रसङ्गात् । न च पुरुषस्य कर्माकर्तृत्वेऽपि प्रकृतिरस्याभिलषितमर्थ-मुपनयतीत्यसौ भोक्ता भवति, यतो नासावप्यचेतना सती शुभाशुभकर्मणां कर्त्री युक्ता येनासौ कर्मफलं पुरुषस्य सम्पादयेत् । अथ यथा पङ्गन्धयोः परस्परसम्बन्धात् प्रवृत्तिस्तथा महदादि लिङ्गं चेतनपुरुषसम्बन्धाच्चेतनावदिव धर्मादिषु कार्येष्वध्यवसायं करोतीत्यदोष एवायम्—उक्तं च—

"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्गन्धवदुभयोरभिसंयोगात् तत्कृतः सर्गः" ॥ [साङ्ख्यका० २१] इति,

१ पृ० २८४ पं० २ । २ "तदा"–तत्त्वसं० पञ्जि० पृ० ४० पं० ६ । ३ "प्रधानहेत्वभाव एव कारणशक्ति-भेदेन हेतुना कार्यस्य परिमाणादिरूपेण वैचित्र्यं(र्यस्य) कार्यकारणतादेश्च उपपद्यमानत्वाद् विरुद्धता हेतूनाम्"–तत्त्वसं० पञ्जि० पृ० ४० पं० १२ । ४ "तथा, कुलालादीनां घटादिकरणे शक्तितः प्रवृत्तिः प्रधानहेत्वभाव उपपद्यते, न तु तद्भावे । यथोक्तं प्राक्–'न च शक्तिर्न च क्रिया' इति"–तत्त्वसं० पञ्जि० पृ० ४० पं० १६ । ५ पृ० २९८ पं० १९ तथा ४० । ६ **तद्भावे** वा० बा० । ७ पृ० २९९ पं० १ तथा ३० । ८ योगद० समा० पा० सू० ९ भा० पृ० ३१ पं० ७ । ९–**सनाव्यंगादि** आ० भां० मां० ।–**सनात्मंगादि** वि० डे० ।–**सनात्प्रगादि** हा० । "पर्यङ्क-रथ-शरणादयः–" माठरवृ० पृ० २९ पं० २२ । "शयनाऽऽसनाऽभ्यङ्गादिवत्"–साङ्ख्य० कौ० पृ० ९१ पं० २ का० १७ । १०–**त्र चै**–वि० डे० । ११ प्र० पृ० पं० १४ । १२–**त्वे चात्म**–भां० मां० । १३–**स्य सङ्घा**–वि० डे० । १४ **लिङ्ग चे**–वा० बा० विना । माठरवृ० पृ० ३३ पं० २४ । १५ **कार्येषु व्यव**–वा० बा० । १६–"रपि संयोगस्तत्कृतः सर्गः"–साङ्ख्यका० ।

असदेतत्; यतो यदि प्रकृतिरकृतस्यापि कर्मणः फलमभिलषितमुपनयति तदा सर्वदा सर्वस्य पुंसोऽभिलषितार्थसिद्धिः किमिति न स्यात्? न च तत्कारणस्य धर्मस्याभावान्नासाविति वक्तव्यम्, यतो धर्मस्यापि प्रकृतिकार्यतया तदव्यतिरेकात् तद्वत् सदैव भाव इति सर्वदा सर्वस्याभिलषितफलप्राप्तिप्रसक्तिः। अपि च, यदि अभिलषितं फलं प्रकृतिरुपनयति तदा नानिष्टं प्रयच्छेत्, नहि कश्चिदनिष्टमभिलषति। किञ्च, उपनयतु नाम प्रकृति(तिः) फलम् तथापि भोक्तृत्वं पुंसोऽयुक्तम् अविकारित्वात्—नहि सुख-दुःखादिना आह्लाद-परितापादिरूपं विकारमनुपनीयमानस्य भोक्तृत्वमस्याकाशवत् सङ्गतम्। न च प्रकृतिरस्योपकारिणी अधिकृतात्मन्युपकारस्य कर्तुमशक्यत्वात्, विकारित्वे वा नित्यत्वहानिप्रसक्तिः अतादवस्थ्यस्यानित्यत्वलक्षणत्वात् तस्यापि विकारिण्यवश्यंभावित्वात्। अथ न विकारापत्त्या आत्मनो भोक्तृत्वमिष्टं किं तर्हि? बुद्ध्यध्यवसितस्यार्थस्य प्रतिबिम्बोदयन्यायेन संचेतनात्। तथाहि—बुद्धिदर्पणसङ्क्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्यध्यारोहति, तदेव भोक्तृत्वमस्य न तु विकारापत्तिः न च पुरुष(षः) प्रतिबिम्बमात्रसङ्क्रान्तावपि स्वरूपप्रच्युतिमान् दर्पणवदविचलितस्वरूपत्वात्, असदेतत्; यतो बुद्धिदर्पणारूढमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंसि सङ्क्रामत् ततः (ततः अव्यतिरिक्तम्) व्यतिरिक्तं वा इति वाच्यम्। यदि अव्यतिरिक्तमिति पक्षस्तदा तदेवोदय-व्यप(य)योगित्वं पुंसः प्रसज्येत उदयादियोगिप्रतिबिम्बाव्यतिरेकात् तत्स्वरूपवत्। अथ व्यतिरिक्तमित्यभ्युपगमस्तदा न भोक्तृता नो भोक्रवस्थातस्तस्य कस्यचिद् विशेषस्याभावात्। न चार्थप्रतिबिम्बसम्बन्धात् तस्य भोक्तृत्वं युक्तम् अनुपकार्योपकारकयोः सम्बन्धासिद्धेः उपकारकल्पनाया अपि भेदाभेदविकल्पतोऽनुपपत्तेः।

अपि च, पुरुषस्य दिदृक्षां प्रधानं यदि जानीयात् तदा पुरुषार्थं प्रति प्रवृत्तिर्युक्ता स्यात् नचैवम् तस्य जडरूपत्वात्, सत्यपि चेतनावत्सम्बन्धे न पङ्गन्धदृष्टान्तादप्रवृत्तिर्युक्तिमती, यतोऽन्धो यद्यपि मार्गं नोपलभते तथापि पङ्गोर्विवक्षामसौ वेत्ति तस्य चेतनावत्त्वात् न चैवं प्रधानं पुरुषविवक्षामवगच्छति तस्माऽचेतनावत्त्वेन जडरूपत्वात्। न च तयोर्नित्यत्वेन परस्परमनुपकारिणोः पङ्गन्धवत् सम्बन्धोऽपि युक्तः। अथ प्रधानं पुरुषस्य दिदृक्षामवगच्छतीत्यभ्युपगम्यते तथा सति भोक्तृत्वमपि तस्य प्रसज्यते करणज्ञस्य भुजिक्रियावेदकत्वाविरोधात्। न च य एकं जानाति तेनाऽपरमपि ज्ञातव्यमित्ययं न नियमः यतः प्रधानस्य कर्तृत्वे भोक्तृत्वमपि नियतसन्निधीति युक्तं वक्तुम् यतो यदि प्रधानस्य बुद्धिमत्त्वमङ्गीक्रियते तदा पुरुषवच्चैतन्यप्रसङ्गः बुद्ध्यादीनां चैतन्यपर्यायत्वात्, यतो यत् प्रकाशात्मतयाऽपरप्रकाशनिरपेक्षं स्वसंविदितरूपं चकास्ति तत् चैतन्यमुच्यते, तद् यदि बुद्धेरपि समस्ति चिद्रूपा सा किमिति न भवेत्? न च यथोक्तबुद्धिव्यतिरेकेणापरं चैतन्यमुपलक्षयामः यतस्तद्व्यतिरिक्तस्य पुरुषस्य सिद्धिर्भवेत्।

यदपि चिद्रूपत्वाद् बुद्धेर्भेदप्रसाधनाय परैरनुमानमुपन्यस्यते—यद् यद् उत्पत्तिमत्त्व-नाशित्वादिधर्मयोगि तत् तद् अचेतनम्, यथा रसादयः, तथा च बुद्धिरिति स्वभावहेतुरिति। तत्रापि वक्तव्यम्—किमिदं स्वतन्त्रसाधनम्, आहोस्वित् प्रसङ्गसाधनमिति? तत्र स्वतन्त्रसाधनेऽन्यतरासिद्धो हेतुः यतो यथाविधमुत्पत्तिमत्त्वमपूर्वोत्पादलक्षणम् नाशित्वं च निरन्वयविनाशात्मकं प्रसिद्धं बौद्धस्य न तथाविधं साङ्ख्यस्य तयोराविर्भाव-तिरोभावरूपत्वेन तेनाङ्गीकरणात् यथा च

---

१ **अविकृता**–वि० सं०। २ "वादमहार्णवोऽप्याह" इत्युल्लिख्य अतः 'विकारापत्तिः' इतिपर्यन्तोऽयं पाठः आचार्यमल्लिषेणेन स्याद्वादमञ्जर्यां निर्दिष्टः—स्याद्वा० मू० श्लो० १५ पृ० ११९ पं० ८–९–१०–११। एवमेव "वादमहार्णवोऽप्यस्मिन् दर्शने स्थितः प्राह" इति निर्दिश्य समुद्धृतोऽयं पाठः आचार्यराजशेखरेण–न्यायाव० टिप्प० पृ० १५३ पं० ८। तथैव च श्रीयशोविजयोपाध्यायेनापि "तथा चाह वादमहार्णवः" इति कृत्वा एष एव पाठः पठितः-शास्त्रवा० स्याद्वादक० पृ० १०९ प्र० पं० ६। ३ **ततः अव्यतिरिक्तम् व्यति**–वि० सं०। ४–**दय–व्ययथो**–वि० सं०। ५ इदं 'न' पदमधिकं भाति। ६–**शेषाभावात्** वा० बा० विना। ७ **दिग्दृक्षां** भां०। ८–**न्धो यु**–वा० बा० विना। ९–**सज्येत** मां० वि० डे०। १०–**मित्यन्न** कां० आ०।–**मित्यत्र नि**–भां० मां० वि० डे० हा०। ११ **प्रकाशतया**–वि० डे० कां०। **प्रकाशशतया**–भां० मां०। **प्रकाशशतयो**–आ० हा०। १२–**थाविधा सा**–वा० बा० विना।

साङ्ख्यस्य तौ प्रसिद्धौ न तथा बौद्धस्येति कथं नान्यतरासिद्धता? न च शब्दमात्रसिद्धौ हेतुसिद्धिः, वस्तुसिद्धौ वस्तुन एव सिद्धस्य हेतुत्वात्। तदुक्तम्—

"तस्यैव व्यभिचारादौ शब्देऽप्यव्यभिचारिणि।
दोषवत् साधनं ज्ञेयं वस्तुनो वस्तुसिद्धितः" ॥ [ ] इति।

अथ प्रसङ्गसाधनमिति पक्षस्तदा साध्यविपर्यये बाधकप्रमाणाप्रदर्शनादनैकान्तिकता, न ह्यत्र प्रतिबन्धोऽस्ति चेतनस्योत्पाद-नाशाभ्यां न भवितव्यमिति।

यदपि प्रकल्पितम्—

"वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य" ॥ [साङ्ख्यका० ५७] इति,

तदपि न सम्यक्; यतः क्षीरमपि न स्वातन्त्र्येण वत्सविवृद्धिं चेतस्याधाय प्रवर्तते किं तर्हि? कादाचित्केभ्यः स्वहेतुभ्यः प्रतिनियतेभ्यः समुत्पत्तिमासादयति; तच्च लब्धात्मलाभं वत्सविवृद्धिनिमित्ततामुपयातीत्यचेतनमपि प्रवर्तत इति व्यपदिश्यते, न त्वेवं प्रधानस्य कादाचित्की प्रवृत्तिर्युक्ता नित्यत्वात् तस्य अन्यहेत्वभावाच्च। तथाहि–न तावत् कादाचित्ककारणसन्निधानायत्ता कादाचित्की शक्तिरस्य युक्ता तदभावात्। नापि स्वाभाविकी सदा सन्निहिता अविकलकारणत्वेन सर्वस्याभ्युदयनिःश्रेयसलक्षणस्य पुरुषार्थस्य युगपदुत्पत्तिप्रसङ्गात्। न च बुद्धि–चैतन्ययोरभेदेऽपि चैतन्यस्यात्मत्वमप्रतिषिद्धमेव, यतो नास्माभिः चैतन्ये आत्मशब्दनिवेशः प्रतिषिध्यते किं तर्हि? यस्तत्र नित्यत्वलक्षणो धर्मः समारोपितः स एव निषिध्यते, तन्नित्यत्वेऽक्षसंहतेर्वैफल्यप्रसक्तेः तदुत्पत्त्यर्थत्वात् तस्यानित्यत्वे चोत्पत्तेरसम्भवात्-नहि वह्नेः सदाऽस्तित्वे तदर्थं जनस्तेन्धनमाददीत। तन्न नित्यैकरूपं चैतन्यं युक्तिसङ्गतम्।

यदपि "परार्थाश्चक्षुरादयः" [ ] इत्याद्युक्तम्, तत्र आधेयातिशयो वा परः साध्यत्वेनाभिप्रेतः, यद्वा अविकार्यनाधेयातिशयः, आहोस्वित् सामान्येन चक्षुरादीनां पारार्थ्यमात्रं साध्यत्वेनाभिप्रेतमिति विकल्पत्रयम्। तत्र यदि प्रथमः पक्षः स न युक्तः, सिद्धसाध्यतादोषाऽऽघातत्वात् यतोऽस्माभिरपि विज्ञानोपकारित्वेनाभ्युपगता एव चक्षुरादयः "चक्षुः प्रतीत्य रूपादि चोत्पद्यते चक्षुर्विज्ञानम्" [ ] इत्यादिवचनात्। अथ द्वितीयः पक्षोऽङ्गीक्रियते तदा हेतोर्विरुद्धतालक्षणो दोषः विकार्युपकारित्वेन चक्षुरादीनां साध्यविपर्ययेण दृष्टान्ते हेतोर्व्याप्तत्वप्रतीतेः। तथाहि–अविकारिणि अतिशयस्याधातुमशक्यत्वात् शयनाऽऽसनादयोऽनित्यस्यैवोपकारिणो युक्ता न नित्यस्येति कथं न हेतोर्विरुद्धता? यदि पुनः सामान्येन आधेयानाधेयातिशयविशेषमपास्य पारार्थ्यमात्रं साध्यत इत्ययं पक्षः कक्षीक्रियते तदापि सिद्धसाध्यतैव,

---

१ "शब्दमात्रसिद्धावपि न हेतुसिद्धिः, वस्तुन एव हेतुत्वेन वस्तुनो हि वस्तुसिद्धिः।
तस्यैव व्यभिचारादौ शब्देऽप्यव्यभिचारिणि। दोषवत् साधनं ज्ञेयं वस्तुनो वस्तुसिद्धितः" ॥
प्रमेयर० को० पृ० २९ पं० १२ वादिघटमुद्गरवादे।

२–**पि चेतन्यस्यात्मत्वमप्रति**–भां० मां०।–**पि चैतस्यात्मत्वमपि प्रति**–वा० बा०।–**पि चेतन्यस्यात्मत्वमपि प्रति**–आ०। ३ **स्य** वा० विना। ४ पृ० ३०७ पं० १६। माठरवृ० पृ० २९ पं० १८ का० १७। साङ्ख्य० कौ० पृ० ९० पं० ९ का० १७। साङ्ख्यद० अ० १ सू० १४० पृ० ९१ पं० २।

५ "चक्खुं च पटिच्च रूपे च उप्पज्जति चक्खुविञ्ञाणं"–संयुत्तनि० निदानसं० गहपतिव० पृ० ७२ अं० ११ भा० २। मध्यमकवृत्ति पृ० ६ पं० ३।

"अभिध. क. व. (२३४ b 5): प्रतिर् वीप्सार्थ इत्येवमादिका कल्पना अत्रैव प्रतीत्यसमुत्पादसूत्रे युज्यते इह कथं भविष्यतिः चक्षुः प्रतीत्य रूपाणि चोत्पद्यते चक्षुर्विज्ञानमिति? न हि 'प्रतीत्यानां चक्षूंषि प्रतीत्यचक्षूंषि' इति समासः संभवति अर्थायोगात् चक्षुर्हि प्रतीत्य रूपाणि प्राप्य चोत्पद्यते चक्षुर्विज्ञानमिति अयमर्थो गम्यते प्रतीत्यसमुत्पादसूत्र (सूत्रान्तरः महानिदानपर्यायसूत्र, सहेतुसप्रत्ययसनिदानसूत्र) चक्षुः प्रतीत्य रूपाणि चोत्पद्यते आविलो मनस्कारो मोहज इति सूत्रे वचनात् (अभिध. क. व. २२७ b 2)" Vallée Poussin इत्यनेन संपादितमध्यमकवृत्ति पृ० ६ टिप्प० ४।

६ **दोषोऽविका**–वा० बा० विना। ७–**रादीनां साध्यसाध्यविप**–वा०।–**रादीनां साध्ये साध्यविप**–भां० मां० आ०। ८ **सामान्येनाधेयानाधेयातिश**–भां० मां०। **सामान्येनाधेयानातिश**–वा० बा०। **सामान्येनाधेयातिश**–वि० डे०।

चक्षुरादीनां विज्ञानोपकारित्वेनेष्टत्वात्। न च चित्तमपि साध्यधर्मित्वेनोपात्तमित्यपरस्य तद्व्यतिरिक्तस्य परत्वमत्राभिप्रेतम्, चित्तादिव्यतिरेकिणोऽपरस्याविकारिण उपकार्यत्वासम्भवात् चक्षूरूपाऽऽलोक-मनस्काराणामपरचक्षुरादिकदम्बकोपकारित्वस्यान्यायप्राप्तत्वात् विज्ञानस्य वा अनेककारणकृतोपकाराध्यासितस्य संहतत्वं कल्पितमविरुद्धमेवेति नात्र साध्ये हेतोरप्यसिद्धता सङ्गच्छते?। तन्न साङ्ख्योपकल्पितचैतन्यरूपस्य नित्यस्यात्मनः कुतश्चित् सिद्धिः। तन्न अशुद्धद्रव्यास्तिकमतावलम्बिसाङ्ख्यदर्शनपरिकल्पितपदार्थसिद्धिरिति पर्यायास्तिकमतम्।

[नयलक्षणानि]

[संग्रह–नैगमनयस्वरूपम्]

अत्र च नैगम-संग्रह-व्यवहारलक्षणास्त्रयो नयाः शुद्ध्यशुद्धिभ्यां द्रव्यास्तिकमतमाश्रिताः ऋजुसूत्र-शब्द-समभिरूढ-एवम्भूतास्तु शुद्धितारतम्यतः पर्याया(य)नयभेदाः। तथाहि—संग्रहमतं तावत् प्रदर्शितमेव, येषां तु मतेन नैगमनयस्य सद्भावस्तैस्तस्य स्वरूपमेवं वर्णितम्–राश्यन्तरोपलब्ध्यं नित्यत्वमनित्यत्वं च नयतीति निगमव्यवस्थाभ्युपगमपरो नैगमनयः। निगमो हि नित्याऽनित्य-सदसत्-कृतक(काऽ)कृतकस्वरूपेषु भावेष्वपास्तसाङ्कर्यस्वभावः सर्वथैव धर्मधर्मिभेदेन सम्पद्यत इति। स पुनर्नैगमोऽनेकधा व्यवस्थितः प्रतिपत्रभिप्रायवशान्नयव्यवस्थानात्। प्रतिपत्तारश्च नानाभिप्रायाः। यतः केचिदाहुः—"पुरुष एवेदं सर्वम्" [श्वेताश्वत० उ० अ० ३, १५] इत्यादि, यदाश्रित्योक्तम्—

"ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" [गीता अ० १५ श्लो० १]

पुरुषोऽप्येकत्व-नानात्वभेदात् कैश्चिदभ्युपगतो द्वेधा, नानात्वेऽपि तस्य कर्तृत्वाऽकर्तृत्वभेदो रूप(भेदोऽप)रैराश्रितः, कर्तृत्वेऽपि सर्वगतेतरभेदः, असर्वगतत्वेऽपि शरीरव्याप्त्यव्याप्तिभ्यां भेदः, अव्यापित्वेऽपि मूर्तेतरविकल्पाद् भेद एव। अपरैस्तु प्रधानकारणिकं जगद् अभ्युपगतम्, तत्रापि सेश्वर-निरीश्वरभेदाद् भेदाभ्युपगमः। अन्यैस्तु परमाणुप्रभवत्वमभ्युपगतं जगतः, तत्रापि सेश्वर-निरीश्वरभेदाद् भेदोऽभ्युपगतः, सेश्वरपक्षेऽपि स्वकृतकर्मसापेक्षत्वाऽनपेक्षत्वाभ्यां तदवस्थ एव भेदाभ्युपगमः। कैश्चित् स्वभाव-काल-यदृच्छादिवादाः समाश्रिताः, तेष्वपि सापेक्षत्वाऽनपेक्षत्वाभ्युपगमाद् भेदव्यवस्था अभ्युपगतैव। तथा, कारणं नित्यम् कार्यमनित्यमित्यपि द्वैतं कैश्चिदभ्युपगतम्, तत्रापि कार्यं स्वरूपं नियमेन त्यजति न वेत्ययमपि भेदाभ्युपगमः। एवं मूर्त्तैरेव मूर्त्तमारभ्यते, मूर्त्तैर्मूर्त्तम्, मूर्त्तैरमूर्त्तमित्याद्यनेकधा प्रतिपत्रभिप्रायतोऽनेकधा निगमनान्नैगमोऽनेकभेदः।

[व्यवहारनयस्वरूपम्]

व्यवहारनयस्तु—अपास्तसमस्तभेदने(मे)कमभ्युपगच्छतोऽध्यक्षीकृतभेदनिबन्धनव्यवहारविरोधप्रसक्तेः—कारक-ज्ञापकभेदे(द)परिकल्पनानुरोधेन व्यवहारमाचर(मारच्च)यन् प्रवर्तते इति कारणस्यापि न सर्वदा नित्यत्वम् कार्यस्यापि न सर्वदा नित्यत्वम् कार्यस्यापि नैकान्ततः प्रक्षय इति। ततश्च न कदाचिदनीदृशं जगदिति प्रवृत्तोऽयं व्यवहारो न केनापि प्रवर्त्यते अन्यथा प्रवर्त्तकान-

---

१–त्वमात्रा–भां० वि० कां० विना। २–कारिण उपकारिण उपकार्यत्वा–वा० बा० विना। ३–त्वस्य न्याय–वा० बा० आ० हा० विना। ४–स्य चा–वि०। ५ साध्य हे–वा० बा० विना। ६–न सङ्ख्योप–कां० आ० हा० वि० विना। ७–दर्शनक–वा० बा० विना। ८ पृ० २७२ पं० १६। ९–पमेव वणित–मां०।–पमेव वर्णितराश्य–भां० हा०। १०–त्तसाङ्कार्य–वि० डे०।–त्स्त्यांकार्य–वा०।–त्स्तसाकार्य–भां० मां० हा०।–त्स्तमाकार्यं स्व–आ०। ११ कर्तृत्वाकर्तृत्वभेदो रपरैरा–भां० मां०। कर्तृत्वाकर्तृत्वे भेदोरपरैरा–आ० वि०। कर्तृत्वाभेदोरपरैरा–वा० बा०। १२ भेदो व्यापि–वा० बा० विना। १३–श्वरभेदाभ्युप–वा० बा० विना। १४–दाद्भेदोपग–वा० बा० विना। १५ कैश्चितु वा० बा०। १६ एवं मूर्तमा–वा० बा०। १७ अनवधारणमत्र विशेषः। १८–स्तभेदानेक–वा० बा० विना।

वस्थाप्रसक्तिः। ततो न व्यवहारशून्यं जगत्। न च प्रमाणाविषयीकृतः पक्षोऽभ्युपगन्तुं युक्तः अदृष्टपरिकल्पनाप्रसक्तेः, दृष्टानुरोधेन ह्यदृष्टमपि वस्तु कल्पयितुं युक्तम् अन्यथा कल्पनासम्भवादिति संग्रह-नैगमाऽभ्युपगतवस्तुविवेकाल्लोकप्रतीतपथानुसारेण प्रतिपत्तिगौरवपरिहारेण प्रमाण-प्रमेय-प्रमितिप्रतिपादनं व्यवहारप्रसिद्ध्यर्थं परीक्षकैः समाश्रितमिति व्यवहारनयाभिप्रायः। ततः स्थितं नैगम-संग्रह-व्यवहाराणां द्रव्यास्तिकनयप्रभेदत्वम्। विषयभेदश्चैषां प्रतिपादितः—

"शुद्धं द्रव्यं समाश्रित्य संग्रहस्तदशुद्धितः।
नैगम-व्यवहारौ स्तां शेषाः पर्यायमाश्रिताः" ॥ [ ]

तदुक्तम्—

"अन्यदेव हि सामान्यमभिन्नज्ञानकारणम्।
विशेषोऽप्यन्य एवेति मन्यते निगमो नयः" ॥ [ ]
"सद्रूपतानतिक्रान्त-स्वस्वभावमिदं जगत्।
सत्तारूपतया सर्वं संगृह्णन् संग्रहो मतः" ॥ [ ]
"व्यवहारस्तु तामेव प्रतिवस्तुव्यवस्थिताम्।
तथैव दृश्यमानत्वात् व्यवहारयति देहिनः" ॥ [ ] इति।

[ऋजुसूत्रनयस्वरूपम्]

पर्यायनयभेदाः ऋजुसूत्रादयः—

"तत्रर्जुसूत्रनीतिः स्यात् शुद्धपर्यायसंश्रिताः (ता)।
नश्वरस्यैव भावस्य भाँवा(वात्) स्थितिवियोगतः" ॥ [ ]

देश-कालान्तरसम्बद्धस्वभावरहितं वस्तुतत्त्वं साम्प्रतिकम् एकस्वभावम् अकुटिलम् ऋजु सूत्रयतीति ऋजुसूत्रः। न हि एकस्वभावस्य नानादिक्-कालसम्बन्धित्वस्वभावमनेकत्वं युक्तम् एकस्यानेकत्वविरोधात्। न हि स्वरूपभेदादन्यो वस्तुभेदः स्वरूपस्यैव वस्तुत्वोपपत्तेः। तथाहि—विद्यमानेऽपि स्वरूपे किमपरमभिन्नं वस्तु यद् रूपनानात्वेऽप्येकं स्यादिति? यद् वस्तुरूपं येन स्वभावेनोपलभ्यते तत् तेन सर्वात्मना विनश्यति न पुनः क्षणान्तरसंस्पर्शीति क्षणिकम्, क्षणान्तरसम्बन्धे तत्क्षणाकारस्य क्षणान्तराकारविशेषाप्रसङ्गात् अतो जातस्य यदि द्वितीयक्षणसम्बन्धः प्रथमक्षणस्वभावं नापनयति तदा कल्पान्तरावस्थानसम्बन्धोऽपि तन्नापनयेत्, स्वभावभेदे वा कथं न वस्तुभेदः अन्यथा सर्वत्र सर्वदा भेदाभावप्रसक्तिः? अक्षणिकस्य क्रम-यौगपद्याभ्यामर्थक्रियानुपपत्तेरसत्त्वम्, सहकार्युपढौकितातिशयमनङ्गीकुर्वतस्तदपेक्षाऽयोगादक्षेपेण कार्यकारिणः सर्वकार्यमेकदैव विदध्यादिति न क्रमकर्तृत्वम्, न वा कदाचनापि स्वकार्यमुत्पादयेत् निरपेक्षस्य निरतिशयत्वात् नहि निरपेक्षस्य कदाचित् करणमकरणं वा विरोधात्, तत्कृतमुका(मुपका)रं स्वभावभूतमङ्गीकुर्वतः क्षणिकत्वमेव। व्यतिरिक्तत्वे वा सम्बन्धासिद्धिः, अपरोपकारकल्पनेऽनवस्थाप्रसक्तिः। युगपदपि न नित्यस्य कार्यकारित्वम् द्वितीयेऽपि क्षणे तत्स्वभावत्वात् ततस्तदुत्पत्तितः तत्क्रमप्रसक्तेः। क्रमाऽक्रमव्यतिरिक्तप्रकारान्तराभावाच्च न नित्यस्य सत्त्वम् अर्थक्रियाकारित्वलक्षणत्वात्

---

१ ततो व्यव–वा० बा० विना। २–रौ स्ता भां०। ३ "मन्यते नैगमो नयः"—न्यायाव० टिप्प० पृ० ११८ पं० १९। ४ न्यायाव० टिप्प० पृ० ११८ पं० २५। ५ "सत्तारूपताम्"—न्यायाव० टिप्प० पृ० १२० पं० २६। ६–स्थितम् वा० बा०। ७–श्रितौ वा० बा० विना। न्यायाव० टिप्प० पृ० १२४ पं० २४। ८ नेश्वर–वा० भां० मां० वि०। नैश्वर–आ० हा०। ९ "भावात् स्थितिवियोगतः"—न्यायाव० टिप्प० पृ० १२४ पं० २५। १०–श्बन्ध–वि० डे०। ११–स्थातत्सम्ब–वा० बा०। १२ तं न इत्यर्थः। १३–सक्तेः वि० डे०। १४–पि स्वं का–वा० बा० आ० वि० डे० विना। १५–त् कारणमकार–वा० बा०। १६–त्कृतनुकारं भां० मां० हा०। १७–वात् तदुत्पत्ति–वा० बा०। १८–रित्वत्वे प्रकारा–वि० डे०।–रिक्तत्वे प्रकारान्तरभावा–भां० मां० आ० हा० कां०।

तस्यं। प्रध्वंसस्य च निर्हेतुकत्वेन स्वभावतो भावात् स्वरसभङ्गुरा एव सर्वे भावाः इति पर्यायाश्रितर्जुसूत्राभिप्रायः। तदुक्तम्—

"अतीतानागताकारकालसंस्पर्शवर्जितम्।
वर्तमानतया सर्वमृजुसूत्रेण सूच्यते" ॥ [ ]

५ प्रमाण-प्रमेयनिबन्धनं यद्यपि शब्दार्थौ सामान्येन भवतः तथापि साक्षात् परम्परया वा प्रमाणस्य कारणमेव स्वाकारार्प्पकविषयः, "नानुकृतान्वयव्यतिरेकं कारणम् नाक(का)रणं विषयः" [ ] तथा

"अर्थेन घटयत्येनां नहि मुक्तार्थरूपताम्।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता" ॥ [ ]

१० इत्यादिवचनात् तदाकारानुविधायिनी तदध्यवसायेन च तत्राविसंवादात् संवित् प्रमाणत्वेन गीयते। अध्यक्षधीश्चाऽशब्दमर्थमात्मन्याधत्ते अन्यथा अर्थदर्शनप्रच्युतिप्रसङ्गात्। न ह्यक्षगोचरेऽर्थे शब्दाः सन्ति तदात्मानो वा येन तस्मिन् प्रतिभासमानेऽपि नियमेन प्रतिभासेरन्निति कथं तत्संसृष्टाः(ष्टा) अध्यक्षधीर्भवेत्? किञ्च, वस्तुसन्निधानेऽपि तन्नामानुस्मृतिं विना तदर्थस्यानुपलब्धाविष्यमाणायामर्थसन्निधिरक्षदृग्जननं प्रत्यसमर्थ इति अभिधानस्मृतादु(?)पक्षीणशक्तित्वान्न
१५ कदाचनापीन्द्रियबुद्धिं जनयेत् सन्निधानाविशेषात्। यदि चायं भवतां निर्बन्धः-स्वाभिधानविशेषणापेक्षमेव चक्षुरादिप्रतिपत्ति(?)स्वार्थमवगमयति तदाऽस्तंगतेयमिन्द्रियप्रभवाऽर्थाधिगतिः तन्नामस्मृत्यादेरसम्भवात्। तथाहि-यत्रार्थे प्राक् शब्दप्रतिपत्तिरभूत् पुनस्तदर्थवीक्षणे तत्सङ्केतितशब्दस्मृतिर्भवेदिति युक्तियुक्तम् अन्यथा अतिप्रसङ्गः स्यात् न चेद् अनभिलापमर्थं प्रतिपत्ता पश्यति तदा तत्र दृष्टमभिलापमपि न स्मरेत् असरंश्च शब्दविशेषं न तत्र योजयेत् अयोजयंश्च न तेन विशि-
२० ष्टमर्थं प्रत्येतीत्यायातमान्ध्यमशेषस्य जगतः। ततः स्वाभिधानरहितस्य विषयस्य विषयिणं चक्षुरादिप्रत्ययं प्रति स्वत एवोपयोगित्वं सिद्धम् न तु तदभिधानानाम् तदर्थसम्बन्धरहितानां पारम्पर्येणापि सामर्थ्यासम्भवात्। इत्यर्थनया व्यवस्थिताः।

[शब्दनयस्वरूपम्]

शब्दनयास्तु मन्यन्ते-कारणस्यापि विषयस्य प्रतिपत्तिं प्रति नैव प्रमेयत्वं युक्तं यावदध्यव-
२५ सायो न भवेत् सोऽप्यध्यवसायविकल्पश्चेत् तदभिधानस्मृति(तिं) विना नोत्पत्तुं युक्तः इति सर्वव्यवहारेषु शब्दसम्बन्धः प्रधानं निबन्धनम्। प्रत्यक्षस्यापि तत्कृताध्यवसायलक्षणविकलस्य बहिरन्तर्वा प्रतिक्षणपरिणामप्रतिपत्ताविव प्रमाणतानुपपत्तेः अविसंवादलक्षणत्वात् प्रमाणानाम्, प्रतिक्षणपरिणामग्रहणेऽपि तस्य प्रामाण्याभ्युपगमे प्रमाणान्तरप्रवृत्तौ यत्नान्तरं क्रियमाणमपार्थकं स्यात्। ततः प्रमाणव्यवस्थानिबन्धनं तन्नामस्मृतिव्यवसाययोजनमर्थप्राधान्यमपहस्तयतीति शब्द
३० एव सर्वत्र प्रमाणादिव्यवहारे प्रधानं कारणमिति स्थितम्। शब्दनयश्च ऋजुसूत्राभिमतपर्यायात् शुद्धतरं पर्यायं स्वविषयत्वेन व्यवस्थापयति। तथाहि—'तटः' 'तटी' 'तटम्' इति विरुद्धलिङ्गलक्षणधर्माक्रान्तं भिन्नमेव वस्तु, नहि तत्कृतं धर्मभेदमननुभवतस्तत्सम्बन्धो युक्तः तद्धर्मभेदे वा स्वयं धर्मी कथं न भिद्यते? यथा हि क्षणिकं वस्तु अतीताऽनागताभ्यां क्षणाभ्यां न सम्बन्धमनुभवत्येवं गोत्वादि कल्पनासामान्यविशेषस्वरूपपरस्परविरुद्धस्त्रीत्वाद्यन्यतमधर्मसंसम्बद्धं नान्यधर्मी(र्मिं)संसम्बद्धमनुभवति(?)विरुद्धधर्माध्यासस्य भेदलक्षणत्वात्, तथाप्यभेदे 'न किञ्चिद् भिन्नं जगदस्ति' इति

१ सत्त्वस्य। २ मुक्त्वाऽर्थ-आ०। ३ सृष्टां अ-वा० बा०। ४ तथार्थ-वा० बा०। ५-न्निधेर-हा० वि० विना। ६-तानुप वा० बा०। ७-बुद्धिं ज-वा० बा० विना। ८-दि वायं भां० मां०। -दिस्यं आ० हा०। ९ चेदमभि-वा० बा०। १०-मर्थं प्र-वा० बा० भां० मां०। ११-गतः स्वाभि-वा० बा० भां० मां०। १२-स्मृति चिंता नो-आ०।-स्मृतिं चिंता विना भां० मां०।-स्मृतिं चिंता ना वा० बा०। १३-क्षणं हा०। १४-लपता सा-आ० हा०। १५-संबंध नान्य-वा०।-संबंद्धं नान्य-वि०। १६ संवधमनु-बा०।

भेदव्यवहार एवोत्सीदेत्। तथा, एकस्मिन्नुदकपरमाणौ 'आपः' इति बहुत्वसङ्ख्याया निर्देशोऽनुपपन्नः न ह्येकत्वसङ्ख्यासमाध्यासितं तदेव तद्विरुद्धबहुत्वसङ्ख्योपेतं भवतीत्येकसङ्ख्ययैव तन्निर्देष्टव्यम्। कालभेदाद् वस्तुभेदः ऋजुसूत्रेणाप्यभ्युपगत एवेति 'अग्निष्टोमयाजी पुत्रोऽस्य जनिता' इत्ययुक्तमेव वचः अतीताऽनागतयोः सम्बन्धाभावात्। तथा, अन्यकारकयुक्तं यत् तदेव अपरकारकसम्बन्ध-
(न्धं) नानुभवतीति अधिकरणं चेद् ग्रामः अधिकरणशब्दवाच्यि(करणवाच्यि)विभक्तिवाच्य एव ५
न कर्माभिधानविभक्त्यभिधेयो युक्त इति 'ग्राममधिशेते' इति प्रयोगोऽनुपपन्नः। तथा, पुरुषभेदेऽपि
नैकान्तद्(कं तद्)वस्तु इति 'एहि मन्ये रथेन यास्यसि नहि यास्यसि यातस्ते पिता' इति च प्रयोगो
न युक्तः अपि तु 'एहि मन्यसे यथाहं रथेन यास्यामि' इत्यनेनैव परभावेनैतन्निर्देष्टव्यम्। एवमुपग्रहणभेदेऽपि 'विरमति' इति न युक्तः आत्मार्थतायां हि 'विरमते' इत्यस्यैव प्रयोगसङ्गतेः। नं चै(चै)वं
लोकशास्त्रव्यवहारविलोप इति वक्तव्यम्, सर्वत्रैव नयमते तद्विलोपस्य समानत्वादिति यथार्थशब्द- १०
नात् शब्दे(ब्द)नयो व्यवस्थितः। तदुक्तम्—

"विरोधिलिङ्ग-सङ्ख्यादिभेदात् भिन्नस्वभावताम्।
तस्यैव मन्यमानोऽयं शब्दः प्रत्यवतिष्ठते" [ ]

[समभिरूढनयस्वरूपम्]

एकसंज्ञासमभिरोहणात् समभिरूढस्त्वाह—यथा हि विरुद्धलिङ्गादियोगाद् भिद्यते वस्तु तथा १५
संज्ञाभेदादपि। तथाहि-संज्ञाभेदः प्रयोजनवशात् सङ्केतकर्तृभिर्विधीयते न व्यसनितया अन्यथा अनवस्थाप्रसक्तेः ततो यावन्तो वस्तुनः स्वाभिधायकाः शब्दास्तावन्तोऽर्थभेदाः प्रत्यर्थं शब्दनिवेशात् नैकस्यार्थस्यानेकेनाभिधानं युक्तमिति 'घटः' 'कुटः' 'कुम्भः' इति वचनभेदाद् भिन्न एवार्थः, क्रियाशब्दत्वाद् वा सर्वशब्दानां सर्वेऽप्यन्वर्था एव वाचकाः ततो 'घटते' 'कुटति' 'कौ भाति' इति च क्रियालक्षणनिमित्तभेदात् नैमित्तिकेनाप्यर्थेन भिन्नेन भाव्यमिति 'घटः' इत्युक्ते कुतः 'कुटः' इति २०
प्रतिपत्तिः तेन तदर्थस्यानभिहितत्वात्? यथा वा 'पावक'शब्दोक्तेरन्यैव पावकशक्तिरन्वय-व्यतिरेकाभ्यां लोकतः प्रसिद्धा तथा घटन-कुटनादिशक्तीनामपि भेदः प्रतीयत एवेति नानार्थवाचिन एव पर्यायध्वनयः नैकमर्थमभिनिवेशन्त इति समभिरूढः। उक्तं च

"तथाविधस्य तस्यापि वस्तुनः क्षणवृत्तिनः।
ब्रूते समभिरूढस्तु संज्ञाभेदेन भिन्नताम्" ॥ [ ] २५

१ "धातुसंबन्धे प्रत्ययाः"-पाणि० अ० ३ पा० ४ सू० १। "सोमयाजी अस्य पुत्रो भविता"-सिद्धान्तकौ० पृ० ४७६ सूत्राङ्क० २८२४। "धातोः संबन्धे प्रत्ययाः"-हैम० अ० ५ पा० ४ सू० ४१। २ संबन्धे ना-आ० वि०। ३-शब्दवावि भां० मां० विना। ४ "अधिशीङ्-स्थाऽऽसां कर्म"-पाणि० अ० १ पा० ४ सू० ४६ सिद्धान्तकौ० पृ० १३७ सूत्राङ्क० ५४२। "अधेः शीङ्-स्थाऽऽस आधारः"-हैम० अ० २ पा० २ सू० २०। ५ नैकांतवस्तु वा० बा० विना। ६ "प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च"-पाणि० अ० १ पा० ४ सू० १०६ सिद्धान्तकौ० पृ० ३३५ सूत्राङ्क० २१६३। आचार्यहेमचन्द्रस्तु एतत् सूत्रमकृत्वैव एनं प्रयोगं समर्थितवान् भङ्ग्यन्तरेण, सा चेयं भङ्गि'-'एहि मन्ये रथेन यास्यसि न हि यास्यसि यातस्ते पिता' इति प्रहासे यथाप्राप्तमेव प्रतिपत्तिः नात्र प्रसिद्धार्थविपर्यासे किञ्चिन्निबन्धनमस्ति 'रथेन यास्यसि इति भावगमनाभिधानात् प्रहासो गम्यते। 'नहि यास्यसि' इति बहिर्गमनं प्रतिषिध्यते। अनेकस्मिन्नपि प्रहसितरि च प्रत्येकमेव परिहास इति अभिधानवशाद् 'मन्ये' इति एकवचनमेव। लौकिकश्च प्रयोगोऽनुसर्तव्य इति न प्रकारान्तरकल्पना न्याय्या"-"त्रीणि त्रीणि अन्य-युष्मदस्मदि"-हैम० अ० ३ पा० ३ सू० १७ बृ० वृ०। ७ ग्रहेण-भां० मां०। ८-णभेदोऽपि वा० बा० विना। ९-ताया हि वा० बा० विना। १०-नन्नेवं वा० बा०। नत्वेवं भां० मां०। ११-ति न व-वा० बा०। १२-रोधलि-आ० विना। "विरोधे लिङ्ग-सङ्ख्यादि"-न्यायाव० टिप्प० पृ० १२६ पं० २०। १३-ति को भा-आ०। १४-पाचक-वा० बा० आ०। १५ न्यायाव० टिप्प० पृ० १२७ पं० १८।

[एवंभूतनयस्वरूपम्]

शब्दाभिधेयक्रियापरिणतिवेलायामेव 'तद् वस्तु' इति भूत एवंभूतः प्राह—यथा संज्ञाभेदाद् भेदवद् वस्तु तथा क्रियाभेदादपि, सा च क्रिया तद्धेत्री[1] यदैव तामाविशति तदैव तन्निमित्तं तत्तद्व्यपदेशमासादयति नान्यदेत्यतिप्रसङ्गात्। तथाहि—यदा 'घटते' तदैवासौ 'घटः' न पुनः 'घटितवान्' 'घटिष्यते' वा 'घटः' इति व्यपदेष्टुं युक्तः सर्ववस्तूनां घटतापत्तिप्रसङ्गात्। अपि च, चेष्टासमय एव चक्षुरादिव्यापारसमुद्भूतशब्दानुविद्धप्रत्ययमास्कन्दन्ति चेष्टावन्तः पदार्थाः यथावस्थितार्थप्रतिभास एव[2] च वस्तूनां व्यवस्थापको नान्यथाभूतः अन्यथा अचेष्टावतोऽपि चेष्टावत्तया शब्दानुविद्धेऽध्यक्षप्रत्यये प्रतिभास्यत्य(भास इत्य)भ्युपगमे[3] तत्प्रत्ययस्य निर्विषयतया भ्रान्तस्यापि वस्तुव्यवस्थापकत्वे सर्वैः प्रत्ययः सर्वस्यार्थस्य[4] व्यवस्थापकः स्यादित्यतिप्रसङ्गः। तन्न घटनसमयात् प्राक् पश्चाद् वा 'घटः' तद्व्यपदेशमासादयतीत्येवंभूतनयमतम्। उक्तं च—

"एकस्यापि ध्वनेर्वाच्यं सदा तन्नोपपद्यते।
क्रियाभेदेन भिन्नत्वादेवंभूतोऽभिमन्यते"॥ [ ] इति।

तत् स्थितमेतत् ऋजुसूत्रादयः पर्यायास्तिकस्य विकल्पा इति।
अस्याश्च गाथायाः सर्वमेव शास्त्रं[5] विवरणम्॥ ३॥

---

१ तद्भेदत्री यदैव तमा-वा० बा०। २-व वस्तू-आ० हा० वि०। ३-भासात्यभ्यु-आ०।-भासत्यभ्यु-मां०। ४ सर्वस्य व्यव-आ०। सर्वस्यान्यव-भां० मां० हा० वि०। ५ न्यायाव० टिप्प० पृ० १२८ पं० २४। ६ शास्त्रवि-वा० बा० भां०।

चतुर्थगाथाव्याख्या।

[द्रव्यास्तिकैकप्रकृतिकयोः संग्रह-व्यवहारयोः शुद्धाशुद्धतया भेदनिरूपणम्]

'दव्वट्ठिओ य पज्जवणओ य'[1] इत्यादिपश्चार्द्धैकदेशस्य विवरणाय आह सूरिः—

दव्वट्ठियनयपयडी सुद्धा संगहपरूवणाविसओ। ५
पडिरूवे[2] पुण वयणत्थनिच्छओ तस्स ववहारो॥ ४॥

इति गाथासूत्रम्।

अत्र च संग्रहनयप्रत्ययः शुद्धो द्रव्यास्तिकः व्यवहारनयप्रत्ययस्त्वशुद्ध इति तात्पर्यार्थः।

अवयवार्थस्तु द्रव्यास्तिकनयस्य व्यावर्णितस्वरूपस्य प्रकृतिः स्वभावः शुद्धा इत्यसङ्कीर्णा विशेषासंस्पर्शवती संग्रहस्य अभेदग्राहिनयस्य प्ररूपणा—प्ररूप्यतेऽनयेति कृत्वा—उपवर्णना १० पदसंहतिस्तस्या विषयोऽभिधेयः। विषय[3]व्यापकारेण विषयिणो वृत्तस्य विषयव्यवस्थापकत्वादुपचारेण[4] विषयेण(ण) विषयिप्रकथनमेतत् अन्यथा कः प्रस्तावः शुद्धद्रव्यास्तिकेऽभिधातुं प्रक्रान्ते संग्रहप्ररूपणाविषयाभिधानस्य?

[संग्रहस्य सत्तामात्रविषयकत्वसाधनम्]

सुबन्तस्य तिङन्तस्य[5](स्य) वा पदस्य वाक्यस्य वा प्ररूपणास्वभावस्य विषयः संग्रहाभि- १५
प्रायेण भाव एव। तथाहि—जाति-द्रव्य-गुण-क्रियापरभाषितरूपेण स्वार्थ-द्रव्य-लिङ्ग-कर्मादिप्रकारेण वा सुबन्तस्य योऽर्थः[6](र्थः स) भावाद् व्यतिरिक्तो वा भवेत्, अव्यतिरिक्तो वा? यदि व्यतिरिक्तस्तदा निरू(रु)पाख्यत्वादत्यन्ताभाववत् न द्रव्यादिरूप इति कथं सुबन्तवाच्यः? अव्यतिरिक्तश्चेत् कथं न भावमात्रता सुबन्तार्थस्य? तिङन्तार्थस्यापि क्रिया-काल-कारक-पुरुष- २०
उपग्रह-वचनादिरूपेण परिभाष्यमाणस्य सत्तारूपतैव। तथाहि-'पचति' इत्यत्र क्रिया विक्लित्तिलक्षणा, काल आरम्भप्रवृत्ति[10](प्रभृति)रवर्ग(रपवर्ग)पर्यन्तो वर्तमानस्वरूपः, कारकं कर्ता, पुरुषः परभा[11]वात्मकः, उपग्रहः परार्थता, वचनमेकत्वम् यद्यपि प्रतिपत्तिविषयस्तथापि सत्त्वमेवैतत् यतः क्रिया ह्यसती चेत् कारकैर्न साध्येत खपुष्पादिवत्, सती चेत् अस्तित्वमेव,सा कारकैश्चाभिव्यज्यत इति। एवं कालादयोऽप्यसन्तश्चेद् न शशशृङ्गाद् भिद्येरन्, सदात्मकाश्चेत् कथं न अस्तित्वादभिन्ना इति सत्तैव तिङन्तस्यार्थः। 'घटोऽस्ति' इति[12] वाक्यार्थ(र्थे) यद् वाक्यं प्रयुज्यते 'घटः सन्' इति तत्र भावाभि- २५
धायिता पदद्वयस्यापि। तथाहि-'घटः' इति विशेषणम् 'सन्' इति विशेष्यम्; अत्र द्वयेनापि चाभा[13]वविपरीतेन भाव्यम् न ह्यन्यथा तद् विशेषणम् नापि तद् विशेष्यं स्यात् निरू(रु)पाख्यत्वाद् अत्यन्ताभा[14]ववत्। यदि पुनरभावविपरीतं तद्[15] इष्यते, विशेषण-विशेष्ययोः कथं न भावरूपता? तेन यदेव[16] पटस्य (घटस्य) भावो घटत्वं तदेव घटः, यच्च सतो भावः सत्त्वं तदेव 'सन्' इति सर्वत्र संग्रहाभिप्रायतः प्ररूपणाविषयो भाव एव। उक्तं चैतत् समयसद्भावमभिधावता अन्येनापि— ३०

"[17]अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्।
अपूर्वदेवताशब्दैः समप्रा(मा)हुर्गवादिषु"॥ [वाक्यप० द्वि० का० श्लो० १२१]

---

१ पृ० २७१ पं० ८। २-रूवेण पु-आ०। शोधनाय व्यापार्यमाणासु सर्वासु टीकाप्रतिषु 'पडिरूवं' इत्येव प्रतीकं टीकाकृता निरदेशि, व्याख्यायि च 'प्रतिरूपम्' इति। ३-या कारण-वा० बा०। ४-ण विषयणा विष-आ०।-ण विषयेणो विष-वि०।-ण विषयिप्र० भां० मां०।-ण विषयिप्रथन-वा० बा०। ५-हरूप-वा० बा० विना। ६-स्याव्याप-वा० बा०।-स्यात्वाप्ररू-भां० मां०।-स्याचाप-वि०। ७-योर्थः स्वभावा स्वभावाद् व्यति-वा० बा०। ८-भावात्तद्र-वा० बा०। ९-मात्रस्य वा० बा०। १०-वृत्तिपपवर्ग-आ०। वृत्तिपवर्ग-भां० मां० हा० वि०। ११-रभवात्म-वा० बा०। १२-ति अस्यार्थे यद् वा० बा० विना। १३-ववैपरीत्येन वा० बा०। १४-भावतया य-वा० बा०। १५ तद्विशेष्यते आ०। १६-व कटस्य वा० बा०। १७ "यथाहुः" इति निर्दिश्य श्लोकोऽयमुद्धृतः तन्त्रवार्तिके पृ० २५१ पं० १३। तत्र च "अपूर्वदेवताख्यैः सममाहुः" इति पाठः।

"घटादीनां न[1] वाकारात्(न्) प्रत्यापयति वाचकः ।
वस्तुमात्रनिवेशित्वात् तद्गतिर्[2]नान्तरीयकैः" ॥ [वाक्यप० द्वि० का० श्लो० १२५] इति । अत एव "यत्र विशेषक्रिया नैव श्रूयते तत्रास्तिर्भवन्तीपरः प्रथमपुरुषे[3]ऽप्रयुज्यमानोऽप्यस्तीति गम्यते" [ ] इत्युक्तं शब्दसमयवेदिभिः । अवगतिश्चैवं युक्ता यदि सत्तां पदार्थो न व्यभिचरेत्, अव्यभिचारे च तदावेशात् तदात्मकतैव सत्तापरित्यागे वा स्वरूपहानमिति सन्मात्रमेवाध्यक्षस्य शब्दस्य वा विषयः अन्तर्नी(र्नी)[4]ताशेषम् अपृथग्व्यवस्थापितमधुरादिरसपानकद्रव्यवत् । भेदप्रतिभासस्तु भेदप्रतिपादकागमोपहतान्तःकरणानां तिमिरो[5]पप्लुतदृशामेकशशलाञ्छनमण्डलस्यानेकत्वावभासनवत् असत्य इति सर्वभेदान् अपह्नुवानः सर्वं सन्मात्रतया संगृह्णन् संग्रहः शुद्धा द्रव्यास्तिकप्रकृतिरिति स्थितम् ।

[व्यवहारस्य विशेषमिश्रितसत्ताविषयकत्वसाधनम्]

तँमेवाऽशुद्धम्[7](द्धाम्) **पडिरूवं पुण** इत्यादिगाथापश्चार्द्धेन दर्शयत्याचार्यः—प्रतिरूपं प्रतिबिम्बम् प्रतिनिधिरिति यावत् । विशेषेण घटादिना द्रव्येण सङ्कीर्णा सत्ता, पुनरिति प्रकृतिं स्मरयति । तेनायमर्थः—'विशेषेण संकीर्णा सत्ता प्रकृतिः स्वभावः **वचनार्थनिश्चयः** इति हेयोपादेयोपेक्षणीयवस्तुविषयनिवृत्ति-प्रवृत्युपेक्षालक्षणव्यवहारसंपादनार्थमुच्यत[8] इति वचनम् तस्य—'घटः' इति विभक्तरूपतया 'अस्ति' इत्यविभक्तात्मतया प्रतीयमानो व्यवहारक्षमः—अर्थस्तस्य निश्चयः निर्गतः पृथग्भूतः चयः परिच्छेदः **तस्य** इति द्रव्यास्तिकस्य **व्यवहारः** इति लोकप्रसिद्धव्यवहारप्रवर्त्तनँपरः[9] नयः । सोऽभिमन्यते यदि हि हेयोपादेयोपेक्षणीयस्वरूपाः परस्परतो विभिन्नस्वभावाः सद्रूपतया शब्दप्रभवे संवेदने भावाः प्रतिभान्ति ततो निवृत्ति-प्रवृत्युपेक्षालक्षणो व्यवहारस्तद्विषयः प्रवृत्तिमासादयति नान्यथा; न चैकान्ततः सन्मात्राऽविशिष्टेषु भावेषु संग्रहाभिमतेषु पृथक् स्वरूपतया परिच्छेदोऽबाधितरूपो व्यवहारनिबन्धनं संभवतीति । तथाहि—[11]यद्यद्याका (यत् यदाका)-रनिरपेक्षतया स्वग्राहिणि ज्ञाने प्रतिभासमाधत्ते तत् तथैव 'सत्' इति व्यवहर्तव्यम्, यथा प्रतिनियतं सत्तादिरूपम्, घटाद्याकारनिरपेक्षं च पटादिकं स्वावभासिनि ज्ञाने स्वरूपं सन्निवेशयतीति स्वभावहेतुः । घटादिनिरपेक्षत्वं च पटादेः घटाद्यभावेऽपि भावात् अवभासमा[12]नाच्च(सनाच्च) सिद्धम् ।

यद्वा **प्रति**शब्दो वीप्सायाम् रूपशब्दश्च वस्तुन्यत्र प्रवर्त्तते । तेनायमर्थः—रूपं रूपं प्रति, वस्तु वस्तु प्रति यो **वचनार्थनिश्चयस्तस्य** प्र[13]कृति(तिः) स्वभावः स **व्यवहार** इति । तथाहि—प्रतिरूपमेव वचनार्थनिश्चयो व्यवहारहेतुर्न पुनरस्तित्वमात्रनिश्चयः, यतः 'अस्ति' इत्युक्तेऽपि श्रोता शङ्कामुपगच्छन् लक्ष्यते अतः 'किमस्ति' इत्याशङ्कायाम् 'द्रव्यम्' इत्युच्यते, तदपि 'किम्? पृथिवी, सापि का? वृक्षः, सोऽपि कः? चूतः' तत्राप्यर्थित्वे यावत् 'पुष्पितः' 'फलितः' इत्यादि तावन्निश्चिनोति यावद् व्यवहारसिद्धिरिति । व्यव[14]हारो हि नानारूपतया सत्तां व्यवस्थापयति तथैव संव्यवहारसंभवात् । अतो व्यवहरतीति व्यवहार इत्यन्वर्थसंज्ञां बिभ्रत् अशुद्धा द्रव्यास्तिकप्रकृतिर्भवति ॥४॥

---

१ **न चाका** मां० वि० । 'न चाकारान्'–वाक्यप० । २–**गतिना** वा० बा० । "तद्गतिर्नान्तरीयकी"–वाक्यप० । "न हि सकलविशेषसहितमर्थं शब्दः प्रत्याययितुमलमिति तत्राकारविशेषावगतिर्नान्तरीयकयेव अनुनिष्पादिन्येव बोद्धव्या"–वाक्यप० टी० । ३–**रुषे यु**–वा० बा० विना । "अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति"–महाभाष्ये अ० २, ३, १ वार्ति० ११, वार्ति० ४ भा० तथा महाभा० २, ३, ४६ वार्ति० ४ भा० । हैमश० अ० ३ पा० ३० सू ३ बृ० वृत्तौ पृ० ५८ प्र० पं० ८ । हैमधातुपा० पृ० २ पं० ४ । पातञ्ज० यो० पा० ३ सू० १७ वाच० टी० पृ० १४२ पं० २५ आनन्दा० । ४ **अथ ग**–हा० । ५–**न्तनीता**–वा० बा० विना । ६–**रोद्भूत**–वि० ।–**रोपहृत**–आ० । ७ **तमेवाऽशुद्धा**–वा० बा० । **तमेवाशुद्ध**–हा० । ८–**विशेषणसं**–वा० बा० । ९–**वहारणसं**–आ० हा० वि० । १०–**नपुरो न**–वा० बा० विना । ११ **यदाद्याका**–भां० मां० आ० हा० । **यद्या**–वि० । १२–**मानत्वसि**–वि० । १३ **प्रवृत्तिः स्व**–वा० बा० । १४–**हारे हि** भां० मां० ।

गुजरात
पुरातत्त्वमन्दिर
ग्रन्थावली



ग्रन्थाङ्क १८

गूजरातपुरातत्त्वमन्दिरग्रन्थावली

आचार्यश्रीसिद्धसेनदिवाकरप्रणीतं

संमतितर्क-प्रकरणम् ।

जैनश्वेताम्बर-राजगच्छीय-प्रद्युम्नसूरिशिष्य-तर्कपञ्चानन-
श्रीमद्-अभयदेवसूरिनिर्मितया तत्त्वबोधविधायिन्या
व्याख्यया विभूषितम् ।

तृतीयो विभागः ।

(प्रथमकाण्डान्तः)

गूजरातविद्यापीठप्रतिष्ठितपुरातत्त्वमन्दिरस्थेन
संस्कृतसाहित्य-दर्शनशास्त्राध्यापकेन
पं० सुखलालसंघविना
प्राकृतवाङ्मयाध्यापकेन जैनन्याय-व्याकरणतीर्थ-
पं० बेचरदासदोशिना च
पाठान्तर-टिप्पण्यादिभिः परिष्कृत्य संशोधितम् ।

गूजरातपुरातत्त्वमन्दिर
अमदावाद

प्रथमावृत्तिः, प्रतिसं० ५००] संवत् १९८४ [मूल्यम्-१० रूप्यकाणि.

विज्ञापन

गूजरातपुरातत्त्वमंदिरनी प्रबंधसमितिना संवत् १९८३ ना मागशर सुद ९ ना बीजा ठराव मुजब आ पुस्तक प्रसिद्ध करवामां आवे छे.

भाद्रपद १५
संवत् १९८३

प्रकाशक

प्रकाशकः—श्यामलाल ह. भगवती कामचलाउ महामात्र, गूजरातविद्यापीठकार्यालय,
अमदावाद

मुद्रकः—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस, नं. २६–२८, कोलभाट लेन, मुंबई

टीका–टिप्पण्युपयुक्तावतरणस्थानानां सङ्केताः ।

अनुयोग०	अनुयोगद्वारसूत्रम् ।
अभिधानप्प०	अभिधानप्पदीपिका (पालीशब्दकोशः)
आप्तमी० आप्तमीमां०	आप्तमीमांसा ।
तत्त्वार्थटी०	तत्त्वार्थसूत्रटीका ।
तत्त्वोपप्लवः	
दशवै० निर्यु०	दशवैकालिकसूत्रनिर्युक्तिः ।
धर्मसं०	धर्मसंग्रहः (बौद्धः) ।
नयचक्र० लि० को०	नयचक्रम् अस्मदीया लिखितप्रेसंकोपी ।
नयोप०	नयोपदेशः ।
न्यायप्र० सू०	न्यायप्रवेशसूत्रम् ।
न्यायप्रवेशसू० वृ०	न्यायप्रवेशसूत्रवृत्तिः ।
न्यायबिं० न्यायबिन्दुप्र०	न्यायबिन्दुप्रकरणम् ।
न्यायवा० ता० टी० न्यायवार्तिकता०	न्यायवार्तिकतात्पर्यटीका ।
न्यायाव०	न्यायावतारः ।
पञ्चास्तिका०	पञ्चास्तिकायः ।
प्रमाणनयत०	प्रमाणनयतत्त्वालोकालङ्कारसूत्रम् ।
प्रवचनसारः	
प्रशस्त० कं०	प्रशस्तपादभाष्यम् कन्दलीसमेतम् ।
बृ०	बृहत्ताडपत्रम् ।
बोधिचर्याव० प्रज्ञापार०	बोधिचर्यावतारः प्रज्ञापारमितापञ्जिकासमेतः ।
भगवती० भगवती० सू० भगवती० टी०	भगवतीसूत्रम् टीकासमेतम् ।
मज्झिमनिकायः	
मध्यमकवृ० प्रत्ययप० आर्यसत्य० प्र०	मध्यमकवृत्तिः मध्यमककारिका प्रत्ययपरीक्षा-प्रकरणम्, आर्यसत्यपरीक्षाप्रकरणम् ।
महायानसूत्रालङ्कारः	
राजवा०	राजवार्तिकम् ।
ल०	लघुताडपत्रम् ।
लौकिकन्याया० भा०	लौकिकन्यायाञ्जलिः, भागः ।
विशेषा० बृ० वृ०	विशेषावश्यकबृहद्वृत्तिः ।
विशेषाव० भा०	विशेषावश्यकभाष्यम् ।
शास्त्रदीपिका युक्तिस्नेह— प्रपूरणीसिद्धान्त०	शास्त्रदीपिका युक्तिस्नेहप्रपूरणी-सिद्धान्तचन्द्रिकाव्याख्यायुता ।

शिक्षासमु० परि०	शिक्षासमुच्चयः परिच्छेदः ।
सम्मति० द्वि० का०	सम्मतितर्कप्रकरणम् द्वितीयं काण्डम् ।
सप्तभङ्गीत०	सप्तभङ्गीतरङ्गिणी ।
सिद्धिवि० टी० लि०	सिद्धिविनिश्चयटीका लिखितप्रेसकोपी गूजरात-पुरातत्त्वमन्दिरसत्का ।
सुत्तनिपातः	
सुमङ्गलविलासिनी सामञ्ञफलसुत्तव०	सामञ्ञफलसुत्तवण्णना ।
सूत्रकृ० टी०	सूत्रकृताङ्गसूत्रम् टीकासहितम् ।
स्थाना० सू०	स्थानाङ्गसूत्रम् ।
स्फोटसि० स्फोटसिद्धिन्यायविचारः अनन्त०	स्फोटसिद्धिन्यायविचारः अनन्तशयनग्रन्थमाला ।

विषयानुक्रमः ।

विषयः	पृष्ठम्	पङ्क्तिः
५ गाथाव्याख्या ।	३१७-३७८	
पर्यायास्तिकैकप्रकृतिकानाम् ऋजुसूत्रादीनां शुद्धाशुद्धभावेन विभजनम् ।	३१७	
ऋजुसूत्रविषयतया क्षणभङ्ग-विज्ञानमात्र-शून्यवादानामुपक्षेपः ।	३१८-३७८	
१ क्षणभङ्गवादः ।	३१८-३४९	
पूर्वपक्षः—स्थैर्यवादिभिः क्षणभङ्गस्य निराकरणम् ।	३१८-३२१	
उत्तरपक्षः—बौद्धैः क्षणभङ्गस्य साधनम् ।	३२१-३४९	
२ ऋजुसूत्रपदस्य द्वितीयां व्याख्यामाश्रित्य विज्ञप्तिमात्रवादः ।	३४२-३६६	
पूर्वपक्षः—बाह्यार्थवादिभिः सौत्रान्तिक-वैभाषिकैः विज्ञप्तिमात्रस्य निराकरणम् ।	३४९-३५४	
उत्तरपक्षः—विज्ञानवादिभिर्योगाचारैर्विज्ञप्तिमात्रस्य स्थापनम् ।	३५४-३६६	
३ पुनः ऋजुसूत्रपदस्य व्याख्यान्तरमाश्रित्य शून्यवादः ।	३६६-३७८	
ऋजुसूत्र-शब्द-समभिरूढ-एवंभूतेषु सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिकानां समवतारः ।	३७८	४
६ गाथाव्याख्या ।	३७९-४०६	
नयवन्निक्षेपाणामपि यथास्वं द्रव्यार्थिक-पर्यायार्थिकरूपतया विभजनम् ।	३७९	२
१ नामनिक्षेपः ।	३७९	१३
नाम व्याख्याय तत्र सङ्केतविधि-तद्विषययोः प्ररूपणम् ।	३७९	१४
भर्तृहरेर्द्वैयार्थिकानुसारिणः शब्दब्रह्मदर्शनस्य पूर्वपक्षतया वर्णनम् ।	३७९	२२
तस्य च दर्शनस्य पर्यायास्तिकमतेन प्रतिविधानम् ।	३८४	३
शब्दार्थयोरनित्यसम्बन्धवादिना स्वपक्षं समुद्धर्तुं मीमांसकसंमत-नित्यसम्बन्धवादस्य निराकरणम् ।	३८६	१२
सिद्धान्तिना शब्दस्य नित्यत्वानित्यत्वपक्षद्वयमाश्रित्य यथायथं द्रव्यार्थिकनिक्षेपरूपत्वव्यवस्थापनम् ।	३८६	२८
२ स्थापनानिक्षेपः	३८७	३
स्थापनां व्याख्याय मुख्य-प्रतिनिध्योर्भेदाभेदपक्षद्वयेऽपि तस्या द्रव्यार्थिकनिक्षेपरूपत्वव्यवस्थापनम् ।	३८७	४
३ द्रव्यनिक्षेपः ।	३८७	१४
द्रव्यं व्याख्याय तत्र द्रव्यार्थिकनिक्षेपत्वभावनम् ।	३८७	१५
द्रव्यार्थिकनिक्षेपेण भावनिक्षेपसंमतस्य क्षणभङ्गस्य विस्तरेण अनेकधा निरासः ।	३८७	१८
द्रव्यनिक्षेपविषयस्य द्रव्यस्य आगमोक्तरीत्या स्वरूपवर्णनम् ।	४०५	३२
४ भावनिक्षेपः ।	४०६	४
भावं व्याख्याय तत्र पर्यायार्थिकत्वकथनम् ।	४०६	५
७ गाथाव्याख्या ।	४०७	
द्रव्य-पर्याययोरन्योन्यव्यावृत्तिग्रहये निरपेक्षनयाश्रितवचसामसत्यत्व-कथनम् ।	४०७	१
८ गाथाव्याख्या ।	४०८	
द्रव्य-पर्याययोरन्योन्यसम्मिश्रत्वसूचनाय ज्ञानानेकान्तवर्णनम् ।	४०८	१

विषयः	पृष्ठम्	पङ्क्तिः
९ गाथाव्याख्या ।	४०८	
वस्तुगत्या द्व्यात्मक एव तत्त्वे नयद्वयविषयविवेकस्य विवक्षाधीनत्वाभिधानम् ।	४०८	११
१० गाथाव्याख्या ।	४०९	
विवक्षाकृतस्य नयद्वयविषयविवेकस्य विशदीकरणम् ।	४०९	१
११ गाथाव्याख्या ।	४०९	
निरपेक्षनयद्वयमेकमेव वस्तु यथा यथा मन्यते तथा विभज्य वर्णनम् ।	४०९	१७
१२ द्वादशगाथाव्याख्या ।	४१०–४१५	
अन्योन्यमुक्तयोर्द्रव्य–पर्याययोर्नास्तित्वोक्तिपूर्वकमुत्पाद–व्यय–ध्रौव्याणां द्रव्यलक्षणत्वेन वर्णनम् ।	४१०	२
उत्पाद–व्यय–ध्रौव्याणां परस्परव्याप्यत्वसमर्थनम् ।	४१०	१४
१३ गाथाव्याख्या ।	४१५	
स्वतन्त्राणामुत्पाद–व्यय–ध्रौव्याणां द्रव्यलक्षणत्वाभावात् प्रत्येकं नयद्वयस्य मिथ्यात्वकथनम् ।	४१५	२५
१४ गाथाव्याख्या ।	४१५–४१६	
उभयारब्धतृतीयनयाभावेऽपि द्वयोरेव नययोरन्योन्यसव्यपेक्षयोस्सम्यक्त्वप्रतिपादनम् ।	४१५	३४
१५ गाथाव्याख्या ।	४१६	
निरपेक्षग्राहित्वे मूलनयवदुत्तरनयानामपि मिथ्यात्ववर्णनम् ।	४१६	९
१६ गाथाव्याख्या ।	४१६	
सङ्ग्रहादीनां मूलनयग्राह्यग्राहित्वान्नोभयवादप्रज्ञापकत्वमिति प्रदर्शनम् ।	४१६	२१
१७–१८ गाथाव्याख्या ।	४१७	
नित्यानित्यैकान्तपक्षद्वयेऽप्यात्मनि संसारसुख–दुःखादेरनुपपत्तिप्रदर्शनम् ।	४१७	१
१९ गाथाव्याख्या ।	४१८	
एकान्तपक्षे चात्मनि कर्मणो बन्ध–स्थितिकारणानुपपत्तिप्रकटनम् ।	४१८	१
२० गाथाव्याख्या ।	४१८–४१९	
एकान्तवादे बन्धाभावेन तन्मूलकसंसारनिवृत्त्यादेरनुपपत्तिप्रकाशनम् ।	४१८	२९
२१ गाथाव्याख्या ।	४१९–४२०	
सर्वेषामपि नयानामन्योन्याऽनिश्रितत्वे मिथ्यात्वम् अन्योन्यनिश्रितत्वे पुनः सम्यक्त्वमिति प्रतिपादनम् ।	४१९	१३
२२–२३–२४–२५ गाथाव्याख्या ।	४२०–४२१	
प्रत्येकं नयेषु मिथ्यात्वेऽपि समुदितेषु सम्यक्त्वस्य रत्नावलीदृष्टान्तेन समर्थनम् ।	४२०	२६
२६ गाथाव्याख्या ।	४२२	
दृष्टान्तोपन्यासप्रयोजकानां तद्गुणानां परिगणनम् ।	४२२	१
२७ गाथाव्याख्या ।	४२२–४२९	
दृष्टान्तस्य साध्यसमतां वदतामेकान्तवादिनां निरासाय पञ्चानां तदभिप्रायाणां निर्देशः ।	४२२	११
१ सांख्याभिमतत्वेनोपन्यस्तस्य सत्कार्यवादस्य निरसनम् ।	४२३	५

विषयः	पृष्ठम्	पङ्क्तिः
२ सांख्यविशेषमतत्वेनोपन्यस्तस्य कारणात्मकपरिणामवादस्य निरसनम् ।	४२३	२५
३ वैशेषिकाभिमतत्वेनोपन्यस्तस्यासत्कार्योत्पत्तिवादस्य निरसनम् ।	४२४	१
४ बौद्धाभिमतत्वेनोपन्यस्तस्य 'कारणाद् भिन्नं कार्यं तन्नासदेव' इति वादस्य निरसनम् ।	४२४	९
५ अपराभिमतत्वेनोपन्यस्ते अद्वैतवादे निरसनीये सर्वेषां तत्त्व–द्रव्य–प्रधान–शब्दब्रह्माद्वैतवादानां निरसनम् ।	४२८	९
२८ गाथाव्याख्या ।	४२९	
खे खेऽशे सत्यानामपि नयानां परांशविचालने मिथ्यात्वात् समयज्ञः सापेक्षावधारणं करोतीति वर्णनम् ।	४२९	६
२९ गाथाव्याख्या ।		
सर्वस्यापि वस्तुनोऽभेदरूपेण द्रव्यार्थिकपरिच्छेद्यस्यैव भेदरूपेण पुनः पर्यायार्थिकपरिच्छेद्यत्वाभिधानम् ।	४२९	२१
३० गाथाव्याख्या ।	४३०	
शब्दार्थगतत्वेन पर्यायस्य द्वैविध्यं प्रदर्श्य तस्य द्विविधस्यापि पुनर्भेदाभेदरूपेण विवेचनम् ।	४३०	१
३१ गाथाव्याख्या ।	४३०	
एकस्यैव वस्तुनस्त्रैकालिकानन्तशब्दार्थपर्यायशालितयाऽनन्तप्रमाणत्वेन सर्वात्मकत्वाख्यानम् ।	४३०	१४
३२ गाथाव्याख्या ।	४३०–४४०	
व्यञ्जनार्थपर्यायभावनया पुरुषस्य भेदाभेदात्मकत्वसमर्थनेन वस्तुमात्रस्याऽनेकान्तरूपत्वसूचनम् ।	४३०	२६
व्यञ्जनपर्यायप्रसङ्गेन वाचकशब्द–वाच्यतत्सम्बन्धयोस्स्वरूपमीमांसा ।	४३१	१२
वर्णेषु वाचकत्वं व्युदस्य स्फोटे तत्प्रतिपादयतो वैयाकरणमतस्य वर्णनम् ।	४३१	१४
वर्णेषु वाचकत्वमभ्युपगम्य स्फोटे तन्निरस्यतो वैशेषिकमतस्य वर्णनम् ।	४३३	१
सानुपूर्विकनित्यवर्णवाचकत्वपरं मीमांसकमतमुपन्यस्य तन्निरसनम् ।	४३५	२०
वाच्य–वाचकयोः सम्बन्धस्य नित्यत्वं निषिध्य तस्य कृतकत्वव्यवस्थापनम् ।	४३६	१६
अनुमानाच्छब्दस्य प्रमाणान्तरत्वप्रसाधनम् ।	४३७	९
परकल्पितां वर्णानां नित्यतां तत्पदादिप्रक्रियां च प्रदूष्याऽनेकान्तदृष्ट्या शब्द–तदर्थसम्बन्धयोः स्वरूपनिरूपणम् ।	४३९	६
३३ गाथाव्याख्या ।	४४०	
पुरुषस्य भेदाभेदैकान्ताभ्युपगमेऽभावरूपतापत्त्या दूषणम् ।	,,	
३४ गाथाव्याख्या ।	४४०	
पुरुषे शब्दार्थपर्यायाभ्यां भेदाभेदरूपत्वस्य व्यवस्थापनम् ।	,,	
३५ गाथाव्याख्या ।	४४१	
वस्तुनोऽनेकान्तात्मकत्वेऽप्येकान्तरूपत्वं वदतोऽप्रमाणत्वख्यापनम् ।	,,	
३६ गाथाव्याख्या ।	४४१–४४६	
सप्तभङ्गीस्वरूपविचारणा ।	,,	
मूलभङ्गत्रयं विवेच्य तत्समर्थकानां षोडशानामपेक्षाभेदानां व्यावर्णनम् ।	४४३–४४६	

विषयः	पृष्ठम्	पङ्क्तिः
३७ गाथाव्याख्या ।	४४६	
चतुर्थभङ्गनिरूपणम् ।	४४६	
३८ गाथाव्याख्या ।	,,	
पञ्चमभङ्गप्रदर्शनम् ।	४४६	
३९ गाथाव्याख्या ।	४४७	
षष्ठभङ्गप्रदर्शनम् ।	४४७	
४० गाथाव्याख्या ।	,,	
सप्तमभङ्गप्रकाशनम् ।	,,	
४१ गाथाव्याख्या ।	४४८	
सप्तानां भङ्गानामर्थनये शब्दनये च यथासम्भवं विभजनम् ।	,,	
४२ गाथाव्याख्या ।	४४८–४४९	
केवलपर्यायार्थिकनयस्य मतमुपदर्श्य तस्याऽपूर्णत्वाभिधानम् ।	,,	
४३ गाथाव्याख्या ।	४४९	
केवलद्रव्यार्थिकनयमतस्य प्रदर्शनम् ।	,,	
४४ गाथाव्याख्या ।	४४९–४५०	
केवलद्रव्यार्थिकनयमतस्याऽप्यपूर्णत्वमिति प्रदर्शनेन वस्तुनो भेदाऽभेदरूपत्वसूचनम् ।	४४९	
४५ गाथाव्याख्या ।	४५०	
पुरुषदृष्टान्ते भेदाऽभेदात्मकत्वपरिणतिर्बाह्यप्रत्यक्षेण सिद्धेति प्रदर्शनम् ।	४५०	
४६ गाथाव्याख्या ।	४५०–४५२	
आध्यात्मिकप्रत्यक्षतोऽपि तत्र दृष्टान्ते यथा भेदाऽभेदात्मकत्वसिद्धिस्तथा दार्ष्टान्तिके जीवेऽपि तद्योजनम् ।	४५०	
उत्पाद-व्यय-ध्रौव्यात्मकतया जीवतत्त्वस्य साधनम् ।	४५१–४५२	
४७ गाथाव्याख्या ।	४५२	
जलदुग्धदृष्टान्तेन जीव-कर्मणोरविभागकथनम् ।	४५२	
४८ गाथाव्याख्या ।	४५३	
जीव-कर्मणोरन्योन्यानुप्रवेशेन तदाश्रितज्ञानादिरूपादीनामपि परस्पराऽनुप्रवेशवर्णनम् ।	,,	
४९ गाथाव्याख्या ।	,,	
परस्पराऽनुप्रवेशादात्म-पुद्गलयोः कथञ्चिदेकत्वस्य अनेकत्वस्य चोपपादनम् ।	४५३	
५० गाथाव्याख्या ।	४५३–४५४	
आत्म-पुद्गलयोर्वस्तुतो बाह्याभ्यन्तरविभागाभावेऽपि अभ्यन्तरव्यपदेशस्य मनोनिमित्तकत्वेन समर्थनम् ।	४५३	
५१–५२ गाथाव्याख्या ।	४५५	
निरपेक्षयोर्द्रव्यास्तिक-पर्यायास्तिकयोर्मतेन यथा यथा कर्मबन्धतत्फलप्ररूपणा भवति तथोपवर्णनम् ।	,,	
५३ गाथाव्याख्या ।	४५५–४५६	
सापेक्षनयद्वयाश्रितानामेव कथञ्चित्पदाङ्कितानां वचसां स्वसमयप्ररूपणात्वं नान्येषामित्यभिधानम् ।	४५५	
५४ गाथाव्याख्या ।	४५६	
स्याद्वादज्ञोऽधिकारिविशेषे सति निरपेक्षनयद्वयाश्रितान्यपि वचांसि प्रयुञ्जानो न दोषभागिति प्रकथनम् ।	,,	

संपादकीय निवेदन.

आ त्रीजो भाग विद्वानो समक्ष उपस्थित करतां संकल्पनी आंशिक सिद्धिने लीधे अमने कांइक भार हळवो थयानो अनुभव थाय छे अने जाणे तेटले अंशे थाक उतर्यो होय तेम भासे छे. बे वर्ष पहेलां आ भागने लगतुं संशोधनकार्य प्रारंभेलुं अने जो ते सतत चालु रह्युं न होत तेम ज पुरातत्त्वमंदिर अने अन्य विद्यारसिक मित्रो तरफथी अमारे जोइती बधी मदद वखतसर मळती रही न होत तो बीजा भाग पछी एक ज वर्षने अन्तरे आ भाग प्रसिद्ध करवानो जे प्रसंग मळ्यो छे ते कदी न मळत.

प्रस्तुत भागमां आवता ग्रन्थ अने तेना संशोधनने लगती केटलीक खास बाबतोनुं स्पष्टीकरण अहीं करी देवुं आवश्यक छे. ग्रन्थने लगती मुख्य बे बाबतो छेः–(१) मूळ गाथाना परिमाण संबंधी अने (२) टीकागत अशुद्धि संबंधी.

(१) पहेला कांडनी ५४ गाथाओमांथी प्रथमनी ४ गाथाओ प्रसिद्ध थयेल पहेला अने बीजा भागमां आवेली छे अने बाकीनी ५० गाथाओ आ त्रीजा भागमां आवी जाय छे अने ए रीते आ भागमां आखुं प्रथम कांड पूर्ण थाय छे. मूलकार श्रीसिद्धसेनदिवाकरे आखा प्रथम कांडमां नयनी सूक्ष्म, व्यवस्थित अने विशद मीमांसा करी छे तेम ज टीकाकार श्रीअभयदेवे अतिविस्तृत दार्शनिक विविध विषयोनी चर्चा द्वारा ए मीमांसाने बहु ज पल्लवित करेली छे. आ त्रीजो भाग प्रकाशित थवाथी मूलकार अने टीकाकारना नयसंबंधी संक्षिप्त तेम ज विस्तृत ऊहापोहने संपूर्णपणे जाणवानुं साधन प्राप्त थाय छे.

(२) प्रस्तुत भागमां पांचमीथी चोपन सुधीनी पचास गाथाओनी टीका आवी जाय छे. तेमां बीजी बधी गाथाओ करतां पांचमी अने छट्ठी ए बे गाथाओनी टीका घणी मोटी छे. तेमां य वळी छट्ठी करतां पांचमीनी टीका तो वधारे मोटी छे. आ भागना लगभग बे तृतीयांश पांचमी अने छट्ठी ए बे गाथानी टीकाथी ज रोकाएला छे अने पांचमी गाथानी टीकाथी एक तृतीयांश करतां वधारे रोकाएल छे. पांचमी गाथानी टीका जेम विस्तारमां तेम अशुद्धिमां पण बाकीनी बधी गाथाओनी टीका करतां चडे छे. सातमी गाथाथी चोपनमी गाथा सुधीनी टीकामां अशुद्धि बहु ज जुज हती अने जे थोडी हती ते दूर करी शकाय तेवी होवाथी तेटला भागमां प्रायः सर्वत्र पाठशुद्धि थइ गइ छे. छट्ठी गाथानी टीकामां अशुद्धि जरा वधारे हती पण ते पांचमी गाथानी टीकाना प्रमाणमां बहु ज थोडी कहेवाय ज्यारे पांचमी गाथानी टीका जेटली अने जेवी अशुद्धि तो हजी सुधी एके गाथानी टीकामां जणाइ नथी. बीजा भागमां आवेली बीजी गाथानी टीका जो के बहु अशुद्ध हती छतां तत्त्वसंग्रहनी प्राप्तिने लीधे ते संपूर्णपणे शुद्ध करी छपावी शकाइ. पांचमी गाथानी टीकाने शुद्ध करवा तेवुं कोइ पण साधन छेवट सुधी प्राप्त थयुं नहि.

जेम बीजी गाथानी टीकामां बौद्धदर्शनने लगती चर्चा मुख्य छे तेम पांचमी गाथानी टीकामां पण मात्र बौद्धतत्त्वोनी चर्चा छे. बीजी गाथानी टीकामां चर्चाएलुं प्रकरण जेम अखंडपणे तत्त्वसंग्रहमां मळी आव्युं अने ते बीजी गाथानी टीकाने शुद्ध करवामां सर्वांशे उपयोगी थयुं तेम पांचमी गाथानी टीकामां चर्चाएल सौत्रांतिक, वैभाषिक, योगाचार अने माध्यमिक ए चार बौद्धशाखाना मंतव्योवाळा टीकाकारे उतारी लीधेला मूळ प्रकरण ग्रंथो जो मळी आवे तो ज ए टीकानी अशुद्धि

सर्वांशे दूर करी शकाय. परन्तु प्रयत्न छतां तत्त्वसंग्रहनी पेठे अखंडपणे संमतिनी टीका साथे सरखावी शकाय तेवा बौद्ध के अन्यदर्शनसंबंधी कोई ग्रंथो ठेठ सुधी मळ्या नहि तेथी पांचमी गाथानी टीकाने संपूर्णपणे शुद्ध करवानुं काम अमारे माटे अशक्य ज रही गयुं.

श्रीअभयदेवसूरिए पांचमी गाथानी टीकामां पर्यायास्तिकनयनो विभाग तेम ज तेनुं उत्तरोत्तर सूक्ष्मपणुं दर्शाववा ऋजुसूत्र, शब्द, समभिरूढ अने एवंभूत ए चार नयोनुं विस्तृत स्वरूप सौत्रांतिक आदि चार शाखाओना जे बौद्धग्रंथो के तेना प्रकरणोने आधारे वर्णव्युं तेम ज घटाव्युं छे ते मूलभूत ज बौद्धग्रंथो के तेना उपरथी अक्षरशः थयेल उतारावाळा अन्य ग्रंथो ज्यांसुधी न मळे त्यांसुधी पांचमी गाथानी टीकाने संपूर्ण शुद्ध करवी कोई पण रीते शक्य नथी. ए टीकाने शुद्ध करवाना मौलिक अने महत्त्वना साधनो प्राप्त न थया छतां तेने शुद्ध करवामाटे अमे बीजा उपलब्ध साधनोनो बहु छुटथी अने कंटाळ्या विना उपयोग कर्यो छे. ए साधनोमां अनेक बौद्ध, जैन अने वैदिक ग्रंथोनो समावेश थाय छे परन्तु ते बधामां शुद्धिकार्यमां उपयोगी थवानी दृष्टिए प्रमेयकमलमार्त्तंडनुं स्थान मुख्य छे.

लेखकोनो असली प्रतनी लिपि वांचवानो भ्रम, अर्थनुं अज्ञान के तेनो विपर्यास, पठन–पाठननो अभाव अने प्रतिना पत्रोनुं खंडितपणुं के अस्तव्यस्तपणुं इत्यादि अनेक कारणोने लीधे अशुद्धिओ पण विविध प्रकारनी उत्पन्न थयेली छे. एने सुधारवा अमे मुख्यपणे त्रण रीतो अखत्यार करेली छे. (१) संमतिटीकानी तेना पूर्ववर्त्ती के उत्तरवर्त्ती समानविषयक ग्रंथो साथे सरखामणी, (२) अर्थदृष्टि अने (३) भाषादृष्टि. ज्यां टीकाने शुद्ध करवामां अन्य ग्रंथोनी सरखामणीनो उपयोग कर्यो छे त्यां पण अर्थ अने भाषादृष्टि छोडी नथी. परन्तु ज्यां तेवी सरखामणीनुं साधन नथी मळ्युं त्यां अर्थदृष्टिने प्रधान राखी भाषादृष्टिनी मददथी पाठशुद्धि कल्पी छे अने ज्यां अर्थदृष्टि पण काम न करी शकी त्यां केवळ भाषादृष्टिनो उपयोग करी पाठशुद्धि कल्पी छे अने चालु संकेतप्रमाणे असली पाठने कायम राखी शुद्धरूपे कल्पेला पाठने कोष्ठकमां दाखल करेल छे अने बनी शक्युं त्यां ते कल्पेला पाठना संवादी उल्लेखो नीचे टिप्पणीमां ते ते ग्रंथना नाम साथे कर्या छे.

आ त्रणे पद्धतिओनो यथाशक्ति संपूर्ण उपयोग कर्या छतां पण पांचमी गाथानी टीका घणे स्थळे घणा प्रमाणमां अशुद्ध अने असंलग्न रही गइ छे. जे जे अंशो अमने खंडित, पुनरुक्त, विपर्यस्त अने असंलग्न लाग्या छे ते बधानो आदिभाग (??) अथवा [?? तथा अंतभाग (??) अथवा ??] आवा चिह्नथी अंकित कर्यो छे. उदाहरणार्थ जुओ पृ० ३२२ तथा ३३३ वगेरे. बहु प्रयत्नने परिणामे पांचमी गाथानी टीकाना पूर्वार्द्धमांथी तो घणी अशुद्धिओ ओछी थइ छे परन्तु उत्तरार्द्ध अने तेमां य तेना अंत भागमां मोटी अने खटके एवी घणी अशुद्धिओ रही ज गइ छे.

छट्ठी गाथानी टीकानो केटलोक प्राथमिक अंश (पृ० ३७९–३८५) तो तत्त्वसंग्रहना शब्दब्रह्मपरीक्षाप्रकरणनो प्रायः अक्षरशः उतारो छे. तेथी एटलो भाग तत्त्वसंग्रहनी मदद द्वारा तद्दन शुद्ध थयो छे. एटलुं ज नहि पण नीचे टिप्पणीमां सरखामणी माटे अपाएल तत्त्वसंग्रहनी मूल कारिकाओ अने क्वचित् क्वचित् पंजिकाना अंशोवडे एटलो भाग अभ्यासको माटे बीजी गाथानी टीकानी पेठे ज वधारे उपयोगी बनेलो छे. एटला अंश पछीनो छट्ठी गाथानी टीकानो बाकीनो पृ० ३८६ थी बधो अंश मोटे भागे बौद्ध मंतव्यनी चर्चाथी भरेलो छे. ए भाग साथे अक्षरशः सरखावी शकाय तेवो ग्रंथ न मळवाथी घणी अशुद्धिओ दूर कर्या छतां पण क्वचित् क्वचित् अशुद्धि रही गइ छे पण ते पांचमी गाथानी टीका जेवी गूढ नथी. एकंदर आ त्रीजा भागमां (पांचमी गाथानी टीका बाद करीए तो) अशुद्धिओ बहु विरल रहेवा पामी छे.

हवे प्रस्तुत भागमां आवेल ग्रंथना संशोधननी बाबत लइए. ए बाबतो मुख्य त्रण छे. (१) प्रतिओ संबंधी, (२) पाठान्तरो संबंधी अने (३) ग्रंथान्तरोना उपयोग संबंधी.

(१) पहेला अने बीजा भागना संशोधन कार्यमां जे प्रतिओनो उपयोग थयेलो छे ते प्रतिओ उपरांत बीजी बे विशिष्ट प्रतिओए आ त्रीजा भागना संशोधनकार्यने बहु सरल अने महत्त्वनुं बनाव्युं छे. ए बे विशिष्ट प्रतिओ ते ताडपत्रनी छे. बेमां एक ताडपत्र लांबा आकारनुं अने बीजुं टुंकुं छे. ताडपत्रनी बन्ने प्रतिओ शुद्धप्राय अने क्वचित् क्वचित् टिप्पणीयुक्त छे. आ बृहत् अने लघु बन्ने ताडपत्रोमां सटीक संमतिनुं उत्तरार्द्ध छे. कारण के तेना नंबरो प्रथमथी शरु थइ अनुक्रमे वधता जाय छे. आ बन्ने प्रतिओना पूर्वार्द्धवाळा खंडो जेमां पहेली गाथाथी छट्ठी गाथानी टीकाना लगभग अर्धांश सुधीनुं पूर्वार्द्ध हशे ते हजी प्राप्त थया नथी. जो ए बन्ने पूर्वार्द्धना खंडो विनाशना पंजामांथी बची कोइ पण स्थले सचवाइ रही गया हशे अने क्यारेक कोइने पण सद्भाग्ये मळी आवशे तो आ उत्तरार्द्धवाळा खंडोनी पेठे ते खंडो पण अशुद्ध रही गयेल टीकाने शुद्ध करवामां अमूल्य मदद आपशे. केवल पांचमी गाथानी टीका पूरतो पण ताडपत्रनो भाग मळ्यो होत तो कदाच एनी आटली जटिल अशुद्धिओ रही न होत. उत्तरार्द्धना जे बे भागो सद्भाग्ये प्राप्त थया छे तेमां बृहत् ताडपत्रमां उत्तरार्द्ध पूर्ण छे एटले प्रथम कांडनी छट्ठी गाथानी टीकाना मध्यभागथी लइ प्रथम कांड पूर्ण अने द्वितीय तथा तृतीय कांड पण पूर्ण छे. ए बृहत् ताडपत्रना कुल ३३४ पानां छे. ज्यारे लघु ताडपत्र उपर उत्तरार्द्ध पण पूर्ण नथी. एनुं प्रथम पत्र नथी अने छेल्लुं पत्र १८७ मुं छे. तेटला पत्रोमां बीजुं कांड पण अपूर्ण छे अने वच्चे घणे स्थले पत्रो गुम थयां छे तेम ज घणे स्थले लींटीओनी लींटीओ घसाइ भुंसाइ गयेली छे. ए बन्ने ताडपत्रना सुंदर अक्षरोए, शुद्ध पाठोए अने महत्त्वनी टिप्पणीओए प्रस्तुत भागना संशोधनमां जे मदद आपी छे तेने लीधे पांचमी गाथानी टीकामां रही गयेल अशुद्धिओनी त्रुटि जरा ओछी खटके छे. कागळनी अन्य प्रतिओनी पेठे आ ताडपत्रनी प्रतिओनी पण विशेष माहिती भविष्यमां आपवानी धारणा होवाथी अत्यारे एटलुं ज सूचववुं बस थशे के, आ बे ताडपत्रना खंडोने लीधे प्रस्तुत त्रीजा भागना संशोधनने वधारे महत्त्व मळ्युं छे अने हवे पछी प्रसिद्ध थनार बीजा कांडनो चोथो भाग अने त्रीजा कांडनो पांचमो भाग पण आ बे खंडोने लीधे ज वधारे महत्त्व प्राप्त करशे.

परन्तु जेम एक बाजु उपलब्ध ताडपत्रना खंडो सगवडमां उमेरो करे छे तेम बीजी बाजु बा० अने बा० प्रतिनो थोडो खंडित भाग संशोधनकार्यमां साले छे. वा० बा० बन्ने प्रतिओ वधारेमां वधारे अशुद्ध छतां क्वचित् क्वचित् अन्य बधी प्रतिओ करतां वधारेमां वधारे शुद्ध छे. ए बन्ने समान प्रतिओना पांचमी गाथानी टीकाना अंतवाळां अने छट्ठी गाथानी टीकाना आरंभवाळां केटलांक पानां उपलब्ध न होवाथी एनुं खंडितपणुं खास साले छे. जो ए बे प्रतिओनां एटलां पानां क्यारेक उपलब्ध थाय तो ते ते स्थळनी अशुद्धिने अल्पांशे दूर करवामां तेनो किंमती उपयोग थइ शकशे.

(२) प्रस्तुत भागना संशोधनमां पाठान्तरनुं कार्य प्रथमना बे भागो करतां कांइक जुदुं पडतुं थयेलुं छे. प्रथमना बे भागोना संशोधन वखते पाठान्तरो लीधा पछी तेमांथी पसंदगी करवानो अने छोडी देवानो क्रम सामान्य रीते एक सरखो राखवामां आव्यो हतो. ज्यारे प्रस्तुत भागमां ए क्रम जाणी जोइने ज एक सरखो राख्यो नथी. प्रस्तुत भागमां पांचमी गाथानी टीका अशुद्धिबहुल छे अने छट्ठी तथा खास करी सातमी आदि बधी गाथाओनी टीका वधारे शुद्ध छे. तेथी ज्यां ज्यां जटिल अशुद्धिओ जणाइ त्यां त्यां प्रतिओमांथी मळेला तद्दन खोटा जणाता पाठान्तरो पण

नीचे नोंध्या छे—जेथी ते ते स्थळोमां सघळी प्रतिओ एक सरखी रीते केवी अने केटली विलक्षण विलक्षण रीते अशुद्ध थइ गइ छे ते अभ्यासीने मालूम पडे अने अशुद्धिनी उत्पत्ति केम थाय छे? ते थया पछी केम वधे छे? तेम ज घणीवार शुद्ध करवा जतां उलटी अशुद्धि केम आवे छे? एनुं सूक्ष्म ज्ञान अशुद्धिनो इतिहास लखनार विद्वान्ने एवा पाठान्तरो उपरथी थइ शके. तेम ज कोई अभ्यासीने ए अशुद्ध जणाता विविध पाठान्तरो उपरथी कालान्तरे शुद्ध पाठ कल्पवानी प्रेरणा मळे—आथी उलटुं जे भाग तद्दन शुद्ध अगर शुद्धप्राय छे त्यां प्रतिओमांथी मळी आवेला अनेक पाठान्तरोमांथी जे उपयोगी लाग्यां ते ज बहुधा राख्यां छे अने अन्तर्गडु जेवा अनुपयोगी जणायेलां पाठान्तरो तद्दन छोडी दीधां छे.

(३) पहेला बे भागना संशोधनमां उपयोग नहीं कराएल एवा पण अनेक ग्रंथोनो प्रस्तुत भागना संशोधनमां उपयोग करवामां आव्यो छे. टीकामां आवेल अवतरणोना मूल स्थान बतावबा, प्रतिपाद्य विषयनी अने पाठनी सरखामणी करवा, कल्पित शुद्ध पाठनो संवाद आपवा, एक ज विषयने भिन्न भिन्न दर्शनना ग्रंथकारो के एक ज दर्शनना भिन्न भिन्न समय भावी ग्रंथकारो केवी केवी रीते चर्चे छे ते जणाववा कोई पण विषय परत्वे अभ्यासीनी दृष्टीने व्यापक बनावी तेना अभ्यासनो मार्ग वधारे सरळ करवा अने कया ग्रंथ के कया ग्रंथकार उपर कोनी कोनी केटकेटली असर पडी छे तेनुं पृथक्करण करवानी सरळता करी आपवा एम अनेक दृष्टिथी प्रेराई प्रस्तुत भागना संशोधनमां कराएलो प्रचुरग्रंथराशिनो उपयोग अभ्यासको आपोआप जोई शकशे.

प्रस्तुत भागना संशोधनमां अनेक ग्रंथनो उपयोग कर्या छतां पण एक महत्त्वपूर्ण ग्रंथनो उपयोग करवो बाकी रही गयो छे. बौद्धभिक्षु धर्मकीर्तिप्रणीत हेतुबिन्दुना दुर्लभ विवरणनी जीर्ण ताडपत्रनी प्रति प्राप्त थयानुं सूचन अमे संमतिना द्वितीय भागना प्रारंभिक निवेदनमां ज करी गयेला छीए. प्रस्तुत भागना संशोधनमां ए प्रतिनो उपयोग करी शकायो होत तो केटलीक अशुद्धिओ दूर करवामां बहु किंमती मदद मळत पण प्रस्तुत ग्रन्थ छपावबा लाग्या पछी तेनी वांची शकाय तेवी नकल तैयार थई शकी. तेथी ए विवरणनी सरखामणी भविष्यना विशिष्ट परिशिष्ट माटे मुलतवी राखवानी फरज पडी छे.

आ भागनी तैयारीथी मांडी प्रसिद्धि सुधीमां खास विद्यारुचिमहानुभावो तरफथी जे जे विविध सगवड मळी छे तेनी नीचे नोंध लई अमे अमारी कृतज्ञता प्रदर्शित करीए छीए.

ख्यातनामा श्रीमद् आत्मारामजी महाराजना पट्टधर प्रशिष्य श्रीमद् **विजयवल्लभसूरि**नी प्रेरणाथी लाहोर शहेरना श्रीसंघे करेली आर्थिक मददथी आ कार्यने लायक सहकारी कार्यकर्ता मेळववामां अमने अतिउपयोगी राहत मळी छे.

प्रवर्त्तक श्रीकान्तिविजयजीना प्रशिष्य अने अमारा हमेशना सहकारी सुशील **मुनिश्रीपुण्यविजयजी**ए दूर रह्या रह्या पण संशोधनकार्यमां करेली विविध मददने लीधे अमने अतिकिंमती अनुकूलता प्राप्त थई छे. ते उपरात उपर सूचवेल हेतुबिन्दु विवरणनी तद्दन जीर्ण अने घसाएल भुंसाएल अक्षरवाळी तथा मुश्केलीथी पण वांची न शकाय एवी प्राचीन लिपिनी ताडपत्रनी प्रति उपरथी बहु परिश्रम लई तेओश्रीए अमारा उपयोग माटे एक सुवाच्य अक्षरवाळी सुंदरतम नकल करी आपी छे. जे पुरातत्त्वमंदिरना पुस्तकसंग्रहमां तेओश्रीना नाम साथे मूकबामां आवी छे.

सुखलाल
अने
बेचरदास.

संपादकीयं निवेदनम् ।

वयमद्याऽयं तृतीयः संमतेर्विभागो विदुषां समक्षमुपस्थापयन्तो लेशमात्रसंकल्पसिद्धिकृतेन कियन्मात्रेण भारलाघवेन स्वल्पं श्रमापनोदमिव अनुभवामः । प्रस्तुतविभागसंशोधनकर्म वर्षद्वयात् प्रागेव प्रारभ्यत किन्तु यदि तत् सततं नाऽकरिष्यत न वा अस्मदपेक्षिता सकलाऽपि साधनसम्पत्तिः पुरातत्त्वमन्दिरेण इतरैश्च विद्याप्रियमहानुभावैः यथासमयमुपाहरिष्यत तदा प्रस्तुतविभागप्रकाशनं द्वितीयविभागाऽनन्तरमेकेनैव वर्षेण कथमपि शक्यविधानं नाऽभविष्यत् ।

प्रस्तुतभागगतग्रन्थ—तदीयसंशोधनसम्बन्धिनः कतिपये विशिष्टविषया अत्र लेशतः स्पष्टीकर्तुमभिप्रेतास्सन्ति । तत्र मूलगाथापरिमाणं टीकागतमशुद्धत्वं चेति द्वावेव ग्रन्थसम्बन्धिनौ विषयौ प्रधानतया वक्तव्यौ स्तः ।

(१) प्रथमप्रभृतिगाथाचतुष्टयस्य प्रकाशितपूर्वे विभागद्वये शेषगाथापञ्चाशतश्च प्रकाश्यमानेऽस्मिन् विभागे लब्धसमावेशतया प्रथमं काण्डं प्रस्तुतविभाग एव परिपूर्यते । मूलकारैः श्रीमद्भिर्दिवाकरैरखिलेऽपि प्रथमे काण्डे सूक्ष्मतया, व्यवस्थिततया, विशदतया च मीमांसिता नया एव टीकाकारैः श्रीमद्भिरभयदेवैरतिविस्तरवत्या दार्शनिकविविधतत्त्वचर्चया विशदीकृता वर्त्तन्ते । प्रस्तुतविभागप्रकाशनेन च मूलकार—टीकाकारकृतनयगोचरसंक्षिप्तविस्तृतसमग्रमीमांसापरिज्ञानसामग्री सुलभतया समुपतिष्ठते ।

(२) प्रस्तुतविभागसन्निविष्टायां गाथापञ्चाशट्टीकायां षष्ठ्यष्टीका विस्तृततरा पञ्चम्याश्च विस्तृततमा विद्यते । पञ्चमगाथाटीका विस्तरेणेवाऽशुद्ध्याऽपि शेषसमस्तगाथाटीकामतिशेते । सप्तमीप्रभृतिसमस्तगाथाटीका सुनिवारविरलाऽशुद्धिमती समासीत् । अत एव सा सर्वत्र शुद्धप्राया समपद्यत । षष्ठगाथाटीकायां किंचिदधिकाऽप्यशुद्धिः पञ्चमगाथाटीकातः स्वल्पतमैवाऽऽसीत् पञ्चमगाथाटीकायां तु यादृशी यावती चाऽशुद्धिरायाता तादृशी तावती च क्वाऽपि टीकांशे नाऽवलोकनपथमवतीर्णा । यद्यपि द्वितीयविभागसन्निविष्टा द्वितीयगाथाटीकाऽप्यशुद्धतरैवाऽऽसीत् तथापि तत्त्वसंग्रहसाहायकेन सा सर्वात्मना शुद्धीकृत्य मुद्रयितुमशक्यत । पञ्चमगाथाटीकां शुद्धीकर्तुं तथाविधं किमपि साधनमद्ययावन्नाऽलभ्यत ।

द्वितीयगाथाटीकायामिव पञ्चमगाथाटीकायामपि बौद्धतत्त्वगोचरैव चर्चा मुख्यतामनुभवति । यथा द्वितीयगाथाटीकाचर्चितं बौद्धप्रकरणं संशोधयितुं तत्त्वसंग्रहीयं तदेव प्रकरणमविकलतया उपायुज्यत तथा पञ्चमगाथाटीकाचर्चितसौत्रान्तिक—वैभाषिक—योगाचार—माध्यमिकाख्यचतुर्विधबौद्धशाखामन्तव्यप्रतिपादकाः टीकाकारैरक्षरशोऽनुकृता मूलप्रकरणग्रन्था एव तां टीकां संशोधयितुं सर्वात्मना उपयुज्येरन्; परन्तु सत्यपि यत्ने तत्त्वसंग्रहवत् संमतिटीकाऽविकलतुलनोपयोगिनां केषांचित् बौद्धतन्त्रीयाणामन्यतन्त्रीयाणां वा ग्रन्थानामिदानीं यावदप्राप्ततया पञ्चमगाथाटीकायाः सर्वाङ्गीणं शुद्धत्वं अस्माकमशक्याऽनुष्ठानमेव परिशिष्यते ।

श्रीमदभयदेवसूरिभिः पञ्चमगाथाटीकायां पर्यायास्तिकनयस्य विभागमुत्तरोत्तरसूक्ष्मत्वं च प्रदर्शयितुम् ऋजुसूत्र—शब्द—समभिरूढैवंभूतनयचतुष्टयस्य विस्तृतं स्वरूपं सौत्रान्तिकादिशाखाचतुष्टयसम्बन्धिनो यान् ग्रन्थान् समाश्रित्य व्यावर्णितं समन्वितं च, ते मूलभूतबौद्धग्रन्था अक्षरशस्तदुपजीविनोऽपरे ग्रन्था वा यावन्नोपलभ्येरन् तावत् पञ्चमगाथाटीकायाः सर्वथा शुद्धिविधानं कथमपि

शक्याऽनुष्ठानं नैव प्रतिभाति । तट्टीकासंशोधनोपयोगिनां मौलिकानां महत्त्वभाजां च साधनानामनुपलब्धत्वेऽपि अन्यान्युपलब्धानि साधनानि असंकुचिततया अखिन्नमनस्कतया च तत्संशोधनकर्मणि कृतोपयोगानि । यद्यपि उपयुक्तेषु तेषु साधनेषु बौद्ध-जैन-वैदिकतन्त्रीया अनेके ग्रन्थाः समाविशन्ति तथापि शुद्धिकार्योपयोगदृष्ट्या प्रमेयकमलमार्तण्ड एव तेषु सर्वेषु प्रथमतामुपयाति ।

लेखकानां मूलप्रतिस्थलिपिवाचनगोचरेण भ्रमेण, अर्थाऽज्ञान–विपर्यासाभ्याम्, पठन–पाठनाऽभावेन, प्रतिस्थपत्राणां खण्डिततया अस्तव्यस्ततया वा अन्यैश्च बहुभिर्हेतुभिरशुद्धयोऽपि विविधाकारास्समुत्पन्नाः दृश्यन्ते । ताः परिष्कर्तुं तिस्रः पद्धतयोऽत्र मुख्यतयाऽस्माभिः समाश्रीयन्त । तद्यथा–पूर्ववर्त्तिभिः उत्तरवर्त्तिभिर्वा समानविषयकैर्ग्रन्थैः संमतिटीकायास्तुलना, अर्थदृष्टिर्भाषादृष्टिश्चेति । यत्र टीकां संशोधयितुं ग्रन्थान्तरतुलनाऽकारि तत्रापि नाऽर्थदृष्टिर्भाषादृष्टिश्च उपैक्षिषाताम् परन्तु यत्र तथाविधतुलनासाधनं नालम्भि तत्राऽर्थदृष्टिं प्रधानीकृत्य भाषादृष्टिसाहाय्येन, यत्र चाऽर्थदृष्टेरपि अकिंचित्करत्वमन्वभावि तत्र केवलां भाषादृष्टिमुपष्टभ्य पाठशुद्धिं कल्पयित्वा यथापूर्वसंकेतं मौलिकपाठं स्थापयित्वैव कल्पितः पाठः कोष्ठके न्यवेश्यत । यथासाध्यं च कल्पिततत्पाठसंवादभागिन उल्लेखा अधस्तात् टिप्पण्यां तत्तद्ग्रन्थान् नामग्राहमुपन्यस्ताः ।

एतस्य च पद्धतित्रयस्य यथाशक्ति सर्वात्मना कृतोपयोगत्वेऽपि पञ्चमगाथाटीका बहुषु स्थानेषु बाहुल्येन अशुद्धाऽसंलग्ना च स्थितैवाऽऽस्ते । ये येंऽशाः अस्माकं खण्डिततया, पुनरुक्ततया, विपर्यस्ततया, असंलग्नतया च प्रतिभान्ति स्म ते सर्वे आदौ (??) अथवा [?? अन्ते च (??) अथवा ??] एतादृशचिह्नैरङ्कयित्वा मुद्रिताः । तद्यथा पृ० ३२२ तथा ३३३ प्रभृति । यद्यपि पञ्चमगाथाटीकायाः पूर्वार्द्धवर्त्तिन्यः बह्व्योऽशुद्धयः भूयसा प्रयत्नेन निराक्रियन्त तथापि तस्या उत्तरार्द्धवर्त्तिन्यः विशेषतस्तु तत्प्रान्तवर्त्तिन्यः शल्यायमाना महत्यो बह्व्योऽशुद्धयः परिशिष्टा आसत एव । षष्ठगाथाटीकान्तर्गतः कियन्मात्रः प्राथमिकोंऽशः (पृ० ३७९–३८५) अक्षरशः तत्त्वसंग्रहीयशब्दब्रह्मपरीक्षाप्रकरणप्रतिकृतितया तत्साहाय्येन न केवलं सर्वथा शुद्ध एव प्रत्युताऽधस्तात् टिप्पण्यां तुलनायै निवेशिताभिः तत्त्वसंग्रहीयमूलकारिकाभिः क्वचित् क्वचित् पङ्क्तिकापङ्क्तिभिश्च द्वितीयगाथाटीकावत् गवेषकदृष्ट्या उपयुक्ततरः समपद्यत । ततोऽग्रेतनस्तु पृ० ३८६ प्रभृति तदीयः सर्वोऽप्यंशः बहुधा बौद्धमन्तव्यस्पर्शिन्या चर्चया व्याप्तो वर्त्तते । तत्र च भूयसीनामशुद्धीनां निराकृतत्वेऽपि अक्षरशः तुलनोपयोगिनो ग्रन्थस्याऽशक्यलाभतया काचित् काचिदशुद्धिः अवशिष्यत एव परन्तु सा पञ्चमगाथाटीकाऽशुद्धिवद् गूढा नैवाऽस्ति । फलतः पञ्चमगाथाटीकावर्जं पश्यतां प्रस्तुते विभागे शिष्यमाणा अशुद्धयो विरलतमा एव दृष्टिपथमुपयास्यन्ति ।

अथाऽतः प्रस्तुतग्रन्थसंशोधनसंबन्धिनो विषयान् गृह्णीयाम । ते पुनः प्रतिगोचरतया, पाठान्तरगोचरतया, ग्रन्थान्तरोपयोगगोचरतया च मुख्यास्त्रय एवाऽत्र चर्चितुमुद्दिष्टाः ।

(१) प्राक्तनविभागद्वयसंशोधनोपयुक्तप्रतिव्यतिरिक्ताभ्यां द्वाभ्यां ताडपत्रमयीभ्यां विशिष्टप्रतिभ्यां प्रस्तुतविभागस्य संशोधनं निष्प्रत्यवायं प्रकर्षपात्रं च संपन्नम् । तत्र च एकं ताडपत्रं दीर्घम्, अन्यच्च ह्रस्वं विद्यते । द्वयमप्येतत् शुद्धप्रायं क्वचित् क्वचिच्च सटिप्पणिकं वर्त्तते । प्रथमादारभ्य क्रमवर्धिष्णुभिरङ्कैरुपेततया तद् बृहल्लघुताडपत्रद्वयमपि संमतिउत्तरार्द्धयुक्तं संलक्ष्यते । प्रथमगाथाटीकाप्रभृतिषष्ठगाथाटीकाऽर्द्धपर्यवसानसंमतिपूर्वार्द्धवती बृहल्लघुताडपत्रद्वयसंबन्धिनी द्वे अपि खण्डे अद्यापि नोपलब्धे । यदि ते द्वे अपि पूर्वार्द्धवती खण्डे विनाशग्रहविमुक्ते क्वापि स्थाने सुरक्षिततयाऽवशिष्येयातां भाग्यवशाच्च कदाचित् केनचिदवाप्येयातां तदा इमे उत्तरार्द्धवती खण्डे

इव ते अपि अवशिष्टां टीकावर्त्तिनीमशुद्धिमपाकर्तुं बलवत्सहायप्रदे संपद्येयाताम् । यदि केवलपञ्चमगाथाटीकात्मकोऽपि ताडपत्रीयपूर्वार्द्धांशः प्राप्स्यत तदा एतावत्यस्तदीया जटिला अशुद्धयः प्रायः अवशिष्टा नाऽभविष्यन् । उपलब्धयोः खण्डयोः चतुस्त्रिंशदधिकशतत्रयमितपत्रे बृहति ताडपत्रे षष्ठगाथाटीकामध्यांशप्रभृतिप्रथमकाण्ड–पूर्णद्वितीय–तृतीयकाण्डपरिमाणं सटीकसंमत्युत्तरार्द्धं पूर्णतया वर्त्तते । प्रथमाङ्कपत्ररहितसप्ताशीत्यधिकशतसंख्यकपत्रशालिनि अन्तराऽन्तरा विलुप्तानेकपत्रे घृष्टध्वस्तप्रचुरतराक्षरपङ्क्तिके लघुनि ताडपत्रे तूत्तरार्द्धमपि अपूर्णद्वितीयकाण्डपर्यन्तमेव विद्यते । एतत्ताडपत्रद्वयवर्त्तिभ्यः सुन्दराऽक्षरेभ्यः शुद्धपाठेभ्यः उपयोगिभ्यश्च टिप्पणकेभ्यः संप्राप्तेन समाश्वासेन पञ्चमगाथाटीकाऽवशिष्टा त्रुटिः किंचिदूनं कण्टकायते । एनयोस्ताडपत्रप्रत्योरितराभिः पत्रप्रतिभिः सहैवाग्रे विशिष्य परिचाययितुमिष्टतया सांप्रतमेतावदेव सूचयितुं पर्याप्तम् यत् उक्ताडपत्रप्रतिद्वयेन प्रस्तुततृतीयविभागस्येव प्रकाशयिष्यमाणयोः द्वितीयकाण्डशालिचतुर्थविभाग–तृतीयकाण्डशालिपञ्चमविभागयोः संशोधनमपि समभ्यधिकां समञ्जसतां समासादयिष्यति ।

परन्तु एकत उपलब्धताडपत्रखण्डद्वयं साधनसंपदं प्रगुणीकरोति अन्यतश्च खण्डितो वा० बा०संज्ञकप्रतिद्वयस्याऽल्पीयान् भागः संशोधनकर्मणि शल्यायते । पञ्चमगाथाटीकाप्रान्त–षष्ठगाथाटीकाप्रारम्भभाजां कतिपयानां पत्राणां व्यपगतत्वेनाऽशुद्धतमयोरपि क्वचित् क्वचित् शुद्धतमयोः समानयोः वा० बा०संज्ञकप्रत्योः खण्डितत्वं शल्यायतेतराम् । यदि तावन्ति पत्राणि प्राप्येरन् तदा तत्तत्स्थलीयटीकागतामशुद्धिमंशतो व्यपनेतुमुपयुज्येरन् ।

(२) प्रस्तुतविभागे पाठान्तरकृत्यं प्राक्तनविभागद्वयात् किंचिद् भिन्नमिव संपन्नम् । प्राक्तनविभागद्वयसंशोधने पाठान्तरस्वीकारपरित्यागक्रमः समानप्राय एवाऽङ्गीकृत आसीत् किन्तु प्रस्तुतविभागे स क्रमो विचार्यैव परिवर्त्तितः । तथाहि—पञ्चमगाथाटीकाया अशुद्धिबहुलत्वात् जटिलाऽशुद्धिमत्सु स्थलेषु सर्वथा अशुद्धतया भासमानान्यपि पाठान्तराणि अधस्ताद् निर्दिष्टानि—यतः तत्र तत्र स्थले सर्वा अपि प्रतयः समानभावेन कीदृश्या कियत्या च विलक्षणविलक्षणरीत्याऽशुद्धाः संवृत्ताः ? इत्येतत् विज्ञातुं शक्नुयुः संशोधनकुशलाः, अशुद्धयः कथमुत्पद्यन्ते ? उत्पन्नाः पुनः कथं प्रवर्धन्ते ? शुद्धौ क्रियमाणायामपि पुनः अशुद्धयः कथं जायन्ते ? इत्येतत् सर्वं सूक्ष्मतयाऽवगन्तुं पारयेयुरशुद्धीतिहासरचनाकोविदाः, तानि पाठान्तराणि निरीक्ष्य पाठशुद्धिमपि परिकल्पयितुं प्रभवेयुः केचिद् व्युत्पन्नाः—अतो वैपरीत्येन च षष्ठीप्रभृतिसमस्तगाथाटीकायाः शुद्धप्रायत्वात् सर्वथा शुद्धेषु शुद्धप्रायेषु च स्थलेषु उपयोगीन्येव पाठान्तराणि बहुधा स्वीकृतानि अन्तर्गडुकल्पानि च शेषाणि परित्यक्तानि ।

(३) प्राक्तनविभागद्वयसंशोधनानुपयुक्ता अपि अनेके ग्रन्थाः प्रस्तुतविभागसंशोधने कृतोपयोगाः । टीकागतानामवतरणानां मूलस्थानानि ज्ञापयितुम् प्रतिपाद्यं विषयम् अन्तर्गतं पाठं च तोलयितुम् कल्पितं शुद्धपाठं संवादयितुम् युगपद्भाविनामसमानतन्त्रीयग्रन्थकाराणां क्रमभाविनां च समानतन्त्रीयग्रन्थकाराणामेकमेव विषयमधिकृत्य प्रवर्त्तमानां चर्चाशैलीमवगमयितुम् क्वाऽपि विषये प्रेक्षावतां दृष्टिं विस्तार्य अभ्यासमार्गं सरलीकर्तुं कस्को ग्रन्थो ग्रन्थकारो वा कस्य कस्य कियता कियता प्रभावेणाऽनुवासितः इत्येतत् पृथक्करणविधानं सुकरीकर्तुं चेच्छद्भिः एवंभूतान् अन्यानपि लाभान् संभावयद्भिः अस्माभिरनुष्ठितः प्रचुरग्रन्थराशेरुपयोगः परिशीलनपटिष्ठैः स्वयमेव दृष्टिगोचरीकरिष्यते ।

एवंसत्यपि एकस्योपयोगिनो ग्रन्थस्योपयोगविधानं प्रस्तुतसंशोधने परिशिष्यत एव । वयं पूर्वमेव संमतिद्वितीयविभागीयनिवेदने बौद्धभिक्षुधर्मकीर्त्तिकृतहेतुबिन्दुमूलकाऽज्ञातकर्तृकदुर्लभविवर-

णवतो जीर्णताडपत्रपुस्तकस्य उपलब्धिं सूचितवन्तः । यदि प्रस्तुतसंशोधने तत् पुस्तकमुपयोक्तुमशक्ष्यत तदा कतिपया अशुद्धीर्दूरीकर्त्तुमशक्ष्यन्त । परन्तु तथाविधीयमाने प्रारब्धमुद्रणप्रस्तुतविभागप्रकाशनं बहु विलम्बमानमवेक्ष्याऽस्माभिः तद्विवरणतुलना भाविविशिष्टपरिशिष्टतन्त्रीकृता ।

विशिष्टविद्यारुचिभ्यो महानुभावेभ्योऽस्माभिः प्रस्तुतविभागस्य संपादने या विविधरूपा सहायता समासादि तां निर्दिश्य कृतज्ञतां प्रकाशयितुं लब्धावसरा भवामः ।

विख्यातनामधेयश्रीमद्आत्मारामजीपट्टधरप्रशिष्यश्रीमद्**विजयवल्लभसूरि**प्रबोधितलाहोरपत्तनीयश्रीश्वेताम्बरसंघसमर्पितद्रव्यसहायकसमासादितसहकारिकार्यकर्तृका वयं प्रस्तुतकर्मणि प्रशस्यरूपामनुकूलतां प्राप्तवन्तः ।

प्रवर्त्तकश्रीकान्तिविजयप्रशिष्यसुशील**मुनिश्रीपुण्यविजय**कृतैरङ्गभूतैर्विविधकार्यैः प्रस्तुतसंशोधनं शीघ्रतरतामगात् । एतद्व्यतिरिक्तं चाऽस्मिन्नवसरे तैरन्यदपि स्मरणीयमुपयोगि कार्यं व्यधायि तच्च हेतुबिन्दुप्रतिकृतिरूपम्—दुष्पठतरप्राचीनलिपिकलिताम् अतिजीर्णाम् घृष्टत्रुटिताक्षरवतीम् नाशसविधवर्त्तिनीं ताडपत्रीयप्रतिमवलम्ब्य बहु परिश्रम्य तैर्या सुन्दरतमाऽक्षरशालिनी प्रतिकृतिः कृत्वोपयोगाय पुरातत्त्वमन्दिरीयपुस्तकसंग्रहे समर्पितास्ति । सा तत्रैव तेषां नाम्ना सहैव संरक्षिता वर्त्तते ।

सुखलालः

बेचरदासश्च ।

संमतितर्क-प्रकरणम् ।

तृतीयो विभागः ।

पञ्चमगाथाव्याख्या ।

[पर्यायास्तिकैकप्रकृतिकानाम् ऋजुसूत्रादीनां शुद्धाशुद्धभावेन विभजनम्]

विशेषप्रस्तारस्य पर्यायनयो मूलव्याकरणी, शब्दादयश्च शेषाः पर्यायनयभेदा इति प्रागुक्तम् ५ तत्समर्थनार्थम्—

मूलणिमेणं पज्जवणयस्स उजुसुयवयणविच्छेदो ।
तस्स उ सद्दाईआ साहपसाहा सुहुमभेया ॥ ५ ॥

इति गाथासूत्रम् ।

अस्य तात्पर्यार्थः—पर्यायनयस्य प्रकृतिराद्या ऋजुसूत्रः स त्वशुद्धा, शब्दः शुद्धा, शुद्धतरा १० समभिरूढः, अत्यन्ततः शुद्धा त्वेवंभूत इति ।

अवयवार्थस्तु—**मूलमादिः ने(णि)मेणं** आधारः **पर्यायो** विशेषः तस्य **नय** उपपत्तिबलात् **परिच्छेदः** तस्य, **ऋजु**—वर्तमानसमयं वस्तु स्वरूपावस्थितत्वात् तदेव—**सूत्रयति** परिच्छिनत्ति नातीताऽनागतम् तस्याऽसत्त्वेन कुटिलत्वात् तस्य **वचनम्**—पदं वाक्यं वा तस्य **विच्छेदो**ऽन्तः-सीमेति यावत् । 'ऋजुसूत्रवचनस्य' इति कर्मणि षष्ठी, तेन 'ऋजुसूत्रस्य एवमयमर्थो नान्यथा' इति १५ प्ररूपयतो वचनं विच्छिद्यमानं यत् तत् मूलनिमेनम् अत्र गृह्यते । ननु कथं वचनविच्छेदः शब्दरूपः परिच्छेदस्वभावस्य नयस्याधारः? नैष दोषः, विषयेण विषयी(यि)कथनरूपत्वादस्य । न च वचनार्थोऽस्य विषयः न शब्द इति वक्तव्यम्, वचनार्थयोरभेदात् वचनमपि यतो विषयः । अथ विषय एव किं नोक्त इति न प्रेरणीयम्, शब्दनयानां यत् शब्दहतस्यैव प्रमाणत्वमिति ज्ञापनार्थत्वादेवमभिधानम्, तस्य च पूर्वापरपर्यायेवि(यैर्वि)विक्ते एकपर्याय एव प्ररूपयतो वचनं विच्छिद्यते एकपर्यायस्य २० परपर्यायासंस्पर्शात् । उक्तं च तन्मतमर्थं प्ररूपयद्भिः—

"पलालं न दहत्यग्निर्दह्यते न गिरिः क्वचित् ।
नासंयतः प्रव्रजति भव्यजीवो न सिद्ध्यति ॥" [ ]

पलालपर्यायस्य अग्निसद्भावपर्यायादत्यन्तभिन्नत्वात् यः यः पलालो नासौ दह्यते यश्च भस्मभावमनुभवति नासौ पलालपर्याय इति । २५

---

१ पृ० २७१ पं० ७-८ । २ "णिमेणमवि ठाणे"-"णिमेणं स्थानम्"—देशीना० च० व० गा० ३७ टी० पृ० १५० पं० १७ । ३-**त्यन्तः शु**-आ० वा० बा० विना । ४-**मादिर्निर्माणमा**-वा० बा० विना । ५ **दोतः-सी**-वा० बा० विना । ६-**न्यस्येति** वा० बा० विना । ७ **मूलनियमेनमत्र** वा० बा० । **मूलंनियमेनमत्र** आ० । **मूलंनि मेनमत्र** हा० । ८ **यच्छब्दहतस्येव** आ० । **यच्छहाहतस्यैव** वा० बा० । **यच्छब्द इती हतस्यैव** वि० । ९-**पर्यायविक्ते** भां० मां० ।-**पर्यायवत्यन्त(र्यायादत्यन्त)विविक्ते** वा० वा० । १०-**क एव पर्याय-** आ० हा० । ११ तत्त्वार्थ० टी० पृ० ४०२ पं० २२ । भगवतीसू० टी० पृ० २०५ प्र० पं० ४ ।-"त्यग्निर्भिद्यते न घटः क्वचित्" १२ "भव्योऽसिद्धो न सिध्यति"-नयोप० पृ० ४० द्वि० श्लो० ३१ ।

[ऋजुसूत्रविषयतया क्षणभङ्ग–विज्ञानमात्र–शून्यवादानामुपक्षेपः]

[१ क्षणभङ्गवादः]

[पूर्वपक्षः–स्थैर्यवादिभिः क्षणभङ्गस्य निराकरणम्]

नंनु च क्षणक्षयपरिणामसिद्धावेवं वक्तुं युक्तम्, प्रमाणरहितस्य वचसो विपश्चितामनादरणीयत्वात्। न च क्षणक्षयावगमे प्रमाणव्यापारः—यतो न तावदध्यक्षं क्षणक्षयितां भावानामवगच्छत् प्रतीयते परैरभ्युपगम्यते वा यतः परैरन्त्यक्षणदर्शिनामेव प्रत्यक्षतः क्षणिकताया निश्चयः प्रकल्प्यते भ्रान्तिकारणसद्भावान्न प्राक्। उक्तं च—

"क्वचित् तदपरिज्ञानं सदृशापरसंभवात्।
भ्रान्तेरपश्यत(?)भेदं मायागोलकभेदवत्" ॥ [ ] इति।

नाप्यनुमानात् तन्निश्चयः अनुमानस्य लिङ्गबलादुपजायमानत्वात्। सामान्यलक्षणं च तस्य "पक्षधर्मत्वम् सपक्षे सत्त्वम् विपक्षे चाऽसत्त्वमेव निश्चितम्" [ ] इति परैर्गीयते। तत्र पक्षधर्मतानिश्चयः—"प्रत्यक्षतोऽनुमानतो वा" [ ] इति वचनात्—यद्यपि प्रमाणद्वयनिबन्धनः सिद्धस्तथापि सपक्षे सत्त्वं सत्त्वादेर्हेतोर्निश्चेतुमशक्यम् क्षणिकतया सर्वार्थानां साधयितुमभिलषितत्वात्(षितत्वात्) सपक्षस्यैवाभावात् साध्यस्य तन्मात्रानुबन्धः स्वभावहेतोर्विशेषलक्षणम् क्षणक्षयस्य चाऽनध्यक्षत्वात् तत्र सोऽपि नाध्यक्षतो निश्चितः। नाप्यनुमानात् तन्निश्चयः अनवस्थाप्रसङ्गात्। तत्कार्यताऽवगमः कार्यहेतोरपि विशेषलक्षणम्। न च क्षणिकस्तु(कवस्तु)कार्यतया किञ्चित् प्रसिद्धं वस्तु, प्रत्यक्षाऽनुपलम्भसाधनत्वात् तस्याः। न च क्षणिकस्य किञ्चित् कार्यं सम्भवति। तथाहि—न विनष्टात् कारणात् कार्यजन्म असतोऽजनकत्वात्। नाप्यविनष्टात् व्यापारालीढस्य द्वितीयक्षणावस्थितेर्जनकत्वे क्षणभङ्गभङ्गप्रसङ्गात् निर्व्यापारस्य च शशशृङ्गवदजनकत्वात् कार्य–कारणयोरेककालताप्रसक्तेः। अनुपलब्धेश्चाऽत्राधिकार एवाऽसम्भवी प्रतिषेधसाधकत्वात् तस्याः क्षणिकतां(विधिस्त्वत्र साध्यत्वेनाभिप्रेतः। न चापरो हेतुः सौगतैरभ्युपगम्यते। नापि प्रत्यक्षानुमानव्यतिरिक्तं प्रमाणान्तरं तदभिप्रायेण विद्यत इति कुतः क्षणिकतानिश्चयः?

प्रत्यभिज्ञाप्रत्यक्षात्स्व(क्षाच्च) भावानां स्थैर्यप्रतिपत्तेः क्षणिकाभ्युपगमोऽसंमत एव। न च प्रत्यभिज्ञा न प्रमाणम्।

"तत्र(त्रा)पूर्वार्थविज्ञानं निश्चितं बाधवर्जितम्।
अदुष्टकारणारब्धं प्रमाणं लोकसंमतम्" ॥ [ ]

---

१ **ननु क्ष**–आ० हा० वि०। २ **कल्पते**–वा० बा० विना। ३ **–इयतं मे**–आ०। ४ "पक्षधर्मत्वम् सपक्षे सत्त्वम् विपक्षे चासत्त्वम् इति"—न्यायप्र०सू० पृ० १ पं० ९। "त्रैरूप्यं पुनर्लिङ्गस्य अनुमेये सत्त्वमेव ॥ ५ ॥ सपक्ष एव सत्त्वम् ॥ ६ ॥ असपक्षे चासत्त्वमेव निश्चितम् ॥ ७ ॥"—न्यायबि० द्विती०प० पृ० १८–१९। ५–**मभिलयित्वा**–हा०।–**मभिलब्धिता**–आ०।–**मभिलषितत्वा**–वि० सं०। ६ "स्वभावः स्वसत्ताभाविनि साध्यधर्मे हेतुः" ॥ १६ ॥–न्यायबि० द्विती०प० पृ० २३। ७–**क्षणं क्षय**–वा० बा० विना। ८–**स्य वा न**–वि० विना। ९–**त्वात्त सो**–भां० मां०। १०–**क वस्तु प्रत्यक्षा**–वा० बा० विना। ११ **तस्य न च** वा० बा० विना। १२–**तावधिस्त्वत्रा सा** आ० हा० वि०। १३ "त्रिरूपाणि च त्रीण्येव लिङ्गानि ॥ ११ ॥ अनुपलब्धिः स्वभाव–कार्य चेति" ॥ १२ ॥ (न्यायबि० द्विती० प० पृ० २१) इति वचनात् बौद्धमते स्वभाव–कार्याऽनुपलब्धिरूपं हेतुत्रयमेव। १४ "द्विविधं सम्यग्ज्ञानम्" ॥ २ ॥ "प्रत्यक्षमनुमानं च" ॥ ३ ॥ (न्यायबि० प्रथ० प० पृ० ५–६) इत्युक्तेः। १५–**पत्तिः** वा० बा० विना। १६–**गमो नमो न च** भां० मां०।–**गमो न च** आ० हा० वि०। अत्र '–गमोऽसंगत एव' इति सुचारु।

१७ "न च प्रत्यभिज्ञा न प्रमाणम्।

"तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम्। अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम्" ॥

इति प्रमाणलक्षणयोगात्"—हेतु० टी० ता० लि० पृ० ८७ प्र० पं० ४। नयोप० पृ० ३३ द्वि० पं० ९। १८ प्रमाणपरीक्षा पृ० ६३ पं० ५–८। तत्त्वार्थश्लोकवा० पृ० १७३ श्लो० ७१। प्रमेयक० पृ० १६ द्वि० पं० १२। "भाट्टेन" उक्तमेतत्–प्रमेयक० पृ० १६ द्वि० टिप्प० अं० ५१।

इति प्रमाणलक्षणयोगात्। प्रत्यक्षं च प्रत्यभिज्ञा आत्मेन्द्रियार्थसम्बन्धानुविधानतस्तदन्यप्रत्यक्षवत् सिद्धम्। न च स्मृतिपूर्वकत्वात् 'स एवायम्' इत्यनुसन्धाना(न)ज्ञानस्य प्रत्यक्षत्वमयुक्तमिति वाच्यम्, सत्संप्रयोगजत्वेन स्मरणपश्चाद्भाविनोऽप्यक्षप्रत्ययस्य लोके प्रत्यक्षत्वेन प्रसिद्धत्वात्। उक्तं च—

"न हि स्मरणतो यत् प्राक् तत् प्रत्यक्षमितीदृशम्" ॥
"वचनं राजकीयं वा लौकिकं नापि विद्यते। ५
न चाऽपि स्मरणात् पश्चादिन्द्रियस्य प्रवर्त्तनम्" ॥
"वार्यते केनचिन्नापि तत् तदानीं प्रदुष्यति।
तेनेन्द्रियार्थसम्बन्धात् प्रागूर्ध्वं वापि यत् स्मृतेः" ॥
"विज्ञानं जायते सर्वं प्रत्यक्षमिति गम्यताम्"।
[श्लो० वा० प्रत्यक्ष० श्लो० २३४–२३५–२३६–२३७] १०

इति अनेकदेश–कालाऽवस्थासमन्वितं सामान्यम् द्रव्यादिकं च वस्तु अस्याः प्रमेयमित्यपूर्वप्रमेयसद्भावः। तदुक्तम्—

"गृहीतमपि गोत्वादि स्मृतिस्पृष्टं च यद्यपि।
तथापि व्यतिरेकेण पूर्वबोधात् प्रतीयते" ॥
"देश–कालादिभेदेन तत्रास्त्यवसरो मितेः। १५
यः पूर्वमवगतो नाशः(नांशः) स च नाम प्रतीयते" ॥
"इदानींतनमस्तित्वं नहि पूर्वधिया गतम्"।
[श्लो० वा० प्रत्यक्ष० श्लो० २३२–२३३–२३४] इति।

नन्वेवं भिन्नाभिन्नवस्तुविषयोनिबन्धा(योऽनुसन्धा)नप्रत्ययः प्राप्तः इष्यत एवैतत्, यतो न भिन्नत्वे न प्रत्यभिज्ञानम् अभिन्नत्वेऽपि न प्रमेयभेदः। प्रत्यभिज्ञाव्यपदेशोऽप्यस्य भेदाभेदालम्बनत्वमेव २०
द्योतयति यतो नैककालैकप्रमेयगोचराणां भिन्नप्रमातृसम्बन्धिज्ञानानां 'प्रत्यभिज्ञा' इति व्यपदेशः, नापि सर्वथा भिन्नेषु घट-पटादिषु। न च कालस्यातीन्द्रियत्वाद् भिन्नकालैकप्रमेयप्रत्यभिज्ञाने न प्रमेयातिरेक इति वक्तव्यम्, यतो यद्यपि न कश्चित् तत्र प्रमेयातिरेकस्तथापि घटादयः कदाचिदुपलक्षिताकारा अन्यदाऽनुपलक्ष(क्ष्य)माणाः सदसत्तया सन्देहविषयतामापद्यन्ते तत्स्वभावावेदिका च प्रत्यभिज्ञा तेषां सन्देहविषयतामपाकुर्वाणा प्रमाणतामश्नुते यतो न विषयातिरेक एव प्रामा- २५
ण्यनिबन्धनं प्रत्ययानाम् किन्तु सन्देहाऽपाकरणमपि सन्दिग्धस्य, यदा त्वविरतोपलब्धिसन्तानाः पुनः पुनरपेतसन्देहसङ्गाः प्रत्यभिज्ञायन्ते भावास्तदा सन्देहविच्छेदाधिकफलाभावात् मा भूत् प्रत्यभिज्ञा प्रमाणम्। न च सविकल्पकमेवैकं प्रत्यभिज्ञाज्ञानम् अविकल्पकस्याऽपि एकत्वग्राहिणः प्रत्यभिज्ञाज्ञानस्य सद्भावात्। तथाहि—एकप्रमातृसम्बन्धिप्रथमप्रत्ययाऽभिन्नविषयाकारानुभवतोऽत्युत्थद्रूपार्थग्राह्यविकल्पकं ज्ञानमनुभूयत एव एकत्वग्राहि च ज्ञानं प्रत्यभिज्ञाज्ञानमुच्यते इति क्षणिकाभिव्यक्तिष्वपि ३०

---

१ "प्रत्यक्षं प्रत्यभिज्ञा अक्षान्वय–व्यतिरेकानुविधानात् तदन्यप्रत्यक्षवत्। न च स्मरणपूर्वकत्वात् तस्याः प्रत्यक्षत्वाभावः सत्संप्रयोगजत्वेन स्मरणपश्चाद्भावित्वेऽपि अस्याः प्रत्यक्षत्वाविरोधात्" इत्यादि–प्रमेयक० पृ० ९७ द्वि० पं० ७। २–**सन्धानात् ज्ञा**–वा० बा० विना। ३–**कीयं वा लौकिकं ना विद्य**–भां० मां० हा०।–**कीयं चालौकिकं वा विद्य**–वि०।–**कीयं चालौकिकं वा विविद्य**–आ०।–कीयं वा वैदिकं वाऽपि विद्य–श्लो० वा०। ४–**गूर्ध्वं चा**–वा० बा०। ५–**धान् प्रताय**–भां० मां०। ६ "व्यक्ति–कालादिभेदेन"–श्लो० वा०। ७–**सरे** वा० बा० विना। ८ –**वगतांशः** वा० बा०। "यः पूर्वावगतोंऽशोऽत्र स न नाम प्रतीयते"–श्लो० वा०। "ननु गृहीतमपि गृह्यते इति कथं प्रामाण्यम्? अत आह—'यः' इति। तस्मिन्नंशे मा भूत् प्रामाण्यम् अगृहीतकालान्तरसम्बन्धापेक्षमेव तु प्रामाण्यम्" इति–श्लो० वा० पार्थ० व्या० पृ० २०३ पं० १६। ९–**पयोऽनुबन्धन**–वा० बा०। १०–**तत य**–वा० बा०। ११ **यतो न भिन्नत्वेऽपि प्रमेयभेदः** वा० बा० विना। १२–**त्वाभिन्नकाले प्र**–वा० बा०। १३–विषयातिरेकस्यै(स्ये)व संदेहापाकरणस्यापि प्रामाण्यनिबन्धनत्वात्–" नयोप० पृ० ३३ द्वि० पं० १३। १४ **एवा प्रा**–हा० वि०। १५–नयोप० पृ० ३४ प्र० पं० १। १६–**त्यभिज्ञानं** वा० बा०। १७–**था प्र**–वा० बा०। १८–**कासिव्य**–आ०।

शब्दमात्रास्वालोचनप्रत्ययावगतमेव स्थैर्यम् 'स एवायम्' इत्यनन्तरमनुसन्धानविकल्पोत्पत्तिदर्शनात् । तथाहि—अर्थसंसर्गानुसारिणोऽनुभवादुपजातान्नीलविकल्पात् तद्व्यापाराऽनुसारिणो यथा नीलानुभवव्यवस्था सौगतैरभ्युपगता तथा 'पूर्वदृष्टं पश्यामि' इत्युल्लेखवतोऽनुसन्धानेः(??) विकल्पात्तुल्यदूरूपशब्दाद्यवभासिनस्तत्त्वात् तद्व्यधिगतरूपत्वं किमिति न व्यवस्थाप्यते(??) 'पूर्वदृष्टमेव पश्यामि' इत्युल्लेखवानुपजायमानोऽप्यनुसन्धानप्रत्ययो न प्रत्यभिज्ञाध्यक्षतामनुभवति क्षणिकाभिव्यक्तिषु शब्दमात्रास्वक्षसंसर्गाभावतस्तदोपजायमानत्वात् चिरतरकालाभिव्यक्तीनां तु घटादिव्यक्तीनां अनुसन्धानविकल्पप्रत्ययाधिगतमेव स्थिरत्वम् इन्द्रियसंसर्गानुसरणतस्तस्य प्रादुर्भावात् । न चेन्द्रिय(या)विषयत्वात् स्थैर्यस्य तदनुसारिणोऽविकल्पस्य वाऽध्यक्षस्य न पौर्वापर्ये वृत्तिरिति वक्तुं युक्तम् नीलादावपि अस्य समानत्वात् । यथा चाक्षव्यापारानन्तरं नीलाद्यवभासस्याऽनुभूतेस्तस्य नीलादिविषयत्वम् तथा नयनव्यापारानन्तरमूर्ध्वद्रूपप्रतिभासानुभूतेस्तस्य तद्विषयत्वमपि व्यवस्थापनीयम् । न च पूर्वदर्शनानुस्मरणमन्तरेण दृश्यमानस्यार्थस्य पूर्वदृष्टताधिगतिर्न सम्भवति, पूर्वदर्शनस्मरण एव वर्तमानदर्शनग्राह्यस्य 'पूर्वदृष्टमेतत्' इत्यध्यवसायात् । तच्च दर्शनं नेदानीन्तनदृशि प्रतिभाति इति तदप्रतिभासने न तद्दृष्टतां(तद्दृ)ष्टतां वर्तमानदर्शनग्राह्यस्याध्यक्षमधिगन्तुं प्रभुरि(भु इ)ति कथं पौर्वापर्येऽक्षजप्रत्ययप्रवृत्तिरिति वक्तव्यम् यतः 'पूर्वदृष्टमेतद्' इत्युल्लेखमन्तरेणाऽपि पौर्वापर्ये दृगवतारात् । तथाहि—मलयगिरिशिखराद्यनुस्मरणकालेऽप्यक्षजे दर्शने पुरो व्यवस्थितो नीलादिरर्थः स्फुटमूर्ध्वद्रूपतया प्रतिभाति तद्रूपतया प्रतिभासनमेवाऽक्षणिकैकत्वप्रतिभासनं कथं न निर्विकल्पकप्रत्यभिज्ञाध्यक्षसमवसेयं तत्त्वम् (??) । न च निर्विकल्पकाध्यक्षेणैवैकत्वग्रहणात् तदेवेदमपि सविकल्पप्रत्यभिज्ञाध्यक्षं गृहीतग्राहितया व्यवहारमात्रेदर्शनफलत्वात् नीलादिविकल्पवदप्रमाणम् (??) यतो गृहीतमगृहीतं वाऽर्थस्वरूपमवभासयन्ती प्रतिपत्तिः अबाधितरूपा अर्थाविसंवादित्वात् प्रमाणम् अर्थाधिगतिफलनिबन्धनत्वे प्रमाणस्य लोके सिद्धत्वात् । ततो निर्विकल्पकस्य विकल्पकस्य वा स्थैर्यग्राहिणः प्रत्यभिज्ञाप्रत्ययस्य प्रमाणतेति तद्बाधितत्वात् क्षणक्षयस्य नाभ्युपगमार्हता युक्तिसङ्गता ।

विनाशस्य सहेतुकत्वात् हेतुसंनिधेः प्रागभावात् क्षयिणामपि भावानां कियत्कालं यावत् स्थैर्यं अनुमानादप्यवसीयते । न च नाशहेतूनामभावः 'दण्डेन घटो भग्नः' 'अग्निना काष्ठं दग्धम्' इति नाशहेतूनामन्वय-व्यतिरेकाभ्यां लोके सुप्रसिद्धत्वात् । अन्वय-व्यतिरेकनिबन्धनो हि सर्वत्र हेतुफलभावः तमभ्युपगच्छन् 'हेतुभिरनाधेर्यत्वं(ध्वं)सा घटादयः' इति प्रत्येतुं न क्षमः । उक्तं च—

"अभिघाताग्निसंयोगनाशप्रत्ययसन्निधिम् ।
विना संसर्गितां याति न विनाशो घटादिभिः" ॥ [ ] इति ।

न चावस्तुत्वाद् विनाशस्य कार्यत्वं न सङ्गतमिति वक्तव्यम्, यतः—

"भावान्तरविनिर्मुक्तो भावोऽत्रानुपलम्भवत् ।
अभावः संमतस्तस्य हेतोः किं न समुद्भवः ?" ॥ [ ]

१–नुसन्धानं वि–मां० आ० हा० वि० ।–नु वि–वा० बा० । २–न विकल्पात् पूर्वदृष्टमेव पश्यामीत्युल्लेखवानुपजायतो नात्यनु–वा० बा० । ३–त्वा ह्यधिगतिरू–हा० । ४ पृ० २८९ पं० १०–११ । ५–पर्यवृ–हा० । ६–क्षस्य व्या–भां० मां० । ७–मनुत्पद्यद्रू–मां० । ८–द्रूपाप्र–वा० बा० । ९–नुसरण–वा० बा० । १०–दृष्यतादृष्टतां वर्तमानग्राह्यसाध्य–वा० बा० ।–दृदृष्टता व–वि० । ११–क्षजद्–आ० । १२–मत्र त्रु–वा० बा० ।–मनु त्रु–वि० । १३–भासमान–वा० बा० विना । १४–कत्वंप्र–आ० । १५–कत्वाग्र–वि० ।–कत्वे ग्र–वा० बा० । १६–तदेवैद सवि–वा० बा० । १७–ध्यक्षगृ–भां० हा० वि० । १८–ग्रप्रवर्तनफलकस्य वा–वा० बा० । १९–कस्या वि–आ० विना । २०–लोके षुप्र–वा० बा० । २१–यत्वंसघटाद–मां० ।–यत्वंसंघटाद–आ० हा० भां० । २२–घातोऽग्निः संयोग नसप्रत्ययसन्निधि । वा० बा० । घाताभिसंयोग–हा० । घातोऽभिसंयोग–आ० । २३–सन्निधि । हा० वि० । २४–तां यान्ति आ० वा० बा० । "तथाहि" इत्युल्लिख्य श्लोकोऽयं निर्दिष्टः हेतु० टी० ता० लि० पृ० ८० प्र० पं० ६ । २५–शस्याका–वा० बा० । २६–तृ । भावः सम–वा० बा० । पृ० १० पं० २० तथा टिप्प० ४ । "तथा चाह कश्चित्" इति निर्दिश्य श्लोकोऽयं समुद्धृतः हेतु० टी० ता० लि० पृ० ८२ प्र० पं० २ । श्लोकान्ते च "तदेतत् कौमारिलं दर्शनमपनुदन्नाह" इत्यपि तत्रैव लिखितम् । स्याद्वादर० पृ० १२३ प्र० पं० ८ । अयं श्लोकः "इति स्वयं भट्टेन प्रकटनात्" इति कृत्वा रत्नाकरावतारिकायां निर्दिष्टः रत्नाकरा० प्र० प० पृ० ४३ पं० २१–२३ ।

घटेन्धनपयसां समासादितविकाराणामवस्थान्तरमेव ध्वंसं मन्यन्ते येऽप्यनुपजातविकाराः प्रदीप–बुद्ध्यादयो ध्वंसमालम्बन्ते तेऽप्यव्यक्तरूपतामात्मस्वभावतां च विकारमेव ध्वंसमासादयन्ति यथा नोपलम्भव्यावृत्तिरेवानुपलम्भः परेषां किन्तु विवक्षितोपलम्भादन्यः पर्युदासवृत्त्योपलम्भ एव तथा भावातिरेकेणाभावस्यासंवेद्यत्वाद् भाव एव(वा)भावः । विशे(वैशे)षिकास्तु मन्यन्ते भवत्वनपेक्षितभावान्तरसंसर्गः प्रच्युतिमात्रमेव प्रध्वंसाभावस्तथापि तत्र हेतुमत्ता न विरोधमनुभवति । ५ तथाहि—

"सं(सन्) बोधगोचरप्राप्तस्तद्भावे नोपलभ्यते ।
नस्या(नश्यन्) भावः कथं तस्य न नाशः कार्यतामियात्" ? ॥ [ ] इति ।

कारणाधीनः पदार्थेषु प्रध्वंस इति तद्धेतुसन्निधानात् प्रागनासादितविनाशं(श)सङ्गतयो भावा इत्यनुमानादक्षणिकत्वसिद्धेर्न क्षणक्षयिता तेषामभ्युपगन्तुं युक्तेति । १०

[उत्तरपक्षः—बौद्धैः क्षणभङ्गस्य साधनम्]

अत्र प्रतिविधीयते यदुक्तम्–'नाध्यक्षतः क्षणिकतावगमः' इति, तत्र यथा अध्यक्षमेव क्षणविशरारुतां भावानामवगमयति तथा प्रतिपादितं प्राक् वेदान्तवादिमतनिराकरणं कुर्वद्भिः । यदपि 'नानुमानतोऽपि तत्सिद्धिः(द्धिः) सामान्यविशेषलक्षणायोगात् लिङ्गस्य' इति, तदसङ्गतमेव; यतः 'सपक्षे सत्त्वम्' इत्यादिना स्वसाध्यप्रतिबिम्ब(बन्ध) एव हेतोर्निश्चितोऽभिधीयते न दर्शनादर्शनमात्रम् सपक्ष–विपक्षयोर्हेतुभावाभावयोः सर्वत्र निश्चयायोगात्—नहि पार्थिवत्वादौ दर्शनादर्शनयोः (??)सतोरप्यन्वयनिश्चय इति कृतकत्वादावपि स न स्यात् । तथाहि—बहुलमदृष्टे(ष्ट)व्यभिचारस्यापि केनचिदसति प्रतिबन्धे सर्वत्र सर्वस्य न तथा भावावगमो नियमनिबन्धनाभावात् नैव वा सर्वदर्शनाव्यभ्युपसपक्षविपर्ययो हेतोर्भावाभावौ ग्रहीतुं शक्यौ(??) यतो न हेतुमन्तः सर्वे एव भावाः साध्यधर्मसंसर्गितयाऽसर्वविदः प्रत्यक्ष(क्षाः) साध्यविविक्ता वा हेतुविकलतयाऽदृश्यानुपलब्धेरभावाव्यभिचारित्वायोगात् । उक्तं च—

"गत्वा गत्वा च तान् देशान् यद्यर्थो नोपलभ्यते ।
तदान्यकारणाभावादसन्नित्यवगम्यते" ॥ [श्लो० वा० अर्था० श्लो० ३८] इति ।

यत्र यत्र साधनधर्मस्तत्र तत्र सर्वत्र साध्यधर्मः यत्र च साध्याभावस्तत्र सर्वत्र साधनधर्मस्याप्यभावः इति अशेषपदार्थाक्षेपेण सपक्षेतरयोः हेतोः सदसत्त्वे ख्यापनीय(?) स्त । क्वचिदेव तादात्म्य–तदुत्पत्तिलक्षणस्य च प्रतिबन्धस्यैकस्मिन्नपि प्रमाणतोऽधिगमेऽन्वय–व्यतिरेकयोर्व्याप्त्या निश्चयः सम्पद्यते नान्यथा तदात्मनस्तादात्म्याभावे नैरात्म्यप्रसङ्गात् कार्यस्य च स्वकारणाभिमते(त)भावाभावे भवतो निर्हेतुकत्वप्रसक्तेश्च । उक्तं च—

"स्वभावेऽप्यविनाभावो भावमात्रानुरोधिनि ।
तदभावे स्वयं भावस्याभावः स्यादभेदतः" ॥ [ ] तथा, ३०

१–वातिरेकेण भा–वा० बा० विना । २–द्यत्वादि एव भा–वा० बा० । ३–भावोऽस्तु मन्यन्ते वा० बा० विना । ४–स्तु म मन्य–वा० बा० । ५–सदबोध–भां० मां० । सदबाध–आ० हा० वि० ।—

"सन् बोधगोचरप्राप्तस्तद्भावे नोपलभ्यते । नश्यन् भावः कथं तस्य न नाशः कार्यतामियात्" ? ॥

तद्भावे "अग्निभावे" । तस्य "अग्न्यादेः"–हेतु० टी० ता० लि० पृ० ८४ प्र० पं० १–२ । ६ नाशका–भां० मां० वा० बा० विना । ७–ति करणाधीन प–वा० बा० विना । ८–त्वसिद्धिर्न आ० हा० वि० । ९–पृ० ३१८ पं० ५ । १०–ध्यक्षं क्षण–आ० । ११–वेदान्तवादिमतनिराकरणं च पृ० २८५–२९६ । १२–पृ० ३१८ पं० १० । १३–क्षणयो–वा० बा० विना । १४–व यत स–मां० ।–व येतः स–हा० वि० ।–व येत स–भां० ।–च यः स–वा० बा० । १५ पृ० ३१८ पं० ११ । १६–निश्चतो–वा० बा० । १७–मात्र स–आ० हा० वि० । १८–तुर्भा–आ० । १९–त्वादौ दर्शनयोः आ० हा० वि० । २०–न चा स–मां० । न स–आ० । २१–व्याप्यास–वा० बा० । २२–पर्ययोर्हे–वि० । २३–भावो ग्रहीतुं शक्यो य–वा० बा० । २४–या स–वा० बा० विना । २५–सर्वा वि–आ० हा० वि० । २६–तुर्विक–वि० । २७–सत्त्वेत्याख्यापनीयेन्नत्क–वा० बा० ।–सत्वे ख्यापनीये—न्नक–भां० मां० हा० वि० । २८–भावे भावतो वा० बा० हा० वि० । २९–एतत् श्लोकद्वयम् हेतु० टी० ता० लि० पृ० ५७ प्र० पं० २–३ । प्रमेयक० पृ० १०१ प्र० पं० ९ ।

"कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितः ।
सम्भवस्त(स भवंस्त)दभावेऽपि हेतुमत्तां विलङ्घयेत्" ॥ [ ]

यस्य च क्वचित् धर्मिणि प्रागुप्र(प)दर्शितप्रतिबन्धप्रसाधकं प्रमाणं वृत्तमिदानीं विस्मृतम् तस्य तदुपन्यासेन तत्र स्मृतिरे(रा)धीयते अनुमेयार्थप्रसिद्धेर्स्तु अविनाभाविनिश्चये तत एव स्मर्यमाणात् (??)प्रमाणान्न पुनर्दृष्टान्तप्रतिबिम्बग्राहकं च प्रामाण्यं यद्वा स्यान्नाद्यापि(??)क्वचिद्धर्मिणि प्रवृत्तं तस्यानुमानोपन्यासकाल एव प्रदर्शनीयमिति न तस्य प्रतिबिम्बग्राहिप्रमाणानुस्मृत्यर्थं पक्षीकृतार्थव्यतिरेकवान् साधर्म्यादिदृष्टान्तः प्रदर्शनीयः अतस्तत्प्रतिबन्धप्रसाधकं साक्षादेव प्रमाणं प्रदर्शनीयम् । तत्र च प्रदर्शिते न किञ्चित् दृष्टान्तप्रदर्शनेन तस्य चरितार्थत्वात् प्रतिबिम्बप्रसिद्धौ च प्रमाणतः साध्यधर्मे सत्येवाऽनुमेये हेतोः सद्भाव इति कथं तस्य सामान्यलक्षणविरहः? तथाहि—
सपक्षः साध्यधर्मवानै(ने)वार्थ उच्यते बाधकप्रमाणबलाच्च(??)विपक्षा अव्यापिनो हेतुः साध्यधर्मवत्त्वे च साध्यधर्मिणि वर्तमानः कथं न सपक्षे वृत्तः यतो न सपक्षव्यवस्था वा सर्वैमिच्छाव्यवस्थापितलक्षणं पक्षत्वमपाकरोति साधयितुमिष्ट इतीच्छा(??)व्यवस्थापितत्व(त्वं) पक्षलक्षणस्य सिद्धमेव सपक्षेत्वात्(त्वं तु) तस्य साध्यधर्मयोगात् वस्तुबलायातमिति न तत् तेन बाध्यते अन्यथा सपक्षव्यतिरिक्ते पक्षे वर्तमानो हेतुः विपक्षावृत्तेरनैकान्तिकः प्रसक्त इति सर्वानुमानोच्छेदः । अथ पक्षीकृतपरिहारेणैवाऽसपक्षस्यापि व्यवस्थापितत्वात् न पक्षे वृत्तोऽसपक्षवृत्तोऽसपक्षवृत्तित्वादनैकान्तिकः, नन्वेवं पक्षपरिहारेण (?) साध्यभावाभावयोस्तद्वान्वयं हेतुर्न साध्यधर्मिणीति कथं पक्षो हेतुमानपि साध्यधर्माध्यासितत्वात् । नहि 'यस्मादनुमेये साध्यं विनापि भावः तत्सद्भावाद्धर्मी साध्यधर्मवान्' इत्यभिधातुं युक्तम्, न च साध्यधर्मवृत्तिव्यतिरेकस्वरूपौ सपक्ष-विपक्षौ विहाय प्रकारान्तरस्य सम्भवः यत्र पक्षत्वं स्यात् अन्योन्यव्यवच्छेदरूपतया सर्वस्य द्वैराश्यव्यवस्थितेः हेतोश्च पक्ष-सपक्षादिप्रविभागापेक्षया गमकत्वे काल्पनिकत्वमनुमानेऽप्यङ्गीकृतं स्यात् न वस्तुबलप्रवृत्तत्वम् तस्मात् साध्यप्रतिबद्धभावतया हेतोर्गमकत्वे साध्यधर्मिण्यपि साध्यधर्मयुक्त एवं परमार्थतः सपक्षात्मन्येवासौ वर्त्तत इति कथं सामान्यलक्षणयोगी न स्यात् । उक्तं च—

"यत् क्वचिद् दृष्टान्तस्य (दृष्टं तस्य) यत्र प्रतिबिम्बः तद्विदः तस्य तद् गमकं तत्रेति वस्तुगतिः" [ ] इति ।

१–प्रमेयक० पृ० १०१ प्र० पं० ८ । २ "स भवंस्त"–हेतु० टी० । संभवंस्तद"–प्रमेयक० । ३–**मत्ता वि** आ० वि० ।–**मत्ताविलम्ब**–हा० ।–**मतां वि**–वा० बा० । ४ **प्रागु प्र**–भां० मां० । **प्रागुप्तद**–आ० हा० वि० । ५–**धकप्र**–भां० मां० वि० । ६–**माण वृ**–वा० बा० विना । ७–**रधायतानु**–वा० बा० । ८–**स्तुश्वविना**–वा० बा० विना । ९ **च प्रमा**–वा० बा० वि० । १०–**यद्वास्याद्यापि** आ० । **यद्यस्यान्नद्यापि** वा० बा० । **यद्वा स्यान्नाप्यापि** हा० । ११–**ति त**–आ० वि० । १२–**नीयोतस्तव प्र**–आ० ।–**नीयोऽसत्तं प्र**–वा० बा० । १३–**दर्शने त**–वा० बा० । १४ **हेतो स**–आ० वि० । **हेतोऽस**–हा० । १५–**व्यापितो हे**–वा० बा० । १६–**क्षे व्यक्तः** वा० बा० । १७–**पक्षो व्य**–हा० वि० । १८–**क्षण प**–भां० । १९–**क्षत्वत् तस्य** हा० वि० । **–क्षत्वन्व तस्य** वा० बा० ।–**क्षत्व तस्य** भां० मां० । २०–**धर्मायो**–वा० बा० विना । २१–**हारेणो वा**–वा० बा० ।–**हारेण वा**–हा० ।–**हारेणेवा**–वि० । २२–**स्तथान्वयं** आ० ।–**स्तथात्वयं** हा० । २३–**तुर्नासा**–हा० वि० । २४–**मानापि** आ० हा० ।–**मानोपि** वि० ।–**मानपि सध्यचध**–वा० बा० । २५–**त्वास्या नहि** वा० बा० विना । २६–**स्मानुमेय साध्यं** वा० बा० । २७–**कत्वप्यनु**–वा० बा० । २८–**प्रकृत्तत्वं तस्यात्** वा० बा० । २९–**यावहे**–वा० बा० । ३०–**व पार**–वा० बा० विना । ३१ **दृष्टान्तस्याय**–वा० बा० ।

"अत एव अन्यत्रोक्तम्" इति उक्त्वा "यत् क्वचिद् दृष्टं तस्य यत्र प्रतिबन्धः तद्विदः तस्य तद् गमकं तत्रेति वस्तुगतिः" ।

अन्यत्र "विनिश्चये" (तन्नाम्नि ग्रन्थे) यत् "लिङ्गम्" क्वचित् "प्रदेशे" दृष्टम् "निश्चितम्" तस्य "लिङ्गस्य" यत्र "वह्न्यादौ" तद्विदः "प्रतिबन्धविदः" तस्य "वह्नेः" तद् "लिङ्गम्" तत्र "यत्र दृष्टं तत्रैव नान्यत्र"–हेतु० टी० ता० लि० पृ० १६ द्वि० पं० १ ।

ततो व्यवस्थितं क्षणिकत्व-सत्त्वयोस्तादात्म्यात् क्वचिद् वस्तुनि वर्तमानं सत्त्वं क्षणिकत्वयुक्त एव वर्तते इति नास्य सामान्यलक्षणायोगः ।

सत्त्वं च भावानां न सत्तायोगलक्षणम् सामान्यादिष्वभावाद् अव्याप्तेः शशशृङ्गादिष्वति(ष्वपि) भावादतिव्याप्तेश्च । न च शशशृङ्गादीनामसत्त्वान्न सत्तायोग इति वाच्यम्, इतरेतराश्रयत्वप्रसक्तेः । तथाहि—तेषामसत्त्वं सत्तायोगविरहात् तद्विरहश्चासत्त्वात् इति व्यक्तमितरेतराश्रयत्वम् । अथ अर्थक्रियासामर्थ्यविरहान्न तेषां सत्तायोगः, नन्वेवं यद् अर्थक्रियासामर्थ्ययुक्तं सत्तायोगस्तस्यैव इत्यर्थक्रियासामर्थ्यमेव सत्त्वमायातमिति व्यर्थः सत्तायोगः । अत एव सामान्यादीनामपि स्वरूपसत्त्वं अर्थक्रियासामर्थ्यात् सिद्धम् 'सत्'प्रत्ययस्य सर्वत्राविशेषात् । न च सामान्यादिषूपचरितः 'सत्'–प्रत्ययः अस्खलद्वृत्तित्वात् उत्पाद-व्यय-ध्रौव्येन(व्याणां) विरोधात् एकस्मिन् धर्मिण्ययोगात् "उत्पाद-व्यय-ध्रौव्ययुक्तं सत्" [तत्त्वा० अ० ५ सू० २९] इत्येतदपि सत्त्वलक्षणमयुक्तम् । अथ 'कथंचिद् उत्पाद-व्ययौ कथंचिद् ध्रौव्यम्' इत्यभ्युपगमः, नैतत्; यतो यथोत्पाद-व्ययौ न तथा ध्रौव्यम् यथा च ध्रौव्यं न तथा उत्पाद-व्ययौ इति कथमेकं वस्तु यथोक्तलक्षणयुक्तं भवेत्? अतोऽर्थक्रियासामर्थ्यमेव सत्त्वमक्षणिकात् क्रम-यौगपद्यविरोधाद् व्यावर्त्तमानं क्षणिक एवाऽवतिष्ठत इति तदात्मतां कथमतिक्रामेत्? तन्न विशेषलक्षणस्याप्ययोगः । तस्मात् 'यत् सत् तत् क्षणिकमेव, सन्ति च द्वादशायतनानि' इति क्षणिकतायामिदमनुमानम् । अत्र च पञ्चस्व(सु) रूपादिष्वैक्ष्यक्षतः सत्त्वसिद्धिः मनो-धर्मायतनयोः स्वसंवेदनतः स्कन्धत्रयस्वभावत्व(?) धर्मायतनस्य संस्कारस्कन्धस्य च विप्रयुक्तस्याभावात् चक्षुरादिच(रादि)पञ्चस्वनुमित्ये(ते)स्तत्कार्यविज्ञानस्य कादाचित्कतया करणान्तरसापेक्षत्वसिद्धेः देशादिविप्रकृष्टेषु च सर्वपदार्थेषु अभ्युपगमविषयेषु प्रसङ्गमुखेन सत्तायाः क्षणिकतासाधन(नम्) व्याप्यसद्भावे व्यापकस्य नियतसंनिधित्वा(त्वात्) व्यापकाभावे च व्याप्यस्याप्यभावात् चक्षुरादि-ध्वनीनाम् 'सन(त्)शब्दस्य च प्रवृत्तिनिमित्तभेदादर्थभेदतः परमार्थतो भेदाभावेऽपि न धर्मिण एव हेतुता । पारमार्थिकरूपस्यावाच्यत्वाद् विकल्पावभासिनमेवार्थं ध्वनयः प्रतिपादयन्ति 'क्षणिक'शब्दस्यापि क्ष(अक्ष)णिकसमारोपव्यवच्छेदविषयतया नैं 'सत्'शब्दार्थता भिन्नार्थतेति तद्द्वारेणापि न प्रतिज्ञार्थैकदेशतां(ता) । अन्वयादिनिश्चयस्तु प्रतिबन्धनिश्चायकप्रमाणनिबन्धनः; स च तादात्म्यलक्षणः प्रतिबन्धः स्वभावहेतोः प्रमाणनिबन्धनः, ननु क्षणिकत्वस्य प्रत्यक्षेणाऽनिश्चयात् कथं तत्तादात्म्यं स्वभावहेतोः प्रत्यक्षप्रमाणतः सिद्धम्? अथ 'कृतका विनाशं प्रति अनपेक्षत्वात् तद्भावनियता यतो भावाः' इत्यनुमानसिद्धं तत्तादात्म्यम्, नैतत्; यतो निर्हेतुकत्वेऽपि विनाशस्य यदैव घटादयो नाशमनुभवन्तः प्रतीयन्ते तदैव तेषामसौ निर्हेतुकः स्यात् नान्यदेति कथं क्षणविशारुढा भावानाम्? अथ एकक्षणभावित्वेन भावस्योत्पत्तेः प्रागपि विनाशसङ्गतिः। ननु यथैकक्षणस्थायित्वेनोत्पत्तिः स्वहेतुभ्यः तथाऽनेकक्षणस्थायित्वेनापि साऽविरुद्धा, दृश्यन्ते हि विचित्रशक्तयः सामग्र्यः । न च यदि क्वचित् कदाचित् विनाशोद्भवे(शो भवेत्) तदा तत्कालद्रव्यापेक्षत्वाद् अन्यानपेक्षत्वहानिरिति वक्तव्यम्, विनाशहेत्वनपेक्षत्वेनानपेक्षत्वात् अन्यथा द्वितीयेऽपि क्षणे विनाशो न स्यात् तत्कालाद्यपेक्षत्वात् ।

१–**ङ्गादिष्वविनाभा**–वा० बा० विना । २ **सत्वं सत्वाक्षणिकात् क्र**–वा० बा० । ३–**क्रामेत** वा० बा० विना । ४ पृ० ३१८ पं० १४ । ५–**ष्वक्षतः** वा० बा० । ६–**भावात्व**–वा० बा० । ७–**नुमितोस्तात्का**–आ० हा० वि० ।–**नुमितास्तत्का**–भां० मां० । ८ **सशब्दस्य** आ० हा० वि० । **स ब्दस्य** वा० बा० । ९–**मित्तभेदतः** भां० मां०।–**मित्तभेदादभेदतः** वा० बा० । १० **न सच्छब्दार्थतेति त**–भां० मां० । ११–**शतां न्वया**–वा० बा० ।

१२ "यद्भावं प्रति यन्नैव हेत्वन्तरमपेक्षते । तत् तत्र नियतं ज्ञेयं स्वहेतुभ्यस्तथोदयात्" ॥
"निर्निबन्धा हि सामग्री स्वकार्योत्पादने यथा । विनाशं प्रति सर्वेऽपि निरपेक्षाश्च जन्मिनः" ॥
—तत्त्वसं० का० ३५४–३५५ पृ० १३२ ।

१३ **नाशनमनु**–आ० हा० वि० । **नशनमनु**–भां० मां० । १४–**नाशाद्भवेत् त**–भां० ।–**नाशाद्भवे त**–भां० ।–**नाशौद्भिवेत् त**–वि० ।–**नाशौद्भेवे त**–हा० । १५ **अन्यादपेक्ष**–भां० मां० हा० वि० । **अस्यादपेक्ष**–वा० बा० । १६–**शहेतुनपेक्ष**–भां० मां० ।–**शहेतुत्वनपेक्ष**–आ० हा० वि० ।

न च क्रम-यौगपद्याभ्यां सामर्थ्यलक्षणं सत्त्वं व्याप्तम् क्रमाऽक्रमनिवृत्तौ च नित्यात् सत्त्वं निवर्त्तमानं क्षणिकेष्वेवावतिष्ठत इति सत्त्वयुक्तस्य कृतकत्वस्य गमकत्वम्, यतः क्षणिकत्वे सति क्रमाऽक्रमप्रतिपत्तेरसंभव एव । तथाहि—येन ज्ञानक्षणेन तत्पूर्वकं वस्तु प्रतिपन्नं न तेनोत्तरकालभावि, येन चोत्तरकालसङ्गतं न तेन पूर्वकालालीढमिति कथं क्रमप्रतीतिः? योऽपि पूर्ववस्तु-
५ प्र[1]त्य(प्रतीत्य)नन्तरमपरस्य ग्राहकः स क्रमग्राही भवेत् तथा च क्षणिकत्वमस्य स्यात् बौद्धस्य च काल एव नास्ति इति कथं तस्य क्रमग्रहः? भिन्नकालवस्त्वग्रहा(हे) का[3]लाभावे चानेकवस्तुरूप एव क्र[4]म(मः) तथा, नित्यस्यापि क्रमकर्तृत्वं न विरुध्यते—यथा च नित्यस्य क्रमकर्तृत्वादनेकरूपत्वात्(त्वं) तथा क्षणिकस्यापि स्यात्। अथ क्षणवद् द्वितीये क्षणे नित्यस्याप्यभावो भवेत् कार्याभावात्, अयुक्तमेतत्; कालाभावाद् भवन्मतेन। भ[6]वतु वा ग्रहस्तथापि कथं क्रमाऽक्रमाभ्यां सत्त्वस्य
१० व्याप्तिः क्रम-यौगपद्यव्यतिरिक्तप्रकारान्तरेणाप्यर्थक्रियासंभवात् न च प्रकारान्तराभावनिश्चयो दृश्यानुपलम्भात् ततो विशिष्टदेशादावेवाभावनिश्चयप्र[8]सक्तेः न सर्वत्र सर्वदा वा। नाप्यदृश्यानुपलम्भात् तदा(द)भावनिश्चयः तस्य संदेहहेतुत्वात्। तस्मान्नित्येषु क्रमाक्रम(मा)योगेऽपि सं[9]त्त्वानिवृत्तेः कथं सत्त्वस्य [11]क्षणिकभा(कस्वभा)वत्वं प्रमाणतः सिद्धं येनाऽन्वय-व्यतिरेकनिश्चयो भवेत्? यद्यपि क्रमाक्रमाभ्यां सत्त्वस्य व्याप्तिः प्रकारान्तराभावात् [12]सिद्धा त्त(त)थापि क्रमाक्रमायोगो न नित्येषु
१५ प्रत्यक्षादिना सिद्धः नित्यानामतीन्द्रियत्वात् तदसिद्धौ न तेषु सत्त्वनिवृत्तिसिद्धिस्तदसि[13]द्धौ च न सत्त्वस्य क्षणिकस्वभावत्वसिद्धिः। किञ्च, सत्त्वात् क्रम-यौगपद्यानुमानं स्यात् ताभ्यां तस्य व्याप्तत्वात् न[14]तु क्षणिकत्वानुमानम् तत्र क्रमकर्तृत्वासंभवादिति।

अत्र केचित् प्रतिविदधति—"प्रत्यक्षसिद्ध(द्धे) एव क्रम-यौगपद्ये। तथाहि—सहभावो भावानां यौग[15]पद्यम् क्रमस्तु पूर्वापरभावः, स च क्रमिणामभिन्न एकप्रतिभासे[16]श्च तत्प्रतिभासैः। अथै-
२० कप्रतिभासानन्तरमपरस्य प्रतिभासः क्रमप्रतिभासः नत्वेकस्यैव अतिप्रसङ्गात्, एवमेतत् किन्तु यदैकप्रतिभासः न तदा परस्य, तदा तत्प्रतिभासे यौगपद्यप्रतिभासप्रसक्तेः। तस्मात् क्रमिणोः पूर्वाऽपरज्ञानाभ्यां ग्रहणे तदभिन्नक्रमोऽपि गृहीत [17]एव, केवलं पूर्वानुभूतपदार्थाऽऽहितसंस्कारप्रबोधात् 'इदमस्मादनन्तरमुत्पन्नम्' इत्यादिवि[18]कल्पप्रादुर्भावे क्रमो गृहीत इति व्यवस्थाप्यते। [20]क्रमे(मि)णोर्ग्रहेऽपि कथञ्चिदानुपूर्व्या [21]विकल्पानुत्पत्तौ क्रमग्रहव्यवस्थापनायोगात् अत एव क्रमिणामेकग्रहेऽपि न
२५ क्रमग्रहो व्यवस्थाप्यते। अपि च, कथं कालाभ्युपगमवादिनोऽपि क्रमग्रहः सर्वकार्याणामेककालत्वात्? न च भिन्नकालकारणोपाधिक्रमात् कार्यक्रमो युक्तः, कालस्याऽभिन्नत्वेनाभ्युपगमात् त(न त)द्योगाद् भावानां क्रमसद्भाव इति। न च पूर्वापररूपत्वा[23]त् 'कालः क्रमवान्' इति वक्तव्यम्, यतस्तस्याऽपि यद्यपरकालापेक्षः क्रमस्तदाऽनवस्थाप्रसक्तिः। अथ स्वरूपेण तस्य क्रमस्तथासति कार्याणामपि बहूनामसहायानां क्रमो भवेत् अस्माकं तु लोकप्रतीत्या 'पूर्वाह्ण'आदिप्रत्ययविषयो महाभूत-
३० विशेषः कालोऽस्त्येव तद्धे[24]दात् क्रमादिप्रतीतिर्युक्तैव। नापि नित्यस्य प्रकारान्तरेण [25]कर्तृत्वसङ्गतिः यत एकदेशकार्य[26]कारणानेक(?) करणे ह्यन्यदा प्रकारान्तरेण करणेऽङ्गीक्रियमाणे वस्तुनः स्वभावभेदाद् भेदप्रसक्तिरिति नैकत्वम् पुनः पुनः कार्यकरणे च क्रम एव न प्रकारान्तरसद्भावः। न च

१–**नक्षणेम तत्पूर्व**–भां० मां०।–**नक्षणेन त्पूर्व**–वा० बा०। २ "न चैतच्छक्यं वक्तुम् क्रम-यौगपद्ये एव भावानां न सिद्धे व्यतिरिक्तकालपदार्थानभ्युपगमादिति"—तत्त्वसं० पञ्जि० पृ० १४४ पं० १५। ३ **कालो भा**–वा० बा०। ४ **क्रम तथा** हा० वि०। ५ **क्षणस्यापि** वा० बा०। ६ **भवक्रु वा** वा० बा०। ७–**प्रसक्तेः तत्सर्वदा वा** भां० मां०।–**प्रसक्तेः तत् सर्वत्र सर्वदा वा** हा० वि०। ८ **वादयुक्तद**–वा० बा०। ९ **तस्यानित्यत्वेषु** वा० बा०। १० **सत्त्वान्निवृत्तिः** आ० हा० वि०। **सत्त्वान्निवृत्तेः** भां० मां०। ११ **क्षणिकाभा**–वा० बा०। १२ **सिद्धो त**–भां० मां० आ०। **सिद्धो भि न्नथापि त्तमाक्रमायो न नित्ये**–हा०। **सिद्धो भि न्नथापि त्तथापि त्तक्रमायो न नित्ये**–वि०। १३–**सिद्धि च** वा० बा० विना। १४ **न क्ष**–हा० वि०। १५–**पद्य क्र**–वि० विना। १६–**सश्चात**–वा० बा०। १७–**स अ**–आ० हा० वि०। १८ **एवं** हा० वि०। १९–**कल्प्यप्रा**–भां० मां० हा०।–**कल्पाप्रा**–वा० बा० आ०। २० **क्रमेणोग्र**–भां० आ० हा० वि०। **क्रमणोग्र**–मां०। २१ **विकल्पानुपपत्तौ** वा० बा० विना। २२–**कल्प्यानु**–हा०। २३–**त्वात् कालात् कालः क्र**–वा० बा० वि० विना। २४–**दा क्र**–वा० बा० आ०। २५ **कर्तृसं**–वा० बा० विना। २६ **कारणे ह्यन्यदा** भां० मां०। **कारणात्येक करणे व्यत्पदा** वा० बा०।

प्रकारान्तरे(रेण) 'नैकदा कार्यं करोति पुनः पुनश्च करोति' इत्येवं करणमभ्युपगन्तव्यम् भावस्यावस्तुत्वप्रसक्तेः सर्वदाऽकर्तृत्वात्। अथ 'एकदा कार्यं करोति पुन(नः) पुनश्च न करोति' इति प्रकारान्तरेण करणमभिमतं तथापि न यदा (पि यदा) न करोति न तदा (ति तदा) अवस्तुत्वमेव प्रसक्तम्। तस्माद् घटादिः पदार्थोऽर्थक्रियाकारी क्रमाक्रमाभ्यां प्रत्यक्षसिद्धः 'स एवायम्' इति ज्ञानादक्षणिकश्च प्रतीयत एव। तस्यैककार्यकरणं प्रति यत् सामर्थ्यं तत् तदैव न पूर्वं ५
न पश्चात् तत्कार्याभावात् सामर्थ्यं तु ततोऽव्यतिरिक्तमेव उत्तरकार्योत्पत्तावप्येवं द्रष्टव्यमिति सामर्थ्यभेदेन पदार्थभेदात् कथं न क्षणिक एव क्रमाक्रमयोर्नियमः? अतो यत्र सत्त्वं तत्र क्रमाक्रमप्रतीतावपि क्षणिकत्वप्रतीतिरेव, य एव क्षणिके क्रमाक्रमयोर्नियमो नित्येऽप्ययमेव न (?) योगः ततो घटादौ यदेतन्नित्यत्वं प्रतीतिविषयत्वेनाध्यवसितं तत् सत्त्वविरुद्धमिति क्रम-यौगपद्याभ्यामर्थक्रियाविरोधो नित्यस्य सिद्ध उच्यते। यथा च दृष्टेषु घटादिषु क्षणिकत्वव्याप्तं सत्त्वं तथाऽ- १०
दृष्टेष्वप्यविशेषादिति सर्वोपसंहारेण व्याप्तिमवगत्य यथा यथा तेषु सत्त्वं निश्चीयते तथा तथा क्षणिकत्वानुमानम् यत्र च सत्त्वानिश्चयस्तत्र सत्त्वाशङ्कया शशविषाणादि[1]ष्विव न क्षणिकत्वप्रतीतिरन्यत्र प्रसं[2]ङ्गसाधनात्। न च तत्राप्यनुमानवैयर्थ्यं बाधकप्रमाणादेव क्षणिकत्वस्य(स्या)निश्चितत्वादिति वाच्यम् प्रागू गृहीतव्याप्तिकस्य सत्त्वनिश्चयमात्रेणैव क्षणक्षयाधिगतेर्बाधकप्रमाणवैयर्थ्यात्। ये तु विपक्षाद् व्यावृत्तत्वेन क्षणिकत्वव्याप्तं सत्त्वस्य सर्वत्रावगम्य तत्रैव सत्त्वात् क्षणिकत्वमनुमापयन्ति तेषां १५
व्याप्तिग्राहकादेव प्रमाणा(णात्) क्षणक्षयस्य सर्वत्र निश्चितत्वादनुमानोत्थानमेव न स्यात् त्रैलोक्यस्य च सर्वस्य प्रत्यक्षत्वाद्धर्मिसिद्धिश्च तेषां दोषः असिद्धश्च हेतुः प्राप्नोति पक्षीकृते च सर्वस्मि[11]न् धर्मिणि बाधकं च स्यात्। यदि वि[12]पक्षाभावस्सिद्धस्तदा साध्यस्यापि सिद्धत्वादनुमानोत्थानं न स्यात् अन्य[13]श्च धर्मी न सिद्ध इति कथं वा [14]कस्य प्रवृत्तिरिति, यत् किञ्चिदेतत्; त(तत्) स्थितमेतत् सत्त्वविशिष्टस्य कृतकत्वस्य क्षणिकत्वेन सह तादात्म्य(त्म्यं) प्रमाणनिश्चितमिति कथं नान्वयव्यतिरेकनिश्चयः? य[15]द्वा २०
सत्त्वविशेषविक[16]लस्याऽपि कृतकत्वादेः क्षणपरिणामे साध्ये नानैकान्तिकत्वम् यतस्तस्य प्रथमे क्षणे य एव स्वभावो द्वितीयेऽपि क्षणे स एव चेत् तदा प्रथमक्षणवदभूत्वा भवनमेव प्रसक्तमिति क्षणि[17]कत्वम्। अथ प्रथमक्षणे जन्मैव तस्य न स्थितिः द्वितीये स्थितिरेव न जन्म एवमपि क्षणिकत्वप्रसक्तिर्जन्म-जन्मिनोः स्थिति-स्थितिमतोश्चाभेदात्। न च द्वितीयेऽपि क्षणे जन्मव्यतिरेकेण स्थितिर्युक्ता। अथ तत्राऽपि जन्म तर्हि न तदा स्थितिर्द्वितीयादिक्षणभावित्वात् तस्याः एवमुत्तरोत्तर- २५
क्षणेष्वपि सर्वदोत्पत्तिरेव न स्थितिरिति [19]क्षणक्षयित्वमेव उत्पत्तिश्च हेतुकृतेति तत्रैव कृत[20]त्वं(?) स्थितौ तस्मात् कृतकत्वस्याक्षणिकत्वविरुद्धत्वान्नानैकान्तिकत्वमिति सत्त्वानन्तर्भूतस्याऽपि कृतकत्वस्य व्याप्तिः प्रमाणनिश्चितेत्यत्राप्यन्वय-व्यतिरेकनिश्चयः।

परे तु सत्त्वलक्षणस्य हेतोस्तादात्म्यस्वरूपः प्रतिबन्धो विपर्यये बाधकप्रमाणनिबन्धन इत्येवं वर्णयन्ति। यत्र क्रम-यौगपद्ययोगो न तस्य क्वचित् सामर्थ्यम् अस्ति चाऽक्षणिकेषु सं [21]यि(इ)ति तेषां ३०
सामर्थ्यविरहलक्षणास[22]त्त्वसिद्धौ ततो निवृत्तौ सत्त्वमर्थक्रियासामर्थ्यलक्षणं क्षणिकेष्वेवाऽवतिष्ठत इति सत्त्वस्य क्षणिकत्वस्वभावतासिद्धिः अनेन हि बाधकेन प्रमाणेन सत्त्वविरो[24]धमसत्त्व (सत्त्वविरुद्धमसत्त्वं) क्षणिकेष्वाकृष्यते। न च विरुद्धयोरेकत्र समवधानमिति ततो विरुद्धानैकान्तिकते अपि नाशङ्कनीये। अथ कथमर्थक्रियासामर्थ्यनिवृत्ति(त्तिः) क्रम-यौगपद्यनिवृत्तिनिमित्ता तयोस्तद्व्यापः

१–**कारणांतरे** वा० बा०। २–**श्च न करोति पुनः पुनः कारणमभ्यु**–वा० बा०। ३–**ति पुनश्च न क**–वा० बा० हा० वि०।–**ति पुनः क**–भां० मां०। ४–**णमभि**–वा० बा० विना। ५ **तदापि** वा० बा० विना। ६–**दा व**–आ० हा० वि०।–**दा न करोति तदा वस्तु**–वा० बा०। ७–**दार्थभे त् क**–भां० मां० हा० वि०।–**दार्थवत् क**–आ०। ८–**व तयो**–वा० बा०। ९–**दिष्विति क्ष**–वा० बा०। १०–**सङ्गासा**–वा० बा०। ११–**सिन्नध**–वा० बा०। १२–**पक्षो भा**–वा० बा०। १३–**न्यश्चाध**–वा० बा० विना। १४ **कस्य वृ**–वा० बा०। १५–**श्चिदेतत् स्थितमतत् स**–भां० मां०।–**श्चिदेतत् स्थितमन सत्व**–आ० हा० वि०। १६ **यथा** आ० हा० वि०। १७–**कल्पस्या**–आ०। १८–**कमथ** वा० बा०। १९–**ति क्षयित्व**–भां० मां०। २०–**कत्वं न स्थिते ते तस्मा**–वा० बा०।–**कत्व स्थितौ** भां० मां०। २१ **सत्तेति** वा० बा० विना। २२–**सत्वो सिद्धो ततो** वा० बा०। २३–**सत्वं वि**–आ०। २४–**धमत्व**–भां० मां०।

कत्वात्? अथात्राऽपि यदि व्याप्यव्यापकभावो [1]बाधकान्तरनिबन्धनस्त(नस्त)दा बाधकान्तरं तत्राप्यन्वेषणीयम् तथा तदन्यत्रापि इत्यनवस्थाप्रसक्तेरप्रतिपत्तिः, असदेतत्; यतः क्रम-यौगपद्याभ्यां सामर्थ्यस्य व्याप्तिः प्रकारान्तरासंभवतो निश्चितेति कुतोऽनवस्था? प्रत्यक्षबलादेव च प्रकारान्तरासंभवो निश्चितः। प्रत्यक्षस्याऽभावविषयत्वविरोधात् नेति चेत्, न; भावमेव [3]क्रमेणेतरेण वा
५ कार्योदयलक्षणं प्रति[4]पन्ना(पद्य) अध्यक्षेण [5]द्वैरा[6]श्यव्यवस्थापनतः प्रकारान्तराभावसाधनात्। तथाहि—यथा क्रमेण यौगप[7]द्येन वा स्वकार्यमुत्पादयन्तो घटादयो भावा अध्यक्षविषयतामवलम्ब[8]न्ते तदेतररूपविवेकि[9]नो ज्ञानात्मनि तथैव प्रतिभासन्ते यतः [10]स्वस्वभावव्यवस्थितयो नात्मानं परेण मिश्रयन्ते भावास्तस्याऽपरत्वप्रसङ्गात् तथा [11]च सर्वत्र सर्व[12]स्योपयोगादिप्रसङ्गः। न चाऽसाधारणरूपाध्यासितेषु प्रतिभासमानेषु तेषु तत्राऽसतो रूपस्याऽवभासो युक्तः अहेतुकतापत्तेः एवं चाक्षसं-
१० विद[13](दां) प्रतिनिय[14]तविषयता [15]प्रमाणपरिदृष्टा [16]हीयेत अहेतुकत्वे प्रतिभासस्य विषयान्तराऽवभासन-प्रस[17]क्तेः अक्षस्य नियामकत्वेप्यविद्यमानाऽनु[18]कारणे(कारेण) न संविद्वशादर्थात्म(त्मा)नः स्वरूपमासादयेयुरिति नियतार्थाध्यवसायतः प्रवृत्तानां नार्थक्रियाप्राप्तिः स्यात् मरीचिकादिषु जलाद्य(ध्य)वसायिनामिव। नापि सुख-दुःखप्राप्ति-परित्यागौ स्याताम्। इति क्रमवत्कार्यसा[19]मर्थ्योदीयमानमध्यक्षं तद्रूपमेवानुकुर्वत् इतररूपा(प)प्रतिभासविविक्ततया स्वसंवेदनेन [20]संवेद्यमानं यथाऽनुभवं पाश्चात्यं
१५ विकल्पद्वयं जनयति तत [21]एवं विभागः संपद्यते 'क्रम[22]भावे(वि) तत् कार्यं [23]नाक्रमम्' इति तस्मात् सर्वस्य तत्राप्रतिभासमानस्य 'यदेवं न भवति तत् क्रमभावि न भवति' इति सर्वस्येतरप्रकारतया व्यवस्थितेः सिद्ध एव तद्व्यतिरिक्तप्रकारान्तराभावः अन्यथा तदन्यतया तस्य व्याप्यभावे स्वविषय[24]व्यवच्छेदा[25]त् तद्रूपतापरिच्छेद एव तस्य न स्यात्। परिच्छेदो हि तदसाधारणरूपानु[26]करणमेव तच्च नास्तीति तत्[27]सद्भावे वा कथं न अतद्रूपव्यवच्छेदः? यतो नाकारान्तराऽसंसृष्टरूपानुकरणस्तदन्य-
२० (णतः अन्यत् तदन्य)व्यवच्छेदनं नाम ततः सर्वस्य तदतद्रूपतया व्यवस्थितेः प्रकारान्तराभावः कथं न सिद्धिमध्यास्ते? एवमितरप्रकारप्रतिपत्तावपि ज्ञेयम्। क्रमश्च तदन्यासाहित्यमुक्तः स चैक-क्षणभाविनाप्यध्यक्षेण वस्तुस्वरूपं गृह्णता तदव्यतिरिक्तो गृहीत [28]एवेत्यप्युक्तम्।

यदपि 'उपलब्धिलक्षणप्राप्तत्वे प्रकारान्तरस्य देशादिनिषेध एव स्यान्नात्यन्ताभावः अनुपलब्धिलक्षणप्राप्तत्वे विप्र[29]कर्ष(र्षि)णां नाऽभावनिश्चय इति कुतोऽध्यक्षतः प्रकारान्तराभावसिद्धिः'
२५ इत्यु[30]क्तम्, तदप्युक्तोत्तरमेव; यतः कार्यान्तरासाहित्यं कैवल्यमङ्कुरादेः क्रमः, यौगपद्यमप्यपरैः बीजादिकार्यै[31]स्तस्य साहित्यम्, प्रकारान्तरं च तदुभयावस्थाभावेऽप्यङ्कुरादेरन्यथाभवनमध्यक्ष(क्षं?) तस्या[32]न्यसहितश्च(स्य?) केवलस्य चाङ्कुरादि[33]स्वभावस्य भावस्य भाव उपलभ्यमान उपलब्धिलक्षणप्राप्त एव स्वभावः क्रम-यौगपद्यस्वभाव[34]बहिर्भूतो नोपलभ्यते उपलभ्यवस्तुनोऽपरसाहित्ये कैवल्ये वा अपनीते

---

१ **बाधकान्तरनिबन्धनं तदा** आ० हा० वि०। **बाधनं तदा**। २ **क्रमेणान्तरेण वा** वा० बा० विना। ३-**पत्ताध्य**-वा० बा० भां० मां०। ४-**राश्यं व्य**-आ०। द्वैराश्यं च—

"कृतकाकृतकत्वेन द्वैराश्यं कैश्चिदिष्यते। क्षणिकाक्षणिकत्वेन भावानामपरैर्मतम्" ॥

—तत्त्वसं० का० ३५२ पृ० १३२।

"इह हि नैयायिकादयः क्षणिकमेकमपि वस्तु नास्तीति मन्यमानाः कृतकाकृतकत्वेन भावानां द्वैराश्यमवस्थापयन्ति ×××। अपरैस्तु वात्सीपुत्रीयादिभिः क्षणिकाक्षणिकत्वेनापि भावानां द्वैराश्यमिष्यते"।

—तत्त्वसं० पञ्जि० पृ० १३२ पं० ५ तथा ७।

५-**पद्येन स्व**-वा० बा० विना। ६-**म्बन्ते तदित**-वि०।-**म्बन्ते न तदे**-वा० बा०। ७-**किनऽज्ञा**-वा०बा०। ८ एतदर्थकं "सर्वभावाः स्वभावेन" इत्यादि-पद्यं पूर्वं समायातम्-पृ० २४३ पं० १७ तथा टि० अं० २०-२१। तदेव च पद्यं विद्यते सिद्धिवि० टी० लि० पृ० ५३ प्र० पं० १। तत्त्वोपप्लवे लि० पृ० १२७ द्वि० पं० २। ९ **च सर्वस्यो**-भां० मां०। १०-**यताव**-वा० बा०। ११ **प्रताण**-आ० हा०। **प्रतारण**-वि०। १२ **हीयते** आ० वि०। १३-**सक्तेरस्य नि**-वा० बा०। १४-**कारेणे** वि०। १५-**मर्थ्यादी**-वा० बा०। १६ **संविद्य**-आ०। १७ **एव** हा० वि०। १८-**भाव त**-वा० बा०। १९ **नाक्राम**-वा० बा० विना। २०-**दा त**-वा० बा०। २१-**नुकार**-हा० वि०। २२-**त्सभा**-भां० मां० आ० हा०।-**त्साभा**-वि०। २३ **एवेत्युक्तम्** आ०। २४-**कर्षणा ना**-हा० वि०। २५ पृ० ३२४ पं० १०। २६-**स्तस्या सा**-हा० वि०। २७-**स्यान्य हि**-वा० बा० विना। २८-**स्वभावस्य भाव उप**-हा० वि०।-**स्वभाव उप**-वा० बा०। २९-**हिर्भूते नो**-वा० बा०।

तद्विविक्तदेशाद्य(ध्य)वसायिनोऽध्यक्षस्यानुभवादभावसिद्धेः। अङ्कुरादे[1]स्तु(??)स्य कार्यस्य क्रमाक्रमभावव्यतिरेकेणाभावेऽन्यदाभावो न(??) क्षतिमावहति तस्मात् प्रत्यक्षत एव प्रकारान्तराभावसिद्धिः (द्धेः) क्रम-यौगपद्ययोगेन कथं न सामर्थ्यस्य व्याप्तिर्भवेत्? अत एव [2]न्यायाद् देश-कालविप्रकर्षिणो भावास्तथाविधं कार्यं ये विदधति क्रमेतराभ्यामन्यथा न ते कर्त्तु[3]मर्हन्ति अन्यथा तस्यैवासम्भवात्। तथाहि—यद्यपि देशादिविप्रकृष्टता तेषां तथापि [4]कार्यस्य भावो [5]दृष्टकार्यधर्मव्यतिरेकेण न ५ सम्भवति कार्यमात्रस्य विशेषाभावात्, कार्यता हि कस्यचिद् भावे भवनम् तच्च अन्यसहि[6]तस्य केवलस्य वा नान्यथा इत्यत्र प्रत्यक्षाऽनुपलम्भतः सिद्धम् यथा च प्रत्यक्षानुपलम्भस्तद(?)भावाव्यित्वसिद्धेः कार्यतायामङ्कुरादेः सर्वत्र तथैव तल्लक्षणव्यवस्थाविशेषाभावा[7]त् तथा कार्यस्य भावोऽपि प्रकारद्वयेन सर्वत्र नान्यथा विशेषाभावाद् भवनमात्रस्येत्यनुपलब्धिलक्षणप्राप्तानामपि क्रम-यौगपद्याभ्यामर्थक्रियासामर्थ्यस्य व्याप्तिः। अनुमानतोऽपि सर्वत्र प्रकारान्तराभावः सिद्ध्यत्येव। तथाहि— १० अन्योन्यव्यवच्छेदरूपाणामेकनिषेधेनापरविधानात् तस्याऽपि प्रतिषेधे विधि-प्रतिषेधयोरेकत्र विरोधादुभयनिषेधात्मनः प्रकारान्तरस्य कुतः सम्भवः? प्रयोगश्चा[8]त्र-यत्र यत्प्रकारव्यवच्छेदेन तदितरैकप्रकारव्यवस्थापनम् न तत्र प्रकारान्तरसम्भवः, तद्यथा नीलप्रकारव्यवच्छेदेनानीलप्रकारव्यवस्थायां पीते, अस्ति च क्रमाऽक्रमयोरन्यतरप्रकारव्यवच्छेदेन तदितरप्रकारव्यवस्थापनं व्यवच्छिद्यमानप्रकाराविषयीकृते सर्वत्र कार्यकारणरूपे भाव इति विरुद्धोपल[9]ब्धिः। व्यव- १५ च्छिद्यमानप्रकारेतरव्यव[10]स्थापनं प्रकारान्तरत्वं प्रकारान्तरंश्च (?) ततो बहिर्भावलक्षण इत्यनयोस्तथा[11]ऽन्यथारूपयोः परस्परपरिहारलक्षणत्वात्। न च अत्रापि बाधकान्ताराशङ्क्या अनवस्थानमाशङ्कनीयम्(??) पूर्वप्रसिद्धस्य विरोधस्य स्मरणमात्रत्वविरुद्धोपल[12]ब्धिषु हि धर्मिणि सद्भावमुपदर्शि विरोधमेव बाधकं(??) तस्माद् विरुद्धयोरेकत्रासम्भवात् प्रतियोग्यभावनिश्चयः शीतोष्णस्पर्शयोरिव भावाभाव[13]योरिव वेति कुतोऽनवस्था? २०

अथ कथं क्रमयौगपद्ययोगोऽक्षणिकेषु भावेषूच्यते? न तावद् अक्षणिकाः क्रमेणार्थक्रियाकारिणः अकारकावस्थाऽविशेषात् प्रागेव द्वितीयादिक्षणभाविनः कार्यस्य का(क)रणप्रसङ्गाच्च तत्कारकस्वभावस्य प्रागेव सन्नि[14]धानात्। न च तदैव सन्निहितोपा(त्पा)दकानां कार्याणामनुदयो युक्तः पक्षा(श्रा)दपि तत्प्रसक्ते(क्तेः)। न च सहकारिक्रमात् [15]कार्यक्रमः इति वक्तव्यम् [16]यतः सहकारिणः किं विशेषाधायित्वेन तथा [17]व्यपदिश्यते(न्ते), आहोस्विद् एककार्यप्रतिनियता(मा)- २५ च्चक्षुरादय [18]इवाक्षेपकारिणः स्वविज्ञाने? तत्र यदि प्रथमो विकल्पः, स न युक्तः; तज्जनितविशेषस्यार्थान्त[19]रत्वप्रसक्तेः यतो [20]न तस्मिन्निष्पन्ने पश्चान्निष्पद्यमानो भिन्नहेतुको वा तत्स्वभावो युक्तः "अयमेव हि भेदो भेदहेतुर्वा विरुद्धधर्माध्यासः कारणभेदश्च" [ ] ततश्चेन्न भेदो न क्वचिद्व्ययं भवेत् अन्यनिमित्ता[21]भावात्। प्रतिभासभेदादिति, ननु प्रतिभासभेदोऽपीतरेतरप्रतिभासाभावरूपतया विरुद्धधर्माध्यासरूपता(तां) [22]नातिवर्त्तते, भेदे [23]वा(चा)तिश[24]यस्य तद्वस्थ एवासौ भाव ३०

१-**रादेस्तु स्य का**-आ०।-**रादेस्तु स्य का**-हा०।-**रादे स्य का**-वा० बा०।-**रादेस्तु म**-वि०। २-**व न न्या**-वा० बा०। ३-**था ते** वा० बा०। ४-**महंति** वा० बा० आ०। ५-**कार्यस्या भा**-आ० हा० वि०। ६ **दृष्टा का**-हा०। ७-**तस्या के**-वा० बा०। ८-**म्भतस्त**-वा० बा०। ९-**वाद् भवनकार्यस्य भावि प्रकार**-वा० बा०। १०-**त्र यत्र त् प्रका**-वा० बा० भां० मां०। ११-**लब्धि व्यव**-वा० बा०।-**लब्धि विद्य**-वि०।-**लब्धि द्यमान**-आ० हा०। १२-**स्थापनं रतत्वं प्रकारान्तरत्वं प्रकारान्तरश्च संभवश्च ततो** वा० बा०।-**स्थापनं प्रकारेतरव्यवस्थापनं प्रकारान्तरश्च ततो** भां० मां०। १३-**थारू**-आ० वा० बा० विना। १४-**लब्धि हि** आ० हा० वि०। १५ **तस्मा यनतरं प्रकारान्तरकत्रा संभ**-वा० बा०। १६-**वयोरिवेति** आ०। १७-**धानश्च च** वा० बा०। १८ **कार्याक्र**-वा० बा०। १९ प्रमेयक० पृ० ४ प्र० पं० ४। २०-**था द्युप**-वा० बा०। २१ **इव क्षेप**-वा० बा०। २२-**न्तरप्र**-वा० बा०। २३ **न भाव इति पश्चान्निष्पद्यमानो** वा० बा०। २४-**भावात् प्रतिभासभेदोपीतरेतर**-वा० बा०। २५ **नाति प्रवर्त**-वा० बा०। २६ "भेदे सम्बन्धासिद्धेस्तदवस्थमेव अकारकत्वमेतेषां पूर्वावस्थायामिव पश्चादपि अनुषज्यते"—प्रमेयक० पृ० ४ प्र० पं० ५। २७-**शयतद्वस्था एवा**-वा० बा०।

इति पश्चादप्यकारकः पूर्वावस्थायामिति(मिव)। [1]तस्मादेवातिशया(यात्) कार्यस्योत्पत्तेस्तत्र भावे कारकव्यपदेशो विकल्परचित एव भवेत्।

अथ द्वितीयो विकल्पोऽभ्युपगमविषयः, सोऽपि न युक्तः; यतो न नित्यानामेक[2]कार्ये प्रतिनियमल[3]क्षणं सहकारित्वमस्माभिरपह्नूयते किन्तु अक्षणिकत्वे प्राक् पश्चात् पृथग्भावसम्भवात् कार्यस्य तथा क्रियाप्रसङ्गेन 'सहैव कुर्वन्ति[4]' इति सहकारित्वनियमो न युक्तिसङ्गतो भवेत् यतो न ति (ते) साहित्येऽपि पररू[5]पेणैव कार्यकारिणः स्वयमकारकाणामपरयोगेऽपि तत्कारित्वासम्भवात् सम्भवे वा प[6]रमार्थतः कार्यनिर्वर्त्तको भवेत्, स्वात्मनि तु कारकत्वव्यपदेशो विकल्पनिर्मित एव भवेत्। एँवं च नार्थानुपकारिणो भावं कार्यमपेक्षेतेति तद्विकलेभ्य एव सहकारिभ्यस्तत् समुत्पद्येत अथवा तेभ्योऽपि न भवेत् स्वयं तेषामप्यकारकत्वात् पररूपेणैव कर्तृत्वाभ्युपगमात्। अतः सर्वेषां स्वयमप[7]कर्तृकत्वा(मकर्तृत्वात्) पररूपेणाप्यकर्तृत्वात् सर्वथा कर्तृत्वोच्छेदतो न कुतश्चित् किञ्चिदुत्पद्येत। तस्मात्' स्वरू[8]पेणैव कार्यस्वभावाः कर्त्तार इति न कदा[9]चित् तत्क्रियाविरतिरिति कुत एकार्थक्रियाप्रतिनियमस्वरूपमक्षणिकानां सहकारित्वम्? सामग्रीजन्यस्वभावतया कार्यस्य तस्याश्चापरापरप्रत्ययय[10]योगरूपतया[11] योग(याऽयोगे) प्रत्येकं तत्क्रियास्वभावत्वेऽप्यनुत्पत्तिरिति चेत्, व्याहतमेतत्; यतोऽयमेकोऽपि क्रमभाविकार्योत्पादने स[12]मर्थः ततः कथमेषां भिन्नकालापरापरप्रत्ययय[13]योगलक्ष[14]णानेकसामग्रीजन्यस्वभावता? एकेनापि तेन तज्जननसामर्थ्य(र्थ्यं) विभ्राणेन [15]तानि जनयतन्मानि(जनयितव्यानि) न ह्यन्यथा केवलस्य तज्जननस्वभावता सिद्ध्यति, [16]तस्याः प्रा(स्याः कार्यप्रा)दुर्भावानुमीयमानस्वरूपत्वात् कार्याणि च कारणान्तराण्यपेक्षमाणानि कथमयमुपेक्षते? अनादृत्य तानि हठादेव [17]जनयेत् कार्याणि। यो हि यन्न जनयति नासौ तज्जननस्वभावः, न चायं केवलः कदाचिदप्युत्तरोत्तरकाल[18]भावीनि प्रत्ययान्तरापेक्षाणि कार्याणि [19]जनयतीति तत्स्व(ति न तत्स्व)भावो [20]भवेत्। अतत्स्वभावश्च प्रत्ययै[21]रनन्त(यान्त)रसन्निधाने[22]ऽप्यत्यक्तरूपो नैव जनयेत्। स च केवलोऽपि तज्जननस्वभाव इति ततस्तेषामुत्पत्ति[23] ब्रु(ब्र)वीषि कार्याणि च सामग्रीजन्यस्वरूपतया सामग्र्यन्तराणि अपेक्षन्त इति ततः केवलादनुत्पत्तिं वदसि एते चोत्पत्ति—अनुत्पत्ती त[24]ज्जन्यत्वातज्जन्य(न्यत्व)स्वभावते विरुद्धे कथमेकत्र स्याताम्? अथ कार[25]णै(णैः) हेत्वन्तरापेक्षकार्यजननस्वभावोऽयमुत्पादित इति केवलो न जनयति, न च सहकारि सहिताऽस-

---

१ "विभिन्नातिशयात् कार्योत्पत्तौ चात्र कारकव्यपदेशोऽपि कल्पनाशिल्पिकल्पित एव"—प्रमेयक० पृ० ४ प्र० पं० ६। २-**कार्यं** आ०। ३ "एकार्थकारित्वेन त्वेषां सहकारित्वं नास्माभिः प्रतिक्षिप्यते किन्तु अपरिणामित्वे तेषां प्राक् पश्चात् पृथग्भावावस्थायामपि कार्यकारित्वप्रसङ्गतः सहैव कुर्वन्तीति नियमो न घटते"—प्रमेयक० पृ० ४ प्र० पं० ७। ४-**न्ति स**-वा० बा०। ५ "न खलु साहित्येऽपि भावाः पररूपेण कार्यकारिणः स्वयमकारकाणामन्यसन्निधानेऽपि तत्कारित्वासंभवात्"—प्रमेयक० पृ० ४ प्र० पं० ८। ६ **परमार्थः** आ०। "संभवे वा पर एव परमार्थतः कार्यकारको भवेत्"—प्रमेयक० पृ० ४ प्र० पं० ९। ७ **एव च** भां० मां०। ८-**स्यानुपकारिणा** आ० हा० वि०।-**स्यानुसारिणो** वा० बा०। ९ **भावकार्य**-वा० बा० हा०। "स्वात्मनि तु कारकव्यपदेशो विकल्पकल्पितो भवेत् तथा च अन्यस्यानुपकारिणो भावमनपेक्ष्यैव कार्यं तद्विकलेभ्य एव सहकारिभ्यः समुत्पद्येत"—प्रमेयक० पृ० ४ प्र० पं० ९। १०-**कर्तृपर**-वा० बा० विना। "अतः सर्वेषां स्वयमकारकत्वे पररूपेणापि अकारकत्वात् तद्वार्तोच्छेदतो न कुतश्चित् किञ्चिद् उत्पद्येत"—प्रमेयक० पृ० ४ प्र० पं० १०। ११-**रूपेणेवा का**-हा० वि०।-**रूपेणैवा का**-आ०। १२-**दाचि त क्रि**-वा० बा०। १३-**या योगारूपतया योगरू तत्क्रिया**-वा० बा०। "तस्याश्च अपरापरप्रत्ययय्योगरूपत्वात् प्रत्येकं नित्यानां तत्क्रियास्वभावत्वेप्यनुत्पत्तिस्तेषामिति—"प्रमेयक० पृ० ४ प्र० पं० १२। १४ **यतो यामेको**-वा० बा०। १५-**मर्थं ततः** वा० बा० विना। १६-**णानेका सा**-वा० बा०। १७ **तानि जनयतनि न ह्य**-वा० बा० विना। "एकेनापि हि तेन तज्जननसामर्थ्यं बिभ्राणेन तानि उत्पादयितव्यानि"—प्रमेयक० पृ० ४ प्र० पं० १३। १८ "तस्याः कार्यप्रादुर्भावानुमीयमानस्वरूपत्वात्"—प्रमेयक० पृ० ४ प्र० पं० १४। १९-**नयेत** आ०। २०-**भावीति** वा० बा० विना। २१-**यन्तीति** वा० बा०। २२ **भवेत् तत्**-वा० बा०। २३-**यान्नतर**-वा० बा०।-**यांनतर**-हा०। २४-**प्यभ्यक्त**-भां० मां०। २५-**त्पत्ति घवीषि** वा० बा०।-**त्पत्ति ऋवीषि** आ० हा० वि०। २६ **तज्जन्यस्वभावत्वे विरुद्धे** वा० बा० विना। २७-**रणे हे**-वा० बा० विना। २८-**कारिसहितावस्थयोरस्य स्वभावप्रत्ययान्तरापेक्षस्वभावजननस्वभावतायाः सर्वदा** वा० बा०।

हितावस्थयोरस्य स्वभावभेदः प्रत्ययान्तरापेक्षं[1]स्वकार्यजननस्वभाव[2]तायाः सर्वदा भावात्, असारमेतत्; यतः प्रत्ययान्तर[3]सन्निधापि(धानेऽपि) स्वरूपेणैवास्य कार्यकारिता; तच्च प्रागप्यस्ति प्रत्ययान्तरापेक्षायाँश्च ततो लभ्यस्यात्मातिशयस्याभावतोऽयोगात् उपकारलक्षणत्वादपेक्षायाः अन्यथाऽतिप्रसक्तेः। तत्सन्निधानस्यासन्निधानतुल्यत्वाच्च केवल एव कार्यं किं न करोति? अकुर्वंश्च केवलः सहितावस्थायां च कुर्वन् कथं न भिन्नस्वभावो भवेत्? अपि च, यदि [5]सहकार्यपेक्षा कार्यजननस्वभावता तस्य सर्वदा अस्ति तदा सर्वदा कार्योत्पत्तिप्रसक्तिः। अथ सहकारिसन्निधान एव तत्स्वभावता कथं न स्वभावँभेदा(दात्) वस्तुभेदं(दः) स्वभावस्यैव वस्तुत्वात्? तस्मात् सहितावस्थायाः स्वरू[6]पेणोपकारकस्य प्रागपि तत्स्वभावत्वे कार्यक्रियाप्रसङ्गान्नाक्षणिकस्य क्रमेण कार्यक्रियासम्भव ति (इति) न क्रमँयोगः। यौगपद्यमपि तस्याऽसङ्गतम् द्वितीयादिक्षणेषु तावत एव कार्यकलापस्योदयप्रसङ्गात् हेतोस्तज्जननस्वभावस्याप्रच्यु[10]तेः। सन्निहितसकलकारणानां वा(चा)नु[11]दयोऽयुक्तः प्रथमक्षणेऽपि तद्भावापत्तेरिति क्रम-यौगपद्यायोगादक्षणि[12]कानामर्था(र्थ)क्रियासामर्थ्यविरहलक्षणमसत्त्वमायातमिति [13]सत्त्वलक्षणः स्वभावहेतुः क्षणिकतायां बाधकप्रमाणबलान्निश्चिततादात्म्यो विशेषलक्षणभाक् कथं न प्रतीतः?

[14]अथाक्षणिकानामिव क्षणक्षयिणामप्यर्थक्रियासामर्थ्यलक्षणं सत्त्वमनुपपन्नमेव, क्रमायोगस्य तत्रापि तदवस्थत्वात्। अतो न क्षणिका अपि [15]परैरं(र)नाधीयमानस्वरूपभेदाः सामर्थ्यक्रियाप्रक्रान्तप्रकारमुत्पादयितुं शक्ताः, न च प्रतिक्षणोदयं विभ्राणाः परस्परतो विशेषमासादयन्ति भावभेदप्रसङ्गात्। तथाहि—असौ विशेषस्तेषां प्रागुत्पत्तेः, पश्चाद्वा? न तावत् प्राक् तेषामेव तदाऽसत्त्वात्। पश्चात् तत्स्वरूपस्याकार्यत्वात् तदुपहितानुपहितक्षणानामविवेकादिति न सहकारिभिरुपकारः। ततो निर्विशेषाणां न क्रम-यौगपद्याभ्यामर्थक्रिया[16]कारित्वलक्षणं सत्त्वम्। तदुक्तं च—

"कः शोभेत [17]वदन्नेवं यदि न स्याद्ह्रीकता।
अज्ञा(ज्ञ)ता वा यतः सर्वं क्षणिकेष्वपि तत्समम्" ॥ [ ]
"विशेषहेतवस्तेषां प्रत्यया न कथञ्चन।
नित्या[18]नामिव युज्यन्ते क्षणानामविवेकता" ॥
"क्रमेण युगपच्चैव यतस्तेऽर्थक्रियाकृतः।
न भवन्ति ततस्तेषां व्यर्थः क्षणिकताश्रमः" ॥ [ ] इति

तदयं सत्ताहेतुरसाधारणानैकान्तिकः क्षणिकाऽक्षणिकयोरभावात्, प्रकारान्तराभावाच्च न ताभ्यां व्य[19]तिरिच्यत इति संशयहेतुस्तयोरिति, असदेतत्; यतो नैवमुपकारः क्षणिकानामभ्युपगम्यते। तथाहि—उप[20]कारः स[21]मग्रकारणाधीनविशेषान्तरविशिष्टक्षणा[22]न्तरजननम्; तच्च कथमभिन्नकालेषु पर[23]स्परं क्षणिके[24]षु भावेषु भवेत् कार्य-कारणयोः परस्परकालपरिहारेणाव[25]स्थानां(नात्) ततः सामग्र्या एव जनकत्वादेकस्य जनकत्वाविरोधादव्यव[26]धानदेशाः समग्र(?) एव प्रत्येकमितरेतरसहकारिणः स्वं स्वं क्षणान्तरं विशिष्टमार[27]भन्ते तदपि चोत्तरो[28]त्तरं तथैव तथैवान्यविशिष्टं कारणभेदाद् भेदसिद्धेः। यथा चक्षुरादयो बीजादय[29]श्चातकि(श्चाऽकि)ञ्चित्करेभ्यः सन्निहितेभ्योऽपि न

१-**क्षत्वास्व**-हा० वि०। २-**तायां स**-आ०हा० वि०। ३-**रसन्नेपि स्वरूपेणेवा**-हा० वि०।-**रसत्तपि स्वरूपेणेवा**-आ०। **रसन्नपि स्वरूपेणैवा**-भां० मां०। "यतः प्रत्ययान्तरसन्निधानेऽपि स्वरूपेणैवास्य कार्यकारिता"—प्रमेयक० पृ० ४ द्वि० पं० ३। ४-**याश्चा त**-आ०। ५-**थाति धानस्या**-मां०। ६ **स-का**-आ० विना। ७-**वभेस्तु भेदस्त्वभावस्येवस्तुभेदस्त्वभावस्यैव वस्तुत्वात् तस्मात्** वा० बा०। ८-**स्थाया स्व**-वा० बा०। ९-**मयोगा यौ**-वा० बा०। १०-**च्युतेऽस**-वा० बा०। ११-**दयो शु**-वा० बा० विना। १२-**काना अपि परैरनार्थ्यविरह**-वा० बा०। १३-**सत्ताल**-वा० बा० हा०। **सत्वाल**-वि०। १४ **अथ क्ष**-आ० विना। १५ **परैरनर्थायमान**-वा० बा० विना। १६-**कारित्वं ल**-वा० बा० भां० मां०। **-कारित्वा ल**-हा० वि०। १७-**दन्नेव** वा० बा० भां० मां० हा०। १८-**नामिद यु**-आ० हा० वि०। १९ **व्यतिरिक्तत**-वा० बा० विना। २०-**काराः** आ० हा० वि०। २१-**मग्राका**-मां०। २२-**न्तरं ज**-आ० हा० वि०। २३-**स्पर क्ष**-भां० मां० हा०। २४-**षु भवेत्** वा० बा० विना। २५-**वस्थां ततः** वा० बा०। २६-**नदेश्यः** आ० हा० वि०। २७-**रभते** हा० वि०। २८-**त्तरं तथैवान्य**-वि०। २९-**श्चा त किञ्चि**-भां० मां० आ०।-**श्चात् किञ्चि**-वा० बा०।

कार्यप्रभवस्तत्सन्निधानस्याकिञ्चित्करत्वात् । न च परस्परसहकारित्वेऽप्यव्यवधानतः क्षणिकानां विशिष्टक्षणान्तरारम्भकत्वमयुक्तम्, प्रथमक्षणोपनिपातिनां क्षित्यादीनां परस्परतः तथाभूतक्षणान्तरजननस्वभावातिशयलाभाभावान्निर्विशेषाणां विशिष्टक्षणान्तरजननायोगात् योगे वाध्यग्राणामपि तत्प्रसङ्गो विशेषाभावादिति वक्तव्यम् मा यतः (व्यम् यतः) किं कार्योत्पादानुगुणविशेषविरहान्निर्विशेषास्तदु(स्त उ)च्यन्ते, आहोस्वित् तदुत्पत्तिनिबन्धनविशेषवैकल्यात्, उत विशेषमात्राभावात्? तत्र यद्याद्यः पक्षः स न युक्तः, यतो नासन्मते कारणस्थमेव कार्यं व्यक्तिमात्रमनुभवति यतस्तदभावे न स्यात्; अपि तु कारणं कार्यरूपविकलमेव कार्यमारभते सतः क्रियाविरोधात् भिन्नस्वभावत्वाच्च कारणात् कार्यस्य । द्वितीयपक्षाभ्युपगमोऽप्ययुक्तः यतोऽव्यवहितः क्षित्यादिकारणा(ण)कलापः कार्योपा(त्पा)दानुगुणविशेषजननसमर्थो हेतुस्तद्भा(??)वास्तत्प्रत्यक्षाऽनुपलम्भतः सिद्धः, केवलमत्र विवादः 'क्षित्यादयः किं क्षणिकास्तथाभूतविशेषारम्भकाः आहोस्विदक्षणिकाः' इति तत्र च साहित्येऽपि न ते पररूपेण कर्त्तारः, स्वरूपं च तेषां प्रागपि तदेवेति कथं कदाचित् क्रियाविरामा इति क्षणिकतैव तेषामभ्युपगमनीया । अथ तेषां समर्थहेतुत्वम् कुतः? परस्परोपसर्पण्याद्याश्रयप्रत्ययविशेषात् तदन्वयव्यतिरेकाऽनुविधानदर्शनात् तेषां चेन्न प्राक् पश्चान्न पृथग्भावः कारणाभावादिति नान्यदोदयप्रसङ्ग(??) प्रत्येकं चेति तृतीयपक्षोऽप्ययुक्तः अपरापरप्रत्ययोगतः प्रतिक्षणं भिन्नशक्तीनां भावानां कुतश्चित् साम्यादेकताप्रतिपत्तावपि भिन्नस्वरूपत्वात् । नहि कारणानां भेदेऽप्येकरूपतैव भावस्याऽनिमित्तताप्रसङ्गात् । तथाहि—(??)यदि न कारणभेदभेदादपि नाभेदः भेदस्वरूपं (??) च कार्यम् तच्चेद् अहेतुकं विश्वस्य वैश्वरूप्यमहेतुकं भवेत् न च कदाचित् किञ्चित् एकमेव वाताऽऽतपशीतादीनां यथासम्भवं सर्वत्र भेदकारणानां भावात् । ततः प्रतिक्षणं स्वभावभेदात् किञ्चिदेव कस्यचित् कारणम् न सर्वं सर्वस्येति क्षणिकानामेवार्थसामर्थ्यलक्षणं सत्त्वं सम्भवतीति नाऽसाधारणानैकान्तिकता सत्त्वस्य । अथ क्षणिकानां क्षित्यादीनां एकदैककार्यक्रियायां सर्वेषामभिन्नैवात्मना तत्रोपयोगोऽभ्युपगन्तव्यः अन्यथा कारणभेदात् कार्यस्यापि भेदप्रसक्तिः स चैका(षा)मेकभावेऽप्यस्ति न च तदैकं कार्यं जनयति सर्वेषां भाव इति(?) तत् कारणात् अतस्तस्य सामान्यात्मनः कदाचित् कार्यकारिणोऽप्यभेदादर्थक्रियासामर्थ्यात् त्वसत्त्वमिति अनैकान्तिकता हेतोः, असदेतत्; यतः किमिदं कारणं भवताऽभिप्रेतम् भेदो वा यद्भेदात् कार्यस्यापि भेदः प्रतिपाद्यते? यदि चक्षुरादिकं प्रत्येकं तदवस्थाभावि कारणम् भेदश्चानेकत्वात् तदा नायं नियमः—अनेकस्माद् भवताऽनेकेनैव भवितव्यम् विपर्यये बाधकप्रमाणाभावात् 'एकेनैवैकं कर्त्तव्यम्' इत्यत्रापि न नियमकारणमुपलभ्यते । किञ्च, 'एकमेकं करोति' इति कुतोऽवगतम्? तद्भावे तस्या(स्य) भावादिति चेत् समानमेतदनेकत्र । तथाहि—एकमङ्कुरादि कार्यमङ्गीकृत्य विशिष्टक्षणान्तरोत्पादनलक्षणेनाऽतिशयाधानेन क्षित्यादीनां प्रवृत्तिः तत्र स्वहेतुपरिणामोपात्तधर्माणस्तदवस्थाप्राप्तास्तस्यैवैकस्य जनने समर्थाः समुत्पन्ना(न्ना ना) न्यस्येति नापरं तद् जनयन्ति,

१-प्रसव-आ० विना । २-प्यव-वा० बा० विना । ३-वावतिश-वा० बा० । ४-वा निर्वि-वा० बा० । ५-सङ्गा वि-वा० वा० । ६-क्तव्यं मा यातः भां० मां० ।-क्तव्यमायातः आ० ।-क्तव्यमायात किं हा० वि० । ७-गुणावि-हा० वि० । ८-गमो यु-वा० बा । ९-द्भावाप्रत्यक्षा-वा० बा० ।-द्भावात्तत्प्रत्यक्षा-हा० ।-द्भावात्प्रक्षा-वि० । द्भावात् तत्प्र-वि० सं० । १०-क्रियवि-वा० बा० । "ततः स्वरूपेणैव भावाः कार्यस्य कर्तार इति न कदाचित् तत्क्रियोपरतिः स्यात्"—प्रमेयक० पृ० ४ प्र० पं० ११ । ११-सर्प्पणाद्या-वा० बा० । १२-श्रयविशे-वा० बा० । १३-धानाद्-वा० बा० विना । १४-च प्राक् पश्चान्न पृ-वा० बा० विना । १५-रूपान्न हि वा० बा० विना । १६ कारणभेदभेदादपि नाभेदा भेदस्वरू-वि० । कारणभेदभेदाऽभेदादपि नाभेदो भेदाभेदस्वरू-वा० बा० । कारणभेदभेदाऽभेदादपि नाभेदादपि नाभेदाभेदस्वरू-भां० । कारणभेदभेदोऽभेदादपि नाभेदादपि नाभेदाभेदस्थरू-मां । १७ कार्यं तो वेदहेतुको वि-वा० बा० । १८-कमेव वाचातातपशीतादीनां आ० ।-कमेव शीतातपवातादीनां वा० बा० । १९ क्षणिकानामेकदैक-भां० मां० । २०-स्यापि भेदाप्र-आ० हा० वि० । २१-कामेष भा-वा० बा० । २२-त तस्य वा० बा० । २३-सामर्थ्यास्त्वसत्व-आ० ।-सामर्थ्यात्वसत्व-वा० बा० हा० ।-सामर्थ्यात्वेसत्व-वि० । २४-रादिकं तद्-वा० बा० आ० विना । २५-प्रकारिणामुप-वा० बा० । २६ किंचि ए-वा० बा० । २७-क्षणोनाति भां० मां० विना । २८ तव स्व-वा० बा० । २९-न्यस्यैति आ० हा० वि० ।

न वानेकोद्भूतं तद् अनेकमासज्यते यतः 'न कारणमेव कार्यं भवति' इत्येतदस्मदादिभिरभ्युपेयते येनानेकपरिणतेरनेकरूपत्वात् कार्यस्याप्यनेकत्वप्राप्ति(प्तिः) किन्तु केषुचित् सत्स्वपूर्वमेव किञ्चित् प्रादुर्भवति तद्भाव एव भावात् तत्कार्यमुच्यते इति नानेकताप्रसङ्गः । यदि त्वेष्वभिन्नं रूपं जनकं स्यात् तदा तस्यैकस्थितावपि भावात् तत्कार्यजननस्वभावत्वाच्च विशेषान्तरविकल्पा(ला)दपि ततः कार्योदयप्रसक्तिः अन्यस्तन्नि(न्यसन्नि)धावपि तस्य विशेषाभावात् तदवस्थायामपि वा न जनयेत् अतो यद्भावाऽभावानुविधायि यद् दृष्टं तत् कार्यम् त एव च विशेषास्तस्य जनका इति कुतोऽनेकान्तः? अथ सामग्रीमाश्रित्य न कारणभेदात् कार्यभेदः स्यादित्युच्यते, तदप्यसत्; सामग्रीभेदे कार्यभेदस्येष्टत्वात् कार्यस्याप्यनेकसामग्रीजनितस्यानेकत्वात् तद्वैलक्षण्ये च तस्यापि विलक्षणत्वात् । तस्मात् न सत्तालक्षणस्य हेतोरनैकान्तिकता । नापि विशेषलक्षणविरहः प्रमाणनिश्चितस्य तन्मात्रानुबन्धस्य स्वभावहेतुलक्षणस्य सद्भावात् ।

यदप्युक्तम् 'कार्यहेतुप्रतिपाद्योऽपि प्रतिक्षणं ध्वंसो न भवति क्षणिकत्वेऽक्षदृशोऽप्रवृत्तेः कार्यकारणभावस्य च प्रत्यक्षानुपलम्भसाधनत्वात्' इति, तदप्यसंगतम्; यतो यदि सर्वत्र प्रत्यक्षानुपलम्भसाधन एव कार्यकारणभावस्तदा चक्षुरादीनां स्वविज्ञानं प्रति कुतः कारणताप्रतिपत्तिः? अथ तद्विज्ञानस्याऽन्येषु सत्स्वपि हेतुषु कादाचित्कतया तद्व्यतिरिक्तकारणान्तरसापेक्षत्वाच्चक्षुरादीनां तत्र हेतुत्वमनुमीयते स तर्हीहापि न्यायः समानः । तथाहि—विषयेन्द्रियादिवशात् प्रतिक्षणविशरारूणि क्रमवन्त्युपजायमानानि ज्ञानानि तथाविधकारणप्रभवत्वमात्मनः सूचयन्तीति कथं (थं न) कार्यहेतुः क्षणेध्वंसितां चक्षुरादीनां प्रतिपादयेत्? कार्यक्रमाद्धि कारणक्रमः प्रतीयमानः कथं कार्यहेतुश्चलप्रतीतिर्भवतीत्यलमतिनिर्बन्धेनाऽज्ञप्रलापेषु । यदप्युक्तम् 'असतोऽजनकत्वान्न क्षणविशरारोः कार्यप्रसवः' इति, तदनभ्युपगमादेव निरस्तम् । यच्च 'अविनष्टा(ष्टाद्) द्वितीयक्षणव्यापारसमावेशवर्त्तिनः कार्यप्रभवाभ्युपगमे क्षणभङ्गभङ्गप्रसङ्गः' इत्यभिहितम्, तदप्यसङ्गतम्; यतो यदि व्यापारसमावेशाद् भावाः कार्यनिव(र्व)र्त्तका भवेयुस्तदा (??) कार्योत्पादने द्वितीयक्षणप्रतीक्षाया स्यादयो दोषा यावता प्रसवव्यापारसमावेशलक्षणदोषो (??) द्वितीयसमयप्रतीक्षाव्यतिरेकेणापि स्वमहिम्नैव कार्यका(?)रणे प्रवर्त्तन्ते एवान्यथा द्वितीयक्षणभाविव्यापारजननेऽप्यपरव्यापारसमावेशव्यतिरेकेणाप्रवृत्तेस्तत्रापि व्यापारान्तरसमावेशकल्पनातोऽनवस्थाप्रसक्तेः अपरापरव्यापारजननोपक्षीणशक्तित्वान्न कदाचनापि कार्यं कुर्युः । अथापरव्यापारनिरपेक्षा एवैकं व्यापारं निव(र्व)र्त्तयन्ति तथासति कार्येण किमपराद्धं येनाद्यव्यापारनिरपेक्षास्तदेवं न जनयन्ति? पारम्पर्यपरिश्रमाऽप्यै(मोऽप्ये)षामेवं परिहृतो भवति । पदार्थव्यतिरेकेण चोपलभ्य स्वभावं व्यापारमभ्युपगच्छतः प्रत्यक्षविरोधश्च । न च व्यापारमन्तरेणार्थक्रिया नोपपत्तिमतीति वक्तव्यम् व्यापारेणैव व्यभिचारात् । तथा, व्यापारस्याप्यपरव्यापारमन्तरेणापि यदि कार्ये प्रवृत्तिः—अन्यथाऽत्राप्यनवस्थाप्रसङ्गात् कार्यानुत्पत्तिः स्यात्—तथा(दा) व्यावृत्त(पृत?)पदार्थस्यापि तमन्तरेणैव सा भविष्यतीति व्यर्थं व्यापारपरिकल्पनम् तत्स्वभावत एव स्वकार्यकारिणो भावा न व्यापारवशात् ते च स्व-

१ नचा-वि० । २-सज्यन्ते हा० वि० । ३-दस्मादिरभ्यु-वा० बा० । ४ प्राप्तिं वा० बा० । प्राप्तं आ० । ५-चित् सत्स्वपू-आ० ।-चित् सत्स्वत्पू-वा० बा० । ६ यदि तु तेष्वभि-आ० । यदि तु ष्वेभि-हा० वि० । ७-दात्तस्यै-वा० बा० । ८-दये प्र-वा० बा० विना । ९ नयति वा० बा० । १० यद्भावाभावात्वाविधा-आ० । यद्भावाभावात्वविधा-वि० । यद्भावानुविधा-वा० बा० । ११-मग्रीनाश्रित्या न आ० विना । १२-स न सा-वा० वा० । १३ तस्यानेकत्वात् त (न) सता(त्ता) लक्ष-वा० बा० । १४ तन्न सत्ता-वि० । १५-षणल-वा० बा० । १६ पृ० ३१८ पं० १६ । १७-क्षणं त्वंसो वा० बा० । १८ तत्र भवमनु-वा० बा० । १९-मानानि तथा-वा० बा० विना । २० क्षणिध्वं-वा० बा० । २१-णध्वंसिनां चक्षु-आ० हा० वि० ।-णध्वंसिनो चक्षु-भां० मां० । २२-पादत् का-वा० बा० । २३ पृ० ३१८ पं० १८ । २४ यद्वा वि-भां० मां० । २५ पृ० ३१८ पं० १८ । २६ प्रतीक्षास्यादयो दोषो यावता वा० बा० । प्रतीक्षाया स्यादयो दोषो यावता वि० । २७-महिमैव आ० विना ।-महिमेवं का-वा० । २८-रणा प्र-वा० बा० । २९-वर्त्तते हा० । ३०-व ति ज-वा० बा० । ३१-श्रमाच्चैषामेवं आ० विना । ३२-या नोपरपपत्ति-(नोपपत्ति-) वा० बा० । ३३-था व्यापारमन्तरेणापि आ० हा० वि० विना । ३४-था वृत प-वा० बा० । ३५-स्यापि मन्त-आ० विना । ३६ एवं आ० हा० वि० । ३७-शास्ते च वा० बा० विना ।

हेतुभ्य एव तथाविधाः समुत्पन्नाः स्वसन्निधिमात्रेव(मात्रेणैव) कार्यं निव(वै)र्त्तयंति(यन्तीति) कुतः क्षणभङ्गभङ्गप्रसङ्गः? न चानष्टात् कारणादुपजायमाने कार्ये(?)कारणभावसम्भवात् तदभावश्चासतः प्रागसामर्थ्यात् सामर्थ्यकाले च कार्यनिष्पत्तेस्तत्वतःस्याऽ(स्तत्र तस्याऽ)नुपयोगात्। तस्मात् पौर्वापर्येणैव कार्यकारणभावः कारणसत्तानन्तरं च कार्यस्योत्पादने नष्टात् कारणात् कार्यप्रभा(प्रभवा)नुषङ्गः तथाभ्युपगमे च तृतीये क्षणे कार्योदयः स्यात् (??) यस्मात् प्रथमे क्षणे कार्योदयः स्यात् (??) यस्मात् प्रथमे क्षणे कारणसत्ता द्वितीये तद्विनाशः ततः कार्योत्पत्तिः तदनन्तरं भाव इति। ततो यथैव कारणविनाशस्तत्सत्तापूर्वको न नष्टाद् भवति तथा तत्समानकालं कार्यं कारं(रण)सत्तानन्तर्यान्नष्टादुपजायते। अथ कारणसत्तापूर्वकत्वाद् विनाशो हेतुमां(मान्) प्रसजति, न; नीरूपत्वात् तस्य तत्र हेतुव्यापाराभावात्। तथाहि—स एव हेतुर्व्यापारेण क्रियते यस्य कृतस्य किञ्चिद् रूपमुपलभ्येत विनाशस्तु ना(नी)रूप इति न तस्य किञ्चित् कर्तव्यम्। दृष्टान्तत्वेन तु विनाशस्योपन्यासो व्यवधायककालासम्भवप्रदर्शनार्थः ततो द्वितीये क्षण(णे) कारणं नष्टं कार्यं चोपजायत(त)मिति कुतस्तयोः सहभावप्रसक्तिः? तदुक्तम्—

"अनष्टाजायते कार्यं हेतुश्चान्येऽपि तत्क्षणम्।
क्षणिकत्वात् स्वभावेन तेन नास्ति सहस्थितिः॥" [ ] इति।

अत्र च अध्ययेना(अध्ययनाऽ)विद्धकर्णोदूद्योतकरादिभिर्यदुक्तम्—"यदि तुलान्तयोर्नामोन्ना-

१ एवं हा० वि०। २ समुत्पन्नः सुसविधिमात्रेव वा० बा०। ३–यती कुतः एव क्षण–वि०। ४ कार्यं स्वकारणेनैककालत्वमनन्तर्यनियमा यदि हि कार्यकारणयोः सहितोत्पत्तिर्भवेत् तदास्यादयो यौगपद्यं च नास्ति सहभाविनोः कार्यकारणभावसंभवात् तदभात्तभावश्चासतः वा० बा०। ५–ष्पन्ने सूत्रतः स्यानुप–वा० बा०। ६ कार्यकारणभावः कारणभावः कारणसत्ता–भां० मां०। ७–णसत्तानान्तरं वा० बा०। ८–त्पादे न–वा० वा०। ९–काल कार्यं वा० बा० मां० विना। १०–रसत्तान–आ०। –रस्तत्तान–हा०।–रसत्तात्तत्त कार्या नष्टा–वा० बा०। ११–नाशो धेतु–वा० बा०। १२–स्य त्तत्र वा० बा० विना। १३–त्र हेतुव्यापार भावा–आ०।–त्र हेतुव्यापाराभावा–भां० मां०। १४–तुर्या–वा० बा० विना। १५–पनुप–आ० वि० विना। १६–रूपं इ–वा० बा०। १७ नष्ट का–भां० मां०। १८–जायतति–वा० बा० विना। १९–नष्टा जाय–आ०।–नष्टा ज्ञाय–वा० बा०। २०–श्चान्येति त–वा० बा०। २१–त्र च अध्ययतेनाविरुद्ध–आ० हा० वि०।–त्र च अध्ययनेनाविरुद्ध–भां० मां०। "उद्द्योतकराऽध्ययनप्रभृतिभिः।" "इति अध्ययनादिमतं निरस्तम्॥"—सम्मति० द्वि० का० प्र० गा० टीका। "इत्यध्ययनाऽविद्धकर्णोदूद्योतकरादीनाम्"–शास्त्रवा० स्याद्वादक० पृ० १२२ प्र० पं० १।

"अत्र अविद्धकर्णोक्तानि विनाशस्य हेतुमत्त्वसाधने प्रमाणानि निर्दिदिक्षुराह—

ननु नैव विनाशोऽयं सत्ताकालेऽस्ति वस्तुनः। न पूर्वं न चिरात् पश्चाद् वस्तुनोऽनन्तरं त्वसौ॥
एवं च हेतुमानेष युक्तो नियतकालतः। कादाचित्कत्वयोगो हि निरपेक्षे निराकृतः॥
वस्त्वनन्तरभावाच्च हेतुमानेव युज्यते। अभूत्वा भावतश्चापि यथैवान्यक्षणो मतः"॥

तत्त्वसं० पञ्जि० पृ० १३६ पं० ७ तथा तत्त्वसं० का० ३६७–३६९ पृ० १३६।

"उद्द्योतकरोक्तामपि युक्तिमाह—

अहेतुकत्वात् किञ्चायमसन् वन्ध्यासुतादिवत्। अथवाऽऽकाशवन्नित्यो न प्रकारान्तरं यतः॥
असत्त्वे सर्वभावानां नित्यत्वं स्यादनाशतः। सर्वसंस्कारनाशित्वप्रत्ययश्चाऽनिमित्तकः॥
नित्यत्वेऽपि सहस्थानं विनाशेनाऽविरोधतः। अजातस्य च नाशोक्तिर्नैव युक्त्यनुपातिनी"॥

तत्त्वसं० पञ्जि० पृ० १३६ पं० २७ तथा तत्त्वसं० का० ३७०–३७२ पृ० १३६–१३७।

२२ **तुलातयो**–आ० विना। "इति सिद्धः कार्यकारणभावः क्षणिकेष्वपि नाशोत्पादयोरेककालत्वात् तुलान्तयोरुन्नमनाऽवनमनवदिति चेत् अथ मन्यसे कार्यकारणभावः क्षणिकेष्वपि संभवतीति कारणविनाशसमकालं कार्यभावात् यदा कारणं विनश्यति तदा कार्यमुत्पद्यते विनश्यच्च कारणमस्ति कारणविनाशेन अभिन्नकालः कार्योत्पादः यथा तुलान्तयोर्नामोन्नामाविति"—न्यायवा० पृ० ४०९ पं० १६–२१।

"न हि तयोर्मिथः कार्यकारणभावः प्रतिबन्धः समसमयत्वात्
नाशोत्पादौ समं यद्वद् नामोन्नामौ तुलान्तयोः।"—अष्टसह० पृ० १९९ पं० १३।

"पूर्वक्षणो विनश्यंस्तु उत्तरक्षणमुत्पादयिष्यति तुलान्तयोर्नामोन्नामवत् इति चेत् एवं तर्हि क्षणयोः स्पष्टैवैककालता आश्रिता"—सूत्रकृ० टी० अ० १ उ० १ पृ० २७ प्र० पं० १३।

"नाशोत्पादौ समं यद्वत् नामोन्नामौ तुलान्तयोः"—प्रमेयक० पृ० १४६ प्र० पं० १४।

भवत् कार्योत्पत्तिकाल एव कारणविनाशस्तदा कार्यकारणभावो न भवेत् यतः [?? कारणस्य विनाशः कारणोत्पाद एव नाशः??] इति वचनात् एवं च कारणेन सह कार्यमुत्पन्नमिति प्राप्तम्। यदि च स एव नाशः प्रथमेऽपि क्षणे न सत्ता भावस्य स्यात् विनाशात् तदैव लोके च भावनिवृत्तिर्विनाशः प्रतीतः न भाव एव, सर्वकालं च विनाशसम्भवात् सर्वदा भावस्य सत्त्वं स्यात्। अथ कारणोत्पादात् कारणवि(?)नाशो भिन्नस्तदा कृतकत्वस्वभावत्वमनित्यत्वस्य न भवे(वेत्) व्यतिरिक्ते च नाशे समुत्पन्ने न भावस्य निवृत्तिरिति कथं क्षणिकत्वम्" [ ] इति, तन्निरस्तम्। यतो द्विविधो विनाशः—सांव्यवहार्यः तात्त्विकश्च। भावनिवृत्तिरूपः प्रथमः, भावरूपश्च द्वितीयः। ततो(?)त्पन्नो भावः कार्यं करोति, कार्यकाले च कारणनिवृत्तिरूपो विनाशो लोकप्रतीत एव, नायं भावस्वभावं इष्यते, नापि कारणोत्पादादभिन्नो वा नीरूपत्वात्। भेदाभेदप्रतिषेध एव केवलस्य क्रियते। उक्तं च—

"भावे ह्येक(ष) विकल्पः स्याद्विधेव(वै)स्तु(स्त्व)नुरोध(धतः)।" [ ] इति

न व्यतिरिक्ते नाशे जाते क्षणरूपस्य भावस्यानिवृत्तिरित्यपास्तम्। यतश्च द्वितीयक्षणोत्पत्तिकाल एव प्रथमक्षणनिवृत्तिः तेनैकक्षणस्थायी भावो 'विनाश'शब्देनोच्यते, अयं च भावरूपत्वात् साधनस्वभाव एव विनाशः कार्योत्पत्तिकाले चैव निवर्त्तत इति कार्यभिन्नकालभावी। न च सर्वकालमस्य सद्भावः भावस्यासत्त्वात्, यद् वा विनश्वरोऽयं भावः 'विनाशोऽस्य' इति द्वाभ्यां धर्मि–धर्मवाचकाभ्यां अविनाशिव्यावृत्तैस्यैवैकस्य भावस्य भेदान्तरप्रतिक्षेपाभ्यामभिधानाद् भाव एव नाश उच्यत इति। यत् पुनरिदमभिहितम् 'विधिरूपेण क्षणिकताऽत्र साधयितुं प्रस्तुतेति प्रतिषेधसाधिकाया अनुपलब्धेरिहानधिकार इति, तत् लिङ्गव्यापारविषयानभिज्ञा(ज्ञ)ताख्यापनम्; यतो न लिङ्गं विधिमुखेन किञ्चित् प्रवर्त्तते सर्वस्य समारोपव्यवच्छेदसाधकत्वेनैव व्यापारादिति कार्य–स्वभावहेत्वोरपि नानुपलब्धिरूपताव्यतिक्रमः तेन परमार्थतः अनुपलब्धिरेवैको हेतुरिति सुगतसुताभ्युपगतः (मः)।

१ एव एव नाशः वा० बा०। एव व नाशः वि०। २ प्राप्त यदि व भास एव नाशः आ० विना। ३–वृत्तिविना–आ० विना। ४ प्रतीतो भाव–वा० बा० विना। ५–स्य संत्वं भां० मां०।–स्य सत्व स्या–आ० हा० वि०।

६ "तदत्र कतमं नाशं परे पर्यनुयुञ्जते। किं क्षणस्थितिधर्माणं भावमेव तथोदितम्॥
अथ भावस्वरूपस्य निवृत्तिं ध्वंससंज्ञिताम्। पूर्वपर्यु(र्य)नुयोगे हि नैव किञ्चिद् विरुध्यते॥

द्विविधो हि विनाशो विधेः प्रतिषेधलक्षणः xxxxx यद्वा भावस्वभावप्रच्युतिलक्षणप्रध्वंसापरनामा विनशनं विनाश इति"—तत्त्वसं० का० ३७३–३७४ तथा तत्त्वसं० पञ्जि० पृ० १३७ पं० २२।

"अयं भावः–द्विविधो ह्यस्माकं विनाशः सांव्यवहार्यः तात्त्विकश्च। आद्यो भावनिवृत्तिरूपः। द्वितीयश्च भावरूपः। तत्र कार्यकाले कारणनिवृत्तिकल्पे आद्यमेव नाशमवलम्बते। वस्तुव्यवस्थापकस्त्वाद्य एव। एतेन 'कार्योत्पत्तिकाल एव कारणविनाशाभ्युपगमे कारणोत्पादरूपत्वात् तस्य सहभावेन कार्यकारणभावव्यवस्थोत्सीदेत् कारणोत्पादात् कारणविनाशस्य भिन्नत्वाभ्युपगमे च कृतकत्वस्वभावत्वमनित्यत्वस्य न भवेत्, व्यतिरिक्ते च नाशे समुत्पन्ने न भावस्य निवृत्तिः इति कथं क्षणिकत्वम्"—शास्त्रवा० स्याद्वादक० पृ० १२१ द्वि० पं० ९–पृ० १२२ प्र० पं० १। ७ **तात्त्विक एव**–वा० बा० विना। ८–**थम भा**–वा० बा० विना। ९ **भावः भावरूप इति ततोत्पन्नो भावः** वा० बा०। १०–**वस्वभाव इ**–वा० बा०। ११ **भावः ह्यो**–वा० बा०। श्लोकोऽयं धर्मकीर्तिसूरेर्ज्ञायते। तथाहि—

"एतेनैतत् प्रतिक्षिप्तं यदुक्तं न्यायमानिना—न तत्र किञ्चिद् भवति न भवत्येव केवलम्" ॥ ३२ ॥
"भावे ह्येष विकल्पः स्यात् विधेर्वस्त्वनुरोधतः। न भावो भवतीत्युक्तमभावो भवतीत्यपि" ॥ ३३ ॥
–शास्त्रवा० स्त० ४ पृ० १२७।

"न्यायमानिना तर्कावलिप्तेन धर्मकीर्तिना"—शास्त्रवा०स्याद्वादक० पृ० १२७ द्वि० पं० ५।

"न तस्य किञ्चिद् भवति न भवत्येव केवलम्"—आप्तमीमां० प० ३ श्लो० ५३ अष्टश० पृ० २८ पं० ३०। अष्टस० पृ० २०० पं० १३। १२ **जायतेऽक्ष**–वा० बा०। १३ **द्वितीयक्षणोत्पत्तिस्तेनैकक्षणनिवृत्तिऽभावोविनाशशब्देनोच्येत** वा० बा०। १४ **च निर्वर्त्त**–वा० बा०। १५ **कार्यं भि**–वा० बा०। १६ **भाव वि**–आ०। १७–**त्तस्य चैकस्य** वा० बा० विना। १८ पृ० ३१८ पं० २०। १९ **न लिङ्ग विधिमुखेन** भां० मां० आ०। **न लिङ्ग वै मुख्येन** वा० बा०।

यदप्यभ्यधायि–'प्रत्यभिज्ञाप्रत्यक्षावसितं भावानामक्षणिकत्वमिति क्षणध्वंसितापरिकल्पनमयुक्तम्' इति, तदप्यसङ्गतम्; तस्याः प्रामाण्यासिद्धेः। तथाहि–प्रमाणस्येदं लक्षणं परेणाभ्यधायि–'तत्राऽपूर्वार्थविज्ञानम्' इत्यादि। न च बाधकवर्जितत्वं अस्याः संभवति प्राक्प्रतिपादितानुमानबाध्यत्वात्। अथ तया बाधितत्वादनुमानस्य कथं बाधकत्वम्? असदेतत्; अनिश्चितप्रामाण्याया अस्या बाधकत्वानुपपत्तेः। न चेतरेतराश्रयत्वं दोषः यतो नानुमानस्य प्रामाण्यं प्रत्यभिज्ञाऽप्रामाण्याश्रितम् अपि तु स्वसाध्यप्रतिबन्ध्या; स्य च (बन्धात्; स च) विपर्यये बाधकप्रमाणबलान्निश्चित इति कथमितरेतराश्रयत्वलक्षणो दोषः? न चानुमानविरोधमनुभवन्त्यपि प्रत्यभिज्ञा प्रमाणम् अन्यथा आकारसाम्यदेवत्व(स्यादेकत्व)मधिगच्छन्ती नीलेतरकुसुमसर्पादिवस्तुनः प्रमाणं भवेत् यतो नात्रापि कुसुमादिकार्यदर्शनमनुमीयमानो भेद(?)प्रत्यक्षप्रतीततामनुभवति। न चानुमानस्यात्र बाधकत्वं न इतरत्र प्रमाणावगतसाध्यप्रतिबिम्ब(बन्ध)पक्षधर्मतात्मकतल्लक्षणसंज्ञिनोऽनुमानस्य प्रत्यभिज्ञा अन्यद्वा वत्प्र(तत्प्र)माणान्तरं बाधकं संभवति विरोधात्। तथाहि–स्वसाध्यप्रतिबन्धे हि सति हेतुः स्वसाध्ये सत्येव तस्मिन् धर्मिणि भवति, बाधा तु तदभावनिमित्तैव कथं न विरोधः? प्रत्यक्षादिकं च बाधकं तत्र धर्मिणि साध्याभावमवबोधयति स्वसाध्याविनाभूतश्च हेतुस्तत्र प्रवर्त्तमानः स्वसाध्यसद्भावमिति भावानामस्थैर्यं भवेत्। अनुमानाप्रामाण्यप्रसङ्गश्चैवं स्यात् तुल्यलक्षणे ह्येकत्र बाधकसद्भावो दृष्ट इति। अदृष्टबाधकेऽपि तदाशङ्का न निवर्त्तते(तेऽ)विशेषात्। नहि दृष्टप्रतियोगिनः प्रागितरेण कश्चिद् विशेषो लक्ष्यते यतो न संभवद्बाधकानामपि सर्वदा तदुपलब्धिः सातिशयप्रज्ञानां तु कदाचिद् बाधकोपलब्धिर्भविष्यतीति तन्निश्चयो(?)बाधकाभावाऽभावयोरित्यनिश्चिततल्लक्षणत्वादनुमानं न किञ्चिदपि प्रमाणं स्यात्। कुतश्चाध्यक्षज्ञानमप्रमाणम्? नानुमानतः नहि प्रत्यक्षाऽनुमानयोः प्रमाणरूपतायां विशेषः–प्रत्यक्षेऽप्यर्थाव्यभिचारा(रः) प्रामाण्यनिबन्धनम् स च तस्मादात्मलाभः[?? अन्यतो भवतोऽभवतो वा भवतः तदा व्यभिचारनियमाभावात् स पा(चा)र्थात्मलाभः साक्षाद् ??]व्यवधानं तथाऽनुमानेऽपि तुल्यः। यदि प्रत्यक्षबाधान(म)न्तरेण प्रत्यभिज्ञानस्याप्रामाण्यं नाभ्युपगम्यते तदा वक्तव्यं किमिति शालिबीजमेव शाल्यङ्कुरजनकं (कं न) कोद्रवबीजम्? अथ शालिबीजभावे तदङ्कुरभावमवगच्छताऽध्यक्षेण तस्यैव तज्जनकत्वव्यवस्थापनान्न कोद्रवबीजस्य कोद्रवबीजभावे[?? शाल्यङ्कुरविविक्तदेशप्रतिभासवतोऽध्यक्षेण तस्याजनकत्वव्यवस्थापनाच्च। नन्वेवमन्वयव्यतिरेकानुविधायि तत्कालकार्यमवगच्छद् अध्यक्षं कस्यचिद् वस्तुनः तदा तज्जननस्वभावतानुत्तरकालभाविनस्तत्कार्यस्य तदानीं तस्याजननस्वभावतां च किमिति न प्रत्येति तथा चोत्तरकाल(लभा)विकार्यजननसमये प्रत्यभिज्ञाज्ञानं यदा 'स एवायम्' इति प्रत्येति तदा कथं प्रत्यक्षेण बाध्यते? यतः 'अयम्' इत्युल्लेखवत् पुरोवस्थितवत्कौ(तत्का)लकार्यजनकं वस्तुनः परामृशति 'स एव' इत्युल्लेखवच्च प्राक्तनम् तदजनकंश्च भावस्तस्य संस्पृशति तत् कथं पूर्वापरकालभावि कार्यजनकस्वभावव्यवस्थापकाऽक्षतप्रत्ययक्रान्ता बाधां प्रत्यभिज्ञाज्ञानमनुभवति? तथा, 'स एवायम्' यः प्रागेव तत्कालकार्याजनकस्वभावोऽध्यक्षेण व्यवस्थापितः स यदि न तर्ह्ययं यो जनकस्वभावतयेदानीं परामृष्टः अथायं जनकस्वभावो विरुद्धरूपमाबिभ्रतां द्विचन्द्रादिप्रत्ययानामिव तत्त्वव्यवस्थापकत्वाऽसंभवादिति स्वप्रतीत्यावाप्येतेयप्रत्यभिज्ञा अतो 'बाधावर्जि(र्जित)त्वम्' अप्यस्या

---

१ पृ० ३१८ पं० २३। २ तत्र पू–वा० बा० विना। पृ० ३१८ पं० २५। ३–ज्ञाऽप्रमा–वा० बा०। –ज्ञाःप्रामा–आ०।–ज्ञाप्रामा–हा० वि०। ४ तु श्रस्वसाध्यप्रतिबन्ध्यस्य विप–आ०। ५–प्रतिवन्ध्यस्य च विप–हा० वि०। ६–पर्यय बा–वा० बा०। ७–नविरोधाम–वा० बा० विना। ८–भवत्यपि वा० बा०। ९–कारं सा–वा० बा०। १०–तरं कु–वा० बा०। ११–माणं वे–वा० बा० विना। १२–माना मे–वा० बा०। १३–णसंनिनो–वा० बा०।–णसंज्ञितो मां०। १४–न्यद्वा त् प्र–आ० हा० वि० विना। १५–थाहि स्वस्वसाध्य–भां० मां०। १६–स्वाख्यं भ–आ० हा० वि०। १७–लब्धः सा–वा० बा० विना। १८–ति न निश्चियो वा० बा०। १९ तदव्य–वा० बा० भां० मां०। २०–धानं नवानु–आ० हा० वि० विना। २१ तत्कार्य–भां० मां०। २२–स्तुन त–वा० बा०। २३–त्कालाका–वा० बा०। २४–नकव–भां० हा० वि०। २५ प्रागमं त–वा० बा०। २६–कश्च भावं तस्य वा० बा०।–कश्च भावस्वस्य भां० मां०। २७–त्यभिज्ञाननानु–वा० बा०। २८ अथेयं वा० बा० विना। २९–भावो न तर्हि स एवेत्यंध्यवसीयमानोऽजनस्वभावो विरुद्धरूप–वा० बा०। ३०–पमबि–वा० बा०। ३१–प्यते प्र–वा० बा०।

असङ्गतम् ??]यथा शुक्तिकायां रजताध्यवसायो दुष्टकारणा(ण)प्रभवत्वेन(नाऽ)प्रमाणं तथा प्रतिक्षणविशरारुषु सदृशापरोत्पत्त्यादिविप्रलम्भहेतोरुपजायमानं प्रत्यभिज्ञानं दु(दु)ष्टकारणारब्धत्वादेव(वाऽ)प्रमाणम्। न च प्रत्यभिज्ञानमेव स्वविषयस्य तत्त्वं व्यवस्थापय(यद)दुष्टकारणारब्ध(ब्धत्व)मात्मनो निष्टाप(निश्चाय)यति, इतरेतराश्रयत्वप्रसक्तेः—अदुष्टकारणारब्धत्वात् स्वविषयव्यवस्थापकत्वम् ततश्चादुष्टकारणारब्धत्वमिति कृत्वा। लूनपुनरुदितकेशादिषु चैकत्वाभावेऽप्यस्य दर्शनात् कुतः स्वविषयव्यवस्थापकत्वम्? न चा(च) केशादिप्रत्यभिज्ञानस्यान्यत्वान्नायं दोषः अन्यत्वा(त्रा)पि नियामक(?)मन्तरेण व्यभिचारशङ्काऽनिवृत्तेः। न च यो जनित्वा प्रध्वंसते 'नैतदेवम्' इति स मिथ्याप्रत्ययः वज्रोपलादिप्रत्यभिज्ञानं तु देशान्तरादौ न विपर्येतीत्यवितथम् अनुमानस्यात्रापि विपर्ययव्यवस्थापकस्य प्रतिपादितत्वात्। तत्र अदुष्टकारणारब्धत्वमप्यत्र संभवति। अर्थक्रियार्थार्हि(र्थी हि) सर्वैः प्रमाणमन्वेषते न व्यसनितयेत्यर्थक्रियासाधनविषयं प्रमाणमित्यभ्युपगन्तव्यम्। न च प्रत्यभिज्ञानविषयेण स्थैर्यमनुभवताऽर्थक्रिया काचित् साध्यत इति तैमिरिकज्ञानवदपूर्वमर्थक्रिया(?) अक्षमं सामान्याद्यधिगच्छदपि न प्रमाणमिति प्रमाणलक्षणाभावान्न प्रत्यभिज्ञाप्रमाणा(?)मात्मध्यक्षं सता नित्येनार्थेन प्रत्यभिज्ञानजनकाभिमतेनेन्द्रियाणां संप्रयोगासिद्धेस्तद्व्यवस्थापकप्रमाणाभावा(वात्)। भावे वा तत एव तत्सिद्धेः व्यर्था प्रत्यभिज्ञा। न च सत्योदकाध्यक्षेष्वप्येतत् समानम्। अर्थक्रियाज्ञानात् तेषां तथाभावसिद्धेः। न च बहिरर्थाभावेऽप्यर्थक्रियाज्ञानस्य भावात् तत्तथात्वसिद्धिः, शून्या(न्य)वाद(दा)पत्तिप्रसङ्गात् तद्व्यतिरेकेणापरस्यार्थव्यवस्थापकस्याभावात्। न चैकत्वे संवादकं प्रमाणं किञ्चित् सिद्धमिति न प्रत्यक्षताऽपि प्रत्यभिज्ञाज्ञानस्येति नातः स्थैर्याधिगतिः।

किञ्च, एकत्वाध्यवसायिन्यपि क्रमोदयमनुभवन्ती प्रत्यभिज्ञा स्वविषयस्य क्रमं सूचयति, नह्यभेदे स्वालम्बनस्य क्रमवत्प्रत्यभिज्ञोदयः संभवति, ततो येन स्वभावेनाद्यं प्रत्यभिज्ञानं तथालम्बनत्वाभिमतः पदार्थो जनयति तेनैव यद्युत्तरकालभावीनि तदाद्यज्ञानकाल एव सर्वेषामुदयप्रसक्तिः सन्निहितकारणत्वात् आद्यज्ञानवत्, अनुदये वा तस्य तानि प्रत्ययजनकत्वमेव। नहि यदा यद् यन्न जनयति तदा तन्न जननस्वभावम् पश्चादपि तत् तत्स्वभावमेव नैव तदापि जनयेत् अथान्येन तदा स्वभावे(व)भेदात् कथं न प्रत्यभिज्ञाविषयस्य भेदा(दः) स्वभावभेदनिबन्धनत्वादर्थभेदस्य? अपि च, सकलसहकारिसन्निधाने येन स्वभावेन तदालम्बनं प्रत्यभिज्ञाज्ञानं जनयति स्व(स) स्वभावस्तस्य तदैवोत्तर(वोत) प्रागप्रा(गप्या)सीत्? यदि तदैव कथं पूर्वस्मादभेदस्तस्य प्रागसतः तदैव सत्ताभ्युपगमात्? अथ अवस्थानां भेदः अवस्थातुश्चाभेदः, न; अवस्थातुरपि तदवस्थाभाविनो जनकाजनकस्वरूपतया भेदस्य नी(न्या)यप्राप्तत्वात्। न चावस्थावा(वान् अ)वस्थाव्यतिरिक्तोऽस्ति उपलब्धिलक्षणप्राप्तत्वे तस्यानुपलम्भेनासत्त्वात्, अनुपलभ्यस्वभावत्वे च तस्य न प्रत्यभिज्ञाविषयत्वमिति

१–कारणत्वमात्म–वा० बा०। २–प्रसक्तेरदुष्टकारणारब्धत्वमात्मनो निश्चयतीतरेतराश्रयत्वप्रसक्तेरदुष्टकारणारब्धत्वात् स्वविषयव्यवस्थापकत्वम् वा० बा०। ३–पकं तत–वा० बा०। ४–रब्धमिति हा० वि०। ५ न वा के–भां० मां० विना। ६–न्यत्वो पि आ० वि०। ७–शङ्काऽ–आ० विना। ८ च या ज–भां० मां०। च जो ज–वा० बा०। ९–सतै नै–भां० मां०। १०–ज्ञा तुं दे–वा० बा० विना। ११–तत्वात्वन्न आ०।–तत्वाव्वन्न हा० वि०। १२–यार्थी तर्हि वा० बा०। १३ सर्वै प्र–आ०। १४–या क्रिया सा–वा० बा०। १५–णमित्युप–वा० बा०। १६–षयण वा० बा०। १७ न प्रमाणलक्षणा–भां० मां०। १८–ज्ञाप्रमाणमान्मध्यक्षं भां० मां०।–ज्ञाप्रमाणमानात्यद्यंध्यक्षं वा० बा०। १९–ध्यक्षं साता आ०। २०–भावे वा भां० मां०। २१–वादाप्यत्ति–भां० मां०।–वादाप्यपत्ति–हा० वि०।–वाप्यत्ति–वा० बा०। २२ न प्रत्यभिज्ञा–भां० मां०। २३–नस्येति मात स्थै–वा० बा० विना। २४–गति वा० बा० विना। २५–त्वावासातात्यपि वा० बा० २६ तवालम्ब–वा० बा०। २७–दार्था ज–आ० विना। २८–भावीति त–मां०। २९–दाद्यतनज्ञान–वा० बा० विना। ३०–दयो वा वा० बा० विना। अत्र 'अनुदये वा तस्य न प्रत्ययजनकत्वमेव' इति पाठः स्यात्। ३१–त्ययः ज–आ०। ३२ यदाद्यं न जन–वा० बा० विना। ३३ जनयति स्वभावं पश्चा–वा० बा०। ३४–व प– वा० बा० मां० विना। ३५–भाव नै–आ०। ३६ स्वभेदात् वा० बा०। ३७–स्य भेदा निबन्धत्वा–वा० बा०। ३८ तदैवो–वा० बा० विना। ३९ सत्त्वा–आ०। ४०–भाविनो जनकस्व–वा० बा०। ४१ नायं प्रा–वा० बा०। ४२ न वावस्थाव्यति–वा० बा०। ४३–व्यतिरिक्ताऽ–वा० बा०।

नाभेदसिद्धिः। सहकारिप्रत्ययोपजनितस्य वा(चा)तिशयस्यालम्बनाद् (नाद् व्यतिरेके) व्यतिरेकपक्षभावी दोषो दुर्निवार इत्युक्तं प्राक्। अथ प्रागपि स स्वभाव आसीत् तदोत्तरकालभावीनि प्रत्यभिज्ञाना(भिज्ञा)कार्याणि प्रागेवोदस्तवति(वन्ति) स्युरिति क्रमवता प्रत्यभिज्ञाज्ञानेन स्वसंवेदनेनोपलक्षितेनाभिन्नत्वेनोपलक्षितस्यापि व्या(बाह्या)लम्बनस्य क्रमः प्रदर्शित एव। अथ दर्शनाविशेषेऽपि प्रत्यभिज्ञाकार्यक्रमानुभवः किमिति सत्यत्वेन व्यवस्थाप्यते न पुनरभिन्नतदालम्बनानुभवतः(भवः) उच्यते, क्रमसंवेदने बाधकाभावादितरत्र तद्विपर्ययात्। यदि ह्यसतो ज्ञानक्रमस्य स्वसंवित्या(त्त्या) विषयीकरणं भवेत् तदा तदभावे स्वसंवित्तेरपि तदव्यतिरिक्ताया(याः) तत्प्रभावान्न केनचित् कस्यापि विषयीकरणं भवेदिति तत्क्रमानुभवः सत्यः बाह्यालम्बनाभेदानुभवस्तु लूनपुनर्जातकेशादिष्विव बाधितत्वादसत्यः। यथाँ चानुसन्धानप्रत्यया बहिरेकत्वाद्यालम्बनाभावेऽप्यान्तरमेव(मेका)कारं बहिर्वद् अवभासमानाः प्रवर्त्तन्ते तथाऽन्यत्र प्रतिपादितम्।

यत् पुनः परैरुच्यते—आलम्बनैकत्वाध्यवसायि प्रत्यभिज्ञाकार्यक्रमदर्शनं सहकारिप्रत्ययैरनाधेयातिशयतामालम्बनस्य बाधनो(धते?) कार्यस्यानुत्पादयौगपद्याभावान्न पुनरभेदम् भेदावभासिनोऽनुभवस्याभावादिति, तदप्यसङ्गतमेव; यतो यद्यालम्बनस्याभेदो न बाध्यते तर्हि सहकारिसन्निधावप्यप्रतीयमानातिशयानां वज्रोपलादीनां अनाधेयातिशयताऽपि कथं बाध्येत? अथ कार्यानुत्पादयौगपद्याभावान्ना(वात् सा) बाध्यते, नन्वेवमनुपलभ्यमानोऽपि भेदस्तस्यामवस्थायां अतिशयवत् किं नाभ्युपगम्यते? यतोऽनतिशयानुभवस्याप्यनुमानत एवाऽप्रामाण्यं परोऽभ्युपगतवान् अन्यथा भेदानुभवमनादृत्य कथमतः सातिशयत्वं तस्यामवस्थायामभिमन्येत? तथा, यद्यालम्बने भेदोऽप्यङ्गीक्रियते तदा को दोषो विशेषाभावादिति क्रमवत्त(व)त्प्रत्यभिज्ञालक्षणकार्यदर्शनात् तदालम्बनस्यापि क्रमः सिद्धः। तदुक्तम्—

"नाक्रमात् क्रमिणो भावो नाप्यपेक्षा विशेषिणः।
क्रमाद् भवन्ती धीर्ज्ञे(ज्ञै)यात् क्रमं सत्या(मं तस्या)ऽपि सत्स(सेत्स्य)ति"[ ]इति।

तदेवं न बहिरवस्थितैकार्थसम्प्रयोगेणेन्द्रियेण जन्यते प्रत्यभिज्ञा तदा(द)भावान्न प्रत्यक्षे(क्षं?) नापि प्रमाणमिति स्थितम्। तथा चैं 'नहि स्मरणतो यत्' इत्यादि वचनं सिद्धसाधनमेव, यतो यदेवंभूतं तद् भव(वे)त् प्रत्यक्षम् नैत्वेवं प्रत्यभिज्ञानमिति का नः क्षतिः? यतः पूर्वानुभूतधर्मारोपणाद् विना 'श (स) एवायम्' इति ज्ञानं नोपजायते तच्चाक्षजे प्रत्ययेऽसंभवि।

यदप्युक्तम् 'देशादिभिन्नं सामान्याद्यालम्बनम्' इति, तदप्यसङ्गतम्; सामान्यादेरभिन्नस्य तद्विषयस्याभावात् भावेऽप्यनेकप्रमाणगोचरत्वेन तत्र प्रवर्त्तमानस्य प्रत्यभिज्ञानस्याऽनधिगतार्थाधिगन्तृत्वायोगात् भिन्नाभिन्नालम्बनत्वेऽपि च प्रत्यभिज्ञानस्य न प्रामाण्यम् अपूर्वप्रमेयाभावात्। नहि देशादयस्तत्र प्रत्यभिज्ञानांते(ज्ञायन्ते) प्रागदर्शनात् तेषाम् पूर्वोपलब्धे तु सामान्यादौ न प्रमेयाधिक्यम्। न च पूर्वप्रसिद्धमेवाग्निसामान्यं देशादिविशिष्टतयानुमानस्याधिगच्छति(गच्छतः) प्रमेयातिरेकानु(कात्) यथा न प्रामाण्यव्याहतिस्तथा प्रागुपलब्धमेव सामान्यादिदेशादितिविशिष्ट(देशादिविशिष्ट)तया प्रतिपद्यमानस्याप्यपूर्वप्रमेयसङ्गतेर्न प्रामाण्यक्षतिरिति वक्तव्यम्, द्वितीयप्रत्यक्षत

१-क्षभवो दो-आ०। २-सीत् तनोत्त-वा० बा०। ३ प्रतिज्ञा-वा० बा०। ४-लक्ष्यते-वा० बा०। ५-भतः वा० बा०। ६-स्तु नपुन-भां० मां० हा० वि०। ७-था वा-वा० बा०। ८-रबहिर्वदनासमानाः वा० बा०। ९-स्य बाधतो का-वा० बा०।-स्य धाना का-आ०। १० कार्यस्य नु-वा० बा०। ११ बाधते आ०। १२-प्य वर्तियमा-वा० बा०। १३-यानापि भां० मां०। १४-शयेना-वा० बा० विना। १५-स्थाया नति-वा० बा०। १६ यतोऽयनेति-भां० मां०। १७-नुभाव-वा० बा० मां० विना। १८-थाऽभे-वा० बा०। १९-द्यालम्बल भे-वा० बा०। २०-वादित क्रम-वि० विना। २१-मत्प्र-वा० बा०। २२ भवं धी ज्ञेयात् क्रमं तस्यापि सत्सतीति वा० बा० विना। २३-पि सेत्स-वि०। २४-कार्थसप्र-आ० वि० विना। २५-क्ष नापि वा० बा०। २६ च। ते हि वा० बा० विना। २७ पृ० ३१९ पं० ४। २८ भव प्र-वा० बा०। २९ नन्वेवं वा० बा० आ०। ३० संभवति वा० बा०। संभवि आ०। ३१ पृ० ३१९ पं० ११। ३२-शादिभिन्न सा-वा० बा०। ३३-च्छतिः वा० बा०। ३४-माण्याद्या-भां० मां०। ३५-था त्रामुप-वा० बा०। ३६-शादिविविशि-वा० बा०। ३७-ण्यकृति-वा० बा० आ० विना।

एव तत्सिद्धिः प्रत्यभिज्ञात(न)स्यापूर्वप्रमेयायोगात्। तं व (न च)पश्यादुपलब्धपूर्वदृष्टार्थभावोऽधिकः प्रत्यक्षानवतः(नवगतः) प्रत्यभिज्ञानेन प्रतीयत इति अपूर्वप्रमेयसद्भावः, यतः पूर्वदृष्टार्थभावो न प्रत्यक्षद्वयगोचरादतिरिक्त इति कथं तस्य ततोऽसिद्धिः? व्यतिरेक(के) वा कथं न मिथ्याप्रत्ययः? 'स एव' इत्यभेदोल्लेखवान् अनुसन्धानं व (च) 'योऽयमिदानीमुपलभ्यते प्रागप्येष मया दृष्टः' इति लोकस्य प्रवर्त्तते अतः 'स एवायम्' इति नहि पूर्वदृष्टतामस्मरतः 'स एवायम्' इत्यनुसन्धानसंभवः [?? तस्मात् स्मृतिरूपतां नातिक्रामति, प्रत्यभिज्ञानं च यथावस्तुस्वरूपग्राहिणाऽध्यक्षेण तदव्यतिरिक्ते क्षणक्षयेऽधिगतेऽपि तत् निश्चितम् तन्निश्चितत्वा नानुमितिः प्रमाणम्, तथा च स्वव्यतिरिक्ते एकत्वे दर्शनद्वयगृहीतमपि तन्निश्चा न प्रमाणमभिज्ञायते, अनुमितिः साध्याविनाभूतलिङ्गसमुद्भवा दर्शनमात्रनिबन्धना न भवतीति प्रतिपन्नेऽप्यंशे समारोप्य व्यवच्छेदं कुर्वाणा प्रमाणम्; नन्वेवं प्रत्यभिज्ञादर्शनबलात् तदुत्पत्तेः समारोपव्यवच्छेदविषया चैवं स्यात् न वस्तुग्राहिणी तथा चाऽस्याः कुतः प्रत्यक्षता स्वतन्त्रायाः प्रामाण्यं वेति। यदपि 'प्रमेयातिरेकाभावेऽपि सन्देहाऽपाकरणात् प्रमाण(णं) प्रत्यभिज्ञा' इत्यभ्यधायि, तदप्यसङ्गतम्; स्मृतेरपि 'किं मया दृष्टं उत न' इति संशयव्यवच्छेदेन 'दृष्टम्' इत्युपजायमानायाः प्रमाणताप्रसक्तः(क्तेः)। आलोचनाज्ञानान्तरं विकल्पकप्रत्यक्षाभ्युपगमात् कालान्तरं सविकल्पकप्रत्यक्षाभ्युपगमात् कालान्तरादिभावोऽपि तत एव निश्चित इति कुतो भवदभिप्रायेण सन्देहं(हः)? नहि निश्चयविषयीकृतमनिश्चितं नाम, न च कालान्तरादौ सद्भावः ततो व्यतिरिक्तः अन्यत्वप्रसङ्गात् इति प्रमेयाऽऽधिक्या(क्य)मेव प्रामाण्यनिबन्धनमभिधातुमु(धातुं यु)क्तम् अन्यथा निष्पादितक्रिये कर्मविशेषाधायि कथं साधनं स्यात्? ??]

यत् तु 'इदानीन्तनमस्तित्वं नहि पूर्वधिया गतम्' इत्युक्तम्, तदुक्तमेव इदानीं(नीन्त)नत्वस्य भेदात् अन्यथा प्राक्तनविकल्पबुद्ध्या वस्त्वव्यतिरेकि इदानीन्तना(नीन्तना)स्तित्वस्य कथमग्रहणम्? यदि च सविकल्पकं प्रत्यभिज्ञाप्रत्यक्षमर्थग्राहकमभ्युपगम्यते तदा सर्वात्मनार्थस्य निश्चितत्वात् प्रमाणान्तरप्रवृत्तेर्वै(वैं)यर्थ्यप्रसक्तेरिति विचारितमन्यत्रेतीह न प्रतन्यते। यैस्तु निर्विकल्पकं प्रत्यभिज्ञाज्ञानं प्रमाणतया अभ्युपगतम् तेषां तदुत्तरकालभाविसविकल्पकाध्यक्षप्रायो घटादिविषयः प्रमेयातिरेकाभावात् कथं प्रमाणतामश्नुवीत? न च प्रमेयातिरेकमन्तरेणापि सन्दिग्धवस्तुनिश्चयनिबन्धनत्वा(त्वात्) प्रमाणमसौ, निर्विकल्पक-सविकल्पकयोरक्षजप्रत्ययययोर्नियतपौर्वापर्ययोरपान्तराले सन्दे-

---

१-त्सिद्धि प्र-आ०। २ तच्च वा० बा० विना। ३-लप्यपू-आ०। ४-क्षाभवतः वा० बा० विना। ५-सिद्धि व्यतिरेक ता कथं वा० बा० विना। ६-न्धान व वा० बा० विना। ७-नसंधान संभ-वा० बा०। ८-तानति-वा० बा०। ९-ज्ञान च भां० मां० आ० हा०।-ज्ञाने च वा० बा०। १० तन्निश्चत्वा नानु-वा० बा०। ११-था व स्त्वव्यति-वा० बा०।-था व स्तुव्यति-भां० मां०। १२-त पि वा० बा०। १३ तन्निश्चा न वि० विना। १४-ण भि-आ० हा० वि० विना। १५-यतो अ-वा० बा०। १६-नुमिति सा-आ० हा० वि०। १७-मानत्रनिवन्ध न भ-भां०।-मानत्रिनिबन्ध न भ-मां०।-मात्रनिबन्धन भ-आ० हा० वि०। १८-प्यंशो स-भां० मां०। १९ नत्वेवं प्रत्यभिज्ञानद-हा० वि०। २०-दर्शनं ब-भां० मां०। २१-या वैवं हा० वि०।-या वैव आ०। २२-माणा प्र-हा०। २३ पृ० ३१९ पं० २५। २४ स्मृतिर-आ०। २५-त्पकं प्र-वा० बा०। २६-मात् कालान्तरादिभा-वा० बा०। २७ एवं नि-हा०। २८ सन्देह न-वा० बा०।

२९ "निष्पादितक्रिये चार्थे प्रवृत्तेः स्मरणादिवत्। न प्रमाणमिदं युक्तं करणार्थविहानितः" ॥
—तत्त्वसं० का० ४५१ पृ० १५९।

३० पृ० ३१९ पं० १७। ३१-दानीन्नन्वित्य वा० बा०।-दानींनन्वस्य आ०।
"नन्विदानींतनास्तित्वं यदि भिन्नं त्वयेष्यते। पूर्वभावात् तदा भेदस्त्वयैव प्रतिपादितः" ॥
—तत्त्वसं० का० ४५७ पृ० १६०।

३२ "अनन्यत्वेऽपि सत्त्वस्य कथं पूर्वधियाऽगतम्। तस्यागतौ हि वस्त्वेव नोपलब्धं प्रसज्यते" ॥
—तत्त्वसं० का० ४५८ पृ० १६०।

३३-कल्पाबु-वा० बा० विना। ३४-दा सर्वदात्मनार्थस्य वा० बा०।-दा सर्वात्मते तदा सर्वानार्थस्य भां० मां०। ३५-चारितम-आ० विना। ३६-श्रुवते न वा० बा० विना। ३७-ग्धनिवस्तुनिश्चय-भां० मां० हा० वि०।-ग्धनिवनिश्चय-वा० बा०। ३८-क्षप्र-वा० बा०।

हासंभवात् तदपाकरणाभावान्न निर्विकल्पकप्रत्यक्षेण समाना [?? प्रत्यभिज्ञानेनैकत्वमवगन्तुं शक्यम् यतोऽर्थसाक्षात्कारि प्रत्यक्षं लोके प्रतीतम् पूर्वापरसंवेदनाऽधिगतभावैकत्वग्राहकं च प्रत्यभिज्ञानम् तत् कत(थ)मध्यक्षस्य स्वरूपम्? तथाहि—न तावत् प्रथमसंविदस्तत्त्वग्रहणसंभवः, तत्संभवे हि भाविसमयादिग्रहणमिति तदैव स्तम्भादेरुदयमध्यास्ते(स्त)मयादिप्रतीतिप्रसक्तिः। न च भावि- ५समय-वे(दे)श-दशादश(र्श)नादि न गृह(ह्य)ते ते तत्सम्बन्धं(न्धि) तु रूपं पूर्वदर्शने प्रतिभात्येव, भाविकालाद्यग्रहे तत्सम्बन्धिरूपस्याप्यग्रहाद् यदेव हि तदेशाद्यनुव्यक्तं रूपं तत्र प्रतिभातीति न तद्दर्शनाऽवसेयम्, यदि तु भाविकालाद्यग्रहेऽपि तत्संबन्धिरूपग्रहस्तथासति सर्वे भावाः समस्त-कालदर्शनसंबन्धिन आद्यदर्शनाऽवसेयाः स्युः, एवं च सति सर्वे नित्या भवेयुः अ(अथ) नैषां प्रथम-दर्शनं(ने) सर्वकालस्थायिता प्रतिभातीति नैते तथाऽभ्युपेयन्ते तर्हि तत्र भाविदृगादिपरिष्वक्तताऽपि १०न प्रतिभातीति साऽपि न तत्र सती। न च तस्यैवोत्तरकालं प्रतीतेः भाविविज्ञानग्राह्यताद्यतः तस्यैवो-पलब्धिः किं पूर्वदेशा, उत उत्तरकालाभ(कालभा)विन्या? यदि पूर्वदेशा तदा सोत्तरकालमसती कथं प्रतिपद्यते? नह्यसद् ग्राहकम् अतिप्रसङ्गात्। यदापि सा सती आसीत् तदा न पश्चाद् दर्शनादि संभवतीति न तत्प्रतिभासिरूपग्रहः प्राक्। अथोत्तरकालभाविनी दृक् तस्योपलब्धि(ब्धिर)युक्त-मेतत्, यतो द्वितीयदृगपि स्वप्रतिभासिनमेव पदार्थात्मानमवभासयितुं न पुनस्तत्त्वम्। यतस्तत्त्वं १५दृश्यमानस्याऽर्थस्य पूर्वदेशादिपरिगतत्वम् (गतत्वम् दृष्टता) वा? ??]

न तावदाद्यः पक्षः, पूर्वदेशादीनामसन्निधानेनाप्रतिभासेन(ने) तत्सम्बद्धस्यापि रूपस्याग्रहणात् प्रत्यक्षेण न चाऽसन्निहिता देशादयः प्रतिभान्ति दर्शनस्य निर्विषयत्वप्रसङ्गात्, सकलातीतभाव-परम्परापरिच्छेदप्रसक्तेश्च कालत्रयप्रदर्शि प्रत्यक्षं भवेत्। न च तथाऽभ्युपगन्तुं युक्तम्, अतीतादौ विशदप्रतिभासाभावात्, तमन्तरेण च प्रत्यक्षेणाग्रहणात्, न च पूर्वदेशादीनां तदा सन्निधानम्, २०सन्निधौ वा तद्दर्शने प्रतिभासनात् पूर्वरूपतात्यागः वर्त्तमानताप्राप्तेः—नहि तद्दर्शनप्रतिभासनमन्तरे-णान्या वर्त्तमानता नीलादीनामपि। तथापि पूर्वरूपत्वे वर्त्तमानव्यवहारोच्छेदप्रसक्तिः। न च पूर्व-देशादीनामप्रतिभासे तत्सम्बद्धरूपप्रतिभासः प्रत्यक्षतः संभवति, अन्यथा सर्वदेश-काल-दशापरि-ष्वक्तभावावगमात् सर्वे एव व्यापिनो नित्याः सर्वाकारस्वभावाः प्रसजन्ति, न च नियतदेशादि-संसर्गितया तेषां प्रतीतेर्नायं दोषः, पूर्वदेशादिसंसर्गितया सम्प्रति दर्शनेऽप्रतिभासमानवपुषस्तथा- २५त्वाभावप्रसक्तेः। तन्न पूर्वदेशादिमत्त्वं दृश्यमानस्य तत्त्वम्।

अथ दृष्टता दृश्यमानस्य तत्त्वम् स्या(सा)पि किं सम्प्रति दर्शने प्रतिभाति ता, आहोस्वित् पूर्व-

---

१-वान्न विक-वा० बा०।-वान्नर्विक-आ०। २ सहमाना-वा० बा०। ३-र्थसाहात्कारि हा० वि०।-र्थसहकारि आ०। ४-कत्वाग्रा-भां० मां०। ५-ज्ञातम् आ० विना। ६ क त-भां० मां०। ७-दस्तत्रग्र-हा०।-दस्त्वत्रग्र-आ०।-दकस्तत्रग्र-वि०। ८-हणं स-वा० बा० भां० मां०। ९-वस्तत्संभवस्त-त्संभवे हि वा० बा०। १०-मयाविग्र-वा० बा०। ११ तवैव संभदेरुदयमस्तास्ते वा० बा०। १२ भा-विसमयदेशदशादशनादि न गृति तेन तत्स-वा० बा०। भाविसमयदेशनादि न गृ ति ते तत्स-भां० मां०। भाविसमयदेशनादि न गृहते तत्स-हा० वि०। १३-म्बन्धे तु आ०। १४-स्याप्याग्र-वा० बा० विना। १५-नु व्यक्तं भां० मां०।-नुपव्यक्तं आ० हा० वि०। अत्र 'तदेशाद्यनुष्वक्तं रूपं तत्र प्रतिभाति' इति पाठः संभाव्यते। १६ अ न्येषां वा० बा० विना। १७-लग्नायिता वा० बा०। १८-परिव्यक्त-आ०। १९-ह्यतस्तस्यै-हा० वि०। अत्र 'ग्राह्यता स्यात् यतः' इति पाठः संभाव्यः। २०-लाभिवि-वा० बा०। २१-शा स्तदा भां० मां० आ०।-शास्तदा हा० वि०। २२-स्तरं का-वा० बा० विना। २३ प्रतिपाद्य-वा० बा० विना। २४-वतीति न त तत्प्र-आ० हा०।-वतीति न न त तत्प्र-भां० मां०। २५-पग्राह्य प्रा-वा० बा०। २६ प्राक्। अधोत्त-हा०। प्रागेवोत्त-आ०। २७-भाविनी व्यक्त तस्यो-वा० बा० विना। २८-तु पु-आ०। २९-सन त-त्सम्बन्धस्या-आ० वि०।-सनन तत्सम्बन्धस्या-हा०। ३०-हण प्र-वा० बा०। ३१ न वा-मां० विना। ३२-यप्र-वा० बा०। ३३-म्परोच्छेद-वा० बा० विना। ३४-णाग्रहणन्न च आ०। ३५-दासन्निधौ वा वा० बा०। ३६-सक्तेः आ०। ३७-त्सम्बन्धरू-आ०। ३८-कासत्वभावाः प्रस-आ०।-कारश्व-भावः प्रजन्ति वा० बा०। ३९-या तम्प्रति वा० बा०। या सं सम्प्रति आ०। ४० दर्शने प्र-वा० बा० विना। ४१ पूर्वादे-आ० विना। ४२-शातिम-वा० बा०। ४३-नस्या सा त्वस्यापि हा० वि०।-नस्य मा त्वस्यापि आ०।-नस्य स त्वस्यापि भां० मां०। ४४ भातिता वा० बा० विना।

दृशि? यद्याद्यः पक्षः तदा वर्त्तमानतैव न पूर्वापरदृगव(गवग)तैकत्वम्। अथ द्वितीयः तदा पूर्वदर्श-नमपेतत्वाद् असत् कथं वर्त्तमानदर्शने प्रतिभाति? तदप्रतिभासे च तद्ग्राह्यतापि प्रच्युतत्वाद् न प्रतिभाति, तद्दृग्ग्राह्यं तु रूपमधुना सन्निहितत्वाद् वर्त्तमानदृगधिगम्यं भविष्यति पूर्वदर्शनस्या-परिच्छेदे तदधिगम्यस्यापि रूपस्याधिगमासंभवात्। यतो न वर्त्तमानं दर्शनं पूर्वदृशमगृह्णत् तदधिगम्यमधिगन्तुं क्षमम् तद्दिशा(तद्दृशो) ग्राह्यमधिगच्छतु पूर्वदृग्ग्राह्यतां तु कथमधि- ५गच्छेत्? यदि तु पूर्वदृगम(गन)वगमेऽपि तद्ग्राह्यता प्रतीयते तथासति सका(क)लातीतदृ-ग्ग्राह्यताऽपि प्रतीयताम्। न च पूर्वदृष्टता नाभाति पूर्वदृष्टरूपं ना(चा)भातीति पूर्वदृष्टताऽप्रतीतौ पूर्वदृष्टरूपाऽप्रतिपत्तेर्नहि नीलताप्र(ताऽप्र)तिपत्तौ नीलोऽर्थोऽधिगतो भवति। स्ववेद्यतया च प्रति-भासमानः स्ववेद्य एव नान्यवेद्यः तत्राप्रतिभासमानरूपाभ्युपगमेऽतिप्रसङ्गात् सर्वस्य सर्वात्मकता-पत्तेः। न च पूर्वदृशाऽपो(दृशोऽपा)ये तत्कर्मता अर्थस्य प्रच्युतेति न भाति तद्गोचरः सर्वात्मना १०भाव्ये(त्ये)व तदपाये तदवगतत्वेनाऽप्रतिभासनाद्य(नाद)न्यथातिप्रसङ्ग इत्युक्तेः। यदि च प्राग्दर्शन-गोचरोऽर्थो वर्त्तमानदृशि प्रतिभाति पूर्वदृग्गोचरसकलपदार्थप्रतिभासप्रसङ्गः। न च भिन्नं पूर्व-दृगवगतं नावभाति अभिन्नं तु तत्प्रतिभासविषयोऽवभासत एव नीलादेर्भिन्नस्यापि वर्त्तमानदर्शन-प्रतिभासनात् पूर्वदृष्टत्वादेव तस्य न तत्र प्रतिभासः, तच्चाभिन्नेऽपि समानम् इति कुतस्तस्य प्रतिभासः? न चाभिन्नस्य पूर्वदृग्गोचरस्य सन्निहितत्वा(त्वात्) प्रतिभासः नेतरस्य विपर्ययात् १५तत्सन्निधेरवासिद्धेः। न च सम्प्रति दर्शनात् तत्सन्निधिसिद्धिः, यतः किं तत् तस्य दर्शनम्, उतान्यस्य? यद्यन्यस्य कथं तत्सन्निधिसिद्धिः सर्वस्य तत्प्रवृत्तेः(त्तेः)। न चाप्रतिभासान्न सर्वस्या(स्य) सन्निधिः इतरेतराश्रयदोषात्-तदप्रतिभासात् सर्वासन्निधिः ततश्च सर्वाप्रतिभास इति व्यक्तमि-तरेतराश्रयत्वम्। अथ तस्यैव दर्शनात् सत्स(तत्स)न्निधिः, असदेतत्; यतः पूर्वदर्शनावगतस्य वर्त्तमानदर्शनमिति न कुतश्चिदवगम्यते? न तावद् दर्शनात्, सन्निहित एव तस्य वृत्तेः। न च २०पूर्वदृष्टसन्निहितयोरेकत्वाद् वर्त्तमानदर्शनवृत्तिः, इतरेतराश्रयत्वप्रसक्तेः—तयोरेकत्वात् तद्दर्शनवृत्तिः तद्वृत्तेश्च तयोरेकत्वमितीतरेतराश्रयत्वम्।

अपि च, तद्दर्शनवृत्तेर्नायं दोषः तदप्रच्युतौ प्रमाणाभावात्। न च प्रत्युत्पन्नदर्शनमेव तत्र प्रमाणम्, इतरेतराश्रयदोषप्रसक्तेः। तथाहि—पूर्वदृष्टस्याप्रच्युतौ प्रवर्त्तमानं दर्शनं प्रमाणं सिध्यति तत्प्रामाण्यात्व(च्च) पूर्वदृष्टस्याप्रच्युतिरिति व्यक्तमितरेतराश्रयत्वम्। न च परिस्फुटप्रतिभासादेव २५वर्त्तमाना दृक् प्रमाणम्, काम-शोकाद्युपप्लुतविशदृशः प्रमाणताप्रसक्तेः। न च विसंवादात् सा अप्रमाणम् इयं तु विपर्ययात् प्रमाणम्, यतः संवादृगपि पूर्वदृष्टेऽर्थे प्रवर्त्तमाना न प्रमाणतया सिद्धा अन्यत्राऽप्रवृत्ता न(?)संवादकृता, ततः पूर्वदृष्टार्थग्राहित्वे दृग् भ्रान्ता प्रसक्ता। अपि च, उत्तर-

---

१-मान न पू-वा० बा०। २-दृग्वतैकत्वम् भां०।-दृग्वंतैकत्वम् आ०।-दृगतैकत्वम् वा० बा०। ३-ह्यतोऽपि वा० बा० विना। ४ भविष्यन्ति वा० बा० विना। ५ पूर्वमानगृह्णत् तदधिगम्यगम्यमधिगन्तु क्ष-वा० बा०। ६-गच्छत् पू-वा० बा० विना। ७ यदि पूर्व-वा० बा०। ८-दृगव-वा० बा० विना। ९ न च पूर्वदृष्टता नाभातीति पूर्वदृष्टताऽप्रती-हा० वि०। न च पूर्वदृष्टता नाभाति पूर्वदृष्टं ता ना भाति पूर्वदृष्टं रूपं नाभातीति पूर्वदृष्टताऽप्रती-भां० मां०। न च पूर्वदृष्टता नाभाति पूर्वदृष्टं ता नाभातीति पूर्वदृष्टताऽप्रती-वा० बा०। १० नीलार्थो-भां० मां०। ११-या प्रति-भां० मां० आ० हा० वि०। १२-न्यवेद्य एव नावेद्यतया प्रतिभासमानः स्ववेद्य एव नान्यवेद्यस्तत्रा-भां० मां०। १३-दृ-शाऽपाये वा० बा० विना। १४ भा नत्गोचरः सर्वात्मा भाव्ये-वा० बा०। १५ तदापा-वा० बा०। १६-र्शनागो-वा० बा०। १७-चरार्थो आ०। १८-वतं भां० मां०।-वसतं हा०।-वसंतं वि०।-वसंत ना-आ०। १९-षयोऽभा-वा० बा०। २०-दर्शनाग्र-वा० बा०। २१ तत्वाभि-भां० मां० आ०। तथा-भि-हा० वि०। २२ न वाभि-वा० बा०। २३-वासिद्धेर्न त सम्प्र-वा० बा०।-वासिद्धेर्नि व सम्प्र-आ०।-वासिद्धेर्मि व सम्प्र-हा० वि०। २४ न वा प्र-वा० बा० मां० विना। २५-दपि प्रतिभासत् सर्वा-वा० बा०। २६ ततश्च सर्वाप्रतिभासात् सर्वाप्रतिभास इति भां० मां०। २७-गम्यंते वा० बा०। २८-यप्र-वा० बा०। २९-माणभा-आ०। ३०-च्युतै प्र-आ०।-च्युते प्र-हा० वि०। ३१ -मान द-हा०। ३२-शदृदशः आ० हा० वि०।-शद् दृशः वा० बा०। ३३-मा न प्र-वा० बा० विना। ३४-न्यथा-हा० वि०।

ज्ञान(ने) पूर्वदर्शनग्राह्यं किं तदृष्टेन रूपेण प्रतिभाति, उत रूपान्तरेण? यदि पूर्वदृष्टेन तथासति पूर्वदृष्टरूपावभास एव न वर्त्तमानरूपपरिच्छेदः। अथ रूपान्तरेण तत्रापि वर्त्तमानदर्शनग्राह्यरूपतैव न पूर्वज्ञानग्राह्यता इति वर्त्तमानमेव तत्। न च ज्ञानद्वयावभासि रूपं तत्र प्रतिभातीति वक्तुं शक्यम्, ज्ञानद्वयाऽभावे तदवभासिनो रूपस्याप्यभावात् यदेव हि ज्ञानमस्ति भवतु तदवभास्येव तद्रूपम् यत् तु नष्टज्ञानं न तदवभासि युक्तम् अन्यथा सकलातीतज्ञानावभासिरूपप्रतिभासप्रसक्तिरित्युक्तम्। तस्माद् इदानीन्तनज्ञानावभासमेवैतद् युक्तम्। न च निर्विकल्पके वर्त्तमानग्रहणे सति प्राक्तनज्ञानावभासिभावपरिच्छेदः समस्ति विकल्पद्वयानतिवृत्तेः। यतः 'सः' इति पूर्वपरिच्छेदः 'अयम्' इति प्रतिभासानुप्रवेशेन प्रतिभाति, उतानुप्रवेशेन? यद्याद्यः पक्षः, तदा 'सः' ति(इति) वा परोक्षाकारः प्रतिभासः 'अयम्' इति वा वर्त्तमानमात्रावभासः। अथाननुप्रवेशेन प्रतिभासस्तदापि प्रतिभासद्वयं परस्परविविक्तमायातम्, तथा च तद्ग्राह्यस्यापि भेदः प्रतिभासभेदात्। न च तदवभासद्वयमेकाधिकरणम् परोक्षाऽपरोक्षरूपनिर्भासद्वयस्यैकाधिकरणत्वासिद्धेः अन्यथा भिन्नाधिकरणसर्वसंविदामेकाधिकरणत्वापत्तेः। तन्नैककालम् भिन्नकालं वा प्रतिभासद्वयमेकार्थम् प्रतिभासभेदात्। न चात्र प्रतिभास एव भिन्नो न प्रतिभास्यः, तद्भेदे तदभेदासिद्धेः। तथाहि—न स्वतः प्रतिभास्याभेदः सिद्धः, स्वसंविन्मात्रप्रसक्तेः। नापि प्रतिभासात् तस्य भिन्नत्वादिति नैकत्वसिद्धिः। उत्तरकालभाविनोऽपि दर्शनात् सन्निहितमात्रस्यैव तत्र प्रतिभासात् पूर्वकालादीनां तत्र प्रतिभासने वर्त्तमानतापत्तेः, तदनवभासे च तत्परिकरितरूपस्याप्यपरिच्छेदः। न च तद्गतत्वेनाऽप्रतिभासेऽप्यत्रुट्यद्रूपतया प्रतिभासात् प्रतिभास्यस्यैकत्वम् यतो विद्युदादिष्वपि पूर्वरूपाप्रतिभासनं यदि त्रुट्यद्रूपत्वमङ्गीक्रियते तर्हि पूर्वदृष्टाप्रतिभासनं वर्त्तमानं(?)वरदशः स्तम्भादावस्तीति कथं न त्रुट्यद्रूपप्रतिभासः स्तम्भादेर्भेदः? अथ ग्राह्यस्याविरतमुपलब्धिरत्रुट्यद्रूपता विद्युदादौ त्ववभासस्य विरतिरित्यत्रुट्यद्रूपता न युक्ता, नन्वविरतोपलब्धिरपि किं तस्य, आहोस्विदन्यस्य इति वक्तव्यम्। यद्यन्यस्य कथमेकत्वम्? अथ तस्यैव, सा न सिद्धा। नहि पूर्वदृष्टस्य पुनरुपलब्धिरिति सिद्धम्।

यदपि 'पूर्वदृष्टं पश्यामि' इति व्यवसायबलात् निर्विकल्पकं दर्शनं 'पूर्वापरैकत्वग्राहि' इत्युक्तम् तदप्यसारम्, यत्ते(यतो) न व्यवसायबलाद् ग्राहकं दर्शनं व्यवस्थाप्यते किन्तु प्रतिभासवशात् अन्यथा अश्वविकल्पसमये गोदर्शनव्यवस्था न स्यात् प्रतिभासश्च निराकृतपूर्वापरभावो वर्त्तमानार्थमारूढः परिस्फुटं सर्वं एवाभाति साक्षात्का(त्क)रणं हि परिस्फुटता तैत्त्व(च्च) सन्निहितप्रतिभासनम् असन्निहितस्य साक्षात्कर्तुमशक्यत्वात् पूर्वदृष्टं सन्निहितं रूपमिति न तद्ग्रहः प्रत्यक्षस्वभावः। अथापि स्यात् नोत्तरप्रत्यक्षे पूर्वदृष्टं रूपमाभातीति किन्तु धर्मिरूपं नीलादिलक्षणम्, असदेतत्; पूर्वापरदर्शनप्रतिभासि स्वरूपव्यतिरिक्तस्य नीलादित्वस्य धर्मिणस्तद्भेदेऽप्यभिन्नस्याऽनुपलब्धे(ब्धेः) नहि पूर्वापरदृगवसेयं मुक्त्वा रूपमपरो नीलादिरूपो धर्मी प्रतिभाति, अप्रतिभासमानस्य नित्यत्वसाधने न कांचित् क्षतिः प्रतिभासस्यैव सर्वस्यानित्यत्वसाधनात्। तन्न अध्यवसायवशाद्ध्यक्षस्य ग्रहणव्यवस्था इत्येके।

अपरे तु मन्यन्ते यद्यपि नीलाद्य(ध्य)वसाया(यात्) नीलदर्शनस्य तद्ग्रहणं व्यवस्थाप्यते तथापि

१–ग्राह्यं किं न दृष्टे–वा० बा०। २–दृष्टे त–भां० मां०। ३–नदृशन–आ०।–नदृशंन–वि०।–नवशंन–वा० बा०। ४–यावभावे तदभा–वा० बा० विना। ५–ज्ञानं तद्–वा० बा० विना। ६ तवभा–वा० बा०। ७–ससक्ति–वा० बा० विना। ८–भासमेवे द्युक्त–आ० हा० वि०।–भासस्येवैतद्युक्त–वा० बा०। ९ सति प्रसक्तेनज्ञा–वा० बा०। १०–रूपानि–वा० बा०। ११–कार्थप्र–वा० बा० वि० विना। १२ तत्र भासात् आ० हा० वि०। त भासात् भां० मां०। १३–भातात् प्र–वा० बा०। १४ प्रतिभासस्यै–वा० बा० विना। १५–मानं रदशः भां० मां०।–मा वरदशः हा०।–मानं शि स्तम्भा–वा० बा०।–मानवरदशः वि०। १६–ह्यस्य वि–वा० बा०। १७ पृ० ३२० पं० २। १८ तदपप्रति यते न वा० बा०। १९–नारूढः वा० बा० विना। २० तत्त्वसन्निहितप्रतिभासनमसन्निहितप्रतिभासनमसन्निहितसाक्षात्क–वा० बा०। २१–नस्यानि–आ०। २२ काचित् कृतिः वा० बा०। २३–सस्यैवं स–भां० आ० हा० वि०।–सस्येवं स–वा० बा०। २४ अव्यव–वा० बा०। २५–हणंव्य–वा० बा०। २६–लान्यव–वा० बा०। २७–साथी नी–वि०। २८–हण व्य–वा० बा०।

लूनपुनर्जातकेशादिषु 'पूर्वदृष्टं पश्यामि' इत्यध्यवसायस्यान्यथापि प्रवृत्त्युपलब्धेः कथं तद्रूपार्थग्राह्यनुभवव्यवस्थापकत्वम्? न च विच्छेदाभिज्ञैस्तत्र भेदस्य ग्रहणाद्भेदग्राहिता मा भूद् अनुभवस्य तन्निबन्धना न पुनरिहैवं भेदावसायस्यैव कस्यचिदभावादि(वादिति) वक्तव्यम्, भेदावसाय एवात्र कस्यचिन्नास्तीत्यदर्शनमात्रादसिद्धेः। अपि च, अवगतविच्छेदानामपि प्रमातृणां समानवर्णसंस्थान-प्रमाणेषु केशादिषूपलम्भसमये न प्रत्यक्षनिबन्धनस्तदन्येषामिवाऽन्यत्वनिश्चयः अपि त्वनुभूतविच्छेदेषु पूर्वरूपाऽसम्भवादेकाकारप्रत्ययगोचरेष्वनित्येष्वनुमाननिबन्धन एव, तत्वा(च्चा)ऽन्यत्रापि समानम् विकल्पवशाच्चायमनुभवस्य विषयव्यवस्थां कुर्वन्नन्यथापि विकल्पस्य सम्भवदर्शनात् समुपजातशङ्कः कथं सर्वत्र कुर्वीत? अथ बाधकप्रमाणबलेनाऽन्यथात्वस्य प्रतीतेः, अत्र च तदभावान्न शङ्कासम्भवः। तदुक्तम्—

"बाधा ज्ञाने त्वनुत्पन्ने का शङ्का निष्प्रमाणका" [ ]

इत्युच्यते, असारमेतत्; यतो यत्र बाधकप्रमाणवृत्तिस्तत्र विपर्ययानिश्चय एव न पुनर्बाधकनिबन्धना शङ्का युक्ता, सा हि तुल्यजातीये प्रतियोगिदर्शनाद्दृष्टप्रतियोगिष्वपि विशेषादर्शनामुपजायत इत्युक्तमसकृत्। तन्नैकत्वाव्य(ध्य)वसायिविकल्पबलान्निर्विकल्पकप्रत्यभिज्ञानस्य पूर्वदृष्टार्थाधिगन्तृत्वं व्यवस्थापयितुं शक्यम्।

यदपि कैश्चिदभ्युपगम्यते–निर्विकल्पकं ज्ञानमेकत्वग्राहि तदनन्तरभावि च सविकल्पकं प्रमाणमिति, तदपि प्रतिविहितमेव; निर्विकल्पकेनैकत्र परिच्छेदात् स्वरूपप्रतिभासनं निर्विकल्पकमुच्यते सन्निहितमेव च स्वरूपमाभाति असन्निहितप्रतिभासस्य वस्त्वसंनिधेर्भ्रान्तत्वात् पूर्वदर्शनादिसम्बन्धिता च(च) तदा सन्निहिता नास्ति। तन्न तत्र दर्शना(न)वृत्तिः स्मृतेरेव तत्र प्रवृत्तेः, पूर्वदर्शनवृत्त्याद्यगतेः स्मरणमन्तरेण पूर्वदृगादिकं स्मरत एव 'पूर्वदृष्टम्' इत्यध्यवसायोदयाद् विस्मरणे तदभावा(द्भावात्) स्मृतिविकलेन्द्रियजप्रतिभासस्य निर्विकल्पकत्वात्। [?? न स्मृतिकृतदर्शनमविकल्पकज्ञानावसेयमेकत्वम्। अत एव कल्पनाज्ञानमप्येकत्वाध्यवसाये शुक्तिकायां रजतबुद्धित्वम ??] न च तत्र बाधकप्रवृत्तेर्भ्रान्तता सन्निहितविषये तु प्रत्यभिज्ञाने न कदाचिद् बाधावृत्तिरिति सत्यार्थता, यतस्तथापि यदि तत्त्वमधिकथं(धिगतं) भवेत् प्रथमदर्शन एवं प्रतिभासेत अप्रतिभासनादसत्यम्। अथ स्मृतिसहिताया दृशस्तत्त्वे व्यापाराच्च प्राक्तनदर्शने प्रतिभासनम्, असारमेतत्; यतः स्मरणसहायमपि दर्शनं नैकत्वग्रहणक्षमम् तस्य वर्त्तमानमात्र एव व्यापारात् वर्त्तमानमेवाक्षप्रभवे ज्ञाने प्रतिभातीति तदेव तद्विषयो न तत्त्वम्। यच्च यद्गोचरस्तद् अन्यसद्भावेऽपि न तत्र प्रतिभाति, यथा गन्धस्मृतावपि न दृशि परिमलः, दृगविषयश्च पौर्वापर्यम् तन्न स्मृतावपि तत् तत्र प्रतिभाति। तथा, स्मृतिरपि नैकत्वमवगच्छति, वर्त्तमानदृग्विषये तस्या अप्रवृत्तेः। नहि वर्त्तमानदर्शनग्राह्यं रूपं स्मृति(तिः) परामृशति परोक्षाकारतया तस्याः प्रवृत्तेः, असंस्पर्शे च न स्वविषयस्य

१–दृष्ट प–वि० विना। २–स्तत्र भेदग्राहिता भां० मां०।–स्तत्राभेदस्य ग्रहणादभेदस्य ग्रहणादभेदग्राहिता वा० बा०। ३–दर्शनामा–वा० बा०। ४ त्वभू–भां० मां०। ५–ष्वतितेष्व–वा० बा०। ६–ना स–वा० बा०। ७–थ बाधनबाधकबलेनान्यथा–वा० बा०। ८–म्भवतस्तदु–वा० बा०। ९ बाध्याज्ञा–आ० हा० वि०। १०–स्तद् विप–वा० बा०। ११–व पु–वा० बा०। १२–योगिवपि वा० बा०। १३ पृ० ३१९ पं० २८। १४–कल्प ज्ञा–भां० मां०। १५–क प–वा० बा०। १६–रूपाप्र–आ०। १७–भासं निर्वि–आ०।–भासन निर्वि–भां०। १८–सन्निधे भ्रा–वा० बा०। १९–ता व त् त–वा० बा० विना। २०–वृत्ते पू–वा० बा०। २१–द्यवग–वा० बा० विना। २२–मन्तरेऽपूर्वदृागादि–वा० बा०। २३–दया वि–आ०। २४–रणा त–वा० बा०। २५–कलेन्द्रियाजनप्र–वा० बा०। २६ स्मृतिकृतं दर्शनं विकल्पकमिति नाधिकल्पकल्पकज्ञानाव–वा० बा०। २७–त्वाव्यवसायं मुक्तिकार्या र–वा० बा०। २८–बुद्धितंवं न आ०।–बुद्धितवं न हा० वि०। २९–धकं प्रवृत्तेः भ्रांतरा स–वा० बा०। ३० बाध्यावृ–आ०। ३१–व तंत् प्रतिभासेताप्रतिभासेताऽप्रतिभासनादसत्य–वा० बा०।–व प्रतिभासेताप्रतिभासेताऽप्रतिभासनादसत्य–भां०। ३२–नप्रद–वा० बा०। ३३–दर्शनं चैकत्वग्र–वा० बा०।–दर्शनं चैकग्र–भां० मां०।–दर्शनं चैकत्वं ग्र–हा० वि०। ३४ नन्त्रेवं य–वा० बा०। ३५–यद्गो–वा० बा० विना। ३६–ग्राह्य रूपं स्मृ–आ०।–ग्राह्यंरूपां स्मृ–हा० वि०।–ग्राह्यां रूपः स्मृ–वा० बा०। ३७–वृत्ते दर्सं–वा० बा०।

तेन सहैक्यमवगमयति । न च दर्शन-स्मरणयोरेकाधिकरणता तत्त्वम् तथाप्रतीत्यभावात् तयोः स्फुटास्फुटावाकारौ बिभ्राणे दर्शन-स्मरणे नैकाधिकरणतामश्नुवीयाताम् सर्वसंविदामेकाधिकरणतापत्तेः । न च तत्र प्रतिभासभेदाद् भिन्नार्थता, स्फुटेतरप्रतिभासभेदाद् दर्शन-स्मरणयोरपि भिन्नार्थताप्रसक्तेः—दर्शनं हि साक्षात्करणाकारम् स्मृतिश्च परोक्षाद्य(ध्य)वसायस्वभावेषि(ति) कथं तयोः प्रतिभासभेदादि(दाद्) भिन्नार्थत्वम् । तन्न ताभ्यामपि एकत्वप्रतिपत्तिः ।

नाप्यात्मा एकत्वं प्रतिपद्यते दर्शन-स्मरणाभावे स्वापादावर्थप्रतिपत्तेस्ततोऽभावात् । दर्शन—स्मरणे च पूर्वापरार्थैः(र्थ)परिहारेण प्रवर्तमाने न तयोरेकत्वमधिगच्छत इति न तद्व्यारेणात्मापि तत्त्वमवैति । न चात्मनोऽपि पूर्वापरावस्थयोरेकत्वावगमः पूर्वबोधेन भाविविबोधसम्बन्धितानु(ताननु)भवात् उत्तरानुभवेन पूर्ववित्सम्बन्धिताऽनवगमात्, अनुभवे वाऽनाद्यनन्तसकलजन्मपरम्परापरिच्छेदप्रसक्तिः । न च शुद्ध एवात्मा स्वसंवेदने प्रतिभाति दृशा(शां) परिगतः तासामप्रतिभासे तद्गतत्वेन तस्याप्यप्रतिभासनादित्युक्तत्वात् । न च दर्शन-स्मरणव्यतिरेकेणान्योऽनुसन्धाना(ता) भाति, ते चान्योऽन्यपरिहारेण स्थिते इति कथमेक आत्मा? न च द्रष्टु(ष्टुः) स्वरूपं स्मर्तृरूपतया 'द(द्र)ष्टाऽहं स्मरामि' इति प्रतीतौ प्रतीतिः(प्रतीयत इति) कथं नैक आत्मा? यतो द्रष्टृ(ष्टृ)स्वरूपं किं स्मर्तृस्वरूपानुप्रवेशेन प्रतिभाति, उतानुप्रवेशेन? य(यद्य)नुप्रवेशेन तदा द्रष्टृस्वरूपता (द्रष्टृस्वरूपता स्मर्तृस्वरूपता) वा, एकस्य रूपस्येतरत्रानुप्रवेशात् । अथानुप्रवेशेन तदा द्रष्टृ-स्मर्तृरूपे अन्योन्यं भिन्ने स च नैक आत्मा । न च द्रष्टृ-स्मर्तृरूपो विकार एव भिद्यते नात्मेति क्रमभाविविकारप्रतिपत्तौ तद्गतत्वेन तस्याप्य(स्यापि) प्रतिपत्तेः विकारव्यतिरेकेण तस्याऽनुपलब्धेरित्युक्तत्वाच्चेति नात्मनोऽप्येकत्वप्रतिपत्तिः । न च स्मरणोत्तरकालभाविनी 'स एवायम्' इत्यनुसन्धानप्रतिपत्तिरक्षान्वयव्यतिरेकानुविधायितया प्रत्यक्षं प्रमाणम्, तस्याः प्रत्यक्षत्वानुपपत्तेः । यदि प्रत्यक्षप्रभवेयं भवेत् पौर्वापर्ये वृत्तिमती न स्यात् अक्षस्य वर्त्तमान एव व्यापारात् । न च स्मरणोपढौकिते पूर्वापरभावेऽक्षस्य वृत्तेः तत्प्रभवायास्तस्यास्तत्र वृत्तिर्युक्ता, अक्षस्य स्मरणोपहितेऽपि पौर्वापर्येऽविषयत्वेनाप्रवृत्तेस्तदुद्भवायास्तस्या अपि प्रवृत्त्यनुपपत्तेः(त्तेः) । न(न)ह्युत्पलरूपप्रवृत्तिमदक्षं स्मरणोपनीतेऽपि गन्धादौ प्रतिपत्तिजननं (?) स्मरणम् न च चक्षुषो गन्धाविषयत्वात् न च तत्र लोचनसंवित्प्रसवः स्मरणोपनीतपौर्वापर्येऽप्यक्ष(क्षा)विषयत्वस्य तुल्यत्वात् । अथ कथमक्षव्यापारानन्तरं प्रत्यभिज्ञा उदयमासादयति यद्यक्षप्रभवान्न(वा न) भवेत्? न; तत्र सति पुरोव्यवस्थितवस्तुदर्शने पूर्वदृष्टे स्मृतेरुदयात् यथा दूरव्यवस्थितचन्दनाद्यर्थदर्शनात् गन्धस्मृतेः 'सुरभि चन्दनम्' इति प्रतिपत्तिः । न च लोचनाविषयत्वाद् गन्धस्य तद्विशिष्टं(ष्ट)चन्दनप्रतिपत्तिस्तद्गतरूपदर्शनालिङ्गप्रभवेति वक्तव्यम्, प्रकृतेऽपि समानत्वात् । तथाहि-वर्तमानदर्शनात् पूर्वकालाद्यनुस्मरणात् तद्विशिष्टपुरोव्यवस्थितार्थप्रतिपत्तिरानुमानिकी पूर्वकालादिसम्बन्धितायास्तदा प्रत्यस्तमयेतोऽक्षागोचरत्वात् तामध्यवस(स्य)न्ती प्रत्यभिज्ञा कथं प्रत्यक्षतामनुभवेत्? अन्यथा परोक्षप्रतिपत्तेः सर्वस्याः प्रत्यक्षताप्रसक्तिः । अथ परोक्ष(क्षा)कारैव प्रतीतिरप्रत्यक्षा प्रत्यभिज्ञा तु पूर्वदृगादियोगित्वे परोक्षाकारा वर्त्तमानत्वे प्रत्यक्षाकारेति स्मरणाऽध्यक्षरूपा एका प्रतीतिः, नैतदेवम्;

१-भ्राणा द-वा० बा० विना । २-रणे मस्नुवीयाताम् वा० बा० । ३-मप्युपधीयताम् वा० बा० विना० । ४-थं न तयोः प्रतिभासाभेदादभिन्नार्थत्वम् वा० बा० विना । ५-रणा च वा० बा० ।-रणो च आ० हा० वि० । ६-राथे प-वा० बा० ।-रार्थौ प-भां० मां० । ७ पूर्वाबो-भां० मां० । पूर्वैरोधे-वा० बा० । ८-नुभावा-वा० बा० हा० वि० । ९ ते वान्यो-आ० विना । १०-या द्रष्टाऽ-वा० बा० । ११-ति प्रतीति क-वा० बा० । १२ यतो दृष्ट-वा० बा० विना । १३-न ह्यनु-वा० बा० विना । १४ द्रष्टृरू- वा० बा० । १५-रूपतां वा भां० हा० वि० ।-रूपंता वा मां० । १६ एवं भि-आ० हा० वि० । एवि भि-भां० मां० । १७-वृत्तेस्तद्भवा-आ० ।-वृत्तेस्तुस्तदुद्भवा-भां० मां० । १८-पत्तेः त तर्ह्यत्पल-आ० हा० वि० ।-पत्ते तर्ह्यत्पल-भां० मां० । १९-वृत्तिदक्षं स्म-वा० बा० ।-वृत्तिदक्ष स्म-भां० हा० वि० । २०-पनी पि वा० बा० विना । २१-ननस्म-वा० बा० । अत्र 'प्रतिपत्तिजननसमर्थम्' इति संभवेत् । २२-त्वात् त व तत्र आ० । २३ तत्रालो-भां० मां० । २४ भवेन्न सति आ० । भवेत् तत्र सति हा० वि० । २५-ना दन्ध-आ० । २६-न्दनाद्यमिति वा० बा० । २७-पत्तित्तस्वद्गत-भां० मां० । २८-लादिसंवन्निता-वा० बा० । २९-यतोऽक्षी-भां० मां० । ३०-कारो व-आ० हा० वि० ।

आकारद्वययोगात् एकवस्तुनं आकारलक्षणत्वात् तद्भेदे ज्ञानस्यापि भेदात् अन्यथा परोक्षाऽपरोक्षाकारभेदेऽपि स्मरण-दर्शनयोरभेदप्रसक्तिर्भवेदिति सर्वमपि ज्ञानं स्मृतिः प्रत्यक्षं वा भवेत्, प्रथमपक्षेऽस्पष्टप्रतिभासप्रसक्तिः । द्वितीये तु सर्वप्रतिभासो विशद्दः(दः) स्यात् । न च स्मरण-दर्शनयोरस्पष्ट-स्पष्टप्रतिभासभेदाद् भेदः, प्रत्यभिज्ञानेऽपि 'सः' इति पूर्वोल्लेखस्याष्ट(स्यास्पष्ट)प्रतिभासतया 'अयम्' इति वर्त्तमानोल्लेखः(खस्य) स्पष्टप्रतिभासरूपतया प्रतिभासभेदात् भेदस्य न्यायप्राप्तत्वात् । न च 'स एवायम्' इत्येकत्वाध्यवसायादेकत्वम् यतः किं पूर्वापराध्यवसायस्यैकत्वम्, यद् वा अध्यवसीयमानस्य? न तावदाद्यः पक्षः अन्योन्यरूपविवेकेन पूर्वापरयोरवभासनात् । तथाहि—'सः' इति पूर्वरूपाध्यवसायो वर्त्तमानरूपाध्यवसायविविक्तः प्रतिभाति, 'अयम्' इति च वर्त्तमानाकारावभासः पूर्वावभासविभिन्नतनुराभाति, परस्परूपानुप्रवेशे वा 'सः' इति वा प्रतिभासः स्यात् 'अयम्' इति वा, तथा च कुतः 'स एव' इत्येका प्रत्यभिज्ञा? परस्परव्यतिरेके च परोक्षाऽपरोक्षप्रतिभासयोर्भेद एवेति कथमेका प्रत्यभिज्ञा? नाप्यवसीयमानस्याऽभेदः, अवसायभेदे तदवसीयमानस्यापि भेदात् । न च 'स एवायम्' इति व्यवहारैकत्वादेकत्वम्, यतो व्यवहारो ज्ञानम्, अभिधानम्, प्रवृत्तिर्वा? तत्र यदि ज्ञानम् तत्राप्यविकल्पां(ल्पम्), स्मृतिः, कल्पना वा? यदि निर्विकल्पकं तत् पूर्वापरकालभावि भिन्नमेव एककालमपि पूर्वापरार्थग्राहि प्रतिभासभेदाद् भिन्नम् । अथ स्मृतिः सापि दर्शनाद् भिन्नैव कथं तदर्थस्यैकत्वं साधयति? न च पूर्वदर्शनविषयवृत्तिः स्मृतिः, तद्विषयत्वस्य तत्रासिद्धेः । तदा(था)हि—न तावद् दर्शनो(नात्) स्मृतेस्तद्विषयत्वं सिध्यति दर्शनकाले स्मृतेरभावात्, तदभावे च न तदर्थवेदनं ततः सिध्यति । नापि स्मृतेरेकार्थता वृत्तिः तत्काले दर्शनस्याभावात्, तद्भावे वा स्मृतेरयोगात् । नहि दर्शनावस्थायां स्मृतिरुदयवती उपयोगवती वा, दर्शनादेवार्थप्रतिपत्तेः । ततो दर्शनकालपरिहारेण प्रवर्त्तमाना स्मृतिर्न दर्शनार्थविषयतामात्मनोऽधिगन्तुं समर्था । अस्पष्टप्रतिभासा च स्मृतिः कथं स्पष्टप्रतिभासा(स)दृग्विषयमर्थमधिगच्छति? इति न तदर्थविषया स्मृतिर्वृत्तिः सिद्धा प्रतिभासभेदस्य भेदकत्वात् अन्यथा भेदोच्छेदप्रसक्तिरित्युक्तत्वात् । न च कल्पनाप्येका व्यवहृतिः यतः पूर्वापरावभासा(भासा 'स एव) अयम्' इत्युल्लेखव(वती) सापि भिन्नैवेत्युक्तम् । अभिधानमपि 'सः' इति 'अयम्' अपि (इति) च भिन्नम् भिन्नार्थं च प्रतिभाति एकार्थत्व(त्वे) पर्यायताप्रसक्तेः । तन्न अभिधाप्येका व्यवहृतिः । प्रवृत्तिस्तु क्रियारूपत्वात् पूर्वापरभाविनी भिन्नैवेति कुतो व्यवहारैकत्वादप्येकत्वम् ।

अथैकत्वाध्यवसायः 'स एवायम्' इति, संवादश्च तत्र विद्यते एवेति कथं न तत्र प्रत्यभिज्ञा प्रमाणम्? उच्यते, प्रतिभास एवाध्यवसाय-संवादौ प्रतिसत्त्वन्ये(?)वा सकल एव निरस्तपूर्वापरभावः स्वाधिकमर्थं वेत्ति भिन्नकालावधेस्तस्य संवेदनासम्भवात् । तथाहि-संवेद्यमानरूपसद्भावे वस्तु संवेद्यते वेदनकाल एव च संवेद्यमानं रूपमस्ति, कालान्तरे तस्य सद्भावाभ्युपगमे स्वत एव संवेदनत्वप्राप्तेः(?)तत्त्वसंवेदनसमयाध्यासितमेव सर्वमाभाति नान्यसमयादियोगि अन्यकालादि-

---

१-गादेवस्तु-वा० बा० । २-न अका-हा० वि० विना । ३ परोक्षप-आ० विना । ४ ज्ञान स्मृ-वा० बा० । ५ भवे अथस पक्षेऽस्प-वा० बा० । ६-रस्पष्टप्र-वा० बा० विना । ७-अत्र 'ष्ट'स्थाने लिपिकारेण 'ष्' इति लिपिः कृता । ८-दा प्रतिज्ञा-वा० बा० । ९ पूर्वोल्लेखोऽस्पष्टप्र-वा० बा० विना । १०-रयो व-वा० बा० विना । ११-था वत् कुतः भां० मां० । १२ इत्येको प्र-भां० मां० । १३ परोक्षस्यतिभासयो भेदे एवेति वा० बा० । १४ तवाप्य-वा० बा० । १५-कल्पा स्मृ-वा० बा० विना । १६-मपि पूर्वग्राहि प्रभास-वा० बा० ।-मपि पूतिभास-भां० मां० । १७-न्न विवा स्मृ-वा० बा० । १८ स्मृति त-वा० बा० । १९-ना स्मृ-वा० बा० । २०-दर्थावे-वा० बा० । २१ स्मृतेरुद-वा० बा० । २२-नार्थं वि-वा० बा० विना । २३-वृत्ति स्मि-आ० हा० वि० २४-वहतिर्य-आ० हा० वि० । २५-राभास एवाधमित्युल्लेखवमी सापि वा० बा० । २६-धानाम-वा० बा० । २७-कार्थत्व पर्यायतो प्र-वा० बा० । २८ तत्राभि-हा० वि० । २९-धाप्यका वा० बा० । ३०-स्तुभि क्रि-भां० मां० । ३१-त्वाऽव्यव-वा० बा० । ३२-च्यतो प्र-वा० बा० । ३३-ध्यवासाय-वा० बा० । ३४-प्रतिसव्वन्ये वा वा० बा० ।-प्रतिसत्त्वत्ये वा आ० हा० ।-प्रतिभासत्वेत्ये वा वि० । ३५-मर्थं वेति भि-वा० बा० । ३६-न्तर तस्य वा० बा० । ३७-गमो स्व-वा० बा० । ३८-न समया-वा० बा० । ३९-प्राप्ते तत्व-भां० मां० ।

योगिनोऽपि तदा प्रतिभासने तदैव प्रकाशरूपसद्भाव इति वर्तमानैव पूर्वकालादियोगता भवेत् नातीता। प्रकाशमानरूपविरहे च न तदा पूर्वकालादियोगितायाः प्रतिभासनमित्येकत्वस्यानुपलब्धेर्न प्रत्यभिज्ञा कथञ्चिदपि सम्भविनी। न च संवादोऽप्येकत्वे सिद्धः, स हि तदर्थज्ञा(?)न्तरवृत्तिः म(न)रैकत्वे पुनः ज्ञानवृत्तिः इत्युक्तम्। तज्जातीये तु पुनर्दर्शनं प्रवर्तते तदैव च संवादात् सममिमानो लोकस्य तत्त्वाध्यवसायात्। तथाहि-'स एवायम्' इति तदर्थक्रियाकारी अयं भाव इत्युच्यते तदर्थकारित्वं च भिन्नस्याप्युपलब्धम् यथा चक्षुरादेस्तज्ज्ञानजननम् तत्रैव च 'स एवायम्' इति भेदेऽप्येकत्वव्यवहारः अथवा पूर्वाऽपरदर्शनाभ्यां परस्परपरिहारेण प्रवृत्ताभ्यामेकत्वलक्षणस्य तदर्थस्य बाधितत्वादनादिकाला भ्रान्तिरेव प्रत्यभिज्ञा। तँन्न क्षणिकाभिव्यक्तिषु शब्दमात्रासु निर्विकल्पकप्रत्यभिज्ञावसितं स्थैर्यम् निर्विकल्पकस्य सविकल्पकस्य वा प्रत्यभिज्ञानस्य प्रामाण्यासिद्धितस्तत्त्वासाधकत्वात्। तन्न प्रत्यक्षविरोधमनुभवन्ति क्षणभङ्गवादिनः।

यँदपि 'नाशस्य कारणाधीनत्वादसन्निहिते(त)कारणस्य घटादिषु अनुदयात् विनाशकारणात् प्रागनिवृत्तरूपा एव घँटादयः, तदपि प्रतिक्षणध्वंसिताभावे सर्वसामर्थ्याभावलक्षणस्यासत्त्वस्य भावात् स्वरसविनाशितया [?? नापि संयोगाद् विनाशमनुभवन्तीध्व(न्ध)नादय इति ??] प्रतिविहितमेव। तथापि किञ्चिद् उच्यते—तत्रेन्धनादीनामग्निसंयोगावस्थायां त्रितयमुपलभ्यते—तदेवेन्धनादि, कश्चिद् विकारः, तुच्छरूपस्वभावः कल्पनाज्ञानप्रतिभासी, तत्राग्न्यादीनां क व्यापार इति वक्तव्यम्। न तावद् इन्धनादिजन्मनि स्वहेतुत एवैषामुत्पत्तेः। नाप्यङ्गारादौ विवादाभावात् अग्न्यादिभ्यश्चाङ्गारादयुत्पत्तावेन्धनादेरनिवृत्तत्वात् तथैवोपलब्ध्यादिप्रसङ्गः। नँ चाङ्गारादिभ्यः काष्ठादेर्ध(ध्वं)सान्नायं दोषः। ततो वस्तुरूपापरध्वंसोपगमेऽपि काष्ठादेस्तदवस्थात् पुनरपि स्वार्थक्रियानिवृत्तेर्वैन्नक(?)प्रसक्तिः। ततोऽप्यपरतथाभूतध्वंसोत्पत्त्यभ्युपगमेऽप्यनवस्था वाच्या। अथ भावान्तरमेव प्रध्वंसाभावः नापरः तत् कथं काष्ठादेस्तथोपलब्ध्यादिप्रसङ्गः? नैतदेवम्; यतः 'काष्ठादेरङ्गारादिरेव ध्वंसो नापरः' इत्यत्र किञ्चिन्निबन्धनं वाच्यम्, तस्मिन् सति तन्निवृत्तिरिति चेत्, न; तुच्छस्वभावनिर्वृत्त्यनङ्गीकरणेऽङ्गारादिकमेवार्थान्तरं निवृत्तिशब्देनोक्तम्। ततश्चायं वाक्यार्थः-अङ्गारादिभावभावात्(?)काष्ठादेरङ्गारादिकं ध्वंस इति। न(?)चाङ्गारादेर्भावस्वात्मनि हेतुत्वविरोधात् अप्रस्तुताभिधानं च प्रसक्तम् अत्स्या(श्या)दिभ्यस्तदुत्पादाभिधानात् काष्ठादीनां निवृत्तौ प्रस्तुतायामर्थान्तरविधाने तेषामनिवर्त्तनात्।

यदप्यभ्यधायि 'बुद्धि-प्रदीपादयो येऽप्यनु(नुप)जातविकारा ध्वंसमासादयन्ति तेऽप्यात्माव्यक्तरूपां(पतां)विकारान्तरम(मे)व ध्वंसमनुभवन्ति' इति, तदप्यसङ्गतम्; बुद्ध्यादीनामात्मरूपविकारापत्तौ प्रमाणाभावात् आत्मनश्चासत्त्वात् कथं तद्रूपता बुद्ध्यादीनां विकारः? 'न च परिणामः सम्भवति' इति प्राक् प्रतिपादितम्। प्रदीपादेस्तु अव्यक्तभावः कार्यदर्शनादनुमेयः तस्यातीन्द्रियत्वात्। न च ध्वस्तस्य प्रदीपादेः किञ्चित् कार्यमुपलभ्यते यतस्तदव्यक्तभावानुमितिः स्यात्। तन्न भावान्तरं प्रध्वंसाभावः। भावान्तरस्य च प्रध्वंसत्वे तद्विनाशाद् घटाद्युन्मज्जनप्रसक्तिः। न च

१-ता भवेन्नतीता भां० मां० आ०।-ता भावेन्नतीता हा० वि०। २-रहे चेन्न वा० बा० विना। ३-सममित्ये-भां० मां० आ० हा० वि० ४-कत्व सि-वा० बा० विना। ५ सिद्धेः वा० बा०। ६-वृत्तिर्नचैक-वा० बा० विना। ७ तत्रा क्ष-आ०। तत्वा क्ष-हा० वि०। ८ स्थैर्य नि-वा० बा० विना। ९-णसङ्ग-भां० मां०। १० पृ० ३२० पं० २२। ११-घटामुनुद-वा० बा०। घटादिषूनुद-हा०। घटादषूनुद-वि०। १२-न्तीधूना-भां०। १३ स्थायां त त्रतय-वा० बा०। १४ न वा-वा० बा० हा० वि०। १५-छादेर्वैशान्नांय दो-भां० मां०।-छादेर्वैशान्तायं आ०।-छादेर्वैशात्तायं हा० वि०।-छादेर्विनाशान्नायं वि०सं०। १६-न्नाव्यं दो-वा० बा०। १७-निवर्तप्र-वा० बा०।-निवृत्तेर्वर्त्तकप्र-भां० मां०।-निवृत्तेर्वैवर्त्तकप्र-हा०।-निवृत्तेर्वैत्तर्कप्र-वि०।-निवृत्तेर्वैत्तर्कप्र-वि० सं०। १८-वृत्यमंगी-वा० बा०। १९-न्तर नि-वा० बा० विना। २०-रादिभाविभा-वा० बा०। २१-रादिक ध्वं-भां० मां०। २२-रादिभावेङ्गारादिर्भावः स्वात्मनि मां०।-रादिभावेङ्गारादेर्भावः स्वात्मनि भां०।-रादिभावे देर्भावः आत्मानि वा० बा०। २३-षामनव-वा० बा०। २४ पृ० ३२१ पं० २। २५-न्ति तन्मा व्यक्तरूपतां वि-ब्रा० बा०। २६-व्यक्ताभा-आ०। २७-भावका-हा० वि०।

कपालादेर्भावरूपतैव ध्वस्ता नाभावात्मकतेति नायं दोषः भावान्तररूपस्याभावस्य तदभावे प्रच्युतत्वात्। न च कृतकस्याभावस्याविनाशितायामनित्यत्वेन कृतकत्वस्य व्याप्तिः सिध्येत् अकृतकत्वे त्वभ्युपगम्यमाने भावान्तरकार्यात्मकत्वंसो(त्वं ध्वंसो)न भवेत्। प्रध्वंसाभावाविनाशे तु सर्वदा प्रध्वंसद्धा(ससद्धा)वात् घटादीनां सत्ता न भवेत्। ततो यथा कारणस्वरूपः प्रागभावः कार्योदये कारणनिवृत्तौ निवर्त्तते—अन्यथा तदात्मकत्वायोगात्—तथा कार्यात्मा ध्वंसाभावोऽपीति नष्टैर्घटादिभिः पुनर्मङ्क्तव्यमेव। न च यथा हेतुबन्धे देवदत्तस्य न पुनः प्रादुर्भावः तथेहापीति वक्तव्यम्, देवदत्तहेतुर्देवदत्तमरणारूपत्वात् तस्य दण्डादिकल्पत्वात्। तन्न कपालादिरूपं भावान्तरं घटादेर्ध्वंसः तत्र कारकव्यापारासम्भवात् क्रियाप्रतिषेधमात्रप्राप्तेः अकारकस्य वाँ हेतुकत्वाद्हेतुमत्त्वाभ्युपगमोऽभावस्य विरुध्येत। हेतुमत्त्वेऽभावस्य कार्यत्वाद् अभावरूपताप्रच्युतिप्रसङ्गः भावस्य कार्यलक्षणत्वात्। तथाहि—यत् स्वकारणसद्भावे भवति तदभावे च न भवति तत् कार्यमुच्यते, भवन्धर्मा च कथं न भावः? यतो 'भवति' इति भावः उच्यते इत्यङ्कुरादेरपि भावशब्दप्रवृत्तिनिमित्तं नापरमुपलभ्यते, तच्चेदभावेऽप्यस्ति कथमसौ न भ(भा)वः? न चार्थक्रियासामर्थ्यं भावशब्दप्रवृत्तिनिमित्तम् तथा(तच्चा)भावे नास्तीति वक्तव्यम्, सर्वसामर्थ्यविकलस्य तस्य प्रतीतिविषयताऽभावात् कथं हेतुमत्त्वावगतिः? प्रतीतिजनकत्वे वा कथं न सामर्थ्ययोग्यता? अथ कार्यत्वे सत्यपि यथा घँट-पटादीनां भेदः प्रतिनियतविज्ञानविषयतया तथा भावाऽभावयोः समानेऽपि कार्यत्वे सत्प्रत्ययँविषयस्य भावता असत्प्रत्ययविषयस्य वा(चा)भावरूपतेति, असदेतत्; असत्प्रत्ययविषयत्वे कार्यताऽप्यस्य दूरोत्सारितैव। अथ स्वहेतुभावे भावात् कार्यता अस्य तर्हि कथं न सत्प्रत्ययं(य)विषयता? तथाहि—यद्यसौ 'भवति' इति प्रतीयते 'सन्' इत्यपि प्रतीयेत, नहि 'अस्ति' 'भवति' 'सँद्भावः' इति शब्दानां कश्चिदर्थभेदो विद्वद्भिरिष्यते, अथ वा(चा)भावात्मकँतयैवासौ भवति, न; व्याहतत्वँात्। यतो 'न भवति' इत्यभाव उच्यते स कथं भवतीति? स्वग्राहिणि ज्ञाने प्रतिनियतेन रूपेणाऽप्रतिभासनात् 'अभँावः' इत्येतदपि न वक्तव्यम्, अत्यन्तपरोक्षचक्षुँरादीनामप्यभावताप्रसक्तेः। न वाँभावस्य भवितृँषु पर्युदासात् प्रसज्यप्रतिषेधो भिद्यते, नवाऽसद्रूपत्वस्य विधानात् स पर्युदासाद् भिद्यते असद्रूपस्य भवनविरोधात्, 'भवँति' इति हि भूत्या सत्तयाऽभिसम्बध्यते, एँवं कथँमसद्रूपस्य विधानं विधिः सँर्वदा प्राधान्यात्? नञर्थश्च पर्युदास एवैको भवेत् यतो यदि कुतश्चित् किञ्चिन्निवँर्त्तेत तदा तत् पर्युदासेन तद्व्यतिरेकि परामृश्येत नँ चैवं भवति, 'निवृत्तिर्भवति' इत्युक्तेऽर्थान्तरस्यैव कस्यचित् सर्वत्र विधानात्, एवं वस्त्वन्तरमेवोक्तं स्यात् न तयोर्विवेकः, अविवेके च न पर्युदासः। अपि च, यद्यँश्यादिभ्योऽभावो भवेत् तद्भँावे काष्ठादयः किमिति नोपलभ्यन्ते? न ह्यँश्यादिभ्यो ध्वंससद्भावेऽपि काष्ठादयो निवृत्ताः ध्वंसोत्पादन एँव अश्यादीनां चरितार्थत्वात् काष्ठोपमर्देन ध्वंसस्योत्पत्तेः। न तेषामुपलब्धिरिति चेत्, कुतः पुनस्तदुपमर्दः? नँ तावत् प्रध्वँंसाभावात् काष्ठादिसत्ताकाले तस्याभावात्। नाश्यादिभ्यः ध्वंसाँविर्भावि(व)न एव तेषां

१-पतेव वा० बा० विना। २ सिद्धेतुः अकृ-वा० बा०। ३ प्रध्वंस इति वान् घ-वा० बा०। ४ पुनन्मङ्क्ष्व्य-वा० बा०। पुनर्मुक्तव्य-भां०। पुनर्मुक्तव्य-मां०। ५-था हंतुबन्धे वा० बा०।-था हेतुबन्धे हा० वि०। अत्र 'हन्तुवैधे' इति पाठः स्यात्। ६ अत्र 'देवदत्तहन्तुर्देवदत्तमरणरूपत्वात्' इति संभाव्यते। ७ वा हेतुमत्ताभ्युप-आ० हा० वि०। चा हेतुमत्ताभ्युप-भां० मां०। ८ भवतः न चा-वा० बा०। भव नवा-हा० वि०। ९-था भवे भां० मां०।-था भावं ना-हा० वि०। १०-स्य प्र-वा० बा० विना। ११-मर्थ्यायो-वा० बा० विना। १२ घटापटादी-वा० बा० भां० मां०। घटादी-हा०। १३-नां भेद प्र-वा० बा० विना। १४-यस्य वा भावरूपतेति वा० बा० विना। १५ सन्नाव इ-वा० बा०। १६-कताया वासौ वा० बा०।-कतायैवासौ आ० हा० वि०। १७-त्वात् यैतो वा० बा०। १८-भावत्येतेतदपि न च व-वा० बा०। १९-क्षुदानीम-वा० बा०। २० वास्य आ० हा० वि०। २१-विविषु प-वा० बा०।-वितृष्णु प-वि०। २२-द्यते सद्रू-वा० बा०। २३-वतीतिति हि वा० बा०। २४ एव क-आ०। २५-थन्स-वा० बा०। २६ सर्वदाऽप्रा-मां०। सर्वद प्रधानात् वा० बा०। २७-वर्तते त-वा० बा०। २८ न चैकं भ-वा० बा०। २९-द्यस्यादि-वा० बा०। ३०-द्भावे को काष्ठाद-वा० बा०। ३१ ह्यस्यादि-आ० हा० वि०। ३२ एवात्मादी-वा० बा०। ३३ न भावत् वा० बा० विना। ३४-ध्वंसाक्षात् काष्ठादि-भां० मां० आ० हा० वि०। ३५-साविन एव तेषां भां० मां०।-सादेर्भावनं एव तेषां आ० हा० वि०।

व्यापारात्। [1]न चोत्पन्नः प्रध्वंसाभावः काष्ठादीनुपमर्दयति तद्योगपद्यप्रसङ्गात्; तथा च सत्यविरोधप्राप्तिः। ध्वंसेन च काष्ठादेर्विनाशने विकल्पत्रयस्य तदवस्थत्वात् ततश्चानवस्था। न च ध्वंसेनावृ[3]तत्वात् काष्ठादेरनुपलम्भः तदवस्थे तस्मिन्नावरणायोगात् ततो विकारभावे वा पुनरपि विकल्पत्रयानतिवृत्तिः। किञ्च, यदि हेतुमान् विनाशस्तदा तं[4]द्भेदात् म(स) भेदं किं नानुभवेत्? कार्यात्म(त्मा)–
५ नो हि घटादयः कारणभेदाद् भेदमनुभवन्तोऽध्यक्षत एवावसीयन्ते, नैवमनासादितभावान्तरसम्बन्धः प्रच्युतिमात्रस्वभावो ध्वंसः तस्या[5]श्यभिघातादिहेतुभेदेऽपि तुस्व(च्छ)रूपतयैव सर्वत्र विकल्पज्ञानेऽवभासनात्। नहि 'अभावो भावः' इति तुच्छरूपतामपहायापरं तस्य किञ्चिद् रूपमीक्ष्यते हेतुमत्त्वे च तदवस्थस्तस्य विनाशप्रसङ्गः। अथ विनाशँ[6]स्य विनाशहेतुर्न दृष्ट इति नासौ विनश्यति। तदुक्तम्—

१० "घटादिषु (?) यथा हेतवो ध्वंसकारिणः।
नैवं नाशँ[7]स्य सो हेतुस्तस्य सञ्जायते कथम्?" [ ] इति।

[8]नन्वेवं बुद्ध्यादीनामप्यविनाशितप्रसक्तिः विनाशहेत्वदर्शनात्। [9]अथात्राऽदृष्टोऽपि ध्वंसहेतुः कल्प्यते अहेतुकविनाशानुपपत्तेः अन्यत्र तस्य हेतुमत्त्वदर्शनात्, बुद्ध्यादीनां चोत्तरकालं स्वरूपासंवेदनात् अवस्थितरूपत्वे च तेषां तदयोगादिति[10], असदेतत्; स्वसंविदितत्वानभ्युपगमे बुद्ध्यादी[11]
१५ नामस्य प्रलापमात्रत्वात्। तथाहि—यथा घटादयो भावा न सर्वदैव ज्ञानविषयतामुपगच्छन्ति तथा बुद्ध्यादयोऽपि ज्ञानान्तरसंवेद्याः सन्तोऽपि नावश्यमनुभवपथमुपयास्यन्तीति कुतस्तेषामनुप[12]लम्भादभावनिश्चयः? न[13] चै[14]कदोपलब्धानामन्यथा(दा)ऽत्यन्तानुपलम्भादसत्त्वनिश्चयो युक्तः, यत उपलम्भः प्रमेयकार्यम्, [15]न च कार्यनिवृत्तिः कारणाभावं गमयति, "न हि अवश्यं कारणानि फलवन्ति" [ ] इति न्यायात् केवलमनुपलभ्यमाना बुद्ध्यादय उपल[16]म्भप्रत्ययान्तर[17]विकला
२० न 'असन्त एव' इति निश्चयः। येषां त्वर्थापत्तिसमधिगम्या बुद्धिस्तेषां चक्षुरादीनामिव कार्यानारम्भेऽपि कुतोऽस्या प्रभ(अभा)वो भवेत्? [18]अथवा एकैवावस्थितरूपा बुद्धिस्तांस्तान् पदार्थान् क्रमेणोपलभते, न ह्यस्या घटादीनामिव विनाशकारणमुत्पश्यामः, ततोऽदृष्टोऽपि यथाऽस्या विनाश[19]हेतुः कल्प्यते विनाशस्यापि तथैव कल्प्यताम्, ततो विनाशेनापि [20]स्वविषयज्ञानजननसामर्थ्यं [21]बिभ्राणेन विनंष्टव्यमिति घटादीनां पुनरप्युन्मज्जनप्रसङ्गः। य(त)तोऽयमहेतुर्निःस्वभावोऽभ्युपग-
२५ न्तव्यः, अग्निसंयोगादयस्तु काष्ठादिष्वङ्गारादिकमेव जनयन्ति, काष्ठादयस्तु स्वरसत एव [22]निरुध्यत[23](न्त) इत्यनवद्यम्। लोकश्चाकिञ्चिद्रूपतामेव [24]नाशस्य प्रतिपद्यते, तत्त्वमपि(?) वा(चा)सतोऽकि[25]ञ्चिद्रू[26]पतैव, [27]यतोऽवैपरीत्यं तत्त्वमुच्यते, [28]न चैतद् विपरीतं [29]यत् 'अकिञ्चिद्रूपो ध्वंसः' इति। ततो यद्यपि 'सदसती [30]तत्त्वम्' इति व्यपदेशस्तथापि नासतो वस्तुता। तेन "विनाशकाले

---

१ **न चोत्प**–आ० हा० वि०। २–**ध्वंस्याभावः** भां० मां०। ३–**वृत्तत्वा**–भां० आ० विना। ४ **तद्भेदात् म भेदं** वा० बा०। ५–**न्तरं स**–भां० मां०। ६–**स्याश्येभिघा**–आ० हा० वि०।–**स्याश्याविघा**–वा० बा०। ७–**शहेतुर्न** भां० मां०। ८–**था— —हेतवो** भां० मां०।–**था—दहेतवो** आ०।–**थादहेतवो** हा० वि०। ९–**कारिणाः तैवं** हा० वि०।–**कारिणाः ति(ते)वं** आ०। १०–**शस्य संजा**–भां० मां०।–**शस्य सोऽहेतुस्तस्य संज्ञायतो कथ**–वा० बा०। ११ **नत्वेवं** भां० मां० आ० हा० वि०। १२ **अ ज्ञा**–वा० बा०। १३–**ति चेत् अस**–वा० बा० विना। १४–**द्ध्यादीनां नामस्य प्रलापनात्वात्** वा० बा०। १५–**लम्भावनि**–भां० मां०। १६ **न चैक**–आ० हा० वि०। १७–**कदोषलब्धा**–वा० बा० भां० मां० आ० वि०। १८ **न च कार्यं न च कार्यनि**–वा० बा०। १९–**लम्भः प्र**–भां० मां० आ० हा० वि०। २०–**र–विल्पनास**–वा० बा०।–**रविकालनास**–आ० हा० वि०। २१ **अथचैकै**–भां० मां०। २२–**नाशिना**–भां० मां०। २३–**मर्थ्यं ब बिभ्रा**–भां० मां०। २४–**व निरूध्यत**–भां० मां० वि०।–**व विरुत**–वा० बा०। २५–**व गाशस्य** आ० हा०।–**व गास्य** वि०।–**व गात्रस्य** वि० सं०। २६– **द्रूपपत्तैव यतो**–भां०।–**द्रूपपतैव यतो**–भां०।–**द्रूप वि यतो**–आ०। २७ **यतो वै**–वा० बा० विना। २८ **न चै परीत्यं तत्त्वमुच्यते न चैव तद्वि**–भां० मां०। २९–**यदि किञ्चिद्रूपौ ध्वं**–आ०। ३० "किं पुनस्तत्त्वम्? सतश्च सद्भावः असतश्च असद्भावः" १, १, १ न्यायद० भा० पृ० २ पं० ५। "किं पुनस्तत्? सदसती तत्"–न्यायवा० पृ० ९ पं० ८। "किं पुनस्तत्त्वम्?×××××सदसती" इति—न्यायवा० ता० टी० पृ० ३२ पं० ११।

[1]न तस्य किञ्चिद् भवति, न भवत्येव केवलम्, अन्यथा कस्यचिद् विधा[2]ने न भावो निवर्त्तितः स्यात्" [ ] [3]इत्यप्रस्तुताभिधानं भवेत्।

यदपि 'कृतकोऽपि विनाशो नित्यः, अकृतकोऽपि प्रागभावो विनाशी' इत्यभिधानम्, तदपि न न्यायानुगतम्। अथ भावा[4]नां कृतकाऽकृतकानां ध्वंसिता–स्थैर्यलक्षणो धर्म एकान्तिकः, न च भावधर्म्मोऽभावेष्वध्यारोपयितुं युक्तः। कुतः पुनरयमेकान्तिको भावधर्म्म इत्यवसितम्? अन्यथा भावस्यानुपलम्भादिति चेत् [5]नन्वनुपलम्भोऽयं भवन्नप्यात्मादेः सत्ताया अनिवर्त्तकोऽन्यत्र कथमन्यथाभावं निवर्त्तयेत्? [6]न चात्मनोऽनुमानेनोपलम्भादिति वाच्यम्, यतोऽनुमानेऽप्यनुपलम्भ एव हेतोः विपक्षवृत्तिं कथं निवर्त्तयति? अथ कृतकाकृतकानां पदार्थानां हेतुकृतविनाशेतरस्वभावदर्शनादव्यभिचारः यद्येवं यस्यैव घटादेः कृतकस्य विनाशकारणवशाद् विनाशो दृष्टः स एव ततस्तथा निश्चीयताम् नान्यः कृतकत्वसाधर्म्यमात्रेण। नहि वस्त्रे रागस्य एव स्वहेतुसन्निधिसापेक्षस्यावश्यम्भाविना(ता) तद्धेतुसन्निधेरप्यपरहेतुसन्निधिसापेक्षत्वात्, 'न चावश्यं हेतवः फलवन्तः' इत्युक्तम्। अथ सापेक्षोऽपि वाससि रागः सर्वत्र यद्युपलभ्यते किमित्यवश्यंभावी न भवेत्? न च तथोपलभ्यते अन्यथापि तस्य ग्रहणात् एवं यदि नाश्यो[7]ऽप्यन्यथापि भाव उपलभ्यते तदा सापेक्षत्वान्नावश्यंभाविता भवेत् न चैवं सर्वत्र[?? कृ[8]तके श(विनाश)स्योपलब्धेरिति, असदेतत्; भवतु समस्तवस्तुव्यापिज्ञानाभावात् भावेऽनुमानवृ[9]त्तेर्न वैफल्यापत्ति(त्तिः) ??] हेतुबलादुपजातध्वंसस्य कस्यचिद् दर्शनेऽपि[10] कारणप्रतिबद्धजन्मनामन्यथापि दर्शनात्, उपजातशङ्को देशा[11]दिविप्रकृष्टेषु भावेषु कथं तथाभावं निश्चिनुयात्? यद्यपि वा(चा)कृ[12]तकानां विनाशं(शो) नोपलब्धः तथापि कालान्तरे तदा वा असौ हेतुनिमित्तो न सं[13]भवीति कुतो निश्चयः? न वा(चा)कृ[14]तकः प्रागभावस्तदविनाशो वा सम्भवतीति प्रतिपादितम्। ततोऽसमर्थो विनाशहेतुरिति स्थितम् व्यर्थश्च। तथाहि–यदि स्वभावतो नश्वरो भावः न किञ्चिद् विनाशहेतुभिः तत्स्वभावतयैव तस्य स्वयं नाशतः–नहि स्वयं पतति पातप्रयासः फलवान्। अथानश्वरस्तदा तत्स्वभावस्यान्यथाकर्त्तुमशक्यत्वाद् व्यर्थो नाशहेतुः। न चै[15]व(च)लरूपतायां तदुपयोगः, यतो नास्माभिः कार्ये[16] भावानां व्यापारः प्रतिक्षिप्यते किन्त्वचलरूप[17]तैव। ततो भावा[18]नामुद्भूता[?? भावस्य भावपूर्वस्तु पूर्वको प्रच्युत एवेति तथोपलब्ध्यादिप्रसङ्गः ??] यश्च विनाशहेतोरस्थिरस्वभावो घटादे[19]र्भवति कथं [20]सं सस्य(तस्य) स्वभावः तस्मिन्निष्पन्ने भिन्नहेतुकः? यतो [21]न तत्स्वभावो युक्तः। [22]न चै[23]व स्वहे[24]तु[25]भिरेव नियमितस्वभावोऽयं कालान्तरस्थायी पदार्थानां हेतुभिर्जनित इत्युत्पा[26]दानन्तरं न विनष्टः स तस्मिन्नेव स्वभावे व्यवस्थितः कथमन्ते[27]ऽपि नश्येत्? तथाहि—उदयकाले यः स्वभावः स्थिरः तत्स्वभाव एवायमन्तेऽपीति पुनस्तावन्तमेव कालं तिष्ठेत्, तथा [28]तदन्तेऽपि तावन्तमपरम् कालान्तरस्थितिरूपस्योदयकाल[29]भाविनः स्वभावस्य तदन्तेऽपि भावात्। न ह्यन्तेऽपि रूपान्तरसम्भवस्तस्यैकस्वभावत्वात् अकिञ्चित्करस्य च विरोधित्वाऽयोगात् तत् कथं तदपेक्षोऽयं निवर्त्तेत? दण्डादिप्रपातसमयेऽस्य प्रच्युतिलक्षणः स्वभावः स किं [30]प्रागासीत् येनाऽसौ

---

१ "न तस्य किञ्चिद् भवति, न भवत्येव केवलम्"–आप्तमीमां० प० ३ श्लो० ५३ अष्टश० पृ० २८ पं० ३०। अष्टसह० पृ० २०० पं० १३। २–**धाने भावो** भां० मां०। ३–**त्यत्रप्र**–वा० बा० विना। ४–**वानां कृतकानां** आ०।–**वानां कृताकानां** वा० बा०। ५–**सितांस्थै**–भां० मां० हा० वि०।–**सिनांस्थै**–आ०। ६ **नत्वनु**–आ० हा० वि०। **नचनु**–भां० मां०। ७ **न चात्मानु**–भां० मां०। **न वात्मानु**–आ० हा० वि०। ८ **न वा**–आ० हा० वि०। ९ पृ० ३४६ पं० १८। १०–**स्यान्य**–वा० बा०। ११–**तकेशास्यो**–वा० बा०। १२–**वृत्ते द र्ष्टन विफल्यापत्ति हे**–वा० बा०। १३–**पि कर**– वा० बा० विना। १४–**शादिप्र**–वा० बा०। १५–**कानां विनाश नो**–हा० वि०। १६ **सम्भवाति** आ० हा० वि०। १७–**श्रया न** आ०।–**श्रय न** हा०।–**श्रये न** वि०। १८–**तक प्रा**–वा० बा० भां० मां० विना। १९ **च बल**–वा० बा० विना। २० **कार्यै भा**–वा० बा०। २१ **किन्त्ववल**–भां० मां०। २२–**नामुद्भूताभावस्वभावपूर्वस्तु पूर्वस्तु पूर्वको** भां० मां०।–**नासुद्भूपताभावस्वभावपूर्वस्तु पूर्वको** आ०।–**नासद्भूताभावस्वभावपूर्वस्तु को प्रत्युत**–हा० वि०। २३ **स त्यस्य स्वभा**–भां० मां० आ० हा० वि०। २४ **न तस्वभावे यु**–वा० बा०। २५ **च स्वभावो युक्तः न च स्वहे**–भां० मां०। २६–**तुभिरिति च निय**–वा० बा० भां० मां० विना। २७–**दानांतरं** आ० हा० वि०। २८–**पि नाशात्** वा० बा०। २९ **तदन्तेति ता**–वा० बा०। **तदान्तेपि ता**–आ०। ३०–**भाविनश्च भा**–आ०।–**भाविन स्वभा**–वा० बा०। ३१ **प्राद्वासी**–वा० बा०।

न निवृत्तः ? नहि तद्भावेऽपि पररूपेणायं निवर्त्तते स्वरूपं च तदेवास्य प्रागपि कथं न निवृत्तिः ? हेतवश्चानुपकार्यापेक्षायां नियुञ्जानाः स्वकार्यमात्मनोऽस्थानपक्षपातित्वमाविष्कुर्युः, न च भवतामप्यकिञ्चित्करमपि मुद्गरादिकमपेक्ष्य कथं प्रवाहो निवर्त्तते इति वाच्यम् यतो न विशरारुक्षणव्यतिरेको(क्य)परः प्रवाहो विद्यते यो निवृत्तावकिञ्चित्करं मुद्गरादिकमपेक्षते किन्तु परस्परविविक्ताः पूर्वापरक्षणा एव, ते च स्वरसत एव विरु(निरु)ध्यन्त इति न क्वचिदकिञ्चित्करापेक्षानिवृत्तिः अतो मुद्गरादिरहिता सामग्री अविभक्तं कार्यं सम्पादयन्ती तत्सन्निधाने विभक्तं कार्यान्तरं जनयति न तु मुद्गरादयः कारणसामर्थ्यं खण्डयन्ति, विकल्पत्रयस्यात्रापि पूर्वोदितस्य प्रसङ्गात् । अतो यदुक्तम्—

"स्वभावोऽपि स तस्येत्थं येनापेक्ष (?) निवर्तते ।
(?) विरोधिनं यथाऽन्येषां प्रवाहा मुद्गरादिकम्" ॥ [ ] इति,

तदपि प्रतिक्षिप्तं द्रष्टव्यम् । अथायं विकल्पः सर्वत्रगत्वादसारः (?) तथाहि—उत्पादेऽप्येवं शक्यते एव वक्तुं स्वभावतो ह्युत्पत्तिस्वभावस्य न किञ्चिदुत्पत्तिहेतुभिस्तत्स्वभावतयैव स्वयमुत्पादात्, अनुत्पत्तिस्वभावस्य तु स्वभावतो व्यर्था उत्पत्तिहेतवः तद्भावान्यथात्वस्य कर्तुमशक्यत्वादिति, नैतत् सारम्; यतो यद्युत्पत्तिरभूत्वा भवनलक्षणैव—अन्यथा तदयोगात्—स्वभावो यस्य स तथोच्यते तदा सिद्धसाधनमेव, यस्य ह्यभूत्वा भ(?)वत्सम्पन्नस्तत्रोत्पादहेतूनां व्यापाराभीवर्ष्याभीष्टत्वात् सतो निवर्त्तयितुमशक्यत्वात् कार्य-कारणयोः सहभावेनानिवृत्तेः, अथोत्पत्तौ स्वभाव आभिमुख्यलक्षणो यस्य सन्निहितसर्वकारणकलापानन्तरभाविन इत्यभिधातुमभिधेयं तदा कथमस्योत्पत्तिहेतूनां वैयर्थ्यम्? नहि तथाभूतकारणवशात् तथाव्यपदेशहेतोर्व्यर्थता युक्ता । अथ द्वितीयो विकल्पः सोऽप्यनुपपन्नः यतोऽनुत्पत्तिर्भावप्रतिषेधमात्रं स्वभावः सर्वसामर्थ्यविरहलक्षणस्याभावस्य तत्र चानभ्युपगमाद्धेतुव्यापारस्य सिद्धसाध्यतैव, न ह्युत्पत्तिहेतवोऽभावं भावीकुर्वन्ति, भावेष्वपि परिणामस्तावदयं न सम्भवति मुत(किमुत) नीरूपेऽभावे? नत्वे(न्वे)वं कथमसदुत्पद्यत इत्युच्यते? कारणानन्तरं यः सद्भावः स प्रागसन्नित्ययमत्रार्थः न पुनरभावो भावत्वमापद्यत इति न कश्चिद्दोषः अन्यथानुपपत्तावनन्तरभावाभावे धर्मो यस्यासन्निहितकारणस्य च स एवमभीष्टस्तदापि तत्राऽसत्त्वादेव कारणानां व्यापारो न भवतीति न काचित् क्षतिः, लोके चोत्पत्तिधर्माऽनागत एवोच्यते, न च तस्य शशविषाणस्येव तीक्ष्णतादिगोचराणामिव भावाश्रयाणां विकल्पानां सम्भवः, न च यदि निर्हेतुको भावस्य विनाशः उत्पादोऽपि तथैवास्तु भावभाव(?)धर्मत्वाविशेषात् यतो न विनाशो नामाऽन्य एव कश्चिदुदयापवर्गिणो भावात् भावश्च स्वहेतोरेव तथाभूत उत्पन्नो न कश्चिद्धर्मोऽस्या(?)न्निमित्तः केवलं तमस्य स्वभावं पश्यन्नपि मन्दबुद्धिर्न विवेचयति दर्शनपाटवाऽभावात् यदा तु विसदृशः(श)कपालादिविधुरप्रत्ययोपनिपातात् उत्पद्यते तदा भ्रान्तिकारणविगमात् प्रत्यक्षनिबन्धनो निश्चय उत्पद्यते, अनुमानतो भावानां सुविदुषां प्रागपि भवत्येव, यथा विषस्वरूपदर्शनेऽप्यतत्कारिपदार्थसाधर्म्यविप्रलब्धो नं मारणशक्तिं नि(निश्चि)नोति प्राक् पश्चात् तु विकारदर्शनात् तन्निश्चयः, न च शक्तिमतः शक्तयो भेदमनुभवन्तीति प्रतिपादितं सौगतैः । जातस्य च स्वभावस्य विनश्वरत्वेऽन्यानपेक्षणान्निर्हेतुको विनाश उच्यते इति स्थितमेतत् यथोक्तप्रकारेणानु-

---

१-वास्या प्रा-आ० हा० वि० । २-माविकु-वा० बा० । ३-द्यते माया निवृ-आ० ।-द्यते मोया निवृ-हा० वि० । ४ विरूध्यत इ-मां० । विरुध्यत इ-भां० । ५-रादिना र-वा० बा० विना । ६-रहित सा-आ० । ७-धाने पिभ-वा० बा० विना । ८ न नु मु-भां० मां० आ० हा० वि० । ९ । तथा-वा० बा० विना । १०-दऽवसारः वा० बा० । ११ तवयो-भां० मां० । १२-त्वा भावत्स-वा० बा० । १३-भावास्या भीष्ट-भां० मां० ।-भावास्याभीष्ट-आ० ।-भावस्या अभीष्ट-हा० वि० । १४-स्यारवाभी-वा० बा० । १५-ना वृ-वा० बा० । १६-स्य सनिहि-भां० मां० । १७-मभिधेयः त-भां० मां० । १८-थालत-वा० बा० । १९-पपन्नाव-वा० बा० । २० धर्मा यस्या-भां० मां० । २१-धर्म्यतानग ए-आ० ।-ध गत ए-हा० वि० । २२ भावतावध-वा० बा० । २३ कश्चिद्धर्मा स्या-हा० वि० । २४-दुषो प्रा-आ० ।-दुषां प्र-वा० बा० । २५ यवां वि-आ० । यवा वि-हा० वि० । २६-विषयरू-वा० बा० विना । २७-लब्धौ न वा० बा० भां० मां० विना । २८ न कारण-वा० बा० विना । २९-शक्तिं नितोति भां० ।-शक्तिं मिनोति वि० सं० ।-शक्तिं नोति वा० बा० ।

मानतो भावानां क्षणक्षयः सिद्धः, प्रत्यक्षतोऽपि क्षणक्षयाधिगमे तद्व्यवहारसाधनानुमानं साफल्यमनुभवतीत्यपरे प्रतिपन्नाः । तदेवं प्रत्यक्षतः अनुमानतश्च क्षणिकत्वव्यवस्थितेः स्थितमेव तद् मूलाधारः पर्यायनयस्य ऋजुसूत्रवचनविच्छेद इति । तस्य ऋजुसूत्रतरोः 'तुः' अवधारणार्थः तेन तस्यैव न द्रव्यास्तिकस्य शब्दादेयः शब्दार्थं गमयन्तः शब्दनयत्वेन प्रतीताः शब्द—समभिरूढैवंभूतास्त्रयो नयाः शाखाप्रशाखा इव स्थूलसूक्ष्मतर(लसूक्ष्मसूक्ष्मतर)दर्शित्वात् सूक्ष्मो भेदो विशेषो येषां ते तथा । यथा हि तरोः स्थूलाः शाखाः, सूक्ष्मास्तत्प्रशाखाः, प्रतिशाखाअति(शाखाश्च) सूक्ष्मतराः एवम् ऋजुसूत्रतरोः स्थूल-सूक्ष्म-सूक्ष्मतराः शाखाःप्रशाखाः (शाखाप्रशाखा)प्रतिशाखारूपा अशुद्धःशुद्धतर-(अशुद्ध-शुद्ध-शुद्धतर)पर्यायास्तिकरूपाः शब्द-समभिरूढैवंभूतास्त्रयो नयाः द्रष्टव्याः । तथाहि-ऋजुसूत्राभ्युपगतं क्षणमात्रवृत्ति वस्तु दिंगा(लिङ्गा)दिभेदाद् भिन्नं शब्दो वृक्षाच्छाखामिव सूक्ष्ममभिमन्यते एकसंज्ञं समभिरूढः शब्दाभिमतं वस्तु संज्ञाभेदादपि भिद्यमानं शाखातः प्रशाखामिव सूक्ष्मतरमध्यवस्यति, तदेव समभिरूढाभिमतं वस्तु शब्दप्रतिपाद्यक्रियासमावेशसमय एवं स्थिति(?)भूत एवंभूतः क्रियाभेदाद् भिन्नं प्रशाखातः प्रतिशाखामिव सूक्ष्मतममधिगच्छत्येवं बाह्यार्थाभ्युपगमपरः शब्द-समभिरूढैवंभूतभेदवानवगन्तव्यः।

[२ ऋजुसूत्रपदस्य द्वितीयां व्याख्यामाश्रित्य विज्ञप्तिमात्रवादः]

[पूर्वपक्षः-बाह्यार्थवादिभिः सौत्रान्तिक-वैभाषिकैः विज्ञप्तिमात्रस्य निराकरणम्]

अथवा ऋजु बाह्यापेक्षया ग्राहक-संवित्तिभेदविकलमविभागं बुद्धिस्वरूपमकुटिलं सूत्रयतीति ऋजुसूत्रः शुद्धः पर्यायास्तिकः ।

ननु किमविभागबुद्धिस्वरूपावेदकप्रमाणसद्भावतो विज्ञप्तिमात्रमभ्युपगम्यते, आहोस्विदर्थसद्भावबाधकप्रमाणसङ्गतेरिति वक्तव्यम् । तत्र यद्याद्यः पक्षः स न युक्तः, यतस्तथाभूतविज्ञप्तिमात्रोपग्राहकं प्रत्यक्षं वा तद् भवेत् अनुमानं वा प्रमाणान्तरस्य सौगतैरनभ्युपगमात्? तत्र न तावत् प्रत्यक्षमर्थसंस्पर्शरहितं विज्ञप्तिमात्रमेवेत्यधिगन्तुं समर्थमर्थाभावनिश्चयमन्तरेण विज्ञप्तिमात्रमेवेत्यवधारणाधिगमानुपपत्तेः । उक्तं च—

"अयमेवेति यो ह्येष भावे भवति निर्णयः ।
नैष वस्त्वन्तराभावसंवित्त्यनुगमादृते" ॥ [श्लो० वा० अभाव० श्लो० १५]

न चार्थाभावोऽध्यक्षसमधिगम्यः अर्थविभासकत्वेन तस्योत्पत्तेः, न च तत्रावभासेऽपि तस्याभावः विज्ञप्तेरप्यभावप्रसक्तेः न च तैमिरिकाक्षजप्रतिभासे चकासदिन्दुद्वयं यथाऽसत्यत्वमनुभवति तथा शुद्धदृक्प्रतिभा(भास)विषयस्यापि स्तम्भादेरपि वितथा(थ)त्वं यतस्तिमिरपरिकरितदृग्विषय-

---

१ तद् मूलधा-वा० बा० भां० मां० । अत्र 'स्थितमेतद् मूलाधारः' इति चारु भाति । २-जुनयसू-मां० । ३ तत्र ऋ-वा० बा० विना । ४-रणोर्थस्ते-भां० मां० । ५-दय र्थे ग-आ० ।-दय शब्दोर्थे ग-हा० वि० ।-र्थ ग-वा० बा० । ६-र्थ ग-भां० मां० विना । ७ शाखा इव वा० बा० । ८-व मूलसूक्ष्मतर-भां० मां० आ० हा० वि० । ९-खाः प्रतिशाखा अतिसूक्ष्मतरा ए-भां० मां० ।-खा सू-आ० ।-खाः सूक्ष्मास्तत्प्रशाखाः सूक्ष्मा तत्प्राशाश्च स्तत्स्तरा ए-वा० बा० । १०-तरो मूलःसूक्ष्मसूक्ष्मतरा शाखारूपा अ-भां० मां० ।-तरो स्थूलःसूक्ष्मसूक्ष्मतरा शाखारूपा अ-भां० ।-तरो स्थूलसूक्ष्मतराः शाखाः प्रशाखाः प्रतिशाखारूपा अ-वा० बा० । ११ स्थूलः सू-आ० । १२-तरा शा-आ० हा० वि० । १३-रूपा श-भां० मां० आ० । १४-स्तु दिगादि-वा० बा० विना । १५ वृक्षाच्छा मिव सूक्ष्माभिम-वा० बा० । १६ एकं सं-आ० हा० वि० । एकसंज्ञा स-वा० बा० । १७ तदेवं स-वा० बा० विना । १८-व व स्थि-भां० मां० ।-व च स्थि-वा० बा० । १९-भूताः क्रि-वा० बा० विना । २०-भूताभेदावा-वा० बा० । २१-भागबु-आ० । २२-दनप्र-वा० बा० । २३ "तथाभूतविज्ञप्तिमात्रं(त्र)ग्राहकं प्रत्यक्षम् अनुमानं वा?"-प्रमेयक० पृ०२१ प्र० पं० १ । २४-रहितवि-आ० । २५ प्रमेयक०पृ० २१ प्र० पं० २ । २६-भानेऽपि वा० बा० । २७ "न च तैमिरिकप्रतिभासे प्रतिभासमानेन्दुद्वयवन्निर्मलमनोऽक्षप्रभवप्रतिभासविषयस्यापि असत्त्वमिति अभिधातव्यम्"-प्रमेयक० पृ० २१ प्र० पं० ४ । २८-यस्या बाध्य-भां० मां० ।

स्यार्थस्य बाध्यमानप्रत्ययविषयत्वादसत्त्वं युक्तम् न पुनः शुद्धदृगवसेयस्य तत्र बाध्यत्वायोगात् यद्वा तैमिरिकावभासिनोऽपीन्दुद्वयादेरवैतथ्यमस्तु। न च बाध्यप्रत्ययावसेयस्य कथमवितथत्वमिति वक्तव्यम् बाध्यत्वाऽयोगात्।

तथाहि-दर्शनं वा बाध्येत, तत्रावभासमानो वाऽर्थः, प्रयोजनं वा? न तावदाद्यः पक्षः दर्शनस्योत्पन्नत्वात्। नाप्यर्थो बाध्यः प्रतिभासमानेन रूपेण तस्य सत्त्वात् अन्यथा प्रतीयमानताऽयोगात्। न च प्रतिभासोऽस्ति किन्तु तन्निर्भासि रूपमसत्यमिति वक्तव्यम् प्रतिभासमानं रूपं बिभ्रतोऽप्यसत्त्वे संविदोऽपि तथात्वप्रसक्तेः। अथार्थक्रियाविरहाद् भ्रान्तज्ञानावभासिनो हिमकरादेर्वैतथ्यम्, अयुक्तमेतत्; यतो यद्य(द्यप्य)र्थक्रिया तत्र नोदिता तथापि पूर्वज्ञानावभासिनः कथं वैतथ्यम्? नह्यन्याभावादन्याभावः अतिप्रसङ्गात्। न चार्थक्रियानिबन्धनं भावानां सत्त्वमिति यत्र सा नोदेति तत् प्रतिभासमानमपि न सत्तामनुभवतीति वाच्यम् यतो यदि भावाः प्रयोजनमुपजनयन्तः सत्तामनुभवन्ति तदा साऽप्यर्थक्रियाजननात् सत्तासंगता स्यात् साऽप्यपरार्थक्रियाजननात् इत्यनवस्थाप्रसक्तिः। अथ अर्थक्रिया प्रतिभासविषयत्वात् सती पदार्थमात्रा अपि तथैव सत्याः (त्याः) स्युरिति व्यर्थाऽर्थक्रिया अत एव तैमिरिकावभासिनः केशादयोऽपि सत्याः प्रतिभासविषयत्वात्। न च बाधकवशात् तेषां वैतथ्यव्यवस्था, बाधकस्यैवानुपपत्तेः। यतस्तैमिरिकोपलब्धकेशादेर्दर्शनान्तरं यदि बाधकं तदा वक्तव्यम्-एककालम् भिन्नकालं वा? यदि भिन्नकालं बाधकमाश्रीयते तदा पूर्वदर्शनकाले नाऽपरम् अपरदर्शनसमये च न पूर्वमिति परस्परकालपरिहारेण प्रवर्त्तमानयोः कथं बाध्य-बाधकता? अथैककालं तद्बाधकम् तच्चा(दा)त्रापि वक्तव्यम्-एकविषयम् भिन्नविषयं वा? न तावदेकविषयम् तस्य सुतरां तत्साधकतोपपत्तेः नह्येकविषयं संविदन्तरं तद्विषयस्यैव संविदन्तरस्य बाधकमुपलब्धम्। भिन्नविषयं संविदन्तरं स्वविषयमेव भासयितुं समर्थम् न पुनर्विषयान्तरसंवेदनमुपदलयितुमलम्, नहि स्वविषयमवतरन्ती नीलसंवित् पीतदृशमपहन्तुं समर्था। न च दर्शनान्तरं पूर्वदर्शनाधिगतमर्थमसत्यमधिगच्छत् तस्य बाधकम्। यतस्तदपि दर्शनं स्वविषयीकृतं वा अस्वविषयीकृतं वा पूर्वदर्शनाधिगतमर्थमसत्यमधिगच्छत् तस्य बाधकं स्यात्? प्रथमपक्षे पूर्वदर्शनाधिगतोऽर्थ उत्तरकालभाविनि दर्शने परिस्फुटमवभासमानः सुतरां सत्यः स्यात् न वितथ इति कथं तत् 'तदसत्यम्' इत्यावेदयति? अथ द्वितीयः पक्षोऽङ्गीक्रियते तदा[21] त्रापि बाध्यदर्शने प्रतिभासमानस्यार्थस्य बाधकसंविदि प्रतिभासाभावात् कथं तस्य ततो वैतथ्यावगतिः? न च विषयान्तरस्य शुक्तिकादेस्तत्रावभासनात् रजतादेरलीकतेति वाच्यम् यतो यदि शुक्तिकाज्ञाने स्वेन रूपेण शुक्तिका प्रतिभाति रजतादेर्भिन्नकालावभासिनः किमिति वैतथ्यं भवेत् सर्वस्य वैतथ्यप्रसक्तेः? अथानुपलम्भो बाधकं प्रमाणमुच्यते तदात्रापि वक्तव्यम्-एककालः, भिन्नकालो वा? तत्र च यद्येककालः सोऽसिद्धः स्वप्रतिभाससमये रजतस्यानुपलम्भायोगात्। कालान्तरभावी रजतानुपलम्भः तदैव तस्यासत्त्वं न पूर्वकालम्। न च भाविकाले पूर्वदर्शनप्रत्यस्तमयात् स्वदर्शनकालावधेरर्थस्याभावः अतिप्रसङ्गात्। तदेवं विशददर्शनावभासि सत्यं बहिरर्थस्वरूपम् यथा स्वसंवित्प्रतिभासमानं विज्ञप्तिस्वरूपम् तथा च तैमिरिकदर्शनावभासीन्दुद्वयमिति स्वभावहेतुः असतः प्रतिभासायोगात्। अथेन्दुद्वयादेर्बहिः सत्त्वे किमिति शुद्धदृशि न प्रतिभासः? यत्र हि बहिरर्थोऽस्ति तत्र योग्यदेशादितः सकलसामग्रीप्रभवसमस्तजनसंविदि प्रतिभा

---

१ अन्यत्रा प्र-आ०। २-वानां त स-भां० मां०।-वानोनां स-आ०। ३ तार्थव भां० मां०। तत्रैव आ०। ४ सत्यः हा० वि०। ५-कालं वा भि-आ०। ६ तत्रापि वा० बा० विना। ७-लब्ध भि-आ० विना। ८-न्तरं सं-वा० बा० विना। ९-पहलयि-हा०।-पदर्शयि-आ०। १० दर्शनानन्त-वा० बा० विना। ११-दा तत्रा-भां० मां०। १२-भासि र-वा० बा० विना। १३-त्र यद्ये-भां० मां०। १४-भासमये भां० मां०। १५-रभावा नु (वी तु) रज-वा० बा०। १६ तदेव वा० बा०। १७ बोधयेत् इति शेषः। १८-काले। वा० बा० विना। १९-या स्व-वा० बा०। २०-भासि ससत्यं आ०।-भावि सत्यं वा० बा०। २१-था त्र तै-वा० बा०। २२-देवंहि स-वा० बा० विना। २३-रर्थोस्तत्र तत्र थो-वा० बा० विना। २४-विदिन्न प्र-वा० बा०।

समाधत्ते यथा नीलादिः न चेन्दुद्वयं नरान्तरविशददृशि प्रतिभाति तद्देशव्यवस्थितपुरुषान्तरसंविदि एकेन्दुमण्डलस्य प्रतिभासनात् ततो ज्ञानाकार एवेन्दुद्वयं न बाह्यम्, असदेतत्; यतो न बहिरर्थाः सन्निधिमात्रेण ज्ञाने प्रतिभासमादधति किन्तु स्वसामग्रीवशात् अन्यथा अत्वा(न्धा)दिदृशि प्रतिभासमादध्युः। अथ लोचनाद्यभावात् नान्धादिदृशि तत्प्रतिभासः, नत्वे(न्वे)वं तिमिरादिसामग्र्यभावात् शुद्धदृशि हिमकरद्वयादेरप्रतिभासमानस्व(त्वम्)। न च स्वसामग्रीवशात् क्षपाकरयुगलं संविदि भासमानं ज्ञानस्वरूपमेव, बहिर्ग्राह्याकारतया प्रतिभासमानस्य इन्दुद्वयस्यान्तर्ग्राहकाकारतया-(याऽ)प्रतिभासनात् ज्ञानरूपत्वायोगात् तद्रूपत्वे वा ग्राहकाकारतया प्रतिभासमानज्ञानस्यापि तथाप्रतिभासमानस्यार्थरूपताप्रसङ्गः। तत्र(त्र) बहिर्ग्राह्याकारतया प्रतिभासमानस्येन्दुद्वयादेर्विज्ञप्तिरूपता, परिशुद्धविशददृगवसेयस्य तु स्तम्भादेः सुतरां ज्ञानरूपतानुपपत्तिः। तन्न अध्यक्षं बहिरर्थाऽवभासि तदभावं गमयति। नं चाध्यक्षमभावग्राहि, तस्य तुच्छतया तद्विषयत्वायोगात्। न च वस्तुत्वादसदंशः प्रत्यक्षग्राह्यः इन्द्रियसम्बन्धाभावेन तस्यापि प्रत्यक्षत्वायोगात् तदसम्बन्धस्तु योग्यताभावात् इन्द्रियस्य। उक्तं च—

"न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः।

भावांशेनैव संयोगे योग्यत्वादिन्द्रियस्य हि" ॥ [श्लो० वा० अभाव० श्लो० १८] इति।

तन्नोभयरूपोऽप्यर्थाभावोऽध्यक्षवेद्यः।

नाप्यनुमानं बाह्याभावमावेदयति, प्रत्यक्षाभावे तस्यायोगात्। न च प्रत्यक्षविरोधे अनुमानस्य प्रामाण्यं सम्भवति "प्रत्यक्षनिराकृतो न पक्षः" [ ] इति वचनात्। न च बाह्यार्थावेदकस्याध्यक्षस्य भ्रान्तत्वान्न तेनानुमानबाधेति वक्तव्यम्, इतरेतराश्रयप्रसक्तेः। तथाहि-अर्थाभावे सिद्धे तद्ग्राहि अध्यक्षं भ्रान्तं सिध्येत्—अन्यथा कथमवितथार्थग्राहिणो भ्रान्तता—भ्रान्तत्वे च तस्य सिद्धे अर्थाभावानुमानस्ये(स्य) न तेन बाध्यते(बाधेति) व्यक्तमितरेतराश्रयत्वम्। न च तदध्यक्षमेव न भवति अनुमानेन बाधनादिति वक्तव्यम्, अनुमानेऽप्यस्य पर्यनुयोगस्य समानत्वात्। [?? तथाहि-बाह्याभावग्राह्यस्य भ्रान्तत्वात् तेनानुमानबाधेति वक्तव्यम् इतरेतराश्रयदोषप्रसक्तेः। तथाहि-अर्थाभावे सिद्धे बलादनुमान(नं) प्रमाणमिति दर्शनाभावेऽप्यर्थाभावसिद्धिः तत्प्रतिबन्धसिद्धेः अप्यक्षमिति तत्त्वात् अन्यथा अनवस्थापत्तेरिति नानुमानवेद्योऽप्यर्थाभावः ??]।

१-था दि-भां० मां०।-था दि प्रति-आ०। २-मग्र्या भा-भां० मां०। ३-मग्रीसमावेशात् आ०। ४ न बाध्य-आ० हा० वि०। ५ "संयोगो"-श्लो० वा०।

६ "साध्याभ्युपगमः पक्षः प्रत्यक्षाद्यनिराकृतः"। १४।
"प्रतिपाद्यस्य यः सिद्धः पक्षाभासोऽक्षलिङ्गतः। लोक-स्ववचनाभ्यां च बाधितोऽनेकधा मतः" ॥ २१ ॥
-न्यायावता०।
"पक्षः × × × प्रत्यक्षाद्यविरुद्ध इति वाक्यशेषः"-न्यायप्रवेशसू० पृ० १ पं० ६।
"साधयितुमिष्टोऽपि प्रत्यक्षादिविरुद्धः पक्षाभासः"-न्यायप्रवेशसू० पृ० २ पं० १३।
"प्रत्यक्षादयो वक्ष्यमाणलक्षणास्तैर्विरुद्धः निराकृतः प्रत्यक्षादिविरुद्धः। किम्? पक्षाभासः"-न्यायप्रवेशसू० वृ० पृ० १९ पं० १८।

"स्वरूपेणैव स्वयमिष्टोऽनिराकृतः पक्ष इति" ॥ ४० ॥-न्यायबिन्दुप्र० तृतीयप०।

"अनिराकृत इति-एतल्लक्षणयोगेऽपि यः साधयितुमिष्टोऽप्यर्थः प्रत्यक्षाऽनुमानप्रतीति-स्ववचनैर्निराक्रियते न स पक्ष इति प्रदर्शनार्थम्" ॥ ५० ॥ न्यायबिन्दुप्र० तृतीयप०।

"प्रत्यक्षनिराकृतो न पक्ष इत्यभिधानात्"-प्रमेयक० पृ० २१ प्र० पं० ६।

७-माने बा-भां० मां० विना।

"न च बाह्यार्थावेदकाध्यक्षस्य भ्रान्तत्वान्न तेन अनुमानबाधेत्यभिधातव्यम्, अन्योन्याश्रयात्-सिद्धे ह्यर्थाभावे तद्ग्राहि अध्यक्षं भ्रान्तं सिध्येत् तत्सिद्धौ च अर्थाभावानुमानस्य तेन अबाधेति"-प्रमेयक० पृ० २१ प्र० पं० ६। ८-त्वात् तथाहि अर्था-आ०। ९-त्वा तेना-वा० बा०। १०-यप्र-वा० बा०। ११-ति त्वत्वात् वा० बा०।

अपि च, तदनुमानं किं कार्यलिङ्गप्रभवम्, स्वभावहेतुसमुत्थं वा, उतानुपलब्धिप्रसूतमिति विकल्पत्रयम्। न तावत् प्रथम–द्वितीयपक्षौ कार्य–स्वभावहेत्वोर्विधिसाधकत्वाभ्युपगमात् "अत्र द्वौ वस्तुसाधनौ" इधि वचनात् ("अत्र द्वौ वस्तुसाधनौ" [न्यायबिन्दु० परि० २ सू० १९] इति वचनात्)। नापि अनुपलब्धिप्रसूतमिति पक्षः अनुपलब्धेरसिद्धेः(रसिद्धत्वात्) बहिरर्थस्य प्रतिभासनात्। उपलभ्यानुपलब्धिस्वा(स्त्व)भावा(व)साधनी सा च नियतदेश–कालमेवार्थाभावं गमयति न सर्वत्र सर्वदेति न ततोऽपि सर्वथा अभावसिद्धिः। तद् भावबाधकप्रमाणाभावात् नार्थाभावतो विज्ञप्तिमात्रसिद्धिः।

अथापि स्यात् नार्थाभावद्वारेण विज्ञानमात्रं साध्यते अपि त्वर्थ–संविदोस्सहोपलम्भनियमादभेदः चन्द्रद्वयादिवदिति वि(विधि)मुखेनैव साध्यत इति न पूर्वोक्तो दोषः, असदेतत्; अभेदस्य प्रत्यक्षेण बाधनात् यतः पुरस्थस्फुटवपुर्नीलादि प्रतिभाति हृदि रूपग्राहकाकारं बिभ्राणा संविच्चकास्तीति कुतोध्वान्तसं(कुतोऽर्थ–तत्सं)विदोरभेदः साधयितुं शक्यः शब्देऽश्रावणवत्(णत्ववत्) पक्षस्य प्रत्यक्षेण निराकृतेः, न वा(चा)भेदेऽपि प्रत्यक्षं भेदाधिगन्तृपलब्धमिन्दुद्वयादिवत् इति न तेव(तेन) बाधा यतो द्विचन्द्रादौ बाधादर्शनात् तस्य भ्रान्तत्वमस्तु स्तम्भादौ त्वर्थक्रियाकारिरूपोपलब्धि(ब्धे)स्तदभावास्त(त्स)त्यता ततो नील–बुद्ध्योर्भेद एव। असिद्धश्चायं हेतुर्मीमांसकमतेन विज्ञानव्यतिरेकेण बाह्यार्थस्यैवोपलम्भात् प्रत्यक्षार्थव्यतिरिक्तस्य तदा ज्ञानस्यानुपलक्षणात्। न चान्तः–सुखाज्ञा(द्या)कारज्ञानोपलम्भात् सिद्धो हेतुरिति वक्तव्यम्, सुखादेर्बाह्या(ह्य)संवेदनं प्रति व्यापारासंवेदनात्। नहि सुखादयः स्वरूपनिमग्नतया प्रतिभासमानास्तदैवार्थग्राहितया प्रतीयन्ते। न च समकालप्रतिभासनात् व्यापारमन्तरेणापि नीलादिग्राहकाः, तेषामपि तद्ग्राहकतापत्तेः। यदि च नीलो(लादी)नां सुखादिकं ग्राहकं तथासति तदभावे नीलादीनां ग्रहणं न स्यात्। नहि यद् यद्ग्राह्यं तत् तदभावे प्रतिभाति चक्षुरभाव इव रूपम् चक्षुःसमवधाने व(च) सुख(खा)भावेऽपि नीलमाभाति [?? नापि तस्य तद्ग्राहकम्। यदि च सुखादिरूपैव संविद् नान्या एवंसति सुखाद्यभावेऽपि नीलादिकस्य स्फुटतया प्रतिभासात् तदा मानसस्य च सुखादेर्नीलावभासावेप्यवभासनत्वासिद्धो नीलादीनां ग्रहणं न स्यात् नहि यद् यदग्राह्यं तत् तद्भाह्यियोः सहोपलम्भनियमः नियतकादाचित्कसहोपलम्भतो योनियमो युक्तः नील–पीतयोरपि तथाभावप्रसङ्गात् ततः सुखादिरूपा न बुद्धिः ??] नापि नीलोपलम्भकाले प्रतिभाति केवलस्य नीलस्यैव तदा प्रतिभासात्(सात् पश्चात्) त्वर्थप्रत्यक्षता अन्यथानुपपत्त्या गम्यते।

अन्ये नु(तु) मन्यन्ते पश्चादपि प्रत्यक्षते एव बुद्धिः प्रतीयते न पुनः सा सर्वदा परोक्षेत्यसिद्ध एव सहोपलम्भनियमः क्रमेण नील–तद्बुद्ध्योः प्रतिभासात् अथा(थ) नीलप्रतिभासकाले तद्बुद्धिः प्रत्यक्षा भवेत् तथापि सहोपलम्भश्च भवेत् भेदश्चेति नात्र विरोधः तथापि रूपाऽऽलोकयोर्भिन्नयोरपि सहोत्प(प)लम्भात् कथं सहोपलम्भा(म्भ)नियमस्य भेदेन सह विरोधसिद्धिः? न च कार्यकारणभावप्रतिबन्धतो ग्राह्यलक्षणत्वाच्च रूपाऽऽलोकयोर्भेदेऽपि सहोपलम्भः नील–तद्बुद्ध्योरपि प्रतिबन्धादेव सहोपलम्भसंभवात्। न च तयोस्तुल्यकालत्वात् प्रतिबन्ध एव न संभवतीति वाच्यम् एकसामग्र्यधीनतालक्षणस्य प्रतिबन्धस्य प्रत्यक्षनील–तद्बुद्ध्योः संभवात्। ततः सहोपलम्भेऽपि नाभेदो भवेत्। न चाभेदेन व्याप्तः सहोपलम्भः सिद्धः येन ततस्तत्सिद्धिः स्यात्। अथ द्विचन्द्रादावभेदे सहोपलम्भदर्शनाद् अन्यत्रापि ततोऽभेदः, नैतत् सारम्; दृष्टान्तमात्रात् साध्यसिद्धेरयोगात् अन्यथा हेतुवैयर्थ्यप्रसक्तेः। न चाभेदव्याप्तः कश्चिद्धेतुरस्ति। न च दृष्टान्तोऽपि सिद्धः चन्द्रद्वयादेरपि ज्ञानाद् भिन्नत्वेन प्रतिपादितत्वात्। अनैकान्तिकश्चायं हेतुः सर्वज्ञज्ञानस्य पृथग्जनचित्तस्य सहोपलम्भेऽपि भेदाभ्युपगमात्। न च सर्वज्ञज्ञानसंवेदनं विनापि पृथग्जनचित्तसंवेदनसंभवात् न तत्र सहोपलम्भनियम इति वाच्यम् यतः परदृशं विनापि तद्ग्राह्यं नीलादि पृथग्जनैरान्तराण्युपलम्भत(लभन्त) इति तद्दर्शनात् तदपि भिन्नमस्तु। अपि च, 'सह शिष्येण पण्डितः' इति 'सह'शब्दो भेद एवोपलब्धः ततो हेतुर्विरुद्धो भवेत् सहभावविवक्षायां भेदेन व्याप्तत्वात्। अथ 'सह'शब्दो नैव सहभावार्थवृत्तिः किन्तु एकार्थवृत्तिः ततः 'एकोपलम्भात्' इति हेतुर्विवक्षितः न चासौ विरुद्धः, असदेतत्; एकोपलम्भस्यासिद्धत्वात् तदसिद्धत्वं च नील–तद्बुद्ध्योर्भेदोपलम्भात्। तथाहि–बहिर्गतत्वेन देश–कालादिभिन्नतया ग्राह्यतया नीलं भिन्नमाभाति अन्तर्गतत्वेन सुखादिरूपतया ग्राहकरूपापन्ना बुद्धिराभातीति न तयोरेकोपलम्भः सिद्धः।

किञ्च, एकस्यैवोपलम्भो ज्ञानस्य, अर्थस्य वा? यदि ज्ञानस्यैव तदा हेतुरसिद्धः नहि परं प्रति ज्ञानस्यैवोपलब्धिः सिद्धा अर्थस्याप्युपलब्धेः। न च तस्याभावात् अनुपलब्धिः इतरेतराश्रयदोषात्। तथाहि–अर्थाभावे सिद्धे ज्ञानस्यैवैकस्योपलम्भः सिद्धो भवति तदुपलम्भसिद्धौ चार्थाभाव इतीतरेतराश्रयत्वम्। न चैकस्य ज्ञानस्योपलम्भ एवेति हेत्वर्थो युक्तः नीलादेरुपलम्भानिराकरणात्। एवं च कथमर्थाभावसिद्धिरित्यनैकान्तिक एव हेतुः। अथ अर्थस्यैवैकस्योपलम्भः एवमपि नार्थाभावसिद्धिः न च 'तथासंवेदनात्' इत्ययमपि हेतुः, असिद्धत्वात्। तथाहि–यादृग्भूतं ज्ञाने संवेदनं(नं न) तादृग् अर्थे स्वप्रकाशरूपत्वा(त्वात्) ज्ञानस्य इतरस्य च तद्विप–

---

१ अत्रे न्द्वो वा० बा० विना।

"अत्र द्वौ वस्तुसाधनौ एकः प्रतिषेधहेतुः" ॥ १९ ॥–न्यायबिन्दुप्र०।

" 'अत्र द्वौ वस्तुसाधनौ' इत्यभिधानात्"–प्रमेयक० पृ० २१ प्र० पं० ८। २–**धनादिवचनान्नाप्यनु**–भां० मां० हा० वि०।– **धनान्नाप्यनु**–आ०। ३–**लब्धिर**–भां० मां०। ४–**द्धा ब**–आ०।

"अनुपलब्धेरसिद्धत्वात् बाह्यार्थस्याध्यक्षादिनोपलम्भात्। किञ्च, अदृश्यानुपलब्धिस्तदभावसाधिका स्यात् दृश्यानुपलब्धिर्वा? प्रथमपक्षे अतिप्रसङ्गः। द्वितीयपक्षे तु सर्वत्र सर्वदा सर्वथा अर्थाभावाऽप्रसिद्धिः प्रतिनियतदेशादावेव अस्यास्तदभावसाधकत्वसंभवात्"–प्रमेयक० पृ० २१ प्र० पं० ९। ५–**लब्धिस्थाने भा**–वा० बा० विना। ६ **तदद्धा**–वा० बा०। ७–**विदोपलम्भ**–वा० बा० विना। ८ "द्विचन्द्रदर्शनवदिति विधिद्वारेणैव साध्यते"–प्रमेयक० पृ० २१ प्र० पं० १२। ९–**दस्य प्रत्युक्षेण** वा० बा०।–**दस्य प्रत्युपेक्षण** हा० वि०।–**दप्यस्य प्रत्युपेक्षण** भां० मां०। "अभेदपक्षस्य प्रत्यक्षेण बाधनात् शब्दे श्रावणत्ववत्"–प्रमेयक० पृ० २१ प्र० पं० १२। १० **पुरस्थ फुटंव**–**(पुरस्थं स्फुटव)**–वा० बा०। ११ **कुतोध्वंतंसं**–मां०। **कुतोध्वतंसवि**–भां०। **कुतोध्वंतसंविवि**–वा० बा०। १२ **शब्दे श्रावणाव**–वा० बा०। १३–**धिगत्रुप**–भां० मां०।–**धिगंत्रुमंप**–वा० बा०। १४ **बाध्यद्**–भां० मां०। १५ "अर्थक्रियाकारिस्तम्भाद्युपलब्धौ तु तदभावात् सत्यता"–प्रमेयक० पृ० २१ प्र० पं० १४। १६–**बुद्ध्याभें**–आ०।–**बुद्ध्यादेर्भे**–वि० सं०। १७ **न चान्तसु**–भां० मां०। **न चान्तासु**–वा० बा०। **न वान्तसु**–हा० वि०। १८–**पारसं**–आ०। १९–**लादीना सु**–वा० बा० विना। २०–**दिकां ग्रा**–वा० बा० आ० विना। २१–**भाति भाति चक्षु**–वा० बा० भां० मां०। २२ **एवंसन्ति** भां० मां० हा० वि० विना। २३–**खाद्याभावे** आ० विना। २४ **तदी मा**–वा० बा०। २५–**खादेनी**–वा० बा० विना। २६–**लावभासावप्येवभा**–आ० हा०।–**लावभासावप्यवभा**–वि०।–**लावभासाभावेप्यवभा**–वि० सं०।–**लावभावप्येवभा**–मां०।–**लावप्येवभा**–भां०। २७–**भावाद्धियोः** भां० मां० आ० हा० वि०। २८–**म्भनियमःऽनयतका**–वा० बा०।–**म्भनियतका**–भां० मां०। २९–**म्भतो यो नि**–हा० वि०।–**म्भन्तो योर्नि**–वा० बा०।–**म्भतोययोर्नि**–वि० सं०।

१ "ज्ञाते त्वर्थेऽनुमानादवगच्छति बुद्धिम्" इति मीमांसकाभिमतम् अष्टस० पृ० ५७ पं० ७। २ **अन्येऽनुम**–वा० बा०। **अन्येऽम**–आ०। ३–**त व** भां० मां०। ४ **परोक्षत्यसि**–भां० मां० हा० वि०। **परोक्षस्य सि**–आ०। ५–**तद्धियो प्र**–भां०।–**तद्धियोग प्र**–मां०। ६–**काले न बुद्धि प्र**–वा० बा० भां० मां० विना। ७–**क्षाभावात्** वा० बा० विना। ८–**म्भश्चाभ**–वा० बा०। ९ **सहोपलम्भान्नि**–वा० बा० विना। १० **सर्वज्ञान**–वा० बा०। ११–**त्तस**–वा० बा० विना। "तथा सर्वज्ञज्ञानस्य तज्ज्ञेयस्य चेतरजनचित्तस्य सहोपलम्भनियमेऽपि भेदाभ्युपगमादनेकान्तः"–प्रमेयक० पृ० २१ प्र० पं० १५।

अत्र पृथग्जनव्याख्या—

"एको पुब्बे चरित्वान मेथुनं यो निसेवति। यानं भंतं व तं लोके हीनं आहु पुथुज्जनम्" ॥ ८१६ ॥

–सुत्तनिपाते पृ० १२४।

"द्वे पुथुजना [अंधो च कल्याणको च] वुत्ता"–मज्झिमनिकाये पृ० २३१ अं० २। "अनरियो तु पुथुज्जनो" ॥ ३५ ॥ "नीचे पुथुजनो" ॥ ८४ ॥–अभिधानप्प० पृ० ६४ तथा १३८। १२ **न स**–भां० मां०। १३–**नरान्तरातराण्यु**–आ०। १४–**ण पिण्डि**–वा० बा०। १५–**शब्दे भेद एवोपलब्धिस्ततो** वा० बा०। १६ **एकेप**–भां० मां०। १७–**द्धौ व्यर्था**–वा० बा० विना। १८–**लम्भनि**–वा० बा० विना। १९ **तातद्ध**–भां० मां०। २० **अर्थो स्व**–वा० बा० विना।

र्ययात्। अर्थस्य हि ज्ञानाधीनः प्रकाशः जडत्वात् न त्व(स्व)यम् ततो यदि स्वप्रकाशनं तथा-
संवेदनं हेत्वर्थस्तदाऽसिद्धः(द्धिः) तदर्थस्य। अथ संवेदनसामान्यं स्वपरसंविदो हेतुः तस्य प्रतिबन्धो
वाच्यः यतः साधारणं सत् तदर्थ-ज्ञानयोः ज्ञानात्मतामेव साधयति। अथापि 'संवेदन'शब्दो
हेतुः सोऽपि प्रतिबन्धाभावादेव नं साध्यं साधयति। किञ्च, तदा(था)संवेदनं नीलादीनामभावसा-
धनत्वेनोपन्यस्यते, उत ज्ञानात्मकताप्रसाधकत्वेन? यद्याद्यः पक्षः स न युक्तः, हेतोर्विरुद्धत्वप्रसक्तेः
उपलब्धेः सत्तया व्याप्तत्वात् नह्यसदुपलभ्यते तथाभ्युपगमे वा ज्ञानावप्यसत्त्वप्रसक्तिः। न चासतो-
ऽनुपलम्भे द्विचन्द्रादेरनुपलब्धिप्रसक्तिः तस्यापि सत्तायोगित्वप्रतिपादनात्। यदि वा संवेदनं सति
ज्ञाने असति च चन्द्रद्वये उपलब्धमित्यनैकान्तिकमस्तु। अथ ज्ञानात्मकता तथासंवेदनात् साध्यते
तत्रापि वक्तव्यम्-किं ज्ञानात्मकत्वेन नीलादेः संवेदनम्, उत व्यतिरिक्ततया? प्रथमपक्षे ज्ञानात्मकं
संवेदनं नीलादेर्हेतुः स चाध्यक्षसिद्धोऽभ्युपगन्तव्य इति नापरं साध्यमस्ति यदर्थं हेतुः स्यात्।
द्वितीयपक्षेऽपि हेतुर्विरुद्धः भिन्नरूपं हि संवेदनं भेदमेव साधयति नैकत्वमन्यथा भेदोपरतिप्रसक्तेः
तदयमपि हेतुर्न युक्तः। इति न कुतश्चित् विज्ञप्तिमात्रसिद्धिः।

[उत्तरपक्षः—विज्ञानवादिभिर्योगाचारैः विज्ञप्तिमात्रस्य स्थापनम्]

अत्र प्रतिविदधति-यत् तावदुक्तम् 'कथं प्रत्यक्षप्रतीतवपुषां नीलादीनामभावः साधयितुं
शक्यते' इति, तत्र प्रत्यक्षेणार्थपरिच्छेदाऽसंभवात् कथं नीलादीनां प्रत्यक्षपरिच्छेद्यता? तथाहि-
प्रत्यक्षमर्थं तुल्यकालं वा प्रकाशयति, भिन्नकालं वा? तुल्यकालमपि प्रत्यक्षम्, परोक्षं वा? यदि
प्रत्यक्षं ज्ञानमर्थात्मानं तुल्यकालमवभासयति तथासति यदैव ज्ञानमवभासतेऽध्यक्षतया तदे(दै)व
नीलादिस्वरूपमपि परिस्फुटमाभाति स्वरूपनिष्ठयोर्द्वयोरपि प्रतिभासनात् कथं ग्राह्यग्राहकभावः?
तथाहि-ज्ञानं नीलाकारविविक्तं स्वरूपनिमग्नं हृदि सन्धीयते अर्थस्तु तद्रूपपरिहारे(रेण) बहिः
स्फुटवपुः प्रतिभाति। न च दर्शनप्रतिभासकाले नीलं स्वरूपनिष्ठं प्रतिभातीति तद्ग्राह्यं युक्तम्
ज्ञानस्यापि नीलावभासकाले प्रतिभासनात् तद्ग्राह्यतापत्तेः। न च दर्शनं बहिरर्थसंविदं प्रति ग्रहण-
क्रियामुपरचयतीति तद् ग्राहकम् नीलं तु तत्प्रतिबद्धप्रकाशतया ग्राह्यमिति वक्तव्यम्, नील-दर्शन-
व्यतिरिक्ताया ग्रहणक्रियाया अभावात् यतो न तथाभूततद्वयव्यतिरिक्ता ग्रहणक्रिया प्रतिभाति। न च
तामन्तरेण कर्तृ-कर्म्मते नील-बोधयोर्युक्ते अतिप्रसङ्गात्। भवतु वा तद्व्यतिरिक्ताऽपरा क्रिया तथा-
पि परोक्षायां तस्यां नीलादेः कर्मसम् बन्धोतस्यं(कर्मत्वं बोधस्य) च कर्तृत्वमतिप्रसङ्गतोऽयुक्तमिति
प्रतिभासना(समान)तनुः अभ्युपगन्तव्या तथाभ्युपगमेऽपि च किंचित्(किं) सा स्वरूपेण प्रतिभाति,
उत तद्ग्राह्यतयेति वक्तव्यम्। प्रथमपक्षे क्रिया स्वरूपनिमग्ना प्रतिभातीति नीलम् बोधः ग्रहणक्रिया
चेति त्रितयं स्वतन्त्रमाभातीति न कर्म-कर्तृ-क्रियाव्यवहृतिर्युक्तिमती। न च परस्परस्वरूपविविक्त-
निर्भासादेव कर्म-कर्तृ-क्रियाव्यवहारः, स्तम्भादेरपि तथापरस्परव्यवहारप्रसक्तेः। अथ ग्राह्यतया
क्रिया प्रतिभाति तदा तस्या अप्यपरक्रिया विषयीक्रियमाणायाः कर्मता तत्क्रियाया अप्यपरक्रिया-
न्तरविषयीक्रियमाणायाः कर्मतेति निरवधिः क्रियापरम्परा प्रसज्येत। अथा(थ) क्रियान्तरमन्तरेण
ग्रहणक्रियाया ग्राह्यता, नन्वेवं नीलादेरपि ग्रहणक्रियाव्यतिरेकेण स्वप्रकाशवपुषः ग्राह्यता समस्तु
तथा च नीलादीनां स्वरूपमेव प्रकाशात्मकमिति विज्ञप्तिमात्रमेव सर्वं भवेत्। अपि च, बोधककाले
(बोधकाले) यदि संवेदनक्रिया विद्यमाना तदा समानकालतया प्रतिभासनात् कथं ज्ञानस्य संवित्क्रिया-

---

१ **प्रकारः प्रकाशः** वा० बा०। २-**त्वान्नन्वय ततो** आ०।-**त्वान्नत्वायं ततो** हा०।-**त्वान्नत्वाय ततो** वि०। ३-**सिस तद्**-वा० बा०। ४-**सामां स्वप**-भां० मां०। ५-**शब्दे हे**-भां० मां०। ६ **न साधयति** भां० मां०। ७ **सत्ताया** वा० बा० आ०। ८-**सता नु**-वा० बा० विना। ९ **सत्वायो**-वा० बा० भां० मां०। १० पृ० ३४९ पं० २५। ११ **तन्न प्र**-वा० बा० आ० हा० वि० विना। १२-**त्यक्षज्ञा**-वा० बा० भां० मां० विना। १३ **यदेव** हा० वि०। १४-**नमेव भा**-वा० बा० विना। १५ **तथैव** वा० बा०। १६ **संधेय**-आ० विना। १७-**दं बहिरर्थग्रहणक्रिया**-वा० बा०। १८-**क्ता क्रिया** आ०। १९-**सम्बन्धो तस्य** भां० मां० आ० हा०। २०-**स्य कर्तृ**-वा० बा०। २१-**ङ्गतो यु**-भां० मां० हा० वि०। २२-**ति भास तनुः अ**-वा० बा० वि० विना। २३ **किञ्चि सो स्व**-वा० बा०। २४ **त्रितीयं** वा० बा० विना। २५ **अथार्थ क्रिया**-आ०। **अर्थाक्रि**-भां० मां०।

(यां) प्रति कर्तृता? नहि समानकालयोः सव्येतरगोविषाणयोरिव हेतुफलभावः। अथ बोधोत्तरकाल-
भाविनी क्रिया तथापि यदा ज्ञानसत्ता न तदा संवित्क्रिया यदा तु संवेदनक्रिया प्रतिभाति न तदा
ज्ञानप्रतिभास इति कथं हेतुफलभावः? न च पूर्वं स्वरूपेण बोधः प्रतिभातः पश्चात् नयनादिसामग्री-
वशात् संवेदनक्रियायुक्तो भातीति कर्त्ताऽसाविति वक्तव्यम् यतो यदा संवित्क्रियायुक्तो बोधः प्रती-
यते न तदा तत्पूर्वदशावगमः यदा च तदवगमः न तदा संविद्युक्तावस्थाधिगतिरिति न पूर्वापरका-
लावगतिस्तयोरवस्थयोः तदभावे च कथं बोधस्य ग्रहणं प्रति कर्तृताप्रतीतिः? अथ नीलानुभवसमये
पूर्वदशां स्मरन् बोधस्यानुभवं प्रति कर्तृतां प्रतिपद्यते, अयुक्तमेतत्; नीलपरिच्छेदकाले बोध-ग्रहणयोः
परस्पराऽसंसक्तयोः समानकालयोः प्रतिभासनात् कर्तृतावगमासम्भवात्। न च बोधस्य पूर्वावस्था-
मध्यवस्था(स्य)पि स्मरणं ग्रहणावस्था(स्थां) प्रतिपद्यत इति कथं तत् कर्तृतामुद्द्योतयितुं प्रभुः(भु)?
न च बोधात्मैवात्मानमुपलभत इति कर्तृतावगतिः यतो यदा नीलग्राहकमात्मानं बोधः प्रतिपा(प)-
द्यते न तदा पूर्वसत्तामनुभवकर्त्री(त्रीं) प्रतिपद्यत इति कथं ग्रहणं प्रति जनकतामात्मनोऽसावधिग-
च्छति? न च प्राक्तनीमग्रहणावस्था(स्थां) नीलाऽवभासकालेऽसावध्यवसा(वस्यति) प्रतिभासयोः
युगपद्विरुद्धयोरापत्तेः तस्मात् समानकाले(लो) बोधो न ग्रहणक्रियामुपजनयितुं समर्थ इत्य-
ग्राहक एव।

किञ्च, यदि बोधो व्यतिरिक्तां ग्रहणक्रियामुपरचयति नीलस्य किमायातं येन तद् ग्राह्यं भवेत् विज्ञानं तद्ग्राहकमिति। न च संविदुत्पत्तावपरोक्षतया नीलमाभातीति ग्राह्यं संविदुत्पादेऽपि तस्या-
प्रकाशात्मकस्य प्रतिभासायोगात्। तथाहि-नीलादिरर्थो जडरूपत्वात् न स्वयं प्रतिपत्तिगोचरताम-
वतरतीति दर्शनं प्रकाशकमस्याभ्युपगतम्, यदि पुनः स्वप्रकाशात्मकं नीलं स्यात् तदा 'विज्ञप्तिरूपं
नीलम्' इति परवाद एवाभ्युपगतो भवेत्। यच्चाप्रकाशात्मकं वस्तु तत् प्रकाशसङ्गावेऽपि नैव
प्रकाशते यतो न प्रकाशात्मा नीलं सङ्क्रामति भेदप्रतिहतिप्रसङ्गात्। न चार्थाकारकार्यतया प्रकाश-
स्यार्थस्य प्रत्यक्षता, यतोऽपरोक्षाकाररूपत्वे तस्य प्रत्यक्षता युक्ता यथा नीलस्वभावतायां नीलस्य
नीलरूपता न तु प्रकाशात्मनं(नः) कार्यस्योद्भूतेः अर्थकार्यतया हि तत्सम्बन्धिता प्रकाशस्य सङ्गता
यथा नयनकार्यतया तत्सम्बन्धिता नं तु तत्स्वरूपं प्रकाशः। अथेन्द्रियाणां ज्ञाने स्वरूपाऽनर्पणाद-
(दप्रत्य)क्षता अर्थस्य तु तत्र स्वरूपपरिच्छेदात् प्रत्यक्षता, असदेतत्; अर्थस्य प्रत्यक्षस्वरूपासम्भवात्
यतो न नीलादेः स्वरूपं बहिरुन्मुखताऽप्रतीतिः(?)अथाप्यपरा बहिरुन्मुखता तत्रास्ति तथापि स्वरूप-
मात्रनिमग्ना प्रतिभासमानमूर्त्तिः सा तृतीया सिद्धेति न तद्वशाद् बोधस्य ग्राहकता सिद्धो(द्धा) तन्न
नील-संविदोस्तुल्यकालं प्रतिभासनादपरव्यापाराभावतः स्वस्वरूपनिमग्नयोर्वेद्यवेदक(कता) न च नील-
तत्संवेदनद्वयस्य स्वरूपनिमग्नस्य स्वतन्त्रतयावभासने तदुत्तरकालभावी कर्म-कर्त्रभिनिवेशी 'नीलमहं
वेद्मि' इत्यवसायो न स्यात् नहि पीतदर्शने नीलोल्लेख उपजायमानः संलक्ष्यते भवति च तथाध्य-
वसायी विकल्प इति तयोर्ग्राह्यग्राहकतेति वाच्यम्, मिथ्यारूपकल्पनया ग्राह्यग्राहकरूपतायाः परि-
च्छेदासम्भवात्। तथाहि-'नीलम्' इति प्रतीतिः पुरोवर्त्ति नीलमुल्लिखन्ती वर्त्तमानदर्शनानुसारिणी
भिन्ना लक्ष्यते, 'अहम्' इत्यात्मानं व्यवस(स्य)न्ती स्वानुभवायत्ता लक्ष्यपरा प्रतीयते, 'वेद्मि' इति
प्रतीतिरप्यपरैव क्रियाव्यवसितिरूपा परस्पराऽव्यतिमिश्रसंवित्तित्रितया(य)मेतत्। नातः कर्म-
-कर्तृ-क्रियाव्यवस्था।

भवतु वैकेयं कल्पनाप्रतीतिः कर्म-कर्तृ-क्रियाव्यवसायिनी तथापि नातो ग्राह्य-ग्राहकता सत्या,
मृगतृष्णिकासु जलाध्यवसायाज्जलसत्यताप्रसक्तेः। न चात्र बाधातोऽसत्यता प्रकृतेऽप्यस्य समा-
नत्वात्। तथाहि-कल्पनोल्लिख्यमानस्य कर्म-कर्तृभावस्य नील-संविदोः स्वतन्त्रतया निर्भासोऽस्त्येव
बाधक इति कथं न ग्राह्यग्राहकभावोऽसत्यः? किञ्च, भ्रान्तेऽपि प्रत्यये ग्राह्यग्राहकतोल्लेखे(खो) दृश्यते,

---

१-**स्तयोस्तदव**-भां० मां०। २-**वसाद**-आ० विना। ३-**साति भा**-वा० बा०। ४ **तत् तस्या**-आ० हा० वि०। ५-**क प्र**-वा० बा०। ६-**भा यो**-आ०। ७ **पराट् वाद**-वा० बा०। ८-**वतयां** वा० बा०। ९-**काशोत्मन का**-वा० बा०।-**काशात्मकं नं का**-हा० वि०। १० **न नु त**-वा० बा० आ०। ११ **यतो नी**-वा० बा० विना। १२ **सिद्धौ त**-वा० बा० विना। १३-**द्यतोदक**-वा० बा०। १४-**त्तित्वतायामेतत्** भां० मां० हा० वि०।-**त्तित्वताया मतव नात क**-आ०।

न च तदुल्लेखमात्रभ्रान्तदर्शनावभासिनः केशादेः सत्यता। अथ तत्र बाधकसद्भावादसत्यता, न; बाधाऽयोगादित्यभिधानात्। [?? न च बहिरर्थाभावेऽपि कथं ग्राह्यताऽध्यवसायादयः वितथदर्शनावसेये केशकलापाध्यवसायेऽप्य(प्यस्य) समानत्वात्। अथात्र सत्यकेशग्राह्यताऽध्यारोप्यते वितथकेशाभावे अर्थाभावे तु सर्वसंविदं न क्वचित् पूर्वदर्शनदृष्टा ग्राह्यता वर्त्तमानदर्शनेऽध्यारोप्यते तत्राप्यपरपूर्वदर्शनदृष्ट तत्राप्येवमित्यनादिरध्यारोपपरम्परा बहिरर्थाभावेऽपि व्यवहारनिबन्धनं युक्तेवेति ??]। अपि च, तुल्यकालं प्रकाशमानवपुर्नीलमुद्भासयन्ती(न्तीं) प्रतीतिमभ्युपैत्य(भ्युपेत्य) व्यापाराभावाद् ग्राह्यग्राहकभावे(वः) प्रतिक्षिप्तः सैव प्रतीतिर्विचार्यमाणा न सङ्गच्छते कुत एवार्थग्राहिणी स्यात्? तथाहि–अनुभूयमानमर्थाक(का)रं विहाय नान्या प्रति(?)यदाभाति यतः प्रकाशमानं नीलादिकं बहिः अन्तश्च सुखादि स्वसंविदितं विरहय्य नान्या संवित् सता(ती) कदाचित् प्रतिभाति इत्यसती सा कथमर्थग्राहिणी भवेत्? न च सुखादिकमेवाहंकार(रा)स्पदस्य(?)तं हृदि परिवर्तमानं नीलादेर्ग्राहकम्, मुत्पादेः(सुखादेः) प्रतिभासमानवपुषो ग्राहकत्वानुपपत्तेः। तथाहि–सुखादयः स्वसंविदिता हृदि प्रकाशन्ते नीलादयस्तु बहिस्तथाभूता एवाऽऽभान्ति, न च परस्पराऽसंसृष्टवपुषोस्तयोः समानकालयोः वेद्यवेदकता, तुल्यकालता(त)या प्रकाशमाननील-पीतयोरपि परस्परतस्तद्भावापत्तेः। न च सुखादिराकारः स्वपरप्रकाशतया प्रतिभासमानो नीलादेर्वेदकः सवितृप्रकाश इव घटादीनाम्। यतो दर्शनात्मनः प्रकाश एव किं बहिरर्थावभासः, आहोस्विद् दर्शनकाले तेषां प्रत्यक्षात्मता? आद्ये विकल्पे ज्ञानात्मनः प्रकाशः स्वसंविद्रूपोऽनुभवः तत् ज्ञानस्य रूपं न बाह्यार्थात्मनाम् अन्यथा प्रत्यक्षात्मतया तयोरभेदप्रसङ्गः। तन्न दर्शनानुभव एव नीलानुभवः। अथ दर्शनसमये प्रत्यक्षं नीलादिस्वरूपं तेषामनुभवः; नन्वत्रापि दर्शनोदयसमये यदि पदार्थप्रत्यक्षता तथासति सामग्रीवशात् प्रत्यक्षाकारं नीलमुत्पादितमिति दर्शनवत् तत् स्वसंविदितं प्रसक्तम्। अत एव दृष्टान्तोऽपि अत्रासङ्गतः। तथाहि-सवितृप्रकाशः स्वरूपनिमग्न एवाभाति घटादिरपि स्वात्मनिश्च(ष्ठ) एव भासत इति नानयोरपि परस्परं प्रकाश्यप्रकाशकभावः। अपि च, आलोकोद्(काद्) घटादिः प्रकाशरूपः प्रादुर्भवतीत्यालोकः प्रकाशकः स्यात्, उपकाराभावे व्यतिरिक्तोपकारप्रादुर्भावे वा घटादीनां प्रकाशायोगात्। न चात्राहङ्कारास्पदनंतर्दनं(दमन्तर्दर्शनं) बहिःपरोक्षाकारमर्थं जनयति, तुल्यकालतया हेतुफलभावायोगात् उपकार्योपकारकभावमन्तरेण बाह्यार्थानामन्तर्दृशां च तद्य(वेद्य)वेदकभावानुपपत्तेः सर्वं वस्तुखं(सं)विन्मात्रकमेवेति स्थितम्।

[?? न च नीलादिव्यतिरिक्तबोधानभ्युपगमे नीलस्वरूपः प्रकाशः पीतस्य प्रकाश न नीलप्रकाश एव पीतस्य प्रकाशोऽभ्युपगम्यते ??] तयोर्भेदेन प्रतिपत्तेः नहि नीलप्रकाशः पीतप्रकाशानुगामितया प्रतिभाति नापि पीतात्मानुभवो नीला(ल)स्वरूपानुभवानुप्रविष्टः प्रकाशत इति कथं नील-पीतयोरनुभवः? तथाभ्युपगमो(मे) वा सर्वपदार्थसङ्कर्य(साङ्कर्य)प्रसक्तिः। न च 'अनुभवः' 'अनुभवः' इत्येकरूपतयोत्पत्तेरनुभवत्वे(स्यै)कता; प्रतिपदार्थं 'स्वरूपम्' 'स्वरूपम्' इत्येकत्वाध्यवसायोत्पत्तेः सर्व-

१-भासित के-आ० हा० वि०। २-धायो-वा० बा० विना। ३-वसेयो के-वा० बा०।-वसे के-भां० मां०। ४ अथात्र समानत्वादथात्र सत्यं के-भां० मां०। ५ सत्यं के-आ० हा० वि०। ६-विदा न भां०। ७ युक्तेवे-आ० विना। ८-य तान्या आ०। ९-मान नी-भां० मां०। १०-रप नान्या सं-हा० वि०।-रप ान्यां सं-भां० मां०।-रप न्या संवि शत कदा-आ०। ११-कारस्पदस्यं तं वा० बा०।-कारस्प तं हा०। १२-कमुत्पादादेः वा० बा० विना। १३-संस्पृष्ट-वा० बा०। १४-खाराका-भां० मां० आ० हा० वि०। १५-र्शना का-वा० बा० विना। १६-द्रूपांनु-आ०। १७ दर्शनानुभव एव नीलानुभवा एव नीलानुभवाऽथ दर्शनानुभवो एव नीलानुभवोऽथ दर्शनसम-वा० बा०। १८-भवोऽत् प्रदर्श-आ०। १९ यदपि पदा-वा० बा० विना। २०-निश्चय ए-आ०।-निश्चय ए-भां० मां० हा० वि०। २१ आलोकोदघटा-हा०। आलोकोद् घाटा-वा० बा०। २२-भावेऽपि व्य-आ०। २३-स्पदनंतदर्शनंतदर्शनं बहिः-आ०।-स्पदनतर्दनं बहि प-वा० बा०। २४-न्तदृशां वा० बा०।-न्तर्दशां आ०। २५ च नह्यवेदंक-भां० मां०। च नह्यवेदक-आ०। २६ सर्वं वसुखंवि-मां०। सर्वं त्रसुखंवि-भां०। २७-काश न नीलप्रकाशन नीलप्रकाश एव वा० बा०। २८-काशानुरागितया वा० बा० विना। २९ नापि चात्मानुभावा नीलास्व-मां०। नापि वात्मानुभावा नीलास्व-भां०। ३०-तयोरेनु-(रेकानु)-वा० बा०। ३१-त्पत्तिर-भां० मां०। ३२-दार्थं स्वरूपं मित्येकत्वा-आ०।

पदार्थानां स्वरूपस्यैकताप्रसक्तेः। [?? अथ प्रत्यक्ष एव पदार्थस्वरूपाप्रत्यक्षं तद्रूपत्वे ग्रहणरहितस्ये(स्यै)वं तस्य प्रतिभासप्रसङ्गः। अथ व्यतिरिक्तं प्रत्यक्षस्वरूपम् एव(वं)सति सामग्रीबलादुपजातं तदेकत्वभासनम् नीलादेस्तु परोक्षत्वात् स्वरूपा(पे)ण परिच्छेदासम्भवः। न चाध्यक्षावभासमानरूपोदय–(ये) नीलमध्यक्षीभवति भिन्नाभिन्नविकल्पप्रसङ्गतोनुपपत्तेः??]। अथाध्यक्षं नीलमपरोक्षस्वभावं जनयतीति ग्राहकम् नीलादेस्त्वध्यक्षरूपतया जन्यमानत्वात् ग्राह्यता, असदेतत्; एककालत्वे नील-दर्शनयोर्जन्यजनकभावायोगात् भिन्नकालत्वे दर्शनबलादध्यक्षरूपतयोपजायमानं स्वप्रकाशकमिति कथं ग्राह्यता भवेत्? अपि च, यदि प्रकाशविकलं नीलं सिध्यति तदा प्रकाशरहितस्य नीलस्य प्रकाशमाविर्भावयन्ती बुद्धिर्भवेद् वेदिका। न च दर्शनविकलस्य परिच्छेदः संभवति तस्य दर्शनेनैव परिच्छेदात्। यदा तु दर्शनमुत्पद्यते तदा तत्कालानमेवार्थमवभासय(यि)तुमलम् पूर्वसत्तां तु तस्य कथमधिगच्छति? न च प्रत्यक्षमपरं प्राग्भावमर्थस्य वेत्ति तत्राप्यपरापरप्रत्यक्षाभ्युपगमादनवस्थावप(स्थाप)त्तेः। न चार्थस्य प्राग्भावमन्तरेण प्रत्यक्षतानुपपत्तेस्तस्य प्राग्भावोऽनुमानेन साध्यते, प्रत्यक्ष(क्षा)भावेऽनुमानस्याप्रवृत्तेः। यदि प्राग्भावोऽर्थस्य प्रत्यक्षतः सिद्धः स्यात् तदा तत्प्रतिबद्धोत्तरकालभाविप्रत्यक्षादनुमीयते न चाध्यक्षोदयवेलायाः प्रागर्थसत्ता सिद्धेति तत्प्रतिबद्धतया दर्शनलक्षणस्य लिङ्गस्याप्रतिपत्तेः। न ततोऽप्यर्थप्राग्भावः सिध्यति। न च प्रागर्थस्य प्राग्भावः सिध्यति, न च प्रागर्थसद्भावमन्तरेण नियता(त)देश-काल-दशापरिगतदर्शनानुदयप्रसक्तिः स्वप्नादौ तथाभूतार्थाभावेऽपि कुतश्चिद् वासनादेर्निमित्तम्(त्तात्) प्रतिनियताकारदर्शनादयो(नोदया)नुभा(भ)वात् अर्थस्य च नियताकारदर्शनाहेतुता। जाग्रद्दशायामपि प्राग्भाविनो(विता) न सिद्धा। न च प्रागर्थसत्ताविरहे भवतोऽपि किं प्रमाणमिति कर्त्तव्य(वक्त)व्यम्, यतो यथा नीलविविक्ततया नीताकारस्य परिच्छेदात् तत्र नीलरूपताऽभावः तथा परिस्फुटप्रतिभासस्य नीलाकारस्य वर्त्तमानतया प्रतिभासनात् तस्य पूर्वरूपताविरहः यदि हि तत् तद्रूपं स्यात् तथा(दा) तथैवावभासेत न ह्यन्यरूपमन्यरूपेण प्रतिभाति दर्शनस्यैव वैत(तथ्य)प्रसङ्गात्। न च वर्त्तमानप्रतिभासं नीलं पूर्वरूपतया प्रतिभातीति पूर्वरूपताविरहस्तस्य सिद्धः यथा च पूर्वरूपतां न किञ्चिज्ज्ञानमावेदयति तथा क्षणभङ्गे साधयद्भिः प्रतिपादितमिति नेहोच्यते। तदेव(वं) दर्शनकाल एव नीलादेरवभासनान्न ग्राह्यता।

[?? न च तद्दर्शनोपरतावपि परदृशि नीलादेरवभासनात् साधारणतया ग्राह्यता दर्शनां(नं) पुनरसाधारणतया स्वसन्तानान्तर इति ग्राहकम् साधारणतया पदार्थपरिच्छेदासंभवात्। तथाहि-स्व-दर्शने वस्तु प्रतिभातीति स्वस्वदृष्टतया प्रतीयताम् नरान्तरदर्शनपरिच्छेदेन(म)न्तरेण तद्द(द्दृ)ष्टतया कथं तत्परिकल्पना। न हि परदृगमनन्त(गवगममन्त)रेण तदेव(तदव)गम्यता न च तस्य प्रत्येतुं

१ पदार्थस्वरूपपदार्थस्वरू प्रत्यक्षं वा० बा०। २-रहितास्यैव वा० बा०। ३-व स त-भां० मां०। ४-भास प्रत्यक्ष-भां० मां०। ५-पम् सति वा० बा०। ६-जातं तदेकवभासतम् वा० बा०।-जातं त तदेकभासं तम् भां० मां०।-जातं त तदेक ाभासतम् हा० वि०। ७-त्वाद्रूपेण आ० हा० वि०।-त्वा पेण भां० मां०। ८-म्भवो न चाध्यक्षाद्रूपेण परिच्छेदासंभवो न चाध्यक्षावभा-भां० मां०।-म्भवावो न चा ाऽरूपादय-वा० बा०। ९ भिन्ना वि-वा० बा०। १० दर्शनं बला-वा० बा० विना। ११-मानस्व-वा० बा० विना। १२-कल नीलमिति सि-आ०।- कलं सि-वा० बा०। १३-काशमाविर्भा-भां० मां०। १४ बुद्धिर्भावेदिका वा० बा०। १५-कल्पस्य वा० बा०। १६ तदा तदा तत्कालानमेवा-भां० मां०। १७ तत्कालानविमेवार्थ-वा० बा०। १८-दवस्था-वा० बा०। १९ न वा-आ० हा० वि०। २०-बद्धातिबद्धोत्तर-भां० मां०। २१ न वा-वा० बा० आ० हा० वि०। २२ लिङ्गस्यालप्र-भां० मां०। लिङ्गस्य लिङ्गस्याप्र-आ०। लिङ्गस्यप्र-वि०। २३ तदाभू-वा० बा०। २४-दशनाद-भां० मां०।-दर्शद्-आ०। २५-कालदर्शनहेतु जाग्र-वा० बा० विना। २६-भासे न ह्य-वा० बा० विना। २७-स्य वेत-हा० वि०।-स्य चेत-भां० मां०। २८ पूर्वं रू-भां० मां०। २९ न च मर्दर्शनो-वा० बा०। ३० तदर्शनोप-मां०। तर्शनोप-भां०। ३१ परिद-भां० मां० आ० हा० वि०। ३२ स्वसंतातानान्तर-वा० बा०। स्व तानान्तर-भां० मां०। ३३-भातीते स्व-वा० बा० भां० मां० हा० वि०। ३४-प्रती तां नतान्त-हा० वि०। ३५-दनान्तरे-मां० हा० वि०।-दनातरे-भां०। ३६-ण दृष्ट-भां० मां०। ३७-कल्पयतां न वा० बा०। ३८ न च स्य वा० बा०। अत्र 'तदवगम्यता तस्य प्रत्येतुं शक्या' इति पाठः संभाव्यते।

शक्ता यतः साधारणतया स्वसन्तताविव प्रतिभाति न सन्तानान्तर प्रति साधारणमर्थस्य प्रकाशयति अन्वयबलेनानुमानस्य प्रवृत्तेः तस्य च साधारण एव परिच्छेदात्, नानुमानं 'अदृष्टमेवायमर्थमवगच्छति' इति एवं साधारणतां वस्तुनः प्रतिपादयति यथा च साधारणमायां(णतायां) न किञ्चित् प्रमाणं प्रवर्त्तते तथा प्रतिपादितमद्वैतं निराकुर्वद्भिः। ततोऽसाधारणतया बोधवन्नीलादिकमपि हृदिता ??] न च समानकालप्रतिभास(सा)विशेषेऽपि चिद्रूपतया बोधो ग्राहकः अर्थस्त्वचिद्रूपत्वाद् ग्राह्यः यतो दर्शनस्यापरोक्षात्मतैव चिद्रूपता अपरोक्षताव्यतिरिक्तायाः चिद्रूपतायाः केनचिदप्रतिपत्तेः सा च नीलादेरपि स्वरूपभासमानमूर्त्तेरस्तीति कथं ना(न) बोधात्मकता? न च नीलादेर्बहीरूपतया प्रकाशनाद् ग्राह्यता, संविदोऽपि(?)नीलादिकमपि हृदि प्रतिभास(समा)नाया बहीरूपतासङ्गावाद् ग्राह्यतापसक्तेः [?? अथ संविदो ग्राहकत्वं बाह्योन्मुखतया प्रकाशता, असदेतत्; संविदाकारव्यतिरेकेण तत्र तस्य भेदप्रतीतेर्नैकता एवं तर्हि पदार्थानुभवोऽप्यध्यक्षतो भिन्नः प्रतिभातीति कथमेकत्वाध्यवसायेऽपि न तस्य भिन्नता ??] ततो नीलात्मे(त्मै)वाऽपरोक्षरूपः प्रतिभाति तद्व्यतिरिक्तस्यानुभवात्मनो नीलग्राहकस्यादर्शनात् स्वरूपेणाप्रतिभासमानस्य चार्थव्यवस्थापकत्वासंभवात् स्वसंवेदनरूपौ नीलादयः सिद्धाः। अथ प्रकाशमाननीलव्यतिरिक्तप्रकाशाभावा(वात्) 'नीलस्य प्रकाशः' इति भेदप्रतिपत्तिर्न स्यात्, असदेतत्; भेदाभावेऽपि 'शिलापुत्रकस्य शरीरम्' इति भेदाध्यवसायदर्शनात्। अथात्र अभेदस्य प्रत्यक्षताद् भेदा वाच्यते (क्षत्वाद् भेदो बाध्यते)। ननु नील-तद्धियोरपि भेदोल्लेखः कल्पनारचितोऽविनिर्भागावभासाद् बाध्यत एव [?? अध्यक्षत परोक्षा संविदपगम्यते तेनापरोक्षनीलावभासतद्बुद्धेरपि परिच्छेदपुरिसच्छिरिति न दूषणावकाशः परोक्षेव बुद्धिरर्थमुद्भासयति??] अर्थस्तु बहिर्देशसंबद्धः प्रत्यक्षमनुभूयते। आह च भाष्यकारः- "स हि बहिर्देशसंबन्धः(बद्धः) प्रत्यक्षमुपलभ्यते" [मीमांसाद० पृ० ७ पं० २३] इति, असदेतत्; बुद्ध्यध्यक्षतामन्तरेण नीलादेस्तद्ग्राह्यत्वायोगात्। यदि ह्यपरोक्षा बुद्धिर्नीलप्रतिभासकाले भवेत् तदा युज्येत वक्तुम्-'बुद्धिरर्थान् गृह्णाति' इति, यदा तु बुद्धिस्तदा न प्रतिभाति तदा नीलादेरपरोक्षस्याऽप्रादुर्भाव एवोक्तः स्यात् न ग्राह्यता। किञ्च, यथा परोक्षार्थसद्भावात् तदवभासिनी बुद्धिरनुमीयते तथात्मना(नो) व्यापारोऽध्यक्षतया प्रतिभासनात् सा तदवभासिन्यप्यनुमीयताम्। न चात्मनोऽपि ग्राहिका 'अहम्' इति बुद्धिरस्त्येव इति वक्तव्यम्, परोक्षत्वे तस्याग्रहकत्व(त्वा)योगात् स्वरूपेणैव वात्मा प्रतिभातीति स्वसंवेद(द्य) एव युक्तः। [?? न चात्मा सत्तादिरूपेण ग्राह्यः (ग्राहकः) तत्पक्षरूपेण ग्राह्य इति ग्राह्यग्राहकयोर्भेदोऽस्तीति वक्तव्यम्, सत्तादिपरिच्छेदे आत्मपरि-

---

१ शक्त्या य-आ०। २-नस्य वृ-वा० बा० विना। ३-मानमद-वा० बा०। ४-मर्थं वग-भां० मां० आ० हा० वि०। ५-णतां वास्तु-वा० बा०। ६-मायायां वा० बा० विना। ७ अद्वैतनिराकरणं च पृ० २८५ पं०६। ८-या बाधवन्नीलादिकमपे हृदिता वा० बा०। ९ कथंतां बो-हा०। १०-ह्यतः प्र-भां० मां० आ० हा० वि०। ११ तत्र स्या भे-वा० बा०। १२-प्रतीतेर्नैक-आ० हा० वि०। १३-स्यादर्शनादर्शनात् वा० बा० भां० मां० हा०। १४-स्य वा-मां० विना। १५-पादी नी-वा० बा०। १६-भावनी-वा० बा० विना। १७-दाव्यव-वा० बा० भां० मां० हा० वि०। १८-तद्धितयो-भां० मां० हा० वि०। १९ भेदाल्लेख दाल्लेख क-भां० मां०। भेदाल्लेखक-आ० हा० वि०। २०-रचितोवनिर्भागाद्विभासाद् आ० हा० वि०।-रचितोवनिर्भागाद्वि भा द् भां० मां०। २१-ध्य त प-वा० बा०। २२-परोक्षे च वा० बा०।

२३ "स बहिर्देशसंबद्ध इत्यनेन निरूप्यते"-श्लो० वा० शून्य० श्लो० ७९ पृ० २९१।

"स बहिर्देशसंबद्ध इत्यनेन ननूच्यते"-तत्त्वसं० का० २०७० पृ०५७८।

"आकारवान् बाह्योऽर्थः स बहिर्देशसंबद्धः प्रत्यक्षमुपलभ्यते इत्यनेन ग्रन्थेन भाष्यकृता शबरेण ××× प्रतिपादितम्"-तत्त्वसं० पञ्जि० पृ० ५७८ पं० १५।

२४ बुद्ध्येध्यक्षता-मां०। बुध्यक्षता-हा० वि०। २५-राक्ष-वा० बा०। २६-ग्राहाकत्वयो-वा० बा०। २७-ण चा-वा० बा०। २८ न वात्मा हा०। २९ ग्राहाः वा० बा० आ०। ३०-च्छेदे आत्मना परिच्छेदात् आ० हा० वि०।-च्छेदे त्मनाऽपरिच्छेदात् वा० बा०।

च्छेदात्। यदि हि सत्तांबोधपरिच्छेदेन तदा आत्मसत्तादिपरिच्छेदोऽन्यथा सत्तादेः सर्वत्र भावाद् वात्मसत्ता परिच्छेत्तु बोधरूप एवात्मनोऽप्रत्यक्षतैव भवेत् तस्यान्यरूपाभावात् न च बोधरूप व (एव) आत्मा प्रत्ययान्तरेण प्रकाश्यते तस्य प्रकाशरूपत्वात् यो ह्यप्रकाशात्मप्रकाशात्मकः स्वरूपेणैव तस्य प्रकाशनात् ??] ततो यँद्यात्मा प्रकाश्यते तदा स्वसंवेदनरूप एवावगन्तव्यः यथा वा(चा)त्मा अपरप्रकाशाभावात् स्वप्रकाशः नीलादयोऽपि तथैवाभ्युपगन्तव्यास्तेषामप्यपरप्रकाशासंवेदनात्।

यदप्युक्तम्—'बुद्धिः परोक्षा' इति, अत्रापि बुद्धेः प्रत्यक्षताप्रसक्तिः। [?? तथाहि-अर्थाप्रत्यक्षता बुद्धिसत्ता तत् तस्यैवाव्यक्तं स्वरूपम् यदि पदार्थस्वरूपा या प्रत्यक्षतेति सर्वः सर्वदर्शी भवेत्। अथ-तद्दोषपरिजिहीर्षायां द्वयादिसामग्यन्तर्गतः प्रतिनियत एवार्थः कस्यचिद्ध्यक्षीभवतीत्युपगम्यते; नन्वेवं सामग्रीवशात् कस्यचिदर्थस्य प्रत्यक्षं स्वरूपमुपजाति(त)मिति स्वसंविदितमेवार्थस्वरूपमायातम्। अथ दर्शनसत्तापूर्वस्य प्रत्यक्षता तर्हि परोक्षतया तस्या अप्रतिभासने तदव्यतिरिक्तपदार्थप्रत्यक्षताया अप्यप्रतिभासनादर्थः प्रत्यक्षो न भवेत्। न च प्रत्यक्षतायामर्थः न तु तस्यां विदितायामिति वक्तव्यम्, तस्या अवेदने प्रत्यक्षीभूतार्थाऽवेदनात्। यतश्चक्षुरादिसामग्रीतः प्रादुर्भूतार्थप्रत्यक्षतायां एव भाति तदर्थः तद्विशिष्टतया प्रत्यक्षीभवन् विदितो भवेत् प्रत्यक्षताऽनवगमात् तत्परिगतो वात्मानवगत इति कथमसावध्यक्षः? यदि हि प्रत्यक्षाकारतया प्रतिभाति तदा प्रत्यक्षोऽर्थः यथा नीलं नीलाकारतया परिच्छिन्नं नीलमिति व्यवस्थाप्यते नान्यथा। न चार्थः प्रत्यक्षतया प्रतीता(प्रतिभा)तीति दर्शनगोचरातिक्रान्तत्वाद्व्यतिरिक्तविषयसंविदोऽप्यप्रकाशनायातमान्यत्यनवशेषस्य जगतः ??] न च पूर्वमर्थावभासः पश्चाद् दर्शनान्तरेण बुद्धेरनवस्थाप्रसक्तेः। यदि पुनरर्थस्य प्रत्यक्षता अपरोक्षा बुद्धिस्तु परोक्षा(?)वगमात् तर्हि चक्षुरादिसामग्रीबलादुपजायमानां सैवार्थस्य प्रत्यक्षता प्रकाशमाना प्रतिपुरुषं भेदमासादयन्ती बुद्धिरस्तु तदुदयेऽर्थपरिच्छेदादिव्यवहारपरिसमाप्तेर्व्यर्थोऽपरा बुद्धिः नार्थप्रत्यक्षतानिबन्धनमपरा बुद्धिरभ्युपगन्तव्या तत्र तस्याः सामर्थ्यादर्शनात् यतश्चक्षुरादिसामग्रीसद्भावे प्रत्यक्षतोद(दे)ति तदभावे नोत्पद्यत इति तन्मात्रदृष्टस्य कल्पनां सैवार्थस्य प्रत्यक्षता प्रकाशमाना प्रति पुरुषं भेदसंगात् ततो बुद्धिः प्रत्यक्षा अभ्युपगन्तव्या तदभ्युपगमे च तद्व्यतिरिक्तार्थानामप्रतिभासनान्निरस्तार्थसद्भावात् पक्षता (?) वा बुद्धिरेवास्तु ननु यदि बुद्धेरेव नीलाद्याकारस्तथासति

१-त्तावोधपापरिच्छेदेत तदा वा० बा०।-त्तावोधे प-आ०।-त्तावोध प-भां० मां०। २-सत्तास प-आ०। ३-च्छेदे तु बोधस्यैव ग्राह्यत्वाततो बोधरूप वात्मानो-वा० बा०। ४ बोधस्यैव ग्राह्यत्वात् ततो बोधरूप-आ० हा० वि०। ५-रूप चात्मा भां० मां०।-रूपं वात्मा वि०। ६ ह्यप्रकाशात्मकः आ० हा० वि०। ह्यप्रकाशात्मकः सव्यतिरिक्तं स्वप्रशमपेक्षते ननु यः प्रकाशात्मकः स्वरू-वा० बा०। ७ यथात्मा आ०। ८-काशते वा० बा०। ९-थार्थार्थप्रत्यक्षताप्रसक्तिः तथाह्यर्थाप्रत्यक्षता बुद्धिसत्ता आ० हा० वि०। १०-सत्तो त तस्यैव व्यक्तं वा० बा०। ११ तस्यैव व्यक्तं हा० वि०। तस्यै वक्तव्यं स्व-आ०। १२-स्वरूपमव्यक्तता तथा सर्वार्थानां स्वरूपायां प्रत्यक्ष-आ० हा० वि०।-स्वरूपमव्यक्तता तथा सर्वार्थानां स्वरूपा यात्प्रत्यक्ष-वा० बा०। १३-हीर्षायं द्रियादि-वा० बा०। १४-तीभ्युपग-भां० मां०आ० हा० वि०। १५ नत्वेवं वि०। १६-पमुपजातमुपजातिमिति आ० विना। १७- सत्तात् पू-वा० बा०। १८-सने वदव्यतिरिक्तपदार्थे प्रत्यक्षताया अप्यप्र-आ०।-सने तदव्य क्षताया अप्यप्र-भां० मां०। १९ न संभ-आ०। २० अस(सं)वे-वा० बा०। २१-र्थावेद-आ०। २२-ताय एव भा-भां० मां० आ०।-ताय एवा भा-हा० वि०। २३-मातत् त्प-आ० हा०। २४ कथमवसा-वा० बा०। २५-सादध्य-आ०। २६ नील नीला-वा० बा० विना। २७ न वार्थः आ० हा० वि०। २८-तिरिक्तं वि-आ०। २९-मान्यत्यनवशेषस्य जनगतः आ०।-मान्यनवशेषस्य जगतः हा० वि०। ३०-रवस्था-वा० बा०। ३१-रधिस्य आ०। ३२ परोक्षवगमा तर्हि वा० बा०। ३३-ना सैवार्थ-भां०।-ना स्यैवार्थ-मां० वि०। ३४-शमना प्र-वा० बा०।-शमाना पु-आ० हा० वि०।-शमानां पु-भां० मां०। ३५-मासेव्य-वा० बा० विना। ३६ तस्याः सा-वा० बा० विना। ३७-क्षतादिति वि०।-क्षतादति भां० मां० आ० हा०। ३८-भाव नोत्पद्य इति वा० बा०। ३९-ना सैवा-आ०। ४०-रस्त्यर्थसद्भावात्पक्षता वा वा० बा०।

ग्राह्यग्राहकाकारद्वयस्य संवेदना(न)मेकं ज्ञानं भवेत् न चाकारद्वयमाभाति नीलादेरेवाकारस्य भासनात्, नैतदेवम्; दृश्य-दर्शनयोरेकादनिर्भासादेवाकारद्वयप्रतिभासाभावात्। यदि पुनर्ग्राह्याकारो ग्राहकाकारश्च पृथक् प्रतिभातस्ततो भेदप्रतिभासा(सात्) ज्ञानाद्वैतमेव न भवेत् तस्माद् दृश्य-दर्शनयोरेकाकारोपलम्भादेकत्वं व्यवस्थितमिति भ्रान्तज्ञानावसेय इव रजताकारः सत्यदर्शना-
५धिगम्योऽप्यसौ ज्ञानस्वभाव एव।

[?? न च बहीरूपतया प्रतिभासनाद् भ्रान्तसंविदवभासिनोऽपि रजतासिद्धात्तसंविद्रूपता सिद्धा तँस्य बाह्यार्थत्वेऽप्यवहारो भेदप्रसक्तेः। न च सत्यासत्ययोर्लोकेतराभ्यां व्यवहारभेदः वितथाज्ञाना-वभासिनस्तस्यालौकिकत्वपरिज्ञानाभावान्न तावदस्यालौकिकत्वम् तज्ज्ञानादेव तत्र तस्याप्रतिभासना यदि तु तँत्र प्रतिभासेत तदर्थक्रियार्थिनस्तत्र वृत्तिर्न भवेत्। अथालौकिकोऽपि रजतादिर्लौकिकतया
१०तत्रावभासत इति प्रवृत्तिरित्वे(स्त्वे)वमलौकिकतया तत्र भातीति विपरीतख्यातिरिति न सँर्वेषां प्रतिभासमानानां सँत्यता। किञ्च, अलौकिके लौकिकं रूपं तस्य सिद्ध्यत् किं सत्यम्, उतासत्यं कथ-मवभाँति? अथ सत्यम् न व्यवहारभेदः। यदि पुनरलौकिके यल्लौकिकं रूपमाभाति तँदा लौकिकरू-पतया सत्यम्; नन्वत्राप्यलौकिके यल्लौकिकं प्रतिभातं तत् किं सत्यतयाँ; उत असत्यतया? यद्यसत्य-तया कथं प्रवृत्तिः? अथ सत्यतया कथमलौकिकं रूपं तँस्य सिध्येत्? किञ्च, यँद्यलौकिकं रूपं
१५प्रतिभातं स्वरूपेण न गृह्यते किं वा लौकिकत्वं परेणालौकिकेतररूपेण गृह्यते तदप्यपरेणेति निरा-(र)वसाँनो(ना) लौकिकपरम्परा समासज्येत। ??]

[?? यदि पुनर्वितथदँर्शनं विपरीतख्यातिरभ्युपेयते तत्रापि वक्तव्यम्—किं विपरीता ख्यातिः, आहो-स्विद् विपरीतस्य वस्तुनो विपरीताकारणे(कारेण) ख्यातिर्विपरीतख्यातिः? तत्र प्रथमे विकल्पे किं स्वरू-पापेक्षया विपरीतख्यातिः, आहोस्वित् ख्यातानन्तर(रा)पेक्षया सर्वैव ख्याँतिः विपरीतख्यातिं(तिः)?
२०आहोस्तदात्रापि वक्तव्यं किं तदैका(दैव) वोत्तरकालम्? यदि तदैव तदा विरोधस्तथाहि यदि तदा विरोधस्तथाहि यदि तदा ख्यातिः कथं स्वरूपविरहलक्षणा विपरीततऽथ स्वरूपप्रच्युतिः कथं किं सा ख्यातिः सती अथोत्तरकालं ख्यातेरभावस्तथापि कँथं विपँरीता ख्यातीनामुत्तरकालप्रच्युतेर्विपरीत-ख्यातिप्रसक्तेः। अथ द्वितीयो विकल्पस्तत्रापि ख्यात्यन्तरापेक्षया सर्वैं(वैं)व ख्यातिर्विपरीतख्यातिरिति सर्वैख्यातेर्वैपरीत्यप्रयु(प्रस)क्तिः, यदि पुनर्वैपरीत्यं शुक्तिकादि रजताद्याकँारेण विपरीतेन ख्यातीति
२५विपरीतख्यातिरित्यथ पक्षाभ्युपगमः सोऽप्ययुक्तः, अन्यरूपेणान्यस्य परिच्छेदायोगात्। तथाहि-किं

---

१ ग्राह्याग्रा-आ० विना। २ न वा-वा० बा० विना। ३-तदैव द्व-भां० मां०। ४-सादेकाका-वा० बा० विना। ५ भवेत् तस्माद् दर्शन-आ०। भवेत् त तस्माद् दर्शन-वि०। ६-द्धान्न सं वा०बा० आ०। ७ तस्या बा-आ०। ८-र्थत्तेऽ-वा० बा०। ९ च सत्ययोर्लो-भां० मां०। १०-रभेदो त-वा० बा० विना। ११-भासितस्त-भां०। १२ तज्ज्ञा-वा० बा०। १३ तव प्र-भां०। तद प्र-भां० सं०। मां०। १४-भासेन तदर्थ-मां०। -भासित तदर्थ-वि०। १५-रत्वेवसलौ-हा० वि०। -रन्वेवमलौ-वा० बा० आ०। १६ सर्वेषां प्रवृत्तिभास-हा० वि०। १७-नानां सर्वैत्यता। किञ्च, अलौकिके रूप तस्य सिध्येत् किं सत्य-वि०। १८ सत्यता किंवा लौकिके लौकिकं रूपं तया सत्यं नन्वत्रा-आ०। सत्यता किंवा लौकिके रूपतया सत्यं नन्वत्रा-वि० सं०। १९-किकं रूप सस्य सिध्यन् किं मत्य-मां०। -किकं रूप सस्य सिध्यत् कि मत्य-भां०। -किकं रूप तस्य सिध्येत् किं सत्य-हा०। २०-भासिति वा० बा० विना। २१-रलौकिक य-हा० वि०। -रलोकिके य-भां० मां०। २२ तदा लोकि-भां० मां०। तदो लोकि-हा०। २३-या यद्यस-वा० बा० भां० मां० हा० वि०। -या उत असत्यतया? यद्यस-वि० सं०। २४ तस्या सिद्धौत् आ०। २५ यद्यल्लौ-वा० बा० विना। २६ किंचा-लौकि-हा० वि०। किं वा लोकि-भां० मां०। २७-सानोऽलोकि-भां० मां० हा० वि०। २८-दर्शन वि-मां० आ० वि०। २९ आहोस्वित ख्यानन्तरापे-वा० बा०। ३० ख्याति विपरीतख्याति आहो-हा० वि०। ख्यातिर्वैपरीतख्यातिः अहो-वा० बा०। ३१-व्यं कि तदैका चौत्त-भां०। ३२ कथ वि-भां० मां०। ३३-परीतेऽख्या- भां०। -परीतोख्या-आ० हा० वि०। ३४-कारिण हा० वि०। -कारण आ०।

रूपद्वयनिर्भासेऽध्यारोपः कल्प्यते, उतैकरूपनिर्भासे? यदि प्रथमः पक्षः तदा द्वयं शुक्तिका रजतस्व-रूपं चात्मस्वरूपेणापेक्षया सँर्वे(वैं)व ख्याँतिः। अथैकं रूपं तत्र चकास्ति तत्रापि यदि रजतमेकं स्वरूपेण भाति कथमध्याँरोपोऽन्याकारपरिहारेण तस्यैवैकस्य प्रतिभा(तिभा)सनात्। अथ शुक्तिका स्वरूपेण प्रतिभाति तत्रापि न विपरीतख्यातिः अन्यरूपविविक्तायास्तस्या एव परिच्छेदादन्यस्या-न्याकारेण प्रतिभासाना(भासन)मन्तरेण ना रजतदग्ग्राह्यो परिमलादेरपि रूपदृग्ग्राह्यताप्रसक्तेः।५
किञ्च, यद्यपरे(रो)क्षतया 'रजतम्' रजतसंविदवभासयति कथमस्या विपँरीतख्यातित्वम्? नँ चान्यदेव देशादिमद् रजतमन्यदेशादितयाऽवभासयतीति विपरीतख्यातिः यतो देशान्तरादि-मत्ता रजतादेः किं तेनैव दर्शनेन गृह्यते, आहोस्वित् पूर्वदर्शनेन? तत्र न तावत् तेनैव तत्र वर्त्तमानदेशादिमत्तया रजतादेरवभासनात् तद्धि तद्देशादिमत्तयैव तावद् गृह्णाति न पूर्वादि-मत्तया। अथ पूर्वकालादिमत्त्वं रजतादेरवभासयतिँ, ननु तदपि तद्देशादिमत्त्वमेव तस्याव-१०
भासयति तदानीन्तनदेशादिमत्त्वं तदनवभासने च कथं भ्रान्तदर्शनावसेयस्य रजतादेस्तेन पूँर्वदेशादिमत्तावगतेस्तँत्रान्यदेशादिनादिमानर्थोऽन्यदेशादितया वितथदर्शने प्रतिभातीति वक्त-व्यम्, न च बाधकप्रमाणं भ्रान्तदृगवगतरजतादेरन्यत्र देशादितामावेदयति यतो बाधकप्रतीतिरपि रजतादिकमलीकतया आवेदयति नत्वन्यदेशादितया नहि सैं 'अन्यदेशादी(दि) रजतम्' इत्यवगच्छ-ति किन्तु 'नेदं रजतम्' इति। यदि च भ्रान्तदृशि प्रतिभासँमानो रजतादिस्तदेशादौ नास्ति तर्हि ज्ञा-१५
नस्यैवाभावाकारो नार्थस्येति कथं न ज्ञानस्य निरालम्बनता? निरालम्बनत्वं ह्यर्थसन्निधिनिरपेक्षस्य ज्ञानस्य जन्म तच्चोपरतप्रमेयाणामर्थसन्निधिनिरपेक्षत्वात् स्वप्नादिप्रत्यया(याना)मस्तीति न दृष्टा-न्तासिद्धिः। यदि च स्वप्नादिदर्शनं विशदावभाँस्यप्यन्यदेशाद्यर्थविषयं परिशुद्धदर्शनमपि यथा प्रति-भासमानं पूर्वदृष्टानां वनं किं नाभ्युपेयँते अथ परित्यागो भवेत्। अथ बाधकेऽपरबो(बा)धकान्तराभा-वात् तस्य वर्त्तमानावभासकत्वं नँ तु बाधकाभावप्रत्ययेऽभावप्रत्ययावतारात् पूर्वदृशार्थग्राहिता नँनु २०
बाधकेवित्तेरपि पूर्वपरिज्ञातयँजता(तरजता)द्यभाववेदित्वं भवेत् नहि कश्चिद् विशेषो वर्त्तमानानुभवं प्रति बाधक-दर्शनयोः यतो रजतदर्शनमतीतविषयग्राहि बाधकं तु वर्त्तमानार्थस्वरूपावेदकमिति विभागो भवेत्। अथ बाधके अपरबाधकान्तराभावात् तस्य वर्त्तमानावभासँकत्वम् नँ तु बाधका-वभासप्रत्ययेऽभावप्रतीतिः पूर्वमभावप्रतीति किं नोपेयते। नँ चापरबाधकाभावात् तत्रापि वर्त्तमा-नार्थग्राहित्वमिति वक्तव्यम्, तत्रापि तत्पर्यनुयोगादनवस्थाप्रसक्तेः। न च सत्यदृने(त्यदर्शने) २५
संवादेयात्(वादात्) सांप्रतिकार्थग्राहित्वम् भ्रान्तज्ञाने तु विपर्ययात् पूर्वदृष्टावभासितसंवादस्यै-वायोगात्। तथाहि-किमुत्तरज्ञानोदयः संवादः, उतार्थक्रियाप्रसू(सू)तिः? यद्युत्तरज्ञानोदयः स किमेकविषयः, भिन्नविषयो वा? यद्येकविषयस्तदा तैमिरिकस्य केशदु(केशोण्डु)कादिविषयो ज्ञाना-

---

१ कल्पते हा० विना०। २-थम प-वा० बा० विना ३-तस्वरूपं वात्मरूपेणपेक्षया स-वा० बा०। -तस्वरूपं चात्मरूपेणापेक्षायां स-हा०। -तस्वरूपेणांपेक्षया स-भां० मां०। ४ सवैव आ० हा० वि०। ५ ख्याति थैकं वा० बा०। ६-ध्यारोपान्याकारकप-आ०। ७-स्तस्य ए-वा० बा०। ८-सा-नन्तरेण रजतदृग्ग्राह्या प-वा० बा०। ९-परीतत्वम् आ०। १० न वा-वा० बा० विना। ११ ताद् गृ-वा० बा०। १२-लादिसद्रजता-आ०। १३-ति नतु त-भां० हा०। १४ पूर्वादेशादिमत्तावगतेस्तत्रान्य-देशादितया मां०। १५-स्तन्नान्य-वा० बा०। १६ सामान्य-वा० बा० विना। १७-सने र-वा० बा० विना। १८-भासस्याप्य-वा० बा० विना। १९-शान्यर्थ-हा० वि०। -शादिन्यर्थ-भां० मां०। २०-मान पू-भां०। २१-यते ऽप परि-भां०। -यते ऽथ परिभागो वा० बा०। २२-वात् तस्या व-हा० वि०। २३ न नु बा-वा० बा० मां० विना। २४ नतु बा-वि०। २५-कचित्ते-वा० बा०। २६-यज्ञ-ता-वा० बा० विना। २७-सत्वम् वा० बा०। २८ न नु बा-वा० बा० मां०। २९-भावप्रतीतितयतीति किं वा० बा०। -भावअप्रतीति नयतीति किं हा०। -भाव अप्रतीति किं वि०। ३० न वा-हा० वि०। ३१ केशादुदका-वा० बा० विना। "यथा चिरकालीनाध्ययनादिखिन्नस्योत्थितस्य नीललोहितादिगुणविशिष्टः केशोण्डू-काख्यः कश्चिन्नयनाग्रे परिस्फुटति अथवा करसंमृदितलोचनरश्मिषु येयं केशपिण्डावस्था स केशोण्डूकः"—१, १, ५ शास्त्र-दीपिका० युक्तिस्नेहप्रपूरणीसिद्धान्त० पृ० ९९ पं० २७।

न्तरोदयः संवादः स्यात्। अथ भिन्नविषयस्तदुदयः संवादस्तत्रापि यदि नाम विषयदर्शनान्तरमुदयमासादयति पूर्वदृशस्तु सत्यत्वे किमायातम्? अन्यथा रजतज्ञानस्य शुक्तिकाज्ञानोदयात् सत्यत्वप्रसक्तिः। अथार्थक्रियाप्रसूतिः संवादः नन्वर्थक्रियापि पूर्वानुभूतादेवोदकादेः किं नाभ्युपगम्यते? अथाविद्यमानं पूर्वानुभूतं जलादि न पानाद्यर्थक्रियामुपजनयितुं समर्थं(र्थ) तर्हि स्वप्नादिदर्शनमपि तदविद्यमानं कथं जनयितुमलम्। नह्यविद्यमानस्य तत्रापि कारणत्वं युक्तम् चिरतरातीतस्यापि तत्प्राप्तेः। न चार्थक्रिया-ज्ञानयोः कश्चिद् विशेषो यतो ज्ञानमर्थमासादयति। नार्थक्रिया अर्थाभावेन दृष्टेति सन्ना(न्नि)हितार्था जन्मा नन्नु तथाभूतार्थाभावेऽपि स्वप्नदशायामर्थक्रियोपलभ्यते एवं जाग्रद्दशायामपि पित्तोपहततनोर्मलयजरसादिसंस्पर्शो दहन्निवासा कथं नार्थक्रियान्यथा दृष्टान्तसंवादः इति सर्वं वासनाप्रतिबद्धं दर्शनं बाह्यार्थसंविधानक्रियमिति स्वरूपप्रतिभासाः सर्वत्र प्रत्यया ना(न) बाह्यार्थावभासिन इति व्यवस्थितम् ??] । ते(तेन) 'नार्थाभावः प्रत्यक्षवेद्यस्तत्र बहिरर्थप्रतिभासनात्' इति निरस्तम् बहिरर्थप्रतिभासनस्योक्तन्यायेनासिद्धत्वात्।

[?? न च प्रत्यक्षतोर्वा भावः साध्यते यतः प्रत्यक्षविरोधो दोषः पक्षस्य स्यात्। अपि तु प्रकाशरूपता नीलादीनां साध्य(ध्या) सा तु यथोक्तप्रकारेण प्रत्यक्षसिद्धैवेति कथं न विज्ञप्तिमात्रता? प्रत्यक्षप्रतीते च ज्ञानमात्रे न किञ्चिदनुमानेनेति? न च तद्भावाद्दोषावकाशोऽस्मात्कम्, न च 'सहोपलम्भनियमात्' इति हेतूपन्यासो व्यर्थ इति वक्तव्यम्, परं प्रति व्यवहारसाधनाय तस्योपन्यासात्। यो हि नील-तःसं(तत्सं)विदोरप्रतीयमानमपि प्रत्यक्षतो भेदं नीलस्य संविदिति कल्पनावशात् पारमार्थिकं भेदमिच्छति तस्य नील-तद्धियोः पृथगनुपलम्भात् पृथक्त्वं न युक्तमिति प्रतिप(पा)द्यते उपलब्धिर्हि सत्त्वम् न च नील-तद्धियोः क्रमेण युगपद् वा भेदोपलब्धिः संख्यव्यतिरेकेण तत्संविद इत्यनुपलब्धेनी(नी)लव्यतिरेकेण तत्संविद इत्यनुपलब्धिर्भेदं तयोर्निराकरोति न तन्नील-तद्धियोरभेदः प्रत्यक्षविरुद्ध इति निराकृतं द्रष्टव्यम्। न च नील-तद्धियोरभेदे प्रत्यक्षसिद्धे किमनुमानप्रसाध्यमभेदव्यवहारयोग्यताया इव (एव) साध्यत्वादित्युक्तत्वात् न च सहोपलम्भनियमोऽसिद्धः। नीलप्रत्यक्षताव्यतिरिक्तसंविदो निराकृतत्वात् यतो न बोधरूपता बोद्धैस्तद्व्यतिरिक्तैरपष्टा येन तदनुपलम्भात् सहोपलम्भोऽसिद्धः स्यात्। अपि तु सुखादिनीलादिप्रत्यक्षतैव संवित् तन्मात्रं च सर्वव्यवहारपरिसमाप्तैश्वरादिव्यापारस्य तत्रैवोपलम्भात् सा च सर्वेषां परिस्फुटमाभाति तदवेदने प्रत्यक्षार्था वेदनोवशे(दने चाशे)षस्य जगतः समायातःमात्प(यातमान्ध्य)मिति प्रतीतत्वात् नील-तद्धियोः कथं(थं न) सिद्धः सहोपलम्भनियमः? ??]

---

१ नाम भिषयदर्शनान्तरमुदयमासादयन्ति पूर्व-हा०। २-मुदर्शनान्तरमुदयन्ति पू-भां० मां० आ०। ३ सत्यत्वप्रसक्त का ज्ञानोदयात् सत्यं संप्रसक्तिः हा० विना। ४-मर्थः त-भां० मां०। ५-कतम् वैर-आ० विना। ६ यतो ज्ञानमर्थाभावे ज्ञानमर्थमा-वा० बा० आ० हा० वि०। ७ संन्निहि-आ०। ८ नतु त-वा० बा० आ० हा० विना। ९ दहन्निवासा कर्थ ना-भां० मां०। दहन्निवाभाव कर्थ ना-वा० बा०। १० दृष्टान्नसं-वा० बा०। दृष्टान्तंसं-आ०। ११-सधिधा-वा० बा०। १२ पृ० ३४९ पं० २५। १३-क्षतो वा भावः सा-भां० मां०।-क्षता वा भावः सा-हा०।-क्षतो भावः सा-आ०।-क्षतो भावाभावः सा-वि०। १४-मात्रेण न वा० बा० विना। १५-ति न व त-हा० वि०।-ति व व त-मां०।-ति न त्र त-भां०। १६-तू न प-वा० बा० विना। १७ पर प्र-आ० विना। १८ उपलब्धिः संख्याव्य-वा० बा० विना। १९ संख्याविरिरे-मां०। २०-लब्धेन्नील-वा० बा०। २१ न तनील द्धियो-वा० बा०। २२-भान प्रमान प्रसा-आ०। २३-हारायो-वा० बा०। २४-ता बोधैस्त-आ०।-ता वोद्धैस्त-वा० बा०। २५-क्तस्पष्टां ये-आ०। २६-न्मात्र च वा० बा०। २७-मास्तैश्व-वा० बा०। २८ भाति तदने-वा० बा० हा० वि० विना। २९-क्षार्थवे-वि०। ३० वेदानाव-वा० बा०। ३१ जनतः वा० बा० आ० हा० वि० विना। ३२-यातःमत्यमति वि०।

[?? मीमांसकमतमपि नीलं प्रत्यक्षं बुद्धिस्तु तद्धेतुभूता प्रवेशप्रत्यक्षार्थान्यथानुपपत्त्या पश्चात् प्रतीयत इति सहोपलम्भोऽसिद्ध इति प्राग् दि(नि)रस्तमेव। यदि तेनोक्तम्—"पश्चादुपलभ्यते बुद्धिः" [ ] इति, तत्रापि बुद्धिप्रतीतिकाले यद्यर्थस्यापि प्रतीतिस्तदा द्वयोर्युगपदुपलम्भः स्यात्। नं चैतदिष्टम् इष्टो वा हेतुर्न सिद्धः। न च युगपदुपलभ्यमानयोः ग्राह्यग्राहकभावः सम्भवतीति ज्ञानमिति न सिद्धो(सिध्येत्) यदि तु तदा नार्थप्रतिभासस्तथापि केवलायास्तस्याः प्रतिभासनात् 'अर्थस्य बुद्धिः' इति न युक्तं भवेदित्यादेः प्राक् प्रतिपादितत्वान्नासिद्धो हेतुः। नाप्यनैकान्तिकः सर्वज्ञज्ञानस्य पृथगुपलम्भाद् भेदः यतः सर्वज्ञा(र्वज्ञज्ञा)नं पृथग्जनचित्ता(त्तात्) पृथग् भाति पृथग्जनस्यापि स्वचित्तं सर्वविद्विज्ञानं विनापि भातीति भेदः नीलतद्धियोस्तु न कदाचित् पृथगुपलम्भः एकलोकी(लोली)भावेन सर्वदोपलम्भात्। नहि नीलव्यतिरिक्ता या प्रत्यक्षता भाति तद्व्यतिरिक्तं वा नीलम् एवं स्वै रूपोपलंम्भाद्वे(द्वै)कत्वव्यवहारः अन्यथा तदयोगात् सर्वं चात्र नीलादयोऽभिन्नरूपोपलम्भा एकत्र(कत्व)व्यवहारे साध्ये स्वरूपे(रूपापे)क्षया दृष्टान्तीभवन्तीति दृष्टान्तासिद्धिरपि न प्रेरणीया। न च सन्दिग्धविपक्षव्यावृत्तिरयं हेतुः अभिन्नोपलम्भेऽपि भेदे सर्वत्राभेदोच्छेदप्रसक्तेः। यदपि 'भेदो(दे)ऽप्येकसामग्र्यधीनतया नीलतद्धियोः सहोपलम्भः' इत्युक्तम् द्रष्टव्यम् भेदाऽनवभासनेन तस्याभावात्। यदपि 'रूपालोकयोः सहोपलंम्भेऽपि भेदः' इत्युक्तम्, तदप्यसम्यक्; यतो रूपालोकयोर्यथोरपृथगुपलंम्भ(लम्भः) भेदोऽपि तयोर्न सम्भवत्येव यतो न नीलमालोक्य वा(लोको वा) तदपि निर्भागावर्त्ती पृथगभ्युपगम्यते प्रकाशात्मनो नीलस्यैवोत्पादात्। ययोः पुनर्भेदस्तयोरपृथगुपलम्भो नास्तीति नीलादिभिन्नस्याप्रत्यक्षरूपस्य तस्यानुपलम्भात्। यदप्युक्तम् 'सह'शब्ददृष्टत्वाद् विरुद्धो हेतुः' इति, तत्रापि विकल्पारूढं भेदमाश्रित्य 'सह'शब्दः प्रयुक्तः परमार्थतस्तदभावेऽपि अथ यदि भेदे विकल्पैरुल्लिख्यते किमिति सत्यो न वस्तुरूपासंस्पर्शित्वाद्धि न तत्र नीलतद्धियोरभेदे एकरूपोपलम्भात् सिध्यत्येव तथा संवेदनादप्यभेदः सिद्धः। नीलादीनां प्रत्यक्षं च स्वरूपं संवेदनमुच्यते। विज्ञानस्यापि ह्यपरोक्षस्तद्भेदात् तदर्थस्य सहशब्दस्यावृत्तिर्युक्ता परमार्थतोऽभेदेऽपि ??]

[?? यद्वा एकस्मिन्नप्यर्थे सहशब्दो दृष्टो(ष्ट) एव यथा 'सहदेशोऽयमस्माकम्' इत्येकरूपोपलब्धिरेकत्वेन व्याप्ता प्रत्यक्षत एव ते गता। ततो न विरुद्धत्वं विपर्ययव्याप्तेरभावात्। यदप्युक्तम् 'एकरूपोपलब्धिवि(ब्धिर्वि)ज्ञानस्यार्थस्य वा प्रथमपक्षेऽपि बौद्धं प्रति'इति तदपि निराकृतमेव; नील-तद्बुद्ध्योरेकरूपोपलम्भस्य प्रतिपादितत्वात् विवादश्च तयोर्भेदाभेदा(दौ) प्रति न स्वरूपं प्रति तस्य सिद्धत्वात्। न चैकरूपोपलम्भस्तयोरध्यक्षसिद्धो वचनमात्रादेवासिद्धो भवति। तस्मान्नील-तद्धियोरभेद एकरूपोपलम्भात् सिध्यत्येव। तथा, संवेदनादप्यभेदः सिद्धः। नीलादीनां प्रत्यक्षं च

---

१ प्रवे प्रत्य-भां मां०। प्रवशप्रत्य-हा० वि०। २ पृ० ३५३ पं० २। ३-ति प्राद्विर-वा० बा०। ४ प्राग् विर-वि०। प्राग् निर-वि० सं०। ५ पृ० ३५३ पं० ४। ६-द्धि ति तत्रा-वि०।-द्धिरि तत्रा-वा० बा० भां० मां० हा०। ७ न तैवदि-आ० विना। ८-ष्टमष्टो वा० बा०। ९ सिद्धोद्यदि वा० बा०। १०-थग् भावेति आ०। ११-पि स्तद्वित्तं स-वा० बा०।-पि स्तैर्वित्तं स-हा० वि०।-पि स्तैष्वित्तं स-आ०। १२ भावि त-मां० विना। १३-लम्भात्त्वेक त्व-वा० बा०।-लम्भात्त्वेकं त्व-आ०। १४-न्यदा त-वा० बा० विना। १५-कत्र्य-आ०। १६ यदि भे-भां०। १७ पृ० ३५३ पं० १०। १८ भेदोऽन-वा० बा० विना। १९-लम्भो-वा० बा० विना। २० पृ० ३५३ पं० ६। २१-कयोयोर-हा० वि०। २२-लम्भेदो-वा० बा०। २३-लोक्ये वा वा० बा०। २४-पि निर्भागावत्ती पृ-आ० हा०।-पि निर्सागोवर्ती पृ-मां०।-पि भेद प्युक्तं निर्भागावत्ती पृ-वि०। २५ पृ० ३५३ पं० १८। २६-रूपां सं-आ० वि०। २७-रभेदो ए-वा० बा०। २८ संवादना-मां० विना। २९-प्यर्थे स-भां० मां० आ०।-प्यर्थ स-हा०। ३० दृष्टो एवं य-वा० बा० विना। ३१ गतौ न विरु-वा० बा०। ३२ न विरुद्धत्व विप-हा०। न विरुद्धत्व विरुद्धत्वं विप-भां०। न विरुद्धत्वं विरुद्धत्वं विप-मां०। ३३ पृ० ३५३ पं० २३। ३४-पि बौद्ध प्र-आ० हा० वि०।

स्वरूपं संवेदनमुच्यते विज्ञानस्यापि ह्यभेदः सिद्धः नीलादीनां प्रत्यक्षं च स्वरूपं संवेदनमुच्यतेऽविज्ञानस्यापि ह्यपरोक्षमेव स्वरूपं संवेदनतद्व्यतिरिक्तस्य तस्यायोगात् अतो न नील-तद्धियोः संवेदनभेदः अन्योन्यस्य संवेदनायोगात्। यदप्युक्तम् 'संविदो भिन्नमभिन्नं वा नीलस्य संवेदनं भेदहेतुविरुद्धः अभेदश्चासिद्धः' इति, तदप्यसंगतमेव; नीलादीनामपरोक्ष आत्मा संविदिति प्रतिपादितत्वात् तथा च ज्ञानव्यवहारयोगात् साध्यते परपरिकल्पितबोधवत् अन्यथा बोधव्यवहारोच्छेदप्रसङ्गात्। ननु कः सहोपलम्भनियमादस्य भेदः? एकोपलम्भ एव तस्याप्यर्थः अत्रापि स एव, नैतत्; सहोपलम्भेन पृथग्भावनिराकरणात् तद्द्वारेण संविद्रूपा नीलादयः प्रसाध्यन्ते। अनेन तु त एव बोधरूपा विधिरूपेणेति द्वयोरपि हेत्वोर्व्यापारभेदोऽस्त्येव परमार्थतस्तु न कश्चिद् भेदः। द्वयोरपि स्वभावहेतुत्वात् तच्चाद्वोधव्यतिरिक्तमभ्युपगम्य सहोपलम्भनियमान्नीलादेः संविद्रूपता साध्यते नहि सकृदुपलभ्यमानयोः ग्राह्यग्राहकभावो नील-बोधयोर्युक्तस्तदन्यक्रियाविरहाच्चन्द्रद्वयस्येव परस्परं बोधेन सहेति प्राक् प्रतिपादितम् ग्राह्यग्राहकभावाभावे स्वसंविद्रूपाः सिद्धा एव नीलादयः तेन नील-तद्धियोः स्वरूपभेदेऽपि चन्द्रद्वयादेरिव परस्परं बोधरूपतयाऽभेदः सहोपलम्भनियमात्। अयं चार्थः स्वयमेव शास्त्रकृता स्पष्टीकृतः—"नहि भिन्नावभासित्वेऽप्यर्थान्तरमेव रूपं नीलस्यानुभवात्।" [ ] इत्यनेन प्रतिभासभेदात् स्वरूपभेदेऽपि नीलस्यानुभवादर्थान्तरं जडतया विजातीयमेव रूपं न भवतीति यावत् स्वरूपभेदेऽपि प्रकाशरूपत्वात्। यदि तु सर्वात्मनील-तद्धियोरभेदः साध्यः तथासति एवकारो न युक्तः नार्थान्तरमेवमिदं वाच्यं स्यात् प्रत्यक्षबाधश्च दुर्निवारो नीलादेः सुखादिरूपस्य च बोधस्य भेदे साध्ये यदा तु तयोर्भेदेऽपि साम्यं बोधरूपतया साध्यते तदा न कश्चिद् दोषः रूपाऽऽलोकयोरपि परस्परं न प्रकाश्यप्रकाशकभावः सहोपलम्भनियमादेव चित्ताचैत्तानामपि स्वसंविद्रूपतैवेति न तैरपि व्यभिचारः सर्वविदोऽपि स्वसंवेदनामेव स्वसत्त्वं परचित्ततदनं तु व्यवहारमात्रेण विद्वेता व(च)दूरोत्सादितैवास्मिन् व्याख्याने स्वरूपैकत्वासाधनादेवासिद्ध इति नैव सुखादेरतन्नी(रन्तर्नी)लादेर्बहिश्चावभासनात्। तयोरेव ग्राह्यग्राहकभावाभावतः सहोपलम्भनियमात् स्वप्रकाशरूपता साध्यते व्यतिरिक्तस्य बोधोऽग्राहकोऽप्रतीतेरेव। अथवा परोक्षो बोध(धः) पुरोव्यवस्थित(ता)र्थान् प्रतिपद्यत इति परेषामभ्युपगमः तदभ्युपगमान्नीलकालो बोधात्मा भवतु प्रत्यक्षस्तथापि न तयोर्वेद्यवेदकभावः सहोपलम्भनियमादिति प्रतिपाद्यते तेनायमदोषः संवेदनं तु प्रत्यक्षरूपं बोधरूपतां नीलसुखादेर्वस्तुस्थित्यैव साधयति बोधव्यवहारस्य तत्रैव सिद्धेरन्यथाभूतस्यानुपलब्धेस्तस्याभावात् ततो नीलादेः सुखादेश्चात्मैवानुभवः चक्षुरादिव्यापारात् परोऽपि तदा स स्यात्।

१–च्यतेऽवि–मां०। २–च्यते वि–वा० बा०। ३–दनाभे–वा० बा० विना। ४ अन्योन्य संवे–वि०। अन्योन्यस्य संवेदनं भेदहेतु–मां०। अन्योन्यस्य संवेदन भेदहेतु–भां०। ५ अभेद इति नश्चासिद्ध इति आ०। ६ तदाप्य–वा० बा० विना। ७ तया व ज्ञा–भां० हा०। तया प ज्ञा–आ०। तया च ज्ञा–वि० सं०। ८–कल्पितं बो–मां० आ० हा० वि०। ९ तद्वा–वा० बा० हा०। १० एवा बो–वा० बा०। ११ तद्वा द्वो–मां० हा० वि०। तद्वो–आ०। तद्वा बोधेन सहेति प्राक् प्रतिपादितम् वा० बा०। १२–भावा नी–आ०।–भातिवो नी–हा० वि०। १३–रूपरबो–भां० आ०। १४–त ग्रा–भां०। १५–भावो ख–आ०। १६–द्रूपाः सिविद्रूपाः सिद्धा–भां०।–द्रूपा सिविद्रूपाः सिद्धा–आ०।–द्रूपाः सिंचिद्रूपाः सिद्धा–मां०। १७–या भे–वा० बा०। १८ अयं वार्थः वा० बा०। अयं तार्थः हा० वि०। अयं भार्थः भां०। १९ युक्तो वा नाथतिमित्येवं वाच्यं वा० बा०। २० वाचं स्या–भां० मां०। २१ साधे य–भां० मां०। २२ तयोऽभे–भां०। २३–कद्वयोर–वा० बा०। २४–काशभा–वा० बा० विना। २५–व चित्तानामपि आ०।–व वित्तानामपि हा०।–व वित्तावित्तानामपि भां० मां०। २६–चार सर्व–हा०।–चारः सर्वाविदोऽपि संव–आ०। २७–स्वसत्व पर–हा०। स्वतन्नं पर–वा० बा०। २८–रचित्ततदनं नु व्य–बा० बा०।–रचित्तातदनं मु व्य–आ०।–रचित्तातदनन्तरं तु–वि० सं०। २९–द्वता च द्वरोत्सा–मां०।–द्वता व द्वरोत्सा–वा० बा०।–द्वतां व द्वरोत्सा–भां०। ३०–रिक्तास्य आ०। ३१ बोधोग्रा–आ०। बोधो अग्रा–वा० बा०। ३२–व ऽग्रवा आ०। ३३–वस्थिवार्था–आ०।–वस्थितच्छिन्नार्था–वि०।–वच्छिन्नार्था–भां० मां० हा०। ३४–तु ष्प्र–वा० बा०। ३५–दनुं प्र–वा० बा० आ० हा० वि० विना। ३६–क्षरूपं बोधरूपं बोध–आ०। ३७–पता नी–भां० मां०। ३८–स्तुस्थित्यैव सा–वा० बा० हा० वि०।–स्तुस्थत्येव सा–मां०।–स्तुस्थत्येवं सा–भां०। ३९–रा पि त–वा० बा०। ४० स्यात् व चक्षु–आ०। स्यात् न चक्षु–वि०।

न च चक्षुरादिव्यापारादेव नीलादयोऽनुभवरूपा जायन्ते यतश्चक्षुरादयोऽपि नानुव्य(नुभवव्य)तिरिक्ताः सत्य(त्या)र्थवादप्रसक्तेः, नैतदेवम्; स्वप्नादेशावेज्ञा(शावज्ञा)ऽदृशायामपि वासनावशादेव नियतावभासोदयो भविष्यतीति न कार्यव्यतिरेकादप्यर्थवादकल्पना युक्तिमतीति सर्वत्र विज्ञप्त(प्ति)मात्रतैव। ??]

[?? ननु यदि विज्ञप्तिमात्रतैव(वा)भ्युपेय(या) तथासति मेय-मानमिति व्यवहारविलोपः तस्य भेदपूर्वकत्वात्—अर्थो हि प्रमितिक्रियया व्याप्यमानत्वात् प्रमेयम् कर्मणि कृत्यविधानात्। तथा नीलादयो यदि बोधः स्यात् तदाऽसौ स्वतन्त्रा(तन्त्रो) नीलदृशं प्रतीत्य प्रमाता भवेत् चक्षुरादयश्च करणतया मानं भवेयुरर्थमितिम् उपलम्भसाध्यत्वात् स्यात् तदभावे तु न नीलादयः संविद्रूपाः सिध्यन्ति सिद्धः प्रमाणनिबन्धनत्वात्। न च स्वसंवेदनमेव प्रमाणं व्यवस्थाकारि तत्र दृष्टान्तासिद्धेः। प्रदीपादयोऽपि हि परप्रकाश्या एव च (न च) तेनैवात्मना स एवाधिगन्तुं शक्यम् न ह्यङ्गुल्यग्रेण तेनैव तदेवाङ्गुल्यग्रं स्पृश्यत इति, असदेतत्; यतो यथा बाह्यार्थवादे सुखादीनामात्मा विषये प्रमाणम् तेषामेव वेदनं वित्तिः फलं सुखादयश्च मेयं यथैवापरेषामात्मा अपरोक्षो म(मे)यः तस्य च प्रकाशरूपता मानम् तत्प्रतिभासः फलम् तदन्यग्राहकाभावेऽप्यनवस्थाप्रसक्तेर्मतनि(र्मतमि)यमेव म(मे)य-मान-फलानां व्यवस्था सर्वत्र नीलादौ योजनीया विज्ञा(ज्ञान)वादे। ??]

[?? अथ नीलादीनां जडत्वान्न संविदस्ति सुखादेरात्मनश्च प्रकाशरूपत्वात् संविदिति, अत्रोच्यते; तत्रापि ज्ञानवादेऽनुभवात्मकत्वात् प्रकाशरूपत्वापत्तेः नीलादेश्च स्वात्मनः संविदि कर्त्तव्यायां योग्या नहि ते तत्र दर्शने जडरूपाः संविदस्तथाऽयोगादित्युक्तेरिति तस्मात् सा नीलादीनां प्रकाशाख्याभेदोल्लेखः। यथा स्वरूपमेयं स्वसंवित् फलमित्यस्ति प्रमाणादिव्यवस्येत्यर्थः श्लोकद्वयस्य

"तत्रात्मनि सुखादीनां यथा वित्तिः फलं तरं।
तथा सर्वत्र संयोज्या मान-मेय-फलस्थितिः"॥ [ ]

अत्राप्यनुभवात्मत्वायोग्याऽस्ती संविदि इति सा योग्यता मानं मेयं रूपं फलं स्वित्याचार्योक्तस्य यदि तर्हि नीलादीनां स्वप्रकाशो वित्तिश्च 'कथमहं नीलं वेद्मि' इति कर्तृ-कर्म-क्रियाभेदोल्लेखः यथा लतिसुखादौचामात्राप्यहमात्मानं वेद्मि सुखादीनि वासौ दृष्ट एव। अथान्यग्राहकाभावात् तत्रासौ मिथ्योल्लेखस्तर्हि नीलादावपि व्यतिरिक्तप्रकाशाभावात् भेदोऽवसेयः कर्तृ-कर्मादितया मिथ्यो वा परोक्षस्य नीलादेरेव प्रकाशनात्। अथास्याः कर्म-कर्तृ-क्रियाभेदाध्यवसितेर्बी(तेर्वी)जं वक्तव्यम् निर्बीजं वान्ययोगात्, नैव; तत् क्वचिदपि कर्त्रादिभेदस्य वास्तवस्यानुपलब्धेर्वातिपरम्परामात्रं अनादिवासनाप्रभवप्रधानादिविकल्पवदसावभ्युपगन्तव्यः। यदपि 'विरोधान्न संवेदनं भवत्यङ्गुल्य-

१ यश्चक्षु–आ०। २–रिक्तः स–वा० बा०। ३–दशावेज्ञाग्रह–वा० बा० आ० हा० वि० विना। ४–त्रतैवाभ्युपेय तथा–वा० बा० विना। ५ प्रमितिक्रि या व्याप्य–आ०। ६–मितिस्तु पलम्भ–वा० बा०। ७ सिध्यं सि–वा० बा० आ० हा० वि० विना। ८–माण व्य–आ० हा० वि०। ९ तव द्व–वा० बा० विना। १०–गन्तुं शक्य न वा० बा०। ११–वादे मुखा–वा० बा०।–वादे नुखा–आ०। १२–मात्मविषाये प्रमाण तेषा–वा० बा०। १३ फलं तु मुखा–आ०। १४–प्राप्तेर्मतिनि–आ०। १५ सर्वग्र नी–वा० बा०। १६–नश्चा प्र–आ०।–नश्चऽप्र–मां०।– नश्चा प्र–भां०। १७–दयः संवि–वा० बा० विना। १८ नहि ते त्र वा० बा०। १९–थायो–वा० बा० विना। २०–काश्याख्या–वा० बा० विना। २१–ख्याभेदेल्ले–वा० बा०। २२ तरां। त–आ० हा० वि०। ततं। त–वा० बा०। २३ संयोज्य मान–मां० आ० हा० वि०। संयोज्य मानं मे–भां०। २४–त्वान्न यो–वा० बा०। २५–ग्यास्ता संविद इति आ०। २६ मान मेयं रूप फलं आ०। मान मेयं रूपं वि०। २७–चार्योक्तस्य वा० बा० विना। २८–थात्मनि सु–वि० सं०। २९–खादौ वा मा–मां० आ० हा० वि०।–खादौ चामत्रा–वा० बा०। ३०–नि नासौ आ०। ३१–रिक्तःप्र–वि०।–रिक्ताप्र–भां०। ३२–वसायः वा० बा०। ३३–कर्मादितया सिद्ध्यो वा प–आ०। ३४ मिथ्यो चा प–वा० बा० हा० वि०। ३५–लादेरव प्र–आ०। ३६–व्यं तिबीज वा–आ०।–व्यं निबीजं वा हा० वि०। ३७ वान्यं वा योगात् वा० बा०। ३८–दस्य यास्तचस्या–वा० बा०।

ग्रवत्' इत्युक्तम्, तदसारम्; यतोऽपरोक्षं स्वरूपं स्वानुभवः तत् कुतोऽत्र विरोधः? तथा 'अङ्गुल्यग्रमपि तेनैव अङ्गुल्यग्रेण न संस्पृश(श्य)ते' इत्यत्रापि किं यथान्या(थाऽन्येना)ङ्गुल्यग्रेणाङ्गुल्यग्रं संस्पृश्यते, उत यथा तेनैव? तत्राद्ये पक्षे सिद्धसाध्यता नहि यथाऽन्येनाङ्गुल्यग्रेणान्यदङ्गुल्यग्रं संस्पृश्यते तत्संस्पर्शः सम्भवी। अथ द्वितीयः पक्षः सोऽप्यनुपपन्नः, तेन तत्संस्पर्श(र्शस्य) न्यायप्राप्तत्वात्। नहि स्वरूपव्यतिरेकेणाङ्गुल्यग्रसम्भवे(वः)। न च स्वरूपमात्मानं न संस्पृशति तथाभ्युपगमे स्वरूपहानिप्रसक्तेः, नीलादीनां त्वपरोक्षप्रकाशस्वभावता स्वरूपमेव अन्यथा तेषां परोक्षताऽभावप्रसङ्गादिति प्रतिपादितत्वात् तत् व्यवस्थितमेतत् नीलादयोऽपरोक्षस्वभावाः प्रकाशन्त इति विज्ञप्तिमात्रकमेवेदं बहिरर्थ(र्थ)संस्पर्शरहितम् तदपि विज्ञप्तिमात्रं पूर्वापरस्वभावविविक्तमध्यक्षणरूपं स्वसंवेदनाध्यक्षतः तथैव प्रतिपत्तेः पौर्वापर्ये प्रमाणात्(णाऽ)प्रवृत्तेः प्रतिपादनादिति क्षणिकविज्ञप्तिमात्रावलम्बी शुद्धपर्यायाऽस्ति(स्तिक)भेद ऋजुसूत्रः ??]

[३ पुनः ऋजुसूत्रपदस्य व्याख्यान्तरमाश्रित्य शून्यवादः]

[?? यद्वा एकत्वानेकत्वसमस्तधर्मकलापविकलता(त)या तदपि विज्ञानं शून्यरूपमृजु सूत्रयतीति ऋजुसूत्रः। स हि माध्यमिकदर्शनावलम्बी सर्वभावनैरात्म्यं(नैरात्म्य)प्रतिपादनाय प्रमा-

---

१–रूप स्वा–आ०। २– मपि नै–वा० बा० विना।

"तेनैव अंगुलग्गेन तं अंगुलग्गं परामसेय्य"—सुमंगलविलासिनी (बुद्धघोषकृता दीघनिकायटीका) भा० १ सामञ्ञफलसुत्तवण्णना पृ० २३५ पं० ३४।

"न हि चित्तं चित्तं समनुपश्यति। तद्यथा न तयैव असिधारया सैव असिधारा शक्यते छेत्तुम्। न तेनैव अङ्गुल्यग्रेण तदेव अङ्गुल्यग्रं स्प्रष्टुं शक्यते"—शिक्षासमु० परि० १३ पृ० २३५ पं० ६।

"उक्तं च लोकनाथेन चित्तं चित्तं न पश्यति ॥ १७ ॥

न च्छिनत्ति यथात्मानमसिधारा तथा मनः" ॥ १८ ॥—बोधिचर्याव०प्रज्ञापार० पञ्जि० परि० ९ पृ० ३९१–३९२ तथा ३९३ पं० २–५।

मध्यमकवृ० प्रत्ययप०प्र० १ पृ० ६२ पं० ८–पृ० ६३ पं० १ तथा टिप्प० १।

"न चैकस्यैवमात्मत्वे दृष्टान्तः कश्चिदस्ति ते"।

"न हि पाकः पच्यते, छिदा वा छिद्यते, नापि करणकर्मत्वं कर्तृकर्मत्वं वा एकस्य संभवति न हि अङ्गुल्यग्रेण एव अङ्गुल्यग्रं स्पृश्यते" इत्यादि—श्लो० वा० शून्य० श्लो० ६४ पार्थ० व्या० पृ० २८७ पं०२३–पृ० २८८ पं० ९।

{"अङ्गुल्यग्रं न तेनैव अङ्गुल्यग्रेण स्पृश्यते"

"यथा अङ्गुल्यग्रं न तेनैव अङ्गुल्यग्रेण स्पृश्यते एवं ज्ञानं न तेनैव ज्ञानेन ग्रहीतुं शक्यते"—न्यायवार्तिकतात्पर्यटीका पृ० ४६६ पं० १०।

"अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति।

स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हति" ॥–प्रकरणपञ्चिका पृ० ६३। न्यायकणिका पृ० २६८।

"नो खलु अङ्गुल्यैव अङ्गुली स्पृश्यते" इत्यादि। तथा,

"यथोक्तम्–

अङ्गुल्यग्रं स्वमात्मानं नात्मना स्प्रष्टुमर्हति"। न्यायमकरन्दे पृ० १३१ पं० ८ तथा पृ० १८३ पं० ११। श्रीभाष्ये पृ० १६९। सर्वार्थसिद्धौ पृ० ३९१।} —लौकिकन्यायाः भा० ३ पृ० ३।

३–स्पृश इ–आ०। ४–था नित्यङ्गुल्यग्रेणातुल्यग्रं वा० बा०। ५–स्पृश्येते वा० बा० आ० हा० वि० विना। ६ उभ यथा वा० बा० विना। ७–ल्यग्रेणा द–भां० मां० आ० हा० वि०।–ल्यग्रेणेदमङ्गु–वि० सं०। ८–स्पर्श संभ–वा० बा० विना। ९–पस्वतिरे–वा० बा०।–पत्वव्य–भां० मां० हा० वि०। १०–न्यमा त्तेषां आ०। ११–ध्यक्षरू–वा० बा० विना। १२–लम्बि शु–आ०। १३–पर्यायो–वा० बा० विना। १४ यथा ए–आ०। १५–मस्तं ध–वा० बा० आ० हा० वि०। १६–ल तद्–वा० बा० विना। १७ शून्यं रू–आ०। १८–त्मा त्माग्र–वा० बा०।

णयति—यद् विशददर्शनावभासि न तत् परमार्थसद्यव(सद्व्यव)हृतिमवतरति यथा तिमिरपरिकरितदृगवभासि इदु(इन्दु)द्वयं विशददर्शनावभासिनश्च स्तम्भ-कुम्भादयः प्रतिभासाविशेषात्। अथापि यु(उ)क्तं यत् तैमिरिकावभासिनश्चन्द्रद्वयादयो न परमार्थसत्त्वः(न्तः) तत्र कारणा(ण)दोषाद्धा बोधो(बाधो)दयाद्(द्धा)परिशुद्धदृगवशेषास्त्वेकेन्दुमण्डलादयो न वितथासू(स्त)त्र कारणदोषविरहाद् बाधाभावत्वेत्यसिद्धः प्रतिभासाविशेषा(षात्), असदेतत्; बाध्यत्वायोगात्। तथाहि—न विज्ञानस्य तत्कालभाविस्वरूपं बाध्यते(बाध्यते) तदानीं तस्य स्वरूपेण प्रतिभासनात्। नाप्युत्तरकालम्, क्षणिकत्वेन तस्य स्वयमेवोत्तरकाल(लम)भावात् नापि प्रमेयं प्रतिभासमानेन रूपेण बाध्यते, तस्य विशदप्रतिभासादेवाभावासिद्धेः। नाप्यप्रतिभासमानरूपत्वात् तस्याप्यभावे वारिणा स्पर्शादिलक्षणेन प्रतिभासनारूपात् तस्यान्यत्वात्। न चान्याभावेऽन्यस्याप्यभावः अतिप्रसङ्गात्। नापि प्रवृत्तिरुत्पन्ना बाध्यते, उत्पन्नत्वादेवासत्तायोगात् तस्याः। नाप्यनुत्पन्ना स्वत एवाऽसत्त्वात्। नाप्यर्थक्रिया उत्पत्ति-क्षययोर्बाध्यत्वायोगात्। न च तस्या भा(अभा)वेऽर्थस्यासत्त्वम्, तस्यास्ततोऽन्यत्वात्। न चार्थक्रियासद्भावादर्थस्य सत्त्वम् अर्थक्रियाया अपि सत्ता(त्त्वा)सिद्धे(द्धेः)। नाप्यपरार्थक्रियाभावात् तस्याः सत्त्वम् अनवस्थाप्रसक्ते(क्तेः)। नाप्यर्थजन्यत्वादर्थक्रियासत्त्वम् इतरेतराश्रयप्रसङ्गात्। न च सत्तासम्बन्धाद् भावान(नां) सत्त्वम् सत्ता-तत्सम्बन्धयोर्निषेधत्(धात्)। नाप्युत्पाद-व्यय-ध्रौव्ययोगात् विरोधाद्यनेकदूषणाघ्रातत्वात् बाधकसद्भावाद् बाध्यत्वं सन्तानमतिप्रसङ्गात्। नाप्येकसन्तानम् एककालमेकतानैककालाविकल्पदर्शनद्वयायोगात्। नापि भिन्नकालमेकार्थम् घटज्ञानानन्तरभाविनसज्ज्ञा(नस्तज्ज्ञा)नस्य बाधकतापत्तेः। नापि भिन्नार्थम् पटज्ञानबाधकतापत्तेः। नाप्यनुपलब्धिबा(ब्धिर्बा)ध्यज्ञानसमानकाला तद्बाधिका तस्या असिद्धः(द्धेः)। नाप्युत्तरकालभाविताया अन्यज्ञानैकार्थविषया एकविषयस्य तदर्थसाधकत्वेन बाधकत्वानुपपत्तेः। नापि भिन्नविषयाणायास्तस्यास्तदानीं स्वविषयसाधकत्वेन पूर्वबाध्यज्ञानविषयाभावप्रतिपादकत्वानुपपत्तेरन्यथातिप्रसक्तेः। न च दुष्टकारणप्रभवत्वेनेन्दुद्वयावभासज्ञानस्यासत्यार्थविषयता तत्प्रभवत्वज्ञातुमशक्तो रिन्द्रियत्वेन तद्वतदोषस्याप्यध्यक्षेणाप्रतिपत्तेः। नाप्य-

---

१–भासादिन्दु–भां० आ० हा० वि०।–भासादिदु–भां०। २ बोधदयाव्व परि–वा० बा०। ३–शेषास्त्वेके–भां० हा० वि०।–शेषांस्त्वेके–भां०।–शेषास्तोके–आ०। अत्र–'दृगवसेयास्त्वेकेन्दु'–इति पाठः संभवेत्। ४ वितथ्यसूत्र आ० वि०। वितथ्यस्तत्र वा० बा० भां० मां०। ५–रणदोषः विर–आ०।–रणादोष विर–भां० मां० हा० वि०। ६–हादबा–हा०। ७–भासाविशेषाः सदे–आ०।–भासाविशेषाऽसदोतदेतद् व्याध्यत्वा–वा० बा०।–भासादिशषाऽसंदे–भां० मां०। अत्र 'बाधाभावाच्चेत्यसिद्धः प्रतिभासाविशेषः असदेतत्' इति पाठसंभवः। ८–रूप वोच्य–भां०।–रूपं वोच्य–आ० हा० वि०।–रूपं थोच्य–मां०। ९ तदानीं त रू–मां०। तदानी त रू–भां०। तदानीं तनस्य स्वरूपं वोच्यते तदानीं तनस्य स्वरूपेण आ०। तदानीं तनस्य स्वरूपेण हा० वि०। १०–मानरूपे–आ०। ११–रूपात्त–वा० बा०। १२–क्षणेम प्र–वा० बा०। १३ तस्यान्यत्वत्वा–वा० बा०। तस्यातत्वा–आ०। तस्या त्वत्वा–हा०। तस्य त्वत्वा–वि०। १४ स्वत एवासत्तायोगात् तस्या नाप्यनुत्पन्ना स्वत एवा–वा० बा०। स्वत एवासत्वायोगात् तस्या नाप्यनुत्पन्ना स्वत एवा–मां० विना। १५–सत्वासिद्धे। आ०। १६ तस्याऽभा–वा० बा०। १७ तस्या स–वा० बा० विना। १८ सत्वा त–वा० बा०। १९–र्निषेधत्वात् ना–आ० हा० वि०।–षेधत्वा ता–वा० बा०। पृ० १०६ पं० ९। पृ० ११० पं० ८। २०–त्वात् अपि चाबाध–वा० बा०। २१–ध्यत्वां स–वा० बा० विना। २२ नाप्येककालमेकता–वा० बा०। २३–न्तानाम् आ०। २४–कल्पाद–हा०। २५–द्व योत् नापि आ०। २६–लमेकालमेकार्थम् भां० मां०। २७–ज्ञानानन्तरं भा–मां०।–ज्ञानांनन्तर भा–भां०। २८–नसज्ञान–आ०।–नसजान–वा० बा०। २९–धता–आ०। ३०–ज्ञार्थ प–वा० बा० विना। ३१–स्या सिद्धः। वा० बा० विना। ३२–भाविनया–आ० हा० वि०।–भाविनीयाव्यजानै–वा० बा०। ३३–कत्तेन भां०। ३४–याणां यास्त–वा० बा० मां० आ० हा० वि०। ३५–शक्तोरि–वा० बा०। 'तत्प्रभवत्वस्य ज्ञातुमशक्तेरिन्द्रियस्यातीन्द्रियत्वेन' इति पाठः स्यात्। पृ० ९ पं० ३। ३६–स्याध्यक्षे–वा० बा०।–स्याप्यक्षे–आ०।

नुमानात् कारणदोषावगतिः अध्यक्षाभावेऽनुमानस्याप्रवृत्तेः। न च नरान्तरस्येन्दुद्वयादेरप्रतिभासनाद् दुष्टकारणजनितविज्ञानविषयत्वामस्य(त्वमस)त्यत्वं वा स्वग्राहिज्ञाने परिस्फुटतया प्रतिभासनात्। न च समानसामग्रीकस्य नरान्तरस्य तदप्रतिभासः यावत् तिमिरं तावत् तस्यावभासनात् न च परिज्ञा सामग्रीकस्यानवभासनात् तदभावः सत्कारणानामेव तद्ग्रहणं प्रति
५ सामर्थ्याविरहाद् दुष्टत्वसिद्धे(द्धेः) ??]

[?? न च सत्यदर्शित्वात् तस्य कारणदुष्टतानुपपत्तिः, कारणादुष्टत्वे सत्यार्थदर्शित्वम् तद्दर्शित्वाच्च क(का)रणादोष इतीतरेतराश्रयदोषापत्तेः। न च तदवभासिविज्ञानस्य मिथ्यारूपत्वात् दोषवत्कारणा(ण)जन्यत्वम् अत्रापीतरेतराश्रयदोषस्य तदवस्थानात्। न च विसंवादिज्ञानविषयत्वात् इन्दुद्वयादेरपारमार्थिकत्वम् विसंवादस्यैवासिद्धेः। न तावत् समानजातीयतद्विज्ञानानुत्पत्ति-
१० विसंवादा(दो) यावत् तिमिरं तावत् तस्योदयसद्भावेन तदनुत्पत्तेरसिद्धत्वात्। नापि विजातीयविज्ञानसंवादादिन्दुद्वयादेर्वैतथ्यम् सत्यज्ञानावभासिस्तम्भादेरपि तत्सद्भावेना(न) वैतथ्यप्रसक्तेः। न च स्तम्भादेरवितथत्वं तदवभासिज्ञानबाधाभावादिति वक्तव्यम् बाधाभावस्य तदवैतथ्याप्रसाधकत्वात्। तथाहि—न तावत् तत्कालो बाधाभावः भावसद्भावम् अ(अव)गमयन्तीन्दुद्वयावभासिज्ञानेऽपि तत्सद्भावात् क्षपाकरयुगलस्य सद्भावप्रसक्तेः। नाप्युत्तरकालभावी तदभावः
१५ पूर्वकताल्प(पूर्वकाला)मर्थसत्तां साधयति तत्कालपरिहारेण प्रवृत्तेस्तथापि तत्साधकत्वे भ्रान्तदृगर(व)सेयस्य रजतादेरुत्तरकालभाविबाधाऽभावतो भावप्रसक्तिर्भवेत्। नाप्युत्तरकाला(कालं) भावमसौ साधयति भ्रान्तदृगत(गवगत)रजतेनैव व्यभिचारात्। नापि समानकाला(कालं) तमेव गमयति समानकालावभासिनोऽर्थस्य भ्रान्तज्ञानावभासिरजतस्यैव ततः सद्भावसिद्धेः। न च बाधाभावः प्रसज्यरूपस्तुच्छरूपतयार्थसत्त्वस्य व्यवस्थापकः तद्भावे तुच्छत्वायोगात्। नं वासाव-
२० ज्ञात तद्व्यवस्थितः स्या परस्परस्थापकयोर्गान्नानामपि ज्ञातः स्वसंवेदनं तत्र ज्ञानासम्भवी(वात्) स्वसंविद्रूपतां बिभ्राणस्य भावस्वरूपतापत्तेः। नाप्यनुपलब्धिस्तज्ज्ञप्तिः तस्या अप्यज्ञाताया गादन्यायो ज्ञापकत्वायोगादन्यानुपलब्धेस्तुच्छरूपायास्तज्ज्ञप्तौ तत्पर्यनुयोगतोऽनवस्थाप्रसक्तेः। न च पर्युदासरूपायास्ततस्तत्सिद्धिः भावविषयत्वेन तस्यास्तदवगमहेतुत्वायोगात्। न बहिर्बाधकविषयगोचरानुपलब्धिर्बाधकाभावमवगमयत्यथा(त्यन्यथा) देवदत्तनीलज्ञानावा(व)भासिनी-
२५ लगोचरात् प्रतिपत्तिनीलदृशमपाकुर्यात्। नापि भिन्नविषया सा तमवगमयत्यन्यथा देवदत्तनीलप्रतिपत्ति तत्पीतप्रतिपत्तिरपाकुर्यात्। न च बाधकप्रत्ययो 'नास्ति' इत्युल्लेखवदभावनाज्ञानं

१-रणादो-हा० वि०। २ नवान्त-वा० बा०। ३-यादे प्र-वा० बा०। ४-ना दुष्ट-वा० बा० आ० हा० वि०। ५-मत्यत्वं वा० बा० विना।-मन्यत्वं वि०सं०। ६-भासा या-भां०। ७-भासात् वा० बा०। ८-स्यान्नव-वा० बा०। ९ तद्ग्राह-आ०। १० सामर्थ्यावरहा दुष्ट-आ०। सामर्थ्यविरहा दुष्ट-हा० वि०। सा र्थ्यविरहा दुष्ट-वा० बा०। ११-सिद्धे न व स-हा० वि०।-सिद्धे त व स-आ०। १२-स्य कर-वा० बा०। १३-पत्तिः कर-आ० विना। १४-त्वात्व क-भां० आ०।-त्वात्व क-मां०। १५-सिद्धो न आ०।-सिद्धः न हा०। १६-त्पत्तिर्विसंवादा यावत् वा० बा०। १७-ज्ञानं सं-वा० बा० विना। १८-वादादिदु-आ०।-वादीविदु-हा०। १९-यादेवोत-आ०। २० सत्पक्षाना-आ०। २१-तथ्याप्र-आ०। २२-गमायन्ती-आ०। २३-वात क्ष-आ०। २४-दगन्त रज-वा० बा० विना। २५ न चा-मां०। वि० सं०। २६ स्यात् प-आ०।'न चासावज्ञातः तद्व्यवस्थितये स्यात् परस्परस्थापकतायोगात् नापि ज्ञातः स्वसंवेदनं तत्र' इति पाठो भवेत्। २७-गात्राना-हा० वि०। २८ ज्ञाना स्व-आ०। २९-दन त-वा० बा०। ३०-वात् संभवा स्व-वा० बा०। ३१-रूपाप-वा० बा० विना। ३२-लब्धिस्ततस्त-वा० बा० विना। ३३ तस्या अप्यज्ञानयोगादन्यानुपलब्धेस्तुच्छरूपायास्त-वा० बा० विना। 'तस्या अप्यज्ञाताया ज्ञापकत्वायोगात् अन्यानुपलब्धेस्तुच्छरूपायास्तज्ज्ञप्तौ' इति पाठो योग्यो भाति। ३४ तस्यर्यनु-आ०। तनृत्पर्यनु-वा० बा०। ३५-रूपतायास्ततस्तत्सिद्धिः भां० मां० हा०।-रूपतायास्ततस्यसित्सिद्धिः आ०।-रूपतायास्तत्तत्सिद्धिः वि०। ३६-स्यास्तेद-भां० मां०। ३७-य तथा वा० बा० विना। ३८-ज्ञानांवाभासितील-भां०। ३९-पत्तिर्नीवद्द-भां० मां०।-पत्तिनीच-द्द-आ० हा०। ४०-'नीलप्रतिपत्तिं तत्पीतप्रतिपत्तिरपाकुर्यात्' इति पाठः सुचारुः। ४१-वताज्ञा-वा० बा०।

तदभावमवगमयति वस्त्वन्तरग्रहणे प्रतियोगिस्मरणे च प्रतियोग्यभावविषयत्वेन परैस्तस्याभ्युपगमात्। उक्तं च—

"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्"।

[श्लो० वा० अभावप० श्लो० २७]

इत्यादि। वस्त्वन्तरस्य च प्रतियोगिसंसृष्टस्याध्यक्षेण ग्रहणे न ततस्तद्भा(स्तदभा)वसिद्धिः। असंसृष्ट-
५ ग्रहणे चाध्यक्षत एवाभावसिद्धव्य(द्धेर्व्य)र्थमभावाख्यं प्रमाणम्। न चाभावप्रमाणादेव प्रतियोग्यसंसृष्टता वस्त्वन्तरस्य प्रतीता तस्यापि प्रतियोग्यसंसृष्ट(ष्ट)वस्त्वन्तरग्रहणमन्तरेणाप्रवृत्तेः तदभ्युपगमे चानवस्थाप्रसक्तेः, तथा, प्रतियोगिनोऽपि यदि वस्त्वन्तरसंसृष्टस्य स्मरणं कथमभावः? अथासंसृष्टग्रहणे सति प्रवर्त्तते असंसृष्टताग्रहणं च यदि प्रत्यक्षादभावप्रमाणवैयर्थ्य(र्थ्यम्)। अभावप्रमाणत्वे तदपि वस्त्वन्तरसंसृष्टप्रतियोगिस्मरणे सति प्रवर्त्तते तत् स्मरणमपि तथाभूतवस्तु-
१० ग्रहणे तदप्यभावप्रमाणादित्यनवस्थाप्रसक्तिः। न चाभासप्रमाद(न चाभावप्रमाणाद)भावप्रतिपत्तावपि प्रतियोगिनो निवृत्तिसिद्धिः अन्यप्रतिपत्तावन्यनिवृत्त्यसिद्धेः। न च तन्निवृत्तिप्रतिपत्तौ प्रतियोगिनिवृत्तिसिद्धिरनवस्थाप्रसक्तेः प्रतियोगिस्वरूपाः(पाऽ)संस्पर्शिरूपाऽपरापरनिवृत्तिप्रतिपत्त्यपरिसमाप्तेः। न चाभावप्रत्यये प्रतियोगिस्वरूपानुवृत्तौ तत्प्रतिषेधः तस्य तत्र प्रतिभासनात्। अननुवृत्तापि(वृत्तावपि) नाभावः अप्रतिभासत्(सात्) न च तद्विविक्तत्वात् तदवाप्रतिपत्तिः तदवभासे
१५ तद्विविक्ततेऽप्रतिपत्तेः। न स्मृतौ प्रतियोगिप्रतिभासात् तद्विविक्ततावगतिः यथाप्रतिभासमवभासासिद्धेः यथा च न प्रतिभासस्तथापि निषेधायोगात् इत्यभावाकारस्य प्रतियोग्यभेदे तत्प्रतिभासेन तन्निराकृतिः भेदेऽपि न प्रतियोगिप्रतिषेध इति न बाधाभावावगमः। अपि च, बाधाभावप्रतीतिरपि यद्यपरबाधाप्रतीते(तेः) श(स)त्या तदानवस्थाप्रसक्तिः। नापि सत्यविषयप्रतिभासा तत्प्रतीतिः सत्या इतरेतराश्रयदोषात्। तत्र प्रसज्यरूपो बाधाभावो भावस्तद्भावव्यवस्थापकः। ??] २०

[?? नापि पर्युदासरूपो बाधकाभावस्तद्व्यवस्थापकः तस्य विषयोपलम्भस्वभावत्वात्। स च यथा न प्राक्कालभावी अर्थतथाभावव्यवस्थापकः तथोत्तरकालभाव्यपि प्रतिभासाविशेषात्। पुनरप्युत्तरकालभाविपर्युदासरूपबाधाभावात्मन्यव्यवस्थायां चोद्यपरिहारानवस्थाप्रसक्तिरिति न

१-भाव गम-वा० बा० आ०। २-हण प्र-आ०। ३-रणे प्र-मां० आ० हा० वि०। ४-स्य प्रतियोगिसंस्पृष्ट-वा० बा० विना।

"यच्च निषेध्याधारवस्तुग्रहणादिसामग्रीत इत्याद्युक्तम् तत्र निषेध्याधारो वस्त्वन्तरं प्रतियोगिसंसृष्टं प्रतीयते असंसृष्टं वा? तत्राद्यपक्षोऽयुक्तः—प्रतियोगिसंसृष्टवस्त्वन्तरस्याध्यक्षेण प्रतीतौ तत्र तदभावग्राहकत्वेनाभावप्रमाणप्रवृत्तिविरोधात्। प्रवृत्तौ वा न प्रामाण्यम्—प्रतियोगिनः सत्त्वेपि तत्प्रवृत्तेः। द्वितीयपक्षे त्वभावप्रमाणवैयर्थ्यम्—प्रत्यक्षेणैव प्रतियोगिनोऽभावप्रतिपत्तेः। अथ प्रतियोग्यसंसृष्टतावगमो वस्त्वन्तरस्याभावप्रमाणसम्पाद्यस्तर्हि तदप्यभावप्रमाणं प्रतियोग्यसंसृष्टवस्त्वन्तरग्रहणे सति प्रवर्त्तेत, तदसंसृष्टतावगमश्च पुनरप्यभावप्रमाणसंपाद्य इत्यनवस्था। प्रथमाभावप्रमाणात् तदसंसृष्टतावगमे चान्योन्याश्रयः। प्रतियोगिनोऽपि स्मरणं वस्त्वन्तरसंसृष्टस्यासंसृष्टस्य वा? यदि संसृष्टस्य तदाऽभावप्रमाणाप्रवृत्तिः। अथासंसृष्टस्य; ननु प्रत्यक्षेण वस्त्वन्तरासंसृष्टस्य प्रतियोगिनो ग्रहणे तथाभूतस्यास्य स्मरणं स्यान्नान्यथा। तथाभ्युपगमे च तदेवाभावप्रमाणवैयर्थ्यम्"—प्रमेयक० पृ० ५३ द्वि० पं० ७।

५ असंस्पृष्ट-मां०। ६-हणे वा-वा० बा० विना। ७-ग्यसंस्पृष्टं-आ०। ८-भावः असं-आ० हा० वि०।-भावः सअसं-भां० मां०। ९-हणो स-वा० बा० आ०। १० न वभा-भां० हा० वि०। न वाभावप्रतिपत्ता-वा० बा०। ११ तद्विविक्तत्वात् तच तद्विविक्तत्वात् तदवाप्रति-भां० मां०। तद्विविक्तत्वात् तदत्वा प्रति-आ०। तद्विविक्तत्वात् तदवा प्रति-हा०। तद्विविक्तत्वादेवा प्रति-वि०। १२ तदभा-वा० बा० विना। १३-क्तताःप्र-आ०। वि० सं०। १४- पत्तेः त स्मृतौ भां० मां० हा० वि०।-पत्तेऽ त स्मृतौ आ०। १५-क्तताग-वा० बा० विना। १६-भासासिद्धेः हा०। १७-भासे तन्नि-वा० बा० विना। १८-परावा-वा० बा०। १९-धाततो-वा० बा० विना। २०-प्र ते वात्या-भां०। २१ न प्रक्षाल-वा० बा०। न प्र ल-भां० मां०। न पल-हा० वि०। २२ अर्थः-भां० मां० आ० हा० वि०। २३-था वव्यव-हा०।-था व्यव-वि०। २४-भावोऽपि भां० मां०।-भावा पि वा० बा० हा० वि०। २५-रकालभा-वा० बा० विना। २६-पबोधा-आ०।

बाधाभावादर्थतथात्वसिद्धिः। न च स्तम्भादीनां परमार्थतस्तत्त्वं सम्बन्धस्य प्रतिभासविषयत्वात्। अप्रतिभासविषयत्वे कथं न तदभावः अप्रतिभासविषयस्यातत्त्वरूपत्वात् न च संवादित्वादपि स्तम्भादेः सत्यत्वम् समानजातीयोत्तरकालभाविज्ञानवृत्तिलक्षणस्य संवादस्य यावत् तिमिरं तावदिन्दुद्वयादावपि भावात्। नापि भिन्नजातीयाज्ज्ञानसंवादात्, भ्रान्तज्ञानावभासिनो रजतादेः शुद्धि(क्ति)काज्ज्ञानसंवादात् सत्यत्वप्रसक्तेः, न चैकार्थाद् भिन्नजातीयज्ञानसंवादात् एकार्थत्वे पूर्वापरज्ञानयोरविशेषात् संवादाज्ज्ञानवत् संवादकस्यापि सत्यत्वव्यवस्थापकत्वायोगात्। न च रूप-स्पर्शज्ञानयोर्विजातीययोरेकार्थविषयत्वम् रूप-स्पर्शयोर्भेदात्। न च रूप-स्पर्शाधिकरणमेकं द्रव्यं तयोर्विषयः एकत्वे प्रमाणवृत्तेः प्रतिपादितत्वात्। नापि भिन्नविषयात् संवादप्रत्ययात् संवादे सत्त्वसिद्धिः शुद्धि(क्ति)कादर्शनात् भ्रान्तद्दगवगतरजतादेः प्र(स)त्यताप्रसङ्गात्। न च स्पर्शज्ञानमर्थाभावेनोपलब्धैसर्वसत्यप्रतिभासमानस्य दशायां तदभावेऽपि तदुदयोपलब्धेः। न च स्वप्न-जाग्रद्दशाभाविनोज्ञा(र्ज्ञा)नयोः कश्चिद्विशेष इति न संवादादपि सत्यता। न च जाग्रद्दशायामिव स्वप्नदशायामपि यर्दवति तत् सर्वं सत्यं प्रतिभासमानस्यासत्त्वायोगात्। दृष्टान्तासिद्धितो न सर्वभावाभावः प्रतिभासमानस्य स्तम्भादेरेकानेकरूपतयाऽव्यवस्थितेः। तथाहि-कालभेदाद् भिन्नोऽध्यक्षतः प्रतिपत्तुं शैक्यम् सन्निहित एव तस्य वृत्ते(त्तेः) नहि मृत्पिण्डस्वरूपग्राह्यध्यक्षं तदासन्निहितं घटमुपलभते तदनुपलम्भे च न तदपेक्षया तेन स्वविषयस्य भेदोऽधिगन्तुं शक्यः प्रतिपादियोगि(प्रतियोगि)ग्रहणमन्तरेण ततो भिन्नमिति(मित्यन)धिगते(तेः)। नापि घटस्वरूपग्राहिणा तेन मृत्पिण्डाद् भेदोऽधिगम्यते तत्स्वरूपाग्रहणे तस्याप्रवृत्तेः। न च स्मरणमपि भेदोऽ(दा)धिगमे प्रभुः(भु) अध्यक्षे गृहीत एवार्थे तस्य व्यावृत्तेः(व्यापृतेः)। न वाध्यक्षमेतद्ग्रहणक्षममिति प्रतिपादितत्वात्। न च स्मरणमर्थग्रहणे प्रभवति तस्य स्वरूपमात्रपर्यवसितत्वात्। तत एव स्मरणसहायमप्यवाक्षं(प्यध्यक्षं) न भेदग्रहणे पटु। न पूर्ववेरूपाग्रहणमेव ततो भेदवेदनं तद्ग्रहणस्य व्यवस्थापयितुमशक्तेः। न च तत्स्वरूपमेव भेद इति तद्ग्रहणात् सोऽपि गृहीतः, न; अपेक्षया भेदव्यवस्थितेः अन्यथा स्वरूपापेक्षयापि भेदप्रसक्तेरिति न कालभेदाद् भेदः प्रमाणगोचरः। नापि देशभेदाद् भावभेदे मे देशस्याप्यपरदेशभेदाद् भेदशक्तितोऽनवस्थाप्राप्तेः। न चान्यभेदोऽन्यत्रानुविशतीति न देशभेदादपि तद्भेदः। नापि स्वरूपभेदाद् भावभेदः नहि समानकालमुद्भासमानयोर्घट-पटयोर्भिन्नं संवेदनं भेदमवस्थापयति प्रकाशमाननील-सुखादिव्यतिरेकेण तस्यानुपलम्भतोऽसत्त्वात् सत्त्वेऽपि समानकालस्य भिन्नकालस्य वाऽध्यक्षस्य परोक्षस्य वा ग्रहणक्रियासहितस्य तद्विका(क)लस्य वा तस्यार्थग्राहकत्वे(त्वा)नुपपत्तेरिति ज्ञाननयप्रस्तावप्रतिपादितत्वान्न भेदग्राहकत्वम्। न च तस्य स्वयमर्थाद् भेदेनाप्रतीतस्य भेदग्राहकत्वमन्यथा खरविषाणादेरपि तत्प्रतिशक्तेः(तत्प्रसक्तेः)। न च तस्य भेदो ज्ञाताज्ञानादवसीयते तस्याप्यप्रतिपन्नभेदस्य तद्भेदाव्यवस्थापकत्वादित्याद्यनवस्थाप्रसक्तेः। न च स्वसंवेदनत एव तद्भेदः सिध्यति तथाभ्युपगमे स्वस्वरूपमात्रपर्यवसितत्वात् तस्य नीलादिभेदव्यवस्थापकत्वानुपपत्तेः। न च स्वत एव स्तम्भादयो भिन्नस्वरूपा(पाः) प्रथन्ते तथाभ्युपगमे स्वसंवेदनरूपतया तेषां अ(स्व)रूपवेदनपर्यवसितत्वेनाऽन्यत्राप्रवृत्तेः परस्परासंवेदनतः कुतः स्वरूपतोऽपि भेदसंवित्तिर्भवेत्? द्वयरूपासंवेदने तन्निष्ठस्य भेदस्याप्यप्रतिपत्तेः। न चापरोक्षे नीलस्वरूपं पीतमपरमाभाति तथा(न चा)पराप्रतिभासनमेव भेदे वेदनम् यतो नीलस्वरूपस्वसंविदितत्वाप्रतिभासमानं पीतमस्ति नास्तीति वा न शक्यमधिगन्तुम् नास्तित्ववेदने च कुतः स्वरूपमात्रा(त्र)प्रतिभासनाद् भेदसिद्धिः। अपि च, स्तम्भादेः स्थूलावभासिनोऽनेकदिक्संबन्धाद् भेदः परमाणुपर्यन्तः पुनस्तत्परमाणूनामपि भेददिक्षट्कसम्बन्धाद् भेदः तत्राप्येवमित्यनवस्थानात् न भेदव्यवस्थितेरेका(क)रूपा व्यवस्थितौ तद्विपर्ययेण भेदव्यवस्थितेरयोगात् ??]।

[??नन्वनेन न्यायेन यद्यत्प(ध्य)क्षावभासिनो नीलादेर्न भेदः अभेदस्तु तदा न्यायप्राप्त इत्यद्वैतापत्तेर्न शून्यता। अन्तर्बहिश्च प्रतिभासमानयोः सुख-नीलाद्योरपह्नोतुमशक्यत्वात् "प्रतिभासतोऽध्यक्षतः" [ ] इति वचनात्, नैतत् सारम्; यतो नास्माभिरवभासमानस्य नीलादेरवभासशून्यताऽभिधीयते प्रतिभासविरतिलक्षणायास्तस्याः कथञ्चिदप्रतीतेः अपि तु प्रतिभासोपमत्वं सर्वधर्माणां शून्यत्वम्। उक्तं च-"प्रतिभासोपमाः सर्वे धर्माः"। [ ] इति। प्रतिभासश्च सर्वो भेदाभेदशून्यः नहि नीलस्वरूपं सुखाद्यात्मकतयाऽभेदरूपमुपलभ्यते तद्रूपतानुपलम्भे च कथमेकं भवितुं युक्तम्? न च तस्य भेदावेदनमेवैकत्वम(वे)दनमेकतो स्वस्वरूपावेदनस्यापि भेदत्वेनाभिधातुं शक्यत्वादिति न विशेषः कश्चित् स्व-परपक्षयोः परस्परपरिहारेण देशास्वभासान्नैकत्वं देशकालाकारैर्जगतः। न चैकत्ववादिनोऽन्योन्यपरिहारेण देशादीनामुपलम्भोऽसिद्धः परस्परानुप्रवेशोपलम्भस्यापि तेषामसिद्धेः। न च प्रतिभासा(स)स्तावदयमस्तीत्यदै(द्वै)तमस्तु नीलादेर्विचित्रस्य प्रतिभासाज(ज्ज)गतो विचित्रताप्राप्तेः। न च बहिर्नीलादेरेकाऽनेका(क)रूपतया युक्ता(क्त्या)नुपपत्तेः प्रकृतिपरिशुद्धं ज्योतिर्मात्रं परमार्थसदस्तु तथाभूतज्योतिर्मात्रस्य कदाचनाप्यप्रतिपत्तेरसत्त्वात् सर्वधर्मशून्यतैव सिद्धिमासादयिष्यनगमान्। यदि प्रतिभासनाज्ज्योतेरवगम्यमाननीलादिवत् ग्राह्योल्लेखभूतेऽपि सत्यसत्यात्मनीलादेरपि मेधावभासितेः सत्यत्वप्रशक्तित्वात्। न च विद्याविरचितप्रतिभासविषयत्वाज्ज्योतिषः सत्यतेतरस्य तु विपर्ययात् सत्यतेति वाच्यम्, कल्पनाया अस्यापि रचयितुं शक्यत्वात्। यदि प्रतिभासैस्सत्योच्यत इति न्यायात् प्रतिभासवपुषां नीलादीनां कथमसत्यं त्यक्तम् तत्रापि प्रतिभासात् सत्यत्वं स्वप्नावभासिनोऽपि तस्य सत्यत्वप्रसक्तिः। न च स्वप्नदशायामपि ज्ञानस्वरूपतया नीलादेः सत्यत्वाज्जाग्रद्-

---

१-**मार्थतस्त्वं सत्वंध**-भां० मां० ।-**मार्थतस्तं सत्वंध**-आ० ।-**मार्थतस्वं सत्वंध**-हा० वि० । २-**यस्यान्त**-वा० बा० मां० आ० हा० वि०। ३-**याज्ञा**-वा० बा० हा० वि०। ४-**दात भ्रान्त**-भां० हा०। -**दाव भ्रान्त**-मां०।-**दा भ्रान्त**-वि०। ५-**वादज्ञा**-मां०। ६ **प्रत्यन्ताप्र**-भां० मां० हा० वि०। **प्रत्येताप्रगासेन्न च** आ०। ७-**ब्ध सवसत्य**-आ०।-**ब्धत् सर्वसत्यं प्रतिभासमानस्याद**-वा० बा०। ८-**दव वि त**-वा० बा०। ९ **सत्य प्र**-आ०। वि० सं०। १०-**सत्वायो**-वा० बा०। ११-**त्तायोगादष्टान्ता**-आ० हा० वि।-**त्तायोगादष्टान्तात् सि**-वा० बा०।-**त्तायोगादष्टाता**-मां०। १२ **शक्य संनि**-वा० बा०। १३-**रूपं ग्रा**-वा० बा० मां० आ० हा० वि०। १४-**ग्राह्याध्य**-वा० बा० विना। १५ **च त त**-आ० हा० वि०। १६-**न्नमि नधि**-भां० मां० हा०।-**न्नमि नधि**-वा० बा०।-**न्नमिवमनधि**-वि०।-**न्नमेवमनधि**-वि० सं०। १७-**त ग्रहण**-वा० बा०। १८-**णछममि**-वा० बा०।-**ण छममि**-भां० मां० हा०।-**णमत्थममि**-वि०। १९-**मर्थ प्रतिपादितत्वान्न च स्मरणमर्थग्रहणे** आ० विना। २० **पूर्वा रू**-वा० बा० विना। २१ **देशभेदाद् भेदशक्ति**-भां०। **देशभेदे मे देशस्याप्यपरदेशभेदाद् भेदशक्ति**-आ०। **'देशभेदाद् भावभेदः देशस्यापि अपरदेशभेदात् भेदशक्तितोऽनवस्थाप्राप्तेः'** इति पाठो योज्यः। २२-**स्य भेदो ज्ञतोज्ञा**-वा० बा०। २३-**तद्भेदव्यव**-आ०। २४ **स्वरू**-वा० बा०।

१-**रूप पी**-आ० वि० विना। २-**तत्राप्र**-वा० बा०। ३-**पमात्रः प्र**-भां०।-**पममात्र प्र**-वा० बा०। ४-**पि भिद**-वा० बा०। ५-**नात् भे**-वा० बा० विना। ६-**भासंतो**-मां०। ७-**रभावशू**-वा० बा०। ८ **सर्वे धर्माः** भां०। **सर्वे धर्म्याः** वा० बा०। **सर्वे धर्म्या** मां० आ०।

"माया-स्वप्न-मरीचि-बिम्बसदृशाः प्रोद्भासश्रुत्कोपमा
विज्ञेयोदकचन्द्रबिम्बसदृशा निर्माणतुल्याः पुनः।
षट् षट् द्वौ च पुनश्च षड्द्वयमता एकैकशश्च त्रयः
संस्काराः खलु तत्र तत्र कथिता बुद्धैर्विबुद्धोत्तमैः" ॥ ३० ॥

× × × तत्र मायोपमा धर्माः षट् × × × स्वप्नोपमाः षट् × × × मरीचिकोपमौ द्वौ धर्मौ × × × प्रतिबिम्बोपमाः पुनः षट् × × × प्रतिभासोपमाः षडेव × × × षड्द्वयमताः प्रतिश्रुत्कोपमा देशनाधर्माः। उदकचन्द्रबिम्बोपमाः × × × धर्माः × × × निर्माणोपमाः" ×—महायानसूत्रालंकारे पृ० ६२ पं० ६। शास्त्रवा० स्याद्वादक० पृ० २१५ प्र० पं० ६। ९-**रूप सु**-आ०। १०-**भ्यन्ते** मां० आ० हा० वि०। ११-**नमेवैकत्वसदन**-हा० वि०।-**नमेवैकत्वमेदमेकते स्थस्वरू**-वा० बा०। १२-**रप्रतिभासपरिहारेण देशास्वनाशात्** वा० बा०। १३-**कत्वावादि**-आ०। १४-**शुद्धज्यो**-आ०। १५-**धर्मा शून्य**-आ० विना। १६-**दपिऽनगमात्** आ० हा० वि०।-**दपि न चागमात्** वा० बा०। १७-**भासासनाज्योतेरेव**-आ०। १८-**तेरेवग**-वा० बा० विना। १९ **मथावभासितेः स**-वा० बा० हा० वि०। **मधावभासिनः स**-आ०। २०-**शक्तिभात्** वा० बा०। २१ **अस्यपि** वा० बा०। २२-**सस्सात्यो**-आ०।-**सस्सत्यो**-हा० वि०। २३-**सत्यं त्युक्त**-वा० बा०। २४-**दशाम**-आ०। २५-**मपि जानस्व**-आ०।

शायामपि तथैव सत्येति विज्ञप्तिमात्रं न शून्यतेति वक्तव्यम् ज्ञानरूपतया प्रसक्तेर्नीलादेरप्रतिभासनात्। न ह्यन्यतरस्यापि दशायां प्रकृतिपरिशुद्धान्तस्तत्त्वज्ञानरूपतया तेषां सर्वदावभासनात्। न च बहीरूपतयाऽवकाशादन्तस्तत्त्वं भवितुमर्हति अन्तराऽरूपतया सुखादेव भासमानबहीरूपतया प्रसक्तेः। तन्न बहिरुद्द्योतमानो नीलादिरन्तस्तब्धस्याकाराभ्युपगन्तव्य इति न विज्ञानवादो ज्यायान्??]।

५ [?? न च बहीरूपतया प्रतिभासन्नी(सनान्नी)लादेस्तथैव सत्यता वान्त(भ्रान्त)रजतादौ तद्रूपाभावेऽपि तथाप्रतिभासोपलब्धेः। अथापि स्यात् शुक्तिकायां प्रतिभासमानस्य रजतस्य वा सत्यता पूर्वदृष्टस्यैव तत्र तस्य स्मृतेरनुभूतरजतस्य स्मृतेरनुकारदर्शनेऽपि रजतस्याप्रतिभासात् पूर्वप्रतिभातं च रजतं ततस्तब्धस्याकारोऽभ्युपगन्तव्यः—विदसत्यतया पतिदर्शनं शून्यवादिनो भवेत्, असदेतत्; यतो यत् शुक्तिकायां पूर्वदृष्टं रजतरूपं सत्यं तस्य प्रतिभासे स्मर्यमाणतया प्रति-
१० पत्तिर्भवेत्। यच्च वर्त्तमानमिदानींतनदर्शनाद् विपरीतख्यातिः स्यान्न स्मृतिप्रमोषः। तथाहि—स्मृतिरभावः तदा तदभावे कथं पूर्वदृष्टरजततदभावप्रतीतिः स्यात्। नाप्यन्यदर्शनं स्मृतिप्रमोषस्तद्भावे परिस्फुटवपुरन्यदर्शनमेव प्रतिभातीति कथं रजते स्मृतिप्रमोषः सर्वदर्शनस्य स्मृतिप्रमोषतापत्तेः। नापि परीता(नापि विपरीता)कारवेदित्वं स्मृतेः प्रमोषः विपरीतख्यातित्वप्रसक्तेः। यदेव प्रत्यक्षाकारणं स्मृतेरभावेनः आकारस्तदासौ प्रत्यक्षस्य रूपं न स्मृतेरिति कथं तेन रूपेण स्मृतिः प्रतिभाति।
१५ अथ प्रत्यक्षभावोकारतया प्रतिभाति तर्हि तदेव रूपं तस्याः सदस्तु न स्मृतिरूपता तस्यास्तत्रा-प्रतिभासना वा बाधकप्रत्ययो रजतमसदेव प्रतिभासमित्युल्लेखन प्रवर्त्तमानो रजताभावमेवावगतिः। न भ्रान्तेः स्मृतिरूपतामिति न रजताभाससमये नापि बाधकप्रत्ययप्रवृत्तिकाले चान्तरदृष्टां स्मृतिरूपता प्रतिरूपता प्रतिपत्तिप्रमोषकल्पना सर्वत्राप्येतद्दोषपरिजिहीर्षया विपरीतख्यातेरभ्युपगमः श्रेयान् यतो न तावतेर्विपरीतत्वं तदैवाभावः ख्यातेरभावादप्रतिभासः न तर्हि ख्यातेरभावे
२० विपरीतख्यातिः, यतो यदि न नामान्यदाख्यातेस्तु वैपरीत्ये किमायातम्? नाप्यन्यप्रतिपत्तिर्विपरीतख्यातिः यतो यदन्यप्रतिपत्तिः पूर्वदर्शनं तु कथं विपरीतख्यातिः? न ह्यन्यदर्शनात् अनाद् (अन्यद्) विपरीतं भवत्यतिप्रसङ्गात्। नापि विपरीताकारदर्शित्वं विपरीतख्यातिः यतोऽत्रापि यदि विपरीतमर्थं दर्शनं गृह्णाति कथं तदा तद् भ्रान्तं भवेत्? अन्यथा नीलदर्शनस्यापि पीत-

---

१-न्यरतस्या-वा० बा०। २-स्यापि दशाया प्र-भां० हा० वि०।-स्यापि दर्शायां प्र-आ०। ३-शुद्धं ततस्तत्त्व-वा० बा० विना। ४-स्तत्वं ज्ञा-आ०। ५-या तेषां सर्वदाव भासनान्न च बहीरूपतया तेषां सर्वत्रावभासनान्न च बहीरूपतयावकाशादन्तस्तत्वं आ० हा० वि०।-या तेषां सर्वदाव भासनान्न च बहीरूपतया तेषां सर्वत्रावभासनान्न च बहीरूपतयावकाशादन्तस्तत्वं भां० मां०। ६-यावकाशादन्तस्तत्वं भवितुमर्हति अन्तरारूपतया सुखादेव भासमानवहीरूपतया प्रसक्तेः वा० बा० आ० विना। ७-रन्तस्तष्टस्या-आ०। ८-भास न्नी-भां० मां०। ९-ता थान्त-आ०। वि० सं०। १० सत्यादृष्ट-भां० मां०। सत्यादृष्टस्येव आ०। ११ स्मृतिर-आ०। १२-रनुकाद-वा० बा०। १३ पूर्वं प्र-आ०। १४-भात च र-हा०।-भावं च र-आ०।-भावं व त र-मां०।-भासत्वं च र-वि०। १५ रजतं तस्तब्धस्याकारो वा० बा०। रजतं ततसूव्यस्याकारो आ०। रजसं तं ततस्तब्धस्यकारो हा०। रजसं तं ततस्तब्धस्याकारो वि०। १६-गन्तव्यं विद-आ०।-गन्तव्य चिद-मां०।-गन्तव्यचिद-वा० बा०। -गन्तव्यं संविद-वि० सं०। १७ पत्तिद-वि० सं०। १८-दर्शनशू-भां०। १९-दभाप्र-वा० बा०। २०-वपुदन्य-वा० बा०।-व र-भां० मां०। २१-जते स्मृतिप्रमोषतापत्तेः भां० मां०। २२-यदव वा० बा०। २३-वतः आ-मां० आ०।-वत आ-हा० वि०।-वः तः आ-वा० बा०। २४ रूपं न स्मृतेरपि क-भां० मां० हा० वि०। रूपं ने स्मृते तिरपि क-आ०। २५-वा र-वा० बा०। २६ तर्हि तदेवं रू-भां० मां० हा० वि०। तहि तदेवं रू-वा० बा०। २७-प्रतिभासना व बोधक-भां० मां० हा० वि०। -प्रतिसासना व वाध-वा० बा०। २८-त्युल्लेखन आ०। २९-वसेवावगति। वा० बा०। ३०-य वृत्तिका-आ०। ३१-काले वा-वा० बा०। ३२-पताप्रतिपत्तिप्रमो-आ० हा० वि०।-पताप्रतिपत्तिः तन्नस्मृतिप्रमो-वा० बा०। ३३ सर्वत्राप्ये-आ०। सर्वान्नाप्ये-भां० मां०। सार्वानाप्ये-वा० बा०। ३४ न तावत् तेर्वि-आ० वि०। न वाव तेर्वि-हा०। न तावत् तैर्वि-वि० सं०। न तावश्चाते-वा० बा०। ३५-भास न आ०। ३६-भावे पिपरित-मां०।-भावें विपरीतेख्या-वा० ३७-माव्यदाख्यातेर्यतो यद्धि नामान्यदाख्याते-वा० बा०। ३८-पत्ति पू-भां०। ३९-नात् विप-आ०।-नार्द्विप-वा० बा०।

दर्शनविपरीतार्थग्राहिणो भ्रान्तताप्रसक्तिः। न च भिन्नदेशादावभिन्नदेशादितया प्रति तद्विपरीतख्यातिः यतो देशादयः स्तत्र(तत्र) दर्शने प्रतिभासमाना यदि सन्तः प्रतिभान्ति तदा कथञ्चित् विपरीतख्यातिः। अथासन्तस्तदाप्यसत्ख्यातिप्रसक्ति(क्तिः) सतां देशादीनां तत्राख्यातेः, न च तद्देशादिसम्बन्धग्रहणाद् विपरीतख्यातिः यतस्तत्सम्बन्धोऽपि यदि सँन(सन्) प्रतिभासि(ति) तदा सदर्थग्रहणान्न विपरीतख्यातिः। अथासंस्तदाप्यसत्ख्यातिरस्त(रस)दर्थग्रहणात्। अन्य- ५
देशादित्वं च भ्रान्तदृगवसेयस्यैव वार्थस्य कल्पने नान्यस्य. न तर्हि स्वप्नदृशो भ्रान्तत्वं तदवभासिनोऽन्यदेशादित्वाभावात् तथापि तत्त्वे सर्वदृशां विपरीतख्यातित्वप्रसक्तिः। अथ भ्रान्तदृगवसेयस्यैवान्यदेशादितयाऽन्यदेशस्यापि ग्रहणमिति विपरीतख्यातिस्तत् तर्हि तस्यान्यदेशादित्वं भ्रान्तदृशा अवसीयते, उत पूर्वदर्शनेन? तदपि यदीदानीन्तनस्यान्यदेशादित्वावगतस्तदा संगतं
पूर्वदर्शनस्येदानीनामशक्यत्वादर्शतश्चातिप्रसङ्गतो ग्राहकत्वानुपपत्तेः नापि पूर्वमिदानीन्तनभ्रान्त- १०
दृगवसेयस्य तेन पूर्वदेशादिगतिः इदानीन्तनज्ञानावसेयस्य पूर्वमभावात्। न चैकमेव पूर्वापरदर्शनावसेयं वस्त्विति न दोषः पूर्वापरदृग्भावयोरेकत्वासिद्धेः पूर्वदर्शनेन वर्त्तमानदेशादिपरिहारेण पूर्वदेशादितयैव तस्यावगतेः नेदानीन्तनस्य पूर्वादिताऽवगतिः। न च पूर्वदेशादिरेव वर्त्तमानादेरपि ग्राहकमिति तेनैव पूर्वापरदेशादिना तथाऽवसीयते पूर्वदर्शनकाले वर्त्तमानदेशादेरभावेन तत्सम्बन्धित्वस्य तेन तत्र प्रतिपत्तुमशक्तेः भावे वा वर्त्तमानदेशादेः पूर्वदेशादिरूपतैवं नेदानीन्तन- ११
देशादितेति तदनुषक्तार्थावगतौ पूर्वदर्शने कथमिदानीन्तनस्य पूर्वादितावगतिः। न च पूर्वदेशादिरेव वर्त्तमानदेशादिः प्रत्यभिज्ञानादवसितस्य परिगतार्थस्याप्येकतापत्तेः स्वप्नादिप्रत्ययस्य पूर्वप्रत्ययवदभ्रान्तताप्रसक्तेः एकविषयत्वात्। न च प्रत्यभिज्ञानात् पूर्वापरदेशादीनां तद्दर्शनकालेऽसत्त्वेनाप्रतिभासनात् तत्सम्बन्धित्वस्याप्यप्रतिपत्तेरसतामपि देशादीनां तत्सम्बन्धित्वस्य वा तत्र प्रतिभासे दर्शनमसं(सत्)ख्यातिः स्यात्। अथ तद्देश द दयस्तत्सम्बन्धित्वं वासत् तत्र प्रति- २०
भाति तथासति विद्यमानार्थग्राहित्वात् नं भ्रान्तं भवेत् पूर्वदेशादिमद्वस्तुप्रतिभासे च यदवभास एव न वर्त्तमानरूपतावगतिरिति न विपरीतख्यातिः अपास्तवर्त्तमानावभासस्य पूर्वरूपग्राहिणः स्मृतिस्तद्विपरीतस्याख्यातित्वयोगात्। न च पूर्वकालावर्त्तमानकालादितया भ्रान्तावभासनात् तत्र तद्विपरीताख्यातित्वमिदानीन्तनदेशाप्रतिभासमान तत्र जखादेः पूर्वरूपताभावप्रसक्तेः यतो यदेव तत्र सन्निहितरूपमाभाति तदेवं सदसत्तु(सदस्तु) पूर्वदेशादित्वम् न च भासमानं न चाभ्युप- २१

१-शादितया वा० बा०। २ प्रति विपरीताख्यातिः आ०। ३-भाति त-मां०। ४ कथञ्चि वि-भां० मां०। कथञ्चि वि-वा० बा०। कथंवि वि-हा० वि०। ५ अथासंस्त-भां० मां० हा० वि०। अवासंस्त-आ०। ६-स्तथाप्य-वा० बा०। ७ सन् प्रतिभाति वि० सं०। ८ सर्व्वग्रह-आ०। ९-रतस्तद-आ०। वि० सं०।-रस्तद-वा० बा०। १०-स्य वार्यस्य आ०।-स्यर्वार्थस्य हा० वि०। ११-था त-वा० बा० विना। १२-न तेवापि वा० बा०। १३ यदिदा-आ०। यदादा-भां०। १४-स्यान्यादेशादि-भां० मां०।-स्यादेशादि-आ०। १५-दाऽसं-भां० मां० हा० वि०।-दाः सं-आ०। १६-नस्येदानींमश-आ०।-नस्येदीनामशत्वादशतश्चाति-वा० बा०। १७-दशत-आ० हा०।-दसत-वि० सं०। १८-शादि-गगति इ-भां० मां० हा० वि०।-शादितावगगतिरिदा-वा० बा०। १९ पूर्वेनभा-भां०। पूर्वेनभा-मां० आ० हा० वि०। २०-वसेय व-भां० मां०। २१-दग्भोवरयो-वा० बा०। २२-गतेः तदा-आ०। २३-रदेशादिशादिना मां०। २४ तस्याव-वा० बा०। २५-शादे पू-वा० बा०।-शादे नः पू-आ०। -शाब्देः पू-हा० वि०। २६-व तन दे-आ०। २७ पूर्वादेव वा० बा० भां० मां० हा० वि०। २८-नदेशादेः प्र-मां०। २९-प्रत्ययवद-वा० बा० आ० विना। ३०-मसंख्या-आ० हा० वि०। ३१ तद्देश द-यादय-मां० आ०। तद्देशदयादय-हा० वि०। तद्देशादयादय-वा० बा०। ३२ वासन्नं वासत् त-आ०। ३३-भाति विद्य-भां० मां०। ३४ न वांतं भ-भां० हा० वि०। न चांतं भ-मां० आ०। ३५-भासे व पदव-वा० बा० विना। ३६-वसास एव भां०।-व भासास एव मां० सं०। ३७-पताग्रा-वा० बा०। ३८ स्मृति चद्धि-वा० बा०। ३९-ना तत्र द्वि-वा० बा०। ४०-त्र जख्यादेखादेः आ०।-त्र जखादेखादेः वा० बा०।-त्र रजतादेः वि० सं०। ४१-व सदसस्तु पू-वा० बा०।

गमविषयः अन्यथा पीतादेव प्रतिभासमानस्य नीलादेः सत्त्वापत्तेः सर्वस्य पूर्वात्मकतापत्तेः। न च सर्वं सर्वं सर्वात्मकतापत्तेः गम्यत एव प्रत्यक्षेण तथा अप्रतिपत्तेः। न चानुमानमपि सर्वस्य सर्वात्मकतामवगमयति प्रत्यक्ष(क्षा)नवतारे तत्रानुमानस्यापानवत्(स्याप्यनवतारात्) अनुमानस्य च सर्वात्मकत्वसाधकत्वे प्रवृत्तो प्रतिनियतरूपा ग्राह्यवाक्षमशेषं विपरीतख्यातितामनुभवेत्। न वा भेदग्राह्यनुमानागमो वाऽवितथो वितथो व्यक्तं तु भेदावभासिनमस्तं वितथमित्यद्वैतापत्तिरध्यक्षमाते भेदे अनुमानागमयोरभेदग्राहिणोः वैतथ्यापत्तेः प्रत्यक्षतोऽविगतभेदे वस्तुन्यभेदग्राहिणोरस्तयोरन्यथा ग्रहणलक्षणस्य वैपरीत्यस्य भावात् नवानुमानावगमबाधितत्वात् अभेदग्राह्यध्यक्षस्य चैतन्यं तद्बाधितत्वेन तयोरेकचैतन्यप्रसक्तेः न च तत्त्वात् तस्य तदबाधकत्वप्रसक्तेः न चानुमानयोरभेदप्रतिपादकत्वं तयोर्भेदप्रतिपादकत्वयोस्ततः प्रतिभासाविशेषात् विपरीतख्यात्यभ्युपगमे सर्वासद्विपरीतख्यातिर्भवेत्। न च यदविसंवादि तन्न विपरीतख्यातिरिति वक्तव्यम् अविसंवादित्वस्यासिद्धेरित्यसकृत् प्रतिपादनात् ??]।

[?? अपि च, पूर्वदृगवगतस्य रूपस्य पुनरवगमोऽविसंवादः न च पूर्वदृगवगमयो (दृगवगतयो)रभेदप्रतिपादकत्वम् पूर्वदृशः प्रच्युतत्वेन तत्राप्रतिभासे तदवगतस्यापि रूपस्याप्रतिभासमानात्(सनात्)। न च पूर्वप्रतिभास्येवेदर्शनावभासिरूपमित्येकत्वात् न पूर्वं प्रतिभासते स्यनमसत्वामेकत्वस्यैवासिद्धेः। तथाहि-दर्शने प्रतिभासमानं रूपं तद्दर्शनग्राह्यमस्तु पूर्वं न ग्राह्यं तु तत् कथमवगतं न तावत् सर्वदर्शनेन उत्तरकालं तस्याभावात् यदापि तदासीत् न तदा वर्त्तमानं दर्शनं तदभावेन तदवसेयरूपावगतिः तदवसायानधिगमे तदवसेयरूपानवगमादन्यथा सकलसन्तानदृगवसेयत्वप्रतिपत्तिप्रसक्तेः सर्वं(वैः) सर्वविद् भवेत्। न च तद्दर्शनेन तदवसायाव्यतिरिक्तभाविदृगवगतरूपपरिच्छेदः न पुनः तद्व्यतिरिक्तरूपपरिच्छेदाभेदादेवेति वक्तव्यम् यतो भाविदृगवगमस्य भेदतदवसेयत्वादेवाध्यक्षस्याप्यप्रवृत्तिर्न पुनर्भेदात्। भिन्नेऽपि सन्निहिते पक्षभूतेरुत्पत्तेरुपलम्भात् तच्चाभिन्नेऽपि भाविदर्शनाग्राह्यत्वमस्तीति न तत्राध्यक्षवृत्तिः न च भिन्नं भाविज्ञानावसेयसन्निहितत्वात् न तदवसेयमभिन्नं तु विपर्ययात् तदधिगम्यमिति वक्तव्यम् भाविदृगसन्निधाने तदवभास्यस्याप्यसन्निहितत्वात्। यदि च भाविज्ञानदृशं तत् परिगतं चार्थ(र्थं) पूर्वदर्शनमवभासयति तदाऽसदर्थग्राहित्वात् भ्रान्तं तदासज्येत। तन्न प्रथमदर्शनेन भाविज्ञाने ग्राह्यरूप-

---

१-तादवं प्र-हा०।-तादवे प्र-वा० बा०।-तादर्थं प्र-वि० सं०। २ न च सर्वं स-मां०। न च सर्वं सर्वात्मक-हा० वि। न च सर्वं सर्वांमर्वात्मकतापते गम्य-वा० बा०। न चा सर्वं स-आ०। ३ नवानु-मां० हा० विना। ४-स्य व सर्वा-भां०।-स्य वा सर्वा-आ०। ५ ग्राह्यचाक्ष-मां०। ६ वाऽवितथोऽवितथोव्य-भां० मां० हा० वि०। वावितथोऽवितथो व्य-वा० बा०। ७-ध्यक्षस्य वैतथ्यं तद्बाधितत्वेन तयोरेकवैतथ्यप्रसक्तेर्न च तद्बाधितत्वात् तस्य तदबाधकत्वप्रसक्तेः न चानुमानमयोरभेदप्रति कत्वं तयोर्भेदप्रतिपादत्वयोन्ततः प्रतिभासाविशेषात् वा० बा०। ८-स्तयोरन्यथा आ० हा० वि०। ९-वान्नचानु-मां०। १०-त्वात् भे-आ० हा० वि०। ११-तन्य तद्बा-आ०। १२ न च तद्बाधितत्वात् आ० हा० वि०। १३ न वानु-आ० हा० वि०। १४ सर्वा सचिद्वि-बा० बा०। १५ असं-वा० बा० विना। १६ अपि पूर्ववदवग-वा० बा० विना। १७ पूर्वदवगम-वा० बा० विना। १८-भा वे द्द-वा० बा०। १९-सते स्य तमस-आ०। सते स्येनीम-वा० बा०।-सते स्य नमसत्वमेकत्व-वि० सं०। २० तत्राहि वा० बा०। २१-ग्राह्यमस्तु पूर्वं न ग्राह्यं तु वा० बा०।-ग्राह्यं तु भां० मां०। २२-मानं त द्द-वा० बा०। २३-रूपाप-आ०। २४-मस्ये भे-भां० मां० हा० वि०।-मस्यै भे-आ०। २५-त्वादेतदवसेयत्वादेवाध्य-वा० बा०। २६-हिते क्षभृते-मां० हा० वि०।-हिते न्यक्षभृतेरुत्तेरुपलम्भात् तत्वासिज्ञेपिभाविर्दर्शनग्राह्यत्वमस्तीति वा० बा०। २७-लम्भते तच्चा-भां० मां० हा० वि०। २८ च भिन्न भा-आ०। २९-स्यतमिति वा० बा०। ३०भावि गसन्नि-वा० बा० विना। ३१-भासस्या-वा० बा० आ० वि०। ३२-गतं वार्थ-भां० मां० आ० हा० वि०। ३३-ग्राहितत्वात् वा० बा० विना। ३४-सद्येता त-वि०। ३५-ज्ञानं ग्रा-वा० बा० विना।

परिच्छेदः तत्परिहारेण पूर्वकालताप्रतिभासोदयात् तत् प्रतिगतमेव रूपं तद्विषयोऽभ्युपगन्तव्यः। नापि वर्त्तमानं दर्शन(नं) दृश्यमानस्य पूर्वदृगवभासिरूपमावेदयति तस्यापि स्वकालभावविरूपावभासकत्वेनोदयात् पूर्वदृशोऽप्रतिभासे तदवगतस्यापि रूपस्य तेनाग्रहणात् पूर्वदृशोऽनवगमेऽपि द(ऽपितद)वगतरूपपरिच्छेदाभ्युपगमात् पूर्वपूर्वज्ञानावभासिरूपपरिच्छेदापत्तिरित्युक्तत्वात्। अपि च, पूर्वज्ञानावभासि रूपं वर्त्तमानावभासितया वा गृह्यते, वर्त्तमानदर्शनावगम्यं वा पूर्वज्ञानावभासितया, द्वयं वा परस्परंसंसक्तमिति विकल्पाः। आद्ये विकल्पे वर्त्तमानदृगवभासिरूपाधिगतिरेव न पूर्वज्ञानावगतरूपाधिगमः। द्वितीयेऽपि प्राक्तनज्ञानावगतरूपाधिगतिरेव पूर्वदृगवगतं च रूपमसदिति तद्ग्राहि वर्त्तमानं ज्ञानं भ्रान्तं भवेत्। पूर्वावभासप्रच्युतेऽ(तेः) तद्ग्राह्यताया अपि प्रच्युतेः नहि तस्मिन् विनष्टे तत्प्रतिभासमानं रूपं संभवति प्रतिभासमानं रूपं संभवति प्रतिभासनप्रसङ्गात्। नापि तृतीयः पक्षः तत्र हीदानीन्तनदृगवभासि पूर्वावगासा(वभासा)धिगम्यं च परस्परं संसक्तं रूपद्वयमाभातीति नैकतावगम इति न पूर्वदर्शनावगतेन रूपेण दृश्यमानस्यावगमो युक्तः। न च रूपान्तरेण दृश्यमानस्यावगमो युक्तः न च रूपान्तरेण दृश्यमानरूपावगमो रूपान्तरावगमात् पूर्वज्ञानावभासिरूपानवगमात् यतः अन्यरूपपरिच्छेदे नान्यत् परिच्छिन्नं भवति। न च वर्त्तमानदर्शनात् पूर्वदर्शनग्राह्यरूपपरिच्छेदः अभेदादेवेति वक्तव्यम् यतः भेदसिद्धो(द्धौ) पूर्वदृगवगतरूपास्यावगतसि(रूपस्यावगमसि)द्धिः तत्सिद्धो(द्धौ) चाभेदसिद्धिरितीतरेतराश्रयदोषप्रसक्तिः। तस्मान्न गृहीतस्य पुनर्ग्रहणसंभव इति न संवादः। तदभावे च भ्रान्ताभ्रान्तज्ञानयोर्विशेषाभावान्न विपरीतख्यातिसंभवः। ??]

नाप्यलौकिकत्वं भ्रान्तज्ञानावभासिनोऽर्थस्यात एव न्यायात्। तथाहि-न तावल्लौकिकत्वाप्रतिपत्तिः यतो मभा(तोऽभा)वस्य निःस्वभावतया केनचिद(दा)कारेण परिच्छेत्तुमशक्यत्वात् परिच्छेदे वास्तु(वा वस्तु)त्वापत्तेः पुनरप्यलौकिकत्वाशङ्काऽनिवृत्तेरनवस्थाप्रसक्तिः। न च लौकिकत्वादन्यत्वं म(न्यत्वम)लौकिकत्वम् यतो यदि तत् तदैव गृह्यते तदा भ्रान्तदृशोऽप्रवृत्तिर्भवेत्। नह्यर्थक्रियार्थिनोऽलौकिकत्वपरिच्छेदप्रवृत्तियु(र्यु)क्तिमती न्याय्य(नाप्य)न्यदाऽलौकिकत्वप्रतिपत्तिः यतः 'नेदं रजतम्' इति कालान्तरेऽभावप्रतीतिस्तव जायते नालौकिकत्वावगतिः। तदेवं प्रतिभासाविशेषात् प्रतिभासमानं केशान्दुकादिव(वत्) सर्वं निःस्वभावम्।

तथाहि-नावभासमानो नीलादिरवयवी देशादिभिन्नस्थूलस्य तस्यैकत्वानुपपत्तेः। न ह्यनेकदेशसम्बन्धविरुद्धधर्माध्यासवत एकत्वं युक्तम् तथाप्येकत्वे घट-पटावपि(पटयोरपि) न भेदो भवेत् विरुद्धधर्माध्यासादन्यस्याभेदकत्वात्। न च देशादिभेदेऽप्येकत्वप्रतिभासादेकता, देशादिभेदेन व्यवस्थितानामवयवानां प्रतिभासभेदादेव भेदात्। न ह्यवोमध्योर्वैदि(ह्यधोमध्योर्ध्वादि)भागा ए(एक)रूपतया प्रतिभाति(भान्ति) पिण्डस्याणुमात्रतापत्तेः। न च तद्व्यतिरिक्तो ग्राह्याकारतां बहिर्बिभ्राणोऽवयवी प्रतिभाति। न च समानदेशतया अवयवेभ्यः पृथक्त्वस्याप्रतिभासः यतः समानदेशा अपि वातातपादयो भावाः पृथगवभासमाना लक्ष्यन्ते। न चैवमवयवनिर्भास इति नासौ

१-च्छेदे त-वा० बा० विना। २-या तत् प्र-वा० बा० आ०। ३-भासरू-आ०। ४-भावेपि विरू-आ०। ५-दनात् वा० बा०। ६ रूप वर्त-आ०। ७-रसंसिक्तेमिति वा० बा०।-रसंसिक्ते मिति मां० हा० वि०। ८-मानज्ञा-मां० आ० हा० वि०। ९-च्युतोऽत-आ० हा० वि०।-च्युतोत-वा० बा०। १०-प्रतिभासमानं रूपं संभवति प्रतिभासमानरूपं संभवति प्रतिभासमानं रूपं संभवति प्रतिभासनप्रसङ्गात् भां० मां०। ११-वगमासा-मां०।-वगगासा-भां०। १२-गमोऽवगमात्। पूर्वं-भां० मां०।-गमोवगमा रूपान्तरावगमात् पूर्वं-हा० वि०।-गमोवगमा रूपान्तरावगमा पूर्वं-वा० बा०। १३-मात् तयोऽन्य-वा० बा० विना। १४-ह सम्भ-आ०। १५ यतोमभा-वा० बा०। १६-न्यथ म-आ०।-न्यत्र म-वा० बा०। १७ न्यायान्यदा-भां० मां०। १८-कत्वा प्र-आ०। १९-भाववप्रतीतिस्तवज्ञाय-हा०।-भावप्रतीतिस्तवज्ञाय-वि०।-भावं च प्रतीति वज्ञाय-भां० मां०।-भातवप्रतीतिस्तव ज्ञाय-आ०। २० तदैवं प्र-आ० विना। २१-सनामं केशांदु-वा० बा०।-समान केशादु-भां० मां०। पृ० ३६१ टि० ३१। २२ सर्वं निः-वा० बा० विना। २३-संबंद्धवि-भां० आ० हा० वि०।-सवद्धवि-वा० बा०। २४ न ह्यवोमध्योऽर्वादि-हा० वि०। न ह्यावोमध्योर्वादि-वा० बा०। न ह्यवोमध्येऽर्वादि-आ०। २५-भागो ए-हा० वि०।-भागा एव या-वा० बा० आ० विना। २६-मवमयं च निर्भा-आ०।

तद्व्यवहारविषयः । न च 'एको घटः' इति प्रतीतेरवयवो(वी) अवयवव्यतिरिक्तमस्ति(क्तः समस्ति) यतो घट(टा)वसायेऽपि तदवयवानामुल्लेखश्चाध्यवसीयते नापरोऽवयवी वर्णाकृत्यक्षराकारशून्यस्य तस्य केनचिदप्यनु(प्यनु)भवान्न कल्पनाऽवसेये(यो)ऽप्यवयवी सत्तामासादयति ।

अनादिवासनासमुत्थं व्यवहारमात्रकमेवेदं मिथ्यार्थं ज्ञानम् । न च व्यवहारमात्रादेव बहिरेकं वस्तु सिद्ध्यति 'नीलादीनां स्वभावः' इत्यत्रापि व्यवहारैकत्वात् स्वभावस्यैकताप्राप्तेः । अथ तत्र प्रतिभासभेदादेकत्वं बाध्यते तर्ह्यत्रापि मध्योर्ध्वादि(ध्योर्ध्वादि)निर्भासभेदात् घटादेरेकत्वं बाध्यत एवेति न बाह्योऽर्थोऽस्त्यवयविरूपः । नापि परमाणुस्वभावः मध्योर्ध्वादिविभागप्रतिभासेऽप्यणूनामप्रतिभासनात् । स्थूलरूपो हि नीलाद्यवभासः संवेद्यते न च परमाणुषु प्रत्येकं स्थूलरूपसम्भवः तथात्वे परमाणुत्वायोगात् । नापि तेषु समुदितेषु स्थूलरूपसङ्गतिः तथावस्थाविनामप्यणूनां स्वरूपतः सूक्ष्मत्वात् । न च तद्व्यतिरिक्तः समुदायः तथात्वे द्रव्यवादप्रसङ्गात् तस्य चोक्तदोषत्वात् । ततो न परमाणुषु कथञ्चित् स्थूलरूपतासम्भवः । न चान्यादृगवभासोऽन्यादृशस्यार्थस्य ग्राहकः नीलदृशोऽपि पीतग्राहकतापत्तेः नियतव्यवस्थाविलोपश्चैवं प्रसज्यते । अपि च, नानादिकसम्बन्धात् परमाणोरप्येकता असङ्गतैव । आह चाचार्यः—

"षड्भिर्न युगपद्योगात् परमाणोः षडंशता" । [ ] इति ।

तदंशानामपि नानादिकसम्बन्धात् पुनः सांशतापत्तेरनवस्थाप्रसक्तिरिति न परमाणुसद्भावः । न चार्थाभावे नियतदेशकालाकारः प्रतिभासो न भवेत् वासनाबलेन तथाभूतप्रतिभासस्य स्वप्नदशायामुपलब्धेर्जाग्रद्दशायामपि तद्बलेनैव तदुदयसद्भावात् अर्थस्तु स्वरूपेण न क्वचित् सिद्धः । नापि प्रतिभासनियामकत्वेनेति नार्थवादो युक्तिसंगतः । न च वासनाबलान्नियताकारं ज्ञानमेव सदस्तु न शून्यतेति वक्तव्यम् यतो नीलादिरूपं ज्ञानमप्येकानेकरूपमयुक्तम् । तथाहि-तस्यापि दिग्भेदान्नैकता अर्थवत् युक्ता प्रतिभासभेदाच्च, नापि नीलादिज्ञानं परमाणुरूपम् ज्ञानपरमाणूनामपि दिक्षष्ठयोगात् सांशतापत्तेरनेकप्रतिपत्तेरयोगाच्चोक्तप्रायम् । न च बहिरवभासमानो नीलादिर्वितथः बोधस्तु परिशुद्धोऽवितथ इति वक्तव्यम् तस्यानुपलब्धेरेवाभावनिश्चयात् । न च वासनाप्रतिबद्धत्वमनुभवस्य निश्चेतुं शक्यम् प्रत्यक्षस्य पौर्वापर्येऽप्रवृत्तेर्नान्वयव्यतिरेकनिश्चायकत्वम् तदनिश्चये च न हेतुफलभावावगतिरध्यक्षात् । नाप्यनुमानम् प्रत्यक्षाभावे तस्याप्यप्रवृत्तेर्न हेतुफलभावः क्वचिदपि सिद्धिमासादयति । किञ्च, यदि वासनाप्रबोधप्रभवं नील-सुखादिव्यतिरिक्तं प्रतिपुरुषनियतं संवेदनमनुभूयेत तदा विज्ञानवादो युक्तिसङ्गतः स्यात् न च तत् कदाचनाप्युपलब्धिगोचरः नील-सुखादेस्त्वेकानेकस्वभावायोगात् वासनाजन्यत्वस्यापि परमार्थतोऽसम्भवात् सर्वधर्मशून्यतैव वस्तुबलायाता । नीलाद्यवभासस्य वासनाप्रतिबद्धत्वं संवृत्या शून्यत्वमुच्यते न सर्वसंवेदनाभावः तस्य कदाचिदप्यननुभवात् । न च प्रतिभासे सति कथं शून्यत्वमिति वक्तव्यम् तस्यैकानेकस्वभावायोगतः शून्यतेति प्रतिपादनात् । उक्तं चाचार्येण—

"भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्मादेकमनेकं वा रूपं तेषां न विद्यते" [ ] इति ।

१-क्तः मस्ति यतो घटवसाये पि वा० बा० । २ घटवसेयेपि हा० वि० । घटमेवसायेपि आ० । ३-मुल्लेख्यश्चा-आ० । ४-परोऽवसीयते नापरोऽवयवी भां० मां० । ५ ग्रन्थाग्रम् १२८३८ ॥ ६-नाद्-यति वा-आ० । ७ बाह्यार्थो-हा० वि० । ८-पगतिः आ० । ९ पृ० १०५ पं० १३ ।

"अयमेव चार्थः कारिकया गीयते—

"षड्भिर्न युगपद्योगात् परमाणोः षडंशता । षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः" ॥

—४, २, २५ न्यायवा० पृ० ५१६ पं० १७ ।

"यदुक्तम् आचार्यपादैः" इत्युल्लिख्य श्लोकोऽयमुद्धृतः-बोधिचर्याव० प्रज्ञापार० पञ्जि० परि० ९ पृ० ५०३ पं० ६ तथा टिप्प० १ ।

न्यायतात्पर्यटी० ४, २, २५ पृ० ६५० पं० २४ तथा पृ० ६५१ पं० १० पर्यन्तम् । रत्नाकरा० प्र० परि० पृ० ३१ पं० १२ । सर्वदर्शनसं० द० २ पृ० ३१ पं० १९२ । १०-षट् यो-आ० हा० वि० । ११-श्चये न च हे-आ० हा० वि० । १२-रुषं नि- आ० । १३-भावयो-आ० हा० वि० । १४-नुभावा-भां० मां० हा० वि० । १५ अष्टस० पृ० ११५ पं० ९ । स्याद्वादर० पृ० ८९ प्र० पं० ६ । "तदुक्तमाचार्येण" इत्युल्लिख्य निर्दिष्टोऽयं श्लोकः शास्त्रवा० स्याद्वादक० पृ० २१५ प्र० पं ८-९ ।

भगवद्भिरप्युक्तम्—"मायोपमाः सर्वे धर्माः" [ ] इति । तदवस्थितमेतत् यत् प्रतिभाति तद् द्विचन्द्रादिवत् सकलमसत्यम् ।

न चात्रैतत् प्रेरणीयम् दृष्टान्त-दार्ष्टान्तिकभेदाभावे द्विचन्द्रादिनिदर्शनेन नीलाद्यवभासस्यासत्यता न साधयितुं शक्या । न ह्यसतो निदर्शनसङ्गतिः । भेदे वा नासत्यता भवेद् भावानाम् पक्ष-दृष्टान्तयोर्हि भेदः सत्यत्वे सति भवति असतः शशविषाणादेरिव भेदानुपपत्तेः । तथा साधनस्याप्यस्तित्वे न शून्यता, नास्तित्वे न साध्यप्रतिपत्तिः । एवं वादि-प्रतिवादि-प्राश्निकानामभावे न वादः सम्भवी । तत्सद्भावे च न शून्यता । आह च भट्टः—

"सर्वदा सदुपायानां वादमार्गः प्रवर्त्तते ॥"
"अधिकारोऽनुपायत्वात् न वादे शून्यवादिनः ।"
[श्लो० वा० निरालम्ब० श्लो० १२८-१२९] इति ।

यतो यदि पारमार्थिकदृष्टान्त-दार्ष्टान्तिकादिभेदाद् वादमार्गप्रवृत्तिः परस्याप्यसौ कथं भवेत्? नहि परमार्थतो भावभेदः प्रत्यक्षतोऽधिगन्तुं शक्यस्तदभावात् । नानुमानादपीति प्रतिपादितम् । न च परस्याभ्युपगमात् साधनादिभेदसिद्धेस्तत्प्रवृत्तिः अप्रमाणकाभ्युपगममात्रादर्थासिद्धेः कल्पितात् तु साधनादिप्रविभागाद् बाह्यार्थव्यवस्थायां भेदप्रपञ्चस्य कल्पनारचितत्वं भवेत् न वास्तवत्वम् । न च लोकप्रसिद्धेन साधनादिभेदेन बाह्यार्थव्यवस्था अर्थवादिनो युक्तिमती, शून्यवादिनोऽपि तत्प्रसिद्धेनैव तेन शून्यताव्यवस्थाया न्यायप्राप्तत्वात् । तथाहि-तस्यापि साधनादिभेदव्यवहारो लोकप्रसिद्धः प्रागासीत् तेन यदि शून्यता व्यवस्थाप्यते न तेन कश्चिद् दोषः । शून्यताव्यवस्थितेरुत्तरकालं यदि साधनादिभेदो विशरति तदा न कश्चिद् दोषः "गतोदके कः खलु सेतुबन्धः" [ ] इति न्यायात् । उक्तं चाचार्येण—"सर्वं एवायमनुमानानुमेयव्यवहारः सांवृतः" [ ] इत्यादि । ततः सांवृता अनुमानगम्या शून्यता ।

यद्वा नीलादीनां प्रतिभासमानानां यत् कल्पितमेकत्वादिरूपं तस्याऽप्रतिभासादेव निषेधः । नहि व्यवहारबलाद्प्रतिभासमानमेकत्वादिकं रूपं कल्पयितुं युक्तम् प्रतिभासव्यतिरेकेण व्यवहारस्याप्ययोगात् । ततो बाह्यमाध्यात्मिकं वा रूपं न तत्त्वम् किन्तु सांवृतमेव । संवृतिश्च त्रिधा सुगतसुतप्रसिद्धा—लोकसंवृतिर्मरीचिकादिषु जलभ्रान्तिरेका, तत्त्वसंवृतिः सत्यनीलादिप्रतीतिर्द्वितीया,

---

१ पृ० ३७१ पं० १२ । "यत्तु उक्तं भगवता—मायोपमा धर्मा यावत् निर्माणोपमा इति"—महायानसूत्रालंकारे पृ० ६२ पं० १० ।

"एतदुक्तं भगवता—अनुत्पन्नाः सर्वभावा मायोपमाश्च इति"—लङ्कावतारसू० द्वितीयभा० पृ० १११ पं० ७ ।

२ "अत्राप्यभिदधत्यन्ये किमित्थं तत्त्वसाधनम् । प्रमाणं विद्यते किञ्चित् आहोस्विच्छून्यमेव हि ॥ ५७ ॥
शून्यं चेत् सुस्थितं तत्त्वमस्ति चेच्छून्यता कथम् ? । तस्यैव ननु सद्भावादिति सम्यग् विचिन्त्यताम् ॥ ५८ ॥
प्रमाणमन्तरेणापि स्यादेवं तत्त्वसंस्थितिः । अन्यथा नेति सुव्यक्तमिदमीश्वरचेष्टितम् ॥ ५९ ॥
उक्तं विहाय मानं चेच्छून्यताऽन्यस्य वस्तुनः । शून्यत्वे प्रतिपाद्यस्य ननु व्यर्थः परिश्रमः ॥ ६० ॥
तस्याप्यशून्यतायां च प्राश्निकानां बहुत्वतः । प्रभूताशून्यतापत्तिरनिष्टा संप्रसज्यते" ॥ ६१ ॥

—शास्त्रवा० समु० षष्ठस्त० पृ० २१५-२१६ ।

३ **सम्भवतीति** । प्र० मां० बहिः । ४-**कारानु**-आ० । शास्त्रवा० स्याद्वादक० पृ० २१६ प्र० पं० ११-१२ । ५-**नादिभेदे व्य**-आ० हा० वि० । ६ शास्त्रवा० स्याद्वादक० पृ० २१६ द्वि० पं० ९ । ७-**द्वा सर्वनी**-मां० ।

८ यदत्र 'लोकसंवृति'-'तत्त्वसंवृति'-'अभिसमयसंवृति'इति संवृतित्रयं निर्दिष्टम् तदेव बोधिचर्यावतारे तत्पञ्जिकायां च 'मिथ्यासंवृति'-'तथ्यसंवृति'-'योगिसंवृति'इति संज्ञया निरदेशि । तथाहि—

"संवृतिः परमार्थश्च सत्यद्वयमिदं मतम् । बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते" ॥ २ ॥

"संव्रियते आव्रियते यथाभूतपरिज्ञानं स्वभावावरणात् आवृतप्रकाशनाच्च अनयेति संवृतिः अविद्या मोहो विपर्यास इति पर्यायाः × × × सा च संवृतिर्द्विविधा लोकत एव **तथ्यसंवृतिः मिथ्यासंवृतिश्चेति** । तथाहि—

किञ्चित् प्रतीत्य जातं नीलादिकं वस्तुरूपमदोषवदिन्द्रियैरुपलब्धं लोकत एव सत्यम् ।

अभिसमयसंवृतियोंगिप्रतिपत्तिस्तृतीया । योगिप्रतीतेरपि ग्राह्यग्राहकाकारंतायाः प्रवृत्तेः । उक्तं च भगवद्भिः–"कतमत् संवृतिसत्यं यावल्लोकव्यवहारः" [ ] । इति व्यवस्थितं सर्वधर्मविरहः शून्यतेति शुद्धतरपर्यायास्तिकमतावलम्बी ऋजुसूत्र एवं व्यवस्थितः ।

[ऋजुसूत्र–शब्द–समभिरूढ–एवंभूतेषु सौत्रान्तिक–वैभाषिक–योगाचार–माध्यमिकानां समवतारः]

अथवा सौत्रान्तिक-वैभाषिकौ बाह्यार्थमाश्रितौ ऋजुसूत्र-शब्दौ यथाक्रमम् वैभाषिकेण नित्यानित्यशब्दवाच्यस्य पुद्गलस्याभ्युपगमात् शब्दनयेऽनुप्रवेशस्तस्य । बाह्यार्थप्रतिक्षेपेण विज्ञानमात्रं समभिरूढो योगाचारः । एकानेकधर्मविकलतया विज्ञानमात्रस्याप्यभाव इति एवम्भूतो व्यवस्थित एवम्भूतो माध्यमिक इति व्यवस्थितमेतत् तस्य तु शब्दादयः शाखाप्रशाखाः सूक्ष्मभेदा इति ॥ ५ ॥

मायामरीचि–प्रतिबिम्बादिषु प्रतीत्य समुपजातमपि दोषवदिन्द्रियोपलब्धं यथास्वं तीर्थिकसिद्धान्तपरिकल्पितं च लोकत एव मिथ्या ।

तदुक्तम्—

"विनोपघातेन यदिन्द्रियाणां षण्णामपि ग्राह्यमवैति लोकः ।
सत्यं हि तल्लोकत एव शेषं विकल्पितं लोकत एव मिथ्या" ॥—बोधिचर्या० प्रज्ञापार० पञ्जि० परि० ९ पृ० ३५२ पं० ३–पृ० ३५३ पं० ७–१६ ।

"एवं संवृति–परमार्थभेदेन द्विविधं सत्यं व्यवस्थाप्य तदधिकृतश्च लोकोऽपि द्विविध एवेति उपदर्शयन्नाह—

तत्र लोको द्विधा दृष्टो योगी प्राकृतकस्तथा । तत्र प्राकृतको लोको योगिलोकेन बाध्यते ॥ ३ ॥

लोको जनः × × × × × द्विधा × योगी प्राकृतकस्तथा । योगः समाधिः सर्वधर्मानुपलम्भलक्षणः सोऽस्यास्तीति योगी लोकः इत्येकः प्रकारो राशिः । तथा प्रकृतिः संसारप्रवृत्तेः कारणमविद्या तृष्णा तस्या जात इति प्राकृतः प्राकृत एव प्राकृतको लोक इति द्वितीयः" ।–बोधिचर्याव० प्रज्ञापार० पञ्जि० परि० ९ पृ० ३६७ पं० १६–पृ० ३६८ पं० १० पर्यन्तम् ।

"न दोषो **योगिसंवृत्या** लोकात् ते तत्त्वदर्शिनः" ।–बोधिचर्याव० पृ० ३७७ ।

"द्वे सत्ये । तद्यथा—

संवृतिसत्यं परमार्थसत्यं चेति"–धर्मसं० पृ० २२ पं० १२ ।

द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना । लोकसंवृतिसत्यं च सत्यं च परमार्थतः" ॥ ८ ॥

–मध्यमकवृ० आर्यसत्यप० प्र० २४ पृ० ४९२ ।

बोधिचर्याव० प्रज्ञापार० पञ्जि० परि० ९ पृ० ३६१ पं० १३ ।

"पितापुत्रसमागमे चोक्तम्–

सत्यं इमे द्वि लोकविदूनां दिष्ट स्वयं अश्रुणित्व परेषाम् ।
संवृति या च तथा परमार्थो सत्यु न सिध्यति किंच तृतीयु" ॥–बोधिचर्याव० प्रज्ञापार० पञ्जि० परि० ९ पृ० ३६१ पं० १७ ।

शास्त्रवा० स्याद्वादक० पृ० २१५ प्र० पं० १० ।

१–**रतयाऽप्र**–भां० ।–**रतयाप्र**–मां० । २ पृ० ३१७ पं० ८ ।

षष्ठगाथाव्याख्या ।

[नयवन्निक्षेपाणामपि यथास्वं द्रव्यार्थिक–पर्यायार्थिकरूपतया विभजनम्]

नयानुयोगद्वारवत् शेषानुयोगद्वारेष्वपि द्रव्यार्थिक-पर्यायार्थिकौ मूलव्याकरणिनाविति दर्शयन्त्य(यन्न)नयोर्व्यापकताम्—

नामं ठवणा दविए त्ति एस दव्वट्ठियस्स निक्खेवो ।
भावो उ पज्जवट्ठिअस्स परूवणा एस परमत्थो ॥ ६ ॥

इत्यनया गाथया—दर्शयत्याचार्यः ।

अथवा वस्तुनिबन्धनाध्यवसायनिमित्तव्यवहारमूलकारणतामनयोः प्रतिपाद्य अधुना अध्यारोपिताऽनध्यारोपितनाम-स्थापना-द्रव्य-भावनिबन्धनव्यवहारनिबन्धनतामनयोरेव प्रतिपादयन्नाहाचार्यः—**नामं ठवणा** इत्यादि ।

अस्याश्च समुदायार्थः—**नाम स्थापना द्रव्यम् इति एष द्रव्यार्थिकस्य निक्षेपः । भावस्तु पर्यायार्थिकनिरूपणाया निक्षेप इति एष परमार्थः ।**

[१ नामनिक्षेपः]

[नाम व्याख्याय तत्र संकेतविधि–तद्विषययोः प्ररूपणम्]

तत्र यस्य कस्यचिद् वस्तुनो व्यवहारार्थमभिधानं निमित्तसव्यपेक्षम् अनपेक्षं वा यत् सङ्केत्यते तन्नाम । सङ्केतकरणात्(णं तु) क्वचिद् अभेदेन यथा 'अयं घटः' इति, क्वचिद् भेदेन यथा 'अस्य चायं घटशब्दो वाचकः' इति भेदेन । एतच्च समानासमानाकारपरिणत्यात्मकेऽपि वस्तुनि समानाकारप्रतिपादनायैव नियोज्यते तस्यानुगतत्वेन तत्र सङ्केतकरणसौकर्यात् । असमानपरिणतेष्वननुगमात् आनन्त्याच्च न तत्र सङ्केतः कर्तुं शक्यः । शब्दव्यापाराच्च वस्तुगतसदृशपरिणतेरेव प्रतिभासता(सनात्) स एव शब्दार्थः यः शाब्द्यां प्रतीतौ प्रतिभातीति नाऽसदृशपरिणामोऽत्यन्तविलक्षणस्तस्यार्थ इति वस्तुस्थितिः ।

[भर्तृहरेर्द्रव्यार्थिकानुसारिणः शब्दब्रह्मदर्शनस्य पूर्वपक्षतया वर्णनम्]

अत्र च द्रव्यार्थिकमतावलम्बी शब्दब्रह्मवाद्याह भर्तृहरिः—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः" ॥

[वाक्यप० श्लो० १ प्रथमका०] इति ।

अत्र आदिः उत्पादः, निधनं विनाशः तदभावाद् 'अनादिनिधनम्' । अक्षरम्' इति अकाराद्यक्षरस्य निमित्तत्वात् अनेन च विवर्त्तोऽभिधानरूपतया निदर्शितः । 'अर्थभावेन' इत्यादिना त्व-

---

१ **पज्जवट्ठिअपरूवणा** शास्त्रवा० स्याद्वादक० पृ० २४२ प्र० पं० ३ । २ शास्त्रवा० स्याद्वादक० पृ० २४२ प्र० पं० ४ । ३–**त्तस्यव्य**–आ० हा० वि० विना । ४–**नपेक्ष या यत्** आ० । ५–**रणत्वात्** आ० विना । ६–**नाकार**–आ० हा० वि० । ७–**नित्यास**–आ० । ८–**णतेध्वननु**–भां० ।–**णते ननु**–आ० । ९ **शाब्दां प्र**–हा० । **शाब्द प्र**–वि० । १०–**ति ताद**–आ० हा० वि० । ११ अत्रोच्यमानः शब्दब्रह्मवादिपक्षः संपूर्णोऽपि शब्दशोऽविकलतया तत्त्वसंग्रहपञ्जिकायां दृश्यते–पृ० ६७ का० १२८–पृ० ७५ का० १५२ । तथाहि–

"नाशोत्पादासमालीढं ब्रह्म शब्दमयं परम् । यत् तस्य परिणामोऽयं भावग्रामः प्रतीयते" ॥

–तत्त्वसं० का० १२८ पृ० ६७ ।

१२ तत्त्वसं० पञ्जि० पृ० ६७ पं० २१ । द्वादशारनय० लि० प्रे० को० पृ० ३३८ पं० ३ । प्रमेयक० पृ० ११ द्वि० पं० ६ । स्याद्वादर० पृ० ४४ प्र० पं० ३ । शास्त्रवा० स्याद्वादक० पृ० २३५ द्वि० पं० १० । नयोप० वृ० पृ० ७५ द्वि० पं० ३ । १३–**नाशः तस्य तद्**–आ० हा० वि० विना । १४–**न वि**–आ० ।

भिधेयो विवर्त्तः। 'प्रक्रिया' इति भेदानामेव संकीर्त्तनम्। 'ब्रह्म' इति पूर्वापरादिदिग्विभागरहितम् अनुत्पन्नम् अविनाशि यच्छब्दमयं ब्रह्म तश्चायं (तस्यायं) रूपादिभावग्रामपरिणाम इति श्लोकार्थः। एतच्च शब्दस्वभावात्मकं ब्रह्म प्रणवस्वरूपम् स च सर्वेषां शब्दानाम् समस्तार्थानां च प्रकृतिः। अयं च वर्णक्रमरूपो वेदस्तदधिगमोपायः प्रतिच्छन्दकन्यायेन तस्यावस्थितत्वात्। तच्च परमं ब्रह्म अभ्युदयनिःश्रेयसफलधर्मानुगृहीतान्तःकरणैरवगम्यते। अत्र च प्रयोगः–ये यदाकारानुस्यूतास्ते तन्मयाः, यथा घट–शरावोदञ्चनादयो मृद्विकारानुगता मृण्मयत्वेन प्रसिद्धाः, शब्दाकारानुस्यूताश्च सर्वे भावा इति स्वभावहेतुः। प्रत्यक्षत एव सर्वभावानां शब्दाकारानुगमोऽनुभूयते। तथाहि–अर्थेऽनुभूयमाने शब्दोल्लेखानुर्गता एव सर्वे प्रत्यया विभाव्यन्ते। उक्तं च—

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" ॥
[वाक्यप० श्लो० १२४ प्रथमका०] इति।

न च वाग्रूपताऽननुवेधे बोधस्य प्रकाशरूपतापि भवेत् तस्यापरामर्शरूपत्वात् तदभावे तु तस्याभावात् बोधस्याप्यभावः, परामर्शाभावे च प्रवृत्ता(त्त्या)दिव्यवहारोऽपि विशीर्येत इति। आह च—

"वाग्रूपता चेद् व्युत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शनी ॥"
[वाक्यप० श्लो० १२५ प्रथमका०] इति।

ज्ञानाकारनिबन्धना च वस्तूनां प्रज्ञप्तिरिति नैषां शब्दाकारानुस्यूतत्वमसिद्धम्, तत्सिद्धेश्च तन्मात्रभावित्वात् तन्मयत्वस्य तन्मयत्वमपि सिद्धमेव। अत एव 'अयं घटः' इत्यभेदेन शब्दार्थसम्बन्धो वैयाकरणैः—'सोऽयमित्यभिसम्बन्धाद् रूपमेकीकृतम्' इत्यादिना अभिजल्पस्वरूपं दर्शयद्भिः प्रतिपादितैः।

अत्र च पर्यायास्तिकमतेन प्रतिज्ञादिदोष उद्भाव्यते—किमत्र जगतः शब्दपरिणामरूपत्वाच्छब्द-

---

१ "'प्रक्रिया' इति भेदाः। 'ब्रह्म' इति नामसंकीर्तनम्—तत्त्वसं० पञ्जि० पृ० ६७ पं० २४।

"'प्रक्रिया' इति भेदाः। 'शब्दब्रह्म' इति नामसंकीर्तनम्"—प्रमेयक० पृ० ११ द्वि० पं० ७। स्याद्वादर० पृ० ४४ प्र० पं० ५।

"'प्रक्रिया' इति भेदानामेव संकीर्तनम्। 'ब्रह्म' इति विशुद्धस्वनामकीर्तनम्"—शास्त्रवा० स्याद्वादक० पृ० २३५ द्वि० पं० १३।

"'प्रक्रिया' प्रतिनियता व्यवस्था, भेदानां संकीर्तनमेतत्"—नयोप० वृ० पृ० ७५ द्वि० पं० ८।

२ पूर्वापरादिविभागरहितम् अनुत्पन्नम् अविनाशि यत् शब्दमयं ब्रह्म"–तत्त्वसं० पञ्जि० पृ० ६७ पं० २०। ३ "तस्यायं रूपादिर्भावग्रामः परिणाम इति प्रतीयते"—तत्त्वसं० पञ्जि० पृ० ६७ पं० २०–२१। ४ "प्रणवो हि किल सर्वेषां शब्दानाम् सर्वेषां च अर्थानाम् प्रकृतिः स च वेदः। अयं तु वर्ण–पदक्रमेण अवस्थितो वेदः"—तत्त्वसं० पञ्जि० पृ० ६८ पं० २। ५–**तास्तेन त**–मां०। स्याद्वादर० पृ० ४८ द्वि० पं० १३–पृ० ४९ द्वि० पं० ३। ६ "यथा घट–शरावोदञ्चनादयो मृद्विकाराः मृदाकारानुगताः पदार्था मृण्मयत्वेन प्रसिद्धाः"—तत्त्वसं० पञ्जि० पृ० ६८ पं० ६। ७–**क्ष एव** आ०। ८–**गत एव** आ० हा० वि०। ९ "अनुविद्धमिवाऽऽभाति सर्वं शब्दे प्रतिष्ठितम्"—प्रमेयक० पृ० ११ द्वि० पं० ५। १० **सर्वं श**–आ० हा० वि०। "सर्वं शब्देन वर्तते"—तत्त्वसं० पञ्जि० पृ० ६८ पं० १०। स्याद्वादर० पृ० ४३ द्वि० पं० १। शास्त्रवा० स्याद्वादक० पृ० २३६ प्र० पं० २। "सर्वं शब्देन जायते"—अनेकान्तज० पृ० ४१ द्वि० पं० १४। ११ "शब्दसंपर्कपरित्यागे हि प्रत्ययानां प्रकाशरूपताया एवाभावप्रसक्तिः वाग्रूपता हि शाश्वती प्रत्यवमर्शिनी च तदभावे प्रत्ययानां नापरं रूपमवशिष्यते"—स्याद्वादर० पृ० ४३ प्र० पं० १६। १२ **तदा भा**–आ०। १३ अनेकान्तज० पृ० ४१ द्वि० पं० १३। नयोप० वृ० पृ० ७५ द्वि० पं० १३। "न हि बोधः प्रकाशेत"—स्याद्वादर० पृ० ४३ द्वि० पं० २। १४ पृ० १८० पं० २१ तथा टिप्प० ११।

मयत्वं साध्यते, उत शब्दात् तस्योत्पत्तेः शब्दमयत्वं यथा 'अन्नमयाः प्राणाः' इति हेतौ 'मयट्'विधानात्? न तावदाद्यः पक्षः परिणामानुपपत्तेः। तथाहि–शब्दात्मकं ब्रह्म रूपाद्यात्मकतां प्रतिपद्यमानं स्वरूपपरित्यागेन वा प्रपद्येत, अपरित्यागेन वा? यदि परित्यागेन इति पक्ष आश्रीयते तदा 'अनादिनिधनम्' इत्यनेन यदविनाशित्वमभ्युपगतम् तस्य हानिप्रसक्तिः पौरस्त्यस्वभावध्वंसात्। अथ अपरित्यागेन इति पक्षस्तदा रूपसंवेदनसमये बधिरस्य शब्दसंवेदनप्रसङ्गः तदव्यतिरेकात् नीला-५ दिवत्। तथाहि–यत् यदव्यतिरिक्तं तत् तत्संवेदने संवेद्यते, यथा तत्स्वरूपम्, रूपाद्यव्यतिरिक्तश्च शब्दात्मेति स्वभावहेतुः। अन्यथा भिन्नयोगक्षेमत्वात् तत् तदात्मकमेव न स्यादिति विपर्यये बाधकं प्रमाणम्। अथ तत्समये न तत्संवेदनमिष्यते तदा रूपादेरप्यसंवेदनप्रसङ्गः एकस्वभावत्वात्। भिन्नधर्मत्वे वा शब्द–रूपादेरत्यन्तभेद एव। नह्येकप्रमा(मात्र)पेक्षयैकस्यैव ग्रहणमग्रहणं वा एकत्वहानिप्रसङ्गात्। यदि पुनर्विरुद्धधर्माध्यासेऽप्यभेदः घट–पटादिव्यक्तीनामपि कल्पितभेदानाम- १० भेदप्रसक्तिः। परेणाभ्युपगतश्च घटादिव्यक्तीनां भेदः यतः स्वात्मनि व्यवस्थितस्य ब्रह्मणो नास्ति भेदः अविकारविषयत्वादस्य इति परसिद्धान्तः। नहि घटाद्यात्मना तस्यानादिनिधनत्वम् किन्तु परमात्मापेक्षया। घटादयश्च परिदृश्यमानोदय-व्ययाः परिच्छिन्नदेशादयश्चोपलभ्यन्त एव। अयं चोपलब्धिलक्षणप्राप्तत्वे ब्रह्मणो दोष उक्तः। अतिसूक्ष्मतयाऽतीन्द्रियत्वे तु तस्य तत्स्वरूपवन्नीलादी- १५ नामप्यग्रहणप्रसक्तिर्दोषः। तेन 'उदयव्ययवतीमेवार्थमात्रामपरदर्शनाः प्रतियन्ति' इत्ययुक्तमेवाभिधानम्। न च यथा नीलत्वाव्यतिरिक्तमपि क्षणिकत्वं तत्संवेदने न संवेद्यते तद्वच्छब्दरूपमपीति वक्तव्यम् यतो नास्मन्मते नीलसंवेदने क्षणिकत्वं न संवेद्यते किन्तु भ्रान्तिकारणवशान्निर्विकल्पकेन गृहीतमपि नि(न नि)श्चीयत इत्यनुभवापेक्षया तद्ग्रहणे तदपि गृहीतमेव निश्चयापेक्षया त्वगृहीतमिति ज्ञानभेदाद् गृहीतत्वमगृहीतत्वं चैकस्याविरुद्धमेव। न चैवं शब्दब्रह्मणो भवन्मतेन ग्रहणाऽग्रहणे,

---

१ "मयट् च"—अ०४।३।८२। सिद्धान्तकौ० अं० १४६२। "तृ–हेतुभ्यो रूप्य–मयटौ"—अ० ६।३।१५६। हैम०।

२ "इति संचक्षते येऽपि ते वाच्याः किमिदं निजम्। शब्दरूपं परित्यज्य नीलादित्वं प्रपद्यते" ॥
तत्त्वसं० का० १२९ पृ० ६८।

३ "न वा तथेति यद्याद्यः पक्षः संश्रीयते तदा। अक्षरत्ववियोगः स्यात् पौरस्त्यात्मविनाशतः" ॥
तत्त्वसं० का० १३० पृ० ६८।

४ "अथाप्यनन्तरः पक्षस्तत्र नीलादिवेदने। अश्रुतेरपि विस्पष्टं भवेच्छब्दात्मवेदनम्" ॥
"येन शब्दमयं सर्वं मुख्यवृत्त्या व्यवस्थितम्। शब्दरूपापरित्यागे परिणामानि(भि)धानतः" ॥
"अगौणे चैवमेकत्वे नीलादीनां व्यवस्थिते। तत्संवेदनवेलायां कथं नास्त्यस्य वेदनम्" ॥
तत्त्वसं० का० १३१–१३२–१३३ पृ० ६८–६९।

५ "शब्दः संवेदनं प्राप्नोति नीलादिसंवेदनवत् तदव्यतिरेकात्"—तत्त्वसं० पञ्जि० पृ० ६८ पं० २७। ६–**काद्-नीला**–आ०। ७ **तत्सं**–आ० हा० वि०। ८ **तथात्म**–आ०।

९ "अस्याऽवित्तौ हि नीलादेरपि न स्यात् प्रवेदनम्। ऐकात्म्याद् भिन्नधर्मत्वे भेदोऽत्यन्तं प्रसज्यते" ॥
तत्त्वसं० का० १३४ पृ० ६९।

१०–**कत्वभा**–आ०।

११ "विरुद्धधर्मसंगो हि बहूनां भेदलक्षणम्। नान्यथा व्यक्तिभेदानां कल्पितोऽपि भवेदसौ" ॥
तत्त्वसं० का० १३५ पृ० ६९।

"न हि एकस्य एकदा एकप्रतिपन्नपेक्षया ग्रहणमग्रहणं च युक्तम्"—तत्त्वसं० पञ्जि० पृ० ६९ पं० २३। प्रमेयक० पृ० १२ द्वि० पं० ४। "न हि एकस्य एकदा एकप्रमात्रपेक्षया ग्रहणमग्रहणं च युक्तम् विरोधात्"—स्याद्वादर० पृ० ४९ प्र० पं० ४। १२–**ध्यासोप्य**–आ० हा० वि०। १३ "यतस्तस्य स्वात्मनि व्यवस्थितस्य नास्ति भेदः विकारविषयत्वादस्येति सिद्धान्तः"—तत्त्वसं० पञ्जि० पृ० ६९ पं० २५। १४ "अयं च अश्रुतेः स्पष्टं शब्दसंवेदनं स्यात् इति यः प्रसङ्गः उक्तः स यदि ब्रह्मणो रूपमुपलब्धिलक्षणप्राप्तमिष्यते तदा द्रष्टव्यः। यदि पुनः अतिसूक्ष्ममतीन्द्रियमिति वर्ण्यते तदा अयमदोषः किन्तु नीलादीनामपि तादृप्यात् तत्स्वरूपवत् अग्रहणप्रसङ्ग इत्ययं दोषो वाच्यः"—तत्त्वसं० पञ्जि० पृ० ६९ पं० २८–पृ० ७० पं० ४। १५ "नीलादिसंवेदनेऽपि न संवेद्यते"—तत्त्वसं० पञ्जि० पृ० ७० पं० ६। १६ **नामास्मन्मते** भां० हा० वि०। **नास्मन्मते** प्र० भां० बहिः। **नामात्मते** आ०। १७ "किन्तु गृहीतमपि निर्विकल्पेन चेतसा भ्रान्तिनिमित्तेन गुणान्तरसमारोपान्न विनिश्चीयते इत्युच्यते"—तत्त्वसं० पञ्जि० पृ० ७० पं० ८। १८ "ग्रहणाग्रहणे युक्ते"—तत्त्वसं० पञ्जि० पृ० ७० पं० १०।

सविकल्पकत्वाभ्युपगमात् सर्वसंविदाम् सविकल्पकत्वेन च सर्वात्मना शब्दस्य निश्चितत्वादगृहीत-स्वभावान्तरानुपपत्तेः।

"निश्चयैः।

यन्न निश्चीयते रूपं तत् तेषां विषयः कथम्? ॥" [ ]

इति प्रतिपादनात्। न चाविकल्पकस्यापि ज्ञानस्याभ्युपगमादयं न दोषः, 'न सोऽस्ति प्रत्ययो लोके' इत्यादेर्विरुद्धत्वप्रसक्तेः 'शब्दाकारानुस्यूतत्वात्' इति हेतोरसिद्धिप्रसक्तिश्च। न च यथा प्रमाणान्तरतः क्षणिकत्वप्रसिद्धेः 'अध्यक्षतोऽनुभूतमपि तन्न निश्चीयते' इति व्यपदिश्यते तथा शब्दात्मता भावानां व्यपदेशमासादयति, तत्प्रसाधकप्रमाणान्तरस्याप्रसिद्धेः। किन्तु शब्दात्मा घटादिरूपतया परिणमन् प्रतिपदार्थं भिद्यते न वेति वक्तव्यम्। यद्याद्यः पक्षस्तदा शब्दब्रह्मणोऽनेकत्वप्रसक्तिः विभिन्नानेकभावात्मकत्वात् तत्स्वरूपवत् एकं च परैर्ब्रह्मेष्यते इत्यभ्युपगमापगमः। अथ यदि द्वितीयः पक्षस्तदा एकदेश-कालाकाररूपतापत्तिर्जगतः इत्येकरूपः प्रतिभासो भवेत् नीलादेरेकब्रह्मरूपाव्यतिरेकात्। अपि च, नित्यशब्दमयत्वे जगतः शब्दस्वरूपवत् सर्वभावानां नित्यत्वप्रसक्तिरिति तेन सह सर्वदोपलब्धेः परिणामासिद्धिः कुशयति परिणामप्रतीतेः(तिम्)। तन्न परिणामकृतं शब्दमयत्वं भावानाम्।

नापि हेतुकृतम्, शब्दस्य नित्यत्वेन अविकारित्वात् ततः कार्योदयासम्भवात्। नाप्यक्रमाच्छब्दब्रह्मणः क्रमवत्कार्योदयो युक्तः, कारणवैकल्याद्धि कार्याणि उदयं प्रति सविलम्बानि भवन्ति शब्दाख्यं चेत् कारणमविलम्बम् अपरस्यापेक्षणीयस्याभावात् किं न तानि युगपदुदयमनुभवेयुः? अपि च, एकस्वभावाच्छब्दब्रह्मणोऽन्यस्य भावान्तरस्योत्पत्तिर्यद्यङ्गीक्रियते तदा 'अर्थरूपेण तद्

१–**स्वनान्तरा**–आ०। २–**श्चयैर्यत्न नि**–हा०।–**श्चयैर्यत्र नि**–वि०।–**श्चयर्यत्न नि**–आ०। "यथोक्तम्—"निश्चयः(यैः)। यन्न निश्चीयते रूपं तत् तेषां विषयः कथम्" इति"—तत्त्वसं० पञ्जि० पृ० ७० पं० १२। ३ पृ० ३८० पं० ९। ४ "किञ्च, क्षणिकत्वं भावानां प्रमाणान्तरतः सिद्धेरनुभूतमपि न निश्चीयते इति व्यपदिश्यते। शब्दात्मता तु भावानां कुतः सिद्धा येन साऽप्येवं व्यवस्थाप्यते"—तत्त्वसं० पञ्जि० पृ० ७० पं० १६। ५ "किञ्च, असौ शब्दात्मा परिणामं गच्छन् प्रतिपदार्थभेदं प्रतिपद्यते न वा?"—प्रमेयक० पृ० १२ द्वि० पं० ५।

६ "प्रतिव्यक्ति तु भेदेऽस्य ब्रह्मानेकं प्रसज्यते। विभिन्नानेकभावात्मरूपत्वाद् व्यक्तिभेदवत्" ॥

तत्त्वसं० का० १३७ पृ० ७०।

७ **परिब्राह्मे**–आ०। "एकं च परमब्रह्मेष्यते"—तत्त्वसं० पञ्जि० पृ० ७१ पं० ३। ८–**गमेः अगमा अत यदि** आ०। ९–**रूप प्रति**–आ०।

"प्रतिभावं च यद्येकः शब्दात्मा(ऽ)भिन्न इष्यते। सर्वेषामेकदेशत्वमेकाकारा च विद् भवेत्" ॥

तत्त्वसं० का० १३६ पृ० ७०।

१० "नित्यशब्दमयत्वे च भावानामपि नित्यता। तद्योगपद्यतः सिद्धेः परिणामो न संगतः" ॥

तत्त्वसं० का० १३८ पृ० ७१।

११–**ब्दरूप**–आ० हा० वि०। १२ **कृतं शय**–हा०।

"एकरूपतिरोभावे ह्यन्यरूपसमुद्भवे। मृदादाविव संसिध्येत् परिणामस्तु नाऽक्रमे" ॥

तत्त्वसं० का० १३९ पृ० ७१।

१३ "अथापि कार्यरूपेण शब्दब्रह्ममयं जगत्। तथापि निर्विकारत्वात् ततो नैव क्रमोदयः" ॥

तत्त्वसं० का० १४० पृ० ७१।

१४–**मविकलम्** मां० बहिः। "तच्चेद् अविकलम् किमपरं तैरपेक्ष्यं येन युगपन्न भवेयुः"—प्रमेयक० पृ० १२ द्वि० पं० ९।

१५ "अन्योन्यरूपसंभूतौ तस्मादेकस्वरूपतः। विवृत्तमर्थरूपेण कथं नाम तदुच्यते" ॥

तत्त्वसं० का० १४१ पृ० ७१।

१६–**णोऽन्यान्यस्य** प्र० भां० बहिः।

"यदि तस्मादेकस्वभावाच्छब्दात्मनोऽन्यान्यस्य स्वभावस्य उत्पत्तिरङ्गीक्रियते"—तत्त्वसं० पञ्जि० पृ० ७१ पं० २५।

"किञ्च, अपरापरकार्यग्रामोऽतोऽर्थान्तरमनर्थान्तरं वोत्पद्येत।"—प्रमेयक० पृ० १२ द्वि० पं० ९।

ब्रह्म विवृत्तम्' इत्येतन्न सिद्धिमासादयेत्। न यतोऽर्थान्तरोत्पादे तत्स्वभावमनासादयतोऽन्यस्य तादूप्येण विवर्तो युक्तिसङ्गत इति सर्वथापि प्रतिज्ञार्थो न घटते। 'शब्दानुस्यूतत्वात्' इति हेतुश्चासिद्धः न यतः परमार्थनैकरूपानुगमो भावानां सम्भवति स्वस्वभावव्यवस्थिततया सजातीयव्यावृत्तस्वरूपत्वात् तेषाम् विजातीयव्यावृत्तिकृतं त्वेकाकारानुस्यूतत्वं कल्पनाशिल्पिनिर्मितमेषाम् घट-शरावोदञ्चनादिषु परमार्थतो भिन्नेष्वपि अमृदात्मकपदार्थव्यावृत्तिकृतमृद्रूपानुस्यूतिवत्। न च नीलादीनां कल्पनाविरचितमपि शब्दाकारानुस्यूतत्वमस्ति, नील-पीतादिषु प्रतिभासं बिभ्राणेषु शब्दानुस्यूतत्वस्य कल्पनयाप्यनुल्लेखात् तत् कथं नासिद्धो हेतुः?

अथ अविभक्तमेव सदा ब्रह्मात्मकं तत्त्वम् न तस्य परमार्थतः परिणामः—येनैकदेशत्वं नीलादेरेकाकारं वा संवेदनं भवेदिति प्रेर्यते—तच्च अविद्योपहतबुद्धयो नीलादिभेदेन विविक्तमिव(विचित्रमिव) मन्यन्ते। यदुक्तम्— १०

"यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः।
सङ्कीर्णमिव मात्राभिश्चित्राभिरभिमन्यते॥" [ ]

"तदेवममृतं (तथेदममलं) ब्रह्म निर्विकारमविद्यया।
कलुषत्वमिवापन्नं भेदरूपं विवर्त्तते॥" [ ] इति।

१–**ह्म निवृ**–आ० हा० वि० विना। २ "न हि अर्थान्तरस्य उत्पादे अन्यस्य तत्स्वभावमनाविशतस्तादूप्येण विवर्तो युक्तः"—तत्त्वसं० पञ्जि० पृ० ७१ पं० २६।

"न हि अर्थान्तरस्य उत्पादे अन्यस्य तत्स्वभावमनाश्रयतस्तादूप्येण विवर्तो युक्तः"—प्रमेयक० पृ० १२ द्वि० पं० १०।

३–**ब्दानुस्सूत**–हा० वि०।–**ब्दानुस्सत**–आ०। ४–**तुश्च सि**–आ० हा० वि० विना।

५ "अतद्रूपपरावृत्तमृद्रूपत्वोपलब्धितः। कुम्भ–कोशादिभेदेषु मृदात्मैकोऽत्र कल्प(ल्प्य)ते" ॥

"नील–पीतादिभावानां न त्वेवमुपलभ्यते। अशब्दात्मपरावृत्तिरबीजा कल्पनाऽपि तत्" ॥

तत्त्वसं० का० १४२–१४३ पृ० ७२।

"न हि भावानां परमार्थेन एकरूपानुगमोऽस्ति"—तत्त्वसं० पञ्जि० पृ० ७२ पं० ७।

६ "अथाविभागमेवेदं ब्रह्मतत्त्वं सदा स्थितम्। अविद्योपप्लवाल्लोको विचित्रं त्वभिमन्यते" ॥

तत्त्वसं० का० १४४ पृ० ७२।

७ **तथाविद्योपह**–हा० वि०। ८ **विवृत्तमि**–आ० हा० वि०।

"विचित्रमिव"–तत्त्वसं० पञ्जि० पृ० ७२ पं० १९।

"ननु परमार्थतोऽनादिनिधनेऽभिन्नस्वभावेऽपि शब्दब्रह्मणि अविद्यातिमिरोपहतो जनः प्रादुर्भाव-विनाशवत् कार्यं भेदेन विचित्रमिव मन्यते"—प्रमेयक० पृ० १२ द्वि० पं० ११। "यथैव हि तिमिरतिरस्कृतलोचनो जनो विशुद्धमपि आकाशं विचित्ररेखानिकरकरम्बितमिव मन्यते"—स्याद्वादर० पृ० ४४ प्र० पं० १२।

९ शास्त्रवा० समु० स्तब० ८ श्लो० २ पृ० २८६ द्वि०। बृहदा० उ० भाष्यवार्ति० ३, ५ पृ० १२४६ श्लो० ४३। अष्टस० पृ० ९३ पं० २१। प्रमेयक० पृ० १२ द्वि० पं० ११। स्याद्वादर० पृ० ४४ प्र० पं० १५। नयोप० वृ० पृ० ७६ प्र० पं० १२।

"यथा भवति बालानां गगनं मलिनं मलैः। तथा भवत्यबुद्धानामात्माऽपि मलिनो मलैः" ॥

माण्डुक्योप० गौडपादका० ३ पृ० ११३ श्लो० ८।

१० "तथेदममृतं ब्रह्म"–तत्त्वसं० पञ्जि० पृ० ७२ पं० २१।"तथेदममलं ब्रह्म"–शास्त्रवा० समु० स्तब० ८ श्लो० ३ पृ० २८७ द्वि०। बृहदा० उ० भाष्यवार्ति० ३, ५ पृ० १२४६ श्लो० ४४। अष्टस० पृ० ९३ पं० २२। प्रमेयक० पृ० १२ द्वि० पं० १२। स्याद्वादर० पृ० ४४ प्र० पं० १६। नयोप० वृ० पृ० ७६ प्र० पं० १३। ११ "निर्विकल्पमविद्यया"–शास्त्रवा० समु० स्तब० ८ श्लो० ३ पृ० २८७ द्वि०। अष्टस०। नयोप० वृ० पृ० ७६ प्र० पं० १३। "निर्विकल्पम् विजातीयभेदविकल्पविकलम्"–शास्त्रवा० स्याद्वादक० पृ० २८७ द्वि० पं० ४। १२ "भेदरूपं विवर्त्ततः"–तत्त्वसं०पञ्जि० पृ० ७२ पं० २२। "भेदरूपं प्रकाशते"–शास्त्रवा०। बृहदा० उ० भाष्यवार्ति०। "भेदरूपं प्रपश्यति"–अष्टस०। प्रमेयक० पृ० १२ द्वि० पं० १२। "कलुषत्वमिवापन्नभेदरूपं तु पश्यति"—स्याद्वादर० पृ० ४४ प्र० पं० १६।

न हि नीलादीनामवस्तुस्वरूपत्वादेकदेशत्वप्रसङ्गः, नापि संवेदनस्याभेदः अविद्याविरचितत्वात् तद्भेदस्येति श्लोकद्वयाभिप्रायः।

[तस्य च दर्शनस्य पर्यायास्तिकमतेन प्रतिविधानम्]

अत्र प्रतिविधीयते–प्रमाणाधीना हि प्रमेयव्यवस्था। न चैवंभूतब्रह्मसिद्धये प्रमाणमुपलभ्यते किञ्चित्। तथाहि–न तावत् प्रत्यक्षं तथावस्थितब्रह्मस्वरूपावेदकम् नीलादिव्यतिरेकेण तत्रापरस्य ब्रह्मस्वरूपस्याप्रतिभासनात्। अथ ज्ञानात्मरूपवत् स्वसंवेदनस्याध्यक्षत एव शब्दब्रह्म सिद्धम् ज्योतिस्तदेव शब्दात्मत्वाच्चैतन्यरूपत्वाच्चेति प्रतिपाद्यते, असदेतत्; स्वसंवेदनविरुद्धत्वात्। तथाहि–अन्यत्र गतचित्तोऽपि रूपं चक्षुषा वीक्षमाणोऽभिलापासंसृष्टमेव नीलादिप्रत्ययमनुभवतीति विस्तरेण प्रतिपादितमेव सौगतैः नेह प्रदर्श्यते ग्रन्थगौरवभयात्। तेन "वाग्रूपता चेद् व्युत्क्रामेत्" इत्यादिना(त्यादि) तथा "न सोऽस्ति प्रत्ययो लोके" इति च प्रत्युक्तं द्रष्टव्यम्। तन्नाध्यक्षतो बाह्येन्द्रियजात् स्वसंवेदनाद्वा तथाभूतब्रह्मसिद्धिः। नाप्यनुमानतस्तत्सिद्धिः यतोऽनुमानं कार्यलिङ्गजम्, स्वभावहेतुप्रभवं वा तत्सिद्धये व्याप्रियेत? अनुपलब्धेः प्रतिषेधविषयत्वेन विधावनधिकारित्वात्। तत्र न तावत् कार्यलिङ्गजं तत्र व्याप्रियते, नित्यस्य क्रम-यौगपद्याभ्यामर्थक्रियाविरोधात् ततः कार्यस्यैव कस्यचिदसम्भवात्। नापि स्वभावहेतुप्रभवस्य तस्य तत्र व्यापारः ब्रह्माख्यस्य धर्मिणोऽसिद्धत्वेन तत्स्वभावभूतस्य धर्मस्य सुतरामसिद्धेः। न चैतद्व्यतिरिक्तमपरं विधिसाधकं लिङ्गमस्ति तस्य स्वसाध्यप्रतिबन्धाभावात्। न चाप्रतिबद्धं लिङ्गं युक्तम् अतिप्रसङ्गात्। शब्दरूपान्वयत्वं चासिद्धत्वात् न पारमार्थिकब्रह्मस्वरूपसाधनायालम्। नाप्यागमात् तत्सिद्धिः तस्यानवस्थितत्वात्। किञ्च,

"ज्ञानमात्रार्थकरणेऽप्ययोग्यं ब्रह्म चामृतम्।
तदयोग्यतयाऽरूपं तद्वा वस्तुषु (?) लक्षणम्॥" [ ]

इत्येतत् प्रतिपादितमनेकधा न पुनरुच्यते। यदपि न्यगादि "तं तु परमं ब्रह्मात्मानमभ्युदयनिःश्रेयसफलधर्मानुगृहीतान्तःकरणा योगिन एव पश्यन्ति' इति, तदप्यसङ्गतमेव; यतो यदि योगजे

---

१ "तत्रापि वेद्यते रूपमविद्योपप्लुतैर्जनैः। यन्नीलादिप्रकारेण त्यागादाने निबन्धनम्"॥
तद्रूपव्यतिरेकेण ब्रह्मरूपमलक्षितम्। कथं व्युत्थितचेतोभिरस्तित्वेन प्रतीयते"॥
तत्त्वसं० का० १४५–१४६ पृ० ७२।

२–ह्यरूपा–आ० हा० वि०। "न तत् प्रत्यक्षतः सिद्धमविभागमभासनात्"। तत्त्वसं० का० १४७ पृ० ७३।
३ "स्यादेतत् स्वसंवेदनप्रत्यक्षत एव तत् सिद्धम् ज्ञानात्मरूपत्वात्। तथाहि—ज्योतिस्तदेव शब्दात्मकत्वात् चैतन्यरूपत्वाच्च"–तत्त्वसं० पञ्जि० पृ० ७३ पं० १०। ४ वीक्ष्यमा–आ० विना। ५ पृ० ३८० पं० १४ तथा ९।
६ "नित्यादुत्पत्त्ययोगेन कार्यलिङ्गं च तत्र न"॥
"धर्मिसत्त्वाप्रसिद्धेस्तु न स्वभावः प्रसाधकः। न चैतदतिरेकेण लिङ्गं सत्ताप्रसाधकम्"॥
तत्त्वसं० का० १४७–१४८ पृ० ७३।
७–लब्धे प्र–आ० हा० वि०। ८–करणोऽप्य–आ०। ९–मृताम्। हा० वि०।
१० "ज्ञानमात्रार्थकरणेऽप्ययोग्यं ब्रह्म गम्यताम्। तदयोग्यतया रूपं तद्ध्यवस्तुत्वलक्षणम्"॥
तत्त्वसं० पञ्जि० पृ० ७३ पं० २६।
११ "ज्ञानं ज्ञेयक्रमात् सिद्धं क्रमवत् सर्वमन्यथा। यौगपद्येन तत् कार्यं विज्ञानमनुषज्यते॥
ज्ञानमात्रेऽपि नैवास्य शक्(क्य?)रूपं ततः परम्। भवतीति प्रसक्ताऽस्य वन्ध्यासूनुसमानता"॥
तत्त्वसं० का० १४९–१५० पृ० ७३–७४।
"एतच्च पूर्वम् ईश्वरपरीक्षायां प्रसाधितम्"–तत्त्वसं० पञ्जि० पृ० ७४ पं० ४। तच्चैवम्—
"क्रमाक्रमविरोधेन नित्या नो कार्यकारिणः। विषयाणां क्रमित्वेन तज्ज्ञानेष्वपि च क्रमः॥
क्रमभावीश्वरज्ञानं क्रमिविज्ञेयसंगतेः। देवदत्तादिविज्ञानं यथा ज्वालादिगोचरम्"॥
तत्त्वसं० का० ७६–७७ पृ० ५०।
१२ तत्तु भां० मां० वि०। १३ पृ० ३८० पं० ५।
१४ "विशुद्धज्ञानसंताना योगिनोऽपि ततो न तत्। विदन्ति ब्रह्मणो रूपं ज्ञाने व्यापृत्य संगतेः"॥
तत्त्वसं० का० १५१ पृ० ७४।

ज्ञाने तस्य व्यापारो भवेत् तदा तत्स्वरूपं योगिनः पश्यन्तीति युक्तं भवेत्। न च तज्ज्ञाने तस्य व्यापार इति प्रतिपादितम्। न च तद्विषयज्ञानोत्पत्त्या योगिनस्तं पश्यन्तीति नास्माभिरभिधीयते—तद्व्यतिरिक्तस्य योगिनस्तज्ज्ञानस्य चाभावात्—किन्तु योगित्वावस्थायामात्मज्योतीरूपं स्वत एव तत् प्रकाशत इति 'योगिनस्तत् पश्यन्ति' इत्युच्यत इति वक्तव्यम्, यतो योग्यवस्थातः प्राग् यदि ब्रह्मणो ज्योतीरूपत्वस्वभावस्तदा सदैवात्मज्योतीरूपत्वात् तस्य न कदाचिद् अयोग्यवस्थेत्ययत्न-सिद्धः सर्वेषां मोक्षः स्यात्। न च भवदभिप्रेताद्वयसंवेदनचित्राकारपरिग्रहप्रतिभासवद् अविभागस्याप्यविद्यावशाद् ब्रह्मणोऽविशुद्धसन्ततीनां तथाप्रकाशनमिति वक्तव्यम्, यतो न तद्व्यतिरेकेणान्ये अविशुद्धसन्ततयो भवदभिप्रायेण सन्ति तेषां(येषां) तथातत्प्रतिभासः। न च स्वयमेव तथा प्रकाशत इति वक्तव्यम्, मोक्षाभावप्रसङ्गात् सर्वदैव तस्य तथाप्रकाशात्मकत्वात्। अस्मन्मते तु विशुद्धज्ञानान्तरोदयात् मुक्तिर्घटत एव। न च भवन्मतेन तद्व्यतिरेकिणी अविद्या सम्भवति यद्वशात् तथा प्रकाशत इत्युच्यते। तदव्यतिरेके चाविद्यायास्तद्वशात् 'तदेव तथा प्रकाशते' इति वचो जाघटीति। न च 'अविद्यावशात् तत् तथा ख्याति' इत्यनेन तस्याविद्यात्मकत्वमेव प्रकाश्यते इति वक्तव्यम्, मोक्षाभावप्रसक्तेरेव—यतो न नित्यैकरूपब्रह्मण्यविद्यात्मके स्थिते तदात्मकाऽविद्याव्यपगमः कुतश्चित् सम्भवी येनाविद्याव्युपरतेर्मुक्तिर्भवेत्। न च तद्व्यतिरेकवदविद्याङ्गीकरणेऽप्यविद्याप्रकाशात्(द्यावशात्) तस्य तथाप्रकाशनं युक्तिसङ्गतम्, नित्यत्वाद् अनाधेयातिशये ब्रह्मणि तस्या अकिञ्चित्करत्वात् अत एव तस्य तयाऽसम्बन्धात् संसाराभावप्रसक्तिश्च। न च सा तत्त्वाऽन्यत्वाभ्यामनिर्वचनीयेति वक्तव्यम्, वस्तुधर्मस्य गत्यन्तराभावात्। न चावस्तुत्वमेव तस्याः तथात्वे तस्य तथाख्यात्ययोगादतिप्रसङ्गात्। न च तथाभूतार्थक्रियाकारिण्यास्तस्यां 'वस्तु' इति नामकरणे कश्चिद् विवादः अस्मन्मते तु तथाभूताऽभिनिवेशवासनैवाऽविद्या, वासना च कारणात्मिका शक्तिरिति पूर्वपूर्वकारणभूतादविद्यात्मकज्ञानादुत्तरोत्तरज्ञानकार्यस्य वितथाकाराभिनिवेशिन उत्पत्तेरेवाविद्यावशात् तथाख्यातिरित्युच्यते, तस्याश्च योगाद्यभ्यासादसमर्थतरतमक्षणोदयक्रमतः प्रच्युतेः शुद्धतरसंवित्सन्तानप्रादुर्भावात् मुक्तिप्राप्तिरित्युपपन्नैव बन्धमोक्षव्यवस्थितिः। नित्यैकरूपे च ब्रह्मणि अवस्थाद्वयायोगात् न संसाराऽपवर्गौ भवन्मते सम्भवतः। ब्रह्मणश्चैकत्वादेकस्य मुक्तौ सर्वेषां मुक्तिप्रसङ्गः अमुक्तौ वैकस्य सर्वेषाममुक्तिप्रसक्तिश्चाऽनिवार्या। न चात्मज्योतीरूपत्वेऽयोग्यवस्थायां किञ्चिदस्य प्रमाणं प्रसाधकमस्ति। यथा हि ज्ञानं स्वसंवेदनप्रसिद्धं प्रकाशात्मतयाऽनैवं शब्दः सर्वसंविदि संवेद्यत इति प्रदर्शितम्। अथ अयोग्यवस्थायां ब्रह्मणो नात्मप्रकाशता अङ्गीक्रियते; नन्वेवमपि प्रागविद्यमान(ना)योग्यवस्थायां स(सा) प्रादुर्भवतीति सुस्थितं तस्य नित्यत्वम्!!!। निराकृतश्च पुरुषाद्वैतवादः प्रागिति समानन्यायत्वादयमपि तथैव निराकर्त्तव्य इत्यलमतिप्रसङ्गेन।

---

१ तज्ञा–भां० मां०। तदज्ञा–आ० वि०। २–संवेदिनविक्तका–आ०। ३–ग्रहः प्र–मां०। ४ "अथापि स्यात् यथा भवतां स्वप्नाद्यवस्थासु ज्ञानमद्वयमपि विचित्राकारपरिग्रहेण प्रतिभासते तथा तदद्वयमपि अविद्यावशात् अविशुद्धसन्ततीनां तथा प्रकाशते"—तत्त्वसं० पञ्जि० पृ० ७४ पं० १९। ५ "न हि तद्व्यतिरेकेण अन्ये केचित् अविशुद्धसन्ततयः सन्ति येषां तत् तथा प्रतिभासते"—तत्त्वसं० पञ्जि० पृ० ७४ पं० २१। ६–शात् तथा आ० हा० वि०। ७ "न हि नित्यैकरूपे ब्रह्मणि अविद्यात्मके"–तत्त्वसं० पञ्जि० पृ० ७४ पं० २७। ८–विद्यावशात् भां० मां० बहिः। "अविद्यावशात् तथाप्रतिभासनम्"—तत्त्वसं० पञ्जि० पृ० ७५ पं० २। ९–वात् न वा–हा० वि०।–वात् तथा व–भां०। "वस्तुधर्मस्य गत्यन्तराभावात् अन्यथा वस्तुत्वमेव न स्यात्। न च अवस्तुवशात् तथा तस्य ख्यातिर्युक्ता अतिप्रसङ्गात्"—तत्त्वसं० पञ्जि० पृ० ७५ पं० ४। १०–स्या वस्थित ना–आ०। "तथाभूतस्य चार्थक्रियाकारिणः स्वभावस्य अवस्थितिनामकरणे"—तत्त्वसं० पञ्जि० पृ० ७५ पं० ५। ११–निवेशत उ–हा० वि०। १२–दुर्भवान्मु–भां० आ० हा० वि०। १३–स्ति तथा भां० मां०। १४–या नैव शष्टः आ०।–या नैवं शाब्दः वि०।–या नैव शाब्दः हा०। १५ "एवमपि प्रागविद्यमानं तदात्मज्योतिष्ट्वमत्यक्तपूर्वरूपस्य ब्रह्मणः पश्चाद् योग्यवस्थायां कुतः संभूतमिति वाच्यम्"–तत्त्वसं० पञ्जि० पृ० ७५ पं० १६। १६ पृ० २८५ पं० ६।

१७ "प्रधानपरिणामेन समं च ब्रह्मदर्शनम्। तद्दूषणानुसारेण बोद्धव्यमिह दूषणम्"॥
तत्त्वसं० का० १५२ पृ० ७५।

यदपि 'अभेदेन सङ्केतकरणं शब्दार्थयोस्तादूप्यं ख्यापयति' इत्युच्यते, तदप्ययुक्तम्; नहि 'अयं घटः' इति घटशब्दस्य घटार्थता घटशब्दता(घटार्थस्य वा घटशब्दता) प्रकाश्यते किन्तु 'अयं घटशब्दवाच्यः घटार्थवाचको वा' इत्ययमत्रार्थः प्रकाशयितुमभिप्रेतः अन्यथा प्रत्यक्षप्रतीतिबाधितार्थप्रकाशकत्वेन इदमुन्मत्तकवचनवदनादरणीयं स्यात्। शब्दार्थयोश्च तादात्म्ये क्षुराऽग्नि-मोदकादिशब्दोच्चारणे आस्यपाटन-दहन-पूरणादिप्रसक्तिः अनवगतसमयस्याभिधानोपलब्धौ तदर्थस्य अर्थोपलब्धौ च तद्वाचकस्यावगतिप्रसक्तिश्च अन्यथा तादात्म्यायोगात् "निश्चीयमानानिश्चीयमानयोर्भेदान्निश्चायकं वाध्यक्षं परपक्षे" [ ] इत्युक्तत्वात्। न च यो यत्प्रतिपादकः स तदात्मको धूमेक्षा(धूमाश्या)दिभिर्व्यभिचारात्। न च शब्दस्य अर्थविशेषणत्वेन प्रतीतेस्तदात्मकता, देशभेदेन शब्दार्थयोरुपलब्धेः। न च भेदे तस्य तद्यवच्छेदकत्वमनुपपन्नम्, काकादेर्भिन्नस्यापि गृहादिकं प्रति व्यवच्छेदकत्वप्रतीतेः। तन्न शुद्धद्रव्यास्तिकाभिमतनामनिक्षेपो युक्तियुक्त इति भावनिक्षेपप्रतिपादकपर्यायास्तिकाभिप्रायः।

[शब्दार्थयोरनित्यसम्बन्धवादिना स्वपक्षं समुद्धर्तुं मीमांसकसंमतनित्यसम्बन्धवादस्य निराकरणम्]

अशुद्धद्रव्यास्तिकप्रकृतिव्यवहारनयमतावलम्बिनस्तु मीमांसका भिन्नानेव शब्दार्थसम्बन्धान्नित्यानाहुः—"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" [मीमां० १-१-५ पृ० ५] इति वचनात्। 'औत्पत्तिकः' इति विरुद्धलक्षणया नित्यस्तैर्व्याख्यातः। नित्यत्वे च सम्बन्धस्य कृतकसम्बन्धवादिनो येनावगतसम्बन्धेन 'अयम्' इत्यादिना शब्देनाप्रसिद्धसम्बन्धस्य घटादेः सम्बन्धः क्रियते तस्यापि यद्यन्येन प्रसिद्धसम्बन्धेन सम्बन्धः तदा तस्याप्यन्येनेत्यनवस्थाप्रसक्तिरिति यो दोषः सः अकृतसम्बन्धवादिनोऽप्यान्न श्लिष्यतीत्ययुक्तवादिन एतेऽपीति भावनिक्षेपवादी पर्यायास्तिकः। अयुक्तवादिता च नित्यवस्तुनः शब्दादेः कस्यचिदसम्भवादिति प्रतिपादितत्वादवगन्तव्या(व्या)। अनवस्थादूषणमपि कृतकसम्बन्धपक्षप्रतिपादितमयुक्तमेव 'अयम्' इत्यादेः शब्दस्यानादिव्यवहारपरम्परातः सिद्धसम्बन्धत्वात्, तेनानवगतसम्बन्धस्य घटादिशब्दस्य सङ्केतकरणाद् अकृतसम्बन्धवादिनोऽपि चानवस्थादोषस्तुल्य एव। तथाहि-अनभिव्यक्तसम्बन्धस्याभिव्यक्तसम्बन्धेन शब्देन यदि सम्बन्धाभिव्यक्तिः क्रियते तदा तस्यापि सम्बन्धाभिव्यक्तिरन्यतोऽभिव्यक्तसम्बन्धादिति कथं नानवस्थादोषस्तुल्यः? यदि पुनः कस्यचित् स्वत एव सम्बन्धाभिव्यक्तिः अपरस्यापि तथैवास्तु इति सङ्केतक्रिया व्यर्था। शब्दविभागाभ्युपगमे चास्मन्मतानुप्रवेशः प्रदर्शितन्यायेन।

'द्रव्य-पर्यायरूपमुभयमपि परस्परविविक्तमेकत्र विद्यते' इत्यभिप्रायो नैगमोऽशुद्धद्रव्यास्तिकप्रकृतिः।

[सिद्धान्तिना शब्दस्य नित्यत्वानित्यत्वपक्षद्वयमाश्रित्य यथायथं द्रव्यार्थिकनिक्षेपरूपत्वव्यवस्थापनम्]

कृतकत्वेऽपि शब्दस्य यत्र यत्र सङ्केतद्वारेण शब्दो नियुज्यते तत्र तत्र प्रतिपादकत्वेन प्रवर्त्तत इति

१-बाधतार्थ-हा० वि० ।-बाधनार्थ-आ० । २ निश्चायमानीनिश्चायमानीनिनिश्चायमानयोर्भे-आ०। निश्चीयमानार्निनश्चीयमानार्निनश्चीयमानयोर्भे-वि०। ३-यकं चाध्य-मां०। ४-मक्षोदिभिर्व्य-मां०।-मक्षोदिभिचा-भां०। ५-प्रतीतिः आ० हा० वि० विना।-प्रतीतेः प्र० मां० बहिः। ६-नात् नुत्प-आ० हा० वि० विना। ७ "घटादेः शब्दस्य संबन्धः क्रियते"-प्रमेयक० पृ० १२४ प्र० पं० ११। तत्र चेयं टिप्पणी—"यथा प्रसिद्धसंबन्धेन घटशब्देन घट एव वाच्यस्तथा अप्रसिद्धसंबन्धेनापि घटशब्देन घट एव वाच्य इति"-टि० ४०। ८-द्यनेन आ० हा० वि०। ९-प्यनेनेति आ० हा०। १०-क अ-हा० वि० विना। ११ पृ० ३३ पं० २५। १२-ष्याम्। आ०। १३ "अनादिपरम्परातोऽर्थमात्रे प्रसिद्धसंबन्धत्वात्"-प्रमेयक० पृ० १२४ द्वि० पं० ७। अर्थमात्रे "पुरोवर्तिनि अनिर्धारितार्थे"-टि० ३२। १४-नानगत-आ०। "तेन अवगतसंबन्धस्य घटादिशब्दस्य संकेतकरणात्"-प्रमेयक० पृ० १२४ द्वि० पं० ७। तेन "अर्थेन सह"-टि० ३३। १५-गमे वा-आ० हा०। १६-स्य यस्य यत्र यत्र मां०।-स्य यत्र सङ्के-आ० हा० वि०।

द्रव्यसाधर्म्याद् द्रव्यार्थिकनिक्षेपः शब्दः य(त)था द्रव्यार्थतायाः अपि सर्वत्राभ्युपगमाद् वाच्य-वाचकयोर्नित्यत्वात् तत्सम्बन्धस्यापि नित्यता समस्त्येव सङ्केतश्च तदभिव्यक्तिरिति द्रव्यार्थिकनिक्षेपः शब्दः।

[२ स्थापनानिक्षेपः]

[स्थापनां व्याख्याय मुख्य-प्रतिनिध्योर्भेदाभेदपक्षद्वयेऽपि तस्या द्रव्यार्थिकनिक्षेपरूपत्वव्यवस्थापनम्] ५

सङ्केताभिधानस्यार्थस्य प्रतिकृतिप्रकल्पना स्थापनेति यद् वस्तु सद्भूताकारेण स्थाप्यत इति णिजन्तात् कर्मणि ष्ठु(यु)प्रत्ययः। सापि द्रव्यार्थिकस्य निक्षेपः मुख्य-प्रतिनिधिविभागाभावात् सदविशेषात् सर्वस्य मुख्यार्थक्रियाकारणात् अन्यथोपयाचितादेस्ततोऽसिद्धिप्रसक्तेः तन्निमित्तद्रव्यादिविनियोगव्यवहाराभावप्रसक्तेश्च मुख्यपदार्थरूपत्वात् स्थापनाया द्रव्यार्थत्वात्। अथवा अध्यवसायोपरचितमेव स्थापनायास्तदेकत्वम् न पुनर्वास्तवम् अन्यथा मुख्य-प्रतिनिधिविभागाभावप्रसक्तेस्तद्रूपोपलक्षकत्वाभावप्रसक्तेश्च। नह्यभेदे उपलक्ष्योपलक्षकभाव उपपन्नः। नापि भिन्नदेशकालचेतनाऽचेतनमुक्तादिविभागो न्यायानुगतो भवेदिति सर्वत्र सद्भावासद्भावरूपतया प्रवर्त्तमानत्वात् द्रव्यधर्मसद्भावादेकत्वाध्यवसायकृतमेव तस्या द्रव्यार्थत्वमिति द्रव्यार्थिकनिक्षेपः स्थापना।

[३ द्रव्यनिक्षेपः]

[द्रव्यं व्याख्याय तत्र द्रव्यार्थिकनिक्षेपत्वभावनम्] १५

द्रवति अतीताऽनागतपर्यायानधिकरणत्वेन अविचलितरूपं स(सत्) गच्छतीति द्रव्यम् तच्च भूतभाविपर्यायकारणत्वात् चेतनमचेतनं वा अनुपचरितमेव द्रव्यार्थिकनिक्षेपः।

[द्रव्यार्थिकनिक्षेपेण भावनिक्षेपसंमतस्य क्षणभङ्गस्य विस्तरेण अनेकधा निरासः]

न च प्रतिक्षणविशरारुतया भावानां नित्यताऽसम्भवान्न द्रव्यार्थिकनिक्षेपः सत्य इति वक्तव्यम् निरन्वयनाशितायां प्रमाणानवतारात्। तथाहि-अध्यक्षम् अनुमानं वा तद्व्याहित्वेन प्रवर्त्तते नान्य(अन्य)स्य प्रमाणत्वेन सौगतैरनभ्युपगमात्? न तावदध्यक्षं क्षणक्षयितां भावानामवगमयितुमलम् प्रतिक्षणमुदयापवर्गसंसर्गितया भावानां तत्राप्रतिभासनात्। नहि प्रतिक्षणं त्रुट्यद्रूपतां बिभ्राणाः पदार्थमात्रास्तत्रावभान्ति स्थिरस्थूररूपतया तेषां तत्र प्रतिभाससंवेदनात्। न चान्याद्दग्भूतप्रतिभासोऽन्याद्दग्भूतार्थव्यवस्थापकः अतिप्रसङ्गात्। न च प्रतिक्षणं भिन्नस्वभावानुभवेऽपि सदृशापरापरोत्पत्तिविप्रलम्भात् यथानुभवव्यवसायानुत्पत्तेः क्षणक्षयानुभवेऽपि स्थिरस्थूररूपाध्यवसाय इति वक्तव्यम् प्रमाणाभावात्। न चान्याद्दग्भूतार्थानुभवेऽन्याद्दग्भूतार्थनिश्चयोत्पत्तिकल्पना ज्यायसी, नीलानुभवेऽपि पीतनिश्चयोत्पत्तिकल्पनायाः सर्वत्र प्रतिनियतार्थव्यवस्थितेरभावप्रसक्तेः। [?? न च भावव्यतिरिक्तस्य वा सादृश्यस्यान्यथा सामान्यपक्षोक्तदोषस्यात्रापि प्रसक्तेः सम्भवः यतो निमित्तात् सदृशापरापरोत्पत्तिर्विभ्रमात् यथानुभवं विकल्पोत्पत्तिर्न भवेत् नं वा सदृशेष्वपि समानविकल्पजनकेषु दर्शनद्वारेण सदृशव्यवहारहेतुत्वमिति वक्तव्यम् नीलादिविशेषाणामप्यभावप्रसक्तेः। यथा हि परमार्थतोऽसदृशा अपि तथाभूतविकल्पोत्पादकदर्शनहेतवः सदृशव्यवहारभाजो

१-निक्षेप श-हा०।-निक्षेपः शब्द सङ्के-वि०। २ "ण्यासश्रन्थो युच्" ३।३।१०७। सिद्धान्तकौ० पृ० ५७५ अं० ३२८४। "णिवेत्त्यासश्रन्थघट्टवन्देरनः" ५।३।१११। हैम०। ३ सर्वस्य ——र्थ-हा०। ४- याकर-प्र० मां० बहिः। ५ सद्भावरू-हा०। ६-त्वा द्र-आ० हा० वि०। ७-रूपं स——च्छ-आ० हा० वि०।-रूप गच्छ-मां०।८ द्रष्टव्यम् आ० हा० वि०। ९ "प्रत्यक्षमनुमानं वा प्रवर्तेत अन्यस्य प्रमाणत्वेन सौगतैरनभ्युपगमात्"-प्रमेयक० पृ० १४४ द्वि० पं० ९। १०-मात् तत्र न तथावद्ध्यक्षं प्र० भां० बहिः। ११-वर्गसर्गि-आ० हा० वि०। १२-स्तवाव-भां०।-स्तदावभीति आ०।-स्तदाचभीति हा० वि०। १३ "स्थिरस्थूलसाधारणरूपतयैव तत्र तेषां प्रतिभासनात्"-प्रमेयक० पृ० १४४ द्वि० पं० १०। १४ "न च अन्याद्दग्भूतः प्रतिभासः"-प्रमेयक० पृ० १४४ द्वि० पं० ११। १५-यादुत्प-मां०। "सदृशापरापरोत्पत्तिविप्रलम्भात् यथानुभवं व्यवसायानुपपत्तेः"-प्रमेयक० पृ० १४४ द्वि० पं० ११। १६-त्पत्तिवि-आ०। १७ न चास-आ०। न स-मां०। १८-सक्ते——था हा० वि०।

भावाः तथा स्वयमनीलादिस्वभावा अपि नीलादिविकल्पोत्पादकदर्शननिमित्ततया नीलादिव्यवहारभाक्त्वं प्रतिपत्स्यन्त इति तेषामपि निःस्वभावताप्रसक्तिः। अत एव प्रतिक्षणं भिन्नस्वभावान् भावान् पश्यन्नपि "विषमङ्ग इव नावधारयति" [ ] इत्यभिधानं न युक्तम्। स्वयमद्वयस्वरूपाणामन्तर्द्वयनिर्भासदर्शनाद् बहिरप्यनाविलाक्षविज्ञानानां खण्डशः प्रतिभासोपलब्धिः याथात्म्येनैवार्थप्रतिभासोऽनुभवैरित्येतस्यासिद्धेः विकल्पवशेन चाध्यक्षस्य प्रामाण्यव्यवस्था अन्यथा दान-हिंसाविरतचेतसामपि स्वर्गप्रापणशक्तेरध्यक्षत एवाधिगमव्यवस्थितेर्न तत्र विप्रतिपत्तिरिति तद्व्युदासार्थमनुमानप्रवर्त्तनम् शास्त्रविरचनं वा वैयर्थ्यमनुभवेत्। विकल्पस्तु स्थिरस्थूरार्थाध्यवसायात् प्रतीतिः कथमध्यक्षतः क्षणिकनिरंशे परमाणुस्वलक्षणे व्यवस्थाप्यामेव सर्वविकल्पानामवस्तुविषयत्वमबाधितार्थं तथा विकल्पस्यावा(वस्तु)विषयत्वे अन्यथाभूतसंवेदनस्यानुपलक्षणाद् वस्तुन्यवस्थाभावप्रसक्तेः। संहृतसकलविकल्पावस्थायामश्वविकल्पनसमये एवं चक्षुःप्रणिधानानन्तरं पुरोव्यवस्थितस्य गवादेर्विशदतया स्थिरस्थूररूपस्यैवानुभवात् अन्यथा भूतार्थप्रतिभासस्य कदाचिदप्यनुपलब्धेः न च वस्तुनः प्रतिक्षणध्वंसित्वात् तत्सामर्थ्यबलोद्भूतेनाध्यक्षेण तद्रूपमेवानुकरणीयम् अन्यरूपानुकरणे असदर्थग्राहकत्वेन तस्य भ्रान्तताप्रसक्तेः क्षणपरिणामग्राह्ये वाध्यक्षमिति वक्तव्यम् इतरेतराश्रयप्रसक्तेः—सिद्धे हि क्षणक्षयित्वे भावानां तत्सामर्थ्यभाविनोऽध्यक्षस्य तद्रूपानुकरणं सिद्ध्यति तत्सिद्धौ च क्षणक्षयित्वं तेषां सिध्यतीति व्यक्तमितरेतराश्रयत्वम्। अपि च, क्षणस्थायित्वेऽपि भावानां यथास्वभावमनुभवः, उतान्यथेति चेत् वस्तुस्वभावानुभवनियमाभावात् कुत आशङ्काव्यावृत्तिरिति चक्षुरादिज्ञानं प्रतिकलमपरापरमेव वस्तुस्वभावमनुभवति किन्तु विकल्पवासनाप्रभवाध्यवसायस्य तन्निश्चयं प्रत्यशक्तिरित्यसङ्गतं नीलादिस्वभावेष्वप्यनाश्वासप्रसक्तिरित्युक्तत्वाच्च। तन्न क्षणक्षयिता भावानामध्यक्षावसेया। ??]

नाप्यनुमानान्निश्चेतव्या, तत्र अध्यक्षावृत्तावनुमानस्याप्यनवतारात्। तथाहि–अध्यक्षाधिगतमविनाभावमाश्रित्य पक्षधर्मतावगमबलादनुमानमुदयमासादयतीति अध्यक्षानवगते तु विषये स्वर्गादाविवाध्यवसायफलस्यानुमानस्य(स्या)प्रवृत्तिरेव सौगतैरभ्युपगता। तथा चाचार्यः–"अदृष्टेऽर्थेऽर्थविकल्पनमात्रम्" [ ] इत्युक्तवान्। यदपि 'निर्हेतुको ध्वंसः पदार्थोदयानन्तरभावी देश-कालपदार्थान्तरमपेक्ष्य? भवतस्तत्सापेक्षतया निर्हेतुत्वाभावप्रसक्तेः' इत्युक्तम् यतो (तत्र) यदि नाम अहेतुकः प्रध्वंसस्तथापि यदैव मुद्गरव्यापारानन्तरमुपलब्धिगोचरस्तदैव तत्सद्भावोऽभ्युपगमनीयः भावोदयानन्तरं तु न कस्यचिदुपलम्भगोचरतामुपगच्छतीति कथं तदैवास्य सद्भावावगतिः? न च मुद्गरादिव्यापारानन्तरमस्य दर्शनात् प्रागपि सद्भावः कल्पनीयः तथाकल्पने ह्यादौ तस्यादर्शनाद् मुद्गरव्यापारसमनन्तरमप्यभावप्रकृतिप्रसक्तिः(वप्रसक्तिः) विशेषाभावात्। न चान्ते क्षयदर्शनाद् आदावप्यसावभ्युपगन्तव्यः सन्तानेनानेकान्तात्। न च मुद्गरादिसंयोगादिकं कारणान्तरमनपेक्षमाणः पदार्थसत्तामात्रानुबन्धित्वात्? तदुदयानन्तरमेव

१–धारतीत्य–मां०। २–न वाध्य–आ० हा० वि०। ३–माण्याव्य–आ० हा० वि०। ४–वावस्थि–आ० हा० वि०। ५–म् न च शा–भां० बहिः। ६–त् किं विक–मां०। ७ प्रततिः आ० हा० वि०। ८–याम् व आ० हा० वि०। ९ "विकल्पोऽवस्तुनिर्भास इत्यस्य विरोधः"–प्रमेयक० पृ० ९ द्वि० पं० ४। तथा तत्रैव 'अवस्तुनिर्भासः' "अवस्तुनि निर्भासः प्रतिभासो यस्य विकल्पस्य सः" टि० १६। "स्वलक्षणविषयत्वे च "विकल्पो वास्तुनिर्भासादसंवादादुपप्लवः"। इति स्ववचनविरोधः"–अष्टस० पृ० १७० टि० १८। १० एवं च–हा०। ११ "न च अर्थस्य प्रतिविनाशित्वात् तत्सामर्थ्यबलोद्भूतेन अध्यक्षेणापि तद्रूपमेव अनुकरणीयमिति"–प्रमेयक० पृ० १४४ द्वि० पं० १४। १२–ग्राह्ये चा–भां० मां०।–ग्राह्यो वा–मां० बहिः। १३–सायेतस्य आ० हा० वि०। १४ "प्रत्यक्षाविषये तु स्वर्गादाविव अनुमानस्याप्रवृत्तिरेव"–प्रमेयक० पृ० १४४ द्वि० पं० १६। १५–दृष्टार्थ र्थविक–हा०।–दृष्टोर्थ यविक–आ०।–दृष्टार्थविक–वि०। १६–क्तवान् भां० आ०। १७–मपेक्ष भ–आ० हा० वि० विना। १८–कः तथा प्र–आ० हा० वि०। "किञ्च, यदि नाम अहेतुको विनाशस्तथापि"–प्रमेयक० पृ० १४५ प्र० पं० ८। १९–द्भावं क–आ०। "प्रागपि सद्भावः कल्पनीयः प्रथमक्षणे तस्य अनुपलम्भात् मुद्गरादिव्यापारानन्तरमपि अभावानुषङ्गात्"–प्रमेयक० पृ० १४५ प्र० पं० ९।

सत्त्वमासादयतीति वक्तव्यम्। यतो यदि नाम भावसत्तामात्रानुबन्धिता नाशस्य तथापि न प्रतिक्षणध्वंसित्वं सिध्यति सत्तायाः एव तथात्वेनानिश्चयात्। तथाहि–असावेकक्षणसंगता वा भवेत्, अनेकक्षणपरिगता वा? तत्र यद्याद्यः पक्षः स न युक्तः, तस्या एकैकक्षणावस्थानासिद्धेः तदसिद्धौ च तदनुबन्धिनः प्रध्वंसस्य कथं प्रतिक्षणभावित्वं निश्चेतुं शक्यम्। विशेषणाप्रतिपत्तौ तद्विशेष्यस्य प्रतिपत्तुमशक्तेर्न क्षणिकसत्तामात्रानुबन्धित्वान्नाशस्योदयानन्तरभावित्वं सिद्धिमासादयति। अथा-(था)नेकक्षणस्थायिसत्तामात्रानुबन्धी ध्वंसः तथासति सत्तायाः क्षणान्तरावस्थानादक्षणिकतैव भावस्य न्यायादनुपतति अनेकक्षणस्थितिसत्तानुबन्धे प्रध्वंसस्यानेकक्षणस्थितिसत्तानन्तरं भावेन नंष्टव्यम् अन्यथा तथाभूतसत्तानुबन्धित्वयोगा(त्वायोगो) ध्वंसस्येति कथं क्षणिकत्वम्? किञ्च, उदयानन्तरमेव भावानां ध्वंस इति कुतः प्रतीयते–किं भिन्नाभिन्नविकल्पाभ्यां ध्वंसस्याघटमानत्वात् आहोस्विदन्यतः प्रमाणादिति विकल्पद्वयम्। तत्र यद्याद्यः पक्षस्तदा नोदयानन्तरं ध्वंसः सिद्धिमासादयति यतो भिन्नाभिन्नविकल्पाभ्यां मुद्गरादिनिरपेक्षि(क्ष)त्वं तस्य सिद्धिमासादयति न पुनर्जन्मान्तरं(न्मानन्तरं) भावः। नहि निर्हेतुकस्य शशविषाणादेः पदार्थोदयानन्तरभावितोपलब्धा। अथ निर्हेतुकत्वे ध्वंसस्य सर्वदा भावात् कालाद्यपेक्षाऽसम्भवतः पदार्थोदयानन्तरमेव भावः; नन्वेवं निर्हेतुकत्वे सर्वदा भावात् प्रथमे क्षणे एव भावप्रसक्तिर्नोदयानन्तरं सद्भावो ध्वंसस्य न ह्यनपेक्षत्वात् निर्हेतुकः क्वचित् कदाचिच्च भवति तद्भावस्य सापेक्षत्वं न(क्षत्वेन) निर्हेतुकत्वविरोधादिति अभ्युपगतमेव एतत् सौगतैः। अथ स्वोत्पत्तिहेतुत एव पदार्था ध्वंसमासादयन्तीति प्रथमक्षण एव तेषां प्रध्वंसे न तथा(तदा) सत्तानुषङ्ग इति पदार्थाभावात् कुतः तत्प्रच्युतिलक्षणो ध्वंसः प्रथमक्षणे भवेत्, असदेतत्; यतो यदि भावहेतुरेव तत्प्रच्युतिहेतुस्तदा किमेकक्षणस्थायिभावहेतोस्तत्प्रच्युतिहेतुत्वम्, किं वानेकक्षणस्थायिभावहेतोरिति वक्तव्यम्। यद्याद्यः पक्षस्तदाऽसिद्धम् एकक्षणस्थायिभावहेतुत्वस्याप्यसिद्धेः तत्कृतकत्वं तत्प्रच्युतेरसिद्धमेव। द्वितीयपक्षे तु 'क्षणिकताऽभावः' इति प्रतिपादितं प्राक्। किञ्च, यदि भावहेतुरेव तत्प्रच्युतिहेतुरभ्युपगम्यते तदा वक्तव्यं किं भावजननादसौ प्राक् तत्प्रच्युतिं जनयति, आहोस्विदुत्तरकालम्, उत समानकालम्? यद्याद्यः पक्षस्तदा प्रागभावः प्रच्युतिर्भवेन्न प्रध्वंसाभावः। अथ द्वितीयस्तथासति भावप्रभववेलायां तत्प्रच्युतिर्नोत्पन्नेति न भावहेतोस्तस्या उत्पत्तिरिति न भावहेतुस्तद्धेतुः। एवं चोत्तरोत्तरकालभाविभावपरिणतिमपेक्ष्योपजायमाना तत्प्रच्युतिः कथं भावोदयानन्तरभाविनी स्यात्? अथ तृतीयपक्षोऽभ्युपगमविषयस्तथापि भावोदयसमयभाविन्या प्रच्युत्या सह भावस्य प्रथमक्षणेऽवस्थानेनाविरोधान्न तत्सद्भावेऽपि सति भावेन नंष्टव्यमिति न कदाचिद् भावाभावसद्भावः। किञ्च, यद्यप्युदयानन्तरोदयवती तत्प्रच्युतिस्तथापि न तदैव मुद्गरादिव्यापारानन्तरमिव प्रतीतिपथमवतरति किन्तु मुद्गरादिव्यापारानन्तरमेव ततश्च प्रागनुपलब्धा मुद्गरादिव्यापारानन्तरमुपलभ्यमाना पुनस्तदभावेऽनुपलभ्यमाना तज्जन्यतयासौ व्यवस्थाप्यते अन्यत्रापि हेतुफलभावस्यान्वयव्यतिरेकानुविधानलक्षणत्वात्। न च मुद्गरव्यापारानन्तरं न प्रच्युतेरुपलम्भः किन्तु कपालसन्ततेरिति तदुदय एव मुद्गरादेर्व्यापारः प्रच्युत्युपलब्धिस्तु विषयाभावादुपजायमाना वितथैवेति वक्तव्यम् यतो घटादेः स्वरूपेणैवाधि(वि)कृतस्यावस्थाना(ने) पूर्ववदुपलब्ध्या-

१–ता नावंशस्य हा०। २–क्षणं ध्वं–आ० विना। ३–भावि श्रेतु श–हा० वि०।–भावि स्था निश्चेतुं श–आ०। ४–बन्धि ध्वं–आ० हा० वि०। ५ ध्वंस ति सत्ता–वि०। ध्वंस त्ति सत्ता–मां०। ध्वंस त्ता–हा०। ६–बन्धित्वंयो–मां० विना। ७–सस्य ति क—चं क्ष–हा०। ८–न्मान्तरभा–आ०।–न्मान्तराभा–भां० मां०। "प्रथमविकल्पे तु भिन्नाभिन्नविकल्पाभ्यां मुद्गराद्यनपेक्षत्वमेव अस्य स्यात् न तु उदयानन्तरं भावः"–प्रमेयक० पृ० १४५ प्र० पं० ११। ९ "तथाभावस्य सापेक्षत्वेन अहेतुकत्वविरोधिना सहेतुकत्वेन व्याप्तत्वात् तथा सौगतैरपि अभ्युपगमात्"–प्रमेयक० पृ० १४५ प्र० पं० १३। १० "ननु प्रथमक्षणे एव तेषां ध्वंसे सत्त्वस्यैव असंभवात् कुतस्तत्प्रच्युतिलक्षणो ध्वंसः स्यात्? ततः स्वहेतोरेव अर्था ध्वंसस्वभावाः प्रादुर्भवन्तीत्यप्यविचारितरमणीयम् यतो यदि"–प्रमेयक० पृ० १४५ प्र० पं० १४। ११ "प्रथमपक्षोऽयुक्त एव क्षणस्थायिभावहेतुत्वस्य अद्यापि असिद्धेः"–प्रमेयक० पृ० १४५ द्वि० पं० २। १२–न्न तद्भा–मां०। १३ यदप्युदयानन्त–आ०। १४–टादेऽस्व–वि०।–टादेस्व–आ० हा०। "घटादेः स्वरूपेण अविकृतस्यावस्थाने पूर्ववदुपलब्ध्यादिप्रसङ्गात्"–प्रमेयक० पृ० १४५ द्वि० पं० ७।

दिप्रसक्तिर्भवेत् । न च तस्य तदा स्वयमेवाभावान्नोपलब्ध्यादिरिति वक्तव्यम् यतः सोऽपि तदभावस्तदैव मुद्गरादिव्यापारानन्तरमुपलभ्यते अन्यदा तु नोपलभ्यत इति कथं न तत्कार्यः? अथ न भावाभावो भावस्वरूपादन्यः केवलं कल्पनाविषयत्वादसदेवासौ (?) व्यवहारपथमवतार्यते; नन्वेवं भावप्रच्युतेः काल्पनिकत्वे भावानामपि काल्पनिकत्वमपरिहार्यम् यतो लाक्षणिको विरोधो नील-पीतादेः परैरभ्युपगतः वस्तुस्वरूपव्यवस्थापकं च लक्षणं तन्निमित्तो विरोधो लाक्षणिक उच्यते भावप्रच्युतिश्च लक्षणं यतो नीलस्य विरोधो नीलप्रच्युत्या तद्विरोधे च पीतादीनामपि तत्प्रच्युतिव्याप्तानां तेन विरोधस्तथा च प्रमाणं नीलपरिच्छेदकत्वेन प्रवृत्तं नीलप्रच्युतिं तद्व्याप्तांश्च पीतादीन् व्यवच्छिन्ददेव स्वपरिच्छेद्यं नीलं परिच्छिनत्तीत्यभ्युपगमः । स च शशविषाणस्येव भावाभावकाल्पनिकत्वाभ्युपगमे कथं मु(यु)क्तिसङ्गतः? नहि शशविषाणप्रच्यस्य भावाभावस्य भावविरुद्धत्वम् पीतादिव्यापकत्वं वा प्रमाणा(ण)विषयत्वेन व्यवस्थापयितुं शक्यम् यतस्तस्य प्रतिनियतपदार्थव्यवस्थाहेतुत्वं भवेत् ।

न च विनाशस्य मुद्गरादिजन्यत्वमसिद्धम् विरोधिरूपतया लोकस्थित्या मुद्गरादीनां तत्कारणत्वव्यवस्थापनात् । तथाहि–न परैः कणभुग्मतानुसारिभिरिव कार्यकारणभावात् पृथग् विरोधाख्यः सम्बन्धोऽभ्युपगम्यते यतस्तैर्मुद्गरादिजन्यस्य विनाशस्य (?) तदतद्रूपत्वेनासम्भवाद् विनाशस्य च तदतत्स्वभावतया विनाशविषयत्वमपाकृत्य घटक्षणो मुद्गरादिकं विनाशकारणत्वेन प्रसिद्धमपेक्ष्य समानक्षणान्तरोत्पादनेऽसमर्थक्षणान्तरमुत्पादयति तदपि तदपेक्षमपरमसमर्थतरम् तदप्युत्तरं तदपेक्षस(क्षमस)मर्थतमं यावद् घटसन्ततेर्निवृत्तिः अन्यत्रापि सर्वत्रैवमेव विरोधित्वं प्रतिपादितं परैः एतदभ्युपगमे च क्षणस्यासमर्थक्षणान्तरजनकत्वेनाभ्युपगतस्य मुद्गरादेः सकाशात् कश्चित् सामर्थ्यविघातोऽभ्युपगन्तव्यः अन्यथाऽसमर्थक्षणान्तरजनकत्वमेवानुपपन्नं भवेत् । न च मुद्गरापेक्षस्य घटक्षणस्य शक्तिव्यावृत्तिः स्वत एव व्यावर्त्तमानस्त्वसौ मुद्गराद्यभावे समानक्षणान्तरोत्पादकमपरं समर्थं जनयति तत्सद्भावे त्वसमर्थक्षणानन्त(णान्त)रम् न तु मुद्गरापेक्षातस्तस्य कश्चित् सामर्थ्यविघात इति वक्तव्यम् यतो मुद्गरादिसन्निपाते तज्जनकस्वभावाव्याहतौ समर्थक्षणान्तरोत्पादप्रसक्तिः समर्थक्षणान्तरजननस्वभावस्य कारणपरम्परायातस्य भावात् प्राक्तनक्षणस्येव नहि तस्य स्वनिरोधादन्यज(ज्ञ)नकत्वम् स च हेतुतः समर्थजननस्वभावो भूत्वा स्वयमेव न भूतो मुद्गरादिना च न तस्य कश्चिच्छक्तिप्रतिघातो विहित इति । यद्यप्यपरकारणान्तरसन्निधानात् कार्यं वैलक्षण्येनैवोत्पत्तुमिच्छति [?? तथापि प्राक्तनघटक्षणस्य तत्स्वभावत्वान्नत्वेवं कार्योत्पत्तिः स्यान्नान्यथेति न च स्वहेतुतो समर्थजननस्वभावस्य तस्योत्पत्तेर्नायं दोषः प्रथमक्षण एवं(व) सन्तत्युच्छेदप्रसक्तिः । अतो मुद्गरादिव्यापारकालेऽपि यदि स्वहेतुत एव समानक्षणान्तरजननसामर्थ्यं घटक्षणस्य समस्ति ततः सदृशक्षणान्तरोत्पत्तेर्मुद्गरादिसन्निधानं व्यर्थम् । अथ स्वहेतुतः समानक्षणान्तराजननसमर्थो घटक्षणस्तथापि प्राक्तनक्षणादिवत् तत्क्षणादप्यपरक्षणान्तरजनकस्य समानक्षणोत्पत्तेर्व्यापारवन्मुद्गरसन्निधिर्व्यर्थ एव । एतच्च स्वहेतुतो भावस्य नश्वरस्वभावत्वे न किञ्चिन्नाशहेतुना अनश्वरस्वभावत्वेऽपि 'सुतराम्' इति वदता परेण दूषणमभ्युपगतमेव ।

१–**यमेव भा**–आ० विना । "न चास्य तदा स्वयमेवाभावात्"–प्रमेयक० पृ० १४५ द्वि० पं० ७ । २–**स्तदा च** मां० । ३–**वच्छेदादेव स्व**–हा० वि० ।–**वच्छेदादे स्व**–आ० । ४–**णस्यैव** भां० विना । ५ **भावका**–भां० । **भावाभावप्रमाणाविषयत्वे का**–वि० । ६–**त्या मुद्गरादीनां** हा० । ७ **तत्कर**–आ० । ८–**द्रूपावनासम्भ**–हा० वि० । ९–**स्य तदतत्स्वभा**–हा० वि० ।–**स्य तदत्स्वभा**–आ० । १० "अथ घट एव मुद्गरादिकं विनाशकारणत्वेन प्रसिद्धमपेक्ष्य समानक्षणान्तरोत्पादनेऽसमर्थं क्षणान्तरमुत्पादयति तदपि अपेक्ष्य अपरमसमर्थतरम् तदपि उत्तरमसमर्थतमम् यावद् घटसन्ततेर्निवृत्तिरित्युच्यते । ननु चात्रापि घटक्षणस्य असमर्थक्षणान्तरोत्पादकत्वेन अभ्युपगतस्य मुद्गरादिना कश्चित् सामर्थ्यविघातो विधीयते वा न वा ? प्रथमविकल्पे कथमभावस्य अहेतुकत्वम् । द्वितीयविकल्पे तु मुद्गरादिसन्निपाते तज्जनकस्वभावाऽव्याहतौ समर्थक्षणान्तरोत्पादप्रसङ्गः समर्थक्षणान्तरजननस्वभावस्य भावात् प्राक्तनक्षणवत्"–प्रमेयक० पृ० १४५ द्वि० पं० ८ । ११–**रसमर्थ**–मां० ।–**रमर्थतर**–आ० । १२–**द्यमपे**–आ० । १३–**रणं प**–मां० ।–**रणाप**–आ० हा० वि० । १४–**म् स्वहे**–मां० बहिः । १५–**तुतोमद्गेजन**–आ० । १६–**दिघत् तक्ष**–हा० वि० ।–**दित् तत्क्ष**–आ० । १७–**च्च सहे**–आ० हा० वि० विना ।

नं चाकिञ्चित्करस्यापि मुद्गरादेः स्वहेतुमन्निर्हेतुसन्निधिबलायातत्वाद् घटक्षणस्यासमर्थक्षणान्तरजननकालेनोपा(प)लम्भविषयता यत एवानेकस्यैव क्षणघटस्य विलक्षणक्षणान्तरोत्पादकत्वाभ्युपगमप्रसक्तिः स्यात् । एवं च मुद्गरादेर्न विरोधित्वम् विनाशस्याहेतुकत्वात् । नापि जनकत्वं पूर्वोक्तदोषप्रसक्तेरिति विलक्षणसन्तत्युत्पादे सन्तानोच्छेदे वा मुद्गरादेरन्वय-व्यतिरेकानुविधानप्रसक्तितो नाश्यादीनां दहनादिकार्ये लोकस्योपादानं भवेत् । न च परमार्थैकत्वस्याभावे घटादीनां मुद्गरादिव्यापारानन्तरमनुपलब्धिर्भवेत् । न च पूर्वसन्तानोच्छेदाद् विलक्षणसन्तानोत्पत्तेश्च तदा घटानुपलब्धिरिति वक्तव्यम् विलक्षणसन्तत्युत्पादस्य प्राक्तनन्यायेनाभावात् पूर्वसन्ततिनिवृत्तेरपि विवर्त्तमानेभ्योऽनर्थान्तरत्वात् तथैवोपलब्ध्यादिप्रसक्तेः तदा तस्य स्वरूपक्षतेरभावात् । न च न तदा तस्य स्वरूपप्रच्युतिरुपपद्यते किन्तु तस्यैकक्षणावस्थायित्वेन तदाऽभवनमिति नोपलम्भः यतः स्वरूपादप्रच्युतस्य नाभवनं नाम किञ्चित् तत्सद्भावाभ्युपगमे वा कथं न स्वरूपप्रच्युतिस्ततोऽर्थान्तरभूतोत्पत्तिमती? अथ स एव न भवति न तु तस्यापरं सत्त्वम् न तु तदेवेदं पुना रूपाभवनमभिधीयते, तत्र च तदेवोत्तरम् । तस्माद् विनाशहेतुव्यापारानन्तरं(रं) पदार्थस्यासद्यवहारं(रं) विदधता तद्व्यतिरिक्तार्थान्तरग्रहणमभ्युपगन्तव्यम् न तु तदग्रहणमात्रम् अन्यथा तस्याभावानिश्चयेकन्यादिव्यवहितस्य सद्यवहारनिषेध एव स्यात् नासद्यवहारप्रवर्त्तनम् यतो न कश्चिदभावानिश्चये तत्स्वरूपाग्रहणे वानुपलब्ध्योर्विशेषः येनैकत्रासद्यवहारप्रवृत्तिः अन्यत्र सद्यवहारनिषेधमात्रात् किंत्वभावोत्पत्तेः प्राग्भावस्याभावनिश्चय(ये) तदुत्पादककारणोपादानं कुर्वन्त उपलभ्यन्ते प्रेक्षापूर्वकारिणः । तदुत्पत्तौ च निवृत्तव्यापारा विनाशकहेतुव्यापारानन्तरं च स्वरूपातिरिक्तं पदार्थान्तरमवगत्य शत्रुध्वंसे सुखभाजो मित्रप्रक्षये तु दुःखानुषक्ता उपलभ्यन्ते । न च मित्रसद्भावो दुःखहेतुः प्रतीतः नापि शत्रुसद्भावः सुखजनक इति तद्व्यतिरिक्तोऽभावस्तज्जनकोऽभ्युपगन्तव्यः । न च मित्राऽमित्राभावे च न दुःख-सुखे विहितोत्तरत्वात् । न चाभावस्य भवितृत्वे भावरूपता अभावप्रत्ययविषयत्वेन भवितृत्वेऽप्यभावरूपत्वात् । यथा हि भवितृत्वेनाविशेषेऽपि घट-पटयोस्तत्प्रतीतिविषयत्वेन तद्रूपता तथा भावाऽभावयोरपि तद्विषयात्(षयत्वात्) तद्रूपत्वे न किञ्चिद् दूषणमुत्पश्यामः । न वा भावस्य भवने विरोध एव दूषण(णम्) स्वरूपेऽबाधितप्रत्ययविषये विरोधासिद्धेः अन्यथा सर्ववस्तुषु तत्सिद्धिप्रसक्तिः । तेन्न मुद्गरादिव्यापारात् प्राग् घटादेस्तद्व्यापारानन्तरमेव तस्या उपलब्धेः पदार्थात्मभूता प्रच्युतिः । अत एव तस्मिन् 'गृहीतैव प्रमाणता' इति हेतोरसिद्धतेत्यपि न वाच्यम्, यतः किं घट एव प्रच्युतिः, उत कपाललक्षणं भ(भा)वान्तरम्, आहोस्वित् तदपरं पदार्थान्तरमिति विकल्पाः । तत्र यदि घटस्वरूपमेव प्रच्युतिस्तर्ह्यपरं तत्राभिधानान्तरं विहितम् घटस्वरूपं त्वविचलितं प्रतीयते कथं न नित्यम्? अथैकक्षणस्थायि घटस्वरूपं प्रच्युतिरिति न घटस्य नित्यता; नन्वेकक्षणस्थायितया घटस्वरूपं न प्रतीतिगोचर इति कथं तस्य प्रच्युतिः? अथ कपालस्वरूपमेव घटप्रच्युतिस्तथापि प्राक्कपालप्रादु-

---

१ **न वा**–आ० हा० वि० । २–**रादे स्व**–आ० । ३ **क्षणे घ**–मां० । ४ **एवं मु**–मां० हा० वि० । **एव मु**–आ० । ५–**शस्य हे**–आ० । ६–**क्षणांसंतत्युदसं**–हा० । ७–**त्पादयं संतानोच्छे**–वि० ।–**त्पाद संततोच्छे**–आ० । ८ **पूर्वसंततिनिवृत्तैर**–हा० वि० । **पूर्वसंतिनिवृत्तैर**–आ० । ९–**स्य रू**–आ० हा० वि० । १० **तदा भ**–आ० । ११ **न नु त**–आ० । १२ **न नु तदेवेद पु**–आ० । १३–**शहेतुर्व्या**–आ० । १४–**हार विदधतां त**–हा० ।–**हार विदधता त**–वि० । १५–**रमग्र**–आ० हा० वि० । १६ **तस्माभा**–हा० वि० । १७–**श्चयेत्कन्यादि**–आ० ।–**श्चयेक्तव्यादि**–हा० वि० । १८–**न यता म कश्चि**–आ० । १९–**त्रात् किंच भा**–मां० ।–**त्रा किन्त्व भा**–आ० हा० वि० । २० "किञ्च भावोत्पत्तेः प्राग्भावस्य अभावनिश्चये तदुत्पादककारणापादनं कुर्वन्तः प्रतीयन्ते प्रेक्षापूर्वकारिणः"–प्रमेयक० पृ० १४५ द्वि० पं० ११ । २१–**दकार**–आ० । २२ **इति त्पद्य**–आ० । "ततस्तद्व्यतिरिक्तोऽभावस्तद्धेतुरभ्युपगन्तव्यः"–प्रमेयक० पृ० १४५ द्वि० पं० १३ । तद्धेतुः "स मुद्गरादिर्हेतुर्यस्य सः" इति तत्रैव टि० २८ । २३–**प्यभावाभाव**–वि० । २४ **घटयोस्त**–मां० आ० हा० वि० विना । २५–**त्यये विषेये विरो**–हा० वि० ।–**त्यये विषेय विरो**–आ० । २६ **तत्र मु**–हा० वि० । २७–**च्युति प्रच्युतित एव** आ० । २८–**यि स्व**–आ० हा० वि० । २९ "अथैकक्षणस्थायि घटस्वरूपं प्रध्वंसः, न; एकक्षणस्थायितया तद्रूपस्याद्यापि अप्रसिद्धेः"–प्रमेयक० पृ० १४६ प्र० पं० १ ।

भावाद् घटस्यावस्थितेः कालान्तरस्थायितैव घटस्य भवेन्न क्षणिकता । न च कपालरूपप्रच्युत्यभ्युपगमे मुद्गरादिव्यापारानन्तरमपि 'घटस्य ध्वंसः' इति पूर्ववदुपलब्ध्यादिप्रसङ्गः यतो न मुद्गरादिना घटस्वरूपं क्रियते स्वहेतोरेव तस्य निष्पत्तेः। नाप्यसती स्वरूपप्रच्युतिरुत्पद्यते तत्र परैर्हेतुव्यापारानभ्युपगमात् यत् तु कपालादिषु मुद्गरादिना निष्पाद्यत इति अभ्युपगतम् न तस्य विरोधान्न हेतुत्वं कुड्यादेरिवेति कथं न प्रागिवोपलब्ध्यादिकं भवेत् अथ स एव न तदा न तेन नित्यता नं चोपलब्ध्यादिकं स्व(दिकस्व)कार्यका(क)रणम्, नैतदेवम्; यतः 'सः' 'न' इति-शब्दयोः किं भिन्नार्थत्वम्, आहोस्विदेकार्थत्वमिति वक्तव्यम्। यदि भिन्नार्थता कथं न 'नञ्'-शब्दवाच्यः पदार्थान्तरमभावोऽभ्युपगतो भवेत्। अभिन्नार्थत्वे तु पूर्वमपि 'नञ्'प्रयोगप्रसक्तिः, न चानुपलम्भे सति 'नञ्'प्रयोगाभ्युपगम इति वक्तव्यम् यतो व्यवधानाद्यभावे स्वरूपादप्रच्युतस्य तस्यैवानुपपत्तिर्भवेत्। अथ स्वरूपात् प्रच्युतिः कथं न कपालकाले मुद्गरादिहेतुकं भावान्तरं प्रच्युतिर्भवेत्? ??]

[?? अथ कपालकाले घटविनाशा(नाशान)भ्युपगमे स्वभावत एव घटस्याविनश्वरस्य परतोऽपि नाशासम्भवतो यः स्वभावो घटस्य प्रथमक्षणात् कियत्कालावस्थानोत्तरकालविनाशलक्षणस्तस्य मुद्गरादिसन्निधानकालेऽपि भावात्-अभावे वा स्वभावनानात्वा(त्वात्) क्षणिकत्वप्रसक्तेः-पुनरपि तावत्कालमवस्थानमनुभूयं तेन(तेन न) नंष्टव्यमिति घटादेः कौटस्थ्यप्रसङ्गः। विनाशहेतुस्व(स्त्व)भावस्याकिञ्चित्करतयाऽनपेक्षणीयः न ह्यसौ भावमेव करोति कृतस्य करणायोगात्। न च भावान्तरं करोति तत्करणेऽपि भावस्य किं सञ्जातमिति तथोपलब्ध्यादिप्रसङ्गात्। न च तस्य तेन सम्बन्धो येन 'तस्यायं विनाशः' इति व्यपदेशभाग् भवेत् तयोरुपकार्योपकारकभावाभावात् तदभावे च पारमार्थिकसम्बन्धायोगात्। यदि पुनर्भावान्तरं विना स्वयमेव क्रियते विनाशहेतुवैक(फ)ल्यम् स्वत एव तस्य तत्करणसमर्थत्वात् अन्यापेक्षानुपपत्तेः असमर्थत्वेऽन्यसन्निधानेऽपि करणानुपपत्तेर्न भावान्तरमपि विनाशहेतुनिर्वर्त्यम्। अभावकरणेऽपि पर्युदासपक्षेऽयमेव दोषः। प्रसज्यपक्षे त्वभावं करोतीति क्रियाप्रतिषेधमात्रमेव। तत्र च तद्धेतुरकिञ्चित्कर एवेत्यनपेक्षणीयः स्यात् तस्य निर्हेतुकत्वात् स्वरसतो भवन्नभावो भावस्य पावकोष्णत्ववन्न कालान्तरभावीति, असदेतत्; हेतुतः साध्यसिद्धेः प्रत्यक्षस्य च क्षणिकत्वग्राहकत्वेनाप्रवृत्तेः न तत्प्रतिबद्धत्वेन हेतुर्निश्चित इत्युक्तत्वात् अहेतुकत्वेऽपि च नाशस्य जन्मान्त(जन्मानन्त)रभावित्वं नित्यस्यापि प्राक् प्रतिपादितत्वात्। न च पावकोष्णत्वदृष्टान्तस्तत्र सम्भवी प्रथमक्षणेऽपि भावध्वंसप्रसक्तेः तद्धेत्वेत्यश्याप्यभिहितत्वात्। न च क्षणावस्थितिलक्षणस्य विनाशस्य तदैवेष्टत्वाददोषः, कालान्तरस्थायित्वस्यापि स्वभावत एव सम्भवाद् विशेषाभावात्। तथाहि-एतदपि वक्तुं शक्यम्—कालान्तरस्थायी स्वहेतोरेव भाव उत्पन्नः न तद्भावे भावान्तरमपेक्षतो(ते)ऽग्निरे(रि)वोष्णत्व इति किं न स्वत एव स्थिरस्वभावो भावो भवेत्? न चैवं कौटस्थ्यप्रसङ्गः क्षणिकपक्षेऽप्यस्य समानत्वात्।

१-द्गलादि-मां०। २ यतो मु-आ० हा० वि०। ३ कुतश्चादेरवेति आ०। ४ कथं प्रा-मां० आ० हा० वि० विना। ५-ब्ध्यादिकं स्वका-वि०। ६ तदा न तेन न नित्यता न चोपलब्ध्यादिकं भवेत् अथ स एव न तदा न तेन न नित्यता (तेन नित्य-मां०) न चोपलब्ध्यादिक स्वका-भां० मां० हा०। ७ न वो-हा०। ८-रणे नै-हा०। ९ न नञ्-आ०। १० सति तत्र-आ० हा० वि०। "न चानुपलम्भे सति नञ्प्रयोग इत्यभिधातव्यम्"-प्रमेयक० पृ० १४६ प्र० पं० ३। ११ "स्वरूपादप्रच्युतार्थस्य अनुपलम्भानुपपत्तेः"-प्रमेयक० पृ० १४६ प्र० पं० ४। स्वरूपात् "पृथुबुध्नोदरादेः" टि० ९। अर्थस्य "घटलक्षणस्य" टि० १०। १२-पा प्र-आ० हा० वि० विना। १३-तुक भा-आ० विना। १४- गमे श्व स्व-आ०। १५ एवं घ-आ०। १६-स्था मनु-आ०। १७-नुभूयं ते-आ० हा०। १८-य ते त नष्ट-आ०। १९-व्यमिति ते घ-हा० वि०। २०-क्षणो न आ०। २१-नर्भवा-आ० हा० वि० विना। २२ स्वभायमे-हा०। स्वभावमे-वि०। २३-पेक्षेपिऽयमे-मां०। २४ तस्यानिर्हेतु-हा०। तस्यार्निहेतु-वि०। तस्यार्निर्हेतु-आ०। २५-वत्त भावस्य आ० वि०। २६-पि वा ना-आ० हा० वि०। २७-स्य न ज-आ० हा० वि०। २८-त्वात्वददो-आ० हा० वि० विना। २९ "शक्यते हितत्राप्येवं वक्तुम् कालान्तरस्थायी स्वहेतोरेव उत्पन्नो भावो न तद्भावे भावान्तरमपेक्षते अग्निरिव उष्णत्वे"-प्रमेयक० पृ० १४६ प्र० पं० ६। ३०-मपेक्षितो-आ०। ३१-भावो भवेत् भां०।

तथाहि-क्षणमपि स्वरसत एव स्थास्नोः कल्पान्तरस्थायित्वमपि किं न भवेत् अन्यथा अग्निरिव शैत्ये न क्षणमपि स्वयमस्थास्नोः स्थायिता युक्तिमती। विनाशहेतुपक्षनिक्षिप्तश्च विकल्पो भावोत्पत्तिहेतावपि समानः। तस्या(था)हि-उत्पत्तिहेतुः स्वभावत एव भावमुत्पित्सुमुत्पादयति, आहोस्विदनुत्पित्सुम्? प्रथमपक्षे विफलता तद्धेतोः। द्वितीयपक्षेऽप्यनुत्पित्सोरुत्पादने वियत्कुसुमादेरप्युत्पादनप्रसङ्गः। स्वहेतुसन्निधेरेवोत्पित्सोरुत्पादनाभ्युपगमे विनाशहेतुसन्निधानाद् विनाशहेतुर्विनश्वरं विनाशयतीत्यभ्युपगमनीयम् न्यायस्य समानत्वात् स्वयमेवोत्पित्सोस्तत्कृतोपकाराभावात् सम्बन्धाभावतो व्यपदेशाभावतोऽपि(भावोऽपि) समानः एवं च प्रयोजनाभावाद् भावहेतुर्भावं नोत्पादयतीति नाप्यभावं भावयतीति कथं नाकिञ्चित्करत्वम्? अभावं भावीकरोति इति चेत्; नन्वेवं हेतुर्विनाशहेतुर्भावमभावीकरोतीति तुल्यम्। यदपि 'स्वकारणादुत्पत्तिरात्मलाभो धर्मो यस्याः सा (यस्य स) स्वोत्पत्तिधर्मा तं यदि स्वहेतुर्नोत्पादयति तदा विरुद्धमभिधानं स्यात्' इत्याद्युक्तं तद् विनाशहेतावपि तुल्यम्। तथाहि-विनाशकारणाद्विनाश आत्मप्रच्युतिलक्षणो धर्मो यस्य तं यदि विनाशहेतुर्न विनाशयति तदा विरुद्धाभिधानमित्याद्यपि कथ(थं) न समानम्। यदपि 'उत्पत्तेः प्राग् उत्पत्तिधर्मिणोऽसत्त्वात् किमुत्पत्तिधर्माणमुत्पत्तिहेतुरुत्पादयति, आहोस्विद् अनुत्पत्तिधर्माणम् इत्यादिविकल्पानुपपत्तिः' तदपि विनाशहेतौ समानम्-प्रागभाववत् प्रध्वंसाभावस्यापि भवन्मतेनाभावात् कथं तत्रापि विकल्पोत्पत्तिः? येषां च न घटनिवृत्तिः कपालस्वरूपादन्या तेषां कथं न कपालहेतुर्घटध्वंसहेतुर्भवेत्? अथ कथं कपालस्वरूपस्य वस्त्वन्तरस्य प्रादुर्भावे 'घटो विनष्टः' इति व्यपदिश्यते? नैष दोषः, मुद्गरादेर्घटस्यैव कपालभावाद् 'घटो विनष्टः' कथं स एवान्यथा भवतीति चेत्, नन्वसत् कथं भवतीति समानम्। अथ प्राग् घटादिकमसत् सद् भवत्युत्पत्तिसमय इत्यविरुद्धम्; नन्वन्यदा घटः सन् कपालीभवति इत्यविरुद्धमेव। कथं तस्यैव तदन्यत्वमिति चेत्, यथा संवेदनस्यैकस्य ग्राह्यग्राहकाद्याकारभेदः यथा ह्यरूपेणानेकमेवं(कं) भवन्न विरुध्यते इत्यस-कृदावेदितम् तेन निवृत्तिः कारणस्य कार्यात्मना परिणतिरेवाभिधीयते तथा च घटप्रच्युतेः कपालस्वरूपत्वे कुतः क्षणिकत्वम्? अथ भावान्तरं घट-कपालव्यतिरिक्तं घटप्रच्युतिः, नन्वेवमपि तेन सह घटस्य युगपदवस्थानाद्यविरोधात् कथं तत् तत्प्रच्युतिः? अथ कपालमन्यभावोपलक्षणम् तेन घटक्षणस्यान्यस्य प्रादुर्भावः पूर्वस्य च प्रध्वंसः सदृशापरापरानुभवश्च दलितपुनरुदितकरुहनिकरादिष्विव 'स एवायम्' इत्येको(का)ऽध्यवसायोदयः। नन्वत्रापि किं स एव पदार्थात्मा प्रतिभाति, आहोस्वित् तत्प्रतिसमयमन्यान्यसंवेदनेऽपि सादृश्यादेकत्वभ्रान्तिरिति नात्र निश्चयो बाधकानुत्पत्तौ दर्शनस्य वितथत्वात् सिद्धः??] न च क्षणक्षयव्यवस्थापकमनुमानमेकत्वाध्यवसायि दर्शनस्य बाधकम् अनुमितेरध्यक्षबाधकत्वेनाप्रवृत्तेस्तस्यास्तत्पूर्वकत्वात् यतोऽध्यक्षावगतं प्रतिबन्धमाश्रित्य पक्षधर्मतादर्शनबलादनुमितिरुदयति अनुमानादविनाभावावगमेऽनवस्थाप्रसक्तेः। न च स्थायितादर्शनमनुमानेन बाधितत्वान्नाध्यक्षतामनुभवतीति वाच्यम्, क्षणक्षयानुमानमध्यक्षेण बाधनादनुमानं(नं न) भवतीत्यपि पर्यनुयोगस्य तुल्यत्वात्। अतः स्थायितादर्शनं क्षणक्षयग्राहिणा परेणाध्यक्षेण बाधकेनाध्य(नानध्य)क्षीकर्त्तव्यम् क्षणक्षयनिर्भासविरहेण तस्य (?) अन्यथा तेन सह विरोधासिद्धेः। ततः प्रतिक्षणभेदावभासेवाध्यक्षं नित्यताध्यवसायिदर्शनस्य बाधकं नान्यत्। न च प्रतिक्षणविशरारुतावभास्यध्यक्षमनुभूयते, स्थिरस्थूरार्थावभासिनोऽध्यक्षप्रभवस्य संवेदनस्य सर्वदोपलक्षणत्वात्। अथ प्रत्यक्षेऽपि बाधकेऽभ्युपगम्यमाने द्वयोरपि दर्शनयोः परस्परप्रतिहतिद्वारेणानध्यक्षता कस्मान्न भवति येनैकमेवानध्यक्षीभवति, नैतदेवम्; अतुल्यत्वात् दुर्बलं हि बलवता प्रतिहन्यते रजतदर्शनमिव

१ "तथाहि—उत्पादहेतुः स्वभावतः" इत्यादि-प्रमेयक० पृ० १४६ प्र० पं० ११। २-प्य भावयती-आ०। ३-स्या सा हा० वि०। ४-था वि-आ०। ५ धर्मोप्यस्य हा०। ६ येषां न च घ-आ० हा० वि०। ७-पादेन्या मां० आ० वि० विना। ८-स्य ग्राहकाद्या-हा०।-स्य ग्रोकाद्या-आ०। ९-रहेतुभे-वि०। १०-न न निवृत्तिः भां० मां०।-न विवृत्तिः हा०। वि० सं०। ११ "युगपदवस्थानाविरोधात् कथं तत् तत्प्रध्वंसः"-प्रमेयक० पृ० १४६ प्र० पं० ५। १२-क्षणस्यान्यप्रा-आ०।-क्षणान्यस्य प्रा-भां० मां०। १३-परानु-आ०। १४ नत्तत्रापि हा०। नतत्रापि वि०। न त्रापि आ०। १५-कत्वं भ्रा-हा०। १६-नाथप्र-आ०। १७-क्षयि ग्रा-भां० मां०। १८ तत प्र-भां०। तत्र प्र-आ० हा० वि०। १९-भा स्यैवा-हा०। २०-णाध्यक्ष-आ० हा० वि०।

शुक्तिकादर्शनेन बलवता रजतदर्शनमयथार्थं(मयथार्थ)क्रियाकारि रूपावभासि दुर्बलमनध्यक्षीक्रियते। न च लूनपुनर्जातकेशादिष्वपि प्रत्यभिज्ञाज्ञानोदया(यात्) स्थायिताप्रतिपत्तिः सर्वत्रालीका, न; दृष्टान्तमात्रादर्थसिद्धेरभावात् अन्यथा हेतूपन्यासस्य वैफल्यापत्तेः। हेतूपयोगितयैव निदर्शनस्य परैः साफल्याभ्युपगमात्। आह च—"स एवाविनाभावो दृष्टान्ताभ्यां दर्श्यते" [ ] इति।

५ यद्वा लूनपुनर्जातशिरसिजादिष्वपि प्रत्यभिज्ञानात् एकता भवतु अप्रध्वस्तः केशादिः कथं प्रत्यभिज्ञायते? नन्वेवं ध्वस्तेऽपि शिरोरुहनिकरादौ समानम्। अथा ध्वस्ते तत्र पुनर्दर्शनात् 'ते एवामी केशाः' इत्येकताप्रतीत्यनुभवात् प्रत्यभिज्ञानम्; ननु ध्वस्तेष्वपि तेषु पुनर्दर्शनात् तुल्यप्रमाणादियोगेष्वेकताप्रतिपत्तिदर्शनात् कथं न प्रत्यभिज्ञानम्? तस्माद् ध्वस्तोदितेष्वपि शिरसिजादिषु प्रत्यभिज्ञानादेकत्वं कस्यचित् रूपस्याभ्युपगन्तव्यम्। अथ दलिताध्यवसायी
१० प्रत्यय(यः) स्थायिताध्यवसायिता(यिनी) प्रत्यभिज्ञां बाधत इति न तेष्वेकता, न; भिन्नकालेन दलितकेशाध्यवसायिप्रत्ययेन प्रत्यभिज्ञाया बाधायोगात् अथवा लूनपुनर्जातकेश-नखादिभेदाभेदाध्यवसायादुभयतैवास्तु स्तम्भादिषु तु विशददर्शनावभासिषु क्षणक्षयविकला स्थायिता प्रतिभातीति तेषां स्थिररूपतैवास्तु।

अथ कथं प्रत्यभिज्ञा प्रामाण्यमनुभवति? कारणदोषाभावात् बाधारहितापूर्वार्थग्राहित्वाच्च।
१५ तदुक्तम्—

"तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम्।
अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम्"॥ [ ] इति।

प्रथमदर्शनानधिगतां स्थायितां प्रत्यभिज्ञानमध्यवस्यति विश्वासादिव्यवहारप्रवर्त्तिका चेति कथं न प्रमाणम्? न चाद्यदर्शनमेव स्थायिताध्यवसायात् उत्तरकालभाविनो नित्यताग्राहितया
२० व्यवस्थाप्यते इति आद्यदर्शनगृहीतां नित्यतामध्यवस्यत् प्रत्यभिज्ञाज्ञानमपूर्वार्थाधिगन्तृत्वाभावान्न प्रमाणम् यत एवमाद्यदर्शनावसेयमेव नित्यत्वमिति कथं क्षणक्षयिता भावानाम्? न चाध्यक्षानवतारे प्रतिक्षणध्वंसितायामनुमानमपि प्रवृत्तिमासादयतीत्युक्तम्। किञ्च, स्वभावलिङ्गप्रभवमनुमानं क्षणक्षयितां भावानामवगमयति इति पराभ्युपगमः। न चाध्यक्षगृहीतं प्रतिक्षणध्वंसित्वम्
२५ येन स्वभावहेतुस्तत्र व्यवहृतिमुपरचयति यथा शिंशपा विशददर्शनावभासिनि तरौ वृक्षत्वव्यवहृतिम् प्रत्यक्षप्रतीत एवार्थे स्वभावहेतोर्व्यवहृतिप्रदर्शनफलत्वात्। न च विद्युदादौ सत्ता-क्षणिकत्वयोरध्यक्षत एव प्रतिबन्धग्रहणादन्यत्रापि शब्दादौ सत्तोपलभ्यमाना क्षणिकत्वमवगमयति, जातरूपे सत्तातः शुक्लतानुमितिप्रसक्तेः। अथ हेमाकारनिर्भासिदर्शनं शुक्लताप्रसाधकमनुमानमुपहन्तीति न तत्र शुक्लतासिद्धिः; नन्वेवं स्तम्भादौ क्षणिकतामुल्लिखन्तीमनुमितिं 'स एवायम्' इत्यभेदप्रतिभासोऽपहन्तीति कुतः क्षणिकतासिद्धिः? अथ प्रत्यभिज्ञा भिन्नेष्वप्यभेद-
३० मुल्लिखन्ती दलितपुनरुदितकरुहादिषूपलभ्यत इति नासावेकत्वे प्रमाणम् तर्हि कामलोपहतदृशां धवलिमानमाबिभ्राणेषु पदार्थेषु कनकाकारनिर्भासिदर्शनमुदेतीति तत् पीतेऽपि न प्रमाणतामासादयेत् तथा च शुक्लतानुमानस्यापि कुतो बाधाप्रसक्तिः?

अथ शुक्लताप्रसाधकस्यानुमानस्यान्यथासिद्धत्वात् युक्तं प्रत्यक्षबाध्यत्वम् तस्यानन्यथासिद्ध-
३५ त्वात्। न ह्यनुपहतेन्द्रियस्य पीतावभासि दर्शनं पीतार्थव्यतिरेकेण सम्भवति कनकादौ तु शुक्लताप्रसाधकमनुमानमन्यथासिद्धत्वात् अध्यक्षविरोधे न तद्विपरीतार्थसाधकं युक्तम्। स्तम्भादौ तु नित्यतावेदकस्याध्यक्षस्य कुतश्चिद् भ्रान्तिकारणादन्यथासिद्धत्वेनानन्यथासिद्धानुमानबाधकत्वमयु-

---

१-मथार्थ-मां०। २-ज्ञानोद-आ०। ३-का, त; द्द-भां० मां०। ४-त्यभिज्ञानं बा-आ० हा० वि०। ५-कता, म; भि-आ० वि०। ६-त्यभिज्ञया मां०। ७-खादिभेदाध्य-आ० हा० वि० विना। ८ "क्षणक्षयवादी स्थिरतावेदकप्रत्यभिज्ञावादिनं प्रत्याह"-बृ० भां० टि०। ९ "आचार्यः"-बृ० टि०। १०-च्च उक्त-वा० बा०। ११-श्वादिव्य-वा० बा०। १२ न वादिद-वा० बा०। १३-प्य इ-वा० बा०। १४-क्तम् स्व-वा० बा०। १५ "स्वभावहेतू रचयतीति योगः"-बृ० मां० टि०। १६ प्रतिविम्बग्र-वा० बा०। १७-पहरन्तीति वा० बा०। १८-त्यभेदः प्र-वा० बा०। १९-बाधत्वम् वा० बा०। २०-क्षविरोधि न बृ० वा० बा० विना।

क्तम्। तथाहि—सति प्रतिबन्धग्रहणेऽनुमितिप्रवृत्तिः प्रतिबन्धग्रहणं च साध्यव्यतिरेकेण साधनस्याभवनज्ञानम् तदेव चाऽनन्यथासिद्धत्वं तस्योच्यते अत एवानुमानस्य प्रामाण्यमपाकुर्वता तत् प्रतिबन्धप्रसाधकप्रमाणस्याप्रामाण्यमुपदर्शनीयम् यतः प्रतिबन्धासिद्धितोऽनुमानं प्रामाण्यादपाक्रियेत। तथा चोक्तं न्यायविदा-"लक्षणयुक्ते बाधासम्भवे तल्लक्षणमेव दूषितं स्यात्" [ ] इति। नित्यताप्रसाधकस्य त्वध्यक्षस्य आस्तामनुमानेन तुल्यकक्षत्वम् तत्प्रतिबन्धप्रसाधकेनाप्य-५ तुल्यकक्षतैव। तथाहि-क्षणक्षयविपरीतनित्यत्वलक्षणार्थमन्तरेणानुपजायमानमध्यक्षं तथाभूतमर्थं व्यवस्थापयत् क्षणिकत्वानुमानबाधकमुच्यते। न चाध्यक्षावसेयं नित्यत्वं वस्तुनो व्यवस्थापयितुं शक्यम् यतः पूर्वापरकालताविष्टमध्यक्षावसेयं तच्च न वस्तुधर्मः वर्त्तमानकालं हि वस्तु पूर्वापरकालभावित्वं च वर्त्तमानवस्तुविरुद्धत्वात् न तद्धर्मत्वेनावस्थापयितुं युक्तमिति प्रत्यभिज्ञाप्रमेयस्य यथाप्रतीत्यसम्भवात् बाधकप्रमाणेनाप्यतुल्यकक्षत्वात् तद्ग्राहिणोऽध्यक्षस्य कुतः क्षणक्षयानुमानबाधकता?१० विपर्ययस्य प्रमाणेनात्र विषये निश्चितत्वात्। [?? न च मूलबाधकत्वेन अनुमानस्यानुभव आशङ्कनीयः प्रत्यक्षाभासस्य कस्यचिद् बाधनात् उत्पलपत्रशतव्यतिभेदाद्यध्यक्षबाधकत्वेनानुमानस्य प्रवृत्तावपि यतो नोच्छेदः एवमत्रापि इति न कश्चिद्दोषः अत एव सर्वत्र प्रत्यक्षं विरोधि बाधकमनुमानं तु तद्विरोधाद् बाध्यमेवेति नियमाभावात् निराकृतम् ??] इतरेतराश्रयत्वमपि नात्राशङ्कनीयम् प्रत्यक्षाभासत्वे अनुमानं बाधकम् अनुमानप्रामाण्यात् प्रत्यक्षस्याभासतेति यस्मान्नानुमानप्रामाण्य-१५ मध्यक्षाभासनिबन्धनम् किन्तु प्रतिबन्धप्रसाधकप्रमाणनिमित्तं तत्प्रामाण्यमिति कुत इतरेतराश्रयत्वम्? असदेतत्, यतो यद्यपि परिच्छिद्यमानस्य वस्तुनः पूर्वकालतापि निश्चीयते तथापि नावस्तुधर्मग्राहकमध्यक्षमिति कथं तद्विषयस्य यथाप्रतीत्यसम्भवः? तथाहि-तस्य पूर्वकालसम्बन्धिता स्वरूपेण गृह्यते नेदानीन्तनसम्बन्धितानुप्रवेशेन तेनेदानीं यद्यपि कुतश्चिन्निमित्तात् तस्य पूर्वकालादित्वमवसीयते तथापि तद्ग्राहकमध्यक्षं कथं न वस्तुग्राहकमिति कुतः तस्याप्रामाण्यम्?२० यदि ह्यविद्यमानं पूर्वकालादित्वम् विद्यमानं वा वर्त्तमानारोपेणाध्यक्षमध्यवस्येत् तदा भवेदस्यायथार्थग्राहित्वाद् अप्रामाण्यम् एतच्च नास्तीति कुतोऽस्याप्रामाण्यप्रसक्तिः?

न च सन्निहितविषयबलोत्पत्त्याऽविचारकत्वादध्यक्षेण पूर्वकालसम्बन्धित्वं परामर्ष्टुमशक्यम् यतो यद्यप्यतीतकालत्वमसन्निहितं तथापि सन्निहितविषयबलादुपजायमानमध्यक्षं वर्त्तमानवस्तुनस्तन्निश्चिनोत्येव यथा अन्त्यसङ्ख्येयग्रहणकाले 'शतम्' इति प्रतीतिः क्रमगृहीतानपि सङ्ख्येयान्।२५ न चैषा अनिन्द्रियजा इन्द्रियान्वयव्यतिरेकानुविधानात्। नाप्यनर्थजा सन्निहितान्त्यसङ्ख्येयजन्यत्वात्। न चैकावभासिनी एकप्रतिपत्तिसमये 'शतम्' इत्यप्रतिपत्तेः अन्यथा प्रथमव्यक्तिप्रतिभाससमय एवैषा भवेत्। न चाप्रमाणमेषा बाधकाभावात्। घटाद्यध्यक्षेण तुल्यत्वात् नास्या विकल्पमात्रता। तस्मात् यथा अन्त्यसङ्ख्येयप्रतिपत्तिसमये प्रागवगत (?) तदादेरपरिच्छिद्यमानार्थोपयोगः तद्विशिष्टप्रतिपत्तौ तथा प्रत्यभिज्ञावसेयवस्तुपरिच्छेदसमये पूर्वकालभाविताया अपि। न च३० विशिष्टप्रतिपत्तिकाले सङ्ख्येयानां विद्यमानता पूर्वकालतायास्तु तद्वैपरीत्यमिति न तत्रोपयोगः यतोऽगृह्यमाणानां तत्कालविद्यमानता नोपयोगिनी यत्र चान्त्यसङ्ख्येयग्रहणसमये पूर्वावगतसङ्ख्येयानामभावस्तत्र यथा तेषामुपयोगः तथा पूर्वकालादिताया अपि तदविशिष्टाया उपयोगो भविष्यतीत्यनवद्यम्।

१-हणं सा-वा० बा०। २-नप्रा-आ०। ३-बन्धसा-वा० बा०। ४-कप्रामाण्यस्याप्रा-वा० बा०। ५-क्रियेत्। भां०।-क्रियते। वा०बा० मां०। ६ "लक्षणयुक्ते बाधासंभवे तल्लक्षणमेव दूषितं स्यात् इति न्यायात्"-प्रमेयक० पृ० १७५ प्र० पं० ४। ७ नित्यं वस्तु-ल०। ८ "तव हि युगपद्भेदग्राहि प्रत्यक्षं विपरीतग्राहिणाऽनुमानेन बाध्यते"-बृ० भां०मां० टि०। ९-मन्यत्रापि बृ० ल० वा० बा० भां० मां० विना। १० "परगदितम्"-मां० टि०। "परविदितम्"-बृ० टि०। ११-धादवा-आ०। १२-नारोपणा-आ० हा० वि०। १३-लम-ल०। १४-मानं व-आ०। १५ "अतीतकालत्वम्"-बृ० टि०। १६-यमग्र-हा० वि०। १७-तमपि प्र-ल०। १८ "निश्चिनोतीति योगः"-बृ० भां० मां० टि०। १९-भासम-आ०। २० "'शतम्' इति प्रतिपत्तिः"-मां० टि०। "यथा एषा एकमेव गृह्णीयात्"-बृ० टि०। २१-गतं त-आ० हा० वि०। २२-दा अप-वा० बा०।-दाप-आ० हा० वि०। २३ "'शतम्' इत्येवंरूपायाम्"-बृ० भां० मां० टि०। २४ यतो गृ-बृ० ल० विना। २५-पि विशि-आ० हा० वि०।

अथापि स्यात् वर्त्तमानतापरिच्छेदसमये तदभावनियतभावत्वात् न पूर्वताऽवगतिर्भावानाम् नीलपरिच्छेदे पीतादीनामिव । तथाहि–नीलप्रच्युत्यविनाभूतत्वात् पीतादीनां नीलपरिच्छेदकं प्रमाणं तत्प्रच्युतेरिव तदविनाभूतपीतादिव्यवच्छेदं कुर्वदेव तत् परिच्छिनत्ति तद्वद् इदानीन्तनपदार्थपरिच्छेदाय प्रमाणं प्रवृत्तं तत्प्रच्युत्यविनाभूतानां व्यवच्छेदकम् वर्त्तमानश्च समयस्तत्प्रच्युत्या विरुद्ध इति तद्व्यावृत्तावप्यतीतानागतौ तेन विरुद्धाविति तदवच्छिन्नस्यापि भावस्य वर्त्तमानावच्छिन्नेन सह न समावेशः तयोः परस्परपरिहारत्वेन विरोधात् तेन वर्त्तमानसम्बन्धिताग्राहिणा प्रमाणेन तत्प्रच्युत्यविनाभूतव्यवच्छेद्यस्य व्यवच्छेदमकुर्वाणेन वर्त्तमानसम्बन्धित्वमेव न परिच्छिन्नं भवेत् ततः पूर्वापरसमयसम्बन्धिनोर्नानात्वे यन्नानाभूतानामेकत्वग्राहि प्रमाणं तस्यं अतस्मिंस्तद्ग्रहणरूपत्वात् अप्रामाण्यम् अत एवैकत्वाध्यवसायस्य सदृशापरापरेत्यादिभ्रमनिमित्तादुत्पादः परिगीयते, असदेतत्; यतो नैकत्वेन निश्चीयमानस्य परस्परविरुद्धकालादिव्यवच्छेदात् नानात्वम् छत्र–कुण्डलाद्यवच्छिन्नस्य देवदत्तादेरिव । न च देवदत्तादेः सहभाव्यनेकविशेषणावच्छिन्नत्वादेकत्वम् तदभावनियतभावलक्षणस्य विरोधस्य सह सम्भविनामपि भावात् ततो विरुद्धावच्छिन्नस्य नानात्वे देवदत्तस्यापि नानात्वप्रसक्तिः । न च देवदत्तादेरेकस्य कस्यचिदभावात् तन्नानात्वप्रसक्तिः न सौगतपक्षे दोषायेति वाच्यम् एकप्रतिभासबलात् देवदत्तादेरेकत्वसिद्धेः अन्यथा नीलसंवेदनस्यापि स्थूलाकारावभासिनो विरुद्धदिक्सम्बन्धात् प्रतिपरमाणुभेदप्रसक्तेः तदवयवानामपि षड्कयोगात् भेदापत्तितोऽनवस्थाप्रसक्तेः प्रतिभासविरतिलक्षणोऽप्रामाणिका शून्यता भवेत् इति सर्वव्यवहारविलोपः । न च च्छत्र–कुण्डलादेरिन्द्रियावसेयवस्तुव्यवच्छेदकत्वेन इन्द्रियजप्रतिपत्तिविषयता सन्निहितत्वेन युक्ता पूर्वापरादित्वस्य तु वर्त्तमानकालावच्छिन्ने वस्तुन्यसन्निधानात् कथं तद्ग्राहिज्ञानग्राह्यता युक्तेति वक्तव्यम् यतो यथाऽन्त्यसङ्ख्येयकाले पूर्वसङ्ख्येयानामसन्निधानेऽपि इन्द्रियजप्रतिपत्तिविषयता तथा पूर्वापरकालभाविताया अपीत्युक्तं प्राक् । अथवा 'तदेवेदम्' इति ज्ञानस्याऽनिन्द्रियजत्वेऽप्यलिङ्गजस्य प्रामाण्यमभ्युपगन्तव्यं बाधारहितत्वेन अनेन प्रतीयमानस्य वस्तुनः पूर्वापरकालभाविता पूर्वापरदर्शनकर्म्मतां चावसीयत इति चाभ्युपगन्तव्यम् अन्यथाऽनक्षालिङ्गप्रत्ययस्य निश्चयात्मनो बाधारहितस्यैवंजातीयस्य कस्यचित् प्रामाण्यानभ्युपगमे अक्षजस्य सन्निहितार्थमात्रग्राहित्वेन लिङ्गजस्य चानवस्थाप्रसक्तितः सकलपदार्थाक्षेपेण प्रतिबन्धग्राहकत्वायोगात् अनुमानप्रवृत्तेरभाव इति कुतः क्षणिकत्वादिधर्म्मसिद्धिः ? यथोक्तविकल्पस्य च प्रामाण्ये कथं न क्षणक्षयानुमानबाधा ?

भवतु वा प्रत्यभिज्ञाज्ञानस्य तदाभाससमानत्वात् क्षणक्षयानुमानाबाधकत्वं तथापि स्मृत्याद्यव्यवहिताक्षप्रभववर्त्तमानतासम्बद्धस्वविषयपरिच्छेदकावभासबाधितत्वात् न क्षणक्षयानुमानस्य स्वविषयव्यवस्थापकत्वम् यतो न भवन्मतेन नीलादिर्ज्ञानसमानकालभावी जनकत्वेन व्यवस्थितः वर्त्तमानज्ञानसत्तासमयात् जनकत्वेन तस्य प्राक्कालभावित्वाभ्युपगमात् जनकश्च ज्ञानविषयः परमतेन तस्य वर्त्तमानसम्बन्धित्वावगमे क्षणद्वयावस्थितत्वेन ग्रहणात् कथं नाक्षणिकत्वग्रहणम् ? तथाहि–एतद्ग्राहिज्ञानमुपजायमानमेवं स्वविषयमवभासयति 'नायं सम्प्रत्येव नीलाद्यर्थः अपि तु प्रागासीत्' इति। यतश्चक्षुरादिव्यापारोद्भूतप्रतिपत्तिभेदः प्रादुर्भूतप्रादुर्भवत् (?) घटविषयत्वेन सुप्रसिद्ध एव उत्पद्य-

---

१ "वर्तमानता"–बृ० मां० टि० । २ **पूर्वभाव**–आ० । ३ "यथा नीलप्रच्युतेर्व्यवच्छेदं कुर्वत् नीलं परिच्छिनत्ति तथा नीलप्रच्युत्यविनाभूतपीतादीनाम(मपि) व्यवच्छेदं कुर्वदेव तत् परिच्छिनत्तीति"–बृ० टि० । ४–**'भूतपीतादेर्व्यवच्छेदम्'** इति सुचारु । ५–**व तस्य तत्** मां० । ६ "नीलम्"–बृ० मां० टि० । ७ "वर्तमानत्वप्रच्युत्या"–बृ० टि० । ८ "वर्तमानप्रच्युतिव्यावृत्तौ"–बृ० टि० । ९ **तदविच्छि**–बृ० ल० वा० बा० विना । १०–**स्य त**–ल० । ११–**शापरेत्या**–बृ० । १२–**त्तादि स**–आ० हा० वि० । १३–**यतं भा**–वा० बा० । १४–**दप्रणतापरादव**–वा० बा० । १५–**णाऽप्रमा**–भां० मां० विना । १६ "विशेषत्वेन"–मां० टि० । "विशेषकत्वेन"–बृ० टि० । १७–**रादेवास्य तु** बृ० ।–**रादि नु व**–वा० बा० । १८–**स्तुस**–आ० हा० वि० । १९–**थान्तस**–भां० मां० । २०–**ङ्गस्य** वा० बा० । २१–**रकर्मदर्शनकर्मता** वा० बा० । २२–**ता वा**–वा० बा० । २३–**स्य वा**–बृ० । २४–**भासमा**–बृ० ल० भां० विना । २५–**त्वात् तन्न** आ० । २६–**लादिज्ञा**–वा० बा० । २७–**या जन**–वा० बा० । २८–**हि अत**–हा० वि० । २९–**पारोदूरप्र**–वा० बा० ।

मानविषयावगमस्वभावप्रतिपत्तेः तद्विपरीतार्थालम्बनाप्रतीतिः अपरैव लोकेनानुभूयते । न चैकसन्तानपूर्वसन्तानव्यावृत्तिनिबन्धनाऽपरसन्तानोत्पत्तिनिबन्धनोऽयं प्रतिपत्तिभेदः क्षणिकत्वसिद्धावेतद्वचनस्य घटमानत्वात् तत्र चाद्यापि विवादात् । न च जनकोऽर्थो वर्त्तमानकालतया नाक्षसंविदि प्रतिभाति किन्तु तस्यां तत्समानकालभाव्याकारस्तेनाधीयते तस्य तथावभासात् वर्त्तमानार्थावगम इत्युच्यते ज्ञानकाले बहिरवभासमानस्य नीलादेर्ज्ञानाकारतयाऽसिद्धेरन्यथाऽन्तरवभासमानस्य सुखादेरप्यर्थाकारताप्रसक्तिः इति ज्ञानसत्तैवोत्सीदेत् । निराकरिष्यते च साकारता ज्ञानस्य । न चार्थस्य ज्ञानजनकत्वे अवगते क्षणद्वयस्थायित्वमर्थस्य सिध्यति तदेव तु तस्यावगन्तुमशक्यम् । तथाहि–न तावत् तदवभासिना ज्ञानेन तस्य जनकताऽवगन्तुं शक्या तेन तत्स्वरूपस्यैव ग्रहणात्, जनकता तु तज्ज्ञानहेतुत्वम् न तत् तेन परिच्छेत्तुं शक्यम्, नापि तदवभासिना ज्ञानान्तरेण तस्यापि तत्तुल्यत्वात् अतत्प्रतिभासिनाप्यतद्ग्रहणस्वभावत्वात् न तज्जनकतापरिच्छेदः तत्स्वरूपप्रतिभासे हि 'इदमस्मादुत्पन्नम्' इत्यवगन्तुं शक्यं नान्यथेति वक्तव्यम् यतो देवदत्तावभासिनो ज्ञानस्य तद्देशदेवदत्तसन्निधेः प्रागभावमवगत्य तद्देशसन्निहितदेवदत्तावभासोदये तस्य तदन्वय–व्यतिरेकानुविधायित्वमवगतं तज्जन्यतां तस्य व्यवस्थापयति अन्वय–व्यतिरेकावगमनिबन्धनत्वात् तज्जन्यतावगतेः अथवा कार्यव्यतिरेकाच्चक्षुरादेरिव विषयस्यापि तज्जनकत्वमवसीयते केवलं चक्षुरादेर्विशिष्टज्ञानव्यतिरेकेण जनकत्वावधारणेऽपि स्वरूपाप्रतिभासादेतीन्द्रियत्वम् विषयस्य पुनः कार्यव्यतिरेकादवगतस्य जनकत्वेन तत्स्वरूपावभासात् तदध्यक्षता । नहीन्द्रियज्ञानविषयत्वव्यतिरेकेणान्यत् प्रत्यक्षलक्षणमिति विषयस्य तज्जनकत्वे स्थिते वर्त्तमानताग्रहण एव तस्याक्षणिकत्वग्रह इति तेन तद्विरुद्धानुमानबाधा । अथ वर्त्तमानार्थावभासिनाऽध्यक्षेण न प्राक्तनक्षणभाविनोऽर्थस्य जनकत्वनिश्चयः तस्यानुमानगम्यत्वात् तेन ज्ञानोदयात् प्रागर्थप्रतिपत्तिरनुमानफलम् जनकत्वात् ज्ञानसत्तातः प्राग्भावो विषयस्यान्यकारणस्येव इति कथमनुमानबाधा वर्त्तमानावभासिनाऽध्यक्षेणेत्युच्यते, असदेतत्; यतो न जनकत्वमनुमानगम्यम् तस्याध्यक्षाविषयत्वे तत्प्रतिबद्धत्वेन लिङ्गस्यानिश्चयादनुमानगम्यताऽपि न भवेत् तत् कुतो ज्ञानार्थव्यतिरिक्तस्यापि वस्तुनो जनकत्वमनुमीयेत? तत् मानसाध्यक्षगम्यम् ऊहाख्यप्रमाणगम्यं वा अभ्युपगन्तव्यम् । यच्च 'जनकत्वात् कार्यसत्तातः पूर्वं कारणसत्तेत्यनुमानगम्यत्वं जनकस्य' इत्युक्तम्, तदपि परिहृतमेव; यतः एका भावावगमपूर्विका चक्रमूर्द्धव्यवस्थितघटप्रतिपत्तिः अपरा प्रदीपादिव्यापारप्रभवा तदनवगमपूर्विका यया स्वविषयपरिच्छेद एवं क्रियते–'न सम्प्रत्येवायं भावः अपि तु प्रागासीत्' इति अतीते च क्षणेऽक्षव्यापारः शतादिप्रतीत्या प्रदर्शितः । यदपि 'न गृह्यमाणस्य ज्ञानसमानसमयस्य जनकता जनकस्य च क्षणिकत्वेन वर्त्तमानतयाऽतीतस्य न प्रतिभासः इति समारोपिताकारग्राहि सर्वमेव ज्ञानम्' इत्युच्यते, तदप्यसारम्; नील–द्विचन्द्रज्ञानयोरविशेषप्रसक्तेः । न च बाह्यार्थवादिना तयोरविशेषोऽभ्युपगन्तव्यः प्रमाणाऽप्रमाणप्रविभागप्रलयप्रसक्तेः । न चानेन न्यायेन विज्ञाननय एवावतार्यत इति वक्तव्यम् तस्य निषेत्स्यमानत्वात् । न च ज्ञानाऽर्थयोरेकसामग्रीजन्ययोः सहभावित्वेन वर्त्तमानग्रहणं क्षणिकत्वेऽपि वैभाषिकमताश्रयणेनाभ्युपगन्तव्यम् क्रियानियमस्य कर्म्मशक्तिनिमित्तत्वेन व्यवस्थापितस्याभावप्रसक्तेः ।

भवतु वाऽनुमानात् प्राक्तनक्षणे सत्ताप्रतीतिस्तथाप्यनन्यथासिद्धेर्नानेनान्यथासिद्धस्य क्षणक्षयानुमानस्य बाधनात् कुतस्तत्सिद्धिः ? न च क्षणक्षयानुमानस्यान्यथासिद्धत्वासिद्धिर्बाधकप्रमाणबलात् सत्ता–क्षणिकत्वयोरविनाभावसिद्धेरिति वक्तव्यम्, यतस्तद्बाधकं प्रमाणं सत्तायाः क्षणिकावि-

---

१–**न पूर्वं सन्तानव्या**–बृ० ।–**न ६ पूर्वसन्तान ६ व्या**–वा० बा० । २–**नाभिधीय**–बृ० ल० वा० बा० विना । ३ **इत्यच्युते** बृ० । ४ "यदि हि ज्ञानेऽवभासमानत्वेन बहिः सत्त्वेन ज्ञायते तदा सुखादेरप्यवभासमानत्वेन ज्ञाने बहिर्भावप्रसक्तिः"–बृ० भां० मां० टि० । ५ "ज्ञानजनकत्वम्"–बृ० मां० टि० । ६ **शक्य तेन तत्** ल० । ७ "परेण"–बृ० मां० टि० । ८–**सन्निधिः** आ० । ९–**दपीन्द्रिय**–ल० । १०–**ग्रह एव** बृ० वा० बा० भां० मां० । ११ "क्षणक्षयग्राहि"–बृ० टि० । १२–**म्यं ते त**–आ० । १३–**गम्यं चा**–भां० मां० । १४ "चक्रमूर्धनि व्यवस्थितघट"–भां० मां० टि० । १५ "अध्यक्षेण"–मां० टि० ।

नाभावप्रतिपादकमध्यक्षम् अनुमानं वा भवेत्? न तावदध्यक्षरूपम् तत्र क्षणिकताप्रतिभासाभावात्। न चानवभासमानक्षणक्षयस्वरूपमध्यक्षं[1] सत्तायास्तदविनाभावमावेदयितुमलम्, न च प्रत्यक्षवपुषि स्फुटमाभाति[2] प्रतिक्षणविशरारुता भावानाम् किन्तु विपरीताध्यवसायोदयात् प्रतिहन्यत इति वक्तव्यम् विहितोत्तरत्वात् प्रागेव। किञ्च, यद्यध्यक्षं प्रतिक्षणमपायमवभासयति भावानां किमिति तदनुसारी निश्चयो नोदयमासादयति? सादृश्यदर्शनाद् भ्रान्तेर्निश्चयानुदय इति[4] न च वक्तव्यम् सादृश्ये प्रमाणाभावात्। न चाप्रामाणिका[6] सादृश्यपरिकल्पना ज्यायसी। किञ्च, यदि विपरीतनिश्चयोत्पादात् प्रतिक्षणापायप्रतिभासप्रतिहतिरभ्युपगम्यते; नन्वेवं पुरोवर्त्तिनि स्तम्भादौ विजातीयस्मरणसमये प्रतिभासमाने क्षणक्षयनिर्भासो भवेत् नित्योल्लेखाभावात्[8]। किञ्च, यदि क्षणक्षयौ[9]वभासि संवेदनं स्थायिताध्यवसायश्च परस्परासंसक्तरूपं प्रत्यक्षद्वयमुदयमासादयति तदा क्षणक्षयावभासस्य न काचित् प्रतिहतिः। न च नित्याध्यवसायसन्निधानमेव तस्य प्रतिहतिः, क्षणक्षयावभासस्यापि नित्याध्यवसायप्रतिघातकत्वप्रसक्तेः सन्निधेरविशेषात् पूर्वोत्तरकालभावित्वस्याप्यकिञ्चित्करत्वात्। अपि च, विजातीयविकल्पोदयेऽपि विशददर्शनस्य प्रतिहतिप्रसक्तिरिति पीताद्यध्यवसायप्रसवे नीलादिकं न प्रतिपन्नं स्यात्। न च विजातीयत्वात् पीतविकल्पो नीलादिदर्शनस्य न प्रतिघातक इति वक्तव्यम् नित्यताध्यवसायस्यापि क्षणक्षयदर्शनं प्रति प्रतिघातकत्वाप्रसक्तेर्विजातीयत्वाविशेषात् आकारभेदादेव ह्यन्यत्रापि विजातीयत्वम् तच्च नित्यानित्ययोरपि तुल्यमेव। न च प्रथमोत्पन्नक्षणिकदर्शनसमानाधिकरणतया नित्योल्लेखस्योत्पत्तेः प्रतिघातकत्वं विरुद्धाकारावभासिनोः प्रत्ययोः सामानाधिकरण्यानुपपत्तेः अन्यथाऽतिप्रसक्तेः। तँन्न सामानाधिकरण्यात् तत्प्रतिहतिरित्यध्यक्षस्वरूपबाधकप्रमाणनिश्चेयो[11] न क्षणक्षय-सत्तयोरविनाभाव इति न सत्तातः क्षणक्षयसिद्धिः। न चानुमानरूपेण बाधकप्रमाणेन क्षणक्षयाविनाभूता सत्ताऽध्यवसीयते तदनुमानेऽप्यविनाभावस्यान्यानुमानबलात् प्रसिद्ध्यभ्युपगमादनवस्थाप्रसक्तेः।

अपि च, किं तद्बाधकं प्रमाणमिति वक्तव्यम् अथार्थक्रियालक्षणं सत्त्वम् नित्ये क्रम-यौगपद्याभ्यामर्थक्रियाविरोधात् ततो व्यावर्त्तमानमनित्ये एवावतिष्ठते इति तेन व्याप्तं तत् सिध्यति इत्येतद् बाधकं प्रमाणम्, असदेतत्; सत्ता-नित्यत्वयोर्विरोधासिद्धेः विरोधो हि भवन् सहानवस्थानलक्षणः परस्परपरिहारस्थितिलक्षणो वा तयोर्भवेत्? न तावत् स्थायिता-सत्तयोराद्यो विरोधः सम्भवी, स हि पदार्थस्य पूर्वमुपलम्भे पश्चात् पदार्थान्तरसद्भावादभावावगतौ निश्चीयते शीतोष्णवत्। न च नित्यतावभासि दर्शनमुदयमासादयति तदभ्युपगमे वा विशददर्शने नित्यतायाः प्रतिभासात् सा विद्यमानैवेति कथं क्षणक्षयिणः सर्वे भावाः स्युः? नापि द्वितीयो विरोधस्तयोः सम्भवति नित्यतापरिहारेण सत्तायाः सत्तापरिहारेण वा स्थायितायाः अनवस्थानात् क्षणिकतापरिहारेण ह्यक्षणिकता व्यवस्थिता अक्षणिकतापरिहारेण च क्षणिकतेत्यनयोः परस्परपरिहारस्थि[13]तिलक्षणताविरोधः। न चार्थक्रियालक्षणा[13] सत्ता क्षणक्षयितया व्याप्तेति नित्यताविरोधिनी सेति वक्तव्यम् इतरेतराश्रयप्रसक्तेः। तथाहि-अर्थक्रियालक्षणा सत्ता क्षणिकतया व्याप्ता नित्यताविरोधात् सिध्यति सोऽपि तस्याः क्षणिकतया व्याप्तेरिति परिस्फुटमितरेतराश्रयत्वम्। न चान्वयनिश्चयद्वारेण सत्त्व-क्षणक्षययोरविनाभावः सिध्यति प्रत्यक्षस्यान्वयग्राहित्वेनात्राप्रवृत्तेः। अनुमानादन्वयप्रतिपत्तावनवस्थाप्रसक्तेरिति प्रतिपादनात्[14]।

---

१ "अध्यक्षेण"-बृ० टि०। "न चाप्रतिभासमानक्षणक्षयस्वरूपं प्रत्यक्षं विपक्षाद् व्यावर्त्य सत्त्वं क्षणिकत्वनियतमादर्शयितुं समर्थम्"-प्रमेयक० पृ० १४६ द्वि० पं० १४। २-**भाति क्षण**-बृ० वा० बा० भां० मां० विना। ३-**परीत्याविवसा**-वा० बा०। ४ **न व**-बृ०। ५-**चाप्रमा**-बृ० वा० बा०। ६-**वात् यदि** वा० बा०। ७-**याभा**-वा० बा०। ८ **प्रति पत्तिघात**-वा० बा०। **प्रतिघात**-मां० हा० वि०। ९-**सक्तिर्वि**-बृ० वा० बा० विना। १० **तत्र सा**-वा० बा० हा० वि०। ११-**निश्चयो** वा० बा० भां० मां० विना। १२-**रस्थितल**-आ० हा० वि० विना। "क्षणिकतापरिहारेण ह्यक्षणिकता व्यवस्थिता तत्परिहारेण च क्षणिकता इत्यनयोः परस्परपरिहारस्थितिलक्षणो विरोधः"-प्रमेयक० पृ० १४७ प्र० पं० ४। १३-**क्षण स**-ल०। १४ प्र० पृ० पं० २०।

अथापि स्यात् अर्थक्रियास्वरूपं सत्त्वं नित्यतायामसम्भवि अन्यथाभूतं च तन्न सम्भवतीति क्षणक्षयिणः सर्वेऽपि भावाः। तथाहि-सत्तासम्बन्धः तावत् सत्त्वं नोपपद्यते व्यक्तिव्यतिरेकेण तस्या अनवभासनात्। न ह्यक्षान्वय-व्यतिरेकानुविधायिनि दर्शनोदये परिस्फुटप्रतिभासव्यक्तिस्वरूपव्यतिरेकेणाऽपरा वर्णसंस्थानविरहिणी बहिर्ग्राह्याकारतां बिभ्राणा सत्ता प्रतिभाति तदवभासिन्या अक्षप्रभवसंविदोऽननुभवात्। न च सकलजन्तुताविशदसंवेदनगोचरातिक्रान्ता सा समस्तीति शक्यमभिधातुम् अभावव्यवहारोच्छेदप्रसक्तेः। न च कल्पनाबुद्धिः 'सत् सत्' इति सत्तास्वरूपमुल्लिखन्ती प्रतिभातीति तदवसेयत्वात् सत्ता सतीति वक्तव्यम् कल्पनाबुद्धावपि बहिःपरिस्फुटव्यक्तिस्वरूपान्तर्नामोल्लेखाध्यवसायव्यतिरेकेण सत्तास्वरूपस्याप्रकाशनात्। तन्न कल्पनाबुद्ध्यध्यवसेयापि सत्तेति कथं सा सतीति? किञ्च, न तावत् सतः सत्तासम्बन्धात् सत्त्वम् सत्तासम्बन्धात् प्रागेव पदार्थस्य सत्त्वप्रसक्तेः प्राक् सत्ताभ्युपगमे च सत्तासम्बन्धवैयर्थ्यम्। नाप्यसतस्तत्सम्बन्धात् सत्त्वम् शशशृङ्गादेरपि सत्त्वप्रसक्तेः। न च खरविषाणादेः स्वरूपविरहात् न सत्तासम्बन्धः इतरेतराश्रयप्रसक्तेः—शशशृङ्गादेः स्वरूपविरहात् सत्तासम्बन्धाभावसिद्धिः तत्सिद्धौ च स्वरूपविरहसिद्धिरितीतरेतराश्रयत्वम्। यदि च शशशृङ्गादेः स्वरूपविरहान्न सत्तासम्बन्धस्तर्हि यत्र गोशृङ्गादौ स्वरूपसद्भावस्तत्र सत्तासम्बन्ध इति स्वरूपसत्त्वमायातम् तथा सत्ताऽपि यदि न स्वरूपेण सती तदा अपरसत्तासम्बन्धात् सा सती स्यात् साऽपि सत्ता अन्यसत्तासम्बन्धात् सत्यभ्युपेयेत्यनवस्थाप्रसक्तिः। अथ सा न सती न तर्हि तत्सम्बन्धो भावसत्त्वव्यवस्थापकः न हि गगनारविन्दसम्बन्धः कस्यचित् सत्त्वव्यवस्थापकः। न च गगनारविन्दस्य सम्बन्धाभावात् न तद्योगः कस्यचित् सत्त्वं व्यवस्थापयति सत्तायास्तु सम्बन्धसद्भावात् तद्योगात् पदार्थसत्त्वमिति वक्तव्यम् यतः सम्बन्धोऽपि विद्यमानस्य भवेत् अविद्यमानस्य वा? यदि विद्यमानस्य न किञ्चित् सम्बन्धकल्पनया तदन्त(तमन्त)रेणापि विद्यमानत्वात्। अथाविद्यमानस्य गगनारविन्दस्यापि स्यात् इति न सत्तासम्बन्धः सत्त्वम्। नापि स्वरूपतः सत्त्वम् स्वप्नावस्थावर्गतेऽपि पदार्थात्मनि स्वरूपसद्भावात् सत्त्वप्रसक्तेः। यदि हि परिस्फुटसंवेदनावभासनं स्वरूपमुच्यते तत् स्वप्नदशायामपि पदार्थात्मनो विद्यत इति कथं न तत्सत्त्वप्रसक्तिः? तत्पारिशेष्यात् अर्थक्रियायोगः सत्त्वम् स च क्रम-यौगपद्याभ्यां व्याप्तः ते च न नित्ये सम्भवतः यतो न क्रमवती अर्थक्रिया नित्ये सम्भविनी तस्य स्वरूपमात्रेण कार्यकरणसामर्थ्ये तदैव सकलकार्योत्पत्तिप्रसक्तिः कालविलम्बायोगात्। नहि पदार्थस्वरूपनिबन्धनं कार्यं तत्स्वरूपस्य प्रागपि सन्निधाने क्रमोत्पत्तिकं युक्तम्। न च नित्यस्याविचलितरूपस्य सहकारिसव्यपेक्षस्य स्वकार्यकरणात् सहकारिक्रमात् कार्यक्रमः, नित्यस्य सहकार्यपेक्षायोगात्। नहि स्थायिनो निरतिशयं स्वरूपं बिभ्राणस्य सहकारिणा क्रमवता कश्चिद्व्यतिरिक्त उपकारः कर्त्तुं शक्यः। नापि व्यतिरिक्तोपकारजननात् तस्य सहकारीणि किञ्चित्कराणि भवन्ति अतिप्रसङ्गात्। न चाकिञ्चित्कराण्यपेक्ष्यन्त इति युगपत् सकलकार्योदयप्रसक्तिः। न च यौगपद्येनाप्यर्थक्रिया नित्यात् सम्भवति पूर्वोत्तरकालयोरपि तत्स्वभावाप्रच्युतेस्तावतः कार्यस्योदयप्रसक्तेरित्यादिक्षणिकतां व्यवस्थापयद्भिः सौगतैः प्रतिपादितम् न पुनरुच्यते ग्रन्थविस्तरभयात्। ततः क्रम-यौगपद्याभ्यामर्थक्रिया नित्याद् व्यावर्त्तमाना क्षणिकतायामेवावतिष्ठत इति कथं न सत्ता क्षणिकताव्याप्ता?

असदेतत्, यतो यद्यर्थक्रिया क्रमेणोत्पत्तिमती भिन्ना हेतोः किमायातम् येन तद्भेदाद्धेतोर्भेदो भवेत् न ह्यन्यभेदादन्यद् भिन्नमतिप्रसङ्गात्। न च हेतोः प्रतिक्षणमभिन्नरूपत्वे एकस्वभावत्वादर्थक्रियापि युगपद् भवेत् यतो नायं नियमः एकस्वभावत्वे हेतोरर्थक्रियया युगपद् भवितव्यम् यदि हि कारणसद्भावेऽर्थक्रिया युगपदुपलभ्येत तदा युगपदुदेतीति व्यवस्था भवेत् न च कारणाभेदेऽपि युगपदुदयमासादयन्ती सा ततो लक्ष्यत इत्यनुभवबाधितमर्थक्रियायौगपद्यम्। न च प्रतिक्षणविशरारुताऽविनाभूतः क्रमवदर्थक्रियोत्पादः क्वचिदुपलब्धो येन तदुदयक्रमात् तद्धेतोः प्रतिक्षणभेदः

---

१ **बहिरप**-बृ० वा० बा०। २-**व्यक्तिः स्व**-वा० बा०। ३-**न्तर्नामोल्लेख्यध्य**-आ०। ४-**बुद्ध्यव**-आ० हा० वि०। ५-**दार्थ स**-आ०। ६ **यदि ग्रा**-आ०। ७ **यदि स्व**-बृ०। ८-**गते प**-वा० बा०। ९-**कतां प्रस्था**-आ० हा० वि०।

सिद्धिमासादयेत्। न चार्थक्रियापि प्रतिक्षणं भेदवती सिद्धा तत् कथं स्वयमसिद्धा हेतोः प्रतिक्षण-भेदमवगमयति। न च सौगतानां कालाभावादर्थक्रियाक्रमो युक्तिसङ्गतः। यदि ह्यतीतानागतवर्त्तमानकालभेदसङ्गतिमासादयेयुः कार्याणि तदा क्रमवन्ति भवेयुः। न च कार्यपरम्पराव्यतिरिक्तः कालः सौगतैरभ्युपगत इति भिन्नफलमात्रमेव। न च फलभेदमात्राद्धेतुभेदव्यवस्था कर्त्तुं शक्या एकस्यापि प्रदीपादेरेकदाऽनेककार्यकरणात्।

अथ वैशेषिकादिपरिकल्पितः पदार्थव्यतिरिक्तः कालोऽभ्युपगम्यते तथापि तस्यैकत्वात् न तद्भेदनिमित्तः कार्यभेदो युक्तिसङ्गतः। न चैककालानुषङ्गात् कार्याणि क्रमवन्ति भवन्ति यौगपद्याभावप्रसक्तेः। न च कालस्यैकत्वेऽपि क्रमवद्घर्षातपादिसम्बन्धात् क्रमः इतरेतराश्रयप्रसक्तेः। तथाहि-कालक्रमाद् वर्षादेः क्रमः तत्क्रमाच्च कालक्रम इति कथं नेतरेतराश्रयत्वम्? न च कालक्रमहेतुरपरः कालोऽभ्युपगमविषयः अनवस्थाप्रसक्तेः कालक्रमनिमित्तापरापरकालाभ्युपगमानिष्ठितेः। न च कालः स्वरूपादेव क्रमवान् कार्याणामपि स्वरूपत एव क्रमवत्त्वप्रसक्तेः एवं च कालपरिकल्पनावैयर्थ्यप्रसक्तिः। तन्न कालाभ्युपगमेऽपि कार्यक्रमो युक्त्या सङ्गच्छत इति कथं कार्यक्रमो हेतुभेदमवगमयति? न च कार्यक्रमाभ्युपगमेऽपि हेतुरनित्यतामासादयतीत्युक्तम्। अथ क्रमेण कार्योदये अनेककर्तृत्वसङ्गतेरनित्यता, ननु कार्यक्रमदर्शनात् यदि नाम कारणस्य क्रमः स्वभावभेदस्तु कथं सिध्यति? न च क्रमेण कार्यजनने जनकत्वाजनकत्वे भवत इति स्वभावभेदलक्षणमनित्यत्वं सिध्यति यतः क्रमोपेतकार्योपलम्भाद्धेतोर्जनकाजनकस्वभावं भेदं कल्पनाऽध्यवस्यति। न च तत्प्रदर्शितस्वभावभेदाद् भावा भिद्यन्ते तथाऽभ्युपगमे वा कल्पना भावानामेकत्वमध्यवस्यन्त्युदयतीति नित्यता तेषां भवेत्। कल्पनाप्रदर्शितश्च भावानां जनकत्वाजनकत्वलक्षणः स्वभावभेदः। तथाहि-उदितप्रयोजनापेक्षया कल्पना भावानां जनकत्वमध्यवस्यति अनुदितफलापेक्षया तु तत्रैवाऽजनकत्वं सैवाध्यारोपयति, न च कल्पनाप्रदर्शितस्वभावभेदात् भावानां भेदो युक्तः अन्यथा परोपजनितकार्यापेक्षयैकस्यैव क्षणस्याजनकत्वम् स्वोत्पाद्यकार्यापेक्षया तु जनकत्वं तदैव तस्यासौ व्यवस्थापयति इति युगपदेकस्य क्षणस्य स्वरूपभेदप्रसक्तिः। अथात्राभेदप्रतिभासः कल्पनाप्रदर्शितं भेदं बाधते तर्हि क्रमेण कार्यजननेऽपि कल्पनाप्रदर्शितो जनकत्वाजनकत्वलक्षणः स्वभावभेदोऽभेदनिर्भासेन किं न बाध्यते? न च क्रमेण कार्योत्पत्तौ हेतुभेदः प्रतिक्षणमवभात्येव भ्रान्त्या तु न निश्चीयत इति वक्तव्यम् प्रतिक्षणं भेदसंवेदनस्याननुभवात् अननुभवे तु तत्कल्पने अतिप्रसक्तिरित्युक्तमिति नार्थक्रियाभेदात् कारणभेदः अन्यभेदस्यान्याभेदकत्वात्।

किञ्च, यदि नाम क्रम-यौगपद्याभ्यां नित्यात् अर्थक्रिया व्यावृत्ता तथापि न ततः क्षणक्षयसिद्धिः। तथाहि-यथैषा अक्षणिकेभ्यो व्यावृत्तत्वात् क्षणिकत्वं साधयति तथा क्षणिकेभ्योऽपि व्यावृत्तत्वादक्षणिकतां साधयेत्। न च क्षणिकेभ्योऽस्या अव्यावृत्तिः। यतः क्षणिका अपि कार्यमुत्पादयन्तः किं केवला एकमुत्पादयन्ति, उतानेकम्? तथा समुदिता अपि तदेकम्, अनेकं वा? न तावदेक एकमुत्पादयत्यनभ्युपगमात् अदर्शनाच्च। तथाहि-एक एवाग्निः इन्धनविकार-धूम-भस्मादिकमनेकं कार्यमुत्पादयन्नुपलभ्यत इति नैक एकमेव जनयतीति नियमः "न वै किञ्चिदेकं जनकम्" [ ] इत्यभ्युपगमविरोधश्चैकस्यैकजनकत्वे। नाप्येकमनेकोत्पादकम् सामग्र्या एव जनकत्वाभ्युपगमात् अनेकस्मात् कार्योत्पत्त्युपलब्धेश्च। नाप्यनेकमेकोत्पादकम् कार्यस्यानेकस्मादुपजायमानस्य नानात्वापत्तेः। न हि विज्ञानवाद्यभ्युपगतकार्यव्यतिरेकेण बाह्यं वस्तु सामग्रीत उपजायमानं विज्ञानं वा एकं भवति। सौत्रान्तिक-वैभाषिकमतेन सञ्चितेभ्यः परमाणुभ्यः सञ्चि-

---

१-**त्रकमे**-आ० हा० वि०विना। २-**र्यकारणा**-आ० हा० वि०। ३-**भाव भेदं क**-आ०। ४-**क्षण स्व**-आ०। ५ "कल्पना"-बृ० टि०। ६-**दात् भेदानां भेदो** हा० वि०। ७ "कल्पना"-बृ० टि०। ८-**दर्शितजन**-बृ०। ९-**सक्तिरित्युक्तमिति** अत्र बृ० प्रतौ 'रि' 'मि' इत्यनयोरुपरि यदेतद् अर्धचन्द्रसदृशं चिह्नमस्ति तद् इकारदर्शकमस्ति। १० "न तु स्वोपादानमात्रभावि किञ्चित् कार्यं संभवति सामग्रीतः सर्वस्य संभवात्। यथोक्तम्—"न किञ्चिदेकमेकस्मात् सामग्र्याः सर्वसंभवः" "-तत्त्वसं० पञ्जि० पृ० १५५ पं० १३। ११ "विज्ञानवादिमते विज्ञानमनेकस्मादुपजायमानं नैकम् सौत्रान्तिकमते बाह्यं वस्तु। एतदेव विवृण्वन्नाह"-बृ० मां० टि०।

तानां तेषामुत्पत्तेः सञ्चितपरमाणुव्यतिरेकेणापरस्य भिन्नस्याभिन्नस्य वा सञ्चयस्य वस्तुसतोऽभावात् यस्य च संवृतिसत एकता घटादेः न तस्य जन्यता, विज्ञानमपि विषयाऽऽलोकमनस्कारादिसामग्रीप्रभवं नैकं युक्तम्। नापि तद् एकरूपमभ्युपगम्यते ग्राह्यग्राहकाकारद्वयरूपस्य तस्य संवेदनात्। न चैकस्य रूपद्वयं बोधाबोधरूपमुपपन्नम्। तथाहि-अहङ्कारास्पदः सुखादिरूपो ग्राहकाकारः अन्तस्तद्विपरीत्येन च ग्राह्याकारोऽपर एव प्रतिभाति तथा च स्वसंवेदनसिद्धभेदत्वात् रूप-रसयोरिव तयोर्नैकत्वम्। अथायमनयोर्भेदावभासो भिन्नयोरिव न पुनर्भिन्नयोरेव। तदुक्तम्—"ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥" [ ] इति, नैतदेवम्; बाह्यार्थवादत्यागप्रसक्तेः सौत्रान्तिकमतस्य वैभाषिकमतस्य चात्र विचारयितुं प्रक्रान्तत्वात् ज्ञानवादस्य च निषेत्स्यमानत्वात्। न च ग्राह्यग्राहकाकारयोः संवृतत्वं स्वकारणान्वयव्यतिरेकानुविधानात्। ग्राहकाकारो हि बोधरूपतया समनन्तरप्रत्ययान्वयव्यतिरेकानुविधायी विषयाकारोऽपि विषयस्यान्वय-व्यतिरेकानुविधत्ते एवं च रूप-रसादेरिव नानयोरेकता। न च निराकारमभिन्नस्वभावमेकसामग्रीजन्यं ज्ञानं सम्भवति पराभ्युपगमेन निराकारत्वेन तस्य विषयसंवेदनत्वानुपपत्तेः। तस्मान्नैकमनेकजन्यमिति स्थितम्।

नापि पूर्वसामग्रीत उत्तरा सामग्री प्रभवतीति बौद्धाभ्युपगमात् अनेकमनेकमुत्पादयतीति वक्तव्यम्, यतः कारणायत्तः कार्याणां स्वभावः अन्यथा निर्हेतुकत्वं तस्य स्यात् पूर्वसामग्री च सर्वेषां सामग्र्यन्तर्भूतानां समग्राजनकत्वेन व्यवस्थितेति कथं कार्यविशेषस्य सामग्र्यन्तर्गतस्यैकस्वभावता? एवं च रूपस्य ज्ञानरूपतापत्तिर्ज्ञानजन्यत्वात् ज्ञानस्वरूपवत् ज्ञानस्यापि रूपस्वरूपतापत्तिः रूपजन्यत्वात् रूपस्वरूपवदित्यनेकत्वव्याघातः। न वा किञ्चिद् रूपम् प्रतिनियतस्वरूपाभावात्। अथावान्तरकारणसामग्रीविशेषसम्भवात् तज्जन्यस्य कारणभेदादेव स्वभावनानात्वमिति नायं दोषः। तथाहि-चक्षूरूपालोकमनस्कारादिषु विज्ञानादिकार्योत्पादकेषु मनस्कारो विज्ञानमुपादानत्वेन जनयति शेषकार्याणि सहकारित्वेन एवं रूपादिकमपि रूपादिकार्यमुपादानत्वेन शेषाणि सहकारित्वेनेत्यवान्तरसामग्रीभेदेन सिद्धः तज्जन्यानां स्वभावभेदः। नन्वत्रापि किं येन रूपेण मनस्कारो ज्ञानस्य जनकस्तेनैव चक्षुरादिकमपि जनयति, आहोस्वित् रूपान्तरेण? यदि तेनैवेति पक्षस्तदा चक्षुरादेर्ज्ञानत्वापत्तिः। तथाहि-सकलस्वगतविशेषाधायकत्वं कार्ये उपादानत्वम् तद्रूपेण चेत् प्रवृत्तो मनस्कारश्चक्षुरादिजनने कथं न चक्षुरादेर्ज्ञानरूपतापत्तिः? अथ स्वभावान्तरेण चक्षुरादिजननेऽसौ प्रवर्त्तते; नन्वेवं स्वभावभेदात् मनस्कारस्य भेदापत्तिः स्वभावभेदलक्षणत्वात् वस्तुभेदस्य। अथ स्वसंविदि एकत्वेनावभासनात् मनस्कारस्यैकत्वमुपादानसहकारिशक्तिभेदेऽपि; नन्वेवमक्षणिकस्यापि तदतत्कालभाविकार्यजनकत्वाजनकत्वभावभेदेऽप्येकत्वेनाध्यक्षे प्रतिभासनात् कथं नैकत्वम्? अथ न स्वभावभेदाद् भावभेदः अपि तु विरुद्धस्वभावभेदात् तदतत्कार्यजनकत्वाजनकत्वे चाक्षणिकस्य विरुद्धौ स्वभावाविति तस्य भेदः; नन्वेवं मनस्कारक्षणस्यापि भेदप्रसक्तिः उपादानत्व-सहकारित्वैर्लक्षणयोः शक्त्योर्मनस्कारात् परस्परतश्च भेदात्। अथ न शक्तीनां शक्ति-शक्तिमतोर्वा भेदस्तथापि विरुद्धस्वभावद्वययोगात् भेद एव यतो मनस्कारस्योपादेयज्ञानं प्रति यैव जनिका शक्तिः सैव चक्षुरादिकं प्रति ततश्चक्षुरादिकं प्रति जनकस्वभावः अजनकस्वभावश्च मनस्कारः

१-**केण पर**-आ० हा० वि०। २ "अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः" इति पूर्वार्धम्"-बृ० भां० मां० टि०। अष्टस० पृ० ९३ पं० १८। स्याद्वादर० पृ० ८९ द्वि० पं० ६। श्लो० वा० पार्थ० व्या० पृ० २७२ पं० १५। सर्वदर्शनसं० द० २ पृ० ३२ पं० २०६। शास्त्रवा० स्याद्वादक० पृ० २१५ द्वि० पं० २। ३-**क-वै**-बृ० वा० बा० भां० मां०। ४-**स्य वा**-बृ० वा० बा० हा० वि० विना। ५ **एवं रू**-आ०। ६-**जन्यज्ञा**-बृ० भां० मां० विना। ७-**रत्वे तस्य वि**-बृ० वा० बा०।-**रत्वेन तस्यावि**-आ० हा० वि०। ८-**थ्री भ**-आ०। ९ **एवं रू**-ल० भां० मां० विना। १०-**स्यापि रूपताप**-भां० मां० आ० वि०। ११-**पं प्रति प्रतिनि**-वा० बा० भां० मां०।-**प प्रतिनि**-आ०। १२ **अथवान्तर**-वा० बा०। १३-**वा तज्ज**-ल० वा० बा०। १४-**दादेवं स्व**-बृ०। १५ **चक्षुस्वरूपा**-आ०। **चक्षु रूपा**-हा० वि०। १६ **एव रू**-ल०। १७-**त्यथान्त**-वा० बा०। १८ **तज्जन्मनां** आ०। १९-**कत्वभाव**-आ०। २०-**त्वक्ष**-आ० हा० वि०। २१-**श्च चक्षु**-भां० मां०। २२-**ननस्व**-भां० मां०।

प्रसक्तः चक्षुरादिजननात् तत्स्वभावः सकलस्वगतविशेषानाधायकत्वादतत्स्वभावः नहि जनकत्वादन्यत् सकलस्वगतविशेषाधायकत्वम्।

नापि मनस्कारोज्जनकत्वम् धर्मधर्मिणोरभेदाभ्युपगमात् अतः शक्ति-शक्तिमतोरभेदपक्षे तदतत्स्वभावत्वमेकदैकस्यैकस्मिन् जन्ये पूर्वोक्तनीत्या प्रसक्तम् तेन विधि-प्रतिषेधरूपविरुद्धधर्म्म-
५ संसर्गाद् भेदः प्रसक्तः। भेदपक्षेऽप्युपादानत्व-सहकारित्वयो रूप-रसवत् तदभावनियतभावत्वेनैककालत्वेऽपि भेदात् मनस्कारलक्षणस्य भावस्य भेदः सिद्ध एव। न चैवमापादितभेदस्याप्यबाधितैकावभासिप्रत्ययविषयत्वात् न नानात्वम् अक्षणिकस्यापि पूर्वक्षणग्रहणपरिणामाजहद्वृत्तोत्तरक्षणग्रहणपरिणामवद्ध्यक्षेणैकतया ग्रहणात् तदतज्जनकाजनकस्वभावभेदेऽपि न नानात्वमित्युक्तत्वात्। न च शक्ति-शक्तिमतोः शक्त्योश्चाभेदे 'इदमुपादानम् इदं च सहकारिकारणम्' इति विभागः
१० क्षणिकपक्षे भवेत्। यदपि 'अन्त्यावस्थायां सर्वेषां प्रत्येकमभिमतकार्योत्पादकत्वम् अन्यसन्निधिस्तु स्वहेतुप्रत्ययसामर्थ्यात् नोपालम्भमर्हति न च भिन्नकार्योत्पत्तिः सर्वेषां तस्यैव जनने सामर्थ्यात् पर्यायानपेक्षणाच्च नोत्पन्नोत्पादोऽपि' इत्युक्तम् तदपि प्राक्तनन्यायेन निरस्तम्। किञ्च, अत्र पक्षे उष्णाद् गर्भगृहं प्रविष्टस्य मनस्कारादिः कारणकलापश्चक्षुर्ज्ञाने समर्थः परस्परनिरपेक्षतयेति यथा मनस्कारस्य चक्षुर्ज्ञानं प्रत्युपादानता तस्यैवैकस्य तज्जनने सामर्थ्यात् तथा आलोकादेरपि इति
१५ दर्शनेक्षतिः प्रतीतिविरुद्धं चैकैकस्यैवोत्पादकत्वम् न चैकैकस्मात् कार्योत्पादः कदाचिदप्युपलब्ध इति कथं न तदभ्युपगमः प्रतीतिविरुद्धः? न च प्रकारान्तरेण क्षणिकानां कार्यकरणसम्भव इति क्षणिकेभ्योऽपि प्राक्तनन्यायेन कार्यकरणसामर्थ्यं निवृत्तमक्षणिकत्वं प्रसाधयेत् श्रावणत्ववद् वा उभयव्यावृत्तत्वात् संशयहेतुर्भवेत्। नाप्येतद् वक्तव्यम् उक्तप्रकारेणाक्षणिकेष्वप्यर्थक्रियानुपपत्तिरिति निर्हेतुकं सकलं जगद् भवेत् अक्षणिकपक्षे बहुभ्यः समवायिकारणत्वादिरूपेभ्य एकमभिन्नं
२० च वस्तूत्पद्यत इत्यभ्युपगमात् तत्र च विरोधाभावादित्युक्तत्वात्।

यदपि 'सत्त्वस्वरूपमुपवर्णयता प्रतिपादितमर्थक्रियालक्षणं भावानां सत्त्वम्' इति तत्र किमर्थक्रियातः सत्त्वम्, आहोस्वित् सत्त्वादर्थक्रिया? तत्र यद्यर्थक्रियातः सत्त्वं तदा प्राक् सत्त्वव्यतिरेकेणापि तस्या उत्पत्तेर्निर्हेतुका सा। अथ सत्त्वादर्थक्रिया तदा अर्थक्रियातः प्रागपि भावसत्त्वसिद्धेः

१-त्वादेत-मां०। २-राजन-भां० हा० वि०। ३ पूर्वग्र-ल०। ४-त्तरग्रह-वा० बा०। ५- नकस्व-आ० हा० वि०। ६-मभिगत-बृ०। ७ "क्रमः"-बृ० टि०। ८ परनिर-आ०। ९-नक्षितिः भां० मां० विना। १० "न हि आलोकं विनाऽपि अन्धकारे ज्ञानमुत्पद्यते ततो मनस्कारस्येव ज्ञानं प्रति आलोकादेरपि उपादानता किं न स्यात् (तदभावेऽपि तस्याभावात्) इति"-बृ० मां० टि०। ( ) एतत्कोष्ठकान्तर्गतः भागः बृ० प्रतौ नास्ति। ११ "नित्यः शब्दः श्रावणत्वादिति। अत्र 'श्रावणत्वात्' इति हेतुर्नित्यानित्यपक्षाभ्यामाकाश-घटादिरूपाभ्यां व्यावृत्तः शब्दं विना अन्यत्र श्रावणत्वस्य अभावात् नित्यानित्यविनिमु(मु)क्तस्य च अन्यस्य असंभवात् संशयहेतुः किम्भूतस्य अस्य श्रावणत्वमिति यतः शब्दं विना श्रावणत्वयुक्तो नान्यः पदार्थोऽस्ति यत्र श्रावणत्वे सति नित्यत्वमनित्यत्वं वा निश्चीयते शब्दस्यैव श्रावणत्वादिति। एवमत्रापि"-मां० टि०। १२-कारेण क्ष-बृ० ल० वा० बा० विना। १३-मभिन्नं व-बृ० विना।

१४ "यच्चार्थक्रियालक्षणं सत्त्वमित्युक्तं तत्र लक्षणशब्दः कारणार्थः स्वरूपार्थः ज्ञापकार्थो वा स्यात्? प्रथमपक्षे किमर्थक्रियालक्षणं कारणं सत्त्वस्य तद्वा अर्थक्रियायाः। तत्रार्थक्रियातः सत्त्वस्योत्पत्तौ प्राक् पदार्थानां सत्त्वमन्तरेणाप्यस्याः प्रादुर्भावात् निर्हेतुकत्वम् निराधारकत्वं वानुषज्येत। अथ सत्त्वादर्थक्रियोत्पद्यते तदार्थक्रियातः प्रागपि सत्त्वसिद्धेर्भावानां स्वरूपसत्त्वमायातम्। अथ स्वरूपार्थोऽसौ तत्रापि तद्धेतोरसत्त्वप्रसङ्गः। न हि अर्थक्रियाकाले तद्धेतुर्विद्यते। न चान्यकालस्य अस्य अन्यकाला सा स्वरूपमतिप्रसङ्गात्। नापि ज्ञापकार्थोऽसौ अर्थक्रियाकालेऽर्थस्यासत्त्वादेव। असतश्चास्याऽतः कथं सत्ताज्ञप्तिरतिप्रसङ्गात्। न चार्थक्रियोदयात् प्राक् कारणमासीदिति व्यवस्थापयितुं शक्यम्। यतो यदि स्वरूपेण पूर्वं हेतुरवगतो भवेत् तदनन्तरं चार्थक्रिया तदार्थक्रिया प्रतिपन्नसम्बन्धोपलभ्यमाना प्राग्धेतुसत्तां व्यवस्थापयतीति स्यात्। न चार्थक्रियामन्तरेण हेतुः स्वरूपेण कदाचिदप्युपलब्धः परैः स्वरूपसत्त्वप्रसङ्गात्। अर्थक्रियायाश्चापरार्थक्रिया यदि सत्त्वव्यवस्थापिका तदानवस्था। न चार्थक्रियाऽनधिगतसत्त्वस्वरूपापि हेतुसत्त्वव्यवस्थापिका अश्वविषाणादेरपि तत्सत्त्वव्यवस्थापकत्वानुषङ्गात्। न च हेतुजन्यत्वादर्थक्रिया सती नार्थक्रियान्तरोदयादित्यभिधातव्यम् इतरेतराश्रयानुषङ्गात्—हेतुसत्त्वाध्यऽर्थक्रिया सती तत्सत्त्वाच्च हेतोः सत्त्वमिति"-प्रमेयक० पृ० १४८ द्वि० पं० २।

१५ "अर्थक्रिया"-बृ० मां० टि०।

स्वरूपसत्त्वमायातम्, अपि चार्थक्रियाकाले हेतोरदर्शनात् असतस्तस्य कथं सत्ताऽवगम्यते? न च 'अर्थक्रियोदयात् प्राक् कारणमासीत्' इति व्यवस्थापयितुं शक्यम्, यतो यदि स्वरूपेण पूर्वं हेतुरवगतो भवेत् तदनन्तरं चार्थक्रियोपलम्भानुभवः स्यात् ततोऽर्थक्रिया अवगतप्रतिबन्धोपलभ्यमाना प्राग् हेतुसत्ताव्यवस्थापनपटीयसी भवेत्। न चार्थक्रियामन्तरेण हेतुः स्वरूपेण कदाचिदप्युपलब्धिगोचरः स्वरूपसत्त्वप्रसक्तेः। किञ्च, यद्यर्थक्रिया हेतुसत्ताव्यवस्थापिका तस्या अप्यपरार्थ-५
क्रिया व्यवस्थापिकेत्यनिष्ठाप्रसक्तेर्न हेतुसत्ताव्यवस्थितिर्भवेत्। न चार्थक्रिया अनधिगतसत्त्वस्वरूपाऽपि हेतुसत्त्वव्यवस्थापिका शशविषाणादेरपि तत्सत्त्वव्यवस्थापकत्वप्रसक्तेः। न च हेतुजन्यत्वादर्थक्रिया सती नार्थक्रियान्तरोदयादिति वक्तव्यम् इतरेतराश्रयप्रसक्तेः। तथाहि-हेतुसद्भावादर्थक्रिया सती तत्सत्त्वाच्च हेतोः सत्त्वमिति परिस्फुटमितरेतराश्रयत्वमिति नार्थक्रियालक्षणं सत्त्वम्।

भवतु वार्थक्रियालक्षणं सत्त्वं तथापि नातः क्षणक्षयानुमानम् यतोऽसौ भावानां १०
क्षणस्थायितां साधयति, उत क्षणादूर्ध्वमभावम्? प्रथमपक्षे सिद्धसाध्यता नित्यस्यापि भावस्य क्षणावस्थानाभ्युपगमात् अन्यथा सदावस्थितिरेव न भवेत् क्षणावस्थितिनिबन्धनत्वात् क्षणान्तरादिस्थितेः। न चोत्तरकालमभावमवगमयति अभावेन सह तस्याः प्रतिबन्धाभावात् न चाप्रतिबन्धविषयः शशविषाणादिवदनुमेयः। किञ्च, समानकालं वा सा साध्यं साधयेत् भिन्नकालं वा? यदि समानकालं सद्रूपं साध्यं साधयति तदा तत्समानकालभाविनः सत्तामात्रस्य १५
सिद्धत्वात् सिद्धसाध्यता अभावेन च प्रतिबन्धाभावान्न ततस्तत्सिद्धिः। अथ भिन्नकालं साधयति तत्रापि प्रतिबन्धाभावात् न ततस्तत्सिद्धिः न हि भिन्नकालेन विद्यमानेनाविद्यमानेन वा सत्तायाः कश्चिदविनाभाव इति यत्राविनाभावस्तत्र विप्रतिपत्तिर्नास्ति यत्र च विप्रतिपत्तिस्तत्राविनाभावस्याभाव इति न सत्तातः क्षणक्षयानुमानम्। न च सत्त्वं वर्त्तमानकालभावित्वम् तच्च पूर्वापरकालसम्बन्धविकलतया क्षणिकत्वं तदात्मकतया भावानां प्रकटयति यतो वर्त्तमानं क्षणिक- २०
मिति कुतोऽवगम्यते? पूर्वापरयोस्तत्रादर्शनादिति चेत्, न; दृश्यादर्शनस्यैवाभावव्यवहारसाधकत्वात्। अदर्शनमात्रस्य तु सत्यपि वस्तुनि सम्भवात् न तत्र प्रमाणता। न च सर्वं वस्तु सर्वदा दर्शनयोग्यम् चक्षुर्व्यापाराभावे वस्तुनोऽप्रतिभासनात् तदैव च चक्षुर्व्यापारात् परेणोपलम्भात् तन्न पूर्वापरयोरनुपलम्भमात्रादभावनिश्चय इति न प्रत्यक्षानुमानाभ्यां क्षणिकतावगमः। न चैतद्व्यतिरिक्तं प्रमाणान्तरं परैरभ्युपगम्यते इति कुतः क्षणिकत्वसिद्धिः? २५

यदपि 'यद् यथावभासते तत् तथैवाभ्युपगन्तव्यम् यथा नीलं नीलरूपतया प्रतिभासमानं तेनैव रूपेणाभ्युपगमविषयः क्षणपरिगतेन च रूपेण पदार्थाः प्रतिभान्तीति प्रत्यक्षसिद्धे क्षणिकत्वे तद्व्यवहारसाधनाय हेतूपादानम्' इति परैः प्रतिपादितम् तदप्ययुक्तम्; 'क्षणपरिगतेन रूपेण प्रतिभासनात्' इति हेतोरसिद्धेः कालान्तरस्थायितयाऽध्यक्षे भावानां प्रतिभासनस्य प्रतिपादितत्वात्। यदप्यभिहितम् 'न प्रथमदर्शनेन कालान्तरस्थितिरवसातुं शक्या' तदप्यसङ्गतम्; स्थिर- ३०
रूपपदार्थदर्शनात् आ विनाशकारणसन्निधानात् स्थायितया आद्यदर्शनेनैव भावस्य ग्रहणात् अन्यथैकक्षणस्थायितया तस्य ग्रहणे व्यवहारार्थमुपादानं न भवेत्। न च तत् क्षणप्रभवं वस्तु व्यवहारं साधयिष्यतीति तदुपादानम् एवंभूतप्रतिपत्तेरभावात्। नहि व्यवहारिणः 'इदमर्थक्रियाकारि वस्त्वन्यदेव' इति प्रतिपद्यन्ते। न च सन्ताननिबन्धनोऽयं व्यवहारः क्षणिकत्वासिद्धौ सन्तानस्यासिद्धेः। न च भ्रान्तोऽयं व्यवहारः अतस्मिंस्तद्ग्रहणरूपस्य भ्रान्तत्वस्य क्षणक्षयासिद्धावसिद्धेः। न च क्षणिकत्वं ३५

---

१ तत्स्वत्वव्य-वा० बा० आ०। २-दत्रार्थ-आ०। ३ "अस्तु वा अर्थक्रियालक्षणं सत्त्वम् तथापि अतोऽर्थानां क्षणस्थायिता क्षणिकत्वं साध्येत क्षणाद् ऊर्ध्वमभावो वा"-प्रमेयक० पृ० १४८ द्वि० पं० १०। ४ "यदि हि एकस्मिन् क्षणे न स्थितिर्भावस्य तदा क्षणान्तरेऽपि कथं स्यात्"-बृ० मां० टि०। ५ तस्याग्र-बृ० वा० बा० हा० वि०। ६ वा साध्यं आ० हा० वि०। ७-कालसद्भू-बृ०। ८ "सत्ता"-मां० टि०। "साधन"-बृ० टि०। ९-वान्नतस्त-वा० बा०।-वात् ततस्त-ल०।-वा ततस्त-आ०। १० "अन्येन पुंसा"-बृ० मां० टि०। ११-क्षसिद्धक्ष-भां० मां०।

तथाप्रतिभासात् सिद्धम् इतरेतराश्रयप्रसक्तेः। तथाहि-प्रतिभासात् क्षणिकत्वसिद्धौ एकत्वव्यवहारो भ्रान्तः सिध्यति तत्सिद्धेश्च तथाप्रतिभाससिद्धौ क्षणिकता सिध्यतीतीतरेतराश्रयत्वम्। न चान्यदनुमानं क्षणिकताप्रतिपादकमस्ति यत एकत्वव्यवहारस्य भ्रान्तता भवेत्। न च भाविजन्मपरम्पराग्रहणप्रसक्तिराद्यप्रत्यक्षेण कालान्तरस्थायिताप्रतिपत्तौ यतोऽबाधितप्रतिपत्तौ यत् प्रतिभाति तदेव तद्ग्राह्यतया व्यवस्थाप्यते नत्वप्रतिभासमानस्यापि ग्राह्यताप्रसक्तिप्रेरणं युक्तिसङ्गतम्। नहि 'सुरभि चन्दनम्' इति विशेषणविशेष्यभावग्रहणे बाह्येऽपि विषये बाह्येन्द्रियनिरपेक्षं स्वातन्त्र्येण प्रवृत्तं मानसमध्यक्षमेकीयमतेनेति सर्वत्रैव तत् प्रवर्ततामिति प्रेरणायुक्तिसङ्गता सर्वस्य तत्राप्रतिभासनात्। यत्रैव विशेषणविशेष्यभावनियतं लिङ्गाद्यनपेक्षं मनः प्रवर्तते तत्रैव तद्ग्रहणव्यापारोऽभ्युपगन्तव्यः न सर्वत्र एवं भाविकालान्तरादिस्थितेरपि वक्तव्यम् यतः तत्रापि भाविकालादीनामसन्निहितत्वेऽपि तद्व्यापिनो भावस्य सन्निहितत्वात् तत्र व्यापृतमक्षं तद्विशेषणत्वव्यवस्थितानां भाविकालादीनामपि ग्राहकम् न चैवं तदनिन्द्रियजमसन्निहितार्थजत्वेन भ्रान्ततरं च इन्द्रियान्वय-व्यतिरेकानुविधानेन सन्निहिते विशेष्ये भावात्, न चासन्निहितानां भाविकालादीनां तत्राप्रतिभासः विशेष्यप्रतिभासाऽऽकृष्टानां शतादिग्रहणे पूर्वसङ्ख्येयानामिव तेषां तत्र प्रतिभासँसंवेदनात् अन्यथा अस्खलद्रूप एकत्वनिबन्धन उपादेयव्यवहारस्तत्र कथं भवेत्? इत्युक्तमसन्निहितार्थस्यापि चेन्द्रियजत्वं तैमिरिकज्ञानस्येवोपपन्नम् केवलमसत्यत्वे विवादः तत्र च बाधकाभावात् कालान्तरस्थायिताप्रतिपत्तेः सत्यता व्यवस्थाप्यते। न च विषयसन्निधानासन्निधाने इन्द्रियजत्वप्रयोजके अपि त्विन्द्रियव्यापारानुविधानम् तच्चात्रास्तीति कथं न कालान्तरस्थितिप्रतिपत्तिरक्षजा? न चावच्छेदकाग्रहणेऽवच्छेद्यस्याप्यग्रहणमिति वक्तव्यम् अवच्छेदकप्रतिभासस्य प्रसाधितत्वात्।

किञ्च, यदि पूर्वापरविविक्तमध्यक्षणप्रतिभास्येव अध्यक्षं भवेत् तदा बाधकसंवादप्रत्ययानुत्पत्तितः प्रमाणेतरव्यवहारो ज्ञानानां विशीर्येत। तथाहि-बाधकं पूर्वविषयापहारेणोत्पत्तिमासादयति पूर्वप्रत्ययेन च यद्युत्तरप्रत्ययसमये स्वविषयसत्त्वं नावभातं तदा स्वसमये बाधकेन पूर्वविज्ञानगोचरस्यासत्त्वावेदनेऽपि कथं बाधकता? नहि विनाशकारणव्यापारोत्तरकालभाविभावासत्त्वावेदकज्ञानस्य पूर्वज्ञानबाधकता। न च बाधकेन पूर्वविज्ञानविषयस्य पूर्वमेवासत्त्वपरिच्छेदात् बाधकता तस्य पूर्वविज्ञानविषये प्रवृत्त्यभ्युपगमप्रसक्तेरिति बाध्यबाधकभावाभ्युपगमे पूर्वोत्तरविज्ञानयोरेकविषयता अभ्युपगन्तव्या अन्यथा सन्तानकल्पनाया असम्भवतो बाध्यबाधकभावविलोपप्रसक्तेरप्रामाण्यव्यवस्था न क्वचित् विज्ञाने भवेत् पूर्वविज्ञानविषये अविजातीयोत्तरज्ञानवृत्तिः संवादः सोऽपि पूर्वापरज्ञानविषयैकत्वे सम्भवति नान्यथेति तद्व्यवहारादपि स्थायिताग्राह्यध्यक्षसिद्धिः पूर्वज्ञानवदुत्तरज्ञानमपि 'तदेवेदम्' इत्युल्लेखवत् पूर्वक्षणेषु वर्त्तते इत्यभ्युपगन्तव्यम् न्यायस्य समानत्वात्। न च पूर्वदेश-काल-दशा-दर्शनानामुत्तरज्ञानप्रतिभासे तद्देशादिताप्रसक्तिरिति वर्त्तमानतामात्रग्रहणात् क्षणिकताग्रह एव अग्रहणे न तेन स्वविषयस्य पूर्वादिताग्रह इति वक्तव्यम् क्षणिकत्वग्रहेऽप्यस्य चोद्यस्य समानत्वात्। तथाहि-उत्तरज्ञानेन पूर्वदेशादीनां ग्रहणे न स्वविषयस्य ततो भेदग्रहः अग्रहणेऽपि सुतरां तेषामग्रहे 'ततो भिन्नमिदम्' इति प्रतीतेरयोगात् प्रतियोगिग्रहणसव्यपेक्षत्वाद् भेदावगतेः। न च स्वविषयस्य तेन तदनुप्रवेशाग्रहणमेव भेदग्रहणम् तद्भेदाग्रहणमेव तदनुप्रवेशस्वरूपनित्यत्वग्रहणमित्यस्यापि वक्तुं शक्यत्वात्। न च स्वरूपमेव भेद इति तद्ग्रहणे भेदग्रहः अभेदेऽप्यस्य समानत्वात्। तथा च 'पूर्वमेवेदं मया दृष्टम्' 'पूर्वदृष्टं पश्यामि' इति च पूर्वोत्तरज्ञानयोर्भाविभूतज्ञानैकार्थविषयताव्यवस्थापकं निश्चयद्वयं यथाक्रममुपजायमानं संलक्ष्यत इति यथा 'नीलमिदं पश्यामि' इति तद्व्यापारानुसारिविकल्पोदयात् तत्प्रतिभासोऽध्यक्षस्याविकल्पकस्य व्यवस्थाप्यते तथा प्रकृतेऽपि पूर्वोत्तरज्ञानद्वये अभेदप्रतिभासो व्यवस्थापनीयः न्यायस्य समानत्वात्। इदमेवं वा निश्चयद्वयमक्षव्यापारानुसारित्वादध्यक्षतामनुभवति यतो नेदमानुमानिकम् लिङ्गाद्यनपेक्षतयोत्पत्तेः, नापि भ्रान्तम् बाधकाभावात्, न च स्मृतिरूपम् अपूर्वार्थप्रतिपत्तेः। न च प्रथमाक्षव्यापारानन्तरमनुत्पत्तेः स्मरणरूपताऽस्य, विशिष्टसामग्यन्तर्भूतेन्द्रियजन्यतया प्रागनुत्पादेऽपि स्मरणरूपतानुपपत्तेः। अत एवोत्पाद्यमाने पटादौ 'अनागताध्यवसायोऽध्यक्षम्' इति केचित् सम्प्रतिपन्नाः। न ह्यनध्यवसितमुत्पाद्यते तथा चोत्पन्ने तदुत्पादकानां प्रतिपत्तिः यदेवोत्पादयितुमध्यवसितं तदेवोत्पादितम् यदेव चोत्पादितं तदेवाध्यवसितमित्यभेदप्रतिपत्तिः सङ्गता भवति। न चास्या अनिमित्तता अनियतनिमित्तता वा कादाचित्कतयाऽनिमित्तत्वस्याभावात् लिङ्गादिनिमित्ताभावतः पारिशेष्यादिन्द्रियलक्षणनियतनिमित्तत्वाच्च। न चैवम्भूतप्रतिपत्तेर्मिथ्यात्वेनोपलब्धेरियमपि मिथ्या, प्रत्यक्षस्यापि कस्यचिन्मिथ्यात्वोपलब्धेः सर्वस्य मिथ्यात्वप्रसक्तेः। न च तत्र बाधकाभावात् सत्यार्थतेति वक्तव्यम् अत्रापि समानत्वात् बाधारहिता हि सविकल्पा प्रतिपत्तिः प्रमा नान्येत्यभ्युपगमात्। न च मनसः सर्वत्रातीते अनागते वाऽव्याहतप्रसरत्वादुत्पाद्यमाने भावे तदध्यवसायस्य मनोजन्यत्वेनाध्यक्षता युक्ता चक्षुरादेस्त्वतीतानागतयोरविषयत्वेन तत्प्रतीतेः कथमध्यक्षतेति वक्तव्यम् उक्तोत्तरत्वात् अतीतानागतविषयस्य मानसाध्यक्षत्वेऽपि वा क्षणप्रतिभासलक्षणस्य हेतोरसिद्धता भवत्येव अबाधितमानसाध्यक्षेण भावानामेकत्वग्रहणात्।

यदपि 'किं क्षणिकेन ज्ञानेन स्थायिता युगपत् क्रमेण वा भावानां गृह्यते, आहोस्वित् अक्षणिकेन' इति विकल्प्य सर्वत्र दोषप्रतिपादनं कृतम् तत् क्षणिकत्वग्रहेऽपि समानम्। तथाहि-न क्षणिके ज्ञाने क्षणस्थिति-क्षणान्तरस्थित्योर्युगपत् क्रमेण वा प्रतिभासे तयोर्भेदप्रतिपत्तिः परस्पराभावस्य भावग्राहिणि तत्राप्रतिभासनाद् भावाभावयोर्विरोधात् तदप्रतिभासने च न तद्भेदप्रतिपत्तिः अभावप्रतिपत्तौ वा भावाभावयोर्विरोधाभावात् न क्षणस्थिति-क्षणान्तरस्थित्योर्भेदप्रतिपत्तिः। नापि तयोरप्रतिभासने भेदावगतिः प्रतियोगिग्रहणसव्यपेक्षत्वाद् भेदप्रतिपत्तेरिति भवतैवाभिधानात्। अन्तर्बहिश्च स्थिरस्थूराध्यक्षप्रतिभासबाधितत्वाच्च प्रकृतविकल्पानामनुत्थानमिति न प्रतिपदमेषां निराकरणे प्रयत्नः सफलः पिष्टपेषणरूपत्वात् दिङ्मात्रप्रदर्शनं तु विहितमेवेत्यलमतिविस्तारिण्या कथया। तत् क्षणक्षयप्रसाधने प्रत्यक्षादेः प्रमाणस्यानवतारात् बाधकत्वेन च तस्यैकत्वाध्यवसायिनः प्रवृत्तिप्रतिपादनात् न पर्यायास्तिकाभिमतपूर्वापरक्षणविविक्तमध्यक्षणमात्रं वस्तु किन्तु अतीतानागतपर्यायाधारमेकं द्रव्यवस्त्विति द्रव्यार्थिकनिक्षेपः सिद्धः।

[द्रव्यनिक्षेपविषयस्य द्रव्यस्य आगमोक्तरीत्या स्वरूपवर्णनम्]

द्रव्यं च अनुभूतपर्यायम् अनुभविष्यत्पर्यायं चैकमेव तेन 'अनुभूतपर्याय'शब्देन तत् कदाचिदभिधीयते कदाचिच्च 'अनुभविष्यत्पर्याय'शब्देन यथा अतीतघृतसम्बन्धो घटो 'घृतघटः' इत्यभिधीयते भविष्यत्तत्सम्बन्धोऽपि तथैवाभिधानगोचरचारी। शुद्धतरपर्यायास्तिकेन च निराकारस्य ज्ञानस्यार्थग्राहकत्वासम्भवात् साकारं ज्ञानमभ्युपगतम् तत्संवेदनमेव चार्थसंवेदनम् ज्ञानानुभवव्यतिरेकेणापरस्यार्थानुभवस्याभावात् घटोपयोग एव घटस्तन्मतेन। तत्पर्यायेण अतीतेन

१-वर्तनमि-भां० मां०। २ व्यावृत्तम-आ०। ३ भ्रान्तरं च भां० हा० वि०। भ्रान्तं च बृ० ल० वा० बा०। ४ विशेष्यभा-आ०। ५ "तद्विशेषणत्वेन"-मां० टि०। ६ "भाविकालादीनाम्"-बृ० मां० टि०। ७ "तद्विशेषणत्वेन"-बृ० टि०। ८ "ज्ञानस्य"-मां० टि०। ९ न वि-आ०। १०-धानेन्द्रियव्यापा-बृ०। ११ "भाविकाल"-मां० टि०। १२-ध्यक्षेण-आ० हा० वि०। १३-शीर्यते त-बृ० ल० वा० बा० विना। १४-षयं स-मां०। १५-त्वंनावभाव तदा बृ०।-त्वंतावभावत्तदा वा० बा०। १६ "ततो यथा पूर्वस्मिन् विज्ञानेऽसत्यपि प्रवृत्तिर्बाधकस्य तथा भाविकालेऽपि किं न स्यात्। तथा च नित्यता कथं सिध्येत् (न सिध्येत्)" बृ० टि०। १७-ग्रहण एव अग्र-आ०।-ग्रह एवं अग्र-भां० हा० वि०। १८ भेदः अग्रहणेऽ-वा० बा०। भेदग्रहणेऽ-हा० वि०।

१-ष्टं पूर्वदृशं पश्या-मां०।-ष्टं पश्या-आ० हा० वि०। २ इमभे-वा० बा० ३-व चा नि-बृ०। ४-माध्यक्ष-मां०। ५ "यथाक्रमं हेतुद्वयं योज्यम्"-बृ० मां० टि०। ६-त्यार्थेति वा० बा०। ७-कल्पकां प्र-वा० बा०। ८-दुत्पद्य-प्र० मां० बहिः। ९ "अध्यवसायस्य"-बृ० मां० टि०। १०-दनं तत् वा० बा०। ११-वस्य भावस्य ग्राहि-वा० बा०।-वग्राहि-आ०। १२-पत्तेरपि भ-वा० बा०।-पत्तिरिति भ-आ०। १३-मात्र व-आ०। १४-र्यायं वैक-वा० बा०। १५-न च त-आ०।

परिणतम् परिणंस्यद् वा द्रव्यं तच्छब्दवाच्यं द्रव्यार्थिकमतेन व्यवस्थितं पूर्ववत् । अत एव घटाद्यर्थाभिज्ञः तत्र च अनुपयुक्तो 'द्रव्यम्' इति प्रतिपादितः द्रव्यार्थिकनिक्षेपश्च । द्रव्यमागमे अनेकधा प्रतिपादितम् इह तु युक्तिसंस्पर्शमात्रमेव प्रदर्श्यते तदर्थत्वात् प्रयासस्य ।

[४ भावनिक्षेपः]

[भावं व्याख्याय तत्र पर्यायार्थिकत्वकथनम्]

भवति-विवक्षितवर्त्तमानसमयपर्यायरूपेण उत्पद्यते-इति भावः, "विभाषा ग्रहः" [३।१।१४३ सिद्धान्तकौ० अं० २९०५] इत्यत्र सूत्रे कैश्चिद् "भवँतेश्च" इति णोऽपीष्यते । अथवा भूतिर्भावः वज्र-किरीटादिधारणवर्त्तमानपर्यायेणेन्द्रादिरूपतया वस्तुनो भवनम्, तद्ग्रहणपर्यायेण वा ज्ञानस्य भवनम् । यथा चायं पर्यायार्थिकप्ररूपणा तथा प्रदर्शित एव प्राक् न पुनरुच्यते । एष एव नयनिक्षेपानुयोगप्रतिपादितः उभयनयप्रविभागः परमार्थः परमं हृदयमागमस्यैतदव्यतिरिक्तविषयत्वात् सर्वनयवादानाम् न हि शास्त्रपरमहृदयनयद्वयव्यतिरिक्तः कश्चिन्नयो विद्यते सामान्यविशेषस्वरूपविषयद्वयव्यतिरिक्तविषयान्तराभावाद् विषयिणोऽप्यपरस्य नयान्तरस्याभाव इति प्राक् प्रतिपादितमिति ॥ ६ ॥

---

१ "अणुवओगो दव्वं"–अनुयोग० पृ० ३२ द्वि० सू० ३३ । "अनुपयोगो द्रव्यम्"–विशेषा० बृ० वृ० पृ० २५ गा० २९ प्र० पं० १६ । २–मे वाच्यं । अ–भां० मां० । ३ "भवतेश्च इति वक्तव्यम्"–काशिका पृ० १७३–३।१।१४३ सूत्रवृत्तौ । "भवतेश्च इति काशिका"–सिद्धान्तकौ० पृ० ४९० सूत्र२९०५वृत्तौ । ४–टादिकरण–बृ० । ५ "भावः"–बृ० ल० मां० टि० ।

[द्रव्य-पर्याययोरन्योन्यव्यावृत्तिग्रहणाय निरपेक्षनयाश्रितवचसामसत्यत्वकथनम्]

एतदपि नयद्वयं शास्त्रस्य परमहृदयम् 'द्रव्यं पर्यायाशून्यम् पर्यायाश्च द्रव्याविरहिणः' इत्येवंभूतार्थप्रतिपादनपरम् नान्यथेत्येतस्यार्थस्य प्रदर्शनार्थमाह—

पज्जवणिस्सामण्णं वयणं दव्वट्ठियस्स 'अत्थि'त्ति ।
अवसेसो वयणविही पज्जवभयणा सपडिवक्खो ॥ ७ ॥

परस्परनिरपेक्षस्य नयद्वयस्य प्रत्येकमेवं वचनविधिः—द्रव्यास्तिकस्य अननुषक्तविशेषं वचनम् 'अस्ति'इत्येतावन्मात्रम्, पर्यायास्तिकस्य त्वपरामृष्टसत्तास्वभावं 'द्रव्यम्' 'पृथिवी' 'घटः' 'शुक्लः' इत्याद्याश्रितपर्यायम् । परस्परनिरपेक्षं चोभयनयवचोऽसदेव, वचनार्थासत्त्वात् । वचनमसदर्थमिति तदर्थस्याप्यसत्त्वमावेदितं भवतीति समुदायार्थः ।

अवयवार्थस्तु–**पर्यायनयेन सह निःसामान्यम्** असाधारणं **वचनं द्रव्यास्तिकस्य 'अस्ति' इति** एतत्, भेदवाद्यभ्युपगतस्य विशेषस्य सत्तारूपतानुप्रवेशात् । एतच्च वचो निर्विषयम्, निर्विशेषत्वात्, वियत्कुसुमाभिधानवत्—

"निर्विशेषं हि सामान्यं भवेच्छशविषाणवत्" [श्लो० वा० आकृति० श्लो० १०]

इति प्रसाधितत्वान्नाव्याप्तिर्हेतोः । असिद्धिः पराभ्युपगमादेव परिहृता । तन्न एकान्तभावनाप्रवृत्तस्य द्रव्यास्तिकनयस्य परमार्थता । पर्यायास्तिकस्याप्येवंप्रवृत्तस्य न सेति पश्चार्द्धेन प्रतिपादयति— **अवशेष** इति शेषः स चोपयुक्तादन्यः **वचनविधिः** वचनभेदः सत्ताविकलविशेषप्रतिपादकः **पर्यायेषु** सत्ताव्यतिरिक्तेष्वसत्सु **भजनात्**–सत्ताया आरोपणात् **सप्रतिपक्षः** इति सतः प्रतिपक्षः–विरोधी असन् भवति । तथाहि—पर्यायप्रतिपादको वचनविधिरवस्तुविषयः, निःसामान्यत्वात्, खपुष्पवत् । भावना तु द्रव्यार्थिकवचनविपर्ययेण प्रयोगस्य कार्या ।

अथवा "अर्थाभिधानप्रत्ययास्तुल्यनामधेयाः" [ ] इति अर्थ-प्रत्ययोः स्वरूपमभिधाय अभिधानस्य द्रव्यास्तिकै-पर्यायास्तिकस्वरूपस्य तदभिधायकस्य वा प्रतिपादनार्थमाह— **पज्जवणिस्सामण्णं** इत्यादि । पर्यायान्निष्क्रान्तम्—तद्विकलम्—सामान्यं सङ्ग्रहस्वरूपं यस्मिन् वचने तत् **पर्यायनिस्सामान्यं वचनम्** । किं पुनस्तत्? इत्याह—**'अस्ति' इति, तच्च द्रव्यार्थिकस्य** स्वरूपम् प्रतिपादकं वा । यद्वा पर्यायः ऋजुसूत्रनयविषयाद् अन्यो द्रव्यत्वादिविशेषः, स एव च निश्चितं सामान्यं यस्मिंस्तत् **पर्यायनिस्सामान्यं वचनम्** द्रव्यत्वादिसामान्यविशेषाभिधायीति यावत् । तच्च अशुद्धद्रव्यार्थिकसम्बन्धि तत्प्रतिपादकत्वेन तत्स्वरूपत्वेन वा । **अवशेषो वचनविधिः**–वर्णपद्धतिः **सप्रतिपक्षः** अस्य वचनस्य पर्यायार्थिकनयरूपः तत्प्रतिपादको वा **पर्यायसेवनात्**; अन्यथा कथमवशेषवचनविधिः स्यात् यदि विशेषं नाश्रयेत्? ॥७॥

१–वक्खे वा० बा० । २–यार्थिक–बृ० वा० बा० । ३–दक प–आ० हा० वि० । ४–रिक्तेषु रूपभ–वा० बा० । ५–कस्वरू–भां० मां० । ६–त्वावि–वा० बा० । ७ यस्मिन् वचने तन्निःसा–हा० वि० । यस्मिन् वचने तस्मिन् वचने तन्निःसा–आ० । ८–व्यार्थिकं स–बृ० । ९–न च । वा० बा० ।

[द्रव्य-पर्याययोरन्योन्यसम्मिश्रत्वसूचनाय ज्ञानानेकान्तवर्णनम्]

एवं तावद् द्रव्यार्थिक-पर्यायार्थिकभेदेन भेदमनुभवतां नयानां स्वरूपं प्रतिपाद्य अनेकान्तभावभावनयैवैषां सत्यता नान्यथेत्येतत्प्रतिपादनार्थं ज्ञानानेकान्तमेव तावदाह—

पज्जवणयवोक्कंतं वत्थुं दव्वट्ठियस्स वयणिज्जं ।
जाव दविओवओगो अपच्छिमवियप्पनिव्वयणो ॥ ८ ॥

द्रव्यास्तिकस्य वक्तव्यम्-परिच्छेद्यो विषयः, निश्चयकर्तृ वचनं निर्वचनम्, विकल्पश्च निर्वचनं च विकल्प-निर्वचनम्, न विद्यते पश्चिमं यस्मिन् विकल्पनिर्वचने तत्-तथा-तथाविधं तद् यस्य द्रव्योपयोगस्यासौ अपश्चिमविकल्पनिर्वचनः सङ्ग्रहावसान इति यावत् ततः परं विकल्पवचनाऽप्रवृत्तेः। **यावद् अपश्चिमविकल्पनिर्वचनो द्रव्योपयोगः** प्रवर्त्तते तावद् **द्रव्यार्थिकस्य** विषयो **वस्तु, तच्च पर्यायाक्रान्तमेव**; अन्यथा ज्ञानाऽर्थयोरप्रतिपत्तेरसत्त्वप्रसक्तिः। न हि पर्यायाऽनाक्रान्तसत्तामात्रसद्भावग्राहकं प्रत्यक्षम् अनुमानं वा प्रमाणमस्ति, द्रव्यादिपर्यायाक्रान्तस्यैव सर्वदा सत्तारूपस्य ताभ्यामवगतेः।

यद्वा यद् **वस्तु** सूक्ष्मतरतमादिबुद्धिना **पर्यायनयेन** स्थूलरूपत्यागेनोत्तरतत्तत्सूक्ष्मरूपाश्रयणाद् **व्युत्क्रान्तम्** गृहीत्वा त्यक्तम्, यथा किमिदं मृत्सामान्यं घटादिभिर्विना प्रतिपत्तिविषयः यावत् शुक्लतमरूपस्वरूपोऽन्त्यो विशेषः एतद् **द्रव्यार्थिकस्य** वस्तु विषयः यतो **यावद् अपश्चिमविकल्पनिर्वचनोऽन्त्यो** विशेषस्तावद् **द्रव्योपयोगः** द्रव्यज्ञानं प्रवर्तते; नहि द्रव्यादयो विशेषान्ताः सदादिप्रत्यया विशिष्टैकान्तव्यावृत्तबुद्धिग्राह्यतया प्रतीयन्ते, न च तथाऽप्रतीयमानास्तथाभ्युपगमार्हाः अतिप्रसङ्गात् ॥ ८ ॥

[वस्तुगत्या द्रव्यात्मक एव तत्त्वे नयद्वयविषयविवेकस्य विवक्षाधीनत्वाभिधानम्]

तदेवं न सत्ता विशेषविरहिणी, नापि विशेषाः सत्ताविकला इति प्रदर्श्योपसंहरन्नाह—

दव्वट्ठिओ त्ति तम्हा नत्थि णओ नियम सुद्धजाईओ ।
ण य पज्जवट्ठिओ णाम कोइ भयणाय उ विसेसो ॥ ९ ॥

तस्माद् द्रव्यार्थिकः इति नयः शुद्धजातीयः विशेषविनिर्मुक्तो **नास्ति-नियमेन** इत्यवधारणार्थः—विषयाभावेन विषयिणोऽप्यभावात्। **न च पर्यायार्थिकोऽपि कश्चिन्नयः**—**'नाम'** इति प्रसिद्धार्थः—नियमेन शुद्धस्वरूपः सम्भवति, सामान्यविकलात्यन्तव्यावृत्तविशेषविषयाभावेन विषयिणोऽप्यभावात्। यदि विषयाभावाद् इमौ नयौ न स्तः यदुक्तम् 'तीर्थकरवचनसङ्ग्रह'-इत्यादि तद् विरुध्यत इत्याह—**भयणाय उ विसेसो भजनायास्तु** विवक्षाया एव **विशेषः**—'इदं द्रव्यम् अयं पर्यायः' इत्ययं भेदः तथा तद्भेदाद् विषयिणोऽपि तथैव भेद इत्यभिप्रायः। भजना च—सामान्यविशेषात्मके वस्तुतत्त्वे उपसर्जनीकृतविशेषं यद् अन्वयिरूपं तद् 'द्रव्यम्' इति विवक्ष्यते यदा तदा द्रव्यार्थिकविषयः, यदा तूपसर्जनीकृतान्वयिरूपं तस्यैव वस्तुनो यद् असाधारणं रूपं तद् विवक्ष्यते तदा पर्यायनयविषयस्तद् भवतीति ॥ ९ ॥

---

१ परिच्छेद्यवि-आ०। २-त्वा त्युक्तम् बृ०। ३-त्ति जम्हा वा० बा०। ४-ओ णिय-बृ०। ५ पृ० २७१ पं० ७। ६ -व्यार्थवि-वा० बा०।

[विवक्षाकृतस्य नयद्वयविषयविवेकस्य विशदीकरणम्]

एवंरूपभजनाकृतमेव भेदं दर्शयितुमाह—

दव्वट्ठियवत्तव्वं अवत्थु णियमेण पज्जवणयस्स ।
तह पज्जववत्थु अवत्थुमेव दव्वट्ठियनयस्स ॥ १० ॥

पर्यायास्तिकस्य द्रव्यास्तिकाभिधेयमस्तित्वम् अवस्त्वेव भेदरूपापन्नत्वात् **द्रव्यास्तिकस्यापि पर्यायास्तिकाभ्युपगता भेदा अवस्तुरूपा एव भवन्ति,** सत्तारूपापन्नत्वात्। अतो भजनामन्तरेणैकत्र सत्तायाः अपरत्र च भेदानां नष्टत्वात् 'इदं द्रव्यम् एते च पर्यायाः' इति नास्ति भेदः। न च प्रतिभासमानयोर्द्रव्य-पर्याययोः कथं पर्यायास्तिक-द्रव्यास्तिकाभ्यां प्रतिक्षेपः इति वक्तव्यम् यतः प्रतिभासोऽप्रतिभासस्य बाधकः न तु मिथ्यात्वस्य; मिथ्यारूपस्यापि प्रतिभासनात्। तथाहि पर्यायास्तिकः प्राह—न मया द्रव्यप्रतिभासो निषिध्यते—तस्यानुभूयमानत्वात्—किन्तु विशेषव्यतिरेकेण द्रव्यस्याप्रतिभासनात् अव्यतिरेके तु व्यक्तिस्वरूपवत् तस्यानन्वयात् उभयरूपतायाश्चैकत्र विरोधात् गत्यन्तराभावात् द्रव्यप्रतिभासस्तत्र मिथ्यैव। विशेषप्रतिभासस्त्वन्यथा, बाधकाभावात् यतः प्रतिक्षणं वस्तुनो निवृत्तेर्नाशोत्पादौ पर्यायलक्षणं न स्थितिः। द्रव्यार्थिकस्तु भजनोत्थापितस्वरूपः प्राह—अस्माकमप्ययमेवाभ्युपगमः—न विशेषप्रतिभासप्रतिक्षेपः किन्तु तस्य भेदाभेदोभयविकल्पैर्बाध्यमानत्वाद् मिथ्यारूपतैव अभेदप्रतिभासस्तु अनुत्पादव्ययलक्षणस्य द्रव्यस्य—तद्विषयस्य सर्वदाऽवस्थितेरबाध्यमानत्वात्—सत्य इति ॥ १० ॥

[निरपेक्षनयद्वयमेकमेव वस्तु यथा यथा मन्यते तथा विभज्य वर्णनम्]

कल्पनाव्यवस्थापितपर्यायास्तिक-द्रव्यास्तिकयोरेवंलक्षणप्रदर्शितस्वरूपयोर्मिथ्यारूपताप्रतिपत्तिः सुकरा भविष्यतीत्याह—

उप(प्प)ज्जंति वियंति य भावा नियमेण पज्जवणयस्स ।
दव्वट्ठियस्स सव्वं सया अणुप्पन्नमविणट्ठं ॥ ११ ॥

उत्पद्यन्ते प्रागभूत्वा भवन्ति **विशेषेण** निरन्वयरूपतया **गच्छन्ति** नाशमनुभवन्ति **भावाः** पदार्थाः—**नियमेन** इत्यवधारणे **पर्यायनयस्य** मतेन—प्रतिक्षणमुत्पाद-विनाशस्वभावा एव भावाः पर्यायनयस्याभिमताः। **द्रव्यार्थिकस्य सर्वं** वस्तु **सदा अनुत्पन्नमविनष्टम्** आकालं स्थितिस्वभावमेवेति मतम्। एतच्च नयद्वयस्याभिमतं वस्तु प्राक् प्रतिपादितमिति न पुनरुच्यते ॥ ११ ॥

१-रूपं भ-आ०। २-ण होइ पज्जाए। बृ०। ३-स्तिकंद्र-आ०। ४-दस्यापन्न-बृ० वा० बा०। ५-धादिग-आ० हा० वि०। ६-भावस्त्व-आ० हा० वि०। ७-व्यास्तिक-बृ० वा० बा०। ८-कयोरेवल-बृ० वा० बा० आ०। ९-स्यापि म-वा० बा०।

द्वादशगाथाव्याख्या ।

[अन्योन्यमुक्तयोर्द्रव्य-पर्याययोर्नास्तित्वोक्तिपूर्वकमुत्पाद-व्यय-ध्रौव्याणां द्रव्यलक्षणत्वेन वर्णनम्]

परस्परनिरपेक्षं चोभयनयप्रदर्शितं वस्तु प्रमाणाभावतो न सम्भवतीत्याह—

दव्वं पज्जवविउयं दव्वविउत्ता य पज्जवा णत्थि ।
उप्पाय-ट्ठिइ-भंगा हंदि दवियलक्खणं एयं ॥ १२ ॥

द्रव्यं पर्यायवियुक्तं नास्ति मृत्पिण्ड-स्थास-कोश-कुशूलाद्यनुगतमृत्सामान्यप्रतीतेः । **द्रव्यविरहिताश्च पर्याया न सन्ति** अनुगतैकाकारमृत्सामान्यानुविद्धतया मृत्पिण्ड-स्थास-कोश-कुशूलादीनां विशेषाणां प्रतिपत्तेः । अतो द्रव्यार्थिकाभितं वस्तु पर्यायाक्रान्तमेव न तद्विविक्तम् पर्यायाभिमतमपि द्रव्यार्थानुषक्तं न तद्विकलम् परस्परविविक्तयोः कदाचिदप्यप्रतिभासनात् । किंभूतं पुनर्द्रव्यमस्तीत्याह–**उत्पाद-स्थिति-भङ्गा** यथाव्यावर्णितस्वरूपाः परस्पराविनिर्भागवर्तिनः, **'हन्दि'** इत्युपप्रदर्शने; **द्रव्यलक्षणं** द्रव्यास्तित्वव्यवस्थापको धर्मः **एतद्** दृश्यताम्, यतः पूर्वोत्तरपर्यायपरित्यागोपादानात्मकैकान्वयप्रतिपत्तिस्तथाभूतद्रव्यसत्त्वं प्रतिपादयतीत्युत्पाद-व्यय-ध्रौव्यलक्षणं वस्त्वभ्युपगन्तव्यम् । एतच्च त्रितयं परस्परानुविद्धम्, अन्यतमाभावे तदितरयोरप्यभावात् ।

[उत्पाद-व्यय-ध्रौव्याणां परस्परव्याप्यत्वसमर्थनम्]

तथाहि—न ध्रौव्यव्यतिरेकेण उत्पाद-व्ययौ सङ्गतौ, सर्वदा सर्वस्याऽनुस्यूताकारव्यतिरेकेण विज्ञान-पृथिव्यादिकस्याप्रतिभासनात् । न चानुस्यूताकारावभासो बाध्यत्वादसत्यः तद्बाधकत्वानुपपत्तेः यतोऽनुस्यूताकारस्य विशेषप्रतिभासो बाधकः परिकल्प्येत; स एव चानुपपन्नः । तथाहि—अनुगतरूपे प्रतिपन्ने अप्रतिपन्ने वा विशेषावभासोऽभ्युपगम्येत ? यदि प्रतिपन्ने तदा किमनुस्यूतप्रतिभासात्मको विशेषप्रतिभासः, उत तद्व्यतिरिक्त इति कल्पनाद्वयम् । यद्यव्यतिरिक्तस्तदा ध्रौव्यावभासस्य मिथ्यात्वे विशेषावभासस्यापि तदात्मकत्वाद् मिथ्यात्वापत्तेः कथमसौ तस्य बाधकः ? अथ द्वितीयो विकल्पस्तत्रापि ध्रौव्यप्रतिभासमन्तरेण स्थास-कोशादिप्रतिभासस्य तद्व्यतिरिक्तस्यासंवेदनात् कथं तद्बाधकतोपपत्तिः ? न चाक्षव्यापारानन्तरमन्वयप्रतिभासमन्तरेण विशेषप्रतिभास एवोपजायत इति वक्तव्यम्, प्रथमाक्षव्यापारे प्रतिनियतदेशवस्तुमात्रस्यैव प्रतीतेः; अन्यथा तत्र विशेषावभासे संशयाद्यनुत्पत्तिप्रसक्तिः, विशेषावगतेस्तद्विरोधित्वात् । न च तदुत्तरकालभाविसादृश्यनिमित्तैकत्वाध्यवसायनिबन्धनेयं संशयाद्यनुभूतिः प्राग् विशेषावगमे एकत्वाध्यवसायस्यैवासम्भवात् अनुभूयते च दूरदेशादौ वस्तुनि सर्वजनसाक्षिकी प्राक् सामान्यप्रतिपत्तिः तदुत्तरकालभाविनी च विशेषावगतिः । अत एव अवग्रहादिज्ञानानां कालभेदानुपलक्षणेऽपि क्रमोऽभ्युपगन्तव्यः उत्पलपत्रशतव्यतिभेद इव । द्वितीयविकल्पोऽप्यत एवानभ्युपगमार्हः, अनुगताकाराप्रतिपत्तौ तद्विशेषावभासस्यासम्भवादिति । नहि मूल-मध्याऽग्रानुस्यूतस्थूलैकाकारप्रतिभासनिह्नवे विविक्ततत्परमाणुप्रतिभासानपह्नव इति कुतस्तस्य स्वविषयव्यवस्थापनद्वारेणान्यबाधकत्वम् ? न चैकत्वप्रतिभासस्य मिथ्यात्वम् तद्विषयस्य विकल्प्यमानस्याघटमानत्वादिति वक्तव्यम्, विकल्पमात्रात् प्रमाणस्यान्यथात्वायोगात् । न चानुगतावभासस्याप्रामाण्यम्, तन्निबन्धनाभावात् । न च क्षणिकानेकनिरंशपरमाण्ववभासस्तन्निबन्धनम्, तस्याभावात् । न ह्यसंवेद्यमानस्तथाभूतावभासः प्रमाणम् इतरद् वा, प्रतीतिधर्मत्वात् प्रमाणेतरयोः । न च सञ्चितपरमाणु-

---

१–ज्ञानि पृ–वा० बा० । २–गम्यते बृ० ल० । ३–स्य त मि–वा० बा० । ४–थ्यात्वावि–आ० हा० वि० । ५–थ्याप–वा० बा० । ६–धकोपप–आ० हा० वि० । ७–पारप्र–वा० बा० । ८ "संशय"विरोधित्वात्–बृ० ल० मां० टि० । ९–क्षणोऽपि भां० मां० । १०–तिभेदा इ–भां० मां० । ११ "'अप्रतिपन्नम्' इत्ययम्"–बृ० ल० मां० टि० । १२–व्यं किं वि–आ० हा० वि० । १३–गात् तान् न वा० बा०

निबन्धन एवायमनुस्यूतस्थूलावभासः, सञ्चितेष्वपि तेषु प्रत्येकं समुदितेषु वा स्थूलरूपतायाः परेणानभ्युपगमात्; सञ्चयस्य च वस्तुरूपस्यैकस्य द्रव्यपक्षोक्तदोषप्रसक्तितोऽनिष्टेः । न चान्यथावभासोऽन्यथाभूतार्थव्यवस्थापकः अतिप्रसक्तेः । तन्न आलम्बनप्रत्ययतया परमाणवः स्थूलावभासजनकाः तत्र स्वरूपानर्पकत्वेनाप्रतिभासनात्; स्थूलाकारस्य वा तेष्वनुस्यूतज्ञानावभासिनो भावेऽनुगतव्यावृत्तहेतुफलरूपभावाभ्युपगमात् परवादाभ्युपगमप्रसक्तिः । यदि च स्तम्भादिप्रतिभासो मिथ्या तर्ह्यतथाभूते तथाभूतारोपणं मिथ्येत्यन्यथाभूतवस्तुसद्भावावेदकं प्रमाणं वक्तव्यम् । तच्च न प्रत्यक्षम् उक्तोत्तरत्वात् । नाप्यनुमानम् क्षणिकपरस्परविविक्तपरमाणुस्वभावभावकार्यादर्शनात् स्थूलैकस्वभावस्य चोपलभ्यमानस्य न तत्कार्यत्वम्, तस्यावस्तुसत्त्वेन परैरभ्युपगमात् । न चावस्तुसत् कस्यचिद् व्यवस्थापकम् अतिप्रसङ्गात् । वस्तुसत्त्वेऽपि न तस्य क्षणिकविविक्तपरमाणुव्यवस्थापकत्वम्, तस्य तद्विरुद्धत्वात् । न हि पावकप्रतिभासो जलव्यवस्थापकत्वेन प्रसिद्धः । न च वनादिप्रत्ययतः शिंशपादिविशेषावगतिरिवात्रापि भविष्यतीति वक्तव्यम्, शिंशपादेः प्राक् प्रतिपत्तेर्वनादेश्च तद्धर्मतया वस्तुत्वात् परमाणूनां न कदाचनापि प्रतिपत्तिः । नापि तद्धर्मतया वस्तुत्वाभ्युपगमः स्थूलस्य पराभ्युपगमविषयः, वस्तुत्वाभ्युपगमे तु तस्य स्यात् सूक्ष्मव्यवस्थापकता, सूक्ष्मापेक्षित्वात् स्थूलस्य अन्यथा तदयोगात् । सूक्ष्मपर्यन्तरूपश्च परमाणुः तस्याभेद्यत्वात् । भेद्यत्वे वा वस्तुत्वापत्तेः तदवयवानां परमाणुत्वापत्तिः, भेदपर्यन्तलक्षणत्वात् परमाणुस्वरूपस्य ।

न च ध्रौव्योत्पत्तिव्यतिरेकेण प्रतिक्षणविशरारुता अणूनामपि सम्भवति, तयोरभावे एकक्षणस्थितीनामपि तेषामभावात् कुतो विनश्वरत्वम् ? अथ देशकालनियतस्य स्थैर्याभावेऽपि क्वचित् कदाचित् पदार्थस्य वृत्तेरन्यदा अन्यत्र च निवृत्तिः, नैतदेवम्; अन्यदा अन्यत्र चावृत्तेरेवानिश्चयात् । तथाहि–कार्य कारणयोः परस्परतो व्यावृत्तिः कथञ्चिदनुस्यूतमेकमाकारं बिभ्रतोर्विज्ञानग्राह्यग्राहकाकारयोरिवापरित्यक्तादात्म्यस्वरूपयोः, आहोस्वित् घट-पटयोरिवात्यन्तभिन्नस्वरूपयोः इत्यत्र न निश्चयः । किञ्च, प्रत्यक्षेणैव हेतु-फलयोः कथञ्चित्तादात्म्यस्य निश्चयान्न घट-पटयोरिवात्यन्तव्यावृत्तिस्तयोः परस्परतोऽभ्युपगन्तव्या, न ह्यध्यक्षतः प्रसिद्धस्वरूपं वस्तु तद्भावे प्रमाणान्तरमपेक्षते, अग्निरिवोष्णत्वनिश्चये । न च कालभेदान्यथानुपपत्त्या प्रतिक्षणं भेदेऽपि पूर्वोत्तरक्षणयोः कथञ्चित्तादात्म्यं वस्तुनो विरुध्यते येनाध्यक्षविरुद्धो निरन्वयविनाशः कल्पनामनुभवति अध्यक्षविरोधेन प्रमाणान्तरस्याप्रवृत्तेः । न चानुवृत्ति-व्यावृत्त्योः परस्परं विरोधैकान्ताभ्युपगमे विज्ञानमात्रमपि सिध्येदिति कुतः क्षणस्थितिर्भावानां निरन्वया व्यावृत्तिर्वा सिद्धिमासादयेत् ? अन्तर्बहिश्च भावानामनुगतव्यावृत्तात्मकत्वात् प्रमाणतस्तथैवानुभवात् तत्स्वरूपाभावे निःस्वभावतया भावाभावप्रसक्तेः । यदि च परस्परव्यावृत्तस्वभावानां परमाणूनां कथञ्चिदनुवृत्तस्थूलैकाकारः पारमार्थिको न भवेत् न किञ्चिद् बहिरध्यक्षेऽवभासेत, परमाणु-पारिमाण्डल्य-नानात्व-परोक्षस्वभावत्वस्वभावानां सञ्चितेष्वप्यणुषु स्थूलैकाकाराध्यक्षस्वभावेन विरोधात् अविरोधे वाऽनेकान्तत्वप्रसक्तेः तथाभूतस्वभावसद्भावेऽपि तेषु पारिमाण्डल्य-नानात्व-परोक्षत्वस्वभावानापायात् । अपाये वा परमाणुरूपतात्यागात् स्थूलैकाकारस्य तेषु सांवृतत्वे साकाराध्यक्षाऽजनकत्वेन न किञ्चिदपि तत्र प्रतिभासेत, तदनध्यक्षत्वे तत्प्रत्यनीकस्य स्वभावस्य पारिमाण्डल्यादेश्चक्षुरादिबुद्धौ रसादेरिवा प्रतिभासनाद् बहिरर्थप्रतिभासशून्यं जगद् भवेत् । स्थूलैकाकारग्राह्यवभासस्य च भ्रान्तत्वे न किञ्चित् कल्पनापोढं प्रत्यक्षमभ्रान्तं भवेत्, तदभावे च प्रमाणान्तरस्याप्यप्रवृत्तेरन्तर्बाह्यरूपस्य प्रमेयस्याव्यवस्थितेर्न कस्यचिदभ्युपगमः प्रतिक्षेपो वेति निर्व्यापारं जगद् भवेत् । तस्मात् क्षणस्थितिधर्मणोऽपि बाह्यान्तर्लक्षणस्य वस्तुनः परस्परव्यावृत्तपरमाणुरूपस्य कथञ्चिदनुवृत्तिरभ्युप-

---

१ तत्र आ–बृ० वा० बा० हा० वि० । २–स्य ते–ल० । ३–गमाप्र–आ० । ४–स्य त–आ० । ५–स्तुत्वे–बृ० वा० बा० भां० मां० विना । ६–मात् तथा व–आ० । ७–भासोऽपि प्रतिपत्तिः नापि तद्धर्मजलव्य–वा० बा० । ८–ल प–वा०बा० । ९ सूक्ष्माव्य–आ० । १०–व्यत्वे चा व–ल० । ११ –भावोऽपि भां० मां० । १२ किं न प्र–आ० । १३–न्त स्याप्र–बृ० वा० बा० । १४–मननुग–भां० मां० । १५–कारोऽध्य–आ० हा० वि० । १६–भावेषु वि–वा० बा० । १७–धात् वि–भां० मां० । १८–भासते त–भां० मां० आ० हा० वि० ।

गन्तव्या, अन्यथा प्रतिभासविरतिप्रसक्तेः। तदभ्युपगमे च परस्परव्यावृत्तयोर्हेतु-फलयोरपि प्रत्यक्षगता अनुगतिरभ्युपगमनीयैव, कल्पनाज्ञाने भ्रान्तसंविदि वा स्वसंवेदनापेक्षया विकल्पेतरयोर्भ्रान्तेतरयोश्च परस्परव्यावृत्तयोराकारयोः कथञ्चिद् अनुवृत्तिमभ्युपगच्छन् कथमध्यक्षां हेतु-फलयोरनुवृत्तिं प्रतिक्षिपेत्? संशयज्ञानं वा परस्परव्यावृत्तोल्लेखद्वयं बिभ्रद् यद्येकमभ्युपगम्यते कथं न पूर्वा-
५ परक्षणप्रवृत्तमेकं हेतुफलरूपं वस्तु? शब्द-विद्युत्-प्रदीपादीनामप्युत्तरपरिणामाप्रत्यक्षत्वेऽपि तस्य सद्भावोऽभ्युपगन्तव्यः, पारिमाण्डल्यादिवत् संविद्ग्राह्याकारविवेकवद् वा अध्यक्षस्यापि केनचिद् रूपेण परोक्षता, अविरोधात्। न च पारिमाण्डल्यादेः प्रत्यक्षतेति वाच्यम्, शब्दाद्युत्तरपरिणामेऽप्यस्य वक्तुं शक्यत्वात् विशेषाभावात्। अत एव अन्ते क्षयदर्शनात् प्रागपि तत्प्रसक्तिरिति न वक्तव्यम्, मध्ये स्थितिदर्शनस्य पूर्वापरकोटिस्थितिसाधकत्वेन प्रसिद्धेः। न हि शब्दादेरनुपादाना उत्पत्तिर्यु-
१० क्तिमती, नापि निरन्वया सन्ततिविच्छित्तिः, चरमक्षणस्याकिञ्चित्करत्वेऽवस्तुत्वापत्तितः पूर्वपूर्वक्षणानामपि तदापत्तितः सकलसन्तत्यभावप्रसक्तेः। न च शब्दादेर्निरुपादानोत्पत्त्यभ्युपगमेऽन्येषामपि सा सोपादानाऽभ्युपगन्तुं युक्ता; तथा च सुप्तप्रबुद्धबुद्धेरपि निरुपादानोत्पत्तिप्रसक्तिः तत्रापि शब्दादेरिव प्रागुपादानादर्शनात्। न चानुमीयमानमत्रोपादानम्, शब्दादावपि तथाप्रसङ्गात्। न च 'दृष्टस्यार्थस्याखिलो गुणो दृष्ट एव' इति परिणामसाधनं निरवकाशम्, दृष्टेऽप्यर्थे
१५ पारिमाण्डल्यादेर्ग्राह्याकारविवेकादेर्वा अंशस्यादृष्टत्वेनानुमीयमानत्वात्, एवं च परिणामसाधनं निरवद्यमेव। यदि हि दृष्टस्याऽदृष्टोंऽशः सम्भवति कथमुत्पन्नस्वभावस्यानुत्पन्नः कश्चनाऽऽत्मा न सम्भवी? स्वभावभेदस्य भावभेदसाधनं प्रत्यनैकान्तिकत्वेन प्रदर्शितत्वात्। तस्माद् वस्तु यत् नष्टं तदेव नश्यति नङ्क्ष्यति च, यदुत्पन्नं तदेवोत्पद्यते उत्पत्स्यते च कथञ्चित्, यदेव स्थितं तदेव तिष्ठति स्थास्यति च कथञ्चिदित्यादि सर्वमुपपन्नमिति भावस्योत्पादः स्थितिविनाशरूपः विनाशोऽपि
२० स्थित्युत्पत्तिरूपः स्थितिरपि विगमोत्पादात्मिका कथञ्चिदभ्युपगन्तव्या।

सर्वात्मना चोत्पादादेः परस्परं तद्वतश्च यद्यभेदैकान्तो भवेत् नोत्पादादित्रयं स्यादिति न कस्यचित् कुतश्चित् तद्वत्ता नाम। न च वस्तुशून्यविकल्पोपरचितत्रयसद्भावात् तद्वत्ता युक्ता अतिप्रसङ्गात्; खपुष्पादेरपि ततस्तद्वत्ताप्रसक्तेः। न चोत्पादादेः परस्परतः तद्वतश्च भेदैकान्तः, सम्बन्धासिद्धितो निस्स्वभावताप्रसक्तेः। एतेन 'उत्पाद-व्यय-ध्रौव्ययोगाद् यदि असतां सत्त्वम्
२५ शशशृङ्गादेरपि स्यात् सतश्चेत् स्वरूपसत्त्वमायातम्, तथोत्पाद-व्यय-ध्रौव्याणामपि यद्यन्यतः सत्त्वम् अनवस्थाप्रसक्तिः स्वतश्चेत् भावस्यापि स्वत एव तद् भविष्यतीति व्यर्थमुत्पादादिकल्पनम् एवं तद्योगेऽपि वाच्यम्' इत्यादि यदुक्तम् तन्निरस्तं द्रष्टव्यम् एकान्तभेदाभेदपक्षोदितदोषस्य कथञ्चिद्भेदाभेदात्मके वस्तुन्यसम्भवात्। नहि भिन्नोत्पाद-व्यय-ध्रौव्ययोगाद् भावस्य सत्त्वमस्माभिरभ्युपगम्यते किन्तु 'उत्पाद-व्यय-ध्रौव्ययोगात्मकमेव सत्' इत्यभ्युपगमः। विरोधादिकं चात्र दूषणं
३० निरवकाशम्, अन्तर्बहिश्च सर्ववस्तुनस्त्रयात्मकस्याबाधिताध्यक्षप्रतिपत्तिविषयत्वात् स्वरूपे विरोधासिद्धेः; अन्यथातिप्रसक्तेः। एकान्तनित्यानित्यस्य प्रमाणबाधितत्वात् अनुभयरूपस्य चासम्भवात् शून्यताया निषेत्स्यमानत्वात् पारिशेष्यात् कथञ्चित् नित्यानित्यं वस्तु अबाधितप्रमाणगोचरमभ्युपगन्तव्यम्।

अत एव "उत्पाद-व्यय-ध्रौव्ययुक्तं सत्" [तत्त्वार्थ० अ० ५ सू० २९] इति सल्लक्षणम्,
३५ अन्यस्य तल्लक्षणत्वानुपपत्तेः। न तावत् सत्तायोगः सत्त्वम्, सामान्यादिना अव्यापकत्वात् निषिद्धत्वाच्च सत्तायास्तद्योगस्य वेति। नाप्यर्थक्रियालक्षणं सत्त्वम्, नश्वरैकान्ते तस्यासम्भवात् तस्य क्वचिदप्यभावात्। उत्पाद-स्थितिस्वभावरहितस्य नश्वरत्वे खपुष्पादेरेव तत् स्यात् न घट-सुखादेः, क्षणस्थितिरेव जन्म विनाशश्च यद्यभ्युपगम्येत कथमनेकान्तसिद्धिर्न स्यात्? न च क्षणात् पूर्वमस्थितौ भावानां किञ्चित् प्रमाणमस्तीति प्रतिपादितम्। न चावस्थितावपि न प्रमाणमिति वक्तव्यम्।
४० प्रत्यक्षस्य तत्र प्रमाणत्वात्। न च सदृशापरापरोत्पत्तिविप्रलम्भाद् अनवधारितक्षणक्षयस्यैकत्वप्रतिपत्तिर्भ्रान्तेति वक्तव्यम्, निरन्वयविनाशप्रसाधकप्रमाणाभावात्। न चाक्षणिके क्रम-यौगपद्या

१–वाऽस्व–बृ०। २ वाक्यम् भां० मां०। ३ तदुत्पत्तितः भां० मां०। ४ स्यात् स्वत–बृ० ल० विना। ५ पृ० ११० पं० ९। ६ "अर्थक्रियात्मकसत्त्वस्य"–बृ० ल० मां० टि०।

भ्यामर्थक्रियाविरोधात् ततो निवर्त्तमानं सत्त्वं निरन्वयविनश्वरस्वभावमिति सत् क्षणिकमेवेति प्रमाणम्, क्षणिकेऽपि तथैवार्थक्रियाविरोधात्। तथाहि–क्षणिकत्वे कार्य-कारणयोर्यौगपद्येन कुतः कार्यकारणभावव्यवस्था? क्रमोत्पादे हेतोरसतः कुतः फलजनकत्वम्? निरन्वयविनाशाभ्युपगमे चानन्तरं विनष्टस्य चिरतरविनष्टस्य च विनष्टत्वाविशेषाच्चिरतरविनष्टादपि कार्योत्पत्तिप्रसक्तिः। भावस्य हि विद्यमानत्वाद् अनन्तरकार्योत्पादनसामर्थ्यम् न व्यवहिततदुत्पादनसामर्थ्यमिति ५ विशेषो युक्तः न पुनरभावस्य, निःस्वभावत्वाविशेषात्। अनेकान्तवादिना हि कथञ्चिद्भेदाभेदौ हेतु-फलयोर्व्यवस्थापयितुं शक्यौ संवेदनस्य ग्राह्यग्राहकाकारयोरिव। भेदाऽभेदैकान्तौ तु परस्परतो न विशेषमासादयत इति न निरन्वयविनाशव्यवस्था नित्यताव्यवस्था वा कर्तुं शक्या, यतो न क्षणिकपक्षेऽपि सत्ताव्यतिरेकेण अपरार्थक्रिया सम्भवति सा चाक्षणिकेऽपि समाना। यथा हि क्षणिकस्य स्वसत्ताकाले कुर्वतोऽपि कार्यं स्वत एव न भवति, भावे वा कार्य-कारणयोर्यौगपद्येन न १० कार्यकारणव्यवस्था नापि सन्तानव्यवस्था भवेत् किन्तु कार्यस्य स्वकालनियमात् तत्तदभावाविशेषेऽपि द्वितीय एव क्षणे भावः तथा अक्षणिकस्यापि प्रागपि विवक्षितकार्योत्पादनसामर्थ्यं ततो भवत् कार्यं स्वकालनियतमेव भविष्यतीति समानं पश्यामः। न चासति कारणविनाशे कार्योत्पत्तिर्न भवतीत्यत्र निबन्धनं किञ्चिदस्ति येनाक्षणिकात् कार्योत्पत्तिर्न भवेत्। यदि चाक्षणिकस्य कार्योत्पत्तिक्षणे स्थितिः कार्योत्पत्तिप्रतिबन्धहेतुः एवं क्षणिकस्यापि तदा तदभावः किं न प्रतिबन्धहेतु- १५ र्भवेत्? यदि च कारणविनाशे कार्योत्पत्तिः, स प्रागिव चिरतरविनष्टे कारणेऽस्तीति तदापि कार्योत्पत्तिः स्यात्। अथ कार्योत्पत्तिकाले नैव कारणसन्निधेरुपयोगः; ननु कारणव्यावृत्तेरपि तदुत्पत्तिकाले नैव कश्चिदुपयोगः, यतः कारणव्यावृत्तौ कार्यं भवेत्। कारणव्यावृत्तिश्च तदभावः, स च प्राक् पश्चादपि कालान्तरेऽस्त्येवेति सर्वदा कार्योत्पत्तिप्रसक्तिरित्युक्तम्। न च कारणस्य प्राग्भावित्वमात्रं कार्योत्पत्तावुपयोगः तस्याकारणाभिमतेष्वपि जगत्क्षणेषु भावात्; तद्विशेषकल्पनायास्त्व- २० क्षणिकेष्वप्यविरोधात्। तथाहि–यद् यदा यत्र कार्यमुत्पित्सु तत् तदा तत्रोत्पादनसमर्थमक्षणिकं वस्त्विति कल्पनायां न काचित् क्षतिः। न च स्वयमेव प्रतिनियतसमयस्य कार्यस्योत्पत्त्यभ्युपगमे न किञ्चित् कारणाभिमतभावेन तस्य कृतमिति न तत् कार्यतया तद्व्यपदेशमासादयेदिति वक्तव्यम्, क्षणिकपक्षेऽप्यस्य समानत्वात्। तस्मात् कथञ्चिद् व्यवस्थितस्यैव भावस्य जन्म-विनाशयोर्दर्शनाद् यथादर्शनं हेतुफलभावव्यवस्थितेः परिणामसिद्धिः समायाता। २५

न चाभेदबुद्धिर्भ्रान्ता, भेदबुद्धावपि तत्प्रसक्तेः, स्वप्नावस्थाहस्त्यादिभेदबुद्धिवत्। न च मिथ्याबुद्धीनामपि विसंवादो भावमात्रे, भेदेष्वेव तद्दर्शितेषु विप्रतिपत्त्युपलम्भेः। तस्माद् अक्षणिकत्वे क्रम–यौगपद्याभ्यामर्थक्रियाविरोधात् क्षणिकत्वमभ्युपगच्छन् क्षणिकानामर्थक्रियादर्शनमभ्युपगच्छेत्; अन्यथा सत्त्वादेर्हेतोर्विपक्षव्यावृत्तिप्रसाधिकाया अनुपलब्धेर्व्यतिरेकासिद्धेरक्षणिकत्वेऽर्थक्रियाविरोधः क्षणिकत्वेऽर्थक्रियोपलम्भमन्तरेण कथं सिद्धिमासादयेत्? न चाक्षणिकेऽर्थक्रिया- ३० विरोधादेव क्षणिकेऽर्थक्रियोपलब्धिः, इतरेतराश्रयप्रसक्तेः। [?? तथाहि–विपक्षे प्रत्यक्षवृत्तेरनुपलब्धेर्व्यतिरेकसिद्धिः, तत्र प्रत्यक्षवृत्तिरक्षणिकत्वेऽर्थक्रियाविरोधात् तद्विरोधसिद्धिरनुपलब्धेर्व्यतिरेकनिश्चयात् तद्विपक्षे प्रत्यक्षवृत्तेरिति व्यक्तमितरेतराश्रयत्वम् ??]। क्षणिकत्वेऽपि च भावानां यथातत्त्वमुपलम्भनियमाभावाद् ग्राह्यग्राहकाकारसंवेदनवद् अयथातत्त्वोपलम्भसंभवान्न क्षणिकत्वमध्यक्षगोचर इत्यतोऽप्यनेकान्तः सिद्धिमासादयति। न च सदृशापरापरोत्पत्तिरनिश्चयहेतुः, भेदैकान्ते ३५ तस्या अप्ययोगात्। न हि तत्र सादृश्यं भावानां व्यतिरिक्तमव्यतिरिक्तं वा सम्भवति। न चाविद्यमानमनुपलभ्यमानं वा तद् विभ्रमहेतुः, अतिप्रसङ्गात्। न च विशेषाणां स्थितिभ्रान्तिजननशक्तिरेव सादृश्यम्, क्षणिकावेदकप्रमाणान्तराभावतः स्थितिप्रतिपत्तेर्भ्रान्त्यसिद्धेः। न चान्याद्दग्भूतं

---

१ कर्तुं युक्ता य–भां०। २–कस्य स–बृ०। ३–पद्येन कार्य–वा० बा०। ४ भवेत् ल० भां० मां०। ५–ति सामान्यं प–वा० बा०। ६ "प्रागभावित्वस्य"–बृ० ल० मां० टि०। ७ पृ० २५७ पं० २४–२७ तथा टि० २७। ८–मर्थे क्ष–बृ० वा० बा०। ९–बुद्धिर्भ्रा–बृ०। १० "सत्त्वग्राहक"–प्रत्यक्षवृत्तेः–मां०टि०। ११–भावात् स्थि–आ०।–भावातः स्थि–हा० वि०।–भावतः सिद्धिस्थि–वा० बा०।

वस्तु अबाधितप्रतिपत्तिजन्मनो हेतुरभ्युपगन्तव्यम्, अभ्रान्तप्रतिपत्तेर्वस्त्वव्यवस्थापकत्वेन प्रतिनियतव्यवहारोच्छेदप्रसक्तेः। अत एव उपलब्धमपि क्षणिकत्वं विषमज्ञ इव न निश्चिनोतीत्युदाहरणमप्यसिद्धम्, यथावस्तूपलम्भनियमाभावात्।

यदपि 'ये यद्भावं प्रत्यनपेक्षास्ते तद्भावनियताः, यथा अन्त्या कारणसामग्री स्वकार्योत्पादने, विनाशं प्रत्यनपेक्षश्च भावः' इत्यभिधानम्, तदपि परिणामप्रसाधकम्; भावस्योत्तरपरिणामं प्रत्यनपेक्षतया तद्भावनियतत्वोपपत्तेः। पूर्वक्षणस्य स्वयमेवोत्तरीभवतोऽपरापेक्षाऽभावतः क्षेपायोगात्, उत्पन्नस्य चोत्पत्ति-स्थिति-विनाशेषु कारणान्तरानपेक्षस्य पुनः पुनरुत्पत्ति-स्थिति-विनाशत्रयमवश्यं भावि तदेवं कस्यचिदंशस्य पदार्थाध्यक्षतायामप्यनिर्णये तस्य सांशतामभ्युपगच्छन् कथमंशेनोत्पन्नस्यांशान्तरेण पुनः पुनरुत्पत्तिं नाभ्युपगच्छेत्? येनैकं वस्त्वनन्तपर्यायं नाङ्गीकुर्वीत? न चैकान्तसाधने उदाहरणमपि किञ्चिदस्ति, अध्यक्षाधिगतमनेकान्तमन्तरेणान्तर्बहिश्च वस्तुसत्तानुपपत्तेः। न च निरन्वयविनाशमन्तरेण किञ्चिद् वस्तु अनुपपद्यमानं संवेद्यते, यतो बहीरूप-संस्थानाद्यात्मना अध्यक्षप्रतीतमनेकान्तमन्तर्विकल्पाविकल्पस्वरूपं संशय-विपर्याससंवेदनात्मकं वा स्वसंवेदनसिद्धमपहाय निरन्वयक्षणक्षयलक्षणं वस्तु प्रकल्पेत। न चानुस्यूतिव्यतिरेकेण ज्ञानानां कार्यकारणभावोऽपि युक्तिसङ्गतः आस्तां स्मृति-प्रत्यभिज्ञा-वासना-सन्तानादिव्यवहारः। नहि भेदाविशेषेऽपि कथञ्चित् तादात्म्यमन्तरेण भेदानामयं नियमः सिद्धिमासादयति केषाञ्चिदेव, अन्यथा ग्राह्य-ग्राहकाकारयोरपि तादात्म्याभावप्रसक्तिर्भवेत् यतः शक्यमत्राप्येवं वक्तुम्—ग्राह्यग्राहकानुभवयोः स्वकारणवशाद् भिन्नस्वभावयोरेव प्रतिक्षणं विशिष्टयोरुत्पत्तिस्तेन रूपेणेति। एवं च—

"अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते॥" [ ]

इत्ययुक्तमेवाभिधानं स्यात्। परेणापि चैवं वक्तुं शक्यत एव—

"परमात्माऽविभागोऽप्यविद्याविप्लुतमानसैः।
सुख-दुःखादिभिर्भागैर्भेदवानिव लक्ष्यते॥" इति।

नैं हि भेदाऽभेदैकान्तयोरागमोपलम्भं परमार्थादर्शनं च प्रति कश्चिद् विशेषः संलक्ष्यते कथञ्चित् परमार्थदर्शनाभ्युपगमे च 'उत्पन्नं कथञ्चित् पुनरुत्पादयेत्' इत्यनेकान्तसिद्धिः स्यादित्युक्तम्। स्वलक्षणस्य परमात्मनो वा परमार्थसतः सर्वथाऽनुपलम्भैकान्ताभ्युपगमे परीक्षाक्षमस्य संवृतिरूपस्याविद्यास्वभावस्य वा दर्शनासम्भवाद् अनेकान्तात्मकस्य सतः सर्वथैकान्तव्युदासेन प्रमाणतो दर्शनमायातमिति कथं तत्प्रतिक्षेपः? न च संवृतेरेवोत्पाद-विनाशाभ्युपगमः, क्षणस्थिति-व्यतिरेकेणापरस्य परमार्थसल्लक्षणलक्ष्यस्याभावात् क्षणस्थायिन एव स्वलक्षणताभ्युपगमात् क्षण-व्यवस्थितयश्च ग्राह्यग्राहकसंवित्त्यादयोऽध्यक्षत्वेनेष्यन्ते तदस्वलक्षणत्वे कोऽपरः स्वलक्षणार्थो भवेत्? तदाकारविविक्तस्यापरस्यात्यन्तानुपलम्भतः प्रत्यक्षत्वानुपपत्तेः। न चानंशमसाधारणं स्वलक्षणं सांशमिव विपर्यासात् प्रतिभातीति वक्तव्यम् अकार्यकारणरूपं कार्यकारणरूपमिव सर्वं विकल्पातीतं सविकल्पमिव पुरुषतत्त्वं प्रतिभातीत्येवं पराभिधानस्यापि सम्भवादित्युक्तत्वात्। ततश्च न कस्यचिद् उत्पादः क्षयो वा भवेत्। न चोत्पाद-विनाशयोः भ्रान्तिकल्पनायां किञ्चिदप्यभ्रान्तं सिध्येत्, निरंशक्षणक्षयाद्यवभासाभावात् स्वसंवित्तिसद्भावमात्रसिद्धेरप्यभावप्रसङ्गात्। क्षणक्षयाद्यवभासस्यासत्यत्वे सैवानेकान्तसिद्धिः समापतति। अथ नेयमसती संवित्तिः कुतश्चिन्निमित्तात् सतीव प्रतिभाति किन्तु सत्येव प्रतिभातीत्यस्याः स्वभावसिद्धिः; नन्वेवं न सर्वथापि भ्रमः सिध्येत् किन्तु भ्रान्ताभ्रान्तैकविज्ञानाभ्युपगमादनेकान्तवाद एव पुनरपि सिद्धिमायातः।

---

१ यदभावं ल० भां० मां० आ० हा० वि०। पृ० ३२३ पं० २५ तथा टि० १२। २ "विलम्बा"योगात्—बृ० ल० टि०। ३—स्तु न स—ल०। ४—पस्था—वा० बा०। ५—स्यूतव्य—ल०। ६ अष्टस० पृ० ९३ पं० १८। स्याद्वादर० पृ० ८९ द्वि० पं० ६। श्लो० वा० पार्थ० व्या० पृ० २७२ पं० १५। सर्वदर्शनसं० द० २ पृ० ३२ पं० २०६। शास्त्रवा० स्याद्वादक० पृ० २१५ द्वि० पं० २। ७ न हि नहि मे—बृ० वा० बा०। ८ "स्थूला"कारविविक्तस्य—मां० टि०। ९—स्यात्य—आ० हा० वि०। १०—कार्यकर—भां० मां०। ११ सविकल्पातीतं सविकल्पमिव—वा० बा०। १२ "क्षणज्ञानं सत्यमसत्यं वेति विकल्पौ"—मां० टि०।

यदपि 'कार्य-कारणयोरभेदाभावः सिध्यति भेदात् अकार्यकारणवत्' इति, तदपि ग्राह्यग्राहकसंवित्त्यादिभिरनैकान्तिकमित्युपेक्षामर्हति। नहि स्वभावभेदात् अभेदे ग्राह्यग्राहकसंवित्त्यादेः कालभेदाद्धेतु-फलयोरभेदाभावो युक्तः कालभेदादपि स्वरूपभेद एव भावानामवसेयः स्वभावतोऽभिन्नस्य कालभेदादपि भेदायोगात्—स्वभावभेदश्चेन्न भेदकः कालभेदः कोपयोगी? इति न तद्भेदात् कार्यकारणयोरात्यन्तिकभेदसिद्धिः एवं चांशेन वृत्तिः कार्यं कारणस्योपपन्ना। न च प्रतिक्षणमंशवृत्तौ दृष्टान्ताभावः संवित्तेर्ग्राह्यग्राहकाकारादेर्दृष्टान्तत्वेन सिद्धत्वात् अनंशवृत्तिस्तु न क्वचिदर्थस्य प्रमाणसिद्धा या दृष्टान्तत्वेन प्रदर्श्येत सर्वस्य सांशवृत्तितयोपलब्धेः। ततो नाध्यक्षसिद्धमनुगमस्वरूपं भावानां लक्षणं प्रतिक्षेप्तुं युक्तम् तत्प्रतिक्षेपे प्रमाणान्तराभावात्। नहि सुखादि-नीलादीनां निरन्वयानां क्वचित् संवेदनमध्यक्षम् अनुमानं वाऽनुभूयते। नापि तेषां भेदविकलानां कदाचिदप्यनुभूतिरिति यथा संविदाकारमन्तरेण ग्राह्यग्राहकाकारयोरसंवित्तेरनुपपत्तिस्तथा तावन्तरेण तस्या अप्यसंवित्तेरनुपपत्तिरिति भेदाभेदरूपं सर्वं प्रमाणप्रमेयलक्षणमभ्युपगन्तव्यम्।

न च पूर्वापराऽधोमध्योर्ध्वादिभेदाभावेऽनुगताकारलक्षणं सामान्यं तेष्वेकाकारप्रतिभासग्राह्यं सम्भवति, अनुगतिविषयाभावे तदनुगतैकाकारस्याप्यभावात्; तदभावे च तद्वृत्तेः सामान्यस्याभाव एव। न च तेष्ववर्त्तमानमपि तत् सामान्यं व्यक्त्यन्तरस्वरूपवत्। किञ्च, तदनुगतं रूपं व्यावृत्तरूपाभावे किं कार्यरूपम्, उत कारणरूपम्, आहोस्विदुभयात्मकम्, उतानुभयस्वभावम्, इति विकल्पाः। आद्यविकल्पे तस्यानित्यत्वप्रसक्तिः। द्वितीयेऽपि सैवेति न तत् सामान्यस्वभावम्। तृतीयपक्षे उभयदोषप्रसक्तिः। तुर्यविकल्पेऽप्यभावप्रसङ्ग इति विशेषाभावे नानुगतिरूपसामान्यसम्भवः सम्भवेऽपि तत्प्रतिपादकं प्रमाणमभिधानीयम्, तच्चाक्षणिकत्वविरोधि कथञ्चित् क्षणिकत्वावभासितयाऽनुभूयत इति विपर्ययसाधकं भवेत् कथञ्चित् क्षणिकत्वावभासस्य भ्रान्तत्वे विपरीतावभासस्यापि भ्रान्तत्वप्रसक्तिः। तदवभासस्याभ्रान्तत्वे वा भ्रान्ताभ्रान्तरूपमेकं विज्ञानमेकान्तपक्षप्रतिक्षेप्यनेकान्तं साधयतीत्यलमतिप्रसङ्गेनेति स्थितमेतत्—ध्रौव्यमुत्पाद-व्ययव्यतिरेकेण न सम्भवति तौ च तदन्तरेणेत्युत्पाद-स्थिति-भङ्गा अपरित्यक्तात्मस्वरूपास्तदितरस्वरूपत्वेन त्रैलक्षण्यं प्रत्येकमनुभवन्तो द्रव्यलक्षणतामुपयान्ति अन्यथा पृथक्पक्षोक्तदोषप्रसक्तिर्दुर्निवारेति व्यवस्थितम् उत्पाद-स्थिति-भङ्गा द्रव्यलक्षणम् इति॥ १२॥

[स्वतन्त्राणामुत्पाद-व्यय-ध्रौव्याणां द्रव्यलक्षणत्वाभावात् प्रत्येकं नयद्वयस्य मिथ्यात्वकथनम्]

एते च परस्परसव्यपेक्षा द्रव्यलक्षणम् न स्वतन्त्रा इति प्रदर्शनायाह—

एए पुण सङ्गहओ पाडिक्कमलक्खणं दुवेण्हं पि।
तम्हा मिच्छदिट्ठी पत्तेयं दो वि मूलणया॥ १३॥

एते उत्पादादयः सङ्ग्रहतः शिबिकोद्वाहिपुरुषा इव परस्परस्वरूपोपादानेनैव लक्षणम्। प्रत्येकं एकका उत्पादादयो द्वयोरपि द्रव्यास्तिक-पर्यायास्तिकयोः अलक्षणम् उक्तवत् तथाभूतविषयाभावे तद्ग्राहकयोरपि तथाभूतयोरभावात् उत्पादादीनां च परस्परविविक्तरूपाणामसम्भवात्। तस्मात् मिथ्यादृष्टी एव प्रत्येकं परस्परविविक्तौ द्वावपि एतौ द्रव्यार्थिक-पर्यायार्थिकस्वरूपौ मूलनयौ समस्तनयराशिकारणभूतौ॥ १३॥

[उभयारब्धतृतीयनयाभावेऽपि द्वयोरेव नययोरन्योन्यसव्यपेक्षयोस्सम्यक्त्वप्रतिपादनम्]

स्यादेतत् भवतु परस्परनिरपेक्षयोर्मिथ्यात्वम्, उभयनयारब्धस्त्वेकः सम्यग्दृष्टिर्भविष्यतीत्याह—

---

१ कार्यका—ल०। २—मनस्य—वा० बा०। ३ "संविदः"—बृ० ल० मां० टि०। ४ तदनुगतैकाकारस्य "ज्ञानस्य"—मां० टि०। ५ "विशेषा"वृत्तेः—मां० टि०। ६—भासतया—बृ० वा० बा०। ७—न वैल—बृ० ल० वा० बा० विना। ८ पाडेक्क—ल०।

ण य तइओ अत्थि णओ ण य सम्मत्तं ण तेसु पडिपुण्णं ।
जेण दुवे एगन्ता विभज्जमाणा अणेगन्तो ॥ १४ ॥

न च तृतीयः परस्परसापेक्षोभयग्राही **अस्ति नयः** कश्चित् तथाभूतार्थस्यानेकान्तात्मकत्वात् तद्ग्राहिणः प्रत्ययस्य नयात्मकत्वानुपपत्तेः । **न च सम्यक्त्वं न तयोः प्रतिपूर्णं** ५ प्रतिषेधद्वयेन प्रकृतार्थावगतेः । अशेषं हि प्रामाण्यं सापेक्षं गृह्यमाणयोरनयोरेवंविषययोर्व्यवस्थितं **येन द्वावपि** एकान्तरूपतया व्यवस्थितौ मिथ्यात्वनिबन्धनम् तत्परित्यागेनाऽन्वय-व्यतिरेकौ **विशेषेण** परस्परात्यागरूपेण **भज्यमानौ** गृह्यमाणावनेकान्तो भवतीति सम्यक्त्वहेतुत्वमेतयोरिति ॥ १४ ॥

[निरपेक्षग्राहित्वे मूलनयवदुत्तरनयानामपि मिथ्यात्ववर्णनम्]

१० एवं सापेक्षद्वयग्राहिणो नयत्वानुपपत्तेस्तृतीयनयाभावः प्रदर्शितः, निरपेक्षग्राहिणां तु मिथ्यात्वं दर्शयितुमाह—

जह एए तह अण्णे पत्तेयं दुण्णया णया सव्वे ।
हंदि हु मूलणयाणं पण्णवणे वावडा ते वि ॥ १५ ॥

यथा एतौ निरपेक्षद्वयग्राहिणौ मूलनयौ मिथ्यादृष्टी **तथा** उभयवादरूपेण व्यवस्थितानाम१५ पि परस्परनिरपेक्षत्वस्य मिथ्यात्वनिबन्धनस्य तुल्यत्वात् **प्रत्येकम्** इतरानपेक्षा **अन्येऽपि दुर्नयाः** न च प्रकृतनयद्वयव्यतिरिक्तनयान्तरारब्धत्वादुभयवादस्य नयानामपि वैचित्र्यादन्यत्रारोपयितुमशक्यत्वात् तद्रूपस्यान्ये सम्यक्प्रत्यया भविष्यन्तीति वक्तव्यम्, यतः **हंदि** इत्येवं गृह्यतां **हुः** इति हेतौ **मूलनयद्वयपरिच्छिन्नवस्तुन्येव व्यापृतास्तेऽपि** तद्विषयव्यतिरिक्तविषयान्तराभावात् सर्वनयवादानां च सामान्यविशेषोभयैकान्तविषयत्वात् । तन्न नयान्तरसद्भावः यतः तदा२० रब्धोभयवादे नयान्तरं भवेत् ॥ १५ ॥

[सङ्ग्रहादीनां मूलनयग्राह्यग्राहित्वान्नोभयवादप्रज्ञापकत्वमिति प्रदर्शनम्]

ननु सङ्ग्रहादिनयसद्भावात् कथं तद्व्यतिरिक्तनयान्तराभावः ? सत्यम्, सन्ति सङ्ग्रहादयः किन्तु तद्विषयव्यतिरिक्तविषयान्तराभावतस्तद्वितयविषयास्तेऽपि तदूषणेनैव दूषिताः यतो न मूलच्छेदे तच्छाखास्तदवस्थाः संभवन्तीत्याह—

२५ सव्वणयसमूहम्मि वि णत्थि णओ उभयवायपण्णवओ ।
मूलणयाण उ आणं पत्तेय विसेसियं बिंति ॥ १६ ॥

संग्रहादिसकलनयसमूहेऽपि नास्ति कश्चिद् नय उभयवादप्ररूपकः यतः मूलनयाभ्यामेव यत् प्रतिज्ञातं वस्तु तदेव आश्रित्य प्रत्येकरूपाः संग्रहादयः पूर्वपूर्वनयाधिगतांशविशिष्टमंशान्तरमधिगच्छन्तीति न विषयान्तरगोचराः । अतो व्यवस्थितम् परस्परात्यागप्रवृत्तसा३० मान्यविशेषविषयसङ्ग्रहाद्यात्मकनयद्वयाधिगम्यात्मकत्वात् वस्त्वप्युभयात्मकम् ॥ १६ ॥

---

१ 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति परिभाषावचनं प्रसिद्धम् । २ अन्वयरूपो द्रव्यार्थिकः व्यतिरेकरूपः पर्यायार्थिकः । ३–**तुत्वभूत**–वा० बा० । ४–**ग्राहिणोर्नय**–बृ० वा०बा० आ० हा० वि० । ५–**वणावा**–ल० भां० मां० । ६–**दस्या न**–ल० विना । ७ **व्यावृतास्ते**–बृ० ल० । **व्यावृत्तास्ते**–वा० बा० । ८–**स्तद्विषयविषया**–वा० बा० । ९–**वउ** । बृ० । १० **उ याणं** आ हा० वि० । ११–**यं बेंति** बृ० । १२–**हाद्या क**–हा० वि० । **हाभ्वात्मक**–आ० । १३–**कभय**–वा० बा० । १४–**गमात्म**–बृ० ल० वा० बा० भां० मां० विना । १५–**त्मत्वात्** वा० बा० ।

[नित्यानित्यैकान्तपक्षद्वयेऽप्यात्मनि संसारसुख-दुःखादेरनुपपत्तिप्रदर्शनम्]

न केवलं बाह्यघटादिवस्तु उभयात्मकं तथाविधप्रमाणग्राह्यत्वात् किन्त्वान्तरमपि हर्ष-शोक-भय-करुणौदासीन्याद्यनेकाकारविवर्त्तात्मकैकचेतनास्वरूपम् तदात्मकहर्षाद्यनेकविकारानेकात्मकं च स्वसंवेदनाध्यक्षप्रतीतम् तस्य भेदाभेदैकान्तैकरूपताभ्युपगमे दृष्टाऽदृष्टविषयसुखदुःखसाधनस्वीकार-त्यागार्थप्रवृत्ति-निवृत्तिस्वरूपसकलव्यवहारोच्छेदप्रसक्तिरिति प्रतिपादयितुमाह— ५

ण य दव्वट्ठियपक्खे संसारो णेव पज्जवणयस्स ।
सासय-वियत्तिवायी जम्हा उच्छेअवाईआ ॥ १७ ॥

द्रव्यार्थिक-पर्यायार्थिकनयद्वयाभिमते वस्तुनि **न संसारः** सम्भवति, **शाश्वत**व्यक्तिप्रतिक्षणान्यत्वैकान्तात्मकचैतन्यग्राहकविषयीकृतत्वात् पावकज्ञानविषयीकृते उदकवत् । तथाहि—संसारः संसृतिः[3] सा चैकान्तनित्यस्य पूर्वावस्थाऽपरित्यागे सति न सम्भवति तत्परित्यागे- १०
नैव-गतेः भावान्तरापत्तेर्वा—संसृतेः सम्भवात् । नाप्युच्छेदे उत्पत्त्यनन्तरनिरन्वयध्वंसलक्षणे संसृतिः सम्भवति गतेः भावान्तरापत्तेर्वा कथञ्चिद् अन्वयिरूपमन्तरेण अयोगात् । अथैकस्य पूर्वाऽपरशरीराभ्यां वियोग-योगौ संसारः असावपि सदा अविकारिणि न सम्भवति, नित्यस्य पूर्वाऽपरशरीराभ्यां वियोग-योगानुपपत्तेः । निरन्वयक्षणध्वंसिनोऽप्येकाधिकरणत्वासम्भवात् न तल्लक्षणः संसारः । न च अमूर्त्तस्यात्मनः असर्वगतैकमनोऽभिष्वक्तशरीरेण विशिष्टवियोग-योगौ संसारः मन- १५
सोऽकर्तृत्वेन शरीरसम्बन्धस्यानुपपत्तेः । यो ह्यदृष्टस्य विधाता स तन्निर्वर्तितशरीरेण सह सम्बध्यते, न चैवं मनः; न च मनसः शरीरसम्बन्धेऽपि तत्कृतसुख-दुःखोपभोक्तृत्वम् आत्मनि तस्याभ्युपगमात् तदर्थं च शरीरसम्बन्धोऽभ्युपगम्यत इति तत्सम्बन्धपरिकल्पनं मनसो व्यर्थम् मनसि सुख-दुःखोपभोक्तृत्वाभ्युपगमे वा आत्मकल्पनावैयर्थ्यम् मनस आत्मत्वसिद्धेः ॥ १७ ॥

तथा— २०

सुह-दुक्खसम्पओगो ण जुज्जए णिच्चवायपक्खम्मि ।
एगंतुच्छेयम्मि य सुह-दुक्खवियप्पणमजुत्तं ॥ १८ ॥

सुखेन अबाधास्वरूपेण, **दुःखेन** बाधनालक्षणेन, **सम्प्रयोगः** सम्बन्धः **न युज्यते** न घटते आत्मनो **नित्यवादपक्षे** द्रव्यास्तिकाभ्युपगमे सुखस्वभावस्य अविचलितरूपत्वात् सदा सुखरूपतैव आत्मनः न दुःखसम्प्रयोगः दुःखस्वभावत्वे तद्रूपतैव तत्त्वादेव । **एकान्तोच्छेदे** च २५
पर्यायास्तिकपक्षे सुख-दुःखसम्प्रयोगो न युज्यत इति सम्बन्धः । तथा पक्षद्वयेऽपि **सुखार्थम् दुःखवियोगार्थं च विशिष्टं कल्पनं** यतनम्—'कल्पतेः' अत्र यतनार्थत्वात्—**अयुक्तम्** अघटमानकम् सुख-दुःखोपादानत्यागार्थप्रयत्नस्याप्ययुक्तत्वमुक्तन्यायात् ।

"संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ।" [साङ्ख्यका० ४०]
इति साङ्ख्यमतमपि निरस्तम् न्यायस्य सर्वैकान्तसाधारणत्वात् ॥ १८ ॥ ३०

१–**भयात्मकस्तथा**–बृ० वा० बा० । २ **णेय प**–बृ० ल० वा० बा० ।
"नित्यत्वैकान्तपक्षेऽपि विक्रिया नोपपद्यते । प्रागेव कारकाभावः क्व प्रमाणं क्व तत्फलम्" ॥ ३७ ॥
"प्रमाण-कारकैर्व्यक्तं व्यक्तं चेदिन्द्रियार्थवत् । ते च नित्ये विकार्ये किं साधोस्ते शासनाद् बहिः" ॥ ३८ ॥
"यदि सत् सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति । परिणामप्रकृप्तिश्च नित्यत्वैकान्तबाधिनी" ॥ ३९ ॥
"पुण्य-पापक्रिया न स्यात् प्रेत्यभावः फलं कुतः । बन्ध-मोक्षौ च तेषां न येषां त्वं नासि नायकः" ॥ ४० ॥
"क्षणिकैकान्तपक्षेऽपि प्रेत्यभावाद्यसंभवः । प्रत्यभिज्ञाद्यभावान्न कार्यारम्भः कुतः फलम् ।" ॥ ४१ ॥
—आप्तमीमां० पृ० २२–२३ परि० ३ । अष्टस० पृ० १७८–१८१ ।

३–**तिः स चै**–आ० ४–**न्निवर्तित**–ल० । ५ **सम्बन्ध्य**–आ० । ६–**सिद्धेः सुह**–आ० हा० वि० । ७–**शिष्ट क**–आ० । ८ "अहंकारादिभिः"–मां० टि० ।

[एकान्तपक्षे चात्मनि कर्मणो बन्ध-स्थितिकारणानुपपत्तिप्रकटनम्]

एकान्तपक्षे आत्मसुख-दुःखोपभोग-निर्वर्त्तकशरीरसम्बन्धहेत्वदृष्टोत्पादकनिमित्तानामप्यसम्भवं दर्शयन्नाह—

कम्मं जोगनिमित्तं बज्झइ बन्ध-ट्ठिई कसायवसा ।
अपरिणउच्छिण्णेसु य बंधट्ठिइकारणं णत्थि ॥ १९ ॥

कर्म अदृष्टम्, **योगनिमित्तं** मनो-वाक्-कायव्यापारनिमित्तम्, **बध्यते** आदीयते, बध्यत इति **बन्धः** अदृष्टमेव तस्य **स्थितिः** कालान्तरफलदातृत्वेन आत्मन्यवस्थानम् सा **कषायवशात्** क्रोधादिसामर्थ्यात् एतदुभयमपि एकान्तवाद्यभ्युपगते आत्मचैतन्यलक्षणे भावे **अपरिणते उत्सन्ने च बन्धस्थितिकारणं नास्ति** । न ह्यपरिणामिनि अत्यन्ताऽनाधेयातिशये आत्मनि क्रोधादयः सम्भवन्ति, नाप्येकान्तोत्सन्ने अनुसन्धानविकले 'अहमनेनाऽऽक्रुष्टः' इति द्वेषसम्भवः तथा च 'अन्य आक्रुष्टः अन्यो रुष्टः' 'अन्यो व्यापृतः अपरो बद्धः अपरश्च मुक्तः' इति कुशलाकुशलकर्मगोचरप्रवृत्त्याद्यारम्भवैफल्यप्रसक्तिः । न चैकसन्ततिनिमित्तोऽयं व्यवहारः, क्षणिकैकान्तपक्षे सन्ततिकल्पनाबीजभूतोपादानोपादेयभावस्यैव अघटमानत्वात् । न चेयमनुसन्धानप्रतिपत्तिर्मिथ्या, द्वेष-गर्व-शाठ्याऽसन्तोषादीनामन्योन्यविरुद्धस्वभावानां क्रमविवर्त्तिनां चिद्विवर्तानां स्वसंवेदनाध्यक्षसिद्धानाम् तथा तथाऽनुभवितुश्च संशय-विपर्यासाऽदृढज्ञानागोचरीकृतस्यैकस्य चैतन्यस्यानुभवात् । न च बाधारहितानुभवविषयस्यापह्नवः सुखादेरप्यनुभवविषयस्यापह्नुतिप्रसङ्गात् तथा च प्रमाणप्रमेयादिव्यवहारोच्छेदप्रसक्तिः । यदपि—

"मिथ्याऽध्यारोपहानार्थं यत्नोऽसत्यपि मोक्तरि" [ ]

इत्युक्तम्, तदप्यनेनैव प्रतिविहितम्; यथोक्तप्रतिपत्तेर्मिथ्यात्वासिद्धेः । न चानुमानेनाश्रितेऽर्थे आरोपबुद्धेरुत्पत्तिर्धूमनिश्चयावगतधूमध्वज इव, न च मिथ्याज्ञानस्य सहजत्वात् विपरीतार्थोपस्थापकानुमानप्रवृत्तावपि न निवृत्तिः तथाभ्युपगमे बोधसन्तानवत् तस्य सर्वदाऽनिवृत्तिरित्यमुक्तिप्रसक्तिः असहजं तु तत्त्वज्ञानप्रादुर्भावेऽवश्यं निवर्त्तते शुक्तिकावगमे रजतभ्रम इव अनिवृत्तौ वा न प्रमाणमप्रमाणबाधकं भवेत् । न च क्षणक्षयनिश्चये 'स एवाहम्' इति प्रत्ययो युक्तः अपि तु 'स इव' इति स्यात्, नहि गवयनिश्चये 'गौरेव' इति प्रत्ययो दृष्टः अपि तु 'गौरिव' इति । न च क्रमवर्त्तिष्वभिष्वङ्ग-द्वेषादिपर्यायेषु चैतन्यानुस्यूतिप्रत्ययस्य मानसत्वमात्मनि क्षणक्षयमनुमानाद् निश्चिन्वतोऽपि तदैव स्पष्टमनुभूयमानत्वाद् विकल्पद्वयस्य युगपदुत्पत्तिः परैर्नेष्टेति विकल्परूपत्वे एकैकत्वप्रत्ययस्य क्षणिकत्वनिश्चयसमये सद्भावो न भवेत् इत्येकान्तनित्याऽनित्यव्युदासेनोभयपक्ष एव बन्धस्थितिकारणं युक्तिसङ्गतम् ॥ १९ ॥

[एकान्तवादे बन्धाऽभावेन तन्मूलकसंसारनिवृत्त्यादेरनुपपत्तिप्रकाशनम्]

किञ्च, एकान्तवादिनां संसारनिवृत्ति-तत्सुखमुक्तिप्राप्त्यर्था प्रवृत्तिश्चासङ्गतेत्याह—

---

१ अन्यो व्यावृत्तः वा० बा० आ० । अन्यो वावृतः बृ० । २ तथाऽनु-आ० हा० । ३-निश्चितार्थ आ-आ० ।-निश्चितर्थे आ-हा० । ४-तार्थो स्था-ल० । ५-दा नि-वा० बा० । ६-दुर्भावो-मां० ।-दुर्भावे प्र० मां० बहिः । ७ स एव भां० मां० विना । ८-वत्तेष्व-मां० ।-वर्तिष्व-प्र० मां० बहिः । ९-स्य च यु-बृ० वा० बा० । १०-कत्वं प्र-बृ० वा० बा० । ११-निवृत्तिवस्तुख-वा० बा० । -निर्व्यत्तवत्सुख-बृ० । -निवृत्तिवत्सुख-प्र० मां० बहिः० ।

बंधम्मि अपूरन्ते संसारभओघदन्सणं मोज्झं ।
बन्धं व विणा मोक्खसुहपत्थणा णत्थि मोक्खो य ॥ २० ॥

बन्धे वाऽसति **संसारो** जन्म-मरणादिप्रबन्धस्तत्र तत्कारणे वा मिथ्यात्वादावुपचारात् तच्छब्दवाच्ये **भयौघो** भीतिप्राचुर्यम् तस्य **दर्शनम्** 'सर्वं चतुर्गतिपर्यटनं दुःखात्मकम्' इति पर्यालोचनं **मौढ्यं** मूढता अनुपपद्यमानसंसारदुःखौघविषयत्वात् मिथ्याज्ञानं वन्ध्यासुतजनितबाधा-गोचरभीतिविषयपर्यालोचनवत् मिथ्याज्ञानपूर्विका च प्रवृत्तिर्विसंवादिन्येव, **बन्धेन विना संसारनिवृत्ति-तत्सुखप्रार्थना च न भवत्येव** तथा **मोक्षश्चानुपपन्नः** निरपराधपुरुषवत् अबद्धस्य मोक्षासम्भवात्, बन्धाभावश्च योग-कषाययोः प्रकृति-स्थिति-अनुभाग-प्रदेशात्मकबन्धहेत्वोरेकान्तपक्षे विरुद्धत्वात् । न चैकरूपत्वात् ब्रह्मणो बन्धाद्यभावप्रेरणा न दोषाय, चेतनाऽचेतनादिभेदरूपतया जगतः प्रतिपत्तेः । न च भेदप्रतिपत्तिर्मिथ्या अविद्यानिर्मितत्वादिति वक्तव्यम् अविद्यायाः प्रतिपत्तिजननविरोधात्, अविरोधे विद्यारूपताप्राप्तेर्द्वैतप्राप्तिरिति । प्रतिविहितश्चाद्वैतवाद इति न पुनः प्रतन्यते ॥ २० ॥

[सर्वेषामपि नयानामन्योऽन्याऽनिश्रितत्वे मिथ्यात्वम् अन्योन्यनिश्रितत्वे पुनः सम्यक्त्वमिति प्रतिपादनम्]

तदेवमेकान्ताभ्युपगमे बन्धहेत्वाद्यनुपपत्तेरैहिकाऽऽमुष्मिकसर्वव्यवहारविलोपः इत्येकान्तव्यवस्थापकाः सर्वेऽपि मिथ्यादृष्टयो नयाः अन्योन्यविषयाऽपरित्यागवृत्तयस्तु त एव सम्यक्त्वं प्रतिपद्यन्त इत्युपसंहरन्नाह—

तम्हा सव्वे वि णया मिच्छादिट्ठी सपक्खपडिबद्धा ।
अण्णोण्णणिस्सिआ उण हवंति सम्मत्तसब्भावा ॥ २१ ॥

यस्माद् एकान्तनित्याऽनित्यवस्त्वभ्युपगमो बन्धादिकारणयोग-कषायाभ्युपगमबाधितः तदभ्युपगमोऽपि नित्याद्येकान्ताभ्युपगमप्रतिहतः इत्येवंभूतपूर्वोत्तराभ्युपगमस्वरूपाः **तस्माद् मिथ्यादृष्टयः सर्वेऽपि नयाः स्वपक्षप्रतिबद्धाः** स्व आत्मीयः पक्षः अभ्युपगमस्तेन प्रतिबद्धाः प्रतिहता यतस्तत इति । नयज्ञानानां च मिथ्यात्वे तद्विषयस्य तदभिधानस्य च मिथ्यात्वमेव । तेनैवं प्रयोगः—मिथ्या सर्वनयवादाः, स्वपक्षेणैव प्रतिहतत्वात् चौरवाक्यवत् । अथ तेषां प्रत्येकं मिथ्यात्वे बन्धाद्यनुपपत्तौ सम्यक्त्वानुपपत्तिः सर्वत्रेत्याह—**अन्योन्यनिश्रिताः** परस्परापरित्यागेन व्यवस्थिताः **पुनर्** इति त एव **सम्यक्त्वस्य** यथावस्थितवस्तुप्रत्ययस्य **सद्भावा भवन्ती**ति न बन्धाद्यनुपपत्तिः ।

ननु यदि नयाः प्रत्येकं सन्ति कथं प्रत्येकावस्थायां तेषां सम्यक्त्वाभावः स्वरूपव्यतिरेकेण अपरसम्यक्त्वाभावात् तस्य च तेष्वभ्युपगमात्? अथ न सन्ति, कथं तेषां समुदायः सम्यक्त्वनिबन्धनो भवेत् असतां समुदायानुपपत्तेः? न च असतोऽऽपि सम्यक्त्वम् नयवादेष्वपि सम्यक्त्वप्रसक्तेः । न च प्रत्येकं तेषां सतामसम्यक्त्वेऽपि तत्समुदाये सम्यक्त्वं भविष्यति **'दव्वट्ठिओ त्ति तम्हा नत्थि णओ'** इत्याद्युपसंहारसूत्रविरोधात् । न च प्रत्येकमेकैकांशग्राहिणः सम्पूर्णवस्तुग्राहकाः समुदिता इति सम्यग्व्यपदेशमासादयन्ति, तत्तत्स्वगोचरापरित्यागेन तत्रापि विषयान्तरे तेषा-

---

१-धमि अ-बृ० ल० ।-धमि अपूरेंते बृ०-धमि यपूरेंते वा० बा० । २ चासति बृ० ल० वा० बा० । ३-ज्ञान व-बृ० ल० । ४ पृ० २८५ पं० ६ । ५ मिच्छादिट्ठी वा० बा० । मिच्छदिट्ठि आ० । ६-निःसृताः बृ० विना । ७-द्भावो भ-आ० हा० विना । ८ "स्वरूपस्य"-बृ० ल० मां० टि० । ९ सतो सम्य-वा० बा० । १० णउ बृ० हा० । ११ पृ० ४०८ गा० ९ । १२ "समुदाये"-मां० टि० ।

मप्रवृत्तेः । न च प्रत्येकमसम्यक्त्वे समुदायेऽपि सम्यक्त्वं युक्तम् सिकतासु तैलवत्, असत सदुत्पत्तेः सतो वा असदुत्पत्तेर्विरोधाच्च ।

अत्राभिधीयते–प्रत्येकमप्यपेक्षितेतरांशस्वविषयग्राहकतयैव सन्तो नयाः तद्व्यतिरिक्तरूपतया त्वसन्त इति सतां तत्समुदाये सम्यक्त्वे न कश्चिद् दोषः, नन्वितरेतरविषयाऽपरित्यागवृत्तीनां ५ ज्ञानानां कथं समुदायः सम्भवी येन तत्र सम्यक्त्वमभ्युपगम्येत? अनुक्तोपालम्भ एषः; न ह्येकदाऽनेकज्ञानोत्पादस्तेषां समुदायो विवक्षितः अपि त्वपरित्यक्तेतररूपविषयाध्यवसाय एव समुदायः। **अन्योन्यनिश्रिताः** इत्यनेनाप्ययमेवार्थः प्रतिपादितः । नहि द्रव्यार्थिक-पर्यायार्थिकाभ्यामत्यन्तपृथग्भूताभ्यामङ्गुलिद्वयसंयोगवदुभयवादोऽपरः प्रारब्धः, ननु यदि प्रमाणं नयाः "प्रमाण-नयैरधिगमः" [तत्त्वार्थ० अ० १ सू० ६] इति प्रमाण-नयभेदकल्पनावैयर्थ्यप्रसक्तिः अथ अप्रमाणम् १० तथाप्यधिगमानुपपत्तिः तत्पृथग्भूतस्यापरस्यासंवेदनात् प्रमाणाभावप्रसक्तिश्च, असदेतत्; यतः अप्रमाणं नयाः नयन्ति इतररूपसापेक्षं स्वविषयं परिच्छिन्दन्तीति नया इति व्युत्पत्तेः । न चापरिच्छेदकाः नयतेर्गत्यर्थत्वेन ज्ञानार्थत्वात् ज्ञानस्य च परिच्छेदात्मकत्वात् । न च परिच्छेदकत्वेऽपि प्रमाणता, समस्तनयविषयीकृतानेकान्तवस्तुग्राहकत्वेन 'प्रकृष्टं मानं प्रमाणम्' 'इतरांशसव्यपेक्षस्वांशग्राही नयः' इति तत्स्वतत्त्वव्यवस्थितेः । न चानेकान्तात्मकवस्तुग्राहिणो नया न भवन्ति, १५ प्रत्येकं स्वविषयनियतत्वात् तेषाम् तद्व्यतिरिक्तस्य चान्यस्य तद्विषयस्यानुभवात् । प्रमाणाभावोऽपि न, आत्मनः कथञ्चित् तद्व्यतिरिक्तस्य प्रमाणत्वेनानुभवसिद्धत्वात् तत्तन्नयविषयीकृताशेषवस्त्वंशात्मकैकद्रव्यग्राहकत्वस्य तत्र प्रतीतेः । न च संशयादिज्ञानैरात्मनः प्रमाणत्वेऽतिप्रसङ्गः, प्रमीयतेऽनेन प्रमिणोतीति वा प्रमाणमिति 'प्र'शब्देन तस्य निरस्तत्वात् । न चात्मनः कर्तृत्वात् करणरूपप्रमाणतानुपपत्तिः, उत्पाद-व्यय-ध्रौव्यात्मकस्य तस्यानेकरूपत्वेन कर्तृ-करणभावाविरोधात् । २० एतेन 'प्रत्येकं मिथ्यादृष्टयो नयाः समुदिताः सम्यक्त्वं प्रतिपद्यन्त इत्यत्र न नयसमुदायोऽर्थद्रष्टा प्रत्येकमद्रष्टृत्वात् जात्यन्धसमूहवत्' इत्येतन्निरस्तम् अद्रष्टृतत्समूहस्य सम्यक्त्वानभ्युपगमात् स्वविषयपरिच्छेदकत्वाच्च नयानाम् 'अद्रष्टृत्वात्' इति हेतुरसिद्धः । 'परिपूर्णवस्त्वनधिगन्तृत्वात्' इति हेतौ प्रतिज्ञार्थैकदेशासिद्धिः सिद्धसाध्यता च समुदायिनो द्रष्टृत्वनिषेधे साध्ये । अथ तत्समुदायस्य द्रष्टृत्वनिषेधः साध्यस्तदा अध्यक्षविरोधः समुदायिव्यतिरिक्तस्यैकान्तेन समुदायस्याभावात् २५ धर्मिणोऽप्रसिद्धिः सिद्धसाध्यता च ॥ २१ ॥

[प्रत्येकं नयेषु मिथ्यात्वेऽपि समुदितेषु सम्यक्त्वस्य रत्नावलीदृष्टान्तेन समर्थनम्]

न च समुदायाभावे नया एव परस्परव्यावृत्तस्वरूपा इति न क्वचित् सम्यक्त्वम्, नय-प्रमाणात्मकैकचैतन्यप्रतिपत्तेः रत्नावलीवत् इत्येतदाह—

'यद्वा यत् प्रत्येकं नयेषु न सम्यक्त्वम् तत् तेषां समुदायेऽपि न भवति, यथा सिकतासु ३० प्रत्येकमभवत् तैलं तासां समुदायेऽपि न भवति' इत्यत्र हेतोरनैकान्तिकताप्रतिपादनार्थमाह—

१–**धात्व** । **अ**–भां० आ० । २ "उत्तरम्"–बृ० मां० टि० । ३–**दतस्ते**–आ० हा० । ४ पृ० ४१९ प्र० गा० । ५–**नापायनेकार्थः प्र**–भा० मां० ।–**नापायमेवार्थः प्र**–आ० ।–**नापायमेकार्थाः प्र**–हा० ।–"**नाप्यमेवार्थः** इत्यर्थः–प्रत्यन्तरे ।–**नाप्य उ तस्यार्थः** द्वितीयप्रत्य० । (अयं च द्वितीयप्रत्यन्तरसत्कः पाठः वा० बा० पुस्तके विद्यते)–**नाप्ययमेवार्थः प्रतिपादितः** इति तु संभावना"–मां० बहिः० । ६ तत् "प्रमाण"–मां० टि० । ७ अपरस्य "अधिगमस्य"–मां० टि० । ८ **प्रमाणभावप्र**–वा० बा० आ० हा० वि० ।–**प्रमाणाभावाप्र**–भां० । –**प्रमाणाभावप्र**–मां० सं० । ९ **नया नयन्तातररू**–हा० । **नया न नयन्तीतररू**–बृ० । **नया य नयन्तीतररू**–वा० बा० । १०–**परिच्छेदकेत्वे**–बृ० ।–**परिच्छेदात्मकत्वे**–भां० । ११–**कृष्टमा**–बृ० । १२ "तयोः प्रमाण––नययोः"–बृ० ल० मां० टि० । १३ "आत्मनि"–बृ० ल० मां० टि० । १४–**त्वादि हेतौ** भां० मां० हा० वि० । –**त्वादिहितौ** आ० । १५ " 'अनित्यः शब्दः अनित्यत्वात्' इतिवत् अत्र च अर्थाद्रष्टृत्वं साध्यम् तदेव च अक्षरान्तरिर्हेतुतयोपन्यस्ता (न्तरैर्हेतुतयोपन्यस्तम्)"–मां० टि० ।–**शासिद्धः** बृ० वा० बा० । १६–**णात्मिकै**– बृ० वा० बा० ।

जहऽणेयलक्खण–इत्यादि—

जहऽणेयलक्खणगुणा वेरुलियाई मणी विसंजुत्ता ।
रयणावलिववएसं न लहंति महग्घमुल्ला वि ॥ २२ ॥

तह णिययवायसुविणिच्छिया वि अण्णोण्णपक्खणिरवेक्खा ।
सम्मद्दंसणसद्दं सव्वे वि णया ण पावेंति ॥ २३ ॥ ५

जह पुण ते चेव मणी जहा गुणविसेसभागपडिबद्धा ।
'रयणावलि'त्ति भण्णइ जहंति पाडिक्कसण्णाउ ॥ २४ ॥

तह सव्वे णयवाया जहाणुरूवविणिउत्तवत्तव्वा ।
सम्मद्दंसणसद्दं लहन्ति ण विसेससण्णाओ ॥ २५ ॥

यथा अनेकप्रकारा विषविघातहेतुत्वादीनि लक्षणानि नीलत्वादयश्च गुणा येषां ते १० वैडूर्यादयो मणयः पृथग्भूता रत्नावलीव्यपदेशं न लभन्ते महार्घमूल्या अपि ॥२२॥

तथा प्रमाणावस्थायाम् इतरसव्यपेक्षस्वविषयपरिच्छेदकाले वा स्वविषयपरिच्छेदकत्वेन सुनिश्चिता अपि अन्योन्यपक्षनिरपेक्षाः 'प्रमाणम्' इत्याख्यां सर्वेऽपि नया न प्राप्नुवन्ति निजे च इतरनिरपेक्षसामान्यादिवादे सुविनिश्चिता हेतुप्रदर्शनकुशला अन्योन्यपक्षनिरपेक्षत्वात् सम्यग्दर्शनशब्दं 'सुनयाः' इत्येवंरूपं सर्वेऽपि संग्रहादयो नया न प्राप्नुवन्ति ॥ २३ ॥ १५

यदा पुनस्त एव मणयो यथा गुणविशेषपरिपाट्या प्रतिबद्धाः 'रत्नावलि' इति आख्यामासादयन्ति प्रत्येकाभिधानानि च त्यजन्ति रत्नानुविद्धतया रत्नावल्यास्तदनुविद्धतया च रत्नानां प्रतीतेः 'रत्नावली' इति तत्र व्यपदेशः न पुनः प्रत्येकाभिधानम् ॥ २४ ॥

तथा सर्वे नयवादा यथानुरूपविनिर्युक्तवक्तव्या इति यथा इति वीप्सार्थे अनु इति सादृश्ये रूपम् इति स्वभावे तेनानुरूपमित्यव्ययीभावः पुनर्यथाशब्देन स एव "यथाऽसा-२० दृश्ये" [पाणि० अ० २ पा०१ सू० ७ सिद्धान्तकौ० अं० ६६१ पृ० १६३] इत्यनेन । यद् यदनुरूपं तत्र विनिर्युक्तं वक्तव्यं उपचारात् तद्वाचकः शब्दो येषां ते तथा—यथानुरूपद्रव्यध्रौव्यादिषु प्रमाणात्मकत्वेन व्यवस्थिताः **सम्यग्दर्शनशब्दं** 'प्रमाणम्' इत्याख्यां **लभन्ते न विशेषसंज्ञाः** पृथग्भूताभिधानानि एकानेकात्मकत्वेन चैतन्यप्रतिपत्तेरन्यथा चाप्रतिपत्तेरिति । ननु नय-प्रमाणात्मकचैतन्यस्याध्यक्षसिद्धत्वेन 'रत्नावलि' इति दृष्टान्तोपादानं व्यर्थम्, न; अध्यक्षसिद्धमप्यनेका-२५ न्तमनभ्युपगच्छन्तं प्रति व्यवहारसाधनाय दृष्टान्तोपादानस्य साफल्यात् । प्रवर्त्तितश्च तेनापि तत्रानेकान्तव्यवहारः ॥ २५ ॥

१–**सद्दा स**–ल० । २–**रूपं वि**–बृ० । ३ अत्र मूलगाथागत 'विणिउत्त' इति प्राकृतपदानुसारेण 'विनियुक्त' इत्येव सम्यग् भाति, 'विनिर्युक्त'इत्यस्य तु प्राकृतपदम् 'विणिजुत्त' इति भवेत् । ४ "अव्ययीभावः"–बृ० ल० मां० टि० । ५ "यथाऽथा" । ३।१।४१। हैम० । ६ "सूत्रेण"–बृ० ल० मां० टि० । ७ "वक्तव्ये" उपचारात् बृ० ल० मां० टि० । ८–**द्धत्वे र**–बृ० वा० बा० ।

[दृष्टान्तोपन्यासप्रयोजकानां तद्गुणानां परिगणनम्]

दृष्टान्तगुणप्रतिपादनायाह—

लोइयपरिच्छयसुहो[1] निच्छयवयणपडिवत्तिमग्गो य।
अह पण्णवणाविसउ[2] त्ति तेण वीसत्थसुवण्णीओ[3] ॥ २६ ॥

व्युत्पत्तिविकल-तद्युक्तप्राणिसमूहसुखग्राह्यत्वम् एकानेकात्मकभावविषयवचोऽवगमजनकत्वं च अथ इत्यवधारणार्थः अनन्तधर्मात्मकवस्तुप्ररूपकवाक्यविषयत्वं दृष्टान्तस्यैव। एतैः कारणैः शङ्काव्यवच्छेदेन अयमुपदर्शित इति गाथातात्पर्यार्थः।

न चावल्यवस्थायाः प्राग् उत्तरकालं च रत्नानां पृथगुपलम्भात् इह च सर्वदा तथोपलम्भाभावाद् विषममुदाहरणमिति वक्तव्यम्, आवल्यवस्थाया उदाहरणत्वेनोपन्यासात्। न च दृष्टान्त-दार्ष्टान्तिकयोः सर्वथा साम्यम् तत्र तद्भावानुपपत्तेः ॥ २६ ॥

[दृष्टान्तस्य साध्यसमतां वदतामेकान्तवादिनां निरासाय पञ्चानां तदभिप्रायाणां निर्देशः]

(१) "रत्नादिकारणेष्वावल्यादिकार्यं सदेव" [ ] इति साङ्ख्यः।

(२) "तेषामेवानेन रूपेण व्यवस्थितत्वात् तदव्यतिरिक्तं विकारमात्रं कार्यं त एव" [ ] इति साङ्ख्यविशेष एव।

(३-४) "न कार्यं कारणे विद्यते इति तेभ्यस्तत् पृथग्भूतम् नहि कारणमेव कार्यरूपेण व्यवतिष्ठते परिणमते वा" [ ] इति वैशेषिकादयः।

(५) "न च कार्यम् कारणं वास्ति द्रव्यमात्रमेव तत्त्वम्" [ ] इत्यपरः।

एवंभूताभिप्रायवन्त एकान्तवादिनो दृष्टान्तस्य साध्यसमतां मन्यन्ते तान् प्रत्याह—

इहरा समूहसिद्धो[4] परिणामकओ व्व जो जहिं अत्थो।
ते[5] तं च ण तं तं चेव व त्ति नियमेण मिच्छत्तं ॥ २७ ॥

इतरथा उक्तप्रकारादन्यथा **समूहे** रत्नानां **सिद्धो** निष्पन्नः **परिणामकृतो वा** मण्या-

---

१ "परीक्षक"—बृ० ल० मां० टि०।

"अथ दृष्टान्तः ××× यत्र लौकिक-परीक्षकाणां दर्शनं न व्याहन्यते"—अ० १। आ० १। सू० १ न्यायद० वात्स्या० पृ० ४ पं० १९।

"लौकिक-परीक्षकाणां दर्शनाविघातहेतुरिति"—न्यायवा० पृ० १५ पं० १२। न्यायवार्तिकता० पृ० ५२ पं० ११।

"लौकिक-परीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः"—अ० १। आ० १। सू०। २५।

××× यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः"—न्यायद० वात्स्या० पृ० ४८ पं० १७। न्यायवा० पृ० १०२ पं० १६। न्यायवार्तिकता० पृ० २६१ पं० १६।

निर्युक्तिकारो भद्रबाहुस्वामी दृष्टान्तपर्यायानेवं निर्दिशति—

"नायमुदाहरणं ति अ दिट्ठंतोवम निदरिसणं तह य। एगट्ठं तं दुविहं चउव्विहं चेव नायव्वं" ॥ ५२ ॥

—दशवै० निर्यु० पृ० ३४ प्र०।

स्वयं ग्रन्थकारस्तु स्वीये न्यायावतारसूत्रे दृष्टान्तस्वरूपमेवं विवृणोतिः—

"साध्य-साधनयोर्व्याप्तिर्यत्र निश्चीयतेतराम्। साधर्म्येण स दृष्टान्तः सम्बन्धस्मरणान्मतः" ॥

"साध्ये निवर्तमाने तु साधनस्याप्यसंभवः। ख्याप्यते यत्र दृष्टान्ते वैधर्म्येणेति स स्मृतः" ॥

"अन्तर्व्याप्त्यैव साध्यस्य सिद्धेर्बहिरुदाहृतिः। व्यर्था स्यात् तदसद्भावेऽप्येवं न्यायविदो विदुः" ॥

—न्यायावता० श्लो० १८-१९-२०।

२-**वण्णावि**-भां०। ३ "रत्नावलीति दृष्टान्तः"-बृ० ल० भां० मां० टि०। ४ **तं व** बृ० ल० वा० बा० हा०। **तं वं**-भां०।

दिष्वावल्यादिः क्षीरादिषु दध्यादिर्वा **यो यत्र अर्थः ते** मण्यादय आवल्यादि कार्यम् क्षीरं वा दध्यादिकम् तत्र तत्सद्भावात् तस्य तत्परिणामरूपत्वात्। 'समूहसिद्धः' 'परिणामकृतो वा' इति द्वयोरुपादानं लौकिकव्यवहारापेक्षया। परमार्थतस्तु परमाणुसमूहपरिणामात्मकत्वात् सर्वं एव समूहकृतः परिणामकृतो वेति न भेदः।

[(१) सांख्याभिमतत्वेनोपन्यस्तस्य सत्कार्यवादस्य निरसनम्]

अयं चाभ्युपगमो मिथ्या। तथाहि—यद्येकान्तेन कारणे कार्यमस्ति तदा कारणस्वरूपवत् कार्यस्वरूपानुत्पत्तिप्रसक्तिः। न हि सदेवोत्पद्यते उत्पत्तेरविरामप्रसङ्गात्। न च कारणव्यापारसाफल्यम् तद्व्यापारनिर्वर्त्यस्य विद्यमानत्वात्। तथाहि—कारणव्यापारः किं कार्योत्पादने, आहोस्वित् कार्याभिव्यक्तौ, उत तदावरणविनाशे इति पक्षाः। तत्र न तावत् कार्योत्पादने, तस्य सत्त्वे कारकव्यापारवैफल्यात् असत्त्वे स्वाभ्युपगमविरोधात्। अभिव्यक्तावपि पँक्षद्वयेऽप्येतदेव दूषणम्। आवरणविनाशेऽपि न कारकव्यापारः, सतो विनाशाभावात् असतो भावस्योत्पादवत्। तन्न सत्कार्यवादे कारकव्यापारसाफल्यम्। न चान्धकारपिहितघटाद्यनुपलम्भे अन्धकारोपलम्भवत् कार्यावारकोपलम्भः येन प्रतिनियतं किञ्चित् तदावारकं व्यवस्थाप्येत। न च कारणमेव कार्यावारकम् तस्य तदुपकारकत्वेन प्रसिद्धेः न ह्यालोकादि रूपज्ञानोपकारकं तदावारकत्वेन वक्तुं शक्यम्। किञ्च, आवारकस्य मूर्त्तत्वे कारणरूपस्य न कार्यस्य तदभ्यन्तरप्रवेशः मूर्त्तस्य मूर्त्तेन प्रतिघातात् अप्रतिघाते च यथा कार्ये कारणाभ्यन्तरप्रविष्टत्वात् तेन आवृतमिति नोपलभ्यते तथा कारणस्याप्यनुपलब्धिप्रसङ्गः अप्रतिघातेन तदनुप्रविष्टत्वाविशेषात्। अथ अन्धकारवत् तद्दर्शनप्रतिबन्धकत्वेन तद् आवारकम्; नन्वेवमदर्शनेऽपि तस्य स्पर्शोपलम्भप्रसङ्गः तस्याप्यभावे तस्याऽसत्त्वमिति तद् आवारकं तत्स्वरूपविनाशकं प्रसक्तम्। न च पटादेरिव घटादिकं प्रति कारणस्य कार्याऽऽवारकत्वमिति न स्पर्शोपलब्धिः, पटध्वंसे इव मृत्पिण्डध्वंसे तदावृतकार्योपलब्धिप्रसङ्गात् एकाभिव्यञ्जकव्यापारादेव सर्वाभिव्यङ्ग्योपलब्धिश्च भवेत् एकप्रदीपव्यापारात् तत्सन्निधानव्यवस्थितानेकघटादिवत्। किञ्च, कारणकाले कार्यस्य सत्त्वे स्वकाल इव कथमसौ तेनाव्रियते? नापि मृत्पिण्डकार्यतया पटादिवत् घटो व्यपदिश्येत, असत्त्वे च नावृतिः अविद्यमानत्वादेव। एकान्तसतः करणविरोधात् असदकरणादिभ्यो न सत्कार्यसिद्धिः। प्रतिक्षिप्तश्च प्रागेव सत्कार्यवाद इति न पुनरुच्यते।

[(२) सांख्यविशेषमतत्वेनोपन्यस्तस्य कारणात्मकपरिणामवादस्य निरसनम्]

अनर्थान्तरभूतपरिणामवादोऽपि प्रतिक्षिप्त एव। न हि अर्थान्तरपरिणामाभावे परिणाम्येव कारणलक्षणोऽर्थः, पूर्वापरयोरेकत्वविरोधात्। न च परिणामाभावे परिणामिनोऽपि भावो युक्तः परिणामनिबन्धनत्वात् परिणामित्वस्य। अभिन्नस्य हि पूर्वापरावस्थाहानोपादानात्मतया एकस्य वृत्तिलक्षणः परिणामो न युक्तियुक्तः। तन्नैकान्ताभेदे कारणमेवानर्थान्तरकार्यरूपतया परिणमत इति स्थितम्।

---

१ "यथाक्रमं योगः"-बृ० ल० मां० टि०। २ "समूहः"-मां० टि०। ३ परिणामः"-मां० टि०। ४ **तस्य परि**-प्र० मां० बहिः। ५ "कारणव्यापार"-बृ० ल० मां० टि०। ६-**व्यक्ताद्युत** बृ०। यथा 'तेऽत्र' 'क्वेऽत्र' इत्यादौ अकारलोपे तत्सूचकम् अवग्रहाभिधेयं चिह्नं विधीयते तथा पुरातनप्रतिषु 'व्यक्तौ उत' इत्यस्य संधौ 'व्यक्ताद्युत' इति निष्पन्ने 'द्यु' इत्यस्य शिरसि ७ इति चिह्नम् उकारसूचकं विहितं लिपिकारैः इति प्रदर्शनार्थमयं पाठो न्यस्तः नैतत् पाठान्तरम्। ७ "सदसत्व"(त्त्व) रूपपक्षद्वये-मां० टि०। ८ **कारणव्या**-बृ० ल० भां० हा० विना। ९ "ज्ञानावारकत्वेन"-मां० टि०। १० "कार्यदर्शन"-बृ० ल० मां० टि०। ११ "कारण"-मां० टि०। १२ "कार्यस्य"-मां० टि०। १३ तस्य "स्पर्शस्य"-मां० टि०। १४ तस्य "कार्यस्य"-मां० टि०। १५-**शकत्वं प्र**-बृ० ल० वा० बा० विना। १६ "कार्यरूपो भावः"-बृ० ल० टि०। "कार्यरूपोऽभावः"-मां० टि०। १७ तेन "कारणेन"-बृ० ल० मां० टि०। १८-**सत्कर**-आ० हा०।

१९ "असदऽकरणादुपादानग्रहणात् सर्वसंभवाभावात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥

साङ्ख्यसप्ततौ" (साङ्ख्यका० ९)-भां० मां० टि०। पृ० २८२ पं० १८।

२० पृ० २९६ पं० ८। २१-**क्षण प**-मां० आ० हा० वि०।

[(३) वैशेषिकाभिमतत्वेनोपन्यस्तस्यासत्कार्योत्पत्तिवादस्य निरसनम्]

मृत्पिण्डावस्थायां घटार्थक्रिया-गुणव्यपदेशाभावात् 'असदुत्पद्यते कार्यम्' इत्ययमप्येकान्तो मिथ्यावाद एव। कार्योत्पत्तिकाले कारणस्याविचलितरूपस्य कार्यादव्यतिरिक्तस्य सत्त्वे पूर्वोक्त-दोषप्रसङ्गात्। तद्व्यतिरिक्तस्य तस्य सद्भावे कारणस्य प्राक्तनस्वरूपेणैवावस्थितत्वात् अकारणा कार्योत्पत्तिर्भवेत् कारणस्य प्राक्तनाऽकरणस्वरूपापरित्यागात् परित्यागे वा कार्यकरणस्वरूपस्वीकारेण तस्यैवावस्थितत्वादनेकान्तसिद्धिः। व्यतिरेके च कारणात् कार्यस्य पृथगुपलम्भप्रसङ्गः। न च तदाश्रितत्वेन तस्योत्पत्तेर्न तत्प्रसङ्ग इति वक्तव्यम्, अवयविनः समवायस्य च निषेत्स्यमानत्वात् निषिद्धत्वाच्च।

[(४) बौद्धाभिमतत्वेनोपन्यस्तस्य 'कारणाद् भिन्नं कार्यं तत्रासदेव' इति वादस्य निरसनम्]

कारणाद् व्यतिरिक्तं तत्र असदेव कार्यमित्ययमपि पक्षो मिथ्यात्वमेव। तथाहि–एकान्ततो निवृत्ते कारणे कार्यमुत्पद्यत इत्यत्र कारणनिवृत्तिः सद्रूपा, असद्रूपा वेति वक्तव्यम्। सद्रूपत्वेऽपि न तावत् कारणस्वरूपा, कारणस्य नित्यत्वप्रसक्तेः निवृत्तिकालेऽपि कारणसद्भावात्। न चाविचलितस्वरूप-मृत्पिण्डसद्भावे घटोत्पत्तिर्दृष्टेति कार्यानुत्पत्तिप्रसक्तिश्च। नापि कार्यरूपा तन्निवृत्तिः कारणानिवृत्तौ कार्यस्यैवानुत्पत्तेः। एवं च कार्यानुत्पादकत्वेन कारणस्याप्यसत्त्वमेव। न च कार्योत्पत्तिरेव कारण-निवृत्तिरिति कारणानिवृत्तेर्न कार्योत्पत्तिरिति नायं दोषः, कार्यगतोत्पादस्य कारणगतविनाशरूपत्वा-योगात् भिन्नाधिकरणत्वात् कारणनिवृत्तेश्च कार्यरूपत्वे कारणं कार्यरूपेण परिणतमिति घटस्य मृत्स्वरूपवत् कपालेष्वप्युपलब्धिप्रसङ्गः। नाप्युभयरूपा तन्निवृत्तिः, कारणनिवृत्तिकाले कार्य–कारणयोर्युगपदुपलब्धिप्रसक्तेः। नाप्यनुभयस्वरूपा तन्निवृत्तिः, मृत्पिण्डविनाशकाले विवक्षितमृत्पिण्ड-घटव्यतिरिक्ताऽशेषजगदुत्पत्तिप्रसक्तेः। अथ असद्रूपा तन्निवृत्तिः तत्रापि यदि कारणाभावरूपा तदा कारणाभावात् कार्योत्पादप्रसक्तेर्निर्हेतुकः कार्योत्पाद इति देश-कालाऽऽकारनियमः कार्यस्य न स्यात् अभावाच्च कार्योत्पत्तौ विश्वमदरिद्रं भवेत्। नापि कार्याभावरूपा तन्निवृत्तिः कार्यानुत्पत्ति-प्रसङ्गात्। नाप्युभयाभावस्वभावा द्वयोरप्यनुपलब्धिप्रसक्तेः। नाप्यनुभयाभावरूपा विवक्षितकार-ण–कार्यव्यतिरेकेण सर्वस्यानुपलब्धिप्रसक्तेः कारणस्योपलब्धिप्रसक्तेश्च। कारणभावाभावरूपापि न तन्निवृत्तिः, कारणस्यानुगतव्यावृत्ततापसक्तेः। अत एव च सदसद्रूपं स्व-पररूपापेक्षया अनेकान्त-वादिभिर्वस्त्वभ्युपगम्यते। पररूपेणेव स्वरूपेणाप्यसत्त्वे वस्तुनो निःस्वभावताप्रसक्तेः। स्वरूपवत् पररूपेणापि सत्त्वे पररूपताप्रसक्तेः। एकरूपापेक्षयैव सदसत्त्वविरोधात् अन्यथा वस्त्वेव न भवेत्। नापि कार्यभावाभावरूपा, कार्यस्योत्पत्त्यनुत्पत्त्युभयरूपताप्रसक्तेः तथा च सिद्धसाध्यता केवलोभ-यपक्षोक्तदोषप्रसक्तिश्च। नापि कार्यकारणोभयभावाभावरूपा, प्रत्येकपक्षोदितसकलदोषप्रसक्तेः। पररूपरसव्यपेक्षकार्यकारणभावाभावरूपकारणनिवृत्त्यभ्युपगमेऽनेकान्तवादप्रसक्तिश्च। नाप्यनुभय-भावाभावरूपा अनुभयरूपस्य वस्तुनोऽभावात्। न च तन्निवृत्तेः सत्त्वम् एकान्तभावाभावयोर्वि-रोधात्। अनुभयभावाभावरूपत्वे तु तस्याः कारणस्याऽप्रच्युतत्वात् तथैवोपलब्धिप्रसङ्गः। अपि च, कारणनिवृत्तिस्तत्स्वरूपाद् भिन्ना, अभिन्ना वा? यद्यभिन्ना, निवृत्तिकालेऽपि कारणस्योपलब्धि-प्रसङ्गः तन्निवृत्तेः कारणात्मकत्वात् स्वकालेऽपि वा कारणस्योपलब्धिर्न स्यात् तस्य तन्निवृत्तिरूप-त्वात्। भिन्ना चेत् 'कारणस्य निवृत्तिः' इति सम्बन्धाभावात् अभिधानानुपपत्तिः। सङ्केतवशात् अभिधानप्रवृत्तावपि आधेयनिवृत्तिकाले अधिकरणस्य सत्त्वम् असत्त्वं वेति वक्तव्यम्। सत्त्वे कार-णविनाशानुपपत्तिः आधेयनिवृत्त्या कारणस्वरूपस्याऽऽधारस्याऽविरोधात् विरोधे वा कारण-तन्निवृ-

---

१ घटाद्यर्थ–मां० आ० वि०। २–रणे का–बृ० ल० वा० बा० विना।–रणका–भां०। ३–नाकारण–मां०। ४ कार्यकार–वा० बा० मां०। ५ "पृथगुपलम्भः"–मां० टि०। ६ पृ० १०६ पं० ९। ७–पाले-ष्वपल–बृ० ल०।–पालेष्टपल–वा० बा०। ८ "घटस्यानिवृत्तेः"–मां० टि०। ९ प्र० पृ० पं० १३ तथा पं० २१। १० प्र० पृ० पं० १७ तथा २२। ११–गमे। ने–बृ०। १२ तस्य का–बृ०। ल० सं०। १३ "कारण"स्वरूपात्–बृ० ल० टि०। १४ "आधेया चासौ निवृत्तिश्च"–मां०टि०।

त्योर्योगपद्यासम्भवात् असत्त्वेऽप्यधिकरणत्वविरोधः असतोऽधिकरणत्वायोगात् तस्य वस्तुधर्म-त्वात्। अथ कारणं निवृत्तेर्नाधिकरणम् अपि तु तद्धेतुः, न; निवृत्तेरुत्तरकार्यवत् तत्कार्यत्वप्रसङ्गात् तदनभ्युपगमे कारणस्य तद्धेतुत्वप्रतिज्ञाहानिः अकार्यस्य तद्धेतुत्वविरोधात् अविरोधे वन्ध्याया अपि सुतं प्रति हेतुत्वप्रसक्तेः। न च कारणाहेतुकैव कारणनिवृत्तिः, कारणानन्तरभावित्वविरोधात्। न च कारणहेतुका तन्निवृत्तिः, कारणसमानकालं तदुत्पत्तिप्रसङ्गतः प्रथमक्षण एव कारणस्यानुपलब्धि-प्रसक्तेः उपलम्भे वा न कदाचित् कारणस्यानुपलब्धिर्भवेत् तन्निवृत्त्याऽविरुद्धत्वात्। न च कारणनिवृत्तिः स्वहेतुका, स्वात्मनि क्रियाविरोधात्। न च निर्हेतुकैव कारणानन्तरमेव तस्या भाव-विरोधात् अहेतोर्देशादिनियमाभावात्।

अथ न कारणं निवृत्तेर्हेतुः अधिकरणं वा किन्तु स्वयमेव न भवति, नन्वत्रापि किं स्वसत्ता-समय एव स्वयं न भवति, आहोस्विदुत्तरकालमिति विकल्पद्वयानतिक्रान्तिः। यदि प्राक्तनविकल्पस्तदा कारणानुत्पत्तिप्रसङ्गः प्रथमक्षण एव निवृत्त्याऽऽक्रान्तत्वात् उत्पत्त्यभावे न निवृत्तिरपि अनुत्पन्नस्य विनाशासम्भवात्। नापि द्वितीयः तदा निवृत्तिभवने उत्पन्नाऽनुत्पन्नतया कारणस्वरूपाऽभवनयो-स्तादात्म्यविरोधात् यदि हि स्वसत्ताकाल एव न भवेत् तदा भवनाऽभवनयोरविरोधात् "स्वयमेव भावो न भवेत्" [ ] इति वचो घटेत नान्यथा। न च जन्मानन्तरं भावा-भावस्य भावात्मकत्वात् तदव्यतिरिक्त एवाभावः नन्वेवमपि जन्मानन्तरं 'स एव न भवति' इत्यनेन अभावस्य भावरूपतैवोक्तेत्युत्तरकालमपि कारणानिवृत्तेस्तथैवोपलब्ध्यादिप्रसङ्गः। भावस्य अभावा-त्मकत्वान्नायं दोष इति चेत्, न; अत्रापि पर्युदासाभावात्मकत्वं भावस्य, प्रसज्यरूपाभावात्मकत्वं वा? प्रथमपक्षे स्वरूपपरिहारेण तदात्मकतां प्रतिपद्यते, अपरिहारेण वा? प्रथमपक्षे स्वभवन-प्रतिषेधपर्यवसानत्वान्न पर्युदासाभावात्मको भावो भवेत्। न चासौ तथा तद्ग्राहकप्रमाणा-भावात् तथाभूतभावग्राहकप्रमाणाभ्युपगमे च प्रसज्यपर्युदासात्मको भावो भवेदित्यनेकान्त-प्रसिद्धिः। द्वितीयपक्षेऽपि न पर्युदासः अनिषिद्धतत्स्वरूपत्वात् पूर्वभावस्वरूपवत्। प्रसज्यरूपा-भावात्मकत्वेऽपि भावस्य प्रतिषिध्यमानस्याश्रयो वक्तव्यः न तावत् मृत्पिण्डलक्षणं कारणमाश्रयः तस्य प्रतिषिध्यमानत्वात् निषिध्यमानस्य चाश्रयत्वानुपपत्तेः। नापि घटलक्षणं कार्यमाश्रयः, कारणनिवृत्तेर्हि प्रागू घटस्यासत्त्वेन 'अयम्' इतिप्रत्ययाविषयत्वात् 'अयं'प्रत्ययविषयत्वे च 'अयं ब्राह्मणो न भवति' 'ब्राह्मणादन्योऽयम्' इति च प्रसज्यपर्युदासव्यवहारो दृष्टः नान्यथेति प्रतिषेध-प्रधानविध्युपसर्जनविधिप्रधानप्रतिषेधोपसर्जनयोः शब्दयोः प्रवृत्तिनिमित्तधर्मद्वयाधारभूतं द्रव्यं विषयत्वेनाभ्युपगन्तव्यमन्यथा तदयोगात्। तथा चानेकान्तवादापत्तिरयत्नसिद्धेति तथाभूतस्य तस्य वस्तुनः प्रमाणबलायातस्य निषेद्धुमशक्यत्वात्। एकान्तेन घटस्योत्पत्तेः प्रागस्तित्वे क्रियायाः प्रवृत्त्यभावः फलसद्भावात् तत्सद्भावेऽपि प्रवृत्तावनवस्थाप्रसक्तेः। कारणेऽप्येतदविशेषतस्तद्वत् प्रसङ्गे द्वयोरप्यभावप्रसङ्गः। न चैतदस्ति तथाऽप्रतीतेः। तन्न मृत्पिण्डे घटस्य सत्त्वम्।

नाप्येकान्ततोऽसत्त्वम्, मृत्पिण्डस्यैव कथञ्चित् घटरूपतया परिणतेः। सर्वात्मना पिण्डनि-वृत्तौ पूर्वोक्तदोषानतिवृत्तेः घटसदसत्त्वयोराधारभूतमेकं द्रव्यं मृल्लक्षणमेकाकारतया मृत्पिण्ड-घटयोः प्रतीयमानमभ्युपगन्तव्यम्। न च कारणप्रवृत्तिकाले कारणगता मृद्रूपता तन्निवृत्तिकाले च कार्यगता सापरैव नोभयत्र मृद्रूपताया एकत्वम्, भेदप्रतिपत्तावपि मृत्पिण्ड–घटरूपतया कथञ्चिदेकत्वस्याबाधितप्रत्ययगोचरत्वात् उपलभ्यत एव हि कुम्भकारव्यापारसव्यपेक्षं मृद्द्रव्यं

---

१ "कार्यत्ववत्"–बृ० टि०। २ "कार्यत्वा"भ्युपगमे–बृ० टि०। ३ च कारण कारण हे–बृ० भां० मां०। च कारणहे–बृ० सं०। ४ घटते भां० मां०। घटेत प्र० मां० बहिः। ५ जन्मान्तरं मां०। जन्मा-नन्तरं प्र० मां० बहिः। ६ "भावा"व्यतिरिक्तः–बृ० ल० मां० टि०। ७–रण नि–मां०।–रणानि–प्र० मां० बहिः। ८ "पर्युदासात्मको(ऽ)भावः"–बृ० ल० टि०। "पर्युदासात्मकोऽभावः"–मां० टि०। ९ तथा "स्वरूपपरि-हाररूपतया"–बृ० ल० मां० टि०। १०–पगमे वा प्र–बृ० ल० वा० बा०। ११–त्मकेऽपि–मां०। १२–क्षण का–आ०। १३–स्य वस्तु–वा० बा० आ०। १४–कान्तघट–आ०। १५ "सत्त्वा"विशेषात्–बृ० ल० मां० टि०। १६ "कार्यवत्"–बृ० ल० मां० टि०। १७ प्रसङ्गेन द्व–आ०। "क्रियायाः" प्रसङ्गे–बृ० ल० मां० टि०। १८ "कारण–कार्ययोः"–बृ० ल० मां० टि०। १९ चैवत–आ०। २० कारणनिवृ–प्र० मां० बहिः।

पिण्डाकारपरित्यागेन शिबिकाद्याकारतया परिणममानम् नहि तत्र 'इदं कार्यमाधेयभूतं भिन्नमुपजातं पङ्के पङ्कजवत्' इति प्रतिपत्तिः । नापि तत्करणनिर्वर्त्यतया दण्डोत्पादितघटवत् । नापि तत्कर्तृतया कुविन्दव्यापारसमासादितात्मलाभपटवत् । नापि तदुपादानतया आम्रवृक्षोत्पादिताम्रफलवत् । तस्मात् पूर्वपर्यायविनाश उत्तरपर्यायोत्पादात्मकः, तदेशकालत्वात्, उत्पादात्मवत् । अभावरूपत्वाद्वा प्रदेशस्वरूपघटाद्यभाववत् । प्रागभावाभावरूपत्वाद्वा घटस्वात्मवत् एवमनभ्युपगमे पूर्वपर्यायस्य ध्वंसात् उत्तरस्य चानुत्पत्तेः शून्यताप्रसक्तिः । उत्तरपर्यायोत्पादाभ्युपगमे वा तदुत्पादः पूर्वपर्यायप्रध्वंसात्मकः प्रागभावाभावरूपत्वात् प्रध्वंसाभावाभाववत् । न च प्राक्तनपर्यायविनाशात्मकत्वे उत्तरपर्यायभवनस्य तद्विनाशे पूर्वपर्यायस्योन्मज्जनप्रसक्तिः अभावाभावमात्रत्वानभ्युपगमाद् वस्तुनः तस्य प्रतिनियतपरिणतिरूपत्वात् । भावाभावोभयरूपतया प्रतिनियतस्य वस्तुनः प्रादुर्भावे मुद्गरादिव्यापारानन्तरमुपलभ्यमानस्य कपालादेरभावस्य नाहेतुकता । न चोभयस्यैकव्यापारादुत्पत्तिविरोधः तथाप्रतीयमाने विरोधासिद्धेः । ततस्तद्विपरीत एव विरोधसिद्धेरुभयैकान्ते प्रमाणानवतारात् । तथात्मकैकत्वेन प्रतीयमानं प्रति हेतोर्जनकत्वविरोधे घटक्षणसत्तायाः स्व–परविनाशोत्पादकत्वं विरुध्येत, एवं चाकारणा घटक्षणान्तरोत्पत्तिर्भवेत् । न च विनाशस्य प्रसज्य–पर्युदासपक्षद्वयेऽपि व्यतिरिक्ताऽव्यतिरिक्तादिविकल्पतो हेत्वयोगान्निर्हेतुकता युक्ताः, सत्ताहेतुत्वेऽपि तथाविकल्पनस्य समानत्वेन प्राक् प्रदर्शितत्वात् ।

यदपि 'विनाशस्य निर्हेतुकत्वात् स्वभावादनुबन्धितेति निरन्वयक्षणक्षयिता भावस्येति नान्वयः,' तदप्यसङ्गतम्; विनाशहेतोर्मुद्गरादेर्घटादिनाशस्य प्रत्यक्षसिद्धत्वात् । न ह्यध्यक्षसिद्धे वस्तुन्यनुमानं विपरीतधर्मोपस्थापकत्वेन प्रामाण्यमात्मसात्करोति । यदपि 'विनाशं प्रति तद्धेतोरसामर्थ्यात् क्रियाप्रतिषेधाच्च स्वरसवृत्तिर्विनाश इति नान्वयः,' तदप्यसङ्गतम्; विनाशहेतोर्भावाभावीकरणसामर्थ्यात् । यथा हि भावहेतुर्भावीकरोति, अन्यथा स्वयमेव नाशेऽपि भावानां द्वितीयक्षणे 'स्वयमेवभावो भावी भवति' इति भवेत् । यथा हि निष्पन्नस्य भावस्य नाभावो नाम कश्चित् तत्सम्बन्धी यद्यन्योऽभावो भवेत् निष्पन्नस्य भावस्य तदा तेन तस्य सम्बन्धासिद्धेः पूर्ववद् दर्शनप्रसङ्ग इति 'स्वयमेव भावो न भवति' इत्यभिधीयते तथा न निष्पन्नस्य भावस्य भावो नामान्यः कश्चित् तेन तस्य सम्बन्धासिद्धेर्न भावस्य सत्ता भवेदिति 'स्वयमेव हेतुनिरपेक्षो भावो भवति' इत्येतदपि वक्तव्यम् । यदि पुनस्तत्र न किञ्चिद् भवतीति क्रियाप्रतिषेधमात्रमिति न हेतुव्यापारः कथं तर्हि तदवस्थस्य भावस्य दर्शनादिक्रिया न भवेदिति वक्तव्यम्? स एव न भवतीति चेत्, तर्हि तस्यैवाभवनं करोति विनाशहेतुरित्यभ्युपगन्तव्यमिति तद्धेतूनामकिञ्चित्करतयाऽनपेक्षणीयत्वमनुपपन्नम् । अत एवापेक्षणीयत्वोपपत्तिर्भावस्यान्यथाकरणात् कथञ्चिदन्यथा सहानवस्थानलक्षणविरोधासिद्धेः प्रतिनियतव्यवहारोच्छेदप्रसक्तिः । अपि च, यदि नाम स एव न भवति तथापि प्रध्वंसाभावः प्रागभावाभावात्मक उत्तरकार्यवदभ्युपगन्तव्यः तस्यापि तदनन्तरमुपलम्भात् । एतावान् विशेषः—विनाशप्रतिपादनाभिप्राये सति तत्प्राधान्येतरोपसर्जनविवक्षायाम् 'विनष्टो भावः' इति प्रयुज्यते प्रतिपत्तिरपि तथैव, विनाशोपसर्जनेतरप्राधान्यविवक्षायाम् 'उत्पन्नानि कपालानि' इति प्रयुज्यते प्रतिपत्तिरपि तथैव । परमार्थतस्तु उभयमप्युभयात्मकम् अन्यथा पूर्वोक्तदोषानतिवृत्तेः । न च कारणस्य निरन्वयविनाशे कार्यस्यादलस्यात्यन्तासत उत्पत्तिर्घटते, विनष्टस्य सकलशक्तिविरहिणः कारणस्य कार्यक्रियायोगात् अविनष्टस्य स्वसत्ताकाले कार्यनिर्वर्त्तने हेतु–फलयोः सहभाव इति तद्व्यपदेशः सव्येतरगोविषाणयोरिव न भवेत् । स्वकाले पश्चात् कार्यस्य भावे तदा कारणस्य स्वसत्तामत्यजतः क्षणक्षयपरिक्षयोऽनिष्टोऽनुषज्यते ।

---

१ शिबिका–भां० मां० । २ "साध्यं त्रिष्वपि एकमेव"–बृ० ल० मां० टि० । ३–**साभाववत्** । आ० । ४ "यथाक्रमम्"–बृ० ल० मां० टि० । ५–**रुध्यते** भां० मां० । ६ **एवं वा**–आ० । ७ **स्वभावहेतुबन्धितेति** मां० । **स्वभावानुबन्धितेति** वा० बा० । ८ **नाशोऽपि** मां० आ० । ९–**यमेवा भा**–वा० बा० । १०–**द्यन्यो भा**–आ० । ११–**सङ्गत इ**–आ० । १२–**पत्तिभा**–बृ० । वा० सं० । १३–**धासिद्धिः प्र**–वा० बा० । १४ "प्रध्वंसाभावस्य"–बृ० ल० टि० । १५ "प्रागभावा"नन्तरम्–बृ० ल० टि० । १६–**क्रियायो**–ल० आ० । १७–**निर्वर्तनो हे**–वा० बा० ।–**निवर्तने** ल० आ० ।

किञ्च, कारणसत्तासमये कार्यस्याभवतः स्वयमेव पश्चाद् भवतः तदकार्यत्वप्रसक्तिश्च । तथाहि–यस्मिन् सति यन्न भवति असति च भवति तत् तस्य न कार्यम् इतरच्च न कारणम्, यथा कुलालस्य पटादिः । क्षणक्षयपक्षे च प्रथमक्षणे कारणाभिमतभावसद्भावे न भवति कार्यम् असति तस्मिन् द्वितीयक्षणे भवति चेति नै तत् तत्कार्यं इतरच्च तत्कारणमिति हेतुफलभावाऽभावस्य तन्मात्रनिबन्धनत्वात् । अत एव क्षणिकाद् अर्थक्रिया व्यावर्त्तमानाऽ स्वं व्याप्यं सत्त्वलक्षणमादाय निवर्त्तत इति यत्र सत्त्वं तत्राऽक्षणिकत्वं सिद्धिमासादयति । न च कार्यकालेऽभवतोऽपि कारणस्य प्राक्तनानन्तरक्षणभावित्वात् कारणत्वम् कार्यकाले स्वयमेवाभवतोऽकारणान्तरवत् कारणत्वायोगात् कार्यस्य च कारणकाले आत्मनैवाऽभवतः कार्यान्तरवत् तत्कार्यत्वानुपपत्तेः । क्षणिकस्य च प्रमाणाविषयत्वान्न तत्र कार्यकारणभावपरिकल्पना युक्तिसङ्गता । न चानुपलब्धेऽपि तत्र कार्यकारणभावव्यवस्था अतिप्रसङ्गात् । न च क्षणक्षयमीक्षमाणोऽपि सदृशापरापरोत्पत्त्यादिविभ्रमनिमित्ताद् नोपलक्षयतीति वक्तव्यम् यतो नाध्यक्षात् क्षणक्षयमलक्षयंस्तत्र कार्यकारणभावं व्यवस्थापयितुं शक्नोति, नाप्यनुमानात् क्षणिकत्वं व्यवस्थापयितुं समर्थः, तस्य स्वांशमात्रावलम्बितया वस्तुविषयत्वायोगात् । न च मिथ्याविकल्पेनाध्यवसितं क्षणिकत्वं वस्तुतो व्यवस्थापितं भवति ।

यदपि 'अक्षणिके क्रम–यौगपद्याभ्यामर्थक्रियाविरोधात्' इत्याद्युक्तम्, तदपि सहकारिसन्निधानवशादक्षणिकस्य क्रमेणार्थक्रियां निर्वर्त्तयतोऽयुक्तमेव । यदप्युक्तम् 'तत्करणस्वभावश्चेदक्षणिकः प्रागेव तत्करणप्रसङ्गः पश्चादिव स्वभावाविशेषात्' इति, तदप्ययुक्तम्; यतो नै वै किञ्चिदेकं जनकम् सामग्रीतः फलोत्पत्तेः । अक्षणिकश्च सामग्रीसन्निधानापेक्षया कार्यनिर्वर्त्तनस्वभावः केवलस्तु तदकरणस्वभावः । न च तदा भाविकार्याकरणादवस्तुत्वम्, क्षणिकेऽपि प्रथमक्षणे कार्याकरणादवस्तुत्वप्रसक्तेः । अत एकत्र कारणान्तरापेक्षानपेक्षाभ्यां जनकत्वाजनकत्वे अविरुद्धे यतः न क्षणिकैकाद्यभ्युपगतक्षणस्यापि सम्बन्ध्यन्तरसन्निधानासन्निधानकृतः स्वभावभेदः अन्यथा अनेकसामग्रीसन्निपातिन एकक्षणस्यैकदा विलक्षणानेककार्योत्पादनेऽनेकत्वप्रसक्तिर्भवेत् दृश्यते च प्रदीपक्षणस्य समानजातीयक्षणान्तरकज्जलचक्षुर्विज्ञानाद्यनेककार्यनिर्वर्त्तकत्वमेकस्य नानासामग्र्युपनिपातिन इति क्रमेणाप्यक्षणिकस्य तदविरुद्धम् । यथा चैकक्षणस्य स्वपरकार्यापेक्षयैकदा जनकत्वाजनकत्वे अविरुद्धे तथा अक्षणिकस्यापि सहकारिकारणसन्निधानाऽसन्निधानाभ्यां क्रमेण कार्यजनकत्वाजनकत्वे न विरोत्स्येते ।

विज्ञप्तिपरमाणुपक्षेऽपि यथैको ज्ञानपरमाणुः सम्बन्ध्यन्तरजनितस्वभावभेदेऽप्यभिन्नः अन्यथा दिक्षट्कयोगात् सावयवत्वकल्पनया अवस्तुत्वप्रसक्तेः सेना–वनादिवत् स्वसंविदि निर्विकल्पिकायामप्रतिभासतः सर्वप्रतिभासविरतिर्भवेत् एवमक्षणिकोऽपि क्रमभाव्यनेकतत्तत्सहकारिसम्बन्धान्तरसव्यपेक्षकार्यजननस्वभावभेदेऽप्यभिन्नोऽभ्युपगन्तव्यः जनकत्वाजनकत्वभेदेऽपि वाऽभिन्नस्वभावे इति नाक्षणिकेऽर्थक्रियाविरोधः । न च क्षणक्षये अध्यक्षप्रवृत्तिव्यतिरेकेण अक्षणिके अर्थक्रियाविरोधः सिध्यति इतरेतराश्रयप्रसक्तेः—तथाहि—अक्षणिकत्वे अर्थक्रियाविरोधात् प्रतिक्षणविशरारुषु अध्यक्षप्र-

---

१–**श्राद्भाव**–बृ० । "सत्यभवतः स्वयमेव नियमेन पश्चाद् भवतस्तत्कार्यत्वं विरुद्धम्" सति "कारणत्वेनाभिमते पूर्वक्षणे" अभवतः "उत्तरक्षणलक्षणकार्यस्य" स्वयमेव "पूर्वक्षणरूपकारणमन्तरेण" तत्कार्यत्वम् "पूर्वक्षणकार्यत्वम्" अष्टश० तथा टि०अं० २–३–४–५ अष्टस० पृ० ९० पं० १ । २ **न तत्का**–भां० मां० आ० । ३–**ना स्वभा**–वा० बा० आ० । ४ **व्याप्य स**–भां० मां० । ५–**वतो का**–वा० बा० भां० मां० आ० । ६ "अनुमानस्य" बृ० ल० टि० । ७–**कल्पना**–आ० । ८–**स्तुनो व्य**–वा० बा० भां० मां० विना ।

९ "यथोक्तम्—

"न किञ्चिदेकमेकस्मात् सामर्थ्याः सर्वसंभवः"—तत्त्वसं० पञ्जि० पृ० १५५ पं० १४ ।

१०–**कत्वाद्य**–वा० बा० ।–**कत्वाद्य**–आ० । ११–**कत्वाप्र**–ल० भां० मां० ।–**कत्वप्र**–प्र० मां० बहिः । १२–**नादने**–भां० मां० ।–**नाद्यने**–प्र० मां० बहिः । १३ **विरात्स्येते** आ० । **विरात्स्यते** वा० बा० । १४–**स्म्बन्धान्त**–आ० । १५–**त्वभेदेऽप्यभिन्न**–आ० ।–**त्वभेदेऽपि वा अभ्युपगन्तव्य भिन्न**–भां० मां० । १६ "अभ्युपगन्तव्यः" इति शेषः–मां० टि० ।

वृत्तिसिद्धिः तस्याश्च अक्षणिके अर्थक्रियाविरोधसिद्धिरिति । न च अक्षणिकवादमतेऽप्ययं समानो दोषः, कालान्तरस्थायिनि भावेऽध्यक्षप्रवृत्तिनिश्चयादेव क्षणिकत्वेऽर्थक्रियाविरोधस्य सिद्धेः । न च क्षणिके अध्यक्षप्रवृत्तिरुपजातैव केवलं भ्रान्तिकारणसद्भावान्न निश्चितेति वक्तव्यम् विहितोत्तरत्वात् । तन्नैकान्तक्षणिकस्य अर्थक्रियाकरणलक्षणं सत्त्वम् अन्यस्य च सत्तासम्बन्धादेः सत्त्वस्य परेणानभ्युपगमात् असन्त एकान्तक्षणिकाः । क्षणिकवद् एकान्ताक्षणिकेष्वप्यर्थक्रियालक्षणं सत्त्वं पूर्वोपदर्शितन्यायेन व्यावृत्तम् सत्तासम्बन्धलक्षणस्य च सत्त्वस्यातिव्याप्तित्वाऽसम्भवादिदोषदुष्टत्वात् असत्त्वमित्येकान्ताऽक्षणिका अप्यसन्तो भावा इत्युत्पाद–व्यय–ध्रौव्यलक्षणमेव भावानां सत्त्वमभ्युपगन्तव्यमिति नैकान्ततः कारणेषु कार्यमसदिति न तत् इति पक्षो मिथ्यात्वमिति स्थितम् ।

[(५) अपराभिमतत्वेनोपन्यस्ते अद्वैतवादे निरसनीये सर्वेषां तत्त्व–द्रव्य–प्रधान–शब्द–ब्रह्माद्वैतवादानां निरसनम्]

अपरस्तु कार्यकारणभावस्य कल्पनाशिल्पिविरचितत्वात् तदुभयव्यतिरिक्तमद्वैतमात्रं तत्त्वमित्यभ्युपपन्नः तन्मतमपि मिथ्या कार्यकारणोभयशून्यत्वात् खरविषाणवत् अद्वैतमात्रस्य व्योमोत्पलतुल्यत्वात् । तथाहि—अद्वैतप्रतिपादकप्रमाणस्य सद्भावे द्वैतापत्तितो नाद्वैतम्, प्रमाणाभावे अद्वैतासिद्धिः प्रमेयसिद्धेः प्रमाणनिबन्धनत्वात् । किञ्च, 'अद्वैतम्' इत्यत्र प्रसज्यप्रतिषेधः, पर्युदासो वा? प्रसज्यपक्षे प्रतिषेधमात्रपर्यवसानत्वात् तस्य नाद्वैतसिद्धिः, प्रधानोपसर्जनभावेनाङ्गाङ्गिभावकल्पनायां द्वैतप्रसक्तिः । द्वितीयपक्षेऽपि द्वैतप्रसक्तिरेव प्रमाणान्तरप्रतिपन्ने द्वैतलक्षणे वस्तुनि तत्प्रतिषेधेनाद्वैतसिद्धिः । द्वैताद्द्वैतस्य व्यतिरेके च द्वैतप्रसक्तिरेव पररूपव्यावृत्तस्वरूपाऽव्यावृत्तात्मकत्वेन तस्य द्विरूपताप्रसक्तेः अव्यतिरेके पुनर्द्वैतप्रसक्तिः । न चाद्वैतस्य अविद्यमानाद् द्वैताद् व्यावृत्ततासम्भवः अविद्यमानस्यापि विद्यमानाद् व्यावृत्तिप्रसक्तेः अन्यथा सद्रूपताविशेषप्रसक्तिर्भवेत् । प्रमाणादिचतुष्टयसद्भावे च न द्वैतवादान्मुक्तिः तदभावे शून्यतावादादिति नाद्वैतकल्पना ज्यायसी । न च नित्यत्वाद्वैतकल्पना भावानामनेकत्वेऽपि युक्तिसङ्गता, सर्वदा सर्वभावानां नित्यत्वे ग्राह्यग्राहकरूपताऽभावप्रसक्तेः तद्भावाभ्युपगमे वा अनेकान्तवादाश्रयणम् ग्राह्यग्राहकरूपतायाविकारिताव्यतिरेकेणायोगात् सा च कथञ्चिदेकस्यानेकरूपानुषङ्गादिति कथं नानेकान्तसिद्धिः?

द्रव्याद्वैतवादे रूपादिभेदाभावप्रसङ्गश्च । न च चक्षुरादिसम्बन्धात् तदेव द्रव्यं रूपादिप्रतिपत्तिजनकम् सर्वात्मना तत्सम्बन्धस्य तथैव प्रतीतिप्रसक्तेः रूपान्तरस्य तद्व्यतिरिक्तस्य तत्राभावात् । तन्न द्रव्याद्वैतमपि ।

प्रधानाद्वैतं त्वयुक्तमेव सत्त्वादिव्यतिरेकेण तस्याभावात् । न च सत्त्वादेस्तद्व्यतिरेकादद्वैतं प्रधानस्य, सत्त्वाद्यव्यतिरेकात् द्वैतप्रसक्तेः महदादिविकारस्य चाभ्युपगमे कथमद्वैतम्? विकारस्य च विकारिणोऽत्यन्तमभेदे 'न विकारी' इति प्रतिपादितम् । भेदाभेदे अनेकान्तसिद्धिः व्यतिरेके द्वैतापत्तिरिति । प्रतिक्षिप्तश्च प्रधानाद्वैतवाद इति न पुनः प्रतिषिध्यते ।

शब्दाद्वैतं तु नामनिक्षेपावसरे प्रतिक्षिप्तमिति न तदभ्युपगमोऽपि श्रेयान् ।

ब्रह्माद्वैतवादस्यापि प्रागेव प्रतिषेधः कृत इति तदेव वा इति अयमपि पक्षो मिथ्यात्वम् । ततः कारणे परिणामिनि वा कार्यम् परिणामो वा सदेव तावेव तावसदेव वा तत् तत्रेति न कारणमेव

१–या विरोधस्य सिद्धेर्न बृ० ल० । २–क्षवृ–भां० मां० विना । ३ पृ० ४२७ पं० १० । ४ पृ० ४२२ गा० २७ ।

५ "हेतोरद्वैतसिद्धिश्चेत् द्वैतं स्याद् हेतु–साध्ययोः । हेतुना चेद् विना सिद्धिर्द्वैतं वाङ्मात्रतो न किम्" ॥२६॥ –आप्तमी० पृ० १८, अष्टस० पृ० १६० ।

६–तमिति प्र–आ० ।

"अद्वैतं न विना द्वैताद् अहेतुरिव हेतुना । संज्ञिनः प्रतिषेधो न प्रतिषेध्याद् ऋते क्वचित्" ॥ २७ ॥ –आप्तमी० पृ० १८, अष्टस० पृ० १६१ ।

७–रूपिता–भां० मां० आ० ।–रूपता प्र० मां० बहिः० । ८ तस्यापि विद्यमानत्वाद् द्वै–भां० मां० आ० । ९ "प्रमेय–प्रमातृ–प्रमिति" प्रभृति–मां० टि० । १० पृ० ४२२ गा० २७ । ११ सदेता–आ० ।

कार्यम् परिणामी वा परिणामः । न कार्यम् नापि कारणम् अपि तु द्रव्यमात्रं तत्त्वमिति तदेव वेति नियमेन एकान्ताभ्युपगमे सर्वे एवैते मिथ्यावादा उक्तन्यायेन **नियमेन मिथ्यात्वम्** इत्यभिधानात् कथञ्चिदभ्युपगमे सम्यग्वादा एवैते इत्युक्तं भवति यत उत्पाद–व्यय–ध्रौव्यात्मकत्वे वस्तुनः स्थिते तद् वस्तु तत्तदपेक्षया कार्यम् अकार्यं च, कारणम् अकारणं च, कारणे कार्यं सच्च असच्च, कारणं कार्यकाले विनाशवत् अविनाशवच्च तथैव प्रतीतेरन्यथा चाऽप्रतीतेः ॥ २७ ॥

[स्वे स्वेऽंशे सत्यानामपि नयानां परांशविचालने मिथ्यात्वात् समयज्ञः सापेक्षावधारणं करोतीति वर्णनम्]

अत एकान्तरूपस्य वस्तुनोऽभावात् सर्वेऽपि नयाः स्वविषयपरिच्छेदसमर्था अपि इतरनयविषयव्यवच्छेदेन स्वविषये वर्त्तमाना मिथ्यात्वं प्रतिपद्यन्त इत्युपसंहरन्नाह—

णियय्वयणिज्जसच्चा सव्वनया परवियालणे मोहा ।
ते उण ण दिट्ठसमओ विभयइ सच्चे व अलिए वा ॥ २८ ॥

निजकवचनीये स्वांशे परिच्छेद्ये **सत्याः** सम्यग्ज्ञानरूपाः **सर्व एव नयाः** संग्रहादयः **परविचालने** परविषयोत्खनने **मोहाः** मुह्यन्तीति मोहा मिथ्याप्रत्ययाः परविषयस्यापि सत्यत्वेनोन्मूलयितुमशक्यत्वात् तदभावे स्वविषयस्याप्यव्यवस्थितेः ततश्च परविषयस्याभावे स्वविषयस्याप्यसत्त्वात् तत्प्रत्ययस्य मिथ्यात्वमेव तद्व्यतिरिक्तग्राहकप्रमाणस्य चाभावात् तस्मात् **तानेव** नयान् **पुनः** शब्दस्यावधारणार्थत्वात् **न** इति प्रतिषेधो विभजनक्रियायाः **दृष्टः समयः** सिद्धान्तवाक्यमनेकान्तात्मकं वस्तुतत्त्वं येन पुंसा स तथा स न **विभजते सत्येतरतया**–स्वेतरविषयमवधारयमाणोऽपि तथा तान् न विभजते अपि त्वितरनयविषयसव्यपेक्षमेव स्वनयाभिप्रेतं विषयं सत्यमेवावधारयतीति यावत् । 'ग्राह्यसत्यासत्याभ्यां ग्राहकसत्यासत्ये' इत्येवमभिधानम् तच्च दृष्टाऽनेकान्ततत्त्वस्य विभजनम् 'स्यादस्त्येव द्रव्यार्थतः' इत्येवंरूपम् ॥ २८ ॥

[सर्वस्यापि वस्तुनोऽभेदरूपेण द्रव्यार्थिकपरिच्छेद्यस्यैव भेदरूपेण पुनः पर्यायार्थिकपरिच्छेद्यत्वाभिधानम्]

अतो नय–प्रमाणात्मकैकरूपताव्यवस्थितमात्मस्वरूपम् अनुगतव्यावृत्तात्मकम् उत्सर्गापवादरूपग्राह्यग्राहकात्मकत्वाद् व्यवतिष्ठत इत्यर्थप्रदर्शनायाह—

दव्वट्ठियवत्तव्वं सव्वं सव्वेण णिच्चमवियप्पं ।
आरद्धो य विभागो पज्जववत्तव्वमग्गो य ॥ २९ ॥

यत् किञ्चिद् **द्रव्यार्थिकस्य** संग्रहादेः सदादिरूपेण व्यवस्थितं वस्तु **वक्तव्यं** परिच्छेद्यं तत् **सर्वं सर्वेण** प्रकारेण **नित्यं** सर्वकालम् **अविकल्पं** निर्भेदम् सर्वस्य सदसद्विशेषात्मकत्वात् तच्च भेदेन सम्पृक्तमिति दर्शयितुमाह—**आरब्धश्च विभागः** स एवाविभागः सत्तारूपो यो द्रव्यादिनाऽऽकारेण, प्रस्तुतश्च भेदः चशब्दस्य प्रक्रान्ताऽविभागानुकर्षणार्थत्वात् **पर्यायवक्तव्यमार्गश्च** पर्यायास्तिकस्य यद् वक्तव्यं विशेषः तस्य मार्गः पन्था जातः—पर्यायार्थिकपरिच्छेद्यस्वभावो विशेषः सम्पन्न इति यावत् ॥ २९ ॥

---

१ सन् वि–ल० भां० मां० । २ "स्वेतरविषयतया"–मां० टि० । ३–व त्वनया–बृ० वा० बा० । –व त्वन्यनया–बृ० सं० । प्र० मां० बहिः । ४ सत्ये असत्ये वा अवधारयतीति प्र० मां० बहिः ।

[शब्दार्थगतत्वेन पर्यायस्य द्वैविध्यं प्रदर्श्य तस्य द्विविधस्यापि पुनर्भेदाभेदरूपेण विवेचनम्]

एवं भेदाभेदरूपं वस्तूपदर्श्य भेदस्य पर्यायार्थिकविषयस्य द्वैविध्यमाह—

सो उण समासओ चिय वंजणणिअ[1]ओ य अत्थणिअओ य ।
अत्थगओ य अभिण्ण[2]ो [3]भइयव्वो वंजणवि[4]यप्पो ॥ ३० ॥

स पुनर्विभागः **समासतः** संक्षेपतो **व्यञ्जननियतः** शब्दनयनिबन्धनः **अर्थनियतश्च** अर्थनयनिबन्धनश्च । तत्र **अर्थगतस्तु** विभागः **अभिन्नः** सङ्ग्रह–व्यवहार–ऋजुसूत्रार्थप्रधाननयविषयोऽर्थपर्यायोऽभिन्नः असद्द्रव्यातीतानागतव्यवच्छिन्नाभिन्नार्थपर्यायरूपत्वात् तद्विषया नया अपि 'अर्थगतो विभागोऽभिन्नः' इत्यु[5]च्यते । **भाज्यो व्यञ्जनविकल्प** इति । वि[6]कल्पितः शब्दपर्यायो भिन्नः अभिन्नश्चानेकाभिधान एकः एकाभिधानश्चैकः इति कृत्वा, समानलिङ्ग–सङ्ख्या–कालादिरनेकशब्दो 'घटः' 'कुटः' 'कुम्भः' इत्यादिक एकार्थ इति शब्दनयः । समभिरूढस्तु भिन्नाभिधेयौ घ[7]ट–कुटशब्दौ, भिन्नप्रवृत्तिनिमित्तत्वात्, रूप–रसादिशब्दवत् इत्येकार्थ एकशब्द इति मन्यते । एवंभूतस्तु चेष्टासमय एव घटो 'घट'शब्दवाच्यः अन्यथाऽतिप्रसङ्गात् । तदेवम् अभिन्नोऽर्थो वाच्योऽस्येत्यभिन्नार्थो घटशब्द इति मन्यते ॥ ३० ॥

[एकस्यैव वस्तुनस्त्रैकालिकानन्तशब्दार्थपर्यायशालितयाऽनन्तप्रमाणत्वेन सर्वात्मकत्वाख्यानम्]

यत् तदन्यतो विभक्तेन स्वरूपेणैकमनेकं च वस्तूक्तम् तद् अनन्तप्रमाणमित्याख्यातुमाह—

एगदवियम्मि जे अत्थपज्जया वयणपज्जया वावि ।
तीयाणा[7]गयभूया तावइयं तं हवइ दव्वं ॥ ३१ ॥

एकस्मिन् जीवादिद्रव्ये **अर्थपर्याया** अर्थग्राहकाः संग्रह–व्यवहार–ऋजुसूत्राख्याः तद्ग्राह्या वा अर्थभेदाः **वचनपर्यायाः** शब्दनयाः शब्द–समभिरूढ–एवंभूताः तत्परिच्छेद्या वस्त्वंशा **वा** ते च **अतीतानागत**वर्त्तमानरूपतया सर्वदा विवर्त्तन्ते विवृत्ताः विवर्त्तिष्यन्त इति तेषामानन्त्याद् **वस्त्वपि तावत्**प्रमाणं **भवति** । तथाहि–अनन्तकालेन सर्वेण वस्तुना सर्वावस्थानां परस्परानुगमेनाऽऽसादितत्वात् अवस्थातुश्चावस्थानां कथञ्चिदनन्यत्वात् घटादिवस्तु पट–पुरुषादिरूपेणापि कथञ्चिद् विवृत्तमिति सर्वं सर्वात्मकं कथञ्चिदिति स्थितम् । दृश्यते चैकं पुद्गलद्रव्यं अतीताऽनागतवर्त्तमानद्रव्य–गुण–कर्म–सामान्य–विशेष[8]परिणामात्मकं युगपत् क्रमेणापि तत् तथाभूतमेव । एकान्ताऽसत उत्पादायोगात् सतश्च निरन्वयविनाशासम्भवादिति प्रतिपादितत्वात् ॥३१॥

[व्यञ्जनार्थपर्यायभावनया पुरुषस्य भेदाभेदात्मकत्वसमर्थनेन वस्तुमात्रस्याऽनेकान्तरूपत्वसूचनम्]

एवं तावद् बाह्याभ्यन्तरभेदेन द्विविधस्यापि वस्तुनोऽनेकान्तात्मकत्वं प्रतिपाद्य तत्प्रतिपादनवाक्यनयानामपि तथाविधमेव स्वरूपम् नान्यादृग्भूतमस्तीति प्रतिपादयन्नाह—

पुरिसम्मि पुरिससद्दो जम्माई मरणकालपज्जन्तो ।
तस्स उ बालाईया पज्जवजोया बहुवियप्पा ॥ ३२ ॥

१–**ओ अ**–ल० भां० विना । २–**ण्णो इयइव्वो वज**–वा० बा० । ३ **भयइव्वो** बृ० ल० । ४ **विअप्पो** बृ० ल० । ५–**त्युच्यन्ते** । बृ० ।–**त्युच्यति** । आ० । ६–**कल्पितश**–वा० बा० । ७ "अनेकमभिधानं यस्य"–बृ० ल० मां० टि० । ८ "समभिरूढनयाशयेन"–बृ० मां० टि० । ९ **घटः कु**–मां० । **घट–पटश**–वा० बा० । १०–**गइभू**–बृ० । ११–**परिमाणात्म**–आ० ।

अथवा अर्थ–व्यञ्जनपर्यायैः शक्ति–व्यक्तिरूपैरनन्तैरनुगतोऽर्थः सविकल्पः निर्विकल्पश्च प्रत्यक्षतोऽवगतः, इदानीं पुरुषदृष्टान्तद्वारेण व्यञ्जनपर्यायं तदविकल्पकत्वनिबन्धनम् अर्थपर्यायं च तत्सविकल्पकत्वनिमित्तमाह—**पुरिसम्मि** इत्यादिना सूत्रेण—

अतीतानागतवर्त्तमानानन्तार्थ–व्यञ्जनपर्यायात्मके **पुरुषवस्तुनि** 'पुरुष'इति शब्दो यस्यासौ **पुरुषशब्दः** तद्वाच्योऽर्थो **जन्मादिर्मरणपर्यन्तो**ऽभिन्न इत्यर्थः 'पुरुषः' इत्यभिन्नाभिधानप्रत्ययव्यवहारप्रवृत्तेः **तस्यैव बालाद्यः पर्यायायोगाः** परिणतिसम्बन्धा **बहुविकल्पा** अनेकभेदाः प्रतिक्षणसूक्ष्मपरिणामान्तर्भूता भवन्ति तत्रैव तथाव्यतिरेकज्ञानोत्पत्तेः एवं च 'स्यादेकः' इत्यविकल्पः 'स्यादनेकः' इति सविकल्पः सिद्धः, अन्यथाऽभ्युपगमे तदभाव एवेति विपक्षे **'अत्थि'त्ति णिद्दिय[1]प्पं** इत्यनन्तरगाथया बाधां दर्शयिष्यति ।

द्वितीयपातनिकाऽऽयातगाथार्थस्तु–पुरुषवस्तुनि पुरुषध्वनिर्व्यञ्जनपर्यायः शेषो **बालादि**-धर्मकलापोऽर्थपर्याय इति गाथासमुदायार्थः ।

[व्यञ्जनपर्यायप्रसङ्गेन वाचकशब्द–वाच्यतत्सम्बन्धयोस्स्वरूपमीमांसा]

ननु कोऽयं 'पुरुष'शब्दः कथं वा शब्दोऽर्थस्य पर्यायस्ततोऽत्यन्तभिन्नत्वात् घटस्येव पटः ?

[वर्णेषु वाचकत्वं व्युदस्य स्फोटे तत् प्रतिपादयतो वैयाकरणमतस्य वर्णनम्]

अत्र वैयाकरणाः प्राहुः—{"यस्मात् उच्चरितात् ककुदादिमदर्थप्रतिपत्तिः स शब्दः" [ ]

ननु अत्र किं गकार–औकार–विसर्जनीयाः ककुदादिमदर्थप्रतिपादकत्वेन शब्दव्यपदेशं लभन्ते, आहोस्वित् तद्व्यतिरिक्तः पद–स्फोटादिः ? तत्र न तावद् वर्णा अर्थप्रत्यायकाः यतस्ते किं समुदिता अर्थप्रतिपादकाः, उत व्यस्ताः ? यदि व्यस्तास्तदैकेनैव वर्णेन गवाद्यर्थप्रतिपत्तिरुत्पादितेति द्वितीयादिवर्णोच्चारणमनर्थकं भवेत् । अथ समुदिता अर्थप्रत्यायकाः, तदपि न सङ्गतम्; क्रमोत्पन्नानामनन्तरविनष्टत्वेन समुदायासम्भवात् । न च युगपदुत्पन्नानां समुदायप्रकल्पना, एकपुरुषापेक्षया

१–**कल्पकश्च** भां० मां० । "सभेदः अभिन्नश्च"–बृ० टि० । "सभेदः अभेदश्च"–ल० मां० टि० । २ "वाचकः पुरुषत्वादेः"–मां० टि० । ३ तद्वाच्यः–"शब्द"वाच्यः–मां० टि० । ४–**न्मादिम**–भां० । ५ गा० ३३ ।

६ "येनोच्चारितेन सास्ना–लाङ्गुल–ककुद–खुर–विषाणिनां संप्रत्ययो भवति स शब्दः"–महाभा० प्र० खं० पृ० १६ पं० १५ । अनेकान्तज० पृ० ४४ प्र० पं० १० अम० ।

७ "अथ 'गौः' इत्यत्र कः शब्दः ? गकार–औकार–विसर्जनीयाः इति भगवान् उपवर्षः"–मीमां० पृ० १० पं० ११ । प्रमेयक० पृ० १३६ प्र० पं० ५ । स्याद्वादर० पृ० ३१७ प्र० पं० २ । श्लो० वा० पार्थ० व्या० पृ० ५११ पं० १० ।

८ "तद्वाचकस्तु पदादिस्फोट एव, न पुनर्वर्णाः । ते हि किं समस्ता व्यस्ता वा तद्वाचकाः ? यदि व्यस्तास्तदैकेनैव वर्णेन गवाद्यर्थप्रतिपत्तिरुत्पादितेति द्वितीयादिवर्णोच्चारणमनर्थकम्" इत्यादिसमग्रोऽयं वैयाकरणपक्षः अक्षरशो वर्तते प्रमेयकमलमार्तण्डे–पृ० १३१ द्वि० पं० ११ ।

"तथाहि—न वर्णाः प्रत्येकमर्थविषयां धियमाविर्भावयन्ति शेषवर्णवैयर्थ्यात् समुदायश्च तेषां न संभवति अन्त्यवर्णग्रहणसमये पूर्वेषामसंभवात्" इत्यादि–प्रशस्त० कं० पृ० २६९ पं० २ ।

"न चास्य विषयो वर्णास्तेषु नैकत्वधीर्भवेत् । न च तत्समुदायोऽपि क्रमिकत्वादसंभवात्" ॥ ४ ॥
–स्फोटसि० पृ० १ ।

९ "तत्र तावद् गकारादेरेकैकस्मान्न वाच्यधीः । उदेति यदि चेदस्ति प्रथमेनैव गादिना" ॥ १२ ॥
"वर्णेनोच्चरितेनेह गवाद्यर्थाभिधानतः । उच्चारणं द्वितीयादिवर्णानां स्यान्निरर्थकम्" ॥ १३ ॥
–स्फोटसि० पृ० २ ।

१० "तदुच्चारणसामर्थ्यं नैकैकस्मात् ततोऽर्थधीः । समुदायोऽपि वर्णेषु क्रमज्ञातेष्वसंभवी" ॥ १४ ॥
–स्फोटसि० पृ० २ ।

युगपदुत्पत्त्यसम्भवात् प्रतिनियतस्थान-करण-प्रयत्नप्रभवत्वात् तेषाम्। न च भिन्नपुरुषप्रयुक्त गकार-औकार-विसर्जनीयानां समुदायेऽप्यर्थप्रतिपादकत्वं दृष्टम् प्रतिनियतक्रमवर्णप्रतिपत्त्युत्तरकालभावित्वेन[1] शाब्द्याः प्रतिपत्तेः संवेदनात्। न चान्त्यो वर्णः पूर्ववर्णानुगृहीतो वर्णानां क्रमोत्पादे सत्यर्थप्रत्यायकः, पूर्ववर्णानामन्त्यवर्णं प्रत्यनुग्राहकत्वायोगात् यतो नान्त्यवर्णं प्रति जनकत्वं पूर्ववर्णानां तदुपकारित्वम् वर्णाद् वर्णोत्पत्तेरभावात्—प्रतिनियतस्थान-करणादिसम्पाद्यत्वाद् वर्णानाम् वर्णाभावेऽपि च वर्णोत्पत्तिदर्शनान्न वर्णजन्यत्वम्। अथार्थज्ञानोत्पत्तौ सहकारित्वं[2] पूर्ववर्णानामन्त्यवर्णं प्रत्युपकारकत्वम्, एतदप्ययुक्तम्; अविद्यमानानां सहकारित्वानुपपत्तेः अत एव प्राक्तनवर्णविज्ञानानामपि[3] सहकारित्वमयुक्तम्। न च पूर्ववर्णसंवेदनप्रभवसंस्काराः तत्सहायतां प्रतिपद्यन्ते, यतः संस्काराः स्वोत्पादकविज्ञानविषयस्मृतिहेतवो नार्थान्तरज्ञानमुत्पादयितुं समर्थाः–नहि घटज्ञानप्रभवः संस्कारः पटे स्मृतिं विदधद् दृष्टः। न च तत्संस्कारप्रभवाः स्मृतयः सहायतां प्रतिपद्यन्ते, युगपदयुगपद्विकल्पानुपपत्तेः। न हि स्मृतीनां युगपदुत्पत्तिः अयुगपदुत्पन्नानां वाऽवस्थितिरस्ति। न च समस्तसंस्कारप्रभवैका स्मृतिस्तत्सहकारिणी, परस्परविरुद्धानेकपदार्थाऽनुभवप्रभवप्रभूतसंस्काराणामप्येकस्मृतिजनकत्वप्रसक्तेर्नानेकवर्णसंस्कारजत्वं स्मृतेः सम्भवतीति[4] कुतोऽस्या अन्त्यवर्णसहकारित्वम्? न चान्यविषया स्मृतिरन्यत्र प्रतिपत्तिं जनयति खदिरव्यापृतपरशोः कदिरच्छेदक्रियाजनकत्वप्रसक्तेः। न चान्यवर्णनिरपेक्ष एव 'गौः' इत्यत्रान्त्यो वर्णः ककुदादिमदर्थप्रत्यायकः पूर्ववर्णोच्चारणवैयर्थ्यप्रसक्तेः घटशब्दान्तव्यवस्थितस्यापि तत्प्रत्यायकत्वप्रसक्तेश्च तस्मान्न वर्णाः समस्त–व्यस्ता अर्थप्रत्यायकाः सम्भवन्ति।

अस्ति च गवादिशब्देभ्यः ककुदादिमदर्थप्रतिपत्तिरिति तदन्यथानुपपत्त्या वर्णव्यतिरिक्तोऽर्थप्रतिपत्तिहेतुः स्फोटाख्यः शब्दो ज्ञायते। श्रोत्रविज्ञाने च वर्णव्यतिरिक्तः स्फोटात्मा निरवयवोऽक्रमः स्फुटमवभातीति तस्याध्यक्षतोऽपि सिद्धिः। तथाहि—श्रवणव्यापारानन्तरभाविन्यभिन्नार्थावभासा संविदनुभूयते, न चासौ वर्णविषया, वर्णानां परस्परव्यावृत्तरूपत्वाद् एकावभासजनकत्वविरोधात् तदजनकस्यातिप्रसङ्गतस्तद्विषयत्वानुपपत्तेः। न चेयं[11] सामान्यविषया, वर्णत्वव्यतिरेकेणापरसामान्यस्य गकार-औकार-विसर्जनीयेष्वसम्भवात् वर्णत्वस्य च प्रतिनियतार्थप्रत्यायकत्वायोगात्। न चेयं भ्रान्ता, अबाध्यमानत्वात्। न चाबाध्यमानप्रत्ययगोचरस्यापि स्फोटाख्यस्य वस्तुनोऽसत्त्वम्, अवयविद्रव्यस्येव[12] स्याप्यसत्त्वप्रसक्तेः। एवमप्यवयव्यभ्युपगमे स्फोटाभ्युपगमोऽवश्यंभावी तत्तुल्ययोगक्षेमत्वात्। स च वर्णेभ्यो व्यतिरिक्तः नित्यः अनित्यत्वे सङ्केतकालानुभूतस्य तदैव ध्वस्तत्वात् कालान्तरे देशान्तरे च गोशब्दश्रवणात् ककुदादिमदर्थप्रतिपत्तिर्न स्यात् असङ्केतिताच्छब्दादर्थप्रतिपत्तेरसम्भवात्[13]। सम्भवे वा द्वीपान्तरादागतस्य गोशब्दाद् गवार्थप्रतिपत्तिर्भवेत् सङ्केतकरणवैयर्थ्यं च प्रसज्येत तस्मान्नित्यः स्फोटाख्यः शब्दो व्यापकश्च सर्वत्रैकरूपतया प्रतिपत्तेः} असदेतदिति वैशेषिकाः।

१–**न साध्याः** प्र० मां० बहिः।

२ "उपाकरिष्यद् वर्णेभ्योऽप्युदपत्स्यत वाच्यधीः। इदं तावद् भवानद्य प्रष्टव्यो मतिमत्तमः" ॥ २२ ॥
"एकत्वेऽप्यन्त्यवर्णस्य गौरित्यादाविहार्थधीः। भिद्यते स तु भेदोऽत्र कस्मादित्यथ मन्यसे" ॥ २३ ॥
"सहायभेदाद् भेदः स्यादिति नेह सहायता। कार्ये व्याप्रियमाणस्य सहायत्वं हि दृश्यते" ॥ २४ ॥
"असतां पूर्ववर्णानां तदानीं व्याप्तिः कथम्?। असतामपि साहाय्यं वर्णानां यदि विद्यते" ॥ २५ ॥
"केवलान्त्यप्रयोगेऽपि भवेदेवाभिधेयधीः" ॥ २६ ॥ इत्यादि–स्फोटसि० पृ० ३–४।

३ **वर्णचित्तानामपि** वा० बा०। ४ वित्तिर्ज्ञानम्। ५ "पूर्ववर्णसहायताम्"–बृ० ल० मां० टि०। ६–**सक्तेः अने**–बृ०।–**सक्ते अने**–वा० बा०। ७ **सम्भवीति** बृ०। ८ "एकस्मृतेः"–बृ० ल० मां० टि०। ९ 'घटः' इत्यत्र अन्ते स्थितस्य विसर्गस्यापि गवार्थप्रत्यायकत्वं स्यात्। १० तदजनकस्य "एकावभासाजनकस्य"–बृ० ल० मां० टि०। ११ इयम् "एकत्वप्रतिपत्तिः"–बृ० ल० मां० टि०। १२–**स्याप्यस्यत्व**–वा० बा०। १३ "देशान्तरे असङ्केतादेव शब्दाद् अर्थप्रतिपत्तिर्भविष्यतीत्याशङ्कावारणाय आह"–बृ० मां० टि०।

[वर्णेषु वाचकत्वमभ्युपगम्य स्फोटे तन्निरस्यतो वैशेषिकमतस्य वर्णनम्]

ते ह्याहुः—एकदा प्रादुर्भूता वर्णाः स्वार्थप्रतिपादका न भवन्तीत्यत्राविप्रतिपत्तिरेव। क्रमप्रादुर्भूतानां न समुदाय इत्यत्राप्यविप्रतिपत्तिरेव। अर्थप्रतिपत्तिस्तु उपलभ्यमानात् पूर्ववर्णध्वंसविशिष्टादन्त्यवर्णात्। न चाभावस्य सहकारित्वं विरुद्धम् वृन्त-फलसंयोगाभावस्येवाऽप्रतिबद्धगुरुत्वफलप्रपातक्रियाजनने, दृष्टं चोत्तरसंयोगं विदधत् प्राक्तनसंयोगाभावविशिष्टं कर्म परमाण्वग्निसंयोगश्च परमाणौ तद्गतपूर्वरूपप्रध्वंसविशिष्टो रक्ततामुत्पादयन्।

यद्वा उपलभ्यमानोऽन्त्यो वर्णः पूर्ववर्णविज्ञानाभावविशिष्टः पदरूपतामासादयन् पदार्थं प्रतिपत्तिं जनयति प्राक्तनवर्णसंवित्प्रभवसंस्कारसव्यपेक्षो वा? न च संस्कारस्य विषयान्तरे कथं विज्ञानजनकत्वमिति[5] प्रेर्यम्[6] तद्भावभावितयार्थप्रतिपत्तेरुपलब्धेः पूर्ववर्णविज्ञानप्रभवसंस्कारश्चान्त्यवर्णसहायतां पूर्वपूर्वसंस्कारप्रभवतया प्रणालिकया विशिष्टः समुत्पन्नः सन् प्रतिपद्यते। तथाहि—प्रथमवर्णे[7] तावद् विज्ञानम् तेन च संस्कारो जन्यते ततो द्वितीयवर्णविज्ञानम् तेन पूर्ववर्णविज्ञानाऽऽहितसंस्कारसहितेन विशिष्टः संस्कारो जन्यते ततस्तृतीयवर्णे ज्ञानम् तेन पूर्वसंस्कारविशिष्टेनापरो विशिष्टतरः संस्कारो निर्वर्त्यत इति यावदन्त्यः संस्कारोऽर्थप्रतिपत्तिजनकान्त्यवर्णसहायः तथाभूतसंस्कारप्रभवस्मृतिसव्यपेक्षो वाऽन्त्यो वर्णः पदरूपः पदार्थप्रतिपत्तिहेतुः।

अथवा शब्दार्थोपलब्धिनिमित्ताऽदृष्टनियमादविनष्टा एव पूर्ववर्णसंवित्प्रभवाः संस्कारा अन्त्यसंस्कारं विदधति तस्मात् पूर्ववर्णेषु स्मृतिरुपजाता अन्त्यवर्णेनोपलभ्यमानेन सहार्थप्रतिपत्तिमुत्पादयति, वाक्यार्थप्रतिपत्तौ वाक्यस्याप्ययमेव न्यायोऽङ्गीकर्तव्यः। वर्णाद् वर्णोत्पत्त्यभावप्रतिपादनं च सिद्धसाधनमेव। तदेवं यथोक्तसहकारिकारणसव्यपेक्षाद् अन्त्याद् वर्णाद् अर्थप्रतिपत्तिरन्वय-व्यतिरेकाभ्यामुपजायमानत्वेन निश्चीयमाना स्फोटपरिकल्पनां निरस्यति तदभावेऽप्यर्थप्रतिपत्तेरुक्तप्रकारेण सम्भवेऽन्यथानुपपत्तेः प्रक्षयात्। न हि दृष्टादेव कारणात् कार्योत्पत्तावदृष्टतदन्तरपरिकल्पना युक्तिसङ्गता अतिप्रसङ्गात्।

किञ्च, यद्युपलभ्यमाना वर्णा व्यस्त–समस्ता नार्थप्रतिपत्तिजननसमर्थाः स्फोटाभिव्यक्तावपि न समर्था भवेयुः। तथाहि—न समस्तांस्ते स्फोटमभिव्यञ्जयन्ति सामस्त्यासम्भवात्। नापि प्रत्येकम् वर्णान्तरवैफल्यप्रसङ्गात् एकेनैव स्फोटाभिव्यक्तेर्जनितत्वात्। न च पूर्ववर्णैः स्फोटस्य संस्कारेऽन्त्यो वर्णस्तस्याभिव्यञ्जक इति न वर्णान्तरवैयर्थ्यम्, अभिव्यक्तिव्यतिरिक्तसंस्कारस्वरूपानवधारणात्[8]। तथाहि–न तावत् तत्र तैर्वैगाख्यः संस्कारो निर्वर्त्यते तस्य मूर्त्तेष्वेव भावात्। नापि वासनारूपः अचेतन-

---

१ "प्रतीयमानात् पूर्ववर्णध्वंसविशिष्टाद् अन्त्यवर्णाद् अर्थप्रतीतेरभ्युपगमाद् उक्तदोषाभावः। न चाभावस्य सहकारित्वं विरुद्धम्–वृन्तफलसंयोगाभावस्य अप्रतिबद्धगुरुत्वफलप्रपातक्रियाजनने तदर्शनात्" इत्यादिकोऽयं वैशेषिकपक्षः सर्वोऽक्षरशः प्रमेयकमलमार्तण्डेऽपि निर्दिष्टः–पृ० १३२ प्र० पं० १४–पृ० १३३ द्वि० पं० ८।

"शब्दाच्च शब्दनिष्पत्तिं कथयति—शब्दात् संयोगविभागनिष्पन्नात् वीचीसंतानवत् शब्दसंतानः यथा जलवीच्या तदव्यवहिते देशे वीच्यन्तरमुपजायते ततोऽपि अन्यत् ततोऽपि अन्यत् इत्यनेन क्रमेण वीचीसंतानो भवति तथा शब्दाद् उत्पन्नात् तदव्यवहिते देशे शब्दान्तरम्—ततोऽपि अनयोर्गमनागमनाभावात् प्राप्तस्यैव उपलब्धिरिति—ततोऽपि अन्यत् ततोऽपि अन्यत् इत्यनेन क्रमेण शब्दसंतानो भवति। एवं संतानेन श्रोत्रदेशे समागतस्य अन्त्यशब्दस्य ग्रहणम्"–प्रशस्त० कं० पृ० २८९ पं० १०–१५। २ "परमाणुगत"–बृ० मां० टि०। ३–**ति प्रेर्यं स्फोटवादिना वितथार्थ**–वा० बा०। अत्र 'स्फोटवादिना' इति टिप्पणमपि पाठे प्रविष्टम्। ४ "स्फोटवादिना" इति शेषः–बृ० मां० टि०। ५–**यार्थाप्र**–आ० हा०। ६ "अथ प्रथममाद्यवर्णज्ञानम् तदनु संस्कारः तदनु तृ(द्वि)तीयवर्णज्ञानम् तेन प्राक्तनेन संस्कारेण अन्त्यो विशिष्टः संस्कारो जन्यते इत्यनेन क्रमेण अन्ते निखिलवर्णविषयः संस्कारो जातः" इत्यादि प्रशस्त० कं० पृ० २६९ पं० ९–११। ७–**दन्त्य सं**–आ०।

"कृतानुग्रहसामर्थ्यो वर्णोऽन्त्यः प्रतिपादकः" ॥ ९७ ॥
"एष एव तु संस्कार इति केचित् प्रचक्षते" ॥ ९८ ॥–श्लो० वा० स्फोट० पृ० ५३५।

८ तदभावे "स्फोटाऽ"भावे–बृ० मां० टि०। ९ "वर्णाः"–बृ० मां० टि०। १०–**रणत्वात्**। आ०।

त्वात् स्फोटस्य तच्चैतन्याभ्युपगमे वा स्वशास्त्रविरोधः। नापि स्थितस्थापकः तस्यापि मूर्त्तद्रव्यवृत्तित्वात् स्फोटस्य चामूर्त्तत्वाभ्युपगमात्। किञ्च, असौ संस्कारः स्फोटस्वरूपः, तद्धर्मो वा? न तावदाद्यः कल्पः स्फोटस्य वर्णोत्पाद्यत्वप्रसक्तेः। नापि द्वितीयः व्यतिरिक्ताऽव्यतिरिक्तविकल्पानुपपत्तेः। तथाहि-असौ धर्मः स्फोटाद् व्यतिरिक्तः, अव्यतिरिक्तो वा? यद्यव्यतिरिक्तस्तदा तत्करणे स्फोट एव कृतो भवेदिति तस्यानित्यत्वप्रसक्तेः स्वाभ्युपगमविरोधः। अथ व्यतिरिक्तस्तदा तत्सम्बन्धानुपपत्तिस्तदनुपकारकत्वात्, तस्योपकाराभ्युपगमे व्यतिरिक्ताव्यतिरिक्तविकल्पः तत्रापि पूर्वोक्त एव दोषोऽनवस्थाकारी। न च व्यतिरिक्तधर्मसद्भावेऽपि स्फोटस्यानभिव्यक्तिस्वरूपव्यवस्थितस्य पूर्ववदर्थप्रतिपत्तिहेतुत्वम् तत्स्वरूपत्यागे वाऽनित्यत्वप्रसक्तिः। अथ न व्यतिरिक्तसंस्कारकृतमुपकारमपेक्ष्य पूर्वरूपपरित्यागादसावर्थप्रतिपत्तिं जनयति किन्तु संस्कारसहायोऽविचलितरूप एव एककार्यकारित्वस्यैव सहकारित्वाभ्युपगमात्; नन्वेवं वर्णानामप्यन्यकृतोपकारनिरपेक्षाणामेककार्यनिर्वर्त्तनलक्षणसहकारित्ववत् सहकारिसहितानामर्थप्रतिपत्तिजनने किमपरस्फोटकल्पनयाऽप्रमाणिकया कार्यम्? किञ्च, पूर्ववर्णैः संस्कारः स्फोटस्य क्रियमाणः किमेकदेशैः क्रियते, सर्वात्मना वा? यद्येकदेशैस्तदा ते ततोऽर्थान्तरभूताः, अनर्थान्तरभूता वा? यद्यर्थान्तरभूतास्तदा तेषां तदनुपकारे सम्बन्धासिद्धिः उपकारे व्यतिरिक्ताऽव्यतिरिक्तविकल्पोक्तदोषानुषङ्गः। न च समवायाद् अनुपकारेऽपि तेषां तत्सम्बन्धिता तस्यानभ्युपगमात्, परैरभ्युपगमे च स्वकृतान्तविरोधः अर्थान्तरभूतत्वे चैकदेशानाम् तेभ्य एवार्थप्रतिपत्तेः न स्फोटस्यार्थप्रत्यायकता। अपि चैकदेशानामर्थप्रतिपत्तिहेतुत्वाभ्युपगमे च वरं वर्णानामेव तदभ्युपगतम् एवं लोकप्रतीतिरनुसृता भवेत्। अथाव्यतिरिक्तास्तदेकदेशास्तदा स्फोटस्यैकेनैव संस्कृतत्वाद् अपरवर्णोच्चारणवैयर्थ्यम्। न च पूर्ववर्णसंवित्प्रभवसंस्कारसहितः तत्स्मृतिसहितो वाऽन्त्यवर्णः स्फोटसंस्कारैकः एवंभूतस्यार्थप्रतिपत्तिजननेऽपि शक्तिप्रतिघाताभावात् स्फोटपरिकल्पना निरवसरैव।

अपि च, स्फोटसंस्कारः स्फोटविषयसंवेदनोत्पादनम्, उतावरणापनयनम्? यद्यावरणापनयनम् तदैकत्रैकदाऽऽवरणापगमे सर्वदेशावस्थितैः सर्वदा व्यापिनित्यरूपतयोपलभ्येत तस्य नित्यत्व-व्यापित्वाभ्यामपगतावरणस्य सर्वत्र सर्वदोपलभ्यस्वभावत्वात् अनुपलभ्यस्वभावत्वे वा न केनचित् कदाचित् कुत्रचिदुपलभ्येत। अथैकदेशावरणापगमः क्रियते; नन्वेवमावृताऽनावृतत्वेन सावयवत्वमस्यानुषज्येत। अथ निर्विभागत्वादेकत्रानावृतः सर्वत्रानावृतोऽभ्युपगम्यते तदा तदवस्थाऽशेषदेशावस्थितैरुपलब्धिप्रसक्तिः यथा च निरवयवत्वादेकत्रानावृतः सर्वत्रानावृतस्तथा तत एवैकत्राप्यावृतः सर्वत्रैवावृतः इति मनागपि नोपलभ्येत। किञ्च, एकदेशाः स्फोटादर्थान्तरम्, अनर्थान्तरं वा? अर्थान्तरत्वेऽपि शब्दस्वभावाः अशब्दात्मका वा? यद्यशब्दात्मका नार्थप्रतिपत्तिहेतवः। अथ शब्दस्वभावास्तत्रापि यदि गोशब्दस्वभावास्तदा गोशब्दानेकत्वप्रसक्तिः। अथागोशब्दस्वरूपा न तर्हि गवार्थप्रत्यायका भवेयुः। अथाव्यतिरिक्तास्तदा स्फोट एव संस्कृत इति सर्वदेशावस्थितैर्व्यापिनस्तस्य प्रतिपत्तिप्रसक्तिरिति पूर्वोक्तमेव दूषणम्। किञ्च, एकदेशावरणापाये स्फोटस्य खण्डशः प्रतिपत्तिः प्रसज्येत। अथ स्फोटविषयसंविदुत्पादस्तत्संस्कारः सोऽपि न युक्तः; वर्णानामर्थप्रतिपत्तिजनन इव स्फोटप्रतिपत्तिजननेऽपि सामर्थ्यसम्भवात् न्यायस्य समानत्वात्। यदि च स्फोट उपलभ्यस्वभावः सर्वदोपलभ्येत, अनुपलभ्यस्वभावत्वे आवरणापगमेऽपि तत्स्वभावानतिक्रमाद् मनागपि नोपलभ्येत इत्यर्थाप्रतिपत्तितः शाब्दव्यवहारविलोपः।

अनेनैव न्यायेन वायूनामपि तद्व्यञ्जकत्वमयुक्तम् वायूनां च व्यञ्जकत्वपरिकल्पने वर्णवैफल्यप्रसक्तिः स्फोटाभिव्यक्तावर्थप्रतिपादने वा तेषामनुपयोगात् स्थिते च स्फोटस्य वर्णोच्चारणात् प्राक् सद्भावे वर्णानाम् वायूनां वा व्यञ्जकत्वं परिकल्प्येत। न च तत्सद्भावः कुतश्चित् प्रमाणादवगत

१-**याऽप्रामा**-वा० बा०। २-**गमे वा स्व**-बृ० ल० वा० बा०। ३ तदू "अर्थप्रत्यायकत्वम्"-ल० टि०। ४-**रक ए**-बृ०। ५-**तस्यार्थ**-भां० मां०। ६ अस्य "अन्त्यवर्णस्य"-बृ० ल० टि०। ७-**वा स्फो**-वा० बा० भां०। ८ "निरवयवत्वादेव"-बृ० ल० मां० टि०। ९ प्र० पृ० पं० २२। १०-**मर्थ्याभावा**-भां० मां०। ११ "स्फोट" व्यञ्जकत्वम्-बृ० ल० मां० टि०। १२ "वायुभिरेव तयोः कृतत्वात्"-बृ० ल० मां० टि०।

इति न तत्परिकल्पना ज्यायसी। यदपि 'प्रत्यभिज्ञाज्ञानं स्फोटस्य नित्यत्वप्रसाधकं वर्णोच्चारणात् प्रागप्यस्तित्वमवबोधयति' इत्यभ्युपगतम् तदपि—प्रत्यभिज्ञाज्ञानस्य सादृश्यनिबन्धनत्वेनात्र विषये प्रतिपादितत्वात्—असङ्गतम्; एकगोव्यक्तौ संकेतितात् गोशब्दात् गोव्यक्त्यन्तरे अन्यत्रान्यदा च नित्यत्वमन्तरेणापि प्रतिपत्तिर्यथा सम्भवति तथा प्रतिपादितम् प्रतिपादयिष्यते च। नातोऽपि स्फोटस्य प्राग् व्यञ्जकात् सत्त्वसिद्धिरिति। ५

"नादेनाऽऽहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवभासते॥" [वाक्यप० प्र० का० श्लो० ८५]

इति भर्तृहरिवचो निरस्तं द्रष्टव्यम्।

यदपि 'विभिन्नतनुषु वर्णेष्वभिन्नाकारं श्रोत्रान्वयव्यतिरेकानुविधाय्यध्यक्षं स्फोटसद्भावमवबोधयति' इत्युक्तम् तदप्यसारम्; घटादिशब्देषु परस्परव्यावृत्तानेकवर्णव्यतिरिक्तस्य स्फोटात्मनोऽर्थप्रत्यायकस्यैकस्याध्यक्षप्रतिपत्तिविषयत्वेनाप्रतिभासनात्। न चाभिन्नावभासमात्राद् अभिन्नार्थव्यवस्था, अन्यथा दूराद् अविरलानेकतरुष्वेकतरुबुद्धेरेकत्वव्यवस्थाप्रसक्तेः न चाविरलानेकतरुष्वेकत्वबुद्धेर्बाध्यमानत्वात् नैकत्वव्यवस्थापकत्वम् स्फोटप्रतिभासबुद्धेरपि बाध्यत्वस्य दर्शितत्वात्। न चैकत्वावभासः स्फोटसद्भावमन्तरेणानुपपन्नः, वर्णत्वान्त्यवर्णविषयत्वेनाप्येकत्वावभासस्योपपद्यमानत्वात् निरवयवस्याक्रमस्य नित्यत्वादिधर्मोपेतस्य स्फोटस्यैकावभासज्ञानेनाननुभवात् अन्यथावभासस्य चान्यथाभूतार्थाव्यवस्थापकत्वात् व्यवस्थापनेऽतिप्रसङ्गात् अवयवि द्रव्यं त्ववयवजन्यत्वेन तदाश्रितत्वेन चाध्यक्षप्रत्यये प्रतिभासत इति न तन्न्यायः स्फोटे उत्पादयितुं शक्यः। तन्न स्फोटात्मा शब्दो वर्णेभ्यो व्यतिरिक्तः। अथ तदव्यतिरिक्तोऽसावभ्युपगम्यते तदा वर्णनानात्वे तन्नानात्वप्रसक्तिः तदेकत्वे वा वर्णानामप्येकत्वप्रसक्तिः।

[सानुपूर्विकनित्यवर्णवाचकत्वपरं मीमांसकमतमुपन्यस्य तन्निरसनम्]

अथ गकाराद्यानुपूर्वीविशिष्टोऽन्त्यो वर्णः विशिष्टानुपूर्वीका वा गकारौकारविसर्जनीयाः शब्दः। तथा च मीमांसकाः प्राहुः—

"यावन्तो यादृशा ये च यदर्थप्रतिपादकाः।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥"
[श्लो० वा० स्फोटवा० श्लो० ६९] इति।

एतदपि न सम्यक्; यतः आनुपूर्वी यद्यनर्थान्तरभूता तदा वर्णा एव नानुपूर्वी, ते च व्यस्ताः समस्ता वा अर्थप्रत्यायका न भवन्तीत्यावेदितम्। अथार्थान्तरभूता तदा वक्तव्यम् सा नित्या, अनित्या वा? न तावदनित्या स्वसिद्धान्तविरोधात्—वैदिकानुपूर्व्या नित्यत्वेनाभ्युपगमात्।

"वक्ता नहि क्रमं कञ्चित् स्वातन्त्र्येण प्रपद्यते।"
[श्लो० वा० शब्दनित्य० श्लो० २८८]

१ "किञ्च शब्दस्य नित्यत्वं श्रोत्रजप्रत्यभिज्ञया। विभुत्वं च स्थितं तस्य कोऽध्यवस्येद् विपर्ययम्"॥
"तस्माद्वा सर्वकालेषु सर्वदेशेषु चैकता। प्रत्यक्षप्रत्यभिज्ञानप्रसिद्धा साऽस्य बाधिका"॥
तत्त्वसं० का० २११७-२११८ पृ० ५९०-५९१।

२ तत्त्वसं० पृ० ७२२ का० २७११। प्रमेयक० पृ० १३३ द्वि० पं० ३। "बुद्धौ शब्दोऽवधार्यते"-वाक्यप०। तत्त्वसं० पञ्जि० पृ० ६३६ पं० ७। स्याद्वादर० पृ० ३१९ प्र० पं० ५। सर्वदर्शनसं० द० १३ पं० १८९ पृ० ३०३। ३ "दूरदेशावस्थितस्य हि विरलपदार्थस्य घनरूपताप्रतीतिः उत्तरकालभाविबलिष्ठविरलरूपताप्रत्ययेन बाध्यत इति तत्र घनत्वप्रतीतिवशाद् व्यवस्थाप्यमानं घनत्वमस्तु अवास्तवम्" इत्यादिकं स्फोटप्रतिविधानावसरे—स्याद्वादर० पृ० ३२३ प्र० पं० ८।

"यथा हि दूरे दृश्यन्ते तरवः करिरूपिणः। (पूर्वं पश्चाच्च) तत्रस्थैस्त एव तरुरूपिणः"॥ १५९॥
"दर्शनाहितसंस्कारक्रमादेवमिहापि ते। नादास्तत्त्वपरिच्छेदे विपर्यासेऽपि कारिणः (?)॥ १६०॥
स्फोटसि० पृ० १८-१९।

४ **यदर्थप्रतिपादने**-गुणग्रन्थे संस्कार० प्रशस्त० कं० पृ० २७० पं० १८। "तदुक्तं तौतातितैः" इति कृत्वा निर्दिष्टोऽयं श्लोकः-सर्वदर्शनसं० द० १३ पं० १६४ पृ० ३०२। ५ पृ० ४३१ पं० १७। ६ "आनुपूर्वी"-बृ० ल० टि०। ७ **कंचित्** श्लो० वा०।

इत्याद्यभिधानात् । नापि नित्या स्फोटपक्षोदितसमस्तदोषप्रसक्तेः । न च वैदिकवर्णाद्यानुपूर्वी नित्या, लौकिकतदानुपूर्व्यविशेषात् । तथाहि-वैदिकवर्णाद्यानुपूर्वी अनित्या, वेदानुपूर्वीशब्दवाच्यत्वात् लौकिकवर्णाद्यानुपूर्वीवत् । न च लौकिकानुपूर्व्या विलक्षणेयम्, वैलक्षण्यासिद्धेः । तथाहि-किमपौरुषेयत्वमस्या वैलक्षण्यम्, आहोस्विद् विचित्ररूपता ? न तावदाद्यः पक्षः अपौरुषेयत्वस्य निरस्तत्वात् । नापि वैचित्र्यम् तस्यानित्यत्वेनाऽविरोधात् तत्सद्भावेऽपि नित्यत्वाप्रसाधकत्वात् लौकिकवाक्येष्वपि वैचित्र्यस्योपलब्धेश्च । न च वर्णानां नित्यव्यापिनामानुपूर्वी सम्भवति, देश-कालकृतक्रमानुपपत्तेः । न चाभिव्यक्त्यानुपूर्वी तेषां सम्भविनी अभिव्यक्तेः प्राग् निरस्तत्वात् । 'पूर्ववर्णसंवित्प्रभवसंस्कारसहितः तत्स्मृतिसहितो वा अन्त्यो वर्णः पदम्' इत्यभ्युपगमोऽपि न युक्तिसङ्गतः संस्कारस्मरणादेरनुपलभ्यमानस्य तदा सहकारित्वकल्पनायां प्रमाणाभावात् । न चार्थप्रतिपत्त्यन्यथानुपपत्तिस्तत्कल्पनायां प्रमाणम्, तत्प्रतिपत्तेरन्यथा सिद्धत्वात् । न चानुपूर्वीसम्भवेऽपि परपक्षे वर्णा अर्थप्रतीतिहेतुतया सम्भवन्ति, तेषां तत्प्रतिपत्तिजननस्वभावत्वे सर्वदा तत्प्रतिपत्तिप्रसक्तेः तज्जननस्वभावस्य सर्वदा भावात् अतज्जननस्वभावत्वे न कदाचिदप्यर्थप्रतिपत्तिं जनयेयुः अनपगताऽतज्जननस्वभावत्वात् । न च सहकारिसन्निधानेऽपि तेषामतज्जननस्वभावतां व्यपगच्छति अनित्यताप्रसक्तिदोषापत्तेः 'नित्याश्च' परैस्ते अभ्युपगता इत्यभ्युपगमविरोधश्च ।

[वाच्य—वाचकयोः सम्बन्धस्य नित्यत्वं निषिध्य तस्य कृतकत्वव्यवस्थापनम्]

न च नित्यसम्बन्धवादिनस्तदपेक्षा वर्णा अर्थप्रत्यायकाः सम्भवन्ति, नित्यस्यानुपकारकत्वेनाऽपेक्षणीयत्वायोगात् । न च नित्यः सम्बन्धः शब्दार्थयोः प्रमाणेनावसीयते प्रत्यक्षेण तस्य अननुभवात् । तदभावे नानुमानेनापि, तस्य तत्पूर्वकत्वाभ्युपगमात् । न च शब्दार्थयोः स्वाभाविकसम्बन्धमन्तरेण गोशब्दश्रवणानन्तरं ककुदादिमदर्थप्रतिपत्तिर्न भवेत् अस्ति च सा इति शब्दस्य वाचिका शक्तिरवगम्यत इति वाच्यम्, अनवगतसम्बन्धस्यापि ततस्तदर्थप्रतिपत्तिप्रसक्तेः । न च सङ्केताभिव्यक्तः स्वाभाविकः सम्बन्धोऽर्थप्रतिपत्तिं जनयतीति नायं दोषः सङ्केतादेव अर्थप्रतिपत्तेः स्वाभाविकसम्बन्धपरिकल्पनावैयर्थ्यप्रसक्तेः । तथाहि—सङ्केताद् व्युत्पाद्याः 'अनेन शब्देनेत्थम्भूतमर्थं व्यवहारिणः प्रतिपादयन्ति' इत्यवगत्य व्यवहारकाले पुनस्तथाभूतशब्दश्रवणात् सङ्केतस्मरणे तत्संतं चार्थं प्रतिपद्यन्ते न पुनः स्वाभाविकं सम्बन्धमवगत्य पुनस्तत्स्मरणे अर्थमवगच्छन्ति । न च वाच्य-वाचकसङ्केतकरणे स्वाभाविकसम्बन्धमन्तरेणानवस्थाप्रसक्तिः वृद्धव्यवहारात् प्रभूतशब्दानां वाच्यवाचकस्वरूपावधारणात् । तथाहि—एको व्युत्पन्नव्यवहारः तथाभूताय 'गामभ्याज शुक्लां देवदत्त! दण्डेन' इति यदा व्यपदिशति द्वितीयस्तु तद्व्यपदेशानन्तरं तथैव विदधाति तदा अव्युत्पन्नसङ्केतः शिशुस्तं तथाकुर्वाणमुपलभ्यैवमवधारयति—'अनेन गोशब्दाद् गवार्थः प्रतिपन्नः अभ्याजादिशब्दाद् अभ्याजिक्रियादिकः अन्यथा कथमपरनिमित्ताभावेऽपि गोपिण्डाऽऽनयनादिकं वाक्यश्रवणानन्तरं विदध्यात्' एवमपोद्धारकल्पनया अव्युत्पन्नानां सङ्केतग्रहणसम्भवान्नानवस्थादोषः । न च प्रथमसङ्केतविधायिनः स्वाभाविकसम्बन्धव्यतिरेकेण वाच्य-वाचकयोः कुतो वाच्यवाचकरूपावगतिरिति वक्तव्यम्, अनादित्वादस्य व्यवहारस्य अपरापरसङ्केतविधायिपूर्वकत्वेन निर्दोषत्वात् । न च वाच्यवाचकसम्बन्धस्य पुरुषकृतत्वे शब्दवदर्थस्यापि वाचकत्वम् अर्थवच्छब्दस्यापि वाच्यत्वं प्रसक्तमिति वक्तव्यम्, योग्यताऽनतिक्रमेण सङ्केतकरणात् । न च स्वाभाविकसम्बन्धव्यतिरेकेण प्रतिनियतयोग्यताया अभावः, कृतकत्वेऽपि प्रतिनियतयोग्यतावतां भावानामुपलब्धेः । तथाहि—यत्र लोहत्वं छेदिकाशक्तिस्तत्रैव क्रियमाणा दृष्टा न जलादौ, यत्रैव तन्तुत्वमस्ति तत्रैव निष्पाद्यते पटोत्पादनशक्तिर्न तु वीरणादौ तत्र तन्तुत्वाभावात् एवं च यत् यथोपलभ्यते तत् तथैवाभ्युपगन्तव्यम्, दृष्टाऽनुमितानां नियोग-प्रतिषेधानुपपत्तेः । तेन यत्रैव वर्णत्वादिकं निमित्तं तत्रैव वाचिका शक्तिः सङ्केतेनोत्पाद्यते यत्र तु तन्नियतं निमित्तं नास्ति तत्र न वाचिका शक्तिरिति न नित्यवाच्यवाचकसम्बन्धपरिकल्पनया प्रयोजनम् । एकान्तनित्यस्य तु ज्ञानजनकत्वे सर्वदा ज्ञानोत्पत्तिः । तदजननस्वभावत्वे न कदाचिद् विज्ञानोत्पत्तिरिति प्राक् प्रतिपादितम् । समयबलेन तु शब्दाद् अर्थप्रतिपत्तौ यथासङ्केतं विशिष्टसामग्रीतः कार्योत्पत्तौ न कश्चिद् दोषः ।

१ पृ० ४३४ पं० २ । २-त्या तदा-बृ० विना । ३ पृ० ३३ पं० २५ । ४ "नित्यवर्णानाम्"-बृ० टि० । ५ पृ० ३४ पं० ३३ । ६-पत्तिस्तत्प्रकल्प-बृ० वा० बा० । ७ तद् "संस्कारस्मरणादि"-बृ० टि० । ८-भावसा सर्वे-वा० बा० ।-भावः सर्वे-बृ० । ९-वत्वे न सर्वदा कदा-भां० मां० । १०-ता व्युप-मां० ।-ता भ्युप-बृ० वा० बा० । ११ "नित्यसंबन्धापेक्षाः"-बृ० टि० । १२-कारत्वेना-भां० मां० । १३ "अनुमानस्य"-बृ० टि० । १४ "अर्थप्रतिपत्तिः"-बृ० टि० । १५ तं वार्थं बृ० वा० बा० । १६-कसं-बन्धकर- भां० मां० ।

[अनुमानात् शब्दस्य प्रमाणान्तरत्वप्रसाधनम्]

अत एवानुमानात् प्रमाणान्तरं शाब्दम् अनुमानं हि पक्षधर्मत्वान्वयव्यतिरेकबलिङ्गबलादुदयमासादयति, शाब्दं तु सङ्केतसव्यपेक्षशब्दोपलम्भात् प्रत्यक्षाऽनुमानाऽगोचरेऽर्थे प्रवर्त्तते । स्वसाध्याव्यभिचारित्वमप्यनुमानस्य त्रिरूपलिङ्गोद्भूतत्वेनैव निश्चीयते शाब्दस्य त्वाप्तोक्तत्वनिश्चये सति शब्दस्योत्तरकालमिति । किञ्च, शब्दो यत्र यत्रार्थे प्रतिपादकत्वेन पुरुषेण प्रयुज्यते तं तमर्थं यथासङ्केतं प्रतिपादयति, न त्वेवं धूमादिकं लिङ्गं पुरुषेच्छावशेन जलादिकं प्रतिपादयतीत्यनुमानात् प्रमाणान्तरं सिद्धः शब्दः । न चैं शब्दाद् अर्थप्रतिपत्तौ शब्दस्य त्रैरूप्यमस्ति, यतो न तस्य पक्षधर्मता

१ नित्यत्वाद्वाच्य-भां० मां० । २-त्यत्वस्य भां० मां० । ३ पृ० ४३६ पं० १२ । ४-ब्दार्थप्र-वा० बा० । ५ "अन्तरा तुण्डं निक्षिप्य वदतस्थागतसुतस्य मतं निरस्यन्नाह"-बृ० ल० टि० ।

६ 'शब्दप्रमाणमनुमानप्रमाणान्तर्भावि' इति पक्षं स्वीकुर्वाणस्य वचनमिदम्-"यदपि उच्यते 'शब्दो हि यत्रैव पुरुषेच्छया विनियुज्यते संकीर्त्यते तदेव प्रत्याययति न तथा धूमादयः अतोऽनुमानाद् भेदः' तदपि अनैकान्तिकम्; इत्याद्यङ्गचेष्टानां लिङ्गानामपि यथेष्टविनियोगेन प्रत्यायकत्वदर्शनात् इत्याह—

यथेष्टविनियोगेन प्रतीतिर्याऽपि शब्दतः । न धूमादेरितीहापि व्यभिचारोऽङ्गवृत्तिभिः" ॥ इत्यादि ।

—श्लो० वा० शब्दप० श्लो० १९ पार्थव्या० पृ० ४११ ।

७ "तदेवं विषयभेदमुक्त्वा इदानीं त्रैलक्षण्यं निराकुर्वन् पक्षधर्मत्वं निराकरोति—

तस्मादर्थविशिष्टस्य न शब्दस्यानुमेयता । कथं च पक्षधर्मत्वं शब्दस्येह निरूप्यते ॥
न क्रियाकर्तृसंबन्धाद् ऋते संबन्धनं क्वचित् । राजा भर्ता मनुष्यस्य तेन राज्ञः स उच्यते ॥
वृक्षस्तिष्ठति शाखासु ता वा तत्रेति तस्य ताः । देशेऽग्निमति धूमस्य कर्तृत्वं भवनं प्रति ॥
कार्यकारणभावादौ क्रिया सर्वत्र विद्यते । न चानवगताकारः संबन्धोऽस्तीति गम्यते ॥
न चास्त्यसति संबन्धे षष्ठीतत्पुरुषोऽपि वा । तस्मान्न पक्षधर्मोऽयमिति शक्या निरूपणा ॥
निवृत्तेऽन्यत्र संबन्धे येऽपि तद्विषयात्मना । वदेयुः पक्षधर्मत्वं शब्दस्याऽनुपलब्धिवत् ॥
तैरप्येतन्निरूप्यं तु शब्दस्तद्विषयः कथम् । न तद्देशादिसद्भावो नाऽऽभिमुख्यादि तस्य वा ॥
तस्मादुत्पादयत्येष यतोऽर्थविषया(यां) मतिम् । तेन तद्विषयः शब्द इति धर्मत्वकल्पना ॥
तत्र वाचकतायां च सिद्धायां पक्षधर्मता । न प्रतीत्यङ्गतां गच्छेन्न चैवमनुमानता ॥
गमकत्वाच्च धर्मत्वं धर्मत्वाद् गमको यदि । स्यादन्योन्याश्रयत्वं हि तस्मान्नैषाऽपि कल्पना ॥

इतश्च न पक्षधर्मत्वं शब्दस्य इत्याह—

न चाऽगृहीतसंबन्धाः स्वरूपव्यतिरेकतः । शब्दं जानन्ति येनात्र पक्षधर्ममतिर्भवेत् ॥
न च स्वरूपमात्रेण धूमादेः पक्षधर्मता । न चापि पूर्वसम्बन्धमपेक्ष्यैषा प्रसज्यते ॥
धूमवानयमित्येवमपूर्वस्यापि जायते । पक्षधर्ममतिस्तेन भिद्येतोत्तरलक्षणात् ॥
न त्वत्र पूर्वसम्बन्धादधिका पक्षधर्मता । न चाऽर्थप्रत्ययात् पूर्वमित्यनङ्गमियं भवेत् ॥
न च धर्मी गृहीतोऽत्र येन तद्धर्मता भवेत् । पर्वतादिर्यथा देशः प्राग्धर्मत्वाऽवधारणात् ॥
यश्चात्र कथ्यते धर्मी प्रमेयोऽस्य स एव नः । न चाऽनवधृते तस्मिंस्तद्धर्मत्वाऽवधारणात् ॥
प्राक् स चेत् पक्षधर्मत्वाद् गृहीतः किं ततः परम् । पक्षधर्मादिभिर्ज्ञातैर्येन स्यादनुमानिता ॥

५६ स० त०

यत्रार्थस्तत्र धर्मिणि शब्दस्याऽवृत्तेः गोपिण्डाधारेण प्रदेशेन शब्दस्याश्रयाश्रयिभावस्य जन्यजनकभावनिबन्धनस्याभावात् अतः 'गोपिण्डवानयं देशः गोशब्दवत्त्वात्' इति नाभिधातुं शक्यम्। नापि गोपिण्डे गोशब्दो वर्त्तते आधाराधेयवृत्त्या जन्यजनकभावेन वा गोपिण्डाभावेऽपि गोशब्दस्य दर्शनात्। न च गम्यगमकभावेन तत्रासौ वर्तते पक्षधर्मत्वाभावे तस्यैवानुपपत्तेः वाच्यवाचकभावेन वृत्तावनुमानात् प्रमाणान्तरत्वम्। तेन 'गोपिण्डो गोत्ववान् गोशब्दवत्त्वात्' अयमपि प्रयोगोऽनुपपन्न एव। नापि गोत्वे गोपिण्डविशेषणे वर्त्तते तत् सामान्येनाश्रयाश्रयिभावस्य जन्यजनकभावस्य वा अस्याभावात्। अतः 'गोत्वं गोपिण्डवत् गोशब्दवत्त्वात्' इत्यपि वक्तुमशक्यम्। विशेषे च साध्ये अनन्वयश्चात्र पक्षे दोषः। न च "गोशब्दो गवार्थवान् गोशब्दत्वात्' इति प्रयोगो युक्तः तथाप्रतीत्यभावात्। न हि 'गौर्गच्छति' इत्युक्ते गमनक्रियाविशिष्टगवार्थप्रतीतिमन्तरेण गोपिण्डेन तद्वान् शब्दो लोकेनावगम्यते, न च गोशब्दो गवार्थवाचकत्वेन गोशब्दत्वाद् अनुमीयते किन्तु गवार्थप्रतिपत्त्यन्यथानुपपत्त्या गवार्थवाचकत्वं तस्य गम्यते। प्रतिनियतपदार्थनिवेशिनां तु देवदत्तादिशब्दानां नान्वयः नापि

निराकृतं पक्षधर्मत्वम्, सपक्षान्वयमिदानीं दूषयति—

अन्वयो न च शब्दस्य प्रमेयेण निरूप्यते। व्यापारेण हि सर्वेषामन्वितत्वं प्रतीयते ॥
यत्र धूमोऽस्ति तत्राग्नेरस्तित्वेनाऽन्वयः स्फुटः। न त्वेवं यत्र शब्दोऽस्ति तत्राऽर्थोऽस्तीति निश्चयः ॥
न तावत्तत्र देशेऽसौ तत्काले वाऽवगम्यते। भवेन्नित्यविभुत्वाच्चेत्सर्वार्थेषु च तत्समम् ॥
तेन सर्वत्र दृष्टत्वाद् व्यतिरेकस्य चाऽगतेः। सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते" ॥ ६८–८८
"ननु ये ज्ञातसम्बन्धास्तेषां दृष्टोऽन्वयः स्फुटः। यद्येवमन्वयात् पूर्वं संबन्धः कोऽपि कल्पितः ॥
नाऽङ्गमर्थधियामेषा भवेदन्वयकल्पना। अन्वयाऽधीनजन्मत्वमनुमानस्य च स्थितम् ॥
ज्ञाते प्रतीतिसामर्थ्ये तद्वशादेव जायते। पश्चादन्वय इत्येष कारणं कथमुच्यते ॥
तस्मात्तन्निरपेक्षैव शब्दशक्तिः प्रतीयते। न च धूमाऽन्वयात् पूर्वं शक्तत्वमवगम्यते ॥
व्यतिरेकोऽप्यविज्ञातादर्थाच्छब्दधियो यदि। सोऽपि पश्चात् स्थितत्वेन नाऽर्थप्रत्ययसाधनम् ॥
सम्बन्धं यं तु वक्ष्यामस्तस्य निर्णयकारणम्। स्यादन्वयोऽतिरेकश्च न त्वर्थाऽधिगमस्य तौ ॥

तदिदं त्रैलक्षण्याभावेन विषयभेदेन चोपपादितम् अननुमानत्वं प्रयोगेण दर्शयति—

तस्मादननुमानत्वं शब्दे प्रत्यक्षवद् भवेत्। त्रैरूप्यरहितत्वेन तादृग्विषयवर्जनात्" ॥ ९२–९८
"प्रमिते च प्रवृत्तत्वात् स्मृतेर्नास्ति प्रमाणता। परिच्छेदफलत्वाद्धि प्रामाण्यमुपजायते ॥
तादात्विकपरिच्छेदफलत्वेन प्रमाणता। प्रत्यभिज्ञानवत् कस्मात् स्मृतेरपि न कल्प्यते ॥
यावान् पूर्वपरिच्छिन्नस्तावानेवावधार्यते। स्मृत्या तदनुसारेण तदाऽसत्त्वेऽस्य नैव धीः" ॥
–१०४–१०६ श्लो० वा० शब्दप० पार्थ० व्या० पृ० ४२४, ४२६, ४२७, ४३०।

"शब्दज्ञानात् परोक्षार्थज्ञानं शाब्दं परे जगुः। तच्चाकर्तृकतो वाक्यात् तथाप्रत्ययिनोदितात् ॥
इदं च किल नाध्यक्षं परोक्षविषयत्वतः। नानुमानं च घटते तल्लक्षणवियोगतः ॥
धर्मी धर्मविशिष्टो हि लिङ्गीत्येतत् सुनिश्चितम्। न भवेदनुमानं च यावत् तद्विषयं न तत् ॥
यश्चात्र कल्प्यते धर्मी प्रमेयोऽस्य स एव च। न चानवधृते तस्मिंस्तद्धर्मत्वावधारणा ॥
प्राक् स चेत् पक्षधर्मत्वाद् गृहीतः किं ततः परम्। पक्षधर्मादिभिर्ज्ञातैर्येन स्यादनुमानता ॥
अन्वयो न च शब्दस्य प्रमेयेण निरूप्यते। व्यापारेण हि सर्वेषामन्वेतृत्वं प्रतीयते ॥
यत्र धूमोऽस्ति तत्राग्नेरस्तित्वेनान्वयः स्फुटम्। नत्वेवं यत्र शब्दोऽस्ति तत्रार्थोऽस्तीति निश्चितम् ॥
न तावत् तत्र देशेऽसौ न तत्काले च गम्यते। भवेन्नित्यविभुत्वाच्चेत् सर्वशब्देषु तत्समम् ॥
तेन सर्वत्र दृष्टत्वाद्व्यतिरेकस्य चागतेः। सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते ॥
तस्मादननुमानत्वं शाब्दे प्रत्यक्षवद् भवेत्। त्रैरूप्यरहितत्वेन तादृग्विषयवर्जनात्" ॥
–तत्त्वसं० का० १४८९–१४९८ पृ० ४३३–४३५। स्याद्वादर० पृ० १३४ द्वि० पं० ७–पृ० १३५ द्वि० पं० ७।

१ तत्र "गोपिण्डे" असौ "गोशब्दः"–बृ० ल० टि०। २–**त्वत्वेन गो**–बृ०। ३ "यतः गोशब्दवत्त्वं गम्यगमकभावेन, आहोस्वित् वाच्यवाचकभावेन? पक्षद्वये दूषणमुक्तम्"–बृ० ल० टि०। ४ **साध्येऽन्व**–वा० बा०। ५ **गोशब्दो गवार्थगोशब्दः गवार्थगोशब्दत्वात्**–भां० मां०।

पक्षधर्मता दृष्टान्ताभावात् दृष्टान्तदार्ष्टान्तिकभेदे चानुमानप्रवृत्तेः। न च शाब्दं स्वभावलिङ्गजमनुमानम् शब्दस्यार्थस्वभावत्वासिद्धेः आकारभेदात् प्रतिनियतकरणग्राह्यत्वात् वाचकस्वभावत्वाच्च तस्य। नापि कार्यलिङ्गजम् अर्थाभावेऽपीच्छातः शब्दस्योत्पत्तेः। न च न बाह्यार्थविषयत्वेन शब्दस्यानुमानता सौगतैरभ्युपगम्यते अपि तु विवक्षाविषयत्वेनेति वक्तव्यम्, यतो यथा न तदर्थो विवक्षा तथा शब्दप्रामाण्यप्रतिपादनेऽभिहितम् न पुनरुच्यते। ५

[परकल्पितां वर्णानां नित्यताम् तत्पदादिप्रक्रियां च प्रदूष्यानेकान्तदृष्ट्या शब्द–तदर्थसम्बन्धयोः स्वरूपनिरूपणम्]

न च मीमांसकाभिप्रायेण वर्णानां वाचकत्वम् अभिव्यक्तानभिव्यक्तपक्षद्वयेऽपि दोषात् अनभिव्यक्तानां ज्ञानजनकत्वे सर्वपुरुषान् प्रति सर्वे सर्वदा ज्ञानजनकाः स्युः केनचित् प्रत्यासत्ति––विप्रकर्षाभावात् अभिव्यक्तानां ज्ञानजनकत्वे एकवर्णाऽऽवरणापाये सर्वेषां समानदेशत्वेनाऽभिव्यक्तत्वात् युगपत् सर्वश्रुतिप्रसक्तिरित्युक्तं प्राक्। इन्द्रियसंस्कारपक्षेऽपि पूर्वप्रतिपादितमेव दूषणमनुसर्त्तव्यम्। किञ्च, यद्यनवगतसम्बन्धा वर्णा अर्थप्रत्यायकास्तदा नालिकेरद्वीपवासिनोऽप्युपलभ्यमाना अर्थावगतिं विदध्युः। अथावगतसम्बन्धाः तथासति पदस्य स्मारकत्वमेव स्यात् न वाचकत्वम् तथा चानधिगतार्थाधिगमहेतुत्वाभावात् न प्रमाणता भवेत्। तदुक्तम्—

"पदं त्वभ्यधिकाभावात् स्मारकान्न विशिष्यते। १५
अथाधिक्यं भवेत् किञ्चित् स पदस्य न गोचरः" ॥
[श्लो० वा० शब्दप० श्लो० १०७] इति।

तन्न मीमांसकमतेनापि वर्णानां शब्दत्वम्। कथं तर्हि वर्णाः शब्दरूपतां प्रतिपद्यन्ते? उक्तमत्र परिमितसङ्ख्यानां पुद्गलद्रव्योपादानाऽपरित्यागेनैव परिणतानामश्रावणस्वभावपरित्यागाऽवाप्तश्रावणस्वभावानां विशिष्टानुक्रमयुक्तानां वर्णानां वाचकत्वात् शब्दत्वम् अन्यथोक्तदोषानतिवृत्तेः। २० वैशेषिकपरिकल्पितपदादिप्रक्रिया त्वनुभवबाधितत्वादयुक्ता। न च निरन्वयविनाशिनां विज्ञानहेतुता सम्भवतीत्यसकृत् प्रतिपादितम्। षट्क्षणावस्थायित्वलक्षणमप्यनित्यत्वं तत्परिकल्पितं निरन्वयविनाशपक्षे अर्थक्रियानिर्वर्त्तनानुपयोगि तेषाम्। न च षट्क्षणावस्थानमपि सम्भवति, प्रथमक्षणसत्ताया द्वितीयक्षणसत्तानुप्रवेशे तत्क्षणसत्तायाः अप्युत्तरक्षणसत्तानुप्रवेशपरिकल्पनायां क्षणिकत्वमेव अननुप्रवेशेऽपि परस्परविविक्तत्वात् क्षणस्थितीनां तदेव क्षणिकत्वमिति कुतः षट्क्षणावस्थानमेकस्य? २५ अक्षणिकत्वे चार्थक्रियाविरोधः प्रतिपादित एवेति न पदादिपरिकल्पना वैशेषिकपक्षे युक्तियुक्तेति स्थितम्। ननु भवत्पक्षेऽपि क्रमस्य वर्णेभ्यो व्यतिरेके न वर्णविशेषणत्वम् अव्यतिरेके वर्णा एव केवलाः ते च न व्यस्तसमस्ता अर्थप्रतिपादका इति पूर्वमेव प्रतिपादितमिति न शब्दः कश्चिदर्थप्रत्यायकः, असदेतत्; वर्णव्यतिरिक्ताऽव्यतिरिक्तस्य क्रमस्य प्रतिपत्तेः। तथाहि–न वर्णेभ्योऽर्थान्तरमेव क्रमः वर्णानुविद्धतया तस्य प्रतीतेः। नापि वर्णा एव क्रमः तद्विशिष्टतया तेषां प्रतिपत्तेः। न ३० च तद्विशेषणत्वेन प्रतीयमानस्य क्रमस्यापह्नवो युक्तिसङ्गतः वर्णेष्वपि तत्प्रसक्तेः। न च भ्रान्तिरूपा प्रतिपत्तिरियम्, वर्णानां तद्विशिष्टतयाऽबाधिताध्यक्षगोचरतया प्रसाधितत्वात् अर्थप्रतिपत्तिकारणतोऽनुमितत्वाच्च। न चाभावः कस्यचिद् भावाध्यवसायितया विशेषणम् नाप्यर्थप्रतिपत्तिहेतुः न च क्रमोऽप्यहेतुः तथात्मकवर्णेभ्योऽर्थप्रतीतेः। ततो भिन्नाभिन्नानुपूर्वीविशिष्टा वर्णा विशिष्टपरिणतिमन्तः शब्दः स च पद-वाक्यादिरूपतया व्यवस्थितः तेन विशिष्टानुक्रमवन्ति तथाभूतपरिणति- ३५ मापन्नानि पदान्येव वाक्यमभ्युपगन्तव्यम्। तद्व्यतिरिक्तस्य तस्य पदवदनुपपद्यमानत्वात्।

---

१ "शब्दस्य"–बृ० ल० टि०। २ **न च बा**–भां० मां०। ३ "शब्दार्थः"–बृ० ल० टि०। ४ पृ० १८५ पं० १। ५ पृ० ३५ पं० १२ तथा पृ० ४३४ पं० २२। ६ पृ० ३६ पं० ४। ७ **न च वा**–मां० आ०। ८ **पदमभ्यधि**–श्लो० वा०। ९ **पदाधिक्यं** श्लो० वा०। १० **किञ्चित् तत् पदस्य** श्लो० वा०। ११ पृ० १३६ पं० १३। १२–**क्तानां वाच**–बृ० ल० वा० बा०। १३ "वैशेषिकाणाम्" बृ० ल० टि०। १४ पृ० ४३१ पं० १७। १५ "अपह्नव"प्रसक्तेः–बृ० ल० टि०। १६ "वर्णविशेषणत्वेन क्रमप्रतीतिः"–बृ० ल० टि०। १७ "क्रमविशिष्टतया"–बृ० ल० टि०।

यच्च 'कथं शब्दो वस्त्वन्तरत्वात् पुरुषादेर्वस्तुनो धर्मो येनासौ तस्य व्यञ्जनपर्यायो भवेत्' इत्युक्तम् तत्र नामनयाभिप्रायात् नाम-नामवतोरभेदात् 'पुरुष'शब्द एव पुरुषार्थस्य व्यञ्जनपर्यायः यद्वा 'पुरुष'इति शब्दो वाचको यस्यार्थगततद्वाच्यधर्मस्यासौ पुरुषशब्दः स चाभिधेयपरिणामरूपो व्यञ्जनपर्यायः कथं नार्थधर्मः? स च व्यञ्जनपर्यायः पुरुषोत्पत्तेरारभ्य आ पुरुषविनाशाद् भवति इति जन्मादिर्मरणसमयपर्यन्त उक्तः, **तस्य तु बालादयः पर्याययोगा बहुविकल्पाः** तस्य पुरुषाभिधेयपरिणामवतो बालकुमारादयस्तत्रोपलभ्यमाना अर्थपर्याया भवन्त्यनन्तरूपाः। एवं च पुरुषो व्यञ्जनपर्यायेणैकः बालादिभिस्त्वर्थपर्यायैरनेकः ॥ ३२ ॥

[पुरुषस्य भेदाभेदैकान्ताभ्युपगमे अभावरूपतापत्त्या दूषणम्]

यथा पुरुषस्तथा सर्वं वस्त्वेकम् अनेकं वा सर्वस्य तथैवोपलब्धेः अन्यथाभ्युपगमे एकान्तरूपमपि तन्न भवेदिति दर्शयन्नाह—

अत्थि त्ति णिव्वियप्पं पुरिसं जो भणइ पुरिसकालम्मि ।
सो बालाइवियप्पं न लहइ तुल्लं व पावेज्जा ॥ ३३ ॥

इति ।

'अस्ति' इति एवं **निर्विकल्पं** निष्क्रान्ताशेषभेदस्वरूपं **पुरुषम्** एकरूपं पुरुषद्रव्यं **यो ब्रवीति पुरुषकाले** पुरुषोत्पत्तिक्षण एव **असौ बालादिभेदं न लभते** बालादिभेदरूपतया नासौ स्वयमेव व्यवस्थितिं प्राप्नुयात्। नापि तद्रूपतया अपरमसौ पश्येत्। एवं चाभेदरूपमेव तत् पुरुषवस्तु प्रसज्येत। **तुल्यं वा प्राप्नुयात्**—तदप्यभेदरूपं बालादितुल्यतामेव अभावरूपतया प्राप्नुयात् भेदाऽप्रतीतावभेदस्याप्यप्रतीतेरभाव इति भावः।

यद्वा **'अस्ति'** इति एवं निर्विकल्पम्-निश्चितो विकल्पो भेदो यस्मिन् पुरुषद्रव्ये तद् **निर्विकल्पं** भेदरूपं **पुरुषं** तत्स्वरूपलाभकाले **भणति असौ बालादिविकल्पं न लभेत तुल्यम्** इति द्रव्यतुल्यतामेवासौ **प्राप्नुयात्**। अत्रापि पूर्ववत् तदग्रहे तदग्रहाद् भेदरूपताया अप्यभाव इति भावः। न चैवमेवास्त्विति वक्तव्यम् सर्वव्यवहारोच्छेदप्रसक्तेरिति भेदाभेदरूपमेव वस्त्वस्तु ॥ ३३ ॥

[पुरुषे शब्दार्थ-पर्यायाभ्यां भेदाभेदरूपत्वस्य व्यवस्थापनम्]

अस्यैवोपसंहारार्थमाह—

वंजणपज्जायस्स उ पुरिसो 'पुरिसो' त्ति णिच्चमवियप्पो ।
बालाइवियप्पं पुण पासइ से अत्थपज्जाओ ॥ ३४ ॥

शब्दपर्यायेणाऽविकल्पः पुरुषः बालादिना त्वर्थपर्यायेण सविकल्पः सिद्ध इति गाथातात्पर्यार्थः। "व्यञ्जयति व्यनक्ति वाऽर्थानिति व्यञ्जनम्—शब्दः न पुनः शब्दनयः तस्य ऋजुसूत्रार्थनयविषयत्वात्" इति केचित्—**तस्य पर्यायः** आ जन्मनो मरणान्तं यावदभिन्नस्वरूपपुरुषद्रव्यप्रतिपादकत्वम् तद्वशेन तत्प्रतिपाद्यं वस्तुस्वरूपमत्र ग्राह्यम् उपचारात् एवं च द्वितयमप्येतत् पुरुषः 'पुरुषः'इति अभेदरूपतया न भिद्यते—व्यञ्जनपर्यायमतेन **पुरुषवस्तु सदा अविकल्पम्** भेदं न प्रतिपद्यत इति यावत्। **बालादिविकल्पं** बालादिभेदं **पुनस्तस्यैव पश्यति अर्थपर्यायः** ऋजुसूत्राद्यर्थनयः। अत्रापि विषयिणा विषयः ऋजुसूत्राद्यर्थनयविषयः अभिन्ने पुरुषरूपे भेदस्वरूपो निर्दिष्टः उपचारात्। एवं चाभिन्नं पुरुषवस्तु भेदं प्रतिपद्यत इति यावत् ॥ ३४ ॥

---

१ पृ० ४३१ पं० १३। २–**त्यस्य ध**–बृ०। ३**दिर्मारण**–बृ० वा० बा०। ४ **यथा गुरुवस्त**–बृ०। ५–**वस्वरू**–आ०। ६–**श्निोति वि**–भां० मां०। ७ "अभेदतुल्यताम्"–बृ० ल० टि०। ८ "यथा अभेदरूपता नास्ति तन्मते तथा भेदरूपताऽपि न स्यात् अभेदाभावे भेदावस्थानाभावात्"–बृ० ल० टि०। ९ "शब्द"वशेन–बृ० ल० टि०। १० **पुरुषः इ**–आ०। ११ "पुरुषवस्तुनः"–बृ० टि०। १२ **अर्थप्रायः** ल०।

[वस्तुनोऽनेकान्तात्मकत्वेऽप्येकान्तरूपत्वं वदतोऽप्रमाणत्वख्यापनम्]

एवं निर्विकल्प-सविकल्पस्वरूपे प्रतिपाद्ये पुरुषादिवस्तुनि तद्विपर्ययेण तद् वस्तु प्रतिपादयन् वस्तुस्वरूपानवबोधं स्वात्मनि ख्यापयतीति दर्शनार्थमाह— ५

सवियप्प-णिव्वियप्पं इय पुरिसं जो भणेज्ज अवियप्पं ।
सवियप्पमेव वा णिच्छएण ण स निच्छिओ समए ॥ ३५ ॥

सविकल्पनिर्विकल्पं स्वात्कारपदलाञ्छितं पुरुषद्रव्यं यः प्रतिपादकः तद् वस्तु **ब्रूयात् अविकल्पमेव सविकल्पमेव वा निश्चयेन** इत्यवधारणेन **स** यथावस्थितवस्तुप्रतिपादने प्रस्तुते अन्यथाभूतं वस्तुतत्त्वं प्रतिपादयन् **न निश्चित** इति निश्चयो निश्चितम् तद् अस्यास्तीति निश्चितः-अर्शआदित्वात् अच्–**समये** परमार्थेन वस्तुसत्त्वस्य परिच्छेत्तेति यावत्। तथाहि—प्रमाणपरिच्छिन्नं तथैवाविसंवादि वस्तु प्रतिपादयन् वस्तुनः प्रतिपादक इत्युच्यते। न च तथाभूतं वस्तु केनचित् कदाचित् प्रतिपन्नम् प्राप्यते वा येन तथाभूतं तद्वचस्तत्र प्रमाणं भवेत् तथाभूतवचनाभिधाता वा तज्ज्ञानं वा प्रमाणतया लोके व्यपदेशमासादयेत् ॥ ३५ ॥

[सप्तभङ्गीस्वरूपविचारणा]

परस्पराक्रान्तभेदाभेदात्मकस्य वस्तुनः कथञ्चित् सदसत्त्वमभिधाय तथा तदभिधायकस्य वचसः पुरुषस्यापि तदभिधानद्वारेण सम्यग्मिथ्यावादित्वं प्रतिपाद्य अधुना भावाभावविषयं तत्रैवैकान्तानेकान्तात्मकमंशं प्रतिपादयतो विवक्षया सुनय-दुर्नय-प्रमाणरूपतां तत्प्रतिपादकं वचो यथा अनुभवति तथा प्रपञ्चतः प्रतिपादयितुमाह—

यद्वा यथैव तद् वस्तु व्यवस्थितं तथैव वचनात् प्रतिपादयतो वक्तुर्निपुणत्वं भवति अन्यथा साङ्ख्य-बौद्ध-कणभुजामिव अभिन्न-भिन्न-परस्परनिरपेक्षोभयवस्तुस्वरूपाभिधायिनाम् अर्हन्मतानुसारिणामपि 'स्यादस्ति' इत्यादिसप्तविकल्परूपतामनापन्नवचनं वक्तॄणां स्यात्कारपदाऽलाञ्छितवस्तुधर्मं प्रतिपादयतामनिपुणता भवेदिति प्रपञ्चतः सप्तविकल्पोत्थाननिमित्तमुपदर्शयितुं गाथासमूहमाह—

अत्थंतरभूएहि य णियएहि य दोहि समयमाईहिं । २५

१–**ग्रार्थन**–आ०। २–**षयेऽभि**–वा० बा०। ३–**यत् व**–बृ० ल० विना। ४ **अविअप्पं** ल०। ५ **अव**–आ०। **अत्**–बृ०। **अन्**–मां०। **अन**–वा० बा०। "अर्शआदिभ्योऽच्" ॥ ५।२।१२७। अं० १९३३ सिद्धान्तकौ०। "अभ्रादिभ्यः" ॥ ७।२।४६। हैम०। ६ "एकान्तविकल्पादिरूपम्"–बृ० ल० टि०। ७–**प्यते येन** बृ० वा० बा० मां० विना। ८ **यथा य**–बृ०। ९–**चनवक्तृ**–भां० मां०।–**चन क्तृ**–वा० बा०।

१० श्रीभगवतीसूत्रे सप्तभङ्ग्या बीजभूतवाक्यत्रयमेवमुपलभ्यतेः

प्र०–"से नूणं भंते! अत्थित्तं अत्थित्ते परिणमइ, नत्थित्तं नत्थित्ते परिणमइ?

उ०–हंता, गोयमा! जाव परिणमइ"। इत्यादि—भगवती० श० १ उ० ३ पृ० ५५। प्रश्नसूत्रांक ३२।

प्र०–"आया भंते! रयणप्पभा पुढवी अन्ना रयणप्पभा पुढवी?

उ०–गोयमा! रयणप्पभा सिय आया, सिय नोआया, सिय अवत्तव्वं आया ति य नो आया ति य"। इत्यादि—भगवती० श० १२ उ० १० पृ० ५९२ द्वि०–५९४ द्वि० सूत्रांक ४६९।

अयं च भगवतीसूत्रगतोल्लेखः नयचक्रेऽपि ज्ञापकत्वेन इत्थं वर्णितः—

"भावः पर्यवः प्रवेशः समन्तात् अवः पर्यवः इति 'परि'शब्द(ब्दः) समन्तादर्थ(र्थः) 'अव'शब्दः प्रवेशार्थः। तद् वस्तुतो दर्शयति—समन्तात् प्रविशति एकताम् अन्यताम् उभयताम् अनुभयतां च योऽर्थः स पर्यवः ××× पर्यवे

वयणविसेसाईयं दव्वमवत्तव्वयं पडइ ॥ ३६ ॥

अस्यास्तात्पर्यार्थः–अर्थान्तरभूतः पटादिः निजो घटः ताभ्यां निजार्थान्तरभूताभ्यां सदसत्त्वं घटवस्तुनः प्रथम–द्वितीयभङ्गनिमित्तं प्रधान–गुणभावेन भवतीति प्रथम–द्वितीयौ भङ्गौ १–२। यदा तु द्वाभ्यामपि युगपत् तद् वस्तु अभिधातुमभीष्टं भवति तदा अवक्तव्यभङ्गकनिमित्तम् तथाभूतस्य वस्तुनोऽभावात् प्रतिपादकवचनातीतत्वात् तृतीयभङ्गसद्भावः वचनस्य वा तथाभूतस्याभावाद् अवक्तव्यं वस्तु ३।

आस्तिकः पर्यवास्तिकः इति मूलसंज्ञा अस्य नयस्य शब्दस्य (?) किमेताः स्वमनीषिका उच्यन्ते उत अस्त(स्य)स्य उपनिबन्धनम् आकर्षम् (आर्षम्) अपीति। अस्तीत्युच्यते, उपनिबन्धनमस्य **तदुभयः स आदिष्टः** इत्यादि।

" 'इमा णं भंते! रयणप्पभा पुढवी आता नोआता ?' इति पृष्टे भगवद्वचनम्—'गोयमा! अप्पणो आदिट्ठे आया, परस्स आदिट्ठे नोआया, तदुभयस्स आदिट्ठे अवत्तव्वं आता ति य णोआता ति य' " इति। एवम् अवक्तव्यत्वम् आत्माऽनात्मपर्यायाभ्यामादेशेऽत्र ज्ञापकनिबन्धनमुच्यते इति।

नियमभङ्गो नवमोऽरः श्रीमल्लवादिप्रणीतनयचक्रस्य टीकायां न्यायागमानुसारिण्यां सिंहसूरिगणिवादिक्षमाश्रमणद्व्यायां समाप्तः"।–नयचक्रलि० को० पृ० ९२९ पं० ३–१४। अनुयोग० पृ० ५५ द्वि० सूत्रांक ७६। **१–साइय** ल० विना। २ प्रमेयर० को० पृ० १२–पृ० २० सप्तभङ्गीस्थापनम्।

३ १ 'स्याद् अस्ति'	२ 'स्यान्नास्ति'
३ 'स्याद् अवक्तव्यः'	४ 'स्याद् अस्तिनास्ति'

इत्येवं भङ्गक्रमः अत्र मूले टीकायां चास्ति। एवमेव च तत्क्रमः तत्त्वार्थसूत्रभाष्ये, विशेषावश्यकभाष्ये, दिगम्बरीयप्रवचनसारेऽपि दृश्यते। तथाहि—

"उत्पन्नास्तिकस्य उत्पन्नं वा, उत्पन्ने वा, उत्पन्नानि वा, सत्"।

"अनुत्पन्नं वा, अनुत्पन्ने वा, अनुत्पन्नानि वा असत्"।

"अर्पिते अनुपनीते न वाच्यम्—सदिति असदिति वा"–तत्त्वार्थसू० भा० अ० ५ सू० ३१ पृ० ४०६ पं० २० तथा पृ० ४१० पं० २९।

"सब्भावाऽसब्भावोभयप्पिओ सपरपज्जओभयओ। कुंभाऽकुंभऽवत्तव्वोभयरूवाइभेओ सो" ॥

–विशेषाव० भा० गा०२२३२ पृ० ९१०।

"अत्थि त्ति य णत्थि त्ति य हवदि अवत्तव्वमिदि पुणो दव्वं। पज्जाएण दु केण वि तदुभयमादिट्ठमण्णं वा" ॥२३॥

–प्रवचनसा० पृ० १६१। प्रवचनसारटीकायामपि तथैवास्ति। "अयं च (स्याद् अवक्तव्यमेव) भङ्गः कैश्चित् ('स्यादस्त्येव स्यान्नास्त्येव' इति) तृतीयभङ्गस्थाने पठ्यते। तृतीयश्च एतस्य स्थाने"–रत्नाकराव० चतु० परि० सू० १८ पृ० ६२ पं० २६।

१ 'स्याद् अस्ति'	२ 'स्यान्नास्ति'
३ 'स्याद् अस्तिनास्ति'	४ 'स्याद् अवक्तव्यः'

इत्येवं तृतीय–चतुर्थभङ्गयोः स्थानव्यत्ययः श्वेताम्बरीयप्रमाणनयतत्त्वालोकालंकार–रत्नाकरावतारिका–स्याद्वादमञ्जरी–नयोपदेशेषु दिगम्बरीयपञ्चास्तिकाय–आप्तमीमांसा–तत्त्वार्थराजवार्तिक–तत्त्वार्थश्लोकवार्तिक–सप्तभङ्गीतरङ्गिणीषु च वर्तते। तथाहि—

१ "स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः"।

२ "स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः"।

३ "स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधि–निषेधकल्पनया तृतीयः"।

४ "स्यादवक्तव्यमेवेति युगपद् विधिनिषेधकल्पनया चतुर्थः"।

–प्रमाणनयत० चतु० परि० सू० १७–१८। रत्नाकराव० चतु० परि० सू० १७–१८ पृ०६२। स्याद्वादमञ्ज० पृ० १८९ पं० ८ आ०। नयोप० पृ० १२ द्वि० पं० ९।

"सिय अत्थि णत्थि उहयं अव्वत्तव्वं पुणो य तत्तिदयं। दव्वं खु सत्तभंगं आदेसवसेण संभवदि" ॥ १४ ॥

–पञ्चास्तिका" पृ० ३०।

प्रवचनसार–पञ्चास्तिकाययोः समानकर्तृकतायामपि प्रवचनसारे पूर्वोक्तः क्रमः पञ्चास्तिकाये तु ततो भिन्नः क्रमः।

"कथंचित् ते सदेवेष्टं कथंचिदसदेव तत्। तथोभयमवाच्यं च नययोगान्न सर्वथा" ॥ १४ ॥

–आप्तमीमां० पृ० १२।

[मूलभङ्गत्रयं विवेच्य तत्समर्थकानां षोडशानामपेक्षाभेदानां व्यावर्णनम्]

तथाहि—असत्त्वोपसर्जनसत्त्वप्रतिपादने प्रथमो भङ्गः। तद्विपर्ययेण तत्प्रतिपादने द्वितीयः। द्वयोस्तु धर्मयोः प्राधान्येन गुणभावेन वा प्रतिपादने न किञ्चिद् वचः समर्थम् यतो न तावत् समासवचनं तत्प्रतिपादकम् नापि वाक्यं सम्भवति। समासषट्के तावन्न बहुव्रीहिरत्र समर्थः तस्यान्यपदार्थप्रधानत्वात् अत्र चोभयप्रधानत्वात्। अव्ययीभावोऽपि नात्र प्रवर्त्तते तस्यात्रार्थेऽसम्भवात्।५ द्वन्द्वसमासे तु यद्यप्युभयपदप्राधान्यम् तथापि द्रव्यवृत्तिस्तावन्न प्रकृतार्थप्रतिपादकः गुणवृत्तिरपि द्रव्याश्रितगुणप्रतिपादकः द्रव्यमन्तरेण गुणानां तिष्ठत्यादिक्रियाधारत्वासम्भवात् तस्या द्रव्याश्रितत्वान्न प्रधानभूतयोर्गुणयोः प्रतिपाद्यत्वम्। तत्पुरुषोऽपि नात्र विषये प्रवर्त्तते तस्याप्युत्तरपदार्थप्रधानत्वात्। नापि द्विगुः सङ्ख्यावाचिपूर्वपदत्वात् तस्य। कर्मधारयोऽपि न, गुणाधारद्रव्यविषयत्वात्। न च समासान्तरसद्भावः येन युगपद् गुणद्वयं प्रधानभावेन समासपदवाच्यं स्यात् अत एव न१० वाक्यमपि तथाभूतगुणद्वयप्रतिपादकं सम्भवति तस्य वृत्त्यभिन्नार्थत्वात्। न च केवलं पदम् वाक्यं वा लोकप्रसिद्धम् तस्यापि परस्परापेक्षद्रव्यादिविषयतया तथाभूतार्थप्रतिपादकत्वायोगात्।

न च "तौ सत्" [३।२।१२७। सिद्धान्तकौ० अं० ३१०६] इति शतृ-शानौर्योरिव सङ्केतितैकपदवाच्यत्वम् विकल्पप्रभवशब्दवाच्यत्वप्रसक्तेः। विकल्पानां च युगपदप्रवृत्तेर्नैकदा तयोस्तद्वाच्यतासम्भवः। न च निजार्थान्तरैकान्ताभ्युपगमेऽप्यर्थस्य वाच्यता, तथाभूतस्य तस्यात्यन्ताऽसत्त्वात्—१५ सर्वथा सत्त्वेऽन्यतोऽव्यावृत्तत्वात् महासामान्यवद् घटार्थत्वानुपपत्तेः। अर्थान्तरत्वे पररूपादिव स्वरूपादपि व्यावृत्तेः खरविषाणवद् असत्त्वादवाच्यतैव। न च घटत्वे घटशब्दप्रवृत्तिनिमित्ते विधिरूपे सिद्धेऽसम्बद्ध एव तत्र पटाद्यर्थप्रतिषेध इति वाच्यम् पटादेस्तत्राभावाभावे घटशब्दप्रवृत्तिनिमित्तस्य घटत्वस्यैवाऽसिद्धेः। शब्दानां चार्थज्ञापकत्वं न कारकत्वमिति तथाभूतार्थप्रकाशनं तथाभूतेनैव शब्देन विधेयमिति नासम्बद्धस्तत्र पटाद्यर्थप्रतिषेधः। अथवा 'सर्वं सर्वात्मकम्' इति२० सांख्यमतव्यवच्छेदार्थं तत्प्रतिषेधो विधीयते तत्र तस्य प्रतीत्यभावात् १।

यद्वा नाम–स्थापना–द्रव्य–भावभिन्नेषु विधित्सिताऽविधित्सितप्रकारेण प्रथम–द्वितीयौ भङ्गौ। तत्प्रकाराभ्यां युगपद् अवाच्यम् तथाभिधेयपरिणामरहितत्वात् तस्य यतो यदि अविधित्सितरूपेणापि घटः स्यात् प्रतिनियतनामादिभेदव्यवहाराभावप्रसक्तिः तथा च विधित्सितस्यापि नात्मलाभ इति सर्वाभाव एव भवेत्। तथा यदि विधित्सितप्रकारेणाप्यघटः स्यात् तदा तन्निबन्धनव्यवहारोच्छेदप्रसक्तिरेव। एकपक्षाभ्युपगमेऽपि तदितराभावे तस्याप्यभाव इति अवाच्यः २।२५

---

१ 'स्याद् घटः'	२ 'स्याद् अघटः'
३ 'स्याद् घटश्च अघटश्च'	४ 'स्याद् अवक्तव्यः'

–१–६ तत्त्वार्थराजवा० पृ० २४ वा० ५।

१ "स्यादस्त्येवाखिलं यद्वत् स्वरूपादिचतुष्टयात्" ॥ ४९ ॥

२ "स्यान्नास्त्येव विपर्यासादिति कश्चिन्निषेधने।

३ स्याद् द्वैतमेव तद्द्वैतादित्यस्तित्व–निषेधयोः ॥ ५० ॥

४ क्रमेण यौगपद्याद्वा स्यादवक्तव्यमेव तत्" ॥ ५१ ॥

–१–६ तत्त्वार्थश्लो० वा० पृ० १२८।

१ "स्यादस्त्येव घटः।	२ स्यान्नास्त्येव घटः।
३ स्यादस्ति नास्ति च घटः।	४ स्यादवक्तव्य एव"।

–सप्तभङ्गीत० पृ० २ पं० २।

१ शास्त्रवा० स्याद्वादक० पृ० २५० प्र० पं० ७–११। २ **तस्यावृत्ताभि**–वा० बा०। ३ **तथापूर्वभू**–मां०। ४–**नवोरिव** बृ० ल० वा० बा०। ५ **न चानि**–बृ०।

६ अत्रत्याः सत्त्वासत्त्वाऽवक्तव्यत्वसमर्थनपरा दशापेक्षाप्रकाराः तत्त्वार्थराजवार्तिके दृश्यन्ते—१, ६ वा० ५ पृ० २४ पं० २१–पृ० २५ पं० १८। त एव च दश प्रकाराः प्रमेयरत्नकोशे समुद्धृताः–पृ० ५ पं० २३–पृ० ८ पं० १०।

शास्त्रवार्तासमुच्चयटीकायामत्रत्याः सर्वेऽपि तथैव परिगृहीताः– पृ० २५० द्वि० पं० १४–पृ० २५२ द्वि० पं० ६।

अथवा स्वीकृतप्रतिनियतप्रकारे तत्रैव नामादिके यः संस्थानादिः तत्स्वरूपेण घटः इतरेण चा-घट इति प्रथम-द्वितीयौ, ताभ्यां युगपदभिधातुमशक्तेरवाच्यः। विवक्षितसंस्थानादिनेव यदीतरे-णापि घटः स्याद् एकस्य सर्वघटात्मकत्वप्रसक्तिः अथ विवक्षितेनाप्यघटः पटादाविव घटार्थिनस्तत्रा-प्यप्रवृत्तिप्रसक्तिः। एकान्ताभ्युपगमेऽपि तथाभूतस्य प्रमाणाविषयत्वतोऽसत्त्वादवाच्यः ३।

यदि वा स्वीकृतप्रतिनियतसंस्थानादौ मध्यावस्था निजं रूपम् [1]कुशूल-कपालादिलक्षणे पूर्वोत्त-रावस्थे अर्थान्तररूपम् ताभ्यां [2]सदसत्त्वं प्रथम-द्वितीयौ। युगपत् ताभ्यामभिधातुमसामर्थ्याद् अवा-च्यलक्षणस्तृतीयो भङ्गः। तथाहि—मध्यावस्थावदितरावस्थाभ्यामपि यदि घटः स्यात् तस्य अनाद्य-नन्तत्वप्रसक्तिः अथ मध्यावस्थारूपेणाप्यघटः सर्वदा घटाभावप्रसक्तिः। एकान्तरूपत्वेऽप्ययमेव प्रसङ्ग इत्यसत्त्वादेव अवाच्यः ४।

अथवा तस्मिन्नेव मध्यावस्थास्वरूपे वर्त्तमानाऽवर्त्तमानक्षणरूपतया सदसत्त्वात् प्रथम-द्वितीय-भङ्गौ। ताभ्यां युगपदभिधातुमशक्तेरवाच्यलक्षणस्तृतीयः। तथाहि—यदि वर्त्तमानक्षणवत् पूर्वोत्तर-क्षणयोरपि घटः स्यात् वर्त्तमानक्षणमात्रमेवासौ जातः पूर्वोत्तरयोर्वर्त्तमानताप्राप्तेः। न च वर्त्तमान-क्षणमात्रमपि पूर्वोत्तरापेक्षस्य तदभावे अभावात्। अथातीतानागतक्षणवद् वर्त्तमानक्षणरूपतया अप्यघटः एवंसति सर्वदा तस्याभावप्रसक्तिः, एकान्तपक्षेऽप्ययमेव दोष इत्यभावादेव अवाच्यः ५।

यद्वा क्षणपरिणतिरूपे घटे लोचनजप्रतिपत्तिविषयत्वाविषयत्वाभ्यां निजार्थान्तरभूताभ्यां सदसत्त्वात् प्रथम-द्वितीयौ भङ्गौ। ताभ्यां युगपदादिष्टोऽवाच्यः। तथाहि—लोचन[3]जप्रतिपत्तिविषय-त्वेनेव यदीन्द्रियान्तरजप्रतिपत्तिविषयत्वेनापि घटः स्यात् इन्द्रियान्तरकल्पनावैयर्थ्यप्रसक्तिः इन्द्रि-यसङ्करप्रसक्तिश्च। अथेन्द्रियान्तरजप्रतिपत्तिविषयत्वेनेव चक्षुर्जप्रतिपत्तिविषयत्वेनापि न घटस्तर्हि तस्यारूपत्वप्रसक्तिः एकान्तवादेऽपि तदितराभावे तस्याप्यभावादवाच्य एव ६।

अथवा लोचनजप्रतिपत्तिविषये तस्मिन्नेव घटे 'घट'शब्दवाच्यता निजं रूपम् 'कुट'शब्दाभिधेय-त्वमर्थान्तरभूतं रूपम् ताभ्यां सदसत्त्वात् प्रथम-द्वितीयौ। युगपत् ताभ्यामभिधातुमिष्टोऽवाच्यः। यदि हि 'घट'शब्दवाच्यत्वेनेव 'कुट'शब्दवाच्यत्वेनापि घटः स्यात् तर्हि त्रिजगत एकशब्दवाच्यता-प्रसक्तिः घटस्य वाऽशेषपटादिशब्दवाच्यत्वप्रसक्तिरिति घटशब्दवाच्यत्वप्रतिपत्तौ समस्ततद्वाच-कशब्दप्रतिपत्तिप्रसङ्गश्च। तथा घटशब्देनापि यद्यवाच्यः स्यात् घटशब्दोच्चारणवैयर्थ्यप्रसक्तिः। एकान्ताभ्युपगमेऽपि घटस्यैवासत्त्वात् सङ्केतद्वारेणापि न तद्वाचकः कश्चित् शब्द इत्यवाच्य एव ७।

अथवा घटशब्दाभिधेये तत्रैव घटे हेयोपादेयान्तरङ्गबहिरङ्गोपयोगानुपयोगरूपतया सदसत्त्वात् प्रथम-द्वितीयौ। ताभ्यां युगपदादिष्टोऽवाच्यः। यदि हि हेयबहिरङ्गानर्थक्रियाकार्यसन्निहितरूपेणा-प्यर्थक्रियाक्षमादिरूपेणेव घटः स्यात् पटादीनामपि घटत्वप्रसक्तिः तद्वद् यद्युपादेयसन्निहितादिरू-पेणाप्यघटः स्यात् अन्तरङ्गस्य वक्तृ-श्रोतृगतहेतुफलभूतघटाकारावबोधकविकल्पोपयोगस्याप्यभावे घटस्याप्यभावप्रसङ्ग इत्यवाच्यः। एकान्ताभ्युपगमेऽप्ययमेव प्रसङ्ग इत्यवाच्यः ८।

अथवा तत्रैवोपयोगेऽभिमतार्थावबोधकत्वानभिमतार्थानवबोधकत्वतः सदसत्त्वात् प्रथम-द्वितीयौ। ताभ्यां युगपदादिष्टोऽवाच्यः। विवक्षितार्थप्रतिपादकत्वेनेवेतरेणापि यदि घटः स्यात् प्रतिनियतोपयोगाभावः तथाभ्युपगमे विविक्तरूपोपयोगप्रतिपत्तिर्न भवेत्। तदुपयोगरूपेणापि यद्य-घटो भवेत् तदा सर्वाभावः अविशेषप्रसङ्गो वा। न चैवम् तथाऽप्रतीतेः। एकान्तपक्षेऽप्ययमेव प्रसङ्ग इत्यवाच्यः ९।

अथवा सत्त्वम् असत्त्वं वा अर्थान्तरभूतम् निजं घटत्वम् ताभ्यां प्रथम-द्वितीयौ, अभेदेन ताभ्यां निर्दिष्टो घटोऽवक्तव्यो भवति। तथाहि—यदि सत्त्वमनूद्य घटत्वं विधीयते तदा सत्त्वस्य घटत्वेन व्याप्तेर्घटस्य सर्वगतत्वप्रसङ्गः तथाभ्युपगमे प्रतिभासबाधा व्यवहारविलोपश्च। तथा अस-त्त्वमप्यनूद्य यदि घटत्वं विधीयते तर्हि प्रागभावादेश्चतुर्विधस्यापि [4]घटेन व्याप्तेर्घटत्वप्रसङ्गः। अथ घटत्वमनूद्य सदसत्त्वे विधीयेते तदा घटत्वं यत् तदेव सदसत्त्वे इति घटमात्रं सदसत्त्वे प्रसज्येते तथा च पटादीनां प्रागभावादीनां चाभावप्रसक्तिरिति प्राक्तनन्यायेन विशेषणविशेष्यलोपात् 'सन् घटः' इत्येवमवक्तव्यः 'असन् घटः' इत्येवमप्यवक्तव्यः। न चैतत्त(चैकान्त)तोऽवाच्यः अनेकान्तपक्षे तु कथञ्चिदवाच्य इति न कश्चिद् दोषः १०।

---

१ **कुसूल**-बृ० वा० बा०। २ "ताभ्यां सदसत्त्वात्"-शास्त्रवा० स्याद्वादक० पृ० २५१ प्र० पं० ८। ३-**न प्र**-मां०। ४ "घटत्वेन"-शास्त्रवा० स्याद्वादक० पृ० २५२ प्र० पं० २। ५-**नां वा भा**-बृ० ल० मां० विना

यद्वा व्यञ्जनपर्यायोऽर्थान्तरभूतः तदतद्विषयत्वात् तस्य, [1]घटार्थपर्यायस्त्वन्यत्रावृत्तेर्निजः ताभ्यां प्रथम-द्वितीयौ, अभेदेन ताभ्यां निर्देशेऽवक्तव्यः। यतोऽत्रापि यदि व्यञ्जनमनूद्य घटार्थपर्याय-विधिः तदा तस्याशेषघटात्मकताप्रसक्तिरिति भेदनिबन्धनतद्व्यवहारविलोपः। अथार्थपर्यायम-नूद्य व्यञ्जनपर्यायविधिः तत्रापि कार्यकारणव्यतिरेकाभावप्रसक्तिः सिद्धविशेषानुवादेन घटत्वसा-मान्यस्य विधाने तस्याऽकार्यत्वात्। एवं च घटस्याभावादवाच्यः। अनेकान्तपक्षे तु युगपदभिधा-तुमशक्यत्वात् कथञ्चिदवाच्यः सिद्धः ११।

यद्वा सत्त्वमर्थान्तरभूतम् तस्य विशेषवदेकत्वादनन्वयिरूपता अत एव न तद्वाच्यमन्यविशे-षवत् अन्त्यविशेषस्तु निजः सोऽप्यवाच्योऽनन्वयात् प्रत्येकावक्तव्याभ्यां [2]ताभ्यामादिष्टो घटोऽवक्तव्यः। अनेकान्तपक्षे तु कथञ्चिदवक्तव्यः १२।

अथवा '[3]संद्रुतरूपाः सत्त्वादयो घटः' इत्यत्र दर्शने अर्थान्तरभूताः सत्त्वादयः, निजं संद्रुतरूपम् ताभ्यामादिष्टो घटोऽवक्तव्यः यतः संद्रुतरूपस्य सत्त्वरजस्तमस्सु सत्त्वे सत्त्वरजस्तमसामभावप्रसक्तिः तेषां परस्परवैलक्षण्येनैव सत्त्वादित्वात् सन्द्रुतरूपत्वे च वैलक्षण्याभावादभाव इति विशेष्याभावाद-वाच्यः। असत्त्वे त्वसत्कार्योत्पादप्रसङ्गः। न चैतदभ्युपगम्यते अभ्युपगमेऽपि विशेषणाभावाद-वाच्यः १३।

अथवा रूपादयोऽर्थान्तरभूताः असंद्रुतरूपत्वं निजम् ताभ्यामादिष्टोऽवक्तव्यः। [4]यथाहि-अरूपा-दिव्यावृत्ता रूपादयस्ते। एवं च रूपादीनां घटताऽवाच्या [5]अरूपादित्वाद् घटस्य। नहि परस्परवि-लक्षणबुद्धिग्राह्या रूपादय एकानेकात्मकप्रत्ययग्राह्याऽरूपादिरूपघटतां प्रतिपद्यन्त इति विशेष्य-लोपादवाच्यः। अथाप्यरूपादिरूपा रूपादयः; नन्वेवमपि रूपादय एव न भवन्तीति तेषामभावे केऽसंद्रुतरूपतया विशेष्या येनासंद्रुतरूपा रूपादयो घटो भवेत् इत्येवमप्यवाच्यः अनेकान्तवादे च कथञ्चिदवाच्यः १४।

यदि वा रूपादयोऽर्थान्तरभूताः [6]मतुबर्थो निजः ताभ्यामादिष्टो घटोऽवक्तव्यः रूपाद्यात्मैकैका-कारावभासप्रत्ययविषयव्यतिरेकेणा[7]परसम्बन्धानवगतेर्विशेष्याभावात् 'रूपादिमान् घटः' इत्यवाच्यः। न चैकाकारप्रतिभासग्राह्यव्यतिरेकेणापररूपादिप्रतिभास इति विशेषणाभावादप्यवाच्यः। अनेकान्ते तु कथञ्चिदवाच्यः १५।

अथवा बाह्योऽर्थान्तरभूतः उपयोगस्तु निजः ताभ्यामादिष्टोऽवक्तव्यः। तथाहि-य उपयोगः स घट इति यद्युच्येत तर्ह्युपयोगमात्रकमेव घट इति सर्वोपयोगस्य घटत्वप्रसक्तिरिति प्रतिनियतस्वरूपा-भावादवाच्यः। अथ यो घटः स उपयोग इत्युच्येत तथाप्युपयोगस्यार्थत्वप्रसक्तिरित्युपयोगाभावे घटस्याप्यभावः ततश्च कथं नावाच्यः? १६।

"एते च त्रयो भङ्गा गुण-प्रधान[8]भावेन सकलधर्मात्मकैकवस्तुप्रतिपादकाः स्वयं तथाभूताः सन्तो निरवयवप्रतिपत्तिद्वारेण सकलादेशाः वक्ष्यमाणास्तु चत्वारः सावयवप्रतिपत्ति[9]द्वारेणाशेष-धर्माक्रान्तं वस्तु प्रतिपादयन्तोऽपि विकलादेशाः" इति केचित् प्रतिपन्नाः। वाक्यं च सर्वमेकाने-कात्मकं सत् स्वाभिधेयमपि तथाभूतमवबोधयति यतो न तावन्निरवयवेन वाक्येन वस्तुस्वरूपा-भिधानं सम्भवति अनन्तधर्माक्रान्तैकात्मकत्वाद् वस्तुनः निरवयववाक्यस्य त्वेकस्वभाववस्तु-विषयत्वात् तथाभूतस्य च वस्तुनोऽसम्भवात् न निरवयवस्य तस्य वाक्यमभिधायकम्। नापि सावयवं वाक्यं वस्त्वभिधायकं सम्भवति वस्तुन एकात्मकत्वात्। न च वस्तुनो व्यतिरिक्तास्तदंशाः, तद्व्यतिरेकेण तेषामप्रतीतेः—एकस्वरूपव्याप्तानेकांशप्रतिभासात्। न च तद् एकात्मकमेव अनेकां-शानुरक्तस्यैव एकात्मनः प्रतिभासात् अतो वस्तुन एकानेकस्वभावत्वात् तथाभूतवस्त्वभिधायकाः

---

१ "घटोऽर्थपर्यायः"-शास्त्रवा० स्याद्वादक० पृ० २५२ प्र० पं० ६। २ "सत्त्वाऽन्त्यविशेषाभ्याम्"-बृ० ल० टि०। ३ **संद्भूतरू**-वा० बा०। ४ "यतो रूपादि-" शास्त्रवा० स्याद्वादक० पृ० २५२ द्वि० पं० २। ५-**च्या रूपादि**-वा० बा०। ६-**रूपत्वादि**-बृ० विना। ७-**ग्राह्यरू**-वा० बा०। ८ **मनुवज्जर्थो** वा० बा०। ९-**त्मकैकारा**-बृ० मां०। -**त्मकेकारा**-भां०। -**त्मकौकारा**-आ०। १०-**पररूपसम्ब**-आ० हा० वि०। "अपररूपसम्ब-न्ध्यनवगतेर्विशेष्याभावाद् न रूपादिमान्"-शास्त्रवा० स्याद्वादक० पृ० २५२ द्वि० पं० ६। ११-**भावे स**-आ०। १२-**द्वारेण शे**-बृ०।

शब्दा अपि तथाभूता एव नैकान्ततः सावयवा उभयैकान्तरूपा वा। तत्र विवक्षाकृतप्रधानभावसदाद्येकधर्मात्मकस्यापेक्षितापराशेषधर्मक्रोडीकृतस्य वाक्यार्थस्य स्यात्कारपदलाञ्छितवाक्यात् प्रतीतेः स्यादस्ति घटः १ स्यान्नास्ति घटः २ स्यादवक्तव्यो घटः ३ इत्येते त्रयो भङ्गाः सकलादेशाः। विवक्षाविरचितद्वित्रिधर्मानुरक्तस्य स्यात्कारपदसंसूचितसकलधर्मस्वभावस्य धर्मिणो वाक्यार्थरूपस्य प्रतिपत्तेश्चत्वारो वक्ष्यमाणका विकलादेशाः—स्यादस्ति च नास्ति घट इति प्रथमो विकलादेशः १। स्यादस्ति चावक्तव्यश्च घट इति द्वितीयः २। स्यात् नास्ति चाऽवक्तव्यश्च घट इति तृतीयः ३। स्यादस्ति च नास्ति चावक्तव्यश्च घट इति चतुर्थः ४। एत एव सप्त भङ्गाः स्यात्पदलाञ्छनविरहिणोऽवधारणैकस्वभावा विषयाभावतो दुर्नया भवन्ति। धर्मान्तरोपादानप्रतिषेधाकरणात् स्वार्थमात्रप्रतिपादनप्रवणा एते एव सुनयरूपतामासादयन्ति। स्यात्पदलाञ्छनविवक्षितैकधर्मावधारणवशाद् वा सुनयाः सद्व्यादेरेकदेशस्य व्यवहारनिबन्धनत्वेन विवक्षितत्वात् धर्मान्तरस्य च निषिद्धत्वात्। अतः 'स्यादस्ति' इत्यादि प्रमाणम् 'अस्त्येव' इत्यादि दुर्नयः 'अस्ति' इत्यादिकः सुनयो ननु (न तु) संव्यवहाराङ्गम् 'स्यादस्त्येव' इत्यादिस्तु नय एव व्यवहारकारणं स्वपराव्यावृत्तवस्तुविषयप्रवर्त्तकवाक्यस्य व्यवहारकारणत्वात् अन्यथा तदयोगात्॥ ३६॥

[चतुर्थभङ्गनिरूपणम्]

एवं निरवयववाक्यस्वरूपं भङ्गकत्रयं प्रतिपाद्य सावयववाक्यरूपचतुर्थभङ्गकं प्रतिपादयितुमाह—

अह देसो सब्भावे देसोऽसब्भावपज्जवे णियओ।
तं दवियमत्थि णत्थि य आएसविसेसियं जम्हा॥ ३७॥

अथ इति यदा देशो वस्तुनोऽवयवः सद्भावेऽस्तित्वे नियतः 'सन्नेवायम्' इत्येवं निश्चितः अपरश्च देशोऽसद्भावपर्याये—नास्तित्व एव—नियतः—'असन्नेवायम्' इत्यवगतः अवयवेभ्योऽवयविनः कथञ्चिदभेदाद् अवयवधर्मैस्तस्यापि तथाव्यपदेशः यथा 'कुण्ठो देवदत्तः' इति। ततोऽवयवसत्त्वासत्त्वाभ्यामवयवी अपि सदसन् सम्भवति। ततः **तद् द्रव्यमस्ति च नास्ति चेति भवत्युभयप्रधानावयवभागेन विशेषितं यस्मात्।** तथाहि-यद् अवयवेन विशिष्टधर्मेण आदिश्यते तद् अस्ति च नास्ति च भवति। तथा, स्वद्रव्य-क्षेत्र-काल-भावैर्विभक्तो घटः स्वद्रव्यादिरूपेणास्ति परद्रव्यादिरूपेण च स एव नास्ति। तथा च पुरुषादि वस्तु विवक्षितपर्यायेण बालादिना परिणतम् कुमारादिना चापरिणतमित्यादिष्टमिति योज्यम्॥ ३७॥

[पञ्चमभङ्गप्रदर्शनम्]

पूर्वभङ्गकप्रदर्शितन्यायेन पञ्चमभङ्गकप्रदर्शनायाह—

सब्भावे आइट्ठो देसो देसो य उभयहा जस्स।
तं अत्थि अवत्तव्वं च होइ दवियं वियप्पवसा॥ ३८॥

सद्भावेऽस्तित्वे यस्य घटादेर्धर्मिणो देशो धर्म आदिष्टोऽवक्तव्यानुविद्धस्वभावे अन्यथा तदसत्त्वात्। न ह्यपरधर्मापविभक्तामन्तरेण विवक्षितधर्मास्तित्वमस्य सम्भवति खरविषाणादेरिव। तस्यैवापरो देश उभयथा अस्तित्वनास्तित्वप्रकाराभ्यामेकदैव विवक्षितोऽस्तित्वानुविद्ध एवावक्तव्यस्वभावः अन्यथा तदसत्त्वप्रसक्तेः न ह्यस्तित्वाभावे उभयाविभक्तता शशशृङ्गादेरिव तस्य सम्भविनी, प्रथम-तृतीयकेवलभङ्गव्युदासस्तथाविवक्षावशादत्र कृतो द्रष्टव्यः तत्र प्रथम-तृती-

१-क्यार्थस्वरूप-आ०। २-भावात् दु-आ०। ३ न तु बृ० सं०। ४-त्यादिसुन-बृ० वा० विना।-त्यादिसुन-भां०। ५-रण स्व-बृ० ल० विना०। ६-ब्भावो बृ० ल०। ७-द्भाव एव प-बृ० वा० बा० मां०। ८ पञ्चमभङ्गप्र-बृ० ल० वा० बा० विना। ९-इद्धो ल०। १० अव्वत्त-बृ० ल०। अवत्तयं च बा० बा०।

ययोर्भङ्गकयोः परस्पराविशेषणभूतयोः प्रतिपाद्येनाधिगन्तुमिष्टत्वात् प्रतिपादकेनापि तथैव विवक्षितत्वात् अत्र तु तद्विपर्ययात् अनन्तधर्मात्मकस्य धर्मिणः प्रतिपाद्यानुरोधेन तथाभूतधर्माक्रान्तत्वेन वक्तुमिष्टत्वात् **तद् द्रव्यमस्ति च अवक्तव्यं च भवति** तद्धर्मविकल्पनवशात् धर्मयोस्तथापरिणतयोस्तथाव्यपदेशे धर्म्यपि तद्द्वारेण तथैव व्यपदिश्यते॥ ३८॥

[षष्ठभङ्गप्रदर्शनम्]

षष्ठभङ्गकं दर्शयितुमाह—

आइट्ठोऽसब्भावे देसो देसो य उभयहा जस्स।
तं णत्थि अवत्तव्वं च होइ दवियं वियप्पवसा॥ ३९॥

यस्य वस्तुनो देशोऽसत्त्वे निश्चितः 'असन्नेवायम्' इत्यवक्तव्यानुविद्धः अपरश्चासदनुविद्ध उभयथा 'सन्नसंश्च' इत्येवं युगपन्निश्चितस्तदा तद् द्रव्यं नास्ति च अवक्तव्यं च भवति विकल्पवशात् तद्व्यपदेश्यावयववशात् द्रव्यमपि तद्व्यपदेशमासादयति। केवलद्वितीयतृतीयभङ्गकव्युदासेन षष्ठभङ्गः प्रदर्शितः॥ ३९॥

[सप्तमभङ्गप्रकाशनम्]

सप्तमप्रदर्शनायाह—

सब्भावाऽसब्भावे देसो देसो य उभयहा जस्स।
तं अत्थि णत्थि अवत्तव्वयं च दवियं वियप्पवसा॥ ४०॥

यस्य देशिनो देशोऽवयवः देशो धर्मो वा सद्भाव नियतो निश्चितः अपरस्तु असद्भावे असत्त्वे तृतीयस्तु उभयथा इत्येवं देशानां सदसद्वक्तव्यव्यपदेशात् तद् अपि द्रव्यमस्ति च नास्ति चावक्तव्यं च भवति विकल्पवशात् तथाभूतविशेषणाध्यासितस्य द्रव्यस्यानेन प्रतिपादनादपरभङ्गव्युदासः। एते च परस्परापेक्षया सप्तभङ्गात्मकाः प्रत्येकं स्वार्थं प्रतिपादयन्ति नान्यथेति प्रत्येकं तत्समुदायो वा सप्तभङ्गात्मकः प्रतिपाद्यमपि तथाभूतं दर्शयतीति व्यवस्थितम्।

अत्र चाद्यभङ्गकस्त्रिधा, द्वितीयोऽपि त्रिधैव, तृतीयो दशधा, चतुर्थोऽपि दशधैव, पञ्चमादयस्तु त्रिंशदधिकशतपरिमाणाः प्रत्येकं श्रीमन्मल्लवादिप्रभृतिभिर्दर्शिताः। पुनश्च षड्विंशत्यधिकचतुर्दशशतपरिमाणास्त एव च द्व्यादिसंयोगकल्पनया कोटीशो भवन्तीत्यभिहितं तैरेव। अत्र तु ग्रन्थविस्तरभयात् तथा न प्रदर्शितास्तत एवावधार्याः।

अथानन्तधर्मात्मके वस्तुनि तत्प्रतिपादकवचनस्य सप्तधा कल्पने अष्टमवचनविकल्पपरिकल्पनमपि किं न क्रियत इति न वक्तव्यम् तत्परिकल्पननिमित्ताभावात्। तथाहि-न तावत् सावयवात्मकमन्योन्यनिमित्तकं तत् परिकल्पयितुं युक्तम् चतुर्थादिवचनविकल्पेषु तस्यान्तर्भावप्रसक्तेः। नापि निरवयवात्मकमन्योन्यनिमित्तकं तत् परिकल्पनामर्हति प्रथमादिष्वन्तर्भावप्रसक्तेः। न च गत्यन्तरमस्तीति नाष्टमभङ्गपरिकल्पना युक्ता। किञ्च, असौ क्रमेण वा तद्धर्मद्वयं प्रतिपादयेत्, यौगपद्येन वा? प्रथमपक्षे गुणप्रधानभावेन तत्प्रतिपादने प्रथमद्वितीययोरन्तर्भावः प्रधानभावेन तत्प्रतिपादने चतुर्थे। यौगपद्येन तत्प्रतिपादने तृतीये, भङ्गकसंयोगकल्पनया भङ्गान्तरकल्पनायां प्रथमद्वितीयभङ्गकसंयोगे चतुर्थभङ्गक एव प्रसज्यते, प्रथमतृतीयसंयोगात् पञ्चमप्रसक्तिः, द्वितीयतृतीयसंयोगात् षष्ठप्रसक्तिः, प्रथमद्वितीयतृतीयसंयोगात् सप्तमः, प्रथमचतुर्थादिसंयोगकल्पनायां पुनरुक्तदोषः। तस्मान्न कथञ्चिदष्टमभङ्गसम्भव इत्युक्तन्यायात् वस्तुप्रतिपादने सप्तविध एव वचनमार्गः॥ ४०॥

१ "धर्म" द्वारेण-बृ० ल० टि०। २ "न हि अपरधर्म-इत्यादिभावना अत्रापि कार्या-" बृ० ल० टि०। सा च पृ० ४४६ पं० ३१। ३-मभङ्गप्र-आ०। ४ "प्रथम-द्वितीय-तृतीय" भङ्गव्युदासः-बृ० ल० टि०। ५ सप्तभङ्गा-वा० बा०। ६-कमपरं निमित्तं तत् परि-बृ० ल० वा० बा०।

[सप्तानां भङ्गानामर्थनये शब्दनये च यथासंभवं विभजनम्]

अन्योन्यापरित्यागव्यवस्थितस्वरूपवाक्यनयानां शुद्ध्यशुद्धिविभागेन संग्रहादिव्यपदेशमासादयतां द्रव्यार्थिकपर्यायार्थिकनयावेव मूलाधार इति प्रदर्शनार्थमाह—

एवं सत्तवियप्पो वयणपहो होइ अत्थपज्जाए ।
वंजणपज्जाए उण सवियप्पो णिव्वियप्पो य ॥ ४१ ॥

एवं इत्यनन्तरोक्तप्रकारेण **सप्तविकल्पः** सप्तभेदः वचनमार्गो **वचनपथः भवत्यर्थपर्याये** अर्थनये संग्रह-व्यवहार-ऋजुसूत्रलक्षणे सप्ताप्यनन्तरोक्ता भङ्गका भवन्ति। तत्र प्रथमः संग्रहे सामान्यग्राहिणि, 'नास्ति' इत्ययं तु व्यवहारे विशेषग्राहिणि, ऋजुसूत्रे तृतीयः, चतुर्थः संग्रह-व्यवहारयोः, पञ्चमः संग्रह-ऋजुसूत्रयोः, षष्ठो व्यवहार-ऋजुसूत्रयोः, सप्तमः संग्रह-व्यवहार-ऋजुसूत्रेषु । **व्यञ्जनपर्याये** शब्दनये **सविकल्पः** प्रथमे पर्यायशब्दवाच्यताविकल्पसद्भावेऽप्यर्थस्यैकत्वात् । द्वितीय-तृतीययोर्**निर्विकल्पः** द्रव्यार्थात् सामान्यलक्षणान्निर्गतपर्यायाभिधायकत्वात् समभिरूढस्य पर्यायभेदभिन्नार्थत्वात् एवंभूतस्यापि विवक्षितक्रियाकालार्थत्वात् लिङ्ग-संज्ञा-क्रियाभेदेन भिन्नस्यैकशब्दावाच्यत्वात् । शब्दादिषु तृतीयः, प्रथम-द्वितीयसंयोगे चतुर्थः तेष्वेव चानभिधेयसंयोगे पञ्चम-षष्ठ-सप्तमा वचनमार्गा भवन्ति ।

अथवा प्रदर्शितस्वरूपा सप्तभङ्गी संग्रह-व्यवहार-ऋजुसूत्रेष्वेवार्थनयेषु भवतीत्याह-**एवं सत्तवियप्पो** इत्यादिगाथाम् । अस्यास्तात्पर्यार्थः—

अर्थनय एव सप्त भङ्गाः शब्दादिषु तु त्रिषु नयेषु प्रथम-द्वितीयावेव भङ्गौ । यो ह्यर्थमाश्रित्य वक्तृस्थः संग्रह-व्यवहार-ऋजुसूत्राख्यः प्रत्ययः प्रादुर्भवति सोऽर्थनयः अर्थवशेन तदुत्पत्तेः अर्थप्रधानतयासौ व्यवस्थापयतीति कृत्वा, शब्दं तु स्वप्रभवमुपसर्जनतया व्यवस्थापयति तत्प्रयोगस्य परार्थत्वात् । यस्तु श्रोतरि तच्छब्दश्रवणादुद्गच्छति शब्द-समभिरूढ-एवंभूताख्यः प्रत्ययस्तस्य शब्दः प्रधानम् तद्वशेन तदुत्पत्तेः अर्थस्तूपसर्जनम् तदुत्पत्तावनिमित्तत्वात् स शब्दनय उच्यते । तत्र च वचनमार्गः सविकल्प-निर्विकल्पतया द्विविधः—सविकल्पं सामान्यम् निर्विकल्पः पर्यायः तदभिधानाद् वचनमपि तथा व्यपदिश्यते । तत्र शब्द-समभिरूढौ संज्ञा-क्रियाभेदेऽप्यभिन्नमर्थं प्रतिपादयत इति तदभिप्रायेण सविकल्पो वचनमार्गः प्रथमभङ्गकरूपः । एवंभूतस्तु क्रियाभेदाद् भिन्नमेवार्थं तत्क्षणे प्रतिपादयतीति निर्विकल्पो द्वितीयभङ्गकरूपस्तद्वचनमार्गः । अवक्तव्यभङ्गकस्तु व्यञ्जननये न सम्भवत्येव यतः श्रोत्राभिप्रायो व्यञ्जननयः स च शब्दश्रवणादर्थं प्रतिपद्यते न शब्दाश्रवणात् अवक्तव्यं तु शब्दाभावविषय इति नावक्तव्यभङ्गकः व्यञ्जनपर्याये सम्भवतीत्यभिप्रायवता व्यञ्जनपर्याये तु सविकल्प-निर्विकल्पौ प्रथमद्वितीयावेव भङ्गावभिहितावाचार्येण 'तु'शब्दस्य गाथायामेवकारार्थत्वात् ॥ ४१ ॥

[केवलपर्यायार्थिकनयस्य मतमुपदर्श्य तस्यापूर्णत्वाभिधानम्]

इदानीं परस्परूपापरित्यागप्रवृत्तसंग्रहादिनयप्रादुर्भूततथाविधा एव वाक्यनयास्तथाविधार्थप्रतिपादका इत्येतत् प्रतिपाद्य अन्यथाभ्युपगमे तेषामप्यध्यक्षविरोधतोऽभाव एवेत्येतदुपदर्शनाय केवलानां तेषां तावन्मतमुपन्यस्यति—

---

१ "अस्तित्वनिषेधेन द्वितीयभङ्गस्य 'नास्ति'इत्यस्य प्रवृत्तेः"–बृ० ल० टि० । २ **त श**–बृ० । ३ **तदुपपत्ते**–बृ० वा० बा० विना । **तदुप तदुपपत्ते**–मां० ।

जह दवियमप्पियं तं तहेव अत्थि त्ति पज्जवणयस्स ।
ण य स समयपन्नवणा पज्जवणयमेत्तपडिपुण्णा ॥ ४२ ॥

यथा वर्त्तमानकालसम्बन्धितया यद् **द्रव्यमर्पितं** प्रतिपादयितुमभीष्टं **तत् तथैवास्ति** नान्यथा अनुत्पन्न-विनष्टतया भावि-भूतयोरविद्यमानत्वेनाप्रतिपत्तेः अप्रतीयमानयोश्च प्रतिपादयितुमशक्तेरतिप्रसङ्गाद् वर्त्तमानसम्बन्धिन एव तस्य प्रतीतेः **इति पर्यायार्थिकनयवाक्यस्याभिप्रायः** । एतद् अनेकान्तवादी दूषयितुमाह–**न** इति प्रतिषेधे, **स** इति तथाविधो वाक्यनयः परामृश्यते **समय** इति सम्यग् ईयते परिच्छिद्यत इति समयोऽर्थस्तस्य **प्रज्ञापना** प्ररूपणा **पर्यायनयमात्रे** द्रव्यनयनिरपेक्षे पर्यायनये **प्रतिपूर्णा** पुष्कला सम्पद्यते । **न स** वाक्यनयः सम्यगर्थप्रत्यायनां पूरयतीति यावत् पर्यायनयस्य सावधारणैकान्तप्रतिपादनरूपस्याध्यक्षबाधनात् तद्बाधां चाग्रतः प्रतिपादयिष्यति ॥ ४२ ॥

[केवलद्रव्यार्थिकनयमतस्य प्रदर्शनम्]

द्रव्यार्थिकवाक्यनयेऽप्ययमेव न्याय इति तदभिप्रायं तावदाह—

पडिपुण्णजोव्वणगुणो जह लज्जइ बालभावचरिएण ।
कुणइ य गुणपणिहाणं अणागयसुहोवहाणत्थं ॥ ४३ ॥

प्राप्तयौवनगुणः पुरुषो लज्जते बालभावसंवृत्तात्मीयानुष्ठानस्मरणात् 'पूर्वमहमप्यस्पृश्यसंस्पर्शादिव्यवहारमनुष्ठितवान्' **यथा** इत्युदाहरणार्थो गाथायामुपन्यस्तः यथैव ततोऽतीत-वर्त्तमानयोरेकत्वमवसीयते । **करोति च गुणेषु** उत्साहादिषु **प्रणिधानमैकाग्र्यम् अनागतं यत् सुखं तस्योपधानं** प्राप्तिस्तस्यै तदर्थम् 'मयैतस्मात् सुखसाधनात् सुखमाप्तव्यम्' इति । यतश्चैवमतोऽनागत-वर्त्तमानयोरैक्यम् ॥ ४३ ॥

[केवलद्रव्यार्थिकनयमतस्याप्यपूर्णत्वमिति प्रदर्शनेन वस्तुनो भेदाभेदरूपत्वसूचनम्]

अत्रापि मते यथावस्थितवस्तुस्वरूपप्ररूपणा न प्रतिपूर्यत इति सूत्रान्तरेण दर्शयति—

१-**यमेत्तिप**–बृ० वा० बा० ।–**यमित्तिप**–ल० मां० आ० । २ **वर्तमानंका**–मां० । ३–**कालंसम्ब**–बृ० भां० मां० आ० हा० वि० । ४ **साधारणे**–बृ० ल० ।

५ "तदिदं लोकानुभवतोऽपि साधयन्नाह–

लज्जते बाल्यचरितैर्बाल एव न चापि यत् । युवा न लज्जते चान्यस्त्रैरायत्यैव चेष्टते" ॥ २९ ॥

"लज्जते बाल्यचरितैः चौर्याऽसंस्पृश्यस्पर्शक्रीडादिभिः अतो बाल एव युवा 'अहमेव पूर्वं चौर्यादि अनुष्ठितवान्' इति लज्जानिबन्धनाऽभेदप्रत्यभिज्ञानाद् बाल-यूनोरभेदसिद्धेः । न चापि एकान्तः बाल एव यद् यस्माद् युवा, एवं हि 'अयमिदानीं युवा न बालः' इति भेदप्रतिभासो नानुरुद्धः स्यात् । न च बालस्वभावापरित्यागे युवस्वभावपरिग्रहोऽपि स्यात् उत्तरस्वभावे पूर्वस्वभावपरित्यागस्य हेतुत्वात् । न च तत्काले यूनि बालसामान्यभेद एव 'इदानीं युवा न बालः' इतिप्रतीतेरिति वाच्यम्, यतो न चान्यः भिन्नसंतानान्तरयुवा तैः बाल्यचरितैः लज्जते अतस्त्रं न तत्संतानीयबालभेद एव । तदेवमतीत-वर्तमानयोर्भेदाभेदो भावितः । एवमनागत-वर्तमानयोरपि, यत आयत्यैव वार्धके सुखहेतुधनाद्यर्थमेव चेष्टते । अतो युव-वृद्धयोरभेदः । नहि अन्योऽन्यार्थं चेष्टत इति" ॥ २९ ॥ शास्त्रवा० समु० स्तब० ७, स्याद्वादक० पृ० २५७ द्वि० । ६ **गुणेष्वत्सा**–वा० बा० । **गुणेषु उत्सा**–ल० । **गुणेषु तु उत्सा**–मां० मां० ।

ण य होइ जोव्वणत्थो बालो अण्णो वि लज्जइ ण तेण ।
ण वि य अणागयवयगुणपसाहणं जुज्जइ विभत्ते ॥ ४४ ॥

न च भवति यौवनस्थः पुरुषो **बालः** अपि त्वन्य एव **अन्योऽपि न लज्जते** बालचरितेन पुरुषान्तरवत् [1]**तेनानन्यः**। **नाप्यनागतवृद्धावस्थायां सुखप्रसाधनार्थमुत्साहस्तस्य** [3]**अत्यन्तामेदे**। एतदेवाह—**विभक्ते** इति विभक्तिर्भेदः। अकारप्रश्लेषाद् अविभक्ते भेदाभावेऽविचलितस्वरूपतया तत्प्रसाधकगुणयत्नासम्भवात्। तस्मान्नाऽभेदमात्रं तत्त्वम् कथञ्चिद्भेदव्यवहृतिप्रतिभासबाधितत्वात्। नापि भेदमात्रम् एकत्वव्यवहारप्रतिपत्तिनिराकृतत्वादिति भेदाभेदात्मकं तत्त्वमभ्युपगन्तव्यम् अन्यथा सकलव्यवहारोच्छेदप्रसक्तिः ॥ ४४ ॥

[पुरुषदृष्टान्ते भेदाभेदात्मकत्वपरिणतिर्बाह्यप्रत्यक्षेण सिद्धेति प्रदर्शनम्]

एवमभेदभेदात्मकस्य पुरुषतत्त्वस्य यथा अतीतानागतदोषगुणनिन्दाभ्युपगमाभ्यां सम्बन्धः तथैव भेदाभेदात्मकस्य तस्य सम्बन्धादिसिद्धेर्योग इति दृष्टान्तदार्ष्टान्तिकोपसंहारार्थमाह—

जाइ-कुल-रूव-लक्खण-सण्णा-संबंधओ अहिगयस्स ।
बालाइभावदिट्ठविगयस्स जह तस्स संबंधो ॥ ४५ ॥

जातिः पुरुषत्वादिका, **कुलं** प्रतिनियतपुरुषजन्यत्वम्, **रूपं** चक्षुर्ग्राह्यत्वलक्षणम्, **लक्षणं** तिलकादि सुखादिसूचकम्, **संज्ञा** प्रतिनियतशब्दाभिधेयत्वम्, एभिर्यः **सम्बन्धस्तदात्मपरिणामः** ततस्तमाश्रित्य **अधिगतस्य** ज्ञानस्य(ज्ञातस्य) तदात्मकत्वेनाभिन्नावभासविषयस्य यद्वा **सम्बन्धो** जन्यजनकभावः एभिर्[2]धिगतस्य तत्स्वभावस्यैकात्मकस्येति यावत् **बालादिभावैर्दृष्टैर्विगतस्य** तैरुत्पादविगमात्मकस्य तथाभेदप्रतीतेस्तस्य **यथा तस्य सम्बन्धो** भेदाभेदपरिणतिरूपो भेदाभेदात्मकत्वप्रतिपत्तेर्बाह्याध्यक्षतः ॥ ४५ ॥

[आध्यात्मिकप्रत्यक्षतोऽपि तत्र दृष्टान्ते यथा भेदाभेदात्मकत्वसिद्धिस्तथा दार्ष्टान्तिके जीवेऽपि तद्योजनम्]

आध्यात्मिकाध्यक्षतोऽपि तथाप्रतीतेस्तथारूपं तद् वस्त्विति प्रतिपादयन्नाह दृष्टान्तदार्ष्टान्तिकोपसंहारद्वारेण—

तेहिं अतीताणागयदोसगुणदुगुंछणऽब्भुवगमेहिं ।
तह बंध-मोक्ख-सुह-दुक्खपत्थणा होइ जीवस्स ॥ ४६ ॥

ताभ्यामतीतानागतदोष-गुणजुगुप्सा-ऽभ्युपगमाभ्यां यथा भेदाभेदात्मकस्य पुरुषत्वस्य सिद्धिः तथा दार्ष्टान्तिकेऽपि **तह बंध-मोक्ख-सुह-दुक्खपत्थणा होइ जीवस्स**

---

१ "न चाप्यभेद एव इत्याह—
युवैव न च वृद्धोऽपि नान्यार्थं चेष्टनं च तत्। अन्वयादिमयं वस्तु तदभावोऽन्यथा भवेत्" ॥३०॥
"न च युवैव वृद्धोऽपि सर्वथा वृद्धपर्यायापन्न एव 'इदानीमयं युवा न वृद्धः' इतिप्रतीतेः। न च तत्काले तत्र यूनि तत्संतानीयवृद्धभेद एव यतः अन्यार्थं संतानान्तरवृद्धवत् न च चेष्टनं कायव्यापाररूपम्। तत् तस्मात् वस्तु अन्वयादिमयम् आदिना व्यतिरेकग्रहाद् अन्वय-व्यतिरेकशबलम् अन्यथा तदभावः अधिकृतवस्त्वभावो भवेत् सर्वथा असत्सद्भावविरोधात्" ॥३०॥ शास्त्रवा० समु० स्तब० ७, स्याद्वादक० पृ० २५८ प्र०। २ **तेनान्यः** बृ० ल० भां० मां० विना। ३ **अत्यन्तमे**–आ० हा० वि० विना। ४ **हियस्स** बृ०। ५–**ह्यत्वलक्षणं तिल**–वा० बा०। –**ह्यत्वं लक्षणं तिल**–ल० आ०। ६–**रभिगतस्य लक्षणं तत्स्व**–बृ०। –**रवि तस्य लक्षणं तत्स्व**–वा० बा०।

इति तथा बन्ध-मोक्ष-सुख-दुःखप्रार्थना तत्साधनोपादानपरित्यागद्वारेण भेदाभेदात्मकस्यैव जीवद्रव्यस्य भवति बालाद्यात्मकपुरुषद्रव्यवत्। न च जीवस्य पूर्वोत्तरभवानुभवितुरभावाद् बन्ध-मोक्षभावाभावः उत्पाद-व्यय-ध्रौव्यात्मकस्य तस्यानाद्यनन्तस्य प्रसाधितत्वात्।

[उत्पाद–व्यय–ध्रौव्यात्मकतया जीवतत्त्वस्य साधनम्]

तथाहि–मरणचित्तं [3]भाव्युत्पादस्थित्यात्मकम् मरणचित्तत्वात् जीवदवस्थाविनाशचित्तवत्[5] तथा जन्मादौ चित्तप्रादुर्भावोऽतीतचित्तस्थितिविनाशात्मकः चित्तप्रादुर्भावत्वात्, मध्यावस्थाचित्तप्रादुर्भाववत् अन्यथा तस्याप्यभावप्रसक्तिः, न चास्याभावः हर्षविषादाद्यनेकविवर्त्तात्मकस्यानन्यवेद्यस्यान्तर्मुखाकारतया स्वसंवेदनाध्यक्षतः शरीरवैलक्षण्येनानुभूतेः। न च तथाप्रतीयमानस्याप्यभावः शरीरादेरपि बहिर्मुखाकारतया प्रतीयमानस्याभावप्रसक्तेः। न च नित्यैकान्तरूपे आत्मनि जन्म-मरणे अपि संभवतः कुतो बन्धमोक्षप्रसक्तिः? न च नित्यस्याप्यात्मनोऽभिनवबुद्धिशरीरेन्द्रियैर्योगो जन्म तद्वियोगो मरणमिति कल्पना सङ्गता अस्याः पूर्वं निषिद्धत्वात्। न चैकान्तोत्पाद-विनाशात्मके चित्ते इहलोक-परलोकव्यवस्था बन्धादिव्यवस्था वा युक्ता यत ऐहिककायत्यागेनाऽऽमुष्मिकतदुपादानमेकस्य परलोकः पूर्वग्रामपरित्यागावाप्ततदन्तरैकपुरुषवत्। न च दृष्टान्तेऽप्येकत्वमसिद्धम् उभयावस्थयोस्तस्यैकत्वेन प्रतिपत्तेः। न चेयं मिथ्या बाधकाभावात् विरुद्धधर्मसंसर्गादेर्बाधकस्याध्यक्षबाधादिना निरस्तत्वात्। न च पूर्वावस्थात्याग एकस्योत्तरावस्थोपादानमन्तरेण दृष्टः पृथुबुध्नोदराद्याकारविनाशवत् मृद्द्रव्यस्य कपालोपादानमन्तरेण तस्यादर्शनात्। न च कपालोत्पादमन्तरेण घटविनाश एव न सिद्धः घट-कपालव्यतिरेकेणापरस्य नाशस्याप्रतीतेरिति वक्तव्यम् कपालोत्पादस्यैव कथञ्चिद् घटविनाशात्मकतया प्रतिपत्तेः अत एव सहेतुकत्वं विनाशस्य कपालोत्पादस्य सहेतुकत्वात्। न च कपालानां भावरूपतैव केवला घटानिवृत्तौ तद्विविक्तायास्तेष्वभावप्रसक्तेः। न चैकस्योभयत्र व्यापारविरोधः दृष्टत्वात्। न च घटनिवृत्ति–कपालयोरेकान्तेन भेदः कथञ्चिदेकत्वप्रतीतेः। न च मुद्गरादेर्नाशं प्रत्यव्यापारे क्वचिदप्युपयोगः कपालेषु न तदुपयोगः अन्त्यावस्थायामपि घटक्षणान्तरोत्पत्तिप्रसक्तेः। तस्य तदुत्पादनसामर्थ्यविनाशात् तस्य स्वरसतो विनाशात् तदव्यतिरिक्तसामर्थ्यस्यापि विनाशः, न; पूर्वं तद्विनाशेऽपि तस्याविनाशात् विरोधिमुद्गरसन्निधानात् समानजातीयक्षणान्तरं न जनयतीति चेत्, न; 'घटविरोधी न च तं विनाशयति' इति व्याहतत्वात्। न च तद्धेत्वभावात् सामर्थ्याभावः तथाविधकार्यजननसमर्थहेतोर्भावात् अन्यथा प्रागपि तथाविधफलोत्पत्तिर्न भवेत्। न च स्वहेतुनिर्वर्त्तित एव दण्डादिसन्निधौ सामर्थ्याभावः दण्डादिसन्निधिमपेक्षमाणस्य तस्य तद्धेतुत्वोपपत्तेः अन्यत्रापि तद्भावस्य तन्मात्रनिबन्धनत्वात्। न च तद्व्यापारानन्तरं तदुपलम्भात् तस्य तत्कार्यत्वे मृद्द्रव्यस्यापि तत्कार्यताप्रसक्तिः तस्य सर्वदोपलम्भात्, सर्वदा तस्यानभ्युपगमे उत्पाद–विनाशयोरभावप्रसक्तिश्चेति प्रतिपादितत्वाच्च। तस्यैव तद्रूपतया परिणतौ कथञ्चिदुत्पादस्यापीष्टत्वात्। यदा च पूर्वोत्तराकारपरित्यागोपादानतयैकं मृदादिवस्त्वध्यक्षतोऽनुभूयते तदा तत् तदपेक्षया कारणम् कार्यम् विनष्टम् अविनष्टं च उत्पन्नम् अनुत्पन्नं च एककालम् अनेककालं च भिन्नम् अभिन्नं चेति कथं नाभ्युपगमविषयः?

न चात्र विरोधः मृद्व्यतिरिक्ततया घट-कपालयोरुत्पन्नविनष्टस्थितिस्वभावतया प्रतीतेः। न च प्रतीयमाने वस्तुस्वरूपे विरोधः अन्यथा ग्राह्यग्राहकाकाराभ्यामेकत्वेन स्वसंवेदनाध्यक्षतः प्रतीयमानस्य संवेदनस्य विरोधप्रसक्तेः। न च संशयदोषप्रसक्तिरपि उत्पत्ति-स्थिति-निरोधानां निश्चितरूपतया वस्तुन्यवगमात्। न च 'स्थाणुर्वा पुरुषो वा' इति प्रतिपत्ताविव प्रकृतनिश्चये

१–**त्मपु**–मां०। २ पृ० ७८ पं० २४। ३ **भावाव्यु**–ल० विना। ४–**दभ्युप**–बृ० ल० वा० बा०। –**दप्यभ्यु**–आ०। ५–**नाशोऽपि** बृ० ल० विना। ६–**धानान्न स**–बृ०। –**धानात्र स**–वा० बा०।

७ एकान्तवादिना अनेकान्तवादे समुद्भावितानां विरोधादीनामष्टानां दोषाणां परिहारोऽन्यत्र–प्रमेयक० पृ० १५६ प्र०। स्याद्वादमञ्ज० श्लो० २४ पृ० १९७ आ०। सप्तभङ्गीत० पृ० ८१।
८–**सक्तिरिति उत्प**–वा० बा०। ९–**न्यधिग**–बृ०। –**न्यविग**–वा० बा०।

"सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशयः" [वैशेषिकद० २, २, १७] इति निमित्तमस्ति। न च व्यधिकरणतादोषासक्तिरपि घटकपालविनाशोत्पादयोर्मृद्द्रव्याधिकरणतया प्रतिपत्तेः। न चोभयदोषानुषङ्गः ज्यात्मकस्य वस्तुनो जात्यन्तरत्वात्। सङ्करदोषप्रसक्तिरपि नास्ति अनुगतव्यावृत्त्योस्तदात्मके वस्तुनि स्वस्वरूपेणैव प्रतिभासनात्। अनवस्थादोषोऽपि न सम्भवी भिन्नोत्पाद-व्यय-ध्रौव्यव्यतिरेकेण तदात्मकस्य वस्तुनोऽध्यक्षे प्रतिभासनात् स्वयमतदात्मकस्यापरयोगेऽपि तदात्मकतानुपपत्तेरन्यथाऽतिप्रसङ्गात्। तथाप्रतिभासादेव अभावदोषोऽपि न सम्भवी अबाधितप्रतिभासस्य तदभावे अभावात् भावे वा न ततो वस्तुव्यवस्थितिरिति सर्वव्यवहारोच्छेदप्रसक्तिः। न च ज्यात्मकत्वमन्तरेण घटस्य कपालदर्शनाद् विनाशानुमानं सम्भवति तत्र तेषां प्रतिबन्धानवधारणात्। नहि तद्विनाशनिमित्तानि तानि मुद्गरादिहेतुत्वात् अभावस्य कारणत्वाभावाच्च। यद्यपि घटहेतुकानि तानि तथापि घटसद्भावमेव गमयेयुर्न तदभावम् नहि धूमः पावकहेतुकस्तदभावगमक उपलब्धः। न चाभिन्ननिमित्तजन्यता तयोः प्रतिबन्धः अभावस्याऽकार्यत्वाभ्युपगमात्। नापि तादात्म्यलक्षणः तयोस्तादात्म्यायोगात्। न च घटस्वरूपव्यावृत्तत्वात् तेषां तदभावप्रतिपत्तिजनकत्वम् सकलत्रैलोक्याभावप्रतिपत्तिजनकत्वप्रसक्तेः तेषां ततोऽपि व्यावृत्तस्वरूपत्वात्। न च घटविनाशरूपत्वात् तेषां नायं दोषः तेषां वस्तुरूपत्वात् विनाशस्य च निःस्वभावत्वात् तथा च तादात्म्यविरोधः अन्यथा घटानुपलम्भवत् तेषामपि तदाऽनुपलब्धिर्भवेत् तस्मात् प्रागभावात्मकः सन् घटः प्रध्वंसाभावात्मकतां प्रतिपद्यत इत्यभ्युपगन्तव्यम् अन्यथा पूर्वोक्तदोषानतिवृत्तिः। सत्त्वलक्षणस्यापि हेतोर्गमकत्वमनेनैव प्रकारेण सम्भवति अन्यथा उत्पत्त्यभावात् स्थित्यभावः तदभावे विनाशस्याप्यभावः असतो विनाशायोगादिति ज्यात्मकमेकं वस्त्वभ्युपगन्तव्यम् अन्यथा तदनुपपत्तेरिति प्राक् प्रदर्शितत्वान्न पुनरुच्यते। यथा चात्मनः परलोकगामित्वम् शरीरमात्रव्यापकत्वं च तथा प्रतिपादितमेव। ननु शरीरमात्रव्यापित्वे तस्य गमनाभावाद् देशान्तरे तद्गुणोपलब्धिर्न भवेत्, न; तदधिष्ठितशरीरस्य गमनाविरोधात् पुरुषाधिष्ठितदारुयन्त्रवत्। न च मूर्त्तामूर्त्तयोर्घटाकाशयोरिव प्रतिबन्धाभावात् मूर्त्तशरीरगमनेऽपि नामूर्त्तस्यात्मनो गमनमिति वक्तव्यम्, संसारिणस्तस्यैकान्तेनामूर्त्तत्वासिद्धेस्तत्प्रतिबद्धत्वाभावासिद्धेः ॥ ४६ ॥

[जल-दुग्धदृष्टान्तेन जीव-कर्मणोरविभागकथनम्]

एतदेवाह—

अण्णोण्णाणुगयाणं 'इमं व तं व' त्ति विभयणमजुत्तं।
जह दुद्ध-पाणियाणं जावंत विसेसपज्जाया ॥ ४७ ॥

अन्योन्यानुगतयोः परस्परानुप्रविष्टयोः आत्म-कर्मणोः **'इदं वा तद् वा'** इति 'इदं कर्म अयमात्मा' इति यद् **विभजनं** पृथक्करणं तद् **अयुक्तम्** अघटमानकम् प्रमाणाभावेन कर्त्तुमशक्यत्वात्। **यथा दुग्ध-पानीययोः** परस्परप्रदेशानुप्रविष्टयोः। किंपरिमाणोऽयमविभागो जीवकर्मप्रदेशयोः? इत्याह—**यावन्तो विशेषपर्यायास्तावान्**। अतः परमवस्तुत्वप्रसक्तेः अन्त्यविशेषपर्यन्तत्वात् सर्वविशेषाणाम् 'अन्त्य' इति विशेषणान्यथानुपपत्तेः ॥ ४७ ॥

---

१ "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"–१, १, २३ न्यायद० पृ० ४५।

२–**दोषाप्रसक्ति**–वा० बा० भां० मां०। ३ **यथा वात्म**–आ० विना। ४ पृ० ७२ पं० ३ तथा पृ० १३४ पं० ३१। ५–**स्तावन्तः पर**–भां० मां०।

[जीव–कर्मणोरन्योन्यानुप्रवेशेन तदाश्रितज्ञानादि–रूपादीनामपि परस्परानुप्रवेशवर्णनम्]

जीव–कर्मणोरन्योन्यानुप्रवेशे तदाश्रितानामन्योन्यानुप्रवेश इत्याह—

रूआइपज्जवा जे देहे जीवदवियम्मि सुद्धम्मि।
ते अण्णोण्णाणुगया पण्णवणिज्जा भवत्थम्मि ॥ ४८ ॥

रूप-रस-गन्ध-स्पर्शादयो ये पर्याया देहाश्रिता जीवद्रव्ये विशुद्धस्वरूपे च ये ज्ञानादयस्तेऽन्योन्यानुगता जीवे रूपादयो देहे ज्ञानादय इति **प्ररूपणीया भवस्थे** संसारिणि अकारप्रश्लेषाद् वा असंसारिणि। न च संसारावस्थायां देहात्मनोरन्योन्यानुबन्धात् रूपादिभिस्तद्व्यपदेशः मुक्त्यवस्थायां तु तदभावात् नासौ युक्त इति वक्तव्यम्, तदवस्थायामपि देहाद्याश्रितरूपादिग्रहणपरिणतज्ञान–दर्शनपर्यायद्वारेणात्मनस्तथाविधत्वात् तथाव्यपदेशसम्भवात् आत्मपुद्गलयोश्च रूपादि–ज्ञानादीनामन्योन्यानुप्रवेशात् कथञ्चिद् एकत्वम् अनेकत्वं च, मूर्त्तत्वम् अमूर्त्तत्वं चान्यतिरेकात् सिद्धमिति ॥ ४८ ॥

[परस्परानुप्रवेशादात्म-पुद्गलयोः कथंचिदेकत्वस्यानेकत्वस्य चोपपादनम्]

एतदेवाह—

एवं "एगे आया एगे दंडे य होइ किरिया य"।
करणविसेसेण य तिविहजोगसिद्धी वि अविरुद्धा ॥ ४९ ॥

एवं इत्यनन्तरोदितप्रकारेण मनो–वाक्–कायद्रव्याणामात्मन्यनुप्रवेशात् आत्मैव न तद्व्यतिरिक्तास्त इति तृतीयाङ्गैकस्थाने **"एगे आया"** [स्थाना० सू० २ पृ० १०] इति प्रथमसूत्रप्रतिपादितः सिद्धः एक आत्मा **एको दण्ड एका क्रियेति भवति** मनो–वाक्–कायेषु दण्ड–क्रियाशब्दौ प्रत्येकमभिसम्बन्धनीयौ **करणविशेषेण** च मनो–वाक्–कायस्वरूपेणात्मन्यनुप्रवेशावासत्रिविधयोगस्वरूपत्वात् **त्रिविधयोगसिद्धिरपि** आत्मनः **अविरुद्धैवेति** एकस्य सतस्तस्य त्रिविधयोगात्मकत्वात् अनेकान्तरूपता व्यवस्थितैव। न चान्योन्यानुप्रवेशात् एकात्मकत्वे बाह्याभ्यन्तरविभागाभाव इति अन्तर्हर्षविषादाद्यनेकविवर्त्तात्मकमेकं चैतन्यम् बहिर्बाल-कुमार–यौवनाद्यनेकावस्थैकात्मकमेकं शरीरमध्यक्षतः संवेद्यत इत्यस्य विरोधः बाह्याभ्यन्तरविभागाभावेऽपि निमित्तान्तरतः तद्व्यपदेशसम्भवात् ॥ ४९ ॥

[आत्म-पुद्गलयोर्वस्तुतो बाह्याभ्यन्तरविभागाभावेऽप्यभ्यन्तरव्यपदेशस्य मनोनिमित्तकत्वेन समर्थनम्]

एतदेवाह—

ण य बाहिरओ भावो अब्भंतरओ य अत्थि समयम्मि।
णोइंदियं पुण पडुच्च होइ अब्भंतरविसेसो ॥ ५० ॥

आत्म-पुद्गलयोरन्योन्यानुप्रवेशात् उक्तप्रकारेण अर्हत्प्रणीतशासने **न बाह्यो भावः अभ्यन्तरो वा संभवति** मूर्त्तामूर्त्तरूपादितयाऽनेकान्तात्मकत्वात् संसारोदरवर्त्तिनः सकलवस्तुनः। 'अभ्यन्तरः' इति व्यपदेशस्तु **नोइन्द्रियं** मनः **प्रतीत्य** तस्यात्मपरिणतिरूपस्य परा-प्रत्यक्षत्वात् शरीर–वाचोरिव। न च शरीरात्मावयवयोः परस्परानुप्रवेशात् शरीरादभेदे आत्म-

---

१–**स्थायां तद्**–मां० आ०। २ "एगे आया। एगे दंडे। एगा किरिया"–स्थाना० सू० २–३–४ पृ० १० तथा १३।

नोऽपि तद्वत् परप्रत्यक्षताप्रसक्तिः इन्द्रियज्ञानस्याशेषपदार्थस्वरूपग्राहकत्वायोगादित्यस्य प्रतिपादयिष्यमाणत्वात् अतः 'शरीरप्रतिबद्धत्वमात्मनो न भवति अमूर्त्तत्वात्' अत्र प्रयोगे हेतुरसिद्धः। यदि चात्मपरिणतिरूपमनसः शरीरादात्यन्तिको भेदः स्यात् तद्विकाराऽविकाराभ्यां शरीरस्य तत्त्वं न स्यात् तदुपकारापकाराभ्यां वा आत्मनः सुख-दुःखानुभवश्च न भवेत् शरीरविघातकृतश्च हिंसकत्वमनुपपन्नं भवेत् शरीरपुष्ट्यादेः रागाद्युपचयहेतुत्वम् शरीरस्य 'कृशोऽहं स्थूलोऽहम्' इति प्रत्ययविषयत्वं च दूरोत्सारितं भवेत्। पुरुषान्तरशरीरस्येव घटाकाशयोरपि प्रदेशान्योन्यप्रवेशलक्षणो बन्धोऽस्त्येवेत्ययुक्तो दृष्टान्तः अन्यथा घटस्यावस्थितिरेव न भवेत्। न चान्योन्यानुप्रवेशसद्भावेऽप्याकाशवत् शरीरपरतन्त्रता आत्मनोऽनुपपन्ना, मिथ्यात्वादेः पारतन्त्र्यनिमित्तस्यात्मनि भावात् आकाशे च तदभावात्। न च शरीरायत्तत्वे सति तस्य मिथ्यात्वादिबन्धहेतुभिर्योगः तस्माच्च तत्प्रतिबद्धत्वम् इतीतरेतराश्रयत्वम् अनादित्वाभ्युपगमेनास्य निरस्तत्वात्। न च शरीरसम्बन्धात् प्राग् आत्मनोऽमूर्त्तत्वम् सदा तैजस-कार्मणशरीरसम्बन्धित्वात् संसारावस्थायां तस्य अन्यथा भवान्तरस्थूलशरीरसम्बन्धित्वायोगात् पुद्गलोपष्टम्भव्यतिरेकेणोर्ध्वगतिस्वभावस्यापरदिग्गमनासम्भवात् स्थूलशरीरेणातिसूक्ष्मस्य रज्ववादिनेवाकाशस्य सम्बन्धायोगात् संसारिशून्यमन्यथा जगत् स्यादिति संसार्यात्मनः सूक्ष्मशरीरसम्बन्धित्वं सर्वदाभ्युपगन्तव्यम्।

अथ शरीरात्मनोस्तादात्म्ये शरीरावयवच्छेदे आत्मावयवस्यापि छेदप्रसक्तिः अच्छेदे तयोर्भेदप्रसङ्गः, न; कथञ्चित् तच्छेदस्याभ्युपगमात् अन्यथा शरीरात् पृथग्भूतावयवस्य कम्पोपलब्धिर्न भवेत्। न च छिन्नावयवानुप्रविष्टस्य पृथगात्मत्वप्रसक्तिः, तत्रैव पश्चादनुप्रवेशात् छिन्ने हस्तादौ कम्पादितल्लिङ्गादर्शनादियं कल्पना। न चान्यत्र गमनात् तस्य तल्लिङ्गानुपलब्धिः एकत्वादात्मनः शेषस्यापि तेन सह गमनप्रसक्तेः। न चैकत्र सन्तताववनेक आत्मा अनेकज्ञानावसेयानामेकत्राधारेऽप्रतिभासप्रसक्तेः शरीरान्तरव्यवस्थितात्मान्तरवत्। न च पृथग्भूतहस्ताद्यवयवस्थितोऽसौ तत्रैव विनष्ट इति कल्पनापि युक्तिसंगता, शेषस्याप्येकत्वेन तद्वद् विनाशप्रसक्तेः ततोऽन्यत्राऽगतेः तत्रासत्त्वात् अविनष्टत्वाच्च तदनुप्रवेशोऽवसीयते गत्यन्तराभावात्। न चैकत्वे आत्मनो विभागाभावाच्छेदाभाव इति वक्तव्यम्, शरीरद्वारेण तस्यापि सविभागत्वात् अन्यथा सावयवशरीरव्यापिता तस्य कथं भवेत्? न चारभ्यमूर्त्तद्रव्यावच्छिन्नावयवस्य(?) सर्वदैव तस्य तथाभावः—उत्तरकालमपि तदवयवोपष्टम्भोपलब्धस्यार्थस्य तथैव स्मरणात् अन्यत्वे चैतददर्शनात्। न चासावारभ्यमूर्त्तद्रव्यवद् द्व्यणुकादिप्रक्रमेणावस्थितसंयोगैस्तैरारब्धः येन तद्वत् तस्य तथैव भावप्रसक्तिः। न चानारब्धत्वात् तस्य निरवयवत्वम् शरीरसर्वगतत्वाभावप्रसक्तेः। न च शरीराऽसर्वगतोऽसौ, तत्र सर्वत्रैव स्पर्शोपलम्भात्। न तदव्यापकस्य तच्छेदे छेदः अतिप्रसङ्गात्। न च तदवयवच्छेदे न छिन्नः तत्र कम्पाद्युपलब्धेः अतस्तत्रैवानुप्रविष्ट एकत्वादिति ज्ञायते। कथं छिन्नाच्छिन्नयोः संघटनं पश्चादिति चेत्? न; एकान्तेन छेदाभावात् पद्मनालतन्तुवदविच्छेदाभ्युपगमात् संघटनमपि तथाभूतादृष्टवशादविरुद्धमेव। न चात्मनः शरीरमात्रव्यापकत्वे अन्यत्र शरीरान्तरसम्बन्धान्यथानुपपत्त्या गतिक्रियाप्रसक्तेरनित्यत्वप्रसक्तिर्दोषः, कथंचित् तस्येष्टत्वात् गृहान्तर्गतप्रदीपप्रभावत् संकोच-विकाशात्मकत्वेन तस्य न्यायप्राप्तत्वात्। न च देहात्मनोरन्योन्यानुबद्धत्वे देहभस्मसाद्भावे आत्मनोऽपि तथात्वप्रसक्तिः, क्षीरोदकवत् तयोर्लक्षणभेदतो भेदात्। नहि भिन्नस्वरूपयोरन्योन्यानुप्रवेशे सत्यप्येकक्षयेऽपरस्य क्षयः यथा क्वाथ्यमाने क्षीरे प्रथममुदकक्षयेऽपि न क्षीरक्षयः। न चेह लक्षणभेदो नास्ति। तथाहि—रूप-रस-गन्ध-स्पर्शादिधर्मवन्तः पुद्गलाः चेतनालक्षणश्चात्मेति सिद्धस्तयोर्लक्षणभेदः। यथा चैकान्तामूर्त्तादिरूपत्वे अर्थक्रियादेर्व्यवहारस्याभावस्तथा प्रतिपादितमनेकधेति मूर्त्तामूर्त्ताद्यनेकान्तात्मकत्वमात्मनोऽभ्युपगन्तव्यम्॥ ५०॥

---

१ यदि वा—वा० बा० आ०। २ तस्या तथा—हा०। प्रमेयक० पृ०—१७१ प्र०—पृ० १७६ द्वि०। रत्नाकराव० परि० ७, ५६ पृ० १४९ पं० २४—पृ० १५३। स्याद्वादमञ्ज० श्लो० ९ पृ० ५९—६६ आ०। शास्त्रवा० समु० स्तब० ३ श्लो० ३२ स्याद्वादक० पृ० १११। ३—था वचाप्यमा—मां०।—था कथ्य—वा० बा०। ४ "स्पर्श-रस-गन्ध-वर्णवन्तः पुद्गलाः"—तत्त्वार्थ० अ० ५ सू० २७। ५ "उपयोगो लक्षणम्"—तत्त्वार्थ० अ० २ सू० ८।

[निरपेक्षयोर्द्रव्यास्तिक-पर्यायास्तिकयोर्मतेन यथा यथा कर्मबन्धस्तत्फलप्ररूपणा भवति तथोपवर्णनम्]

अस्य च मिथ्यात्वादिपरिणतिवशोपात्तपुद्गलाङ्गाङ्गिभावलक्षणो बन्धः तद्वशोपनतसुख-दुःखाद्यनुभवस्वरूपश्च भोगः अनेकान्तात्मकत्वे सत्युपपद्यते अन्यथा तयोरयोग इति प्रतिपादनार्थमाह—
दव्वट्ठियस्स इत्यादि। ५

अथवा परस्परसापेक्षद्रव्यास्तिक-पर्यायास्तिकयोः प्ररूपणा प्रदर्शितन्यायेन सम्भविनी निरपेक्षयोः कथं सा? इत्याह—

दव्वट्ठियस्स आया बंधइ कम्मं फलं च वेएइ।
बीयस्स भावमेत्तं ण कुणइ ण य कोइ वेएइ॥ ५१॥

द्रव्यास्तिकस्येयं प्ररूपणा-आत्मा एकः स्थायी कर्म ज्ञानादिविबन्धकं बध्नाति स्वीकरोति तस्य कर्मणः फलं च कार्यरूपं वेदयते भुङ्क्ते आत्मैव। द्वितीयस्य तु पर्यायार्थिकस्येयं प्ररूपणा-नैवात्मा स्थाय्यस्ति किन्तु भावमात्रं विज्ञानमात्रमिति न करोति न च कश्चिद् वेदयते उत्पत्तिक्षणानन्तरध्वंसिनः कर्तृत्वाऽनुभवितृत्वायोगात्॥ ५१॥

तथेयमपि तयोस्तथाभूतयोः प्ररूपणेत्याह—

दव्वट्ठियस्स जो चेव कुणइ सो चेव वेयए णियमा। १५
अण्णो करेइ अण्णो परिभुंजइ पज्जवणयस्स॥ ५२॥

य एव करोति स एव वेदयते नित्यत्वात् द्रव्यास्तिकस्यैतन्मतम्। अन्यः करोत्यन्यश्च भुङ्क्ते क्षणिकत्वात् पर्यायनयस्य। ननु पूर्वगाथोक्तमेव पुनरभिदधता पिष्टपेषणमाचार्येण कृतं भवेत्, न; उत्पत्तिसमनन्तरध्वस्तेन करणम् भोगो वा सम्भवीति प्राक् प्रतिपादितम् इह तु उत्पत्तिक्षण एव कर्त्ता तदनन्तरक्षणश्च भोक्तेति न पुनरुक्तता। उक्तं च परैः—२० "भूतिर्येषां क्रिया सैव कारकं सैव वोच्यते" [ ] इति॥ ५२॥

[सापेक्षनयद्वयाश्रितानामेव कथंचित्पदाङ्कितानां वचसां स्वसमयप्ररूपणात्वं नान्येषामित्यभिधानम्]

इयमसंयुक्तयोरनयोः स्वसमयप्ररूपणा न भवति या तु स्वसमयप्ररूपणा तामाह— २५

जे वयणिज्जवियप्पा संजुज्जंतेसु होन्ति एएसु।
सा ससमयपण्णवणा तित्थयराऽऽसायणा अण्णा॥ ५३॥

ये वचनीयस्याभिधेयस्य विकल्पास्तत्प्रतिपादका अभिधानभेदाः संयुज्यमानयोरन्योन्यसम्बद्धयोर्भवन्त्यनयोर्द्रव्यास्तिक-पर्यायास्तिकवाक्यनययोः। ते च—'कथंचिन्नित्य आत्मा कथञ्चिदमूर्त्तः' इत्येवमादयः। सा एषा स्वसमयस्येति तदर्थस्य प्रज्ञापना निदर्शना अन्या तु ३० निरपेक्षयोरनयोरेव नययोर्या प्ररूपणा सा तीर्थकरस्यासादनाऽधिक्षेपः। "एगमेगेणं जीवस्स

---

१ "क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया?। भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते"॥—बोधिचर्यावता० प्रज्ञापार० पञ्जि० परि० ९ पृ० ३७६ पं० २। २, २, २० ब्रह्म० भामती पृ० ५३१। रत्नाकराव० परि० १—१५ पृ० २९ पं० १४। स्याद्वादमञ्ज० श्लो० १६ पृ० १३८ पं० ७ आ०। मध्यमकवृ० पृ० ११६ टि० १। २ प्र०—"एगमेगस्स णं भंते! जीवस्स एगमेगे जीवपएसे णाणावरणिज्जस्स कम्मस्स केवइएहिं अविभागपलिच्छेदेहिं आवेढिए परिवेढिए सिया? उ०—गोयमा! सिय आवेढियपरिवेढिए सिय नो आवेढियपरिवेढिए। जइ आवेढियपरिवेढिए नियमा अणंतेहिं"।—भगवती० शत० ८ उद्दे० १० सू० ३५९।

पएसे अणंतेहिं णाणावरणिज्जपोग्गलेहिं आवेढियपवेढिए" [ ] इति तीर्थकृद्वचने प्रमाणोपपन्ने सत्यपि—

"नामूर्त्तं मूर्त्ततामेति मूर्त्तं नायात्यमूर्त्तताम् ।
द्रव्यं कालत्रयेऽपीत्थं च्यवते नात्मरूपतः" ॥ [ ] इति ।

५ तीर्थकृन्मतमेवैतन्नयवादनिरपेक्षमिति कैश्चित् प्रतिपादयद्भिस्तस्याधिक्षेपप्रदानात् ॥ ५३ ॥

[स्याद्वादज्ञः अधिकारिविशेषे सति निरपेक्षनयद्वयाश्रितान्यपि वचांसि प्रयुञ्जानो न दोषभागिति प्रथनम्]

परस्परनिरपेक्षयोरनयोः प्रज्ञापना तीर्थकरासादना इत्यस्यापवादमाह–

पुरिसज्जायं तु पडुच्च जाणओ पण्णवेज्ज अण्णयरं ।
१० परिकम्मणाणिमित्तं दाएही सो विसेसं पि ॥ ५४ ॥

पुरुषजातं प्रतिपन्नद्रव्यपर्यायान्यतरस्वरूपम् श्रोतारं वा प्रतीत्य आश्रित्य ज्ञकः स्याद्वादवित् प्रज्ञापयेत् आचक्षीत अन्यतरत् पर्यायम् द्रव्यं वा—अभ्युपेतपर्यायाय द्रव्यमेव, अङ्गीकृतद्रव्याय च पर्यायमेव कथयेत् । किमित्येकमेव कथयेत्? परिकर्मनिमित्तं बुद्धिसंस्कारार्थम् । परिकर्मितमतये दर्शयिष्यत्यसौ स्याद्वादाभिज्ञः विशेषमपि द्रव्य-पर्याययोः पर-
१५ स्परविनिर्भागरूपमेकांशविषयविज्ञानस्यान्यथा विपर्ययरूपताप्रसक्तिः स्यात् तदितराभावे तद्विषयस्याप्यभावात् ॥ ५४ ॥

इति तत्त्वबोधविधायिन्यां [3]सम्मतिटीकायां [3]प्रथमकाण्डम् ॥

---

१ "परः शङ्कते" इति निर्दिश्य समुद्धृतमिदं पद्यमित्थम्—
"नामूर्तं मूर्ततां याति मूर्तं नायात्यमूर्ततम् ।
यतो बन्धाद्यतो न्यायादात्मनोऽसंगतं तया ॥ ४१ ॥–शास्त्रवा० समु० स्तब ३ ।

२ **सन्मति**–बृ० वा० बा० । **संमति**–ल० भां० आ० । ३ **प्रथमं काण्डं** बृ० ।

Rinsen Buddhist Text Series VI–1
サンマティタルカ

Siddhasena Divākara : Saṃmatitarka Prakaraṇam, with Abhayadevasūri's Commentary : Tattvabodhavidhāyinī
Volume I

1984年9月1日 複製第1刷発行 全二冊 定価16,000円

発行者 片岡英三
印刷 明文堂印刷所
製本 新生製本株式会社

発行所 株式会社 臨川書店
京都市左京区今出川通川端東入
(〒606) 郵便振替 京都7-800番
電話 (075) 721-7111

RINSEN BOOK CO.
P.O.BOX: SAKYO 8/IMADEGAWA
KAWABATA, SAKYO-KU,
KYOTO 606, JAPAN

Rinsen Buddhist Text Series VI-2

SAṂMATITARKA-PRAKARAṆAM

By

Siddhasena Divākara

With

Abhayadevasūri's Commentary,
Tattvabodhavidhāyinī

Vol. II

SAṂMATITARKA-PRAKARAṆAM

By

Siddhasena Divākara

With

Abhayadevasūri's Commentary,
Tattvabodhavidhāyinī

Vol. II



1984

RINSEN BOOK CO.

Reprinted from the original edition published
in 5 vols., 1924～1931.

ISBN4-653-01084-6

L 257832

REPRODUCED BY
RINSEN BOOK CO., KYOTO 1984

गूजरात
पुरातत्त्वमन्दिर
ग्रन्थावली

ग्रन्थाङ्क १९

गूजरातपुरातत्त्वमन्दिरग्रन्थावली

आचार्यश्रीसिद्धसेनदिवाकरप्रणीतं

संमतितर्क-प्रकरणम् ।

जैनश्वेताम्बर-राजगच्छीय-प्रद्युम्नसूरिशिष्य-तर्कपञ्चानन-
श्रीमद्-अभयदेवसूरिनिर्मितया तत्त्वबोधविधायिन्या
व्याख्यया विभूषितम् ।

चतुर्थो विभागः ।

(द्वितीयकाण्डान्तः)

गूजरातविद्यापीठप्रतिष्ठितपुरातत्त्वमन्दिरस्थेन
संस्कृतसाहित्य-दर्शनशास्त्राध्यापकेन
पं० सुखलालसंघविना
प्राकृतवाङ्मयाध्यापकेन जैनन्याय-व्याकरणतीर्थ-
पं० बेचरदासदोशिना च
पाठान्तर-टिप्पण्यादिभिः परिष्कृत्य संशोधितम् ।

गूजरात विद्यापीठ
अमदावाद

प्रथमावृत्तिः, प्रतिसं० ५००] संवत् १९८५ [मूल्यम्-१० रूप्यकाणि.

प्रकाशकः—नरहरि द्वारकादास परीख महामात्र, गूजरात विद्यापीठ,
अमदावाद

मुद्रकः—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस, नं. २६–२८, कोलभाट लेन, मुंबई

टीका–टिप्पण्युपयुक्तावतरणस्थानानां संकेताः ।

अभिधान०	अभिधानचिन्तामणिकोशः ।
अष्टश०	अष्टशती ।
आप्तपरीक्षाप्रस्तावना ।	
आवश्यकनि० नवकारनि०	आवश्यकनिर्युक्तौ नमस्कारनिर्युक्तिः ।
आवश्यक० हारि०	आवश्यकस्य हरिभद्रीया वृत्तिः ।
कल्पसू० मू०	कल्पसूत्रमूलम् ।
कुमारसं०	कुमारसंभवटीका ।
केवलिभुक्तिप्रकरणम्	शाकटायनविरचितं केवलिभुक्तिप्रकरणम् ।
गोम्मटसारः	
गं० श्लो० वा०	गङ्गानाथझाकृतानुवादं श्लोकवार्तिकम् ।
चरकसंहिता ।	
जैनतर्कपरि०	जैनतर्कपरिभाषा ।
ज्ञानबिं०	ज्ञानबिन्दुः ।
तत्त्वार्थ० व्या०	तत्त्वार्थव्याख्या ।
तत्त्वार्थश्लोकवार्तिकालङ्कारः ।	
तत्त्वोप० लि०	तत्त्वोपप्लवः लिखितः ।
त्रिंशिकाविज्ञ०	त्रिंशिकाविज्ञप्तिः वसुबन्धुकृता ।
त्रिंशिकाविज्ञ० भा०	त्रिंशिकाविज्ञप्तिभाष्यम् स्थिरमतिकृतम् ।
नयनप्रसादिनी चित्सुखी ।	
नियमसारः ।	
नन्दि० चू० लिं० लि०	नन्दिसूत्रचूर्णिः लिम्बडीभण्डारसत्का लिखिता ।
नन्दि० म० नन्दिसूत्रवृत्तिः	नन्दिसूत्रमलयगिरिटीका
नन्दि० ल० वा० लि०	नन्दिसूत्रलघुटीका वाडीपार्श्वनाथभण्डारसत्का लिखिता ।
ध० न्या० टी० न्यायबिं० टी०	धर्मकीर्तिकृतन्यायबिन्दोष्टीका ।
ध० न्या० टी० टि०	धर्मकीर्तिकृतन्यायबिन्दोष्टीकायाष्टिप्पणी ।
न्यायमञ्ज०	न्यायमञ्जरी ।
न्यायसि० मु० का० मुक्ताव०	न्यायसिद्धान्तमुक्तावलिकारिका ।
परीक्षामुखम् ।	
प्रमाणप०	प्रमाणपरीक्षा ।
प्रमाणमी०	प्रमाणमीमांसा ।
प्रज्ञाप०	प्रज्ञापनासूत्रम् ।
बृहद्द्रव्यसंग्रहः ।	
महाभा०	महाभारतम् ।
,, वनप०	,, वनपर्व ।
रत्नाकराव०	रत्नाकरावतारिका ।
रामाय० अरण्य०	रामायणम् अरण्यकाण्डः ।
लघीयस्त्र०	लघीयस्त्रयम् ।

लघीयस्त्र० स्वो० बृ० लि०	लघीयस्त्रयस्य स्वोपज्ञा बृहद्वृत्तिः लिखिता ।
विशेषणवती ।	
विशेषा० भा०	विशेषावश्यकभाष्यम् ।
विशेषावश्यकभाष्यवृत्तिः ।	
विज्ञप्तिमात्र०	विज्ञप्तिमात्रतासिद्धिः विंशतिका वसुबन्धकृता ।
वैजय०	वैजयन्तीकोशः ।
श्रीभा०	श्रीभाष्यम् ।
श्लो० वा० अनु०	श्लोकवार्तिकम् अनुमानपरिच्छेदः ।
,, अर्थाप०	,, अर्थापत्तिपरिच्छेदः ।
,, उपमान०	,, उपमानपरिच्छेदः ।
,, निरा०	,, निरालम्बनवादः ।
,, प्रत्यक्ष० / ,, प्रत्यक्षसू०	,, प्रत्यक्षसूत्रम् । / ,, ,,
,, शब्दप०	,, शब्दपरिच्छेदः ।
षड्द० स० बृ० वृ०	षड्दर्शनसमुच्चयबृहद्वृत्तिः ।
स्फुटार्थअभि०	स्फुटार्थअभिधर्मकोशव्याख्या यशोमित्रकृता ।

विषयानुक्रमः

विषयः	पृष्ठम्
प्रथमगाथाव्याख्या ।	४५७–५९५
१ उपयोगनिरूपणम् ।	४५७–४५८
व्यस्तयोर्दर्शन-ज्ञानयोः लक्षणमभिधाय द्रव्यास्तिक-पर्यायास्तिकाभ्यां तयोः स्वभावस्य विभज्य वर्णनम् ।	४५७
उपयोगस्य साकारानाकारते स्पष्टयित्वा तयोः प्रामाण्याऽप्रामाण्य-कथंतताभिधानम् ।	४५८
२ प्रमाणसामान्यनिरूपणम् ।	४५८–५१८
वैभाषिक-सौत्रान्तिक-योगाचारसंमतानां निराकार-साकारविज्ञानवादानां परस्परोपमर्दं पूर्वपक्षतयोपन्यासः ।	४५८–४६३
बाह्यार्थं तद्ग्राहकं च निराकार-साकारज्ञानं स्वीकुर्वता सिद्धान्तिना साकारज्ञानप्रमाणवादस्य प्रतिविधानम् ।	४६३–४६६
जैमिनीयसंमतं ज्ञातृव्यापारस्य प्रमाणत्वं निराकर्तुं तद्विशेषणस्यानधि-गतार्थाधिगन्तृत्वस्य व्यपोहनम् ।	४६६–४६७
धर्मोत्तरीयं प्रमाणसामान्यलक्षणं व्यावर्ण्य सिद्धान्तिना तस्य समालोच्य दूषणम् ।	४६७–४७१
नैयायिक-वैशेषिकसंमतस्य सामग्रीप्रामाण्यवादस्य पूर्वपक्षतयोपन्यासः ।	४७१–४७२
सामग्रीप्रमाणवादं प्रतिविधाय स्वार्थनिर्णीतिस्वभावज्ञानस्य प्रमाणसामान्यलक्षणतयोपसंहारः ।	४७३–४७५
नैयायिकादिसंमतं परसंविदितत्वपक्षमपास्य सिद्धान्तिना लक्षणैकदेश-भूतस्य स्वनिर्णीतिस्वभावत्वस्य व्यवस्थापनम् ।	४७५–४७९
विज्ञान-शून्यतावादीयमर्थस्यासत्त्वपक्षं निरस्य तस्य च पारमार्थिकत्वं प्रतिष्ठाप्य लक्षणेऽर्थनिर्णीतिस्वभावत्वस्योपपादनम् ।	४८०–४८८
स्वार्थनिर्णयस्वभावं ज्ञानमिति प्रमाणलक्षणं प्रतिक्षेप्तुकामेन सौगतेन निर्विकल्पस्यैव प्रत्यक्षत्वस्थापनम् ।	४८८
वैयाकरणसम्मतं केवलसविकल्पकवादमुपन्यस्य निर्विकल्पकवादिना तस्य दूषणम् ।	४८९–४९३
नैयायिकादिसम्मतं केवलसविकल्पकवादमुपन्यस्य निर्विकल्पकवादिना तस्यापि दूषणम् ।	४९३–४९९
निर्विकल्पकमेवाध्यक्षमिति मतं प्रतिविधाय सविकल्पस्याध्यक्षत्व-मुपपाद्य च सिद्धान्तिना स्वार्थनिर्णयस्वभावज्ञानस्य प्रमाणसामान्यलक्षणत्वव्यवस्थापनम् ।	४९९–५१८
३ प्रमाणविशेषनिरूपणम् ।	५१८–५७२
प्रत्यक्षम् ।	५१८–५५३
प्रत्यक्षे निरूपयितव्ये पूर्वं सौगतमतविरोधितया नैयायिकसम्मतस्य प्रत्यक्षलक्षणस्योपन्यासः ।	५१८–५२४
निर्विकल्पकस्यैव प्रत्यक्षत्वमामनतां सौगतानां नैयायिकसम्मते विकल्पप्रामाण्ये प्रतिक्षेपः ।	५२४–५२५
नैयायिकैः सौगताक्षेपस्य प्रतिविधानम् ।	५२५–५२७

विषयः	पृष्ठम्
केषांचित् न्यायसूत्रीयप्रत्यक्षलक्षणे प्रतिक्षेपः ।	५२७–५३०
नैयायिकैः फलविशेषणपक्षाश्रयेण प्रतिक्षेपमुदस्य प्रत्यक्षसूत्रोक्त-लक्षणस्य समर्थनम् ।	५३०–५३२
नैयायिकैर्विन्ध्यवासीयप्रत्यक्षलक्षणस्य निराकरणम् ।	५३३–५३४
नैयायिकैर्जैमिनीयसूत्रोक्तप्रत्यक्षलक्षणस्य निरासः ।	५३४–५३९
सिद्धान्तिना न्यायसूत्रीयप्रत्यक्षलक्षणस्य खण्डनम् ।	५४०–५५२
प्रसङ्गादिन्द्रियाणां प्राप्याप्राप्यकारित्वचर्चा ।	५४०–५४६
अनुषङ्गात् तमसो भावाभावत्वप्रक्रमः ।	५४३
प्रत्यक्षस्य तद्भेदानां च सिद्धान्तसंमतं निरूपणम् ।	५५२–५५३
प्रत्यक्षैकप्रमाणवादिनश्चार्वाकस्यानुमानप्रामाण्याशङ्का ।	५५४
सौगतैरनुमानप्रामाण्यसमर्थनेन चार्वाकाशङ्कायाः प्रतिविधानम् ।	५५४–५५९
अक्षपादीयानुमानसूत्रस्य विविधां व्याख्यामुपन्यस्य तदीयानुमान-लक्षणस्य अनेकधा निरूपणम् ।	५६०–५६७
सौगतप्रणीतानुमानलक्षणाश्रयेण नैयायिकोक्तानुमानलक्षणस्य प्रतिक्षेपप्रकारः ।	५६७–५७२
सौगतैर्मीमांसकीयमनुमानलक्षणमुपन्यस्य तस्य स्वमतानुसारित्वाविष्करणम् ।	५७२
४ प्रमाणसङ्ख्यानिरूपणम् ।	५७३–५९०
प्रत्यक्षभिन्नानि प्रमाणान्यनुमानेऽन्तर्भावयतां प्रमाणद्वयवादिनां सौगतानां विचारप्रक्रिया ।	५७३–५७४
सौगतसंमतं प्रमाणद्वित्ववादं प्रतिवदितुं मीमांसकेन शाब्दस्य प्रमाणान्तरत्वस्थापनम् ।	५७४–५७५
मीमांसकेन उपमानस्य प्रमाणान्तरत्वस्थापनम् ।	५७५–५७७
नैयायिककृतमुपमानस्य स्वरूपवर्णनम् प्रमाणान्तरत्वसमर्थनं च ।	५७७–५७८
मीमांसकेन अर्थापत्तेः स्वरूपव्यावर्णनपूर्वकं प्रमाणान्तरत्वसमर्थनम् ।	५७८–५७९
मीमांसकेन अभावस्य प्रमाणान्तरत्वसमर्थनम् ।	५७९–५८२
सौगतेन मीमांसकादिमतानामुपमानादीनामप्रमाणत्वं यथायथं प्रत्यक्षानुमानयोरन्तर्भावनेन पृथक्प्रामाण्याभावं चोपपाद्य प्रमाणान्तरत्वप्रतिविधानम् ।	५८२–५९०
सौगतकृतां मीमांसकादिसम्मतप्रमाणान्तरप्रतिविधानप्रक्रियां यथासिद्धान्तं स्वीकृत्याऽपाकृत्य च सिद्धान्तिना प्रत्यक्ष-परोक्षतया प्रमाणद्वय-व्यवस्थापनम् ।	५९०–५९५
मुख्यवृत्त्या संव्यवहारेण च परोक्षप्रमाणस्य स्वरूपविभजनम् ।	५९५
२ गाथाव्याख्या ।	५९६
दर्शनविषयीभूतस्य प्रमेयस्य न विशेषाकारेण शून्यत्वम् न वा ज्ञानविषयीभूतस्य सामान्याकारेण इति निरूपणम् ।	,,
३ गाथाव्याख्या ।	५९६
उपयोगस्वाभाव्यादेव छाद्मस्थिकयोर्ज्ञान-दर्शनयोः क्रमवर्तित्वम् न पुनः केवलिगतयोस्तयोः सहवर्तित्वात् इति प्रतिपादनम् ।	,,
४ गाथाव्याख्या ।	५९७–६०५
केवलज्ञानदर्शनयोः सहभावित्वे विप्रतिपद्यमानानां केषांचिन्मतस्य साधिक्षेपं निर्देशः ।	५९७

विषयः	पृष्ठम्
केवलोपयोगद्वयस्य क्रमभावित्वं प्रतिषेध्य तत्सहभावित्वपरतया आगमस्य व्याख्यानम् ।	६०५
५ गाथाव्याख्या ।	६०६
आगमेन केवलज्ञानदर्शनयोर्यौगपद्यमभिधाय अनुमानयुक्त्या पुनस्तत्प्रतिपादनम् ।	,,
६ गाथाव्याख्या ।	६०६
सर्वज्ञे छाद्मस्थिकक्रमोपयोगाभावात् तदृष्टान्तेनैव तत्र केवल-ज्ञानादन्यदा केवलदर्शनाभावप्रतिपादनम् ।	,,
७ गाथाव्याख्या ।	६०७
क्रमवादिमतेऽनुमानविरोधवदागमविरोधोऽप्यापततीति प्रदर्शनम् ।	,,
८ गाथाव्याख्या ।	६०७
सोपसंहारमागमविरोधस्य स्पष्टीकरणम् ।	,,
९ गाथाव्याख्या ।	६०७
प्रकरणकारेण क्रमोपयोगद्वयवादिनम् सहोपयोगद्वयवादिनं च पर्यनुयुज्य स्वपक्षस्योपन्यासः ।	,,
१० गाथाव्याख्या ।	६०८
केवलज्ञान-दर्शनयोरभेदपक्ष एव सर्वज्ञत्व-सर्वदर्शित्वोपपत्तिरिति प्रकटनम् ।	,,
क्रमाऽक्रमाऽभेदपक्षत्रयग्राहिण आचार्यान् नामग्राहं निर्दिश्य तैः स्वस्वपक्ष-पोषकतया व्याख्यातानां सूत्राणां संसूचनम् ।	,,
११ गाथाव्याख्या ।	६०९
साकारानाकारोपयोगयोरैकान्तिकभेदासंभवप्रदर्शनेन अनेकान्तस्य समर्थनम् ।	,,
१२ गाथाव्याख्या ।	६०९
क्रमाक्रमोपयोगद्वयपक्षे शास्त्रसिद्धं ज्ञात-दृष्टभाषित्वं भगवतो न घटते इत्यभिधानम् ।	,,
१३ गाथाव्याख्या ।	६०९
क्रमाक्रमपक्षद्वये भगवतः अज्ञातदर्शितया अदृष्टज्ञायितया च सर्वज्ञत्वासंभवप्रदर्शनम् ।	,,
१४ गाथाव्याख्या ।	६०९
आगमसिद्धसमसंख्यकविषयावगाहित्वयुक्तया केवलज्ञानदर्शनयोरभेदस-मर्थनम् ।	,,
१५ गाथाव्याख्या ।	६१०
अभेदवाद्युक्तस्य केवले अपर्यवसितत्वादिदोषस्य क्रमवादिना समुद्धरणम् तस्य च पुनरभेदवादिना प्रतिसमाधानम् ।	६१०
भुक्ति-क्रमोपयोगयोरिच्छन्ना व्याप्तिं स्वीकुर्वतां केषांचिन्मतस्य व्यावर्णनम् ।	,,
केवलिकवलाहारचर्चा ।	६१०–६१५
कवलाहारनिषेधवादस्य पूर्वपक्षतयोपन्यासः ।	६१०–६११
पूर्वपक्षं प्रतिविधातुमुपयोगक्रमसामान्यस्य छद्मना व्याप्तिं निरस्य भुक्तेरपि तेन सह व्याप्त्यभावे तात्पर्यख्यापनम् ।	६१२
केवलिनि कवलाहारमुपपादयितुं बाधकप्रमाणनिरासपूर्वकं साधकप्रमाणप्रदर्शनम् ।	६१२
१६ गाथाव्याख्या ।	६१५

विषयः	पृष्ठम्
मत्यादिज्ञानचतुष्करूपे दृष्टान्ते यत्र यत्रोपयोगे विषयभेदस्तत्र तत्रासर्वार्थत्वमिति व्याप्तेर्भावनम् ।	६१५
१७ गाथाव्याख्या ।	६१६
मत्यादिवैधर्म्येण केवलोपयोगस्य असर्वार्थत्वाभावेन विषयभेदाभावाद्-क्रमोपयोगद्वयात्मकैकरूपत्वसाधनम् ।	६१६
१८ गाथाव्याख्या ।	६१६
अभिन्नोपयोगवादिना स्वपक्षे समापतत आगमविरोधस्यार्थगत्या व्याख्यान्तरमाश्रित्य परिहरणम् ।	,,
१९ गाथाव्याख्या ।	६१७
अक्रमोपयोगद्वयात्मकमेकं चेत् केवलं किमिति मनःपर्यायवदागमे तस्य ज्ञानमात्रतया न कथनम् किमिति च ज्ञान-दर्शनरूपतया द्वैविध्येन वर्णनमिति चोद्ये मर्मोद्घाटनम् ।	,,
२० गाथाव्याख्या ।	६१७
एकत्वेऽपि केवलस्य ज्ञान-दर्शनोभयरूपतया शास्त्रे पाठात् तस्य कथंचिदनेकरूपत्वाभ्युपगमनम् ।	,,
२१ गाथाव्याख्या ।	६१७
एकदेशिना मत्युपयोगं दृष्टान्तीकृत्य एकस्यापि केवलोपयोगस्य द्विरूपत्वसमर्थनम् ।	,,
२२ गाथाव्याख्या ।	६१८
पुनरप्येकदेशिना क्रमिकभेदं दूषयितुं शास्त्रीययुक्त्या ज्ञान-दर्शनयोः कथंचिदन्यत्वव्यवस्थापनम् ।	,,
२३–२४ गाथाव्याख्या ।	६१८
एकदेशीये अवग्रहमात्रमतिज्ञानस्य दर्शनत्वाभ्युपगमे समापततो दोषस्याभिधानं तत्समर्थनं च ।	६१८
२५ गाथाव्याख्या ।	६१८
ज्ञान एव चक्षुरचक्षुर्दर्शनप्रवादसमर्थनाय दर्शनपदस्य अर्थाभिधानम् ।	,,
२६ गाथाव्याख्या ।	६१९
अस्पृष्टाविषयावगाहित्वेऽपि न मनःपर्यायबोधस्य दर्शनत्वप्रसङ्ग इति सयुक्तिकं प्रतिपादनम् ।	,,
२७ गाथाव्याख्या ।	६१९
अस्पृष्टाविषयावगाहि ज्ञानमेव दर्शनम् न ततः पृथगिति प्रतिपादनम् ।	,,
२८ गाथाव्याख्या ।	६१९
अस्पृष्टार्थावगाहित्वेऽपि श्रुतज्ञानस्य दर्शनत्वाभावप्रतिपादनम् ।	,,
२९ गाथाव्याख्या ।	६२०
अवधिज्ञान एव प्रवृत्तिनिमित्तवशेन दर्शनशब्दस्यापि लब्धावकाशत्वसमर्थनम् ।	,,
३० गाथाव्याख्या ।	६२०
सिद्धान्तिना एकस्यैव केवलोपयोगस्य ज्ञानदर्शनोपयोगद्वय-रूपत्वव्यावर्णनम् ।	,,
सूर्यभिप्रायेण ज्ञानपञ्चक-दर्शनचतुष्कयोः स्वरूपविभजनम् ।	,,
३१ गाथाव्याख्या ।	६२१
एक एव केवलोपयोगो द्व्यात्मक इति स्वसिद्धान्तः समयान्तरोत्पादवचनं तु परतीर्थिकमतकथनमिति विभजनम् ।	,,

विषयः	पृष्ठम्
३२ गाथाव्याख्या ।	६२१
एवंभूततत्त्वश्रद्धानरूपस्य सम्यग्दर्शनस्य सम्यग्ज्ञानरूपत्वमेव इति वर्णनम् ।	,,
३३ गाथाव्याख्या ।	६२२
सम्यग्ज्ञाने दर्शनत्वस्य नियततया दर्शने सम्यग्ज्ञानत्वस्य विकल्प-नीयतया सम्यग्दर्शनं विशिष्टज्ञानरूपमेव इति फलिताभिधानम् ।	,,
३४ गाथाव्याख्या ।	६२२
सूत्रोक्तं साद्यपर्यवसितत्वं शब्दशः स्पृशतां केषांचिदाचार्याणां गर्विष्ठतया सम्यग्वादित्वाभावप्रतिपादनम् ।	,,
३५ गाथाव्याख्या ।	६२२
सिद्धान्तिना केवलस्य पर्यवसितत्वप्रदर्शनम् ।	,,
३६ गाथाव्याख्या ।	६२३
सिध्यत्समये केवलस्य विनाशवद् उत्पादस्यापि प्रदर्शनम् अपर्यवसितत्व-विषयकसूत्रोक्तेरपेक्षाविशेषेण समर्थनं च ।	,,
३७–३८ गाथाव्याख्या ।	६२३
स्वरूप-लक्षणाभ्यां जीव-केवलयोर्भेदे सत्यपि कथं तयोरेकत्वमित्यस्याः केषांचिदाशङ्काया उल्लेखः ।	६२३
३९ गाथाव्याख्या ।	६२३
प्रागुक्तामाशङ्कां निरसितुमुपक्रमः ।	,,
४० गाथाव्याख्या ।	६२४
अनेकान्तात्मकैकरूपत्वेन साध्येन सत्त्वस्य हेतोर्व्याप्तिं प्रसाधयितुं दृष्टान्तोपन्यासः ।	,,
४१ गाथाव्याख्या ।	६२४
दृष्टान्तगृहीतव्याप्तेः सत्त्वहेतोर्दार्ष्टान्तिके केवले उपनयनम् ।	,,
४२ गाथाव्याख्या ।	६२४
जीव-तत्पर्यायगतं प्रामाणिकं व्यवहारमाश्रित्य द्रव्य-पर्याययोरे-कान्तभेदनिराकरणम् ।	,,
४३ गाथाव्याख्या ।	६२५
आत्मद्रव्यस्य स्वाभाविकैर्वैभाविकैश्च पर्यायैः कथंचिदेकानेकत्वप्रदर्शनम् ।	,,

संपादकीय निवेदन

जो के आ भाग त्रीजो भाग प्रसिद्ध थया पछी पूरूं एक वर्ष वीत्या पहेलां ज प्रसिद्ध थाय छे छतां एनी संपूर्ण तैयारीमां फक्त एटलो ज वखत लाग्यो छे एम कोई न धारे. आगळना भागोनी पेठे आ भागनी तैयारी पण दोढे ज चालती हती. साधनसंपत्ति अने सहकारीओनी मदद पण अविच्छिन्न रहेली तेथी ज आ भागनुं प्रकाशन जलदी करी शकायुं छे.

(क) प्रस्तुत भागने अंगे बे बाबतो अत्रे जणाववानी छे; **ग्रंथने लगती** अने **संपादनने लगती. ग्रंथने लगती बाबतमां मुख्य त्रण मुद्दाओ छे. १ मूळ अने टीकानुं परिमाण २ विषय** ३ अने **तेनी नवीनता.**

१ प्रस्तुत भागमां सम्मतितर्कनुं बीजुं काण्ड आखुं आवी जाय छे. एमां ४३ गाथाओ छे. ए बधी गाथाओनी संपूर्ण टीका पण आ भागमां आवी ज जाय छे. बधी गाथाओमांथी पहेली गाथानी टीकाथी ज प्रस्तुत भागनो मोटो हिस्सो रोकाएलो छे. लगभग पोणा जेटलो हिस्सो ए टीकाए रोक्यो छे अने बाकीना हिस्सामां बीजीथी ठेठ सुधीनी बधी गाथाओनी टीका समाई जाय छे.

२ प्रस्तुत भागमां आवेला बीजा काण्डनो विषय ज्ञान छे. जैन आगमोमां जे ज्ञानसंबंधी प्राचीन विचार छे अने जे तेना भेदोनुं वर्गीकरण छे तेने ज आधारे आ बीजा काण्डमां चर्चा करवामां आवी छे. परंतु टीकामां एक विशेषता छे अने ते ए के जैन आगमनी प्राचीन शैलीमां स्थान नहि पामेली अने तर्कना विकास दरमियान उद्भव तथा प्रसार पामेली प्रमाणचर्चा टीकाकारे पहेली गाथानी टीकामां बहु उदारताथी दाखल करी छे. ए चर्चामां तत्कालीन बौद्ध अने वैदिक दर्शनोनां मंतव्योने पूर्वपक्षरूपे गोठवी सर्वदर्शनसंग्रहनी ढबे अंदरोअंदर एकथी बीजानुं निरसन करी छेवटे जैनदर्शननां मंतव्योने उत्तरपक्षरूपे मूकी तेनुं ज स्थापन करवामां आव्युं छे. ए प्रमाणचर्चा टीकाकारना बौद्ध अने वैदिक दर्शनसंबंधी प्रमाणविषयक महान् ग्रंथराशिना अभ्यासनी साक्षी पूरे छे. बीजीथी छेल्ली गाथा सुधीनी टीकामां मात्र गाथानो ज विषय टीकाकारे स्पष्ट कर्यो छे, एमां तो फक्त प्राचीन आगमशैलीए ज्ञाननो विचार आवे छे तेथी तेमां दर्शनांतरना ग्रंथो अने तेना विषयने स्थान ज मळ्युं नथी.

३ जैन आगमोमां उपयोगना दर्शन अने ज्ञानरूपे बे भेद पाडी दरेकना अनुक्रमे चार अने पांच प्रकारो वर्णववामां आव्या छे, ए ज आगमनी ज्ञाननिरूपणासंबंधी प्राचीन शैली; ए शैलीने आधारे ज प्रस्तुत बीजा काण्डमां ज्ञाननी चर्चा छे, पण आ चर्चामां जे एक तत्त्व छे ते समग्र जैन वाङ्मयनी दृष्टिए तद्दन नवीन छे. प्राचीन आगम परंपरामां पांच ज्ञान अने चार दर्शनोनुं वर्णन होवाथी तेम ज ए नवे प्रकारोना आवरणभूत कर्मना नव प्रकारोनुं वर्णन होवाथी केवळज्ञान अने केवळदर्शन ए बन्ने उपयोगो जूदा जूदा तेम ज भिन्नभिन्न समयवर्ती मनाता आव्या छे. गमे त्यारे पण पाछळथी उत्पन्न थयेली बीजी एक विचारपरंपरा ए बन्ने उपयोगोनुं जूदापणुं स्वीकारे छे छतां तेनुं भिन्नभिन्नसमयवर्तीपणुं न स्वीकारतां मात्र समकालीनपणुं स्वीकारे छे. आ बन्ने परंपराओनी सामे दिवाकर श्रीसिद्धसेने एक त्रीजो पक्ष रजु कर्यो अने ते ए के जेम उक्त बन्ने उपयोगोनुं भिन्नभिन्नसमयवर्तीपणुं संभवतुं नथी तेम तेमनुं व्यक्तिरूपे जूदापणुं पण संभवतुं नथी. तेथी ए बन्ने उपयोगो जूदा नथी पण एक ज उपयोगनां बे जूदां जूदां सार्थक नामो छे. आ पक्ष दिवाकरश्रीनो पोतानो ज होवाथी ते नव्य मत तरीके पण

प्रसिद्ध छे. ए नव्य पक्षनी इमारत तर्कना पाया उपर चणाएली छे. आगमना पाठो उपरथी स्पष्टपणे फलित थती केवळोपयोगना क्रमपक्षनी परंपरानो अने पाछळथी विचारबळे उत्पन्न करेली केवळोपयोगना युगपद् पक्षनी परंपरानो सबळ विरोध शमाववा अने पोताना पक्षने सप्रमाण स्थापवा माटे दिवाकरश्रीए प्रस्तुत बीजा काण्डमां अद्भुत बुद्धिचातुरी अने प्रतिभा वापर्यां छे. जेम हमेशां बनतुं आव्युं छे तेम ते वखते पण शास्त्रना आधार सिवाय कोई पण वस्तु लोकोने गळे ऊतारवानुं अशक्यप्राय जणावाथी दिवाकरश्रीए बे विरोधी परंपराओ सामे पोतानो पक्ष तर्कबळथी मूक्यो खरो पण तेनी साबीती तो शास्त्रवाक्योने आधारे ज करी एम करवामां पण तेमणे कौशळ खूब वापर्युं छे. विषय अने तेना प्रतिपादननी आ ज नवीनता प्रस्तुत बीजा काण्डमां छे. ए नवीनता समजवा, एनो तुलनात्मक दृष्टिए अभ्यास करवा अने तेना पक्षप्रतिपक्षोनी दलीलो जाणावा माटे गा० ४ पृ० ५९७–६०४ उपर एक टिप्पण आपवामां आव्युं छे. एमां आर्यावर्तीय मुख्य मुख्य बधां दर्शनोना सर्वज्ञत्वविषयक पक्षप्रतिपक्षो उपरांत जैनदर्शनमां ते संबंधी उपलब्ध थती बधी विचारपरंपराओ प्रधान प्रधान पुरस्कर्ता अने ग्रंथोनां नाम साथे आपवामां आवी छे. दिवाकरश्रीना प्रबळ विरोधी सैद्धान्तिक जिनभद्रगणि क्षमाश्रमण हता तेमना विशेषणवती नामक नहि छपायेल ग्रंथमां प्रस्तुत विषयनी सौथी वधारे चर्चा मळे छे. तेथी एनो ए बधो भाग टिप्पणमां आपी तेमां अमुद्रित नन्दिचूर्णि अने लघुनन्दिटीकानो उपयोग करी प्रस्तुत विषय उपरनी मुद्रित के अमुद्रित समग्र ज्ञात साहित्यनी सामग्री एकत्र करवामां आवी छे ते अभ्यासीओना मानसने अनुकूळ थाय एवी छे.

उपयोगनो अभेद पक्ष दिवाकरश्रीनो स्वोपज्ञ कहेवाय छे. ए विचारनां सूक्ष्म बीजो जैन परंपरामां प्रथम हतां के नहि ते कहेवुं जो के कठण छे छतां बहु बारीकीथी विचार अने तुलना करतां एम चोक्खुं लागे छे के न्याय वैशेषिक आदि सर्वज्ञवादी जैनेतर दर्शनोना सर्वज्ञत्वसंबंधी विचारोना उंडा अभ्यासे अने तुलनात्मक बुद्धिए उपयोगनो अभेद पक्ष उपस्थित करवामां दिवाकरश्रीने कांइक प्रेरणा आपी हशे.

(ख) **संपादनने लगती बाबतमां मुख्य पांच मुद्दा अत्रे कहेवाना छे. १ प्रतिओ २ पाठांतरो ३ संशोधनमां वपरायेल ग्रंथोना उपयोगनी पद्धति ४ तद्दन अप्रसिद्ध एवां लिखित पुस्तकोनो उपयोग ५ एक अगत्यना ग्रंथनो उपयोग शक्य छतां नहि करवानुं कारण.**

१ त्रीजा भागनी पेठे आ भागना संशोधनमां पण कागळ उपरांत ताडपत्रनी प्रतिओनो उपयोग करवामां आव्यो छे. फेर एटलो के त्रीजा भागमां ताडपत्रनी बन्ने प्रतिओ अधूरी हती ज्यारे आ भागमां ताडपत्रनी बृहत् प्रति तो संपूर्ण ज हती. कागळ अने ताडपत्रनी प्रतिओमांनो प्रस्तुत बीजा काण्डने लगतो बधो भाग मोटे भागे शुद्ध ज छे. तेमां य भां० मां० वा० बा० अने ताडपत्रनी प्रतिओनुं स्थान शुद्धिनी दृष्टिए उत्तरोत्तर चडतुं छे. ताडपत्रनी प्रतिओमां शुद्धि उपरांत नानां नानां टिप्पणोनी पण एक खास विशेषता छे. जेथी प्रस्तुत संशोधनमां बहु मदद मळी छे. एमांनां केटलांक टिप्पणो मां० प्रतिमां पण छे.

२ पाठांतरो लेवां अने तेमांथी पसंद करी गोठववानो क्रम तो प्रथमना भागोनी जेम ज आ भागमां पण राखवामां आव्यो छे छतां प्रतिओनी शुद्धि अने अन्य साधनोनी सगवडने लीधे आ भागमां पाठांतरो बहु आव्यां ज नथी अने लीधेल पाठांतरोमांथी पण यथासंभव ओछां राखवामां आव्यां छे.

३ प्रस्तुत संशोधनमां वपरायेल ग्रंथोना बे भाग पडे छे; १ छपायेल २ लखेल. ग्रंथने शुद्ध करवा माटे, विषयने स्पष्ट करवा माटे, सरखामणी माटे के अभ्यासमां विशाळता आणवा माटे ज्यां ज्यां छपायेल ग्रंथोनो उपयोग थयेलो छे त्यां त्यां घणी जगोए तो शरुआतमां ते ते ग्रंथोना उपयोगी पाठो वगर संकोचे नीचे आपवामां आव्या छे. पण घणे स्थळे लाघव आदि अनेक कारणोने लीधे मात्र तेनां स्थळो ज सूचववामां आव्यां छे. परंतु ज्यां ज्यां लखेल पुस्तकोनो उपयोग कर्यो छे त्यां त्यां बनी शक्युं त्यां सुधी तेना पाठो ज नीचे आपवानो आग्रह राख्यो छे, जेथी अभ्यासीने दुर्लभ एवा लिखित पुस्तकोना पाठो सुलभ थाय.

४ अत्यार सुधीमां हजु क्यांय प्रसिद्धि नहि पामेल अने मोटे भागे अज्ञात अगर दुर्लभप्राय एवां सात लिखित पुस्तकोनो प्रस्तुत संशोधनमां उपयोग करवामां आव्यो छे, जे प्रथमना त्रण भागोमां अल्पप्राय छे. १ हेतुबिंदुटीका २ तत्त्वोपप्लव ३ सिद्धिविनिश्चय टीका ४ न्यायकुमुदचंद्रोदय ५ विशेषणवती ६ नन्दिचूर्णी अने ७ लघुनन्दिटीका. आ साते ग्रंथोनो करवा धारेलो सर्वांशे उपयोग थयो छे एम रखे कोई धारे. एम करवुं ए वर्तमान मर्यादामां अशक्यप्राय हतुं छतां आवश्यक स्थळोए दिशासूचन पूरतो खास उपयोग कर्यो छे.

५ बीजा काण्डनी ४३ गाथाओमांनी प्रस्तुत विषय उपर महत्त्व धरावती केटलीक गाथाओनी व्याख्या महामहोपाध्याय श्रीयशोविजयजीए पोताना ज्ञानबिंदुप्रकरणमां करी छे. ए व्याख्या मुद्रित पण छे अने गंभीर पण छे. तो ए प्रस्तुत भागमां तेनो उपयोग आवश्यक छतां कर्यो नथी ते एम धारीने के भिन्नभिन्न स्थळे टिप्पणमां कटके कटके ए व्याख्या आपवी ते करतां एक ज साथे समग्र व्याख्या आपवी ए विशेष अनुकूळ थशे. तेथी प्रथमना त्रण भागोमां समाप्त थयेल नयकाण्डनी अनेक गाथाओ उपरनी उपाध्यायजीश्रीना भिन्न भिन्न ग्रंथोमां मळी आवती छूटी छूटी व्याख्याओना संग्रहरूपे आगळ आपवा धारेल परिशिष्टनी पेठे ज्ञानकाण्डमांनी गाथाओ उपरनी तेमनी व्याख्यानुं परिशिष्ट पण छेवटे ज आपवा धारीए छीए. ते साथे एमां विशेषता ए रहेशे के बीजा पण श्वेतांबर दिगंबर आचार्योए जे जे अने जेटजेटली गाथाओ उपर करेली व्याख्याओ उपलब्ध थाय छे ते पण परिशिष्टमां जोडवामां आवशे. त्रीजा काण्डनी गाथाओ विषे पण आ योजना योग्य धारी छे जेथी अत्यार सुधीमां सम्मतितर्कनी गाथाओ उपर छूटुं छूटुं के एकसाथे लखायेलुं बधुं साहित्य अभ्यासीने एक ज स्थळे उपलब्ध थाय.

प्रस्तुत भागना संशोधनकार्यमां पाठांतर लेवां, प्रतिओ जोवी वगेरे नीरस अने कठण छतां बहु किंमती कार्यमां उदारचेता प्रवर्तक **श्रीकान्तिविजयजीना** शिष्य **श्रीचतुरविजयजीए** पोताना सुशील अने विद्याव्यसनी शिष्य **पुण्यविजयजी** आदि साथे जे किंमती मदद आपी छे तेनी अत्यंत कृतज्ञतापूर्वक अमे नोंध लईए छीए.

सुखलाल
अने
बेचरदास.

संपादकीयं निवेदनम्

पूर्वभागसहभावित्वेनैव संपादनकार्यस्य समारब्धतया साधनसाद्गुण्य–सहकारिसाहायकयोरविच्छिन्नोपनततया च प्रस्तुतभागस्य प्रकाशनं तृतीयभागानन्तरं किञ्चिदूनेनैकेनैव वर्षेण संपन्नमित्यवगन्तव्यम् ।

१ ग्रन्थगोचरः २ संपादनगोचरश्चेति द्वावेव प्रस्तुतभागसंबन्धिनौ विषयौ प्रधानतयाऽत्र प्रतिपिपादयिषितौ स्तः ।

ग्रन्थगोचरे विषये १ मूल-टीकयोः परिमाणम् २ प्रतिपाद्यं तत्त्वम् ३ तदीयं चापूर्वत्वम् इति त्रीण्येव वस्तूनि वक्तव्यानि सन्ति ।

१ प्रस्तुते भागे सम्मतितर्कस्य त्रिचत्वारिंशद्गाथात्मकं द्वितीयं काण्डम् तदीया च टीका संपूर्णतया परिसमाप्यते । तत्र चास्य भागस्य पादोनमितप्रायोंऽशः प्रथमगाथाटीकया शेषश्चाऽवशिष्टसमस्तगाथाटीकया व्याप्तो वर्तते ।

२ आगमगतां ज्ञानस्य तदीयभेदानां च प्राचीनां विचारशैलीमनुसरन्तीं ज्ञानचर्चां विदधतः प्रस्तुतान्मूलकाण्डात् तट्टीकाया एतावान् विशेषः—आगमगतायां प्राचीनायां शैल्यामलब्धावकाशा तर्कविकाससमये च प्राप्तोद्भवप्रसरा प्रमाणचर्चा टीकाकारेण प्रथमगाथाटीकायां सविस्तरं संगृहीता वर्तते । तत्र च तत्कालोपलब्धानि बौद्धवैदिकदर्शनानां मन्तव्यानि पूर्वपक्षतया सन्निवेश्य सर्वदर्शनसंग्रहीयमार्गेण परस्परं निरस्य पर्यवसाने जैनदर्शनमन्तव्यान्युत्तरपक्षतयोपन्यस्य प्रतिष्ठापितानि सन्ति । सा पुनः प्रमाणचर्चा टीकाकारकृतस्य बौद्धवैदिकदर्शनसंबन्धिप्रमाणविषयकमहाग्रन्थराशिगोचराभ्यासस्य साक्षित्वं परिपूरयति । टीकाकारेण द्वितीयाप्रभृतिचरमापर्यवसानसमस्तगाथाटीकायां गाथागतस्यैवाऽर्थस्य स्फुटीकृततया तत्र च केवलमागमशैलीकृताया ज्ञानमीमांसाया लब्धावकाशत्वेन न तत्र दर्शनान्तरीया ग्रन्था न वा तदीया विषयाः स्थानमलभन्त ।

३ आगमेषूपयोगं ज्ञानदर्शनरूपतया द्वेधा विभज्य तयोर्द्वयोरनुक्रमेण पञ्च चत्वारश्च प्रकारा वर्णिताः सन्ति । इयमेव ज्ञाननिरूपणपरा प्राचीनाऽऽगमिकशैली निगद्यते; यद्यप्येनामेव शैलीमवलम्बमाना प्रस्तुतकाण्डगता ज्ञानचर्चा समस्ति तथापि तस्यामुपलभ्यमानमेकं तत्त्वमितरस्मिन् समग्रेऽपि जैनवाङ्मयेऽदृष्टचरतया सर्वथैवाऽपूर्वं प्रतिभाति । तद्यथा—प्राचीनाऽऽगमपरंपरा ज्ञानपञ्चक-दर्शनचतुष्कयोस्तदीयावरणभूतकर्मप्रकारनवकस्य च व्यावर्णिततया केवलज्ञान-केवलदर्शनरूपमुपयोगद्वयं विभिन्नत्वेन भिन्नभिन्नसमयवर्तित्वेन चाऽभ्युपगच्छति । यदाकदाचिच्च पश्चादुत्पन्ना द्वितीया विचारपरंपरा तस्योपयोगद्वयस्य विभिन्नत्वं मन्यमानाऽपि भिन्नभिन्नसमयवर्तित्वमनङ्गीकृत्यैकसमयवर्तित्वमेवाऽभ्युपगच्छति । तत्र च केवलोपयोगे भिन्नभिन्नसमयवर्तित्ववद् वैयक्तिकभेदस्याऽप्यसंभवात् केवल एक एवोपयोगो द्वाभ्यां सार्थकाभ्यां नामभ्यां द्वेधा व्यपदिश्यत इत्येष तृतीयः पक्षः श्रीसिद्धसेनदिवाकरेण पूर्वोक्तयोर्द्वयोः परंपरयोः समक्षमुपस्थाप्य समर्थितः । अयं च पक्षो दिवाकरोपज्ञतया नव्यमतत्वेन ख्यातिं गतः । एष च नव्यपक्षप्रासादस्तर्कभूमिकामवष्टभ्य विनिर्मितो वर्तते । आगमेभ्यः स्पष्टतया प्रतीयमानायाः केवलोपयोगद्वयक्रमपक्षपरंपरायाः पश्चाद् विचारबलप्रादुर्भावितायाः केवलोपयोगयौगपद्यपक्षपरंपरायाश्च विरोधमुन्मूलयितुं स्वपक्षं सप्रमाणं स्थापयितुं च श्रीमता दिवाकरेण प्रस्तुते काण्डेऽद्भुता चातुरी प्रतिभा चोपायोजिषाताम्, सार्वदिकाऽनुभववत् तदाऽपि शास्त्राधारमन्तरेण कस्यापि वस्तुनो लोकेन स्वीकारयितुमशक्यत्वमवगम्य श्रीमता दिवाकरेण

द्वयोर्विरोधिपरंपरयोः पुरस्तात् सतर्कबलमुपन्यस्तोऽपि स्वपक्षः शास्त्रवाक्यैरेव सकौशलं प्रमाणीकृतः । एषैव प्रतिपाद्यगता प्रतिपादनशैलीगता चापूर्वता प्रस्तुते काण्डे प्रतीयते । सिद्धसेनोपज्ञत्वेन प्रसिद्धस्योपयोगाभेदपक्षस्य सूक्ष्माणि विचारबीजानि जैनपरंपरायां प्रागभूवन् न वेत्यस्य सांप्रतं वक्तुमशक्यत्वेऽपि सूक्ष्मेक्षिकया तुलनात्मकविचारणाबलादेतावत्त्विदानीं वक्तुं पार्यते यत् न्याय–वैशेषिकप्रभृतिसर्वज्ञवादिजैनेतरदर्शनसंमतसर्वज्ञत्वविषयकविचारगोचरगम्भीराभ्यासप्रयुक्तमेवोपयोगाभेदपक्षोपस्थापनं तत्समर्थनं चेति ।

प्रस्तुतकाण्डस्य मुख्यतयाऽपूर्वतया च प्रतिपाद्य उपयोगाभेदपक्षो दिवाकरोपज्ञानामनेकेषां विशेषाणामन्यतमो विशेषोऽवगन्तव्यः । एनं विशेषं परिज्ञातुम् तुलनयाऽभ्यसितुम् तदीयपक्षप्रतिपक्षयोर्युक्तीरवगन्तुं च गा० ४ पृ० ५९७–६०४ एकं टिप्पणं निवेशितम् । तत्राऽऽर्यावर्तीयसमग्रमुख्यमुख्यदर्शनगतैः सर्वज्ञत्वसंबन्धिभिः पक्षप्रतिपक्षैः सह तदीया जैनदर्शनगताः सर्वा अपि विचारपरंपराः सशास्त्राधारं विविच्य संनिवेशिताः सन्ति । श्रीमद्दिवाकरप्रबलविरोधिश्रीजिनभद्रगणिक्षमाश्रमणकर्तृके विशेषणवतीनामकेऽमुद्रिते ग्रन्थे प्रस्तुतविषयायाश्चर्चाया विस्तृततयोपलभ्यत्वेन तद्गतं सर्वमप्युपयुक्तं भागं टिप्पणके समादाय तत्र चामुद्रिते नन्दिचूर्णि-नन्दिलघुटीके उपयुज्य प्रस्तुतविषयसंबन्धिनी सर्वाऽपि मुद्रिताऽमुद्रितवाङ्मयसामग्री समगृह्यत सा चाभ्यासिनां मनांस्यनुकूलयिष्यतीति संभाव्यते ।

संपादनगोचरे च विषये आदर्शगतत्वेन, पाठान्तरगतत्वेन, संशोधनोपयुक्तग्रन्थोपयोगपद्धतिगतत्वेन, काप्यप्रसिद्धलिखितग्रन्थोपयोगगतत्वेन, प्रसिद्धात्युपयोगिग्रन्थोपयोगाविधानकारणगतत्वेन च पञ्चैव वस्तूनि वक्तव्यानि सन्ति ।

१ तृतीयभागवत् प्रस्तुतभागस्याऽपि संशोधने पत्रप्रतिभिः सार्धं ताडपत्रप्रती अप्युपायोजिषाताम् विशेषश्चैतावानेव यत् तृतीये भागे द्वे अपि ते प्रती अपूर्णे आस्ताम् अत्र तु बृहत्ताडपत्रप्रतिरेका पूर्णैवाऽऽसीत् ।

२ पत्र-ताडपत्रादर्शगतः प्रस्तुतकाण्डसंबन्धी सर्वोऽपि पाठः शुद्धप्राय एव विद्यते तत्राऽपि भां० मां० वा० बा० ता० संज्ञका आदर्शा उत्तरोत्तराधिकशुद्धिभाजः सन्ति । केवलताडपत्रादर्शद्वयगतेभ्यो लघुलघुतरटिप्पणकेभ्योऽपि पाठशुद्धेरिव प्रस्तुते संशोधनकर्मणि महानुपकारः संवृत्तः ।

यद्यपि पाठान्तराणां संग्रह-पृथक्करणव्यवस्थापनक्रमः प्राक्तनभागतुल्यतयैव प्रस्तुतभागेऽवलम्बितस्तथाप्यादर्शानां शुद्धतयेतरसाधनानां च सुलभतया संगृहीतानामपि पाठान्तराणां यथासंभवमल्पीकृतत्वात् प्रस्तुते भागे तेषां भूयस्त्वं नावशिष्यते ।

३ प्रस्तुतसंशोधनोपयुक्ता ग्रन्था मुद्रित–लिखिततया द्वेधा विभज्यन्ते । ग्रन्थं शोधयितुम् विषयं विशदीकर्तुम् तुलनां विधातुम् विशालमभ्यसितुं च यत्र यत्र मुद्रिता ग्रन्था उपयोजितास्तत्र पूर्वं बहुषु स्थलेषु तत्तद्ग्रन्थगता उपयोगिनः पाठा निःसंकोचमधस्तादुपन्यस्ताः । पुरस्ताच्चानेकेषु स्थलेषु लाघवादिभिर्बहुभिर्हेतुभिः केवलं तदीयानि तदीयानि स्थलान्येव प्राधान्येन सूचितानि परंतु यत्र लिखिता ग्रन्था उपायोजयिषत तत्र सर्वत्राभ्यासिनां सौलभ्याय तत्तदज्ञातदुर्लभग्रन्थगतान् पाठान् यथाशक्यं यथामर्यादं चाधस्तादुपन्यसितुमाग्रहो व्यधायि ।

४ इदानीं यावत् काप्यप्रकाशिता अज्ञातप्राया दुर्लभप्रायाश्च प्राक्तनभागसंशोधनेऽल्पोपयोजितप्रायाः सप्त लिखितग्रन्था यथामर्यादं प्रस्तुते संशोधने दिङ्मात्रतयोपयोजिताः सन्ति । ते चेमे १ हेतुबिन्दुटीका २ तत्त्वोपप्लवः ३ न्यायकुमुदचन्द्रोदयः ४ सिद्धिविनिश्चयटीका ५ विशेषणवती ६ नन्दिचूर्णी ७ लघ्वी नन्दिवृत्तिश्च ।

५ श्रीमद्वाचकयशोविजयैः स्वीये तत्र तत्र ग्रन्थे सम्मतितर्कीयकाण्डत्रयगता बह्व्यो गाथाः प्रकीर्णतया क्रमबद्धतया च विवृता दृश्यन्ते अभ्यासिनामानुगुण्याय तासां सर्वासामपि तदीयव्याख्योपेतानां गाथानां ग्रन्थसमाप्तिगामिषु परिशिष्टेषु संकलयितुमिष्टतया नयकाण्डवत् प्रस्तुतेऽपि काण्डे तत्र तत्र टिप्पणके खण्डीकृत्य नोपन्यासः कृतः । एवमेवान्यैरपि श्वेताम्बरीय–दिगम्बरीयैराचार्यैः कृतविवरणत्वेनोपलभ्यास्तत्तद्गाथास्तेषु परिशिष्टेषु संकलयितुमिष्टतया न क्वचित् टिप्पणके उपन्यास्यन्त ।

प्रस्तुतभागसंशोधनकर्मोपयोगिषु पाठान्तरग्रहण–प्रतिप्रेक्षणादिषु नीरसेषु क्लिष्टेषु च बहुमूल्येषु कार्येषु सहायतां विदधानान् उदारचित्तप्रवर्तकश्री**कान्तिविजय**शिष्यान् श्री**चतुरविजय–पुण्यविजय**यादीन् कृतज्ञतापूर्वकं स्मराम इति ।

सुखलालः
बेचरदासश्च ।

संमतितर्क-प्रकरणम् ।

चतुर्थो विभागः ।

द्वितीयः काण्डः ।

प्रथमगाथाव्याख्या ।

[१ उपयोगनिरूपणम्]

[व्यस्तयोर्दर्शन-ज्ञानयोः लक्षणमभिधाय द्रव्यास्तिक-पर्यायास्तिकाभ्यां तयोः स्वभावस्य विभज्य वर्णनम्]

एवमर्थाभिधानरूपज्ञेयस्य सामान्य-विशेषरूपतया द्यात्मकत्वं प्रतिपाद्य 'ये वचनीयविकल्पाः संयुज्यमानयोरनयोर्नययोर्भवन्ति[1] सा स्वसमयप्रज्ञापनाऽन्यथा तु सा तीर्थकृदासादना'[2] इति यदुक्तम् ५ तदेव प्रपञ्चयितुम् 'उपयोगोऽपि परस्परसव्यपेक्षसामान्य-विशेषग्रहणप्रवृत्तदर्शन-ज्ञानस्वरूपद्वयात्मकः प्रमाणम् दर्शन-ज्ञानैकान्तरूपस्त्वप्रमाणम्' इति दर्शयितुं प्रकरणमारभमाणो द्रव्यार्थिक-पर्यायार्थिकाभिमतप्रत्येकदर्शन-ज्ञानस्वरूपप्रतिपादिकां गाथामाहाचार्यः—

[3]जं सामण्णग्गहणं दंसणमेयं विसेसियं णाणं ।
दोण्ह वि णयाण एसो पाडेक्कं अत्थपज्जाओ ॥ १ ॥ १०

द्रव्यास्तिकस्य **सामान्यमेव** वस्तु तदेव गृह्यते अनेनेति **ग्रहणं दर्शनमेतद्** उच्यते, पर्यायास्तिकस्य तु विशेष एव वस्तु स एव गृह्यते येन तत् **ज्ञानम्** अभिधीयते ग्रहणम् **विशेषितम्** इति विशेषग्रहणमित्यभिप्रायः । **द्वयोरपि** अनयोर्नययोरेष **प्रत्येकमर्थपर्यायः** अर्थ विषयं पर्येति अवगच्छति यः सोऽर्थपर्यायः ईदृग्भूतार्थग्राहकत्वमित्यर्थः ।

१-**नयोर्नय**-आ० हा० वि० । २ पृ० ४५५ गा० ५३ पं० २८ ।

३ "जं सामण्णंगहणं भावाणं णेव कट्ठुमायारं । अविसेसिदूण अट्ठे दंसणमिदि भण्णए समए" ॥ ४३ ॥
इतीयं गाथा दर्शनस्वरूपप्रतिपादिका बृहद्द्रव्यसंग्रहगता—पृ० १६८ ।

[उपयोगस्य साकारानाकारते स्पष्टयित्वा तयोः प्रामाण्याऽप्रामाण्यकथंताभिधानम्]

उपयोगस्य चानाकार-साकारते सामान्य-विशेषग्राहकते एव तत्र तत्राभिधीयेते । अविद्यमान आकारः भेदो ग्राह्यस्य अस्येत्यनाकारं दर्शनमुच्यते । सह आकारैर्ग्राह्यभेदैर्वर्त्तते यद् ग्राहकं तत् साकारं ज्ञानमित्युच्यते । निराकार-साकारोपयोगौ[1] तूपसर्जनीकृततदितराकारौ स्वविषयावभास-
५ कत्वेन[2] प्रवर्तमानौ प्रमाणम् न तु निरस्तेतराकारौ, तथाभूतवस्तु[3]रूपविषयाभावेन निर्विषयतया प्रमाणत्वानुपपत्तेरितरांशविकलैकांशरूपोपयोगसत्तानुपपत्तेश्च । तेनैकान्तवाद्यभ्युपगमः 'बोधमात्रं प्रमाणम् साकारो बोधोऽनधिगतार्थाधिगन्तृत्वविशिष्टः स एव ज्ञातृव्यापारोऽर्थदृष्टताख्यफलानुमेयः संवेदनाख्यफलानुमेयो वा अनधिगतार्थाधिगन्ता इन्द्रियादिसंपाद्यः अव्यभिचारादिविशेषणविशि-
१० ष्टार्थोपलब्धिजनिका सामग्री तदेकदेशो वा[4] बोधरूपोऽबोधरूपो वा साधकतमत्वात् प्रमाणम्' इत्यादिरूपोऽयुक्तः ।

[२ प्रमाणसामान्यनिरूपणम्]

[वैभाषिक[5]-सौत्रान्तिक-योगाचारसंमतानां निराकार-साकार-विज्ञानवादानां परस्परोपमर्दं पूर्वपक्षतयोपन्यासः]

तथाहि—'बोधः प्रमाणम्' इति वदन्तो वैभाषिकाः पर्यनुयोज्याः—किं बोधमात्रस्य प्रामाण्यम्,
१५ आहोस्विद् बोधविशेषस्य ? यदि बोधमात्रस्य तदा तल्लक्षणप्रणयनमयुक्तम् व्यवच्छेद्याभावात्, अबोधस्य व्यवच्छेद्यत्वेऽपि संशय-विपर्ययादीनां बोधस्वभावत्वात् प्रमाणताप्रसक्तिः । न च संशयादीनामपि प्रमाणता लोक-शास्त्रविरोधात् । लोकप्रसिद्धं च प्रमाणं व्युत्पादयितुमारब्धम् तत्र चेन्द्रियादेरपि प्रमाणतायाः प्रसिद्धेर्बोधस्य प्रामाण्येऽव्याप्तिश्च लक्षणदोषः । न चाबोधरूपस्येन्द्रियादेर्लोकः प्रमाणतां न व्यपदिशति 'प्रदीपेनोपलब्धम्' 'चक्षुषा दृष्टम्' 'धूमेनावगतम्' इति लौकिकानां व्यवहारदर्शनात् ।

१-कार ज्ञा-वा० बा० विना । २-पयोगावुप-आ० । ३-स्तुवि-बृ० । ४ वा बोधरूपो वा सा-वा० बा० । ५-कत्वात् बृ० वा० बा० । ६ संक्षेपेण वैभाषिकादिमतस्वरूपमित्थं वर्णितमस्ति षड्दर्शनसमुच्चय-बृहद्वृत्तौ—"अथवा वैभाषिक-सौत्रान्तिक-यौगाचार-माध्यमिकभेदाच्चतुर्धा बौद्धा भवन्ति ।

तत्रार्यसमितीयापरनामकवैभाषिकमतमदः—चतुःक्षणिकं वस्तु जातिर्जनयति, स्थितिः स्थापयति, जरा जर्जरयति, विनाशो विनाशयति । तथा आत्मापि तथाविध एव पुद्गलश्चासावभिधीयते । निराकारो बोधोऽर्थसहभाव्येकसामग्यधीन-स्तत्रार्थे प्रमाणमिति ।

सौत्रान्तिकमतं पुनरिदम्—रूप-वेदना-विज्ञान-संज्ञासंस्काराः सर्वशरीरिणामेते पञ्च स्कन्धा विद्यन्ते न पुनरात्मा । त एव हि परलोकगामिनः । तथा च तत्सिद्धान्तः—पञ्चेमानि भिक्षवः ! संज्ञामात्रम् प्रतिज्ञामात्रम् संवृतिमात्रम् व्यवहार-मात्रम् । कतमानि पञ्च ? अतीतोऽध्वा, अनागतोऽध्वा, सहेतुको विनाशः, आकाशम्, पुद्गल इति, अत्र पुद्गलशब्देन परपरि-कल्पितो नित्यत्वव्यापकत्वादिधर्मक आत्मेति । बाह्योऽर्थो नित्यमप्रत्यक्ष एव ज्ञानाकारान्यथानुपपत्त्या तु सन्नवगम्यते । साकारो बोधः प्रमाणम् तथा क्षणिकाः सर्वेसंस्काराः खलक्षणं परमार्थः । यदाहुस्तद्वादिनः—प्रतिक्षणं विशरारवो रूप-रस-गन्ध-स्पर्शपरमाणवो ज्ञानं चेत्येव तत्त्वमिति । अन्यापोहः शब्दार्थः । तदुत्पति-तदाकारताभ्यामर्थपरिच्छेदः । नैरात्म्यभावनातो ज्ञानसंतानोच्छेदो मोक्ष इति ।

योगाचारमतं त्विदम्—विज्ञानमात्रमिदं भुवनम्, नास्ति बाह्योऽर्थः ज्ञानाद्वैतस्यैव तात्त्विकत्वात् । अनेके ज्ञानसंतानाः साकारो बोधः प्रमाणम् वासनापरिपाकतो नील-पीतादिप्रतिभासाः । आलयविज्ञानं हि सर्ववासनाधारभूतम् । आलयविज्ञा-नविशुद्धिरेवापवर्ग इति ।

माध्यमिकदर्शने तु-शून्यमिदम् स्वप्नोपमः प्रमाण-प्रमेययोः प्रविभागः, मुक्तिस्तु शून्यतादृष्टेस्तदर्थं शेषभावनेति । केचित्तु माध्यमिकाः स्वस्थं ज्ञानमाहुः"—पृ० ४६ पं० १२—पृ० ४७ पं० १५ ।

एतदर्थं सर्वदर्शनसंग्रहगतं बौद्धदर्शनमपि (पृ० २८-४६) विलोकनीयम् ।

७-ज्याः बो-आ० । ८-णमयु-वा० बा० । ९ प्रमेयक० पृ० ३ प्र० पं० ९ ।

न चौपचारिकं तेषां प्रामाण्यम् प्रमितिक्रियायां साधकतमत्वेन मुख्यप्रामाण्योपपत्तेः अत एव शास्त्रान्तरेष्वपि विशिष्टोपलब्धिजनकस्य[1] बोधाऽबोधरूपविशेषत्यागेन सामान्यतः

"लिखितं साक्षिणो[2] भुक्तिः प्रमाणं त्रिविधं स्मृतम्[3]" [ ] इत्युक्तिः ।

किञ्च, 'प्रमीयतेऽनेन' इति प्रमाणशब्दः करणविशेषप्रतिपादकः करणविशेषत्वं चास्य विशिष्टो-पलब्धिस्वरूपकार्यजनकत्वेन कार्यस्य चाव्यभिचारादिस्वरूप[4]प्रमितिरूपत्वात् तज्जनकेनापरेण साधक-
५ तमेन भाव्यम् एकस्यैव स्वात्मनि करणक्रियाविरोधात् ततो बोधाबोधरूपस्य प्रमितिजनकस्य प्रमाणतोपपत्तेः 'बोधमात्रं प्रमाणम्' इत्यत्राव्याप्तिर्लक्षणदोषः प्राप्नोतीति स्थितम् । अथ बोधविशेषः प्रमाणम् तदाऽत्रापि वक्तव्यम्-कः पुनरसौ बोधस्य विशेषः ? यद्यव्यभिचारादिविशेषणविशिष्टत्वं तदा प्रमितिस्वभावस्य तस्य प्रमाणताप्रसक्तिः । न चाभ्युपगम्यत एवेति वाच्यम् करणविशेषस्य प्रमाणत्वव्यवस्थितेः । १०

अत एव "निराकारो बोधोऽर्थसहभाव्येकसामग्यधीनस्तत्रार्थे प्रमाणम्" [ ] इति वैभाषिकोक्तमसंगतम् । अपि च, कर्मण्यसौ प्रमाणमभ्युपेयते । यत उक्तम्—

"सव्यापारमिवाभाति व्यापारेण स्वकर्मणि[5]" [ ] इति ।

कर्मता च बोधसहभाविनोऽर्थस्य तद्बोधापेक्षया न सम्भवति, तत्समानकालस्य तत्कृतविकार्य-त्वाद्ययोगात् अकर्मरूपे च तत्र कारणे क्रियायाः कथं प्रतिनियमः तदभावे चैकसामग्यधीनतायाः १५
मपि सर्वः सर्वस्य बोधो भवेत् । किञ्च, एकसामग्यधीनत्वस्य द्वयोरप्यविशेषात् यथा बोधोऽर्थस्य ग्राहकस्तथाऽर्थोऽपि बोधस्य किं न भवेत् ? तन्न निराकारो बोधः प्रमाणं सम्भवति ।

अथ मा भून्निराकारो बोधः प्रमाणम् साकारस्त्वसौ प्रमितिक्रियायां साधकतमत्वात् प्रमा-णम्; ननु च बोधस्य प्रमाणस्वरूपत्वादर्थाकारात्मकत्वमयुक्तम् प्रमेयरूप[6]त्वापत्तेः । न च प्रमेयरूपमेव प्रमाणं भवितुमर्हति प्रमाणस्य तद्ग्राहकत्वेन प्रतिभासात् । न च तथात्वेन प्रतिभासमानमपि प्रमेय- २०
रूपं युक्तम् प्रमाण-प्रमेययोरन्तर्बहिर्व्यवस्थितत्वेनावभासनात् भेदेन च प्रतिभासमानं नान्यथा-धिगन्तुं युक्तम् । न हि प्रतिभासः साक्षात्करणाकारत्वात् प्रत्यक्षरूपोऽर्थव्यवस्थापकः प्रमाणान्तरा-दनुग्रहं बाधां वा प्रतिपद्यते[7] ।

उक्तं च—

"प्रमाणस्य प्रमाणेन[8] न बाधा नाप्यनुग्रहः । २५
बाधायामप्रमाणत्वमानर्थक्यमनुग्रह[9]" ॥ [ ] इति

सर्वदा बहिर्विच्छिन्नार्थावभासिनोऽध्यक्षस्याप्रमाणत्वे प्रमाणान्तरप्रवृत्तिरेव । न चाध्यक्षेण ज्ञानमेव बहिरर्थाकारं वेद्यते न बाह्योऽर्थ इति कथं निराकारता तस्येति वक्तव्यम् ज्ञानरूपतया बोधस्याध्यक्षे प्रतिभासनात् अर्थस्य च ज्ञानरूपतयाऽप्रतिपत्तेः । न ह्यनहङ्कारास्पदत्वेनार्थस्य प्रति-भासेऽहङ्कारास्पदबोधरूपस्येव ज्ञानरूपता युक्ता, यदि त्वहङ्कारास्पदत्वेनार्थस्य प्रतिभासः स्यात् तदा ३०
ज्ञानरूपादभिन्नत्वात् तदात्मनः 'अहं घटः' इति प्रतिभासः स्यात् । न चान्यथाभूता प्रतिपत्तिरन्यथा-

---

१-स्य बोधरूपवि-भां० मां० । २-क्षिणो भुक्षिः प्र-आ० ।-क्षिणो मुक्ति प्र-हा० ।
३ "ततो यद् बोधाबोधरूपस्य प्रमाणत्वाभिधानकम्—

"लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्"—

इति तत् प्रत्याख्यातम् ज्ञानस्यैवानुपचरितप्रमाणव्यपदेशार्हत्वात्"
लिखितम् "शासनादि लोके पत्रादि तत् प्रमाणम्" साक्षिणः "पुरुषाः प्रमाणम्" भुक्तिः "अनुभवः प्रमाणम्"—प्रमेयक० पृ० ३ प्र० पं० ११, टि० ४०, ४१, ४२ । षड्द० स० बृ० वृ० पृ० २०७ पं० १७-१९ । ४-रूप-त्वात्-वा० बा० । ५-नकत्वेना-वा० बा० । ६-षवि-आ० हा० वि० । ७-कर्मण इ-हा० वि० । ८-पताप-बृ० वा० बा० । ९-रूपार्थ-आ० । १०-पद्येत-आ० हा० वि० । ११-न नाबा-(नाऽऽबा-) आ० । १२ अत्र 'अनुग्रहे' 'अनुग्रहः' इति द्वयमपि संभाव्यते इति विचार्य **'अनुग्रह इति'** इति सर्वप्रतिषु विद्यमानः ससन्धिः पाठो न्यस्तः ।

भूतमर्थं व्यवस्थापयितुं शक्ता प्रतिपत्तिव्यतिरेकेणाप्यर्थव्यवस्थितिप्रसक्तेरतिप्रसक्तिश्च नीलप्रतिपत्तेरपि पीतादिव्यवस्थापनाप्रसङ्गात् । अथ साकारं विज्ञानमाकारप्रतिनियमात् तत्प्रतिपत्त्यैवार्थापत्त्या तदाकारतां तज्जनकस्यार्थस्य व्यवस्थापयेदिति प्रतिकर्म व्यवस्था सिध्यति निराकारं तु विज्ञानं बोधमात्रतया व्यवस्थितं सर्वार्थान् प्रत्यविशिष्टत्वात् 'नीलस्येदं संवेदनं न पीतस्य' इति प्रतिकर्म व्यवस्थानिबन्धनं न भवेदिति साकारं ज्ञानमभ्युपगन्तव्यम्, असदेतत्; 'सर्वार्थान् प्रति बोधमात्रतया निराकारस्याविशिष्टत्वात्' इति हेतोरसिद्धेः निराकारत्वेपि चक्षुरादिवृत्त्या बोधस्य तत्रैव नियमितत्वात् । न च नियतत्वं तस्य सर्वार्थेषु, नीलादावेव तस्य प्रतीतेः समानत्वेऽपि वा पुरोवर्त्तिन्येव नीलादौ समानत्वस्य सम्भवान्न सर्वार्थसाधारणी प्रतिपत्तिरिति निराकारज्ञानवादिनो न काचित् क्षतिः तथादृष्टत्वात् 'नहि दृष्टेऽनुपपन्नं नाम' । निराकारत्वे किमिति पुरोवर्त्तिन्येव नीलादौ प्रवर्त्तते विज्ञानम्? चक्षुरादिभिस्तत्रैव नियमितत्वादिति प्रतिपादितं प्राक् । कस्मात् तैस्तत्र तन्नियम्यत इति चेत् अत्र वस्तुस्वभावैरुत्तरं वाच्यम् न हि कारणानि कार्यजननप्रतिनियमे पर्यनुयोगमर्हन्ति तत्र तस्य वैफल्यात् । साकारत्वेऽपि चायं पर्यनुयोगः समानः । तथाहि—साकारमपि ज्ञानं किमिति नीलादिकमेव पुरोवर्त्ति तत्सन्निहितमेव च व्यवस्थापयति? तेनैव तथा तस्य जननादिति चेत् समानमेतन्निराकारत्वेऽपि । किञ्च, चक्षुरादिजन्यं तद्विज्ञानं किमिति चक्षुराद्याकारं न भवति इति पर्यनुयोगे भवतापि 'वस्तुस्वभावैरुत्तरं वाच्यम्' इति वक्तव्यम् तदस्माभिरभिधीयमानं किमित्यसंगतं भवतः प्रतिभाति । अपि च, साकारता विज्ञानस्य किं साकारेण प्रतीयते, आहोस्विन्निराकारेण? यदि साकारेण तदा तत्रापि प्रतिपत्तावाकारान्तरपरिकल्पनमित्यनवस्थाप्रसक्तिः । निराकारेण चेद् बाह्यार्थस्यापि तथाभूतेनैव प्रतिपत्तिप्रसक्तिः । न च बाह्ये प्रत्यासत्तिनियमाभावान्न तथाभूतेन प्रतिपत्तिरिति वाच्यम् इतरत्रापि प्रत्यासत्तिनियमाभावस्य तुल्यत्वात् । शुक्ले पीताकारदर्शनाद् अभ्रान्ते न प्रतिनियमाभाव इति चेत् निराकारेऽपि तर्ह्यभ्रान्तत्वादेव प्रतिनियमो भविष्यतीति किमाकारपरिकल्पनया? कथमाकारमन्तरेण प्रतिनियम इति न वाच्यम् आकारेऽप्यस्य समानत्वात् । तथाहि—साकारवादिनोऽपि कथं प्रतिनियम इति प्रेरणायाम् 'प्रतिनियताकारपरिग्रह एव प्रतिनियमः' इति नोत्तरं युक्तम् प्रतिनियताकारपरिग्रहस्यैव प्रतिनियमरूपतयोपन्यस्तस्याद्यापि विचार्यमाणत्वात् । अथानुमानाद् बाह्योऽर्थः प्रतीयते तर्हि प्रतिबन्धसिद्धिर्वक्तव्या । न च बाह्योऽर्थोऽध्यक्षतः कदाचनापि सिद्धः नापि तत्प्रतिबद्धो ज्ञानाकार इति न प्रतिबन्धसिद्धिः तामन्तरेण न चानुमानप्रवृत्तिरिति कथं बाह्यार्थसिद्धिः? अथार्थापत्त्या बाह्योऽर्थोऽधिगम्यते, न; अर्थापत्त्याऽर्थस्वरूपप्रतिपत्तौ तस्याः प्रत्यक्षरूपताप्रसक्तेः । न च स्वरूपप्रतिपत्तिमन्तरेणाप्यनुमानवत् तस्याः प्रामाण्यम् अनुमानस्यावगतप्रतिबन्धलिङ्गप्रभवत्वेन प्रामाण्यात् अत्र च तदभावात् । नं चाऽप्यत्यन्तपरोक्षस्यार्थस्य केनचिदाकारेण विषयीकरणमिति न तस्य प्रतिपत्तिविषयता अनुमानविषयस्य तु पूर्वदृष्टत्वात् 'इदं तत्' इत्याकारेण प्रतिपत्तिविषयता सम्भवत्यपि इति नार्थापत्त्याप्यर्थप्रतीतिः । अथ दूरस्थितवृक्षादौ तत्पिण्डाद्याकारो यथा बाह्यवृक्षाद्यर्थव्यतिरेकेण न प्रतिभासविषयस्तद्वत् पुरोवर्त्तिनि स्तम्भादौ तदाकारः सत्येव बाह्ये स्तम्भाद्यर्थे इति सिद्ध एव बाह्योऽर्थः । न च वृक्षादावपि पिण्डाद्याकार एव वृक्षादिः तस्य स्व-पराभ्यां सन्निहितस्यान्यथाप्रतीतेः असदेतत्; यतः स्व-पराभ्यामसौ सन्निहितः प्रतीयमानः साकारेण वा

१-सक्तेरितिप्र-बृ० । २-रसिद्धत्वात् नि-आ० । ३-रणा प्र-भां० । ४ "नास्ति दृष्टेऽनुपपन्नं नाम"—मीमांसाद० १-१-५ भा० पृ० १३ पं० २० । ५-रादेस्त-आ० ।-रादिस्त-हा० वि० । "यतो निराकारस्येऽपि अवबोधस्य इन्द्रियवृत्त्या पुरोवर्तिन्येवार्थे नियमितत्वान्न सर्वार्थघटनप्रसङ्गः"—प्रमेयक० पृ० २८ प्र० पं० १२ । ६ प्राक् तस्मा-बृ० सं० । प्र० पृ० पं० ६ । ७ "कस्मात् तैस्तत्र तन्नियम्यते इत्यत्र वस्तुस्वभावैरुत्तरं वाच्यम्" -प्रमेयक० पृ० २८ द्वि० पं० १ ।

"प्रत्यक्षेण प्रतीतेऽर्थे यदि पर्यनुयुज्यते । स्वभावैरुत्तरं वाच्यं दृष्टे काऽनुपपन्नता" ॥

इति स्वयमभिधानात्"—अष्टस० पृ० १९१ पं० १३ । ८-पि वायं वा० बा० वि० विना । ९-दाऽऽत्मा-बृ० आ० हा० वि० । १० न चात्य-बृ० ल० । ११-क्षादौ मृत्पिण्डाद्याका-बृ० आ० हा० ।-क्षादौ मृत्पिण्डाका-वा० बा० वि० । १२ बाह्यार्थः आ० हा० वि० ।

ज्ञानेन प्रतीयते, निराकारेण वा? यदि साकारेण इति पक्षस्तदा असावपि ज्ञानाकार एव न बाह्योऽर्थ इति कश्चिदपि अर्थासिद्धेरसिद्धो दृष्टान्तः तथा च प्रतिबन्धाप्रसिद्धेर्न ज्ञानाकाराद् बाह्यार्थसिद्धिः । अथ निराकारेण तेन अर्थः स्व-पराभ्यां प्रतीयत इति प्रतिबन्धसिद्धिरभ्युपगम्यते पिण्डाद्याकारस्य बाह्यार्थेन सह; नन्वेवं निराकारं ज्ञानं बाह्यार्थग्राहकं सिद्धमिति व्यर्थं ज्ञानाकारकल्पनम् । न च तत्रापि प्रतिभासमानो वृक्षो ज्ञानाकार एव इति अपरमर्थं साधयति तत्रापि अपरापरार्थकल्पनायामनवस्थाप्रसङ्गात् कुतोऽर्थसिद्धिः? ज्ञानाकारात् इति चेत्; ननु प्रतिबन्धाग्रहणे कथं ततस्तत्सिद्धिः इति पुनरपि तदेव वक्तव्यमिति अपर्यवसाना पर्यनुयोगानवस्था । तस्मात् निराकारादेव ज्ञानाद् बाह्यार्थसिद्धिरभ्युपगन्तव्या ।

अथ निराकारं ज्ञानं नीलादावर्थे व्यापारवत् प्रवर्त्तते, उत निर्व्यापारम् इति कल्पनाद्वयम् । प्रथमकल्पनायामपि अव्यतिरिक्तव्यापारवत् उत व्यतिरिक्तव्यापारवत् इति कल्पनाद्वयम् । आद्यविकल्पे ज्ञानरूपमेव न व्यापारः कश्चित् । न च व्यापार-तद्वतोरभेदो युक्तः धर्मधर्मितया प्रतीतेः । द्वितीयविकल्पेऽपि सम्बन्धासिद्धिः ततस्तस्योपकाराभावात् उपकारेऽपि तस्य तन्निवर्तनेऽपरो व्यापारः कल्पनीय इत्यनवस्था । व्यापारस्यापि चार्थग्रहणव्यापृतावपरो व्यापारः परिकल्पनीय इत्यत्राप्यनवस्था । निर्व्यापारस्यापि व्यापारस्यार्थव्यापृतावर्थस्यापि ज्ञानग्रहणे व्यापृतिप्रसक्तिरित्यर्थस्यापि ज्ञानं प्रति ग्राहकता स्यात् । न च निराकारो बोधो निर्व्यापारोऽपि बोधस्वरूपत्वादर्थग्राहकः अर्थस्याप्यर्थरूपतया बोधं प्रति ग्राहकतोपपत्तेः ततो ग्राह्यरूपासंस्पर्शान्न बोधस्य ग्राहकता । न च ग्राह्यार्थरूपान्यथानुपपत्त्या बोधस्य ग्राहकताव्यवस्था, इतरेतराश्रयदोषप्रसक्तेः । तथाहि—ग्राह्यरूपव्यवस्था ग्राहकरूपसंस्पर्शाद् ग्राहकरूपव्यवस्थापि ग्राह्यरूपसंस्पर्शादिति कथं नेतरेतराश्रयदोषः? न च समानकालयोर्नील-बोधयोर्ग्राह्यग्राहकभावव्यवस्था, कर्म-कर्तृरूपत्वासिद्धेः—न हि समानकालतायां निर्वर्त्य-विकार्य-प्राप्यरूपकर्मतासम्भवः समानकालस्य निर्वर्त्य-विकार्यताऽयोगात् प्राप्यरूपता च न तद्व्यतिरिक्ता सम्भवति समानकालयोर्द्वयोरपि ग्राह्यग्राहकभावाविशेषात् । तन्न निराकारस्याप्यर्थव्यवस्थापकत्वं बोधस्येति "विज्ञप्तिमात्रमेव नार्थव्यवस्था" [ ] इति विज्ञानवादिनः । अयुक्तमेतत्; सप्रतिघरूपतयाऽध्यक्षतो बाह्यस्य सिद्धेर्विज्ञप्तिमात्रत्वे तद्रूपताऽभावप्रसक्तिर्भवेत् ।

१-कारज्ञा-बृ० । २ एते निर्वर्त्यप्रभृतयः कर्मकारकभेदाः । तदुल्लेखः तत्स्वरूपं चैवम्—

"प्राप्यं विषयभूतं च निर्वर्त्यं विक्रियात्मकम् । कर्तुश्च क्रियया व्याप्यमीप्सितानीप्सितेतरत्" ॥
—जैने० व्या० पृ० ९७ पं० ३ ।

"निर्वर्त्यं च विकार्यं च प्राप्यं च त्रिविधं मतम् । तत्रेप्सिततमं कर्म चतुर्धाऽन्यत् तु कल्पितम्" ॥

× × × × ×

"सती वा विद्यमाना वा प्रकृतिः परिणामिनी । यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते" ॥
"प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा । निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्" ॥
"यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते । तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम्" ॥
"प्रकृत्युच्छेदसंभूतं किञ्चित् काष्ठादिभस्मवत् । किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्" ॥
"क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते" ॥
—वाक्यप० तृ० का० श्लो० ४५-५१ पृ० २०२-२०५ ।

ब्रह्मणः स्वरूपे न कश्चनापि कर्मकारकप्रकारो घटते इति निरूपयता श्रीशंकराचार्येण स्वभाष्ये कर्मकारकस्य चातुर्विध्यमभ्यनुज्ञातम् । भामतीकृताऽपि तदेव विशदीकृतम् । तद्यथा "अत्र च कूटस्थनित्यम् इति निर्वर्त्यकर्मतामपाकरोति । सर्वव्यापि इति प्राप्यकर्मताम् । सर्वविक्रियारहितम् इति विकार्यकर्मताम् । निरवयवम् इति संस्कार्यकर्मताम्" —ब्रह्मसू० १-१-४ पृ० ११९ पं० १९ ।

भर्तृहर्युक्तं निर्वर्त्यादिस्वरूपं गद्यात्मकतया निरदेक्षि आचार्यहेमचन्द्रेण—"तत् त्रेधा—निर्वर्त्यम् विकार्यम् प्राप्यं च । तत्र यदसज्जायते जन्मना वा प्रकाश्यते तन्निर्वर्त्यम् । कटं करोति । पुत्रं प्रसूते । प्रकृत्युच्छेदेन गुणान्तराधानेन वा यद् विकृतिमापाद्यते तद् विकार्यम् । काष्ठं दहति । काण्डं लुनाति । यत्र तु क्रियाकृतो विशेषो नास्ति तत् प्राप्यम् । आदित्यं पश्यति । ग्रामं गच्छति" ।—हैम० बृ० वृ० २-२-३ पृ० २१ द्वि० पं० ६ ।

न चाध्यक्षतः सप्रतिघबाह्यरूपतया प्रतीयमानस्य 'विज्ञप्तिः' इति नामकरणे काचिन्नः क्षतिः नामकरणमात्रेण सप्रतिघत्वबाह्यरूपत्वादेरर्थधर्मस्याव्यावृत्तेः । अतः सप्रतिघत्वादिरूपो बाह्योऽर्थः तद्विपरीतश्चान्तरो बोधोऽभ्युपगन्तव्य इति कथं विज्ञप्तिमात्रम्? न च सप्रतिघाकारतया बोधप्रतिपत्तिः तद्विषयतया तु तस्य प्रतिपत्तिरस्त्येव 'नीलविषयो बोधो मयाऽनुभूयते' इति निश्चयोत्पत्तेः । न च प्रतिभासनिश्चयमन्तरेणापरं पदार्थस्वरूपव्यवस्थितौ निबन्धनमुत्पश्यामः ततो निराकारादेव बोधाद् बाह्यार्थसिद्धिरभ्युपेया, असदेतत्; यतः 'निराकारं ज्ञानमर्थव्यवस्थापकम्' इति किं प्रत्यक्षतोऽवगम्यते आहोस्विदनुमानतः उतार्थापत्तेरिति विकल्पाः । तत्र न तावत् प्रत्यक्षतस्तत्प्रतिपत्तिः प्रतिभासमानशरीर-स्तम्भादिव्यतिरिक्तस्यापरस्य ज्ञानस्यानुपलम्भेनासत्त्वात् । न च सुखाद्यान्तररूपेण अहङ्कारास्पदतया स्वसंवेदनाध्यक्षतो ज्ञानरूपं प्रतीयत एवेति कथं तस्यानुपलम्भः यतः सुखादयो नान्तःस्प्रष्टव्यशरीरव्यतिरिच्यमानतनवः प्रतिभान्ति 'अहम्'इति प्रत्ययोऽपि तथाभूतशरीरालम्बनतया संवेद्यत इति । न च तद्व्यतिरिक्तो बोधात्मा स्वप्नेऽप्यनुभवविषय इति न प्रत्यक्षतो ग्राह्यव्यतिरिक्तवपुर्ग्राहकस्वरूपमवभातीति न तत् प्रत्यक्षावसेयम् । नाप्यनुमानाधिगम्यम् प्रत्यक्षाप्रवृत्तौ तत्पूर्वकस्य तत्र तस्याप्यप्रवृत्तेः । नाप्यर्थापत्तिस्तत्सद्भावमवगमयति तस्याः प्रामाण्यानुपपत्तेः । किञ्च, अनुस्मरणमात्रमर्थापत्तिः न च 'इदं तत्'इत्युल्लेखवदनुस्मरणमदृष्टेऽर्थे प्रवृत्तिमासादयति । न च ज्ञानस्वरूपं कदाचनापि दृष्टम् दृष्टौ वा तत एव तत्सिद्धेः किमर्थापत्त्या? अथ 'अर्थस्य ज्ञानम्'इति निराकारस्य ज्ञानस्य प्रतीतेस्तत्सद्भावः । न चार्थग्राहकत्वेन सर्वदा 'अर्थस्य ज्ञानम्'इत्येवंप्रतीयमानस्याविसंवादिप्रत्ययविषयस्य तस्याभावः संवेदनमात्रस्याप्यभावप्रसक्तेः । अतो निराकाराऽविसंवादिप्रत्ययविषया बुद्धिः सिद्धेति युक्तमुक्तम्-"निराकारा नो बुद्धिः" [ ] इति, असदेतत्; यतो निराकारा अर्थबुद्धिर्मया प्रतीयत इत्यपरा बुद्धेस्तदर्थस्य च ग्राहिका बुद्धिः प्रसज्येत तथा च सति आकारमन्तरेण केनाकारेण 'बुद्धिरर्थस्य'इति संयोज्य प्रतीयेत? नहि 'इदं तत्'इत्यनिरूपिताकारमाकारान्तरेण नियोजनामर्हति । न च तथाऽप्रतीयमाना 'बुद्धिः'इति व्यपदेशमासादयति शशशृङ्गादेरपि बुद्धित्वप्रसक्तेः । अथापि स्यात् 'ममार्थबुद्धिरासीत्'इति नार्थाकारव्यतिरिक्ता सा प्रतिभाति किन्तु पृथगपोद्धारपरिकल्पनया प्रकाशरूपतया व्यवस्थापिता 'बुद्धिः'इति व्यपदिश्यते, अयुक्तमेतत्; यतो नाव्यतिरेकेण प्रतीयमाना बुद्धिर्विकल्पेनापोद्धर्तुं शक्या न च पृथक् प्रतीयते सेत्युक्तम् । अथ सुख-स्तम्भाद्याकारतया यँद्यन्त(न्तः)स्प्रष्टव्यरूपादिकमेव ज्ञानं प्रतिभाति न पुनस्ततो व्यतिरिक्तमपरं ज्ञानम् तथासति संवेदनमात्रमेव प्रसक्तम् एँवं च 'चक्षुरादिना मया रूपं प्रतीयते'इति सम्बन्धाभावात् कथं प्रतीतिः? अस्ति चेयं प्रतीतिः तस्मादुपलँभ्ये रूपादिके अभिमुखीभूतं चक्षुस्तत्प्रकाशँत्वं विदधाति सा च बुद्धिरुच्यते । न च नीलाद्याकारमविद्यमानमेव तत्र प्रकाशत्वमुत्पन्नमिति वक्तव्यम् विद्यमाननीलादिविषयँस्य चक्षुरादिव्यापारादविद्यमानस्य प्रकाशत्वस्यैव तत्रोत्पत्तेः नीलादेस्तु पूर्वमेव भावात् तथा च सति 'अर्थस्य बुद्धिः'इति व्यपदेशः सिद्ध एव । अत एवोक्तम्-"बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" [न्यायद० १-१-१५] इति, एतदप्यसत्; यतो न प्रकाशव्यतिरेकेण नीलादिरुपलभ्यते इति कुतः पूर्वव्यवस्थिते एव नीलादौ प्रकाशता चक्षुरादेरुदयतीति वक्तुं शक्यम् न हि प्रकाशतारहितं कदाचिदुपलब्धं नीलादिकम् उपलँम्भे वा सर्वस्य सर्वदर्शित्वप्रसक्तिः । अथ 'नीलस्य प्रकाशः'इति व्यतिरेक उपलभ्यत एव, न; 'शिलापुत्रकस्य शरीरम्' 'स्तम्भस्य स्वरूपम्' इत्यत्रापि व्यतिरेकोपलब्धेर्व्यतिरेकः स्यात् 'प्रकाशस्य प्रकाशता' इति च दृष्टेर्भेदः प्रकाशतायाः स्यात् । अथात्रैकैव प्रकाशतोपलभ्यते नापरेति न प्रकाशस्यापरः प्रकाशः व्यतिरेकोपलम्भस्य प्रत्यक्षबाधितत्वात् तर्हि नील-प्रकाशयोरपि न प्रत्यक्षप्रतीतो भेद इति तत्रापि समानन्यायतो व्यतिरेकस्यासिद्धेर्नीलाद्याकारैव प्रकाशता सा च बुद्धिः इति सिद्धा साकारता ज्ञानस्य ।

१-परज्ञा-ल० । २ नान्तस्प्र-बृ० । नान्तद्रष्ट-आ० । ३-षयस्याभा-आ० । ४-'त्यपरा* बुद्धेस्तदर्थस्य च ग्राहिका बुद्धिः* प्रसज्येत' इत्यन्वयसूचकचिह्वाङ्कितः पाठः ल० । ५ नहीह त-आ० । ६-ण यो-बृ० वा० बा० । ७ यद्यन्तप्रष्ट-हा० वि० । यदेतत्स्प्रष्ट-वा० बा० । यद्यन्तद्रष्ट-आ० । ८ एवं चक्षु-बृ० ल० वा० बा० विना । ९-लंभ्ये बृ० । लंभे बृ० सं० । वा० बा० । १०-शकत्वं भां० मां० । ११-यचक्षु-वा० बा० । १२-लम्भे च स-आ० हा० वि० ।

अथ परोक्षा बुद्धिर्निराकारा च ततः साकारत्वमुभयस्यासिद्धम्, असदेतत्; निराकारस्य बोधस्य 'बुद्धिः बुद्धिः' इति विकल्पेऽप्यप्रतिभासनात् अर्थापत्तेश्च प्रक्षयः प्रकाशमात्रेणार्थस्य सिद्धत्वाद् व्यर्थं तदपरबुद्धिपरिकल्पनम् ततश्च यदुक्तम्—"निराकारमेव ज्ञानमर्थोन्मुखमुपलभ्यमानं प्रतिनियमेन कथं सर्वसाधारणमिति सिद्धः प्रतिकर्म प्रत्ययः" [ ] इति, तदप्ययुक्तम्; यतो न किञ्चिन्नीलाद्याकारप्रकाशताव्यतिरेकेणोपलभ्यतेऽपरमिति कस्यार्थे प्रत्यासन्नता परैः परिकल्प्यते प्रकाशता तु यदि निराकारा स्यात् प्रतिकर्म व्यवस्था न भवेत् न ह्यालोकमात्रेणामिश्रितघटादिरूपेण तद्रूपप्रकाशनं युक्तम् कथं तर्हि चक्षुरादिना रूपमुपलभ्यत इति व्यवस्था? बाह्यार्थवादिपरिकल्पिते परोक्षे रूपादौ तदाकारा प्रकाशता चक्षुरादिना जन्यत इति तथाव्यपदेशः संभवी प्रकाशँता वा अपोद्धारँपरिकल्पनयाऽनादिवासनानियमाद् भिन्ना व्यपदिश्यत इति न किञ्चिदयुक्तम् यद्वा पूर्वसामग्रीतश्चक्षुरादिरूपाद्याकारप्रकाशता बुद्धिस्वभावोपजायत इत्येकसामग्र्यधीनतयाँ तथाव्यपदेशः—दृश्यते हि प्रदीप-प्रकाँशयोः समानकालयोः 'प्रदीपेन घटः प्रकाँशितः' इत्येकसामग्र्यधीनतया व्यपदेशः । न ह्येककालयोरत्रापि प्रकाश्य-प्रकाशयोः कार्यकारणभाव उपपद्यते; ननु यदि साकारं विज्ञानमभ्युपगम्यते तदा चक्षुरादिकोऽर्थः प्रतिक्षिप्त एवँ भवेत् चक्षुराद्याकारस्य संवेदनमात्रस्यैवोपलब्धेर्न तदाकाराच्चक्षुराद्यर्थव्यवस्था स्यात् । यतो न बाह्यार्थस्तदाकारं च विज्ञानं द्वयमुपलम्भविषयः तँत्त्वे वा ज्ञानमेव, तत्रापि साकारम् तत्राप्यर्थस्य पुनरप्युपलब्ध्यभ्युपगमे ज्ञानाकारेऽन्तर्भाव इति न कदाचित् स्वरूपेणोपलब्धिर्धर्मवेदिति नार्थव्यवस्था, असदेतत्; कार्यव्यतिरेकेण बाह्यार्थपरिकल्पना अर्थापत्त्या वा परेषामभिमतेति तदभ्युपगमादर्थस्यायमाकारः प्रकाशतामनुप्रविष्ट इत्यभिधानात् यथोक्तदोषानुपपँत्तिः अथवा विज्ञानवादेऽर्थासिद्धिप्रेरणं सिद्धसाध्यतया न दोषावहमिति साकारमेव ज्ञानं प्रमाणमभ्युपन्नाः सौत्रान्तिक-योगाचाराः ।

[बाह्यार्थं तद्ग्राहकं च निराकार-साकारज्ञानं स्वीकुर्वता सिद्धान्तिना साकारज्ञानप्रमाणवादस्य प्रतिविधानम्]

अत्र प्रतिविधीयते—निराकारं विज्ञानमर्थग्राहकमिति नँ प्रत्यक्षतः प्रतीयते शरीर-स्तम्भादिव्यतिरेकेणानुँपलम्भतस्तस्यासत्त्वादिति 'तस्यासत्त्वात्' इत्यत्र हेतुरसिद्धः अहङ्कारास्पदँस्य सुखादेर्ज्ञानविशेषस्यान्तःस्वसंवेदनप्रत्यक्षानुभूयमानस्य सत्त्वात् । न च स्वसंवेदनप्रत्यक्षसिद्धस्याप्यसत्त्वम् स्तम्भाद्याकारस्यापि ज्ञानस्यासत्त्वप्रसक्तेः न हि तथाप्रतिभासव्यतिरेकेणापरत्रापि सत्त्वनिबन्धनम् न च 'अहम्' इति प्रत्ययोऽन्तँःस्प्रष्टव्यशरीराद्यालम्बनः शरीरस्य सप्रतिघत्वेनापरप्रत्यक्षविषयत्वेन चाऽज्ञानरूपतया मुख्याहंप्रत्ययविषयत्वानुपपत्तेः ज्ञानस्यैवाप्रतिघान्यवेद्यरूपस्यान्तर्मुखाकारस्य मुख्याहंप्रत्ययविषयत्वात् 'अहं कृशः'इत्यादिशरीरालम्बनस्य त्वहंप्रत्ययस्यौपचारिकत्वात् उपचारनिबन्धनत्वस्य च प्राक् प्रतिपादितत्वात् तेन 'निराकारस्य ज्ञानस्य स्वप्नेऽप्यसंवेदनान्न प्रत्यक्षतो ग्राह्यव्यतिरिक्तं ग्राहकस्वरूपं प्रतिभाति' इँति प्रत्युक्तम् । 'नीलमहं वेद्मि' इति बाह्यनीलार्थग्राहकस्यान्तर्ग्राँह्याद् व्यतिरिक्तस्य स्वसंवेदनाध्यक्षतो ज्ञानस्याहमहमिकया प्रतीतेः । न चान्तःसुखादयो बहिश्च नीलादयः परिस्फुटवपुषः स्वसंविदिताः प्रतिभान्ति न पुनस्तद्व्यतिरिक्तं निराकँारं ज्ञानस्वरूपमर्थग्राहकमाभाति सुखादेरर्थग्राहकत्वायोगादिति वक्तव्यम् यतो बाह्यं प्रति सुखादीनां नैवास्माभिरपि ग्राहकत्वमभ्युपगम्यते । नहि सुखादयो भावनोपनेयजन्मानो बहिरर्थसंनिधिमन्तरेणापि प्रादुर्भवन्तः पदार्थव्यक्तीनां नियमेनोद्द्योतकाः स्वरूपेऽपर्यवसितस्वरूपत्वात् तेषाम् चक्षुरादिप्रभवास्तु संविदो बहिरर्थमुद्भासयन्त्यः स्पष्टावभासा अन्वय-व्यतिरेकाभ्यां पृथगवसीयन्त इति पदार्थग्राहिण्यस्ता एवाभ्युपगमनीयाः सुखादिवेदनं तु हृदि परिवर्तमानं बाह्यार्थसंविदः पृथगेव न तत् बाह्यार्थग्राहक-

---

१-शता चाऽपो-बृ० । २-रक-बृ० ल० विना । ३-या व्यप-आ० हा० वि० । ४-काश्ययोः भां० मां० । ५-काशते' वा० बा० । ६-व च भ-वा० बा० । ७ तत्त्वे विज्ञा-आ० हा० वि० । ८-नरूप-बृ० ल० वा० बा० । ९-पत्तेः भां० । १० पृ० ४६२ पं० ७ । ११-नुपलम्भस्तस्या-बृ० ल० वा० बा० ।-नुपलम्भतस्तस्यासत्त्वादिति हेतुर-आ० । १२-दसु-बृ० । १३-न्तःप्र-आ० हा० वि० । १४ पृ० ४६२ पं० ११ । १५-न्तर्ग्राह्यद्व्यति-हा० ।-न्तर्ग्राह्यव्यति-वा० बा० आ० वि० । १६-कारज्ञा-बृ० वा० बा० आ० वि० ।

तयाऽभ्युपगमविषयः । तदेवं ग्राह्याद् व्यतिरेकेण निराकारज्ञानस्य स्वसंवेदनाध्यक्षसिद्धत्वादनुमानमपि तत्सत्त्वप्रतिपादकत्वेन प्रवर्तत एव विप्रतिपत्तिसद्भावे । यच्च 'अर्थापत्तेरप्रामाण्याद् नातस्तत्प्रतिपत्तिः' इति, तत् सिद्धसाधनमेव । यदपि 'निराकारा मया बुद्धिः प्रतीयते इति बुद्धेरप्यपरा बुद्धिर्ग्राहिका' इत्याद्युक्तम् तदप्यसंगतमेव; यतः स्वपरार्थग्राहकं बुद्धेः स्वरूपम् तेन च रूपेण स्वसंविदि प्रतिभासमाना कथं शशशृङ्गादिवदव्यवस्थितस्वरूपा भवेत्? यदपि 'तदव्यतिरिक्ततया प्रतीयमाना न विकल्पेनाप्यपोढुं शक्या' इति, तदप्यसङ्गतम्; ग्राह्यार्थस्वरूपविविक्ततया स्वरूपेण तत्प्रतिभासनस्य प्रतिपादितत्वात् । यदपि 'प्रकाशतारहितं नीलादिकं नोपलभ्यते तथोपलम्भे सर्वः सर्वदर्शी भवेत्' इति, अत्रापि यदि ज्ञानं विना नीलादिकं नोपलभ्यत इत्युच्यते तदा सिद्धसाध्यता तदन्तरेण तदुपलम्भस्यानिष्टेः । अथ नीलमेव प्रकाशरूपमिति प्रतिपाद्यते, तदयुक्तम्; नीलस्य जडतया प्रकाशरूपत्वानुपपत्तेः परस्परपरिहारस्थितलक्षणतया जडाजडयोरेकत्वायोगात् । यदपि 'नीलस्य प्रकाशः' इति व्यतिरेकः 'शिलापुत्रकस्य शरीरम्' इत्यादाविवाभेदेऽपि संभवति' इति, तदपि न सम्यग्; दृष्टान्ते हि प्रत्यक्षावगतोऽभेदो भेदप्रतिभासस्य बाधकः न तु दार्ष्टान्तिके प्रत्यक्षारूढोऽभेदप्रतिभासः समस्ति । तथाहि—ग्राह्यरूपं स्तम्भाद्यनन्यव्यापृतत्वेन ग्राह्यतयाऽध्यक्षे प्रतिभाति प्रकाशता तु स्तम्भादिकर्मणि व्यापृतत्वेन ग्राहकतया प्रतिभातीति न स्तम्भ-तत्संवेदनयोरभेदावभासोऽध्यक्षारूढोऽवभाति । न केवलं ग्राहकाकारोऽन्यव्यापृतत्वेन प्रतिभाति किन्त्वाह्लादादिस्वभावतया अहङ्कारास्पदश्च प्रतिभास-निश्चयाभ्यामवसीयते तद्ग्राह्यस्तु तद्विपरीतत्वेन । न चाध्यक्षसिद्धभेदयोर्नील-तत्संवेदनयोः कुतश्चित् प्रमाणादेकताऽवसातुं शक्येति न भेदप्रतिभासस्य बाधा । न च नीलादिरेव ज्ञानरूपः 'अहं नीलादिः' इत्यनवगमात् तेन 'नीलाद्याकारैव प्रकाशता सा च बुद्धिरिति साकारता ज्ञानस्य' इति यदुक्तम् तदपि निरस्तं द्रष्टव्यम् । यदपि 'प्रकाशतामात्रेणार्थस्य सिद्धत्वाद् व्यर्थं तदपरबुद्धिपरिकल्पनम्', तदपि सिद्धमेव साधितम्; अर्थप्रकाशताया अर्थव्यतिरिक्ताया बुद्धित्वेन तदपरबुद्धिपरिकल्पनाया असिद्धत्वात् । यदपि 'नापरं नीलाद्याकारप्रकाशताव्यतिरेकेणोपलभ्यत इति कस्यार्थे प्रत्यासन्नता परैः परिकल्प्यते' तदपि नीलाद्यर्थग्रहणपरिणतेर्ज्ञानस्य स्वसंवेदनाध्यक्षतः सिद्धेरयुक्ततया स्थितम् । 'प्रकाशता तु यदि निराकारा भवेत् प्रतिकर्म व्यवस्था न स्यात्' इति यदुक्तम्, तदप्यसंगतमेव; यतः प्रकाशता किं नीलाद्याकारा, आहोस्विद् ग्राह्याकाराऽभ्युपगम्यते? यदि प्रथमो विकल्पस्तदा वक्तव्यम् किमेकदेशेन नीलाद्याकारा प्रकाशता, आहोस्वित् सर्वात्मनेति? तत्र यद्येकदेशेन तदा सांशैका प्रकाशता प्रसक्तेत्यनेकान्तसिद्धिः । अथ सर्वात्मना तदा प्रकाशताया जडरूपनीलादिस्वभावत्वाद् विज्ञप्तिरूपताऽभावप्रसक्तिः जडस्य प्रकाशरूपतायोगात् । अथ ग्राह्याकारा एवमपीतरेतराश्रयत्वम् । तथाहि—ग्राह्यस्य प्रतिनियतरूपसिद्धौ तदाकारा प्रकाशता सिध्यति तत्सिद्धौ च ग्राह्यस्य प्रतिनियतरूपसिद्धिरिति व्यक्तमितरेतराश्रयत्वम् । नहि देवदत्तस्य प्रतिनियताकारतासिद्धौ यज्ञदत्तस्य तदाकारतासिद्धिर्दृष्टा । न च प्रकाशतासाकारतासिद्धिमन्तरेणापि ग्राह्यस्य प्रतिनियतरूपसिद्धिः निराकारज्ञानस्य प्रतिकर्मव्यवस्थाहेतुत्वप्रसक्तेः । न च 'यद् यदाकारं तत् तस्य ग्राहकम्' इति व्याप्तिसिद्धिः अन्यथोत्तरनीलक्षणः पूर्वनीलक्षणस्य ग्राहकः स्यात् । न च तस्याज्ञानरूपत्वान्नायं दोषः देवदत्तनीलज्ञानस्य यज्ञदत्तनीलज्ञानग्राहकताप्रसक्तेः । न च तयोः कार्यकारणभावाभावान्नायं दोषः सदृशसमनन्तरज्ञानक्षणं प्रत्युत्तरज्ञानक्षणस्य ग्राहकताप्रसक्तेः । अथ तत्र तादृग्विधसारूप्याभावान्नायं दोषः; ननु तथाविधं सारूप्यं यदि कथञ्चित्सारूप्यमभिधीयते तदाऽनेकान्तवादापत्तिः । अथ सर्वात्मना सारूप्यम् तदोत्तरक्षणस्य पूर्वक्षणरूपताप्रसक्तिरित्येकक्षणमात्रं सर्वः सन्तानो भवेत् । न च पूर्वोत्तरक्षणयोः परपक्षे भिन्नमभिन्नं वा एकान्ततः सारूप्यं संभवति भेदपक्षे सामान्यवादप्रसक्तेः अभेदपक्षे तु तदभावप्रसक्तेः । न च परपक्षे सारूप्यग्रहणोपायः संभवतीत्युक्तम् । किञ्च, यदि नीलाकारं ज्ञानमनुभूयत इति बाह्योऽप्यर्थो नीलतया व्यवस्थाप्यते तर्हि त्रैलोक्यगतनीलार्थव्यवस्थितिस्ततो भवेत् सर्वनीलार्थसाधारणत्वात् तस्य । अथ नीलाकारताऽविशेषेऽपि कश्चित् प्रतिनियमहेतुस्तत्र विद्यते यतः पुरोवर्तिन एव नीलादेस्ततो व्यवस्था तर्ह्यनाकारत्वेऽपि ज्ञानस्य तत एव नियमहेतोः प्रतिनियतार्थव्यवस्थापकत्वं भविष्यतीति तत्साकारतापरिकल्पनं व्यर्थम् । यदपि 'चक्षुरादिना रूपमुपलभ्यते इतिव्यपदेशनिबन्धनं चक्षुरादिजन्यत्वं रूपाकारप्रकाशस्य' उक्तम्, तदपि स्वजाड्याविष्करणमात्रम्; यतो यया प्रत्यासत्त्या चक्षुरादिकं समानकालं भिन्नकालं वा भिन्नं रूपाद्याकारं ज्ञानं जनयति तयैव निराकारमपि ज्ञानं समानकालं भिन्नकालं वा स्वग्राह्यं भिन्नमपि ग्रहीष्यति न हि चक्षुरादेर्विभिन्नकार्योत्पादनवद् विभिन्नग्राह्यग्रहणे शक्तिप्रक्षयः कश्चिद् ज्ञानस्य संभवी ।

अथ विभिन्नकार्योत्पादनमप्यसंभवीति नाभ्युपगम्यते तर्हि "प्रमाणमविसंवादि" [ ] इति प्रमाणलक्षणप्रणयनमनर्थकं धर्मकीर्तेरासज्यते अविसंवादित्वस्यार्थक्रियाज्ञानजनकत्वलक्षणस्याभावात् । अथ व्यावहारिकमेतत् प्रमाणलक्षणं न पारमार्थिकम् किं तर्हि पारमार्थिकमिति वक्तव्यम्? अज्ञातार्थप्रकाशो वेति चेत्, न; अत्रापि यद्यज्ञातस्यार्थस्य प्रकाशः स्वसंविदितोऽर्थग्रहणपरिणाम आत्मसम्बन्धी तदाऽस्मन्मताभ्युपगम इति न कश्चिद्दोषः । अथ "स्वरूपस्य स्वतो गतिः" [ ] इति वचनाद् अज्ञातार्थप्रकाशः स्वरूपसंवेदनमात्रम् तदाध्यक्षबाधा दोषः स्वपरवेदकत्वेन ज्ञानस्य स्वसंवेदनाध्यक्षतः प्रतिपत्तेरिति प्रतिपादितत्वात् प्रतिपादयिष्यमाणत्वाच्च । एतेन 'एकसामग्र्यधीनतया चक्षुरादिना रूपमुपलभ्यत इति व्यपदेशः' इत्येतदपि निरस्तम् भिन्नानामेकसामग्र्यधीनत्वलक्षणप्रतिबन्धाविरोधे ग्राह्यग्राहकलक्षणस्यापि तस्याविरोधात् यथा चैकसामग्र्यधीनानां चक्षुरादीनां समानसमयेऽपि स्वरूपप्रतिनियमस्तथा ग्राह्यग्राहकयोरपि समानकालत्वाविशेषेऽपि विज्ञानं ग्राहकमेव अर्थस्तु ग्राह्य एवेति प्रतिनियमो भविष्यति । अथैकसामग्र्यधीनत्वं रूपप्रतिनियमश्चक्षुरादेर्नेष्यते तर्हि प्रमाणादिव्यवहारस्य सकलस्य विलोपात् साकारज्ञानाभ्युपगमोऽसंगत एव स्यात् । यदपि 'कार्यव्यतिरेकेण बाह्यार्थकल्पनाऽर्थापत्त्या वा परेषामिति तदभ्युपगमेनोच्यते अर्थस्यायमाकारः प्रकाशतामनुप्रविष्टः' इत्युक्तम्, तदपि परदर्शनाऽनभिज्ञतां ख्यापयति; न हि जैनानां कार्यव्यतिरेकात् अर्थापत्त्या वाऽर्थपरिकल्पना किन्तु तद्ग्राहकप्रतिभासवशात् । साकारज्ञानवादिनस्तु यदि ज्ञानाकारोऽर्थव्यतिरेकेण नोपपद्यत इत्यर्थव्यवस्थापकस्तदाऽनियतार्थव्यवस्थापकः स्यात् । जनकस्यैव व्यवस्थापक इति चेत्, न; चक्षुरादेरपि व्यवस्थापकः स्यात् । तज्जनकत्वेऽपि चक्षुरादेरतदाकारत्वान्नेति चेत्; ननु चक्षुरादिजन्यत्वेऽपि किमिति तज्ज्ञानं तदाकारं न भवति चक्षुरादि वा स्वाकारज्ञानाजनकमिति वक्तव्यम्? स्वहेतुबलायाततत्स्वभावत्वात् तयोरिति चेत्; ननु निराकारज्ञानपक्षेऽपि तत्स्वाभाव्याद् ज्ञानमेव चक्षुरादिव्यतिरेकेण स्वजनकार्थव्यवस्थापकमिति किं नाभ्युपगम्यते न्यायस्य समानत्वात्? किञ्च, ग्राहकस्यार्थजन्यत्वेन साकारता सा च प्रतिभासगोचरा एवं च ग्राहके आकारस्य जनकस्यैव प्रतिभासविषयत्वेऽन्यस्य तज्जनकस्य कल्पनाप्रसक्तिः तत्राप्येवमित्यनवस्था भवेत् । तन्न

१-कारस्य ज्ञा-बृ० वा० बा० भां० मां० विना । २ पृ० ४६२ पं० १३ । ३ पृ० ४६२ पं० १९ । ४-दपि च त-आ० हा० वि० । ५ पृ० ४६२ पं० २४ । ६ पृ० ४६२ पं० ३३ । ७-भवीति बृ० वा० बा० । ८ पृ० ४६२ पं० ३५ । ९-व्यावृतत्वे-बृ० ल० ।-व्यावृत्तत्वे-वा० बा० । १० व्यावृतत्वे-बृ० ल० । व्यावृत्तत्वे-वा० बा० । ११-व्यावृतत्वे-बृ० ल० ।-व्यावृत्तत्वे-वा० बा० । १२ पृ० ४६२ पं० ३८ । १३ पृ० ४६३ पं० २ । १४ पृ० ४६३ पं० ५ । १५ पृ० ४६३ पं० ६ । १६-शता-आ० हा० वि० ।

१-कारपरि-बृ० ल० वा० बा० भां० हा० । २ पृ० ४६३ पं० ७ । ३-जात्यावि-वा० बा० विना । ४ वा भिन्नरू-बृ० ल० वा० बा० हा० विना । ५-रपरिज्ञानं हा० । ६ "अविसंवादकं ज्ञानं सम्यग्ज्ञानम्"—न्यायबिं० टी० पृ० ३ पं० ५ । "यथाह प्रमाणमविसंवादि ज्ञानम्"—तत्त्वसं० पञ्जि० पृ० ४२८ पं० १० । "अन्ये तु अविसंवादि ज्ञानं प्रमाणमभिदधति"—तत्त्वोप० लि० पृ० ३७ पं० १ । "अपरे पुनरविसंवादकत्वं प्रमाणसामान्यलक्षणमाचक्षते"—न्यायमञ्ज० आ० १ पृ० २३ पं० १९ । "तथाह प्रज्ञाकरगुप्तः प्रमाणमविसंवादि ज्ञानम् इत्यादि प्रमाणलक्षणं व्यवहारेण"—सिद्धिवि० टी० लि० पृ० ७८ पं० १९ इत्युल्लेखाद् वचनमेतत् प्रज्ञाकरगुप्तीयं ज्ञायते । पार्थसारथिमिश्रः श्लोकवार्तिकटीकायां वचनमेतद् धर्मकीर्तिकर्तृकतयोल्लिखतीति तत्पाठप्रदर्शनपूर्वकं संसूचितं प्रथमे भागे पृ० १५ पं० २३ तथा टि० १२ । "अविसंवादकं प्रमाणम्"—न्यायावता० टी० पृ० २० पं० १५ । स्याद्वादर० पृ० १७ प्र० पं० ७ । "प्रमाणमविसंवादि ज्ञानमिति सौगताः"—प्रमाणमी० १-१-८ पृ० ११ पं० १९ । ७ पृ० १५ पं० २२ । ८ पृ० ४६३ पं० १० । ९ पृ० ४६३ पं० १७ । १०-ह्याहिप्र-बृ० ल० वा० बा० भां० मां० । ११ अयं चर्चस्तावद् भङ्ग्यन्तरेण वर्तते—आप्तमी० का० १३ अष्टश० पृ० ११ पं० २९ । अष्टस० पृ० ११८ पं० १० । प्रमेयक० पृ० २७ द्वि० पं० ९ ।

साकारज्ञानानुभववशादर्थव्यवस्था । प्रकाशतानुप्रविष्टता चार्थाकारस्यायुक्तैव वस्त्वन्तरानुप्रवेशासंभवात् संभवे वा प्रकाशताया अपि चैतन्यरूपतायाः पृथिव्याद्यनुप्रवेशात् परलोकाय दत्तो जलाञ्जलिर्भवेत् । यदपि 'अर्थवादिन एवायं दोषो ज्ञानवादे तु सिद्धसाध्यता' इति, तदपि न्यायबहिष्कृतम्; प्रमाणसिद्धस्याप्यर्थस्याभावो यदि न दोषाय भवेत् ज्ञानाभावोऽपि न दोषाय स्यात् । न च शून्यताभ्युपगमात् तदभावोऽपि न दोषावह इति वक्तव्यम् तत्प्रतिपादकप्रमाणाभावान्न शून्यतेति न साकारज्ञानप्रमाणवादोऽभ्युपगमार्होऽनेकदोषदुष्टत्वादिति स्थितम् ।

[जैमिनीयसंमतं ज्ञातृव्यापारस्य प्रमाणत्वं निराकर्तुं तद्विशेषणस्यानधिगतार्थाधिगन्तृत्वस्य व्यपोहनम्]

जैमिनीयाभिमतस्य तु ज्ञातृव्यापारस्य फलानुमेयस्य[2] यथा प्रमाणता न संभवति तथा स्वतः प्रामाण्यं निराकुर्वद्भिः प्रदर्शितमिति[3] न पुनः प्रतन्यते । यदपि अनधिगतार्थाधिगन्तृत्वं ज्ञातृव्यापारविशेषणत्वेन प्रतिपादितम्[4] तदप्यसङ्गतमेव; यतः[5] प्रमाणं वस्तुन्यधिगतेऽनधिगते वाऽव्यभिचारादिविशिष्टां प्रमां जनयन्नोपालम्भविषयः । न चाधिगते वस्तुनि किं कुर्वत् तत् प्रमाणतामाप्नोतीति वक्तव्यम् विशिष्टप्रमां विदधतस्तस्य प्रमाणताप्रतिपादनात् । न च पूर्वोत्पन्नैव प्रमा तेन जन्यते, प्रमित्यन्तरोत्पादकत्वेन प्रमाणत्वात् । न च प्रमित्यन्तरजनकत्वेऽप्यधिगते विषये तस्याकिञ्चित्करत्वेनोपालम्भविषयता, स्वहेतुसन्निधिबलादधिगतमनधिगतं वा वस्त्वधिगच्छतोऽप्रेक्षापूर्वकारितयोपालम्भविषयतानुपपत्तेः । न चैकान्ततोऽनधिगतार्थाधिगन्तृत्वे प्रामाण्यं तस्यावसातुं शक्यम् तद्व्यर्थतथाभावित्वलक्षणं संवादादवसीयते स च तदर्थोत्तरज्ञानवृत्तिः । न चानधिगतार्थाधिगन्तुरेव प्रामाण्ये संवादप्रत्ययस्य प्रामाण्यमुपपन्नम् न चाप्रमाणेन संवादप्रत्ययेन प्राक्तनस्य प्रामाण्यं व्यवस्थापयितुं शक्यम् अतिप्रसङ्गात् अतो यथा अधिगतार्थाधिगन्तुरर्थक्रियानिर्भासिज्ञानस्य प्रामाण्यम् तथा साधननिर्भासिनोऽप्यभ्युपगन्तव्यम् । न च सामान्य-विशेषतादात्म्यवादिन एकान्ततोऽनधिगतार्थाधिगन्तृत्वं प्रमाणस्य संभवति इदानीन्तनास्तित्वस्य पूर्वास्तित्वाभेदात् तस्य च पूर्वमप्यधिगतत्वसंभवात्[6] कथञ्चिदनधिगतार्थाधिगन्तृत्वाभ्युपगमे अस्मन्मतानुप्रवेशप्रसक्तिः । अथँ अप्रेक्षापूर्वकारितया प्रमा-

---

१ पृ० ४६३ पं० १८ । २ "अर्थापरोक्षतातत्संवेदनरूप"स्य—बृ० ल० टि० । ३ पृ० २० पं० १ । ४ पृ० ४५८ पं० ७ । ५ अनधिगतार्थाधिगन्तृत्वविशेषणस्य निरसनमिदं प्रायोऽक्षरशः परीक्षामुखीय १–४सूत्रव्याख्यायां वर्तते—प्रमेयक० पृ० १६ द्वि० पं० ३ । एतदेवांशतः "यदपि प्रमाणविशेषणमनधिगतार्थग्राहिलमभिधीयते परैः तदपि न साम्प्रतम्" इत्यादिना शब्दान्तरेण न्यायमञ्जर्यां दृष्टिपथमायाति—आ० १ पृ० २१ पं० २४ । स्याद्वादरत्नाकरे तु तदेव

"अविज्ञातज्ञानं लभिदधति भट्टस्य तनयाः प्रमाणं तत् सम्प्रत्यवतरतु दूष्यत्वपदवीम्" ॥

इत्यादिभङ्ग्यन्तरेण चर्चितम्—१–२ पृ० १८ प्र० पं० १५ । ६ "अन्यथा भेदायोगात्"—बृ० ल० टि० ।

७ "न च प्रयोजनानुवर्ति प्रमाणं भवति । कस्य चैष पर्यनुयोगः ? न प्रमाणस्य अचेतनत्वात् । पुंसस्तु सन्निहिते विषये करणे च संभवन्ति ज्ञानानीति सोऽपि किमनुयोज्यताम् किमक्षिणी निमील्य नास्ते कस्माद् दृष्टं विषयं पश्यसीति । प्रमाणस्य तु न किञ्चिद् बाध्यं पश्यामः येन तद् अप्रमाणमिति व्यवस्थापयामः न च सर्वात्मनः वैफल्यम् हेये अहिकण्ठ–वृक–मकर–विषधरादौ विषये पुनः पुनरुपलभ्यमाने मनःसंतापात् सत्वरं तदपहानाय प्रवृत्तिः उपादेयेऽपि चन्दन–घनसार–हार–महिलादौ परिदृश्यमाने प्रीत्यतिशयः स्वसंवेद्य एव भवति" इत्यादि—न्यायमञ्ज० आ० १ पृ० २२ पं० २–८

"न च प्रयोजनानुवर्ति प्रमाणं भवति × × ×

किमिति पश्यसि वस्तु तदेव भो यदिह पूर्वधिया कलितं किल ।
किमिति वस्तुनि सन्निहितेऽपि च त्वमसि नैव निमीलितलोचनः ॥

अपि च,

पुनः पुनः प्रमाणानां प्रवृत्तौ विषयेष्विह । सर्वथा नास्ति वैयर्थ्यं फलस्याप्युपलम्भनात् ॥
तथाहि–हालाहल–जिह्मगादौ हेये मुहुर्वस्तुनि वीक्ष्यमाणे ।
स कोऽपि तापः स्फुरति प्रकामं न गोचरं यो वचसामुपैति ॥

णस्यानुपालम्भविषयत्वेऽपि पुरुषस्य प्रेक्षापूर्वकारिणोऽधिगतविषयमपि प्रमाणं पर्येषमाणस्योपालम्भविषयता—स हि पूर्वाधिगते वस्तुनि प्रेक्षापूर्वकारी किमित्यधिगमाय प्रमाणान्तरमन्वेषते निष्पन्नप्रयोजनापेक्षया हेतुं व्यापारयतः प्रेक्षापूर्वकारिताहानिप्रसक्तेः, नैतदेवम्; यतः प्रीत्यतिशयादेः प्रयोजनस्यानिष्पन्नस्य भावात् तन्निष्पत्त्यर्थमुपायान्वेषणं न प्रेक्षापूर्वकारितां तस्योपहन्तुं समर्थम् । तथाहि–सुखसाधने[1] विषये पुनः पुनः प्रमां जनयतः प्रीत्यतिशयजनकत्वेन सप्रयोजनत्वात् प्रमाणान्वेषणस्य न तदन्वेष्टुः पुरुषस्योपालम्भार्हता । न च निश्चिते विषये न किञ्चिन्निश्चयान्तरेण प्रयोजनम्–यतस्तदर्थं प्रमाणान्वेषणं न वैयर्थ्यमनुभवेत्–यतो[2] भूयो भूय उपलभ्यमाने दृढतरा प्रतिपत्तिर्भवतीति सुखसाधनं तथैव निश्चित्योपादत्ते दुःखसाधनं च तथात्वेन सुनिश्चित्य[3] परित्यजेत् अन्यथा विपर्ययेणाप्युपादान–त्यागौ भवेताम् अत एवैकविषयाणामपि[4] शाब्दाऽनुमानाऽध्यक्षाणां प्रामाण्यमुपपन्नम् प्रतिपत्तिविशेषस्य प्रीत्यतिशयादेश्च सद्भावात् । न च प्रथमप्रत्ययेनैवार्थक्रियासमर्थवस्तुप्रदर्शने प्रवर्तितः पुरुषः प्रापितश्चार्थ इति तत्रापरप्रमाणान्वेषणं वैयर्थ्यमनुभवेत्, पुरुषप्रवृत्तेः प्रमाणाधीनत्वाभावात् विशिष्टप्रमाया एव प्रमाणाधीनत्वात् तां च जनयत उपेक्षणीयादौ विषये प्रमाणस्याप्रवर्तकस्यापि प्रमाणत्वेन लोके प्रसिद्धत्वात् प्रवृत्तेस्तु पुरुषेच्छानिबन्धनत्वात् तदभावे[5] नोक्तफलजनकस्य प्रमाणत्वव्याघातः । न च पुरुषार्थसाधनप्रदर्शकत्वमेव तस्य प्रवर्त्तकत्वम् तत्सद्भावेऽपि[6] 'प्रवर्त्तितोऽहमनेनात्र' इति तद्ग्रहणेच्छाभावे प्रतिपत्त्यनुपपत्तेः । न च प्रवृत्त्यभावे तस्य प्रदर्शकत्वलक्षणो निजो व्यापार एव नोपपद्यत इति वक्तव्यम् प्रतीतिबाधोपपत्तेः । नहि चन्द्रार्काद्यर्थविषयमध्यक्षमप्रवर्तकत्वात् न तत्प्रदर्शकमिति लोकप्रतीतिः । तन्न अनधिगतार्थाधिगन्तृत्वमपि ज्ञातृव्यापारविशेषणमुपपत्तिमत् । अतोऽनधिगतार्थाधिगन्ता ज्ञातृव्यापारोऽर्थप्रकटताख्यफलानुमेयो जैमिनीयपरिकल्पितो न प्रमाणमिति स्थितम् ।

[धर्मोत्तरीयं प्रमाणसामान्यलक्षणं व्यावर्ण्य सिद्धान्तिना तस्य समालोच्य दूषणम्]

सौगतैस्तु 'प्रमाणमविसंवादिज्ञानम्' इति वचनात् अविसंवादकत्वं प्रमाणलक्षणमुक्तम् अविसं-

---

निरीक्ष्यमाणे परमार्थतस्तु हेये मुहुर्मोहविकारमुख्ये ।
विवेकसेकद्भुतमानसानामरोचकस्तीव्रतरोऽभ्युदेति ॥
प्रि(प्रे)यस्विनी–पार्वण–शीतरोचिर्–मयूर–माणिक्यमुखे लजस्रम् ।
आदेयवस्तुन्यवलोक्यमाने सम्प्राप्यते प्रीतिरसः स कोऽपि ॥" इत्यादि—स्याद्वादर० १–२ पृ० १८ द्वि० पं० ७– पृ० १९ प्र० पं० ४ ।

१–**धनवि**–बृ० ल० भां० मां० विना । २ "उत्तरम्"—बृ० ल० टि० । ३ **सुनिश्चितं प**–ल० वा० बा० भां० मां० हा० । ४–**मपि शब्दा**—बृ० ल० वा० बा० विना । ५ "प्रवृत्त्यभावे"—बृ० टि० । "प्रवृत्तिः"—ल० टि० । ६ "प्रदर्शकता–" बृ० ल० टि० । ७–**हणे भावेच्छा प्रति**–वा० बा० । ८–**कत्वमि**–वा० बा० । "न च प्रवृत्त्यभावे प्रमाणस्यार्थप्रदर्शकत्वलक्षणव्यापाराभावो वाच्यः प्रतीतिविरोधात् । न खलु चन्द्रार्कादिविषयं प्रत्यक्षमप्रवर्तकत्वान्न तत्प्रदर्शकमिति लोके प्रतीतिः"—प्रमेयक० पृ० ८ प्र० पं० ६ । "न च प्रवृत्तेरभावे प्रमाणस्य वस्तुप्रदर्शकस्वरूपो व्यापार एव न संभवतीति विभावनीयम् अनुभवविरोधात् । न खलु कुमुदबान्धवादौ प्रत्यक्षेण दृष्टेऽप्यप्रवर्तमानो लोकः तस्याप्रदर्शकत्वमिति प्रतिपद्यते"—स्याद्वादर० पृ० २१ द्वि० पं० ६ । ९ "भट्टमतं(त)प्रसिद्धतत्संवेदनरूपफलोप(पल)क्षणमेतत्"—ल० टि० । १० **जैमिनीय**–वा० बा० ।

११ एतत् सर्वं धर्मोत्तरीयायां धर्मकीर्तिकृतन्यायबिन्दुवृत्तावित्थं दृश्यते—"अविसंवादकं ज्ञानं सम्यग्ज्ञानम् । लोके च पूर्वमुपदर्शितमर्थं प्रापयन् संवादक उच्यते तद्वद् ज्ञानमपि प्रदर्शितमर्थं प्रापयत् संवादकमुच्यते प्रदर्शिते चार्थे प्रवर्तकत्वमेव प्रापकत्वम् नान्यत् । तथाहि—न ज्ञानं जनयद् अर्थं प्रापयति अपि तु अर्थे पुरुषं प्रवर्तयत् प्रापयत्यर्थम् प्रवर्तकत्वमपि प्रवृत्तिविषयप्रदर्शकत्वमेव । न हि पुरुषं हठात् प्रवर्तयितुं शक्नोति विज्ञानम् अत एव चार्थाधिगतिरेव प्रमाणफलम् अधिगते चार्थे प्रवर्तितः पुरुषः प्रापितश्चार्थः तथा च सति अर्थाधिगमात् समाप्तः प्रमाणव्यापारः । अत एव अनधिगतविषयं प्रमाणम् येनैव हि ज्ञानेन प्रथममधिगतोऽर्थस्तेनैव प्रवर्तितः पुरुषः प्रापितश्चार्थः तत्रैवार्थे किमन्येन ज्ञानेनाधिकं कार्यम् ततोऽधिगतविषयमप्रमाणम् तत्र योऽर्थो दृष्टत्वेन ज्ञातः स प्रत्यक्षेण प्रवृत्तिविषयीकृतः यस्माद् यस्मिन्नर्थे प्रत्यक्षस्य साक्षात्कारित्वव्यापारो विकल्पेनानुगम्यते तस्य प्रदर्शकं प्रत्यक्षम् तस्माद् दृष्टतया ज्ञातः प्रत्यक्षदर्शितः । अनुमानं तु लिङ्गदर्शनान्निश्चिन्वत् प्रवृत्तिविषयं दर्शयति

वादकत्वं च प्राप्तिनिमित्तप्रवृत्तिहेतुभूतार्थक्रियाप्रसाधकार्थप्रदर्शकत्वम् यतोऽर्थक्रियार्थी पुरुषस्तन्निर्वर्त्तनक्षममर्थमवाप्तुकामः प्रमाणमप्रमाणं वा अन्वेषते यदेव चार्थक्रियानिर्वर्तकवस्तुप्रदर्शकं तदेव तेनान्विष्यते प्रत्यक्षानुमाने एव च तथाभूतार्थप्रदर्शके न ज्ञानान्तरमिति ते एव च लक्षणार्हे तयोश्च द्वयोरप्यविसंवादकत्वमस्ति लक्षणम् प्रत्यक्षेण ह्यर्थक्रियासाधनं दृष्टतयाऽवगतं प्रदर्शितं भवति अनुमानेन तु दृष्टलिङ्गाव्यभिचारितयाऽध्यवसितम् इत्यनयोः प्रदर्शकत्वमेव प्रापकत्वम् न ह्याभ्यां प्रदर्शितेऽर्थे प्रवृत्तौ न प्राप्तिरिति नान्यत् प्रदर्शकत्वव्यतिरेकेण प्रापकत्वम् तच्च शक्तिरूपम्। उक्तं च—"प्रापणशक्तिः प्रामाण्यम् तदेव च प्रापकत्वम् अन्यथा ज्ञानान्तरस्वभावत्वेन व्यवस्थितायाः प्राप्तेः कथं प्रवर्त्तकज्ञानशक्तिस्वभावता? तत्र यद्यपि प्रत्यक्षं वस्तुक्षणग्राहि तद्ग्राहकत्वं च तस्य प्रदर्शकत्वं तथापि क्षणिकत्वेन तस्याप्राप्तेः तत्सन्तान एव प्राप्यत इति सन्तानाध्यवसायोऽध्यक्षस्य प्रदर्शकव्यापारो द्रष्टव्यः अनुमानस्य तु वस्त्वग्राहकत्वात् तत्प्रापकत्वं यद्यपि न संभवति तथापि स्वाकारस्य बाह्यवस्त्वध्यवसायेन पुरुषप्रवृत्तौ निमित्तभावोऽस्तीति तस्य तत्प्रापकमुच्यते"। [ ] एतदुक्तं भवति—प्रत्यक्षस्य हि क्षणो ग्राह्यः स च निवृत्तत्वान्न प्राप्तिविषयः सन्तानस्त्वध्यवसेयः प्रवृत्तिपूर्विकायाः प्राप्तेर्विषय इति तद्विषयं प्रदर्शितार्थप्रापकत्वमध्यक्षस्य प्रामाण्यम् अनुमानेन त्वारोपितं वस्तु गृहीतम् स्वाकारो वा तयोर्द्वयोरप्यवस्तुत्वान्न प्रवृत्तिविषयतेति न तद्विषयं तस्य प्रापकत्वम् अपि त्वारोपित-बाह्ययोरभेदाध्यवसायेन वस्तुन्येव प्रवर्त्तकत्व-प्रापकत्वे अस्य द्रष्टव्ये। तेनानुमानस्य ग्राह्योऽनर्थः प्राप्यस्तु बाह्यः स्वाकाराऽभेदेनाध्यवसित इति तद्विषयमस्यापि प्रदर्शितार्थप्रापकत्वं प्रामाण्यम्। उक्तं च—"ततोऽपि विकल्पात् तदध्यवसायेन वस्तुन्येव प्रवृत्तेः प्रवृत्तौ च प्रत्यक्षेणाभिन्नयोगक्षेमत्वात्" [ ] तथाऽपरमप्युक्तम्—"न ह्याभ्यामर्थे परिच्छिद्य प्रवर्त्तमानोऽर्थक्रियायां विसंवाद्यते" [ ] इति। अत्र च प्रत्यक्षानुमानयोर्द्वयोरपि परिच्छेदः सन्तानविषयोऽध्यवसायो द्रष्टव्यः तथा, प्रामाण्यं वस्तुविषयं द्वयोरिति च। उक्तमत्रापि—"सन्तानविषयत्वेन वस्तुविषयत्वं द्वयोरुक्तम्" [ ] लौकिकं चैतदविसंवादकत्वं प्रामाण्यम् यतो लोके प्रतिज्ञातमर्थं प्रापयन् पुरुषः संवादकः प्रमाणमुच्यते तद्वदत्रापि द्रष्टव्यम्। न च क्षणिकस्य ज्ञानस्यार्थप्राप्तिकालं यावदनवस्थितेः कथं प्रापकतेत्याशङ्कनीयम् प्रदर्शकत्वव्यतिरेकेण तस्यास्तथा च प्रत्यक्षं प्रतिभासमानं नियतमर्थं दर्शयति अनुमानं च लिङ्गसंबद्धं नियतमर्थं दर्शयति अत एते नियतस्यार्थस्य प्रदर्शके तेन ते प्रमाणे नान्यद् विज्ञानम्। प्राप्तुं शक्यमर्थमादर्शयत् प्रापकम् प्रापकत्वाच्च प्रमाणम् आभ्यां प्रमाणाभ्यामन्येन ज्ञानेन प्रदर्शितोऽर्थः कश्चिद् अत्यन्तविपर्यस्तः यथा मरीचिकासु जलम् स च असत्त्वात् प्राप्तुमशक्यः कश्चिदनियतो भावाभावयोः यथा संशयार्थः। न च भावाभावाभ्यां युक्तोऽर्थो जगत्यस्ति ततः प्राप्तुमशक्यस्तादृशः। सर्वेण चालिङ्गजेन विकल्पेन नियामकमदृष्ट्वा प्रवृत्तेन भावाभावयोरनियत एवार्थो दर्शयितव्यः स च प्राप्तुमशक्यः तस्माद् अशक्यप्रापणमत्यन्तविपरीतं भावाभावानियतं चार्थं दर्शयदप्रमाणमन्यद् ज्ञानम्। अर्थक्रियार्थिभिश्च अर्थक्रियासमर्थप्राप्तिनिमित्तं ज्ञानं मृग्यते। यच्च तैर्मृग्यते तदेव शास्त्रे विचार्यते ततोऽर्थक्रियासमर्थवस्तुप्रदर्शकं सम्यग्ज्ञानम् यच्च तेन प्रदर्शितं तदेव प्रापणीयम् अर्थाधिगमात्मकं हि प्रापकमित्युक्तम्। तत्र प्रदर्शिताद् अन्यद् वस्तु भिन्नाकारं भिन्नदेशं भिन्नकालं च। विरुद्धधर्मसंसर्गाद्धि अन्यद् वस्तु देश-कालाऽऽकारभेदश्च विरुद्धधर्मसंसर्गः तस्माद् अन्याकारवद्वस्तुग्राहि नाकारान्तरवति वस्तुनि प्रमाणम् यथा पीतशङ्खग्राहि शुक्ले शङ्खे, देशान्तरस्थग्राहि च न देशान्तरस्थे प्रमाणम् यथा कुक्षिकाविवरदेशस्थायां मणिप्रभायां मणिग्राहि ज्ञानं नापवरकदेशस्थे मणौ, कालान्तरयुक्तग्राहि च न कालान्तरवति वस्तुनि प्रमाणम् यथा अर्धरात्रे मध्याह्नकालवस्तुग्राहि स्वप्नज्ञानं नार्धरात्रकाले वस्तुनि प्रमाणम्।

ननु देशनियतमाकारनियतं च प्रापयितुं शक्यम् यत्कालं तु परिच्छिन्नं तत्कालं न शक्यं प्रापयितुम् नोच्यते यस्मिन्नेव काले परिच्छिद्यते तस्मिन्नेव काले प्रापयितव्यमिति अन्यो हि दर्शनकालः अन्यश्च प्राप्तिकालः किन्तु यत्कालं परिच्छिन्नं तदेव प्रापणीयम् अभेदाध्यवसायाच्च संतानगतमेकत्वं द्रष्टव्यमिति"—१-१ पृ० ३ पं० ५-पृ० ४ पं० ११। षड्द० स० बृ० वृ० पृ० ३२ पं० १५-पृ० ३३।

१ "अर्थक्रिया-" बृ० ल० टि०। २-**ग्राहि ग्राह**-बृ०। ३-**कत्वे च** आ० हा० वि०। ४ "क्षणस्य"—बृ० ल० टि०। ५-**थापि साका**-आ० हा० वि०। ६ "वस्तुविषयमभेदाध्यवसायेन"-बृ० ल० टि०। ७ **प्रवर्तते प्रवृ**- वा० बा०। ८ "विकल्पस्य"—बृ० टि०। ९ **द्वयोरित्युक्तम्** बृ० विना।

शासंभवादित्युक्तत्वात्। न चान्यस्य ज्ञानान्तरस्य प्राप्तौ सन्निकृष्टत्वात् तदेव प्रापकमित्याशङ्कनीयम् यतो यद्यप्यनेकस्मात् ज्ञानक्षणात् प्रवृत्तावर्थप्राप्तिस्तथापि पर्यालोच्यमानमर्थप्रदर्शकत्वमेव ज्ञानस्य प्रापकत्वं नान्यत् तच्च प्रथमज्ञानक्षण एव संपन्नमिति नोत्तरोत्तरज्ञानक्षणानां तदुपयोगि प्राप्यमाणं च वस्तु नियतदेश-कालाऽऽकारं प्राप्यत इति तथाभूतवस्तुप्रदर्शकयोस्तयोरेव प्रामाण्यम् न ज्ञानान्तरस्य तेन प्रदर्शितप्रापकत्वलक्षणे प्रामाण्ये पीतशङ्खादिग्राहिज्ञानानामपि प्रापकत्वात् प्रामाण्यप्रसक्तिर्न भवति न हि तानि प्रदर्शितमर्थं प्रापयन्ति यद्देश-कालाऽऽकारं वस्तु तैः प्रदर्शितम् न तत् तथा प्राप्यते यच्च यथा प्राप्यते न तैस्तत् तथा प्रदर्शितम् देशादिभेदेन वस्तुभेदस्य निश्चितत्वान्न तेषां प्रदर्शितार्थप्रापकता। एवमपि प्रदर्शितार्थप्रापकत्वे जलादिप्रदर्शकस्य मरीच्यादिवस्त्वन्तरप्राप्तौ प्रदर्शितप्रापकत्वेन प्रामाण्यप्रसक्तिरिति न किञ्चिदप्रमाणं भवेत्। प्रमाणद्वयव्यतिरिक्तं च ज्ञानं न नियतप्रदर्शितार्थप्रापकम्। तेन हि भावाभावसाधारणोऽनियतोऽर्थः प्रदर्शितः स च तथाभूतोऽस्वान्न प्राप्तुं शक्य इति न तत् प्रदर्शितार्थप्रापकत्वेन प्रमाणम्। अनियतार्थप्रदर्शकत्वं च शाब्दादेः साक्षात् पारम्पर्येण वा प्रतिपाद्यादर्थादनुत्पत्तेः। तत् स्थितं प्रापणशक्तिस्वभावमविसंवादकत्वं प्रामाण्यं द्वयोरेव। प्रापणशक्तिश्च प्रमाणस्यार्थाविनाभावनिमित्ता दर्शनपृष्ठभाविना विकल्पेन निश्चीयते। तथाहि—दर्शनं यतोऽर्थादुत्पन्नं तदर्शकमात्मानं स्वानुरूपावसायोत्पादनात् निश्चिन्वदर्थाविनाभावित्वं प्रापणशक्तिनिमित्तं प्रामाण्यं स्वतो निश्चिनोतीत्युच्यते न पुनर्ज्ञानान्तरं तन्निश्चायकमपेक्षतेऽर्थानुभूताविव ततोऽविसंवादकत्वमेव प्रमाणलक्षणं युक्तम्।

एतदप्ययुक्तम्, यतो नार्थप्रदर्शकत्वमेव प्रापकत्वम् पुरुषेच्छाधीनप्रवृत्तिनिमित्तत्वात् सति वस्तुन्यर्थप्राप्तेः। एतच्च प्राक् प्रतिपादितम्। उपेक्षणीये च विषये पुरुषस्य तद्विषयार्थित्वाद्यभावे प्राप्ति-परित्यागयोरभावेऽपि तत्प्रदर्शकत्वलक्षणस्य प्रामाण्यस्य न कश्चिद् व्याघात उपलभ्यते। अथ इष्टाऽनिष्टसाधनार्थव्यतिरेकेणोपेक्षणीयस्यार्थान्तरस्याभावान्न तत्प्रदर्शकं किञ्चिज् ज्ञानं समस्तीति कथं प्रापकत्वाभावेऽपि प्रदर्शकत्वस्य संभवेन दोषोपादनं क्रियते? तथा च तृतीयविषयाभावमवगत्यैवोक्तम्-"अर्थानर्थविवेचनस्यानुमानायत्तत्वात्" [ ] तथा, "हिताहितप्राप्ति-परिहारयोः" [ ] इति च। तृतीयविषयाभावश्च सर्वस्य वस्तुनो राशिद्वयेन्तर्भावात्।

१-**पयोगी प्राप्य**-वा० बा०। "तच्च प्रथमत एव ज्ञानक्षणे संपन्नमिति नोत्तरोत्तरज्ञानानां तदुपयोगि तद्विशेषांशप्रदर्शकत्वेन तु तत् तेषामुपपन्नमेव"। तद् "प्रदर्शकत्वम्"। उपयोगि "फलवत्"। तद्-"अर्थ"-। अंश-"भेद-"। प्रमेयक० पृ० ८ प्र० पं० ५, टि० १२-१३-१४-१५। २-**यतार्थः** बृ०। ३ **न च त**-वा० बा०। ४ पृ० ४६७ पं० १३। ५-**षादानं** वा० बा०। ६ दार्शनिकग्रन्थेषु तावदर्थविभागक्रम इत्थं दृश्यते—

यद्यपि न्यायसूत्रभाष्यकारवार्तिककाराभ्यामुपेक्षणीयार्थस्य पार्थक्येन कृतं समर्थनं न दृष्टं तथापि अवयवसूत्रे हानोपादानोपेक्षाबुद्धित्रयवर्णनेन तयोस्तदर्थस्य पार्थक्ये तात्पर्यं प्रतिभाति यतो वाचस्पतिमिश्रेण उपेक्षणीयार्थस्य हेयोपादेयपार्थक्येन समर्थनं कृत्वा तत्तात्पर्यं स्पष्टीकृतम्—

"अप्रतीयमानमर्थं कस्माज्जिज्ञासते? तं तत्त्वतो ज्ञातं हास्यामि वोपादास्य उपेक्षिष्ये वेति। ता एता हानोपादानोपेक्षाबुद्धयस्तत्त्वज्ञानस्यार्थस्तदर्थमयं जिज्ञासते" १-१-३२ वात्स्या० भा०।

"पुरुषापेक्षया तु प्रामाण्ये चन्द्रतारकादिविज्ञानस्य पुरुषानपेक्षितस्य अप्रामाण्यप्रसङ्गः। न चातिदवीयस्तया तदर्थस्य हेयतया तदपि पुरुषस्यापेक्षितम् तस्योपेक्षणीयविषयत्वात्। न चोपेक्षणीयमपि अनुपादेयत्वाद् हेयमिति निवेदयिष्यते" न्यायवा० ता० टी० १-१-१ पृ० २१ पं० १६। तन्निवेदनस्थानं च १-१-३ पृ० १०३ पं० २२-पृ० १०४ पं० ३।

"ननु कोऽयमुपेक्षणीयो नाम विषयः? स हि उपेक्षणीयत्वादेव नोपादीयते चेत् स तर्हि हेय एव अनुपादेयत्वादिति, नैतद् युक्तम्, उपेक्षणीयविषयस्य स्वसंवेद्यत्वेन अप्रत्याख्येयत्वात्।

हेयोपादेययोरस्ति दुःख-प्रीतिनिमित्तता। यत्नेन हानोपादाने भवतस्तत्र देहिनाम्॥
यत्नसाध्यद्वयाभावादुभयस्यापि साधनात्। ताभ्यां विसदृशं वस्तु स्वसंविदितमस्ति नः॥
उपादेये च विषये दृष्टे रागः प्रवर्तते। इतरत्र तु विद्वेषस्तत्रोभावपि दुर्लभौ॥

यत्तु अनुपादेयत्वाद् हेय एवेति, तदप्रयोजकम्, न ह्येवं भवति, यदेतद् नपुंसकम् स पुमान् अस्त्रीत्वात् स्त्री वा नपुंसकम् अपुंस्त्वादिति, स्त्रीपुंसाभ्यामन्यदेव नपुंसकम् तथोपलभ्यमानत्वात्। एवमुपेक्षणीयोऽपि विषयो हेयोपादेयाभ्यामर्थान्तरम् तथोपलम्भादिति।

तथाहि-तृतीयं वस्तु नेष्टसाधनम् उपेक्षणीयत्वात् यच्च तत्साधनं न भवति तस्यानिष्टसाधनराशावन्तर्भावः एतच्चायुक्तम्; स्वसंविदितवस्त्वपह्नवस्य युक्तिशतेनापि कर्तुमशक्यत्वात् । तथाहि-यथा तद् वस्तु इष्टसाधनं न भवति तथाऽनिष्टसाधनमपि न भवति इष्टानिष्टसाधनयोर्यल्लोपादेयत्व-हेयत्वदर्शनात् उपेक्षणीयस्य चायत्नसाध्योपादानत्यागविषयत्वात् कथमिष्टानिष्टसाधनयोरन्तर्भावः? तन्न प्रदर्शकत्वमेव प्रापकत्वम् । न च बौद्धाभ्युपगमेन प्रदर्शितार्थप्रापकत्वं क्वचिदपि ज्ञाने संभवति । तद्धि सन्तानाश्रयेण सौगतैः परिकल्प्यते । न च सन्तानः संभवति-स हि स्वरूपेण वा वस्तुसन् भवेत् सन्तानिरूपेण वा? न तावत् स्वरूपेण सन्तानिव्यतिरेकेण तस्य वस्तुसतोऽनभ्युपगमात् अभ्युपगमे वा क्षणिकवादहानिप्रसक्तिः सामान्यानभ्युपगमश्च निर्निबन्धनो भवेत् इति न तस्य स्वरूपेण प्रवृत्त्यादिविषयता । सन्तानिरूपेणापि तस्य सत्त्वे सन्तानिन एव तथाभूता न तद्व्यतिरिक्तः सन्तानः प्रवृत्त्यादिविषयः सन्तानिनां चोत्पत्त्यनन्तरध्वंसित्वात् न तद्विषयस्य विज्ञानस्य प्रदर्शितार्थप्रापकत्वम् दृश्य-प्राप्ययोः क्षणयोरत्यन्तभेदात् यत्र हि देश-कालाऽऽकारभेदादभेदेन प्रतीयमानस्यापि वस्तुनो भेदोऽभ्युपगम्यते तत्र स्वरूपेण भिन्नयोः पूर्वोत्तरक्षणयोः कथमभेदः येन प्रदर्शितार्थप्रापकत्वं साधननिर्भासिज्ञानस्य युक्तिसंगतं भवेत्? अथ संवृत्या सन्तानस्य स्वरूपसिद्धेः पूर्वोक्तमदूषणम् । तथा च प्रतिपादितम्-"सांव्यवहारिकस्य च प्रमाणस्यैतल्लक्षणम्" [ ] नन्वेवं लोकव्यवहारानुरोधेन यदि प्रदर्शितार्थप्रापकत्वं प्रमाणस्याभ्युपगम्यते तदा नित्यानित्यवस्तुप्रदर्शकस्य तद् अभ्युपगम्यताम् लोकव्यवहारस्य तत्रैवोपपत्तेः । न च तथाभूततद्ग्राहकस्य युक्तिबाधितत्वान्निर्विषयत्वम् सन्तानविषयस्यैव पूर्वोक्तन्यायेन युक्तिबाधितत्वोपपत्तेः । तन्नाध्यवसितार्थप्रापकं प्रत्यक्षं पराभ्युपगमेन संभवति । तथाहि-यदेवाध्यक्षेणोपलब्धं तदेव तेनाध्यवसितम् न च सन्तानस्तेन पूर्व-

---

यदेतत् तृण-पर्णादि चक्रास्ति पथि गच्छतः । न धीश्छत्रादिवत् तत्र न च काकोदरादिवत्" ॥
—न्यायमञ्ज० आ० १ पृ० २४ पं० २५–पृ० २५ पं० १२ ।

"प्रमितिर्गुण-दोष-माध्यस्थ्यदर्शनम् । गुणदर्शनमुपादेयत्वज्ञानम्, दोषदर्शनं हेयत्वज्ञानम्, माध्यस्थ्यदर्शनं न हेयं नोपादेयमिति ज्ञानं प्रमितिः"-[प्रशस्त० कं० पृ० १९९ पं० १८-१९] इत्येषा श्रीधरीयकन्दल्यपि उपेक्षणीयं भावं व्यक्ततया समर्थयते ।

"पुरुषस्यार्थः अर्थ्यत इत्यर्थः काम्यत इति यावत् । हेयोऽर्थः उपादेयो वा । हेयो ह्यर्थो हातुमिष्यते उपादेयोऽप्युपादातुम् । न च हेयोपादेयाभ्यामन्यो राशिरस्ति उपेक्षणीयो ह्यनुपादेयत्वाद् हेय एव"—ध० न्या० टी० १-१, पृ० ४ पं० २१ ।

"ननु च हेयोपादेयाभ्यामन्योऽप्युपेक्षणीय अस्ति(योऽस्ति) तस्य किमिति न कथनम्? इत्याह—न च हेयेत्यादि । × × × किन्तु तस्यानुपादेयत्वाद् हेयत्वमेवेति न पृथक्कथनम् । तेन यदुक्तं कैश्चिद् हेयोपादेययोः पुरुषार्थोपयोगित्वात् कथनम् उपेक्षणीयस्य तद्विपर्ययान्न कथनमिति तत् प्रत्युक्तम्"—ध० न्या० टी० टि० पृ० १३ पं० ७ ।

"हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत्"-१-२ । "अर्थ्यतेऽभिलष्यते प्रयोजनार्थिभिरित्यर्थो हेय उपादेयश्च । उपेक्षणीयस्यापि परित्यजनीयत्वाद् हेयत्वम् उपादानक्रियां प्रति अकर्मभावात् नोपादेयत्वम् हानक्रियां प्रति विपर्ययात् तत्त्वम् । तथा च लोको वदति-अहमनेन उपेक्षणीयत्वेन परित्यक्त इति"—प्रमेयक० पृ० २ प्र० पं० ४ । "अभिमताऽनभिमतस्वीकारतिरस्कारक्षमं हि प्रमाणम् अतो ज्ञानमेवेदम्"—१-२ । "अभिमताऽनभिमतयोरुपलक्षणत्वाद् अभिमताऽनभिमतोभयाभावस्वभाव उपेक्षणीयोऽप्यत्रार्थो लक्षयितव्यः । रागगोचरः खल्वभिमतः द्वेषविषयोऽनभिमतः रागद्वेषद्वितयानालम्बनं तृणादिरुपेक्षणीयः तस्य चोपेक्षकं प्रमाणं तदुपेक्षायां समर्थमित्यर्थः"—स्याद्वादर० पृ० २१ द्वि० पं० १ ।

"अर्यते अर्थ्यते वा अर्थो हेयोपादेयोपेक्षणीयलक्षणः हेयस्य हातुम् उपादेयस्योपादातुम् उपेक्षणीयस्योपेक्षितुमर्थ्यमानत्वात् । न च अनुपादेयत्वाद् उपेक्षणीयो हेय एवान्तर्भवति अहेयत्वाद् उपादेय एव अन्तर्भावप्रसक्तेः । उपेक्षणीय एव च मूर्धाभिषिक्तोऽर्थो योगिभिस्तस्यैव अर्थ्यमानत्वात् अस्मदादीनामपि हेयोपादेयाभ्यां भूयानेव उपेक्षणीयोऽर्थः । तन्नायमुपेक्षितुं क्षमः"—प्रमाणमी० १-१-२ पृ० ५ पं० ११ ।

१ "न हेतु-फलभावादिरन्यभावादनन्वयात् । संतानान्तरवन्नैकः संतानस्तद्वतः पृथक्" ॥—आप्तमी० ३ श्लो० ४३ ॥ अष्टस० पृ० १९१ पं० ५ ।

२ "अन्येष्वनन्यशब्दोऽयं संवृतिर्न मृषा कथम्? । मुख्यार्थः संवृतिर्नास्ति विना मुख्यान्न संवृतिः" ॥
—आप्तमी० ३ श्लो० ४४ । अष्टस० पृ० १९२ पं० २ ।

मुपलब्ध इति कथमसावध्यवसीयते? न हि क्षणमात्रभाविनां सन्तानिनां दर्शनविषयत्वे तत्पृष्ठभाविनाऽध्यवसायेन तदद्दृष्टस्यैव विषयीकरणम् न चान्यथाभूतवस्तुग्रहणेऽन्यथाभूताध्यवसायिनः प्रदर्शितार्थप्रापकत्वं प्रामाण्यं युक्तम् तथाभ्युपगमे शुक्तिकायां रजताध्यवसायिनोऽपि तत् स्यात् । अथात्र प्रवृत्तेन रजतं न प्राप्यत इति न प्रदर्शितार्थप्रापकत्वं तर्हि सन्तानेऽध्यवसिते क्षणः प्राप्यत इति प्रकृतेऽपि न प्रदर्शितार्थप्रापकत्वम् । अथात्र सन्तान एव प्राप्यते तर्हि स एव वस्तुसन् भवेदिति न सामान्यधर्माः स्वरूपेणासन्तोऽभ्युपगन्तव्याः अक्षणिकस्य च वस्तुनः सिद्धेः । यदुक्तं भवद्भिः-"दर्शनेन क्षणिकाक्षणिकत्वसाधारणस्यार्थस्य विषयीकरणात् कुतश्चिद् भ्रमनिमित्तादक्षणिकत्वारोपेऽपि न दर्शनमक्षणिकत्वे प्रमाणम् किन्तु प्रत्युताप्रमाणम् विपरीतावसायाक्रान्तत्वात् क्षणिकत्वेऽपि न तत् प्रमाणं अनुरूपाध्यवसायाऽजननात् नीलरूपे तु तथाविधनिश्चयकरणात् प्रमाणम्" [ ] इति, तद् विरुध्यते । किञ्च, एवंवादिन एकस्यैव दर्शनस्य क्षणिकत्वाक्षणिकत्वयोरप्रामाण्यम् नीलादौ तु प्रामाण्यं प्रसक्तमित्यनेकान्तवादाभ्युपगमो बलादापतति । न च क्षणग्रहणे तद्विपरीतसन्तानावसायोत्पत्तौ दर्शनस्य प्रामाण्यं युक्तं मरीचिकास्वलक्षणग्रहणे जलाध्यवसायिन इव, यतो 'यदेव मया तत्त्वतो दृष्टं तदेव प्राप्तम्' इत्यध्यवसाये तस्य प्रामाण्यं व्यवस्थाप्यते । न च दृष्टस्य क्षणिकसन्तानिस्वरूपेण सन्तानस्य प्राप्तिरिति प्राक् प्रतिपादितम् स्वरूपेण तु तस्याऽसत्त्वात् प्राप्यविषयतैवेति न धर्मोत्तरमतपर्यालोचनया किञ्चित् परमार्थतः प्रदर्शितार्थप्रापकं प्रमाणं संभवति अतः संवादकत्वमपि तन्मतेन प्रमाणलक्षणमयुक्तम् ।

[नैयायिक-वैशेषिकसंमतस्य सामग्रीप्रामाण्यवादस्य पूर्वपक्षतयोपन्यासः]

नैयायिकास्तु "अव्यभिचारादिविशेषणविशिष्टार्थोपलब्धिजनिका सामग्री प्रमाणम्" [ ] इति प्रमाणसामान्यलक्षणं प्रतिपन्नाः तज्जनकत्वं च प्रामाण्यमिति च । अथ सामग्र्याः प्रमाणत्वे साधकतमत्वमनुपपन्नम् सामग्री ह्यनेककारकस्वभावा तत्र चानेककारकसमुदाये कस्य स्वरूपेणातिशयो वक्तुं शक्येत? तथाहि—सर्वस्मात् कारणकलापात् कार्यमुपजायमानमुपलभ्यते तदन्यतमापाये ऽप्यनुपजायमानं कस्य कार्योत्पादने साधकतमत्वमावेदयतु? न च समस्तसामग्र्याः साधकतमत्वम् अपरस्यासाधकतमस्याभावे तदपेक्षया साधकतमत्वस्यानुपपत्तेः असाधकतममपेक्ष्य साधकतमत्वव्यवस्थितेः न च अनेककारकजन्यत्वेऽपि कार्यस्य "विवक्षातः कारकाणि भवन्ति" [ ] इति न्यायात् साधकतमत्वं विवक्षात इति वक्तव्यम् पुरुषेच्छानिबन्धनत्वेन वस्तुव्यवस्थितेरयोगात् । अथ कर्म-कर्तृविलक्षणस्याव्यभिचारादिविशेषणविशिष्टोपलब्धिजनकस्य प्रमाणत्वान्न यथोक्तदोषानुषङ्गः, असदेतत्; अनेकसन्निधानात् कार्यस्य स्वरूपलाभे एकस्य तदुत्पत्तौ वैलक्षण्याभावे साधकतमत्वानुपपत्तेः । तन्न कर्म-कर्तृवैलक्षण्यमपि साधकतमत्वम् । अत्र चानेकपक्षानुद्भाव्य उद्द्योतकराऽध्ययनप्रभृतिभिः साधकतमत्वं निरस्तम् ते च पक्षा ग्रन्थगौरवभयान्नेह प्रदर्श्यन्ते । सन्निपत्यजनकत्वे

१-यत्वेन त-आ० । २-तस्य व-वा० बा० । ३-वृत्ते र-वा० बा० । ४ क्षणिकाक्षणि-बृ० । ५ पृ० ४७० पं० ९ । ६ "सन्तानस्य"—बृ० ल० टि० । ७ "अव्यभिचारिणीमसंदिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम्"-इत्यादिना सामग्रीप्रमाणवादसमर्थनं दृश्यते न्यायमञ्ज० आ० १ पृ० १२ पं० २२–पृ० १५ पं० २२ । इदं सामग्रीप्रमाणवादिकणाद-नैयायिकमतम् तदुपपादनम् सिद्धान्तिकृतं तत्प्रतिविधानं च सर्वं प्रमेयकमलमार्तण्डे वर्तते पृ० ३ द्वि० पं० १ । न्यायकुमुदचन्द्रोदये तु तदेव सर्वमतिस्फुटतया विपश्चितम् लि० पृ० १४ प्र० पं० ३–पृ० १७ द्वि० पं० ४ । स्याद्वादरत्नाकरेऽपि न्यायकुमुदचन्द्रोदयगतां सरणीमाश्रित्यैव पुनस्तदेव सविशेषतया स्पष्टीकृतं दृश्यते, तत्र च सामग्रीप्रमाणवादप्रदर्शनपरा भट्टजयन्तकर्तृकपल्लवगताः सप्त श्लोका अपि समुद्धृताः सन्ति–पृ० ३० द्वि० पं० १ । ८ "विशिष्टार्थोपलब्धि–" बृ० ल० टि० । ९ शक्यते वा० बा० । १० हैम० बृ० वृ० ७–४–१२२ । ११ प्रमाणस्य प्रमातृ–प्रमेयाभ्यां साधकतमत्वेन वैलक्षण्यं दर्शयितुकामेन उद्द्योतकरेण साधकतमत्वार्थः सप्तधा दर्शितः । तथाहि—"कः खलु साधकतमार्थः साधकतमं प्रमाणमिति केवलं वाक्यमभिधीयते नार्थ इति । १ भावाभावयोस्तद्वत्ता न प्रमातरि प्रमेये वाऽसति प्रमा भवति सति तु भवति न पुनः सति भवत्येव प्रमाणे तु सति भवन्ती भवत्येव सोऽयमतिशयः साधकतमत्वमुच्यते । २ यद्वान् वा प्रमिमीते सोऽतिशयः किंवान् प्रमिमीते? प्रमाणवान् प्रमिमीते प्रमाणे सति प्रमिमीते नासतीति । ३ सतोर्वाऽकर्तृत्वं यदभावात् यस्य चाभावात् प्रमातृ–प्रमेये न प्रमां कुरुतः

पूर्वोदितदोषाभावः । तथाहि—अनेकसन्निधौ कार्यनिष्पत्तेः साधकतमत्वानुपपत्तिः तस्मिंस्तु सति यदा नियमेन कार्यमुपजायते तदा कथं न तस्य साधकतमत्वोपपत्तिः ? असदेतत्, एवं प्रमाणत्वस्याव्यवस्थितिप्रसक्तेः । तथाहि—दीपादेः प्रकाशस्य सामग्र्येकदेशस्य कस्याञ्चिदवस्थायां प्रमाणत्वेनाभिमतस्य सद्भावेऽपि प्रमेयाभावात् कार्यानिष्पत्तौ तत्सद्भावे तु तन्निष्पत्तौ तस्यापि प्रदीपवत् सन्निपत्यकारकत्वात् प्रमाणताप्रसक्तिर्भवेत् तथा प्रमातुरपि मूर्च्छाद्यवस्थायामनवधाने वाऽन्यकारकसन्निधानेऽपि कार्यानुत्पत्तौ तदवधानादिसन्निधाने तज्जन्यकार्यनिष्पत्तेः सन्निपत्यजनकत्वेन साधकतमत्वप्रसक्तिः ।

अत्र कारकसाकल्यस्य साधकतमत्वेनाभ्युपगमात् पूर्वोक्तदोषाभावं केचिन्मन्यन्ते । तथाहि—नैकस्य प्रदीपादेः सामग्र्येकदेशस्य करणता अपि तु कारकसाकल्यस्य तदभावे कारकसाकल्याभावेनाभिमतकार्यासत्त्वमिति प्रमातृ–प्रमेयसद्भावे कारकसाकल्यस्योत्पत्तौ प्रमितिलक्षणस्य कार्यस्य भाव एव । अथ मुख्यप्रमातृ–प्रमेयसद्भावेऽपि पूर्वोदितस्य नियमस्य तुल्यता, न; कारकसाकल्यभावाभावनिमित्तत्वात् तन्मुख्यगौणभावस्य । तथाहि—कथंचित् कारकवैकल्ये तयोः सत्त्वेऽपि गौणता तत्साकल्ये कुतश्चिद् निमित्तान्तरात् यथोक्तप्रमितिलक्षणकार्यनिष्पत्तावगौणता प्रमातृ–प्रमेययोः तयोश्चानुपपत्तौ साकल्यस्यासत्त्वम् अतः कारकसाकल्ये कार्यस्यावश्यंभाव इति तस्यैव साधकतमत्वम् । अनेककारकसन्निधाने उपजायमानोऽतिशयः सन्निपत्यजननं साधकतमत्वं यद्युच्येत तदा न कश्चिद् दोषः । तथाहि—सामग्र्येकदेशकारकसद्भावेऽपि प्रमितिकार्यस्यानुत्पत्तेरेकदेशस्य न प्रमाणता सामग्रीसद्भावे त्ववश्यन्तया विशिष्टप्रमितिस्वरूपोत्पत्तेः एकदेशापेक्षया तस्या एव सन्निपत्यजनकत्वेन साधकतमता । न चात्र किमपेक्षया तस्याः साधकतमत्वं अन्यस्मिन्नसाधकतमे साधके साधकतरे वा सति तदपेक्षया तस्याः साधकतमत्वमुपपन्नमिति प्रेरणीयम् यतो न सामग्र्यन्तर्गतानामेकदेशानां जनकत्वव्याघातः तेषामेव धर्ममात्रत्वात् सामग्र्यस्येति जनकैकदेशापेक्षया तत्सामग्र्यस्य साधकतमत्वात् प्रमाणत्वमुपपन्नमेव । एतेन यत् परैः प्रेरितम्—"किल सामग्री करणं तच्च कर्तृकर्मापेक्षम् सामग्रीजनकत्वेनैं तयोर्व्यापृतेरर्थान्तरभूतयोरभावात् किमपेक्ष्य साधकतमत्वमासादयेत्" [ ] इति, तदपि निरस्तम्; यतः कर्तृ-कर्मणोः सामग्रीजनकत्वेन स्थितयोः कथमसत्त्वम् ? तत्सद्भावे च तदपेक्षा कथं न तस्याः करणता ? अथापि स्यात् तस्यास्तज्जन्यत्वे करणत्वव्याघातः अन्यतः सिद्धस्य करणत्वसद्भावात्, असदेतत्; यतो दृश्यत एव प्रदीपादेस्तज्जन्यस्यापि करणत्वसद्भाव इति न कश्चिद् व्याघातस्तज्जन्यत्व-करणत्वयोः । ततोऽव्यभिचारादिविशेषणार्थोपलब्धिजनिका सामग्री बोधाबोधस्वभावा तदेकदेशभूतकारकजन्या प्रमाणम् । वैशेषिका अप्येतदेव प्रमाणसामान्यलक्षणं प्रतिपादयन्ति । एतत्कार्यभूता वा यथोक्तविशेषणविशिष्टोपलब्धिः प्रमाणस्य सामान्यलक्षणम् तया स्वकारणस्य प्रमाणाभासेभ्यो व्यवच्छिद्यमानत्वात् इन्द्रियजत्वादिविशेषणविशेषिता सैवोपलब्धिः प्रमाणस्य विशेषलक्षणमिति स्थितं सामग्री प्रमाणमिति ।

सोऽतिशयः । ४ संयोगवच्चरमभाविता वा यथा वा संयोगः पश्चाद्भावी द्रव्यशक्तिर्भवति तथा प्रमाणं चरमभावि प्रमातृ–प्रमेययोः प्रमाशक्तिर्भवति पश्चाद्भावोऽतिशयः । ५ प्रतिपत्तेरानन्तर्यं वा यद्वा प्रमाणानन्तरं प्रतिपत्तेर्जन्म स चायमतिशय इति । ६ असाधारणकारणता वा प्रमाता साधारणं कारणं सर्वप्रतिपत्तीनाम् प्रमेयमपि अशेषपुरुषसाधारणत्वात् तथाभूतम् प्रमाणं त्वसाधारणकारणत्वात् प्रधानम् प्राधान्याच्च साधकतमत्वेनाभिधीयत इति । ७ प्रमाकारणसंयोगविशेषकत्वं वा यो वा प्रमाकारणं संयोगस्तस्य प्रमाणमनुग्रहे वर्तमानमतिशयशब्दवाच्यम्"—न्यायवा० १–१–१ पृ० ६ पं० २३–पृ० ७ पं० १३ । साधकतमत्वगोचरा एते सप्तऽपि पक्षा अधिकं विशदीकृता वाचस्पतिमिश्रेण—न्यायवा० ता० टी० पृ० २४ पं० १५—पृ० २६ पं० १२ ।

१–**मग्र्यैक**–बृ० । २ "प्रमेयस्य"–बृ० ल० टि० । ३–**धाने का**–आ० हा० वि० । ४ "परः प्रतिविधत्ते"– बृ० ल० टि० । ५–**भावे नाभि**–हा० वि० । ६ "प्रमातृ–प्रमेययोः"—बृ० ल० टि० । ७–**द्युच्यते** आ० हा० वि० । ८–**पत्तिमदिति** बृ० ल० वा० बा० । ९–**मग्रीकार**–आ० । १०–**न च त**– बृ० ल० भां० मां० हा० । ११ "कर्तृ"–बृ० ल० टि० । १२ "सामग्री"–ल० टि० । १३–**स्य विशेषल**–आ० हा० वि० । १४ **तयोरेककारण**–आ० ।

[सामग्रीप्रमाणवादं प्रतिविधाय स्वार्थनिर्णीतिस्वभावज्ञानस्य प्रमाणसामान्यलक्षणतयोपसंहारः]

अत्र प्रतिविधीयते–यत् तावदुक्तम्–'कारकसाकल्यस्य करणत्वेनाभ्युपगमे पूर्वोक्तदोषाभावः' इति, अत्र वक्तव्यम्–किमिदं कारकसाकल्यम् ? किं सकलान्येव कारकाणि, आहोस्वित् तद्धर्मः, उत तत्कार्यम्, किंवा पदार्थान्तरमिति प्रक्षाः । तत्र न तावत् सकलान्येव कारकाणि साकल्यम् कर्तृ-कर्माभावे तेषां करणत्वानुपपत्तेः तत्सद्भावे वा नान्येषां कर्तृकर्मरूपता सकलकारकव्यतिरेकेणान्येषामभावात् भावे वा न कारकसाकल्यम् । अथ तेषामेव कर्तृ-कर्मरूपता, न; तेषां करणत्वाभ्युपगमात् न च कर्तृ-कर्मरूपाणामपि तेषां करणत्वम् तेषां परस्परविरोधात् । तथाहि–ज्ञानचिकीर्षाधारता स्वातन्त्र्यं वा कर्तृता, निर्वर्त्यादिधर्मयोगिता कर्मत्वम्, प्रधानक्रियानाधारत्वं करणत्वम् एतानि परस्परविरुद्धानि कथमेकत्र संभवन्ति ? अथापरापरनिमित्तभेदादेकत्र कर्तृ–कर्म–करणरूपतायां अविरोधः; ननु तान्यपि निमित्तानि किं सकलकारकेभ्यो व्यतिरिक्तानि, उताव्यतिरिक्तानीति वाच्यम् । यद्यव्यतिरिक्तानीति पक्षस्तदा तदभेदे तेषामप्यभेदः तेषां वा भेदे कारकस्यापि भेदः अन्यथाऽव्यतिरेकासिद्धेः । अथ व्यतिरिक्तानि तदा सम्बन्धासिद्धिः—न च समवायलक्षणः सम्बन्धः तस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च, न च एकान्तभेदे विशेषणविशेष्यभावादिकोऽपि सम्बन्धः कश्चित् संभवति तत्रापि सम्बन्धान्तरकल्पनातोऽनवस्थाप्रसक्तेः, न च तस्य सम्बन्धरूपत्वात् सम्बन्धान्तरमन्तरेणापि सम्बद्धत्वान्नानवस्था एकान्तभेदे सम्बन्धरूपताया एवायोगात् । कथञ्चिन्निमित्तानां कारकेभ्योऽभेदे अनेकान्तवादापत्तिः । तत्र सकलकारणानि साकल्यम् । अथ कारणधर्मः साकल्यम्; ननु सोऽपि यदि कारकाव्यतिरिक्तस्तदा धर्ममात्रम् कारकमात्रं वा । अथ व्यतिरिक्तस्तदा 'सकलकारकधर्मः साकल्यम्' इति सम्बन्धासिद्धिः सम्बन्धेऽपि यदि सर्वकारणेषु युगपदसौ संबध्यते तदा बहुत्वसङ्ख्या तैंत् पृथक्त्व-संयोग-विभाग-सामान्यानामन्यतमस्वरूपापत्तिस्तस्येति तद्दूषणेन तस्य दूषितत्वात् न साधकतमत्वमुपपत्तिमत् ।

अथ तत्कार्यं साकल्यम्, तदप्ययुक्तम्; नित्यानां साकल्यजननस्वभावत्वे सर्वदा तदुत्पत्तिप्रसक्तेः ततश्चैकप्रमाणोत्पत्तिसमये सकलतदुत्पाद्यप्रमाणोत्पत्तिप्रसक्तिः तज्जनकस्वभावस्य कारणेषु पूर्वोत्तरकालभाविनस्तदैव भावात् । तथाहि–यदा यज्जनकमस्ति तत् तदोत्पत्तिमत् यथा तत्कालाभिमतं प्रमाणम् अस्ति च पूर्वोत्तरकालभाविनां सर्वप्रमाणानां तदा नित्याभिमतं जनकमात्मादिकं कारणमिति कथं न तदैव सकलतदुत्पाद्यप्रमाणोत्पत्तिप्रसक्तिः ? अथ आत्मादिके सत्यपि तदा तानि न भवन्ति न तर्हि तत् तत्कारणम् नापि तानि तत्कार्याणीति सकृदपि तानि ततो न भवेयुरिति सकलं जगत् प्रमाणविकलमापद्येत । न च आत्मादिके तत्करणसमर्थे सत्यपि स्वयमेव यथाकालं तानि भवन्ति इति वक्तव्यम् तेषां तत्कार्यताऽभावप्रसक्तेः तस्मिन् सत्यपि तदाऽभावात् स्वयमेवान्यदा च भावात् । न च स्वकालेऽपि कारणे सत्येव भवन्तीति तत्कार्यता गगनादिकार्यताप्रसक्तेः–गगनादावपि सत्येव तेषां भावात् । न च गगनादेरपि तत् प्रति कारणत्वस्येष्टेर्नायं दोषः, प्रमितिलक्षणस्य तत्फलस्यापि व्योमादिजन्यतया आत्माऽनात्मविभागाभावप्रसक्तेः । अथ यत्र प्रमितिः समवेता स एव आत्मा न व्योमादिरिति न तद्विभागाभावः; ननु 'समवेता' इति कोऽर्थः ? समवायेन संबद्धेति चेत्; ननु तस्य नित्यसर्वगतैकत्वेन व्योमादावपि प्रमितेः सम्बन्धान्न तत्परिहारेणात्मनो विभागः । न च समवायाविशेषेऽपि समवायिनोर्विशेषान्नायं दोषः, समवायस्याभावप्रसक्तेः । अथ यदा यत्र यथा

---

१ पृ० ४७२ पं० ८ । २ अत्र बृहत्ताडपत्रादर्शे 'किमिदं कारकसाकल्यम्' इति प्रश्नं विषयीकुर्वाणानां पक्षाणां संख्यास्पष्टीकरणाय तत्तत्पक्षदर्शकवाक्यस्योपरि १–२–३–४ इत्येवमङ्का अपि लिखिताः । अन्यत्रापि एतादृशे स्थले तत्रैवादर्शे क्वचित् क्वचित् अङ्काः प्रदर्शिताः सन्ति । ३—**षामेककर्तृ**–ल० विना । "तद्भावे वान्येषां कर्तृकर्मरूपता तेषामेव वा ता–(**न ता**–)वदन्येषां सकलकारकव्यतिरेकेणान्येषामभावात् भावे वा न कारकसाकल्यम् नापि तेषामेव कर्तृकर्मरूपता करणत्वाभ्युपगमात्"–प्रमेयक० पृ० ३ द्वि० पं० २ । ४–**गित्वात् क**–वा० बा० । "निर्वर्त्यत्वादिधर्मयोगित्वं कर्मत्वम्"—प्रमेयक० पृ० ३ द्वि० पं० ४ । ५ पृ० १०६ पं० १० । ६ **संबंधमंतरेणापि** बृ० । ७ **संबंधत्वा**–ल० वा० बा । **संबंधान्ना**–आ० हा० वि० । ८–**त्रं वा का**–आ० । "धर्ममात्रं कारकमात्रं वा स्यात्"–प्रमेयक० पृ० ३ द्वि० पं० ६ । ९ **सम्बन्ध्यते** आ० हा० वि० । १० **तत्र पृ**–आ० हा० वि० ।

यद् भवति तदा तत्र तथा तदात्मादिकं कर्तुं समर्थमिति नैकदा सकलतदुत्पाद्यप्रमाणोत्पत्तिप्रसक्तिः, नं; स्वभावभूतसामर्थ्यभेदमन्तरेण कार्यस्य कालादिभेदायोगात् अन्यथा दृश्यपृथिव्यादिमहाभूतकार्यनानात्वस्य कारणं किमदृष्टं पृथिवीपरमाण्वादिर्चेतुर्विधमभ्युपेयते? एकमेवानंशं नित्यं सर्वगं सर्वोत्पत्तिमतां समवायिकारणमभ्युपगम्यताम्। अथ कारणजातिभेदमन्तरेण न कार्यभेद उपपद्यते तर्हि कारणशक्तिभेदमन्तरेणापि न कार्यभेद उपपद्यते इत्यभ्युपगन्तव्यम्। अथ यया शक्त्यैकमनेकाः शक्तीर्बिभर्ति—तत्राप्यनेकशक्तिपरिकल्पनेऽनवस्थाप्रसक्तेः—तयैव तद् अनेकं कार्यं विधास्यतीति न शक्तिभेदपरिकल्पना, असदेतत्; यतो न जैनस्यायमभ्युपगमः यदुत भिन्नाः शक्तीः कयाचित् प्रत्यासत्तिलक्षणया शक्त्या एकः कश्चिद्धारयतीति किन्तु तत् तदात्मकम् तदपि तथाविधं न कस्याश्चित् शक्तेः अपि तु स्वकारणवशात्। न चैकस्यानेकात्मकत्वमदृष्टमेव परिकल्प्यते अनेकरूपाद्यात्मकस्यैकस्य पटादेः प्रमाणतः प्रतिपत्तेः अन्यथा गुणगुणिभाव एव न भवेत् समवायस्य तन्निमित्तस्याभावात्। ततो नित्यानि चेत् सकलकारणानि साकल्यजननस्वभावानि, सकलकालभाविसाकल्यस्य तदैवोत्पत्तिप्रसक्तिः। न चेत् तज्जननस्वभावानि नैकदापि तदुत्पत्तिः अतज्जननस्वभावात् सकृदपि तस्यानुत्पत्तेः। न च सहकारिसव्यपेक्षाणि तानि तज्जनयन्ति नित्यस्यानुपकार्यतया सहकार्यपेक्षाऽयोगात्। न च संभूयैकार्थकारित्वं तेषां सहकारित्वम् एकान्तनित्यवादे तस्यापि निषिद्धत्वात्। तन्न सकलकारणकार्यमपि साकल्यं संभवति। किञ्च, किमसकलानि कारणानि साकल्यं जनयन्ति उत सकलानि? न तावदसकलानि अतिप्रसङ्गात्। नापि सकलानि साकल्यमन्तरेण 'सकलानि' इति व्यपदेशाभावात् भावे वा अकिञ्चित्करं साकल्यमिति तत्परिकल्पना व्यर्था। किञ्च, यया प्रत्यासत्त्या तानि साकल्यं जनयन्ति तयैव प्रमितिमप्युत्पादयिष्यन्तीति व्यर्था साकल्यपरिकल्पना। अथ साकल्यस्य साधकतमत्वात् तदभावे नाकरणिका प्रमित्युत्पत्तिस्तर्हि साकल्योत्पत्तावपि तेषामपरं साकल्यलक्षणं करणमभ्युपगन्तव्यम् अन्यथा अकरणिका साकल्यस्यापि कथमुत्पत्तिः? अथ तदुत्पत्तावपि करणमभ्युपगम्यते तर्हि तदुत्पत्तावप्यपरं करणमभ्युपगन्तव्यमित्यनवस्था। अँथ करणोत्पत्तौ नापरं करणमभ्युपगम्यत इति नानवस्था तर्हि उपलब्ध्युत्पत्तावपि न करणमभ्युपगन्तव्यमिति न साकल्यप्रमाणपरिकल्पना युक्तिसङ्गता। न च साकल्यस्य अध्यक्षादिप्रमाणसिद्धत्वाद् अध्यक्षबाधितोऽयं विकल्पकलापः, आत्माऽन्तःकरण-तत्संयोगादेः कारणसाकल्यस्यातीन्द्रियत्वेनाध्यक्षाविषयत्वात् तत्पूर्वकत्वेन पूर्ववदादेरनुमानस्याप्यभ्युपगमान्न तेतोऽपि साकल्यसिद्धिः केवलं विशिष्टार्थोपलब्धिलक्षणमध्यक्षसिद्धं कार्यं करणमन्तरेण नोपपद्यत इति तत्परिकल्पना, तच्च साकल्यमिति न कल्पयितुं शक्यम् आत्मादिकरणसद्भावे कार्यस्योपपत्तावपरपरिकल्पनेऽदृष्टपरिकल्पनाप्रसक्तितोऽपरापरादृष्टपरिकल्पनयाऽनवस्थाप्रसक्तेः। तन्न सकलकारणकार्यमपि साकल्यम्। अथ पदार्थान्तरं सकलकारणेभ्यः साकल्यम् तदा यत् किञ्चित् पदार्थान्तरं तत् साकल्यं प्रसज्यत इति यस्य कस्यचित् पदार्थान्तरस्य सद्भावे अर्थोपलब्धिर्भवेदिति सर्वदा सर्वस्य सर्वज्ञताप्रसक्तिः। तन्न कारकसाकल्यं प्रमाणम्। तेन 'प्रमातृ-प्रमेययोरभावे साकल्याभावः' इत्यादि प्रतिक्षिप्तम् तत्सद्भावेऽपि भवदभिप्रायेण साकल्यानुपपत्तेः।

यदपि 'मुख्यगौणभावस्य कारकसाकल्यभावाभावनिमित्तत्वात्' इत्यादि, तदपि व्योमकुसुमावतंसकभावाभावकृतदेवदत्तसौभाग्यासौभाग्यप्रख्यं द्रष्टव्यम्; एतेन 'सन्निपत्यजननं साधकतमत्वम्' यद् व्याख्यातम् तदपि निरस्तम् तस्यापि साकल्यार्थत्वात्। यदपि 'साकल्यं हि तेषामेव धर्ममात्रम् नैकान्तेन वस्त्वन्तरम्' इति, तदपि अनेकान्तवादिमतानुप्रवेशं भवतः सूचयति अन्यथा साकल्यस्य सकलेभ्योऽभेदे धर्ममात्रमिति नं साकल्यम् धर्ममात्रं वा भवेदिति न धर्मिणः। एकान्तभेदे तु वस्त्वन्तरमेव तत् इति 'न वस्त्वन्तरम्' इत्यभिधेयशून्यं वचः वस्त्वन्तरपक्षे तु दोषाः प्रतिपादिता एव। यदपि 'प्रमातृप्रमेयजन्यत्वेऽपि सामग्र्या न करणत्वव्याहतिः[11]' इति, तदपि न सङ्गतम्; सामग्र्या-

---

१ न च स्व-ल० आ० हा० वि०। २ "पार्थिव-आप्य-तैजस-वायवरूपम्"-बृ० ल० टि०। ३-कार्यकारणम्-बृ० विना। ४ अथ च क-आ० हा० वि०। ५ "अनुमानात्"-बृ० टि०। "अनुमानतः"-ल० टि०। ६ पृ० ४७२ पं० १२। ७ पृ० ४७२ पं० १५। ८ पृ० ४७२ पं० २०। ९ न च सा-आ० हा० वि०। १० प्र० पृ० पं० २९। ११ पृ० ४७२ पं० २६।

स्तज्जन्यत्वेऽनवस्थाद्यनेकदोषापत्तेः प्रतिपादनात्। यदपि 'अव्यभिचारादिविशेषणविशिष्टार्थोपलब्धिजनिका सामग्री प्रमाणम्' इत्युक्तम् तदप्यसङ्गतम्; अव्यभिचारादेरुपलब्धिविशेषणस्य भवदभिप्रायेणायोगात् यथा च तस्याऽयोगस्तथा प्रत्यक्षलक्षणे प्रदर्शयिष्यामः। सामग्री च तज्जनिका यथा न संभवति तथाभिहितमेव साकल्यं विचारयद्भिः। यच्च 'अबोधस्वभावस्यापि प्रदीपादेः प्रमाणत्वं प्रतिपाद्यते, तदप्यसङ्गतमेव; अबोधस्वभावस्य तस्य प्रमितिक्रियायां साधकतमत्वायोगात्। यच्च लोकस्तेषां प्रामाण्यम् 'दीपेन मया दृष्टम्' 'चक्षुषाऽवगतम्' 'धूमेन प्रतिपन्नम्' इति व्यवहरति तदुपचारतः यथा 'ममायं पुरुषः चक्षुः' इति न तु मुख्यतः मुख्यतस्तु बोधस्यैव प्रमितिं प्रति तादात्म्यादव्यवहितं साधकतमत्वम् चक्षुरादेस्तु बोधव्यवधानाद् गौणम्। न च व्यपदेशमात्रात् पारमार्थिकवस्तुव्यवस्था उपचारतोऽपि 'नड्वलोदकं पादरोगः' इत्यादिव्यपदेशप्रवृत्तेः। न च प्रमाणस्य प्रमितिरूपता विरुद्धा स्वरूपे विरोधासिद्धेः। न च प्रमाण-प्रमित्योरेकान्ततो भेद एवाभ्युपगम्यते, कथञ्चिद् बोधादर्थपरिच्छित्तिविशेषस्य भेदात् प्राक्तनपर्यायनिरोधेन कथञ्चिदवस्थितस्यैव बोधस्यार्थपरिच्छित्तिविशेषरूपतयोत्पत्तेः अन्यथा कार्यकारणभावविरोधात् इत्यसकृत् प्रतिपादितत्वात्। एतेन

'लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्।'

इति यत् शास्त्रान्तरेषु बोधाबोधरूपस्य प्रमाणत्वाभिधानम् तदप्युपचारेण व्याख्येयमित्युक्तं भवति अन्यथा प्रमाणविरोधः प्रदर्शितन्यायेन। यदपि 'तत्कार्यभूता वा उदितविशेषणोपलब्धिस्तस्य सामान्यलक्षणम्' इत्युक्तम् तदप्यसङ्गतम्; न हि यथोक्तविशेषणोपलब्धिः पराभ्युपगमेन संभवति। नापि पराभ्युपगतप्रमाणकार्यतयासौ सिद्धा येन स्वकारणं प्रमाणाभासेभ्यो व्यवच्छिन्द्यात्। तन्नाक्षपाद-कणभुग्मतानुसारिपरिकल्पितमपि प्रमाणसामान्यलक्षणमुपपत्तिक्षमम्। तस्मात् प्रमाणं स्वार्थनिर्णीतिस्वभावं ज्ञानमित्येतदेव प्रमाणसामान्यलक्षणमनवद्यम्।

[नैयायिकादिसंमतं परसंविदितत्वपक्षमपास्य सिद्धान्तिना लक्षणैकदेशभूतस्य स्वनिर्णीतिस्वभावत्वस्य व्यवस्थापनम्]

ननु चात्रापि स्वग्रहणविधुरस्य ज्ञानस्य नैयायिकादिभिरभ्युपगमाद् बौद्धैस्त्वर्थग्रहणविधुरस्येति स्वार्थनिर्णीतिस्वभावताऽसिद्धा। तथाहि—नैयायिकाः प्रतिपादयन्ति—घटादिज्ञानं स्वग्राह्यं न भवति ज्ञानान्तरग्राह्यं वा, ज्ञेयत्वाद् घटादिवत्।

अत्र प्रयोगे हेतुः स्वरूपासिद्धः आश्रयासिद्धश्च धर्मिणो ज्ञानस्याप्रतिपत्तौ तदाश्रितज्ञेयत्वधर्मा-प्रतिपत्तेः। न चाश्रयासिद्धस्य परैर्गमकत्वमभ्युपगम्यते अन्यथा सामान्यादिनिषेधे 'सामान्यस्यासिद्धौ परं प्रत्याश्रयासिद्धो हेतुः' इति दोषोद्भावनमयुक्तियुक्तं भवेत्। अथ घटादिज्ञानस्य प्रमाणतः प्रसिद्धेर्नायं दोषः; ननु तत्प्रसिद्धिरध्यक्षतः, अनुमानतो वा प्रमाणान्तरस्यात्रानधिकारात्? न तावदध्यक्षतः तस्येन्द्रियार्थसन्निकर्षजत्वाभ्युपगमात् न च ज्ञानस्य चक्षुरादीन्द्रियेण सन्निकर्षः न च तद्व्यतिरिक्तमिन्द्रियान्तरमस्ति। अथ मनोलक्षणमन्तःकरणमस्ति तस्य च ज्ञानेन संयुक्तसमवायः सन्निकर्ष इति तत्प्रभवमध्यक्षं तत्र प्रवर्तत इति। तथाहि-आत्मना मनः संयुक्तम् आत्मनि च समवेतं ज्ञानमिति

---

१ पृ० ४७१ पं० १८। २-मग्री त-बृ०। ३ पृ० ४७३ पं० ३। ४ न्यायस्याक्षोपयोगो महाभाष्ये इत्थं विहितः—

"अन्तरेणापि निमित्तशब्दं निमित्तार्थो गम्यते। तद्यथा—"दधित्रपुसं प्रत्यक्षो ज्वरः" ज्वरनिमित्तमिति गम्यते। "नड्वलोदकं पादरोगः" पादरोगनिमित्तमिति गम्यते। "आयुर्घृतम्" आयुषो निमित्तमिति गम्यते"—१-१-५८ पृ० ४५८। लौकिकन्याया० भा० ३ पृ० ६६ तथा ६१।

५ पृ० ४५९ पं० ३। ६ पृ० ४७२ पं० २८। ७ ज्ञानस्य परसंविदितत्वनिराकरण-स्वसंविदितत्वस्थापनपरेयं चर्चा प्रमेयकमलमार्तण्डे भाष्यायमाणा बहुधा शब्दसाम्यं बिभ्रती च क्रमोत्क्रमाभ्यां वर्तते-पृ० ३३ द्वि० पं० ६-पृ० ३८। प्र० पं० ५। ८ प्रस्तुतप्रक्रियाप्रतिपादकं षड्दर्शनसमुच्चयबृहट्टीकायां "यदुक्तम्" निर्दिश्य समुद्धृतं प्राच्यं पद्यमित्थम्—

"आत्मा सहैति मनसा मन इन्द्रियेण स्वार्थेन चेन्द्रियमिति क्रम एष शीघ्रः।
योगोऽयमेव मनसः किमगम्यमस्ति यस्मिन् मनो व्रजति तत्र गतोऽयमात्मा" ॥ पृ० ५८ पं० १।

मनोज्ञानेन्द्रियार्थसन्निकर्षोत्पन्नतदेकार्थसमवेताध्यक्षग्राह्यत्वाद् घटादिज्ञानस्य कथमाश्रयासिद्धत्वादि-
हेतोर्दोषः ? युक्तमेतत् यदि इन्द्रियं मनः सिद्धं भवेत् । अथानुमानात् तत्सिद्धिः । तथाहि–घटादिज्ञान-
ज्ञानमिन्द्रियार्थसन्निकर्षजम् प्रत्यक्षत्वे सति ज्ञानत्वात् चक्षुरादिप्रभवरूपादिज्ञानवत्, न; अस्य हेतो-
रप्रसिद्धविशेषणत्वात् न हि घटादिज्ञानज्ञानस्याध्यक्षत्वं सिद्धम् इतरेतराश्रयत्वात् । तथाहि—मनइ-
न्द्रियसिद्धावस्याध्यक्षत्वसिद्धिः तत्सिद्धौ च सविशेषणहेतुसिद्धेर्मनइन्द्रियसिद्धिरिति व्यक्तमितरेतरा-
श्रयत्वम् । न च घटादिज्ञानाद् भिन्नमपरं ज्ञानं तद्ग्राहकमनुभूयत इति विशेष्यासिद्धश्च हेतुः ।

सुखादिसंवेदनेन व्यभिचारी च । तथाहि–तत्संवेदनमध्यक्षत्वे सति ज्ञानं न च तज्जन्यमिति व्यभिचारः । अथास्यापि पक्षीकरणाददोषः । तथाहि–सुखादिसंवेदनमिन्द्रियार्थसन्निकर्षजम् अध्यक्ष-
ज्ञानत्वात् चक्षुरादिप्रभवरूपादिवेदनवत् सुखादिर्वा भिन्नज्ञानवेद्यः ज्ञेयत्वात् घटवत् । नन्वेवं
व्यभिचारविषयस्य पक्षीकरणे न कश्चिद्धेतुर्व्यभिचारी स्यात् । तथाहि–अनित्यः शब्दः प्रमेयत्वात् घटवत् इत्यत्राप्यात्मादेर्व्यभिचारविषयस्य पक्षीकरणान्न व्यभिचारः शक्यं ह्यत्रापि वक्तुम् अनित्य आत्मादिः प्रमेयत्वात् घटवत् । न चात्र प्रत्यक्षबाधः अन्यत्रापि तस्य समानत्वात् न हि सुखाद्य-
विदितस्वरूपं पूर्वं घटादिवदुत्पन्नं पुनरिन्द्रियसम्बन्धोपजातज्ञानान्तराद् वेद्यत इति लोकप्रतीतिः अपि
तु प्रथममेव स्वप्रकाशरूपं तदुदयमासादयदुपलभ्यते । आत्मनि क्रियाविरोध इति चेत्, न; स्वरूपेण
पदार्थस्य विरोधाभावात् अन्यथा प्रदीपादेरप्यपरप्रकाशविकलस्वरूपप्रकाशविरोधः स्यात् । तस्य
तत्स्वरूपं कुतः सिद्धमिति चेत् प्रदीपादौ कुतः? तथादर्शनमितरत्रापि समानम् । न चैकस्य
स्वभावोऽपरत्राप्यभ्युपगमार्हः अन्यथा स्वपराप्रकाशस्वभावो घटगतः प्रदीपेऽप्यभ्युपगमनीयो भवेत्।
न च तदवगमात् पूर्वमप्रतीयमानमपि सुखाद्यभ्युपगन्तुं युक्तम् श्रवणसमयात् प्राक् पश्चाच्च शब्दस्य
सत्ताभ्युपगमप्रसङ्गतो नित्यत्वापत्तेः । न चात्मनो ज्ञानाच्च अर्थान्तरभूता एव सुखादयोऽनुग्रहादि-
विधायिनो भवेयुः इतरथा योगिनोऽपि ते तथा स्युः । न च तेषां तत्राऽसमवायान्नायं दोषः
समवायस्य निषिद्धत्वात् । तन्न सुखादिग्रहणे मनइन्द्रियसिद्धिः । अत एव च 'आत्मा मनसा युज्यते
तत्र च समवेताः सुखादयः' इत्यादिप्रक्रियाऽनुपपन्नैव । न च निरंशयोरात्म-मनसोः संयोगः
संभवी एकदेशेन तत्संयोगे सांशत्वप्रसक्तेः सर्वात्मना संयोगे उभयोरेकत्वप्राप्तेः । यदि च यत्र मनः
संयुक्तं तत्र समवेतं ज्ञानं समुत्पादयति तदा सर्वात्मनां व्यापितया समानदेशत्वेन मनसस्तैः संयुक्त-
त्वात् सर्वात्मसमवेतसुखादिषु तदैवैकं ज्ञानमुत्पादयतीति प्रतिप्राणि भिन्नमनःपरिकल्पनमनर्थक-
मासज्येत । न च यस्य सम्बन्धि यन्मनस्तत्समवेतसुखादिज्ञाने तदेव हेतुरिति नायं दोषः प्रति-
नियतात्मसम्बन्धित्वस्यैव तत्रासिद्धेः न हि तत्कार्यत्वेन तत्सम्बन्धिता, तस्य नित्यत्वाभ्युपगमात्
तत्र चानाधेयाप्रहेयातिशये तत्कार्यताऽयोगात् । नापि तत्संयोगात् तस्यापि तत्रैकदेशेन सर्वात्मना
वाऽयोगात् योगेऽपि व्यापकत्वेन समानदेशिसर्वात्मभिर्युगपत्संयोगात् प्रतिनियतात्मसम्बन्धित्वा-
नुपपत्तेः । न च यददृष्टप्रेरितं तत् प्रवर्तते तत्सम्बन्धीति वक्तव्यम् अदृष्टस्याचेतनत्वेन प्रतिनियत-
विषय(षये) तत्प्रेरकत्वायोगात् प्रेरकत्वे वा ईश्वरपरिकल्पनावैयर्थ्यप्रसक्तेः । न चेश्वरप्रेरित एवासौ
तत्प्रेरक इति न तत्परिकल्पनावैयर्थ्यम् अदृष्टप्रेरणामन्तरेणेश्वरस्य साक्षान्मनःप्रेरकत्वोपपत्तेरदृष्ट-
परिकल्पनावैफल्यापत्तेः । न चेश्वरस्य सर्वसाधारणत्वाददृष्टविकलस्य मनःप्रेरकत्वे न ततस्तस्य प्रति-
नियतात्मसम्बन्धितेति अदृष्टपरिकल्पना, तस्याचेतनत्वेनेश्वरसहितस्यापि प्रतिनियतमनःप्रवृत्ति-
हेतुत्वायोगात् अचेतनस्यापि चेतनसहितस्य प्रवर्तने मनसोऽचेतनस्यादृष्टविकलस्य चेतनसहितस्य

१–**तोर्दोषोऽयु**–बृ० । २ **घटज्ञा**–ल० विना । ३ "इन्द्रियार्थसन्निकर्षजन्यम्"—बृ० ल० टि० । ४ **सुखसं**–बृ० । ५ पृ० ४७५ पं० ३१ । ६ **तदैवै**–वा० बा० । ७–**षयेमेतत प्रे**–हा० ।–**षयमेतत् प्रे**–भां० मां० आ० वि० । "नापि यददृष्टप्रेरितं प्रवर्तते निवर्तते वा तत् तस्येति वाच्यम् अचेतनस्यादृष्टस्य अनिष्टदेशादिपरिहारेण इष्टदेशादौ तत्प्रेरणासंभवात् अन्यथेश्वरकल्पनावैफल्यम्"—प्रमेयक० पृ० ३६ द्वि० पं० ११ । ८–**रितयेवासौ** बृ० वा० बा० ।–**रितायेवासौ** आ० ।–**रितायवासौ** ल० हा० वि० ।–**रित एवासौ** ल० सं० । ९ "आत्मा"—ल० टि० । "न चेश्वरस्यादृष्टप्रेरणे व्यापारात् साफल्यं मनस एवासौ प्रेरकः कल्प्यतां किं परंपरया"—प्रमेयक० पृ० ३७ प्र० पं० १ । १०–**वैयर्थ्यापत्तेः** ल० ।

प्रवृत्तिर्भविष्यतीत्यदृष्टपरिकल्पनावैयर्थ्यं पुनः प्रसज्यते । न च प्रतिनियमनिमित्तमदृष्टकल्पना, तस्यापि
स्वतःप्रतिनियतत्वासिद्धेः । येनात्मना यद् अदृष्टं निर्वर्तितं तत् तस्येति प्रतिनियमसिद्धिरिति चेत्;
ननु किमिदमात्मनोऽदृष्टनिर्वर्तकत्वम्? तदाधारत्व इति चेत्; ननु समवायस्यैकत्वे आत्मनां च
व्यापकत्वेनैकदेशत्वे 'प्रतिनियत एवात्मा प्रतिनियतादृष्टाधारः' इत्येतदेव दुर्घटम् । समवाया-
विशेषेऽपि समवायिनोर्विशेषात् प्रतिनियमे समवायाभावप्रसक्तेरित्यात्मसुखाद्युत्पत्संवेदनस्य
कथञ्चित्तादात्म्यमभ्युपेयम् अन्यथा तदेकार्थसमवेतज्ञानग्राह्यत्वेन सुखादयो न सिद्धिमासादयेयुः ।
तन्नादृष्टमपि मनसः प्रतिनियमहेतुः । न च 'येनात्मना यन्मनः प्रेर्यते तत् तत्सम्बन्धि' इति प्रतिनियमः
अदृष्टवदात्मनोऽप्यचेतनत्वेन तत् प्रत्यप्रेरकत्वात् चेतनत्वेऽपि नानुपलब्धस्य प्रेरणमिति न नियतं
मनः सिद्ध्यतीत्येकस्मात् ततो युगपत्सर्वसुखादिसंवेदनप्रसक्तिरित्युक्तन्यायेन सुखादिसंवेदनस्येन्द्रि-
यार्थसन्निकर्षजन्यत्वाभावाद् हेतुरनेन व्यभिचारी ।

किञ्च, स्वसंविदितविज्ञानानभ्युपगमे 'सदसद्वर्गः कस्यचिदेकज्ञानालम्बनः अनेकत्वात् पञ्चाङ्गु-
लिवत्' इत्यत्र पक्षीकृतैकदेशेन व्यभिचारः तज्ज्ञानाऽन्यसदसद्वर्गयोरनेकत्वाविशेषेऽप्येकज्ञानालम्बन-
त्वाभावात् एकशाखाप्रभवत्वानुमानवत् । अथ सर्वज्ञज्ञानं स्वसंविदितमिति नानेकत्वानुमानस्य
व्यभिचारस्तर्हि तज्ज्ञानवदन्यज्ञानस्यापि न स्वात्मनि क्रियाविरोध इति 'सर्वं ज्ञानं स्वसंविदितम् ज्ञान-
त्वात् सर्वज्ञज्ञानवत्' इति तदृष्टान्तबलात् स्वसंविदितसकलज्ञानसिद्धिः घटादिज्ञानं ज्ञानान्तरग्राह्यम्
ज्ञेयत्वात् घटवत् इत्यत्र च व्यभिचारः ।

अथ "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायद० १-१-१६] इति वचनाद् आत्मेन्द्रियवि-
षयसन्निधानेऽपि यतो युगपज्ज्ञानानि नोपजायन्ते ततोऽवसीयते अस्ति तत्कारणं यतस्तथा तदनुत्प-
त्तिरिति तत्कारणं मनः सिद्धम्; ननु तदनुत्पत्तिर्मनःप्रतिबद्धा कुतः सिद्धा यतस्तस्यास्तदनुमीयेत?
अथात्मनः सर्वगतस्य सर्वार्थैः सम्बन्धात् पञ्चभिश्चेन्द्रियैरात्मसम्बद्धैः स्वविषयसम्बन्धे एकदा
किमिति युगपज्ज्ञानानि नोत्पद्यन्ते यद्यणु मनो नेन्द्रियैः सम्बन्धमनुभवेत् तत्सद्भावे तु यदैकेनेन्द्रि-
येणैकदा तत् सम्बध्यते न तदाऽपरेण तस्य सूक्ष्मत्वादिति सिद्धा युगपज्ज्ञानानुत्पत्तिर्मनोनिमित्तेति;
नन्वेवं तस्यात्मसंयोगसमये श्रोत्रसंज्ञकेन नभसापि संयोगात् संयुक्तसमवायाविशेषात् सुखादिवत्
शब्दोपलब्धिरपि तदैव स्यात् निमित्तस्य समानत्वेऽपि युगपज्ज्ञानानुत्पत्तावपरं निमित्तान्तरमभ्युप-
गन्तव्यमिति नातो मनःसिद्धिः । न च कर्णशष्कुल्यवच्छिन्नाकाशदेशस्य श्रोत्रत्वात् तेन च तदैव
मनसः सम्बन्धाभावान्नायं दोषः निरंशस्य नभसः प्रदेशाभावात् । न च संयोगस्याव्याप्यवृत्तित्वं
तस्य प्रदेशव्यपदेशनिमित्तम् उपचरितस्य व्यपदेशमात्रनिबन्धनस्यार्थक्रियायामुपयोगाभावात् न ह्यु-
पचरिताग्नित्वो माणवकः पाकनिर्वर्तनसमर्थो दृष्टः । न च कर्णशष्कुल्यवच्छिन्ननभोभागस्य तथाविध-
स्यापि शब्दोपलब्धिहेतुत्वमुपलभ्यत एवेति वाच्यम् तदुपलब्धेरन्यनिमित्तत्वात् । किञ्च, चक्षुराद्य-
न्यतमेन्द्रियसम्बन्धाद् रूपादिज्ञानोत्पत्तिकाले मनसः संबद्धसम्बन्धात् मानसज्ञानं किं न भवेत्? न
च 'तथाविधादृष्टाऽभावात्' इत्युत्तरम् अदृष्टनिमित्तयुगपज्ज्ञानानुत्पत्तिप्रसक्तितो मनसोऽनिमित्तता-
भावात् अश्वविकल्पसमये गोदर्शनानुभवाद् युगपज्ज्ञानानुत्पत्तिश्चासिद्धा कथं मनोऽनुमापिका? न
चाश्वविकल्प-गोदर्शनयोर्युगपदनुभवेऽपि क्रमोत्पत्तिकल्पना अध्यक्षविरोधात् । न चोत्पलपत्रशतव्य-
तिभेदवदाशुवृत्तेः क्रमेऽपि यौगपद्यानुभवाभिमानः अध्यक्षसिद्धस्य दृष्टान्तमात्रेणान्यथाकर्तुमशक्तेः
अन्यथा शुक्लशङ्खादौ पीतविभ्रमदर्शनात् स्वर्णेऽपि तद्भ्रान्तिर्भवेत् । मूर्तस्य सूच्यग्रस्यौत्तराधर्यव्यवस्थि-

---

१–**ष्टपरिक**–बृ० ल० । २ "अदृष्टस्य"—बृ० ल० टि० । ३–**यतहे**–बृ० ल० वा० बा० भां० मां० विना । ४–**यतमनः** बृ० ल० वा० बा० भां० मां० विना । ५–**जत्वा**–बृ० । ६ "यथा सदसद्वर्गः कस्यचिदेकज्ञानालम्बनमनेकत्वात् पञ्चाङ्गुलवत्" । सद्—"द्रव्यगुणादि" । असद्–"प्रागभावादि"—प्रमेयक० पृ० १०५ प्र० पं० ८, टि० १९–२० । ७ "पक्वान्येतानि फलानि एकशाखाप्रभवत्वात् उपयुक्तफलवत्"—प्रमेयक० पृ० १०३ प्र० पं० ११ । ८ **सर्वज्ञा**–वा० बा० आ० हा० वि० । ९–**त्र व्य**–बृ० । १० "युगपदनुत्पत्तेः"—बृ० ल० टि० । ११ "मनः"—बृ० ल० टि० । १२–**मीयते** वा० बा० । १३ "मनः"—बृ० ल० टि० । १४–**शस्य व्य**–ल० ।–**शनिमि**–बृ० । १५ **संबंद्धसं**–वा० बा० आ० हा० वि० ।

तमुत्पलपत्रशतं युगपद् व्यासुमशक्तेः। क्रमभेदेऽप्याशुवृत्तेस्तत्र यौगपद्याभिमान इति युक्तम् आत्मनस्तु क्षयोपशमसव्यपेक्षस्य युगपत् स्वपरप्रकाशनस्वभावस्य स्वयममूर्त्तस्याप्राप्तार्थग्राहिणो युगपत् स्वविषयग्रहणे न कश्चिद् विरोध इति[1] किं न युगपद् ज्ञानोत्पत्तिः? न च मनोऽपि सूच्यग्रवन्मूर्त्तमिन्द्रियाणि तूत्पलपत्रवत् परस्परपरिहारस्थितस्वरूपाणि न युगपद् व्यासुं समर्थमिति न युगपज्ज्ञानोत्पत्तिः तथाभूतस्य तस्यैवासिद्धेः। तथाहि—सिद्धे तद्विभ्रमे मनःसिद्धिः तत्सिद्धौ च युगपज्ज्ञानोत्पत्तिविभ्रमसिद्धिरितीतरेतराश्रयत्वान्न मनःसिद्धिः।

ननु "जुगवं दो णत्थि उवओगा[2]" [आवश्यकनि० गा० ९७९] इति वचनात् भवतोऽपि[3] युगपज्ज्ञानानुत्पत्तिः सिद्धैव, न[4]; मानसविकल्पद्वययौगपद्यनिषेधपरत्वादस्य नेन्द्रिय-मनोविज्ञानयोर्यौगपद्यनिषेधः। न च 'विवादास्पदीभूतानि ज्ञानानि क्रमभावीनि ज्ञानत्वात् मानसविकल्पद्वयवत्' इत्यतोऽनुमानात् तद्विभ्रमसिद्धिः अस्य प्रत्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टत्वात्। न चैतदनुमानबाधितत्वात् युगपत्प्रतिपत्त्यनुभवः प्रत्यक्षमेव न भवति 'अश्रावणः शब्दः सत्त्वात् घटवत्' इत्यनुमानबाधितत्वात् श्रावणशब्दज्ञानस्याप्यप्रत्यक्षताप्रसक्तेः। न च सौगतमतमेतत् न जैनमतमिति वक्तव्यम् "सहभाविनो गुणाः क्रमभाविनः पर्यायाः[5]" [ ] इति जैनैरभिधानात्। तथा च सहभावित्वं गुणानां प्रतिपादयता द्रष्टान्तार्थमुक्तम्—

"सुखमाह्लादनाकारं विज्ञानं मेयबोधनम्।
शक्तिः क्रियानुमेया स्यात् यूनः कान्तासमागमे[6]॥" [ ]

तदेवं मनसोऽसिद्धेर्न घटादिज्ञानं तेन सन्निकृष्टमिति कुतस्तत्राध्यक्षज्ञानोत्पत्तिः? इति यतस्ततस्तत् प्रतीयेत न चान्यत् तदुत्पत्तौ पराभ्युपगमेन निमित्तमस्ति सद्भावे वेन्द्रियार्थसन्निकर्षोत्पन्नत्वादिना तद्ग्राहिणोऽध्यक्षता विरुध्येत। अथ ज्ञानान्तरस्यानध्यक्षत्वेऽपि घटज्ञानग्राहकता भविष्यतीति न धर्म्यसिद्धेराश्रयासिद्धो हेतुर्भविष्यति घटज्ञानस्य ततः सिद्धेः, असदेतत्; स्वयमसिद्धेन ज्ञानेन गृहीतस्याप्यगृहीतरूपत्वात् अन्यथा सर्वज्ञज्ञानगृहीतस्य रथ्यापुरुषज्ञानगृहीतत्वं भवेदिति तस्यापि सर्वज्ञताप्रसक्तिः। न च स्वज्ञानगृहीतं तद्गृहीतमिति नायं दोषः स्वसंविदितज्ञानाभावे 'स्वज्ञानम्' इत्यस्यैवासिद्धेः। स्वस्मिन् समवेतं स्वज्ञानमभिधीयते इति नायं दोष इति चेत्, न; तस्याभावात् भावेऽप्यविशिष्टत्वाच्च। न च स्वोत्पादितं 'स्वम्'इति वक्तव्यम् तदुत्पादस्य परदर्शने तदाधेयत्वेन

१-ति न ल०। २ एवं च 'तवापि जुगवं दो णत्थि उवओगा' इति वचनव्याघात इति वाच्यम्; उक्तवचनस्य समानसविकल्पद्वययौगपद्यनिषेधपरत्वात् इन्द्रिय-मनोज्ञानयोरेकदाप्युपपत्तेः इति सम्मतिटीकाकारः"—शास्त्रवा० स्याद्वादक० पृ० १५५ प्र० पं० ६-८।

"नाणम्मि दंसणम्मि अ इत्तो एगयरयम्मि उवउत्ता। सव्वस्स केवलिस्सा जुगवं दो नत्थि उवओगा"॥—

आवश्यकनि० नवकारनि० गा० ९३ पृ० १७५। आवश्यक० हारि० पृ० ४४६ गा० ९७९। विशेषावश्यकभाष्ये एषैव गाथा (३०९६ पृ० १२००) "एतदिहैव व्यक्तं पुरस्ताद् वक्ष्यति। ततोऽस्यां गाथायां भद्रबाहुस्वामिभिर्व्यक्तेऽपि युगपदुपयोगे निषिद्धे तद्यौगपद्याभिमानोऽद्यापि न त्यज्यते इति भावः" इति व्याख्याता। नन्दिसूत्रटीकायां तु "एतदेव सूत्रेण दर्शयति" इत्यवतरणिकां कृत्वोद्धृतैषा गाथा-पृ० १३८ प्र० पं० १३-द्वि० पं० १। अधिकारिभेदेन ज्ञान-दर्शनयोर्द्वयोरुपयोगयोर्यौगपद्याऽयौगपद्यप्रतिपादिका बृहद्द्रव्यसंग्रहेऽपि गाथा वर्तते। सा चेयम्—

"दंसणपुव्वं णाणं छदमत्थाणं ण दोण्णि उवउग्गा।
जुगवं जम्हा केवलिणाहे जुगवं तु ते दो वि"॥ ४४॥—पृ० १६९।

३ भगवतो-बृ० ल० वा० बा० विना। ४ न समान-आ० हा० वि०। ५ "सहभुवो गुणाः"—सिद्धिवि० टी० लि० पृ० ९६ पं० १३। "गुणः सहभावी धर्मः × × × पर्यायस्तु क्रमभावी" × × ×—प्रमाणनयत० ५, ७-८। रत्नाकरा० ५, पृ० ८२। ६ अष्टस० पृ० ७८ पं० १४। "कथमन्यथा न्यायविनिश्चये "सहभुवो गुणाः" इत्यस्य—

"सुखमाह्लादनाकारं विज्ञानं मेयबोधकम्। शक्तिः क्रियानुमेया स्याद् यूनः कान्तासमागमे"॥

इति निदर्शनं स्यात्"-सिद्धिवि० टी० लि० पृ० ९६ पं० १३-१४।

प्रसिद्धत्वात् समवायाभावे च तस्याप्यसिद्धत्वान्नित्यस्य चेश्वरज्ञानस्येश्वरज्ञानत्वासिद्धेः[1]। न च स्वसंविदितज्ञानवादेऽपि स्वसंविदितत्वाविशेषाद् देवदत्तज्ञानं यज्ञदत्तज्ञानं प्रसज्येत यज्ञदत्तज्ञानस्य देवदत्तासंविदितत्वात् स्वज्ञानस्य कथञ्चित् स्वात्मना तादात्म्यात् तस्यैव तद्रूपतया परिणतेरिति प्रसाधितत्वात्। ज्ञानान्तरेण तस्य संवेदनात् नागृहीतत्वमिति चेत्, न; तस्यापि ज्ञानान्तरेण ग्रहणेऽनवस्थाप्रसक्तेः अग्रहणेऽगृहीतवेदनेन गृहीतस्य द्वितीयज्ञानस्यागृहीतरूपत्वान्न तेन 'प्रथम-ग्रहणमिति तदवस्था धर्म्यसिद्धिः[2] तेन घटादिज्ञानस्य धर्मिणः द्वितीयेन तस्यापि तृतीयेन ग्रहणादर्थसिद्धेर्नापरज्ञानकल्पनमिति नानवस्था' इति यदुक्तम् तदप्यसङ्गतम्; तृतीयादेर्ज्ञानस्याग्रहणे प्रथमस्याप्यसिद्धेरुक्तन्यायात् यदि पुनस्तृतीयज्ञानेन स्वयमसिद्धेनापि[3] द्वितीयं गृह्यते द्वितीयेन तथाभूतेनैव प्रथमम् तेनापि तथाभूतेनैवार्थो ग्रहीष्यत इति द्वितीयज्ञानपरिकल्पनमपि व्यर्थमासज्येत। न च 'विदितोऽर्थः'इति ज्ञानविशेषणस्यार्थस्य प्रतिपत्तेः "अगृहीतविशेषणा च विशेष्ये बुद्धिर्नोपजायते[4]" [ ] इति विशेषणग्राहिज्ञानं द्वितीयं परिकल्प्यते। न च विशेषणस्याप्यपरविशेषणविशिष्टता प्रतीयते येन तृतीयादिज्ञानपरिकल्पना युक्तिसङ्गता भवेदिति वक्तव्यम् विशेषणस्यैव तृतीयादिज्ञानपरिकल्पनामन्तरेण ग्रहणासंभवादित्युक्तेः स्वसंविदितज्ञानाभ्युपगम एव ज्ञानविशेषणविशिष्टार्थप्रतिपत्तिः संभविनी अन्यथा तदयोगादनवस्थाऽनिवृत्तेः। न च विषयान्तरसञ्चारादनवस्थानिवृत्तिः यतो धर्मिज्ञानविषयात् साधनादि विषयान्तरम् तत्र ज्ञानस्योत्पत्तिर्विषयान्तरसञ्चारः न चापरापरज्ञानग्राहिज्ञानसन्तत्युत्पत्ताववश्यंभाविबाह्यसाधनादिविषयसन्निधानम् येन तत्र ज्ञानस्य सञ्चारो भवेत् सन्निधानेऽपि "अन्तरङ्ग-बहिरङ्गयोरन्तरङ्गस्यैव बलीयस्त्वात्[5]" [ ] नान्तरङ्गविषयपरिहारेण बाह्यविषये ज्ञानोत्पत्तिर्भवेदिति कुतोऽनवस्थानिवृत्तिः? न चादृष्टवशादनवस्थानिवृत्तिः स्वसंविदितज्ञानाभ्युपगमेनाप्यनवस्थानिवृत्तेः संभवाद् अन्यथा कार्येऽनुपपद्यमानेऽदृष्टपरिकल्पनाया उपपत्तेः स्वसंवेदनेऽपि चादृष्टस्य शक्तिप्रक्षयाभावात्[6]। एतेन 'ईश्वरादेरनवस्थानिवृत्तिः' इति प्रतिविहितम् तस्यादृष्टकल्पनत्वात् प्रतिषिद्धत्वाच्च। न च शक्तिप्रक्षयाच्चतुर्थज्ञानादेरनुत्पत्तेरनवस्थानिवृत्तिः धर्मिग्रहणस्यैवमभावापत्तेः। किञ्च, शक्तिर्यद्यात्मनोऽव्यतिरिक्ता तदा तत्क्षये आत्मनोऽपि क्षयापत्तिः व्यतिरिक्ता चेत् तत एव ज्ञानोत्पत्तेरनर्थक आत्मा भवेत्। न च 'सा तस्य' इति नात्मानर्थक्यम् समवायाभावे 'तस्य सा' इत्यसिद्धेः। किञ्च, यदि शक्तिप्रक्षयादनवस्थानिवृत्तिः बाह्यविषयमपि ज्ञानं न भवेत् शक्तिप्रक्षयादेव। न च चतुर्थादिज्ञानजनन-शक्तेरेव प्रक्षयो न बाह्यविषयज्ञानशक्तेः युगपदनेकशक्त्यभावात् भावे वा युगपदनेकज्ञानोत्पत्तिप्रसक्तिः सहकार्यपेक्षापि नित्यस्यासंभविनीति प्रतिपादितम्[7]। क्रमेण शक्तिभावे कुतः स इति वक्तव्यम्? आत्मन इति चेत्, न; अपरशक्तिविकलात् ततः तदभावात् अपरशक्तिपरिकल्पने तद्भावेऽप्यपरशक्तिपरिकल्पनमित्यनवस्था। तदेवं स्वसंविदितविज्ञानानभ्युपगमे कथञ्चिद् घटादिज्ञानस्यासिद्धेराश्रयासिद्धः 'ज्ञेयत्वात्[8]' इति हेतुः स्वरूपासिद्धश्चेति व्यवस्थितमेतत् स्वनिर्णीति-स्वभावं ज्ञानमिति।

१-सिद्धिः। वा० बा०। "स्वोत्पाद्यत्वायोगेन"—बृ० टि०। "स्वोत्पाद्यत्वायोगात्"—ल० टि०। २ धर्मासि-वा० बा०। धर्मसि-आ०। ३-मपि सि-ल०। ४ "न हि अप्रतीते विशेषणे विशिष्टं केचन प्रत्येतुमर्हन्तीति"—मीमां० १-३-३३ पृ०५६ पं० २१। सिद्धिवि० टी० लि० पृ० ११३ पं० ८। "नाऽगृहीते विशेषणे विशिष्टबुद्धिरुदेति"—लौकिकन्यायाः भा० ३ पृ० ७७। अस्य न्यायस्य क्व क्वोपयोगः, तस्य च पाठभेदभिन्नानि कानिचिद् रूपान्तराणि इत्यादि सर्वं लौकिकन्यायाञ्जलौ तत्रैव विशेषेण निरूपितम्। ५ "अन्तरङ्ग-बहिरङ्गयोरन्तरङ्गं बलवत् इति न्यायात्"—ब्रह्मसू० शाङ्करभा० आनन्दगि० टी० २-१-४ पृ० ४३२ पं० १५। हैम० बृ० वृ० ७-४-१२२। लौकिकन्याया० भा० ३ पृ० १०। ६-यादेते-ल०। ७ पृ० १०२ पं० ६। ८ पृ० ४७४ पं० १३। ९-नानाभ्यु-बृ०।-नाभ्यु-ल० वा० बा० आ० हा० वि०। १० पृ० ४७५ पं० २४।

[विज्ञान-शून्यतावादीयमर्थस्यासत्त्वपक्षं निरस्य तस्य च पारमार्थिकत्वं प्रतिष्ठाप्य लक्षणेऽर्थनिर्णीतिस्वभावत्वस्योपपादनम्]

अत्राह सौगतः—भवतु स्वसंविदितं[1] ज्ञानम् अर्थग्रहणस्वभावं तु तन्न युक्तम् अर्थस्यैवाभावात्। तथाहि[2]—यद् अवभासते तद् ज्ञानम् यथा सुखादिः अवभासते च नीलादिकमिति स्वभावहेतुः।

नन्वत्र किं स्वतोऽवभासो हेतुः, उत परतः, आहोस्विदवभासमात्रमिति विकल्पाः। तत्र यद्याद्यः पक्षः स न युक्तः, परं प्रति तस्यासिद्धत्वात् 'नीलमहं वेद्मि' इत्यहमहमिकया नीलाद् विभिन्नस्वरूपतया प्रतीयमानेन ज्ञानेन नीलादेर्ग्रहणाभ्युपगमान्न परानपेक्षनीलाद्यवभासः परस्य सिद्धः। यदि तु परनिरपेक्षो नीलाद्यवभासः परस्य सिद्धो भवेत् किमतो हेतोरपरं साध्यमिति वक्तव्यम्? ज्ञानरूपतेति चेत्; ननु सा यदि प्रकाशता तदा हेतुसिद्धौ सिद्धैव न साध्या। अथ सा न सिद्धा कथं हेतोर्नासिद्धिः? अथ भ्रान्तेः पुरुषधर्मत्वात् स्वतोऽवभासनं नीलादिष्वभ्युपगच्छन्नपि ज्ञानरूपतां नेच्छेदिति साध्यते तर्हि भ्रान्तेरेव भावधर्ममिच्छन्नपि कश्चिद् भावं नेच्छेदिति "नासिद्धे भावधर्मोऽस्ति[3]" [ ] इत्यत्र कथमुक्तम्—"को हि भावधर्मं हेतुमिच्छन् भावं नेच्छेत्[4]" [ ] इति। अथापि स्यात् यदि भिन्नेन ज्ञानेन नीलादेर्ग्रहणमुपपत्तिमद् भवेत् तदा हेतुरसिद्धः स्यात् न चैवम्। तथाहि—न भिन्नकालस्यार्थस्य तेन ग्रहणं संभवति नापि समानकालस्य, तथा न निर्व्यापारेण, नापि भिन्नाभिन्नव्यापारवता, तथा, न परोक्षेण, नापि स्वसंविद्रूपं बिभ्रता, नापि ज्ञानान्तरवेद्येनेति प्रतिपादितं सौगतैरिति न स्वतोऽवभासलक्षणो हेतुरसिद्धः असदेतत्; एवमभ्युपगच्छतः सौगतस्यानुमानोच्छेदप्रसक्तेः। तथाहि—'यद् अवभासते तद् ज्ञानम् सुखादिवत् तथा च नीलादिकम्' इत्यनुमानमेतत्[5] तच्च त्रिरूपलिङ्गप्रभवम्[6] "त्रिरूपाल्लिङ्गादर्थदृग्" [ ] इति वचनात् लिङ्गं[7] चानुमानाद् भिन्नं भिन्नसमयं च यदि तस्य जनकं तर्हि समस्तानुमानजनकं तदेव स्यादिति अनुमानभेदकल्पनावैयर्थ्यम्। अथ भिन्नकालमपि लिङ्गं किञ्चिदेव कस्यचित् कारणमिति नायं दोषस्तर्हि ज्ञानमपि तथाविधं किञ्चिदेव कस्यचिद् ग्राहकम् अर्थो वा तथाविधः कश्चिदेव कस्यचिद् ग्राह्य इति नातिप्रसक्तिः। अथ भिन्नकालेऽतीतानुत्पन्नेऽर्थे ग्रहणप्रवृत्तं ज्ञानं निर्विषयं भवेत् तर्हि लिङ्गाद् विनष्टानुत्पन्नादुपजायमानमनुमानं निर्हेतुकं किं न भवेत्? अथ स्वकाले विद्यमानं स्वरूपेण तज्जनकमिति नायं दोषस्तर्हि ग्राह्यमपि स्वकालेऽपि विद्यमानमिति तथा तस्य तद्ग्राहकं न निर्विषयं भवेत्। अथ न भिन्नकालं लिङ्गमनुमानस्य कारणं किन्तु समकालम्, न; समकालस्य जनकत्वविरोधात् अविरोधे वा अनुमानमपि लिङ्गस्य जनकं भवेत् तथा चान्योन्याश्रयदोष इति नैकस्यापि

१-दितज्ञा-बृ० विना। २ "तथा च यदुक्तं प्रज्ञाकरेण यदवभासते तज् ज्ञानम् यथा सुखादि अवभासते च नीलादिकम् जडस्य प्रतिभासायोगात्"—सिद्धिवि० टी० लि० पृ० १३६ पं० १२-१३। अयं चर्चाविधिस्तावदर्थशः शब्दशश्च प्रमेयकमलमार्तण्डे वर्तते—पृ० २२ प्र० पं० ४।

३ "नासिद्धेर्भाव- × × ×। धर्मो विरुद्धो भावश्च सा × × × ?" ॥—
—तत्त्वसं० पञ्जि० पृ० ४१२ पं० २७।
"असिद्धो भावधर्मश्चेद् व्यभि-× × ×। विरुद्धो धर्मोऽभावस्य स सत्तां साधयेत् कथम्" ॥
—अष्टस० पृ० ५८ पं० १८।
"नासिद्धे भावधर्मोऽस्ति व्यभिचार्युभयाश्रयः। धर्मो विरुद्धो भावस्य सा सत्ता साध्यते कथम्" ? ॥—
न्यायमञ्ज० आ० २ पृ० १२८ पं० ७। प्रमाणमी० १-२-१७ पृ० ६८ पं० २०। जैनतर्कपरि० पृ० १२२ द्वि० पं० ४ यशो०।

४ एतादृशी वाचोयुक्तिः अष्टसहस्र्याम् प्रमेयकमलमार्तण्डे च यथाक्रममित्थं दृश्यते—"को हि नाम सर्वज्ञभावधर्मं हेतुमिच्छन् सर्वज्ञमेव नेच्छेत्"—पृ० ५८ पं० १६। "को हि नाम स्वप्रतिभासं तत्रेच्छन् ज्ञानतां नेच्छेत्"—पृ० २२ प्र० पं० ७। ५ प्र० पृ० पं० ४। ६ 'त्रिरूपलिङ्गप्रभवं त्रिरूपाल्लिङ्गादर्थदृग्' इत्येवमङ्कितः पाठः बृ०। ७ 'लिङ्गं चानुमानाद् भिन्नं भिन्नसमयं च। यदि तस्य जनकं तर्हि' इत्येवमङ्कितः पाठः बृ०। ८ "ज्ञानम्-बृ० टि०।

सद्भावः। अथानुमानमेव जन्यम् तत्रैव जन्यताप्रतीतेः न लिङ्गम् तद्विपर्ययात्, न; अनुमानव्यतिरेकेण ग्राह्यतावज्जन्यताया अप्रतीतेः। न च तत्स्वरूपमेव जन्यता लिङ्गेऽपि स्वरूपसद्भावेन जन्यताप्रसक्तेः तथा च परस्परजन्यतायां पुनरपि स एवेतरेतराश्रयलक्षणो दोषः। अथ स्वरूपाविशेषेऽपि लिङ्गानुमानयोरनुमान एव जन्यता लिङ्गापेक्षा न पुनर्लिङ्गे तदपेक्षा सेति तर्हि नील-तत्संवेदनयोस्तदविशेषेऽपि तत एव नीलस्यैव तत्संवेदनापेक्षा ग्राह्यता न तु तत्संवेदनस्य नीलापेक्षा सेति समानमुत्पश्यामः। न च लिङ्गमनुमानोत्पत्तिकरणादुत्पादकम् यतो यद्युत्पत्तिरनुमानादनर्थान्तरभूता क्रियते तदानुमानमेव लिङ्गेन कृतं भवेत् तथा च तल्लिङ्गमेव प्रसक्तम् लिङ्गजन्यत्वादुत्तरलिङ्गक्षणवत्। न चानुमानोपादानजन्यत्वात् तदनुमानमेव, यतस्तदप्यनुमानोपादानकारणं कुतो जायते? इति पर्यनुयोगे 'अपरलिङ्गात्' इत्युत्तरमभिधानीयम् तत्र च तस्य लिङ्गजन्यत्वाल्लिङ्गतापत्तिरिति पर्यनुयोगे पुनरपि अनुमानोपादानत्वादनुमानत्वमित्युत्तरपर्यनुयोगानवस्थाप्रसक्तिः स्यात्। अथ तथाप्रतीतेर्लिङ्गजन्यत्वाविशेषेऽपि किञ्चिल्लिङ्गम् अपरमनुमानं तर्हि ज्ञानजन्यत्वाविशेषेऽपि किञ्चिज्ज्ञानम् अपरोऽर्थ इति किं न स्यात्? ततश्च 'नीलादि ज्ञानं ज्ञानकार्यत्वात् उत्तरज्ञानवत्' इत्ययुक्ततया व्यवस्थितम्। यदपि 'यया प्रत्यासत्त्या स्वरूपं विषयीकरोति ज्ञानं तयैव चेद् अर्थम् तयोरैक्यप्रसक्तिः न ह्येकस्वभाववेद्यमनेकं युक्तम् अन्यथैकमेव न किञ्चिद् भवेत् अथान्यथा, स्वभावद्वयापत्तिर्ज्ञानस्य भवेत् तदपि च स्वभावद्वयं यद्यपरेण स्वभावद्वयेनाधिगच्छति तदाऽपरापरस्वभावद्वयापेक्षणादनवस्था अन्यथा स्वार्थयोरपि तदपेक्षा न स्यात् स्वसंवेदनलक्षणत्वाच्च ज्ञानस्य नासंविदितं रूपं युक्तम्' इत्युक्तम्, तदपि निरस्तम्; लिङ्गस्य समानक्षणानुमानकरणेप्यस्य समानत्वात्। तथाहि—लिङ्गं यया प्रत्यासत्त्या स्वोपादेयक्षणान्तरं जनयति तयैव चेदनुमानम् तयोरैक्यमिति लिङ्गानुमानयोरन्यतरदेव भवेत्। न च लिङ्गाभावेऽनुमानम् तदभावे वा लिङ्गमित्यन्यतरस्याप्यभावः। न च लिङ्गं सजातीयक्षणं नोपजनयति अनुमानसमये नीलाद्यवभासाभावप्रसक्तेः। अथान्यया स्वोपादेयक्षणम् अपरया चानुमानं तर्हि लिङ्गस्यैकस्य रूपद्वयमायातम् तत्र चावभासनं लिङ्गम् तच्च ज्ञानमेव। न च ज्ञानस्याविदितं रूपं संभवति विरोधात् तद्वेदनं चापरेण तद्वयेनेति सैवात्राप्यनवस्था। अपि च, येन स्वभावेनैकां शक्तिमात्मनि बिभर्ति लिङ्गं तेनैव चेदपराम् तयोरैक्यम् अन्येन चेत् स्वभावद्वयम् तत्रापि चापरं स्वभावद्वयं प्राक्तनन्यायेनेत्यपराऽनवस्था। अथ तत्करणैकस्वभावत्वाल्लिङ्गं भिन्नस्वभावं कार्यद्वयं निर्वर्तयेत् तर्हि ज्ञानमपि परस्परविविक्तरूपयोः स्वार्थयोरेकं सद् ग्राहकमस्तु तद्ग्रहणैकस्वभावत्वात् ततो यदि लिङ्गेनानुमानस्योत्पत्तिरनर्थान्तरभूता क्रियते तर्हि ज्ञानेनार्थस्यानर्थान्तरभूता गृहीतिः क्रियत इति समानो न्यायः। अथार्थान्तरभूतोत्पत्तिर्लिङ्गेनानुमानस्य क्रियते तर्हि नानुमानसद्भावः सद्भावेऽपि 'लिङ्गम्' 'उत्पत्तिः' 'अनुमानम्' इति परस्परासंसक्तत्रितयस्य प्रतिभासात् "भ्रान्तिरपि सम्बन्धतः प्रमा" [ ] इति न युक्तमभिधानम्। अथ तयाप्युत्पत्त्या अपरार्थान्तरभूतोत्पत्तिर्विधीयते तर्हि तयापि तथाविधापरोत्पत्तिर्विधीयत इत्यनवस्थानान्नानुमानसद्भावः। किञ्च, लिङ्गेनोत्पत्तिः स्वसमया भिन्नसमया वा विधीयेत? भिन्नसमयाँ चेद् अर्थग्रहणवत्प्रसक्तिः। समानसमया चेत् सव्येतरगोविषाणवदन्योन्यमुपकार्योपकारकभावाभावान्न जन्यजनकभावः तद्भावे वा तदुत्पत्तिर्जन्यता लिङ्गस्य प्रसज्येत ततश्च लिङ्गमुत्पत्तिर्भवेत् तत्कार्यत्वात् उत्तरोत्पत्तिवत्। न च लिङ्गेनोत्पत्तिर्विधीयते न तया लिङ्गं तस्यामेव कार्यताप्रतीतेरिति वक्तव्यम् तद्व्यतिरेकेण कार्यताऽप्रतीतेः प्रतीतौ वा 'लिङ्गम्' 'कार्यता' 'उत्पत्तिः' इति त्रितयं परस्परासम्बद्धं भवेत्। न च तत्स्वरूपमेव कार्यता लिङ्गस्यापि ततस्तद्भावापत्तेः। अथ तदविशेषेऽपि प्रतिनियतः कार्यकारणभाव उत्पत्ति-लिङ्गयोस्तर्हि ज्ञानार्थयोः स्वरूपाविशेषेऽपि नियतो ग्राह्यग्राहकभावः किं न स्यात्? एवमन्यदपि ग्राह्यग्राहकभावपक्षोदितदूषणं लिङ्गानुमानयोर्जन्यजनकभावाभ्युपगमे

---

१ "अनुमान"-बृ० ल० टि०। २-नकार-बृ०। ३ "न चेति योगः"—ल० टि०। ४-ण तद्वये-बृ० ल०।-ण द्वये-वा० बा०। ५ "भ्रान्तिरपि संबन्धतः प्रमेति चेत्"—सिद्धिवि० टी० लि० पृ० ६८ पं० ८। "अतस्मिंस्तद्ग्रहो भ्रान्तिरपि संधानतः प्रमा"—षड्द० स० बृ० वृ० पृ० ४१ पं० १६। ६-या चे तदर्थ-ल०। ७-दितं दू-बृ०।

समानतया योज्यम् । अथ सकलानुमानोच्छेदकत्वान्नायं विचारोऽत्र युक्तस्तर्हि ज्ञानार्थयोरपि न विधेयः तत्राप्यस्य विचारस्य सकलव्यवहारोच्छेदकत्वात् । न च परमार्थतो लिङ्गमनुमानकारणं नेष्यत एव व्यवहारिजनमतानुरोधेन तस्याङ्गीकरणादिति वक्तव्यम् तेनैव 'अहम्'इति भिन्नावभासिना ज्ञानेन नीलादेर्भिन्नस्य ग्रहणसिद्धेः स्वतोऽवभासनलक्षणस्य हेतोरसिद्धत्वप्रसक्तेः । न च क्वचिद् व्यवहाराश्रयणं क्वचिन्नेति युक्तम् न्यायस्य समानत्वात् । अथ लिङ्गमनुमानकारणं नेष्यत एव ग्राह्यग्राहकभाववत् कार्यकारणभावस्यापि निषेधात् । कथमनुमानम्? स्वसाध्याविनाभावितेन्द्रहणात् तदपि तद्योग्यतया; नन्वनुमानं स्वविषयतया विषयीकरोति न ज्ञानान्तरमिति कुतोऽयं विभागः? न चानुमानं न किञ्चिद् विषयीकरोति तस्याप्रमाणत्वप्रसक्तेः ।

न च समारोपव्यवच्छेदकरणात् तत् प्रमाणम् समानासमानसमयसमारोपव्यवच्छेदविधानेऽर्थग्रहणवद्दोषप्रसक्तेः । तथाहि–भिन्नसमयसमारोपव्यवच्छेदविधाने एकस्मादेवानुमानात् सकलसमारोपविच्छेदोदयात् सकलं जगद् असमारोपमिति समारोपान्तरसमुच्छेदार्थमनुमानान्तरान्वेषणमनर्थकमासज्येत । अथ भिन्नसमयोऽप्यसौ कश्चिदेव केनचित् तेन समुच्छिद्यते; ननु भिन्नकालोऽर्थोऽपि कश्चिदेव केनचित् संवेदनेन विषयीक्रियते न सर्वैः सर्वेणेति समानम् । यथा च स्वरूपं समारोपस्य व्यवच्छिद्यते तथा अर्थस्य तदेव विषयीक्रियत इत्यपि समानम् । न च समारोपव्यवच्छेदोऽनुमानेन सौगतमते विधातुं शक्यः तद्व्यवच्छेदस्य विनाशरूपत्वात् तस्य च निर्हेतुकत्वाभ्युपगमात् । न च प्रवृत्तसमारोपस्य स्वत एव निवृत्तेर्भावितस्तु तेन व्यवच्छेदः क्रियत इति वक्तव्यम् यतस्तस्यापि सतो व्यवच्छेदो भूतवन्न तेन विधातुं शक्यः असतोऽपि खरविषाणवन्नासौ शक्यक्रियः । अथ भाविनोऽपि समारोपस्य न तेन व्यवच्छेदो विधीयते अपि तु तदुत्पत्तिप्रतिबन्धः; ननु समर्थे कारणे तदुत्पत्तेरवश्यंभावित्वान्न ततस्तत्प्रतिबन्धः अनुत्पत्तौ वा न तत् तत्कारणम् नाप्यसौ तज्जन्यो भवेत् । अथ तेन तत्कारणस्य सामर्थ्यविघातः क्रियते, सोऽप्ययुक्तः; सतः सामर्थ्यस्योपहन्तुमशक्यत्वात् अस्य चार्थस्य—

"तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्सस्य कस्तां क्षपयितुं क्षमः" ॥ [ ]

इति भवतैव प्रतिपादनात् । असमर्थे तु कारणे कारणाभावादेव नोत्पत्स्यत इति कस्तत्रानुमानोपयोगः न चानुमानसहायः प्राक्तनः समारोपक्षण उत्तरं समारोपक्षणान्तरजननासमर्थं जनयतीति द्वितीये क्षणे कारणाभावादेव समारोपानुत्पत्तिः लिङ्गानुमानयोरिव पूर्वोत्तरसमारोपक्षणयोर्हेतुफलभावाभावात् । अथ समारोपव्यवच्छेदकृदप्यनुमानं नेष्यते तर्हि प्रकृतानुमानस्य फलान्तराभावादभिधानमसाधनाङ्गवचनत्वान्निग्रहस्थानमापद्यते । अथ प्रकृतानुमानं नोपन्यस्यते कुतस्तर्हि नीलादीनां ज्ञानरूपतासिद्धिः? प्रत्यक्षत एवेति चेत्, तत एव जडतासिद्धिरप्यस्तु । अथ ज्ञानरूपतापि नीलादेर्नापरा समस्त्यपि तु तत्स्वरूपमेव, न; अन्यत्राप्यस्य समानत्वात् । अथ नीलादेर्जडत्वे प्रतिभासो न भवेत् जडस्य प्रकाशायोगात्, न; स्वतस्तस्याभावे सिद्धसाध्यतापत्तेः परतोऽपि तदभावोऽसिद्धो 'नीलमहं वेद्मि' इति प्रतीतेः जडस्य च प्रकाशायोगे कस्यासाविति वाच्यम् ज्ञानस्येति चेत्, न; तत्रापि 'स्वतः परतो वा' इति विकल्पद्वयानतिवृत्तेः । न च जडस्य स्वतःप्रकाशे ज्ञानता जडताविरोधिनी प्रसज्यते ज्ञानस्य तु स्वतःप्रकाशे विरोधाभावान्न प्रथमविकल्पे दोषापत्तिः निरंशैकपरमाणुपरिमाणस्य तस्य स्वतःप्रकाशे स्थूलैकप्रतिभासविरोधात् न हि प्रत्यक्षप्रतीतस्य स्थूलैकप्रतिभासस्य विरोधो न दोषाय तत्प्रतिभासपरिहारेण निरंशैकपरमाणुप्रतिभासस्याप्रतीयमानस्याभ्युपगमे एकस्य ब्रह्मणः स्वतः प्रतिभासः किं नाभ्युपगम्यते अप्रतिभासमानकल्पनायास्तत्रापि निरङ्कुशत्वात्? चित्रैकस्वभावस्य तस्याभ्युपगमे क्षणिकत्वविरोधः क्रम-

१ "अविनाभावः"–बृ० टि० । "अविनाभावग्रहणात्"—ल० टि० । २ "तद्ग्रहणम्"—बृ० ल० टि० । ३ "कर्तृतापन्नम्"—बृ० ल० टि० । ४ **समान्यस**–भां० मां० । **समानं स**–बृ० । ५-**धानेऽर्थग्र**–ल० । **–धानेर्थाग्र**–आ० हा० वि० । ६ "नित्यत्वादचिकित्स्यस्य"—तत्त्वसं० पञ्जि० पृ० २५७ पं० ५ । सिद्धिवि० टी० लि० पृ० २६ पं० १२-१३ । शास्त्रवा० स्याद्वादक० पृ० १७८ द्वि० पं० ३ ।

परिणामिनस्तथैवात्मनः स्वतःप्रतिभासाविरोधात् सर्वविकल्पातीतस्य तस्याभ्युपगमे नील–सुखादिव्यतिरिक्तस्य तस्य ब्रह्मस्वरूपवत् तदप्रतिभासनमेव विरोधः नील–सुखाद्यात्मकत्वेऽपि नील–सुखप्रतिभासेन पीत–दुःखप्रतिभासाविषयीकरणात् पीत–दुःखप्रतिभासेन नील–सुखप्रतिभासयोश्चासंवेदनात् परलोकवदसत्त्वेन सकलशून्यताप्रसक्तिः । किञ्च, नीलादिप्रतिभासानामेकेनाणुप्रतिभासेन तदन्येषां तैश्च तस्याविषयीकरणादभावप्रसक्तिः स्वतोऽपि केवलपरमाणुप्रतिभासस्यासंवेदनात् । अथ नील–सुखादीनां नाभावः स्वयमुपलम्भात्, न; सन्तानान्तरानिषेधप्रसक्तेः तदभ्युपगमे कथं स्व–परग्रहणव्यापारनिषेधोऽनुमानाभावात् । न च विचारात् तद्व्यापारनिषेधः अनेन तदविषयीकरणे न तन्निषेधः विषयीकरणे ग्राह्यग्राहकभावसिद्धेर्न तन्निषेधः इति न सकलविकल्पातीतत्वसंभवः । न च तत्त्वस्यान्यत्र न भावः नाप्यभावः सर्वत्र तथाभावापत्तेः सन्तानान्तरवत् ततः स्थूलैकत्वादिविकल्परहितस्य कदाचिदप्यप्रतिभासनाद् जडवदजडस्यापि न स्वतोऽवभासनं पराभ्युपगमेन संभवति । परतस्तस्यावभासने जडस्यापि ततोऽवभाससिद्धेर्विज्ञानमात्रताऽसिद्धिः । न च परेण समानकालेनाप्रतिबन्धात् परस्परग्रहणप्रसक्तेश्च नार्थग्रहणम् भिन्नकालेनाप्यतिप्रसङ्गात् न तेन तद्ग्रहणम् अन्यत्रापि समानत्वात् । अत एव "स्वरूपस्य स्वतो गतिः" [ ] इत्ययुक्तम् तत्रापि समानकालस्य गतावर्थवत्प्रसङ्गात् । न च स्वरूपस्य ज्ञानतादात्म्यान्नायं दोषः तादात्म्येऽपि समानेतरकालविकल्पद्वयानतिवृत्तेः । अथ स्वरूपं ज्ञानमेवेति न भेदभाविविकल्पावतारस्तत्र, न; तथाप्रतीतेः तत्तथाप्रतीतिश्च यद्यप्रमाणं नातः स्वरूपस्य ज्ञानतासिद्धिः प्रमाणं चेत् तर्हि स्वपरग्रहणस्वरूपतापि ज्ञानस्य तत एव सिद्धेति न तत्रापि तद्विकल्पावतारः प्रत्यक्षविरोधात् । तन्न स्वतोऽवभासनं हेतुः असिद्धत्वात् ।

परतोऽवभासनं चेत्, न; तस्यापि वाद्यसिद्धत्वात्—

"नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते" ॥ [ ] इत्यभिधानान्न

सौगताभिप्रायेण परप्रकाशता कस्यचित् सिद्धा ।

न च प्रकाशनलक्षणस्य हेतोर्ज्ञानत्वेन व्याप्तिसिद्धिर्यतः स्वरूपमात्रपर्यवसितं ज्ञानं सर्वमवभासनं ज्ञानं(त्व)व्याप्तमिति नाधिगन्तुं समर्थम् । न च सकलसम्बन्ध्यप्रतिपत्तौ सम्बन्धप्रतिपत्तिः । उक्तं च—

"द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात् ।
द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम्" ॥ [ ]

न च विवक्षितज्ञानं ज्ञानत्वमवभासनं चात्मन्येव प्रतिपद्य तयोर्व्याप्तिमधिगच्छति । तत्रैवानुमानप्रवृत्तेः तत्र च तत्प्रवृत्तेर्वैयर्थ्यम् साध्यस्याध्यक्षसिद्धत्वात् । न च सकलं ज्ञानमात्मनि तयोर्व्याप्तिं प्रतिपद्यत

१ "नीलादिप्रतिभासानामिति योगः"—बृ० टि० । "तदन्येषां नीलादिप्रतिभासानामिति योगः"—ल० टि० । २ "नीलादिप्रतिभासैः"—बृ० ल० टि० । ३ "एकाणुप्रतिभासस्य"–बृ० ल० टि० । ४ "विचारेण"—बृ० ल० टि० । ५-**तस्य तत्व**–बृ० । ६ "न चैवंवादिनः स्वरूपस्य स्वतोऽवगतिर्घटते" । एवंवादिनः "समकालो भिन्नकालो वार्थो न ग्राह्य इत्येवंवादिनो योगाचारस्य" । स्वरूपस्य "ज्ञानस्य" । स्वतः "ज्ञानात्"–प्रमेयक० पृ० २४ प्र० पं० २, टि० ९–१०–११ । ७ **नान्या**–ल० वा० बा० भां० मां० । ८–**भावो बु**–ल० वा० बा० ।

९ प्रमेयक० पृ० २४ प्र० पं० ५, अन्यः "अर्थः" । अनुभाव्यो "ग्राह्यः" । अनुभवो "ग्राहकः"—टि० ३३–३४–३५ । स्याद्वादर० पृ० ७३ द्वि० पं० १३ । "नान्योऽनुभावो बुद्ध्याऽस्ति × × × स्वयमेव प्रकाशते"—न्यायमञ्ज० आ० ९ पृ० ५४० पं० १९ । श्लो० वा० पार्थ० व्या० पृ० २७५ पं० १९ । सर्वदर्शनसं० द० २ पृ० ३१ पं० १९६ । षड्द० स० बृ० वृ० पृ० ४० पं० १३ ।

१० "न खलु स्वरूपमात्रपर्यवसितं ज्ञानं निखिलमवभासमानत्वं ज्ञानत्वव्याप्तमित्यधिगन्तुं समर्थम्"—प्रमेयक० पृ० २४ प्र० पं० ६ । ११ पृ० २ पं० २५, टि० ७ । "तदुक्तमन्यैः—द्वयसंबन्धसंवित्तिर्नैकरूपप्रवेदनात् ।" इत्यादि—५,२४ तत्त्वार्थश्लो० वा० पृ० ४२१ पं० ११ । सिद्धिवि० टी० लि० पृ० १०९ पं० २६ । १, २० रत्नाकरव० पृ० ४२ पं० ८ । स्याद्वा० का० १६ पृ० १३० पं० ८ । १२ "अवभासनस्य"—बृ० ल० टि० ।

इति वक्तव्यम् सकलज्ञानावेदने वादिनैवंप्रतिपत्तुमशक्तेः । न च न परमार्थतस्तयोर्व्याप्तिः अपि तु व्यवहारेणेति वक्तव्यम् व्यवहारस्यापि प्रमाणत्वाभ्युपगमे उक्तदोषानतिवृत्तेः । अथाप्रमाणं विकल्पनमात्रमसौ; नन्वनुमानमप्यतः प्रवृत्तिमासादयत् तथाभूतमिति नातोऽभिमतसिद्धिः । न च मिथ्याविकल्पविषयधूमाग्निव्याप्तिप्रभवाश्यनुमानवदस्यापि स्वसाध्याव्यभिचारित्वम् मिथ्याविकल्पावगतव्याप्तिप्रभवस्य तस्य स्वसाध्याव्यभिचारित्वव्याघातात् न हि साध्यभाव एव साधनभावलक्षणव्याप्त्यभावे साधनप्रभवानुमानस्य कस्यचित् स्वसाध्याव्यभिचारोऽविरुद्धः । न चाविद्यमानव्याप्तिलिङ्गप्रभवादनुमानात् सौगतस्य स्वमतसिद्धिः परस्यापि तथाभूतात् कार्याद्यनुमानात् ईश्वराद्यभिमतसाध्यसिद्धिप्रसक्तेः । न च ज्ञानत्व-स्वतःप्रकाशनयोः साध्यसाधनयोः कुतश्चित् प्रमाणाद् व्याप्तिसिद्धिः पारमार्थिकी ज्ञानवज्जडस्यापि परतोग्रहणसिद्धेर्हेतोरनैकान्तिकत्वप्रसक्तेः । जडस्य प्रकाशायोगोऽप्यप्रतिपन्नस्य प्रतिपत्तुमशक्यः शक्यत्वे वा सन्तानान्तरस्यापि स्वप्रकाशायोगः प्रतिपत्तव्य इति तस्याप्यभावः प्रसक्तः तथा च परप्रतिपादनार्थं प्रकृतहेतूपन्यासो व्यर्थः । अथ प्रतिपन्नस्य जडस्य प्रकाशायोगस्तथापि विरोधः—'जडः प्रतीयते प्रकाशायोगश्च' इति । अथादृश्येऽपि जडे विचारात् तदयोगः प्रतीयते; ननु जडस्य तेनाप्यविषयीकरणे पूर्ववद्दोषः-'विचारस्तत्र न प्रवर्तते तत एव च प्रकाशायोगप्रतिपत्तिः' इति । विषयीकरणे विचारवत् प्रत्यक्षादिनापि तस्य विषयीकरणात् प्रकाशायोगोऽसिद्धः । न च सुखादौ प्रकाशनस्य ज्ञानत्वेन व्याप्तिनिश्चयात् स्वव्यापकरहिते जडे न तस्य संभवोऽन्यथा कृतकत्वादेरप्यनित्यत्वविकल आत्मादौ संभव इति सकलानुमानोच्छेद इति वक्तव्यम् यतस्तत् तत्र तेन व्याप्तमिति कुतो निश्चितम्? 'तस्मिन् सति दर्शनात्' इति यद्युच्येत पुरुषत्वं किञ्चिज्ज्ञत्वेन व्याप्तं तत एव सिद्ध्येत् विपक्षे बाधकाभावः प्रकृतेऽपि समानः । अपि च, ज्ञानत्वेन व्याप्तं प्रकाशनं सुखादौ स्वयमेव प्रतिपन्नं यदि तदेव नीलादावपि कुतश्चित् प्रमाणात् प्रतीयते तदा ततस्तत्र साध्यसिद्धिर्युक्ता न पुनः साध्यव्याप्तधर्मविलक्षणादपि 'धर्मात् प्रतिभासः' इति शब्दसाम्येऽपि अन्यथा बुद्धिमत्कारणव्याप्तघटादिसन्निवेशविलक्षणादपि पर्वतादिसन्निवेशात् तत्र बुद्धिमत्कारणसिद्धिः स्यादिति "वस्तुभेदे प्रसिद्धस्य" [ ] इत्यादेरभिधानमसङ्गतं भवेत् । न च नीलादौ सुखाद्यवभासनं परस्य सिद्धम् सिद्धौ वा विप्रतिपत्तेरभावान्न तदवबोधार्थं शास्त्रप्रणयनं सौगतस्य युक्तम् । जडतासमारोपव्यवच्छेदार्थं तदिति चेत्, न; स्वप्रतिभासेऽप्यन्यथाप्रतिभाससमारोपोऽस्त्येव आत्मनोऽनेकरूपेण स्वतःप्रतिभासाभ्युपगमात् स कुतो व्यवच्छिद्यताम्? न चायं न समारोपः स्वात्मनि स्वकार्यकारी साध्यवत् 'स्वप्रतिभासो नीलादिः अन्यग्राहकाभावे सत्युपलभ्यमानत्वात् सुखादिवत्' इत्यतोऽनुमानात् स व्यवच्छिद्यते अन्यग्राहकाभावश्चानुपलम्भादिति चेत्, न; स्वसंवेदनप्रत्यक्षतोऽहमहमिकया अन्यग्राहकोपलब्धेस्तदभावस्यासिद्धत्वात् । अथ 'स्थूलोऽहम्' 'कृशोऽहम्' इति प्रतीतेः 'अहं'प्रत्ययः शरीरमेव न च तत् नीलादेर्ग्राहकम् स्वयं तस्य प्रमेयत्वात्, न; अन्धकाराद्यवगुण्ठितशरीराग्रहेऽपि सालोकघटादिग्रहणोपलब्धेः शरीरात् तद्भेदसिद्धिस्तथाप्यभेदे न किञ्चिद् भिन्नं भवेत् । ततो भिन्नोऽपि न नीलादेर्ग्राहक इति चेत्, न; अस्य प्रतिविहितत्वात् । ततो न दृष्टान्तदृष्टसाधनधर्मस्य साध्यधर्मिण्यवगतिरित्यसिद्धो हेतुः । न च नैयायिकादीन् प्रति सुखादेर्ज्ञानता सिद्धेति साध्यविकलता दृष्टान्तस्य अथात एव हेतोर्ज्ञानता सुखादेः सिद्धेति न साध्यविकलतादोषः; नन्वत्राप्यपरं निदर्शनमुपादेयम् तत्राप्येतच्चोद्ये निदर्शनान्तरमित्यनवस्था । नीलादेर्निदर्शनत्वे इतरेतराश्रयत्वम्—सुखादिज्ञानतासिद्धौ नीलादेस्तद्रूपतासिद्धिः तस्याश्च तन्निदर्शनवशात् सुखादेस्तद्रूपतेति कथं नेतरेतराश्रयत्वम्? न च सुखादौ दृष्टान्तमन्तरेणापि तद्रूपतासिद्धिः नीलादावपि तथैव तदापत्तेः । अथ सुखादेर्जडत्वे प्रतिभासो न भवेत् जडस्य प्रकाशायोगात्; ननु नीलादावपि प्रकाशतासिद्धावेतदेव

---

१ "प्रमाणभूतम्"—बृ० टि० । "प्रमाणरूपम्"-ल० टि० । २ **प्रतिपद्यत इति** बृ० । ३ "विचारेण"—बृ० ल० टि० । ४-**शायोगः प्र**-बृ० । ५ "तद्दर्शनात्"—बृ० ल० टि० । ६ **प्रतीयेत त**-बृ० । ७-**शात् तद् बु**-वा० बा० । ८ "शास्त्रप्रणयनम्"—बृ० ल० टि० । ९-**भासमारो**-बृ० भां० मां० विना । १० "स्वप्रतिभासेऽपि यो जायते"—बृ० ल० टि० । ११ "अन्यग्राहकस्य"—बृ० ल० टि० । १२-**त्वान्नाधका**-ल० । **-त्वान्नकारा**-बृ० । १३ "तस्यां च तन्निदर्शनात्"—प्रमेयक० पृ० २४ द्वि० पं० ७ ।

वक्तव्यम् किं सुखादिनिदर्शनेन? तत्र चोक्तमेव दूषणम् । अथ सुखादेरज्ञानत्वे ततोऽनुग्रहाद्यभावो भवेत्, ननु किं सुखमेवानुग्रहः, उत ततो भिन्नम्? प्रथमपक्षे क ज्ञानत्वेनासौ व्याप्तः यतस्तदभावे न स्यात् व्यापकाभावे हि नियमेन व्याप्याभावः परस्याभीष्टः अन्यथा प्राणादेः सात्मकत्वेन क्वचिद् व्याप्त्यसिद्धावप्यात्माभावे स न भवेदिति केवलव्यतिरेकिहेत्वगमकत्वप्रदर्शनमयुक्तं भवेत् । तन्न प्रथमः पक्षः । नापि द्वितीयः यतो यदि नाम सुखे ज्ञानताऽभावः अर्थान्तरभूतानुग्रहस्याभावे किमायातम् नहि यज्ञदत्तस्य गौरताऽभा(ताऽभा)वे देवदत्ताभावो दृष्टः । तज्ज्ञानताकार्यत्वात् तदभाव इति चेत्, न; परं प्रति तदसिद्धेः । किञ्च, ग्राह्यग्राहकभाववत् समानसमय-भिन्नसमययोः कार्यकारणभावो दुरन्वय इति प्राक् प्रतिपादितं न पुनरुच्यते । तन्न नैयायिकादीन् प्रति ज्ञानता सुखादेः कुतश्चित् साधनात् सिद्धा । प्रत्यक्षतस्तत्सिद्धिरिति चेत्, न; नीलादावप्यध्यक्षतः एव तत्सिद्धिप्रसक्तेरनुमानोपन्यासस्तत्र तत्साधनाय वैफल्यमासादयेत् तथापि तदुपन्यासे सुखादावपि तत्प्रसाधनाय तस्योपन्यासो भवेत् न हि नीलादिकमपि स्वसंवेद्यमिति परस्य न सिद्धम् । अथ तत्र जडतासमारोपाद् तद्व्यवच्छेदार्थमनुमानं प्रवर्त्तमानं नानर्थकं तर्हि सुखादावपि तद्व्यवच्छेदाय तत् प्रवर्त्तमानं किमित्यनर्थकं भवेत्? अस्ति च तत्रापि नैयायिकादीनां जडतासमारोपः तत्र च तत्प्रवर्त्तने दोषः प्रतिपादित एव । न च विपरीतारोपव्यतिषक्तमूर्तयो भावा दृष्टान्तीभवन्ति साध्याविशेषादिति । न सुखादीनां प्रकृतसाध्ये दृष्टान्तता । न च जैनस्य तत्र समारोपाभावात् तं प्रति तस्य दृष्टान्तता साधनोपन्यासस्यापि तमेव प्रति प्रसक्तेर्नैकान्ततोऽर्थाभावः सर्वान् प्रति विप्रतिपत्तेरनिराकरणाद् जैनस्यापि किमिति तत्र तदभावः? तेन तत्र ज्ञानत्वनिश्चयात् निश्चयसमारोपयोश्च विरोधादिति चेत्, कुतः पुनस्तत्र तस्य तन्निश्चयः? प्रमाणमन्तरेणेति चेत्, न; तथानिश्चितस्य दृष्टान्तत्वायोगात् । प्रमाणतश्चेत् नीलादौ जडतानिश्चयस्यापि तत एव संभवात् समारोपाभावतोऽनुमानोपन्यासो व्यर्थस्तद्व्यवच्छेदाय । नीलादावजडे जडतानिश्चयो न प्रमाणनिबन्धनस्तेन तत्रानुमानोपन्यास इति चेत् सुखादौ कुतस्तन्निबन्धनो ज्ञानतानिश्चयः? अध्यक्षतस्तस्य ज्ञानतासिद्धिरिति चेत्, न; इतरत्रापि तत एव जडतासिद्धेः न च जडतानिश्चयहेतुरध्यक्षं प्रमाणमेव न भवति इतरत्रापि तत्प्रसक्तेः अबाधितत्वमुभयत्र समानम् न च जैनस्य सुखादौ प्रकाशनं ज्ञानरूपतया व्याप्तं प्रसिद्धमिति तेन स्तम्भादौ ज्ञानता साध्यत इति न किञ्चित् प्रमाणाप्रमाणसिद्धताविचारेण प्रयोजनं यतः स्वतःप्रकाशनं ज्ञानरूपतया व्याप्तं तस्य यत् सिद्धं तत् स्तम्भादौ नास्तीत्यसिद्धो हेतुः परतःप्रकाशनं यत् स्तम्भादौ तस्य सिद्धं न तद् ज्ञानरूपतया व्याप्तम् प्रकाशनमात्रं च स्तम्भादावुपलभ्यमानं जडतयाऽविरुद्धत्वान्नैकान्ततो ज्ञानरूपतां साधयतीति न प्रकाशनलक्षणो हेतुर्ज्ञानरूपतां स्तम्भादेः साधयतीति स्थितम् ।

अथ माभून्नीलादेर्ज्ञानरूपता तत्प्रसाधकप्रमाणाभावतः पारमार्थिकार्थरूपता तु तस्य कुतो येन तद्ग्राहिज्ञानमर्थनिर्णीतिरूपतया प्रमाणं भवेत्? उच्यते; अबाधितप्रत्ययविषयत्वान्नीलादेः परमार्थरूपता । तथाहि-जाग्रदवस्थोपलभ्यमानो नीलादिः परमार्थसन् सुनिश्चिताऽसंभवद्बाधकप्रमाणत्वात् सुखादिसंवेदनवत् । न चास्य प्रत्यक्षं बाधकम् अस्खलत्प्रत्ययविषयतया सर्वैरस्य दर्शनात् अन्यथा व्यवहारिणस्तत्र प्रवृत्तिर्न स्यात् । न चानुमानं बाधकम् अध्यक्षसिद्धेऽनुमानस्य बाधकत्वेनाप्रवृत्तेः न चानुमानमर्थासत्त्वप्रतिपादकमुपलभ्यते । अथ यद् विशददर्शनावसेयं न तत् परमार्थसत् यथा तैमिरिकोपलभ्यमानं केशोन्दुकादि, विशददर्शनावसेयं च स्तम्भादिकमित्यतोऽनुमानात् तदभावः, न; अस्यानुमानस्य पराभ्युपगमेन प्रामाण्यायोगादिति प्रतिपादितत्वात् । किञ्च, परमार्थसत्ताभावः

---

१ "अनुग्रहः"—बृ० ल० टि० । २ "ज्ञानरूपता"—बृ० ल० टि० । ३-**ताभा**-बृ० विना । ४ "न खलु यज्ञदत्तस्य गौरत्वाभावे देवदत्ताभावो दृष्टः"-प्रमेयक० पृ० २४ द्वि० पं० ११ । ५ **तज्ञा**-ल० वा० बा० । **तदज्ञा**-भां० मां० । ६-**त एतत्**-बृ० विना । ७ "ज्ञानरूपता"—बृ० ल० टि० । ८ "जैनम्"—बृ० ल० टि० । ९ "जैनेन"—बृ० ल० टि० । १० "सुखादिषु"—बृ० ल० टि० । ११-**यावि**-बृ० विना । १२ पृ० ३६१ टि० ३१ । एतत्पदस्यार्थं स्पष्टीकर्तुमयमष्टसहस्रीगतः पाठो विचारणीयः—"नभसि केशादिज्ञानं हि बहिर्विसंवादकत्वात् प्रमाणाभासम् स्वरूपे संवादकत्वात् प्रमाणम्"—पृ० २४८ पं० ११ ।

स्तम्भादेर्यद्यनेनानुमानेन न प्रतीयते कथमस्य बाधकता? बाध्यज्ञानगृहीतधर्माभावग्राहकस्यैव बाधकत्वात् 'अश्रावणः शब्दः' इत्यस्य प्रत्यक्षवत् अन्यथा नीलज्ञानस्यापि पीतज्ञानबाधकता भवेत्। प्रतीयत इति चेत् स यद्यपरमार्थसन् नातः स्तम्भादेरसत्त्वसिद्धिः परमार्थसंश्चेत् अनेनैव हेतोर्व्यभिचारः। न चाभावग्राहकत्वादनुमानं तद्बाधकं नेष्यते अपि तु परमार्थसत्त्वसमारोपव्यवच्छेदकरणादिति वक्तव्यम् तस्यैवासिद्धेः। तथाहि–तद्व्यवच्छेदः समारोपस्वभावः तदभावरूपो वा भवेत्? प्रथमपक्षे समारोपव्यवच्छेदकार्यनुमानं समारोपकारि प्रसक्तम् न चैतद् युक्तम् कृतस्य करणायोगात्। द्वितीयपक्षे विनाशस्य सहेतुकत्वमनिष्टमासज्यते। किञ्च, असौ व्यवच्छेदोऽनुमानेन यदि प्रतीयते परमार्थसंश्च पुनरपि हेतोरनैकान्तिकत्वम्। न प्रतीयते चेत् न तर्ह्यनुमानेन समारोपव्यवच्छेदकरणम् अन्यथाभूतस्य तस्य तेन करणासंभवात्। न च स्तम्भादिस्वरूपोऽपि समारोपव्यवच्छेदोऽनुमानेन क्रियते स्तम्भादेः स्वहेतुभ्य एवोत्पत्तेः। न चासावनुमानस्वरूप एव तेनैव तस्य करणविरोधात्। न चानुमानसन्निधौ तदनुत्पत्तिरेव ततस्तद्व्यवच्छेदः तत्रापि पूर्वोक्तदोषस्य समानत्वात्। किञ्च, समारोपविविक्तं भावान्तरं यदि भाविसमारोपानुत्पत्तिः तच्चानुमानेन प्रतीयते परमार्थसच्च पुनरपि हेतुस्तेनैव व्यभिचारी। अथ न परमार्थसन्न तर्हि तद्ग्राह्यनुमानं प्रमाणमिति कथं तस्य बाधकत्वम्? न च न तद्व्यवच्छेदकरणादनुमानं तद्बाधकमपि तु तदभावाविसंवादादिति वक्तव्यम् तदविषयस्य तदविसंवादकत्वायोगात्। तत आत्मलाभ एव तदविसंवाद इति चेत्; ननु तदात्मलाभोऽपि यद्यनुमानेनात्मनो ज्ञायते पारमार्थिकश्च पुनरप्यनेनैव हेतुर्व्यभिचारी अपारमार्थिकश्चेन्न तद्विषयमनुमानं तद्बाधकम्। न च स्वापादौ तदभावदर्शनावसेयत्वयोः प्रतिबन्धग्रहणादन्यत्रापि दर्शनावसेयत्वं तत्प्रतिबद्धं तज्जनितं चानुमानं पदार्थाभावजनितमिति सिद्धस्तत आत्मलाभोऽविसंवादः यतः साकल्येन प्रतिबन्धग्रहणे प्रतिबन्धस्य ग्राह्यं तदासक्तं तत्र च पूर्वप्रतिपादित एव दोषः तदग्रहणे च न तस्मादनुमानस्यात्मलाभनिश्चयः। न च तयोरेकत्र सहभावदर्शनात् सर्वत्र तथाभावः अन्यथेश्वराद्यनुमानमप्यविसंवादकं भवेत्। अपि च, स्वापाद्यवस्थावभासिनो घटादेर्यदि परमार्थसत्त्वाभावो न गृह्यते कथं न साध्यविकलता दृष्टान्तस्य। गृह्यते चेत् तस्य पारमार्थिकत्वे हेतोर्व्यभिचारस्तदवस्थः अपारमार्थिकत्वे दृष्टान्तः साध्यविकलः। अथ न सौगतेन तदभावो गृह्यते अपि तु बहिरर्थवादिनेति न पूर्वोक्तो दोषः, न; तेन प्रमाणेन तदभावग्रहणे सौगतेनापि तद्ग्रहणप्रसङ्गात् प्रमाणस्य क्वचित् पक्षपातासंभवात् प्रमाणमन्तरेण ग्रहणे न तेन हेतोर्व्याप्तिः अभ्युपगममात्रसिद्धस्य व्यापकत्वायोगात् अन्यथा बौद्धाभिमतनाशादिना सुखादेरचेतनत्वसाधनं साङ्ख्यस्य किमित्ययुक्तं भवेत्? तच्च प्रकृतमनुमानं साध्यसाधनयोर्व्याप्त्यग्रहणात् प्रकृतसाध्यसाधनायालमिति न तद्बाधकं युक्तम्। न च प्रत्यक्षानुमानव्यतिरिक्तं प्रमाणान्तरं सौगतस्याभीष्टं यत् तद्बाधकं भवेत् अतः 'सुनिश्चितासंभव–' इत्यादिहेतुर्नासिद्धः। न चापरमार्थसति यथोक्तो हेतुः संभवीति नानैकान्तिकः।

अथ स्वप्नदृष्टे घटादावपरमार्थसति यथोक्तहेतोः सद्भाव इति कथं नानैकान्तिकः? न च तत्र बाधकप्रमाणविषयत्वम् बाध्यत्वस्य क्वचिदप्यसंभवात्। तथाहि–न तावद् बाधकेन ज्ञानस्य प्रतिभासकाले स्वरूपं बाध्यते तस्य परिस्फुटेन रूपेण प्रतिभासनात् नाप्युत्तरकालं क्षणिकत्वेन तदा तस्य स्वयमेवाभावात् नापि तत्प्रमेयस्य प्रतिभासमानेन रूपेण स्वरूपं बाध्यते प्रतिभासनादेव न च प्रतिभासमानरूपसहचारिणा स्पर्शादिरूपेण, तस्य ततोऽन्यत्वात् न चान्याभावेऽन्यस्याभावोऽतिप्रसङ्गात्। न च ज्ञानस्य ज्ञेयस्य वा फलमुत्पन्नमनुत्पन्नं वा बाध्यते उत्पन्नस्य विद्यमानत्वेन बाध्यत्वासंभवात् अनुत्पन्नस्यापि स्वयमेवासत्त्वात्। न च स्वप्नदृष्टे घटादिके उदकाहरणाद्यर्थक्रिया न संभवति तस्या अपि तत्र दर्शनात् "असतः सत्त्वेन प्रतिभासनमस्य" [ ] इति ज्ञापनात् सं तेन बाध्यत इति चेत्, न; प्रतिभासमानस्य तज्ज्ञापनासंभवात् जाग्रद्दृष्टघटादावपि तत्प्रसङ्गात्। न च

१–सत्त्वे स–आ० वि०। २–स्य तेन बृ० विना। ३ "अनुमानेन"—बृ० ल० टि०। ४ "तस्यानुमानरूपसमारोपस्य"—बृ० ल० टि०। ५ "समारोप"—बृ० ल० टि०। ६ प्र० पृ० पं० ५। ७–हणं त–ल०। ८ "बाह्यार्थवादिना"—बृ० ल० टि०। ९ "न संविद्रूपाः सुखादयः विनाशित्वादिभ्यः कुम्भवदिति"—बृ० ल० टि०। १० पृ० ४८५ पं० ३१। ११–भावो–बृ० ल०। १२–त्पन्नं वा–बृ० ल०। १३ "उदकस्य"–बृ० ल० टि०। १४ "स्वप्नवेदने"–बृ० ल० टि०। १५ "घटादिकोऽर्थः"–बृ० ल० टि०।

'नेदम्'इति तत्र ज्ञानाभावान्न तत्प्रसङ्गः 'नेदम्'इति ज्ञानस्य सत्यपि क्वचित् झटित्यपसृते भावात् असत्यपि चान्यगतचित्तस्याभावात्। तथाहि–शीघ्रं गच्छतो मरीचिकाजलज्ञाने 'नेदम्'इति प्रत्ययो नोत्पद्यत एव। 'नेदम्'इति प्रत्ययविषयस्यापि च कथं सत्यता? बाधकाभावादिति चेत्; ननु बाधकं 'नेदम्'इति ज्ञानम् तस्य चाभावोऽसत्यपि विषये भवतीत्युक्तम्। किञ्च, तद्विषयम् अन्यविषयं वा बाधकमभ्युपगम्यते? न तावत् तद्विषयम् विरोधात्–नहि यत् यद्विषयं तदेव तस्यासत्प्रतिभासनं ज्ञापयतीत्युपपन्नम्। नाप्यन्यविषयम् तेनाप्रतिभासमानस्यान्यस्य तज्ज्ञापनायोगात् अन्यथा घटज्ञानं पटस्य तद् ज्ञापयेदिति।

अत्र प्रतिविधीयते–नहि बाधकेन ज्ञानेन स्वरूपम् ज्ञानस्य विषयः फलं वा बाध्यते किन्तु ज्ञानस्यासद्विषयत्वम् अर्थस्य वाऽसत्प्रतिभासनं तेन ज्ञाप्यते यथा शुक्तिकाज्ञानेन रजतविज्ञानस्य रजताकारस्य वा। एतच्च बाध्यबाधकभावमनिच्छताप्यवश्यमभ्युपगन्तव्यम् प्रतिभासाद्वैते स्कन्धसन्तानादिविकल्पानां स्वयमेव निर्विषयत्वोपवर्णनात् तदुपवर्णनाऽभावे बाह्यभावानामेकानेकरूपतया सामान्य–सामानाधिकरण्य–विशेषणविशेष्यभावादेः पारमार्थिकस्य भावात् प्रतिभासाद्वैतस्याभाव एव स्यात्। किञ्च, बाध्यबाधकभावप्रतिषेधविधायियुक्त्युपन्यासेन वादिना किं क्रियते इति वक्तव्यम् न किञ्चिदिति चेत्, तदुपन्यासवैयर्थ्यम्। अथ तूष्णींभावो निग्रहः स्यादिति तदुपन्यासस्तर्हि तदुपन्यासेऽप्यसाधनाङ्गवचनं निग्रह एव भवेदिति तदुपन्यासानर्थक्यम्। बाध्यबाधकभावाभावप्रतिपत्तिस्तदुपन्यासप्रयोजनमिति चेत्, न; तत्प्रतिपत्तेर्यथार्थत्वे परमतसिद्धिप्रसक्तेः तस्या अयथार्थत्वे पुनरप्यानर्थक्यम्। समारोपव्यवच्छेदार्थं तदुपन्यास इति चेत् बाध्यबाधकभावाभावेऽपि तद्भावाध्यवसायसमारोपस्य व्यवच्छेदः स्वरूपापहारश्चेत् तर्ह्यभ्युपगत एव बाध्यबाधकभावः। किञ्च, उदयकाल एव तदपहारे तदप्रतिभास इति न समारोपो नाम इति कस्य निवृत्त्यर्थः शास्त्राद्यारम्भः अन्यदापि स्वयमेव नाशान्न ततस्तन्निवृत्तिः? अथ शास्त्रादेः प्राक्तनसमारोपक्षणादुत्तरसमारोपक्षणजननासमर्थः क्षणः समुपजायत इति तन्निवृत्तिस्तर्हि बाधकाद् बाध्यनिवृत्तिरपि तथैव संपत्स्यत इति न बाध्यबाधकभावनिराकरणं युक्तिसंगतं स्यात्। न च बाध्यबाधकाभावेऽपि परस्य तद्भावाभिमान इति शास्त्रादिना ज्ञाप्यते 'असत्येवार्थे सदभिमानो बाध्यस्येति बाधकेन ज्ञाप्यते' इत्यस्य स्वयमेवाभ्युपगमप्राप्तेस्तद्विषयातद्विषयबाधकपक्षोक्तदोषस्याप्येवमभ्युपगच्छता स्वयमेवाङ्गीकरणात्। अथ न किञ्चित् शास्त्रादिना क्रियते केवलमलीकाभिमानोऽयं लोकस्य 'शास्त्रेण बाध्यबाधकभावाभावो ज्ञाप्यते तत्समारोपो वा व्यवच्छिद्यते' इति; ननु तदभिमानस्यालीकता तदभावेऽपि तदध्यवसायः तथा चैतत्परिज्ञाने परमतमेवाभ्युपगतं भवेत्। अथ शास्त्राद्युपन्यासोऽपि नाभ्युपगम्यते तर्हि 'बाध्यत्वायोगात्' इत्यादिकं किमिति वक्तव्यम्? तदपि नास्तीति चेत् उपलभ्यमानस्य कथमसत्त्वम्? अथोपलभ्यते किन्तु स्वप्नोपलब्धसदृशं तत्। तथाहि–तद्वचनमपरमार्थसत् उपलभ्यमानत्वात् स्वप्नोपलभ्यमानवचोवदित्यतोऽनुमानात् तदसत्त्वम्, असदेतत्; पूर्वोपन्यस्तदोषानुबन्धात् पुनरपि 'स्वप्नोपलभ्यमानवत्' इत्युत्तराभिधाने चक्रकप्रसक्तिरिति किञ्चिच्छास्त्रादिकमभ्युपगच्छता

१ "घटादिके"–बृ० ल० टि०। २ "कर्तृभूतम्"–बृ० ल० टि०। ३ "बाधकं कर्मभूतम्"–ल० टि०। ४ "बाधकेन"–बृ० ल० टि०।

५ "असाधनाङ्गवचनमपजयप्राप्तिरिति व्याहतम्"–अष्टश० का० ७ पृ० ७ पं० ८। "तदुक्तम्—स्वपक्षसिद्धिरेकस्य निग्रहोऽन्यस्य वादिनः। नासाधनाङ्गवचनं नादोषोद्भावनं द्वयोः"॥–अष्टस० पृ० ८७ पं० २०। "अत्र कीर्तिराह—द्वाविंशतिधा निग्रहस्थानानि विभज्यन्ते तेषां च प्रतिपदमिदानीं विशेषलक्षणानि वर्ण्यन्त इति न मृष्यामहे। कुतः? असाधनाङ्गवचनमदोषोद्भावनं द्वयोः। निग्रहस्थानमन्यत् तु न युक्तमिति नेष्यते"॥–न्यायमञ्ज० आ० १२ पृ० ६३९ पं० ५–९। सौगतागमितं पराजयाधिकरणं परीक्षमाणेनाचार्यहेमचन्द्रेण प्रस्तुतटिप्पणोपन्यस्तः "असाधनाङ्गवचन—" इत्यादिकः श्लोकः "यथाह धर्मकीर्तिः" इत्युल्लिख्योद्धृतः प्रमाणमीमांसायाम्—२–१–३४ पृ० १०४ पं० २०–२१। न्यायदर्शनसंमतं पराजयाधिकरणमक्षपादेनेत्थं लक्षितम्—"विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्"–न्यायद० १–२–१९। एतदपि निग्रहस्थानलक्षणं "न विप्रतिपत्त्यप्रतिपत्तिमात्रम्" इति सूत्रयन्नाचार्यहेमचन्द्रस्तत्रैव प्रतिक्षिप्तवान्।

६ तदभा–वा० बा० आ०। ७–धकाभा–बृ०। ८–णादेव न कि–आ०। ९–धकाभा–बृ० ल०।

बाध्यबाधकभावाभावेऽपि तदभिमानो लोकस्येति प्रतीतिश्रितावभ्युपगन्तव्यः स इति बाध्यबाधकभावः स्वप्नोपलब्धौ[1] घटादौ सिद्धो न प्रकृतहेतोर्व्यभिचारः । नापि विरुद्धता परमार्थसत्ताभावेन व्याप्यसिद्धेः अन्यथा[2]ऽपारमार्थिकं स्वसंवेदनमात्रमपि भवेत् तत्रा[3]प्यपरहेतोः पारमार्थिकत्वसाधकस्याभावात् विपर्ययव्याप्तश्च हेतुर्विरुद्धो भवेदिति असिद्ध-विरुद्धा[4]ऽनैकान्तिकत्वदोषरहिताद् भवत्यतो हेतोर्जाग्रदवस्थोपलभ्यमानस्य घटादेः परमार्थसत्त्वसिद्धिः । तेन 'संवृतानुमानसाध्या शून्यता यद्वा परेण यः कश्चिद्धर्मः पदार्थस्याभ्युपगम्यते स प्रमाणाभावा[5]न्न सिध्यति प्रमाणव्यावृत्तौ प्रमेयस्य व्यावृत्तेरभ्युपगमार्हत्वात्' इत्याद्यपि परोक्तं निरस्तं द्रष्टव्यम् । उक्तदूषणप्रकारस्यात्रापि समानत्वात् ।

यच्च प्रतिभासाविशेषप्रतिपादनं कृतम्, तदप्ययुक्तम्; स्वसंवेदनमात्रवत् प्रधानादेरपि सद्भावसिद्धेस्तदभावे स्वसंवेदनस्याप्यभावापत्तेः अन्यथा प्रतिभासाविशेषायोगात् तस्याप्यभावे न किञ्चित् तत्त्वं स्यात् । शून्यताभ्युपगमात् तत्त्वाभावः समि[6]ष्यत एवेति चेत्, न; तदभ्युपगमस्यापि तत्त्वरूपत्वात् । न च सापि निष्प्रमाणिका अभ्युपगन्तुं युक्ता प्रमाणभावे वा कथं शून्यता तस्यैव तत्त्वरूपत्वात् । न चान्यपरिहारेण तस्य शून्यताव्यवस्थापकत्वे प्रतिभासाविशेषसिद्धिः । अथ न शून्यता नाम काचित् यद्व्यवस्थापकं प्रमाणमन्विष्येत अपि तु प्रतिभासोपमत्वं सर्वधर्माणां सेति । उक्तं च—"मायोपमाः सर्वे धर्माः" [ ] इति, असदेतत्; प्रमाणाभावे सर्वधर्माणां मायोपमत्वस्यै[7]वासिद्धेः । यदपि 'प्रतिभासमानस्यैकानेकत्वरूपतयाऽयोगः' तदपि प्रतिभासाभावे असङ्गतम् तत्सद्भावे वा यथा प्रतिभासस्यास्तित्वं तथैकत्वानेकत्वादेरपि धर्मकलापस्यास्तु तन्निषेधकयुक्तिकलापस्य निरस्तत्वात् प्रतिभासस्य च विद्यमानत्वात् इत्यलमतिप्रसङ्गेनेति सिद्धा विज्ञान-शून्यतावादनिषेधेन अर्थनिर्णीतिस्वभावता प्रमाणस्य ।

[स्वार्थनिर्णयस्वभावं ज्ञानमिति प्रमाणलक्षणं प्रतिक्षेप्तुकामेन सौगतेन निर्विकल्पस्यैव प्रत्यक्षत्वस्थापनम्]

अत्राह सौगतः—भवतु स्वार्थनिर्णीतिस्वभावमनुमानम् प्रत्यक्षं तु निर्विकल्पकत्वान्न तन्निर्णयस्वभावम् । तथाहि—यद् यथा अवभाति तत् तथाव्यवहृतिमवतरति यथा विशदमाभासमानं सुखादिसंवेदनम् नामाद्युल्लेखविविक्ततया चाक्षजं संवेदनमाभातीति स्वभावहेतुः नामाद्युल्लेखपरिष्वक्तवपुषः संविदो[8]ऽध्यक्षत्वविरोधात् यतः साक्षात्कारिज्ञानमध्यक्षतया लोके प्रसिद्धम् साक्षात्कारित्वं च सन्निहितार्थावभासित्वम् असन्निहिते तदभावात् नामादिकं चासन्निहितत्वात् परोक्षमिति न तद्योजनामवतरीतुमलम् ।

१-धकाभावाभावे-वा० बा० ।-धकभावे-आ० । २ "स्वप्ने उपलब्धिर्यस्येति समासः यद्वा स्वप्नोपलब्धौ यो घटादिस्तत्रासौ"-बृ० ल० टि० । "स्वप्नोपलब्धे [ब्धेः-बृ० टि०] इति पाठान्तरम्"-ल० टि० । ३-थापा-बृ० विना । ४-त्रापि प-वा० बा० । ५ "तेन निरस्तं द्रष्टव्यमिति संटङ्कः"—बृ० ल० टि० । ६-वान्ना सि-आ० हा० वि० । ७ स्याद्वादर० पृ० ९३ प्र० पं० १०-१३ । "अभ्यधिष्महि च-

शून्ये मानमुपैति चेन्ननु तदा शून्यात्मता दुःस्थिता नो चेत् तर्हि तथापि किं न सुतरां शून्यात्मता दुःस्थिता ?"—रत्नाकरा० १,१५ पृ० ३२ पं० २५ ।

"विना प्रमाणं परवन्न शून्यः स्वपक्षसिद्धेः पदमश्नवीत । कुप्येत् कृतान्तः स्पृशते प्रमाणमहो ! सुदृष्टं खदसूयिदृष्टम्"—स्याद्वा० का० १७ पृ० १४४ । ८ पृ० ३७७ पं० १, टि० १ । पृ० ३७१ टि० ८ ।

९ न्यायप्रवेशकारेण "तत्र प्रत्यक्षं कल्पनापोढं यज्ज्ञानमर्थे रूपादौ नामजात्यादिकल्पनारहितं तदक्षमक्षं प्रति वर्तत इति प्रत्यक्षम्" इत्यनेन निर्विकल्पकस्य प्रत्यक्षप्रमाणत्वं सूत्रितम्-न्यायप्र० सू० ५४ पृ० ७ । तदेव धर्मकीर्तिना "तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम्" इत्यत्र सूत्रे 'अभ्रान्त'पदनिवेशनेन परिष्कृत्य समर्थितम्-न्यायबिं० १-४-पृ० ६ । "यदुक्तं धर्मोत्तरादिना-कल्पनापोढमभ्रान्तं प्रत्यक्षमिति"—सिद्धिवि० टी० लि० पृ० ५४ पं० ९ ।

एतदेव निर्विकल्पकस्य प्रमाणत्वोपवर्णनं शान्तरक्षितेन प्रत्यक्षलक्षणपरीक्षायां सविस्तरं विविधाक्षेपपरिहारादिना समर्थ्य प्रतिष्ठापितम्-तत्त्वसं० का० १२१३-१३६१ पृ० ३६६-४०४ ।

[वैयाकरणसम्मतं केवलसविकल्पकवादमुपन्यस्य निर्विकल्पकवादिना तस्य दूषणम्]

अत्राह वैयाकरणः—न वाक्संस्पर्शरहिता काचित् प्रतिपत्तिरस्ति शब्दानुविद्धायास्तस्याः प्रतिभासनात् यदि तु तत्संस्पर्शविकला सा[1]ऽभ्युपगम्येत प्रकाशरूपतापि[2] तस्या हीयेत वाग्रूपता हि शाश्वती प्रत्यवमर्शिनी च तदभावे न तस्याः किञ्चिदपरं रूपमवशिष्यते । तदुक्तम्—

"वाग्रूपता चेद् व्युत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शि[3]नी" ॥ [वाक्यप० प्र० का श्लो० १२५]

न च निरस्तोल्लेखं स्वसंवेदनं व्यवहारविरचे[4]नचतुरमिति सविकल्पमभ्युपगन्तव्यम् ।

असदे[5]तत् यतोऽध्यक्षं पुरःसन्निहितमेव भावात्मानमवभासयति तत्रैवाक्षवृत्तेः वाग्रूपता च न पुरःसन्निहितेति न सा तत्र प्रतिभाति । न च व्यापितया पदार्थात्मतया वा अर्थदेशे सन्निहिता वागिति तद्दर्शने साप्यवभाति, वाचामर्थदेशे सन्निधेरयोगात् । तथाहि-यदाऽक्षान्वये संवेदने पुरस्थो नीलादिराभाति न तदा तद्देश एव शब्दात्मा वक्तृमुखदेशस्य तस्यावभासनात् । न चान्यदेशतयोपलभ्यमानोऽन्यदेशोऽभ्युपगन्तुं युक्तः नीलादेरपि तथाभावप्रसक्तेः । अतो वाग्विविक्तस्य नीलादेरवभासनान्नार्थदेशे वाक्सन्निधिरिति न तत्संस्पर्शवत्यक्षमतिः । न च पदार्थात्मता वाचो युक्ता, तत्त्वेनाप्रतिभासनात् । तस्मादिहि शब्दाकारविविक्तः पुरः प्रतिभाति शब्दोऽप्यर्थविविक्तस्वरूपेण श्रोत्रज्ञानेऽवभातीति न तयोरैक्यम् प्रतिभासभेदतो भेदात् तथाप्यभेदे न क्वचिद् भेदो भवेदित्यध्यक्षं शब्दविविक्तरूपादिविषयं न वाग्रूपतासंसृष्टं तत्र तस्या असन्निधानात् । व्यवहितायाअपि वाचः प्रतिभासे सकलव्यवहितभावपरम्परा प्रतिभासताम् अर्थसन्निधानेऽपि वा वाचो लोचनमतावर्थप्रतिभासे न तस्याः प्रतिभासः तदविषयत्वात् नहि यो यदविषयः स सन्निहितोऽपि तत्र प्रतिभाति यथाऽऽभ्ररूपप्रतिपत्तौ तद्रसः अविषयश्च लोचनबुद्धेः शब्द इति । लोचनबुद्धिर्वाऽर्थमनुसरन्ती स्वविषयमेवावभासयति नेन्द्रियान्तरविषयं सन्निहितमपि यथा रसनसमुद्भवा मधुरादिप्रतिपत्तिस्तदेव न परिमलादिकं लोचनप्रभवप्रत्ययेनैव श्रुतिविषयशब्दप्रतिपत्तौ नयनबुद्धिरेव सर्वाक्षविषयग्राहिका इतीन्द्रियान्तरपरिकल्पनावैयर्थ्यम् । शब्दात्मकेऽपि पदार्थेऽभ्युपगम्यमाने श्रुतिरेव शब्दपरिणतिमधिगच्छति लोचनं च रूपविवर्तं पर्येतीत्यभ्युपगन्तव्यम् अन्यथैकमेवाक्षं विषयपञ्चकं विषयीकरोतीति तत्राप्यक्षपञ्चककल्पना विफलतामनुभवेत् ततः सकलमक्षवेदनं वाचकविकलं स्वविषयमेवावलोकयतीति निर्विकल्पकम् । न चार्थसन्निधानाद् वाचः—सन्निधावप्यक्षान्तरवैफल्यप्रसक्तेः—लोचनमतौ यदि नाम न शब्दसन्निधिजनिता शब्दाकारता तथाप्युपादानाद् बोधरूपतैव वाग्रूपतापि वाचकस्मृतिजनिता तत्र भविष्यति यतो यदि स्मरणजनितो वाग्रूपतोल्लेखस्तदा स्पष्टलोचनप्रभवदृशो भिन्न एव भवेत् कारण-विषयभेदात् । तथाहि-लोचनव्यापारानुसारिणी दृग् वर्तमानकालं रूपमात्रं विशदतयाऽवभासयति विकल्पस्तु शब्दस्मरणप्रभवोऽसन्निहितां वाग्रूपतामध्यवस्यति कथं न हेतुविषयभेदात् तयोर्भेदः ? अथ वाक्परिष्वक्तं रूपमधिगच्छद् 'रूपमिदम्'इत्येकं संवेदनमध्यवस्यति जन इति कथं न तयोरैक्यम् ? नैतत्, यतः 'रूपमिदम्'इति ज्ञानेन वाग्रूपतापन्नाः पदार्था गृह्येरन्, भिन्नवाग्रूपताविशेषणविशिष्टा वा? प्रथमपक्षे लोचनं वाग्रूपतायां न प्रभवतीति तदनुसारिण्यध्यक्षमतिरपि न तत्र प्रवृत्तिमती ततः कथमसावर्थरूपापन्नां वाग्रूपतामधिगन्तुं क्षमेत्यन्यैवाक्षमतिर्नामोल्लेखात् । अथ द्वितीयः पक्षस्तदापि नर्यं[6]नदृग् तद्विषये शुद्ध एव पुरोव्यवस्थिते

---

१ इदं मतं तन्निरसनं च प्रमेयकमलमार्तण्डे समानप्रायं वर्तते-पृ० ११ द्वि० पं० ३-पृ० १२ प्र० पं० ११ । अष्टसहस्र्यां तु वैयाकरणीयशब्दाद्वैतदर्शन-तत्प्रतिवादपरा चर्चा संक्षिप्ता भङ्ग्यन्तरेण च दृश्यते-पृ० १३० पं० १ । २-ते यदुक्तम् बृ० ल० वा० बा० । ३ पृ० ३८० पं० १४, टि० १३ । "तथा च वैयाकरणा आहुः" इत्युल्लिख्य श्लोकोऽयमुद्धृतो वर्तते न्यायबिन्दुटीकाटिप्पण्याम्-पृ० २० पं० २-४ । न्यायमञ्ज० आ० ९ पृ० ५३२ पं० ११ । ४-चनाच-आ० । ५ "सौगत उत्तरमिति"—ल० टि० । ६-क्तनी-आ० । ७-विक्तः स्व-बृ० । ८-ति अत्रा-बृ० वा० बा० । ९ चार्थे स-वा० बा० । चास-बृ० । १०-यनं द्व-आ० हा० वि० विना । ११-दृग् वि-बृ० ।

प्रवर्तते न वाचि, तत्र चावर्त्तमाना कथं तद्विशिष्टं स्वविषयमुद्द्योतयितुं समर्था, न हि विशेषणं भिन्नमनवभासयन्ती तद्विशिष्टतया विशेष्यमवभासयति दण्डाग्रहण इव दण्डिनम् । न च यद्यपि वाग् दृशि न प्रतिभाति तथापि स्मृतौ प्रतिभातीति विशेषणमर्थस्य भिन्नज्ञानग्राह्यस्यापि विशेषणत्वोपपत्तेरिति वक्तुं शक्यम् संविदन्तरप्रतीतस्य स्वातन्त्र्येण प्रतिभासनात् तदनन्तरप्रतीयमानविशेषणत्वानुपपत्तिः[1]। यतो नैककालमनेककालं वा शब्दस्वरूपं स्वतन्त्रतया स्वग्राहिणि ज्ञाने प्रतिभासमानं विशेषणभावं प्रतिपद्यते सर्वत्र तस्य[2] तद्भावापत्तेः । न च शब्दानुरक्तरूपाद्यध्यक्षमतिरुदेतीति शब्दस्य विशेषणत्वं रूपादेश्च विशेष्यत्वम् यतो यदि तदनुरक्तता तत्प्रतिभासस्तदा शब्दस्याक्षबुद्धावप्रतिभासनान्न तदनुरक्तता । अथ रूपादिदेशे शब्दवेदनं तदनुरक्तता, तदपि न युक्तम्; निरस्तशब्दसन्निधीनां रूपादीनां स्वज्ञाने प्रतिभासनात् । अथ तत्कालशब्दप्रतिभासस्तदनुरागः, न; नयनदृशि रूपादिव्यतिरिक्तशब्दप्रतिभासाभावात् यतो न तुल्यकालमपि शब्दं लोचनसंविद् अवभासयितुं क्षमा तस्य तदविषयत्वात्[3]। अथ शब्दानुषक्तरूपस्मृतिदर्शनात् तद्रूपस्य तस्य प्राग्दर्शनमुपेयते तर्हि शब्दविविक्तमर्थरूपं प्रत्यक्षमधिगच्छति वाचकं तु स्मृतिरुल्लिखतीति न तत्संस्पर्शमध्यक्षमनुभवतीति निर्विकल्पकमासक्तम् अन्यथा शब्दस्मरणासंभवाद्ध्यक्षाभावो भवेत्[4]। तथाहि-यदि वाक्संस्पृष्टस्य सकलार्थस्य संवेदनं तथासत्यर्थदर्शने तद्वाक्स्मृतिस्तत्र च तत्परिकरितार्थदर्शनम् न च कश्चिद्वाक्संस्पर्शविकलमर्थमवगच्छति तमन्तरेण च न वाक्स्मृतिः तां चान्तरेण न वागनुषक्तार्थदर्शनमित्यर्थदर्शनाभावो भवेत् ततोऽर्थदर्शनान्निर्विकल्पकमेव तदभ्युपगन्तव्यम्। यदि च वाक्संसृष्टस्यैवार्थस्य ग्रहणं तदाऽगृहीतसंकेतस्य बालकस्य तद्ग्रहणं न भवेत् । अथ तस्यापि 'किम्'इति वागुल्लेखोऽस्तीति तदनुषक्ततद्ग्रहणं सविकल्पकम् नैतद् युक्तम्; तस्य 'किमपि'इति सामान्यस्यैव ग्रहणं भवेन्न विशेषस्येति न विशदावभास्यर्थसंवेदनसंभवः । यदा चाश्वं विकल्पयतो गोदर्शनं परिणमति तदा तद्वागपरिच्छेदात् कथमवबोधस्य शाश्वती वाग्रूपता? न हि तदा गोशब्दोल्लेखस्तदवबोधस्य संभवति तत्संवेदनाभावात् युगपद्विकल्पद्वयानुत्पत्तेश्च । ततोऽध्यक्षमर्थसाक्षात्करणान्न वाग्योजना-

१-पत्तेः। आ० हा० वि० । २-स्य सद्भा-बृ० । ३ "शब्दस्य लोचनसंविदविषयत्वात्"—बृ० टि० । ४-मर्थस्वरू-बृ० वा० बा० भां० मां० । ५ "शब्द–" बृ० टि० । ६-संसृष्ट-बृ० वा० बा० आ० । ७-कश्चिद् वा-बृ० । कश्चिदर्वा- आ० । ८-संस्पृष्ट-आ० । ९-हणे स-बृ० विना । १०-क्षात्का-वा० बा० भां० मां० विना ।

'न वाक्संस्पर्शरहिता काचित् प्रतिपत्तिरस्ति शब्दानुविद्धायास्तस्याः प्रतिभासनात्' इति वैयाकरणसिद्धान्तस्य निरसनं तत्त्वार्थश्लोकवार्तिकेऽनेन प्रकारेण दृश्यते—

"तथासति यदाह परः—

"वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती । न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी" ॥

इति तदपास्तं भवति तया विनैव आभिनिबोधिकस्य प्रकाशनादित्यावेदयति

वाग्रूपता ततो न स्याद् योक्ता प्रत्यवमर्शिनी । मतिज्ञानं प्रकाशेत सदा तद्धि तया विना ॥
वैखरीं मध्यमां वाचं विनाक्षज्ञानमात्मनः । स्वसंवेदनमिष्टं नोऽन्योन्याश्रयणमन्यथा ॥
पश्यन्त्या तु विना नैतद्व्यवसायात्मवेदनम् । युक्तं न चात्र संभाव्यः प्रोक्तोऽन्योन्यसमाश्रयः ॥
व्यापिन्या सूक्ष्मया वाचा व्याप्तं सर्वं च वेदनम् । तया विना हि पश्यन्ती विकल्पात्मा कुतः पुनः ॥
मध्यमा तदभावे क्व निर्बीजा वैखरी रवात् । ततः सा शाश्वती सर्ववेदनेषु प्रकाशते ॥
इति येऽपि समादध्युस्तेऽप्यनालोचितोक्तयः । शब्दब्रह्मणि निर्भागे तथा वक्तुमशक्तितः ॥
न ह्यवस्था च श्रोत्रस्य सत्याद्वैतप्रसङ्गतः । न च तासामविद्यात्वं तत्त्वासिद्धौ प्रसिध्यति ॥
ब्रह्मणो न व्यवस्थानमक्षज्ञानात् कुतश्चन । स्वप्नादाविव मिथ्यात्वात् तस्य साकल्यतः स्वयम् ॥
नानुमानात् ततोऽर्थानां प्रतीतेर्दुर्लभत्वतः । परप्रसिद्धिरप्यस्य प्रसिद्धा नाप्रमाणिका ॥
स्वतःसंवेदनात् सिद्धिः क्षणिकानंशवित्तिवत् । न परब्रह्मणो नापि सा युक्ता साधनाद् विना ॥
आगमादेव तत्सिद्धौ भेदसिद्धिस्तथा न किम् । निर्बाधादेव चेत्तव्यं न प्रमाणान्तराद्दते ॥
तदागमस्य निश्चेतुं शक्यं जातु परीक्षकैः । न चागमस्ततो भिन्नः समस्ति परमार्थतः ॥
तद्विवर्तस्त्वविद्यात्मा तस्य प्रज्ञापकः कथम् । न चाविनिश्चिते तत्त्वे फेनबुद्बुदवद् भिदा ॥
मायेयं बत दुष्पारा विपश्चिदिति पश्यति । येनाविद्या विनिर्णीता विद्यां गमयति ध्रुवम् ॥
भ्रान्तेर्बीजाविनाभावादनुमात्रैवमागता । ततो नैव परं ब्रह्मास्त्यनादिनिधनात्मकम् ॥

मुपस्पृशतीति निराकृतम् "वाग्रूपता चेद् व्युत्क्रामेत्" इत्यादि लोचनाद्यध्यक्षे वाक्संस्पर्शायोगात् यतः श्रोत्रग्राह्यां वैखरीं वाचं न तावन्नयनजसंवेदनमुपस्पृशति तस्यास्तदविषयत्वात्। नापि स्मृति-

विवर्तेतार्थभावेन प्रक्रिया जगतो यतः" ।—१,२० पृ० २४० श्लो० ८९-१०४ ।

१ पृ० ४८९ पं० ५ । २-ध्यक्ष वा-बृ० ।

३ वैखर्यादयस्तिस्रो वाचो वाक्यपदीये इत्थं दर्शिताः—

"वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् । अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥"

का० १ श्लो० १४४ पृ० ५५ ।

तासामेव सूक्ष्माख्यवाग्भेदसहितानां वाचां लक्षणानि प्रमेयकमलमार्तण्डे प्राचीनपद्यैर्वर्णितानि । स्याद्वादरत्नाकरे वाक्यपदीयटीकायां च तान्येव विस्तरतो व्यावर्णितानि, तत्संवादकप्राचीनपद्यानां व्याख्यापि तत्र स्फुटं कृता । तद्यथा क्रमशः—

"स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते । अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ॥
स्वरूपज्योतिरेवान्तःसूक्ष्मा वागनपायिनी । तया व्याप्तं जगत् सर्वं ततः शब्दात्मकं जगत् ॥

इत्यादि"—पृ० १२ प्र० पं० ९ ।

"सा चेयं वाक् त्रैविध्येन व्यवस्थिता वैखरी मध्यमा पश्यन्तीति । तत्र येयं स्थान–करण–प्रयत्नक्रमव्यज्यमाना अकारादिवर्णसमुदायात्मिका वाक् सा वैखरीत्युच्यते । तदुक्तम्—

स्थानेषु विधृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥

अस्यार्थः—स्थानेष्विति ताल्वादिस्थानेषु, वायौ प्राणसंज्ञे, विधृते अभिघातार्थं निरुद्धे सति कृतवर्णपरिग्रहेति हेतुद्वारेण विशेषणम् ततः ककारादिवर्णरूपस्वीकारात् वैखरीसंज्ञा वक्तृभिर्विशिष्टायां खरावस्थायां स्पष्टरूपायां भवा वैखरीति निरुक्तेः वाक् प्रयोक्तॄणां संबन्धिनी, यथा तेषां स्थानेषु तस्याश्च प्राणवृत्तिरेव निबन्धनं तत्रैव निबद्धा सा तन्मयत्वादिति ।

या पुनरन्तःसङ्कल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता वाक् सा मध्यमेत्युच्यते । तदुक्तम्—

केवलं बुद्ध्युपादानात् क्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥

अस्यार्थः—स्थूलां प्राणवृत्तिं हेतुत्वेन वैखरीवदनपेक्ष्य केवलं बुद्धिरेवोपादानं हेतुर्यस्याः सा प्राणस्थत्वात् क्रमरूपमनुपतति अस्याश्च मनोभूमावववस्थानम्, वैखरी–पश्यन्त्योर्मध्ये भवाद् मध्यमा वागिति ।

या तु ग्राह्यभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् सा पश्यन्तीत्युच्यते । तदुक्तम्—

अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तःसूक्ष्मा वागनपायिनी ॥

अस्यार्थः—पश्यन्ती यस्यां वाच्यवाचकयोर्विभागेनावभासो नास्ति सर्वतश्च सजातीयविजातीयापेक्षया संहृतो वाच्यानां वाचकानां च क्रमो देशकालकृतो यत्र क्रमविवर्तशक्तिषु विद्यते । स्वरूपज्योतिः स्वप्रकाशा वेद्यते वेदकभेदातिक्रमात् सूक्ष्मा दुर्लक्ष्या अनपायिनी कालभेदास्पर्शादिति"—१-७-पृ० ४३ द्वि० पं० ३-१८ ।

"यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी श्लिष्टव्यक्तवर्णसमुच्चारणप्रसिद्धसाधुभावा भ्रष्टसंस्कारा च दुन्दुभि–वेणु–वीणादिशब्दरूपा चेत्यपरिमितभेदा । मध्यमा त्वन्तःसन्निवेशिनी परिगृहीतक्रमेव बुद्धिमात्रोपादाना सूक्ष्मा प्राणवृत्त्यनुगता प्रतिसंहृतक्रमा सत्यप्यभेदे समाविष्टक्रमशक्तिः । पश्यन्ती तु सा चलाचलाप्रतिबद्धसमाधाना सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा च प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमितभेदा । तत्र व्यावहारिकीषु सर्वासु वागवस्थासु व्यवस्थितसाध्वसाधुप्रविभागा पुरुषसंस्कारहेतुः परन्तु पश्यन्त्या रूपमनपभ्रंशमसंकीर्णं लोकव्यवहारातीतम् । तस्या एव वाचो व्याकरणेन साधुत्वज्ञानलभ्येन शब्दपूर्वेण योगेनाधिगम इत्येकेषामागमः । तदुक्तमितिहासे आश्वमेधिके पर्वणि ब्राह्मणगीतासु—(महाभा० पर्व १४ अनुगीतापर्व २ अ० २२ श्लो० २०-२३ ।)

गौरिव प्रचरत्येका रसमुत्तमशालिनी । दिव्यादिव्येन रूपेण भारती गौः शुचिस्मिता ॥
एतयोरन्तरं पश्य सूक्ष्मयोः स्पन्दमानयोः । प्राणापानान्तरे नित्यमेका सर्वस्य तिष्ठति ॥
अन्या त्वपरिमाणेव विना प्राणेन वर्तते । जायते हि ततः प्राणो वाचमाप्याययन् पुनः ॥
प्राणेनाप्यायिता सैव व्यवहारनिबन्धनम् । सर्वस्योच्छ्वासमात्रेण न वाग् वदति कर्हिचित् ॥
घोषिणी जातनिर्घोषा अघोषा च प्रवर्तते । तयोरपि च घोषिण्या निर्घोषैव गरीयसी ॥ इति ।

(आश्वमेधिके पर्वणि वाक्यपदीयटीकायां च पाठान्तरसहितानीमानि पद्यानि वर्तन्ते) पुनश्चाह—

स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धनी ॥

विषयां मध्यमां तामवगमयति तामन्तरेणापि शुद्धसंविदो भावात् । संहृताशेषवर्णादिविभागा

केवलं बुद्ध्युपादानक्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥
अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तस्सैषा वागनपायिनी ॥
सैषा संकीर्यमाणाऽपि नित्यमागन्तुकैर्मलैः । अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते ॥
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते । पुरुषे षोडशकले तामाहुरमृतां कलाम् ॥

इति सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवदनाख्येयपरिमाणा तुरीयेण भागेन मनुष्येषु प्रत्यवभासते"—का० १ पृ०५६ पं० १-पृ० ५७ पं० ६ ।

"एतेन—

वाग्रूपता चेद् व्युत्क्रामेदवबोधस्य शाश्वती । न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥

इति वाक्संस्पृष्टस्यैव सकलार्थस्य संवेदनम् इति शाब्दिकमतं निरस्तम् अर्थदर्शने तद्वाक्स्मृतेस्तत्संसर्शः तत्संसर्शे च तत्संस्पृष्टार्थग्रहणमिति अन्योन्याश्रयात् अगृहीतसंकेतस्य च बालस्य वागसंसर्शेनार्थाग्रहणप्रसङ्गात् 'किम्' इति वाक्संसर्शे च सामान्यग्रहेऽपि विशेषाग्रहात् । किञ्च, वैखरीं वाचं न नायनं ज्ञानमुपस्पृशति तस्याः श्रोत्रमात्रग्राह्यत्वाभ्युपगमात् । नापि स्मृतिविषयां मध्यमाम् तामन्तरेणापि शुद्धसंविदो भावात् । संहृताशेषवर्णादिविभागा पश्यन्ती च वागेव न भवति बोधरूपत्वात् वाचश्च वर्णरूपत्वात् अतो न तद्युक्ता प्रतिपत्तिः अपि तु अविकल्पिकैवेति"—शास्त्रवा० स्याद्वादक० पृ० १५५ द्वि० पं० १०-पृ० १५६ प्र० पं० ३ ।

"उक्तं च—

वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा । द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी" ॥

—कुमारसं० स० २ श्लो० १७ टीका ।

श्रुतज्ञानभेदान् संख्यापयता विद्यानन्दिस्वामिना स्याद्वाददृष्ट्या द्रव्यभावभङ्ग्या ता एव चतस्रोऽपि वैखर्यादयो वाचो द्रव्य-पर्याय-व्यक्ति-शक्तिप्रकारतया निरूपितास्तत्त्वार्थश्लोकवार्तिके तट्टीकारूपे तत्त्वार्थश्लोकवार्तिकालङ्कारे च—

"चतुर्विधा हि वाग् वैखरी मध्यमा पश्यन्ती सूक्ष्मा चेति"—१, २० पृ० २४० पं० १९ ।

"स्याद्वादिनां पुनर्वाचो द्रव्य-भावविकल्पतः । द्वैविध्यं द्रव्यवाग् द्वेधा द्रव्यपर्यायभेदतः ॥
श्रोत्रग्राह्यात्र पर्यायरूपा सा वैखरी मता । मध्यमा च परैस्तस्याः कृतं नामान्तरं तथा ॥
द्रव्यरूपा पुनर्भावार्गणाः पुद्गलाः स्थिताः । प्रत्ययान्मनसा नापि सर्वैप्रत्ययगामिनी ॥
भाववाग् व्यक्तिरूपाऽत्र विकल्पात्मनिबन्धनम् । द्रव्यवाचोभिधा तस्याः पश्यन्तीत्यनिराकृताः ॥
वाग्विज्ञानावृतिच्छेदविशेषोपहितात्मनः । वक्तुः शक्तिः पुनः सूक्ष्मा भाववागभिधीयताम् ॥
तया विना प्रवर्तन्ते न वाचः कस्यचित् क्वचित् । सर्वज्ञस्याप्यनन्ताया ज्ञानशक्तेस्तदुद्भवः ॥"

—१,२० पृ० २४१ श्लो० १०४-१०९ ।

"ननु च श्रोत्रग्राह्या पर्यायरूपा वैखरी मध्यमा च वागुक्ता शब्दाद्वैतवादिभिः यतो नामान्तरमात्रं तस्याः स्यान्न पुनरर्थभेद इति । नापि पश्यन्ती वाग् वाचकविकल्पलक्षणा सूक्ष्मा वा वाक् शब्दज्ञानशक्तिरूपा किं तर्हि स्थानेषु उरःप्रभृतिषु विभज्यमाने विवृते वायौ कृतवर्णत्वपरिग्रहा वर्णत्वमापद्यमाना वक्तृप्राणवृत्तिहेतुका वैखरी "वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना" इति वचनात् । तथा मध्यमा केवलमेव बुद्ध्युपादाना क्रमरूपानुपातिनी वक्तृप्राणवृत्तिमतिक्रम्य प्रवर्तमाना निश्चिता "केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥" इति वचनात् । पश्यन्ती पुनरविभागा सर्वतः संहृतक्रमा प्रत्येया । सूक्ष्माऽत्र स्वरूपज्योतिरेवान्तरवभासिनी नित्यावगन्तव्या । "अविभागानु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तःसूक्ष्मा वागवभासिनी ॥" इति वचनात् । ततो न स्याद्वादिनां कल्पयितुं युक्ताश्चतस्रोऽवस्थाः श्रुतस्य वैखर्यादयस्तदनिष्टलक्षणत्वादिति केचित् । तेऽपि न प्रातीतिकोक्तयः । वैखर्या मध्यमायाश्च श्रोत्रग्राह्यत्वलक्षणानतिक्रमात् । स्थानेषु विवृतो हि वायुर्वक्तृणां प्राणवृत्तिश्च वर्णत्वं परिगृह्य वैखर्याः कारणम् । वर्णत्वपरिग्रहस्तु लक्षणम् । स च श्रोत्रग्राह्यत्वपरिणाम एव इति न किञ्चिदनिष्टम् । तथा केवला बुद्धिर्वक्तृप्राणवृत्त्यतिक्रमश्च मध्यमायाः कारणं तु (?) लक्षणं क्रमरूपानुपातित्वमेव च तत्र श्रोत्रग्रहणयोग्यत्वाविरुद्धमिति न निराक्रियते । पश्यन्त्याः सर्वतः संहृतक्रमत्वमविभागत्वं च लक्षणम् । तच्च यदि सर्वथा तदा प्रमाणविरोधः, वाच्यवाचकविकल्पकभाविभागयोस्तत्र प्रतिभासनात् कथंचित् तु संहृतक्रमत्वं विभागत्वं च तत्रेष्टमेव युगपदुपयुक्तश्रुतविकल्पानामसंभवाद् वर्णादिविभागाभावाचानुपयुक्तश्रुतविकल्पस्येति तस्याविकल्पात्मकत्वलक्षणानतिक्रम एव । सूक्ष्मायाः पुनरन्तःप्रकाशमानस्वरूपज्योतिर्लक्षणत्वं कथंचिन्नित्यत्वं च नित्योद्घाटितान्निरावरणलब्ध्यक्षरज्ञानाच्छक्तिरूपाच्च चित्सामान्यान्न विशिष्यते"—१,२० पृ० २४१ पं० २३—पृ० २४२ पं० ६ ।

पश्यन्ती वागेव न भवति बोधरूपता(पत्वात्) वर्णपदाद्यनुक्रमलक्षणत्वाद् वाचः न तद्युक्ता प्रतिपत्तिर्विकल्पिका अपि तु निर्विकल्पिकैव श्रुतिस्मृतिविषयवर्णपदानुक्रमोल्लेखशून्यत्वात् । यदि चाविकल्पकं संवेदनं किञ्चिन्नाभ्युपेयते तदा वाक्संस्मरणासंभवाद् विकल्पस्याप्यसंभव एव स्यात् । अथ प्रथमं संवेदनं तदा वाचकस्मृतेरभावादविकल्पकम् तज्जनितवाचकस्मृतिसहकारीन्द्रियप्रभवं त्वभिधानानुरक्तार्थावभासि द्वितीयं सविकल्पकम्, नैतदस्ति; यतः स्मृतिसचिवमपि लोचनं न वाचके तत्संकेतसमयभाविनि प्रवृत्तिमदिति कथं तदविषये स्मृतिदर्शितेऽपि वाचकानुषक्तेऽध्यक्षप्रवृत्तिः यतो न गन्धस्मृतिसहकारिलोचनमविषये परिमलादौ संवेदनं जनयद् दृष्टम् किन्तु सन्निहित एव मलयजरूपे दर्शनं तु तत्सहचारिणि परिमलादौ स्मृतिं जनयतीति नं तत् तद्रूपसंविदो रूपं हेतुविषयभेदात् तथात्रापि नयनसंवेदनं रूपमात्रसाक्षात्कारि भिन्नम् तद्दर्शनोपजनितं तु विकल्पज्ञानं वचनँपरीतार्थाध्यवसायस्वभावं भिन्नमेवेत्यविकल्पकमध्यक्षं सिद्धम् । १०

[नैयायिकादिसम्मतं केवलसविकल्पकवादमुपन्यस्य निर्विकल्पकवादिना तस्यापि दूषणम्]

स्यादेतत् यद्यपिं वाचो नयनजप्रतिपत्त्यविषयत्वान्न तद्विशिष्टार्थदर्शनमध्यक्षं तथापि द्रव्यादेर्नयनादिविषयत्वात् तद्विशिष्टार्थाध्यक्षप्रतिपत्तिः सविकल्पिका भविष्यति । तथाहि–नियतदेशादितया वस्तु परिदृश्यमानं व्यवहारोपयोगि अन्यथा तँदसंभवाद् देशादिसंसर्गरहितस्य च तस्य कदाचिदप्यननुभवात् यच्च देशादिविशिष्टतया नामोल्लेखाभावेऽपि वस्तु संगृह्णाति तत् सविकल्पकम् विशेषण-१५ विशेष्यभावेन हि प्रतीतिः कल्पना देशादयश्च नीलादिवद् तदवच्छेदका दर्शने प्रतिभान्तीति न तत्र शब्दसंयोजनापक्षभावी दोषः ।

एतदप्यसत्, यतोऽध्यक्षं पुरोवर्ति नीलादिकमवलोकयितुं समर्थम् न तदवष्टब्धं भूतलम् तदनवभासे च कथं तद्विशिष्टमर्थं तदवगन्तुं प्रभुः(भु)? यदपि तदनवष्टब्धं तत्र प्रतिभाति तदपि न तद्विशेषणमिति शुद्धस्यैव सकलस्य प्रतिभासनान्न विशेषणविशेष्यभावग्रहणम् । तथाहि— २० दर्शने रूपमालोकश्च स्वस्वरूपव्यवस्थितं द्वितयमाभाति न तद्व्यतिरिक्तं काल-दिगादिकमिति कथमप्रतिभासमानं तद्विशेषणं भवति सर्वत्र तद्भावप्रसक्तेः; तेन 'देशादिभिर्विशिष्टस्य सर्वस्यार्थस्य संवेदनम्' ९१इति निरस्तम् विशेषणभूतस्य कस्यचिदप्रतिभासनात् । यत्रापि स्थिराधेयदर्शनादधस्तादाधारमनुसन्धिन्वन्ति तत्रापि नानुमानावसेयमधिकरणमिन्द्रियविज्ञानविषयविशेषणम् नापि तदवसायोऽक्षबुद्धेः स्वरूपमिति न विशेषणविशिष्टप्रतिपत्तिरक्षबुद्धिः । किञ्च, २५ समानकालयोर्वा भावयोर्विशेषणविशेष्यभावम् भिन्नकालयोर्वा अक्षबुद्धिरवभासयति? न तावद् भिन्नकालयोः तयोर्युगपत् तत्राप्रतिभासनात्–यदा हि विशेषणं खादिकं पूर्वमवभाति न तदा खाम्यादिकं विशेष्यम् यदापि चोत्तरकालं तदवभाति न तदा खादिकम् असन्निधानादिति न ९२तद्विशिष्टतयाऽध्यक्षेण तस्य ग्रहणम् । तथाहि–चक्षुर्व्यापारे पुरोव्यवस्थितश्चैत्र एव परिस्फुटमाभातीति तन्मात्रग्रहणान्न तद्विशिष्टत्वप्रतीतिः । न चासन्निहितमपि विशेषणं स्मरणसन्निधापितमक्षबुद्धिरधि- ३० गच्छति स्मरणात् प्रागिव तदुत्तरकालमपि विशेषणासन्निधेस्तुल्यत्वान्न तत्र ९३तँदाप्यध्यक्षबुद्धिप्रवृत्तिरित्यपास्तविशेषणस्यार्थस्य साक्षात्करणं युक्तियुक्तम् । नापि तुल्यकालयोर्भावयोर्विशेषणविशेष्यभावमध्यक्षमधिगन्तुं समर्थम् तस्यानवस्थितेः । तथाहि–अविशिष्टेऽपि दण्डपुरुषसंयोगे कश्चिद् दण्डविशिष्टतया पुरुषं 'दण्डी'इति प्रतिपद्यते अपरस्तु तत्रैव पुरुषविशिष्टतया 'दण्डोऽस्य'इति प्रतिपद्यते असङ्केतितविशेषणविशेष्यभावस्तु 'दण्ड-पुरुषौ' इति स्वतन्त्रं द्वयमधिगच्छति वास्तवे तु तस्मिन् ३५

१–**धरूप । ता व**–वा० बा० । "संहृताशेषवर्णादिविभागा तु पश्यन्ती सूक्ष्मा चान्तर्ज्योतीरूपा वागेव न भवति अनयोरर्थात्मदर्शनलक्षणत्वात्" । संहृत–"नष्ट–"।–वर्णादि–"पद–वाक्य–"।–विभागा–"अर्थदर्शनम्" ।–पश्यन्ती "अर्थदर्शनलक्षणा" ।–ज्योतीरूपा "आत्मदर्शनलक्षणा"—प्रमेयक० पृ० १२ प्र० पं० ८ तथा टि० २७, २८, २९, ३०, ३१ । २ "पश्यन्तीवाचा युक्ता"– बृ० टि० । ३–**कल्पकै**–बृ० । ४ **यदि वावि**–बृ० विना । ५–**चके संकेत**–वा० बा० भां० मां० ।–**चके तत्सम**– बृ० । ६ **न तद्रू**–बृ० वा० बा० हा० वि० विना । ७–**नव्यप**–आ० हा० वि० । ८ "एवं शब्दब्रह्मवादिपूर्वपक्षप्रतिक्षेपः कृतः । संप्रति नैयायिकान् प्रत्याह"—बृ० टि० । ९–**पि न वा**–वा० बा० विना । १० "व्यवहार–" बृ० टि० । ११ प्र० पृ० पं० १३ । १२ "स्वादि–" बृ० टि० । १३ "उत्तरकालेऽपि"–बृ० टि० ।

योग्यदेशस्थप्रतिपत्तॄणां दण्ड-पुरुषरूपयोरिव तुल्याकारतयाऽवभासो भवेत् न चैवम् । तेन दण्ड-पुरुषस्वरूपमेव स्वतन्त्रमध्यक्षावसेयम् विशेषणविशेष्यभावस्तु कल्पनाविरचित एव । येन हि दण्डोपकृतपुरुषजनितार्थक्रिया प्रागुपलब्धा तदर्थी च स तत्र विशेषणत्वेन दण्डं विशेष्यत्वेन च पुरुषं प्रतिपद्यते प्रधानत्वात् येन च पुरुषोपकृतदण्डेन फलमभ्युपेतं स तत्र दण्डं प्राधान्याद् विशेष्यमध्यवस्यति अपरिगतफलोपकारस्य प्रथमदर्शने स्वरूपमात्रनिर्भासात् ततोऽन्वय-व्यतिरेकाभ्यामवगतसामर्थ्यं द्वयमासाद्य विशिष्टत्वप्रतिपत्तिः प्रागवगते च सामर्थ्ये नेन्द्रियस्य व्यापारः तस्यासन्निहितत्वात् । न च व्यापाराविषये तत् प्रतिपत्तिजननसमर्थम् । न च पुरःसन्निहितेऽर्थे प्रवर्तमानमिन्द्रियं तत्रापि प्रतिपत्तिमुपजनयितुं समर्थम् वर्त्तमानकालालीढनीलादिदर्शनप्रवृत्तस्य चिरातीतभावपरम्परादर्शनप्रवृत्तिप्रसक्तेः सकलातीतभावविषयस्मृतेरध्यक्षता भवेत् तथा स्वगोचरचारिणी स्मृतिरपि स्फुटमर्थं वर्तमानसमयमुद्भासयिष्यतीति सर्वाक्षमतिः स्मृतिर्भवेत् । न च वर्त्तमानमर्थमध्यक्षमेवोद्भासयतीति किं तत्र स्मृत्या? यत्र हि दर्शनानवतारस्तत्र स्मृतिपरिकल्पना फलवती स्पष्टदर्शनावतारे तु वर्तमानसमयभाविनि रूपादौ स्मृतिप्रवृत्तिरसंभविनी विफला चेति न तत्परिकल्पना; नन्वेवमतीते विशेषणादौ स्मृतिरेव प्रवर्तिष्यत इति किं तत्र विशदसंविदवतारेण? सा हि सन्निहितमेवार्थमवतरति न च तदा विशेषणादयः सन्निहितास्तानवलम्बमाना निरालम्बनैव भवेत् ततो विशुद्धरूपमात्रप्रतिभासाद्ध्यक्षसंविन्निरस्तविशेषणमर्थमवगमयति विशेषणयोजना तु स्मरणादुपजायमाना अपास्ताक्षार्थसन्निधिर्मानसी । न च स्पष्टप्रतिभासाद् वर्तमानार्थग्राहिणीति वक्तव्यम् तामन्तरेणापि स्फुटमर्थप्रतिभासात् । न च स्मृतिमन्तरेणापि यदि विशदतनुरर्थात्मा प्रतिभातीति न तस्य ग्राहिका स्मृतिस्तर्ह्यक्षव्यापारसद्भावे सुखमन्तरेणापि विषयावगतिरस्तीति सुखमपि विषयग्राहि न स्यात् यतो निरस्तबहिरर्थसन्निधयो भावनाविभूततनवः सुखादयो नार्थावेदकाः स्वग्रहणपर्यवसितस्वरूपत्वात् तेषाम् अक्षान्वयव्यतिरेकानुविधायिन्यो विशदसंविद एव बहिरर्थावभासिकाः पृथगवसीयन्ते सुखादिभ्यस्ता एव तदवभासिकास्तद्वद् विकल्पोऽपि नार्थसाक्षात्करणस्वभाव इति ।

ननु यदि न पुरःस्थितार्थग्राही विकल्पः कथं ततस्तत्र प्रवृत्तिर्भवेत्? यदेव विशेषणादिकं प्राक् तेनानुभूतं तत्रैव ततः प्रवृत्तिर्भवेत् नहि स्वात्मानमनारूढेऽर्थे प्रवृत्तिविधायि विज्ञानमुपलब्धम् अन्यथा शुक्लमर्थमवतरन्ती संविन्नीलार्थे प्रवर्त्तिका भवेत् । न च निर्विकल्पकमेव संवेदनं वर्तमानेऽर्थे प्रवृत्तिविधायि, विकल्पमन्तरेणापि सर्वत्र प्रवृत्तिप्रसक्तेः । न च सुखसाधनत्वनिश्चयमन्तरेण पुरःप्रकाशनमात्रेण कश्चित् प्रवर्तत इति विकल्प एव पुंरोव्यवस्थितार्थग्राही प्रवर्त्तकत्वात् अक्षानुसारितया च स एवाध्यक्षमिति युक्तं पूर्वदृष्ट-नामादिविशेषणग्राही निश्चय इति, एतदप्यसङ्गतम्; धूमग्राह्यध्यक्षव्यतिरिक्ताऽस्पष्टावभासाश्यनुमानाकारस्येव विशददर्शनभूतोऽर्थाकाराद् व्यतिरिक्तविकल्पमत्युल्लिख्यमानाऽस्पष्टाकारस्य तदाऽननुभवात् । ततो बहिरर्थग्राहिण्यो विकल्पमतयोऽभ्युपगन्तव्या न पुनस्तदा विकल्पमतिः पूर्वदृष्टविशेषणमात्राध्यवसायिनी अपरा पुरोवर्त्तिविशदार्थावभासाध्यक्षसंविदपरैव भेदप्रतिभासाभावादिति, असदेतत्; यतो यदि नाम पुरोवर्त्तिनमर्थं विकल्पमतिरुद्द्योतयितुं प्रभवति तथापि न तत्र प्रवृत्तिः प्रवृत्तिविरचनाचतुरार्थक्रियासमर्थरूपानवभासनात् तदवभासने ह्यर्थक्रियार्थिनां प्रवृत्तिर्युक्ता । न चार्थक्रियासम्बन्धं वर्तमानसमयसम्बन्धिन्यर्थे ताः प्रदर्शयितुं समर्थाः तदानीं तस्या असन्निधानात् असन्निधौ च न तत्र सामर्थ्यावगतिः पदार्थस्वरूपमात्रावसायात् । न च तत्स्वरूपमात्रावसायादेव सामर्थ्यावगतिः अतिप्रसङ्गात् । ततः पुरोवर्त्तिनि प्रवर्तमानोऽपि न विकल्पः प्रवर्तकः । न च यतः पूर्वमर्थक्रिया प्रभवन्ती दृष्टा संप्रत्यपि तदर्थक्रियार्थितया तदध्यवसायात् प्रवृत्तिर्भविष्यति, यतो येन प्रागर्थक्रिया निर्वर्तिता तदेवेदं पुरः प्रतिभातीति तन्निर्भासाभावे कुतः सिध्यति? न च कल्पनैव तदध्यवसायिनी तन्निर्भासः यतो न कल्पनाबुद्ध्यध्यवसितं तत्त्वं परमार्थसद्व्यवहारमवतरति प्रत्यक्षप्रतिभातस्यैव तद्व्यवहारावतारात् तदभावे तद-

१-ददर्शनाव-वा० बा० भां० मां० । २-त्मा न प्र-भां० मां० । ३ पुरोऽवस्थि-बृ० वा० बा० भां० मां० । ४-स्वन्धं प्रव-वा० बा० ।-स्वन्धव-बृ० आ० हा० वि० । ५ "अर्थक्रियासमर्थवस्तु"-बृ० टि० । ६-बुद्ध्यव-बृ० वा० बा० विना । ७-हारात्तद-आ० वि० ।

भावात् । न चाध्यक्षबुद्धेस्तत्त्वावसायः प्रथमाक्षसन्निपातवेलायामेव नीलादिरूपतावत् तन्निर्भासोदयप्रसक्तेः । अतो न कल्पनाध्यक्षविषयस्तत्त्वम् आद्यदर्शनानधिगतत्वात् ।

अथ सहकारिवैकल्याद् यद्यप्याद्यदर्शनावभासि न तत्त्वं तथापि न तन्नास्ति न हि तीक्ष्णांशुकरनिकरोपहतदृशां गर्भगृहाद्यनुप्रवेशानन्तरमप्रतिभासमाना अपि घटादयो भावाः स्वस्थीभूतनेत्राणां न प्रतिभान्ति, न च प्रागप्रतिभासनान्न सन्ति यथा च सहकारिवशात् पूर्वमप्रतिभाता अपि पश्चात् प्रतिभान्ति तथात्राप्याद्यदर्शनं शुद्धार्थावभासि यद्यपि तत्त्वं नानुभवति स्मरणसहायाक्षप्रभवा तु प्रत्यभिज्ञा तदनु भविष्यतीति न तत्त्वस्यासत्त्वम् नाप्यक्षान्वयव्यतिरेकानुविधायिनी प्रत्यभिज्ञा न प्रत्यक्षमिति, अत्रोच्यते; यद्यक्षप्रभवा संविदाद्या न तत्त्वमवभासयति पश्चादपि तदविषयत्वान्नावभासयेत् यथा ह्यक्षमविषयत्वान्नैकत्वे प्रतिपत्तिं विदधाति तथा स्मरणसहकृतमपि न तत्र तां विधास्यति अविषयत्वाविशेषात् न हि परिमलस्मरणसहायमपि लोचनं गन्धे प्रतिपत्तिकृदुपलब्धमिति न तत्त्वग्रहणमध्यक्षात् । किञ्च, किं कुर्वाणा स्मृतिरिन्द्रियस्य सहकारित्वं प्रतिपद्यते? पूर्वापरस्य ढौकनमिति चेत्; ननु विनष्टेऽप्यर्थे स्मृतिरुदयन्ती दृष्टेति कथं तत्सन्निधापिते पौर्वापर्ये प्रवर्तमानाध्यक्षधीः सत्यार्था भवेत्? अथ यदुपरतं वस्तु तद्ग्राहिणी बुद्धिर्न सत्यार्थग्राहिणीति युक्तम् अनुपरतं त्वर्थमवगच्छन्ती कथं सा न सत्यार्था? अयुक्तमेतत्; यतः स्मर्यमाणस्यार्थस्यानुपरतिः कुतोऽवगता? न स्मरणात् व्युपरतेऽपि स्मृतिप्रवृत्तेरित्युक्तत्वात् । न च स्मरणोपनीतपौर्वापर्यस्य दर्शने प्रतिभासनात् तदप्रच्युतिः इतरेतराश्रयदोषप्रसक्तेः । तथाहि-स्मर्यमाणस्यार्थस्यानस्तमयसिद्धेस्तदुपनीते तत्र दर्शनप्रवृत्तिः सिद्ध्यति तत्सिद्धौ च स्मरणोपनीतस्यानस्तमयसिद्धिरिति कथं नेतरेतराश्रयत्वम्? अथ स्मृतिः संप्रति प्रतिभासविषयादर्थाद् भिन्नं विषयमध्यवस्यन्ती निरालम्बना स्यात् प्रतिभासविषयं तमेवार्थमुल्लिखन्ती तु कथमसदर्थविषया? न; दर्शनगृहीतमेवार्थमुल्लिखतीत्यत्र प्रमाणाभावान्न स्मरणोपनीतैकत्वावभासिन्यध्यक्षमतिः सत्यार्थग्राहिणी सिद्धा । न च पूर्वदर्शनमेव पूर्वरूपसङ्गतमर्थमनुभवदेकत्वे प्रमाणम् यतो यदि पूर्वरूपतामर्थस्याऽऽद्यदर्शनमेवावभासयति तथासति पूर्वापरैकत्वं तदेवावगमयिष्यतीति तत्र स्मृतिः प्रवर्तमाना व्यर्था । न च तदपि पूर्वरूपतां तस्यावभासयितुं क्षमम् तस्य सन्निहितमात्रविषयत्वात् पूर्वरूपता हि पूर्वदेश-काल-दशासम्बन्धिता पूर्वदेशादीनां च तद्दर्शने अप्रतिभासनात् न तत्संस्पर्शिरूपप्रतिभासस्तत्र संभवी नहि तदप्रतिभासे तत्सम्बन्धिपदार्थरूपप्रतिभासः अन्यथा नीलताऽप्रतिभासेऽपि पीते नीलसम्बन्धिताऽवगतिर्भवेत् । तन्नैकत्वग्राहिण्यध्यक्षमतिः । यच्च 'दृष्टता प्रत्यक्षग्राह्या' इति परैरुच्यते तत्र दृष्टता यदि तादृशि प्रतिभातता तदा वर्त्तमानतैव । अथ पूर्वदृशि प्रतिभातता तदा पूर्वदृशोऽप्रतिभासने कथं तत्प्रतिभाततावभासः संप्रति संवेदने? तत्र हि स्वदृष्टतया सन्निहितं रूपमाभातीति सैव तत्र युक्ता पूर्वदर्शनं तु प्रत्यस्तमितमिति तदृष्टतापि व्युपरतैवेति कथं सा वर्तमानदृशि प्रतिभासेत? तदभ्युपगमे वा तादृशो निरालम्बनत्वप्रसक्तिः । न च पूर्वदृश्यमानता तत्र व्युपरता दृष्टता तु तदैवोत्पन्नेति कथमसती येन तां प्रतियती प्रत्यक्षमतिर्निरालम्बना भवेत्? यतो यदि दृष्टता तत्र सन्निहिता भवेत् तदा प्रथममागतो नीलादिरूपतामिव तामप्यधिगच्छेत् न चाधिगच्छतीति ज्ञानस्वभावोऽसाधारणतयाऽसौ नार्थस्वरूपमिति कुतोऽध्यक्षावसेया? तथाहि-पूर्वदर्शनमनुस्मरन्नेव पूर्वदृष्टतां व्यवहारी तत्राध्यारोपयति विस्मरणे तदनध्यवसायात् यच्च स्मृतिरध्यवस्यति स्वरूपं न तद्दर्शनपथोपयुक्तम् आकारभेदात् । न च तद्दर्शन-स्मरणे एकं विषयं बिभृतः 'पूर्वदृष्टं पश्यामि' इत्यध्यवसायात् । यतः किं स्मर्यमाणं दृश्यमानतया रूपं प्रतीयते, आहोस्विद् दृश्यमानं स्मर्यमाणतयेति विकल्पद्वयम् । तत्र यद्याद्यः पक्षस्तथासति स्मर्यमाणं परिस्फुटतया रूपमाभातीति कथं तस्य परोक्षता? अथ द्वितीयस्तत्रापि दृश्यमानं स्मर्यमाणेन रूपेणावभातीति सर्वं परोक्षं भवेदिति न काचिदध्यक्षमतिः सत्यार्था स्यात् । अतोऽक्षधीर्वर्तमानमेव रूपं प्रत्येति स्मृतिरपि तदसंस्पर्शि परोक्षं रूपमिति न तयोरैक्यम् प्रतिभासभेदस्य सर्वत्र भेदकत्वात् तस्य च विशदाविशदरूपतयावभासमानयोर्दृश्य-स्मर्यमाणयोः सद्भावात् कथं न भेदः?

१ च पूर्वसह-भां० मां० । २-धानेपि ते बृ० वा० बा० विना । ३-स्यानु-बृ० । ४-गमे त-बृ० । ५-रणे[२] ए-'णे' इत्यस्य शिरसि न्यस्तोऽयं द्विर्लसंख्यासूचकोऽङ्को द्विवचनख्यापनाय प्रतौ निर्दिष्टो भाति ।

किञ्च, यदि शुद्धमेव दर्शनं स्मृतिनिरपेक्षं पूर्वरूपताग्राहि; नन्वेवं भाविरूपताग्राहि प्रथमदर्शनं किं नोपेयते न हि भाविभूतयोरसन्निहितत्वे विशेषः येनैकत्राध्यक्षवृत्तिरपरत्र नेति भवेत्? न च 'पूर्वदृष्टं पश्यामि' इति व्यवसायात् पूर्वरूपे एव दर्शनव्यापारः 'पूर्वमेवेदं मया दृष्टम्' इत्यध्यवसायाद् भाविरूपेऽपि दर्शनव्यापारप्रसक्तेः। अतोऽपाकृतम्–"इदानींतनमस्तित्वं नहि पूर्वधिया गतम्" इति। न च पूर्वदृशा तदा भाविकालताया असन्निधानादग्रहणम् संप्रति दर्शनकाले पूर्वरूपताया अप्यसन्निधेस्ततोऽग्रहणप्रसक्तेः। यदि पुनर्भाविरूपतामप्यध्यक्षमनुभवति 'पूर्वमेवेदं मया दृष्टम्' इति व्यवहृतिदर्शनात् तर्हि प्रथमसंवेदनमेव मरणावधिरूपपरम्परामधिगच्छतीति तदैव मृतो भवेत्। न च मृतिसद्भावे मृतो भवत्युत्पत्तिसमये तु नासाविति कुतोऽयं दोषः यतो यदि तदासौ[1] नास्ति कथमसती सा[2] दर्शने प्रतिभाति? तदप्रतिभासने तु कथं भाविरूपपरिगतो भावोऽवभातो भवेत्[3]? यदेव तत्र वर्त्तमानं रूपमाभाति तदेवाध्यक्षमस्तु न भावि यदि तु तदपि तदाध्यक्षं तदाद्याध्यक्ष एव मृत्युपाधेः सकलविषयस्य प्रतिभातस्यास्तमयात् तद्विषया[4] तदुत्तरकालभाविनी सर्वा मतिर्निर्विषया भवेत्। किञ्च, भावि–भूतयोरध्यक्षविषयत्वे भिन्नमपि तदध्यक्षविषयं भवेदिति सर्वास्त्रिकालदर्शी भवेदिति "भविष्यंश्चैषोऽर्थो[5] न ज्ञानकालेऽस्तीति न प्रतिभाति" [ ] इति निराकृतं द्रष्टव्यम् भावि–भूतकालतावद् भविष्यतो धर्मादेर्दर्शनकालेऽसतोऽपि प्रतिभासनात्। न चाभिन्नयोर्भावि–भूतरूपयोः प्रतिभासेऽपि भाविधर्मादेर्भिन्नत्वान्न प्रतिभासः भेदेनाध्यक्षप्रतिभासनाविरोधात् दृश्यन्त एव हि भिन्नरूपा घट–पटादयोऽध्यक्षप्रतिभासमादधानास्तन्न भाविभूतरूपताध्यक्षावसेयेति स्मृतिविषयः पूर्वरूपता दर्शनावभासिनोऽर्थस्य भाविरूपता चानुमानावसेया। तेन

"न च स्मरणतः पश्चादिन्द्रियस्य प्रवर्तनम्"॥
"वार्यते केनचिन्नापि तदिदानीं प्रदुष्यति[6]"।

[श्लो० वा० प्रत्यक्ष० श्लो० २३५–२३६]

इति निरस्तम् यतो यदि स्मरणादूर्ध्वं वर्त्तमानरूपे इन्द्रियस्य प्रवर्त्तनमभिप्रेतं तथासति वर्त्तमानमात्रपरिच्छेदान्न स्मरणोपढौकितैकत्वग्रहः। अथ पूर्वरूपे तत्रापि यथा प्राक् स्मृतेर्दर्शनं पूर्वरूपतायामविषयत्वान्न प्रवर्तते तथा तदुत्तरकालमपि अविषयत्वाविशेषात्। "तदा प्रवर्तने चक्षुषो न दोषः" [ ] इँत्यत्रापि यद्यसन्निहिते स्मरणोपढौकिते नयनं प्रवर्तते तर्ह्यविद्यमानविषयत्वात् तदालम्बनं ज्ञानं निर्विषयं भवेदिति कथं न दोषः? तिमिरोपहतदृशोऽप्यसत्यदर्शनमेव दोषः तच्चात्रापि समानमिति कथं न दोषः? अथ वर्तमाने स्मृत्युत्तरकालं तत् प्रवर्तमानमदुष्टं तर्हि नैकत्वप्रतीतिः। न च यदेव वर्तमानं तदेव पूर्वमिति भेदाभावात् तत्त्वग्रहः अभेदस्यासिद्धेः–न हि दृश्यमान–स्मर्यमाणयोरभेदसिद्धिः दृश्यमाने स्मृतेः स्मर्यमाणे च दृशोऽनवतारात्। न च स्मरणोपनीते पूर्वरूपे दोषाभावेऽपीन्द्रियप्रवर्तनं युक्तम् धूमदर्शनोत्तरकालं स्मृत्युपस्थापिते पावकेऽपि दोषाभावादिन्द्रियप्रवृत्तिप्रसक्तेः शक्यं ह्यत्रापि वक्तुम्—

न चापि लिङ्गतः पश्चादिन्द्रियस्य प्रवर्तनम्।
वार्यते केनचिन्नापि तदिदानीं प्रदुष्यति॥

अथ प्रत्यक्षप्रतिभाताद्धूमात् स्पष्टावभासाद् व्यतिरिक्ता स्मृतिःप्रभवानुमितिर्भिन्नाकारान्निमुल्लिखतीति न तत्र दृगवतारस्तर्हि विशददृगवसेयाद् रूपादस्पष्टतया पूर्वरूपमुल्लिखन्ती स्मृत्युपजनिता प्रतिपत्तिर्न दृगुपदर्शितं रूपमवतरतीत्यभ्युपेयम् ततः स्मृतेः पूर्वमुत्तरकालं वा पौर्वापर्यविविक्तं वर्तमानकालमर्थं दृगवतरतीति नैकत्वग्राहिणी। ततो विकल्पविकलाध्यक्षमतिः सिद्धा एकत्वप्रतिपत्तिस्तु स्मृतिकृतोदया पृथगेव पूर्वापरविविक्तरूपावभासिस्पष्टदृशः।

अथ पौर्वापर्ये दृशोऽप्रवृत्तेर्न तद्ग्रहात् सविकल्पाध्यक्षमतिः जातिगुणक्रियादीनां तु दर्शनविषयत्वात् तद्विशिष्टार्थप्रतिपत्तिः सविकल्पिका भविष्यति, न; जात्यादेः स्वरूपानवभासनात् न हि

---

१ "मृतिः"–बृ० टि०। २ "मृतिः"–बृ० टि०। ३ "यतो मृतेरभावस्ततः कथं भाविरूपपरिगतो भावो भवेत्"–बृ० टि०। ४–**यात्तदु**–बृ०। ५–**ष्यंश्चैकार्थो** बृ० वा० बा० भां० मां० विना। ६ पृ० ३१९ पं० ६–७। प्रमेयक० पृ० ९७ द्वि० पं० ९। ७ "परोदिते"–बृ० टि०। ८ "एकत्व–" बृ० टि०।

व्यक्तिद्रव्यव्यतिरिक्तवपुर्ग्राह्याकारतां बहिर्विभ्राणा विशददर्शने जातिराभातीति न तद्योजनादध्यक्षमतिः सविकल्पिका। न चाम्र–बकुलादिषु 'तरुस्तरुः' इत्युल्लिखन्ती बुद्धिराभातीति नाऽसती जातिः विकल्पोल्लिख्यमानतयापि बहिर्ग्राह्याकारतया जातेरनुद्भासनात् प्रतीतिरेव तत्रापि तुल्याकारतां वचनं वा बिभर्ति। न च शब्दः प्रतीतिर्वा जातिमन्तरेण तुल्याकारतां नानुभवति 'जातिर्जातिः' इत्यपरजातिव्यतिरेकेणापि गोत्वादिसामान्येषु तयोस्तुल्याकारतादर्शनात्। न च तेष्वप्यपरा जातिः अनवस्थाप्रसक्तेः। अथ तुल्याकारा प्रतिपत्तिर्यदि निर्निमित्ता तदा सर्वदा भवेत् न वा क्वचित् व्यक्तिनिमित्तत्वे आम्रादिष्विव घटादिष्वपि 'तरुस्तरुः' इति प्रतिपत्तिर्भवेत् व्यक्तिरूपताया अत्रापि समानत्वात्, असदेतत्; व्यक्तिनिमित्तत्वेऽपि प्रतिनियतव्यक्तिनिमित्तत्वान्नातिप्रसङ्गः यथा हि ताः प्रतिनियता एव कुतश्चिन्निमित्तात् प्रतिनियतजातिव्यञ्जकत्वं प्रतिपद्यन्ते तथा प्रतिनियतां तुल्याकारां प्रतिपत्तिं[1] तत एव जनयिष्यन्तीति किमपरजातिकल्पनया? यथा वा गुंड्वृच्यादयो भिन्ना एकजातिमन्तरेणापि ज्वरादिशमनमेकं कार्यं निर्वर्तयन्ति तथा आम्रादयस्तरुत्वमन्तरेणापि तत एव 'तरुस्तरुः' इति प्रतिपत्तिं जनयिष्यन्ति नान्य इति व्यर्था तेषु तरुत्वजातिकल्पना। तन्न जातिर्दर्शने कल्पनाज्ञाने वा बहिराकारमाबिभ्रती स्वेन वपुषा प्रतिभाति कल्पनाबुद्धावप्यविशदाकारव्यक्तिरूपमन्तःशब्दोल्लेखं वापहाय वर्णसंस्थानव्यतिरिक्तजातिस्वरूपानवभासनात्। तन्नाप्रतीयमाना जातिः सती। नापि कस्यचिद् विशेषणमिति न तद्योजनाविधायिनी अध्यक्षमतिरिति न सविकल्पिका। एवं गुण–क्रियादीनामप्यप्रतिभासनादसत्त्वमिति न तद्विशिष्टार्थग्राह्यध्यक्षं सविकल्पकतामनुभवति। अथ निर्विकल्पकत्वेऽध्यक्षेण शुद्धवस्तुग्रहणात् कथं ततो व्यवहृतिः[7] सा हि हेयोपादेययोर्दुःख–सुखसाधनत्वनिश्चये हानोपादानार्था दृष्टा न च निर्विकल्पकमध्यक्षं तन्निश्चयरूपम्, असदेतत्; यतो यद्यपि सविकल्पकमध्यक्षं तथापि कथं तदर्थिनां तत्र ततः प्रवृत्तिः न हि निश्चयमात्रात् फलार्थिनः प्रवर्तन्ते अपि तु तज्जननयोग्यतावसायात् सा चासन्निहितफलानिश्चये न निश्चेतुं शक्या। न च परोक्षं सुखसाधनत्वं निश्चिन्वती मतिरध्यक्षतामनुभवति अनुमितेरप्यध्यक्षताप्रसक्तेः परोक्षनिश्चयरूपताया अविशेषात्। न च निश्चयात्मकेनाध्यक्षेण वस्तु निश्चीयते तत्प्रतिबद्धा च प्रागर्थक्रियोपलब्धा ततः पुरस्थार्थावसायात् तत्र स्मृतिः प्रादुर्भवन्ती तत्राभिलाषजननात् प्रवृत्तिमुपजनयति निर्विकल्पकेऽप्यस्य समानत्वात्। तथाहि—प्रत्यक्षप्रतिभाते वस्तुनि पूर्वमर्थक्रियावगतेति तत्स्मरणाँव(णाद)भिलाषेण प्रवृत्तिर्भविष्यतीति कः स्व–परपक्षयोर्विशेषः? अथ वस्तुस्वरूपप्रतिभासं दर्शनमर्थक्रियासम्बन्धाननुभवान्न प्रवृत्तिमुपरचयितुं क्षमम् तत्सम्बन्धानुभवे वा सविकल्पकं तद् भवेत्। न चाप्रवर्तकस्य प्रामाण्यम्—"प्रामाण्यं व्यवहारेण[11]" [ ] इत्यत्र "व्यावहारिकस्य चैतत् प्रमाणस्य लक्षणमुक्तम्" [ ] इत्यभिधानात्, असदेतत्; यतो न दर्शनं केवलं प्रमाणं क्षणिकत्वादावपि तस्य[13] भावात् किन्तु अभ्यासपाटवादिसव्यपेक्षं यत्रांशे विधिप्रतिषेधविकल्पद्वयं जनयत् पुरुषं प्रवर्तयति तत्रास्य प्रामाण्यमिति निश्चयापेक्षस्य प्रत्यक्षस्य व्यवहारसाधकत्वान्न प्रामाण्यक्षतिः; नन्वेवमपि यदि निश्चये सति प्रवृत्तिस्तदभावे च नेत्यभ्युप-

---

१–**द्वयद्व्यति**–आ० हा० वि०।–**द्वयाद्व्यति**–वि० सं०। २ "शब्द–प्रतीत्योः"– बृ० टि०। ३ शास्त्रवा० स्याद्वादक० पृ० १५६ द्वि० पं० ५। ४–**पत्तिं त ए**–बृ०।

५ "यथा धान्यभयादीनां नानारोगनिवर्तने। प्रत्येकं सह वा शक्तिर्नानात्वेऽप्युपलभ्यते॥
न तेषु विद्यते किञ्चित् सामान्यं तत्र शक्तिमत्। चिरक्षिप्रादिभेदेन रोगशान्त्युपलम्भतः॥
सामान्येऽतिशयः कश्चिन्न हि क्षेत्रादिभेदतः। एकरूपतया नित्यं धान्यादेस्तु स विद्यते॥
एवमत्यन्तभेदेऽपि केचिन्नियतशक्तितः। तुल्यप्रत्यवमर्शादेर्हेतुत्वं यान्ति नापरे"॥

—तत्त्वसं० का० ७२३–७२६ पृ० २३९।

६–**त एव** बृ० भां० मां०। ७ "व्यवहृतिः"–बृ० टि०। ८–**ननि**–आ०। ९ "अर्थक्रिया"–बृ० टि०। १०–**णाभि**–बृ० भां० मां० आ० हा० वि०। ११–**ण्यं व्यवहारेण तत्र** भां० मां० आ० हा० वि०। १२ पृ० १५ पं० २४। १३ "दर्शनमात्रस्य"–बृ० टि०।

गमस्तर्हि प्रवृत्तिकरणान्निश्चय एव प्रमाणं भवेत् न च दर्शनगृहीतं नीलं निश्चिन्वन्नुपजायमानो विकल्पो गृहीतग्राहितया अप्रमाणम् यतोऽर्थक्रियासम्बन्धितामुल्लिखन्ती दर्शनावगतस्यार्थस्य कल्पना प्रवृत्तिमारचयति । न च विशददृशार्थक्रियासाधकता तस्यावगतेति कथं कल्पना न भिन्नविषया? सर्वत्र च कल्पनैव प्रवृत्तिं विरचयति दर्शनाभावेऽप्यनुमानात् प्रवृत्तिदर्शनाद् दर्शनसद्भावेऽपि क्षणिकादौ व्यवसायाभावात् प्रवृत्तेरभावाद् व्यवहारमुपरचयन्ती मतिः प्रमाणमिति न निर्विकल्पिका सा प्रमाणं किन्तु विकल्पिकैव । ननु न विकल्पस्याप्रामाण्यम् किन्त्वसौ प्रत्यक्षं न भवति अनुमानताभ्युपगमात् । अथ लिङ्गजत्वाभावादपरोक्षमर्थं निश्चिन्वन् कथमनुमानं विकल्पः? नैतत्; यतो नापरोक्षमेवार्थमसौ निश्चिनोति अर्थक्रियासम्बन्धित्वस्य परोक्षस्याप्यध्यवसितेस्तदभावे च प्रवृत्तेरयोगात् । सा च फलसङ्गतिः परोक्षाऽनुमानग्राह्या दृश्यमान इव प्रदेशे परोक्षदहनसङ्गतिः । न च तत्र धूमलिङ्गसद्भावादनुमानावतारेऽपि फलसम्बन्धितायां लिङ्गाभावान्नानुमानप्रवृत्तिः प्रतिभासमानरूपस्यैव लिङ्गत्वात् । तथाहि–उपलभ्यमाने जलरूपे शीतस्पर्शादयस्तत्सहचारिणो यदि निश्चेतुं शक्याः कालान्तरस्थायितया तदा तत्र प्रवृत्तिर्युक्ता रूपप्रतिभासमात्रस्य तु तदैवोदयान्न तदर्था प्रवृत्तिः सङ्गता प्रवृत्तौ वा तदविरतिप्रसक्तिः स्पर्शादीनां चैकसामग्र्यधीनतयोपलभ्यमानं रूपं हेतुः स्थैर्यं चोपलभ्यमानं कालान्तरस्थितौ लिङ्गमिति कथं न निश्चयोऽनुमानम्? न च सम्बन्धस्मरणपक्षधर्मत्वनिश्चयादुपजायमानमनुमानमनुभूयते अत्र तु त्रैरूप्यपर्यालोचनमन्तरेणापि नीलानुभवानन्तरं 'नीलमेतत्' इति निश्चयो झगित्युदेतीति नानुमानतास्य यतो न सर्वदानुमितिस्त्रैरूप्यपर्यालोचनमपेक्ष्य प्रवर्तते अत्यन्ताभ्यासात् कदाचित् सम्बन्धस्मरणानपेक्षलिङ्गस्वरूपदर्शनमात्रादुदयदर्शनाद् धूमोपलम्भादभ्यासदशायामग्निप्रतिपत्तिवत् । अथात्राविनाभावपर्यालोचनं प्रागासीदनवगतसम्बन्धस्य धूमदर्शनादेवाप्रतीतेस्तर्हि मन्दाभ्यासे प्रकृतेऽपि पर्यालोचनमस्त्येव–'एवंजातीये पूर्वमप्यर्थक्रियोपलब्धा इदमप्येवंजातीयं प्रतिभासमानं रूपम्' इति । अभ्यासदशायां तु रूपदर्शनादेव पर्यालोचनमन्तरेणापि झगिति फलयोग्यता प्रतीयते इति व्यवस्थितमेतत्–दृश्यमानं रूपं धर्मि तत्फलयोग्यता साध्या तद्रूपसामान्यं लिङ्गमिति न प्रतिज्ञार्थैकदेशत्वमपि हेतोः अतो निश्चयः स्वरूपावभासादुदयमासादयन् परोक्षमर्थक्रियायोग्यत्वं निश्चिन्वन्ननुमानमेव । व्यवहारोऽप्यतः एव न प्रत्यक्षात् । आह च—

"तदृष्टावेव दृष्टेषु संवित्सामर्थ्यभाविनः ।
स्मरणादभिलाषेण व्यवहारः प्रवर्तते" ॥ [ ]

इति स्मरणादनुमानरूपाद् व्यवहारः प्रवर्तत इत्ययमर्थः ।

नँन्वन्यगतचेतसोऽभ्यस्ते परिमलादावविकल्पाक्षमतेः प्रवृत्तिदर्शनात् कथं न निर्विकल्पकं प्रवर्त्तकम्? किञ्च, यद्यनुमितिरेव बाह्ये सर्वदा प्रवृत्तिमारचयति तर्हि तत्र नाध्यक्षं प्रमाणमिति

---

१ "सविकल्पिका"–बृ० टि० । २–**भावे प्र**–आ० हा० वि० विना । ३ "उत्तरम्"–बृ० टि० । ४ "जलरूपे"–बृ० टि० । ५ "अनुमानरूपान्निश्चयात्"–बृ० टि० । ६ "येन वार्तिककार एवमाह" इत्युल्लिख्य विभिन्नोत्तरार्धकमेतत् पद्यं न्यायबिन्दुटीकाटिप्पण्यामुद्धृतमित्थं वर्तते–

"तदृष्टावेव दृष्टेषु संवित्सामर्थ्यभाविनः । स्वव्यापारलकरणात् स्मरणादित्यादि"–पृ० ३१ पं० ५–६ ।
"तदुक्तम्" इति कृत्वा इदं पद्यं सिद्धिविनिश्चयटीकायामुपन्यस्तमस्ति–लि० पृ० ९० पं० १८ ।

सिद्धिविनिश्चयटीकायां "कारिकां विवृण्वन्नाह" इत्युपक्रम्य " 'तदृष्टावेव' इत्यादि"प्रतीकं निर्दिश्य च व्याख्यातमेतत् पद्यमित्थं दृश्यते–"निर्विकल्पिका दृष्टिस्तदृष्टिस्तस्यां सत्यां पुनर्ये दृष्टास्तेषु व्यवहारः । प्रवृत्तावङ्गीक्रियमाणायां कुत इत्यत्राह–संवित्तीत्यादि–संवित्तेर्बलं सामर्थ्यं तस्माद् या सजातीयस्मृतिस्तस्या अभिलाषः आदिशब्देन द्वेषपरिग्रहस्तस्मादिति"–लि० पृ० ११८ पं० १९–२२ । सिद्धिविनिश्चयटीकाव्याख्यानत एतत् पद्यमित्थं कल्पयितुमुचितं भाति—

तदृष्टावेव दृष्टेषु संवित्तिबलभाविनः । स्मरणादभिलाषादेर्व्यवहारः प्रवर्तते ॥

"यदुक्तम्" इत्युल्लिख्योद्धृतं पद्यमिदं धर्मसंग्रहण्यां वर्तते–पृ० २६ द्वि० पं० ७ । पृ० १६ पं० २६ ।

७ **न त्वन्य**–बृ० विना ।

स्वसंवेदनमात्रमेवैकमध्यक्षं भवेत् तथा च—"रूपादिस्वलक्षणविषयमिन्द्रियज्ञानम् आर्यसत्यचतुष्टयगोचरं योगिज्ञानम्" [ ] इत्यादि चतुर्विधाध्यक्षोपवर्णनमसङ्गतमनुषज्येत । अथ निर्विकल्पकमध्यक्षं नार्थस्यार्थक्रियायोग्यतामधिगच्छति तदभावे न प्रवृत्तिरित्यप्रवर्तकत्वान्न बाह्ये प्रमाणं तर्ह्यनुमानमपि नार्थक्रियासङ्गतिमवभासयति तस्यावस्तुविषयत्वात् तथा च तदपि कथं प्रवर्तकम्? अथ तदध्यवसायितया तस्योत्पत्तेरर्थग्राहित्वाभावेऽपि प्रवर्तकता, असदेतत्; तदध्यवसायित्वस्याप्यनुपपत्तेः । तथाहि–तदध्यवसायित्वं तस्य किं ग्राहकाकारः, उत ग्राह्याकारः इति वक्तव्यम् यदि ग्राहकाकारस्तदा तस्य ग्राहकं स्वरूपं न बाह्यमर्थं सन्निधापयतीति न तदध्यवसायोऽनुमानसाध्यः । अथ ग्राह्याकारः सोऽपि नार्थस्वरूपसंस्पर्शीति कथं तदवगमे बाह्यार्थाऽध्यवसितिरनुमानफलम्? तदेवमनुमितेः स्वसंवेदनमात्रपर्यवसितत्वान्नार्थप्रदर्शनद्वारेण प्रवर्तकता युक्ता । नन्वनुमाने सति प्रवृत्तिर्दृष्टा तदभावे सा न दृष्टेति तत्कार्यासौ निश्चीयते तर्ह्यभ्यासदशायां विकल्पविकले दर्शने सति प्रवृत्तिर्दृष्टा प्रतिपदोच्चारं तत्र विकल्पनासंवेदनेऽपि पुरःपरिस्फुटप्रतिभासमात्रादेव प्रवृत्युपपत्तेस्तत्कार्याऽसौ किं न व्यवस्थाप्यते? अथानुमानादनभ्यासदशायां प्रवृत्तिरुपलब्धेति तदन्तरेण सा कथं भवेत्? न; मन्दाभ्यासेऽनुमानादेव प्रवृत्तिः अभ्यासदशायां तु पर्यालोचनलक्षणानुमानव्यतिरेकेणापि वस्तुदर्शनमात्रादेव समस्तु तथादर्शनात् अन्यथाऽनभ्यासदशायामनुमानात् प्रवृत्तिदर्शनात् सर्वदानुमानस्यैव व्यवहृतिजनकत्वे प्रत्यक्षेण लिङ्गग्रहणाभावतस्तन्निश्चयकृदपरमनुमानमभ्युपगन्तव्यम् तत्राप्यनुमानान्तरालिङ्गनिश्चय इति तन्निश्चयकृदपरमनुमानमित्यनवस्थाप्रसङ्गतो न कदाचिद् व्यवहृतिर्भवेत् । ततोऽविकल्पकं दर्शनमभ्यासदशायां व्यवहारकृदभ्युपगन्तव्यमन्यथा पूर्वोक्तप्रकारेणानुमानानवतारात् । न च पौर्वापर्येऽप्रवृत्तिमत् सन्निहितमात्रावभास्यध्यक्षं कथं तादृग्लिङ्गग्रहणक्षमं यतोऽनभ्यासावस्थायामनुमानात् प्राग् व्यवहारः पश्चात्त्वध्यक्षादभ्यासदशायामिति प्रेर्यम्? यतः संवृत्या लिङ्गप्रतिबन्धग्राहि प्रत्यक्षमभिमतम् लोकस्य ह्येवमभिमानः 'तदेव साध्यप्रतिबद्धं लिङ्गमहं पश्यामि' इति तदभिमानाच्च लिङ्गप्रतिबन्धग्राह्यध्यक्षं व्यवहारकृदभ्युपेयते परमार्थपर्यालोचनया तु न प्रत्यक्षानुमानभेदः नापि व्यवहारः संवेदनमात्रत्वात् सर्वप्रपञ्चस्य । स्वसंवेदनं च सकलविकल्पविकलमिति कथं स्वार्थनिर्णयस्वभावं ज्ञानं प्रमाणं सिद्धिमासादयेत्?

[निर्विकल्पकमेवाध्यक्षमिति मतं प्रतिविधाय सविकल्पस्याध्यक्षत्वमुपपाद्य च सिद्धान्तिना स्वार्थनिर्णयस्वभावज्ञानस्य प्रमाणसामान्यलक्षणत्वव्यवस्थापनम्]

अत्र प्रतिविधीयते–'स्वार्थनिर्णयस्वभावं प्रत्यक्षं न भवति' इत्येतत् किं तद्ग्राहकप्रमाणाभावादभिधीयते, आहोस्वित् तद्बाधकप्रमाणसद्भावात्? तत्र न तावदाद्यः पक्षोऽभ्युपगमार्हः स्थिरस्थूलसाधारणस्य स्तम्भादेरर्थस्य बहिरन्तश्च सद्द्रव्यचेतनत्वाद्यनेकधर्माक्रान्तस्य ज्ञानस्यैकदा निर्णयात् सांशस्वार्थनिर्णयात्मनोऽध्यक्षस्य स्वसंवेदनप्रत्यक्षसिद्धत्वात् तद्ग्राहकप्रमाणाभावोऽसिद्धः । {तथाहि–अन्तर्बहिश्च स्वलक्षणं पश्य(श्यं)ल्लोकः स्थूलमेकं स्वगुणावयवात्मकं ज्ञानं घटादिकं च सकृत्प्रतिपत्त्याध्यवस्यति, न चेयं प्रतिपत्तिरनध्यक्षा विशदस्वभावतयानुभूतेः । न च विकल्पाऽविकल्पयोर्मनसोर्युगपद्वृत्तेः क्रमभाविनोर्लघुवृत्तेर्वा एकत्वमध्यवस्यति जनस्तत्रेत्यविकल्पाऽध्यक्षगतं वैशद्यं

---

१ बौद्धसम्मतं केवलनिर्विकल्पकप्रामाण्यपक्षं वैयाकरणसम्मतं केवलसविकल्पकप्रामाण्यपक्षं च निराकृत्य निर्विकल्पकसविकल्पकोभयप्रामाण्यं व्यवस्थापयितुं कुमारिलेन चर्चा कृताऽस्ति—श्लो० वा० प्रत्यक्षसू० श्लो० ८६–१४५ ।

सैव चर्चा तदीयानि कानिचित् पद्यान्युपयुज्य वाचस्पतिमिश्रेण सूक्ष्मेक्षिकया हृदयहारिण्या च शल्या विस्तरमुपनीता दृश्यते–न्यायवा० ता० टी० पृ० १३३–१३७ ।

अत्रत्यः शास्त्रार्थः प्रस्तुतग्रन्थशैल्या क्वचित् क्वचित् शब्दसाम्यमजहदेव संक्षेपेण भङ्ग्यन्तरेण च प्रमेयकमलमार्तण्डे वर्तते–पृ० ८ द्वि० पं० ६—पृ० ११ द्वि० पं० २ ।

मार्तण्डगतश्च स एव शास्त्रार्थः अक्षरशः समादाय पुनरनेकधा पल्लवीकृत्य च वर्णितः स्याद्वादरत्नाकरे दृश्यते–पृ० ७५–८८ आ० । शास्त्रवा० स्याद्वादक० पृ० १५६ द्वि० पं० ९– ।

२–**पद वृ**–आ० हा० वि० । शास्त्रवा० स्याद्वादक० पृ० १५६ द्वि० पं० ११ । ३–**भाविनोल**–बृ० आ० वि० ।

विकल्पे सांशस्वार्थाध्यवसायिन्यध्यारोपयतीति वैशद्यावगतिः एकस्यैव तथाभूतस्वार्थनिर्णयात्मनो विशदज्ञानस्यानुभूतेरननुभूयमानस्याप्यपरनिर्विकल्पकस्य परिकल्पने बुद्धेश्चैतन्यस्यापरस्य परिकल्पनाप्रसङ्ग इति साङ्ख्यमतमप्यनिषेध्यं स्यात्। किञ्च, सविकल्पाविकल्पयोः कः पुनरैक्यमध्यवस्यति? न तावदनुभवो विकल्पेन आत्मन ऐक्यमध्यवस्यति व्यवसायविकलत्वेनाभ्युपगमात् तस्य अन्यथा भ्रान्तताप्रसङ्गात्। नापि विकल्पोऽविकल्पेन स्वस्यैक्यमध्यवस्यति तेनाविकल्पस्याविषयीकरणात् अन्यथा स्वलक्षणगोचरताप्राप्तेः अविषयीकृतस्य चान्यत्राध्यारोपाभावात् न ह्यप्रतिपन्नरजतः शुक्तिकायां रजतमध्यारोपयितुं 'रजतमेतत्' इति समर्थः। न च यथेश्वरादिविकल्पस्तदविषयीकरणेऽप्यध्यवसिततद्भाव उपजायते तथात्राप्यध्यवसिताविकल्पस्वभावो विकल्पः समुपजायत इति स तयोरैक्यमध्यवस्यति, उक्तोत्तरत्वात्। तथाहि—न तावदनुभव एवंरूपमात्मानमवगच्छति तेनास्यार्थस्याविषयीकरणात् 'एतत्'रूपतया तस्यासिद्धेश्च। न हि मरीचिका जलरूपतयाऽध्यवसिता तद्रूपतयाऽसिद्धार्थक्रियोपयोगिन्युपलब्धा एवमनुभवोऽपि विकल्परूपतयाऽध्यवसितस्तथाऽसिद्धो नार्थक्रियोपयोगी नातः किञ्चित् सिध्यति। नापि विकल्पः तस्याऽवस्तुविषयत्वाभ्युपगमात्। यदि पुनर्विकल्पस्तद्रूपमात्मानमध्यवस्येत् तर्हि परमार्थविषयता तस्येति

"विकल्पोऽवस्तुनिर्भासाद् विसंवादादुपप्लवः" [ ]

इति असङ्गतं स्यात्। अत एव न विकल्पान्तरमपि तमध्यवस्येत् तस्यापि तुल्यदोषत्वात्। किञ्च, तयोरैक्यं व्यवस्यतीत्यत्र यदि विकल्पं निर्विकल्पकतया मन्यते व्यवहारी तदा निर्विकल्पकमेव सर्वं ज्ञानमिति विकल्पव्यवहारोच्छेदादनुमानप्रमाणाभावः। अथाविकल्पं विकल्पतया तदा सविकल्पकमेव सर्वं प्रमाणमिति अविकल्पप्रत्यक्षवादो विशीर्येत। यथा हि प्रज्ञाकराभिप्रायेण मणिप्रभायां मणिज्ञानं 'य एव मणिर्मया दृष्टः स एव प्राप्तः' इत्यभिमानिनः प्रत्यक्षं प्रमाणम्—अन्यथाऽभ्यासदशायां भाविनि दृश्य-प्राप्ययोरेकत्वाध्यवसायात् प्रत्यक्षमेव प्रमाणमिति न भवेत् अन्यस्य तन्निबन्धनस्य तत्राप्यभावात्—तथा सर्वं निर्विकल्पं विकल्पत्वेन निश्चित्य सविकल्पकमेव सर्वं ज्ञानमिति यो व्यवहरति तस्य किमिति तदेव न प्रमाणम्? यथा हि दृश्यं प्राप्यारोपात् प्राप्यम् तथाऽविकल्पो विकल्पारोपाद् विकल्पो भवेत् न्यायस्य समानत्वात्। अथ यथा प्राप्यमणिप्रभा-मणिप्रतिभासयोरेकत्वाध्यवसायेऽपि न मणिप्राप्तौ तत्प्रतिभासस्याभावः—अन्यथा मणिः प्रतिभातो न प्राप्तः स्यात्—तथा सविकल्पाविकल्पयोरेकत्वाध्यवसायेऽपि निर्विकल्पकस्य नाभावः; नन्वेवं सांशस्थूलैकस्पष्टप्रतिभासव्यतिरिक्तस्य निरंशक्षणिकपरमाणुप्रतिभासैलक्षणनिर्विकल्पकानुभवस्य तदैव निर्णयप्रसक्तिः। अथ विकल्पेनाविकल्पस्य सहस्रांशुनेव तारानिकरस्येव तिरस्कारान्न तथा निर्णयस्तर्हि विकल्पस्याप्यविकल्पेन तिरस्कारात् प्रतिभासनिर्णयो न स्यात्।

अथ विकल्पस्य बलीयस्त्वादविकल्पस्य च दुर्बलत्वात् तेन तस्य तिरस्कारः; ननु कुतो विकल्पस्य बलीयस्त्वम्? प्रचुरविषयत्वादिति चेत्, न; अविकल्पविषय एव प्रवृत्त्यभ्युपगमात् अन्यथाऽस्य गृही-

---

१-**कल्पे स्वांश**-बृ० ल० वा० बा० विना। २-**स्याप**-आ०। ३-**कल्पत्वे**-ल० विना। "न तावन्निर्विकल्पकम् अध्यवसायविकलत्वात् तस्य अन्यथा भ्रान्ततापसङ्गः"-प्रमेयक० पृ० ९ द्वि० पं० ३। "न तावन्निर्विकल्पकम् तस्याध्यवसायशून्यत्वात् इतरथा भ्रान्तत्वप्रसक्तिः"—स्याद्वादर० पृ० ८२ पं० ४ आ०। ४-**स्तद्वि**-बृ०। ५ **एवंस्वरू**-आ० हा० वि०। ६ **तथावस्तु**-भां० मां० विना। ७ "अनुभवरूपम्"-बृ० ल० टि०।

८ "विकल्पोऽवस्तुनिर्भासः इत्यस्य विरोधः"। अवस्तुनिर्भासः "अवस्तुनि निर्भासः प्रतिभासो यस्य विकल्पस्य सः" इत्यस्य "ग्रन्थस्य"—प्रमेयक० पृ० ९ द्वि० पं० ४ टि० १६, १७। "तदुक्तम्—विकल्पोऽवस्तुनिर्भासौ(सो) विसंवादादुपप्लवः"—सिद्धिवि० टी० लि० पृ० ९० पं० २२। "यथोक्तम् विकल्पो वस्तुनिर्भासाद्विसंवादादुपप्लव इति"-प्रशस्त० कं० पृ० १९० पं० १८। "विकल्पोऽवस्तुनिर्भासात्" इति वचो विरुध्यते"—स्याद्वादर० पृ० ८२ पं० ६ आ०। "विकल्पोऽवस्तुनिर्भासाद् विसंवादादुपप्लवः। प्रत्यक्षाभः" इति वचनात्"-धर्मसं० पृ० १३४ प्र० पं० १। "तदुक्तम्" इति कृत्वा "विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः"इत्युद्धृतं वर्तते सर्वदर्शनसंग्रहे-पृ० ४४ द० २ पं० ३३५।

९ "विकल्पान्तरस्य"-बृ० ल० टि०। १० **सर्वज्ञा**-भां० मां० आ० विना। ११-**माणं न** बृ० ल०। १२-**सकलक्ष**-आ० हा० वि०। १३-**कल्पिकानु**-ल० आ० हा० वि०।-**कल्पिका त्वानु**-वा० बा० भां० मां०। १४-**ना तमोनि**- आ०। "भानुना तारानिकरस्येवेति चेत्"—प्रमेयक० पृ० ८ द्वि० पं० १४। "तिग्मभानुना विभावरीभुजंगस्येवेति चेत्"-स्याद्वादर० पृ० ७९ पं० २५ आ०।

तग्राहित्वासंभवात्। निर्णयात्मकत्वात् तस्य तदात्मकत्वमिति चेत्; ननु तस्य किं स्वरूपे निर्णयात्मकत्वम्, उतार्थरूपे? न तावत् स्वरूपे "सर्वचित्त-चैत्तानामात्मसंवेदनं प्रत्यक्षम्" [न्यायबिं० १-१०] इत्यस्य विरोधात्। एवमपि तत्र तस्य निर्णयात्मकत्वे चक्षुरादिज्ञानं स्वपरयोस्तदात्मकं किं न भवेत्? तथा च स्वार्थाकाराध्यवसायाधिगमश्चक्षुरादिचेतसां सिद्ध इति केन कस्य तिरस्कारः? तन्न विकल्पः स्वरूपे निर्णयात्मकोऽभ्युपगन्तव्यः। अथाऽर्थे तस्य निर्णयात्मकत्वम्; नन्वेवमेकस्य विकल्पस्य निर्णयानिर्णयस्वभावं रूपद्वयमायातम् तच्च परस्परं तद्वतश्च यद्येकान्ततो भिन्नमभ्युपगम्यते समवायादेरनभ्युपगमात् सम्बन्धासिद्धेः 'बलवान् विकल्पो निर्णयात्मकत्वात्' इत्यस्यासिद्धिः। न च रूपादीनामिव परस्परमेकसामग्यधीनतालक्षणः तयोः सम्बन्धः तद्वता चाग्निधूमयोरिव तदुत्पत्तिलक्षण इति वक्तव्यम् स्वाभ्युपगमविरोधात्। किञ्च, यदा विकल्पस्य कारणत्वम् निर्णयाऽनिर्णययोश्च कार्यत्वं तदा विकल्पस्य पूर्वकालत्वं तयोश्चोत्तरकालत्वम् प्रज्ञाकराभिप्रायात् तु विपर्ययोऽपि मरणलिङ्गस्यारिष्टादेस्तत्कार्यतया प्राग्भाविनस्तेनाभ्युपगमात् तथा च भिन्नकालस्य विकल्पस्य न निर्णयानिर्णयात्मकत्वमिति ज्ञानरूपताया अप्यभावः तद्विकलस्य गत्यन्तराभावात् तयोश्च विकल्पस्वभावविकलतया निःस्वभावता। ज्ञानाद् भिन्नयोरनुपलभ्यत्वेन गत्यन्तराभावात् स्वयं तयोरुपलम्भे विकल्पाद् भिन्ने ज्ञाने स्याताम् एवं च यदनिर्णयात्मकं तत् तदेव यच्च निर्णयस्वरूपं तदपि तदेव तथा च निर्विकल्पकस्य पृथगुपलम्भनिर्णयः स्यादिति पूर्वोक्तमेव दूषणं पुनरापतति, निर्णयात्मकेऽपि चक्षुरादिज्ञानमपि तथैव स्यादिति पूर्वोक्त एव दोषः। तत्रापि रूपद्वयकल्पनायां प्रकृतो दोषः अनवस्था च। तन्न परस्परं तद्वतश्च भेदैकान्तो युक्तः। अभेदैकान्तेऽपि तद्वयमेव तद्वान् वा भवेत् तथा च न प्रकृतसिद्धिः।

अथ निर्णयानिर्णयस्वभावयोरन्योन्यं तद्वतश्च कथञ्चित्तादात्म्यं तर्हि यत् स्वात्मनि अनिर्णयात्मकं बहिरर्थे च निर्णयस्वभावं रूपं तत्साधारणमात्मानं प्रतिपद्यते चेद् विकल्पः स्वरूपेऽपि सविकल्पकः प्रसक्तः अन्यथा निर्णयस्वभावतादात्म्यायोगात्। न च स्वरूपमनिश्चिन्वन् विकल्पोऽर्थं निश्चिनोति इतरथाऽगृहीतस्वरूपमपि ज्ञानमर्थग्राहकं भवेदिति न नैयायिकमतप्रतिक्षेपः। न च नैयायिकाभ्युपगमेन परगृहीतस्य स्वगृहीततादोषः भवन्मतेऽपि परनिश्चितस्य स्वनिश्चितत्वप्रसक्तेः। यथा च परज्ञातमननुभूतत्वान्नात्मनो विषयस्तथा विकल्पस्य स्वरूपमनिश्चितत्वान्नात्मनो विषय इति समानं पश्यामः। न च तस्यापि विकल्पान्तरेण निश्चयः तस्यापि विकल्पान्तरेण निश्चयापत्तेरनवस्थाप्रसक्तेः। न च विकल्पस्वरूपमनुभूतमपि क्षणिकत्वादिवदनिश्चितमर्थनिश्चायकं युक्तम् अनिश्चितस्यानुभवेऽपि क्षणिकत्ववत् स्वयमव्यवस्थितत्वात् अव्यवस्थितस्य च शशशृङ्गादेरिवान्यव्यवस्थापकत्वायोगात्। यथा च विकल्पस्य स्वार्थनिर्णयात्मकत्वं तथा चक्षुरादिबुद्धीनामपि तद्युक्तम् अन्यथा तासां तद्ग्राहकत्वायोगात्। अथ विकल्पस्य बहिरर्थे प्रवृत्तिरेव नास्तीति कथं तन्निर्णयात्मकः? न हि नीलज्ञानं पीताप्रवृत्तिकं तन्निर्णयात्मकं वक्तुं शक्यम् प्रतिपन्नभिप्रायवशात् बौद्धैर्बाह्यार्थव्यवसायात्मकत्वं विकल्पस्य परमार्थतो निर्विषयत्वेऽपि व्यावर्ण्यते, तदयुक्तम्; यतः किमिदं विकल्पस्य परमार्थतो निर्विषयत्वम्? यद्यात्मविषयत्वं तर्ह्यात्मविषयं निर्विकल्पकमपि ज्ञानं निर्विषयमित्यर्थनिर्णयात्मकत्वाद् बलवान् विकल्प इति निर्विकल्पकानुभवस्य निर्णयस्तिरस्कारक इत्यसङ्गतं स्यात् सविकल्पकस्यैव कस्यचिदभावादात्मविषयस्य निर्विकल्पकस्यापि विकल्पवत् सविकल्पकस्यैवं वा भावात् न चैवं कस्यचित् प्रतिपत्तुरभिप्रायः। अथ साधारणस्यास्पष्टस्य स्व-परयोरविद्यमानस्याकारस्य शब्दसंसर्गयोग्यस्य विषयीकरणं निर्विषयत्वम्, न; तस्य तत्र संबन्धाभावतो विषयीकरणासंभवात् तथापि तद्विषयीकरणे सर्व-

---

१ "विकल्पस्य"-बृ० ल० टि०। २ "बलीयस्त्वम्"-बृ० ल० टि०। ३ न्यायबिन्दुसूत्रे 'प्रत्यक्ष'पदं नास्ति। ४ "स्वरूपे"-बृ० ल० टि०। ५ "तस्य विकल्पस्य"-बृ० ल० टि०। ६-**सायो धि**-बृ०। ७ **इति न व**-बृ०। ८ "निर्णयानिर्णययोः"-बृ० टि०। ९-**था भि**-बृ०। १० **तद्विकल्पस्य** ल० भां० मां० विना। ११ **च नि**-आ० हा० वि०। १२-**था नि**-बृ०। १३-**त्मके च**-ल० वा० बा० विना। १४-**र्थे नि**-बृ०। १५-**भावरू**-आ० हा० वि०। १६-**था गृ**-बृ० विना। १७-**ज्ञानम**-बृ० ल० वा० बा० भां मां० विना। १८-**त्वात्मनो** बृ०।-**त्वान्न मनो** बृ० सं०। १९-**शात् तु बौ**-बृ० वा० बा० भां० मां०। २०-**व चाभा**-भां० मां०।

मपि ज्ञानं तथैव स्वविषयं विषयीकुर्यादिति तदुत्पत्त्यादिसम्बन्धकल्पनमनर्थकमासज्येत। न च तादात्म्यलक्षणस्तत्र तस्य सम्बन्धः तदाकारेऽविकल्पकत्वस्य अविकल्पकत्वे वा तदाकारत्वस्य प्रसक्तेः। तदुत्पत्तिसम्बन्धवशात् तेन तद्ग्रहणम् इत्येतदप्ययुक्तम् तदाकारस्य तज्ज्ञानोत्पादकत्वेन स्वलक्षणत्वप्राप्तेस्तज्ज्ञानस्य सविषयताप्रसक्तिदोषात्। न च स्ववासनाप्रकृतिविभ्रमवशादतदुत्पन्नमतदाकारं च तत् तद्विषयीकरोति अक्षसमनन्तरविशेषात् अन्यस्याप्युपजातस्य तथात्वविषयीकरणप्रसक्तेः सर्वत्र तदाकारतदुत्पत्तिप्रतिबन्धकल्पनावैयर्थ्यप्रसक्तेः। अतस्तदाकारविषयीकरणासंभवाद् विकल्प्यार्थाभावतो दृश्य-विकल्प्यावर्थावेकीकृत्य प्रवर्तत इत्ययुक्तमभिधानम्। ततो न बलवान् विकल्प इति कथं तेनाविकल्पतिरस्कार इति अविकल्पकनिश्चयस्तदैव भवेत् न चैवम् अतो नाविकल्पस्य विकल्पेनैकत्वाध्यवसायः। किञ्च, विकल्पेऽविकल्पकस्यैकत्वेनाध्यारोप इति कुतो निश्चीयते? अस्पष्टात्स्वलक्षणग्राहिणि स्पष्टस्वलक्षणग्राहित्वस्य प्रतीतेस्तदध्यारोपावगतिरिति चेत्; ननु यदि नाम तत्र तत्प्रतीतिः अविकल्पारोपस्तु कुतः? स्पष्टत्वादेस्तद्धर्मस्य तत्र दर्शनादिति चेत्; तद्धर्मः स्पष्टत्वादिरित्येतदेव कुतः? तत्र दर्शनादिति चेत्; अंत एव विकल्पधर्मोऽप्यस्तु अन्यथाऽविकल्पस्यापि मा भूत्। न च विकल्पव्यतिरेकेणाविकल्पमपरमनुभूयते यस्य स्पष्टत्वादिधर्मः परिकल्पेत एवमपि तत्र तत्परिकल्पने ततोऽप्यपरमननुभूयमानं विशदत्वादिधर्माधारं परिकल्पनीयमित्यनवस्थाप्रसक्तिः। अथ किञ्चिज्ज्ञानं सविकल्पकमपरं निर्विकल्पकं राश्यन्तराभावात् विकल्पस्य चार्थसामर्थ्योद्भूतत्वासंभवान्न विशदत्वादिधर्मयोगः अविकल्पस्यापि तद्योगाभावे विशदत्वादिकं न क्वचिदपि भवेदित्यविकल्पस्यैव तदभ्युपगन्तव्यम्। भवेदेतत् यद्यर्थसामर्थ्यप्रभवत्वेन वैशद्यादेर्व्याप्तिः स्यात् तदभावे तन्न भवेत् न चैवम् अर्थसामर्थ्योद्भूतेऽपि दूरस्थितपादपादिज्ञाने वैशद्यादेरभावात् योगिप्रत्यक्षे चार्थप्रभवत्वाभावेऽपि च भावात्। न च तदप्यर्थसामर्थ्योद्भूतम् तत्समानसमयस्य चिरातीतानुत्पन्नस्य चार्थस्य तद्ग्रहणानुपपत्तेः। तथाहि-प्रागसर्वज्ञः सन् सुगतो विवक्षितक्षणे सर्वज्ञतामासादयंस्तत्समानसमयभाविनां भावानाम्-तज्ज्ञानं प्रत्यजनकत्वात् तेषाम्-ग्राहको न स्यात् एवमुत्तरोत्तरतद्विज्ञानक्षणा अपि स्वसमयार्थग्राहका न भवेयुः चिरतरविनष्टस्य भावकलापस्यासत्त्वेन तदकारणत्वान्न तं प्रति ग्राहकता भवेत् अनुत्पन्नस्य च पदार्थसमूहस्य कारणत्वासंभवात् तं प्रति ग्राहकता तस्य दूरोत्सारितैव। अथ चिरातीतं भावि च तत्कारणमभ्युपगम्यत इति नायं दोषः; नन्वत्राप्यभ्युपगमे येन स्वभावेन तत् तदनन्तरभावि कार्यमुत्पादयति तेनैव यदि सुगतज्ञानमिदानीन्तनकालभावि जनयति तदैकस्वभावत्वान्नित्यादिवत् कार्यक्रमायोगात् पूर्वमेवैतदप्युत्पद्येत। अथ समनन्तरप्रत्ययस्य सुगतज्ञानहेतोरिदानीमेव भावान्न पूर्वमुत्पत्तिः, असदेतत्; यत आलम्बनकारणं चिरातीतसमयभावि तदैव तत्कार्यमुत्पादयितुं प्रभवति समनन्तरप्रत्ययस्त्विदानीमिति विरुद्धकारणसामर्थ्यानुविधायिनः कार्यस्योत्पत्तिरेव न भवेत्। अथान्येन स्वभावेन तर्हि सांशं तत् प्रसज्यत इति तद्ग्राहिणोऽपि ज्ञानस्य सांशैकवस्तुग्राहकत्वेन सविकल्पकताप्रसक्तिः। एवं भाविकारणेऽपि वक्तव्यम्। तन्न योगिप्रत्यक्षमर्थसामर्थ्यप्रभवमभ्युपगन्तव्यम् अन्यथा पूर्वोक्तदोषप्रसक्तेः। तच्च तदप्रभवमपि यथा विशदम्—अन्यथा प्रत्यक्षत्वानुपपत्तेः—तथा विकल्पज्ञानमर्थसामर्थ्याप्रभवमपि यदि विशदं भवेत् तदा को विरोधः? विकल्पस्य वैशद्यमेव विरोधः। तदुक्तम्—

"न विकल्पानुबद्धस्य स्पष्टार्थप्रतिभासिता।
स्वप्नेऽपि स्मर्यते स्मार्त्तं न च तत् तादृगर्थदर्शनम्" ॥ [ ]

१-षयं निवि-ल०।-षयं[2] वि-आ०। 'स्वविषयम्' इति पदस्य 'विषयीकुर्यात्' इति क्रियाया व्याप्यत्वेन द्वितीयान्तत्वात् 'सर्वमपि ज्ञानम्' इति पदेन सह नान्वयः इति ख्यापनाय आ० प्रतौ 'षयं' इत्यस्य शिरसि द्वितीयविभक्तिसूचकोऽङ्को न्यस्तः। २-कारे विकल्पकत्वे वा ल० वा० बा० भां० मां० विना। ३-कल्पार्था-वा० बा० विना। ४-कल्पाव-भां० मां० हा० विना। ५ "अविकल्पक"-बृ० ल० टि०। ६ "सविकल्पके"-बृ० ल० टि०। ७ "तत्र दर्शनादेव"-बृ० ल० टि०। ८-कल्प्येत बृ० सं०। ९ "पदार्थसमूहम्"-बृ० ल० टि०। १० कार्योत्प-आ० हा० वि०। ११ भवति। बृ०। १२ "अर्थाप्रभवम्"—बृ० ल० टि०। १३-त्यक्षानु-बृ०। १४ "तथा चोक्तम्" इत्युल्लिख्योद्धृतोऽयं श्लोको वर्तते सिद्धिविनिश्चयटीकायाम्-लि० पृ० ९५ पं० १६। "न विकल्पानुबन्धस्य"-शास्त्रवा० स्याद्वादक० पृ० १५७ द्वि० पं० ३।

इति चेत्; ननु स्वप्नावस्थायां पुरोवर्त्तिहस्त्याद्यवभासमेकं ज्ञानमनुभूयते अपरं तु स्मरणज्ञानम् तत्र पूर्वोल्लेखतयोपजायमानस्य यदि वैशद्यवैकल्यम् नैतावता सर्वविकल्पस्य पुरोवर्त्तिस्तम्भाद्युल्लेखवतो वैशद्याभावः तत्र तस्य स्वसंवेदनाध्यक्षतः प्रतीतेः। न चाविकल्पकं तदिति वक्तव्यम् स्थिरस्थूलपुरोव्यवस्थितहस्त्याद्यवभासिनः स्वप्नदशाज्ञानस्याविकल्पकत्वे अनुमानस्यापि सांशवस्त्वध्यवसायिनो निर्विकल्पकत्वप्रसक्तेर्विकल्पवार्तोविरतिरेव स्यात्। अत एव 'प्रथमं निर्विकल्पकं निरंशवस्तुग्राहकं तदर्थसामर्थ्योद्भूतत्वात् तदुत्तरकालभावि तु निर्विकल्पकज्ञानप्रभवमर्थनिरपेक्षं सांशवस्त्वध्यवसायि सविकल्पकमविशदं लघुवृत्तेस्तु निर्विकल्पकज्ञानवैशद्याध्यारोपात् तत्राध्यक्षत्वाभिमानो लोकस्य' इति एतदपि निरस्तं द्रष्टव्यम् विकल्प एव पूर्वोक्तन्यायेन वैशद्योपपत्तेर्निर्विकल्पकस्य च निरंशक्षणिकपरमाणुमात्रावसायिनः कदाचिदप्यनुपलब्धेस्तत्र वैशद्यकल्पनाया दूरापास्तत्वात्।

अथ संहृतसकलविकल्पावस्थायां पुरोवर्तिवस्तुनिर्भासि विशदमक्षप्रभवं ज्ञानमविकल्पकं संवेद्यत एव तथा चाध्यक्षसिद्ध एव ज्ञानानां कल्पनाविरह इति नात्र प्रमाणान्तरान्वेषणमुपयोगि। तदुक्तम्—

"प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति" ॥ [ ] इत्यादि।

तथा पुनरप्युक्तम्—

"संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना।
स्थितोऽपि चक्षुषा रूपं वीक्षते साक्षजा मतिः" ॥ [ ]

न ह्यस्यामवस्थायां नामादिसंयोजितार्थोल्लेखो विकल्पस्वरूपोऽनुभूयते। न च विकल्पानां स्वसंविदित-

---

१-हस्ताद्य-बृ०। २ "स्वप्नज्ञाने पुरोवर्त्यनेकपावभासरूपतया"—बृ० ल० टि०। ३ "वैशद्यस्य"-बृ० ल० टि। ४-हस्ताद्य-बृ०। "स्वप्नदशायामपि स्मरणविलक्षणस्य पुरोवृत्तिहस्त्याद्यवभासिनो बोधस्य निर्विकल्पकत्वे अनुमानस्यापि सांशवस्तुग्राहिणस्तथात्वप्रसङ्गे विकल्पवार्तायां एव व्युपरमप्रसङ्गात्"—शास्त्रवा० स्याद्वादक० पृ० १५७ द्वि० पं० ४-५। ५-रपेक्ष सां-बृ० भां० मां०। ६-दनु-आ० हा० वि०। ७ "प्रत्यात्मवेद्यः सर्वेषां विकल्पा नामसंश्रयः॥ इति पश्चिमार्धम्"-बृ० टि०। "प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः॥ इति"—ल० टि०।

"यदाह न्यायवादी—

प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति। प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः॥
संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना। स्थितोऽपि चक्षुषा रूपमीक्षते साऽक्षजा मतिः॥
पुनर्विकल्पयन् किञ्चिदासीद् मे कल्पनेदृशी। इति वेत्ति न पूर्वोक्तावस्थायामिन्द्रियाद् गतौ॥

इत्यादि, तदपाकृतमवसेयम्"—अनेका० पृ० २०७ पं० ११-१८।

"यदाह न्यायवादी धर्मकीर्तिर्वार्तिके-प्रत्यक्षमित्यादि तदपाकृतमवसेयमिति योगः। प्रत्यक्षं प्रस्तुतम् कल्पनापोढमिति एतत् प्रत्यक्षेणैव सिध्यति। कथमित्याह—प्रत्यात्मवेद्यो यस्मात् सर्वेषां प्रमातृणाम्, विकल्पो नामसंश्रयः शब्दानुविद्ध इत्यर्थः॥ तथा, संहृत्य सर्वतश्चिन्तां विकल्परूपाम्, स्तिमितेन अन्तरात्मना प्रसन्ननिर्व्यापारेण, स्थितोऽपि सन्, चक्षुषा रूपमीक्षते पश्यति यया बुद्धया सा अक्षजा मतिः॥ ईक्षित्वा पुनर्विकल्पयन् किञ्चित् पश्चात् आसीद् मे कल्पना ईदृशी एवंभूता इति वेत्ति, न पूर्वोक्तावस्थायां चक्षुषा रूपेक्षणलक्षणायाम् इन्द्रियाद् गतौ॥ इत्यादि यदाह न्यायवादी तद् अपाकृतम् अपास्तमवसेयम्"—अनेका० टी० पृ० २०८ पं० ११-२०।

प्रमेयकमलमार्तण्डे "विकल्पो नामसंश्रयः" इति पाठो वर्तते। नामसंश्रयः "शब्दः संश्रयः कारणं यस्य विकल्पस्य सः"—पृ० ९ द्वि० पं० ८ टि० ३८।

अयं श्लोकः सिद्धिविनिश्चयटीकायामुद्धृतोऽस्ति-लि० पृ० ३१ पं० १९। "यथाह" इति निर्दिश्य वाचस्पतिमिश्रः श्लोकस्यास्य पूर्वार्धमुद्धृतवान्-न्यायवा० ता० टी० पृ० १५४ पं० ९-१०। स्याद्वादर० पृ० ८२ पं० १९-२० आ०। शास्त्रवा० स्याद्वादक० पृ० १५७ द्वि० पं० ६। ८ सप्तमं टिप्पणं विलोकनीयम्।

"संहृत्य सर्वतश्चित्तं स्तिमितेनान्तरात्मना। स्थितोपि चक्षुषा रूपं खं च स्पष्टं व्यवस्यति॥"
—तत्त्वार्थश्लोकवा० पृ० १८६ श्लो० १३। प्रमेयक० पृ० ९ द्वि० पं० ७। "परेण हि यासौ तदवस्थोपवर्णिता "संहृत्य सर्वत्र चिन्ताम्" इत्यादिना"—सिद्धिवि० टी० लि० पृ० ३४ पं० २५। स्याद्वादर० पृ० ८२ पं० १२-१३ आ०। शास्त्रवा० स्याद्वादक० पृ० १५७ द्वि० पं० ८। ९-जितोर्थो-बृ०।

रूपतयाऽननुभूयमानानामपि संभव इति विकल्पविकला सावस्था सिद्धा, असदेतत्; यतस्तस्यामवस्थायां स्थिरस्थूलस्वभावशब्दसंसर्गयोग्यपुरोव्यवस्थितगवादिप्रतिभासस्यानुभूतेः सविकल्पकज्ञानानुभव एव । नहि शब्दसंसर्गप्रतिभास एव सविकल्पकत्वम् तद्योग्यावभासस्यापि कल्पनात्वाभ्युपगमात् अन्यथाऽव्युत्पन्नसंकेतस्य ज्ञानं शब्दसंसर्गविरहात् कल्पनावन्न स्यात् । न च पूर्वकालदृष्टत्वस्य वर्तमानसमयभाविनि संयोजनाच्छब्दोल्लेखाभावेऽप्यसदर्थग्राहितयाऽविशदप्रतिभासत्वात् तत् सविकल्पकम्, पूर्वकालदृष्टत्वस्य पूर्वदर्शनाप्रतीतावपि व्यापकाप्रतीतौ व्याप्यस्येव प्रतीतेरसत्त्वासिद्धेस्तत्सम्बन्धित्वग्राहिणोऽसदर्थताऽसिद्धेर्वैशद्याभावस्य तत्रानुपपत्तेः शब्दसंसर्गयोग्यप्रतिभासस्य विशदतया विकल्परूपस्याप्यध्यक्षतोपपत्तेः शब्दयोजनामन्तरेणापि स्थिरस्थूरार्थप्रतिभासं निर्णयात्मकं ज्ञानमध्यक्षमभ्युपगन्तव्यम् अन्यथा तस्य प्रामाण्यमेवानुपपन्नं भवेत् । तथाहि–यत्रैवांशे नीलादौ विधिप्रतिषेधविकल्पद्वयं पाश्चात्यं तज्जनयति तत्रैव तस्य प्रामाण्यम् तदाकारोत्पत्तिमात्रेण प्रामाण्ये क्षणिकत्वादावपि तस्य प्रामाण्यप्रसक्तेः क्षणक्षयानुमानवैफल्यमन्यथा भवेत् विकल्पश्च शब्दसंयोजितार्थग्रहणं तत्संयोजना च शब्दस्मरणमन्तरेणासंभविनी तत्स्मरणं च प्राक्तत्सन्निध्युपलब्धार्थदर्शनमन्तरेणानुपपत्तिमत् तद्दर्शनं चाध्यक्षतः क्षणिकत्वादाविव निश्चयजननमन्तरेणासंभवि निश्चयश्च शब्दयोजनाव्यतिरेकेण नाभ्युपगम्यत इत्यध्यक्षस्य क्वचिदप्यर्थप्रदर्शकत्वासंभवात् प्रामाण्यं न भवेत् । तस्मात् शब्दयोजनामन्तरेणाप्यर्थनिर्णयात्मकमध्यक्षमभ्युपगन्तव्यम् अन्यथाऽविकल्पाध्यक्षेण लिङ्गस्याप्यनिर्णयात् अनुमानात् तन्निर्णये अनवस्थाप्रसक्तेरनुमानस्याप्यप्रवृत्तितः सकलप्रमाणादिव्यवहारविलोपः स्यात् । अत एव "अश्वं विकल्पयतो गोदर्शनात् न तदा गोशब्दसंयोजना तस्यास्तदानानुभवात् युगपद्विकल्पद्वयानुत्पत्तेश्च निर्विकल्पकगोदर्शनसद्भावस्तदा" [ ] इति निरस्तम् गोशब्दसंयोजनामन्तरेणापि तद्दर्शनस्य निर्णयात्मकत्वात् अन्यथाऽश्वविकल्पनाद् व्युत्थितस्य गवि क्षणिकत्ववत् शब्दस्मरणासंभवतः स्मृतिर्न भवेत् अभ्युपगमनीयं चैतत् अन्यथा गोशब्दस्मरणस्यापि विकल्परूपत्वादपरतच्छब्दस्मरणमन्तरेण तद्योजनारूपस्य तस्यासंभवात् तत्स्मरणमभ्युपगन्तव्यम् तस्यापि चापरतच्छब्दस्मरणमन्तरेण तथाभूतस्यानुपपत्तेरपरतच्छब्दस्मरणमित्यनवस्थानान्न प्रथमशब्दस्मरणमिति न क्वचिद् विकल्पप्रसवो भवेत् । अथापरशब्दस्मरणमन्तरेणापि शब्दस्मरणसंभवान्नानवस्था तर्हि प्रथमशब्दस्मरणं तद्योजनं च व्यतिरेकेणाप्यश्वविकल्पनसमये गोदर्शनस्य निर्णयात्मनः संभवात् कथमस्याविकल्परूपता सिद्धिमुपगच्छेत्? यदपि 'निरंशवस्तुसामर्थ्योद्भूतत्वात् प्रथमाक्षसन्निपातजं निरंशवस्तुग्राहि निर्विकल्पकम्' इति, तदप्यसङ्गतम्; निरंशस्य वस्तुनोऽभावेन तत्सामर्थ्योद्भूतत्वस्य निर्विकल्पकत्वहेतोस्तत्रासिद्धेः । न चैं यत् निरंशप्रभवं तन्निरंशग्राहि, निरंशरूपक्षणप्रभवस्याप्युत्तररूपक्षणस्य तद्ग्राहित्वादर्शनात् । न च 'ज्ञानत्वे सति' इति विशेषणान्नायं दोषः प्रत्यक्षप्रभवविकल्पस्य ज्ञानत्वेऽपि तद्भावानुपपत्तेः उपपत्तौ वा हिंसाविरतिदानचित्तस्वसंवेदनाध्यक्षप्रभवनिर्णयेन तद्ग्रहणोपपत्तेर्निश्चयविषयीकृतस्य चानिश्चितरूपान्तराभावात्

---

१ " यथा व्यापकाप्रतीतौ व्याप्यप्रतीतिर्नेति वैधर्म्यदृष्टान्तोऽयं तथा पूर्वदर्शनाप्रतीतावपि पूर्वकालदृष्टत्वस्य प्रतीत्यसत्त्वं नेति भावः"–बृ० ल० टि० । २ "प्रत्यक्षज्ञानस्य"–बृ० ल० टि० ।

३ "किञ्च, एवं तस्य प्रामाण्यमेवानुपपन्नं स्यात्; यत्रैव हि पाश्चात्यं विधि–निषेधविकल्पद्वयं तज्जनयति तत्रैव तस्य प्रामाण्यम्, विकल्पश्च शब्दसंयोजितार्थग्रहणम्, तत्संयोजना च शब्दस्मरणाधीना, तच्च सम्बन्धितावच्छेदकप्रकारकसम्बन्धिग्रहरूपार्थधीजन्यमिति, न चेदेवम् गवानुभवाद् गोशब्दसंयोजनावत् क्षणिकत्वानुभवात् क्षणिकत्वशब्दसंयोजनापि स्यात् । एतेन 'अश्वं विकल्पयतो गोदर्शनेऽपि तदा गोशब्दसंयोजनाभावाद् युगपद्विकल्पद्वयानुपपत्तेश्च निर्विकल्पकमेव गोदर्शनम्' इति निरस्तम्, गोशब्दसंयोजनामन्तरेणापि तद्दर्शनस्य निर्णयात्मकत्वात्, अन्यथा तत्स्मरणानुपपत्तेः, समानप्रकारकानुभवस्यैव समानप्रकारकस्मरणहेतुत्वात्, तत्संशयापत्तेश्च तत्प्रकारकनिश्चयस्यैव तत्प्रकारकसंशयविरोधित्वात्; अन्यथा क्षणिकत्वादावपि स्मरणासंशयप्रसङ्गात्"—शास्त्रवा० स्याद्वादक० पृ० १५७ द्वि० पं० १३ ।

४–**कत्वस्सं**–भां० मां० । ५–**यतो गोर्द**–बृ० । ६–**नुपपत्ते**–बृ० ल० वा० बा० विना । ७–**स्तदेतन्नि**–बृ० ल० वा० बा० विना । ८–**परं त**–ल० वा० बा० भां० मां० विना । ९–**शव**–भां० मां० आ० हा० वि० । १० **च नि**–बृ० । ११–**क्षभ**–बृ० ल० वा० बा० । १२–**नत्वे त**–आ० हा० वि० । १३ "प्रत्यक्षग्राहिता–" बृ० टि० ।

स्वर्गप्रापणसामर्थ्यादेरपि तद्वतस्य निश्चयात् तत्र विप्रतिपत्तिर्न भवेत् । अथानुभवस्यैवायं यथावस्थितवस्तुग्रहणलक्षणः स्वभावविशेषो न विकल्पस्य तेनायमदोषस्तर्हि यथा दानचित्तानुभवः स्वसंवेदनाध्यक्षलक्षणस्तद्वतं सद्द्रव्यचेतनादिकं विषयीकरोति तथा स्वर्गप्रापणसामर्थ्यमपि तत्स्वरूपाव्यतिरिक्तत्वात् विषयीकुर्यात् ततश्च सद्द्रव्यचेतनत्ववादाविव तत्रापि विवादो न भवेत् । न चासौ नास्तीति शक्यं वक्तुम् चार्वाकादेस्तत्र विप्रतिपत्तिदर्शनात् । तथाहि—"यावज्जीवेत् सुखं जीव" [ ] इत्याद्यभिधानान्न स्वर्गः नापि तत्प्राप्तिहेतुः कश्चिद् भाव इति चार्वाकाः । "नैव दानादिचित्तात् स्वर्गः यदि ततो भवेत् तदनन्तरमेवासौ भवेत् अन्यथा मृताच्छिखिनः केकायितं भवेत् तस्मात् ततो धर्मस्तस्माच्च स्वर्गः" [ ] इति नैयायिकादयः । "इष्टानिष्टार्थसाधनयोग्यतालक्षणौ धर्माधर्मौ" [ ] इति मीमांसकाः । उक्तं च शाबरे—"य एव श्रेयस्करः स एव धर्मशब्देनोच्यते" [मीमांसाद० १–१–२ शाब० पृ० ४ पं० १५] अनेन द्रव्यादीनामिष्टार्थसाधनयोग्यता धर्म इति प्रतिपादितं शबरस्वामिना । भट्टोऽप्येतदेवाह—

"श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः ।
चोदनालक्षणैः साध्या तस्मादेष्वेव धर्मता ॥
एषामैन्द्रियकत्वेऽपि न तावद्रूप्येण धर्मता ॥
श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते ।
तावद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः" ॥

[श्लो० वा० सू० २ श्लो० १९१–१३–१४] इति ।

एवमनेकधा विवाददर्शनान्न विवादाभावः स च स्वर्गप्रापणसामर्थ्यस्य दानचित्तादभेदे वस्तुस्वरूपग्राहिणा च स्वसंवेदनाध्यक्षेणानुभवे सद्द्रव्यचेतनत्ववादाविव न युक्तः । अथ तच्चित्तादभिन्नं तत्प्रापण-

---

१ **निर्णयात्** वा० बा० । २–**द्रव्यं चे**–ल० भां० मां० । ३ "द्रव्यतः परमार्थतश्चेतनत्वम्"–बृ० ल० टि० । ४ "स्वर्गप्रापणसामर्थ्येऽपि"– बृ० ल० टि० । ५ "विवादः"–बृ० ल० टि० । ६ "यथाह—

यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः । भस्मीभूतस्य शान्तस्य पुनरागमनं कुतः ॥"—न्यायमञ्ज० आ० ७ पृ० ४६७ पं० २४ ।

"तदेतत् सर्वं बृहस्पतिनाऽप्युक्तम्" इत्युल्लिख्योद्धृते श्लोकद्वयके

"यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत् । भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥"

इत्युपन्यस्तवान् सायणमाधवः—सर्वदर्शनसं० पृ० १४ द० १ पं० १२२ । गुणरत्नसूरिरपि लोकायतमतविवेचने परावर्तितपूर्वार्धमेनमेव श्लोकमित्थमुद्धृतवान् "तदुक्तम्" इति कृत्वा—

"यावज्जीवेत् सुखं जीवेत् तावद्वैषयिकं सुखम् । भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥"—षड्द० स० बृ० वृ० पृ० ३०२ पं० २० ।

७–**स्तस्मात् स स्व**–आ० हा० वि० ।–**स्तन्मते च स्व**–वा० बा० । ८–**धनायो**–आ० हा० वि० । षड्द० स० बृ० वृ० पृ० २८९ पं० २–११ ।

९ तत्त्वसं० पञ्जि० पृ० ५८३ पं० ११–२० । "यद्यपि गोदोहनादिद्रव्यम्, यागादिक्रिया, नीचैस्त्वादिगुणश्च फलसाधनत्वाद् धर्मशब्देनोच्यते नापूर्वादय इति श्रेयस्करभाष्ये वक्ष्यते, तथापि तेषां फलसाधनरूपेण धर्मत्वात् फलस्य च जन्मान्तरादिभाविलाद्धर्मस्वरूपेण प्रत्यक्षविषयत्वं न संभवति"—१–१–२ शास्त्रदीपिका पृ० १९ पं० १८ । श्लो० वा० पार्थव्या० पृ० ४८ पं० २२ ।

"य एव श्रेयस्करः स एव धर्मशब्देनोच्यते । कथमवगम्यते? यो हि यागमनुतिष्ठति तं धार्मिकमिति हि समाचक्षते । यश्च यस्य कर्ता स तेन व्यपदिश्यते यथा पाचको लावक इति । तेन यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते । न केवलं लोके, वेदेऽपि "यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्" इति यजतिशब्दवाच्यमेव धर्मं समामनन्तीति श्रेयस्करभाष्ये वक्ष्यत इत्यर्थः"—१–१–२ शास्त्रदीपिका युक्तिस्नेहप्रपूरणीसिद्धान्त० पृ० १९ पं० २९ ।

१० "इन्द्रियगोचररूपतया"–बृ० ल० टि० । पूर्वार्धमस्येत्थम्—"द्रव्य–क्रिया–गुणादीनां धर्मत्वं स्थापयिष्यते" ।

सामर्थ्यं तद्ग्रहे गृहीतमेव किन्तु स्वसंवेदनस्य "सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमविकल्पम्" [ ] इति वचनात् अविकल्पाध्यक्षत्वमिति तद्गृहीतस्यागृहीतकल्पत्वाद् विवाद-संभवस्तत्र आह च कीर्तिः—"पश्यन्नपि न पश्यति" [ ] इत्युच्यते, असदेतत्; यतो यदि तत्सामर्थ्यं निर्विकल्पकाध्यक्षविषयत्वात् गृहीतमप्यगृहीतकल्पं तर्हि तच्चित्तमपि तत एव तथा भवेत् अविशेषात् तथा च 'यद् दानादिचित्तं तद् बहुजनसेव्यतानिबन्धनम् यथा त्यागिनरपतिचित्तम् दानादिचित्तं च विवक्षितम्' इत्याद्यनुमानमगमकम्-आश्रयासिद्धत्वादिदोषात्-प्रसज्येत । अथात्र विकल्पोत्पत्तेर्न दोषः, असदेतत्; यतो यद्यहेतुको विकल्पश्चित्तवत् तत्सामर्थ्येऽपि भवेत् अथ न, तत्र चित्तेऽपि मा भूत् अविशेषात् । अनुभवाद् विकल्पोत्पत्तिर्नानिमित्तेति चेत् उभयत्र स्यान्न वा क्वचिद्-प्यनुभवस्याप्यविशेषात् । न च चेतोविकल्पप्रभव एवानुभवः समर्थो न तत्सामर्थ्यविकल्पोत्पत्ताविति वक्तव्यम् यतो येन स्वभावेन तच्चित्तचेतनादिकं स्वसंवेदनाध्यक्षमनुभवति तेनैव चेत् तत्सामर्थ्यं तर्ह्युभयत्रापि विकल्पस्ततः प्रादुर्भवेत् । अथ रूपान्तरेण तर्ह्युभयरूपतैकस्यानुभवस्येत्यविकल्पकैकान्त-वादव्याघातः । न चैकेनैव स्वभावेनोभयानुभवेऽपि तत्सामर्थ्यं न विकल्पमुत्पादयत्यनुभवोऽशक्तेरन्यत्र तदुत्पादयति विपर्ययादिति वक्तव्यम्, एकस्य शक्तेतररूपद्वयायोगात् । न चैकत्र शक्तिरेवान्यत्रा-शक्तिस्तस्येति ईश्वरस्यापि क्रमभाविकार्यविधायिन एकत्र शक्तिरेवापरत्राशक्तिरिति स्वभावभेदो न भवेदिति न नित्यकारणप्रतिक्षेपो भवेत् । अथ नानुभवमात्राद् विकल्पप्रभवः अन्यथा निर्णयात्मकानु-भववादिनोऽपि विस्तीर्णप्रघट्टकादौ वर्णपदवाक्यादेः सकलस्य निर्णयात्मनाऽध्यक्षेणानुभवात् स्मरण-विकल्पानुदयो न भवेत् । अथात्र दर्शनपाटवाभ्यासप्रकरणाद्यपेक्षा तर्ह्यन्यत्रापि सा तुल्येति, एत-दप्यसत्; यतो दर्शनस्य पाटवं सच्चेतनादौ तद्ग्रहणयोग्यता तत्सामर्थ्ये अपाटवं तदग्रहणयोग्यता तच्च दर्शनस्य दृश्यस्य च सांशतायामुपपत्तिमदिति कथं न सविकल्पकता? विकल्पजननाजनने तत्पाटवा-पाटवे अपि नाभ्युपगमनीये सांशतापत्तिदोषादेव । अथाभ्यासादिसहायं दर्शनं विकल्पमुत्पादयति; नन्वेवमपि यदेव सच्चेतनादौ दर्शनं तदेव चेत्, अन्यत्रोभयत्र विकल्पोत्पत्तिर्भवेत् अन्यथा 'नित्यस्यापि सहकारिसचिवमेकदैकत्र यद्रूपं तस्यान्यत्रान्यदा सद्भावेऽपि न तत्कार्यकरणं तदा तत्र' इति तस्य यद् दूषणं तदसङ्गतं भवेत् । किञ्च, यदपरमपेक्ष्य कार्यजनकं क्वचिद् दृष्टं तत् तत्सहकृतं कार्यं

१-दने प्र-वा० बा० । २ अत्र धर्मकीर्तिकृते न्यायबिन्दौ "सर्वचित्तचैत्तानामात्मसंवेदनम्" इत्येतावदेव सूत्रं दृश्यते-प० १ सू० १० पृ० ११ । ततः "प्रत्यक्षमविकल्पकम्" इत्यंशस्तत्सूत्रटीकानुसारी समुद्धृतो बोद्धव्यः । सा च टीकेयम् वर्तते—"तच्च ज्ञानरूपं वेदनमात्मनः साक्षात्कारि निर्विकल्पकमभ्रान्तं च तस्मात् प्रत्यक्षम्"-पृ० ११ पं० १४ । तट्टीकाटिप्पण्यपि यथा—"तत् प्रत्यक्षं स्वसंवेदनरूपं निर्विकल्पकं तत्र शब्दादियोजनाभावात् । कुतः । शब्दे संकेता-भावात् । अभ्रान्तं च तद्विज्ञानं स्वरूपेऽविपर्यस्तत्वाद् बाधकाभावाच्चेति"—पृ० ३३ पं० ५-६ । "सर्वचित्तचैत्तानामात्म-संवेदनं प्रत्यक्षं निर्विकल्पकमिति"—सिद्धिवि० टी० लि० पृ० ५१ पं० २० ।

३ पृ० २४५ पं० १४-१५ । "अथ क्षणिकत्वादेर्निर्विकल्पकैकवेद्यत्वात् तद् गृहीतकल्पत्वाद् न दोषः," तदाह धर्मकीर्तिः-"पश्यन्नपि न पश्यतीत्युच्यते" इति न दोष इति चेत् । न, तच्चित्तांशेऽपि तथात्वप्रसङ्गात् । तत्र विकल्पोत्पत्तेर्न दोष इति चेत् । न, स्मरणरूपतदनुत्पत्तेरनुत्तरत्वात् । तव विस्तीर्णप्रघट्टकानुभवे सकलवर्णपदाद्यस्मरणवदुपपत्तिरिति चेत् । न, मम विस्तीर्णप्रघट्टकस्थले वर्णादीनां तज्ज्ञानानां च व्यक्तिभेदाद् दृढसंस्कारस्यैव निश्चयस्य स्मृतिजनकत्वेन नियमसंभवात्, तव तु निरंशानुभवस्यांशे विकल्पजननाऽजननस्वभावभेदस्य, शक्तिभेदस्य, पाटवाऽपाटवादेर्वा न संभव इत्युक्तत्वात्; 'एकस्यापि सहकारिसाचिव्येन तद्विकल्पस्यैव जनकत्वं, नान्यविकल्पस्य' इत्यभ्युपगमे स्थिरस्यापि सहकारिसाचिव्याऽसाचिव्याभ्यां कार्यजनकत्वाजनकत्वाभ्युपगमप्रसङ्गात्; कुम्भकारादिसहकृतस्य मृदादेर्घटाद्यन्वय-व्यतिरेकदर्शनवदभ्यासादिसहकृतस्य निर्वि-कल्पस्य कदापि विकल्पान्वयव्यतिरेकाग्रहणेनाभ्यासादिसहकृतस्याविकल्पस्य विकल्पजनकत्वकल्पनाया अन्याय्यत्वाच्च"—शास्त्रवा० स्याद्वादक० पृ० १५८ प्र० पं० ७ ।

४ "स्वर्गप्रापण-" बृ० ल० टि० । ५ "सद्द्रव्यचेतनत्वादिरूपे"-बृ० ल० टि० । ६ "उत्पादे"-बृ० ल० टि० । ७ "शक्तिभावात्"-बृ० ल० टि० । ८ "विस्तीर्णप्रघट्टकादौ"-बृ० टि० । विस्तीर्णप्रघट्टकादौ स्मरणविकल्पानु-दये"-ल० टि० । ९-स्यान्यदा भां० मां० आ० हा० वि० ।

निर्वर्त्तयतीति युक्तं मृदादिवत् कुम्भकाराद्युपकृतम् । न चाभ्यासादिसहायमविकल्पकं कदाचिद् विकल्पमुपजनयद् दृष्टमिति कथं तस्य सहकारिसचिवस्य विकल्पजनकताभ्युपगमः? । अथ सच्चेत-नादिविकल्पमविकल्पकमुत्पादयद् दृष्टमिति तदभ्युपगमः; स्यादेतत् यदि क्रमभाविहेतुफलभूतम-विकल्पसविकल्पकं ज्ञानद्वयमवसीयेत न च तदवसीयते सांशैकविकल्पस्वभावस्य सामान्यविशेषात्मक-वस्तुग्राहिणः प्रथममेवोपजायमानस्यैकस्यैव निश्चयात् । तथाप्यप्रतीयमानस्य पूर्वकालभाविनोऽपरस्या-विकल्पकस्याभ्युपगमे तत्राप्यपरस्य तथाभूतस्याभ्युपगम इत्यनवस्थाप्रसक्तिः ।

यदप्यविकल्पकस्याभ्यासादिसहायविकल्पजनने प्रघट्टकास्मरणं दृष्टान्तत्वेनोपन्यस्तम्, तदप्य-युक्तम्; यतो वर्णादीनां तज्ज्ञानानां च व्यक्तिभेदाद् दृढसंस्काराण्येव निश्चयात्मकान्यपि ज्ञानानि स्मृतिजनकानि नापराणीति प्रतिनियतविषयस्मृतिसंभवान्न सकलप्रघट्टकास्मरणदोषः अनिश्चया-त्मकं तु ज्ञानं क्षणिकत्वादाविव न क्वचिद् विकल्पहेतुर्भवेत् इत्युक्तं प्राक् । न च भवत्पक्षे सच्चेतनादि-स्वर्गप्रापणशक्त्यादीनां परस्परं तदनुभवानां च भेदः येनेदमुत्तरं समानं भवेत् । तथाहि-सच्चेतनादि-तत्सामर्थ्ययोरभेदे तदनुभवादेकरूपादुभयत्र संस्कारः स्मरणं वा भवेत् न वा क्वचिदिति अन्यथा अनुभवस्य सांशतापत्तिरिति सविकल्पकत्वं भवेत् । तस्माद् दानचित्तादौ सच्चेतनत्वादिकमनुभूयते न स्वर्गप्रापणसामर्थ्यमित्यभ्युपगन्तव्यम् । अथ तच्चेतसो मूषिकालर्कविषविकारवदनन्तरं फलस्यानु-पलम्भाद् अतत्फलसाधर्म्यादसामर्थ्यसमारोपाद् वा तदनुभवेऽपि न विकल्पः । तदुक्तम्— १५

"एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न दृष्टो भागः स्यात् यः प्रमाणैः परीक्ष्यते" ॥ [ ]
"नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् ।
शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात्" ॥ [ ] इति ।

अत्र च तात्पर्यार्थः—यद् यतोऽभिन्नं तस्मिन्ननुभूयमाने तदनुभूयते, यथा तस्यैव स्वरूपम् २० अभिन्नं च सच्चेतनादेश्चेतसः स्वर्गप्रापणसामर्थ्यम् तस्य ततो भेदे सम्बन्धासिद्धेः सामर्थ्यादेव तत्प्राप्ते-श्चेतसस्तत्प्राप्तिं प्रत्यकारकत्वं च भवेत् निरंशस्य च वस्तुनोऽध्यक्षेणानुभवेऽननुभूतापरांशाभावान्न तत्र प्रमाणान्तरप्रवृत्तिः प्रयोजनवती अयं च निश्चयात्मकाध्यक्षवादिनो दोषः निश्चिते विपरीत-समारोपाभावात् निश्चयारोपमनसोर्बाध्यबाधकभावात् अविकल्पदर्शनानुभूते तु वस्तुन्यनिश्चयाद् भ्रान्तिनिमित्तगुणान्तरारोपसंभवात् तद्व्यवच्छेदार्थं प्रमाणान्तरप्रवृत्तिः सप्रयोजनैवेति, एतदप्य- २५ युक्तम्, यतस्तत्सामर्थ्यस्य यत् फलं सच्चेतसां तदेव, उतान्यदिति? प्रथमपक्षे उभयत्र निश्चयाभावः फलादर्शनस्याविशेषात् । द्वितीयपक्षे घट-पटवत् तद्भेदः । यदप्यसामर्थ्यसमारोपात् तन्निश्चयानु-त्पत्तिरिति तत्रापि तत्सामर्थ्यानुभवो यद्यनिश्चितोऽप्यस्ति सर्वं सर्वत्रानिश्चितमपि भवेदिति साङ्ख्य-मताऽप्रतिक्षेपः । न च तत्सामर्थ्यं तच्चेतसोऽभिन्नमिति तदनुभवे तस्याप्यनुभवः चन्द्रग्रहणेऽपि तदेकत्वाग्रहणतस्तैमिरिकदर्शनेन व्यभिचारात् । तस्यापि ग्रहणमिति चेत्, न; भ्रान्तेरभावप्रसङ्गतः ३०

---

१ "उत्तरम्"-बृ० ल० टि० । २ "निर्विकल्पकस्य"-बृ० टि० । ३ "दृढसंस्काराण्येव स्मृतिजनकानीति योगः"-बृ० ल० टि० । ४-त्पक्षे तच्चे-आ० हा० वि० । ५ "स्वर्गप्रापणसामर्थ्य"-बृ० ल० टि० ।

६ "यथोक्तम्—

तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः । भागः कोऽन्यो न दृष्टः स्यात् यः प्रमाणैः परीक्ष्यते ॥" इति—प्रशस्त० कं० पृ० २०८ पं० ३ ।

"तदुक्तम्" इत्युल्लिख्योद्धृतवानिदं 'एकस्यार्थस्वभावस्य' इत्यादि पद्यं जयन्तभट्टः ।—न्यायमञ्ज० आ० २ पृ० ९३ पं० १४ ।

"तदुक्तम्" इत्युल्लिख्य श्रीयशोविजयैरिदं पद्यद्वयमुद्धृतं वर्तते शास्त्रवार्तासमुच्चयस्य टीकायाम्-पृ० १५८ द्वि० पं० २-४ ।

७ "स्वर्ग-"बृ० ल० टि० । ८-त्यपका-आ० हा० वि० । ९-मित्तं गु- ल० वा० बा० । १० "चित्त-तत्सामर्थ्ययोर्भेदः"-बृ० ल० टि० । ११ "चन्द्रैकत्वस्य तैमिरिकदर्शने"-ल० टि० । "चन्द्रैकत्वस्य"-बृ० टि० ।

"कल्पनापोढमभ्रान्तं प्रत्यक्षम्" [न्यायबिं० १-४] इत्यत्राभ्रान्तग्रहणानर्थक्यप्रसक्तेर्व्यवच्छेद्याभावात्। चन्द्रग्रहणमपि तत्र नास्तीति चेत्, न; एकत्वाप्रतिपत्तावपि तत्प्रतिभासदर्शनात्। एकस्य द्वित्वविशिष्टतया तस्य ग्रहणान्मरीचिकाजलज्ञानवद् भ्रान्तं तदिति चेत्, न; द्वित्वे यथा विसंवादाभिप्रायात् तद् भ्रान्तं तथा चन्द्रमसि संवादाभिप्रायात् किमिति तत्रा(न्ना)भ्रान्तं प्रमाणेतरव्यवस्थाया व्यवहार्यनुरोधतः समाश्रयणात् "प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम्" [ ] इति भवतैवाभिहितत्वात्। न चैकत्र ज्ञाने भ्रान्तेतररूपद्वयमयुक्तम् व्यवहारिणा तथाश्रयणात् अन्यथैकचन्द्रदर्शनस्यापि 'चन्द्ररूपे प्रमाणता क्षणिकत्वे अप्रमाणता' इति रूपद्वयं न स्यात् क्षणक्षयेऽपि तत्प्रामाण्ये प्रमाणान्तराप्रवृत्तिर्भवेत्। चन्द्रमस्यप्यप्रमाणत्वे न किञ्चित् क्वचित् प्रमाणं भवेदिति सर्वप्रमाणव्यवहारलोपः। यस्य तु मतं दृश्य-प्राप्ययोरेकत्वे अविसंवादाभिमानिनः प्रत्यक्षं प्रमाणम् इतरस्य तयोर्विवेके सत्यनुभूतेऽपि न प्रमाणम् तस्य चन्द्रदर्शने चन्द्रप्राप्त्यभिमानिनः किमिति चन्द्रमात्रे तन्न प्रमाणम्? विवेकानध्यवसायिनस्तु यदि तदननुभूतेऽप्येकत्वे प्रमाणं तर्हि यद् यथावभासते तत् तथैव परमार्थसद्व्यवहारावतारि यथा नीलं नीलतयावभासमानं तथैव सद्व्यवहारावतारि अवभासन्ते च क्षणिकतया सर्वे भावाः इत्यनुमानमसङ्गतम् हेतोरसिद्धताप्राप्तेः। अथ तं प्रत्येतदनुमानमेव नोपादीयते तर्हि कं प्रत्येतदुपादेयम्? यस्तयोर्विवेकं मन्यते तं प्रतीति चेत्, न; तं प्रत्यनुमानानर्थक्यात् तदन्तरेणापि तदर्थनिष्पत्तेः यच्च तं प्रति भाविनि प्रवर्तकत्वादनुमानं प्रमाणं युक्तम् तत् "सर्वचित्त-चैत्तानामात्मसंवेदनं प्रत्यक्षम्" [ ] इति वचनात् स्वरूपेऽभ्रान्तं बहिरर्थे "भ्रान्तिरपि सम्बन्धतः प्रमा" [ ] इति वचनाद् भ्रान्तमित्येकमेव कथं द्विरूपम्? किञ्च, यदि तस्य न प्रत्यक्षं प्रमाणमस्ति कथमनुमानप्रादुर्भावः? अस्ति चेत् तत् किंविषयमिति वाच्यम्? साधनावभासिजलादिसाधनविषयं प्राप्यावभासि प्राप्यार्थक्रियाविषयमिति चेत्; ननु तदपि जलादिमात्रे प्रमाणम् स्वविषयकार्यजननसामर्थ्यादावप्रमाणम् अन्यथा विवादाभावात् शास्त्रप्रणयनं तदर्थमनर्थकं भवेदिति तदप्यंशेनैव प्रमाणम्। यत् पुनरभ्यधायि 'दृश्य-प्राप्ययोरेकत्वे

१ पृ० ४८८ टि० ९।

" तस्मायत्कल्पनापोढपदं प्रत्यक्षलक्षणे। भिक्षुणा पठितं तस्य व्यवच्छेद्यं न विद्यते॥

अभ्रान्तपदस्यापि व्यावर्त्यं न किंचन तन्मतेन पश्यामः। ननु तिमिराशुभ्रमणनौयानसंक्षोभाद्याहितविभ्रमं द्विचन्द्रालातचक्रचलत्पादपादिदर्शनमपोद्यमस्य परैरुक्तम्। सत्यमुक्तम् अयुक्तं तु कल्पनापोढपदेनैव तद्व्युदाससिद्धेः। तत्रापि निर्विकल्पकं ज्ञानमेकं चन्द्रादिविषयमेव विकल्पास्तु विपरीताकारग्राहिणो भवन्ति यथा मरीचिग्राहिणि निर्विकल्पके सलिलावसायी विकल्प इति। ननु तिमिरेण द्विधाकृतं चक्षुरेकतया न शक्नोति शशिनं ग्रहीतुमिति निर्विकल्पकमपि द्विचन्द्रज्ञानम्। यद्येवं तरङ्गादिसादृश्यरूषितमूषरे मरीचिचक्रं चक्षुषा परिच्छेत्तुमशक्यमिति तत्रापि निर्विकल्पकमुदकग्राहि विज्ञानं किमिति नेष्यते अभ्युपगमे वा सदसत्कल्पनोत्पातादिकृतः प्रमाणेतरव्यवहारो न स्यात्। अपि च न बाधकोपनिपातमन्तरेण भ्रान्तताऽवकल्पते ज्ञानानाम्। न च क्षणिकवादिमते बाध्यबाधकभावो बुद्धीनामुपपद्यते इत्यलं विमर्देन।

इति सुनिपुणबुद्धिर्लक्षणं वक्तुकामः पदयुगलमपीदं निर्ममे नानवद्यम्।
भवतु मतिमहिम्नश्चेष्टितं दृष्टमेतज्जगदभिभवधीरं धीमतो धर्मकीर्तेः" ॥—

न्यायमञ्ज० आ० २ पृ० ९९ पं० २३–।

२ "शशि"–बृ० टि०। ३ **शास्त्रमो**–बृ० वि०। तत्त्वार्थश्लो० वा० पृ० १७३ श्लो० ६२।

"नान्तरीयकत्वादेकानुभवोऽन्यानुभवे मानमिति चेत्। न, चन्द्रग्रहणेऽपि तदेकत्वाग्रहणतस्तैमिरिकदर्शनेन व्यभिचारात्, द्वित्वे तस्य भ्रान्तत्वेऽपि चन्द्रेऽभ्रान्तत्वात् प्रमाणेतरव्यवस्थाया व्यवहारिजनापेक्षत्वात् "प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम्" इति त्वयैवाभिहितत्वात् अन्यथैकचन्द्रदर्शनस्यापि चन्द्ररूपे प्रमाणता क्षणिकत्वे चाप्रमाणता इति रूपद्वयस्याभ्युपगमविरोधात्"—शास्त्रवा० स्याद्वादक० पृ० १५८ द्वि० पं० ६–९। ४–**रस्पद्व**–बृ०। ५–**हारिणां त**–वा० बा०। ६–**रूपेण प्र**–बृ० भां० मां०। ७ "चन्द्रदर्शन"–बृ० ल० टि०। ८ शास्त्रवा० स्याद्वादक० पृ० १५८ द्वि० पं० १०–। ९ "विसंवादाभिमानिनः"—बृ० ल० टि०। १० "वादिनः"–बृ० ल० टि०। ११ "चन्द्रदर्शनम्"—बृ० ल० टि०। १२ "यथा विवेकानध्यवसायिनश्चन्द्रविषये एकत्वेऽननुभूतेऽपि दर्शनं प्रमाणं तथा क्षणिकत्वेऽप्यननुभूते भविष्यतीति"—बृ० ल० टि०। १३ "विवेकानध्यवसायिनम्"–बृ० ल० टि०। १४ "अनुमानम्"–बृ० टि०। १५ "विवेकप्रतिपत्तारं प्रति"–बृ० ल० टि०। १६ पृ० ५०६ टि० १। १७–**रूपे भ्रा**–बृ० विना। १८ पृ० ४८१ गतं पञ्चमं टिप्पणमवलोकनीयम्। १९ "विवेकाध्यवसायिनः"–बृ० ल० टि०।

विसंवादबुद्धिं प्रति प्रत्यक्षाभासम्' इति तत्र दृश्यादिमात्रे तदाभासत्वे वस्तुदर्शनमुच्छिद्येत। अथात्र प्रमाण-तदाभासधर्मद्वयमेकत्राप्यभ्युपगम्यते प्रकृतेऽप्यभ्युपगम्यताम्। अथ तैमिरिकज्ञानेनाप्रतीयमानमेकत्वं तस्येति कथम्? ननु निश्चिते शब्दे अनिश्चिता क्षणिकता तस्येत्यपि कथम्? अनुमानेन तत्रैव निश्चयात् तस्येति एतदन्यत्रापि समानम्। तदेवं निरंशत्वे वस्तुनस्तच्चित्तग्रहणे तत्सामर्थ्यस्यापि ग्रहणप्रसक्तेर्विवादाभावस्तत्रैव भवेत् न चैवमिति सांशं वस्तु तथाभूतवस्तुग्राहकं प्रमाणमपि सांशं सत् सविकल्पकम्। अपि च, यदि निरंशवस्तुसामर्थ्योद्भूतत्वात् कल्पनापोढमध्यक्षं स्वसंवेदनं तथाभूतवस्तुप्रभवत्वाभावात् संवेदनग्राहि निर्विकल्पकं च न भवेत्। अथ तादात्म्यं तत्र तन्निमित्तम्, न; सच्चेतनादेरिव स्वर्गप्रापणसामर्थ्यादेरपि ग्रहणप्रसक्तेस्तदविशेषात्। अथ न तादात्म्याद् ग्रहणमेवाभिन्नस्य किन्तु तादात्म्यादेव, असदेतत्; तादात्म्यादेव स्वरूपस्य ग्रहे इत्यत्र प्रमाणाभावात्। अविकल्पकं दर्शनं प्रमाणमिति चेत्, न; सुषुप्तावस्थायां तत्प्रसङ्गात् तत्रापि चैतन्यसद्भावात् अन्यथा प्रबोधावस्थाविज्ञानमनुपादानम् अचेतनोपादानं वा भवेत्। न च तदनुरूपप्रबोधदर्शनाज्जाग्रद्विज्ञानोपादानं तत् विप्रकृष्टदेशकालस्यापि कारणत्वे तैमिरिकज्ञानस्यापि विप्रकृष्टदेशकालकारणप्रभवत्वसंभवात् निरालम्बनता न भवेत् अतोऽव्यवहितं कारणमभ्युपगन्तव्यम्। न च सुषुप्तावस्थायां विकल्पानुत्पत्तेर्न तत्प्रसङ्गः विकल्पवशात् तादात्म्ये सत्यपि तद्व्यवस्थायां बाह्यार्थेऽपि तत एव तद्व्यवस्थोपपत्तेर्विकल्प एव प्रमाणं भवेत्।

किञ्च, यद्यर्थप्रभवत्वात् ज्ञानमर्थग्राहकं तर्हि इन्द्रियादेरपि तत एव ग्राहकं भवेत् तद्व्यतिरिक्तबाह्यार्थग्राहकत्वं च तस्याभ्युपेयते। तथाहि—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्" [वात्स्या० भा० पृ० १ पं० १] इत्यत्र भाष्ये प्रमातृ-प्रमेयाभ्यामर्थान्तरमर्थसहकार्यर्थवत् प्रमाणं नैयायिकैर्व्याख्यातम्। तेन न तत्प्रभवत्वं तन्निमित्तम् तदभ्युपगमे वा शब्दज्ञाने शब्दवत् तत्समवायिकारणकर्णशष्कुल्यवच्छिन्नभोदेशाख्यश्रोत्रेन्द्रिय-तत्समवाययोरपि प्रतिभासः स्यादित्याकाशसमवायविषयानुमानोपन्यासो वैयर्थ्यमनुभवेत् अध्यक्षसिद्धेऽनुमानोपन्यासप्रयासस्य वैफल्यात्। न च समवायविषयाध्यक्षस्याविकल्पकत्वेन तद्गृहीतस्यागृहीतरूपत्वान्नायं दोषः शब्देऽप्यस्य समानत्वात् यतो नैकमेकत्र निर्णयात्मकमपरत्रान्यथेत्येकान्तवादिनो वक्तुं युक्तम्। एवं रूप-तत्सामान्य-समवायेष्वपि वाच्यम्। अथ न कारणमित्येवार्थग्रहः किन्तु योग्यतातः; नन्वेवं किमनिमित्तमर्थस्य ज्ञानं प्रति कारणता परिकल्प्यते? अथ न तद्ग्रहणान्यथानुपपत्तेस्तत्प्रति तत्कारणतापरिकल्पनम् किन्त्वन्वय-व्यतिरेकाभ्याम्-'अर्थे सति तदवभासि ज्ञानमुपलब्धं तदभावे च न' इत्यन्वय-व्यतिरेकनिबन्धनोऽन्यत्रापि हेतुफलभाव इति, असदेतत्; योगिज्ञानस्य सकलातीतानागतपदार्थसाक्षात्कारिणोऽतीतानागततत्पदार्थाभावेऽपि भावाभ्युपगमात्। न च सर्वेऽप्यतीतानागता भावास्तदा सन्ति सर्वभावानां नित्यताप्रसक्तेः। न च तद्विषयं तज्ज्ञानं न भवति 'सदसद्वर्गः कस्यचिदेकज्ञानालम्बनः अनेकत्वात् पञ्चाङ्गुलिवत्' इत्यनुमानविरोधात्। एतेन "यस्य ज्ञाने प्रतिभासस्तस्य तत्र तत्कारणत्वं निमित्तमभिधीयते नत्वप्रतिभासमानस्य समवायादेस्तन्निमित्तः प्रतिभासो भवतु इत्यासञ्जयितुं युक्तम्" [ ] इत्यध्ययनादिमतं निरस्तम् योगिज्ञानेऽकारणस्यापि प्रतिभासप्रतिपादनात्। 'तैजसं चक्षुः रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवत्' तथा 'प्राप्तार्थप्रकाशकं चक्षुः तैजसत्वात् प्रदीपवत्' इत्येतदप्यत एव निरस्तम् रूपप्रकाशकत्वं हि रूपज्ञानजनकत्वम् तच्च प्रदीपस्यासिद्धम् तस्य रूपैकज्ञानसंसर्गित्वात्। प्रयोगश्चात्र-प्रदीपस्तद्विज्ञानकारणं न भवति विषयत्वात् यो हि यद्विषयो नासौ तत्कारणं यथा त्रिकालाशेषभावविषययोगिज्ञानस्यातीतादिकोऽर्थः तथा च प्रदीपो विषयो यथोक्तरूपज्ञानस्य तस्मान्न कारणमिति तैजसत्वासिद्धौ च चक्षुषः प्राप्तार्थप्रकाश-

१–**त्राभ्यु**–आ० हा० वि०। २ "द्विचन्द्रज्ञानेनैकत्वमप्रतीतमिति"–बृ० ल० टि०। ३ "द्विचन्द्रदर्शने"–बृ० ल० टि०। ४ "स्वर्गप्रापणसामर्थ्य"–बृ० ल० टि०। ५–**स्तत्र भ**–बृ० ल० वा० बा०। ६ **ग्रहण इ**–आ० हा० वि०। ७ "स्वरूपग्रहण"–बृ० ल० टि०। ८ "स्वप्रज्ञानम्"–बृ० ल० टि०। ९–**कार्यार्थ**–ल० आ० हा० वि०। १० "अर्थप्रभवत्वादर्थग्राहकत्व"–बृ० ल० टि०। ११ "यथा शब्दे"–बृ० ल० टि०। १२ प्रशस्त० कं० पृ० ३९ पं० ५, पृ० ४० पं० ११। न्यायसि० मु० का० ४२। १३–**स्याप्यसि**–बृ० भां० मां०।

कत्वं दूरोत्सारितमेव । अत एव "नाननुकृतान्वयव्यतिरेकं कारणं नाकारणं विषयः" [ ] इति सौगतमतमप्यपास्तम् । तथाहि–किं कारणं विषय एव, उत कारणमेव विषयः? प्रथमपक्ष रूपादिसंविदां चक्षुराद्यपि विषयो भवेत् तथा च 'यस्मिन् सत्यपि यन्न भवति तत् तदतिरिक्तहेत्वपेक्षं यथा कुलालाभावे सत्यप्यपरकारकसमूहेऽभवन् घटः कुलालापेक्षः सत्यपि च रूपादौ कदाचिन्न भवति रूपादिज्ञानम्' इत्यनुमानोपन्यासो व्यर्थः अध्यक्षत एव चक्षुराद्यधिगतेः । द्वितीयपक्षेऽपि 'भविष्यति रोहिण्युदयः कृत्तिकोदयादतीतक्षपायामिव' इत्यस्यानुमानस्य भावी रोहिण्युदयोऽकारणत्वात् विषयो न स्यात् न हि भावी रोहिण्युदयः कृत्तिकोदयस्य परम्परयापि कारणम् । अथ भावी रोहिण्युदयः प्राग्भाविनः कृत्तिकोदयस्य कारणं प्रज्ञाकराभिप्रायेण कार्यस्य प्राग्भावित्वात् तर्हि 'अभूद् भरण्युदयः कृत्तिकोदयात्' इत्यनुमानमविषयं भवेत् । अथ भरण्युदयोऽपि कृत्तिकोदयस्य कारणं तेनायमदोषः; ननु येन स्वभावेन भरण्युदयात् कृत्तिकोदयस्तेनैव यदि शकटोदयादपि तदा भरण्युदयादिव पश्चात् ततोऽपि भवेत् यथा वा शकटोदयात् प्राक् तथैव भरण्युदयादपि प्राग् भवेत् । अथान्यतरकार्यं कृत्तिकोदयस्तर्ह्यन्यतरस्यैव ततः प्रतीतिर्भवेत् न चैवमिति न युक्तं 'कारणमेव विषयः' इति पक्षाश्रयणम् । अथ कारणं स्वाकाराधायकं विज्ञाने विषय एवेति पक्षः अयमप्ययुक्तः; यतः किं कारणमेव तदाधायकं तत्र, आहोस्वित् तत् तदाधायकमेवेति विकल्पद्वयानतिवृत्तिः । प्रथमविकल्पे केशोन्दुकादिज्ञानं कुतः कारणात् तदाकारमुपजायते? न तावदर्थात् तस्य तत्कारणत्वानभ्युपगमात् अभ्युपगमे वा तस्याभ्रान्ततापत्तेः । न समनन्तरप्रत्ययात् तस्य तदाकारता(ताऽ)योगात् । नेन्द्रियादेः अत एव हेतोः । तन्न कारणमेव तदाधायकमिति पक्षाभ्युपगमः क्षमः । नापि तत् तदाधायकमेवेति पक्षोऽभ्युपगन्तुं युक्तः इन्द्रियस्यापि तदाधायकतापत्तेस्तज्ज्ञानविषयताप्रसक्तेः । अर्थस्य च सर्वात्मना तत्र स्वाकाराधाने ज्ञानस्य जडताप्रसक्तेः उत्तरार्थक्षणवदेकदेशेन तदाधायकत्वे सांशतापसक्तेः । समनन्तरप्रत्ययस्य तत्र स्वाकाराधायकत्वान्न जडतापत्तिलक्षणो दोष इति चेत्, न; समनन्तरप्रत्ययार्थक्षणयोः द्वयोरपि स्वाकारार्पकत्वे तज्ज्ञानस्य चेतनाचेतनरूपद्वयापत्तेः । प्राक्तनज्ञानक्षणस्यैव तत्र स्वाकाराधायकत्वे सर्वात्मना तदाधाने तस्य पूर्वरूपताप्रसक्तिरिति कारणरूपतैव स्यात् तथा च पूर्वपूर्वक्षणानामप्येवं प्रसक्तेरेकक्षणवर्त्ती सर्वः सन्तानो भवेदिति प्रमाणादिव्यवहारलोपः ।

किञ्च, तदाकारं तत उत्पन्नं च यदि समनन्तरप्रत्यये न तत् प्रमाणम् तदुत्पत्ति-सारूप्ययोर्व्यभिचार इति नार्थेऽपि तत् प्रमाणं भवेत् । तथा च—

"अर्थेन घटयेदेनां नहि मुक्त्वार्थरूपताम् ।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता" ॥ [ ]

---

१ "नाकारणं विषयः इति वचनप्रामाण्यात्"–अनेका० टी० पृ० २०७ पं० १ । स्याद्वादर० पृ० ७६९ पं० १९ आ० । बोधिचर्याव० प्रज्ञापार० पृ० ३९८ पं० १० । धर्मसं० पृ० १७६ द्वि० पं० १२ । स्याद्वा० पृ० १३४ पं० १८ । "तदुक्तम्–नाननुकृतान्वयव्यतिरेकं कारणं नाकारणं विषयः"–षड्द० स० बृ० वृ० पृ० ३७ पं० ३ । "'नाननुकृतान्वयव्यतिरेकं कारणं नाकारणं विषयः' इति हि सौगतानां मतम्"–शास्त्रवा० स्याद्वादक० पृ० १५१ प्र० पं० ८ ।

२ "ननु प्रज्ञाकराभिप्रायेण भाविरोहिण्युदयकार्यतया कृत्तिकोदयस्य गमकत्वात् कथं कार्यहेतौ नास्यान्तर्भाव इति चेत् कथमेवमभूद् भरण्युदयः कृत्तिकोदयादित्यनुमानम्? अथ भरण्युदयोपि कृत्तिकोदयस्य कारणं तेनायमदोषः । ननु येन स्वभावेन भरण्युदयात् कृत्तिकोदयस्तेनैव यदि शकटोदयात् तदा भरण्युदयादिव अतोपि पश्चादसौ स्यात् । यथा च शकटोदयात् प्राक् तथैव भरण्युदयादपि"–प्रमेयक० पृ० ११० प्र० पं० ९–।

३ प्र० पृ० पं० २ । ४ "केशोन्दुकज्ञानस्य"–बृ० ल० टि० । ५–**णमेव तत्तदा**–भां० मां० । **–णमेतत् तदा**–आ० । ६–**मः नापि** ल० वा० बा० भां० मां० विना । ७ शास्त्रवा० स्याद्वादक० पृ० १५९ प्र० पं० १० । ८ **मुक्तार्थ**–वा० बा० आ० हा० वि० । "तदुक्तम्" इत्युल्लिख्योद्धृतं पद्यमिदमस्ति सिद्धिविनिश्चयटीकायाम्—लि० पृ० ११९ पं० १ । "अर्थेन घटयत्येनां न हि मुक्तार्थरूपताम्"–प्रमेयक० पृ० २८ प्र० पं० ७ । प्रमाणमी० पृ० ३३ पं० १७ । स्याद्वा० पृ० १३६ पं० २२ ।

इत्यसङ्गतमभिधानम् । अथ यदाकारं यदुत्पन्नं यदध्यवस्यति तत्र तत् प्रमाणम् नन्वत्रापि यदाकारं यदुत्पन्नं विज्ञानमेवार्थाध्यवसायं जनयति, उत तत् तमेव, आहोस्विज्जनयत्येवेति कल्पनात्रयम् । आद्यकल्पनायां कारणान्तरनिषेधाद् विकल्पवासनापि तत्कारणं न भवेत् एवं च निर्विकल्पकबोधाद् यथा सामान्यावभासी विकल्पस्तथार्थादेव तथाभूताद् भविष्यतीति किमन्तरालवर्तिनिर्विकल्पदर्शनकल्पनया? न चाविकल्परूपताविशेषेऽपि दर्शनादेव विकल्पोत्पत्तिर्नार्थाद् वस्तुस्वाभाव्यादित्युत्तरम् तस्य स्वरूपेणैवासिद्धेः । किञ्च, यथा(थाऽ)विकल्पादर्थादविकल्पदर्शनप्रभवस्तथा दर्शनादपि तथाभूतात् तथाभूतस्यैवाविकल्पस्य प्रसव इति विकल्पवार्ताप्युपरतैव भवेत् । किञ्च, स्थिरस्थूरावभासि स्तम्भादिज्ञानं यद्यविकल्पकं कोऽपरो विकल्पो यस्तज्जन्यो भवेत्? अथ 'स्तम्भः स्तम्भोऽयम्' इत्यनुगताकारावभासि ज्ञानं विकल्पः सामान्यावभासित्वात् तर्ह्याद्यमप्यनेकावयवसाधारणस्थूलैकाकारस्तम्भावभासि विकल्पः किं न भवेत् सामान्यावभासस्यात्रापि तुल्यत्वात्? अस्यापलापेऽपरस्याप्रतिभासनात् प्रतिभासविकलं जगत् स्यात् । न च स्तम्भप्रतिभासात् प्राग् निरंशक्षणिकैकपरमाणुगोचरमविकल्पकं ज्ञानं पुरुषवत् प्रतिभाति तथापि तत्कल्पने पुरुषपरिकल्पनापि भवेदिति न सौगतपक्षस्यैव सिद्धिः । किञ्च, निरंशक्षणिकानेकस्तम्भादिपरमाण्वाकाराद्यनेकं तद् बिभर्ति स्वात्मनि तदा सविकल्पकमासज्येत अनेकानुविधानस्य विकल्पनान्तरीयकत्वात् । अथ भिन्नं प्रतिपरमाणु तदिष्यते भवेदेवमविकल्पकं किन्तु एकपरमाणुग्रहणव्यापारवैन्नापरपरमाणुग्रहणाय व्याप्रियत इति तेषां परलोकप्रख्यताप्रसक्तिः तद्वेदनैश्च तस्यावेदनमिति तस्याप्यभावः । न चैकैकपरमाणुनियतभिन्नं वेदनमविकल्पकम् अन्यविविक्तैकपरमाणोर्वाग्दृशि अप्रतिभासनाद् विवादगोचरस्य तज्ज्ञानस्य विकल्पजनकत्वासिद्धेः । तत्र प्रथमः पक्षो युक्तिसङ्गतः । इतश्चायमसङ्गतो यतो येन स्वभावेनाविकल्पकं दर्शनं स्वजातीयमुत्तरं जनयति तेनैव यदि विकल्पं तर्ह्यविकल्पो विकल्पः प्रसज्येत विकल्पो वाऽविकल्पः अन्यथा कारणभेदः कार्यभेदविधायी न भवेत्; स्वभावान्तरेण जनने सांशतापत्तिरिति । अथ तत् तमेव जनयति तथासति धारावाहिनिर्विकल्पसन्ततिर्न भवेत् । अथ तत् तं जनयत्येवेति तृतीयपक्षाश्रयणं तथासति क्षणभङ्गादापि निश्चय इति न ज्ञानसंततौ सत्त्वसमारोपः । न च रागादयस्तन्निबन्धना इति तद्व्यवच्छेदार्थमनुमितिर्नैरर्थक्यमनुभवेत् । किञ्च, यदि व्यवसायवशात् निर्विकल्पकस्य प्रामाण्यव्यवस्था तर्हि तदुत्पत्तिसारूप्यार्थग्रहणमन्तरेणाध्यवसाय एव प्रमाणं भवेत् । अथ तथाभूतानुभवमन्तरेण विकल्प एव न भवेत्, असदेतत्; तस्य तज्जन्यत्वासिद्धेरुक्तविकल्पदोषानतिक्रमात् । किञ्च, यदि तदाकारार्पणान्निर्णयप्रभवस्तदा स्वलक्षणगोचरो निर्णयो भवेत् निर्णयवद् वा सामान्यविषयमविकल्पकमासज्येत अन्यथा स्मृतिसारूप्याद् दर्शनस्य सारूप्यसाधनमयुक्तं भवेत् । अथार्थलेशमात्रानुकारि स्मरणं तथापि स्वलक्षणविषयत्वं स्मरणस्य सर्वथा तदनुकारित्वमविकल्पकस्याप्यसिद्धम् अन्यथा तस्य जडतापत्तिरिति प्रतिपादनात् तथा च—"विकल्पोऽवस्तुनिर्भासाद् विसंवादादुपप्लवः" इत्ययुक्ततया व्यवस्थितम् । अथ न लेशतोऽपि परमार्थतस्तदनुकारी विकल्पः प्रतिपन्नभिप्रायवशात् तु तदभिधानमिति न स्वलक्षणगोचरत्वम् निर्विकल्पकस्यापि व्यवहार्यभिप्राय-

---

१ "अथ यदाकारं यदुत्पन्नं यदध्यवस्यति तत्र तत् प्रमाणम् । नन्वत्र यदाकारं यदुत्पन्नं विज्ञानमेवाऽर्थाध्यवसायं जनयतीत्यर्थः, उत तमेवेति आहोस्विज्जनयत्येवेति? । आद्ये विकल्पवासनापि तत्कारणं न भवेत् । एवं च निर्विकल्पकबोधाद् यथा सामान्यावभासी विकल्पः, तथाऽर्थादेव तथाभूताद् भविष्यति, इति किमन्तरालवर्तिनिर्विकल्पककल्पनया? । न चाविकल्पताविशेषेऽपि दर्शनादेव विकल्पोत्पत्तिः, नार्थात्, वस्तुस्वाभाव्यादित्युत्तरम्, तस्य स्वरूपेणैवासिद्धेः, 'स्तम्भः स्तम्भोऽयम्' इतिवत् स्थिरैकस्तम्भावगाहिज्ञानस्य सामान्यविषयत्वात्, ऊर्ध्वतासामान्यापलापे तिर्यक्सामान्यस्याप्यपलापाज्जगतः प्रतिभासवैकल्यप्रसङ्गात्, निरंशक्षणिकानेकपरमाण्वाकारस्य तस्य सांशत्वेनाभ्युपगन्तुमशक्यत्वात्, प्रतिविविक्तपरमाणुतद्वेदस्य दुःश्रद्धानत्वात् । किञ्च, यथाऽविकल्पादर्थादविकल्पदर्शनप्रभवः तथा दर्शनादपि तथाभूताद् विकल्पस्यैव प्रभव इति विकल्पकथाऽप्युच्छिन्ना । द्वितीये धारावाहिकनिर्विकल्पकसंततिर्न स्यात् । तृतीयेऽपि अत्यन्तायोगव्यवच्छेदः स्वभावभेदं विना दुर्घट इति न किञ्चिदेतत् । तस्मात् तदुत्पत्तिसारूप्यार्थग्रहणमन्तरेणाप्यध्यवसायस्य प्रामाण्यं युक्तम्, अनाद्यसत्यविकल्पवासनात एव तदुत्पत्त्यभ्युपगमे दर्शनस्याप्यहेतुत्वात् "यत्रैव जनयेदेनां" इत्याद्यभ्युपगमव्याघातात् ।"—शास्त्रवा० स्याद्वादक० पृ० १५९ प्र० पं० १३ ।

२ "अर्थाध्यवसायमेव"–बृ० ल० टि० । ३ "अविकल्प"–बृ० टि० । ४ "मतुप्-प्रत्ययः"–बृ० टि० । ५ "अपरपरमाणुवेदनैः"–बृ० टि० । ६ "विज्ञानमेवार्थाध्यवसायं जनयतीत्ययम्"–बृ० ल० टि० । ७–**शात् न नि**–वा० बा० । ८–**रादर्श**–ल० । ९–**र्णयाप्र**–ल० । १० पृ० ५०० पं० १४ टि० ८ ।

वशात् तदनुकारित्वं न परमार्थतः "सर्वमालम्बने भ्रान्तम्" [ ] इत्यभिधानात् । ननु किमिति न परमार्थतोऽपि तदनुकारि तत्? सामान्यावभासादिति चेत्; नन्वसावपि कुतः? अनाद्यसत्यविकल्पवासनातः नन्वेवं न दर्शनं विकल्पजनकमिति "यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता" [ ] इत्यसङ्गतं वचो भवेत् । न च तद्वासनाप्रबोधविधायकत्वेन तदपि तद्धेतुः इन्द्रियार्थसन्निधानस्यैव तत्प्रबोधहेतुत्वात् । न च वासनाप्रभवत्वेनाक्षजस्य भ्रान्ततैवं भवेत् अर्थस्यापि कारणत्वेनानुमानवत् प्रमाणत्वात् । न च निर्विषयत्वात् व्यवसायस्याप्रामाण्यम् अनुमानस्यापि तत्प्रसक्तेः प्रत्यक्षप्रभवविकल्पवत् तस्याप्यवस्तुसामान्यगोचरत्वात् । न च तद्ग्राह्यविषयस्यावस्तुत्वेऽप्यध्यवसेयस्य स्वलक्षणत्वात् दृश्यविकल्पा(ल्प्या)वर्थावेकीकृत्य ततः प्रवृत्तेरनुमानस्य प्रामाण्यम् प्रकृतविकल्पेऽप्यस्य समानत्वात् अन्यथा "पक्षधर्मतानिश्चयः प्रत्यक्षतः क्वचित्" [ ] इति कथं वचो युक्तं भवेत्? न च गृहीतग्रहणाद् विकल्पोऽप्रमाणम् क्षणक्षयानुमानस्यापि तत्प्रसक्तेः शब्दस्वरूपावभास्यध्यक्षावगतक्षणक्षयविषयत्वात् । न चाध्यक्षेण धर्मिस्वरूपग्राहिणा शब्दग्रहणेऽपि न क्षणक्षयग्रहणम् विरुद्धधर्माध्यासतस्तैस्तैर्भेदप्रसक्तेः । प्रज्ञाकराभिप्रायेण तु लिङ्ग-लिङ्गिनोः साकल्येन योगिप्रत्यक्षतो व्याप्तिग्रहणेऽनभ्यासदशायां प्राप्ये भाविन्यनधिगतार्थाधिगन्तृत्वाभावादनुमानं प्रमाणं न भवेत् । अथानिर्णीतमनुमेयं निश्चिन्वत् प्रमाणमनुमानं तर्ह्यनिश्चितं नीलं निश्चिन्वन् विकल्पस्तथाविधः किं न प्रमाणम्? अथ समारोपव्यवच्छेदकरणादनुमानं प्रमाणं तर्हि नीलविकल्पोऽपि तत एव प्रमाणं भवेत् । न च सादृश्यादेव समारोपः—येन तत्रानीलसमारोपो न भवेत्—किन्तु स्वागमाहितविकल्पाभ्यासवासनातोऽपि यथा 'सर्वं सर्वात्मकम्' इति साङ्ख्यस्य एवं च नीलेऽनीलात्मकत्वसमारोपं व्यवच्छिन्दानो विकल्पः क्षणक्षयानुमानवत् कथं न प्रमाणम्? दृश्यन्ते हि शुक्तिकारज्ज्वादिषु रजत—सर्पादिसमारोपास्तथाभूतविकल्पवशाल्लिङ्गानुस्मरणमन्तरेणापि निवर्तमानाः ।

अथ भवत्वसौ विकल्पः प्रमाणम् न च प्रमाणान्तरम् अनुमानेऽन्तर्भावात्, नः अनभ्यासदशायां भाविनि प्रवर्तकत्वादनुमानं प्रमाणमिष्टं तच्च निश्चितत्रिरूपाल्लिङ्गादुपजायते निश्चयस्य चानुमानान्तर्भावे त्रैरूप्यनिश्चयोऽप्यनुमानं तदपि निश्चितत्रैरूप्याल्लिङ्गात् प्रवर्तत इत्यनवस्थानात् अनुमानाप्रवृत्तिरेवेति कुतो विकल्पस्य तत्रान्तर्भावः? अथ पक्षधर्मान्वयव्यतिरेकनिश्चायकं लिङ्गस्य नानुमानं तर्हि प्रमाणान्तरस्याभावाद्ध्यक्षं निर्णयात्मकं पक्षधर्मत्वादिनिश्चयः सिद्धः । अत एवं 'अनभ्यासदशायामनुमानम् अभ्यासदशायां तु दर्शनमेव प्रमाणं न च तृतीया दशा विद्यते यस्यां विकल्पः प्रमाणं भवेत्' इति निरस्तम् अनभ्यासदशायामनुमानस्यैव तमन्तरेणाप्रवृत्तेस्तदपेक्षस्यैव तस्य प्रमाणत्वात् । न च भवतु प्रत्यक्षानुमानव्यतिरिक्तो विकल्पस्तथापि न तदपेक्षं दर्शनं प्रमाणं स्वत एव तस्य प्रमाणत्वात् अन्यथा विकल्पस्यापि विकल्पान्तरापेक्षया प्रमाणत्वादनवस्था दुष्परिहारा अर्थविषयीकरणाद् विकल्पस्यान्यनिरपेक्षस्य प्रामाण्ये निर्विकल्पकस्यापि तथैव प्रामाण्यं भविष्यतीति किं विकल्पापेक्षयेति वक्तव्यम् यतः संशय-विपर्ययोत्पादकमपि दर्शनमेवं प्रमाणं स्यात् तथा च तत्राप्यर्थक्रियार्थी प्रवर्तेत । अथ जले 'जलमेतत्' इति निर्णयविधायि प्रमाणं तर्हि सिद्धं विकल्पापेक्षणं तस्येति वरं विकल्प एव प्रमाणमभ्युपगतस्तस्यैव प्रवृत्त्यादिव्यवहारसाधकतमत्वात् । यदपि 'अभ्यासदशायां दर्शनमेव विकल्पनिरपेक्षं प्रमाणम्' इति तत्र वक्तव्यं क्व तत् प्रमाणम्? प्राप्ये

१-**शादनु**-आ० हा० वि० । २ "सर्वमालम्बने भ्रान्तमिति राद्धान्तात्"-सिद्धिवि० टी० लि० पृ० ५४ पं० १३ । ३-**ति प**-बृ० । ४ "स्वलक्षणानुकारि"-बृ० ल० टि० । ५ "निर्विकल्पकम्"-बृ० ल० टि० । ६ "विकल्पः"-बृ० ल० टि० । ७ "यत्रैव जनयेदेताम्"-प्रमेयक० पृ० १० द्वि० पं० ५ । "अत्रापरः सौगतः प्राह-यत्रैव जनयेदेनां तत्रैवास्य प्रमाणतेति धर्मोत्तरस्य मतमेतत्"—सिद्धिवि० टी० लि० पृ० ९१ पं० १६ । शास्त्रवा० स्याद्वादक० पृ० १५१ द्वि० पं० ६ । ८ "दर्शनम्"-बृ० टि० । ९-**पि कर**-वा० बा० । १० "अनुमानस्यापि"-बृ० ल० टि० । ११-**वसायस्य** आ० हा० वि० । शास्त्रवा० स्याद्वादक० पृ० १५९ द्वि० पं० १२ । "न च तद्ग्राह्यस्य सामान्यरूपत्वेऽप्यध्यवसेयस्य स्वलक्षणरूपत्वाद् दृश्यविकल्प्यावर्थावेकीकृत्य ततः प्रवृत्तेरनुमानस्य प्रामाण्यं प्रकृतविकल्पेऽप्यस्य समानत्वात्"-प्रमेयक० पृ० ११ प्र० पं० १० । स्याद्वादर० पृ० ८८ पं० ६ आ० । १२ पृ० ७६ पं० ३३-३४ । १३ "धर्मिणः"-बृ० ल० टि० । १४ "क्षणक्षय"-बृ० ल० टि० । १५ शास्त्रवा० स्याद्वादक० पृ० १६० प्र० पं० १-। १६ **एव च** आ० हा० वि० । १७ "अनुमाने"-बृ० ल० टि० । १८ "सामानाधिकरण्यमेतत्"-बृ० ल० टि० । १९-**वमन**-आ० हा० वि० । २० "दर्शनस्य"-बृ० ल० टि० ।

भाविनि रूपादाविति चेत्, तस्याविषयीकरणे तेनायुक्तम् अन्यथा नीलज्ञानं पीते प्रमाणं स्यात् विषयीकरणे भाविविषयत्वं तस्यैव भवेत् तथा च "वर्तमानावभासि सर्वं प्रत्यक्षम्" [ ] इति विरुध्येत । अथ वर्त्तमानविषयमपि भाविनि प्रवृत्तिविधानात् प्रमाणम्, नः अविषयीकृते प्रवर्तकत्वासंभवात् प्रवर्तकत्वे वा शाब्दमपि सामान्यमात्रविषयं विशेषे प्रवृत्तिं विधास्यतीति न मीमांसकमतप्रतिक्षेपो युक्तः । यदि वा(चा)विषयेऽपि कुतश्चिन्निमित्ताद् ज्ञानं प्रवर्तकं तर्हि प्रत्यक्षेऽपि पृष्ठभाविसामान्यमात्राध्यवसायिविकल्पस्य विशेषे प्रवर्तकत्वं भविष्यतीति न युक्तम् 'दृश्य-विकल्प्य(ल्प्य)योरर्थयोरेकीकरणं तत्र प्रवृत्तिनिमित्तम्' इत्यभिधानम् । तत्र प्राप्ये तत् प्रमाणम् । दृश्य-प्राप्ययोरेकत्वे तत् प्रमाणमिति चेत् कुत एतत्? व्यवहारिणां तत्राविसंवादाभिप्रायात् अविसंवादि च ज्ञानं प्रमाणम् । तदुक्तम्—"प्रमाणमविसंवादिज्ञानम् अर्थक्रियास्थितिरविसंवादनम्" [ ] इति चेत्; ननु तदेकत्वं कस्य विषयः? दर्शनस्येति चेत्, नः तस्य सामान्यविषयतया सविकल्पकत्वप्रसक्तेः । विकल्पस्येति चेत्, नः अभ्यासदशायां विकल्पस्यानभ्युपगमात् । कथं च दृश्य-प्राप्ययोरेकत्वं विकल्पस्यैव विषयो नाविकल्पस्य एकत्वस्यायोगादिति चेत् कथं विकल्पविषयः? अवस्तुविषयत्वात् तस्येति चेत् दर्शनस्य को विषयः? दृश्यमानक्षणमात्रमिति चेत् ननु यदि तत् सञ्चितपरमाणुस्वभावं तत्र दर्शने प्रतिभाति तदा तस्य सविकल्पकत्वमिति प्राक् प्रतिपादितम् । विविक्तैकैकपरमाणुरूपं चेत् सर्वशून्यताप्राप्तेर्न काचिदभ्यासदशा यस्यां दर्शनं प्रमाणं विकल्पविकलं भवेत् । यथा चानेकपरमाण्वाकारमेकं ज्ञानं तथा दृश्य-प्राप्ययोर्घटादिकमेकमिति तद्विषयं परमार्थतोऽभ्यासदशायां सविकल्पकमध्यक्षं किमिति नाभ्युपगम्यते? अथाशक्यविवेचनत्वाच्चित्रप्रतिभासाप्येकैव बुद्धिः घटादिकस्तु चित्रो नैकस्तद्विपर्ययात्; ननु किमिदं बुद्धेरशक्यविवेचनत्वम्? यदि सहोत्पत्तिविनाशौ तदन्याननुभवो वा तदभ्युपगम्यते तदैकक्षणभाविसन्तानान्तरज्ञानेषु भिन्नरूपतयोपगतेष्वपि तस्य भावादित्यनैकान्तिको हेतुः । अथ सन्तानान्तराण्यपि नाभ्युपगम्यन्ते कथमवस्थाद्वयाभ्युपगमः? व्यवहारेण तदभ्युपगमे तथैव सन्ताननानात्वोपगमादनैकान्तिकत्वं तदवस्थमेव । न च प्रतिभासाद्वैतवादोपगमात् तान्यपि पक्षीक्रियन्त इति नानैकान्तिकः एकशाखाप्रभवत्वहेतोरपि विपक्षविषयपक्षीकरणादनैकान्तिकत्वाभावप्रसक्तेः । न चात्राऽऽऽमताग्राह्यध्यक्षेण पक्षबाधनान्न पक्षीकरणसंभवः प्रकृतेऽपि युगपद्भाविनां नानाचित्तसंतानानां भेदावभासिस्वसंवेदनाध्यक्षेण बाधनादस्य समानत्वात् । अथानन्यवेद्यत्वमशक्यविवेचनत्वम् तदपि सुखादिभिः क्रमेणैकसन्तानभाविभिर्व्यभिचारि । अथैषामपि पक्षीकरणम्; नन्वेवं परिणाम्यात्मसिद्धेः 'यद् यथावभासते' इत्याद्यनुमानमयुक्तम् हेतोरसिद्धताप्राप्तेः । अथ भेदाभेदात्मकत्वेन प्रतिभासनं तदभिमतं तर्हि दृश्य-प्राप्ययोरपि तदस्तीति कथं नैकत्वम्? अथ नीलादिप्रतिभासानां नैकत्वं चित्रप्रतिभासात् न नानात्वं तदात्मकस्य वा तद्ग्राहकस्याभावात् सर्वविकल्पातीतं तु तत्त्वमिति अत्रापि यद्येकत्वस्यैकान्तेन निषेधः साध्यस्तदा सिद्धसाध्यता अन्यथा चित्रप्रतिभासाभावात् । कथञ्चिदेकत्वस्य तु निषेधेऽसिद्धश्चित्रप्रतिभासादिति हेतुः यतः पीतादीनां नीलप्रतिभासेनाविषयीकरणे सन्तानान्तरवदभावस्तथापि भावे न सन्तानान्तरनिषेधः तेषां च क्षणक्षयसाधने ग्राह्यग्राहकभाव इति न सर्वविकल्पातीतं तत्त्वं विषयीकरणे तदाकारेणापि तद्ग्राहकाभावात् नापि नानात्वमित्यस्य विरोधः स्वपरग्राहकस्यैव तद्ग्राहकत्वात् सर्वथा तदाकारत्वे नीलमात्रं पीतमात्रं भवेदिति न चित्रप्रतिभासः कथञ्चित् तदाकारत्वे सिद्धं सविकल्पदर्शनम् । अथ सर्वविकल्पातीते तत्त्वे इदमप्यवक्तव्यम् तर्हि न परस्यापि परतो गतिः किन्तु "स्वरूपस्य स्वतो गतिः" [ ] इत्ये-

१ "भाविरूपादेः"-बृ० ल० टि० । २ **तस्य भ**-बृ० ल० वा० बा० । ३-**क्षदृष्टभा**-आ० हा० वि० । ४ **विशेषप्रवर्तक**-बृ० ल० विना । ५ पृ० १५ पं० २३ । ६ "विकल्पस्य"-बृ० ल० टि० । ७ अशक्यविवेचनत्वं तन्निराकरणं च प्रमेयक०मार्तण्डे भङ्ग्यन्तरेण चर्चितं दृश्यते-पृ० २५ प्र० पं० ६ । ८ "प्रथमपक्षे दूषणमेतत्"-बृ० ल० टि० । ९ "प्रत्यक्षबाधस्य"-बृ० ल० टि० । १०-**विचेतन**-बृ० । ११ "एकसन्तानसुखादीनाम्"-बृ० ल० टि० । १२ पृ० ४८८ पं० २२ । १३ "अशक्यविवेचनत्वम्"-बृ० ल० टि० । १४-**रणेऽत**-बृ० । १५ "नानात्व"-बृ० ल० टि० । १६-**कल्पं द्**-ल० आ० ।

तदपि न वक्तव्यम् तथा च विज्ञानाद्वैतमपि कुतः? न चान्यग्रहणविमुखज्ञानसंवेदनादेवमुच्यते अन्यत्राप्यस्य समानत्वात्। तदेवं चित्रप्रतिभासमभ्युपगच्छता चित्रमेकं ज्ञानमभ्युपगन्तव्यमिति अभ्यासदशायामपि व्यवसायात्मकमध्यक्षं सिद्धिमासादयेत्।

यदपि 'यद्यर्थग्रहणं व्यवसायोऽविकल्पे तथा नामकरणमथ जात्यादिविशिष्टार्थग्रहणं तत् प्रत्यक्षेऽसंभवि' इत्युच्यते, तदपि निरस्तं द्रष्टव्यम्; अर्थग्रहणस्य विकल्पस्वभावनान्तरीयकत्वात्। यदि ह्येकैकपरमाणुनियतभिन्नदर्शने तन्नाम क्रियेत तदा स्यादेतत् न चैवम् स्थूलैकप्रतिभासाभावप्रसक्तेः। यदपि 'जात्यादिविशिष्टग्रहणं प्रत्यक्षेऽसंभवि' तदपि सदृशपरिणामसामान्याभ्युपगमे सिद्धम् तथाभूतस्य तस्याध्यक्षे प्रतिभाससंवेदनात् तथाभूतस्यापि तस्य निराकरणे "नो चेद्भ्रान्तिनिमित्त—" इत्यादेस्तथा "अर्थेन घटयेदेनाम्" इत्यादेश्चाभिधानमसङ्गतं भवेत्। तथाहि—शुक्तिका—रजतयोः कथञ्चित् सदृशपरिणामाभावे रूपसार्धर्म्यदर्शनाभावाद् अन्यथाऽतिप्रसङ्गात्। अथ मरीचिकासु यथा जलाभावेऽपि तद्दर्शनं तथा तयोर्भविष्यति न च तयोस्तद्दर्शनं सत्यम् तत्परिणामस्य परमार्थतस्तत्रा-भावात् इतरेतराश्रयदोषप्रसक्तेः। तथाहि—तत्परिणामस्य परमार्थतस्तयोः सत्त्वे तद्दर्शनस्य सत्यता ततश्च तत्परिणामस्य पारमार्थिकत्वमिति व्यक्तमितरेतराश्रयत्वमिति चेत्, असदेतत्; सर्वभावे-ष्वेवमव्यवस्याप्रसङ्गात्। तथाहि—स्वसंवेदनमविकल्पमध्यक्षं तथाप्रतीतेर्यदि सिद्धिमासादयति तत एव सदृशपरिणामोऽपि सेत्स्यति अनवगतसम्बन्धस्यापि खण्डमुण्डादिषु समानप्रत्ययोत्पत्तेः तस्य भ्रान्तत्वे संवेदनेऽपि तत्प्रसक्तेः। अथ सत्येव स्वसंवेदने तद्दर्शनमिति न भ्रान्तम्, न; इतरेतराश्रय-दोषप्रसक्तेः। तथाहि—स्वसंवेदनस्य सत्यत्वे तद्दर्शनमभ्रान्तम् अतश्च तत्सत्यत्वमिति कथं नेतरेतरा-श्रयदोषः? अथ बाधकासद्भावान्नायं दोषः सदृशपरिणामस्य किं बाधकमिति वक्तव्यम्? विशेषे-ष्वस्तस्य भेदे सम्बन्धासिद्धिः अभेदे विशेषा एव न तत्सद्भाव इति बाधकमिति चेत्, न; एकान्त-भेदाभेदपक्षस्य तत्रानिष्टेस्त एव विशेषाः कथञ्चित् परस्परं समानपरिणतिभाज इत्यस्यदभ्युपगमात्। न च चित्रैकविज्ञानवत् समानासमानपरिणतेरेकत्वविरोधः 'यदेवाहमद्राक्षं तदेव स्पृशामि आस्वादयामि जिघ्रामि' इति प्रतीतेर्गुणगुणिनोरेकत्वप्रतीतेः। न च यदेव रूपं दृष्टं तदेव कथं स्पृश्यते इन्द्रियविषयसंकरप्रसक्तेरिति वक्तव्यम् चक्षुर्ग्राह्यतास्वभावस्यैकस्य स्पर्शनादिविषयतास्वभावा-विरोधात्। तथाहि—दूरादिदेशं सहकारिणमासाद्यैकोऽपि भूरुहोऽविशदतयेन्द्रियजे प्रत्यये प्रतिभाति स एव निकटादिदेशसचिवो विशदतयेत्युपलब्धम्। न चाविशदं दर्शनमवस्तुविषयम् तस्य वस्तु-विषयतया प्रतिपादितत्वात्। न च चक्षुःप्रभवे प्रत्यये रूपमेव चकास्ति नापरस्तद्वानिति वक्तव्यम् यतोऽत्रापि स्तम्भव्यपदेशार्हं रूपं किमेकं प्रतिभाति, उतानेकाऽनंशपरमाणुसञ्चयमात्रम्? प्रथम-पक्षेऽधोमध्योर्ध्वात्मकैकरूपवद्रसाद्यात्मैकैकस्तम्भप्रसिद्धिः। द्वितीयपक्षेऽपि किमेकमनेकपरमा-ण्वाकारं चक्षुर्ज्ञानम्, उतैकैकपरमाण्वाकारमनेकम्? प्रथमपक्षे रूपाद्यात्मैकवस्तुसिद्धिप्रसक्तिः चित्रैकज्ञानवत्। द्वितीयेऽपि विविक्तज्ञानपरमाणुप्रतिभासस्यासंवेदनात् सकलशून्यताप्रसक्तिरिति प्रतिपादितम् एतेन क्रियावतोऽपि भावस्याध्यक्षविषयता प्रतिपादिता। न चैकस्य देशाद् देशान्तर-प्राप्तिहेतुः क्रिया न केनचित् प्रमाणेनावसातुं शक्येति वक्तव्यम् पूर्वपर्यायग्रहणपरिणाममुञ्चताऽ-ध्यक्षेणोत्तरपर्यायग्रहणात् यथा स्तम्भादावधोभागग्रहणमत्यजतोर्ध्वादिभागग्रहस्तेन अन्यथा सकल-शून्यतेत्युक्तत्वात्। यदपि—

---

१ "परग्रहग्रहणसम्मुखज्ञानसंवेदनात् परतो गतिरित्येवम्"—बृ० ल० टि०। 'ग्रह' इत्यङ्कितं पदं ल० टि० नास्ति। २-**हणव्य**—बृ०। ३ "अविकल्पेऽपि वस्तुग्रहणस्य मतत्वान्नाममात्रेण भेदः"—बृ० ल० टि०। ४-**भावानन्तरी-यकत्वात्** आ० हा० वि०।-**भावानान्तरीयकत्वात्** ल०। ५ **क्रियते त**—बृ० ल० वा० बा० विना। ६ पृ० ५०७ पं० १८। ७ पृ० ५११ पं० २७। ८-**धर्म्याद**—बृ०। ९ "इह किमपि कूटं संभाव्यते"—बृ० ल० टि०। अत्र 'रूपसाधर्म्यदर्शनाभ्यावाद् भ्रान्तिर्न स्यात् अन्यथातिप्रसङ्गात्' एतादृशपाठकल्पनया कूटत्वं शक्यं परिहर्तुम्। १० "रजत"—बृ० ल० टि०। ११ "शुक्तिकायाम्"—बृ० ल० टि०। १२-**ति भ्रा**—ल०। १३-**सक्तिः** आ० हा० वि०। १४-**यमस्य** बृ०। १५-**द्यात्मकै**-भां० मां०। १६-**द्यात्मकैक**-बृ०। १७ "प्रत्यक्षेण"—बृ० ल० टि०।

"विशेषणं विशेष्यं च सम्बन्धं लौकिकीं स्थितिम्।
गृहीत्वा संकलय्यैतत् तथा प्रत्येति नान्यथा" ॥ [ ]

इत्युक्तम् तदपि निरस्तं द्रष्टव्यम्; चित्रपतङ्गस्यैवैकानेकात्मनो वस्तुनः प्रथमतयैव प्रतिभासनात् एवंकल्पनाया दूरापास्तत्वात्। यदपि—

"संकेतस्मरणोपायं दृष्टं सङ्कलनात्मकम्।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथम्" ॥ [ ]

इत्यभिधानम्, तदप्यसङ्गतम्; संकेतकालानुभूतशब्दस्मरणमन्तरेणापि व्यवसायात्मकस्य ज्ञानस्याक्ष-प्रभवस्य प्रतिपादनात् अन्यथा विकल्पानुत्पत्तेरित्युक्तत्वात्। तस्मात् पुरोवर्तिस्थिरस्थूलस्वगुणपर्याय-साधारणस्तम्भादिप्रतिभासस्याक्षप्रभवस्य निर्णयात्मनः स्वसंवेदनाध्यक्षतोऽनुभूतेः स्वार्थनिर्णयात्मक-मध्यक्षं सिद्धम्। न चेदं मानसम् एतद्व्यतिरेकेण निरंशैकपरमाणुग्राहिणोऽविकल्पस्य कदाचिदप्य-ननुभवात्। यदि चायं स्तम्भादिप्रतिभासो मानसो भवेत् विकल्पान्तरतोऽस्य निवृत्तिर्भवेत् न चैवम् क्षणक्षयित्वमनुमानान्निश्चिन्वतोऽश्वादिकं वा विकल्पयतस्तदैवास्य प्रतिभाससंवेदनात्। ततोऽध्यक्ष-प्रमाणसिद्धत्वान्न सविकल्पकत्वे साधकप्रमाणाभावः। तथानुमानादपि सविकल्पकत्वमध्यक्षस्य नासिद्धम्। तथाहि—यद् ज्ञानं यद्विषयीकरोति तत् तन्निर्णयात्मकतया अनुमानमिवाश्व्यादिकम् विषयीकरोति च स्वार्थमध्यक्षमिति। न चाँस्याध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्यया-पदिष्टत्वम् पक्षस्य चाध्यक्षबाधः साध्यविपरीतार्थोपस्थापकाध्यक्षस्य निषिद्धत्वात्। न च स्वार्थ-विषयीकरणं विज्ञानस्यासिद्धम् प्राक् तस्य प्रसाधितत्वात्। अतो नासिद्धो हेतुः। न च सपक्षावृत्ति-त्वादसाधारणानैकान्तिकः स्वार्थनिर्णयात्मकत्वेन प्रसिद्धेऽनुमाने अस्य वृत्तिनिश्चयात्। न चानुमान-स्याप्यर्थविषयीकरणमन्तरेण तन्निश्चयस्वरूपता संभवति समारोपव्यवच्छेदकत्वादेः प्रामाण्य-निमित्तस्य तत्र निषिद्धत्वात् तदन्तरेण प्रामाण्यस्यैवायोगात्। न च निर्णयात्मकार्थविषयीकरणयोर-नुमाने साहचर्यदर्शनेऽपि विपर्यये बाधकप्रमाणाभावतः संदिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिकः तदुत्पत्तिसारूप्यादेर्निर्णयस्वभावताव्यतिरिक्तस्यैकान्तवादे अर्थविषयीकरणनिबन्धनस्य विज्ञानेऽसंभ-वात् तदसंभवस्य च प्राक् प्रतिपादितत्वात्। ततो न सन्दिग्धविपक्षव्यावृत्तिकोऽपि। अत एव न विरुद्धः विपक्षवृत्तेरेव विरुद्धत्वात्। ततोऽसिद्धविरुद्धानैकान्तिकादिदोषविकलाद् भवत्यतः साधनाद् विवक्षितसाध्यसिद्धिरिति न तत्साधकप्रमाणाभावान्निर्णयात्मकाध्यक्षाभावः।}

नापि तद्बाधकप्रमाणसद्भावात् तस्यैवासिद्धेः। तथाहि—तद्बाधकमध्यक्षम् अनुमानं वा प्रकल्प्येत प्रमाणान्तरानभ्युपगमात्। न तावदध्यक्षं तद्बाधकं संभवति अविकल्पप्रसाधकस्य तस्य तद्बाधकत्वात् न च निरंशक्षणिकैकपरमाणुसंवेदनं स्वसंवेदनाध्यक्षतः सिद्धमिति प्राक् प्रतिपादितमिति नाध्यक्षं तद्बाधकम्। नाप्यनुमानं तद्बाधकं संभवति अध्यक्षाप्रवृत्तौ तत्पूर्वकस्य तस्यापि तत्राप्रवृत्तेः। यदपि 'यद् यथा प्रतिभाति तत् तथा सद्व्यवहृतिमवतरति' इत्यादि निर्विकल्पकाध्यक्षप्रसाधकमनुमान-मुपन्यस्तं तत्रापि प्रत्यक्षानुमाननिराकृतत्वं पक्षदोषः नामादिविशेषणोल्लेखविविक्ततया नाक्षमति-रुद्धातीति हेतोरसिद्धता च जातिगुणक्रियाद्यनेकविशेषणविशिष्टस्थिरस्थूराकारस्तम्भादिविषयाक्षज-प्रत्ययस्यैकानेकस्वभावस्य विशेषणविशिष्टतया स्वसंवेदनाध्यक्षतो निर्णयात् अस्य च प्राक् प्रसाधि-तत्वात्। यदपि 'विशेषणपरिष्वक्तवपुषः संविदोऽध्यक्षत्वविरोधात्' इत्युक्तम् तदपि प्रलापमात्रम्; स्वसंवेदनाध्यक्षप्रसिद्धे स्वरूपे विरोधायोगात् अन्यथाऽतिप्रसङ्गात्। यदपि 'सन्निहितमर्थमवतरत्य-ध्यक्षं नामादिकं च विशेषणमसन्निहितमिति न तद्योजनामवतरीतुं क्षमम्' इति तत्रापि यदि सन्नि-हितमर्थमध्यक्षमवतरेत् पक्षममूलपरिष्वक्तमञ्जनादिकं सन्निहितं किं नावतरेत्? अथ यत् प्रतिभास-

---

१ अष्टस० पृ० ११९ पं० १०। २ "विशेषणं विशेष्यं च" इत्यादिकल्पनायाः" बृ० ल० टि०। ३ **दृष्टसङ्ग**-आ० हा० वि० विना। ४-**नाद्यथा** आ० हा० वि० विना। ५-**स्थूरस्व**-बृ० वा० बा०। ६-**हिणो वि**-बृ० विना। ७ "स्वार्थविषयत्वादिति हेतोः"—बृ० ल० टि०। ८-**स्य वा**-बृ०। ९-**त्वादन्त**-बृ० ल०। १०-**प्यादिनि**-आ० हा० वि०। ११ "अनुमानस्य"—बृ० ल० टि०। १२ पृ० ४८८ पं० २२। १३ पृ० ४८८ पं० २३। १४ पृ० ४८८ पं० २५।

योग्यं वस्तु तदेवावतरेत्; ननु स्तम्भादिकं व्यवहितमपि योग्यम् अञ्जनादिकं त्वतिसन्निहितमप्य-
योग्यमित्येतदेव कुतः? स्तम्भादेः प्रतिभासनात् तत् तत्र योग्यं नेतरत् विपर्ययादिति चेत्, न;
इतरेतराश्रयदोषप्रसक्तेः। तथाहि–प्रतिभासनात् स्तम्भादि योग्यं ततश्च तत्प्रतिभासनमिति कथं
नेतरेतराश्रयत्वम्? अथ न योग्यतातस्तत्प्रतिभासनव्यवस्था किन्तु तत्प्रतिभासनात् तद्योग्यता
५ व्यवस्थाप्यते तर्हि तत्प्रतिभासनं कुतो व्यवस्थाप्यम्? स्वसंवेदनादिति चेत्; ननु यत्प्रतिभासः
संवेद्यते तत् तत्र योग्यमितरच्चायोग्यमिति व्यवस्थायां तत्सन्निधानासन्निधाने क्रोपयोगिनी? एवं
च यद्यसन्निहितस्यापि नामादिविशेषणस्याध्यक्षमतौ प्रतिभासः को विरोधोऽध्यक्षत्वेन? विरोधे
वा चिरातीतभविष्यदर्थराशेरसन्निहितस्य बुद्धसंवेदने प्रतिभासनाध्यक्षताविरोधस्तस्यापि भवेत्।
अथ विशदत्वात् तज्ज्ञानस्य नाध्यक्षताविरोधः तद् विशेषणविशिष्टार्थावभासिन्यप्यध्यक्षज्ञाने
१० समानम्। एतेन 'उपाधीनामुपाधिमतः पूर्वकालत्वे उपाधिमद्ग्राहिणा ज्ञानेनासन्निहितत्वेनाग्रहणान्न
तद्विशेषणविशिष्टार्थग्राहिण्यध्यक्षमतिर्विशदा संभवति' इति प्रत्युक्तम् बुद्धज्ञानेऽप्यनेन न्यायेन
वैशद्याभावतोऽनध्यक्षतापत्तेः। न चासन्निहितस्यापि विशेषणस्याध्यक्षप्रतिभासे सकलस्याप्यसन्नि-
हितस्य प्रतिभासप्रसक्तिः यतो यस्यैवाऽसन्निहितस्यापि प्रतिभासः संवेद्यते तदेव तत्र प्रतिभातीत्य-
भ्युपगन्तव्यम् अन्यथा अनन्तरातीतार्थक्षणस्याध्यक्षप्रतिभासे चिरतरातीतस्याप्यतीततया प्रति-
१५ भासप्रसक्तिरित्यनाद्यतीतजन्मपरम्परा[1]प्रतिभास्यवाग्दृगध्यक्षं भवेत्। यच्च 'वाचोऽव्यापितयाऽपदार्था-
त्मतया च नार्थदेशे सन्निधिरिति तद्दर्शने न सा प्रतिभाति' [2]इति तत् सिद्धमेव साधितम्। यच्च
'व्यवहितायास्तु वाचः प्रतिभासे निखिलातीतार्थपरम्परा प्रतिभासताम्' [3]इति तदसङ्गतम् न ह्येकस्य
व्यवहितस्य प्रतिभासे अतीतक्षणवत् सकलस्य व्यवहितस्य चिरातीतक्षणस्येव प्रतिभासः संभवी-
त्युक्तत्वात्। यच्च 'समनन्तरप्रत्ययाद् बोधरूपतेव वाग्रूपताऽपि वाचकस्मृतिसन्निहितोदया
२० भविष्यति' इति तद्युक्तमेव। यच्च 'हेतुविषयभेदादक्षस्मृतिप्रभवसंवेदनस्मरणयोर्भेदप्रसक्तिः' इति,
तदसङ्गतमेव; चक्षूरूपालोकमनस्कारप्रभवस्य यथा रूपज्ञानस्य हेतुभेदेऽप्येकसामग्रीप्रभवत्वाद-
भेदस्तथा विशिष्टशब्दस्मरणमनस्कारसचिवसामग्रीप्रभवस्य 'रूपम्' इत्युल्लेखवतो विशदस्यैकतया
प्रतीयमानस्य किमिति भेदो भवेत्? यथा हि चक्षुषो रूपग्रहणप्रतिनियमः बोधाच्चिद्रूपता आलोकाद्
विशदतेत्याद्यनेकधर्माक्रान्तस्य रूपज्ञानस्यैकरूपतया प्रतिभासनादेकता तथा विशिष्टाच्छब्दस्मरण-
२५ मनस्काराद् 'रूपम्' इति विशिष्टोल्लेखाक्रान्तस्यैकतया प्रतीयमानस्य बोधविशेषस्यैकरूपता युक्ति-
सङ्गतैव सामग्र्यन्तर्गतकारणभेदेऽपि सामग्रीलक्षणस्य कारणस्याभिन्नत्वात्। यदपि 'तटस्थवाग्रूपता-
विशिष्टा वा अर्थमात्रा गृह्यन्ते वाग्रूपतापन्ना वा' तत्पक्षद्वयमप्यनभ्युपगमान्निरस्तम् विशिष्टशब्द-
वाच्यतया तु विशिष्टक्षयोपशमसव्यपेक्षेन्द्रियजप्रतिपत्त्याऽर्थमात्रा गृह्यन्ते एव तद्वाच्यत्वं चार्थ-
मात्राणां कथंचिदनन्यभूतो निजो धर्म इति प्रतिपादितं शब्दप्रामाण्यं व्यवस्थापयद्भिः केवलं
३० तद्वाच्यताप्रतिपत्तिस्तासां मतिः श्रुतं वा? इत्यत्र विचारः स च यथास्थानं निरूपयिष्यते। अक्ष-
प्रभवा तु 'रूपमिदम्' इति प्रतिपत्ती रूपशब्दवाच्यताविशिष्टार्थग्राहिण्येका स्वसंवेदनाध्यक्षतोऽनुभू-
यत एव अस्या अपलापे स्वसंवेदनमात्रस्याप्यपलापप्रसक्तेः शून्यतामात्रमेव स्यात्। न च शब्द-
गोचरोऽर्थ इन्द्रियाविषयः सामान्यविशेषात्मनस्तस्याक्षप्रभवप्रतिपत्तौ प्रतिभासनात्। न च प्रति-
भासमानस्याविषयत्वम् अतिप्रसङ्गात्। यच्च 'न संविदन्तरप्रतीतोऽर्थः संविदन्तरप्रतीतस्य
३५ विशेषणम्' तद्युक्तमेव विशिष्टशब्दवाच्यताविशेषणस्य रूपस्य 'रूपमिदम्' इत्येकप्रतीतिविषयत्वा-
भ्युपगमात्। अत एव 'केयं तदनुरक्तता' इति विकल्पत्रये यद् दोषाभिधानं तदनभ्युपगमादेव
निरस्तम्। यदपि 'यदि नाँमपरिणद्धस्य सकलार्थस्य संवित् तदार्थसंवेदनमेव न भवेत्' इति
दोषाभिधानम् तदप्यनभ्युपगमान्निरस्तम् नहि शब्दानुविद्धार्थप्रतिपत्तिरेव सविकल्पिका तथाभ्युपगमे
सविकल्पप्रतिपत्त्युत्पत्तिरेव न भवेदित्युक्तं प्राक्। 'अगृहीतसंकेतस्य पुंसोऽर्थप्रतिपत्तिर्निर्विकल्पिका'
४० तथा 'अश्वं विकल्पयतो गोप्रतिपत्तिः गोशब्दोल्लेखविकलां' इति, अत्रापि प्रतिविहितमेव। यदपि

१–**भासार्वा**–आ० हा० वि०। २ पृ० ४८९ पं० ९—। ३ पृ० ४८९ पं० १६—। ४ **मतिश्रु**–बृ० भां० मां० विना। ५ पृ० ४९० पं० ४। ६ पृ० ४९० पं० ७–९। ७ पृ० ४९० पं० १३। "नाम्ना परिणद्धः संबद्धः वाक्संसृष्ट इति भावः"–बृ० ल० टि०। ८ पृ० ४९० पं० १७। ९ पृ० ४९० पं० १९।

"वाग्रूपता चेद् व्युत्क्रामेत्" [1]इत्यादि दोषाभिधानम् तदपि सिद्धसाध्यतया निरस्तम्। यच्च 'समान-
कालयोर्वा भावयोर्विशेषणविशेष्यभावमिन्द्रियप्रतिपत्तिरधिगच्छति भिन्नकालयोर्वा' इति पक्षद्वयेऽपि
दोषाभिधानम् तदप्यसङ्गतम् यत्र हि समानासमानकालविशेषणविशिष्टोऽर्थः अबाधिताकाराक्षज-
प्रतिपत्तौ प्रतिभाति सा तद्ग्राहिकाऽभ्युपगम्यते नाऽन्येति कुतोऽतिप्रसङ्गदोषावकाशः? यथा च
स्तम्भाकारोत्पन्नैकपरमाणुग्रहणप्रवृत्तं संवेदनं भिन्नदेशं परमाण्वन्तरमवभासयति—अन्यथा प्रति- ५
भासविरतिप्रसङ्गात्—तथा विशेषणग्रहणप्रवृत्तं भिन्नकालविशेष्यावभासि तदभ्युपगन्तव्यम् अन्यथा
विशेषणविशिष्टार्थावभासाभावो भवेदित्युक्तं प्राक्। न च विशेषणविशेष्यभावस्यानवस्थानान्न
समानकालयोरपि तयोस्तद्भावप्रतिपत्तिः अनेकधर्मकलापाक्रान्तस्य वस्तुनो विशिष्टसामग्रीप्रभवप्रति-
पत्त्या प्रतिनियतधर्मविशिष्टतया ग्रहणात्। न चार्वाग्दृग्दर्शने अशेषधर्माध्यासितवस्तुस्वरूपप्रति-
भासः कस्यचित् कथञ्चित् कयाचित् प्रतिपत्त्या यथाक्षयोपशमं ग्रहणात्। न च तत्प्रतिपत्त्याऽगृह्य- १०
माणस्यात्यन्तिकस्ततो भेदः असत्त्वं वा क्षणिकत्वादेरपि नीलप्रतिपत्त्याऽप्रतीयमानस्य तथा[3]त्वप्रसक्ते-
रित्युक्तत्वात्। यदपि 'पुरोवर्त्तिनि रूपे प्रवृत्तमक्षं यद्यतीते विशेषणादौ प्रतिपत्तिमुपजनयति अति-
चिरमुपगतासु पदार्थपरम्परास्वपि प्रतिपत्तिमुपजनयेत्' तदप्ययुक्ताभिधानम् यतो यदेव ह्यक्षमतौ
परिस्फुटमवभाति तत्रैवाक्षं प्रतिपत्तिमुपरचयतीति व्यवस्थाप्यते अन्यथैकस्तम्भपरिणत्यापन्नैकपरमा-
णुग्रहणज्ञानजननप्रवृत्तमक्षं तदपरपरमाणुग्रहणज्ञानजननवत् सकलपदार्थग्राहिज्ञानजननेऽपि प्रवर्तेत [4]१५
भेदाविशेषात्, भवद्भ्युपगमेनानन्तरातीतक्षणग्रहणज्ञानजननप्रवृत्तं वा सकलातीतक्षणग्रहणज्ञान-
जनने वा प्रवर्तेत अतीतत्वाविशेषात्। अथ यदेव तज्ज्ञाने प्रतिभाति तज्जनन एव तस्य व्यापारः
परिकल्प्यते तदितरत्राऽपि समानम्। न च विशेषणादयस्तदाऽसन्निहिता एवैकान्ततो येन तान्
प्रति प्रत्यक्षबुद्धिर्निरालम्बना भवेत् निरन्वयक्षणक्षयस्य निषिद्धत्वात् कथञ्चिदनुगतस्य च प्रसाधि-
तत्वात्। यदपि 'सुखादिव्यतिरिक्तस्याक्षप्रभवसंवेदनस्यार्थावभासकत्वं प्रतिपादितम्' तदपि सिद्ध- २०
साधनमेव। यच्च 'सुखादिवद् विकल्पोऽपि नार्थसाक्षात्करणस्वभावः' [5]इति, अत्र यद्यविशेषेण
विकल्पमात्रमभिधीयते तदा सिद्धसाध्यता। अथ प्रकृतो विकल्पस्तदाऽसिद्धम् तमन्तरेणापरस्यार्थ-
साक्षात्कारिणोऽविकल्पस्याभावात्। यदपि 'यदि नाम पुरोवर्तिनमर्थं विकल्पमतिरुद्द्योतयति तथा-
प्यर्थक्रियासमर्थरूपापरिच्छेदान्न तत्र प्रवृत्तिमारचयितुं क्षमा' [6]इति, तदप्ययुक्तम्; अर्थक्रियासमर्थ-
रूपस्य तस्या एव परिच्छेदकत्वेन प्रवर्तकत्वात्–अन्यथा प्रवृत्तेरभावप्रसङ्गात्–[7]तामन्तरेण कस्यचित् २५
प्रत्ययस्य तद्रूपपरिच्छेदकत्वेन प्रवर्तकत्वायोगादिति प्रतिपादनात्। अत एव 'यदि नयनप्रसरमनु-
सरन्ती प्रथमा मतिर्न तत्त्वं प्रत्येति पश्चादपि नैव प्रत्येष्यति स्मरणसहायस्यापि लोचनस्याविषयतयै-
[12]कत्वे प्रतिपत्त्यजनकत्वात्' [13]इत्यादि सर्वं प्रतिक्षिप्तम् स्थिरस्थूरार्थावभास्यक्षप्रभवसंवेदनस्य प्राप्तिपर्य-
वसानफलनिमित्तस्य स्वसंवेदनाध्यक्षतः प्रसिद्धेस्तथापि तत्त्वस्याक्षप्रतिपत्त्यविषयत्वे संवेदनस्य
स्वसंवेदनाध्यक्षविषयताऽपि न भवेत्। अबाधितप्रतिपत्तिविषयत्वादिकं च सर्वमन्यत्रापि समानम्। ३०

अथ स्वसंवेदनं संवेदनाभावे न दृष्टमिति तत् तद्विषयम् संवेदनं तु विपर्ययान्न तद्विषयम्;
ननु किं क्षणिकनिरंशैकपरमाण्वाकारसंवेदनाभावे तन्न दृष्टम् उत तद्विपरीतसंवेदनाभावे? यद्याद्यः
पक्षः स न युक्तः सर्वदा तदभाव एव तस्य दृष्टेः। अथ द्वितीयस्तदा विपर्ययसिद्धिः। यथा
स्थिरस्थूराकारसंवेदनाभावेऽभवत् स्वसंवेदनं तद्विषयं सिध्यति तथा स्थिरस्थूरार्थाभावेऽभवत्
संवेदनं किं न तद्विषयं सिध्यति येन लोचनाविषयत्वं तत्त्वस्य [14]भवेत्? यथा च पूर्वदेशदशादर्शना- ३५
नामग्रहणेऽपीदानीन्तनदर्शनेन स्वग्राह्यस्य तद्विवेकः प्रतीयते तथा तेन तस्य [15]तत्संसृष्टता किमिति
नावगम्यत इति न युक्तं पूर्वदर्शनाद्यप्रतीतौ तद् दृष्टतादिकं तस्य न प्रत्येतुं शक्यमित्याद्यभिधानम्।
यदि च प्राप्याप्रतीतावपि दृश्यदर्शनेन स्वग्राह्यस्य तदेकत्वं प्रतीयते–अन्यथा तस्याविसंवादकत्वा-

१ पृ० ४९१ पं० १। २ पृ० ४९३ पं० २६—। ३ "आत्यन्तिकभेद"–बृ० ल० टि०। ४ पृ० ४९४ पं० ७। ५–**वर्तते भे**–आ० हा० वि०। ६–**वर्तते अ**–आ० हा० वि०। ७ "विशेषणेऽपि"—बृ० टि०। ८ पृ० ४९४ पं० १९। ९ पृ० ४९४ पं० २१। १० पृ० ४९४ पं० ३२। ११ "सविकल्पमतिम्"–बृ० ल० टि०। १२–**नस्य वि**–बृ० ल० विना। १३ पृ० ४९५ पं० ८। १४ "एकत्वस्य"—बृ० ल० टि०। १५ "पूर्वदेशद-शादि"–बृ० ल० टि०।

योगात् प्रामाण्यं न स्यात्-किमित्यर्थक्रियाऽदर्शने तत्समर्थरूपाऽप्रतिपत्तिर्येन प्रकृतविकल्पात् प्रवृत्तिर्न भवेत् । यदपि 'स्मर्यमाणस्यार्थस्य सत्त्वासिद्धेस्तद्वृत्तिस्मृत्यनन्तरभाविनोऽध्यक्षस्य सत्यता' इत्यादीतरेतराश्रयत्वं प्रेरितं तत् स्वसंवेदनेऽपि समानम् । तथाहि-संवेदनस्य सत्यत्वे तत्स्वसंवेदनस्य सत्यवेदिता तस्याश्च तत्सत्यतेति कथं नेतरेतराश्रयत्वम् ? 'यथा च लिङ्गनिश्चयाद् विशदतनोरनुमितिरविशदावभासा पृथगवसीयते न तथा प्रकृतविकल्पात् पृथगविकल्पिका मतिः कदाचिदप्यनुभूयते' इति तत् सत्यमेव, निरंशक्षणिकैकपरमाण्ववभासस्यासत्त्वप्रतिपादनात् । यदपि "न चापि लिङ्गतः पश्चादिन्द्रियस्य प्रवर्तनम्" इत्यादि प्रत्यंगि(प्रत्यग्गि)रयोपन्यस्तम् तत् सर्वमयुक्ततया स्थितम् । यदपि 'जात्यादेरभावात् तद्विशिष्टार्थप्रतिपत्तिः सविकल्पिका न संभवति' इति, तदपि प्रतिक्षिप्तत्वान्न पुनः प्रतिसमाधानमर्हति । यच्च 'फलयोग्यता परोक्षेति नाध्यक्षमतिर्निश्चयात्मिका तत्र प्रवर्तते' इति, तदपि प्रतिविहितमेव । यँच्च 'दर्शनपरिणत्यनवर्गतं फलसम्बन्धित्वमवगच्छन्ती कथं न भिन्नविषया' इति, तत् सिद्धमेव साधितम् तद्व्यतिरेकेण दर्शनपरिणतेरविकल्पिकाया अभावात् । यदपि 'रूपदर्शनालिङ्गात् परोक्षार्थक्रियायोग्यताध्यवसायानुमानमुदयमासादयद् व्यवहृतिमुपजनयति' इति, तदप्ययुक्तम्; फलजननयोग्यतायाः परोक्षत्वासिद्धेः । प्रतिभासमानरूपस्य चानिश्चितस्य लिङ्गत्वायोगादनुमानात् तन्निश्चये अनवस्थाप्रतिपादनात् अध्यक्षतस्तन्निश्चये च सिद्धं निर्णयात्मकमध्यक्षम् । यदपि 'अनिश्चयात्मकमध्यक्षमभ्यासदशायां प्रवृत्तिमुपरचयद् दृष्टम्' तदप्यसङ्गतम्; शब्दोल्लेखशून्यस्यापि सावयवैकरूपार्थाधिगतिस्वभावस्य सविकल्पकतया व्यवस्थापनात् तमन्तरेणाभ्यासदशायामपि प्रवृत्त्यनुपपत्तेः । यत् पुनः सर्वदाऽनुमानात् प्रवृत्त्यभ्युपगमे लिङ्गग्रहणाभावतोऽध्यक्षेणाऽनवस्थादूषणमभ्यधायि तद् युक्तमेव । यदपि 'पौर्वापर्येऽप्रवृत्तमध्यक्षं कथं तादृग्लिङ्गग्रहणे क्षमम्' इति पूर्वपक्षमुत्थाप्य 'लोकाभिमानादेवाऽध्यक्षं लिङ्गग्राहि व्यवहारकृच्च तत्त्वतस्तु स्वसंविन्मात्रत्वान्न प्रत्यक्षानुमानभेदः' इत्युत्तराभिधानम्, तदप्यसङ्गतम्; प्रत्यक्षानुमानभेदस्यापारमार्थिकत्वे स्वसंवेदनमात्रस्याप्यपारमार्थिकत्वप्रसक्तेः सर्वशून्यतापत्तिरिति निर्विकल्पकत्वादिव्यवहारो दूरापास्त एव स्यात् । न च शून्यतैवास्तित्वमभिधानं युक्तिसङ्गतम् प्रमाणमन्तरेण तदभ्युपगमस्याप्यघटमानत्वात् इत्युक्तत्वात् । तदेवं सकलबाधकापाये साधकप्रमाणविषयत्वात् सविकल्पकमध्यक्षं सिद्धमिति व्यवस्थितं प्रमाणं स्वार्थनिर्णीतिस्वभावज्ञानमिति ।

अत्र च स्वस्य ग्रहणयोग्योऽर्थः स्वार्थ इत्यस्यापि समासस्याश्रयणाद् व्यवहारिजनापेक्षया यस्य यथा यत्र ज्ञानस्याविसंवादस्तस्य तथा तत्र प्रामाण्यमित्यभिहितं भवति तेन संशयादेरपि धर्मिमात्रापेक्षया न प्रामाण्यव्याहतिः । एतेन "प्रत्यक्षं कल्पनापोढमभ्रान्तम्" इति प्रत्यक्षलक्षणं सौगतपरिकल्पितमयुक्ततया व्यवस्थापितम् ।

[३ प्रमाणविशेषनिरूपणम्]

[प्रत्यक्षम्]

[प्रत्यक्षे निरूपयितव्ये पूर्वं सौगतमतविरोधितया नैयायिकसम्मतस्य प्रत्यक्षलक्षणस्योपन्यासः]

तत्राऽऽहुर्नैयायिकाः—मा भूत् सौगतपरिकल्पितं निर्विकल्पकमध्यक्षं प्रमाणम् "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्" [न्यायद-१-१-४] इत्येतल्लक्षणलक्षितं तु प्रत्यक्षं प्रमाणम् । अस्यार्थः—इन्द्रियं द्रव्यत्वकरणत्वनियताधिष्ठानत्वातीन्द्रियत्वे सत्यपरोक्षोपलब्धिजनकत्वात् चक्षुरादि मनःपर्यन्तम् तस्यार्थः परिच्छेद्य इन्द्रियार्थः । "पृथिव्यादिगुणा

१-**पाप्र**-बृ० ल० वा० बा० । २ "स्वसंवेदनसत्यवेदितायाः"-बृ० ल० टि० । ३ "सविकल्पसंवेदनम्"-बृ० ल० टि० । ४-**सस्य स**-आ० हा० वि० । ५ पृ० ४९६ पं० ३१ । ६ पृ० ४९६ पं० ३९ । ७ **यच्च यदर्श**-आ० । पृ० ४९८ पं० ३ । ८-**गतिफल**-वा० बा० । ९ पृ० ४९८ पं० २२ । १० पृ० ४९९ पं० १३—। ११ **तदयु**-हा० वि० । पृ० ४९९ पं० १५ । १२ पृ० ४९९ पं० १८ । १३ पृ० ४९९ पं० २०—। १४ पृ० ४८८ पं० ११, टिप्पण ७ । १५ पृ० ४८८ टि० ९ । १६ "गन्ध-रस-रूप-स्पर्श-शब्दाः पृथिव्यादिगुणास्तदर्थाः"-न्यायद० १-१-१४ ।

रूपाद्यस्तदर्थाः" [ ] इति तदर्थलक्षणत्वात् अर्थ इति लक्ष्यनिर्देशः तदर्थत्वं लक्षणं तदर्थत्वं चेन्द्रियार्थत्वम् । ननु 'तदर्थाः' इत्येतावदेवास्तु तदर्थलक्षणं पृथिव्यादिगुणग्रहणं तु न कर्त्तव्यम्, न; तदर्थत्वेन लक्षणेन ये संगृहीतास्तेषां विभागार्थं पृथिव्यादिगुणग्रहणम् । तथा चोद्योतकरः—"पृथिव्यादिग्रहणेन त्रिविधं द्रव्यमुपलब्धिलक्षणप्राप्तं गृह्यते गुणग्रहणेन सर्वो गुणोऽस्मदाद्युपलब्धिलक्षणप्राप्त आश्रितत्व-विशेषणत्वाभ्याम्" [ ] एवं च पृथिव्यादिगुणग्रहणं लक्ष्यविभागसूत्रोपलक्षणार्थम्; नन्वेवमपि रूपादिग्रहणं व्यर्थं गुणग्रहणेन संगृहीतत्वात्, न; विशेषलक्षणप्रतिपादनार्थत्वात् । तथा च प्रतिपादितम्-पृथिव्यादिगुणस्य सतश्चक्षुर्ग्राह्यत्वमेव यस्य तद्रूपं 'चक्षुर्ग्राह्यं यत् तद् रूपम्' इत्यभिधीयमाने घटादावतिप्रसक्तिस्तन्निवृत्त्यर्थमवधारणम् तथापि रूपत्वेऽतिप्रसङ्गः तन्निवृत्त्यर्थं पृथिव्यादिगुणग्रहणम् एवं रसादिष्वपि । "एकादिव्यवहारहेतुः सङ्ख्या" [प्रशस्त० भा० पृ० १११ पं० ३] इत्यादिविशेषलक्षणं वैशेषिकमतप्रसिद्धं सर्वत्र द्रष्टव्यम् । नन्वेवं रूपादीनामपि विशेषलक्षणं न वाच्यं तत्रैव प्रसिद्धत्वात्, न; अविप्रतिपत्तिज्ञापनार्थत्वात् रूपादयो हि बहुभिर्विषयत्वेन संप्रतिपन्ना इति पञ्चानामपि लक्षणाभिधानम् पुरुषस्य चैतेऽतिशयेनासक्तिहेतवः एतावत्त्वत्रोपयुज्यते इन्द्रियविषयभूतोऽर्थः अर्थशब्देनाभिप्रेतः नार्थमात्रम् । तेन सन्निकर्षः प्रत्यासत्तेरिन्द्रियस्य प्राप्तिः तस्य च व्यवहितार्थानुपलब्ध्या सद्भावः सूत्रकृता प्रतिपादितः तत्सद्भावे च सिद्धे पारिशेष्यात् तत्संयोगादिकल्पना; परिशेषश्चेन्द्रियेण सार्द्धं द्रव्यस्य संयोग एव युतसिद्धत्वात् १ । गुणादीनां द्रव्यसमवेतानां संयुक्तसमवाय एव अद्रव्यत्वे सति अत्र समवायात् २ । तत्समवेतेषु संयुक्तसमवेतसमवाय एव अन्यस्यासंभवात् प्राप्तेश्च प्रसाधितत्वात् ३ । शब्दे समवाय एवाकाशस्य श्रोत्रत्वेन व्यवस्थापितत्वात् शब्दस्य च गुणभावात् गुणत्वेन चाकाशलिङ्गत्वादाकाशसमवायित्वं निश्चितमिति समवाय एवेत्युक्तम् ४ । शब्दत्वे समवेतसमवाय एव परिशेषात् ५ । समवायाभावयोश्च विशेषणविशेष्यभाव एव परिशेषात् ६ । लक्षणस्य च त्रैविध्यात् कथमेतल्लक्षणं व्यवच्छिनत्तीत्यन्यव्यवच्छेदार्थमिन्द्रियार्थसन्निकर्षः कारणमित्यभिधीयते कारणत्वेऽप्यसंभविदोषाशङ्कापरिजिहीर्षयाऽन्याननुयायि कारणवचनं नन् त्वन्यानुयायिकारणनिवृत्तिः एवंभूतस्य इन्द्रियार्थसन्निकर्षस्यैव कारणत्वाभिधानम् नत्वन्तःकरणेन्द्रियसम्बन्धस्य तस्याऽव्यापकत्वात् अव्यापकत्वं तु सुखादिज्ञानोत्पत्तावसंभवात् । अथ 'निकर्ष'ग्रहणमेवास्तु 'सं'ग्रहणं व्यर्थम्, न; संशयादिज्ञान-

---

१ **लक्षणनि**-वा० बा० । २ "अत्र चोद्देशक्रमस्मारिता अर्था लक्ष्यतया प्रतिपत्तव्याः तेषां च लक्षणं तदर्था इति । तदिति अनन्तरलक्षितानीन्द्रियाणि परामृशति । तेषामिन्द्रियाणामर्था इन्द्रियैरर्थ्यमानत्वमर्थानां लक्षणम्"-न्यायवा० ता० टी० पृ० २२४ पं० १७-२० । **तदर्थत्वं चेन्द्रिया**-बृ० ल० । ३ **तदर्थत्वं पञ्चेन्द्रिया**-वा० बा० ।

४ "पृथिव्यादिग्रहणेन पृथिव्यप्तेजांसि बाह्यकरणग्राह्याणि अपदिश्यन्ते, गुणग्रहणेन च सर्वे आश्रितो गुण इति सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽपरत्व-स्नेह-वेग-कर्मसामान्यविशेषा अनाश्रितश्च समवायस्तद्धर्मत्वाद् गुण इति"—न्यायवा० पृ० ७२ पं० २१-२४ । न्यायवा० ता० टी० पृ० २२५ पं० १७—।

५ "गन्ध-रस-रूप-स्पर्श-शब्दास्तर्हि पृथङ् न वक्तव्याः गुणग्रहणेन ग्रहणात् । पृथिव्यादिगुणास्तदर्था इति सूत्रे वक्तव्यम् । लघु चैवं भवतीति स एवार्थः सेत्स्यतीति । न कर्तव्यम्; गन्ध-रस-रूप-स्पर्श-शब्दानां पृथगभिधानमिन्द्रियविशेषनियमज्ञापनार्थम् । इन्द्रियाणि गन्ध-रस-रूप-स्पर्श-शब्देषु तत्सामान्येषु नियतानि अन्यत्रानियतानि । तत्र पृथिव्यप्तेजांसि द्वीन्द्रियग्राह्याणि, शेषश्च गुणराशिः सत्ता-गुणत्वे च सर्वेन्द्रियग्राह्ये समवायोऽभावश्च तथा"—न्यायवा० पृ० ७३ पं० १-७ । न्यायवा० ता० टी० पृ० २२५ पं० २३ ।

६ "चक्षुर्ग्राह्यत्वमेवेति"-बृ० ल० टि० । ७-**भूतोऽर्थश**-भां० मां० विना । ८-**कर्ष प्र**-वा० बा० । ९ "पृथक्"-बृ० ल० टि० । न्यायवा० पृ० ३१ पं० १-। न्यायवा० ता० टी० पृ० १०९ पं० ४-। न्यायमञ्ज० पृ० ७२ पं० २३ । प्रशस्त० कं० पृ० १९५ पं० ९-। १० "इन्द्रियादिना"-बृ० ल० टि० । ११ "द्रव्ये इन्द्रियसंयुक्ते गुणानाम्"—बृ० ल० टि० । १२ "रूपत्वादिषु"—बृ० ल० टि० । १३ "समवायोऽभावश्च विशेषणविशेष्येण ज्ञायते"-बृ० ल० टि० । १४ **च तैर्विध्यात्** वा० बा० । अत्रायमभिप्रायो भाति—कारणगर्भत्वेन कार्यगर्भत्वेन स्वरूपगर्भत्वेन च लक्षणस्य त्रैविध्यं न्यायगतलक्षणमीमांसायां प्रसिद्धम् । तद्यथा—कपालमयत्वादि जलाहरणादि कम्बुग्रीवादि च यथाक्रमं कारणगर्भम् कार्यगर्भम् स्वरूपगर्भं च घटस्य लक्षणं भवितुमर्हति । अन्यश्चेदभिप्रायो ग्रन्थकारस्य स्यात् तर्हि पर्यालोचकैरनुसन्धेयः । १५-**लुक्षणव्य**-भां० मां० आ० ।-**लुक्ष्यं व्य**-बृ० ।-**लुक्षं व्य**-वा० बा० । १६ **नन्वन्या**-वा० बा० विना । १७-**नुनया**-वा० बा० ।

निवृत्त्यर्थत्वात् 'सं'शब्दोपादानस्य । तथाहि–सम्यग् निकर्षः संनिकर्षः सम्यक्त्वं तु तस्य यथोक्त-विशेषणविशिष्टफलजनकत्वेन, नैतत्; अव्यभिचारादिपदोपादानवैयर्थ्यप्रसक्तेस्तदर्थस्य 'सं'शब्दोपादानादेव लब्धत्वात्, न; अव्यभिचारादिविशेषणोपादानमन्तरेण तत्सम्यक्त्वस्य ज्ञातुमशक्तेः कारणस्य ह्यतीन्द्रियस्य सम्यक्त्वमसम्यक्त्वं वा सम्यगसम्यक्कार्यद्वारेणैव निश्चीयत इति तत्फलविशेषणार्थम-५ व्यभिचार्यादिपदोपादानं कारणसाधुत्वावगमाय न व्यर्थम् । नन्वेवमपि 'सं'शब्दोपादानानर्थक्यम् अव्यभिचारादिपदोपादानादेव तत्फलस्य विशेषितत्वात्, न; 'सं'ग्रहणस्य सन्निकर्षषट्कप्रतिपादनार्थ-त्वात् एतदेव सन्निकर्षषट्कं ज्ञानोत्पादे समर्थं कारणं न संयुक्तसंयोगादिकमिति 'सं'ग्रहणाल्लभ्यते । नन्वेवमपीन्द्रियग्रहणानर्थक्यम्, न; अनुमानव्यवच्छेदार्थत्वात् । तथाहि–'अर्थसन्निकर्षादुत्पन्नम्' इत्यभिधीयमानेऽनुमाने प्रसङ्ग इतीन्द्रियग्रहणमिन्द्रियविषयेऽर्थे सन्निकर्षाद् यदुत्पद्यते ज्ञानं तत् १० प्रत्यक्षमनुमानादिभ्यो व्यवच्छिनत्ति न चानुमानिकमिन्द्रियसम्बन्धादिन्द्रियविषये समुत्पद्यत इति । तथाप्यर्थग्रहणमनर्थकमिति चेत्, न; स्मृतिफलसन्निकर्षनिवृत्त्यर्थत्वात् । तथाहि–आत्माऽन्तःकरण-सम्बन्धात् स्मृतिरुपजायत इति तज्जनकस्यापि प्रत्यक्षत्वं स्यादसत्यर्थग्रहणे न चेन्द्रियार्थसन्निकर्षजा स्मृतिः अतीतस्याऽपि स्मर्यमाणत्वात् तस्य च तदाऽसत्त्वात् । उत्पत्तिग्रहणं कारकत्वज्ञापनार्थम्[६] । ज्ञानग्रहणं सुखादिनिवृत्त्यर्थम् ।

१-कर्षः २ स-आ० । २ "कर्तृभूतम्"—बृ० टि० । ३ स्मृतिस-बृ० । ४-हणं न आ० । ५ "बीजा-दिवत् कारकोऽर्थसन्निकर्षः दीपादिवद् व्यञ्जकः"—बृ० टि० ।

६ "अथ ज्ञानग्रहणं किमर्थं? सुखादिव्यवच्छेदार्थम् । इन्द्रियार्थसन्निकर्षात् सुखदुःखे अपि भवतः तद्व्यु-दासार्थमाह ज्ञानमिति" ।—न्यायवा० पृ० ३६ पं० २२—।

"पृच्छति अथ ज्ञानेति । प्रत्यक्षसमाज्ञातलक्ष्यानुवादेन लक्षणे विधीयमाने ज्ञायत एवैतज् ज्ञानमिति, लोके साक्षा-त्कारिज्ञानहेतोः प्रत्यक्षत्वादिति भावः । उत्तरं सुखादिव्युदासार्थम् । तदेव हि लक्षणवाक्यमुच्यते यस्य लक्ष्यानपेक्षोऽतिव्या-प्त्यव्याप्तिव्युदासो लक्षणपदेभ्य एव प्रतीयते । लक्ष्यानुरोधेन तु लक्षणव्यवस्थापनेऽन्योन्याश्रयत्वमगतिर्वेति भावः ।

सुखादीनां विज्ञानाभिन्नहेतुजत्वेन विज्ञानत्वादशक्यं व्यावर्तनमिति चेत् । न । अभिन्नहेतुजत्वासिद्धेः । न खलु यैव चन्दनस्पर्शज्ञानस्योत्पत्तौ सामग्री सैव सुखस्यापीति, अस्ति हि शीतार्त्तस्यापि चन्दनेन्द्रियसंयोगाच्छीतस्पर्शज्ञानमिति तद्वदेवास्य सुखमपि भवेत् । अवान्तरसामग्रीभेदेऽपीन्द्रियार्थमनस्कारजत्वाज् ज्ञानजातीयत्वमिति चेत् । न । किञ्चित्कारणभेदेऽपि कार्य्य-भेदस्यानाकस्मिकत्वोपपत्तेः । तदर्थत्वाच्च कारणभेदानुसरणप्रयासस्य । न चोपादानाभेदादभेद इति युक्तम् । भिन्नानामपि ज्ञानानामेकसमनन्तरप्रत्ययोपादानत्वस्य भवद्भिरभ्युपगतत्वात् । अपि चोपादानाभेदश्च कुतश्चित् कारणभेदात् कार्य्यभेदश्चेति को विरोधः । अत एवास्माकमभेदेऽप्युपादानस्य पिठरस्यौष्ण्यापराह्ण्यस्य च वह्निसंयोगस्य पूर्वरूपादिप्रध्वंसानां कारणानां भेदाद् भिन्नजातीया जायन्ते गन्धरूपरसस्पर्शा इति सिद्धान्तः । तस्मादर्थप्रवणेभ्यो ज्ञानेभ्यस्तदप्रवणतया भिन्नजातीयाः सुखादयो यथास्वमनुकूलवेदनीयत्वादिभिर्लक्षणैरन्योन्यमपि भेदवन्तस्तीव्रसंवेगितया प्रमित्सानपेक्षमानसप्रत्यक्षवेदनीया इति रमणीयम्"।

न्यायवा० ता० टी० पृ० १२३ पं० २—।

"अथवा सुखादिव्यावृत्त्यर्थं ज्ञानपदोपादानम् । इन्द्रियार्थसन्निकर्षोत्पन्नं हि सुखमपि भवति तत्र तज्जनकं कारकचक्रं प्रमाणं मा भूद् ज्ञानजनकमेव प्रमाणं यथा स्यादिति ज्ञानग्रहणम् ।

अत्र शाक्याश्चोदयन्ति न ज्ञानपदेन सुखादिव्यवच्छेदः कर्त्तुं युक्तः शक्यो वा सुखादीनामपि ज्ञानस्वभावत्वात् । ज्ञान-स्यैवामी भेदाः सुखं दुःखमिच्छा द्वेषः प्रयत्न इति । कारणाधीनो हि भावानां भेदो भवितुमर्हति समानकारणानामपि तु भेदेऽभिधीयमाने न कारणकृतं पदार्थानां नियतं रूपमिति तदाऽऽकस्मिकत्वप्रसङ्गः । तदुक्तम् ।

तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः । तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम् ॥ इति ।

तस्माज् ज्ञानरूपाः सुखादयः तदभिन्नहेतुजत्वादिति तदिदमनुपपन्नम् । प्रत्यक्षविरुद्धत्वाद्धेतोः । सुखादि संवेद्यमानमा-नन्दादिरूपतयाऽनुभूयते ज्ञानं विषयानुभवस्वभावतयेति प्रत्यक्षसिद्धभेदत्वात् कथमभेदे अनुमानं क्रमते । अत एव इदमपि न वचनीयम् । एवमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्त्तं पश्यामः तत्र यथेष्टं सञ्ज्ञाः क्रियन्तामिति । संविदो विषयानुभव-स्वभावतयैव प्रतिभासात् सुखादेश्च विषयानुभवस्वभावानुस्यूतस्याप्रतिभासात् । ज्ञानमेव विषयग्रहणरूपं प्रकाशते न सुखं दुःखं वा । यस्तु सुखज्ञानं दुःखज्ञानमिति प्रतिभासः स ज्ञानस्वभावभेदकृत एव संशयज्ञानं विपर्ययज्ञानमितिवत् । उक्तमत्र संशय-

न च तुल्यकारणजन्यत्वात् ज्ञान–सुखादीनामेकत्वमिति तन्निवृत्त्यर्थं ज्ञानग्रहणं न कार्यम् तुल्यकारणजन्यत्वस्यासिद्धत्वात् । वक्ष्यति च चतुर्थेऽध्याये—"एकयोनयश्च पाकजाः" [४–१–५ वात्स्या० भा०] । न च तेषामेकत्वमिति व्यभिचारः । प्रत्यक्षविरोधश्च सुप्रसिद्ध एव । तथाहि–आल्हादादिस्वभावाः सुखादयोऽनुभूयन्ते ग्राह्यतया च ज्ञानं त्वर्थावगमस्वभावं ग्राहकतयाऽनुभूयत इति ज्ञान–सुखाद्योर्भेदोऽध्यक्षसिद्ध एव । विशिष्टादृष्टकारणजन्यत्वात् सुखादेः सुखादिजात्युत्पाद्य-५ त्वाच्च न भिन्नहेतुजत्वमसिद्धं ज्ञान–सुखाद्योः अतो बोधजनकस्य ज्ञापनार्थं युक्तं ज्ञानग्रहणम् ।

अव्यपदेश्यग्रहणमप्यतिव्याप्तिनिवृत्त्यर्थम् व्यपदेशः शब्दः तेन इन्द्रियार्थसन्निकर्षेण चोत्पादित-मध्यक्षम्–शाब्देऽन्तर्भावात्–स्यात् तन्निवृत्त्यर्थमव्यपदेश्यपदोपादानम्[१] । नन्विन्द्रियविषये शब्दस्य

विपर्ययादौ विषयानुभवस्वभावत्वमनुस्यूतमवभाति संशयो हि विषयग्रहणात्मकोऽनुभूयते अनिश्चितं तु विषयं गृह्णाति विपर्य-योऽपि विषयग्रहणात्मक एव विपरीतमसन्तं वा विषयं गृह्णाति न तु विषयग्रहणस्वभावं सुखं दुःखं चानुभूयते । अन्य एवार्य ग्राह्यैकस्वभाव आन्तरो धर्मः सुखदुःखादिरिति घटज्ञानवद्विषयतयैव ज्ञानं भिनत्ति न स्वभावभेदेन संशयवदिति । तत्रैतत् स्यात् स्वप्रकाशत्वात् सुखादेर्न ग्राह्यैकस्वभावत्वम् । अतश्च ग्राह्यग्रहणोभयस्वभावत्वाज् ज्ञानमेव तदिति । मैवं वोचः । प्रकाशत्वं ज्ञानेऽपि प्रतिक्षिप्तं प्रतिक्षेप्स्यते तत् कुतः सुखादौ भविष्यति । न हि ग्रहणस्वभावं कश्चित् सुखमनुभवति ज्ञानवदिति । नन्वस्य प्रकाशत्वा-नभ्युपगमे सुखादेरुत्पादानुत्पादयोरविशेषात् सर्वदा सुखित्वं न कदाचिद्वा स्यादिति । नैतदेवम् । उत्पन्नमेव सपदि सुखं गृह्यते ज्ञानेनेति कथमनुत्पन्नान्न विशिष्यते । प्रत्युत स्वप्रकाशसुखवादिनामेष दोषः स्वप्रकाशस्य दीपादेः सर्वान् प्रत्यविशिष्टत्वात् । क्वचित् सन्ताने स्वप्रकाशसुखोत्पादात् तेनैव स्वप्रकाशेन सुखेनान्योऽपि सुखी स्याद् यस्यापि सुखं नोत्पन्नमिति । किंच किमेकमेव ज्ञानं सर्वसुखदुःखाद्यशेषाकारभूषितमिष्यते उत किंचित् सुखात्मकं किंचिद् दुःखात्मकं ज्ञानमिति । आद्ये पक्षे सर्वाकारखचितज्ञानो-पजननादेकस्मिन्नेव क्षणे परस्परविरुद्धसुखदुःखादिधर्मप्रबन्धवेदनप्रसङ्गः । उत्तरस्मिंस्तु किंचित् सुखज्ञानं किंचिद्दुःखज्ञानमिति यत्किंचिदसुखदुःखचितं विषयानुभवस्वभावमपि ज्ञानमनुभूयमानमेषितव्यमेव । तच्च न स्वच्छम् अपि तु केनचिद् घटादिना विषयेणोपरक्तमन्वयव्यतिरेकाभ्यां च घटाद्युपजननापायेऽपि बोधस्वभावमनुवर्त्तमानं प्रतीयते । तदिदानीं सुखज्ञानमप्यनु-भूयमानं सुखेन विषयभावजुषा घटादिनेवोपरज्यते इति गम्यते न स्वरूपेणैव सुखात्मकं ततो भिन्नरूपस्य बोधमात्रस्वभावस्य ज्ञानस्यान्यदा दृष्टत्वादिति । तस्मान्न बोधरूपाः सुखादयः । अभिन्नहेतुजत्वादिति चायमसिद्धो हेतुः समवायिकारणस्यात्मनः असमवायिकारणस्यात्मनः संयोगस्य अभेदेऽपि निमित्तकारणस्य सुखज्ञानत्वादेर्भिन्नत्वात् । ननु सुखोत्पादात् पूर्वमनाश्रयं सुखत्वसामान्यं कथं तत्र स्यात् । कश्चापि सुखहेतुभिः कारकैः संसर्गः असंसृष्टं च कथं कारकं स्यात् । उच्यते । सर्वसर्वगतानि सामान्यानि साधयिष्यन्ते इति सन्ति तत्रापि सुखत्वादीनि योग्यतालक्षण एव चैषां सुखहेतुभिः कारकैः संसर्गः धर्माधर्मवत् । धर्माधर्मौ हि सर्वस्य प्राणिनां सुखदुःखहेतोः जायमानस्य शाल्यादेः कार्यस्य कारणं तयोश्च तत्कारणैः बीजक्षितिजलादिभिः सहयोग्यतैव संसर्गः एवं सुखत्वादीनामपि स्यात् । तस्मान्निमित्तकारणभेदाद् भिन्नानि ज्ञानसुखादीनि कार्याणि ।

निमित्तकारणान्यत्वमपि कार्यस्य भेदकम् । विलक्षणा हि दृश्यन्ते घटादौ पाकजा गुणाः ॥
अपि च ज्ञानमिच्छन्ति न सर्वं ज्ञानपूर्वकम् । सुखदुःखादि सर्वं तु विषयज्ञानपूर्वकम् ॥
विषयानुभवोत्पाद्या यत्रापि न सुखादयः । तत्रापि तेषामुत्पत्तौ कारणं विषयस्मृतिः ॥

क्वचित्तु सङ्कल्पोऽपि सुखस्य कारणतां प्रतिपद्यते । तस्मात् सर्वं सुखादि ज्ञानपूर्वकमेव । ज्ञानमपि ज्ञानपूर्वकमेवेति चेद् उपरिष्टान्निराकरिष्यमाणत्वात् । न हि गर्भादौ मदमूर्छाद्यनन्तरं वा ज्ञानमुपजायमानं ज्ञानान्तरपूर्वकं भवतीति वक्ष्यामः । तेन सुखादीनां वैलक्षण्योपपादनात् सुखादिव्यवच्छेदस्य सिद्धत्वात्" । न्यायमञ्ज० आ० २ पृ० ७४ पं० ११—।

१ "एकप्रत्यनीकाः पृथिव्यां श्यामादयोऽग्निसंयोगेनैकेन एकयोनयश्च पाकजा इति"—पृ० ३६६ पं० १६ ।

"व्यभिचारादहेतुः ॥ एकप्रत्यनीकाश्च रूपादयः एकाग्निसंयोगविरोधिनः न चैषामेकत्वमिति अनैकान्तिकम् । एकयो-नित्वादेकं रागादयः शब्दवदित्यप्यनेनैव प्रत्युक्तम् । एकयोनयो रूपादयो न चैषामेकत्वमिति"। न्यायवा० पृ० ४५० पं० १६।

"एकयोनयो हि रूपादयो न चैषामेकत्वं, यदि पुनस्तत्र रूपादीनां परस्परभेदसिद्धये कश्चित् कारणभेद आस्थीयते स रागादिष्वपि समान इति भावः" । न्यायवा० ता० टी० पृ० ५८९ पं० ४ ।

२ "ज्ञानस्य ज्ञानजात्युत्पाद्यत्वात्"—बृ० ल० टि० । ३ "परः"—बृ० टि० । ४ अव्यपदेश्यपदकृत्यचर्चा भाष्य-वार्तिक-तात्पर्यटीकासु उत्तरोत्तरमधिकतया विविधतया च कृता दृश्यते—१–१–४ वात्स्या० भा० पृ० २० पं० ९ । न्यायवा० पृ० ३६ पं० २४ । न्यायवा० ता० टी० पृ० १२७ पं० ६ । जयन्तस्तु तां सर्वामपि चर्चां संगृह्य, समीक्ष्य चातिपल्लवयांचकार—न्यायमञ्ज० आ० २ पृ० ७७ पं० २१–पृ० ८० पं० ६ ।

सामान्यविषयत्वेन व्यापारासंभवादिन्द्रियस्य च स्वलक्षणविषयत्वान्नोभयोरेकविषयत्वमिति न तज्जन्यमेकं ज्ञानं संभवति, न; तयोर्भिन्नविषयत्वस्य "व्यक्त्याकृतिजातयस्तु पदार्थः" [न्यायद० २-२-६५] इत्यत्र निषेत्स्यमानत्वात् तद्भावभावित्वाच्चोभयजन्यत्वं ज्ञानस्यावगतमेव। तथाहि–चक्षुर्गोशब्दव्यापारे सति 'अयं गौः' इति विशिष्टकाले ज्ञानमुपजायमानमुपलभ्यत एव तद्भावभावित्वेन चान्यत्रापि कार्यकारणभावो व्यवस्थाप्यते तच्चात्रापि तुल्यमिति कथं नोभयजं ज्ञानम्? न चान्तःकरणानधिष्ठितत्वदोषश्चक्षुषः तेनाधिष्ठानात् शब्दस्य च प्रदीपवत् करणत्वात्। न च ग्राह्यत्वकाले शब्दस्य करणत्वमयुक्तम् श्रोत्रस्यैव तदा करणभावात् शब्दस्य तु तदा ग्राह्यत्वमेव गृहीतस्य चोत्तरकालमन्तःकरणाधिष्ठितचक्षुःसहायस्यार्थप्रतिपत्तौ व्यापार इति भवत्युभयजं 'गौः' इति ज्ञानम्। न चास्य प्रमाणान्तरत्वं युक्तम् उभयविलक्षणत्वात्[1] शाब्देऽव्यपदेश्यविशेषणस्याभावात् प्रत्यक्षे च भावादस्य शाब्दत्वात्। न च शब्देनैव यज्ञान्यते तच्छाब्दमिति शाब्दलक्षणे नियमः अपि च शब्देन यज्ञानितं तच्छाब्दम् अस्ति च प्रक्रान्ते एतद्रूपमिति कथं न शाब्दम्? न चैतन्नास्ति न चाप्रमाणम् अव्यभिचारित्वादिविशेषणयोगात्। न चानुमानम् पक्षधर्मत्वाद्यभावात्। प्रत्यक्षमप्येतन्न भवति शब्देनापि जन्यत्वात्। नाप्युपमानम् तल्लक्षणविरहात्। पारिशेष्यात् शाब्दम्। ननु शाब्दमपि न युक्तम् इन्द्रियेणापि जनितत्वात्, न; शब्दस्यात्र प्राधान्यात् प्राधान्यं च तस्य प्रभूतविषयापेक्षया यतोऽसौ न क्वचिद् व्याहन्यते–तथा च प्रत्यपादि भाष्यकृता–"यावदर्थो वै नामधेयशब्दः[2]" [१-१-४ वात्स्या० भा०] इति। न त्वेवमिन्द्रियं तस्य स्वर्गादौ प्रतिहन्यमानत्वात्। तस्मात् प्राधान्याच्छब्देनैव व्यपदेशः।

व्यपदेशकर्मतापन्नज्ञाननिवृत्त्यर्थमव्यपदेश्यमिति विशेषणमिति केचित् प्रतिपन्नाः। तथाहि–इन्द्रियार्थसन्निकर्षादुपजातस्य ज्ञानस्य शब्देनाऽनभिधीयमानस्य प्रत्यक्षत्वम् अयुक्तमेतत् प्रदीपेन्द्रियसुवर्णादीनामभिधीयमानत्वेऽपि प्रत्यक्षत्वानिवृत्तेः। न च ज्ञानस्याभिधीयमानत्वे करणत्वव्याहतिः शक्तिनिमित्तत्वात् कारकशब्दस्य। न ह्यभिधीयमानार्थोऽन्यत्र तदैव परिच्छित्तिं न विदधाति। न चायं न्यायो नैयायिकैर्नाभ्युपगतः "प्रमेया च तुलाप्रामाण्यवत्[3]" [न्यायद० २-१-१६] इत्यत्र प्रतिपादयिष्यमाणत्वात्। फलविशेषणपक्षेऽप्यभिधीयमानस्य स्वकारणव्यवच्छेदकत्वमस्त्येव। शब्दब्रह्मनिवृत्त्यर्थमेतदिति, एतदप्ययुक्तम्; अप्रकृतत्वात्। शब्दप्रमेयत्वेऽपीन्द्रियार्थसन्निकर्षोत्पन्नत्वं ज्ञानस्य संभवति किमनेन विशेषणेन कृत्यम्? तथाहि–इन्द्रियविषयभूतेन रूपेण शब्देन वा जनितं ज्ञानमिति कोऽत्र प्रत्यक्षत्वे विशेषः? सर्वथा लक्षणं युक्तिमदेव विशेषणं चातिव्याप्त्यादिदोषनिवृत्त्यर्थं लक्षणे उपादेयम् न परपक्षव्युदासार्थम्।

इन्द्रियार्थसन्निकर्षादुपजातं शब्देन[4] चाजनितं व्यभिचारिज्ञानं न प्रत्यक्षव्यवच्छेदकमित्यव्यभिचारिपदोपादानम्। इन्द्रियजत्वं च मरीच्यादिषूदकज्ञानस्य तद्भावभावित्वेनावसीयते। मरीच्यालम्बन-

---

१ "प्रत्यक्ष–शाब्दोभयविलक्षणत्वं च न प्रमाणान्तर इत्याह"—बृ० टि०। "प्रत्यक्ष–शब्दोभयलक्षणत्वेन प्रमाणान्तरता गौरिति ज्ञानस्य नाभिधेया कुत इत्याह"–ल० टि०।

२ भाष्ये तु "यावदर्थं वै नामधेयशब्दाः"–इति पाठोऽस्ति। न्यायवा० ता० टी० पृ० १२५ पं० १४। ३ "प्रमेयता च तुलाप्रामाण्यवत्"—न्यायवा० पृ० १९३। "यथा तुला किल कलयति प्रमाणतां तथा प्रमेयतामपि तुलान्तराश्रयणेन"—बृ० ल० टि०। ४ "सामग्रीप्रमाणतापक्षे न केवलम्"—बृ० ल० टि०। ५ अव्यपदेश्यपदस्य शब्दब्रह्मनिवृत्तिपरतां व्याख्यातुकामेन वाचस्पतिमिश्रेण "तत्र नामरहितमविकल्पकं नास्तीति ये विप्रतिपद्यन्ते तन्मतमपाचिकीर्षुरुपन्यस्यति भाष्यकारः" इत्यादिना वैयाकरणीयः शब्दब्रह्मवाद उपन्यस्तः अनन्तरं च सा निवृत्तिपरता "अयमभिसन्धिः–सामानाधिकरण्येन शब्दात्मकत्वं रूपादीनामभिधीयमानं शब्दब्रह्मात्मत्वं वोच्यते श्रूयमाणगौरित्यादिपदभेदात्मत्वं वा" इत्यादिना सविस्तरं दर्शिता–न्यायवा० ता० टी० पृ० १२५ पं० १२ तथा पृ० १२७ पं० ९। ६–**क्षणमुपा–** आ० हा० वि०। ७–**न वाज**–बृ० विना। ८ "विशेषकम्"—बृ० ल० टि०। भाष्यादिषु 'अव्यभिचारि' पदस्यैतद् व्यावर्त्यं दर्शितमस्ति—वात्स्या० भा० पृ० २० पं० २०—। न्यायवा० पृ० ३७ पं० ६। न्यायवा० ता० टी० पृ० १३० पं० २२–१३२ पं० १४। न्यायमञ्ज० आ० २ पृ० ८८ पं० ७–पृ० ९० पं० ६। ९ "इन्द्रिय"–बृ० ल० टि०।

त्वमपि तत एवावसीयते मरीचिदेशं प्रति प्रवृत्तेश्च। पूर्वानुभूतोदकविषयत्वे तु तद्देशैव प्रवृत्तिर्भवेन्न मरीचिदेशे। भ्रान्तत्वान्न तद्देशे प्रवर्तत इति चेत् य एवाभ्रान्तः स उदकस्मरणादुदकदेश एव प्रवर्तते अयं तु भ्रान्त इति अयुक्तमेतद् भ्रान्तिनिमित्ताभावात्। इन्द्रियव्यापार एव तन्निमित्त इति चेत् अयुक्तमेतत् तत एवेन्द्रियजत्वसिद्धेः। न[5] च स्मृतिर्बाह्येन्द्रियजा दृष्टा इदं तु बाह्येन्द्रियजमिति न स्मृतिः। ननु कथमुदकज्ञानस्यालम्बनं मरीचयोऽप्रतिभासमानाः? उक्तमेतत् तेषु सत्सु भावादस्य। ननु यद्येतद् अनुदके उदकप्रतिभासं भवत्यन्यत्र किमिति न भवेत्? न भवत्यन्यस्योदकेन सारूप्याभावात् तस्मादुदकसरूपा मरीचय एव देशकालादिसव्यपेक्षा उदकज्ञानं जनयन्ति। तथाहि–सामान्योपक्रमं विशेषपर्यवसानम् 'इदमुदकम्' इत्येकं ज्ञानं तस्य सामान्यवानर्थः स्मृत्युपस्थापितविशेषापेक्षो जनकः तिरस्कृतस्वाकारस्यागृहीताकारान्तरस्य सामान्यविशिष्टस्य वस्तुनो विपर्ययजनकत्वे तथाविधस्येन्द्रियेण सम्बन्धोपपत्तेः कथं नेन्द्रियार्थसन्निकर्षजो विपर्ययः? नन्वस्य शब्दसहायेन्द्रियार्थसन्निकर्षजत्वेन नाव्यभिचारिपदव्यवच्छेद्यत्वम् अव्यपदेश्यपदेनैव निरस्तत्वात्, न; प्रथमाक्षसंनिपातजस्य शब्दस्मरणनिमित्तस्येन्द्रियार्थसन्निकर्षप्रभवस्याशब्दजन्यस्याव्यभिचारिपदापोह्यत्वाभ्युपगमात्। अभ्युपगमनीयं चैतत् अन्यथोदकशब्दस्मृतेरयोगात् "यत्सन्निधाने यो दृष्टस्तंदृष्टेस्तङ्कनौ स्मृतिः" [ ] इति न्यायात्। न च तरङ्गायमाणवस्तुसन्निधाने उदकशब्दस्य दृष्टिः किन्तूदकसन्निधान एव अतो मरु–जङ्गलादौ देशे क्वचिद्दूरस्थस्य निदाघसमये तरङ्गायमाणवस्तुनः सामान्यविशिष्टस्य दर्शनम् तदनन्तरं तत्सहचरितोदकत्वानुस्मरणम् तस्मात् सामान्यवत्ताध्यारोपितोदकग्रहणम् तत उदकशब्दानुस्मृतिः ततोऽप्यनुस्मृतोदकसहायादिन्द्रियार्थसन्निकर्षात् 'उदकम्' इति ज्ञानम् अतो यत् पूर्वमुदकशब्दस्मृतेर्निमित्तं तत् इन्द्रियार्थसन्निकर्षजत्वेनाव्यभिचारिपदापोह्यमिति केचित् संप्रतिपन्नाः।

अपरे तु स्मर्यमाणशब्दसहायेन्द्रियार्थसन्निकर्षजमप्यव्यभिचारिपदापोह्यमेव मरीचिषु 'उदकम्' इति शब्दोल्लेखवज्ज्ञानं मन्यन्ते अव्यपदेश्यपदव्यवच्छेद्यं तु यत्र प्रथमतः एवेन्द्रियसन्निकृष्टेऽर्थे संकेतानभिज्ञस्य श्रूयमाणाच्छब्दात् 'पनसोऽयम्' इति ज्ञानमुत्पद्यते तत्र शब्दस्यैव तदवगतौ प्राधान्यात् इन्द्रियार्थसन्निकर्षस्य तु विद्यमानस्यापि तदवगतावप्राधान्यात् तदेवाव्यपदेश्यपदव्यवच्छेद्यं न पुनरवगतसमयस्मर्यमाणशब्दसचिवेन्द्रियार्थसन्निकर्षप्रभवम् तत्र तत्सन्निकर्षस्यैव प्राधान्याद् वाचकस्य च तद्विपर्ययात्। ननु सामग्र्यां कस्य व्यभिचारः कर्तुः, करणस्य, कर्मणो वा? तत्र स्वाकारसंवरणेनाकारान्तरेण ज्ञानजननात् कर्मणो व्यभिचारः कर्तृ–करणयोस्तु तथाविधकर्मसहकारित्वादसाविति मन्यन्ते। भवत्वयं व्यभिचारः न त्वेतन्निवृत्त्यर्थमव्यभिचारिपदोपादानमर्थवत् अनिन्द्रियार्थसन्निकर्षजत्वादेव तन्निवृत्तिसिद्धेः। नहि ज्ञानरूपतेन्द्रियार्थसन्निकर्षजत्वे तत्र सिद्धे[6] तस्माद् यद् अतस्मिंस्तदित्युत्पद्यते तद् व्यभिचारिज्ञानम् तद्व्यवच्छेदेन 'तस्मिंस्तत्' इति ज्ञानमव्यभिचारिपदसंग्राह्यम्। नन्वेवमपि ज्ञानपदमनर्थकम् अव्यभिचारिपदादेव ज्ञानसिद्धेः व्यभिचारित्वं हि ज्ञानस्यैव तद्व्यवच्छेदार्थमव्यभिचारित्वमपि तस्यैवेति ज्ञानपदमनर्थकम्, न; इन्द्रियार्थसन्निकर्षोत्पन्नस्याज्ञानरूपस्यापि सुखस्याव्यभिचारात् तन्निवृत्त्यर्थं ज्ञानपदमर्थवत्। किं पुनः सुखं व्यभिचारि?

---

१ "तद्भावभावितातः"–बृ० ल० टि०। २ "परः"–बृ० ल० टि०। ३ "परः"—बृ० ल० टि०। ४ "शब्दः"—बृ० ल० टि०। ५ "वस्तु"—बृ० ल० टि०। ६ "जङ्गलो निर्जले देशे" इत्यादि—हैम० अनेका० ३,६४४। ७–**वज्ञाध्या**–बृ०। ८–**कारं सं**–आ० हा० वि०। ९ "व्यभिचारः"–बृ० टि०। १० "तथाहि–मरीचिकायां जलज्ञानस्येन्द्रियार्थसन्निकर्षो नास्ति तद्धि जलं परिच्छिनत्ति न च जलं तत्र विद्यते येन स्वार्थसन्निकर्षः स्यात् तेन तन्निवृत्तयेऽव्यभिचारिपदं न कार्यमिति"–बृ० ल० टि०। ११ "परः"—बृ० ल० टि०।

"व्यभिचाराव्यभिचारौ हि ज्ञानस्य धर्मौ न सुखादेः अतस्तदुपादानात् तद्धर्मयोगि ज्ञानं लभ्यत एव किं ज्ञानग्रहणेन। नैतदेवम्। सुखस्यापि सव्यभिचारस्य दृष्टत्वात्। किं पुनः सुखं व्यभिचारवद् दृष्टम्? यदेतत् परदाराभिमर्शादिनिषिद्धाचरणसंभवं सुखं तद् व्यभिचारि। ननु सुखस्य कीदृशो व्यभिचारः? ज्ञानस्यापि कीदृशो व्यभिचारः? अतस्मिंस्तथाभावः सुखस्यापि अतस्मिंस्तथाभाव एव। किं परपुरन्ध्रपरिरम्भसंभवं सुखं सुखं न भवति? किं शुक्तिकायां रजतज्ञानं ज्ञानं न भवति? ज्ञानं तु तद् भवति किन्तु मिथ्या। इदमपि सुखं भवति किन्तु मिथ्या। ननु न सुखं मिथ्या तदपि हि आनन्दस्वभावमेव।

यत् परयोषिति । ननु कस्तस्य व्यभिचारः? ज्ञानस्य क इति वाच्यम्? अतस्मिंस्तदिति भावः स सुखेऽपि समानः। किं पराङ्गनोत्पन्नं सुखं न भवति? मरीचिषूदकज्ञानं किं न ज्ञानम्? अथातस्मिंस्तदितिभावाद् ज्ञानत्वेऽपि तद् व्यभिचारि असुखसाधने पराङ्गनादौ सुखस्य भावात् समानं व्यभिचारित्वमिति सुखनिवृत्यर्थं ज्ञानपदमर्थवत्। एतच्च केचिद् दूषयन्ति–नहि तापादिस्वभावं पराङ्गनायां सुखमुत्पद्यते अपि त्वाह्लादस्वरूपम् यथा स्वललनायाम् सुखसाधनत्वादेव चासक्तिहेतुत्वादधर्मोत्पादकत्वेन तस्या भाविनि काले दुःखसाधनत्वम् । न च यस्यैकदा दुःखजनकत्वं तस्य सर्वदा तद्रूपत्वमेव अन्यथा पावकस्य निदाघसमये दुःखजनकत्वाच्छिशिरेऽपि तज्जनकत्वमेव स्यात् एवं देशाद्यपेक्षयापि न नियतरूपता भावानाम्। उक्तं च भाष्यकृता—"सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयः" [वात्स्या० भा० पृ० १ पं० १२] इति। ततो व्यभिचाराभावान्न सुखनिवृत्त्या ज्ञानपदोपादानमर्थवत्। न चैवमनर्थकमेवैतत् धर्मिप्रतिपादनार्थत्वादस्य ज्ञानपदोपात्तो हि धर्मी इन्द्रियार्थसन्निकर्षजत्वादिभिर्विशेष्यते अन्यथा धर्म्यभावे क्वाऽव्यभिचारादीन् धर्मांस्तत्पदानि प्रतिपादयेयुः? न च विशेषणसामर्थ्याद्धर्मिणः प्रतिलम्भ इति वक्तव्यम् तथाभ्युपगमे 'प्रत्यक्षं प्रत्यक्षम्' इत्येव वक्तव्यं शेषस्य सामर्थ्यलभ्यत्वात् । यथोक्तविशेषणविशिष्टं संशयज्ञानं भवति 'व्यभिचारिप्रतियोगि अव्यभिचारि' इति कृत्वा न चैतत् प्रत्यक्षव्यवच्छेदकम् न चास्येन्द्रियार्थसन्निकर्षजत्वं नास्ति तद्भावितया तज्जन्यत्वस्य तत्र सिद्धेः अतस्तद्व्यवच्छेदार्थं व्यवसायात्मकपदोपादानम्। व्यवसीयते अनेनेति व्यवसायो विशेष उच्यते विशेषजनितं व्यवसायात्मकम् संशयज्ञानं तु सामान्यजनितत्वान्नैवम् अथवा निश्चयात्मकं व्यवसायात्मकम् संशयज्ञानं त्वनिश्चयात्मकम् अत एव विपर्ययाद् भिन्नम् व्यवस्यति व्यवसायः अन्यपदार्थव्यवच्छेदेनैकपदार्थालम्बनत्वमस्य तद्विपरीतस्तु संशयः।

[निर्विकल्पकस्यैव प्रत्यक्षत्वमामनतां सौगतानां नैयायिकसम्मते विकल्पप्रामाण्ये प्रतिक्षेपः]

ननु च विकल्परूपत्वान्न व्यवसायात्मकस्येन्द्रियार्थजत्वम् कथमस्य प्रत्यक्षफलता? न च व्यवसायात्मकस्याप्यध्यक्षता जैनमतानुसारेण व्यवस्थापनीया तेनानै(ने)कान्तात्मकस्य वस्तुनोऽङ्गीकृतत्वात् भवतस्त्वेकान्तवादिनस्तद्युक्तितः तद्व्यवस्थापनासंभवात्। कुतः पुनर्विकल्पस्यानर्थजत्वम्? शब्दार्थप्रतिभासस्वभावत्वात्। नँहि विकल्पोऽर्थसामर्थ्यापेक्षः समुपजायते निर्विकल्पकं त्वर्थसन्निधानापेक्षं तत्सामर्थ्यसमुद्भूतत्वात् प्रत्यक्षं प्रमाणम्। तदुक्तम्—"यो ज्ञानप्रतिभासमन्वयव्यतिरेकावनुकारयति" [ ] इत्यादि । अथ शब्दार्थप्रतिभासित्वेऽपि किमिति विकल्पानां नार्थजत्वम्? रूपादेरर्थस्य स्वलक्षणत्वेन व्यावृत्तरूपत्वात् शब्दार्थत्वानुपपत्तेः विकल्पप्रतिभास्याकारस्य तु तद्व्यतिरिक्तस्यार्थत्वानुपपत्तेः सदसद्रूपस्य नित्यत्वासत्त्वाभ्यां तस्य ज्ञानजनकत्वनिषेधात् अनुगतस्य चाशब्दार्थत्वात् स्वलक्षणस्य च सर्वतो व्यावृत्ततयाऽनुगतत्वासंभवादनर्थजा विकल्पाः।

यद्येवं शुक्तिकायां रजतज्ञानमपि न मिथ्या तदपि विषयानुभवस्वभावमेव । ननु विषयानुभवस्वभावमपि तद् ज्ञानं विषयं व्यभिचरति । सुखमपि तर्हि इदमानन्दस्वभावमपि विषयं व्यभिचरत्येव । किमसुखसाधनेन तद् जनितम्? ज्ञानमपि किमज्ञानसाधनेन जनितम्? ननु ज्ञानं ज्ञानसाधनेन जनितमसत्येन प्रत्यक्षबाधितेन रजतादिना । सुखमपि सुखसाधनेन जनितमसत्येन तु शास्त्रबाधितेन परवनितादिना । किं परवनितादि न सत्यम्? तत्रापि ज्ञानजनकं सत्यम् असत्यं प्रत्यक्षबाधितत्वात्। परवनितायपि सुखसाधनमसत्यं शास्त्रबाधितत्वात्। ननु शास्त्रेण किमत्र बाध्यते? ज्ञानेऽपि प्रत्यक्षेण किं बाध्यते? विषयो मिथ्येति ख्याप्यते । शास्त्रेणापि सुखस्य हेतुर्मिथ्येति ख्याप्यते । किं स विषयः सुखहेतुर्न भवति? यथा त्वेष विषयः कलुषस्य ज्ञानस्य हेतुस्तथा सोऽपि कलुषस्य कटुविपाकस्य सुखस्य हेतुरिति तथाविधं सुखमपि व्यभिचारि भवत्येवेति अलमतिकेलिना"—न्यायमञ्ज० आ० २ पृ० ७६ पं० १८—।

१-**त्वाच्छशि**-ल० वा० बा० । २-**नपदोपपत्तो हि** बृ० ।-**नपदोत्पत्तौ हि** ल० वा० बा० । ३ "संशये"—बृ० टि० । "संशय"—ल० टि० । ४ वात्स्या० भा० पृ० २१ पं० ५। न्यायवा० पृ० ३७ पं० १६–। न्यायवा० ता० टी० पृ० १४४ पं० ३—। न्यायमञ्ज० आ० २ पृ० ९० पं० ७। ५-**त्मकमसंश**-आ० हा० वि० । ६ " 'ननु च' इत्यादेरुत्तरं कुत इत्यादिना निगदति"-बृ० टि० । ७ "परः" बृ० टि० । ८-**भासस्या**-ल० । ९-**नकत्वानि**-आ० हा० वि० । १० "यत् सत् तत् तावत् परेण नित्यमिष्टम् नित्यस्य च हेतुता नास्ति असतोऽपि न हेतुता निरुपाख्यत्वात्"-बृ० टि० ।

इतोऽप्यक्षार्थजा न भवन्ति अक्षार्थसन्निपातवेलायां प्रथमत एव तेषामनुद्भूतेः यदि हि तदुद्भववास्ते स्युः स्मृतिमन्तरेणानुभवत उत्पद्येरन्। न चार्थोपयोगेऽपि तामन्तरेण उत्पद्यन्ते। तदुक्तम्—

"अर्थोपयोगेऽपि पुनः स्मार्त्ते शब्दानुयोजनम्।
अक्षधीर्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत्" ॥ [ ]

यो हि यज्जन्यः स तदापात एव भवत्यविकल्पवत् न भवन्ति च तदापातसमये विकल्पा इति नार्थजन्यत्वं तेषां स्मृतिव्यवहितत्वात्। न चार्थस्य स्मृत्याऽव्यवधानं तस्यास्तत्सहकारित्वादिति वाच्यम् यतो यद्यर्थस्य ज्ञानजनकत्वं तदा तज्जनने किमित्यसौ स्मृत्यपेक्षः? न च तया विना ज्ञानस्योत्पत्तिस्तन्नार्थस्तज्जनकः । न च तदपेक्षस्य तस्य तज्जनकत्वं तस्यास्तत्र व्यतिरिक्ताव्यतिरिक्तोपकारजनकत्वेनाकिञ्चित्करत्वात्। तदुक्तम्—

"यः प्रागजनको बुद्धेरुपयोगाविशेषतः।
स पश्चादपि तेन स्यादर्थापायेऽपि नेत्रधीः" ॥ [ ]

अपि च, जात्यादिविशेषणविशिष्टार्थग्राहिविकल्पज्ञानम् न च जात्यादीनां सद्भावः तत्त्वेऽपि तद्विशिष्टग्रहणं बहुप्रयाससाध्यमध्यक्षं न भवति। उक्तं च—

"विशेषणं विशेष्यं च सम्बन्धं लौकिकीं स्थितिम्।
गृहीत्वा संकलय्यैतत् तथा प्रत्येति नान्यथा" ॥ [ ]
"संकेतस्मरणोपायं दृष्टसङ्कलनात्मकम्।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथम्?" ॥ [ ] इति।

अतोऽर्थसन्निधानाभावेऽपि भावान्नार्थप्रभवा विकल्पाः। अथ मा भूवन् राज्यादिविकल्पा अर्थप्रभवाः इदंताविकल्पास्त्वर्थमन्तरेणानुद्भवन्तः कथं नार्थप्रभवाः? तदुक्तम्—"नान्यथेदंतया" [ ] इति चेत्, न; इदंताविकल्पानामपि वस्तुप्रतिभासित्वासंभवात् न हि शब्दसंसर्गयोग्यार्थप्रतिभासिनो विकल्पा वस्तुनिश्चायका अन्यथा शब्दप्रत्ययस्याध्यक्षप्रतीतितुल्यता भवेत्। उक्तं च—

"शब्देनाव्यापृताक्षस्य बुद्धावप्रतिभासनात्।
अर्थस्य दृष्टाविव तदनिर्देश्यस्य वेदकम्" ॥ [ ] इति।

तन्नार्थाक्षप्रभवत्वं व्यवसायस्येति प्रत्यक्षत्वमयुक्तम्।

[नैयायिकैः सौगताक्षेपस्य प्रतिविधानम्]

अत्र नैयायिकाः प्रतिविदधति–किमिदं विकल्पत्वं परस्याभिप्रेतम्? किं शब्दसंसर्गयोग्यवस्तुप्रतिभासित्वम्, आहोस्विदविद्यमानार्थग्राहित्वम्, किं विशेषणविशिष्टार्थावभासित्वम्, उताकारान्तरानुषक्तवस्त्ववभासकत्वम्? तत्र यद्याद्यः पक्षस्तदा वक्तव्यम् किमिदं शब्दसंसर्गयोग्यार्थप्रतिभासित्वं विकल्पत्वं पारिभाषिकम् उत वास्तवम्? यदि पारिभाषिकम् तदा न युक्तम् परिभाषाया

---

१ अष्टस० पृ० १२२ पं० २। तत्त्वोप० लि० पृ० ५१ पं० १२। सिद्धिवि० टी० लि० पृ० ७६ पं० १८। न्यायवा० ता० टी० पृ० १३६ पं० २१। न्यायमञ्ज० आ० २ पृ० ९२ पं० २३। २ अष्टस० पृ० १२२ पं० १०। तत्त्वोप० लि० पृ० ५१ पं० ९। सिद्धिवि० टी० लि० पृ० ३५ पं० ११। न्यायवा० ता० टी० पृ० १३७ पं० १। न्यायमञ्ज० आ० २ पृ० ९२ पं० १९।

तात्पर्यटीकायां तु–"दक्षापायेऽपि नेत्रधीः" इति पाठमाश्रित्य "अन्धानामपि रूपसाक्षात्कारप्रसङ्गः" इति भावो वर्णितो दृश्यते।

३ "सद्भावेऽपि"–बृ० ल० टि० । ४ सिद्धिवि० टी० लि० पृ० ३१ पं० १। न्यायवा० ता० टी० पृ० १३७ पं० ९। न्यायमञ्ज० आ० २ पृ० ९३ पं० ३। पृ० ५१५ पं० १ टि० १।

५ "दृष्टसङ्कल्पनात्मकम्। पूर्वापरपरामर्शशून्यं तच्चाक्षुषं कथम्–"न्यायमञ्ज० आ० २ पृ० ९३ पं० ७। पृ० ५१५ पं० ५।

६ "तत्रैतत् स्यात्। द्विविधा विकल्पाः छात्रमनोरथविरचिताः इदन्ताग्राहिणश्च नीलमित्यादयः तत्र पूर्वे मा भूवन् प्रमाणं कस्तेष्वर्थनिरपेक्षजन्मसु प्रामाण्येऽभिनिवेशः। इदन्ताग्राहिणां त्वर्थाविनाभूतत्वात् कथं न प्रामाण्यमिति"—न्यायमञ्ज० आ० २ पृ० ९३ पं० ९। ७ पृ० २६० पं० १७ टि० ११।

अत्रानवतारात्। अथ वास्तवम् तदपि न, प्रमाणाभावात्। भवतु वा तस्य तद्रूपत्वं तथापि कथमनध्यक्षत्वम्? अथार्थसामर्थ्योद्भूतत्वात् तस्येत्युक्तम् विकल्पानां च तदसंभवान्नाध्यक्षता; ननु नीलादिज्ञानवच्छब्दार्थप्रतिभासित्वेऽपि कथं नार्थप्रभवत्वं तेषाम्? स्वलक्षणातिरिक्तशब्दार्थस्याभावान्न तत्प्रभवत्वं तेषामिति चेत्; नन्वेवमसदर्थग्राहित्वं कल्पनात्वं प्रसक्तम् तच्च सामान्यादेः सत्त्वप्रतिपादनान्निरस्तम् जातिविशिष्टस्यार्थस्य शब्दार्थत्वेन प्रतिपादनात् तदवभासिनो ज्ञानस्य कथमसदर्थविषयत्वेन कल्पनात्वं भवेत्? न चार्थाभावेऽपि विकल्पानामुत्पत्तेर्नार्थजत्वम् अविकल्पस्याप्यर्थाभावेऽपि भावादनर्थजत्वप्रसक्तेः। अथ तदध्यक्षं प्रमाणमेव नाभ्युपगम्यते तर्हि विकल्पानामप्ययं न्यायः समानः तेऽप्यसदर्था अध्यक्षप्रमाणतया नाभ्युपगम्यन्ते असदर्थत्वं च विकल्पाविकल्पयोर्बाधकप्रमाणावसेयम् तच्च यत्र न प्रवर्तते तस्य कथमसदर्थता? एतेन द्वितीयो विकल्पः प्रतिविहितः। अथ विशेषणविशिष्टार्थग्राहित्वं कल्पनात्वम् तदा किं तथाभूतार्थाभावात् तद्ग्राहिणो ज्ञानस्य विकल्पकत्वम्, आहोस्विद् विशेषणविशिष्टार्थग्राहित्वेनैवेति वक्तव्यम् आद्यविकल्पे सिद्धसाध्यता असदर्थग्राहिणः प्रत्यक्षप्रमाणत्वेनानभ्युपगमात्। न च द्वितीयपक्षादस्य पक्षान्तरत्वम् द्वितीयपक्षस्य च प्रतिविधानं विहितमेव। अथ द्वितीयः पक्षोऽभ्युपगम्यते सोऽपि न युक्तः नीलादिज्ञानस्यापि अप्रत्यक्षत्वप्रसक्तेः। अथास्य न विशेषणविशिष्टार्थग्राहिता, ननु विशेषणविशिष्टार्थग्राहकत्वेनाध्यक्षत्वस्य को विरोधो येन तद्ग्राहिणोऽध्यवसायस्यानध्यक्षता? अथ विशेषणविशिष्टार्थग्राहित्वे विचारकत्वमध्यक्षविरुद्धम् अर्थसामर्थ्योद्भूतस्य विचारकत्वायोगात्, असदेतत्; विशेषणविशिष्टार्थावभासिनस्तस्याविकल्पवत् विचारकत्वायोगात् स्मरणाद्यनुसंबधान(संधान)समर्थस्य प्रमातुरेव विचारकत्वात् कथं विशेषणग्रहणादिसामग्रीप्रभवस्य तस्याप्रत्यक्षता? विशिष्टसामग्रीप्रभवस्यास्याप्रत्यक्षत्वे चक्षूरूपालोकमनस्कारसापेक्षस्याविकल्पस्याप्रत्यक्षताप्रसक्तिः। न च विशेषणादिसामग्र्यनपेक्षत्वादस्य प्रत्यक्षता प्रतिनियतस्वसामग्र्यपेक्षस्य विशेषणविशिष्टार्थावभासिनोऽपि प्रत्यक्षत्वाविरोधात् अन्यथा रूपज्ञानस्यालोकाद्यपेक्षस्याध्यक्षत्वे रसज्ञानं सामग्र्यन्तरसापेक्षमनध्यक्षं स्यात् विभिन्नस्वभावसामग्रीसापेक्षत्वात्। न च विशेषणविशिष्टार्थग्रहणे विशेषणविशेष्यसम्बन्धलौकिकस्थितीनां परामर्शः यतो विशेषणविशेष्यतत्सम्बन्धानां न स्वतन्त्राणां विशिष्टार्थग्रहणात् प्रागवभासः अपि तु चक्षुरादिव्यापारे स्वतन्त्रनीलग्रहणवत् विशेषणविशिष्टार्थग्रहणं सकृदेव; केवलं तत्र 'त्रयम्' इति प्रतिभासो विशिष्टार्थग्रहणस्यान्यथाऽसम्भवात् कथ्यते। न च यथावस्थितवस्तुग्रहणं कल्पना अतीतादिग्रहणवत्। न च जात्यादित्रयस्याभिन्नस्य भेदाध्यवसायः दण्ड-शब्दयोर्भिन्नयोरभेदाध्यवसायो वा कल्पनाद्वयस्याप्यसंभवात्। तथाहि-न जात्यादित्रयस्य वस्तुनोऽव्यतिरेकादसत्त्वाद्वाऽभेदे भेदाध्यवसायः द्वयोरप्यनुपपत्तेः न हि जात्यादेरभेदे असत्त्वे वा तद्व्यवच्छिन्नवस्तुग्रहणसंभवः असतोऽभिन्नस्य वा अवच्छेदकत्वानुपपत्तेः। न च तत्प्रतिभासेऽपि प्रतिभासविषयस्य द्विचन्द्रादेरिव प्रमाणबाधितत्वात् तत्प्रतिभासोऽप्रमाणम् यतो न द्विचन्द्रादेरिव जात्यादेः किञ्चिद् बाधकम् वृत्तिविकल्पादेस्तद्बाधकस्य निषेधात्। तन्न जात्यादित्रयस्याभिन्नस्य भेदप्रतिभाँसः कल्पना। नापि दण्ड-शब्दयोरभेदाध्यवसायः यदि तत्राभेदप्रतिपत्तिस्तदैकप्रतिभासेऽवच्छेदकावच्छेद्यभावेन ग्रहणं न भवेत् किं हि तदपेक्ष्यावच्छेदकमवच्छेद्यं वा अर्थान्तरापेक्षत्वात् तयोः। तथाहि-दण्डस्य दण्डिनं प्रति व्यवच्छेदकत्वेन प्रतिभासो नैकत्वेन एवं वाचकस्याऽपि वाच्यप्रतिपत्तौ द्रष्टव्यम्। वाचकावच्छिन्नवाच्यप्रतिभासाभ्युपगमवादिनामेतन्मतम् येषां तु तटस्थ एव वाचकः वाच्यप्रतिपत्तौ वाचकत्वेन प्रतिभातीति मतं तेषामभेदाध्यवसायो दूरापास्त एव। अपि च, एवंवादिना तिरस्कृतस्वाकारस्याकारान्तरानुषक्तस्यार्थस्य ग्रहणं कल्पनेति चतुर्थपक्ष एवाभ्युपगतो भवेत्। न चायमभ्युपगमः सौगतानां युक्तः स्वसिद्धान्तविरोधात्। तथाहि-अविकल्पकमेतद्विज्ञानं भ्रान्तमध्यक्षाभासमभ्रान्तपदव्यवच्छेद्यं सौगतसमये प्रसिद्धम्। तथा च—

---

१ "प्रत्यक्षस्य"-बृ० ल० टि०। २ पृ० ५२५ पं० २७। ३ प्र० पृ० पं० ११। ४-**ग्राहित्वे**-आ०। ५-**तस्य तस्य वि**-ल० भां० मां०। ६-**हणवि**-भां० मां०। ७ "वैधर्म्य-"बृ० ल० टि०। ८-**यव**-बृ० आ० हा० वि०। ९ "विशिष्ट-"बृ० ल० टि०। १०-**भासक**-आ० हा० वि०। ११-**पि पिण्ड**-ल०। १२-**स्तदेक**-वा० बा० भां० मां० विना। १३ **तदापे**-बृ० आ० हा० वि०। १४-**पेक्षाव**-आ० हा० वि०।

"भ्रान्तिसंवृतिसंज्ञानमनुमानानुमानिकम्।
स्मार्ताभिलाषिकं चेति प्रत्यक्षाभं सतैमिरम्" ॥ [ ]

इत्यत्र 'स्मार्ताभिलाषिकं चेति' 'इति' शब्दपरिसमापिताद् विकल्पवर्गात् पृथक् 'सतैमिरम्' इत्यनेनाविकल्पस्यैवंजातीयकस्य प्रत्यक्षाभासत्वं प्रतिपादितम्। कल्पनात्वे वास्याऽभ्रान्तपदोपादानमेतद्व्यवच्छेदार्थं प्रत्यक्षलक्षणे न युक्तियुक्तं स्यात्। तन्न चतुर्थपक्षाभ्युपगमोऽपि न्यायोपपन्न इति नार्थसामर्थ्यानुद्भूतत्वादप्रत्यक्षता विकल्पानाम्। यच्च 'अर्थोपयोगेऽपि' इत्यादिदूषणमक्षजत्वे तेषां प्रतिपादितम् तदप्यसङ्गतम्; यतो यथा निर्विकल्पोत्पादकसामग्र्यन्तर्भूताश्चक्षुरादयः सहकारिणोऽन्योन्यसव्यपेक्षा अपि कार्योत्पादनेनैव परस्परतो व्यवधीयन्ते-तज्जननस्वभावत्वात् तेषां-तथा सविकल्पोत्पादका अपि। न चान्त्यावस्थाप्राप्तं निर्विकल्पोत्पादकं चक्षुरादिकमन्यनिरपेक्षमेव स्वकार्यनिर्वर्तकमन्यसन्निधिस्तु तत्र स्वहेतुनिबन्धनो नोपालम्भविषय इति वक्तव्यम् "न वै किञ्चिदेकं जनकमँ" [ ] इत्यादेर्विरोधप्रसक्तेः। अतश्चक्षुरादिवन्न स्मृत्याऽर्थस्य व्यवधानम्। न च क्षणिकत्वात् स्मृतिकाले अर्थस्यातीतत्वात् तया तस्य व्यवधानं क्षणिकत्वस्यासान् प्रत्यसिद्धत्वात् स्फटिकसूत्रे निराकरिष्यमाणत्वाच्च। यदपि अर्थस्य स्मृतिसापेक्षत्वे दूषणमभ्यधायि-'यः प्रागजनक'-इत्यादि, तदप्यसङ्गतम्; उपयोगाविशेषस्यासिद्धत्वात्। तथाहि-भावानां द्विविधा शक्तिः प्रतिनियतकार्यजनने एका स्वरूपशक्तिरपरा सहकारिस्वभावा। तत्र प्राक्स्मरणात् स्वरूपशक्तिः केवला न कार्यं जनयति, यदा तु समासादितसहकारिशक्तिः स्वरूपशक्तिर्भवति तदा कार्यमाविर्भावयत्येव। न च स्वरूपशक्तेः सहकारिशक्त्या व्यतिरिक्तोऽव्यतिरिक्तो वा कश्चिदुपकारः क्रियते किन्तु संभूय ताभ्यामेकं कार्यं निष्पाद्यते। तथाहि-अन्त्यावस्थाप्राप्तक्षणवत् सहकर्तृत्वमेव सर्वत्र सहकारार्थो न त्वतिशयाधानमिति क्षणभङ्गभङ्गे विस्तरेण प्रतिपादयिष्यते। यदपि 'विशेषणं विशेष्यं च' इत्यादि दूषणमभिहितम् तथा, 'सङ्केतस्मरणोपायम्' इत्यादि च तदपि प्रागेव निरस्तम्। यदपि 'विकल्पाध्यक्षयोरेकविषयत्वे प्रतिभासभेदो न स्यात् दृश्यते च तदुक्तम्—'शब्देनाव्यापृताक्षस्य' इत्यादि तदप्यसङ्गतम्; शब्दाक्षप्रभवप्रतिपत्त्योर्विषयभेदस्य प्रसाधितत्वात्। शब्दजप्रतिपत्तौ शब्दावच्छेदेन वाच्यस्य कैश्चित् प्रतिभासोपगमात्ँ कारणभेदादेकविषयत्वेऽपि प्रतिभासभेदस्य च कैश्चिदभ्युपगमान्नैकान्तेन तयोर्भिन्नविषयता। तन्न व्यवसायात्मकं विकल्परूपत्वादनक्षार्थजम्। व्यवसायस्य ज्ञानरूपत्वाद् ज्ञानग्रहणं न कार्यमिति चेत्, न; धर्मिनिर्देशार्थं ज्ञानपदोपादानस्य दर्शितत्वात्। व्यवसायात्मकग्रहणं तु धर्मनिर्देशार्थमिति न पुनरुक्तम्।

[केषांचित् न्यायसूत्रीयप्रत्यक्षलक्षणे प्रतिक्षेपः]

ननु फल-स्वरूप-सामग्रीविशेषणत्वेनासंभवान्नेदं लक्षणम्। तथाहि-प्रत्यक्षफलविशेषणत्वे इन्द्रियार्थसन्निकर्षजत्वादिषु ज्ञान-प्रत्यक्षशब्दयोः सामानाधिकरण्यानुपपत्तिः फलप्रमाणाभिधायकत्वेन; ज्ञानं हि फलं प्रत्यक्षं तत्साधकतमत्वात् प्रमाणमिति कथं तयोः सामानाधिकरण्यम्? न च एवंभूतं फलं यतस्तत् प्रत्यक्षम्, 'यतः' इत्यस्याश्रुतत्वात्। तन्न फलविशेषणपक्षः।

अथैतद्दोषपरिजिहीर्षया स्वरूपविशेषणपक्षः समाश्रीयते सोऽप्ययुक्तः एतद्विशेषणविशिष्टस्य प्रत्यक्षनिर्णयस्याकारकस्य प्रत्यक्षत्वप्रसक्तेः, न चाकारकस्यासाधकतमत्वात् प्रत्यक्षत्वं युक्तम्। अथ कारकत्वं विशेषणमुपादीयते तथापि संस्कारजनके प्रसङ्गः। अथैवंविशिष्टमुपलब्धिसाधनं यत् तत् प्रत्यक्षम्। नन्वेवमप्यश्रुतपरिकल्पनाप्रसक्तिः। सामान्यलक्षणानुवादद्वारेण विशेषलक्षणविधानान्नाश्रुतकल्पनेति चेत्, न; एवमपि द्वितीयलिङ्गदर्शनेऽविनाभावस्मृतिजनके गोत्ववदर्थदर्शने च सङ्केत-

---

१-**क्षाभासित्वं** वा० बा०।-**क्षावभासित्वं** भां० मां०। २ "कल्पनापोढपदेनैव व्यवच्छिन्नत्वात्"—बृ० ल० टि०। ३ पृ० ५२५ पं० ३। ४ पृ० १२ पं० ५। ५ **स्फुटि**-वा० बा० भां० मां० विना। "स्फटिकेऽप्यपरापरोत्पत्तेः क्षणिकत्वाद् व्यक्तीनामहेतुः"—न्यायद० ३-२-१०। ६ पृ० ५२५ पं० १०। ७ पृ० ५२५ पं० १४। ८ पृ० ५२५ पं० १६। ९ "शब्दविशिष्टतया"-बृ० ल० टि०। १०-**त् कर**-वा० बा० भां० मां० विना। ११ पृ० ५२४ पं० १०। १२ "ज्ञान"-बृ० ल० टि०। १३ "प्राप्नोति स्वरूपविशेषणपक्षे"-बृ० ल० टि०। १४ "स हि संस्कारं जनयन् कारक एवेति प्राप्नोति अस्य प्रत्यक्षता"—बृ० ल० टि०।

स्मृतिजनके प्रसङ्गः। तन्निवृत्त्यर्थमर्थोपलब्धिजनकत्वाध्याहारे विपर्ययज्ञानजनके प्रसङ्गः। विपर्ययज्ञानं हि सारूप्यज्ञानादुपजायते यथोक्तविशेषणविशेषितात् तस्य चार्थोपलब्धित्वमिन्द्रियार्थसन्निकर्षजत्वप्रतिपादनात् सूत्रकारस्याभीष्टमेव । अथ तद्व्यावृत्तये अव्यभिचारिविशिष्टोपलब्धिजनकत्वाध्याहारस्तथापि संशयज्ञानजनके प्रत्यक्षत्वप्रसक्तिः । अथ तन्निवृत्तये व्यवसायात्मकार्थोपलब्धिजनकत्वाध्याहारस्तथाप्यनुमाने प्रसङ्गः यस्मात् प्राक् प्रतिपादिताशेषविशेषणाध्यासितं विशिष्टोपलब्धिजनकं च परामर्शज्ञानमध्ययनादिभिरभ्युपगम्यत इति तस्यानुमितिफलजनकस्याध्यक्षताप्रसक्तिः । अथेन्द्रियार्थसन्निकर्षजोपलब्धिजनकस्येत्यध्याहारस्तथाप्युभयजज्ञानजनकस्य प्रत्यक्षताप्रसक्तिः यस्मादिन्द्रियजस्वरूपज्ञानात् केनचिद् 'देवदत्तोऽयम्' इति शब्द उच्चारिते इन्द्रियशब्दव्यापाराद् 'देवदत्तोऽयम्' इति सङ्केतग्रहणसमये ज्ञानमुत्पद्यते यथोक्तविशेषणविशिष्टमिति तज्जनकस्य स्वरूपज्ञानस्य प्रत्यक्षताप्रसक्तिः । तन्निवृत्त्यर्थमव्यपदेशपदाध्याहार इति चेत् तर्ह्यश्रुतस्य द्वितीयसूत्रस्य कल्पनाप्रसक्तिः । सत्यामप्यश्रुतसूत्रकल्पनायामव्याप्त्यतिव्याप्त्योरनिवृत्तिः तुलासुवर्णादीनामबोधरूपाणामप्रत्यक्षत्वप्राप्तेः सन्निकर्षेन्द्रियादीनां च । न च सन्निकर्षस्य प्रामाण्यं सूत्रकृता नेष्टं "सन्निकर्षविशेषात् तद्ग्रहणम्" [ ] इति वचनात् ग्रहणहेतोश्च प्रामाण्यम् । न च कर्म-कर्तृरूपता तस्येति कर्म-कर्तृविलक्षणस्य ज्ञानजनकत्वात् कथं न तस्य प्रामाण्यम्? एवमिन्द्रियाणामपि प्रमाणत्वं सूत्रकृतोऽभिमतम् "इन्द्रियाणि अतीन्द्रियाणि स्वविषयग्रहणलक्षणानि" [ ] इति वचनात् । न च प्रमाणसहकारित्वात् तेषां प्रमाणत्वम् अन्यस्येन्द्रियात् प्रागुपग्राहकस्योपग्राहिणोऽभावात् भावेऽप्यज्ञानरूपत्वात् तस्य न प्रमाणता भवेदित्यव्याप्तिस्तदवस्थैव । प्रदीपादीनां चाज्ञानात्मकत्वेऽपि प्रमाणत्वं प्रसिद्धं लोके तथा सुवर्णादेः—"प्रमेया च तुलाप्रामाण्यवत्" [न्यायद० २-१-१६] इति-प्रामाण्यं प्रतिपादितं सूत्रकृता । सूत्रस्य चार्थः—यथा सुवर्णादि परिच्छिद्यते तदा तुला प्रमाणम् प्रमाणं चानुमानमागमपूर्वकम् दशपलादिज्ञानस्यानिन्द्रियार्थसन्निकर्षपूर्वकत्वात् तदभावश्च वस्त्रादिव्यवहितेऽपि भावात् तथा प्रमेयं च यदा सुवर्णादिना तुलान्तरमितेनानुमीयते तदा सुवर्णादिद्रव्यं प्रत्यक्षं प्रमाणमिन्द्रियार्थसन्निकर्षजज्ञानजनकत्वात् इन्द्रियार्थसन्निकर्षजं च पञ्चपलरेखादिज्ञानं तद्भावभावित्वात् अत इन्द्रियादिसहकारि तत् सुवर्णादि पञ्चपलरेखादिज्ञानमुत्पादयत् प्रत्यक्षं प्रमाणम् । सुवर्णवदिन्द्रियार्थजज्ञानमुत्पादयन्तः सर्व एव भावाः प्रत्यक्षप्रमाणतामाबिभ्रति । स्मृति-संशय-विपर्ययादीनां चेन्द्रियार्थसन्निकर्षेण सह व्यापारे विशिष्टफलजनकत्वेन प्रत्यक्षतोपेयते। तथाहि-संशय-विपर्ययययोरपि बाह्ये विषये स्वालम्बने स्वावच्छेदकत्वेनेन्द्रियार्थसन्निकर्षेण सह व्यापारादात्मप्रत्यक्षवादिनां चात्मनो विशेषणत्वेन विशिष्टप्रतीतिजनकत्वेन प्रत्यक्षत्वात्। न च तयोः सूत्रोपात्तविशेषणयोगिता सन्दिग्धविपर्ययस्वभावत्वात् । अतिव्याप्तिरपि यदेन्द्रियार्थसन्निकर्षालिङ्गाद् गतिमदिन्द्रियं प्रतिपद्यते तदा सकलसूत्रोपात्तविशेषणयोगात् सन्निकर्षलक्षणलिङ्गालम्बनस्य ज्ञानस्य तथाविधफलजनकस्य प्रत्यक्षताप्रसङ्गात् । एतच्च 'इन्द्रियस्यार्थः' इति समासाश्रयणे दूषणं द्रष्टव्यमिति स्वरूपविशेषणपक्षे अनेकदोषापत्तिः।

अथ ज्ञानप्रामाण्यवादिभिर्निर्णयस्य प्रामाण्यमिष्यत एवेति नानिष्टप्रेरणावकाशः । तथाहि-तत्सद्भावे विषयाधिगतिरिति लोकस्याभिमानः यच्च तथाविधविषयाधिगमे करणं तत् प्रमाणम्। निर्णये च सति तदधिगतिरिति स एव प्रमाणम् अत एव नाश्रुतसूत्रान्तरकल्पनादोषानुषङ्गोऽपि, नैतत् सारम्; यतो निर्णये सति योऽयं विषयाधिगत्यभिमानः स किं साधकतमत्वान्निर्णयस्य उत

१ "विपर्ययज्ञानस्य"—बृ० ल० टि०। २ "अनुमानजनके प्रसङ्ग इत्यर्थः"—बृ० ल० टि०। ३ "सन्निकर्षस्य"—बृ० ल० टि०। ४ "यदि हि इन्द्रियात् प्राक् किञ्चिदन्यदपि भवेत् तदा इन्द्रियं तस्य सहकारि कुर्यात्। न च किञ्चित् प्रसिद्धं तदा तदुपग्राह्यस्याभावात्"—बृ० ल० टि०। ५ "गुरुत्वपरिमाणज्ञानसाधनं तुला प्रमाणम् ज्ञानविषयो गुरुद्रव्यं सुवर्णादि प्रमेयम् । यदा सुवर्णादिना तुलान्तरं व्यवस्थाप्यते तदा तुलान्तरप्रतिपत्तौ सुवर्णादि प्रमाणम् तुलान्तरं प्रमेयमिति" इत्यादि—वात्स्या० भा० पृ० ११३ पं० ८-११। न्यायवा० पृ० १९३ पं० ८-११। न्यायवा० ता० टी० पृ० ३६४ पं० २२-पृ० ३६५ पं० ८। ६-**तू यथा** भां० मां०। ७ "तुला"—बृ० ल० टि०। ८ **यथा सु**-भां० मां०। ९-**रमेतेना**-बृ० सं०। १० "तुलायास्तु प्रमेयत्वम्"—बृ० ल० टि०। ११-**त्वादित इ**-वा० बा०। १२-**सानाश्रय**-बृ० ल० विना। १३-**यावग**-बृ०।

विषयाधिगतिस्वभावत्वादिति सन्देहः विशेषहेत्वभावात् साधकतमत्वे च सिद्धे तत्प्रामाण्यावगतिः।

अथ विषयाधिगतिस्वभावत्वेनैव निर्णयस्य विषयाधिगत्यभिमानो न साधकतमत्वेनेति भवतोऽपि विशेषहेत्वभावः, न; अबोधस्वभावानामप्यर्थोपलम्भनिमित्तानां भावे विषयाधिगतिसिद्धेः तथा च 'धूमाज् ज्ञातोऽग्निः' इति व्यपदिशंल्लोक उपलभ्यते नाग्निज्ञानादिति एवं चक्षुषः प्रदीपादेश्चान्धकारे विषयाधिगतिनिमित्तताव्यपदेशो लोकप्रसिद्ध इति परिच्छेदेऽबोधस्वभावस्य तज्जनकस्य साधकतमत्वान्नार्थज्ञानस्य प्रमाणता । अथापि स्यात् साधकतमज्ञानजनकत्वेनापि धूमादीनां तथाव्यपदेशः संभवीति न तेषां ततः साधकतमत्वसिद्धिः तथा च धूमसद्भावेऽपि विषयाधिगतिरित्यभिमानाभावात् सति त्वर्थज्ञाने प्रत्येकशस्तेषामभावेऽपि भावाद् विषयाधिगत्यभिमाने अनन्तरवृत्तमर्थज्ञानमेव साधकतमम् न विषयाधिगतौ ज्ञानस्य साधकतमता विषयाधिगतिस्वरूपत्वात् तस्य न च किञ्चिद्वस्तु स्वरूपे साधकतमं तद्विशेषाभिधानं च प्रमाणपदम् अथ स्वविषये सव्यापारप्रतीततामुपादाय फलस्यैव प्रमाणतोपचारः। उक्तं च—

"सव्यापारप्रतीतत्वात् प्रमाणं फलमेव सत्" । [ ] तथा,
"सव्यापारमिवाभाति व्यापारेण स्वकर्मणि" । [ ] इति

चेत्, न; मुख्यसद्भावे उपचारपरिकल्पनात्। बौद्धपक्षे तु न मुख्यं साधकतमत्वं क्वचिदपि सिद्धमिति नोपचारः अस्मन्मते तु धूमादीनां साधकतमत्वं विशिष्टावगतिहेतुत्वात् ज्ञानस्य तु न तद् युक्तं तस्य तत्स्वभावत्वात् अभिमानवशात् तस्य साधकतमत्वे प्रमाण-फलयोर्भेदः प्रसज्यते स च भवतोऽनिष्टः। यच्च 'धूमादिभावेऽपि विषयाधिगतेरभावात् तद्भावे च भावात्' इत्युक्तम्, तदसंगतम्; यतो नैव ज्ञानसद्भावे काचित् तज्जन्या विषयाधिगतिः धूमादिसद्भावे तु तस्याः सद्भावोऽनन्तरमुपलभ्यत एव अतो धूमाद्येव साधकतमम् अभिमानस्तु ज्ञानानन्तरमुपजायमानो धूमादिभावेऽप्यनुपजायमानो ज्ञानस्य न साधकतमत्वं प्रकाशयति अपि त्वर्थाधिगमस्वरूपताम्। तथाहि-अर्थाधिगतावर्थोऽधिगत इत्यभिमानः प्रभवति न तु धूमादिभावे। अतो विषयाधिगत्यभिमानस्यानेन प्रकारेण भावान्न तदवगतौ साधकतमत्वं ज्ञानस्येति निर्णयेऽध्यक्षताप्रसक्तिप्रेरणा तदवस्थैव । किञ्च, सुप्तावस्थोत्तरकालं घटादिज्ञानोत्पत्तौ यद्यबोधरूपं तज्जनकं प्रमाणं नेष्यते तदा प्रागपरज्ञानस्याभावात् कस्य तत् फलं भवेत्? घटत्वसामान्यज्ञानस्य घटज्ञानं फलमिति चेत् ननु घटत्वज्ञाने किं प्रमाणम्? तदेवेति चेत् एकस्य प्रमाण-फलताप्रसक्तिः । अभ्युपगम्यत एवेति चेत् न, विशेष्यज्ञानेऽपि तत्प्रसङ्गात्। न च विशेष्यज्ञानोत्पत्तौ विशेषणज्ञानस्य प्रमाणत्वं दृष्टमिति ततस्तद्विघ्नमभ्युपगम्यत इति वक्तव्यम् इन्द्रियार्थसन्निकर्षानन्तरं घटत्वादिसामान्यज्ञानस्य दर्शनात् तत्र सन्निकर्षस्य प्रमाणत्वप्रसक्तेः । अज्ञानत्वान्नेति चेत् न, विशेषणज्ञानं विशेष्यज्ञानोत्पत्तौ ज्ञानत्वाद् विशेष्यविषयत्वेन प्रमाणं स्यात् न च तदिष्यते विशेषणविशेष्यालम्बनभिन्नज्ञानवादिभिः अतो यथा विशेषणज्ञानस्य विशेष्यज्ञानोत्पत्तौ प्रामाण्यं तथा सन्निकर्षस्यापि विशेषणज्ञानोत्पत्तौ तदभ्युपगन्तव्यम् । तथाहि-सन्निकर्षः प्रमाणं विशिष्टज्ञानोत्पत्तौ कारणत्वात् विशेषणज्ञानवत् । ज्ञानत्वात् प्रमाणत्वाभ्युपगमेऽकारकाणां निर्णयादीनां प्रमाणत्वं स्यात् न च स्वसंवेद्यत्वेन तेषामजनकानामपि प्रमाणत्वम् अर्थान्तरफलवादित्वहानिप्रसङ्गात्। न च नैयायिकैरनर्थान्तरभूतं बौद्धैरिव फलमभ्युपगम्यते तदभ्युपगमे वा तत्पक्षनिरासादयमपि निरस्त एव अतो ज्ञानप्रमाणवादिनः सुषुप्तावस्थोत्तरकालं घटत्वादिज्ञानाभावप्रसक्तेर्घटादिज्ञानस्याप्यभावप्रसङ्ग इत्यशेषस्य जगत आन्ध्यापत्तिः । न च सुषुप्तावस्थायां ज्ञानसद्भावान्नायं दोषः असंवेद्यमानस्य तदवस्थायां तस्य सद्भावासिद्धेः। न च जाग्रत्प्रत्ययेन तत्सद्भावोऽवसीयते तस्य तत्प्रतिबन्धासिद्धेः। तत्कार्यत्वात् तत्प्रतिबन्ध इति चेत् न, वैशेषिकैः सर्वस्य ज्ञानस्य

१-**ति भाव**-बृ० ल० वा० बा० विना। २-**गते सि**-बृ०। ३ "विषयाधिगतिनिमित्ततारूपः"—बृ० ल० टि०। ४-**भवतीति** बृ० आ० हा० वि०। ५ **सन्निकर्षज्ञाने** वा० बा० विना। ६-**भावेपि भावेपि भा**-वा० बा०। ७-**त्यभिधाने** आ० हा० वि०। ८ "ज्ञानस्य"—बृ० ल० टि०। ९ "साधकतम"—बृ० ल० टि०। १० "प्रत्यक्षज्ञानस्य"—बृ० ल० टि०। ११ न्यायमञ्ज० आ० २ पृ० ७० पं० १६। १२ "अवगतिस्वभाव-" बृ० ल० टि०। १३ अत्र 'तत्'पदं यदि धूमादिपरं तदा 'तदभावे च' इति पाठः संभाव्यते, यदि च 'तत्'पदमर्थज्ञानपरं तदा यथाश्रुतमेव सम्यक्। १४ "विषयाधिगमरूपः"—बृ० ल० टि०। १५ **सुषुप्ता**-भां० मां०।

ज्ञानपूर्वकत्वानभ्युपगमात् विशेष्यज्ञानादीनामेव विशेषणज्ञानादिपूर्वकत्वं नान्येषां प्रतिबन्धाभावात्। बोधरूपता प्रतिबन्ध इति चेत् न, अबोधस्वभावादपि बोधस्योत्पत्त्यविरोधादन्यथा अधूमस्वभावादग्नेर्धूमोत्पत्तिर्न भवेत् । तस्य तज्जननस्वभावत्वाददोष इति चेत् न, इतरत्राप्यस्य समानत्वात् । तथाहि–अबोधात्मिका कारणसामग्री बोधजननस्वभावत्वात् तं जनयिष्यतीति न प्रतिबन्धः । तस्मादबोधात्मकस्यापि प्रमाणत्वमभ्युपगन्तव्यमित्यव्यापकत्वं लक्षणदोषः । तन्न स्वरूपविशेषणपक्षोऽपि युक्तिसंगतः ।

नापि सामग्रीविशेषणपक्षः तत्रास्यौपचारिकत्वात् । तथाहि-सामग्रीविशेषणपक्षे इन्द्रियार्थसन्निकर्षोत्पन्नमित्युपपन्नमिति व्याख्येयम् तच्चायुक्तम् उत्पत्तिशब्दस्य स्वरूपनिष्पत्तौ प्रसिद्धत्वात् । तथा ज्ञानशब्दोऽपि सामग्रीविशेषणपक्षे ज्ञानजनकत्वात् 'सामग्र्यं ज्ञानम्' इति व्याख्येयम् एवमव्यभिचारि व्यवसायात्मकं च सामग्र्यम् तथाविधफलजनकत्वात् अव्यपदेश्यमपि तच्छब्देन सहाव्यापारात् । तदेवं सूत्रोपात्तविशेषणयोगित्वं सामग्र्यस्य तथाविधफलजनकत्वेन न स्वत इति न युक्तस्तत्पक्षोऽपि ।

[नैयायिकैः फलविशेषणपक्षाश्रयेण प्रतिक्षेपमुद्दस्य प्रत्यक्षसूत्रोक्तलक्षणस्य समर्थनम्]

तर्ह्यनर्थकं सूत्रम्, न; फलविशेषणपक्षस्योपपत्तेः। ननु तत्रापि 'यतः' इत्यध्याहारोऽस्त्येव दोषः, न; तावन्मात्रेण सकलदोषविकलाभिमतपक्षसिद्धेः। अतस्तथाविधं ज्ञानं यतो भवति तत् प्रत्यक्षमिति सकलदोषविकलं प्रत्यक्षलक्षणं सिद्धम्। नन्वेतस्मिन्नपि पक्षे ज्ञानस्य प्रामाण्यं न लभ्यते इष्टं च तस्य प्रामाण्यम्—"यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलम्" [१-१-३ वात्स्या० भा०] इति वचनात्, नैष दोषः; ज्ञानस्याप्येवंविधफलजनकत्वेन प्रमाणत्वात्। तथा चानुभवज्ञानवंशजायाः स्मृतेः 'तथा

---

१ "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेशमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्–[न्यायद० १-१-४]

प्रत्यक्षमिति लक्ष्यनिर्देशः इतरल्लक्षणम् । समानासमानजातीयव्यवच्छेदो लक्षणार्थः । समानजातीयं प्रमाणतया अनुमानादि, विजातीयं प्रमेयादि ततो व्यवच्छिन्नं प्रत्यक्षस्य लक्षणमनेन सूत्रेणोपपाद्यते ।

अत्र चोदयन्ति—इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणैः स्वरूपं वा विशिष्यते, सामग्री वा, फलं वा ? तत्र स्वरूपविशेषणपक्षे यद् एवंस्वरूपं ज्ञानं तत् प्रत्यक्षमिति तत्स्वरूपस्य विशेषितत्वात् फलविशेषणानुपादानाच्च लक्षणमव्याप्ति–अतिव्याप्तिभ्यामुपहतं स्यात् । अव्याप्तिस्तावद् अतथाविधस्वरूपस्य बोधस्य इन्द्रियादेश्च निर्मलफलजनकतया लब्धप्रमाणभावस्यापि प्रामाण्यं नोक्तं भवेत्। अतिव्याप्तिश्च तथाविधस्वरूपस्यापि ज्ञानस्याकारकस्य वा संस्कारकारिणो वा स्मृतिं जनयतो वा संशयमादधानस्य वा विपर्ययमुत्पादयतो वा प्रमाणत्वं प्राप्नोति फलस्याविशेषितत्वात् । तद्विशेषणाभिधाने पुनरश्रुतसूत्रान्तराध्याहारप्रसक्तिः अव्याप्तिश्च तदवस्थेति न स्वरूपविशेषणपक्षः"—न्यायमञ्ज० आ० २ पृ० ६५ पं० ४–। २ "नापि सामग्रीविशेषणपक्षः तत्र हीन्द्रियार्थसन्निकर्षोत्पन्नमिति इन्द्रियार्थसन्निकर्षोपपन्नं सामग्र्यमिति व्याख्यातव्यम् । अव्यपदेशमव्यभिचारि व्यवसायात्मकं ज्ञानमिति च तज्जनकत्वादुपचारेण तथा साकल्यं वर्णनीयमिति क्लिष्टकल्पना" ।—न्यायमञ्ज० आ० २ पृ० ६५ पं० १७–। ३–**न स्व**-बृ० ल० ।

४ "फलविशेषणपक्षोऽपि न संगच्छते ज्ञान-प्रत्यक्षयोः फल-करणवाचिनोः सामानाधिकरण्यप्रसङ्गात् । प्रमाणलक्षणप्रस्तावात् प्रत्यक्षं प्रमाणमुच्यते तच्च करणमिति वर्णितम् । ज्ञानं तु तदुपजनितं फलमिति कथमैकाधिकरण्यं तस्मात् पक्षत्रयस्यापि अयुक्तियुक्तत्वात् पक्षान्तरस्यापि असंभवादयुक्तं सूत्रमिति । अत्रोच्यते–स्वरूप–सामग्रीविशेषणपक्षौ तावद् यथोक्तदोषोपहतत्वान्नाभ्युपगम्येते । फलविशेषणपक्षमेव संमन्यामहे । तत्र च यद् वैयधिकरण्यं चोदितं तद् 'यतः'-शब्दाध्याहारेण परिहरिष्यामः । यत एवं यद् विशेषणविशिष्टं ज्ञानाख्यं फलं भवति तत् प्रत्यक्षमिति सूत्रार्थः । इत्थं च न क्वचिद् अव्याप्तिरतिव्याप्तिर्वा न काचित् क्लिष्टकल्पना 'यतः'शब्दाध्याहारमात्रेण निरवद्यलक्षणोपवर्णनसमर्थसूत्रपदसंगतिसंभवात् । ननु समानाधिकरणे एव ज्ञान–प्रत्यक्षपदे कथं न व्याख्यायेते किं 'यतः'शब्दाध्याहारेण ? उक्तमत्र करणस्य प्रमाणत्वाद् ज्ञानस्य च तत्फलत्वात् फल–करणयोश्च स्वरूपभेदस्य सिद्धत्वात् । तदत्र—

प्रमाणतायां सामग्र्यास्तज्ज्ञानं फलमिष्यते । तस्य प्रमाणभावे तु फल(लं) हानादिबुद्धयः ॥" इत्यादि—न्यायमञ्ज० आ० २ पृ० ६५ पं० २१—। ५ **ज्ञानं न य**-बृ० ।

६ "यदा सन्निकर्षस्तदा ज्ञानं प्रमितिः यदा ज्ञानम् तदा हानोपादानोपेक्षाबुद्धयः फलम्"—वात्स्या० भा० पृ० १७पं०२१।

"सर्वं च प्रमाणं स्वविषयं प्रति भावसाधनं प्रमितिः प्रमाणमिति । विषयान्तरं प्रति करणसाधनं प्रमीयते अनेनेति

चायम्' इत्येतद् ज्ञानमिन्द्रियार्थसन्निकर्षजत्वात् प्रत्यक्षं फलं तत्स्मृतेस्तु प्रत्यक्षप्रमाणता, सुखदुःखसम्बन्धस्मृतेस्त्विन्द्रियार्थसन्निकर्षसहकारित्वात् 'तथा चायम्' इति सारूप्यज्ञानजनकत्वेनाध्यक्षप्रमाणता सारूप्यज्ञानस्य च 'सुखसाधनोऽयम्' इत्यानुमानिकफलजनकत्वेनानुमानप्रमाणता । न च सुखसाधनत्वज्ञानमिन्द्रियार्थसन्निकर्षजं शक्तेरसन्निहितत्वात् शक्तिर्हि सहकारिकारणान्तरसान्निध्यम् तच्चासन्निहितमिति नाध्यक्षप्रमाणफलं सुखसाधनत्वज्ञानमिति केचित् । अपरे तु वाह्येऽप्यर्थे विशेष्याकृष्टमसन्निहिते विशेषणे मनः प्रवर्तते इति मनोलक्षणेन्द्रियार्थसन्निकर्षजमध्यक्षप्रमाणफलमेतज् ज्ञानमिति सम्प्रतिपन्नाः । नन्वेवमप्यव्यापकं लक्षणम् आत्मसुखादिविषयज्ञानस्याप्रत्यक्षफलत्वात् तच्च मनसोऽनिन्द्रियत्वात् अनिन्द्रियत्वं तु मनस इन्द्रियसूत्रे अपरिपठितत्वात् प्रत्यक्षफलता च तद्विषयज्ञानस्याभ्युपगम्यते, असदेतत्; मनस इन्द्रियधर्मोपेतत्वेनेन्द्रियत्वात् अधिगतानधिगतविषयग्राहकत्वमिन्द्रियधर्मः स च मनसि विद्यत एव तेनेन्द्रियधर्मोपेतस्य सर्वस्यैव प्रत्यक्षसूत्रे इन्द्रियग्रहणेनाविरोधः । ततः प्रत्यक्षसूत्र एवेन्द्रियत्वं मनसः सिद्धम् तत्सिद्धौ च नाव्याप्तिर्लक्षणदोषः । इन्द्रियसूत्रे च मनसोऽपाठः तत्सूत्रस्य नानात्वे इन्द्रियाणां लक्षणपरत्वात् सूत्रशब्देन हि जात्यपेक्षया सूत्रसमूह एवोच्यते तेन लक्षणसूत्रसमूहोद्देशार्थं तत्सूत्रम् । तथा च जिघ्रत्यनेनेति घ्राणं भूतं गन्धोपलब्धौ कारणम् 'घ्राणम्' इत्यभिधीयमाने सन्निकर्षे प्रसङ्गः तन्निवृत्त्यर्थं 'भूतम्' इति भूतस्वभावत्वं विशेषणम् । एवं चष्टे अनेनेति चक्षू रूपोपलब्धौ कारणम् सन्निकर्षे प्रसङ्गस्तन्निवृत्त्यर्थं भूतग्रहणं सम्बन्धनीयम् प्रदीपे प्रसङ्गस्तन्निवृत्त्यर्थमिन्द्रियाणामिति वाच्यम् एवं त्वगादिष्वपि योज्यम् । एवं च सूत्रपञ्चकमेतल्लक्षणार्थं प्रत्येकमिन्द्रियाणां न पुनर्विभागार्थम् आदिसूत्रोद्दिष्टस्य भेदवतो विभागाभ्युपगमात् विभक्तविभागे चानवस्था विभागार्थं वा बाह्यानामित्यध्याहारः कार्यः स्वलक्षणसामर्थ्यात् । मनसस्तु तदनन्तरं लक्षणानुपदेशो वैधर्म्यात् तच्च तस्याभूतस्वाभाव्यात् भूतस्वाभाव्येनेन्द्रियाणि व्यवच्छिद्यन्ते "भूतेभ्यः" [न्यायद० १-१-१२] इति वचनात्, न तु मनस एतल्लक्षणमस्ति अत एव सर्वविषयत्वं मनसः न त्विन्द्रियाणि बाह्यानि सर्वविषयाणि तन्त्रयुक्त्या वा मनसोऽनभिधानम् परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः । न चैवं घ्राणादीनामप्यनभिधानं प्रसज्यते घ्राणादेरप्यनभिधाने स्वमतस्यैवाभावात् परमतमिति व्यपदेशासंभवात् । अस्ति च "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायद० १-१-१६] इति वचनात् मनसोऽभिधानमिन्द्रियत्वेन इन्द्रियानन्तरं त्वनभिधानं वैधर्म्यादित्युक्तम् । तन्नाव्याप्तिर्दोष इति स्थितम् । २५

प्रमाणम् । यदि भावसाधनः प्रमाणशब्दः किं फलम् विषयस्याधिगतत्वात् । उक्तं फलं हानादिबुद्धय इति । ज्ञाते तद्भावात् ज्ञाते खल्वर्थे त्रिधा बुद्धिर्भवति हेयो वा उपादेयो वा उपेक्षणीयो वेति । केचित् तु सन्निकर्षमेव प्रत्यक्षं वर्णयन्ति न तच्याय्यं प्रमाणाभावात्–सन्निकर्ष एव प्रमाणमिति न प्रमाणमस्ति । उभयं तु युक्तं परिच्छेदकत्वात्–उभयं परिच्छेदकम्–सन्निकर्षो ज्ञानं च । एकान्तवादिनस्तु दोष इति"—न्यायवा० पृ० २९ पं० १–। न्यायवा० ता० टी० पृ० १०२ पं० ८–पृ० १०५ पं० १६।

"तस्मात् सुष्ठूक्तं यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलमिति । तदेवं फलविशेषणपक्षे 'यतः'शब्दाध्याहारेण वाचकं सूत्रम् यत इन्द्रियार्थसन्निकर्षोत्पन्नत्वादिविशेषणविशेषितं ज्ञानाख्यं फलं भवति तत् प्रत्यक्षमिति"—न्यायमञ्ज० आ० २ पृ० ७२ पं० ४–।

१–**त्यक्ष फ**-वा० बा० विना । २ **सर्वस्येव** भां० मां० । ३–**नाविरोधः** ल० वा० बा० आ० हा० वि० । ४–**त्वं च वि**-बृ० । ५–**भागे वा**-बृ० । ६ "मनसः"—बृ० ल० टि० । ७ "घ्राण–रसन–चक्षुस्–त्वक्–श्रोत्राणीन्द्रियाणि भूतेभ्यः" इति सूत्रम् । न्यायवा० पृ० ६९–। न्यायवा० ता० टी० पृ० २२१–। न्यायमञ्ज० आ० ८ पृ० ४७६–। ८ प्र० पृ० पं० १९ । ९ "आत्मादिषु सुखादिषु च प्रत्यक्षलक्षणं वक्तव्यम् अनिन्द्रियार्थसन्निकर्षजं हि तदिति इन्द्रियस्य वै सतो मनस इन्द्रियेभ्यः पृथगुपदेशो धर्मभेदात् भौतिकानीन्द्रियाणि नियतविषयाणि सगुणानां चैषामिन्द्रियभाव इति, मनस्त्वभौतिकं सर्वविषयं च नास्य सगुणस्येन्द्रियभाव इति । सति चेन्द्रियार्थसन्निकर्षे सन्निधिमसन्निधिं चास्य युगपज्ज्ञानानुत्पत्तिकारणं वक्ष्यामः (अ० १ आ० १ सू० १६) इति । मनसश्चेन्द्रियभावात् तत्र वाच्यं लक्षणान्तरमिति । तन्त्रान्तरसमाचाराच्चैतत् प्रत्येतव्यमिति । परमतमप्रतिषिद्धमनुमतमिति हि तन्त्रयुक्तिः"—वात्स्या० भा० पृ० २१ पं० १४–।

"इन्द्रियार्थसन्निकर्षोत्पन्नमित्येवमादिलक्षणमात्मादिषु सुखादिषु च नास्ति मनसोऽनिन्द्रियत्वादव्यापकमेतत् प्रत्यक्षलक्षणमिति । कथं पुनरिन्द्रियं मनो न भवति ? इन्द्रियसूत्रेऽपठितत्वात् । परिपठितानि घ्राणादीनीन्द्रियाणि । **न च तेषु मनः**

पठितम्। तस्मान्मनो नेन्द्रियम्। पृथक् चानभिधानान्नास्ति मनस इन्द्रियत्वे प्रमाणं ततश्च नेन्द्रियं मनः। न चैवं प्रत्यक्षाः सुखादयो भविष्यन्तीति। प्रत्यक्षाश्चैते नानुमानिकाः लिङ्गाभावात्। न हि लिङ्गमन्तरेणानुमेयार्थो गम्यते। नाप्यन्यत् प्रमाणं प्रतिपादकमस्ति सुखादीनाम्। न च तेषामनुमेयत्वम्। न चान्या गतिरस्ति। तस्मात् कर्त्तव्यं सुखादीनां प्रत्यक्षेण ग्रहणोपसंख्यानमिति। कश्चैवमाह न प्रत्यक्षाः सुखादय इति? इन्द्रियार्थसन्निकर्षजन्यप्रत्यक्षवायाह। नैष दोषः। मनस इन्द्रियत्वादिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानमिति। यत्तु सूत्रेऽनभिधानं तद्वैधर्म्यात्। किं तद्वैधर्म्यं? सर्वविषयत्वासर्वविषयत्वे। सर्वविषयं मनोऽसर्वविषयाणीतराणि। सर्वविषयं तु मनः स्मृतिकारणसंयोगाधारत्वात् आत्मवत् सुखग्राहकसंयोगाधिकरणत्वात् समस्तेन्द्रियाधिष्ठातृत्वाच्च आत्मवत्। भौतिकाभौतिकत्वं तु न, विरोधात्। न हि भौतिकं मनो नाप्यभौतिकमिति। कार्यधर्मावेतौ भौतिकत्वमभौतिकत्वं च। न च कार्यं मनः। तस्मान्न भौतिकं नाप्यभौतिकमिति। श्रोत्रे चासम्भवः यदि भौतिकत्वाभौतिकत्वलक्षणाद् वैधर्म्यादपरिपाठः सूत्रे मनसः, श्रोत्रमपि सूत्रे न पठितव्यं तर्हि, न हि श्रोत्रं भौतिकं नाप्यभौतिकमिति। स्वार्थे प्रत्ययविधानमिति चेत्। न। प्रत्ययवैयर्थ्यात्। स्यादेषा बुद्धिः स्वार्थिक एष प्रत्ययो भूतमेव भौतिकमिति। तच्च न। प्रत्ययवैयर्थ्यात्। न हि भौतिकमित्यनेन कश्चित्तद्धितार्थो लभ्यते। तस्माद् व्यर्थमेतत् स्वार्थे प्रत्ययविधानमिति। यत्पुनरेतत् पृथगभिधानं नास्तीति। न नास्ति युगपज्ज्ञानानुपपत्तेरिति। युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमित्युच्यते। तेन च प्रतिपादितमेतन्मनसः करणत्वमिति सगुणानामिन्द्रियभावो वैधर्म्यमित्येतदप्ययुक्तम्। श्रोत्रानभिधानप्रसङ्गादेव। तस्मात् सर्वविषयत्वासर्वविषयत्वमेव वैधर्म्यमित्येतदेव ज्यायः। तच्चान्तरसमाचाराच्च। तच्चान्तरे मन इन्द्रियमिति पठ्यते। तच्चेह न प्रतिषिध्यते। अप्रतिषेधादुपात्तं तदिति न। शेषाभिधानवैयर्थ्यात्। शेषाण्यपीन्द्रियाणि तैः परिपठितानि तस्मात् तान्यपि न वक्तव्यानि यद्यप्रतिषेधादुपादानं स्यादिति। न। तच्चयुक्त्यनवबोधात्। न भवता तच्चयुक्तिः परिज्ञायते। परमतमप्रतिषिद्धमनुमतमिति हि तच्चयुक्तिः। न च यस्य स्वमतपरिग्रहो नास्ति तस्य स्वमतं परमतं वा भिद्यते। भवता च परमतानुरोधेन सर्वं स्वमतं निवार्यत इति। तन्निवारणात् स्वमतं परमतमित्येतदेव न स्यात्। तस्मादस्ति मन इन्द्रियं चेति। तदुपपन्नमिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानमिति व्यापकं लक्षणम्"—न्यायवा० पृ० ३८ पं० १–।

"अव्यापकत्वेन लक्षणाक्षेपपरं भाष्यमात्मादिष्वित्यादि, तद्व्याचष्टे। इन्द्रियार्थेति। देशयति। कथं पुनरिति। परिहरति। इन्द्रियेति। मा भूदिन्द्रियसूत्रे पाठः, तद्धि बाह्येन्द्रियलक्षणमान्तरं च मन इत्यत आह। पृथक् चेति। न च सुखादौ प्रमाणान्तरमस्ति, तस्मात् पारिशेष्यात् सिद्धं प्रत्यक्षत्वमित्याह। प्रत्यक्षाश्चेति। ननु नैते प्रमेयाः, स्वसंवेदनसिद्धत्वात्, तत् किमत्र प्रमेयार्थेन प्रमाणेनेत्यत आह। न च तेषामिति। ननूक्तं स्वसंवेदनतया न प्रमाकर्म्मभाव एषामित्यत आह। न चान्या गतिरिति। संवेदनत्वेन हि तेषां स्वसंवेदनता न चैते संवेदनमित्युक्तमधस्तादिति भावः। आक्षेपमुपसंहरति। तस्मादिति। भाष्ये चात्मादिषु सुखादिष्विति नित्यानित्याभिप्रायं वर्गद्वयमात्मसुखदुःखत्वादयो नित्या अनित्याश्च सुखदुःखादय इति। तदिदमुक्तं दिग्नागेन।

'न सुखादिप्रमेयं वा मनो वाऽस्तीन्द्रियान्तरम्।'

न च तत् सम्भवति। घ्राणादिसूत्रेण विभागपरेण निषेधादिति भावः।

समाधिभाष्यमिन्द्रियस्य वै सत इति। तद्व्याचिख्यासुर्गूढाभिप्रायः पृच्छति। कश्चैवमिति। आक्षेप्तुरुत्तरमिन्द्रियार्थेति। समाधाता आह। नैष दोष इति। आक्षेप्तुरनुशयबीजमुद्घाट्य दूषयति। यत्तु सूत्र इति। नेदं विभागपरं घ्राणादिसूत्रमपि तु लक्षणपरं, तत्र चेन्द्रियमपि मनो न लक्षितं वैधर्म्यादित्यर्थः। वैधर्म्यमाह। वैधर्म्यमिति। तत्र प्रमाणयति। सर्वविषयं त्विति। वैधर्म्यान्तरं दूषयति। भौतिकेति। कार्य्यस्य हि विशेषौ भौतिकत्वाभौतिकत्वे, भूतकार्य्यं भौतिकं यद् भूतकार्य्यं न भवति तद् भौतिकं न भवति। भूतकार्य्यत्वप्रतिषेधश्च तदन्यकार्य्यत्वं गमयति। विशेषनिषेधस्य शेषाभ्यनुज्ञानहेतुत्वात्। इतरथा त्वकार्य्यमेवोच्येत न त्वभौतिकम्। तस्मादकार्य्यस्य मनसोऽभौतिकत्वं कार्य्यधर्म्मो विरुद्धमित्यर्थः। अपि च वैधर्म्यान्मनोवत् श्रोत्रमपि न वक्तव्यमित्याह। श्रोत्रे चेति। शङ्कते। स्वार्थ इति। भूतानि हि घ्राणादीनि श्रोत्रान्तानि मनस्तु न भूतमिति वैधर्म्यमित्यर्थः। निराकरोति। तच्च नेति। दर्शयिष्यति हि वार्त्तिककारो यथा स्वार्थिको न कश्चिदपि प्रत्यय इत्यर्थः। आक्षेपहेतुमनुभाषते। यत्पुनरिति। दूषयति। तन्नास्तीति। तदनेन सति चेन्द्रियार्थसन्निकर्षे इत्यादि भाष्यं व्याख्यातम्। यच्चापरं वैधर्म्यं घ्राणादिभ्यो मनस उक्तं भाष्यकारेण तत्रिहावलोकितेन दूषयति। सगुणानामिति। घ्राणादीनि यथा स्वस्वगुणेन गन्धादिना बाह्यं गन्धादि बोधयन्ति नैवं स्वगुणेन शब्देन श्रोत्रं बाह्यं शब्दं बोधयति, तन्मनोवत् श्रोत्रमपि घ्राणादिसूत्रे न पठितव्यमित्यर्थः। भाष्योक्तेषु मध्येऽभिमतं वैधर्म्यमुपसंहरति। तस्मादिति। भूतत्वाभूतत्वलक्षणं वैधर्म्यं न भौतिकत्वाभौतिकत्वग्रहणेन शक्यमित्यवधारणाभिप्रायः। ननु युगपज्ज्ञानानुत्पत्तेर्ज्ञानकारणं मनोऽस्तीत्यवगम्यते न पुनरस्येन्द्रियत्वमपि, तद्भावानवगमे च नेन्द्रियार्थसन्निकर्षजं सुखादिज्ञानं शक्यं वक्तुमित्यत आह। तच्चान्तरेति। तच्च्यते व्युत्पाद्यते अनेन तत्त्वमिति तच्चं शास्त्रम्। तदनेन मनसश्चेत्यादि भाष्यं व्याख्यातम्, तद् दूषितं दिग्नागेन।

[नैयायिकैर्विन्ध्यवासीयप्रत्यक्षलक्षणस्य निराकरणम्]

"श्रोत्रादिवृत्तिरविकल्पिका" [ ] इति विन्ध्यवासिप्रत्यक्षलक्षणमनेनैव निरस्तम्। यथा ह्यविकल्पिका शाक्यदृष्ट्याऽध्यक्षमतिः प्रमाणं न भवति तथा विन्ध्यवासिपरिकल्पिताऽपि सा

'अनिषेधादुपात्तं चेदन्येन्द्रियरुतं वृथा।'

तद् दूषयितुमुपन्यस्यति। न शेषेति। तद् दूषयति। न तच्चयुक्तीति। सर्वस्य तच्चान्तरे लोके च सिद्धत्वादवक्तव्यतायां स्वमतमपि नास्ति। वचनलिङ्गं हि मतज्ञानं न चानुमते निषेधमात्रे शक्यं कर्त्तुमभावस्य भावनिरूपणाधीननिरूपणत्वादिति भावः। सिद्धमर्थमुपसंहरति। तस्मादिति। प्रकृतमुपसंहरति। तदिति"—न्यायवा० ता० टी० पृ० १४६ पं० १—।

१ साङ्ख्यकारिकाप्रमुखेदानींतनोपलभ्यमानसाङ्ख्यदर्शनग्रन्थेषु प्रत्यक्षलक्षणमित्थं दर्शितमस्ति—

"प्रतिविषयाध्यवसायो दृष्टम्"—साङ्ख्यका० ५।

"विषयं विषयं प्रति योऽध्यवसायो नेत्रादीनामिन्द्रियाणां पञ्चानां रूपादिषु पञ्चसु तत् प्रत्यक्षं प्रतिपत्तिरूपं दृष्टाख्यम्"—माठर० पृ० १२ पं० १०–।

"× × × विषयं विषयं प्रति वर्तते इति प्रतिविषयम्। वृत्तिश्च सन्निकर्षः। अर्थसन्निकृष्टमिन्द्रियमित्यर्थः। तस्मिन् अध्यवसायः तदाश्रित इत्यर्थः। अध्यवसायश्च बुद्धिव्यापारो ज्ञानम् उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति वृत्तिरिति ज्ञानमिति चाख्यायते। इदं तत् प्रमाणम्—साङ्ख्य० कौ० पृ० २४ पं० ११—।

"यत् संबद्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्षम्"—साङ्ख्यद० १–८९।

"संबद्धं भवत् संबद्धवस्त्वाकारधारि भवति यद् विज्ञानं बुद्धिवृत्तिस्तत् प्रत्यक्षं प्रमाणमित्यर्थः"—साङ्ख्यप्र० भा० पृ० ६५ पं० १६–।

"तत्र प्रत्यक्षं तावत् श्रोत्रादिपञ्चकं लोकोचितशब्दादिगुणग्राहकम्"—साङ्ख्यस० साङ्ख्यतत्त्ववि० पृ० २७ पं० ५।

यद्यपि टीकाकृन्निर्दिष्टमिदं साङ्ख्यसंमतं प्रत्यक्षलक्षणं पूर्वनिर्दिष्टसाङ्ख्यग्रन्थेषु न क्वाप्युपलभ्यते तथाप्यन्ये समालोचकाष्टीकाकृन्निर्दिष्टां 'श्रोत्रादिवृत्तिरविकल्पिका' इति शब्दानुपूर्वीमेवाऽविकलतया विकलतया वोद्धृत्यैतल्लक्षणं समालोचितवन्तः। तद्यथा—

"तथा, श्रोत्रादिवृत्तिरविकल्पिका एतदपि प्रत्युक्तम्"—इत्यादि तत्त्वोप० लि० पृ० ७७ पं० १०–पृ० ८१ पं० ५।

"तथा, श्रोत्रादिवृत्तिरिति। किं कारणम्? पञ्चपदपरिग्रहेण प्रत्यक्षलक्षणमुक्तं यत्रान्यतरपदपरिग्रहो नास्ति तत् प्रत्यक्षाभासमिति"—न्यायवा० पृ० ४३ पं० १०–।

"वार्षगण्यस्यापि लक्षणमयुक्तमित्याह—श्रोत्रादिवृत्तिरिति। पञ्चानां खल्विन्द्रियाणामर्थाकारेण परिणतानामालोचनमात्रं वृत्तिरिष्यते, सा च संशयादिव्यापकत्वादलक्षणमिति"—न्यायवा० ता० टी० पृ० १५५ पं० १९–।

"श्रोत्रादिवृत्तिरपरैरविकल्पिकेति प्रत्यक्षलक्षणमवर्णि तदप्यपास्तम्।
साम्यान्न यस्य न च सिध्यति बुद्धिवृत्त्या द्रष्टृत्वमात्मन इति प्रतिपादितं प्राक्" ॥
—न्यायमञ्ज० आ० २ पृ० १०० पं० १३–।

"ईश्वरकृष्णस्तु प्रतिविषयाध्यवसायो दृष्टमिति प्रत्यक्षलक्षणमवोचत्। तदपि न मनोज्ञम्। अनुमानादिज्ञानानामपि विषयाध्यवसायस्वभावत्वेनातिव्याप्तेः। यत्तु राजा व्याख्यातवान् प्रतिरामिमुख्ये वर्तते तेनाभिमुख्येन विषयाध्यवसायः प्रत्यक्षमिति तदपि अनुमानादावस्त्येव" इत्यादि—न्यायमञ्ज० आ० २ पृ० १०९ पं० ४–१४।

"श्रोत्रादिवृत्तिरध्यक्षमित्यप्येतेन चिन्तितम्। तस्या विचार्यमाणाया विरोधश्च प्रमाणतः" ॥ ३६ ॥ × × ×

"न च प्रमाणतो विचार्यमाणा श्रोत्रादिवृत्तिः साङ्ख्यानां युज्यते" इत्यादि—तत्त्वार्थश्लो० वा० पृ० १८७ पं० २६–३२।

"एतेनेन्द्रियवृत्तिः प्रमाणमित्यभिदधानः साङ्ख्यः प्रत्याख्यातः" इत्यादि—प्रमेयक० पृ० ६ प्र० पं० ७–१४।

"तथाहि–श्रोत्रादिवृत्तिः प्रत्यक्षमिति साङ्ख्याः प्रत्यक्षलक्षणमाचक्षते" इत्यादि—स्याद्वादर० पृ० ३४३ पं० १–४ आ०।

"श्रोत्रादिवृत्तिरविकल्पिका प्रत्यक्षमिति वृद्धसाङ्ख्याः" × × × "प्रतिविषयाध्यवसायो दृष्ट(ष्टम्) इति प्रत्यक्षलक्षणमितीश्वरकृष्णः" इत्यादि—प्रमाणमी० पृ० ३९ पं० ७–१७।

२ "आचार्येण कुमारिलेन शान्तरक्षितेन कमलशीलेन हरिभद्रेण च स्वस्वग्रन्थे विन्ध्यवासिनो नाम निर्दिष्टम्। तद्यथा—

"संदिह्यमानसद्भाववस्तुबोधात् प्रमाणता। विशेषदृष्टमेतच्च लिखितं विन्ध्यवासिना" ॥—श्लो० वा० अनु० श्लो० १४३ पृ० ३९३। तत्त्वसं० का० १४४५ पृ० ४२२।

प्रमाणं न युक्ता। न च सांख्यदर्शनकल्पितस्य श्रोत्रादेः पदार्थस्य सिद्धिः सत्कार्यवादसिद्धौ तत्पदार्थव्यवस्थितेः तस्य च निषिद्धत्वात्। किञ्च, श्रोत्रादीनां वृत्तिस्तेभ्यो यद्यव्यतिरिक्ता तदा श्रोत्रादिकमेव तच्च सुप्तमत्ताद्यवस्थास्वपि विद्यत इति तदाप्यध्यक्षप्रमाणप्रसक्तिरिति सुप्तादिव्यवहारोच्छेदः। अथ व्यतिरिक्ता तेभ्यो वृत्तिस्तदा वक्तव्यम् किमसौ तेषां धर्ममात्रम् आहोस्विदर्थान्तरम्? यद्याद्यः पक्षस्तदा वृत्तेस्तैः सम्बन्धो वक्तव्यः यदि तादात्म्यं तदा श्रोत्रादिमात्रमेवासाविति पूर्वोक्तो दोषः। अथ समवायस्तदाऽयुतसिद्धिप्रसक्तिरिति व्यापिश्रोत्रादिसद्भावे सति नियतदेशा वृत्तिरभिव्यज्यत इति ब्रूवते। अथ संयोगस्तदार्थान्तरप्रसक्तिरिति न तद्धर्मो वृत्तिर्भवेत्। अथार्थान्तरं वृत्तिस्तदा नासौ वृत्तिः अर्थान्तरत्वात् पटादिवत्। अथार्थान्तरत्वेऽपि प्रतिनियतविशेषसद्भावात् तेषामसौ वृत्तिः; नन्वसौ विशेषो यदि श्रोत्रादिविषयप्राप्तिस्वरूपस्तदेन्द्रियार्थसन्निकर्षोऽभिधानान्तरेण प्रतिपादितो भवेत्। स च यद्यव्यभिचारादिविशेषणविशिष्टार्थोपलब्धिजनकः प्रत्यक्षं प्रमाणमभिधीयते तदा असत्पक्ष एव समाश्रितो भवेत्। अथ तथाभूतोपलब्ध्यजनकः न तर्हि प्रमाणमसाधकतमत्वात्। अथार्थाकारपरिणतिः श्रोत्रादीनां वृत्तिस्तदात्रापि वक्तव्यम् किमसौ परिणतिः श्रोत्रादिस्वभावा, उत धर्मः, आहोस्विदर्थान्तरमिति? पक्षत्रयेऽपि च पूर्ववद्दोषाभिधानं विधेयम्। न च श्रोत्रादीनां विषयाकारपरिणतिः परपक्षे संभविनी परिणामस्य व्यतिरिक्तस्याव्यतिरिक्तस्य चासंभवादिति प्रतिपादितत्वात्। प्रतिनियताध्यवसायस्तु श्रोत्रादिसमुत्थोऽध्यक्षफलम् न पुनरध्यक्षं प्रमाणमसाधकतमत्वात्। विशिष्टोपलब्धिनिर्वर्तकत्वेनाध्यक्षत्वेऽस्मन्मतमेव समाश्रितं भवेत्। तन्न सांख्यमतानुसारिपरिकल्पितमप्यध्यक्षलक्षणमुपपन्नम्।

[नैयायिकैर्जैमिनीयसूत्रोक्तप्रत्यक्षलक्षणस्य निरासः]

जैमिनिपरिकल्पितमपि प्रत्यक्षलक्षणम् "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम्" [मीमांसाद० १-१-४] इति संशयादिषु समानत्वात् वार्तिककारप्रभृतिभिर्निरस्तमेव। यैरपि—

"एतच्च यथोक्तं प्रत्यक्षदृष्टसम्बन्धमनुमानं विशेषतोदृष्टमनुमानमित्येवं विन्ध्यवासिना गदितम्"—तत्त्वसं० पञ्जि० पृ० ४१३ पं० २२। "सारूप्यं सादृश्यं विन्ध्यवासीष्टम्"—तत्त्वसं० पञ्जि० पृ० ६३६ पं० ७।

"यदेव दधि तत् क्षीरं यत् क्षीरं तद्दधीति च। वदता रुद्रिलेनैव ख्यापिता विन्ध्यवासिता" ॥

—तत्त्वसं० पञ्जि० पृ० २२ पं० २६।

"दैहभोगेन नैवास्य भावतो भोग इष्यते। प्रतिबिम्बोदयात् किन्तु यथोक्तं पूर्वसूरिभिः"—शास्त्रवा० स्त० ३, श्लो० २७।

"पूर्वसूरिभिः विन्ध्यवास्यादिभिः"—शास्त्रवा० स्याद्वादक० पृ० १०९ प्र० पं० ८। आचार्यहेमचन्द्र-यादवप्रकाशौ लेनं 'व्याडि' इति नाम्नापि प्रत्यभिज्ञापयतः—

"अथ व्याडिर्विन्ध्यवासी नन्दिनीतनयश्च सः"—अभिधान० ३, श्लो० ५१६। "विन्ध्ये वसति विन्ध्यवासी"—अभिधान० टी०।

"अथ व्यालिर्विन्ध्यवासी नन्दिनीनन्दनोऽपि च"—वैजय० श्लो० १५८ पृ० ९६।

१ पृ० २९६ पं० ८। २ इदं विन्ध्यवासिप्रणीतप्रत्यक्षलक्षणनिराकरणं शब्दशः प्रमेयकमलमार्तण्डे वर्तते—पृ० ६ प्र० पं० ७-१४। तदेव चांशतः साम्येन स्याद्वादरत्नाकरेऽपि दृश्यते—पृ० ७३ पं० ४ आ०। ३ "श्रोत्रादिभिः सह"—बृ० ल० टि०। ४ प्र० पृ० पं० २। ५-**णतिश्रो**-बृ० वा० बा० आ० हा० वि०।-**णतश्रो**-ल०। ६ प्र० पृ० पं० २-४। ७ पृ० २९७ पं० २-३०।

८ "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् अनिमित्तं विद्यमानोपलम्भनत्वात्" इति सूत्रम्। सोपपत्तिकमेतत् मीमांसाश्लोकवार्तिकादितोऽवगन्तव्यम्—श्लो० वा० पृ० १३३-२०७ श्लो० १-२५४। शास्त्रदीपिका पृ० ३५ पं० १६-पृ० ४३ पं० ११।

९ "तथा, सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् तदपि प्रत्युक्तम्" इत्यादि—तत्त्वोप० लि० पृ० ७३ पं० १४-पृ० ७७ पं० ९।

"सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमिति एतदपि संशयाद्युत्पत्तिनिमित्तत्वादलक्षणमिति। तथा चोक्तं प्रत्यक्षसूत्रं वर्णयद्भिरिति"—न्यायवा० पृ० ४३ पं० ६-। "जैमिनिप्रत्यक्षलक्षणं दूषयति-सत्संप्रयोग-इति" इत्यादि—न्यायवा० ता० टी० पृ० १५५ पं० ९-१९।

"सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः"। [श्लो० वा० सू० ४ प्रत्यक्ष० श्लो० ३८] इत्यादिना तल्लक्षणं व्याख्यातम् तेषामपि प्रयोगस्यातीन्द्रियत्वात् सम्यक्त्वं न विशिष्टफलमन्तरेण ज्ञातुं शक्यम् फलविशेषणत्वेन च न किञ्चित् पदं श्रूयत इति न कार्यद्वारेणापि तत्सम्यक्त्वावगतिः। बुद्धिजन्मनः प्रमाणत्वं तु न सम्भवत्येव बुद्धेर्ज्ञातृव्यापारलक्षणायाः पूर्वमेव प्रमाणत्वनिषेधात्। यैस्तु "नेदं प्रत्यक्षलक्षणविधानं किन्तु लोकप्रसिद्धप्रत्यक्षानुवादेन प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वविधानम्"[ ] इति व्याख्यातं तैरपि वाच्यम् कतरस्य प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वं विधीयते?

"सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम्" इत्यादिना जयन्तकृतं जैमिनिप्रत्यक्षलक्षणसमालोचनमत्रत्यया सर्वया चर्चया समानप्रायं वर्तते—न्यायमञ्ज० आ० २ पृ० १०० पं० १७-पृ० १०८ पं० २५।

तदेव च तत्त्वार्थश्लोकवार्तिक-स्याद्वादरत्नाकर-प्रमाणमीमांसादितोऽपि क्रमेण समवगन्तव्यम्-पृ० १८७ श्लो० ३७। पृ० ३४१ पं० १९-पृ० ३४२ पं० २५ आ०। १-१-३० पृ० ३७ पं० १९-पृ० ३९ पं० ७।

१ श्लोकवार्तिके "प्रयोग इन्द्रियाणां च व्यापारोऽर्थेषु कथ्यते"-इत्युत्तरार्धम्।

"सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः। दुष्टत्वाच्छुक्तिकायोगो वार्यतामक्षजेक्षणात्"—न्यायमञ्ज० आ० २ पृ० १०१ पं० ३।

"वार्यते रजतेक्षणात्"—स्याद्वादर० पृ० ३४२ पं० ६ आ०, प्रमाणमी० पृ० ३८ पं० ११।

२ पृ० २० पं० १। प्रमेयक० पृ० ६ प्र० पं० १५—पृ० ७ द्वि० पं० १४।

३ पृ० ४८ पं० १७-। "भवदासेनैतत् सूत्रं द्विधा कृत्वा सत्संप्रयोगे इत्येवमादि तत् प्रत्यक्षमित्येवमन्तं प्रत्यक्षलक्षणपरम् अनिमित्तमित्यादि च तस्य धर्मं प्रत्यनिमित्तत्वपरं व्याख्यातम् तदुपन्यस्य दूषयति"—श्लो० वा० पार्थ्या० पृ० १३३ पं० १५-पृ० १३४ पं० ९। "अत्र भाष्यकारेणैतत् सूत्रं सकलमेव प्रत्यक्षस्यानिमित्तत्वकथनपरत्वेन व्याख्यातम्, वृत्त्यन्तरे तु सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमित्येतावत् प्रत्यक्षलक्षणपरत्वेन व्याख्यातम् अवशिष्टं तु तस्य धर्मं प्रत्यनिमित्तत्वेन। तदस्य लक्षणपरत्वे परोद्भावितं दूषणमनूद्य परिहरति"—शास्त्रदीपिका युक्तिस्नेहप्रपूरणीसिद्धान्त० पृ० ३५ पं० ३६-। गं० श्लो० वा० पृ० ६९ टि० १२।

४ "कतरस्य प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वं प्रतिपाद्यते किमस्मदादिप्रत्यक्षस्य योगिप्रत्यक्षस्य वा। तत्रास्मदादिप्रत्यक्षस्य तथात्वे सर्वेषामविवाद एवेति किं तत्रेयता श्रमेण। योगिप्रत्यक्षस्य तु भवतामसिद्धत्वात् कस्य धर्मं प्रत्यनिमित्तत्वप्रतिपादनम्।

एवं च धर्मिणोऽभावादाश्रयासिद्धतां स्पृशेत्। विद्यमानोपलम्भत्वप्रत्यक्षत्वादिसाधनम् ॥

परप्रसिद्धया तत्सिद्धिरिति चेत्केयं प्रसिद्धिर्नाम। प्रमाणमूला तद्विपरीता वा। आद्ये पक्षे प्रमाणस्यापक्षपातित्वात् परस्येव तवापि तत्सिद्धिर्भवतु। अप्रमाणमूलत्वे तु न कस्यचिदप्यसौ प्रसिद्धिः।

योगिज्ञानं परेषां यत्सिद्धं तदनुभाषणे। प्रतिज्ञापदयोरेव व्याघातस्ते प्रसज्यते ॥

परैर्हि धर्मग्राहि योगिज्ञानमभ्युपगतम् अतस्तदनुभाषणे धर्मग्राहकं न धर्मग्राहकमिति उक्तं स्यात्।

परसंसिद्धमूलं च नानुमानं प्रकल्पते। उक्तं भवद्भिरेवेदं निरालम्बनदूषणम् ॥

साध्यसिद्धिर्यथा नास्ति परसिद्धेन हेतुना। तथैव धर्मिसिद्धत्वं परसिद्धया न युज्यते ॥

तत्रैतत्स्यात् प्रसङ्गसाधनमिदं प्रसङ्गश्च नाम परप्रसिद्धेन परस्यानिष्टापादनमुच्यते। परस्य च विद्यमानोपलम्भनं सत्सम्प्रयोगजन्यं च प्रत्यक्षं प्रसिद्धम्। अतस्तेनैव धर्मेण हेतुना धर्मानिमित्तत्वं तस्योपपद्यते इति को दोषः। नैतदेवम्।

प्रसङ्गसाधनं नाम नास्त्येव परमार्थतः। तद्धि कुड्यं विना तत्र चित्रकर्मेव लक्ष्यते ॥

न हि नभःकुसुमस्य सौरभासौरभविचारो युक्तः। अथापि किं न एतेन भवत्विदं प्रसङ्गसाधनम्।

तदत्रापि न तु व्याप्तिप्रतीतिरिह मादृशाम्। न धर्मग्राहि सर्वेषां प्रत्यक्षमिति वेत्ति कः ॥

मत्प्रत्यक्षमक्षमं धर्मग्रहणे इति भवान्न जानीते त्वत्प्रत्यक्षमपि न धर्मग्राहीति नाहं जाने अन्यस्य प्रत्यक्षमीदृशमेवेत्युभावप्यावां न जानीवहे।

त्वया तु यदि सर्वेषां प्रत्यक्षं ज्ञातमीदृशम्। तर्हि त्वमेव योगीति योगिनो द्रक्ष्यि किं वृथा ॥

प्रामाणिकस्थितिं तस्मादित्थं श्रोत्रिय! बुध्यसे। परोक्तेऽतीन्द्रिये ह्यर्थे मा वादीर्दूषणं पुनः ॥

प्रमाणसिद्धे हतशक्तिदूषणं प्रमाणशून्येऽपि वृथा तदुक्तयः।
निरस्य चोद्यव्यसनं तु मृग्यतामतीन्द्रिये वस्तुनि साधनं पुनः ॥
स चेत् पर्यनुयुक्तः सन् वक्तुं शक्नोति साधनम्।
ओमिति प्रतिपत्तव्यं नो चेज्ञास्त्येव तस्य तत्"—न्यायमञ्ज० आ० २ पृ० १०२ पं० ८-।

किमस्मदादिप्रत्यक्षस्य, उत योगिप्रत्यक्षस्येति? तत्र यद्याद्यः पक्षः स न युक्तः सिद्धसाध्यताप्रसक्तेः। द्वितीयपक्षोऽप्ययुक्तः योगिप्रत्यक्षस्य स्वमतेनासिद्धत्वात्। न चासिद्धस्यानिमित्तत्वविधानम् अन्यथा खरविषाणादेरपि तं प्रत्यनिमित्तत्वविधिर्भवेत्। न च योगिप्रत्यक्षं परेणाभ्युपगतमिति तं प्रति तस्य तदनिमित्तत्वं साध्यत इति वक्तव्यम् यतो यदि प्रमाणतस्तत् तेनाभ्युपगतं तदा प्रमाणप्रसिद्धस्य ५ भवतोऽपि प्रसिद्धत्वात् कथं तस्य तदनिमित्तत्वं साध्येत तन्निमित्ततयैव योगिप्रत्यक्षस्य प्रमाणप्रसिद्धत्वात्? अथाप्रमाणतस्तत् तेनाभ्युपगतं तदा प्रमाणाभावादेव नासावभ्युपगम इति कथं ततस्तस्य तदनिमित्तत्वसिद्धिः? अत एवातीन्द्रियं वस्त्वनङ्गीकुर्वता परप्रतिपन्ने वस्तुन्यतीन्द्रियेऽसौ प्रमाणं प्रष्टव्यः—स चेत् तत् तत्र ब्रूते तदा तद्वस्त्वङ्गीकर्तव्यम्। अथ न ब्रूते तदा तस्य प्रमाणाभावादेवासिद्धिः न तदुक्तप्रमाणप्रतिषेधात् न ह्यतीन्द्रिये वस्तुनि प्रमाणं प्रतिषेधविधायि प्रवर्तितु- १० मुत्सहते धर्म्यसिद्धत्वादिदोषैराघ्रातत्वात्। अथापि स्यात् भवेदेष दोषः स्वतन्त्रसाधनपक्षे नत्विदं स्वतन्त्रसाधनम् अपि तु प्रसङ्गसाधनम् तच्च स्वतोऽप्रसिद्धेऽपि वस्तुनि परप्रसिद्धेन परस्यानिष्टापादनमिति परैरभ्युपगतं यथा सामान्यादिनिषेधे, एतदप्ययुक्तम्; दृष्टान्तस्याप्यसिद्धेः। यथा च सामान्यादिनिषेधे न प्रसङ्गसाधनं प्रवर्तते तथा नैयायिकैः प्रतिपादितं सामान्यादिपरीक्षायाम्। किञ्च, प्रसङ्गसाधनानुपपत्तिरत्र, यतः प्रसङ्गः सर्वोऽपि विपर्ययफल इति पूर्वं प्रसङ्गः प्रदर्शनीयः। स च कथं प्रद- १५ र्शयत इति वक्तव्यम्? अथ योगिप्रत्यक्षं धर्मग्राहकं न भवति विद्यमानोपलम्भनत्वात्, न; हेतोरसिद्धत्वात्। अथ तत्सिद्ध्यर्थं हेत्वन्तरोपादानम्। तथाहि-विद्यमानोपलम्भनं योगिप्रत्यक्षं सत्संप्रयोगजत्वात्, न; अस्याप्यसिद्धत्वात्। अथैतत्सिद्धये हेत्वन्तरमुपादीयते-विवादास्पदं सत्संयोगजं प्रत्यक्षत्वात् तच्छब्दवाच्यत्वाद्वा अस्मदादिप्रत्यक्षवदिति दृष्टान्तः सर्वत्र वक्तव्यः। धर्मादिग्राहकत्वे वा धर्मा- देरसत्त्वान्न विद्यमानोपलम्भकत्वमिति विपर्ययः अविद्यमानोपलम्भनत्वे च न सत्संयोगजम् अस- २० त्संयोगजत्वे वा न प्रत्यक्षम् नापि तच्छब्दवाच्यम् ननु भवत्येवंप्रसङ्गपूर्वको विपर्ययः तस्य त्वनेन किं सद्भावो निषिध्यते, उत प्रत्यक्षत्वम्? प्राच्ये विकल्पे धर्म्यसिद्धता हेतूनामित्युक्तम्। द्वितीयेऽपि तस्य प्रमाणान्तरत्वप्रसक्तिः विशेषप्रतिषेधस्य शेषाभ्यनुज्ञानलक्षणत्वात्। स्यादेतत् विशेषप्रतिषेधे धर्मिण एव प्रतिषेधः तस्य तद्रूपतयैवाभ्युपगमात् न च धर्म्यसिद्धत्वादिर्हेतुदोषः 'यदि' अर्थस्याभ्युपगमात्, असदेतत्; व्याप्तौ सत्यां प्रसङ्गपूर्वकस्य विपर्ययस्य प्रवृत्तेः। न च प्रत्यक्षत्वस्य तच्छब्दवाच्यत्वस्य वा २५ सत्संप्रयोगजत्वेन व्याप्तिसिद्धिः क्वचित् संजाता। अथ प्रसङ्गसाधनवादिनि तत्सिद्धिस्तथापि दोषः- न हि यत् तेन न गृह्यते तदन्येनापि न गृह्यत इति व्याप्तिसिद्धिः। तथाहि-यथा प्रसङ्गसाधनवादि- चक्षुर्नातिदूरस्थविषयग्राहि सम्पात्यादेर्गृध्रराजस्य तु चक्षुष्ट्वेऽपि चक्षुर्योजनशतव्यवहितावभासि श्रूयते रामायणादौ। न च कादम्बर्यादेरिव काव्यत्वादस्याप्रमाणतेति न तन्निबन्धना वस्तुव्यवस्था भारतेऽपि प्रमाणभूते अस्यार्थस्य संसूचनात्। स्वरूपार्थप्रतिपादकत्वेऽपि च भारतादीनां प्रमाणता सिद्धैव। ३० यद्यासप्रणीतत्वे निश्चयस्तदा वृषदंशचक्षुश्चक्षुष्ट्वेऽपि तच्छब्दवाच्यत्वेऽपि वा भिन्नस्वभावं दृष्टं तद्वत्

१ पृ० १११ पं० ३-३४। २ **पूर्वं प्र**-बृ० हा० विना। ३ **तद्धित्सि**-आ०। **तत्सित्सि**-वा० बा०। ४ **सम्पत्या**-वा० बा०। **सम्पत्त्या**-भां० मां०। सम्पातिनामा च गृध्रराजो योजनशतव्यवहितामपि दशरथनन्दनसुन्दरीं ददर्शेति श्रूयते रामायणे—न्यायमञ्ज० आ० २ पृ० १०३ पं० २३। ५ **तु चक्षुश्चक्षुष्टेऽपि** वा० बा०। **तु चक्षुष्केऽपि** ल०। ६ गृध्रराजस्य सविस्तरवर्णनार्थं द्रष्टव्यम्—रामाय० अरण्य० स० १४ श्लो० १-३६।

७ "सखा दशरथस्यासीज्जटायुररुणात्मजः। गृध्रराजो महावीरः संपातिर्यस्य सोदरः॥
स ददर्श तदा सीतां रावणाङ्कगतां स्नुषाम्। सक्रोधोऽभ्यद्रवत् पक्षी रावणं राक्षसेश्वरम्॥
अथैनमब्रवीद्गृध्रो मुञ्चमुञ्चेति मैथिलीम्। घ्रियमाणे मयि कथं हरिष्यसि निशाचर!॥
न हि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे वधूम्। उक्त्वैवं राक्षसेन्द्रं तं चकर्त नखरैर्भृशम्॥
पक्षतुण्डप्रहारैश्च शतशो जर्जरीकृतम्। चक्षार रुधिरं भूरि गिरिः प्रस्रवणैरिव" ॥ इत्यादि—
महाभा० वनप० अ० २८० श्लो० १-५।

८-**स्तथा वृ**-बृ० विना। ९ "वृषदंशो मार्जारः" अमर० सिंहादिवर्ग० २,६। अभिधान० ४,३६७। "तथाहि- योजनशतव्यवहितमन्धकारान्तरितं वा नास्मदादिलोचनगोचरतामुपयाति सम्पातिवृषदंशदृशोस्तु विषयो भवत्येव"।— न्यायमञ्ज० आ० २ पृ० १०४ पं० ९।

योगिप्रत्यक्षं भविष्यति एवं प्रतिवादिप्रत्यक्षेऽपि साध्यसाधनयोर्व्याप्तिनिषेधो द्रष्टव्यः। अथ गृध्र- वृषदंशचक्षुषोरेतत्स्वभावत्वेऽपि रूपग्रहणप्रतिनियमः न हि ते रसादौ कदाचित् प्रवर्तन्ते तथा योगिप्रत्यक्षस्यापि स्वविषय एवातिशयो भविष्यति। तदुक्तम्—

"यत्राप्यतिशयो दृष्टेः" इत्यादि। तथा,
"येऽपि सातिशया दृष्टाः प्रज्ञामेधादिभिर्नराः"। इत्यादि च। ५

एवमेतत् किन्तु द्विविधं प्रत्यक्षम् बाह्येन्द्रियजम् मानसं च। तत्र पूर्वस्यातीतादिग्राहकत्वनिषेधे रसादिग्राहकाणामिव इतरेतरविषयाग्रहणे सिद्धसाध्यता। मानसस्य त्वतीतादिरपि विषयः तस्य सर्वविषयत्वात्। तथाहि—वादि-प्रतिवादिनोर्मानसं स्पष्टाभं स्मार्तमतीतार्थग्राहि विज्ञानं सिद्धम् एव- मनागतार्थाध्यवसायि मानसं वादि-प्रतिवादिनोस्तथाविधं द्रष्टव्यम्। तस्य चाभूतार्थस्यापि स्पष्टाभता भावनाप्रकर्षात् काम-शोक-भयादिज्ञाने प्रतिपादिता। यत् पुनर्भूतार्थं प्रमाणद्वयपूर्वकं भावनाप्रकर्ष- १० समुद्भूतं तत् संवादात् प्रमाणम् विशदत्वाच्च प्रत्यक्षम् संभाव्यते च तथाविधं प्रत्यक्षं योगिनाम् यथाऽस्मदादीनां प्रातिभम्—'श्वो मे भ्राता आगन्ता' इत्यनागतार्थग्राहकम्। न च सन्दिग्धस्वभावताऽस्य निश्चितत्वेनोत्पादाद् बाधकाभावान्न विपर्यस्तताऽपि। अथ सर्वा प्रतिभा सत्यार्था न सिद्धेति न प्रमाणं प्रातिभं तर्हीन्द्रियजमपि सर्वं न सत्यार्थं सिद्धमिति तदप्यप्रमाणं भवेत्। अथ मा भूत् प्रमाणं यद्वाध्यते इतरं तु (इतरत् तु) प्रमाणम् प्रातिभेऽपि समानमेतत्। अथ प्रतिभाया न प्रमाणफलता १५ अर्थजत्वानुपपत्तेः। तथाहि-कर्मशक्तिः कर्तृकरणसहकृता क्रियानिर्वर्तिका कर्तृकरणशक्तिरिव कर्म- शक्तिसहकृता। न चासती स्वरूपेणानागता वर्तमानकालकर्तृ-करणाभ्यां सह कर्मशक्तिः स्वकार्ये व्याप्रियते। नापि कर्तृकरणशक्तिर्वर्तमानसमयसम्बन्धिनी भाविकर्मशक्त्या तदा विद्यमानया सह स्वकार्ये व्याप्रियत इति कथमनागतार्थविषयार्थजा प्रतिभा? ततो न प्रमाणफलं सेति, अयुक्तमेतत्; असमानकालत्वेऽपि प्रतिभाविषयस्य कर्तृकरणव्यापारसमानकालतोपपत्तेः। तथाहि-करणं प्रति- २० भाजनकं न वर्तमानसमयवस्तुपरिच्छेदकं किन्त्वनागतस्य तेनानागते वस्तुनि करणस्य व्यापाराद् वस्तुनश्च तेन रूपेण सत्त्वात् कथं प्रतिभा निर्विषया? यदि च सा भाविभावविषयं ज्ञानं निर्विषयं तर्हि चोदनाजनितं ज्ञानं वाक्यप्रभवं वाक्यकाले कार्यस्यार्थस्यासत्त्वान्निर्विषयमासज्येत। अथ वर्तमानार्थग्रहणस्वभावोऽध्यक्षस्यैव न शब्दादेः। उक्तं च—

"सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना"। [श्लो० वा० प्रत्यक्ष० श्लो० ८४] २५

तथा—

"एष प्रत्यक्षधर्मश्च वर्तमानार्थतैव या"॥ [श्लो० वा० निरा० श्लो० ११४]
"सन्निकृष्टार्थवृत्तित्वं न तु ज्ञानान्तरेष्वयम्"। [श्लो० वा० निरा० श्लो० ११५] इति,

१ पृ० ४९ पं० १२। तत्त्वसं० का० ३३८७ पृ० ८८६। न्यायमञ्ज० आ० २ पृ० १०४ पं० ३। २ पृ० ४९ पं० १०। "प्रज्ञामेधाबलैर्नराः"—तत्त्वसं० का० ३१६० पृ० ८२५। "प्रज्ञामेधाबलैर्नृणाम्"—न्यायमञ्ज० आ० २ पृ० १०४ पं० ६। ३-**कर्षात् का**-बृ० ल०।

४ "अपि चानागतं ज्ञानमस्मदादेरपि क्वचित्। प्रमाणं प्रातिभं श्वो मे भ्राताऽऽगन्तेति दृश्यते॥
नानर्थजं न संदिग्धं न बाधविधुरीकृतम्। न दुष्टकारणं चेति प्रमाणमिदमिष्यताम्॥
क्वचिद्बाधकयोगश्चेदस्तु तस्याप्रमाणता। यत्रापरेद्युरभ्येति भ्राता तत्र किमुच्यताम्"॥
न्यायमञ्ज० आ० २ पृ० १०६ पं० १३—।

५-**शक्तिः स्वक**-वा० बा०। ६-**शक्तिरेव** वा० बा०। ७ "मनोलक्षणम्"-बृ० ल० टि०। ८ **च भा**-भां० मां० विना।

९ "सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना। सामान्यं वा विशेषो वा ग्राह्यं नाऽतोऽत्र कल्प्यते"॥ श्लो० वा०। न्यायकु० लि० पृ० २४ द्वि० पं० १०। "सन्निहितं वर्तमानं च गृह्यते चक्षुरादिना"-सिद्धिवि० टी० लि०- पृ० ४१३ पं० ४।

१० "तस्योत्पत्तौ कथञ्चित् स्युः पृथिव्यादीनि कारणम्। एष प्रत्यक्षधर्मश्च वर्तमानार्थतैव या"॥ श्लो० वा०।

११ **ननु ज्ञा**-बृ० ल०।

"सन्निकृष्टार्थवृत्तिश्च न तु ज्ञानान्तरेष्वियम्। कथमुत्पादयेज् ज्ञानं तत्राऽसंश्चेत्कुतोन्वियम्"॥ श्लो० वा०।

१२ "वर्तमानार्थतारूपः प्रत्यक्षधर्मः"-बृ० ल० टि०।

असदेतत्; मनोविज्ञानस्यातीतानागतार्थग्रहणे व्याघाताभावात् चक्षुरादिप्रभवप्रतिपत्तीनां तु युक्त एव वर्तमानार्थग्रहणलक्षणो धर्मः न तु मानसस्य अन्यथा चोदनाजनितस्यापि स्यादित्युक्तम्।

नन्वेवमपि भाविरूपता भावस्य सावधिः प्रागभावः न च भिन्नकालत्वाद् वस्त्ववस्तुनोः सम्बन्ध इति कथं तस्य भाविरूपता? अत्र केचिदाहुः—न तयोरसम्बन्धिता विशेषणविशेष्यतया प्रतिपत्तेः, नैतत्; न हि सम्बन्धपूर्वको विशेषणविशेष्यभावः किं तर्हि भाविता भावस्योच्यते? बुद्धौ प्रतिभासमानस्याकारस्य कुतश्चिन्निमित्तात् प्रागभावविशेषणता तच्च निमित्तं भोजनादिकार्यं भ्रातृकृतम् तद् भ्रातुरनागतस्य नोपपद्यत इत्यनागमनकाल एव कार्येण बुद्ध्युपस्थापितस्य भ्रातुः श्वस्तनागमनविशिष्टतां प्रतिपद्यते। सद्व्यवहारनिबन्धनं च सत्त्वम् तच्च विधिप्रतिभास एव अतो विधिप्रतिभासस्वभावत्वान्न निर्विषया प्रतिभा। मा भून्निर्विषयत्वं तस्याः तेन त्वर्थेन सह सन्निकर्ष इन्द्रियस्य वाच्यः इन्द्रियार्थासन्निकर्षजस्य प्रत्यक्षत्वानुपपत्तेः। अत्र केचित् प्रतिसमादधति—'श्वो मे भ्राताऽत्र देशे आगन्ता' इति प्रतिभोत्पादाद् देशादेश्चेन्द्रियेण संयोगात् तद्विशेषणत्वाच्च श्वस्तनागमनविशिष्टस्य भ्रातुः संयुक्तविशेषणभावः सन्निकर्षः। एतत् परे नाऽनुमन्यन्ते विशेषणविशेष्ययोरेकविषयत्वान्न भ्रात्रा विशेषणेन चक्षुरादेः सन्निकर्षः तदभावाद् विशेषणाग्रहणे कथं विशेष्यबुद्धिः? अपि च, श्वस्तनागमनविशिष्टभ्रातृज्ञानं प्रतिभा न देशादिज्ञानम् न चेन्द्रियस्य तेन कश्चित् सम्बन्धः। अत एव आर्षमपि ज्ञानं न प्रतिभा। यतः—

"ऋषीणामपि यद् ज्ञानं तदप्यागमपूर्वकम्"। [वाक्यप० प्र० का० श्लो० ३०]

अनेनोपायजत्वमार्षस्य दर्शयति उपायश्च सन्निकर्ष-लिङ्ग-शब्दस्वभावः आगमग्रहणस्य प्रदर्शनार्थत्वात्। नापि धर्मविशेषात् सन्निकर्षं विनापि प्रतिभायाः समुद्भवः यतो धर्माधर्मयोः फलजनकत्वं साधनजनकत्वेनैव यथा सुखादौ जन्ये शरीरादेर्जनकम् एवं प्रतिभाया अपि धर्मविशेषजन्यत्वे केनचिदिन्द्रियार्थसन्निकर्षादिना साधनेन धर्मविशेषजनितेन भाव्यम्। अत एव सिद्धदर्शनमपि न प्रतिभा रथ्यापुरुषस्यापि भावात्। अनियतनिमित्तप्रभवत्वेनाप्रमाणं प्रतिभेति यत् कैश्चिदभ्यधायि तन्नैयायिकैर्निराक्रियत एव मनसस्तन्निमित्तत्वेन तत्र तत्र प्रतिपादनात्। नाप्यस्या लिङ्ग-शब्दप्रभवत्वम् तदभावेऽपि भावात्। उपमानजत्वाशङ्का दूरोत्सारिता अतः प्रत्यक्षं प्रतिभा। यद्येवं तदुत्पत्तावक्षं वक्तव्यम् किमत्रोच्यते मनसः सन्निहितत्वात् तस्य विशिष्टार्थग्रहणे विशेषणविशेष्यभावः सन्निकर्षः नियामकत्वेन पूर्वं प्रदर्शितः यथा प्रत्यभिज्ञानोत्पत्तौ स्मर्यमाणप्रतीयमानानुभवविशेषणं वस्तु तस्या विषयः न चैतावति बाह्येन्द्रियव्यापार इति मानसं प्रत्यभिज्ञानम् तद्वत् प्रातिभमपि।

---

१ "वर्तमानार्थतारूपः प्रत्यक्षधर्मः"–बृ० ल० टि०।

२ "ननु भावितया ग्रहणमघटमानम् भावित्वं हि नाम सावधिः प्रागभावः अभावस्य च भावेन भ्रात्रा सह कः सम्बन्धः। वस्त्ववस्तुनोर्विरोधात्। तदेतदसम्यक्। तद्देशसंबन्धस्य तत्र प्रागभावो न तु धर्मिणः। स हि विद्यते एव प्रागभावतः। स च कुतश्चिद्भोजनोत्कण्ठादेः कारणात् स्मरणपदवीमुपारूढः श्वस्तनागमनविशिष्टत्वेन प्रतिभातीति प्रातिभस्य स एव जनक इति। तस्मादनर्थजत्वाभावात् प्रमाणं प्रातिभम्"–न्यायमञ्ज० आ० २ पृ० १०६ पं० २३—।

३–**षता** बृ०। ४–**ते सिद्ध्यव्यव**–भां० मां०। ५ "सन्निकर्षाभावात्"—बृ० ल० टि०। ६–**वा वि**–ल० वा० बा०।–**वादवि**–आ० हा० वि०। ७ "भ्रात्रा"–बृ० ल० टि०।

८ "न चागमाद्दते धर्मस्तर्केण व्यवतिष्ठते। ऋषीणामपि यद् ज्ञानं तदप्यागमहेतुकम्" ॥ वाक्यप०। न्यायमञ्ज० आ० २ पृ० १०७ पं० ८।

९ "उपायस्य"–बृ० ल० टि०। १० "यथा सुखादेर्धर्मविशेषजन्यत्वे शरीरादेर्धर्मविशेषजनितस्य भावस्तथेति"–बृ० ल० टि०। ११–**वत्वेन प्र**–वा० बा०। १२–**भावे भा**–बृ० आ० हा० वि०। १३ प्रशस्तपादभाष्ये तत्त्वसंग्रहपञ्जिकायां च प्रातिभस्य वर्णनमित्थं दृश्यते—

"आम्नायविधातृणामृषीणामतीतानागतवर्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धेष्वनुपनिबद्धेषु चात्ममनसोः संयोगाद् धर्मविशेषाच्च यत् प्रातिभं यथार्थनिवेदनं ज्ञानमुत्पद्यते तदार्षमित्याचक्षते। तत् तु प्रस्तारेण देवर्षीणाम् कदाचिदेव लौकिकानां यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति"।

अन्धाद्यभावो बाह्यार्थाभ्युपगमे मनसः स्वातन्त्र्येण पूर्वं निराकृतः। एवं मानसस्य प्रत्यक्षस्याविद्यमानोपलम्भकस्य सद्भावान्न प्रसङ्गसाधने व्याप्तिसिद्धिः। तथा सर्वस्यैव स्थर्पत्यादेः क्रियमाणवस्तुग्रहणं प्रत्यक्षं सिद्धमेव। किञ्च, कथं जैमिनीयाः स्थिरग्रहणवादिनो वर्त्तमानविषयमेव प्रत्यक्षं संचक्षते? स्थिरग्रहणं हि वस्तुन एवं भवति यदि वर्तमानविशिष्टस्यैवातीतानागतकालविशिष्टग्रहणम् अन्यथा स्थिरग्रहणाभावः। तथा चोक्तम्—

"रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते" [ ]

ततः परस्परव्याहतार्थाभिधानात् यत्किञ्चिदेतत्। तदेवं न प्रत्यक्षस्यातीन्द्रियार्थग्रहणनिषेधः पूर्वोक्तनीत्या, संभाव्यते चातीन्द्रियार्थग्रहणमध्यक्षस्य। यथा तत् संभवति तथा सर्वज्ञसिद्धौ प्रतिपादितमिति न पुनरुच्यते।

किञ्च, सत्संयोगजत्वाद् यदि विद्यमानोपलम्भनत्वमुच्यते तत्र 'सता सीदता साधुना सद्भिर्वा' इत्येतान् पक्षान् व्युदस्याभिमतपक्षस्थापनं कृतम्–सति सम्प्रयोगे, प्रयोगश्च द्विधा प्रदर्शितः—अर्थेष्विन्द्रियाणां व्यापारः योग्यता वा न तु नैयायिकाभ्युपगत एव संयोगादिः। स द्विविधोऽप्यतीतानागतादिलक्षणेऽर्थे अन्तःकरणस्य चोदनाया इव कार्येऽर्थे न वार्यते। अथाविद्यमाने कथं करणव्यापारः? करणत्वेनाभ्युपगतायाश्चोदनाया अपि कथं कार्येऽर्थे? ततो नान्तःकरणस्य विशेषः तत्प्रमेयस्य त्रिकालावच्छिन्नत्वात् भाविरूपस्यापि वा तद्रूपत्वेन सतो वर्तमानत्वापत्तिः। तथा चोक्तं व्यासेन—

"अवश्यं भाविनं नाशं विद्धि सम्प्रत्युपस्थितम्।
अयमेव हि ते कालः पूर्वमासीदनागतः" ॥ [ ]

यत् पुनः कार्यं कालत्रयापरामृष्टं शशशृङ्गप्रख्यं तत्र कथं प्रेरणाख्यकरणव्यापारः? अथाबाधितप्रतीतिजनकत्वेन प्रेरणायास्तत्र व्यापारस्तर्ह्यन्तःकरणेऽप्येतत् तुल्यम्। ततोऽविद्यमानोपलम्भनस्य मानसाध्यक्षस्य सद्भावान्न प्रसङ्गसाधने व्याप्तिसिद्धिरिति न प्रथमा व्याख्या।

द्वितीयव्याख्याने तत्संतोर्व्यत्ययेऽपि च न संशयज्ञानव्युदासः। तत्र ह्ययमर्थो व्यवतिष्ठते यद्विषयं विज्ञानं तेनैव संप्रयोगे इन्द्रियाणां प्रत्यक्षम् प्रत्यक्षाभासं त्वन्यसंप्रयोगजमिति। तत्र संशयज्ञानं सम्यग्ज्ञानवत् यत्प्रतिभासि तेनैव संयोगे भवति। ननु उभयालम्बनत्वादुभयप्रतिभासि संशयज्ञानम् न चोभयात्मकेनेन्द्रियसम्बन्धः यद्यपि नोभयात्मकेन तेनेन्द्रियसम्बन्धस्तथापि तत्त्वतः सामान्यवान् पुरोऽवस्थितो धर्मी प्रतिभासमानान्यतरविशेषाश्रयः अतो यत् प्रतिभाति तेन सहेन्द्रियस्य संयोगे संशयज्ञानमुदेति न चैतद्व्यवच्छेदाय किञ्चित् पदमुपात्तमिति नैतल्लक्षणात् तद्व्युदास इति न जैमिनीयमपि प्रत्यक्षलक्षणमनवद्यम्। चार्वाकैस्तु प्रत्यक्षमपि न तत्त्वतः प्रमाणमभ्युपगम्यत इति न तद्विचारणप्रयासः सफल इत्यक्षपादविरचितमेव प्रत्यक्षलक्षणमनवद्यमिति नैयायिकाः।

"इन्द्रियलिङ्गाद्यभावे यदर्थप्रतिभानं सा प्रतिभा प्रतिभैव प्रातिभमित्युच्यते तत्र भवद्भिः। तस्योत्पत्तिरनुपपन्ना कारणाभावादित्यनुपयोगे सति इदमुक्तम् धर्मविशेषादिति। विशिष्यते इति विशेषो धर्म एव विशेषो धर्मविशेषः विद्यातपःसमाधिजः प्रकृष्टो धर्मस्तस्मात् प्रतिभोदयः। तत्तु प्रस्तारेण बाहुल्येन देवर्षीणां भवति कदाचिदेव लौकिकानामपि यथा कन्यका ब्रवीति श्वो मे भ्राताऽऽगन्तेति हृदयं मे कथयतीति। न चेदं संशयः उभयकोटिसंस्पर्शाभावात् न च विपर्ययः संवादादतः प्रमाणमेव"—प्रशस्तकं० पृ० २५८ पं० १—।

"प्रातिभं तु ज्ञानमार्षं यथा श्वो मे भ्राताऽऽगमिष्यतीति"—तत्त्वसं० पञ्जि० पृ० ८० पं० २१।

१ "सूत्रधारादेः"–बृ० ल० टि०। २ "यथाह भट्टः–रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते इति"—न्यायमञ्ज० आ० ७ पृ० ४६२ पं० १७। ३ पृ० ५३–६९। ४ **यद्यऽवि**–भां मां० विना। ५ **अर्थेन्द्रि**–आ०हा० वि०। ६–**ना इ**–भां० मां०। ७ "व्यापार इति योगः:"—बृ० ल० टि०। ८ "वर्तमानः"–बृ० ल० टि०। ९–**थमव्या**–भां० मां०। १०–**त्सतोव्य**–वा० बा०। ११–**त्ययोऽ**–भां मां०। १२ "जैमिनीयैः"–बृ० ल० टि०। १३ "संशयज्ञान–" बृ० ल० टि०। १४–**यप्रत्यक्षलक्षणमप्यनव**–भां० मां०।

[सिद्धान्तिना न्यायसूत्रीयप्रत्यक्षलक्षणस्य खण्डनम्]

[प्रसङ्गादिन्द्रियाणां प्राप्याप्राप्यकारित्वचर्चा]

असदेतत् तदभ्युपगमेनेन्द्रियार्थसन्निकर्षोत्पन्नत्वादेरघटमानत्वात् । तथाहि-इन्द्रियं यदि चक्षुर्गोलकादिकमवयविरूपमभ्युपगम्यते तदा तस्य स्वविषयेण व्यवहितदेशेन पर्वतादिना सन्निकर्षोऽसिद्धः । न ह्यत्यन्तव्यवहितयोर्हिमवद्विन्ध्ययोरिव चक्षुर्गोलक-तदर्थयोः सन्निकर्षः संयोगादिलक्षणः सिद्धः । न चावयविलक्षणं गोलकादि वस्तु सिद्धम् तद्ग्राहकाभिमतप्रमाणस्य निषिद्धत्वात् । न च तदाधारः संयोगादिकः सम्बन्धः समस्ति पराभ्युपगतस्य तस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च । योऽपि कथंचित् पदार्थाव्यतिरिक्तः संश्लेषलक्षणः काष्ठ-जतुनोरिव सम्बन्धः प्रसिद्धः सोऽपि व्यवहितेन पर्वतादिना स्वविषयेण सह चक्षुर्गोलकस्यानुपपन्नः तत्प्रसाधकप्रमाणाभावात् । अथास्ति तत्प्रसाधकं प्रमाणम् । ननु तत् किं प्रत्यक्षम्, उतानुमानम्? न तावत् प्रत्यक्षमत्र विषये प्रवर्तितुमुत्सहते न हि 'देवदत्तचक्षुस्तद्विषयेण पर्वतादिना सम्बद्धम्' इत्यसदादेरक्षप्रभवा प्रतिपत्तिः । अथानुमानं तत्सन्निकर्षप्रसाधनाय प्रवर्तते । ननु किं तदनुमानमिति वक्तव्यम्? अर्थ 'चक्षुः प्राप्तार्थप्रकाशकम् बाह्येन्द्रियत्वात् त्वगादिवत्' इत्येतदनुमानं तत्सन्निकर्षप्रसाधनम्, न; चक्षुर्गोलक-तदर्थयोरध्यक्षेणैवासन्निकृष्टयोः प्रतिपत्तेरध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेनास्य हेतोः कालात्ययापदिष्टत्वात् अवयविलक्षणस्य च चक्षुषोऽसिद्धेराश्रयासिद्धश्च हेतुः । अत एव स्वरूपासिद्धश्च न ह्यविद्यमानस्यावयविनो बाह्येन्द्रियत्वमुपपन्नम् 'त्वगादिवत्' इति निदर्शनमपि साध्यसाधनविकलम् । अथ चक्षुःशब्देनात्र तद्रश्मयोऽभिधीयन्त इति न प्रागुक्तदोषावकाशः, न; तेषामसिद्धेः इतरथाऽस्यानुमानस्य वैफल्यापत्तेराश्रयासिद्धो हेतुः । अथात एवानुमानात् तत्सिद्धेर्नायं दोषः, न; इतरेतराश्रयदोषप्रसक्तेः । तथाहि-तद्रश्मिसिद्धावाश्रयासिद्धत्वदोषपरिहारः तस्मिंश्च सत्यतो हेतोस्तत्सिद्धिरिति व्यक्तमितरेतराश्रयत्वम् अत एव स्वरूपासिद्धिरपि हेतोः तेषामसिद्धौ तदाश्रयबाह्येन्द्रियत्वासिद्धेः । यदि पुनर्गोलकाद् बहिर्भूता रश्मयश्चक्षुःशब्दवाच्या अर्थप्रकाशकास्तर्हि गोलकस्याञ्जनादिना संस्कार

---

१ "अवयवि"–बृ० ल० टि० । २ "चक्षुर्विषय"—बृ० ल० टि० । ३ साङ्ख्य-नैयायिक-वैशेषिक-जैमिनीयाः सर्वेषां बहिरिन्द्रियाणां प्राप्यकारित्वं मन्यन्ते । बौद्धास्त्वग्-घ्राण-रसनानां प्राप्यकारित्वम् चक्षुः-श्रोत्रयोरप्राप्यकारित्वं च स्वीकुर्वते । जैनास्तु त्वग्-घ्राण-रसन-श्रोत्राणां प्राप्यकारित्वम् चक्षुषोऽप्राप्यकारित्वं च साधयन्ति । तदेवं साङ्ख्य-नैयायिक-वैशेषिक-जैमिनीय-बौद्ध-जैनतर्कग्रन्थेषु प्राप्यकारित्वाप्राप्यकारित्वविषयो वादः सविस्तरं चर्चितो दृश्यते । अत्र च तत्तद्ग्रन्थीयतद्वादस्थलप्रदर्शनमात्रं क्रियते क्रमेण—

सांख्यद० १, ८७ पृ० ६२ पं० २१–। मुक्तावं० पृ० २९३ पं० १–२९४ ।

न्यायद० ३,१, ३३—५३ पृ० २५८—२७४ । न्यायवा० पृ० ३३ पं० १५—३६ पं० २१ तथा पृ० ३७३ पं० ४—३८५ पं० ६ । न्यायवा० ता० टी० पृ० ११६ पं० १८–१२३ पं० १ तथा पृ० ५२० पं० २२–५२६ पं० ११ । न्यायमञ्ज० आ० ८ पृ० ४७७ पं० २५–४८० पं० २० ।

प्रशस्त० कं० पृ० २३ पं० ४– ।

१, १, १३ शाबरभा० पृ० १९–२० । श्लो० वा० पृ० १४६–१४९ तथा पृ० ७४०–७८१ । शास्त्रदीपिका अधि० ६ पृ० १३३–१४० ।

स्फुटार्थअभि० पृ० ८४–९४ ।

प्रज्ञाप० १५, पृ० २९८ प्र० पं० ६–१० । आवश्यकनि० गा० ५ । विशेषाव० भा० गा० २०४–२१२ पृ० १२२–१२७ तथा गा० ३३६–३४० पृ० १९९–२०० । १, १९ तत्त्वार्थभाष्यव्याख्या पृ० ८७ पं० २३—। राजवा० पृ० ४७ पं० ३३–४८ पं० ३२ । तत्त्वार्थश्लो० वा० पृ० २२९ श्लो० १–२३६ श्लो० ९८ । न्यायकु० लि० पृ० ३६ द्वि० पं० ११– ४२ । प्रमेयक० पृ० ५९ प्र० पं० ११– ६२ प्र० पं० ५ । २, ३ स्याद्वादर० पृ० ३१८ पं० ११–३४१ आ० । २, ५ रत्नाकरावं० पृ० ५१ पं० २२– ६० श्लो० ९३ ।

अन्तरिन्द्रियस्य मनसस्तु प्राप्यकारित्वं पुष्णाति सांख्यवेदान्तप्रक्रिया न पुनस्तद्भिन्नदर्शनप्रक्रिया ।

४ "त्वगिन्द्रियलक्षणावयविनोऽस्माभिः प्राप्तार्थप्रकाशकत्वं बाह्येन्द्रियत्वं च नेष्यते अवयविनोऽभावात्"–बृ० ल० टि० ।

उन्मीलनादिकश्च व्यापारो वैयर्थ्यमनुभवेत् । अथ गोलकाश्रयास्त इति तन्निमीलने असंस्कारे वा तेषामपि स्थगनमसंस्कृतिश्चेति विषयं प्रति गमनं तत्प्रकाशनं च न स्यात् अतस्तदर्थं तदुन्मीलनं तत्संस्कारश्च न वैयर्थ्यमनुभवेत् तर्हि गोलकानुषक्तकामलादेः प्रकाशकत्वं तेषां स्यात् न हि प्रदीपः स्खलन्नं शलाकादिकं न प्रकाशयतीति दृष्टम् । यैरपि 'गोलकान्तर्गतं तेजोद्रव्यमस्ति तदाश्रितास्ते' इत्यभ्युपगतं तेषामपीदं दूषणं समानम् न हि काचकूपिकान्तर्गताः प्रदीपादिरश्मयस्ततो निर्गच्छन्तस्तद्योगिनमर्थं न प्रकाशयन्ति । तदेवं रश्मीनामसिद्धेर्न ते चक्षुःशब्दाभिधेयाः । अथ रसनादयो बाह्येन्द्रियत्वात् प्राप्तार्थप्रकाशका उपलब्धाः बाह्येन्द्रियं च चक्षुः ततस्तदपि प्राप्तार्थप्रकाशकम् न च गोलकस्य बाह्यार्थप्राप्तिः सम्भविनीति पारिशेष्यात् तद्रश्मीनां तत्प्राप्तिरिति रश्मिसिद्धिः, न; अत्यासन्नमलाञ्जनशलाकादेः प्रकाशप्रसक्तेः । किञ्च, यदि गोलकाद्निर्गत्य बाह्यार्थेनाभिसंम्बध्य तद्रश्मयोऽर्थं प्रकाशयन्ति तर्ह्यर्थं प्रत्युपसर्पन्तस्त उपलभ्येरन् रूप-स्पर्शविशेषवतां तैजसानां वह्न्यादिवत् सतामनुपलम्भे निमित्ताभावात् न चोपलभ्यन्त इत्युपलब्धिलक्षणप्राप्तानामनुपलम्भादसत्त्वम् । अनुद्भूतरूप-स्पर्शत्वादनुपलभ्यास्त इति चेत् किं पुनरनुद्भूतरूप-स्पर्शं तेजोद्रव्यमुपलब्धं येनैवं कल्पना भवेत्? अथ दृश्यते सतोरपि तैजसरूप-स्पर्शयोर्नीर-हेम्नोरनुद्भूतिः, न; स्वर्ण-तप्तोदकयोस्तेजस्त्वासिद्धेः दृष्टानुसारेण चानुपलभ्यमानभावप्रकल्पनाः प्रभवन्ति अन्यथा रात्रौ भास्करकराः सन्तोऽपि नोपलभ्यन्ते अनुद्भूतरूपस्पर्शत्वान्नायनरश्मिवदित्यपि कल्पनाप्रसक्तेः । अथ यद्यपि नयना रश्मयोऽध्यक्षतो न प्रतीयन्ते तथाप्यनुमानतः प्रतीयन्ते अनुमानं च तेजोरश्मिवत् चक्षू रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपकलिकावदिति तद्रश्मिसत्त्वप्रतिपादकम् नैवं भास्करकरसत्त्वप्रतिपादकं क्षपायामनुमानमस्ति, न; निशायां बहुलान्धकारायां वृषदंशचक्षुर्बाह्यालोकसव्यपेक्षमर्थप्रकाशकं चक्षुष्ट्वात् दिवा पुरुषचक्षुर्वदित्यस्यानुमानस्य रात्रौ तत्सत्त्वप्रतिपादकस्य भावात् । अथ वृषदंशादेश्चाक्षुषं तेजोऽस्तीत्यर्थसिद्धेर्न किञ्चिद् भास्करज्योतिषाऽनुद्भूतरूपेण प्रकल्पितेन तर्हि मनुष्यादीनामपि तदस्तीति किमुद्भूतरूपेण बाह्यतेजसा तेषां कृत्यम्? अथ यद् यथा दृश्यते तत् तथाऽभ्युपगम्यत इति मनुष्यादीनां नायनं सौर्यं च तेजो विज्ञानकारणं दृश्यते ततस्तथैव तत् कल्प्यते क्षपायां मार्जारादेर्नायनमेव दृश्यते अतस्तदेव तत्कारणं प्रकल्प्यते न सौर्यम् भवेदेवं यदि तथादर्शनं स्यात् यावता यथा रात्रौ भास्करकरादर्शनं तथा दिवा चाक्षुषरश्म्यदर्शनम् यथा वा दिवा भास्करकरावभासनं तथा क्षपायां वृषदंशनेत्रालोकावलोकनम् विशेषस्त्वयम्-एकदा भास्कररश्मयोऽन्यदा नायनास्तेऽनुमेया इति । अथान्धकारावगुण्ठनिशीथिनीसमयेऽपि भास्करकरसंभवे नक्तंचराणामिव नराणामपि रूपदर्शनं स्यात्, न; सन्तोऽपि तदा तैत्करा न नराणां रूपदर्शनजननप्रत्यलाः यथा त एव वासरे उलूकादीनाम् भावशक्तीनां विचित्रत्वात् । तस्मादनुपलम्भात् क्षपायां यथा न भास्करकरास्तथा नायना रश्मयोऽन्यैदेति स्थितम् । यदपि परेणात्रोक्तम् 'दूरस्थितकुड्यादिप्रतिफलितानामन्तराले गच्छतां प्रदीपरश्मीनां सतामप्यनुपलम्भदर्शनान्नानुपलम्भात् तदभावसिद्धिः' इति, तदप्यनेनैव निरस्तम्; रविरश्मीनामपि क्षपायामभावासिद्धिप्रसक्तेः । किञ्च, योगिन आत्ममनःसंयोगो यदा सदसद्वर्गालम्बनमेकं ज्ञानं जनयति तदा सकलसदसद्वर्गस्तस्य चेन्न सहकारी तर्हि "अर्थवत् प्रमाणम्" [वात्स्या० भा० पृ० १] इत्यत्र "अर्थः सहकारी यस्य विशिष्टप्रमितौ प्रमातृप्रमेयाभ्यामर्थान्तरं तदर्थवत् प्रमाणम्" [ ] इति विरुध्यते । सहकारी चेदसौ देशाद्यन्तरितोऽपि तर्हि तत्कुड्यादेः प्रभासुरतयोत्पन्नौ प्रदीपो देशाव्यवहितोऽपि सहकारीति नान्तराले तद्रश्मिसिद्धिः । ततो न तैरनुपलम्भव्यभिचारः अत एव नाप्यनुमानम् उदकं तेज उखादिव्यवहितमप्युष्णस्पर्शं जनयिष्यतीति नोदके उष्णस्पर्शोपलम्भादनुद्भूतभास्वररूपस्य तेजसः सिद्धिः । यदपि चक्षुः स्वरश्मिसम्बद्धार्थप्रकाशकं तैजसत्वात् प्रदीपवदित्यनुमानम् अनेन किं चक्षुषो रश्मयः साध्यन्ते उतान्यतः सिद्धानां ग्राह्यार्थसम्बन्धस्तेषां साध्यत इति? आद्ये पक्षे तरुणनारीनयनानां दुग्धधवलतया भासुर-

---

१-पः प्रल-बृ० आ० हा० वि० । २-सम्बन्ध्य बृ० ल० विना । ३ बहुला-बृ० आ० हा० वि० । ४ "चाक्षुषं तेजः"-बृ० ल० टि० । ५ "भास्करसम्बन्धिना"–बृ० ल० टि० । ६-व रूप-ल० वा० बा० । ७ "रवि–" बृ० ल० टि० । ८ "दिने"–बृ० ल० टि० । ९-कुड्यादि-भां० मां० विना । १०-ज्ञानं न ज-वा० बा० भां० मां० विना । ११-प्युपलब्धं रूप-मां० । -प्युपलब्ध रूप-भां० ।

रश्मिरहितानामध्यक्षतः प्रतीतेरध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टो हेतुः। अथ यद्ध्यक्षग्रहणयोग्यं साध्यमध्यक्षत एव तत्र नोपलभ्यते तत्र तद्बाधः कर्मणः[1] यथाऽनुष्णोऽग्निः सत्त्वादिति न चाध्यक्षग्रहणयोग्या नायना रश्मयः सदा तेषामदृश्यत्वात्, न; पृथिव्यादिद्रव्येऽपि तेषां साध्यत्वप्रसक्तेः। तथाहि-रश्मिवन्तो भूम्यादयः सत्त्वात् प्रदीपवदित्यनुमातुं शक्यत्वात् यथैव हि तैजसत्वं प्रदीपे रश्मिवत्तया व्याप्तमुपलब्धं तथा सत्त्वमपि। अस्याऽन्यथाऽपि संभावना न तैजसत्वस्येति कुतो विभागः? अथ भूम्यादेस्तत्साधनेऽध्यक्षबाधः, न; दुग्धवलक्षाबलालोचनानामपि तत्साधने[2] तद्विरोधः समानः। अथ वृषदंशचक्षुषोऽध्यक्षतो वीक्ष्यन्ते रश्मय इति कथं तद्विरोधः? ननु यदि तत्र त ईक्ष्यन्तेऽन्यत्र किमायातम्? तत एवान्यत्र तत्साधने हेम्नि पीतत्वप्रतीतौ रजते पीतत्वप्रसङ्गः प्रमाणबाधनमुभयत्र तुल्यम्। अथ तत्र[3] तत्प्रतीतेर्नान्यत्र सत्त्वेन ते साध्यन्ते अपि त्वनुमानतः तत् तु दृष्टान्तमात्रम्; नन्वत्र 'नेत्रत्वात्' इति यदि हेतुः 'तैजसत्वात्' इत्यस्याऽऽनर्थक्यम् अत एव प्रकृतसिद्धेः अध्यक्षबाधा चात्रापि तदवस्थैव 'तैजसत्वात्' इत्यस्य हेतुत्वे प्रदीपदृष्टान्तेनैवार्थसिद्धेर्वृषदंशनेत्रनिदर्शनमनर्थकम्। न च तस्य तैजसत्वं परं प्रति सिद्धमिति तत्साधनविकलता तदपेक्षया दृष्टान्तदोषः। न च रश्मिवत्त्वाद् बिडाललोचनस्य तैजसत्वं सिद्धम् मण्यादीनामपि तत्प्रसक्तेः। न च रश्मिवत्त्वान्मण्यादीनामपि तैजसत्वम् मूलोष्णप्रभाया एव तैजसत्वात् अन्यथा तरुणतरुकिसलयानामपि तैजसत्वं स्यात्। न च नारीनयनानां तैजसत्वं सिद्धमित्यसिद्धो हेतुः। न च रश्मिवत्त्वादेव तेषां तत्[4] साध्यते इतरेतराश्रयदोषप्रसक्तेः—सिद्धे भाँस्वरप्रभावत्वे तैजसत्वसिद्धिस्ततश्च भास्वरप्रभावत्वसिद्धिरिति कथं नेतरेतराश्रयदोषः? अथ तैजसं चक्षू रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवदित्यतोऽनुमानात् तैजसत्वसिद्धेर्नेतरेतराश्रयदोषः। नन्वत्र भास्वररूपोष्णस्पर्शतेजोद्रव्यसमवेतगोलकस्वभावं कार्यद्रव्यं यदि 'चक्षुः'शब्दवाच्यं तस्य तैजसत्वसाधने अध्यक्षविरोधः तद्विपरीतरूपस्पर्शाधारतयाऽध्यक्षतः प्रतिपत्तेः। तथाहि-अबला-पारावत-बलीवर्दादीनां चक्षुषो धवल-लोहित-नीलरूपतयोष्णस्पर्शविकलतया चाध्यक्षतः प्रतिपत्तिः सिद्धैव। न च गोलकव्यतिरिक्तं चक्षुस्तद्ग्राहकप्रमाणाभावात् सिद्धमित्याश्रयासिद्धः स्वरूपासिद्धश्च, रूपस्यैव प्रकाशकत्वादिति हेतुरनैकान्तिकश्च तुहिनकरकरनिकरेण तस्य रूपस्यैव प्रकाशकत्वेऽप्यतैजसत्वात्। न चास्यापि पक्षीकरणाददोषः व्यभिचारविषयस्य पक्षीकरणादैकान्तिकत्वे सर्वत्रानैकान्तिकहेत्वभावप्रसक्तेः। न चैवं जलानलयोर्विशेषगुणसङ्करात् भेदः सिध्येत्। नं च तन्निकरान्तर्गतं तेजस्तत्रापि रूपप्रकाशकमिति न व्यभिचारः प्रदीपेऽप्यन्यस्य तदन्तर्गतस्य तत्प्रकाशकस्य प्रकल्पनात् दृष्टान्तासिद्धिप्रसक्तेः। प्रत्यक्षबाधोभयत्र चक्षूरूपसम्बन्धेन रूपस्यैव प्रकाशकेन च व्यभिचारः। न चासौ रसादेरपि प्रकाशकः इन्द्रियान्तरपरिकल्पनावैफल्यप्रसक्तेः। रूपप्रकाशकत्वं च रूपज्ञानजनकत्वम् तच्च नीलरूपेऽपि विद्यते अन्यथा "अर्थवत् प्रमाणम्" [वात्स्या० भा० पृ० १] इत्यत्रार्थसहकारित्वं तस्य न स्यादिति तेन व्यभिचारः। अथ द्रव्यत्वे सति करणस्य रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वादिति विशेषणान्न सम्बन्ध-रूपाभ्यामनेकान्तः। ननु यथा सम्बन्धादेरद्रव्यादेरप्यतैजसस्य रूपज्ञानजननं तथा चक्षुषोऽपि किं न स्यात्? न च 'अदर्शनात्' इत्युत्तरम् असर्वदर्शिदर्शननिवृत्तेर्भावानिवर्तकत्वात्। प्रदीपवदिति दृष्टान्तस्यापि रूपप्रकाशकत्वासिद्धेः साधनविकलता दृष्टान्तस्य। न च

१-द्बाधकः क-बृ० ल० वा० बा० विना। २ "पक्षस्य"—बृ० ल० टि०। ३-धने तु त-बृ० आ० हा० वि०। ४ "वृषदंशनेत्रे"-बृ० ल० टि०। ५ "रश्मिप्रतीतेः"-बृ० ल० टि०। ६ "नारीनयनानां तैजसत्वम्"-बृ० ल० टि०। ७ भास्कर-भां० मां०। ८-त्तिस्तथा सि-भां० मां०। ९-णादनैका-बृ० वा० बा०। १० "अयमभिप्रायः-यथा न हिमकरकरा रूपप्रकाशकाः किन्तु तदन्तर्गतमन्यदेव तेजो रूपप्रकाशकम्"-ल० टि०। "अयमभिप्रायः-यथा न हिमकरकरा रूपप्रकाशकाः किन्त्वन्यदेव तेषु अन्तर्गतं रूपं तेजः तत् तत्प्रकाशकमिति"-बृ० टि०। ११ "हिमकरनिकर"-बृ० ल० टि०। १२ "दीपेऽपि वक्तुं शक्यम्-न दीपो रूपप्रकाशकः किन्तु तदन्तर्गतमन्यदेव तेजो रूपप्रकाशकम्"-बृ० ल० टि०। १३ "सन्निकर्षो हि चक्षूरूपसंबन्धरूपः स च रूपप्रकाशकोऽपि तै-(न तै-)जसतामनुभवति"-बृ० ल० टि०। १४ "न च तैजसत्वं रूपप्रकाशकत्वेऽपि"-बृ० ल० टि०। १५-रूपे वि- बृ० आ० हा० वि० विना।

प्रदीपे सति प्रतिनियतप्राणिनां रूपदर्शनसंभवात् तस्य रूपप्रकाशकत्वम् अञ्जनादिसंस्कृतचक्षुषां तदभावेऽपि रूपदर्शनसद्भावात्। न च यदन्तरेणापि यद् भवति तत् तत्कार्यम् इतरत् तत्कारणम् अन्वयव्यतिरेकनिबन्धनत्वात् तद्भावस्य। अथ प्रदीपे सति यद् दर्शनं तत् तदभावे न भवति यत्तु तदभावे भवति न तत् तत्रापि तत्सदृशम्। न चान्यस्य व्यभिचारे अन्यस्यासौ[2] अतिप्रसङ्गात्, असदेतत्; यतो यादृशमेव रूपदर्शनमालोके संस्कृतचक्षुषाम् तदभावेऽपि तादृशमेव तद्भेदानवधारणात्। तथा[3] हि तद्भेदकल्पने न किञ्चित् कस्यचिद् वस्तुनः[4] सदृशमिति सौगतमतानुप्रवेशः स्यात्। रूप-प्रदीपयोश्च सहोत्पन्नयोर्युगपद्दर्शने प्रदीपवत् रूपस्यापि प्रदीपप्रकाशकत्वाद् रूपं तैजसं भवेत्[5] अन्यथा न प्रदीपोऽपि तैजसः स्यात् तज्जनकत्वाविशेषात् तयोः। न चान्यदा प्रदीपस्यैव रूपप्रकाशकत्वोपलब्धेः स एव तदापि प्रकाशकोऽन्यदाऽप्यञ्जनादिसंस्कृतचक्षुषां तदभावेऽपि रूपदर्शनसद्भावात् तस्य तत्प्रकाशकत्वासिद्धेः। अथ तस्मिन् सति कदाचित् कस्यचित् रूपदर्शनात् तस्य तत्प्रदर्शकत्वं तर्हि नक्तंचराणां संतमसे रूपदर्शनात् तदभावे च तदभावात् हेतुफलभावस्य सर्वत्र तन्निबन्धनत्वात् तमोऽपि रूपप्रकाशकत्वात् प्रदीपवत् तैजसं भवेत्। अन्यथा हेतोरनेनैव व्यभिचारः स्यात्।

[अनुषङ्गात् तमसो भावाभावत्वप्रक्रमः]

आलोकाभाव[13] एव तम इति चेत्, न; आलोकस्यापि तमोऽभावरूपताप्रसक्तेः। आलोकस्य तरतमादिरूपतयोपलम्भात् नाभावरूपतेति चेत् न, तमस्यप्यस्य समानत्वात्। यथा चालोकः प्रतिभासविषयस्तथा तमोऽपि तद्विषयः। न चालोकप्रतिभासाभाव एव तमःप्रतिभासः इतरत्राप्यस्य समानत्वात्। न च चक्षुर्व्यापाराभावेऽपि तत्प्रतिभाससंवेदनादालोकप्रतिभासाभाव एव तमःप्रतिभासः प्रतिनियतसामग्रीप्रभवविज्ञानावभासित्वात् प्रतिनियतभावानां तमसस्तदतत्प्रभवविज्ञानावभासित्वात् आलोकस्य च तद्विपर्ययात् यद्वा आलोकस्याप्यचक्षुर्जे सत्यस्वप्नज्ञाने प्रतिभासनात् तमोज्ञानाभावरूपता भवेत्। अथालोकस्य रूपप्रतिपत्तौ हेतुभावान्नाभावरूपता तर्हि तमसोऽपि नक्तंचररूपप्रतिपत्तौ हेतुभावो विद्यत इति नाभावरूपता भवेत्। तदेवमालोकस्य वस्तुत्वे तमसोऽपि तदस्त्विति[14] तेन हेतोर्व्यभिचारः[15]। भवतु वा आलोकाभाव एव तमस्तथापि व्यभिचारापरिहारः तदभावस्यातैजसस्यापि तत्प्रकाशकत्वात्[16]। अथ तमोऽभावेऽपि रूपदर्शनान्न तस्य तत्प्रकाशकत्वं तर्हि नक्तंचराणामालोकाभावेऽपि रूपदर्शनादालोकस्यापि न तत्प्रकाशकत्वं भवेत्। अथास्मदादीनां

१ "दीपाभावे"—बृ० ल० टि०। २ "व्यभिचारः"-बृ० ल० टि०। ३ अत्र 'तथापि' पाठः सम्यक् स्यात्। ४-स्तुतः स-बृ० ल०। ५ "प्रदीप-रूपयोः"-बृ०ल० टि०। ६ "आलोकाभावे"-बृ० ल० टि०। ७ "दीप-" बृ० ल० टि०। ८-स्य प्र-बृ० आ० हा० वि०। ९ "तमः-" बृ० ल० टि०। १० "रूपदर्शन-" बृ० ल० टि०। ११ "रूपप्रकाशकत्वादित्यस्य"-ल० टि०। १२ "तमसा"-ल० टि०।

१३ तमसः स्वरूपे मतद्वयम्-केचित् तमो भावरूपं मन्यन्ते केचित्त्वभावरूपम्। तत्र जैनाः पुद्गलपरिणामतया, भर्तृहरिप्रमुखवैयाकरणा अणुपरिणामतया, सांख्याः प्रकृतिपरिणामतया मीमांसकाश्च अभावस्य पदार्थान्तरत्वाभावेन च तमसो भावरूपतां प्रतिपन्नाः। नैयायिक-वैशेषिकौ तु तमसस्तेजोऽभावरूपत्वेन अभावरूपतां स्वीकृतवन्तः। तमोभावाभावचर्चाविषयाणि तत्तद्ग्रन्थस्थलानि यथा—५, २४ राजवा० वा० १९, २०, २१ पृ० २३३। ५, २४ तत्त्वार्थभाष्यव्याख्या पृ० ३६३ पं० ६- ३६४ पं० १६। प्रमेयक० पृ० ६५ प्र० पं० २-। ५, ८ स्याद्वादर० पृ० ८४९ पं० १९—८६७ पं० ९ आ०। २, २१ रत्नाकराव० पृ० ६४-७२। स्याद्वा० का० ५ पृ० १६ पं० ७-२१।

"अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः। छायाऽऽतपतमःशब्दभावेन परिणामिनः॥
स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः। अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः॥"
—वाक्यप० प्र० का० श्लो० १११-११२।

न्यायवा० ता० टी० पृ० ३४५ पं० ४—१६। प्रशस्त० कं० पृ० ९ पं० १- १० पं० ८।

१४ "वस्तुत्वम्"-बृ० टि०। १५ "'रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्' इत्यस्य"-बृ० ल० टि०। १६ "नक्तंचरादीनां रूपप्रकाशकत्वात्"-बृ० ल० टि०।

किमित्यालोकाभावे रूपदर्शनं न भवति? भवत्येव कथमन्यथान्धकारसाक्षात्करणम्? घटरूपदर्शनं किं नेति चेत् बहलतमोव्यवधानात् तीव्रालोकतिरोहितालरूपवत् । प्रदीपोपादानं तु तस्य व्यवच्छेदार्थम् । अत एवान्यत्रोक्तम्—

"तमोनिरोधे वीक्षन्ते तमसानावृत्तं(वृतं) परम् ।
घटादिकम्" [ ] इत्यादि ।

प्रदीपस्य च घटरूपव्यवधायकतमोऽपनेतृत्वे 'तैजसं चक्षू रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात् प्रदीपवत्' इति साधनविकलत्वाद् दृष्टान्तस्य निरस्तं द्रष्टव्यम् ।

न चान्यत एव तस्य रश्मयः सिद्धाः केवलमनेन प्राप्तार्थप्रकाशकत्वं तेषां साध्यत इति वक्तव्यम् तत्सद्भावप्रतिपादकस्य प्रमाणस्याभावात् । अथ यद्यप्राप्तार्थप्रकाशकं चक्षुः अविशेषेण सर्वं प्रकाशयेत्, न; भावानां नियतशक्तित्वात् । यतो य एव यत्र योग्यः स एव तत् प्रकाशयति अन्यथा संयुक्तसमवायाविशेषाच्चक्षुर्यथा कुवलयरूपं प्रकाशयति तथा तद्गन्धमपि प्रकाशयेत् तथा चेन्द्रियान्तरवैफल्यम् । अथ योग्यताऽभावान्न तत् तद्गन्धमवभासयति तर्हि योग्यताऽभावात् प्राप्त्यभावेऽपि नातिव्यवहितमतिसन्निकृष्टं वा तद्रूपं प्रकाशयतीति सर्वत्र योग्यतैवाश्रयणीया नापरं सम्बन्धप्रकल्पनेन कृत्यम् 'रश्मयो वा कुतो न लोकान्तमुपयान्ति'? इति प्रेरणायां परेणाप्ययोग्यतैव तत्र इतरत्र तु योग्यता प्रतिविधानत्वेन वक्तव्या । तथा, यस्य कारणाद् भिन्नमेव कार्यं तस्य भेदाविशेषात् सर्वं सर्वस्मात् कुतो नोत्पद्यत इति चोद्ये योग्यतातो नापरमुत्तरमिति सैवात्राप्यभ्युपगमनीया । किञ्च, यदि प्राप्तार्थप्रकाशकं चक्षुः स्फटिकाद्यन्तरितवस्तुप्रकाशकं न स्यात् तद्रश्मीनां विषयं प्रति गच्छतां स्फटिकादिना प्रतिबन्धात् । न च तैस्तस्य ध्वस्तत्वादयमदोषः तद्व्यवहितवस्तुदर्शनसमये स्फटिकादेर्व्यवधायकस्यादर्शनप्रसङ्गात् तदुपरि व्यवस्थापितस्य चाधारविनाशात् पातप्रसक्तेश्च न हि परमाणवो दृश्याः कस्यचिदाधारभूता वा अवयविकल्पनावैयर्थ्यप्रसक्तेः । अन्यस्यावयविन आशूत्पत्तेरदोषश्चेत्, न; तदा तद्व्यवहितस्यादर्शनप्रसक्तेः । तथा च यदा व्यवधायकदर्शनं न तदा व्यवहितदर्शनम् यदा च व्यवहितदर्शनं न तदा व्यवधायकदर्शनमिति प्रसज्येत । न चैवम् युगपद् द्वयोर्दर्शनात् । अथाशूत्पत्तेर्निरन्तरं व्यवहितप्रतिपत्तिविभ्रमस्तर्हि तदभावस्यापि आशुवृत्तेरभावप्रतिपत्तिविभ्रमस्तथा किं न भवेत्? भावपक्षस्य बलीयस्त्वादिति चेत्, न; भावाभावयोः परस्परं स्वकार्यकरणं प्रत्यविशेषात् । किञ्च, कलुषजलाद्यावृतस्यार्थस्य किं न ते प्रकाशकाः स्फटिकादेरिव जलादेरपि भेदे तेषां सामर्थ्यप्रतिघातात्? न च जलेन ते प्रतिहन्यन्ते स्वच्छजलेनापि तेषां प्रतिघातात् तद्व्यवहितस्याप्यप्रकाशनप्रसङ्गात् । अथ तेषां तत्र प्रकाशनयोग्यता तर्हि तत एव तेऽप्राप्तमप्यर्थं प्रकाशयिष्यन्तीति व्यर्थं संयुक्तसमवायादिसन्निकर्षप्रकल्पनम् । अपि च, समवायसम्बन्धनिषेधे चक्षुषो घटरूपेण संयुक्तसमवायप्रतिबन्धस्याभावात् तद्रूपाप्रकाशकत्वात् कथं नासिद्धो हेतुः 'रूपादीनां मध्ये रूपस्यैव प्रकाशकत्वात्' इति? अथ 'इह तन्तुषु पटः' इति बुद्धिः सम्बन्धनिबन्धना तद्बुद्धित्वात् 'इह कुण्डे दधि' इति बुद्धिवत् इत्यतोऽनुमानात् समवायसिद्धेः न संयुक्तसमवायसम्बन्धाभावः, न; 'इह'बुद्ध्या सम्बन्धमात्रसाधने घट-तद्रूपयोः कथञ्चित्तादात्म्यसम्बन्धाभ्युपगमात् सिद्धसाध्यताप्रसङ्गात् । अथ कथञ्चित्तादात्म्यसम्बन्धः तद्बुद्धिनिमित्तत्वेन न प्रतिपन्न इति कथमतोऽसौ साध्यस्तर्हि समवायेऽप्येतत् समानम् । तथापि ततस्तत्साधनेऽन्यत्र कः प्रद्वेषः? अथ घट-तद्रूपयोः कथञ्चित्तादात्म्यसम्बन्धो विरोधान्नेष्यते तर्हि भावाभावयोः कथञ्चित्तादात्म्याभावे समवायादेरसंभवादसम्बन्धः स्यात् तथा च अभावेनाक्षाणां सन्निकर्षाभावान्नाक्षतस्तत्प्रतिपत्तिः स्यात् । विशेषणविशेष्यभावस्य भावाभावयोः सम्बन्धस्य भावान्नायं दोष इति चेत्, न; भावाभावाभ्यां

१ "जनाः"–बृ० ल० टि० । २–**पस्य व्य**–भां० मां० । ३–**क्षुः स्फुटि**–ल० वा० बा० । ४–**तां स्फुटि**–ल० वा० बा० । ५ "प्रतिबन्धस्य"–बृ० ल० टि० । ६–**मये स्फुटि**– ल० वा० बा० । ७–**स्य बाधा**–बृ० ल० वा० बा० विना । ८–**न्तर व्य**–वा० बा० । "निरन्तरस्फटिकादिविभ्रमः"–प्रमेयक० पृ० ६१ द्वि० पं० ६ । ९ "अवयवि–" बृ० ल० टि० । १० "रश्मयः"–बृ० ल० टि० । ११–**काः स्फुटि**–वा० बा० । १२ "स्वच्छजल–" बृ० ल० टि० । १३ **व्यर्थं समवा**–बृ० आ० हा० वि० । १४ अत्र प्रशस्त० कं० गतं समवायनिरूपणं द्रष्टव्यम्–पृ० ३२४–३२५ । १५–**न प्र**–वा० बा० ।

तस्यानर्थान्तरत्वे तावेव स एव वा स्यात् । अर्थान्तरत्वे भावाभावयोः सद्भावेऽपि न विशेषणविशेष्यरूपता ताभ्यां तस्यासम्बन्धात् सम्बन्धे वा ताभ्यां तस्यापरेण सम्बन्धनिमित्तेन विशेषणविशेष्यभावेन भवितव्यम् । तस्यापि सम्बन्धनिमित्तेनापरेण तेनेत्यनवस्था भवेत् । तस्मात् कथञ्चित् तयोस्तादात्म्यमभ्युपगन्तव्यम् । अन्यथाऽभावस्याध्यक्षप्रमाणग्राह्यता न भवेत् । तदेवं समवायासिद्धेर्नाक्षस्य रूपेण सम्बन्ध इति न तेन तस्य ग्रहणं परपक्षे भवेदिति "चक्षुषो घटेन संयोग एव युतसिद्धत्वात् द्रव्यसमवेतानां गुणादीनां संयुक्तसमवाय एव" [ ] इत्यादि षोढा सन्निकर्षप्रतिपादनमयुक्तम् संयोग-समवाय-विशेषणविशेष्यभावसम्बन्धानामभावेन तदनुपपत्तेः संयोगादेश्चाभावः प्रतिपादित एव यथावसरमिति न पुनः प्रतिपाद्यते ।

अथ यथाऽस्माकं चक्षुषः प्राप्तार्थप्रकाशकत्वं प्रमाणाभावान्न सिद्धं तथा भवतोऽप्यप्राप्तार्थप्रकाशकत्वं तस्य तत एव न सिद्धमिति कथम्— १०

"रूवं पुण पासइ अपुट्ठं तु" [आवश्यकनि० गा० ५]

इत्यभिधानं युक्तिसङ्गतम्, न; तस्याप्राप्तार्थप्रकाशने अनुमानसद्भावात् । तथाहि–अप्राप्तार्थप्रकाशकं चक्षुः अत्यासन्नार्थाप्रकाशकत्वात् यत् पुनः प्राप्तार्थप्रकाशकं तदत्यासन्नप्रकाशकमुपलब्धम् यथा श्रोत्रादि अत्यासन्नार्थाप्रकाशकं च चक्षुस्तस्मादप्राप्तार्थप्रकाशकमिति व्यतिरेकी हेतुः । न चायमसिद्धो हेतुः गोलकस्थस्य कामलादेः पक्ष्मपुटगतस्य चाञ्जनादेस्तेनाप्रकाशनात् कथमन्यथा दर्पणादेः परोपदेशस्य वा तत्प्रतिपत्त्यर्थमुपादानं भवेत्? अथ साध्यनिवृत्तौ नियमेन यतः साधनं निवर्तते स वैधर्म्यदृष्टान्तः जीवच्छरीरस्य सात्मकत्वे साध्ये घट इव आत्मशरीरसंयोगविशेषे सात्मकत्वे निवर्तमाने नियमेन ततः प्राणादिमत्त्वनिवृत्तेः न च श्रोत्रादेरप्राप्तार्थप्रकाशकत्वे निवर्तमानेऽत्यासन्नार्थाप्रकाशकत्वं नियमेन व्यावर्तते चक्षुष इव तस्याप्यत्यासन्नार्थाप्रकाशकत्वात् ततो नायं व्यतिरेकी हेतुः, न; कर्णशष्कुलीप्रविष्टमशकादिशब्दस्य तेन प्रकाशनात् स्पर्शनादौ त्वविवाद एव । "चक्षुः-श्रोत्र-मनसामप्राप्तार्थकारित्वम्" [ ] इति वचनादप्राप्तार्थप्रकाशकं श्रोत्रमिति न साध्यनिवृत्तौ साधननिवृत्तिस्तत इति नायं व्यतिरेकी हेतुरिति सौगतः यथा सर्वगतात्मपक्षे सात्मकं जीवच्छरीरं प्राणादिमत्त्वादिति हेतुः, न; अप्राप्तकारित्वे श्रोत्रस्य चक्षुष इवात्यासन्नविषयप्रकाशकत्वं न स्यादिति मशकादिशब्दस्य प्राप्तस्य प्रत्यक्षतः प्रकाशकत्वेन प्रतीयमानस्याप्राप्तार्थप्रकाशकत्वं तस्याध्यक्षबाधितम् अश्नावनुष्णत्ववत् । अथ 'दूरे शब्दो निकटे शब्दः' इति प्रतीतेः प्राप्तार्थाप्रकाशकम् प्राप्तार्थप्रकाशकं च श्रोत्रमिष्यते, न सदेतत्; यतः साकारज्ञानपक्षेऽनाकारज्ञानपक्षे वाऽयमभ्युपगम इति वाच्यम्? न तावत् प्रथमः पक्षः शब्दाकारस्य ज्ञानगतस्यावभासे दूर-निकटव्यवहारानुपपत्तेः अन्यथा स्वसंवेदनाकारेऽपि तत्प्रसक्तिर्भवेदिति सर्वत्रासन्नदूरव्यवहारोऽघटमानकः स्यात् । अथाकाराधायकस्यासन्नादित्वात् तद्व्यवहारस्तर्हि परपक्षेऽप्येतदुत्तरं समानं भवेदिति किं तत्प्रतिक्षेपः? शक्यं हि परेणाप्येवमभिधातुम् कर्णशष्कुल्यनुप्रविष्टस्य शब्दस्य ग्रहणेऽपि तत्प्रथमकारणस्य दूरत्वाद् दूरव्यवहारो विपर्ययाच्च विपर्यय इति । द्वितीयपक्षस्त्वयुक्तः सौगतस्यानभिमतत्वात् । अथ परापेक्षयाऽप्राप्तार्थप्रकाशकं श्रोत्रमित्यभिधीयते दूरादिव्यवहारात्

१–**वयोस्तद्धा**–भां० मां० विना । २–**पताभ्यां** भां० मां० आ० हा० । ३ पृ० ५१९ पं० १५–२० टि० ९ । ४ पृ० ११३ पं० ४२ तथा पृ० १०६ पं० १० ।

५ "पुट्ठं सुणेइ सद्दं रूवं पुण पासइ अपुट्ठं तु । गंधं रसं च फासं बद्धपुट्ठं वियागरे" ॥ इति संपूर्णा गाथा ।

६ "चक्षुषाऽप्रकाशनात्"–बृ० ल० टि० । ७ "घटादेः सकाशात्"–बृ० ल० टि० । ८ "प्राप्तार्थप्रकाशकत्वे"–बृ० ल० टि० । ९ "श्रोत्रादेः"–बृ० ल० टि० । १० "श्रोत्रेण"–बृ० ल० टि० । ११ "श्रोत्रस्य"–बृ० ल० टि० । १२ **प्राप्तार्थप्र**–वा० बा० आ० हा० वि० । अत्र 'प्राप्तार्थप्रकाशकं च' इत्यंशस्य असंलग्नतया भासमानत्वात् 'अथ दूरे शब्दो निकटे शब्द इति प्रतीतेः प्राप्तार्थप्रकाशकं श्रोत्रमिष्यते' एतावान् पाठो मौलिको भाति । "प्राप्यकारित्वे च श्रोत्रस्य तद्गोचरे शब्दे दूरादिव्यवहारो न स्यात् । अस्ति चात्रायं दूरे शब्दो निकटे शब्दः श्रूयत इति प्रतीतिः अतोऽप्राप्यकारित्वमेवास्योपपन्नम्"—स्याद्वादर० पृ० ३३३ पं० १८ आ० । १३ "निराकारज्ञानस्य"–बृ० टि० । १४ "निराकारज्ञानरूपः"–ल० टि० । १५–**या प्रा**–वा० बा० ।

तद्विषये चक्षुर्वेदिति, न; एवं परसिद्धेनानुमानेन प्रमाणेतरसामान्यव्यवस्थादेश्चार्वाकस्योत्पत्त्यनित्यत्वादिना सुखादेरचेतनत्वप्रसाधनं सांख्यस्य चानिषिद्धं भवेत् बौद्धाभ्युपगतेनानुमानेनोत्पत्त्यादिना च तेनापि स्वाभिप्रेतसाध्यस्य साधयितुं शक्यत्वात्। यश्च बाणादेरागतस्य ग्रहणेऽपि दूरादिव्यवहारं प्रतिपद्यते परः स कथं तत एव त्वदीयं साध्यं प्रतिपद्येत? यदि च स्वोत्पत्तिदेशस्थ एवं शब्दः श्रोत्रेण गृह्येत नागतस्तर्हि कथमनुवाते शब्दस्य तद्देशोत्पत्तिकस्यैव श्रवणम् प्रतिवातेऽश्रवणम् मन्दवाते मनाक् श्रवणं भवेत्? न च प्रतिकूलवातेन शब्दस्य नाशितत्वात् श्रोत्रस्य वाभिहतत्वान्न श्रवणं शब्दविनाशे अनुकूलवातस्थस्यापि तदश्रवणप्रसक्तेः। शब्दस्य विनष्टत्वात् व्यवहितदेशस्थस्य च तस्य श्रोत्राभिघातहेतुत्वानुपपत्तेः अन्यथा भस्त्रादिव्यवस्थितस्यापि तस्य तदुपघातकत्वं स्यात्। अनुकूलवातेन तस्य तं प्रति प्रेरणात् तेन तच्छ्रवणे 'प्राप्तः शब्दः श्रूयते' इति प्राप्तम् तथापि तत्र दूरादिव्यवहारे न श्रोत्रमप्राप्तप्रकाशकमतः सिध्यतीति कथं न व्यतिरेकी हेतुः? न च 'चक्षुः'शब्देन नायनरश्म्यभिधानादत्यासन्नप्रकाशकत्वाच्च तेषाम् 'अत्यासन्नाप्रकाशकत्वात्' इति हेतुरसिद्धः तेषां प्रत्यक्षादिप्रमाणाविषयत्वेन सद्भावासिद्धेरिति प्रतिपादनात्। तदसिद्धतादिदोषविकलादतो हेतोरप्राप्तार्थप्रकाशकत्वं चक्षुषः सिद्धमिति 'रूवं पुण पासइ अपुट्ठं तु' इति न युक्तिविकलं वचः तदेवमिन्द्रियार्थसन्निकर्षोत्पन्नत्वं प्रत्यक्षस्यासिद्धम्।

यदपि 'न त्वन्तःकरणेन्द्रियसम्बन्धस्य सुखादिज्ञानोत्पत्तावसंभवेन तस्याव्यापकत्वादभिधानम्' इति, तदप्यसम्बद्धम्; यथा हीन्द्रियार्थसन्निकर्षो यथोक्तन्यायेन रूपिज्ञानोत्पत्तौ न संभवीति न प्रत्यक्षलक्षणं तथान्तःकरणेन्द्रियसम्बन्धोऽपि; अन्तःकरणस्य परपरिकल्पितस्यासिद्धत्वात् तत्सम्बन्धस्य च दूरापास्तत्वात्। यथा चान्तःकरणस्यासिद्धिस्तथा स्वनिर्णये ज्ञानस्य साधयद्भिः प्रदर्शितम्। यदपि 'अव्यभिचारादिकार्यविशेषणोपादानमन्तरेण सन्निकर्षस्य साधुत्वं ज्ञातुं न शक्यते' इति अभिधानम् तदप्यसङ्गतम्; परपक्षेऽव्यभिचारादिधर्मोपेतस्य ज्ञानकार्यस्यैवासिद्धेः कथं ततः सन्निकर्षस्य साधुत्वावगमः? कार्यत्वानवगमश्च ज्ञानस्य स्वसंविदितत्वानभ्युपगमे ज्ञानान्तरप्रत्यक्षतायामनवस्थादिदोषोपपत्तेः प्राक् प्रतिपादनात्। यच्च 'अर्थग्रहणं स्मृतिफलसन्निकर्षनिवृत्त्यर्थम्' इत्युक्तम्, तदप्यसङ्गतम्; स्मृतिवद् ज्ञानस्याप्यर्थजन्यत्वासिद्धेः तज्जन्यत्वात् तस्य तद्ग्राहकत्वे समानसमयत्रिरातीतानागतार्थग्राहकत्वं तस्य न स्यात् तथाभूतस्यार्थस्य तत् प्रत्यजनकत्वात् तथा च सर्वज्ञज्ञानं सकलपदार्थग्राहकं न भवेदिति प्राक् प्रतिपादितम्। यदपि 'ज्ञानग्रहणं सुखादिनिवृत्त्यर्थम्' इति प्रतिपादितम्, तदप्यसङ्गतम्; सुखादेर्ज्ञानरूपत्वानतिक्रमात् अन्यथा आल्हादाद्यनुभवो न स्यात् तद्ग्राहकस्यापरस्यानुभवस्यानवस्थादिदोषतो निषिद्धत्वात्। यदपि भिन्नहेतुकत्वं सुखादेः प्रतिपादितम् तदपि सुखत्वादेः सामान्यस्यासिद्धेरसङ्गतम्। यश्च प्रत्यक्षविरोधः प्रतिपादितो ज्ञानसुखयोरेकत्वे-'ज्ञानमर्थावबोधस्वभावं सुखादिकमाल्हादादिस्वभावं ततो भिन्नमध्यक्षतोऽनुभूयते' इति सोऽप्यनुपपन्नः यतः स्वावबोध एव विज्ञाने अव्यभिचरितो धर्मः स्मरणादौ ज्ञानरूपतायामप्यर्थावबोधरूपताया अभावात्। एतच्च 'अर्थोपलब्धिः' इति विशेषणमुपाददता प्रमाणे परेणाभ्युपगतमेव। स्वावबोधरूपता तु ज्ञानाव्यभिचरिता सुखादावप्यस्ति अन्यथा तस्यानुभव एव न स्यादिति प्रतिपादितम् ततश्च सुखादेर्ज्ञानरूपतायां कथमध्यक्षविरोधः? अदृष्टविशेषप्रभवत्वेन च सुखादेर्भेदे सुरूपज्ञानस्य विरूपज्ञानाद् ज्ञानरूपतया भेदो भवेत् अदृष्टविशेषजन्यताया अविशेषात्। तन्न सुखादिव्यवच्छेदार्थं ज्ञानपदोपादानं युक्तम्। अव्यपदेश्यपदोपादानमप्यनर्थकम् व्यवच्छेद्याभावात्। उभयर्जं ज्ञानं व्यवच्छेद्यमिति चेत्, न; तस्याध्यक्षतायां दोषाभावात्। अथ शब्दजत्वात् तस्य शाब्देऽन्तर्भावः; नन्वक्षजत्वादध्यक्षे किमिति नान्तर्भावः? शब्दस्य तत्र प्राधान्याच्छाब्दं तदिति चेत्, न; अक्ष-

१-स्य वानि-आ०। २ "परवादिना"-बृ० ल० टि०। ३-च श्रोत्रे-बृ० आ० हा० वि० विना। ४-हारो न श्रो-आ० हा० वि०।-हारे श्रो-वा० बा०। ५ पृ० ५४५ पं० ११। ६ पृ० ५१९ पं० २३। ७-स्य दू-भां० मां० विना। ८ पृ० ४७७ पं० १७-पृ० ४७८ पं० ६। ९ पृ० ५२० पं० ३। १० कार्यान-वा० बा० विना। ११ पृ० ५२० पं० ११। १२ "ज्ञानस्य"-बृ० ल० टि०। १३ "अर्थः"-बृ० ल० टि०। १४ सर्वज्ञानं बृ०। १५ पृ० ५२० पं० १४। १६ पृ० ५२१ पं० ५। १७ पृ० ५२१ पं० ४। १८-यजज्ञा-बृ० आ० वि०। १९-क्षतया दो-बृ०।

लिङ्गातिक्रान्त एव शब्दस्य प्राधान्येन व्यापारोपगमात्। अथोभयजज्ञानविषयस्यापि तदतिक्रान्तत्वं तद्व्यपदेश्यपदोपादानमन्तरेणापि शाब्द एव तस्यान्तर्भावो भविष्यतीति तद्व्यवच्छेदार्थमव्यपदेश्यपदोपादानमनर्थकम्। अथोभयजत्वादस्य प्रमाणान्तरत्वं स्यात् असति अव्यपदेश्यग्रहणे, न; अक्षप्राधान्ये प्रत्यक्षता शब्दप्राधान्ये तु शाब्दतेति कथं प्रमाणान्तरता? न चोभयोरपि प्राधान्यम् सामग्र्यामेकस्यैव साधकतमत्वात् तेनैव च व्यपदेशप्राप्तेः। यदपि 'व्यभिचारिज्ञाननिवृत्त्यर्थमव्यभिचारिपदमुपात्तम्; तदप्ययुक्तम्; तत्प्रतिपाद्यस्यार्थस्य परमतेनासङ्गतेः। तथाहि—अदुष्टकारणप्रभवत्वं बाधारहितत्वं वा अव्यभिचारित्वं प्रवृत्तिसामर्थ्यावगमव्यतिरेकेण न ज्ञातुं शक्यमिति स्वतःप्रामाण्यनिराकरणप्रस्तावे प्रतिपादितमिति प्रवृत्तिसामर्थ्यमेवाव्यभिचारित्वम्। तच्च विषयप्राप्त्या विज्ञानस्याव्यभिचारित्वं ज्ञायमानं किं प्रतिभातविषयप्राप्त्याऽवगम्यते आहोस्विदप्रतिभातविषयप्राप्त्या? यदि प्रतिभातविषयप्राप्त्या तदोदकज्ञाने किमुदकावयवी प्रतिभातः प्राप्यते उत तत्सामान्यम् आहोस्विदुभयमिति पक्षाः। तत्र यद्यवयवी प्रतिभातः प्राप्यत इति पक्षः स न युक्तः अवयविनोऽसत्त्वेन प्रतिभासं प्रति विषयत्वासंभवात् सत्त्वेऽपि न तस्य पराभ्युपगमेन प्रतिभातस्य प्राप्तिः झँषादिविवर्तनाभिघातोपजातावयवक्रियादिक्रमेण ध्वंससंभवात्। अथावस्थितव्यूहैरवयवैरारब्धस्य तस्य तज्जातीयतया प्रतिभातस्यैव प्राप्तिः नन्वेवमप्यन्यः प्रतिभातोऽन्यश्च प्राप्यत इति कथं तदवभासिनो ज्ञानस्याव्यभिचारिता न ह्यन्यप्रतिभासनेऽन्यत्र प्राप्तावव्यभिचारिता अन्यथा मरीचिकाजलप्रतिभासे दैवात् सत्यजलप्राप्तौ तदवभासिनस्तस्याऽव्यभिचारिता भवेत्। न च तद्देशजलप्रापकस्याव्यभिचारितेति नायं दोषः यतो देशस्यापि भास्करकरानुप्रवेशादिनाऽवयवक्रियाक्रमेण नाशात् तत्त्वानुपपत्तिः। नैं चैवमव्यभिचारित्वादिनः चन्द्रार्कादिज्ञानं विनश्यदवस्थपदार्थोत्पादितत्वा(दितं वा) तदव्यभिचारि भवेत्। अथ प्रतिभातोदकसामान्यप्राप्त्या तदव्यभिचारीति पक्षः सोऽप्ययुक्तः एकान्ततो व्यक्तिभ्यो भिन्नस्याभिन्नस्य वा सामान्यस्यासत्त्वेन प्रतिभासप्राप्यालम्बनत्वायोगात् सत्त्वेऽपि तस्य नित्यतया स्वप्रतिभासज्ञानजनकत्वायोगादजनकस्य च परेण ज्ञानविषयत्वानभ्युपगमात् ज्ञानविषयत्वेऽपि तस्य पानावगाहनाद्यर्थक्रियाऽनिर्वर्तकत्वान्नार्थक्रियार्थिनां तज्ज्ञानात् जलाद्युपादानार्था प्रवृत्तिर्भवेत्। न च समवायात् सामान्यावगमेऽपि व्यक्तावर्थक्रियार्थिनां प्रवृत्तिः अन्यप्रतिभासे अन्यत्र प्रवृत्त्ययोगात् योगे वाऽतिप्रसङ्गात्। न च समवायस्यातिसूक्ष्मतया जाति-व्यक्त्योरेकलोलीभावेन जातिप्रतिपत्तावपि भ्रान्त्या व्यक्तौ प्रवृत्तिः तज्ज्ञानस्यातस्मिंस्तद्ग्रहणरूपतया भ्रान्तिरूपत्वादव्यभिचारित्वायोगात्। न च समवायोऽपि जातेर्व्यक्तौ संभवति संभवेऽपि तस्य व्यापितया सर्वत्रैकस्य प्रतिनियतव्यक्तिप्रवृत्तिनिमित्तत्वानुपपत्तिः। न च नित्यस्य तस्य ज्ञानजनकत्वमपि संभवीति स्वग्राहिणि ज्ञाने अप्रतिभासमानस्य कथं भ्रान्तिहेतुतापि तस्य संभवति? प्रतिभासनेऽपि स्वरूपेण प्रतिभासनात् कथं भ्रान्तिनिमित्तता? न च सामान्यस्य प्रतिपत्तौ सामान्यसाध्यार्थक्रियार्थितया तदर्थिनां प्रवृत्तिः ज्ञानाभिधान-

१ "इन्द्रियसन्निकर्षाभावेन"-बृ० ल० टि०। २-क्षप्राधान्ये तु शाब्दतेति कथं बृ० ल० आ०।-क्षप्राधान्ये नु मानतेति कथं हा० वि०। ३ "शब्देन्द्रिययोः"-बृ० ल० टि०। ४ "व्यभिचारिपद-" बृ० ल० टि०। ५ पृ० ८-१९। ६-कज्ञानेन कि-बृ० आ० हा० वि०।

तत्त्वोपप्लवे (लि० पृ० २-३०) इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति नैयायिकसंमतप्रत्यक्षलक्षणस्य विचारासहत्वप्रदर्शिका सविस्तरा चर्चा दृश्यते, तत्र यो योंऽशः शब्देनार्थेन च प्रस्तुतटीकया समानभावं बिभर्ति सोऽत्रान्यत्र च तत्तत्स्थले समुद्धृतोऽस्ति।

"अथावगतं तदवगतेरव्यभिचारिता कथमवगम्यत इति पूर्वोक्तमनुसर्तव्यम्। उदकप्राप्त्या पूर्वोत्पन्नोदकविज्ञानस्याव्यभिचारिता व्यवस्थाप्यते। किं तत्प्रतिभातोदकप्राप्त्या आहोस्वित् तज्जातीयोद(दक) प्राप्त्या तद्वंशजजलप्राप्त्या वा? तद्यदि प्रतिभातोदकप्राप्त्या तदयुक्तम् प्रतिभातोदकस्यावस्थानं नोपपद्यते। क्षणमहिषपरिवर्तनाभिघातोपजातावयवक्रियान्यायेन प्रत्यक्षमयसंभवात्। अथ तज्जातीयोदकप्राप्त्या एवं तर्ह्यसत्योदकज्ञानेऽपि जाते क्वचित् तोयमासादयन्ति पुमांसस्तदपि अवितथं स्यात्" इत्यादि—तत्त्वोप० लि० पृ० ४ पं० ८।

७ "मत्स्य"-बृ० ल० टि०। ८-वर्तमानाभि-बृ० आ० हा० वि०। ९ "विषयप्राप्तिलक्षणाव्यभिचारित्वकल्पने"-बृ० ल० टि०। १०-चारावा-भां० मां०। ११-त्पादितत्वात्तद-भां०। १२ "सामान्यस्य"-बृ० ल० टि०। १३-नां ज्ञा- बृ०। १४-क्तिप्रतिनिमि-हा० वि०। -क्तिनिमि-ल० वा० बा० भां० मां०। १५ "समवायस्य"-बृ० टि०। १६ "समवायस्य"-बृ० टि०। १७ "अर्थक्रियार्थिनाम्"-बृ० ल० टि०।

लक्षणायास्तदर्थक्रियायास्तदैव निष्पत्तेः । व्यापकत्वाच्च सामान्यस्य न प्रतिनियतदेशकालप्रवृत्ति-
विषयतेति प्रवृत्त्यभावात् न तत्सामर्थ्यम् तदभावान्न तदवभासिनो ज्ञानस्याव्यभिचारितावगतिः। अथ
प्रतिभाततद्धेदर्थप्राप्त्या तदव्यभिचारित्वमिति पक्षः सोऽप्यसङ्गतः अवयवि-सामान्ययोरभावे तद्ध-
त्पक्षस्य दूरापास्तत्वात्। अथ प्रतिभातावयवप्राप्त्या तस्याव्यभिचारिता, न; अवयवानामपि द्व्यणुकं
५ यावदवयवित्वात् परमाणूनां चार्वाग्दर्शनेऽप्रतिभासनान्न कथंचित्प्रतिभातार्थप्राप्त्या ज्ञानस्याव्यभि-
चारितासंभवः । किञ्च, प्रवृत्तिसामर्थ्येनाव्यभिचारिता पूर्वोदितज्ञानस्य किं लिङ्गभूतेन ज्ञायते,
उताध्यक्षरूपेण? यद्याद्यः पक्षः स न युक्तः तेन सह सम्बन्धानवगतेः अवगतौ वा न प्रवृत्तिसामर्थ्येन
प्रयोजनम्। अथ द्वितीयः सोऽपि न युक्तः ध्वस्तेन पूर्वज्ञानेन सह इन्द्रियस्य सन्निकर्षाभावात् तद्वि-
यज्ञानस्याध्यक्षफलतानुपपत्तेः केशोन्दुकादिज्ञानवत् तस्य निरालम्बनत्वाच्च कथमव्यभिचारिताव्यव-
१० स्थापकत्वम्? न चाविद्यमानस्य कथञ्चिद्विषयभावः संभवति जनकत्वाकारार्पकत्वमहत्त्वादिधर्मो-
पेतत्वसहोत्पादसत्त्वमात्रादीनां विषयत्वहेतुत्वेन परिकल्पितानामसति सर्वेषामभावात् । अथात्मा-
न्तःकरणसम्बन्धेनाव्यभिचारिताविशिष्टज्ञानमुत्पन्नं गृह्यत इति तदव्यभिचारितावगमः; नन्वत्राप्य-
व्यभिचारित्वं किं ज्ञानधर्मः उत तत्स्वरूपम्? यदि तद्धर्मस्तदा न नित्यः सामान्यदूषणेनोपोदितत्वात्।
अनित्योऽपि यदि ज्ञानात् प्रागुत्पन्नस्तदा न तद्धर्मः धर्मिणमन्तरेण तस्य तद्धर्मत्वायोगात् ।
१५ सहोत्पादेऽपि तादात्म्य-तदुत्पत्ति-समवायादिसम्बन्धाभावे 'तस्य धर्मः' इति व्यपदेशानुपपत्तिः।
पश्चादुत्पादे पूर्वं व्यभिचारि तद् ज्ञानं स्यात्। किञ्च, अव्यभिचारितादिको धर्मो ज्ञानाद् व्यतिरिक्तः
अव्यतिरिक्तो वा? यदि व्यतिरिक्तस्तदा तस्य ज्ञानेन सह सम्बन्धो वाच्यः । स न समवायलक्षणः
तस्यासिद्धेः सिद्धावपि ज्ञानस्य धर्मतया अव्यभिचारितादिधर्माधिकरणताऽयोगात् धर्माणां धर्माधि-
करणताऽनभ्युपगमात् अभ्युपगमे वा तस्यापि धर्मिरूपताप्रसक्तिः । अथ समानधर्माधिकरणता
२० धर्माणां नाभ्युपगम्यते विजातीयधर्माधिकरणता त्विष्यत एव अन्यथा ज्ञाने 'अव्यभिचारि' इत्यादि-
व्यपदेशानुपपत्तिर्भवेत् तर्ह्यव्यभिचारितादीनामपि धर्माणां सत्त्व-प्रमेयत्व-ज्ञेयत्वाद्यनेकधर्माधि-
करणतया धर्मिरूपतैव प्रसक्तेति कस्यचिद्धर्मस्यापरधर्मानधिकरणस्याभावाद् धर्माभावतो धर्मिणोऽ-
प्यभावप्रसक्तिः। नापि विशेषणविशेष्यभावलक्षणोऽसौ तस्याप्यपरसम्बन्धकल्पनया सम्बन्ध(द्ध)-

---

१ "पानादिरूपा स्वर्थक्रिया ततः कथं प्रादुःष्यात्"–बृ० टि० । २ "जातिमदर्थप्राप्त्या"–बृ० ल० टि० ।
३ "किञ्च, प्रवृत्तिसामर्थ्येनाव्यभिचारिता पूर्वोदितज्ञानस्य ज्ञाप्यते किं लिङ्गभूतेन आहो अध्यक्षात्मकेन? तद्यदि लिङ्गभूतेन
तदयुक्तम् तेन साकं संबन्धानवगतेः अवगतौ वा अलं प्रवृत्तिसामर्थ्येन । अथाध्यक्षात्मकेन तदयुक्तम् पूर्वोदितप्रत्यस्तमितेन
साकं सन्निकर्षाभावात् तद्विषयविज्ञानं न प्रत्यक्षफलं निरालम्बनत्वात् केशोण्डुकादिसंवेदनवत्। न विज्ञानस्याभावोऽवभाति न
भावस्तदभावात्। अविद्यमानस्य विषयार्थो वक्तव्यः । किमाकारार्थ(र्पि)कत्वेन वा महत्त्वादिधर्मोपेतत्वेन वा सत्तामात्रेण वा
सहोत्पादेन वा सर्वस्य प्रत्यस्तमितत्वात् कथमसौ विषयस्तद्विषयत्वे केशोण्डुकादिविज्ञानस्येव मिथ्यात्वे बीजमन्वेषणीयम्
आत्मसत्तामात्रेण मिथ्यात्वे सर्वस्य मिथ्यात्वमापद्यते ततस्तत्त्वोपप्लवः स्यात् । अथान्यथाऽव्यभिचारित्वं गृह्यते आत्मान्तः-
करणसंबन्धेनोत्पन्नं विज्ञानमव्यभिचारिताविशिष्टं प्रद्योत्यते तदयुक्तम् तदव्यभिचारित्वं तद्धर्मो वा तत्स्वरूपं वा? तद्यदि
तद्धर्मः स नित्योऽनित्यो वा? यदि नित्यस्तदा जातिदोषेणापोपो(णापो)दितो वेदितव्यः । अथानित्यः स पूर्वोत्पन्नः सह
पश्चाद् वा जातः? तद्यदि पूर्वोत्पन्नस्तदा कस्यासौ धर्मः? न हि धर्मिणमन्तरेण धर्मो भवितुमर्हति सर्वतो व्यावृत्तरूपत्वात्
कः कस्येति वक्तव्यम्। अथ सहोत्पन्नः कस्तयोः संबन्ध इति वक्तव्यम् । तादात्म्य-तदुत्पत्ति-समवायसंबन्धाभावे सति
षष्ठ्यर्थो वक्तव्यस्तस्याव्यभिचारित्वमिति । अथ पृष्ठोत्पन्नस्तर्हि पूर्वं व्यभिचारिता विज्ञानस्य प्राप्नोति न चाध्यात्मिको व्यभि-
चारिरूपो धर्मोऽस्ति सुखादिव्यतिरिक्तस्तत्प्रतीत्यसंभवेन स्वयमनभ्युपगमात् । यदि वाऽव्यभिचारादयो धर्मा अर्थान्तरभूता
अभ्युपगम्यन्ते तैरवच्छिन्नं विज्ञानं सामर्थ्या अवस्थापकमुद्बुध्यते तच्चानुपपन्नम्"–इत्यादि—तत्त्वोप० लि० पृ० १२
पं० ३–पृ० १३ पं० ११ ।

४ "ज्ञानेन सह लिङ्गस्य"–बृ० ल० टि० । ५ "पूर्वज्ञानविषयः"–बृ० ल० टि० । ६–**यहे**–बृ० आ० हा० वि०
विना० । ७–**नापादि**–बृ० ल० आ० हा० वि० । ८ "यावदद्यापि व्य(अव्य)भिचारिता न जायते"–बृ०ल० टि० ।
९ "व्य(अव्य)भि०धर्मिणः"–बृ० टि० । "व्य(अव्य)भि०धर्मस्य"–ल० टि० । १० "सम्बन्धः"–ल० टि० ।
११–**णां च धर्मा**–आ० हा० वि० । **–णां न च धर्मा**–बृ० ल० । १२–**ऽसावस्या**–बृ० आ० हा० वि० ।

त्वेऽनवस्थाप्रसक्तेः असम्बद्धत्वे 'तत्सम्बद्धः' इति व्यपदेशानुपपत्तेः । नाप्यसावेकार्थसमवायः
आत्मन्येवाव्यभिचारितादिधर्मकलापस्य प्रसक्तेः। न च समवायाभावे एकार्थसमवायः संभवी न
चान्यः सम्बन्धोऽत्र परैरभ्युपगम्यते। किञ्च, यदि अव्यभिचारितादयो धर्मा अर्थान्तरभूता ज्ञानस्य
विशेषणत्वेनोपेयन्ते तदैकविशेषणावच्छिन्नज्ञानप्रतिपत्तिकाले नापरविशेषणावच्छिन्नस्य तस्य प्रति-
पत्तिरित्यशेषविशेषणानवच्छिन्नं तत् सामर्थ्या व्यवच्छेदकं भवेत् अपरविशेषणावच्छिन्नतत्प्रति-५
पत्तिकाले ज्ञानस्य ज्ञानान्तरविरोधितया तस्यासत्त्वात् । अथ निर्विकल्पके युगपदनेकविशेषणा-
वच्छिन्नस्य तस्य प्रतिभासान्नायं दोषस्तर्हि 'व्यवसायात्मकम्' इति पदमध्यक्षलक्षणे नोपादेयम्
अनिश्चयात्मकस्याप्यध्यक्षफलत्वेनाभ्युपगमात्। अथ विशेषजनितं व्यवसायात्मकम्; नन्वेवं सामान्य-
जनितं विशेषणज्ञानमध्यक्षफलं न भवेत् । यदि चानेकविशेषणावच्छिन्नैकज्ञानाधिगतिरेकं ज्ञानम्
कथमेकानेकरूपं वस्तु नाऽभ्युपगतं भवेत्? अथाव्यतिरिक्तस्तर्हि ज्ञानमेव नाऽव्यभिचारितादि तदेव १०
वा न ज्ञानमित्यन्यतरदेव स्यात् न सामग्रीव्यवच्छेदस्ततो भवेत्। अथाव्यभिचारितादि ज्ञानस्वरूपमेव
तदा विपर्ययज्ञानेऽप्यव्यभिचारिताप्रसक्तिः । अथ विशिष्टं ज्ञानमव्यभिचारितादिस्वभावम्; ननु
विशेषणमन्तरेण विशिष्टता कथमुपपत्तिमती? विशेषणस्य चैकान्ततो भेदे सैव सम्बन्धासिद्धिः
अभेदे न विशिष्टता कथंचिद्भेदे परपक्षसिद्धिः। तन्न अव्यभिचारितापदोपादानमर्थवत्।

इतोऽप्यपार्थकम् इन्द्रियार्थसन्निकर्षपदेनैव तद्व्यावर्त्यस्यापोदितत्वात् । तथाहि–मरीच्युदक-१५
ज्ञानव्यवच्छेदायाऽव्यभिचारिपदोपादानम् तज्ज्ञाने च उदकं प्रतिभाति न च तेनेन्द्रियसम्बन्धः अवि-
द्यमानेन सह सम्बन्धानुपपत्तेः विद्यमानत्वे वा न तद्विषयज्ञानस्य व्यभिचारिता विद्यमानार्थज्ञानवत्।
अथ प्रतिभासमानोदकसम्बन्धाभावेऽपि मरीचिभिः सम्बन्धादिन्द्रियस्य तत्सन्निकर्षप्रभवं तत् अत एव
मरीचीनां तदालम्बनत्वं तस्य तदन्वयव्यतिरेकानुविधानात् तद्देशं प्रति प्रवृत्तेश्च मिथ्यात्वमपि तज्-
ज्ञानस्यान्यदालम्बनमन्यत् प्रतिभातीति कृत्वा; नन्वप्रतिभासमानं कथमालम्बनम्? यदि ज्ञानजन-२०
कत्वात् इन्द्रियादेरप्यालम्बनत्वप्रसक्तिः आकारार्पकत्वतदधिकरणत्वादिकं त्वालम्बनत्वं न परस्या-
भिमतम् तस्मात् तदवभासित्वमेवालम्बनत्वम् न च मरीच्युदकज्ञाने मरीचयः प्रतिभान्ति ।
अथोदकाकारतया ता एव तत्र प्रतिभान्ति; ननु तास्य उदकाकारता यद्यव्यतिरिक्ता परमार्थसती च
तदा तत्प्रतिपत्तेर्न व्यभिचारित्वम्। अथापरमार्थसती तदा तासामप्यपरमार्थसत्त्वप्रसक्तिः। किञ्च,
अपारमार्थिकोदकतादात्म्ये मरीचीनां तदुदकज्ञानवद् मरीचिज्ञानमपि वितथं भवेत्। न च उदकाकार २५
एकस्मिन् प्रतीयमाने मरीचयः प्रतीयन्त इति वक्तुं शक्यमतिप्रसङ्गात् । अथ व्यतिरिक्ता ताभ्य
उदकाकारता तर्हि तत्प्रतिपत्तौ कथं मरीचयः प्रतिभान्ति अन्यप्रतिभासेऽप्यन्यप्रतिभासाभ्युपगमे
अतिप्रसङ्गात्? किञ्च, केशोन्दुकज्ञाने किमालम्बनम् किं वा प्रतिभातीति वक्तव्यम्? अथ केशोन्दु-
कादिकमेवालम्बनम् प्रतिभाति च तदेव तत्र तर्हि मरीच्युदकज्ञानेऽपि तदेवालम्बनम् तदेव प्रति-
भातीति किं न भवेत्? न च तज्ज्ञानस्य प्रतीयमानान्यालम्बनत्वेन मिथ्यात्वम् अपि तु प्रतिभास- ३०
मानस्यासत्यत्वेन अन्यथा केशोन्दुकज्ञानस्य मिथ्यात्वं न भवेत्। न च मरीचिदेशं प्रति प्रवृत्तेर्मरीच्या-

---

१–**स्वबन्धत्वे** आ० । २–**स्वबन्ध इ**–बृ० वा० बा० मां० आ० । ३–**भावऽ(वेऽ)पि ए**–ल० । ४ "विशेष-
कम्"–बृ० ल० टि० । ५ "अव्यभिचारित्व"–बृ० ल० टि० । ६–**कालेन ज्ञा**–भां० मां० । ७ "ज्ञानस्य"–बृ० ल०
टि० । ८–**फलं भ**–ल० । ९ "अव्यभिचारिपदव्यावृत्त्यस्य"–बृ० ल० टि० ।

"अतोऽव्यभिचारिपदमपार्थकमितोऽप्यपार्थकमिन्द्रियार्थसन्निकर्षपदेनापोदितत्वात् न हि केशोण्डुकविज्ञानस्य नयनार्थ-
सन्निकर्षोद्भूतिरस्ति। नन्वस्ति मरीच्युदकविज्ञानस्य तदपनोदायाव्यभिचारि पदम् तन्न, यत उदकं प्रतिभाति न च तेन सह
सम्बन्धोऽस्ति विद्यमानेन सार्कं सम्बध्यते नाऽविद्यमानेन । तत्संबन्धे वा न तद्विषयो मिथ्यात्वमिहोपपद्यते सत्योदकसंवे-
दनवत्; ननु यद्यपि प्रतीयमानोदकेन सह संबन्धो नास्ति चक्षुषस्तथापाप्या(**थाप्या**)लम्ब्य मरीचिनिचयेन सार्कं
संबन्धोऽस्ति तस्यैवालम्बनत्वात् तद्देशं प्रति प्रवृत्तेरत एव मिथ्यात्वमन्यद् आलम्बनमन्यच्च प्रतिभाति"–इत्यादि—तत्त्वोप०
लि० पृ० १५ पं० ११–पृ० १६ पं० २ ।

१० "मरीचिदेशम्"–बृ० ल० टि० । ११ "अव्यतिरिक्ता"–बृ० ल० टि० । १२ "मरीच्युदक"–बृ० ल० टि० ।
१३–**सत्वे**–बृ० । १४ "न हि केशोन्दुकज्ञानस्य प्रतीयमानात् केशोन्दुकादन्यत् किञ्चिदालम्बनमस्ति ततोऽस्यापि मिथ्यात्वं
न स्यात्"–बृ० ल० टि० ।

लम्बनत्वम् तद्देशस्यैवमालम्बनत्वप्रसक्तेः[1] न च प्रतिभासमानान्यार्थसन्निकर्षजत्वं तज्ज्ञानस्य सत्योदकज्ञाने अस्यादृष्टेः । न चा(वा) प्रतीयमानसन्निकर्षजत्वंस्य तस्य[3] तज्जत्वमभ्युपगन्तुं युक्तम् अन्यथानुमेयदहनज्ञानस्यापीन्द्रियार्थसन्निकर्षजत्वं स्यात् । अथ मन एव तत्रेन्द्रियं तस्य च दहनेन सह प्रतीयमानेन नास्ति सम्बन्धः इहापि तर्हि प्रतीयमानेनोदकेन न सम्बन्धश्चक्षुषः मरीचीनां तु न
५ प्रतीयमानत्वमिति ताभिरपि कथं तस्य सम्बन्धः? यच्च 'सामान्योपक्रमं विशेषपर्यवसानम् 'इदमुदकम्' इत्येकं ज्ञानं तस्य सामान्यवानर्थः स्मृत्युपस्थापितविशेषापेक्षो जनकः तिरस्कृतस्वाकारस्य परिगृहीताकारान्तरस्य सामान्यविशिष्टस्य वस्तुनो जनकत्वे तथाविधस्येन्द्रियेण सम्बन्धोपपत्तेरिन्द्रियार्थसन्निकर्षजो विपर्ययः' इति, तदत्यन्तमसम्बद्धम्; पराभ्युपगमेनास्यानुपपत्तेः । तथाहि–सामान्योपक्रममिति यदि सामान्यविषयम् 'इदम्'इति ज्ञानं तदा[5] मरीच्युदकयोः साधारणमेकं सामान्यं
१० 'इदम्'इति ज्ञानस्य विषयो वक्तव्यः । न चैकान्ततो व्यक्तिभिन्नमभिन्नं वा सामान्यं संभवति संभवेऽपि सत्त्वद्रव्यत्वव्यतिरिक्तस्य मरीच्युदकसाधारणस्य तस्य न सद्भावः सत्त्वद्रव्यत्वादेश्च ज्वलनादावपि सद्भाव इति न मरीच्युदकसाधारणत्वम् । तरङ्गायमाणत्वं तूभयसाधारणं सामान्यं पराभ्युपगमेन न संभवत्येव संभवेऽपि न तँस्य तदुभयनियतत्वम् अन्यत्रापि सद्भावोपपत्तेः । 'विशेषपर्यवसानम्' इत्येतदपि यदि विशेषग्राहकं तदा सामान्यग्राहकत्वानुपपत्तिः न हि 'इदम्'–
१५ इत्येतस्य ज्ञानस्य विशेषग्राहिताऽनुभूयते तत्त्वे वा सामान्य–विशेषयोर्भिन्नस्वरूपत्वात् कथं सामान्यग्राहिताऽस्य? अथ 'उदकम्'इति ज्ञानं विशेषग्राहि तर्हि भिन्नावभासम् 'इदम्' 'उदकम्' इति ज्ञानद्वयं प्रसक्तम् प्रतिभासभेदस्यान्यत्रापि भेदनिबन्धनत्वात् तस्य चात्रापि भावात् । ज्ञानद्वये च 'इदम्'इति सामान्यावभासि सत्यार्थविषयं सन्निकर्षप्रभवम् 'उदकम्'इति त्वविद्यमानविशेषावभासि न तत् सन्निकर्षप्रभवम् यदसत्यार्थं न तद् व्य(अव्य)भिचारिपदोपादानव्यवच्छेद्यम् सन्निकर्षो-
२० त्पन्नपदेनैवोपोदितत्वात् यच्च सन्निकर्षजं सामान्यज्ञानं तद् व्यभिचारि न भवतीति नाव्यभिचारिपदव्यवच्छेद्यम् । अथ 'इदमुदकम्' इत्युल्लेखद्वययुक्तमेकं ज्ञानं तर्हि सामान्ये तत् प्रत्यक्षं प्रमाणं च विशेषे अनध्यक्षमप्रमाणं चेति कथमेकं ज्ञानमध्यक्षानध्यक्षरूपं प्रमाणाप्रमाणरूपं च नाभ्युपगतं भवेत्? अथ सामान्येऽपि नाध्यक्षं प्रमाणं चेदमभ्युपगम्यते तर्हीन्द्रियार्थसन्निकर्षजत्वाभावादस्य नाव्यभिचारिपदापोद्यता विशेषेऽप्यस्य प्रामाण्येऽध्यक्षत्वे[8] चाव्यभिचारिपदमपार्थकमपोद्याभावात् । यदि
२५ च सामान्यवानर्थः स्मृत्युपस्थापितविशेषापेक्षोऽस्य जनकः कथमस्य विपर्यस्तता विद्यमानविशेषविषयत्वात्? अथ स्मृत्युपस्थापितत्वाद् विशेषस्य अविद्यमानविशेषविषयतया तस्य विपर्यस्तता; ननु तत्राविद्यमानः स्मृत्युपस्थापितो विशेषः कथं तज्जनको येन सामान्यवानर्थस्तदपेक्षस्तज्जनकः परिगीयेत? तथापि तज्जनकत्वे इन्द्रियस्य स्वदेशकालासन्निहितार्थापेक्षस्य ज्ञानजनकत्वादर्थेन सन्निकर्षकल्पना तस्य प्रमाणस्य चार्थवत्त्वकल्पना विशीर्येत तथा च "इन्द्रियार्थसन्निकर्षोत्पन्नम्"
३० [न्यायद० १–१–४] इति "अर्थवत् प्रमाणम्" [१–१–वात्स्या० भा० पृ० १] इति च न वक्तव्यं स्यात् । अथाजनकस्य तत्र न प्रतिभास इति स्मृत्युपस्थापितस्य तस्य तज्जनकता तर्ह्यविद्यमानस्य न जनकत्वमिति विद्यमानविशेषविषयत्वेन तज्ज्ञानस्याविपर्यस्तेति तद्व्यवच्छेदार्थमव्यभिचारिपदोपादानमनर्थकं भवेत् । सामान्यवतोऽर्थस्य केवलस्य तज्जनकत्वे तस्यैव तत्र प्रतिभासः स्यात् । यँदपि 'तिरस्कृतस्वाकारस्य परिगृहीताकारान्तरस्य तस्य तज्जनकत्वम्' तत्रापि वस्तुनः स्वाकारतिरस्कारे वस्तु-
३५ त्वमेव न स्यादिति कथं तस्य सामान्यविशिष्टता? तथाहि–मरीचीनां मरीच्याकारतापरित्यागे वस्तुत्वमेव परित्यक्तं भवेत् स्वाकारलक्षणत्वाद् वस्तुनः न चाकारान्तरस्य परिग्रहः संभवति वस्त्वन्तरस्य

१ "न चावभातोदकभिन्नार्थसन्निकर्षजत्वमुदकविज्ञानस्योपपद्यते सत्योदकज्ञानेऽदृष्टत्वात् अन्यथानुमेयदहनज्ञानस्यापि इन्द्रियार्थसन्निकर्षजत्वमापनीपद्येत आत्ममनःसन्निकर्षजत्वात् । अथ प्रतीयमानदहनेन सह मनसो नास्ति संबन्धः तदिहापि प्रतीयमानेनाम्भसा सह नास्ति सम्बन्धश्चक्षुषस्तस्माद् अव्यभिचारिपदं न युक्तम् इन्द्रियार्थसन्निकर्षपदेनापोदितत्वात्"–इत्यादि—तत्त्वोप० लि० पृ० १७ पं० १०–१६ ।

२–त्व (–त्वं तस्य) तस्य ल० । ३ "तज्ज्ञानस्य"–बृ० ल० टि० । ४ "सन्निकर्षजत्वम्"–बृ० ल० टि० । ५ पृ० ५२३ पं० ८ । ६ तथा म–बृ० आ० हा० वि० विना । ७ "तरङ्गायमाणत्वसामान्यस्य"–बृ० टि० । ८–वापोहित–बृ० वा० बा० विना । ९ "सन्निकर्षप्रभवत्वात्"–बृ० ल० टि० । १०–क्षत्वे वा–बृ० ल० वा० बा० विना । ११ पृ० ५२३ पं० ९ ।

वस्त्वन्तरानापत्तिरूपत्वात् तदापत्तिरूपत्वे वा मरीचय उदकरूपतामापन्ना इति तत्प्रतिभासि ज्ञानं सत्योदकज्ञानवदविपर्यस्तमिति तद्व्यवच्छेदार्थमव्यभिचारिपदोपादानं न कार्यं भवेत् सामान्यविशिष्टस्य च वस्तुन इन्द्रियसम्बद्धस्य विपर्ययज्ञानजनकत्वे यत्रांशे तस्येन्द्रियसम्बन्धोत्पाद्यत्वं तत्राध्यक्षता प्रमाणता च अन्यत्र तद्विपर्यय इत्येकं ज्ञानमध्यक्षं प्रमाणं तद्विपर्ययरूपं च भवेदित्युक्तम्[1] ।
यदपि "यत्सन्निधाने यो दृष्टः" इत्यादि[3], तदप्ययुक्तम्; शब्दावच्छेदेन 'उदकम्'इति ज्ञानस्यानुत्पत्तेः[5]
न ह्युदकवत् शब्दोऽप्यत्र ज्ञाने विशेषणभूतो ग्राह्यतया प्रतिभाति तथाप्रतीतेरभावात् । शब्दविशिष्टोदकप्रतिभासाभ्युपगमेऽपि यदि शब्दस्मरणाद्यन्तरेण नार्थनिश्चयस्तदाऽनवस्थादोषप्रतिपादनान्न तद्धनिस्मृतिर्भवेत् । अथ शब्दस्मरणाद्यन्तरेणाप्युदकादेर्निश्चयस्तदा जैनमतानुप्रवेशान्न दोषासक्तिः काचित् ।

एवं संशयज्ञानव्यवच्छेदार्थं व्यवसायात्मकपदोपादानमपि न कर्तव्यम् इन्द्रियार्थसन्निकर्षोत्प- १०
न्नपदेनैव तस्यापि निरस्तत्वात् न हि पराभ्युपगमेन 'स्थाणुर्वा पुरुषो वा' इति संशयज्ञानमेकमुभयोल्लेखीन्द्रियार्थसन्निकर्षजं संभवति असंभवप्रकारश्च पूर्ववदनुसृत्यात्रापि वक्तव्यः । सविकल्पकाध्यक्षप्रसाधनप्रकारश्चैकान्ताक्षणिकपक्षे न सम्भवत्येव "यः प्रागजनको बुद्धेः" इत्यादेर्दूषणस्य तत्राविचलितस्वरूपत्वात् यथा चाक्षणिकैकान्ते सहकार्यपेक्षा न संभवति भावानां तथा प्राक् प्रतिपादितमिति न पुनरुच्यते । यदपि 'संशयज्ञानव्यवच्छेदार्थं व्यवसायात्मकपदम्' इत्यभिधानम् तत्र सामा- १५
न्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च 'किंस्वित्'इत्यनवधारणात्मकः प्रत्ययः सन्देहो व्यवच्छेद्यतयाभिमतः तत्र च किं प्रतिभाति धर्मिमात्रम् धर्मो वा? यदि धर्मी वस्तुसन् प्रतिभाति तदा नास्याऽपनेयता सम्यग्ज्ञानत्वात् । अथावस्तुसन्नसावत्र प्रतिभाति तदाऽव्यभिचारिपदव्यावर्तितत्वान्न तद्व्यावर्तनाय व्यवसायपदोपादानमर्थवत् । अथ धर्मः प्रतिभाति तदाऽत्रापि वक्तव्यम् किमसौ स्थाणुत्व–पुरुषत्वयोरन्यतरः उभयं वा? यदि स्थाणुत्वलक्षणो वस्तुसन् कथमस्य ज्ञानस्य २०
व्यवच्छेद्यता सम्यग्ज्ञानत्वादिति? अथापारमार्थिकोऽसौ तत्र प्रतिभाति तथाप्यव्यभिचारिपदापोद्यतैव मिथ्याज्ञानत्वात् । एवं पुरुषत्वलक्षणप्रतिभासेऽप्येतदेव दूषणं वाच्यम् । उभयस्यापि तात्त्विकस्य प्रतिभासे न तज्ज्ञानस्य सन्देहरूपतेति नापोद्यता । उभयस्याप्यतात्त्विकस्य प्रतिभासे तद्विषयज्ञानस्य विपर्ययँरूपता न सन्देहात्मकतेत्यव्यभिचारिपदापोद्यतैव । अथैकस्य धर्मस्य तात्त्विकत्वम् अपरस्यातात्त्विकत्वम् एवमपि तात्त्विकधर्मावभासित्वात् तज्ज्ञानमव्यभिचारि अतात्त्विकधर्मावभासित्वाच्च तदेव २५
व्यभिचारीति एकमेव ज्ञानं प्रमाणमप्रमाणं च प्रसक्तम् । न च सन्दिग्धाकारप्रतिभासित्वात् सन्देहज्ञानमिति वाच्यम् यतो यदि सन्दिग्धाकारता परमार्थतोऽर्थे विद्यते तदाऽबाधितार्थगृहीतिरूपत्वान्न सन्देहज्ञानता सत्यार्थज्ञानवत् । अथ न विद्यते तदाऽव्यभिचारिपदेन तद्ग्राहिज्ञानस्यापोदितत्वाद् व्यवसायग्रहणं तद्व्यवच्छेदायोपादीयमानं निरर्थकम् । अथ न किञ्चिदपि तत्र प्रतिभाति न तर्हि तस्येन्द्रियार्थसन्निकर्षजत्वमिति न तद्व्यवच्छेदाय व्यवसायात्मपदोपादानमर्थवत् । तन्न तदपि ३०
प्रत्यक्षलक्षणे उपादेयम् ।

यदपि[6] 'फलस्वरूपसामग्रीविशेषणत्वेनासंभवान्नेदं लक्षणम्' इति, तदुक्तमेवाभिहितम्; अस्य पक्षत्रयेऽप्यघटमानत्वात् । यँदपि 'यतः' इत्यध्याहारात् फलविशेषणपक्षाश्रयणम्', तदप्यसङ्गतम्; यतोऽपरिच्छेदस्वरूपस्याध्यक्षप्रमाणता विशिष्टप्रमितिजनकत्वेन प्रमेय-प्रमात्रोरिवासङ्गता । न च प्रमातृ-प्रमेययोरर्थान्तरत्वे सति विशिष्टप्रमितिजनकं यत् तत् प्रत्यक्षमिति विशेषणात् प्रमातृ-प्रमेय- ३५
व्यतिरिक्तस्य तस्य प्रमाणता, सन्निकर्षादिप्रमाणत्वाभिमतव्यतिरिक्तस्य तज्जनकस्य प्रमाणतेत्यपि वक्तुं शक्यत्वात् । न च सामग्र्यस्य सन्निकर्षस्य वा साधकतमत्वात् प्रमाणता, साधकतमत्वस्य प्रमाणसामान्यलक्षणप्रस्तावे निरस्तत्वात् । यदपि इन्द्रियादेरचेतनस्य प्रमाणत्वं प्रतिपादितम् तदप्य-

१–राप–वा० बा० । २ पृ० ५५० पं० २२ । ३ पृ० ५२३ पं० १३ । ४–मेकोल्ले–ल० । ५ पृ० ५२५ पं० १० । ६ "सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः"–वैशेषिकद० २–२–१७ । प्रशस्त० कं० पृ० १७४ पं० २०–पृ० १७५ पं० ८ । "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः"–न्यायद० १–१–२३ । ७–यस्वरू– भां० मां० । ८–पि स्वफल–वा० बा० भां० । पृ० ५२७ पं० २८ । ९ पृ० ५३० पं० १४ । १० पृ० ४७१ पं० २० ।

तिप्रसङ्गतोऽघटमानकम्। यदपि 'ज्ञानसद्भावे न काचित् तज्जन्या विषयाधिगतिः अक्षादिसद्भावे तु विषयाधिगतिर्भिन्नोपजायत इत्यक्षादेरेवाधिगतिजनकस्य प्रमाणता' इति, तदप्यसमीक्षिताभिधानम्; ज्ञानस्यैव यथावस्थितार्थाधिगतिस्वभावतया प्रमाणत्वात् प्रमाणफलाभेदाविरोधस्य च प्रतिपादितत्वात् अक्षादिसद्भावे तु विषयाधिगतेरसिद्धत्वात्। तथाहि—व्यापारवदक्षादिसद्भावेऽपि व्यासक्तचेतसो न विषयाधिगतिः सत्यस्वप्नज्ञाने त्वक्षादिव्यापाराभावेऽपि यथावस्थितार्थाधिगतिरुपलभ्यत इति न सा अक्षादिकार्या। न चासावपि मनोऽक्षकार्या परपरिकल्पितमनोऽक्षस्य प्रागेव निषिद्धत्वात्। अत एव 'चक्षुषाऽधिगतम्' इति तस्य साधकतमत्वाभिमानः न साधकतमताव्यवस्थापकः तदभावेऽपि विषयाधिगतिसद्भावात्। 'ज्ञानेनाधिगतः' इत्यभिमानस्तु ज्ञानस्य साधकतमताव्यवस्थापक एव ज्ञानाभावे तदधिगतेरभावात्। परम्परया तूपचरितमर्थाधिगतौ साधकतमत्वमक्षादेर्न प्रतिषिध्यते अस्मदादिप्रत्यक्षस्य स्वार्थाधिगतिस्वभावस्याक्षादिप्रभवत्वात्। तत् "इन्द्रियानिन्द्रियनिमित्तम्" [तत्त्वार्थ० १-१४] इति वचनात् एतेन प्रातिभस्यानक्षप्रभवस्यापि स्वार्थावगतिरूपस्य विशदतयाऽध्यक्षप्रमाणता प्रतिपादिता द्रष्टव्या। तेन यत् तत्रेन्द्रियार्थसन्निकर्षजत्वाभावप्रतिपादनेन मीमांसकैर्दूषणमभ्यधायि यच्च नैयायिकैर्मनोऽक्षार्थजत्वसमर्थनेनोत्तरं प्रतिपादितं तदुभयमप्ययुक्ततया व्यवस्थितम्। शेषं त्वत्र यथास्थानं प्रतिविहितत्वान्न प्रत्युच्चार्य दूष्यते। तन्नैकान्तवादिप्रकल्पितमध्यक्षलक्षणमनवद्यम्।

[प्रत्यक्षस्य तद्भेदानां च सिद्धान्तसंमतं निरूपणम्]

किं पुनस्तदनवद्यम्? "स्वार्थसंवेदनं स्पष्टमध्यक्षं मुख्यगौणतः" [ ] इत्येतत्। अत्र च मुख्यमतीन्द्रियज्ञानमशेषविशेषालम्बनमध्यक्षं सर्वज्ञसिद्धौ प्रतिपादितम्। गौणं तु संव्यवहारनिमित्तमसर्वपर्यायद्रव्यविषयमिन्द्रियानिन्द्रियप्रभवमसदाद्यध्यक्षं विशदमुच्यते। अस्य च स्वयोग्योऽर्थः स्वार्थः तस्य संवेदनं विशदतया निर्णयस्वरूपम्। तेन संशय-विपर्ययाऽनध्यवसायलक्षणस्य ज्ञानस्य संव्यवहारानिमित्तस्य नाध्यक्षताप्रसक्तिः नाप्यज्ञानरूपस्येन्द्रियादेः अविकल्पस्य वा सौगतपरिकल्पितस्येन्द्रियज-मानस-योगिज्ञानस्वसंवेदनरूपस्य। स्वं चार्थश्च स्वार्थौ तयोः संवेदनं स्वार्थसंवेदनमित्यस्यापि समासस्याश्रयणात् अर्थसंवेदनस्यैव जैमिनीय-वैशेषिकादिपरिकल्पितस्य परोक्षस्य तदेकार्थसमवेतानन्तरज्ञानग्राह्यस्यास्वसंविदितस्वभावस्याध्यक्षताव्युदासः विज्ञानवादिपरिकल्पितस्य च स्वरूपमात्रग्राहकस्य।

प्रमाणप्रमेयरूपस्य च सकलस्य क्रमाक्रमभाव्यनेकधर्माक्रान्तस्यैकरूपस्य वस्तुनः सद्भावेऽध्यक्षप्रमाणस्यैकस्य क्रमवर्तिपर्यायवशात् तथाव्यपदेशमासादयतश्चातुर्विध्यमवग्रहेहावायधारणरूपतयोपपन्नम्। तत्र "विषयविषयिसन्निपातानन्तरमाद्यं ग्रहणमवँग्रहः" [ ] विषयस्य तावत्

१ पृ० ५२९ पं० १८। २ पृ० ५३७ पं० १५। ३ पृ० ५३७ पं० २०।

४ "प्रत्यक्षं विशदं ज्ञानं मुख्यसंव्यवहारतः। परोक्षं शेषविज्ञानं प्रमाणे इति संग्रहः" ॥ ३ ॥—लघीयस्त्र० पृ० ६। प्रमाणप० पृ० ६९ पं० २४-२५।

"तदुक्तम्-प्रत्यक्षं विशदं ज्ञानं त्रिधाश्रितमविप्लवम्। परोक्षं प्रत्यभिज्ञादि प्रमाणे इति संग्रहः" ॥ अष्टस० पृ० २८९ पं० २।

५ पृ० ५३-६९। ६-**स्य संव्य**-बृ० आ० हा० वि०। ७ "तत्राव्यक्तं यथास्वमिन्द्रियैर्विषयाणामालोचनावधारणमवग्रहः"-१-१५ तत्त्वार्थ० भा०। "विषयविषयिसन्निपातसमयानन्तरमाद्यग्रहणमवग्रहः। विषयविषयिसन्निपाते सति दर्शनं भवति तदनन्तरमर्थस्य ग्रहणमवग्रहः"-१-१५ सर्वार्थ० तथा राजवा०।

"विषयविषयिसन्निपातानन्तरमाद्यं ग्रहणमवग्रहः। विषयस्तावद् द्रव्यपर्यायात्मार्थः विषयिणो द्रव्यभावेन्द्रियम् अर्थग्रहणं योग्यतालक्षणम् तदनन्तरभूतं सन्मात्रं दर्शनं स्वविषयव्यवस्थापनविकल्पमुत्तरं परिणामं प्रतिपद्यतेऽवग्रहः"—लघीयस्त्र० स्वो० वृ० लि० पृ० २ प्र० पं० १-३।

"विषयविषयिसंनिपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रहः"—प्रमाणनयत० २-७।

द्रव्यपर्यायात्मनोऽर्थस्य विषयिणश्च निर्वृत्युपकरणलक्षणस्य द्रव्येन्द्रियस्य लब्ध्युपयोगस्वभावस्य च भावेन्द्रियस्य विशिष्टपुद्गलपरिणतिरूपस्यार्थग्रहणयोग्यतास्वभावस्य च यथाक्रमं सन्निपातो योग्यदेशावस्थानं तदनन्तरोद्भूतं सत्तामात्रदर्शनस्वभावं दर्शनमुत्तरपरिणामं स्वविषयव्यवस्थापनविकल्परूपं प्रतिपद्यमानमवग्रहः। "पुनरवगृहीतविषयाकाङ्क्षणमीहा" [ ] "तदनन्तरं तदीहितविशेषनिर्णयोऽवायः" [ ] "अवेतविषयस्मृतिहेतुस्तदनन्तरं धारणा" [ ]।५

अत्र च पूर्वपूर्वस्य प्रमाणता उत्तरोत्तरस्य च फलतेत्येकस्यापि मतिज्ञानस्य चातुर्विध्यम् कथञ्चित् प्रमाणफलभेदश्चोपपन्नः। यथा च प्रतिभासभेदेऽपि ग्राह्यग्राहकसंविदां युगपदेकत्वं तथा क्रमभाविनामवग्रहादीनां हेतुफलरूपतया व्यवस्थितस्वरूपाणामेकत्वं कथंचिदविरुद्धम् अन्यथा हेतुफलभावाभावप्रसक्तिरिति प्रतिपादितमनेकशः। धारणास्वरूपा च मतिरविसंवादस्वरूपस्मृतिफलस्य हेतुत्वात् प्रमाणम् स्मृतिरपि तथाभूतप्रत्यवमर्शस्वभावसंज्ञाफलजनकत्वात्, संज्ञाऽपि तथाभूततर्कस्वभावचिन्ताफलजनकत्वात्, चिन्ताऽप्यनुमानलक्षणाभिनिबोधफलजनकत्वात्, सोऽपि हानादिबुद्धिजनकत्वात्। तदुक्तम्—"मतिस्मृतिसंज्ञाचिन्ताऽभिनिबोध इत्यनर्थान्तरम्" [तत्त्वार्थ० १-१३] अनर्थान्तरमिति कथंचिदेकविषयम्। "प्राक् शब्दयोजनात् मतिज्ञानमेतत् शेषमनेकप्रभेद(दं) शब्दयोजनादुपजायमानमविशदं ज्ञानं श्रुतम्" [ ] इति केचित्। सैद्धान्तिकास्तु अवग्रहेहावायधारणाप्रभेदरूपाया मतेर्वाचकाः पर्यायशब्दा मतिः स्मृतिः संज्ञा चिन्ता अभिनिबोध इत्येते शब्दा इति प्रतिपन्नाः। स्मृतिसंज्ञाचिन्तादीनां तु कथञ्चिद्गृहीतग्राहित्वेऽप्यविसंवादकत्वादनुमानवत् प्रमाणताऽभ्युपेया। न चानुमानस्यागृहीतस्वलक्षणाध्यवसायात् प्रामाण्यं न यथोक्तस्मृत्यादेः शब्दानित्यत्वादिषु लिङ्गलिङ्गिधियोरप्रमाणताप्रसङ्गात् व्याप्तिग्राहकप्रमाणेन साकल्येनानधिगतस्वलक्षणाध्यवसायिना सत्त्वानित्यत्वादेर्ग्रहणे तयोः समधिगतस्वलक्षणविषयत्वात्। शेषमत्र सविकल्पकमध्यक्षं प्रसाधयद्भिश्चिन्तितम्। अत्र च यत् शब्दसंयोजनात् प्राक् स्मृत्यादिकमविसंवादिव्यवहारनिर्वर्तनक्षमं प्रवर्तते तन्मतिः शब्दसंयोजनात् प्रादुर्भूतं तु सर्वं श्रुतमिति विभागः।

"अक्षार्थयोगे दर्शनानन्तरमर्थग्रहणमवग्रहः"। प्रमाणमी० १-१-२७ ॥

ईहादित्रयस्य लक्षणवाक्यानामपि क्रमविकासमवगन्तुकामैरुक्तेभ्य एव ग्रन्थेभ्यस्तत्तुलना विधेया।

आवश्यकनिर्युक्ति–विशेषावश्यकभाष्ययोस्तु अवग्रहादीनां चतुर्णां लक्षणानीत्थम्—

"अत्थाणं उग्गहणं अवग्गहं तह वियालणं ईहं। ववसायं च अवायं धरणं पुण धारणं बेंति" ॥ नि० १७९ ॥

सामण्णत्थावग्गहणमुग्गहो भेयमग्गणमहेहा। तस्सावगमोऽवाओ अविच्चुई धारणा तस्स" ॥ भा० १८० ॥

१ "कर्णशष्कुलिकारूपमुपकरणेन्द्रियम् कदम्बगोलकाद्याकारा चक्षुरादीन्द्रियनिर्वृत्तिः"-बृ० ल० टि०।

द्रव्येन्द्रिय-भावेन्द्रियस्वरूप-संस्थान-पृथुलादिकं प्रज्ञापनोपाङ्गगतेन्द्रियाख्यपञ्चदशपदतोऽवबोद्धव्यम्-पृ० २९२ द्वि०-३१७ प्र०। २-**णलक्षणस्य** वा० बा० भां० मां०। ३-**त्रदर्शनमुत्तर**-बृ० आ० हा० वि०। ४ "पुनरवग्रहगृहीतविशेषाकाङ्क्षणमीहा"—लघीयस्त्र० स्वो० वृ० लि० पृ० २ प्र० पं० ३। ५ "तथेहितविशेषनिर्णयोऽवायः"-लघीयस्त्र० स्वो० वृ० लि० पृ० २ प्र० पं० ४। ६ "स्मृतिहेतुर्धारणा संस्कार इति यावत्-लघीयस्त्र० स्वो० वृ० लि० पृ० २ प्र० पं० ५। ७ "प्रमाणमिति सर्वत्र संटङ्कः"-बृ० ल० टि०। ८-**त्यनर्थान्तरमिति कथ**-बृ० ल० वा० बा० विना। सर्वेष्वपि श्वेताम्बरीय-दिगम्बरीयेषु तत्त्वार्थव्याख्याग्रन्थेषु "मतिः स्मृतिः संज्ञा" इत्यादिक एव पाठः। सिद्धिविनिश्चयटीकायामपि तथैव समुद्धृतो दृश्यते—लि० पृ० ९९ पं० १४। "ज्ञानमाद्यं मतिः संज्ञा चिन्ता चाभिनिबोधनम्"।-लघीयस्त्र० प० ३ श्लो० १।

९ "प्राङ् नामयोजनाच्छेषं श्रुतं शब्दानुयोजनात्" ॥-लघीयस्त्र० प० ३ श्लो० १। "अविसंवादस्मृतेः फलस्य हेतुत्वात् प्रमाणं धारणा स्मृति(स्मृतिः) संज्ञायाः प्रत्यवमर्शस्य, संज्ञा चिन्तायास्तर्कस्य, चिन्ताभिनिबोधस्यानुमानादेः प्राक् शब्दयोजनाच्छेषं श्रुतज्ञानमनेकप्रभेदम्"—लघीयस्त्र० स्वो० वृ० लि० पृ० २ द्वि० पं० ११। "प्राङ् नामयोजनाच्छेषम्" इत्याद्याकलङ्कं पद्यमादाय विद्यानन्दिना चर्चितम्—१,२० तत्त्वार्थ० श्लो० वा० श्लो० ८४-८८। विशेषा० गा० १६२ पृ० ९९। १० विशेषा० गा० ३९६-४०१ पृ० २२६-२२९। १,१३ तत्त्वार्थ० व्या० पृ० ७८ पं० १२—। ११ **सत्त्वनि**-वा० बा० भां० मां० विना। १२ "लिङ्ग-लिङ्गिधिषणयोः"-बृ० ल० टि०।

१३ "मति-श्रुतयोः स्वरूपविभागपरा भूयसी चर्चा शास्त्रेषु दृश्यते, ततो विशेषार्थिना विशेषावश्यकभाष्य-ज्ञानबिन्दुतोऽवसेया-विशेषाव० भा० गा० ९७-१७५ पृ० ६३-१०६। ज्ञानबिं० पृ० १३६ द्वि०-१३८ द्वि० तथा १४२ द्वि०-१४३ द्वि०।

[प्रत्यक्षैकप्रमाणवादिनः चार्वाकस्यानुमानप्रामाण्याशङ्का]

अत्राहुश्चार्वाकाः—भवतु सांव्यवहारिकं विशदमध्यक्षम् अनुमानादिकं तूपचरितरूपत्वाद्विषयाभावाच्च प्रमाणमनुपपन्नमिति कथं शब्दसंयोजनात् श्रुतं स्मृत्याद्युपपत्तिमत्? तदुक्तम्—"प्रमाणस्यागौणत्वादनुमानादर्थनिर्णयो दुर्लभः" [ ] तथा "अनधिगतार्थपरिच्छित्तिः प्रमाणम्" । [ ] न चानुमानमर्थपरिच्छित्तिस्वभावम् तद्विषयाभिमतस्य सामान्यादेरर्थस्याभावात् । भावेऽपि यदि विशेषस्तद्विषयोऽभ्युपगम्यते तदा तत्र हेतोरनुगमाभावः अथ सामान्यं तद्विषयस्तदा सिद्धसाध्यताप्रसक्तिः । तदुक्तम्—"विशेषेऽनुगमाभावः सामान्ये सिद्धसाधनम्" । [ ] इति । किञ्च, व्याप्तिग्रहणे पक्षधर्मतावगमे च सत्यनुमानं प्रवर्तते न च व्याप्तिग्रहणमध्यक्षतः संभवति तस्य सन्निहितमात्रार्थग्राहकत्वेन सकलपदार्थाक्षेपेण व्याप्तिग्रहणेऽसामर्थ्यात् । नाप्यनुमानं तद्ग्रहणक्षमम् तस्यापि व्याप्तिग्रहणपुरःसरतया तत्र प्रवृत्तेः अनुमानात् तद्ग्रहणेऽनवस्थेतरेतराश्रयदोषप्रसक्तेः । प्रत्यक्षानुमानव्यतिरिक्तस्य च व्याप्तिग्राहकत्वायोगात् विशेषविरुद्धानुमानविरोधयोश्च सर्वत्र सुलभत्वात् कुतोऽनुमानस्य प्रामाण्यम्?

[सौगतैरनुमानप्रामाण्यसमर्थनेन चार्वाकाशङ्कायाः प्रतिविधानम्]

अत्र प्रत्यक्षानुमानप्रमाणद्वयवादिनः सौगताः प्रतिविदधति–प्रमाणेतरसामान्यस्थितेः परबुद्धिपरिच्छित्तेः स्वर्गापूर्वदेवतादिप्रतिषेधस्य चाकृतलक्षणाभिः स्वसंवित्तिभिः कर्तुमशक्तेः प्रमाणान्तरसद्भावः सिद्धः । यच्च 'प्रमाणस्यागौणत्वात्' इत्युक्तम् तत्र यद्यगौणत्वमनुपचरितत्वमभिप्रेतं तदानुमानमप्यनुपचरितमेव अस्खलितबुद्धिरूपत्वात् अथ धर्मिधर्मसमुदायस्य साध्यत्वे हेतोः पक्षधर्मत्वम् अन्वयो वाऽसंभवीति धर्मिणः साध्यत्वं पक्षधर्मत्वप्रसिद्ध्यर्थं धर्मस्य चान्वयसिद्ध्यर्थमुपचरितमित्युपचरितविषयत्वादनुमानमुपचरितम्, असदेतत्; यतो यत्र धर्मिणि धूममात्रमग्निमात्रव्याप्तमुपलभ्यते तत्रैवाग्निप्रतिपत्तिर्भवन्ती लोके दृश्यत इति कस्यात्रोपचारः? समुदायस्याप्येवं साध्यत्वं सिध्यत्येव । यदाह "केवल एव धर्मो धर्मिणि साध्यस्तथेष्टसमुदायस्य सिद्धिः कृता भवति" [ ] इति । पुनरप्युक्तम्—

"धर्मस्याव्यभिचारस्तु धर्मेणान्यत्र दर्श्यते ।
तत्र प्रसिद्धं तद्युक्तं धर्मिणं गमयिष्यति ॥" [ ] इति ।

न चानुमानविषये साध्यशब्दोपचारे अनुमानमुपचरितं नाम । न चागौणत्वादभ्रान्तत्वात् प्रमाणस्यानुमानस्य च भ्रान्तत्वादप्रामाण्यम् भ्रान्तस्याप्यनुमानस्य प्रतिबन्धबलादुपजायमानस्य प्रामाण्यसिद्धेः । तथाहि—प्रत्यक्षस्यापि अर्थस्यासंभवेऽभाव एवाव्यभिचारित्वलक्षणं प्रामाण्यम् तच्च साध्यप्रतिबद्धहेतुप्रभवस्यानुमानस्याप्यस्तीति कथं न प्रमाणम्? तदुक्तम्—

---

१ प्रत्यक्षैकप्रमाणसमर्थनप्रवणं चार्वाकमतं प्रमेयकमलमार्तण्डे द्रष्टव्यम्–पृ० ४५ द्वि० पं० ५। २ पृ० ७० पं० २७ टि० २। "तथा चाहुः–प्रमाणस्यागौणत्वादनुमानार्थनिश्चयो दुर्लभः"–न्यायमञ्ज० आ० २ पृ० ११८ पं० २१।

३ "विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनात् । तद्वतोऽनुपपन्नत्वादनुमानकथा कुतः" ॥—न्यायमञ्ज० आ० २ पृ० ११९ पं० ४–५। "येऽपि मन्यन्ते—विशेषेऽनुगमाभावः सामान्ये सिद्धसाध्यता"—१,१,५ शास्त्रदीपिका पृ० ११ पं० १०।

४ अत्रार्थे कारिकेयं वर्तते—"तदुक्तं धर्मकीर्तिना–

प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः । प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित्"—प्रमाणप० पृ० ६४ पं० ३६–३८। प्रमेयक० पृ० ४६ द्वि० पं० २। "तथा चोक्तं सौगतैः" इति कृत्वोद्धृतोऽयं श्लोकः प्रशस्तपादकन्दल्याम्–पृ० २५५ पं० १७–१९। "धर्मकीर्तिरप्येतदाह" इति निर्दिश्योद्धृतोऽयं श्लोकः प्रमाणमीमांसायाम्–१–१–११ पृ० १४ पं० १४। ५–**धस्याक्ष**–आ० हा० वि०। ६ प्र० पृ० पं० ४। ७ **धर्मत्वं प्र**–भां० मां० आ० हा० वि०। ८ "साध्यधर्म"–बृ० टि०।

"लिङ्गस्याव्यभिचारस्तु धर्मेणान्यत्र दृश्यते । तत्र प्रसिद्धं तद्युक्तं धर्मिणं गमयिष्यति ॥"—न्यायवा० ता० टी० पृ० १८० पं० ९।

"अर्थस्यासंभवे भावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयम्" ॥ [ ] इति ।

तेन 'अनधिगतार्थपरिच्छित्तिः प्रमाणम्' इत्यादि यदुक्तम् तदप्यपास्तम्; यतः सर्व एव प्रेक्षावान् प्रवृत्तिकामः प्रमाणमन्वेषते प्रवृत्तिविषयार्थप्रदर्शकम् । अर्थक्रियासमर्थश्चार्थः प्रवृत्तिविषयः । अनागतं च प्रवृत्तिसाध्यमर्थक्रियासामर्थ्यमर्थस्य नाध्यक्षमधिगन्तुं समर्थम् भाविनि प्रमाणव्यापारासंभवात् तत् कथमस्यार्थपरिच्छेदमात्रात् प्रामाण्यं युक्तम्? अतः स्वविषये अध्यक्षं तदुत्पत्त्या 'यत् पूर्वं मया प्रबन्धेनार्थक्रियाकारि प्रतिपन्नं वस्तु तदेवेदम्' इति निश्चयं कुर्वत् प्रवर्तकत्वात् प्रमाणम् अनुमानेऽपि चैतत् समानम् यतोऽर्थक्रियाकारित्वेन निश्चितादर्थात् पारम्पर्येणोत्पत्तिरेवाव्यभिचारित्वलक्षणं प्रामाण्यमनुमानेऽप्यध्यक्षवत् कथं नाविप्रतिपत्तिविषयः? प्रतिपद्यत एवं चाश्यनुमानस्य तदुत्पत्त्या बाह्यवह्न्यध्यवसायेन लोकोऽध्यक्षवत् प्रामाण्यम् । अथाध्यक्षमपि प्रमाणं नेष्यते तर्हि लोकप्रतीतिबाधा भवन्तमनुबध्नाति अध्यक्षानुमानयोः प्रमाणतया लोके प्रतीतत्वात् । न च नाध्यक्षानुमानयोः प्रामाण्यमस्माभिर्निषिध्यते किन्तु त्रिलक्षणं चतुर्लक्षणं वा लिङ्गं न केनचित् प्रमाणेन भवतः प्रसिद्धमिति पर्यनुयोगे यद्यनुमानं साधकमभिधीयते ततस्तत्रापि स एव पर्यनुयोग इत्येवं सर्वत्र पर्यनुयोगपराण्येव बृहस्पतेः सूत्राणीति वक्तव्यम् यतः पक्षधर्मात् तदंशव्याप्तात् प्रमाणतोऽवगतात् साध्यप्रतिपत्तिरनुमानम् पक्षधर्मतानिश्चयश्च क्वचित् प्रत्यक्षात् क्वचिच्चानुमानात् यत्राप्यनुमानात् तन्निश्चयस्तत्रापि नानवस्थादिदूषणम् प्रत्यक्षादेव क्वचित् तन्निश्चयादनवस्थादिदोषव्यावृत्तेः तदंशव्याप्तिनिश्चयश्च कार्यहेतोः कस्यचित् स्वभावहेतोश्च विशिष्टप्रत्यक्षादेव । स्वभावहेतोरप्यनित्यत्वस्याध्यक्षेणैव प्रतिपत्तेस्तन्निबन्धन एव तन्निश्चयः । अध्यक्षावगतेऽपि च क्षणिकत्वे तद्व्यवहारसाधनाय प्रवर्त्तमानमनुमानं न वैयर्थ्यमनुभवेत् शिंशपात्वाद् वृक्षत्वानुमानवत् । न च सत्त्व-क्षणिकत्वयोस्तादात्म्ये सत्त्वनिश्चये क्षणिकत्वस्यापि निश्चयात् तदनिश्चये वा सत्त्वस्याप्यनिश्चयात्—अन्यथा तत्तादात्म्यायोगात्—क्षणिकत्वानुमानवैयर्थ्यम् यतो निश्चयापेक्षो हि गम्यगमकभावः निश्चयश्चानुभवाविशेषेऽपि सत्त्व एव न क्षणिकत्वे सदृशापरापरोत्पत्त्यादेर्भ्रान्तिनिमित्तस्य सद्भावात् विपर्यये बाधकप्रमाणवृत्त्या सत्त्व-क्षणिकत्वयोस्तादात्म्यसिद्धेर्बाधकप्रमाणस्य च प्रतिबन्धसिद्धिरध्यक्षत इति नानवस्थादिदोषः । न च निर्विकल्पकं व्यास्या प्रतिबन्धग्रहणाक्षमम् विकल्पोत्पादनद्वारेण तस्य तत्र सामर्थ्याभ्युपगमात् । न चाप्रमाणकेन परः पर्यनुयुज्यते वादिप्रतिवादिनोः पर्यनुयोगस्य प्रमाणत्वेनासिद्धेः । अथ यथा वचनात्मकमनुमानं न वक्तुः प्रमाणम् अथ चाऽनेन वक्ता परान् प्रतिपादयति तथाऽप्रमाणकेन पर्यनुयोगः क्रियत इत्ययुक्तमेतत् यतो वचनाद् द्वयोरप्यर्थप्रतीतिः प्रमाणभूतैवोत्पद्यतेऽर्थपरिच्छेदकत्वात् केवलं वक्तुरधिगमस्य निष्पन्नत्वात् प्रमाणं नोच्यते न पुनरप्रमाणं भवति अप्रामाण्ये वा द्वयोरप्यप्रमाणमिति कथं तथार्थप्रतीतिः? यदपि 'परप्रसिद्धेनानुमानेन तदेव निषिध्यते' इत्युच्यते तदप्येतेनैव निरस्तम् । यच्च 'तद्विषयस्य सामान्यादेरभावादनुमानमप्रमाणम्' इत्युक्तम् तदप्यतद्रूपपरावृत्तवस्तुमात्रप्रसाधकत्वेनानुमानस्य प्रतिपादनात् प्रतिविहितम् यथोक्तस्य च सामान्यस्यायोगव्यवच्छेदेन प्रतिनियतदेशादिसम्बन्धितयाऽनुमानेन प्रसाधनात् । 'विशेषेऽनुगमाभावः सामान्ये सिद्धसाधनम्' इत्यपि प्रतिविहितमेव । अवगततादात्म्यतदुत्पत्तिप्रतिबन्धस्य च लिङ्गस्य साध्यगमकत्वे विशेषविरुद्धानुमानविरोधयोः सहभावदर्शनमात्रप्रतिपन्नाविनाभावलिङ्गप्रभ-

---

१ "प्रमाणहेतुत्वे"–बृ० टि०। २ पृ० १७ पं० ९। तत्त्वसं० पञ्जि० पृ० ७७५ पं० २७। आप्तप० पृ० ४३ पं० १६। १–१–११ प्रमाणमी० पृ० १४ पं० १६। ३ पृ० ५५४ पं० ४। ४ "प्रत्यक्षस्य"–बृ० टि०। ५–**पत्तिर्वि**–बृ०। ६–**व वा**–बृ० वा० बा० विना। ७ **लोकेऽ**–बृ० विना। ८ **लिङ्गं के**–वा० बा० भां० मां० विना। ९ पृ० ६९ पं० ३९। "परपर्यनुयोगपराणि हि बृहस्पतेः सूत्राणि इति वचनात्"—प्रमाणप० पृ० ६३ पं० १। १० "प्रत्यक्षनिबन्धन–" बृ० टि०। ११–**न पर्य**–वा० बा०। १२–**नं व**–भां० मां० विना। १३ "वचनात्मकं हि अनुमानं परार्थं ततस्तस्यैव प्रमाणं न वक्तुः वक्ता चात्माप्रमाणेनाऽपि परं प्रतिपादयति"—बृ० ल० टि०। १४ **नित्योत्पन्न**–बृ० सं०। १५ **कथं वितथार्थं प्र**–भां० मां०। १६ पृ० ५५४ पं० ५। १७ पृ० ५५४ पं० ७।

वयोः कथमवकाशः? तेन 'विशेषविरुद्ध'-इत्याद्यप्यसङ्गतमेव अतोऽनुमानस्यापि प्रामाण्योपपत्तेः "प्रत्यक्षमेवैकं प्रमाणम्" [ ] इति चार्वाकमतमयुक्तम्। अत्र च—

"पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः।
अविनाभावनियमाद्धेत्वाभासास्ततोऽपरे" [ ]

५ इति वचनात् पक्षधर्मस्तदंशेन व्याप्त इति लक्षणनिर्देशः हेतुरिति लक्ष्यनिर्देशः त्रिधैव स हेतुरिति तत्प्रभेदनिर्देशः।

---

१ पृ० ५५४ पं० १२।

२ क्वचित् क्वचित् खण्डितोऽपि हेतुबिन्दुतर्कटीकागतः पाठः समानप्रायत्वेन परस्परशुद्धीकरण-तुलनयोरुपयोगितया सटिप्पणिकत्वेन च अर्थवैशद्योपयोगितया ताडपत्रप्रत्युपलब्धावस्थ एवात्र समुद्रियते—

"एष चार्थः पक्षधर्मस्तदंशेन व्याप्तो हेतुः कस्य परोक्षा···पि च व्याप्तौ सत्यां तत्र नियतं भवतीत्यभिप्रायवता विपर्ययव्याप्तिं प्रदर्शयितुमिदमुक्तम्—"हेत्वाभासास्ततोऽपरः" इति तत्रैतत् स्यात् क्षणिकविपक्ष···विपर्ययेण व्याप्तिर्बाधकप्रमाणवशादवसिता इह तु त्रिसङ्ख्याबाह्यानामर्थानां हेत्वाभासत्वेन व्याप्तिः कतरेण प्रमाणेनावसितेत्यव···अविनाभावनियमात् इति। त्रिविधहेतुव्यतिरिक्ते लिङ्गतयोपगते शङ्क्यमाने वा वस्तुनि पक्षधर्मतासद्भावेऽप्यविनाभावाभावा····

तथा च वक्ष्यति—

"न स त्रिविधाद्धेतोरन्यत्रास्तीत्यत्रैव नियत उच्यते" इति। अविनाभाववैकल्यं च हेत्वाभासत्वेनासिद्धविरुद्धानैकान्तिकसामान्य···णव्याप्तं प्रमेयत्वादौ निश्चितमिति हेत्वाभासत्वे साध्येऽविनाभाववैकल्यं स्वभावहेतुः अविनाभाववैकल्यं च त्रिविधहेतुव्यतिरिक्तत्वादेव त····गता नापि हेतुत्वं तेषु निषिध्यमानं केवलं व्यामोहात् हेतुत्वमन्यत्र प्रसिद्धमेव तत्राऽऽरोपितमाशङ्कितं वा तद्विरुद्धोपलम्भादपसार्यते। तत् किमुच्यते···विनः कथं विरोध इति न च सहानवस्थानलक्षण एव विरोधो येन तन्न्यायः सर्वत्रोपवर्ण्येत। नाऽपि यद् यत्र प्रतिषिध्यते तस्य तत्रैव विरो···(धः प्रति) पत्तव्यो येन "कथऽमसतः केनचिद् विरोधगतिः" इति चोद्येत। नहि नात्र शीतस्पर्शोऽग्नेरिति साध्यधर्मिण्येव शीतस्पर्शस्याग्निना विरोध···न्धो यथा ऽस्त्यन्यत्र प्रतीतविरोधस्याग्निना साध्यधर्मिणि निषेधः तथा हेत्वाभासत्वोपलम्भाद् हेतुत्रयबाह्येष्वर्थेषु हेतुत्वनिरास ·····तोऽपि च लाक्षणिको विरोधः प्रतीयते। यथा क्षणिकत्वेनाक्षणिकत्वस्य तस्य वस्तुनि क्वचिदप्यसम्भवात्। भावेन वा यद्वदभावस्य सर्वसन्नि···क्षणस्येत्यलं दुर्मतिविसन्दितेष्वत्यादरेणेति स्थितमेतत्-त्रित्वे हेतुत्वं नियम्यमान···कानुपलब्धितः सिद्धम्। तथाहि-तादात्म्य-तदुत्पत्तिभ्यामविनाभावो व्याप्तः, तयोस्तत्रावश्यंभावात्। तस्य च तयोरेव भावादतत्स्वभावस्यातदुत्पत्तेश्च। या तदव्यभिचारनियमाभावात्।

तदुक्तम्—

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमोऽदर्शनान्न न दर्शनात्॥
नियमः कः परस्यान्यथा परैः। अनन्तरनिमित्ते वा धर्मे वाससि रागवत्॥ इति॥

रूपादिनाऽपि हि रसादेरविनाभावो न ख· णाव्यभिचारद्वारक इति। तत्कारणोत्पत्तिरेवाविनाभावनिबन्धनम्। अन्यथा तदनायत्तस्य तत्कारणानायत्तस्य वा तेन···नायां सर्वस्य सर्वात्मैरविनाभावः स्यात्, अविशेषात्। एकार्थसमवायनिमित्तो रूपरसादेरविनाभाव इति चेत्, ननु समवायोऽप्याधार्या···भूतानामुपवर्ण्यते। स चाधाराधेयभावस्तदात्मानुपकारेऽतिप्रसङ्गतो न सिध्यतीत्येकसामग्यधीनतैवैकार्थसमवाय···योऽन्यो वा वस्तुभूतः संबन्धोऽसम्भवी तथा सम्बन्धपरीक्षायां विस्तरतः शास्त्रकृता प्रतिपादितमेवेति तत एवावधार्यम्। अंस····न वा जन्यजनकभावे तादात्म्ये वा तेनैवाविनाभावो नान्येनेत्यत्र वस्तुस्वभावैरेवोत्तरं वाच्यम्। ये एवं भवन्ति नास्माभिः क···इति चेत्, आकस्मिकस्तर्हि स वस्तूनां स्वभाव इति न कस्यचिन्न स्यात्। न ह्यहेतोर्देशकालद्रव्यनियमो युक्तः। नहि···नीयेत न वा यस्य यत्र किञ्चिदार्थत्तमनायत्तं वा अन्यथा विशेषाभावादिष्टदेशकालद्रव्यवदन्यदेशादिभावः केना·····द् यद् येनाविनाभूतं दृश्यते तस्य तेनाव्यभिचारकारणं तत्त्वचिन्तकैरभिधानीयम्, न तु पादप्रसारिकाऽवलम्बनीया। तच्चाव्यभिचारकारणम् यथोक्तादन्यन्न युज्यते इति तद्विकला न हेतुलक्षणभाजः इति। तथा चाह—

---

१ त्रित्वे। २ भवतोऽन्यभावेऽभावलक्षणः। ३ शीतस्पर्शस्य। ४ संयो···(?)त्रित्वहेतु··। ५ अविनाभावे। ६ तादात्म्यात्। ७ साध्येन। ८ साधनस्य। ९ विपक्षे। १० सपक्षे। ११ साधनस्य। १२ तादात्म्यतदुत्पत्त्यभावे। १३ साध्ये। १४ मुद्गरादि। १५ नित्यत्वादिके। १६ एकसामग्रीप्रतिबन्धाभावे। १७ साध्यानायत्तस्य। १८ साध्यकारणाऽनायत्तस्य। १९ ऽऽधेयस्य रूपरसादेरनुपकारे २० पर···। २१ प्रतिबद्धं।

अथ हेत्वन्तराभावनिश्चये त्रिधैव स इति नियमो युक्तः प्रतियोग्यभावनिश्चयसापेक्षत्वाद्

संयोग्यादिषु येष्वस्ति प्रतिबन्धो न तादृशः। न ते हेतव···व्यभिचारस्य संभवात्॥ इति॥

अत्र प्रयोगः यस्य येन सह तादात्म्य-तदुत्पत्ती न स्तो न स तदविनाभावी, यथा प्रमेयत्वादिरनित्यत्वादिना न, नस्तश्च केन ि··तादात्म्यतदुत्पत्ती स्वभावकार्यव्यतिरेकिणामर्थानामिति व्यापकानुपलब्धिः। स्वभावानुपलब्धिस्तु स्वभावहेतावन्तर्भावितेति तस्या····लक्षण एव प्रतिबन्धः। व्यापककारणानुपलब्धी तु तादात्म्यतदुत्पत्तिलक्षणप्रतिबन्धवशादेव व्याप्यकार्ययोर्निवृत्तिं साधयत···

···त् तन्मात्रसम्बद्धः स्वभावो भावमेव वा। निवर्त्तयेत् कारणं वा कार्यमव्यभिचारतः॥ इति॥

तदेवं हेतुलक्षणं संख्यानियमस्तदुपदर्श····मत्र श्लोके निर्दिष्टमिति। अथवा त्रिधैव स इति स पक्षधर्मस्त्रिप्रकार एव स्वभावकार्यानुपलम्भाख्यस्तदंशेन व्याप्तो नान्यः।' त्रिप्रकारस्तदंशेन व्याप्त एवेति सम्बन्धः। किं कारणम्? अविनाभावनियमात्। अविनाभावस्य व्याप्तेः त्रिविध एव पक्षधर्मे नियम्यमानस्य च पक्षधर्मस्याविनाभावे नियमात्। तेन च भावकार्यानुपलम्भात्मकत्रिविधपक्षधर्मव्यतिरिक्ता न तदंशेन व्याप्ता इति। त्रिविधश्च कार्यस्वभावानुपलब्धिरूपः पक्षधर्मस्तदंशेन व्याप्त एवेति न तस्याहेतुत्वमित्युक्तं भवति। ततस्त्रिविधहेतुबाह्येष्वविरोधाद्धेतुव्यवहारं कुर्वन्तः त्रिविधे च हेतावविनाभावस्यावश्यम्भावादहेतुत्वमाचक्षाणा निरस्ता भवन्ति। तत्रैतत् स्यात् हेत्वाभासानामवि ··हि कथितम्। तत्र कार्यस्वभावयोर्विधिसाधनत्वान्न प्रतिषेधे साध्ये व्यापारः अनुपलब्धितोऽपि न हेत्वन्तराभावनिश्चयो यतः सा चतुर्द्धाऽवस्थिता स्वभाव··व्यापकानुपलब्धयो विरुद्धविधिश्चेति। तत्र तुल्ययोग्यतारूपस्यैकज्ञानसंसर्गिणः स्वभावानुपलब्धिरन्योपलब्धिरूपा अभावव्यवहारहेतुरिष्यते। न····तरमत्यन्ताभावतयोपगतमनुक्तान्तरूपम् यदि हि स्यादेशादिनिषेध एवास्य स्यात् नात्यन्ताभावः। कारणव्यापकानुपलब्धी तु सिद्धे कार्य···व्याप्यव्यापकभावे भवतः। न च हेत्वन्तरेऽत्यन्तासत्त्वयाऽङ्गीकृते प्रकारोऽयं सम्भवति तत् कथं ते तदभावं गमयिष्यतः। विरोधोऽप्यविकल·····भवतोऽन्यभावेऽभावादवगम्यत इति विरुद्धोपलब्धिरप्यसम्भविनी। सम्भवे वा कारणानुपलब्ध्यादीनां कथमत्यन्तनिषेधः? इत्याशङ्क्याह—"हेत्वाभासास्ततोऽपरे" इति। ततस्त्रिविधाद्धेतोरपरेऽन्ये हेत्वाभासा यतस्ततस्त्रिधैव स इति। एवं मन्यते—इह यद् यत्र नियम्यते विपर्ययेण तद्विपक्षस्य व्याप्तौ स नियमः सिध्यति। यथा यत् सत् तत् क्षणिकमेवेति। सत्त्वस्य क्षणिकेषु नियम उच्यमानः सत्त्वविपर्ययेणा···त्वेन क्षणिकविपक्षस्याक्षणिकस्य व्याप्तौ सिध्यति। एवमिहापि त्रित्वे हेतुर्नियम्यमानो हेतुविपर्ययेण हेत्वाभासत्वेन त्रिसंख्या वा··स्य व्याप्तौ त्रिसंख्यायामेव नियतो भवति। ततस्त्रिविधहेतुव्यतिरिक्तानामर्थानां हेत्वाभासतां दर्शयति। तेन स्वभावविरुद्धोपलब्ध्य·····भावानुपलम्भव्यतिरिक्तानामर्थानां हेतुत्वाभावनिश्चय इति। हेतुतदाभासयोश्च परस्परपरिहारस्थितलक्षणतयैव विरोधो···क्षणप्रतीतिकाल एव प्रतिपन्नः तदात्मनियतप्रतिभासज्ञानादेव तद्विपरीतस्यान्यतया तदाभासताप्रतीतेः परस्परमितरेतररूपाभाव ···यात्। तत्र त्रिविधहेतुव्यतिरिक्तेष्वर्थेषु हेत्वाभासत्वमुपलभ्यमानं स्वविरुद्धं हेतुत्वं निराकरोति। ते च हेतुत्रयबाह्या अर्था नात्यन्तासत्त··भिधानीयम् तत्र शिष्याणां हेतुव्यवहारनिवृत्तय इत्याह "हेत्वाभासास्ततोऽपरे" इति। ततः पक्षधर्मस्तदंशेन व्याप्त इति हेतुलक्षणादपरेऽ··लक्षणविकला हेत्वाभासा गम्यन्त एवेति न तल्लक्षणमुच्यते। तथाहि-पक्षधर्म इत्युक्ते यत्र पक्षधर्मता नास्ति न स हेतुस्तदंशेन व्याप्त इति वचने यत्र तदंशव्याप्तिविरहो विपर्ययव्याप्तेर्व्यापकस्य वा तत्रावश्यम्भावाभावात् ते हेतुरूपविकलतया हेत्वाभासा असिद्धविरुद्धाऽनैकान्तिका गम्यन्त एव। तथाहि—यल्लक्षणो योऽर्थः शिष्यस्य व्युत्पादितः तल्लक्षणविरहिते न तद्व्यवहारं स्वयमेव प्रवर्तयिष्यत्य····परिहारेणव तद्रूपप्रतिपत्तेरिति न तत्र यत्नः फलवान् भवति। यत्त्वन्यत्र हेत्वाभासव्युत्पादनं तन्मन्दबुद्धीनधिकृत्य इदं तु प्रकरणं विपुलमतीनुद्दिश्य प्रणीतम् "संक्षेपतः" इति वचनात्। त एव हि संक्षेपोक्तं यथावदवगन्तुं क्षमाः न मन्दमतयः तेषां विस्ताराभिधानमन्तरेण यथावदर्थप्रतिपत्तेरभावात्। अत एवार्थाक्षिप्तोपन्यासपूर्वकमेव हेत्वाभासलक्षणं तत्रोपवर्णितमिति। तदत्र व्याख्याने हेतुलक्षणं १ हेतुसंख्यानियमः २ तस्य च त्रिविधस्य हेतुत्वावधारणं ३ तदुभयकारणं ५ श्लिष्टनिर्देशा·····हेत्वाभासलक्षणानभिधानकारणं चेति ६ षडर्थाः श्लोकेऽत्र निर्दिष्टा इति"—हेतु० टी० ता० लि० पृ० ४ ब-पृ० ९ ब।

२२····दि। २३ऽनित्यादिकः। २४ व्याप्यं कृतकत्वादिकम्। २५ चार्वाकाः। २६ तुल्यं ल··तो योग्यतारूपं यस्य। २७ एकज्ञानसंसर्गिव··। २८ हेतुत्वम्। २९·····र्योगत्वे। ३० हेतु—। ३१ यद्रूपः। ३२ तस्योभयस्य हेतुसंख्यानियमस्य हेतुत्वावधारणस्य च कारणं अविनाभावनियम इत्येत···।

भावेषु सावधारणनिश्चयस्य । उक्तं च—

"अयमेवेति यो ह्येष भावे भवति निर्णयः ।
नैष वस्त्वन्तराभावसंवित्त्यनुगमाद्दते" [ ] इति ।

न च हेत्वन्तराभावः प्रत्यक्षसमधिगम्यः तस्याभावविषयत्वविरोधात् । नाप्यनुमानतः तस्य त्रिविधलिङ्गप्रभवत्वोपवर्णनात् कार्यस्वभावयोश्च विधिसाधकत्वेनाभावे साध्ये व्यापारासंभवात् अनुपलब्धेश्च हेत्वन्तराभावनिश्चये चतुर्विधाया अप्ययोगात् । तथाहि–स्वभावानुपलब्धिर्ह्यन्योपलब्धिरूपा तुल्ययोग्यतारूपस्यैकज्ञानसंसर्गिणोऽभावव्यवहारहेतुरभ्युपगम्यते । न चात्यन्तासत्त्वयोपगतं हेत्वन्तरमुक्तस्वभावम् तथात्वे देशादिनिषेध एव तस्य भवेन्नात्यन्ताभावः । कारणव्यापकानुपलब्ध्योरपि कार्यकारणव्याप्यव्यापकभावसिद्धौ सत्यां व्यापारः न चात्यन्तासतो हेत्वन्तरस्य किञ्चिद् वस्तु कारणं व्यापकं वा सिद्धं येन तयोस्तत्र व्यापारो भवेत् । विरुद्धविधिरप्यत्रासंभवी यतो विरोधोऽविकलकारणस्य भवतोऽन्यभावेऽभावादवसीयते न च हेत्वन्तरेऽत्यन्तासत्यं प्रकारः संभवति संभवे वा न कारणानुपलब्ध्यादीनामात्यन्तिकनिषेधहेतुतेत्याशङ्क्याह—"हेत्वाभासास्ततोऽपरे" इति । तदंशव्याप्तिवचनेनान्वयव्यतिरेकयोरभिधानात् ततः पक्षधर्मत्वान्वयव्यतिरेकलक्षणकार्यस्वभावानुपलब्धिस्वरूपात्त्रिविधाद्धेतोरपरेऽन्ये हेत्वाभासा यतस्ततः "त्रिधैव सः" इति । अयमभिप्रायः—त्रित्वे हेतुर्नियम्यमानो हेतुर्विपर्ययेण हेत्वाभासत्वेन त्रिसंख्याबाह्यस्यार्थस्य व्याप्तौ त्रिसंख्यायामेव नियतो भवति । यथा सत्त्वलक्षणो हेतुः क्षणिकेषु नियम्यमानः सत्त्वविपर्ययेणासत्त्वेन क्षणिकविपक्षस्याक्षणिकस्य व्याप्तौ नियतः सिध्यतीति त्रिविधहेतुव्यतिरिक्तेष्वर्थेषु हेत्वाभासतोपदर्शनम् । इह च विरुद्धोपलब्ध्या कार्यस्वभावानुपलम्भव्यतिरिक्तानां भावानां हेतुत्वाभावनिश्चयः । हेतुतदाभासयोश्च परस्परपरिहारस्थितलक्षणतैव विरोधः प्रतिपन्नः हेतुलक्षणप्रतीतिकाल एव तदात्मनियतप्रतिभासज्ञानादेव तद्विपरीतस्यान्यतया तदाभासताप्रतीतेः परस्परमितरेतररूपाभावनिश्चयात् । तेन हेत्वाभासत्वं त्रिविधहेतुव्यतिरिक्तेषूपलभ्यमानं स्वविरुद्धं हेतुत्वं निराकरोति । न चात्यन्तासत्त्वेन हेतुत्रयबाह्यार्था अभ्युपगताः केवलं हेतुत्वमन्यत्र प्रसिद्धमेव तेषु व्यामोहादध्यारोपितमाशङ्कितं वा तद्विरुद्धोपलब्धेः प्रतिषिध्यत इति कथम् "अत्यन्तासंभविनो न विरोधगतिः" [ ] इति दूषणम्? सहानवस्थानलक्षणवत् परस्परपरिहारस्थितलक्षणस्यापि विरोधस्य भावे सर्वत्र तन्न्यायोपवर्णनमसंगतमेव । अन्यत्र च प्रसिद्धविरोधयोः शीतोष्णयोरिव हेतुतदाभासयोर्हेतुत्रयबाह्येष्वर्थेषु हेत्वाभासत्वोपलम्भाद्धेतुत्वनिरासो यथाग्नावुष्णस्पर्शोपलम्भात् शीतस्पर्शनिषेध इति न क्वचित् साध्यधर्मिण्येव विरोधः प्रतिपत्तव्यः । अत्यन्तासतोऽपि च लाक्षणिको विरोधोऽवगम्यत एव यथा भावेन सर्वशक्तिविरहलक्षणस्याभावस्य । कुतः पुनः प्रमाणात् त्रिसंख्याबाह्यानामर्थानां हेत्वाभासत्वेन व्याप्तिरवगतेत्याशङ्क्याह—"अविनाभावनियमात्" इति लिङ्गत्रयाऽऽशङ्क्यमाने त्रिविधहेतुव्यतिरिक्तेऽर्थे पक्षधर्मतासद्भावेऽप्यविनाभावस्याभावात् । वक्ष्यति च—"न सं त्रिविधाद्धेतोरन्यत्रास्तीत्यत्रैव नियत उच्यते" [ ] इति हेत्वाभासत्वेनासिद्धविरुद्धानैकान्तिकसामान्यधर्मेण व्याप्तमविनाभाववैकल्यं प्रमेयत्वादाववगतमिति हेत्वाभासत्वे साध्ये तत्स्वभावहेतुः त्रिविधहेतुव्यतिरिक्तत्वादेव तदन्येषामविनाभाववैकल्यं व्यापकानुपलब्धेः सिद्धम् अविनाभावस्य तादात्म्य-तदुत्पत्तिभ्यां व्याप्तत्वात् तयोरेव तस्य भावात् तत्र च तयोरवश्यं भावादतदुत्पत्तेरतत्स्वभावस्य च तदनायत्ततया तदव्यभिचारनियमाभावात् । उक्तं च—

"कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात्" ॥ [ ]

१–णस्य नि–वा० बा० । २–भावः सं–भां० मां० । पृ० ३४९ पं० २३ । ३–४–५ पृ० ५५६ पं० ३–४ । ६ "अपि तु अन्यत्र धर्म्यन्तरे"–बृ० ल० टि० । ७ "परस्परपरिहारस्थितिलक्षणः"—बृ० ल० टि० । ८ पृ० ५५६ पं० ४ । ९ "अविनाभावः"–बृ० ल० टि० । १०–हेतु त्रि–वा० बा० । ११ "अविनाभावस्य"–बृ० टि० । १२–त् अत्र वा० बा० भां० मां० । १३ "तादात्म्य–तदुत्पत्त्योः"–बृ० ल० टि० । १४–यमोद–बृ० भां० मां० विना । पृ० ७६ पं० १७ । तत्त्वसं० पञ्जि० पृ० ४३० पं०२० । "नियमोऽदर्शनान्न तु दर्शनात्"–प्रशस्त० कं० पृ० २०७ पं० ८ । न्यायवा० ता० टी० पृ०१५८ पं० २४ । नयनप्रसादिन्यां चित्सुखया व्याख्यायाम् "तदप्युक्तं कीर्तिना" इत्युल्लिख्यायं श्लोक उद्धृतोऽस्ति परं तत्र "-ऽदर्शनान्न तु दर्शनात्" इति चतुर्थं चरणम्-पृ० ७१ पं० २८ ।

"अवश्यंभावनियमः कः परस्यान्यथा परैः ।
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत्" ॥ [ ] इति ।

याऽपि रसतः समानसमयस्य रूपादेः प्रतिपत्तिः साऽपि स्वकारणाव्यभिचारनिमित्ताविनाभावनिबन्धनेति तत्कारणोत्पत्तिरेवाविनाभावनिबन्धनमन्यथा तदनायत्तस्य तत्कारणानायत्तस्य वा तेनाविनाभावकल्पनायामविशेषात् सर्वार्थैरविनाभावो भवेत् । न चैकार्थसमवायनिमित्तो रूपरसादेरविनाभावः तस्य निषिद्धत्वात् । तदुक्तम्—

"एकसामग्र्यधीनत्वाद् रूपादे रसतो गतिः ।
हेतुर्धर्मानुमानेन धूमेन्धनविकारवत् ॥" [ ] इति ।

तदेवं तादात्म्य-तदुत्पत्त्योरविनाभावव्यापिकयोर्यत्राभावस्तत्राविनाभावाभावाद् हेतुत्वस्याप्यभावः सिद्धः । तदुक्तम्—

"संयोग्यादिषु येष्वस्ति प्रतिबन्धो न तादृशः ।
न ते हेतव इत्युक्तं व्यभिचारस्य संभवात्" ॥ [ ]

तथा च प्रयोगः–यस्य येन तादात्म्य-तदुत्पत्ती न स्तः न स तदविनाभावी यथा प्रमेयत्वादिरनित्यत्वादिना न स्तश्च केनचित् तादात्म्य–तदुत्पत्ती स्वभावकार्यव्यतिरेकिणामर्थानामिति व्यापकानुपलब्धिः । स्वभावानुपलब्धेस्तु स्वभावहेतावन्तर्भाव इति तस्यास्तादात्म्यलक्षण एव प्रतिबन्धः । कारणव्यापकानुपलब्ध्योरपि तादात्म्य–तदुत्पत्तिप्रतिबन्धाद् व्याप्यकार्यनिवृत्तिसाधकत्वम् । उक्तं च—

"तस्मात् तन्मात्रसम्बद्धः स्वभावो भावमेव वा ।
निवर्तयेत् कारणं वा कार्यमव्यभिचारतः" ॥ [ ] इति ।

यद्वा "त्रिधैव सः" इति स पक्षधर्मस्त्रिप्रकार एव स्वभावकार्यानुपलम्भाख्यः तदंशेन व्याप्तो नान्यः स त्रिप्रकारस्तदंशेन व्याप्त एवेति च सम्बन्धनीयम् । अविनाभावनियमात् अविनाभावस्य व्याप्तेस्त्रिप्रकार एव पक्षधर्मे नियमात् त्रिविधस्य च पक्षधर्मस्याविनाभावनियमात् तेन त्रिविधपक्षधर्मव्यतिरिक्ता न हेतवः । त्रिविधश्च पक्षधर्मो हेतुरेव तदंशेन व्याप्त एवेति कृत्वा हेतुलक्षणावगमादेव हेत्वाभासाः ततो हेतुलक्षणयुक्तादपरे अन्ये तल्लक्षणविकला हेत्वाभासा अवगम्यन्त इति न पृथक् तल्लक्षणाभिधानम् । तदेवं यथोक्तलक्षणाद्धेतोः साध्यप्रतिपत्तिः स्वार्थमनुमानम् यथोक्तहेत्वभिधानं च परार्थमनुमानमिति स्थितम् । {एतेन "तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं च" [न्यायद० १-१-५] नैयायिकपरिकल्पितमनुमानलक्षणं प्रतिक्षिप्तम् ।

---

१ पृ० ७६ पं० २० । २ "अ०"–बृ० टि० । इदं टिप्पणकं संकेतयुक्तं भाति । तत्र 'अ' शब्देन अविनाभावः । एवमग्रेतनटिप्पणगतेन 'ता०' 'त०' शब्देन तादात्म्यतदुत्पत्तिश्च सूचिता भाति । ३ "ता०" "त०" बृ० टि० । ४–चारिनि–बृ० हा० । ५–धर्मानु–भां० ।

"एकसामग्र्यधीनत्वं स्वरूपादेस्सतो गतिः । हेतुधर्मानुमानेन धूमेन्धनविकारवत्" ॥–तत्त्वसं० पञ्जि० पृ० ४१७ पं० २४ ।

"एकसामग्र्यधीनस्य रूपादेरसतो गतिः" ।—न्यायवा० ता० टी० पृ० १६२ पं० ८ । १–२–१२ प्रमाणमी० पृ० ६३ पं० १२ । ६–त्वव्याप्य–वा० बा० भां० मां० विना । ७–स्बन्धः वा० बा० मां० । ८ यदि वा त्रि–भां० मां० । ९ पृ० ५५६ पं० ३ ।

१० प्रस्तुतसूत्रगतमनुमानत्रैविध्यं वात्स्यायनेन द्विधा व्याख्यायि–वात्स्या० भा० पृ० २३–२४ ।

इदं त्रिविधमपि अनुमानं प्रत्येकमन्वयविधाद्वयेन व्यतिरेकविधया अन्वय–व्यतिरेकविधाद्वयेन च पञ्चविधं सत् कालत्रयभेदेन पञ्चदशधा भवति । तदेव च प्रतिपन्नाऽप्रतिपन्नसंदिग्ध–विपर्यस्तपुरुषभेदेन षष्टिभेदं जायते । आन्तर्गणिकं त्वेतदनन्तभेदं भवति इत्यादि सर्वमनुमानत्रैविध्यविषयकमतान्तरसमालोचनसहितं सविस्तरं विवेचनं न्यायवार्तिक–न्यायवार्तिकतात्पर्यटीका–न्यायमञ्जरीप्रभृतिग्रन्थेभ्योऽवसेयमनुक्रमेण–पृ० ४३–५७ । पृ० १५६–१९६ । पृ० १०९–१३५ ।

नैयायिकवत् सांख्य–जैन–चरकाचार्यास्त्रिविधमनुमानं प्रतिपन्नाः । वैशेषिकास्तद् द्विविधं मन्यन्ते । मीमांसका अपि तद् द्विविधं वर्णयन्ति । बौद्धास्तु पूर्ववदादिभेदेनानुमानं न विभजन्ति । तथाहि—

साङ्ख्यकारिकायामीश्वरकृष्णः "त्रिविधमनुमानमाख्यातम्" [का० ५] इत्यनेनानुमानस्य त्रैविध्यमाख्यातवान् । माठरस्तद्वृत्तौ त्रिविधपदेन पूर्ववदादिभेदान् व्याख्यातवान् उदाहृतवांश्च सत्कार्यवादसिद्धान्तानुसारेण अत एव साङ्ख्य–नैयायिकयोः

[अक्षपादीयानुमानसूत्रस्य विविधां व्याख्यामुपन्यस्य तदीयानुमानलक्षणस्य अनेकधा निरूपणम्]

अत्र च सूत्रे "तत्पूर्वकमनुमानम्" इत्येतावदनुमानलक्षणमित्येके। "तत्पूर्वकं त्रिविधमनुमानम्" इति चान्ये । "तत्पूर्वं त्रिविधं पूर्ववत् शेषवत् सामान्यतोदृष्टं चानुमानम्" इत्यपरे । आद्ये सूत्रे लक्ष्यलक्षणविभागमुपदर्शयन्ति—अनुमानमिति लक्ष्यनिर्देशः तत्पूर्वकमिति लक्षणम् अत्र चैकस्य पूर्वकशब्दस्य समानश्रुत्या "प्रमाणतर्कसाधनोपालम्भ–" [न्यायद० १–२–१] सूत्रवत् साधनशब्दस्य लुप्तनिर्देशं मन्यन्ते। 'तत्पूर्वकम्' इत्यत्र तच्छब्देन प्रत्यक्षं प्रमाणमभिसम्बध्यते । तत्पूर्वकं तत्फलं तत्फलपूर्वकं तत्पूर्वकं तदनुमानं व्यवच्छिनत्तीत्युच्यमाने संस्कारे अतिप्रसङ्गः तस्य तत्फलपूर्वकत्वेऽप्यबोधरूपत्वान्नानुमानव्यवच्छेदकत्वमिति तन्निवृत्तये ज्ञानग्रहणं कार्यम् अथ प्रत्यक्षसूत्रे ज्ञानग्रहणं प्रक्रान्तं तदिहापि सम्बध्यते; नन्वेवमपि ज्ञानरूपं तत्पूर्वकं यतो भवति तदनुमानमित्युच्यमाने स्मृत्यातिप्रसङ्गः द्वितीयलिङ्गदर्शनपूर्विकाया अविनाभावसम्बन्धस्मृतेस्तत्पूर्वकत्वात् तज्जन-

---

पूर्ववदाद्यनुमानविषयाण्युदाहरणानि अत्यन्तं विभिन्नानि वर्तन्ते । उक्तकारिकाव्याख्यायां साङ्ख्यतत्त्वकौमुद्यां वाचस्पतिमिश्रस्तु पूर्ववदादित्रिप्रकारमेव तद् वीतावीतभेदेन संगृहीतवान् तत्स्वरूपं च सविस्तरं विवृतवान् ।

जैनागमग्रन्थेषु भगवती–[श० ५, उ० ४] अनुयोगद्वार [पृ० २१२–२१५ स०] प्रभृतिषु पूर्ववदादिभेदेनानुमानविभागः कृतो दृश्यते परन्तु तत्र सामान्यदृष्ट–विशेषदृष्टोभयभेदभिन्नं तृतीयमनुमानं दृष्टसाधर्म्यवन्नाम्ना ज्ञापितमस्ति । 'प्रत्यक्षं च परोक्षं च' इति सूत्रयन्तः श्रीसिद्धसेन–समन्तभद्रादयो जैनतार्किका इममागमिकमनुमानविभागं न वर्णितवन्तः ।

चरकसंहितायां श्लोकस्थाने अनुमानद्वैविध्यमित्थं प्रदर्शितम्—

"प्रत्यक्षपूर्वं त्रिविधं त्रिकालं चानुमीयते । वह्निर्निगूढो धूमेन मैथुनं गर्भदर्शनात् ॥
एवं व्यवस्यन्त्यतीतं बीजात् फलमनागतम् । दृष्ट्वा बीजात् फलं जातमिहैव सदृशं बुधाः" ॥

अ० ११ श्लो० २८–२९ पृ० २६१ ।

प्रशस्तपादभाष्ये "तत् तु द्विविधम् दृष्टं सामान्यतोदृष्टं च" [पृ० २०५] इत्यादिनाऽनुमानद्वैविध्यं प्रदर्शितम् ।

मीमांसादर्शने शाबरभाष्ये "तत् तु द्विविधम्—प्रत्यक्षतोदृष्टसंबन्धं सामान्यतोदृष्टसंबन्धं च" [पृ० ८ पं० ९] इत्येवमनुमानद्वैविध्यं प्ररूपितम् ।

इदमेव मीमांसकसंमतमनुमानद्वैविध्यं तत्त्वसंग्रहे इत्थं निरूपितम्—

"द्वैविध्यमनुमानस्य केचिदेवं प्रचक्षते । विशेषदृष्ट–सामान्यपरिदृष्टत्वभेदतः" ॥—तत्त्वसं० का० १४४२ पृ० ४२२ ।

"केचिदिति कुमारिलादयः" । तत्त्वसं० पञ्जि० । अत्रार्थे सविशेषमवबुभुत्सुभिः श्लोकवार्तिकगतोऽनुमानपरिच्छेदोऽवधारणीयः । जैनागमे सामान्यदृष्ट–विशेषदृष्टे अनुमानस्य प्रभेदौ मीमांसकनये तु ते एवानुमानस्य भेदाविति बोद्धव्यम् ।

१ "अत्र हि प्रथमं लिङ्गदर्शनं ततः प्रतिबन्धस्मरणम् ततः केषांचिन्मते परामर्शज्ञानं ततः साध्यार्थप्रतीतिः ततः प्रत्यक्षलक्षणावसरवर्णितेन क्रमेण हेयादिज्ञानमितीयति प्रतीतिकलापे यथोपपत्ति कार्यकारणभावो वक्तव्य इत्येवं तत्पूर्वकपदमेव केवलमनुमानलक्षणक्षममिति गुरवो वर्णयांचक्रुः ।

अन्ये पुनः उपमानाद्यतिव्याप्तिव्युदासाय त्रिविधग्रहणं व्याख्यातवन्तः । तत्पूर्वकमनुमानमित्युच्यमाने सति उपमानादौ प्रसङ्ग इति त्रिविधग्रहणम्" ।—न्यायमञ्ज० आ० २ पृ० १२६ पं० २३—पृ० १२७ पं० २ ।

"तदेवं लक्षणे कश्चित् सर्वं सूत्रमयोजयत् । एवं तु ख्यापितं न स्यात् सूत्रकारस्य कौशलम्" ॥—न्यायमञ्ज० आ० २ पृ० १२७ पं० १५ ।

२ "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति संपूर्णं सूत्रम् ।

३ "तानि ते तत् पूर्वं यस्य तदिदं तत्पूर्वकम्" इत्यादिना 'तत्पूर्वक'पदस्य व्युत्पत्तिविचारणा न्यायवार्तिके वर्तते—पृ० ४३ पं० १९–। एषैव विचारणा न्यायवार्तिकतात्पर्यटीकायामपि चर्चिताऽस्ति–पृ० १५६ पं० २१–। न्यायमञ्जर्यां तु सैव भङ्ग्यन्तरेण विशेषविशदतया सुललिततया च निरूपिताऽस्ति—आ० २, पृ० १२६ पं० ७—।

४ **तत्फलपूर्वकं तत्पूर्वकपूर्वकं** ल० मां० वि० । **तत्फलपूर्वकं तत्पूर्वकपूर्वकपूर्वकं** वा० बा० । **तत्फलपूर्वकं तत्पूर्वकं पूर्वकं** बृ० । **तत्फलपूर्वकपूर्वकं** हा० ।

५ "विशिनष्टि"—बृ० ल० टि० । "यदि प्रत्यक्षपूर्वकमनुमानं संस्कारे निर्णये च प्रसज्ज इति । प्रत्यक्षपूर्वको भावनाख्यः स्मृतिहेतुः संस्कारः निर्णयश्च प्रत्यक्षपूर्वकत्वादनुमानं प्रसज्यत इति । नैष दोषः विज्ञानस्याधिकृतत्वात् । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति ज्ञानाधिकारो वर्तत इति तेन न संस्कारेऽतिप्रसङ्गः । निर्णये तु उभयथा" इत्यादि—न्यायवा० पृ० ४५ पं० १९–। न्यायवा० ता० टी० पृ० १७० पं० २०—।

६ **नन्वेवमिहापि** भां० मां० ।

कस्यानुमानत्वप्रसङ्ग इति तन्निवृत्तयेऽर्थोपलब्धिग्रहणं कार्यम् स्मृतेस्त्वनर्थजन्यत्वमर्थं विनाऽपि भावात् । न च विनष्टस्य जनकत्वम् अविनष्टत्वप्रसक्तेः । न च विनष्टरूपतया जनकत्वम् तदाऽसत्त्वात् । अतोऽर्थोपलब्धिर्यथोक्तविशेषणा यतो भवति तदनुमानम् । एवमपि लैङ्गिकविपर्ययेऽतिप्रसङ्गः यतो गवयविषाणदर्शनाद् गोप्रतिपत्तिरुपजायते यद् गोविषाणसादृश्यज्ञानं प्रत्यक्षफलं तत्पूर्वकं 'गौः' इति विपर्ययज्ञानम् अतस्तज्जनकस्याप्यनुमानत्वप्रसक्तिः तन्निवृत्तये अव्यभिचारिपदमनुवर्तनीयम् ५ एवमपि संशयज्ञानजनकेऽतिप्रसङ्गः यतो गोगवयानुयायिलिङ्गदर्शनाद् 'गौर्गवयो वा' इति संशय उपजायते तज्जनकं च सदृशलिङ्गज्ञानं प्रत्यक्षफलम् तत्पूर्वकं संशयज्ञानमर्थविषयं च तज्जनकस्याप्यनुमानप्रसक्तिरिति तद्व्यवच्छित्तये व्यवसायात्मकपदमनुवर्तनीयम् । तथाप्यविनाभावसम्बन्धस्मरणानन्तरं 'तथा चायं धूमः' इति प्रदर्शनज्ञानाद् 'अग्निः' इति वाक्याच्च नालिकेरद्वीपवासिनो विशिष्टदेशेऽग्निप्रतिपत्तिरुपजायते न च तस्या अनुमानफलत्वम् शाब्दत्वेन व्यवस्थापनात् तन्निवृत्तयेऽव्यप- १० देश्यपदानुवृत्तिः तथाप्युपमानेऽतिप्रसङ्गः गृहीतातिदेशवाक्यस्य पुंसः सादृश्यज्ञानं वाक्यार्थानुस्मरणसहायमव्यपदेश्यादिविशेषणत्रयविशिष्टं संज्ञासंज्ञिसम्बन्धज्ञानं तत्पूर्वकपूर्वकं जनयदपि नानुमानम् तत्फलस्याव्यपदेश्यत्वं च श्रूयमाणवाक्याजनितत्वात् । तथानुमानादिपूर्वकाणामसङ्ग्रह इति अव्याप्त्यतिव्याप्ती न निवर्तेते ततस्तन्निवृत्तये विग्रहद्वयाश्रयणम्–तानि ते च पूर्वं यस्य तत् तत्पूर्वकम् । 'तानि' इति विग्रहविशेषाश्रयणेन सर्वप्रमाणपूर्वकत्वमनुमानस्य लभ्यते । न च तेषां पूर्वमप्रकृतत्वात् १५ कथं सर्वनाम्ना परामर्श इति प्रेर्यम् यतः साक्षादप्रकृतत्वेऽपि प्रत्यक्षसूत्रे व्यवच्छेद्यत्वेन प्रकृतत्वात् अव्याप्तेरेव निवृत्तिः । अतिव्याप्तेस्तु 'ते द्वे प्रत्यक्षे पूर्वं यस्य' विग्रहविशेषाश्रयान्निवृत्तिः । तथाहि–तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनं च सम्बध्यते । न चोपमानफलमेवम्भूताध्यक्षफलद्वयपूर्वकमिति तत्फलाद् भिद्यते अनुमानफलम् । न चानुमेयप्रतिपत्तिकाले सम्बन्धग्रहणस्य निवृत्तत्वात् कथं तत्पूर्वकत्वमनुमेयप्रतिपत्तेरित्याशङ्कनीयम् यतोऽविनाभावसम्बन्धग्रहण- २० जनितसंस्कारप्रभवा स्मृतिः सम्बन्धदर्शनवाच्याऽत्र गृह्यते तया जनितो लिङ्गपरामर्शः तेनाप्रत्यक्षस्यार्थस्यानुमानम् । न चोपमानफलमेवंभूतफलपूर्वकम् अविनाभावसम्बन्धानुभवसम्बन्धस्मृतिपूर्वकत्वेन तस्य निषेत्स्यमानत्वात् । न चैवमपि प्रत्यक्षद्वयस्याश्रुतत्वान्नैवं सम्बन्ध इति वक्तव्यम् एकशेषतस्तत्सिद्धेः । नन्वेवमप्यविनाभावसम्बन्धदर्शनस्याश्रुतत्वादेव व्याख्यानमयुक्तम्, न; विशिष्टफलद्वारेण तदुपपत्तेः । तथाहि–अव्यभिचारादिविशेषणविशिष्टं फलं यतः समुपजायते तदनुमान- २५ मित्युक्ते अविनाभावसम्बन्धः सिध्यत्येव । अनिन्द्रियार्थसन्निकर्षजमशाब्दमसारूप्यमव्यभिचारि व्यवसायात्मकं न ह्यविनाभावविकलाल्लिङ्गादुदयमासादयितुं समर्थम्; अर्थापत्त्यादीनां चानुमान एवान्तर्भावान्न तत्प्रसङ्गः । एवं यथोक्तप्रकारेण नातिव्याप्त्यव्याप्ती ।

ये तु पूर्वशब्दस्यैकस्य लुप्तनिर्देशं नाभ्युपगच्छन्ति तेषां प्रत्यक्षफले अनुमानत्वप्रसक्तिः तत्फलस्य प्रत्यक्षप्रमाणपूर्वकत्वात् । अथाकारकस्याप्रमाणत्वात् कारकत्वं लभ्यते तथापि संस्कारजनके ३० प्रसङ्गः । उपलब्धिजनकस्येति चेत् स्मृतिजनके प्रसङ्गः । अर्थोपलब्धिजनकस्येति विशेषणे लैङ्गिकविपर्ययोपलब्धिजनके प्रसङ्गः । अव्यभिचरितार्थोपलब्धिजनकस्येति विशेषणे लैङ्गिकसन्दिग्धार्थोपलब्धिजनके प्रसङ्गः । व्यवसायात्मिकार्थोपलब्धिजनकस्येत्यभिधाने लिङ्गशब्दोत्पाद्यार्थोपलब्धिजनके

१–**ष्टस्य प्र**–ल० । २–**यते तद्वो**–वा० बा० भां० मां० । ३ "अर्थजन्यं च"–बृ० ल० टि० । ४–**पूर्वं सम**–वि० । ५–**फल त**–भां० मां० । ६ "पर(रा)मर्शज्ञानादिति वा पाठः"–ल० टि० । ७–**फलं शा**–वा० बा० । ८–**त्वम् श**–हा० । ९ "अग्निरेषः इति वाक्यादुपजायमानत्वात्"–बृ० ल० टि० । १०–**ज्ञान वा**–वा० बा० भां० मां० विना । ११–**ज्ञान त**–बृ० ।

१२ "तानि ते तत् पूर्वं यस्य तदिदं तत्पूर्वकम् । यदा 'तानि' इति विग्रहस्तदा समस्तप्रमाणाभिसंबन्धात् सर्वप्रमाणपूर्वकत्वमनुमानस्य वर्णितं भवति । पारंपर्येण पुनस्तत् प्रत्यक्ष एव व्यवतिष्ठत इति तत्पूर्वकत्वमुक्तं भवति । यदापि विवेकात् ते पूर्वे यस्येति ते द्वे प्रत्यक्षे पूर्वे यस्य प्रत्यक्षस्य तदिदं तत्पूर्वकं प्रत्यक्षमिति"—न्यायवा० पृ० ४३ पं० २०–। न्यायवा० ता० टी० पृ० १५६ पं० २०—। न्यायमञ्जर्यामेतत् प्रकारान्तरेण सुस्पष्टं चर्चितमस्ति—आ० २ पृ० १२५ पं० ५–।

१३–**मक्ष**–बृ० आ० हा० वि० विना । १४–**भूतं फ**–ल० । १५–**भवं स**–बृ० । १६–**त्रैव स**–आ० हा० वि० ।

१७ अत्र विशेषणपदमध्याहृत्य 'उपलब्धिजनकस्येति विशेषणमिति चेत्' एतादृशः पाठः पूरणीयः ।

प्रसङ्गः । अव्यपदेश्यार्थोपलब्धिजनकस्येति विशेषणे विशिष्टफलजनकस्याध्यक्षफलस्यानुमानत्वमभ्युपगतं भवेत् । तथा च विशिष्टज्ञानमेवानुमानं प्रसज्यत इत्यव्याप्तिर्लक्षणदोषः । न च तस्यैवानुमानत्वम् "स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि" [१-१-१६ वात्स्या० भा०] इति वचनात् सर्वस्य विशिष्टफलजनकस्यानुमानत्वात् तथापि स्वरूपविशेषणवादिनामेषामनुमानत्वं न प्राप्नोति अव्यभिचारादिविशेषणानामसंभवात् । स्मृत्यादयस्तु स्वज्ञानविशिष्टा लिङ्गं सम्भवन्त्येव अतोऽर्थोपलब्धिरव्यभिचारादिविशेषणविशिष्टा तत्पूर्वकपूर्विका यतः तदनुमानमित्यभिधीयमाने न कश्चिद्दोषः । नन्वेतस्मिन् सूत्रव्याख्याने त्रिविधग्रहणमनर्थकम्, न; अनुमानविभागार्थत्वात् । न च पूर्ववदादिवैयर्थ्यम् स्वभावादिविषयप्रतिषेधेन तद्ग्रहणस्य पूर्ववदादिविषयज्ञापनार्थत्वात्—पूर्ववदाद्येव त्रिविधविभागेन विवक्षितम् न स्वभावादिकम् ।

अपरे[2] तु तत्पूर्वकं त्रिविधमनुमानमित्येतावदनुमानलक्षणमाचक्षते । अत्र चानुमानमिति लक्ष्यम् तत्पूर्वकं त्रिविधमिति लक्षणम् । तत्पूर्वकमनुमानमित्यभिधीयमाने संस्कार-स्मृति-शाब्द-विपर्यय-संशयोपमानादिषु प्रसङ्गस्तन्निवृत्त्यर्थं त्रिविधपदोपादानम् । त्रिविधमिति त्रिरूपम् त्रीणि च रूपाणि पक्षधर्मान्वयव्यतिरेकलक्षणानि गृह्यन्ते पूर्ववद[3]दादिश्रुतेः । पूर्वमुपादीयमानत्वात् कथञ्चयेऽपि पूर्वः पक्षः सोऽस्यास्तीति पूर्ववत्-पक्षधर्मत्वम् । शेष उपयुक्तादन्यत्वात् साधर्म्यदृष्टान्तः तस्मिन् विद्यत इति शेषवत्-सपक्षे सत्त्वम् । सामान्यतोऽदृष्टमिति विपक्षे मनागपि यन्न दृष्टम्-विपक्षे सर्वत्रासत्त्वं तृतीयं रूपम् एतद्रूपलिङ्गालम्बनं यत् तत्पूर्वकं तदनुमानमित्युच्यमाने संस्कारादौ नातिप्रसङ्गस्तथाप्यतिव्याप्तिर्बाधितसप्रतिपक्षेषु तन्निवृत्त्यर्थं सामान्यतोदृष्टं चेति 'च'शब्दोऽबाधितविषयत्वासत्प्रतिपक्षत्वरूपद्वयसमुच्चयार्थः । तथाप्यव्याप्तिः अन्वय-व्यतिरेकिलिङ्गालम्बनयोरसंग्रहात्, न; अन्वयिलिङ्गविवक्षायां सामान्यतोऽदृष्टमित्येतस्यानभिसम्बन्धात् 'पूर्ववत्-शेषवत्—च'शब्दसमुच्चितरूपद्वयोपेतचतुर्लक्षणलिङ्गप्राप्तेः । व्यतिरेकिविवक्षायां शेषवदित्येतस्यानभिसम्बन्धाद् व्यतिरेकिचतुर्लक्षणलिङ्गसंग्रहाद् अन्वयव्यतिरेकिलिङ्गविवक्षायां समस्तपदाभिसम्बन्धात् पञ्चलक्षणलिङ्गप्राप्तेः ।

अन्ये[4] तु त्रिविधग्रहणमतिव्याप्तिनिवृत्त्यर्थमेवान्यथा वर्णयन्ति—त्रिविधं त्रिप्रकारम् के पुनस्त्रयः प्रकारा इति विवक्षायां पूर्ववदादिनिर्देशः । तत्र पूर्ववत् यत्र कारणेन कार्यमनुमीयते । अथापि स्यात् पूर्वं कारणं तदस्यास्तीति पूर्ववत् कार्यम् एवं च कार्यात् कारणानुमानं पूर्ववत् प्रसक्तम् न कारणात् कार्यानुमानम् । न च कारणदर्शनात् कार्यप्रतिपत्तिः संभविनी । तथाहि—कारणात् कार्ये साध्ये यदि कार्यस्य धर्मित्वं तदा तस्यासि[5]द्धत्वादाश्रयासिद्धो हेतुः । अथ तस्य सिद्धत्वान्न धर्म्यसिद्ध्या हेतोराश्रयासिद्धता तर्हि साधनवैफल्यम् कार्यसत्त्वस्य हेतुव्यापारात् प्रागेव सिद्धत्वात् । न च कार्यसत्तायां साध्यायां कारणलक्षणो हेतुर्भावधर्मः सिद्धः तत्सत्तासि[6]द्धौ हेतोस्तद्धर्मतासि[7]द्धेः । नाप्यभावधर्मोऽसौ तत्सत्तासाधने तस्य विरुद्धत्वात् । नाप्युभयधर्मः तत्र तस्य व्यभिचारित्वात् न ह्युभयधर्मो भावमेव प्रतिपादयेत् । उक्तं च—"नासिद्धे भावधर्मोऽस्ति" [ ] इत्यादि । किञ्च, कारणात् कार्यमस्तीति साध्ये हेतुर्व्यधिकरणः स्यात् । कारणाच्च यदि प्रतिबद्धसामर्थ्यात् कार्यास्तित्वं भाव्यनुमीयते तदानैकान्तिकत्वं हेतोः तदुक्तम्—"नावश्यं कारणानि तद्वन्ति भवन्ति" [ ] प्रतिबन्धवै[10]कल्यसंभवात् । अथाप्रतिबद्धसामर्थ्यात् तदा तथाभूतकारणदर्शनसमय एव कार्यस्योत्पत्तेरनन्तरसमये तस्याध्यक्षत्वात् प्रतिबन्धाद्यनुस्मरणं व्यर्थम् । यदपि समग्रेण हेतुना कार्योत्पादानुमानं सौगतैरभ्युपगतं तदपि योग्यतानुमानम् । तथाहि—योग्येयं बीजादिसामग्री प्रतिबन्धवैफल्यासंभवे विवक्षितकार्योत्पादने इत्येवं तत्स्वभावभूतयोग्यतानुमानात् स्वभावहेतुप्रभवम् । तदुक्तम्—

"हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः ॥" [ ] इति,

असदेतत्; यतो न कार्यस्य धर्मित्वं कारणस्य च हेतुत्वमस्माभिः क्रियते येन कार्यस्य सिद्ध्यसिद्धिभ्यामनुमानाप्रवृत्तिर्भवेत् किन्तु कारणस्येव धर्मित्वं मेघादेः क्रियते तस्य च सिद्धत्वान्नाश्रयासिद्धत्वदोषः । तत्रैव च वृष्ट्युत्पादकत्वं धर्मः साध्यते तद्धर्मेणोन्नतत्वादिना । न च प्रतिज्ञार्थैकदेश एवं हेतुः साध्यसाधनयोर्धर्मिधर्मयोर्वा भेदात् । तथाहि-मेघत्वजातियुक्तानां धर्मित्वं भविष्यद्वृष्ट्युत्पादकत्वमसिद्धमर्थान्तरं ततः साध्यो धर्मः उन्नतत्वादिकमपि साधनधर्मः मेघेभ्यो भिन्नम् तेषां द्वैविध्यदर्शनात् तेन न प्रतिज्ञार्थैकदेशताऽपि । न च साध्य-साधनयोरैक्यम् न च भाष्यविरोधः "कारणेन कार्यमनुमीयते" [१-१-५ वात्स्या० भा०] इति तत्र वचनात् यत उन्नतत्वादिधर्मविशिष्टा मेघाः कारणम् तथाविध[8]कारणधर्मेण[9] भविष्यद्वृष्ट्युत्पादकत्वं धर्मो यदाऽनुमीयते तदा वृष्टे[11]रनुमानात् कारणात् कार्यानुमानमित्युपदिश्यते । अथोन्नतत्वादिधर्मयुक्तानामपि मेघानां वृष्ट्यजनकत्वदर्शनात् कथमैकान्तिकं कारणात् कार्यानुमानम्? न; विशिष्टस्योन्नतत्वादेर्धर्मस्य गमकत्वेन विवक्षितत्वात् । न च तस्य विशेषो नासर्वज्ञेन निश्चेतुं पार्यत इति वक्तुं शक्यम् सर्वानुमानोच्छेदप्रसक्तेः । तथाहि-मशकादिव्यावृत्तधूमादीनामपि स्वसाध्याव्यभिचारित्वमसर्वविदा न निश्चेतुं शक्यमिति वक्तुं शक्यत एव । अथ "सुविवेचितं कार्यं कारणं न व्यभिचरति" [ ] इति न्यायाद् धूमादेर्गमकत्वं तर्ह्यत्रापि तुल्यम् यो हि भविष्यद्वृष्ट्यव्यभिचारिणमुन्नतत्वादिविशेषमवगन्तुं समर्थः स एव तस्मात् तामनुमिनोति नागृहीतविशेषः । तदुक्तम्—"अनुमातुरयमपराधो नानुमानस्य[12]" [२-१-३८ वात्स्या० भा०] तथा सूत्रकारेणाऽप्यभ्यधायि—"नैकदेशत्रासादृश्येभ्योऽर्थान्तरभावात्" [न्यायद० २-१-३८] अत एव "गम्भीरध्वानवत्त्वे सति" [१-१-५ न्यायवा० पृ० ४७] इत्याद्युन्नतत्वादेर्वार्तिककृता विशेषो दर्शितः । न चैवं साध्यसाधनभावे कार्यसत्तायाः साध्यत्वं येन भावाभावोभयधर्मस्याहेतुत्वमिति दोषः स्यात् । वैयधिकरण्यमपि प्रदर्शितप्रयोगे परिहृतमेव । यच्च अप्रतिबद्धसामर्थ्यस्य कारणस्य हेतुत्वे कार्यप्रत्यक्षतालक्षणं दूषणमभिहितम् तदसंगतमेव व्यवधानसंभवात् । तथाहि-निष्पाद्ये पटे अनुत्पन्नावयवक्रियस्यान्त्यतन्तोर्यदा क्रियातो विभागस्तदाऽविनाभावसम्बन्धस्मृ[13]ति विभागात् पूर्वसंयोगविनाशः तन्त्वन्तरेण च संयोगोत्पत्तिर्यदैव तदैवाविनाभावसम्बन्धस्मरणात् परामर्शज्ञा[14]नम्, यदा संयोगात् कार्योत्पादस्तदैव परामर्शविशिष्टाल्लिङ्गात् 'भविष्यति कार्यम्' इत्यनुमेयप्रतिपत्ति[15]ः । न चोत्पादकाल एव कार्यस्य प्रत्यक्षता तत्र तदा रूपाद्यभावात् । न च

१-**वत्येव** बृ० ल० मां० ।

२ अत्र न्यायवार्तिक-तात्पर्यटीका-मञ्जरी-रत्नाकरीयाणि तत्तत्स्थलान्यपि अनुसंधेयानि-न्यायवा० पृ० ४६ पं० २-। न्यायवा० ता० टी० पृ० १७१-१७३ । न्यायमञ्ज० आ० २ पृ० १२७ पं० ५-। स्याद्वादर० पृ० ५२७ पं० २२-पृ० ५२८ पं० १९ आ० ।

३-**दाश्रितेः** वा० बा० । ४ **पूर्वपक्षः** वा० बा० विना ।

५ न्यायवा० पृ० ४६ पं० १५-पृ० ४७ । न्यायवा० ता० टी० पृ० १७३ पं० १६—पृ० १७६ । प्रस्तुता पूर्ववदादिविषया चर्चा मञ्जर्यामपि समानप्राया वर्तते—न्यायमञ्ज० आ० २ पृ० १२७ पं० २६-।

६ "कार्यस्य"-बृ० ल० टि० । ७ "कार्यसत्ता"-बृ० ल० टि० । ८-**त्ताऽसि**-बृ० । ९ पृ० ४८० पं० ११, टि० ३ । १०-**वैफल्य**-वा० बा० मां० विना ।

१ "यत्र कारणेन कार्यमनुमीयते यथा मेघोन्नत्या भविष्यति वृष्टिरिति" संपूर्णं भाष्यवाक्यम् । २ **तथापि का**-बृ० आ० हा० वि० । ३ "उन्नतत्वादिना"-बृ० टि० । ४ "वृष्टिम्"-बृ० टि० । ५ "सोऽयमनुमातुरपराधो नानुमानस्य योऽर्थविशेषेणानुमेयमर्थमविशिष्टार्थदर्शनेन बुभुत्सत इति" संपूर्णं भाष्यवाक्यम् ।

"आवर्तेवर्तनाशालिविशालकलुषोदकः । कल्लोलविकटास्फालस्फुरत्फेनच्छटाञ्चितः ॥
वहद्बहलशैवालवनशाद्वलसंकुलः । नदीपूरविशेषोऽपि शक्येत न निवेदितुम् ॥
प्रमातुरपराधोऽयं विशेषं यो न पश्यति । नानुमानस्य दोषोऽस्ति प्रमेयाव्यभिचारिणः ॥
रोधोपघातसादृश्यव्यभिचारनिबन्धनम् । अनुमानाप्रमाणत्वमतो वक्तुमसांप्रतम् ॥
पारम्पर्येण वृष्टिश्च नदीपूरस्य कारणम् । पतद्धनपयोबिन्दुसंदोहस्यन्दनक्रमात्" ॥

—न्यायमञ्ज० आ० २ पृ० १३० पं० १३—।

६ "कथं पुनरस्य प्रयोगः? वृष्टिमन्त एते मेघा गम्भीरध्वानवत्त्वे सति बहुलबलाकावत्त्वे सति अचिरप्रभावत्त्वे सति उन्नतिमत्त्वात् वृष्टिवन्मेघवदिति-"न्यायवा० पृ० ४७ पं० १० । ७ पृ० ५६२ पं० २९ । ८ पृ० ५६२ पं० ३१ । ९ पृ० ५६२ पं० ३३ । एतद् मञ्जर्या समानमेव दृश्यते—न्यायमञ्ज० आ० २ पृ० १२९ पं० १२-। १० "एककाल"-बृ० टि० । ११-**स्मृति वि**-आ० हा० वि० । १२ "इत्येककालः"-बृ० टि० । १३-**त्तिः तथोत्पा**-हा० । १४ "कार्ये"-बृ० टि० । १५ "भावकाले"-बृ० टि० ।

रूपादिभिः सहोत्पादस्तदधिकरणानाम् रूपादीनां तत्कार्यत्वात् कार्यकारणयोश्च सहोत्पादे निर्हेतुकत्वप्रसक्तेः । न चान्त्यतन्तुक्रिया अन्तराले प्रतिबन्धसंभवात् त्रिचतुरक्षणव्यवधानान्नावश्यं विवक्षितकार्योत्पादिकेति वक्तव्यम् यतोऽनुत्पन्नावयवक्रिये तन्ताविति विशेषणोपादानं कृतमिति नाधारविनाशात् क्रियाविनाशः क्रिया चाविनष्टा स्वकार्यं विभागमवश्यमुत्पादयति सं च स्वप्रतिबन्धकाभावे स्वाश्रयसंयोगं नियमतो निर्वर्तयति अन्यथा क्रियायाः स्थैर्यप्रसक्तिर्नित्याधारयोश्च नित्यत्वप्रसक्तिर्भवेत् स च क्रियाप्रभवः संयोगो नियतो द्रव्याविर्भावकः सति तस्मिन् द्रव्यप्रभवोपलम्भात् । ततोऽन्त्यतन्तुक्रियातोऽन्त्यतन्तोर्विभागविशिष्टस्योपलम्भात् कार्यानुमाने न कार्यप्रत्यक्षतादोषः । येषां तु परामर्शज्ञानं न संभवति तेषां कार्यप्रत्यक्षता दूरापास्तैव । यत् पुनः 'समग्रात् कारणात् स्वात्मभूतस्य योग्यताख्यधर्मस्यानुमानं न कार्यस्य तेन स्वभावहेतुप्रभवमेतदनुमानम्' इति, तदसङ्गतम्; अभेदे गम्यगमकभावस्यासंभवात् । अथ यत्रापि साध्यसाधनयोर्वास्तवोऽभेदस्तत्रापि स्वलक्षणेन व्यवहारायोगात् लिङ्गसाध्यधर्मिसाध्यधर्मनानात्वप्रतिपत्तिरूपो व्यवहारो बुद्ध्यारूढ एव । तदुक्तम् "सर्वं एवायमनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिभेदेन" [ ] इत्यादि । असदेतत्, यतो यदि बुद्धिकल्पितो धर्मधर्मिव्यवहारस्तर्हि कल्पिताद्धेतोः साध्यसिद्धिर्भवेत् । ततश्च यावान् हेतुदोषः स सर्वो भवत्प्रयुक्ते साधने प्रसज्येत । तदुक्तं कुमारिलेन—

"यदि चाविद्यमानोऽपि भेदो बुद्धिप्रकल्पितः ।
साध्यसाधनधर्मादेर्व्यवहाराय कल्पते ॥
ततो भवत्प्रयुक्तेऽस्मिन् साधने यावदुच्यते ।
सर्वत्रोत्पद्यते बुद्धिरिति दूषणता भवेत् ॥"
[श्लो० वा० निरा० श्लो० १७१–१७२] इति ।

अथ धर्मधर्मितया भेद एव बुद्धिपरिकल्पितो नार्थोऽपि लिङ्गलक्षणः विकल्पभेदानामिच्छामात्रानुरोधित्वेन स्वतन्त्राणामर्थाप्रतिबद्धत्वेन तदप्रतिपादकत्वात् विकल्पकल्पिताद्धेतोरर्थप्रतिपत्त्यभ्युपगमे अर्थप्रतिलम्भ एव न भवेत् ततोऽर्थं एवार्थं गमयति, असदेतत्; यतो यदि कृतकत्वादिलक्षणोऽर्थोऽनित्यत्वादेरर्थस्य गमकस्तदा तयोस्तादात्म्याद् गम्यगमकभावोऽयुक्त इत्यसकृदावेदितम् । अथ विकल्पप्रतिभासी कृतकत्वादिकः सामान्यलक्षणोऽर्थोऽभ्युपगम्यते तदा तस्यावस्तुत्वेन साध्यप्रतिबद्धत्वाभावाद् वस्तुत्वेनाध्यवसितस्यापि कुतो गमकत्वम् ? ययोर्हि प्रतिबन्धो न तयोर्भेद इति न गम्यगमकभावः ययोश्च भेदाध्यवसायो न तयोः प्रतिबन्धः । न च दृश्य-विकल्प्ययोरेकत्वाध्यवसायादनुमानानुमेयव्यवहारादोषः तथाभ्युपगमे तदेव कल्पनाविरचितलिङ्गप्रभवत्वमनुमेयप्रतिपत्तेः संवादविरोधि समायातमिति कुतः परोक्तदूषणव्युदासः ? न च समारोपव्यवच्छेदः स्वभावहेतोः फलं संभवीति प्रतिपादितमसकृदिति न पुनः प्रतन्यते ततोऽप्रतिबद्धसामर्थ्यकारणदर्शनात् कार्यस्यैवानुमानं न पुनः समग्रेभ्यः सामर्थ्यानुमानं युक्तम् । न च समर्थकारणस्य धर्मिभूतस्यानन्तरभाविकार्यविशिष्टत्वेऽनुमीयमाने समर्थत्वेन तद्गतेन साधनधर्मेण हेतुरपि व्यधिकरणः । अतः 'हेतुना यः समग्रेण' इत्यायुक्तमेव । अत्र च पूर्वं कारणमस्यास्तीति पूर्ववत् कार्यं नाभिधीयते किन्तु कारणधर्म उन्नतत्वादिः तेन कारणधर्मस्य वृष्ट्युत्पादकत्वस्यानुमानम् न तु पूर्ववत्—कार्यात् कारणानुमानम् तेन 'पूर्ववत् कार्यात् कारणानुमानं प्राप्नोति' इति यद् गोगाचार्येण प्रेरितम् तन्निराकृतं द्रष्टव्यम् ।

---

१ "पटादि"–बृ० टि० । २ "स्वकार्यविभागः"–बृ० टि० । ३–वे आश्र–भां० मां० । ४ निवर्त–बृ० विना । ५ "पारम्पर्येण"–बृ० टि० । ६ पृ० ५६३ पं० १ । ७–मानं का–वा० बा० ।–मान कार्य–बृ० । ८–कस्वभा–भां० मां० । ९ "एतेन "सर्वं एव अयमनुमानाऽनुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिन्यायेन" इति एतदपि प्रत्युक्तम्"–अनेका० पृ० २०९ पं० १० । १० कल्प्यते वा० बा० । श्लो० वा० । ११ एवं बृ० । १२–वादिवि–बृ० । १३ "कारणगतेन"–बृ० टि० । १४ पृ० ५६३ पं० ३ । १५–णस्य वृ–ल० । १६ पृ० ५६२ पं० २४ । १७ यद् दिग्नागाचा–मां० । य दिग्नागाचा–भां० । य दिङ्नागाचा–वा० बा० ।

शेषवदित्यत्रापि कारण-कार्ययोर्लिङ्गत्वेनोपक्षेपे अनुपयुक्तं कार्यं शेषः तद् यस्यास्ति तच्छेषवदिति तद्वत एव साधनधर्मः कश्चिदुक्तः न तु कारणम् तेन हि कार्यगतेन धर्मान्तरमप्रत्यक्षं वृष्टिमद्देशसम्बन्धित्वादिकं कार्यगतमेवानुमीयते । अत एव कारणगमकत्वपक्षोक्तदोषप्रसक्त्यभावोऽत्रापि द्रष्टव्यः । तथाहि-नदीशब्दवाच्यो गर्तविशेषो धर्मी तस्योपरिवृष्टिमद्देशसम्बन्धित्वं साध्यो धर्मः उभयतटव्यापित्वादिकस्तु साधनधर्मः अनेकफल-फेनसमूहवत्त्व-शीघ्रतरगमनत्व-कलुषत्वादिकश्च तस्य विशेषः साध्याव्यभिचारी यदा निश्चितो भवति तदा गमकत्वम् नोभयतटव्यापित्वमात्रं तोयस्य । अत एव न प्रतिज्ञार्थैकदेशताऽपि दोषः । न चोभयतटव्यापित्वमुदकस्य कथमपामधःपातलक्षणाया वृष्टेः कार्यमिति वक्तव्यम् पारम्पर्येण तस्य तत्कार्यत्वात् । तथाहि— द्रवत्वादापः भूसंसृष्टाः स्पन्दन्ते स्पन्दमानाश्च संयुक्ताः परस्परं महत्कार्यमारभन्ते तदपि स्पन्दमानं स्वात्मनि वेगमारभते क्रियाकारणापेक्षं तच्च तथाप्रवृत्तं नदीशब्दवाच्यं गर्तं विदधाति । तत्र पूर्वोदकविलक्षणस्योदकस्योभयतटसंयोगः पारम्पर्येण वृष्टिकार्य इति कार्यात् कारणानुमानं शेषवत् । शेषमत्र पूर्ववदनुमान एव चिन्तितम् । सामान्यतोदृष्टम् अकार्यकारणभूतेन लिङ्गेन यत्र लिङ्गिनोऽवगमः । अविनाभावित्वं त्रयाणामप्यविशिष्टम् । विवक्षितसाध्यसाधनापेक्षयाऽकार्यकारणभूतत्वादिकस्तस्य विशेषः । अन्यत्रदृष्टस्यान्यत्रदर्शनं व्रज्यापूर्वकं देवदत्तादेः तथा चादित्यस्यान्यवृक्षोपरिसम्बन्धितया निर्दिश्यमानस्यान्यपर्वतोर्ध्वभागसम्बन्धितया निर्देशो दृष्टः तेन च गत्यविनाभाविना भाव्यम् । अन्यत्रदर्शनस्य च न गतिकार्यत्वम् गतेः संयोगादिकार्यत्वात् । अन्यत्रदर्शनं धर्मि गत्यविनाभूतमिति साध्यो धर्मः अन्यत्रदर्शनशब्दवाच्यत्वाद् देवदत्तान्यत्रदर्शनवत् । नन्वन्यत्रदर्शनस्य शेषवत्यन्तर्भावो गतिजन्यत्वात् । अथान्यत्रदर्शनं न साक्षाद् गतिकार्यमपि तु पारम्पर्येणेति न शेषवत्यन्तर्भावस्तर्ह्युभयतटव्यापित्वमपि न साक्षाद् वृष्टिकार्यमिति न शेषवदुदाहरणं भवेत् । अथ नान्यत्रदर्शनं हेतुः किन्तु तच्छब्दवाच्यत्वम् नन्वत्रापि वक्तव्यम् किं तद् अन्यत्रदर्शनमेव, उत तच्छक्तिः ? पूर्वस्मिन् विकल्पे शेषवत्यन्तर्भावः । उत्तरस्मिन्नपि 'अन्यत्रदर्शनम्' इत्येवंविधः शब्दो विशिष्टप्रत्ययजनने अन्यत्रदर्शनस्वरूपस्य सहकारी हेतुः स च पारम्पर्येण गतेः कार्यत्वात् शेषवान्, असदेतत्; अत्र ह्यन्यत्रदर्शनत्वं हेतुः न तच्छब्दवाच्यत्वम् तच्च स्वरूपसहकारिभेदेन द्विरूपा शक्तिः अन्यत्रदर्शनं स्वरूपशक्तिस्तद्दर्शनत्वं सहकारिशक्तिः सा चात्ममनःसंयोगोऽदृष्टादि च । तत्र केषांचिन्नित्यत्वे केषांचिदनित्यत्वेऽपि न गतिकार्यतेति कुतः शेषवत्यन्तर्भावः ?

एतदपरे दूषयन्ति—अन्यत्रदर्शनमित्यनेन सवितुः किमप्यधिकरणं निर्दिष्टम् । न च निरूप्यमाणं तत् संभवतीति तद्दर्शनमात्रमेवावशिष्यते न 'अन्यत्र' इतिशब्दवाच्यम् । अथोदयसमयेऽन्यत्रदर्शनं ततोऽन्यत्रदर्शनं सवितुरस्तमयसमये न च दृष्टस्यापलापो युक्तियुक्तः सत्यम् अस्त्ययं प्रतिभासः स तु 'अन्यत्र' इत्यधिकरणस्य निर्देष्टुमशक्तेरयुक्तः । न च तत्सद्भावेऽप्यन्यत्रदर्शनत्वमनुपलभ्यमानं हेतुः । न च तस्योपलम्भः संभवति आत्ममनःसंयोगादृष्टादेः सर्वस्यातीन्द्रियत्वात् संयोगस्यैन्द्रियकत्वेऽप्यप्रत्यक्षद्रव्यवृत्तेः प्रत्यक्षाप्रत्यक्षद्रव्यवृत्तेश्च तस्यातीन्द्रियत्वात् । अतोऽसिद्धत्वान्नान्यत्रदर्शनत्वं गत्यनुमापकमिति न सामान्यतोदृष्टानुमानोदाहरणमेतद् युक्तं किन्तु समानकालस्य स्पर्शस्य रूपाद्-कार्यकारणभूतात् प्रतिपत्तिः सामान्यतोदृष्टानुमानप्रभवा । न च रूप-स्पर्शयोः कार्यकारणभावो नैयायिकदृष्ट्या प्रसिद्धः अविनाभावस्तु तमन्तरेणापि तयोरुपपन्न एव । न च सौगतप्रक्रियया

---

१ "पूर्वमप्रतिपादितम्"–बृ० टि० । २ "अनुपयुक्तकार्यं"–बृ० टि० । ३ "तेन गोगाचार्यदोषो नास्ति कारणानभिधानात्"–बृ० टि० । ४–स्वबन्धत्वा–ल० वा० बा० । ५ न्यायमञ्ज० आ० २ पृ० १३० पं० २३–। ६–तसाधना–वा० बा० हा० वि० । ७–नं प्रत्र–आ० हा० वि० । ८ "गमनपूर्वकम्"–बृ० टि० । ९–वि भाव्य–वा० बा० । १० "संयोगादि कार्यं यस्य तद्भावः"–बृ० टि० । ११ "स्वरूपशक्तिरात्ममनःसंयोगः सहकारिशक्तिरदृष्टादि भण्यते"–बृ० टि० । १२ "अन्यत्रदर्शनस्य पारम्पर्येण गतिकार्यत्वात्"–बृ० टि० । १३ अत्र वा० बा० आ० हा० वि० । १४ "अन्यत्रदर्शनत्वम्"–बृ० टि० । १५–र्शनस्व–बृ० । १६–भवीति बृ० । १७ "अधिकरणसद्भावे"–बृ० टि० । १८ "अन्यत्रदर्शनस्य तत्त्वस्य वा"–बृ० टि० । १९–कालस्प–वा० बा० आ० वि० । –कार्यस्य स्प–भां० मां० । २० "रूप-स्पर्शयोर्विभिन्नगुणत्वात् ततो रूपं रूपस्यैवारम्भकम् न स्पर्शस्य एवं स्पर्शोऽपि"–बृ० टि० ।

रूपस्य स्पर्शकार्यता तत्कार्यतया लोके तस्याप्रसिद्धेः[1]। न चाप्रसिद्धमपि तत्कार्यत्वं गमकत्वान्यथानुपपत्त्या तस्य परिकल्पनीयम् प्रतिबन्धस्य सौगताभ्युपगमेन[2] तादात्म्यतदुत्पत्तिलक्षणस्यासंभवात् संभवेऽपि तद्ग्राहकप्रमाणायोगात् क्षणविशरारुत्वे भावानां सर्वस्याप्यस्याघटमानत्वेन प्रतिपादितत्वात्। ततो रूपेण स्पर्शानुमानं सामान्यतोदृष्टमनुमानम्।

अथवा[3] पूर्वेण तुल्यं वर्तत इति पूर्ववदिति वतेः प्रयोगः। न च क्रियातुल्यत्वे वतिप्रयोगस्य[4] वैयाकरणैरिष्टेरत्र च सम्बन्धप्रतिपत्तेः स्पष्टत्वादनुमेयप्रतिपत्तेश्चाविशदतया[5] तद्भावतो विषयतुल्यत्वस्य च तन्निमित्तत्वेनानिष्टेर्वतिप्रयोगोऽनुपपन्न इति वक्तव्यम् यतो यद्यपि प्रत्यक्षानुमानप्रतीत्योर्भेदस्तथापि विषयतुल्यत्वात् कथंचित् क्रियाया अपि तुल्यता समस्तीति न वतेः प्रयोगोऽनुपपन्नः तेन पूर्वप्रतिपत्त्या तुल्या प्रतिपत्तिर्यतो भवति तत् पूर्ववदनुमानम् नन्वेवं शेषवत्-सामान्यतोदृष्टयोरपि पूर्ववत्त्वप्रसक्तिः। तथाहि-साध्यसाधनयोः प्रत्यक्षेण दृष्टान्तधर्मिणि सामान्यरूपतया प्रतिबन्धग्रहणम् अन्यथाऽनवस्थाप्रसक्तेरनुमानस्याप्रवृत्तिरिति तत्त्रितयस्यापि पूर्वेण तुल्यत्वात् पूर्ववत्त्वम्। न हि यादृग्भूतेन साध्यसामान्येन लिङ्गसामान्यस्य दृष्टान्ते अध्यक्षतोऽविनाभावग्रहस्तादृग्भूतस्यैवानध्यक्षस्य साध्यस्य क्वचिद्धर्मिणि हेतुसामान्यात् शेषवत्-सामान्यतोदृष्टयोरप्रतिपत्तिः। अतो विषयतुल्यतया क्रियातुल्यत्वाद् वतेः सर्वत्रैव संभवात् कुतः शेषवत्-सामान्यतोदृष्टयोः पूर्ववतो भेदसिद्धिः? असदेतत्, प्रत्यक्षेणागृहीतान्वयं केवलव्यतिरेकबलात् प्रमां निर्वर्तयत् शेषवदनुमानमित्यभ्युपगमात्। तथाहि-शेषवन्नाम परिशेषः[10] यथा गुणत्वाद् इच्छादीनां पारतन्त्र्ये सिद्धे शरीरेन्द्रियादिषु प्रसक्तेषु प्रतिषेधः शरीरविशेषगुणा इच्छादयो न भवन्ति तद्गुणवैधर्म्यात् तच्च रूपादीनां स्वपरात्मप्रत्यक्षत्वेऽपीच्छादीनां स्वात्मप्रत्यक्षत्वमेव नापीन्द्रियाणाम् इच्छाद्युत्पत्तौ तेषां समवायाद्यादिकारणत्वायोगात्[11] नापि विषयाणाम् उपहतेष्वनुस्मरणदर्शनात्[12] न चान्यस्य प्रसक्तिरस्ति अतः परिशेषादात्मसिद्धिः। प्रयोगश्चात्र-योऽसौ परः स आत्मा इच्छाद्याधारत्वात् ये त्विच्छाद्याधारा न भवन्ति ते आत्मशब्दवाच्या अपि न भवन्ति यथा शरीरादयः आत्मशब्दश्च आत्मत्वसम्बन्धिनि द्रष्टव्यः। न चैवं पूर्वेण तुल्यं पूर्ववदिति वतिरत्र संभवति सपक्षे अदृष्टत्वात्। न चैवं सामान्यतोदृष्टात् पूर्ववतोऽविशेषः यतो यत्र धर्मी साधनधर्मश्च प्रत्यक्षः साध्यधर्मश्च सर्वदाऽप्रत्यक्षः साध्यते तत् सामान्यतोदृष्टं यथेच्छादयः परतन्त्रा गुणत्वात् रूपवत् उपलब्धिर्वा करणसाध्या क्रियात्वात् छिदिक्रियावत् असाधारणकारणपूर्वकं जगद्वैचित्र्यं चित्रत्वात् चित्रादिवैचित्र्यवदित्यादि सामान्यतोदृष्टस्यानेकमुदाहरणम्। उक्तं च ईश्वरकृष्णेन—"सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात्" [साङ्ख्यका० ६] इत्यादि। ननु साध्यधर्मस्य सर्वदाऽप्रत्यक्षत्वे तेन हेतोर्व्याप्तिग्रहणासंभवात् कथं तत्प्रतिपादकलिङ्गप्रवृत्तिः? नैष दोषः केनचिदर्थेन सामान्यात्। ननु लिङ्गं गुणत्वं कार्यत्वं वाऽत्र सामान्यस्वभावम् न च तस्य सामान्यं केनचिदर्थेन संभवति "निःसामान्यानि सामान्यानि" [ ] इति वचनात्।

अत्र केषांचित् प्रतिसमाधानम्-इच्छादय एवात्र लिङ्गत्वेनोक्ता इच्छादेश्च रूपादिना सामान्यं गुणत्वं कार्यत्वं चोपपद्यत एव। अपरे तु लिङ्गाधिकरणत्वादिच्छादयो लिङ्गत्वेनोक्ता इति व्याचक्षते। तेषां च पूर्ववत् सामान्ययोगः प्रतिपत्तव्यः ततोऽप्रत्यक्षस्य पारतन्त्र्यस्य प्रतिपत्तिः सामान्यतोदृष्टम्। अत्रापि च धर्मिण इच्छादेः प्रत्यक्षप्रतिपन्नत्वं गुणत्वकार्यत्वादेरपि साधनस्य

१-सिद्धिः वा० बा०। २-न वा ता-भां० मां०। ३ "अथवा पूर्ववदिति भाष्यम्। तस्यार्थः पूर्वेण तुल्यं वर्तत इति पूर्ववत्। क्रियातुल्यतायां च वतिरिति क्रियातुल्यता दर्शिता"-न्यायवा० ता० टी० पृ० १७९ पं० १७। ४ "तेन तुल्यं क्रिया चेद् वतिः"-पाणि० ५-१-११५। "त्वादेरिवे"-हैम० ७-१-५२। ५ "पूर्वप्रतिपत्तेर्हि वैशद्यमनुमेयप्रतिपत्तेस्तु नास्तीति"-बृ० ल० टि०। ६ "क्रियातुल्यलाभावतः"-बृ० टि०। "क्रियातुल्यत्वभावतः"-ल० टि०। ७ "वतिप्रत्ययनिमित्तत्वेन"-बृ० ल० टि०। ८-हीत्वान्व-बृ०। ९-रेकात् प्र-बृ० आ० हा० वि०।

१० "शेषवन्नाम परिशेषः स च प्रसक्तप्रतिषेधेऽन्यत्राऽप्रसङ्गाच्छिष्यमाणे संप्रत्ययः" इत्यादि—१-१-५ वात्स्या० भा० पृ० २३ पं० १६—। न्यायवा० पृ० ५१ पं० १६। न्यायवा० ता० टी० पृ० १८२ पं० १२। का० ५ साङ्ख्यतत्त्वकौ० पृ० ३० पं० ७-।

११-वायादि-वा० बा० भां० मां० विना। १२-दिकका-वा० बा०।

तद्धर्मत्वं प्रतिपन्नमेव। पारतन्त्र्येण च स्वसाध्येन तस्य व्याप्तिरध्यक्षतो रूपादिष्ववगतैव। साध्यव्यावृत्त्या साधनव्यावृत्तिरपि प्रमाणान्तरादेवावगता। न च त्रितयप्रसिद्धावस्यां[1] प्रवृत्तेर्न सामान्यतोदृष्टता अपि तु पूर्ववदेवैकमनुमानं प्रसक्तमिति वक्तव्यम् धर्मिणि पारतन्त्र्यस्य सर्वदाऽप्रत्यक्षत्वात् नहीच्छादौ धर्मिणि कदाचित् पारतन्त्र्यं प्रत्यक्षम् परस्याप्रत्यक्षत्वात्। अनेन च विशेषेणैतत् सामान्यतोदृष्टव्यपदेशमासादयति। धर्मिणः साध्यसाधनयोर्वा सर्वदा प्रत्यक्षत्वे गमकाङ्गासिद्धौ गमकत्वासिद्धेः सामान्यतोदृष्टमनुमानमेव न भवेत्।

नन्वेवं पूर्ववत्-शेषवत्-सामान्यतोदृष्टानां परस्परतः को विशेषः? उच्यते-इच्छादेः पारतन्त्र्यमात्रप्रतिपत्तौ गुणत्वं कार्यत्वं वा पूर्ववत् तदेव चाश्रयान्तरबाधया विशिष्टाश्रयत्वेन बाधकेन प्रमाणेनावसीयमानं शेषवतः फलम्, तस्य साध्यधर्मस्य धर्म्यन्तरे प्रत्यक्षस्यापि तत्र धर्मिणि सर्वदाऽप्रत्यक्षत्वं सामान्यतोदृष्टव्यपदेशनिबन्धनम् अतस्त्रयाणामेकमेवोदाहरणम् शेषवतश्च शिष्यमाणोक्तिरन्वयव्यतिरेकिणो हेतोः पारतन्त्र्यप्रतिपत्तौ द्रष्टव्या। तत् स्वहेतोः प्रतिपन्नमाश्रयान्तराद् बाधकेन प्रच्यावितं तस्य शिष्यमाणविशिष्टाश्रयत्वप्रतिपत्तिः[2] शेषवतः फलम्। एवं च वतेः सर्वत्र संभवान्न विशेष इति न वक्तव्यम्, विशेषस्य प्रदर्शितत्वात्। एतत्त्रिप्रकारां मतिं जनयत् तत्पूर्वकं सदनुमानमित्यव्याप्त्यादिदोषविकलमनुमानलक्षणम्।

तृतीयसूत्रेऽप्येतदेव व्याख्यानम्। अयं तु विशेषः—पूर्वस्मिंस्त्रिप्रकारमेव लिङ्गमनुमानव्यवच्छेदकम् पूर्ववदादयस्तु त्रिप्रकारलिङ्गविशेषणार्थाः। उत्तरस्मिंस्तु सर्वमेतदनुमानव्यवच्छेदार्थम् व्यवच्छेदस्तु पूर्वेणैव न्यायेन। अत्र च सूत्रत्रये प्रथमसूत्रव्याख्यानमेवाभिमतमध्ययनप्रभृतीनाम् अणुना सूत्रेण महतोऽर्थस्य सङ्ग्रहादकारकस्य च त्रिप्रकारलिङ्गालम्बनस्योत्तरव्याख्यानेऽनुमानत्वप्रसक्तिः। फलस्याश्रयणाद् उपलब्धिसाधनस्येत्यध्याहारो न युक्तोऽप्रकृतत्वात्। सामान्यलक्षणे प्रकृतत्वाददोष इति चेत् तर्ह्यतिव्याप्तिनिवृत्त्यर्थं पूर्ववदादिपदोपादानं न कर्तव्यम् प्रत्यक्षसूत्रेऽव्यपदेश्यादीनां प्रकृतत्वात्। शाब्दे च प्रसङ्गो न व्यावर्त्तते यत् लिङ्ग-शब्दाभ्यां जन्यते विज्ञानं यथोक्तविशेषणविशिष्टोपलब्धिरूपं तत्साधनस्यानुमानत्वप्रसक्तिरतस्तन्निवृत्तये विशेषणान्तरोपादानं कर्तव्यम्। प्रथमसूत्रव्याख्याने तु सर्वदोषाभावः प्रक्रान्तस्याविरोधिनः सर्वस्याभिसम्बन्धात्। त्रिविधग्रहणं तत्र विभागार्थमित्युक्तम् पूर्ववदादिग्रहणमपि स्वभावादित्रैविध्यप्रतिषेधेन पूर्ववदादिष्वेव नियमज्ञापनार्थम्[3]। पूर्ववदादीनां तु द्वितीयसूत्रे यद्व्याख्यानं तदेवेहापि द्रष्टव्यम्। विशेषस्तु तत्रानुमानलक्षणोपयोगित्वमिह तु त्रिविधभागेन विभज्यमानस्य स्वरूपदर्शनार्थम्। अनुमानस्य च त्रैविध्यं कारणादित्रैविध्यादेवेति।}

[सौगतप्रणीतानुमानलक्षणाश्रयेण नैयायिकोक्तानुमानलक्षणस्य प्रतिक्षेपप्रकारः]

कथं[4] पुनः सौगतप्रणीतलक्षणादस्य प्रतिक्षेपः? उच्यते-तत्पूर्वकमिति प्रत्यक्षप्रमाणफलपूर्वकं यतो भवति तदनुमानमिति प्रथमसूत्रव्याख्यानमसंगतमेव परोक्तलक्षणलक्षितस्य प्रत्यक्षस्य प्रमाणत्वेनासिद्धेः तत्पूर्वकत्वस्यानुमानलक्षणस्यासंभवात्[5]। तदसंभवे च स्मृत्यादिजनकत्वव्यवच्छेदार्थं विशेषणकलापाध्याहारोऽप्यसंगत एव। यदपि पूर्वशब्दस्य लुप्तस्यानिर्देशे प्रत्यक्षफलेऽनुमानत्वप्रसक्तिप्रेरणम्[6] तदप्यसङ्गतम् तत्फलस्यैव प्रत्यक्षप्रमाणत्वेन व्यवस्थापितत्वात् अबोधरूपस्य प्रमाणत्वनिषेधात्। यदपि 'त्रिविधग्रहणमनुमानविभागार्थम् पूर्ववदादिग्रहणं च विभागविषयज्ञापनार्थम्' इत्युक्तम्[7] तदप्यसारम् कारणादप्रतिबद्धसामर्थ्यात् प्रदर्शितन्यायेन[8] कार्यानुमाने कार्याध्यक्षतादोषस्याविचलितरूपत्वात्। या च 'अनुत्पन्नावयवक्रियस्यान्त्यतन्तोर्यदा क्रियातो विभागः' इत्यादि-

---

१ "धर्मि-तद्धर्म-व्याप्तिरूप"-बृ० ल० टि०। २ "पारतन्त्र्यानुमानस्य"-बृ० ल० टि०। ३-न्यतोऽद्द-बृ०। ४-मात्राप्र-वा० बा० भां० मां० विना। ५ "पारतन्त्र्यम्"-बृ० टि०। ६-पत्तिविशेषतः फ-आ० हा० वि०। ७-कारं मितिं जनय-बृ०।-कारं मिति जनय-आ० हा० वि०।-कारमिति जनय-वा० बा०। ८ "विशेषकम्"-बृ० टि०। ९-दकस्तु आ० हा० वि०। १०-क्षणाप्र-बृ० आ० हा० वि०। ११-र्थमपू-बृ०। १२ "अत्र प्रतिविधीयते"-बृ० टि०। १३-मानं ल-बृ०। १४ पृ० ५६१ पं० २९। १५ पृ० ५६२ पं० ९। १६ पृ० ५६२ पं० ३३। "पूर्वपक्षवेलोपन्यस्त"-बृ० टि०। १७ पृ० ५६३ पं० २५।

प्रक्रियोपवर्णिता साऽपि प्रमाणबाधितत्वादनुद्घोष्या । यथा च क्रियाविभागादीनां प्रमाणबाधितत्वं तथा प्राक् प्रतिपादितम् प्रतिपादयिष्यते च यथावसरम् । यदपि 'मेघानां भविष्यद्वृष्टिकार्यविशेषणविशिष्टत्वमुन्नतत्वादिना धर्मेण तद्वतेन साध्यते' इत्युक्तम् तदप्यसंगतम् अस्वसंविदितविज्ञानाऽभ्युपगमवादिनां प्रदर्शितन्यायेन धर्माद्यसिद्धेरवयविसंयोगविशेषणविशेष्यभावादीनां च पराभ्युपगमेनासिद्धेर्हेतोराश्रय-स्वरूप-दृष्टान्तासिद्धिदोषा वाच्याः । न च कार्याभावात् कारणमात्रस्याभावसिद्धिरिति सन्दिग्धव्यतिरेको हेतुः अप्रतिबद्धसामर्थ्यस्य कारणविशेषस्याभावसिद्धावपि नाप्रतिबद्धसामर्थ्यत्वं कारणस्योन्नतत्वादिधर्मविशिष्टस्य ज्ञातुं शक्यम् ज्ञातौ वा कार्यस्यैव तदा प्रत्यक्षतेत्युक्तं प्राग् । यदपि 'यो हि भविष्यद्वृष्ट्यव्यभिचारिणमुन्नतत्वादिविशेषमवगन्तुं समर्थः स एव तस्मात् तामनुमिनोति' इत्युक्तम् तदप्यसङ्गतम् तदनुमितेः प्रागेव कार्यस्य प्रत्यक्षतया तदनुमितेर्वैयर्थ्यप्रसक्तेरित्युक्तत्वात् । यदपि 'गम्भीरध्वानवत्त्वे सति' इत्याद्युन्नतत्वादेर्विशेषणम् तदप्येतेनैव निरस्तम् अनुमेयप्रतिपत्तौ तस्यानुपयोगित्वात् अध्यक्षत एव तत्प्रतिपाद्यस्यार्थस्य सिद्धेः । यदपि शेषवत उदाहरणं प्रतिपादितम् तत्र नदीविशेषो धर्मी अवयविरूपोऽसिद्धः उभयतटव्यापित्वादिकस्तु संयोगविशेषत्वात् साधनधर्मोऽसिद्धः संयोगस्यासत्त्वेन प्रतिपादनात् । यदपि वृष्टिकार्यत्वं साधनधर्मस्य परम्परया प्रक्रियोपवर्णनेन प्रदर्शितम् तदपि प्रक्रियाया असिद्धत्वान्निरस्तम् । 'अकार्यकारणभूतेन लिङ्गेन यत्र लिङ्गिनोऽवगमस्तत् सामान्यतोदृष्टम्' इति यदभिधानम् तदप्यसङ्गतम् अकार्यकारणभूतस्यास्वभावभूतस्य च लिङ्गस्य गमकत्वेऽविनाभावनिमित्तस्य तादात्म्य-तदुत्पत्तिलक्षणप्रतिबन्धस्याभावेऽपि गमकत्वाभ्युपगमात् सर्वस्य सर्वं प्रति गमकत्वोपपत्तेः । न चासत्यपि जन्यजनकभावे तादात्म्ये वा स्वसाध्येनैव लिङ्गस्याविनाभावो नान्येनेत्यत्र वस्तुस्वभावैरुत्तरं वाच्यं य एवं भवन्ति नास्माभिर्वयं केवलं द्रष्टार इति वक्तव्यम् यत एवमभ्युपगमे आकस्मिक एव वस्तूनां स स्वभावो भवेत् तथा च न कस्यचिदसौ न स्यात् न ह्यहेतोर्देशकालनियमो युक्तः । तद्धि किञ्चित् क्वचिदुपलीयेत न वा यस्य किञ्चिद् यत्रायत्तमनायत्तं वा अन्यथेष्टदेशकालद्रव्यवदन्यदेशादिभावः केन वार्येत विशेषाभावात्? ततो येनाऽविनाभूतं यद् दृश्यते तेन तस्य तत्त्वचिन्तकैरव्यभिचारनिबन्धनं वाच्यम् न पुनः पादप्रसारिका विधेया । तच्च यथोक्तादन्यदव्यभिचारनिबन्धनं नोपपत्तिमत् । न च तादात्म्य-तदुत्पत्तिलक्षणप्रतिबन्धमन्तरेण पक्षधर्मताऽपि हेतोः संभवति संयोग-समवायादिलक्षणस्य सम्बन्धस्य प्रागेव निरस्तत्वात् । एकार्थसमवायित्वस्य च समवायाभावे दूरापास्तत्वात् विशेषणविशेष्यभावस्य च सम्बन्धस्य संयोगाद्यन्तरेणासंभवात् । न चानवगतपक्षधर्मत्वादेर्हेतोर्भवद्भिर्गमकत्वमभ्युपगम्यते । एकसामग्र्यधीनतालक्षणस्तु प्रतिबन्धः कार्यकारणभावविशेष एवेति तदभावे तस्याप्यभाव इति नाकार्यकारणभूताद् रूपादेस्तत्समानकालस्य रसस्यानुमानं सामान्यतोदृष्टस्योदाहरणं युक्तिसङ्गतम् ।

यदपि वतेः प्रयोगमाश्रित्य पूर्ववदनुमानं व्याख्यातम् तत्रापि दृष्टान्तधर्मिणि साध्यसाधनयोः प्रत्यक्षेण प्रतिबन्धग्रहणेऽनुमानस्योत्थानं न स्यात् साध्यधर्मिणि हेतोः साध्यधर्मेणाविनाभूतत्वाग्रहणात् । न च दृष्टान्तधर्मिणि हेतोः साध्याविनाभूतत्वग्रहणमात्रादेव साध्यधर्मिणि साध्यप्रतिपत्तिः अन्यथा 'लोहलेख्यं वज्रं पार्थिवत्वात् काष्ठवत्' इत्यत्रापि साध्यप्रतिपत्तिर्भवेत् दृष्टान्तधर्मिणि

---

१ पृ० ५६३ पं० ७। २ पृ० ५६३ पं० १८। ३ पृ० ५६३ पं० २१। ४-**दृप्यनेनैव** बृ० भां० मां०। ५ पृ० ५६५ पं० ४। ६ पृ० ५६५ पं० ८। ७ पृ० ५६५ पं० १२। ८ इतः 'संयोगाद्यन्तरेणासंभवात्' इतिपर्यन्तः पाठोऽक्षरशः हेतुबिन्दुटीकायां वर्तते स च पृ० ५५६ पं० ३३ टिप्पणतोऽवगन्तव्यः। ९ **एवं भवति** आ० हा० वि०। **एवं न भवन्ति** भां० मां०। १०-**पनीये**-वा० बा०।-**पमीये**-आ० हा० वि०। ११-**चारिनि**-ल०। १२ पादप्रसारिका, भिक्षुपादप्रसारणन्यायः द्वावेतौ समानौ न्यायौ । एनयोः सष्ठीकरणम् एतदुपयोगस्थलानि च लौकिकन्यायाञ्जलौ यथाक्रमं द्वितीये पृ० ४६ प्रथमे पृ० ३९ च भागे दर्शितानि सन्ति। भिक्षुपादप्रसारणन्यायः प्रथमे भागे एवं विवृतोऽस्ति—"यथा कश्चिद् भिक्षुर्यथेष्टभोजनाच्छादनवासगृहादिलाभार्थं कस्यचिद् धनिनो गृहे प्रविश्य युगपत् सर्वाभीष्टालाभं मन्यमानः प्रथमं धनिगृहे मे पादप्रसारणमस्तु पश्चादनेन परिचयमुत्पाद्य सर्वमभीष्टं संपादयिष्यामीति धिया स्वल्पामपि भिक्षां बहु मन्यमानः पश्चात् क्रमेण स्वाभीष्टं संपादयति एवं यत्र विवक्षा तत्रास्य प्रवृत्तिः"—पृ० ३९। १३-**दात्म्यं त**-बृ० ल० वा० बा०। १४ पृ० ११३ तथा पृ० १०६। १५ पृ० ५६६ पं० ५। १६-**तत्वग्र**-भां० मां०।

पार्थिवत्वस्य लोहलेख्यतयाऽध्यक्षतः प्रतिपत्तेः । न चाध्यक्षबाधनादत्र न साध्यप्रतिपत्तिः बाधाऽविनाभावयोर्विरोधात् अविनाभावयुक्ते अध्यक्षबाधाऽयोगात् । न चाबाधितत्वाऽसत्प्रतिपक्षत्वरूपद्वययोगात् त्रिलक्षणस्य हेतोरविनाभावपरिसमाप्तिरिति त्रैलक्षण्येऽपि पार्थिवत्वस्यावाधितत्वरूपान्तराभावान्न साध्याविनाभाव इति वक्तव्यम् अबाधितत्वस्याविसंवादित्वप्रतिपत्तिमन्तरेण ज्ञातुमशक्तेः अज्ञातस्य च ज्ञापकहेत्वनङ्गत्वात् तदङ्गत्वे वाऽनवगताविनाभावस्यापि धूमोऽग्निप्रतिपत्तिं विदध्यात् । तन्नाबाधितत्वं हेतो रूपान्तरमिति पार्थिवत्वं काष्ठे लोहलेख्यत्वाविनाभूतमध्यक्षतः प्रतिपन्नं वज्रे उपलभ्यमानं लोहलेख्यत्वं गमयेत् । अथ सर्वोपसंहारेणाध्यक्षं दृष्टान्तधर्मिण्यपि प्रवृत्तं साध्यसाधनयोरविनाभावमवगमयतीति साध्यधर्मिण्यपि हेतोः साध्यधर्मेणाविनाभावनिश्चयान्नानुमानानुत्थानम्; भवेदेतत् यद्यसदाद्यध्यक्षं सकलदेशकालनियतसाध्यसाधनसाकल्यावभासि भवेत् तथाभ्युपगमे वा धूमस्वरूपावभासिनाऽध्यक्षेण देशादिव्यवहितस्याग्नेरपि प्रतिपत्तेरनुमानप्रवृत्तेर्वैयर्थ्यप्रसक्तिः स्यात् । न च मानसं योगिप्रत्यक्षं वा सर्वोपसंहारेण साध्यसाधनयोर्व्याप्तिग्राहकं संभवति अध्यक्षस्य विशदावभासस्य साध्यसाधनावगतिस्वभावस्यासंवेदनात् विशदावभासि च सन्निहितार्थग्रहणस्वभावमसदाद्यध्यक्षमित्युक्तं प्राक् । अथानुमानेन व्याप्तिग्रहणेऽनवस्थाप्रसक्तेर्भवताऽप्यध्यक्षतस्तद्ग्रहणमभ्युपगन्तव्यम् तत्र चोक्त एव दोषः, तदसत्; प्रतिबन्धग्राहिणा प्रमाणेन सकलोपसंहारेण व्याप्तिनिश्चयात् । तथाहि-महानसादौ विशिष्टमध्यक्षमग्निधूमयोः कार्यकारणभावग्राहकत्वेन प्रवृत्तं 'सर्वत्रानग्निव्यावृत्तोऽग्निः अधूमव्यावृत्तस्य धूमस्य जनकः' इति व्यवस्थापयति अन्यथा सकृदप्यग्नेर्धूमस्योत्पत्तिर्न भवेत् अहेतोः कदाचिदप्युत्पत्तिविरोधात् । तदुक्तम्—

"कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितः ।
संभवंस्तदभावेऽपि हेतुमत्तां विलङ्घयेत्" ॥ [ ]

तथा भावमन्तरेणापि भवन् स्वभावो निःस्वभाव एव स्यात् । तदुक्तम्—

"स्वभावेऽप्यविनाभावो भावमात्रानुरोधिनि ।
तदभावे स्वयं भावस्याभावः स्यादभेदतः" ॥ [ ]

इति तादात्म्य-तदुत्पत्तिव्यवस्थापकमेव प्रमाणं सकलोपसंहारेण व्याप्तिव्यवस्थापकमित्युक्तं प्राक् ।

अथ सर्वोपसंहारेण व्याप्तिग्रहणे अनुमानस्याप्रामाण्यं भवेत् व्याप्तिग्राहकप्रमाणप्रतिपन्नार्थविषयत्वेन स्मृतिरूपत्वात् तदंशव्याप्तिसामर्थ्येन च हेतोः स्वसाध्यप्रतिपादकत्वं न पक्षे सत्तामात्रेतः तत्स्थस्य रासभादेरपि साध्यप्रतिपादकत्वप्रसक्तेस्तत्तदंशव्याप्तिवचनेनैव गतत्वात् पक्षधर्म इति हेतोः पृथग् लक्षणं न वक्तव्यं भवेत् । उक्तं च जैनैः—

अन्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम्? ।
नान्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम्? ॥ [ ] इति ।

१-**तरू**-वा० बा०। २ "प्रत्यक्षग्रहणकक्षीकारे"-बृ० ल० टि०। ३ पृ० ३२२ पं० १ तथा टि० १-२। "तथा च कीर्तिना कीर्तितं वार्तिके" इत्युल्लिख्यायं श्लोकः स्याद्वादरत्नाकरे उद्धृतोऽस्ति-पृ० ५१५ पं० ७ आ०। १,२,१२ प्रमाणमी० पृ० ६४ पं० ५। ४ पृ० ३२१ पं० २९ तथा टि० २९। ५-**त्र तत्स्थ**-भां० मां०। ६ "प्रतिज्ञास्थस्य"-बृ० ल० टि०।

७ अस्य पद्यस्य कर्तृत्वविषये प्राचां विप्रतिपत्तयो दृश्यन्ते—

आचार्यकमलशीलेन "अन्यथा" इत्यादिना पात्रस्वामिमतमाशङ्कते" इत्युल्लिख्य व्याख्यातासु षोडशसु कारिकासु पात्रस्वामिसंबन्धं धारयद् इदं पद्यं १३६९ तमं सव्यत्ययं वर्तते-तत्त्वसं० का० १३६४-१३७९ पृ० ४०५-४०७।

वादिदेवसूरिणा तत् पद्यं पात्रस्वामिकर्तृकत्वेन निर्दिष्टम्—स्याद्वादर० पृ० ५२१ पं० ५-६ आ०।

दिगम्बरपरम्परायां 'पात्रकेसरी' इति प्रसिद्धिं प्राप्तेन विद्यानन्दिस्वामिना स्वकृतौ तत्त्वार्थश्लोकवार्तिके "तथाह च" इत्युक्त्वा प्रमाणपरीक्षायां च "तदुक्तम्" इत्युक्त्वा तत् पद्यं समुद्धृतं दृश्यते-पृ० २०३ श्लो० १७८, पृ० ७२ पं० १८। तथा,

केचन स्वामिपदस्य पात्रकेसरीति अर्थं गृहीत्वा अस्य पद्यस्य पात्रकेसरिकर्तृकतां मन्यमाना अभूवन् तेषां मतं निराकर्तुकामेन रविभद्रशिष्यानन्तवीर्येण तस्य पद्यस्य तीर्थकरसीमन्धरकर्तृकता स्थापिता सिद्धिविनिश्चयवृत्तौ । तथाहि—

"कस्य तदित्याह—स्वामिनः पात्रकेसरिण इत्येके । कुत एतत्? तेन तद्विषयत्रिलक्षणकदर्थनपुत्तरभाष्यं यतः कृतमिति चेत् नन्वेव(वं?) सीमन्धरभट्टारकस्याशेषार्थसाक्षात्कारिणस्तीर्थंकरस्य स्यात् । तेन हि प्रथमम्—

अनुपलब्धेश्च पक्षधर्मत्वं नोपपत्तिमत् अन्योपलब्धिस्वभावायास्तस्याः पुरुषधर्मत्वात् । कार्यहेतोश्च स्वातन्त्र्येण धर्म्यनपेक्षत्वात् कुतः पक्षधर्मता? स्वभावहेतोः पुनर्धर्मिरूपत्वाद् भेदनिबन्धना पक्षधर्मता दूरोत्सारितैव । न च कल्पितस्य पक्षधर्मस्य कार्यस्वभावहेतुत्वं साध्यव्याप्तिश्चोपपत्तिमती । ततो न पक्षधर्मत्वं हेतोर्लक्षणं भवदभिप्रायेण युक्तिसंगतम्, असदेतत्;

यतो यद्यपि सर्वोपसंहारेण साध्यसाधनयोर्व्याप्तिप्रतिपत्तिस्तथापि न तत्प्रतिपत्तिमात्रात् 'इदानीमिह साध्यधर्मिणि साध्यधर्मः' इति विशेषावगमः तेनाप्रतिपन्नविशिष्टदेशादिसम्बन्धि-साध्यार्थप्रतिपादकत्वेनानुमानं नाप्रामाण्यमश्नुते । न चान्यदेशादिस्थेन साध्यधर्मेणान्यदेशादिस्थः साधनधर्मः सम्बन्धमनुभवति तेन प्रतिनियतदेशादिविशेषितसाधनप्रतिपत्तिबलादेव प्रतिनियत-देशाद्यवच्छिन्नसाध्यप्रतिपत्तिरेवानुमानमिति न पक्षधर्मत्वमन्तरेणानुमानसंभवः । न च धूममात्राद् वह्निमात्रस्यावगतिरनुमानम् व्याप्तिग्राहकप्रमाणफलत्वात् तस्याः । न च हेतोः पक्षधर्मत्वं 'यत्र साधनधर्मस्तत्र साध्यधर्मः' इत्यविशिष्टावगतिमात्रात् सिध्यति साध्यधर्मिधर्मतया साधनधर्मस्या-प्रतीतेः सामान्येनाभिधानात् ततो विशिष्टदेशाद्यवच्छिन्नसाध्यावगतये पक्षधर्मत्वं प्रदर्शनीयम् अतः 'यत्र यत्र धूमस्तत्र तत्राग्निः' इत्यनेनैव पक्षधर्मत्वस्योक्तत्वात् प्रदेशविशेषे अग्निसिद्ध्यर्थं 'धूमश्चात्र' इति न वक्तव्यमुक्तार्थत्वात् इति यदुक्तं तन्निरस्तं द्रष्टव्यम् । एतेनैव यदुक्तं कुमारिलेन—

"नदीपूरोऽप्यधोदेशे दृष्टः सन्नुपरि स्थिताम्[3] ।
नियम्यो गमयत्येव वृत्तां वृष्टिं नियामिकाम् ॥
एवं यत् पक्षधर्मत्वं ज्येष्ठं हेत्वङ्गमिष्यते ।
तत् पूर्वोक्तान्यधर्मत्वदर्शनाद् व्यभिचार्यते ॥
पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणताऽनुमा ।
सर्वलोकप्रसिद्धा न पक्षधर्ममपेक्षते[4] ॥
क्लेशेन पक्षधर्मत्वं यस्तत्रापि प्रकल्पयेत् ।
न संगच्छेत तस्यैतल्लक्ष्येण सह लक्षणम् ॥
यथा लोकप्रसिद्धं च लक्षणैरनुगम्यते ।
लक्ष्यं हि लक्षणेनैतदपूर्वं न प्रसाध्यते" ॥ [ ] इति,

तदपि प्रत्युक्तम् यतः किमित्यधस्तान्नदीपूरमुपलभ्योपर्येव वृष्ट्यनुमानं नान्यत्र? तथा, शिशुरयं ब्राह्मणो मातापित्रोर्ब्राह्मण्यादिति किमिति यस्यैव शिशोः ब्राह्मण्यं साध्यं तस्यैव मातापितृब्राह्मण्य-लक्षणो धर्मः सम्बन्धी गमको न मातापितृब्राह्मण्यमात्रम्? अथ नदीपूरस्योपरिदेशसम्बन्धिनः अन्यसम्बन्धिमातापितृब्राह्मण्यस्य चागमकत्वादेवमनुमानं तर्हि नदीपूरो यतः समायातस्तत्रैव

अन्यथानुपपन्नत्वं यत्र त त्रयेण किम्? । नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्? ॥

इत्येतत् कृतम् । कथमिदमवगम्यत इति चेत् पात्रकेसरिणा त्रिलक्षणकदर्थनं कृतमिति कथमवगम्यत इति समानम् । आचार्यप्रसिद्धेरित्यपि समानम् । उभयत्र कथा च महती सुप्रसिद्धा । तस्य तत्कृतत्वे प्रमाण(प्रामाण्या)प्रामाण्ये तत्प्रसिद्धौ कः समाश्वासः? तदर्थं करणात् तस्येति चेत् तर्हि सर्वं शास्त्रं तदविधेयं चात एव शिष्याणामेव न तत्कृतमिति व्यपदिश्येत पात्र-केसरिणोऽपि वा न भवेत् तेनापि अन्यार्थं तत्करणात् तेनापि अन्यार्थमिति न कस्यचित् स्यादेनत(?)तद्विषयप्रबन्धकरणात् पात्रकेसरिणस्तदिति चिन्तितं मूलसूत्रकारेण कस्यचिद् व्यपदेशाभावप्रसङ्गात् । तस्मात् साकल्येन साक्षात्कृत्योपदिशत एवायं भगवतस्तीर्थकरस्य हेतुरिति निश्चीयते"—सिद्धिवि० टी० लि० पृ० ३०० पं० २–१२ ।

'अयं श्लोकः पद्मावत्या देवतया विरचितः' इत्यादिका किंवदन्ती प्रभाचन्द्र-ब्रह्मदत्ताभ्यां स्वरचितकथाकोशे लिखि-तायां पात्रकेसरिकथायां वर्तते—आप्तपरीक्षाप्रस्तावना पृ० २–३ पात्रकेसरिकथा ।

१ "पक्षस्य धर्मत्वं न घटते"–बृ० ल० टि० । २—भावं हे–बृ० ल० ।

३ नैतानि पद्यानि मीमांसाश्लोकवार्तिके दृश्यन्ते, किन्तु इतस्त्रीणि पद्यानि अनिर्दिष्टकर्तृकानि प्रमेयकमलमार्तण्डे उद्धृतानि वर्तन्ते पृ० ५० द्वि० पं० १०—पृ० ५१ प्र० पं० १–२ । वादिदेवसूरिस्तु तान्येव पद्यानि भट्टकर्तृकतया समुद्धरति—स्याद्वादर० पृ० २८५ पं० १–६ आ० । ४ "भट्टोऽप्याह" इत्युल्लिख्य आचार्यहेमचन्द्रेण एक एवायं श्लोक उद्धृतोऽस्ति–२–१–१७ प्रमाणमी० पृ० ७९ । "भट्टेन स्वयमभिधानात्" इत्युक्त्वा रत्नप्रभसूरिरपि एनमेकमेव श्लोकमुद्धृतवान्—२,१ रत्नाकराव० पृ० ४९ पं० १४–१६ ।

वृष्ट्यनुमानं नान्यत्र व्यभिचारात् तस्य च तत्सम्बन्धित्वनिश्चये गमकत्वं नान्यथा अनैकान्तिकत्व-प्रसक्तेः एवं च कथं न पक्षधर्मतानिश्चयो हेत्वङ्गम्? तन्मातापितृब्राह्मण्यस्यापि पक्षधर्मत्वं तन्निश्चयश्च समस्त्येवान्यथागमकताऽयोगान्नात्रापि क्लेशेन पक्षधर्मत्वकल्पना ।

अथवा व्यभिचारनिमित्त एव धर्मो हेतुर्युक्तो धूमस्याग्निकार्यत्ववत् ब्राह्मणमातापितृजन्यत्वं च ब्राह्मण्यनिमित्तं शिशोरिति तदेव हेतुर्युक्तोऽन्यस्य तत्कल्पनायां क्लेशः स्यादेव । एवं चन्द्रोदयात् समुद्रवृद्ध्यनुमानं किमिति तदैव न पूर्वं नापि पश्चात्? तदैव व्याप्तेर्ग्रहणादिति चेत् तर्हि साध्य-साधनयोस्तत्कालसम्बन्धित्वमेवेति स एव कालो धर्मी तत्सम्बन्धिनश्चन्द्रोदयात् तत्रैव साध्यानु-मानमिति कथमत्राप्यपक्षधर्मत्वम्? कालानभ्युपगमे च नैतदनुमानं व्यभिचारात् । न च सौगतैः कालानभ्युपगमान्नास्यानुमानस्य सम्भवः । पूर्वाह्णादिप्रत्ययविषयस्य महाभूतविशेषस्य कालशब्द-वाच्यस्याभ्युपगमात् । एवं विशिष्टपिपीलिकोत्सर्पणादेरपि पक्षधर्मता योज्या । नन्वेवमपि तदंश-व्याप्तिवचनेनैव गतत्वात् पक्षधर्म इति पृथग् लक्षणं न वक्तव्यम्, नः अपक्षधर्मस्यापि साध्यव्याप्तस्य हेतुत्वनिराकरणार्थत्वात् तस्य अन्यथा महानसोपलब्धधूमाद् महार्णवे पावकानुमानं प्रसज्येत । अथ महानसस्थो धूमो न तत्स्थेन पावकेन व्याप्तः एवमेतत् किन्तु 'साध्यव्याप्तो हेतुः' इत्येतावन्मात्रे लक्षणे यत्रैव साधनधर्मस्तत्रैव साध्यधर्मानुमानमिति न प्राप्येत इत्यन्यत्रापि साध्यानुमानाशङ्का भवेत् ततस्तन्निवृत्त्यर्थं पृथक् पक्षधर्मवचनम् । यदा च भूतलादेरुपलब्धिजननयोग्यताऽनुपलब्धि-स्तदाऽसौ भूतलादिस्वभावेति कथमनुपलब्धेरपक्षधर्मत्वम्? पुरुषधर्मरूपायास्त्वनुपलब्धेरन्यभूत-लादिकार्यत्वमेव तद्धर्मत्वम् परमार्थतस्तस्यास्तदायत्तत्वात् । कृतकत्वादेस्तु शब्दादिधर्मत्वम् परमार्थत एकत्वेऽपि भेदान्तरप्रतिक्षेपाद्धर्मभेदव्यवस्थापनात् । धूमादेरपि कार्यस्य प्रदेशादिधर्मत्वम् तत्कार्य-तया तदायत्तत्वात् । तेषां च विकल्पेन तत्सम्बन्धिस्वरूपमेव 'पक्षस्यायं धर्मः' इति व्यवस्थाप्यते । तन्नास्मन्मते सर्वोपसंहारेण व्याप्तिग्रहणेऽनुमानानुत्थानम् । नापि हेतोः पक्षधर्मत्वाभिधानं व्यर्थम् यथा च पक्षधर्मतानिश्चयो व्याप्तिनिश्चयश्च यतश्च प्रमाणतः संभवति तथा प्रदर्शितमेव प्रमाण-वार्तिकादौ ग्रन्थगौरवभयान्नेह प्रदर्श्यते विस्तरतः ।

यदपि विषयतुल्यतया क्रियातुल्यत्वं वतेः प्रयोगनिबन्धनमभ्यधायि तदपि प्रतिभासभेदस्य विषयभेदमन्तरेणानुपपद्यमानत्वप्रतिपादनात् प्रतिक्षिप्तम् । तत्र पूर्ववदिति 'वति'प्रयोगाश्रयणेनापि व्याख्यानं युक्तिसङ्गतम् । यदपि 'पूर्ववतः शेषवदनुमानस्य भेदप्रतिपादनाय शेषवन्नाम परिशेषः' इत्याद्यभिधानम्, तदपि स्वप्रक्रियोपवर्णनमात्रम्; यत इच्छादीनां गुणत्वसिद्धौ पारतन्त्र्यसिद्धेः शरीरादिषु प्रसक्तेषु प्रतिषेधे सति परिशेषादात्मसिद्धिः तच्च गुणत्वमिच्छादीनां द्रव्याश्रितत्वसिद्धौ सिध्यति तच्च समवायाभावतोऽयुक्तमिति प्रतिपादितम् । यदपि 'सामान्यवत्त्वे सति अचाक्षुष-प्रत्यक्षत्वात् रसवत्' इत्यादि इच्छादीनां गुणत्वसिद्धावनुमानमुपन्यस्यते तदपि न युक्तिक्षमम् रसादीनामपि गुणत्वासिद्धितो दृष्टान्तासिद्धेः । न च तेषामपि गुणत्वसिद्धौ दृष्टान्तान्तरमस्ति इच्छादीनां तदृष्टान्तत्वे इतरेतराश्रयदोषप्रसक्तेः । यदपि 'इच्छादयो गुणाः प्रतिषिध्यमानकर्मत्वे सत्येकद्रव्यत्वात् शब्दवत्' इत्यनुमानम् तत्रापि दृष्टान्तासिद्धिः । तथाहि–द्रव्यस्य द्वैविध्यं वैशेषिकैः प्रतिपादितम्–घटाद्यनेकद्रव्यं द्रव्यम् अद्रव्यं चाकाशादि । शब्दस्तु प्रतिषिध्यमानकर्मत्वे सत्येकद्रव्यः तस्माद् रूपादिवद् गुण इत्येवं शब्दस्य गुणत्वसिद्धौ दृष्टान्तसिद्धिर्भवेत् । न चैतत् शब्दगुणत्वसिद्धौ साधनमुपपत्तिमत् शब्दस्य हि गुणत्वसिद्धौ निराश्रयस्य गुणस्यासंभवादाश्रयभूतेन गुणिना भवितव्यम् पृथिव्यादेश्च तद्गुणत्वनिषेधात् परिशेषादाकाशाश्रयः शब्दः तस्य चैकत्वं शब्दलिङ्गाविशेषाद् विशेष-लिङ्गाभावाच्च ततो गुणत्वसिद्धौ शब्दस्यैकद्रव्यत्वसिद्धिः ततश्च यथोक्तविशेषणाद् गुणत्वसिद्धिरिती-तरेतराश्रयत्वान्न शब्दस्य दृष्टान्तत्वसिद्धिः । { अथ नानेन प्रकारेणैकद्रव्यत्वं शब्दस्य साध्यते किन्तु कादाचित्कत्वाच्छब्दः कार्यम् कार्यस्य च क्षणिकत्वनिषेधे अनाधारस्यासंभवात् समवायिकारणेन

१–र्वाह्यादि–आ० हा० वि० विना । २–रूपयोस्त्व–बृ० । अत्र 'षष्ठ्या द्विवचनम्' इति सूचकं ६–२ इति अङ्कद्वयम् । ३ "हेतूनाम्"–बृ० टि० । ४ पृ० ५६६ पं० ८ । ५ पृ० ५६६ पं० १६ । ६–षु च प्र–भां० मां० । ७–दात्म्यसि–बृ० वा० बा० विना । ८–नां द्व–बृ० आ० हा० वि० ।

भवितव्यम् पृथिव्यादेश्च समवायिकारणत्वनिषेधे आकाशस्यैव समवायिकारणत्वम् तस्यैकत्वं पूर्ववद् द्रष्टव्यम्। अत एकद्रव्यत्वं शब्दस्य सिद्धमिति प्रतिषिध्यमानकर्मत्वे एकद्रव्यत्वात् रूपादिवद् गुणः शब्दः सिद्ध इति न दृष्टान्तासिद्धिः। प्रतिषिध्यमानकर्मत्वं च 'शब्दः कर्म न भवति शब्दान्तरहेतुत्वात् आकाशवत्' शब्दान्तरहेतुत्वं च शब्दस्य कार्यत्वाव्यापकत्वाभ्यां सिद्धम् कार्यं हि पूर्ववत् समवायि-
५ कारणापेक्षम् पृथिव्यादेश्च समवायिकारणत्वनिषेधात् व्योम्नस्तं प्रति समवायिकारणता शब्दस्य च प्रत्यक्षत्वान्यथाऽनुपपत्त्या सन्तानकल्पना सन्तानश्च शब्दान्तरहेतुत्वमन्तरेणानुपपन्न इति नासिद्धौ हेतु-दृष्टान्तौ। प्रतिषिध्यमानकर्मत्वं चेच्छादीनां कर्मत्वानधिकरणतयाध्यक्षप्रतिपत्तित एव सिद्धम् एकद्रव्यत्वं च यज्ञदत्तेच्छादीनां देवदत्तादावनुभवाभावतो व्यवस्थितमेव। } असदेतत् कार्यत्वस्य समवायिकारणप्रभवत्वेन शब्दादावसिद्धेर्न पूर्वोक्तप्रक्रिययाऽप्येकद्रव्यत्वसिद्धिः। अत एव शब्दान्तर-
१० हेतुत्वान्न कर्मत्वप्रतिषेधः शब्दस्य हेतु-दृष्टान्तयोरसिद्धेः न हि शब्दलक्षणस्य कार्यस्य निराधारस्य सम्भवे व्योम्नः समवायिकारणत्वेन शब्दान्तरहेतुत्वं शब्दस्य वाऽसमवायिकारणत्वेन तद् युक्तम्। न च शब्दप्रत्यक्षताऽन्यथानुपपत्त्या सन्तानकल्पना युक्तिसङ्गता तामन्तरेणापि शब्दप्रत्यक्षतोपपत्तेः प्रतिपादनात्। एकद्रव्यत्वस्य प्रतिषिध्यमानकर्मत्वस्य चेच्छादिष्वध्यक्षत एव सिद्धौ गुणत्वसमवायाद् गुणरूपताया अपि तत एव सिद्धेरनुमानोपन्यासस्य वैयर्थ्यं स्यात्। न चाध्यक्षसिद्धेऽपि गुणत्वयोगे
१५ व्यवहारसाधनार्थं तदुपन्याससाफल्यम् तद्गुणत्वस्य समवायस्य वाऽध्यक्षप्रतिपत्तौ कदाचिदप्यप्रतिभासनात्। एतेन 'गुणत्वयोगात् रूपादयो गुणाः' इति निरस्तम् गुणत्वसमवायस्य व्यतिरेकिहेतो रूपादिषु गुणव्यवहारसाधकस्यासिद्धेः। यदपि इच्छादेः पारतन्त्र्यमात्रप्रतिपत्तौ गुणत्वं कार्यत्वं वा पूर्ववदित्यादित्रयाणामपि हेतूनां विभागेनोदाहरणप्रदर्शनम् तदप्यसङ्गतमेव; गुणत्वकार्यत्वयोर्यथोक्त-
२० प्रकारेण पारतन्त्र्यप्रतिपत्तौ हेतुत्वासंभवतः सर्वस्यानुपपत्तिकत्वादित्यलमतिप्रसङ्गेन। एतेन सांख्यैरपरि-कल्पितमपि पूर्ववत् शेषवत् सामान्यतोदृष्टं चेति त्रिविधमनुमानं निरस्तम् न्यायस्य समानत्वात्। यदपि "तल्लिङ्ग-लिङ्गिपूर्वकम्" [साङ्ख्यका० ५] इत्यनुमानलक्षणं तैरभ्यधायि तदपि यद्यसत्प्रणीता-नुमानलक्षणानुयायि न व्याख्यायते तदा प्रतिबन्धग्राहकप्रमाणासंभवतः प्रदर्शितन्यायेन नानु-मेयप्रतिपत्त्यङ्गम्। अथानुयायितया तदैतदेव लक्षणं शब्दान्यत्वेऽप्यभ्युपगतमिति न विप्रतिपत्तिः।

[सौगतैर्मीमांसकीयमनुमानलक्षणमुपन्यस्य तस्य स्वमतानुसारित्वाविष्करणम्]

२५ "ज्ञातसम्बन्धस्यैकदेशदर्शनादसन्निकृष्टेऽर्थे बुद्धिरनुमानम्" [१-१-५ शाबरभा०] इति शाबर-मनुमानलक्षणम्। अत्र च यदि दर्शनादर्शननिबन्धनं सम्बन्धग्रहणमाश्रीयते तदा तत्पुत्रत्वादेरप्यनु-मानत्वसंभवादतिव्याप्तिर्लक्षणदोषः। अथ न सहभावदर्शनमात्रात् सम्बन्धावगमः किन्तु विपर्यये हेतोर्बाधकप्रमाणबलात् न च तदत्रास्तीति नातिव्याप्तिः। ननु किं पुनर्विपर्यये बाधकप्रमाणम्? अदर्शनमिति चेत् स्वसम्बन्धिनोऽदर्शनस्यात्रापि सद्भावात् सर्वसम्बन्धिनोऽन्यत्राप्यसिद्धेर्न ह्यवा-
३० गृह्य देशकालविप्रकृष्टाः साध्यविकला हेतुरहितत्वेन सकलार्था निश्चेतुं शक्याः अथ कारणव्यापकानु-पलब्धिविरुद्धविधीनामन्यतमद् बाधकं प्रमाणं तर्हि कार्यकारणव्याप्यव्यापकभावविरोधसिद्धौ प्रमाणतस्तत् प्रवर्तत इति कार्यकारणभावादिकः सम्बन्धस्तद्वगमनिमित्तं चाध्यक्षादिकं प्रमाणम-भ्युपगन्तव्यम्। न चैवमप्यपक्षधर्मस्य हेतोर्गमकत्वं प्राक् प्रदर्शितन्यायेनोपपद्यत इति पक्षधर्मत्वमपरं रूपान्तरं लक्षणं वक्तव्यम् तथाभ्युपगमे च 'ज्ञातसम्बन्धस्य' इत्यनेनान्वयव्यतिरेकयोः संसूचनात्
३५ पक्षधर्मत्वस्य चाध्याहारात् "त्रिरूपाल्लिङ्गाल्लिङ्गिनि ज्ञानमनुमानम्" [ ] इत्येतदेवा-स्मदीयमनुमानलक्षणं भवद्भिरभ्युपगतं भवतीति सौगताः।

---

१ कार्यस्य बृ०। २ पृ० ५६६ पं० २६।

३ "प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्। तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु" इति संपूर्णा कारिका।

४ "अनुमानं ज्ञातसंबन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिः"—शाबरभा० पृ० ८ पं० ८। पृ० २० पं० १० तथा टि० ५। ५–लार्थाः सर्वैर्निश्चीयन्त इति निश्चेतुं शक्यम् अथ वा० बा० भां० मां०।–लार्थाः सर्वैर्निश्चीयन्त इति निश्चेतुं शक्या अथ ल०। ६ पृ० ३ पं० ३। "तत्र त्रिरूपाल्लिङ्गाद् यदनुमेये ज्ञानं तदनु-मानम्"–न्यायबिं० १-३।

[४ प्रमाणसङ्ख्यानिरूपणम्]

[प्रत्यक्षभिन्नानि प्रमाणान्यनुमानेऽन्तर्भावयतां प्रमाणद्वयवादिनां सौगतानां विचारप्रक्रिया]

अप्रत्यक्षस्य चार्थस्य स्वसाध्येन धर्मिणा च सम्बद्धाद् अन्यतः सामान्याकारेण प्रतिपत्तेः यद्-प्रत्यक्षार्थविषयं प्रमाणं तदनुमानेऽन्तर्भूतमिति प्रत्यक्षानुमानलक्षणे द्वे एव प्रमाणे। तथाहि–न परोक्षोऽर्थः स्वत एव तदाकारोत्पत्त्या प्रतीयते प्रमाणेन तस्यापरोक्षत्वप्रसक्तेः। विकल्पमात्रस्य च ५ स्वतन्त्रस्य राज्यादिविकल्पवद्प्रमाणत्वात् तदप्रतिबद्धस्यावश्यतया तदव्यभिचाराभावात्। न च स्वसाध्येन विनाभूतोऽर्थो गमकः अतिप्रसक्तेः धर्मिसम्बन्धानपेक्षस्यापि गमकत्वे प्रत्यासत्तिविप्रकर्षा-भावात् सर्वत्र प्रतिपत्तिहेतुर्भवेत्। यच्चैवंविधार्थप्रतिपत्तिनिबन्धनं प्रमाणं तदनुमानमेव तस्यैवं-लक्षणत्वात् तथा च प्रयोगः—यदप्रत्यक्षं प्रमाणं तदनुमानान्तर्भूतम् यथा लिङ्गबलभावि अप्रत्यक्ष-प्रमाणं च शाब्दादिकं प्रमाणान्तरत्वेनाभ्युपगम्यमानमिति स्वभावहेतुः। यच्च यत्रान्तर्भूतं तस्य न १० ततो बहिर्भावः यथा प्रसिद्धान्तर्भावस्य क्वचित् कस्यापि अन्तर्भूतं चेदं सर्वं प्रत्यक्षादन्यत् प्रमाण-मनुमान इति विरुद्धोपलब्धिः अन्तर्भाव-बहिर्भावयोः परस्परपरिहारस्थितलक्षणतया विरोधात्। अत एव "प्रत्यक्षस्याभावविषयत्वविरोधान्न ततः प्रमाणान्तराभावोऽवसातुं शक्यः नापि कार्य-स्वभावलक्षणादनुमानात् कार्यस्वभावयोर्विधिसाधकत्वेनाभावसाधने व्यापारानभ्युपगमात् कारण-व्यापकानुपलब्ध्योस्तु अत्यन्तासत्तयोपगते प्रमाणान्तरेऽभावसाधकत्वेन व्यापार एव न संगच्छते १५ अत्यन्तासतस्तस्य कार्यत्वेन व्याप्यत्वेन वा कस्यचिदसिद्धेः। तयोश्च कार्यकारणव्याप्यव्यापकभाव-सिद्धावेव व्यापाराद् विरुद्धविधिरप्यत्रासंभवी सहानवस्थानलक्षणस्य विरोधस्यात्यन्तासत्यसिद्धेः" [ ] इत्यादि यत् परेणोच्यते तदपास्तं द्रष्टव्यम् यथाप्रदर्शितन्यायेन स्वभावविरुद्धोपलब्धेरत्र व्यापारात्। स्यादेतत् भवतु परोक्षविषयस्य प्रमाणस्यानुमानेऽन्तर्भावः अर्थान्तरविषयस्य च तस्या-सावयुक्तः, न; प्रत्यक्षपरोक्षाभ्यामन्यस्यार्थस्याभावात् प्रमेयरहितस्य च प्रमाणस्य प्रामाण्यासंभवात् २० प्रमीयतेऽनेनेत्यागृहीतप्रमेयस्यैव प्रमाणमिति व्युत्पत्त्या तस्य प्रमाणत्वव्यवस्थितेः। तथाहि–यदविद्य-मानप्रमेयं न तत् प्रमाणम् यथा केशोन्दुकादिज्ञानम् अविद्यमानप्रमेयं च प्रमेयद्वयातिरिक्तविषय-तयाऽभ्युपगम्यमानं प्रमाणान्तरमिति कारणानुपलब्धिः प्रमेयस्य साक्षात् पारम्पर्येण वा प्रमाणं प्रति कारणत्वात्। तदुक्तम्—"नाननुकृतान्वयव्यतिरेकं कारणम् नाकारणं विषयः" [ ] इति। न च प्रत्यक्ष-परोक्षातिरिक्तप्रमेयान्तराभावप्रतिपादकप्रमाणान्तराभावादसिद्धो हेतुरिति २५ वक्तव्यम् अध्यक्षेणैव प्रमेयान्तरविरहप्रतिपादनात्। तँद्धि पुरःस्थितार्थसामर्थ्यादुपजायमानं तदात्म-नियतप्रतिभासावभासादेव तस्य प्रत्यक्षव्यवहारकारणं भवति तदन्यात्मतां च तस्य व्यवच्छिन्दान-मन्यदर्थजातं सकलं राश्यन्तरत्वेन व्यवस्थापयत् तृतीयप्रकाराभावं च साधयति तत्राप्रतीयमानस्य सकलस्यार्थजातस्यान्यत्वेन परोक्षतया व्यवस्थापनादन्यथा तस्य तदन्यात्मताऽव्यवच्छेदे तद्रूपतया परिच्छेदो न भवेदिति न किञ्चिद्ध्यक्षेणावगतं भवेत्। प्रतिनियतस्वरूपता हि भावानां प्रमाणतो ३० व्यवस्थिता अन्यथा सर्वस्य सर्वत्रोपयोगादिप्रसङ्गतः प्रतिनियतव्यवहारोच्छेदप्रसक्तिर्भवेत्। सा चेन्न प्रत्यक्षावगता किमन्यद् रूपं तेन तस्यावगतमिति पदार्थस्वरूपावभासिना प्रमेयान्तराभावः प्रति-पादित एव। अनुमानतोऽपि तदभावः प्रतीयत एव अन्योन्यव्यवच्छेदरूपाणामितरप्रकारव्यवच्छेदेन तदितरप्रकारव्यवस्थापनात्। प्रयोगश्चात्र–यत्र यत्प्रकारव्यवच्छेदेन तदितरप्रकारव्यवस्था न तत्र प्रकारान्तरसम्भवः तद्यथा–पीतादौ नीलप्रकारव्यवच्छेदेनाऽनीलप्रकारव्यवस्थायाम् अस्ति च ३५ प्रत्यक्ष-परोक्षयोरन्यतरप्रकारव्यवच्छेदेनेतरप्रकारव्यवस्था व्यवच्छिद्यमानप्रकारविषयीकृते सर्व-स्मिन् प्रमेय इति विरुद्धोपलब्धिः तदतत्प्रकारयोः परस्परपरिहारस्थितलक्षणत्वात्। अतः प्रमेयान्तराभावान्न प्रमाणान्तरभावः। उक्तं च—

१–माने द्वे भां० मां०। २–कर्षभा–बृ० ल०। ३ "अत एव तदपास्तं द्रष्टव्यमिति दूरतः संटङ्कः"—बृ० ल० टि०। ४–सँत्य–बृ०। सप्तम्येकवचनसूचकमङ्कद्वयम्। ५ न च प्र–आ० हा० वि०। ६ पृ० ५१० पं० १, टि० १। ७ "प्रत्यक्ष–" बृ० टि०। ८ तदान्यात्मनां च त–वा० बा०। ९–त्मतां अ–बृ०। १०–कारवि–वा० बा० भां० मां०। ११ अतः शब्दज्ञानात् प्रमेया–आ० हा० वि०।

"न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य संभवः ।
तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते" ॥ [ ] इति ।

[सौगतसंमतं प्रमाणद्वित्ववादं प्रतिवदितुं मीमांसकेन शाब्दस्य प्रमाणान्तरत्वस्थापनम्]

अत्राह मीमांसकः—"शब्दज्ञानादसन्निकृष्टेऽर्थे बुद्धिः शाब्दम्" [१-१-५ शाबरभा०] इति वचनात् ।

"शब्दादुदेति यद् ज्ञानमप्रत्यक्षेऽपि वस्तुनि ।
शाब्दं तदिति मन्यन्ते प्रमाणान्तरवादिनः" ॥ [ ]

इतिलक्षणलक्षितस्य प्रमाणान्तरस्य सद्भावात् कथं द्वे एव प्रमाणे? न चास्य प्रत्यक्षप्रमाणता सविकल्पकत्वात् । नाप्यनुमानता त्रिरूपलिङ्गाप्रभवत्वात् अनुमानगोचराविषयत्वाच्च । तदुक्तम्—

"तस्मादननुमानत्वं शाब्दे प्रत्यक्षवद् भवेत् ।
त्रैरूप्यरहितत्वेन तादृग्विषयवर्जनात्" ॥ [श्लो० वा० शब्दप० ९८]

तथाहि-न शब्दस्य पक्षधर्मत्वम् धर्मिणोऽयोगात् । न चार्थस्य धर्मित्वम् तेन तस्य सम्बन्धासिद्धेः । न चाप्रतीतेऽर्थे तद्धर्मतया शब्दस्य प्रतीतिः संभविनी प्रतीते चार्थे न तद्धर्मताप्रतिपत्तिः शब्दस्योपयोगिनी तामन्तरेणाप्यर्थस्य प्रागेव प्रतीतेरन्यथा तस्य तद्धर्मतया प्रतीत्ययोगात् । भवतु वार्थो धर्मी तथापि किं तत्र साध्यमिति वक्तव्यम्? सामान्यमिति चेत्, न; तस्य धर्मिपरिच्छेदकाल एव सिद्धत्वात् तदपरिच्छेदे धर्मिपरिच्छेदायोगात् "नागृहीतविशेषणा विशेष्ये बुद्धिः" [ ] इति न्यायात् । न च सामान्यं धर्मि अर्थविशेषस्तत्र साध्यो धर्मः उक्तदोषानतिक्रमात् विशेषस्य चानन्वयात्। अथ शब्दो धर्मी अर्थवानिति साध्यो धर्मः शब्द एव च हेतुः, न; प्रतिज्ञार्थैकदेशत्वप्राप्तेः । अथ शब्दत्वं हेतुरिति न प्रतिज्ञार्थैकदेशत्वं दोषः, न; शब्दत्वस्यागमकत्वाद् गोशब्दत्वस्य च निषेत्स्यमानत्वेनासिद्धत्वात् । अत एवानुमानतुल्यविषयताऽपि न शाब्दे संभवति । तदुक्तम्—

---

१ सौगतसंमतं प्रमाणद्वैविध्यं पूर्वपक्षयित्वा जयन्तभट्टेन प्रत्युक्तम् तच्च—
"ते हि प्रमेयद्वैविध्यात् प्रमाणं द्विविधं जगुः । नान्यः प्रमाणभेदस्य हेतुर्विषयभेदतः" ॥
इत्यादिकं
इत्युद्धृताखिलपरोदितदोषजातसंपातभीतिरिह संग्रह एष सिद्धः ।
सर्वोश्च सौगतमनस्सु चिरप्ररूढा भग्नाः प्रमाणविषयद्वयसिद्धिवाञ्छाः" ॥
इत्यन्तं न्यायमञ्जरीतोऽवबोद्धव्यम्—पृ० २८-३६ ।

२ शाब्दं प्रमाणान्तरत्वेनानङ्गीकृतवतः शाक्यवैशेषिकानधिक्षिप्य कुमारिलभट्टेन तत् प्रमाणान्तरत्वेन व्यवास्थापि तच्च
"तत्रानुमानमेवेदं बौद्धैर्वैशेषिकैः श्रितम्" ।
इत्यादितः
"दृष्ट्वाऽनुमानव्यतिरेकभीताः क्लिष्टाः पदाभेदविचारणायाम्" ।
इतिपर्यन्तं श्लोकवार्तिकतोऽवसेयम्—पृ० ४१०-४३३ ।

३ "शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्"—शाबरभा० पृ० ८ पं० १२ । "तत्र शबरस्वामी शाब्दलक्षणमाह—शब्दज्ञानादसन्निकृष्टेऽर्थज्ञानं शाब्दमिति । शब्दस्वलक्षणग्रहणादुत्तरकालं परोक्षेऽर्थे यद् उत्पद्यते ज्ञानम् तत् शब्दादागतमिति कृत्वा शाब्दप्रमाणम्"—तत्त्वसं० पञ्जि० पृ० ४३४ पं० ३-५ । ४ शाब्दस्य प्रमाणान्तरत्वं स्थापयन्त्येषा सकलाऽपि सपद्या चर्चा शब्दसाम्यमजहती प्रमेयकमलमार्तण्डे अधिकविशदतया वर्तते—पृ० ४७ द्वि० पं० २-पृ० ४८ प्र० पं० ५ । ५-**णेन न चा**-बृ० ।

६ प्रमाणान्तरपरीक्षायां शाब्दविचारे पूर्वपक्षं स्थापयन् शान्तरक्षितो भङ्क्ष्यन्तरेणैतदेवाभिव्यक्तवान् । तथाहि—
"शब्दज्ञानात् परोक्षार्थज्ञानं शाब्दं परे जगुः । तच्चाकर्तृकतो वाक्यात् तथाप्रत्ययिनोदितात् ॥
इदं च किल नाध्यक्षं परोक्षविषयत्वतः । नानुमानं च घटते तल्लक्षणवियोगतः" ॥
—तत्त्वसं० का० १४८९-१४९० पृ० ४३३ ।

७ तत्त्वसं० का० १४९८ पृ० ४३५ । ८ "तद्धर्मताप्रतिपत्तिम्"—बृ० टि० । ९ **धर्मप**-बृ० । १० पृ० ४७९ पं० १०, टि० ४ । ११-**यादेव ज्ञा**-हा० वि० । १२ **धर्मो अ**-आ० हा० वि० । १३ "हेतुत्व"—बृ० टि० ।

"सामान्यविषयत्वं हि पदस्य स्थापयिष्यते ॥
धर्मी धर्मविशिष्टश्च लिङ्गीत्येतच्च साधितम् ।
न तावदनुमानं हि यावत्तद्विषयं न तत् ॥
अथ शब्दोऽर्थवत्त्वेन पक्षः कस्मान्न कल्प्यते ॥
प्रतिज्ञार्थैकदेशो हि हेतुस्तत्र प्रसज्यते । ५
पक्षे धूमविशेषे हि सामान्यं हेतुरिष्यते ॥
शब्दत्वं गमकं नात्र गोशब्दत्वं निषेत्स्यते ।
व्यक्तिरेव विशेष्याऽतो हेतुश्चैका प्रसज्यते" ॥ इति ।
[श्लो० वा० शब्दप० ५५-५६,६२-६३-६४]

शब्दस्य चार्थेन सम्बन्धाभावतो यथा न पक्षधर्मत्वं तथान्वयोऽपि प्रमेयेण व्यापाराभावतोऽसंगत १०
एव । तदुक्तम्—

"अन्वयो न च शब्दस्य प्रमेयेण निरूप्यते ।
व्यापारेण हि सर्वेषामन्वेतृत्वं प्रतीयते ॥
यत्र धूमोऽस्ति तत्राग्नेरस्तित्वेनान्वयः स्फुटः ।
न त्वेवं यत्र शब्दोऽस्ति तत्रार्थोऽस्तीति निश्चयः ॥ १५
न तावद्यत्र देशेऽसौ न तत्कालेऽवगम्यते ।
भवेन्नित्यविभुत्वाच्चेत् सर्वार्थेष्वपि तत्समम् ॥
तेन सर्वत्र दृष्टत्वाद्व्यतिरेकस्य चागतेः ।
सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते" ॥ [श्लो० वा० शब्दप० ८५-८८]

अन्वयाभावे व्यतिरेकस्याप्यभावः । उक्तं च— २०

"अन्वयेन विना तस्माद्व्यतिरेकः कथं भवेत्?" । [ ] इति ।

तदेवमनुमानलक्षणाभावात् शाब्दं प्रमाणान्तरमेव ।

[मीमांसकेन उपमानस्य प्रमाणान्तरत्वस्थापनम्]

उपमानमपि प्रमाणान्तरम् । तस्य लक्षणम्—

"दृश्यमानाद् यदन्यत्र विज्ञानमुपजायते । २५
सादृश्योपाधि तत्त्वज्ञैरुपमानमिति स्मृतम्" ॥ [ ]

---

१ "धर्मी धर्मविशिष्टो हि लिङ्गीत्येतत् सुनिश्चितम् । न भवेदनुमानं च यावत् तद्विषयं न तत् ॥
यश्चात्र कल्प्यते धर्मी प्रमेयोऽस्य स एव च । न चानवधृते तस्मिंस्तद्धर्मत्वावधारणा ॥
प्राक् स चेत् पक्षधर्मत्वाद् गृहीतः किं ततः परम् । पक्षधर्मादिभिर्ज्ञातैर्येन स्यादनुमानता" ॥
—तत्त्वसं० का० १४९१-१४९३ पृ० ४३४ ।

२ **चार्थत्वन** आ० हा० वि० । ३-"मन्वितत्वं"-श्लो० वा० ।
"अन्वयो न च शब्दस्य प्रमेयेण निरूप्यते । व्यापारेण हि सर्वेषामन्वेतृत्वं प्रतीयते ॥
यत्र धूमोऽस्ति तत्राग्नेरस्तित्वेनान्वयः स्फुटम् । नत्वेवं यत्र शब्दोऽस्ति तत्रार्थोऽस्तीति निश्चितम्" ॥
—तत्त्वसं० का० १४९४-१४९५ पृ० ४३४-४३५ ।

४ "न तावत् तत्र देशेऽसौ तत्काले वाऽवगम्यते"-श्लो० वा० ।
"न तावत् तत्र देशेऽसौ न तत्काले च गम्यते । भवेन्नित्यविभुत्वाच्चेत् सर्वशब्देषु तत्समम् ॥
तेन सर्वत्र दृष्टत्वाद् व्यतिरेकस्य चागतेः । सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते" ॥—
तत्त्वसं० का० १४९६-१४९७ पृ० ४३५ ।

५ शाब्दस्य अनुमानेऽन्तर्भावं प्रतिक्षिपन्त्याः ततश्च तत्पार्थक्यं समर्थयन्त्याश्च न्यायमञ्जरीगतायाश्चर्चायाः प्रस्तुतचर्चातः केवलं भङ्गीभेदः न तु वाच्यभेदः । सा हि ततः "आह आस्तां तावदेतत् इदं तु चिन्त्यताम्—किमर्थमिदं पुनः शब्दस्य पृथग्लक्षणमुपवर्ण्यते" इत्यत आरभ्य "एवंविधविषयभेदात् सामग्रीभेदाच्च प्रत्यक्षवद् अनुमानादन्यः शब्द इति सिद्धम्" इत्यवसाना द्रष्टव्या—पृ० १५२ पं० ४-पृ० १५५ पं २० ।

६ उपमानस्य प्रमाणान्तरत्वं ख्यापयन्त्येषा पद्धयुता चर्चा प्रमेयकमलमार्तण्डेऽपि ईदृश्येव वर्तते—पृ० ४८ प्र० पं० ५-द्वि० पं० ६ ।

यथोक्तम्—"उपमानमपि सादृश्यादसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति यथा गवयदर्शनं गोस्मरणस्य" [१–१–५ शाबरभा०] इति। अस्यायमर्थः—येन प्रतिपन्ना गौरुपलब्धो न गवयः न चातिदेशवाक्यं 'गौरिव गवयः' इति श्रुतम् तस्याटव्यां पर्यटतः गवयदर्शने प्रथमे उपजाते परोक्षगवि सादृश्यज्ञानं यदुत्पद्यते 'अनेन सदृशो गौः' इति तदुपमानमिति। तस्य विषयः सादृश्यविशिष्टः परोक्षो गौः तद्विशिष्टं वा सादृश्यम् सादृश्यं च वस्तुभूतमेव। यदाह—

"सादृश्यस्य च वस्तुत्वं न शक्यमवबाधितुम्।
भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तत्" ॥
[श्लो० वा० उपमान० श्लो० १८] इति।

अस्य चानधिगतार्थाधिगन्तृतया प्रामाण्यमुपपन्नम् यतोऽत्र गवयविषयेण प्रत्यक्षेण गवय एव विषयीकृतो न पुनरसन्निहितोऽपि सादृश्यविशिष्टो गौः तद्विशिष्टं वा सादृश्यम्। यदपि तस्य 'पूर्वं गौः' इति प्रत्यक्षमभूत् तस्यापि गवयोऽत्यन्तमप्रत्यक्ष एवेति कथं गवि तदपेक्षं तत्सादृश्यज्ञानम्? तदेवं गवयसदृशो गौरिति प्रागप्रतिपत्तेरनधिगतार्थाधिगन्तृ परोक्षे गवि गवयदर्शनात् सादृश्यज्ञानम्। तदुक्तम्—

"तस्माद् यत् स्मर्यते तत् स्यात् सादृश्येन विशेषितम्।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥
प्रत्यक्षेणावबुद्धेऽपि सादृश्ये गवि च स्मृते।
विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता ॥
प्रत्यक्षेऽपि यथा देशे स्मर्यमाणे च पावके।
विशिष्टविषयत्वेन नानुमानाप्रमाणता ॥"
[श्लो० वा० उपमान० श्लो० ३७–३९] इति।

न चेदं प्रत्यक्षम् परोक्षविषयत्वात् सविकल्पत्वाच्च; नाप्यनुमानम् हेत्वभावात्। न च स एव दृश्यमानो गवयविशेषः तद्गतं वा सादृश्यं हेतुः उभयस्यापि धर्मिणा सह प्रतिबन्धाभावात् न चाप्रतिबद्धो हेतुः अतिप्रसङ्गात्। न च गोगतं सादृश्यं गौर्वा हेतुः प्रतिज्ञार्थैकदेशत्वात्। न च सादृश्यमात्रं प्राक् प्रमेयेण सम्बद्धं प्रतिपन्नम्। न चान्वयप्रतिपत्तिमन्तरेण हेतोः साध्यप्रतिपादकत्वमुपलब्धम्। तदेवं गवार्थदर्शने गवयं पश्यतः सादृश्येन विशिष्टे गवि पक्षधर्मत्वग्रहणं सम्बन्धानुस्मरणं चान्तरेण प्रतिपत्तिरुपजायमाना नानुमानेऽन्तर्भवतीति प्रमाणान्तरमुपमानम्। तदुक्तम्—

---

१ "उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे" इत्यादि—शाबरभा० पृ० ८ पं० १४। "उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे" इत्यादि—तत्त्वसं० पञ्जि० पृ० ४४४ पं० ९।

प्रमाणान्तरपरीक्षायामुपमानविचारे पूर्वपक्षमारचयन् शान्तरक्षितः पूर्वं तावत् प्रस्तुतचर्चया साम्यं बिभ्रत् शबरस्वामिसंमतोपमानसमर्थनमाह—तत्त्वसं० का० १५२६—१५४२ पृ० ४४४—४४७।

२–**जायते** बृ० वा० बा०। ३–**शिष्टं वा सादृश्यं च वस्तु**–वा० बा० भां मां०।–**शिष्टस्य सादृश्यं च वस्तु**–आ० हा० वि०। ४ "सादृश्यस्यापि वस्तुत्वं न शक्यमपबाधितुम्"—श्लो० वा०। "सादृश्यस्य च वस्तुत्वं न शक्यमपबाधितुम्"—तत्त्वसं० का० १५३३ पृ० ४४५।

५ "सादृश्यं वा तदाश्रितम्"—तत्त्वसं० का० १५३५ पृ० ४४५। ६ **स्मृतेः** वा० बा०।

"प्रत्यक्षेणावबुद्धे च सादृश्ये च गवि स्मृते। विशिष्टस्यान्यतोऽसिद्धेरुपमायाः प्रमाणता ॥
प्रत्यक्षेऽपि यथा देशे स्मर्यमाणेऽपि पावके। विशिष्टविषयत्वेन नानुमानाप्रमाणता" ॥
—तत्त्वसं० का० १५३६–१५३७ पृ० ४४६।

७ "न हि प्रत्यक्षतासिद्धं विज्ञानस्योपपद्यते। इन्द्रियार्थाभिसंबन्धव्यापारविरहात् तदा" ॥
—तत्त्वसं० का० १५३८ पृ० ४४६।

८ "त्रैरूप्यानुपपत्तेश्च न च तस्यानुमानता। पक्षधर्मादि नैवात्र कथंचिदवकल्पते" ॥
—तत्त्वसं० का० १५३९ पृ० ४४६।

९ "गवा"—बृ० टि०।

"न चैतस्यानुमानत्वं पक्षधर्माद्यसम्भवात्।
प्राक् प्रमेयस्य सादृश्यं न धर्मत्वेन गृह्यते ॥
गवये गृह्यमाणं च न गवार्थानुमापकम्।
प्रतिज्ञार्थैकदेशत्वाद् गोगतस्य न लिङ्गता ॥
गवयश्चाप्यसम्बन्धान्न गोलिङ्गत्वमृच्छति। ५
सादृश्यं न च पूर्वेण पूर्वं दृष्टं तदन्वयि ॥
एकस्मिन्नपि दृष्टेऽर्थे द्वितीयं पश्यतो वने।
सादृश्येन सहैकस्मिंस्तदैवोत्पद्यते मतिः" ॥
[श्लो० वा० उपमान० श्लो० ४३–४६] इति।

[नैयायिककृतमुपमानस्य स्वरूपवर्णनम् प्रमाणान्तरत्वसमर्थनं च] १०

नैयायिकास्तूपमानलक्षणमभिदधति—'प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्' [न्यायद० १–१–६] इति। अत्र 'उपमानम्' इति लक्ष्यनिर्देशः 'प्रसिद्धसाधर्म्यात् साध्यसाधनम्' इति लक्षणम्

---

१ "(प्राग् गोगतं हि सादृश्यं न) धर्मत्वेन गृह्यते। गवये गृह्यमाणं च न गवामनुमापकम्" ॥
—तत्त्वसं० का० १५४० पृ० ४४६।

२ "गवामनु"–श्लो० वा०।

३ "प्रतिज्ञार्थैकदेशत्वाद् गोगतस्य न लिङ्गता। गवयश्चाप्यसंबन्धान्न गोलिङ्गत्वमृच्छति" ॥
—तत्त्वसं० का० १५४१ पृ० ४४७।

४ "सादृश्यं न च सर्वेण"–श्लो० वा०। श्लोकवार्तिकव्याख्याकारोऽपि 'सर्वेण' इति प्रतीकं गृहीत्वैव एनं श्लोकं व्याख्याति। तथाहि—"अत उक्तम् सर्वेण इति। सत्यं दृष्टम् न तु सर्वेण गवयं दृष्ट्वा तत्सादृश्यं गृह्णतैवमन्वयो गृहीतो भवतीति"—श्लो० वा० पार्थव्या० पृ० ४४७ पं० २०—२१। प्रमेयकमलमार्तण्डेऽपि श्लोकवार्तिकवत् पाठः। तत्र च टिप्पण्याम् 'सर्वेण' इत्यस्य "पुंसा" इति स्पष्टीकरणम्—पृ० ४८ द्वि० पं० ५ टि० ३३।

५ "सहैवास्मिंस्त"–श्लो० वा०। पार्थ० व्याख्यायां तु 'एकस्मिन्' इति प्रतीकमस्ति। ६ "उपमानं सैव"—बृ० टि०।

७ नैयायिकसंमतमुपमानस्वरूपं तत्समर्थनं च सविशेषं जिज्ञासमानैर्वात्स्यायनभाष्य–न्यायवार्तिक–तात्पर्यटीकागतं तदवधेयम्—पृ० २५। पृ० ५७–५८। पृ० १९६–२०१।

मञ्जरीकारीया तु उपमानविषया चर्चा तत्स्वरूपं स्पष्टयति, तस्य प्रमाणान्तरतां समर्थयते, मीमांसकोक्तं तत्स्वरूपं च समालोचयति सा च सर्वाप्यत्रावधारणीया—न्यायमञ्ज० आ० २ पृ० १४१–१४९।

८ प्रस्तुतटीकाकारः पूर्वं शबरस्वामिसंमतामुपमानव्यवस्थामुपन्यस्य ततो नैयायिकसंमतां तामुपन्यस्यति शान्तरक्षितोऽपि तथैव तामुपन्यस्य परीक्षितवान्। तथाहि—

"श्रुतातिदेशवाक्यस्य समानार्थोपलम्भने। संज्ञासंबन्धविज्ञानमुपमा कैश्चिदिष्यते" ॥
—तत्त्वसं० का० १५६३ पृ० ४५१।

"कैश्चिदिति नैयायिकैः। त एवमुपमानस्य लक्षणमाहुः—प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति"—तत्त्वसं० पञ्जि० पृ० ४५१ पं० १६।

वृद्धनैयायिकास्तु उपमानस्वरूपमित्थं वर्णयन्ति—

"किदृग्गवय इत्येवं पृष्टो नागरिकैर्यदा। ब्रवीत्यारण्यको वाक्यं यथा गौर्गवयस्तथा" ॥
—तत्त्वसं० का० १५२६ पृ० ४४४।

"कीदृशो गवय इत्येवंपृष्टस्य यद् वाक्यं यादृशो गौस्तादृशो गवय इति, अस्य वाक्यस्योपमानत्वं वृद्धनैयायिकानां प्रसिद्धम्"—तत्त्वसं० पञ्जि० पृ० ४४४ पं० ६–७।

श्रीधरस्तु पूर्वमीमांसक–शबरस्वामिशिष्यप्रभृतिभिर्यत् पृथक् पृथग् उपमानस्वरूपं वर्णितं तत् प्रदर्श्य तस्यानुमान एवान्तर्भावं करोति—प्रशस्त० कं० पृ० २२० पं० १६—पृ० २२२ पं० ८।

"अत्र वृद्धनैयायिकास्तावदेवमुपमानस्वरूपमाचक्षते–संज्ञासंज्ञिसंबन्धप्रतीतिफलं प्रसिद्धेतरयोः सारूप्यप्रतिपादकमतिदेशवाक्यमेवोपमानम्" इत्यादि—न्यायमञ्ज० आ० २ पृ० १४१ पं० १५—१६।

कैश्चिद् अद्यतनैरपि यदितरद् उपमानस्वरूपं वर्णितं तदपि न्यायमञ्जर्यां प्रदर्शितमस्ति—पृ० १४२ पं० १३–१५।

'प्रसिद्धसाधर्म्यात्' इत्यागमपूर्विका प्रसिद्धिर्दर्शिता । आगमस्तु 'यथा गौस्तथा गवयः' इत्येवम् प्रसिद्धेन साधर्म्येण प्रसिद्धं वा साधर्म्यमिति साधर्म्यप्रसिद्धेः संस्कारवान् पुरुषः कदाचिदरण्ये परिभ्रमन् समानमर्थं यदा पश्यति तदा तज्ज्ञानादागमाहितसंस्कारप्रबोधः ततः स्मृतिः 'गोसदृशो गवयः' इत्येवंरूपा स्मृतिसहायेन्द्रियार्थसन्निकर्षेण 'गोसदृशोऽयम्' इति ज्ञानमुत्पाद्यते तच्चेन्द्रियार्थसन्निकर्षजत्वात् प्रत्यक्षफलम् तदेवाव्यपदेश्यादिविशेषणविशिष्टार्थोपलब्धिजनकत्वाद् गोसारूप्यज्ञानमुपमानम् । न च तत्रैव विषये हेयादिज्ञानोत्पादकत्वेनोपमानप्रमाणताप्रसक्तिः हेयादिज्ञानस्येन्द्रियार्थसन्निकर्षजत्वात् तज्जनकत्वेनास्य प्रत्यक्षप्रमाणताप्रसक्तेः । न च शब्देन सार्धं यथोक्तमुत्पाद्यदेतच्छाब्दं प्रसज्यते अव्यपदेश्यपदाध्याहारात् । अव्यभिचार्यादिपदानां तु पूर्ववद् व्यवच्छेद्यं द्रष्टव्यम् । नन्वेवमप्यनुमाने प्रसङ्गः तस्य यथोक्तफलजनकत्वात्, न; अविनाभावसम्बन्धस्मृतिपूर्वकस्य परामर्शज्ञानस्य विशिष्टफलजनकत्वेनानुमानत्वात् । न चाधिकृतज्ञानमविनाभावसम्बन्धस्मृतिपूर्वकम् गोसदृशस्य गवयशब्दवाच्यत्वेनान्यस्याप्रसिद्धत्वात् । 'गोसदृशस्य गवयशब्दः संज्ञा' इति आगमात् प्रतीतिरिति चेत्, न; तस्य सन्निधीयमानगोसदृशपिण्डविषयत्वेनाप्युपपत्तेः निश्चितश्चान्वयः साध्यप्रतिपत्त्यङ्गम् न च तदोपलभ्यमानाद् गोसदृशपिण्डाद् व्यतिरिक्तगोसदृशसद्भावनिश्चायकं प्रमाणमस्ति । न चात्र व्यतिरेक्यपि हेतुः समस्ति सपक्षासत्त्वप्रतिपादकप्रमाणाभावात् अतो नाविनाभावसम्बन्धानुस्मृतिः । व्याप्तिरहितेऽपि चागमे 'गोसदृशो गवयः' इति सकृदुच्चारिते उत्तरकालं गोसदृशपदार्थदर्शनात् 'अयं स गवयशब्दवाच्यः' इति प्रतिपत्तिर्भवतीति नानुमानमेतत्; संज्ञासंज्ञिसम्बन्धज्ञानं त्वागमिकं न भवत्येव शब्दस्य तज्जनकस्य तदाऽभावात् शब्दजनितं च शाब्दं प्रमाणमिति व्यवस्थितम् । प्राक् शब्दप्रतीतत्वात् शाब्दमिति चेत्, नन्वनुमानस्याप्येवमभावप्रसक्तिः अग्निसामान्यस्य प्राक् प्रत्यक्षेण प्रतीतत्वात् न ह्यप्रतीते महानसादावग्निसामान्येऽनुमानप्रवृत्तिरिति अप्रतीतार्थाप्रतिपादकत्वादनुमानं न प्रमाणं भवेत् । न च विशिष्टदेशाद्यवच्छेदसाधकत्वेनास्य प्रामाण्यम् इतरत्रापि समानत्वात् । तथाहि–सन्निधीयमानपिण्डविषयत्वेन स्वप्रतिपाद्यमिदं प्रतिपादयति आगमस्त्वसन्निहितपिण्डविषयत्वेन । न चागमात् संज्ञासंज्ञिसम्बन्धः प्रतीयते ततः सारूप्यमात्रप्रतीतेः । यत्र च शब्दस्यैव साधकतमत्वं तदेव शाब्दफलम् न च विप्रतिपत्त्यधिकरणे संज्ञासंज्ञिसम्बन्धज्ञाने एतत् समस्ति । प्रत्यक्षफलं तु न भवत्येवैतत् संज्ञासंज्ञिसम्बन्धस्येन्द्रियेणासन्निकर्षात् तदसन्निकर्षश्चेन्द्रियाविषयत्वात् तस्य । तदेवं संज्ञासंज्ञिसम्बन्धप्रतिपत्तिरूपं फलं यतः समुपजायते तदुपमानम् आह च सूत्रकारः—"साध्यसाधनम्" [न्यायद० १-१-६] इति । साध्यं विशिष्टं फलम् तस्य साधनं जनकं यत् तदुपमानम् । एवं सारूप्यज्ञानवत् सारूप्यस्याप्युपमानत्वं न पुनः संज्ञासंज्ञिसम्बन्धज्ञानस्य फलाभावात् । न च हेयादिज्ञानमस्य फलं प्रत्यक्षादिफलत्वात् । तथाहि–हेयादिज्ञानं पिण्डविषयं तच्चेन्द्रियार्थसन्निकर्षादुपजायते यथा प्रत्यक्षफलमनुमानं विशिष्टफलजनकत्वात् । एवं प्रमाणान्तरानिष्पाद्यविशिष्टफलजनकत्वात् प्रमाणान्तरमुपमानम् ।

[मीमांसकेन अर्थापत्तेः स्वरूपव्यावर्णनपूर्वकं प्रमाणान्तरत्वसमर्थनम्]

अर्थापत्तिरपि प्रमाणान्तरम् यतस्तस्या लक्षणम्—"अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यदृष्टार्थकल्पना" [१-१-५ शाबरभा०] । कुमारिलोऽप्येतदेव भाष्यवचनं विभजन्नाह—

"प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत् ।
अदृष्टं कल्पयत्यन्यं सा ऽर्थापत्तिरुदाहृता ॥
दृष्टः पञ्चभिरप्यस्माद् भेदेनोक्ता श्रुतोद्भवा ।
प्रमाणग्राहिणीत्वेन यस्मात् पूर्वविलक्षणा" ॥ [श्लो० वा० अर्थाप० श्लो० १-२]

१ "गवयरूपम्"—बृ० ल० टि० । २ **तथेन्द्रि**–बृ० । ३–**ज्ञानत्वविशि**–आ० हा० वि० ।–**ज्ञानविशि**–ल० ।–**ज्ञानाविशि**–बृ० । ४–**रिक्तः गो**–वा० बा० । ५ **शाब्दप्र**–ल० । ६–**सक्तेः** आ० हा० वि० । ७–**न प्रति**–वा० बा० भां० मां० विना । ८ **विधिप्र**–भां० मां० । **विधिं प्र**–बृ० । ९ पृ० ५७७ पं० ११ । १०–**रूप्यं ज्ञा**–बृ० । ११ तत्त्वसं० पञ्जि० पृ० ४५६ पं० २३–२४ । १२ "यत्रार्थोऽनन्यथा भवन्"–ल० टि० । "यत्रार्थो नान्यथा भवन् अदृष्टं कल्पयेदन्यम्–पाठान्तरम्"–बृ० ल० टि० । १३–**ल्पयन्त्यन्यं** बृ० आ० हा० ।–"ल्पयेदन्यं"–श्लो० वा० । १४ "अर्थम्"– बृ० ल० टि० ।

प्रस्तुता टीका कौमारिलं श्लोकवार्तिकमनुसरति–श्लो० वा० अर्थाप० श्लो० १-८८ पृ० ४५०-४७२ ।

प्रत्यक्षादिभिः षड्भिः प्रमाणैः प्रसिद्धो योऽर्थः स येन विना नोपपद्यते तस्यार्थस्य प्रकल्पनमर्थापत्तिः यथाग्नेर्दाहकत्वम् । तत्र प्रत्यक्षपूर्विकार्थापत्तिः यथाग्नेः प्रत्यक्षेणोष्णस्पर्शमुपलभ्य दाहकशक्तियोगोऽर्थापत्त्या प्रकल्प्यते न हि शक्तिरध्यक्षपरिच्छेद्या नाप्यनुमानादिसमधिगम्या अप्रत्यक्षेणार्थेन शक्तिलक्षणेन कस्यचिदर्थस्य सम्बन्धासिद्धेः । अनुमानपूर्विका त्वर्थापत्तिः यथा आदित्यस्य देशान्तरप्राप्त्या देवदत्तस्येव गत्यनुमाने ततो गमनशक्तियोगोऽर्थापत्त्यावसीयते । उपमानपूर्विका त्वर्थापत्तिः यथा 'गवयवद् गौः' इत्युक्तेरर्थाद् वाहदोहादिशक्तियोगस्तस्य प्रतीयते अन्यथा गोत्वस्यैवायोगात् । शब्दपूर्विकार्थापत्तिः यथा शब्दादर्थप्रतीतौ शब्दस्यार्थेन सम्बन्धसिद्धिः । अर्थापत्तिपूर्विकार्थापत्तिः यथोक्तप्रकारेण शब्दस्यार्थेन सम्बन्धसिद्धावर्थान्नित्यत्वसिद्धिः पौरुषेयत्वे शब्दस्य सम्बन्धायोगात् । अभावपूर्विकार्थापत्तिः यथा जीवतो देवदत्तस्य गृहे अदर्शनादर्थाद् बहिर्भावः । अत्र चतसृभिरर्थापत्तिभिः शक्तिः साध्यते, पञ्चम्यां नित्यता, षष्ठ्यां गृहाद् बहिर्भूतो देवदत्त एव साध्यत इत्येवं षट्प्रकारा अर्थापत्तिः । अन्ये तु श्रुतार्थापत्तिमन्यथोदाहरन्ति 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति वाक्यश्रवणाद् रात्रिभोजनवाक्यप्रतिपत्तिः श्रुतार्थापत्तिः । गवयोपमितस्य गोस्तज्ज्ञानग्राह्यताशक्तिरुपमानपूर्विकार्थापत्तिः । तदुक्तम्—

"तत्र प्रत्यक्षतो ज्ञातात् दाहाद्दहनशक्तिता ।
वह्नेरनुमितात् सूर्ये यानात् तच्छक्तियोगिता" ॥ [श्लो० वा० अर्थाप० श्लो० ३]
"पीनो दिवा न भुङ्क्ते इत्येवमादिवचःश्रुतौ ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते" ॥ [श्लो० वा० अर्थाप० श्लो० ५१]
"गवयोपमिताया गोस्तज्ज्ञानग्राह्यशक्तिता" ॥ [श्लो० वा० अर्थाप० श्लो० ४]
"अभिधानप्रसिद्ध्यर्थमर्थापत्त्यावबोधितात् ।
शब्दे वाचकसामर्थ्यात् तन्नित्यत्वप्रमेयता" ॥ [श्लो० वा० अर्थाप० श्लो० ५]
"प्रमाणाभावनिर्णीतचैत्राभावविशेषितात् ।
गेहाच्चैत्रबहिर्भावसिद्धिर्या त्विह दर्शिता" ॥
"तामभावोत्थितामन्यामर्थापत्तिमुदाहरेत्" ।
[श्लो० वा० अर्थाप० श्लो० ८-९] इत्यादि ।

इयं च षट्प्रकाराप्यर्थापत्तिर्नाध्यक्षम् अतीन्द्रियशक्त्याद्यर्थविषयत्वात् । अत एव नानुमानम् प्रत्यक्षानुगतप्रतिबद्धलिङ्गप्रभवत्वेन तस्योपवर्णनात् अर्थापत्तिगोचरस्यार्थस्य कदाचिदप्यध्यक्षाविषयत्वात् तेन सहार्थापत्त्युत्थापकस्यार्थस्य सम्बन्धाप्रतिपत्तेस्तदैवार्थापत्त्या ततस्तस्य प्रकल्पनात् प्रमाणान्तरमेवार्थापत्तिः ।

[मीमांसकेन अभावस्य प्रमाणान्तरत्वसमर्थनम्]

"अर्थस्यासन्निकृष्टस्य प्रसिद्ध्यर्थं प्रमान्तरम् ।
प्रमाभावमभावाख्यं वर्णयन्ति तथाऽपरे" ॥ [ ]

प्रमाणान्तरपरीक्षायामर्थापत्तिविचारे पूर्वपक्षप्रसङ्गे शान्तरक्षित ईदृगेव अर्थापत्तिस्वरूपं तद्भेदांश्च निरूपितवान् तच्चात्र तत्कारिकाङ्कैरेव निर्दिश्यते–तत्त्वसं० का० १५८७–१६०६ पृ० ४५६–४६१ ।

प्रमेयकमलमार्तण्डस्तु प्रस्तुतटीकया अक्षरशः साम्यं बिभर्ति–पृ० ४८ द्वि० पं० ६–पृ० ४९ प्र० पं० ८ ।

श्रीधरोऽपि तामनुमानेऽन्तर्भावयन् व्याख्यातवान्–प्रशस्त० कं० पृ० २२२–२२५ ।

श्रीधरानुसारी जयन्तस्तु अर्थापत्तिं व्यावर्णयन् नोज्झितवान् प्रस्तुतटीकासाम्यम्—न्यायमञ्ज० आ० १ पृ० ३६ पं० ८–पृ० ४९ पं० ४ ।

१–**स्तज्ज्ञा**–आ० हा० वि० विना । २ तत्त्वसंग्रहे ईदृशी एव कारिका–१५८८ । "ज्ञानाद् दाहाद्दहनशक्तता । वह्नेरनुमिता सूर्ये यानात्तच्छक्तियोग्यता"—श्लो० वा० । ३ "गवयोपमिता या गौस्तज्ज्ञानग्राह्यता मता"–श्लो० वा० । "गवयोपमिता या गौस्तज्ज्ञानग्राह्यशक्तता"–तत्त्वसं० का० १५९९ । ४ "शब्दे बोधकसामर्थ्यात् तन्नित्यत्वप्रकल्पनम्"—श्लो० वा० ।

५ अर्थापत्तिचर्चायामिव अत्र अभावचर्चायामपि समानप्रायाणि श्लोकवार्तिक–तत्त्वसंग्रह–प्रमेयकमलमार्तण्ड–कन्दली–न्यायमञ्जरीणामभावनिरूपकाणि तत्तच्चर्चास्थलानि अवधारणीयानि—श्लो० १–५८ पृ० ४७३–४९२ । का० १६४८–१६५९ पृ० ४७०–४७३ । पृ० ४९ प्र० पं० ९—पृ० ५० प्र० पं० ४ । पृ० २२५–२३० । पृ० ४९–५१ ।

"अभावोऽपि प्रमाणाभावः 'नास्ति'इत्यर्थस्यासन्निकृष्टस्य" [१–१–५ शाबरभा०] इति वचनात्। अन्ये पुनरभावाख्यं प्रमाणं त्रिधा वर्णयन्ति–प्रमाणपञ्चकाभावलक्षणोऽनन्तरोक्तोऽभावः, प्रतिषिध्यमानाद् वा तदन्यज्ञानम् आत्मा वा विषयरूपेणानभिनिवृ(निर्वृ)त्तस्वभाव इति अनेन चाभावप्रमाणेन प्रदेशादौ घटादीनामभावो गम्यते। तदुक्तम्—

"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता" ॥ [श्लो० वा० अभावप० श्लो० १]

"प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते।
सात्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि" ॥
[श्लो० वा० अभावप० श्लो० ११] इति।

न च प्रत्यक्षेणैवाभावोऽवसीयते तस्याभावविषयत्वविरोधात् भावांशेनैवेन्द्रियाणां संयोगात्। तदुक्तम्—

"न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः।
भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि" ॥
[श्लो० वा० अभावप० श्लो० १८] इति।

नाप्यनुमानेनासौ साध्यते हेत्वभावात्। न च प्रदेश एव हेतुः तस्य साध्यधर्मित्वेनाभ्युपगमात्। न चैवमपि हेतुः प्रतिज्ञार्थैकदेशताप्राप्तेः न च प्रदेशविशेषो धर्मी तत्सामान्यं हेतुः तस्य घटाभावव्यभिचारात् न हि सर्वत्र प्रदेशे घटाभावः शक्यः साधयितुं सघटस्यापि प्रदेशस्य संभवात्। अथ घटानुपलब्ध्या प्रदेशे धर्मिणि घटाभावः साध्यते, असदेतत्; साध्यसाधनयोः कस्यचित् सम्बन्धस्याभावात्। तस्मादभावोऽपि प्रमाणान्तरमेव। न चाभावस्य तद्विषयस्याभावादभावप्रमाणान्तरवैयर्थ्यम् प्रागभावादिभेदेन चतुर्विधस्य वस्तुरूपस्याभावस्य भावात् अन्यथा कारणादिविभागतो व्यवहारस्य लोकप्रतीतस्याभावप्रसङ्गात्। तदुक्तम्—

"न च स्याद् व्यवहारोऽयं कारणादिविभागतः।
प्रागभावादिभेदेन नाभावो यदि भिद्यते" ॥ [श्लो० वा० अभावप० श्लो० ७]

अभावस्य च प्रागभावादिभेदान्यथानुपपत्तेरर्थापत्त्या वस्तुरूपताऽवसीयते। तदुक्तम्—

"न चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता।
कार्यादीनामभावः को भावो यः कारणादि न" ॥
[श्लो० वा० अभावप० श्लो० ८] इति।

अनुमानप्रमाणावसेया वाऽभावस्य वस्तुरूपता। यदाह—

"यद्वाऽनुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्त्वयम्।
तस्माद् गवादिवद् वस्तु प्रमेयत्वाच्च गृह्यताम्" ॥
[श्लो० वा० अभावप० श्लो० ९] इति।

---

१ "तत्र कुमारिलेन त्रिविधोऽभावो वर्णितः—आत्मनोऽपरिणाम एकः पदार्थान्तरविशेषज्ञानं द्वितीयः ××× प्रमाणनिवृत्तिमात्रात्मकस्तृतीयः"–तत्त्वसं० पञ्जि० पृ० ४७३ पं० ११–१३।

२–**नभिर्निवृत्त**–आ०।–**नभिवृत्त**–ल० वा० बा०। "अपरिणत–"बृ० टि०।

"सात्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनीति।
सा–प्रत्यक्षादेरनुत्पत्तिः निषेध्याभिमतघटादिपदार्थज्ञानरूपेणापरिणतं साम्यावस्थमात्मद्रव्यमुच्यते घटादिविविक्तभूतलज्ञानं वा"—तत्त्वसं० पञ्जि० पृ० ४७१ पं० १०–१२।

३–**ज्ञानं चान्य**–भां० मां०। "सात्मनः परिणामो वा"–श्लो० वा०। तत्त्वसं० का० १६४९ पृ० ४७१। ४ "न तावदिन्द्रियैरेषा नास्तीत्युत्पद्यते मतिः"–श्लो० वा०। पृ० ३५१ पं० १३। ५ "प्रमेयतया"–बृ० ल० टि०। ६–**गशः** बृ०। ७ "नाभावो विद्यते यदि"–तत्त्वसं० का० १६५४ पृ० ४७२। श्लोकवार्तिकेऽपि "नाभावो विद्यते यदि"–इति पाठान्तरं विद्यते। ८–**रणादित इ**–हा० वि०।–**रणोदित इ**– आ०। "योऽभावः कारणादिनः"–श्लो० वा०। "यो भावः कारणादिना"—तत्त्वसं० का० १६५५ पृ० ४७२। ९–"बुद्धयोर्ग्राह्यो यतः स्वयम्"–तत्त्वसं० का० १६५६ पृ० ४७३।

अभावश्च चतुर्धा व्यवस्थितः–प्रागभावः प्रध्वंसाभावः इतरेतराभावः अत्यन्ताभावश्चेति। तत्र—

"क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ॥
नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम्।
गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ॥
शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते" ॥
[श्लो० वा० अभावप० श्लो० २–३–४]

यदि चैतद्व्यवस्थापकमभावाख्यं प्रमाणं न भवेत् तदा प्रतिनियतवस्तुव्यवस्था दूरोत्सारितैव स्यात्। तदुक्तम्—

"क्षीरे दधि भवेदेव दध्नि क्षीरं घटे पटः।
शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्तिरात्मनि ॥
अप्सु गन्धो रसश्चाग्नौ वायौ रूपेण तौ सह।
व्योम्नि सर्वपर्शता ते च न चेदस्य प्रमाणता" ॥
[श्लो० वा० अभावप० श्लो० ५–६] इति।

न च निरंशभावैकरूपत्वाद् वस्तुनस्तत्स्वरूपग्राहिणाऽध्यक्षेण तस्य सर्वात्मना ग्रहणादगृहीतस्य चापरस्यासदंशस्य तत्राभावात् कथं तद्व्यवस्थापनाय प्रवर्त्तमानमभावाख्यं प्रमाणं प्रामाण्यमश्नुत इति वक्तव्यम् यतः सदसदात्मके वस्तुनि प्रत्यक्षादिना तत्र सदंशग्रहणेऽप्यगृहीतस्यासदंशस्य व्यवस्थापनाय प्रमाणाभावस्य प्रवर्तमानस्य न प्रामाण्यव्याहतिः। तदुक्तम्—

"स्वरूप-पररूपाभ्यां नित्यं सदसदात्मके।
वस्तुनि ज्ञायते किंचित् रूपं कैश्चित् कदाचन ॥
यस्य यत्र यदोद्भूतिर्जिघृक्षा चोपजायते।
चेत्यतेऽनुभवस्तस्य तेन च व्यपदिश्यते ॥
तस्योपकारकत्वेन वर्ततेंऽशस्तदेतरः।
उभयोरपि संवित्त्योरुभयानुगमोऽस्ति तु ॥
प्रत्यक्षाद्यवतारश्च भावांशो गृह्यते यदा।
व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षित" ॥
[श्लो० वा० अभावप० श्लो० १२–१३–१४,१७] इति।

न च भावांशादभिन्नत्वादभावांशस्य तद्ग्रहणे तस्यापि ग्रह इति, सदसदंशयोर्धर्म्यभेदेऽपि भेदाभ्युपगमात्। उक्तं च—

"ननु भावादभिन्नत्वात् सम्प्रयोगोऽस्ति तेन च।
न ह्यत्यन्तमभेदोऽस्ति रूपादिवदिहापि नः ॥
धर्मयोर्भेद इष्टो हि धर्म्यभेदेऽपि नः स्थिते।
उद्भवाभिभवात्मत्वाद् ग्रहणं चावतिष्ठते" ॥[श्लो० वा० अभावप० १९–२०] इत्यादि।

---

१ पृ० १८६ पं० २२ टि० ११। २ तत्त्वसं० पञ्जि० पृ० ४७२ पं० १४–१५। ३ "तौ गन्ध-रसौ"–बृ० ल० टि०। ४ **संस्पर्शता** भां० मां० विना। "संस्पर्शिता"–श्लो० वा०। "सस्पर्शकास्ते"–तत्त्वसं० पञ्जि० पृ० ४७२ पं० १६। ५ "गन्ध-रूप-रसाः"–बृ० ल० टि०। ६ तत्त्वसं० का० १६७२। ७ "संवित्तावुभया"—श्लो० वा०। ८ तत्त्वसं० का० १६७३। ९ "अभावप्रमाणस्य"–बृ० ल० टि०। "व्यापारस्तदनुत्पत्ति"–श्लो० वा०। "तदनुत्पत्तिः प्रत्यक्षाद्यभाव इति–पार्थ० व्या० पृ० ४७८। "व्यापारस्तदनुत्पत्ते"–तत्त्वसं० का०। "तदनुत्पत्तेर्व्यापारः–तेषां प्रत्यक्षादीनामनुत्पत्तेरभावस्येति यावत्"–तत्त्वसं० पञ्जि० पृ० ४७७ पं० ७। १० **जिघ्रिक्षत इति** वा० बा०। "जिघृक्षिते"–श्लो० वा०। तत्त्वसं० का०। "अभावांशे ग्रहीतुमिष्टे"–तत्त्वसं० पञ्जि० पृ० ४७७ पं० ६। ११ "अभावेन"–बृ० ल० टि०। १२–**पि न स्थिते** हा० वि०।–**पि नः स्थितेः** भां० मां०। १३ "उत्कटत्वानुत्कटत्वात्मत्वात्"–बृ० टि०।

तदेवमगृहीतप्रमेयाभावग्राहकत्वात् प्रमाणाभावस्य प्रमाणत्वम् प्रत्यक्षादिष्वनन्तर्भावात् प्रमाणान्तरत्वं च व्यवस्थितम् ।

[सौगतेन मीमांसकादिमतानामुपमानादीनामप्रमाणत्वं यथायथं प्रत्यक्षानुमानयोरन्तर्भावनेन पृथक्प्रामाण्याभावं चोपपाद्य प्रमाणान्तरत्वप्रतिविधानम्]

अत्र प्रतिविधीयते–यत् तावत् शाब्दस्य त्रैरूप्यरहितत्वेन तादृग् विषयाभावाच्चानुमानानन्तर्भावप्रतिपादनमभ्यधायि तद् युक्तमेव न ह्यप्रमाणस्यानुमानेऽन्तर्भावो युक्तः । कुतः पुनः शब्दोद्भवस्य ज्ञानस्याप्रामाण्यम् ? शब्दस्यार्थप्रतिबन्धाभावात् न हि शब्दोऽर्थस्य स्वभावः अत्यन्तभेदात् नापि कार्यं तेन विनापि भावात् न च तादात्म्य–तदुत्पत्तिव्यतिरिक्तः सम्बन्धो गमकत्वनिबन्धनमस्ति । न च सङ्केतवलाद् वास्तवप्रतिपत्तिशक्तियुक्तानां प्रदीपानामिवार्थप्रकाशकत्वं संभवति । न च व्यवस्थितैवार्थप्रतिपादनयोग्यता सङ्केतेन शब्दस्याभिव्यज्यत इति वक्तव्यम् पुरुषेच्छावशादन्यत्रार्थे शब्दस्य समयादप्रवृत्तिप्रसक्तेः दृश्यते च पुरुषेच्छावशादन्यत्रापि विषये शब्दानां प्रवृत्तिः । न च पुरुषेच्छावृत्तिः समयो वस्तुप्रतिबद्धः तदभावेऽपि तस्य प्रवृत्तेः । न च सङ्केतमन्तरेण शब्दस्य वस्तुप्रत्यायकत्वम् सङ्केताभावप्रसक्तेः । आप्तप्रणीतशब्दानां पुनरर्थाव्यभिचारेऽप्याप्तप्रणीतत्वानिश्चयादेवाप्रामाण्यं न पुनराप्तस्यैवासंभवात् तत्संभवबाधकप्रमाणाभावात् । ततो बाह्ये विषये शब्दानां प्रतिबन्धाभावतः प्रामाण्यमेव न संभवति पक्षधर्मत्वाद्यसंभवादनुमानत्वाभावप्रतिपादनं युक्तमेवेति स्थितम् । यत्तु वक्त्रभिप्रायसूचने प्रामाण्यमस्य तत्रानुमानलक्षणयुक्तस्यैव नान्यादृग्भूतस्येति न प्रमाणान्तरत्वम् ।

उपमानस्य त्वपूर्वार्थाधिगन्तृत्वाभावात् प्रामाण्यमेव न संभवति । नन्वस्यापूर्वार्थविषयता प्रागुपदर्शितैव सत्यमुपदर्शिता न तु युक्ता । तथाहि-तस्य विषयः सादृश्यविशिष्टो गौः तद्विशिष्टं वा सादृश्यमुपदर्शितं तच्च भूयोऽवयवसामान्ययोगलक्षणं प्रतिपादितम् । न च सामान्यं तद्योगो वा वस्तु संभवीति प्रतिपादितम् तत्सद्भावेऽपि प्रत्यक्षविषयतया परैस्तस्येष्टेः कथमुपमानस्य तद्गोचरत्वेनागृहीतार्थग्राहित्वं प्रामाण्यनिबन्धनं भवेत् ? सादृश्यज्ञानस्य चोत्पत्तावयं क्रमः—पूर्वं तावद् गो-गवययोर्विषाणित्वादि सादृश्यं गवि प्रत्यक्षतः प्रतिपद्यते पश्चाद् गवयदर्शनानन्तरं 'यदेतद् विषाणित्वादि सादृश्यं पिण्डेऽस्मिन्नुपलभ्यते मया तद् गव्यप्युपलब्धम्' इति स्मरति तदनन्तरं गवि विषाणित्वादिसादृश्यप्रतिसन्धानं जायते 'अनेन पिण्डेन सदृशो गौः' इति । एवं च स्मार्तमेतद् ज्ञानं कथं प्रमाणान्तरं भवेत् ? यदि च गवि प्रत्यक्षेणोभयगतं विषाणित्वादिसादृश्यं प्राग् न प्रतिपन्नं

१-**तमप्र**–बृ० वा० बा० विना । २ पृ० ५७४ पं० ९ ।

३ "वचसां प्रतिबन्धो वा को बाह्येष्वपि वस्तुषु । प्रतिपादयतां तानि येनैषां स्यात् प्रमाणता ॥
भिन्नाक्षग्रहणादिभ्यो नैकात्म्यं न तदुद्भवः । व्यभिचाराच्च चान्यस्य युज्यतेऽव्यभिचारिता" ॥
—तत्त्वसं० का० १५१३–१५१४ पृ० ४४० ।

४ "शब्दानाम्"—बृ० टि० । ५-**मवायाद**–आ० हा० वि० । ६ "वस्त्वभावे"—बृ० टि० ।

७ "यत्र त्वेषामभीष्टेयं व्यक्तं तत्र त्रिरूपता । विवक्षायां तु साध्यायां त्रैलक्षण्यं प्रकाशितम् ॥
एवं स्थितेऽनुमानत्वं शब्दे धूमादिवद् भवेत् । त्रैरूप्यसहितत्वेन तादृग्विषयसत्त्वतः" ॥
—तत्त्वसं० का० १५२४–१५२५ पृ० ४४३ ।

८ पृ० ५७६ पं० ९ । ९ पृ० ५७६ पं० ७ । "भूयोवयवसामान्ययोगः सादृश्यमस्ति चेत्" ॥
—तत्त्वसं० का० १५४३ पृ० ४४७ ।

१० "सामान्यानि निरस्तानि भूयस्ता तेषु सा कुतः" ? ।—तत्त्वसं० का० १५४४ पृ० ४४७ ।

११ "एवं तु युज्यते तत्र गोरूपावयवैः सह । गवयावयवाः केचित् तुल्यप्रत्ययहेतवः ॥
तत्रास्य गवये दृष्टे स्मृतिः समुपजायते । असकृद् दृष्टपूर्वेषु गोरूपावयवेष्वियम् ॥"
—तत्त्वसं० का० १५४७–१५४८ पृ० ४४७ ।

१२-**ग् प्र**-आ० हा० वि० ।

भवेत् प्रतिपन्नमपि यदि विस्मृतं भवेत् तदा गवयदर्शने सत्यपि परोक्षगवि नैव सादृश्यज्ञानमुपजायेत । अतो विषाणित्वादिसादृश्यं पूर्वमेव गवि प्रत्यक्षेणावगतमिदानीं गवयदर्शनात् तत्रैव स्मर्यते तन्न गृहीतग्रहणात् सादृश्यज्ञानं प्रमाणम् । अथ पूर्वप्रत्यक्षेण गोगतमेव सादृश्यमवगतं गवयदर्शनेन तु तद्गतमेव उभयगतसादृश्यप्रतिपत्तिस्तु गवयदर्शनानन्तरं सादृश्यज्ञाननिबन्धनेति अगृहीतग्राहितया प्रमाणमुपमानम्, असदेतत्; पूर्वमुभयगतसादृश्याप्रतिपत्तौ गवयदर्शनानन्तरमप्यप्रतिपत्तेस्तदनुसन्धानप्रतिपत्तेरप्यसंभवात् न हि गवयपिण्डदर्शनानन्तरं प्रागप्रतिपन्नतत्सादृश्येऽश्वपिण्डे 'अनेन सदृशोऽश्वः' इति प्रतिपत्तिः कदाचिदपि भवति । तस्मात् प्रागध्यक्षावगतसादृश्ये प्रतियोगिग्रहणाद् व्यवहारमात्रप्रवृत्तिरेव तदा, प्राक् तदप्रवृत्तिः प्रतियोग्यपेक्षत्वात् तस्य भ्रात्रादिव्यवहारवत् । न चैतावता प्रामाण्यं युक्तम् प्रमाणानामियत्ताऽभावप्रसक्तेः । एवं च धूमदर्शनात् स्मर्यमाणाग्निसम्बन्धितयाऽध्यक्षानवगतप्रदेशे तदयोगव्यवच्छेदमवगमयन्ती प्रतिपत्तिरुपजायमानानुमितिः प्रमाणतां यथा समासादयति न तथा सादृश्यप्रतिपत्तिः गवाख्यधर्मिप्रतिपत्तिकाल एव भूयोऽवयवसामान्ययोगलक्षणस्य सादृश्यस्य प्रतिपत्तेः । तेन 'प्रत्यक्षेऽपि यथा देशे' इत्यादि वचनमयुक्ततया व्यवस्थितम् । किञ्च, यदि सादृश्यज्ञानं गृहीतग्राहित्वेऽपि व्यवहारमात्रप्रवर्तनात् प्रमाणं तर्हि वैसदृश्यज्ञानमपि सप्तमं प्रमाणं भवेत् ।

"दृश्यात् परोक्षे सादृश्यधीः प्रमाणान्तरं यदि ।
वैधर्म्यमतिरप्येवं प्रमाणं किं न सप्तमम् ?" ॥ [ ]

तथा सौपानमालामाक्रामतः प्रथमाक्रान्तं पश्चादाक्रान्तादीर्घं महद् ह्रस्वं चेत्याद्यनेकं प्रमाणं प्रसक्तमिति कुतः प्रमाणषट्कवादः सङ्गतो भवेत् ?

"दृश्यमानव्यपेक्षं चेद् दृष्टज्ञानं प्रमान्तरम् ।
तत्पूर्वमस्मादित्यादि प्रमाणान्तरमिष्यताम्" ॥ [ ]

अप्रामाण्ये चास्य पक्षधर्मत्वाद्यभावप्रतिपादनं सिद्धसाधनमेव अप्रमाणस्यानुमानत्वानभ्युपगमात् । यदा च प्रत्यक्षेण प्रतियन्नपि गवाश्वादौ भूयोवयवसामान्ययोगं तद्वियोगं वा व्यामूढः सदृशासदृशव्यवहारं न प्रवर्तयति तदा विषयदर्शनेन विषयिणो व्यवहारस्य साधनात् त्रैरूप्यसद्भावादनुमानप्रमाणता समस्त्येव । तथाहि—गवाश्वादौ विषाणाद्यवयवसामान्ययोगस्तद्वियोगो वा प्रागुपलब्ध इदानीं स्मर्यमाण इति नासिद्धता हेतोः प्रवृत्तव्यवहारविषयश्च सर्व एवार्थोऽत्र दृष्टान्तोऽस्तीति नान्वयव्यतिरेकयोरप्यभावः । ततो 'न चैतस्यानुमानत्वम्' इत्यादि पक्षधर्मत्वाद्यसंभवप्रतिपादनमसंगतम् व्यवहारसाधने पक्षधर्मत्वादेः प्रसाधनात् ।

१-**जायतेऽतो** आ० हा० वि० । २ "विज्ञातार्थप्रकाशत्वान्न प्रमाणमियं ततः"—तत्त्वसं० का० १५५० पृ० ४४८ ।

३ "व्यवहारस्य"–बृ० टि० ।

४ "एतावता च लेशेन प्रमाणत्वव्यवस्थितौ । नेयत्ता स्यात् प्रमाणानामन्यथाऽपि प्रमाणतः" ॥
—तत्त्वसं० का० १५५६ पृ० ४४९ ।

५ पृ० ५७६ पं० १८ । ६-**दशज्ञा**–ल० वा० बा० ।
"गवयस्योपलम्भे च तुरङ्गादौ प्रवर्तते । तद्वैसदृश्यविज्ञानं यत् तदन्यप्रमा न किम्" ? ॥
—तत्त्वसं० का० १५५९ पृ० ४५० ।

७ तत्त्वसंग्रहे त्वन्यया भङ्ग्योदाहृतमस्ति—
"तरुपङ्क्त्यादिसंदृष्टावेकपादपदर्शनात् । द्वितीयशाखिविज्ञानादाद्योऽसाविति निश्चयः ॥
प्रमाणान्तरमासक्तं सादृश्याद्यनपेक्षणात् । गृहीतग्रहणान्नो चेत् समानमुपमास्वपि ॥"
—तत्त्वसं० का० १५५७–१५५८ पृ० ४५० ।

८ पृ० ५७६ पं० २५ । ९ "प्रतिपद्यमानोऽपि"—बृ० ल० टि० । १०-**द्वियोगे वा** ल० आ० ।-**द्वियोगं च** वि० । ११ पृ० ५७७ पं० १ । १२ मीमांसकसंमतोपमानप्रतिवादिन्येषा चर्चा उपमानस्य प्रत्यभिज्ञात्मतां स्थापयन्तीं प्रमेयकमलमार्तण्डीयां चर्चामनुसरति—प्रमेयक० पृ० ९९ द्वि० पं० ६–पृ० १०० प्र० पं० ६ ।

नैयायिकोपवर्णितमप्युपमानमनधिगतार्थाधिगन्तृत्वाभावात्[1] प्रमाणं न भवति । तथाहि—यथा गौस्तथा गवय इति वाक्याद् गोसदृशार्थसामान्यस्य गवयशब्दवाच्यतायाप्रतिपत्तेः अन्यथा विसदृशमहिष्याद्यर्थदर्शनादपि 'अयं स गवयः' इति संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः किं न भवेत् ? तस्माद् यथा कश्चित्[2] 'योऽङ्गदी कुण्डली छत्री स राजा' इति कुतश्चिदुपश्रुत्य अङ्गदादिमदर्थदर्शनात् 'अयं स राजा' इति प्रतिपद्यते । न चासौ प्रतिपत्तिः प्रमाणम् उपदेशवाक्यादेवाङ्गदादिमतोऽर्थस्य राजशब्दवाच्यत्वेन प्रतिपन्नत्वात् तथेहापि 'यथा गौस्तथा गवयः' इत्यतिदेशवाक्यात् सम्बन्धमवगत्य गवयदर्शनात् सङ्केतानुस्मरणे सति 'अयं स गवयशब्दवाच्योऽर्थः' इति प्रतिपत्तेरप्रमाणमुपमानम् । यदि[3] पुनरतिदेशवाक्यात् सम्बन्धप्रतिपत्तिर्नाभ्युपगम्यते पश्चादपि 'अयं स गवयशब्दवाच्यः' इति प्रत्ययो न स्यात् तदपरनिमित्ताभावाद् दृश्यते च तस्माद् गृहीतग्रहणान्नेदं प्रमाणम् । अथातिदेशवाक्यात् पूर्वं गोसदृशार्थस्य गवयशब्दवाच्यता सामान्येन प्रतीता गवयदर्शनानन्तरं तु गवयविशेषं तच्छब्दवाच्यत्वेन पूर्वमप्रतीतं प्रतिपद्यत इति न गृहीतग्राहिता, असदेतत्; सन्निहितगवयविशेषविषयस्य ज्ञानस्य प्रत्यक्षतयोपमानत्वानुपपत्तेः । गवयदर्शनोत्तरकालभावि तु 'अयं स गवयशब्दवाच्योऽर्थः' इति यद् ज्ञानं तत् प्रत्यक्षबलोत्पन्नत्वात् स्मृतिरेव न प्रमाणम् । किञ्च, गवयविशेषस्य गवयशब्दवाच्यता यद्यतिदेशवाक्यान्न प्रतिपन्ना कथं तर्हि गवयविशेषदर्शन उपजातेऽकस्मादस्य तच्छब्दवाच्यतां प्रतिपद्यते ? यस्यैवार्थस्य सम्बन्धग्रहणकाले येन सह सम्बन्धोऽनुभूतस्तस्यैवार्थस्य तेन सह सम्बन्धे तच्छब्दवाच्यता कालान्तरेऽपि दृश्यते ततः सामान्येन सङ्केतकाल एव सम्बन्धः प्रतीतः पश्चाद् गवयदर्शन उपजाते सङ्केतमनुसृत्य 'अयं स गवयशब्दवाच्योऽर्थः' इति प्रतिपद्यते इत्यभ्युपगन्तव्यम् । एतेन

"उपयुक्तोपमानस्तु तुल्यार्थग्रहणे सति ।
विशिष्टविषयत्वेन सम्बन्धं प्रतिपद्यते[4]" ॥ [ ]

इत्यपि निरस्तम् विशेषस्य सङ्केतकालानुभूतस्य व्यवहारकालानुगमादवाच्यत्वाच्च । यश्च शब्दप्रभवप्रतिपत्तावर्थः प्रतिभाति स एव[5] शब्दवाच्यः न च विशेषस्तत्र प्रतिभाति अक्षज्ञान इव विशदाभासस्य तत्रासंवेदनात् संवेदने वा विकल्परूपताविरहादर्थरूपस्यैवानुकारात्[6] तस्य[7] च शब्दसंसर्गविकलत्वात्[8] तत्सामर्थ्यप्रभवे च ज्ञाने असतस्तत्र शब्दस्याप्रतिभासनान्न विशेषः शब्दवाच्यः[9] या च 'अयमसौ गवयशब्दवाच्यः' इति विशेषस्य वाच्यताप्रतिपत्तिः सा दृश्यविकल्प(ल्प्य)योरेकीकरणाद्

१ पृ० ५७७ पं० ११ ।

२ "तत्रापि संज्ञासंबन्धप्रतिपत्तिरनाकुला । तस्यातिदेशवाक्यस्य तदैव श्रवणे यदि ॥
तथा परिगृहीतार्थग्रहणान्न प्रमाणता । स्मृतेरिवोपमानस्य करणार्थवियोगतः" ॥
—तत्त्वसं० का० १५६४–१५६५ पृ० ४५२ ।

३–**त् स योऽङ्गदी** भां० मां० ।

४ "अथ सा नैव संजाता तथापि प्रतिपद्यते । सोऽयं यस्य मया संज्ञा संश्रुतेति कथं तदा ॥
तथाद्यश्रुततत्संज्ञो गवयस्योपलम्भने । तन्नाम श्रुतमस्येति न ज्ञातुं कश्चन प्रभुः" ॥
—तत्त्वसं० का० १५६६–१५६७ पृ० ४५२ ।

५ इतः "उपयुक्तोपमानस्तु" इति पद्यपर्यन्ता चर्चा अविद्धकर्णसंमतेति कमलशील आह । तथाहि—
"अविद्धकर्णस्त्वाह—आगमात् सामान्येन प्रतिपद्यते विशेषप्रतिपत्तिस्तूपमानादिति । अतस्तन्मतमाशङ्कते × × ×
उपयुक्तोपमानश्चेत् तुल्यलग्रहणे सति । विशिष्टविषयत्वेन सम्बन्धमवगच्छति ॥
उपयुक्तमुपमानमतिदेशवाक्यं यस्य स तथोक्तः । × × ×
आगमाद्धि स संबन्धं वेत्ति सामान्यगोचरम् । विशिष्टविषयं तं तु विजानात्युपमाश्रयात्" ॥
—तत्त्वसं० का० १५६८–१५६९ पृ० ४५२ ।

अस्य अविद्धकर्णमतस्य प्रतिविधानमपि चतसृभिः कारिकाभिः कृतं वर्तते तत्त्वसंग्रहे—का० १५७०–१५७३ पृ० ४५२–४५३ । ६ **गोशब्दार्थस्य** ल० । ७–**जायते**–आ० हा० वि० । ८ अनेन पद्येन समानभावं बिभ्राणा तत्त्वसंग्रहीया कारिका द्रष्टव्या—प्र० पृ० टि० ५ । ९ **एक श**–वा० बा० । १० "अर्थरूपस्य"–बृ० टि० । ११ "अर्थरूपसामर्थ्य"–बृ० टि० । १२–**वाच्यो यथा यम**–आ० हा० वि० ।

भ्रान्तिः अन्यथा पूर्वानुभूताकारपरामर्शेन दृश्यमानस्य 'अयमसौ गवयशब्दवाच्यः' इति प्रतिपत्तिः कथं भवेत् अतिदेशवाक्यश्रवणसमये विशेषे सम्बन्धाप्रतिपत्तेः ? प्रतिपत्त्यभ्युपगमे वा विशेषेऽपि सामान्यवत् स्मृतिरेवेति कुतः प्रामाण्यमुपमानस्य? यदपि 'गौरिव गवयः' इति गो-गवययोरतिदेशवाक्यात् सादृश्यमात्रप्रतिपत्तिः 'संज्ञासंज्ञिसम्बन्धप्रतिपत्तिस्तूपमानात्' तदप्यसमीक्षिताभिधानम्, यतो गवयदर्शनानन्तरम् 'अयं स गवयशब्दवाच्यः' इति प्रतिपत्तिरुपजायते इयं च नाध्यक्षप्रतिपत्तिफलम् अश्रुतातिदेशवाक्यस्य प्रभ्रष्टसंस्कारस्य वा तत्सद्भावेऽप्यस्यानुत्पत्तेर्विशेषशब्दवाच्यत्वस्याध्यक्षविषयत्वानभ्युपगमाच्च । अतिदेशवाक्यस्मरणसहायस्य गवयदर्शनस्य तत्प्रतिपत्तिजनकत्वे स्मर्यमाणमतिदेशवाक्यमेव तज्जनकमभ्युपगतं भवेन्न दर्शनम् न हि यत्राध्यक्षमप्रवृत्तिमत् तत्र शब्दस्मरणसहितमपि प्रवर्तते यथा चक्षुर्ज्ञानं गन्धस्मरणसहायं परिमलप्रतिपत्तौ अतिदेशवाक्याच्च सम्बन्धाप्रतिपत्तावपरस्य तत्प्रतिपत्तिनिमित्तस्याभावात् 'अयं स गवयशब्दवाच्यः' इति पूर्वानुभूतपरामर्शेन प्रतिपत्तिर्न स्यात् अपि तु 'अयं गोसदृशः' इत्येवं भवेत् । न चैतत्प्रतिपत्त्यन्यथानुपपत्त्यैव प्रमाणान्तरमुपमाख्यमेतत्प्रतिपत्तिजनकं प्रकल्पनीयम् 'यः कुण्डली स राजा' इति श्रुतातिदेशवाक्यस्य तदर्शनानन्तरम् 'अयं स राजशब्दवाच्यः' इति प्रतिपत्तेरप्युपमानफलत्वप्रसक्तेः । अथात्र तच्छब्दवाच्यता अतिदेशवाक्यादेव प्रतिपन्नेति नातिप्रसक्तिस्तर्हि 'गौरिव गवयः' इत्यतिदेशवाक्याद् गोसदृशस्यार्थस्य गवयशब्दवाच्यताऽपि प्रतिपन्नेति नोपमानप्रमाणफलता 'अयं स गवयशब्दवाच्यः' इति प्रतिपत्तेः । तस्मात् स्मृतिरूपत्वादस्याः प्रतिपत्तेर्नैतस्या जनकस्य प्रमाणतेति अनुमानानन्तर्भावप्रतिपादनं न दोषायेत्यलमतिविस्तरेण[1] ।

अर्थापत्तेस्तु षट्प्रकारायाः[2] 'प्रत्यक्षादिप्रमाणप्रसिद्धोऽर्थो येन विना नोपपद्यते तस्यार्थस्य प्रकल्पनमर्थापत्तिः' इति लक्षणं नोपपत्तिमत् यतोऽग्नेर्दाहकत्वेन विनाऽग्नित्वं नोपपद्यत इति तदा दाहकत्वं परिकल्प्यते यदि तयोः कश्चित् संबन्धो भवेत् असति च तत्र सत्यप्यग्नौ दाहकत्वस्याभावः असत्यपि च भाव इति कथं दाहकत्वमन्तरेण वह्नेरभावसिद्धिरिति दाहकत्ववद्दाहकत्वमपि कल्पनीयं स्यात् । अतः सम्बन्धे निश्चिते सति एकमविनाभूतं सम्बन्धिनमुपलभ्य द्वितीयस्य सम्बन्धिनः प्रकल्पना युक्तिमती । एवं च प्रकल्पने अनुमानत्वमेव सम्बन्धनिश्चयपूर्वकत्वाद् एकस्माद् द्वितीयपरिकल्पनस्य कृतकत्वदर्शनपूर्वकाऽनित्यत्वानुमानवत्[3] । सम्बन्धश्चार्थापत्तिप्रवृत्तेः प्रागेव तयोः प्रतिपत्तव्यः । एवं ह्यर्थापत्युत्थापकस्यार्थस्यानन्यथाभावोऽर्थापत्तेराश्रयः सिद्धो भवेत् । अथ प्रकल्प्यमानार्थानन्यथाभवनमर्थापत्युत्थापकस्यार्थस्य तदैव सिद्धमित्यनुमानादर्थापत्तेर्भेदः; ननु यदि तस्यानन्यथाभवनं प्रमाणान्तरात्[4] प्रतिपन्नमर्थापत्तेराश्रयस्तदाऽनुमानेऽन्तर्भावः अथ न सिद्धं तदा नार्थापत्तिप्रवृत्तिरतिप्रसङ्गादित्युक्तम् । अथार्थापत्तिरेव प्रकल्प्यार्थानन्यथाभवनं दृष्टस्य श्रुतस्य[5] वार्थस्य प्रकल्पयति तर्हीतरेतराश्रयत्वम्–अनन्यथाभवनसिद्धौ तस्यार्थापत्तिप्रवृत्तिः तत्प्रवृत्तेश्च तस्यानन्यथाभवनप्रसिद्धिरिति व्यक्तमितरेतराश्रयत्वम् । ततस्तादात्म्य-तदुत्पत्तिप्रतिबन्धलक्षणान्यथाभवननिश्चयमन्तरेणान्यतरः सम्बन्धी अन्यतोऽर्थादर्थापत्त्या प्रकल्पयितुं न शक्यत इत्यन्वयव्यतिरेकसिद्धिः । पक्षधर्मता त्वर्थापत्तिसमाश्रयोऽर्थो यत्र धर्मिणि प्रमाणतो निश्चीयते तत्रैव स्वप्रकल्प्यं प्रकल्पयतीति न दुरुपपादा कारण–व्याप्कयोरेव प्रतिबन्धात् तयोश्चान्यत्र सद्भावे कार्य–व्याप्ययोरपरत्रासंभवात्[6] । एवमर्थापत्तेरनुमानेऽन्तर्भावात् तल्लक्षणमनुमानलक्षणात् पृथगयुक्तम् । प्रत्यक्ष-

१–**तानाका**–आ० । २ "गवयसद्भावे"—बृ० टि० । ३ "राज"–बृ० टि० । ४ "उपमामानविचारः"–बृ० टि० । प्रमेयकमलमार्तण्डे नैयायिकसंमतमुपमानं प्रतिविदधत्येषा चर्चा भङ्गीभेदेन दृश्यते–पृ० १०० प्र० पं० ७—। ५ पृ० ५७९ पं० १–। ६–**पूर्विकानि**–वा० बा० ।–**पूर्वकनि**–बृ० आ० हा० वि० । ७ "अर्थापत्तिप्रवृत्तिकाले"—बृ० टि० । ८ **प्रपन्न**–वा० बा० । ९ **सिद्धः त**–बृ० । १०–**स्य चा**–वा० बा० भां० मां० ।

११ "तत्र शक्तातिरेकेण न शक्तिर्नाम काचन । याऽर्थापत्त्याऽवगम्येत शक्तश्चाध्यक्ष एव हि ॥
दाहादीनां तु यो हेतुः पावकादिः समीक्ष्यते । असंशयाविपर्यासं शक्तिः कान्या भवेत् ततः ॥
व्यतिरिक्ते तु कार्येषु तस्या एवोपयोगतः । भावोऽकारक एव स्यादुपयोगे न भेदिनी ॥
अर्थक्रियासमर्थं हि स्वरूपं शक्तिलक्षणम् । एवमात्मा च भावोऽयं प्रत्यक्षाद् व्यवसीयते" ॥
—तत्त्वसं० का० १६०७–१६१० पृ० ४६१ ।

पूर्विका त्वर्थापत्तिर्योदाहृता सा प्रमाणमेव न भवति स्मृतिरूपत्वात् न हि पावकादन्यैव दाहैकशक्तिर्याऽर्थापत्तिसाध्या स्यात् । वह्निस्वरूपमेव दाहादिककार्यनिर्वर्तनसमर्थं शक्तिव्यपदेशमासादयति अध्यक्षेण च तत्स्वरूपं प्रतियता तदव्यतिरिक्ता शक्तिरपि प्रतिपन्नैव न हि कारणभावादन्या भावानां शक्तिः । स च कार्यात् प्राग्भाव एव । अन्वयव्यतिरेकौ च प्रत्यक्षानुपलम्भगम्यौ तौ च विशिष्टमेव प्रत्यक्षमिति प्रत्यक्षावगतत्वाच्छक्तेर्नार्थापत्तिविषयता । न च शक्तिः शक्तादन्यैव 'अस्येयं शक्तिः' इति सम्बन्धाभावप्रसक्तेः उपकारकल्पनायामनवस्थादिदोषात् व्यतिरिक्ताऽव्यतिरिक्तशक्तिप्रकल्पनायामपि विरोधादिदूषणं प्रतिपादितमेव । तन्न प्रत्यक्षपूर्विकाया अर्थापत्तेरुदाहरणं युक्तम् । अत एव 'चतसृभिरर्थापत्तिभिः प्रत्यक्षादिप्रसिद्धस्यार्थस्य शक्तिः साध्यते' इत्ययुक्तमुक्तम् वह्निरूपादिदर्शनाद् दाहकशक्तियुक्तवस्तुसाधनेऽभ्युपगम्यमाने चार्थापत्तिरनुमानमेव भवेत् । विशिष्टरूपाद् विशिष्टस्पर्शानुमानाद् देशान्तरप्राप्त्या सवितुर्गन्तुरनुमानादनुमानपूर्विकार्थापत्तिरनुमानमेव । अर्थापत्तिपूर्विका चार्थापत्तिरनुमितानुमानम् अर्थापत्तेरनुमानेऽन्तर्भावात् । यत्तूदाहरणम्—'शब्दस्यार्थेन सम्बन्धसिद्धेरर्थान्नित्यत्वसिद्धिः' इति, तदयुक्तम्; पौरुषेयाणामपि हस्तसंज्ञादीनां सङ्केतसम्बन्धादर्थप्रतिपादनसामर्थ्योपलब्धेः । नित्यस्य क्रम-यौगपद्याभ्यामर्थक्रियाविरोधात् कस्यचिद् भावस्यासंभवात् कथमर्थापत्त्या सम्बन्धस्य नित्यत्वं साध्येत ? चक्षुरादिज्ञानान्यथानुपपत्त्या लोचनादिप्रतीतिस्त्वनुमानमेव । तथाहि-येषु सत्स्वपि ये कादाचित्काः परिदृश्यमानकारणव्यतिरिक्तकारणान्तरसापेक्षास्ते यथाऽङ्कुरादयोऽसमग्रसामग्रीकाः कादाचित्कं चेदं रूपालोकमनस्कारादिषु सत्स्वपि चक्षुर्ज्ञानमिति स्वभावहेतुः । न चैवं धर्म्यसिद्धिः ज्ञानस्यैव धर्मित्वात् । अत्र यत् तत्कारणं तच् चक्षुरिति व्यवह्रियते । न चैतत्प्रतिपत्तिविषयस्य चक्षुषः स्वलक्षणत्वात् कथमस्याः प्रतिपत्तेरनुमानतेति वक्तव्यम् स्वलक्षणस्य चक्षुरादेरस्यां प्रतिपत्तावप्रतिभासनात् तत्र शास्त्रकृतां विप्रतिपत्तिदर्शनात् तत्सद्भावे तस्यायोगात् । उपमानस्य चाप्रमाणत्वात् तत्पूर्विकाऽर्थापत्तिः प्रमाणत्वेन दूरापास्तैव । योऽपीयमभावपूर्विकार्थापत्तिः साऽपि न प्रमाणान्तरम् । तथाहि-देवदत्तो धर्मी बहिर्भावस्तस्य साध्यो धर्मः गृहासंसृष्टजीवनं हेतुः । एवंविधस्य गृहासंसृष्टजीवनस्य साध्येन व्याप्तेः स्वात्मन्येव निश्चयादनुमानमेव । कथं पुनर्देवदत्तस्यानुपलभ्यमानस्य जीवनं सिद्धं येन हेतुर्भवेदिति चेत्, नः भवदभ्युपगमेन सिद्धमङ्गीकृत्य हेतुत्वेनोपन्यासात् परमार्थतस्तु सन्दिग्धमेव यतो युष्माभिरप्यसिद्धेनैव जीवनेन बहिर्भावः साध्यत इति समानता न्यायस्य । श्रुतार्थापत्तिरपि प्रमाणं न भवति ।

---

१ पृ० ५७९ पं० २ । २-हशा-भां० मां० विना । ३-दिका-बृ० । ४-मर्थश-बृ० हा० वि० । ५-तिनियता ल० । ६-रणाभा-ल० । ७ पृ० ५७९ पं० १० । ८ पृ० ५७९ पं० ४ । ९ पृ० ५७९ पं० ८ ।

१० "अनन्यत्ववियोगेऽपि शब्दानां न विरुध्यते । अर्थप्रत्यायनं यद्वत् पाणिकम्पादिकारणम्" ॥

—तत्त्वसं० का० १६३५ पृ० ४६७ ।

११-त्वादत्र यत्र यत्का-भां० मां० । १२ तैत् बृ० । अत्र न्यस्तोऽयं द्वितीयोऽङ्कः 'तत् तत्' इति वीप्सासूचको भाति ।

१३ "उपमायाः प्रमाणत्वे विस्तरेण निराकृते । अर्थापत्तेस्तदुत्थाया वारितैव प्रमाणता" ॥

—तत्त्वसं० का० १६३२ पृ० ४६७ ।

१४ पृ० ५७९ पं० ९ ।

१५ "तदापि गेहायुक्तत्वं दृष्ट्याऽदृष्टेर्विनिश्चितम् । अतस्तत्र बहिर्भावो लिङ्गादेवावसीयते ॥
सद्मना यो ह्यसंसृष्टो नियतं बहिरस्यसौ । गेहाङ्गणस्थितो दृष्टः पुमान् द्वारि स्थितैरिव ॥
विपक्षोऽपि भवत्यत्र सदनान्तर्गतो नवः । अर्थापत्तिरियं तस्मादनुमानान्न भिद्यते" ॥

—तत्त्वसं० का० १६४५-१६४७ पृ० ४७० ।

तथाहि-'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्येतद्वाक्यं स्वार्थप्रत्यायनद्वारेण रात्रिभोजनवाक्यान्तरमुपकल्पयतीत्यभ्युपगमः । न च स्वार्थमेतत् प्रतिपादयति बहिरर्थे शब्दानां प्रतिबन्धाभावतः प्रामाण्यानुपपत्तेः । अथ कुतश्चित् प्रमाणाद् दिवाभोजनप्रतिषेधे भोजनकार्यस्य पीनताविशेषस्य प्रतिपत्तिर्न तर्हि श्रुतार्थापत्तिर्भवेत् कार्यतो रात्रिभोजनकारणप्रतिपत्तेरनुमानेऽन्तर्भावात् । वाक्याद् वाक्यान्तरप्रतिपत्तिस्त्वयुक्तैव तेन सह वाक्यस्य प्रतिबन्धासंभवात् न हि दिवाभोजनप्रतिषेधवाक्यस्य रात्रिभोजनवाक्येन कश्चित् कार्यकारणभावादिकः सम्बन्धः संभवतीत्युक्तम् । तन्नार्थापत्तिः प्रमाणान्तरम् ।

अभावाख्यं तु प्रमाणं त्रिप्रकारम्—'प्रमाणपञ्चकाभावः तदन्यज् ज्ञानम् आत्मा वा ज्ञानविनिर्मुक्तः' इत्युक्तम् । तत्राद्यस्य तावत् पक्षस्यासंभव एव यतः प्रमाणपञ्चकाभावो निरुपाख्यत्वान्न किञ्चित्; स कथं प्रमेयाभावं परिच्छिन्द्यात् परिच्छित्तेर्ज्ञानधर्मत्वात् ? अथ प्रमाणपञ्चकाभावो वस्त्वभावविषयज्ञानं प्रमाणं जनयन्नुपचारादभावाख्यं प्रमाणमुच्यते; नन्वेवमपि प्रमाणपञ्चकाभावस्यावस्तुत्वाद् अभावज्ञानजनकत्वायोगात् प्रमाणत्वमनुपपन्नम् । तथाहि-वस्त्वेव कार्यमुत्पादयति नावस्तु तस्य सकलसामर्थ्यविकलत्वात् सामर्थ्यं वा तस्य भावरूपताप्रसक्तेः तथा चाभावाद् भवति ज्ञानमिति 'भावान्न भवति' इति हेतुप्रतिषेध एव तस्य कुतः स्यात् एवं च देशकालादिप्रतिनियमो न स्यात् । अपि च—

"शब्दस्य वृत्तेः सर्वत्र पञ्चानामपि न क्वचित् ।
प्रमाणानामभावोऽतो नार्थाभावविनिश्चयः ॥
अगृहीतान्न चाभावात् प्रमेयाभावनिर्णयः ।
तद्ग्रहोऽप्यन्यतो भावादनवस्था दुरुत्तरा ॥
मेयाभावात् प्रमाभावनिर्णयेऽन्योन्यसंश्रयः ।
मेयाभावात् प्रमाणस्य तस्मात् तस्य विनिर्णयात् ॥
अज्ञातस्यापि चाक्षस्य प्रमाहेतोः प्रमाणता ।
प्रमाभावस्त्वसामर्थ्यान्नाज्ञातोऽभाववेदकः" ॥ [ ]

द्वितीयपक्षे तु यत् तदन्यज्ञानं प्रत्यक्षमेव तत् प्रमाणम् पर्युदासवृत्त्या च तदेवाभावप्रमाणशब्दवाच्यतामनुभवति । तथाविधेन च तेन तदन्यभावलक्षणो भावः परिच्छिद्यत एव । यत् पुनः 'इह घटो नास्ति' इति ज्ञानं तत् प्रत्यक्षसामर्थ्यप्रभवत्वात् स्मृतिरूपतामासादयन्न प्रमाणम् । तथा हि सकलत्रैलोक्यव्यावृत्तपदार्थसामर्थ्योद्भूततदाकारदर्शनानन्तरं विकल्पद्वयम् 'इदमत्रास्ति' 'इदं नास्ति' इति दर्शनसामर्थ्यभावि तद्गृहीतमेवार्थमुल्लिखदुपजायते । तत्र दर्शनमेव भावाभावयोः प्रतिपादकत्वात् प्रमाणं न तु विधिप्रतिषेधविकल्पौ गृहीतग्राहित्वात् अन्यभावलक्षणस्य भावाभावस्याध्यक्षेणैव सिद्धत्वात् । व्यवहार एवान्योपलब्ध्याऽपि साध्यते स्वयमेव वा 'नास्तीह घटः' इति विकल्पयति न च तावता प्रमाणान्तरत्वं यथादृष्टस्यैव विकल्पनात् । सकलत्रैलोक्यव्यावृत्तस्वरूपस्याध्यक्षेण ग्रहणेऽपि य एव निराकर्तुमिष्टो घटादिकोऽर्थः स एव व्यवच्छिद्यते नान्यः तेन 'न प्रत्यक्षेण घटादी-

---

१ "पीनो दिवा न भुङ्क्ते चेत्यस्मिन्नर्थे न निश्चयः । द्वेषमोहादिभिर्योगादन्यथाऽपि वदेत् पुमान् ॥
अर्थगत्यनपेक्षेण यदि वाक्यान्तरं पुनः । सार्थमाक्षिप्यते तेन स्यादाक्षेपो वचोन्तरे ॥
अथोपगमरूपेण तत्रार्थगतिरिष्यते । प्रमाणान्तरतो यद्वा भवत्यर्थगतिस्ततः" ॥

—तत्त्वसं० का० १६२०-१६२२ पृ० ४६४ ।

२ "पीनताविशेषरूपात्"-बृ० टि० । ३-न्धाभावा-भां० मां० । ४ अर्थापत्तेः पृथक्प्रमाणतां प्रतिविदधाना अनुमाने च तस्या अन्तर्भावं समर्थयमाना सविस्तरा चर्चा प्रमेयकमलमार्तण्डे स्याद्वादरत्नाकरे च दृश्यते—पृ० ५० प्र० पं० १०-पृ० ५४ । पृ० २८३ पं० २२-पृ० ३०९ पं० २२ आ० ।

५ अभावस्य प्रामाण्यं प्रतिक्षिपन्ती विस्तरयुता चर्चा तत्त्वसंग्रहे मार्तण्डे न्यायमञ्जर्याम् रत्नाकरे च विद्यते—तत्त्वसं० का० १६६०—१६९१ पृ० ४७४-४८२ । प्रमेयक० पृ० ५४ प्र० पं० ८-पृ० ५७ द्वि० पं० १४ । न्यायमञ्ज० आ० १ पृ० ५१ पं० १०-पृ० ५४ पं० ७ । स्याद्वादर० पृ० ३१० पं० १-पृ० ३१३ पं० १० आ० । ६ पृ० ५८० पं० २ । ७-न्यज् ज्ञा-बृ० सं० । ८-न्यताभाव-बृ० । ९ "स्मृत्या"-बृ० टि० । १०-मर्थ्याभा-आ० हा० वि० ।

नामभावो गृह्यते तस्याभावविषयत्वविरोधात् नाप्यनुमानेन हेत्वभावात्' इत्यादि यदुक्तं तन्निरस्तं द्रष्टव्यम्। तृतीयपक्षस्य पुनरसंभव एव आत्मनोऽभावात् भावेऽपि तस्य ज्ञानाभावे कथं वस्त्वभावावेदकत्वम् वेदनस्य ज्ञानधर्मत्वात् ज्ञानविनिर्मुक्तात्मनि च तस्याभावात्। अथ "चैतन्यं पुरुषस्य स्वरूपम्" [ ] इति वचनात् तस्यैतद्रूपतेष्यते तर्हि ज्ञानविनिर्मुक्त इति न वक्तव्यम् स्वरूपहानिप्रसक्तेः पुरुषस्यैव च प्रत्यक्षादिप्रमाणत्वं भवेद् बोधरूपत्वात्। अभ्युपगम्यत एवेति चेत् तर्हि बुद्धिजन्म प्रत्यक्षमिति न वक्तव्यम्। ततः प्रमाणपञ्चकाभावो ज्ञानविनिर्मुक्तात्मलक्षणश्चाभावः प्रमाणं न भवति तदन्यज्ञानलक्षणश्चाभावः प्रत्यक्षमेवेति न प्रमाणान्तरमभावः। यच्च अभावस्य प्रागभावादिभेदतश्चातुर्विध्यं वस्तुस्वरूपत्वं च प्रतिपादितम् तदसङ्गतमेव यतः स्वस्वभावव्यवस्थितयः सर्वे एव भावा नात्मानं परेण मिश्रयन्ति तस्यापरत्वप्रसक्तेः। न चान्यतोऽव्यावृत्तस्वरूपाणामेषां भिन्नोऽभावांशः संभवति तद्भावे वा तस्यापि पररूपत्वाद् भावेन ततोऽपि व्यावर्तितव्यमित्यपरापरभावपरिकल्पनयाऽनवस्थाप्रसङ्गतो न कुतश्चिद् भावेन व्यावर्तितव्यमिति द्रव्यमेकं विश्वं भवेत् ततश्च सहोत्पत्त्यादिप्रसङ्गः परभावाभावाच्च व्यावर्तमानस्य भावस्य पररूपताप्रसक्तिरिति पूर्वोक्त एव दोषः। न चेतरेतराभावात्मकत्वे भावानां घटाभावात्मकात् कटाद् व्यावर्तमानः पटो यथा न घटस्तथा परभावाभावादपि निवर्तमानस्य तस्य न पररूपतेति वक्तव्यम् यतो नास्माकं घटात् पटो भिन्नः कटलक्षणाभाववशात् यतो निवर्तमानस्य ततस्तस्य घटरूपताप्रसक्तिर्भवतामिव अपि तु स्वस्वभाववशात् परस्परतो भेदमनुभवन्ति भावा इत्युक्तं प्राक् तेन स्वत एव घटाभावरूपः पटः न पुनर्वस्तुभूताभावांशवशात् येन भवतामिव ततो व्यावर्तमानस्य तस्य पररूपताप्रसक्तिर्भवेत्। स्वभावादपि परगतादस्य निवृत्तेः न पररूपतेति चेत् न, उभयतो व्यावृत्तस्यापि यथा परस्य पररूपताऽभ्युपगता तथाऽस्यापि स्यात् उभयरूपता वा स्यात् ततो निवर्तमानो भावः स्वेनैव रूपेणान्यतो निवर्तते नाभावांशवशादिति कुतोऽस्मत्पक्षसमानताप्रसक्तिः? यदि पुनरस्मदभ्युपगत एव न्यायोऽभ्युपगम्यते तदाऽसदंशप्रकल्पनमनर्थकमासज्येत। न च सदंशासदंशयोरात्यन्तिकभेदाभावान्नायं दोषः 'धर्मयोर्भेद इष्टो हि' इत्यादिवचनतस्तयोर्भेदाभ्युपगमात् आत्यन्तिकभेदस्य च परस्य क्वचिदनिष्टेः।

"सद्गुणद्रव्यरूपेण रूपादेरेकतेष्यते।
स्वरूपापेक्षया चैषां परस्परं विभिन्नता" ॥ [श्लो० वा० अभावप० श्लो० २४]

इति वचनात्। एवं चात्यन्तिकस्य क्वचिदपि भेदस्याभावादभावरूपता भावानामन्योन्यं न सिद्ध्येदित्यन्योन्याभावाभाव एव। एवं कारणे कार्याभावः कार्यात् कारणाच्च भेदात् तद्व्यादपि व्यावर्तमानोऽपरापराभाववशाद् व्यावर्तत इत्युभयतोऽनवस्थालतां निरवसानामातनोति तथा कार्ये कारणाभावश्च। अथ कार्यादीनामभावः कारणाद्यात्मकः स्वभावेनैव कार्यादिरूपविकलतया भिद्यते ततो नान्याभाववशादेवं कार्यात्मा कारणादीनामभावोऽपि; नन्वेवं कारणादयोऽपि कार्यादिभ्यः स्वभावेनैव भेत्स्यन्त इति किमपराभावांशपरिकल्पनया? अत एव "कार्यादीनामभावः को भावो यः कारणादि न" इत्यपि सङ्गतं स्यात् कारणादेरेव स्वरूपस्य पर्युदासवृत्त्या कार्याद्यभावशब्दवाच्यत्वात् तस्य च कारणादिस्वरूपस्याभावस्य वस्तुरूपताऽस्माकमिष्टैव। प्रागभावादेश्च कारणादिभावरूपतया कारणादिविभागतो व्यवहारो लोकस्याप्येवं सिद्ध एव। अनुवृत्तिव्यावृत्तिबुद्धिग्राह्यत्वात् तत्स्वभावो गवादिर्वेदित्यत्रापि हेतुरसिद्धः साधनविकलश्च दृष्टान्तः अबाधितानुवृत्तिव्यावृत्तिबुद्धिग्राह्यत्वस्य

१ पृ० ५८० पं० १०–१५। २ पृ० ३०७ पं० १४ टि० ८। ३–द्रूपं नेष्य–आ० हा० वि०। ४ पृ० ५८१ पं० १ तथा पृ० ५८० पं० २०। ५ भिन्नो भा–बृ० विना०। ६ "भिन्नाभावांश"–बृ० टि०। ७–भावांभावा–बृ०। अत्र '६–१' इलङ्केन 'भावस्य अभावात्' इति षष्ठीतत्पुरुषः सूच्यते इति भाति। ८–त्मकत्वात् बृ०। ९–वादपि वा० बा०। १०–त् स्वाभा–वा० बा० भां० मां०। ११–रस्पररू–बृ० ल० विना। १२ पृ० ५८१ पं० ३२। १३–स्परवि–भां० मां०। १४ पृ० ५८० पं० २६। १५ "अनुवृत्तव्यावृत्तस्वभाव"–बृ० ल० टि०। १६ पृ० ५८० पं० ३०। १७ "सौगतानां गवादावप्यनुवृत्तिव्यावृत्तिबुद्धिग्राह्यत्वस्यासिद्धेः"–बृ० ल० टि०।

क्वचिदप्यसिद्धेः। वस्तुनः सर्वस्य सकलसजातीयविजातीयव्यावृत्तत्वात् सामान्येन तत्साधने केशोन्दुकादिभिरनेकान्तः प्रतिबन्धाभावतः सन्दिग्धविपक्षव्यावृत्तिकश्च हेतुः कल्पनासमारोपितस्य च वस्तुत्वसाधनेऽभ्युपगमबाधः। 'प्रमेयत्वाच्च' इत्ययं पुनरनैकान्तिको हेतुः प्रसज्यरूपेणाभावेन तस्यापि प्रमाणतः कथञ्चिद्विषयीकरणात्। न च तुच्छरूपस्याभावस्याभावान्नायं दोषः यतो यदि प्रमाणतस्तस्याभावोऽवसीयते कथं न तस्य प्रमेयत्वं तस्याभावरूपतया प्रमाणेन विषयीकरणात्? अथ न प्रमाणतस्तस्य विषयीकरणं कथमप्रमाणकं वच्च उच्यमानं शोभेत? तुच्छरूपस्य चाभावस्यानभ्युपगमे प्रागभावादयोऽपि वस्तुरूपा अभ्युपगता न सिध्यन्ति पर्युदास एवैको नञर्थश्च स्यात् सोऽपि वा न भवेत् कस्यचिदनिवर्तनादित्युक्तं प्राक्। क्षीरादिस्वरूपश्च यदि दध्यादीनां प्रागभावादिस्तदा सिद्धसाध्यता। अथ ततो भिन्नोऽसावसदंशस्तदाऽनवस्थादिदोषतोऽयुक्त इति "क्षीरे दध्यादि यन्नास्ति" इत्यादि प्रागभावादिस्वरूपप्रतिपादनमयुक्तम्। यदपि "क्षीरे दधि भवेदेव" इत्याद्यभिधानम् तदप्यसङ्गतम् यतो यदि नाम तत्प्रतिपादकं प्रमाणं न प्रवृत्तं तथापि कथं क्षीरादिषु दध्यादिसद्भावः तद्भावस्य कारणायत्तत्वात्? तदसत्त्वग्राहकप्रमाणाभावाद्धि तदसद्व्यवहारनिवृत्तिमात्रकमेव स्यान्न तत्र दध्यादिसद्भावः। निरंशैकभावरूपत्वे च पदार्थस्य "स्वरूप-पररूपाभ्यां नित्यम्" इत्यादि सर्वं निरस्तम्। यच्च 'यस्य यत्र यदोद्भूतिः' इत्यादि 'उद्भवाभिभवात्मत्वात्' इति च तत्र सदसदंशयोः सत्त्वेऽपि स्वत एव यद्युद्भवाभिभवौ तदा अपरनिमित्तानपेक्षणात् सर्वदैव स्याताम् न ह्यनिमित्तस्य कस्यचित् कदाचिदुद्भवोऽपरस्य चाभिभवो युक्तः। न चैकाभिभवनिमित्तोऽपरस्योद्भवस्तदुद्भवनिमित्तो वा परस्याभिभवः इतरेतराश्रयप्रसक्तेः। अभिभवश्च स्वरूपखण्डनम् तच्च विनाशः स चाहेतुक इति नोद्भवनिमित्तोऽभिभवः विनाशस्य च सर्वसामर्थ्यविकलतया कथमभिभवनिमित्तोऽपरस्योद्भवः? न चाभिभवावस्थायामनुपलब्धस्य तस्यैवोद्भवावस्थायामुपलम्भः सिद्धो येनोद्भवाभिभवव्यवस्था भवेत्। न च प्रत्यभिज्ञानादेकत्वसिद्धेर्नायं दोषः असदर्थग्राहितया तस्य भ्रान्तत्वात्। न च धर्मिणः सर्वदाऽवस्थानात् तद्ग्राहितया प्रत्यभिज्ञानस्य नायं दोषः तस्याप्याद्यदर्शनेनोद्भूतस्वभावतयोपलभ्यमानस्य पुनरनुपलम्भपूर्वकमुपलब्धस्यानुपलम्भसमयेऽसतः—अन्यथा तदाप्युपलम्भप्रसङ्गात्—यत् प्रत्यभिज्ञानं तस्यासद्विषयतया भ्रान्तत्वानतिक्रमात्। न चावस्थाव्यतिरिक्तोऽवस्थाता सिद्धः उपलब्धिलक्षणप्राप्तस्य तस्यानुपलम्भात् अनुपलभ्यस्वभावत्वे वा कुतस्तस्य प्रत्यभिज्ञानम्? अव्यतिरिक्तश्चेदवस्थाविनाशे तस्यापि विनाशप्रसङ्गः अविनाशे विरुद्धधर्मसंसर्गादवस्थाभ्यस्तस्य भेदः अन्यत्रापि तस्य तन्मात्रनिबन्धनत्वात्। यथा च प्रत्यभिज्ञा न प्रमाणं तथा प्रतिपादितमेव न पुनरुच्यते। तदेवमभावस्य प्रमेयासंभवात् संभवेऽपि तस्यार्थक्रियासामर्थ्यविकलतया विज्ञानजननायोगान्न तद्ग्राहकमभावाख्यं प्रमाणं संभवतीति स्थितम्।

एतेन संयुक्तविशेषणभावादभावग्राहीन्द्रियार्थसन्निकर्षजमध्यक्षं नैयायिकप्रकल्पितमपि व्युदस्तम्। तथाहि-तत् तावदनिमित्तं न भवति कादाचित्कत्वात्। नाभावनिमित्तं तस्याजनकत्वात्। जनकत्वेऽपि तस्यानाधेयातिशयतया सहकार्यपेक्षाऽयोगात् सर्वदा तज्ज्ञानजननप्रसक्तेस्तज्ज्ञानस्यैव सद्भावो भवेत्। सहकार्याधेयातिशयत्वे वाऽभावस्य भावरूपता भवेत् विशेषप्रतिलम्भलक्षणत्वाद् भावस्य। पर्युदासरूपस्य तस्याभ्युपगमाददोषश्चेत्, न; स्वसिद्धान्तविरोधात् तथापि तथाभूतस्य तस्याभ्युपगमे प्रतिषेध्यविविक्तप्रदेशादिरूपतैव तस्याभ्युपगता भवेत् प्रदेशादिश्च प्रथमाक्षसन्निपातजाध्यक्षप्रतिपन्न एवेति गृहीतग्राहितया कथं तदनन्तरभाविनः स्वतन्त्रस्याध्यक्षान्तरस्य पृथक् प्रामाण्यम् अभावविषयत्वं वा भवेत्? तस्मात् प्रसज्यप्रतिषेधरूपतैवाभावस्याभ्युपगन्तव्या तस्य च तथाभूतस्य घटादिना सम्बन्धाभावात् 'घटस्याभावः' इति कथं घटविशेष्यता? घटेनाविशेषणे च 'घटो नास्ति' इति न प्रतीतिर्भवेत् अपि तु 'अभावोस्ति' इत्येवं प्रतिपत्तिः स्यात् एवं च घटस्यानिवर्तनान्न किंचित् कृतं स्यात्। न चाभावः प्रदेशादेर्विशेषणं संभवति भावाभावयोः सम्बन्धाभावात्। न तावत् तादात्म्यलक्षणस्तयोः सम्बन्धः अन्योन्यव्यवच्छेदरूपत्वात् उपकार्योपकारकभावाभावाच्च।

१ पृ० ५८० पं० ३०। २–पस्याभावान्ना–बृ० वा० बा० हा०। ३–स्य वा–भां० मां०। ४ पृ० ५८१ पं० २। ५ पृ० ५८१ पं० १०। ६ पृ० ५८१ पं० १९। ७ पृ० ५८१ पं० २१। ८ पृ० ५८१ पं० ३३। ९–म् तर्ह्यनि–बृ० ल० वा० बा० विना। १०–च्छेद्यरू–भां० मां०।

तदुत्पत्तिलक्षणः । न चापरसम्बन्धमन्तरेण तयोर्विशेषणविशेष्यभावः सम्भवत्यतिप्रसङ्गात् । न चैतत्प्रतीतिसामर्थ्यादेवाभिप्रेतसम्बन्ध[1]प्रकल्पना प्रतीतेरन्यथापि सिद्धेः । तन्नाक्षस्य संयुक्तविशेषणभावादेतत्प्रतिपत्तिजनकत्वं युक्तम् । किञ्च, 'इह घटस्याभावः' इति स्वतन्त्रो यद्यध्यक्षप्रत्ययः कथं दर्शनानन्तरं भवेत् ? न च मानसाध्यक्षवत् स्वातन्त्र्येऽप्यानन्तर्यं भविष्यति तत्र स्वविषयानन्तरविषयसहकारित्वादेस्तदानन्तर्यनिमित्तस्य सद्भावात् अत्र च तस्यासंभवात् । तदेवं घटविविक्तप्रदेशसामर्थ्योद्भूतेनाध्यक्षेण तत्स्वरूपग्रहणे 'सघटात् प्रदेशादयमन्यः प्रदेशः' 'नायं घटवान्' 'इह घटो नास्ति' इत्यादयः प्रतिषेधविकल्पाः प्रवर्तमाना गृहीतग्राहितया स्मृतिरूपतां बिभ्राणा न ततः पृथक् प्रमाणतामासादयन्तीत्यभ्युपगन्तव्यम् अन्यथा शुक्लभावदर्शनानन्तरं 'शुक्लोऽयं भावः न नीलः' इति प्रत्ययो दर्शनात् पृथक् प्रमाणं भवेत् । एवमन्येषामपि युक्ति[2]-संभवानुपलब्ध्यादीनां प्रमाणान्तरत्वेन परप्रकल्पितानां यथालक्षणं प्रत्यक्षानुमानयोरन्तर्भावो निराकरणं वा विधेयम् । तदेवं शब्दादीनां केषाञ्चित् प्रामाण्यमेव न सम्भवति अपरेषां त्वनयोरन्तर्भाव इत्यालोच्य न्यायविदोक्तम्—"प्रमाणस्य सतोऽत्रैवान्तर्भावाद् द्वे एव प्रमाणे" [ ] इति ।

[सौगतकृतां मीमांसकादिसम्मतप्रमाणान्तरप्रतिविधानप्रक्रियां यथासिद्धान्तं स्वीकृत्याऽपाकृत्य च सिद्धान्तिना प्रत्यक्ष-परोक्षतया प्रमाणद्वयव्यवस्थापनम्]

अत्र प्रतिविधीयते-[3]यत् तावत् पक्षधर्मत्वादित्रिलक्षणयोगिनो हेतोः साध्यप्रतिपत्तिरनुमानमभिहितम् तत्र त्रिलक्षणस्य हेतोरविनाभावित्वं नावश्यंभावि तत्पुत्रादेस्त्रैलक्षण्येऽपि गमकत्वादर्शनात् । अथ यत्राविनाभावित्वं तत्र त्रैलक्षण्यमवश्यंभावीति हेतोस्तल्लक्षणमुच्यते, असदेतत्; 'सर्वमनेकान्तात्मकं क्षणिकं वा सत्त्वात्' इति साधयतः क्वचिदन्वयाभावेऽपि सत्त्वस्यानेकान्तात्मकत्वेन क्षणिकत्वेन वा विनाऽनुपपत्त्या गमकत्वदर्शनात् । तथा, 'परिणामी ध्वनिः क्षणिको वा श्रावणत्वात्' इत्यत्रापि न क्वचिदन्वयसद्भावः । न चानित्यत्वमन्तरेण श्रावणत्वं संभवति नित्यस्य श्रवणज्ञानजनकत्वासंभवात् यस्मिन् सत्येव यद् भवति [4]यदभावे [5]यन्न भवत्येव कथं न तत् तस्य गमकं भवेत् ? तथा सर्वोऽपि धूमोऽग्निमन्तरेण न कदाचित् प्रभवतीति व्याप्तिसाधने नान्वयः संभवति तदसिद्धौ च कुतोऽभिमतप्रदेशे धूमाद् अग्निनिश्चयः ? अतस्त्रिलक्षणपरिकल्पनायां व्याप्तिनिश्चयस्य सर्वत्रासंभवात् कार्य-स्वभावहेतुद्वयस्यापि गमकत्वं न स्यात् । तथा 'नास्तीह घटः उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः' इत्यत्रापि दृष्टान्ताभावान्नान्वयः सिद्धः । न च शशशृङ्गादिको दृष्टान्तः समस्तीति वक्तव्यम् तत्रापि दृष्टान्ता[6]न्तरकल्पनायामनवस्थाप्रसक्तेः । अथ शशशृङ्गादावनुपलम्भात् प्रवर्तिताभावव्यवहारोऽपि मूढः अनुपलभ्यमानेऽपि प्रदेशविशेषे घटादौ यस्तं न प्रवर्तयति स निमित्तदर्शनात् तत्र प्रवर्त्यत इति भवत्येव शशशृङ्गादिरभावव्यवहारे साध्येऽनवस्थादोषविकलो दृष्टान्तः तत्रानुपलम्भेनाभावव्यवहारस्य प्रवृत्तासद्व्यवहारशशशृङ्गादिदृष्टान्तबलात् प्रसाधनात् प्रदेशविशेषे घटाभावस्य त्वध्यक्षसिद्धत्वात्, असदेतत्; यतो घटाभावसिद्धिर्घटाभावनिर्णय उच्यते स चेत् [7]सिद्धः अभावव्यवहारोऽपि सिद्ध एव अभावनिर्णयव्यतिरेकेणाभावव्यवहारायोगात् । न च प्रदेशे घटाभावं निश्चिन्वानोऽपि तच्छब्दादिकं कश्चिन्न प्रवर्तयेदित्यनुपलम्भेन प्रवर्त्यत इति वाच्यम् एवं हि भावं निश्चिन्वानोऽपि कश्चित् शब्दं नोच्चारयेदिति तत्प्रवर्तनाय हेत्वन्तरं मृग्यं स्यात् ततो घटादावप्यभावस्य साध[1]नादृष्टान्तान्वेषणे तत्राप्यभावो यदि दृष्टान्तान्तरात् सिद्धस्तदा सैवानवस्था ।

१-न्धकल्प-बृ० आ० हा० वि० ।

२ युक्ति-अनुपलब्धि-संभव-ऐतिह्यादीनां पृथक् प्रामाण्यप्रतिक्षेपः प्रत्यक्ष-परोक्षयोश्चान्तर्भावस्तत्त्वसंग्रहे प्रतिपादितः-का० १६९२-१७०० पृ० ४८२-४८४ ।

३ प्रस्तुतचर्चया साम्यं बिभ्राणा हेतुस्वरूपप्रधाना चर्चा प्रमेयकमलमार्तण्डतोऽवबोद्धव्या—पृ० १०० द्वि० पं०१२-पृ० १०७ प्र० पं० ७ । ४ "अनित्यत्वाभावे"-बृ० टि० । ५ "श्रवणज्ञानजनकत्वम्"-बृ० टि० । ६ "महानसादेरन्वयार्थं ग्रहणे तत्रापि अपरनिदर्शनाद् व्याप्तिर्निश्चेतव्या तत्राप्यपरस्मादित्यनवस्थानादिति"-बृ० टि० । ७ "व्यवहारम्"-बृ० टि० । ८-ङ्गादेर-भां० मां० । ९-देशघ-बृ० आ० । १०-धनाद् दृष्टा-बृ० सं० ।-धनदृष्टा-आ० । अत्र 'साधने' अथवा 'साधनाय' इति पाठः कल्पयितुं योग्यो भाति ।

अथ तत्र साध्याविनाभूतादनुपलम्भादेर्लिङ्गाद् दृष्टान्तान्तरमन्तरेणाप्यभावनिर्णयः शब्दादिव्यवहारस्य च प्रवृत्तिस्तर्ह्यनुपलब्धावन्वयमन्तरेणापि गमकत्वमविनाभावमात्रात् कथं नाभ्युपगतं भवेत् ? एतेन 'व्यतिरेकस्यान्वयेन विनाभावादगमकाङ्गता' इत्यपास्तम् तेन नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गादिति व्यतिरेक्यपि हेतुर्गमकः सिद्धः । अथ सर्वथा परोक्षस्यात्मनोऽनुपलम्भादभावासिद्धेरनात्मवत्तया घटादीनां सन्देहाद् व्यतिरेकासिद्धितोऽस्य हेतोरनैकान्तिकत्वम्; नन्वेवं कथं सत्त्वादेः क्षणिकत्वव्याप्तिसिद्धिर्यतः क्षणक्षयी ध्वनिः सिध्येत् ? अथात्र विपर्यये बाधकप्रमाणबलात् सत्त्वस्य क्षणक्षयित्वेन व्याप्तिसिद्धिस्तर्ह्यत्रापि बाधकप्रमाणबलादेव निरात्मकाद् घटादेरविचलितस्वरूपादात्मनश्च[2] प्राणादीनां निवृत्तेः सात्मकत्वेन तेषां व्याप्तिसिद्धिः किं नाभ्युपगम्यते ? अथैवमपि [3]स्वैरसनिरन्वयविनश्वरबुद्धिमात्रजन्यत्वात् प्राणादेर्बुद्धिसन्तानेन व्याप्तिप्रसक्तिः, असदेतत्; बुद्धिक्षणस्य अप्राप्य स्वकार्यकालं निवृत्तेरपरबुद्धिक्षणस्य [4]तत उत्पत्तेरसंभवात् सन्तानव्यावृत्तेः कुतस्तत्र प्राणादेर्वृत्तिः ? सन्तानसद्भावेऽपि निरंशस्वभावस्य शक्तिनानात्वमन्तरेण कार्यनानात्वासंभवात् कुत[5]श्चित्तक्षणश्चित्तक्षणान्तरजनकः सन् प्राणादेरुपकारकः स्यात् ? अथ कारणशक्तिभेदाभावेऽपि कार्याण्येव भिद्यन्ते कथं तर्ह्यक्षणिकतायामर्थक्रियाविरोधः सिध्येत् क्रमयौगपद्याभ्यामर्थक्रियाभावात् तदभावो वा युक्तिसङ्गतः स्यात् ? नित्यस्य चात्मनोऽसंभवे कथं तेन सात्मकत्वं घटादिषु सन्दिग्धं येन निरात्मकाद् घ[6]टादेः प्राणादिमत्त्वादेः सन्दिग्धो व्यतिरेको भवेत् । तस्मात् परिणाम्यात्मव्यतिरेकेण जीवच्छरीरस्य प्राणादिमत्त्वमनुपपन्नम् निरंशस्यैकपरमाणुवत् तदुपकारासंभवाच्च कूटस्थेन निरंशक्षणिकविज्ञानपरमाणुसन्ततिरूपेण चात्मना सात्मकत्वसाधने तस्येष्टविघातकृद् विरुद्धः प्राणादिमत्त्वादि[7]र्हेतुः प्रसज्यते ।

अथ साध्याभावे सर्वत्र साधनाभावो व्यतिरेकः साध[8]नसद्भावेऽपि साध्यसद्भावाभावे व्यतिरेक एव न भवेत् साधनाभावेन साध्याभावस्याव्याप्तत्वात् य एव च साध्यसद्भाव एव साधनसद्भावः स एवान्वयः स च दृष्टान्तधर्मिणमन्तरेणापि साध्यधर्मिण्यपि विपर्यये[9] बाधकप्रमाणबलान्निश्चीयमानः कथमसन् ? न चैवं पक्षत्वेनेच्छाव्यवस्थितलक्षणेन तत्र पारमार्थिकस्य सपक्षत्वस्य बाधान्यथा साध्यधर्मिण्येव हेतुः अविद्यमानसाध्यधर्मे वर्तमानो विरुद्धः स्यात्-इति तत्र[10] तद्युक्त एव वर्त्तमानः कथं न सपक्षवृत्तिः ? इति यत्र व्यतिरेकसद्भावस्तत्रावश्यमन्वयः यत्र चासौ तत्रावश्यंभावी व्यतिरेक इति नैकसद्भावे द्वितीयस्याभावः; नन्वेवमपि 'श्व उदेष्यति सविता अद्यतनादित्योदयात्' 'जाता समुद्रवृद्धिः शशाङ्कोदयदर्शनात्' इत्यादिप्रयोगेषु हेतोः पक्षधर्मत्वाभावेऽपि गमकत्वोपलब्धेर्न पक्षधर्मत्वं [11]तल्लक्षणम् अथात्रापि कालस्य देशस्य वा तावतः पक्षत्वमिति पक्षधर्मता, न; कालस्याकाशस्य च पक्षत्वेन सौगतस्यानिष्टेः । अथापि भूतसंक्षोभादिलक्षणः कालः आ[12]काशं वा पक्षत्वेनाभ्युपगम्यत एवेति नापक्षधर्मता, न; लोकस्य साध्यान्यथानुपपन्नहेतुप्रदर्शनमात्रादेव पक्षधर्मत्वाद्यनुस्मरणमन्तरेणापि साध्यप्रतिपत्तिदर्शनात् त्रैलक्षण्यस्य तत्र सतोऽप्यकिञ्चित्करत्वात् । न च सौगताभ्युपगमेन हेतोः पक्षधर्मता सम्भवति सामान्य[13]स्यावस्तुतयाऽभ्युपगतस्य हेतुत्वे शशशृङ्गादे[14]रिव पक्षधर्मताऽसम्भवात् स्वलक्षणस्य च हेतुत्वे पक्ष एव हेतुरिति नैतद्धर्मो हेतुः अभेदे धर्मिधर्मभावस्यानुपपत्तेः स्वलक्षणस्य चान्यत्रानुगमान्नान्वयसिद्धिः अतद्रूपपरावृत्तस्य तस्य हेतुत्वेऽपि स्वलक्षणपक्षभावी दोषस्तदवस्थ एव अतद्रूपपरावृत्तेः स्वलक्षणादव्यतिरेकात् व्यतिरेके अनुगतत्वे पारमार्थिकत्वे च सामान्यस्य भङ्ग्यन्तरेण हेतुत्वमभ्युपगतं भवेत् कल्पनाविरचितस्य हेतुत्वे

१-श्च प्रमाणादी-ल० आ० हा० वि० । २ "प्राणादीनाम्"-बृ० ल० टि० । ३ "सोत्साह"-बृ० ल० टि० । ४-[3]रसनिर-बृ० । ३-१ इत्यङ्कौ तृतीयातत्पुरुषसूचकौ भातः । ५ तत् उ-भां० मां० विना । ६-तश्चित्तक्षणान्त-बृ० ल० वा० बा० विना । ७ घटादेः सोत्साह प्राणादि-आ० हा० वि० । अत्र "सोत्साह" इति तृतीयटिप्पनकं पाठे प्रविष्टं भाति । घ[1]टादेः बृ० । अङ्कौ पञ्चम्येकवचनसूचकौ बोद्धव्यौ । ८-मत्त्वादेः[1] बृ० । षष्ठ्येकवचनसूचकावङ्कौ ज्ञातव्यौ । ९-धनाऽस-वा० बा० ।—धनास-भां० मां० । १०-ये वा बा-बृ० आ० विना । ११ "साध्यधर्मिणि साध्यधर्मः"—बृ० टि० । १२ "हेतु"-बृ० टि० । १३ "आलोकसंज्ञकम्"-बृ० ल० टि० । १४-न्यस्य व-वा० बा० । १५-देरेव भां० मां० ।

कुतः पक्षधर्मता ? कल्पनायाः परमार्थतो वस्त्वसंस्पर्शादित्युक्तं प्राक् । न च परपक्षे पक्षधर्मत्वं संभवति पक्षलक्षणस्यैवासंभवात् । "जिज्ञासितविशेषो धर्मी पक्षः" [न्यायबिं० २,८] इति तल्लक्षणं चेत् नैतत् यतो न तावत् शब्दे वादी अनित्यत्वं जिज्ञासितुमर्हति स्वनिश्चयवदन्येषां निश्चयोत्पादनाय तेन साधनप्रयोगात् । नापि प्रतिवादी, प्रतिपक्षप्रसाधनाय वाद्युक्तसाधनप्रतिघाताय च तस्य प्रवृत्तेः । नापि प्राश्निकाः तेषां विदितवेद्यतया तत्र जिज्ञासाऽसंभवात् । स्वार्थानुमाने च हेतोर्लक्षणं न कथञ्चित् तद्युक्तितः स्वयमेव तत्र जिज्ञासनात् । एतेन "प्रतिपिपादयिषितविशेषो धर्मी" [ ] इत्यपि लक्षणं प्रतिविहितम् यदर्थमनुमानमुपन्यस्तं तेन तत्र जिज्ञास्यविशेषो धर्मी पक्ष इति चेत्, न; हेतावपि समर्थनात् प्राग् जिज्ञासनीयविशेषत्वात् पक्षत्वप्राप्तेः । साध्यत्वेन बुभुत्सितविशेषो धर्मी पक्ष इति चेत्, न; बुभुत्सितग्रहणस्यानर्थकत्वात् । साध्यविशेषो धर्मीति चेत् तथापि न किञ्चिद्विशेषग्रहणेन धर्मिग्रहणेन वा प्रयोजनमिति न पक्षलक्षणं परोदितमनवद्यम् । तस्माद् यदन्तरेण यन्नोपपद्यते तत् साधनमितरच्च साध्यमित्येतावदेव पक्षादिलक्षणमनवद्यम् । "स्वरूपेणैव निर्देश्य" [ ] इत्यादिकमपि पक्षलक्षणमेकान्तवादिनोऽसङ्गतम् धर्मिधर्मभावस्यैकान्तवादे कथंचिदप्यनुपपत्तेरित्यसकृत् प्रतिपादनात् । तदेवं त्रैलक्षण्यस्यासंभवात् संभवेऽपि सति साध्याविनाभावित्वमात्रेणैव हेतोर्गमकत्वान्न किञ्चित् पक्षधर्मत्वादिना रूपान्तरेणेति । तथाहि—न क्वचित् धूमसत्ताग्निविनाभाविनीति सिद्धमविनाभावित्वम् तत्सिद्धौ च सत्यपि पक्षधर्मादिवचने तथैव गमकत्वम् न हि वास्तवं रूपं साध्याविनाभावित्वलक्षणं हेतोरुपलभ्यमानं पक्षधर्मत्वादिवचनेऽवचने वा स्वसाध्यं न साधयति न हि वस्तुबलायातां स्वसाध्यप्रतिपादनशक्तिं लिङ्गं पक्षधर्मत्वादिवचनादवचनाद् वा मुञ्चति वस्तुशक्तीनां वचनादव्यावृत्तेः । अथ त्रैलक्षण्यमपि हेतोः संभवतीति तदपि लक्षणत्वेन प्रकल्प्यते सत्यं संभवति किन्तु अविनाभावित्वेनैव हेतोः गमकत्वं सिद्धं न किञ्चित्तल्लक्षणवचनेन । तथाहि-यद्रूपानुवादेन हेतोः स्वरूपं लक्ष्यते तदेव लक्षणत्वेनानुवदितव्यमित्यविनाभावित्वरूपानुवादमात्रेण हेतुलक्षणस्य परिसमाप्तेर्न पक्षधर्मत्वादि विधेयमनुवदितव्यं वा लक्षणत्वेन । न च तत् तत्र संभवतीति लक्षणत्वेन वाच्यम् तथाभ्युपगमे अबाधितविषयत्वमपि तादृग्विधे हेतौ संभवतीति लक्षणान्तरत्वेन वचनीयं स्यात् । अथाविनाभावित्वं सदपि पक्षधर्मत्वाद्यभावेऽगमकम्, न, व्याहतत्वात् । तथाहि—अविनाभावित्वं स्वसाध्येन विना तस्यासंभव उच्यते अगमकत्वं तु विनापि साध्यं संभवत्तस्यैवेति कथं नान्योन्यविरुद्धयोर्व्याहतिः ? अथ धर्मिणोऽन्यत्राविनाभावित्वं तस्य न पुनर्विवादाधिकरणे धर्मिणीति न पक्षधर्मत्वाद्यभावे तस्य गमकत्वम् तत् किमयं तपस्वी विवादाधिकरणो(णं) धर्मी शण्ढमुद्वाह्य पुत्रं मृग्यते । तथाहि-अन्यत्र तदविनाभावित्वम् विवादाधिकरणे तु तन्नास्तीति कथमन्यस्तद्वानुच्यते ? न च धर्मः केवलो यदा हेतुस्तदा स केवलो न संभवतीति न तावन्मात्रस्याविनाभावित्वमिति यतो धर्ममात्रवचनेऽपि साधारस्यैवाविनाभावित्वम् यथा कृतकत्वमनित्यत्वमन्तरेणानुपपद्यमानं कृतकत्ववत्स्वेव भावेषु व्यवतिष्ठते न ह्यन्यत्र तत्कृतकत्वं नाप्यविनाभावीति कृतकत्वस्याविनाभावित्वमाक्षिप्तधर्मिस्वरूपमेवेति सामर्थ्यसिद्धम् । तेन नावश्यं तत्सत्त्वं वचनेन विधातव्यं धर्मोपरक्तधर्मिणि पृथक्पक्षधर्मत्ववचनमन्तरेणाप्यन्यथानुपपन्नत्वं कृतकस्यार्थस्य स्वरूपं जानानस्तदुपलभमान एव तदविनाभाविनमपरं स्वभावं झगित्यवगच्छति यतो नानेन पूर्वमन्यथानुपपत्तिरूपनिश्चयसमयेऽन्यत्र व्यवस्थितो धूमोऽन्यत्र व्यवस्थितेन वह्निना विनाऽनुपपन्न इत्यविना-

१ "अनुमेयोऽत्र जिज्ञासितविशेषो धर्मी" इति न्यायबिन्दुसूत्रस्यांशरूपं वचनमेतद् बोद्धव्यम् ।

२ "स्वनिश्चयवदन्येषां निश्चयोत्पादनं बुधैः । परार्थं मानमाख्यातं वाक्यं तदुपचारतः" ॥—न्यायावता० श्लो० १० ।

३ अत्र 'जिज्ञासितुमर्हति' इति पूर्वोक्तमध्याहार्यम् । ४–**क्षसा**–बृ० ।

५ "अन्यथाऽनुपपन्नत्वं हेतोर्लक्षणमीरितम् । तदप्रतीतिसन्देहविपर्यासैस्तदाभता" ॥—न्यायवता० श्लो० २२ ।

६ "अन्यथानुपपद्यमानत्वम्"–बृ० टि० । **लिङ्गम्** बृ० । १–१ इत्यङ्काभ्यां प्रथमैकवचनं सूचितमस्ति । ७–**रणध**–आ० हा० वि० । ८–**रणे ध**–वा० बा० । ९ एतत्समानो न्यायो लौकिकन्यायाञ्जलावयं वर्तते—"पण्डकमुद्वाह्य मुग्धायाः पुत्रप्रार्थनम्"—भा० २ पृ० ४६ । तत्रास्य न्यायस्य उपयोगस्थलान्यपि दर्शितानि सन्ति ।

१० "पक्षधर्मे"–बृ० टि० । ११–**पन्नं कृ**–भां० मां० । १२ **जानाति न स्त**–मां० । **जानीमस्त**– बृ० । **जानमस्त**–आ० हा० वि० । १३–**लभ्यमा**–भां० मां० आ० हा० वि० ।

भावः प्रतीतः नाऽपि तयोस्तथाविधः प्रतिबन्धः न च प्रदेशव्यवस्थितं धूममुपलभमानोऽवश्यंतया 'यत्र यत्र धूमस्तत्र तत्राऽग्निः' इति 'तथा चेह धूमः' इति परामृश्य 'अग्निमान्' इति प्रत्येति किन्तु परिज्ञातविनाभावो 'धूमदर्शनानन्तरं प्रदेशेऽग्निरत्र' इति प्राक्तनानुभवदार्ढ्यात् स्मरति 'असत्यत्र वह्नौ धूम एव न स्यात्' इति लिङ्गरूपानुस्मरणं प्रकृतस्मरणस्य तथाभावमन्तरेणाभावप्रदर्शनार्थम् ।

अथात्रापि ऽन्यथानुपपन्नं स्वरूपं हेतोः क्वचिदनेन निश्चेतव्यम् यत्र च तन्निश्चीयते स सपक्षः पुनस्तथाविधरूपवेदिनां यत्रासौ हेतुस्तत्रैव ततो हेतोस्तदन्यप्रतिपत्तिरिति पक्षधर्मान्वयव्यतिरेकबलादेव हेतुर्गमक इति, नैतत् सारम्; यतोऽविनाभावित्वरूपेणैव सपक्षे सत्त्वमत्राक्षिप्तमिति न रूपान्तरम् । तथाहि–अविनाभावित्वं रूपं ज्ञातं सद् गमकमिति तत् क्वचिद् ज्ञातव्यम् तेन तद्रूपपरिज्ञानोपायत्वात् तदरूपं सदविनाभावित्वमेवैकं हेतो रूपं विधीयमानं स्वात्मन्यन्तर्भावयति ज्ञेयसत्ताया ज्ञानसत्तानिबन्धनत्वात् ज्ञानं यथा न पृथग्रूपं तथा क्वचित् सपक्षे सत्त्वमप्यपश्यतः तदविनाभावि-रूपग्रहणाभाव इति तदेवैकं रूपं विधीयमानमन्यत् सर्वमाक्षिपतीति न तस्माद्धेतोरन्यद्रूपं युक्तम् । अथ तैर्विना तदेवैकं रूपं हेतोर्न ज्ञायत इति रूपान्तरं कल्प्यते तर्हि न केवलं सपक्षे सत्त्वं विना तद्रूपं न ज्ञायते किन्तु बुद्धीन्द्रियादिकमपि विना तन्न ज्ञायते इति तेषामपि तद्रूपताप्रसक्तिः । अत एव "अपक्षधर्मस्यापि हेतोर्गमकत्वे चाक्षुषत्वमपि शब्दे नित्यत्वस्य गमकं स्यात्" [ ] इति परोक्तमपास्तम् यतश्चाक्षुषमनित्यत्वाविनाभावि शब्दश्चाक्षुषो न भवतीति कुतोऽत्र दोषावकाशः ? यदपि 'यदि धूमोऽदृश्यविनाभावित्वमात्रादग्निं गमयेत् महाम्बुराशौ किं न गमयेत् ?' इति चोद्यम् तदप्यसङ्गतम् यतो नान्यदेशो धूमोऽम्भोनिधिपावकाविनाभावी सिद्धः तद्देशसाध्याविनाभावित्वात् तस्य । अत एव यद्यप्यन्यदेशस्थो हेतुर्नान्यदेशस्थसाध्याविनाभावी तथाप्यपक्षधर्मोऽसौ गमको न भवतीत्यस्यार्थस्य ज्ञापनार्थं पृथक् पक्षधर्मत्ववचनं लक्षणे विधेयमिति न वक्तव्यम् साध्यान्यथानुपपन्नत्वैकरूपप्रतिपत्तेरेव तदर्थस्य लब्धत्वात् । एतेन 'न स त्रिविधाद्धेतोरन्यत्रास्तीति अत्रैव नियत उच्यते' इत्यपि निरस्तम् यथोक्तप्रकारेण साध्याविनाभावित्वस्यैव त्रित्वव्यापकत्वात् तद्विकलस्य तस्य विद्यमानस्याप्यकिञ्चित्करत्वात् किञ्चित्करत्वेऽप्यविनाभावित्वैकरूपनिर्णयनिमित्ततया दृष्टान्तादिवद् हेत्वनङ्गत्वात् । स्वभावकार्यानुपलम्भकल्पनामन्तरेणाप्यन्यथानुपपत्तिमात्राद्धेतोर्गमकत्वोपपत्तेर्नाविनाभावः त्रिसंख्येन हेतुना व्याप्तः । तथाहि-वृक्षाच्छायानुमानं लोके प्रसिद्धम् न च वृक्षस्तच्छायाकार्यं सहभावित्वात्, नापि स्वभावः स्वभावभेदोपलब्धेः । एतेन तुलादेर्नमनाद् उन्नामाद्यनुमानं चिन्तितम् 'परभागवान् इन्दुः अर्वाग्भागवत्त्वात् घटादिवत्' इत्यत्रापि न तादात्म्यं तदुत्पत्तिर्वा पराभ्युपगमेन संभवति ऊर्ध्वभागवतामधोभागवतां च परमाणूनां स्वभावभेदात् सहभावाच्च । एकसामग्र्यधीनताप्रतिबन्धकल्पनायां रूपादे रसादेरिवानुमानं कारणात् कार्यानुमानं प्रसक्तम् । तथाहि–समानकालभाविनो रूपादेर्यद् रसतोऽनुमानं तत् तत्कारणाद् रूपजनकादनुमितादनुमानम् । न च-समानकालभावि रूपजनकत्वानुमानं रसहेतोरेतदिति हेतुधर्मानुमानम् कारणात् कार्यानुमानेऽप्येवं दोषाभावात् । न चात्रैवं लोकप्रतीत्यभावदोषः हेतुधर्मानुमानेऽपि लोकप्रतीतेरभावात् । तथाहि—तथाविधरसोपलम्भात् तत्समानकालं तथाविधं रूपम् अर्वाग्भागदर्शनाच्च परभागं लोकः प्रतिपद्यते न पुनर्विशिष्टं कारणम् । अथाप्रतिबद्धादेकतोऽन्यप्रतिपत्तावतिप्रसङ्गः, न; अविनाभूतादन्यतोऽन्यप्रतिपत्त्यभ्युपगमात् । अथ प्रतिबन्धमन्तरेणान्यस्यान्याविनाभाव एव कुतः ? ननु प्रतिबन्धोऽप्यपरप्रतिबन्धमन्तरेणान्यस्यान्येन कुतः ? अथ प्रतिबन्धोऽपि न वास्तवः प्रतिबद्धयोरन्यः किन्तु कारणानन्तरमपरस्य कार्याभिमतस्य भावो वस्तुस्वरूपमेव तच्च पूर्वोत्तरवस्तुस्वरूपग्राहिप्रत्यक्षानुपलम्भाभ्यां निश्चीयते तन्निश्चयनमेव कार्यकारणभावप्रतिबन्धनिश्चयनम् । नन्वेवं प्रत्यक्षानुपलम्भाभ्यामन्येनान्य-

१–**भावप्र**–बृ० आ० हा० वि० । २ "अविनाभावः"–बृ० टि० । ३–**त्रान्य**–भां० मां० । ४ "साध्य"–बृ० टि० । ५ **कल्पते** भां० वि० । ६ **शब्दनित्य**–वा० बा० । ७ "पक्षधर्मत्व"–बृ० टि० । ८ **स द्विवि**–बृ० । "अविनाभावः"–बृ० टि० । ९ पृ० ५५८ पं० ३०–३१ तथा पृ० ५५६ टि० पं० १५ । १० "पक्षधर्मादेः"–बृ० टि० । ११ "सहभाविनो(नोः) कार्यकारणभावाभावात् तत्र च तद्भावादिति"–बृ० टि० । १२–**मन्तेभाग**–बृ० विना । १३ "रसकारणात्"–बृ० टि० । १४–**व तं सप्तम्या तच्च** आ० हा० ।–**व स तं सप्तम्या तच्च** वि० । अत्र किमपि टिप्पणमन्तः प्रविष्टमाभाति । १५ **पूर्वोक्त व**–बृ० । इदं पाठान्तरं न मूललेखकेन लिखितं किन्तु तावति रिक्ते स्थाने पश्चात् केनचित् पूरितमिति लिपिभेदाद् मषीभेदाच्च स्पष्टं ज्ञायते । १६–**रणाभा**–आ० हा० वि० ।

स्याविनाभावित्वनिश्चयेऽपि न दोषः। अथैकदान्येनान्यस्याविनाभावित्वदर्शनेऽपि सर्वदा सर्वत्रानयोरेवमेव भाव इति न दर्शनादर्शनाभ्यां निश्चेतुं शक्यम् प्रतिबन्धग्रहणे तु नायं दोषः कर्पूरोर्णादीन्धनस्वभावानुकारिधूमस्वरूपग्राहिणा विशिष्टाध्यक्षेण सकृदपि प्रवृत्तेनाग्निधूमयोः कार्यकारणभावनिश्चयात् 'सर्वदाऽनग्निव्यावृत्ताग्निजन्योऽधूमव्यावृत्तो धूमः' इति निश्चीयते अन्यथाऽन्यदैकदाप्यग्नेर्धूमस्योत्पादो न भवेत् अहेतोः सकृदप्यभावात् भावे वा निर्हेतुकताप्रसक्तेः। तदुक्तम्-'कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितः' इत्यादि अयुक्तमेतत् परपक्षे कार्यधर्मानुवृत्तेरेवायोगात्। एकदेशेन कार्यधर्मानुवृत्तावनेकान्तवादप्रसक्तेः सर्वात्मना तदनुवृत्तौ कार्यस्य कारणरूपतापत्तेः कार्यकारणभावाभावप्रसङ्गात् इत्युक्तत्वात्। किञ्च, सर्वदा सर्वत्राग्निजन्यो धूम इति न प्रत्यक्षमनुपलम्भसहायमपीयतो व्यापारान् कर्तुं समर्थम् सन्निहितविषयबलोत्पत्तेरविचारकत्वाच्च। तत्पृष्ठभाविनोऽपि विकल्पस्य नात्रार्थे सामर्थ्यम् तदर्थविषयतया तस्य गृहीतग्राहित्वेनाप्रामाण्याभ्युपगमात्। अनुमानमपि नैवं प्रतिबन्धग्राहकम् अनवस्थेतरेतराश्रयदोषप्रसक्तेः। न च भवत्पक्षेऽप्यविनाभावित्वग्रहणे हेतोरयं समानो दोषः यतोऽन्यथानुपपन्नैकलक्षणो हेतुरित्यस्माकं हेतुलक्षणम् अन्यथानुपपन्नत्वं च तादात्म्यतदुत्पत्त्योः पूर्ववत्-शेषवत्-सामान्यतोदृष्टास्मित्येषां च तथैकार्थसमवायि-संयोगि-समवायीत्यादीनां च तथा वीतमवीतं वीतावीतं चेत्यादीनां च सर्वहेतूनां व्यापकम् सति गमकत्वे सर्वेषामप्येषां साध्याविनाभावित्वात् तद्विकलानां च गमकत्वायोगात्; तस्य च ग्राहकमूहः प्रत्यक्षानुपलम्भप्रभवः प्रमाणम् तच्चाविसंवादकत्वादनक्षजत्वाल्लिङ्गजत्वाच्च स्वार्थाध्यवसायरूपं मतिनिबन्धनमस्माकम(कम्) प्रमाणान्तरं परैः प्रमाणान्तरत्वेनावश्यमभ्युपगन्तव्यम् अन्यथा व्याप्तिग्राहकप्रमाणाभावतोऽनुमानस्याप्यप्रवृत्तिप्रसक्तेः। अत एवानुमानं प्रमाणमभ्युपगच्छता 'प्रत्यक्षमनुमानं चेति द्वे एव प्रमाणे' इति न वक्तव्यम् अनुमानाभ्युपगमे यथोक्तन्यायेन प्रमाणान्तरस्याप्यापत्तेः। यदपि 'गोत्वाद् विषाणी' इत्यादौ 'समुदायव्यवस्थायाः कारणं समुदायिनः' इत्यभिहितम् तत्रापि व्यवस्था यदि शब्दात्मिका अथ विकल्पात्मिकाभ्युपगम्यते उभयथाऽपि नार्थेन प्रतिबन्धसिद्धिः अतो न कार्यहेतुर्गमकः नापि स्वभावहेतुरविनाभावैकल्ये इति स्थितम् 'उपलब्धिलक्षणप्राप्तस्य' इत्यनुपलब्धौ विशेषणोपादानं चानर्थकम् परचैतन्य-भूत-ग्रहादीनामदृश्यानामपि क्वचिदभावसिद्धेर्दाहादिव्यवहारदर्शनात्। यदि पुनरनुपलब्धिलक्षणप्राप्तानुपलब्धेरभावो न सिध्येत् 'नेदं निरात्मकं जीवच्छरीरम् अप्राणादिमत्त्वप्रसङ्गात्' इत्यत्र प्रयोगेऽदृश्यानुपलम्भादभावासिद्धेर्घटादीनां नैरात्म्यासिद्धितो 'यत् सत् तत् सर्वं क्षणिकम्' इति व्याप्तेः साकल्येनासिद्धौ प्रकृतोऽपि क्षणभङ्गो भावानां न सिद्धिमासादयेत्। यथा च तादात्म्यतदुत्पत्तिलक्षणप्रतिबन्धग्रहणं परपक्षे न संभवति तथा असकृत् प्रतिपादितम् तेन 'त्रिसंख्यहेतुव्यतिरिक्तेषु तथाविधप्रतिबन्धाभावादविनाभावस्य हेतुत्वव्यापकस्याभावाद्धेत्वाभासत्वम्' इति यदुक्तं तन्निरस्तं द्रष्टव्यम् यथोक्तप्रतिबन्धेन त्रित्वस्याविनाभावस्य चाव्याप्तेः उक्तन्यायेन तेनैव तयोर्व्याप्तेः। अतः 'संयोग्यादिषु येष्वस्ति प्रतिबन्धो न तादृशः' इत्यादि सर्वमयुक्ततया व्यवस्थितम्। यथोक्तहेतुप्रभवस्य च साध्यनिश्चयस्यानुमानत्वेऽन्यतः सम्बद्धात् सामान्याकारेण प्रतिपत्तिरनुमानमित्यादि प्रमाणान्तरस्य तत्रान्तर्भावप्रतिपादनमयुक्तम् यथोक्तन्यायात्। शब्दस्य चाप्तप्रणीतत्वेन सामान्यविशेषात्मकबाह्यार्थविषयस्य यथा प्रमाणान्तरत्वं तथा प्राक् प्रतिपादितम्। अर्थापत्तेश्च प्रमाणत्वेनानुमानेऽन्तर्भावनं सिद्धसाधनमेव। अभावस्य च पृथगप्रामाण्यप्रतिपादनमस्माकमभीष्टमेव सदसदात्मकवस्तुतत्त्वग्राहिणाऽध्यक्षेण यथाक्षयोपशमं भावांशवदऽभावांशस्यापि ग्रहणात्। केवलं क्वचिदुपसर्जनीकृतसदंशस्य प्रधानतयाऽसदंशस्य ग्रहणं क्वचिच्च विपर्ययेण। न च सदंशासदंशयोरे-

---

१-**वृत्त्याग्नि**-बृ० आ० हा० वि०। २ पृ० ५६९ पं० १८ टि० ३। "पश्चार्धं तु-स भवंस्तदभावेऽपि हेतुमत्तां विलङ्घयेत् ॥"-बृ० टि०। स भवंस्तदभावेऽपि हेतुमत्तां विलङ्घयेत्। इति अपरार्धम् ॥-ल० टि०। ३-**दीनां स**-बृ० आ० हा० वि०। ४ ऊहस्य परोक्षप्रमाणभेदत्वेन समर्थनं प्रमेयकमलमार्तण्ड-स्याद्वादरत्नाकराभ्यामवसेयम्—पृ० १०० द्वि० पं० ४-११। पृ० ५०० पं० ९-पृ०५१६ पं० १५ आ०। ५-**त्वाल्लिङ्ग**-आ० हा० वि०। ६ **स्वार्थाध्यवसा**-बृ०। **स्वार्थव्यवसा**-आ० हा० वि०। ७-**सिद्धे—र्दा**-वा० बा०। ८-**रात्म्यसि**-वा० बा० भां० मां० विना। ९-**स्य वाच्या**-वा० बा०। १० पृ० ५५९ पं० ११ तथा पृ० ५५७ टि० पं० २। ११-**श्च प्रामाण्यमनुमा**-बृ०। १२-**नमभाव**-बृ०।

कान्तेन भेदोऽभेदो वा उभयात्मकतया जात्यन्तररूपस्य वस्तुनो विरोधादिदोषविकलस्य साधितत्वात्। तेनैकान्तभेदाभेदपक्षावाश्रित्यानवस्थादि सकलमेव दूषणजातमनास्पदम् अध्यक्षप्रमाणप्रसिद्धे सदसदात्मके वस्तुनि सर्वस्य दूषणत्वेनाभिहितस्य तदाभासत्वात्। उपमानादेरप्यविसंवादकस्य प्रमाणत्वे सर्वस्य परोक्षेऽन्तर्भावात् अन्यसंख्याव्युदासेन प्रत्यक्षं परोक्षं चेति द्वे एव प्रमाणे अभ्युपगन्तव्ये अन्यथा तत्संख्यानवस्थितेः। ५

[मुख्यवृत्त्या संव्यवहारेण च परोक्षप्रमाणस्य स्वरूपविभजनम्]

किं पुनरिदं परोक्षम्? अविशदमविसंवादि ज्ञानं परोक्षम्। तेन—

"मुख्यसंव्यवहारेण संवादि विशदं मतम्।
ज्ञानमध्यक्षमन्यद्धि परोक्षमिति संग्रहः" ॥ [ ] इति।
"यद् यथैवाविसंवादि प्रमाणं तत् तथा मतम्। १०
विसंवाद्यप्रमाणं च तदध्यक्ष-परोक्षयोः" ॥ [ ]

तिमिरादुपप्लुतं ज्ञानं चन्द्रादावविसंवादकत्वात् प्रमाणम् तत्संख्यादौ तदेव विसंवादकत्वादप्रमाणं प्रमाणेतरव्यवस्थायास्तल्लक्षणत्वात् यतो ज्ञानं यदप्यनुकरोति तत्र न प्रमाणमेव समारोपव्यवच्छेदापेक्षत्वात् अन्यथा दृष्टे प्रमाणान्तरवृत्तिर्न स्यात् कृतस्य करणायोगात् तदेकान्तहानेः कथंचित् करणानिष्टेः तदस्य विसंवादोऽप्यवस्तुनिर्भासाच्चन्द्रादिवस्तुनिर्भासादविसंवादोऽपीत्येकस्यैव ज्ञानस्य १५
यत्राविसंवादस्तत्र प्रमाणता इतरत्र तदाभासतेति प्राक् प्रतिपादितत्वान्न पुनरुच्यते। स्थितमेतत् प्रत्यक्षं परोक्षं च द्वे एव प्रमाणे।

अत्र च मति-श्रुताऽवधि-मनःपर्याय-केवलज्ञानानां मध्ये मति-श्रुते मुख्यतः परोक्षं प्रमाणम्। अवधि-मनःपर्याय-केवलानि तु प्रत्यक्षं प्रमाणम्। तदुक्तं वाचकमुख्येन

"मति-श्रुताऽवधि-मनःपर्याय-केवलानि ज्ञानम्"। २०
"तत् प्रमाणे"।
"आद्ये परोक्षम्"।
"प्रत्यक्षमन्यत्"। [तत्त्वार्थ० १-९,१०,११,१२]

अस्य च सूत्रसमूहस्य व्याख्या गन्धहस्तिप्रभृतिभिर्विहितेति न प्रदर्श्यते। परोक्षप्रमाणता च मतेर्मुख्यवृत्त्याऽत्र प्रदर्शिता। संव्यवहारतस्तु विशदरूपस्य मतिभेदस्य प्रत्यक्षताऽभ्युपगतैव ॥ १ ॥ २५

---

१ एतत्पद्यगतो भावः श्रीसमन्तभद्रेण "तत्त्वज्ञानं प्रमाणं ते"[-आप्तमी० श्लो० १०१] इति कारिकांशेन प्रतिपिपादयिषितः, स एव च भट्टारकाकलङ्केन अष्टशत्यां स्पष्टीकृतः। तद्यथा—

"बुद्धेरनेकान्तात् येनाकारेण तत्त्वपरिच्छेदस्तदपेक्षया प्रामाण्यमिति तेन प्रत्यक्षतदाभासयोरपि प्रायशः संकीर्णप्रामाण्येतरस्थितिरुन्नेतव्या प्रसिद्धानुपहतेन्द्रियदृष्टेरपि चन्द्रार्कादिषु देशप्रत्यासत्त्याद्यभूताकारावभासनात् तथोपहताक्षादेरपि संख्यादिविसंवादेऽपि चन्द्रादिस्वभावतत्त्वोपलम्भात् तत्प्रकर्षापेक्षया व्यपदेशव्यवस्था गन्धद्रव्यादिवत्। तथानुमानादेरपि कथंचिन्मिथ्याप्रतिभासेऽपि तत्त्वप्रतिपत्त्यैव प्रामाण्यम्"—अष्टश० अष्टस० पृ० २७६ पं० १५-। २-**क्षयोः ॥ अस्ति तैमि**-भां०।-**क्षयोः ॥ अस्ति तिमि**-मां०। ३-**दप्युपक**-भां० मां०। ४ "मति-श्रुते"-बृ० टि०।

[दर्शनविषयीभूतस्य प्रमेयस्य न विशेषाकारेण शून्यत्वम् न वा ज्ञानविषयीभूतस्य सामान्याकारेण इति निरूपणम्]

सामान्यविशेषात्मके च प्रमाणप्रमेयरूपे वस्तुतत्त्वे व्यवस्थिते द्रव्यास्तिकस्यालोचनमात्रं विशेषाकारत्यागि दर्शनं यत् तत् सत्यम् इतरस्य तु विशेषाकारं सामान्याकाररहितं यद् ज्ञानं तदेव पारमार्थिकमभिप्रेतम् 'प्रत्येकमेषोऽर्थपर्यायः' इति[1] वचनात् । प्रमाणं तु द्रव्यपर्यायौ दर्शन-ज्ञानस्वरूपावन्योन्याविनिर्भागवर्तिनाविति दर्शयन्नाह—

दव्वट्ठिओ वि होऊण दंसणे पज्जवट्ठिओ होइ ।
उवसमियाईभावं पडुच्च णाणे उ विवरीयं ॥ २ ॥

अस्यास्तात्पर्यार्थः—दर्शनेऽपि विशेषांशो न निवृत्तः नापि ज्ञाने सामान्यांश इति ।

द्रव्यास्तिकोऽपि[2] इति आत्मा द्रव्यार्थरूपः स **भूत्वा दर्शने** सामान्यात्मके स ह्यात्मा चेतनालोकमात्रस्वभावो भूत्वा तदैव **पर्यायास्तिको** विशेषाकारोऽपि **भवति** । यदा हि विशेषरूपतयाऽऽत्मा संपद्यते तदा सामान्यस्वभावमपरित्यजन्नेव विशेषाकारश्च विशेषावगमस्वभावं ज्ञानं दर्शने सामान्यपर्यालोचने प्रवृत्तोऽप्युपात्तज्ञानाकारः न हि विशिष्टेन रूपेण विना सामान्यं संभवति। एतदेवाह—**औपशमिकादिभावं प्रतीत्य** इति औपशमिक-क्षायिक-क्षायोपशमिकादीन् भावान् अपेक्ष्य विशेषरूपत्वेन **ज्ञानस्वभावाद् वैपरीत्यं** सामान्यरूपतां प्रतिपद्यते विशेषरूपः सन् स एव सामान्यरूपोऽपि भवति न ह्यस्ति सामान्यं विशेषविकलं वस्तुत्वात् शिवकादिविकलमृत्त्ववत् विशेषा वा सामान्यविकला न सन्ति असामान्यत्वात् मृत्त्वरहितशिबकादिवत् ॥ २ ॥

[उपयोगस्वाभाव्यादेव छाद्मस्थिकयोर्ज्ञान-दर्शनयोः क्रमवर्तित्वम् न पुनः केवलिगतयोस्तयोः सहवर्तित्वात् इति प्रतिपादनम्]

अत्र च सामान्यविशेषात्मके प्रमेयवस्तुनि तद्ग्राहि प्रमाणमपि दर्शनज्ञानरूपं तथापि च्छद्मस्थोपयोगस्वाभाव्यात् कदाचिद् ज्ञानोपसर्जनो दर्शनोपयोगः कदाचित्तु दर्शनोपसर्जनो ज्ञानोपयोग इति क्रमेण दर्शनज्ञानोपयोगौ क्षायिके तु ज्ञानदर्शने युगपद्वर्तिनी इति दर्शयन्नाह सूरिः—

मणपज्जवणाणंतो[3] णाणस्स य दरिसणस्स य विसेसो ।
केवलणाणं पुण दंसणं ति णाणं ति य समाणं ॥ ३ ॥

मनःपर्यायज्ञानमन्तः पर्यवसानं यस्य विश्लेषस्य स तथोक्तः **ज्ञानस्य च दर्शनस्य च विश्लेषः** पृथग्भावः मत्यादिषु चतुर्षु ज्ञानदर्शनोपयोगौ क्रमेण भवत इति यावत् । तथाहि—चक्षुरचक्षुरवधिज्ञानानि चक्षुरचक्षुरवधिदर्शनेभ्यः पृथक्कालानि छद्मस्थोपयोगात्मकज्ञानत्वात् श्रुत-मनःपर्यायज्ञानवत् वाक्यार्थविशेषविषयं श्रुतज्ञानम् मनोद्रव्यविशेषालम्बनं च मनःपर्यायज्ञानम् एतद्द्वयमपि अदर्शनस्वभावं मत्यवधिज्ञानदर्शनोपयोगाद् भिन्नकालं सिद्धम् । **केवलज्ञानं पुनः** केवलाख्यो बोधः **दर्शनमिति** वा **ज्ञानमिति** वा यत् केवलं तत् **समानं** समानकालं द्वयमपि युगपदेवेति भावः । तथाहि—एककालौ केवलिगतज्ञानदर्शनोपयोगौ तथाभूताप्रतिहताविर्भूततत्स्वभावत्वात् तथाभूतादित्यप्रकाशतापाविव यदैव केवली जानाति तदैव पश्यतीति सूरेरभिप्रायः ॥ ३ ॥

---

१ पृ० ४५७ गा० १ पं० १०, १३ । २ "आत्मा न केवलं पर्यायार्थिकः"—बृ० टि० । ३-णाणंदो बृ० ।

[केवलज्ञान-दर्शनयोः सहभावित्वे विप्रतिपद्यमानानां केषांचिन्मतस्य साधिक्षेपं निर्देशः]

अयं चागमविरोधीति केषांचिन्[1]मतमुपदर्शयन्नाह—

केई[2] भणंति "जइया जाणइ तइया ण पासइ जिणो"त्ति ।
सुत्तमवलंबमाणा तित्थयरासायणाऽभीरू ॥ ४ ॥

---

१ "जिनभद्रक्षमाश्रमणादीनाम्"—ल० टि० ।

२ प्रस्तुतां केवलज्ञान-केवलदर्शनोपयोगचर्चां तुलनादृष्ट्या ऐतिहासिकदृष्ट्या चाभ्यसितुं जैनेतरदर्शनगतां सर्वज्ञत्वमीमांसां पूर्वं संक्षेपेणात्र पक्षप्रतिपक्षविभागपुरस्सरमुपन्यस्य अनन्तरं जैनदर्शनगता सा किञ्चिद् विस्तरतः प्रदर्शयितुमभिप्रेता ।

तथाहि—प्रथमं तावत् भारतीयदर्शनेषु सर्वज्ञत्वसम्भवासम्भवविषयावेव द्वौ पक्षौ स्तः । चार्वाका जैमिनीयाश्च सर्वज्ञत्वासम्भवपक्षग्राहिणः [मीमां० १-१-२ शाबरभा० तथा श्लो० वा० श्लो० ११३ प्रभृति, मीमां० १-१-४ शाबरभा० श्लो० वा० श्लो० २६] तदितरे च सर्वे दार्शनिकाः सर्वज्ञत्वसंभवपक्षग्राहिणः सन्ति ।

सर्वज्ञत्वसम्भवपक्षग्राहिष्वपि केचिदीश्वरवादिनः केचिच्चानीश्वरवादिनः । तत्र ईश्वरवादिनो वैशेषिक-नैयायिक-पातञ्जलौपनिषदाः अनीश्वरवादिनश्च साङ्ख्य-बौद्ध-जैनाः ।

ईश्वरवादिन ईश्वरे अनाद्यनन्तं-नित्यं-सर्वज्ञत्वं मन्यमानाः योगप्रकर्षपराकाष्ठाप्राप्तेषु केषुचिद् जीवात्मस्वपि सादिसान्तं-अनित्यं-सर्वज्ञत्वं स्वीकुर्वते [कन्दली पृ० ५६ पं० २४, प्रशस्तपा० पृ० १८७ पं० ७ तथा कन्दली पृ० १९५ पं० १९ । न्यायद० ४-१-२१ वात्स्या० भा० न्यायवा० न्यायवा० ता० टी० । न्यायमञ्ज० आ० २ पृ० १०३ पं० १९ तथा आ० ३ पृ० २०० पं० २८ । योगद० १-२५, ३-४९, ५५ ४-३१ भा० टी० । ब्रह्मसू० १-१-३,४,५,२-१-१, १४,२-३-१८ शाङ्करभा० भा० । श्रीभा० ।] परन्तु अनीश्वरवादिनः केषुचिद् योगिमूर्धन्येष्वेव जीवात्मसु सर्वज्ञत्वमभ्युपगच्छन्ति-["बुद्धानां हि सा भगवतां सर्वप्रकारं गोचरः सर्वाकारसर्वज्ञेयज्ञानाविघातादिति"—का० २२ विज्ञप्तिमात्र० वृ० पृ० ११ पं० ४ । "क्लेशा हि मोक्षप्राप्तेरावरणमिति अतस्तेषु प्रहीणेषु मोक्षोऽधिगम्यते ज्ञेयावरणमपि सर्वस्मिन् ज्ञेये ज्ञानप्रवृत्तिप्रतिबन्धभूतम् × × × तस्मिन् प्रहीणे सर्वाकारे ज्ञेयेऽसक्तमप्रतिहतं च ज्ञानं प्रवर्तत इत्यतः सर्वज्ञत्वमधिगम्यते" —का० १ त्रिंशिकाविज्ञ० भा० पृ० १५ पं० ८-११ ।

"अचित्तोऽनुपलम्भोऽसौ ज्ञानं लोकोत्तरं च तत्" । का० २९ त्रिंशिकाविज्ञ० ।

"आद्यस्य क्लेशबीजम् इतरस्य द्वयावरणबीजम् तदुद्घातात् सर्वज्ञतावाप्तिर्भवतीति"—का० २९ त्रिंशिकाविज्ञ० भा० पृ० ४४ पं० १७-१८]

अत्र मुख्यतया द्वौ विशेषौ ज्ञातव्यौ तत्र प्रथमो नित्यानित्यत्वविषयकः यथा साङ्ख्यसम्मतं सर्वज्ञत्वं जन्यत्वेन सादिकं देहादिपर्यन्तस्थायित्वेन च सान्तं बोद्धव्यम् जैनसम्मतं तु सार्वज्ञ्यं सादिकमपि प्रवाहरूपेणाविनश्वरत्वाद् विदेहावस्थायामपि सदा सत्त्वेन अनन्तं बोद्धव्यम् ।

द्वितीयश्च स्वरूपविषयो विशेषः स चायम्-वैशेषिकादिसकलजैनेतरदर्शनसम्मतमीश्वरीयमनीश्वरीयं वा सार्वज्ञ्यं सामान्य-विशेषतद्वत् सकलत्रैकालिकगोचरमेकविधमेव । जैनसम्मतं तु सार्वज्ञ्यं सामान्यविशेषात्मकसकलत्रैकालिकवस्तुगोचरं सदपि गौणप्रधानभावेन सामान्यावगाहितया विशेषावगाहितया च भिद्यमानं केवलज्ञानकेवलदर्शनसंज्ञाद्वयेन व्यपदिश्यते ।

तत्र जैनवादिनः सर्वेऽपि सर्वज्ञत्वं सर्वदर्शित्वं च निर्विवादमभ्युपगच्छन्तोऽपि तदीये स्वरूपे विप्रतिपद्यन्ते—केचित् केवलज्ञान-केवलदर्शनयोः क्रमं समर्थयन्ते । केचित् तयोर्यौगपद्यं व्यवस्थापयन्ति । केचिच्च तयोरैक्यं प्रस्थापयन्ति ।

अमी त्रयोऽपि पक्षाः श्वेताम्बरीयवाङ्मयेषु चर्चिताः लब्धावकाशाश्च दृश्यन्ते । दिगम्बरीयवाङ्मयेषु तु द्वितीय एव पक्षश्चर्चितो लब्धप्रतिष्ठश्चावेक्ष्यते ।

इमे त्रयोपि पक्षाः विशेषणवत्याम्, विशेषावश्यकभाष्ये, नन्दिसूत्रचूर्ण्याम् [लिं० लि० पृ० ८-९] हरिभद्रीयायाम् [वा० लि० पृ० २१-] मलयगिरीयायां च नन्दिसूत्रवृत्तौ, [पृ० १३४ द्वि०-पृ० १३८ द्वि०] धर्मसङ्ग्रहण्याम्, तत्त्वार्थभाष्यवृत्तौ [पृ० ११० पं० १४] प्रज्ञापनावृत्तौ [पृ० ५३१ प्र० पं० ९—पृ० ५३३ प्र०] ज्ञानबिन्दौ [पृ० १५४ पं० ४] च सविस्तरं दृश्यन्ते ।

अत्रोद्धियमाणाः सर्वा अपि गाथा विशेषणवत्यन्तर्गता अवबोद्धव्याः तासु या या विशेषावश्यकभाष्य-नन्दिसूत्रचूर्णि-नन्दिसूत्रलघुवृत्ति-धर्मसंग्रहणी-नन्दिसूत्रमलयगिरिवृत्तिषु आगताः तास्तत्र तत्र तत्तद्ग्रन्थनाम्ना सूचिताः । यच्च गाथा-विवरणप्रभृतिविशेषावश्यकभाष्यादिषु अधिकमुपयोगि च वर्तते तदपि तत्र तत्र टिप्पण्यां समुपन्यस्तम्—

"[1]केई भणंति जुगवं जाणइ पासइ य केवली नियमा। अण्णे एगंतरिअं इच्छंति सुओवएसेणं ॥ १८४ ॥
—नन्दि० चू०। नन्दि० ल०। धर्मसं० गा० १३३६। नन्दि० म०।
[2]अण्णे ण चेव वीसुं दंसणमिच्छंति जिणवरिंदस्स। जं चिय केवलणाणं तं चिय से दरिसणं बिंति ॥ १८५ ॥
—नन्दि० चू०। नन्दि० ल०। धर्मसं० गा० १३३७। नन्दि० म०।
[3]जंह किर खीणावरणे देसण्णाणाण संभवो ण जिणे। उभयावरणाईए तह केवलदंसणस्सावि ॥ १८६ ॥
—नन्दि० चू०। नन्दि० ल०। धर्मसं० गा० १३५२। नन्दि० म०।
[4]देसण्णाणोवरमे जह केवलणाणसंभवो भणिओ। देसदंसणविगमे तह केवलदंसणं होइ ॥ १८७ ॥
—नन्दि० चू०। नन्दि० ल०। धर्मसं० गा० १३५३। नन्दि० म०।
अह देसणाणदंसणविगमे तुह केवलं मयं नाणं। न मयं केवलदंसणमिच्छामेत्तं णणु तवेयं ॥ १८८ ॥
—नन्दि० चू०। नन्दि० ल०। धर्मसं० गा० १३५४। नन्दि० म०।
देसण्णाणाभावो जह अकसिणविसयलिंगलिंगित्ता। जुत्तो जिणम्मि एवं ण उ केवलदंसणाभावो ॥१८९॥
अहवा ण चेव देसण्णाणाभावो जिणम्मि किं कज्जं ?। जाणइ जेण जिणंदो तेसिं विसए अपरिसेसे ॥१९०॥
तह वि य ण पंचणाणी भण्णइ समयम्मि मा हु होजाहि। केवलणाणाकसिणप्पसंगदोसो जिणंदस्स ॥१९१॥
पुण्णे महातलागे णत्थि पभुत्तं तदंतवत्तीणं। जह सेसतलागाणं जिणम्मि तह सेसणाणाणं ॥१९२॥
अहवा जह संताण वि गह-ताराईण दिणकरब्भुदए। न पुहुत्तमेवमण्णण्णाणाणं केवलब्भुदए ॥१९३॥
अहवा खओवसमियत्तणेण छउमत्थभाववत्तीणि। केवलणाणं खइयं जेण जिणे(ऽ)संभवो तस्स ॥ १९४ ॥
केवलदंसणमेवं छउमत्थे णत्थि तं जओ खइयं। जइ तं नत्थि जिणम्मि वि तो कत्थ तयं गहेयव्वं ?॥१९५॥
छउमत्थम्मि जिणम्मि व जं णत्थी सव्वहेव तं णत्थि। सिद्धं च चउवियप्पं च दंसणं सासणे बहुसो ॥१९६॥
आह ण उ सव्वसो चिय केवलिणो णत्थि दंसणं किंतु। णाणं ति दंसणं ति य एक्कं चिय केवलं तस्स ॥१९७॥
जइ एगत्तं दोण्ह वि तो एगयरोवओगया जुत्ता। इहरा फुडमण्णत्तं पुणरुत्त णिरत्थया वा वि ॥ १९८ ॥
पत्तेयावरणत्तं कह वा बारसविहोवओगत्तं ?। सागाराणागारं सिद्धाणं लक्खणं कह णु ? ॥१९९॥
—विशेषा० भा० गा० ३०९३ पूर्वार्धम्।

---

१ "इत्थ केवलणाणदंसणोवयोगेहिं बहुधा समयसभावं आयबुद्धीए पकप्पिता इमं भणंति"—नन्दि० चू०।
"इह च केवलज्ञानदर्शनोपयोगचिन्तायां क्रमोपयोगादौ सूरीणामनेकविधा विप्रतिपत्तिरतः संक्षेपतो विनेयजनानुग्रहाय तत्प्रदर्शनार्थं क्रियत इति। तत्र"—नन्दि० ल०।

२ "गाथाद्वयम् अस्य व्याख्या—केचन सिद्धसेनाचार्यादयो भणन्ति किम्? युगपदेकस्मिन्नेव काले जानाति पश्यति चैत्येकः केवली नलन्यः नियमान्नियमेन। अन्ये जिनभद्रगणिक्षमाश्रमणप्रभृतय एकान्तरितं जानाति पश्यति चेत्येवमिच्छन्ति श्रुतोपदेशेन यथा श्रुतानुगमानुसारेणेत्यर्थः। अन्ये तु वृद्धाचार्याः न नैव पृथक् पृथग्दर्शनमिच्छन्ति जिनवरेन्द्रस्य केवलिन इत्यर्थः किं तर्हि यदेव केवलज्ञानं तदेव से तस्स केवलिनो दर्शनं ब्रुवते क्षीणावरणस्य देशज्ञानाभावात् केवलदर्शनाभावादिति भावना। अयं गाथाद्वयार्थः"—नन्दि० ल०।

३ "जे भणंति केवलणाणदंसणाण एगत्तं ते इमं हेतुजुत्तिं भणंति"—नन्दि० चू०।
"अधुना ये केवलज्ञानदर्शनाभेदवादिनस्तन्मतमुपन्यस्यन्नाह"—नन्दि० ल०।

४ "एस ते हेतुजुत्तं तहा अत्थं ण संसहइ त्ति हेउत्तरहेउजुत्तीण चेव भणंति आ (?) वा संसहइ तहा उत्तरहेऊ जुत्तीए चेव भणंति।
भेदण्णाणोवरमे जह केवलणाणसंभवो भणितो। देसदंसणविगमे तह केवलदंसणं होइ" ॥—नन्दि० चू०।
"सिद्धान्तवाद्याह"—नन्दि० ल०।

५ इतो गाथात उपरि अधस्ताद् वा या या अधिका गाथा विशेषावश्यकभाष्ये विद्यन्ते ताः सर्वा अपि अत्र निर्दिष्टाः—
"सव्वाओ लद्धीओ जं सागरोवओगलाभाओ। तेणेह सिद्धलद्धी उप्पज्जइ तदुवउत्तस्स ॥
एवं च गम्मइ धुवं तरतमजोगोवओगया तस्स। जुगवोवओगभावे सागरविसेसणमजुत्तं ॥
अहव मई सव्वं चिय सागारं से तओ अदोसो त्ति। नाणं ति दंसणं ति च न विसेसो तं च नो जम्हा ॥
सागारमनागारं लक्खणमेयं ति भणियमिह चेव। तह नाण-दंसणाइं समए वीसुं पसिद्धाइं ॥
नाणं पंचवियप्पं चउव्विहं दंसणं कत्तो ?"। गा० ३०८९–३०९३।
भणियमिहेव य केवलनाणुवउत्ता मुणंति सव्वं ति। पासंति सव्वउ त्ति य केवलदिट्ठीहिणंताहिं ॥ गा० ३०९४।

णाणस्स जाणिअव्वे विसओ जइ दंसणस्स दट्ठव्वे। जुत्तं तो इहरा पुण लक्खणवेहम्मभावण्णं ॥२००॥
अह वा जइ णाणेण वि दीसइ णज्जइ य दंसणेणावि। एवं खु णाणदंसणपरूवणा कप्पणामेत्तं ॥२०१॥
एवं च सेसदंसणणाणाण वि णाम पत्तमेगत्तं। सिद्धाणि अ पत्तेअं दंसणणाणाणि समयम्मि ॥२०२॥
कह वा जिणेण भणियं दोण्णि अहं नाणदंसणट्ठाए। सोमिलपुच्छाए जइ दंसणणाणाणमेगत्तं ॥२०३॥
आह जओ चिय जीवाणण्णाइं तेण तेसिमेगत्तं। भण्णइ तो सेसाण वि णाणाणं पत्तमेगत्तं ॥ २०४ ॥
ताइं पि जीवभावाणण्णाइं जे य सेसया भावा। अण्णोण्णलिंगभिण्णा खओवसमिआदओ पंच ॥ २०५ ॥
सइ जीवाणण्णत्ते णाणत्तं तव मयं अहो तेसिं। ण मयं केवलदंसणणाणाणं एव मिच्छा ते ॥ २०६ ॥
जह जीवाणन्नाणं नाणत्तं सेसभावभेयाणं। तह जीवाणण्णाणं णाणत्तं केवलाणं पि ॥ २०७ ॥
अह भणियं च जिणमए जाणइ पासइ य केवलण्णाणी। ण वि दंसण त्ति तम्हा णाणं चिय दंसणं तस्स ॥२०८॥
भण्णइ जहोहिणाणी जाणइ पासइ य भासियं सुत्ते। ण य णाम ओहिदंसणणाणेगत्तं तह इमं पि ॥२०९॥
—नन्दि० चू०। नन्दि० ल०। धर्मसं गा० १३५५। नन्दि० म०।

जं पासइ त्ति भणियं तम्हा तं दंसणेण घेत्तव्वं। जेण विसेसियमेअं पण्णवणदसाइसुत्तेसु ॥२१०॥
खीणे पंचविहम्मि वि णाणावरणम्मि जाणइ जगं ति। पासइ य दंसणावरणविप्पणासम्मि सव्वण्णू ॥२११॥
मइणाणाणत्थंतरभूयस्स वि चक्खुदंसणस्सेह। जह दंसणोवयारो जुत्तो तह केवलस्सावि ॥२१२॥
भण्णइ चक्खुद्दंसणमइनाणत्तमिह कालभेयकयं। जं जत्थ दंसणं तत्थ णत्थि कालम्मि णाणं तु ॥२१३॥
जइ वा जुगवं चक्खुद्दंसणमइणाणविसयया होज्जा। तो जुगवं छउमत्थे वि होज्ज उवओगदुगमेवं ॥२१४॥
तम्हा अचक्खुदंसणमिह दंसणमिट्ठमुग्गहेहाओ। सव्वत्थ अवाओ धारणा य सुद्धं मईणाणं ॥२१५॥
आह किमोग्गहमेत्तं ण दंसणं होइ सेसयं णाणं। भण्णइ एगसमइओ जमोग्गहो णोवओगो उ ॥२१६॥
अंतोमुहुत्तमेत्तं उवओगो णियमिओ जओ सुत्ते। तम्हा दंसणकालो सिद्धो फुडमोग्गहेहातो ॥२१७॥
जह सेसणाणदंसणणाणत्तं तह जिणम्मि किमणिट्ठं ?। णाणत्तं केवलणाणदंसणाणं सलक्खणओ ॥२१८॥
णाणं वत्तं दंसणमव्वत्तं भणइ देसियं समए। तो णाणदंसणाणं जिणम्मि सविसेसणं जुत्तं ॥२१९॥
भण्णइ केवलदंसणमव्वत्तं जेण होज्ज को हेऊ ?। जइ नाणाओ अन्नं वत्तं च हवेज्ज को दोसो ? ॥२२०॥
जह सव्वं विण्णेयं णाणेण जिणोऽमलं विजाणेइ। तह दंसणेण पासइ णियया वरणक्खए सव्वं ॥२२१॥
जेसिमणिट्ठं दंसणमण्णं णाणा हि जिणवरिंदस्स। तेसिं न पासइ जिणो सविसयणिययं जओ णाणं ॥२२२॥

आह पिहभावम्मि वि उवउत्ता दंसणे य णाणे य। भणियं तो जुगवं सो णणु भणियमिणं पि तं सुणसु ॥
गा० ३०९५।
अह सव्वस्सेव न केवलिस्स दो किंतु कासइ हवेज्ज। सो य जिणो सिद्धो वा तं च न सिद्धाहिगाराओ ॥
गा० ३०९७।

अहवा पुव्वद्धेण व सिद्धमिक्को ति किंथ बिइएणं। इत्तो चिय पच्छद्धे वि गम्मई सव्वपडिसेहो ॥ गा० ३०९८।
तो कहमिहेव भणियं उवउत्ता दंसणे य नाणे य ?। समुदायवयणमेयं उभयनिसेहो य पत्तेयं ॥ गा० ३०९९।
जमपज्जंताइं केवलाइं तेणोभओवओगो त्ति। भण्णइ नायं निअमो संतं तेणोवओगो त्ति ॥ गा० ३१००।
एगयराणुवउत्ते तदसव्वन्नुदरिसणत्तण न तं च। भण्णइ छउमत्थस्सवि समाणमेगन्तरे सव्वं ॥ गा० ३१०३।
अह जम्मि नोवउत्तो तं नत्थि तओ न दंसणाइतिगे। अत्थि जुगवोवओगो त्ति होउ साहू कहं विगलो ? ॥
गा० ३१०६।
आह भणियं नणु सुए केवलिणो केवलोवओगेण। पढम त्ति तेण गम्मइ सओवओगोभयं तेसिं ॥
गा० ३१०८।

उवओगग्गहणाओ इह केवलनाणदंसणग्गहणं। जइ तदणत्थंतरया हवेज्ज सुत्तम्मि को दोसो ? ॥ गा० ३१०९।
तग्गहणे किमिह फलं नणु तदणत्थंतरोवएसत्थं। तह वत्थुविसेसत्थं सयसो सुत्ताइं समयम्मि ॥ गा० ३११०।
सिद्धो काइय–नोसंजयाइपज्जायओ स एवेगो। सुत्तेसु विसेसिज्जइ जहेह तह सव्ववत्थूणि ॥ गा० ३१११।
जइ केवलीण जुगवं उवओगा होज्ज होज्ज तो एवं। सागारऽणगारयमीसाण य तिण्हमप्पबहुं ॥ गा० ३१२५।
जइ नन्नुन्नावरणं नाकारणया कहं तदावरणं। एगंतरोवओगे जिणस्स तं भण्णइ सहावो ॥ गा० ३१३४।
परिणामियभावाओ जीवत्तं पिव सहाव एवायं। एगंतरोवओगो जीवाणमणण्णहेउ त्ति ॥ गा० ३१३५।

जह पासइ तह पासउ पासइ जो जेण दंसणं तं से । जाणइ अ जेण अरहा तं से णाणं ति घेत्तव्वं ॥२२३॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३५६ । नन्दि० म० ।

जं केवलाइं साईअपज्जवसियाइं दो वि भणिआइं । तो बिंति केइ जुगवं जाणइ पासइ य सव्वण्णू ॥२२४॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३३८ । नन्दि० म० ।

इहरा ऽऽईणिहणत्तं मिच्छा ऽऽवरणक्खओ त्ति व जिणस्स । इयरेयरावरणया अहवा णिक्कारणावरणं ॥२२५॥
—विशेषा० भा० गा० ३१०२ । नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३३९ । नन्दि० म० ।

तहा य असव्वण्णुत्तं असव्वदरिसित्तणप्पसंगो य । एगंतरोवओगे जिणस्स दोसा बहुविहीया ॥२२६॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४० । नन्दि० म० ।

ठिइकालं जह सेसदंसणणाणमणुवओगे वि । दिट्ठमवट्ठाणं तह ण होइ किं केवलाणं पि ॥२२७॥
—विशेषा० भा० गा० ३१०१ ।

तुल्ले वि णाणदंसणसब्भावे किह णु जुगवमुवओगो । छउमत्थस्साणिट्ठो इट्ठो य जिणस्स दुविहो वि ? ॥२२८॥
सव्वक्खीणावरणो अह मण्णसि केवली ण छउमत्थो । तो जुगवमजुगवं पि य उवओगविसेसणं तेसिं ॥२२९॥
—विशेषा० भा० गा० ३१०४ ।

देसक्खए अजुत्तं जुगवं कसिणोभओवओगित्तं । देसोभओवओगो पुणाइ पडिसिज्झए कीस ? ॥ २३० ॥
—विशेषा० भा० गा० ३१०५ ।

अह णेवं सो घेप्पउ जह छउमत्थस्स तह जिणस्सावि । दोण्हं उवओगाणं एगयरो एगसमयम्मि ॥ २३१ ॥
तो भणइ एव मिच्छा उभयावरणक्खओ त्ति केवलिणो । उवउत्तस्सेगयरे जेणेगयरस्स आवरणं ॥ २३२ ॥
भण्णइ भिण्णमुहुत्तोवओगकाले वि तो तिणाणस्स । मिच्छा छावट्ठीसागरोवमाइं खओवसमो ॥ २३३ ॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४१ । नन्दि० म० ।

१ "एवं पराभिप्पाए पडिसिद्धे एगंतरोवयोगता सिद्धा । तहविमं भण्णति"—नन्दि० चू० ।

२ "तत्थ जे ते भणंति जुगवं जाणइ पासइ य ते इमं उववत्तिं उवदिसंति" ।—नन्दि० चू० ।

"सांप्रतं युगपदुपयोगवादिमतप्रदर्शनायाह"—नन्दि० ल० ।

३ "यस्मात् केवलज्ञानदर्शने साद्यपर्यवसिते द्वे अपि भणिते ततो ब्रुवते केचन सिद्धसेनाचार्यादयः किम्? युगपदेकस्मिन् काले जानाति पश्यति च कः? सर्वज्ञ इति गाथार्थः"—नन्दि० ल० ।

४ "इतरथान्यथा आदिनिधनत्वं सादिपर्यवसानत्वं केवलज्ञानदर्शनयोरुत्पत्त्यनन्तरमेव केवलज्ञानोपयोगकाले केवलदर्शनाभावादेव केवलदर्शनोपयोगकालेऽपि केवलज्ञानाभावात् । तथा, मिथ्यावरणक्षय इति वा जिनस्य—न ह्यपनीतावरणौ द्वौ प्रदीपौ क्रमेण प्रकाश्यं प्रकाशयत इत्यभिप्रायः । तथा इतरेतरावरणता-स्वावरणे क्षीणेष्यन्यतमभावे अन्यतमाभावादिति भावना । अथवा निष्कारणावरणमित्यकारणमेव अन्यतरोपयोगकालेऽन्यतरस्यावरणम् तथा च सति सर्वदैव भावाभावप्रसङ्गस्तथा चोक्तम्—

नित्यं वा सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां कादाचित्कत्वसंभवः ॥ इति गाथार्थः"
—नन्दि० ल० ।

५ "व्याख्या—तथा च सति असर्वज्ञत्वं असर्वदर्शित्वप्रसङ्गश्च पाक्षिकं वा असर्वज्ञत्वम्—यदा सर्वज्ञो न तदा सर्वदर्शी दर्शनोपयोगाभावादेव, यदा सर्वदर्शी न तदा सर्वज्ञः ज्ञानोपयोगाभावात् । एवमेकान्तरोपयोगे ह्युपगम्यमाने सति जिनस्य केवलिनः दोषा बहुविधा इति गाथार्थः"—नन्दि० ल० ।

६ "एवं परेण बहुधा भणिते आगमवादी उत्तरमिममाह" ।—नन्दि० चू० ।

"एवं परेणोक्ते सत्यागमवाद्याह"—नन्दि० ल० ।

७ "व्याख्या । यदुक्तमितरथादिनिधनत्वमिति । तदसदिति दर्शयति—उपयोगानुपयोगकालापेक्षयैव साद्यपर्यवसितत्वात् केवलज्ञानदर्शनयोरित्यभिप्रायो न चानर्थमिदम् कथम्? भण्यते अन्यथा हि भिन्नमुहूर्त्तोपयोगकाले मत्यादीनां ततस्त्रिज्ञानिनः मिथ्या षट्षष्टिसागरोपमाणि क्षयोपशमः प्रतिपादितश्च सूत्रे न च युगपदेव मत्याद्युपयोगः । एवं क्षायिकोपयोगेपि भविष्यति । जीवस्वाभाव्यादिति गाथाभिप्रायः"—नन्दि० ल० ।

अह ण वि एवं तो सुण जहेव खीणंतराइओ अरहा । संते वि अंतराक्खयम्मि पंचप्पगारम्मि ॥२३४॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४२ । नन्दि० म० ।

सययं ण देइ लहइ व भुंजइ उवभुंजई य सव्वण्णू । कज्जम्मि देइ लहइ य भुंजइ व तहेव एयं पि ॥२३५॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४३ । नन्दि० म० ।

देंतस्स लभंतस्स य भुंजंतस्स वि जिणस्स एस गुणो । खीणंतराइयत्ते जं से विग्घं ण संभवइ ॥२३६॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४४ । नन्दि० म० ।

उवउत्तस्सेमेव य णाणम्मि व दंसणम्मि व जिणस्स । खीणावरणगुणोऽयं जं कसिणं सुणइ पासइ वा ॥२३७॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४५ । नन्दि० म० ।

तो भणइ केवलाणं पत्तो इयरेयरावरणदोसो । भण्णइ चउणाणिस्स वि स एव दोसो समाविसइ ॥२३८॥
एवं विणा वि णामं कारणमुप्पायविगमया पत्ता । एवं च सइ विण्णाणुब्भवो कह णु सिद्धाणं ? ॥ २३९ ॥
जुगवाणुवओगित्ते वुच्चइ चउणाणिणो विणा हेउं । विगमुप्पाओ जह तह जिणस्स जइ होज्ज को दोसो ॥२४०॥
अहवा खीणावरणे जिणम्मि णिक्कारणावरणदोसो । ण उ जुज्जइ छउमत्थे संतावरणे त्ति ते बुद्धी ॥ २४१ ॥
भण्णइ छउमत्थस्स वि णाणेगयरोवओगिभावत्ते । संते वि खओवसमे सेसावरणं न संभवइ ॥ २४२ ॥
जेणं जया ण जाणइ णूणमुइण्णं तदा तदावरणं । अध संतेण ण जाणइ मिच्छावरणक्खओवसमो ॥ २४३ ॥
एवं जं जं कालं उववज्जइ जम्मि जम्मि णाणम्मि । तं तं कालं जुत्तो तस्सावरणक्खओवसमो ॥ २४४ ॥
ठिइकालविसंवाओ णाणाणं न वि य ते चउण्णाणी । एवं सति छउमत्थो अत्थि न जइ दंसणी समए ॥२४५॥
—विशेषा० भा० गा० ३१०७ ।

पासंतो ण वि जाणइ जाणं व ण पासई जइ जिणंदो । एवं ण कयाइ वि सो सव्वण्णू सव्वदरिसी य ॥२४६॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४६ । नन्दि० म० ।

जुगवमजाणंतो वि हु चउहिं णाणेहिं जह चउण्णाणी । भण्णइ तहेव अरहा सव्वण्णू सव्वदरिसी यं ॥ २४७॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४७ । नन्दि० म० ।

तुल्ले उभयावरणक्खयम्मि पुव्वयरमुब्भवो कस्स । दुविहुवओगाभावे जिणस्स जुगवं ति चोएइ ॥ २४८ ॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४८ । नन्दि० म० ।

भण्णइ ण एस णियमो जुगवुप्पण्णेसु जुगवमेवेह । होयव्वं उवओगेण एत्थ सुण ताव दिट्ठंतं ॥२४९॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३४९ । नन्दि० म० ।

१ "जधा तओ तत्थस्स मतिसुतावधिणाणेसु अंतमुहुत्तो कालोवयोगसंभवो उवयोगाणुवयोगेण य छावट्ठिसागरा से ट्ठितिकालो दिट्ठो तधा जति जिणस्स णाणदंसणा सादिअपज्जवसाण उवयोगाणुवयोगेण भवति तो को दोसो ? जति एयं ते णाणुमयं तो इमं ते कधं अणुमतं भविस्सति ?"—नन्दि० चू० ।

"न च क्षयकार्येण अवश्यमनवरतमेव भवितव्यमिति दर्शयन्नाह"—नन्दि० ल० ।

२ "पुणो परं आह"—नन्दि० चू० ।

"व्याख्या—पश्यन्नपि न जानाति जानन् वा न पश्यति यदि जिनेन्द्रः । एवं न कदाचिदप्यसौ सर्वज्ञः सर्वदर्शी च युगपदन्यतरोपयोगकालेऽन्यतरोपयोगानुभावादिति गाथार्थः"—नन्दि० ल० ।

३ "उत्तरमाचार्य्य आह"—नन्दि० चू० ।

"सिद्धान्तवाद्याह"—नन्दि० ल० ।

४ "इयं तु निगदसिद्धैव । नवरं क्षायिकभावमाश्रित्येति गाथार्थः"—नन्दि० ल० ।

५ "पर एवाह"—नन्दि० चू० ।

६ "व्याख्या—तुल्ये उभयावरणक्षये केवलज्ञानदर्शनावरणक्षये पूर्वतरं प्रथमतरमुद्भवः उत्पादः कस्य? यदि ज्ञानस्य स किंनिबन्धन इति वाच्यम् । तदावरणक्षयनिबन्धन इति चेत् दर्शनेऽपि तुल्य इति तस्याप्युद्भवप्रसङ्गः । एवं दर्शनेपि वाच्यः । अतः स्वावरणक्षयेऽपि दर्शनाभाववद् ज्ञानस्याप्यभावप्रसङ्गः । विपर्ययो वा एवं द्विविधोपयोगाभावे जिनस्य युगपदिति चोदयन्नयं गाथार्थः"—नन्दि० ल० ।

७ "उत्तरमाचार्य आह"—नन्दि० चू० ।

"अत्र सिद्धान्तवाद्याह"—नन्दि० ल०

जह जुगवुप्पत्तीइ वि सुत्ते सम्मत्तमइसुयाईणं । णत्थि जुगवोवओगो सव्वेसु तहेव केवलिणो ॥२५०॥
—नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३५० । नन्दि० म० ।
भणियं पि य पण्णत्ती-पण्णवणाईसु जह जिणो समयं । जं जाणइ ण वि पासइ तं अणु-रयणप्पभाईणि ॥२५१॥
—विशेषा० भा० गा० ३११२ । नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३५१ । नन्दि० म० ।
इवसद्दमतुप्पच्चयलोवा तं बिंति केइ छउमत्थे । अण्णे पुण परतित्थिअवत्तव्वमिणं तं जंपंति ॥ २५२॥
—विशेषा० भा० गा० ३११३ ।
जं छउमत्थाऽऽधोहियपरमावहिणो विसेसिउं कमसो । णिद्दिसइ केवलित्तेण तस्स छउमत्थया णत्थि ॥२५३॥
—विशेषा० भा० गा० ३११४ ।
ण य पासइ अणुमण्णो छउमत्थो मोत्तुमोहिसंपण्णं । तत्तो जो परमावहिणाणी तत्तो वि किंचूणो ॥ २५४ ॥
—विशेषा० भा० गा० ३११५ ।
ते दो वि विसेसेउं अण्णो छउमत्थकेवली को सो ? । जो पासइ परमाणुं गहणमिहं जस्स होज्जा हि ॥२५५॥
—विशेषा० भा० गा० ३११६ ।
तेसिं चिय छउमत्थाइयाण मग्गिज्जए जहिं सुत्ते । केवलसंजम-संवर-बंभाईएहिं निव्वाणं ॥ २५६ ॥
—विशेषा० भा० गा० ३११७ ।
तिण्णि वि पडिसेहेउं तीसु वि कालेसु केवली तत्थ । सिज्झिसु सिज्झइ त्ति य सिज्झिस्सइ या विणिद्दिट्ठा २५७॥
—विशेषा० भा० गा० ३११८ ।
एवं विसेसयम्मि वि परमयमेगंतरोवओगो त्ति । ण पुण जुगवोवओगो परवत्तव्वं ति का बुद्धी ? ॥ २५८ ॥
—विशेषा० भा० गा० ३११९ ।
अण्णं च इमा गाहा समए सिद्धाहिगारपरिपढिया । फुडवियडत्थं साहइ जिणस्स एगंतरुवओगं ॥ २५९ ॥
णाणम्मि दंसणम्मि य एत्तो एगतरगम्मि उवउत्ता । सव्वस्स केवलिस्सा जुगवं दो णत्थि उवओगा ॥ २६० ॥
—विशेषा० भा० गा० ३०९६ । नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३५७ । नन्दि० म० ।
सिद्धाण वि एगयरोवओगवत्तित्तणं ति एईसे । पुव्वद्धेणं सिद्धं अच्छउ पच्छद्धमिह ताव ॥ २६१ ॥
परवत्तव्वमिणं ति य भणिज्ज एयं पि कोइ तं ण भवे । पण्णत्तीए विसेसियमेयं जम्हा णियंठेसु ॥ २६२ ॥
उवओगो एगयरो पणुवीसइमे सए सिणायस्स । भणिओ वियडत्थो चिय छट्ठुद्देसे विसेसेउं ॥ २६३ ॥
—विशेषा० भा० गा० ३१२० । नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३५८ । नन्दि० म० ।
पण्णवणाचरमंपए भणिओ सिद्धो विसुद्धनाणीहिं । सागारे उवउत्तो सिज्झइ जह तत्थ गंतूणं ॥ २६४ ॥
अह भणसी सव्वं चिय सागारं से अओ अदोसो त्ति । ता सिद्धलक्खणं कह भणियं सागारऽणागारं ॥२६५॥
एवं फुडवियडम्मि वि सुत्ते सव्वण्णुभासिए सिद्धे । कह तीरइ परतित्थियवत्तव्वमिणं ति वोत्तुं जे ? ॥ २६६ ॥
—विशेषा० भा० गा० ३१२१ ।
सव्वत्थ सुत्तमत्थि य फुडमेगयरोवउत्तसत्ताणं । उभओवउत्तसत्ता सुत्ते वुत्ता ण कत्थइ वि ॥ २६७ ॥
—विशेषा० भा० गा० ३१२२ ।
कस्सइ वि णाम कत्थइ काले जइ होज्ज दोवि उवओगा । उभओवउत्तसत्ताण सुत्तमेगं पि ता हुज्जा ॥ २६८ ॥
—विशेषा० भा० गा० ३१२३ ।
दुविहाणं पि य जीवाण भणियमप्पबहुयं ससमयम्मि । सागारऽणगाराण य ण भणियमुभओवउत्ताणं ॥२६९॥
—विशेषा० भा० गा० ३१२४ ।
जइ केवलीण जुगवं उवओगा होज्ज होज्ज तो एवं । सागारऽणगाराण य मीसाण य तिण्हमप्पबहुं ॥ २७० ॥
—विशेषा० भा० गा० ३१२५ ।

१ "किंच, सिद्धाधिकारे एगंतरोवयोगदंसिगा इमा पाहुडा गाहा"—नन्दि० चू० ।
"स्वपक्षे समर्थनायैव सिद्धान्तवाद्याह"—नन्दि० ल० ।
२ "किंच, भगवईए"—नन्दि० चू० ।
"नवरं भगवत्यां पञ्चविंशतितमे शते [श० २५ उ० ६ पृ० ८९९ द्वि० सू० ७६७] अधिकारोपलक्षिते सिणाययस्स त्ति स्नातकस्य केवलिनः ।"—नन्दि० ल० ।
३ प्रज्ञाप० प० ३६ पृ० ६०७ सू० ३४९ ।

अहव मई छउमत्थे पडुच्च सुत्तमिणमो ण केवलिणो । तं पि न जुज्जइ जं सव्वसत्तसंखाहिगारोऽयं ॥ २७१ ॥
—विशेषा० भा० गा० ३१२६ ।
काउं सिद्धग्गहणं बहुवत्तव्वयपएसु सव्वेसु । इह केवलमग्गहणं जइ ते तं कारणं वच्चं ॥ २७२ ॥
—विशेषा० भा० गा० ३१२७ ।
अहवा विसेसियं चिय जीवाभिगमम्मि एतमप्पबहुं । दुविह त्ति सव्वजीवा सिद्धा सिद्धादिया जत्थ ॥ २७३ ॥
—विशेषा० भा० गा० ३१२८ ।
सिद्ध सइंदियकाए जोगे वेए कसाय लेसा य । णाणुवओगाहारगभासा य सरीरचरिमे य ॥ २७४ ॥
—विशेषा० भा० गा० ३१२९ ।
अंतोमुहुत्तमेव य कालो भणिओ तहोवओगस्स । साई अपज्जवसिओ त्ति णत्थि कत्थइ वि णिद्दिट्ठो ॥२७५॥
—विशेषा० भा० गा० ३१३० ।
जह सिद्धाईयाणं भणियं साईअपज्जवसियत्तं । तह जइ उवओगाणं हवेज्ज तो होज्ज ते जुगवं ॥ २७६ ॥
—विशेषा० भा० गा० ३१३१ ।
कस्स व णाणुमयमिणं जिणस्स जइ होज्ज दो वि उवओगा । णूणं ण होंति जुगवं जओ णिसिद्धा सुए बहुसो ॥
—विशेषा० भा० गा० ३१३२ । नन्दि० चू० । नन्दि० ल० । धर्मसं० गा० १३५९ । नन्दि० म० ।
ण वि अभिणिवेसबुद्धी अम्हं एगंतरोवओगम्मि । तह वि भणिमो ण तीरइ जं जिणमयमण्णहा काउं ॥२७८॥
—विशेषा० भा० गा० ३१३३ ।
मोत्तूण हेउवायं आगममेत्तावलंबिणो होउं । सम्ममणुचिंतणिज्जं किं जुत्तमजुत्तमेयम्मि ? ॥ २७९ ॥
अहवा ण सव्वसो चिय सव्वं जिणमयमहेउयं भणियं । किंतु अणुयत्तमाणो अण्णत्तं हेउओ भणइ" ॥२८०॥

अत्र श्रीमल्लवादिव्यवस्थापितलेन प्रसिद्ध एक एव उपयोगयौगपद्यपक्षो दिगम्बरीयेषु प्रवचनसार-आप्तमीमांसा-अष्टशती-अष्टसहस्री-तत्त्वार्थश्लोकवार्तिक-नियमसार-गोम्मटसार-बृहद्द्रव्यसंग्रहेषु स्पष्टमुपलभ्यते नेतरौ खण्डनीयत्वेनापि । अनुक्रमेण तद्यथा—

"तेकालणिच्च विसमं सकलं सव्वत्थसंभवं चित्तं । जुगवं जाणदि जोण्हं अहो हि णाणस्स माहप्पं ॥
ज्ञानाधि० १ ॥ ५१ ॥
"तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनम् । क्रमभावि च यज्ज्ञानं स्याद्वादनयसंस्कृतम् ॥ १०१ ॥
परि० १० पृ० ४४ ।

तत्र सकलज्ञानावरणपरिक्षयविजृम्भितं केवलज्ञानं युगपत्सर्वार्थविषयं करणक्रमव्यवधानातिवर्तित्वाद् युगपत्सर्वभासनं तत्त्वज्ञानत्वात् प्रमाणम् । तथोक्तम् 'सर्वद्रव्यपर्यायेषु केवलस्य' इति सूत्रकारैः । केवलज्ञानदर्शनयोः क्रमवृत्तित्वात् चक्षुरादिज्ञानदर्शनवद्युगपत्सर्वभासनमयुक्तमिति चेन्न, तयोर्यौगपद्यात्, तदावरणक्षयस्य युगपद्भावात् 'मोहक्षयाज्ज्ञानदर्शना-

१ सिद्धान्तवाद्येवानुद्धतत्वमागमभक्तिं च परां ख्यापयन्नाह—नन्दि० ल० ।
इतो धर्मसंग्रहण्यामिमा गाथा अधिका वर्तन्ते—
जं दंसणणाणाइं सामन्नविसेसगहणरूवाइं । तेण ण सव्वण्णू सो णाया ण य सव्वदरिसी वि ॥
समुदितमुभयं सव्वं अण्णतरेण ण वि घेप्पति तयं च । भेदाभेदे वि मिहो एसो खलु होइ णातो त्ति ॥
सामन्नमिह कहंची णेयं अब्भंतरीकयविसेसं । ते वि इतरेण एवं उभयं पि ण जुज्जई इहरा ॥
एवं च उभयरूवे सिद्धे सव्वम्मि वत्थुजायम्मि । दंसणणाणे वि फुडं सिद्धे चिय सव्वविसए त्ति ॥
जं एत्थ णिव्विसेसं गहो विसेसाण दंसणं होति । सविसेसं पुण णाणं ता सयलत्थे तओ दो वि ॥
समताधम्मविसिट्ठं घेप्पति जं दंसणेण सव्वं तु । ण तु विसमताए ता कह सयलत्थमिणं ति वत्तव्वं ? ॥
एवं विवज्जासेणं णाणस्स वि असयलत्थया णेया । उभयग्गहणे [य] दोण्हवि अविसेसो पावती णियमा ॥
समएतरधम्माणं भेदाभेदम्मि ण खलु अण्णोण्णं । णिरवेक्खमेव गहणं इय सयलत्थे तओ दो वि ॥
जं सामण्णप्पहाणं गहणं इतरोवसज्जणं चेव । अत्थस्स दंसणं तं विवरीयं होइ णाणं तु ॥
जीवसहावातो चिय एतं एवं तु होइ णातव्वं । अविसिट्ठम्मि वि अत्थे जुगवं चिय उभयरूवे वि ॥
अण्णे सव्वं णेयं जाणति सो जेण तेण सव्वण्णू । सव्वं च दरिसणिज्जं पासइ ता सव्वदरिसि त्ति ॥
णेया तु विसेस चिय सामण्णं चेव दरिसणिज्जं तु । ण य अण्णेयण्णाणे वि तस्स णो इट्ठसिद्धि त्ति ॥
गा० १३६०-१३७१ धर्मसं० पृ० ४४२ द्वि० ।

वरणान्तरायक्षयाच्च केवलम्' इति अत्र प्रथमं मोहक्षयस्ततो ज्ञानावरणादित्रयक्षयः सकृदिति व्याख्यानात्। तज्ज्ञानदर्शनयोः क्रमवृत्तौ हि सर्वज्ञत्वं कादाचित्कं स्याद् दर्शनकाले ज्ञानाभावात् तत्काले च दर्शनाभावात्। सततं च भगवतः केवलिनः सर्वज्ञत्वं सर्वदर्शित्वं च साद्यपर्यवसिते केवलज्ञानदर्शने इति वचनात्। कुतस्तत्सिद्धिरिति चेत् निर्लोठितमेतत् सर्वज्ञसिद्धिप्रस्तावे न पुनरिहोच्यते। केवलज्ञानदर्शनयोर्युगपद्भावः कुतः सिद्ध इति चेत्, सामान्य-विशेषविषययोर्विगतावरणयोरयुगपत्प्रतिभासायोगात् प्रतिबन्धकान्तराभावात्। सामान्यप्रतिभासो हि दर्शनं विशेषप्रतिभासो ज्ञानम्। तत्प्रतिबन्धकं ज्ञानावरणं दर्शनावरणं च। यदुदयादस्मदादेः केवलज्ञानदर्शनानाविर्भावः तयोश्च युगपदात्मविशुद्धिप्रकर्षविशेषात् परिक्षयसिद्धेः कथमिवायुगपत्प्रतिभासनं सामान्यविशेषयोः स्यात् प्रक्षीणाशेषमोहान्तरायस्य प्रतिबन्धान्तरं च कथमिव संभाव्येत येन युगपत्तद्वितयं न स्यात्? अस्तु नाम केवलं तत्त्वज्ञानं युगपत्सर्वाभासनम्, मतिश्रुतावधिमनःपर्ययज्ञानं तु कथमित्युच्यते"।

—अष्टश० अष्टस० पृ० २८१ पं० ५—।

"सोपयोगस्यानेकस्य ज्ञानस्यैकत्र यौगपद्यवचने हि सिद्धान्तविरोधः सूत्रकारस्य न पुनरनुपयोगस्य सह द्वावुपयोगौ न स्त इति वचनात्॥ सोपयोगयोर्ज्ञानयोः सह प्रतिषेधादिति निवेदयन्ति—

क्षायोपशमिकं ज्ञानं सोपयोगं क्रमादिति। नार्थस्य व्याहतिः काचित् क्रमज्ञानाभिधायिनः॥

निरुपयोगस्यानेकस्य ज्ञानस्य सहभाववचनसामर्थ्यात् सोपयोगस्य क्रमभावः क्षायोपशमिकस्येत्युक्तं भवति तथा च नार्थस्य हानिः क्रमभाविज्ञानावबोधकस्य सम्भाव्यते। अत्रापराकूतमनूद्य निराकुर्वन्नाह—

मोपयोगौ सह स्यातामित्यार्याः ख्यापयन्ति ये। दर्शनज्ञानरूपौ तौ न तु ज्ञानात्मकाविति॥
ज्ञानानां सह भावाय तेषामेतद्विरुद्धयते। क्रमभावि च यज्ज्ञानमिति युक्तं ततो न तत्"॥

१-३० श्लो० ६-८ पृ० २५३ पं० ३०—।

"जुगवं वट्टइ णाणं केवलणाणिस्स दंसणं च तहा। दिणयरपयास-तापं जह वट्टइ तह मुणेयव्वं"॥ १६०॥
"सिद्धाणं सिद्धगई केवलणाणं च दंसणं खयियं। सम्मतमणाहारं, उवजोगा ण क्रमपउत्ती"॥ ७३०॥
"दंसणपुव्वं णाणं, छदमत्थाणं ण दोण्णि उवउग्गा। जुगवं जम्हा केवलि-णाहे जुगवं तु ते दोवि॥ ४४॥

दंसणपुव्वं णाणं छदमत्थाणं" सत्तावलोकनदर्शनपूर्वकं ज्ञानं भवति छद्मस्थानां संसारिणाम्। कस्मात् "ण दोण्णि उवउग्गा जुगवं जम्हा" ज्ञानदर्शनोपयोगद्वयं युगपन्न भवति यस्मात् "केवलिणाहे जुगवं तु ते दोऽवि" केवलिनाथे तु युगपत्तौ ज्ञानदर्शनोपयोगौ द्वौ भवत इति"—पृ० १६९ पं० ३-८।

अत्रेदमवधातव्यं विशेषावश्यकभाष्ये नन्दिचूर्ण्यां च पक्षत्रयं पुरस्कर्तृणां नामानि अनिर्दिश्यैव सामान्यतो वर्णितम् हरिभद्रीयायां मलयगिरीयायां च वृत्तौ क्रमोपयोगपक्षः श्रीजिनभद्रगणिक्षमाश्रमणादिसत्कत्वेन युगपदुपयोगपक्षः श्रीसिद्धसेनादिसत्कत्वेन एकोपयोगपक्षश्च श्रीवृद्धाचार्यादिसत्कत्वेन उपन्यस्तः परन्तु सम्मतिटीकाकारैः श्रीमदभयदेवैः युगपदुपयोगपक्षः श्रीमल्लवादिसत्कत्वेन एकोपयोगपक्षश्च प्रकरणकार-सिद्धसेनदिवाकर-सत्कत्वेन वर्णितः—

श्रीहरिभद्राभयदेवमलयगिरीणां पक्षद्वयपुरस्कर्तृविषयोऽयं मतभेदः वाचकवर्यैः श्रीमद्यशोविजयैरित्थं परिहृतः—"इदमिदानीं निरूप्यते-केवलज्ञानं स्वसमानाधिकरणकेवलदर्शनसमानकालीनं न वा, केवलज्ञानक्षणत्वं स्वसमानाधिकरणदर्शनक्षणाव्यवहितोत्तरत्वव्याप्यं न वा? एवमाद्याः क्रमोपयोगवादिनां जिनभद्रगणिक्षमाश्रमणपूज्यपादानाम्, युगपदुपयोगवादिनां च मल्लवादिप्रभृतीनाम्, यदेव केवलज्ञानं तदेव केवलदर्शनमिति वादिनां च महावादिश्रीसिद्धसेनदिवाकराणां साधारण्यो विप्रतिपत्तयः। यत्तु युगपदुपयोगवादित्वं सिद्धसेनाचार्याणां नन्दिवृत्तावुक्तं तदभ्युपगमवादाभिप्रायेण न तु स्वतन्त्रसिद्धान्ताभिप्रायेण, क्रमाक्रमोपयोगद्वयपर्यनुयोगानन्तरमेव स्वपक्षस्य संमतावुद्भावितत्वादिति द्रष्टव्यम्"—ज्ञानबिं० पृ० १५४ द्वि० पं० ५।

सार्वश्यविषयकोक्तपक्षत्रयगतः पारस्परिको बलीयान् विवादस्तैरेव नयवादाश्रयेण इत्थं समाहितः—

"भेदग्राही व्यवहृतिनयं संश्रितो मल्लवादी पूज्याः प्रायः करणफलयोः सीम्नि शुद्धर्जुसूत्रम्।
भेदोच्छेदोन्मुखमधिगतः संग्रहं सिद्धसेनस्तस्मादेते न खलु विषमाः सूरिपक्षास्त्रयोऽपि॥
चित्सामान्यं पुरुषपदभाक्केवलाख्ये विशेषे तद्रूपेण स्फुटमभिहितं साद्यनन्तं यदेव।
सूक्ष्मैरंशैः क्रमवदिदमप्युच्यमानं न दुष्टं तत्सूरीणामियमभिमता मुख्यगौणव्यवस्था॥
तमोऽपगमचिज्जनुःक्षणभिदा निदानोद्भवाः श्रुता बहुतराः श्रुते नयविवादपक्षा यथा।
तथा क इव विस्मयो भवतु सूरिपक्षत्रये प्रधानपदवी धियां क्व नु दवीयसी दृश्यते"॥

—ज्ञानबिं० पृ० १६४ प्र० श्लो० २,३,४,।

केचित् ब्रुवते "यदा जानाति तदा न पश्यति जिनः" इति सूत्रम्—"केवली णं भंते! इमं रयणप्पभं पुढविं आयारेहिं पमाणेहिं हेऊहिं संठाणेहिं परिवारेहिं जं समयं जाणइ नो तं समयं पासइ? हंता गोयमा! केवली णं" [ ] इत्यादिकम्—अवलम्बमानाः।

अस्य च सूत्रस्य किलायमर्थः-केवली सम्पूर्णबोधः 'णं' इति प्रश्नोऽभ्युपगमसूचकः। 'भन्ते!' इति भगवन्! इमां रत्नप्रभामन्वर्थाभिधानां पृथ्वीमाकारैः समनिम्नोन्नतादिभिः प्रमाणैर्दैर्घ्यादिभिः हेतुभि- ५
रनन्तानन्तप्रदेशिकैः स्कन्धैः संस्थानैः परिमण्डलादिभिः परिवारैः घनोदधिवलयादिभिः 'जं समयं णो तं समयं' इति च "कालाध्वनोरत्यन्तसंयोगे" [पा० २-३-५] इति द्वितीया अधिकरणसप्तमीबाधिका तेन यं समयं जानाति यदा जानातीत्यर्थः 'णो तं समयं' पश्यतीति न तदा पश्यतीति भावः। विशेषोपयोगः सामान्योपयोगान्तरितः सामान्योपयोगश्च विशेषोपयोगान्तरितस्तत्स्वाभाव्यादिति प्रश्नार्थः। उत्तरं पुनः 'हंता गोयमा!' इत्यादिकं प्रश्नानुमोदकम् 'हंता' इत्यभिमतस्यामन्त्रणम् 'गौतम' १०
इति गोत्रामन्त्रणम् प्रश्नानुमोदनार्थं पुनस्तदेव सूत्रमुच्चारणीयम् हेतुप्रश्नस्य चात्र सूत्रे उत्तरम्—"साकारे से णाणे अणागारे दंसणे" [ ] साकारं विशेषावलम्बि अस्य केवलिनो ज्ञानं भवति अनाकारमतिक्रान्तविशेषं सामान्यालम्बि दर्शनम्। न चानेकप्रत्ययोत्पत्तिरेकदा निरावरणस्यापि तत्स्वाभाव्यात् न हि चक्षुर्ज्ञानकाले श्रोत्रज्ञानोत्पत्तिरुपलभ्यते। न चावृतत्वात् तदा तदनुत्पत्तिः स्वसमयेऽप्यनुत्पत्तिप्रसङ्गात्। ततो युगपदनेकप्रत्ययानुत्पत्तौ स्वभाव एव कारणम् नावरणसद्भावः। सन्निहितेऽपि १५
च द्व्यात्मके विषये विशेषांशमेव गृह्णन् केवली तत्रैव सामर्थ्यात् सर्वज्ञ इति व्यपदिश्यते सर्वविशेषज्ञत्वात् सर्वसामान्यदर्शित्वाच्च सर्वदर्शी। यद्येवंव्याख्यायामकिञ्चिज्ज्ञत्वं केवलिनः होढदानं चेति दूषणम्, तन्न; यतो यदि तत् केवलं ज्ञानमेव भवेद् दर्शनमेव वा ततः स्यादकिञ्चिज्ज्ञता न चैवम् आलदानमपि न संभवति 'यं समयं' इत्याद्युक्तव्याख्यायाः सम्प्रदायाविच्छेदतोऽपव्याख्यानत्वायोगात्। न च दुःसम्प्रदायोऽयम् तदन्यव्याख्यातृणामविसंवादात् "जं समयं च णं समणे भगवं महा- २०
वीरे" [ ] इत्यादावप्यागमे असकृदुच्चार्यमाणस्यास्य शब्दस्यैतदर्थत्वेन सिद्धत्वात्। ततो दुर्व्याख्यैषा—यैः समकं यत्समकमिति भवतैव होढदानं कृतम्।

[केवलोपयोगद्वयस्य क्रमभावित्वं प्रतिषेध्य तत्सहभावित्वपरतया आगमस्य व्याख्यानम्]

एते च व्याख्यातारः तीर्थकरासादनाया अभीरवः तीर्थकरमासादयन्तो न बिभ्यतीति यावत्। सां च 'न किञ्चिज्ज्ञानाति तीर्थकृदित्यधिक्षेपः' 'अन्यथोक्ते तीर्थकृतैवमुक्तम्' इत्यालदानम्। २५
तथाहि—यदि विषयः सामान्यविशेषात्मकस्तदा विषयि केवलं विशेषात्मकं वा भवेत् सामान्यात्मकं वा? यदि विशेषात्मकमिति पक्षस्तदा निःसामान्यविशेषग्राहित्वात् तेषां च तद्विकलानामभावात् निर्विषयतया तदवभासिनो ज्ञानस्याभाव इत्यकिञ्चिज्ज्ञः सर्वज्ञस्ततो भवेत्। अथ

१ "केवली णं भंते! इमं रयणप्पभं पुढविं आगारेहिं हेतूहिं उवमाहिं दिट्ठंतेहिं वण्णेहिं संठाणेहिं पमाणेहिं पडोयारेहिं जं समयं जाणति तं समयं पासइ? जं समयं पासइ तं समयं जाणइ?

गोयमा! नो तिणट्ठे समट्ठे।

से केणट्ठेणं भंते! एवं वुच्चति-'केवली णं इमं रयणप्पभं पुढविं आगारेहिं जं समयं जाणति नो तं समयं पासति, जं समयं पासति नो तं समयं जाणति?

गोयमा! सागारे से णाणे भवति, अणागारे से दंसणे भवति से तेणट्ठेणं जाव णो तं समयं जाणति एवं जाव अहेसत्तमं। एवं सोहम्मकप्पं जाव अच्चुयं गेविज्जगविमाणा अणुत्तरविमाणा ईसीपब्भारं पुढविं, परमाणुं पोग्गलं दुपदेसियं खंधं जाव अणंतपदेसियं खंधं"इति संपूर्णं सूत्रम्—प्रज्ञाप० प० ३० सू० ३१४ पृ० ५३१-।

एतत्सदृशान्यन्यानि सूत्राणि भगवतीसूत्रीयचतुर्दशाऽष्टादशशतकान्तर्गताभ्यां दशमाष्टमोद्देशकाभ्यां यथाक्रममवगन्तव्यानि।

२ "कालाध्वनोर्न्यासौ"-हैम० २-२-४२। ३-या सप्तमीबा-ल० वा० बा० भां० मां० विना। ४ 'नाम'-ल० टि०। ५ "आलदानम्"-बृ० ल० टि०। ६ "सिद्धसेनदिवाकरेण"-बृ० टि०। ७ "जिनभद्रगणिक्षमाश्रमणमतमुक्तम् सम्प्रत्युत्तरं कृतम्"-बृ० टि०। ८ सा न आ० हा० वि०। ९-नं च त-भां० मां० विना।

सामान्यात्मकम् एवमपि विशेषविकलसामान्यरूपविषयाभावतो निर्विषयस्य दर्शनस्याप्यभावान्न किञ्चित् केवली पश्येत्। अथायुगपद् ज्ञानदर्शने तस्याभ्युपगम्येते तथापि यदा जानाति न तदा पश्यति, यदा च पश्यति न तदा जानातीत्येकरूपाभावे अन्यतरस्याप्यभावात् पूर्ववदकिञ्चिज्ज्ञोऽकिञ्चिद्दर्शी च स्यात्। उभयरूपे वा वस्तुन्यन्यतरस्यैव ग्राहकत्वात् केवलोपयोगो विपर्यस्तो वा भवेत्। तथाहि—यद् उभयरूपे वस्तुनि सामान्यस्यैव ग्राहकं तद्विपर्यस्तम् यथा सांख्यज्ञानम् तथा च सामान्यग्राहि केवलदर्शनमिति तथा, यद् विशेषावभास्येव तथाभूते वस्तुनि तदपि विपर्यस्तम् यथा सुगतज्ञानम् तथा च केवलज्ञानमिति। यथा च सामान्यविशेषात्मकं वस्तु तथा प्रतिपादितमनेकधा।

होढदानमपि सूत्रस्यान्यथाव्याख्यानादुपपन्नम्। तथाहि—न पूर्वप्रदर्शितस्तत्रार्थः किन्त्वयम्—केवली इमां रत्नप्रभां पृथिवीं यैराकारादिभिः समकं तुल्यं जानाति न तैराकारादिभिस्तुल्यं पश्यतीति किमेवं ग्राह्यम्? 'एवम्' इत्यनुमोदना। ततो हेतौ पृष्टे सति तत्प्रतिवचनं भिन्नालम्बनप्रदर्शकं तत्-ज्ञानं साकारं भवति यतो दर्शनं पुनरनाकारमित्यतो भिन्नालम्बनावेतौ प्रत्ययाविति। इदं चोदाहरणमात्रं प्रदर्शितम्। एवं च सूत्रार्थव्यवस्थितौ पूर्वार्थकथनमालदानमेव। 'जंसमयं' इत्यत्र 'जं'शब्दे 'अम्'भावः प्राकृतलक्षणात्—

णीया लोवमभूया आणीया दो वि बिंदु-दुब्भावा।
अत्थं वहंति तं चिय जो चिय सिं पुव्वनिद्दिट्ठो[2] ॥ [ ]

अभूत एव बिन्दुरिहानीतः। यथा 'यत्कृतसुकृते' इति "जंकयसुकयं" [ ] इति लोकप्रयोगे ॥४॥

[आगमेन केवलज्ञान-दर्शनयोर्यौगपद्यमभिधाय अनुमानयुक्त्या पुनस्तत्प्रतिपादनम्]

आगमेनाभिधाय यौगपद्यं ज्ञान-दर्शनयोरनुमानेनाऽपि तयोस्तद् दर्शयितुमाह—

केवलणाणावरणक्खयजायं केवलं जहा णाणं।
तह दंसणं पि जुज्जइ णियआवरणक्खयस्संते ॥ ५ ॥

केवलज्ञानावरणक्षये यथोत्पन्नं विशेषावबोधस्वभावं ज्ञानं तथा तदैव दर्शनावरणक्षये सति सामान्यपरिच्छेदस्वभावं दर्शनमप्युत्पद्यताम् न ह्यविकलकारणे सति कार्यानुत्पत्तिर्युक्ता तस्यातत्कार्यताप्रसक्तेरितरत्राप्यविशेषतोऽनुत्पत्तिप्रसक्तेश्च। ज्ञानकाले दर्शनस्यापि संभवः तदुत्पत्तौ कारणसद्भावाद् युगपदुत्पत्त्यविकलकारणघटपटयुगपदुत्पत्तिवत्[3]। ननु च हेतौ सत्यपि श्रुताद्यावरणक्षयोपशमे श्रुताद्यनुत्पद्यमानमपि कदाचित् दृष्टमित्यनैकान्तिको हेतुः, न; श्रुतादौ क्षीणावरणत्वस्य हेतोरभावात् श्रुतादेः क्षीणोपशान्तावरणत्वात्। भिन्नावरणत्वादेव च श्रुतावधिवन्नैकत्वमेकान्ततो ज्ञानदर्शनयोरेकेन[4]दोभयाभ्युपगमवादेनैव ॥ ५ ॥

[सर्वज्ञे छाद्मस्थिकक्रमोपयोगाभावात् तदृष्टान्तेनैव तत्र केवलज्ञानादन्यदा केवलदर्शनाभावप्रतिपादनम्]

यज्जातीये[5] यो दृष्टस्तज्जातीय एवासावन्यत्राप्यभ्युपगमार्हो न जात्यन्तरे धूमवत् पावकेतरभावाभावयोः अन्यथानुमानादिव्यवहारविलोपप्रसङ्गादित्याह—

भण्णइ खीणावरणे जह मइणाणं जिणे ण संभवइ।
तह खीणावरणिज्जे विसेसओ दंसणं नत्थि ॥ ६ ॥

---

१ "ह्यात्मके"—बृ० टि०।

२ नीतौ लोपमभूतौ आनीतौ द्वावपि बिन्दु-द्विर्भावौ। अर्थं वहन्ति तमेव य एव तयोः पूर्वनिर्दिष्टः ॥

३ "यदविकलकारणं तद् भवत्येव यथाऽऽदित्यप्रकाशसमये तदविनाभावी प्रतापः। अविकलकारणं च ज्ञानोत्पत्तिकाले दर्शनमिति प्रयोगः"—बृ० टि०। ४-कतोभ-वा० बा०। ५ यो यो द-बृ०।

यथा क्षीणावरणे मति-श्रुताऽवधि-मनःपर्यायज्ञानानि जिने न संभवन्तीत्यभ्युपगम्यते तथा तत्रैव क्षीणावरणीये विश्लेषतो ज्ञानोपयोगादन्यदा दर्शनं न संभवतीत्यभ्युपगन्तव्यम् क्रमोपयोगस्य मत्याद्यात्मकत्वात् तदभावे तदभावात् ॥ ६ ॥

[क्रमवादिमतेऽनुमानविरोधवदागमविरोधोऽप्यापततीति प्रदर्शनम्]

न केवलं क्रमवादिनोऽनुमानविरोधः आगमविरोधोऽपीत्याह— ५

सुत्तम्मि चेव साई अपज्जवसियं ति केवलं वुत्तं।
सुत्तासायणभीरूहि तं च दट्ठव्वयं होइ ॥ ७ ॥

साद्यपर्यवसाने केवलज्ञानदर्शने क्रमोपयोगे तु द्वितीयसमये तयोः पर्यवसानमिति कुतोऽपर्यवसितता? तेन क्रमोपयोगवादिभिः सूत्रासादनाभीरुभिः "केवलणाणे णं भंते!" [ ] इत्यादि आगमे साद्यपर्यवसानताभिधानं केवलज्ञानस्य केवलदर्शनस्य च द्रष्टव्यं—पर्यालोचनीयं भवति। सूत्रासादना चात्र सर्वज्ञाधिक्षेपद्वारेण द्रष्टव्या अचेतनस्य वचनस्याधिक्षेपायोगात्।

न च द्रव्यापेक्षयाऽपर्यवसितत्वम् द्रव्यविषयप्रश्नोत्तराश्रुतेः। अथ भवतोऽपि कथं तयोरपर्यवसानता पर्यायाणामुत्पादविगमात्मकत्वात्? न च द्रव्यापेक्षयैतदिति वाच्यम् अस्मत्पक्षेऽप्यस्य समानत्वात्। तद्विषयप्रश्नप्रतिवचनाभावान्नेति चेत् तर्हि भवतोऽपि द्रव्यापेक्षयाऽपर्यवसानकथनमयुक्तम्, असदेतत्; तयोर्युगपद् रूपरसयोरिवोत्पादाभ्युपगमान्न ऋजुत्व-वक्रतावत्। एवमपि सपर्यवसानतेति चेत्, न; कथंचित् केवलिद्रव्यादव्यतिरेकतस्तयोरपर्यवसितत्वात्। न च क्रमैकान्तेऽप्येवं भविष्यत्यनेकान्तविरोधात्। न चात्रापि तथाभावः तथाभूतात्मकैककेवलिद्रव्याभ्युपगमात् रूपरसात्मैकद्रव्यवत् अक्रमरूपत्वे च द्रव्यस्य तदात्मकत्वेन तयोरप्यक्रम एव। न च तयोस्तद्रूपतया तथाभावो न स्वरूपतः तथात्वेऽनेकान्तरूपताविरोधान्निरावरणस्याक्रमस्य क्रमरूपत्वविरोधाच्च तस्यावरणकृतत्वात्। किञ्च, यदि सर्वथा क्रमेणैव तयोरुत्पत्तिरनेकान्तविरोधः। अथ कथञ्चित् तदा युगपदुत्पत्तिपक्षोऽप्यभ्युपगतः। न च द्वितीये क्षणे तयोरभावे अपर्यवसितता छाद्मस्थिकज्ञानस्येव युक्ता। पुनरुत्पादादपर्यवसितत्वे पर्यायस्याप्यपर्यवसितताप्रसक्तिः। द्रव्यार्थतया तत्त्वे द्वितीयक्षणेऽपि तयोः सद्भावोऽन्यथा द्रव्यार्थत्वायोगात् ॥ ७ ॥

[सोपसंहारमागमविरोधस्य स्पष्टीकरणम्]

तदेवं क्रमाभ्युपगमे तयोरागमविरोध इत्युपसंहरन्नाह— २५

संतम्मि केवले दंसणम्मि णाणस्स संभवो णत्थि।
केवलणाणम्मि य दंसणस्स तम्हा सणिहणाइं ॥ ८ ॥

क्रमोत्पादे सति केवलदर्शने न तदा ज्ञानस्य संभवस्तथा केवलज्ञाने न दर्शनस्य तस्मात् सनिधने केवलज्ञानदर्शने ॥ ८ ॥

[प्रकरणकारेण क्रमोपयोगद्वयवादिनम् सहोपयोगद्वयवादिनं च पर्यनुयुज्य स्वपक्षस्योपन्यासः] ३०

अत्र प्रकरणकारः क्रमोपयोगवादिनं तदुभयप्रधानाक्रमोपयोगवादिनं च पर्यनुयुज्य स्वपक्षं दर्शयितुमाह—

१-भवीन्यभ्यु-आ० हा० वि०। २ "केवलणाणी णं पुच्छा, गोयमा! सातिए अपज्जवसिते"—प्रज्ञाप० प० १८ सू० २४१ पृ० ३८९। ३-थात्वेनैका-वा० बा० आ० हा० वि०।

दंसणणाणावरणक्खए समाणम्मि कस्स पुव्वअरं ।
होज्ज समं उप्पाओ हंदि दुए णत्थि उवओगा ॥ ९ ॥

सामान्यविशेषपरिच्छेदकावरणापगमे समाने कस्य प्रथमतरमुत्पादो भवेत् अन्यतरस्योत्पादे तदितरस्याप्युत्पादः स्यात् न चेदन्यतरस्यापि न स्यादविशेषात् इत्युभयोरप्यभाव-
५ प्रसक्तिः अक्रमोपयोगवादिनः कथमिति चेत् **सममू** एककालम् **उत्पादस्तयोर्भवेत्** सत्यक्रमकारणे कार्यस्याप्यक्रमस्य भावादित्यक्रमौ द्वावुपयोगौ। अत्रैकोपयोगवाद्याह-**हंदि दुवे णत्थि उवओगा** इति द्वावप्युपयोगौ नैकदेति ज्ञायताम् सामान्यविशेषपरिच्छेदात्मकत्वात् केवलस्येति ॥ ९ ॥

[केवलज्ञान-दर्शनयोरभेदपक्ष एव सर्वज्ञत्व-सर्वदर्शित्वोपपत्तिरिति प्रकटनम्]

यदेव ज्ञानं तदेव दर्शनमित्यस्मिन्नेव वादे सर्वज्ञतासंभव इत्याह—

१० **जइ सव्वं सायारं जाणइ एक्कसमएण सव्वण्णू ।**
जुज्जइ सयावि एवं अहवा सव्वं ण याणाइ ॥ १० ॥

यदि आकारात्मकं वस्तु भवनं भवनात्मकं वा आकारात्मकं सामान्यविशेषयोरविनिर्भागवृत्ति-
त्वात् **सर्वं साकारं**[3] जानंस्तदात्मकं सामान्यं तदैव पश्यति तत् पश्यन् वा तदव्यतिरिक्तं विशेषं
तदैव **जानाति** उभयात्मकवस्त्ववबोधैकरूपत्वात् सर्वज्ञोपयोगस्य तदा सर्वज्ञत्वं सर्वदर्शित्वं च
१५ तस्य **सर्वकालं युज्यते** प्रतिक्षणमुभयात्मकैकरूपत्वात् तस्य। **अथवा सर्वं** सामान्यं साकारं वा
वस्तु **न पश्यति न जानाति** च तथाभूतयोस्तयोरसत्त्वात् जात्यन्धवत् आकाशवद्वा। अथवा सर्वं
न जानात्येकदेशोपयोगवृत्तित्वाद् मतिज्ञानिवत्। युगपत् क्रमेण चैकान्तभिन्नोपयोगद्वयवादिमते न
सर्वज्ञता सर्वदर्शिता चेत्याशय आचार्यस्य।

[क्रमाऽक्रमाऽभेदपक्षत्रयग्राहिण आचार्यान् नामग्राहं निर्दिश्य तैः स्वस्वपक्षपोषकतया व्याख्यातानां सूत्राणां संसूचनम्]

२० अत्र च जिनभद्रगणिक्षमाश्रमणपूज्यानामयुगपद्व्युपयोगद्वयमभिमतम्। मल्लवादिनस्तु युग-
पद्भावि तद्वयमिति। सिद्धान्तवाक्यान्यपि "सागारमणागारं लक्खणमेयं तु सिद्धाणं" [प्रज्ञाप० द्विती० प० सू० ५४ गा० १६०]। तथा "केवलणाणुवउत्ता जाणंति" [प्रज्ञाप० द्विती० प० सू० ५४ गा० १६१] इत्यादीनि युगपदुपयोगवादिना स्वमतसंवादकत्वेन व्याख्यातानि । क्रमोपयोगवादिना
२५ तु "सव्वाओ लद्धीओ" [विशेषावभा० गा० ३०८९] इत्यादीनि स्वमतसंवादकत्वेन। प्रकरणकारोपि स्वमतसंवादकान्येतान्यन्यानि च व्याख्यातवान् ॥ १० ॥

---

१ एकस-वा० बा० आ०। २-गवर्तित्वा-वा० बा०। ३-कारं ज्ञानं तदा-बृ० आ० हा० वि०। ४-कान्तरितोप-बृ०।

५ "असरीरा जीवघणा उवउत्ता य दंसणे य नाणे य"। इति पूर्वार्धम्-प्रज्ञाप० पृ० १०६ द्वि०।

६ "केवलनाणुवउत्ता जाणंता सव्वभावगुणभावे । पासंता सव्वओ खलु केवलदिट्ठीहिऽणंताहिं" ॥—प्रज्ञाप० पृ० १०६ द्वि०।

७ इदं गाथाद्वयमौपपातिके आवश्यकनिर्युक्त्यन्तर्गतनमस्कारनिर्युक्तौ विशेषावश्यकभाष्यटीकायां च वर्तते—पृ० ११६ प्र० गा० ११-१२। पृ० १७५ गा० ९१-९२। पृ० ११९८,११९९।

८ "सव्वाओ लद्धीओ जं सागारोवओगलाभाओ। तेणेह सिद्धलद्धी उप्पज्जइ तदुवउत्तस्स" ॥ इति संपूर्णा गाथा।

[साकारानाकारोपयोगयोरेकान्तिकभेदासंभवप्रदर्शनेन अनेकान्तस्य समर्थनम्]

साकारानाकारोपयोगयोर्नैकान्ततो भेद इति दर्शयन्नाह सूरिः—

परिसुद्धं सायारं अवियत्तं दंसणं अणायारं ।
ण य खीणावरणिज्जे जुज्जइ सुवियत्तमवियत्तं ॥ ११ ॥

ज्ञानस्य हि व्यक्तता रूपं **दर्शनस्य** पुनरव्यक्तता **न च क्षीणावरणे** अर्हति **व्यक्तताव्य-**५
क्तते युज्येते। ततः सामान्यविशेषज्ञेयसंस्पर्शी उभयैकस्वभाव एवायं केवलिप्रत्ययः। न च ग्राह्यद्वि-
त्वाद् ग्राहकद्वित्वमिति तत्र संभावना युक्ता केवलज्ञानस्य ग्राह्यानन्त्येनानन्ततापत्तेः । अन्योन्यानु-
विद्धग्राह्यांशद्वयभेदाद् ग्राहकस्य तथात्वकल्पने एकत्वानतिक्रमान्न दोष इति।

सूरेरयमभिप्रायः—न चैकस्वभावस्य प्रत्ययस्य शीतोष्णस्पर्शवत् परस्परविभिन्नस्वभावद्वयवि-
रोधो दर्शनस्पर्शनशक्तिद्वयात्मकैकदेवदत्तवत् स्वभावद्वयात्मकैकप्रत्ययस्य केवलिन्यविरोधात् अनेका- १०
न्तवादस्य प्रमाणोपपन्नत्वात् ॥ ११ ॥

[क्रमाक्रमोपयोगद्वयपक्षे शास्त्रसिद्धं ज्ञात-दृष्टभाषित्वं भगवतो न घटते इत्यभिधानम्]

क्रमाक्रमोपयोगद्वयाभ्युपगमे तु भगवत इदमापन्नमिति दर्शयति—

अदिट्ठं अण्णायं च केवली एव भासइ सया वि ।
एगसमयम्मि हंदी वयणवियप्पो न संभवइ ॥ १२ ॥ १५

अदृष्टमेव ज्ञातं जात्यन्धहस्तिपरिज्ञानवत् **अज्ञातमेव च** दृष्टमलातचक्रदर्शनवत्। **सर्वकाल-**
मेव केवली भाषत इत्येतदापन्नमक्रमोपयोगपक्षे । क्रमवर्त्युपयोगपक्षे तु एकस्मिन् समये
जानाति यत् तदेव भाषते ज्ञातं न च दृष्टम् समयान्तरे तु यदा पश्यति तदापि दृष्टं भाषते न ज्ञातम्
बोधानुरूप्येण वाचः प्रवर्तनात्। बोधस्य चैकांशावलम्बित्वादक्रमोपयोगपक्षे, क्रमोपयोगपक्षे तु तत्त्वाद्
भिन्नसमयत्वाच्च तत **एकस्मिन् समये** ज्ञातं दृष्टं च भाषत इत्येष **वचनविशेषो** भवद्दर्शने **न** २०
संभवतीति गृह्यताम् ॥ १२ ॥

[क्रमाक्रमपक्षद्वये भगवतः अज्ञातदर्शितया अदृष्टज्ञायितया च सर्वज्ञत्वासंभवप्रदर्शनम्]

तथा च सर्वज्ञत्वं न संभवतीत्याह—

अण्णायं पासंतो अदिट्ठं च अरहा वियाणंतो ।
किं जाणइ किं पासइ कह सव्वण्णु त्ति वा होइ ॥ १३ ॥ २५

अज्ञातं पश्यन्नदृष्टं च जानानः किं जानाति किं वा पश्यति न किञ्चिदपीति भावः।
कथं वा तस्य सर्वज्ञता भवेत्? ॥ १३ ॥

[आगमसिद्धसमसंख्यकविषयावगाहित्वयुक्त्या केवलज्ञानदर्शनयोरभेदसमर्थनम्]

ज्ञानदर्शनयोरेकसंख्या(ख्य)त्वादप्येकत्वमित्याह—

केवलणाणमणंतं जहेव तह दंसणं पि पण्णत्तं । ३०
सागारग्गहणाहि य णियमपरित्तं अणागारं ॥ १४ ॥

---

१ "जुज्जइ सवियत्तमवियत्तं"-ज्ञानबिं० पृ० १५८ प्र० पं० ९। २-पक्षे चैक-हा०। ३-दा द्व-वा० बा०। ४-त्वादभि-वा० बा०। ५ "एकांशावलम्बित्वात्"-बृ० टि०। ६ "एकसंख्याशालित्वात्"-ज्ञानबिं० पृ० १५९ प्र० पं० १।

अत्र तात्पर्यार्थः—यद्येकत्वं ज्ञान-दर्शनयोर्न स्यात् ततोऽल्पविषयत्वाद् दर्शनमनन्तं न स्यादिति "अणंतं केवलणाणे अणंते केवलदंसणे" [ ] इत्यागमविरोधः प्रसज्येत । दर्शनस्य हि ज्ञानाद् भेदे **साकारग्रहणाद्**नन्तविशेषवर्तिज्ञानाद्**नाकारं** सामान्यमात्रावलम्बि केवलदर्शनं यतो **नियमेनै**कान्तेनैव **परीत**मल्पं भवतीति कुतो विषयभेदादनन्तता ?

युगपदुपयोगद्वयवादी अनन्तं दर्शनं प्रज्ञप्तमित्यस्यां प्रतिज्ञायां **'साकारग्गहणाहि य णियमऽपरित्तं'** इत्यकारप्रश्लेषात् साकारे विशेषे गतं यत् सामान्यं तस्य यद् ग्रहणं दर्शनं तस्य नियमोऽवश्यंभावस्तेनापरीतमपरिमाणमिति साकारगतग्रहणनियमेनापरीतत्वादिति हेतुमभिधत्ते । यच्चापरीतं तदनन्तं यथा केवलज्ञानम् अपरीतता च दर्शनस्य द्रव्य-गुण-कर्मादेः साकारस्य च सकलस्य द्रव्यत्व-गुणत्व-कर्मत्वादिना स्वसामान्येन तावत्परिमाणेनाशून्यत्वात् सामान्यविकलस्य पर्यायस्यासंभवात् । विशेषतादात्म्यव्यवस्थितसामान्यस्य दर्शनविषयस्यानन्त्येन दर्शनस्यापरीतत्वं नासिद्धमिति भवति तस्यानन्त्यसिद्धिरिति व्यवस्थितः ॥ १४ ॥

[अभेदवाद्युक्तस्य केवले अपर्यवसितत्वादिदोषस्य क्रमवादिना समुद्धरणम् तस्य च पुनरभेदवादिना प्रतिसमाधानम्]

क्रमवादिदर्शने ज्ञानदर्शनयोरपर्यवसितत्वादिकं नोपपद्यत इति यत् प्रेरितमेकत्ववादिना तत्परिहारार्थमाह—

भण्णइ जह चउणाणी जुज्जइ णियमा तहेव एयं पि ।
भण्णइ ण पंचणाणी जहेव अरहा तहेयं पि ॥ १५ ॥

यथा क्रमोपयोगप्रवृत्तोऽपि मत्यादि**चतुर्ज्ञानी** अपर्यवसितचतुर्ज्ञान उत्पद्यमानतज्ज्ञानसर्वदोपलब्धिको व्यक्तबोधो ज्ञातदृष्टभाषी ज्ञाता द्रष्टा संज्ञेयवर्ती **चावश्यमेव युज्यते** तच्छक्तिसम्भवात् **तथैतद्**पि एकत्ववादिना **यद**पर्यवसितादि केवलिनि प्रेर्यते तद् युज्यत एव ।

अत्रैकत्ववादिना प्रतिसमाधानं भण्यते **यथैवार्हन्न पञ्चज्ञानी** भवति **तथैतद**पि क्रमवादिना यदुच्यते भेदतो ज्ञानवान् दर्शनवानिति च तदपि न भवतीति सूत्रकृतोऽभिप्रायः ।

[शुक्ति-क्रमोपयोगयोश्छद्मना व्याप्तिं स्वीकुर्वतां केषांचिन्मतस्य व्यावर्णनम्]

अत्र च छद्मस्थे किलोपयोगक्रमस्य दृष्टत्वात् केवलिनि च छद्माभावान्न क्रमवान् ज्ञानदर्शनोपयोग इत्ययमत्रार्थो विवक्षित इति केचित् प्रतिपन्नाः न हि यो यज्जातीये दृष्टः सोऽतज्जातीयेऽपि भवति अतिप्रसङ्गात् अन्यथा छद्मस्था अपि केवलिवत् क्रमोपयोगित्वात् सर्वज्ञाः स्युः सोऽपि वा न भवेत् तत एव सर्वज्ञवन्निरावरणास्ते सोऽपि वा सावरणः तत एव एकज्ञानिनो वा ते सोऽपि वा चतुर्ज्ञानी स्यात् ।

[केवलिकवलाहारचर्चा]

[कवलाहारनिषेधवादस्य पूर्वपक्षतयोपन्यासः]

अत एव छद्मस्थे भुजिक्रियादर्शनात् केवलिनि तद्विजातीये भुजिक्रियाकल्पना न युक्ता—अन्यथा चतुर्ज्ञानित्वाऽकेवलित्व-संसारित्वादयोऽपि तत्र स्युः—न देहित्वं तद्भुक्तिकारणं तथाभूतशक्त्यायु-

---

१ "अणंते नाणे केवलिस्स, अणंते दंसणे केवलिस्स, निव्वुडे नाणे केवलिस्स, निव्वुडे दंसणे केवलिस्स"—भगवतीसू० श० ५ उ० ४ सू० १८५ पृ० २१६ । २—**कार वि**—बृ० वा० बा० विना । ३—**हणे नि**—बृ० । ४—**लद्ध**—बृ० । ५—**स्थितिसा**—हा० वि० । ६—**स्थिति ती । क्र**—वा० बा० । ७—**तमनेकत्व**—बृ० आ० हा० वि० । ८ "युगपदुपयोगवादी"—बृ० टि० । ९ "ज्ञातदृष्टभाषी ज्ञाता दृष्टा च नियमेन"—ज्ञानबिं० पृ० १५९ प्र० पं० १२ । १०—**र्ती वाव**—बृ० वा० बा० मां० विना । ११ "यदपर्यवसितत्वादि क्रमोपयोगे केवलिनि"—ज्ञानबिं० पृ० १५९ प्र० पं० १३ । १२—**पक्षा न हि** आ० हा० वि० । १३ इयं चर्चा स्याद्वादरत्नाकरे भङ्ग्यन्तरेण चर्चिता विद्यते—परि० २ सू० २७ पृ० ४५७–४८३ । १४ "केवलिनि"—बृ० टि० ।

ष्ककर्मणोस्तद्धेतुत्वादेकवैकल्ये तदभावात् । औदारिकव्यपदेशोऽप्युदारत्वान्न भुक्तेः । यदपि 'एकेन्द्रियादीनामयोगिपर्यन्तानामाहारिणां सूत्रोपदेशात् केवलिनः कवलाहारित्वं केचित् प्रतिपन्नाः' तदपि सूत्रार्थापरिज्ञानात् तत्र ह्येकेन्द्रियादिभिः सह भगवतो निर्देशान्निरन्तराहारोपदेशाच्च शरीरप्रायोग्यपुद्गलग्रहणमाहारत्वेन विवक्षितमन्यथा क्षणत्रयमात्रमपहाय समुद्घातावस्थायां निरन्तराहारो भगवांस्तेनाहारेण भवेत् । यदपि 'यथासंभवमाहारव्यवस्थितेः सह निर्देशेऽपि कवलाहार एव केवलिनो व्यवस्थाप्यते युक्त्या अन्यथा तच्छरीरस्थितेरभावादिति' तदपि न युक्तिक्षमम् यतो यदि नामास्मदादेः प्रकृताहारमन्तरेणौदारिकशरीरस्थितेः प्रभूतकालमभावात् केवलिनोऽपि तथाऽनुमीयते तर्हि सर्वज्ञतापि तस्य कथमवसातुं शक्या दृष्टव्यतिक्रमप्रकल्पनायोगात् श्रूयते च प्रकृताहारमन्तरेणाप्यौदारिकशरीरस्थितिश्चिरतरकाला प्रथमतीर्थकृत्प्रभृतीनाम् । न च तदियत्तानियमप्रतिपादकं प्रमाणमस्तीति सूत्रभेदकरणनिमित्तासंभवात् यथान्यासमेव सूत्रार्थपरिकल्पनमस्तु एवं च निरन्तराहारवचनमप्यनुल्लङ्घितं भवेत् । अथापि स्यादतिशयदर्शनान्निरवशेषदोषावरणहानेरत्यन्तशुद्धात्मस्वभावप्रतिपत्तिवत् प्रकृताहारविकला औदारिकशरीरस्थितिरात्यन्तिकी क्वचिद् यदि भवेत् तदाऽसंभवन्मुक्तीनां केवलिनां प्रमाणतः प्रतिपत्तेः "असरीरा जीवघणा" इत्याद्यागमविरोधः प्रसज्येत, असदेतत्; यतः किमेवं सर्वज्ञस्यासत्त्वं प्रतिपादयितुमभिप्रेतम् उतातिशयदर्शनस्य तदहेतुत्वम् ? न तावदाद्यः पक्षः धर्मिणोऽभावे तद्धर्मस्य प्रस्तुतस्य साधयितुमशक्तेः । नापि द्वितीयः औदारिकशरीरस्य चिरतरकालावस्थायित्वस्याविरोधात् । न चातिशयदर्शनस्य तदहेतुत्वे केवलिभुक्तिसिद्धिः । न च यदतिशयवत् तदात्यन्तिकमतिशयमनुभवतीति सर्वत्र साध्यते किन्तु व्याप्तिदर्शनमात्रमेतत् अतः कियत्कालावस्थितिमात्रं केवलिनां शरीरस्थितेरिष्टं नात्यन्तिकम् । न च संयोगस्यात्यन्तिकी स्थितिः संभवति सत्यपि प्रकर्षदर्शने जीवकर्मणोरनादित्वेऽपि विश्लेषप्रतिपत्तेः संश्लेषस्थितिनियमस्य चानिष्टेरसंख्येयकालादूर्ध्वं पुद्गलपरिणतेः सर्वस्या अन्यथाभवनाद् औदारिकशरीरस्य च निराहारस्य चिरतरकालस्थायिन उत्तरकालमशेषकर्मक्षयाद् विनिवृत्तावस्ति साधनं सुनिश्चितासंभवद्बाधकप्रमाणत्वम् इदमेव च तत्त्वव्यवस्थायां सर्वत्राभ्युपगन्तव्यम् न ह्यध्यक्षाद्यवगम्यस्यार्थस्यैतदन्तरेण तत्त्वव्यवस्थितिः अनुभूतस्यापि बाधकप्रत्ययप्रवृत्तौ मिथ्यात्वरूपतया व्यवस्थापनात् । ततः सुनिश्चितासंभवद्बाधकप्रमाणत्वादेव प्रमाणप्रमेयतत्त्वसिद्धिः बाधकप्रमाणनिश्चयात् तद्विपरीतार्थप्रतिपत्तिः उभयोरनिश्चये दृष्टश्रुतयोरर्थयोः संशीतिरिति व्यवस्था सुनिश्चितासंभवद्बाधकप्रमाणत्वं च प्रकृताहारवैकल्येऽपि सर्वज्ञौदारिकशरीरचिरस्थायित्वप्रतिपादकागमस्य समस्त्येवेति न किञ्चित् तस्य कवलाहारपरिकल्पनया । केवली च कवलाहारमश्नन् किं बुभुक्षया उत शरीरस्थित्यन्यथाऽनुपपत्त्या आहोस्वित् स्वभावतोऽज्ञातीति वक्तव्यम् ? न तावदाद्यः पक्षः बुभुक्षाया दुःखरूपत्वात् तन्मूलदोषराशिनिवृत्तौ तस्या असंभवात् अनिवृत्तौ वा तत्प्रभवस्य दुःखसमूहस्य सद्भावे आत्यन्तिकसौख्यानुपपत्तिर्भगवति स्यात् । न च क्षुत्तुल्या शरीरवेदनेत्युक्तम् । बुभुक्षामन्तरेणापि शरीरं स्थापयितुमिच्छुरज्ञातीति चेत्, न; अनन्तवीर्यस्य भगवतः शरीरस्थितिमिच्छोः प्रकृताहारमन्तरेणापि तत्स्थापनासामर्थ्याविरोधात् शरीरतिष्ठापयिषाऽपि बुभुक्षावत् क्लेश एवेति न प्रथमपक्षादस्य विशेष इति न द्वितीयः पक्षोऽपि । नापि तृतीयपक्षाभ्युपगमोऽपि युक्तः प्रकृताहारविकलस्यैव विवक्षितकालभाविशरीरस्थितिस्वभावकल्पनयैव दोषाभावाद् अन्यथाऽशिष्टव्यवहारेष्वपि तत्स्वभावकल्पनायाः प्रसङ्गात् । तीर्थप्रवर्तनस्य तु व्यापारव्याहारलक्षणस्य तत्कालभाविविवक्षाचिकीर्षाऽभावेऽपि सद्भावो न विरुध्यते तीर्थप्रवर्तनस्य सद्भावनाविशेषोत्पन्नविशिष्टफलरूपत्वात् । सकलक्लेशोपरमेऽपि च तीर्थप्रवर्तनं स्वयमभ्युपगतं परेण प्रकृताहारादिकं तु क्लेशोपशमनार्थं कथं तत्स्वभावतः कल्पयितुं युक्तम् ? न च भगवति क्लेशः नापि तदुपशमनवाञ्छा तस्येति कवलाहारपरिकल्पनायां भगवति पक्षत्रयेऽपि दोषानतिवृत्तेः प्रकारान्तरस्य चासंभवान्न तत्र प्रकृताहारकल्पना युक्तिसंगता ।

---

१ स्याद्वादर० पृ० ४५८ पं० ४–५ । २ पृ० ६०८ पं० २२ टि० ५ । ३ "शरीरस्थितेरहेतुरतिशयदर्शनमिति भावः"—बृ० टि० । ४—**भययोर**—आ० हा० वि० । ५ "पंथसमा नत्थि जरा खुहासमा वेयणा नत्थि" इति जैनागमे विश्रुतं सुभाषितम् । ६—**पिबुद्धिबुभुक्षा**—भां० मां० । ७—**स्य तद्भा**—वा० बा० विना ।

[पूर्वपक्षं प्रतिविधातुमुपयोगक्रमसामान्यस्य छद्मना व्याप्तिं निरस्य भुक्तेरपि तेन सह व्याप्त्यभावे तात्पर्यख्यापनम्]

अत्र प्रतिविधीयते यदुक्तम्[1] 'छद्मस्थे उपयोगक्रमस्य दृष्टत्वात् केवलिनि च छद्माभावादुपयोगक्रमाभावः' तत्र क्रमोपयोगस्य क्षयोपशमकार्यत्वात् केवलिनि च तदभावात् क्रमोपयोगस्यापि तत्कार्यस्याभावः। तथाहि–यत् यत्कारणं तत् तदभावे न भवति यथा चक्षुरभावे चक्षुर्ज्ञानम् क्षयोपशमकारणश्च क्रमोपयोग इति क्षायिकोपयोगवति केवलिनि क्रमोपयोगाभावः। अथ क्षयोपशमाभावे भवतु[2] तत्र मतिज्ञानादिक्रमवदुपयोगाभावः केवलज्ञानदर्शनयोस्तु क्षायिकत्वात् कथं क्षयोपशमाभावे तयोः क्रमाभावः? उच्यते, यद् यदाऽविकलकारणं तत् तदाऽवश्यंतया प्रादुर्भवति यथा अन्त्यावस्थाप्राप्तक्षित्यादिसामग्रीसमयेऽङ्कुरः अविकलकारणं च केवलज्ञानोपयोगकाले केवलदर्शनम् स्वावरणक्षयलक्षणाविकलकारणसद्भावेऽपि तदा तस्यानुत्पत्तावतद्धेतुकताप्रसक्तेर्देशकालाकारनियमो न भवेत्। अनायत्तस्य तदसंभवात् इति प्रतिपादितत्वात्[3]। क्रमोत्पत्तिस्वभावप्रकल्पनायां क्षायिकत्वं तस्य परित्यक्तं स्यात् अध्यक्षसिद्धे च क्रमे तत्स्वभावप्रकल्पना युक्तिसंगता अन्यथातिप्रसङ्गः सर्वभावव्यवस्थाविलोपप्रसक्तेः। न च यो यज्जातीये दृष्टः सोऽन्यत्रातज्जातीये न भवति इत्येतदत्र विवक्षितं किं तर्हि कारणाभावे कार्यं न भवति अविकलकारणं चाविलम्बितोत्पत्तिकमेतदत्र प्रतिपादयितुमभिप्रेतमाचार्यस्य।

[केवलिनि कवलाहारमुपपादयितुं बाधकप्रमाणनिरासपूर्वकं साधकप्रमाणप्रदर्शनम्]

तेन यदि केवलिनो भुक्तिकारणाभावः सिद्धो भवेत् प्रतिबद्धत्वं वा स्वकार्यकरणे कारणस्यावगतं भवेत् तदा तदभावनिश्चयः स्यात् न चैतदुभयमपि भवस्थकेवलिनि सिद्धम् अप्रतिबद्धसामर्थ्यस्य क्षुद्वेदनीयकर्मोदयस्य तत्र सद्भावात्। तेनातज्जातीयत्वेऽपि केवलिनि भुक्तिप्रकल्पनायां चतुर्ज्ञानत्वाऽकेवलित्वापत्त्यादेर्दूषणस्यानवकाशो भुक्तिकारणस्यैव तत्कारणस्य तत्राभावान्निर्निमित्तस्य च चतुर्ज्ञानित्वादेः कार्यस्यासंभवात्। यच्च अतज्जातीयत्वं केवलिनः प्रतिपादितं[4] तत् किमस्मदाद्यपेक्षया आहोस्विदात्मीयच्छद्मस्थावस्थापेक्षया? तत्राद्ये[11] विकल्पे सिद्धसाध्यता। द्वितीयपक्षेऽपि किं घातिकर्मक्षयापेक्षया तत् तस्याभ्युपगम्यते आहोस्विद् भुक्तिनिमित्तकर्मक्षयापेक्षया? प्रथमपक्षे सिद्धं विजातीयत्वम् न तु तावता तस्य भुक्तिप्रतिषेधः अप्रतिबद्धसामर्थ्यस्य भुक्तिकारणस्य तथाविजातीयत्वेऽपि स्वकार्यनिर्वर्तकत्वात्। द्वितीयपक्षोऽप्ययुक्तः अतज्जातीयत्वस्यैवासिद्धत्वात् तन्निमित्तस्य कर्मणो भवस्थकेवलिनि पर्यन्तसमयं यावदनुवृत्तेः। यदपि[13] 'न देहित्वं भुक्तिकारणं तथाभूतशक्त्यायुष्ककर्मणोस्तद्धेतुकत्वादेकवैकल्ये तदभावात्' इति तदप्यसंगतम् यतो न देहित्वमात्रं प्रकृतभुक्तिकारणमपि तु विशिष्टकर्मोदयादिसामग्री तस्याश्च ततोऽद्याप्यव्यावृत्तेः कुतस्तदभावः? तथाभूतशक्त्यायुष्ककर्मणोश्चैकस्यापि वैकल्यासिद्धेरेकवैकल्ये तदभावादित्यसिद्धम्। यच्च[13] 'औदारिकव्यपदेशोऽप्युदारत्वान्न भुक्तेः' इति, तदपि न दोषावहम् औदारिकशरीरित्वे स्वकारणाधीनाया भुक्तेरप्रतिषेधात्। व्यपदेशस्योदारत्वनिमित्तत्वेऽपि स्वकारणनिमित्तप्रकृतभुक्तिसिद्धेः। यदपि[14] 'एकेन्द्रियादीनामयोगिपर्यन्तानामाहारिणां सूत्र उपदेशः' इत्याद्यभिधानम्, तदप्यसंगतम्; एकेन्द्रियादिसहचरितत्वनिरन्तराहारोपदेशत्वाद्यन्तरेणापि "विग्गहगइमावण्णा" [ ] इत्यादि सूत्रसंदर्भस्य केवलिभुक्तिप्रतिपादकस्यागमे सद्भावात्। न च तस्याप्रामाण्यम् सर्वज्ञप्रणीतत्वेनाभ्युपगतसूत्रस्येव प्रामाण्योपपत्तेः। न च तत्प्रणीतागमैकवाक्यतया प्रतीयमानस्याप्यस्यातत्प्रणीतत्वम् अन्यत्रापि तत्प्रसक्तेः। यदपि[5] 'शरीरप्रायोग्यपुद्गलग्रहणमाहारत्वेनाभिमतमत्र' इत्यभिधानम् तदप्यसंगतम्; विग्रहगत्यापन्नसमवहतकेवल्ययोगिसिद्धव्यतिरिक्ताशेषप्राणिगणस्य शरीर[5]प्रायोग्यपुद्गलग्रहणमेवाहारशब्दवाच्यमिह सूत्रेऽभिप्रेतमिति कोऽन्यः सामयिकशब्दार्थविदो भवतोऽभिधातुं समर्थः? यदपि[6] 'निरन्तराहारत्वं केवलिनस्तेनाहारेण समुद्घातक्षणत्रयमपहाय भवेत्' इत्युक्तम् तदप्यसंगतम् विशिष्टाहारस्य विशिष्टकारणप्रभवत्वात् तस्य च प्रतिक्षणमसंभवात् यस्तु पुद्गलादानलक्षणो लोमाद्याहारस्तस्य प्रतिक्षणं सद्भावेऽप्यदोषात्। यदपि[6] 'यथासंभवमाहारव्यवस्थितेः केवलिनः कवलाहारः अन्यथा शरीरस्थितेरभावात् व्यवस्थाप्यते' इत्यभिधानम् तद्युक्तमेव न हि देशोनपूर्वकोटिं यावद् विशिष्टाहारमन्तरेण विशिष्टौदारिकशरीरस्थितिः संभविनी। न च तच्छद्मस्थावस्थातः केवल्यवस्थायामात्यन्तिकं तच्छरीरस्य विजातीयत्वं येन प्रकृताहारविरहेऽपि तच्छरीरस्थितेरविरोधो भवेत् ज्ञानाद्यतिशयेऽपि प्राक्तनसंहननाद्यधिष्ठितस्य तस्यैवापातमनुवृत्तेः। अस्मदाद्यौदारिकशरीरविशिष्टस्थितेर्विशिष्टाहारनिमित्तत्वं प्रत्यक्षानुपलम्भप्रभवप्रमाणेन सर्वत्राधिगतमिति विशिष्टाहारमन्तरेण तत्स्थितेरन्यत्र सद्भावे सकृदपि तत्स्थितिस्तन्निमित्ता न भवेत्[7] अहेतोः सकृदपि सद्भावाभावात्। यदि पुनर्विशिष्टाहारनिमित्ताप्यस्मदादिषु विशिष्टशरीरस्थितिः पुरुषान्तरे तद्व्यतिरेकेणापि भवेत् तर्हि महानसादौ धूमध्वजप्रभवोऽपि धूमः पर्वतादौ तमन्तरेणापि भवेदिति धूमादेरग्याद्यनुमानमसङ्गतं भवेद् व्यभिचारात्। अथैतज्जातीयो धूम एतज्जातीयाग्निप्रभवः सर्वत्र सकृत्प्रवृत्तेनैव प्रमाणेन व्यवस्थाप्यते तत्कार्यतापतिपत्तिबलादग्निस्वभावादन्यत्र तस्य[8] भावे सकृदप्यग्नेर्न भावः स्याद् अग्निस्वभावाजन्यत्वात् तस्य भवति चाग्निस्वभावान्महानसादौ धूम इति सर्वत्र सर्वदा तत्स्वभावादेव तस्योत्पादे तदुत्पत्तिकस्याधूमस्वभावत्वादिति न धूमादेरग्याद्यनुमाने व्यभिचारस्तर्ह्ययं प्रकारः प्रकृतेऽपि समानः विशिष्टौदारिकशरीरस्थितेर्विशिष्टाहारमन्तरेणापि भावे तच्छरीरस्थितिरेवासौ न भवेत्। न चात्यन्तविजातीयत्वं तस्या इति प्रतिपादितम्। सर्वथा समानजातीयत्वं तु महानसपर्वतोपलब्धधूमयोरप्यसंभवि। ततोऽस्मदादेरिव केवलिनोऽपि प्रकृताहारमन्तरेणौदारिकशरीरस्थितिश्चिरतरकालो न संभवतीत्यनुमानं प्रवर्तत एव अन्यथा धूमादेरग्याद्यनुमानमपि न स्यात्। यदपि[9] 'कुतस्तस्यैवं सर्वज्ञतादिसिद्धिः' इत्यभिधानम् तदप्यसङ्गतम् घातिकर्मक्षयप्रभवसर्वज्ञतादेः प्रकृताहारेण तत्कार्येण वा चिरकालभाव्यौदारिकशरीरस्थित्यादिना[10] विरोधासंभवात् सर्वज्ञतासिद्धिनिबन्धनस्य च प्रमाणस्य प्रतिपादितत्वात् प्रकृताहारप्रतिपादकस्य च। यदपि[13] 'निराहारौदारिकशरीरस्थितेः प्रथमतीर्थकरप्रभृतीनामतिशयश्रवणात् तदियत्तानियमप्रतिपादकप्रमाणाभावाच्च' इति तदप्यपर्यालोचिताभिधानम् तस्य प्रामाण्ये[13] तदियत्तानियमस्यापि तत एव सिद्धेः तदधिकनिराहारतच्छरीरस्थितेः सूत्रे निषेधान्निरशनकालस्य तावत एवोत्कृष्टताप्रतिपादनात्। यदपि[14] 'सूत्रभेदकरणकारणासंभवात्' इत्यादि तदप्यसंगतम् चिरतरकालस्थितेरेव तच्छरीरस्य सूत्रभेदकरणकारणं प्रकृताहारमन्तरेण तत्स्थितेरसंभवस्य प्रतिपादनात्। भूयांसि च प्रकृताहारप्रतिपादकानि केवलिनः सूत्राण्यागमे[15] उपलभ्यन्ते प्रतिनियतकालप्रकृताहारनिषेधकानि

---

१ श्वेताम्बरमार्गानुयायिनः केवलिनः (सर्वज्ञस्य) कवलाहारकलं स्वीकुर्वते। दिगम्बरा अपि ये यापनीयसंघानुयायिनस्तेषामेव तद् अभिप्रेतम् नान्येषां दिगम्बराणाम्। अत्र विषये यापनीयसंघाग्रगामिना श्रीमता शाकटायनेन रचितं सप्तत्रिंशत्कारिकामयं केवलिभुक्तिप्रकरणमवबोद्धव्यम्। इतरदिगम्बराणां च मतमवबोद्धु प्रमेयकमलमार्तण्डगता सा केवलिकवलाहारचर्चाऽपि अत्रानुसन्धेया—पृ० ८४ द्वि० पं० १६—पृ० ८७ द्वि० पं० ५।

२ पृ० ६१० पं० २४। ३ **भवति त**–वा० बा०। ४ "देशकालप्रतिनियम"–बृ० टि०। ५ पृ० ५६८ पं० २१ तथा टि० ८। ६–**स्थालो**–भां० मां०। ७–**न्यत्र त**–आ० हा० वि०। पृ० ६१० पं० २५। ८–**रणं वा**–बृ० वा० बा०। ९ "वैधर्म्येण निदर्शनमुक्तम्–"बृ० टि०। १० पृ० ६१० पं० २५। ११–**द्ये क**–भां० मां० विना। १२ पृ० ६१० पं० ३२। १३ पृ० ६११ पं० १। १४ पृ० ६११ पं० २।

१ "विग्गहगइमावन्ना केवलिणो समुहया अयोगी या। सिद्धा य अणाहारा सेसा आहारगा जीवा" ॥ इत्येषा गाथा सूत्रकृताङ्गसूत्रटीकाकृता श्रीशीलाङ्केन तत्सूत्रद्वितीयश्रुतस्कन्धस्य आहारपरिज्ञानाम्नि तृतीयेऽध्ययने व्याख्यायामुद्धृताऽस्ति–पृ० ३४४ द्वि० पं० १–२। तस्या विशदा व्याख्याऽपि तत्स्थानत एव बोद्धव्या। प्रमेयकमलमार्तण्डेऽपि एषा उद्धृताऽस्ति–पृ० ८५ प्र० पं० १२। स्याद्वादर० पृ० ४६२ पं० २४। २ पृ० ६११ पं० ४। ३–**रप्रयो**–बृ०। ४ पृ० ६११ पं० ४। ५ पृ० ६११ पं० ५। ६ **तस्या भा**–ल० सं०। ७ अत्र–**'त्पादेऽतदुत्पत्ति'**–इति सावग्रहः पाठो युज्यते अन्यथा **'स्याधूम'** इति असंगतं स्यात्। ८ प्र० पृ० पं० १२। ९ पृ० ६११ पं० ८। १०–**स्तस्यैव स**–भां० मां० विना। ११ पृ० ५३–६९। १२ पृ० ६११ पं० ९। १३–**माण्यात्तदिय**–बृ०।–**माण्यं तर्हि तदिय**–आ०। १४ पृ० ६११ पं० १०। १५ सूत्राणि चैतानि सूत्रकृताङ्गसूत्रान्तर्गतद्वितीयश्रुतस्कन्धे आहारपरिज्ञानाम्नि तृतीयेऽध्ययने, भगवतीसूत्रे प्रथमशतकीयप्रथमोद्देशके, प्रज्ञापनासूत्रे च आहारपदे लभ्यन्ते–पृ० ३४२–३६०। पृ० १९–३०। पृ० ४९८—५२४।

च। यथा प्रथमतीर्थकृत एव चतुर्दशभक्तनिषेधेनाष्टापदनगे दशसहस्रकेवलिसहितस्य निर्वाणगति-
प्रतिपादकानि सूत्राणि। यद्यपि 'अतिशयदर्शनान्निरवशेषदोषावरणहानेः' इत्याद्याशङ्क्य विकल्पद्वय-
मुत्थाप्य परिहृतम् तत्रापि नास्माभिः सर्वज्ञत्वादेरभावः साध्यते येन धर्मिणोऽभावात् प्रकृत-
साध्यसिद्धिर्न भवेत् किन्तु यद्यतिशयदर्शनान्नैर्मल्यप्रतिपत्तिवद् आत्यन्तिकी शरीरस्थितिस्तस्य
५ साध्येत तदा मुक्तेरभावः प्रसज्यते एवेति प्रसङ्गसाधनं भवदभिप्रेतव्याप्तिबलात् क्रियत इति न
प्रागुक्तदोषावकाशः। द्वितीयपक्षेऽपि 'न केवलिभुक्तिः सिध्यति नाप्यनाहारौदारिकशरीरस्य चिर-
तरकालस्थायित्वं विरुध्यते' इति यदूषणमुक्तम् तदनुक्तोपालम्भरूपम् न ह्येवं केवलिभुक्त्यादिकम-
स्माभिः साध्यते किन्तु प्रदर्शितप्रमाणात् सर्वज्ञप्रणीतागमाच्च। 'न च यदतिशयवत्' इत्याद्यप्य-
सङ्गतम् संवत्सरमात्रशरीरस्थितिसिद्धावपि केवलिनामतोऽतिशयात् प्रभूततरकालस्थित्यसिद्धेः।
१० न च तावत्कालप्रकृताहारविरहप्रतिपादकमपि केवलिनां सूत्रमुपलभ्यते। यच्च 'संयोगस्यावस्थान-
मात्यन्तिकं न भवति' इत्यादि तत् सिद्धमेव साधितम्। यच्च 'सुनिश्चितासंभवद्बाधकप्रमाणत्वं
प्रकृताहारविरहेऽपि चिरतरमौदारिकशरीरस्थितेः प्रतिपादकस्य सूत्रस्यास्त्येव' इत्युक्तम् तदपि
प्रकृताहारविरहे केवलिप्रकृतशरीरस्थितेः प्रतिपादकस्य सूत्रस्यैवाभावादयुक्तम्। यदपि 'आहार-
विरहातिशयप्रतिपादकं सूत्रं प्रथमतीर्थकृदादेः' तदपि तच्छद्मस्थावस्थायां न पुनः केवल्यवस्थायाम्
१५ असंभवद्बाधकप्रमाणत्वं चासिद्धमनुमानस्य तदाहारप्रतिपादकस्य बाधकस्य प्रदर्शितत्वात् सूत्र-
समूहस्य च व्याख्याप्रज्ञप्त्याद्यङ्गेषु तद्बाधकस्योपलम्भात्।

किञ्च, सुनिश्चितासंभवद्बाधकप्रमाणत्वं न प्रमाणलक्षणं तस्य ज्ञातुमशक्यत्वात्। तथाहि—बाध-
कप्रमाणाभावो यद्यन्यतः प्रमाणादवसीयते तर्हि तत्रापि बाधकप्रमाणाभावनिश्चयात् प्रामाण्यनिश्चय-
स्तदभावनिश्चयश्चान्यतोऽबाधितप्रमाणादित्यनवस्थाप्रसक्तिः। अथ बाधानुपलम्भाद् बाधकाभाव-
२० निश्चयः, न; उत्पत्स्यमानबाधकेऽपि बाधकोत्पत्तेः प्राग् बाधानुपलब्धिसंभवान्न बाधकानुपलम्भाद्
बाधाभावनिश्चयः। न चानिश्चितलक्षणं प्रमाणं प्रमेयव्यवस्थानिबन्धनम् अतिप्रसङ्गात्। अथ संवादाद-
संभवद्बाधकप्रमाणत्वनिश्चयस्तर्हि संवादित्वमेव प्रमाणलक्षणमभ्युपगमार्हं किमबाधितत्वलक्षणप्रति-
ज्ञानेन तच्च संवादित्वमतीन्द्रियार्थविषयस्यागमस्याप्तप्रणीतत्वान्निश्चीयते तत्प्रणीतत्वनिश्चयश्चागमै-
कवाक्यतया व्यवस्थितस्य केवलिभुक्तिप्रतिपादकसूत्रसमूहस्य सिद्ध एवेति भवत्यागमादपि केवलिभु-

---

१-दनादिसूत्राणि ल० भां० मां० विना। २ तच्चेत्थम्—

"ते णं काले णं ते णं समए णं उसभे अरहा कोसलिए वीसं पुव्वसयसहस्साइं कुमारवासमज्झे वसित्ता णं तेवट्ठिं पुव्वसयसहस्साइं रज्जवासमज्झे वसित्ता णं तेसीइं पुव्वसयसहस्साइं अगारवासमज्झे वसित्ता णं एगं वाससहस्सं छउमत्थ-परिआयं पाउणित्ता एगं पुव्वसयसहस्सं वाससहस्सूणं केवलिपरिआयं पाउणित्ता पडिपुण्णं पुव्वसयसहस्सं सामण्णपरियागं पाउणित्ता चउरासीइं पुव्वसयसहस्साइं सव्वाउयं पालइत्ता खीणे वेयणिज्जाउयनामगुत्ते इमीसे ओसप्पिणीए सुसमदुसमाए समाए बहुविइक्कंताए तिहिं वासेहिं अद्धनवमेहि य मासेहिं सेसेहिं जे से हेमंताणं तच्चे मासे पञ्चमे पक्खे माहबहुले तस्स णं माहबहुलस्स तेरसीपक्खे णं उप्पिं अट्ठावयसेलसिहरंसि दसहिं अणगारसहस्सेहिं सद्धिं चोद्दसमेणं भत्तेणं अपाणएणं अभीइणा नक्खत्तेणं जोगमुवागएणं पुव्वण्हकालसमयंसि संपलियंकनिसण्णे कालगए विइक्कंते जाव सव्वदुक्खप्पहीणे"—मू० कल्पसू० सू० २२७ पृ० ४९ द्वि०।

३ पृ० ६११ पं० ११। ४ पृ० ६११ पं० १४—१६। ५-त इति ल० वा० बा० भां० मां० विना। ६ पृ० ६११ पं० १३। ७ पृ० ६११ पं० १६। ८ पृ० ६११ पं० १७। ९ पृ० ६११ पं० १९। १० पृ० ६११ पं० २१। ११ पृ० ६११ पं० ९। १२ पृ० ६१३ पं० ३४ तथा टि० १५।

१३ भगवतीतिनाम्ना प्रसिद्धे व्याख्याप्रज्ञप्तिसूत्रे द्वितीयशतकीयप्रथमोद्देशके स्कन्दकतापसाधिकारे सर्वज्ञस्य भगवतो महावीरस्य शरीरं वर्णयता सूत्रकारेण तस्य नित्यभोजित्वमपि 'वियडभोती' इति विशेषणेन सूचितम्। तच्चेत्थम्—

"तेणं कालेणं तेणं समयेणं समणे भगवं महावीरे वियडभोती या वि होत्था। तए णं समणस्स भगवओ महावीरस्स वियट्टभोगियस्स सरीरं ओरालं सिंगारं कल्लाणं सिवं धन्नं मंगल्लं सस्सिरीयं अणलंकियविभूसियं × × × सिरीए अतीव अतीव उवसोभमाणे चिट्ठइ"—पृ० ११७ प्र० तथा पृ० ६१३ टि० १५।

१४ "यावद् भाविन्या बाधाया अभावः"—बृ० ल० टि०। १५ "अनिश्चित एव बाधकाभावो मानलक्षणं भविष्यतीत्याह—न चेति"—बृ० ल० टि०।

क्तिसिद्धिः। तेन 'सूत्रभेदप्रकृप्तिः कवलाहारपरिकल्पनायां केवलिनः' इति दोषाभावः यथोक्तन्यायात्
तत्सिद्धेः। यद्यपि 'केवली प्रकृतमाहारमश्नन्' इत्यादिपक्षत्रयमुत्थाप्य तत्र दोषाभिधानम् तदप्यसंगतम्
यतः प्रथमपक्षे बुभुक्षयाऽश्नतो दुःखितापरसक्तिर्दोष उद्भावितः स चादोष एव असातानुभवस्य वेदनीय-
कर्मप्रभवस्यायोग्यवस्थाचरमक्षणं यावत् संभवात् तत्कारणस्यासातवेदनीयकर्मोदयस्याप्रतिबद्धत्वात्
अविकलकारणस्य च कार्यस्योत्पत्त्यप्रतिषेधात् अन्यथा तस्य तत्कारणत्वायोगात्, न च दग्धरज्जुसं- ५
स्थानीयत्वात् तस्य स्वकार्याजनकत्वम् तत एव सातवेदनीयस्यापि स्वकार्याजनकत्वप्रसक्तेः सुखानुभव-
स्यापि भगवत्यभावप्रसङ्गात्। यथा च दग्धरज्जुसंस्थानीयायुष्ककर्मोदयकार्यं प्राणादिधारणं भगवति
तथा प्रकृतमप्यभ्युपगम्यतां विशेषाभावात्। न च बुभुक्षाया दुःखरूपत्वाद् भगवत्यसंभवः प्रतिपा-
दयितुं शक्यः "एकादश जिने" [तत्त्वार्थ० अ० ९, सू० ११] इति सूत्रात् क्षुदादिपरिषहैकादशकस्य
केवलिनि सिद्धेः। यदपि 'अनन्तवीर्यत्वं प्रकृताहारमन्तरेणापि शरीरस्थितिकारणमभिधीयते' तदपि १०
छद्मस्थावस्थायां भगवत्यपरिमितबलश्रवणात् समस्त्येव न च प्रकृताहारमन्तरेण तत् तस्यामवस्थायां
शरीरस्थितिकारणम् अन्यथा कर्मक्षयार्थमनशनादितपस्युद्यमवतः प्राणवृत्तिप्रत्ययं तस्यामवस्थाया-
मशनाद्यभ्यवहरणमसङ्गतं स्यात्। न च प्राक् क्षायोपशमिकं तस्य वीर्यं कैवल्यावस्थायां तु क्षायिकं
तदिति विशिष्टाहारमन्तरेणापि शरीरस्थितिनिबन्धनम् तत्सद्भावेऽपि शरीरस्थितिनिमित्तशयनोप-
वेशादिवत् प्रकृताहारस्याप्यविरोधात्। न चोपवेशादिकमपि शरीरस्थित्यर्थं तत्रासिद्धम् समुद्घाता- १५
वस्थानन्तरकालं पीठफलकादिप्रत्यर्पणश्रुतेस्तद्ग्रहणमन्तरेण तत्प्रत्यर्पणस्यासंभवात् तद्ग्रहणस्य च
यथोक्तप्रयोजनमन्तरेणाभावात् अन्यथाऽप्रेक्षापूर्वकारितापत्तेः। यदपि 'बुभुक्षया देहं तिष्ठापयिषोः
क्लेशवत्त्वे न कश्चिद् विशेषः' तदप्यसारम् क्लेशस्य भगवत्यद्याप्यामुक्तिगमनात् सर्वथा अनिवृत्तेः।
तत्स्वभावपरिकल्पनया दोषप्रसञ्जनमभ्युपगमादेव निरस्तम्। तदेवं बाधकप्रमाणाभावात् साधकस्य
च सद्भावात् सिद्धा केवलिभुक्तिरित्यलं प्रसक्तानुप्रसक्तया।॥ १५॥ २०

[मत्यादिज्ञानचतुष्करूपे दृष्टान्ते यत्र यत्रोपयोगे विषयभेदस्तत्र तत्रासर्वार्थत्वमिति व्याप्तेर्भावनम्]

क्रमेण युगपद्वा परस्परनिरपेक्षस्वविषयपर्यवसितज्ञानदर्शनोपयोगौ केवलिन्यसर्वार्थत्वान्मत्यादि-
ज्ञानचतुष्टयवन्न स्त इति दृष्टान्तभावनायाह—

पण्णवणिज्जा भावा समत्तसुयणाणदंसणाविसओ। २५
ओहिमणपज्जवाण उ अण्णोण्णविलक्खणा विसओ॥ १६॥

मतिश्रुतयोरसर्वपर्यायसर्वद्रव्यविषयतयाऽभिन्नार्थत्वे श्रुतस्यासर्वार्थग्रहणात्मकत्वभावनया मति-
रपि तथा भावितैवेति श्रुतज्ञानस्यैव गाथायामसर्वार्थत्वभावना प्रदर्शिता। **प्रज्ञापनीयाः** शब्दाभि-
लाप्या **भावा** द्रव्यादयः **समस्तश्रुतज्ञानस्य** द्वादशाङ्गवाक्यात्मकस्य **दर्शनाया** दर्शनप्रयोजि-
कायास्तद्वाक्योपजातायाः बुद्धेर्**विषय** आलम्बनम् मतेरपि त एव शब्दानभिधेया विषयः शब्दपरि- ३०
कर्मणानपेक्षस्य ज्ञानस्य यथोक्तभावविषयस्य मतित्वात्। **अवधिमनःपर्याययोः पुनरन्योन्य-
विलक्षणा** भावा **विषयः** अवधेः पुद्गलाः मनःपर्यायज्ञानस्य मन्यमानानि द्रव्यमनांसि विषयः इति
असर्वार्थान्येतानि मत्यादिज्ञानानि परस्परविलक्षणविषयाणि च अत एव भिन्नोपयोगरूपाणि॥ १६॥

---

१ पृ० ६११ पं० १०। २ पृ० ६११ पं० २७—३९। ३ "कार्यस्य"—बृ० ल० टि०। ४ "असाता-
वेदनीयस्य"—बृ० ल० टि०। ५ पृ० ६११ पं० ३१। ६ "प्राणवृत्तौ प्रत्ययं कारणभूतम्"—बृ० ल० टि०।
७ "छद्मस्थावस्थायाम्"—बृ० ल० टि०। ८ पृ० ६११ पं० ३२। ९ पृ० ६११ पं० ३३। १०-णानापे-
आ० हा० वि०।

[मत्यादिवैधर्म्येण केवलोपयोगस्य असर्वार्थत्वाभावेन विषयभेदाभावादक्रमोपयोगद्वयात्मकैकरूपत्वसाधनम्]

एवमसकलार्थत्वं भिन्नोपयोगपक्षे दृष्टान्तसमर्थनद्वारेण प्रदर्श्योपसंहारद्वारेणाक्रमोपयोगद्वयात्मकमेकं केवलमन्यथा सकलार्थता तस्यानुपपन्नेति दर्शयितुमाह—

तम्हा चउव्विभागो जुज्जइ ण उ णाणदंसणजिणाणं ।
सयलमणावरणमणंतमक्खयं केवलं जम्हा ॥ १७ ॥

यस्मात् केवलं सकलं सकलविषयं तस्मान्न तु नैव ज्ञानदर्शनप्रधानानां निर्मूलिताशेषघातिकर्मणां जिनानां छद्मस्थावस्थोपलब्धतत्तदावरणक्षयोपशमकारणभेदप्रभवमत्यादिचतुर्ज्ञानेष्विव ज्ञानदर्शनयोः पृथक् क्रमाक्रमविभागो युज्यते । कुतः पुनः सकलविषयत्वं भगवति केवलस्यानावरणत्वात् न ह्यनावृतमसकलविषयं भवति । न च प्रदीपादिना व्यभिचारोऽनन्तत्वात् अनन्तत्वं च द्रव्यपर्यायात्मकानन्तार्थग्रहणप्रवृत्तोत्पादव्ययध्रौव्यात्मकोपयोगवृत्तत्वेनाक्षयत्वात् । यथा च सकलपदार्थविषयं सर्वज्ञज्ञानं तथा प्राक् प्रदर्शितम् । ततोऽक्रमोपयोगद्वयात्मकमेकमिति स्थितम् न चाक्रमोपयोगद्वयात्मकत्वे कथं तस्य केवलव्यपदेश इति क्रमाक्रमभिन्नोपयोगवादिना प्रेर्यम् इन्द्रियालोकमनोव्यापारनिरपेक्षनिरावरणात्मसत्तामात्रनिबन्धनतथाविधार्थविषयप्रतिभासस्य तथाविधव्यपदेशविषयत्वात् । अद्वैतैकान्तात्मकं तु तन्न भवति सामान्यविशेषोभयानुभयविकल्पचतुष्टयेऽपि दोषानतिक्रमात् । तथाहि—न तावत् सामान्यरूपतया तदद्वयं सामान्यस्य विशेषनिबन्धनत्वात् तदभावे तस्याप्यभावात् नापि विशेषमात्रत्वात् तदद्वयम् अवयवावयविविकल्पद्वयानतिक्रमात् न तावत् तदवयवरूपम् अवयव्यभावे तदपेक्षावयवरूपताऽसंभवात् । न चावयविरूपम् अवयवाभावे तद्रूपस्यासंभवात् न च तद्व्यातिरिक्तविशेषरूपम् असदविशेषप्रसङ्गात् न चैकान्तव्यावृत्तोभयरूपम् उभयदोषानतिक्रमात् । न चानुभयस्वभावम् असत्त्वप्रसक्तेः । न च ग्राह्यग्राहकविनिर्मुक्ताऽद्वयस्वरूपम् तथाभूतस्यात्मनः कदाचिदप्यननुभवात् सुषुप्तावस्थायामपि न ग्राह्यग्राहकस्वरूपविकलमद्वयं ज्ञानमनुभूयते ॥ १७ ॥

[अभिन्नोपयोगवादिना स्वपक्षे समापतत आगमविरोधस्यार्थगत्या व्याख्यान्तरमाश्रित्य परिहरणम्]

ज्ञानदर्शनोपयोगद्वयात्मकैककेवलोपयोगवादी स्वपक्षे आगमविरोधं परिहरन्नाह—

परवत्तव्वयपक्खाअविसिट्ठा तेसु तेसु सुत्तेसु ।
अत्थगईअ उ तेसिं वियंजणं जाणओ कुणइ ॥ १८ ॥

परैर्वैशेषिकादिभिर्यानि वक्तव्यानि प्रतिपाद्यानि तेषां पक्षा अभ्युपगमाः "युगपद् ज्ञानानुत्पत्तिः" [ ] "नागृहीतविशेषणा विशेष्ये बुद्धिः" [ ] इत्यादयः तैरविशिष्टा अभिन्ना भगवन्मुखाम्भोजनिर्गतेषु तेषु तेषु सूत्रेषु "जं समयं पासइ णो तं समयं जाणइ" [ ] इत्यादिषु अभ्युपगमाः प्रतिभासन्ते । न च ते तथैव व्याख्येयाः प्रमाणबाधनात् । तस्मात् अर्थगत्यैव सामर्थ्यनैव तेषां व्यक्तिं सकलवस्तुव्याप्यनेकान्तात्मकैककेवलावबोधप्रभवद्रादशाङ्गैकश्रुतस्कन्धाविरोधेन व्याख्यां ज्ञको ज्ञाता करोति । श्रुतावधिमनःपर्यायकेवली त्रिविधो "जं समयं पासइ नो तं समयं जाणइ" । [ ] न त्वेवं केवलकेवली तस्यासर्वज्ञताप्रसक्तेरिति सूरेरभिप्रायः ॥ १८ ॥

१-दृश्योपसंहारिणाक्रमो-वा० बा० ।-दर्श्योपयोगद्वारेणाक्रमो-बृ० आ० हा० वि० । २ तन्न सा-आ० हा० वि० । ३-षक्रममा-भां० मां० । ४-यरू-आ० हा० वि० । ५-लद्ध-वा० बा० । ६-वलं के-आ० वि० ।

[अक्रमोपयोगद्वयात्मकमेकं चेत् केवलं किमिति मनःपर्यायवदागमे तस्य ज्ञानमात्रतया न कथनम् किमिति च ज्ञान-दर्शनरूपतया द्वैविध्येन वर्णनमिति चोद्ये मर्मोद्घाटनम्]

यद्यक्रमोपयोगद्वयात्मकमेकं केवलं किमिति मनःपर्यायज्ञानवत् तद् ज्ञानत्वेनैव न निर्दिष्टम्? तस्मात् "केवलनाणे केवलदंसणे" [ ] इति भेदेन सूत्रनिर्देशात् क्रमेण युगपद्वा भिन्नमुपयोगद्वयं केवलावबोधरूपमित्याशङ्क्याह—

जेण मणोविसयगयाण दंसणं णत्थि दव्वजायाण ।
तो मणपज्जवणाणं णियमा णाणं तु णिद्दिट्ठं ॥ १९ ॥

यतो मनःपर्यायज्ञानविषयगतानां परमनोद्रव्यविशेषाणां विशेषरूपतया बाह्यस्य चिन्त्यमानस्य घटादेर्लिङ्गिनो गमकतोपपत्तेः दर्शनं सामान्यरूपं नास्ति द्रव्यरूपाणां चिन्त्यमानालम्बनपरमनोद्रव्यगतानां चिन्त्याविशेषाणां विशेषरूपतया बाह्यार्थगमकत्वात् तद्ग्राहि मनःपर्यायज्ञानं विशेषाकारत्वाद् ज्ञानमेव ग्राह्यदर्शनाभावाद् ग्राहकेऽपि तदभावः ततो मनःपर्यायाख्यो बोधो नियमाद् ज्ञानमेवागमे निर्दिष्टो न तु दर्शनम् । केवलं तु सामान्यविशेषोपयोगैकरूपत्वात् केवलं ज्ञानं केवलं दर्शनं चेत्यागमे निर्दिष्टम् ॥ १९ ॥

[एकत्वेऽपि केवलस्य ज्ञान-दर्शनोभयरूपतया शास्त्रे पाठात् तस्य कथंचिदनेकरूपत्वाभ्युपगमनम्]

तथा पुनरप्येकरूपानुविद्धामनेकरूपतां दर्शयन्नाह—

चक्खुअचक्खुअवहिकेवलाण समयम्मि दंसणविअप्पा ।
परिपढिया केवलणाणदंसणा तेण ते अण्णा ॥ २० ॥

चक्षुरचक्षुरवधिकेवलानां स्वसमये दर्शनविकल्पा भेदाः परिपठितास्तेन दर्शनमध्ये पाठाद् दर्शनमपि केवलम् ज्ञानमध्ये पाठाद् ज्ञानमपि अतो भिन्ने एव केवलज्ञानदर्शने न चात्यन्तं तयोर्भेद एव केवलान्तर्भूतत्वेन तयोरभेदात्, न चैवमभेदाद्वैतमेव सूत्रयुक्तिविरोधात् तत्परिच्छेदकस्वभावतया कथंचिदेकत्वेऽपि तथा तद्व्यपदेशात् ॥ २० ॥

[एकदेशिना मत्युपयोगं दृष्टान्तीकृत्य एकस्यापि केवलोपयोगस्य द्विरूपत्वसमर्थनम्]

एतदेव दृष्टान्तद्वारेणाह—

दंसणमोग्गहमेत्तं 'घडो' त्ति णिव्वण्णणा हवइ णाणं ।
जह एत्थ केवलाण वि विसेसणं एत्तियं चेव ॥ २१ ॥

अवग्रहमात्रं मतिरूपे बोधे दर्शनम् 'इदम्' 'तत्' इत्यव्यपदेश्यम् 'घटः' इति निश्चयेन वर्णना निश्चयात्मिका मतिज्ञानं यथेह तथेहापीति दार्ष्टान्तिकं योजयति जह एत्थ इत्यादिना केवलयोरप्येतन्मात्रेणैव विशेषः एकान्तभेदाभेदपक्षे तत्स्वभावयोः पूर्वोक्तदोषप्रसङ्गाद् अजहद्वृत्त्यैकरूपयोरेवाभिनिबोधिकरूपयोस्तत्तद्रूपतया तथाव्यपदेशसमासादनात् कथंचिदेकानेकात्मकत्वोपपत्तेर्भेदैकान्ते तयोरप्यभावापत्तेः ॥ २१ ॥

---

१ चिन्त्यताव्वि-भां० मां० । चिंतिताव्वि-वा० बा० । चिंत्याव्वि-हा० वि० । २ मतिर्ज्ञा-आ० । "घट इति निश्चयेन वर्णना तदाकाराभिलाप इति यावत् । कारणे कार्योपचाराच्च घटाकाराभिलापजनकं घटे मतिज्ञानमित्यर्थः यथाऽत्रैवं तथा केवलयोरप्येतावन्मात्रेण विशेषः"—ज्ञानबिं० पृ० १६० द्वि० पं० १३ । ३ प्र० पृ० पं० २० ।

[पुनरप्येकदेशिना क्रमिकभेदं दूषयितुं शास्त्रीययुक्त्या ज्ञान-दर्शनयोः कथंचिदन्यत्व-व्यवस्थापनम्]

इतश्च कथञ्चिद् भेदः—

दंसणपुव्वं णाणं णाणणिमित्तं तु दंसणं णत्थि ।
तेण सुविणिच्छियामो दंसणणाणाण अण्णत्तं ॥ २२ ॥

दर्शनपूर्वं ज्ञानम्, ज्ञाननिमित्तं तु दर्शनं नास्तीत्युक्तं यतः सामान्यमुपलभ्य पश्चाद् विशेषमुपलभते न विपर्ययेणेत्येवं छद्मस्थावस्थायां हेतुहेतुमद्भावक्रमः । तेनाप्यवगच्छामः कथञ्चित् तयोर्भेद इति । अयं च क्षयोपशमनिबन्धनः क्रमः केवलिनि च तदभावादक्रम इत्युक्तम् ॥२२॥

[एकदेशीये अवग्रहमात्रमतिज्ञानस्य दर्शनत्वाभ्युपगमे समापततो दोषस्याभिधानं तत्समर्थनं च]

यदुक्तम् 'अवग्रहमात्रं मतिज्ञानं दर्शनम्' इत्यादि तदयुक्तम् अतिव्याप्तेरित्याह—

जइ ओग्गहमेत्तं दंसणं ति मण्णसि विसेसिअं णाणं ।
मइणाणमेव दंसणमेवं सइ होइ निप्फण्णं ॥ २३ ॥
एवं सेसिंदियदंसणम्मि नियमेण होइ ण य जुत्तं ।
अह तत्थ णाणमेत्तं घेप्पइ चक्खुम्मि वि तहेव ॥ २४ ॥

यदि मत्यवबोधे अवग्रहमात्रं दर्शनं विशेषितं ज्ञानमिति मन्यसे मतिज्ञानमेव दर्शनमित्येवं सति प्राप्तम् न चैतद् युक्तम् । "स द्विविधोऽष्टचतुर्भेदः" [तत्त्वार्थ० अ० २ सू० ९] इति सूत्रविरोधात् ॥ २३ ॥

एवं शेषेन्द्रियदर्शनेष्वप्यवग्रह एव दर्शनमित्यभ्युपगमेन मतिज्ञानमेव तदिति । न च तद् युक्तं पूर्वोक्तदोषानतिवृत्तेः । अथ तेषु श्रोत्रादिष्विन्द्रियेषु दर्शनमपि भवत् तद् ज्ञानमेव, मात्रशब्दस्य दर्शनव्यवच्छेदकत्वात् । अत एव तत्र 'श्रोत्रज्ञानम्' इत्यादिव्यपदेश उपलभ्यते 'श्रोत्रदर्शनम्' 'घ्राणदर्शनम्' इत्यादिव्यपदेशस्तु नागमे क्वचित् प्रसिद्धस्तर्हि चक्षुष्यपि तथैव गृह्यतां 'चक्षुर्ज्ञानम्' इति न तु 'चक्षुर्दर्शनम्' इति । अथ तत्र दर्शनम् इतरत्रापि तथैव गृह्यताम् । ज्ञान-दर्शनयोरुपलम्भरूपत्वे अविशेषप्रसङ्गस्तयोरिति चेत् एवमेतद्रूपतया स्वभावभेदात् तु भेद इति ॥२४॥

[ज्ञान एव चक्षुरचक्षुर्दर्शनप्रवादसमर्थनाय दर्शनपदस्य अर्थाभिधानम्]

नन्ववग्रहस्य मतिभेदत्वाद् मतेश्च ज्ञानरूपत्वाद् अवग्रहरूपस्य दर्शनस्याभाव एव भवेत् उच्यते—

णाणं अपुट्ठे अविसए य अत्थम्मि दंसणं होइ ।
मोत्तूण लिंगओ जं अणागयाईयविसएसु ॥ २५ ॥

अस्प(स्पृ)ष्टेऽर्थरूपे चक्षुषा य उदेति प्रत्ययः स चक्षुर्दर्शनं ज्ञानमेव सत् इन्द्रियाणामविषये च परमाण्वादौ अर्थे मनसा ज्ञानमेव सद् अचक्षुर्दर्शनम्, मुक्त्वा मेघोन्नतिरूपा-

---

१ पृ० ६१२ पं० ३ । २ पृ० ६१७ गा० २१ पं० २६ । ३-णमित्तं बृ० । ४ प्र० पृ० पं० १५ । ५-वमेतत्तरूप-वा० बा० । ६ "अस्पृष्टेऽर्थे"—ज्ञानबिं० पृ० १६१ द्वि० पं० १३ ।

लिङ्गाद् भविष्यद्दृष्टौ नदीपूराद् वोपर्यतीतवृष्टौ वा लिङ्गिविषयं यद् ज्ञानं तस्यास्प(स्पृ)ष्टाविषयार्थस्याप्यदर्शनत्वात् ॥ २५ ॥

[अस्पृष्टाविषयावगाहित्वेऽपि न मनःपर्यायबोधस्य दर्शनत्वप्रसङ्ग इति सयुक्तिकं प्रतिपादनम्]

यद्यस्पृष्टाऽविषयार्थज्ञानं दर्शनमभिधीयते ततः—

मणपज्जवणाणं दंसणं ति तेणेह होइ ण य जुत्तं । ५
भण्णइ णाणं णोइंदियम्मि ण घडादओ जम्हा ॥ २६ ॥

एतेन लक्षणेन मनःपर्यायज्ञानमपि दर्शनं प्राप्तं परकीयमनोगतानां घटादीनामालम्ब्यानां तत्रासत्त्वेनास्पृष्टेऽविषये च घटादावर्थे तस्य भावात् न चैतद् युक्तम् आगमे तस्य दर्शनत्वेनापाठात् । भण्यते अत्रोत्तरम(म्) णोइंदियम्मि मनोवर्गणाख्ये मनोविशेषे प्रवर्तमानं मनःपर्यायबोधरूपं ज्ञानमेव न दर्शनं यस्मादस्पृष्टा घटादयो नास्य विषयो लिङ्गानुमेयत्वात् तेषाम् । १० तथा चागमः "जाणइ वज्झेऽणुमाणेणं" [विशेषा० भा० गा० ८१४] । ननु च परकीयमनोगतार्थाकारविकल्पस्योभयरूपत्वात् किमिति तद्ग्राहिणो मनःपर्यायावबोधस्य न दर्शनरूपता ? न, मनोविकल्पस्य बाह्यार्थचिन्तनरूपस्य विकल्पात्मकत्वेन ज्ञानरूपत्वात् तद्ग्राहिणो मनःपर्यायज्ञानस्यापि तद्रूपतैव घटादेस्तु तत्र परोक्षतैवेति दर्शनस्याभाव एव मनोविकल्पाकारस्योभयरूपत्वेऽपि छाद्मस्थिकोपयोगस्य परिपूर्णवस्तुग्राहकत्वासंभवाच्च न मनःपर्यायज्ञाने दर्शनोपयोगसंभवः ॥ २६ ॥ १५

[अस्पृष्टाविषयावगाहि ज्ञानमेव दर्शनम् न ततः पृथगिति प्रतिपादनम्]

किञ्च,

मइसुयणाणणिमित्तो छउमत्थे होइ अत्थउवलंभो ।
एगयरम्मि वि तेसिं ण दंसणं दंसणं कत्तो ? ॥ २७ ॥

मतिश्रुतज्ञाननिमित्तश्छद्मस्थानामर्थोपलम्भ उक्त आगमे । तयोरेकतरस्मिन्नपि २० न दर्शनं संभवति नं तावदवग्रहो दर्शनं तस्य ज्ञानात्मकत्वात् ततः कुतो दर्शनम् ? नास्तीत्यर्थः । अस्पृष्टेऽविषये चार्थे ज्ञानमेव दर्शनं नान्यदिति प्रसक्तम् ॥ २७ ॥

[अस्पृष्टार्थावगाहित्वेऽपि श्रुतज्ञानस्य दर्शनत्वाभावप्रतिपादनम्]

ननु श्रुतमस्पृष्टे विषये किमिति दर्शनं न भवेत् ? इत्याह—

जं पच्चक्खग्गहणं ण इन्ति सुयणाणसम्मिया अत्था । २५
तम्हा दंसणसद्दो ण होइ सयले वि सुयणाणे ॥ २८ ॥

यस्मात् श्रुतज्ञानप्रमिताः पदार्था उपयुक्ताध्ययनविषयास्तथाभूतार्थवाचकत्वात् श्रुतशब्दस्य प्रत्यक्षं न गृह्यन्ते अतो न श्रुतं चक्षुर्दर्शनसंज्ञम् मानसमचक्षुर्दर्शनं श्रुतं भविष्यतीत्येतदपि नास्ति अवग्रहस्य मतित्वेन पूर्वमेव दर्शनतया निरस्तत्वात् ॥ २८ ॥

---

१ "तस्यास्पृष्टाविषयार्थस्यापि दर्शनत्वेनाव्यवहारात्"—ज्ञानबिं० पृ० १६२ प्र० पं० ३ । २-त्तरं मनो-भां० मां० । ३-इंद्रियम्मि भां० मां० विना ।
४ "दव्वमणोपज्जाए जाणइ पासइ य तग्गएऽणंते । तेणावभासिए उण जाणइ बज्झेऽणुमाणेणं" ॥—विशेषा० भा० पृ० ८१४ द्वि० ।
५-गस्यो परिपू-हा० वि० । ६ न चाव-बृ० आ० हा० वि० । ७-दार्थ उ-भां० मां० विना । ८-ह्यते अ-बृ० वा० बा० विना । ९ प्र० पृ० पं० २० ।

[अवधिज्ञान एव प्रवृत्तिनिमित्तवशेन दर्शनशब्दस्यापि लब्धावकाशत्वसमर्थनम्]

नन्वेवमवधिदर्शनस्याप्यभावः स्यादित्याह—

जं अप्पुट्ठा भावा ओहिण्णाणस्स होंति पच्चक्खा ।
तम्हा ओहिण्णाणे दंसणसद्दो वि उवउत्तो ॥ २९ ॥

यस्मादस्पृष्टा भावा अण्वादयोऽवधिज्ञानस्य प्रत्यक्षा भवन्ति चक्षुर्दर्शनस्येव रूपसामान्यम् ततस्तत्रैव दर्शनशब्दोऽप्युपयुक्तः ॥ २९ ॥

[सिद्धान्तिना एकस्यैव केवलोपयोगस्य ज्ञानदर्शनोपयोगद्वयरूपत्वव्यावर्णनम्]

केवलावबोधस्तु ज्ञानदर्शनोपयोगद्वयात्मको ज्ञानमेव सन् दर्शनमप्युच्यत इत्याह—

[1]जं अप्पुट्ठे भावे जाणइ पासइ य केवली णियमा ।
तम्हा तं णाणं दंसणं च अविसेसओ सिद्धं ॥ ३० ॥

यतोऽस्पृष्टान् भावान्नियमेनावश्यंतया केवली चक्षुष्मानिव पुरःस्थितं चक्षुषा पश्यति जानाति चोभयप्राधान्येन । तस्मात् तत् केवलावबोधस्वरूपं ज्ञानमप्युच्यते दर्शनमप्यविशेषत उभयाभिधाननिमित्तस्याविशेषात् न पुनर्ज्ञानमेव सदविशेषतोऽभेदतो दर्शनमिति सिद्धम् । यतो न ज्ञानमात्रमेव तत् नापि दर्शनमात्रं केवलम् नाप्युभयाक्रमरूपं परस्परविविक्तम् नापि क्रमस्वभावम् अपि तु ज्ञानदर्शनात्मकमेकं प्रमाणमन्यथोक्तवत् तदभावप्रसङ्गात् ।

[सूर्यभिप्रायेण ज्ञानपञ्चक-दर्शनचतुष्कयोः स्वरूपविभजनम्]

छद्मस्थावस्थायां तु प्रमाणप्रमेययोः सामान्यविशेषात्मकत्वेऽप्यनपगतावरणस्यात्मनो दर्शनोपयोगसमये ज्ञानोपयोगस्यासम्भवाद् अप्राप्यकारिनयन-मनःप्रभवार्थावग्रहादिमतिज्ञानोपयोगप्राक्तनी अवस्था अस्प(स्पृ)ष्टावभासिग्राह्यग्राहकत्वपरिणत्यवस्था व्यवस्थितात्मप्रबोधरूपा[2] चक्षुरचक्षुर्दर्शनव्यपदेशमासादयति । द्रव्यभावेन्द्रियालोकमतिज्ञानावरणकर्मक्षयोपशमादिसामग्रीप्रभवरूपादिविषयग्रहणपरिणतिश्चात्मनोऽवग्रहादिरूपा मतिज्ञानशब्दवाच्यतामश्नुते । श्रुतज्ञानावरणकर्मक्षयोपशमवाक्यश्रवणादिसामग्रीविशेषनिमित्तप्रादुर्भूतो वाक्यार्थग्रहणपरिणतिस्वभावो वाक्यश्रवणानिमित्तो वा आत्मनः श्रुतज्ञानमिति शब्दाभिधेयतामाप्नोति। रूपिद्रव्यग्रहणपरिणतिविशेषस्तु जीवस्य भवगुणप्रत्ययावधिज्ञानावरणकर्मक्षयोपशमप्रादुर्भूतो लोचनादिबाह्यनिमित्तनिरपेक्षः अवधिज्ञानमिति व्यपदिश्यते तज्ज्ञैः अवधिदर्शनावरणकर्मक्षयोपशमप्रादुर्भूतस्तु स एव तद्द्रव्यसामान्यपर्यालोचनस्वभावोऽवधिदर्शनव्यपदेशभाग् भवति । अर्धतृतीयद्वीपसमुद्रान्तर्वर्तिसकलमनोविकल्पग्रहणपरिणतिर्मनःपर्यायज्ञानावरणकर्मक्षयोपशमादिविशिष्टसामग्रीसमुत्पादिता चक्षुरादिकरणनिरपेक्षस्यात्मनः मनःपर्यायज्ञानमिति वदन्ति विद्वांसः । छाद्मस्थिकोपयोगं चात्मा स्वप्रदेशावरणक्षयोपशमद्वारेण प्रतिपद्यते

---

१ प्रस्तुतगाथासंवादकमेकं पद्यं मलधारिहेमचन्द्रसूरिणा स्वकीयायां विशेषावश्यकभाष्यवृत्तौ स्तुतिकारकर्तृकत्वेन समुद्धृतं वर्तते । तद्यथा—

"यदपि केवलज्ञानं केवलदर्शनं च तस्योच्यते तत्रापि तयोर्न विशेष इत्यभिप्रायवता प्रोक्तं स्तुतिकारेण

एवं कल्पितभेदमप्रतिहतं सर्वज्ञतालाञ्छनं सर्वेषां तमसां निहन्तृ जगतामालोकनं शाश्वतम् ।
नित्यं पश्यति बुध्यते च युगपद् नानाविधानि प्रभो ! स्थित्युत्पत्तिविनाशवन्ति विमलद्रव्याणि ते केवलम्" ॥

—पृ० ११९८ पं० १० ।

यद्यपि इदं पद्यं लभ्यासु एकविंशतौ सिद्धसेनीयद्वात्रिंशिकासु न दृश्यते तथापि तत् सिद्धसेनप्रणीतमेवाऽवसीयते समन्तभद्रवत् तस्यैव स्तुतिकारत्वेन प्रसिद्धत्वात् तस्यैव अभिन्नकेवलज्ञानदर्शनोपयोगद्वयमतप्रस्थापकत्वेन विश्रुतत्वाच्च ।

२–**मात्र के**–भां० मां० हा० । ३–**पाच्चक्षु**–बृ० हा० वि० ।

न त्वनन्तज्ञेयज्ञानस्वभावस्यात्मन एतदेव खण्डशः प्रतिपत्तिलक्षणं पारमार्थिकं[1] रूपं सामान्यविशेषात्मकवस्तुविस्तरव्यापि युगपत्परिच्छेदस्वभावद्व्यात्मकैककेवलावबोधतात्त्विकरूपत्वात् तस्य । तच्च तस्य स्वरूपं केवलज्ञानदर्शनावरणकर्मक्षयाविर्भूतं करणक्रमव्यवधानातिवर्तिसकललोकालोकविषयत्रिकालस्वभावपरिणामभेदानन्तपदार्थयुगपत्सामान्यविशेषसाक्षात्करणप्रवृत्तं केवलज्ञानं केवलदर्शनमिति च व्यपदिश्यते । तेन 'अवग्रहरूप आभिनिबोधो दर्शनम् स [3]एव चेहादिरूपो विशेषग्राहको ज्ञानं तद्व्यतिरिक्तस्यापरस्य ग्राहकस्याभावात् तस्यैवैकस्य तथाग्रहणात् तथाव्यपदेशादुत्फणविफणावस्थासर्प[4]द्रव्यवत् ततस्तयोरवस्थयोरव्यतिरेकात् तस्य च तद्रूपत्वादेक एवाभिनिबोधो दर्शनं मतिज्ञानं चाभिधीयत इति सूत्रकृतोऽभिप्रायः' इति यत् कैश्चिद् व्याख्यातं तदसङ्गतं लक्ष्यते आगमविरोधात् युक्तिविरोधाच्च न ह्येकान्ततोऽभेदे पूर्वमवग्रहो दर्शनं पश्चाद् ईहादिकं ज्ञानं तयोश्च तत्रान्तर्भाव इति शक्यमभिधातुम् कथंचिद्भेदनिबन्धनत्वादस्य आत्मरूपतया तु तयोरभेदोऽभ्युपगम्यत एव । न चैकस्यैव मतिज्ञानस्योभयमध्यपातादुभयव्यपदेशः अवग्रहस्य [5]दर्शनत्वे 'अवग्रहादिधारणा[6]पर्यन्तं मतिज्ञानम्' इत्यस्य व्याहतेः तस्य वाऽदर्शनत्वे 'अवग्रहमात्रं दर्शनम्[7]' इत्यस्य विरोधात् आगमविरोधश्च तद्व्यतिरेकेण दर्शनानभ्युपगमे तदभ्युपगमे वाऽष्टाविंशतिभेदमतिज्ञानव्यतिरिक्तदर्शनाभ्युपगमात् कुतो ज्ञानमेव दर्शनं छद्मस्थावस्थायाम् ? केवल्यवस्थायां तु क्षीणावरणस्याऽऽत्मनो नित्योपयुक्तत्वात् सदैव दर्शनावस्था वर्तमानपरिणतेर्वस्तुनोऽवगमरूपायाः प्राक् तथाभूतानवबोधरूपत्वासंभवात् तथाभूतज्ञानविकलावस्थासंभवे वा प्रागितरपुरुषाविशेषप्रसङ्गात् । ततो युगपज्ज्ञानदर्शनोपयोगद्वयात्मकैकोपयोगरूपः केवलावबोधोऽभ्युपगन्तव्य इति सूरेरभिप्रायः ॥ ३० ॥

[एक एव केवलोपयोगो द्व्यात्मक इति स्वसिद्धान्तः समयान्तरोत्पादवचनं तु परतीर्थिकमतकथनमिति विभजनम्]

द्व्यात्मक एक एव केवलावबोध इति दर्शयन्नाह—

साई अपज्जवसियं ति दो वि ते ससमयओ हवइ एवं ।
परतित्थियवत्तव्वं च एगसमयंतरुप्पाओ ॥ ३१ ॥

द्वे अपि ते ज्ञानदर्शने यदि युगपद् न नाना भवतस्तदा स्वसमयः स्वसिद्धान्तः 'साद्यपर्यवसिते' इति घटते यस्त्वेकसमयान्तरोत्पाद[8]स्तयोः 'यदा जानाति तदा न पश्यति' इत्येवमभिधीयते स परतीर्थिकशास्त्रं नार्हद्वचनम् नयाभिप्रायेण प्रवृत्तत्वादिति सूरेरभिप्रायः ॥ ३१ ॥

[एवंभूततत्त्वश्रद्धानरूपस्य सम्यग्दर्शनस्य सम्यग्ज्ञानरूपत्वमेव इति वर्णनम्]

एवंभूतं वस्तुतत्त्वं श्रद्दधानः सम्यग्ज्ञानवानेव पुरुषः सम्यग्दृष्टिरित्याह—

एवं जिणपण्णत्ते सद्दहमाणस्स भावओ भावे ।
पुरिसस्साभिणिबोहे दंसणसद्दो हवइ जुत्तो ॥ ३२ ॥

एवमनन्तरोक्तविधिना जिनप्रज्ञप्तान् भावान् श्रद्दधानस्य पुरुषस्य यदाभिनिबोधिकं ज्ञानं तदेव सम्यग्दर्शनम् विशिष्टावबोधरूपाया रुचेः सम्यग्दर्शनशब्दवाच्यत्वादिति भावः ॥ ३२ ॥

१–**र्थिकरू**–हा० वि० । २–**नानति**–बृ० सं० । ३ **एवेहा**–भां० मां० विना । ४–**स्थयोर्व्यति**–बृ० । ५ **दर्शनत्वेन अ**–वा० बा० । **दर्शने अ**–बृ० । ६–**पर्यन्त म**–बृ० वा० बा० मां० विना । ७ पृ० ६१७ गा० २१ पं० २६ । ८–**गमे वाष्टा**–बृ० ।

[सम्यग्ज्ञाने दर्शनस्य नियततया दर्शने सम्यग्ज्ञानस्य विकल्पनीयतया सम्यग्दर्शनं विशिष्टज्ञानरूपमेव इति फलिताभिधानम्]

ननु यदि सम्यग्ज्ञाने सम्यग्दर्शनं नियमेन दर्शनेऽपि रुचिलक्षणे सम्यग्ज्ञानं किमिति न स्यात् ? न, एकान्तरुचावपि सम्यग्ज्ञानप्रसक्तेरित्याह—

सम्मण्णाणे णियमेण दंसणं दंसणे उ भयणिज्जं ।
सम्मण्णाणं च इमं ति अत्थओ होइ उववण्णं ॥ ३३ ॥

सम्यग्ज्ञाने नियमेन सम्यग्दर्शनं **दर्शने** पुनर्भजनीयं विकल्पनीयं सम्यग्ज्ञानम् एकान्तरुचौ न संभवति अनेकान्तरुचौ तु सम्यग्दर्शने समस्ति । यतश्चैवमतः **सम्यग्ज्ञानं चेदं** सम्यग्दर्शनं च विशिष्टरुचिस्वभावमवबोधरूपमर्थतः सामर्थ्यादुपपन्नं भवति ॥ ३३ ॥

[सूत्रोक्तं साद्यपर्यवसितत्वं शब्दशः स्पृशतां केषांचिदाचार्याणां गर्विष्ठतया सम्यग्वादिलाभावप्रतिपादनम्]

अत्र साद्यपर्यवसितं केवलज्ञानं सूत्रे प्रदर्शितम् अनुमानं च तथाभूतस्य तस्य प्रतिपादकं संभवति । तथाहि—घातिकर्मचतुष्टयप्रक्षयाविर्भूतत्वात् केवलं सादि न च तथोत्पन्नस्य पश्चात्तस्यावरणमस्ति अतोऽनन्तमिति न पुनरुत्पद्यते विनाशपूर्वकत्वादुत्पादस्य न हि घटस्याविनाशे कपालानामुत्पादो दृष्ट इत्यनुत्पादव्ययात्मकं केवलमित्यभ्युपगमवतो निराकर्तुमाह—

केवलणाणं साई अपज्जवसियं ति दाइयं सुत्ते ।
तेत्तियमित्तोत्तूणा[3] केइ विसेसं ण इच्छंति ॥ ३४ ॥

केवलज्ञानं साद्यपर्यवसितमिति दर्शितं सूत्रे इत्येतावन्मात्रेण गर्विताः केचन **विशेषं** पर्यायं पर्यवसितत्वस्वभावं विद्यमानमपि **नेच्छंति** ते न च सम्यग्वादिनः ॥ ३४ ॥

[सिद्धान्तिना केवलस्य पर्यवसितत्वप्रदर्शनम्]

यतः—

जे संघयणाईया भवत्थकेवलिविसेसपज्जाया ।
ते सिज्झमाणसमये ण होंति विगयं तओ होइ ॥ ३५ ॥

ये वज्रऋषभनाराचसंहननादयो भवस्थस्य केवलिनः आत्मपुद्गलप्रदेशयोरन्योन्यानुवेधाद् व्यवस्थितेः-**विशेषपर्यायास्ते सिध्यत्समयेऽपगच्छन्ति** तदपगमे तदव्यतिरिक्तस्य केवलज्ञानस्याप्यात्मद्रव्यद्वारेण विगमात् अन्यथाऽवस्थातुरवस्थानामात्यन्तिकभेदप्रसक्तेः केवलज्ञानं **ततो विगतं भवतीति** सूत्रकृतोऽभिप्रायः ॥ ३५ ॥

१-**स्य प्रति**-बृ० आ० हा० वि० । २-**यमेत्तो**- बृ० आ० हा० वि० । ३-**मित्तोत्तणा** आ० ।-**मित्तोमूणा** वि० ।-**मित्तोपूणा** हा० । 'उत्तूण' शब्दो दृप्तवाची देश्यः । "दरिए उत्तुण-उम्मुह-उच्चुंचु-च्छुच्छु-उत्तुरिद्धीओ"—देशीना० प्रथ० व० गा० ९९ पृ० ४१ ।

[सिध्यत्समये केवलस्य विनाशवद् उत्पादस्यापि प्रदर्शनम् अपर्यवसितत्वविषयकसूत्रोक्तेरपेक्षाविशेषेण समर्थनं च]

विनाशवत् केवलज्ञानस्योत्पादोऽपि सिध्यत्समय इत्याह—

सिद्धत्तणेण य पुणो उप्पण्णो एस अत्थपज्जाओ ।
केवलभावं तु पडुच्च केवलं दाइयं सुत्ते ॥ ३६ ॥

सिद्धत्वेनाशेषकर्मविगमस्वरूपेण पुनः पूर्ववदुत्पन्न **एष** केवलज्ञानाख्योऽर्थपर्याय उत्पादविगमध्रौव्यात्मकत्वाद् वस्तुनः अन्यथा वस्तुत्वहानेः । यत् त्वपर्यवसितत्वं **सूत्रे** केवलस्य **दर्शितं** तत् तस्य **केवलभावं** सत्तामात्रमाश्रित्य कथंचिदात्माव्यतिरिक्तत्वात् तस्य आत्मनश्च द्रव्यरूपतया नित्यत्वात् ॥ ३६ ॥

[स्वरूप–लक्षणाभ्यां जीव–केवलयोर्भेदे सत्यपि कथं तयोरेकत्वमित्यस्याः केषांचिदाशङ्काया उल्लेखः]

ननु केवलज्ञानस्यात्मरूपतामाश्रित्य तस्योत्पादविनाशाभ्यां केवलस्य तौ भवतः न चात्मनः केवलरूपतेति कुतस्तद्वारेण तस्य तावित्याह—

जीवो अणाइणिहणो केवलणाणं तु साइयमणंतं ।
ईअ थोरम्मि[1] विसेसे कह जीवो केवलं होइ ॥ ३७ ॥
तम्हा अण्णो जीवो अण्णे णाणाइपज्जवा तस्स ।
उवसमियाईलक्खणविसेसओ केइ इच्छन्ति ॥ ३८ ॥

जीवोऽनादिनिधनः केवलज्ञानं तु साद्यपर्यवसितमिति स्थूरे विरुद्धधर्माध्यासलक्षणे **विशेषे** छायातपवदत्यन्तभेदात् **कथं जीवः केवलं भवेत्** ? जीवस्यैव तावत् केवलरूपता असंगता दूरतः संहननादेरिति भावः ॥ ३७ ॥

तस्माद् विरुद्धधर्माध्यासतोऽन्यो **जीवो** ज्ञानादिपर्यायेभ्यः **अन्ये** च ततो **ज्ञानादिपर्याया**[2] लक्षणभेदाच्च तयोर्भेदः । तथाहि—ज्ञान-दर्शनयोः क्षायिकः क्षायोपशमिको वा भावो लक्षणम् जीवस्य तु पारिणामिकादिर्भावो लक्षणमिति **केचित्** व्याख्यातारः **प्रतिपन्नाः** ॥ ३८ ॥

[प्रागुक्तामाशङ्कां निरसितुमुपक्रमः]

एतन्निषेधायाह—

अह पुण पुव्वपयुत्तो अत्थो एगंतपक्खपडिसेहे ।
तह वि उयाहरणमिणं ति हेउपडिजोअणं वोच्छं ॥ ३९ ॥

यद्यप्ययं **पूर्वमेव** द्रव्यपर्याययोर्भेदाभेदैकान्तपक्षप्रतिषेधलक्षणोऽर्थः **प्रयुक्तो** योजितः 'उप्पाय–ट्ठिइ–भंगा'[3] [प्र० का० गा० १२] इत्यादिना अनेकान्तव्यवस्थापनात् **तथापि** केवलज्ञाने अनेकान्तात्मकैकरूपप्रसाधकस्य **हेतोः** साध्येनानुगमप्रदर्शकप्रमाणविषयमुदाहरणमिदमुत्तरगाथया **वक्ष्ये** ॥ ३९ ॥

---

१ **इअ घोर**-भां० मां० । **एत्थोर**-बृ० आ० हा० वि० । २-**पर्याय ल**-बृ० वा० बा० विना । ३ पृ० ४१० पं० ५ ।

[अनेकान्तात्मकैकरूपत्वेन साध्येन सत्त्वस्य हेतोर्व्याप्तिं प्रसाधयितुं दृष्टान्तोपन्यासः]

तदेवाह—

जह कोइ सट्ठिवरिसो तीसइवरिसो णराहिवो जाओ ।
उभयत्थ जायसद्दो वरिसविभागं विसेसेइ ॥ ४० ॥

यथा कश्चित् पुरुषः षष्टिवर्षः सर्वायुष्कमाश्रित्य त्रिंशद्वर्षः सन्नराधिपो जात उभयत्र मनुष्ये राजनि च जातशब्दोऽयं प्रयुक्तो वर्षविभागमेवास्य दर्शयति । षष्टिवर्षायुष्कस्य पुरुषसामान्यस्य नराधिपपर्यायोऽयं जातः अभेदाध्यासितभेदात्मकत्वात् पर्यायस्य नराधिपपर्यायात्मकत्वेन चायं पुरुषः पुनर्जातो भेदानुषक्ताभेदात्मकत्वात् सामान्यस्य एकान्तभेदेऽभेदे वा तयोरभावप्रसङ्गान्निराश्रयस्य पर्यायप्रादुर्भावस्य तद्विकलस्य वा सामान्यस्यासंभवात् संशयविरोधवैयधिकरण्याऽनवस्थोभयदोषादीनामनेकान्तवादे च प्रागेव निरस्तत्वात् ॥ ४० ॥

[दृष्टान्तगृहीतव्याप्तेः सत्त्वहेतोर्दार्ष्टान्तिके केवले उपनयनम्]

दृष्टान्तं प्रसाध्य दार्ष्टान्तिकयोर्जनायाह—

एवं जीवद्दव्वं अणाइणिहणमविसेसियं जम्हा ।
रायसरिसो उ केवलिपज्जाओ तस्स सविसेसो ॥ ४१ ॥

एवमनन्तरोक्तदृष्टान्तवज्जीवद्रव्यमनादिनिधनमविशेषितभव्यजीवरूपं सामान्यं यतो राजत्वपर्यायसदृशः केवलित्वपर्यायस्तस्य तथाभूतजीवद्रव्यस्य विशेषस्तस्मात् तेन रूपेण जीवद्रव्यसामान्यस्यापि कथंचिदुत्पत्तेः सामान्यमप्युत्पन्नं प्राक्तनरूपस्य विगमात् सामान्यमपि तदभिन्नं कथंचिद् विगतं पूर्वोत्तरपिण्डघटपर्यायपरित्यागोपादानप्रवृत्तैकमृद्द्रव्यवत् केवलरूपतया जीवरूपतया वा अनादिनिधनत्वान्नित्यं द्रव्यमभ्युपगन्तव्यम् प्रतिक्षणभाविपर्यायानुस्यूतस्य च मृद्द्रव्यस्याध्यक्षतोऽनुभूतेर्न दृष्टान्तासिद्धिस्तस्मात् केवलं कथंचित् सादि कथंचिदनादि कथंचित् सपर्यवसानं कथंचिदपर्यवसानं सत्त्वादात्मवदिति स्थितम् ॥ ४१ ॥

[जीव-तत्पर्यायगतं प्रामाणिकं व्यवहारमाश्रित्य द्रव्यपर्याययोरेकान्तभेदनिराकरणम्]

न द्रव्यं पर्यायेभ्यो भिन्नमेवेत्याह—

जीवो अणाइनिहणो 'जीव' त्ति य णियमओ ण वत्तव्वो ।
जं पुरिसाउयजीवो देवाउयजीवियविसिट्ठो ॥ ४२ ॥

जीवोऽनादिनिधनो जीव एव विशेषविकल इति नियमतो न वक्तव्यम् यतः पुरुषायुष्कजीवो देवायुष्कजीवाद् विशिष्टो जीव एव इति त्वभेदे पुरुषजीव इत्यादिभेदो न भवेत् केवलस्य सामान्यस्य विशेषप्रत्ययाभिधानानिबन्धनत्वान्निर्निमित्तस्यापि विशेषप्रत्ययाभिधानस्य संभवे सामान्यप्रत्ययाभिधानस्यापि निर्निमित्तस्यैव भावात् तन्निबन्धनसामान्याभ्युपगमोऽप्ययुक्तः स्यादिति सर्वाभावः । न च विशेषप्रत्ययस्य बाधारहितस्यापि मिथ्यात्वमितरत्रापि तत्प्रसक्तेरिति प्रतिपादनात् ॥ ४२ ॥

---

१ जाइस-बृ० । २-पशब्दोऽ-भां० मां० । ३-दाध्यवसि-वा० बा० । ४-कल्पस्य बृ० आ० विना । ५ पृ० ४५१ पं० ३३ टि० ७ । ६-जनामाह भां० मां० । ७ एव्वं बृ० वा० बा० विना । ८-ण्डद्रव्यघ-बृ० बा० बा० विना । ९ सादिकं क-वा० बा० भां० मां० । १०-न्यस्यावि-वा० बा० विना ।

[आत्मद्रव्यस्य स्वाभाविकैर्वैभाविकैश्च पर्यायैः कथंचिदेकानेकत्वप्रदर्शनम्]

केवलज्ञानस्य कथंचिदात्माऽव्यतिरेकादात्मनो वा केवलज्ञानाव्यतिरेकात् कथञ्चिदेकत्वं तयोरित्याह—

संखेज्जमसंखेज्जं अणंतकप्पं च केवलं णाणं ।
तह रागदोसमोहा अण्णे वि य जीवपज्जाया ॥ ४३ ॥

आत्मन एकत्वात् कथञ्चित् तदव्यतिरिक्तं केवलमप्येकम् केवलस्य वा ज्ञानदर्शनरूपतया द्विरूपत्वात् तदव्यतिरिक्त आत्माऽपि द्विरूपः असंख्येयप्रदेशात्मकत्वादात्मनः केवलमप्यसंख्येयम् अनन्तार्थविषयतया केवलस्यानन्तत्वादात्माऽप्यनन्तः । एवं रागद्वेषमोहा अन्येऽपि जीवपर्यायाश्छद्मस्थावस्थाभाविनः संख्येयाऽसंख्येयानन्तप्रकारा आलम्ब्यभेदात् तदात्मकत्वात् संसार्यात्माऽपि तद्वत् तथैव स्यात् । सोमिलब्राह्मणप्रश्नप्रतिवचने चागमे एतदर्थप्रतिपादकं च सूत्रम्—"एगे भवं दुवे भवं" इत्यादि "जाव अणेगभूयभावभविए भवं" इति प्रश्ने उत्तरं-"सोमिला ! एगे वि अहं जाव अणेगभूयभावभविए य अहं । से केणट्ठेणं भंते ! एवं वुच्चइ ? एगे वि अहं" इत्याद्युत्तरहेतुप्रश्ने हेतुप्रतिपादनम् । "सोमिला ! दव्वट्ठयाए एगे अहं, णाणदंसणट्ठयाए दुवे अहं" [भगवती० श० १८ उ० १० सू० ६४७] इत्यादि प्रकृतार्थसंवादि सिद्धम् । रागादीनां चैकाद्यनन्तभेदत्वमात्मपर्यायत्वात् यो ह्यात्मपर्यायः स एकाद्यनन्तभेदो यथा केवलावबोधस्तथा च रागादय इति स्थित्युत्पत्तिनिरोधात्मकत्वमर्हत्यपि सिद्धमिति यत् परेणोक्तम्—"अनेकान्तात्मकत्वाभावेऽपि केवलिनि सत्त्वात् यत् सत् तत् सर्वमनेकान्तात्मकमिति प्रतिपादकस्य शासनस्याव्यापकत्वात् कुसमयविशासित्वं तस्यासिद्धम्" [ ] इति तत् प्रत्युक्तं द्रष्टव्यम् ॥ ४३ ॥

तत्त्वबोधविधायिन्यां सम्मतिटीकायां द्वितीयं काण्डम् ।

---

१ "एगे भवं दुवे भवं अक्खए भवं अव्वए भवं अवट्ठिए भवं अणेगभूयभावभविए भवं ?
सोमिला ! एगे वि अहं जाव अणेगभूयभावभविए वि अहं ।
से केणट्ठेणं भंते ! एवं वुच्चइ जाव-भविए वि अहं ?
सोमिला ! दव्वट्ठयाए एगे अहं, नाण-दंसणट्ठयाए दुविहे अहं, पएसट्ठयाए अक्खए वि अहं, अव्वए वि अहं अवट्ठिए वि अहं, उवयोगट्ठयाए अणेगभूयभावभविए वि अहं । से तेणट्ठेणं जाव-भविए वि अहं"—इति संपूर्णं सूत्रम् भगवतीसू० पृ० ७६० प्र० । २-त्तितिरो-आ० हा० वि० । त्तिविरो-भां० मां० । ३-त् प्रयुक्तं द्र-भां० मां० ।-त् प्रत्यक्षं द्र-बृ० आ० हा० वि० । ४ (ग्रन्थाग्रम्) ७२५० बृ० ।
८० स० त०

शुद्धिपत्रम्

शुद्धिः	पृष्ठे	पङ्क्तौ
शैल्या	४९९	३५
प्रशस्त० कं०	५३९	३४
तत्त्वार्थश्लो०	५५३	३९

गूजरात
पुरातत्त्वमन्दिर
ग्रन्थावली



ग्रन्थाङ्क २१

गूजरातपुरातत्त्वमन्दिरग्रन्थावली

आचार्यश्रीसिद्धसेनदिवाकरप्रणीतं

सन्मतितर्क-प्रकरणम्।

जैनश्वेताम्बर-राजगच्छीय-प्रद्युम्नसूरिशिष्य-तर्कपञ्चानन-
श्रीमद्-अभयदेवसूरिनिर्मितया तत्त्वबोधविधायिन्या
व्याख्यया विभूषितम्।

पञ्चमो विभागः।

(तृतीयं काण्डम्)

गूजरातविद्यापीठप्रतिष्ठितपुरातत्त्वमन्दिरस्थेन
संस्कृतसाहित्य-दर्शनशास्त्राध्यापकेन
पं० सुखलालसंघविना
प्राकृतवाङ्मयाध्यापकेन जैनन्याय-व्याकरणतीर्थ-
पं० बेचरदासदोशिना च
पाठान्तर-टिप्पण्यादिभिः परिष्कृत्य संशोधितम्।

गूजरात विद्यापीठ
अमदावाद

प्रथमावृत्तिः, प्रतिसं० ५००] संवत् १९८७ [मूल्यम्-१० रूप्यकाणि.

प्रकाशकः—नरहरि द्वारकादास परीख महामात्र, गूजरात विद्यापीठ,
अमदावाद

मुद्रकः—रामचंद्र येसू शेडगे, निर्णयसागर प्रेस, नं. २६–२८, कोलभाट लेन, मुंबई.

टीका–टिप्पण्युपयुक्तग्रन्थसंकेतस्पष्टीकरणम् ।

अनुयोगद्वारवृत्तिः	
आचारा० सू०	आचाराङ्गसूत्रम्
आवश्यकनि० उवग्घायनि०	आवश्यकनिर्युक्तौ
,, पढमाव०	उपोद्घातनिर्युक्तिः, प्रथमावश्य-
,, सामायिकनि०	कनियुक्तिः, सामायिकनिर्युक्तिः
उत्तरा०	उत्तराध्ययनसूत्रम् ।
ओघनि०	ओघनिर्युक्तिः ।
का०	कारिका ।
गु० मू०	गुलाबविजयसत्का सन्मतिसूत्रमूलप्रतिः ।
जीवविचा०	जीवविचारप्रकरणम् ।
जीवाजीवाभि० प्रतिप०	जीवाजीवाभिगमसूत्रे प्रतिपत्तिः ।
जम्बूद्वीपप्र० वक्ष०	जम्बूद्वीपप्रज्ञप्तौ वक्षस्कारः ।
तत्त्वार्थ० / तत्त्वार्थसू०	तत्त्वार्थसूत्रम् ।
तत्त्वार्थ० भा०	तत्त्वार्थभाष्यम् ।
तत्त्वार्थराजवा०	तत्त्वार्थराजवार्तिकम् ।
द्रव्यगुणपर्यायरासः	
धर्मसं०	धर्मसङ्ग्रहणीसूत्रम् ।
नवत०	नवतत्त्वप्रकरणम् ।
नैषध०	नैषधकाव्यम् ।
न्यायकुमुद० लि०	न्यायकुमुदचन्द्रोदयः लिखितः ।
पराशरमाधवः	
पातञ्जलद०	पातञ्जलदर्शनम् ।
पञ्चाध्या०	पञ्चाध्यायी अमृतचन्द्रीया
पञ्चाश०	पञ्चाशकम् ।
पञ्चाशकटी०	पञ्चाशकटीका ।
पञ्चास्ति०	पञ्चास्तिकायः ।
प्रवचन० / प्रवचनसा०	प्रवचनसारः ।
प्रवचनसारो० द्वा०	प्रवचनसारोद्धारे द्वारम् ।
बृहत्सं० वृक्ष०	बृहत्संहिता (वाराही संहिता) वृक्षायुर्वेद- प्रकरणम्
ब्रह्मसू० शां०	ब्रह्मसूत्रशाङ्करभाष्यम् ।
भगव० / भगवतीसू०	भगवतीसूत्रम् ।
मनु० / मनुस्मृ०	मनुस्मृतिः ।
महाभा० शान्ति० मो० प० अ०	महाभारतम् शान्तिपर्वणि मोक्षपर्व अध्यायः ।
महाव्युत्पत्तिः	बौद्धग्रन्थः ।
यास्कनि०	यास्कनिरुक्तम् ।

वाच०	वाचस्पत्य ।
वायुपुराणम्	
विशेषाव०	विशेषावश्यकभाष्यम् ।
वैद्यक० सिं०	वैद्यकशब्दसिन्धुः ।
वैशेषिकद्वात्रिंशिका	
श० } शत० }	शतकम् ।
शास्त्रदी०	शास्त्रदीपिका ।
शास्त्रवा० समु० स्तब०	शास्त्रवार्तासमुच्चये स्तवकः ।
श्लो० वा० वाक्याधि०	श्लोकवार्तिके वाक्याधिकारः ।
,, औत्पत्तिकसू०	,, औत्पत्तिकसूत्रम् ।
षड्द० स०	षड्दर्शनसमुच्चयः ।
षड्द० बृ०	षड्दर्शनसमुच्चयस्य बृहद्वृत्तिः ।
सनातन प्र० गु०	सनातनजैनग्रन्थमाला प्रथमो गुच्छकः ।
सनातन प्र० गु० स्वयंभूस्तो० अर०	,, अरनाथस्तोत्रम् ।
सूर्यसिद्धान्तः	
स्वयंभू० } स्वयंभूस्तो० }	स्वयंभूस्तोत्रम् ।

विषयानुक्रमः ।

विषयः	पृष्ठम्
प्रथमगाथाव्याख्या ।	६२७
सामान्यविशेषयोरन्योन्यानुविद्धस्वरूपत्वकथनम् ।	,,
२ गाथाव्याख्या ।	,,
सामान्यविशेषयोरेकान्तभेदं वदतो दोषापत्तिप्रकटनम् ।	,,
३ गाथाव्याख्या ।	६२८
आप्तवचनस्यानेकान्तात्मकवस्तुबोधकत्वेन स्वरूपकथनम् ।	,,
४ गाथाव्याख्या ।	६२९
आप्तवचने समुपतिष्ठमानाया एकान्तपक्षाश्रिताया आशङ्काया अनेकान्तपक्षाश्रयणेन निराकरणम् ।	,,
५ गाथाव्याख्या ।	६३०
संभवद्भिः पर्यायैर्घटादेर्वस्तुनः अस्तित्व-नास्तित्वप्ररूपणम् ।	,,
६ गाथाव्याख्या ।	,,
वर्तमानपर्यायेऽपि द्रव्यस्यानेकान्तात्मकत्वसमर्थनम् ।	,,
७ गाथाव्याख्या ।	६३१–६३३
आत्मनोऽनेकान्तात्मकत्वस्य बुद्धिगम्यतया प्रदर्शनम् ।	६३१
८ गाथाव्याख्या ।	,,
द्रव्य-गुणयोः कथञ्चिद्भेदमनिच्छतां केषाञ्चित् तयोर्भेदविषयाऽऽशङ्का ।	,,
९ गाथाव्याख्या ।	६३४
द्रव्यगुणयोरेकान्तभेदाशङ्कां निराकर्तुं गुणशब्दस्यार्थपरीक्षा ।	६३४
१० गाथाव्याख्या ।	
गुणस्य पर्यायाद् भेदे तृतीयस्य गुणार्थिकनयस्यापि वचनीयत्वप्रसञ्जनम् ।	,,
११ गाथाव्याख्या ।	,,
तृतीयस्य गुणार्थिकनयस्य भगवदनुक्तत्वोपपादनम् ।	,,
१२ गाथाव्याख्या ।	६३५
तुल्यार्थत्वाद् आगमाच्च पर्यायशब्देन गुणस्यैवाभिधानमिति कथनम् ।	,,
१३ गाथाव्याख्या ।	,,
भगवतो गुणद्वारेणापि देशनादर्शनान्न गुणाभाव इति पूर्वपक्षः ।	,,
१४ गाथाव्याख्या ।	,,
उक्तस्य पूर्वपक्षस्य सिद्धान्तवादिना निराकरणम् ।	,,
१५ गाथाव्याख्या ।	,,
सिद्धान्तिना स्वोक्तस्यार्थस्य दृढीकरणम् ।	,,
१६–१७–१८ गाथाव्याख्या ।	६३६
भेदस्य निरासेनाभेदस्य फलितत्वेऽप्येकान्तिना तस्य दार्ढ्याय सोपनयमुदाहरणम् ।	,,
१९ गाथाव्याख्या ।	,,
कथञ्चिद् भेदाभेदं मिथ्या वदतोऽभेदैकान्तपक्षस्य निराकरणम् ।	,,

विषयः	पृष्ठम्
२० गाथाव्याख्या ।	६३७
अभेदैकान्तवादिन आशङ्का ।	,,
२१ गाथाव्याख्या ।	,,
सिद्धान्तवादिनाऽऽशङ्कानिरसनम् ।	,,
२२ गाथाव्याख्या ।	,,
अनेकान्तवादे अनन्तद्विगुणादिवैषम्यपरिणतिः कथं घटते ? इत्याशङ्का तन्निरासश्च ।	,,
२३–२४ गाथाव्याख्या ।	६३७–६३८
प्रागुक्तस्य लक्षणस्य बाधाद् भेदैकान्तवादिना द्रव्य-गुणयोर्लक्षणान्तराभिधानम् अभेदैकान्तवादिना च विकल्प्य तद्दूषणम् ।	६३७
२५ गाथाव्याख्या ।	६३८
प्रस्तुतप्रपञ्चस्य शिष्यबुद्धिवैशद्यमात्रप्रयोजनकत्वकथनम् ।	६३८
२६ गाथाव्याख्या ।	६३८
वस्तुत्वे कथञ्चिद् भेदाभेदात्मके व्यवस्थितेऽपि तदन्यथावादिनां मिथ्यादृष्टित्वकथनम् ।	,,
२७ गाथाव्याख्या ।	,,
अनेकान्तस्य व्यापकतां प्रदर्शयितुमनेकान्तेऽप्यनेकान्ताभ्युपगमनम् ।	,,
२८ गाथाव्याख्या ।	६३९
षड्जीवनिकायास्तद्घाते च धर्म इत्यत्राप्यनेकान्तव्यवस्थापनम् ।	,,
२९ गाथाव्याख्या ।	६४०
गतिमत्यपि द्रव्ये अपेक्षाविशेषेण गत्यगती प्रदर्श्यानेकान्तस्य व्यापकत्वोपपादनम् ।	,,
३० गाथाव्याख्या ।	,,
दहनादावपेक्षाविशेषेणादहनत्वादिकं निरूप्यानेकान्तस्य व्यापकत्वसमर्थनम् ।	,,
३१ गाथाव्याख्या ।	,,
स्वस्यापि वस्तुनः प्रतिनियतस्वरूपान्यथानुपपत्त्या स्वरूपास्तित्व-पररूपनास्तित्वाभ्युपगमेनानेकान्तात्मकत्वप्रदर्शनम् ।	,,
३२ गाथाव्याख्या ।	६४१
उत्पादपर्यायस्य प्रयोग-विस्रसाजन्यत्वेन द्वैविध्यकथनम् ।	,,
३३ गाथाव्याख्या ।	,,
विस्रसाजन्यस्याप्युत्पादस्य द्वैविध्यवर्णनम् ।	,,
आकाशादिद्रव्यत्रयस्य कथञ्चित् सावयवत्वसाधनम् सामयिकीनामाकाशादिसंज्ञानामुपपादनं च ।	,,
३४ गाथाव्याख्या ।	६४२
उत्पादवद् विगमस्यापि द्वैविध्यवर्णनम् ।	,,
३५ गाथाव्याख्या ।	६४३
उत्पाद-विनाश-ध्रौव्याणां भिन्नाभिन्नकालत्वस्यार्थान्तरानर्थान्तरत्वस्य चाभिधानम् ।	,,
३६ गाथाव्याख्या ।	६४४
उक्तस्यार्थस्य प्रत्यक्षसिद्धेनोदाहरणेनोपोद्बलनम् ।	,,
३७ गाथाव्याख्या ।	६४५
उत्पादादित्रयं प्रत्येकं त्र्यात्मकवत् त्रैकालिकमप्यस्ति इति वदत एव यथार्थवक्तृत्वाभिधानम् ।	,,

विषयः	पृष्ठम्
३८ गाथाव्याख्या ।	६४६
विभागजन्यमुत्पादमनिच्छतां केषाञ्चिद् उत्पादार्थानभिज्ञत्वख्यापनम् ।	,,
३९ गाथाव्याख्या ।	६४६–६४९
प्रतिवादिसम्मतोत्पादप्रक्रियाकथनपूर्वकं सिद्धान्तसम्मतस्य विभागजन्योत्पादस्य समर्थनम् ।	६४६
४० गाथाव्याख्या ।	६४९
प्रतिवादिमतमाक्षिप्य प्रतिबन्दीतया स्वेष्टस्य विभागजन्योत्पादस्य समर्थनम् ।	,,
४१ गाथाव्याख्या ।	,,
एकस्मिन्नपि समये प्रत्येकं द्रव्यमनन्तपर्यायात्मकं प्रागुक्तरीत्या सिध्यति इत्यभिधानम् ।	,,
४२ गाथाव्याख्या ।	,,
एकस्मिन् द्रव्ये एकसमयेऽनन्तधर्मात्मकत्वस्य दृष्टान्तेन साधनम् ।	,,
४३ गाथाव्याख्या ।	६५०
आगमस्य हेतुवादाहेतुवादाभ्यां द्वैविध्येन विभजनम् ।	,,
४४ गाथाव्याख्या ।	६५१
आगमोक्तस्य वस्तुनो हेतुद्वारा वास्तविकत्वसाधनमेव हेतुवादस्य लक्षणमिति सूचनम् ।	,,
४५ गाथाव्याख्या ।	६५१–६५५
जीवादितत्त्वं कथं प्रतिपादयन् सिद्धान्तस्य आराधकः कथं वा प्रतिपादयन् तस्य विराधक इत्यभिधानम् ।	,,
४६ गाथाव्याख्या ।	६५५
हेतुसाध्यमर्थं हेतोरेव इतरं चागमत एव साधयतो नयवादः शुद्धो नान्यस्य इति कथनम् ।	,,
४७ गाथाव्याख्या ।	६५५
अपरिशुद्धनयवादरूपपरसमयानां संख्यानम् ।	,,
४८ गाथाव्याख्या ।	६५६
कं कं नयमाश्रित्य कस्कः समयः प्रस्थित इति प्रश्नस्य व्याकरणम् ।	,,
४९ गाथाव्याख्या ।	६५६–७०४
द्रव्यास्तिक-पर्यायास्तिकोभयाश्रितस्यापि वैशेषिकसमयस्य कथं मिथ्यात्वमिति प्रश्नस्य प्रतिवचनम् ।	६५६
कणादोक्तषट्पदार्थीव्यवस्थाया उपन्यासः कणादोक्तां तत्त्वव्यवस्थां निरसितुं पूर्वं द्रव्यपदार्थस्य खण्डनम् ।	६५७
क्रमशो रूपादिगुणानां प्रक्रियाभुपन्यस्य तेषां खण्डनम् ।	६७२
निरूपणपुरस्सरं कर्मपदार्थस्य खण्डनम् ।	६८५
,, सामान्यपदार्थस्य ,, ।	६८७
,, विशेषपदार्थस्य ,, ।	६९८
,, समवायपदार्थस्य ,, ।	७००
५० गाथाव्याख्या ।	७०४–७०९
अन्योन्यनिरपेक्षनयाश्रितानां वादानां मिथ्यात्वराहित्याभावप्रतिपादनम् ।	७०४
न्याय-वैशेषिकसम्मतस्यासत्कार्यरूपस्यासद्वादस्य सदोषत्वप्रदर्शनम् ।	७०५
बौद्धसम्मतस्यासत्कारणरूपस्यासद्वादस्य सदोषत्वदर्शनम् ।	,,

विषयः	पृष्ठम्
साङ्ख्यसम्मतस्य सत्कार्यरूपस्य सद्वादस्य सदोषत्वख्यापनम्	७०६
सत्कारणककार्यरूपस्य सद्वादस्य सदोषत्वप्रकटनम्।	७०७
कथञ्चित् सदसद्वादस्य निर्दोषत्वसमर्थनम्।	,,
प्रसङ्गात् चित्ररूपचर्चा।	७०८
५१ गाथाव्याख्या।	७०९
अन्वय-व्यतिरेकाभ्यां निरपेक्षनयद्वये मिथ्याज्ञानरूपत्वस्य दृढीकरणम्।	,,
५२ गाथाव्याख्या।	७१०
कार्य-कारणयोर्भेदाभेदरूपत्वदर्शनेनानेकान्तरूपत्वोपपादनम्।	,,
५३ गाथाव्याख्या।	७१०–७१७
सदाद्येकान्तवत् कालाद्येकान्तेऽपि मिथ्यात्वख्यापनम्।	,,
कालैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः।	७११
स्वभावैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः।	,,
नियत्येककारणवादमुपन्यस्य ,, ।	७१४
कर्मैककारणवादमुपन्यस्य ,, ।	,,
पुरुषैककारणवादमुपन्यस्य ,, ।	७१५
५४ गाथाव्याख्या।	७१७–७१८
आत्मन्येकान्तरूपस्य नास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम्।	,,
५५ गाथाव्याख्या।	७१८
आत्मन्येकान्तरूपस्यास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम्।	,,
५६ गाथाव्याख्या।	७१९–७२५
एकान्तवादिनः साधर्म्येण वा वैधर्म्येण वैकान्तधर्मयुक्तधर्मिसाधनाशक्तत्वाभिधानम्।	,,
प्रसङ्गाद् हेत्वाभाससङ्ख्याविषया चर्चा।	,,
५७ गाथाव्याख्या।	७२५
परस्परभिन्नं सामान्य-विशेषयोः स्वरूपमनूद्य तस्य निराकरणम्।	,,
५८ गाथाव्याख्या।	,,
अनेकान्तरूपतया वस्तु साधयतो वादिनोऽजेयत्वाभिधानम्।	,,
५९ गाथाव्याख्या।	७२६
एकान्तानिश्चितरूपाभ्यां वस्तु वदतो लौकिकपरीक्षकाग्राह्यवचनत्वकथनम्।	७२७
६० गाथाव्याख्या।	७२७–७३१
निर्दोषभावप्ररूपणाया मार्गप्रकाशनम्।	७२७
एकान्तक्षणिकाक्षणिकत्वे निरस्य तदुभयात्मकत्वसाधनम्।	७२८
६१ गाथाव्याख्या।	७३१
विवेचनविकलामागमस्य प्रतिपत्तिमाश्रयतां तत्त्वानभिज्ञत्वख्यापनम्।	,,
६२ गाथाव्याख्या।	७३२
निरपेक्षैकनयप्रवृत्तानां दोषोद्भावनम्।	,,
६३ गाथाव्याख्या।	७३२–७४५
न शासनभक्तिमात्रेण नाप्यांशिकज्ञानमात्रेणानेकान्तप्ररूपणाकुशल इति कथनम्।	७३२
तत्त्वसप्तके निरूप्ये पूर्वं जीवाजीवौ निरूप्य तत्र कणादादिसम्मततत्त्वानामन्तर्भावप्रदर्शनम्।	,,
ध्यानचतुष्कस्य सभेदप्रभेदं व्यावर्णनम्।	७३४
ऐकान्तिकं वाच्यस्वरूपं निरसितुं लडादेरर्थविचारपक्षाः।	७३७

विषयः	पृष्ठम्
६४ गाथाव्याख्या।	७४५
अर्थवशात् सूत्रस्य निष्पत्तिर्न तु निरपेक्षसूत्रमात्रेणार्थस्येति कथनम्।	,,
६५ गाथाव्याख्या।	७४६–७५५
अधीतसूत्रस्यार्थसंपादने प्रयत्नाभावे शासनविडम्बकत्वकथनम्।	७४६
निर्ग्रन्थानां वस्त्रपात्रादिनिषेधकस्य दिगम्बरीयमतस्य पूर्वपक्षतयोपन्यासः।	,,
सिद्धान्तिना पूर्वपक्षं प्रतिविधाय निर्ग्रन्थानां धर्मोपकरणतया वस्त्रपात्रादिधारणस्य समर्थनम्।	७४७
प्रतिमाभूषाया आगमविहितत्वसमर्थनम्	७५४
६६ गाथाव्याख्या।	७५५
बहुश्रुतत्वादिदर्पात् तात्पर्यापरिज्ञानाच्चानिश्चितशास्त्रार्थस्य सिद्धान्तप्रत्यनीकत्वकथनम्।	,,
६७ गाथाव्याख्या।	,,
क्रियाप्रधानानां ज्ञानयोगमसाधयतां क्रियाफलानुभवाभावकथनम्।	,,
६८ गाथाव्याख्या।	७५६
ज्ञानक्रिययोरन्यतरवैकल्ये मोक्षफलवन्ध्यत्वकथनम्।	,,
६९ गाथाव्याख्या।	७५७
अनेकान्तमयत्वेन जिनवचनस्य स्तवनं पार्यन्तिकमङ्गलविधानं च।	,,
सप्तभङ्ग्यादिप्रदर्शनेनानेकान्तसमर्थनम्।	,,
प्रासङ्गिकी निग्रहस्थानस्वरूपपर्यालोचना।	७५९

संपादकीय निवेदन ।

सन्मतिना पांचमा भागमां त्रीजुं कांड पूरुं आवी गयुं छे. अने ए रीते त्रिकांडी आ आखो ग्रंथ मूळ अने टीका साथे पांच भागोमां पूरो थाय छे.

१९८६ नी शरुआतमां ज छपाई गयेलुं आखुं त्रीजुं काण्ड तैयार हतुं एथी मात्र मूळ अने टीकाटिप्पणी पूरतो पांचमो भाग बीजा भागोनी जेम प्रगट करी शकाय तेम तो हतो पण एमां केटलांक आवश्यक परिशिष्टो उमेरवानां होवाथी तेनुं प्रकाशन लंबाववामां आव्युं छे. आ पांचमा भागने अंगे अमारुं निवेदन नीचेना मुद्दा परत्वे छे.

१ त्रीजा कांडना मूळ अने टीकानुं परिमाण.

२ मूळनो विषय अने मूळकारनी तेजस्विता.

३ टीकाना स्वरूपनी चर्चा अने टीकाकारना समयनुं वातावरण.

४ कांडनां नामो अने ग्रंथना पूर्वमुद्रित नामनुं परिवर्तन.

५ प्रतिओनो उपयोग अने परिशिष्टोनो परिचय.

(१) आ कांडनी मूळ गाथाओ मात्र मूळवाळा लिखित पुस्तकमां ७० छे अने मूळसहित टीकावाळां लिखित पुस्तकोमां एक गाथा ओछी छे–६९ छे. मूळवाळा लिखित पुस्तकमां जे गाथा ७० मी छे ते गाथाने टीकावाळां पुस्तकोमां छेल्ली एटले ६९ मी गणवामां आवी छे. एटले मूळवाळा पुस्तकमां जे गाथा ६९ मी छे ते गाथाने टीकावाळां पुस्तकोमां स्थान आपवामां नथी आव्युं. अमारा मुद्रणमां अमे ए गाथाने पाठांतर तरीके पृ. ७५७ मां नोंधेली छे.

सन्मति प्रकरणनी छेल्ली गाथा आशीर्वादात्मक मंगळ सूचवे छे. अने आ वधारानी गाथा नमस्कारात्मक मंगळरूप छे. कहेवाय छे के शास्त्रना आदि, मध्य अने अंतमां मंगळ होवां जोइए, ते प्रमाणे आ प्रकरणमां पण आदि अने अंतमां मंगलात्मक शब्दनो निर्देश मळे छे. ए रीते विचार करीए अने आ वधारानी गाथाने वधारानी न मानीए तो अंते बे मंगळ थई जाय छे जेनो खास कंई उपयोग जणातो नथी. तेथी एम कल्पी शकाय छे के कदाच आ नमस्कारात्मक मंगळने सूचवती गाथा वधारानी ज होय अने मूळग्रंथकारनी कृति न होय. आ एक वात.

बीजी वात ए छे के टीकाकारे आ प्रकरणनी बधी गाथाओनी व्याख्या करेली छे. जे गाथा सहजमां समजाय एवी छे तेनी पण व्याख्या करवी छोडी नथी. जो आ गाथा मूळनी ज होत तो टीकाकारे पोतानी शैली प्रमाणे जरूर तेनी व्याख्या करी होत. छेवटे कांई नहि तो आ गाथा लखीने 'सुगमार्था' के 'स्पष्टार्था' आवुं पण लख्युं होत. पण टीकानी कोई प्रतिओमां–जेमांनी केटलीक आजथी ५०० वर्ष जेटली जूनी छे तेमां–एकेमां आ गाथानो उल्लेख ज नथी. आ बन्ने कारणोथी अमारी कल्पना एवी थाय छे के अनेकांतवादना कोई भक्ते आ गाथाद्वारा अनेकांतवादनुं खरुं महत्त्व बतावी अनेकांतवादना आ प्रतिष्ठित प्रकरणमां एने उमेरेली होवी जोईए.

बृहट्टिप्पनीकारे आ प्रकरणनी १७० गाथा नोंधेली छे. अने जैनग्रंथावलीमां ए १६८ नोंधायेली छे. पण अमारी सामेनी टीकावाळी बधी प्रतिओमां १६६ थी वधारे गाथाओ क्यांये मळती नथी. तेथी वधारानी गाथानो खुलासो अमे उपर प्रमाणे करीए छीए, अने एथी आ त्रीजा कांडनी ६९ गाथाओ होवानुं प्रमाणित करीए छीए.

आगळना भागो–कांडो–नी जेम आ भागमां पण टीकाकारे पोतानी टीकाने केटलेक स्थळे विस्तारेली छे अने केटलेक स्थळे टूंकावी छे. एकंदर जोतां कोई पण भाग करतां आ भागमां टीकानुं परिमाण खास ओछुं जणाशे नहि. आ भागमां द्वितीय भागनी अपोहचर्चानी जेम कणादमतनी परीक्षाना प्रकरणमां श्रीशांतरक्षितना तत्त्वसंग्रहनुं पूरेपूरुं प्रतिबिंब छे, जे अमे टिप्पणमां एनी कारिकाओ वगेरे मूकीने जणाव्युं छे.

(२) न्यायना कोई पण ग्रंथमां प्रमाण अने प्रमेय ए बे तत्त्वनी चर्चा प्रस्तुत होय छे ज्यारे जैनन्यायना ग्रंथमां ए बे उपरांत त्रीजी नयनी चर्चा पण होय छे. प्रस्तुत प्रकरणमां पहेलामां नयनी, बीजामां ज्ञान वा प्रमाणनी अने त्रीजा कांडमां ज्ञेय के प्रमेयनी चर्चा करेली छे.

गौतम के दिग्नागनी प्रमेयनी चर्चाओनी जेम आ प्रकरणनी प्रमेयनी चर्चामां पदार्थना स्वरूप विषे एटले के संसारमां मुख्य तत्त्वो अमुक अमुक छे, तेना भेदो प्रभेदो अमुक छे अने ते प्रत्येकनुं स्वरूप अमुक जातनुं छे, एवी खास कंई चर्चा करवामां नथी आवी. परंतु पदार्थना स्वरूपने कई रीते समजवुं जोईए अने पदार्थने कई रीते जोईए तो बराबर समजाय एवी समजण वधु वीगतथी आपवामां आवी छे, अने विचारना जगतमां जीव अने जगत विषे जे जे विरोधी मान्यताओ चाली आवे छे तेनो समन्वय करवानी दृष्टि पण आ प्रकरणमां खास मूकवामां आवी छे.

एक अनुभवी कहे छे के दृश्य अने अदृश्य बधुं नित्य छे, अने बीजो अनुभवी कहे छे के ए बधुं अनित्य छे. आ मान्यताओ जे बे दृष्टिकोण उपर रहीने स्थिर करवामां आवी छे ते दृष्टिकोण जिज्ञासुओना ख्यालमां आवी जाय तो ए बे वचेनो विरोध तुरत टळी जाय. ए विरोध टाळनारी सरळ अने समाधायक पद्धति आ ग्रंथमां खास स्पष्ट करवामां आवी छे.

एक द्रष्टा एम कहे छे के अमुक पदार्थ मने तो लांबो देखाय छे, बीजो कोई एम कहे के मने तो ए ज पदार्थ टूंको देखाय छे अने त्रीजो एम कहे के ए त्रिकोण देखाय छे; त्यारे आ बधाना दृष्टिकोणने समजनारो वैज्ञानिक एम कहे के ए पदार्थ लांबो, टूंको अने त्रिकोण देखाय छे ए बधुं सापेक्ष भावे बराबर छे. कारण के जोनाराओनी निर्दोष दृष्टिओ अने पदार्थ वचेनो संबंध जुदी जुदी जातना छे. आ समाधानकारी दृष्टिनुं नाम अनेकांतवाद विभज्यवाद के स्याद्वाद छे.

जैन आगमोमां आ दृष्टिनुं दिग्दर्शन तो छे ज पण आ ग्रंथकारे आ प्रकरणमां ए दृष्टिने एक वैज्ञानिकनी रीते समजावेली छे. एटले के जेम कोई वैज्ञानिक कोई तत्त्वनुं पृथक्करण करीने तेमांना प्रत्येक अंशने स्पष्ट करी बतावे छे तेम आचार्य सिद्धसेन दिवाकरे आ कांडमां अनेकांतवादनी बधी बाजुओने खुली रीते समजावेली छे. एम अनेकांतवादनुं शास्त्रीय पृथक्करण आ पुस्तकमां ज पहेलुं थयुं छे.

आ प्रकरणना प्रांत भागमां केटलीक गाथाओ एवी पण छे जे उपरथी आपणे तेना कर्तानी तेना पोताना युगमां व्यापेली मंदताने तोडनारी तेजस्विता अने रूढ विचारधारानी सामे स्थापेला रचनात्मक विचारप्रवाहने पण जोई शकीए छीए.

केटलीक वार एवुं बने छे के पोताने सत्यद्रष्टा माननारा भलभला मोटा माणसो पण मात्र शब्दस्पर्शी होय छे, जे शब्दस्पर्शथी पोतानुं जीवन अने सामाजिक जीवन छिन्नभिन्न थतुं होय छे. ज्यारे बधी बाजी हाथमांथी जवानो वखत आवे छे त्यारे पण ए शब्दस्पर्श नथी मूकातो.

आचार्य सिद्धसेनना जमानामां आवुं आवुं होवानुं झांखुं झांखुं दर्शन थाय छे.

तेओ कहे छे के—

"कांई शासन उपरना मात्र रागने लीधे कोई सिद्धांतनो ज्ञाता एटले सिद्धांतनो बधी रीते तलस्पर्शी अभ्यासी थई शकतो नथी. तेम ज कोई अमुक अमुक ज दृष्टिकोण उपर रहीने शास्त्रने समजावतो होय ते पण तेनी प्ररूपणामां निश्चित होई शकतो नथी" (गाथा. ६३).

"सूत्र अर्थना आधाररूप छे. माटे सूत्रने ज वळगी रहेवामां आवे अने तेना व्यापक अर्थनो विचार न करवामां आवे तो कदी पण अर्थनी प्रतिपत्ति थई शकती नथी. ए अर्थनुं भान तो तेने ज थई शके छे जे दुर्गम एवा नयवादना गहन वनमां प्रवेश करवाने उत्साही होय." (गा० ६४)

आवुं छे माटे आचार्यश्री कहे छे के—

"सूत्रना भणनाराए अर्थसंपादनमां खूब यत्न करवो जोईए. ते न करनारा केटलाक धृष्ट अने अशिक्षित आचार्यो महापुरुषोनी आज्ञानी फजेती करे छे." (गा० ६५)

"जेने अज्ञ लोको बहु ज्ञानी समजता होय, जे एवा ज लोकोमां पूजातो होय अने जेनो शिष्य-परिवार कांई ठीक ठीक होय तेवो आचार्य जो अनेकांतना स्वरूपने निश्चितपणे न समजतो होय तो ते आचार्य सिद्धांतनो द्रोही छे." (गा० ६६)

आजना क्रांतदर्शी संतनी जेम आचार्य सिद्धसेन आटलेथी न अटकतां वधुमां जणावे छे के:—

"जेओ पोताना क्रियाकांडमां कुशळ छे अने ए क्रियाकांडने ज प्रधानपणे वळगीने चाले छे तेओ जो पोताना सिद्धांतनुं अने परसमयनुं विशाळ ज्ञान न धरावता होय तो तेओ ए क्रियाकांडना भारनो कशो उद्देश ज समजता नथी." (गा० ६७)

आचार्यश्रीनां आ वचनो उपरथी तेमना समयना तमोमय वातावरणनो ख्याल आववा साथे ते वातावरणने भेदवानुं सामर्थ्य धरावनारुं तेमनुं तेज पण प्रगट थाय छे.

(३) टीकाकारश्रीए पोतानी शैली जेवी बीजा बे कांडोमां एकसरखी राखी छे तेवी आमां पण राखी छे. तेमनो उद्देश तो ए लागे छे के मूळ ग्रंथने आश्रीने तेमना पोताना समय सुधी स्थिर थयेलां बधां तत्त्वचिंतनो आ टीकामां गोठवी देवां जे बधां कांडोमां एकसरखी रीते जळवाई रहेलो देखाय छे.

आ कांडनी टीकामां एक स्थळे ब्राह्मणत्व विषे (गाथा ४९ पृष्ठ ६९९) चर्चा छे अने एक स्थळे मूर्तिना शृंगार (भूषा) विषे (गा० ६५. पृ० ७५४) चर्चा छे. ते बन्ने चर्चाओ टीकाकारना समयना वातावरणनो ख्याल आपवाने पूरती छे.

जातिवाद विषे जैनोनो अने बौद्धोनो एकसरखो मत ए छे के कोई जाति मात्र जातिने लीधे मान्य के पूज्य गणाती नथी जो तेमां लायकात न होय तो. आ वस्तु भगवान महावीर पछी जैनोना जीवनमां घणा वखत सुधी टकी रहेली हती, आजे तो ते नथी. तेने लोपावानो प्रसंग ब्राह्मणोना जातिप्रधान बंधारणना सामर्थ्यनी असर सिवाय बीजो कल्पी शकातो नथी, पण ते लोपावानी तारीखनो निर्णय करवो कठण छे. छतां य टीकाकार अभयदेवे आ टीकामां ए जातिवादनी सामे थवाने बौद्धाचार्य शांतरक्षित जेवो ज प्रयास करेलो छे, तेथी कदाच एम कल्पी शकाय छे के एना जमाना सुधी श्वेतांबर जैनोमां ए जातिवादनी असर न होय अथवा टीकाकारे आ वात मात्र चर्चा तरीके ज लखेली होय.

बीजुं ए के टीकाकारना जमानामां मूर्तिनो शृंगार करवा न करवानी चर्चा वधु पडती चालती हशे जेथी एमणे आ टीकामां पोतानो शृंगार करवानो पक्ष स्थापित करेलो जणाय छे. वस्तुतत्त्वविचारना ग्रंथोमां आवी चर्चाओने अवकाश न होवो जोईए छतां ते ते समयनुं सांप्रदायिक वातावरण ज आवी चर्चाओने छेडी दे छे.

(४) टीकावाळी कोई प्रतिमां कांडनां खास नामो लखवामां आव्यां नथी. मात्र मूळनी प्रतिमां पहेला कांडनुं नाम 'नयकांड' छे, अने बीजानुं नाम 'जीवकांड' छे. त्रीजानुं कशुं नाम नथी आप्युं.

अमे अहीं कांडोनां जे नामो राखेलां छे ते मूळना विषयने अनुसरीने राखेलां छे. मूळनी प्रतिमां जे बीजा कांडनुं नाम 'जीवकांड' लखेलुं छे तेना करतां मूळनो विषय जोतां तेनुं 'ज्ञानकांड' नाम वधारे बंधबेसतुं लागे छे. तेथी ज अमे ए प्रतिमांनुं पहेलुं नाम कायम राख्युं छे. बीजा कांडनुं नाम बदल्युं छे अने त्रीजा कांडनुं नाम तो अमारे विषय प्रमाणे नवुं कल्पवुं पड्युं छे.

आगळना चारे भागोमां परंपराप्रसिद्ध एवुं 'सम्मति' नाम कायम राखेलुं पण ए विषे विशेष ऊहापोह करीने अमे आ भागमां 'सन्मति' एवुं नाम राखेलुं छे. ए विषे अमे तेम करवाना कारणनी सप्रमाण चर्चा छट्ठा भागमां प्रस्तावनामां करेली छे.

(५) पाठांतरोनी पद्धति आ भागमां बीजा भागोना जेवी ज राखी छे अने बीजा भागोमां वपरायेली प्रतिओनो उपयोग पण तेटलो ज थयो छे. कोई खास नवी प्रति उमेराणी नथी पण ताडपत्रनी बे प्रतिमांनी ल० संज्ञावाळी प्रतिनो अंतनो घणो भाग अधूरो होवाथी तेनो उपयोग अमे आमां करी शक्या नथी.

परिशिष्टोनो परिचय.

ग्रंथनुं रहस्य, संशोधकोने उपयोगी एवी ऐतिहासिक वस्तु अने संपादनशैली वगेरेने समजवा माटे ग्रंथने अंते नीचे जणावेला स्वरूपवाळां १३ परिशिष्टो अकारादि क्रममां आपवामां आव्यां छे.

१. पहेला परिशिष्टमां सन्मतिनी मूळ गाथाओ तेना कांडना अने गाथाना अंक साथे मूकवामां आवी छे.

२. जे जे श्वेताम्बरीय के दिगम्बरीय न्यायग्रंथो प्रस्तुत संपादनने अंगे अमारा जोवामां आवेला, तेमां ज्यां ज्यां सन्मतिसूत्रनी मूळ गाथाओ उद्धृत करायेली छे, तेने लगतुं बीजुं परिशिष्ट छे. एमां नयचक्र अने सिद्धिविनिश्चय जेवा केटलाक हस्तलिखित दुर्लभ ग्रंथोनी पण नोंध छे.

३. त्रीजुं परिशिष्ट पण बीजाना जेवुं ज छे, मात्र तेमां सन्मतिना रहस्यने पूरेपूरुं पामी पोतानी कृतिमां परिणमावनाराओमां विरल एवा श्रीमान् यशोविजय उपाध्यायजीना लगभग बधा मुद्रित ग्रंथोनो उपयोग करेलो छे.

श्रीमान् यशोविजयजीए पोताना ग्रंथमां ज्यां ज्यां सन्मतिसूत्रनी गाथाओ उद्धरेली छे त्यां त्यां बधे तेमणे विवरण पण करेलुं छे. एमांनुं केटलुंक विवरण तो स्वतंत्र छे, जे प्रस्तुत टीकाने अनुसरतुं पण नथी. अमे एम धारेलुं के श्रीमान् यशोविजयजीना विवरणवाळी बधी गाथाओनो एक संग्रह करवो, जे सन्मतिनी लघु टीका जेवो बनी जाय; पण ए माटे एक खास जुदो बीजो भाग ज तैयार करवो पडत जेथी ग्रंथ प्रकाशनमां घणो वधारे विलंब थात, तेथी ए संग्रह न करतां अहिं आ परिशिष्ट ज एवुं आपेलुं छे के तेने वांचनारो कोई व्युत्पन्न विद्यार्थी पण ए संग्रहने सुखेथी करी शके.

४. परिशिष्ट चोथामां कांडना अने गाथाना अंक साथे तथा गाथानी व्याख्याना पृष्ठांक साथे मूळगाथागत शब्दोनो कोश आपेलो छे. जे एक ज शब्द ज्यां ज्यां जेटली वार वपरायो छे, तेना पण उपर लख्या प्रमाणेना बधा अंको आपी दीधा छे.

५. पांचमा परिशिष्टमां पूर्वपक्ष दर्शाववा के संवाद माटे टीकाकारे उद्धरेलां अन्यग्रंथगत सघळां गद्य के पद्य अवतरणोनो ग्रंथना पृष्ठांक साथे उतारो छे. तथा जे अवतरणो उपर विशेष टिप्पणो

करवामां आव्यां छे, ते अवतरणो पासे कोष्ठकमां टिप्पणीना अंको पण मूकवामां आव्या छे. (आ प्रत्येक अवतरणोनां टीकाकारे नहिं दर्शावेलां मूळ स्थानो मळ्यां त्यां सुधी शोधी शोधीने मूकेलां छे. जे मूळ स्थानो मळी शक्यां नथी ते अवतरणो पासे ग्रंथमां खाली [ ] आवुं निशान मूकेलुं छे.

६. परिशिष्ट छट्ठामां टीकाकारे नोंधेला ग्रंथकारो अने ग्रंथोनां नामोनो उल्लेख छे.

७. सातमा परिशिष्टमां टीकाकारे चर्चेला वादो अने वादीओनां नामोनो निर्देश छे.

८. परिशिष्ट आठमामां दर्शनशास्त्र अने खास तो जैनदर्शनने लगता अने टीकाकारे निर्देशेला विशिष्ट शब्दोनो कोश ग्रंथना पृष्ठांक साथे आपवामां आव्यो छे. जे शब्दो उपर खास टिप्पणो करवामां आव्यां छे ते शब्दोनी पासे कोष्ठकमां टिप्पणीना अंको पण जणाववामां आव्या छे.

९. नवमा परिशिष्टमां समग्र ग्रंथमां टीकामां वपरायेला देशसूचक, स्थळसूचक, आचाररूढि-सूचक, वस्तुसंज्ञासूचक अने ग्रन्थान्तर विषय वगेरेना सूचक एवा खास ऐतिहासिक विशिष्ट शब्दोने पृष्ठना अने पंक्तिना अंको साथे मूकवामां आव्या छे. अने जे शब्दो उपर टिप्पणो करेलां छे तेओ पासे कोष्ठकमां टिप्पणीना अंको पण आपेला छे.

१०. टीकाकारे जेनां स्थळोनो निर्देश नथी कर्यो एवां अवतरणोनां अमोए शोधेलां स्थळोनां नामोनो आ दशमा परिशिष्टमां निर्देश छे.

११. परिशिष्ट अगीआरमामां प्रतिओमां मळी आवेलां टिप्पणोनो ते ते प्रतिना नाम साथे अने अमे करेलां टिप्पणोनो ग्रंथ-पृष्ठ अने टिप्पणना अंक साथे संग्रह करेलो छे.

१२. परिशिष्ट बारमामां संपादन माटे एटले विवेचन, तुलना, टिप्पण के अवतरण वगेरे माटे संपादकोए निर्देशेला ग्रंथकारो अने ग्रंथोनां नामोनो ग्रंथना पृष्ठ अने टिप्पणना अंक साथे निर्देश करेलो छे.

१३. परिशिष्ट तेरमामां संपादनने अंगे वपरायेला ग्रंथमात्रनां मुद्रण स्थान, संपादक अने मुद्रणसमय वगेरेनो उल्लेख छे.

श्रीमान् प्रवर्तक **कान्तिविजयजी**ना शिष्य श्रीमान् **चतुरविजय**जी अने **पुण्यविजय**जीना आभारनो उल्लेख अमे प्रत्येक भागमां करता आव्या छीए, पण आ भागमां तो अमारा उपर एमनुं ऋण निःसीम छे, एम कहेवामां कांई उपचार करवा जेवुं नथी. कारण के आ भागमां आपेलां बधां परिशिष्टोनां तथा छट्ठा भागमां आवनार गुजराती अनुवाद अने प्रस्तावनानां बधां प्रूफो तेमणे घणी काळजीथी तपासी आपवानी कृपा करी छे. जो तेमनी आ कृपानो लाभ अमे न मेळवी शक्या होत तो अमारी शारीरिक अगवडोने लीधे आ भाग कोण जाणे क्यारे बहार पडत अने समग्र ग्रंथ प्रकाशमां पण क्यारे आवत ए कही शकात नहि. आ साथे जैनसाहित्यप्रेमी श्री**केशवलालभाई प्रेमचंद मोदी**ना पण अमे कृतज्ञ छीए, जेमना तरफथी आ प्रवृत्तिने अंगे अनेक वार उपयोगी सहायता अमे मेळवेली छे. परिशिष्टना विधानमां खास सहायक एवा सहृदय विद्वान् मित्र श्रीमान् **रसिकलाल** भाईनो आभार पण भूली शकाय तेम नथी.

सुखलाल
अने
बेचरदास.

सम्पादकीयं निवेदनम् ।

सन्मतेरस्मिन् पञ्चमे भागे तृतीयं काण्डं समाप्तम् । एवं च काण्डत्रयमितः सटीकोऽयं समग्रः समूलो ग्रन्थः पञ्चसु भागेषु पूर्णो जातः ।

गतवर्षारम्भ एव तृतीयं काण्डं मुद्रितमासीत् । ततश्च अन्यभागवदयमपि मूलटीकाटिप्पणियुक्तः पञ्चमो भागः प्राकाश्यं नेतुं योग्योऽभवत् परन्तु अनेन भागेन सह मुद्रणीयानि उपयोगीनि आवश्यकानि च परिशिष्टानि क्रियमाणानि आसन्, अत एवायं भागो विलम्बेन विदुषां करतलमागतः । अस्य भागस्य संबन्धे निवेदनीयानि मुख्यानि वस्तूनि इमानि ।

(१) तृतीयस्य काण्डस्य मूलटीकयोः परिमाणम् ।

(२) मूलस्य विषयो मूलकारस्य च तेजस्विता ।

(३) टीकास्वरूपचर्चा टीकाकारसमयस्य च परिस्थितिः ।

(४) काण्डानां नामानि पूर्वमुद्रितस्य च ग्रन्थनाम्नः परिवर्तनम् ।

(५) प्रतीनामुपयोगः परिशिष्टानां च परिचयः ।

(१) मूलमात्रे लिखितपुस्तकेऽस्य भागस्य सप्ततिर्गाथाः प्राप्यन्ते । मूलसहिते च तादृशे टीकापुस्तके गाथानामेकोनसप्ततिर्लभ्यते । मूलमात्रपुस्तके या सप्ततितमी गाथा सैव सटीकेषु पुस्तकेषु अन्तिमा अर्थादेकोनसप्ततितमी गणिता । या गाथा मूलपुस्तके एकोनसप्ततितमी सा टीकापुस्तकेषु क्वापि न दृश्यते । अतश्च सा मूलपुस्तकगता गाथा ७५७ पृष्ठे पाठान्तरत्वेनास्माभिर्निर्दिष्टा ।

सन्मतिप्रकरणस्यान्तिमा गाथा आशीर्वादरूपं मङ्गलं सूचयति । इयं च मूलपुस्तकगता अन्तिमा विवादग्रस्ता गाथा नमस्कारात्मकमङ्गलरूपा । शास्त्रस्यादौ मध्येऽन्ते च मङ्गलमावश्यकमिति प्राचीनः प्रवादः । प्रवादानुसारेण चास्मिन् प्रकरणे आदावन्ते च मङ्गलात्मकता व्यक्ता । यदि मूलपुस्तकगता अन्तिमा गाथा प्रक्षिप्ता नावधार्येत तदा प्रकरणस्यान्ते मङ्गलद्वयापत्तिर्जायेत । न चान्ते मङ्गलद्वयस्य कश्चिदुपयोगः । अतो मूलपुस्तकगता अन्तिमा नमस्कारात्मकमङ्गलसूचिका गाथा अधिकैव भवेत् न मूलकारकृतिरिति ।

अन्यच्चास्य प्रकरणस्य सर्वा अपि गाथाः टीकाकारेण व्याख्याताः । या गाथा श्रवणमात्रेणैव गतार्था साऽपि टीकाकृता स्वव्याख्यया नास्पृष्टा रक्षिता । इयं च गाथा यदि मूलकारकृतिरेवाभविष्यत् तदा टीकाकारस्तामवश्यं व्याख्यास्यदेव । अन्ततो नान्यत्किमपि किन्तु इमां गाथां निर्दिश्य 'सुगमार्था' 'स्पष्टार्था' वेत्युल्लेखं तु सोऽकरिष्यदेव । परन्तु टीकायाः कस्मिंश्चित् प्राचीनतमे एकस्मिन्नपि पुस्तके नेयं गाथा उल्लिखिता दृश्यते । अतो विवादाध्यासिता सा गाथा अनेकान्तवादस्य केनचिद्भक्तेन तन्माहात्म्यदर्शनाय अस्मिन् प्रतिष्ठिते अनेकान्तवादप्रकरणे प्रक्षिप्ता भवेदिति असन्मतम् ।

बृहट्टिप्पणिकृता अस्य प्रकरणस्य गाथानां सप्तत्यधिकं शतं निर्दिष्टम् । जैनग्रन्थावल्यां तु अष्टषष्ट्यधिकं शतं प्राप्यते । उपयुज्यमानासु सर्वास्वपि सटीकप्रतिषु क्वापि षट्षष्ट्यधिकशतादतिरिक्ता एकाऽपि गाथा न लभ्यते । अतस्तस्या अधिकाया गाथायाः पूर्वोक्तमेव निराकरणं स्थिरीकृतमस्माभिः । ततश्चास्य काण्डस्य एकोनसप्ततिर्गाथाः प्रमाण्यन्ते ।

अस्मिन्नपि काण्डे टीका कियत्सु स्थलेषु विस्तारिता कियत्सु च संक्षेपिता । प्रमाणतोऽस्य काण्डस्यापि व्याख्यामानं न न्यूनं प्रतिभाति । अस्मिन्भागेऽपि कणादमतपरीक्षाप्रकरणं सर्वथा शान्तरक्षितकृत-तत्त्वसङ्ग्रहप्रतिच्छायैव । तच्चास्मिंस्तत्त्वसङ्ग्रहकारिकाः पञ्जिकां च टिप्पणे उपन्यस्य सुस्पष्टितम् ।

(२) न्यायविषयके ग्रन्थे सर्वत्रापि प्रमाणं च प्रमेयं चेति तत्त्वद्वयी एव प्रस्तुता । जैनन्यायग्रन्थे तु सैव नयतत्त्वाधिका तत्त्वत्रयी चर्च्यते । प्रस्तुते प्रकरणे प्रथमे नयो द्वितीये प्रमाणम् तृतीये च काण्डे प्रमेयमिति तत्त्वत्रयी चर्चिताऽस्ति ।

गौतमो दिग्नागो वा स्वीये स्वीये प्रकरणे 'जगति प्रधानानि तत्त्वानि इमानि, तेषां भेदाः प्रभेदा एते, तेषु एकैकस्य स्वरूपमेतत्' इत्यादिपद्धत्या यथा प्रमेयं चर्चयाञ्चकार तथा नायमाचार्योऽस्मिन् प्रकरणे किमपि तादृशं चर्चयामास । किन्तु पदार्थस्वरूपं कया रीत्या बोद्धव्यं कया रीत्या च पदार्थो दर्शनीयो येन सुज्ञानः स्यादित्येतादृशी बोधसरणी सविस्तरमत्र प्रकरणे ग्रन्थकृता निरूपिता । यच्च संसारे जीव-जडविषया या या विरोधिन्यः परम्पराः परम्परातः प्रचलिताः कर्णोपकर्णमायाताश्च सन्ति तासां सर्वासां समन्वयबीजमपि अत्र प्रकरणे प्रतिष्ठापितमाचार्येण ।

एकः कश्चिदनुभवी कथयति 'यदिदं दृश्यमदृश्यं वा तत्सर्वं नित्यम्' । द्वितीयश्च महानुभावः कथयति 'यदिदं सत् तत्सर्वमनित्यम्' इति । यां मूलदृष्टिमालम्ब्य एते विरुद्धे मते तैस्तैरनुभविभिः स्थिरीकृते सा दृष्टिर्यदि तत्त्वजिज्ञासुभिर्ज्ञायेत—विचारगोचरं प्राप्येत तदा तयोर्विरुद्धयोर्मतयोर्विरोधस्तूर्णमुपशान्तः स्यात् । या च तद्विरोधशमनी सरला समाधायिका पद्धतिः सैवास्मिन्ग्रन्थे सुस्पष्टिता । सा दृष्टिरनेकान्तवादो विभज्यवादः स्याद्वादो वा इति नाम्ना जैनशास्त्रे विश्रुता ।

जैनागमेषु तस्या दृष्टेर्बीजं विद्यत एव परन्तु वैज्ञानिकेन इव मूलकृता सिद्धसेनाचार्येण प्रस्तुते प्रकरणे सा दृष्टिस्तदीयांशान् पृथक् पृथक् कृत्वा विशदीकृत्य च दर्शिता । अनेकान्तवाददृष्टेरेतादृशं शास्त्रीयं पृथक्करणमस्मिन् पुस्तक एव प्रथमं प्राप्यते ।

अयं महावादी सिद्धसेनाचार्यो रूढमार्गानुगामी नासीत् किन्तु स्वयुगव्याप्तं सामाजिकाज्ञानान्धतमसं दूरीकर्तुं स दिवाकरो दिवाकर एव जातः । एतच्चास्य प्रकरणस्य प्रान्तस्थिताभिर्गाथाभिः स्पष्टमवगम्यते ।

इतरेषां सत्प्रवृत्तिं तिरस्कुर्वन्तः स्वप्रवृत्तिमेव सत्यशोधिकां च मन्यमानाः सूरयो न सत्याचारपराः किन्तु केवलं शब्दग्रहाविष्टा वाक्पटव एव इत्यपि जगति दृश्यते । ततश्च निखिलः समाजोऽपि उत्पथानुगो भवति । तादृशं समाजं पश्यन्तोऽपि ते शब्दस्पर्शपरा गुरवः कुनृपा इव स्वसत्तासाधकं दुराग्रहं न त्यजन्ति । एतादृशान् सिद्धान्तपण्डितंमन्यमानान् सूरीन् सिद्धसेनाचार्या एवं शिक्षयन्ति—

"जिनशासनरागमात्रेण कश्चित् सिद्धान्तज्ञो न हि भवितुमर्हति । शास्त्रज्ञोऽपि कश्चिदेकान्तग्रहेण तत्त्वनिरूपणायां निश्चितो न भवति ।" (गाथा ६३)

"सूत्रमेवार्थस्य मूलम् अतस्तद्रटनमेव श्रेय इति मन्यमानाः सूत्रगतं व्यापकमर्थं न विचारयेयुः तदा कदाऽपि ते न सूत्रार्थं प्रतिपत्तुं समर्थाः । सूत्रार्थं सम्यक्तया त एव प्रतिपद्यन्ते ये दुर्गमं नयवादगहनवनमवगाहितुमुत्साहिन इति ।" (गा० ६४)

सूत्रं रटद्भिस्तद्रटनापेक्षया तदर्थसंपादने भूरि भूरि यतितव्यम् । तदकुर्वन्तः कियन्तो धृष्टा अशिक्षिताश्चाचार्या महापुरुषाज्ञां विडम्बयन्ति ।" (गा० ६५)

"यमज्ञा ज्ञानिनं मन्यन्ते पूजयन्ति च यस्य च शिष्यपरिवारो गणनाकोटिमागत एतादृश आचार्यो यद्यनेकान्तस्वरूपं सम्यग् नावगच्छेत् तर्हि स जिनसिद्धान्तद्रोही बोध्यः ।" (गा० ६६)

अद्यतनः क्रान्तदर्शीव सिद्धसेनाचार्यो न इयतैव कथनेन विरमति किन्तु किञ्चिदधिकमपि उद्घोषयति ।

"स्वसिद्धान्तं परसमयं च गभीरतया अजानन्तः क्रियाकाण्डमेव च प्रधानया अवलगन्तस्ते कमपि क्रियाकाण्डभारोद्देशमेव नावबुध्यन्ते ।" (गा० ६७)

उपर्युक्तगाथागतैराचार्यवचनैस्तत्समयतमोमयपरिस्थितिभेदकमाचार्यतेजः सुस्पष्टतया प्रकटीभवति ।

(३) टीकाकृता काण्डद्वये या टीकाशैली योजिता सैवास्मिन्काण्डेऽपि दृश्यते । मूलग्रन्थमाश्रित्य स्वसमयं यावत् स्थिरीभूतानि सर्वाणि तत्त्वचिन्तनानि अस्यां टीकायां योजनीयानीत्युद्देशेनेयं टीका कृता इत्यवभाति । स चोद्देशस्त्रिष्वपि काण्डेषु समान एव व्यवस्थितो दृश्यते ।

ब्राह्मणत्वं नित्यमनित्यं वेति जिनमूर्तिराभूषणैराभूषणीया न वेति च चर्चाद्वयं टीकाकृता अस्य काण्डस्य टीकायां प्रक्रान्तम् । तदेतत् टीकाकृत्समयस्थितिं संसूचयितुमलम् ।

"कम्मुणा बम्भणो होइ कम्मुणा होइ खत्तिओ" (उत्तराध्ययन अध्ययन २५ गाथा ३२) इत्यागमवचनाद् जिनशासनप्रवराः कामपि जातिं जातित्वेनैव न उत्कर्षयन्ति किन्तु गुणैः प्रधानामेव प्रधानां मन्यन्ते । बौद्धानामपि जातिवादविषये ईदृशमेव मतम् । तच्च आचार्यशान्तरक्षितेन तत्त्वसङ्ग्रहे सुसमर्थितम् । गुणप्रधानामेव जातिं सुजातिं मन्वानः श्रीज्ञातपुत्रीयः सिद्धान्तो ज्ञातपुत्रजिननिर्वाणानन्तरमपि तदनुयायिभिश्चिरमाचरितः, परन्तु अधुनातनजैनेषु तदाचरणा न दृश्यते । ते तु केवलं जातिमेव प्रधानां मन्वाना अधुनातनब्राह्मणा इव दृश्यन्ते । एतादृशविपरीताचारप्रसरणे जातिप्रधानब्राह्मणसमाजप्रबलसंसर्गमन्तरा नान्यत्किमपि प्रबलं कारणमवभाति । यच्च मूर्तिभूषाविषयो विवादोऽत्र टीकाकृता उदलेखि स तु साम्प्रदायिक एव । वस्तुतस्तु एतादृशेषु तत्त्वविचारग्रन्थेषु एते साम्प्रदायिका विवादा न स्थानमर्हन्ति । किन्तु "तत्त्वाद्रूढिर्बलीयसी" इति न्यायेन तत्त्वविचारेष्वपि अहो! रूढिसाम्राज्यं सुदुर्निवारम् ।

(४) टीकाप्रतिषु क्वापि काण्डनाम्नामुल्लेखो न विद्यते । केवलं मूलप्रतौ नयकाण्डेति नाम्ना प्रथमं काण्डं जीवकाण्ड इति नाम्ना च द्वितीयं काण्डमभिहितं तृतीयस्य तु किमपि नाम न निर्दिष्टम् । अत्र तु मूलग्रन्थविषयमनुसृत्य काण्डनामानि अस्माभिः परिवर्तितानि प्रकल्पितानि च ।

पूर्वमुद्रितेषु चतुर्षु अपि भागेषु मुखपृष्ठे परम्पराप्रसिद्धं 'सम्मति' इति नाम मुद्रितम् । अस्मिन् भागे तु तत्स्थाने 'सन्मति' इति नाम सविशेषं विचार्य योजितम् । एतद्विषया सप्रमाणा चर्चा षष्ठे भागे प्रस्तावनायामस्माभिः कृता ।

(५) पाठान्तरयोजनपद्धतिः प्रतीनामुपयोगश्च पूर्वमुद्रितभागवदत्रापि अवगन्तव्यः । केवलं 'ल' संज्ञिका ताडपत्रप्रतिः प्रान्ते त्रुटिताऽऽसीत् ।

परिशिष्टानां परिचयः ।

ग्रन्थरहस्यं संशोधकोपयोगि ऐतिहासिकं वस्तु सम्पादनशैलीं चावगन्तुं ग्रन्थान्ते त्रयोदश परिशिष्टानि अकारादिक्रमेण योजितानि । तत्स्वरूपं यथा—

(१) सन्मतेः सर्वा मूलगाथाः काण्डाङ्केन गाथाङ्केन च सह प्रथमपरिशिष्टे दर्शिताः ।

(२) श्वेताम्बरीया दिगम्बरीयाश्च ये ये न्यायग्रन्थाः प्रस्तुतसम्पादनाय अस्माभिरवलोकितास्तेषु यत्र यत्र सन्मतिसूत्रमूलगाथा उद्धृतास्तत्तद्गाथास्थलदर्शकं द्वितीयं परिशिष्टम् । नयचक्र—सिद्धिविनिश्चयप्रमुखा हस्तलिखिता दुर्लभा ग्रन्था अपि अत्र परिशिष्टे उपयुक्ताः ।

(३) तृतीयमपि परिशिष्टं द्वितीयपरिशिष्टमिव ज्ञेयम्, नवरम् सन्मतिसूत्ररहस्यं यथार्थं प्राप्य स्वकृतौ तदवतारयत्सु प्रधानानां श्रीमतां यशोविजयोपाध्यायानां प्रायस्सर्वे मुद्रिता ग्रन्था अत्र परिशिष्टे उपयुक्ताः ।

श्रीमता उपाध्यायेन स्वकृतौ यत्र या गाथा उद्धृता तत्र तस्या विवरणमपि कृतम् । तच्च विवरणं क्वचित् क्वचित् स्वतन्त्रम्—प्रस्तुतां टीकां नानुसरति । एकस्मिन् परिशिष्टे ताः सर्वाः सविवरणा गाथाः संयोज्य मुद्रणीया येन तत्संग्रहः सन्मतिलघुटीकेव स्यादित्यासीदस्माकं भावना । परन्तु तदर्थं पृथगेवैको भागो मुद्रणीयो भवेत् तत्र च स्यादसह्यः कालविलम्बः इति न तत्करणे प्रयत्नं कृतवन्तः, किन्तु इदं परिशिष्टमेवैतादृशं व्यधायि यत् केनचित् व्युत्पन्नेन च्छात्रेणापि तद्दर्शनमात्रेणैव स संग्रहः सुकरः ।

(४) काण्डस्य गाथायाश्चाङ्केन तव्याख्यायाश्च पृष्ठाङ्केन सह मूलगाथागतशब्दानां कोशो दर्शितश्चतुर्थे परिशिष्टे । यः शब्दो यत्र यत्र यतिकृत्वः समागतस्तस्य तानि सर्वाणि स्थलानि दर्शितानि ।

(५) पूर्वपक्षं दर्शयितुं स्वमतं संवदितुं च टीकाकृता यानि अन्यग्रन्थगतानि गद्यपद्यानि अवतरणानि उद्धृतानि तानि सपृष्ठाङ्कं दर्शितानि पञ्चमे परिशिष्टे । तथा यानि अवतरणानि सटिप्पणानि तेषां पार्श्वे कोष्ठके टिप्पणाङ्कोऽपि निहितः । (तेषां च टीकाकारादर्शितानि मूलस्थलान्यपि संशोध्य संशोध्य दर्शितानि यथासम्भवम्, येषाञ्च मूलस्थानानि न प्राप्तानि तेषां पार्श्वे ग्रन्थे [ ] एतादृशं रिक्तं चिह्नं विहितम्)

(६) टीकाकारेण दर्शितानां ग्रन्थकाराणां ग्रन्थानां च नामानि स्थापितानि षष्ठे परिशिष्टे ।

(७) टीकाकृता चर्चितानां वादानां वादिनां च नामानि निर्दिष्टानि सप्तमे परिशिष्टे ।

(८) दर्शनशास्त्रगोचरा मुख्यतया तु जैनपरिभाषाविषयाः टीकाकारनिर्दिष्टा विशिष्टाः शब्दाः सपृष्ठाङ्कं दर्शिता अष्टमे परिशिष्टे । तथा ये शब्दाः सविवेचनास्तेषां पार्श्वे कोष्ठके तट्टिप्पणाङ्कोऽपि दर्शितः ।

(९) समग्रे ग्रन्थे टीकोपयुक्ता देश—स्थल—रूढाचार—पदार्थसंज्ञासूचका ग्रन्थान्तरविषयबोधकाश्च ऐतिह्यप्रधानाः शब्दाः सूचिता नवमे परिशिष्टे । तथा तेषु ये शब्दा विवेचितास्तेषां पार्श्वे कोष्ठके टिप्पणाङ्कोऽपि निक्षिप्तः ।

(१०) टीकाकारानिर्दिष्टस्थलेष्ववतरणेषु येषां स्थलानि अस्माभिरुपलब्धानि तानि नामग्राहं निर्दिष्टानि दशमे परिशिष्टे ।

(११) प्रतिप्राप्तानि टिप्पणानि तत्तत्प्रतिनामग्राहमस्मत्सन्निवेशितानि टिप्पणानि च सपृष्ठाङ्कं निवेशितानि एकादशे परिशिष्टे ।

(१२) सम्पादनप्रवृत्तौ उपयुक्तानां ग्रन्थानां ग्रन्थकाराणां च नामानि सपृष्ठाङ्कं सटिप्पणाङ्कं च निर्दिष्टानि द्वादशे परिशिष्टे ।

(१३) सम्पादनोपयुक्तानां ग्रन्थानां मुद्रणस्थानानि सम्पादकनिर्देशो मुद्रणसमयादिकं च निर्दिष्टं त्रयोदशे परिशिष्टे ।

श्रीमत्प्रवर्तकश्रीकान्तिविजयशिष्याणां तत्रभवतां **श्रीचतुरविजय-पुण्यविजयानामाभारं** प्रतिभागं समुल्लिखन्तो वयमस्मिन्भागेऽपि तान्भूरि भूरि स्मरामः । अस्य भागस्य परिशिष्टसंबन्धि षष्ठभागगतानुवादसंबन्धि च सर्वं प्रूफशोधनादिकं तैरेव महानुभावैर्व्यधायि । यदि ते एतन्नाकरिष्यन् तर्हि शरीरव्यथाबाधिता वयं किमपि कर्तुं समर्था न अभविष्याम । परिशिष्टविधाने सहायकानां सहृदयविद्वन्मित्राणां **रसिकलालानामपि** सादरं नामस्मरणमावश्यकम् । सम्पादनप्रवृत्तौ धनपुस्तकादिसाहाय्यकर्तॄणां जैनसाहित्यरसिकानां श्रीमोदी**केशवलालानामपि** नाम न विस्मर्यते ।

सुखलालः
बेचरदासश्च ।

सन्मति-प्रकरणम् ।

पञ्चमो विभागः ।

तृतीयः काण्डः ।

[सामान्यविशेषयोरन्योन्यानुविद्धस्वरूपत्वप्रदर्शनम्]

एवं दर्शन-ज्ञानात्मनोः परस्परविनिर्भागरूपतां प्रतिपाद्य इदानीं सामान्य-विशेषयोरन्योन्यानुविद्धं स्वरूपमुपदर्शयन्नाह—

सामण्णम्मि विसेसो विसेसपक्खे य वयणविणिवेसो ।
दव्वपरिणाममण्णं दाएइ तयं च णियमेइ ॥ १ ॥ ५

सामान्ये 'अस्ति' इत्येतस्मिन्, **विशेषो** द्रव्यमित्ययम्; तथा **विशेषपक्षे च** घटादौ, 'अस्ति' इत्येतस्य **वचनस्य**—नाम-नामवतोरभेदात्—सत्तासामान्यस्य, **विनिवेशः** प्रदर्शनम्, **द्रव्यपरिणतिमन्यां** सत्ताख्यस्य द्रव्यस्य पृथिव्याख्यां परिणतिमन्यां सत्तारूपापरित्यागेनैव वृत्तां **दर्शयति** विशेषाभावे सामान्यस्याप्यन्यथाभावप्रसक्तेः—यद् यदात्मकं तत् तदभावे न भवति, घटाद्यन्यतमविशेषाभावे मृद्वत् विशेषात्मकं च सामान्यमिति तदभावे तस्याप्यभावः । तथा, १० **तकं च** विशेषम्, द्वितीयपक्षे सामान्यात्मनि **नियमयति** विशेषः सामान्यात्मक एव तदभावे तस्याप्यभावप्रसङ्गात् यतः सामान्यात्मकस्य विशेषस्य सामान्याभावे घटादेरिव मृदभावे न भावो युक्तः ॥ १ ॥

[सामान्यविशेषयोरेकान्तभेदं वदतो दोषापत्तिप्रकटनम्]

न च विशेषाद् व्यतिरिक्तं सामान्यमेकान्ततः, तस्माद् वा विशेषा नियमतो भिन्ना इत्यभ्यु- १५ पगन्तव्यम् अध्यक्षादिप्रमाणविरोधात् इत्याह—

एगंतणिव्विसेसं एयंतविसेसियं च वयमाणो ।
दव्वस्स पज्जवे, पज्जवाहि दवियं णियत्तेइ ॥ २ ॥

एकान्तेन निर्गता विशेषा यस्मात् सामान्यात् तद् विशेषविकलं सामान्यं **वदन्** **द्रव्यस्य पर्यायान्** ऋजुत्वादीन् **निवर्तयति** ऋजु-वक्रतापर्यायात्मि(त्म)काङ्गुल्यादिद्रव्यस्य २०

---

१ श्रीहरिभद्रेण ईदृशमङ्गुल्युदाहरणमित्थं सष्टितं धर्मसंग्रहण्याम्—

"दीसइ पचक्खं चिय एयं वक्कम्मि उज्जुए होंते । अंगुलिदव्वम्मि परं भावेतव्वं इहेक्केण ॥
वक्कत्तमंगुलीओ कहंचि अभिन्नं ति तीए जोगाओ । भिन्नं पि अवत्थंतरभावे ततो नियत्तीओ ॥
तं चिय कहं चऽवत्थंतरे वि तं तुल्लबुद्धितो हंदि । एगंतेणऽन्नत्ते भिजेज्ज इमी वि तह चेव" ॥
—गा० ३४८–३५० पृ० १५२–१५३ ।

"से णूणं भंते ! अत्थित्तं अत्थित्ते परिणमइ नत्थित्तं नत्थित्ते परिणमइ ?–[भगवतीसू० श० १ उ० ३ सू० ३२] इत्यादि सूत्रं विवृण्वन् श्रीअभयदेवसूरिरीदृशमङ्गुलिदृष्टान्तं दर्शितवान् ।

अध्यक्षादिप्रमाणप्रतीयमानस्य विनिवृत्तिप्रसक्तेरध्यक्षादिप्रमाणबाधापत्तिः। तथा, **एकान्तविशेषं** सामान्यरहितं **वदन् पर्यायेभ्यो** विशेषेभ्यो **द्रव्यं निवर्तयति,** एवं चाङ्गुल्यादिद्रव्याऽव्यतिरिक्तऋजु-वक्रतादिविशेषस्य प्रत्यक्षाद्यवगतस्य निवृत्तिप्रसक्तिः। न चाऽबाधितप्रमाणविषयीकृतस्य तथाभूतस्य तस्य निवृत्तिर्युक्ता, सर्वभावनिवृत्तिप्रसक्तेः अन्यभावाभ्युपगमस्यापि तन्निबन्धनत्वात् तत्प्रतीतस्याप्यभावे सर्वव्यवहाराभाव इति प्रतिपादितम्।

अत्राह—'**सामण्णम्मि**[1]' इत्यादिकाण्डं नाऽऽरब्धव्यम् उक्तार्थत्वात् यतो न तावदनेन वस्तु अनेकान्तात्मकं प्रतिपाद्यते '**एगदवियम्मि**[2]' [प्र० का० गा० ३१] इत्यादिना '**इहरा समूहसिद्ध**[3]'—[प्र० का० गा० २७] इत्यादिना च तस्य प्रतिपादितत्वात्। तथा, '**उप्पाय-ट्ठिइ-भंगा हंदि दवियलक्खणं एयं**[4]' [प्र० का० गा० १२] इत्यनेन लक्षणद्वारेण सर्वस्य सतः अनेकान्तात्मकत्वं प्रदर्शितमेव। अथ प्रमाणविषयवाक्यनिरूपणार्थमिदं प्रस्तूयते, तदपि न सम्यक्; '**सवियप्प-णिव्वियप्पं**[5]' [प्र० का० गा० ३५] इत्यादिना तस्यापि निरूपितत्वात् वाक्यस्य च वस्तुत्वात् तन्निरूपणे तस्यापि निरूपितत्वान्न तन्निरूपणार्थमप्येतदपुनरुक्तम्, एवमेतत्; किन्तु प्रमेयप्राधान्येन तद्ग्राहकस्य प्रमाणस्यापि निरूपणमित्येतत्प्रदर्शनद्वारेण तत्प्रतिपादकवाक्यावतारः प्राग् विहितः, इह त्वविद्यमानप्रमेयस्य प्रमाणस्य प्रमाणत्वासंभवात् प्रमाणनिरूपणद्वारेण प्रमेयनिरूपणमिति प्रदर्शनद्वारेणैतद्वाक्यावतार इत्यदोषः। यद्वा अनेकान्तपक्षोक्तदोषपरिहारोऽनेकधा व्यवस्थाप्यत इति न कश्चिद् दोषः '**सामण्णम्मि**[6]' इत्यादि सूत्रसंदर्भविरचने ॥ २ ॥

[आप्तवचनस्यानेकान्तात्मकवस्तुबोधकत्वेन स्वरूपकथनम्]

सामान्य-विशेषानेकान्तात्मकवस्तुप्रतिपादकं वचनमाप्तस्य, इतरदितरस्येत्येतदेव दर्शयन्नाह—

पच्चुप्पन्नं भावं विगय-भविस्सेहिं जं समण्णेइ।
एयं पडुच्चवयणं दव्वंतरणिस्सियं जं च ॥ ३ ॥

प्रत्युत्पन्नं भावं—वस्तुनो वर्तमानपरिणामम् **विगत-भविष्यद्भ्यां** पर्यायाभ्यां **यत् समानरूपतया नयति** प्रतिपादयति वचः **तत् प्रतीत्यवचनं** समीक्षितार्थवचनं सर्वज्ञवचनमित्यर्थः, अन्यच्चानाप्तवचनम्।

ननु वर्तमानपर्यायस्य प्रागपि सद्भावे कारकव्यापारवैफल्यम् क्रिया-गुण-व्यपदेशानां च प्रागप्युपलम्भप्रसङ्गश्च। उत्तरकालं च सद्भावे विनाशहेतुव्यापारनैरर्थक्यम् उपलब्ध्यादिप्रसङ्गश्च। ततो यद् यदैवोपलम्भादिकार्यकृत् तत् तदैव न प्राक् न पश्चात् अर्थक्रियालक्षणसत्त्वविरहे वस्तुनोऽभावात्, असदेतत्; तस्य प्रागसत्त्वेऽदलस्योत्पत्त्ययोगात्। न चात्मादिद्रव्यं विज्ञानादिपर्यायोत्पत्तौ दलम् तस्य निष्पन्नत्वात्। न च निष्पन्नस्यैव पुनर्निष्पत्तिः अनवस्थाप्रसङ्गात्। न च तत्र विद्यमान एव ज्ञानादिकार्योत्पत्तिः 'तत्र' इति संबन्धाभावतो व्यपदेशाभावप्रसङ्गात्, समवायसंबन्धप्रकल्पनायां तस्य सर्वत्राविशेषात् तद्वद् आकाशादावपि तत् स्यात्। अथात्मादिद्रव्यमेव तेनाऽऽकारेणोत्पद्यत इति नाऽदलोत्पत्तिः कार्यस्य भवत्येवमुत्पत्तिः किन्त्वात्मद्रव्यं पूर्वमप्यासीत् पश्चादपि भविष्यति तत्सर्वावस्थासु तादात्म्यप्रतीतेः अन्यथा पूर्वोत्तरावस्थयोस्तत्प्रतिभासो न भवेत्। न चैकत्वप्रतिभासो भ्रान्तः, बाधकाभावे भ्रान्त्यसिद्धेः। न चार्थक्रियाविरोधो नित्यत्वे

१ पृ० ६२७ गा० १। २ पृ० ४३० गा० ३१। ३ पृ० ४२२ गा० २७। ४ पृ० ४१० गा० १२। ५ पृ० ४४१ गा० ३५। ६ पृ० ६२७ गा० १।

बाधकः, अनित्यत्वे एव तस्य बाधकत्वेन प्रतिपादनात्। न चोत्पाद-विनाशयोरपि तत्र प्रतिपत्तावेकान्ततो नित्यत्वमेव, परिणामनित्यतया तस्य नित्यत्वात्; अन्यथा खरविषाणवत् तस्याऽभावप्रसङ्गात्। न चैवं तस्य विकारित्वप्रसङ्गो दोषाय, अभीष्टत्वात्। न च नित्यत्वविरोधस्तथैव तत्तत्त्वप्रतीतेः। न च तस्य तथात्वप्रतिपत्तिर्भ्रान्तिः, बाधकाभावादित्युक्तत्वात्। अथ ज्ञानपर्यायादात्मनो व्यतिरेके भेदेनोपलम्भः स्यात् अव्यतिरेके पर्यायमात्रम् द्रव्यमात्रं वा भवेत् व्यतिरेकाव्यतिरेकपक्षस्तु विरोधाघ्रातः अनुभयपक्षस्त्वन्योऽन्यव्यवच्छेदरूपाणामेकनिषेधेनाऽपरविधानादसंगतः, असदेतत्; व्यतिरेकाऽव्यतिरेकपक्षस्याऽभ्युपगमात्। न च व्यतिरेकपक्षभावी तद्व्यतिरेकेणोपलब्धिप्रसङ्गो दोषः, एकज्ञानव्यतिरेकेण ज्ञानान्तरेऽपि तस्य प्रतीतेर्व्यतिरेकोपलम्भस्य सद्भावात् अव्यतिरेकोऽपि, ज्ञानात्मकत्वेन तस्य प्रतीतेः। न च व्यतिरेकाऽव्यतिरेकयोरन्योऽन्यपरिहारेणावस्थानाद् विरोधः अबाधितप्रमाणविषयीकृते वस्तुतत्त्वे विरोधाऽसंभवात्; अन्यथा संशयज्ञानस्यैकानेकरूपस्य वैशेषिकेण, ग्राह्य-ग्राहकसंवित्तिरूपस्य बुद्ध्यात्मनश्चैकानेकस्वभावस्य सौगतेन कथं प्रतिपादनमुपपत्तिमद् भवेत् यदि प्रमाणप्रतिपन्ने वस्तुतत्त्वे विरोधः संगच्छेतेत्यादि पूर्वमेव प्रतिपादितम्। वर्तमानपर्यायस्यान्वयिद्रव्यद्वारेण त्रिकालास्तित्वप्रतिपादकं प्रतीत्यवचनमिति सिद्धम्।

परमाण्वारम्भकद्रव्यात् कार्यद्रव्यं द्व्यणुकादि **द्रव्यान्तरं** वैशेषिकाभिप्रायतः तेन **निःसृतं** संबद्धं कारणं परमाण्वादि **यत्** प्रतिपादयति तदपि **प्रतीत्यवचनम्।** तथाहि—द्व्यणुकरूपतया परमाणवः प्रादुर्भूताः द्व्यणुकतया प्रच्युताः परमाणुरूपतया अविचलितस्वरूपा अभ्युपगन्तव्याः अन्यथा तद्रूपतयाऽनुत्पादे प्राक्तनरूपताऽपगमो न स्यात् परमाण्ववस्थावत् प्राक्तनरूपानपगमे वा नोत्तररूपतयोत्पत्तिस्तदवस्थावत्। परमाणुरूपतयाऽपि विनाशोत्पत्त्यभ्युपगमे पूर्वोत्तरावस्थयोर्निराधारविगम-प्रादुर्भावप्रसक्तिः। न च तदवस्थयोरेवाऽऽधारत्वम्, तयोस्तदानीमसत्त्वात्। न च पूर्वोत्तरकार्यद्रव्यविनाश-प्रादुर्भावयोः कारणस्याविनाश-प्रादुर्भावौ, ततस्तस्यैकान्ततो हिमवद्-विन्ध्ययोरिव भेदप्रसक्तेः। न च कारणाश्रितस्य कार्यद्रव्यस्योत्पत्तेर्नायं दोषः, तयोर्युतसिद्धितः कुण्ड-बदरवत् पृथगुपलब्धिप्रसक्तेः। अयुतसिद्धावपि कार्योत्पत्तौ कारणस्याऽप्युत्पत्तिप्रसक्तिः; अन्यथाऽयुतसिद्ध्यनुपपत्तेः। अथाऽयुताश्रयसमवायित्वमयुतसिद्धिः, सा च कार्योत्पत्तौ कारणानुत्पत्तावपि भवत्येव, न; समवायासिद्धावयुतसिद्ध्यसिद्धेः। न चायुतसिद्धित एव समवायसिद्धिः, इतरेतराश्रयदोषप्रसक्तेः। न चाध्यक्षतः समवायसिद्धेर्नायं दोषः, तन्त्वात्मकपटप्रतिभासमन्तरेणाध्यक्षप्रतिपत्तावपरसमवायाप्रतीतेः—'इह तन्तुषु पटः' इत्यत्रापि प्रत्यये 'इह तन्तुषु' इति प्रतिपत्तिस्तन्त्वालम्बना, 'पटः' इति प्रतिपत्तिः पटालम्बना संवेद्यत इति नापरः समवायप्रतिभासः। न च 'इह तन्तुषु पटः' इति लौकिकी प्रतिपत्तिः, किन्तु 'पटे तन्तवः' इति। न चान्यथाभूतप्रतिपत्त्याऽन्यथाभूतार्थव्यवस्था। न चानुमानादपि समवायप्रसिद्धिः, प्रत्यक्षाभावे तत्पूर्वकस्य तस्य तत्राऽप्रवृत्तेः। अनुमानपूर्वकस्य तु तस्यानवस्थादिदोषाघ्रातत्वात् तत्राप्रवृत्तिरित्यनेकशः प्रतिपादितं न पुनरुच्यत इति व्यवस्थितमेतत् तथाभूतवस्तुप्रतिपादकमेवाऽऽप्तवचनम् एकान्तप्रतिपादकं तु नाप्तवचनम्।

अथवा एकद्रव्यादन्यद् द्रव्यं **द्रव्यान्तरं** तस्मिन् **निःसृतं** संबद्धं **यत्** तदपि **प्रतीत्यवचनम्।** यथा—दीर्घतरं मध्यमिकाङ्गुलिद्रव्यमपेक्ष्य ह्रस्वतरमङ्गुष्ठकद्रव्यमिति वचः। ह्रस्व-दीर्घादिकस्तु स्वधर्म एव द्रव्यान्तरविशेषाभिव्यङ्ग्यः पितेव पुत्रादिना।

यद्वा गोत्वसदृशपरिणतियुक्ताच्छाबलेयद्रव्यात् तत्सदृशपरिणतियुक्तं बाहुलेयादि **द्रव्यान्तरं** तस्मिन् **निःश्रितं** संबद्धं वाचकत्वेन 'गौः' इति **यद्** वचनं तदपि **प्रतीत्यवचनम्।** न पुनः केवलतिर्यक्सामान्य-विशेष-तद्वदुभयादिप्रतिपादकम् असद्भूतार्थप्रतिपादकत्वाद् उन्मत्तवाक्यवत् ॥ ३ ॥

[आप्तवचने समुपतिष्ठमानाया एकान्तपक्षाश्रिताया आशङ्काया अनेकान्तपक्षाश्रयणेन निराकरणम्]

ननु प्रत्युत्पन्नपर्यायस्य स्वकालवदतीताऽनागतकालयोः सत्त्वे अतीताऽनागतकालयोर्वर्तमानकालतापत्तेः-अन्यथा तद्रूपतया तयोस्तत्सत्त्वासंभवात्-त्रैकाल्यायोगात् तस्य तद्विशिष्टतानुपपत्तेस्तथाभूतार्थप्रतिपादकं वचनमप्रतीत्यवचनमेवेत्याशङ्क्याऽऽह—

दव्वं जहा परिणयं तहेव अत्थि त्ति तम्मि समयम्मि ।
विगय-भविस्सेहि उ पज्जएहिं भयणा विभयणा वा ॥ ४ ॥

द्रव्यं चेतनाचेतनम्, **यथा** तदाकारार्थग्रहणरूपतया, घटादिरूपतया वा **परिणतं वर्तमानसमये तथैव अस्ति । विगत-भविष्यद्भिस्तु पर्यायैर्भजना** कथंचित् तैस्तस्यैकत्वम्, ५ **विभजना** विगतभजना नानात्वं कथंचित्, 'वा' शब्दस्य कथंचिदर्थत्वात् । ततः प्रत्युत्पन्नपर्यायस्य विगत-भविष्यद्भ्यां न सर्वथैकत्वमिति कथं तत्प्रतिपादकवचनस्याप्रतीत्यवचनतेति भावः ॥ ४ ॥

[संभवद्भिः पर्यायैर्घटादेर्वस्तुनः अस्तित्व-नास्तित्वप्ररूपणम्]

ननु घटादेरर्थस्य कैः पर्यायैरस्तित्वम् अनस्तित्वं वा ? इत्याह—

परपज्जवेहिं असरिसगमेहिं णियमेण णिच्चमवि नत्थि ।
१० **सरिसेहिं पि वंजणओ अत्थि ण पुणऽत्थपज्जाए ॥ ५ ॥**

वर्तमानपर्यायव्यतिरिक्तभूत-भविष्यत्पर्यायाः **परपर्यायास्तैर्विसदृशगमैर्विजातीयज्ञानग्राह्यैर्नियमेन** निश्चयेन **नित्यं** सर्वदा **नास्ति** तद् द्रव्यम्, **तैरपि** तदा तस्य सद्भावे अवस्थासंकीर्णताप्रसक्तेः । **सदृशैस्तु व्यञ्जनतः** सामान्यधर्मैः सत्-द्रव्य-पृथिवीत्वादिभिः विशेषात्मकैश्च शब्दप्रतिपाद्यैरस्ति, सामान्य-विशेषात्मकस्य शब्दवाच्यत्वात् । सामान्यमात्रस्य तद्वाच्यत्वे १५ शब्दादप्रवृत्तिप्रसक्तेरर्थक्रियासमर्थस्य तेनानुक्तत्वात् सामान्यमात्रस्य च तदुक्तस्यार्थक्रियाऽनिर्वर्तकत्वात्, विशेषमन्तरेण सामान्यस्यासंभवात् सामान्यप्रतिपादनद्वारेण लक्षणया विशेषप्रतिपादनमपि शब्दान्न संभवति, क्रमप्रतिपत्तेरसंवेदनात्; विशेषाणां त्वानन्त्यात् संकेतासंभवतः शब्दावाच्यत्वम् । परस्परव्यावृत्तसामान्य-विशेषयोरप्यवाच्यत्वम् उभयदोषप्रसङ्गात् । तत उभयात्मकं वस्तु गुण-प्रधानभावेन शब्देनाभिधीयत इति सदृशैर्व्यञ्जनतोऽस्तीत्युपपन्नम् । **न पुनर्नैव अर्थ-**२० **पर्यायैः** ऋजुसूत्राभिमतार्थपर्यायेण तद् अस्ति, अन्योन्यव्यावृत्तवस्तुस्वलक्षणग्राहकत्वात् तस्य । अयं चार्थः पूर्वसूत्र एव प्रदर्शित इत्यन्यथा गाथासूत्रं व्याख्येयम्—अन्यवस्तुगताः पर्याया विसदृशसदृशतया द्विप्रकाराः, तत्र **विसदृशैर्विवक्षितो** घटादिर्**नैवास्ति । सदृशैस्तु** कैश्चिदुक्तवदस्ति, कैश्चिन्नेति तात्पर्यार्थः ॥ ५ ॥

[वर्तमानपर्यायेऽपि द्रव्यस्यानेकान्तात्मकत्वसमर्थनम्]

२५ ननु प्रत्युत्पन्नपर्यायेण भावस्यास्तित्वनियमे एकान्तवादापत्तिरित्याशङ्क्याह—

पच्चुप्पण्णम्मि वि पज्जयम्मि भयणागइं पडइ दव्वं ।
जं एगगुणाईया अणंतकप्पा गमविसेसा ॥ ६ ॥

वर्तमानेऽपि परिणामे स्व-पररूपतया सदसदात्मरूपताम्, अधो-मध्योर्ध्वादिरूपेण च भेदाऽभेदात्मकतां च **भजनागतिमासादयति द्रव्यम्, यत एकगुण**कृष्णत्वादयोऽनन्त-३० **प्रकारास्तत्र गुणविशेषास्तेषां** च मध्ये केनचिद् गुणविशेषेण युक्तं तत् । तथाहि—कृष्णं द्रव्यं तद्द्रव्यान्तरेण तुल्यम् अधिकम् ऊनं वा भवेत् प्रकारान्तराभावात्, प्रथमपक्षे सर्वथा तुल्यत्वे तदेकत्वापत्तिः; उत्तरपक्षयोः संख्येयादिभागगुणवृद्धि-हानिभ्यां षट्स्थानकप्रतिपत्तिरवश्यंभाविनी ।

१-दृशैकस्तु बृ० आ० । २-त्मकां च बृ० आ० हा० वि० । ३ षट्स्थानकस्वरूपमित्थमवगन्तव्यम्—

"वुड्ढी वा हाणी वा अणंत-असंख-संखभागेहिं । वत्थूण संख-ऽसंख-ऽणंतगुणणेण य विहेआ ॥

अनन्ताऽसंख्यात-संख्यातभागैः संख्याताऽसंख्याताऽनन्तगुणनेन च वस्तूनां पदार्थानां वृद्धिर्वा हानिर्वा विधेया । इह हि षट्स्थानके त्रीणि स्थानानि भागेन भागाहारेण वृद्धानि हीनानि वा भवन्ति, त्रीणि च स्थानानि गुणनेन गुणकारेण ××× । तत्र भागाहारे अनन्ताऽसंख्यात-संख्यातलक्षणः क्रमः, गुणकारे च संख्याताऽसंख्याताऽनन्तलक्षण इति" ।—प्रवचनसारो० गा० ४३२ द्वा० २६० ।

स्यादेतत् पुद्गलद्रव्यस्य तादृग्भूतापरपुद्गलद्रव्यापेक्षया अनेकान्तरूपता युक्ता, प्रत्युत्पन्नत्वात्मद्रव्यपर्याये कथमनेकान्तरूपता ? न, आत्मपर्यायस्यापि ज्ञानादेस्तत्तद्ग्राह्यार्थापेक्षयाऽनेकान्तरूपता पुद्गलवन्न विरुध्यते । तथा द्रव्य-कषाय-योगोपयोग-ज्ञान-दर्शन-चारित्र-वीर्यप्रभेदात्मकत्वादात्मनः पुद्गलवदनेकान्तरूपता आर्षे प्रतिपादितैव—

"कइविहे णं भंते ! आया पण्णत्ते ? ५
गोयमा ! अट्ठविहे । तं जहा-दविए आया" [भगवतीसू० शत० १२, उ० १०] इत्यादौ ॥ ६ ॥

[आत्मनोऽनेकान्तात्मकत्वस्य बुद्धिगम्यतया प्रदर्शनम्]

इतश्चामेकान्तात्मकता आत्मनः प्रतिपत्तव्येत्याह—

कोवं उप्पायंतो पुरिसो जीवस्स कारओ होइ ।
तत्तो [2]विभएयव्वो परम्मि सयमेव भइयव्वो ॥ ७ ॥ १०

कोपपरिणतिमुपनयन् पुरुषो जीवस्य परभवप्रादुर्भावे **निर्वर्तको भवति,** तन्निमित्तस्य कर्मण उपादानात् । कोपपरिणाममापद्यमानश्च पुरुषस्ततः परभवजीवाद् **विभजनीयो** भिन्नो व्यवस्थापनीयः, कार्य-कारणयोर्मृत्पिण्ड-घटवत् कथंचिद् भेदात्; अन्यथा कार्य-कारणभावाभावप्रसङ्गात् । न चासौ ततो भिन्न एव **परस्मिन् भवे स्वयमेव पुरुषो भजनीयः** आत्मरूपतया अभेदेन व्यवस्थाप्यत इति भावः घटाद्याकारपरिणतमृद्द्रव्यवत् कथंचिदभिन्न इत्यनेकान्तः । १५

यद्वा **कोपपरिणतिमन्यस्मिन्** जीवे **उत्पादयन् पुरुषः कारको भवति । ततोऽसौ** कोपकारकत्वेन **विभजनीयः**—कोपपरिणतियोग्ये जीवे कारकः, अन्यत्राकारक इति ॥ ७ ॥

[द्रव्य-गुणयोः कथंचिदभेदमनिच्छतां केषांचित् तयोर्भेदविषयाऽऽशङ्का]

द्रव्यं गुणादिभ्योऽनन्यत् तेऽपि द्रव्यादनन्य एवेत्येतदनेकान्तममृष्यमाणा आहुः—

[3]रूव-रस-गंध-फासा असमाणग्गहण-लक्खणा जम्हा । २०
तम्हा दव्वाणुगया [4]गुण त्ति ते केइ इच्छंति ॥ ८ ॥

---

१ "कइविहा णं भंते ! आया पण्णत्ता ? गोयमा ! अट्ठविहा आया पण्णत्ता । तं जहा-दवियाया कसायाया जोगाया उवओगाथा णाणाया दंसणाया चरित्ताया वीरियाया" इत्यादि संपूर्णं सूत्रम्-भगवतीसू० पृ० ५८८ सू० ४६७ ।

२ **वियभइयव्वो** गु० मू० विना । ३ **रूप-रस**-आ० हा० वि० ।

४ 'गुण'शब्दस्य वैशेषिकादिदर्शनेषु प्रतिनियतार्थत्वेन अतिप्रसिद्धत्वात् केषुचित् उत्तराध्ययन-तत्त्वार्थादिग्रन्थेषु च तस्य विशिष्टार्थत्वेन निर्देशात् भगवत्यादिषु चागमेषु गुण-पर्यायशब्दयोर्द्वयोरपि प्रयोगदर्शनात् जैनमते उपतिष्ठमानाम् 'किं गुणशब्दः पर्यायशब्दसमानार्थक एव उत भिन्नार्थकः' इति विप्रतिपत्तिं निराकर्तुकामेन श्रीसिद्धसेनदिवाकरेण गुणशब्दस्य पर्यायशब्दसमानार्थकत्वपरं स्वकीयं मतमाविष्कृतं मूलगाथायाम् ।

परन्तु तयोर्द्वयोरपि शब्दयोरर्थमर्यादामवगन्तुमपरेषामपि अनेकेषामाचार्याणां तद्विषयाणि विविधानि मतानि परिज्ञातव्यानि सन्ति । तानि चेत्थम्—

उत्तराध्ययनसूत्रे गुण-पर्यायशब्दयोः पृथक् पृथग् निर्देशः तल्लक्षणं चेत्थं निरूपितमस्ति । तथाहि—

"गुणाणमासओ दव्वं एगदव्वस्सिआ गुणा । लक्खणं पज्जवाणं तु उभओअस्सिआ भवे ॥
एगत्तं च पुहत्तं च संखा संठाणमेव य । संजोगा य विभागा य पज्जवाणं तु लक्खणं ॥
गुणानां तु रूपादीनामतिप्रतीतत्वाल्लक्षणं नोक्तमिति"—अ० २८ गा० ६ तथा १३ ।

श्रीमदुमास्वातिना सूत्रे भाष्ये च पृथक् पृथक् प्रयुक्तौ लक्षितौ च गुण-पर्यायशब्दौ तयोर्विभिन्नार्थत्वपरं तदीयं तात्पर्यं सूचयतः । तथाहि—

"गुण-पर्यायवद् द्रव्यम्"—तत्त्वार्थ० ५, ३७ ।

"सर्वं त्रित्वं द्रव्य-गुण-पर्यायावरोधात्"-१, ३५ तत्त्वार्थ० भा०। "गुणान् लक्षणतो वक्ष्यामः। भावान्तरं संज्ञान्तरं च पर्यायः। तदुभयं यत्र विद्यते तद् द्रव्यम्"-५, ३७ तत्त्वार्थ० भा०।

श्रीकुन्दकुन्देन पृथक्तया प्रयुक्त-लक्षितौ अमृतचन्द्रेण च भिन्नार्थतया स्पष्टमेव व्याख्यातौ गुण-पर्यायशब्दौ विभिन्नार्थत्वपरमेव तदीयं तात्पर्यं ज्ञापयतः। तद्यथा—

"अत्थो खलु दव्वमओ दव्वाणि गुणप्पगाणि भणिदाणि। तेहिं पुणो पज्जाया पज्जयमूढा हि परसमया" ॥ १ ॥
—प्रवचन० पृ० ११९।

"लिंगेहिं जेहिं दव्वं जीवमजीवं च हवदि विण्णादं। ते तब्भावविसिट्ठा मुत्तामुत्ता गुणा णेया" ॥ ३८ ॥
प्रवचन० पृ० १८२।

"दव्वेण विणा ण गुणा गुणेहिं दव्वं विणा ण संभवदि। अव्वदिरित्तो भावो दव्वगुणाणं हवदि तम्हा" ॥ १३ ॥—
पञ्चास्ति० पृ० २९।

अस्य गाथात्रयस्य अमृतचन्द्रीया व्याख्यापि अत्रानुसंधेया।

श्रीराजमल्लेन तु अमृतचन्द्रवत् तौ द्वावपि शब्दौ भिन्नार्थतया स्पष्टमेव परिभाषितौ। यथा—

"द्रव्याश्रया गुणाः स्युर्विशेषमात्रास्तु निर्विशेषाश्च। करतलगतं यदेतैर्व्यक्तमिवालक्ष्यते वस्तु" ॥ १०४ ॥

"क्रमवर्तिनो ह्यनित्या अथ च व्यतिरेकिणश्च पर्यायाः। उत्पाद-व्ययरूपा अपि च ध्रौव्यात्मकाः कथंचिच्च" ॥ १६५ ॥
—पञ्चाध्या० पृ० ३७, ५४।

पूज्यपादेन तु अन्वयित्व-व्यतिरेकित्वरूपेण गुण-पर्याययोः स्पष्टमेव भेदं प्रतिपाद्य तद्वाचकयोर्द्वयोः शब्दयोर्विभिन्नार्थत्वं तत्त्वार्थसूत्रव्याख्यायां प्रदर्शितम्। तथाहि—

"के गुणाः? के पर्यायाः? अन्वयिनो गुणाः व्यतिरेकिणः पर्यायाः। उभयैरुपेतं द्रव्यमिति। उक्तं च—

गुण इदि दव्वविहाणं दव्वविकारो हि पज्जवो भणिदो। तेहिं अणूणं दव्वं अजुदपसिद्धं हवे णिच्चं ॥

ततः सामान्यापेक्षया अन्वयिनो ज्ञानादयो जीवस्य गुणाः, पुद्गलादीनां च रूपादयः। तेषां विकारा विशेषात्मना भिद्यमानाः पर्यायाः। घटज्ञानम् पटज्ञानम् क्रोधः मानः गन्धः वर्णः तीव्रः मन्द इत्येवमादयः"—५, ३८ सर्वार्थसिद्धिः पृ० १७९।

श्रीमदकलङ्केन गुण-पर्याययोः द्वयोरपि शब्दयोरेकार्थत्वम् विभिन्नार्थत्वं च द्वयमपि तत्त्वार्थसूत्रव्याख्यायां समर्थितम्। तच्चैवम्—

"गुणा एव पर्याया इति वा निर्देशः। अथवा उत्पाद-व्यय-ध्रौव्याणि न (?) पर्यायाः न तेभ्योऽन्ये गुणाः सन्ति ततो गुणा एव पर्याया इति सति सामानाधिकरण्ये मतौ सति गुण-पर्यायवदिति निर्देशो युज्यते"—५, ३७ तत्त्वार्थराजवा० वा० २ पृ० २४३।

"नित्यं द्रव्यमाश्रित्य ये वर्तन्ते ते गुणा इति। पर्यायाः पुनः कादाचित्का इति न तेषां ग्रहणम् तेन अन्वयिनो धर्मा गुणा इत्युक्तं भवति तद्यथा जीवस्यास्तित्वादयः ज्ञान-दर्शनादयश्च पुद्गलस्य अचेतनत्वादयः रूपादयश्च। पर्यायाः पुनः घटज्ञानादयः कपालादिविकाराश्च"—५, ४० तत्त्वार्थराजवा० वा० ४ पृ० २४४।

प्रस्तुतविषये विशिष्टचर्चा विदधता विद्यानन्दिना पूज्यपादसरणिरेव अनुसृता। तथाहि—

"गुणाः वक्ष्यमाणलक्षणाः पर्यायाश्च तत्सामान्यापेक्षया ××× विशेषापेक्षया पर्यायाणां नित्ययोगाभावात् कादाचित्कत्वसिद्धेः"—५, ३८ तत्त्वार्थश्लो० वा० पृ० ४३८।

"कः पुनरसौ पर्यायः? इत्याह—

तद्भावः परिणामोऽत्र पर्यायः प्रतिवर्णितः। गुणाच्च सहभुवो भिन्नः क्रमवान् द्रव्यलक्षणम्" ॥—५, ४२ तत्त्वार्थश्लो० वा० पृ० ४४०।

गुण-पर्यायशब्दयोर्व्याख्यां विदधता श्रीअमृतचन्द्रसूरिणा स्वीये तत्त्वार्थसारे अकलङ्कमतमेव समाश्रितम्। तथाहि—

"गुणो द्रव्यविधानं स्यात् पर्यायो द्रव्यविक्रिया। द्रव्यं ह्ययुतसिद्धं स्यात् समुदायस्तयोर्द्वयोः ॥ ९ ॥
सामान्यमन्वयोत्सर्गौ शब्दाः स्युर्गुणवाचकाः। व्यतिरेको विशेषश्च भेदः पर्यायवाचकाः ॥ १० ॥
गुणैर्विना न च द्रव्यं विना द्रव्याच्च नो गुणाः। द्रव्यस्य च गुणानां च तस्मादव्यतिरिक्तता ॥ ११ ॥
न पर्यायाद् विना द्रव्यं विना द्रव्यान्न पर्ययः। वदन्त्यनन्यभूतत्वं द्वयोरपि महर्षयः" ॥ १२ ॥—
सनातन० प्र० गु० पृ० १२१।

रूप-रस-गन्ध-स्पर्शाः असमानग्रहण-लक्षणा यस्मात् ततो द्रव्याश्रिता गुणा इति केचन वैशेषिकाद्याः, स्वयूथ्या वा सिद्धान्तानभिज्ञा अभ्युपगच्छन्ति। तथाहि—गुणा द्रव्याद् भिन्नाः, भिन्नप्रमाणग्राह्यत्वात् भिन्नलक्षणत्वाच्च; स्तम्भात् कुम्भवत्। न चासिद्धौ हेतू, द्रव्यस्य 'यमहमद्राक्षं तमेव स्पृशामि' इत्यनुसंधानाध्यक्षग्राह्यत्वात् रूपादीनां च प्रतिनियतेन्द्रियप्रभवप्रत्ययावसेयत्वात् 'दार्शनं स्पार्शनं च द्रव्यम्' इत्याद्यभिधानादसमानग्रहणता द्रव्य-गुणयोः सिद्धा। तथा, विभिन्नलक्षणत्वमपि—

"क्रियावद् गुणवत् समवायिकारणं द्रव्यम्" [वैशेषिकद० १-१-१५] "द्रव्याश्रय्यगुणवान् संयोग-विभागेष्वकारणमनपेक्षः" [वैशेषिकद० १-१-१६] इति वचनात् सिद्धम् ॥ ८ ॥

श्रीसिद्धसेनसूरिणाऽपि एकार्थत्वम् विभिन्नार्थत्वं च द्वयमपि नयभेदेन व्यवस्थाप्य अकलङ्कीय एव पन्थास्तत्त्वार्थभाष्यवृत्तौ स्पष्टमनुसृतः। तद् यथा—

" गुणाः शक्तिविशेषाः त एव क्रमेण सह च भवन्तः सर्वतोमुखत्वाद् भेदाः पर्यायास्तान् गुणान् पिण्डघटकपालादीन् रूपादींश्च ××× व्यवहारनयसमाश्रयणेन तु गुणाः पर्याया इति वा भेदेन व्यवहारः प्रवचने। युगपदवस्थायिनो गुणा रूपादयः, अयुगपदवस्थायिनः पर्यायाः। वस्तुतः पर्याया गुणा इति ऐकात्म्यम्"—५, ३७ तत्त्वार्थ० व्या० पृ० ४२८।

उक्तयोर्द्वयोरपि शब्दयोरेकार्थत्वं हृदि संमन्यमानेनापि वादिदेवसूरिणा प्राक्तनतर्कग्रन्थेषु तयोर्विभिन्नार्थत्वेन प्रयोगपरिपाटिं पश्यता स्वीये प्रमाणनयतत्त्वालोकालङ्कारग्रन्थे पर्यायशब्दस्य अर्थ संकोच्य विभिन्नार्थत्वं तयोर्द्वयोः शब्दयोर्व्यावर्णितम् उपपादितं च स्याद्वादरत्नाकरे। तच्चैवम्—

"विशेषोऽपि द्विरूपः-गुणः पर्यायश्चेति ॥ ६ ॥

गुणः सहभावी धर्मः यथा आत्मनि विज्ञानव्यक्ति-शक्त्यादिरिति ॥ ७ ॥

पर्यायस्तु क्रमभावी यथा तत्रैव सुख-दुःखादिरिति ॥ ८ ॥ "—परि० ५ पृ० ७३५।

श्रीमता हरिभद्रेण तु प्रस्तुते विषये सिद्धसेनदिवाकरीय एव पन्था अनुसृतः प्रतिभासते, स एव च मार्ग उपाध्याययशोविजयेन अनुधावितः सविस्तरमुपपादितश्च—

"अन्वयो व्यतिरेकश्च द्रव्य-पर्यायसंज्ञितौ। अन्योन्यव्याप्तितो भेदाभेदवृत्त्यैव वस्तु तौ" ॥ ३१ ॥
—शास्त्रवा० समु० स्तब० ७ पृ० प्र० २६१।

"अन्वयो व्यतिरेकश्चेत्येतावंशौ द्रव्य-पर्यायसंज्ञितौ—द्रव्यं पर्यायश्चेति द्रव्य-पर्यायपदवाच्यौ। एतेन 'द्रव्यं गुणाः पर्यायाश्च' इति विभागः केषांचिद् अनभिज्ञस्वयूथ्यानाम् परयूथ्यानां वा निरस्तः, विभिन्ननयग्राह्याभ्यां द्रव्य-पर्यायत्वाभ्यामेव विभागात्। यदि च गुणोऽप्यतिरिक्तः स्यात् तदा तद्ग्रहार्थं द्रव्यार्थिक-पर्यायार्थिकवद् गुणार्थिकनयमपि भगवानुपादेक्ष्यत्, न चैवमस्ति; रूप-रस-गन्ध-स्पर्शानामर्हता तेषु तेषु सूत्रेषु "वण्णपज्जवेहिं" इत्यादिना पर्यायसंज्ञयैव नियमनात्। गुण एव तत्र पर्यायशब्देन उक्त इति चेत्, नन्वेवं गुण-पर्यायशब्दयोरेकार्थत्वेऽपि पर्यायशब्देनैव भगवतो देशना इति न गुणशब्देन पर्यायस्य तदतिरिक्तस्य वा गुणस्य विभागौचित्यम्। 'एकगुणकालः' 'दशगुणकालः' इत्यादौ गुणशब्देनापि भगवतो देशना अस्त्येवेति चेत्, अस्त्येव संख्यानशास्त्रधर्मवाचकगुणशब्देन, न तु गुणार्थिकनयप्रतिपादनाभिप्रायेण" इत्यादि—शास्त्रवा० स्याद्वादक० पृ० प्र० २६१।

१ रूप-रसादीनामसमानग्रहण-लक्षणता वैशेषिकैरित्थं वर्णिताऽस्ति—"रूपं चक्षुर्ग्राह्यम्"। × "रसो रसनग्राह्यः"। "गन्धो घ्राणग्राह्यः"। × "स्पर्शस्त्वगिन्द्रियग्राह्यः"।—प्रशस्त० कं० पृ० १०४-१०५-१०६।

२ एतद् वाक्यमेव श्रीयशोविजयोपाध्यायः स्वीये गूर्जरभाषानिबद्धे सप्तबके द्रव्यगुणपर्यायरासे इत्थमनूदितवान्—

"शक्तिरूप गुण कोइक भाषइ ते नही मारगि निरतइं रे. जिन०"। "कोइक दिगंबरानुसारी शक्तिरूप गुण भाषइ छइ, जे माटइं ते इम कहइ छइ जे जिम द्रव्यपर्यायनुं कारण द्रव्य तिम गुणपर्यायनुं कारण गुण"इत्यादि—ढा० २ दो० १०।

३ मुद्रिते वैशेषिकदर्शने तु एवं पाठो दृश्यते—

"क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्"। "द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्"।

[द्रव्य-गुणयोरेकान्तभेदाशङ्कां निराकर्तुं गुणशब्दस्यार्थपरीक्षा]

एतत्परिहारायाह—

दूरे ता अण्णत्तं गुणसद्दे चेव ताव पारिच्छं ।
किं पज्जवाहिओ[1] होज्ज पज्जवे चेव गुणसण्णा ॥ ९ ॥

दूरे तावद् गुण-गुणिनोरेकान्तेनान्यत्वम्—असंभावनीयमिति यावत्—गुणात्मकद्रव्यप्रत्ययबाधितत्वाद् एकान्तगुणगुणिभेदस्य । न च समवायनिमित्तोऽयमभेदप्रत्ययः, तस्य निषिद्धत्वात्[2] । न चैकत्वप्रत्ययस्य प्रागुपन्यस्तानुमानबाधा, एकत्वप्रत्ययाध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेनैकशाखाप्रभवत्वानुमानस्येव तस्य कालात्ययापदिष्टत्वात् । ततो गुण-गुणिनोरेकान्तान्यत्वस्यासंभवात् गुणशब्दे एव तावत् परीक्ष्यमस्ति—किं पर्यायादधिके गुणशब्दः ? उत पर्याय एव प्रयुक्त इति ? अभिप्रायश्च न पर्यायादन्यो गुणः, पर्यायश्च कथंचिद्द्रव्यात्मक इति विकल्पः कृतः ॥ ९ ॥

[गुणस्य पर्यायाद् भेदे तृतीयस्य गुणार्थिकनयस्यापि वचनीयत्वप्रसञ्जनम्]

यदि पर्यायादन्यो गुणः स्यात् पर्यायार्थिकवद् गुणार्थिकोऽपि[3] नयो वचनीयः स्यादित्याह—

दो उण णया भगवया दव्वट्ठिय-पज्जवट्ठिया नियया ।
एत्तो य गुणविसेसे गुणट्ठियणओ वि जुज्जंतो ॥ १० ॥

द्वावेव मूलनयौ भगवता द्रव्यार्थिक-पर्यायार्थिकौ नियमितौ[4], तत्रातः पर्यायादधिके गुणविशेषे ग्राह्ये सति तद्ग्राहकगुणास्तिकनयोऽपि नियमितुं[5] युज्यमानकः स्यात् अन्यथा अव्यापकत्वं नयानां भवेत् अर्हतो वा तदपरिज्ञानं प्रसज्येत ॥ १० ॥

[तृतीयस्य गुणार्थिकनयस्य भगवदनुक्तत्वोपपादनम्]

न च भगवताऽसावुक्त इत्याह—

जं च पुण अरिहया तेसु तेसु सुत्तेसु गोयमाईणं ।
पज्जवसण्णा णियया वागरिया तेण पज्जाया ॥ ११ ॥

---

१ अत्र टीकानुरोधेन 'पज्जवाहिए' इति पाठः संभाव्यते अथवा सप्तम्यर्थे प्रथमा समर्थनीया । २ पृ० १०६ पं० १० । ३ पृ० ६३३ पं० ३ ।

४ 'गुण-पर्याययोर्विभिन्नत्वे पर्यायप्रतिपादकपर्यायार्थिकवद् गुणप्रतिपादको गुणार्थिकोऽपि स्वतन्त्रो नयः कथमागमे नोक्तः' इत्याशङ्कया प्रेरितेन दिवाकरेण उक्तयोर्द्वयोः शब्दयोरेकार्थत्वं वर्णितं परंतु तयोर्विभिन्नार्थत्वं मन्यमानाभ्यामकलङ्कविद्यानन्दिभ्यां सा शङ्का प्रकारान्तरेणैव अपाकृता, तदपाकरणयुक्तिरपि तयोर्द्वयोर्विभिद्यते, अकलङ्कीया युक्तिर्वस्तुस्थितिसार्शिनी विद्यानन्दीया च तर्कानुगामिनी इति द्वयोर्भेदः प्रतिभाति । तद्यथा—

"द्रव्यार्थिकः पर्यायार्थिक इति द्वावेव मूलनयौ । यदि गुणोऽपि कश्चित् स्यात् तद्विषयेण मूलनयेन तृतीयेन भवितव्यम् न चास्ति असौ इत्यतो गुणाभावाद् गुण-पर्यायवदिति निर्देशो न युज्यते, तन्न; किं कारणम् ? अर्हत्प्रवचनहृदयादिषु गुणोपदेशात् । उक्तं हि अर्हत्प्रवचने—'द्रव्याश्रया निर्गुणा गुणाः' इति । अन्यत्र चोक्तम्—

गुण इति दव्वविधाणं दव्ववियारो य पज्जवो भणिदो । तेहि अणूणं दव्वं अजुदवसिद्धं हवदि णिच्चं ॥

यदि गुणोऽपि विद्यते ननु चोक्तं तद्विषयस्तृतीयो मूलनयः प्राप्नोति, नैष दोषः; द्रव्यस्य द्वावात्मानौ सामान्यम् विशेषश्चेति । तत्र सामान्यमुत्सर्गोऽन्वयः गुण इत्यनर्थान्तरम् । विशेषो भेदः पर्याय इति पर्यायशब्दः । तत्र सामान्यविषयो नयो द्रव्यार्थिकः, विशेषविषयः पर्यायार्थिकः । तदुभयं समुदितमयुतसिद्धरूपं द्रव्यमित्युच्यते न तद्विषयस्तृतीयो नयो भवितुमर्हति विकलादेशत्वान्नयानाम् तत्समुदायोऽपि प्रमाणगोचरः सकलादेशत्वात् प्रमाणस्य" इत्यादि—

५,३७ तत्त्वार्थराजवा० वा० २ पृ० २४३ ।

"गुणवद् द्रव्यमित्युक्तं सहानेकान्तसिद्धये । तथा पर्यायवद् द्रव्यं क्रमानेकान्तवित्तये" ॥ २ ॥

—तत्त्वार्थश्लो० वा० पृ० ४३८ ।

५ इदमन्तर्भूतण्यर्थकं बोध्यम् सेट्त्वं च बहुलाधिकारात् समर्थनीयम् ।

यतः पुनर्भगवता तस्मिंस्तस्मिन् सूत्रे "वण्णपज्जवेहिं, गंधपज्जवेहिं" [भगवतीसू० शत० १४, उ० ४ सू० ५१३] इत्यादिना पर्यायसंज्ञा नियमिता वर्णादिषु गौतमादिभ्यः व्याकृतास्ततः पर्याया एव वर्णादयो न गुणा इत्यभिप्रायः ॥ ११ ॥

[तुल्यार्थत्वाद् आगमाच्च पर्यायशब्देन गुणस्यैवाभिधानमिति कथनम्]

अथ तत्र गुण एव पर्यायशब्देनोक्तः तुल्यार्थत्वात् आगमाच्च— "य एव पर्यायः स एव गुणः" [ ] इत्यादिकात् । एतदेवाह—

परिगमणं पज्जाओ अणेगकरणं गुण त्ति तुल्लत्था ।
तह वि ण 'गुण' त्ति भण्णइ पज्जवणयदेसणा जम्हा ॥ १२ ॥

परि समन्तात् सहभाविभिः क्रमभाविभिश्च भेदैर्वस्तुनः परिणतस्य गमनं परिच्छेदो यः स पर्यायः[1] विषय-विषयिणोरभेदात्; अनेकरूपतया वस्तुनः करणं—करोतेर्ज्ञानार्थत्वात्-ज्ञानम्-विषय-विषयिणोरभेदादेव-गुणः इति तुल्यार्थौ गुण-पर्यायशब्दौ, तथापि न 'गुणार्थिकः' इत्यभिहितस्तीर्थकृता पर्यायनयद्वारेणैव देशना यस्मात् कृता भगवतेति ॥ १२ ॥

[भगवतो गुणद्वारेणापि देशनादर्शनान्न गुणाभाव इति पूर्वपक्षः]

गुणद्वारेणापि देशनायां भगवतः प्रवृत्तिरुपलभ्यते इति न गुणाभाव इत्याह—

जंपन्ति अत्थि समये एगगुणो दसगुणो अणंतगुणो ।
रूवाई परिणामो भण्णइ तम्हा गुणविसेसो ॥ १३ ॥

जल्पन्ति द्रव्य-गुणान्यत्ववादिनः-विद्यते एव सिद्धान्ते "एगगुणकालए दुगुणकालए" [भगवतीसू० शत० ५, उ० ७ सू० २१७] इत्यादि रूपादौ व्यपदेशस्तस्माद् रूपादिर्गुणविशेष एवेत्यस्ति गुणार्थिको नयः उपदिष्टश्च भगवतेति ॥ १३ ॥

[उक्तस्य पूर्वपक्षस्य सिद्धान्तवादिना निराकरणम्]

अत्राह सिद्धान्तवादी—

गुणसद्दमंतरेणावि तं तु पज्जवविसेससंखाणं ।
सिज्झइ णवरं संखाणसत्थधम्मो 'तइगुणो' त्ति ॥ १४ ॥

रूपाद्यभिधायिगुणशब्दव्यतिरेकेणापि 'एकगुणकालः' इत्यादिकं पर्यायविशेषसंख्यावाचकं वचः सिध्यति न पुनर्गुणास्तिकनयप्रतिपादकत्वेन, यतः संख्यानं गणितशास्त्रधर्मः-'अयं तावद्गुण इति एतावताऽधिको न्यूनो वा भावः' इति गणितशास्त्रधर्मत्वादस्येत्यर्थः ॥ १४ ॥

[सिद्धान्तिना स्वोक्तस्यार्थस्य दृढीकरणम्]

दृष्टान्तद्वारेणामुमेवार्थं दृढीकर्तुमाह—

जह दससु दसगुणम्मि य एगम्मि दसत्तणं समं चेव ।
अहियम्मि वि गुणसद्दे तहेय एयं पि दट्ठव्वं ॥ १५ ॥

---

१ जीवाजीवाभि० प्रतिप० ३ सू० ७८ पृ० ९८ प्र० । जम्बूद्वीपप्र० वक्ष० २ सू० ३६ पृ० १६४ द्वि० ।
२ भगवतीसू० पृ० ६४० प्र० ।

३ मलयगिरीयायां धर्मसंग्रहणिटीकायां शाकटायनसम्मतं पर्यायलक्षणमित्थमुपन्यस्तं वर्तते—

"यदाह शाकटायनः-क्रमेण पदार्थानां क्रियाभिसंबन्धः पर्याय इति"—पृ० १४४ प्र० पं० १२ ।

४ भगवतीसू० पृ० २३५ प्र० । ५ "संखाणे × × × सुपरिनिट्ठिए" । "संखाणे त्ति गणितस्कन्धे सुपरिनिष्ठित इति योगः"—[भगवतीसू० श० २ उ० १ सू० ९० पृ० ११२ द्वि० तथा पृ० ११४ प्र०] इत्येवं गणितार्थवाचकः 'संख्यान'-शब्दः भगवतीप्रभृतिसूत्रेषु विद्यते । ६ शब्दस्य व्य-भां० मां० ।

यथा दशसु द्रव्येषु, एकस्मिन् वा द्रव्ये दशगुणिते दशशब्दातिरेकेऽपि दशत्वं सममेव तथैव एतदपि न भिद्यते-'परमाणुरेकगुणकृष्णादिः' इति। एकादिशब्दाधिक्ये गुण-पर्यायशब्दयोर्भेदः वस्तु पुनस्तयोस्तुल्यमिति भावः। न च गुणानां पर्यायत्वे वाचकमुख्यसूत्रम्—"गुण-पर्यायवद् द्रव्यम्" [तत्त्वार्थ० अ० ५, सू० ३७] इति विरुध्यते, युगपदयुगपद्भावि-पर्यायविशेषप्रतिपादनार्थत्वात् तस्य। न चैवमपि मतुप्प्रयोगाद् द्रव्यविभिन्नपर्यायसिद्धिः, नित्ययोगेऽत्र मतुब्विधानात् द्रव्य-पर्याययोस्तादात्म्यात् सदाऽविनिर्भागवर्तित्वात् अन्यथा प्रमाणबाधोपपत्तेः। संज्ञा-संख्या-स्वलक्षणाऽर्थक्रियाभेदाद् वा कथंचित् तयोरभेदेऽपि भेदसिद्धेर्न मतुबनुपपत्तिः॥ १५॥

[भेदस्य निरासेनाभेदस्य फलितत्वेऽप्येकान्तिना तस्य दार्ढ्याय सोपनयमुदाहरणम्]

एवं द्रव्य-पर्याययोर्भेदैकान्तप्रतिषेधे अभेदैकान्तवाद्याह—

एयंतपक्खवाओ जो उण दव्व-गुण-जाइभेयम्मि।
अह पुव्वपडिक्कुट्ठो उआहरणमित्तमेयं तु॥ १६॥
पिउ-पुत्त-णत्तु-भेव्वय-भाऊणं एगपुरिससंबंधो।
ण य सो एगस्स पिय त्ति सेसयाणं पिया होइ॥ १७॥
जह संबन्धविसिट्ठो सो पुरिसो पुरिसभावणिरइसओ।
तह दव्वमिंदियगयं रूवाइविसेसणं लहइ॥ १८॥

एकान्तव्यतिरिक्ताभ्युपगमवादो यः पुनर्द्रव्य-गुण-क्रियाभेदेषु स यद्यपि पूर्वमेव प्रतिक्षिप्तः भेदैकान्तग्राहकप्रमाणाभावात् अभेदग्राहकस्य च 'सर्वमेकं सदविशेषात् विशेषे वा वियत्कुसुमवदसत्त्वप्रसङ्गात्' इति प्रदर्शितत्वात्।

तथापि तत्स्वरूपे दार्ढ्योत्पादनार्थमुदाहरणमात्रमभिधीयते—

पितृ-पुत्र-नप्तृ-भाग्नेय-भ्रातृभिर्य एकस्य पुरुषस्य संबन्धस्तेनासावेक एव पित्रादिव्यपदेशमासादयति। न चासावेकस्य पिता-पुत्रसंबन्धतः—इति शेषाणामपि पिता भवति।

यथा प्रदर्शितसंबन्धविशिष्टः पित्रादिव्यपदेशमाश्रित्यासौ पुरुषरूपतया निरतिशयोऽपि सन् तथा द्रव्यमपि घ्राण-रसन-चक्षुस्-त्वक्-श्रोत्रसंबन्धमवाप्य रूप-रस-गन्ध-स्पर्श-शब्दव्यपदेशमात्रं लभते द्रव्यस्वरूपेणाविशिष्टमपि नहि शक्रेन्द्रादिशब्दभेदाद् गीर्वाणनाथस्येव रूपादिशब्दभेदाद् वस्तुभेदो युक्तस्तदा द्रव्याद्वैतैकान्तस्थितेः कथंचिद् भेदाभेदवादो द्रव्य-गुणयोर्मिथ्यावाद इति॥ १६॥ १७॥ १८॥

[कथंचिद् भेदाभेदं मिथ्या वदतोऽभेदैकान्तपक्षस्य निराकरणम्]

अस्य निराकरणायाह—

होज्जाहि दुगुणमहुरं अणंतगुणकालयं तु जं दव्वं।
ण उ डहरओ महल्लो वा होइ संबंधओ पुरिसो॥ १९॥

---

१ "ववदेसा संठाणा संखा विसया य होंति ते बहुगा। ते तेसिमणण्णत्ते अण्णत्ते चावि विज्जंते"॥ ४६॥—पञ्चास्ति०।

२ "भव्वो बहिणीतणए" "भव्वो भागिनेयः"—देशीना० व० ६ गा० १००। तत्रैव च "भच्चो" इति पाठान्तरम्।

३ पृ० २७२ पं० १७। ४ भगिनीवद् भग्नीशब्दोऽपि वियते ततो भग्न्या अपत्यं भाग्नेयः—वाच०।

यदि नाम आम्रादिद्रव्यमेव रसनसंबन्धाद् 'रसः' इति व्यपदेशमात्रमासादयेत् द्विगुणमधुरं रसतः कुतो भवेत् तथा नयनसंबन्धाद् यदि नाम 'कृष्णम्' इति भवेत् अनन्तगुणकृष्णं तत् कुतः स्यात् वैषम्यमेदावगतेर्नयनादिसंबन्धमात्रादसंभवात्। तथा, पुत्रादिसंबन्धद्वारेण पित्रादिरेव पुरुषो भवेत् न त्वल्पो महान् वेति युक्तः। विशेषप्रतिपत्तेरुपचरितत्वे मिथ्यात्वे वा सामान्यप्रतिपत्तावपि तथाप्रसक्तेरिति भावः॥ १९॥

[अभेदैकान्तवादिन आशङ्का]

अत्राहाभेदैकान्तवादी—

भण्णइ संबंधवसा जइ संबंधित्तणं अणुमयं ते।
णणु संबंधविसेसे संबंधिविसेसणं सिद्धं॥ २०॥

संबन्धसामान्यवशाद् यदि संबन्धित्वसामान्यम् अनुमतं तव, ननु संबन्धविशेषद्वारेण तथैव संबन्धिविशेषोऽपि किं नाभ्युपगम्यते?॥ २०॥

[सिद्धान्तवादिनाऽऽशङ्कानिरसनम्]

सिद्धान्तवाद्याह—

जुज्जइ संबंधवसा संबंधिविसेसणं ण उण एयं।
णयणाइविसेसगओ रूवाइविसेसपरिणामो॥ २१॥

संबन्धविशेषवशाद् युज्यते संबन्धिविशेषः यथा दण्डादिसंबन्धिविशेषजनितसंबन्धविशेषसमासादितसंबन्धिविशेषोऽवगतः। द्रव्याद्वैतवादिनस्तु न संबन्धिविशेषः नापि संबन्धविशेषः संगच्छत इति कुतो रसनादिविशेषसंबन्धजनितो रसादिविशेषपरिणामः?॥ २१॥

[अनेकान्तवादे अनन्त-द्विगुणादिवैषम्यपरिणतिः कथं घटते इत्याशङ्का तन्निरासश्च]

नन्वनेकान्तवादिनोऽपि रूप-रसादेरनन्त-द्विगुणादिवैषम्यपरिणतिः कथमुपपन्ना? इत्याह—

भण्णइ विसमपरिणयं कह एयं होहिइ त्ति उवणीयं।
तं होइ परणिमित्तं ण व त्ति एत्थऽत्थि एगंतो॥ २२॥

शीतोष्णस्पर्शवदेकत्रैकदा विरोधाद् भण्यते 'एकत्र आम्रफलादौ विषमपरिणतिः कथं भवति' इति परेण प्रेरिते उपनीतं प्रदर्शितमात्रेण-तद् भवति परनिमित्तम्—द्रव्य-क्षेत्र-काल-भावानां सहकारिणां वैचित्र्यात् कार्यमपि वैचित्र्यमासादयति—तद् आम्रादि वस्तु विषमरूपतया परनिमित्तं भवति, न वा 'परनिमित्तमेव' इत्यत्राप्येकान्तोऽस्ति, स्वरूपस्यापि कथंचिन्निमित्तत्वात्। तन्न द्रव्याद्वैतैकान्तः संभवी॥ २२॥

[प्रागुक्तस्य लक्षणस्य बाधाद् भेदैकान्तवादिना द्रव्य-गुणयोर्लक्षणान्तराभिधानम् अभेदैकान्तवादिना च विकल्प्य तद्दूषणम्]

द्रव्य-गुणयोर्भेदैकान्तवादिना प्राक् प्रदर्शिततल्लक्षणस्यैकत्वप्रतिपत्त्यध्यक्षबाधितत्वाद् लक्षणान्तरं वक्तव्यम् तदाह—

दव्वस्स ठिई जम्म-विगमा य गुणलक्खणं ति वत्तव्वं।
एवं सइ केवलिणो जुज्जइ तं णो उ दवियस्स॥ २३॥

---

१ अत्राह भेदै-वा० बा० भां० मां०। २ न चाप-वा० बा० भां० मां०। ३ वक्तव्यं छ दव्वस्स बृ० आ० हा० वि०।

द्रव्यस्य लक्षणं स्थितिः जन्म-विगमौ लक्षणं गुणानाम्, एवं सति केवलिनो युज्यत एतल्लक्षणम्-तत्र किल केवलात्मना स्थिते एव चेतनाचेतनरूपा अन्ये अर्था ज्ञेयभावेनोत्पद्यन्ते, अज्ञेयरूपतया च नश्यन्ति। न तु द्रव्यस्याप्यादेर्लक्षणमिदं युज्यते, न हि अणौ रूपादयो जायन्ते अत्यन्तभिन्नत्वात् गव्यश्वादिवत्। अथवा केवलिनोऽपि सकलज्ञेयग्राहिणो नैतल्लक्षणं युज्यते। न चापि द्रव्यस्य अचेतनस्य गुण-गुणिनोरत्यन्तभेदे असत्त्वापत्तेः—असतोश्च खरविषाणादेरिव लक्षणासंभवादिति ॥ २३ ॥

दव्वत्थंतरभूया मुत्ताऽमुत्ता य ते गुणा होज्ज ।
जइ मुत्ता परमाणू णत्थि अमुत्तेसु अग्गहणं ॥ २४ ॥

द्रव्यार्थान्तरभूतगुणवादिनः द्रव्यादर्थान्तरभूतगुणा मूर्ताः, अमूर्ता वा भवेयुः? यदि मूर्ताः परमाणवो न तर्हि परमाणवो भवन्ति, मूर्तिमद्रूपाद्याधारत्वात् अनेकप्रदेशिकस्कन्धद्रव्यवत्। अथामूर्ताः, अग्रहणं तेषाम् अमूर्तत्वात् आकाशवत्। ततो द्रव्य-गुणयोः कथंचिद् भेदाभेदावभ्युपगमनीयौ अन्यथोक्तदोषप्रसक्तेः। तथाहि—द्रव्य-गुणयोः कथंचिद् भेदः यथाक्रममेकानेकप्रत्ययावसेयत्वात्, कथंचिदभेदोऽपि रूपाद्यात्मना द्रव्यस्वरूपस्य रूपादीनां च द्रव्यात्मकतया प्रतीतेः; अन्यथा तदभावापत्तेः ॥ २४ ॥

[प्रस्तुतप्रपञ्चस्य शिष्यबुद्धिवैशद्यमात्रप्रयोजनकत्वकथनम्]

ततः

सीसमईविप्फारणमेत्तत्थोऽयं कओ समुल्लावो ।
इहरा कहामुहं चेव णत्थि एवं ससमयम्मि ॥ २५ ॥

शिष्यबुद्धिविकाशनमात्रार्थोऽयं कृतः प्रबन्धः; इतरथा कथैवैषा नास्ति स्वसिद्धान्ते 'किमेते गुणा गुणिनो भिन्नाः, आहोस्विद् अभिन्नाः' इति, अनेकान्तात्मकत्वात् सकलवस्तुनः ॥ २५ ॥

[वस्तुत्वे कथंचिद् भेदाभेदात्मके व्यवस्थितेऽपि तदन्यथावादिनां मिथ्यादृष्टित्वकथनम्]

एवंरूपे च वस्तुतत्त्वे अन्यथारूपं तत् प्रतिपादयन्तो मिथ्यावादिनो भवन्तीत्याह—

ण वि अत्थि अण्णवादो ण वि तव्वाओ जिणोवएसम्मि ।
तं चेव य मण्णंता अवमण्णंता ण याणंति ॥ २६ ॥

नैवास्ति अन्यवादो गुण-गुणिनोः, नाप्यनन्यवादो जिनोपदेशे द्वादशाङ्गे प्रवचने सर्वत्र कथंचिदित्याश्रयणात्। तदेव अन्यदेवेति वा मन्यमानाः मननीयमेव अवमन्यमाना घादिनोऽभ्युपगतविषयावज्ञाविधायित्वाद् अज्ञा भवन्ति अभ्युपगमनीयवस्त्वस्तित्वप्रतिपादकोपायनिमित्तापरिज्ञानाद् मृषावादिवदिति तात्पर्यार्थः। ततोऽनेकान्तवाद एव व्यवस्थितः ॥ २६ ॥

[अनेकान्तस्य व्यापकतां प्रदर्शयितुमनेकान्तेऽप्यनेकान्ताभ्युपगमनम्]

ननु 'सर्वत्रानेकान्तः' इति नियमे अनेकान्तेऽप्यनेकान्ताद् एकान्तप्रसक्तिः। अथ नानेकान्ते अनेकान्तवादस्तर्हि अव्यापकोऽनेकान्तवाद इत्यत्राह—

भयणा वि हु भइयव्वा जह भयणा भयइ सव्वदव्वाइं ।
एवं भयणा णियमो वि होइ समयाविरोहेण ॥ २७ ॥

यथा भजना अनेकान्तो भजते सर्ववस्तूनि तदतत्स्वभावतया ज्ञापयति तथा भजनाऽपि अनेकान्तोऽपि भजनीयः—अनेकान्तोऽप्यनेकान्त इत्यर्थः—नय-प्रमाणापेक्षया 'एकान्तश्चाऽनेकान्तश्च' इत्येवं ज्ञापनीयः। एवं च भजनाऽनेकान्तः संभवति, नियमश्च एकान्तश्च सिद्धान्तस्य "रयणप्पभा सिआ सासया सियाऽसासया" [जीवाजीवाभि० प्रतिप० ३ उ० १ सू० ७८] इत्येवमनेकान्तप्रतिपादकस्य "दव्वट्ठयाए सासया, पज्जवट्ठयाए असासया" [ ] इत्येवं चैकान्ताभिधायकाविरोधेन।

न चैवमव्यापकोऽनेकान्तवादः, 'स्यात्'पदसंसूचितानेकान्तगर्भस्यैकान्तस्य तत्त्वात् अनेकान्तस्यापि 'स्यात्'कारलाञ्छनैकान्तगर्भस्य अनेकान्तस्वभावत्वात्। न चानवस्था, अन्यनिरपेक्षस्वरूपत एव तथात्वोपपत्तेः यद्वा स्वरूपत एवानेकान्तस्यैकान्तप्रतिषेधेनानेकान्तरूपत्वात् 'स्यादेकान्तः' 'स्यादनेकान्तः' इति कथं नानेकान्तेऽनेकान्तोऽपि। अनेकान्तात्मकवस्तुव्यवस्थापकस्य तद्व्यवस्थापकत्वं स्वयमनेकान्तात्मकत्वमन्तरेणाऽनेकान्तस्याऽनुपपन्नमिति न तत्राऽव्यापकत्वादिदोष इत्यसकृदावेदितमेव ॥ २७ ॥

[षड् जीवनिकायास्तदघाते च धर्म इत्यत्राप्यनेकान्तव्यवस्थापनम्]

नन्वनेकान्तस्य व्यापकत्वे 'षड् जीवनिकायाः' 'तदघाते वा धर्मः' इत्यत्राप्यनेकान्त एव स्यादित्याशङ्क्याऽऽह—

णियमेण सद्दहंतो छक्काए भावओ न सद्दहइ ।
हंदी अपज्जवेसु वि सद्दहणा होइ अविभत्ता ॥ २८ ॥

नियमेनाऽवधारणेन 'षडेवैते जीवाः कायाश्च' इत्येवं श्रद्दधानः षट्कायान् भावतः परमार्थतो न श्रद्धत्ते जीवराश्यपेक्षया तेषामेकत्वात् कायानामपि पुद्गलतयैकत्वात् जीव-पुद्गलप्रदेशानां परस्पराविनिर्भागवृत्तित्वाच्च जीवप्रदेशानां स्याद् अजीवत्वम् प्रत्येकं प्राधान्यविवक्षया स्याद् अनिकायत्वम् सूत्रविहितन्यायेन प्रवृत्तस्याऽप्रमत्तस्य 'हिंसाऽप्यहिंसा' इति 'तद्घाते स्यादधर्मः' इति। न भावसम्यग्दृष्टिरसौ स्यात्, द्रव्यसम्यग्दृष्टिस्तु स्यात् 'भगवतैवमुक्तम्' इति जिनवचनरुचि-

---

१ "इमा णं भंते! रयणप्पभा पुढवी किं सासया? असासया?
गोयमा! सिय सासता सिय असासया।
से केणट्ठेणं भंते! एवं वुच्चइ–सिय सासया सिय असासया?
गोयमा! दव्वट्ठयाए सासता, वण्णपज्जवेहिं गंधपज्जवेहिं रसपज्जवेहिं फासपज्जवेहिं असासता से तेणट्ठेणं गोयमा! एवं वुच्चति–तं चेव जाव सिय असासता। एवं जाव अधेसत्तमा"—जीवाजीवाभि० पृ० ९८ प्र० पं० ११—१४।

२ "अनेकान्तोऽप्यनेकान्तः प्रमाण–नयसाधनः। अनेकान्तः प्रमाणात् ते तदेकान्तोऽर्पितान्नयात्" ॥ —सनातन० प्र० गु० स्वयंभूस्तो० अर० श्लो० १८।

"अनेकान्ते तदभावादव्याप्तिरिति चेत्, न; तत्रापि तदुपपत्तेः। ६। स्यादेतत् अनेकान्ते सा विधि–प्रतिषेधविकल्पना नास्ति। यदि स्याद् यदाऽनेकान्तो न भवति तदैकान्तदोषानुषङ्गो भवेत् अनवस्थाप्रसङ्गश्च। ततस्तत्रानेकान्तत्वमेव इति सा सप्तभङ्गी व्याप्तिमती न भवतीति, तन्न; किं कारणम्? तत्रापि तदुपपत्तेः 'स्याद् एकान्तः' 'स्याद् अनेकान्तः' 'स्याद् उभयः' 'स्याद् अवक्तव्यः' 'स्याद् एकान्तश्च अवक्तव्यश्च' 'स्याद् अनेकान्तश्च अवक्तव्यश्च' 'स्याद् एकान्तश्च अनेकान्तश्च अवक्तव्यश्च' इति। तत् कथमिति चेत्? उच्यते—प्रमाण–नयार्पणाभेदादेकान्तो द्विविधः—सम्यगेकान्तः मिथ्यैकान्त इति। अनेकान्तो द्विविधः सम्यगनेकान्तः मिथ्यानेकान्त इति। तत्र सम्यगेकान्तो हेतुविशेषसामर्थ्यापेक्षः प्रमाणप्ररूपितार्थैकदेशादेशः, एकात्मावधारणेन अन्याशेषनिराकरणप्रवणप्रणिधिर्मिथ्यैकान्तः। एकत्र सप्रतिपक्षानेकधर्मस्वरूपनिरूपणो युक्त्यागमाभ्यामविरुद्धः सम्यगनेकान्तः, तदतत्स्वभाववस्तुशून्यं परिकल्पितानेकात्मकं केवलं वाग्विज्ञानं मिथ्यानेकान्तः। तत्र सम्यगेकान्तो नय उच्यते, सम्यगनेकान्तः प्रमाणम्। नयार्पणादेकान्तो भवत्येकनिश्चयप्रवणत्वात्। प्रमाणार्पणादनेकान्तो भवति अनेकनिश्चयाधिकरणत्वात्। यद् यदि अनेकान्तोऽनेकान्त एव स्यात् नैकान्तो भवेत् एकान्ताभावात् तत्समूहात्मकस्य तस्याप्यभावः स्यात् शाखाद्यभावे वृक्षाद्यभाववत् तदविनाभाविविशेषनिराकरणादात्मलोपे सर्वलोपः स्यात्। एवमुत्तरे च भङ्गा योजयितव्याः"—तत्त्वार्थराजवा० १–६–६ पृ० २५–२६। शास्त्रवा० स्याद्वादक० पृ० २२३ द्वि० पं० १—१०।

३ "अनेकान्ततो"–बृ० टि०। ४ "एकान्तोऽपीति"–बृ० टि०। ५ "वस्तु–" बृ० टि०। ६–कायित्व–बृ०।

स्वभावत्वात्। ततोऽपर्यायेष्वपि न विद्यन्ते अर्चि-र्मुर्मुरादयो विवक्षितपर्याया येषु पुद्गलेषु तेष्वपि अविभक्तश्रद्धानं यत् तदपि भावत एव भवेत्–'अर्चिष्मानयं भावो भूतो भावी वा' इति। तन्नाऽव्यापकोऽनेकान्तवादः ॥ २८ ॥

[गतिमत्यपि द्रव्ये अपेक्षाविशेषेण गत्यगती प्रदर्श्यानेकान्तस्य व्यापकत्वोपपादनम्]

५ नन्वनेकान्तस्य व्यापकत्वे 'गच्छति तिष्ठति' इत्यत्राऽप्यनेकान्तः स्यात्, तथाभ्युपगमे च तयोरभावप्रसक्तिरित्येतदेवाऽऽह—

गइपरिगयं गई चेव केइ णियमेण दवियमिच्छंति।
तं पि य उड्ढगईयं तहा गई अन्नहा अगई ॥ २९ ॥

'गतिक्रियापरिणामवद् द्रव्यं गतिमदेव' इति केचिद् मन्यन्ते, तदपि गति-
१० क्रियापरिणतं जीवद्रव्यं सर्वतो गमनाऽयोगाद् ऊर्ध्वादिप्रतिनियतदिग्गतिकं तैर्वादिभिरभ्युपगन्तव्यम्; एवं च तत् तथा प्रतिनियतदिग्गमनेनैव गतिमत्; अन्यथाऽपि गतिमत् स्यात् तदाऽभिप्रेतदेशप्राप्तिवद् अनभिप्रेतदेशप्राप्तिरपि तस्य भवेदित्यनुपलभ्यमानयुगपद्विरुद्धोभयदेश-प्राप्तिप्रसक्तेरत्राप्यनेकान्तो नाऽव्यापकः। अभिप्रेतगतिरेव तत्राऽनभिप्रेताऽगतिरिति चेत्, न; अनभिप्रेतगत्यभावाभावे प्रतिनियतगतिभाव एव न भवेत् तत्सद्भावे वा तदवस्थोऽनेकान्तः ॥ २९ ॥

१५ [दहनादावपेक्षाविशेषेणादहनत्वादिकं निरूप्यानेकान्तस्य व्यापकत्वसमर्थनम्]

स्यादेतत् 'दहनाद् दहनः, पवनात् पवनः' इत्यत्राप्यनेकान्ते दहनादावदहनादेर्विरुद्धरूपस्य संभवात् स्वरूपाभावः स्यादित्यत्राह—

गुणणिव्वत्तियसण्णा एवं दहणादओ वि दट्ठव्वा।
जं तु जहा पडिसिद्धं दव्वमदव्वं तहा होइ ॥ ३० ॥

२० गुणेन दहनादिना निर्वर्तितोत्पादिता संज्ञाऽभिधानं येषां तेऽपि दहन–पवनादय एव-मेवाऽनेकान्तात्मका द्रष्टव्याः। तथाहि—दाह्यपरिणामयोग्यं तृणादिकं दहतीति दहनः तदपरि-णतिस्वभावं स्वात्माकाशाऽप्राप्त-वज्राऽण्वादिकं न दहतीति। तेन यद् द्रव्यं यथा दहनरूपतया प्रतिषिद्धं तद् अद्रव्यमदहनादिरूपम् तथा भजनाप्रकारेण स्याद् दहनः स्यान्नेति भवति ततो नाऽव्यापी अनेकान्तः।

२५ तथा, 'अदहनः' इत्यत्राप्यनेकान्तः। तथाहि-यद् उदकद्रव्यं यथा दहनरूपेण प्रतिषिद्धं-दहनो न भवतीति 'अदहनः' इति तदपि न सर्वथा अदहनद्रव्यं भवति, पृथिव्यादेरदहनरूपाद् व्यावृत्तत्वात् अन्यथा दहनव्यतिरिक्तभूतैकत्वप्रसङ्ग इत्यनेकान्त एव अदहनव्यावृत्तस्य तद्द्रव्यत्वात् ॥ ३० ॥

[सर्वस्यापि वस्तुनः प्रतिनियतस्वरूपान्यथानुपपत्त्या स्वरूपास्तित्व–पररूपनास्तित्वाभ्युप-गमेनानेकान्तात्मकत्वप्रदर्शनम्]

३० नन्वेवं तदतद्रव्यत्वाद् जीवद्रव्यमजीवद्रव्यम् अजीवद्रव्यं च जीवद्रव्यं स्यादित्याशङ्क्याऽऽह—

कुंभो ण जीवदवियं जीवो वि ण होइ कुंभदवियं ति।
तम्हा दो वि अदवियं अण्णोण्णविसेसिया होंति ॥ ३१ ॥

कुम्भो जीवद्रव्यं न भवतीति जीवोऽपि न भवति घटद्रव्यम्। तस्माद् द्वावपि अद्रव्यमन्योन्यविशेषितौ परस्परभावात्मकौ।

१-द्योऽवि-आ० हा० वि० विना। २-नस्य त-बृ०। ३ "दहनद्रव्यत्वात् ततोऽनेकान्तो दहनादहनयोः"-बृ० टि०।

यतोऽयमभिप्रायः—जीवद्द्रव्यं कुम्भादेरजीवद्द्रव्याद् व्यावृत्तम् अव्यावृत्तं वा? प्रथमपक्षे स्वरूपापेक्षया जीवो जीवद्द्रव्यम्, कुम्भाद्यजीवद्द्रव्यापेक्षया तु न जीवद्द्रव्यमित्युभयरूपत्वादनेकान्त एव। द्वितीयविकल्पे तु सर्वस्य सर्वात्मकतापत्तेः प्रतिनियतरूपाभावतस्तयोरभावः खरविषाणवत्। ततः सर्वमनेकान्तात्मकम्-अन्यथा प्रतिनियतरूपताऽनुपपत्तेः—इति व्यवस्थितम् ॥ ३१ ॥

[उत्पादपर्यायस्य प्रयोग–विस्रसाजन्यत्वेन द्वैविध्यकथनम्] ५

अत्र प्रागुक्तम्—'प्रत्युत्पन्नं पर्यायं विगतभविष्यद्भ्यां यत् समानयति वचनं तत् प्रतीत्यवचनम्' इति, तत्र वचनादिकोऽपि पर्यायः, स चाऽप्रयत्नानन्तरीयको वचनविशेषलक्षणः घटादिकस्तु प्रयत्नानन्तरीयक इति केचित् संप्रतिपन्नास्तन्निराकरणाय 'यद् यतोऽन्वय-व्यतिरेकाभ्यां प्रतीयते तत् तत एवाऽभ्युपगन्तव्यम् अन्यथा कार्यकारणभावाभावप्रसक्तिः' इत्याह—

उप्पाओ दुवियप्पो पओगजणिओ य वीससा चेव। १०
तत्थ उ पओगजणिओ समुदयवायो अपरिसुद्धो ॥ ३२ ॥

द्विभेद उत्पादः–पुरुषेतरकारकव्यापारजन्यतया अध्यक्षाऽनुमानाभ्यां तथा तस्य प्रतीतेः। पुरुषव्यापारान्वयव्यतिरेकानुविधायित्वेऽपि शब्दविशेषस्य तदजन्यत्वे घटादेरपि तदजन्यताप्रसक्ते-र्विशेषाभावात् प्रत्यभिज्ञानादेश्च विशेषस्य प्रागेव निरस्तत्वात् तत्र प्रयोगेण यो जनित उत्पादः—मूर्तिमद्द्रव्यारब्धावयवकृतत्वात्—स समुदायवादः, तथाभूताऽऽरब्धस्य समुदायात्म १५
कत्वात्। तत एवाऽसावपरिशुद्धः, सावयवात्मकस्य तच्छब्दवाच्यत्वेन अभिप्रेतत्वात् ॥ ३२ ॥

[विस्रसाजन्यस्याप्युत्पादस्य द्वैविध्यवर्णनम्]

विस्रसाजनितोऽप्युत्पादो द्विविध इत्याह—

साभाविओ वि समुदयकओ व्व एगंतिओ (एगत्तिओ) व्व होज्जाहि।
आगासाईआणं तिण्हं परपच्चओऽणियमा ॥ ३३ ॥ २०

स्वाभाविकश्च द्विविध उत्पादः—एकः समुदयकृतः प्राक्प्रतिपादितावयवारब्धो घटादि-वत्। अपरश्चैकत्विकोऽनुत्पादिताऽमूर्तिमद्द्रव्यावयवारब्ध आकाशादिवत्। आकाशादीनां च त्रयाणां द्रव्याणामवगाहकादिघटादिपरद्रव्यनिमित्तोऽवगाहनादिक्रियोत्पादोऽनियमाद् अनेकान्ताद् भवेत्—अवगाहक-गन्तृ-स्थातृद्रव्यसन्निधानतोऽम्बर-धर्मा-ऽधर्मेष्ववगाहन-गति—स्थितिक्रियोत्पत्तिनिमित्तभावोत्पत्तिरित्यभिप्रायः। २५

[आकाशादिद्रव्यत्रयस्य कथंचित् सावयवत्वसाधनम् सामयिकीनामाकाशादिसंज्ञाना-मुपपादनं च]

नन्वनारब्धाऽमूर्तिमद्द्रव्यावयवत्वे गगनादीनां निरवयवत्वप्रसक्तेरनेकान्तात्मकत्वव्याघातः, न; मूर्तिमद्द्रव्याऽनारब्धानामपि तेषां सावयवत्वात्। न च सावयवत्वमसिद्धम् प्रदेशव्यवहारस्याऽऽकाशे दर्शनात्। न च 'आकाशस्य प्रदेशाः' इति व्यवहारो मिथ्या, मिथ्यात्वनिमित्ताभावात्। न च ३०
संयोगस्याऽव्याप्यवृत्तित्वनिमित्तः सावयवत्वाध्यारोपो मिथ्यात्वकारणम् निरवयवेऽव्याप्यवृत्ति-संयोगाधारत्वस्याऽध्यारोपनिमित्तस्यैवाऽनुपपत्तेः। यदि च सावयवं नभो न भवेत् तदा श्रोत्राकाश-समवेतस्येव शब्दस्य ब्रह्मभाषितस्याऽप्युपलम्भोऽस्मदादि(दे)र्भवेत् निरवयवैकाकाशश्रोत्रसमवेत-त्वात्। अथ धर्माधर्माभिसंस्कृतकर्णशष्कुल्यवरुद्धाकाशदेश एव श्रोत्रं तत्र च ब्रह्मभाषितस्याऽसम-वायान्नास्मदादिभिः श्रवणम्। नन्वेवं सैव सावयवत्वप्रसक्तिः श्रोत्राकाशप्रदेशाद् ब्रह्मशब्दाधारा- ३५
काशदेशस्यान्यत्वात्। यदि च सावयवमाकाशं न भवेत्, शब्दस्य नित्यत्वं सर्वगतत्वं च स्यात् आकाशैकगुणत्वात् तन्महत्त्ववत्। अथ क्षणिकैकदेशवृत्तिविशेषगुणत्वस्य शब्दे प्रमाणतः प्रसिद्धेर्नायं दोषः। नन्वेवमेकदेशवृत्तिविशेषगुणत्वाभ्युपगमे कथं न शब्दाधारस्याऽऽकाशस्य सावयवत्व-

---

१ पृ० ६२८ गा० ३। २ प्र० पृ० गा० ३२। ३-शप्रदेश-भां० मां०। ४ प्रस्तुतचर्चागतः कश्चित् कश्चिदंशः प्रायेण शब्दशः प्रमेयकमलमार्तण्डे वर्तते-पृ० १६८ प्र० पं० १०—। ५-तः सि-भां० मां०।

प्रसिद्धिः ? न हि निरवयवत्वे 'तस्यैकदेशे एव शब्दो वर्तते न सर्वत्र' इति व्यपदेशः संगच्छते । न च संयोगस्याऽव्याप्यवृत्तित्वनिबन्धनोऽयम् यत आकाशं व्याप्य संयोगो न वर्तते इति तदेकदेशे वर्तते इत्यभ्युपगमप्रसक्तिः व्याप्यवृत्तित्वं हि सामस्त्यवृत्तित्वम्, तत्प्रतिषेधश्च पर्युदासपक्षे एकदेशवृत्तित्वमेव, प्रसज्यपक्षे तु वृत्तिप्रतिषेध एव; न चासौ युक्तः संयोगस्य गुणत्वेन द्रव्याश्रितत्वात् तदभावे च तदभावात् । न च निरवयवत्वे आकाशस्य संतानवृत्त्या आगतस्य शब्दस्य श्रोत्रेणाप्युपलब्धिः संभवति अन्यान्याकाशदेशोत्पत्तिद्वारेण तस्य श्रोत्रसमवेतत्वानुपपत्तेः । जलतरङ्गन्यायेनापरापराकाशदेशादावपरापरशब्दोत्पत्तिप्रकल्पनायां कथं नाकाशस्य सावयवत्वम् ?

किञ्च, आकाशं शब्दोत्पत्तौ समवायिकारणमभ्युपगम्यते, यच्च समवायिकारणं तत् सावयवम्, यथा तन्त्वादि, समवायिकारणं च परेण शब्दोत्पत्तावाकाशमभ्युपगतम् । न च परमाण्वाऽऽत्मादिना व्यभिचारः तस्यापि सावयवत्वात्; अन्यथा द्व्यणुक-बुद्ध्यादेस्तत्कार्यस्य सावयवत्वं न स्यात् । न च बुद्ध्यादेः सावयवत्वमसिद्धम् आत्मनः सावयवत्वेन साधितत्वात् तद्विशेषगुणत्वेन बुद्ध्यादेः कथंचित् तादात्म्यसिद्धितः सावयवत्वोपपत्तेः । न च यत एव प्रमाणादणवः सिद्धास्तेषां निरवयवत्वमपि तत एव सिद्धमिति तद्ग्राहकप्रमाणबाधितत्वात् सावयवत्वानुमानस्याऽप्रामाण्यम् प्रमाणतः परमाणूनामसिद्धावाश्रयासिद्धितः सावयवत्वानुमानस्याऽप्रवृत्तिरिति वाच्यम्, यतः सावयवकार्यस्य सावयवकारणपूर्वकत्वे साध्ये न पूर्वोक्तदोषावकाशः । न च कार्यकारणयोरात्यन्तिको भेदः, समवायनिषेधे हि हिमवद्—विन्ध्ययोरिव भेदे विशिष्टकार्यकारणरूपतानुपपत्तेः । ततो द्व्यणुकादेः परमाणुकार्यस्य सावयवत्वात् तदात्मभूताः परमाणवः कथं न सावयवाः इति न परमाण्वादिभिर्व्यभिचारः । अपि च, सावयवमाकाशं तद्विनाशान्यथानुपपत्तेः । न चाऽऽकाशस्य विनाशित्वमसिद्धम् । तथाहि—अनित्यमाकाशम्, तद्विशेषगुणाभिमतशब्दविनाशान्यथानुपपत्तेः । यतो न तावदाश्रयविनाशाच्छब्दविनाशोऽभ्युपगतस्तन्नित्यत्वाभ्युपगमविरोधात्; न विरोधिगुणप्रादुर्भावात्, तन्महत्त्वादेरेकार्थसमवायित्वेन रूप-रसयोरिव विरोधिताऽसिद्धेः । विरोधित्वे वा श्रवणसमयेऽपि तदभावप्रसङ्गः तदाऽपि तन्महत्त्वस्य सद्भावात् । नापि संयोगादिर्विरोधिगुणः तस्य तत्कारणत्वात् । नापि संस्कारः तस्य गुणत्वेन शब्देऽसंभवात् संभवे वा शब्दस्य द्रव्यत्वप्रसक्तिः । आकाशस्य द्रव्यत्वेन तत्संभवेऽपि तस्याभावे आकाशस्याऽप्यभावप्रसक्तिः तस्य तदव्यतिरेकात् । व्यतिरेके वा 'तस्य' इति संबन्धाऽयोगात् । नापि शब्दोपलब्धिप्रापकधर्माद्यभावात् तदभावः तस्य विभिन्नाश्रयस्थानेन विनाशयितुमशक्यत्वात् । शक्यत्वे वा तदाधारस्यापि विनाशप्रसङ्गः तस्य तदव्यतिरेकात् । ततोऽम्बरविशेषगुणत्वे शब्दस्य तद्विनाशान्यथानुपपत्त्या तस्यापि विनाशित्वम्, ततोऽपि सावयवत्वम् । न च बुद्ध्यादिभिर्व्यभिचारः उक्तोत्तरत्वात् । किंच, आश्रितविनाशे आश्रयत्वस्यापि विनाशः आश्रितत्वनिबन्धनत्वात् तस्य धर्मस्य च धर्मिणः कथंचिदव्यतिरेकात् तथाऽऽकाशस्य विनाशित्वात् सावयवत्वं घटादेरिवोपपन्नम् । किंच, सावयवमाकाशम्, हिमवद्—विन्ध्यावरुद्धविभिन्नदेशत्वात्, तदवष्टब्धदेशभूभागवत्; अन्यथा तयो रूप-रसयोरिवैकदेशाकाशस्थितिप्रसक्तिः, न चैतद् दृष्टमिति सर्वं वस्तूत्पाद-विनाश-स्थित्यात्मकत्वात् कथंचित् सावयवं सिद्धम् । ततः प्रयोग-विस्रसात्मकमूर्तिमद्द्रव्यानारब्धत्वेनाऽऽकाशादेरुत्पाद ऐकत्विकोऽभिधीयते; न पुनर्निरवयवकृतत्वादैकत्विकः । अयमपि स्यादैकत्विकः स्यादनैकत्विकः; न त्वैकत्विक एव । एवं मूर्तिमदमूर्तिमदवयवद्रव्यद्वयोत्पाद्याऽवगाह-गति-स्थितीनां यथोक्तप्रकारेण तत्रोत्पत्तेः अवगाह-गति-स्थितिस्वभावस्य च विशिष्टकार्यत्वाद् विशिष्टकारणपूर्वकत्वसिद्धेस्तत्कारणे आकाशादिसंज्ञाः समयनिबन्धनाः सिद्धाः ॥ ३३ ॥

[उत्पादवद् विगमस्यापि द्वैविध्यवर्णनम्]

उत्पादवद् विगमोऽपि तथाविध एवेत्याह—

विगमस्स वि एस विही समुदयजणियम्मि सो उ दुवियप्पो ।
समुदयविभागमेत्तं अत्थंतरभावगमणं च ॥ ३४ ॥

१ पृ० १४९ पं० १९–। २ प्रमेयक० पृ० १६८ प्र० पं० १३। ३ प्र० पृ० पं० ११। ४ प्रमेयक० पृ० १६८ प्र० पं० १२—।

विगमस्याप्येष एव द्विरूपो भेदः—स्वाभाविकः प्रयोगजनितश्चेति तद्व्यातिरिक्तस्य वस्तुनोऽभावात् पूर्वावस्थाविगमव्यतिरेकेणोत्तरावस्थोत्पत्त्यनुपपत्तेः न हि बीजादीनामविनाशेऽङ्कुरादिकार्यप्रादुर्भावो दृष्टः । न चाऽवगाह-गति-स्थित्याधारत्वं तदनाधारत्वस्वभावप्राक्तनावस्थाध्वंसमन्तरेण संभवति तत्र **समुदयजनिते** यो विनाशः **स** उभयत्रापि **द्विविधः**-एकः **समुदयविभागमात्र**प्रकारो विनाशः यथा पटादेः कार्यस्य तत्कारणपृथक्करणे तन्तुविभागमात्रम्, द्वितीयप्रकार-**स्त्वर्थान्तरभावगमनं** विनाशः यथा मृत्पिण्डस्य घटार्थान्तरभावेनोत्पादो विनाशः । न चार्थान्तररूपविनाशविनाशे मृत्पिण्डप्रादुर्भावप्रसक्तिरिति वक्तव्यम्, पूर्वोत्तरकालावस्थयोरसंकीर्णत्वात्—अतीतत्वेन प्राक्तनावस्थाया उत्पत्तेः अतीतस्य च वर्तमानताऽयोगात्—तयोः स्वस्वभावापरित्यागतस्तथानियतत्वात् तुच्छरूपस्य ह्यभावस्याऽभावः स्यादपि तदभावरूपः, न तु वस्त्वन्तरादुपजायमानं वस्त्वन्तरमतीततरावस्थारूपं भवितुमर्हति तर-तमप्रत्ययार्थव्यवहाराभावप्रसक्तेः । प्रतिपादितं च कस्यचिद् रूपस्य निवृत्त्या रूपान्तरगमनं वस्तुनः प्रागिति न पुनरभिधीयते ॥ ३४ ॥

[उत्पाद-विनाश-ध्रौव्याणां भिन्नाभिन्नकालत्वस्यार्थान्तरानर्थान्तरत्वस्य चाभिधानम्]

न चोत्पाद-विनाशयोरैकान्तिकतद्रूपताऽभ्युपगमे अनेकान्तवादव्याघातः, कथंचित् तयोस्तद्रूपताऽभ्युपगमात् । तदाह—

तिण्णि वि उप्पायाई अभिण्णकाला य भिण्णकाला य ।
अत्थंतरं अणत्थंतरं च दवियाहि णायव्वा ॥ ३५ ॥

त्रयोऽप्युत्पाद-विगम-स्थितिस्वभावाः परस्परतोऽन्यकालाः यतो न पटादेरुत्पादसमय एव विनाशः तस्यानुत्पत्तिप्रसक्तेः । नाऽपि तद्विनाशसमये तस्यैवोत्पत्तिः अविनाशापत्तेः । न च तत्प्रादुर्भावसमय एव तत्स्थितिः तद्रूपेणैवावस्थितस्यानवस्थाप्रसक्तितः प्रादुर्भावाऽयोगात् । न च घटरूपमृत्स्थितिकाले तस्या विनाशः तद्रूपेणावस्थितस्य विनाशानुपपत्तेः । न च घटविनाशविशिष्टमृत्काले तस्या एवोत्पादो दृष्टः । नाऽपि तदुत्पादविशिष्टमृत्समये तस्या एव ध्वंसोऽनुत्पत्तिप्रसङ्गत एव युक्तः । ततस्त्रयाणामपि भिन्नकालत्वात् तद् द्रव्यमर्थान्तरं नानास्वभावम् न ह्यन्योन्यव्यतिरिक्तकालोत्पाद-विगम-ध्रौव्याऽव्यतिरिक्तमेकस्वरूपं द्रव्यमुपपद्यते तस्य तेभ्यो भेदप्रसक्तेः । न च तद् भिन्नमेवास्तु तत्त्रितयविकलस्य तस्य तथाऽनुपलब्धितोऽसत्त्वात् । न चैकस्य द्रव्यस्याभावादनेकान्ताभावप्रसक्तिः यतोऽ**भिन्नकाला**श्चोत्पादादयः । नहि कुशूलविनाशघटोत्पादयोर्भिन्नकालता; अन्यथा विनाशात् कार्योत्पत्तिः स्यात् घटाद्युत्तरपर्यायानुत्पत्तावपि प्राक्तनपर्यायध्वंसप्रसक्तिश्च स्यात् । पूर्वोत्तरपर्यायविनाशोत्पादक्रियाया निराधाराया अयोगात् तदाधारभूतद्रव्यस्थितिरपि तदाऽभ्युपगन्तव्या । न च क्रियाफलमेव क्रियाधारः तस्य प्रागसत्त्वात्; सत्त्वे वा क्रियावैफल्यात् । ततस्त्रयाणामभिन्नकालत्वात् तद्व्यतिरिक्तं द्रव्यमभिन्नं न नाना । न च घटोत्पाद-विनाशापेक्षया भिन्नकालतयाऽर्थान्तरत्वम् कुसूल-घटविनाशोत्पादापेक्षया अभिन्नकालत्वेनानर्थान्तरत्वादेकान्त इति वक्तव्यम्, द्रव्यस्य पूर्वावस्थायां भिन्नाऽभिन्नतया प्रतीयमानस्योत्तरावस्थायामपि भिन्नाऽभिन्नतया तस्यैव प्रतीतेरनेकान्ताऽव्याहतेः । न चाऽबाधिताऽध्यक्षादिप्रतिपत्तिविषयस्य तस्य विरोधाद्युद्भावनं युक्तिसंगतम् सर्वप्रमाण—प्रमेयव्यवहारविलोपप्रसङ्गात् । अत एव **अर्थान्तरमनर्थान्तरं चोत्पादादयो द्रव्यात्**, तद्धा तेभ्यस्तथेति प्रतिज्ञेयम् **द्रव्यात्** तथाभूततद्ग्राहकत्वपरिणतादात्मलक्षणात् प्रमाणादित्यपि व्याख्येयम् नहि तथाभूतप्रमाणप्रवृत्तिस्तथाभूतार्थमन्तरेणोपपन्ना धूम इव धूमध्वजमन्तरेण, संवेद्यते च तथाभूतग्राह्य-ग्राहकरूपतया अनेकान्तात्मकं स्वसंवेदनतः प्रमाणमिति न तदपलापः कर्तुं शक्यः; अन्यथाऽतिप्रसङ्गात् ।

१ "तुच्छस्य हि अभावस्याभावे मृत्पिण्डोत्पादो भवेत् न तु"—बृ० टि० । २ "मृत्पिण्डरूपम्"—बृ० टि० । ३ "यस्मिन्नेव समये उत्पादस्तस्मिन्नेव यदा विनाशस्तस्य तदा कमु(कथमु)-त्पत्तिः ?"—बृ० टि० । ४-नाशोत्पत्तेः बृ० विना । ५ "मृदः"-बृ० टि० । ६ **न चैक(चैव)मेकस्य** बृ० । ७ "घटादि"-बृ० टि० ।

यद्वा देशादिविप्रकृष्टा उत्पत्ति-विनाश-स्थितिस्वभावा भिन्नाभिन्नकाला अर्थान्तरानर्थान्तर-रूपाः, **द्रव्यत्वात्**–द्रव्याव्यतिरिक्तत्वादित्यर्थः—अन्यथोत्पादादीनामभावप्रसक्तेः । तेभ्यो वा द्रव्यमर्थान्तरानर्थान्तरम्, द्रव्यत्वात् । प्रतिज्ञार्थैकदेशता च हेतोर्नाशङ्कनीया द्रव्यविशेषे साध्ये द्रव्यसामान्यस्य हेतुत्वेनोपन्यासात् ॥ ३५ ॥

[उक्तस्यार्थस्य प्रत्यक्षसिद्धेनोदाहरणेनोपोद्बलनम्]

अत्रैवार्थे प्रत्यक्षप्रतीतमुदाहरणमाह—

जो आउंचणकालो सो चेव[1] पसारियस्स वि ण जुत्तो ।
तेसिं पुण पडिवत्ती–विगमे कालंतरं णत्थि ॥ ३६ ॥

य आकुञ्चनकालोऽङ्गुल्यादेर्द्रव्यस्य स एव तत्प्रसारणस्य न युक्तः भिन्नकालतया आकुञ्चन-प्रसारणयोः प्रतीतेस्तयोर्भेदः, अन्यथा तयोः स्वरूपाभावापत्तेरित्युक्तम् तत्तत्पर्यायाभिन्नस्याङ्गुल्यादिद्रव्यस्यापि तथाविधत्वात् तदपि भिन्नमभ्युपगन्तव्यम् अन्यथा तदनुपलम्भात् अभिन्नं च तदवस्थयोस्तस्यैव प्रत्यभिज्ञायमानत्वात् । **तयोः पुन**रुत्पाद-विनाशयोः—प्रतिपत्तिश्च प्रादुर्भावः, विगमश्च विपत्तिः—**प्रतिपत्ति–विगमं** तत्र **कालान्तरं** भिन्नकालत्वमङ्गुलिद्रव्यस्य च **नास्ति ।** पूर्वपर्यायविनाशोत्तरपर्यायोत्पत्त्यङ्गुलिद्रव्यावस्थितीनामभिन्नकालता अभिन्नरूपता च प्रतीयते एकस्यैव द्रव्यस्य तथाविवर्तात्मकस्याध्यक्षतः प्रतीतेः ।

अथवा **'कालान्तरं नास्ति'** इत्यत्र 'अ'कारप्रश्लेषाद् नञश्चोपादानात् प्रतिषेधद्वयेन प्रकृतार्थगतेः कालान्तरं कालभेद उत्पादादेर्द्रव्यस्य चास्तीति कथंचिद् भेद इत्यर्थः—कथंचिद् भेदेनाऽपि प्रतिपत्तेः । तेनोत्पत्ति-विनाश-स्थितीनां परस्पररूपपरित्यागाऽपरित्यागप्रवृत्तप्रत्येक-त्र्यात्मकैकरूपत्वेऽपि न वर्तमानपर्यायात्मकस्यैवाऽतीताऽनागतकालयोः सत्त्वम् वस्तुनस्त्र्यात्मकत्वाभ्युपगमात् । अतीताऽनागतकालयोरपि तद्रूपेण सत्त्वे उत्पादविनाशयोरभावेन कथं त्र्यात्मकत्वं तस्य भवेत् द्रव्यस्योत्पत्ति-विनाशनिमित्तत्वादतीतादितायाः अन्यथा वर्तमानवत् तदभावात्? न च तत्पर्यायस्याऽतीताऽनागतकालयोरभावे कथं नित्यत्वमिति वाच्यम्, कथंचित् तस्याभ्युपगमात् परित्यक्तोपादित्स्यमानपूर्वोत्तरपर्यायस्यान्यान्यवेषपरित्यागोपादानैकनटपुरुषवद् द्रव्यस्य विवर्तात्मकत्वात् । सर्वथा नित्यत्वे पूर्वोत्तरव्यपदेशाभावप्रसक्तेः । सर्वथाऽनित्यत्वेऽप्युभयत्रैकप्रतिभासव्यपदेशादिव्यवहाराभावश्च स्यात् । न चैकानेकत्वप्रतिभासो मिथ्या । ततो यदेव विनष्टं शिवकरूपतया तदेवोत्पन्नं मृद्द्रव्यं घटादिरूपतया अवस्थितं च मृत्त्वेनेति त्र्यात्मकं तत् सर्वदा द्रव्यमिति व्यवस्थितम् ॥ ३६ ॥

---

१ अर्थानुसारेण–**गमेऽकालंतरं** इत्यपि पाठः । २–**रूपपरित्यागप्रवृ**-वा० बा० आ० ।

३ "न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात् । व्येत्युदेति विशेषात् ते सहैकत्रोदयादि सत् ॥
कार्योत्पादः क्षयो हेतोर्नियमाल्लक्षणात् पृथक् । न तौ जात्याद्यवस्थानादनपेक्षाः खपुष्पवत् ॥
घट-मौलि–सुवर्णार्थी नाशोत्पादस्थितिष्वयम् । शोक–प्रमोद–माध्यस्थ्यं जनो याति सहेतुकम् ॥
पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः । अगोरसव्रतो नोभे तस्मात् तत्त्वं त्रयात्मकम्" ॥
—आप्तमी० श्लो० ५७—६० ।

अत्रत्या अष्टशती अष्टसहस्री च विलोकनीया । शास्त्रवा० स्त० ७ श्लो० १–३ । तथा,
"तयाहुर्मुकुटोत्पादो न घटानाशधर्मकः । स्वर्णान्न चान्य एवेति न विरुद्धं मिथस्त्रयम् ॥
न चोत्पाद–व्ययौ न स्तो ध्रौव्यवत् तद्धिया गतेः । नास्तित्वे तु तयोर्ध्रौव्यं तत्त्वतोऽस्तीति न प्रमा ॥
न नास्ति ध्रौव्यमप्येवमविगानेन तद्गतेः । अस्याश्च भ्रान्ततायां न जगत्यभ्रान्ततागतिः ॥
उत्पादोऽभूतभवनं स्वहेत्वन्तरधर्मकम् । तथाप्रतीतियोगेन विनाशस्तद्विपर्ययः ॥
तथैतदुभयाधारस्वभावं ध्रौव्यमित्यपि । अन्यथा त्रितयाभाव एकदैकत्र किं न तत् ॥
एकत्रैवैकदैवैतदित्थं त्रयमपि स्थितम् । न्याय्यं भिन्ननिमित्तत्वात् तदभेदे न युज्यते" ॥
—शास्त्रवा० स्त० ७ श्लो० ९–१४ ।

जैनवत् सांख्य–मीमांसकाभ्यामपि वस्तुनस्त्र्यात्मकता स्वीक्रियते—पातञ्जलद० पा० ३ सू० १३—। श्लो० वा० वनवा० श्लो० २०–२३ ।

स्याद्वादं परीक्षमाणेन शान्तरक्षितेन एषा त्र्यात्मकता विप्र(मीमांसक)–निर्ग्रन्थ(जैन)-कापिल(सांख्य)संमतत्वेन परीक्षिता—तत्त्वसं० का० १७७६–७९ पृ० ५०१–५०२ ।

[उत्पादादित्रयं प्रत्येकं त्र्यात्मकवत् त्रैकालिकमप्यस्ति इति वदत एव यथार्थवक्तृत्वाभिधानम्]

यथोत्पाद-व्यय-स्थितीनां प्रत्येकमेकैकं रूपं त्र्यात्मकं तथा भूत–वर्तमान–भविष्यद्भिरप्येकैकं रूपं त्रिकालतामासादयतीत्येतदेवाह—

उप्पज्जमाणकालं उप्पण्णं ति विगयं विगच्छंतं ।
दवियं पण्णवयंतो तिकालविसयं विसेसेइ ॥ ३७ ॥

उत्पद्यमानसमये एव किञ्चित् पटद्रव्यं तावदुत्पन्नम्—यद्येकतन्तुप्रवेशक्रियासमये तद् द्रव्यं तेन रूपेण नोत्पन्नं तर्ह्युत्तरत्रापि तन्नोत्पन्नमित्यत्यन्तानुत्पत्तिप्रसक्तिस्तस्य स्यात् । न चोत्पन्नांशेन तेनैव पुनस्तदुत्पद्यते तावन्मात्रपटादिद्रव्योत्पत्तिप्रसक्तेरुत्तरोत्तरक्रियाक्षणस्य तावन्मात्रफलोत्पादने एव प्रक्षयाद् अपरस्य फलान्तरस्याऽनुत्पत्तिप्रसक्तेः । यदि च विद्यमाना एकतन्तुप्रवेशक्रिया न फलोत्पादिका, विनष्टा सुतरां न भवेत् असत्त्वात् अनुत्पत्त्यवस्थावत् न ह्यनुत्पन्नविनष्टयोरसत्त्वे कश्चिद् विशेषः । ततः प्रथमक्रियाक्षणः केनचिद् रूपेण द्रव्यमुत्पादयति, द्वितीयस्त्वसौ तदेव अंशान्तरेणोत्पादयति अन्यथा क्रियाक्षणान्तरस्य वैफल्यप्रसक्तेः । एकेनांशेनोत्पन्नं सद् उत्तरक्रियाक्षणफलांशेन यद्यपूर्वमपूर्वं तद् उत्पद्येत तदोत्पन्नं भवेद् नान्यथेति प्रथमतन्तुप्रवेशादारभ्यान्त्यतन्तुसंयोगावधिं यावद् उत्पद्यमानं प्रबन्धेन तद्रूपतयोत्पन्नम्, अभिप्रेतनिष्ठारूपतया चोत्पत्स्यत इत्युत्पद्यमानम् उत्पन्नमुत्पत्स्यमानं च भवति, एवमुत्पन्नमपि उत्पद्यमानमुत्पत्स्यमानं च भवति, तथोत्पत्स्यमानमपि उत्पद्यमानमुत्पन्नं चेत्येकैकमुत्पन्नादिकालत्रयेण यथा त्रैकाल्यं प्रतिपद्यते तथा विगच्छदादिकालत्रयेणाप्युत्पादादिरेकैकः त्रैकाल्यं प्रतिपद्यते । तथाहि—यथा यद् यदैवोत्पद्यते तत् तदैवोत्पन्नम् उत्पत्स्यते च । यद् यदैवोत्पन्नं तत् तदैव उत्पद्यते उत्पत्स्यते च । यद् यदैवोत्पत्स्यते तत् तदैवोत्पद्यते उत्पन्नं च । तथा, तदेव तदैव यदुत्पद्यते तत् तदैव **विगतं विगच्छद् विगमिष्यच्च** । तथा, यदेव यदैवोत्पन्नं तदेव तदैव विगतं विगच्छद् विगमिष्यच्च । तथा, यदेव यदैवोत्पत्स्यते तदेव तदैव विगतं विगच्छद् विगमिष्यच्च । एवं विगमोऽपि त्रिकाल उत्पादादिना दर्शनीयः, तथा स्थित्याऽपि त्रिकाल एव सप्रपञ्चः प्रदर्शनीयः । एवं स्थितिरपि उत्पाद-विनाशाभ्यां सप्रपञ्चाभ्यामेकैकाभ्यां त्रिकाला प्रदर्शनीयेति **द्रव्यमन्योन्यात्मकतथाभूतकालत्रयात्मकोत्पाद-विनाश-स्थित्यात्मकं प्रज्ञापर्यंस्त्रिकालविषय**प्रादुर्भवद्धर्माधारतया तद् **विशिनष्टि ।** अनेन प्रकारेण त्रिकालविषयं द्रव्यस्वरूपं प्रतिपादितं भवति; अन्यथा द्रव्यस्याभावात् तद्वचनस्य मिथ्यात्वप्रसक्तिरिति भावः ॥ ३७ ॥

१–**प्रसक्तिरुत्तरो**-भां० विना । २–**णान्तरवै**—वृ० ।

३ "ण भवो भंगविहीणो भंगो वा णत्थि संभवविहीणो । उप्पादो वि य भंगो ण विणा धोव्वेण अत्थेण" ॥ ८ ॥
—प्रवचनसा० पृ० १३६ ।

"एतेन कालत्रयापेक्षयाऽपि त्रिलक्षणमुपदर्शितम् तस्य अन्वितेन रूपेण कालत्रयव्यापित्वात् अन्यथा व्युत्यत्तैकान्ते सर्वथाऽर्थक्रियाविरोधात् कूटस्थैकान्तवत् । ततो द्रव्यपर्यायात्मकं जीवादि वस्तु क्रमयौगपद्याभ्यामर्थक्रियान्यथानुपपत्तिरिति प्रमाणोपपन्नम् । तथा च स्थितिरेव स्थास्यति उत्पत्स्यते विनङ्क्ष्यति सामर्थ्यात् स्थिता उत्पन्ना विनष्टेति गम्यते । विनाश एव स्थास्यति उत्पत्स्यते विनङ्क्ष्यति स्थित उत्पन्नो विनष्ट इति च गम्यते । उत्पत्तिरेव उत्पत्स्यते विनङ्क्ष्यति स्थास्यतीति न कुतश्चिद् उपरमति सोत्पन्ना विनष्टा स्थितेति गम्यते । स्थित्याद्याश्रयस्य वस्तुनो अनाद्यनन्तत्वाद् अनुपरमसिद्धेः स्थित्यादिपर्यायाणां कालत्रयापेक्षिणामनुपरमसिद्धिः अन्यथा तस्यातल्लक्षणत्वप्रसङ्गात् सत्त्वविरोधात् । एतेन जीवादि वस्तु तिष्ठति स्थितम् स्थास्यति, विनश्यति विनष्टम् विनङ्क्ष्यति, उत्पद्यते उत्पन्नम् उत्पत्स्यते चेति प्रदर्शितम् कथंचित् तदभिन्नस्थित्यादीनामन्यथा स्थास्यत्यादिव्यवस्थानुपपत्तेः"—अष्टस० पृ० ११३ पं० २–१० ।

४ अत्र 'तथा यदैव यदुत्पद्यते तत् तदैव' इति पाठः सम्यग् भाति ।' "यदैवोत्पद्यमानं तदैव विगतं विगच्छद् विगमिष्यच्च"—नयोप० पृ० ४३ द्वि० पं० ८ । ५–**मन्यान्यात्म**—वृ० आ० हा० वि० ।

[विभागजन्यमुत्पादमनिच्छतां केषांचिद् उत्पादार्थानभिज्ञत्वख्यापनम्]

नन्वर्थान्तरगमनलक्षणस्य विनाशस्यासंभवात् विभागजस्य चोत्पादस्य; तद्व्याभावे स्थितेरप्यभावात् तत् त्रैकाल्यं दूरोत्सारितमेवेति मन्यमानान् वादिनः प्रति तदभ्युपगमप्रदर्शनपूर्वकमाह—

दव्वंतरसंजोगाहि केचि दवियस्स बेंति उप्पायं ।
उप्पायत्थाऽकुसला विभागजायं ण इच्छंति ॥ ३८ ॥

समानजातीयद्रव्यान्तरादेव समवायिकारणात् तत्संयोगासमवायिकारण-निमित्तकारणादिसव्यपेक्षाद् अवयवि कार्यद्रव्यं भिन्नं कारणद्रव्येभ्य उत्पद्यत इति **द्रव्यस्योत्पादं केचन ब्रुवते । ते चोत्पादार्थानभिज्ञा विभागजातं नेच्छन्ति ॥ ३८ ॥**

[प्रतिवादिसंमतोत्पादप्रक्रियाकथनपूर्वकं सिद्धान्तसंमतस्य विभागजन्योत्पादस्य समर्थनम्]

कुतः पुनर्विभागजोत्पादानभ्युपगमवादिन उत्पादार्थानभिज्ञाः ? यतः—

अणु दुअणुएहिं दव्वे आरद्धे 'तिअणुयं' ति ववएसो ।
तत्तो य पुण विभत्तो अणु त्ति जाओ अणू होइ ॥ ३९ ॥

द्वाभ्यां परमाणुभ्यां कार्यद्रव्ये **आरब्धे** 'अणुः' इति **व्यपदेशः** परमाणुद्वयारब्धस्य द्व्यणुकस्याणुपरिमाणत्वात् । **त्रिभिर्द्व्यणुकैश्चतुर्भिर्वाऽऽरब्धे 'त्र्यणुकम्' इति व्यपदेशः;** अन्यथोत्पत्तावुपलब्धिनिमित्तस्य महत्त्वस्याभावप्रसक्तेः ।

अत्र किल त्रिभिश्चतुर्भिर्वा प्रत्येकं परमाणुभिरारब्धमणुपरिमाणमेव कार्यमिति त्र्यादिपरमाणूनामारम्भकत्वे आरम्भवैयर्थ्यप्रसक्तिरिति द्वाभ्यां परमाणुभ्यां द्व्यणुकमारभ्यते । त्र्यणुकमपि न द्वाभ्यामणुभ्यामारभ्यते कारणविशेषपरिमाणतोऽनुपभोग्यत्वप्रसक्तेः यतो महत्त्वपरिमाणयुक्तं तद् उपलब्धियोग्यं स्यात् तथा चोपभोग्यं कारणबहुत्वमहत्त्वप्रचयजन्यं च महत्त्वम् । न च द्वि-त्रिपरमाण्वारब्धे कार्ये महत्त्वम्, तत्र महत्परिमाणाभावात् तेषामणुपरिमाणत्वात्; प्रचयोऽप्यवयवाभावान्न संभवति तेषाम् । नापि द्वाभ्यामणुभ्याम् कारणबहुत्वाभावात् न प्रचयोऽपि प्रशिथिलावयवसंयोगाभावात् । उपलभ्यते च समानपरिमाणैस्त्रिभिः पिण्डैरारब्धे कार्ये महत्त्वम् न द्वाभ्यामिति महत्परिमाणाभ्यां ताभ्यामेवारब्धे महत्त्वम् न त्रिभिरल्पपरिमाणैरारब्ध इति समानसंख्या-तुला-परिमाणाभ्यां तन्तुपिण्डाभ्यामारब्धे पटादिकार्ये प्रशिथिलावयवतन्तुसंयोगकृतं महत्त्वमुपलभ्यते न तद् इतरत्रेति ।

नन्वेवं यदि कार्यारम्भस्तदा 'द्रव्याणि द्रव्यान्तरमारभन्ते द्वे बहूनि वा समानजातीयानि' इत्यभ्युपगमः परित्यज्यताम् यतो न परमाणु-द्व्यणुकादीनामपरित्यक्ताजनकावस्थानामनङ्गीकृतस्वकार्यजननस्वभावानां च द्व्यणुक-त्र्यणुकादिकार्यनिर्वर्तकत्वम्; अन्यथा प्रागपि तत्कार्यप्रसङ्गात् ।

अथ न तेषामजनकावस्थात्यागतो जनकस्वभावान्तरोत्पत्तौ कार्यजनकत्वं किन्तु पूर्वस्वभावव्यवस्थितानामेव संयोगलक्षणसहकारिशक्तिसद्भावात् तदा कार्यनिर्वर्तकत्वम् प्राक् तु तदभावान्न कार्योत्पत्तिः कारणानामविचलितस्वरूपत्वेऽपि न च संयोगेन तेषामनतिशयो व्यावर्त्यते अतिशयो वा कश्चिदुत्पाद्यते अभिन्नो भिन्नो वा संयोगस्यैवाऽतिशयत्वात् । न च कथमन्यः संयोगस्तेषामतिशय इति वाच्यम् अनन्यस्याप्यतिशयत्वायोगात् न हि स एव तस्यातिशय इत्युपलब्धम् तस्मात् तत्संयोगे सति कार्यमुपलभ्यते तदभावे तु नोपलभ्यत इति संयोग एव कार्योत्पादने तेषामतिशय इति न तदुत्पत्तौ तेषां स्वभावान्तरोत्पत्तिः संयोगातिशयस्य तेभ्यो भिन्नत्वादिति, असदेतत्; यतः कार्योत्पत्तौ तेषां संयोगोऽतिशयो भवतु संयोगोत्पत्तौ तु तेषां कोऽतिशय इति वाच्यम्, न तावत् स एव संयोगः तस्याद्याप्यनुत्पत्तेः, नापि संयोगान्तरम् तस्यानभ्युपगमात्; अभ्युपगमेऽपि तदुत्पत्तावप्यपरसंयोगातिशयप्रकल्पनायामनवस्थाप्रसक्तेः । न च क्रिया अतिशयः तदुत्पत्तावपि पूर्वोक्तदोषप्रसङ्गात् । किञ्च, अदृष्टापेक्षादात्माऽणुसंयोगात् परमाणुषु क्रियोत्पद्यत इत्यभ्युपगमादात्म-परमाणुसंयोगोत्पत्तावप्यपरोऽतिशयो वाच्यः तत्र च तदेव दूषणम् । किञ्चासौ संयोगो द्व्यणुकादिनिर्वर्तकः किं परमाण्वाद्याश्रितः उत तदन्याश्रितः, आहोस्विद् अनाश्रित इति ? यद्याद्यः पक्षस्तदा तदुत्पत्तावाश्रय उत्पद्यते नवेति ? यद्युत्पद्यते तदा परमाणूनामपि कार्यत्वप्रसक्तिस्तत्संयोगवत् । अथ नोत्पद्यते तदा संयोगस्तदाश्रितो न स्यात्, समवायस्याभावात्, तेषां च तं प्रत्यकारकत्वात् तदकारकत्वं तु तत्र तस्य प्रागभावानिवृत्तेस्तदन्यगुणान्तरवत् । ततस्तेषां कार्यरूपतया परिणतिरभ्युपगन्तव्या; अन्यथा तदाश्रितत्वं संयोगस्य न स्यात् । अन्याश्रितत्वेऽपि पूर्वोक्तदोषप्रसङ्गः । अनाश्रितत्वपक्षे तु निर्हेतुकोत्पत्तिप्रसक्तिः । अथ संयोगो नोत्पद्यत इत्यभ्युपगमस्तदा वक्तव्यम्-किमसौ सन्, उताऽसन्? यदि संस्तदा तन्नित्यत्वप्रसक्तिः—"सदकारणवन्नित्यम्" [वैशेषिकद० ४-१-१] इति भवतोऽभ्युपगमात् तथा चासौ गुणो न भवेत्-नित्यत्वेनाऽनाश्रितत्वाद् अनाश्रितस्य च पारतन्त्र्यायोगाद् अपरतन्त्रस्य चाऽगुणत्वात् । अथाऽसन्निति पक्षस्तदा कार्यानुत्पत्तिप्रसङ्गः तदभावे प्राग्वद् विशिष्टपरिमाणोपेतकार्यद्रव्योत्पत्त्यभावात्, तथा च जगतोऽदृश्यताप्रसक्तिरिति संयोगैकत्वसंख्या-परिमाण-महत्त्व-परत्वाद्यनेकगुणानां तत्रोत्पत्तिरभ्युपेया कारणगुणपूर्वप्रक्रमेण कार्योत्पत्त्यभ्युपगमात् । इष्टमेवैतदिति चेत्, ननु तेषां क आश्रय इति वक्तव्यम्, न तावत् कार्यम् तदुत्पत्तेः प्राक् तस्याऽसत्त्वात्; सत्त्वे वोत्पत्तिविरोधात् न च प्रथमक्षणे निर्गुणमेव कार्यं गुणोत्पत्तेः प्रागस्तीति

---

१ अणुअत्तएहिं आरहदव्वे तियणुयं ति निद्देसो । तत्तो य पुण विभत्ते अणु त्ति जाओ अणू होइ ॥
गु० मु० मू० ।

व्याख्याकारकृतार्थानुसारेण 'दुअणुएहिं' इति पदं 'दोहिं अणुएहिं' 'बहुएहिं दुअणुएहिं' चेत्यर्थद्वयबोधकं श्लिष्टं प्रतिभाति । अतो मूलगाथाया अन्वयद्वयमेवं विधातव्यम्—दु-अणुएहिं दव्वे आरद्धे अणु त्ति ववएसो अर्थात् द्वाभ्यां परमाणुभ्यां कार्यद्रव्ये आरब्धे 'अणुः' इति व्यपदेशः । पुनश्च दुअणुएहिं दव्वे आरद्धे तिअणुयं ति ववएसो अर्थात् द्व्यणुकैः—त्रिभिर्द्व्यणुकैः चतुर्भिर्वा कार्यद्रव्ये आरब्धे 'त्र्यणुकम्' इति व्यपदेशः ।

२-एहिं आरद्धदव्वे ति- मु० मू० । ३ अणुं होइ बृ० भां० मां० ।

४ "यदापि द्वे द्वे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुकसमवायिनां शुक्लादीनामारम्भकत्वम् × × × × × यदापि बहवः परमाणवो बहूनि वा द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः कार्यमारभते × × ×—२-२-११ ब्रह्मसू० शां० पृ० ५०५-५०६ ।

"द्व्यणुकैर्बहुभिरारभ्यते इत्यपि नियमः न द्वाभ्याम् तस्याणुपरिमाणोत्पत्तौ कारणसद्भावेनाणुत्वोत्पत्तावारम्भवैयर्थ्यात् बहुषु त्वनियमः । कदाचित् त्रिभिरारभ्यते इति त्र्यणुकमित्युच्यते कदाचिच्चतुर्भिरारभ्यते कदाचित् पञ्चभिरिति यथेष्टं कल्पना"—प्रशस्त० कं० पृ० ३२-पं० ६-९ ।

"तेभ्यस्तेषां परमाणूनां परस्परसंयोगाः ततश्च द्वाभ्यां द्व्यणुकम् त्रिभिर्द्व्यणुकैस्त्र्यणुकमित्यनेन क्रमेण कार्यद्रव्यं घटादिकमुत्पद्यते इति"—प्रशस्त० कं० पृ० १०८ पं० १५ ।

"द्व्यणुकस्य अणुपरिमाणं तु परमाणावणुत्वापेक्षया नोत्कृष्टम् त्रसरेणुपरिमाणं तु न सजातीयम् अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्य असमवायिकारणमित्यर्थः"—कारिका० सिद्धान्तमु० गुणनिरू० का० १११-११२ पृ० ४२९—४३० ।

---

१ न च प्र—भां० मां० ।

२ किञ्च असौ संयोगो द्व्यणुकादिनिर्वर्तकः किं परमाण्वाद्याश्रितः तदन्याश्रितः अनाश्रितो वा ? प्रथमपक्षे तदुत्पत्तावाश्रय उत्पद्यते नवा ? यद्युत्पद्यते तदाणूनामपि कार्यतानुषङ्गः । अथ नोत्पद्यते तर्हि संयोगस्तदाश्रितो न स्यात् समवायप्रतिषेधात् तेषां च तं प्रत्यकारकत्वात् । तदकारकत्वं चानतिशयत्वात् । अनतिशयानामपि कार्यजनकत्वे सर्वदा कार्यजनकत्वप्रसङ्गोऽविशेषात् । अतिशयान्तरकल्पने चानवस्था—तदुत्पत्तावप्यपरातिशयान्तरपरिकल्पनात् । ततस्तेषामसंयोगरूपतापरित्यागेन संयोगरूपतया परिणतिरभ्युपगन्तव्या इति सिद्धं तेषां कथंचिदनित्यत्वम् । अन्याश्रितत्वेऽपि पूर्वोक्तदोषप्रसङ्गः । अनाश्रितत्वे तु निर्हेतुकोत्पत्तिप्रसक्तेः सदा सत्त्वप्रसङ्गतः कार्यस्यापि सर्वदा भावानुषङ्गः"—प्रमेयक० पृ० १६० प्र० पं० ६-११ ।

३-पूर्वक्रमे—बृ० आ० हा० वि० ।

वक्तव्यम् गुणसंबन्धवत् सत्तासंबन्धस्याप्याद्यक्षणे अभावतस्तत्सत्त्वासंभवात् । न चोत्पत्ति-सत्तासंबन्धयोरेककालतयाऽऽद्यक्षण एव सत्त्वम् तदा रूपादिगुणसमवायाभावतोऽनुपलम्भे ततस्तत्सत्तासंबन्धव्यवस्थापनाऽसंभवात् । न हि 'सत्' इत्युपलम्भमन्तरेण तदा तस्य सत्तासंबन्धः सत्त्वं वा व्यवस्थापयितुं शक्यम् । न च महत्त्वादेर्गुणस्य द्रव्येण सहोत्पादे तद्व्याधेयता तद्व्यस्य वा तदाधारता अकारणस्याश्रयत्वायोगात् । न चैककालयोः कार्यकारणभावः सव्येतरगोविषाणयोरिव भवत्पक्षे युक्तः । तन्न कार्यं तदाश्रयः । अथाऽणवस्तदाश्रयस्तर्हि कार्यद्रव्यस्यापि त एवाश्रयः इत्येकाश्रयौ कार्य-गुणौ प्राप्तौ । तथाऽभ्युपगमेपि न तावद् युतसिद्धयोस्तयोः कुण्ड बदरवद् आश्रयाऽऽश्रयिभावः अकार्यकारणप्रसङ्गात् । नाऽयुतसिद्धयोः, अयुतसिद्ध्याऽऽश्रयाश्रयिभावविरोधात् । तथाहि—'अपृथक्सिद्धः' इत्यनेन भेदनिषेधः प्रतिपाद्यते समवायाभावे अन्यस्यार्थस्यात्रासंभवात्, 'आधाराधेयभावः' इत्यनेन चैकत्वनिषेधः क्रियते इति कथमनयोरेकत्र सद्भावः? अथ नात्राधाराधेयभावस्तर्हि तेषां सत्त्वम्, उत असत्त्वमिति वक्तव्यम् । यद्याद्यः पक्षस्तदा 'संयोगादिगुणात्मकाः परमाणव एव तथाभूतं कार्यम्' इति जैनपक्ष एव समाश्रितः स्यात् । द्वितीयपक्षे तु सर्वानुपलब्धिप्रसक्तिः ।

यदि च परमाणवः स्वरूपापरित्यागतः कार्यद्रव्यमारभन्ते स्वात्मनोऽव्यतिरिक्तं तदा कार्यद्रव्यानुत्पत्तिप्रसक्तिः । न हि कार्यद्रव्ये परमाणुस्वरूपापरित्यागे स्थूलत्वस्य सद्भावः तस्य तदभावात्मकत्वात् । तस्मात् परमाणुरूपतापरित्यागेन मृद्द्रव्यं स्थूलकार्यस्वरूपमासादयतीति तद्रूपतापरित्यागेन च पुनरपि परमाणुरूपतामनुभवतीति वलयवत् पुद्गलद्रव्यपरिणतेरादिरन्तो वा न विद्यते इति न कार्यद्रव्यं कारणेभ्यो भिन्नम् । न चार्थान्तरभावगमनं विनाशोऽयुक्त इति तद्रूपपरित्यागोपादानात्मकस्थितिस्वभावस्य द्रव्यस्य त्रैकाल्यं नानुपपन्नम् । यथा च एकसंख्या-संयोग-महत्त्वाऽपरत्वादिपर्यायैः परमाणूनामुत्पत्तेः कार्यरूपाः परमाणवस्तथा बहुत्वसंख्या-विभागाऽल्पपरिमाणपरत्वात्मकत्वेन प्रादुर्भावात् परमाणवः कार्यद्रव्यवत् तथोत्पन्नाश्चाभ्युपगन्तव्याः, कारणान्वयव्यतिरेकानुविधानोपलम्भस्य कार्यताव्यवस्थानिबन्धनस्यात्रापि सद्भावादिति अयमर्थः **'तत्तो य'** इत्यादिना गाथापश्चार्धेन प्रदर्शितः । **तस्माद्** एकपरिमाणाद् द्रव्याद् **विभक्तः** विभागात्मकत्वेनोत्पन्नः **अणुरिति अणुर्जातो भवति** एतदवस्थायाः प्राक् तदसत्त्वात्; सत्त्वे वा इदानीमिव प्रागपि स्थूलरूपकार्याभावप्रसङ्गात् इदानीं वा तद्रूपता तद्रूपाविशेषात् प्राक्तनावस्थायामिव स्यात् । एवं चतुर्विधकार्यद्रव्याभ्युपगमोऽसंगतः । न च य एव कार्यद्रव्यारम्भकाः परमाणवस्त एव तद्द्रव्यविनाशोत्तरकालं स्वरूपेण व्यवस्थिताः कार्यद्रव्यप्रागभाव-प्रध्वंसाभावयोरेकत्वविरोधात् घटद्रव्यप्रागभाव-प्रध्वंसाभावमृत्पिण्ड-कपालवत् । न च प्रागभाव-प्रध्वंसाभावयोस्तुच्छरूपतया मृत्पिण्ड-कपालरूपत्वमसिद्धम् तुच्छरूपस्याभावस्य प्रमाणाजनकत्वेन तद्विषयत्वतो व्यवस्थापयितुमशक्यत्वादिति प्रतिपादनात् । न च कपालसंयोगाद् घटद्रव्यमुपजायते तद्विभागाच्च विनश्यतीति मृत्पिण्डस्य घटद्रव्यं प्रति समवायिकारणत्वमयुक्तमिति वक्तव्यम् अध्यक्षत एव मृत्पिण्डोपादानत्वेन तस्य प्रतीतेः अत एव घटस्य कपालसमवायिकारणत्वानुमानमध्यक्षबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टम् । न चाल्पपरिमाणतन्तुप्रभवं महत्परिमाणं पटकार्यमुपलब्धमिति घटादिकमपि तदल्पपरिमाणानेककारणप्रभवं कल्पयितुं युक्तम् विपर्ययेणापि कल्पनायाः प्रवृत्तिप्रसङ्गात्, अध्यक्षबाधस्तु तदितरत्रापि समानः । किञ्च, परमाणूनां सर्वदैकं रूपमभ्युपगच्छन्नभावमेव तेषामभ्युपगच्छेत् अकारकत्वप्रसङ्गात्-तच्च प्रागभाव-प्रध्वंसाभावविकलत्वेनानाधेयातिशयत्वाद् वियत्कुसुमवत् । तदसत्त्वे च कार्यद्रव्यस्याप्यभावः अहेतोस्तस्यासत्त्वात् । तदभावे च परापरत्वादिप्रत्ययादेरयोगात् कालादेरप्यमूर्तद्रव्यस्याभाव इति सर्वाभावप्रसक्तिः ।

यदपि 'अर्थान्तरगमनलक्षणो विनाशोऽसंभवी परमाणुपर्यन्तत्वात् सर्वविनाशानाम्' इत्यभिधानम्, तदप्यसंगतम्; तथाभूतविनाशे प्रमाणाभावात् । तथाहि-न तावदध्यक्षं तत्प्रतिपादने

१-ङ्गा अभ्यु-भां० मां० । २ तद्वि-वा० बा० । ३ "तेषामापरमाण्वन्तो विनाशः" । "तेषां शरीरेन्द्रियाणां द्व्यणुकादिविनाशक्रमेण तावद् विनाशो यावत् परमाणुरिति"-प्रशस्त० कं० पृ० ५१ पं० १२-१३ ।

व्याप्रियते कपालपर्यन्तघटविनाशोपलम्भे तस्य व्यापारोपलब्धेः । नानुमानमपि, प्रत्यक्षाप्रवृत्तौ तत्र तस्याप्यप्रवृत्तेः—अध्यक्षपूर्वकत्वेन तस्य व्यावर्णनात् । आगमस्य चात्रार्थे अनुपयोगात् । परमाणुपर्यन्ते च विनाशे घटादिध्वंसे न किंचिदप्युपलभ्येत परमाणूनामदृश्यत्वेनाभ्युपगमात् । छिद्रघटेनापाकनिक्षिप्तेन वा तेनानेकान्त इति चेत्, न; सर्वस्य पक्षीकृतत्वात् अवयविनि च छिद्रस्योत्पन्नत्वात् तस्य च निरवयवत्वान्नावयवे तदुत्पत्तिः परमाणुषु तदसंभवात् । पाकान्यथानुपपत्त्या परमाणुपर्यन्तो विनाशः परिकल्प्यत इति चेत्, न; विशिष्टसामग्रीवशाद् विशिष्टवर्णस्य घटादेर्द्रव्यस्य कथंचिदविनाशेऽप्युत्पत्तिसंभवात् । परमाणुपर्यन्तविनाशाभ्युपगमे च तद्देशत्व-तत्संख्यात्व-तत्परिमाणत्वोपर्यवस्थापितकर्परांद्यपातप्रत्यक्षोपलभ्यत्वादीनि पच्यमाने घटे न स्युः । शून्यग्रविद्धघटेनानेकान्तश्च परिहृत एव । न च कपालार्थी घटं भिन्द्यादापरमाण्वन्ते विनाशे । ततः प्रतीतिविरुद्धत्वान्नासावभ्युपगन्तव्य इति ॥ ३९ ॥

[प्रतिवादिमतमाक्षिप्य प्रतिबन्दीतया स्वेष्टस्य विभागजन्योत्पादस्य समर्थनम्]

प्रस्तुतमेवाक्षेपद्वारेणोपसंहरत्याचार्यः—

बहुयाण एगसद्दे जइ संजोगाहि होइ उप्पाओ ।
णणु एगविभागम्मि वि जुज्जइ बहुयाण उप्पाओ ॥ ४० ॥

द्व्यणुकादीनां सति **संयोगे यद्येकस्य** त्र्यणुकादेः कार्यद्रव्यस्योत्पादो **भवति**—अन्यथैकाभिधानप्रत्ययव्यवहारायोगात् नहि बहुषु 'एको घट उत्पन्नः' इत्यादिव्यवहारो युक्तः—**'ननु'** इत्यक्षमायाम् । **एकस्य** कार्यद्रव्यस्य **विनाशेऽपि युज्यत एव बहूनां** समानजातीयानां तत्कार्यद्रव्यविनाशात्मकानां प्रभूततया विभक्तात्मनामुत्पाद इति । तथाहि-घटविनाशाद् बहूनि कपालानि उत्पन्नानीत्यनेकाभिधानप्रत्ययव्यवहारो युक्तः; अन्यथा तदसंभवात् । ततः प्रत्येकं त्र्यात्मकास्त्रिकालाश्चोत्पादादयो व्यवस्थिता इत्यनन्तपर्यायात्मकमेकं द्रव्यम् ॥ ४० ॥

[एकस्मिन्नपि समये प्रत्येकं द्रव्यमनन्तपर्यायात्मकं प्रागुक्तरीत्या सिध्यति इत्यभिधानम्]

नन्वनन्ते काले भवत्वनन्तपर्यायात्मकमेकं द्रव्यम्, एकसमये तु कथं तत् तदात्मकमवसीयते? प्रदर्शितदिशा तदात्मकं तदवसीयत इत्याह—

एगसमयम्मि एगद्दवियस्स बहुया वि होंति उप्पाया ।
उप्पायसमा विगमा ठिईउ उस्सग्गओ णियमा ॥ ४१ ॥

एकस्मिन् समये एकद्रव्यस्य बहव उत्पादा भवन्ति, उत्पादसमानसंख्या विगमा अपि तस्यैव तदैवोत्पद्यन्ते विनाशमन्तरेणोत्पादस्यासंभवात् नहि पूर्वपर्यायाविनाशे उत्तरपर्यायः प्रादुर्भवितुमर्हति; प्रादुर्भावे वा सर्वस्य सर्वकार्यतापसक्तिः, तदकार्यत्वं वा कार्यान्तरस्येव स्यात् । **स्थितिरपि सामान्यरूपतया** तथैव **नियता** स्थितिरहितस्योत्पादस्याभावात् भावे वा शशशृङ्गादेरप्युत्पत्तिप्रसङ्गात् ॥ ४१ ॥

[एकस्मिन् द्रव्ये एकसमयेऽनन्तधर्मात्मकत्वस्य दृष्टान्तेन साधनम्]

एतदेव दृष्टान्तद्वारेण समर्थयन्नाह—

काय-मण-वयण-किरिया-रूवाइ-गईविसेसओ वावि ।
संजोयभेयओ जाणणा य दवियस्स उप्पाओ ॥ ४२ ॥

यदैवानन्तानन्तप्रदेशिकाहारभावपरिणतपुद्गलोपयोगोपजातरस-रुधिरादिपरिणतवशाविर्भूत-

१-राद्यापात-भां० मां० आ० । २-रस्य च स्या-भां० मां० आ० ।

शिरोऽङ्गुल्याद्यङ्गोपाङ्गभावपरिणतस्थूरसूक्ष्मसूक्ष्मतरादिभेदभिन्नावयवात्मकस्य **कायस्योत्पत्तिस्तदै**-वानन्तानन्तपरमाणूपचितमनोवर्गणापरिणतिप्रतिलभ्य**मन**उत्पादोऽपि, तदैवं **वचन**स्यापि कायोत्कृष्टतरवर्गणोत्पत्तिप्रतिलब्धवृत्तिरुत्पादः, तदैव च कायाऽऽत्मनोरन्योन्यानुप्रवेशाद् विषमीकृताऽसंख्यातात्मप्रदेशे काय**क्रियो**त्पत्तिः, तदैव च **रूपादी**नामपि प्रतिक्षणोत्पत्तिविनश्वराणामुत्पत्तिः, तदैव च मिथ्यात्वाऽविरति-प्रमाद-कषायादिपरिणतिसमुत्पादितकर्मबन्धनिमित्ताऽऽगामि**गति-विशेषा**णामप्युत्पत्तिः, तदैव चोत्सृज्यमानोपादीयमानानन्तानन्तपरमाण्वापादिततत्प्रमाण**संयोग-विभागा**नामुत्पत्तिः ।

यद्वा यदैव शरीरादेर्द्रव्यस्योत्पत्तिस्तदैव त्रैलोक्यान्तर्गतसमस्तद्रव्यैः सह साक्षात् पारंपर्येण वा संबन्धानामुत्पत्तिः सर्वद्रव्यव्याप्तिव्यवस्थिताकाश-धर्माधर्मादिद्रव्यसंबन्धात्, तदैव च भावि-स्वपर्याय-पर**ज्ञान**विषयत्वादीनां चोत्पादनशक्तीनामप्युत्पादः शिरो-ग्रीवा-चक्षु-नेत्र-पिच्छोदर-चरणाद्यनेकावयवान्तर्भावकमयूराण्डकरसशक्तीनामिव; अन्यथा तत्र तेषामुत्तरकालमप्यनुत्पत्तिप्रसङ्गात् । उत्पाद-विनाश-स्थित्यात्मकाश्च प्रतिक्षणं भावाः शीतोष्णसंपर्कादिवशादवान्तरसूक्ष्मतर-तमादिभेदेन तथैव स्व-परापेक्षया युगपत् क्रमेण चोपलब्धेः । न च तर-तमादिभेदेन नवपुराणतया क्रमेणोपलब्धिः प्रतिक्षणं तथोत्पत्तिमन्तरेण संभवति । न चास्मदाद्यध्यक्षं निरवशेषधर्मात्मकवस्तुग्राहकं येनानन्तधर्माणामेकदा वस्तुन्यप्रतिपत्तेरभाव इत्युच्येत अनुमानतः प्रतिक्षणमनन्तधर्मात्मकस्य तस्य प्रदर्शितन्यायेन प्रतिपत्तेः । सकलत्रैलोक्यव्यावृत्तस्य च वस्तुनोऽध्यक्षेण ग्रहणे—तद्व्यावृत्तीनां पारमार्थिकतद्धर्मरूपतया अन्यथा तस्य तद्व्यावृत्तताऽयोगात्—कथं नानन्तधर्माणां वस्तुन्यध्यक्षेण ग्रहणम्? ॥ ४२ ॥

[आगमस्य हेतुवादाहेतुवादाभ्यां द्वैविध्येन विभजनम्]

इदानीं विदितनयत्वाद् विशिष्टप्रज्ञः शिष्यो विगृह्य कथनयोग्यः[3] संपन्न इति तस्य विग्रहकथनोपदेशमाह—

दुविहो इत्यादि ।

अथवा प्रत्यक्ष-परोक्षरूपः संक्षेपतो द्विविध उपयोग आत्मनः । तत्र प्रत्यक्षोपयोगस्त्रिविधः अवधि-मनःपर्याय-केवलभेदेन । तत्र केवलोपयोगः सकलविषयः प्राक् प्रतिपादितः[4] । अवधि-मनःपर्यायोपयोगस्त्वसकलविषयोऽस्मदादिभिरागमगम्यः । परोक्षोपयोगस्तु मति-श्रुतरूपो द्विविधः । तत्राक्ष-लिङ्गप्रभवमत्युपयोगस्य स्वरूपमावेदितम् । श्रुतोपयोगस्य त्वाचार्यस्तद्धेतुभूतहेत्वहेतुवादभेदभिन्नागमप्रतिपादनद्वारेण स्वरूपमाह—

दुविहो धम्मावाओ अहेउवाओ य हेउवाओ य ।
तत्थ उ अहेउवाओ भवियाऽभवियादओ भावा ॥ ४३ ॥

वस्तुधर्माणामस्तित्ववादीना**मा**समन्ताद् **वाद**स्तत्प्रतिपादक आगमः **अहेतु-हेतु**वाद-भेदेन **द्वैविध्यं** प्रतिपद्यते । प्रमाणान्तरानवगतवस्तुप्रतिपादक आगमोऽहेतुवादः । तद्विपरीतस्त्वसौ हेतुवादः-हिनोति गमयत्यर्थमिति हेतुस्तत्परिच्छिन्नोऽर्थोऽपि हेतुः, तं वदति य आगमः स हेतुवादः । यस्तु वस्तुस्वरूपप्रतिपादकत्वेऽपि तद्विपरीतोऽसावहेतुवादो दृष्टिवादात् प्रायेणान्यः । **तत्र त्वहेतुवादो भव्याभव्य**स्वरूपप्रतिपादक आगमः तद्विभागप्रतिपादनेऽध्यक्षादेः प्रमाणान्तरस्याप्रवृत्तेः-नहि 'अयं भव्यः, अयं त्वभव्यः' इत्यत्रागममन्तरेण प्रमाणान्तरप्रवृत्तिसंभवोऽस्मदाद्यपेक्षया ।

१-**व च व**-बृ० । २-**मानानन्तपर**-वा० बा० भां० मां० । ३-**ग्यस्सं**-भां० मां० विना । ४ पृ० ५३ पं २३ । ५ गा० ३० द्वितीयकां० पृ० ६२० ।

ननु 'तद्विभागप्रतिपादकं वचो यथार्थम् अर्हद्वचनत्वात् अनेकान्तात्मकवस्तुप्रतिपादकवचोवत्' इत्यनुमानात् तद्विभागप्रतिपत्तौ कथं न तस्यानुमानविषयता? न; एवमप्यागमादेव तद्विभागप्रतिपत्तेः—तद्व्यतिरेकेण प्रमाणान्तरस्य तत्प्रतिपत्तिनिबन्धनस्याभावात् । अर्हदागमस्य च प्रधानार्थसंवादनिबन्धनतत्प्रणीतत्वनिश्चयेऽनुमानतोऽतीन्द्रियार्थविषये प्रामाण्यं निश्चीयत इत्यभ्युपगम्यत एव । आगमनिरपेक्षस्य तु प्रमाणान्तरस्यास्मदादेस्तत्र प्रवृत्तिर्न विद्यत इत्येतावताऽहेतुवादत्वमेतद्विषयागमस्योच्यत इति ॥ ४३ ॥

[आगमोक्तस्य वस्तुनो हेतुद्वारा वास्तविकत्वसाधनमेव हेतुवादस्य लक्षणमिति सूचनम्]

वचनव्यापारं केवलमपेक्ष्यायं क्रमः । यदा तु ज्ञान-दर्शन-चारित्रत्रितये यथावदनुष्ठानप्रवणः तद्विकलश्च पुरुषः प्रतीयते तदा अनुमानगम्योऽपि तद्विभागो भवति, यथा-भव्यः अभव्यो वाऽयं पुरुषः, सम्यग्ज्ञानादिपरिपूर्णाऽपरिपूर्णत्वाभ्याम्, लोकप्रसिद्धभव्याऽभव्यपुरुषवत् । अहेतुवादागमावगते वा धर्मिणि भव्याऽभव्यस्वरूपे तद्वि(तदवि)परीतनिर्णयफलो हेतुवादः प्रवर्तते । योऽयमागमे भव्यादिरभिहितः स तथैव, यथोक्तहेतुसद्भावात् इत्याह—

भविओ सम्मद्दंसण-णाण-चरित्तपडिवत्तिसंपन्नो ।
णियमा दुक्खंतकडो त्ति लक्खणं हेउवायस्स ॥ ४४ ॥

भव्योऽयम्, **सम्यग्दर्शन-ज्ञान-चारित्रप्रतिपत्तिसं**पूर्णत्वात् उक्तपुरुषवत् । तत्परिपूर्णत्वादेव **नियमात्** संसार**दुःखा**न्तं करिष्यति कर्मव्याधेरात्यन्तिकं विनाशमनुभविष्यति, तन्निबन्धनमिथ्यात्वादिप्रतिपक्षाभ्याससात्मीभावात्, व्याधिनिदानप्रतिकूलाचरणप्रवृत्ततथाविधातुरवत् । यः पुनर्न तत्प्रतिपक्षाभ्याससात्म्यवान् नासौ दुःखान्तकृद् भविष्यति तन्निदानानुष्ठानप्रवृत्ततथाविधातुरवत् **इति हेतुवाद**स्य **लक्षणम्** । हेतुवादश्च प्रायो दृष्टिवादः तस्य द्रव्यानुयोगत्वात्, "सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्गः" [तत्त्वार्थसू० १-१] इत्यादेरनुमानादिगम्यस्यार्थस्य तत्र प्रतिपादनात् । यथा चात्रानुमानादिगम्यता तथा गन्धहस्तिप्रभृतिभिर्विकान्तमिति नेह प्रदर्श्यते ग्रन्थविस्तरभयात् ॥ ४४ ॥

[जीवादितत्त्वं कथं प्रतिपादयन् सिद्धान्तस्य आराधकः कथं वा प्रतिपादयन् तस्य विराधक इत्यभिधानम्]

"जीवाऽजीवाऽऽश्रव-बन्ध-संवर-निर्जरा-मोक्षास्तत्त्वम्" [तत्त्वार्थसू० १-४] इत्युभयवादागमप्रतिपाद्यान् भावांस्तथैवाऽसंकीर्णरूपान् प्रतिपादयन् सैद्धान्तिकः पुरुषः इतरस्तु तद्विराधक इत्याह—

जो हेउवायपक्खम्मि हेउओ आगमे य आगमिओ ।
सो ससमयपण्णवओ सिद्धंतविराहओ अन्नो ॥ ४५ ॥

यो हेतुवादागमविषयमर्थं **हेतु**वादागमेन, तद्विपरीता**गम**विषयं चार्थ**मागम**मात्रेण प्रदर्शयति वक्ता **स स्वसिद्धान्त**स्य द्वादशाङ्गस्य **प्रतिपादन**कुशलः, अन्यथा प्रतिपादयंश्च-तदर्थस्य प्रतिपादयितुमशक्यत्वात् तत्प्रतिपादके वचस्यनास्थादिदोषमुत्पादयन्-**सिद्धान्तविराधको** भवति सर्वज्ञप्रणीतागमस्य निस्सारताप्रदर्शनात् तत्प्रत्यनीको भवतीति यावत् ।

तथाहि-पृथिव्यादेर्मनुष्यपर्यन्तस्य षड्विधजीवनिकायस्य जीवत्वमागमेन अनुमानादिना च प्रमाणेन सिद्धं तथैव प्रतिपादयन् स्वसमयप्रज्ञापकः, अन्यथा तद्विराधकः । यतः प्रव्यक्तचेतने त्रसनिकाये चैतन्यलक्षणं जीवत्वं स्वसंवेदनाध्यक्षतः स्वात्मनि प्रतीयते, परत्र त्वपरेणानुमानतः ।

---

१ **तत्तद्विपरीत**-वा० बा० विना ।

वनस्पतिपर्यन्तेषु पृथिव्यादिषु स्थावरेषु अनुमानतश्चैतन्यप्रतिपत्तिः । तथाहि-वनस्पतयश्चेतनाः,

१ "साम्प्रतं वनस्पतिजीवास्तिले लिङ्गमाह—से बेमि—इमं पि जाइधम्मयं एयं पि जाइधम्मयं; इमं पि वुड्ढिधम्मयं एयं पि वुड्ढिधम्मयं; इमं पि चित्तमंतयं एयं पि चित्तमन्तयं; इमं पि छिण्णं मिलाइ; एयं पि छिण्णं मिलाइ; इमं पि आहारगं एयं पि आहारगं; इमं पि अणिच्चयं एयं पि अणिच्चयं; इमं पि असासयं एयं पि असासयं; इमं पि चओवचइयं एयं पि चओवचइयं; इमं पि विपरिणामधम्मयं एयं पि विपरिणामधम्मयं"—आचारा० सू० अ० १ उ० ५ सू० ४६ पृ० ६५ ।

महाभारत-मनुस्मृत्योरपि वनस्पत्यादीनां सचेतनत्वमित्थं समर्थितं दृश्यते—

"भरद्वाज उवाच—

पञ्चभिर्यदि भूतैस्तु युक्ताः स्थावर-जङ्गमाः । स्थावराणां न दृश्यन्ते शरीरे पञ्च धातवः ॥
अनूष्मणामचेष्टानां घनानां चैव तत्त्वतः । वृक्षाणां नोपलभ्यन्ते शरीरे पञ्च धातवः ॥
न शृण्वन्ति न पश्यन्ति न गन्ध-रसवेदिनः । न च स्पर्शं विजानन्ति ते कथं पाञ्चभौतिकाः ? ॥
अद्रवत्वादनग्नित्वादभूमित्वादवायुतः । आकाशस्याप्रमेयत्वाद् वृक्षाणां नास्ति भौतिकम् ॥

भृगुरुवाच—

घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः । तेषां पुष्प-फलव्यक्तिर्नित्यं समुपपद्यते ॥
ऊष्मतो म्लायते वर्णं त्वक् फलं पुष्पमेव च । म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते ॥
वाय्वग्न्यशनिनिष्पेषैः फलं पुष्पं विशीर्यते । श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः ॥
वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति । न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः ॥
पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि । अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ॥
पादैः सलिलपानाच्च व्याधीनां चापि दर्शनात् । व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे ॥
वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत् । तथा पवनसंयुक्तः पादैः पिबति पादपः ॥
सुख-दुःखयोश्च ग्रहणात् छिन्नस्य च विरोहणात् । जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते ॥
तेन तज्जलमादत्तं जरयत्यग्निमारुतौ । आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते" ॥—

महाभा० शान्ति० मो० प० अ० १८२ श्लो० ६-१८ पृ० २९१ ।

"उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः । ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः ॥
अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः । पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ॥
गुच्छगुल्मं तु विविधं तथैव तृणजातयः । बीजकाण्डरुहाण्येव प्रताना वल्लय एव च ॥
तमसा बहुरूपेण वेष्टिताः कर्महेतुना । अन्तःसंज्ञा भवन्त्येते सुख-दुःखसमन्विताः" ॥—

मनु० अ० १ श्लो० ४६-४९ पृ० १४-१५ ।

'भक्षयति बलीवर्दान् यवान्' 'भक्षयति बलीवर्दान् सस्यम्' वा इत्यत्र भक्षेर्हिंसार्थं मन्यमानाः पतञ्जलि—चन्द्रगोमि-देवनन्दि-कैयट-हेमचन्द्र-नागेश-ज्ञानेन्द्रसरस्वतीप्रमुखवैयाकरणा अपि वनस्पतेः सचेतनत्वं प्रतिपन्नाः । यथाक्रमं तद्यथा—

"अहिंसार्थस्येति किमर्थम् ? भक्षयन्ति यवान् बलीवर्दाः भक्षयति बलीवर्दान् यवान्"१-४-५२ इत्यङ्कस्य सूत्रस्य "भक्षेरहिंसार्थस्य" इति वार्तिके—महाभाष्ये पृ० २७५ ।

"अहिंसायामिति किम् ? भक्षयति बलीवर्दान् सस्यम्"—२-१-४९—चान्द्रे ।

"अहिंसार्थस्येति किम् ? भक्षयति बलीवर्दो यवम् भक्षयति बलीवर्द यवम्-अत्र हिंसाऽस्ति वनस्पतिकायानां प्राणित्वात्"—१-२-१२१-पृ० १०१ जैनेन्द्रे ।

"भक्षयन्ति यवानिति । क्षेत्रस्थानां प्ररोहाद्यवस्थायां यवानां भक्षणाद् हिंसा भवति, तदवस्थायां कैश्चिच्चैतन्यस्याभ्युपगमात् । परकीययवभक्षणे वा परो हिंसितो भवति । हिंसाङ्गे भक्षणेऽत्र भक्षिर्वर्तते"—१-४-५२ इति सूत्रस्य वार्तिकं स्पष्टयन् प्रदीपः ।

"वनस्पतीनां प्रसव-प्ररोह-वृक्षादिमत्त्वेन चेतनत्वाद् तद्विशेषस्य सस्यस्य प्राणवियोगस्तद्भक्षणात् स्वाम्युपघातो वाऽत्र हिंसेति भक्षेर्हिंसार्थता"—२-२-६ हैमशब्दा० ।

"पिण्ड्या अप्राणित्वाद् उदाहरणे भक्षेरहिंसार्थत्वम् । ननु यवानामपि अचेतनत्वात् तद्विषयस्यापि कथं हिंसार्थत्वम् ? अत आह-क्षेत्रस्थानामिति । इदमुपलक्षणम् बीजावस्थानामपि भक्षणे हिंसासत्त्वात् । हिंसाङ्गे इति । इदमुभयसाधारणम् तत्र आद्ये यवान् हिंसन् भक्षयतीत्यर्थः द्वितीये तु 'परान्' इत्यध्याहार्यम्-परान् हिंसन् यवान् भक्षयतीत्यर्थः । अत्र आद्यमेव युक्तं भाष्यस्वरसादित्याहुः"—१-४-५२ इति पाणिनीयसूत्रस्य उपर्युक्तमेव वार्तिकं समुद्द्योतयन् उद्द्योतः ।

"अहिंसार्थस्य किम् ? भक्षयति बलीवर्दान् सस्यम् । ×××बलीवर्दाः सस्यं भक्षयन्ति तान् भक्षयतीत्यर्थः । क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसा ज्ञेया तस्यामवस्थायां तेषां चेतनत्वात्"—१-४-५२ सिद्धान्तकौ० तत्त्वबोधि० ।

वृक्षायुर्वेदाभिहितप्रतिनियतकालायुष्कविशिष्टौषधप्रयोगसंपादितवृद्धि-हानि-क्षत-भग्नसंरोहण-प्रतिनियतवृद्धिषड्भावविकारोत्पादनाशावस्थानियतविशिष्टशरीरस्निग्धत्व-रूक्षत्व-विशिष्टदौहृद-बाल-कुमार-वृद्धावस्था-प्रतिनियतविशिष्टरसवीर्यविपाक-प्रतिनियतप्रदेशाहारग्रहणादिमत्त्वान्यथानुपपत्तेः, विशिष्टस्त्रीशरीरवत् इत्याद्यनुमानं भाष्यकृत्प्रभृतिभिर्विस्तरतः प्रतिपादितं तच्चैतन्यप्रसाधक-

१ वराहमिहिराचार्यप्रणीतायां बृहत्(वाराही)संहितायां वृक्षायुर्वेदविषय इत्थं वर्णितो वर्तते—

"अथ तेषां रोगज्ञानमाह—

शीतवातातपै रोगो जायते पाण्डुपत्रता । अवृद्धिश्च प्रवालानां शाखाशोषो रसक्षुतिः ॥ १४ ॥
चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम् । विडङ्गघृतपङ्क्तान् सेचयेत् क्षीरवारिणा ॥ १५ ॥

तथा च काश्यपः—

शाखाविटपपत्रैश्च छायया विहिताश्च ये । येऽपि पर्ण-फलैर्हीना रूक्षाः पत्रैश्च पाण्डुरैः ॥
शीतोष्णवर्षवातार्दैर्मूलैर्व्याप्तिश्रितैरपि । शाखिनां तु भवेद् रोगो द्विपानां लेखनेन च ॥
चिकित्सैतेषु कर्तव्या ये च भूयः पुनर्नवाः । शोधयेत् प्रथमं शस्त्रैः प्रलेपं दापयेत् ततः ॥
कर्दमेन विडङ्गैश्च घृतमिश्रैश्च लेपयेत् । क्षीरतोयेन सेकः स्याद् रोहणं सर्वशाखिनाम् ॥

अथ फलनाशचिकित्सितमाह—

फलनाशे कुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः । शृतशीतपयःसेकः फलपुष्पसमृद्धये ॥ १६ ॥

अथ वृद्ध्यर्थप्रयोगमाह—

"अविकाजशकृच्चूर्णस्याढके द्वे तिलाढकम् । सक्तुप्रस्थो जलद्रोणो गोमांसतुलया सह ॥ १७ ॥
सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः । वल्लीगुल्मलतानां च फलपुष्पाय सर्वदा" ॥ १८ ॥

—बृहत्सं० वृक्षायुर्वेदाध्या० ५४ पृ० ७४६-७४७ ।

२ षड्भावविकारा इत्थमवगन्तव्याः—

"षड्भावविकारा भवन्तीति वार्ष्यायणिः—जायते अस्ति विपरिणमते वर्धते अपक्षीयते विनश्यतीति"—यास्कनि० पृ० ४४ पं० १३ । एतदेव विकारषड्कपरिगणनं महाभाष्ये "भूवादयो धातवः" १-३-१ इति सूत्रे, वाक्यपदीये तृतीयकाण्डे प्रथमजातिसमुद्देशीयषट्त्रिंशश्लोकव्याख्यायाम् (तृ० कां० पृ० ३१) हेमचन्द्रशब्दानुशासने "क्रियार्थो धातुः" ३-३-३ इति सूत्रे च विद्यते ।

३ भाष्यकृता श्रीजिनभद्रगणिक्षमाश्रमणेन वनस्पतिपर्यन्तेषु पृथिव्यादिषु स्थावरेषु अनुमानतश्चैतन्यमित्थं साधितं वर्तते—

"जम्म-जरा-जीवण-मरण-रोहणा-ऽऽहार-दोहला-ऽऽमयओ । रोग-तिगिच्छाईहि य नारि व्व सचेयणा तरवो ॥

सचेतनास्तरवः इति प्रतिज्ञा, जन्म-जरा-जीवन-मरण-क्षतसंरोहणा-ऽऽहार-दौहृदा-ऽऽमय-तच्चिकित्सादिसद्भावात् इति हेतुः, नारीवत् इति दृष्टान्तः । × × × × ×

छिक्कपरोइया छिक्कमेत्तसंकोयओ कुलिंगो व्व । आसयसंचाराओ वियत्त ! वल्लीवियाणाइं ॥
सम्मादयो य साव-प्पबोह-संकोयणाइओऽभिमया । वउलादओ य सद्दाइविसयकालोवलंभाओ ॥

सचेतनाः स्पृष्टप्ररोदिकादयो वनस्पतयः स्पृष्टमात्रसंकोचात् कुलिङ्गः-कीटादिः-तद्वत् । तथा, सचेतना वल्ल्यादयः स्वरक्षार्थं वृति-वृक्ष-वरण्डकाद्याश्रयं प्रति संचरणात् । तथा, शम्यादयश्चेतनत्वेन अभिमताः स्वाप-प्रबोध-संकोचादिमत्त्वात् देवदत्तवत् । तथा, सचेतना बकुला-ऽशोक-कुरुबक-विरहक-चम्पक-तिलकादयः शब्दादिविषयकालोपलम्भात्—शब्द-रूप-गन्ध-रस-स्पर्शविषयाणां काले प्रस्तावे उपभोगस्य यथासंख्यमुपलम्भादित्यर्थः यज्ञदत्तवदिति । एवं पूर्वमपि दौहृदादिलिङ्गेषु कूष्माण्डी-बीजपूरकादयो वनस्पतिविशेषाः पक्षीकर्तव्या इति ।

अथ सामान्येन तरूणाम् पृथ्वीविशेषाणां च विद्रुमादीनां सचेतनत्वसाधनायाह—

मंसंकुरो व्व समाणजाइरूवंकुरोवलंभाओ । तरुगण-विद्रुम-लवणो-वलादओ सासयावत्था ॥

तरुगणः तथा विद्रुम-लवणो-पलादयश्च स्वाश्रयावस्थाः स्वजन्मस्थानगताः सन्तश्चेतनाः छिन्नानामप्यमीषां पुनस्तत्स्थान एव समानजातीयाङ्कुरोत्थानात् अर्शोमांसाङ्कुरवत् । × × ×

अथोदकस्य सचेतनत्वं साधयितुमाह—

भूमिक्खयसाभावियसंभवओ दद्दुरो व्व जलमुत्तं । अहवा मच्छो व सभाववोमसंभूयपायाओ ॥

नित्यनुमानतस्तेषां चैतन्यमात्रं सिध्यति । साधारण-प्रत्येकशरीरत्वादिकंस्तु भेदः—

"गूढसिर-संधि-पव्वं समभंगमहीरगं च छिण्णरुहं । साहारणं सरीरं तव्विवरीयं च पत्तेयं ॥"

[जीवविचा० गा० १२]

इत्याद्यागमप्रतिपाद्य एव ।

५ जीवलक्षणव्यतिरिक्तलक्षणास्त्वजीवा धर्माऽधर्माऽऽकाश-काल-पुद्गलभेदेन पञ्चविधाः । तत्र पुद्गलास्तिकायव्यतिरिक्तानां स्वतो मूर्तिमद्द्रव्यसम्बन्धमन्तरेणात्मद्रव्यवदमूर्तत्वाद् अनुमानप्रत्यायवसेयता । तथाहि—गति-स्थित्यवगाहलक्षणं पुद्गलास्तिकायादिकार्यं विशिष्टकारणप्रभवम्, विशिष्टका-

---

भौममम्भः सचेतनमुक्तम् क्षतभूमिसजातीयस्वाभाविकस्य तस्य संभवात् दर्दुरवत् । अथवा, सचेतनमन्तरिक्षमम्भः अभ्रादिविकारस्वभावसंभूतपातात् मत्स्यवदिति ।

तेजोऽनिलावधिकृत्याह—

अपरप्पेरियतिरियानियमियदिग्गमणओऽणिलो गो व्व । अनलो आहाराओ विद्धि-विगारोवलम्भाओ ॥

सात्मको वायुः अपरप्रेरिततिर्यगनियमितदिग्गमनात् गोवत् । तथा, सात्मकं तेजः आहारोपादानात् तद्वृद्धौ विकारनिशेषोपलम्भाच्च नरवत्"—विशेषा० भा० गा० १७५३-१७५८ पृ० ७४४-७४६ ।

तथा, पृथिव्यादिवनस्पत्यन्तानां स्थावराणां स्पष्टतया श्रोत्रादीन्द्रियरहितत्वेऽपि श्रोत्रादीन्द्रियजोऽनुभवो विलोक्यत एव अत एव वनस्पत्यन्तानां तेषां सचेतनत्वं साधितं पुरातनैः । स्थूलतया इन्द्रियरहितत्वेऽपि वनस्पतिषु केषां केषां वृक्षाणामस्मदादिवत् कीदृशः कीदृशोऽनुभवो जायते तदेतत् सर्वं सविस्तरं तेनैव भाष्यकृता भाष्यटीकाकृता चेत्थमुपवर्णितम्—

"जह सुहुमं भाविंदियनाणं दव्विंदियावरोहे वि । तह दव्वसुयाभावे भावसुयं पत्थिवाईणं ॥

इह केवलिनो विहाय शेषसंसारिजीवानां सर्वेषामप्यतिस्तोक-बहु-बहुतर-बहुतमादितारतम्यभावेन द्रव्येन्द्रियेष्वसत्स्वपि लब्धीन्द्रियपञ्चकावरणक्षयोपशमः समस्त्येवेति परममुनिवचनम् । ततश्च यथा येन प्रकारेण पृथिव्यादीनामेकेन्द्रियाणां श्रोत्र-चक्षु-र्घ्राण-रसनलक्षणानां प्रत्येकं निर्वृत्युपकरणरूपाणां द्रव्येन्द्रियाणां तत्प्रतिबन्धककर्मावृतत्वादवरोधेऽप्यभावेऽपि सूक्ष्ममव्यक्तं लब्ध्युपयोगरूपं श्रोत्रादिभावेन्द्रियज्ञानं भवति लब्धीन्द्रियावरणक्षयोपशमसंभूताऽणीयसी ज्ञानशक्तिर्भवतीत्यर्थः । तथा तेनैव प्रकारेण द्रव्यश्रुतस्य द्रव्येन्द्रियस्थानीयस्याभावेऽपि भावश्रुतं भावेन्द्रियज्ञानकल्पं पृथिव्यादीनां भवतीति प्रतिपत्तव्यमेव । इदमुक्तं भवति—एकेन्द्रियाणां तावत् श्रोत्रादिद्रव्येन्द्रियाभावेऽपि भावेन्द्रियज्ञानं किञ्चिद् दृश्यत एव वनस्पत्यादिषु स्पष्टतल्लिङ्गोपलम्भात् । तथाहि—कलकण्ठोद्गीर्णमधुरपञ्चमोद्गारश्रवणात् सद्यः कुसुम-पल्लवादिप्रसरो विरहकवृक्षादिषु श्रवणेन्द्रियज्ञानस्य व्यक्तं लिङ्गमवलोक्यते । तिलकादितरुषु पुनः कमनीयकामिनीकमलदलदीर्घशरदिन्दुधवललोचनकटाक्षविक्षेपात् कुसुमाद्याविर्भावश्चक्षुरिन्द्रियज्ञानस्य । चम्पकार्यंहिपेषु तु विविधसुगन्धिगन्धवस्तुनिकुरम्बोन्मिश्रविमलशीतलसलिलसेकात् तत्प्रकटनं घ्राणेन्द्रियज्ञानस्य । बकुलादिभूरुहेषु तु रम्भातिशायिप्रवररूपवरतरुणभामिनीमुखप्रदत्तस्वच्छसुस्वादुसुरभिवारुणीगण्डूषास्वादनात् तदाविष्करणं रसनेन्द्रियज्ञानस्य । कुरबकादिविटपिषु अशोकादिद्रुमेषु च घनपीनोन्नतकठिनकुचकुम्भविभ्रमापभ्राजितकुम्भीनकुम्भरणन्मणिवलयवल्गत्कङ्कणाभरणभूषितभव्यभामिनीभुजलताऽवगूहनसुखाद् निष्पिष्टपद्मरागचूर्णशोणतलतत्पादकमलपार्ष्णिप्रहाराच्च झगिति प्रसून-पल्लवादिप्रभवः स्पर्शनेन्द्रियज्ञानस्य स्पष्टं लिङ्गमभिवीक्ष्यते । ततश्च यथैतेषु द्रव्येन्द्रियासत्त्वेऽप्येतद् भावेन्द्रियजन्यं ज्ञानं सकलजनप्रसिद्धमस्ति तथा द्रव्यश्रुताभावे भावश्रुतमपि भविष्यति । दृश्यते हि जलाद्याहारोपजीवनाद् वनस्पत्यादीनामाहारसंज्ञा, संकोचनवल्ल्यादीनां तु हस्तस्पर्शादिभीत्या अवयवसंकोचनादिभ्यो भयसंज्ञा, विरहक-तिलक-चम्पक-केशराऽशोकादीनां तु मैथुनसंज्ञा दर्शितैव, बिल्व-पलाशादीनां तु निधानीकृतद्रविणोपरिपादमोचनादिभ्यः परिग्रहसंज्ञा । न चैताः संज्ञा भावश्रुतमन्तरेणोपपद्यन्ते । तस्माद् भावेन्द्रियपञ्चकावरणक्षयोपशमाद् भावेन्द्रियपञ्चकज्ञानवद् भावश्रुतावरणक्षयोपशमसद्भावाद् द्रव्यश्रुताभावेऽपि यच्च यावच्च भावश्रुतमस्त्येव एकेन्द्रियाणामित्यलं विस्तरेण"—विशेषा० भा० गा० १०३ पृ० ६८-६९ ।

१ साधारण-प्रत्येकशरीरधारिणां वनस्पतीनां सलक्षणं सविस्तरं विवेचनं प्रज्ञापना(पन्नवणा)सूत्रतोऽवबोद्धव्यम्—प० १ सू० २२-२६ पृ० ३०-३९ ।

२ "अजीवकाया धर्माधर्माकाशपुद्गलाः । १ । कालश्चेत्येके" ।३८।—तत्त्वार्थ० अ० ५ ।

३ "गति-स्थित्युपग्रहो धर्माधर्मयोरुपकारः । १७ । आकाशस्यावगाहः" । १८ ।—तत्त्वार्थ० अ० ५ ।

र्यत्वात्, शाल्यङ्कुरादिकार्यवत्, यश्चासौ कारणविशेषः स धर्माऽधर्माऽऽकाशलक्षणो यथासंख्यमवसेयः । कालस्तु विशिष्टपरापरप्रत्ययादिलिङ्गानुमेयः । पुद्गलास्तिकायस्तु प्रत्यक्षाऽनुमानलक्षणप्रमाणद्वयगम्यः । यस्तेषां धर्मादीनामसंख्येयप्रदेशात्मकत्वादिको विशेषः तत्प्रदेशानां च सूक्ष्म-सूक्ष्मतरत्वादिको विभागः स "कालो य होइ सुहुमो" [ ] इत्याद्यागमप्रतिपाद्य एव, नागमनिरपेक्षयुक्त्यवसेयः । एवमाश्रवादिष्वपि तत्त्वेषु युक्त्याऽऽगमगम्येषु युक्तिगम्यमंशं युक्तित एव, आगमगम्यं तु केवलागमत एव प्रतिपादयन् स्वसमयप्रज्ञापकः, इतरस्तु तद्विराधक इति प्रज्ञापकलक्षणमवगन्तव्यम् ॥ ४५ ॥

[हेतुसाध्यमर्थं हेतोरेव इतरं चागमत एव साधयतो नयवादः शुद्धो नान्यस्य इति कथनम्]

यो हेतुसाध्यमर्थं हेतुना साधयति आगमसिद्धं च आगमेन, तस्य नयवादः परिशुद्धः नान्यस्येत्येतदेवाऽऽह—'परिसुद्ध'—इत्यादि । १०

यद्वा वस्तुधर्मप्रतिपादकोऽहेतु-हेतुवादप्रभेद आगमो वाक्य-नयरूपः परिशुद्धेतरभेदेन द्विरूपतां प्रतिपद्यते इत्याह—

परिसुद्धो नयवाओ आगममेत्तत्थसाहओ होइ ।
सो चेव दुण्णिगिण्णो दोण्णि वि पक्खे [४]विधम्मेइ ॥ ४६ ॥

परि समन्तात् शुद्धो नयवादः यदा विवक्षिताऽविवक्षितानन्तरूपात्मकवस्तुप्रतिपादकं नयवाक्यं प्रवर्तते 'स्यान्नित्यम्' इत्यादिकं तदा भवति, प्रमाणपरिशुद्धागमार्थमात्रस्य न्यूनाधिकव्यवच्छेदेन प्रतिपादनात् अधिकस्याऽसंभवेन न्यूनस्य च नयानामसर्वार्थत्वप्रसङ्गतोऽर्थस्य परिशुद्धागमविषयत्वायोगात् । स एव नयवादः इतररूपनिरपेक्षैकरूपप्रतिपादकत्वेन यदा दुर्निक्षिप्तः प्रमाणविरुद्धार्थप्रतिपादकत्वेनाऽवतारितस्तदा द्वितीयधर्मनिरपेक्षस्य प्रतिपाद्यधर्मस्याऽप्यभावतोऽप्रतिपादनाद् अपरिशुद्धो भवति, प्रमाणविरुद्धस्य तथातदर्थस्य व्यवस्थापयितुमशक्यत्वात् ॥ ४६ ॥

[अपरिशुद्धनयवादरूपपरसमयानां संख्यानम्]

अपरिशुद्धश्च नयवादः परसमयः स कियद्भेदो भवति ? इत्याह—

जावइया वयणवहा तावइया चेव होंति णयवाया ।
जावइया णयवाया तावइया चेव परसमया ॥ ४७ ॥

अनेकान्तात्मकस्य वस्तुन एकदेशस्य यद् अन्यनिरपेक्षस्याऽवधारणम् अपरिशुद्धो नयः, तावन्मात्रार्थस्य वाचकानां शब्दानां यावन्तो मार्गाः-हेतवो नयाः-तावन्त एव भवन्ति नयवादास्तत्प्रतिपादकाः शब्दाः । यावन्तो नयवादास्तावन्त एव परसमया भवन्ति स्वेच्छाप्रकल्पितविकल्पनिबन्धनत्वात् परसमयानां परिमितिर्न विद्यते । ननु यद्यपरिमिताः परसमयाः कथं तन्निबन्धनभूतानां नयानां संख्यानियमः "नैगम-संग्रह-व्यवहारर्जुसूत्र-शब्द-समभिरूढैवंभूता नयाः"

---

१ "वर्तना परिणामः क्रिया परत्वापरत्वे च कालस्य" । २२ ।—तत्त्वार्थ० अ० ५ ।

२-द्रव्यादिका-बृ० आ० हा० वि० ।

"रूपिणः पुद्गलाः । ४ । शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् । १९ । सुख-दुःख-जीवित-मरणोपग्रहाश्च" । २० ।
—तत्त्वार्थ० अ० ५ ।

३ "नित्यावस्थितानि अरूपाणि । ३ । आऽऽकाशादेकद्रव्याणि । ५ । निष्क्रियाणि च । ६ । असंख्येयाः प्रदेशा धर्माधर्मयोः । ७ । जीवस्य च । ८ । आकाशस्याऽनन्ताः । ९ । संख्येयासंख्येयाश्च पुद्गलानाम् । १० । लोकाकाशेऽवगाहः । १२ । धर्माधर्मयोः कृत्स्ने । १३ । एकप्रदेशादिषु भाज्यः पुद्गलानाम् । १४ । असंख्येयभागादिषु जीवानाम्" । १५ ।
—तत्त्वार्थ० अ० ५ ।

४ विहम्मेवि शु० मू० मु० मू० ।

[तत्त्वार्थसू० १-३३] इति श्रूयते ? न; स्थूलतस्तच्छ्रुतेः, अवान्तरभेदेन तु तेषामपरिमितत्वमेव स्वकल्पनाशिल्पिघटितविकल्पानामनियतत्वात् तदुत्थप्रवादानामपि तत्संख्यापरिमाणत्वात् ॥ ४७ ॥

[कं कं नयमाश्रित्य कस्कः समयः प्रस्थित इति प्रश्नस्य व्याकरणम्]

ननु कं नयमाश्रित्य कः परसमयः प्रवृत्तः ? को वा कस्य विषयः ? इत्याह—

५ **जं कावि़लं दरिसणं एयं दव्वट्ठियस्स वत्तव्वं ।**
सुद्धोअणतणअस्स उ परिसुद्धो पज्जवविअप्पो ॥ ४८ ॥

यत् कापिलं दर्शनं सांख्यमतम् **एतद् द्रव्यास्तिकनयस्य वक्तव्यम्**–तद्विषयविषयम् तदुत्थापितं चेति भावः–**शौद्धोदनेस्तु परिशुद्धः पर्यायविशेष** एव वक्तव्यः–परिशुद्धपर्यायास्तिकनयविशेषविषयं तदुत्थापितं च सौगतमतमित्यभिप्रायः । मिथ्यास्वरूपनयप्रभवत्वाद् अनयो-
१० र्मिथ्यात्वं प्राक् प्रदर्शितमेव ॥ ४८ ॥

[द्रव्यास्तिक–पर्यायास्तिकोभयाश्रितस्यापि वैशेषिकसमयस्य कथं मिथ्यात्वमिति प्रश्नस्य प्रतिवचनम्]

ननु भवतु परस्परनिरपेक्षैकैकनयावलम्बिनोः साङ्ख्य-सौगतमतयोर्मिथ्यात्वम्, कणभुग्मतस्य तु द्रव्यार्थिक-पर्यायार्थिकनयद्वयावलम्बिनः कथं मिथ्यात्वम् ? इत्यत्राह—

१५ **दोहि[1] वि णएहि णीअं सत्थमुलूएण तह वि मिच्छत्तं ।**
जं सविसअप्पहाणत्तणेण अण्णोण्णनिरवेक्खा ॥ ४९ ॥

द्वाभ्यामपि द्रव्यार्थिक-पर्यायार्थिक**नयाभ्यां प्रणीतं शास्त्रम् उलूकेन**[3] वैशेषिकशास्त्रप्रणेत्रा, द्रव्य-गुणादेः पदार्थषट्कस्य नित्यानित्यैकान्तरूपस्य तत्र प्रतिपादनात् ।

[कणादोक्तषट्पदार्थीव्यवस्थाया उपन्यासः]

२० तथाहि—**द्रव्य**[2]**-गुण-कर्म-सामान्य-विशेष-समवायाख्याः षडेव पदार्थाः, न्यूनाऽधिकप्रतिपादकप्रमाणाभावे परस्परविविक्तस्वरूपषट्पदार्थव्यवस्थापकप्रमाणविषयत्वात्, उभयाभिमतघटादिषट्पदार्थवत् । तत्र पृथिव्यप्-तेजो-वाय्वाकाश-काल-दिगात्म-मनांसि नवैव द्रव्याणि । 'पृथिवी आपः तेजो वायुः' इत्येतत् चतुःसंख्यं नित्याऽनित्यभेदाद् द्विप्रकारं द्रव्यम्; तत्र परमाणुरूपं नित्यम् " सदकारणवन्नित्यम् " [वैशेषिकद० ४-१-१] इति वचनात्, तदारब्धं तु द्व्यणुकादि कार्यद्रव्य-
२५ मनित्यम् । आकाशादिकं तु नित्यमेव, अनुत्पत्तिमत्त्वात् । एषां च द्रव्यत्वाभिसंबन्धाद् द्रव्यरूपता, द्रव्यत्वाभिसंबन्धश्च द्रव्यत्वसामान्योपलक्षितसमवायः, तत्समवेतं वा सामान्यम्, एतच्चेतरव्यवच्छेदकमेषां लक्षणम् । तथाहि—पृथिव्यादीनि मनःपर्यन्तानि इतरेभ्यो भिद्यन्ते 'द्रव्याणि' इति वा व्यवहर्तव्यानि द्रव्यत्वाभिसंबन्धात्, यानि तु नैवम् न च तानि द्रव्यत्वाभिसंबन्धवन्ति, यथा गुणादिवस्तूनि, इति केवलव्यतिरेकिहेतुबलात् पृथिव्यादीनि द्रव्याणि गुणादिभ्यो व्यावृत्तरूपाणि
३० सिद्धानि । पृथिव्यादीनामपि भेदवतां पृथिवीत्वाभिसंबन्धादिकं लक्षणमितरेभ्यो भेदव्यवहारे तच्छब्दवाच्यत्वे वा साध्ये केवलव्यतिरेकिरूपं द्रष्टव्यम् । अभेदवतां त्वाकाश-काल-दिग्द्रव्याणामनादिसिद्धतच्छब्दवाच्यता द्रष्टव्या । नवैव चैतानि द्रव्याणि, न्यूनाधिकत्वप्रतिपादकप्रमाणाभावे

---

१ पृ० २९६ पं० ८ तथा पृ० ३८७ पं० १८ । २ **दोहिं वि णएहिं** गु० मू० ।

३ कणादापरनाम्न उलूकमहर्षेर्वृत्तान्तावबोधाय वायुपुराणमिहानुसंधेयम्—अ० २३ श्लो० २०३ ।

४ मूलग्रन्थकृता दिवाकरेण वैशेषिकशास्त्रनिःष्यन्दभूता वैशेषिकद्वात्रिंशिकाऽपि रचिताऽस्ति सा च तद्रचितासु द्वात्रिंशति द्वात्रिंशिकासु चतुर्दशी वर्तते एषाऽपि प्रस्तुतविषयसादृश्यावबोधाय बुभुत्सुभिरत्रावगन्तव्या भवेत्—द्वात्रिंशद्-द्वात्रिंशिका पृ० १८–१९ ।

अत्र द्रव्यादिपदार्थस्वरूपं सविस्तरमवबोद्धुकामेन समग्रं वैशेषिकदर्शनं सभाष्यं सकन्दलिकं चानुसंधेयम् ।

परस्परव्यावृत्तनवलक्षणयोगित्वात्, उभयाभिमतनवघटादिवत् । एवं रूपादयश्चतुर्विंशतिर्गुणाः । उत्क्षेपणादीनि पञ्च कर्माणि । पराऽपरभेदभिन्नं द्विविधं सामान्यमनुगतज्ञानकारणम् । नित्यद्रव्यवृत्तयोऽन्त्या विशेषा अत्यन्तव्यावृत्तबुद्धिहेतवः । अयुतसिद्धानामाधार्याऽऽधारभूतानाम् 'इह' इतिप्रत्ययहेतुर्यः संबन्धः स समवाय एको व्यापकश्च । अत्र च पदार्थषट्के द्रव्याणि गुणाश्च केचिन्नित्या एव, केचित् त्वनित्या एव । कर्म अनित्यमेव । सामान्य-विशेष-समवायास्तु नित्या५ एवेति पदार्थव्यवस्था । ततश्चैतत् शास्त्रं **तथापि मिथ्यात्वम्**, तत्प्रदर्शितपदार्थषट्कस्य प्रमाणबाधितत्वात् ।

[कणादोक्तां तत्त्वव्यवस्थां निरसितुं पूर्वं द्रव्यपदार्थस्य खण्डनम्]

यतश्चतुःसंख्यं पृथिव्यादिद्रव्यं परमाणुरूपं यन्नित्यमुपवर्णितम्[4], तदसंगतम्[5]; एकान्ताऽक्षणिकत्वे क्रम-यौगपद्याभ्यामर्थक्रियाविरोधात् तल्लक्षणं सत्त्वं ततो व्यावर्तते, ततश्च असत्त्वमेव तस्य ।१० यदि च स्थूलकार्यद्रव्यकारणभूतानामणूनां तज्जनकैकस्वभावता तदा तत्कार्याणां सकृदेव सर्वेषामुत्पत्तिप्रसक्तिः अविकलकारणत्वात् । तथा च प्रयोगः—येऽविकलकारणास्ते सकृदेवोत्पद्यन्ते, यथा समानोत्पादा बहवोऽङ्कुराः, अविकलकारणाश्च परमाणुकार्यत्वेनाऽभिमता भावा इति स्वभावहेतुः । अविकलकारणस्याप्यनुत्पादे सर्वदाऽनुत्पत्तिप्रसक्तिः विशेषाभावात् इति विपर्यये बाधकं[6] प्रमाणम् । स्यादेतत्, सँमवाय्यसमवायि-निमित्तभेदात् त्रिविधं कारणम्, यत्र हि कार्यं समवैति तत् समवा-१५ यिकारणम् यथा-द्व्यणुकस्य अणुद्वयम् । यच्च कार्यैकार्थसमवेतम् कार्यकारणैकार्थसमवेतं वा कार्यमुत्पादयति तद् असमवायि कारणम् यथा-पटावयविद्रव्यारम्भे तन्तुसंयोगः, पटसमवेतरूपाद्यारम्भे पटोत्पादकतन्तुरूपादि च । शेषं तु उत्पादकं निमित्तकारणम् यथा—अदृष्टाऽऽकाशादि । तत्र संयोगादेरपेक्षणीयस्य असंनिधेरविकलकारणत्वमसिद्धम्, असदेतत्; संयोगादिनाऽनाधेयातिशयत्वात्

१–**शतिगु**–वृ० विना । २ पृ० ६५६ पं० २३ ।

३ प्रस्तूयमानैषा सपूर्वपक्षा समग्राऽपि वैशेषिकाभिमतद्रव्य–गुणादितत्त्वपरीक्षणचर्चाऽविकलतया तत्त्वसंग्रहपञ्जिकायां विद्यते–पृ० १८५ का० ५४७—पृ० २७४ का० ८६६ ।

सैव च क्वचित् क्वचित् शब्दसाम्येन क्वचिच्चान्यथाऽपि भङ्ग्या अर्थसाम्यमजहती न्यायकुमुदचन्द्रोदये, प्रमेयकमलमार्तण्डे स्याद्वादरत्नाकरे च विद्यते–लि० पृ० ११६ द्वि० पं० ३–पृ० १७४ द्वि० पं० १० । पृ० १५६ प्र० पं० ८–पृ० १८८ द्वि० पं० १३ । पृ० ८३७ पं० २०–पृ० ९७० पं० १५ ।

४ "तत्र नित्याणुरूपाणामसत्त्वमुपपादितम् । निःशेषवस्तुविषयक्षणभङ्गप्रसाधनात्" ॥
—तत्त्वसं० का० ५५१ पृ० १८६ ।

५ "नित्यत्वे सकलाः स्थूला जायेरन् सकृदेव हि । संयोगादि न चापेक्ष्यं तेषामस्त्यविशेषतः" ॥
—तत्त्वसं० का० ५५२ पृ० १८६ ।

६ **बाधक प्र**–वृ० आ० हा० वि० । "समग्रकारणस्याप्यनुत्पादे सर्वदैवानुत्पादप्रसङ्गो विशेषाभावादिति बाधकं प्रमाणम्"—तत्त्वसं० पञ्जि० पृ० १८६ पं० २० ।

७ "ननु समवायि-असमवायि-निमित्तभेदात् त्रिविधं कारणं कार्यजन्मनि व्याप्रियते । यत्र हि कार्यं समवैति तत् समवायि कारणम् यथा द्व्यणुकस्य अणुद्वयम् । यच्च कार्यैकार्थसमवेतं कार्यकारणैकार्थसमवेतं वा कार्यं समुत्पादयति तद् असमवायि कारणम् यथा पटारम्भे तन्तुसंयोगः पटसमवेतरूपाद्यारम्भे पटोत्पादकतन्तुरूपादि च शेषं तु उत्पादकं निमित्तकारणम् यथा अदृष्टाकाशादि" इत्यादि—न्यायकुमुद० लि० पृ० ११८ प्र० पं० १२–द्वि० पं० १–२ । प्रमेयक० पृ० १५९ द्वि० पं० १५–।

८ "असमवेतं तु यद् यस्य कारणभावं प्रतिपद्यते तद् असमवायिकारणम् यथा अवयविद्रव्यारम्भेऽवयवसंयोगः"
—तत्त्वसं० पञ्जि० पृ० १८६ पं० २२ ।

९ "परिशेषं तु कारणं निमित्तकारणम् तद्यथा धर्मादय इत्ययमेषां विभागः"—तत्त्वसं० पञ्जि० पृ० १८६ पं० २४ ।

नित्यतया अणूनां तदपेक्षत्वायोगात्। न च तन्तु-करणादीनां कार्याणां सकृत् प्रादुर्भाव उपलभ्यते तस्माद् विपर्ययः। तथा च प्रयोगः—ये क्रमवत्कार्यहेतवस्तेऽनित्याः, यथा-क्रमवदङ्कुरादिनिर्वर्तका बीजादयः, तथा च परमाणव इति स्वभावहेतुः। यदपि अविद्धकर्णोक्तमणूनां नित्यत्वसाधकं प्रमाणम्—"परमाणूत्पादकाभिमतं कारणं सद्धर्मोपेतं न भवति, सत्त्वप्रतिपादकप्रमाणाविषयत्वात्, शशशृङ्गवत्" [ ] इति। तत्र कुविन्दादेरणूत्पादककारणस्य सत्त्वप्रतिपादकप्रमाणविषयत्वाद् असिद्धो हेतुः। यथा च पटादयः परमाण्वात्मकाः कुविन्दोत्पाद्यास्तथा प्रदर्शयिष्यामः। देश-काल-स्वभावविप्रकृष्टानां च भावानां सदुपलम्भकप्रमाणनिवृत्तावपि सत्त्वाविरोधाद् अनैकान्तिकश्च हेतुः। ततो न अण्वनित्यत्वप्रसाधकानुमानप्रतिज्ञाया अनुमानबाधा। न च 'यत एव प्रमाणात् परमाणवः प्रसिद्धाः तत एव नित्यत्वधर्मोपेता अपि ते' इति तद्ग्राहकप्रमाणबाधितत्वात् तदनित्यत्वप्रसाधकानुमानस्याऽनुत्थानम् प्रमाणतोऽप्रसिद्धौ चाणूनामाश्रयाऽसिद्धतया तत् इति वाच्यम्, सर्वस्य प्रमाणविषयस्य अनित्यत्वधर्मोपेतस्यैव तद्विषयत्वात् अन्यथाभूतस्य तदजनकत्वे तद्विषयत्वानुपपत्तेः "नाऽकारणं विषयः" [ ] इति प्रसाधितत्वात्। नित्यस्य चाऽकारणत्वात्। तन्न चतुःसंख्यं परमाण्वात्मकं नित्यद्रव्यं संभवति।

नापि तदारब्धमवयवि द्रव्यं संभवति, गुणावयवव्यतिरिक्तस्य तस्याऽनुपलम्भात् न हि शुक्लादिगुणेभ्यः तन्त्वाद्यवयवेभ्यश्च अर्थान्तरभूतं पटादि द्रव्यं चक्षुरादिज्ञानेऽवभासते। न च अवयविनो द्व्यणुकादेरनुपलम्भे परमाणूनां विविक्तस्वरूपाणामुपलम्भाऽविषयत्वात् प्रतिभासाऽभावप्रसक्तेः आश्रयाऽसिद्धतया अवयव्यादिनिषेधकप्रसङ्गसाधनप्रयोगानुपपत्तिः इति वक्तव्यम्, परमाणूनामेव विशिष्टाकारतयोत्पन्नानां प्रतिभासविषयतया आश्रयासिद्धताद्यनुपपत्तेर्न प्रयोगानुपपत्तिः। एवं च यद् उपलब्धिलक्षणप्राप्तं सद् यत्र नोपलभ्यते तत् तत्र नास्ति, यथा-क्वचित् प्रदेशविशेषे घटादिरनुपलम्भविषयः, गुणाऽवयवार्थान्तरभूतो गुण्यवयवी च दृश्यत्वेनाऽभिमतः नोपलभ्यते च तत्रैव देशे इति स्वभावानुपलब्धिः। न च हेतोर्विशेषणमसिद्धम्, "महति अनेकद्रव्यवत्त्वात् रूपाच्चोपलब्धिः" [वैशेषिकद० ४-१-६] इति वचनात् तयोर्दृश्यत्वेनाऽभ्युपगमात्।

नन्वं गुणव्यतिरिक्तो गुणी उपलभ्यत एव तद्रूपादिगुणाग्रहणेऽपि तस्य ग्रहणात्। तथाहि—मन्दमन्दप्रकाशे तद्वतसितादिरूपानुपलम्भेऽपि उपलभ्यते बलाकादिः, स्वगतशुक्लगुणाग्रहणेऽपि च सन्निहितोपधानावस्थायां गृह्यते स्फटिकोपलः, तथाऽऽप्रपदीनकञ्चुकावच्छन्नशरीरः पुमांस्तद्वतश्या-

---

१ "न च सकृदेव स्थूलानां तनुभवनादीनामुदयोऽस्ति क्रमेण तन्वादीनामुत्पत्तिदर्शनात् तस्माद् विपर्ययः"—तत्त्वसं० पञ्जि० पृ० १८७ पं० १।

२ **तन्तुक**–भां० मां०। ३–**नुकार**–भां० मां० विना।

४ "अविद्धकर्णस्त्वणूनां नित्यत्वप्रसाधनाय प्रमाणमाह—परमाणूनामुत्पादकाभिमतं सद्धर्मोपगतं न भवति सत्त्वप्रतिपादकप्रमाणाविषयत्वात् खरविषाणवदिति"—तत्त्वसं० पञ्जि० पृ० १८७ पं० ४।

५ "सद्धर्मोपगतं नो चेदणूत्पादकमिष्यते। विद्यमानोपलम्भार्थप्रमाणाविषयत्वतः" ॥
—तत्त्वसं० का० ५५३ पृ० १८७।

६ "नासिद्धेर्दृश्यते येन कुविन्दाद्यणुकारणम्। परमाण्वात्मका एव येन सर्वे पटादयः" ॥
—तत्त्वसं० का० ५५४ पृ० १८७।

७ "सद्ग्राहकप्रमाभावान्न वा सत्ता प्रसिध्यति। प्रमाणविनिवृत्तौ हि नार्थाभावेऽस्ति निश्चयः" ॥
—तत्त्वसं० का० ५५५ पृ० १८७।

८ "तदारब्धस्त्ववयवी गुणावयवभेदवान्। नैवोपलभ्यते तेन न सिध्यत्यप्रमाणकः" ॥
—तत्त्वसं० का० ५५६ पृ० १८७।

९ "नन्वित्यादिना उद्योतकर–भाविविक्तादयो हेतोरसिद्धतामुद्भावयन्ति—
ननूपधानसंपर्कै दृश्यते स्फटिकोपलः। तद्रूपाग्रहणेऽप्येवं बलाकादिश्च दृश्यते ॥
कञ्चुकान्तरिते पुंसि तद्रूपाद्यगतावपि। पुरुषप्रत्ययो दृष्टो रक्ते वाससि वस्त्रधीः" ॥
—तत्त्वसं० का० ५५७–५५८ पृ० १८८।

मादिरूपाप्रतिभासेऽपि 'पुमान्' इति प्रत्ययोत्पत्तेः प्रतिभात्येव, कुङ्कुमादिरक्तं च वस्त्रं तद्रूपस्य संसर्गिरूपेणाऽभिभूतस्य अप्रकाशेऽपि प्रकाशत एव 'वस्त्रम्' इति प्रत्ययोत्पत्तेः अध्यक्षत एव गुण-गुणिनोर्भेदः सिद्धः। तथा, अनुमानतोऽपि तयोर्भेदः। तथाहि—यद् यद्व्यवच्छेद्यत्वेन प्रतीयते तत् ततो भिन्नम्, यथा देवदत्ताद् अश्वः, गुणिव्यवच्छेद्यत्वेन प्रतीयते च नीलोत्पलस्य रूपादय इति। तथा, पृथिव्यप्-तेजो-वायवो द्रव्याणि रूप-रस-गन्ध-स्पर्शेभ्यो भिन्नानि, एकवचन-बहुवचनविषयत्वात्, यथा 'चन्द्रः' 'नक्षत्राणि'इति, तथा च 'पृथिवी' इति एकवचनम् 'रूप-रस-गन्ध-स्पर्शाः' बहुवचनमुपलभ्यते इति तयोर्भेदः। अवयवाऽवयविनोरप्यनुमानतः सिद्धो भेदः। तथाहि—विवादाधिकरणेभ्यस्तन्तुभ्यो भिन्नः पटः भिन्नकर्तृकत्वात् घटादिवत्, भिन्नशक्तिकत्वाद् वा विषाऽगदवत्, पूर्वोत्तरकालभावित्वाद् वा पितापुत्रवत्, विभिन्नपरिमाणत्वाद् वा कुवल-बिल्ववत् इति। विरुद्धधर्माध्यासनिबन्धनो ह्यन्यत्रापि भावानां भेदः; स च अत्राप्यस्ति इति कथं न भेदः? यदि चाँवयवी अवयवेभ्यो भिन्नो न भवेत् स्थूलप्रतिभासो न स्यात्, परमाणूनां सूक्ष्मत्वात्। न च अन्याद्दगभूतः प्रतिभासः अन्याद्दगर्थव्यवस्थापकः अतिप्रसङ्गात्। न च स्थूलाभावे 'परमाणुः' इति व्यपदेशोऽपि संभवी, स्थूलापेक्षित्वाद् अणुत्वस्य" [ ] इति उद्द्योतकरादयः।

अत्र प्रतिविधीयते—यदुक्तम् 'स्वगतगुणाऽनुपलम्भेऽपि बलाका-स्फटिकादय उपलभ्यन्ते' इति, तदसंगतम्; तज्ज्ञानस्य अयथार्थत्वेन भ्रान्ततया निर्विषयत्वात्। तथाहि—बलाकादयः शुक्लाः सन्तः श्यामादिरूपतया उपलभ्यन्ते, न च तेषां तद्रूपं तात्त्विकमस्ति, 'तद्रूपाग्रहणेऽपि तेषां ग्रहणम्' इत्यभ्युपगमक्षतिप्रसक्तेः। न च तदा श्यामादिरूपाद् व्यतिरिक्तोऽपरः स्फटिकादिस्वभाव उपलभ्यते, श्यामादिरूपस्यैवोपलम्भात्। न च अतद्रूपा अपि बलाकादयः श्यामादिरूपेणोपलभ्यन्ते, यत आकारवशेन प्रतिनियतार्थता ज्ञानस्य व्यवस्थाप्यते, अन्याकारस्यापि तस्य अन्यार्थतायां रूपज्ञानस्यापि

---

१ **पुमानिति तत्र**–भां० मां०। "तथाऽऽप्रपदीनकञ्चुकावच्छन्नशरीरे पुंसि तदा श्यामादिरूपाद्यग्रहणेऽपि पुमान् पुमान् इति प्रत्ययः प्रसूयत एव"—तत्त्वसं० पञ्जि० पृ० १८८ पं० १८।

२ "रूपादीन्दीवरादिभ्य एकान्तेन विभिद्यते। तेन तस्य व्यवच्छेदाच्चैत्रादेश्च तुरङ्गमः ॥
क्षित्यादिरूपगन्धादेरत्यन्तं वा विभिद्यते। एकानेकवचोभेदाच्चन्द्र–नक्षत्रभेदवत्" ॥
—तत्त्वसं० का० ५५९–५६० पृ० १८८।

३–**वच्छेदकत्वेन** वा० बा० भां० मां०।
"इन्दीवरादिभ्यो गुणो भिन्न इन्दीवरस्य रूपादय इत्येवं तेन इन्दीवरादिना तस्य रूपादेर्व्यवच्छेदात् यथा चैत्रस्य तुरङ्गम इति चैत्रेण स्वाम्यन्तरेभ्यो व्यवच्छिद्यमानस्तुरङ्गमस्ततो भिद्यते"—तत्त्वसं० पञ्जि० पृ० १८८ पं० २७–।

४–**वच्छेदकत्वेन** वा० बा० भां० मां०। ५–**यन्ते च** वा० बा० भां० मां०।

६ "विभिन्नकर्तृशक्त्यादेर्भिन्नौ तन्तुपटौ तथा। विरुद्धधर्मयोगेन स्तम्भ–कुम्भादिभेदवत् ॥"
—तत्त्वसं० का० ५६१ पृ० १८९।

७ "स्थूलार्थासंभवे तु स्यान्नैव वृक्षादिदर्शनम्। अतीन्द्रियतयाऽणूनां न चाणुवचनं भवेत् ॥
स्थूलवस्तुव्यपेक्षो हि सुसूक्ष्मोऽर्थस्तथोच्यते। स्थूलैकवस्त्वभावे तु किमपेक्षाऽस्य सूक्ष्मता" ॥
—तत्त्वसं० का० ५६२–५६३ पृ० १८९।

८ गोतम–वात्स्यायन–उद्द्योतकर–श्रीधर–वाचस्पतिमिश्र–जयन्तभट्टैः अवयवादवयविनः पृथग्भावसिद्धिः सविस्तरं साधिता। तद्यथा–२–१–३३–३६ न्यायद०। २–१–३३–३६ न्यायद० वात्स्याभा० पृ० १३३–१४०। न्यायवा० पृ० २१६–२५१। प्रशस्त० कं० पृ० ४१ पं० १२–पृ० ४३। न्यायवा० ता० टी० पृ० ३८८ पं० २–पृ० ४०२ पं० ६। न्यायमञ्ज० आ० ९ पृ० ५४९ पं० ३–पृ० ५५१ पं० २१।

९ पृ० ६५८ पं० २३।

१० "नन्वु रक्तादिरूपेण गृह्यन्ते स्फटिकादयः। न च तद्रूपता तेषां स्वपक्षक्षयसंगतेः" ॥
—तत्त्वसं० का० ५६४ पृ० १८९।

११ "तद्रूपव्यतिरिक्तश्च नापरात्मोपलभ्यते। न चान्याकारधीवेद्या युक्तास्तेऽतिप्रसङ्गतः ॥
—तत्त्वसं० का० ५६५ पृ० १९०।

रसविषयताप्रसक्तेः अविशेषात्। न[1] च अन्याकारस्य अन्यविषयव्यवस्थापकत्वेऽपि तस्य परस्येष्टसिद्धिः, यतः शुक्लादय एव श्यामादिरूपेण प्रतिभान्ति तज्ज्ञानस्य भ्रान्तत्वात् न पुनस्तद्व्यतिरिक्तस्य गुणिनस्ततः सिद्धिर्भवेत्। यच्च[2] 'कञ्चुकावच्छन्ने पुंसि 'पुमान्' इति ज्ञानमध्यक्षम् अवयविव्यवस्थापकम्' उक्तम्, तद् अध्यक्षमेव न भवति; शब्दानुविद्धत्वात् अस्पष्टाकारत्वाच्च अपि तु रूपादिसंहतिमात्रलक्षणपुरुषविषयमनुमानमेतत् इति नातोऽवयविसिद्धिः। तथाहि—रूपा[3]दिप्रचयात्मकपुरुषहेतुकः कञ्चुकसंनिवेश उपलभ्यमानः स्वकारणमनुमापयति धूम इवाग्निम्। यच्च 'कुङ्कुमादिरक्ते वस्त्रे तद्रूपाप्रतिपत्तावपि 'वस्त्रम्' इति ज्ञानम्' तदपि प्राक्[4]नशुक्लरूपविनाशे सामग्र्यन्तरोपजातरूपान्तरस्य अध्यक्षेण ग्रहणे सति उत्तरकालं तत्पृष्ठभाविसमयवशात् 'वस्त्रम्' इति समुदायविषयं सांवृतं परमार्थतो निर्विषयमेव प्रत्यवमर्शज्ञानम् इत्यसिद्धमस्य प्रत्यक्षत्वम्। न चैतद् अनुमानम् पूर्वाध्यक्षगृहीतविषयत्वात् अलि(लै)ङ्गिकत्वाच्च। तन्नात्र अभिभूतं किञ्चिद् रूपं विद्यते। न[5] चाभिभूतवस्त्ररूपस्य तदवस्थायामभावे धौतवस्त्रावस्थायां पुनः शुक्लरूपानुपलब्धिः स्यादिति वक्तव्यम्, यतः अग्न्यादिसामग्रीप्रादुर्भूतभास्वररूपस्य लोहादेः पुनः श्यामादिरूपान्तरोत्पत्तिवत् तत्रापि सामग्र्यन्तरात् शुक्लरूपोत्पत्तेरविरोधात्। न च 'प्राक्तनमेवं रूपमभिभूतत्वात् तदानुपलब्धम् पश्चाद् अभिभवाभावाद् उपलभ्यते' इत्यस्य प्रतिषेधेन 'रूपान्तरमेव प्राक्तनरूपविनाशेनोपजातमत्रोपलभ्यते' इति भवतोऽपि किं प्रमाणमिति वक्तव्यम्, अनुमानस्य सद्भावात्। तथाहि—यद् अपरित्यक्ताऽनभिभूतस्वभावं तस्य न परेणाऽभिभवः, यथा पूर्वावस्थायां तस्यैव अपरित्यक्ताऽनभिभूतस्वभावं चाभिभवावस्थायां रूपमिति व्यापकविरुद्धोपलब्धिः। परित्यक्ताऽनभिभूतस्वभावत्वाभ्युपगमेऽपि सिद्धमस्याऽन्यत्वम् स्वभावभेदस्य भावभेदलक्षणत्वात् अन्यथाऽतिप्रसङ्गात्।

नं[6] च स्वतन्त्रेच्छामात्रभाविनः षष्ठी[7]वचनभेदादेर्बाह्यवस्तुगतभेदाऽव्यभिचारित्वम् येन ततो गुण-गुणिनोर्भेदसिद्धिः स्यात्। तेन 'यद् यद्व्यवच्छिन्नम्' इत्यादिप्रयोगानुपपत्तिः[12]। यदि तु वस्तुगतभेदमन्तरेण षष्ठ्यादिवृत्तिर्न भवेत् 'स्वस्य भावः' 'षण्णां पदार्थानामस्तित्वम्', 'दारा:' 'सिकताः' इत्यादौ षष्ठ्यादेर्वृत्तिर्न स्यात् भावादेरत्र व्यतिरिक्तस्य तन्निबन्धनस्याभावात्। अथ[13] सदुपलम्भकप्रमाणविषयत्वं धर्मान्तरं षण्णामस्तित्वमिष्यत इति न हेतोर्व्यभिचारः, न; सप्तमपदार्थप्रसक्तेः षट्पदार्थाभ्युपगमो हीयेत। अथ[14] षट्पदार्थव्यतिरिक्तानामपि धर्माणामभ्युपगमान्नायं दोषः। तथा च पदार्थप्रवेशके[2] ग्रन्थे—"एवं धर्मैर्विना[3] धर्मिणामुद्देशः कृतः" [प्रशस्तपादभा० पृ० २६ पं० १] इति, असदेतत्; तैस्तेषां[4] संबन्धानुपपत्तेः तमन्तरेण च धर्म-धर्मिभावायोगात् अन्यथाऽतिप्रसङ्गात्। न च संयोगलक्षणोऽत्र संबन्धः, संयोगस्य गुणत्वेन द्रव्येष्वेव भावात्। नापि समवायस्वरूपः, सत्तावत् तस्य सर्वैकत्वाभ्युपगमात्, समवायेन च सह समवायसंबन्धे द्वितीयसमवायाभ्युपगमः स्यात्[5] तत्र चानवस्था। न च षड्भिः पदार्थैर्धर्माणामुत्पादनात् 'तेषां ते' इति व्यपदेशः, तथाभ्युपगमे बदरादयोऽपि कुण्डादिसंबन्धिनस्तथैव स्युः इति संयोगसमवायाख्यसंबन्धान्तरकल्पनावैयर्थ्यप्रसक्तिः। भवेत्[6] वा षण्णामस्तित्वं धर्मान्तरम् तथापि व्यभिचार एव, तदस्तित्वे अपरास्तित्वाद्यभावेऽपि 'तदस्तित्वस्य अस्तित्व-प्रमेयत्व-अभि[7]धेयत्वानि' इति षष्ठ्यादिप्रवृत्तेः। अथ तत्रापि अपरास्तित्वाभ्युपगमस्तदाऽनवस्थाप्रसक्तिः। न[8] चेष्टत्वाद् अदोषः, सर्वेषामपि उत्तरोत्तरधर्माधारत्वाद् धर्मित्वप्रसक्तेः[10] "षडेव धर्मिणः प्रोक्ताः" [ ] इत्येतस्याऽनुपपत्तिः षट्पदार्थव्यतिरिक्तानामन्येषामपि वा धर्मिणामस्तित्ववादीनां विशिष्टधर्माधाराणां संभवात्। न च धर्मिरूपा एव ये ते एव षड्भेन अवधारिता इति वक्तव्यम्, गुणादीनामनिर्देशप्रसङ्गात् न हि गुणादीनां धर्मिरूपतैव किन्तु द्रव्याश्रितत्वात् धर्मरूपत्वमपि। यस्त्वाह[9]—"सदुपलम्भकप्रमाणगम्यत्वं षण्णामस्तित्वमभिधीयते, तच्च षट्पदार्थविषयं ज्ञानम् तस्मिन् सति 'सत्' इति व्यवहारप्रवृत्तेः। एवं 'ज्ञा[10]नजनितं ज्ञानज्ञेयत्वम्' 'अभिधानजनितम् अभिधेयत्वम्' इत्येवं व्यतिरेकनिबन्धना षष्ठी सिद्धा, न चाऽनवस्था, न च षट्पदार्थव्यतिरिक्तपदार्थान्तरप्रसक्तिः ज्ञानस्य गुणपदार्थेऽन्तर्भावात्" [ ] सोऽप्ययुक्तवादी; एवमपि अस्तित्वादेः षट्पदार्थाव्यतिरेके सप्तमपदार्थप्रसक्तेर्न्याय-

१ "शुक्लादयस्तथा वेद्या इत्येवं चापि संभवेत्। तस्माद् भ्रान्तमिदं ज्ञानं कम्बुपीतादिबुद्धिवत्" ॥
—तत्त्वसं० का० ५६६ पृ० १९०।

२ पृ० ६५८ पं० २५।

३ "कञ्चुकान्तर्गते पुंसि न ज्ञानं लानुमानिकम्। तद्धेतुसन्निवेशस्य कञ्चुकस्योपलम्भनात्" ॥
—तत्त्वसं० का० ५६७ पृ० १९०।

४ "कषायकुङ्कुमादिभ्यो वस्त्रे रूपान्तरोदयः। पूर्वरूपविनाशे हि वाससः क्षणिकत्वतः" ॥
—तत्त्वसं० का० ५६८ पृ० १९१।

५ "नाप्येतदनुमानं पूर्वप्रत्यक्षगृहीतविषयत्वादलैङ्गिकत्वाच्च"—तत्त्वसं० पञ्जि० पृ० १९१ पं० १०।

६ "पुनर्जलादिसापेक्षात् तस्मादेवोपजायते। रूपाद् रूपान्तरं शुक्लं लोहादेः श्यामतादिवत्" ॥
—तत्त्वसं० का० ५६९ पृ० १९१।

७ "तादवस्थ्ये तु रूपस्य नान्येनाभिभवो भवेत्। प्राक्तनानभिभूतस्य स्वरूपस्यानुवर्तनात्" ॥
—तत्त्वसं० का० ५७० पृ० १९१।

८-**श्चादनभिभवादुप**-भां० मां०। "स्यादेतत् कथमिदमवगम्यते रूपान्तरमेवोपजायते न पुनः प्राक्तनं रूपमभिभूतत्वात् प्रागनुपलब्धं सत् पश्चादभिभवाभावादुपलभ्यत इत्याह"—तत्त्वसं० पञ्जि० पृ० १९१ पं० १८।

९-**स्थायास्त**-बृ०। "यथा तस्यैव प्राक्तनावस्थायाम्"—तत्त्वसं० पञ्जि० पृ० १९१ पं० २२।

१० "षष्ठीवचनभेदादि विवक्षामात्रसंभवि। ततो न युक्ता वस्तूनां तत्स्वरूपव्यवस्थितिः ॥
तथाहि भिन्नं नैवान्यैः षण्णामस्तित्वमिष्यते। तेषां वर्गश्च नैवैकः कश्चिदर्थोऽभ्युपेयते" ॥
तत्त्वसं० का० ५७१-५७२ पृ० १९१-१९२।

११ पृ० ६५९ पं० ५। १२ पृ० ६५९ पं० ३।

१३ "संज्ञापकप्रमाणस्य विषये तत्त्वमिष्यते। षण्णामस्तित्वमिति चेत् षड्भ्योऽन्यस्ते प्रसज्यते" ॥
—तत्त्वसं० का० ५७३ पृ० १९२।

१ "षडेते धर्मिणः प्रोक्ता धर्मास्तेभ्योऽतिरेकिणः। इष्टा एवेति चेत् कोऽयं संबन्धस्तस्य तैर्मतः ॥
द्रव्येषु नियमाद् युक्ता न संयोगो न चापरः। समवायोऽस्ति नान्यश्च संबन्धोऽङ्गीकृतः परैः" ॥
—तत्त्वसं० का० ५७४-५७५ पृ० १९२।

२ 'पदार्थधर्मसंग्रह' नामैको ग्रन्थः प्रशस्तपादापरनाम्ना प्रशस्तदेवेन रचितो विद्यते। तथाहि—
"प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः। पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः"—प्रशस्त० कं० पृ० १।
अस्मिन्नेव ग्रन्थे च 'एवं धर्मैर्विना' इत्यादि उपरि निर्दिष्टं वाक्यं विद्यते। पञ्जिकाकृता कमलशीलेन टीकाकृता चाभयदेवेन स संग्रह एव पदार्थप्रवेशक इति नाम्नाऽत्र निर्दिष्टः प्रतिभाति। स च संग्रहः 'प्रशस्तपादभाष्यम्' इत्यपि प्रख्यातिं गतः।

३ **एव ध**-आ० विना। तथाहि पदार्थप्रवेशके ग्रन्थः(न्थे) "एवं धर्मैर्विना धर्मिणामेष निर्देशः कृत इति"
—तत्त्वसं० पञ्जि० पृ० १९२ पं० २६।

"तथा च पदार्थप्रवेशकग्रन्थः एवं धर्मैर्विना धर्मिणामेव निर्देशः कृतः"—प्रमेयक० पृ० १५७ द्वि० पं० ८। "तथा च पदार्थप्रवेशकग्रन्थः-एवं धर्मैर्विना धर्मिणामुद्देशः कृतः"—स्याद्वादर० पृ० ८७८ पं० १०।

४ "संबन्धानुपपत्तौ च तेषां धर्मो भवेत् कथम्?। तदुत्पादनमात्राच्चेदन्येऽपि स्युस्तथाविधाः" ॥
—तत्त्वसं० का० ५७६ पृ० १९३।

५ "तस्याप्यस्तित्वमित्येवं वर्तते व्यतिरेकिणी। विभक्तिस्तस्य चान्यस्य भावेऽनिष्ठा प्रसज्यते" ॥
—तत्त्वसं० का० ५७७ पृ० १९३।

६ "अन्यधर्मसमावेशे प्राप्ता तत्र च धर्मिता। द्रव्यादेरपि धर्मित्वमस्मादेव च संमतम्" ॥
—तत्त्वसं० का० ५७८ पृ० १९३।

७ "ततश्च षडेते धर्मिण एव प्रोक्ता इत्येतन्नोपपद्यते"—तत्त्वसं० पञ्जि० पृ० १९३ पं० २२। पृ० ६६० टि० १३।

८ "षण्णामपि पदार्थानामस्तित्वाऽभिधेयत्वज्ञेयत्वानि" इत्यादि—प्रशस्त० कं० पृ० १६ पं० १।

९ "अन्यः पुनराह—षण्णामस्तित्वं हि सदुपलम्भकप्रमाणगम्यत्वम्। गम्यत्वं च षट्पदार्थविषयं विज्ञानम् तस्मिन् सति सद्व्यवहारप्रवर्तनात्। तथा ज्ञानजनितं ज्ञेयत्वम् अभिधानजनितमभिधेयत्वमिति। अतो व्यतिरेकनिबन्धना षष्ठी भवत्येव। न चाप्यनवस्था, नापि षट्पदार्थान्तरप्रसङ्ग इति। तस्यापीदं कल्पनामात्रमेव"—तत्त्वसं० पञ्जि० पृ० १९३ पं० २७-पृ० १९४ पं० ३।

१० **ज्ञानजनितं ज्ञानं ज्ञेयत्वम्** बृ०।

प्राप्तत्वात्। किंच, यदि षण्णां पदार्थानामर्थक्रियासमर्थपदार्थस्वरूपं स्वतत्त्वं न स्यात् तदा शशशृङ्गरूपता तेषां भवेत् अर्थक्रियाऽसामर्थ्यात्, ततश्च कथं सदुपलम्भकप्रमाणगम्यता तेषाम्। अथ अर्थक्रियासमर्थं रूपं तेषां विद्यते तदा ते तद्रूपा एव, भेदान्तरप्रतिक्षेपमात्रजिज्ञासायां 'तेषामस्तित्वम्' इत्येवं यदि व्यपदेशं व्यतिरेकविभक्त्या समासादयन्ति तदा न कश्चिद् विरोधः। न हि तदव्यतिरिक्तमपि स्वरूपं बुद्ध्याऽपकृष्य ततो व्यतिरिक्तमिव अभिधीयमानं विरोधभाग् भवति, इच्छामात्रानुविधायित्वाद् वाच उत्पाद्यकथाश्रयातिसुन्दरपदार्थवचनवत्।

भिन्नकर्तृकत्वाद्यनुमानमपि असंगतम्, यतो यदि अप्राप्तपटव्यपदेशेभ्यस्तन्तुभ्यः प्राक्तनावस्थेभ्यो भेदः पटस्यात्र साध्यते[1] तदा सिद्धसाधयताप्रसक्तिः सर्वभावानां क्षणिकत्वेन तद्विलक्षणपटाख्यपदार्थानुत्पादेऽपि प्रतिक्षणं भिन्नत्वात्। अथ पटावस्थायां ये तन्तवस्तेभ्यः पटस्य भेदः साध्यस्तदा हेतोर्नामसिद्धता न हि तदवस्थाभावितन्तुभ्यः पटस्य भेदाप्रसिद्धौ भिन्नकर्तृकत्वादयो धर्माः सिद्धिमासादयन्ति। न च तत्सिद्धिः इदानीमेव तत्सिद्धये साधनस्योपन्यासात्। न च 'तन्तवः' 'पटः' इति च संज्ञामात्रात् पदार्थानां भेदसिद्धिः, संज्ञान्तरस्य प्रयोजनान्तरवशेनापि संकेतनात्। तथाहि—योषित्कर्तृकास्तन्तवः शीतापनोदाद्यर्थाऽसमर्थाः तन्तुशब्दसमावेशभाजः, कुविन्दकर्तृका विशिष्टावस्थाप्राप्ताः प्रावरणाद्यर्थक्रियासमर्थाः पटव्यपदेशसमावेशिनस्तदर्थक्रियाप्रतिपादनाय व्यवहारिस्तथा तत्र संकेतकरणात् अन्यथा गौरवाऽशक्ति-वैफल्यदोषप्रसङ्गात्। तथाँहि—यदि यावन्तो भावा विवक्षितैककार्यनिर्वर्तनसमर्थास्तेषु तावन्तः शब्दा निवेश्यन्ते तदा गौरवदोषः, न चैषामसाधारणं रूपं निर्देष्टुं शक्यमिति अशक्तिदोषः, उत्प्रेक्षितसामान्याकारेण निर्देशे वरं 'पटः' इत्येकयैव श्रुत्या प्रतिपादनं कृतम् न च किञ्चित् फलमस्य प्रत्येकं पृथगभिधानप्रयासस्य पश्याम इति वैफल्यदोषः। सामस्त्येन त्वभिधाने सति व्यवहारलाघवादिर्गुण इत्येकार्थक्रियाकारिषु अनेकेषु एकशब्दसंकेत उपपन्नः सकलवस्तुविवक्षायां 'जगत्' 'त्रिभुवन' 'विश्व' आदिशब्दवत्। एवम् एकवचनादिकं सांकेतिकं व्यवहारलाघवार्थमुपादीयमानं न वास्तवं तयोर्भेदं प्रसाधयति। विशिष्टावस्थाप्राप्तानां चाणूनामिन्द्रियग्राह्यत्वाद् अतीन्द्रियत्वमसिद्धमिति न अवयव्यभावे प्रतिभासविरतिप्रसक्तिर्दूषणम्[2] नँ हि सर्वदैव इन्द्रियातिक्रान्तस्वरूपाः परमाणवः क्षणिकवादिभिरभ्युपगम्यन्ते तेषां सर्वदैक-

१ पृ० ६५९ पं० ७।

२ "प्रथमेभ्यश्च तन्तुभ्यः पटस्य यदि साध्यते। भेदः साधनवैफल्यं दुर्निवारं तदा भवेत्॥
प्राप्तावस्थाविशेषा हि ये जातास्तन्तवोऽपरे। विशिष्टार्थक्रियासक्ताः प्रथमेभ्योऽविलक्षणाः"॥
—तत्त्वसं० का० ५७९–५८० पृ० १९४।

३–ध्यते तत् सि–भां० मां०। "यदि प्रथमावस्थाभाविभ्योऽसमधिगतपटाख्यानेभ्यस्तन्तुभ्यः पटस्य भेदः साध्यते तदा सिद्धं साध्यते"—तत्त्वसं० पञ्जि० पृ० १९४ पं० १४।

४ "एककार्योपयोगित्वज्ञापनाय पृथक्श्रुतौ। गौरवाऽशक्तिवैफल्यदोषत्यागाभिवाञ्छया॥
साकल्येनाभिधानेन व्यवहारस्य लाघवम्। मन्यमानैः कृता येषु वागेका व्यवहर्तृभिः॥
तेभ्यः समानकालस्तु पटो नैव प्रसिध्यति। विभिन्नकर्तृसामर्थ्यपरिमाणादिधर्मवान्"॥
—तत्त्वसं० का० ५८१–५८३ पृ० १९४।

५ "यावता स एवायं तन्तुव्यतिरेकी पटो न सिद्धः तद्भेदस्यैव प्रसाधयितुं प्रस्तुतत्वात्"
—तत्त्वसं० पञ्जि० पृ० १९४ पं० २७—।

६ "न च 'पटः' 'तन्तवः' इति संज्ञामात्राद् वस्तूनां भेदः"—तत्त्वसं० पञ्जि० पृ० १९५ पं० १।

७ "तथाहि—तत्र यावन्तः पदार्था विवक्षितैककार्यसाधनयोग्यास्तावन्त एव शब्दाः प्रयोक्तव्या इति गौरवदोषः। न चाप्येषामसाधारणं रूपं शक्यं निर्देष्टुमित्यशक्तिदोषः। उत्प्रेक्षितसामान्याकारेण च निर्देशे क्वमेकयैव श्रुत्या प्रतिपादनम् न चास्य पृथक्पृथक्प्रतिपादनप्रयासस्य किञ्चित् फलमुपलभ्यते इति वैफल्यदोषः"—तत्त्वसं० पञ्जि० पृ० १९५ पं० ७–१०।

८ "सामस्त्येन त्वभिधाने कृते सति व्यवहारलाघवं गुणः"—तत्त्वसं० पञ्जि० पृ० १९५ पं० ११।

९ पृ० ६५९ पं० १२ टि० ७।

१० "अन्योन्याभिसराश्चैवं ये जाताः परमाणवः। नैवातीन्द्रियता तेषामन्यानां(**मन्येषां**) गोचरत्वतः॥
नीलादिः परमाणूनामाकारः कल्पितो निजः। नीलादिप्रतिभासा च वेद्यते चक्षुरादिधीः"॥
—तत्त्वसं० का० ५८४–५८५ पृ० १९५।

स्वभावताविरहात्। ततः परस्पराविनिर्भागवर्तितया सहकारिवशादुत्पन्नाः परमाणव एव अध्यक्षविषयतामुपयान्तीत्यभ्युपगन्तव्यम् अन्यथा विजातीयानां द्रव्याऽनारम्भकत्वात् पौर्वकतसोपल-हेम-सूतादेरुपलम्भो न स्यात्। न च तत्र संयोगस्योपलभ्यता, अदृष्टाश्रयस्य तस्यापि उपलम्भाविषयत्वात् वाय्वाकाशसंयोगवत्। ननु पौर्वापर्यादिदिग्भेदेन परमाणवो व्यवस्थिताः न च ते तद्रूपेण उपलभ्यन्त इति कथमध्यक्षतैषाम्? न; सर्वाकारानुभवेऽपि यत्रैवांशे अभ्यासादिकारणसद्भावान्नि-५श्चयस्तत्रैवाध्यक्षविषयताव्यवस्थापनात् अन्यत्र तु गृहीतस्यापि व्यवहारायोग्यत्वेन निश्चयानुत्पत्तेरगृहीतकल्पत्वात्। ननु अवयव्यभावे बहुषु परमाणुषु अक्षव्यापारेण 'एकः पटः' इति कथं प्रत्ययः? न; अनेकसूक्ष्मतरपदार्थसंवेदनतः 'एकः' इति विभ्रमोत्पत्तेः प्रदीपादौ नैरन्तर्योत्पन्नसदृशापरापरज्वालादिपदार्थसंवेदनेऽपि एकत्वविभ्रमवत्। ननु भेदेन अनुपलक्ष्यमाणाः परमाणवः कथमध्यक्षाः? न; विवेकेन अनवधार्यमाणस्य अनध्यक्षत्वे प्रदीपादौ पूर्वापरविभागेन अनुपलक्ष्यमाणे अनध्यक्षता-१०प्रसक्तेः अवयवविवेकेन वाऽगृह्यमाणोऽपि अवयवी कथं तथाप्रत्यक्षत्वेनेष्टः?

यदि च नीलादिनिर्भासे नाऽणवः प्रतिभान्ति तदा बाह्यार्थवादिना नीलादिज्ञानं निर्विषयं वाऽभ्युपगम्येत, सविषयं वा? न तावन्निर्विषयम्, विज्ञानमात्रताप्रसक्तेः। सविषयत्वेऽपि नात्ममात्रविषयम्, विज्ञानवादप्रसक्तेरेव। बाह्यविषयत्वेऽपि नीलादिर्विषयः स्थूलरूपतया प्रतिभासमान एकः, अनेको वा? एकोऽपि अवयवैरारब्धः, अनारब्धो वा? तत्र न तावत् अयमुभयरूपोऽपि एको १५युक्तः, स्थूलस्य एकस्वभावत्वविरोधात्। तथाहि-यदि स्थूलमेकं स्यात् तदा एकदेशरागे सर्वस्य रागः प्रसज्येत, एकदेशाऽऽवरणे च सर्वस्य आवरणं भवेत् रक्ताऽरक्तयोः आवृताऽनावृतयोश्च भवदभ्युपगमेन एकत्वात्। न च परस्परविरुद्धधर्माध्यासेऽपि एकत्वं युक्तम् अतिप्रसङ्गात्, तथाऽभ्युपगमे वा विश्वमेकं द्रव्यं स्यात् ततश्च सहोत्पत्त्यादिप्रसङ्गः। न चैकदेशावरणे सर्वमावृतमुपलभ्यते इत्यध्यक्षविरोधः। अनुमानविरोधोऽपि। तथाहि-यद् विरुद्धधर्माध्यासितं न तद् एकम्,२०यथा अश्व-महिषादिकमुपलभ्यमानाऽनुपलभ्यमानस्वरूपम्, आवृताऽनावृतस्वरूपेण च विरुद्धधर्माध्यासितं स्थूलमिति व्यापकविरुद्धोपलब्धिः। सर्वस्य एकत्वप्रसङ्गो विपर्यये बाधकं प्रमाणम्। "एकस्मिन् भेदाभावात् सर्वशब्दप्रयोगानुपपत्तिः" [ ] इति उद्द्यो-

१ "पौर्वापर्यविवेकेन यद्यप्येषामलक्षणम्। तथाऽप्यध्यक्षताऽबाधा पानकादाविव स्थिता"॥
—तत्त्वसं० का० ५८६ पृ० १९५।

२ "तथाहि—पानके तप्तोपले सूतहेमादौ च मिश्रे परमाणव एव तथोपलभ्यन्ते"—तत्त्वसं० पञ्जि० पृ० १९६ पं० २।

३ "सर्वेषामेव वस्तूनां सर्वव्यावृत्तिरूपिणाम्। दृष्टावपि तथैवेति न सर्वाकारनिश्चयः॥
अकल्पनाक्षगम्येऽपि निरंशेऽर्थस्य लक्षणे। यद्भेदव्यवसायेऽस्ति कारणं स प्रतीयते"॥
—तत्त्वसं० का० ५८७–५८८ पृ० १९६।

४ "समानज्वालासंभूतेर्यथा दीपेन विभ्रमः। नैरन्तर्यस्थितानेकसूक्ष्मवित्तौ तथैकधा"॥
—तत्त्वसं० का० ५८९ पृ० १९७।

५ "विवेकालक्षणात् तेषां नो चेत् प्रत्यक्षतेष्यते। दीपादौ सा कथं दृष्टा किं वेष्टोऽवयवी तथा"॥
—तत्त्वसं० का० ५९० पृ० १९७।

६ "एतावत्तु भवेदत्र कथमेषां न निश्चये। नीलादिपरमाणूनामाकार इति गम्यते॥
तदप्यकारणं यस्मान्नैव ज्ञानमगोचरम्। न चैकस्थूलविषयं स्थौल्यैकत्वविरोधतः"॥
—तत्त्वसं० का० ५९१–५९२ पृ० १९७।

७ "स्थूलस्यैकस्वभावत्वे मक्षिकापदमात्रतः। पिधाने पिहितं सर्वमासज्येताऽविभागतः॥
रक्ते च भाग एकस्मिन् सर्वं रज्येत रक्तवत्। विरुद्धधर्मभावे वा नानात्वमनुषज्यते"॥
—तत्त्वसं० का० ५९३–५९४ पृ० १९८।

तंकरः। तथाहि–सर्वशब्दोऽनेकार्थविषयः, न च अवयवी नानात्मा इति कथं तत्र सर्वशब्दप्रयोगः येन एकदेशावरणे सर्वावरणप्रसक्तिरित्युच्येत? असदेतत्; यतो य एव वस्त्रादयो भावा लोके प्रसिद्धास्त एव भवद्भिरपि अवयवित्वेन कल्पिताः, तत्र च 'सर्वं वस्त्रं रक्तम्' इत्यादिको लोके सर्वैकशब्दप्रयोगः प्रसिद्ध एवेति कथं तत्र तत्प्रयोगानुपपत्तिः? यदर्थविवक्षायां रक्तादिशब्दप्रयोगो लोके तस्यामेव अस्माभिरपि तत्प्रतीतिमनुसृत्य भवतां विरोधप्रतिपादनाय 'सर्व'आदिशब्दप्रयोगः क्रियते इति कथमस्यानुपपत्तिः? किञ्च, स्थूलस्य एकत्वमभ्युपगच्छतो भवत एव अयं दोषः नास्माकम् तदनभ्युपगमात् । न च पटकारणेषु तन्तुषु उपचारतः पटाभिधानप्रवृत्तेः 'सर्व'आदिशब्दप्रयोगानुपपत्तिर्दोषः परस्यापि न भविष्यतीति वक्तव्यम्, एवं सर्वदैव बहुवचनप्रयोगापत्तेः । न हि भवदभ्युपगमेन बहुषु एकवचनमुपपत्तिमत् । न च अवयविगतां संख्यामादाय पटादिशब्दस्तदवयवेषु तन्त्वादिषु अपरित्यक्तात्माभिधेयगतलिङ्गादिर्वर्तत इति वाच्यम्, अस्य व्यपदेशस्य गौणत्वे स्खलद्वृत्तितयाऽगौणाद् भेदप्रसक्तेः न चासावस्ति । तथाहि—'रक्तं सर्वं वस्त्रम्' इत्यत्र नैवं बुद्धिः–'न वस्त्रं रक्तम्, किन्तु तत्कारणभूतास्तन्तवः' इति । किञ्च, भेदेनोपलब्धयोर्गो-वाहीकयोर्मुख्योपचरितशब्दविषयता संभवति । न च अवयवाऽवयविनोः कदाचिद् भेदेनोपलब्धिरिति नात्रोपचरितशब्दप्रयोगो युक्तः ।

शंकरस्वामी अत्राह—" 'वस्त्रस्य रागः' कुङ्कुमादिद्रव्येण संयोग उच्यते, स च अव्याप्यवृत्तिः तत एकत्र रक्ते न सर्वस्य रागः न च शरीरादेरेकदेशावरणे सर्वस्य आवरणं युक्तम्" [ ] इति, असदेतत्; यतो यदि पटादिर्निरंशमेकं द्रव्यम् तदा किं कुङ्कुमादिना तत्र अव्याप्तम् येन

---

१ एतदुद्द्योतकरमतं वार्तिके शब्दान्तरेणेत्थं प्रतिभाति—"यत् पुनरेतद् अवयवी अवयवेषु वर्तमान एकदेशेन वर्तते कृत्स्नो वा वर्तत इति ? तत्र एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ ११ ॥

एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः । कृत्स्नमिति च एकदेश इति च भेदविषयावेतौ शब्दौ, न चैतावेकस्मिन्नुपपन्नौ—अनेकस्याशेषता कृत्स्नशब्दस्यार्थः अशेषस्य कस्यचिदभिधानमेकदेशशब्दस्य । न चैतद् इहोपपद्यते इति । तस्मान्नावयविनि कृत्स्नशब्दो नाप्येकदेशशब्द इति"—४-२-११ न्यायवा० पृ० ५०५ पं० ४–१२ ।

"एकस्मिन् कृत्स्नैकदेशशब्दासंभवादप्रश्नः" इत्याद्यपि अवयवसाधनवार्तिकमत्रावगन्तव्यम्—न्यायवा० पृ० २१४ पं० १३—।

"उद्द्योतकरस्त्वाह—एकस्मिन् भेदाभावात् सर्वशब्दप्रयोगानुपपत्तिरिति"—तत्त्वसं० पञ्जि० पृ० १९८ पं० १४ ।

२ "ननु चैकस्वभावत्वात् सर्वशब्दोऽत्र किंकृतः । स ह्यनेकार्थविषयो नानात्मावयवी न च" ॥
—तत्त्वसं० का० ५९५ पृ० १९८ ।

३ "ननु ये लोकतः सिद्धा वासो–देह–नगादयः । त एवावयविलेन भवद्भिरुपवर्णिताः ॥
रक्तं वासोऽखिलं सर्वं निःशेषं निखिलं तथा । तत्रेच्छामात्रसंभूतमिति सर्वं प्रयुज्यते ॥
तथाविधविवक्षायामस्माभिरपि वर्ण्यते । सर्वं स्याद् रक्तमित्यादि निर्निबन्धा हि वाचकाः" ॥
—तत्त्वसं० का० ५९६–५९८ पृ० १९८ ।

४ "तत्र च लोके सर्वैकदेशशब्दयोः प्रवृत्तिः प्रसिद्धैव । तथा च वक्तारो भवन्ति—सर्वं वासो रक्तमित्यादेः"
—तत्त्वसं० पञ्जि० पृ० १९९ पं० १ ।

५ "अपि च भवत एवायं स्थूलस्यैकत्वमभ्युपगच्छतो दोषः नास्माकम् न हि अस्माभिः स्थूलस्यैकत्वमिष्यते"
—तत्त्वसं० पञ्जि० पृ० १९९ पं० ४–५ ।

६ "भाक्तं तदभिधानं चेद् वचोभेदः प्रसज्यते । न च बुद्धेर्विभेदोस्ति गौण–मुख्यतयेष्टयोः" ॥
—तत्त्वसं० का० ५९९– पृ० १९९ ।

७ "ननु चेत्यादिना शंकरस्वामिनः परिहारमाशङ्कते—
" ननु चाव्याप्यवृत्तित्वात् संयोगस्य न रक्तता । सर्वस्यासज्यते नापि सर्वमावृतमीक्ष्यते" ॥
—तत्त्वसं० का० ६०० पृ० १९९ ।

८ "ननु चानंशके द्रव्ये किमव्याप्तं व्यवस्थितम् । स्वरूपं तदवस्थाने भेदः सिद्धोऽत एव वा ॥
बहुदेशस्थितिस्तेन नैवैकस्मिन् कृतास्पदा । ततः सिद्धा पटादीनामणुभ्योऽनेकरूपता" ॥
—तत्त्वसं का० ६०१–२ पृ० १९९–२०० ।

९ **पटादि नि**–वा० बा० । "यदि हि पटादिरेकमेव द्रव्यम्"—तत्त्वसं० पञ्जि० पृ० २०० पं० ३ ।

संयोगोऽव्याप्यवृत्तिर्भवेत्? अथ अव्याप्तमपि किञ्चिद् रूपं तत्रावस्थितं तदा तयोर्भेदः व्याप्ताऽव्याप्तयोर्विरुद्धधर्माध्यासत एकस्वभावत्वायोगात् । न च पृथुतरदेशावस्थानमेकस्य युक्तम् निरंशत्वात्, अन्यथा सर्वत्र स्थूलसूक्ष्मादिभेदो न स्यात् एकत्वेन अविशेषात् । न चाल्पबह्ववयवारम्भादिकृतोऽसौ विशेषोऽवयवानाम् तथाभेदेऽपि अवयविनां निरंशतया परस्परं विशेषाभावात्, अवयवाल्पबहुत्वग्रहणकृते च स्थूलादिव्यवहारे अवयवमात्रमेव अभ्युपगतं दृश्यत्वेन स्यात्[५] स्थूलादिव्यतिरेकेण अन्यस्य अदृश्यमानत्वात् । किञ्च, अवयवाल्पबहुत्वकृते तथाभेदे अवयवा एव तथा तथा उत्पद्यमाना अल्पबहुतराः स्थूलसूक्ष्मादिव्यवस्थानिबन्धनं भविष्यन्ति किं तदारब्धावयविकल्पनया तस्य कदाचिदपि अदृष्टसामर्थ्यत्वात्? किञ्च, अव्याप्यवृत्तिः संयोग इति यदि 'सर्वं द्रव्यं न व्याप्नोति' इत्ययमर्थस्तदा द्रव्यस्य 'सर्व'शब्दाविषयत्वाभ्युपगमाद् अयुक्तः । अथ तदेकदेशवृत्तिः, तदसंगतम्; तस्य एकदेशासंभवात् । न च 'तदारम्भके अवयवे वर्तते' इत्यर्थप्रकल्पना, अवयवानामेव रक्तत्वात् तदवयविरूपस्य अरक्तत्वप्रसक्तेर्युगपद् रक्ताऽरक्तरूपद्वयोपलब्धिः प्रसज्येत। किञ्च, तदारम्भकोऽपि अवयवो यदि अवयविरूपस्तदा संयोगस्य अव्याप्यवृत्तितया तत्रापि एकदेशवृत्तित्वमिति तुल्यः पर्यनुयोगः । अथ अणुरूपस्तदा अणूनामतीन्द्रियत्वात् तदाश्रितः संयोगोऽप्यतीन्द्रिय एवेति न रक्तोपलम्भो भवेत् । न च यथा अङ्गुलिरूपस्य आश्रयोपलब्धावेवोपलब्धिर्व्याप्तिस्तथा संयोगस्य आश्रयोपलब्धावेवोपलब्धिर्न विद्यते इति अव्याप्यवृत्तिरसावुच्यते इति वक्तव्यम्, संयोगस्यापि आश्रयानुपलब्धावनुपलब्धेः अन्यथा घट-पिशाचसंयोगस्यापि उपलब्धिः स्यात्। एवं च अङ्गुलिरूपवद् रागस्यापि अदृष्टाश्रयस्य अनुपलब्धेराश्रयोपलब्धावेवोपलब्धिरिति व्याप्यवृत्तिरसावपि स्यात्। अथ अरक्तेष्ववयवेषु समवेतस्य द्रव्यस्योपलब्धावपि न रागस्य संयोगस्वभावस्योपलब्धिरित्याश्रयोपलब्धौ नास्योपलब्धिरित्यव्याप्यवृत्तित्वम्, न; रक्तारक्तावयवसमवेतस्य अवयविन एकत्वात् रक्तेऽप्यवयवे रागस्य तद्द्वारेण अनुपलब्धिप्रसङ्गात् आश्रयोपलम्भेऽपि तस्याऽनुपलम्भात्[२०]। न चान्यः संयोगग्रहणोपायः आश्रयोपलम्भात् समस्ति ततो नैकरूपो विषयो युक्तः। अनेकरूपोऽपि अणुसंचयात्मक एव सामर्थ्यात् सिद्धः विद्यमानावयवस्य एकत्वायोगात् । ततः पटादीनां परमाणुरूपत्वाद् नीलादिः परमाणूनामाकारः सिद्धः स्थूलरूपस्यैकस्य अपरस्य विषयस्यासंभवात्[२५]। न च 'परमाणुः' इति व्यपदेशः स्थूलस्यैकस्याऽभावे अयुक्तः, कल्पितस्थूलापेक्षयाऽपि तद्व्यपदेशस्य संभवात्। ततो न स्थूलमेकं द्रव्यमवयवाऽनारब्धमपि घटते तदारब्धं तु सुतरां संभवि। तथा च–यद् अनेकम् न तद् एकद्रव्यानुगतम्, यथा घट-कुट्यादयः, अनेके च तन्त्वादयः इति व्यापकविरुद्धोपलब्धिः। यद्वा–यद् एकम् न तद् अनेकद्रव्याश्रितम्, यथा एकपरमाणुः, एकं च अवयविसंज्ञितं द्रव्यमिति व्यापकविरुद्धोपलब्धिप्रयोगः प्रसङ्गसाधनरूपः। प्रयोगद्वयेऽपि अवयविनोऽवयवेषु वृत्त्यनुपपत्तिर्विपर्यये बाधकं प्रमाणम् । सा च एकावयवक्रोडीकृतेन वा स्वभावेन

---

१ "तेषामवयवाल्पबहुत्वग्रहणकृते विशेषेऽवयवमात्रमेवाभ्युपगतं स्यात् तत्रैव स्थूलादिव्यवहारात् ततश्चाणुमात्रमेव दृश्यत्वेनाभ्युपेतं स्यात्। स्थूलसूक्ष्मा(क्ष्म ?)व्यतिरेकेणान्यस्य(स्या ?)दृश्यमानत्वात्"—तत्त्वसं० पञ्जि० पृ० २०० पं० ११–१३ ।

२–**लब्धिव्या**–वा० बा० आ० । "स्यान्मतं यथा व्याप्तिरङ्गुलिरूपस्याश्रयोपलब्धावेवोपलब्धिरुच्यते"
—तत्त्वसं० पञ्जि० पृ० २०० पं० १९–२० ।

३ पृ० ६५९ पं० १२ टि० ७ ।

४ "अविज्ञातार्थतत्त्वस्तु पिण्डमेकं च मन्यते । लोकस्तत्कल्पितापेक्षः परमाणुरिहोच्यते ॥
निमित्तनिरपेक्षा वा संज्ञेयं तादृशी स्थिता । सङ्केतान्वयिनी यद्वन्निर्वित्तेऽपीश्वरश्रुतिः" ॥
—तत्त्वसं० का० ६०३–६०४ पृ० २०१ ।

५ "एकावयव्यनुगता नैव तन्तु–करादयः । अनेकत्वाद् यथा सिद्धाः कट–कुट्य–कुटादयः ॥
यदि वाभिमतं द्रव्यं नानेकावयवाश्रितम् । एकत्वादणुवद् वृत्तेरयुक्तिर्बाधिका प्रमा" ॥
—तत्त्वसं० का० ६०५–६०६ पृ० २०१ ।

६ "तद्धयेकवृत्तिभाजैव रूपेणावयवान्तरे । वर्तेत यदि वाऽन्येन न प्रकारान्तरं यतः ॥
तत्र तेनैव नान्यत्र वृत्तिरस्यावकल्पते । तेन क्रोडीकृतेन नान्यथा तत्र वृत्तिमत्" ॥
—तत्त्वसं० का० ६०७–६०८ पृ० २०१–२०२ ।

अवयवी अवयवान्तरे वर्तते, उत स्वभावान्तरेण प्रकारान्तरासंभवात्? यदि तेनैव इति पक्षः, स न युक्तः; तस्य तेनैव अवयवेन क्रोडीकृतत्वात् अन्यत्र वर्तितुमशक्तेः, शक्तौ वा तत्राऽवयवे तस्य सर्वात्मना वृत्त्यनुपपत्तिः अपरस्वभावाभावान्न तस्य अपरावयववृत्तिस्वभावः, तद्भावे वा एकत्वहानिप्रसक्तेः । तथाहि-यत् एकक्रोडीकृतम् न तत् तदैव अन्यत्र प्रवर्तते, यथा एकभाजनक्रोडीकृतमाम्रादि न तदैव भाजनान्तरमध्यमध्यास्ते, एकावयवक्रोडीकृतं च अवयविस्वरूपम् इति व्यापकविरुद्धोपलब्धिः । एकावयवसंबद्धस्वभावस्य अतद्देशावयवान्तरसंबद्धस्वभावताऽभ्युपगमे तदवयवानामेकदेशताप्रसक्तिर्विपर्यये बाधकं प्रमाणम् । एकदेशतायां च ऐकात्म्यम् अविभक्तरूपत्वात्, विभक्तरूपावस्थितौ च एकदेशत्वं न स्यात् । अथ स्वभावान्तरेण अवयवान्तरे वृत्तिस्तदा एकोऽनेकवृत्तिर्न स्यात् स्वभावभेदात्मकत्वाद् वस्तुभेदस्य अन्यथा तदयोगात् ।

"'अवयवी अवयवेषु वर्तते' इति समवायरूपा प्राप्तिरुच्यते" [ ] इति उद्द्योतकराऽभ्युपगमेऽपि 'किमेकावयवसमवेतेनैव स्वभावेन अवयवान्तरेषु वर्तते, अथ अन्येन' इति विचारः समान एवेति कृत्स्नैकदेशशब्दानुच्चारणेऽपि वृत्त्यनुपपत्तिर्युक्ता, तदुच्चारणेऽपि सा युक्तैव । तथाहि-यदि सर्वात्मना प्रत्येकमवयवेषु अवयवी वर्तेत तदा यावन्तोऽवयवास्तावन्त एव

१ "नैव धात्र्यन्तरक्रोडमध्यास्ते हि यथा शिशुः । एकक्रोडीकृतं द्रव्यं नाश्रयेत तथाऽपरम्" ॥
—तत्त्वसं० का० ६०९ पृ० २०२ ।

२ "तत्संबद्धस्वभावस्य ह्यतद्देशेऽपि वृत्तितः । प्राप्तं तदेकदेशत्वमैकात्म्यं चाविभागतः ॥
अन्येनैवात्मना वृत्तौ नैकोऽनेकव्यवस्थितः । सिध्येत् स्वभावभेदस्य वस्तुभेदात्मकत्वतः" ॥
—तत्त्वसं० का० ६१०-६११ पृ० २०२ ।

३ "तस्माद् आश्रयाश्रितधर्मनिर्देशमात्रमवयव्यवयवेषु वर्तत इति । का पुनरियं वृत्तिः? एकस्यानेकत्राश्रयाश्रितभावलक्षणा प्राप्तिः"—न्यायवा० पृ० २१४ पं० २२—तथा पृ० ५०५ पं० २० ।

"उद्द्योतकरस्त्वाह—आश्रयाश्रितधर्मनिर्देशमात्रमेतत् अवयव्यवयवेषु प्रवर्तत इति । आश्रितभावलक्षणा हि समवायरूपा प्राप्तिरुच्यत इति ।"—तत्त्वसं० पञ्जि० पृ० २०२ पं० २६—।

४ "समवायात्मिका वृत्तिस्तस्य तेष्विति चेन्ननु । तस्यामपि विचारोऽयं कोपेनैव प्रधावति" ॥
—तत्त्वसं० का० ६१२ पृ० २०३ ।

५ "यद्वा सर्वात्मना वृत्तावनेकत्वं प्रसज्यते । एकदेशेन चानिष्टा नैको वा न क्वचिच्च सः" ॥
—तत्त्वसं० का० ६१३ पृ० २०३ ।

"अपि चैकोऽनेकत्र वर्तत इति प्रतिजानानो नानुयोक्तव्यः कस्मात्? उभयेन व्याघातात्-एकमनेकत्र वर्तते इति ब्रुवाणः किमेकदेशेन वर्तते उत सर्वात्मना इति नानुयोक्तव्यः । कस्मात्? उभयेन व्याघातात् यदि एकमनेकत्र वर्तमानं प्रत्यवयवं सर्वात्मना वर्तते नैकमनेकत्र वर्तते अनेकमनेकत्र वर्तत इत्यापन्नम् । एवं चानुयोगेऽधिकरणव्याघातः । अथैकमनेकत्र वर्तमानं प्रत्यवयवमेकदेशेन वर्तते तथापि नैकमनेकत्र वर्तत इति प्राप्तम् अनेकमनेकत्र वर्तत इत्यापन्नम् । ये च त(त्र) एकदेशाः प्रत्येकमवयवेषु वर्तन्ते तेऽवयविन इति प्राप्तम् । एतस्मिन् पक्षे नैकमनेकत्र वर्तते किं तर्हि? अनेकमनेकत्रेति । अथ प्रत्येकं परिसमाप्त्या वर्तत इति अयमर्थोऽनेकमनेकत्र वर्तत इति" इत्यादि—न्यायवा० पृ० २१५ पं० ३-१३ । तथा

"कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः ॥ ७ ॥

अवयवा अवयविनि वर्तमानाः कृत्स्नेन वर्तन्ते एकदेशेन वा? तत्र तावदवयवा अवयविनि कृत्स्ने न वर्तन्ते अवयवावयविनोः परिमाणभेदात् । अल्पपरिमाणोऽवयवो महापरिमाणश्चावयवीति अल्पपरिमाणेन महापरिमाणस्याव्याप्तिः एकद्रव्यश्च अवयवः प्राप्नोति एकावयवविवृत्तित्वात् । न चैकद्रव्यं द्रव्यमविनश्यदाधारमस्ति । नापि अवयव्येकदेशेन वर्तते न हि अस्यान्ये अवयवा एकदेशभूताः सन्ति । तस्मिन्नपि चैकदेशेन वर्तमानोऽवयवः किमेकदेशेन वर्तते कृत्स्नेन वेति पूर्ववत् प्रसङ्गः" इत्यादि
—न्यायवा० पृ० ५०३ पं० ९-१९ ।

अवयविनः प्रत्यवयवमेकदेशेन वृत्तिः कात्स्न्येन वा प्रकारान्तराभावात्? न तावदेकदेशेन वृत्तिः अवयवव्यतिरेकेणास्यैकदेशाभावात् । कात्स्न्येन वृत्तौ वा अवयवान्तरे वृत्त्यभावः एकावयवसंसर्गावच्छिन्ने स्वरूपे अवयवान्तराणामनवकाशात् तत्स्वरूपव्यतिरेकेण चास्य स्वरूपान्तराभावात्" इत्यादि—प्रशस्त० कं० पृ० ४२ पं० १७-२० ।

अवयविनः स्युः स्वभावभेदमन्तरेण प्रत्यवयवं तस्य सर्वात्मना वृत्त्यनुपपत्तेः । एवं च युगपदनेककुण्डादिव्यवस्थितबिल्वादिवद् अनेकावयव्युपलब्धिप्रसक्तिः । अथ एकदेशेन असौ तेषु वर्तते इति पक्षस्तदा अनवस्थाप्रसक्तिः तेषु अपि अवयवेषु वृत्तौ अपरैकदेशवृत्तिकल्पनया । अथ यैरेकदेशैरवयवी अवयवेषु वर्तते ते तस्य स्वात्मभूता इति नानवस्था तर्हि तद्वत् पाण्यादयोऽपि अवयवास्तस्य स्वात्मभूताः किं नाऽभ्युपगम्यन्ते? तथाऽभ्युपगमे चापरावयवप्रकल्पना न स्यात् अवयवप्रचयात्मकत्वात् तस्य ।

नन्विदं प्रसङ्गसाधनम्, स्वतन्त्रसाधनं वा? स्वतन्त्रसाधने अवयविनोऽप्रसिद्धेराश्रयासिद्धत्वादिदोषः । न च वृत्त्या परस्य सत्त्वं व्याप्तम् येन तन्निवृत्तौ तत्सत्त्वव्यावृत्तिर्भवेत् वृत्त्यभावेऽपि रूपादेः परेण सत्त्वाभ्युपगमात् । एकदेशेन सर्वात्मना वा अवयविनो वृत्तिप्रतिषेधे विशेषप्रतिषेधस्य शेषाभ्यनुज्ञानलक्षणत्वात् प्रकारान्तरेण वृत्तिरभ्युपगता स्यात् । यथा च वृत्तिद्वयमुपलम्भादभ्युपगम्यते तथा अवयविनि वृत्तेरुपलम्भात् प्रकारान्तरेण असौ किं नाभ्युपगम्यते? वृत्तिश्च समवायः तस्य सर्वत्रैकत्वात् निरवयवत्वाच्च कृत्स्नैकदेशशब्दाविषयत्वम् । अथ प्रसङ्गसाधनम् तदपि अवयविनः वृत्तेश्च अनुपलम्भेऽयुक्तम् । न च परस्य भवतो वा कात्स्न्यैकदेशाभ्यामनेकस्मिन् एकस्य वृत्तिरुपलब्धिगोचरः यस्या असंभवाद् अवयविद्रव्यमसत् स्यात् । अथ एवंभूता वृत्तिः क्वचिद् उपलब्धा तदा अवयविन्यपि सा भविष्यतीति न तत्प्रतिषेधो युक्तः, वृत्तिमात्रस्य चानुपलम्भे 'एकदेशेन सर्वात्मना वा' इति विशेषप्रतिषेधोऽनुपपन्नः सिद्धे धर्मिणि तस्योपपत्तेः धर्म्यसिद्धौ च तस्यैव प्रतिषेधो विधेयः तेनैतावदेव वक्तव्यम् 'वृत्तिरेव नास्ति' इति, न चैतदपि युक्तम्; अध्यक्षत एव अवयवेषु अवयविनो वृत्तिसिद्धेः । तथाहि—इन्द्रियव्यापारे सति 'इह तन्तुषु पटः' इति बुद्धिरबाधितरूपोपजायत एव । न च अबाधितरूपाया अस्या अप्रत्यक्षत्वं युक्तम् रूपादिस्वलक्षणग्राहिणोऽप्यध्यक्षस्य अनध्यक्षताप्रसक्तेः—अविशेषात्, असदेतत्; यतो नेदमस्माभिः स्वतन्त्रसाधनमभिधीयते किन्तु प्रसङ्गसाधनम्, तस्य च 'व्याप्यव्यापकभावसिद्धौ व्याप्याभ्युपगमो व्यापकाभ्युपगमनान्तरीयकः व्यापकनिवृत्तिर्वा व्याप्यनिवृत्त्यविनाभाविनी' इत्येतत्प्रदर्शनफलस्य प्रवृत्तिर्युक्तैव । व्याप्यव्यापकभावसिद्धिश्चात्र लोकप्रसिद्धैव भवताऽभ्युपगमनीया । लोकश्च कस्यचित् सर्वात्मना वृत्तिं कुत्रचिदभ्युपगच्छति, यथा-श्रीफलस्य कुण्डादौ, क्वचिच्च कस्यचिद् एकदेशेन, यथा-अनेकपीठाधिशयितस्य चैत्रादेः । यत्र च प्रकारद्वयं वृत्तेर्व्यावृत्तं तत्र वृत्तेरभाव एव कथं न व्याप्तिसिद्धिर्येनात्र प्रसङ्गसाधनस्यावकाशो न स्यात्? निरस्ता च प्रागेव अनेकस्मिन् एकस्य वृत्तिः न पुनः प्रतिपाद्यते । यच्च अध्यक्षत एव वृत्तिः सिद्धा 'इह इदम्' इति अक्षानुसारिबुद्ध्युत्पत्तेः, तदप्यसंगतम्; यतो न 'इह तन्तुषु पटः' इतिविकल्पिकाऽपि लोके बुद्धिः प्रवर्तते किं तर्हि? 'पटे तन्तवः' इति । न चाऽध्यक्षे तन्तुसमवेतं व्यतिरिक्तं पटादिद्रव्यमवभासते । न च विवेकेन अप्रतिभासमानस्य 'इह

१-मे वाप-वा० बा० । "एवं हि सति एकोऽवयवी न स्याद् अवयवप्रचयमात्ररूपत्वात् तस्य तथा च सति दृष्टपाण्यादिसमुदायमात्रात्मक एवास्तां वस्तु किमपरैस्तस्य स्वात्मभूतैरवयवैः परिकल्पितैः"—तत्त्वसं० पञ्जि० पृ० २०३ पं० १८-।

२ " 'स्वातन्त्र्येण' इत्यादिना शङ्करस्वामिनः परिहारमाशङ्कते—
स्वातन्त्र्येण प्रसङ्गेन साधनं यत् प्रवर्तते । स्वयं तदुपलब्धौ हि सत्यां संगच्छते न तु ॥
न च कात्स्न्यैकदेशाभ्यां वृत्तिः क्वचन लक्षिता । यस्या असंभवाद् द्रव्यमसत् स्यादपरोऽपि च ॥
दृष्टौ वा क्वचिदेतस्या द्रव्यादावनिवारणम् । अथ तस्मिन्नदृष्टौ तु भेदे प्रश्नो न युज्यते ॥
एतावत् तु भवेद् वाच्यं वृत्तिर्नास्तीति तच्च न । युक्तं प्रत्यक्षतः सिद्धेरिहेदमिति बुद्धितः ॥
प्रत्यक्षं न तदिष्टं चेद् बाधकं किञ्चिदुच्यताम् । रूपादिचेतसोऽपि स्यान्नैव प्रत्यक्षताऽन्यथा" ॥
—तत्त्वसं० का० ६१४-६१८ पृ० २०३-२०४ ।

३-दिदोषः बृ० आ० । "स ह्याह-स्वातन्त्र्येण प्रसङ्गमुखेन वा यत् साधनं क्रियते तत् स्वयमुपलब्धौ सत्यां संगच्छते अन्यथा ह्यसिद्धता दोषः स्यात्"—तत्त्वसं० पञ्जि० पृ० २०४ पं० ७-८ ।

४ "तदत्र वृत्तिर्नास्तीति प्रागभेदेन साधितम् । इहेत्यस्ति न च ज्ञानं तद्रूपाप्रतिभासनात्" ॥
—तत्त्वसं० का० ६१९ पृ० २०४ ।

५ पृ० ६६६ पं० १३ । ६ प्र० पृ० पं० १८ ।

इदं वर्तते' इति बुद्धिविषयता न हि विवेकेन अप्रतिभासमाने कुण्डादौ बदरादिके 'इह कुण्डे बदराणि' इति प्रत्ययः प्रादुर्भवति । यदपि[1] 'कात्स्न्यैंकदेशाभ्यां वृत्तिर्न क्वचिदुपलक्षिता' इति, तदप्यसंगतम्; बदरादेः[2] कुण्डादौ सर्वात्मना, वंशादेरेकदेशेन स्तम्भादौ वृत्तेरुपलक्षणात् । यदपि[3] उक्तमुद्द्योतकरेण—"एकस्मिन् अवयविनि कृत्स्नैकदेशशब्दप्रवृत्त्यसंभवात् अयुक्तोऽयं प्रश्नः—'किमेकदेशेन वर्तते, अथ कृत्स्नो वर्तते' इति । 'कृत्स्नम्' इति हि खल्वेकस्य अशेषाभिधानम्, 'एकदेशः' इति च अनेकत्वे सति कस्यचिदभिधानम्, ताविमौ कृत्स्नैकदेशशब्दौ एकस्मिन्नवयविनि अनुपपन्नौ" [२-१-३२ न्यायवा०] इति, तदपि प्रत्युक्तं प्राक्तनन्यायेनैव । तथा च 'कृत्स्नः पटः कुण्डे वर्तते, एकदेशेन वा' इत्येवं पटादिषु कृत्स्नैकदेशशब्दप्रवृत्तिर्दृश्यत एव । न चेयमुपचरिता, अस्खलद्वृत्तित्वात् । न च शब्दप्रवृत्त्यनुपपत्तिमात्रप्रेरणया वस्त्वर्थस्य प्रतिषेधः शक्यते विधातुम्, तत्र तच्छब्दाप्रवृत्तावपि व्याप्त्यव्याप्तिशब्दयोः प्रवृत्त्युपपत्तेः । तथाहि-'अवयवी अवयवेषु वर्तमानः प्रत्यवयवं किं व्याप्त्या वर्तते, उत अव्याप्त्या' इत्येवं विवक्षितार्थाभिधाने न कंचिद् दोषमुत्पश्यामः । तन्न नित्यानित्यरूपपृथिव्यादिचतुःसंख्यं द्रव्यमुपपत्तिमत्[4] ।

आकाशाख्यैकनित्यद्रव्यप्रसिद्धये शब्दं गुणत्वाल्लिङ्गत्वेन प्रतिपादयन्ति । तथा च परेषां प्रयोगः—ये विनाशित्वोत्पत्तिमत्त्वादिधर्माध्यासिताः ते क्वचिद् आश्रिताः, यथा घटादयः, तथा च शब्दाः, तस्मादेभिराश्रितैः क्वचिद् भवितव्यम्, यश्चैषामाश्रयः स पारिशेष्याद् आकाशः । तथाहि-नायं शब्दः पृथिव्यादीनां वायुपर्यन्तानां गुणः, अध्यक्षग्राह्यत्वे सति अकारणगुणपूर्वकत्वात्, ये तु पृथिव्यादीनां चतुर्णां गुणास्ते बाह्येन्द्रियाध्यक्षत्वे सति अकारणगुणपूर्वका न भवन्ति, यथा रूपादयः, न च तथा शब्दः । एवम् 'अयावद्द्रव्यभावित्वात्' 'आश्रयाद् भेर्यादेरन्यत्रोपलब्धेश्च' इत्यादयो हेतवो द्रष्टव्याः । स्पर्शवतां यथोक्तविपरीता गुणा उपलब्धाः । 'प्रत्यक्षत्वे सति' इति च विशेषणं परमाणुगतैः पाकजैः अनैकान्तिकत्वं मा भूत् इत्युपात्तम् । न च आत्मगुणः अहंकारेण विभक्तग्रहणात् बाह्येन्द्रियाध्यक्षत्वात् आत्मान्तरग्राह्यत्वाच्च, बुद्ध्यादीनामात्मगुणानां तद्वैपरीत्योपलब्धेः । न दिक्-काल-मनसाम् श्रोत्रग्राह्यत्वात् । अतः पारिशेष्याद् गुणो भूत्वा आकाशस्य लिङ्गम् । आकाशं च शब्दलिङ्गाविशेषात् विशेषलिङ्गाभावाच्च एकम् विभु च सर्वत्रोपलभ्यमानगुणत्वात् समवायित्वे सति अनाश्रितत्वाच्च द्रव्यम्, अकृतकत्वान्नित्यम् ।

२५ परा[5]ऽपरव्यतिकर-यौगपद्याऽयौगपद्य-चिर-क्षिप्रप्रत्ययलिङ्गः कालो द्रव्यान्तरम् । तथा[6]हि—

---

१ पृ० ६६७ पं० १३ तथा पं० ९ टि० २ ।

२ "कृत्स्नैकदेशशब्दाभ्यामयं चार्थः प्रकाश्यते । नैरंश्येनास्य किं वृत्तिः किं वा तस्यान्यथैव सा ॥
यथा पात्रादिसंस्थस्य श्रीफलादेर्यथाऽथवा । अनेकासनसंस्थस्य चैत्रादेरुपलक्षिता" ॥
—तत्त्वसं० का० ६२०-६२१-पृ० २०५ ।

३ "एकस्मिन् कृत्स्नैकदेशशब्दासंभवादप्रश्नः-किमवयव्येकदेशेन वर्तते अथ कृत्स्नेनैव वर्तत इति न युक्तः प्रश्नः-नावयवी कृत्स्नो नैकदेशः । कृत्स्नमिति खलु अनेकस्याशेषस्याभिधानम् । एकदेश इति चानेकत्वे सति कस्यचिदभिधानम् । ताविमौ कृत्स्नैकदेशशब्दावेकस्मिन्ननुपपन्नौ"इत्यादि—न्यायवा० पृ० २१४ पं० १३—। तथा पृ० ५०५ पं० ६-१२ ।
"वृत्त्यनुपपत्तेश्च नैकत्रावयवे कात्स्न्येनावयवी वर्तते । तेष्वपि कथं वर्तते ? अन्यैरेकदेशैः तेष्वपि अन्यैरिति नास्त्यन्यः" इत्यादि—न्यायमञ्ज० आ० ९ पृ० ५४९ पं० १२-१३ ।

४ "एवं वायुपर्यन्तं चतुर्विधं द्रव्यमपास्तम् आत्माख्यं तु प्रागेवात्मपरीक्षायां निरस्तम् । इदानीमाकाश-काल-दिग्-मनसां प्रतिषेधार्थमाह—"तत्त्वसं० पञ्जि० पृ० २०५ पं० २० ।

५ "समाश्रिताः क्वचिच्छब्दा विनाशित्वादिहेतुतः । घट-दीपादिवत् तच्च किल व्योम भविष्यति" ॥
—तत्त्वसं० का० ६२२ पृ० २०५ ।

६ "आदित्यादिक्रियाद्रव्यव्यतिरेकनिबन्धनम् । परापरादिविज्ञानं घटादिप्रत्ययो यथा ॥
वलीपलितकार्कश्यगत्यादिप्रत्ययादिदम् । यतो विलक्षणं हेतुः स च कालः किलेष्यते" ॥
—तत्त्वसं० का० ६२३-६२४ पृ० २०६ ।

७ "द्रव्यशब्देन वलीपलितादयो ग्रहीतव्याः । परः पिता अपरः पुत्रः युगपत् चिरम् क्षिप्रम् क्रियते कृतं करिष्यते चेति यदेतत् परापरादिज्ञानम्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २०६ पं० १४-१५ ।

'परः पिता' 'अपरः पुत्रः' 'युगपत्' 'अयुगपत्' वा तथा, 'चिरम्' 'क्षिप्रम्' वा 'कृतम्' 'करिष्यते' वा इति यत् पराऽपरादिज्ञानम् तत् आदित्यादिक्रिया-द्रव्यव्यतिरिक्तपदार्थनिबन्धनम्, तत्प्रत्ययविलक्षणत्वात्, घटादिप्रत्ययवत् । योऽस्य हेतुः स पारिशेष्यात् कालः । यतः न तावत् पराऽपरादिप्रत्ययः दिग्देशकृतोऽयम्, स्थविरे अपरदिग्भागावस्थितेऽपि 'परोऽयम्' इति प्रत्ययोत्पत्तेः । तथा, यूनि परदिग्भागावस्थितेऽपि 'अपरोऽयम्' इति ज्ञानप्रादुर्भावात् । न च वली-पलितादिकृतोऽयं प्रत्ययः, तत्कृतप्रत्ययवैलक्षण्येन उत्पत्तेः । नापि क्रियानिर्वर्तितः, तत्प्रतिभावितज्ञानवैलक्षण्येन संवेदनात् । तथा च सूत्रम्—"अपरस्मिन् परं युगपद् अयुगपत् चिरं क्षिप्रमिति काललिङ्गानि" [वैशेषिकद० २-२-६] इति । आकाशवदेव अस्यापि विभुत्व-नित्यत्वैकत्वादयो धर्मा अवगन्तव्याः ।

दिगपि एकादिधर्मोपेतं द्रव्यं प्रमाणतः सिद्धम् । तथाहि-मूर्तेष्वेव द्रव्येषु मूर्तं द्रव्यमवधिं कृत्वा 'इदमस्मात् पूर्वेण दक्षिणेन पश्चिमेन उत्तरेण पूर्वदक्षिणेन दक्षिणापरेण अपरोत्तरेण उत्तरपूर्वेण अधस्तात् उपरिष्टात्' अमी दश प्रत्यया यतो भवन्ति सा दिग् इति । तथा च सूत्रम्—"'अत इदम्' इति यतस्तद् दिशो लिङ्गम्" [वैशेषिकद० २-२-१०] इति । एते हि विशेषप्रत्यया न आकस्मिकाः संभवन्ति । न च परस्परापेक्षमूर्तद्रव्यनिमित्ताः, इतरेतराश्रयत्वेन उभयप्रत्ययाभावप्रसक्तेः । ततोऽन्यनिमित्तोत्पाद्यत्वासंभवाद् एते दिशो लिङ्गभूताः । दिशश्च विभुत्वैकत्व-नित्यत्वादयो धर्माः कालवद् अवगन्तव्याः । एतस्याश्च एकत्वेऽपि प्राच्यादिभेदेन नानात्वं कार्यविशेषाद् व्यवस्थितम् । प्रयोगश्चात्र-यदेतत् पूर्वाऽपरादिज्ञानम् तद् मूर्तद्रव्यव्यतिरिक्तपदार्थनिबन्धनम्, तत्प्रत्ययविलक्षणत्वात्, सुखादिज्ञानवत् इति ।

आत्मद्रव्यस्य च विभुत्वादिधर्मोपेतस्य पराऽभ्युपगतस्य प्रागेव प्रतिषेधः कृतः इति न तत्पूर्वपक्षः पुनः प्रदर्श्यते ।

मनोद्रव्यस्य तु युगपज्ज्ञानानुत्पत्तिर्लिङ्गम् । तथा च सूत्रम्—"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायद० १-१-१६] इति । अनेकेन्द्रियार्थसन्निधाने सत्यपि एकदा क्रमेण ज्ञानोत्पत्त्युप-

---

१ **अपरं परं** आ० हा० वि० । **अपरमपरं** वा० बा० ।
"तथा च सूत्रम्—अपरं परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि"—तत्त्वसं० पञ्जि० पृ० २०६ पं० २० ।
"तथा सूत्रम्—अपरस्मिन् परं युगपच्चिरं क्षिप्रमिति काललिङ्गानि"—न्यायकु० लि० पृ० १३९ द्वि० पं० १२ ।
"तथा च सूत्रम्—अपरस्मिन् परं युगपद् अयुगपत् चिरं क्षिप्रमिति काललिङ्गानि"—प्रमेयक० पृ० १६९ प्र० पं० ७ ।
गूजरातीप्रेस-बनारससंस्कृतसिरीझसत्कयोर्वैशेषिकदर्शनसंस्करणयोः चोखम्बासंस्कृतसिरीझगते च वैशेषिकसूत्रपाठे समान एव पाठो मुद्रितो दृश्यते । यथा—"अपरस्मिन्नपरं युगपच्चिरं क्षिप्रमिति काललिङ्गानि"-२-२-६ । गूजरातीप्रेसप्रकाशितानि तदुपस्कार-विवृति-भाष्याण्यपि तमेव पाठमनुसरन्ति । तत्र च पाठान्तरसूचिका टिप्पणी इत्थं दृश्यते—"बॉम्बेरायलआशिआटिकसोसाइटीसंज्ञकग्रन्थसंग्रहालयस्थलिखितप्राचीनपुस्तके तु 'अपरस्मिन् परम्' इति पाठः सूत्र उपलभ्यते । उपस्कारे च 'अपरस्मिन् परम्' इत्यनेन 'परस्मिन् परम्' इत्यपि द्रष्टव्यमिति"—गू० वै० पृ० ९८ ।

२ "पूर्वापरादिबुद्धिभ्यो दिगेवमनुमीयते ।"—तत्त्वसं० का० ६२५ पृ० २०६ ।

३ "तथा च सूत्रम्—इत इदमिति यतस्तद् दिशो लिङ्गम्-इति"—तत्त्वसं० पञ्जि० पृ० २०७ पं० ३ ।
"तथा च सूत्रम्—अत इदमिति यतस्तद् दिशो लिङ्गम्"—न्यायकु० लि० पृ० १४३ प्र० पं० १३ । प्रमेयक० पृ० १७० प्र० पं० १३ ।
गूजरातीप्रेस-बनारससंस्कृतसिरीझ-चोखम्बासिरीझसत्केषु संस्करणेषु तु "इत इदमिति यतस्तद् दिश्यं लिङ्गम्" इति मुद्रितं दृश्यते ।

४ पृ० १३४ पं० ३१ ।

५ "क्रमेण ज्ञानजात्या च मनसोऽनुमितिर्मता ॥
चक्षुरादिविभिन्नं च कारणं समपेक्षते । क्रमेण जाता रूपादिप्रतिपत्ती रथादिवत्" ॥
—तत्त्वसं० का० ६२५-६२६ पृ० २०६ ।

६ "तथा च सूत्रम्—युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्-इति—तत्त्वसं० पञ्जि० पृ० २०७ पं० १२ ।
एतस्य न्यायदर्शनीयसूत्रस्य भाष्यम्, वार्तिकम् न्यायवार्तिकतात्पर्यटीका चात्रानुसंधानीया ।
मनोनिरूपणपरं प्रशस्तपादभाष्यम् तत्कन्दल्यपि चात्रावबोद्धव्या—प्रशस्त० कं० पृ० ८९-९४ ।

लम्भाद् अनुमीयते इन्द्रियार्थव्यतिरिक्तं हेत्वन्तरमस्ति इति यत्सन्निधानाऽसन्निधानाभ्यां ज्ञानस्य उत्पत्त्यनुत्पत्ती भवतः । तथा च प्रयोगः—रूपाद्युपलब्धिः आत्मबाह्येन्द्रियार्थव्यतिरिक्तहेत्वन्तरापेक्षा, क्रमेण उपजायमानत्वात्, रथादिवत् ।

अत्र प्रतिविधीयते-यदि सामान्येन आश्रितत्वमात्रं शब्दानां साध्यते तदा सिद्धसाध्यता तेषां भूतकार्यतया तदाश्रितत्वात् कार्यस्य कारणप्रतिबद्धात्मलाभतया तदाश्रितत्वाभ्युपगमात् । अथ एक-नित्याऽमूर्त-विभुद्रव्यसमवेतत्वेन एषामाश्रितत्वं साध्यते तदा तथाभूतसाध्यान्वितत्वस्य दृष्टान्ते हेतोरभावात् अनैकान्तिकता हेतोः, प्रतिज्ञायाश्च अनुमानविरोधित्वम् । तथाहि-यदि नित्यैकव्यापिनभोद्रव्यसमवेताः शब्दा भवेयुस्तदा एकदोत्पन्नानेकशब्दवद् अन्यकाला अपि ते तदैव स्युः अविकलकारणत्वात् एकाश्रयत्वाच्च । न च सहकार्यपेक्षा नित्यस्य संभवति इति प्रतिपादितम् । नापि समवायित्वमनुपकारिणो युक्तम् अतिप्रसङ्गात् । ततोऽक्रमभावित्वप्रसङ्गो व्यवस्थितः । तत्कारणस्य नित्यत्वे व्यापित्वे च शब्दानां सर्वपुरुषैर्ग्रहणप्रसङ्गः । तथाहि-आकाशात्मकं श्रोत्रम् आकाशं च एकमेव इति तत्प्राप्तानां सर्वेषामपि श्रवणं स्यात् । न च निरवयवाकाशे अयं विभागः–'इदमात्मीयं श्रोत्रम्' 'इदं च परकीयम्' इति । अथ यदीयधर्माऽधर्माभिसंस्कृतकर्णशष्कुल्यवरुद्धं नभः तत् तस्य श्रोत्रमिति विभागः, अत एव नासिकादिरन्ध्रान्तरेण न शब्दोपलम्भः संजायते, तत्कर्णशष्कुलीविघाताद् बाधिर्यादिकं च व्यवस्थाप्यते इति, असदेतत्; अनंशस्य नभस एवंविधविभागानुपपत्तेः । न च पारमार्थिकविभागनिष्पाद्यं फलं परिकल्पितावयवविभागो निर्वर्तयितुं क्षमः अतिप्रसङ्गात् अन्यथा मलयजरसादिकमपि पावकप्रकल्पनया प्लोषादिकार्यं विदध्यात् । न च कल्पिततदवयववशादपि प्रतिनियतशब्दोपलम्भदर्शनान्नायं दोषः, शब्दोपलम्भकार्यस्य अन्यथा सिद्धत्वात् । न च 'संयोगस्य अव्याप्यवृत्तित्वकृता आकाशस्य देशाः' इति व्यपदेशः, प्रागेव अस्य प्रतिषिद्धत्वात् । अपि च, अनल-कर्णशष्कुल्यादयोऽपि समानदेशाः स्युः अभिन्नैकनभः–संसर्गित्वात् । तथाहि-येन एको वियत्स्वभावेन संयुक्तस्तेनैव अपरोऽपीति तद्देशभावी सोऽपि स्यात् तत्संयुक्तस्वभाववियत्संसर्गित्वात् तद्देशावस्थिताऽनलवत् । शब्दानामपि अत एव एकदेशत्वात् एकोपलम्भे सर्वोपलब्धिश्च स्यात् । दूरासन्नाद्यवस्थायिता तु भावानां प्रतीतिगोचरा विरोधिनी च भवेत् ।

दिक्-कालसाधनप्रयोगेष्वपि एते दोषाः–सामान्येन साधने सिद्धसाध्यता । विशेषसाधने हेतोरन्वयाद्यसिद्धिः अनुमानबाधितत्वं च प्रतिज्ञायाः इति-समानाः । तथाहि-पूर्वापरोत्पन्नपदार्थविषयपूर्वापरशब्दसंकेतवशोद्भूतसंस्कारनिबन्धनत्वात् प्रकृतप्रत्ययस्य कारणमात्रे साध्ये कथं न सिद्धसाध्यता? विशेषे च कथं नान्वयासिद्धिः? अनुमानबाधा च प्रतिज्ञायाः पूर्ववद् भावनीया । अत एव नेतरेतराश्रयदोषोऽपि पूर्वपक्षोदितो विशिष्टपदार्थसंकेतप्रभवत्वेऽस्य प्रत्ययस्य । किञ्च, निरंशैकदिक्-कालाख्यपदार्थनिमित्तत्वं परापरादिप्रत्ययस्य प्रसाधयितुमभ्युपगतम्, तच्चायुक्तम्;

१ "उपात्तादिमहाभूतहेतुत्वाङ्गीकृतेर्ध्वनेः । सिद्धा एवाश्रिताः शब्दास्तेष्वित्याद्यमसाधनम्" ॥
—तत्त्वसं० का० ६२७ पृ० २०७ ।

२ "एकव्यापिध्रुवव्योमसमवायस्तु सिध्यति । नैषामन्वयवैकल्यादक्रमाद्याप्तितस्तथा" ॥
—तत्त्वसं० का० ६२८ पृ० २०७ ।

३ "काल-दिक्साधनयोरपि सामान्येन सिद्धसाध्यता विशेषेणान्वयासिद्धिर्हेतोः प्रतिज्ञायाश्च अनुमानबाधेति"
—तत्त्वसं० पञ्जि० पृ० २०८ पं० २१ ।

४ प्र० पृ० पं० ४–।

५ "विशिष्टसमयोद्भूतमनस्कारनिबन्धनम् । परापरादिविज्ञानं न कालान्न दिशश्च तत् ॥
निरंशैकस्वभावत्वात् पौर्वापर्याद्यसंभवः । तयोः संबन्धिभेदाच्चेदेवं तौ निष्फलौ ननु" ॥
—तत्त्वसं० का० ६२९–६३० पृ० २०८ ।

६ पृ० ६६९ पं० १३ ।

७ परादिप्र–भां० मां० आ० । "परापरादिज्ञानस्य निरंशैकदिक्कालाख्यपदार्थनिबन्धनत्वं साधयितुमिष्टम्"
—तत्त्वसं० पञ्जि० पृ० २०९ पं० ४–५ ।

स्वाकारानुकारिप्रत्ययजनकस्य तद्विषयत्वात् निरंशस्य च पौर्वापर्यादिविभागाभावतस्तथाभूतप्रत्ययोत्पादकत्वासंभवात् । तथाभूतप्रत्ययाद् विपरीतार्थसिद्धेः इष्टविपर्ययसाधनात् विरुद्धश्चैवं हेतुः स्यात् । अथ बाह्याऽऽध्यात्मिकभावपौर्वापर्यनिबन्धनस्य दिक्-कालयोः पौर्वापर्यव्यपदेशस्य भावान्न हेतोर्विरुद्धता । नन्वेवं दिक्-कालपरिकल्पना व्यर्था तत्साध्याभिमतस्य कार्यस्य बाह्याऽऽध्यात्मिकैः संबन्धिभिरेव निर्वर्तितत्वात् । तथाहि-दिक् पूर्वापरादिव्यवस्थाहेतुरिष्यते कालश्च पूर्वापरक्षण-लव-निमेष-कला-मुहूर्त-प्रहर-दिवस-अहोरात्र-पक्ष-मास-ऋतु-अयन-संवत्सरादिप्रत्ययप्रसवनिमित्तोऽभ्युपगतः, अयं च स्वरूपभेदः स्वात्मनि तयोः समस्तोऽप्यसंभवी तत्संबन्धिषु पुनर्भावेषु विद्यमानस्तत्र प्रत्ययहेतुरिति व्यर्था तत्प्रकल्पना । अथ तत्संबन्धिष्वपि अयं भेदः अपरक्रियादिभेदनिमित्तस्तर्हि तत्रापि एवम् इति अनवस्थाप्रसक्तिः । अथ पदार्थेषु पूर्वापरभेदः कालनिमित्तः ननु कालोऽप्यसौ न स्वतः इति अपरकालनिमित्तो यद्यभ्युपगम्यते तदा अनवस्था । अथ पदार्थभेदनिमित्तस्तदा इतरेतराश्रयत्वप्रसङ्गः । अथ तत्र स्वत एव अयं भेदः पदार्थेष्वपि स्वत एव अयं किं नाभ्युपगम्यते? ततश्च पुनरपि दिक्-कालप्रकल्पनं व्यर्थम् ।

मनःसाधनेऽपि हेतौ कारणमात्रे साध्ये सिद्धसाध्यता मनस्कारादेश्चक्षुरादिव्यतिरिक्तस्य कारणमात्रस्येष्टेः । विशेषेणं तु नित्यैकमनःसाधने अनन्वयदोषः प्रतिज्ञायाश्च अनुमानबाधा इष्टविपर्ययसाधनाद् विरुद्धश्च हेतुः इति दोषाः पूर्ववद् वाच्याः । चक्षुरादिव्यतिरिक्ताऽनित्यकारणसापेक्षत्वस्य साधनाद् विरुद्धता प्रकटैव अन्यथा हि अत्रापि नित्यकारणत्वे चेतसामविकलकारणत्वात् क्रमोत्पत्तिर्विरुद्धैव भवेत् । तन्न पृथिव्यादेर्मनःपर्यन्तस्य द्रव्यनवकस्य प्रमाणतः सिद्धिः । ततः 'पृथिव्यादीनि द्रव्याणि इतरेभ्यो भिद्यन्ते, द्रव्यत्वाभिसंबन्धात्' इत्यादिहेतूपन्यासोऽयुक्त एव, तत्स्वरूपासिद्धौ हेतोराश्रयासिद्धत्वदोषात्, स्वरूपासिद्धश्च अयं हेतुः द्रव्यत्वाभिसंबन्धस्य समवायलक्षणस्य असिद्धेः, विशेषणासिद्धश्च द्रव्यत्वसामान्यस्य निषिद्धत्वात् निषेत्स्यमानत्वाच्च । न चात्र अन्वयः सिद्धः, साधर्म्यदृष्टान्तस्य अभावात् । न च सपक्षाभावे केवलव्यतिरेकी हेतुर्गमकः, प्रतिबन्धप्रसाधकप्रमाणविषयसाधर्म्यदृष्टान्ताभावे सर्वत्र साध्याभावात् साधनस्य व्यावृत्त्यसिद्धेः । "'साध्यसद्भावे एव सर्वत्र साधनसद्भावः' इत्येवंभूतान्वयाऽप्रसिद्धौ 'साध्याभावे सर्वत्र साधनस्य अभावः' इति सकलाक्षेपेण व्यतिरेकस्यासंभवात्" [ ] इत्यादेर्न्यायस्य असकृत् प्रतिपादितत्वात् । यदपि 'नवैव द्रव्याणि' इत्यादिप्रयोगप्रतिपादनम्, तदप्यसंगतमेव; तत्स्वरूपासिद्धौ तत्संख्यासिद्धेर्दूरापास्तत्वात् । न च लक्षणयोगित्वमपि तेषाम् असिद्धपृथिवीत्वाभिसंबन्धादेर्लक्षणस्य अनुपपत्तेः । अत एव अन्योन्यव्यावृत्तादेर्विशेषणस्यानुपपत्तिः विशेष्याभावे विशेषणस्याप्यसंभवात् । 'न्यूनाधिक–' इत्याद्यपि तद्विशेषणमसंगतम्, प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां नैयायिकाभ्युपगतपदार्थानां षट्पदार्थाधिकानाम् तमश्छायादीनां च नवद्रव्याधिकानां सद्भावात् । न च

१ "तथाहि–कालः पूर्वापरक्षणलवनिमेषकाष्ठाकलामुहूर्ताहोरात्राऽर्धमासादिप्रत्ययप्रसवहेतुः दिक् च पूर्वोत्तरादिव्यवस्थाहेतुरिष्यते"—तत्त्वसं० पञ्जि० पृ० २०९ पं० १३ ।

२ "चक्षुरायतिरिक्तं तु मनोऽस्माभिरपीष्यते । षण्णामनन्तरोद्भूतप्रत्ययो यो हि तन्मनः" ॥
—तत्त्वसं० का० ६३१ पृ० २०९ ।

३ "नित्ये तु मनसि प्राप्ताः प्रत्यया यौगपद्यतः । तेन हेतुरिह प्रोक्तो भवतीष्टविघातकृत् ॥
सौगतापरनिर्दिष्टमनःसंसिद्धयसिद्धये । साकारमन्यथाऽऽवृत्तं मन्ये सूत्रमिदं कृतम्" ॥
—तत्त्वसं० का० ६३२–६३३ पृ० २०९–२१० ।

४ पृ० ६५६ पं० २७ । ५ पृ० ६५६ पं० ३२ । ६ न्यायद० १–१–१ । ७ पृ० ५४३ टि० १३ ।

"से णूणं भंते! दिया उज्जोए रातिं अंधयारे?
हंता, गोयमा! जाव–अंधयारे ।
से केणट्ठेणं?
गोयमा! दिया सुभा पोग्गला सुभे पोग्गलपरिणामे, रातिं असुभा पोग्गला असुभे पोग्गलपरिणामे । से तेणट्ठेणं०" ।
—भगव० श० ५ उ० ९ सू० २२४ पृ० २४६ ।

"सद्दंधयारउज्जोओ पहा छायाऽऽतवे इ वा । वण्ण–रस–गंध–फासा पुग्गलाणं तु लक्खणं" ॥
—उत्तरा० अ० २८ गा० १२ । नवत० गा० ९ ।

पदार्थषोडशकस्य षट्स्वेव अन्तर्भावात् तमश्छायादीनां च तेजोऽभावरूपत्वात् न तदधिकपदार्थसद्भाव इति वक्तव्यम्, द्रव्यादीनामपि षण्णां प्रमाणप्रमेयरूपपदार्थद्वयेऽन्तर्भावात् पदार्थषट्कस्याऽपि अनुपपत्तेः । अथ तदन्तर्भावेऽपि अवान्तरविभिन्नलक्षणवशात् प्रयोजनवशाद् वा द्रव्यादिषड्व्यवस्था तर्हि तत एव प्रमाणादिषोडशकव्यवस्था तमश्छायादिद्रव्यान्तरव्यवस्थाऽपि भविष्यति इति 'न्यूनाधिक'-इत्यादिविशेषणानुपपत्तिरेव । न च तमश्छायादेर्बहुलत्वादितरतमविशेषयोगिनः विशिष्टार्थक्रियानिर्वर्तनसमर्थस्य च भासामभावरूपतेति वक्तव्यम्, भासामप्येवं तमश्छायाऽभावरूपताप्रसक्तेः । न च आवारकद्रव्यसन्निधानापेक्षतेजोऽभावरूपता तयोः, स्वसामग्रीतो विशिष्टपदार्थोत्पत्तौ प्रतियोग्यभावरूपत्वे भासामपि तथात्वोपपत्तेः । यदपि मधुर-शीतद्रव्योपयोगाद् ये गुणाः समुपजायन्ते छायादिसेवनादपि ते प्रादुर्भवन्तीत्युपचारात् 'छाया मधुर-शीतला' इत्युच्यते तत् तेजस्यपि समानम् । यथा च छाया-तमसोः पुद्गलद्रव्यात्मकत्वं तथा प्राक् प्रतिपादितमिति न पुनरुच्यते । तदेवं 'पृथिव्यादीनि नव द्रव्याणि' इत्यनुपपन्नम् तत्सद्भावप्रतिपादकप्रमाणाभावात् बाधकस्य च प्रदर्शितत्वात् ।

द्रव्याभावाच्च गुणादयो विशेषपर्यन्ताः असन्त एव, तेषां तदाश्रितत्वाभ्युपगमात् आश्रयाभावे च तदाश्रितानां तत्परतन्त्रतयाऽवस्थानासंभवात् । गुण-कर्मणां च साक्षाद्द्रव्याश्रितत्वं परैरभ्युपगतम् । तथा च सूत्रम्—"द्रव्याश्रयी अगुणवान् संयोग-विभागेष्वकारणम् अनपेक्ष इति गुणलक्षणम्" । [वैशेषिकद० १-१-१६] "एकद्रव्यम् अगुणम् संयोग-विभागेष्वनपेक्षम् कारणम् इति कर्मलक्षणम्" । [वैशेषिकद० १-१-१७] एकमेव एकस्मिन्नेव च द्रव्ये आश्रितमेकद्रव्यं कर्म । गुणास्तु केचिद् अनेकस्मिन् वर्तन्ते संख्या-संयोगादयः, अनेके वा एकदा एकत्र वर्तन्ते रूप-रसादयः । सामान्यविशेषाश्च केचिद् द्रव्यत्व-पृथिवीत्वादयो द्रव्यवृत्तय एव गुणत्व-कर्मत्वादयस्तु द्रव्यसंबन्ध(बद्ध)गुण-कर्माश्रिताः । सत्तासामान्यं तु द्रव्य-गुण-कर्मवृत्ति । विशेषास्तु नित्यद्रव्येष्वेव वर्तन्त इति द्रव्यप्रतिषेधे गुणादिप्रतिषेधः प्रसिद्ध एव । समवायस्तु पञ्चपदार्थवृत्तिरूपः पञ्चपदार्थनिषेधे निषिद्ध एव, सर्वाश्रयाश्रिताभावे तस्याऽभावात् । ततो द्रव्यनिषेधादेव अशेषपदार्थनिषेधसिद्धावपि विशेषतो गुणादिप्रतिषेधः प्रदर्श्यते परदर्शनस्य सर्वथाऽयुक्तताप्रदर्शनात् ।

[क्रमशो रूपादिगुणानां प्रक्रियामुपन्यस्य तेषां खण्डनम्]

तत्र "रूप-रस-गन्ध-स्पर्शाः संख्याः परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वाऽपरत्वे बुद्धयः सुखदुःखे इच्छा-द्वेषौ प्रयत्नश्च गुणाः" । [वैशेषिकद० १-१-६] इति सूत्रसंगृहीताः सप्तदश, 'च'शब्दसमुच्चिताः—गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माऽधर्म-शब्दाश्च सप्त गृह्यन्ते इति चतुर्विंशतिगुणाः । तत्र चक्षुर्ग्राह्यं रूपं पृथिव्युदकज्वलनवृत्ति । रसो रसनेन्द्रियग्राह्यः पृथिव्युदकवृत्तिः । गन्धो

---

१ पृ० ५४३ पं० १४- टि० १३ ।

२ "द्रव्याणां प्रतिषेधेन सर्वे एव तदाश्रिताः । गुण-कर्मादयोऽप्यस्ता भवन्त्येव तथा मताः" ॥
—तत्त्वसं० का० ६३४ पृ० २१० ।

३ "गुणत्व-कर्मत्वादयश्च द्रव्यसंबद्धगुण-कर्मपदार्थवृत्तयः"—तत्त्वसं० पञ्जि० पृ० २१० पं० २३ ।

४ "क्व कस्य समवायश्च संबन्धिन्यपहस्तिते । विशेषप्रतिषेधोऽयं तथापि पुनरुच्यते" ॥
—तत्त्वसं० का० ६३५ पृ० २११ ।

५ "तत्र 'रूप-रस-गन्ध-स्पर्शाः सङ्ख्या-परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वापरत्वे बुद्धयः सुख-दुःखे इच्छा-द्वेषौ प्रयत्नश्च गुणाः' इति सूत्रम् । चशब्दाद् गुरुत्व-द्रवत्व-स्नेह-संस्कार-धर्माधर्म-शब्दाश्च परिगृह्यन्ते"—तत्त्वसं० पञ्जि० पृ० २११ पं० ६-।

"गुणाश्च रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वाऽपरत्व-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्नाश्चेति कण्ठोक्ताः सप्तदश । चशब्दसमुच्चिताश्च गुरुत्व-द्रवत्व-स्नेह-संस्काराऽदृष्टशब्दाः सप्तैव इत्येवं चतुर्विंशतिर्गुणाः"—प्रशस्त० कं० पृ० १० पं० ११-।

६ तत्त्वसं० पञ्जि० पृ० २११ पं० ८-।

"तत्र रूपं चक्षुर्ग्राह्यम् पृथिव्युदकज्वलनवृत्ति × × × । रसो रसनग्राह्यः पृथिव्युदकवृत्तिः × × × । गन्धो घ्राणग्राह्यः पृथिवीवृत्तिः"—इत्यादि गुणग्रन्थगतं समग्रं गुणनिरूपणमत्रावगन्तव्यं सविस्तरं विज्ञातुकामेन—प्रशस्त० कं० पृ० १०४-२८९ ।

घ्राणग्राह्यः पृथिवीवृत्तिः । स्पर्शस्त्वगिन्द्रियग्राह्यः पृथिव्युदकज्वलनपवनवृत्तिः । रूपादेश्च गुणत्वे सति चक्षुर्ग्राह्यत्वादिकं लक्षणमितरव्यवच्छेदकम् । एषां च मध्ये रूपस्य महत्त्वाद्युपेतद्रव्यसमवेतस्य शुक्लादेर्निरवयवस्य यदि ग्रहणमिष्यते तदा कुञ्चिकादिविवरवर्तिसूक्ष्मप्रदीपाद्यालोकोद्द्योतिताऽपवरकादिव्यवस्थितपृथुतरघटादिद्रव्यसमवेतशुक्लादिरूपाभिव्यक्तौ सकलस्यैव यावद्द्रव्यवर्तिन उपलब्धिः स्यात् निरवयवत्वात् न हि एकस्य तस्य अवयवा विद्यन्ते येन एकदेशाभिव्यक्तिर्भवेत् । एवं[1] गन्ध-रस-स्पर्शानामपि तदाधारैकदेशस्थानामभिव्यक्तौ यावद्द्रव्यभाविनामुपलब्धिप्रसङ्गः । अथ भवत्येव सकलस्य नीलादेरुपलब्धिः[2] ननु तेन आलोकादिना नीलादेरणुशो भेदाभ्युपगमे पृथिव्यादिपरमाणुद्रव्यवद् अणुपरिमाणयोगित्वेन गुणवत्त्वाद् द्रव्यताप्रसक्तिर्भवेत् । न चैवमपि गुणसंज्ञाकरणे कश्चिद् गुणः अविवादप्रसक्तेः । न च अणुत्वेऽपि आश्रितत्वाद् गुणत्वमुपपन्नम् सदसतोराश्रयानुपपत्तेः, अतिप्रसङ्गाच्च-अवयविद्रव्यस्यापि अवयवद्रव्याश्रितत्वाद् गुणत्वापत्तेः ।

संख्या[3] तु एकादिव्यवहारहेतुः एकत्वादिलक्षणा परैरभ्युपगता । सा पुनः एकद्रव्या च अनेकद्रव्या च । तत्र एकसंख्या एकद्रव्या, अनेकद्रव्या तु द्वित्वादिसंख्या । तत्र एकद्रव्यायाः सलिलादिपरमाण्वादिगतरूपादीनामिव नित्यानित्यत्वनिष्पत्तयः अनेकद्रव्यायास्तु एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः अपेक्षाबुद्धिविनाशाद् विनाशः क्वचिद् आश्रयविनाशादिति । इयं च द्विविधाऽपि संख्या प्रत्यक्षत एव सिद्धा, विशेषबुद्धेश्च निमित्तान्तरापेक्षत्वाद् अनुमानतोऽपि सिद्धिः इति परे[5] मन्यन्ते । अत्र समुदायव्यावृत्तैकत्वादिसंज्ञाविषयपदार्थव्यतिरेकेण उपलब्धिलक्षणप्राप्तायाः संख्याया अनुपलब्धेरसत्त्वं शशविषाणवत् । न च विशेषणमसिद्धम् तस्या दृश्यत्वेन इष्टेः । तथा च सूत्रम्—"संख्या[6]-परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वाऽपरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणि" [वैशेषिकद० ४-१-११] न च विशेषबुद्धितोऽनुमानतोऽपि संख्यासिद्धिः यतो यथा 'एको गुणः' 'बहवो गुणाः' इत्यादौ संख्यामन्तरेणापि एकादिबुद्धिस्तथा घटादिष्वपि असहायादिषु स्वेच्छाविरचितैकत्वादिसंकेताहितमनस्कारप्रभवमेकादिज्ञानं भविष्यतीति किमेकादिसंख्यया? न च गुणेषु

---

१ "द्रव्ये महति नीलादिरेक एव यदीष्यते । रन्ध्रालोकेन तद्व्यक्तौ व्यक्तिर्दृष्टिश्च नास्य किम् ?" ॥
—तत्त्वसं० का० ६३६ पृ० २११ ।

२ "तत्र च द्रव्ये यद्येकमेवानवयवं नीलादि चतुर्विधमिष्यते तदा सूक्ष्मेणापि कुञ्चिकादिविवरवर्तिना प्रदीपाद्यालोकेन ऊर्ध्वापवरकादिस्थितपृथुतरघटादिद्रव्यसमवेतस्य नीलादिरूपस्याभिव्यक्तौ सत्यां सकलस्यैव यावद्द्रव्यवर्तिनो रूपादेरभिव्यक्तिरुपलब्धिश्च प्राप्नोति निरवयवत्वात्"—तत्त्वसं० पञ्जि० पृ० २११ पं० १५-।

३ "न च देशविभागेन स्थितो नीलादिरिष्यते । व्यज्यते यस्तदा तेन तस्य भेदोऽणुशस्ततः" ॥
—तत्त्वसं० का० ६३७ पृ० २११ ।

४ "तत्र एकादिव्यवहारहेतुरेकत्वादिलक्षणा सङ्ख्या सा पुनरेकद्रव्या चानेकद्रव्या च" इत्यादि—तत्त्वसं० पञ्जि० पृ० २१२ पं० ४-।

"एकादिव्यवहारहेतुः संख्या । सा पुनरेकद्रव्या चानेकद्रव्या च । तत्रैकद्रव्यायाः सलिलादिपरमाणु-रूपादीनामिव नित्यानित्यत्वनिष्पत्तयः । अनेकद्रव्या तु द्वित्वादिका परार्धान्ता । तस्याः खलु एकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्यो निष्पत्तिः अपेक्षाबुद्धिविनाशाद् विनाश इति"—प्रशस्त० कं० पृ० १११ पं० ३—।

५ "विशेषबुद्धेश्च निमित्तान्तरापेक्षत्वादनुमानतोऽपीति परो मन्यते"—तत्त्वसं० पञ्जि० पृ० २१२ पं० ८—।

६ **संख्याः** मु० वै० द० मू० । गू० वै० द० । " 'संख्याः' इति बहुवचनमेकत्वादिकाः सर्वा एव संख्याः संगृह्णाति" इति-गू० वै० द० पृ० १८२ पं० १३ उपस्कारवचनाद् मूलसूत्रस्थं बहुवचनमेवोचितं भाति" । पञ्जिकायां तु "संख्या-परिमाणानि" इत्यादिपाठः—पृ० २१२ पं० १५ ।

"अतद्रूपपरावृत्तगजादिव्यतिरेकिणी । न सङ्ख्या भासते ज्ञाने दृश्येष्टा नैव सास्ति तत्" ॥—तत्त्वसं० का० ६३८ पृ० २१२ ।

७ "इच्छारचितसंकेतमनस्कारान्वयं खिदम् । घटेष्वेकादिविज्ञानं ज्ञानादाविव वर्तते ॥
अद्रव्यत्वान्न संख्यास्ति तेषु काचिद् विभेदिनी । तज्ज्ञानं नैव युक्तं तु भाक्तमस्खलितत्वतः" ॥
—तत्त्वसं० का० ६३९-६४० पृ० २१२ ।

संख्या संभवति अद्रव्यत्वात् तेषाम् संख्यायाश्च गुणत्वेन द्रव्याश्रितत्वात्। न च गुणेषु उपचरितमेकत्वादि ज्ञानम् अस्खलद्वृत्तित्वात्। न च गुणेषु संख्यासद्भावे अनवस्थादिबाधकप्रमाणोपपत्तेरुपचरितमेकत्वादिज्ञानम् घटादिष्वपि वृत्ति-विकल्पादेर्द्वित्वादिसंख्यायां बाधकस्य सद्भावात् तद्विज्ञानस्य तथात्वप्रसक्तेः। न च वृत्ति-विकल्पादेर्बाधकस्य अबाधकत्वम् तस्य निरस्तत्वात्। न च
५ क्वचिद् मुख्यसंख्याभावे गौणप्रत्ययस्य तद्विषयस्याऽभाव इति घटादौ मुख्यसंख्यायोगोऽभ्युपगन्तव्य इति वाच्यम्, मुख्यपूर्वकत्वेन गौणप्रत्ययस्य एवंविधे विषये बौद्धं प्रति क्वचिदपि असिद्धेः न हि गवादिष्वपि 'गौः' इति ज्ञानं पारमार्थिकगोत्वनिबन्धनतया मुख्यं सिद्धम् नापि वाहीके तद् ज्ञानं वस्तुभूतगोत्वाध्यारोपाद् उपचरितम्। किञ्च, यथा वाहीके गौरिव अयम् न तु गौरेव साक्षाद्यभावात् स्खलति प्रत्ययः इति गौणः न एवम् एक इव एको गुणः न तु एक एव इति प्रत्ययः किन्तु
१० यादृशी घटादिषु अस्खलिता बुद्धिर्भवति तादृशी गुणादिष्वपि। अथ न सादृश्यापेक्षमेतद् ज्ञानम् किन्तु यत् तदाश्रयेभूतं द्रव्यं तद्गतैकत्वादिसंख्यातः गुणादीनां तदेकार्थसमवायात्, नन्वेवम् 'एकस्मिन् द्रव्ये रूपादयो बहवो गुणाः' इति ज्ञानोत्पत्तिर्न स्यात् तदाश्रयद्रव्ये बहुत्वसंख्याया अभावात्। 'षट् पदार्थाः' 'सुख-दुःखे' 'इच्छा-द्वेषौ' 'पञ्चविधं कर्म' 'परमपरं च द्विविधं सामान्यम्' 'एको भावः' 'एकः समवायः' इति व्यपदेशेषु च किं निमित्तमिति वक्तव्यम्, न ह्यत्र एकार्थसमवायिनी
१५ संख्या विद्यते इति अव्यापिनी इयमपि कल्पना न युक्तिसंगता। भवतु वा एकार्थसमवायाद् अन्यतो वा स्वप्रकल्पिताद् हेतोरयं प्रत्ययस्तथापि गुणादिगतमुख्यसंख्याऽभावतः स्खलद्वृत्तिः स्यात् माणवके सिंहप्रत्ययवत्, न चैवमुपलभ्यते इति संकेतमात्रनिबन्धन एव सर्वत्र अभ्युपगन्तव्यः। यदपि 'गँज-तुरग-स्यन्दनादिव्यतिरिक्तनिमित्तप्रभवः सेनाप्रत्ययः, गजादिप्रत्ययविलक्षणत्वात्, वस्त्र-चर्म-कम्बलेषु नीलप्रत्ययवत्' इति संख्यासिद्धये यद् अविद्धकर्णोक्तं प्रमाणम्, तदप्ययुक्तम्; गर्जादि-
२० व्यतिरिक्तसंकेतादिप्रभवत्वेन इष्टत्वात् सिद्धसाध्यतादोषाघ्रातत्वात्। अथ विशिष्टसंख्यानिमित्तप्रभवत्वमस्य साध्यत्वेन अभिप्रेतम् तदा अनैकान्तिको हेतुः बुद्ध्यादौ 'एका बुद्धिः' इत्यादिविशिष्टप्रत्ययस्य संख्यामन्तरेणापि भावात्। 'अनेकद्रव्या च द्वित्वादिसंख्या, एकत्वेभ्योऽनेकविषयैकबुद्धिसहितेभ्य उत्पद्यते' इत्यभ्युपगमश्च अनुपपन्नः, संकेताभोगमात्रेण संख्येयेषु 'द्वे' 'त्रीणि द्रव्याणि'

१-संख्यायाः बा-वा० बा०।

२ मुख्यसंख्याऽभावे गौणप्रत्ययस्य तद्विषयस्य भाव इति-भां० मां०। मुख्यपूर्वकत्वेन संख्याभावे गौणप्रत्ययस्य तद्विषयस्याभाव इति-आ० हा० वि०।

३ "न हि यथा वाहीको गौरिति स्खलति प्रत्ययः गौरिव गौर्नतु गौरेव साक्षाद्यभावादिति न तथायं स्खलति एकमिवैकं ज्ञानादि न त्वेकमेवेति किं तर्हि यादृशी घटादिष्वस्खलिता बुद्धिर्भवति तादृशी ज्ञानादिष्वपि"—तत्त्वसं० पञ्जि० पृ० २१२ पं० २७—।

४ मुख्यसि-बृ० विना।

५ "तद्द्रव्यसमवेताच्चैदेकत्वात् परिकल्प्यते। गुणादिष्वेकविज्ञानमेकार्थसमवायतः" ॥
—तत्त्वसं० का० ६४१ पृ० २१३।

६ "अस्तु नामैवमेकत्र ज्ञाने व्याप्ति(द्व्यादि)मतिस्तु कम्। एतेष्वपेक्षते हेतुं षट्पदार्थादिकेषु वा ॥
एकार्थसमवायादेर्गौणोऽयं प्रत्ययो भवन्। तथा च स्खलितो यस्मान्माणवेऽनलबुद्धिवत्" ॥
—तत्त्वसं० का० ६४२-६४३ पृ० २१३।

७ "गजादीत्यादिना अविद्धकर्णोक्तं संख्यासिद्धये प्रमाणमाशङ्कते—
गजादिप्रत्ययेभ्यश्च वैलक्षण्यात् प्रसाध्यते। संख्याबुद्धिस्तदन्योत्था नीलवस्त्रादिबुद्धिवत्"—
—तत्त्वसं० का० ६४४ पृ० २१३।

८ "इच्छारचितसंकेतमनस्काराद्युपायतः। तत्रेष्टसिद्धिर्बुद्धयादौ संख्यैतेनैव वा भवेत्" ॥
—तत्त्वसं० का० ६४५ पृ० २१४।

९ "बुद्ध्यपेक्षा च संख्याया निष्पत्तिर्यदि वर्ण्यते। संकेताभोगमात्रेण तद्बुद्धिः किं न संमता" ॥
—तत्त्वसं० का० ६४६ पृ० २१४।

इत्यादिबुद्धेरुपपत्तेः तथापि अदृष्टसामर्थ्यस्य अन्यस्य तद्धेतुत्वकल्पने हेत्वनवस्थाप्रसक्तिः। किञ्च, अपेक्षाबुद्ध्यन्वय-व्यतिरेकानुविधायित्वे द्वित्वादिप्रत्ययस्य द्व्यादिसंख्याप्रभवत्वाभ्युपगमे तद्धेतुभूतसंख्याया एकस्या अनेकवृत्तित्वमभ्युपगतं भवति, तच्च प्रमाणबाधितमिति असकृद् आवेदितम्। अतोऽपेक्षाबुद्धिरेव द्व्यादिबुद्धिनिमित्तभूता वरमभ्युपगन्तव्येति स्थितम्।

"परिमाणव्यवहारकारणं परिमाणं महद् अणु दीर्घम् ह्रस्वमिति चतुर्विधम्" [ ]५
इति परैरभ्युपगतम्। "तत्र महद् द्विविधम्-नित्यम् अनित्यं च। नित्यम् आकाश-काल-दिगात्मसु परममहत्त्वम्, अनित्यम् त्र्यणुकादिषु द्रव्येषु। अणु अपि नित्याऽनित्यभेदात् द्विविधम्-परमाणु-मनस्सु पारिमाण्डल्यलक्षणं नित्यम्, अनित्यं द्व्यणुक एव। कुवलाऽऽ-मलक-बिल्वादिषु तु महत्त्वपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोऽणुव्यवहारः। तथाहि-यादृशं बिल्वे महत् परिमाणम् तादृशं न आमलके यादृशं च तत् तत्र न तादृशं कुवल इति। ननु महद्-दीर्घयोस्त्र्यणुकादिषु वर्तमानयोः द्व्यणुके च १०
अणुत्व-ह्रस्वत्वयोः को विशेषः? महत्सु 'दीर्घमानीयताम्' दीर्घेषु 'महद् आनीयताम्' इति व्यवहारभेदप्रतीतेरस्ति तयोः परस्परतो भेदः। अणुत्व-ह्रस्वत्वयोस्तु विशेषो योगिनां तद्दर्शिनामध्यक्ष एव" [ ] महदादि च परिमाणं रूपादिभ्योऽर्थान्तरम्, तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वात्, सुखादिवत्। अत्र यदि 'रूपादिविषयेन्द्रियबुद्धिविलक्षणबुद्धिग्राह्यत्वात्' इति हेत्वर्थस्तदा हेतुरसिद्धः तथाव्यवस्थितरूपादिव्यतिरेकेण महदादिपरिमाणस्य अध्यक्षप्रत्ययग्राह्यत्वेन असंवेदनात्। अथ १५
'अणु' 'महत्' इत्याकारतत्प्रत्ययविलक्षणकल्पनाबुद्धिग्राह्यत्वात्' इति हेतुस्तदा विपर्यये बाधकप्रमाणाभावाद् अनैकान्तिकः। न ह्यस्याः किञ्चिदपि परमार्थतो ग्राह्यमस्ति कल्पनाबुद्धित्वात्। एकदिग्मुखादिप्रवृत्तेषु विशिष्टरूपादिषु उपलब्धेषु तद्विलक्षणरूपादिभेदप्रकाशनाय समयवशात् 'महत्' इत्यादि अध्यवस्यन्ती बुद्धिः प्रवर्तते इति नातो वस्तुव्यवस्था। न च रूपादिव्यतिरिक्तं ग्राह्यमप्यस्या अस्तीति असिद्धता हेतोः। प्रत्यक्षबाधा च प्रतिज्ञायाः अध्यक्षत्वेन अभ्युपगतस्य महदादे रूपादि- २०
व्यतिरेकेण अनुपलब्धेः। ततो दृष्टे स्पृष्टे वा एकदिङ्मुखप्रवृत्ते रूपादौ भूयसि अतद्रूपपरावृत्ते 'दीर्घम्' इति व्यवहारः प्रवर्तते परिमाणाभावेऽपि तदपेक्षया चाल्पीयसि रूपादौ समुत्पन्ने 'ह्रस्वम्' इति व्यवहारः। एवं महदादौ अपि योज्यम्। एकाऽनेकविकल्पाभ्यां रूपादिवद् महदाद्यनुपपत्तेश्च अभावः। अँविद्यमानेऽपि महदादौ भवत्प्रकल्पिते प्रासादमालादिषु महदादिप्रत्ययप्रादुर्भूतेरनुभवाद्

---

१ "एवं ह्यदृष्टसामर्थ्यस्य हेतुत्वं न कल्पितं स्यादन्यथा हि हेतूनामनवस्था भवेत्"—तत्त्वसं० पञ्जि० पृ० २१४ पं० १६।

२ "महद्दीर्घादिभेदेन परिमाणं यदुच्यते। तदप्यर्थे तथारूपभेदादेव न किं मतम्?" ॥—तत्त्वसं० का० ६४७ पृ० २१४।

"परिमाणं मानव्यवहारकारणम्। तच्चतुर्विधम् अणु महद् दीर्घं ह्रस्वं चेति। तत्र महद् द्विविधम् नित्यमनित्यं च। नित्यमाकाशकालदिगात्मसु परममहत्त्वम् अनित्यं त्र्यणुकादावेव। तथा चाण्वपि द्विविधम् नित्यमनित्यं च। नित्यं परमाणुमनस्सु तत् पारिमाण्डल्यम्। अनित्यं द्व्यणुक एव"—प्रशस्त० कं० पृ० १३० पं० २०—।

३ "कुवलयामलकबिल्वादिषु महत्स्वपि तत्प्रकर्षभावाभावमपेक्ष्य भाक्तोऽणुत्वव्यवहारः"—प्रशस्त० कं० पृ० १३० पं० २५।

"कुवलामलबिल्वादिषु च महत्स्वपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोऽयं व्यवहारः"—तत्त्वसं० पञ्जि० पृ० २१५ पं० १।

"अनित्यमणुपरिमाणं द्व्यणुक एवेत्ययुक्तम् कुवलयामलकबिल्वादिषु परस्परापेक्षयाणुव्यवहारदर्शनादत आह-कुवलयामलकबिल्वादिष्विति। बिल्वे यः प्रकर्षभावो महत्परिमाणातिशययोगित्वं तस्यामलकेऽभावमपेक्ष्याणुव्यवहारो भाक्तः। उभाभ्यां भज्यते इति भक्तिः सादृश्यं तस्यायमिति भाक्तः सादृश्यमात्रनिबन्धनो गौण इत्यर्थः एवमामलकपरिमाणातिशयाभावं कुवलयेऽपेक्ष्याणुव्यवहारः। यत्र हि मुख्यमणुत्वं द्व्यणुके तत्र महत्परिमाणस्याभावो दृष्टः आमलकेऽपि यादृशं बिल्वे महत्परिमाणं तादृशं नास्तीत्येतावता साधर्म्येणोपचारप्रवृत्तिः"—प्रशस्त० कं० पृ० १३४ पं० १—।

४ "दीर्घा प्रासादमालेति महती वेद्यते यथा। न हि तत्र यथारूपं परिमाणं प्रकल्पितम् ॥
एकार्थसमवायेन तथा चेद् व्यपदिश्यते। न महत्त्वं न दैर्घ्यं च धामस्वस्ति विवक्षितम्" ॥—तत्त्वसं० का० ६४८-६४९ पृ० २१५।

अनैकान्तिकश्च हेतुः। न च यत्रैव प्रासादादौ समवेतो मालाख्यो गुणः तत्रैव महत्त्वादिकमपीत्येकार्थसमवायवशात् 'महती प्रासादमाला' इति प्रत्ययोत्पत्तेर्न अनैकान्तिकत्वम्, स्वसमयविरोधात्। तथाहि—नं प्रासादो भवद्भिरवयविद्रव्यमभ्युपगम्यते विजातीयानां द्रव्यानारम्भात्, किं तर्हि? संयोगात्मको गुणः। न च गुणः परिमाणवान् "निर्गुणा गुणाः" [ ] इति वचनात्। ततो मालाख्यस्य गुणस्य प्रासादादिष्वभावात् 'प्रासादमाला' इत्ययमेव प्रत्ययस्तावद् अयुक्तः—दूरत एव 'सा महती ह्रस्वा वा' इत्यादिप्रत्ययव्यपदेशसंभवो मालायाः संख्यात्वेन प्रासादादीनां च संयोगत्वेन महत्त्वादेश्च परिमाणत्वेन परैरभ्युपगमात् त्रयाणामपि गुणत्वाद् गुणेषु च गुणासंभवात् 'महती प्रासादमाला' इति नैकार्थसमवायात् प्रत्ययोत्पत्तिः। अथापि अवयविस्वभावा माला इष्यते तथापि द्रव्यस्य द्रव्याश्रयत्वान्न मालायाः संयोगस्वरूपप्रासादाश्रयत्वं युक्तम्। अथ माला जातिस्वभावा अभ्युपगम्यते तथापि जातेः प्रत्याश्रयं परिसमाप्तत्वात् एकस्मिन्नपि प्रासादे 'माला' इति प्रत्ययोत्पत्तिर्भवेत्। 'एका प्रासादमाला महती दीर्घा ह्रस्वा वा' इत्यादिप्रत्ययानुपपत्तिस्तदवस्थैव स्यात् मालायाम् तदाश्रये च प्रासादादौ एकत्वादेर्गुणस्य असंभवात् काष्ठादिषु च प्रासादाश्रयेषु विवक्षितदीर्घाद्ययोगात् बह्वीषु च प्रासादमालासु 'माला' 'माला' इति अनुगतप्रत्ययोत्पत्तिर्न स्यात् जातावपरजातेरनुपपत्तेः। न च तदाश्रयजातिनिबन्धन औपचारिकोऽयं प्रत्ययोऽस्खलद्वृत्तित्वात्। न हि मुख्यप्रत्ययाऽविशिष्टो गौणो युक्तोऽतिप्रसङ्गात्। अत एव मालादिषु महत्त्वादिप्रत्ययोऽपि नौपचारिकः। उक्तं च—

"मालादौ च महत्त्वादिरिष्टो यश्चौपचारिकः।
मुख्याऽविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः॥" [ ] इति।

तन्न परिमाणं रूपादिषु पृथग् गुण इति स्थितम्।

संयुक्तमपि द्रव्यं यद्वशात् 'अत्रेदं पृथक्' इत्यपोद्रियते तदपोद्धारव्यवहारकारणं पृथक्त्वं नाम गुणः इति काणादाः 'घटादिभ्योऽर्थान्तरम्, तत्प्रत्ययविलक्षणज्ञानग्राह्यत्वात्, सुखादिवत्' इति

१ "प्रासादश्चेष्यते योगो गुणः सोऽपरिमाणवान्। न तस्मात्स्यपरा माला नोपचारस्य चाश्रयः"॥—तत्त्वसं० का० ६५० पृ० २१६।

२ "विजातीयद्रव्यानारम्भात्"—तत्त्वसं० पञ्जि० पृ० २१६ पं० ९। "विजातीयानां द्रव्यानारम्भकत्वात्"—प्रमेयक० पृ० १७८ प्र० पं० १४।

३ "स च गुणः परिमाणवान्न भवति "निर्गुणा गुणाः" इति समयात्"—तत्त्वसं० पञ्जि० पृ० २१६ पं० १०।
"न च गुणः परिमाणवान् निर्गुणा गुणा इत्यभिधानात्"—प्रमेयक० पृ० १७८ प्र० पं० १४।

४ "द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्"—वैशेषिकद० १-१-१६।
"रूपादीनां गुणानां सर्वेषां गुणत्वाभिसंबन्धो द्रव्याश्रितत्वं निर्गुणत्वम् निष्क्रियत्वम्"—प्रशस्त० कं० पृ० ९४ पं० ६।
"अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः"—न्यायसि० मु० का० ८६।
"द्रव्याश्रया निर्गुणा गुणाः"—तत्त्वार्थसू० ५-४०।

५ "अथ जातिस्वभावा मालाऽङ्गीक्रियते एवमपि जातेस्सर्वात्मना प्रत्याश्रयपरिसमाप्तत्वादेकोऽपि प्रासादो मालेत्युच्येत वृक्षवत्। यथोक्तम्—गेहो यद्यपि संयोगस्तन्माला किन्तु तद् भवेत्। जातिश्चेद् गेह एकोऽपि मालेत्युच्येत वृक्षवत्"॥—तत्त्वसं० पञ्जि० पृ० २१६ पं० १४—।

६ "बह्वीषु च प्रासादमालासु माला माला इत्यनुगामी व्यपदेशो न स्यात् जातेरजातितः। यदाह—मालाबहुत्वे तच्छब्दः कथं जातेरजातितः"—तत्त्वसं० पञ्जि० पृ० २१६ पं० १९—।

७ "नहि मुख्यप्रत्ययाविशिष्टो गौणो युक्तोऽतिप्रसङ्गात् यदाह—
मालादौ च महत्त्वादिरिष्टो यश्चौपचारिकः। मुख्याविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः"॥
—तत्त्वसं० पञ्जि० पृ० २१६ पं० २३—।

८ "तत्र इदमस्मात् पृथगिति यद्वशात् संयुक्तमपि द्रव्यमपोद्रियते तदपोद्धारकारणं पृथक्त्वं नाम, तच्च घटादिभ्योऽर्थान्तरं तत्प्रत्ययविलक्षणबुद्धिग्राह्यत्वादिति पूर्ववत् परस्याभिप्रायः"—तत्त्वसं० पञ्जि० पृ० २१६ पं० २६—।

व्यवस्थिताः। अत्र तावद् हेतोरसिद्धता, परस्परस्वरूपव्यावृत्तरूपादिव्यतिरेकेण अर्थान्तरभूतस्य पृथक्त्वगुणस्य अध्यक्षे अप्रतिभासनेन घटादिविलक्षणज्ञानग्राह्यत्वस्यासिद्धेः। अत एव उपलब्धिलक्षणप्राप्तत्वेन अभ्युपगतस्य तस्य अनुपलम्भाद् असत्त्वम्। न च 'पृथक्' इति विकल्पप्रत्ययावसेयत्वेन तस्य सत्त्वम् सजातीय-विजातीयव्यावृत्तरूपाद्यनुभवनिबन्धनत्वात् तत्प्रत्ययस्य। व्यावृत्तता च भावानां स्वस्वभावव्यवस्थितेः अन्यथा स्वत एव अव्यावृत्तरूपाणां पृथक्त्वादिवशात् तेषां पृथग्रूपताऽसिद्धेः पृथक्त्वादेर्भिन्नाऽभिन्नपृथग्रूपभावकरणे अकिञ्चित्करत्वात्-भेदपक्षे संबन्धासिद्धेः, अभेदपक्षे तु पृथग्रूपस्य भावस्यैव उत्पत्तेरर्थान्तरभूतपृथक्त्वगुणकल्पनावैयर्थ्यात् तत एव 'पृथक्' व्यवहारसिद्धेर्हेतोरनैकान्तिकत्वम्। किञ्च, यथा परस्परव्यावृत्तात्मतया सुख-दुःखादिगुणेषु 'पृथक्' इति प्रत्ययविषयता पृथक्त्वगुणाभावेऽपि-गुणेषु गुणासंभवात्-तथा घटादिष्वपि भविष्यतीति हेतोरनैकान्तिकता परिस्फुटैव। न च गुणेषु 'पृथक्' इति प्रत्ययो भाक्तः मुख्याऽविशिष्टत्वात्। 'पृथक्' इत्यपोद्धारव्यवहारस्य स्वरूपविभिन्नपदार्थनिबन्धनत्वात् परोपन्यस्तानुमाने प्रतिज्ञाया अनुमानबाधा। तथा च प्रयोगः—ये परस्परव्यावृत्तात्मानः ते स्वव्यतिरिक्तपृथक्त्वानाधाराः, यथा सुखादयः, परस्परव्यावृत्तात्मानश्च घटादयः इति स्वभावहेतुः। एकस्य अनेकवृत्त्यनुपपत्तिः संबन्धाभावश्च समवायस्य प्रतिषेत्स्यमानत्वात् सुखादिषु तद्व्यवहाराभावप्रसक्तिश्च विपर्यये बाधकं प्रमाणम्। तन्न पृथक्त्वं गुणः तत्साधकप्रमाणाभावाद् बाधकोपपत्तेश्चेति व्यवस्थितम्।

अप्राप्तिपूर्विका प्राप्तिः संयोगः प्राप्तिपूर्विका च अप्राप्तिर्विभागः। एतौ च द्रव्येषु यथाक्रमं 'संयुक्त'-'विभक्त'-प्रत्ययहेतू अन्यतरोभयकर्मजौ संयोग-विभागजौ च यथाक्रमम्। न च संयोग-विभागयोः सत्त्वप्रतिपादकप्रमाणाविषयत्वात् सद्व्यवहाराविषयता शशविषाणवत् इति वाच्यम्, "संयोगस्य द्रव्ययोर्विशेषणत्वेन अध्यक्षतः प्रतीयमानत्वात्। तथाहि-कश्चित् केनचित् 'संयुक्ते द्रव्ये आहर' इत्युक्तो ययोरेव द्रव्ययोः संयोगमुपलभ्य(भ)ते ते एव आहरति न द्रव्यमात्रम् अन्यथा हि यत्

१ "अपोद्धारव्यवहृतिः पृथक्त्वाद् या तु कल्प्यते। कारणात् सा विभिन्नात्मभावनिष्ठा न किंमता"?॥
—तत्त्वसं० का० ६५१ पृ० २१७।

२ "परस्परविभिन्ना हि यथा बुद्धि-सुखादयः। पृथग्वाच्यास्तदङ्गं च विनाऽन्येन तथाऽपरे"॥—तत्त्वसं० का० ६५२ पृ० २१७।

३ "यौ संयोगविभागौ च द्रव्येषु नियतौ परैः। संयुक्तादिधियो हेतू कल्पितौ तावनर्थकौ"॥—तत्त्वसं० का० ६५३ पृ० २१८।

४ "संयुक्ते आहरेत्युक्ते संयोगं प्रेक्षते ययोः। तदन्यपरिहारेण ते एवाहरति ह्ययम्"॥—तत्त्वसं० का० ६५७ पृ० २१८।

५ "तथाहि—कश्चित् केनचित् संयुक्ते द्रव्ये आहरेत्युक्ते ययोरेव द्रव्ययोः संयोगमुपलभते ते एव आहरति न द्रव्यमात्रम्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २१८ पं० २३—।

संयोगसमर्थनपरमेतद् उद्द्योतकरमतं न्यायवार्तिके इत्थमुपलभ्यते—

"विशेषणभावाच्चार्थान्तरं संयोगः—संयुक्ते द्रव्ये आहरेत्युक्ते ययोर्द्रव्ययोः संयोगं पश्यति ते इतरेभ्यो विविच्य संयुक्ते आहरति। × × × यदि चार्थान्तरं संयोगो न स्यात् क्षेत्रोदकबीजाग्नीन्धनादीनि सर्वत्राविशेषतानि सर्वत्राङ्कुरपाकादिकार्यं कुर्युः तान्येव तानीति। तस्माद् यस्तैरपेक्ष्यते सोऽर्थोऽन्यस्तस्मिन् संयोग इति संज्ञेति। क्षेत्रोदकबीजाग्नीन्धनानि अङ्कुरपाकादिकार्योत्पत्तौ सापेक्षाणि सर्वदा तत्कार्यानारम्भाद् दण्डादिवत्-यथा दण्डाद्यनेकं कारणं संयोगादिनिमित्तान्तरापेक्षं सर्वदा न घट-पटादिकार्यं करोति तथा बीजाद्यपि तस्मात् तदपि सापेक्षम्। × × × सान्तरनिरन्तरबुद्धयोश्च निमित्तं वक्तव्यम्। यदि संयोगं विभागं निमित्तान्तरं न प्रतिपद्यसे सान्तरमितिबुद्धेर्निरन्तरमिति च बुद्धेर्भेदहेतुर्वक्तव्यः। न हि निमित्तभेदमन्तरेण बुद्धीनां भेदो दृष्टो रूपादिवदिति-या चेयमचलति चलतीति बुद्धिर्या असंयुक्ते संयुक्तमिति अविभक्ते विभक्तमिति च सा च प्रधानमन्तरेण न भवति। सर्वा एता मिथ्याबुद्धयः प्रधानानुकारेण भवन्तीति प्रधानं वक्तव्यम्। न हि निष्प्रधानं भ्रान्तं दृष्टम् स्थाणु-पुरुषवदिति। यथा स्थाणौ सति पुरुषे स्थाणुरिति बुद्धिः पुरुषे वाऽसति स्थाणौ पुरुषबुद्धिरिति। यदि चार्थान्तरं संयोगो न स्यात् कुण्डलीत्यस्या बुद्धेः किञ्चिन्निमित्तमवश्यं विधीयमानं वा निमित्तान्तर-

किञ्चिद् आहरेत्। एतद् विभागसाधनेऽपि विपर्ययेण सर्वं समानम् । किञ्च, यदि अर्थान्तरभूतौ संयोग-विभागौ वस्तुनो न स्याताम् तदा वस्तुमात्रनिबन्धनौ 'सान्तरमिदम्' 'निरन्तरम्' इति च प्रत्ययौ नोत्पद्येयाताम् न हि विशेषप्रत्ययौ वस्तुविशेषमन्तरेण संभविनौ सर्वदा सर्वत्र भावप्रसङ्गात्। अपि च, दूरदेशवर्तिनः प्रमातुः सान्तरावस्थितेऽपि धव-खदिरादौ निरन्तरावसायिनी बुद्धिर्योत्पद्यते या च शाखिशिखरावसक्ते बलाकादौ सान्तरत्वाध्यवसायिनी समुपजायते; द्विविधाऽपि इयम् 'अतस्मिंस्तत्' इति प्रवृत्तेर्मिथ्याबुद्धिः। न च असौ मुख्यपदार्थानुभवमन्तरेण क्वचिद् उपजायमाना संलक्ष्यते न हि अननुभूतरजतस्य शुक्तिकायाम् 'रजतम्' इति विभ्रमः इति कश्चित् मुख्यो भावो विभ्रमधियो निमित्तमभ्युपगन्तव्यः; तदभ्युपगमे च संयोग-विभागसिद्धिः तद्व्यतिरेकेण अन्यस्य एतद्बुद्धेर्निबन्धनस्य असंभवात्। तथा, 'कुण्डली देवदत्तः' इति मतिः किंनिबन्धना उपजायते इति वक्तव्यम् । न पुरुष-कुण्डलमात्रनिबन्धना, सर्वदा तयोस्तस्या उत्पत्तिप्रसङ्गात् । अपि च, यदेव क्वचित् केनचित् उपलब्धं सत्त्वेन; तस्यैव अन्यत्र विधिः प्रतिषेधो वा दृष्टः । यदि च संयोगो न कदाचिद् उपलब्धः कथं विभागेन अस्य 'चैत्रोऽकुण्डलः कुण्डली वा' इत्येवं प्रतिषेधः विधिश्च

मुपादेयम्। न तावत् कुण्डलनिमित्ता नापि देवदत्तनिमित्ता। न च भवता निमित्तान्तरं प्रतिपाद्यते, निमित्तान्तरं चान्तरेण यथा कथंचिद् व्यवस्थिताभ्यां देवदत्त-कुण्डलाभ्यां कुण्डलीति बुद्धया भवितव्यम् । तस्मादवश्यं विधीयमानं प्रतिषिध्यमानं वा निमित्तान्तरमभ्युपगन्तव्यम् । यदि प्रतिषिध्यमानं यदन्यत्र भवति तदन्यत्र प्रतिषिध्यत इति प्रतिषिध्यमानस्य विषयो वक्तव्यः। तस्मान्न कथञ्चन संयोगः प्रतिषेद्धुं शक्यते । इहबुद्धिनिमित्तत्वाच्च—इयमिहबुद्धिः प्रवर्तमाना नतैं संबन्धात् प्रवर्तते—यथेह कुण्डे बदराणीति—नेयं बदरमात्रनिमित्ता न कुण्डमात्रनिमित्तेति। यदस्या निमित्तं स संयोग इति। × × × तस्माद् उपपन्नमर्थान्तरं संयोग इति"—पृ० २१९ पं० १–पृ० २२५ पं० १।

प्रमेयकमलमार्तण्डे तु तत् तन्मतमित्थं वर्तते—

"ननु संयोगो नामार्थान्तरं न स्यात् तदा क्षेत्रे बीजादयो निर्विशिष्टत्वात् सर्वदैवाङ्कुरादिकार्यं कुर्युः न चैवम् तस्मात् सर्वदा कार्यानारम्भात् तेऽङ्कुरादिकार्योत्पत्तौ कारणान्तरसापेक्षा यथा मृत्पिण्डदण्डादयो घटकरणे कुम्भकारादिसापेक्षाः योऽसावपेक्ष्यः स संयोग इति। किञ्च, द्रव्ययोर्विशेषणभावेनाध्यक्षत एवासौ प्रतीयते । तथाहि—कश्चित् केनचित् संयुक्ते द्रव्ये आहरेत्युक्ते ययोरेव द्रव्ययोः संयोगमुपलभते ते एवाहरति न द्रव्यमात्रम्। किञ्च, कुण्डली देवदत्त इत्यादि मतिरुपजायमाना किंनिबन्धनेति अभिधातव्यम् ? न तावत् पुरुषकुण्डलमात्रनिबन्धना सर्वदा तस्याः सद्भावप्रसङ्गात् । किञ्च, यदेव केनचित् क्वचिदुपलब्धसत्त्वं तस्यैवान्यत्र विधिप्रतिषेधमुखेन लोके व्यवहारप्रवृत्तिर्दृष्टा। यदि तु संयोगो न कदाचिदुपलब्धस्तत् कथमस्य चैत्रोऽकुण्डली कुण्डली वेत्येवं विभागेन व्यवहारो भवेत्। चैत्रोऽकुण्डलीत्यत्र हि न कुण्डलं चैत्रो वा प्रतिषिध्यते देशादिभेदेनानयोः सतोः प्रतिषेधायोगात्। तस्माच्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते। तथा चैत्रः कुण्डलीत्यनेनापि विधिवाक्येन चैत्र-कुण्डलयोर्नान्यतरस्य विधानं तयोः सिद्धत्वात्। पारिशेष्यात् संयोगस्यैव विधिर्ज्ञायते इत्यप्युद्योतकरस्य मनोरथमात्रम्"—पृ० १८५ द्वि० पं० १०—पृ० १८६ प्र० पं० २।

तत्त्वसंग्रहे त्वेतदुद्योतकरमतं समग्रं वर्तते परंतु न प्रस्तुतटीकाक्रमेण अत एव यत्र यत्र तत्त्वसंग्रहानुसारिणी टीका समायाता तत्र तत्र तास्ताः कारिकाः क्रमव्यत्यासेनापि उद्धृताः।

१ निरन्तरमिदं वस्तु सान्तरं चेदमित्ययम् । बुद्धिभेदश्च केनैष विद्यते तौ च चेदिह" ॥—तत्त्वसं० का० ६५८ पृ० २१८।

२ "या चेयं सान्तरे बुद्धिर्नैरन्तर्यावसायिनी। निरन्तरेऽपि या चान्या मिथ्याबुद्धिरियं द्विधा ॥
मिथ्याबुद्धिश्च सर्वैव प्रधानार्थानुकारिणी। प्रधानं चेह वक्तव्यं तदुक्तौ तौ च सिद्धयतः" ॥—तत्त्वसं० का० ६५९-६६० पृ० २१९।

३ "या चेयमीषत्तरुशिखरावलम्बे बलाकादौ निरन्तरेऽपि सान्तरत्वमिवावस्यन्ती जायतेऽन्या"—तत्त्वसं० पञ्जि० पृ० २१९ पं० ९–।

४ "कुण्डलीति मतिश्चेयं किंनिमित्तोपजायते। नरकुण्डलभावान्नो सर्वदा तत्प्रसङ्गतः ॥
अन्यत्र दृष्टभावस्य निषेधोऽन्यत्र युज्यते। संयोगश्च भवेद् दृष्टः स कथं प्रतिषिध्यते ? ॥
चैत्रोऽकुण्डल इत्येवं तस्मादस्त्येव वास्तवः। यन्निषेधविधानादि विभागेन प्रवर्तते" ॥—तत्त्वसं० का० ६६१-६६३ पृ० २१९।

भवेत् ? यतः 'अकुण्डलश्चैत्रः' इति न कुण्डलं प्रतिषिध्यते तस्य अन्यदेशादौ विद्यमानस्य प्रतिषेद्धुमशक्यत्वात्, अत एव न चैत्रः ततश्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते । एवं 'कुण्डली चैत्रः' इत्यत्रापि चैत्र-कुण्डलयोर्नान्यतरस्य विधिः तयोः सिद्धत्वात्। ततः पारिशेष्याद् अप्रतीतस्य तत्संयोगस्यैव विधिरिति संयोगादिर्वास्तवः समस्त्येव यद्वशाद् विभक्तविधि-प्रतिषेधप्रवृत्तिः 'चैत्रः कुण्डली' इत्यादिप्रयोगेषु। किञ्च, यदि संयोगः अर्थान्तरं न भवेत् तदा बीजादयः—अविशिष्टत्वात् सर्वदैव स्वकार्यमङ्कुरादिकं विदध्युः न चैवम् सर्वदा तेषां कार्यानारम्भात्; अतो बीजादयः स्वकार्यनिर्वर्तने कारणान्तरसव्यपेक्षाः मृत्पिण्ड-दण्ड-चक्र-सूत्रादय इव घटादिकरणे; योऽसौ अपेक्ष्यः स संयोगः" [ ] इति उद्द्योतकरः।

अत्र प्रतिविधीयते-यत् तावदुक्तम् 'पदार्थविशेषणभावेन संयोगोऽध्यक्षतः प्रतीयते' इति, तदयुक्तम्; यतः न संयुक्तपदार्थार्थान्तरभूतः संयोगः कदाचित् प्रतिपत्तुर्दर्शनपथमवतरति, न तद्दर्शनाद् विशिष्टे द्रव्येऽसावाहरति किं तर्हि ? प्राग्भाविसान्तरावस्थातो विशिष्टे निरन्तरावस्थे ये समुत्पन्ने वस्तुनी; ते एव 'संयुक्त'प्रत्ययविषये तच्छब्दवाच्ये, अवस्थाविशेषे संकेतितत्वात् 'संयुक्त'-शब्दस्य। ततो यत्र तथाविधे वस्तुनी 'संयोग'शब्दविषयतामुपगते निश्चिनोति तत्र ते एव आहरति नान्ये न हि प्रेक्षावान् शब्दात् तदप्रेरिते अर्थे प्रवृत्तिमारचयति। वस्त्वन्तरमेव च तथा तथोत्पद्यमानं 'निरन्तरमिदं वस्तु' 'सान्तरमिदम्' इति च बुद्धिभेदनिबन्धनं भविष्यति संयोग-विभागयोर्द्रव्यार्थान्तरभूतयोरभावेऽपि इति अनैकान्तिको 'विशेषप्रत्ययत्वात्' इति हेतुः। तथाहि-विच्छिन्नं यदुत्पन्नं वस्तु तत् सान्तरबुद्धेर्निमित्तभावमुपयात्येव हिमवत्-विन्ध्याद्रिवत्, अविच्छिन्नोत्पत्तिकं च निरन्तरबुद्धिविषयः निरन्तरोपरचितदेवदत्त-यज्ञदत्तगृहवत् न हि गृहयोः परेणापि संयोगगुणाश्रयत्वमभ्युपगम्यते निर्गुणत्वाद् गुणानाम् तयोश्च संयोगात्मकत्वेन गुणत्वात् । नापि हिमवत्-विन्ध्ययोर्विभागाश्रयत्वम् प्राप्तिपूर्विकाया अप्राप्तेर्विभागलक्षणायास्तयोरभावात् । नं च सर्वा मिथ्याबुद्धिः

---

१ "पारिशेष्यात् संयोगस्यैवाप्रतीतस्य विधेर्ज्ञायते तस्मादस्त्येव संयोगादिर्वास्तवः यद्वशाच्चैत्रः कुण्डली न भवतीत्यादिनिषेधविधानादि प्रविभक्तमेव प्रतीयते । आदिशब्देन विशेषणत्वेनोपादानमित्यादिपूर्वोक्तपरिग्रहः"—तत्त्वसं० पञ्जि० पृ० २२० पं० ३—।

२ "बीजोदकेत्यादिना उद्द्योतकरमतोपदर्शनाद् हेतोरसिद्धतामाशङ्कते—
बीजोदकपृथिव्यादि सर्वदा कार्यकारकम्। प्रसक्तं निर्विशेषत्वात् संयोगासंभवेन तु ॥
क्षेत्र-बीज-जलादीनि सापेक्षाणीति गम्यते। स्वकार्यकरणान्नित्यं दण्डचक्रोदकादिवत् ॥
यस्तैरपेक्ष्यते भावः स संयोगो भविष्यति । सविशेषणभावाच्च भिन्न एवेति गम्यते" ॥—तत्त्वसं० का०६५४-६५६ पृ० २१८।

३ पृ० ६७७ पं० २०।

४ "प्राप्तावस्थाविशेषे हि नैरन्तर्येण जातितः । ये पश्यत्याहरत्येष वस्तुनी ते तथाविधे" ॥—तत्त्वसं० का० ६६६ पृ० २२१।

५ अत्र द्वितीयाद्विवचनस्य समुचितत्वेन प्रकृतिभावस्य साधुत्वात् 'द्रव्ये असा'-इत्येव पाठः सुचारुः । "नहि संयुक्तपदार्थान्तरभूतः संयोगः प्रतिपत्तुर्दर्शनपथमवतरति येन तद्दर्शना(त्त)द्विशिष्टे द्रव्ये आहरति"—तत्त्वसं० पञ्जि० पृ० २२१ पं० १५।

६ विच्छिन्नमन्यथा चैव जातमेति निमित्तताम् । सान्तरानन्तरज्ञाने गेह-विन्ध्य-हिमाद्रिवत्" ॥—तत्त्वसं० का० ६६७ पृ० २२१।

७ "गेह-विन्ध्य-हिमाद्रिवत् इति। अनयोरेव यथायोगमुदाहरणम्। न हि अविच्छेदेनोत्पन्नयोः स्वयं संयोगात्मनोर्गेहयोरपरः संयोगो निरन्तरबुद्धेर्निबन्धनमस्ति परमतेऽपि, नापि विच्छेदेनोत्पन्नयोस्तयोरेव विभागः सान्तरप्रत्ययनिमित्तमस्ति निर्गुणत्वाद् गुणानामित्युक्तमेतत्। न हि हिम-विन्ध्ययोरपि विभागः सान्तरबुद्धेर्हेतुरस्ति प्राप्तिपूर्विका ह्यप्राप्तिर्विभाग इति समयात्"—तत्त्वसं० पञ्जि० पृ० २२१ पं० २५—।

८ "मिथ्याबुद्धिर्न सर्वैव प्रधानार्थानुसारिणी। साधर्म्यनिरपेक्षाऽपि क्वचिदन्तरुपप्लवात् ॥
अन्यत्र गतचित्तस्य द्विचन्द्रादिमतिर्यथा। अविच्छिन्नादिजातं वा प्रधानमिह विद्यते" ॥—तत्त्वसं० का० ६६८-६६९ पृ० २२२।

साधर्म्यग्रहणादुत्पद्यते कस्याश्चित् तदन्तरेणापि इन्द्रियवैगुण्यमात्रादेव उत्पत्त्युपलब्धेः अन्यगतचैतसस्तैमिरिकस्य द्विचन्द्राद्यविकल्पबुद्धिवत् । न च प्रधानार्थानुसारित्वेऽपि मिथ्याबुद्धेः परस्य इष्टसिद्धिः विच्छिन्नाऽविच्छिन्नरूपतया उपजातस्य वस्तुनः प्रधानभूतस्य तद्बुद्धिनिबन्धनस्य सिद्धावपि तदर्थान्तरभूतसंयोग-विभागलक्षणगुणाप्रसिद्धेः, यथा च चैत्र-कुण्डलयोर्विशिष्टावस्थाप्राप्तौ संयोगः प्रादुर्भवति न सर्वदा तथा 'चैत्रः कुण्डली' इति मतिरपि तदवस्थाविशेषनिबन्धना कदाचिदेव भविष्यति न सर्वदा इति किमर्थान्तरभूतसंयोगकल्पनया? यदपि 'यदेव क्वचिद् उपलब्धम्' इत्याद्यभिधानम्, तदपि असंगतम्; विशिष्टावस्थायाः प्रदर्शितमितिनिबन्धनाया उपलभ्यस्वभावायाः अन्यत्रानुपलम्भतः प्रतिषेधोपपत्तेः परपरिकल्पितस्य च संयोगस्य संयोगिपदार्थविवेकेन क्वचिदपि प्रत्यये अप्रतिभासनात् कुतः प्रतिषेधः विधिर्वा संभवी? यदि च देवदत्त कुण्डलयोर्देशान्तरादौ सत्त्वान्न निषेधः असत्त्वेऽपि तदानर्थक्यम् तदा नञर्थाभाव एव स्यात् । संयोगप्रतिषेधेऽपि चैतद् दूषणं समानम् तस्यापि विद्यमानत्वे प्रतिषेधानुपपत्तेः अविद्यमानत्वे तदानर्थक्यात् । यदपि 'बीजादयोऽविशिष्टत्वात् सर्वदैव कार्यं विदध्युः' इत्याद्युक्तम् तत्र बीजादीनामविशिष्टत्वमसिद्धम् सर्वभावानां प्रतिक्षणविशरारुतया विशिष्टावस्थाप्राप्तौ जनकत्वात् बीजादीनां स्वकार्यजनने सापेक्षत्वमात्रसाधने च सिद्धसाध्यता अव्यवधानाद्यवस्थान्तरसापेक्षाणां बीजादीनामङ्कुरादिस्वकार्यनिर्वर्तनस्य अस्माभिरभ्युपगमात्। अथ संयोगाख्यपदार्थान्तरसापेक्षत्वं तेषां साध्यते तदा तथाविधेन धर्मेण हेतोरन्वयासिद्धेरनैकान्तिकता दृष्टान्तस्य च साध्यविकलताप्रसक्तिः। अथ अवस्थान्तरविशेषापेक्षा बीजादयः स्वकार्योत्पत्तिहेतवः न पुनरर्थान्तरभूतसंयोगापेक्षा इति कुतः सिद्धं येन सापेक्षत्वमात्रे साध्ये सामान्येन सिद्धसाध्यतादोष उद्भाव्यते? यदि हि संयोगमात्रसापेक्षा एव ते तदारम्भकास्तदा प्रथमोपनिपात एव अङ्कुरादिकार्यप्रसवो बीजादिभ्यो भवेत् पश्चाद्वद् अविकलकारणत्वात् । अथ प्रथमोपनिपाते न तदुदयः पश्चादपि न स्यात् पूर्ववद् विकलकारणत्वाविशिष्टत्वात् । न च बीजादेः संयोगे अनुपकारिणि अपेक्षा युक्ता अतिप्रसङ्गात् । न च तत्कारणानां क्षिति-बीजादीनामेकस्वभावतया नित्यसन्निहितत्वात् संयोगानां कादाचित्कत्वं युक्तम्। अथ क्षित्यादीनां संयोगेऽपि जन्ये कर्मादिसापेक्षत्वात् संयोगस्य कादाचित्कत्वम्, न; तत्रापि तुल्यपर्यनुयोगत्वात् । तथाहि-कर्मापि कस्मात् सर्वदा न जनयति? इति पर्यनुयोगस्य अव्यावृत्तिरेव । न च तत्कारणाभावात् इत्युत्तरं संगतम् नित्यकारणाभ्युपगमे तस्यापि नित्यभावः इति पर्यनुयोगस्य सर्वत्र तुल्यत्वात् । क्षणिकवादिनस्तु नायं दोषः पूर्वपूर्वहेतुप्रतिबद्धत्वात् तदुत्तरोत्तरकार्याणां युगपत् कारणवैकल्येन सर्वेषामसन्निधानात्, अतः परेषामङ्कुरादिकार्यहेतुत्वं बीजादीनां न सर्वदा प्रसज्यत इति नार्थान्तरसंयोगसापेक्षास्ते इति व्यवस्थितम्। संयोगसद्भावबाधकं च प्रमाणं प्रत्यक्षवद् अनुमानमपि विद्यत

---

१ "कुण्डलीति मतिश्चेयं जातावस्थाविशेषयोः । चैत्रकुण्डलयोरेव संयोग इव जायते" ॥—तत्त्वसं० का० ६७० पृ० २२२।

२ पृ० ६७८ पं० ९ टि० ४। ३ पृ० ६७८ पं० ११।

४ "सोऽवस्थातिशयस्तादृग् दृष्टोऽन्यत्र निषिध्यते । चैत्रे कुण्डल इत्यादौ न संयोगस्त्वदृष्टितः" ॥—तत्त्वसं० का० ६७१ पृ० २२२।

५-**तमतिबन्ध**-भां० मां०। "यदवस्थाविशेषनिबन्धनेयं मतिरुपवर्णिता तस्योपलब्धिलक्षणप्राप्तस्य"—तत्त्वसं० पञ्जि० पृ० २२३ पं० १।

६ पृ० ६७९ पं० १। ७ पृ० ६७९ पं० ५।

८ "उच्यते क्षणिकत्वेन नाविशेषा जलादयः। सत्त्वेऽप्यव्यवधानादि तेऽपेक्षन्ते दशान्तरम्" ॥—तत्त्वसं० का० ६६४ पृ० २२०।

९ "संयोगमात्रसापेक्षा यदि तु स्युर्जलादयः। योगानन्तरमेव स्यात् कार्यमेतेन वा भवेत्" ॥—तत्त्वसं० का० ६६५ पृ० २२०।

१० "तस्माद् भवत एव दर्शनेऽङ्कुरादिकार्यप्रसवहेतुत्वं क्षित्यादीनां सर्वदा प्रसज्यत इति न संयोगार्थान्तरसापेक्षाः क्षित्यादय इति सिद्धम्"—तत्त्वसं० पञ्जि० पृ० २२१ पं० ९—।

एव । तथाहि-या संयुक्ताकारा बुद्धिः सा भवत्परिकल्पितसंयोगानास्पदवस्तुविशेषमात्रप्रभवा, 'संयुक्तौ प्रासादौ' इति बुद्धिवत्, संयुक्ताकारा च 'चैत्रः कुण्डली' इत्यादिबुद्धिः इति स्वभावहेतुः। यद्वा-या अनेकवस्तुसन्निपाते सति समुत्पद्यते सा भवत्परिकल्पितसंयोगविकलानेकवस्तुविशेषमात्रभाविनी, यथा विरलावस्थितानेकतन्तुविषया बुद्धिः, तथा च विमत्यधिकरणभावापन्ना संयुक्तबुद्धिः इति स्वभावहेतुः। एतदेव प्रयोगद्वयं विभागप्रतिषेधेऽपि वाच्यम्। तथाहि-मेषादिषु विभक्तबुद्धिः विभागरहितपदार्थविषयमात्रनिबन्धना, विभक्तबुद्धित्वात् अनेकपदार्थाऽसन्निधानायत्तोदयत्वाद् वा, देवदत्तयज्ञदत्तगृहविभागबुद्धिवत् हिमवत्-विन्ध्यविभागबुद्धिवद्वा । साध्यविपर्यये हेतोर्बाधकं प्रमाणम्-एकस्यानेकवृत्त्यनुपपत्तिः इति न संयोग-विभागगुणद्वयसद्भावः।

'इदं परम्' 'इदमपरम्' इति यतोऽभिधानप्रत्ययौ भवतः तद् यथाक्रमं परत्वम् अपरत्वं च सिद्धम्। प्रयोगश्चात्र-योऽयं 'परम्' 'अपरम्' इति च प्रत्ययः स घटादिव्यतिरिक्तार्थान्तरनिबन्धनः, तत्प्रत्ययविलक्षणत्वात्, सुखादिप्रत्ययवत्। तथाहि-एकस्यां दिशि स्थितयोः 'परम्' 'अपरम्' इति च प्रत्ययोत्पत्तेर्न तावदयं दिग्निबन्धनः, एकस्मिन्नपि वर्तमानकाले वर्तमानयोर्युव-स्थविरयोरनियतदिग्देशसंयुक्तयोः 'परम्' 'अपरम्' इति च प्रत्ययोत्पत्तेर्नाप्ययं कालनिबन्धनः तदविशेषेऽपि प्रत्ययविशेषात्; न चान्यद् अस्य निबन्धनमभिधातुं शक्यम् तस्माद् यन्निबन्धनोऽयं प्रत्ययः तत् परत्वम् अपरत्वं चाभ्युपगन्तव्यम्। एतच्च द्वितयमपि दिक्कृतम् कालकृतं च । दिक्कृतस्य तावदियमुत्पत्तिः—एकस्यां दिश्यवस्थितयोः पिण्डयोरेकस्य द्रष्टुः संनिकृष्टमवधिं कृत्वा 'एतस्माद् विप्रकृष्टोऽयम्' इति परत्वाधारे बुद्धिरुत्पद्यते ततस्तामपेक्ष्य परेण दिक्प्रदेशेन योगात् परत्वमुत्पद्यते; विप्रकृष्टं वाऽवधिं कृत्वा 'एतस्मात् संनिकृष्टोऽयम्' इत्यपरत्वाधारे बुद्धिरुत्पद्यते तामपेक्षा(क्ष्या)परेण दिक्प्रदेशेन योगाद् अपरत्वस्य उत्पत्तिः। कालकृतयोस्तु अयमुत्पत्तिक्रमः। तथाहि-वर्तमानकालयोः अनियतदिग्देशसंयुक्तयोर्युव-स्थविरयोर्मध्ये यस्य वली-पलित-रूढश्मश्रुतादिना अनुमितमादित्योदयानां भूयस्त्वम् तत्रैकस्य द्रष्टुर्युवानमवधिं कृत्वा स्थविरे विप्रकृष्टबुद्धिरुत्पद्यते तामपेक्ष्य परेण कालप्रदेशेन योगात् परत्वस्योत्पत्तिः, स्थविरं चावधिं कृत्वा यस्य अरूढश्मश्रुतादिना अनुमितमादित्योदयाऽस्तमयानामल्पत्वम् तत्र यूनि संनिकृष्टबुद्धिरुत्पद्यते तामपेक्ष्य अपरेण कालप्रदेशेन योगात् अपरत्वस्योत्पत्तिरिति।

अत्र च परत्वसाधनमनैकान्तिकम् साध्यविपक्षेऽपि हेतोर्वृत्तेः। तथाहि-यथा क्रमेण उत्पादाद् नीलादिषु कालोपाधिः क्रमेण च व्यवस्थानाद् दिगुपाधिश्च 'परं नीलम् अपरं च' इति प्रत्ययोत्पत्तिः असत्यपि परत्वापरत्वलक्षणे गुणे—गुणानां निर्गुणत्वात्—तथा पटादिष्वपि भविष्यतीति यद्यर्थान्तरनिमित्तत्वमात्रं परेण इह साधयितुमिष्टं तदा कथं न अनैकान्तिकता हेतोः? अथ नित्यदिक्-कालपदार्थहेतुकगुणविशेषनिबन्धनत्वं प्रकृतप्रत्ययस्य तदा दृष्टान्ताभावः अनुमानबाधा च प्रतिज्ञायाः। तथाहि-यः पराऽपरादिप्रत्ययः स परपरिकल्पितगुणरहितार्थमात्रकृतक्रमोत्पादव्यवस्थानिबन्धनः, परापरप्रत्ययत्वात्, रूपादिषु परापरप्रत्ययवत्, परापरप्रत्ययश्चायं घटादिषु इति स्वभावहेतुः। न च

---

१ "न पराभिमताद् योगाज्जायते युक्तवस्तुधीः। युक्तबुद्धितया यद्वत् प्रासादादिषु युक्तधीः ॥
अनेकवस्तुसद्भावे जायमानतयाऽथवा। विभक्तानेकतन्त्वादिविषया इव बुद्धयः ॥
विभागेऽपि यथायोगं वाच्यमेतत् प्रमाद्वयम्। एकस्यानेकवृत्तिश्च न युक्तेति प्रबाधकम्" ॥—तत्त्वसं० का० ६७२-६७४ पृ० २२३।

२ "परापराभिधानादिनिमित्तं यच्च कल्प्यते । परत्वमपरत्वं च दिक्कालावधिकं न तत्" ॥—तत्त्वसं० का० ६७५ पृ २२३।

३ "एकस्यां दिश्यवस्थितयोः पिण्डयोरेकस्य द्रष्टुः संनिकृष्टमवधिं कृत्वा एतस्माद् विप्रकृष्टोऽयमिति परत्वाधारे बुद्धिरुत्पद्यते ततस्तामपेक्ष्य परेण दिक्प्रदेशेन संयोगात् परत्वमुपजायते। विप्रकृष्टं चावधिं कृत्वा एतस्मात् सन्निकृष्टोऽयमित्यपरत्वाधारे बुद्धिरुत्पद्यते तामपेक्ष्यापरेण दिक्प्रदेशेन संयोगादपरत्वस्योत्पत्तिः"—तत्त्वसं० पञ्जि० पृ० २२४ पं० ११—।

४ "यस्य वलीपलितरूढश्मश्रुतादिनाऽनुमितमादित्योदयास्तमयानां बहुत्वम्"—तत्त्वसं० पञ्जि० पृ० २२४ पं० १६।

५ "यथा नीलादिरूपाणि क्रमभावव्यवस्थितेः। अन्योपाधिविवेकेऽपि तथोच्यन्ते तथापरे (परापरे)" ॥
—तत्त्वसं० का० ६७६ पृ० २२३।

नीलादिकेषु एकार्थसमवायाद् उपचरितोऽयं परापरत्वादिप्रत्ययः इति अनैकान्तिकता भवत्प्रयुक्तस्यापि हेतोः पारंपर्येण च नीलादिष्वपि परत्वादेर्निमित्तभावोपगमात् साध्यविकलता च दृष्टान्तस्येति वक्तव्यम्, अस्खलद्वृत्तित्वेन अस्य उपचरितत्वाभावात् स्वाश्रयेऽपि च तयोरुपलब्ध्यभावाद् न तद्बलेन प्रत्ययो युक्त इति कुतो रूपादिषु तन्निबन्धनो भविष्यति? सुखादिषु वा पूर्वोत्तरकालभाविषु[1] किंनिबन्धनोऽयं भवेत्? न चैवं तत्रैकार्थसमवायादेस्तन्निबन्धनस्याभावात्। किञ्च, दिक्-कालयोः पूर्वमेव प्रतिषिद्धत्वात् तद्धेतुकयोः परत्वाऽपरत्वयोरभाव इति कुतस्तन्निमित्तत्वाशङ्का येन हेतोरनैकान्तिकता स्यात्? न च परमार्थतो दिक्-कालयोः प्रदेशाः सन्ति यतस्तत्संयोगादपेक्षाबुद्धिसहिताद् उत्पत्तिस्तयोर्भवेत्। दिक्-कालयोरेकात्मकत्वेन निरवयवत्वाद् न चार्थक्रियानिबन्धन उपचरितोऽवयवभेदो युक्तः अर्थक्रियाया वस्तुस्वभावप्रतिबद्धत्वात् उपचारस्य च अपारमार्थिकत्वात्। तत् कुतः अनैकान्तिकता प्रकृतहेतोः? असिद्धता च परोपन्यस्तहेतोः पूर्ववद् वाच्या।

'[2]न संख्यादयो गुणा द्रव्याद् अव्यतिरेकिणः, तेषां तद्व्यवच्छेदहेतुत्वात्, यो हि यद्व्यवच्छेदकः नासौ तदव्यतिरेकी देवदत्तव्यवच्छेदकदण्डादिवत्, तथा च संख्यादयो द्रव्यव्यवच्छेदकाः, तस्माद् न तदव्यतिरेकिणः' इत्यत्र प्रयोगे यदि [3]द्रव्याद् अव्यतिरेकत्वनिषेधमात्रं साध्यं तदा सिद्धसाध्यतः सर्वसंवृतिमतामवस्तुतया तत्त्वाऽन्यत्ववाच्यत्वेन अनिष्टेः। अथ 'समूह-संतानादयः तत्त्वाऽन्यत्वाभ्यामवचनीया न भवन्ति, प्रतिनियतधर्मयोगित्वात्, रूपादिवत्' अत्रापि यदि पारमार्थिकनियतधर्मत्वं हेतुत्वेनेष्टं तदा असिद्धो हेतुः, न हि संतानादीनां पारमार्थिकनियतधर्मयोगित्वं सौगतं प्रति सिद्धम्। अथ सामान्येन हेतुः तदा शशशृङ्गादावपि कल्पितनियतधर्मयोगित्वस्य अभावत्वाऽमूर्तत्वादेः सद्भावाद् अनैकान्तिकः। अथ न द्रव्यादव्यतिरेकप्रतिषेधमात्रं साध्यम् किं तर्हि? [4]द्रव्या(व्याद्) व्यतिरेकित्वम् प्रतिषेधद्वयेन प्रकृतार्थगतेः, असदेतत्; संख्यादेर्द्रव्याद् व्यतिरेकेण अनुपलम्भाद् अभावतो हेतोराश्रयासिद्धत्वप्रसक्तेः। न च द्रव्यात्मकत्वेन प्रतीयमानस्यापि संख्यादेर्भेदः साधयितुं शक्यः तदात्मनस्ततो भेदे तस्य निःस्वभावताप्रसक्तेः। [5]तन्न संख्यादयः परत्वाऽपरत्वपर्यन्ता द्रव्याद् व्यतिरेकिणः कुतश्चित् प्रमाणादवसीयन्ते इति न तथा ते सद्व्यवहारविषयाः।

१–भाविषु तन्निबन्धनोऽयं भवेत् तत्रैकार्थसमवायादेस्तन्निबन्धनस्याभावात् वा० बा०।

"सुखादिषु वा पूर्वोत्तरकालभाविषु किं कल्प्येत, न हि तत्रैकार्थसमवायोऽस्ति"—तत्त्वसं० पञ्जि० पृ० २२५ पं० ७।

२ "सङ्ख्यायोगादयः सर्वे न द्रव्याव्यतिरेकिणः। तद्व्यवच्छेदकत्वेन दण्डादिरिव चेन्मतम्॥

तेषां संवृतिसत्त्वेन वर्णनादिष्टसाधनम्। तत्त्वान्यत्वेन निर्वाच्यं नैव संवृतिसद् यतः"॥—तत्त्वसं० का० ६७७–६७८ पृ० २२५।

३ **द्रव्या व्यति**–वा० बा० भां० मां०। "तदत्र द्रव्यादव्यतिरेकित्वनिषेधमात्रे साध्ये सिद्धसाध्यता दोषः प्रतिज्ञायाः"—तत्त्वसं० पञ्जि० पृ० २२५ पं० २१।

४ "अथेत्यादिनात्राविद्धकर्णस्योत्तरमाशङ्कते—

अथानिर्वचनीयत्वं समूहादेर्निषिध्यते। यस्मान्नियतधर्मत्वं रूप-शब्द-रसादिवत्"॥—तत्त्वसं० का० ६७९ पृ० २२५।

५ "निःस्वभावतया तस्य तत्त्वतोऽम्बरपद्मवत्। न सिद्धा नियता धर्माः कल्पनारोपितास्तु ते॥

तथैवोक्तावनेकान्तो वियत्पद्मादिभिर्यतः। अभेदो व्यतिरेकश्च वस्तुन्येव व्यवस्थितः"॥—तत्त्वसं० का० ६८०–६८१ पृ० २२६।

६ "संख्यादेर्द्रव्यतोऽन्यत्वमेवं चेत् प्रतिपाद्यते। आश्रयासिद्धता हेतोः संख्यादीनामसिद्धितः॥

समुच्चयादिभिन्नं तु द्रव्यमेव तथोच्यते। स्वरूपादेव भेदश्च व्याहतः साधितो भवेत्"॥—तत्त्वसं० का० ६८२–६८३ पृ० २२६।

७ "किं तर्हि द्वौ प्रतिषेधौ विधिमेव गमयत इति प्रतिषेधद्वयेन द्रव्याद् व्यतिरेकित्वमेव साध्यत इति"—तत्त्वसं० पञ्जि० पृ० २२६ पं० १७।

८ "एवं तावत् परत्वान्ता गुणाः प्रतिषिद्धाः"—तत्त्वसं० पञ्जि० पृ० २२६ पं० २७।

ये चं[1] बुद्ध्यादयः प्रयत्नान्ता आत्मसमवेतत्वेन तद्गुणा अभ्युपगताः ते तथाभूतात्मनिषेधादेव प्रतिषिद्धाः। तथाहि–आत्मा एषामुत्पत्तिकारणत्वेन वा आश्रयोऽभ्युपगम्येत, स्थितिनिमित्ततया वा? न तावद् आद्यः पक्षः, अविकलकारणतया बुद्ध्यादेः सर्वदैव सर्वस्योत्पत्तिप्रसक्तेः अनाधेयातिशयस्य सहकार्यपेक्षाऽयोगात्। न च क्रम-यौगपद्यव्याप्तकार्योत्पादनसामर्थ्यस्य नित्ये संभवः तत्र क्रम-यौगपद्याभ्यामर्थक्रियाविरोधस्य प्रतिपादितत्वात्। न च द्वितीयोऽपि पक्षो युक्तः, स्थितेः स्थातुरव्यतिरेकात् तस्य तद्धेतुत्वे स्थातृहेतुत्वमेव स्यात् तच्च प्राक्तनन्यायेन असंगतम्। न च परिनिष्ठितात्मरूपत्वात् स्थातुः कश्चिद्धेतुः संभवी, तत्र तस्य अकिञ्चित्करत्वात्। व्यतिरेकेऽपि स्थितेः स्थातुर्न तेन किञ्चित् कृतं स्यात् स्थितेरर्थान्तरभूतायाः करणात्। एवं च अकिञ्चित्करः कथमाश्रयो बुद्ध्यादेरसौ भवेत्? न च स्थितेस्तत्संबन्धितया करणात् तस्याऽसावुपकारकत्वाद् आश्रयः तस्यास्तत्संबन्धित्वासिद्धेः भिन्नायास्तदुपकाराभावे संबन्धायोगात् तत उपकारकल्पनायामनवस्थाप्रसक्तेः समवायसंबन्धस्य च असिद्धेः। न च तस्य स्थितिं प्रति हेतुत्वमपि युक्तम् नित्यस्य क्वचिदपि सामर्थ्यायोगात्। किञ्च, स्थाप्यमानो बुद्ध्यादिः स्थितिस्वभावो वा तेन स्थाप्येत, अस्थितिस्वभावो वा? यदि अस्थितिस्वभावः नासौ केनचित् स्थापयितुं शक्यः तत्स्वभावाव्यतिक्रमात्। अथ स्थितिस्वभावः तदा तत्स्वभावस्य स्वयमेव तत्स्वभावतया तस्य स्थितिसिद्धेः किमकिञ्चित्करस्थापककल्पनया? अथ स्थातुः पाताभावं कुर्वन् स्थापकः न अकिञ्चित्करः, न; पाताभावस्य प्रसज्यप्रतिषेधरूपत्वे कारकव्यापाराविषयत्वात्, पर्युदासरूपत्वेऽपि किमसौ पात एव, उत पाताद् अन्यत् पदार्थान्तरम्? यदि पात एव तदा 'स्थापकः स्थातुः पातं करोति' इति प्राप्तम् तथा च कथमसौ स्थापको भवेत्? अथ पदार्थान्तरं पाताद् अन्यद् असौ करोति; नन्वेवं पदार्थान्तरकरणेऽपि स्थाता पतेदेव पदार्थान्तरोत्पादेऽपि तस्य त्राणासंभवात्। न च पदार्थान्तरेण स्थापकोत्पादितेन स्थातुः पातप्रतिबन्धः क्रियत इति वक्तव्यम्, तस्याऽपि पातादनन्यत्वे पात एव कृतः स्यात्, अन्यत्वे तेन तत्संबन्धासिद्धेस्तत्करणेऽपि स्थातुस्तदवस्थ एव पातो भवेत्; तेनापि अपरपातप्रतिबन्धकरणे तद्भिन्नाऽभिन्नविकल्पद्वयानतिवृत्तिद्वारेण अनवस्थादिप्रसक्तिः। तन्न कश्चित् कस्यचित् स्थापकः। किञ्च, भवेन्नाम बदरादेर्मूर्तद्रव्यस्य अधोगमनप्रतिबन्धकत्वेन कुण्डादिराश्रयः। बुद्ध्यादेस्तु अमूर्तस्य अधोगत्यभावात् किं कुर्वाण आत्मादिराश्रयो भवेत्? अपि च, नोत्पन्नानां बुद्ध्यादीनां कश्चिद् आश्रयः, सैंतां निराशंसतया आश्रितत्वानुपपत्तेः। नापि अनुत्पन्नानाम् निरुपाख्यतया तेषां तत्त्वायोगात्। किञ्च, "बुद्धिः उपलब्धिः ज्ञानम् इति अनर्थान्तरम्[3]" [न्यायद० १–१–१५] इति वचनाद् बुद्धेर्ज्ञानरूपता परैरभ्युपगता। न च तस्याः स्वसंविदितत्वमभ्युपगतम् बुद्ध्यन्तरग्राह्यतयाऽभ्युपगमात्। न च तथाभूतायास्तस्या रूपादिवद् बुद्धित्वं युक्तमिति प्राक् प्रतिपादितम्। सुख-दुःख-इच्छा-द्वेषादीनां च अज्ञानरूपत्वे रूपादिवन्नात्मविशेषगुणता अभ्युपगन्तुं युक्ता। ज्ञानरूपत्वे बुद्धेर्भेदेन अभिधानमसंगतमेव, कश्चिद् विशेषमुपादाय ज्ञानात्मकानामपि ततो भेदेन अभिधाने अभिमानादीनामपि भेदेन अभिधानं कार्यमित्यलमतिजल्पितेन।

गुरुत्व[4]-द्रवत्व-स्नेहानां तु रूपादिवद् गुणरूपता प्रतिषेध्या। 'गुरुत्वं[5] हि पृथिव्युदकवृत्ति

---

१ "बुद्ध्यादयस्तु प्रयत्नान्ता आत्माश्रितत्वेन तद्गुणा इष्टाः। ते चात्मनिषेधादेव निषिद्धा द्रष्टव्याः। न चैषामात्माऽऽश्रयो युक्तः। तथाहि—उत्पत्तिहेतुतया चामीषामात्माऽऽश्रयो भवेत् स्थितिहेतुतया वा? न तावदुत्पत्तिहेतुतया सर्वदैवाविकलकारणतया सुखादीनामुत्पत्तिप्रसङ्गात्" इत्यादि। "नापि स्थितिहेतुतया युक्तः स्थितेः स्थातुरव्यतिरिच्यमानरूपत्वात्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २२७ पं० १—।

२ "सदसतोश्च निराशंसत(या)नुपाख्यत्वेन चाश्रयणानुपपत्तिरिति"—तत्त्वसं० पञ्जि० पृ० २२७ पं० १८।

३ "यथोक्तम्—बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरमिति"—तत्त्वसं० पञ्जि० पृ० २२७ पं० २०।

"बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्यायाः"—प्रशस्त० कं० पृ० १७१ पं० १६।

४ "गुरुत्व-द्रवत्व-स्नेहानां तु रूपादिवत् प्रतिषेधो विधेयः"—तत्त्वसं० पञ्जि० पृ० २२७ पं० २५।

५ "गुरुत्वं जल-भूम्योः पतनकर्मकारणम्। × × × द्रवत्वं स्यन्दनकर्मकारणम् त्रिद्रव्यवृत्ति। तत् तु द्विविधम् सांसिद्धिकम् नैमित्तिकं च। सांसिद्धिकमपां विशेषगुणः नैमित्तिकं पृथिवी-तेजसोः सामान्यगुणः। × × × स्नेहोऽपां विशेषगुणः संग्रह-मृजादिहेतुः"—प्रशस्त० कं० पृ० २६३ पं० २५–पृ० २६६।

पतनक्रियानिबन्धनम्, द्रवत्वं तु पृथिव्युदक-ज्वलनवृत्ति स्प(स्य)न्दनहेतुः पृथिव्यनलयोर्नैमित्तिकम् अपां सांसिद्धिकम्, स्नेहस्तु अम्भसि एव स्निग्धप्रत्ययहेतुः' इत्यादिप्रक्रिया पृथिव्यादीनामाधारत्वनिषेधात् तद्गतरूपादिनिषेधाच्च निषिद्धैव, तन्न्यायस्य अत्रापि समानत्वात्।

संस्कारस्तु त्रिविधः—वेगः भावना स्थितस्थापकश्चेति—अभ्युपगतः। तत्र वेगाख्यः पृथिव्यप्-तेजो-वायु-मनस्सु मूर्तिमद्द्रव्येषु प्रयत्नाभिघातविशेषापेक्षात् कर्मणः समुत्पद्यते नियतदिक्क्रियाप्रबन्धहेतुः स्पर्शवद्द्रव्यसंयोगविरोधी च, तत्र शरीरादिप्रयत्नविशेषाविर्भूतकर्मविशेषनिमित्तः—यद्वशाद् इषोः अन्तराले अपातः—स च नियतदिक्क्रियाकार्यसंबन्धोन्नीयमानसद्भावः लोष्टाद्यभिघातोत्पन्नकर्मोत्पाद्यस्तु शाखादौ वेगाख्यः संस्कारः। भावनासंज्ञः पुनः आत्मगुणः ज्ञानजः ज्ञानहेतुश्च दृष्टाऽनुभूतश्रुतेष्वर्थेषु स्मृति-प्रत्यभिज्ञानकार्योन्नीयमानसद्भावः। मूर्तिमद्द्रव्यगुणः स्थितस्थापको घनावयवसंनिवेशविशिष्टं स्वमाश्रयं कालान्तरस्थायिनमन्यथा व्यवस्थितमपि प्रयत्नतः पूर्ववद् यथावस्थितं स्थापयतीति कृत्वा, दृश्यते च तालपत्रादेः प्रभूततरकालसंवेष्टितस्य प्रसार्यमुक्तस्य पुनस्तथैव अवस्थानं संस्कारवशात् एवं धनुः-शाखा-शृङ्ग-दन्तादिषु भुग्नापवर्तितेषु च वस्त्रादिषु तस्य कार्यं परिस्फुटमुपलभ्यत एवेति ततस्तत्सद्भावः सिद्धः। असदेतत्, क्षणभङ्गसिद्धौ वेगाख्यसंस्कारकार्यस्य कर्मप्रबन्धस्य असिद्धेः। न हि उत्पत्त्यनन्तरं भावानां नाशे नियतदिक्क्रियाप्रबन्धस्य तद्धेतोश्च संस्कारस्य उत्पत्तिः। न च स्वोपादानदेशाऽनन्तरदेशोत्पाद एव भावानां क्रियाप्रबन्धः, हेतोरनैकान्तिकत्वप्रसक्तेः। तथाहि-ततः प्राक्तनस्वहेतव एव सिद्धिमासादयन्ति न यथोक्तः संस्कारः तेन सह क्वचिदपि अन्वयासिद्धेः। यदि च तथाविधसंस्कारवशाद् इष्वादीनामपातस्तदा च न कदाचिदपि पातः स्यात् पातप्रतिबन्धकस्य वेगस्य सर्वदा अवस्थानात्। एवं च आकाशप्रसर्पिणः शरस्य अकस्मात् पातोपलब्धिर्न स्याद् भवदभ्युपगमेन। न च मूर्तिमद्द्रव्यादिसंयोगाद्युपहतशक्तित्वाद् वेगस्य पतनम् प्रथममेव पातप्रसक्तेः वाय्वादिसंयोगस्य तद्विरोधिनस्तदैव सद्भावात्। न च प्राग् वेगस्य बलीयस्त्वाद् विरोधिनमपि मूर्तद्रव्यसंयोगमपास्य स्वाधारं देशान्तरं प्रापयति, पश्चादपि तस्य बलीयस्त्वात् तथैव तत्प्रापकत्वप्रसक्तेः। न हि वेगस्य पश्चाद् अन्यथात्वम् अन्यथोत्पत्तिकारणाभावात् तत्समवायिकारणस्य इष्वादेः सर्वत्र अविशिष्टत्वात्। न च कर्माख्यं कारणं पश्चाद् विशिष्यत इति वक्तव्यम् तस्यापि तुल्यपर्यनुयोगत्वात्, अन्यत्वेऽपि च प्रतिक्षणं कर्मणः वेगस्य प्राक्तनस्यैव अवस्थानाद् विनाशकारणाभावात् शरस्य अपात एव स्यात्। न च वायुसंयोगस्तस्य विनाशकारणम् प्रथममेव तत्संयोगाद् वेगविनाशाद् इषोः पातप्रसङ्गात् सर्वत्र वायोरविशेषेण तत्संयोगस्यापि अविशेषात्। न च प्रभूताकाशदेशसंयोगोत्पादनात् संस्कारप्रक्षयाद् इषोः पातः, संस्कारस्यैकस्वभावत्वेन अवस्थितस्य प्रागिव पश्चादपि प्रक्षयानुपपत्तेः। न च आकाशदेशाः परेणाऽभ्युपगम्यन्ते येन तत्संयोगानां भूयस्त्वं संस्कारक्षयहेतुत्वं वा युक्तियुक्तं भवेत्। कल्पनाशिल्पिघटितानां तु आकाशदेशानां संयोगभेदकत्वमनुपपन्नम् तदायत्तभेदानां च संयोगानां संस्कारक्षयहेतुत्वं दूरोत्सारितमेव इषोस्तु पातोऽन्यथासिद्ध इत्यलमतिप्रपञ्चेन।

स्मृत्यादिकार्यात् तु सामान्येन यदि भावनामात्रं साध्यते तदा सिद्धसाध्यता पूर्वानुभवाऽऽहितसामर्थ्यलक्षणाया ज्ञानस्यात्मभूतायास्तस्याः स्मृतिहेतुत्वेन अस्माभिरपि अभ्युपगमात्। अथ आत्मगुणस्वरूपा भावना साधयितुमभिप्रेता तदा तया तथाभूतया स्मृत्यादेः क्वचिदपि अन्वयासिद्धेरनैकान्तिकता हेतोः, प्रतिज्ञायाश्च अनुमानबाधितत्वम् तदाधारस्य आत्मनः पूर्वमेव निराकृतत्वात्

---

१ "वेगाख्यो भावनासंज्ञः स्थितस्थापकलक्षणः। संस्कारस्त्रिविधः प्रोक्तः"—तत्त्वसं० का० ६८४ पृ० २२७।

"त्रिविधः संस्कारो वेगो भावना स्थितस्थापकश्चेति"—तत्त्वसं० पञ्जि० पृ० २२८ पं० ३। "संस्कारस्त्रिविधो वेगो भावना" स्थितिस्थापकश्च "स्थितस्थापकः-पा० पु०।"—प्रशस्त० कं० पृ० २६६ पं० २३—।

२ "नासौ संगच्छतेऽखिलः॥

क्षणिकत्वात् पदार्थानां न काचिद् विद्यते क्रिया। यत्प्रबन्धस्य हेतुः स्यात् संस्कारो वेगसंज्ञकः"॥

—तत्त्वसं० का० ६८४-६८५ पृ० २२७-२२८।

३ "भावनाख्यस्तु संस्कारश्चेतसो वासनात्मकः। युक्तो नात्मगुणश्चेदं युज्यते तन्निराकृतेः"॥—तत्त्वसं० का० ६८६ पृ० २२९।

तदभावे तस्या अपि अभावात्। तथाहि-ये यदाश्रितास्ते तस्याऽभावे अवस्थितिं न प्रतिलभन्ते, यथा कुड्याभावे चित्रादयः, आश्रिताश्च परेण आत्मनि संस्कारादयोऽभ्युपगम्यन्ते इति व्यापकविरुद्धोपलब्धिः। स्थितस्थापकस्तु संस्कारः अत्यन्तमसंगत एव। तथाहि-असौ किं स्वयमस्थिरस्वभावं भावं स्थापयति, उत स्थिरस्वभावमिति पक्षद्वयम्। यदि अस्थिरस्वभावम् तदा क्षणादूर्ध्वं तस्य स्वयमेव अभावात् कस्य असौ स्थापकः स्यात्? अथ द्वितीयः पक्षः तदा स्थिरे स्वभावेऽवस्थितानां भावानां तादूप्यादेव अवस्थानात् किमकिञ्चित्करस्थापकप्रकल्पनया? न च क्षणिकत्वेऽपि भावानामेकक्षणावस्थितानु(वु)त्तरकालं स्थापकस्य सामर्थ्यमङ्गीक्रियते यतः स्वरूपप्रतिलम्भलक्षणैव भावानां स्थितिरुच्यते न पुनर्लब्धात्मसत्ताकानाम् आत्मरूपसंधारणलक्षणोत्तरकालं स्वयं चलात्मन उत्तरकालमवस्थानासंभवात् संभवे वा न कदाचिदपि निवृत्तिः स्यात् पूर्ववत् पश्चादपि अविशिष्टत्वात् अतत्स्वभावत्वप्रसङ्गाच्च। न च क्षणस्थितिप्रबन्धेऽपि स्थापकस्य सामर्थ्यसिद्धिः, पूर्वपूर्वकारणसामर्थ्यकृतस्य उत्तरोत्तरकार्यप्रसवस्य संस्कारमन्तरेणापि सिद्धेः, अक्षणिकस्य तु अन्यथात्वासंभवात् स्वत एव स्थितिरिति न तत्रापि स्थापकोपयोगः। न च संस्कारस्य क्षणोत्पादनेऽपि सामर्थ्यम् प्राक्तनक्षणमन्तरेण अपरस्य तत्राऽपि सामर्थ्यानवधारणात्। तथाहि-प्रमाणाधीना प्रमेयव्यवस्था। न च प्रसिद्धकारणव्यतिरेकेण वस्त्रादिषु प्रत्यक्षाऽनुपलम्भाभ्यां चक्षुरादिवद् वा कार्यव्यतिरेकतोऽपरस्य सामर्थ्यावधारणम्। न च अदृष्टसामर्थ्यस्यापि हेतुत्वकल्पना अतिप्रसङ्गात् तदपरापरहेतुप्रकल्पनाया अनिवृत्तेः। न च संस्कार उत्पादकहेतुरिष्टः परैः किन्तु उत्पन्नस्य वस्त्रादेरुत्तरकालं स्थापको गुणः, तत्र च अस्य अकिञ्चित्करत्वमेवेति प्राग् व्यवस्थापितम्।

"कर्तृफलदायी आत्मगुण आत्म-मनःसंयोगजः स्वकार्यविरोधी धर्माऽधर्मरूपतया भेदवान् अदृष्टाख्यो गुणः" [ ] इति वैशेषिकैः परोक्षाऽदृष्टस्वरूपमुपवर्णितम्। कर्तुः प्रियहित-मोक्षहेतुर्धर्मः अधर्मस्तु अप्रिय-प्रत्यवायहेतुः" [प्रशस्तपा० भा० पृ० २७२ पं० ८ तथा पृ० २८० पं० ४] इति, एतच्च तत्समवायिकारणस्य आत्मनो मनसः आत्म-मनःसंयोगस्य च निमित्ताऽसमवायिकारणत्वेन अभ्युपगतस्य निषेधात् कारणाभावे कार्यस्यापि अभावात् सर्वमनुपपन्नम्।

शब्दस्तु आकाशगुणत्वेन अभिमतः तस्य च आकाशगुणत्वं प्राग् निषिद्धमिति न चतुर्विंशतिरपि गुणाः प्रमाणोपपत्तिकाः॥

[निरूपणपुरस्सरं कर्मपदार्थस्य खण्डनम्] २५

उत्क्षेपणादीनि पञ्च कर्माणि। तथा च सूत्रम्—"उत्क्षेपणम् अपक्षेपणम् आकुञ्चनम् प्रसारणम्

---

१ "स्थितस्थापकरूपस्तु न युक्तः क्षणभङ्गतः। स्थितार्थासंभवाद् भावे तादूप्यादेव संस्थितिः"॥

—तत्त्वसं० का० ६८७ पृ० २२९।

२-तानामुत्तरका-आ० हा० वि०। "अथापि स्यात् क्षणिकत्वेऽपि सर्वभावानामेकक्षणावस्थितौ प्रबन्धेन चानुवृत्तौ तस्य सामर्थ्यमुच्यत इति"—तत्त्वसं० पञ्जि० पृ० २३० पं० १।

३ "क्षणं त्वेकमवस्थानं स्वहेतोरेव जातितः। पूर्वपूर्वप्रभावाच्च प्रबन्धेनानुवर्तनम्"॥—तत्त्वसं० का० ६८८ पृ० २३०।

४ "नान्यथोदयवानेष कस्यासौ स्थापकस्ततः। न चास्य दृष्टं हेतुत्वं संस्कारोऽन्योऽपि वा भवेत्॥

उत्पन्नस्यैव चेष्टोऽयं वस्त्रादेः स्थापको गुणः। गुणसंस्कारनामैवं सर्वथापि न संभवी"॥—तत्त्वसं० का० ६८९-६९० पृ० २३०।

५ "अथ अदृष्टसामर्थ्यस्यापि हेतुत्वं कल्प्यते तदा संस्कारः अन्योऽपि वा शुक-बकादिरुत्पत्तेर्हेतुर्भवेत्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २३० पं० २०।

६ "कर्तृफलदाय्यात्मगुण आत्ममनःसंयोगजः स्वकार्यविरोध्यदृष्टम्। तच्च द्विविधं धर्माऽधर्मभेदात्। तत्र धर्मः कर्तुः प्रियहितमोक्षहेतुः अधर्मस्त्वप्रियाहितप्रत्यवायहेतुरिति परोक्तादृष्टलक्षणम्"—तत्त्वसं० पञ्जि० पृ० २३१ पं० ५-।

७ "मनोयोगात्मनां पूर्वं विस्तरेण निबन्धनात्। परोक्तलक्षणोपेतं नादृष्टमुपपद्यते"॥—तत्त्वसं० का० ६९१ पृ० २३१।

८ पृ० १३६ पं० १३। ९ "उत्क्षेपणमपक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणीति सूत्रम्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २३१ पं० १४।

गमनमिति कर्माणि" [वैशेषिकद० १-१-७] इति । तत्र उत्क्षेपणं यद् ऊर्ध्वाधःप्रदेशाभ्यां संयोग-विभागकारणं कर्म उत्पद्यते । यथा-शरीरावयवे तत्संबन्धे वा मूर्तिमति मुशलादौ द्रव्ये ऊर्ध्वभागिभिः आकाशदेशाद्यैः संयोगकारणम् अधोदिग्भागावच्छिन्नैश्च तैर्विभागकारणं प्रयत्नादिवशात् कर्म तद् उत्क्षेपणमुच्यते, एतद्विपरीतसंयोग-विभागकारणं च कर्म अपक्षेपणम्, ऋजुद्रव्यस्य कुटिलत्वकारणं च कर्म आकुञ्चनम् यथा-ऋजुनोऽङ्गुल्यादिद्रव्यस्य ये अग्रावयवास्तेषामाकाशादिभिः स्वसंयोगिभिर्विभागे सति मूलप्रदेशैश्च संयोगे सति येन कर्मणा अङ्गुल्यादिरवयवी कुटिलः संपद्यते तद् आकुञ्चनम्, एतद्विपर्ययेण तु संयोग-विभागोत्पत्तौ येन अवयवी ऋजुः संपद्यते तत् कर्म प्रसारणम्, अनियतदिग्देशैर्यत् संयोग-विभागकारणं तद् गमनम् । चतुष्प्रकारमपि उत्क्षेपणादिकं कर्म नियतदिग्देशसंयोग-विभागकारणम् । अनियतदिग्भिस्तु भावैः संयोग-विभागकारणं तु कर्म गमनम् तेन भ्रमण-स्पन्दन-रेचनादीनामपि गमन एव अन्तर्भावात् पञ्चैव कर्माणि । मूर्तिमद्द्रव्यसंयोग-विभागकार्योपलम्भात् पञ्चविधस्यापि कर्मणोऽनुमानात् प्रसिद्धिः । तथा, अध्यक्षतोऽपि उत्क्षेपणादेः कर्मणः प्रतिपत्तिः इन्द्रियव्यापारेण 'गच्छति' इत्यादिप्रतिपत्युत्पत्तेः । तथाच—"संख्याः परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वाऽपरत्वे कर्म च रूपिसमवायाच्चाक्षुषाणि" [वैशेषिकद० ४-१-११] इति सूत्रमपि उपपन्नम् ।

अत्र संयोग-विभागलक्षणं तावत् तत्कार्यमसिद्धम् तयोः पूर्वमेव निषेधात् । न च नैरन्तर्योत्पादादिमात्रलक्षणौ तत्कार्यतया संयोग-विभागौ हेतुत्वेन वाच्यौ, तथाविधेन कर्मणा तयोः क्वचिद् अन्वयासिद्धेः अनैकान्तिकताप्रसक्तेः । साध्यविपर्ययेण च हेतोर्व्याप्तेर्विरुद्धताऽपि वक्तव्या । सिद्धसाध्यता च कारणमात्राऽस्तित्वे साध्ये तथाविधसंयोग-विभागकारणत्वेन वाय्वादेरभीष्टेः । कारणविशेषास्तित्वे च साध्ये अनुमानबाधः प्रतिज्ञायाः । तथाहि-पदार्थानां क्रिया भवन्ती क्षणिकानां भवेत्, अक्षणिकानां वा ? न तावत् क्षणिकानाम् उत्पत्तिदेशे एव तेषां ध्वंसाद् देशान्तरप्राप्यसंभवात् । तथाहि-यो यत्र देशे ध्वंसते स न तदन्यदेशमाक्रामति, यथा प्रदीपादिः, जन्मदेशे एव च ध्वंसन्ते सर्वभावा इति व्यापकविरुद्धोपलब्धिः । न च असिद्धताऽस्य हेतोः अन्यस्य क्षणिकत्वायोगात् । अथ यदि नाम भावानां क्षणिकता इष्यते तथापि उत्पत्तिकाल एव किं नैषां क्रिया भवति ? नैतत् । यतः पाश्चात्यदेशविश्लेषे पुरोवर्तिदेशश्लेषे च सति गन्ता भावो भवति नाकाशादिः । न च एकः क्षणमात्रभाविनः क्रियाकालविलम्बः संभवति येन प्राक्तनदेशपरिहारेण अपरदेशमाक्रामेत् सत्ताकाल एव ध्वंसवशीकृतत्वात् । तन्न जन्मकालभाविनी क्रिया, नाऽपि पूर्वोत्तरयोः कोट्योः, तस्यैव तदानीमभावात् । अतः उत्पत्तिक्षणात् परतः क्षणमपि यो न व्यवतिष्ठेत तस्य आस्तां विदूरतरदेशाँवक्रमणसंभवः परमाणुमात्रप्रदेशसंक्रमणमपि नास्तीति कुतः क्षणिकस्य क्रिया । नाँपि अक्षणिकस्य

---

१ "तन्नोत्क्षेपणं शरीरावयवेषु तत्संबद्धेषु च यदूर्ध्वभागिभः प्रदेशैः संयोगकारणमधोभागिभश्च प्रदेशैः विभागकारणं कर्म उत्पद्यते गुरुत्व-प्रयत्न-संयोगेभ्यस्तदुत्क्षेपणम्" इत्यादि—प्रशस्त० कं० पृ० २९१ पं० १०-पृ० २९२ ।

२ "तत्संबद्धे वा"—तत्त्वसं० पञ्जि० पृ० २३१ पं० १५ ।

३ "रूपिद्रव्यसमवायाच्चा"—वैशेषिकद० ४-१-११ ।

४ पृ० ६७९ पं० १०—।

५ "क्षणक्षयिषु भावेषु कर्मोत्क्षेपाद्यसंभवि । जातदेशे च्युतेरेव तदन्यप्राप्त्यसंभवात् ॥
जन्मातिरिक्तकालं हि क्रियाकालं परे जगुः । इष्टाशुतरनाशेषु दीपादिष्वपि वस्तुषु ॥
तथाहि कारणाश्लेषः सामान्यस्याभिव्यञ्जनम् । स्वावयवे ततः कर्म विभागस्तदनन्तरम् ॥
संयोगस्य विनाशश्च ततो द्रव्यस्य संक्षयः । षट्क्षणस्थायितैवेष्टा दीपादावपि वस्तुनि ॥
पश्चिमाग्रिमदेशाभ्यां विश्लेषाऽऽश्लेषसंभवे । गन्ताऽपरो वा सर्वश्च कर्माधारः प्रकल्पितः ॥
यो जनः क्षणमध्यास्ते नैव जातु चलात्मकः । तस्याप्यन्तरमात्रेऽपि देशसंक्रान्त्यसंभवः" ॥
—तत्त्वसं० का० ६९२-६९७ पृ० २३१-२३२-२३३ ।

६ **-शाच्चंक्रम**-वा० बा० आ० । "अतो यः क्षणमपि नास्ते तस्यास्तां तावद् विदूरतरदेशान्तरावक्रमण(णा)संभवः"—तत्त्वसं० पञ्जि० पृ० २३३ पं० ११ ।

७ "स्थैर्ये तु वस्तुनः सर्वे दुर्घटा गमनादयः । सुतरामेव सर्वासु दशास्वस्याविशेषतः" ॥—तत्त्वसं० का० ६९८ पृ० २३३ ।

असौ युक्ता, यत एकरूपं हि सर्वदा वस्तु अक्षणिकमुच्यते न च तस्य आकाशवत् सर्वदाऽविशिष्टत्वात् क्रियासमावेशो युक्तः । तथाहि-यत् सर्वदा अविशिष्टं न तस्य क्रियासंभवः, यथा आकाशस्य, अविशिष्टं च वस्तु अक्षणिकाभिमतं सर्वदा इति व्यापकविरुद्धोपलब्धिप्रसङ्गः । न च अक्षणिकस्य अविशिष्टत्वेऽपि प्रकृत्यैव गन्तृरूपत्वात् क्रियावत्त्वं भविष्यतीत्यनैकान्तिकता हेतोराशङ्कनीया, यतो यदि प्रकृत्यैव उत्क्षेपणादिक्रियायोगिनो भावा भवेयुस्तदा नैषां कदाचिन्निश्चलता भवेत् सर्वदा एकरूपत्वात् । अथ अगन्तृरूपताऽप्येषामङ्गीक्रियते तथासति सर्वदा एकरूपत्वाद् आकाशवद् अगन्तारो भवेयुः । एवं च गत्यवस्थायामपि अचलत्वमेषां प्रसक्तम् अपरित्यक्ताऽगतिरूपत्वात् निश्चलावस्थावत् । अथ उभयरूपत्वाद् एषामयमदोषः, नैवम्; गन्तृत्वाऽगन्तृत्वविरुद्धधर्माध्यासादेकत्वव्याहतिप्रसक्तेः क्षणिकतैव आपद्येत भिन्नस्वभावयोरचलाऽनिलयोरिव अत्यन्तभेदात् । अनुमानविरोधवद् अध्यक्षविरोधोऽपि प्रतिज्ञायाः । तथाहि-यँद् उपलब्धिलक्षणप्राप्तं सद् नोपलभ्यते न तत् प्रेक्षावता 'सत्' इति व्यवहर्तव्यम्, यथा क्वचित् प्रदेशविशेषेऽनुपलभ्यमानो घटः, नोपलभ्यते च विशिष्टरूपादिव्यतिरेकेण कर्मेति स्वभावानुपलब्धिः । तथा, तथादेशान्तरावष्टम्भोत्पादिरूपादिव्यतिरेकेण इन्द्रियज्ञाने कर्मणः प्रतिभासानुपलक्षणात् उत्क्षेपणादिबुद्धेस्तु साभिजल्पत्वात् अनध्यक्षत्वम् । न चेयं कर्मपदार्थानुभवसामर्थ्यभाविनी, यथासंकेतं तथोत्पद्यमानरूपादिवशेन उत्पत्तेः 'नित्याऽनित्ययोर्गत्ययोगात्' इति प्रतिपादनात्, गतिव्यवहारस्तु लोके अपरापरनैरन्तर्योत्पत्तिमत्पदार्थोपलब्धेः 'स एवायं गच्छति' इति भ्रान्त्युत्पत्तेः प्रदीपादौ गमनव्यवहारवद् उपपद्यत एव न हि प्रदीपादिः स एव देशान्तरमाक्रामति षट्क्षणस्थायित्वेन तस्य परैरभ्युपगमात् "स्वकारणसंबन्धकालः प्रथमः ततः स्वसामान्याभिव्यक्तिकालः ततः अवयवकर्मकालः ततः अवयवविभागकालः ततः स्वारम्भकावयवसंयोगविनाशकालः ततः द्रव्यविनाशकालः" [ ] इति प्रक्रियोपवर्णनात् । अथ च तत्रापि 'स एव प्रदीपादिर्गच्छति' इति व्यवहारप्रवृत्तिरिति नान्यथासिद्धाद् व्यवहारमात्राद् द्रव्यव्यतिरिक्तकर्माभ्युपगमः श्रेयानिति स्थितम् ॥

[निरूपणपुरस्सरं सामान्यपदार्थस्य खण्डनम्]

परँाऽपरभेदभिन्नं सामान्यमपि द्रव्य-गुण-कर्मात्मकपदार्थत्रयाश्रितत्वाभ्युपगमात् तन्निरासान्निरस्तमेव आश्रयमन्तरेण आश्रितानां सद्भावेऽनाश्रितत्वप्रसङ्गात् । तथापि परेषां तत्राभिनिवेश

---

१ "यदि गन्त्रादिरूपं तत्प्रकृत्या गमनादयः । सदा स्युः क्षणमप्येवं नावतिष्ठेत निश्चलम् ॥
यस्माद् गत्याद्यसत्त्वेऽपि प्राप्नुवन्त्यस्य ते ध्रुवम् । अत्यक्तपूर्वरूपत्वाद् गत्याद्युदयकालवत्" ॥
—तत्त्वसं० का० ६९९-७०० पृ० २३३ ।

२ "अथागन्त्रादिरूपं तत्प्रकृत्याऽगमनादयः । सदा स्युः क्षणमप्येकं नैव प्रसन्दवद् भवेत् ॥
यस्माद् गत्यादिभावेऽपि निश्चलात्मकमेव तत् । अत्यक्तपूर्वरूपत्वाद् निश्चलात्मककालवत्" ॥
—तत्त्वसं० का० ७०१-७०२ पृ० २३४ ।

३ "यदि तु स्यादगन्ताऽयमेकदा चान्यथा पुनः । परस्परविभिन्नात्मसंगतेर्भिन्नता भवेत् ॥
अत्यन्तभिन्नावात्मानौ ताविति व्यवसीयते । विरुद्धधर्मवृत्तित्वात् चलनिश्चलवस्तुवत्" ॥
—तत्त्वसं० का० ७०३-७०४ पृ० २३४ ।

४ "दृश्यत्वाभिमतं कर्म न वस्तुव्यतिरेकि च । दृश्यते सोऽपि नैवास्य सत्ता युक्त्यनुपातिनी ॥
अस्थिरे वा स्थिरे वैवं गत्यादीनामसंभवः । प्राक्तनाऽपरदेशाभ्यां विभागप्राप्त्ययोगतः" ॥
—तत्त्वसं० का० ७०५-७०६ पृ० २३४-२३५ ।

५ **तथा देशा**-भां० मां० । "न हि रूपादेस्तथादेशान्तरावष्टम्भेनोत्पद्यमानस्य व्यतिरेकेण"—तत्त्वसं० पञ्जि० पृ० २३५ पं० ३ ।

६ "देशान्तरोपलब्धेस्तु नैरन्तर्येण जन्मनः । समानापरवस्तूनां गतिभ्रान्तिः प्रदीपवत्" ॥
—तत्त्वसं० का० ७०७ पृ० २३५ ।

७ "द्रव्यादिषु निषिद्धेषु जातयोऽपि निराकृताः । पदार्थत्रयवृत्ता हि सर्वास्ताः परिकल्पिताः" ॥
—तत्त्वसं० का० ७०८ पृ० २३६ ।

इति पराभ्युपगमप्रदर्शनपूर्वकः तद्विशेषप्रतिषेधप्रदर्शनमार्गः प्रदर्श्यते-तत्र सामान्यं द्विविधम्-परम् अपरं च । परं सत्ताख्यम् तच्च त्रिषु द्रव्य-गुण-कर्मसु पदार्थेषु अनुवृत्तिप्रत्ययस्यैव कारणत्वात् सामान्यमेव न विशेषः । अपरं तु द्रव्यत्व-गुणत्व-कर्मत्वादिलक्षणम् तच्च स्वाश्रयेषु द्रव्यादिषु अनुवृत्तिप्रत्ययहेतुत्वात् सामान्यमित्युच्यते, स्वाश्रयस्य च विजातीयेभ्यो व्यावृत्तप्रत्ययहेतुतया विशेषणात् सामान्यमपि सद् विशेषसंज्ञां लभते । तथाहि-द्रव्यादिषु 'अगुणः' इत्यादिका या इयं व्यावृत्तबुद्धिरुत्पद्यते तां प्रति एषामेव हेतुत्वं नान्यस्य न हि अगुणत्वादिकमपरमस्ति, अपेक्षाभेदाच्च एकस्य सामान्यविशेषभावो न विरुध्यते यद्वा सामान्यरूपता मुख्यतः विशेषसंज्ञा तु उपचारतः विशेषाणामिव द्रव्यत्वादीनामपि व्यावृत्तबुद्धिनिबन्धनत्वात् । सामान्यस्य चेन्द्रियान्वयव्यतिरेकानुविधाय्यनुगताकारप्रत्ययग्राह्यत्वाद् अध्यक्षतः प्रसिद्धिः । तथा, अनुमानाच्च । तथाहि-व्यावृत्तेषु खण्ड-मुण्ड-शाबलेयादिषु अनुगताकारः प्रत्ययः तद्व्यतिरिक्तानुगताकारनिमित्तनिबन्धनः, व्यावृत्तेषु अनुगताकारप्रत्ययत्वात्, यो यो व्यावृत्तेषु अनुगताकारः प्रत्ययः स स तद्व्यतिरिक्तानुगतनिमित्तनिबन्धनः यथा चर्म-चीर-कम्बलेषु नीलप्रत्ययः, तथा चायं शाबलेयादिषु 'गौः' 'गौः' इति प्रत्ययः, तस्मात् तद्व्यतिरिक्तानुगतनिमित्तनिबन्धन इति । तथाहि-नेदंमनुस्यूताकारज्ञानं पिण्डेषु निर्हेतुकम्, कादाचित्कत्वात् । न शाबलेयादिपिण्डनिबन्धनम्, तेषां व्यावृत्तरूपत्वात् अस्य च अनुगतरूपत्वात् । यदि चेदं पिण्डमात्रप्रभवं स्यात् तदा शाबलेयादिष्विव कर्कादिष्वपि 'गौः' 'गौः' इति उल्लेखेन उत्पद्येत पिण्डरूपतायास्तेष्वपि अविशेषात् । अथ वाह-दोहाद्यर्थक्रियानिबन्धनेष्वेव तेषु 'गौः' 'गौः' इतिप्रत्ययहेतुता, न; तदर्थक्रियाऽभावेऽपि वत्सादौ गोबुद्धिप्रवृत्तेः महिष्यादौ तत्सद्भावेऽपि च अप्रवृत्तेः । किञ्च, अर्थक्रियाया अपि प्रतिव्यक्तिभेदे कुतोऽनुगताकारज्ञानहेतुता? अभेदे सिद्धमनुगतनिमित्तनिबन्धनत्वमस्य ज्ञानस्य । न चास्य बाधितत्वम्, सर्वदा सर्वत्र सर्वप्रमातृणां शाबलेयादिषु अनुस्यूतप्रत्ययोत्पत्तेः । न च दुष्टकारणप्रभवत्वम्, विशदनेत्राणामप्यनुस्यूताकारस्य अक्षजप्रत्यये प्रतिभासनात् । न च संशय-विपर्ययाऽनध्यवसायरूपतयाऽस्योत्पत्तिः, तद्वैपरीत्येन अस्य प्रतिभासनात् । न चैवंभूतस्याऽपि प्रत्ययस्य अप्रमाणता स्वलक्षणविषयस्यापि तस्य अप्रमाणताप्रसक्तेः । न च प्रतीयमानस्यापि अनुगतप्रत्ययस्य अपलापः शक्यते कर्तुम्, सर्वप्रत्ययापलापप्रसक्तेः । तस्माद् अनुगतप्रत्ययनिमित्तत्वात् सामान्यसद्भावः सिद्धः ।

अत्र प्रतिविधीयते-यत् तावदुक्तम् 'अध्यक्षप्रत्ययादेव सामान्यं प्रतीयते' इति, तदयुक्तम्; शाबलेयादिव्यतिरेकेण अपरस्य अनुगताकारस्य अक्षजप्रत्यये सामान्यस्य अप्रतिभासनात् । न हि अक्षव्यापारेण शाबलेयादिषु व्यवस्थितं सूत्रकण्ठे गुण इव भिन्नमनुगताकारं सामान्यं केनचिल्लक्ष्यते

१ "तत्रेयं द्विविधा जातिः परैरभ्युपगम्यते । सामान्यमेव सत्ताख्यं समस्तेष्वनुवृत्तितः ॥
द्रव्यत्वादि तु सामान्यं सद्विशेषोऽभिधीयते । स्वाश्रयेष्वनुवृत्तस्य चेतसो हेतुभावतः ॥
विजातिभ्यश्च सर्वेभ्यः स्वाश्रयस्य विशेषणात् । व्यावृत्तिबुद्धिहेतुत्वं तेषामेव ततः स्थितम्" ॥
—तत्त्वसं० का० ७०९-७११ पृ० २३६ ।

"प्रत्यक्षतः प्रसिद्धास्तु सत्त्व-गोत्वादिजातयः । अक्षव्यापारसद्भावे सदादिप्रत्ययोदयात् ॥"
—तत्त्वसं० का० ७१४ पृ० २३७ ।

३ "अनुमानबलेनापि सत्त्वमासां प्रतीयते । विशेषप्रत्ययो येन निमित्तान्तरभाविकः" ॥
—तत्त्वसं० का० ७१५ पृ० २३७ ।

४ अतः परं भाविविक्तोद्द्योदकरादिमतमालम्ब्य तत्त्वसंग्रहकारिकाभिः (का० ७१६-८१२ पृ० २३८-२६२) तत्पञ्जिकया च विहितया समग्रया सामान्यपदार्थपरीक्षया नैषा टीका सर्वशः साम्यं बिभर्ति तथापि अन्तराऽन्तरा साम्यं वर्तते तच्च यथास्थानं निर्देक्ष्यते, भावार्थस्तु समानो भाति । सविस्तरं विज्ञातुकामैस्तु ताः सर्वा अपि कारिका विलोकनीयाः ।

५ **कर्मादि**-भां० मां० । ६ प्र० पृ० पं० ९ ।

७-**तं भूतकण्ठे** भां० मां० विना । श्लोकवार्तिकमूलेऽपि अयं 'भूतकण्ठ'-शब्दः प्रयुक्तः । तद्यथा—
"भूतकण्ठगुणादेश्च प्रतिपिण्डं समाप्तितः" ॥—
"कण्ठगुणः कण्ठभूषणं हारादि"—श्लो० वा० वनवा० श्लो० ३५ पृ० ६२२ ।
"भूतकण्ठगुणवत् सकृत्सूत्रवद् वा"—श्लो० वा० पार्थ० व्या० पृ० ६२१ पं० २२ ।
स्याद्वादरत्नाकरे तु सामान्यविचार एव एष शब्दो बहुशः प्रयुक्तो दृश्यते । तद्यथा "भूतकण्ठे गुण इव" इत्यादि—
पृ० ९५१ पं० २०-२१-२२,२४ ।

८ "सूत्रकण्ठः खञ्जरीटे द्विजन्मनि कपोतके"—हैं० अनेका० ४-७० ।

'गौः' 'गौः' इति विकल्पज्ञानेनापि त एव समानाकाराः शाबलेयादयो बहिर्व्यवस्थिता अवसीयन्ते अन्तश्च शब्दोल्लेखः; न पुनस्तद्भिन्नमपरं गोत्वम् । तन्न निर्विकल्पकेन सविकल्पकेन वाऽध्यक्षेण सामान्यं व्यवस्थापयितुं शक्यम् । यदपि 'कार्यभूतानुगतप्रत्ययेन अनुमानतः सामान्यव्यवस्थापनम्, तदप्यसंगतम्; तस्य प्रत्ययहेतुत्वेन प्रमाणतोऽनिश्चयात्, तथा हि अनुगताकारज्ञानस्य निर्निमित्तस्य असंभवात् केनचिन्निमित्तेन भाव्यम् इत्येतावन्मात्रं सिध्यति । तच्च सामान्यम् अन्यद् वेति न निश्चयो भवताम् । कार्यान्वय-व्यतिरेकाभ्यां च कारणत्वावधारणम्, पिण्डानां च विज्ञानजन्मनि ततः सामर्थ्यं विशेषप्रत्यये सिद्धमिति इहापि तेषामेव सामर्थ्यप्रकल्पनम्, न; सामान्यस्य तस्य क्वचिदपि सामर्थ्यानवधारणात् । तथाहि-पिण्डसद्भावे अनुगताकारं ज्ञानमुपलभ्यते तदभावे न इति वरमध्यक्षप्रत्ययावसेयानां तेषामेव तन्निमित्तता कल्पनीया । यदपि 'पिण्डानामविशिष्टत्वात् प्रतिनियमो न स्यात् तज्जन्मनि' इत्यभिधानम्, तदपि असंगतम्; यतो यथा पिंडादिरूपतयाऽविशेषेऽपि तन्तूनामेव पटजन्मनि हेतुत्वम् न कपालादीनाम् तथा शाबलेयादीनामेव 'गौः' 'गौः' इति ज्ञानोत्पादने सामर्थ्यं भविष्यति कयाचिद् युक्त्या न कर्कादीनाम्, यथा वा गुडूच्यादेरेव ज्वरादिशमने सामर्थ्यं प्रतीयते न दध्यादेर्वैस्तुरूपतयाऽविशेषेऽपि तथा प्रकृतेऽपि भविष्यतीति न पर्यनुयोगो युक्तः । किञ्च; सामान्यं परेण मूर्तमभ्युपगम्यते, अमूर्तं वा? यदि अमूर्तम् न सामान्यं स्याद् रूपवत् । अथ मूर्तम् तथा च न सामान्यं घटादिवत् । तथा, यदि अनंशं सामान्यमभ्युपगम्यते तर्हि न सामान्यम् अनंशत्वात् परमाणुवत्, सांशत्वेऽपि न सामान्यम् घटवत् । किञ्च, यदि पिण्डेभ्यो भिन्नं सामान्यम् भेदेन एव उपलभ्येत घटादिभ्य इव पटः । न च एकान्ततो व्यक्तिभ्यः सामान्यस्य भेदे 'गोर्गोत्वम्' इति व्यपदेशोपपत्तिः संबन्धाभावात्, समवायस्य तत्संबन्धत्वेन निषेत्स्यमानत्वात् । व्यक्तिभ्यस्तस्याऽभेदे अन्यत्राऽननुयायित्वाद् न सामान्यरूपता पिण्डस्वरूपवत् । न च भेदेन व्यक्तिभ्यस्तस्याऽनुपलक्षणं भिन्नप्रतिभासविषयत्वाद् असिद्धम्, बुद्धिभेदस्य व्यक्तिनिमित्तत्वेन प्रतिपादनात् । किञ्च, यदि सामान्यबुद्धिर्व्यक्तिभिन्नसामान्यनिबन्धना भवेत् तदा व्यक्त्यग्रहणेऽपि भवेत् अश्वबुद्धिवद् गोपिण्डाग्रहणे, न च कदाचित् तथा भवेत् । ततो न व्यक्तिव्यतिरिक्तसामान्यसद्भावः । अथ आधारप्रतिपत्तिमन्तरेण आधेयप्रतिपत्तिर्न भवतीति तद्ग्रहे एव तद्ग्रहः नाऽभावात् अन्यथा कुण्डाद्याधारप्रतिपत्तिमन्तरेण बदराधेयस्य अप्रतिपत्तेः तस्याप्यभाव एव स्यात्, न; बदरादेः प्रतिनियताधारमन्तरेणापि स्वरूपेणोपलब्धेर्नाभावः गोत्वादेस्तु प्रतिनियतपिण्डोपलम्भमन्तरेण स्वरूपेण कदाचनाऽपि अनुपलब्धेरभाव एव, तेन 'तदग्रहे तद्ग्रह्यभावात् इत्यत्र सामान्याभिव्यञ्जकपिण्डग्रहण एव तदभिव्यङ्ग्यसामान्यबुद्धिसद्भावात्-प्रकाशग्रहण एव गृह्यमाणघटादिसत्त्ववत्-सामान्यस्यापि सत्त्वम्' इति यदुक्तम् तन्निरस्तं भवति घटनिमित्तघटबुद्धिवत् सामान्यनिबन्धनत्वेन तद्बुद्धेरसिद्धेः । किञ्च, सामान्यं निराधारं वा अभ्युपगम्येत, आधारवद् वा? यदि निराधारम् न सामान्यं स्यात् अनाधारत्वात् शशशृङ्गवत् । आधारवत्त्वेऽपि तस्य तत्र वृत्त्यनुपपत्तिः तथाहि-तस्य एकदेशेन वा तत्र वृत्तिर्भवेत् सर्वात्मना वा? सर्वात्मना वृत्तौ एकस्मिन्नेव पिण्डे सर्वात्मना परिसमाप्तत्वाद् यावन्तः पिण्डाः तावन्ति सामान्यानि स्युः, न वा सामान्यम् एकपिण्डवृत्तित्वाद् रूपादिवत् । एकदेशवृत्तावपि न सामान्यं स्यात् सामान्यस्य निरंशत्वेन एकदेशासंभवात् संभवेऽपि ते ततो भिन्ना वा स्युः, अभिन्ना वा? यदि भिन्नास्तदा तेषु सामान्यं वर्तते, उत नेति? यदि वर्तते तदा किं सर्वात्मना, उत एकदेशेन? यदि सर्वात्मना तावत्सामान्यप्रसक्तिः प्रत्येकमेकदेशे तस्य परिसमाप्तत्वात्, न वा सामान्यम् प्रदेशवृत्तित्वाद् घटवत् । अथ एकदेशेन, एकदेशेषु वृत्तिस्तदा तेऽपि एकदेशा यदि ततो भिन्नास्तदा तेष्वपि अपरैकदेशवशाद् वृत्तिरिति अनवस्थाप्रसक्तिः । अथ अभिन्नास्तदा तेषां सामान्यरूपत्वात् तावन्ति सामान्यानि स्युः । न च सामान्यात्मकानां तेषां करणरूपता युक्ता येन तैः पिण्डेषु सामान्यं वर्तेत नहि घटत्वादिसामान्यं गोत्वस्य पिण्डवृत्तौ करणत्वेन उपलब्धम् ।

१ **अतश्च** बृ० आ० । २ पृ० ६८८ पं० १० । ३ पृ० ६८८ पं० १५-१६ । ४ **यथा घटादि**-भां० मां० । **यथा यदि रू**-बृ० आ० हा० वि० । ५ **वा गडू**-वा० बा० ।

६ "यद्यनेकानुवृत्ति गोलं तत् किं प्रतिपिण्डं परिसमाप्त्या वर्तते अथैकदेशेनेति?" इत्यादि सामान्यविषयिणी चर्चा न्यायवार्तिकतोऽवबोद्धव्या-२-२-६५ पृ० ३१७-३१९ ।

न च सामान्यस्य अनुवृत्त्येकरूपत्वात् कात्स्न्यैंकदेशशब्दयोस्तत्राऽप्रवृत्तिः, निरवयवैकरूपेऽपि व्याप्त्यव्याप्तिशब्दयोर्भवतैव प्रवृत्त्यभ्युपगमात् तत्र च कृत्स्नैकदेशवृत्तिपक्षोक्तदोषाणां समानत्वात् अपरस्य चात्र वक्तव्यस्य पूर्वमेव निषिद्धत्वात्। तन्न वृत्त्यनुपपत्तेः सामान्यस्य सत्त्वमभ्युपगन्तुं युक्तम्।

किञ्च, पिण्डोत्पत्तिकाले किं गवात्मकेन पिण्डेन गोत्वं संबंध्यते, उत अगवात्मकेन? यदि आद्यः पक्षस्तदा गोत्वसंबन्धात् प्राक् पिण्डस्य यद्यपरगोत्वसंबन्धाद् गोरूपता तदा अनवस्थाप्रसक्तिः। अथ तत्संबन्धमन्तरेणाऽपि तस्य गोरूपता तदा गोत्वसंबन्धवैयर्थ्यम् तमन्तरेणापि गोपिण्डस्य प्रागेव गोरूपत्वात्। अथ अगोरूपेण तदाऽगोरूपत्वाविशेषात् अश्वादिपिण्डैरपि गोत्वसंबन्धप्रसक्तिः इति अश्वादयोऽपि गोरूपाः स्युः। न च अगोरूपत्वाविशेषेऽपि गोत्वसंबन्धात् प्राक् शाबलेयादिभिरेव गोत्वं संबध्यते न कर्कादिभिरिति वक्तव्यम्, नियमहेतोरभावात्। अथ उपलक्षणभेदो नियमहेतुः। तथाहि-यत्र ककुदादीनि उपलक्षणानि पिण्डे तत्रैव गोत्वं वर्तते न केसराद्युपलक्षणवति, असदेतत्; गोत्वादेरचेतनत्वेन निरभिप्रायस्य प्रदर्शितोपलक्षणप्रत्यभिज्ञानवशाद् अन्यपरिहारेण प्रतिनियताधारवृत्तित्वानुपपत्तेः। न च ककुदाद्युपलक्षणयोगिनः पिण्डादेः स्वात्मनि गोत्वाधारसामर्थ्यं प्रतिनियतं निमित्तं कल्पयितुं युक्तम्, यतो यया शक्त्या ककुदादिमन्तः पिण्डविशेषा गोत्वसामान्यं विजातीयपिण्डव्यवच्छेदेन स्वात्मनि व्यवस्थापयन्ति तयैव 'गौः' 'गौः' इत्यनुगताकारज्ञानहेतवोऽपि भविष्यन्तीति किमन्तर्गडुसामान्यप्रकल्पनया। न च अदृष्टं गोत्वादेः सामान्यस्य प्रतिनियतव्यक्तिवृत्तिनिमित्तं कल्पनीयम्, तत्रापि अस्य दूषणस्य समानत्वात्। यदपि 'अनुगताकारं ज्ञानं सामान्यमन्तरेण असंभवि' इति, तत्रापि किं यत्रानुगतं ज्ञानं तत्र सामान्यसंभवः प्रतिपाद्यते, आहोस्वित् यत्र सामान्यसंभवस्तत्र अनुगतं ज्ञानमिति? तत्र यदि आद्यः पक्षः, स न युक्तः; यतो गोत्वादिसामान्येषु बहुषु 'सामान्यम्' 'सामान्यम्' इति अनुगताकारप्रत्ययप्रवृत्तेः अपरसामान्यप्रकल्पनाप्रसक्तिः स्यात्। तथा, प्रागभावादिष्वपि अभावेषु 'अभावः' 'अभावः' इत्यनुगतप्रत्ययप्रवृत्तिरस्ति, न च परैः अभावसामान्यमभ्युपगतमिति व्यभिचारः। न च सामान्यादिषु अनुगतप्रत्ययस्य गौणत्वान्न व्यभिचारः, अस्खलद्वृत्तित्वेन गौणत्वस्य असिद्धेरित्युक्तत्वात्। अथ यत्र सामान्यं तत्रानुगतप्रत्ययकल्पना, न; पाचकादिषु तदभावेऽपि अनुगतप्रत्ययप्रवृत्तेः। न च तत्रापि पचनक्रियानिमित्तोऽयं प्रत्ययः तस्याः प्रतिव्यक्ति भिन्नत्वात् तत्सामान्यनिमित्तत्वे प्रागेव तत्प्रत्ययप्रसूतिर्भवेत् सामान्यस्य नित्यत्वेन तदापि तद्धेतोर्भावात्। अभिव्यञ्जकक्रियाभावात् प्राक् अनभिव्यक्तत्वात् तत्सामान्यस्य न तत्प्रत्ययोत्पत्तिरिति चेत्, पचनक्रियानिवृत्तावपि अभिव्यञ्जकाभावेन अनभिव्यक्तात् तत्सामान्यात् तत्प्रत्ययोत्पत्तिर्न स्यात् अनुत्पन्नवद् विनष्टस्यापि अभिव्यञ्जकस्य अभिव्यञ्जकत्वायोगात्। अथ एकदा अभिव्यक्तस्य तत्सामान्यस्य नित्यत्वेन सर्वदा अभिव्यक्तत्वाद् उत्तरकालं तत्प्रत्ययोत्पत्तिस्तर्हि पचनक्रियायाः प्रागपि तत्सामान्यस्य एकरूपतया अभिव्यक्तत्वात् ततस्तत्प्रत्ययोत्पत्तिः स्यात्। अथ प्राग् न तस्याऽभिव्यक्तिस्तर्हि अभिव्यक्ताऽनभिव्यक्तस्वभावद्वययोगात् तस्य नैकत्वम् स्वभावभेदलक्षणत्वाद् वस्तुभेदस्य। अथ व्यक्तिप्रतिभाससमय एव सामान्यस्य प्रतिभास इति न ततः प्राक् पश्चाद् वा अभिव्यक्तैकरूपस्यापि तस्य ग्रहणं तर्हि व्यक्तिप्रतिभासकाले अपरप्रतिभासस्याऽसंवेदनाद् अनुगतप्रतिभासस्य च तदा व्यक्तिनिबन्धनत्वात् सामान्यस्य अभाव एवेति प्राप्तम्। तेन 'यत्र सामान्यसद्भावाद् अनुगताकारं ज्ञानं प्रवर्तते तत्र तद् मुख्यम् यत्र तु तदभावात् तत् तद् गौणम्' इत्येतदपि निरस्तम् सामान्यनिबन्धनत्वेन अनुगतज्ञानस्य क्वचिदपि असिद्धेः मुख्याभावे गौणकल्पनाया दूरापास्तत्वात्। यदपि 'किमनेन प्रसङ्ग आपाद्यते परस्य, आहोस्वित् स्वतन्त्रसाधनमिति, न तावत् प्रसङ्गसाधनम् पराभ्युपगमेनैव तस्य वृत्तेः, न च परस्य कात्स्न्यैन एकदेशेन वा निरंशस्य वृत्तिः सिद्धा किन्तु वृत्तिमात्रं समवायस्वरूपं सिद्धम् तच्च विद्यत एव समवायस्य प्रमाणतः सिद्धेः। तन्न प्रसङ्गसाधनमेतत्। स्वतन्त्रं तु साधनं न भवति सामान्यलक्षणस्य धर्मिणोऽसिद्धेर्हेतोराश्रयासिद्धिप्रसङ्गात्, धर्मिसिद्धौ वा तत्प्रतिपादकप्रमाणबाधितत्वात् तदभावसाधकप्रमाणस्य अप्रवृत्तिरेव' इत्यभिधानम्, तदप्यसंगतम्; यतो नास्माभिः किञ्चिदत्र सामान्यस्य साध्यते किन्तु येन सामान्यं व्यक्त्याश्रितमभ्युपगम्यते तेन तत्र तस्य एकदेशेन सर्वात्मना वा-अन्यथा वृत्तेरसंभवात्-

१-बन्ध्यते भां० मां०। २ पृ० ६८८ पं० १३-१४। ३-चनादि-भां० मां०।

वृत्तिर्वाच्या। अथ समवायलक्षणा वृत्तिस्तत्र तस्य उक्तैव, न; तस्याः स्वरूपानिर्देशात्। अथ आश्रयाऽऽश्रयिभावस्तस्याः स्वरूपम्, न; अस्य पर्यायमात्रत्वात्-वृत्तिमात्रम् समवायः आश्रयाश्रयिभावः इति च पर्यायशब्दाः। एतेन तु कात्स्न्यैंकदेशवृत्तिव्यतिरेकेण लोकप्रसिद्धाऽपरवृत्तिप्रदर्शनं कृतम्। या तु समवायलक्षणा स्वशास्त्रपरिभाषिता वृत्तिः सा तु तद्ग्राहकप्रमाणाभावात् सामान्यवद् असिद्धस्वरूपैव यदि च पिण्डेभ्यो व्यतिरिक्तम्-कुण्डव्यतिरिक्तबदरवत्-सामान्यं प्रमाणत उपलभ्येत तदा तेषु तस्य वृत्तिप्रकल्पना स्यात् न च तत् तथोपलभ्यत इत्युक्तं प्राक्। अपि च, उत्पन्ने पिण्डे सामान्यं वर्तते, आहोस्वित् अनुत्पन्ने, उत उत्पद्यमाने इति विकल्पाः। न तावद् अनुत्पन्ने, तदा पिण्डस्याऽसत्त्वात्। नापि उत्पन्ने, अगोरूपे अश्वपिण्ड इव तत्र तस्य वृत्त्ययोगात् इत्युक्तत्वात्। नापि उत्पद्यमाने, अनिष्पन्नस्य आधारत्वायोगात् विद्यमानस्वरूपाणामेव कुण्डबदराणामाश्रयाश्रयिभावदर्शनात् अतः 'य एव पिण्डोत्पत्तिकालः स एव तत्सामान्यसंबन्धसमयः' इति अयुक्तम्, अन्यत्र एवमदर्शनात्।

किञ्च, उत्पद्यमानेन पिण्डेन सह सामान्यं संबन्ध्यमानं किमन्यत आगत्य संबध्यते उत पिण्डेन सह उत्पादात्, आहोस्वित् पिण्डोत्पत्तेः प्रागेव तद्देशावस्थानात् इति विकल्पाः। तत्र न तावद् अन्यत आगत्य संबध्यत इति पक्ष आश्रयितुं युक्तः यतः प्राक्तनपिण्डपरित्यागेन तत् तत्र आगच्छति, उत अपरित्यागेन इति वाच्यम्। यदि परित्यागेन इति पक्षः स न युक्तः प्राक्तनपिण्डस्य गोत्वपरित्यक्तस्य अगोरूपताप्रसक्तेः। अथ अपरित्यागेन तदा अपरित्यक्तप्राक्तनपिण्डस्य निरंशस्य रूपादेरिव गमनासंभवः न हि अपरित्यक्तप्राक्तनाधाराणां रूपादीनामाधारान्तरसंक्रान्तिः क्वचिदपि उपलब्धा, न च प्राक्तनाधारापरित्यागेऽपि आधारान्तरसंक्रमः सर्पादेरिव सामान्यस्य भविष्यतीति वक्तव्यम्, सामान्यस्य अमूर्तत्वाभ्युपगमात् अमूर्तस्य च रूपादिवद् गमनासंभवात्। न च सर्पवत् पूर्वाधारापरित्यागेन आधारान्तरक्रोडीकरणे सामान्यरूपता, सदेशस्य घटवत् सामान्यरूपतानुपपत्तेः। न च पिण्डोत्पत्तेः प्राक् तद्देशे तस्य अवस्थानाद् उत्पद्यमाने पिण्डे तस्य वृत्तिरित्यभ्युपगमोऽपि युक्तः निराधारस्य सामान्यस्य तत्र अवस्थानासंभवात् अवस्थाने वा आकाशवत् सामान्यरूपताविरहात्। न च पिण्डेनैव सह उत्पद्यत इति पक्षप्रकल्पनाऽपि संगता, उत्पत्तिमत्त्वेन तस्य अनित्यताप्रसक्तेः अनित्यस्य च ज्वालादिवत् सामान्यरूपताऽयोगात्। न च शाबलेयादिपिण्डस्य सामान्यसंबन्धविकलस्यैव परेण अवस्थानमभ्युपगतमिति सामान्यप्रकल्पना अनेकदोषदुष्टत्वाद् असंगतैव। तदुक्तम्—

"न याति न च तत्रासीदस्ति पश्चान्न वांऽशवत्।
जहाति पूर्वं नाधारमहो! व्यसनसंततिः"॥ [ ]

तथा—

"यत्रासौ वर्तते भावस्तेन संबध्यते न च।
तद्देशिनं च व्याप्नोति किमप्येतद् महाद्भुतम्"॥ [ ]

न च गमनादिधर्मविकलस्यापि सामान्यस्य उत्पद्यमानपिण्डसंबन्धो 'गौः' 'गौः' इत्यनुस्यूताकारप्रत्ययात् प्रतीयत एवेति प्रमाणप्रतिपन्ने वस्तुनि विरोधाद्युद्भावनमसंगतमेवेति वाच्यम्, 'गौः' 'गौः' इत्यनुगताकारप्रत्ययस्य प्रागभावादिषु अभावप्रत्ययवत् सामान्यसंबन्धमन्तरेणाऽपि सिद्धत्वात्। किञ्च, पिण्डेभ्यो व्यतिरिक्तं यदि अनुस्यूतमेकं सामान्यमभ्युपगम्येत तदा एकपिण्डोपलम्भे तस्य अविभक्तत्वात् पिण्डान्तरालेऽपि उपलब्धिः स्यात् न हि तस्य एकत्राभिव्यक्तस्य अन्यत्र अनभिव्यक्तस्वरूपता विरुद्धधर्माध्यासतो भेदप्रसक्तेः तथापि अभेदे न किञ्चिद् भिन्नं स्याद् इति सर्वत्र भेदव्यवहारनिवृत्तेः तदपेक्षस्य अभेदव्यवहारस्याऽपि विरहात् सर्वाभावप्रसक्तिः। अथ अन्तराले संयुक्तसमवायसंबन्धस्य उपलम्भहेतोश्चक्षुषोऽभावाद् अनुपलम्भः, असदेतत्; तत्र तत्सद्भावे प्रमाणाभावात्-यदि हि पिण्डद्वयान्तराले सामान्यस्य कुतश्चित् प्रमाणात् सद्भावः सिद्धः स्यात् तदा ग्रहण-

१-अत्र सामान्यगोचरा चर्चाऽवगन्तव्या—पृ० २३९ पं० ३-पृ० २४१ पं० १। हेतुबिन्दुतोऽप्येषाऽवधारणीया लि० पृ० ३१ ब०-३५ अ०।

२ 'तदुक्तम्' इत्युल्लिख्यायं श्लोकः स्याद्वादरत्नाकरे उद्धृतो वर्तते—पृ० ९५५ पं० १८।

निमित्तं यथोपवर्णितमुपपद्येताऽपि, न च तत्सद्भावः सिद्ध इति असकृद् आवेदितम् । न च स्वव्यक्तिसर्वगतत्वात् सामान्यस्य अयमदोषः, अन्तराले तस्य अभावे स्वव्यक्तिषु च सद्भावे अनेकत्वप्रसक्तेः तदन्तरेण अन्तराले विच्छिन्नस्य सकलस्वव्यक्तिसंबद्धत्वानुपपत्तेः । यदपि 'अत्र 'अन्तराल' शब्देन किं पिण्डान्तरमश्वादिरूपमभिधीयते, आहोस्विद् मूर्तद्रव्याभावः, उत आकाशादिप्रदेश इति विकल्पाः । यदि अश्वादिपिण्डान्तराभिधानं तदा तत्र गोत्वसामान्यस्य अवृत्तेरग्रहणमुपपन्नमेव न हि यद् यत्र नास्ति तत् तत्र गृह्यत इति परस्याभ्युपगमः अथ आकाशादिदेशस्तदा तत्रापि सामान्यस्य वृत्तेरग्रहणमेव । एवं मूर्तद्रव्याभावेऽपि अग्रहणमभावादेव' इति दूषणाभिधानम्, तदपि असंगतमेव । एवं दूषणाभिधाने सर्वत्र तदभिधानानिवृत्तेः । तथाहि—'घटद्वयान्तराले पटादिद्रव्यस्य अग्रहणाद् अभावः' इत्यत्रापि विकल्पौत(कल्प्यैत)द्दोषाभिधानस्य अभिधातुं शक्यत्वात् । अथ अत्र 'अन्तराल'शब्दस्य लोकप्रसिद्ध एवार्थः प्रकल्प्यते तर्हि एतद् अन्यत्रापि समानमिति न पर्यनुयोगावकाशः ।

किञ्च, यदि उपलभ्यस्वभावं सामान्यमभ्युपगम्यते तदा साक्षाद्यवयवानामिव शाबलेयादौ तद्बुद्ध्या ग्रहणं स्यात्, अग्रहणात् तद् असदित्यत्र किं साक्षादिबुद्ध्याऽग्रहणात् सामान्यस्य असत्त्वम्, आहोस्वित् स्वबुद्ध्या इति कल्पनाद्वयम् । न तावत् साक्षादिबुद्ध्या अगृह्यमाणत्वात् तस्य असत्त्वम् रूपादेरपि रसादिबुद्ध्यग्रहणाद् असत्त्वप्रसक्तेः । अथ स्वबुद्ध्या अगृह्यमाणत्वाद् असत्त्वम्, तदयुक्तम्; विरोधात्–न हि 'सामान्यबुद्धिः सामान्यस्य च अग्राहिका' इत्यभिधानमविरुद्धम् 'माता च मे वन्ध्या च' इत्यभिधानवत् । न च अनुगताकारबुद्ध्या सामान्यं न गृह्यते, व्यावृत्तबुद्धेरपि विशेषं प्रत्यग्राहकत्वप्रसक्तेः । अतः 'तद्बुद्ध्या अगृह्यमाणत्वात् असत् सामान्यमित्ययुक्तम्' इत्यपि अभिधानमसंगतम् यतो भवदभिप्रायेण समानाकारशाबलेयादिबुद्धिः सामान्यबुद्धिः तया च देश-कालव्यापि सामान्यं न गृह्यते तथाभूतस्य बुद्ध्यजनकत्वेन तद्ग्राह्यत्वायोगात् अत एव अनुगताकारबुद्धेरव्यापकक्षणिकशाबलेयादिपदार्थप्रभवत्वात् तद्ग्राहकत्वमेव न सामान्यग्राहकत्वम् । किञ्च, अक्षणिक-व्यापकैकस्वभावत्वे सामान्यस्य किं येनैव स्वभावेन एकस्मिन् पिण्डे वर्तते सामान्यं तेनैव पिण्डान्तरे, आहोस्वित् स्वभावान्तरेण? यदि तेनैव ततः सर्वपिण्डानामेकत्वप्रसक्तिः एकदेश-काल-स्वभावनियतपिण्डवृत्त्यभिन्नसामान्यस्वभावक्रोडीकृतत्वात् सर्वपिण्डानाम् प्रतिनियतदेश-काल-स्वभावैकपिण्डवत् । अथ स्वभावान्तरेण, तदा अनेकस्वभावयोगात् सामान्यस्य अनेकत्वप्रसक्तिः स्वभावभेदस्य भावभेदकत्वात् अन्यथा भेदायोगात् । न च एकस्य अनेकवृत्तित्वं रूपादेरिव युक्तम् । अथ यथा एकस्य रूपादेरेकवृत्तित्वं–तथैवोपलम्भात्–अभ्युपगम्यते तथा एकस्य सामान्यस्य अनेकवृत्तित्वमनेकत्रोपलम्भात् किं नाऽभ्युपगम्यते अबाधितोपलम्भस्य भावरूपव्यवस्थानिबन्धनत्वात्? भवेद् एतत् यदि अनेकवृत्तितया एकं सामान्यं स्वरूपतोऽध्यक्षे प्रतिभासेत न चैवम् व्यक्तिव्यवस्थितस्य एकस्य व्यक्तिभ्यो भिन्नस्य कुत्रचित् प्रत्यये अप्रतिभासनात् । न च देशव्याप्तिः कालव्याप्तिर्वा कस्यचिद् भावस्य केनचित् प्रमाणेन प्रतिपत्तुं शक्येति प्राक् प्रतिपादितम् । न च परस्परव्यावृत्तात्मानो भावा अनुगतनिमित्तमन्तरेण कथमभिन्नाकारप्रत्ययनिबन्धनं भवन्तीति वक्तव्यम् यतो यथा गुडूच्यादयो भावाः परस्परविविक्ता अपि सह प्रत्येकं च एकसामान्यमन्तरेणापि एकं ज्वरादिशमनलक्षणं कार्यं निर्वर्तयन्ति—न हि तत्र एकं सामान्यं तदर्थक्रियासंपादनसमर्थमस्ति अन्यथा तेषां चिर-क्षिप्रादिभेदेन व्याध्युपशमसामर्थ्योपलब्धिर्न स्यात् सामान्यस्य सर्वत्र एकरूपत्वात्, न च सरसौषधाद्युपयोगसंपाद्यशीघ्रव्याध्युपशमादिभेदोपलब्धिश्च स्यात् सामान्यस्य नित्यस्वभावतया परैरनाधेयातिशयस्य सर्वत्र सर्वदा एकरूपत्वात् । गुडूच्यादिभावनिबन्धनत्वे तु नायं दोषः तस्य प्रतिक्षणं भिन्नत्वे भिन्नशक्तित्वात्—तथा इहापि केचिद् भावाः प्रकृत्यैव एकाकारपरामर्शहेतवो भविष्यन्तीति न तदर्थं सामान्यप्रकल्पनं युक्तम् । यदपि 'अनुगतप्रत्ययः पिण्डव्यतिरिक्तानुगतनिमित्तनिबन्धनः' इत्याद्यनुमानम् तत्र प्रतिज्ञाया अनुमानबाधा । तथाहि–अनुगतप्रत्ययानां पिण्डव्यतिरिक्तमनुगतं निमित्तमालम्बनभूतं साधयितुमभिप्रेतम् तच्चायुक्तम् तस्य तत्र अप्रतिभासनात् वर्णाऽऽकृत्यक्षराकारस्यैव

१ २–२–६५ न्यायवा० पृ० ३१५ पं० २१—। २–कल्पैत–बृ० । ३–मित्यभिधान–वा० बा० । ४–क्षणिकाव्या–वा० बा० ।–क्षणिके व्या–बृ० । ५ पृ० ६८८ पं० १० ।

अर्थस्य तत्र प्रतिभासनाच्च तद्रूपविकलतया सामान्यस्य परैरभ्युपगमात् कथं तत्प्रतिभासे तस्य प्रतिभासः अन्याकारस्य विज्ञानस्य अन्यालम्बनत्वे अतिप्रसङ्गात्? तथाहि—यो यद्विलक्षणार्थप्रतिभासः प्रत्ययः स तद्ग्राहको न भवति, यथा रूपप्रत्ययो न रसादिग्राहकः, जातिविलक्षणवर्णादिप्रतिभासश्च अन्वयी प्रत्यय इति व्यापकविरुद्धोपलब्धिः ।

योऽपि शंकरस्वामी[1] अत्राह—"सामान्यमपि नीलत्वादि नीलाद्याकारमेव अन्यथा 'नीलम्' 'नीलम्' इति अनुवृत्तिप्रत्ययो न स्यात् इति हेतोरसिद्धत्वात् नानुमानबाधा" [ ] इति, सोऽपि अयुक्तकारी; नीलादेर्गुणाद् नीलत्वादेः सामान्यस्य एवमभेदप्रसङ्गात् । अथ गुणस्य व्यावृत्तत्वात् तत्सामान्यस्य तु अनुगतत्वात् आकारभेदाद् भेदः, न; व्यावृत्तनीलादिगुणव्यतिरिक्तानुगतनीलत्वादिसामान्यस्य नीलाद्याकारस्य अप्रतिभासनाद् अध्यक्षे असाधारणस्य नीलादेरेकस्यैव प्रतिभासनात् विकल्पज्ञानेऽपि यथादृष्टस्यैव निर्णयात् द्वितीयस्य सामान्याकारस्य तत्रापि अनिश्चयात् । न च क्षणिकत्ववत् प्रतिभासमानमपि सामान्यं व्यक्तिभेदेन नोपलक्ष्यत इति वक्तव्यम्–अनुपलक्षितस्य व्यक्तिष्वभिन्नधी–ध्वनिनिमित्तत्वायोगात् न हि विशेषणानुपलक्षणे विशेष्ये बुद्धि, रुपजायते दण्डानुपलक्षणे दण्डिबुद्धिवत् तथा च "समवायिनः श्वैत्यात् श्वैत्यबुद्धेः श्वेते बुद्धिः" [वैशेषिकद० ८–१–९] इति वचनं निरवकाशं भवेत् । किञ्च, अविकल्पविज्ञानवादिनः प्रतिभातानुपलक्षणं युज्येतापि भवतस्तु सविकल्पकाध्यक्षवादिनो गृहीताऽनुपलक्षणमयुक्तम् निश्चयानामुपलक्षणमन्तरेण अपरग्रहणासंभवात् न हि निश्चयैरनिश्चितं गृहीतं नाम । किञ्च, यदि अत्र अनुगतं निमित्तं नित्यं साध्यते तदा तस्य असिद्धिः विपर्ययसिद्धेः । तथाहि—अनुगताभिधानप्रत्ययाः क्रमवत्कारणप्रभवाः, क्रमेण उपजायमानत्वात्, प्रदीपज्वालाप्रभवक्रमभाविप्रत्ययवत् । यदि तु अक्रमसामान्यहेतुका एते अभविष्यन्न क्रमेण उत्पत्तिमासादयिष्यन् अविकलकारणत्वात् तथापि तेषां तद्धेतुकत्वे सर्वं सर्वहेतुकं स्यात् इति प्रतिनियतकार्यकारणभावव्यवस्थाविलोपप्रसक्तिः । अनैकान्तिकश्च हेतुः षट्सु पदार्थेषु अपरानुगतनिमित्ताभावेऽपि 'पदार्थाः' 'पदार्थाः' इत्यनुगतप्रत्ययोपलब्धेः । न च सदुपलम्भकप्रमाणविषयत्वादिकमनुगतं निमित्तमत्रापि अस्ति इत्यव्यभिचारः, प्रागुक्तोत्तरत्वाद् अस्य । न च विपक्षे वृत्तौ अस्य बाधकं प्रमाणमस्ति इति संदिग्धविपक्षव्यावृत्तिकत्वाद् अनैकान्तिकः । न च अनुगतनिमित्ताभावेऽपि अस्य भावे प्रत्ययभेदकृता विषयभेदव्यवस्था न स्यादिति रूपादिप्रत्ययानामपि न स्वविषयव्यवस्थापकत्वं भवेदिति वक्तव्यम्, अनुगतप्रत्ययस्य विशिष्टाभिलापत्वेन स्वलक्षणाविषयीकरणात् तद्व्यवस्थापकत्वायोगात् यथासंकेतं तत्तद्व्यावृत्ति-

१ "शङ्करस्वामी लाह—सामान्यमपि नीलत्वादि नीलाद्याकारमेव अन्यथा हि नील इत्येवमनुवृत्तिप्रत्ययो न स्यात्" इत्यादि—तत्त्वसं० पञ्जि० पृ० २४३ पं० २७ ।

"सामान्यस्यापि नीलादिरूपत्वे गुणतोऽस्य कः । भेदो नानुगतश्चैको नीलादिरुपलक्ष्यते ॥
भासमानोऽपि चेदेष न विवेकेन लक्ष्यते । तत्कथं धीध्वनी व्यक्तौ वर्तेते तद्बलेन तौ ॥
निश्चयात्मक एवायं सामान्यप्रत्ययः परैः । इष्टश्चाग्रहणे प्राप्ते युक्तं नानुपलक्षणम्" ॥
—तत्त्वसं० का० ७४०–७४२ पृ० २४४ ।

२ मुद्रितेषु वैशे० द० पुस्तकेषु "समवायिनः श्वैत्याच्छ्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते एते कार्यकारणभूते"–८–१–९ इति सूत्रं वर्तते, केवलं गू० वै० पुस्तके इत्थं टिप्पणी दृश्यते—"त एते" इत्यादि पृथक् सूत्रं चन्द्रकान्तमते—पृ० ३०३ ।

३ "सिद्धेऽप्यन्यनिमित्तत्वे न सामान्यं प्रसिध्यति । अनुगाम्येकमध्रौव्यविविक्तं च क्रमोदयात्" ॥
—तत्त्वसं० का० ७४३ पृ० २४४ ।

४ "पदार्थशब्दः कं हेतुमपरं षट्स्वपेक्षते । अस्तीति प्रत्ययो यश्च सत्तादिष्वनुवर्तते ॥
अन्यधर्मनिमित्तश्चेत् तत्राप्यस्त्यस्तितामतिः । तदन्यधर्महेतुत्वेऽनिष्टासक्तेरधर्मिता ॥
व्यभिचारी ततो हेतुरमीभिरयमिष्यते । न च सर्वोपसंहाराद् व्याप्तिरस्य प्रसाधिता" ॥
—तत्त्वसं० का० ७४४–७४६ पृ० २४५ ।

५–स्याविष्टाभि–बृ० । "न हि सामान्यप्रत्ययो वस्तुस्वलक्षणविषयः परमार्थतो युक्तः आविष्टाभिलापेन प्रत्ययेन स्वलक्षणस्याविषयीकारणात्"—तत्त्वसं० पञ्जि० पृ० २४६ पं० २ ।

मादाय एकत्रापि अनेकविरुद्धधर्माध्यवसायिविकल्पप्रसूतेरविरोधात् । यदि च अनुगतनिमित्तमन्तरेण अनुगतप्रत्ययो न भवेत् इच्छाविरचितरूपेषु 'चन्द्रापीडादि'भावेषु नष्टाऽजातेषु च महासम्मत-शङ्खचक्रवर्तिप्रभृतिषु कथं भवेत्? न हि तत्रापि सामान्यसद्भावः तस्य व्यक्त्याश्रितत्वात् तदभावे तस्याप्यभावात् न हि आश्रितानामयं धर्मः–यदुत आश्रयाभावेऽपि केवलानामवस्थानम् अनाश्रितत्वप्रसङ्गात् केवलस्य वा अवस्थाने ग्रहणप्रसक्तिरेव इति न नष्टाऽजातेषु अनुगताकारः प्रत्ययः सामान्यनिबन्धनः स्यात् इति अनेकान्त एव हेतोः । न च परेणापि केवलस्य सामान्यस्य ग्रहणमभ्युपगम्यते । तथा चोक्तम्—"स्वाश्रयेन्द्रियसंनिकर्षापेक्षप्रतिपत्तिकं सामान्यम्" [ ] इति । केवलस्यापि च सामान्यस्य ग्रहणाभ्युपगमे सामान्यप्रत्ययस्य व्यक्त्यध्यवसायो न प्राप्नोति व्यक्तेस्तदानीमभावाद् 'व्यक्तीनामिदं सामान्यम्' इति संबन्धश्च न स्यात् निमित्ताभावात् । तथाहि-संबन्धस्य निमित्तं भवत् तद्व्यङ्ग्यत्वं वा सामान्यस्य भवेत्, तज्जन्यता वा, तद्ग्रहणापेक्षग्रहणता वा? तत्र न तावद् व्यक्तिभिर्व्यङ्ग्यत्वात् सामान्यं ताभिः संबद्धम् परैरनुपकार्यस्य नित्यत्वात् सामान्यस्य अविशेषतो व्यङ्ग्यत्वानुपपत्तेः यो हि यस्य अनुपकार्यः स तस्य अभिव्यङ्ग्यो न भवति, यथा हिमवान् विन्ध्यस्य, अनुपकार्यं च सामान्यं व्यक्तिभिः इत्यनुपकार्यस्यापि व्यङ्ग्यत्वे सर्वैः सर्वस्य व्यङ्ग्यः स्यात् इत्यतिप्रसङ्गः । नापि तज्जन्यता तन्निबन्धनम् नित्यतया अभ्युपगतस्य तज्जन्यत्वायोगात् केवलस्यापि ग्रहणाभ्युपगमाच्च । नापि तज्ज्ञानपारतन्त्र्यमपि तस्य संभवति तेन "स्वाश्रयेन्द्रियसन्निकर्षापेक्षप्रतिपत्तिकं सामान्यम्" इति अयुक्तमभिधानम् आश्रयस्यायोगात् तद्गतेन्द्रियसन्निकर्षाद्यपेक्षाया दूरोत्सारितत्वात् न चास्य नित्यतया परैरनाधेयविशेषत्वात् क्वचिदपि अपेक्षा अतो यदि तत्स्वविषयज्ञानोत्पादनसमर्थं तदा सर्वदैव तद् जनयेत् अथ असमर्थम् न कदाचिदपि जनयेत् न हि समर्थम् असमर्थं वा तस्य तद्रूपं तत् केनचिद् अन्यथा कर्तुं शक्यम् नित्यत्वहानिप्रसङ्गात् । यदुक्तम्—

"तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्स्यस्य कस्तां क्षपयितुं क्षमः?" ॥ [ ] इति ।

अत एव अस्य व्यक्तिषु वृत्तिरपि अनुपपन्ना । तथाहि-वृत्तिरस्य भवन्ती स्थितिलक्षणा वा भवेत्,

१-प्रसूते-बृ० आ० हा० वि० ।

२ "इच्छारचितरूपेषु नष्टाजातेषु वा ततः । अनैकान्तिकता हेतोः सर्वैरेभिर्यथोदितैः" ॥
—तत्त्वसं० का० ७४९ पृ० २४६ ।

३ महाव्युत्पत्तिनामके बौद्धग्रन्थे चक्रवर्तिनां षष्टिर्नामानि परिगणितानि विद्यन्ते, तेषु 'महासंमत' इत्याद्यं नाम वर्तते—पृ० ५२ अं० १८० ।

४-चक्रप्र-बृ० आ० हा० वि० । "इच्छारचितरूपेषु चन्द्रापीडादिषु नभस्तलोपकल्पितधवलगृहादिषु नष्टाजातेषु च महासम्मत-शङ्खप्रभृतिषु"—तत्त्वसं० पञ्जि० पृ० २४६ पं० २१ । ५ प्र० पृ० पं० ७ ।

६ **न हि समर्थमसमर्थं वा तस्य तत्स्वविषयज्ञानोत्पादरूपं तत् केनचिदन्यथा कर्तुं शक्यं नित्यत्व**—आ० हा० वि० । अस्मिन् पाठान्तरे 'स्वविषयज्ञानोत्पाद' इत्यंशोऽधिको भाति स च यदि 'तत्' इत्यस्य टिप्पणात्मकत्वेन अन्तःप्रविष्टो न स्यात् तर्हि पाठान्तरत्वेन समर्थनीयः । वस्तुतः 'तद्रूपम्' इत्यस्य स्थाने 'यद्रूपम्' इति सम्यग् भाति परामर्शकस्य 'तत्'–पदस्याग्रे सत्त्वेन तत्संबन्धितया 'यत्' पदस्यैवापेक्षणात् । अत्रार्थे संवादो यथा—

"तस्य योग्यमयोग्यं वा रूपं यत् प्रकृतिस्थितम् । तद् ध्रौव्यादप्रकम्प्यं हि को नाम चलयिष्यति" ॥
—तत्त्वसं० का० ७९५ पृ० २५६ ।

अस्याः कारिकायाः पञ्जिका तु इत्थं वर्तते—"न हि तस्य तद्रूपं समर्थमसमर्थं वा तत् क्वचिद् अन्यथाकर्तुमीशते नित्यत्वहानिप्रसङ्गात्"—तत्त्वसं० पञ्जि० पृ० २५७ पं० ४ ।

७ पृ० ४८२ पं० २२ टि० ६ ।

८ "अपि चानेकवृत्तिलं सामान्यस्य यदुच्यते । तत्र केयं मता वृत्तिः स्थितिः किं व्यक्तिरेव वा ॥
स्वरूपाप्रच्युतिस्तावत् स्थितिरस्य स्वभावतः । नाधारस्तत्कृतौ शक्तो येन स्थापकता भवेत् ॥
गमनप्रतिबन्धोऽपि न तस्य बदरादिवत् । विद्यते निष्क्रियत्वेन नाधारोऽतः प्रकल्प्यते ॥
स्थितिस्तत्समवायश्चेन्न तथैव विचार्यते । सोऽभीष्टोऽयुतसिद्धानामाश्रयाश्रयितात्मकः" ॥
—तत्त्वसं० का० ७९८–८०१ पृ० २५९ ।

अभिव्यक्तिलक्षणा वा? स्थितिरपि निःस्वभावताप्रच्युतिरभ्युपगम्यते, आहोस्विद् अधोगतिप्रतिबन्धस्वरूपा? तत्र न तावद् आद्यः पक्षः, सामान्यस्य नित्यतया स्वभावाऽप्रच्युतेः स्वतःसिद्धत्वात् । नापि अधोगतिप्रतिबन्धस्वरूपा स्थितिस्तत्र संभविनी, अमूर्त-सर्वगतत्वाभ्यां निष्क्रियत्वात् स्वत एव अधोगमनासंभवात् प्रतिबन्धकानां वैयर्थ्यात् । न च सामान्यस्य स्वव्यक्तिषु समवायः स्थितिरभ्युपगन्तव्या, तस्यैव विचार्यमाणत्वात् । तथाहि–अयुतसिद्धानामाश्रयाश्रयिभावो यः संबन्धः 'इह' इति प्रत्ययहेतुः स समवायः परैरभ्युपगतः । 'आश्रितत्वं च सामान्यस्य व्यक्तिप्रतिबद्धस्थितित्वेन वा, तदभिव्यङ्ग्यतया वा' इत्येतदेव पर्यालोचयितुं प्रक्रान्तम् परस्परासंकीर्णरूपाणां भावानामकिञ्चित्करार्थान्तरसमवायायोगात् योगे वा सर्वैः सर्वस्य समवायः प्रसज्येत । तथाहि–व्यावृत्तस्वरूपान् भावान् संश्लेषयन् पदार्थः समवायः प्रकल्पितः । न च अर्थान्तरभावेऽपि स्वात्मव्यवस्थिता भावाः परस्परस्य स्वभावमात्मसात्कुर्वन्ति । न च अर्थान्तराश्लेषकारिणो भावान्तरस्य 'समवायः' इति नामकरणेऽपि काचित् क्षतिः । न च श्लेषकरणात् समवायरूपत्वं संश्लेषस्य, संश्लिष्यमाणपदार्थेभ्यो भिन्नस्य करणे तैस्तस्य संबन्धासिद्धेः; अभिन्नस्य करणे सामान्यादेः कार्यत्वेन अनित्यत्वप्रसक्तेः । तन्न सामान्यस्य व्यक्तिषु स्थितिर्वृत्तिः । नापि तदभिव्यक्तिलक्षणाऽसौ युक्ता । तथाहि–तद्विषयविज्ञानोत्पादनलक्षणा वा तदभिव्यक्तिः, स्वरूपपरिपोषलक्षणा वा? न तावत् स्वभावपरिपोषलक्षणा, नित्यस्य स्वभावान्यथाकरणासंभवात् । नापि तद्विषयविज्ञानोत्पादनस्वरूपा असौ युक्ता, सामान्यस्य स्वत एव विज्ञानोत्पादनसामर्थ्ये अभिव्यक्तिकारणापेक्षाऽयोगात् असामर्थ्येऽपि परैरनाधेयविशेषत्वात् सामान्यस्य तदपेक्षत्वानुपपत्तेः परैराधेयविशेषत्वाभ्युपगमेऽपि अनित्यत्वप्रसक्तितो व्यक्तिवद् असाधारणत्वात् सामान्यरूपताऽनुपपत्तेः तेन सामान्यस्य व्यक्तिषु वृत्तिनिबन्धनाभावाद् अवृत्तिः । तथा च प्रयोगः–यस्मिन् यस्य वृत्तिनिबन्धनं नास्ति न तत्र तद् वर्तते, विन्ध्ये इव हिमवान्, नास्ति च भेदेषु वृत्तिनिबन्धनं सामान्यस्य इति व्यापकानुपलब्धिः । सर्वैऽपि च परप्रकल्पिताः सामान्यसाधनाय हेतवः अनया दिशा प्रतिषेद्धव्याः ।

कुमारिलप्रकल्पितास्तु-गोपिण्डभेदेषु गोबुद्धिः एकगोत्वनिबन्धना, गवाभासत्वात् एकाकारत्वाच्च, एकगोपिण्डविषयबुद्धिवत् । अथवा येयं गोबुद्धिः सा शाबलेयान्न भवति तद्व्यतिरिक्तार्थान्तरालम्बना वा, तदभावेऽपि भावात्, घटे पार्थिवबुद्धिवत् । सर्वगतत्वं च सामान्यस्य प्रमाणान्तरात् सिद्धम् । तथाहि–येयं गोमतिः सा प्रत्येकसमवेतार्थविषया, प्रतिपिण्डं कृत्स्नस्वरूपपदार्थाकारत्वात्, प्रत्येकव्यक्तिविषयबुद्धिवत् । एकत्वमपि सामान्यस्य प्रमाणोपपन्नमेव । तथाहि–यद्यपि सामान्यं सर्वात्मना प्रतिव्यक्ति परिसमाप्तं तथापि एकमेव तत्, एकाकारबुद्धिग्राह्यत्वात्, यथा 'नञ्'-युक्तेषु वाक्येषु ब्राह्मणादिनिवर्तनम् । न चैतत् शक्यं वक्तुम्—'भिन्नेषु अभिन्नाकारः प्रत्ययो भ्रान्त इति न तद्बलाद् वस्तुतत्त्वव्यवस्था' इति, यतो नास्य दुष्टकारणप्रभवत्वमस्ति, नापि बाधकप्रत्ययसद्भावः ततो मिथ्यात्वनिबन्धनाभावात् कथं भ्रान्तता? तदुक्तम्—

"पिण्डभेदेषु गोबुद्धिरेकगोत्वनिबन्धना ।
गवाभासैकरूपाभ्यामेकगोपिण्डबुद्धिवत् ॥
न शाबलेयाद् गोबुद्धिः ततोऽन्यालम्बनाऽपि वा ।
तदभावेऽपि सद्भावाद् घटे पार्थिवबुद्धिवत् ॥
प्रत्येकसमवेतार्थविषयैवाथ गोमतिः ।
प्रत्येकं कृत्स्नरूपत्वात् प्रत्येकव्यक्तिबुद्धिवत् ॥

१ "स्यादाधारो जलादीनां गमनप्रतिबन्धकः । अगतीनां किमाधारैः सामान्यानां प्रकल्पितैः ॥
स्वज्ञानोत्पत्तियोग्यत्वे किमभिव्यक्तिकारणैः । स्वज्ञानोत्पत्त्ययोग्यत्वे किमभिव्यक्तिकारणैः ॥
द्वयः समर्थः समर्थात्मा व्यञ्जकैः क्रियते यदि । भावोऽस्थिरो भवेदेवं दीपव्यङ्ग्यघटादिवत्" ॥
—तत्त्वसं० का० ८०२–८०४ पृ० २६० ।

२ "अनया च दिशाऽन्येऽपि सर्वे दूष्याः कुहेतवः" ।

"अन्येऽपि कुहेतव इति कुमारिलगदिताः तत्रामी तेन कुहेतव उक्ताः"—तत्त्वसं० का० ७९७ तथा पञ्जि० पृ० २५७ पं० १६—।

३ "तस्मात् पिण्डेषु गोबुद्धि"–श्लो० वा० । ४ "गवाभासैकरूप्याभ्या"–श्लो० वा० । ५ "प्रत्येकं कृत्स्नबुद्धित्वात्"–श्लो० वा० ।

प्रत्येकसमवेताऽपि जातिरेकैव बुद्धितः ।
'नञ्'युक्तेष्विव वाक्येषु ब्राह्मणादिनिवर्तनम् ॥
नैकरूपा मतिर्गौत्वे मिथ्या वक्तुं च शक्यते ।
नात्र कारणदोषोऽस्ति बाधकः प्रत्ययोऽपि वा" ॥
[श्लो० वा० वन० श्लो० ४४-४७-४९] इति ।

अत्र प्रथमसाधने साध्यविकलमुदाहरणम् गोत्वस्य एकस्य तत्रासिद्धेस्तन्निबन्धनत्वस्यैकगोपिण्डविषयबुद्धेरप्यसिद्धत्वात् । अथ सामान्येन एकनिबन्धनत्वमात्रं साध्यते तदा सिद्धसाध्यता विजातीयव्यवच्छेदेन कल्पितैकाऽगोव्यावृत्तिनिबन्धनत्वस्य इष्टत्वात् । न 'शाबलेयाद् गोबुद्धिः' इत्यत्रापि साक्षात् तदुत्पत्तिनिषेधे साध्ये सिद्धसाध्यता तत्स्वलक्षणानुभवाहितसंस्कारसंकेतादिव्यवहितत्वात् तस्याः । अथ परंपरयाऽपि 'ततो न भवति' इति साध्यते तदा अनुमानबाधः प्रतिज्ञायाः साध्यविकलता च दृष्टान्तस्य । अन्यालम्बनत्वेऽपि साध्ये सन्निहितशाबलेय-गोबुद्धेर्यदि ततोऽर्थान्तरालम्बनत्वं साध्यते तदा अनुभवविरोधः सन्निहितशाबलेयादिपिण्डाध्यवसायित्वेन तस्याः संवेदनात् दृष्टान्तस्य च साध्यविकलता पूर्ववत् । अथ शाबलेयाऽसन्निधौ बाहुलेयादिसन्निधानप्रवृत्ता या बुद्धिः सा ततोऽन्यालम्बनेति पक्षः तदा सिद्धसाध्यता । अथ साक्षात् वस्तुसदालम्बनेति साध्यते तदा अनैकान्तिकता हेतोः न हि परमार्थतोऽस्या वस्तुसदालम्बनमस्तीति प्रसाधितत्वात् । यदपि 'प्रत्येकपरिसमाप्तार्थविषयत्वसाधनम्' तत्रापि सामान्येन साध्ये सिद्धसाध्यता प्रतिपदार्थमतद्रूपपरावृत्तवस्तुरूपाध्यवसायेन अस्याः प्रवृत्तेः । अथ वस्तुभूत-प्रत्येकपरिसमाप्त-नित्यैकसामान्याख्यपदार्थविषयत्वं साध्यते तदा दृष्टान्तस्य साध्यविकलता अनैकान्तिकता च हेतोः तथाविधेन साध्येन हेतोः क्वचिदपि अन्वयासिद्धेः । एकस्य च क्रमवत्सु बहुषु सर्वात्मना परिसमाप्तत्वे सर्वव्यक्तिभेदानामन्योन्यमेकरूपताप्रसक्तिः एकव्यक्तिपरिनिष्ठितस्वभावसामान्यसंस्पृष्टत्वात् एकव्यक्तिरूपवत्, सामान्यस्य वा अनेकरूपतापत्तिः युगपदनेकवस्तुपरिसमाप्तात्मरूपत्वात् अतिदूरदेशावस्थितानेकभाजनव्यवस्थितानेकाम्रादिफलवत् इत्यनुमानबाधः । अत एव 'न चात्र बाधकः प्रत्ययोऽस्ति' इति यदुक्तम् तदपास्तम् बाधकस्य प्रदर्शितत्वात् । यदपि 'एकत्वसाधनं सामान्यस्य,' तत्रापि तस्य प्रत्येकसमवेतत्वासिद्धेः आश्रयासिद्धो हेतुः । स्वरूपासिद्धश्च-एकबुद्धिग्राह्यत्वस्य परमार्थतस्तत्रासिद्धेः शाबलेयादिषु 'समानाः' इति बुद्ध्युत्पत्तेः । ब्राह्मणादिनिवर्तनं च परमार्थतो नैकमस्ति, तस्याऽवस्तुत्वात् अतः साध्यविकलमुदाहरणम् । कल्पनाशिल्पिघटिते चैकत्वे साध्ये सिद्धसाध्यता अपोहस्य कल्पनानिमित्तस्य एकत्वेन इष्टेः । 'न चात्र कारणदोषोऽस्ति' इत्येतदपि असिद्धम्, अनाद्यविद्यावासनास्वरूपस्य कारणदोषस्य सद्भावात् । बाधकसद्भावश्च 'न च याति' इत्यादिना प्रदर्शितः । तथाहि-ये यत्र नोत्पन्नाः नापि प्रागवस्थायिनः नापि पश्चात् अन्यतो देशादागतिमन्तस्ते तत्र न वर्तन्ते नापि उपलभ्यन्ते, यथा रासभशिरसि तद्विषाणादयः, तथा च सामान्यं तच्छून्यदेशोत्पादवति शाबलेयादिके वस्तुनि इति व्यापकानुपलब्धिः । न चायमनैकान्तिको हेतुः तत्र वृत्त्युपलम्भयोः प्रकारान्तरासंभवात् तच्च स्वाश्रयमात्रव्यापित्वाऽभ्युपगमे गोत्वादिजातेर्बाधकं प्रमाणं प्रदर्शितम् । सर्वसर्वगतत्वाऽभ्युपगमे तु तस्या एकस्मिन् व्यक्तिभेदे ग्रहणे विजातीयव्यक्तिभेदे व्यक्त्यन्तराले चोपलम्भः स्यात् अनुपलम्भात् तु तदभाव इति दृश्यानुपलम्भो बाधकं प्रमाणम् । तथाहि-उपलब्धव्यक्तिसमवेतसामान्यस्वरूपाद् उपलब्धाद् अव्यतिरिक्तं चेद् व्यक्त्यन्तरालवर्ति सामान्यरूपम् तदा तस्यापि ग्रहणं भवेत् गृहीतादभिन्नत्वात् गृहीतस्वरूपवत् । अथ न तस्य उपलम्भस्तथासति अनुपलब्धरूपाव्यतिरेकात् तद्वद् उपलब्धव्यक्तिसमवायिनोऽपि रूपस्योपलम्भो न स्यात् । अथ उभयरूपताऽभ्युपगम्यते तदा रूपभेदात् तद्वस्तुभेदः परस्परविरुद्धधर्माध्यासात् न हि अन्योन्यविरुद्धरूपग्रहणाग्रहणधर्माध्यासितमपि वस्तु एकं युक्तम् अतिप्रसङ्गात्-विश्वस्यैवमेकद्रव्यताप्रसक्तेः सहोत्पाद-विनाशाद्युपपत्तिः स्यात् अन्यथा 'एकम्' इति नाममात्रमेव भवेत् न च तत्र विवादः । नित्यत्वैकत्वरूपाभ्युपगमे च

१ "-स्तन्निबन्धनत्वमेकगोबुद्धेरप्यसिद्धमेव"—तत्त्वसं० पञ्जि० पृ० २५८ पं० ५—।
२ पृ० ६९५ पं० २५—। ३ पृ० ६९५ पं० २९। ४ पृ० ६९५ पं० २६। ५ पृ० ६९५ पं० २९। ६ पृ० ६९१ पं० २६।

सामान्यस्य अनेकशो बाधकं प्रतिपादितमेवानुमानम्-ये क्रमित्वाऽनुगामित्व-वस्तुत्वोत्पत्तिमत्त्वादिधर्मोपेतास्ते परपरिकल्पितनित्यैकसर्वगतसामान्यतो नात्मलाभमासादयन्ति, यथा पाचकादिप्रत्ययाः, तथा चामी गवादिप्रत्यया इति विरुद्धव्याप्तोपलब्धिः नित्यभावविरुद्धाऽनित्यताभावेन क्रमित्वादेर्व्याप्तत्वात् नित्यस्य च क्रमाऽक्रमाभ्यामर्थक्रियाविरोधाद् नानैकान्तिकता हेतोः दृष्टान्तस्य च साध्यान्वितत्वेन पूर्वं प्रसाधितत्वान्नासिद्धो दृष्टान्तः । तदेवं बाधकप्रत्ययस्य अभावोऽसिद्धः अनेकप्रकारस्य बाधकस्य प्रदर्शितत्वात् ।

भवतु वा गोत्वादि सामान्यम् कर्कादिविलक्षणत्वेन शाबलेयादीनां प्रतिपत्तेः, ब्राह्मणत्वादि सामान्यं तु उपदेशमात्रव्यङ्ग्यम् गवाश्वादिवद् ब्राह्मणेतरविशेषप्रतिपत्त्यभावात् । न च उपदेशसहायाध्यक्षगम्यं तत् अध्यक्षविषये उपदेशापेक्षाऽयोगात्, तद्योगे वा उपदेशस्यैव केवलस्य व्यापार इति उपदेशमात्रव्यङ्ग्यतैव । अथ 'वर्णविशेषाऽध्ययनाऽऽचार-यज्ञोपवीतादिव्यतिरिक्तनिमित्तनिबन्धनं 'ब्राह्मणः' इति ज्ञानम्, तन्निमित्तबुद्धिविलक्षणत्वात्, गवाश्वादिज्ञानवत्' इति लिङ्गात् प्रतिपत्तेः ब्राह्मणत्वादिसामान्यस्य नागममात्रव्यङ्ग्यत्वमिति, असदेतत्; नगरादिज्ञानवद् व्यतिरिक्तनिबन्धनाभावेऽपि तथाभूतज्ञानस्य कथंचिद् उपपत्तेः । न हि नगरादिज्ञानेऽपि व्यतिरिक्तं द्रव्यान्तरमस्ति यद् एकाकारज्ञाननिबन्धनं भवेत् काष्ठादीनामेव प्रत्यासत्त्या कयाचित् प्रासादादिव्यवहारनिबन्धनानां नगरादिव्यवहारनिबन्धनत्वोपपत्तेः अन्यथा 'षण्णगरी' इत्यादिष्वपि वस्त्वन्तरकल्पनाप्रसक्तेः । न च तत्रापि तथाऽस्तु इति वक्तव्यम्, वस्त्वन्तरस्य तन्निबन्धनस्य तत्र निषिद्धत्वात् । अतोऽनैकान्तिको हेतुः सिद्धसाध्यता च समुदायिभ्योऽन्यत्वाङ्गीकरणे समुदायस्य तन्निबन्धनत्वाद् ब्राह्मणबुद्धेः तदग्रहे तद्बुद्ध्यभावात् पानकवत् इति न वर्णादिभ्यो व्यतिरिक्तम् । तस्मात् शरीरोत्पत्तिकारणं श्रुतं तपो वा ब्राह्मणत्वं परिकल्पनीयं स्यात् । तत्र ब्राह्मणशुक्रशोणितसंभूते शरीरविशेषे यदि ब्राह्मणत्वजातिः समवेता भवेत् ततः संस्कारभ्रंशेऽपि न ततो व्यावर्तेत तेन संस्काराभावात् व्रात्यो नाऽब्राह्मणो भवेत् । अथ संस्काररहितोऽपि व्रात्यो ब्राह्मण एव केवलं ब्राह्मणक्रियामकुर्वाणस्य भवति अब्राह्मणव्यपदेशस्तत्र पुत्रस्येव पुत्रक्रियामकुर्वतः । तथाहि-'अयमगौः' 'अयमनश्वः' 'अयममनुष्यः' इत्यादिव्यवहारो लोके सुप्रसिद्ध एव । न चैतावता तत्क्रियावैकल्येऽपि परमार्थतस्तस्य तथाभावः, प्रत्यक्षादिविरोधात् । एतस्यां च वस्तुव्यवस्थायां ब्राह्मणमातापितृपाद्यत्वस्य प्राधान्यात् गजादीनां शिक्षेव केवलमध्ययनादिका क्रिया संपद्यते, तथाऽभ्युपगमे च ब्रह्म-व्यास-मतङ्ग-विश्वामित्रप्रभृतीनां

१ प्रमेयकमलमार्तण्डे स्याद्वादरत्नाकरे च ब्राह्मणत्वस्य नित्यजातिरूपत्वनिषेधपरा विस्तृता रुच्या च चर्चा वर्तते-पृ० १४१ प्र०-पृ० १४३ प्र० । पृ० ९५८ पं० ९-पृ० ९६३ पं० १० ।

तत्त्वसंग्रहे तु जातिमदनिषेधव्याजेन ब्राह्मणत्वस्य नित्यप्रतिष्ठानता निरस्ता । सा चेत्थम्—

"शतशः प्रतिषिद्धायां जातौ जातिमदश्च किम् । तदन्यातिशयासिद्धौ विशिष्टा सा च किं मता ॥
वशित्वादिगुणाधाराः प्रक्षीणाशेषकल्मषाः । सर्वेऽप्यत्राविशेषेण तद्योगे च विजातयः ॥
भवेयुर्यदि सिद्ध्यन्ति विशिष्टास्तत्समाश्रयाः । वैशिष्ट्यमन्यथा नैव लुब्धकद्विजजातिवत् ॥
जातकर्मादयो ये च प्रसिद्धास्ते तदन्यवत् । आचाराः सांवृतास्ते हि कृत्रिमेष्वपि भाविनः ॥
अतीतश्च महान् कालो योषितां चातिचापलम् । तद् भवत्यपि निश्चेतुं ब्राह्मणत्वं न शक्यते ॥
अतीन्द्रियपदार्थज्ञो न हि कश्चित् समस्ति वः । त्वदन्वयविशुद्धिं च नित्यो वेदोऽपि नोक्तवान्" ॥
—तत्त्वसं० का० ३५७५-३५८० पृ० ९२०-२१ ।

अयं भावो हर्षेणापि दर्शितः—

"शुद्धिर्वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः । तदानन्तकुलादोषाददोषा जातिरस्ति का ॥
कामिनीवर्गसंसर्गैर्न कः संक्रान्तपातकः" ।—नैषध० स० १७ श्लो० ४०-४१ पृ० ३६९ ।

तट्टीकायां च "यदाहुः" इत्यादिना

"अप्येकपङ्क्त्यां नाश्नीयात्सयतैः स्वजनैरपि । को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत्" । इति । तथा—

"अनादाविह संसारे दुर्वारे मकरध्वजे । कुले च कामिनीमूले का जातिपरिकल्पना" ।

इति पद्यद्वयं उद्धृतं दृश्यते तत्रत्यं प्रथमं पद्यं पराशरमाधवे बृहस्पत्युक्तत्वेन समुद्धृतम्—

अ० १ आचारकां० पृ० ३७६ ।

ब्राह्मणत्वं न स्यात्। न च अदृश्ये वस्तुनि निर्णयो विधातुं शक्यः 'शूद्राद्युत्पाद्यत्वमस्य नास्ति' इति, अनादिगोत्रपद्धतौ च कामार्तत्वात् सर्वदा प्रमदानां कस्याश्चिद् व्यभिचारसंभवात् कुतो योनिनिबन्धनब्राह्मण्यनिश्चयात् संस्कारस्य अध्ययनादेश्च अविपर्ययस्तत्त्वनिश्चयः? आगमस्य च तन्निश्चयनिबन्धनत्वेन कल्पितस्य रागादियुक्तपुरुषप्रणीतत्वेन अप्रामाण्यात् न निश्चयहेतुता अपौरुषेयस्य च
५ प्रतिव्यक्ति एवंभूतार्थप्रतिपादनपरस्य अनुपलम्भान्न ततोऽपि तन्निश्चयः। न च अविगानतस्त्रैवर्णिकप्रवादोऽत्र वस्तुनि प्रमाणम् तस्यापि व्यभिचारित्वोपलब्धेः—दृश्यन्ते च बहवस्त्रैवर्णिकैरविगानेन ब्राह्मणत्वेन व्यवह्रियमाणा विपर्ययभाजः इत्यलमतिनिर्बन्धेन वचनमात्रगम्येऽर्थे। इति व्यवस्थितमेतत्-असत् सामान्यम्, तत्साधकप्रमाणाभावात् बाधकोपपत्तेश्च।

[निरूपणपुरस्सरं विशेषपदार्थस्य खण्डनम्]

१० नित्यद्रव्यवृत्तयः[1] परमाण्वाकाश-काल-दिगात्ममनस्सु वृत्तेः अत्यन्तव्यावृत्तबुद्धिहेतवो विशेषाः ते च—परमाणूनां जगद्विनाशारम्भकोटिभूतत्वात् मुक्तात्मनाम् मुक्तमनसां च संसारपर्यन्तरूपत्वाद् अन्तत्वं तेषु भवा—अन्त्या इत्युच्यन्ते तेषु स्फुटतरमालक्ष्यमाणत्वात्, वृत्तिस्त्वेषां सर्वस्मिन्नेव परमाण्वादौ नित्ये द्रव्ये विद्यत एव अत एव 'नित्यद्रव्यवृत्तयः' 'अन्त्याः' इत्युभयपदोपादानम्। अपरे[2] तु उत्पाद-विनाशलक्षणान्तरहितेषु द्रव्येषु भवा अन्त्या इत्यस्य व्याख्यानं 'नित्यद्रव्य-
१५ वृत्तयः' इति पदं वर्णयन्ति। व्यावृत्तबुद्धिहेतुत्वं च विशेषाणां सद्भावप्रतिपादकं प्रमाणम्। यथा हि अस्मदादीनां गवादिषु आकृति-गुण-क्रियाऽवयव-संयोगनिमित्तोऽश्वादिभ्यो व्यावृत्तः प्रत्ययो दृष्टः-तद्यथा-'गौः' 'शुक्लः' 'शीघ्रगतिः' 'पीनककुदः' 'महाघण्टः' इति यथाक्रमम्-तथास्मद्विशिष्टानां योगिनां नित्येषु तुल्याऽऽकृति-गुण-क्रियेषु परमाणुषु मुक्तात्म-मनस्सु च अन्यनिमित्ताभावे प्रत्याधारं यद्वलाद्[3] 'विलक्षणोऽयम्' 'विलक्षणोऽयम्' इति प्रत्ययवृत्तिः देश-कालविप्रकर्षोपलब्धे च 'स
२० एवायम्' इति प्रत्यभिज्ञानं च यतो भवति ते योगिनां विशेषप्रत्ययोन्नीतसत्त्वा अन्त्या विशेषाः सिद्धाः। योगिनां तु एते प्रत्यक्षत एव सिद्धाः।

एते च लक्षणासंभवादेव असन्तः। तथाहि[4]—यद् एषां नित्यद्रव्यवृत्तित्वादिकं लक्षणमभिहितम्, तत् असंभवदोषदुष्टत्वाद् अलक्षणमेव। यतः न किञ्चिन्नित्यं द्रव्यमस्ति, तस्य पूर्वमेव निरस्तत्वात्। तदभावे च तद्वृत्तित्वं लक्षणमेषां दूरोत्सारितमेव। यच्च योगिप्रभवविशेषप्रत्ययबलाद् एषां सत्त्वं
२५ साध्यते, तद् असंगतमेव; हेतोरनैकान्तिकत्वात्। तथाहि-परमाण्वादीनां स्वस्वभावव्यवस्थितेः स्वरूपं परस्परासंकीर्णरूपं वा भवेत्, संकीर्णस्वभावं वेति कल्पनाद्वयम्। आद्यकल्पनायां स्वत एव असंकीर्णपरमाण्वादिरूपोपलम्भात् योगिनां तेषु वैलक्षण्यप्रत्ययोत्पत्तिर्भविष्यतीति व्यर्थमपरविशेषपदार्थकल्पनम्। द्वितीयायामपि विशेषाख्यपदार्थान्तरसन्निधानेऽपि परस्परव्यतिमिश्रेषु परमाण्वादिषु तद्बलाद् व्यावृत्तप्रत्ययो योगिनां प्रवर्तमानः कथमभ्रान्तो भवेत् स्वरूपतोऽव्यावृत्तस्वरूपेषु

---

१ "नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः। ते खल्वत्यन्तव्यावृत्तिहेतुत्वाद् विशेषा एव"—प्रशस्त० कं० पृ० १३ पं० २०।
"विशेषा एव केचित्तु व्यावृत्तेरेव हेतवः। नित्यद्रव्यस्थिता येऽन्त्या विशेषा इति वर्णिताः" ॥
—तत्त्वसं० का० ७१२ पृ० २३६।

२ "अन्तेषु भवा अन्त्याः स्वाश्रयविशेषकत्वाद् विशेषाः। विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमानाः अत्यन्तव्यावृत्तिबुद्धिहेतवः"—इत्यादि—प्रशस्त० कं० पृ० ३२१ पं० १२—।

३ **यद्वर्णाद्** बृ० आ० हा० वि०।
"यद्बलात् परमाण्वादौ जायन्ते योगिनां धियः। विलक्षणोऽयमेतस्मादिति प्रत्येकमाश्रिताः" ॥
—तत्त्वसं० का० ७१३ पृ० २३७।

४ "ये पुनः कल्पिता एते विशेषा अन्त्यभाविनः। नित्यद्रव्यव्यपोहेन तेऽप्यसंभविताः क्षणाः ॥
अण्वाकाशदिगादीनामसंकीर्णं यदा स्थितम्। स्वरूपं च तदैतस्माद् वैलक्षण्योपलक्षणम् ॥
मिश्रीभूतापरात्मानो भवेयुर्यदि ते पुनः। नान्यभावेऽप्यविभ्रान्तं वैलक्षण्योपलक्षणम् ॥
कथं तेषु विशेषेषु वैलक्षण्योपलक्षणम्। स्वत एवेति चेन्नैवमण्वादावपि किं मतम्" ॥
—तत्त्वसं० का० ८१३-८१६ पृ० २६३।

अण्वादिषु व्यावृत्ताकारतया प्रवर्तमानस्य तस्य अतस्मिंस्तद्ग्रहणरूपतया भ्रान्तत्वाऽनतिक्रमात्? एवमेतत्प्रत्ययययोगिनस्तेऽयोगिन एव स्युः। किञ्च, यदि विशेषाख्यपदार्थान्तरव्यतिरेकेण विलक्षणप्रत्ययोत्पत्तिर्न भवेत् कथं तेषु विशेषेषु तस्योत्पत्तिर्भवेत् तेषु अपरविशेषाभावात्? भावे वा अनवस्थाप्रसक्तेः 'नित्यद्रव्यवृत्तयः'[1] इति च अभ्युपगमक्षतिः स्यात् विशेषेषु अपि विशेषाणां वृत्तेः। अथ स्वत एव तेषु परस्परवैलक्षण्यमिति अपरविशेषमन्तरेणापि वैलक्षण्यबुद्धिविषयता तर्हि परमाण्वादी-५ नामपि तत एव तद्बुद्धिप्रवृत्तिर्भविष्यतीति व्यर्थं विशेषाख्यपदार्थपरिकल्पनम्। अथ विशेषेषु अपरविशेषयोगाद् व्यावृत्तबुद्धिपरिकल्पनायामनवस्थादिबाधकोपपत्तेः उपचारात् तेषु तद्बुद्धिः, न; तथाभूतविज्ञानाधाराणां योगिनामयोगित्वप्रसक्तेः-तद्बुद्धेः 'विशेषा इव' इति स्खलद्रूपतया प्रवृत्तौ अनिर्णयबुद्ध्यधिकरणत्वात् तेषां 'विशेषा एव' इत्यस्खलद्रूपबुद्ध्यधिकरणत्वे अपरविशेषविकलानां विशेषाणां परमाण्वादीनामिव अविशेषरूपतया तद्बुद्धेर्विपर्यस्तरूपत्वेन तदाधाराणां कथं न अयोगि- १० त्वम्? यदि च बाधकोपपत्तेर्विशेषेषु व्यावृत्तबुद्धिर्न अपरविशेषनिबन्धना तर्हि परमाण्वादिष्वपि भिन्नविशेषनिबन्धना नासावभ्युपगन्तव्या, तेषां तत्र भिन्नाभिन्नव्यावृत्तरूपकरणानुपपत्तेर्बाधकस्य सद्भावात्। यदप्यत्र अध्ययनाद्युक्तं प्रतिसमाधानम्—"यथा[2] श्वमांसाशुच्यादीनां स्वत एव अशुचित्वम् अन्येषां च भावानां तद्योगात् तत् तथेहापि तादात्म्यात् विशेषेषु स्वत एव व्यावृत्तप्रत्ययहेतुत्वम् परमाण्वादिषु तु तद्योगात्। किञ्च, अतदात्मकेष्वपि अन्यनिमित्तः प्रत्ययो भवत्येव यथा प्रदीपात् १५ पटादिषु न पुनः पटादिभ्यः प्रदीपे एवं विशेषेभ्य एव अण्वादौ विशिष्टप्रत्ययः न अण्वादिभ्य इत्यादिकम्" [ ], तदपि असंगतम्; यतोऽशुचित्वं भावानां कल्पनासमारोपितम् न पारमार्थिकम् अव्यवस्थितेस्तस्य। तथाहि—यदेव कस्यचित् श्रोत्रियादेर्द्रव्यमशुचित्वेन प्रतिभाति तदेव कापालिकादेः शुचित्वेन। न च एकस्य परस्परविरुद्धानेकरूपसमावेशो युक्तः एकत्वहानिप्रसक्तेः। भवतु वा पारमार्थिकं पदार्थानामशुचित्वं तथापि न दृष्टान्त-दार्ष्टान्तिकयोः साम्यम् यतः २० स्व(श्व)मांसाद्यशुचिद्रव्यसंसर्गाद् मोदकादयो भावाः प्रच्युतप्राक्तनशुचिस्वभावा अपर एव अशुचिरूपा उत्पद्यन्ते इति युक्तमेषामन्यसंसर्गजमशुचित्वम् न तु परमाण्वादिषु एतत् संभवति तेषां नित्यत्वादेव प्राक्तनाऽविविक्तस्वरूपपरित्यागेन अपरविविक्तस्वरूपतयाऽनुपपत्तेः अत एव प्रदीप-पटदृष्टान्तोऽपि असंगतः पटादीनां प्रदीपादिपदार्थान्तरोपाधिकस्य रूपान्तरस्य उत्पत्तेः प्रकृते च तदसंभवात् इति। अनुमानबाधितश्च विशेषसद्भावाभ्युपगमः। तथाहि-विवादाधिकरणेषु भावेषु २५ विलक्षणप्रत्ययः तद्व्यतिरिक्तविशेषनिबन्धनो न भवति, व्यावृत्तप्रत्ययत्वात्, विशेषेषु व्यावृत्तप्रत्ययवत् इति। पूर्ववद् अस्य हेतोः प्रतिबन्धादिकं वाच्यम्। तन्न विशेषपदार्थसद्भावः तत्साधकप्रमाणाभावात् बाधकोपपत्तेश्चेति स्थितम्।

---

१ "नित्यद्रव्यवृत्तयोऽन्त्या इति चाभ्युपगमहानिप्रसङ्गाच्च"—तत्त्वसं० पञ्जि० पृ० २६३ पं० २२।

२ "यथा गवाश्वमांसादीनां स्वत एवाशुचित्वं तद्योगादन्येषां तथेहापि तादात्म्यादन्यविशेषेषु स्वत एव प्रत्ययव्यावृत्तिः तद्योगात् परमाण्वादिष्विति"—प्रशस्त० कं० पृ० ३२२ पं० १३।
"'स्वत एव' इत्यादिना प्रशस्तमतेरत्रोत्तरमाशङ्कते—
स्वत एवाशुचित्वं हि श्वमांसादेर्यथा स्थितम्। तद्योगादपरेषां तु तथेहापि यदीष्यते ॥
यथा प्रकाशको दीपो घटादेश्च स्वतः स्थितः। तत्प्रकाशात्मतायां च नियतोऽयमिदं तथा ॥"
—तत्त्वसं० का० ८१७-८१८ पृ० २६४।

३ **यथा स्वमांसा**-वा० बा० भां० मां०। "स ह्याह यथा श्वमांसा"-तत्त्वसं० पञ्जि० पृ० २६४ पं० ६।

४ "ननु चाशुचिभावोऽयं सांवृतो न तु तात्त्विकः। तत् स्वयं परतो वाऽयं कथं नाम भविष्यति ॥
अथवा भाविकत्वेऽपि श्वमांसादिवशादिमे। जायन्तेऽशुचयो भावा नैव नित्या अजन्मतः ॥
प्रदीपादिप्रभावाच्च ज्ञानोत्पादस्वरूपताम्। लभन्ते क्षणिका ह्यर्थाः कलशाभरणादयः ॥
न विवादास्पदीभूतविशेषबलभाविनी। वैलक्षण्यमतिस्तेषु क्रमोत्पत्तेः सुखादिवत्" ॥
—तत्त्वसं० का० ८१९-८२२ पृ० २६४।

५ "तथाहि—श्वमांसादिकाशुचिद्रव्यसंपर्कादन्नादयो भावाः"-तत्त्वसं० पञ्जि० पृ० २६४ पं० २५।

[निरूपणपुरस्सरं समवायपदार्थस्य खण्डनम्]

संमवायस्तु 'इह तन्तुषु पटः' इत्यादीहबुद्धिविशेषाद् द्रव्यादिभ्यो अर्थान्तरत्वेन अभ्युपगम्यते "अयुतसिद्ध"—[प्रशस्त० कं० पृ० १४ तथा ३२४] इत्यादिलक्षणोपेतः । यथा हि सत्ता-द्रव्यत्वादीनामात्मानुरूपप्रत्ययकर्तृत्वात् स्वाधारेषु तेभ्यः परस्परतश्च अर्थान्तरभावस्तथा समवायस्यापि पञ्चसु पदार्थेषु 'इह तन्तुषु पटः' 'इह पटद्रव्ये गुण-कर्मणी' 'इह द्रव्य-गुण-कर्मसु सत्ता' 'इह द्रव्ये द्रव्यत्वम्' 'इह गुणे गुणत्वम्' 'इह कर्मणि कर्मत्वम्' 'इह द्रव्येषु अन्त्या विशेषाः' इत्यादिविशेषप्रत्ययदर्शनात् पञ्चभ्यः पदार्थेभ्य अर्थान्तरता तस्य अवसीयते । तथा च प्रयोगः-येषु यदाकारविलक्षणो यः प्रत्ययः तद्व्यतिरिक्तार्थान्तरनिबन्धनः सोऽभ्युपगन्तव्यः, यथा 'पुरुषे दण्डी इति प्रत्ययः, तथा चायं पञ्चसु पदार्थेषु 'इह' प्रत्यय इति स्वभावहेतुप्रतिरूपकः प्रयोगः । निबन्धनमन्तरेण अस्य सद्भावे नित्यं सत्त्वमसत्त्वं वा स्यादिति विपर्यये बाधकं प्रमाणम् । एवम् 'इह' बुद्धिलिङ्गावसेयः समवायः । अध्यक्षबुद्ध्यवसेयत्वमपि तस्य केचन मन्यन्ते । तथाहि–अक्षव्यापारे सति 'इह तन्तुषु पटः' इत्यादिप्रत्ययोत्पत्तेर्विशेषणभूतस्य तस्य 'इह' बुद्ध्यध्यक्षावसेयता । समवायश्च न संयोगवद् भिन्नः किन्तु तल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च सत्तावत् सर्वत्र एक एव, अकारणत्वाच्च तद्वदेव नित्यः । अकारणत्वं च तत्कारणानुपलब्धेः सिद्धम् ।

अत्र प्रतिविधीयते—'इह तन्तुषु पटः'इत्यादिका बुद्धिः स्वसमयाहितवासनाप्रकल्पितैव न तु लोके तथोत्पद्यमानत्वेन सिद्धेति धर्म्यसिद्धेराश्रयासिद्धो हेतुः । तथाहि—यत्र नानात्वमुपलक्षितं भवेत् तत्र आधाराधेयभावे सति 'इह' बुद्धिरुत्पद्यमाना लोके संवेद्यते, यथा 'इह कुण्डे दधि' इति । न च नानात्वं तन्तु-पटयोरुपलब्धिगोचरः इति कथं तत्र 'इह'बुद्ध्युत्पादः ? न च स्वमतिप्रकल्पितस्य कार्यस्य कारणपर्यनुयोगः परं प्रति विधेयः । न चेच्छायाः पदार्थरूपानुरोधः तस्याः स्वातन्त्र्यवृत्तित्वात् ततोऽपि वस्तुव्यवस्थापने तेषामव्यवस्थाप्रसक्तेः भवत्परिकल्पितस्यापि वस्तुनोऽन्यथाऽन्यस्य प्रकल्पयितुं शक्यत्वात् न केवलम् 'इह तन्तुषु पटः' इत्यादिका बुद्धिर्लोके न संवेद्यते किन्तु विपर्ययेणैव तस्या उत्पादानुभवः । तथाहि—'वृक्षे शाखा' 'पर्वते शिला' इत्यादिका बुद्धिर्लोके उत्पद्यमानत्वेन संवेद्यते । न च 'वृक्षे शाखा' इत्यादिकाऽपि मतिः समवायनिबन्धना किन्तु विवक्षितशाखाव्यतिरिक्तस्कन्धादिविशिष्टसमुदायनिबन्धनैव । एवम् 'इह घटे रूप-रस-गन्ध-स्पर्शाः' इत्यादिबुद्धेरपि घटस्वभावत्वं रूपादीनां निबन्धनत्वेन प्रतिपद्यते लोकः । तथाहि—घटे रूपादिकं घटस्वभावमेव एतद्रूपादिकं न पटादिस्वभावम् बहुषु रूपादिषु साधारणशक्तिविशेषप्रतिपादनाभिप्रायेण तदन्यरूपादिव्यवच्छेदेन घटादिश्रुतेः संकेतः रूपादिश्रुतेस्तु प्रत्येकमसाधारणचक्षुर्ज्ञानादिकार्योत्पादनशक्तिप्रकाशनाय समयकरणम् अत एव घटादिश्रुतिर्न रूपादीन् भेदान् आक्षिपति तत्सामानाधिकरण्याभावात् रूपादिशब्दाश्च घट-पटादिसर्वावस्थरूपादिवाचका इति रूपादिशब्देभ्यः केवलेभ्यो न तद्विशेषप्रतीतिस्तेन विशिष्टावस्थरूपादिप्रतिपादनाय 'घटे रूपादयः' इत्येवमुभयपदप्रयोगः क्रियते ततोऽपि घटात्मका रूपादयः पटात्मकरूपादिव्यवच्छेदेन प्रतीयन्ते घटशब्दस्तु सर्वावस्थं चलनादिस्वभावान्वितं घटं ब्रूत इति केवलान्न विशेषप्रतीतिः 'रूपम्' इत्यादिशब्दप्रयोगे तु तदन्यव्यवच्छेदेन विशेषप्रतिपत्तिरुपजायते इति तत्प्रयोगः । तस्मात् संकेतवशात् 'इह घटे रूपादयः' इत्यादि ज्ञानं तथाभूतपदार्थनिबन्धनम् न समवायनिबन्धनम् यतो न घटरूपादिसमवायानां भेदः परस्परतः क्वचिदपि उपलब्धिगोचरः तत् कथमेतद् ज्ञानं समवायनिबन्धनं भवेत् ? तेन परोपन्यस्तहेतोरनैकान्तिकत्वात् उक्तन्यायेन प्रतिज्ञायाश्च अनुमानबाधितत्वान्न समवायसिद्धिः । यदपि 'इह बुद्ध्यविशेषात्' इत्याद्यभिधानम् तदपि असंगतम्, यतो यदि एकः समवायः स्यात् तदा 'तन्तुषु घटः' इत्यादिबुद्धेरपि उत्पत्तिः स्यात् । तथाहि—यत एव समवायात् 'कपालेषु घटः' इति प्रत्ययोत्पत्तिरभ्युपगता स एव समवायः तन्तुषु घटस्य इति किमिति तथाप्रत्ययोत्पत्तिर्न भवेत् ? अथ न तन्तुषु घट आश्रितः इति तत्र तथाप्रत्ययो नोत्पद्यते, असदेतत् ; यतः 'कपालेषु घट आश्रितः' इति समवायबलाद् भवद्भिरभिधीयते; स च समवायः किं तन्तुषु नास्ति येन 'इह तन्तुषु घटोऽस्ति' इति प्रत्ययो न भवेत् समवायस्य एकत्वेन सर्वत्र अविशेषात् ? एवं च द्रव्य-गुण-कर्मणां द्रव्यत्व-गुणत्व-कर्मत्वादिविशेषणैः संबन्धस्य एकत्वात् पदार्थपञ्चकस्य विभागो न भवेत् । अथ समवायस्य एकत्वेऽपि न पदार्थसंकरः, आधाराधेयनियमात् । तथाहि—'द्रव्येष्वेव द्रव्यत्वम्' 'गुणेष्वेव गुणत्वम्' 'कर्मस्वेव कर्मत्वम्' इत्येवं द्रव्यत्वादीनां प्रतिनियताधारावच्छेदेन प्रतिपत्तेः सद्भावः, न; एवं समवायस्य प्रतिपदार्थं भिन्नत्वोपपत्तेः । अथ 'इह' इति समवायनिमित्तायां बुद्धेरभिन्नाकारतया सर्वत्र अनुगमाद् एकः समवायः सर्वत्रावसीयते, तदेकत्वेऽपि द्रव्यत्वादिनिमित्तानां प्रत्ययानां प्रतिनियताधारावच्छेदेना-

---

१ "तन्तुष्वेव पटोऽमीषु वीरणेषु कटः पुनः । इत्यादीहमतेर्भावात् समवायोऽवगम्यते" ॥—तत्त्वसं० का० ८२३ पृ० २६५ ।

२ "अयुतसिद्धानामाधार्याधारभूतानां यः संबन्ध इहप्रत्ययहेतुः स समवायः"—प्रशस्त० कं० ।

३ "तस्याभावे स चेत् किं हि मतेरस्या निबन्धनम् । न विशेषमतिर्दृष्टा निमित्तान्तरवर्जिता ॥
इहबुद्धयविशेषाच्च योगवन्न विभिद्यते । सर्वस्मिन् भाववत्त्वेष एक एव प्रतीयते ॥
कारणानुपलब्धेश्च नित्यो भाववदेव सः । न ह्यस्य कारणं किञ्चित् प्रमाणेनोपलभ्यते" ॥
—तत्त्वसं० का० ८२४–८२६ पृ० २६५ ।

४ "एवं तावद् वैशेषिकाणां मतेन इहबुद्धिलिङ्गानुमेयः समवायः । नैयायिकमतेन तु इहबुद्धिप्रत्यक्षगम्य एव"
—तत्त्वसं० पञ्जि० पृ० २६५ पं० २४—।

५ "तदेतदिहविज्ञानं परेषामेव वर्तते । स्वसिद्धान्तानुरागेण न दृष्टं लौकिकं तु तत्" ॥
—तत्त्वसं० का० ८२७ पृ० २६६ ।

६ "नानात्वलक्षणे हि स्यादाधाराधेयभूतयोः । इदमत्रेति विज्ञानं कुण्डादौ श्रीफलादिवत् ॥
नैव तन्तुपटादीनां नानात्वेनोपलक्षणम् । विद्यते येन तेषु स्युरिदमत्रेति बुद्धयः" ॥
—तत्त्वसं० का० ८२८–२९ पृ० २६६ ।

७ "स्वेच्छया रचिते वाऽस्मिन् कल्पितेष्विव वस्तुषु । न कारणनियोगोऽयं परं प्रत्युपपद्यते" ॥
—तत्त्वसं० का० ८३० पृ० २६६ ।

८ "वृक्षे शाखाः शिलाश्वाग इत्येषा लौकिकी मतिः । अगाख्यपरिशिष्टाङ्गनैरन्तर्योपलम्भनात् ॥
तौ पुनस्तास्विति ज्ञानं लोकातिक्रान्तमुच्यते । घटे रूपं क्रियादीति तादात्म्यं लवयच्छति ॥
रूपकुम्भादिशब्दा हि सर्वावस्थाभिधायकाः । तद्विशेषाभिधानाय तथा ते विनिवेशिताः ॥
तानाश्रित्यैषु विज्ञानं तेनाकारेण वर्तते । समवायान्न भेदस्य सर्वेषामप्यनीक्षणात्" ॥
—तत्त्वसं० का० ८३१–८३४ पृ० २६७ ।

९ उत्पाद्य–वा० बा० भां० मां० ।

१ "अतो घटादिश्रुती रूपादिभेदानाक्षिपतीति सामानाधिकरण्याभावाद् वैयधिकरण्येनैव तादात्म्यं प्रतिपाद्यते"
—तत्त्वसं० पञ्जि० पृ० २६७ पं० १९ ।

२-सर्वावस्तुरू–बृ० आ० हा० वि० । "रूपादिशब्दा हि सर्वावस्थस्य रूपादेर्वाचकाः"—तत्त्वसं० पञ्जि० पृ० २६७ पं० २१ ।

३ पृ० ७०० पं० १० टि० ३ ।

४ "यद्येकः समवायः स्यात् सर्वेष्वेव च वस्तुषु । कपालादिष्वपि ज्ञानं पटादीति प्रसज्यते ॥
गजादिष्वपि गोत्वादि समस्तीत्यनुषज्यते । ततो गवादिरूपत्वममीषां शाबलेयवत् ॥
पटस्तन्तुषु योऽस्तीति समवायात् प्रतीयते । अस्ति चासौ कपालेषु तस्येति न तथेति किम् ॥
नाश्रितः स कपाले चेन्ननु तन्तुष्वपीष्यते । आश्रितः समवायेन स कपालेऽपि नास्ति किम् ? ॥
तन्तोर्यः समवायो हि पटस्येत्यभिधीयते । स घटस्य कपालेषु तद्वीरनवधिर्भवेत् ॥
एवं यश्च गजत्वादिसमवायो गजादिषु । गोत्वादिजातिभेदानां स एव स्याश्रयेष्वपि" ॥
—तत्त्वसं० का० ८३५–८४० पृ० २६८–२६९ ।

५ भवतु अ–वा० बा० भां० मां० । "किमिति तथाप्रतीतिर्न भवेत्"—तत्त्वसं० पञ्जि० पृ० २६८ पं० २० ।

६ " 'आधार' इत्यादिनाऽत्र प्रशस्तमतेरुत्तरमाशङ्कते—
आधाराधेयनियमः स चैकत्वेऽपि विद्यते । द्रव्येष्विव हि तज्जातिकर्मस्वेव च कर्मता" ॥
—तत्त्वसं० का० ८४१ पृ० २६९ ।

७ "इहेति समवायोत्थविज्ञानान्वयदर्शनात् । सर्वत्र समवायोऽयमेक एवेति गम्यते ॥
द्रव्यत्वादिनिमित्तानां व्यतिरेकस्य दर्शनात् । धियां द्रव्यादिजातीनां नियमस्त्ववसीयते" ॥
—तत्त्वसं० का० ८४२–८४३ पृ० २६९ ।

८-वच्छेदेनानुया–वा० बा० । "प्रतिनियताधारावच्छेदेनोत्पत्तेर्व्यतिरेकस्यानन्वयलक्षणस्य दर्शनात्"
—तत्त्वसं० पञ्जि० पृ० २६९ पं० १६ ।

ननुयायितयोत्पत्तेर्द्रव्यत्वादीनां भेद इति न पदार्थपञ्चकस्य संकीर्णताप्रसक्तिः, यथा हि दधि-कुण्डयोः संयोगैकत्वेऽपि आधार्याधारप्रतिनियम उपपत्तिमान् तथा समवायैकत्वेऽपि द्रव्यत्वादीनां व्यङ्ग्यव्यञ्जकशक्तिभेदाधा(दाधा)राधेयप्रतिनियमोपपत्तेः असंकीर्णपदार्थव्यवस्था संगतैव प्रमाणनिबन्धनत्वात् प्रमेयव्यवस्थायाः इति, असदेतत्; यतो नास्माकं रूपत्वादीनां रूपादिषु आधेयनियमः सिद्धः भवतां पुनः समवायमेकं सर्वत्राऽभ्युपगच्छतां प्रतिनियमो दुर्घटः प्रसज्येत। तथाहि—'द्रव्ये एव द्रव्यत्वम्' इत्येवं नियमः समवायनिबन्धनो भवद्भिरभ्युपगम्यते, द्रव्यत्वादेः समवायस्य च गुणादिष्वपि एकस्यैव सद्भावात् कथं न पदार्थसंकरप्रसङ्गः द्रव्यत्वाद्याधेयत्वस्य अभिन्ननिमित्तत्वात्? अथ द्रव्ये द्रव्यत्वस्य यः समवायः न स एव गुणादिषु गुणत्वादेस्तर्हि संयोगवत् समवायस्य प्रत्याधारं भेदः स्यात्। अथ स्वरूपेण अभिन्नस्यापि समवायस्य द्रव्यत्वादिविशेषणभेदाद् भेद इति न पदार्थसंकरः; ननु द्रव्यत्वादेर्विशेषणस्य समवायाभेदे कुतो भेदः? यदि स्वत एव आधेयतानियमोऽपि तेषां स्वत एव भविष्यतीति समवायप्रकल्पना व्यर्था। अथ प्रतिनियताधारसंबन्धवशात् तेषां प्रतिनियतरूपता तर्हि 'समवायस्य विशेषणभेदाद् भिन्नता विशेषणानां च समवायात् सा' इत्यन्योन्यसंश्रयः। यदपि 'द्रव्यत्वादिनिमित्तानाम्' इत्याद्यभिहितम् तदपि असंबद्धम्; न हि अविकले निमित्ते सति कार्यस्य अनन्वयित्वं युक्तम् तस्य अतत्कार्यत्वप्रसक्तेः। एवं च बुद्धिव्यतिरेकासंभवात् तद्वशाद् आधाराधेयभावनियमव्यवस्था न युक्तिसंगता। न च 'द्रव्य एव द्रव्यत्वमाश्रितम्' इति व्यपदेशात् तन्नियमः समवायवशादेव आश्रितत्वादिव्यवस्थोपवर्णनात्, तस्य च सर्वत्राऽविशिष्टत्वात् तथाव्यपदेशस्यापि भवदभ्युपगमेनायोगात्। न च व्यङ्ग्यव्यञ्जकशक्तिप्रतिनियमाद् आधाराधेयप्रतिनियमः, व्यङ्ग्यादिप्रतिनियमस्यापि समवायनिमित्तत्वात्। तथाहि—द्रव्यादीनां द्रव्यत्वादिसामान्यव्यञ्जकत्वं तत्समवायबलादेव परैरभ्युपगम्यते यतः द्रव्य एव द्रव्यत्वं समवेतम् ततस्तेनैव तद् व्यज्यते न पुनर्ज्ञानोत्पादनयोग्यस्वभावोत्पादनात् नित्ये सत्तादौ तदयोगात् स च समवायः सर्वत्राऽविशिष्ट इति न तद्वलाद् व्यङ्ग्यव्यञ्जकशक्तिप्रतिनियम इति न ततोऽपि आधाराधेयप्रतिनियमः।

योऽपि दधि-कुण्डसंयोगो दृष्टान्तत्वेन उपात्तः सोऽपि अस्मान् प्रत्यसिद्धः पूर्वमेव संयोगस्य

---

१ "तद्यथा कुण्ड–दध्नोश्च संयोगैक्येऽपि दृश्यते। आधाराधेयनियमस्तथेह नियमो मतः॥
व्यङ्ग्यव्यञ्जकसामर्थ्यभेदाद् द्रव्यादिजातिषु। समवायैकभावेऽपि नैव चेत् स विरुध्यते"॥
—तत्त्वसं० का० ८४४–८४५ पृ० २६९।

२ "व्यङ्ग्यव्यञ्जकशक्तिभेदादाधाराधेयप्रतिनियम इति"—तत्त्वसं० पञ्जि० पृ० २६९ पं० २६।

३ "आधाराधेयनियमो नन्वेकस्येऽस्य दुर्घटः। द्रव्यत्वं द्रव्य एवेष्टं कथं तत्समवायतः॥
तस्यासौ समवायश्च गुणादिष्वपि विद्यते। गुणजात्यादिसंबन्धादेक एव ह्ययं तयोः"॥
—तत्त्वसं० का० ८४६–८४७ पृ० २७०।

४ "अन्यथा गुणजात्यादिभिन्न एव भवेदयम्। योगिभेदात् प्रतिव्यक्ति यथा योगो विभिद्यते"॥
—तत्त्वसं० का० ८४८ पृ० २७०।

५ पृ० ७७१ पं० २५ टि० ७।

६ "द्रव्यत्वादिनिमित्तानां व्यतिरेको न युज्यते। धिया निमित्तसद्भावादतस्तन्नियमोऽपि न"॥
—तत्त्वसं० का० ८४९ पृ० २७०।

७ "तदाश्रितत्वस्थानादि तस्मादेवाभिधीयते। समवायादतश्चैतन्न युक्तं तन्नियामकम्"॥
—तत्त्वसं० का० ८५० पृ० २७०।

८ "व्यङ्ग्यव्यञ्जकसामर्थ्यभेदोऽपि समवायतः। नान्यतस्तु स नित्यानामुत्पादानुपपत्तितः॥
न हि दीपादिसद्भावाजायन्ते यादृशा इमे। विज्ञानजनने योग्या घटाद्या जातयस्तथा"॥
—तत्त्वसं० का० ८५१–८५२ पृ० २७१।

९ "कुण्ड–दध्नोश्च संयोग एकः पूर्वं निराकृतः। न चासौ नियतस्तस्माद् युज्यते (तिप्रसङ्गतः)"॥
—तत्त्वसं० का० ८५३ पृ० २७१।

प्रतिषिद्धत्वात्, तत्सद्भावेऽपि चायं पर्यनुयोगस्तत्रापि तुल्यः। तथाहि—यदि 'इह कुण्डे दधि' इति बुद्धिः संयोगनिमित्ता तस्य च एकत्वम् तदा निमित्तत्वाविशेषात् यथा 'कुण्डे दधि' इति प्रत्ययः तथा 'दध्नि कुण्डम्' इत्यपि स्यात् दधि-कुण्डसंयोगस्याविशेषे तज्जन्यप्रत्ययस्यापि अविशेषप्रसक्तेः अन्यथा तस्य तन्निमित्तत्वायोगात् अतिप्रसङ्गात्। किञ्च, यदि 'इह तन्तुषु पटः' इति प्रत्ययः तन्तु-पटव्यतिरिक्तनिमित्तमन्तरेण न स्यात् 'इह समवायिषु समवायः' इत्यपि प्रत्ययः अपरसमवाय-निमित्तमन्तरेण न स्यात्। अथापरसमवायप्रकल्पनायामनवस्थाप्रसक्तेस्तमन्तरेणापि अस्य प्रत्ययस्योत्पत्तिस्तर्हि अनेनैव हेतुरनैकान्तिकः स्यात् इति न 'इह' प्रत्ययात् समवायसिद्धिः। यच्च 'कारणानुपलब्धेर्नित्यः समवायः' इत्यभिधानम्, तदप्यसंगतम्, यतो यद्यसौ नित्यः स्यात् तदा घटादीनामपि नित्यत्वं प्रसज्येत स्वाधारेषु तेषां सर्वदाऽवस्थानात्। तथाहि-एषां समवायवशात् स्वाधारेषु अवस्थानमिष्यते स च नित्य इति किमिति सदैते न संतिष्ठेरन्? अथ स्वारम्भकावयवविनाशाद् विभागाद् वा घटादीनां विनाशः सत्यपि समवायेऽवस्थितिहेतौ सहकारिकारणान्तराभावाद् विरोधिप्रत्ययोपनिपाताच्च ततो न घटादीनां नित्यत्वप्रसङ्ग इति, असदेतत्; यतः कपालादीनां घटाद्यारम्भकावयवानामपि स्वारम्भकावयवेषु समवायोऽभ्युपगम्यते तेषामपि स्वारम्भकावयवेषु यावत् परमाणुः तस्य च नित्यत्वाद् नान्यथात्वसद्भाव इति सर्वेषां सर्वदा स्वारम्भकावयवेषु समवायसद्भावात् कुतो विभागो विनाशो वा—येन कारणविभागादिसद्भावात् घटादेर्विनाशोत्पत्तिर्भवेत्—विरोधिसमवायसद्भावे विभागादेरनुत्पत्ते (?) यदि च स्वारम्भकावयवानां विनाशोऽभ्युपगम्येत तदा समवायस्यापि विनाशाभ्युपगमोऽवश्यंभावी संबन्धिनिवृत्तौ संबन्धनिवृत्तेरवश्यंभावित्वात् कुण्ड-बदरसंयोगिविनाशे तत्संयोगवत्, संबन्धिनां वा अविनाशप्रसङ्गः अविनष्टसंबन्धत्वात् अनुपरतसंयोगद्रव्यद्वयवत् अन्यथा उभयेषामपि तत्संबद्धस्वभावहानिप्रसक्तिः स्यात्। अथ यदि निवृत्ताशेषसंबन्धित्वात् समवायविनाश इति प्रथमप्रयोगार्थस्तदा हेतोः पक्षैकदेशासिद्धताप्रसक्तिः न हि अशेषाणां संबन्धिनां प्रलयेऽपि विनाशः परमाण्वादीनां तत्रापि अवस्थानात्। अथ 'विनष्टकतिपयसंबन्धित्वात्' इति हेतुर्विवक्षितस्तदा अनैकान्तिकः यतः यदि नाम कश्चित् संबन्धी विनष्टस्तथापि अपरसंबन्धिनिबन्धना संबन्धस्य अवस्थितिर्युक्तैव। न च संयोगस्यापि कतिपयसंयोगिविनाशेऽपि अपरसंयोग्यवस्थानात् अनेनैव न्यायेन अवस्थानप्रसक्तिः, संयोगस्य प्रतिसंयोगि भिन्नत्वात् तद्विनाशे विनाशोपपत्तेः समवायस्य तु सर्वत्र एकत्वात् नैकसंबन्धिविनाशे विनाशः 'इह' प्रत्ययस्य अन्यत्रापि अविशेषात् तन्निबन्धनस्य समवायस्यापि अभेद इति नान्यसंबन्धिसद्भावे तद्विनाशप्रसक्तिः, असदेतत्; यतः

---

१ पृ० ६७९ पं० ९ तथा पृ० ११३ पं ४२–।

२ पृ० ७०० पं० १४।

३ "नित्यत्वेनास्य सर्वेऽपि नित्याः प्राप्ताः (घटादयः)। आधारेषु सदा तेषां समवायेन संस्थितेः"॥
—तत्त्वसं० का० ८५४ पृ० २७१।

४ "स्वारम्भकविभागाद्वा यदि वा तद्विनाशतः। ते नश्यन्ति क्रियाद्या (दीव) योगादेरिति चेन्न तत्॥
स्वाधारैस्समवायो हि तेषामपि सदा मतः। तेषां विनाशभावे तु नियताऽस्यापि नाशिता"॥—
—तत्त्वसं० का० ८५५–८५६ पृ० २७१।

५ "संबन्धिनो निवृत्तौ हि संबन्धोऽस्तीति दुर्घटम्। न हि संयुक्तनाशेऽपि संयोगो नोपतिष्ठते॥
यथा संयोगभावे तु संयुक्तानामवस्थितिः। समवायस्य सद्भावे तथा स्यात् समवायिनाम्"॥
—तत्त्वसं० का० ८५६–८५८ पृ० २७२।

६ **तत्संबन्धस्व**–आ०। "अन्यथा तत्संबन्धस्वभावहानिरुभयेषामपि प्रसज्येत"—तत्त्वसं० पञ्जि० पृ०२७२ पं०१८।

७ "एकसंबन्धिनाशेऽपि समवायोऽवतिष्ठते। अन्यसंबन्धिसद्भावाद् योगो नो चेन्न भेदतः"॥
—तत्त्वसं० का० ८५९ पृ० २७२।

८ "यद्येवं ये विनश्यन्ति घटाद्याः समवायिनः। तेषां वृत्त्यात्मको योऽसौ समवायः प्रकल्पितः॥
स एव व्यवतिष्ठेत किं संबन्ध्यन्तरस्थितेः। अथान्य एव संयोग**विभाग**बहुतादिवत्॥
नाद्यस्तल्लक्षणस्यैव समवायस्य संस्थितौ। पूर्ववत् ते स्थिता एव प्राप्नुवन्ति घटादयः॥
न तेषामनवस्थाने तेषां (वृत्त्यात्मकः क्वचित्)। सम(वायो)वतिष्ठेत संज्ञामात्रेण वा तथा।
अतः प्रागपि सद्भावान्न ते वृत्ताः स्युराश्रये। पश्चादिव तथा ह्येषा वृत्तिस्तेषामवस्तुतः"॥
—तत्त्वसं० का० ८६०–८६४ पृ० २७३।

किं य एव घटादयो विनाशमनुभवन्ति स्वकारणादिसमवायिनः तद्वृत्त्यात्मक एव समवायः अविनष्टे पटादिसंबन्ध्यन्तरेऽवतिष्ठते, आहोस्वित् अन्य एव असौ इति कल्पनाद्वयम् । यदि आद्यः पक्षस्तदा प्रागवस्थावद् अप्रच्युतवृत्तित्वाद् घटादयोऽवस्थिता एव स्युः तदनवस्थाने वा अनवस्थितवृत्तित्वात् समवायस्यापि विनाशः तस्य वृत्त्यात्मकत्वात् अन्यथा तस्य तद्रूपतानुपपत्तेः । स्वतन्त्रस्य च तदनुपकारिणस्तद्वृत्तिः 'समवायः' इति नामकरणे संज्ञामात्रमेव भवेत् न वस्तुतथाभावः तथा च अविनष्टसंबन्ध्यवस्थायामपि घटादयो न स्वाश्रयवृत्ताः समवायसद्भावबलात् सिध्येयुः विनष्टसमवायिकारणावस्थायामिव परमार्थतो वृत्त्यभावात् एकरूपवृत्तिसद्भावेऽपि तेषां विनाशाभ्युपगमात् न तन्निमित्ता स्वकारणेषु तेषां स्थितिर्भवेत्[1] तत्सद्भावेऽपि कथं तद्भावनिमित्तस्तद्भाव इति स्वयमेव चिन्त्यम् । अथ द्वितीयः पक्षस्तदा संयोगादिवत् समवायबहुत्वप्राप्तेः 'समवायोऽभेदवान्' इत्यभ्युपगमव्याहतिः नित्यत्वे च समवायस्य अभ्युपगम्यमाने स्वकारणसमवायस्य स्वसत्तासमवायस्य च जन्मशब्दवाच्यस्य सर्वदा सद्भावात् कार्यजन्मनि क्वचिदपि कारणानां साफल्यं न स्यात् तथा च अध्यक्षादिविरोधः तन्त्वादेः पटादिकार्यजनकत्वेन अध्यक्षादिना प्रतीतेः "अन्यतरकर्मजः उभयकर्मजः[3] संयोगजश्च संयोगः" [वैशेषिकद० ७-२-९] "विभागोऽपि अन्यतरोभयकर्म-विभागजः"[4] [ ] "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम्" [न्यायद० १-१-४] इत्यादिजन्मप्रतिपादकसूत्रसमूहविरोधश्च । समवायलक्षणस्य च जन्मनो नित्यतया क्रमासंभवाद् भावानां क्रमोत्पत्तिरुपलभ्यमाना विरुद्धा च स्यात् । समवायलक्षणजन्मनित्यतया च 'जगद् अनुपकार्योपकारकभूतम्' इति शास्त्रप्रणयनमनर्थकं भवेत् । बुद्धिजन्मनोऽपि समवायस्वभावतया क्रमाभावात् "युगपद् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" [न्यायद० १-१-१६] इत्यादि सर्वमपि विरुद्धं स्यात् इति नित्यसमवायप्रकल्पनमसमञ्जसमिति स्थितम् । तदेवमुलूकप्रतिपादितशास्त्रस्य मिथ्यात्वम् तदभिहितपदार्थानामप्रमाणत्वात् प्रमाणबाधितत्वाच्च । आचार्यस्तु एतत् सर्वं हृदि कृत्वा तन्मिथ्यात्वाऽविनाभूतं प्रतिपादितसकलन्यायव्यापकम् **'जं सविसय-'** इत्यादिना गाथापश्चार्धेन हेतुमाह-**यस्मात् स्वविषयप्रधानताव्यवस्थिताऽन्योन्यनिरपेक्षोभयनयाश्रितं तत् अन्योन्यनिरपेक्षनयाश्रितत्वस्य मिथ्यात्वादिनाऽविनाभूतत्वात् ॥ ४९ ॥**

[अन्योन्यनिरपेक्षनयाश्रितानां वादानां मिथ्यात्वराहित्याभावप्रतिपादनम्]

अन्योन्यनिरपेक्षनयाश्रितस्य मिथ्यात्वाऽविनाभूतत्वमेव दर्शयन्नाह—

जे संतवायदोसे सक्कोलूया भणंति संखाणं ।
संखा य असव्वाए तेसिं सव्वे वि ते सच्चा ॥ ५० ॥

यान् एकान्तसद्वादपक्षे द्रव्यास्तिकाभ्युपगतपदार्थाभ्युपगमे शाक्यौलूक्या दोषान् वदन्ति साङ्ख्यानां क्रिया-गुणव्यपदेशोपलब्ध्यादिप्रसङ्गादिलक्षणान् ते सर्वेऽपि तेषां सत्या इत्येवं संबन्धः कार्यः । ते च दोषाः एवं सत्याः स्युः यद्यन्यनिरपेक्षनयाभ्युपगतपदार्थप्रतिपादकं तत्

१-त् न तत्स-वा० बा० ।

२ "अथान्य एव संयोगविभागबहुतादिवत् । संबन्ध्यन्तरसद्भावे समवायोऽवतिष्ठते ॥
संयोगादिवदेवं हि नन्वस्य बहुता भवेत् । एवमाद्यस्य सद्भावे बहु स्यादसमञ्जसम्" ॥
—तत्त्वसं० का० ८६५-८६६ पृ० २७३-२७४ ।

३-**कर्मसं**-बृ० भां० मां० । "अप्राप्तयोः प्राप्तिः संयोगः स च त्रिविधः—अन्यतरकर्मजः उभयकर्मजः संयोगजश्च"—प्रशस्त० कं० पृ० १३९ पं० १८ ।—तत्त्वसं० पञ्जि० पृ० २७४ पं० ९ ।

४ "एतेन विभागो व्याख्यातः"—वैशेषिकद० ७-२-१० ।
"प्राप्तिपूर्विकाऽप्राप्तिर्विभागः स च त्रिविधः—अन्यतरकर्मजः उभयकर्मजः विभागजश्च"-प्रशस्त० कं० पृ० १५१ पं० ५ ।

५ पृ० ६५६ गा० ४९ ।

शास्त्रं मिथ्या स्यात् नान्यथा प्रागपि कार्यावस्थात एकान्तेन तत्सत्त्वनिबन्धनत्वात् तेषाम् अन्यथा कथंचित् सत्त्वे अनेकान्तवादापत्तेर्दोषाभाव एव स्यात् । **साङ्ख्या अपि असत्कार्यवाददोषान्** असदकरणादीन् **यान्** वदन्ति ते सर्वे तेषां सत्या एव एकान्ताऽसति कारणव्यापारासंभवात् अन्यथा शशशृङ्गादेरपि कारणव्यापारादुत्पत्तिः स्यात् ।

[न्याय-वैशेषिकसम्मतस्यासत्कार्यरूपस्यासद्वादस्य सदोषत्वप्रदर्शनम्] ५

अथ शशशृङ्गस्य न कारणावस्थायामसत्त्वादनुत्पत्तिः किन्तु कारणाभावात् घटादेस्तु मृत्पिण्डावस्थायामसतोऽपि कारणसद्भावादुत्पत्तिः । ननु कुतः शशशृङ्गस्य कारणाभावः ? अत्यन्ताभावरूपत्वात् तस्येति चेत् तदेव कुतः ? कारणाभावात् इति चेत् सोऽयमितरेतराश्रयदोषः । घटादीनामपि च मृत्पिण्डावस्थायामसत्त्वे कुतः कारणसद्भावः ? प्रागसत्त्वादेव तत्र कारणसद्भावः सति कारणव्यापारासंभवादिति चेत्, असदेतत्; घटस्य मृत्पिण्डावस्थायां सत्त्वे प्रागनवस्थायोगाद्- १०
सत्त्वेऽपि शशशृङ्गस्येव तदनुपपत्तेः । अथास्य उत्पत्तिदर्शनात् प्रागभावः न शशशृङ्गस्य, न; इतरेतराश्रयदोषप्रसक्तेः । तथाहि—यावदस्य प्रागभावित्वं न तावदुत्पत्तिसिद्धिः यावच्च नोत्पत्तिसिद्धिर्न तावत् प्रागभावित्वसिद्धिरिति व्यक्तमितरेतराश्रयत्वम् । अथ कारणस्य कार्यशून्यता प्रागभावः प्रागेव सिद्धः, असदेतत्; अकारणस्यापि कार्यशून्यतोपलम्भात् तत्संबन्धाद् घटस्य तत्कार्यताप्रसक्तेः ।
तथाहि—यस्य प्रागभावित्वं तस्य कार्यता तच्च कार्यशून्यं पदार्थान्तरं कारकाभिमताद्[3] अन्यदपि च १५
तत्प्रागभावस्वभावं प्राप्तम् तत्संबन्धेन च घटादेः शशशृङ्गादिव्यवच्छेदेन कार्यता अभ्युपगतेति सूत्रपिण्डकार्यताऽपि घटस्यैवं भवेत् । न च तदन्वय-व्यतिरेकाभावान्न तत्कार्यता, अन्वय-व्यतिरेकाभावस्य तत्राऽसत्त्वनिबन्धनत्वात् । न च प्रागभावो नाम प्रत्यक्षादिप्रमाणग्राह्यः, मृत्पिण्डस्वरूपमात्रस्यैव तत्र प्रतिभासनात् । न च कारणस्वरूपमेव प्रागभावः, निर्विशेषणस्य स्वरूपमात्रस्य कार्येऽपि सद्भावात् तस्यापि प्रागभावरूपताप्रसक्तेः । अथ कार्यान्तरापेक्षया तस्यापि प्रागभावरूपता कारण- २०
स्वभावाऽभ्युपगम्यत एव, न; कारणाभिमतापेक्षयाऽपि तद्रूपताप्रसक्तेः । तथाप्रतीत्यभावान्न तद्रूपतेति चेत्, न; प्रतीतिमात्रादनपेक्षितवस्तुस्वरूपाद् वस्तुव्यवस्थाऽयोगात् । ततो मृत्पिण्डादिरूपतया वस्तु गृह्यतेऽध्यक्षादिना न पुनस्तद्व्यतिरिक्तकारणादिरूपतया तस्यास्तत्राऽप्रतिभासनात्, प्रतिभासनेऽपि विशिष्टकार्यापेक्षया कारणत्वस्य प्रतिपत्तौ कार्यप्रतिभासमन्तरेण तत्कारणत्वस्याऽप्रतीतेरसतस्तदानीं कार्यस्याप्रतिभासनात् प्रत्यक्षस्य असदर्थग्राहकत्वेन भ्रान्तताप्रसक्तेः तदा २५
तत्कार्यस्य सत्त्वप्रसक्तिः स्यादिति कथमसति कारणव्यापारः प्रतीयेत ? तन्न असतः कार्यत्वं युक्तम् ॥

[बौद्धसम्मतस्यासत्कारणरूपस्यासद्वादस्य सदोषत्ववदर्शनम्]

नापि असत्कारणं कार्यम् तदानीमसति कारणे तस्य तत्कृतत्वायोगात् क्षणमात्रावस्थायिनः कारणस्य स्वभावमात्रव्यवस्थितेरन्यत्र व्यापारायोगात् । अथ तदनन्तरं कार्यस्य भावात् प्रांभावित्वमात्रमेव कारणस्य व्यापारः, असदेतत्; समस्तभावक्षणानन्तरं विवक्षितकार्यस्य सद्भावात् सर्वेषां ३०
तत्पूर्वकालभावित्वस्य भावात् तत्कारणताप्रसक्तेः । अथ सर्वभावक्षणाभावेऽपि तद्भाव इति न तस्य तत्कार्यता, न; क्षणिकेषु भावेषु विवक्षितक्षणाभाव एव सर्वत्र विवादाध्यासितकार्यसद्भावान्न तदपेक्षयाऽपि तस्य कार्यता भवेत् । न च क्षणिकस्य कार्यस्य तदभावेऽपि पुनर्भवनसंभवः तस्य तदैव भावाद् अन्यदा कदाचिदप्यभावात् । न च विशिष्टभावक्षणधर्मानुविधानात् तस्य तत्कार्यताव्यवस्था, सर्वथा तद्धर्मानुविधाने तस्य कारणरूपतापत्तेस्तत्प्राक्कालभावितया तत्कार्यताव्यतिक्रमात्, कथं- ३५
चित् तद्धर्मानुविधाने अनेकान्तवादापत्तेः 'असत्कारणं कार्यम्' इत्यभ्युपगमव्याघातात् । अथ

---

१ पृ० २८२ पं० १८ । २ उत्पत्तिस्थितिज्ञप्तीनां मध्याद् ज्ञप्तिसापेक्षस्यैव इतरेतराश्रयस्यात्र सुघटत्वेन **'यावदस्य न प्रागभावित्वम्'** इत्येव पाठो ज्यायान् भाति । ३-**पि तत्प्रा**-आ० ।

४ "यद्यसत् सर्वथा कार्यं तन्मा जनि खपुष्पवत् । मोपादाननियामो भून्माऽऽश्वासः कार्यजन्मनि" ॥—आप्तमी० का० ४२ पृ० २४ । कारिकैषाऽत्र साष्टशतिका सवृत्तिका चावबोद्धव्या ।

५ **प्रागभा**-वा० बा० विना ।

संतानापेक्षः कार्यकारणभाव इत्ययमदोषः, न; संतानस्य पूर्वापरक्षणव्यतिरेकेणाभावात् भावे वा तस्यैव कार्यकारणरूपस्य अर्थक्रियासामर्थ्यात् सत्त्वं स्यात् न क्षणानामर्थक्रियासामर्थ्यविकलतया भवेत् । अथ तत्संबन्धिनः संतानस्य कार्यकारणत्वे तेषामपि कार्यकारणभावः, न; भिन्नयोः कार्यकारणभावादपरस्य संबन्धस्य अभावात् संतानस्य च सर्वजगत्क्षणानन्तरभावित्वेन सर्वसंतान-
५ताप्रसक्तिः स्यात् । किञ्च, तस्यापि नित्यत्वे क्षणकार्यत्वे च सत्कार्यवादप्रसक्तिः, क्षणिकत्वे च अन्वयाऽप्रसिद्धेस्तस्य तत्कार्यताऽप्रसिद्धिः, व्यतिरेकश्च कार्यतानिबन्धनं क्षणिकपक्षे न संभवतीति प्रतिपादितमेव । न च अत्रापि अपरसंतानप्रकल्पनया कार्यकारणभावप्रकल्पनं युक्तम् अनवस्था-प्रसक्तेः । तथाहि–संतानस्यापि कार्यताऽभ्युपगमे क्षणिकत्वान्न कार्यरूपता अतः संतानान्तरमत्रापि कार्यतानिबन्धनमभ्युपगन्तव्यम् तत्रापि च क्षणिकत्वे कार्यताऽप्रसिद्धेस्तन्निबन्धनमपरं संतानान्तर-
१०मभ्युपगमनीयमित्यनवस्था परिस्फुटैव । किञ्च, क्षणिकभावाभ्युपगमवादिनो यदि भिन्नकार्योदया-द्धेतोः सत्त्वमभिमतं तदा तत्कार्यस्यापि अपरकार्योदयात् सत्त्वसिद्धिरित्यनवस्थाप्रसक्तेर्न क्वचित् सत्त्वव्यवस्था स्यात् इति कुतस्तद्व्यवच्छेदेन 'असत् कार्यम्' इति व्यपदेशः । अथ ज्ञानलक्षणकार्य-सद्भावाद्धेतोः सत्त्वव्यवस्थितिः, ननु ज्ञानस्यापि कथं ज्ञेयसत्ताव्यवस्थापकत्वम्? ज्ञेयकार्यत्वात् इति चेत्, ननु किं तेनैव ज्ञानेन ज्ञेयकार्यता स्वात्मनः प्रतीयते, उत ज्ञानान्तरेण? न तावत् तेनैव, तस्य
१५प्रागसत्त्वाभ्युपगमादप्रवृत्तेः प्रवृत्तौ वा तत्कार्यतावगतिः पुनः प्राक् प्रवर्तने संगच्छते तत्रापि पुनः प्राक् प्रवृत्ताविति अनवस्थाप्रसक्तेः कुतस्तस्य तत्कार्यतावगतिः? अथ समानकालत्वेऽपि ज्ञानस्य ज्ञेयकार्यता, ननु एवमविशेषाद् ज्ञेयस्यापि ज्ञानकार्यतावगतिः स्यादिति तदपि तद्व्यवस्थापकं प्रसज्येत । न च समानकालयोः स्तम्भ-कुम्भयोः कार्यकारणतोपलब्धेति प्रकृतेऽपि सा न स्यात् । अथ केवलस्यापि कुम्भस्य द्रष्टरकार्यता, ज्ञानस्यापि केवलस्य द्रष्टरकार्यताप्रसक्तिः । तस्य ततोऽन्य-
२०त्वान्न व्यभिचार इति चेत्, ननु कुम्भोऽपि कुतोऽन्यः स न भवेत्? प्रत्यभिज्ञानान्नान्य इति चेत्, एतद् ज्ञानेऽपि समानम्, नित्यता च कुम्भस्यैवं भवेदिति कुतोऽसत्कार्यवादः? न च प्रत्यभिज्ञानं भवतः प्रमाणम् पूर्वापररूपाधिकरणस्यैकतयाऽप्रतीतेः न हि पूर्वापरप्रत्ययाभ्यामपरपूर्वरूपताग्रहः । नापि एकप्रत्ययेन पूर्वापररूपद्वयस्य क्रमेण ग्रहः एकस्य अक्रमस्य क्रमवद्रूपग्राहकतयाऽप्रवृत्तेः । न च स्मरणस्य द्वयोर्वृत्तिः संभवति । न चास्य प्रमाणता । न च पूर्वापरप्रत्ययथोः परस्परपरिहारेण वृत्तौ
२५तत उत्पद्यमानं स्मरणमेकत्वस्य वेदकं युक्तम् अगृहीतग्राहितया अस्मरणरूपताप्रसक्तेः । न च आत्मापि एकत्वमवैति प्रत्यक्षादिप्रमाणवशेन अर्थावेदकत्वात् तस्य चैकत्वे अप्रवृत्तेः । न च प्रमाणनिरपेक्ष एव आत्मा एकत्वग्राहकः स्वाप-मद-मूर्च्छाद्यवस्थायामपि तस्य तद्ग्राहकत्वोपपत्तेः । न च तस्यापि एकत्वं कुतश्चित् प्रमाणात् प्रसिद्धम् तद्ग्राहकत्वेन तस्याऽप्रतीतेः । न च बौद्धस्य आत्मा अन्यद् वा वस्तु नित्यमस्ति "क्षणिकाः सर्वसंस्काराः" [ ] इति वचनात् । तन्न तेनैव आत्मनः
३०प्रमेयकार्यताऽवगतिः । नापि अन्येन तस्यापि स्वप्रमेयकार्यावगतौ प्रागवृत्तितयाऽसामर्थ्यात् । तन्न ज्ञानलक्षणमपि कार्यं हेतोः सत्तां व्यवस्थापयितुं समर्थं क्षणिकैकान्तवादे । अध्यक्षस्य यथोक्तन्यायेन पौर्वापर्येऽप्रवृत्तेः, अत एव नानुमानस्यापि पौर्वापर्ये प्रवृत्तिः तस्य तत्पूर्वकत्वात् प्रत्यक्षाऽप्रतिपन्नेऽर्थे परलोकादाविवार्थविकल्पनमात्रत्वेन सर्वज्ञानस्य अभ्युपगमात् । तन्न असत्कार्यवादः प्रमाणसंगतः ।

[सांख्यसम्मतस्य सत्कार्यरूपस्य सद्वादस्य सदोषत्वख्यापनम्]

३५ सत्कार्यवादस्तु प्रागेव निरस्तत्वाद् अयुक्त एव । तथाहि—नित्यस्य कार्यकारित्वं तत्र स्यात्, तच्च अयुक्तम्; नित्यस्य व्यतिरेकाप्रसिद्धितः कार्यकरणे सामर्थ्याप्रसिद्धेः, न हि नित्यस्य सर्वदेशका-

---

१–वर्तते सं–बृ० हा० । २–कत्वेवेद–बृ० ।–कत्वेवेद–आ० । ३ पृ० ४२४ पं० १ ।

४ "यदि सत् सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति । परिणामप्रक्लप्तिश्च नित्यत्वैकान्तबाधिनी"॥—आप्तमी० का० ३९ पृ० २३। एषाप्यत्र सविघरणाऽवगन्तव्या । सत्कार्यवादनिरसनं प्रमेयकमलमार्तण्डतोऽप्यवधारणीयम्—पृ० ८२ प्र० पं० ११ ।

५ पृ० २९७ पं० ३१ तथा पृ० ४२३ पं० ५ ।

"इदं लिह निरूप्यते किं सत् क्रियते असदेव वा" इत्यादिना सत्कार्यवादः प्रतिक्षिप्तः श्रीधरेण न्यायकन्दल्याम्—पृ० १४३ पं० ५–।

"सत्कार्यवादश्च विचार्यमाणो न समस्त्येवेति कुतस्त्या हेतुसिद्धिः?" इत्यादिना सत्कार्यवादो निरस्तो जयन्तभट्टेन न्यायमञ्जर्याम्—पृ० ४९२ पं० २२ ।

लव्यापिनः क्वचित् कार्यव्यापारविरहिणः सामर्थ्यमवगन्तुं शक्यम् । अथ सर्वदेशाव्यापिनस्तस्य तत्र सामर्थ्यं भविष्यति, तद् असत्; यतः सर्वदेशाव्याप्तिस्तस्य तथाप्रतीतेर्यद्यवसीयते सर्वकालाव्याप्ति-रपि तस्य तत एव अभ्युपगमनीया स्यात् । अभ्युपगम्यत एवेति चेत्, नन्वेवं कतिपयदेशकालव्या-प्तिरप्यप्रतिपत्तेरेव अनुपपन्नेति निरंशैकक्षणरूपता भावानां समायाता । न च तदेकान्तपक्षेऽपि कार्यजनकता, प्राक् प्रतिक्षिप्तत्वात् । न चैकान्तनित्यव्यापकत्वपक्षे प्रमाणप्रवृत्तिः इत्यसकृत् प्रतिपा-५
दितम् । न चासति कार्ये निर्विषयत्वात् कारणव्यापारासंभवात् सत्येव तत्र तेषां व्यापारः, यतो न दृष्ट्वा श्रुत्वा ज्ञात्वा वा हेतूनां कार्ये व्यापारः तेषां जडत्वेन तदसंभवात् । न चादृश्यमानाऽजडेश्वरा-दिहेतुकमकृष्टोत्पत्तिकं भूरुहादि संभवतीति प्राक् प्रतिपादितम् । न चाऽसतः कार्यस्य विज्ञानं न ग्राहकम् असत्यप्यक्षादिबुद्धेः प्रवृत्तेः अन्यथा कथं कार्यार्थप्रतिपादिका चोदना भवेत्? किञ्च, यदि सत्येव कार्ये कारणव्यापारस्तदा उत्पन्नेऽपि घटादिकार्ये कारणव्यापारादनवरतं तदुत्पत्तिप्रसक्तिः १०
तत्सत्त्वाविशेषात् । अथाभिव्यक्तत्वान्नोत्पन्ने पुनरुत्पत्तिः उत्पत्तेरभिव्यक्तिस्वरूपत्वात् तस्याश्च प्रथम-कारणव्यापारादेव निर्वृत्तत्वात् ननु अभिव्यक्तिरपि यदि विद्यमानैव उत्पद्यते उत्पन्नाऽपि पुनः पुनरुत्पद्येत । अथ अविद्यमाना तदाऽसदुत्पत्तिप्रसक्तिः । न चाभिव्यक्तावप्यसत्यां कार्य इव कारण-व्यापारोऽभ्युपगन्तुं युक्तः स्वसिद्धान्तप्रकोपप्रसङ्गात् ।

[सत्कारणककार्यरूपस्य सद्वादस्य सदोषत्वप्रकटनम्] १५

अथ सतः कारणाद् कार्यमिति सत्कार्यवादः असतो हेतुत्वायोगात् तथाभ्युपगमे वा शशशृ-ङ्गादेरपि पदार्थोत्पत्तिप्रसक्तिः । अत्यन्ताभाव-प्रागभावयोः असत्त्वेनाविशेषात् न च प्रागभावी आसीदिति हेतुर्नात्यन्ताभावीति वक्तव्यम् यतो यदा आसीत् तदा न हेतुः अन्यदा हेतुरिति प्रसक्तेः । ततश्च इदं प्रसक्तम्—असन् हेतुः संश्च अहेतुरिति । ततः सन्नेव हेतुः तस्य कार्ये व्यापारात् नासन् तत्र तदयोगात्, एतदप्यसत्; यतः सतोऽपि कारणस्य प्राक्तनरूपापरित्यागान्न कार्यं प्रति हेतुता २०
प्राक्तनावस्थावत् । अथ तदा व्यापारयोगाद् हेतुता, असदेतत्; व्यापारेण कार्यं प्रति तस्य हेतुत्वे 'सोऽपि व्यापारः कुतस्तस्य?' इति पर्यनुयोगसंभवाद् व्यापारवत्पदार्थाच्चेत्, ननु तत्रापि व्यापारो यद्यपरव्यापारात् तदा व्यापारपरंपराव्यवहितत्वात् कारणस्य न कदाचित् कार्योत्पादने प्रवृत्तिः स्यात् अनन्तव्यापारपरंपरापर्यवसानं यावत् कस्यचिदनवस्थानादसतः कारणात् कार्योत्पत्तिश्च स्यात् । अथ कारणस्वरूपमेव व्यापारः तत्काल एव च कार्यम् तेन नानवस्था, नापि असतः कारणात् कार्यो- २५
त्पत्तिः, नन्वेवं कारणसमानकालं कार्यं स्यात् तथा च सव्येतरगोविषाणवत् कुतः कार्यकारणभावः? अथ कार्यभावकाले कारणस्य न सद्भावस्तर्हि चिरतरनष्टादिव तत्कालध्वंसिनोऽपि कुतः कार्यस-द्भावः? कार्योत्पत्तिकाले तदनन्तरभाविनः सत्ता चेत्, तर्हि कार्योत्पत्तिः कार्यान्न भिन्नेति कार्यकार-णयोः समानकालतैव स्यात् तथा च कुतः कार्यकारणभावः? न च 'सतः कारणात् कार्योत्पत्तिः' इत्यभ्युपगमवादिनः कार्योत्पत्तिकाले कारणस्यासत्त्वं बौद्धस्येव सिद्धम् । अविचलितरूपस्य च तस्य ३०
सद्भावे तदापि न कार्यवत्ता विकलकारणत्वात् प्राग्वत्, तदा तद्रूपत्वे वा पूर्वमपि तद्रूपत्वं स्यात् अवि-कलकारणत्वात् तदवस्थावत् । तन्नैकान्तसत्कार्यवादः असत्कार्यवादो वा युक्तः अनेकदोषदुष्टत्वात् ।

[कथंचित् सदसद्वादस्य निर्दोषत्वसमर्थनम्]

अथ एकान्तेन सदसतोरजन्यत्वात् अजनकत्वाच्च कार्यकारणभावाभावात् सर्वशून्यतैव । तदु-क्तम् 'अशक्तं सर्वमिति चेत्' इत्यादि, न; कथंचित् सदसतोर्जन्यत्वात् जनकत्वाच्च । न चैकस्य सद- ३५
सद्रूपत्वं विरुद्धम्, कथंचिद् भिन्ननिमित्तापेक्षस्य सदसत्त्वस्य एकदा एकत्र अबाधिताध्यक्षतः प्रति-पत्तेः । न च अध्यक्षप्रतिपन्ने वस्तुनि विरोधः अन्यथा एकचित्रपटज्ञाने चित्ररूपतायाः चित्रपटे च चित्रैकरूपस्य विरोधः स्यात् । तथा च 'शुक्लाद्यनेकप्रकारं पृथिव्या रूपम्' इति वैशेषिकस्य विरुद्धा-भिधानं भवेत् ।

---

१ पृ० १०२ । २–गादथा–बृ० आ० हा० वि० । ३ प्रागभा–वा० बा० भां० मां० । ४–नन्तरव्या–वा० बा० भां० मां० । 'नन्तरव्या–'इत्यत्र '२' इत्यस्य द्विवसंख्यासूचकाङ्कस्य रेफतया भ्रान्तेः पुस्तकलेखकैः–'नन्तरव्या'—इति लिपिकरणेन–'नन्तरव्या'–इति पाठान्तरं जातमिति प्रतिभाति । ततश्च 'अनन्तानन्तव्यापार'–इत्येव पाठः सम्यक् स्यात् । ५–णस्य स–वा० बा० ।

[प्रसङ्गात् चित्ररूपचर्चा]

अथ तदवयवानां शुक्लाद्यनेकरूपयोगिता अवयविनस्तु एकमेव रूपम्, न; तदवयवानामपि अवयवित्वेनानेकप्रकारैकरूपयोगित्वविरोधात्। अथ प्रत्येकमवयवेषु शुक्लादिकमेकैकं रूपम् तर्हि तदवयवादिष्वपि एकैकमेव रूपं यावत् परमाणव इति विभिन्नघट-पटादिपदार्थेष्विव चित्रपटेऽपि 'नील-पीत-शुक्लरूपा एते भावाः' इति प्रतिपत्तिः स्यात् न पुनः 'चित्ररूपः पटः' इति, अवयवाऽवयविनोरन्यत्वात् अवयवानामनेकरूपा(प)संबन्धित्वेऽपि अवयविनस्तथाभावाभावात्। अथावयविनोऽपि विभिन्नानेकरूपसंबन्धित्वमभ्युपगम्यते तथापि चित्रैकरूपप्रतिभासानुपपत्तिः अनेकरूपसंबन्धित्वस्यैव तत्र सद्भावात् सूत्रव्याघातश्चैवं स्यात् "अविभुनि द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामसंभवात्" [ ] इति सूत्रेणाभिधानात् अव्यापके पटादिद्रव्ये एकेन्द्रियग्राह्याणां शुक्लादीनां विशेषगुणानामसंभवोऽनेन सूत्रेण प्रतिपादितः स च व्याहन्येत। किञ्च, शुक्लादीनामेकत्र पटादावनेकस्वरूपाणां सद्भावाभ्युपगमे व्याप्यवृत्तित्वम्, अव्याप्यवृत्तित्वं वा? अव्याप्यवृत्तित्वे[1] "शेषाणामाश्रयव्यापित्वम्" [प्रशस्त० कं० पृ० १०३ पं० ८] इति विरुध्येत। आश्रयव्यापित्वेऽप्येकावयवसहितेऽपि अवयविनि उपलभ्यमाने अपरावयवाऽनुपलब्धावपि अनेकरूपप्रतिपत्तिः स्यात् सर्वरूपाणामाश्रयव्यापित्वात्। अथ शुक्लाद्यनेकाकारं चित्रमेकं तद्रूपं यथा शुक्लादिको रूपविशेषः कथं तर्हि अनेकाकारमेकं[3] रूपमविरुद्धं भवेत् चित्रैकरूपाभ्युपगमस्य चित्रतरत्वात्। अथ चित्रैकरूपस्य तस्य प्रत्यक्षेण प्रतीतेर्न विरोधस्तर्हि सदसद्रूपैकरूपतया कार्यकारणरूपस्य वस्तुनः प्रतिपत्तौ विरोधः कथं भवेत्? न च चित्रपटादावपास्तशुक्लादिविशेषं रूपमात्रं तदुपलम्भान्यथानुपपत्त्याऽस्तीति अभ्युपगन्तव्यम् 'चित्ररूपः पटः' इति प्रतिभासाभावप्रसक्तेः। अथ परस्परविरुद्धानां शुक्लादिरूपाणां चित्रैकरूपानारम्भकत्वात् शुक्लादीनां रूपाणां समानरूपारम्भकत्वोपलम्भान्न तत्र चित्रैकरूपोत्पत्तिः। नन्वयमपरो वैशेषिकस्येव दोषोऽस्तु असमानजातीयगुणानारम्भवादिनः। किञ्च, यदि समानजातीयगुणारम्भकत्वमेव कारणगुणानामित्यभ्युपगमः 'शुक्लात् शुक्लम्' इत्यादिप्रतीतेः कथं तर्हि कारणगतशुक्लादिरूपविशेषेभ्यः कार्ये रूपमात्रस्य अपास्ततद्विशेषस्य उत्पत्तिर्भवेत् तेभ्यस्तस्यासमानत्वात्। अथ तद्वतरूपमात्रेभ्यस्तद्रूपमात्रस्य उत्पत्तेर्न दोषः, असदेतत्; शुक्लादिरूपविशेषव्यतिरेकेण रूपत्वादिसामान्यमपहाय रूपमात्रस्याभावात् सामान्यस्य च नित्यत्वेन अजन्यत्वात्। न च रूपमात्रनिबन्धनः 'चित्ररूपः पटः' इति प्रतिभासो युक्तः, शुक्लादिप्रत्ययस्यापि तन्निबन्धनत्वेन शुक्लादिरूपविशेषस्याऽप्यभावप्रसक्तेः। न चावयवगतचित्ररूपात् पटे चित्रप्रतिभासः अवयवेष्वपि तद्रूपासंभवात्। न च अन्यरूपस्यान्यत्र विशिष्टप्रतिपत्तिजनकत्वम् पृथिवीगतचित्ररूपाद् वायौ चित्ररूपप्रतिपत्तिप्रसक्तेः भेदश्चावयवावयविनोर्भवदभिप्रायेण यदि च रूपमात्रमेव तत्र स्यात् 'क्षितौ रूपमनेकप्रकारम्' इति विरुध्यते—अनेकप्रकारं हि शुक्लत्वादि भेदभिन्नमुच्यते रूपमात्रं च शुक्लादि विशेषरहितम् तस्य शुक्लादिविशेषेष्वनन्तर्भावात् कथं न विरोधः? यदपि शुक्लाद्यनेकप्रकाररूपाभ्युपगमे क्षितौ सूत्रविरोधपरिहाराभिधानं किल अविभुनि द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामेकाकाराणामसंभवः न तु अनेकाकाराणाम् क्षितौ 'शुक्लाद्यनेकाकाराणां तेषामुपलम्भात् एकाकाराणामेकत्र बहूनां सद्भावे एकेनैव शुक्लादिप्रतिपत्तेर्जनितत्वाद् अपरतद्भेदकल्पनावैयर्थ्यप्रसङ्गान्न तदभ्युपगमः न चैवमनेकाकाराणाम्' इति, तदपि असंगतम्; व्याप्याऽव्याप्यवृत्तित्वविकल्पद्वयेऽपि दोषप्रतिपादनात् अथ अव्याप्यवृत्तित्वे न विरोधदोषः शेषाणामाश्रयव्यापित्वमेव इत्यवधारणानभ्युपगमात् नन्वेवं सूक्ष्मविवरप्रविष्टालोकोद्द्योतिताल्पतरपटविभागवृत्तिरूपदेशस्य प्रतिपत्तौ यदि तदाधारस्य पटावयविनः प्रतिपत्तिस्तदा तदाधेयाशेषशुक्लादिरूपप्रतिपत्तिरपि भवेत् आधेयप्रतिपत्तिमन्तरेण तदाधारत्वस्य प्रतिपत्तुमशक्तेः। न चाल्पतरोऽल्पतमरूपाधारत्वव्यतिरिक्तं तस्य तदन्यरूपाधारत्वमनेकम् अनेकस्वभावयोगिनः पटस्य अनेकत्वप्रसक्तेः स्वभावभेदलक्षणत्वाद् वस्तुभेदस्य अन्यथा तदयोगात्

१-त्वे विशेषाणा-वृ० आ० हा० वि०। "शेषास्त्वेकैकद्रव्यवृत्तयः"—प्रशस्त० कं० पृ० ९५ पं० २१। २-मेकरू-वा० बा० भां० मां०। ३-ण यदि चित्ररूप-भां०।-ण च यदि चित्ररूप-मां०। -ण चित्ररूप-वा० बा० आ०। ४-रान्यतम-वा० बा० भां० मां०। ५-त्वमनेकस्व-वा० बा० विना।

तदनेकत्वेऽपि तस्यैकत्वे कथं न अनेकाकारमेकं स्यात्? अथ तत्प्रतिपत्तौ नावयवविप्रतिपत्तिस्तर्हि निराधारस्य रूपस्य प्रतिपत्तौ गुणरूपता विशीर्येत द्रव्याश्रयादिलक्षणयोगित्वात् तस्य। न च तद्रूपता(ताऽ)प्रतिपत्तौ तल्लक्षणयोगिता तस्य अवगन्तुं शक्या प्रमेयव्यवस्थायाः प्रमाणाधीनत्वात्। अणुपरिमाणयोगित्वे च अल्पतरपटादिरूपस्य परमाणोरिव द्रव्यरूपताप्रसक्तिः तस्यैव तद्योगित्वात् अत एव 'एकावयवसहितस्य पटस्योपलम्भात् एकरूपोपलम्भेऽपि आश्रयाव्यापितया शेषरूपाणामनुपलम्भाच्चित्रप्रतिभासाभावः' इति यदुक्तम् तदपि निरस्तम्, एकरूपोपाध्युपकाराङ्गशक्त्यभिन्नस्य पटद्रव्यस्य निश्चयात्मना अध्यक्षेण ग्रहणे अशेषरूपोपाध्युपकारकशक्त्यभिन्नात्मनस्तस्य एकरूपतया ग्रहणात् उपकार्यग्रहणमन्तरेण उपकारकत्वग्रहणस्यासंभवात् शक्तीनां ततो भेदे संबन्धासिद्धेरपरोपकारकशक्तिप्रकल्पनायामनवस्थाप्रसक्तेः कथं नाशेषोपकार्यरूपप्रतिभासाच्चित्रप्रतिभासप्रसक्तिः? एतेन 'तन्तूनां नीलाद्यनेकरूपसंबन्धित्वात् पटेऽपि अनेकरूपारम्भकत्वे न किञ्चिद् बाधकं प्रमाणं कारणगुणपूर्वक्रमेण तथाविधस्य रूपस्य उत्पादात्' इत्यपि प्रत्युक्तम् एकावयवप्रतिभासे चित्रप्रतिभासोत्पत्तिप्रसङ्गस्यैव बाधकत्वात्। यदपि 'भवतु वा एकं पटे चित्रं रूपम् नीलादिरूपैरेकरूपारम्भात् यथा हि शुक्लादिर्विशेषो रूपस्य तथा चित्रमपि रूपविशेष एव चित्रशब्दवाच्यः' इति, तदपि असंगतमेव; अनेकाकारस्य एकत्वे चित्रैकशब्दवाच्यत्वे वाभ्युपगम्यमाने सदसदनेकाकारानुगतस्य एकस्य कारणादिशब्दवाच्यत्वेनाभ्युपगमाविरोधात्। यथा च बहूनां तन्त्वादिगतनीलादिरूपाणां पटगतैकचित्ररूपारम्भकत्वं दृष्टत्वादविरुद्धं तथानेकाकारस्य एकरूपत्वं वस्तुनो दृष्टत्वादेवाविरुद्धमभ्युपगन्तव्यम् अत एव एकानेकरूपत्वात् चित्ररूपस्य एकावयवसहितेऽवयविनि उपलभ्यमाने शेषावयवावरणे चित्रप्रतिभासाभाव उपपत्तिमान्। सर्वथा त्वेकरूपत्वे तत्रापि चित्रप्रतिभासः स्यात् अवयविव्याप्त्या तद्रूपस्य वृत्तेः। न चावयवनानारूपोपलम्भसहकारीन्द्रियमवयविनि चित्रप्रतिभासं जनयतीति तत्र सहकार्यभावात् चित्रप्रतिभासानुत्पत्तिरिति वाच्यम्, अवयविनोऽप्यनुपलब्धिप्रसङ्गात् न हि चाक्षुषप्रतिपत्त्याऽगृह्यमाणरूपस्यावयविनो वायोरिव ग्रहणं दृष्टम्। न च चित्ररूपव्यतिरेकेणापरं तत्र रूपमात्रमस्ति यतस्तत्प्रतिपत्त्या पटग्रहणं भवेत्। न चावयवरूपोपलम्भोऽवयविरूपप्रतिपत्तौ अक्षसहकारी, तद्भावे वा तदवयवरूपोपलम्भोऽपि स्वावयवरूपोपलम्भाक्षसहकारीति तमन्तरेण स न स्यादिति पूर्वपूर्वावयवरूपोपलम्भापेक्षया परमाणुरूपोपलम्भाभावात् तज्जन्यद्व्यणुकाद्यवयविरूपोपलम्भासंभवान्न क्वचिदपि रूपोपलब्धिः स्यात्। तदभावे च नावयव्युपलब्धिरिति तदाश्रितपदार्थानामप्युपलम्भाभावात् सर्वप्रतिभासाभावः स्यात्। तत एकानेकस्वभावं चित्रपटरूपवद्वस्तु अभ्युपगन्तव्यं वैशेषिकेण।

बौद्धेनापि चित्रपटप्रतिभासस्य एकानेकरूपतामभ्युपगच्छता एकानेकरूपं वस्तु अभ्युपगतमेव। अथ प्रतिभासोऽपि एकानेकरूपो नाभ्युपगम्यते तर्हि सर्वथा प्रतिभासाभावः स्यात् इति असकृद् आवेदितम्। तत एकान्ततोऽसति कार्ये न कारणव्यापारस्तेनाभ्युपगन्तव्यः असति तत्र तदभावात्। नापि सति, मृत्पिण्डे तस्य तमन्तरेणापि ततः प्रागेव निष्पन्नत्वात्। न च मृत्पिण्डे कारकव्यापारः पृथुबुध्नोदराद्याकारस्तत्फलम् अन्यत्र व्यापारे अन्यत्र फलासंभवात् स एव मृत्पिण्डः कारकव्यापारात् पृथुबुध्नोदराद्याकारतां प्रतिपद्यते इति कारकव्यापार-फलयोरैक्यविषयत्वे अनेकान्तवादसिद्धिः। तस्माद् द्रव्यास्तिक-पर्यायास्तिकाभ्यां केवलाभ्यां सहिताभ्यामन्योन्यनिरपेक्षाभ्यां व्यवस्थापितं वस्तु असत्यमिति तत्प्रतिपादकं शास्त्रं सर्वं मिथ्येति व्यवस्थितम्॥ ५०॥

[अन्वय—व्यतिरेकाभ्यां निरपेक्षनयद्वये मिथ्याज्ञानरूपत्वस्य दृढीकरणम्]

अमुमेवार्थमन्वय-व्यतिरेकाभ्यां दृढीकर्तुमाह—

ते उ भयणोवणीया सम्मद्दंसणमणुत्तरं होंति।
जं भवदुक्खविमोक्खं दो वि न पूरेंति पाडिक्कं॥ ५१॥

तौ द्रव्य-पर्यायास्तिकनयौ भजनया परस्परस्वभावाऽविनाभूततया उपनीतौ सदसद्रूपैकान्तव्यवच्छेदेन तदात्मकैककार्यकारणादिवस्तुप्रतिपादकत्वेन उपयोजितौ यदा भवतस्तदा सम्यग्दर्शनमनुत्तरं—नास्ति अस्माद् अन्यद् उत्तरं प्रधानं यस्मिंस्तत् तथाभूतं—भवतः परस्परविनिर्भाग-

१ अत्र कन्दलीगतं चित्ररूपसमर्थकं युक्तिकथनमवबोद्धव्यम्—प्रशस्त० कं० पृ० ३० पं० ३—।

वर्तिद्रव्यपर्यायात्मकैकवस्तुतत्त्वविषयरुच्यात्मकाऽबाधिताऽवबोधस्वभावत्वात्। यदा तु अन्योन्यनिरपेक्षद्रव्य-पर्यायप्रतिपादनत्वेन उपनीतौ भवतो न तदा सम्यक्त्वं प्रतिपद्येते **यस्मात्** संसारभाविजन्मादिदुःखविमोक्षमात्यन्तिकं विश्लेषं **द्वावपि** तौ **प्रत्येकं न** विधत्तः मिथ्याज्ञानात् सम्यक्क्रियानङ्गतया आत्यन्तिकभवोपद्रवान्निवृत्त्यसिद्धेः तद्विपर्ययकारणत्वात् तच्चासकृत् प्राक् प्रतिपादितमिति न पुनः प्रतन्यते। ततः कारणात् कार्यं कथंचिद् अन्यत् कथंचिदनन्यत् अत एव तदतद्रूपतया 'सच्च असच्च' इति ॥ ५१ ॥

[कार्य–कारणयोर्भेदाभेदरूपत्वदर्शनेनानेकान्तरूपत्वोपपादनम्]

अमुमेव अर्थमुपसंहारद्वारेण उपदर्शयन्नाह—

नत्थि पुढवीविसिट्ठो'घडो'त्ति जं तेण जुज्जइ अणण्णो।
जं पुण'घडो'त्ति पुव्वं ण आसि पुढवी तओ अण्णो ॥ ५२ ॥

नास्ति सद्द्रव्यमृत्पृथिवीत्वादिभ्यो **विश्लिष्टो** भिन्नो **घटः** सदादिव्यतिरिक्तस्वभावतया तस्यानुपलम्भात्। किञ्च, यदि सत्त्वादयो धर्मा घटाद् एकान्ततो भिन्नाः सोऽपि वा तेभ्यो भिन्नः स्यात् तदा न घटस्य सदादित्वं स्यात् खतोऽसदादेरन्यधर्मयोगेऽपि शशशृङ्गादेरिव तत्त्वा(तथात्वा)योगात् सदादेरपि घटाद्याकाराद् अत्यन्तभेदे निराकारतया अत्यन्ताभावस्येव उपलम्भविषयत्वायोगाद् ज्ञेयत्व-प्रमेयत्वादिधर्माणामपि सदादिधर्मेभ्यो भेदे असत्त्वम् सदादेस्तु तेभ्यो भेदे अज्ञेयत्वाद् असत्त्वमेव "उपलम्भः सत्ता" [ ] इति वचनात्। ततः सदादिरूपतया उपलभ्यमानत्वाद् घटस्य तेभ्योऽभिन्नरूपताऽभ्युपगन्तव्या प्रमेयव्यवस्थितेः प्रमाणनिबन्धनत्वात्। **यत् पुनः** पृथुबुध्नोदराद्याकारतया **पूर्वं** सदादिर्न **आसीत् ततोऽसौ अन्यस्ते**भ्यो घटरूपतया प्राक् सदादेरनुपलम्भात् प्रागपि तद्रूपस्य सदादौ सत्त्वे अनुपलम्भायोगात् दृश्याऽनुपलम्भस्य च अभावाव्यभिचारित्वात् तदतद्रूपतायां च विरोधाभावात् प्रतीयमानायां तदयोगात् अबाधितप्रत्ययस्य च मिथ्यात्वासंभवाद् बाधाविरहस्य च प्रागेव उपपादितत्वात् ॥ ५२ ॥

[सदाद्येकान्तवत् कालाद्येकान्तेऽपि मिथ्यात्वख्यापनम्]

सदाद्येकान्तवादवत् कालाद्येकान्तवादेऽपि मिथ्यात्वमेव इत्याह—

कालो सहाव णियई पुव्वकयं पुरिस कारणेगंता।
मिच्छत्तं ते चेवा(व) समासओ होंति सम्मत्तं ॥ ५३ ॥

काल-स्वभाव-नियति-पूर्वकृत–पुरुषकारणरूपा एकान्ताः सर्वेऽपि **एकका मिथ्यात्वम् त एव समुदिताः** परस्पराऽजहद्वृत्तयः **सम्यक्त्व**रूपतां प्रतिपद्यन्ते इति तात्पर्यार्थः।

१-**तत्तथात्वयो**-आ० हा० वि०। २-**न्ताभावादस्यैव वोपल**-बृ० आ० हा० वि०। ३-**वादोऽपि** बा० बा० भां० मां०। ४ **चेव उ स**-गु० मू० मु० मू०।

५ श्वेताश्वतरोपनिषदि ब्रह्मकारणताप्रश्नविचारे काल-स्वभावादीनामपि कारणता चर्चिता निरस्ता च विद्यते। तद्यथा—

"ॐ ब्रह्मवादिनो वदन्ति—
किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥
काल-स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम्।
संयोग एषां न त्वात्मभावादात्माप्यनीशः सुख-दुःखहेतोः" ॥—१-२ इत्यादि-। अ० १।

माठरेण सांख्यकारिकावृत्तौ, क्रियाऽक्रियावादादिमतं विवेचयता शीलाङ्केन सूत्रकृताङ्गसूत्रटीकायाम् हरिभद्रेण शास्त्रवार्तासमुच्चये च काल-स्वभावादिवादा भङ्ग्यन्तरेण उपन्यस्ता निरस्ताश्च विद्यन्ते। तद्यथा—

का० ६१ पृ० ७५-७६। समवस० अ० १२ पृ० २१० प्र०—२११ प्र०। शास्त्रवा० समु० स्तव० २ श्लो० ५२-८१ पृ० ७९-८९।

क्रियाऽक्रियावादादिस्वरूपं निरूपयन् गुणरत्नः षड्दर्शनसमुच्चयबृहट्टीकायां काल-स्वभावादिवादानां स्वरूपमात्रं प्ररूपितवान्। तच्च-पृ० १० पं० १५—पृ० १६ पं० ५।

[कालैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

तत्र काल एव एकान्तेन जगतः कारणमिति कालवादिनः प्राहुः। तथाहि—सर्वस्य शीतोष्ण-वर्ष-वनस्पति-पुरुषादेर्जगतः प्रभव-स्थिति-विनाशेषु ग्रहोपरागयुतियुद्धोदयास्तमयगतिगमनागमनादौ च कालः कारणम् तमन्तरेण सर्वस्यास्याऽन्यकारणत्वाभिमतभावसद्भावेऽप्यभावात्, तत्सद्भावे च भावात्। तदुक्तम्— ५

"कालः पचति भूतानि कालः संहरति प्रजाः।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः" ॥

[महाभा० आदिप० अ० १ श्लो० २७३,२७५],

असदेतत्; तत्कालसद्भावेऽपि वृष्ट्यादेः कदाचिददर्शनात्। न च तदभवनमपि तद्विशेषकृतमेव, नित्यैकरूपतया तस्य विशेषाभावात्। विशेषे वा तज्जननाऽजननस्वभावतया तस्य नित्यत्वव्यतिक्रमात् स्वभावभेदाद् भेदसिद्धेः। न च ग्रहमण्डलादिकृतो वर्षादेर्विशेषः तस्यापि अहेतुकतयाऽभावात्। न च काल एव तस्य हेतुः इतरेतराश्रयदोषप्रसक्तेः—सति कालभेदे वर्षादिभेदहेतोर्ग्रहमण्डलादेर्भेदः तद्भेदाच्च कालभेद इति परिस्फुटमितरेतराश्रयत्वम्। अन्यतः कारणाद् वर्षादिभेदे न 'काल एव एकः कारणं भवेत्' इत्यभ्युपगमविरोधः। कालस्य च कुतश्चिद् भेदाभ्युपगमे अनित्यत्वमित्युक्तम्। तत्र च प्रभव-स्थिति-विनाशेषु यद्यपरः कालः कारणम्, तदा तत्रापि स एव पर्यनुयोग इत्यनवस्थानान्न वर्षादिकार्योत्पत्तिः स्यात्। न चैकस्य कारणत्वं युक्तम् क्रम-यौगपद्याभ्यां तद्विरोधात्। तन्न काल एव एकः कारणं जगतः। १५

[स्वभावैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

अपरे तु 'स्वभावत एव भावा जायन्ते' इति वर्णयन्ति। अत्र यदि 'स्वभावकारणा भावाः' इति तेषामभ्युपगमस्तदाँ स्वात्मनि क्रियाविरोधो दोषः न हि अनुत्पन्नानां तेषां स्वभावः समस्ति उत्पन्नानां तु स्वभावसंगतावपि प्राक् स्वभावाभावेऽपि उत्पत्तेर्निर्वृत्तत्वान्न स्वभावस्तत्र कारणं भवेत्। अथ कारणमन्तरेण भावा भवन्ति स्व-परकारणनिमित्तजन्मनिरपेक्षतया सर्वहेतुनिराशंसस्वभावा भावाः। तथा चात्र स्वभाववादिभिर्युक्तिः प्रदर्श्यते—यद् अनुपलभ्यमानसत्ताकं तत् प्रेक्षावतामसद्व्यवहारविषयः, यथा शशशृङ्गम्, अनुपलभ्यमानसत्ताकं च भावानां कारणमिति स्वभावानुपलब्धिः। न च अयमसिद्धो हेतुः कण्टकादितैक्ष्ण्यादेर्निमित्तभूतस्य कस्यचिद् अध्यक्षादिना असंवेदनात्। तदुक्तम्— २५

---

१ अत्र ग्रहीयविविधदशायाः प्रस्तुतत्वेन उपराग-युति-युद्धादयः सर्वेऽपि शब्दा ग्रहेण योज्याः तदर्थश्च सूर्यसिद्धान्तादिज्योतिषग्रन्थेभ्योऽवसेयः।

२-**मयगमन**-बृ० आ० हा० वि०। ३-**त् न तत्स**-बृ० आ० हा० वि०। ४ महाभारते कालमाहात्म्यमित्थं वर्णितं विद्यते—

"विधातृविहितं मार्गं न कश्चिदतिवर्तते। कालमूलमिदं सर्वं भावाभावौ सुखासुखे ॥
कालः सृजति भूतानि कालः संहरते प्रजाः। संहरन्तं प्रजाः कालं कालः शमयते पुनः ॥
कालो विकुरुते भावान् सर्वाँल्लोके शुभाशुभान्। कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः ॥
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः। कालः सर्वेषु भूतेषु चरत्यविधृतः समः ॥
अतीताऽनागता भावा ये च वर्तन्ति साम्प्रतम्। तान् कालनिर्मितान् बुद्ध्वा न संज्ञां हातुमर्हसि" ॥
—महाभा० आदिप० अ० १ श्लो० २७२-२७६।

५ सांख्यकारिकावृत्तौ, शास्त्रवार्तासमुच्चये षड्दर्शनसमुच्चयबृहट्टीकायां च अयमीदृश एव श्लोको वर्तते-पृ० ७६। पृ० ८० श्लो० ५४। पृ० ११ पं० १२-१३।

६ स्वभाववादनिरूपण-तन्निरसनपरा प्रस्तुता टीका तत्त्वसंग्रहीयस्वाभाविकवादपरीक्षयाऽक्षरशः साम्यं भजते। तथाहि-

"सर्वहेतुनिराशंसं भावानां जन्म वर्ण्यते। स्वभाववादिभिस्ते हि नाहुः स्वमपि कारणम्" ॥
—तत्त्वसं० का० ११० पृ० ६२।

७-**दा स्यादात्म**-भां० मां०। "ते स्वक्रियाया विरोधत इत्यादिना निरस्ताः"-तत्त्वसं० पञ्जि० पृ० ६२ पं० ९।

८ "राजीवकेसरादीनां वैचित्र्यं कः करोति हि। मयूरचन्द्रकादिर्वा विचित्रः केन निर्मितः" ॥
—तत्त्वसं० का० १११ पृ० ६२।

"कः[1] कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां वा ।
स्वभावतः सर्वमिदं प्रवृत्तं न कामचारोऽस्ति कुतः प्रयत्नः ?" ॥ [ ]

अथापि स्यात् भवतु बाह्यानां भावानां कारणानुपलब्धेरहेतुकत्वम् आध्यात्मिकानां तु कुतो निर्हेतुकत्वसिद्धिः ? असदेतत्; यतो यदि नाम दुःखादीनामध्यक्षतो निर्हेतुकत्वमसिद्धं तथापि अनुमानतस्तत् तेषां सिद्धमेव । तथाहि—यत् कादाचित्कं तद् निर्हेतुकम्, यथा कण्टकादेस्तैक्ष्ण्यम्, कादाचित्कं च सुखादिकमिति स्वभावहेतुः । न च यस्य भावाभावयोर्नियमेन यस्य भावाभावौ तत् तस्य कारणम्, व्यभिचारात् । तथाहि—स्पर्शसद्भाव एव चक्षुर्विज्ञानम् तदभावे न तत् कदाचित्, न च स्पर्शः तत्कारणम् । तन्नैतत् कारणभावलक्षणम् व्यभिचारित्वात् । अतः सर्वहेतुनिराशंसं जन्म भावानामिति सिद्धम्,

असदेतत्; कण्टकादितैक्ष्ण्यादेरपि निर्हेतुकत्वासिद्धेः । तथाहि—अध्यक्षाऽनुपलम्भाभ्यामन्वयव्यतिरेकतो बीजादिकं तत्कारणत्वेन निश्चितमेव । यस्य हि यस्मिन् सत्येव यस्य भावः यस्य च विकाराद् यस्य विकारः तत् तस्य कारणमुच्यते । उत्सूनादिविशिष्टावस्थाप्राप्तं च बीजं कण्टकादितैक्ष्ण्यादेरन्वय-व्यतिरेकवत् अध्यक्षाऽनुपलम्भाभ्यां कारणतया निश्चितमिति 'अनुपलभ्यमानसत्ताकं च कारणम्' इति असिद्धो हेतुः । यदपि 'कार्यकारणभावलक्षणं व्यभिचारि' इत्युक्तम्, तदपि असिद्धम्; स्पर्शस्यापि रूपहेतुतया चक्षुर्विज्ञाने निमित्ततया इष्टत्वात् तमन्तरेण रूपस्यैव विशिष्टावस्थास्यासंभवात् । न च व्यतिरेकमात्रं कार्यकारणभावनिबन्धनत्वेन अभ्युपगम्यते तद्वादिभिः किन्तु तद्विशेष एव । तथाहि—समर्थेषु सत्सु येषु कार्यं भवद् उपलब्धम् तेषां मध्ये अन्यतमस्यापि अभावे तद् अभवत् तत्कारणं तद् इति व्यवस्थाप्यते न तु यस्याभावे यन्न भवतीति व्यतिरेकमात्रतः; अन्यथा मातृविवाहोचितपारशीकदेशप्रभवस्य पिण्डखर्जूरस्य तद्विवाहाभावे अभावाद् अव्यभिचारः स्यात् । न चैवंभूतस्य व्यतिरेकस्य स्पर्शेन व्यभिचारः न हि रूपादिसंनिधानमुपदर्श्य स्पर्शस्य एकस्याभावात् चक्षुर्विज्ञानं न भवतीति शक्यं दर्शयितुमिति कुतो व्यभिचारः कार्यकारणभावलक्षणस्य ? नं

---

१ अयं श्लोकः शास्त्रवा० स्याद्वादक० टीकायाम् षड्द० बृ० टीकायां च विद्यते-पृ० ८३ प्र० । पृ० १३ ।

माठरवृत्तौ तु—

"येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः । मयूराश्चित्रिता येन स नो वृत्तिं विधास्यति" ॥
इति भावार्थकः श्लोको वर्तते-पृ० ७५ ।

२ "यथैव कण्टकादीनां तैक्ष्ण्यादिकमहेतुकम् । कादाचित्कतया तद्वद् दुःखादीनामहेतुता" ॥
—तत्त्वसं० का० ११२ पृ० ६२ ।

बौधिचर्यावतारपञ्जिकायां तत्त्वसंग्रहीयकारिकाभिरेव स्वभाववादः स्थापितः निरस्तश्च प्रकारान्तरेण-परि० ९ पृ० ५४१ । धर्मसंग्रहण्यां तु केवलं स्वभाववादस्थापनं तन्निरसनं चोभयमन्यया भङ्ग्या वर्णितं विद्यते । तथाहि तदाद्यान्त्यभागौ—

"किन्न सहावो त्ति मई भावो वा होज्ज जं अभावो वा । जइ भावो किं चित्तो किं वा सो एगरूवो त्ति ॥ × × ×
एवं नियइ जइच्छा कालो दिव्वं पधाणमादी वि । सव्वे वि असव्वाया एगंतेणं मुणेयव्वा" ॥
—धर्मसं० गा० ५४९-५६६ पृ० २११-२१६ ।

३ "सरोजकेसरादीनामन्वयव्यतिरेकवत् । अवस्थातिशयाक्रान्तं बीजपङ्कजलादिकम् ॥
प्रत्यक्षानुपलम्भाभ्यां निश्चितं कारणं यदा । किमित्यन्यस्तदा हेतुरमीषां परिपृच्छ्यते ॥
—तत्त्वसं० का० ११३-११४ पृ० ६३ ।

४ अत्र वाक्ये द्वयोः 'यस्य' पदयोः निष्प्रयोजनकत्वेन 'यस्य हि यस्मिन् सत्येव भावः' इत्येव पाठः समीचीनः संभाव्यते । "तथाहि-यस्मिन् सत्येव यस्य जन्म भवति यस्य च विकाराद् यस्य विकारस्तत् तस्य कारणमुच्यते । तच्चैवंभूतं बीजादिकमुच्छ्रूनादिविशिष्टावस्थाप्राप्तं राजीवकेसरादीनामन्वयव्यतिरेकवत्"—तत्त्वसं० पञ्जि० पृ० ६३ पं० १५ ।

५-**पश्यैवं वि**-बृ० । "स्पर्शस्यापि रूपहेतुतया चक्षुर्विज्ञानेऽपि निमित्तभावस्येष्टत्वात् । तथाहि—स्पर्श इति भूतान्युच्यन्ते । तानि चोपादायोपादाय रूपं वर्तते ततश्चक्षुर्विज्ञानं प्रति स्पर्शस्य निमित्तभावोऽस्त्येव केवलं साक्षात्पारंपर्यकृतो विशेषः"-तत्त्वसं० पञ्जि० पृ० ६३ पं० १९ ।

६ "नियतौ देश-कालौ च भावानां भवतः कथम् । यदि तद्धेतुता नैषां स्युस्ते सर्वत्र सर्वदा ॥
क्वचित् कदाचित् कस्मिंश्चिद् भवन्तो नियताः पुनः । तत्सापेक्षा भवन्त्येते तदन्यपरिहारतः" ॥
—तत्त्वसं० का० ११५-११६ पृ० ६४ ।

केवलं बीजादिः कारणत्वेन भावानां निश्चितः किन्तु देश-कालादिरपि । तथाहि—यदि प्रतिनियतदेश-कालहेतुता कण्टकादेस्तैक्ष्ण्यादेर्न स्यात् तदा येयमतद्देश-कालपरिहारेण प्रतिनियतदेश-कालता तेषामुपलम्भगोचरचारिणी सा न स्यात् तन्निरपेक्षत्वात् तद्वद् अन्यदेशकाला अपि ते भवेयुः न चैवम् अतः प्रतिनियतदेशादौ वर्तमानास्तदपेक्षास्त इति सिद्धम् तथा च तत्कार्या अपेक्षालक्षणत्वात् तत्कार्यत्वस्य नियतदेशतया च तेषां वृत्तिरध्यक्षत एव सिद्धेति कथं न तत्कार्यतावगतिः ? यदपि 'कादाचित्कत्वात्' इति साधनम्, तदपि विरुद्धम्; साध्यविपर्ययसाधनाद् अहेतोः कादाचित्कत्वानुपपत्तेः । साध्यविकलश्च दृष्टान्तः अहेतुकत्वस्य तत्राप्यभावात् । एवमनुपलभ्यमानसत्ताकं भावानां कारणमिति हेतोरसिद्धता प्रतिज्ञायाश्च प्रत्यक्षविरोधो व्यवस्थितः । सिद्धत्वेऽपि चास्य हेतोरनैकान्तिकत्वम् । तथाहि—यदि अनुपलम्भमात्रं हेतुत्वेन उपादीयते तदा प्रमाणाभावात् कारणसत्ताभावासिद्धेः कथं नानैकान्तिकता ? तथाहि—कारणम् व्यापकं वा निवर्तमानं कार्यम् व्याप्यं वा आदाय निवर्तते । न च प्रमाणमर्थसत्ताया व्यापकं वृक्षत्ववत् शिंशपायाः अभिन्नस्यैव व्यापकत्वात् । न च प्रमाण-प्रमेययोरभेदः भिन्नप्रतिभासविषयत्वात् । नापि प्रमाणं कारणमर्थस्य व्यभिचारात् देश-कालादिविप्रकृष्टानां भावानां प्रमाणाविषयीकरणेऽपि सत्ताऽविरोधात् । न च यदन्तरेणापि यद् भवति तत् तस्य कारणम् अतिप्रसङ्गात् कारणत्वाभ्युपगमे स्वाभ्युपगमव्याघातात् । न च प्रमाणात् प्रमेयप्रभवः अपि तु प्रमेयात् प्रमाणस्य अन्यथा तेन तद्ग्रहणाऽयोगात् । न च प्रमाणमप्रतिबद्धमपि अर्थसत्तानिवर्तकम् अतिप्रसङ्गात्—गोनिवृत्तौ अश्वनिवृत्तिप्रसक्तेः । किञ्च, अनुपलब्धिर्हेतुत्वेन उपादीयमाना स्वोपलम्भनिवृत्तिरूपा वा उपादीयेत, सर्वपुरुषोपलम्भनिवृत्तिस्वभावा वा ? तत्र न तावद् आद्यः पक्षः खैल-बिलाद्यन्तर्गतस्य बीजादेः स्वोपलम्भनिवृत्तावपि सत्ताअनिवृत्तेर्हेतोरनैकान्तिकत्वात् । अथ द्वितीयः पक्षः सोऽपि न युक्तः; हेतोरसिद्धेः न हि मयूरचन्द्रकादेः सर्वपुरुषैरदृष्टं कारणं नोपलभ्यते इत्यर्वाग्दृशा निश्चेतुं शक्यम् । किञ्च, 'निर्हेतुका भावाः' इत्यत्र हेतुरुपादीयते, आहोस्वित् नेति ? यदि नोपादीयते तदा न स्वपक्षसिद्धिः प्रमाणमन्तरेण तस्या अयोगात् । अथ हेतुरुपादीयते तदा स्वाभ्युपगमविरोधः प्रमाणजन्यतया स्वपक्षसिद्धेरभ्युपगमात् । तदुक्तम्—

"न हेतुरस्तीति वदन् सहेतुकं ननु प्रतिज्ञां स्वयमेव बाधते ।

---

१ "तदपेक्षा तथावृत्तिरपेक्षा कार्यतोच्यते । प्रत्यक्षा च तथा वृत्तिः सिद्धास्तेनेह हेतवः" ॥
—तत्त्वसं० का० ११७ पृ० ६४ ।

-**कार्यापे**-बृ० आ० हा० वि० । "तदन्यदेशादिपरिहारेण नियते देशादौ या वृत्तिरियमेवापेक्षेत्युच्यते न त्वभिप्रायात्मिका । स्यादेतद् यदि नाम तदपेक्षा तेषाम् तथापि तत्कार्यता कथमवसितेत्याह-अपेक्षा कार्यतोच्यत इति"
—तत्त्वसं० पञ्जि० पृ० ६४ पं० १७ ।

२-**षामवृ**—भां० मां० विना ।

३ "तत्स्वाभाविकवादोऽयं प्रत्यक्षेण प्रबाध्यते । प्रत्यक्षानुपलम्भाभ्यां हेतुरूपस्य निश्चयात्" ॥
—तत्त्वसं० का० ११८ पृ० ६४ ।

४ "मा वा प्रमाणसत्ता भूद्धेतुसद्भावसिद्धये । तथापि मानाभावेन नैवार्थासत्त्वनिश्चयः" ॥
—तत्त्वसं० का० ११९ पृ० ६५ ।

५ "यस्मादर्थस्य सत्ताया व्यापकं न च कारणम् । प्रमाणं भेदसद्भावाद्व्यभिचारात् तदुद्भवात्" ॥
—तत्त्वसं० का० १२० पृ० ६५ ।

६ **यमन्त**-बृ० आ० हा० वि० । ७ "कारणत्वाभ्युपगमे वा"—तत्त्वसं० पञ्जि० पृ० ६५ पं० १५ ।

८ "यश्च नैवंविधो भावस्तस्य नैव निवृत्तितः । ऐकान्तिकमसंबन्धाद् गम्यतेऽन्यनिवर्तनम्" ॥
—तत्त्वसं० का० १२१ पृ० ६५ ।

९ "सर्वा दृष्टिश्च संदिग्धा खा दृष्टिर्व्यभिचारिणी । विन्ध्यादिरिन्द्रदूर्वादेरदृष्टापि सत्त्वतः" ॥
—तत्त्वसं० का० १२२ पृ० ६५ ।

१० धुस्तूरे तमाले च खलशब्दः बिलस्तु वेतसवृक्षे—वैद्यक० सिं० ।

११ "अहेतुकत्वसिद्धयर्थं न चेद्धेतुः प्रयुज्यते । न चाप्रमाणिकी सिद्धिरतः पक्षो न सिद्धयति ॥
तत्सिद्धये च हेतुश्चेत् प्रयुज्येत तथापि न । सिद्धेस्तद्धेतुजन्यत्वात् पक्षस्ते संप्रसिद्धयति" ॥
—तत्त्वसं० का० १२३-१२४ पृ० ६६ ।

१२ तत्त्वसं० पञ्जिकायाम् "तथा चोक्तमाचार्यसूरिपादैः" इति निर्दिश्य पद्यमिदमुपनिबद्धम् तत्र च "स्वयमेव सादयेत्" इति पाठो मुद्रितः—पृ० ६६ पं० १४ ।

अथापि हेतुप्रणयालसो भवेत् प्रतिज्ञया केवलयाऽस्य किं भवेत्?" ॥
[ ] इति ।

न च ज्ञापकहेतूपन्यासेऽपि कारकहेतुप्रतिक्षेपवादिनो न स्वपक्षबाधा इति वक्तव्यम् यतो लिङ्गं तत्प्रतिपादकं वा वचो यदि पक्षसिद्धेरुत्पादकं न भवेत् कथं तस्य ज्ञापकहेतुता स्यात् अन्यथा सर्वस्य सर्वं प्रति ज्ञापकता प्रसज्येत । न चैवं कारक-ज्ञापकहेत्वोरविशेषः साध्यानुत्पादकस्य ज्ञापकहेतुत्वात् तदुत्पादकस्य तु कारकहेतुशब्दवाच्यत्वात् अनुमानबाधितत्वं च प्रतिज्ञायाः स्पष्टमेव । तथाहि—प्रतिनियतभावसंनिधौ ये प्रतिनियतजन्मानस्ते सहेतुकाः यथा भवत्प्रयुक्तसाधनसंनिधिभावि तत्साध्यार्थज्ञानम् तथा च मयूरचन्द्रकादयो भावाः इति स्वभावहेतुः । तन्न स्वभावैकान्तवादाभ्युपगमो युक्तिसंगतः ।

[नियत्येककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

सर्वस्य वस्तुनस्तथातथानियतरूपेण भवनाद् नियतिरेव कारणमिति केचित्[5] । तथाहि—तीक्ष्णशस्त्राद्युपहता अपि तथामरणनियततासभावे जीवन्त एव दृश्यन्ते नियते च मरणकाले शस्त्रादिघातमन्तरेणापि मृत्युभाज उपलभ्यन्ते, न च नियतिमन्तरेण स्वभावः कालो वा कश्चिद् हेतुः यतः कण्टकादयोऽपि नियत्यैव तीक्ष्णादितया नियताः समुपजायन्ते न कुण्ठादितया कालोऽपि शीतादेर्भावस्य तथानियततयैव तदा तदा[6] तत्र तत्र तथा तथा निर्वर्तकम्(कः) । तथा चोक्तम्—

"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः सोऽवश्यं भवति नृणां शुभोऽशुभो वा ।
भूतानां महति कृतेऽपि हि प्रयत्ने नाऽभाव्यं भवति न भाविनोऽस्ति नाशः" ॥ [ ] इत्यादि ।

असदेतत्; शास्त्रोपदेशवैयर्थ्यप्रसक्तेः तदुपदेशमन्तरेणापि अर्थेषु नियतिकृतत्वबुद्धेर्नियत्यैव भावाद् दृष्टादृष्टफलशास्त्रप्रतिपादितशुभाशुभक्रियाफलनियमाभावश्च । अथ तथैव नियतिः कारणमिति नायं दोषः, न; नियतेरेकस्वभावत्वाभ्युपगमे विसंवादाऽविसंवादादिभेदाभावप्रसक्तेः अनियमेन नियतेः कारणत्वाद् अयमदोष इति चेत्, न; अनियमे कारणाभावान्न नियतिरेव कारणम् नियतेर्नित्यत्वे कारकत्वायोगात् अनित्यत्वेऽपि तदयोग एव । किञ्च, नियतेरनित्यत्वे कार्यत्वम् कार्यं च कारणादुत्पत्तिमदिति तदुत्पत्तौ कारणं वाच्यम् । न च नियतिरेव कारणम् तत्रापि पूर्ववत् पर्यनुयोगानिवृत्तेः । न च नियतिरात्मानमुत्पादयितुं समर्था स्वात्मनि क्रियाविरोधात् । न च कालादिकं नियतेः कारणम् तस्य निषिद्धत्वात् । न च अहेतुका सा युक्ता नियतरूपताऽनुपपत्तेः । न च स्वतोऽनियता अन्यभावनियतत्वकारणम् शशशृङ्गादेस्तद्रूपतानुपलम्भात् । तन्न नियतिरपि प्रतिनियतभावोत्पत्तिहेतुः ।

[कर्मैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

जन्मान्तरोपात्तमिष्टाऽनिष्टफलदं कर्म सर्वजगद्वैचित्र्यकारणमिति कर्मवादिनः । तथा चाहुः—

"यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवाऽवतिष्ठते ।
तथा तथा तत्प्रतिपादनोद्यता प्रदीपहस्तेव मतिः प्रवर्तते ॥" [ ]

---

१ "तथाहि ज्ञापको हेतुर्वचो वा तत्प्रकाशकम् । सिद्धेर्निमित्ततां गच्छन् साध्यज्ञापकमुच्यते" ॥
—तत्त्वसं० का० १२५ पृ० ६६ ।

२ "अतः कारक एवायं ज्ञापको हेतुरुच्यते । साध्यानुत्पादकत्वात् तु कारको न प्रकाश्यते" ॥
—तत्त्वसं० का० १२६ पृ० ६६ ।

३ "तस्मात् सहेतवोऽन्येऽपि भावा नियतजन्मतः । साध्यार्थविषयं यद्वज्ज्ञानं साधनभावि ते" ॥
—तत्त्वसं० का० १२७ पृ० ६७ ।

४-**नस्तथानि**-बृ० आ० हा० वि० । ५ नियतिवादस्य प्ररूपको मस्करी गोशालक इति जैनागमानामभिप्रायः । गोशालकचरितं च भगवतीसूत्रीयपञ्चदशशतकादवसेयमत्र ।

६-**दा तत्र तथा** आ० भां० । ७ अयं श्लोकः शास्त्रवा० स्याद्वादक० टीकायामुद्धृतो वर्तते-पृ० ८३ द्वि० ।

८ शास्त्रवा० स्याद्वादक० पृ० ८५ प्र० पं० ५ ।

तथा च—

"स्वकर्मणा युक्त एव सर्वो ह्युत्पद्यते नरः ।
स तथाऽऽकृष्यते तेन न यथा स्वयमिच्छति" ॥ [ ]

तथाहि—समानमीहमानानां समानदेश-काल-कुलाऽऽकारादिमतामर्थप्राप्त्यप्राप्ती नाऽनिमित्ते युक्ते अनिमित्तस्य देशादिप्रतिनियमायोगात् । न च परिदृश्यमानकारणप्रभवे तस्य समानतयोपलम्भात् न चैकरूपात् कारणात् कार्यभेदः तस्याहेतुकत्वप्रसक्तेः अहेतुकत्वे च तस्य कार्यस्यापि तद्रूपतापत्तेः भेदाऽभेदव्यतिरिक्तस्य तस्यासत्त्वात् । ततो यन्निमित्ते एते तद् दृष्टकारणव्यतिरिक्तमदृष्टं कारणं कर्म इति,

असदेतत्; कुलालादेर्घटादिकारणत्वेनाध्यक्षतः प्रतीयमानस्य परिहारेणापराऽदृष्टकारणप्रकल्पनायां तत्परिहारेणापराऽपराऽदृष्टकारणकल्पनयाऽनवस्थाप्रसङ्गतः क्वचिदपि कारणप्रतिनियमाऽनुपपत्तेः । न च स्वतन्त्रं कर्म जगद्वैचित्र्यकारणमुपपद्यते तस्य कर्त्रधीनत्वात् । न चैकस्वभावात् ततो जगद्वैचित्र्यमुपपत्तिमत् कारणवैचित्र्यमन्तरेण कार्यवैचित्र्यायोगात् वैचित्र्ये वा तदेककार्यताप्रच्युतेः अनेकस्वभावत्वे च कर्मणः नाममात्रनिबन्धनैव विप्रतिपत्तिः पुरुष-काल-स्वभावादेरपि जगद्वैचित्र्यकारणत्वेन अर्थतोऽभ्युपगमात् । न च तेन चेतनवताऽनधिष्ठितमचेतनत्वाद् वास्यादिवत् कर्म प्रवर्तते । अथ तदधिष्ठायकः पुरुषोऽभ्युपगम्यते न तर्हि कर्मैकान्तवादः पुरुषस्यापि तदधिष्ठायकत्वेन जगद्वैचित्र्यकारणत्वोपपत्तेः । न च केवलं किञ्चिद् वस्तु नित्यमनित्यं वा कार्यकृत् संभवतीति असकृत् प्रतिपादितम् । तन्न कर्मैकान्तवादोऽपि युक्तिसंगतः ।

[पुरुषैककारणवादमुपन्यस्य तस्यैकान्तिकत्वनिरासः]

अन्यस्त्वाह—"पुरुष एवैकः सकललोकस्थिति-सर्ग-प्रलयहेतुः प्रलयेऽपि अलुप्तज्ञानातिशयशक्तिः" [ ] इति । तथा चोक्तम्—

"ऊर्णनाभ इवांऽशूनां चन्द्रकान्त इवाऽम्भसाम् ।
प्ररोहाणामिव प्लक्षः स हेतुः सर्वजन्मिनाम्" ॥ [ ] इति ।

तथा, "पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्" [ ] इत्यादि । ऊर्णनाभोऽत्र मर्कटको व्याख्यातः । अत्र सकललोकस्थिति-सर्ग-प्रलयहेतुता ईश्वरस्येव पुरुषवादिभिः पुरुषस्य इष्टा । विशेषस्तु समवायाद्यपरकारणसव्यपेक्ष ईश्वरो जगद् निर्वर्तयति अयं तु केवल एव । अस्य च ईश्वरस्येव जगद्धेतुता असंगता । तथाहि—

"पुरुषो जन्मिनां हेतुर्नोत्पत्तिविकलत्वतः ।
गगनाम्भोजवत् सर्वमन्यथा युगपद् भवेत्" ॥ [ ]

किञ्च, प्रेक्षापूर्वकारिप्रवृत्तिः प्रयोजनवत्तया व्याप्तेति किं प्रयोजनमुद्दिश्य अयं जगत्करणे प्रवर्तते ?

---

१ "दैवादेवार्थसिद्धिश्चेद् दैवं पौरुषतः कथम् । दैवतश्चेदनिर्मोक्षः पौरुषं निष्फलं भवेत्" ॥ इत्यादिर्दैवविचारोऽत्रानुसंधेयः—आप्तमी० परि० ८ श्लो० ८८—।

२ "अन्ये स्त्रीशसधर्माणं पुरुषं लोककारणम् । कल्पयन्ति दुराख्यातसिद्धान्तानुगबुद्धयः ॥
समस्तवस्तुप्रलयेऽप्यलुप्तज्ञानशक्तिमान् । ऊर्णनाभ इवांऽशूनां स हेतुः किल जन्मिनाम्" ॥
—तत्त्वसं० का० १५३-१५४ पृ० ७५-७६ ।

३ अयं भावो भङ्ग्यन्तरेण बृहदारण्यकाद्युपनिषत्सु वर्णितः—बृहदा० उ० २-१-२० । श्वेताश्वत० उ० ६-१० । ब्रह्मोप० पृ० १५२ पं० ५ । तत्त्वसं० पञ्जि० पृ० ७६ पं० ४ । ४ पृ० २७३ पं० १३ टि० १० ।

५-**त्र कर्मटको** वा० बा० । "ऊर्णनाभो मर्कटकः"—तत्त्वसं० पञ्जि० पृ० ७६ पं० १० ।

६ "अस्यापीश्वरवत् सर्वं वचनीयं निषेधनम् । किमर्थं च करोत्येष व्यापारमिममीदृशम्" ॥
—तत्त्वसं० का० १५५ पृ० ७६ ।

७ तत्त्वसं० पञ्जि० पृ० ७६ पं० १४ ।

८ "यद्यन्येन प्रयुक्तत्वान्न स्यादस्य स्वतन्त्रता । अथानुकम्पया कुर्यादेकान्तसुखितं जगत् ॥
आधिदारिद्र्यशोकादिविविधायासपीडितम् । जनं तु सृजतस्तस्य कानुकम्पा प्रतीयते" ॥
—तत्त्वसं० का० १५६-१५७ पृ० ७६ ।

नेश्वरादिप्रेरणात् अस्वातन्त्र्यप्रसक्तेः । न परानुग्रहार्थमनुकम्पया दुःखितसत्त्वनिर्वर्तनानुपपत्तेः । न तत्कर्मप्रक्षयार्थं दुःखितसत्त्वनिर्माणे प्रवृत्तिः तत्कर्मणोऽपि तत्कृतत्वेन तत्प्रक्षयार्थं तन्निर्माणप्रवृत्तौ अप्रेक्षापूर्वकारितापत्तेः । न च प्राक् सृष्टेः अनुकम्पनीयसत्त्वसद्भाव इति निरालम्बनाया अनुकम्पाया अयोगात् नातोऽपि जगत्करणे प्रवृत्तिर्युक्ता । न च अनुकम्पातः प्रवृत्तौ सुखिसत्त्वप्रक्षयार्थं प्रवृत्तिर्युक्तेति देवादीनां प्रलयानुपपत्तिर्भवेत् । न च समर्थस्य दुःखकारणमधर्मादिकमपेक्ष्य कृपालोर्दुःखितसत्त्वनिर्वर्तनं युक्तम् कृपापरतन्त्रतया दुःखप्रदे कर्मण्यवधा(धी)रणोपपत्तेः न हि कृपालवः परदुःखहेतुत्वमेव इच्छन्ति परदुःखवियोगेच्छयैव तेषां सर्वदा प्रवृत्तेः । न च क्रीडया अपि तत्र तस्य प्रवृत्तिर्युक्ता क्रीडोत्पादेऽपि जगदुत्पादापेक्षया तस्यास्वातन्त्र्योपपत्तेः जगदुत्पत्ति-स्थिति-प्रलयात्मकस्य विचित्रक्रीडोपायस्य तदुत्पत्तौ अपेक्षणात् । यदि विचित्रक्रीडोपायोत्पादने तस्य प्रागेव शक्तिः तदा युगपद् अशेषजगदुत्पत्ति-स्थिति-प्रलयान् विदध्यात् । अथ आदौ न तत्र शक्तिस्तदा अशक्तावस्थाया अविशिष्टत्वात् क्रमेणापि न तान् विदध्यात् एकत्र एकस्य शक्ताऽशक्तत्वलक्षणविरुद्धधर्मद्वयायोगात् । अयं च दोष ईश्वरवादिनामपि समान इति । "परानुग्रहार्थमीश्वरः प्रवर्तते यथा कश्चित् कृतार्थो मुनिरात्महिताऽहितप्राप्ति-परिहारार्थासंभवेऽपि परहितार्थमुपदेशादिकं करोति तथा ईश्वरोऽपि आत्मीयामैश्वर्यविभूतिं विख्याप्य प्राणिनोऽनुग्रहीष्यन् प्रवर्तत इति अथवा शक्तिस्वाभाव्यात् यथा कालस्य वसन्तादीनां पर्यायेण अभिव्यक्तौ स्थावर-जङ्गमविकारोत्पत्तिः स्वभावतः तथैव ईश्वरस्यापि आविर्भावाऽनुग्रह-संहारशक्तीनां पर्यायेण अभिव्यक्तौ प्राणिनामुत्पत्ति-स्थिति-प्रलयहेतुत्वम्"-[ ] इति यदुक्तं प्रशस्तमतिना तदपि प्रतिक्षिप्तं द्रष्टव्यम् । तथाहि—यदि असौ अनुग्रहप्रवृत्तस्तदा सर्वमेकान्तसुखिनं प्राणिगणं विदध्यात् इत्युक्तम् । शक्तिस्वाभाव्यात् करणे उत्पत्ति-स्थित्युपसंहारान् जगतो युगपत् कुर्यात् इत्यादिकमपि उक्तमेव दूषणम् । तथा चाह—

"सर्ग-स्थित्युपसंहारान् युगपद् व्यक्तशक्तितः ।
युगपच्च जगत् कुर्यात् नो चेत् सोऽव्यक्तशक्तिकः" ॥

---

१ "सृष्टेः प्रागनुकम्पा(म्प्या)नामसत्त्वे नोपपद्यते । अनुकम्पाऽपि यद्योगाद्धाताऽयं परिकल्प्यते" ॥
—तत्त्वसं० का० १५८ पृ० ७६ ।

२ "न चायं प्रलयं कुर्यात् सदाऽभ्युदययोगिनाम् । तददृष्टव्यपेक्षायां स्वातन्त्र्यमवहीयते" ॥
—तत्त्वसं० का० १५९ पृ० ७७ ।

३ "पीडाहेतुमदृष्टं च किमर्थं स व्यपेक्षते । उपेक्षैव पुनस्तत्र दयायोगेऽस्य युज्यते" ॥
—तत्त्वसं० का० १६० पृ० ७७ ।

४ "किन्त्ववधीरणमेव तत्र तस्य कृपापरतन्त्रतया युक्तं कर्तुम्"—तत्त्वसं० पञ्जि० पृ० ७७ पं० १४ ।

५ "क्रीडार्था तस्य वृत्तिश्चेत् क्रीडायां न प्रभुर्भवेत् । विचित्रक्रीडनोपायव्यपेक्षातः शिशुर्यथा" ॥
—तत्त्वसं० का० १६१ पृ० ७७ ।

६ "क्रीडासाध्या च या प्रीतिस्तस्या यदपि साधनम् । तत्सर्वं युगपत् कुर्याद् यदि तत्कृतिशक्तिमान् ॥
क्रमेणाऽपि न शक्तः स्याद्यो चेदादौ स शक्तिमान् । नाऽविभक्तस्य युज्येते शक्त्यशक्ती हि वस्तुनः" ॥
—तत्त्वसं० का० १६२-१६३ पृ० ७७ ।

७ "यदाह प्रशस्तमतिः" इत्यादि—तत्त्वसं० पञ्जि० पृ० ७८ पं० २-।

८ न्यायवार्तिके ईश्वरोपादानताप्रकरणे उद्द्योतकरः "अथायमीश्वरः कुर्वाणः किमर्थं करोति" इति ईश्वरविषयं प्रश्नमुत्थाप्य तद्विषये इमानि मतान्तराणि समुपन्यस्यति—

"क्रीडार्थमित्येके" × × × "विभूतिख्यापनार्थमित्यपरे—जगतो वैश्वरूप्यं ख्यापनीयमित्यपरे मन्यन्ते"—४-१-२१ पृ० ४६२ पं० १७-४६३ पं० १ ।

९-"शक्तिकः"—तत्त्वसं० पञ्जि० पृ०७८ पं० ९ । १०-शक्तितः हा० ।

"न व्यक्तशक्तिरीशोऽयं क्रमेणाप्युपपद्यते ।
व्यक्तशक्तिरतोऽन्यश्चेत् भावो ह्येकः कथं भवेत्" ॥ [ ]

एवं कालस्यापि पर्यायेण वसन्ताद्यभिव्यक्तिप्रवृत्तौ अयमेव दोषः । भावास्तु शीतोष्णादिपरिणतिभाजः प्रतिक्षणविशरारवः कथंचित् काल इत्यभिधानाभिधेयाः प्राग् व्यवस्थापिताः । अथ न क्रीडाद्यर्था भगवतः प्रवृत्तिः किन्तु पृथिव्यादिमहाभूतानां यथा स्वकार्येषु स्वभावत एव प्रवृत्तिस्तथा ईश्वरस्यापि इति, अयुक्तमेतत्; एवं हि तद्व्यापारमात्रभाविनामशेषभावानां युगपद् भावो भवेत् अविकलकारणत्वात् सहकार्यपेक्षाऽपि न नित्यस्य संगता इत्युक्तम् । पुरुषवादिनां तु केवलस्यैव पुरुषस्य जगत्कारणत्वेन अभ्युपगमात् तदपेक्षा दूरापास्तैव । पृथिव्यादिमहाभूतानां तु स्वहेतुबलायाताऽपरापरस्वभावसद्भावान्न तदुत्पाद्यकार्यस्य युगपदुत्पत्त्यादिदोषः संभवी । न च यथा ऊर्णनाभः स्वभावतः प्रवृत्तोऽपि न स्वकार्याणि युगपद् निर्वर्तयति तथा पुरुषोऽपीति वाच्यम्, यत ऊर्णनाभस्यापि प्राणिभक्षणलाम्पट्यात् स्वकार्ये प्रवृत्तिर्न स्वभावतः अन्यथा तत्राप्यस्य दोषस्य समानत्वात् न ह्यसौ नित्यैकस्वभावः अपि तु स्वहेतुबलभाव्यपरापरकादाचित्कशक्तिमानिति तद्भाविनः कार्यस्य क्रमप्रवृत्तिरुपपन्नैव । न च यथा कथंचिद् अबुद्धिपूर्वकमेव पुरुषो जगन्निर्वर्तने प्रवर्तते, प्राकृतपुरुषादप्येवमस्य हीनतया प्रेक्षापूर्वकारिणामनवधेयवचनताप्रसक्तेः । एवं प्रजापतिप्रभृतीनामपि जगत्कारणत्वेनाभीष्टानां निरासो द्रष्टव्यः न्यायस्य समानत्वात् । तन्न कालाद्येकान्ताः प्रमाणतः संभवन्तीति तद्वादो मिथ्यावाद इति स्थितम् । त एव अन्योन्यसव्यपेक्षा नित्याद्येकान्तव्यपोहेन एकानेकस्वभावाः कार्यनिर्वर्तनपटवः प्रमाणविषयतया परमार्थसन्त इति तत्प्रतिपादकस्य शास्त्रस्यापि सम्यक्त्वमिति तद्वादः सम्यग्वादतया व्यवस्थितः ॥ ५३ ॥

[आत्मन्येकान्तरूपस्य नास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम्]

यथैते कालाद्येकान्ता मिथ्यात्वमनुभवन्ति स्याद्वादोपग्रहात् तु त एव सम्यक्त्वं प्रतिपद्यन्ते तथा आत्माऽपि एकान्तनित्याऽनित्यत्वादिधर्माध्यासितो मिथ्यात्वम् अनेकान्तरूपतया तु अभ्युपगम्यमानः सम्यक्त्वं प्रतिपद्यत इत्याह—

णत्थि ण णिच्चो ण कुणइ कयं ण वेएइ णत्थि णिव्वाणं ।
णत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं ॥ ५४ ॥

---

१ तत्त्वसं० पञ्जि० पृ० ७८ पं० १०-।

२ "अथ स्वभावतो वृत्तिरित्यादिना उद्द्योतकरमतमाशङ्कते—
अथ स्वभावतो वृत्तिः सर्गादावस्य वर्ण्यते । पावकादेः प्रकृत्यैव यथा दाहादिकर्मणि ॥
यद्येवमखिला भावा भवेयुर्युगपत् ततः । तदुत्पादनसामर्थ्ययोगिकारणसन्निधेः" ॥
—तत्त्वसं० का० १६४-१६५-पृ० ७८ ।

एतदेवोद्द्योतकरीयं मतं न्यायवार्तिके इत्थमुपन्यस्तमस्ति—
"किमर्थं तर्हि करोति ? तत्स्वाभाव्यात् प्रवर्तते इत्यदुष्टम्—यथा भूम्यादीनि धारणादिक्रियां तत्स्वाभाव्यात् कुर्वन्ति तथेश्वरोऽपि तत्स्वाभाव्यात् प्रवर्तत इति प्रवृत्तिस्वभावकं तत् तत्त्वमिति" इत्यादि—४-१-२१ पृ० ४६३ पं० ४—।

३ "स्वहेतुबलसंभूता नियता एव शक्तयः । असर्वकालभाविन्यो ज्वलनादिषु वस्तुषु ॥
अन्यथा यौगपद्येन सर्वं कार्यं समुद्भवेत् । तेषामपि न चेदेष नियमोऽभ्युपगम्यते" ॥
—तत्त्वसं० का० १६६-१६७ पृ० ७८-७९ ।

४ "प्रकृत्यैवांशुहेतुत्वमूर्णनाभेऽपि नेष्यते । प्राणिभक्षणलाम्पट्याल्लालाजालं करोति यत्" ॥
—तत्त्वसं० का० १६८ पृ० ७९ ।

५ "यथाकथंचिद्वृत्तिश्चेद् बुद्धिमत्ताऽस्य कीदृशी । नासमीक्ष्य यतः कार्यं शनकोऽपि प्रवर्तते" ॥
—तत्त्वसं० का० १६९ पृ० ७९ ।

६ "शौर्यात्मजादयो येऽपि धातारः परिकल्पिताः । एतेनैव प्रकारेण निरस्तास्तेऽपि वस्तुतः" ॥
—तत्त्वसं० का० १७० पृ० ७९ ।

नास्ति आत्मा एकान्तत इति बृहस्पतिमतानुसारी। अस्ति आत्मा किन्तु प्रतिक्षणविशरारुतया चित्तसंततेर्**न नित्य** इति बौद्धाः। अस्ति आत्मा नित्यो भोक्ता **न तु करोति** इति सांख्याः त एव प्राहुः कर्ता असौ न भोक्ता प्रकृतिवत् कर्तुर्भोक्तृत्वानुपपत्तेः। यद्वा येन कृतं कर्म नासौ तद् भुङ्क्ते क्षणिकत्वाद् चित्तसंततेः इति बौद्धाः क्षणिकत्वात् चित्तसंततेः **कृतं न वेदयते** इति बौद्ध एव आह। कर्ता भोक्ता च आत्मा किन्तु न मुच्यतेऽसौ चेतनत्वात् अभव्यवत्—रागादीनामात्मस्वरूपाऽव्यतिरेकात् तदक्षये तेषामपि अक्षयात् इति याज्ञिकः। निर्हेतुक एवासौ मुच्यते तत्स्वभावताव्यतिरेकेण अपरस्य तत्र उपायस्य अभावात् इति मण्डली[1] प्राह। एतानि षड् मिथ्यात्वस्य स्थानानि षण्णामप्येषां पक्षाणां मिथ्यात्वाधारतया व्यवस्थितेः।

तथाहि—एतानि नास्तित्वादिविशेषणानि साध्यधर्मिविशेषणतया उपादीयमानानि किं प्रतिक्षव्युदासेन उपादीयन्ते, आहोस्वित् कथंचित् तत्संग्रहेण इति कल्पनाद्वयम्। प्रथमपक्षे अध्यक्षविरोधः स्वसंवेदनाध्यक्षतश्चैतन्यस्य आत्मरूपस्य प्रतीतेः कथंचित् तस्य परिणामनित्यताप्रतीतेश्च शरीरादिव्यापारतः कर्तृत्वोपलब्धेश्च स्वव्यापारनिर्वर्तितभक्त[2]-सूपादिभोक्तृत्वसंवेदनाच्च पुद्गललक्षणविलक्षणतया रागादिविविक्ततया च शमसुखरसावस्थायां कथंचित् तस्य उपलब्धेश्च स्वोत्कर्षतरतमादिभावतो रागाद्यपचयतरतमभावविधायिसम्यग्ज्ञान-दर्शनादेरुपलम्भाच्च। अनुमानतोऽपि विरोधः तथाभूतज्ञानकार्यान्यथानुपपत्तितः चैतन्यलक्षणस्य आत्मनः सिद्धिः घटादिवद् रूपादिगुणतः ज्ञानस्वरूपगुणोपलम्भात् कथंचित् तदभिन्नस्य आत्मलक्षणस्य गुणिनः सिद्धिरिति कथं नानुमानविरोधः? इतरधर्मनिरपेक्षधर्मलक्षणस्य विशेषणस्य तदाधारभूतस्य च विशेष्यस्य अप्रसिद्धेः अप्रसिद्धविशेष[3]णविशेष्योभयदोषैर्दुष्टश्च पक्षः। 'आत्मा' इति वचनेन तत्सत्ताभिधानम् 'नास्ति'इत्यनेन च तत्प्रतिषेधाभिधानमिति पदयोः प्रतिज्ञावाक्ये व्याघातः लोकविरोधश्च तथाभूतविशेषणविशिष्टतया धर्मिणो लोकेन व्यवह्रियमाणत्वात् स्ववचनविरोधश्च तत्प्रतिपादकवचनस्य इतरधर्मसापेक्षतया प्रवृत्तेः। हेतुरपि इतरनिरपेक्षैकधर्मरूपोऽसिद्धः तथाभूतस्य तस्य क्वचिद् अनुपलब्धेः सर्वत्र तद्विपरीत एव भावाद् विरुद्धश्च। दृष्टान्तश्च साध्यसाधनधर्मविकलः तथाभूतसाध्यसाधनधर्माधिकरणतया कस्यचिद् धर्मिणः अप्रसिद्धेः। तन्न प्रथमः पक्षः। नापि द्वितीयः स्वाभ्युपगमविरोधप्रसङ्गात् साधनवैफल्यापत्तेश्च तथाभूतस्य अनेकान्तरूपतया अस्माभिरप्यभ्युपगमात्। तस्माद् व्यवस्थितमेतद् एकान्तरूपतया षडपि एतानि मिथ्यात्वस्य स्थानानि ॥ ५४ ॥

[आत्मन्येकान्तरूपस्यास्तित्वादिवादषट्कस्य मिथ्यारूपत्वकथनम्]

न केवलं 'नास्ति' इत्यादिषण्मिथ्यात्वस्थानानि तद्विपर्ययेणापि एकान्तवादे तथैव तानीति दर्शयन्नाह—

अत्थि अविणासधम्मी करेइ वेएइ अत्थि णिव्वाणं।
अत्थि य मोक्खोवाओ छम्मिच्छत्तस्स ठाणाइं ॥ ५५ ॥

'अस्ति आत्मा' इति पक्षः पूरणादेर्वादिनः। 'स च अविनाशधर्मी'त्येषा प्रतिज्ञा कपिलमतानुसारिणः। 'कर्तृ-भोक्तृस्वभावोऽसौ' इति मतं जैमिनेः। 'तथाभूत एवासौ जडस्वरूपः' इति अक्षपादकणभुग्मतानुसारिणः। 'अस्ति निर्वाणम्' 'अस्ति च मोक्षोपायः' इत्यामनन्ति नास्तिक-याज्ञिकव्यतिरिक्ताः पाषण्डिनः। एते च अभ्युपगमा एकान्ताभ्युपगमत्वाद् मिथ्यास्थानानि, एष्वपि पूर्ववद् विकल्पद्वयेऽपि तद्दोषानतिक्रान्तेः एकान्तेन तदस्तित्वादेरध्यक्षाऽनुमानाभ्यामप्रतीतेः तथाभ्युपगमे च खास्तित्वेनेवान्यभावास्तित्वेनापि तस्य भावात् सर्वभावसंकीर्णताप्रसक्तेः स्वस्वरूपाऽव्यवस्थितेः खपुष्पवत् असत्त्वमेव स्यात् इत्यादिदूषणमसकृत् प्रतिपादितम्। हेतु-दृष्टान्तदोषाश्च पूर्ववद् अत्रापि वाच्याः।

चतुर्थपादं तु गाथायाः केचिद् अन्यथा पठन्ति—"**छस्सम्मत्तस्स ठाणाइं**"ति। अत्र तु

१-**ण्डलीक प्रा**—आ०। २-**भक्तरूपादि**—बृ० विना। ३-**षणविशिष्टोभ**-बृ० आ० हा० वि०। ४ प्र० पृ० पं० ९। ५-**स्तिकत्वेनैवा**—बृ० आ० हा० वि०।

पाठे इतरधर्माऽजहद्वृत्त्या प्रवर्तमाना एते षट्ट पक्षाः सम्यक्त्वस्य आधारतां प्रतिपद्यन्ते इति व्याख्येयम्। न च 'स्यादस्ति आत्मा' 'स्यान्नित्यः' इत्यादिप्रतिज्ञावाक्यम् अध्यक्षादिना प्रमाणेन बाध्यते स्व-परभावाभावोभयात्मकभावावभासकाध्यक्षादिप्रमाणव्यतिरेकेण अन्यथाभूतस्य अध्यक्षादेरप्रतीतेः तेन अनुमानाऽभ्युपगम-स्ववचन-लोकव्यवहारविरोधोऽपि न प्रतिज्ञायाः अध्यक्षादिप्रमाणावसेये सदसत्तात्मके वस्तुनि कस्यचिद् विरोधस्यासंभवात्। न चाप्रसिद्धविशेषणः पक्षः लौकिक-परीक्षकैस्तथाभूतविशेषणस्याविप्रतिपत्त्या सर्वत्र प्रतीतेः अन्यथा विशेषणव्यवहारस्य उच्छेदप्रसङ्गात् अन्यथाभूतस्य तस्य क्वचिदपि असंभवात् तथाभूतविशेषणात्मकस्य धर्मिणः सर्वत्र प्रतीतेर्नाप्रसिद्धविशेष्यतादोषः। नापि अप्रसिद्धोभयता दूषणम् तथाभूतद्वयव्यतिरेकेणान्यस्यासत्त्वतः प्रमाणाविषयत्वात्। हेतुरपि नाऽप्रसिद्धः तत्र तस्य सत्त्वप्रतीतेः, विपक्षे सत्त्वासंभवाद् नापि विरुद्धः अनैकान्तिकताऽपि अत एवायुक्ता। दृष्टान्तदोषा अपि साध्यादिविकलत्वादयो नात्र संभविनः असिद्धत्वादिदोषवत्येव साधने तेषां भावात्। न च अनुमानतः अनेकान्तात्मकं वस्तु तद्वादिभिः प्रतीयते अध्यक्षसिद्धत्वात् यस्तु प्रतिपन्नेऽपि ततस्तस्मिन् विप्रतिपद्यते तं प्रति तत्प्रसिद्धेनैव न्यायेन अनुमानोपन्यासेन विप्रतिपत्तिनिराकरणमात्रमेव विधीयते इति न अप्रसिद्धविशेषणत्वादेर्दोषस्यावकाशः। प्रतिक्षणपरिणाम-परभागादीनां तु उत्तरविकाराऽवाग्भागदर्शनान्यथानुपपत्त्या अनुमाने न अध्यक्षादिबाधा अस्मदाद्यध्यक्षस्य सर्वात्मना वस्तुग्रहणाऽसामर्थ्यात् स्फटिकादौ च अवाग्भाग-परभागयोरध्यक्षत एवैकदा प्रतिपत्तेः। न च स्थैर्यग्राह्यध्यक्षं प्रतिक्षणपरिणामानुमानेन विरुध्यते अस्य तदनुग्राहकत्वात् कथंचित् प्रतिक्षणपरिणामस्य तत्प्रतीतस्यैव अनुमानतोऽपि निश्चयात् ॥ ५५ ॥

[एकान्तवादिनः साधर्म्येण वा वैधर्म्येण वैकान्तधर्मयुक्तधर्मिसाधनाशक्तत्वाभिधानम्]

अनेकान्तव्यवच्छेदेन एकान्तावधारितधर्माधिकरणत्वेन धर्मिणं साधयन्नेकान्तवादी न साधर्म्यतः साधयितुं प्रभुः नापि वैधर्म्यतः इति प्रतिपादयन्नाह—

साहम्मउ व्व अत्थं साहेज्ज परो विहम्मओ वा वि।
अण्णोण्णं पडिकुट्ठा दोण्णवि एए असव्वाया ॥ ५६ ॥

समानस्तुल्यः साध्यसामान्यान्वितः साधनधर्मो यस्य असौ सधर्मा साधर्म्यदृष्टान्तापेक्षया साध्यधर्मी तस्य भावः **साधर्म्यम् ततो वा अर्थं** साध्यधर्माधिकरणतया धर्मिणं **साधयेत् परः** अन्वयिहेतुप्रदर्शनात् साध्यधर्मिणि विवक्षितं साध्यं यदि वैशेषिकादिः साधयेत् तदा तत्पुत्रत्वादेरपि गमकत्वं स्यात् अन्वयमात्रस्य तत्रापि भावात्। अथ **वैधर्म्याद्** विगतस्तथाभूतः साधनधर्मो यस्माद् असौ विधर्मा तस्य भावो वैधर्म्यम् ततो वा व्यतिरेकिणो हेतोः प्रकृतं साध्यं साधयेत् उभाभ्यां वा-'वा' शब्दस्य समुच्चयार्थत्वात्—तथापि तत्पुत्रत्वादेरेव गमकत्वप्रसक्तिः श्यामत्वाभावे तत्पुत्रत्वादेरन्यत्र गौरपुरुषेऽभावाद् उभाभ्यामपि तत्साधने अत एव साध्यसिद्धिप्रसक्तिः स्यात्।

[प्रसङ्गाद् हेत्वाभाससंख्याविषया चर्चा]

अथात्र कालात्ययापदिष्टत्वादिदोषसद्भावाद् न साध्यसाधकताप्रसक्तिः, न; असिद्ध-विरुद्धाऽनैकान्तिकहेत्वाभासमन्तरेणापरहेत्वाभासासंभवात्। न च त्रैरूप्यलक्षणयोगिनोऽसिद्धत्वादिहेत्वाभासता कृतकत्वादेरिव अनित्यत्वसाधने संभवति, अस्ति च भवदभिप्रायेण त्रैरूप्यं प्रकृतहेताविति कुतोऽस्य हेत्वाभासता?

अथ भवतु अयं दोषः येषां त्रैरूप्येऽविनाभावपरिसमाप्तिः नास्माकं पञ्चलक्षणहेतुवादिनाम् प्रकरणसमादेरपि हेत्वाभासत्वोपपत्तेः त्रैलक्षण्यसद्भावेऽपि अपरस्यासत्प्रतिपक्षत्वादेर्हेतुलक्षणस्यासंभवेन तदाभासत्वसंभवात्। "यस्मात्[1] प्रकरणचिन्ता स प्रकरणसमः" [न्यायद० १-२-७] इति प्रकरणसमस्य लक्षणाभिधानात्—प्रक्रियेते साध्यत्वेनाधिक्रियेते निश्चितौ पक्ष-प्रतिपक्षौ यौ तौ प्रकरणम् तस्य चिन्ता संशयात् प्रभृत्यानिश्चयाद् आलोचनस्वभावा यतो भवति स एव तन्निश्चयार्थं

---

१ "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः" इति पाठो न्यायदर्शने।

प्रयुक्तः प्रकरणसमः पक्षद्वयेऽपि तस्य समानत्वात् उभयत्रापि अन्वयादिसद्भावात्। तथाहि—तस्योदाहरणम्—अनित्यः शब्दः नित्यधर्मानुपलब्धेः अनुपलभ्यमाननित्यधर्मकं घटादि अनित्यं दृष्टम् यत् पुनर्नित्यं न तद् अनुपलभ्यमाननित्यधर्मकम् यथा आत्मादि। एवं चिन्तासंबन्धिपुरुषेण तत्त्वानुपलब्धेरेकदेशभूताया अन्यतरानुपलब्धेः अनित्यत्वसिद्धौ साधनत्वेन उपन्यासे सति द्वितीय-
५श्चिन्तासंबन्धी पुरुष आह—यदि अनेन प्रकारेण अनित्यत्वं साध्यते तर्हि नित्यतासिद्धिरपि अन्यतरानुपलब्धेस्तत्रापि सद्भावात्। तथाहि—नित्यः शब्दः अनित्यधर्मानुपलब्धेः अनुपलभ्यमानाऽनित्यधर्मकं नित्यं दृष्टम् आत्मादि यत् पुनर्न नित्यं तत् नानुपलभ्यमानाऽनित्यधर्मकम् यथा घटादि। एवमन्यतरानुपलब्धेरुभयपक्षसाधारणत्वात् प्रकरणानतिवृत्तेर्हेत्वाभासत्वम् न च निश्चितयोः पक्ष-प्रतिपक्षपरिग्रहेऽधिकारात् कथं चिन्तायुक्त एवं साधनोपन्यासं विदध्यात् इति वक्तव्यम्
१०यतोऽन्यदा संदेहेऽपि चिन्तासंबन्धी पुरुषः अन्यतरानुपलब्धेः पक्षधर्मान्वय-व्यतिरेकान् अवगच्छन् तद्बलात् स्वसाध्यं यदा निश्चिनोति तदा द्वितीयस्तामेव स्वसाध्यसाधनाय हेतुत्वेन अभिधत्ते। यदि अतः त्वत्पक्षसिद्धिः अत एव मत्पक्षसिद्धिः किं न भवेत् त्रैरूप्यस्य पक्षद्वयेऽपि अत्र तुल्यत्वात्। अथ नित्यत्वाऽनित्यत्वैकान्तविपर्ययेणापि अस्याः प्रवृत्तेः अनैकान्तिकता उभयवृत्तिर्हि अनैकान्तिकः न प्रकरणसमः, न; यत्र पक्ष-सपक्ष-विपक्षाणां तुल्यो धर्मो हेतुत्वेन उपादीयते तत्र संशयहेतुता
१५साधारणत्वेन तस्य विरुद्धविशेषानुस्मारकत्वात् न तु प्रकृत एवंविधः यतः नित्यधर्मानुपलब्धेरनित्य एव भावः न नित्ये एवम् अनित्यधर्मानुपलब्धेर्नित्य एव भावः नाऽनित्ये एवं च एकत्र साध्ये विपक्षव्यावृत्तेः[1] प्रकरणसमता न अनैकान्तिकता पक्षद्वयवृत्तितया तस्याभावात्। ननु यदि अयं पक्षद्वये वर्तते तदा साधारणानैकान्तिकः अथ न प्रवर्तते कथमयं पक्षद्वयसाधकः स्यात् अतद्वृत्तेः अतत्साधकत्वात्, न; पक्षद्वये प्रकृतस्य वृत्त्यभ्युपगमात्। तथाहि—साधनकाले अनित्यपक्ष एव नित्यधर्मा-
२०नुपलब्धिर्वर्तते न नित्ये, यदाऽपि नित्यत्वं साध्यं तदापि नित्यपक्ष एव अनित्यधर्मानुपलब्धिर्वर्तते नाऽनित्ये, ततश्च सपक्षे एव प्रकरणसमस्य वृत्तिः सपक्ष-विपक्षयोश्च अनैकान्तिकस्य; साध्यापेक्षया च पक्ष-सपक्ष-विपक्षव्यवहारः नान्यथा तेन साध्यद्वयवृत्तिः उभयसाध्यसपक्ष-वृत्तिश्च प्रकरणसमः नतु कदाचित् साध्यापेक्षया विपक्षवृत्तिः अनैकान्तिकस्तु विपक्षवृत्तिरपि इत्यस्मात् अस्य भेदः। न च रूपत्रययोगेऽपि अस्य हेतुत्वम् सप्रतिपक्षत्वात् यस्य तु प्रतिबन्धपरिसमाप्ती रूपत्रययोगे तेन
२५प्रकरणसमस्य नाहेतुत्वमुपदर्शयितुं शक्यम्। न चास्य कालात्ययापदिष्टत्वम् अबाधितविषयत्वात् ययोर्हि प्रकरणचिन्ता तयोरयं हेतुः न च तौ संदिग्धत्वात् बाधामस्योपदर्शयितुं क्षमौ। न च हेतुद्वयसंनिपातात् एकत्र धर्मिणि संशयोत्पत्तेस्तज्जनकत्वेनास्य अनैकान्तिकता यतो न संशयहेतुत्वेन अनैकान्तिकत्वम् इन्द्रियसंनिकर्षादेरपि तथात्वप्रसक्तेः। न च तत्त्वानुपलब्धिर्विशेषस्मृत्यादिशून्या संशयकारणम् न च तत्सहिताया अस्या हेतुत्वम् केवलाया एव तत्त्वेन उपन्यासात्। न च
३०संदिग्धे विषये भ्रान्तपुरुषेण निश्चयार्थमुपादीयमानाया अस्याः संदेहहेतुता युक्ता। भवतु वा कथंचिद् अतस्संशयोत्पत्तिस्तथापि अनैकान्तिकाद् अस्य विशेषः स हि सपक्ष-विपक्षयोः समानः अयं तु तद्विपरीतः साध्यद्वयवृत्तित्वात् तु प्रकरणसमः न चासंभवः अस्यैवंविधसाधनप्रयोगस्य भ्रान्तेः सद्भावात्। अथास्यासिद्धे अन्तर्भावः नित्यवादिनो नित्यधर्मानुपलब्धेः इतरस्य च इतरधर्मानुपलब्धेरसिद्धत्वात्, असदेतत्; यतश्चिन्तासंबन्धिपुरुषेण प्रकरणसमस्य हेतुत्वेन उपन्यासः तस्य च तत्संबन्धि-
३५नैव कथमितरेण असिद्धतोद्भावनं विधातुं शक्यम्? यस्य हि अनुपलब्धिनिमित्तसंशयोत्पत्तौ शब्दे[3] नित्यत्वाऽनित्यत्वजिज्ञासा स कथमन्यतरानुपलब्धेर्हेतुत्वप्रयोगे असिद्धतां ब्रूयात् अत एव सूत्रकारेण "यस्मात् प्रकरणचिन्ता" [न्यायद० १-२-७] इति असिद्धतादोषपरिहारार्थमुपात्तम्। एवम् 'अनित्यः शब्दः, पक्ष-सपक्षयोः अन्यतरत्वात्, घटवत्' इति चिन्तासंबन्धिना पुरुषेण उक्ते अपरस्तत्संबन्धी 'नित्यः शब्दः, पक्ष-सपक्षयोः अन्यतरत्वात्, आकाशवत्' यदाह तदा प्रकरणसम एव।

४० अत्र प्रेरयन्ति—पक्ष-सपक्षयोः अन्यतरः पक्षः सपक्षो वा? यदि पक्षः तदा न हेतोः सपक्षवृत्तिता न हि शब्दस्य धर्म्यन्तरे वृत्तिः संभवतीति असाधारणतैवास्य हेतोः स्यात्। अथ सपक्षः

१-टादिः ए—आ० ह्रा० वि० विना। २-वृत्तिः प्र—वा० बा०। ३-शब्दे नित्यत्वजि—वा० बा० आ०। ४ पृ० ७१९ पं० ३७। ५ शब्दः सपक्षपक्षयोरन्य—भां० मां० विना।

अन्यतरशब्दवाच्यस्तदा हेतोरसिद्धता सपक्षयोर्घटाऽऽकाशयोः शब्दाख्ये धर्मिणि अप्रवृत्तेः असिद्धे अन्तर्भूतस्य अस्य न प्रकरणसमता। न च पक्ष-सपक्षयोर्व्यतिरिक्तः कश्चिद् अन्यतरशब्दवाच्यः यस्य पक्षधर्मता अन्वयश्च भवेत्। तन्नायं हेतुः।

अत्र प्रतिविदधति—भवेदेष दोषः यदि पक्ष-सपक्षयोर्विशेषशब्दवाच्ययोर्हेतुत्वं विवक्षितं भवेत्; तच्च न, अन्यतरशब्दाभिधेयस्यैव हेतुत्वेन विवक्षितत्वात्; स च पक्ष-सपक्षयोः साधारणः तस्यैव[5]
साधारणशब्दाभिधेयत्वात्। यदि च अनुगतो द्वयोर्धर्मः कश्चित् शब्दवाच्यो न भवेत् तदा 'विशेष'-शब्दवत् 'अन्यतर'शब्दोऽपि न तत्र प्रवर्तेत। नापि तच्छब्दात् उभयत्र प्रतीतिर्भवेत् दृश्यते च तस्मात् पक्षताम् सपक्षतां चासाधारणरूपत्वेन कल्पितां परित्यज्य अन्यतरशब्दो द्वयोरपि वाचकत्वेन योग्यः ततो या विशेषप्रतीतिः सा पुरुषविवक्षानिबन्धना यदा हि साधनप्रयोक्ता पक्षधर्मत्वमस्य विवक्षति तदा 'अन्यतर'शब्दवाच्यः पक्षः सपक्षे अनुगमविवक्षायां तु सपक्षस्तच्छब्दवाच्यः
एतदभिप्रायवांश्च 'अन्यतर'शब्दवाच्यं हेतुत्वेन प्रतिपादयति न 'विशेष'शब्दवाच्यम्। न च विवक्षानिबन्धनशब्दप्रवृत्तौ पक्षादिशब्दवत्'अन्यतर'शब्दोऽपि विशेषाभिधायी स्यात् यतो लोकव्यवहाराच्छब्दार्थसंबन्धव्युत्पत्तिः तत्र च 'पक्ष'शब्दस्य न सपक्षे प्रवृत्तिः नापि 'सपक्ष'शब्दस्य पक्षे यथा च अनयोः संकेतादपि नान्यत्र वृत्तिः एवम् 'अन्यतर'शब्दस्य सामान्ये संकेतितस्य न विशेष एव वृत्तिः उभयाभिधायकत्वे तु विवक्षावशेन अन्यतरत्र नियमः। न चैवमपि विशेषे तस्य वृत्तौ दूषणं तदवस्थमेव, एवंदोषोद्भावने कस्यचित् सम्यग्धेतुत्वानुपपत्तेः कृतकत्वादेरपि पक्षधर्मत्वविवक्षायां विशेषरूपत्वात् अनुगमाभावात् सपक्षविशेषितस्य पक्षधर्मत्वायोगात्। अथ कृतकत्वमात्रस्य हेतुत्वेन विवक्षातो न दोषस्तर्हि तत् प्रकृतेऽपि तुल्यम् 'अन्यतर'शब्दस्यापि अनङ्गीकृतविशेषस्य द्वयाभिधाने सामर्थ्योपपत्तेः। एतेन यदुक्तं न्यायविदा—"अनर्थः खल्वपि कल्पनासमारोपितो न लिङ्गम् तथा पक्ष एवायं पक्ष-सपक्षयोरन्यतरः" [ ] इत्यादि तदपि निरस्तम् त्रैरूप्यसद्भावेऽपि
प्रकरणसमत्वेनास्यागमकत्वात्। प्रत्यक्षाऽऽगमबाधितकर्मनिर्देशानन्तरप्रयुक्तः कालात्ययापदिष्टोऽपि हेत्वाभासोऽपरोऽभ्युपगतः यथा 'पक्वानि एतानि आम्रफलानि, एकशाखाप्रभवत्वात्, उपयुक्तफलवत्' अस्य हि रूपत्रययोगिनोऽपि प्रत्यक्षबाधितकर्मानन्तरप्रयोगात् कालात्ययापदिष्टता अगमकत्वे निबन्धनम्-हेतोः कालः अदुष्टकर्मानन्तरं प्रयोगः प्रत्यक्षादिविरुद्धस्य तु दुष्टकर्मानन्तरं प्रयोगात् हेतुकालव्यतिक्रमेण प्रयोगः तस्माच्च कालात्ययापदिष्टशब्दाभिधेयता हेत्वाभासता च। तदुक्तं न्यायभाष्यकृता—"यत् पुनरनुमानं प्रत्यक्षाऽऽगमविरुद्धं न्यायाभासः स इति" [वात्स्यायनभा० पृ० ४ पं० ५] तदेवं पञ्चलक्षणयोगिनि हेतौ अविनाभावपरिसमाप्तेः तत्पुत्रत्वादौ तु त्रैलक्षण्येऽपि कालात्ययापदिष्टत्वान्न गमकत्वम् इति नैयायिकाः।

असदेतत्, असिद्धादिव्यतिरेकेण अपरस्य प्रकरणसमादेः हेत्वाभासस्यायोगात्। यच्च प्रकरणसमस्य 'अनित्यः शब्दः अनुपलभ्यमाननित्यधर्मकत्वात्' इति उदाहरणं प्रदर्शितम् तद् असंगतमेव,
यतः अनुपलभ्यमाननित्यधर्मकत्वं यदि शब्दे न तत्त्वतः सिद्धं तदा पक्षवृत्तितयास्यासिद्धेः कथं नासिद्धः? अथ तत् तत्र सिद्धम् तदा किं साध्यधर्मान्विते धर्मिणि तत् सिद्धम्, उत तद्विकल इति वक्तव्यम्। यदि तदन्विते तदा साध्यवत्येव धर्मिणि तस्य सद्भावसिद्धेः कथमगमकता न हि साध्यधर्ममन्तरेण धर्मिण्यभवनं विहाय अपरं हेतोः अविनाभावित्वम् तच्चेत् समस्ति कथं न गमकता अविनाभावनिबन्धनत्वात् तस्याः? अथ तद्विकले तत् तत्र सिद्धं तदा तत्र वर्तमानो हेतुः कथं न
विरुद्धः विपक्ष एव वर्तमानस्य विरुद्धत्वात्? भवति च साध्यधर्मविकल एव धर्मिणि वर्तमानो विपक्षवृत्तिः। अथ संदिग्धसाध्यधर्मवति तत् तत्र वर्तते तदा संदिग्धविपक्षव्यावृत्तिकत्वाद् अनैकान्तिकः। अथ साध्यधर्मिव्यतिरिक्ते धर्म्यन्तरे यस्य साध्याभाव एव दर्शनं स विरुद्धः यस्य च तदभावेऽपि असौ अनैकान्तिकः न हि धर्मिण एव विपक्षता तस्य हि विपक्षत्वे सर्वस्य हेतोः अहेतुत्वप्रसक्तेः यतः साध्यधर्मी साध्यधर्मसदसत्त्वाश्रयत्वेन सर्वदा संदिग्ध एव साध्यसिद्धेः प्राग् अन्यथा
साध्याभावे निश्चिते साध्याभावनिश्चायकेन प्रमाणेन बाधितत्वात् हेतोरप्रवृत्तिरेव स्यात्। प्रत्यक्षादिप्रमाणेन च साध्यधर्मयुक्ततया धर्मिणो निश्चये हेतोर्वैयर्थ्यप्रसक्तिः प्रत्यक्षादित एव हेतुसाध्यस्य

१-तां वा सा—भां०। २ पृ० ७२० पं० २।

सिद्धेः तस्मात् संदिग्धसाध्यधर्मा धर्मी हेतोराश्रयत्वेन एष्टव्य इति यदि अनैकान्तिकस्तत्र वर्तमानो हेतुर्धूमादिरपि तर्हि तथाविध एव स्यात् तस्यापि एवं संदिग्धव्यतिरेकित्वात् यदि हि विपक्षवृत्तित्वेन निश्चितो यथाऽगमकस्तथा संदिग्धव्यतिरेक्यपि अनुमानप्रामाण्यं परित्यक्तमेव भवेत् ततोऽनुमेयव्यतिरिक्ते साध्यधर्मवति वर्तमानः साध्याभावे चानैकान्तिको हेतुः साध्याभाववत्येव तु वर्तमानः पक्षधर्मत्वे सति विरुद्ध इत्यभ्युपगन्तव्यम्। यश्च विपक्षाद् व्यावृत्तः सपक्षे च अनुगतः पक्षधर्मो निश्चितः स स्वसाध्यं गमयति प्रकृतस्तु यद्यपि विपक्षाद् व्यावृत्तस्तथापि न स्वसाध्यसाधकः प्रतिबन्धस्य स्वसाध्येनानिश्चयात् तदनिश्चयश्च न विपक्षवृत्तित्वेन किन्तु प्रकरणसमत्वेन एकशाखाप्रभवत्वादेस्तु कालात्ययापदिष्टत्वेन इति, असदेतत्; यतो यदि धर्मिव्यतिरिक्ते धर्म्यन्तरे हेतोः स्वसाध्येन प्रतिबन्धोऽभ्युपगम्यते तदा धर्मिण्युपादीयमानोऽपि हेतुः साध्यस्योपस्थापको न स्यात् साध्यधर्मिणि[1] साध्यमन्तरेणापि हेतोः सद्भावाभ्युपगमात् तद्व्यतिरिक्त एव धर्म्यन्तरे तस्य साध्येन प्रतिबन्धग्रहणात्। न चान्यत्र स्वसाध्याविनाभावित्वेन निश्चितः अन्यत्र साध्यं गमयेत् अतिप्रसङ्गात्। अथ यदि साध्यधर्मान्वितत्वेन साध्यधर्मिण्यपि हेतुरन्वयप्रदर्शनकाल एव निश्चितस्तदा पूर्वमेव साध्यधर्मस्य साध्यधर्मिणि निश्चयात् पक्षधर्मताग्रहणस्य वैयर्थ्यम्, असदेतत्; यतः प्रतिबन्धप्रसाधकेन प्रमाणेन सर्वोपसंहारेण साधनधर्मः साध्यधर्माभावे क्वचिदपि न भवतीति सामान्येन प्रतिबन्धनिश्चये पक्षधर्मताग्रहणकाले यत्रैव धर्मिण्युपलभ्यते हेतुस्तत्रैव स्वसाध्यं निश्चाययतीति पक्षधर्मताग्रहणस्य विशेषविषयप्रतिपत्तिनिबन्धनत्वान्नानुमानस्य वैयर्थ्यम् न हि विशिष्टधर्मिण्युपलभ्यमानो हेतुस्तद्वतसाध्यमन्तरेण उपपत्तिमान् अन्यथा तस्य स्वसाध्यव्याप्तत्वायोगात्। न चैवं तत्र हेतूपलम्भेऽपि साध्यविषयसदसत्त्वानिश्चयः येन संदिग्धव्यतिरेकिता हेतोः सर्वत्र भवेत् निश्चितस्वसाध्याविनाभूतहेतूपलम्भस्यैव साध्यधर्मिणि साध्यप्रतिपत्तिरूपत्वात् न हि तत्र तथाभूतहेतुनिश्चयात् अपरस्तस्य स्वसाध्यप्रतिपादनव्यापारः अत एव निश्चितप्रतिबन्धैकहेतुसद्भावे धर्मिणि न विपरीतसाध्योपस्थापकस्य तल्लक्षणयोगिनो हेत्वन्तरस्य सद्भावः तयोर्द्वयोरपि स्वसाध्याविनाभूतत्वात् नित्याऽनित्यत्वयोश्च एकत्र एकदा एकान्तवादिमतेन विरोधात् असंभवात् तद्व्यवस्थापकहेत्वोरपि असंभवस्य न्यायप्राप्तत्वात् संभवे वा तयोः स्वसाध्याविनाभूतत्वात् नित्याऽनित्यत्वधर्मयुक्तत्वं धर्मिणः स्यादिति कुतः प्रकरणसमस्यागमकता? अथान्यतरस्यात्र स्वसाध्याविनाभावविकलता तर्हि तत एव तस्यागमकता इति किमसत्प्रतिपक्षतारूपप्रतिपादनप्रयासेन? किञ्च, नित्यधर्मानुपलब्धिः प्रसज्यप्रतिषेधरूपा, पर्युदासरूपा वा शब्दानित्यत्वे हेतुः? न तावत् आद्यः पक्षः अनुपलब्धिमात्रस्य तुच्छस्य साध्यासाधकत्वात्। अथ द्वितीयः तदा अनित्यधर्मोपलब्धिरेव हेतुरिति यद्यसौ शब्दे सिद्धा कथं नानित्यतासिद्धिः? अथ चिन्तासंबन्धिना पुरुषेणासौ प्रयुज्यत इति न तत्र निश्चिता तर्हि कथं न संदिग्धासिद्धो हेतुर्वादिनं प्रति प्रतिवादिनस्तु असौ स्वरूपासिद्ध एव नित्यधर्मोपलब्धेस्तत्र तस्य सिद्धेः। यदपि 'उभयानुपलब्धिनिबन्धना यदा द्वयोरपि चिन्ता तदैकदेशोपलब्धेरन्यतरेण हेतुत्वेन उपादाने कथं चिन्तासंबन्ध्येव द्वितीयः तस्याऽसिद्धतां वक्तुं पारयति' इत्याद्यभिधानम्, तदपि असंगतम्; यतो यदि द्वितीयः संशयापन्नत्वात् तत्रासिद्धतां नोद्भावयितुं समर्थः प्रथमोऽपि तर्हि कथं संशयितत्वादेव तस्य हेतुतामभिधातुं शक्तो भवेत्। अथ संशयितोऽपि तत्र हेतुतामभिदध्यात् तर्हि असिद्धतामप्यभिदध्यात् भ्रान्तेरुभयत्राविशेषात्। यदपि 'साधनकाले नित्यधर्मानुपलब्धिः अनित्यपक्ष एव वर्तते न विपक्षे' इत्याद्यभिधानम् तदपि असंगतम्[3]; विपक्षाद् एकान्ततोऽस्य व्यावृत्तौ पक्षधर्मत्वे च स्वसाध्यसाधकत्वमेव अन्योन्यव्यवच्छेदरूपाणामेकव्यवच्छेदेन अपरत्र वृत्तिनिश्चये गत्यन्तराभावात् न हि योऽनित्यपक्ष एव वर्तमानो निश्चितो वस्तुधर्मः स तत्र साधयतीति वक्तुं युक्तम्। अथ द्वितीयोऽपि वस्तुधर्मस्तत्र तथैव निश्चितः, न; परस्परविरुद्धधर्मयोस्तदविनाभूतयोर्वा एकत्र धर्मिण्ययोगात् योगे वा नित्यानित्यत्वयोः शब्दाख्ये धर्मिणि एकदा सद्भावाद् अनेकान्तरूपवस्तुसद्भावोऽभ्युपगतः स्यात् तमन्तरेण तद्धेत्वोः स्वसाध्याविनाभूतयोस्तत्रायोगात्। अथ द्वयोस्तुल्यबलयोरेकत्र प्रवृत्तौ परस्परविषयप्रतिबन्धान्न स्वसाध्यसाधकत्वम्, असदेतत्; स्वसाध्याविनाभूतयोर्धर्मिणि तयोरुपलब्धिरेव स्वसाध्यसाधकत्वमिति कुतस्तत्सद्भावे परस्परविषयप्रतिबन्धः? तत्प्रतिबन्धो हि तयोस्तथाभूतयो-

१ साध्यधर्ममन्तरे—वा० बा०। २ पृ० ७२० पं० १९। ३-च्छेद्यरू—वा० बा०।

स्तत्राप्रवृत्तिः सा च त्रैरूप्याभ्युपगमे विरोधाद् अयुक्ता भावाऽभावयोः परस्परपरिहार-स्थितिलक्षणतया एकत्रायोगात्। अथ द्वयोरन्योन्यव्यवच्छेदरूपयोः एकत्रायोगाद् अनित्यधर्मानुपलब्धेर्नित्यधर्मानुपलब्धेर्वा बाधा, न; अनुमानस्यानुमानान्तरेण बाधाऽयोगात्। तथाहि—तुल्यबलयोर्वा तयोर्बाध्यबाधकभावः अतुल्यबलयोर्वा? न तावत् आद्यः पक्षः द्वयोस्तुल्यत्वे एकस्य बाधकत्वम् अपरस्य च बाध्यत्वमिति विशेषानुपपत्तेः। न च पक्षधर्मत्वाद्यभावादिरेकस्य विशेषः तस्यानभ्युपगमात्[1] अभ्युपगमे वा तत एव एकस्य दुष्टत्वान्न किञ्चिद् अनुमानबाधया। तन्न पूर्वः पक्षः। नापि द्वितीयः यतः अतुल्यबलत्वं तयोः पक्षधर्मत्वादिभावाभावकृतम्, अनुमानबाधाजनितं वा? न तावत् आद्यः पक्षः तस्यानभ्युपगमात् अभ्युपगमे वाऽनुमानबाधावैयर्थ्यप्रसक्तेः। नापि द्वितीयः तस्याद्यापि विचारास्पदत्वात् न हि द्वयोस्त्रैरूप्यात्[2] तुल्यत्वे एकस्य बाध्यत्वम् अपरस्य च बाधकत्वम् इति व्यवस्थापयितुं शक्यम्। तन्न अनुमानबाधाकृतमपि अतुल्यबलत्वम् इतरेतराश्रयदोषापत्तेः परिस्फुटत्वात्। एतेन पक्ष-सपक्षान्यतरत्वादेरपि प्रकरणसमस्य व्युदासः कृतो द्रष्टव्यः न्यायस्य समानत्वात्। यदपि 'अत्र असाधारणत्वाऽसिद्धत्वदोषद्वयनिरासार्थमन्यतरशब्दाभिधेयत्वं पक्ष-सपक्षयोः साधारणं हेतुत्वेन विवक्षितम् अन्यतरशब्दात् तथाविधार्थप्रतिपत्तेः तस्य तत्र योग्यत्वात्' इत्यभिधानम्, तदपि असंगतम्; यतः यत्रानियमेन फलसंबन्धो विवक्षितो भवति तत्रैव लोके 'अन्यतर'शब्दप्रयोगो दृष्टः यथा 'देवदत्त-यज्ञदत्तयोरन्यतरं भोजय' इत्यत्र अनियमेन देवदत्तः यज्ञदत्तो वा भोजनक्रियया संबध्यते इति 'अन्यतर'शब्दप्रयोगः न चैवं शब्दः पक्ष-सपक्षयोरन्यतरः तस्य पक्षत्वेन 'अन्यतर'शब्दवाच्यत्वाऽयोगात्। यदपि 'यदा पक्षधर्मत्वं प्रयोक्ता विवक्षति तदा 'अन्यतर'शब्दवाच्यः पक्षः' इत्याद्यभिधानम्, तदपि असंगतम्; एवंविवक्षायामस्य कल्पनासमारोपितत्वे अनर्थरूपतया लिङ्गत्वानुपपत्तेः न हि कल्पनाविरचितस्यार्थत्वम् त्रैरूप्यं वा उपपत्तिमत् अतिप्रसङ्गात् तत्त्वे वा अन्यस्य गमकतानिबन्धनस्याभावात् सम्यग्धेतुत्वं स्यात् इति उक्तं प्राक्। कालात्ययापदिष्टस्य तु लक्षणमसंगतमेव न हि प्रमाणप्रसिद्धत्रैरूप्यसद्भावे हेतोर्विषयबाधा संभविनी तयोर्विरोधात् साध्यसद्भाव एव हेतोर्धर्मिणि सद्भावस्त्रैरूप्यम् तदभाव एव च तत्र तत्सद्भावो बाधा भावाभावयोश्च एकत्र एकस्य विरोधः। किञ्च, अध्यक्षाऽऽगमयोः कुतो हेतुविषयबाधकत्वमिति वक्तव्यम्, स्वार्थासंभवे तयोरभावात् इति चेत् हेतावपि सति त्रैरूप्ये तत् समानमित्यसावपि तयोर्विषये बाधकः स्यात् दृश्यते हि चन्द्रार्कादिश्चैर्यग्राहि अध्यक्षं देशान्तरप्राप्तिलिङ्गप्रभवतद्गत्यनुमानेन बाध्यमानम्। अथ तत्स्थैर्यग्राह्यध्यक्षस्य तदाऽऽभासत्वाद् बाध्यत्वं तर्हि एकशाखाप्रभवत्वानुमानस्यापि तदाभासत्वाद् बाध्यत्वमित्यभ्युपगन्तव्यम्। न चैवमस्त्विति वक्तव्यम् यतस्तस्य तदाभासत्वं किमध्यक्षबाध्यत्वात्, उत त्रैरूप्यवैकल्यात्? न तावत् आद्यः पक्षः इतरेतराश्रयदोषसद्भावात्—तदाभासत्वे अध्यक्षबाध्यत्वम् ततश्च तदाभासत्वमिति एकाऽसिद्धौ अन्यतराऽप्रसिद्धेः। नापि द्वितीयः त्रैरूप्यसद्भावस्य तत्र परेणाभ्युपगमात् अनभ्युपगमे वा तत एव तस्यागमकतोपपत्तेरध्यक्षबाधाभ्युपगमवैयर्थ्यात्। न चाबाधितविषयत्वं हेतुलक्षणमुपपन्नम् त्रैरूप्यवन्निश्चितस्यैव तस्य गमकाङ्गतोपपत्तेः। न च तस्य निश्चयः संभवति, स्वसंबन्धिनोऽबाधितत्वनिश्चयस्य तत्कालभाविनः असम्यगनुमानेऽपि सद्भावात् उत्तरकालभाविनः असिद्धत्वात्, सर्वसंबन्धिनस्तादात्विकस्य उत्तरकालभाविनश्चासिद्धत्वात्। न हि अर्वाग्दृशा 'सर्वत्र सर्वदा सर्वेषामत्र बाधकस्याभावः' इति निश्चेतुं शक्यम्, तन्निश्चयनिबन्धनस्याभावात् नानुपलम्भस्तन्निबन्धनः सर्वसंबन्धिनस्तस्यासिद्धत्वात्, आत्मसंबन्धिनः अनैकान्तिकत्वान्न संवादस्तन्निबन्धनः प्राग् अनुमानप्रवृत्तेस्तस्यासिद्धेः अनुमानोत्तरकालं तत्सिद्ध्यभ्युपगमे इतरेतराश्रयदोषप्रसक्तेः। तथाहि—अनुमानात् प्रवृत्तौ संवादनिश्चयः ततश्चाबाधितत्वावगमे अनुमानप्रवृत्तिरिति परिस्फुटमितरेतराश्रयत्वम्। न चाविनाभावनिश्चयादपि अबाधितविषयत्वनिश्चयः, पञ्चलक्षणयोग्यविनाभावपरिसमाप्तिवादिनामबाधितविषयत्वानिश्चये अविनाभावनिश्चयस्यैव असंभवात्। यदि च प्रत्यक्षाऽऽगमबाधितकर्मनिर्देशानन्तरप्रयुक्तस्यैव कालात्ययापदिष्टत्वम् तर्हि 'मूर्खोऽयं देवदत्तः, त्वत्पुत्रत्वात्, उभयाभिमतत्वत्पुत्रवत्' इत्यस्यापि गमकता स्यात्। न हि सकलशास्त्रव्याख्यातृत्वलिङ्गजनितानुमानबाधितविषयत्वमन्तरेण अन्यद् अध्यक्षबाधितविषयत्वम् आगमबाधितविषयत्वं वा अगम-

१-प्यात्तु—भां० मां० विना।

कतानिबन्धनमस्यास्ति। न चानुमानस्य तुल्यबलत्वान्नानुमानं प्रति बाधकता संभविनी इति वक्तव्यम्, निश्चितप्रतिबन्धलिङ्गसमुत्थस्यानुमानस्यानिश्चितप्रतिबन्धलिङ्गसमुत्थेन अतुल्यबलत्वात् अत एव न साधर्म्यमात्राद् हेतुर्गमकः अपि तु आक्षिप्तव्यतिरेकात् साधर्म्यविशेषात्। नापि व्यतिरेकमात्रात् किन्तु अङ्गीकृतान्वयात् तद्विशेषात्। न च परस्परानन्विद्धोभयमात्रादपि अपि तु परस्परस्वरूपाजहद्वृत्तिसाधर्म्य-वैधर्म्यरूपवत्त्वात्। न च प्रकृतहेतौ प्रतिबन्धनिश्चायकप्रमाणनिबन्धनं त्रैरूप्यं निश्चितमिति, तदभावादेव अस्य हेत्वाभासत्वम् न पुनरसत्प्रतिपक्षत्वाऽबाधितविषयत्वापररूपविरहात्। यदा च पक्षधर्मत्वाद्यनेकवास्तवरूपात्मकमेकं लिङ्गमभ्युपगमविषयस्तदा तत् तथाभूतमेव वस्तु प्रसाधयतीति कथं न विपर्ययसिद्धिः? न च साध्यसाधनयोः परस्परतो धर्मिणश्च एकान्तभेदे पक्षधर्मत्वादिधर्मयोगो लिङ्गस्य उपपत्तिमान्, संबन्धासिद्धेः। न च समवायादेः संबन्धस्य निषेधे एकार्थसमवायादिः साध्य-साधनयोः धर्मिणश्च सम्बन्धः संभवी, एकान्तपक्षे तादात्म्य-तदुत्पत्तिलक्षणोऽप्यसौ अयुक्त एव इति'पक्षधर्मत्वम्'इत्यादि हेतुलक्षणमसंगतमेव स्यात्। यदि च पक्षधर्मत्वादिकं हेतोस्त्रैरूप्यमभ्युपगम्यते कथं न परवादाश्रयणम् एकस्य हेतोरनेकधर्मात्मकस्य अभ्युपगमात्। न च यदेव पक्षधर्मस्य सपक्ष एव सत्त्वम् तदेव विपक्षात् सर्वतो व्यावृत्तत्वमिति वाच्यम्, अन्वय-व्यतिरेकयोर्भावाभावरूपयोः सर्वथा तादात्म्यायोगात् तत्त्वे वा केवलान्वयी केवलव्यतिरेकी वा सर्वो हेतुः स्यात् न त्रिरूपवान् व्यतिरेकस्य च अभावरूपत्वात् हेतोस्तद्रूपत्वे अभावरूपो हेतुः स्यात्। न चाभावस्य तुच्छरूपत्वात् स्वसाध्येन, धर्मिणा वा संबन्ध उपपत्तिमान्। न च विपक्षे सर्वत्रासत्त्वमेव हेतोः स्वकीयं रूपं व्यतिरेकः न तुच्छाभावमात्रमिति वक्तव्यम्, यतो यदि सपक्ष एव सत्त्वं विपक्षाद् व्यावृत्तत्वम् न ततो भिन्नमस्ति तदा तस्य तदेव सावधारणं नोपपत्तिमत् वस्तुभूतान्याभावमन्तरेण प्रतिनियतस्य तस्य तत्राऽसंभवात्। अथ ततः तद् अन्यद् धर्मान्तरम् तर्हि एकरूपस्य अनेकधर्मात्मकस्य हेतोस्तथाभूतस्य साध्याविनाभूतत्वेन निश्चितस्य अनेकान्तात्मकवस्तुप्रतिपादनात् कथं न परोपन्यस्तहेतूनां सर्वेषां विरुद्धता एकान्तविरुद्धेनानेकान्तेन व्याप्तत्वात्?

किञ्च, हेतुः सामान्यरूपो वा उपादीयेत परैः, विशेषरूपो वा? यदि सामान्यरूपस्तदा तद् व्यक्तिभ्यो भिन्नम्, अभिन्नं वा? न तावद् भिन्नम् 'इदं सामान्यम् अयं विशेषः, अयं तद्वान्' इति वस्तुत्रयोपलम्भानुपलक्षणात् तथा च सामान्यस्य भेदेन अभ्युपगन्तुमशक्यत्वात्। न च समवायवशात् परस्परं तेषां भेदेन अनुपलक्षणम् यतः समवायस्य 'इह'बुद्धिहेतुत्वमुपगीयते, न च भेदग्रहणमन्तरेण 'इह इदमवस्थितम्'इति बुद्ध्युत्पत्तिसंभवः। किञ्च, "नागृहीतविशेषणा विशेष्ये बुद्धिः" [ ] इति काणादानां सिद्धान्तः न च सामान्यनिश्चयः संस्थानभेदावसायमन्तरेण उपपद्यते यतः दूरात् पदार्थस्वरूपमुपलभमानो नागृहीतसंस्थानभेदः अश्वत्वादिसामान्यमुपलब्धुं शक्नोति, न च संस्थानभेदावगमस्तदाधारोपलम्भमन्तरेण संभवतीति कथं नेतरेतराश्रयदोषप्रसङ्गः। तथाहि—पदार्थग्रहणे सति संस्थानभेदावगमः तत्र च सामान्य-विशेषावबोधः तस्मिंश्च सति पदार्थस्वरूपावगतिः इति व्यक्तमितरेतराश्रयत्वम् चक्रकप्रसङ्गो वा। किञ्च, अश्वत्वादेः सामान्यभेदस्य स्वाश्रयसर्वगतत्वे कर्कादिव्यक्तिशून्ये देशे प्रथमतरमुपजायमानाया व्यक्तेः अश्वत्वादिसामान्येन योगो न भवेत् व्यक्तिशून्ये देशे सामान्यस्य अनवस्थानात् व्यक्त्यन्तरादनागमनाच्च ततः सर्वसर्वगतं तद् अभ्युपगन्तव्यम् एवं च कर्कादिभिरिव शाबलेयादिभिरपि तद् अभिव्यज्येत। न च कर्कायानामेव तदभिव्यक्तौ सामर्थ्यम् न शाबलेयादीनामिति वाच्यम्, यतः यया प्रत्यासत्त्या ता एव तद् आत्मनि अवस्थापयन्ति तयैव ता एव 'अश्वः अश्वः' इति एकाकारपरामर्शप्रत्ययमुपजनयिष्यन्तीति किमपरतद्भिन्नसामान्यप्रकल्पनया? न च स्वाश्रयेन्द्रियसंयोगात् प्राक् स्वज्ञानजनने असमर्थं सामान्यं तदा परैरनाधेयातिशयम् तमपेक्ष्य स्वावभासि ज्ञानं जनयति, प्राक्तनाऽसमर्थस्वभावाऽपरित्यागे स्वभावान्तरानुत्पादे च तदयोगात् तथाभ्युपगमे च क्षणिकतापसक्तेः। न च स्वभावान्तरस्योपजायमानस्य ततो भेदः संबन्धासिद्धितः तत्सद्भावेऽपि प्राग्वत् तस्य स्वावभासिज्ञानजननायोगान्न प्रतिभासः स्यात्। तथा च सामान्यस्य व्यक्तिभ्यो भेदेन अप्रतिभासमानस्य असिद्धत्वात् कथं हेतुत्वम्? किञ्च, प्रतिव्यक्ति सामान्यस्य सर्वात्मना परिसमाप्तत्वाभ्युपगमात् एकस्यां व्यक्तौ विनिवेशितस्वरूपस्य तदैव

१ साधारणं वा० बा० भां० मां० विना। २–यतस्य तत्रा—वा० बा० भां० मां०।

व्यक्त्यन्तरे वृत्त्यनुपपत्तेस्तदनुरूपप्रत्ययस्य तत्रासंभवात् असाधारणता च हेतोः स्यात्। यदि च असाधारणरूपा व्यक्तयः स्वरूपतः तदा परसामान्ययोगादपि न साधारणतां प्रतिपद्यन्त इति व्यर्था सामान्यप्रकल्पना स्वतः असाधारणस्य अन्ययोगादपि साधारणरूपत्वानुपपत्तेः स्वतस्तद्रूपत्वेऽपि निष्फला सामान्यकल्पना इति व्यक्तिव्यतिरिक्तस्य सामान्यस्य अभावात् असिद्धस्तल्लक्षणो हेतुः इति कथं ततः साध्यसिद्धिः? अथ व्यक्त्यव्यतिरिक्तं सामान्यं हेतुः तदपि असंगतमेव व्यक्त्यव्यतिरिक्तस्य व्यक्तिस्वरूपवद् व्यक्त्यन्तरानुगमात् सामान्यरूपतानुपपत्तेः व्यक्त्यन्तरसाधारणस्यैव वस्तुनः'सामान्यम्' इत्यभिधानात् तत्साधारणत्वे वा न तस्य व्यक्तिस्वरूपाऽव्यतिरिच्यमानमूर्तिता सामान्यरूपतया भेदाव्यतिरिच्यमानस्वरूपस्य विरोधात्। तन्न व्यक्त्यव्यतिरिक्तमपि सामान्यं हेतुः व्यक्तिस्वरूपवत् असाधारणत्वेन गमकत्वायोगात् अत एव न व्यक्तिरूपमपि हेतुः। न चोभयं परस्परानन्विद्धं हेतुः उभयदोषप्रसङ्गात्। न अनुभयम् अन्योन्यव्यवच्छेदरूपाणामेकाभावे द्वितीयविधानात् अनुभयस्य असत्त्वेन हेतुत्वायोगात् बुद्धिप्रकल्पितं च सामान्यम् अवस्तुरूपत्वात् साध्येन अप्रतिबद्धत्वात् असिद्धत्वाच्च न हेतुः। तस्मात् पदार्थान्तरानुवृत्तव्यावृत्तरूपमात्मानं बिभ्रद् एकमेव पदार्थस्वरूपं प्रतिपत्तुर्भेदाभेदप्रत्ययप्रसूतिनिबन्धनं हेतुत्वेन उपादीयमानं तथाभूतसाध्यसिद्धिनिबन्धनमभ्युपगन्तव्यम्। न च यदेव रूपं रूपान्तराद् व्यावर्तते तदेव कथमनुवृत्तिमासादयति, यच्च अनुवर्तते तत् कथं व्यावृत्तिरूपतामात्मसात्करोति इति वक्तव्यम् भेदाभेदरूपतया अध्यक्षतः प्रतीयमाने वस्तुस्वरूपे विरोधासिद्धेरिति असकृद् आवेदितत्वात्।

किञ्च, एकान्तवाद्युपन्यस्तहेतोः किं सामान्यं साध्यम्, आहोस्विद् विशेषः, उत उभयं परस्परविविक्तम्, उतस्विद् अनुभयमिति विकल्पाः। तत्र न तावत् सामान्यम् केवलस्य तस्य असंभवात् अर्थक्रियाकारित्वविकलत्वाच्च। नापि विशेषः तस्य अननुयायित्वेन साधयितुमशक्यत्वात्। नापि उभयम् उभयदोषानतिवृत्तेः। नापि अनुभयम् तस्य असतो हेत्वव्यापकत्वेन साध्यत्वायोगात्। एतदेव आह गाथापश्चार्धेन **अन्योन्यप्रतिकुष्टौ** प्रतिक्षिप्तौ **द्वावपि एतौ** सामान्य-विशेषैकान्तौ **असद्वादाविति**। इतरविनिर्मुक्तस्य एकस्य शशशृङ्गादेरिव साधयितुमशक्यत्वात्॥ ५६॥

[परस्परभिन्नं सामान्य-विशेषयोः स्वरूपमनूद्य तस्य निराकरणम्]

सामान्य-विशेषयोः स्वरूपं परस्परविविक्तमनूद्य निराकुर्वन् आह—

दव्वट्ठियवत्तव्वं सामण्णं पज्जवस्स य विसेसो।
एए समोवणीआ विभज्जवायं विसेसेंति॥ ५७॥[1]

द्रव्यास्तिकस्य वक्तव्यं वाच्यम् विशेषनिरपेक्षं **सामान्यमात्रम्**, **पर्यायास्तिकस्य** पुनः अनुस्यूताकारविविक्तो **विशेष** एव वाच्यः **एतौ** च सामान्यविशेषौ अन्योन्यनिरपेक्षौ एकैकरूपतया परस्परप्राधान्येन वा एकत्र **उपनीतौ** प्रदर्शितौ **विभज्यवादम्** अनेकान्तवादं सत्यवादस्वरूपम् **अतिशयाते** असत्यरूपतया ततः तौ अतिशयं लभेते इति यावत्—विशेषे साध्ये अनुगमाभावतः, सामान्ये साध्ये सिद्धसाधनतया साधनवैफल्यतः, प्रधानोभयरूपे साध्ये उभयदोषापत्तितः, अनुभयरूपे साध्ये उभयाभावतः साध्यत्वायोगात्। तस्माद् विवादास्पदीभूतसामान्यविशेषोभयात्मकसाध्यधर्माधारसाध्यधर्मिणि अन्योन्यानुविद्धसाधर्म्यवैधर्म्यस्वभावद्वयात्मकैकहेतुप्रदर्शनतो नैकान्तवादपक्षोक्तदोषावकाशः संभवी, अत एव गाथापश्चार्धेन—एतौ सामान्य-विशेषौ समुपनीतौ परस्परसव्यपेक्षतया 'स्यात्'पदप्रयोगतो धर्मिणि अवस्थापितौ विभज्यवादम् एकान्तवादम् **विशेषयतः** निराकुरुतः एवमेव तयोरात्मलाभात् अन्यथा अनुमानविषयस्य उक्तन्यायतः असत्त्वात् इत्यपि दर्शयति॥ ५७॥

[अनेकान्तरूपतया वस्तु साधयतो वादिनोऽजेयत्वाभिधानम्]

यत्र अनुमानविषयतया अभ्युपगम्यमाने साध्ये दूषणवादिनः अवकाश एव न भवति तदेव साध्यं हेतुविषयतया अभ्युपगन्तव्यमिति दर्शयन्नाह— ४०

१-सेसंति भां० मां० आ० हा० वि०।

हेउविसओवणीयं जह वयणिज्जं परो नियत्तेइ ।
जइ तं तहा पुरिल्लो दाइंतो केण जिंव्वंतो ॥ ५८ ॥

हेतुविषयतया उपनीतम् उपदर्शितं साध्यधर्मिलक्षणं वस्तु पूर्वपक्षवादिना 'अनित्यः शब्दः' इत्येवं **यथा वचनीयं परो** दूषणवादी **निवर्तयति** सिद्धसाध्यताऽननुगमदोषाद्युपन्यासेन एकान्तवचनीयस्य तदितरधर्मानुषक्तस्य अनेकदोषदुष्टतया निवर्तयितुं शक्यत्वात् । **यदि तत् तथा** द्वितीयधर्माक्रान्तं 'स्यात्'शब्दयोजनेन **पुरिल्लः** पूर्वपक्षवादी **अदर्शयिष्यत** ततोऽसौ **नैव केनचिद् अजेष्यत** । जितश्चासौ तथाभूतस्य साध्यधर्मिणोऽप्रदर्शनात् प्रदर्शितस्य च एकान्तरूपस्य असत्त्वात् तत्प्रदर्शकोऽसत्यवादितया निग्रहार्ह इति ॥ ५८ ॥

[एकान्तानिश्चितरूपाभ्यां वस्तु वदतो लौकिकपरीक्षकाग्राह्यवचनत्वकथनम्]

एतदेव दर्शयन्नाह—

एयन्ताऽसब्भूयं सब्भूयमणिच्छियं च वयमाणो ।
लोइय-परिच्छियाणं वयणिज्जपहे पडइ वादी ॥ ५९ ॥

आस्तां तावत् **एकान्तेन असद्भूतम्** असत्यम्, **सद्भूतमपि अनिश्चितं वदन् वादी लौकिकानाम् परीक्षकाणां** च **वचनीयमार्गं पतति** । ततः अनेकान्तात्मकाद् हेतोः तथाभूतमेव साध्यधर्मिणं साधयन् वादी सद्वादी स्यादिति तथैव साध्याऽविनाभूतो हेतुर्धर्मिणि तेन प्रदर्शनीयः तत्प्रदर्शने च 'हेतोः सपक्ष-विपक्षयोः सदसत्त्वमवश्यं प्रदर्शनीयम्' इति यदुच्यते परैः तद् अपास्तं भवति तावन्मात्रादेव साध्यप्रतिपत्तेः । न च ततस्तत्प्रतिपत्तावपि विद्यमानत्वाद् रूपान्तरमपि तत्रावश्यं प्रदर्शनीयम्, ज्ञातत्वादेरपि तत्र प्रदर्शनप्रसक्तेः । अथ सामर्थ्यात् तत् प्रतीयत इति न वचनेन प्रदर्श्यते तर्हि अन्वय-व्यतिरेकावपि तत एव नावश्यं प्रदर्शनीयौ । अत एव दृष्टान्तोऽपि नावश्यं वाच्यः साधर्म्य-वैधर्म्यप्रदर्शनपरत्वात् तस्य । उपनय-निगमनवचनयोस्तु दूरापास्तता तदन्तरेणापि साध्याविनाभूतहेतुप्रदर्शनमात्रात् साध्यप्रतिपत्त्युत्पत्तेः अन्यथा तदयोगात् । त्रिलक्षणहेतुप्रदर्शनवादिनस्तु निरंशवस्त्वभ्युपगमविरोधः निरंशे त्रैलक्षण्यविरोधात् परिकल्पितस्वरूपत्रैरूप्याभ्युपगमोऽप्यसंगतः परिकल्पितस्य परमार्थसत्त्वे तद्दोषानतिक्रमात् अपरमार्थसत्त्वे तल्लक्षणत्वायोगात् असतः सल्लक्षणत्वविरोधात् । न च कल्पनाव्यवस्थापितलक्षणभेदाल्लक्ष्यभेद उपपत्तिमान् इति लिङ्गस्य निरंशस्वभावस्य किञ्चिद् रूपं वाच्यम् । न च साधर्म्यादिव्यतिरेकेण तस्य स्वरूपं प्रदर्शयितुं शक्यत इति तस्य निस्स्वभावताप्रसक्तिः । न चैकलक्षणहेतुवादिनोऽपि अनेकान्तात्मकवस्त्वभ्युपगमाद् दर्शनव्याघात इति वाच्यम् "प्रयोगनियम एव एकलक्षणो हेतुः" [ ] इति अभिधानात् । न च स्वभावनियमे तथाभूतस्य शशशृङ्गादेरिव निःस्वभावत्वात् । 'गमकाङ्गनिरूपणया एकलक्षणो हेतुः' इति व्यवस्थापितत्वात् । न च एकान्तवादिनां प्रतिबन्धग्रहणमपि युक्तिसंगतम् अविचलितरूपे आत्मनि ज्ञानपौर्वापर्याऽभावात् प्रतिक्षणध्वंसिन्यपि उभयग्रहणानुवृत्तैकचैतन्याभावात् 'कारणस्वरूपग्राहिणा ज्ञानेन कार्यस्य तत्स्वरूपग्राहिणा च कारणस्य ग्रहणासंभवात् एकेन च द्वयोरग्रहणे कार्यकारणभावादेः प्रतिबन्धस्य ग्रहणायोगात् कारणादिस्वरूपाव्यतिरेकेऽपि कारणत्वादेर्न तत्स्वरूपग्राहिणा कार्यकारणभावादेर्ग्रहः एकसंबन्धिस्वरूपग्रहणेऽपि तद्ग्रहणप्रसक्तेः । न च तद्ग्रहेऽपि निश्चयानुत्पत्तेर्न दोषः सविकल्पकत्वेन प्रथमाक्षसन्निपातजस्य अध्यक्षस्य व्यवस्थापनात् । न च कार्यानुभवानन्तरभाविना स्मरणेन कार्यकारणभावोऽनुसंधीयत इति वक्तव्यम् अनुभूत एव स्मरणप्रादुर्भावात् न च प्रतिबन्धः केनचिदनुभूतः तस्य उभयनिष्ठत्वात् उभयस्य च पूर्वापरकालभाविनः एकेन अग्रहणात् । न च कार्यानुभवानन्तरभाविनः स्मरणस्य

१ जिप्पंतो गु० मू० मु० मू० । २-त्येव य—वा० बा० । ३-परिच्छया—गु० मू० मु० मू० । ४ न स्व—बृ० । ५-त्पत्तेरदो—वा० बा० भां० मां० ।

कार्यानुभवो जनकः तदनन्तरं स्मरणस्य अभावात् । न च क्षणिकैकान्तवादे कार्यकारणभाव उपपत्तिमान् इत्युक्तम् । न च संतानादिकल्पनाप्यत्रोपयोगिनी । न च स्मरणकाले अतीततद्विषयस्मरणमात्रं प्रतीयते अपि तु तदनुभविताऽपि 'अहमेवमिदमनुभूतवान्' इति अनुभवित्राधारानुभूतविषयस्मृत्यध्यवसायात् एकाधारे अनुभव-स्मरणे अभ्युपगन्तव्ये तदभावे तथाऽध्यवसायानुपपत्तेः । न चानुभव-स्मरणयोः अनुगतचैतन्याभावे तद्धर्मतया प्रतिपत्तिर्युक्ता, न हि यत्प्रतिपत्तिकाले यद् नास्ति तत् तद्धर्मतया प्रतिपत्तुं युक्तम्, बोधाभावे ग्राह्य-ग्राहक-संवित्तित्रितयप्रतिपत्तिवत्, अस्ति च तद्धर्मतया अनुभव-स्मरणयोस्तदा प्रतिपत्तिरिति कथं क्षणिकैकान्तवादः तत्र वा प्रतिबन्धनिश्चय इति ? न चैकान्तवादिनः सामान्यादिकं साध्यं संभवतीति प्रतिपादितम् । तस्मात् अनेकान्तात्मकं वस्तु अभ्युपगन्तव्यम् अध्यक्षादेः प्रमाणस्य तत्प्रतिपादकत्वेन प्रवृत्तेः ॥ ५९ ॥

[निर्दोषभावप्ररूपणाया मार्गप्रकाशनम्]

स एव च सन्मार्गः इति उपसंहरन्नाह—

दव्वं खित्तं कालं भावं पज्जाय-देस-संजोगे ।
भेदं च पडुच्च समा भावाणं पण्णवणपज्जा ॥ ६० ॥

द्रव्य-क्षेत्र-काल-भाव-पर्याय-देश-संयोगान् भेदं चेत्यष्टौ भावान् आश्रित्य वस्तुनो भेदे सति **समा** सर्ववस्तुविषयायाः **प्रज्ञापनायाः** स्याद्वादरूपायाः **पर्या** पन्था मार्ग इति यावत् ।

तत्र द्रव्यं पृथिव्यादि, क्षेत्रं स्वारम्भकावयवस्वरूपम् तदाश्रयं वा आकाशम्, कालं युगपदयुगपच्चिरक्षिप्रप्रत्ययलिङ्गलक्षणम् वर्तनात्मकं वा नव-पुराणादिलक्षणम्, भावं मूलाङ्कुरादिलक्षणम्, पर्यायं रूपादिस्वभावम्, देशं मूलाङ्कुरपत्रकाण्डादिक्रमभाविविभागम्, संयोगं भूम्यादिप्रत्येकसमुदायं द्रव्य-पर्यायलक्षणम्, भेदं प्रतिक्षणविवर्तात्मकं वा जीवाजीवादि**भावानां प्रतीत्य** समानतया तदतदात्मकत्वेन प्रज्ञापना निरूपणा या सा सत्पथ इति न हि तदतदात्मकैकद्रव्यत्वादिभेदाभावे खरविषाणादेर्जीवादिद्रव्यस्य विशेषः यतो न द्रव्य-क्षेत्र-काल-भाव-पर्याय-देश-संयोग-भेदरहितं वस्तु केनचित् प्रत्यक्षाद्यन्यतमप्रमाणेन अवगन्तुं शक्यम् । न च प्रमाणागोचरस्य सद्व्यवहारगोचरता संभविनीति तदतदात्मकं तद् अभ्युपगन्तव्यम् । न हि एकान्ततः अतदात्मकं द्रव्यादिभेदभिन्नम् व्यतिरिक्तरूपं च प्रमाणतस्तद् निरूपयितुं शक्यम् द्रव्यादिव्यतिरिक्तस्य शश-शृङ्गवत् कुतश्चित् प्रमाणाद् अप्रतीतेः न हि ततो द्रव्यादीनां भेदेऽपि समवायसंबन्धवशात् तत्संबद्धताप्रसङ्गः संबन्धिभेदेन तद्भेदाभेदकल्पनाद्व्यानतिवृत्तेः । प्रथमविकल्पे समवायानेकत्वप्रसक्तिः संबन्धिभेदतो भेदात् संयोगवद् अनित्यत्वप्रसक्तिश्च । द्वितीयकल्पनायामपि संबन्धिसंकरप्रसक्तिः । न चैवं छत्र-दण्ड-कुण्डलादिसंबन्धविशेषविशिष्टदेवदत्तादेरिव समवायिनो जाति-गुणत्वादेर्भेदेन उपलब्धेर्(ब्धिर्न)हि य एव दण्ड-देवदत्तयोः संबन्धः स एव छत्रादिभिरपि तत्संबन्धाविशेषे तद्विशेषणविशेष्यवैफल्यप्रसक्तेः न हि विशेषणं विशेष्यं धर्मान्तराद् व्यवच्छिद्य आत्मन्यव्यवस्थापयद् विशेषणरूपतां प्रतिपद्यते एवं समवायसंबन्धस्याविशेषे द्रव्यत्वादीनामपि विशेषणानामविशेषान्न जीवाजीवादिद्रव्यव्यवच्छेदकता स्यात् इति समवायिसंकरप्रसक्तिः कथं नासज्येत ? न च समवायतद्ग्राहकप्रमाणाभावात् संभवति तदभावे न वस्तुनो वस्तुत्वयोगो भवेदिति तद् अनेकान्तात्मकैकरूपमभ्युपगन्तव्यम् । न चैकानेकात्मकत्वं वस्तुनो विरुद्धम् प्रमाणप्रतिपन्ने वस्तुनि विरोधायोगात् । तथाहि—एकानेकात्मकम् आत्मादि वस्तु, प्रमेयत्वात्, चित्रपटरूपवत् ग्राह्यग्राहकाकारसंवित्तिरूपैकविज्ञानवद् वा । न च वैशेषिकं प्रति चित्रपटरूपस्य एकानेकत्वमसिद्धम् प्राक् प्रसाधितत्वात् । नापि ग्राह्यग्राहकसंवित्तिलक्षणरूपत्रयात्मकमेकं विज्ञानं बौद्धं प्रत्यसिद्धम् तथाभूतविज्ञानस्य प्रत्यात्मसंवेदनीयस्य प्रतिक्षेपे सर्वप्रमाण-प्रमेयप्रतिक्षेपप्रसक्तेः । स्वार्थाकारयोर्विज्ञानमभिन्नस्वरूपम्, विज्ञा-

१ "पद्येत्यर्थः" बृ० टि० । २ वर्तमानात्म—भां० मां० आ० । ३-त्येकं स—वा० बा० । ४-त्मनि अनवस्था—वा० बा० भां० मां० । ५-वायसं—बृ० आ० हा० वि० ।

नस्य च वेद्य-वेदकाकारौ भिन्नात्मानौ कथञ्चिद् अनुभवगोचरापन्नौ, एतच्च प्रतिक्षणं स्वभावभेदमनुभवदपि न सर्वथा भेदवत् संवेद्यते इति संविदात्मनः स्वयमेकस्य क्रमवर्त्यनेकात्मकत्वं न विरोधमनुभवतीति कथमध्यक्षादिविरुद्धं निरन्वयविनाशित्वमभ्युपगन्तुं युक्तम्? न हि कदाचित् क्वचित् क्षणिकत्वमन्तर्बहिर् वा अध्यक्षतोऽनुभूयते 'तथैव' इति निर्णयानुत्पत्तेः भेदात्मन एव अन्तर्विज्ञानस्य बहिर्घटादेश्च अभिन्नस्य निश्चयात्। तथाभूतस्यापि अनुभवस्य भ्रान्तिकल्पनायां न किञ्चिद् अध्यक्षमभ्रान्तलक्षणभाग् भवेत् न हि ज्ञानं वेद्य-वेदकाकारशून्यं स्थूलाकारविविक्तम् परमाणुरूपं वा घटादिकमेकं निरीक्षामहे यतः बाह्याध्यात्मिकं भेदाभेदरूपतया अनुभूयमानं भ्रान्तविज्ञानविषयतया व्यवस्थाप्येत। अतः "यथादर्शनमेव इयं मानमेयव्यवस्थितिः न पुनर्यथातत्त्वम्" [ ] इत्येतद् अनिश्चितार्थाभिधानम्। न हि क्वचित् केनचित् प्रमाणेन एकान्तरूपं वस्तुतत्त्वमयं प्रतिपन्नवान् यत एवं वदन् शोभेत। यदा च अध्यक्षविरुद्धः निरंशक्षणिकैकान्तः ततो नानुमानमपि अत्र प्रवर्तितुमुत्सहते अध्यक्षबाधितविषयत्वात् तस्य। तेन "निरन्वयविनश्वरं वस्तु प्रतिक्षणमवेक्षमाणोऽपि नावधारयति" [ ] इत्येतदपि असदभिधानम्, प्रतिक्षणविशरारुतायाः कुतश्चिदपि अनीक्षणात्।

[एकान्तक्षणिकाक्षणिकत्वे निरस्य तदुभयात्मकत्वसाधनम्]

अत एव क्षणिकत्वैकान्ते सत्त्वादिहेतुरुपादीयमानः सर्व एव विरुद्धः अनेकान्त एव तस्य संभवात्। तथाहि—अर्थक्रियालक्षणं सत्त्वम् न चासौ तदेकान्ते क्रम-यौगपद्याभ्यां संभवति, यतः 'यस्मिन् सत्येव यद् भवति तत् तस्य कारणम् इतरच्च कार्यम्' इति कार्यकारणलक्षणम् क्षणिके च कारणे सति यदि कार्योत्पत्तिर्भवेत् तदा कार्य-कारणयोः सहोत्पत्तेः किं कस्य कारणम् किं वा कार्यं व्यवस्थाप्येत त्रैलोक्यस्य च एकक्षणवर्तिता प्रसज्येत। 'यदनन्तरं यद् भवति तत् तस्य कार्यम् इतरत् कारणम्' इति व्यवस्थायां कारणाभिमते वस्तुनि असत्येव भवतस्तदनन्तरभावित्वस्य दुर्घटत्वात् चिरतरविनष्टादपि च तस्य भावो भवेत् तदभावाविशेषात्। न च अनन्तरस्यापि कार्योत्पत्तिकालमप्राप्य विनाशमनुभवतश्चिरातीतस्येव कारणता यतः अर्थक्रिया क्षणक्षयेण विरुध्येत प्राक्कालभावित्वेन कारणत्वे सर्वं प्रति सर्वस्य कारणता प्रसज्येत सर्ववस्तुक्षणानां विवक्षितकार्यं प्रति प्राग्भावित्वाविशेषात् तथा च स्वपरसंतानव्यवस्थाऽपि अनुपपन्नैव स्यात्। न च सादृश्यात् तद्व्यवस्था सर्वथा सादृश्ये कार्यस्य कारणरूपताप्रसक्तेरेकक्षणमात्रं संतानः प्रसज्येत, कथंचित्सादृश्येऽनेकान्तवादप्रसक्तिः न च सादृश्यं भवदभिप्रायेण अस्ति सर्वत्र वैलक्षण्याविशेषात् अन्यथा स्वकृतान्तप्रकोपात्। न च क्षणिकैकान्तवादिनः अन्वय-व्यतिरेकप्रतिपत्तिः संभवतीति साध्य-साधनयोस्त्रिकालविषययोः साकल्येन व्याप्तेरसिद्धेः यत् सत् तत् सर्वं क्षणिकम् संश्च शब्द इत्याद्यनुमानप्रवृत्तिः कथं भवेत्? अकारणस्य च प्रमाणविषयत्वानभ्युपगमे साध्य-साधनयोस्त्रिकालविषयव्याप्तिग्रहणस्य दूरोत्सारितत्वात् "नाननुकृतान्वयव्यतिरेकं कारणम् नाकारणं विषयः" [ ] इति वचनमनुमानोच्छेदकं च प्रसक्तम् ग्राह्यग्राहकाकारज्ञानैकत्ववद् ग्राह्याकारस्यापि युगपदनेकार्थावभासिनश्चित्रैकरूपता एकान्तवादं प्रतिक्षिपत्येव भ्रान्त्यात्मनश्च दर्शनस्य अन्तर् बहिश्च अभ्रान्तात्मकत्वं कथंचिद् अभ्युपगन्तव्यम् अन्यथा कथं स्वसंवेदनाध्यक्षता तस्य भवेत् तदभावे च कथं तत्स्वभावसिद्धिर्युक्ता? कथं च भ्रान्तज्ञानं भ्रान्तिरूपतया आत्मानमसंविदद् ज्ञानरूपतया वा अवगच्छद् बहिस्तथा नावगच्छेत् यतो भ्रान्तैकान्तरूपता तिमिराद्युपप्लुतदृशां भवेत्? कथं च भ्रान्तविकल्पज्ञानयोः स्वसंवेदनमभ्रान्तमविकल्पं वा अभ्युपगच्छन् अनेकान्तं नाभ्युपगच्छेत्? ग्राह्यग्राहकसंवित्त्याकारविवेकं संविदः स्वसंवेदनेनासंवेदयन् संविद्रूपतां च अनुभवन् कथं क्रमभाविनोर्विकल्पेतरात्मनोरनुगतसंवेदनात्मानमनुभवप्रसिद्धं प्रतिक्षिपेत्? ततः क्रम-सहभाविनः परस्पर-

१ **तथैव नि**—बृ० वा० बा०। **तथेति नि**-आ० वि०। **तथैति नि**-हा०।

२ "अयं सौगतः 'यथादर्शनमेव मानमेयफलस्थितिः क्रियते न पुनर्यथातत्त्वं सा क्रियते' इत्येवं ब्रूयात्"—सिद्धिवि० टि० लि० पृ० १२२ पं० २२।

३-**इये नैका**—बृ० विना। ४ **कथं न भ**—वा० बा० भां० मां०। ५-**या चाव**-वा० बा० भां० मां०। ६ **भ्रान्तावि**-भां० मां०। ७-**वेकसं**-वा० बा० भां० मां० विना।

विलक्षणान् स्वभावान् यथावस्थितरूपतया व्याप्नुवत् सकललोकप्रतीतं स्वसंवेदनम् अनेकान्ततत्त्वव्यवस्थापकमेकान्तवादप्रतिक्षेपि प्रतिष्ठितमिति 'निरंशक्षणिकस्वलक्षणमन्तर्बहिश्चानिश्चितमपि संवित्तिर्विषयीकरोति' इति कल्पना अयुक्तिसंगतैव अप्रमाणप्रसिद्धकल्पनायाः सर्वत्र निरङ्कुशत्वात् सकलसर्वज्ञताकल्पनप्रसक्तेः न हि एकस्य संवित्तिः अपरस्य असंवित्तिः सर्वत्र संबन्धाभावाविशेषात् न हि वास्तवसंबन्धाभावे परिकल्पितस्य तस्य नियामकत्वं युक्तम् अतिप्रसङ्गात्। न च वास्तवः संबन्धः परस्य सिद्धः इति तादात्म्य-तदुत्पत्त्योरभावात् साध्य-साधनयोः प्रतिबन्धनियमाभावे अनुमानप्रवृत्तिर्दूरोत्सारितैव।

अथ क्षणिकान्निवर्तमानमपि अर्थक्रियालक्षणं सत्त्वमक्षणिके अवस्थास्यतीति न ततोऽनेकान्तात्मकवस्तुसिद्धिः, न; अक्षणिकेऽपि क्रमयौगपद्याभ्यां तस्य विरोधात्। तथाहि—न तावद् अक्षणिकस्य क्रमवत् कार्यकरणम् प्राक् तत्करणसमर्थस्य अभिमतक्षणवत् तदकरणविरोधात्। प्राक् तदसामर्थ्ये पश्चादपि न तत्सामर्थ्यम् अपरिणामिनोऽनाधेयाऽप्रहेयातिशयत्वात् स्वभावोत्पत्तिविनाशाभ्युपगमेऽपि नित्यैकान्तवादविरोधात्। ततो व्यतिरिक्तस्य अतिशयस्य करणे अनतिशयस्य तस्य प्रागिव पश्चादपि तत्करणासंभवात्। सहकारिकारणापेक्षाऽपि तस्य अयुक्तैव यतोऽसहायस्य प्रागकरणस्वभावस्य पुनः ससहायस्य कार्यकरणं भवेत् न हि सहकारिकृतमतिशयमनङ्गीकुर्वतस्तदपेक्षा उपपत्तिमती। तन्न क्रमेण अपरिणामी भावः कार्यं निर्वर्तयति। नापि यौगपद्येन, कालान्तरे तस्याकिञ्चित्करत्वेनावस्तुत्वापपत्तेः क्षणमात्रावस्थायित्वप्रसक्तेः। न च क्रम-यौगपद्यव्यतिरिक्तं प्रकारान्तरं संभवतीति अर्थक्रिया व्यापिका निवर्तमाना व्याप्यां सत्तां नित्यादपि आदाय निवर्तते इति यत् सत् तत् सर्वमनेकान्तात्मकं सिद्धम् अन्यथा प्रत्यक्षादिविरोधप्रसक्तेः न हि भेदमन्तरेण कदाचित् कस्यचिद् अभेदोपलब्धिः हर्ष-विषादाद्यनेकाकारविवर्तात्मकस्य अन्तश्चैतन्यस्य स्वसंवेदनाध्यक्षतः वर्ण-संस्थान-सदाद्यनेकाकारस्य स्थूलस्य पूर्वापरस्वभावपरित्यागोपादानात्मकस्य घटादेर्बहिरेकस्य इन्द्रियजाध्यक्षतः संवेदनात् सुखादि-रूपादिभेदविकलतया चैतन्य-घटादेः कदाचिदपि उपलम्भागोचरत्वात् महासामान्यस्य अवान्तरसामान्यस्य वा सर्वगताऽसर्वगतधर्मात्मकस्य व्यक्तिव्यतिरिक्तस्वभावतया कदाचित् क्वचिद् अनुपलब्धेः द्रव्य-गुण-कर्मणां कथं तद्विशिष्टतया प्रतिपत्तिर्भवेत्? समवायस्य च अनवस्थादोषतः संबन्धान्तराभावाद् द्रव्य-गुण-कर्म-सामान्य-विशेषाणामन्योन्यं तादात्म्यानिष्टौ तेषु अवृत्तेः सर्वपदार्थस्वरूपाऽप्रसिद्धिः स्यात्। स्वत एव समवायस्य द्रव्यादिषु वृत्तौ समवायमन्तरेणापि द्रव्यादयोऽपि स्वाधारेषु वृत्तिं स्वत एव आत्मसात्करिष्यन्तीति समवायकल्पनावैयर्थ्यप्रसक्तिः। अवयविनोऽपि स्वारम्भकावयवेषु तादात्म्यानभ्युपगमे सामान्यस्येव तद्वत्सु वृत्तिविकल्पानवस्थादिदोषप्रसङ्गान्न वृत्तिर्भवेत् वृत्तौ वा साकल्येन प्रत्याधारं ग्रहणासंभवात् व्यक्तिवद् भेदप्रसक्तिः खण्डशः प्रतिपत्तेः अगृहीतस्वभावाद् गृहीतस्वभावस्य भेदात् तथा च सामान्यादिरूपताहानिप्रसक्तिः।

किञ्च, सर्वैकाधारव्यापिनः सामान्यस्य द्रव्यस्य वा तद्वतां सामस्त्येन ग्रहणासंभवात् कथं तद्ग्रहे तद्ग्रहणं भवेत् आधाराप्रतिपत्तौ तदाधेयस्य तत्त्वेनाप्रतिपत्तेः सामान्याद्यंशेषु गृहीतेष्वपि सामान्यादेर्वृत्तिविकल्पादिदोषस्तेष्वपि पूर्ववत् समानः तदंशग्रहणेऽपि च सामान्यस्य व्यापिनः कदाचिद् अपि अप्रतिपत्तेः 'सद् द्रव्यम्' इत्यादिप्रतिपत्तिस्तद्वत्सु न कदाचिद् भवेत् तदंशानां सामान्यादेरत्यन्तभेदात् अत एव द्रव्यादिषट्पदार्थव्यवस्थाऽपि अनुपपन्ना भवेत् प्रतिभासगोचरचारिणां सामान्याद्यंशानां पदार्थान्तरताप्रसक्तेः। अथ निरंशं सामान्यमभ्युपगम्यत इति नायं दोषस्तर्हि सकलस्वाश्रयप्रतिपत्त्यभावतो मनागपि न सामान्यप्रतिपत्तिरिति 'सद् द्रव्यं पृथिवी' इत्यादिप्रतिपत्तेर्निंतरामभावः स्यात्। तदंशानां सामान्याद् भेदाभेदकल्पनायां द्रव्यादय एव भेदाभेदात्मकाः किं नाभ्युपगम्यन्ते इति सामान्यादिप्रकल्पना दूरोत्सारितैव इति कुतस्तद्भेदैकान्तकल्पना? ततः सामान्यविशेषात्मकं सर्वं वस्तु सत्त्वात् न हि विशेषरहितं सामान्यमात्रम् सामान्यरहितं वा विशेषमात्रं संभवति। तादृशः क्वचिदपि वृत्तिविरोधात् वृत्त्या हि सत्त्वं व्याप्तं स्वलक्षणात् सामान्यलक्षणाद् वा तादृशाद् वृत्तिनिवृत्त्या निवर्तत एव यतः क्वचिद् वृत्तिमतोऽपि स्वलक्षणस्य न देशान्तरवर्तिना

१-**वानन्यथा**-वा० बा० भां० मां०। २ अत्र लिपिकारभ्रमः आत्मनेपदमनित्यमिति न्यायाद्वा समर्थनीयम्। ३ **तत्कार**-भां० मां०। ४ **वृत्तिः स्वतोपि** बृ० आ०।

अन्येन संयोगः तत्संसर्गाव्यवच्छिन्नस्वभावान्तरविरहाद् विशेषविकलसामान्यवत् एकस्य प्रति-संबन्धि संबन्धस्वभावविशेषाभ्युपगमे विशेषाणां तत्स्वलक्षणं सामान्यलक्षणमेव स्यात् । न च विशेषैरन्यदेशस्थितैरसंयुक्तस्यैकत्र तस्य वृत्तिः अव्यवधानाविशेषात् एवं च स्वभावविशेषाणां सामान्यरूपाः सर्वे एव भावाः विशेषरूपाश्च । तत्र देश-कालावस्थाविशेषनियतानां सर्वेषामपि सत्त्वं सामान्यमेकरूपम् अव्यवधानात् तस्य च ते विशेषा एव अनेकं रूपम् यतः तदेव सत्त्वं परिणाम-विशेषापेक्षया गोत्व-ब्राह्मणत्वादिलक्षणा जातिः परिणामविशेषाश्च तदात्मका व्यक्तयः इति परस्पर-व्यावृत्तानेकपरिणामयोगाद् एकस्य एकानेकपरिणतिरूपता संशयज्ञानस्येव अविरुद्धा व्यक्तिव्यति-रिक्तस्य सामान्यस्य उपलब्धिलक्षणप्राप्तस्य अनुपलब्धेः शशशृङ्गवत् असत्त्वात् 'सन् घटः' इत्यादि-प्रत्ययः सामान्यविशेषात्मकवस्त्वभावे अबाधितरूपो न स्यात् । न च चक्षुरादिबुद्धौ वर्णाकृत्यक्षराका-रशून्यं सामान्यं परव्यावर्णितस्वरूपमवभासते प्रतिभासभेदप्रसङ्गात् । यदि च तत् सर्वगतम् पिण्डा-न्तरालेऽपि उपलभ्येत स्वभावाविशेषात् । आश्रयाभावात् अनभिव्यक्तयभ्युपगमे अभिव्यक्ताद् अनभिव्यक्तस्वरूपस्य भेदात् सामान्यरूपता न स्यात् । न च आश्रयभावाभावौ अभिव्यक्तयन-भिव्यक्ती सत्प्रत्ययकर्तृत्वाऽकर्तृत्वे नित्यैकस्वभावस्य युज्येते, तद्रूपयोगिनोऽप्येकत्वे कथं नानेका-न्तसिद्धिः ? स्वाश्रयसर्वगतत्वेऽपि सत्ताया आश्रयेण एकेन एकदा प्रकाशितायाः सर्वदा सर्वत्र प्रका-शितत्वात् सकलवस्तुप्रपञ्चस्य सकृद् उपलब्धिप्रसङ्गः न वा कस्यचिद् उपलब्धिः स्यात् अविशेषात् । प्रकारान्तरेण प्रतीत्यभ्युपगमे अनेकान्तवाद एव । स्वतः सतां विशेषाणां सत्तासंबन्धानर्थक्यम् असतां तत्संबन्धानुपपत्तिः अतिप्रसक्तेः । अक्रियसामान्यसंबन्धाद् व्यक्तीनामक्रियत्वम् सामान्यस्य वा क्रिया-वत्त्वाद् अव्यापकत्वं स्यात् । व्यक्तयव्यतिरेके व्यक्तिस्वलक्षणवत् तत् सामान्यमेव न भवेत् व्यक्तीनां वा सामान्याव्यतिरेकात् व्यक्तिस्वरूपहानेः सामान्यस्य तद्रूपता न भवेत् । न च व्यतिरेकाव्यतिरेक-पक्षेऽपि अनवस्थोभयपक्षदोष-वैयधिकरण्य-संशयविरोधादिदोषप्रसङ्गात् सर्वथा तदभावः, अन-वस्थादिदोषस्य प्राक् प्रतिषिद्धत्वात् प्रतीयमानेऽपि तथाभूते वस्तुनि विरोधादिदोषासञ्जने प्रकारान्तरेण प्रतिभासासंभवात् सर्वशून्यताप्रसङ्गः । न च सैवास्तु इति वक्तव्यम् स्वसंवेदनमात्र-स्यापि अभावप्रसङ्गतः निष्प्रमाणिकायाः तस्या अपि अभ्युपगन्तुमशक्यत्वात् तथापि तस्या अभ्यु-पगमे वरमनेकान्तात्मकं वस्तु अभ्युपगन्तव्यम् तस्य अबाधितप्रतीतिगोचरत्वात् ।

तेन रूपादिक्षणिकविज्ञानमात्र-शून्यवादाभ्युपगमः तथा पृथिव्याद्येकान्तनित्यत्वाभ्युपगमः तथा आत्माद्यद्वैताङ्गीकरणम् तथा परलोकाभावनिरूपणम् द्रव्य-गुणादेरत्यन्तभेदप्रतिज्ञानं च तथा हिंसातो धर्माभ्युपगमः दीक्षातो[2] मुक्तिप्रतिपादनम् इत्याद्येकान्तवादिप्रसिद्धं सर्वमसत् प्रतिपत्तव्यम् तत्प्रतिपादनहेतूनां प्रदर्शितनीत्या अनेकान्तव्याप्तत्वेन विरोधात् इतरधर्मसव्यपेक्षस्यैकान्तवाद्यभ्युप-गतस्य सर्वस्य पारमार्थिकत्वात् अभिष्वङ्गादिप्रतिषेधार्थं विज्ञानमात्राद्यभिधानस्य सार्थकत्वात् । तथाहि—'अहमस्यैव अहमेवास्य' इति एकान्तनित्यत्वस्वस्वामिसंबन्धाभिनिवेशप्रभवरागादिप्रतिषे-धपरं क्षणिकरूपादिप्रतिपादनं युक्तमेव । सालम्बनज्ञानैकान्तप्रतिषेधपरं विज्ञानमात्राभिधानम् । सर्वविषयाभिष्वङ्गनिषेधप्रवणं शून्यताप्रकाशनम् । 'क्षणिक एवायं पृथिव्यादिः' इति एकान्ताभिनिवे-शमूलद्वेषादिनिषेधपरं तन्नित्यत्वप्रणयनम् । जात्यादिमदोन्मूलतानुगुण्यमात्माद्यद्वैतप्रकाशनम् । 'जन्मान्तरजनितकर्मफलभोक्तृत्वमेव धर्मानुष्ठानम्' इति एकान्तनिरासप्रयोजनं परलोकाभावावबो-धनम् । द्रव्याद्यव्यतिरेकैकान्तप्रतिषेधाभिप्रायं तद्भेदाख्यानम् । अप्रमत्तस्य योगनिबन्धनप्राण-व्यपरोपणस्य अहिंसात्वप्रतिपादनार्थं 'हिंसातो धर्मः' इति वचनम्, राग-द्वेष-मोह-तृष्णादिनिब-न्धनस्य प्राणव्यपरोपणस्य दुःखसंवेदनीयफलनिर्वर्तकत्वेन हिंसात्वोपपत्तेः अत एव वैदिकहिंसाया अपि तन्निमित्तत्वे अपायहेतुत्वमन्यहिंसावत् प्रसक्तम् न च तस्या अतन्निमित्तत्वम्, "चित्रया यजेत पशुकामः[3]" [ ] इति तृष्णानिमित्तश्रवणात् । न चैवंविधस्य वाक्यस्य प्रमाणताऽपि उपपत्तिमती तत्प्राप्तिनिमित्ततद्धिंसोपदेशकत्वात् तृष्णादिवृद्धिनिमित्ततदन्यतद्विघातोपदेशवाक्य-

१-ति संबन्धे सं-बृ० ।-ति संबन्ध-वा० बा० । २-तो युक्ति—भां० मां० ।
३ "चित्रया यजेत पशुकामः"—१-४-३ शाबरभा० पृ० ६० पं० ९ ।

धत् । न च अपौरुषेयत्वादस्य प्रामाण्यम् तस्य निषिद्धत्वात् । न च पुरुषप्रणीतस्य हिंसाविधायकस्य तस्य प्रामाण्यम् 'ब्राह्मणो हन्तव्यः' इति वाक्यवत् । न च वेदविहितत्वात् तद्धिंसाया अहिंसात्वम् प्रकृतहिंसाया अपि तत्त्वोपपत्तेः । न च "ब्राह्मणो न हन्तव्यः" [ ] इति तद्वाक्यबा-धितत्वान्न प्रकृतहिंसायास्तद्धितत्वम् "नं वै हिंस्रो भवेत्" [ ] इति वेदवाक्य-बाधितचित्रादियजनवाक्यविहितहिंसावत् प्रकृतहिंसायास्तद्धितत्वोपपत्तेः । अथ 'ब्राह्मणो हन्तव्यः' इति वाक्यं न क्वचिद् वेदे श्रूयते, न; उत्सन्नानेकशाखानां तत्राभ्युपगमात् तथा च "सहस्रवर्त्मा सामवेदः[3]" [ ] इत्यादिश्रुतिः । अथ यज्ञाद् अन्यत्र हिंसाप्रतिषेधः तत्र च तद्विधानम् यथा च "अन्यत्र हिंसा अपायहेतुः" [ ] इत्यागमात् सिद्धम् तथा तत एव तत्र स्वर्गहेतुः इत्यपि सिद्धम् न च यद् एकदा एकत्र अपायहेतुः तत् सर्वदा सर्वत्र तथेत्यभ्युपगन्तव्यम् आतुर-स्वस्थभुजिक्रियावत् अवस्थादिभेदेन भावानां परस्परविरुद्धफलकर्तृत्वोपलम्भात्, असम्यगे-तत्; तृष्णादिनिमित्तहिंसाया अपायहेतुत्वेन सर्वशास्त्रेषु प्रसिद्धेः तृष्णादिनिमित्ता च प्रकृतहिंसेति प्रतिपादितत्वात् । न च यन्निमित्तत्वेन यत् प्रसिद्धम् तत् फलान्तरार्थित्वेन विधीयमानमौत्सर्गिकं दोषं न निवर्तयति, यथा आयुर्वेदप्रसिद्धं दाहादिकं रुगपगमार्थितया विधीयमानं स्वनिमित्तं दुःखं क्लिष्टकर्मसंबन्धहेतुतया च मखविधानाद् अन्यत्र हिंसादिकं शास्त्रे प्रसिद्धमिति सप्ततन्तावपि तद् विधीयमानं काम्यमानफलसद्भावेऽपि तत्कर्मनिमित्तं तद् भवत्येव । न च हिंसातः स्वर्गादिसुखप्राप्तौ असुखनिर्वर्तकक्लिष्टकर्महेतुता असंगता नरेश्वराराधननिमित्तब्राह्मणादिवधानन्तरावासग्रामादिला-भजनितसुखसंप्राप्तौ तद्वधस्यापि तथात्वोपपत्तेः । अथ ग्रामादिलाभो ब्राह्मणादिवधनिर्वर्तितादृष्टनि-मित्तो न भवति तर्हि स्वर्गादिप्राप्तिरपि अध्वरविहितहिंसानिर्वर्तिता न भवतीति समानम् । अथ अश्वमेधादौ आलभ्यमानानां छागादीनां स्वर्गप्राप्तेर्न तद्धिंसा हिंसेति तर्हि संसारमोचकविरचिताऽपि तत एव हिंसा न हिंसा स्यात् देवतोद्देशतो म्लेच्छादिविरचिता च ब्राह्मण-गवादिहिंसा च न हिंसा स्यात् । अथ तदागमस्य अप्रमाणत्वान्न तदुपदेशजनिता हिंसा अहिंसेति, ननु वेदस्य कुतः प्रामा-ण्यसिद्धिः ? न गुणवत्पुरुषप्रणीतत्वात्, परैस्तस्य तथाऽनभ्युपगमात् । न अपौरुषेयत्वात्, तस्य असंभवात् । तन्न प्रदर्शिताभिप्रायाद् विना हिंसातो धर्मावाप्तिर्युक्ता ।

परमप्रकर्षावस्थज्ञान-दर्शन-चारित्रात्मकमुक्तिमार्गस्य 'दीक्षा'शब्देन अभिधाने दीक्षातो मुक्ति-रुपपन्नैव अविकलकारणस्य कार्यनिर्वर्तकत्वात् अन्यथा कारणत्वायोगात् । तत्र तद्भक्त्युत्पादनार्थं चैवमभिधानाद् अदोषः न हि तद्भक्त्यभावे उपादेयफलप्राप्तिनिमित्तसम्यग्ज्ञानादिपुष्टिनिमित्तदीक्षा-प्रवृत्तिप्रवणो भवेत् । तन्न अन्यपरत्वं प्रदर्शितवचसामभ्युपगन्तव्यम् तथाऽभ्युपगमे वा अनाप्तत्वं तद्वादिनां प्रसज्येत तत्र पूर्वोक्तदोषानतिवृत्तेः ॥ ६० ॥

[विवेचनविकलामागमस्य प्रतिपत्तिमाश्रयतां तत्त्वानभिज्ञत्वख्यापनम्]

ये तु अविवेचितागमप्रतिपत्तिमात्रमाश्रयन्ते ते अनवगतपरमार्था एव इति प्रतिपादयन्नाह—

पाडेक्कनयपहगयं सुत्तं सुत्तहरसदसंतुट्ठा ।
अविकोवियसामत्था जहागमविभत्तपडिवत्ती ॥ ६१ ॥

प्रत्येकनयमार्गगतं सूत्रम्–"क्षणिकाः सर्वसंस्काराः विज्ञानमात्रमेवेदं भो जिनपुत्राः ! यद् इदं त्रैधातुकम्" [ ] इति, "ग्राह्यग्राहकोभयशून्यं तत्त्वम्" इति, "नित्यमेकमण्डव्यापि निष्क्रियम्" [ ] इत्यादि, "सदकारणवद् नित्यम्" [वैशेषिकद० ४-१-१] इति, "आत्मा वे श्रोतव्यो ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः" [बृहदा० उ० २-४-५] इत्यादि, "सत्ता-द्रव्यत्वसंबन्धात् सद्द्रव्यं वस्तु" [ ] इति, "परलो-किनोऽभावात् परलोकाभावः" [ ] "चोदनालक्षणोऽर्थो धर्मः" [मीमांसाद० १-१-२]

१ "न जातु ब्राह्मणं हन्यात्"—अ० ८ श्लो० ३८० मनुस्मृ० । २ न च हिं—वा० बा० । ३ "सहस्रवर्त्मा सामवेदः"—१-१-१ महाभा० पृ० ६५ पं० १ । ४-स्वस्थसुभु-भां० मां० । ५ पृ० ७१ पं० २९ ।

इति, "धर्माधर्मक्षयंकरी दीक्षा" [ ] इत्यादिकमधीत्य 'सूत्रधरा वयम्' इति शब्द-मात्रसंतुष्टा गर्ववन्तः अविकोविदसामर्थ्याः अविकोविदम् अज्ञं सामर्थ्यं येषां ते तथाऽविदित-सूत्रव्यापारविषया इति यावत् । किमित्येवं ते? इत्याह—यथाश्रुतमेव अविभक्ता अविवेकेन प्रतिपत्तिरेषामिति कृत्वा सूत्राभिप्रायव्यतिरिक्तविषयविप्रतिपत्तित्वात् इतरजनवद् अज्ञा इत्यभि-प्रायः । अथवा स्वयूथ्या एव एकनयदर्शनेन कतिचित् सूत्राणि अधीत्य केचित् 'सूत्रधरा वयम्' इति गर्विता यथावस्थितान्यनयसव्यपेक्षसूत्रार्थापरिज्ञानाद् अविदितात्मविद्वत्स्वरूपा इति गाथाभि-प्रायः ॥ ६१ ॥

[निरपेक्षैकनयप्रवृत्तानां दोषोद्भावनम्]

अथ एषामेकनयदर्शनेन प्रवृत्तानां यो दोषस्तमुद्भावयितुमाह—

सम्मद्दंसणमिणमो सयलसमत्तवयणिज्जणिद्दोसं ।
अत्तुक्कोसविणट्ठा सलाहमाणा विणासेंति ॥ ६२ ॥

सम्यग्दर्शनमेतत् परस्परविषयाऽपरित्यागप्रवृत्तानेकनयात्मकम् तच्च 'स्यान्नित्यः' इत्यादि सकलधर्मपरिसमाप्तवचनीयतया निर्दोषम्, एकनयवादिनस्त्वविषये सूत्रव्यवस्थापनेन आत्मोत्कर्षेण विनष्टाः स्याद्वादाभिगमं प्रति अनाद्रियमाणा 'वयं सूत्रधराः' इत्यात्मानं श्लाघमानाः सम्यग्दर्शनं विनाशयन्ति—तदात्मनि न व्यवस्थापयन्तीति यावत् ॥ ६२ ॥

[न शासनभक्तिमात्रेण नाप्यांशिकज्ञानमात्रेणानेकान्तप्ररूपणाकुशल इति कथनम्]

अथ न ते आगमप्रत्यनीकाः तद्भक्तत्वात् तद्देशपरिज्ञानवन्तश्चेति कथं तद् विनाशयन्तीति? अत्राह—

ण हु सासणभत्तीमेत्तएण सिद्धंतजाणओ होइ ।
ण विजाणओ वि णियमा पण्णवणाणिच्छिओ णामं ॥ ६३ ॥

न च शासनभक्तिमात्रेणैव सिद्धान्तज्ञाता भवति—न च तदज्ञानवान् भावसम्यक्त्व-वान् भवति अज्ञातस्य अर्थस्य विशिष्टरुचिविषयत्वानुपपत्तेः तद्भक्तिमात्रेण श्रद्धानुसारितया द्रव्य-सम्यक्त्वम् । मार्गानुसार्यवबोधमात्रानुषक्तरुचिस्वभावं तु सदपि न भावसम्यक्त्वसाध्यफलनिर्वर्तकम् भावसम्यक्त्वनिमित्तत्वेनैव तस्य द्रव्यसम्यक्त्वरूपत्वोपपत्तेः । न च जीवादितत्त्वैकदेशज्ञाताऽपि नियमतोऽनेकान्तात्मकवस्तुस्वरूपप्रज्ञापनायां निश्चितो भवति एकदेशज्ञानवतः सकलधर्मा-त्मकवस्तुज्ञानविकलतया सम्यक् तत्प्ररूपणाऽसंभवात् । तथाहि—सर्वज्ञो यथावस्थितैकदेशज्ञः जीवादिसकलतत्त्वज्ञता तु आगमविदः सामान्यरूपतया अभिधीयते "मति-श्रुतयोर्निबन्धो द्रव्येष्व-सर्वपर्यायेषु" [तत्त्वार्थ० १-२७] इति वचनात् ।

[तत्त्वसप्तके निरूप्ये पूर्वं जीवाजीवौ निरूप्य तत्र कणादादिसंमततत्त्वानामन्तर्भावप्रदर्शनम्]

तत्त्वं तु जीवाऽजीवास्रव-बन्ध-संवर-निर्जरा-मोक्षाख्याः सप्त पदार्थाः । तत्र चेतनालक्षणोऽर्थो जीवः, तद्विपरीतलक्षणस्तु अजीवः, धर्माधर्माकाशकालपुद्गलभेदेन त्वसौ पञ्चधा व्यवस्थापितः । एत-त्पदार्थद्वयान्तर्वर्तिनश्च सर्वेऽपि भावाः न हि रूप-रस-गन्ध-स्पर्शादयः साधारणासाधारणरूपा मूर्ता-

---

१–जनपदवज्ञानिन इत्य–भां० मां० ।–जनपदवद्ज्ञान इत्य–बृ० आ० हा० वि० । २ णाम मु० मू० ।

३ प्रायो बहुषु आदर्शेषु तत्र च बहुषु स्थलेषु तालव्यशकारस्योपलम्भेऽपि क्वचित् क्वचिद् दन्त्यसकारस्य दर्शनात् तस्यैव च प्रकृते शुद्धतरत्वात् तथैव च ग्रन्थान्तरसंवाददर्शनात् पाठान्तरवैषम्यपरिहाराय लाघवाय एकविधपाठपरिग्रहाय च सर्वत्र दन्त्यसकारविशिष्टं रूपमङ्गीकृत्य 'आस्रव'पदमेव उपयुक्तमत्रास्माभिः न तु 'आश्रव'पदम् ।

ऽमूर्तचेतनाऽचेतनद्रव्यगुणाः, उत्क्षेपणाऽपक्षेपणादीनि च कर्माणि, सामान्य-विशेष-समवायाश्च जीवाऽजीवव्यतिरेकेण आत्मस्थितिं लभन्ते तद्भेदेन एकान्ततस्तेषामनुपलम्भात् तेषां तदात्मकत्वेन प्रतिपत्तेः अन्यथा तदसत्त्वप्रसक्तेः । ततो जीवाजीवाभ्यां पृथक् जात्यन्तरत्वेन द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाः न वाच्याः । एवम् प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानि च न पृथग् अभिधानी-यानि । तथा,

"प्रकृतेर्महान् महतोऽहंकारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि" ॥ [सांख्यका० का० २२] इति

चतुर्विंशतिः पदार्थाः पुरुषश्चेति न वक्तव्यम् । तथा, दुःख-समुदा(द)य-मार्ग-निरोधाश्चत्वारि आर्य-सत्यानि इति न वक्तव्यम् । तथा पृथिवी आपः तेजः वायुः इति तत्त्वानि इति न वक्तव्यम् । तत्प्रभेद-रूपतया अभिधानेऽपि न दोषः जात्यन्तरकल्पनाया एव अघटमानत्वात् राशिद्वयेन सकलस्य जगतो व्याप्तत्वात् तदव्याप्तस्य शशशृङ्गतुल्यत्वात् । शब्दब्रह्माद्येकान्तस्य च प्राक् प्रतिषिद्धत्वात् अबाधित-रूपोभयप्रतिभासस्य तथाभूतवस्तुव्यवस्थापकस्य प्रसाधितत्वात् विद्याऽविद्याद्वयभेदाद् द्वैतकल्पना-यामपि त्रित्वप्रसक्तेः । बाह्यालम्बनभूतभावापेक्षया विद्यात्वोपपत्तेः अन्यथा निर्विषयत्वेन उभयोर-विशेषात् तत्प्रतिभागस्य अघटमानत्वात् न हि द्वयोर्निरालम्बनत्वे विपर्यस्ताऽविपर्यस्तज्ञानयोरिव विद्याविद्यात्वभेदः ततो नाद्वयं वस्तु, नापि तद्व्यतिरिक्तमस्ति ।

अथ आस्रवादीनामपि अनुपपत्तिः राशिद्वयेन सकलस्य व्याप्तत्वात्, न; ततस्तेषां कथंचिद् भेदप्रतिपादनार्थत्वात् अनयोरेव तथापरिणतयोः सकारणसंसार-मुक्तिप्रतिपादनपरत्वात् तथाभि-धानस्य अनेन वा क्रमेण तज्ज्ञानस्य मुक्तिहेतुत्वप्रदर्शनार्थत्वात् विप्रतिपत्तिनिरासार्थत्वाद् वा तद-भिधानस्य अदुष्टता । तथाहि—आस्रवति कर्म यतः स आस्रवः काय-वाग्-मनोव्यापारः स च जीवाजीवाभ्यां कथंचिद् भिन्नः तथैव प्रतीतिविषयत्वात् । अथ बन्धाभावे कथं तस्योपपत्तिः? प्राक् तत्सद्भावे वा न तस्य बन्धहेतुता न हि यद् यद्धेतुकं तत् तदभावेऽपि भवति अतिप्रसङ्गात्, असदे-तत्; पूर्वोत्तरापेक्षया अन्योन्यं कार्यकारणभावनियमात् । न च इतरेतराश्रयदोषः प्रवाहापेक्षया अनादित्वात् । पुण्यापुण्यबन्धहेतुतया चासौ द्विविधः उत्कर्षाऽपकर्षभेदेन अनेकप्रकारोऽपि दण्ड-गुप्त्यादित्रित्वादिसंख्याभेदमासादयन् फलानुबन्ध्यननुबन्धिभेदतः अनेकशब्दविशेषवाच्यतामनु-भवति एकान्तवादिनां च नायं संभवतीति कम्मं जोगनिमित्तं [प्र० का० गा० १९] इति गाथार्थं प्रदर्शयद्भिः प्राक् प्रतिपादितत्वात् । तन्निमित्तः सकषायस्य आत्मनः कर्मवर्गणापुद्गलैः संश्लेषविशेषो बन्धः स च सामान्येन एकविधोऽपि प्रकृति-स्थित्यनुभाग-प्रदेशभेदेन चतुर्धा पुनः एकैको ज्ञानावरणीयादि-मूलप्रकृतेभेदाद्दृष्टविधः पुनरपि मत्यावरणाद्युत्तरप्रकृतिभेदाद् अनेकविधः अयं च कश्चित् तीर्थकरत्वादिफलनिर्वर्तकत्वात् प्रशस्तः अपरश्च नारकादिफलनिर्वर्तकत्वाद् अप्रशस्तः प्रशस्ताऽप्रशस्तात्मपरिणामोद्भूतस्य कर्मणः सुख-दुःखसंवेदनीयफलनिर्वर्तकत्वात् ।

---

१ कणादमतमेतत्, अस्य स्थापन-निरसने पूर्वं समायाते द्रष्टव्ये । २ अक्षपादमतमेतत् ।

३ न्यायद० १-१-१ । ४ "प्रकृतेर्महान् ततोहंकार"–सांख्यका० ।

५ बौद्धमते दुःखकारणभूतद्वितीयार्यसत्यपरत्वं समुदयपदस्य प्रसिद्धम् । तद्यथा–
"समुदेति यतो लोके रागादीनां गणोऽखिलः । आत्मात्मीयभावाख्यः समुदयः स उदाहृतः" ॥ ६ ॥—षड्द० स० ।

६ आश्रव–बृ० विना । ७ अत्र आस्रवस्य निरूपणीयत्वेन तत्र च मनोदण्डादित्रिविधदण्डस्य समावेशेऽपि त्रिवि-धाया गुप्तेः संवररूपत्वेन आस्रवविरोधितया आस्रवे समावेशाभावात् 'दण्डागुप्त्यादि' इति पाठं कल्पयित्वा अर्थसंगतिः कर्तुमुचिता । ८ पृ० ४१८ गा० १९ ।

९ "ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः"–सांख्यका० ४४ । "ज्ञानस्य विपर्ययोऽज्ञानं तेनाज्ञानेन × × × आत्मानं निबध्नाति-न मोक्षं गच्छतीत्यर्थः × × × स च बन्धस्त्रिविधः प्रकृतिबन्धः वैकारिकबन्धः दक्षिणाबन्धश्चेति । तत्र प्रकृतिबन्धो नाम अष्टासु प्रकृतिषु परत्वेनाभिमानः" [का० ४४ माठरवृ० पृ० ६२] इत्यादिना सांख्या अपि बन्धं प्रतिपन्नाः ।

[ध्यानचतुष्कस्य सभेदप्रभेदं व्यावर्णनम्]

अप्रशस्तश्च आत्मपरिणामो द्विविधः आर्त-रौद्रभेदात् आमुहूर्तस्थायी आक्रन्दन-विलपन-परिदेवन-शोचन-परविभवविस्मय-विषयसंगादिकश्च स्वसंवेद्य आत्मनः अनुमेयश्च परेषाम् क्लिष्टः परिणामविशेष आर्तध्यानशब्दवाच्यो बाह्यः आभ्यन्तरश्च अमनोज्ञसंप्रयोगानुत्पत्त्यध्यवसानम् उत्पन्नस्य च विनाशाध्यवसायः मनोज्ञसंप्रयोगस्य उत्पत्तिकल्पनाध्यवसायः उत्पन्नस्य अविनाश-संकल्पाध्यवसानम् इत्येतत् चतुर्विधमार्तध्यानम् अमनोज्ञसंप्रयोगश्च बाह्याध्यात्मजत्वेन द्विधा-शीताऽऽतप-व्यालादिजनितो बाह्यः वात-पित्त-श्लेष्मादिप्रादुर्भूतोऽभ्यन्तरः शारीरः भय-विषा-दाऽरति-शोक-जुगुप्सा-दौर्मनस्यादिप्रभवो मानसः अयंममनोज्ञसंप्रयोगः कथं नाम मे न संपद्यत इति संकल्पप्रबन्ध आर्तध्यानम् कृष्ण-नील-कापोतलेश्याबलाधायकं प्रमादाधिष्ठानम् आप्रमत्त-गुणस्थानात् तिर्यग्-मनुष्यगतिनिर्वर्तकम् उत्कर्षाऽपकर्षभेदात् क्षायोपशमिकभावरूपं परोक्षज्ञान-रूपत्वात्। एवं रुद्रे भवं रौद्रं हिंसाऽनृत-स्तेय-संरक्षणाऽऽनन्दभेदेन चतुर्विधम् तत्र हिंसायामा-नन्दो रुचिर्यस्मिन् तद् हिंसानन्दम् एवमुत्तरत्रापि योज्यम् एतदपि बाह्याध्यात्मभेदाद् द्विविधम् परुषनिष्ठुरवचनाक्रोशनिर्भर्त्सनताडनपरदारातिक्रमाभिनिवेशादिरूपं बाह्यम्—स्वपराभ्यां स्वसंवेदना-ऽनुमानगम्यं बाह्यम्; आध्यात्मिकं हिंसायां संरम्भ-समारम्भादिलक्षणायां नैर्घृण्येन प्रवर्तमानस्य संकल्पाध्यवसानम्-संकल्पश्चिन्ताप्रबन्धस्तस्याध्यवसानम्—तीव्रकषायानुषक्तत्वं प्रथमं हिंसानन्दं नाम। परेषामनेकप्रकारैर्मिथ्यावचनैर्वञ्चनं प्रति संकल्पाध्यवसानं मृषानन्दं नाम। परद्रव्यापहरणं प्रति अनेकोपायैर्यत् तत् स्तेयानन्दम्। परिग्रहे 'मम एव इदं स्वम् अहमेव अस्य स्वामी' इति अभिनिवेशः तदपहर्तृविघातेन संरक्षणं प्रति संकल्पाध्यवसानं संरक्षणानन्दम्। चतुर्विधमप्येतत् कृष्णादिलेश्याबलाधायकं प्राक् प्रमत्तगुणस्थानात् प्रमादाधिष्ठानं कषायप्राधान्यादौदयिकभावरूपं नरकगतिफलनिर्वर्तकं पापध्यानद्वयमपि हेयम्।

उपादेयं तु प्रशस्तं धर्म-शुक्लध्यानद्वयम्। तत्र पर्वतगुहा-जीर्णोद्यान-शून्यागारादौ मनुष्याद्या-पातविकले अवकाशे मनोविक्षेपनिमित्तशून्ये सत्त्वोपघातरहिते उचिते शिलातलादौ यथासमाधानं विहितपर्यङ्कासन ऊर्ध्वस्थानस्थो वा मन्दमन्दप्राणाऽपानप्रचारः—अतिप्राणनिरोधे चेतसो व्याकुल-त्वेन एकाग्रतानुपपत्तेः—निरुद्धलोचनादिकरणप्रचारो हृदि ललाटे मस्तके अन्यत्र वा यथापरिचयं मनोवृत्तिं प्रणिधाय मुमुक्षुर्ध्यायेत् प्रशस्तं ध्यानम्। तत्र बाह्याध्यात्मिकभावानां याथात्म्यं धर्मः तस्माद् अनपेतं धर्म्यम्। तच्च द्विविधम् बाह्यम् आध्यात्मिकं च। सूत्रार्थपर्यालोचनम् दृढव्रतता शीलगुणानुरागः निभृतकायवाग्व्यापारादिरूपं बाह्यम् आत्मनः स्वसंवेदनग्राह्यमन्येषामनुमेय-माध्यात्मिकं तत्त्वार्थसंग्रहादौ चातुर्विध्येन प्रदर्शितं संक्षेपतः अन्यत्र दशविधम्। तद्यथा—अपा-योपायजीवाऽजीवविपाकविरागभवसंस्थानाज्ञाहेतुविचयानि चेति। लोक-संसारविचययोः संस्थान-भवविचययोरन्तर्भावान्नोद्दिष्टदशभेदेभ्यः पृथगभिधानम्। तत्र अपाये विचयो विचारो यस्मिन् तद् अपायविचयम्। एवम् अन्यत्रापि योज्यम्। 'दुष्टमनो-वाक्-कायव्यापारविशेषाणामपायः कथं नु नाम स्यात्' इत्येवंभूतः संकल्पप्रबन्धो दोषपरिवर्जनस्य कुशलप्रवृत्तित्वाद् अपायविचयम्। 'तेषामेव कुशलानां स्वीकरणमुपायः स कथं नु मे स्यात्' इति संकल्पप्रबन्ध उपायविचयम्। असंख्ये-यप्रदेशात्मकसाकाराऽनाकारोपयोगलक्षणाऽनादिस्वकृतकर्मफलोपभोगित्वादिजीवस्वरूपानुचिन्तनं जीवविचयम्। धर्माधर्माकाशकालपुद्गलानामनन्तपर्यायात्मकानामजीवानामनुचिन्तनमजीवविचयम् मूलोत्तरप्रकृतिभेदभिन्नस्य पुद्गलात्मकस्य मधुरकटुफलस्य कर्मणः संसारिसत्त्वविषयविपाकविशेषा-नुचिन्तनं विपाकविचयम्। 'कुत्सितमिदं शरीरकम् शुक्रशोणितसमुद्भूतम् अशुचिभूतघटोपमम् अनित्यम् अपरित्राणम् गलदशुचिनवच्छिद्रतया अशुचि आधेयशौचम् न किञ्चिदत्र कमनीयतरं समस्ति किंपाकफलोपभोगोपमाः प्रमुखरसिका विपाककटवः प्रकृत्या भङ्गुराः पराधीनाः संतोषा-मृताखादपरिपन्थिनः सद्भिर्निन्दिता विषयाः तदुद्भवं च सुखं दुःखानुषङ्गि दुःखजनकं च नातो देहिनां तृप्तिः न च एतद् आत्यन्तिकमिति नात्र आस्था विवेकिना आधातुं युक्तेति विरतिरेव अतः

१ आर्तध्यानादिध्यानचतुष्टयस्य विशेषस्वरूपं भगवतीसूत्र-स्थानाङ्गसूत्र-आवश्यकसूत्रेभ्योऽवसेयं भवेत्—श० २५ उद्दे० ७। स्था० ४ उद्दे० १। ध्यानशतकम् पृ० ५८२-६०२। २-**यमनोज्ञ**-बृ० वा० बा०। ३-**नैर्वैचनं** वा० बा० विना। ४ वाचकउमास्वातिप्रणीततत्त्वार्थसू० अ० ९।

श्रेयस्कारिणी' इत्यादिरागहेतुविरोधानुचिन्तनं वैराग्यविचयम्। 'प्रेत्य स्वकृतकर्मफलोपभोगार्थं पुनः प्रादुर्भावो भवः स च अरघट्टघटीयन्त्रवद् मूत्र-पुरीषाऽऽन्त्रनिबद्धदुर्गन्धजठरपुटकोटरादिषु अजस्रमावर्तनम् न चात्र किञ्चिद् जन्तोः स्वकृतकर्मफलमनुभवतः चेतनमचेतनं वा सहायभूतं शरणतां प्रतिपद्यते' इत्यादि भवसंक्रान्तिदोषपर्यालोचनं भवविचयम्। 'भवन-नग-सरित्-समुद्र-भूरुहादयः पृथिवीव्यवस्थिताः साऽपि घनोदधि-घनवात-तनुवातप्रतिष्ठा तेऽपि आकाशप्रतिष्ठाः तदपि स्वात्मप्रतिष्ठम् तत्र अधोमुखमल्लकसंस्थानं वर्णयन्ति अधोलोकम्' इत्यादि च संस्थानानु-चिन्तनं संस्थानविचयम्। अतीन्द्रियत्वाद् हेतूदाहरणादिसंद्भावेऽपि बुद्ध्यतिशयशक्तिविकलैः पर-लोक-बन्ध-मोक्ष-धर्माऽधर्मादिभावेषु अत्यन्तदुःखबोधेषु आप्तप्रामाण्यात् तद्विषयं तद्वचनं तथैवेति आज्ञाविचयम्। आगमविषयविप्रतिपत्तौ तर्कानुसारिबुद्धेः पुंसः स्याद्वादप्ररूपकागमस्य कष-च्छेद-तापशुद्धितः समाश्रयणीयत्वगुणानुचिन्तनं हेतुविचयम्। एतच्च सर्वं धर्मध्यानम् श्रेयोहेतुत्वात् एतच्च संवररूपम् अशुभास्रवप्रत्यनीकत्वात् "आस्रवनिरोधः संवरः" [तत्त्वार्थ० ९-१] इति वचनात्। गुप्ति-समिति-धर्मानुप्रेक्षादीनां चास्रवप्रतिबन्धकारित्वात्। अयमपि जीवाऽजीवाभ्यां कथंचिदभिन्नः भेदाभेदैकान्ते दोषोपपत्तेः। न चायमेकान्तवादिनां घटते मिथ्याज्ञानाद् मिथ्या-ज्ञानस्य निरोधानुपपत्तेः। संवरश्च द्विविधः सर्व-देशभेदात्। पीत-पद्मलेश्याबलाधानमप्रमत्त-संयतस्य अन्तर्मुहूर्तकालप्रमाणं स्वर्गसुखनिबन्धनमेतद् धर्मध्यानं प्रतिपत्तव्यम्।

कषायदोषमलापगमात् शुचित्वम् तदनुषङ्गात् शुक्लं ध्यानम्। तच्च द्विविधम्-शुक्ल-परमशुक्ल-भेदात्। तत्र पृथक्त्ववितर्कवीचारम् एकत्ववितर्कावीचारं चेति शुक्लं द्विधा। परमशुक्लमपि सूक्ष्म-क्रियाप्रतिपाति व्युपरतक्रियानिवर्ति चेति द्विधा। बाह्याध्यात्मिकभेदाच्च एतदपि द्विविधम्-गात्र-दृष्टि-परिस्पन्दाभावः जृम्भोद्गारक्षवथुविरहः अनभिव्यक्तप्राणाऽपानप्रचारत्वमित्यादिगुणयोगि बाह्यम् परेषामनुमेयम् आत्मनश्च स्वसंवेद्यम्-आध्यात्मिकं तु पृथग्भावः पृथक्त्वम्-नानात्वम्, वितर्कः-श्रुत-ज्ञानम्-द्वादशाङ्गम्, वीचारः-अर्थ-व्यञ्जन-योगसंक्रान्तिः-व्यञ्जनम्-अभिधानम् तद्विषयोऽर्थः मनो-वाक्-कायलक्षणो योगः संक्रान्तिः परस्परतः परिवर्तनम् पृथक्त्वेन वितर्कस्य अर्थ-व्यञ्जन-योगेषु संक्रान्तिर्वीचारः यस्मिन् अस्ति तत् पृथक्त्ववितर्कवीचारम्। तथाहि—असावुत्तमसंहननो भावयति विजृम्भितपुरुषकारवीर्यसामर्थ्यः संहृताशेषचित्तव्याक्षेपः कर्मप्रकृतीः स्थित्यनुभागादिभिर्ह्रासयन् महासंवरसामर्थ्यतो मोहनीयमचिन्त्यसामर्थ्यमशेषमुपशमयन् क्षपयन् वा द्रव्यपरमाणुम् भावपर-माणुं चैकमवलम्ब्य द्रव्य-पर्यायार्थाद् व्यञ्जनम् व्यञ्जनाद् वा अर्थम् योगाद् योगान्तरम् व्यञ्जनाद् व्यञ्जनान्तरं च संक्रामन् पृथक्त्ववितर्कवीचारं शुक्लतरलेश्यमुपशमक-क्षपकगुणस्थानभूमिकमन्त-र्मुहूर्तार्धं(द्धं) क्षायोपशमिकभूमिकं प्रायः पूर्वधरनिषेव्यमाश्रितार्थ-व्यञ्जनयोगसंक्रमणं श्रेणिभेदात् स्वर्गापवर्गफलप्रदमाद्यं शुक्लध्यानमवलम्बते एतच्च निर्जरात्मकम् आत्मस्थितकर्मक्षयकारणत्वात् तस्याः "तपसा निर्जरा च" [तत्त्वार्थ० ९-३] इति वचनात् ध्यानस्य चान्तरोत्कृष्टतपोरूपत्वाद् जीवाजीवाभ्यां कथंचिदसावभिन्ना द्व्यङ्गुलवियोगवत् वियुक्तात्मनो वियोगस्य कथंचिद् अभेदात् एकान्तवादे तु पूर्ववत् पश्चादपि अवियोगः अतद्धर्मत्वात् वियोगे वा पूर्वमपि तत्स्वभावत्वाद् अयु-क्तस्य वियोगाभाव एव न हि बन्धाभावे तद्विनाशः संभवी तस्य वस्तुधर्मत्वात् न हि अङ्गुल्योः संयोगाभावे तद्वियोग इति व्यवहारः। तस्माद् निर्जराया अपि एकान्तवादे अनुपपत्तिः। एकत्वेन वितर्को यस्मिन् तद् एकत्ववितर्कम् विगतार्थ-व्यञ्जन-योगसंक्रमत्वाद् अवीचारं द्वितीयं शुक्लध्यानम्। तथाहि—एकपरमाणौ एकमेव पर्यायमालम्ब्यत्वेन आदाय अन्यतरैकयोगबलाधानमाश्रितव्यतिरि-क्ताशेषार्थव्यञ्जनयोगसंक्रमविषयचिन्ताविक्षेपरहितं बहुतरकर्मनिर्जरारूपं निश्शेषमोहनीयक्षयानन्तरं युगपद्भाविघातिकर्मत्रयध्वंसनसमर्थमकषायच्छद्मस्थवीतरागगुणस्थानभूमिकं क्षपको द्वितीयं शुक्ल-

१ पीत-पद्मादिकानां षण्णां लेश्यानां सविस्तरं स्वरूपं प्रज्ञापनासूत्रीयलेश्यापदतोऽवगन्तव्यम्—प० १७ पृ० ३३०-३७३। २ अत्र मूलतत्त्वार्थे तदीये भाष्ये च 'कियानिवृत्ति' इत्येव पाठो मुद्रितो दृश्यते-अ० ९-४१। सर्वार्थसिद्धि-रा-जवार्तिक-श्लोकवार्तिकेषु तु 'कियानिवर्ति' इत्येव पाठो मुद्रितो वर्तते परन्तु सर्वार्थसिद्धौ तालपत्रगतपाठान्तरत्वेन 'किया-निवृत्ति' इति पाठोऽपस्तादुपन्यस्तः-अ० ९-३९।

ध्यानमासादयति। प्रायः पूर्वविदेव तदनन्तरं ध्यानान्तरे वर्तमानः क्षायिकज्ञान-दर्शन-चारित्र-वीर्यातिशयसंपत्समन्वितो भगवान् केवली जायत इति स च अत्यन्तापुनर्भवसंपदङ्गनासमालिङ्गिततनुः कृतकृत्यः अचिन्त्यज्ञानाद्यैश्वर्यमाहात्म्यातिशयपरमभक्तिनम्रामरेश्वरादिवन्द्यचरणः अन्तर्मुहूर्तम् देशोनां वा पूर्वकोटिं भवोपग्राहिकर्मवशाद् विहरन् यदा अन्तर्मुहूर्तपरिशेषायुष्कस्तत्तुल्यस्थितिनाम-गोत्र वेदनीयश्च भवति तदा मनो-वाग्-बादरकाययोगं निरुध्य सूक्ष्मकाययोगोपगः सूक्ष्मक्रियाऽप्रतिपाति शुक्लध्यानं तृतीयमध्यास्ते यदा पुनरन्तर्मुहूर्तस्थितिकायुष्ककर्माधिकतरस्थितिशेषकर्मत्रयो भवत्यसौ तदा आयुष्ककर्मस्थितिसमानस्थितिशेषकर्मसंपादनार्थं समुद्घातमाश्रित्य दण्ड-कपाट-मन्थलोकापूरणानि स्वात्मप्रदेशविसरणतश्चतुर्भिः समयैर्विधाय तावद्भिरेव तैः पुनस्तान् उपसंहृत्य स्वप्रदेशविश(स)रणसमीकृतभवोपग्राहिकर्मा स्वशरीरपरिमाणो भूत्वा ततः तृतीयं शुक्लध्यानभेदं परिसमाप्य्य पुनश्चतुर्थं शुक्लध्यानमारभते तत् पुनर्विगतप्राणापानप्रचाराशेषकाय-वाग्-मनोयोगसर्वदेशपरिस्पन्दत्वाद् विगतक्रियानिवर्ति इत्युच्यते तत्र च सर्वबन्धास्रवनिरोधः अशेषकर्मपरिक्षयसामर्थ्योपपत्तेः तदेव च निश्शेषभवदुःखविटपिदावानलकल्पं साक्षाद् मोक्षकारणम् तद्ध्यानवांश्च अयोगिकेवली निःशेषितमलकलङ्कोऽवाप्तशुद्धनिजस्वभाव ऊर्ध्वगतिपरिणामस्वाभाव्यात् निवातप्रदेशप्रदीपशिखावद् ऊर्ध्वं गच्छति एकसमयेन आलोकान्तात् विनिर्मुक्ताशेषबन्धनस्य प्राप्तनिजस्वरूपस्य आत्मनो लोकान्ते अवस्थानं मोक्षः "बन्धवियोगो मोक्षः" [ ] इति वचनात्।

अत्र च जीवाजीवयोः आगमादिव अध्यक्षाऽनुमानतोऽपि सिद्धिः प्रदर्शिता आस्रवस्यापि तथैव, कर्मयोग्यपुद्गलात्मप्रदेशानां परस्परानुप्रवेशस्वभावस्य तु बन्धस्य अनुपलब्धावपि अध्यक्षतः अनुमानात् प्रतिपत्तिः। तथाहि—अशेषज्ञेयज्ञानस्वभावस्य आत्मनः स्वविषयेऽप्रवृत्तिर्विशिष्टद्रव्यसंबन्धनिमित्ता, पीतद्दूःपूरपुरुषस्वविषयज्ञानाऽप्रवृत्तिवत्, यच्च ज्ञानस्य स्वविषयप्रतिबन्धकं द्रव्यं तद् ज्ञानावरणादि वस्तुसत् पुद्गलरूपं कर्म, आत्मनश्च सकलज्ञेयज्ञानस्वभावता स्वविषयाप्रवृत्तिश्च छद्मस्थावस्थायां प्राक् प्रदर्शितैव। औदारिकाद्यशेषशरीरनिबन्धनस्य अनेकाऽवान्तरभेदभिन्नाष्टविधकर्मात्मकस्य कार्मणशरीरस्य सर्वज्ञप्रणीतागमात् सिद्धेः कथं न ततो बन्धसिद्धिः? न च कार्मणशरीरस्य मूर्तिमत्त्वात् सत्त्वे उपलब्धिः स्यात् अनुपलम्भाच्च तद् असत् इति वाच्यम् यतः न सर्वं मूर्तिमद् उपलभ्यते सौक्ष्म्यात् पिशाचादिशरीरस्येव औदारिकादिशरीरनिमित्ततयोपकल्पितस्य अनुपलम्भेऽपि अपह्नोतुमशक्यत्वात्। कथमनुपलभ्यमानस्य अस्तित्वं नस्येति चेत्, न; आप्तवादात् तस्य सिद्धेः। न च तदभाव औदारिकाद्यपूर्वशरीरयोग आत्मनः स्यात्। न हि रज्ववाकाशयोरिव मूर्तामूर्तयोर्बन्धविशेषयोगः कार्मणशरीराविनाभूतश्चामुक्तेः सदात्मा इति तस्य कथंचिद् मूर्तत्वम् ततश्च औदारिकादिशरीरसंबन्धो रज्जु-घटयोरिव उपपत्तिमान्। अथ सूक्ष्मशरीरसिद्धावपि आस्रवनिरपेक्षाः परमाणवो वाय्वादिसूक्ष्मद्रव्यनिमित्तपरमाणुद्रव्यवद् भविष्यन्तीति न बन्धहेत्वास्रवसिद्धिः, नैतत्; क्रोडीकृतचैतन्यप्रयोजनस्य अचेतनस्य आस्रवनिरपेक्षपरमाणुहेतुत्वानुपपत्तेः न हि अभ्यन्तरीकृतचैतन्यप्रयोजनस्य आकाशद्रव्यादेर्वाग्-बुद्धि-शरीरारम्भादिनिरपेक्षपरमाणुजन्यता परस्यापि सिद्धा अतः तृष्णानुबद्धस्य चैतन्यस्य मनो-वाक्-कायव्यापारवतः कर्मवर्गणापुद्गलसचिवस्य कार्मणशरीरानुविद्धस्य तथाविधतच्छरीरनिर्वर्तकत्वम् अन्यथा तथाविधकारणप्रभवतच्छरीराभावे आत्मनो बन्धाभावतः संसारिसत्त्वविकलं जगत् स्यादेव। तीर्थान्तरीयैरपि आतिवाहिकादिशब्दवाच्यतया अभ्युपगम्यमानं कार्मणशरीरं सकलदृष्टपदार्थाविसंवाद्यर्हदुक्तागमप्रतिपाद्यमवश्यमभ्युपगन्तव्यम् अन्यथा सकलदृष्टाऽदृष्टव्यवहारोच्छेदप्रसङ्गः। न च अचेतनस्य तस्य कथं भवान्तरप्रापकत्वम्? चेतनाधिष्ठितस्य अचेतनस्यापि देवदत्तव्यापारप्रयुक्तदेशान्तरप्रापणशक्तिमन्नौद्रव्यवद् अचेतनस्यापि तत्प्रापकत्वाविरोधात्। न च सदा चैतन्यानुषक्तस्य तस्य अचेतनव्यपदेशयोगितेति प्राक् प्रतिपादितत्वात्। तदेवम् अनुमानाऽऽगमाभ्यां बन्धस्य प्रसिद्धिः। संवरस्य तु अध्यक्षाऽनुमानाऽऽगमप्रसिद्धता

---

१ "कृत्स्नकर्मक्षयो मोक्षः" तत्त्वार्थसू० अ० १०-३। २-णुवृत्त्यवद् भ-वृ० आ० हा० वि०।

३-तस्यपि देव-वृ० आ० हा० वि०।-तस्यापि चेतस्यापि देव-वा० बा०। पुरस्ताद् 'अचेतनस्यापि' इति पदस्य सत्त्वेन वाक्यसामञ्जस्याय **चेतनाधिष्ठितस्य देवदत्तव्यापारप्रयुक्तदेशान्तरप्रापणशक्तिमन्नौद्रव्यवद् अचेतनस्यापि तत्प्रापकत्वाविरोधात्'** इत्येव पाठः कल्पयितुं समुचितः प्रतिभाति।

न्यायानुगतैव चैतन्यपरिणतेः स्वात्मनि स्वसंवेदनाध्यक्षसिद्धत्वात् अन्यत्र तु तत्प्रभवकार्यानुमेयत्वात् आगमस्य च तत्प्रतिपादकस्य प्रदर्शितत्वात्। निर्जरा तु ज्ञानावरणीयादेः कर्मणः केवलज्ञानसद्भावान्यथानुपपत्त्या अनुमानतः। "तपसा निर्जरा च" [तत्त्वार्थ० ९-३] इति आप्तागमतश्च अस्मदादिभिः प्रतीयते सर्वकर्मनिर्जरावद्भिस्तु स्वसंवेदनाध्यक्षतः परमपदप्राप्तिहेतोः सम्यग्ज्ञानादेः स्वसंविदितत्वात् सर्वकर्मापगमाविर्भूतचैतन्यसुखस्वभावात्मस्वरूपस्य मोक्षस्यापि अनन्तरोक्तन्यायतः प्रतिपत्तिः। तथाहि—'यदुत्कर्षतारतम्याद् यस्य अपचयतारतम्यं तत्प्रकर्षनिष्ठागमने भवति तस्य आत्यन्तिकः क्षयः, यथा उष्णस्पर्शतारतम्यात् शीतस्पर्शस्य, भवति च ज्ञान-वैराग्यादेरुत्कर्षतारतम्याद् अज्ञान-रागादेरपचयतारतम्यम्' इति अनुमानतः भगवदागमतश्च अस्मदादेरपवर्गसिद्धिः भगवतां तु केवलाध्यक्षतः इति जीवाऽजीवपदार्थद्वयाऽव्यतिरिक्तास्रवादिप्रतिपत्तिर्मुमुक्षुभिर्विधेया। तथाहि—मोक्षार्थिभिरवश्यं मोक्षः प्रमाणतः प्रतिपत्तव्यः अन्यथा तदुपायप्रवृत्त्यनुपपत्तेः न हि अनवगतसस्यादिसद्भावस्तदर्थी तत्प्राप्त्युपाये कृष्यादौ प्रवर्तितुमुत्सहते तदुपायप्रवृत्तिरपि उपायस्वरूपसंवर-निर्जरालक्षणपदार्थद्वयप्रतिपत्तिमन्तरेण अनुपपन्ना अज्ञातस्य प्रेक्षापूर्वकारिप्रवृत्तिविषयत्वानुपपत्तेः। तथाहि—अशेषकर्मवियोगलक्षणो मोक्षः संवर-निर्जराफलः तदभावे अनुपपद्यमानस्तत्प्रवृत्तिं तज्ज्ञानपूर्विकामाक्षिपति। न हि अभिनवकर्मोत्पत्तौ प्राक्तनाशेषकर्मसंयोगाभावो भावे वा आत्यन्तिकः तद्वियोगः संभवतीति संवर-निर्जराङ्गानं मुमुक्षुभिरवश्यं विधातव्यम्। कर्मबन्धोऽपि संवर-निर्जरानिवर्तनीयः संसारसरित्स्रोतःप्रवर्तको ज्ञातव्यः अज्ञातस्य उपायनिवर्तनीयत्वायोगात्। अयमपि आस्रवफलत्वेन ज्ञातव्यः अन्यथा तदनुपपत्तेः। यथा हि घटादेः स्नेहाभावे रजःसंबन्धो न घटते तथा कषायस्नेहाभावे नात्मनः कर्मरजःसंबन्ध उपपत्तिमान्। आस्रवोऽपि बन्धहेतुर्जीवाऽजीवकारणतया ज्ञातव्यः अन्यथा कारणस्य तस्य असंभवात्। न हि अज्ञातकारणं तत्कार्यतया शाल्यङ्कुरादिवज् ज्ञातुं शक्यम्। न च जीवाजीवबहिर्भूतमास्रवस्य कारणं भवति तद्व्यतिरेकेण पदार्थान्तरस्याऽसत्त्वात् जीवाजीवयोश्च परिणामित्वे सति आस्रवादिहेतुत्वम् एकान्तनित्यस्य अनित्यस्य वार्थक्रियाऽनिर्वर्तकत्वेन असत्त्वात्। तस्मात् परिणामिजीवाजीवपदार्थद्वयाव्यतिरिक्तौ कथंचित् सकारणौ हेयोपादेयरूपौ बन्ध-मोक्षौ प्रतिपत्तव्याविति सप्त पदार्थाः प्रमाणतोऽभ्युपगन्तव्याः।

यथा च संवर-निर्जरयोर्मोक्षहेतुता आस्रवस्य च बन्धनिमित्तत्वम् तथा आगमात् प्रतिपत्तव्यम् तस्य च जीवाजीवादिलक्षणे दृष्टविषये वस्तुतत्त्वे सर्वदाऽविसंवादात् अदृष्टविषयेऽपि एकवाक्यतया प्रवर्तमानस्य प्रामाण्यं प्रतिपत्तव्यम्। न च वक्रधीनत्वात् तस्य अप्रामाण्यम् वक्रधीनत्व-प्रमाणत्वयोर्विरोधाभावात् वक्रधीनस्यापि प्रत्यक्षस्य प्रामाण्योपलब्धेः। न च अक्षजत्वाद् वस्तुप्रतिबद्धत्वेन तत्र प्रामाण्यम् न शाब्दस्य विपर्ययादिति वक्तव्यम् शाब्दस्य अत एव प्रमाणान्तरत्वोपपत्तेः अन्यथा अनुमानादविशेषप्रसङ्गात्। तथाहि—गुणवद्वक्तृप्रयुक्तशब्दप्रभवत्वादेव शाब्दम् अनुमानज्ञानाद् विशिष्यते अन्यथा बाह्यार्थप्रतिबन्धस्य अत्रापि सद्भावाद् नानुमानादस्य विशेषः स्यात्। यदा च परोक्षेऽपि विषये अस्य प्रामाण्यमुक्तन्यायात् तदा गुणवद्वक्तृप्रयुक्तत्वेन अस्य प्रामाण्यम् अतश्च गुणवद्वक्तृप्रयुक्तत्वमितीतरेतराश्रयदोषोऽपि नात्र अवकाशं लभते यथोक्तसंवादाद् अस्य प्रामाण्यनिश्चये। 'कुतोऽयमस्यात्र संवादः' इति अपेक्षायाम् 'आप्तप्रणीतत्वात्' इत्यवगमो न पुनः प्रथममेव तत्प्रणीतत्वनिश्चयाद् अस्य अर्थप्रतिपादकत्वम् प्रतिबन्धनिश्चयाद् अनुमानेव नापि दृष्टविषयाविसंवादिवाक्यैकवाक्यतां विरहय्य अदृष्टार्थवाक्यैकदेशस्य अन्यतः कुतश्चित् प्राक्संवादित्वनिबन्धनस्य प्रामाण्यस्य निश्चयः अभ्यासावस्थायां तु आप्तप्रणीतत्वनिश्चयात् प्रवृत्तिरदृष्टार्थवाक्यान्न वार्यत इति कुत इतरेतराश्रयावकाशः?

[ऐकान्तिकं वाच्यस्वरूपं निरसितुं लडादेरर्थविचारपक्षाः]

एकान्तवादिवाक्यात् तु दृष्टार्थेऽपि विसंवादिनः सर्वथा अप्रवृत्तिरेव निश्चितविसंवादाङ्कुल्यग्रहस्तियूथशतप्रतिपादकवाक्यादिवद् न हि एकान्तवादिवचनानां वाच्यं संभवि इत्युक्तम्। यतः सामान्यं वा तद्वाच्यं भवेत्, विशेषो वा, उभयम्, अनुभयं वेति विकल्पाः। { न तावत् सामान्यम् तस्येतरव्यावृत्तप्रतिनियतैकवस्तुरूपत्वायोगात् शब्दवाच्यत्वे घटाद्यानयनाय प्रेरितः सर्वत्र प्रवर्तेत

न वा क्वचित् भेदनिबन्धनत्वात् प्रवृत्तेः सामान्यस्य अनर्थक्रियाकारितया च प्रवृत्तिनिबन्धनत्वायोगात्। अथापि स्यात् यदाऽयं प्रतिपत्ता वाक्यमश्रुतपूर्वं शृणोति तदा पदानां संकेतकालानुभूतानामर्थं सामान्यलक्षणमेव प्रतिपद्यते या तु वाक्यार्थप्रतिपत्तिः सा अपेक्षा-सन्निधानाभ्यां विशेषणविशेष्यभावात् पदार्थप्रतिपत्तिनिबन्धना न पुनस्ततो वाक्यात् तथाविधस्य तस्य स्वार्थेन सह संबन्धाप्रतिपत्तेः वाक्यमेव च प्रवृत्ति-निवृत्तिव्यवहारक्षमम् न पदम् तस्य अनर्थक्रियाकारिसामान्यप्रतिपादकत्वेनाप्रवृत्त्यङ्गत्वात्। अत एव न विवक्षाप्रतिभासिनमर्थं प्रतिपादयन्तः शब्दा अनुमानतामासादयन्ति अगृहीतप्रतिबन्धादपि वाक्यविशेषाद् यथोक्तन्यायतो वाक्यार्थप्रतिपत्तेः। अनेनैव अभिप्रायेण सौगता वाक्यगतां चिन्तामनादृत्य पदमेव अनुमानेऽन्तर्भावितवन्तः। उक्तं च मीमांसकैः—

"वाक्यार्थे तु पदार्थेभ्यः संबन्धानुगमाद् ऋते।
बुद्धिरुत्पद्यते तस्माद् भिन्ना साऽप्यक्षबुद्धिवत्" ॥
[श्लो० वा० शब्दप० श्लो० १०९] तथा,

"वाक्येष्वदृष्टेष्वपि सार्थकेषु पदार्थचिन्मात्रतया प्रतीतिम्।
दृष्ट्वानुमानव्यतिरेकभीताः क्लिष्टाः पदाभेदविचारणायाम्" ॥
[श्लो० वा० शब्दप० श्लो० १११] इति,

असदेतत्; एवंकल्पनायां पदार्थानामपि वाक्यार्थप्रतिपत्तिहेतुत्वासंभवात्। तथाहि—'घटः पटः कुम्भः' इत्यादिपदेभ्यः यथा अन्योन्याननुषक्तस्वतन्त्रसामान्यात्मकार्थप्रतिपत्तिस्तथा संबद्धपदसमूहश्रवणादपि किं न तथाभूतसामान्यप्रतिपत्तिर्भवेत्? न हि ततः सामान्यमात्राधिगमे तत्परित्यागतो विशिष्टार्थप्रतिपत्तौ निमित्तमस्ति न वापेक्षा-सन्निधानादिकं पदार्थानां तत्प्रतिपत्तौ निमित्तम् पदार्थस्य पदार्थान्तरं प्रत्युत्पत्तौ प्रतिपत्तौ वा अपेक्षादेरयोगात् तस्य सामान्यात्मकत्वेन उत्पत्तेरसंभवात् स्वपदेभ्य एव प्रतिपत्तेः तत्रापि पदार्थान्तरापेक्षाद्यनुपपत्तेः। अर्थशक्तित एव ततो विशेषप्रतिपत्तिरिति चेत् तर्हि पदार्थानामेकार्थसंभवा प्रतिपत्तिर्यस्य तस्यापि ततस्तत्प्रतिपत्तिर्भवेत्। न च सामान्यत्यागे किञ्चिन्निबन्धनम् बाधकाभावात् सति अर्थित्वे उभयप्रतिपत्ति-प्रवृत्ती स्याताम्। न च वाक्यार्थप्रत्यय एव बाधकः तेन तस्य विरोधाभावात् सामान्य-विशेषयोः साहचर्यात् सामान्यप्रत्ययस्य च विशेषप्रतिपत्तिं प्रति निमित्तत्वाभ्युपगमात् निमित्तस्य च निमित्तिना अबाध्यत्वात् अन्यथा तस्य तन्निमित्तत्वायोगात्। अथ प्रागपि एवमयं व्युत्पादितः—यत्र पदार्थानामेकद्रव्यसंभवस्तत्र पदार्थसामान्यत्यागाद् विशेषः प्रतिपत्तव्यः यथा नीलोत्पलादौ, नन्वेवं सर्ववाक्यानि अस्य व्युत्पादितान्येव भवन्ति। तथाहि—यः कश्चित् संभवदेकद्रव्यार्थनिवेशः पदसमूहः स संकेतसमयावगतसामान्यात्मकावयवार्थपरित्यागतस्तेषामेव विशेषणविशेष्यभावेन विशिष्टार्थगोचरः प्रतिपत्तव्यः, यथा 'नीलोत्पलं पश्य' इत्यादिपदसंघातः, तथा चायमपूर्ववाक्यात्मकः पदसमुदायः इति संकेतमनुसृत्य यदा ततस्तथाभूतमर्थं प्रत्येति तदा कथं न विशिष्टार्थवाचकं वाक्यम्? अनेनैव च क्रमेण शब्दविदां समयव्यवहार उपलभ्यते। यथा 'धात्वादिः क्रियादिवचनः कर्त्रादिवचनश्च लॅडादिः' इति समयपूर्वकं प्रकृति-प्रत्ययौ प्रत्ययार्थं सह ब्रूत इति व्युत्पादितोऽनर्थक्रियाकारित्वेन सामान्यमात्रस्य विशेषनिरपेक्षस्य प्रतिपादयितुमनिष्टेः तत्परित्यागेन व्यवहारकाले विशेषमवगच्छति व्यवहारी। न च प्रकृति-प्रत्ययार्थावेव अत्र पदार्थं प्रतिपादयतः न पदमिति मन्तव्यम्,

"अशाब्दे वापि वाक्यार्थे न पदार्थेष्वशाब्दता।
वाक्यार्थस्येव नैतेषां निमित्तान्तरसंभवः" ॥ [श्लो० वा० वाक्याधि० श्लो० २३०]

इत्यस्य विरोधप्रसक्तेः। न च वाक्यस्य वाक्यार्थे संकेतकरणे अनुमानात् शाब्दस्य अविशेषप्रतिपत्तिः, विशेषस्य प्राक् प्रतिपादितत्वात् केवलस्य च पदस्य प्रयोगानर्हत्वात् वाक्यस्य तु प्रयोगार्हस्य सामान्यानभिधायकत्वात् कथं सामान्यं शब्दार्थः स्यात्?

१ लगडादिः आ० हा० वि०। लगुडादिः बृ०। नियोगस्वरूपप्रतिपादन-निरसनपरा अष्टसहस्रीगता चर्चाऽत्रानुसंधेया-पृ० ५ पं० १७-पृ० १०।

यैस्तु पूर्वपदानुरञ्जितं पदमेव वाक्यम् पदार्थ एव पदार्थान्तरविशेषितो वाक्यार्थोऽभ्युपगतः। तथाहि—'दण्डी' 'छत्री' इत्यादिव्यपदेशं यथा पुरुष एव समासादयति नान्यस्तद्व्यतिरिक्तः तथा 'अपाक्षीत्' 'पचति' 'पक्ष्यति' इत्याद्यतीतकालाद्यवच्छिन्नः क्रियाविशिष्टश्च देवदत्त एव प्रतीयते-'अपाक्षीत्' इत्यादिशब्दानां देवदत्तशब्देन सामानाधिकरण्यात्-न तु तद्व्यतिरिक्तोऽर्थः। अथ यद्यत्र कालाद्यवच्छिन्नपुरुष एव प्रतीयते तदा 'अग्निहोत्रं जुहुयात्' 'ग्रामं गच्छ' 'स्वाध्यायः कर्तव्यः' इति लिट्-लोट्-कृत्यप्रयोगेषु कस्यार्थस्य प्रतीतिः? अत्रापि कर्मणि नियुक्तः क्रियाविशिष्टोऽध्येषणादिविशिष्टश्च देवदत्त एव प्रतीयते केवलं वर्तमानादिः कालो न विशेषणत्वेन अत्र अवतिष्ठते। अथ यदि नात्रार्थातिरेकावगतिर्भावसंपादने कथं पुरुषः प्रवर्तते? यथा हि देवदत्तः 'पचति' इत्यादिवाक्यान्न प्रवर्तते तथा 'जुहुयात्' इत्यस्मादपि नैव प्रवर्तेत प्रवृत्तिनिमित्तस्य अनवबोधात्, असदेतत्; 'जुहुयात्' इत्यादिवाक्यजनितविज्ञानस्यैव प्रवर्तकत्वात् प्रवृत्तेस्तद्भावभावित्वेन उपलम्भात् एतद्वाक्यसमुत्थं ज्ञानं पुरुषं स्वर्गादिसाधने नियोजयद् उपलभ्यते न 'पचति' आदिवाक्यसमुत्थम्। तथाहि—विध्यादिवाक्यजनितज्ञानानन्तरमिच्छा तदनन्तरं प्रयत्नः तदनन्तरं च पुरुषस्य स्वर्गादिफलार्थः परिस्पन्दः ततोऽपि फलपर्यन्तात् स्वर्गफलावाप्तिः इत्यभिधानात्। तेऽपि अयुक्तिकारिणः एकान्तपक्षे विशेषण-विशेष्ययोरत्यन्तभेदे अभेदे वा विशेषणानुरागस्य पद-पदार्थेष्वसंभवात् वाक्यार्थकल्पनादेरनुपपत्तेः अत एव 'अपाक्षीद् देवदत्तः' इत्यादौ न कालक्रियाविशिष्टपुरुषप्रतिपत्तिः क्रियादेः पुरुषाद् भेदे संबन्धासिद्धितो व्यवच्छेदकत्वानुपपत्तेः अभेदेऽपि एकस्य तात्त्विकविशेषणविशेष्यरूपताऽसंगतेः अन्यथा अतिप्रसङ्गात् कल्पनारचितस्य तद्रूपत्वस्य सर्वत्राविशेषात् विशिष्टप्रत्ययोत्पत्तेश्च अन्यनिमित्तत्वात् विरोधादिदोषस्य च तत्र प्रागेव प्रतिविहितत्वात्। एतेन लिडादियुक्तवाक्यजनितविज्ञानस्य प्रवर्तकत्वमेकान्तवादिप्रकल्पितं प्रतिक्षिप्तम् तद्भावभावित्वस्य अन्यथासिद्धत्वप्रतिपादनात्। यदपि अत्र

" "संसर्गमोहितधियो विविक्तं धातुगोचरात्।
भावात्मानं न पश्यन्ति ये तेभ्यः स विविच्यते" ॥ [ ]

इत्यादिना ग्रन्थसंदर्भेण प्रतिपादयन्ति—भाव एव साध्यतया लिडादिभिरभिधीयते न कर्ता "पूर्वापरीभूतं भावमाख्यातमाचष्टे" [ ] इति वचनाद् भाव एव च कालत्रयशून्यः साध्यतया प्रतीयमानो विधिरिति अभिधीयते स च आत्मलाभाय प्रेरयन् पुरुषं लिडर्थः' इति, तदपि अनुपपन्नम्; भावस्य फलसापेक्षत्व-निरपेक्षत्वविकल्पद्वयेऽपि साध्यत्वानुपपत्तेः। न तावत् फलनिरपेक्षो भाव आत्मविषयसाध्यतायां पुरुषं प्रेरयितुं समर्थः, प्रेक्षापूर्वकारिणः फलविकले कर्मणि कुतश्चिदप्रवृत्तेः। अपि च, असौ भावः स्वात्मनिष्पादनाय पुरुषं प्रेरयन् निष्पन्नः अनिष्पन्नो वा प्रेरयेत्? न तावद् निष्पन्नः तत्सद्भावस्य सिद्धत्वात्। नापि अनिष्पन्नः अविद्यमानस्य अतिप्रसङ्गतः प्रेरकत्वायोगात्। न च सामान्याकारेण विद्यमानो विशेषाकारसंपादनाय भावः पुरुषं प्रेरयतीति वक्तव्यम् सामान्याकारेण विद्यमानतया तस्य साध्यत्वानुपपत्तेः विद्यमानस्य च वर्तमानत्वेन लिडर्थत्वानुपपत्तेः त्रिकालशून्यस्य लिडर्थत्वाभ्युपगमाद् विशेषाकारतायाश्च संपाद्यत्वेऽपि प्रेरकत्वानुपपत्तिरित्युक्तम्। अथ फलापेक्षो भावः स्वात्मसंपादनाय पुरुषं प्रेरयतीत्यभ्युपगमस्तर्हि फलस्यैव प्रेरकत्वम् न भावस्य स्यात् तथाभ्युपगमेऽपि दोष एव-तत्रापि विद्यमानाविद्यमानविकल्पद्वयानतिवृत्तेः। तथाहि—यद्यपि सर्वाः क्रियाः प्रयोजनवत्त्वेन व्याप्ता इति तदेव भावसंपादने पुरुषं प्रेरयति तथापि तत् एकान्ततो विद्यमानं कथं पुरुषं प्रेरयेत्? न हि यद् यस्यास्ति स तदर्थमेव लोके प्रवर्तमानो दृष्टः प्रयोजनमनुद्दिश्य प्रेरकसद्भावेऽपि कस्यचित् प्रवृत्त्यनुपलब्धेः। न च प्रयोजनस्य आत्मसंबन्धितामुत्पादयितुमसौ प्रवर्तते, आत्मसंबन्धितायाः अपि विद्यमानत्वेन प्रवृत्तिविषयत्वानुपपत्तेः। किञ्च, दुःखविरहसुखस्वभावलक्षणं प्रयोजनमुपजायमानमात्मसंबन्धितयैव उपजायत इति न तदर्थोऽपि प्रयासः सफलः। न च प्रयोजनमविद्यमानं पुरुषं प्रेरयति अविद्यमानस्य कारकत्वायोगात्। कार्यतया तत् तत्र प्रेरयतीति चेत्, ननु साऽपि यदि भावरूपा न तर्हि विद्यमानत्वात् पुरुषप्रवर्तिका भवेत्। न च विद्यमानस्य कार्यरूपता संभवति तस्य कार्यताविरोधात्। अथ अभावरूपा तथापि

१-वर्तेत बृ०। २-वर्तेत बृ०। ३-वर्तते वा० बा०। ४ अयुक्तका-वा० बा०। ५-सुख भा-भां०।
९५ स० प्र०

न प्रेरकत्वम् अभावस्यापि स्वरूपेण विद्यमानत्वात्। न च स्वर्गाभावः पुरुषार्थत्वेन अभ्युपगतः। न च परस्परविविक्तोभयरूपतयाऽपि कार्यतायाः प्रेरकत्वम् उभयदोषानुषङ्गात् अन्योन्यानुषक्तोभयरूपताऽभ्युपगमे परपक्षाभ्युपगमप्रसक्तिः फलानुभवपर्यायाव्यतिरिक्तस्य कारणपर्यायात्मकस्य आत्मनः फलात्मतया परिणामात् कारण-फलपर्याययोः कथंचिद् अभेदात् एकस्यैव आत्मद्रव्यस्य तत्तद्रूपतया विवृत्तेः फलस्य भावाभावरूपतया प्रवर्तकत्वात् अन्यथा सर्वव्यवहारोच्छेदप्रसक्तेः।

अन्ये तु विधेः प्रवर्तकत्वमभ्युपपन्नाः त्रिकालशून्यो विधिरेव प्रवर्तकैकस्वभावः लिङोपदिश्यमानः कर्मणि पुरुषं नियोजयति स च प्रेषणाऽध्येषणादिव्यतिरिक्तस्तदनुगतश्च गोव्यक्तिषु गोत्ववत्। अध्येषणा सत्कारपूर्वको नियोगः प्रेषणा तु न्यत्कारपूर्वको नियोग एव पुरुषगताशयविशेषः प्रेषणाऽध्येषणाशब्दवाच्यः। न चास्य प्रेरकत्वम् व्यभिचारात्। तथाहि—अध्येषणाऽभावेऽपि प्रेषणातः पुरुषप्रवृत्तिरुपलभ्यते तदभावेऽपि चाध्येषणातः इति न प्रेषणादेः पुरुषप्रवर्तकत्वम् किन्तु यथोक्तो विधिर्भाव्यनिष्ठभावकव्यापारस्वभावभावनानुगते स्वर्गादिफलसंपादके धात्वर्थे पुरुषं नियोजयति। तदुक्तम्—

"विधावनाश्रिते साध्यः पुरुषार्थो न लभ्यते।
श्रुतः स्वर्गादिवाक्येन धात्वर्थः साध्यतां व्रजेत्"॥
[श्लो० वा० औत्पत्तिकसू० श्लो० १४]

अपरे तु मन्यन्ते धात्वर्थमात्रे फलपर्यालोचनानिरपेक्षो विधिः पुरुषं प्रेरयति स तथाभूतो लिडादिप्रत्ययाभिधेयः इति।

सर्व एते अयुक्तवादिनः यतः विधिर्न अलब्धसत्ताकः पुरुषं प्रेरयति अविद्यमानस्य गगनकुसुमादेरिव प्रेरकत्वासंभवात् संभवे वा विद्यमानताप्रसक्तेः। न च अविद्यमानविध्यर्थं प्रेरणा प्रतिपादयितुं प्रभवति प्रतिपादने वा अविद्यमानविषयत्वेन केशोण्डुकादिज्ञानवद् न प्रमाणं भवेत्। न च अविद्यमानेन सह लिट्प्रत्ययस्य संबन्धः तदभावात् तस्य अवाचकत्वं स्यात्। अथ लब्धसत्ताको विधिः प्रेरकस्तदा त्रिकालशून्यता तस्य व्यावर्तेत वर्तमानकालताप्राप्तेः लिट्प्रत्ययगम्यता च न स्यात् सांप्रतकाले च तस्मिन् प्रत्यक्षादेरप्यवतारात् चोदनैव धर्मे प्रमाणम् प्रमाणमेव चोदना इति न वक्तव्यं स्यात् प्रत्यक्षादेस्तत्र प्रवृत्तौ अवधारणद्वयस्यापि अनुपपत्तेः। न च सामान्याभिधायि पदं विशेषाभिधायि युक्तम् औत्पत्तिकश्च शब्दस्य संबन्धः सामान्यलक्षणेन अर्थेन न विशेषेण। न च असंबद्धपदं विशेषे विज्ञानं विधातुं समर्थम्। न च अनवगतो विधिः प्रवर्तको युक्तः। किञ्च, विधेरपि निष्पाद्यत्वात् तन्निष्पत्तये पुरुषः केन प्रेर्येत इति वक्तव्यम्। यदि विध्यन्तरेण[1] तथा तत्रापि तदन्तरेण इति अनवस्था। अथ इच्छातः तत्रासौ प्रवर्तते तर्हि सर्वत्र तथैव प्रवर्तताम् किमप्रमाणकविधिकल्पनया? अथ नित्यो विध्यर्थः पुरुषं प्रेरयतीत्यभ्युपगमस्तर्हि तस्य लिट्प्रत्ययवाच्यता व्यावर्तेत लिडस्त्रिकालशून्यार्थविषयत्वात् विध्यर्थस्य तु नित्यतया वर्तमानकालत्वात् वर्तमानकालत्वे च तत्र अध्यक्षादेरपि अवतारात् प्रतीतार्थानुवादकत्वेन न तत्र प्रेरणा प्रमाणं स्यात्। किञ्च, नित्यत्वे लिङर्थस्य धर्मरूपता व्यावर्तेत कार्यरूपस्य अर्थस्य धर्मरूपताभ्युपगमात् चोदनैकगम्यस्य तु विध्यर्थस्य लिङा संबन्धानवगमात् न ततस्तत्प्रतिपत्तिः स्यात्। अथ अनवधारितनित्यसंबन्धमपि शब्दे[2]शक्तिस्वाभाव्यात् तत्पदं तमर्थमेव बोधयति तर्हि गवादिपदानामपि शब्दशक्तयैव अनवगतसंबन्धानां स्वार्थप्रत्यायकत्वं भवेत्। अथ तेषां तथाभूतानां न तत्त्वम् तर्हि विधिपदस्यापि तन्न स्यात् अत एव न पदाद् वाक्यम् पदार्थाद् वा वाक्यार्थ एकान्ततो भिन्नः अभिन्नो वा अभ्युपगन्तव्यः अन्यथा उक्तदोषानतिवृत्तेः। किञ्च, अयं विधिर्वाक्यश्रवणानन्तरं किं प्रतिभाति, उत पुरुषव्यापारान्यथानुपपत्त्या प्रतीयते? न तावद् आद्यः पक्षः वाक्यश्रवणानन्तरं पुरुषस्यैव अध्येषणादिविशिष्टतया प्रतीतेः पुरुषश्च आत्मानमेव वाक्यात् कर्मणि नियुज्यमानमवगच्छति तदवगमाच्च इच्छयैव प्रवर्तते अतः प्रवृत्तिरपि अन्यथासिद्धेति नासौ लिङर्थमवगमयति। किञ्च, प्रवृत्त्यन्यथानुपपत्त्या निमित्तमात्रस्यैव अवगतिर्न विध्यर्थस्य प्रत्यक्षादेरपि हेयम् उपादेयं चार्थमवगत्य निवर्तन्ते प्रवर्तन्ते वा जन्तवः। न

१ "श्रुतस्वर्गादिबाधेन"—श्लो० वा०।
२-ण तत्रापि वा० बा०। अत्र 'विध्यन्तरेण तदा तत्रापि' इति पाठः सुचारुः। ३-ब्दव्यक्ति-बृ०।

च तत्र विधेर्निवर्तकत्वम् प्रवर्तकत्वं वेष्यते एवमिहापि अभिप्रेतफलार्थी अध्येषणादेः इच्छातो वा प्रवर्तेत। न च अध्येषणादेर्व्यभिचारात् प्रवर्तकत्वमयुक्तम् यथासंभवं प्रवर्तकत्वोपपत्तेः यदा अध्येषणा तदा तस्या एव प्रवर्तकत्वम् यदा तु प्रेषणा तदा तस्या एव। न हि रक्ततन्त्वभावेऽपि शुक्लेभ्यस्तेभ्यः पटोत्पत्तौ रक्ततन्तवो न स्वोत्पाद्यपटोत्पत्तौ परिणामिकारणतां प्रतिपद्यन्ते न च तद्व्यतिरिक्तोऽन्यः कश्चित् तत्र परिणामिकारणत्वमासादयति। किञ्च, धात्वर्थोऽपि यदि धातुना परिनिष्पन्नोऽभिधीयते तदा न विधेः पुरुषप्रेरकत्वमभ्युपगन्तव्यम् धात्वर्थस्य निष्पन्नत्वात्। सामान्यपदार्थवादिनां तु धात्वभिधेयस्य कथं पुरुषव्यापारसाध्यत्वम् सामान्यस्य नित्यतया साध्यत्वानुपपत्तेः? न च विशेष उत्पाद्यो धातुवाच्यः तेन सह नित्यतया संबन्धायोगात् न हि अनित्येन नित्यः संबन्धो घटते अभ्युपेयते वा वाच्यवाचकतत्संबन्धानां परेण नित्यत्वाभ्युपगमात्। अपि च, विधेः प्रवर्तकत्वे कारकत्वं स्यात् न प्रामाण्यम् इच्छा-प्रयत्नादेरिव तथात्वे तदनुपपत्तेः प्रवर्तकत्वं च यथोक्तन्यायाद् अनुपपन्नम्। एवं 'ब्राह्मणं न हन्यात्' इति प्रतिषेधविधिरपि प्रतिक्षिप्तो द्रष्टव्यः। तथाहि—अयं पुरुषं क्व प्रेरयतीति वक्तव्यम् नञर्थे, भावनायाम्, धात्वर्थे वा? तत्र यदि नञर्थे विधिः पुरुषं प्रवर्तयति, तदयुक्तम्; नञर्थस्य अभावरूपत्वात् तत्र विधेः प्रेरकत्वासंभवात्। न हि अक्रियात्मके नञर्थे कस्यचित् प्रेरकत्वमुपपत्तिमत्। अथ वधप्रवृत्तं पुरुषं निवर्तयति प्रतिषेधविधिः, अयुक्तमेतत्; प्रतिषेधेनैव निवर्तितत्वाद् विधेस्तत्र नैरर्थक्यात्। अथ प्रतिषेधनिषिद्धस्य अनिवृत्तेस्तत्र विधिराश्रीयते विधिनिषिद्धोऽपि यदि न निवर्तते तदा किमाश्रयणीयम्? अथ भावनायां विधेः प्रवर्तकत्वम्, अयुक्तमेतत्; रागत एव तस्यामस्य प्रवृत्तेः विधेर्वैयर्थ्यात्। न च धात्वर्थेऽपि तमसौ प्रवर्तयति, तत्रापि रागादेवास्य प्रवृत्तेः। विधिर्हि अप्रवृत्तप्रवर्तकः रागात् प्रवृत्तस्य च प्रवर्तने विधित्वायोगात्। अथ नञ्संबद्धभावनायां विधिः प्रवर्तयति, न; नञर्थसंबद्धायास्तस्या अभावरूपत्वेन प्रवृत्तिविषयत्वानुपपत्तेः। अथ नञर्थविशिष्टधात्वर्थे प्रतिषेधविधिना पुरुषः प्रवर्त्यते, नैतत् सारम्; तस्यापि नञर्थविशिष्टस्य अभावरूपत्वात् प्रवृत्तिविषयत्वायोगात्। न च भावनायां हननविशिष्टायां रागात् प्रवर्तमानः पुरुषः प्रतिषेधपर्युदस्तायां विधिना नियुज्यते, अभावविशिष्टाया भावनाया विधिविषयत्वायोगात्। न चासौ हननाभावविशिष्टा विधि[2]विषयतां प्रतिपद्यते, अभावस्य अव्यापाररूपतया भावनां प्रति व्यवच्छेदकत्वायोगात्। न च हन्तिर्नञुपहितः। अभक्ष्याऽस्पर्शनीयन्यायेन हननव्यतिरिक्तधात्वर्थान्तराभिधायकत्वात् तदवच्छिन्नां भावनां प्रकाशयति सा च विधेर्गोचरतां प्रतिपद्यते इति वक्तव्यम्, यतो भावनायां हननव्यतिरिक्तधात्वर्थमात्रविशिष्टायां विधेः प्रवर्तकत्वमेव न निवर्तकत्वम् प्रवर्तकत्वैकरूपत्वेन तस्याऽभ्युपगमात् तच्च यथा तस्य न संभवति तथा प्रतिपादितमेव। तन्न मीमांसकाभिप्रायेण विधेः प्रवर्तकत्वम् निवर्तकत्वं वा संभवति। तेन—

"साधने पुरुषार्थस्य संगिरन्ते त्रयीविदः।
बोधविधौ समायत्तम्" [ ] इत्याद्यसंगतार्थाभिधानम्।

ये तु भावनां वाक्यार्थत्वेन प्रतिपादयन्ति भावना हि भाव्येऽर्थे स्वर्गादिके पुरुषस्य व्यापारः "भाव्यनिष्ठो भावकव्यापारो भावना" [ ] इति वचनात् सा च 'किं केन कथम्' इति त्र्यंशपरिपूर्णा—किम् इति स्वर्गम्, केन इति दर्श-पूर्णमास्यादिना भावयन्, कथम् इति इतिकर्तव्यतां दर्शयति प्रयोगादिव्यापाररूपाम्—इयमित्थंभूता भावना पदार्थप्रतिपाद्या पदानां वाक्यार्थप्रतिपादने सामर्थ्याभावात् तानि हि स्वार्थप्रतिपादनमात्रेण निवृत्तव्यापाराणि न वाक्यार्थबोधक्षमाणि आकाङ्क्षासन्निधियोग्यतावच्छिन्नानां पदार्थानामेव अन्वय-व्यतिरेकाभ्यां वाक्यार्थवेदकत्वप्रतिपत्तेः। तथाहि—पदश्रवणाभावेऽपि यदा श्वेतगुणं द्रव्यं पश्यति अश्वजातिं च 'हेषा'शब्दाद् अनुमिनोति क्रियां च खुरविक्षेपादिशब्देन च बुध्यते तदा 'श्वेतोऽश्वो धावति' इति अवगच्छति। उक्तं च—

"पश्यतः श्वेत[3]मारूपं 'हेषा'शब्दं च शृण्वतः।
पदविक्षेपशब्दं च श्वेताश्वो धावतीति धीः"॥
[श्लो० वा० वाक्याधि० श्लो० ३५८]

१ अत्र 'निवर्तितत्वाद् विधेस्तत्र' इति पाठः संभाव्यते। २ विधेवि-(-धेर्वि-)-बृ०।
३ अत्र 'श्वेतता' इत्यपि संभाव्येत। "श्वेतिमा"—श्लो० वा०।

यत्र चापचारात् मानसात् शृण्वन्नपि पदानि पदार्थान् नावधारयति तत्र न भवति वाक्यार्थप्रत्यय इति व्यतिरेकबलात् पदार्थानां वाक्यार्थावेदकत्वमवसीयते। उक्तं च—

"भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया" ॥
"अनेकगुणजात्यादिविकारार्थानुरञ्जिता"।
[श्लो० वा० वाक्याधि० श्लो० ३३०-३३१]

एतेऽपि अयुक्तवादिन एव, पुरुषव्यापारस्य तद्व्यतिरिक्तस्य प्राक् प्रतिषिद्धत्वात् वाक्यार्थानुपपत्तेः। तत्सत्त्वेऽपि यदि असौ पदार्थाद् अभिन्नस्तदा पदार्थ एव स्यात् न वाक्यार्थः तथा च कुतः पदार्थगम्यता। न च पदार्थस्य सामान्यात्मकत्वात् कार्यता ततो न धर्मरूपता तथा च प्रत्यक्षादिगोचरत्वात् चोदनायास्तदनुवादकत्वेन तद्विषयत्वेन प्रवर्तमानाया न प्रामाण्यं स्यात् इत्युक्तं प्राक्। न च पदानामपि प्रामाण्यं स्मृत्युत्पादकत्वेन भवद्भिरभ्युपगम्यते

"पदमप्यधिकाभावात् स्मारकान्न विशिष्यते" [श्लो० वा० शब्दप० श्लो० १०७]

इति अभिधानात्। तथा च न क्वचिदर्थे शाब्दस्य प्रामाण्यं भवेत्। अथ क्रियाकारकसंसर्गरूपः पदार्थादर्थान्तरं वाक्यार्थः ननु असावपि यदि अनित्यस्तदा कारकसंपाद्यः, पदार्थसंपाद्यो वा? न कारकसंपाद्यः स्वकृतान्तप्रकोपात्। पदार्थोत्पाद्यत्वेऽपि य एव पदार्थास्तस्योत्पादकास्त एव यदि ज्ञापकास्तदा पूर्वं किं ज्ञापकाः, उत उत्पादका इति वक्तव्यम्। यदि प्राक् ज्ञापकास्तदा तदुत्पादितं ज्ञानमविद्यमानवाक्यार्थविषयत्वात् केशोन्दुकादिज्ञानवत् अप्रमाणं स्यात् कर्तव्यतया ते तं ज्ञापयन्तीति चेत्, न; तस्यामपि भावाभावोभयानुभयविकल्पानतिक्रमात्। आद्यविकल्पे तत्कर्तव्यताया भावस्वभावतया विद्यमानवाक्यार्थविषया चोदना स्यात् तथा च विद्यमानोपलम्भनत्व-तत्संप्रयोगजत्वोपपत्तेः अध्यक्षवन्न भावना अर्थविषया स्यात्। अथ अभावस्वभावा कर्तव्यता, न; अभावस्य तुच्छतया कर्तुमशक्तेः। अतुच्छत्वेऽपि स्वेन रूपेण विद्यमानत्वात् कर्तव्यताऽसंभवात्। न च अभावविषयं चोदनायाः परैः प्रामाण्यमभ्युपगम्यते अभावप्रमाणविषयत्वाच्च अभावस्य तद्विषयत्वे चोदनाया अनुवादकत्वाद् अप्रामाण्यप्रसङ्गश्च। न च उभयाकारताऽपि, उभयदोषप्रसक्तेः। अनुभयविकल्पेऽपि चोदनाजनितज्ञानस्य निर्विषयताप्रसक्तिः। अथ ते तं प्राग् उत्पादयन्ति पश्चाद् ज्ञापयन्ति इत्यभ्युपगमः सोऽपि अनुपपन्नः विद्यमानार्थविषयत्वेन चोदनायाः प्रत्यक्षाद्यवगतार्थगोचरत्वाद् अप्रामाण्यप्रसक्तेः। अथ नित्यो वाक्यार्थः पदार्थैः प्रतिपाद्यते नन्वेवं विद्यमानार्थगोचरत्वं चोदनायाः स्यात् तथा च 'त्रिकालशून्यकार्यरूपार्थविषयविज्ञानोत्पादिका चोदना'इत्यभ्युपगमव्याघातः।

अपि च, वाक्यार्थमवबोधयन्तः पदार्थाः किं शब्दप्रमाणतया अवबोधयन्ति, उत अनुमानत्वेन, आहोस्वित् अर्थापत्तितः, उतस्वित् प्रमाणान्तरत्वेन इति विकल्पाः। यद्याद्यो विकल्पः स न युक्तः, पदार्थानामशब्दात्मकत्वात्। अथ द्वितीयः सोऽपि न युक्तः, पदार्थानां वाक्यार्थाविनाभावित्वेन प्राग् अप्रतिपत्तेः अनुमानानवतारात्। न च वाक्यार्थस्य प्रमाणान्तरागोचरत्वात् पदार्थव्यापकताऽनवगता अनुमानगोचरः अन्यत्रापि तथाभावप्रसक्तेः वाक्यार्थाविनाभावित्वावगमे वा पदार्थानां चोदनाया अनुवादरूपताप्रसक्तेरप्रामाण्यानुषङ्गः। न च पदार्थानां पक्षधर्मता क्वचिद् अवगम्यते। न च तदवगमव्यतिरेकेण अनुमानप्रवृत्तिः। न च अर्थापत्तिरूपत्वेन पदार्था वाक्यार्थमवबोधयन्ति 'चोदनालक्षणोऽर्थो धर्मः' इत्यभ्युपगमव्याघातप्रसक्तेः। न च अर्थापत्तिरनुमानाद् विशिष्यते इति

१ यत्र चापचारात् मानसाच्छृ–वा० बा० भां० मां०। यत्र चापरात् मानसाच्छृ–बृ० आ० हा० वि०। यत्र चापरात्मा न स्याच्छृ–बृ० सं०।

पार्थसारथिमिश्रेण शाबरवचनमित्थमुद्धृतम्—

"मानसादपचारादुचरितेभ्योऽपि पदेभ्यः" श्लो० वा० पार्थ० व्या० पृ० ९४६ पं० १५। मुद्रिते शाबरे तु इत्थं पाठो दृश्यते—"मानसादप्याघाताद् यदुचरितेभ्यः पदेभ्यः"–पृ० २५ पं० १७। "यत्रापि मानसापचारादग्रहणं तत्रापि" —श्लो० वा० पार्थ० व्या० पृ० ९४७ पं० १०।

"मानसेनापराधेन पदार्थान् ये न गृह्णते"–श्लो० वा० वाक्याधि० श्लो० ३६०।

"किञ्च, अन्वयव्यतिरेकाभ्यामपि पदार्थानां निमित्तत्वमवसीयते। उच्चरितेभ्योऽपि पदेभ्यः कदाचिद् मानसादपचारात् पदार्थाग्रहणे वाक्यार्थाग्रहणात्"—शास्त्रदी० युक्तिस्नेहप्रपूरणी सिद्धान्तचन्द्रिका पृ० १६० पं० २६।

प्राक् प्रतिपादितत्वात्। न च प्रमाणान्तरात्मकाः सन्तः पदार्था वाक्यार्थं गमयन्ति, तृतीयविकल्पोक्तदोषप्रसक्तेः। अथ 'पदेभ्यः पदार्थाः तेभ्यश्च वाक्यार्थः प्रतीयते' इति पारम्पर्येण चोदनाया धर्मं प्रति निमित्तता तर्हि श्रोत्रात् पदज्ञानम् ततोऽपि पदार्थविज्ञानम् तस्माच्च धर्मज्ञानम् इति प्रत्यक्षलक्षणोऽर्थो धर्मः प्रसक्तः। अथ साक्षाद् धर्मं प्रत्यक्षस्य व्यापाराभावान्न प्रत्यक्षलक्षणता धर्मस्य तर्हि चोदनाया अपि साक्षात् तत्र व्यापाराभावान्न चोदनालक्षणोऽपि धर्मः स्यात्। पदं च पदार्थस्यापि स्मारकत्वाद् न वाचकम्। न च वाक्यार्थे स्मर्यमाणपदार्थसंबद्धतयाऽविज्ञाते पदार्थस्मरणान्यथानुपपत्त्या प्रतिपत्तिर्युक्ता। न च संबन्धो वाक्यार्थेन सह कस्यचिद् अवगन्तुं शक्यः संबन्ध्यवगमपुरस्सरत्वात् संबन्धप्रतिपत्तेः स्मर्यमाणपदार्थप्रतिपत्त्यन्यथानुपपत्तिं च विना नान्यतो वाक्यार्थप्रतिपत्तिः तामन्तरेण च नान्यथानुपपत्तेः प्रवृत्तिः इति इतरेतराश्रयप्रवृत्तेर्न कथंचिद् वाक्यार्थप्रतिपत्तिः स्यात्। संबन्धावगममन्तरेण अपि पदार्थानां वाक्यार्थावेदकत्वे एकपदार्थसमुदायस्य सर्ववाक्यार्थावेदकत्वप्रसक्तिः। यदपि मानसाद् अपचारात् पदश्रवणेऽपि पदार्थानवगमाद् न वाक्यार्थज्ञानं दृष्टमिति पदार्थानामेव वाक्यार्थावबोधकत्वमवसीयत इत्युक्तम् तदपि अचारु; विशिष्टपदसमुदायात् कथंचिद् अभिन्नस्य वाक्यस्यैव अनवबोधात् तत्र वाक्यार्थप्रतिपत्त्यनुत्पत्तेर्न पुनः पदार्थानवगमात्। न हि उपहतमनसो वाक्यात्मकपदानां श्रोत्रसंबन्धमात्रेण अवगमः न चानवगतं स्वरूपेण वाक्यं वाक्यार्थसंबद्धत्वेन वा स्वार्थे प्रतिपादयति अतिप्रसङ्गात्। यदि च उपहतमनाः पदानि शृणोति तदर्थान् किमिति नावधारयति? अथ परामर्शरूपं तदर्थावधारणं तर्हि पदश्रवणमपि निश्चयात्मकमेव अभ्युपगन्तव्यम् अतदात्मकस्य तच्छ्रवणस्य स्वाप-मद-मूर्च्छादिष्विव परमार्थतोऽश्रवणरूपत्वात् अविकल्पज्ञानस्य अज्ञानरूपतया व्यवस्थापितत्वात्। पूर्वपदानुविद्धं चान्त्यपदं यदा वाक्यम् पूर्वपदानि च स्वाभिधेयविशिष्टतया अन्त्यपदप्रतिपत्तिकाले परामृश्यमानानि वाक्यार्थप्रतिपत्तिजनकानि तदा पदार्थानवगमे वाक्यस्यैव स्वार्थाभिसंबद्धतया अनवगमात् कथं ततो वाक्यार्थप्रतिपत्तिर्भवेत्? तथाहि—'गौर्गच्छति' इति वाक्यप्रयोगे गोशब्दात् सामान्यविशेषात्मकं गवार्थं गच्छत्याद्यन्यतमक्रियासापेक्षं प्राक् प्रतिपद्यते 'गच्छति' इत्येतस्माच्च तमेव प्रतिनियतगमिक्रियावच्छिन्नमवगच्छति ततः क्रियाद्यवच्छिन्नः सामान्यविशेषात्मको वाक्यार्थो व्यवतिष्ठते पदसमुदायात्मकाद् वाक्यात् पदार्थात्मकस्यैव तस्य प्रतिपत्तेः। यस्मिन्नुच्चरिते यः प्रतीयते स एव तस्यार्थः इति शाब्दिकानां व्यवहारात्। यश्च शब्दमन्तरेणापि अध्यक्षादेरर्थः प्रतीयते न स शब्दार्थः तेन 'पश्यतः श्वेतमारूपम्' इत्याद्यभिधानं प्रकृतानुपयोग्येव अतः पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्थाः प्रागवगताः सन्तो वाक्यार्थं गमयन्ति तस्मात् पदेभ्यः पदार्थप्रत्ययः पदार्थेभ्यो वाक्यार्थप्रत्ययः

"पदार्थानां तु मूलत्वमिष्टं तद्भावभावतः"।
"पदार्थपूर्वकस्तस्माद् वाक्यार्थोऽयमवस्थितः"।
[श्लो० वा० वाक्याधि० श्लो० १११,३३६]

इत्यादि यत् परैरुक्तम् तत् अपास्तं भवति अतो नाभिहितान्वयः नापि अन्वितानां क्रिया-कारकादीनामेकान्ततोभिधानम् यतः पदार्थः पदार्थान्तरसंसक्त एव यदि पदेन अभिधीयते तदा प्रथमपदेनैव वाक्यार्थस्य अभिहितत्वात् शेषपदोच्चारणमनर्थकमासज्येत पदस्य च वाक्यरूपताप्रसक्तिः विशेषाभिधायित्वात् यावन्ति च वाक्ये पदानि तावन्ति वाक्यानि स्युः यावन्तश्च पदार्था वाक्यार्था अपि तावन्त एव प्रसज्येरन्। यदि च पदार्थानेकत्वेऽपि एक एव वाक्यार्थस्तदा प्रतिपादितार्थप्रतिपादकत्वात् शेषपदार्थपदानां पौनरुक्त्यमासज्येत। अन्वितार्थाभिधायकत्वे च पदस्य 'गौः' इत्युक्ते 'गच्छति'आदिक्रियाविशेषाकाङ्क्षा न स्यात् तत एव क्रियाविशेषसंसर्गस्य अवगतत्वात्। न च विशेषाणामानन्त्यात् समयकरणाशक्तेरसंकेतितस्य च अतिप्रसङ्गतः प्रतिपादनसामर्थ्यायोगात् पदानां विशेषप्रत्यायनसामर्थ्यं स्यात्। न च केवलसामान्याभिधायि पदं संभवति सामान्यस्य अर्थक्रियाऽनिर्वर्तकत्वेन व्यापित्वेन चानयनादिक्रियासंसर्गाभावात् ततश्च सामान्य-विशेषयोरन्यतरस्यापि पदेन अनभिधानात् कथमन्विताभिधानम्? सामान्यस्य नित्यत्वात् एकत्वाच्च पदेन सह संकेतसद्भावात्

१ प्रत्यध्यक्षस्य बृ०। २–णाप्यक्षादे–भां० मां०। ३ पृ० ७४१ पं० ३९। ४–शेषणानामा–बृ०।

पदार्थत्वेऽपि वाक्यार्थस्य तत्संबद्धत्वेन अग्रहणात् कुतस्तत्प्रतिपत्तिरित्युक्तं प्राक्। यदि च पदात् पदार्थे उत्पन्नं ज्ञानं वाक्यार्थपर्यवसायि अभ्युपगम्येत चक्षुरादिप्रभवं रूपादिज्ञानं गन्धादिपर्यवसितं तदा प्रसज्येत। अथ चक्षुरादिप्रभवं रूपादिज्ञानं न गन्धादिसाक्षात्कारि इति नायं दोषस्तर्हि पदप्रभवं पदार्थज्ञानमपि न वाक्यार्थावभासि इति न तत्पर्यवसितमभ्युपगन्तव्यम्। चक्षुरादेर्गन्धादाविव पद-
५ स्यापि वाक्यार्थसंबन्धानवगमात् सामर्थ्यानुपपत्तेः। न च पदात् सामान्यमात्रपदार्थप्रतिपत्तावपि तद्विशेषप्रतिपत्तिः स्यात् विशेषरूपेण तु प्रवृत्त्यादिव्यवहारसमर्थो वाक्यार्थो न संसर्गमात्रम् तस्य अर्थक्रियाऽक्षमस्य श्रोत्रनभिवाञ्छितत्वात् अनभिवाञ्छितार्थप्रतिपादकस्य च वचस उन्मत्तकविरुत-[1]स्येवाप्रमाणत्वात्। न च विशेषमन्तरेण सामान्यमनुपपद्यमानं संसर्गविशेषमवबोधयतीति शक्यं वक्तुम् आधारप्रतिपत्तावपि तद्विशेषप्रतिपत्तेरयोगात् न हि 'पय आनीयताम्' इत्युक्ते तदाधारपात्र-
१० मात्रप्रतिपत्तावपि कुटादिविशेषप्रतिपत्तिः संभविनी। तन्न अन्विताभिधानम् अभिहितान्वयो वा एकान्तवादिमतेन संभवी। विधिवाक्यस्य च प्रामाण्यनिरासे अर्थवादादिवाक्यानां प्रामाण्यमपास्तमेव क्रियाङ्गत्वेन तेषां परैः प्रामाण्याभ्युपगमात् अन्यथा तदयोगात्। तदुक्तम्—"आम्नायस्य क्रियार्थत्वाद् आनर्थक्यमतदर्थानाम्" [मीमांसाद० १-२-१] इति। न च विध्यङ्गताऽपि अर्थवादादिवाक्यानां पराभ्युपगमेन संभवति सामान्यादेस्तदर्थस्य असंभवेन विध्यर्थोपकारकत्वायोगतोऽर्थद्वारेण
१५ तेषां तदङ्गत्वानुपपत्तेः। न च अर्थकृतं संबन्धमपहाय शब्दः शब्दान्तरस्य अङ्गभावमासादयतीत्यतिप्रसङ्गात्। तन्न सामान्यशब्दार्थवादिप्रकल्पितं तत् तदभिधेयं संभवतीति न प्रथमपक्षाभ्युपगमः श्रेयान्। {

द्वितीयविकल्पाभ्युपगमेऽपि विशेषाः किं समुच्चिताः शब्दवाच्याः, उत विकल्पिताः इति वक्तव्यम्। यदि विकल्पिता इति पक्षस्तदा एकविशेषव्यतिरेकेण अन्येषां विशेषाणां न विवक्षित-
२० दुग्धशब्दवाच्यता स्यात् ततश्च एकपयःपरमाणोरन्यत्र तत्परमाण्वादौ न दुग्धशब्दात् प्रतिपत्तिप्रवृत्ती स्याताम्। समुच्चितानामपि तेषां तच्छब्दवाच्यत्वे एकस्मिन्नपि पयसि तद्बहुत्वप्रसङ्गः परस्परविविक्तपयःपरमाणूनां तत्र अनेकत्वात्। न च तत्समुच्चयेऽपि पयः तद्व्यतिरेकेण तदनभ्युपगमात् तथा तस्याप्रतीतेश्च। न च एककार्यकारितया तथा व्यपदेशः तस्यापि वस्तुत्वे तद्रूपत्वात् अवस्तुत्वे कार्यविरोधात्। तेषां च एकत्रैव सामर्थ्यं तस्य एकस्य एकपरमाणुरूपत्वे अनुपलभ्यता-
२५ प्रसक्तिः अनेकाणुरूपत्वे एककार्यत्वविरोधः एकस्य तत्कर्तृकत्वविरोधश्च स्थूलैकवस्तुनस्तदेककार्यत्वे तस्य समानरूपताप्रसङ्गः स्वारम्भावयवद्रव्यव्यापकैकरूपत्वात्। एवं च विशेषमात्रवादत्यागः। स्वावयवसाधारणैकरूपवस्त्वनभ्युपगमेऽपि च प्रतिनियतविषयप्रतिपत्त्यभावप्रसक्तिः। अनेकावयवात्मकैकस्थूलैवस्त्वभावे तदाकारप्रतिपत्तेरभावात् सर्वदा सर्वस्यास्तस्यास्तदाकारतयैव संवेदनात् अन्योन्यानुविद्धाननुविद्धवस्तुव्यवस्थापकप्रमाणाभावे च प्रमाणान्तरप्रतिपन्नतथाभूतवस्तुप्रतिपाद-
३० काभिधानस्यापि असंभवात् प्रतिनियतप्रवृत्तिहेतुशाब्दव्यवहाराभावप्रसक्तिश्च अत एव तथाभूतविकल्पजननात् 'शब्दः प्रमाणमसत्यपि बाह्यस्वलक्षणविषयत्वे' [3]इत्ययुक्तम्। 'पयः पीयताम्' इत्यभिधानोत्थापितविकल्पाकारस्य खरविषाणशब्दोत्थापितविकल्पाकाराद् अभेदप्रसक्तेः सर्वत्र तथाभूतवस्त्वनुभवाभाव एव विकल्पाकारप्रवृत्तेर्बहिष्प्रवृत्त्यभावश्च। न च तदध्यवसायेन तत्र प्रवृत्तिः सर्वदा तत्तत्त्वाग्रहणे अतत्त्वस्य तत्त्वरूपतया तत्राध्यारोपासंभवात्। न चैवं मृगतृष्णिकासु अध्यारोपितो-
३५ दकाकारस्येव तस्य प्राप्तिर्भवेत्। न च स्वलक्षणानुभवद्वारायातविकल्पप्रभवशब्दस्य संवादित्वकल्पनाऽपि भवन्मतेन संगता निरंशक्षणिकपरमाणुस्वलक्षणानुभवस्याभावात् अन्यस्य चानभ्युपगमात् अभ्युपगमे वा शब्दस्य अनेकान्तवस्तुविषयप्रामाण्यप्रसङ्गः त्रिरूपलिङ्गप्रतिपादकवाक्यवत् पारम्पर्येण तस्य तत्र प्रतिबन्धात् न चैवमपि विशेषैकान्तसिद्धिः उभयवादप्राप्तिप्रसङ्गात्। तन्न द्वितीयविकल्पस्यापि संभवः।

४० तृतीयविकल्पोऽपि प्रत्येकपक्षभाविदोषप्रसङ्गतोऽनभ्युपगमविषयः न च परस्परनिरपेक्षयोः

१ उन्मत्तकविरुद्धतस्ये-आ० ह्रा० वि०। उन्मत्तकमविरुतस्ये-वा० बा०। उत्तमकविरुतस्ये-भां० मां०। २-लखभावे भां० मां०।-लवस्तुभावे आ० ह्रा० वि०। ३ इत्युक्तम् वा० बा० भां० मां०। ४-वृत्ताभा-बृ० आ० ह्रा० वि०।

सामान्यविशेषयोरसत्त्वे तदारब्धोभयवादो युक्तः अङ्कुलिद्वयाभावे तत्संयोगवत्। अनुभयविकल्पाभ्युपगमोऽपि असंगतः प्रतिनियतसामान्यविशेषयोरनभिधाने प्रवृत्त्यादिव्यवहाराभावप्रसक्तेः। न च अनुभयपक्षः संभवति अन्योन्यव्यवच्छेदरूपयोरन्यतरनिषेधस्य तदपरविधिनान्तरीयकत्वात् परस्परापेक्षया द्वयोरपि उपसर्जनत्वे निरपेक्षत्वे च असत्त्वमेव सापेक्षत्वे च इतरेतराश्रयदोषानुषङ्गः द्वयोरपि प्राधान्ये सापेक्षत्वानुपपत्तेरसत्त्वमेव अन्यतरस्यैव उपसर्जनत्वे निमित्तानुपपत्तिः द्वयोरपि ५
औदासीन्याभ्युपगमे अव्यवहार्यतोपपत्तिः तदतदात्मकैकवस्तुनो यथाक्षयोपशमं प्रमाणतः प्रधानोपसर्जनरूपतया प्रतिपत्त्यभ्युपगमे 'स्यात् सामान्य-विशेषात्मकं वस्तु' इति अशेषरूपात्मकवस्तुप्रतिपादकत्वेन शब्दादेः प्रमाणभूतप्रतिपत्तिनिबन्धनस्य अभ्युपगमात् अनेकान्तमतानुप्रवेशः समानासमानपरिणामात्मकैकवस्तुप्रतिपादकत्वेन शब्दादेरभ्युपगमात् तस्मात् अनुगत-व्यावृत्तात्मकैकप्रतिभासजनकस्वभावं तथाभूतधर्मद्वयात्मकमेकं वस्तु अभ्युपगन्तव्यम् अन्यथा तथाभूतप्रतिभासस्य १०
हेत्वभावतोऽभावप्रसक्तेः अन्यादृशस्य च तस्याऽसंवेदनात् सर्वप्रतिभासविरतिप्रसङ्ग इत्युक्तं प्राक्। न च अनादितथाभूतविकल्पप्रसववासनातस्तथाभूतप्रतिभाससद्भावात् अयमदोषः तस्या अपि अनन्तधर्मात्मकैकरूपताऽनभ्युपगमे तथाविधविज्ञानजनकत्वायोगात् इति असकृदावेदितत्वात्। न च सर्वं एवायं प्रमाण-प्रमेयव्यवहारो भ्रान्तिरूप इति वक्तव्यम् अपरस्य अभ्रान्तरूपस्य अभावात्। न च सुगतज्ञानमभ्रान्तम् तस्य उत्पत्तिकारणाभावतोऽभावात्। न नैरात्म्यादिभावना तत्कारणम् तस्या ११५
मिथ्यारूपतया अमिथ्यारूपतज्ज्ञानहेतुत्वायोगात्। न च तस्य सद्भावः सिद्धः अध्यक्षतोऽनधिगमात्। न च अनुमानतोऽपि तत्सिद्धिः तत्प्रतिबद्धलिङ्गाप्रतिपत्तेः। न च लोकप्रसिद्धप्रमाणस्य प्रमाणता अभ्युपगता 'सर्वं एवायं प्रमाण'-इत्याद्यभिधानात्। न चाप्रमाणकवस्तुभावनाप्रकर्षजं ज्ञानमभ्रान्तम् काम-शोक-भयादिज्ञानस्य भावनाप्रकर्षजस्यापि भ्रान्तत्वोपलब्धेः नैरात्म्यादेश्च वस्तुनः अप्रमाणोपपन्नत्वप्रतिपादनात्। न च सत्यभयादिज्ञानपूर्वकस्यापि भावनोत्थभयज्ञानस्य सत्यतोप- २०
लब्धा इति अस्यापि असत्यताप्रसक्तिः अध्यारोपात् कामादिज्ञानस्य असत्यतेति चेत् अत्रापि अध्यारोपः समानः इन्द्रियज्ञानग्राह्यवस्तुनस्तद्विषयत्वेन अभावात् निर्विकल्पकविषयस्य विकल्पज्ञानविषयत्वविरोधात्। न च 'भावनाजमविकल्पम् विशदत्वात्' इति वाच्यम् तथात्वेऽपि तत्प्रतिभासस्य अभ्यासकृतत्वेन तत्र मिथ्यात्वोपपत्तेः। न च तत्प्रतिभासः वस्तुकृत एव न भावनाकृत इति वाच्यम् इतरत्रापि तथा प्रसक्तेः। न च प्रमाणान्तरबाधातः तत्रासौ न तत्कृतः अत्रापि तद्बाधासं- २५
भवात् क्षणिकस्य अर्थस्य प्रमाणान्तरतः प्राग् उपलब्धस्य भावनाप्रकर्षजे ज्ञाने असंभवात् अविकल्पविषयस्य भावनाविकल्पविषयत्वायोगात् तत्प्रकर्षजेऽपि तस्याऽप्रतिभासनात्। न च अन्यदा तस्य दृष्टत्वाद् न प्रमाणबाधा इतरत्रापि अस्य तुल्यत्वात्। न च निरन्वयविनाशसंगते चेतसि भावनादेः संभव इति प्रतिपादितमनेकशः। न च सौगतं ज्ञानं कथंचिदपि प्रमाणतामासादयति तन्निबन्धनतदाकारोत्पत्त्यादेर्निरस्तत्वात् 'अज्ञातार्थप्रकाशो वा' इत्यस्यापि पारमार्थिकप्रमाणलक्षणस्य प्रतिक्षिप्त- ३०
त्वात्। तदेवमेकान्तवादिप्रकल्पितस्य प्रमाण-प्रमेयादेः सर्वस्य अघटमानत्वात् तच्छासनं दृष्टवत् अदृष्टार्थेऽपि विसंवादित्वाद् अप्रमाणम्। तत्प्रतिपक्षभूतं च यथोक्तजीवादितत्त्वप्रकाशकं सर्वत्र दृष्टार्थे अव्यभिचारित्वात् अदृष्टार्थेऽपि सहेतुके हेयोपादेयस्वरूपे बन्ध-मोक्षलक्षणे वस्तुतत्त्वे प्रमाणमिति स्थितम्। अतः पूर्वापरैकवाक्यतया सकलानन्तधर्मात्मकजीवादितत्त्वप्रतिपादकसूत्रसंदर्भस्य नय-प्रमाणद्वारेण प्रवृत्तस्य तात्पर्यार्थज्ञाता सिद्धान्तज्ञाता न पुनरपरिहृतविरोधतदेकदेशज्ञाता। न ३५
चैकदेशज्ञः स्याद्वादप्ररूपणायाः सम्यक् समर्थ इति व्यवस्थितम्॥ ६३॥

[अर्थवशात् सूत्रस्य निष्पत्तिर्न तु निरपेक्षसूत्रमात्रेणार्थस्येति कथनम्]

सूत्रस्य सूचनार्थत्वात् अर्थवशात् तस्य निष्पत्तिः न पुनः सूत्रमात्रेणैव अन्यनिरपेक्षेण अर्थनिष्पत्तिः इत्याह—

सुत्तं अत्थनिमेणं[1] न सुत्तमेत्तेण अत्थपडिवत्ती। ४०
अत्थगई उण णयवायगहणलीणा दुरभिगम्मा॥ ६४॥

१-निगेणं वा० बा० भां० मां०।-नियेणं आ० ह्रा० वि०।

अनेकार्थराशिसूचनात् सूते वा अस्माद् अर्थराशिः शेते वा अस्मिन् अर्थसमूहः श्रूयते वा अस्माद् अनेकोऽर्थ इति निरुक्तवशात् **सूत्रम्**। अर्यत इति अर्थः साक्षात् तस्याभिधेयः गम्यश्च सामर्थ्यात् तस्य स्थानमेव सूत्रम् यथार्थं सूत्रार्थव्यवस्थापनात् सूत्रान्तरनिरपेक्षस्य तस्य अर्थव्यवस्थापने प्रमाणान्तरबाधया तदर्थस्य तत्सूत्रस्य उन्मत्तकवाक्यवत् असूत्रत्वापत्तेः। अत एव निर्युक्त्याद्यपेक्षत्वात् सूत्रार्थस्य न सूत्रमात्रेणैव अर्थस्य पौर्वापर्येण अविरुद्धस्य प्रतिपत्तिः अयथार्थतयाऽपि अविवृतस्य तस्य श्रुतेः। **अर्थस्य** तु यथाव्यवस्थितस्य **गतिः** प्रतिपत्तिः पुनर्द्रव्यार्थ-पर्यायार्थलक्षण-**नयवादावेव गहनं** विपिनम् तत्र **लीना** तथा च **दुरधिगम्या** दुरवबोधा सकलनयसम्मतार्थस्य प्रतिपादकं सूत्रम्—"जीवो अणाइणिहणो" [ ] इत्यादिवाक्यवद् न प्रमाणार्थसूचकं स्यात् प्रवृत्तानि च नयवादेन सूत्राणि। तथा च आगमः—

"णत्थि णएण विहूणं सुत्तं अत्थो य जिणमए किञ्चि।
आसज्ज उ सोआरं णए णअविसारओ बूआ" ॥
[आवश्यकनि० उवग्घायनि० गा० ३८] इति ॥ ६४ ॥

[अधीतसूत्रस्यार्थसंपादने प्रयत्नाभावे शासनविडम्बकत्वकथनम्]

यत एवम् अनेकान्तात्मकार्थप्रतिपादकत्वेन सूत्रं व्याख्येयम्—

तम्हा अहिगयसुत्तेण अत्थसंपायणम्मि जइयव्वं।
आयरियधीरहत्था हंदि महाणं विलंबेन्ति ॥ ६५ ॥

तस्मात् इति पूर्वोक्तार्थप्रत्यवमर्शार्थः **अधिगतम्** अधीतम् अशेषं **सूत्रं** येन असौ तथा-अधीततत्कालव्यावहारिकाशेषसिद्धान्तेन इति यावत् **अर्थसंपादने** तद्विषयप्रमाण-नय-स्वरूपावधारणे **यतितव्यम्**। अधीत्य सूत्रं श्रोतव्यम् श्रुत्वा च नयसर्वसंवादविनिश्चयपरिशुद्धं भावनीयम् अन्यथा **आचार्या धीरहस्ता** अशिक्षितशास्त्रार्था अनभ्यस्तकर्माऽपि कर्मणि धृष्टतया व्याप्रियते येषां हस्तस्ते धीरहस्ता आचार्याश्च ते अशिक्षितधृष्टाश्च इति यावत् **हंदि** गृह्यताम् ते तादृशा **महाज्ञाम्** आप्तशासनं विगोपयन्ति विडम्बयन्ति इति यावत्।

[निर्ग्रन्थानां वस्त्रपात्रादिनिषेधकस्य [२]दिगम्बरीयमतस्य पूर्वपक्षतयोपन्यासः]

तथा च दृश्यन्त एव सर्वज्ञवचनं यथावस्थितमनवगच्छन्तो दिग्वाससो वस्त्र-पात्रादिधर्मोपकरणसमन्वितानां यतीनां नैर्ग्रन्थ्याभावाद् न सम्यग्व्रतानि तीर्थकृद्भिः प्रतिपादितानीति प्रतिपादयन्तः। तथाहि—यद् रागाद्यपचयनिमित्तनैर्ग्रन्थ्यविपक्षरूपं तत् तदुपचयहेतुः यथा विशिष्टशृङ्गारानुषक्ताङ्गनाङ्गसंगादिकम् यथोक्तनैर्ग्रन्थ्यविपक्षभूतं च वस्त्रादिग्रहणं श्वेतवाससामिति। तथा, यः स्वीकृतग्रन्थः सोऽध्वनि संचरन् न अभीष्टस्थानप्राप्तिमान् भवति, यथा चौरा[३]द्युपद्रुते पथि संचरन् असहायः स्वीकृतग्रन्थोऽध्वगः, स्वीकृतग्रन्थश्च मोक्षाध्वनि संचरन् वस्त्राद्युपकरणवान् सितपट इति। तथा, यो यद्विनेयः स तल्लिङ्गानुकारी, यथा चीवरादिलिङ्गधारिसुगतविनेयो रक्तपटः व्युत्सृष्टत्यक्तदेहतीर्थकृद्विनेयाश्च भिक्षव इति। न च वस्त्राद्युपकरणाऽऽग्रहवत्सु प्रव्रज्यापरिणामः संभवी मिथ्यादृष्टिष्वपि परिग्रहाग्रहवत्सु अन्यथा तत्प्रसक्तेः। तथा च प्रयोगः—श्वेतभिक्षवो महाव्रतपरिणामवन्तो न भवन्ति न वा तत्फलसाधकाः, वस्त्र-पात्रादिपरिग्रहाग्रहयोगित्वात्, महारम्भगृहस्थवत्। न च भगवद्भिः वस्त्रग्रहणं यतीनामुपदिष्टम् तदागमे वस्त्रग्रहणप्रतिषेधस्य श्रवणात्। तथाहि—स्थि[४]तकल्प "आचेलक्क(क्कु)द्देसिय"-[ ] इत्यादिसूत्रे चेलग्रहणप्रतिषेधः आचेलक्यपदेन

१ पृ० १३६। विशेषाव० गा० २२७७।
२ दिगम्बरीयमतमेतत् प्रमेयकमलमार्तण्डतोऽवगन्तव्यम्—पृ० ९५ प्र० पं० ५-द्वि० पं० ९।
३-**राद्युपहते** आ०। ४ **स्थितकल्पा** आ-वृ० आ० हा० वि०। ४ **स्थितिकल्पे** आ-वा० बा०।
५-**चेलुक्कदेसि**-भां० मां०।-**चेलुक्केदेसि**-आ० हा० वि०।-**चेलुक्कदेसि**-वा० बा०।
"आचेलक्कुद्देसियसिज्जायररायपिंडकिइकम्मे। वयजेट्ठपडिक्कमणे मासं पज्जोसवणकप्पो" ॥
—पञ्चाश० पृ० २६४ गा० ६।

कृत एव। तथा, परीषहेषु अचेलपरीषहस्य यतेरुपदेशात्। तथा, "णगिणस्स वा वि मुण्डस्स" [ ] इत्याद्यागमे बहुशो यतेर्वस्त्रादिपरित्यागो भगवद्भिः प्रतिपादित इति। तत् प्रतिषिद्धं वस्त्रादिग्रहणमाचरन्तः परतीर्थिका इव कथं सम्यग्ज्ञान-दर्शन-चारित्रलक्षणमुक्तिमार्गसमन्विताः श्वेताम्बरा इति।

[सिद्धान्तिना पूर्वपक्षं प्रतिविधाय निर्ग्रन्थानां धर्मोपकरणतया वस्त्रपात्रादिधारणस्य [१]समर्थनम्] ५

अत्र प्रतिविधीयते—'यत् तावद् रागाद्यपचयनिमित्त-इत्यादिप्रयोगोपादानम्, तत्र रागाद्यपचयनिमित्तं किमेकदेशनैर्ग्रन्थ्यम्, आहोस्वित् सर्वथा नैर्ग्रन्थ्यम् इति? यदि सर्वथा नैर्ग्रन्थ्यं रागाद्यपचयनिमित्तम् तत्र तथाभूतनैर्ग्रन्थ्यस्य मुक्तव्यतिरेकेण असंभवात् मिथ्यात्वाऽविरति-प्रमाद-कषाय-योग-बलप्रवृत्ताष्टविधकर्मसंबन्धस्य ग्रन्थत्वात् तदभावस्य च आत्यन्तिकस्य निश्शेषतो मुक्तेषु एव संभवात् ततश्च कथं तस्य रागाद्यपचयहेतुतेति कथं न विशेषणासिद्धो हेतुः। अथ देशनैर्ग्रन्थ्यं रागाद्यपचयनिमित्ततयाऽत्र विवक्षितं तदाऽत्रापि वक्तव्यम्—किं तत् सम्यग्ज्ञानादितारतम्येन उपचीयमानम् आहोस्विद् बाह्यवस्त्राद्यभावरूपम्? तत्र यदि आद्यः पक्षः स न युक्तः तथाभूतस्य सम्यग्ज्ञानादिविपक्षत्वेन वस्त्रादिग्रहणस्य असिद्धेः हेतोर्विशेष्यासिद्धताप्रसक्तेः। नापि द्वितीयः वस्त्राद्यभावस्य रागाद्यपचयनिमित्तत्वासिद्धेः हेतोर्विशेषणासिद्धतादोषात्। न च वस्त्राद्यभावो रागाद्यपचयहेतुत्वेन सिद्ध इति वक्तव्यम् अतिशयरागवद्भिः पारापतादिभिर्व्यभिचारात्। न च पुरुषत्वे सति वस्त्राभावो रागाद्यपचयहेतुः वस्त्रविकलनाहलैर्व्यभिचारात्। न च आर्यदेशोत्पत्तिमत्पुरुषत्वे सति असौ तद्धेतुरिति वक्तव्यम् तथाभूतकामुकपुरुषैर्व्यभिचारात्। न च व्रतधारितथाभूतपुरुषत्वे सति असौ तन्निमित्तम् तथाभूतपाशुपतैर्व्यभिचारात्। न च 'जैनशासनप्रतिपत्तिमत्तथाभूतपुरुषत्वे सति' इति विशेषणोपादानात् अदोषः, उन्मत्तदिगम्बरैर्व्यभिचारात्। न च 'अनुन्मत्तत्वे सति' इत्यपरविशेषणाद् दोषाभावः मिथ्यात्वोपेतद्रव्यलिङ्गावलम्बिदिग्वाससा व्यभिचारात्। न च सम्यग्दर्शनादिसमन्वितपुरुषत्वे सति असौ तद्धेतुः विशेषणस्यैव तत्र सामर्थ्येन विशेष्यस्यासामर्थ्यतोऽनुपादानप्रसक्तेः। न च विशिष्टश्रुतसंहननविकलानामर्वाक्कालभाविपुरुषाणां वस्त्रादिधर्मोपकरणाभावे यतियोग्याहारविरह इव विशिष्टशरीरस्थितेरभावतः सम्यग्दर्शनादिसमन्वितत्वविशेषणोपपत्तिरिति विशेष्यसद्भावो विशेषणस्य बाधक एव। अथ वस्त्रादिपरिग्रहस्य तृष्णापूर्वकत्वात् तस्यां च रागादेरवश्यंभावित्वात् सम्यग्दर्शनादेश्च तद्विपक्षत्वात् तृष्णाप्रभववस्त्रग्रहणाभावः स्वकारणनिवृत्तिमन्तरेण अनुपपद्यमानो रागादिविपक्षभूतसम्यग्ज्ञानाद्युत्कर्षविधायकत्वात् कथं तद्भावबाधकत्वेन उपदिश्यत इति न; वस्त्रादिपरिग्रहस्य तृष्णानिमित्तत्वे आहारग्रहणस्यापि तथात्वप्रसक्तेः। न च आहारग्रहणस्य परिग्रहव्यवहाराविषयत्वात् न तृष्णापूर्वकत्वमिति वाच्यम् मूर्छाविषयत्वे तस्य 'परिग्रह'शब्दवाच्यत्वोपपत्तेः "मूर्छा परिग्रहः" [तत्त्वार्थ० ७-१२] इति वचनात्। अथ स्रक्-चन्दनादिवद् उपभोगार्थम् मांसादिभक्षणवत् शरीरबृंहणार्थं वा नासौ गृह्यते किन्तु ज्ञानाद्युपष्टम्भनिमित्तशरीरस्थित्यादिहेतुतया अतो न तृष्णापूर्वकः नापि 'परिग्रह'-शब्दवाच्यः तर्हि वस्त्रादिधर्मोपकरणग्रहणेऽपि समानमेतत्। अथ वस्त्राद्यभावेऽपि शरीरस्थितिसंभवात् तृष्णापूर्वकमेव तद्ग्रहणम्, न; आहारेऽप्यस्य समानत्वात्। अथ तमन्तरेण चिरतरकालशरीरस्थितेरस्मदादेरदर्शनात् वेदनोपशमादिभिः षड्भिर्निमित्तैस्तस्य ग्रहणं तर्हि अनुत्तमसंहननस्य विशिष्टश्रुताऽपरिकर्मितचित्तवृत्तेः कालातिक्रान्तादिवसतिपरिहारकृतप्रयत्नस्य षड्विधजीवनिकायविध्वंसविधाय्यशनाद्यनारम्भिणः शीताद्युपद्रवाद् वस्त्रादिग्रहणमन्तरेण शरीरस्थितेरभावात् तद्ग्रहणमपि न्याय्यम् तथा, वाय्वादिनिमित्तप्रादुर्भूतविक्रियावल्लिङ्गसंवरणप्रयोजनपटलाद्युपधिविशेषस्य च ग्रहणं किं नाभ्युपगम्यते शीतादिबाधोपजायमानार्तध्यानप्रतिषेधार्थं युक्तकल्पादेश्चादानं किमिति

१ सविस्तरमेतत् समर्थनं विशेषावश्यकभाष्य-उत्तराध्ययनपाइअटीका-शास्त्रवार्तासमुच्चयटीकातोऽवगन्तव्यम्—गा० २५५०-२६०९। अ० २। पृ० ३१७ द्वि०-३२५ द्वि०।
२-**णस्यास्य बा**-आ० हा० वि०।

नेष्यते? न च स्त्री-स्रक्-चन्दनाद्यभावोपजायमानसंक्लेशपरिणामनिबर्हणार्थं रूयादेरपि ग्रहणं प्रसज्यत इति वक्तव्यम् क्षुद्वेदनाप्रशमनिमित्तत्रिकोटीपरिशुद्धाहारग्रहणवद् अङ्गनासंप्रयोगसंकल्पप्रभववेदनापरिणामोपशमार्थं[1] वृष्यतरमांसाद्याहारग्रहणस्यापि प्रसक्तेः । अथ तथाभूताहारग्रहणे सुतरां क्लिष्टाध्यवसायोत्पत्तिप्राबल्यमिति न तद्ग्रहणम् तत् रूयादिग्रहणेऽपि समानम् । यदपि वस्त्राद्यभावे संक्लेशपरिणामोत्पत्तिः कातराणाम् न स्वशरीरमपि काष्ठवद् मन्यमानानां दिग्वाससाम् तथादर्शनात् इति, तदपि अनुभवविरुद्धम्; आर्तध्यानोपगतानामनन्तसत्त्वोपमर्दविधाय्यनलारम्भादिप्रतिषिद्धाचरणवत्तया तेषामुपलम्भात् तदनाचरणवतस्तु आत्महिंसकत्वेन अविरत्याश्रयणाद् अयतित्वं न्यायतः प्रसक्तम् । अथ गण्डच्छेदनादिप्रादुर्भवदुःखातिशयमसहमानकातरातुरवत्[2] तदुःखान्तं न शीतादिदुःखमसहमानः संसारबाधान्तमुपयातुं क्षमः तर्हि क्षुद्वेदनादुःखासहनेऽपि एतत् समानम् । अथ मुक्तिमार्गाविरोधित्वाद् आहारग्रहणमदुष्टम् वस्त्रादिग्रहणमपि अत एव किं नादुष्टम्? अथ वस्त्रादेर्मलादिदिग्धस्य यूकादिसन्मू(सम्मू)र्छनानेकसत्त्वहेतुतया तद्ग्रहणे तद्व्यापत्तेरवश्यंभावित्वात् मुक्तिमार्गाविरोधित्वं तस्यासिद्धम् तर्हि आहारग्रहणेऽपि एतत् समानम्—सम्मूर्छनाद्यनेकजन्तुसंपातहेतुत्वस्य तत्परिभोगनिमित्ततद्विनाशस्य च तत्रापि संभवात्[3]। तथाहि—संभवन्त्येव आगन्तुकाः सम्मूर्छनजाश्च[4] अनेकप्रकारास्तत्र जन्तवः तत्परिभोगे च अवश्यंभावी तेषां विनाशः भुक्तस्य च तस्य कोष्ठगतस्य संसक्तिमत्त्वात्[5] तदुत्सर्गे अनेककृम्यादिसत्त्वव्यापत्तिरवश्यंभाविनी । अथ विधानेन तत्परिभोगादिकं विदधतो न सत्त्वव्यापत्तिः व्यापत्तौ वा शुद्धाशयस्य तद्रक्षादौ यत्नवतो गीतार्थस्य ज्ञानादिपुष्टालम्बनप्रवृत्तेः अहिंसकत्वाद् न तद्ग्रहणं मुक्तिमार्गविरोधि तर्हि वस्त्रादिग्रहणमपि एवं क्रियमाणं कथं मुक्तिमार्गविरोधि स्यात्? अथ वस्त्रादेर्मलदिग्धस्य क्षालने अप्कायादिविनाशः बाकुशिकत्वं च अक्षालने संसक्तिदोष[6] इति उभयतः पाशारज्जुरिति तद्ग्रहणं मुक्तिमार्गविरोधि, न; आहारादिग्रहणेऽपि अस्य समानत्वात् । तथाहि—तद्दिग्धस्य आस्यादेः प्रक्षालनादौ अप्कायादिविनाशः अक्षालने प्रवचनोपघात इति तद्ग्रहणस्य मुक्तिमार्गविरोधित्वं कथं न समानम्? अथ प्रासुकोदकादिना यत्नतस्तद्दिग्धाऽऽस्यादिप्रक्षालने नायं दोषः वस्त्रादिशोधनेऽपि यत्नतः क्रियमाणे अदोष एव । तेन 'न साक्षाद् वस्त्रग्रहणस्य मुक्तिसाधनत्वम् रत्नत्रयस्यैव साक्षात् तत्साधनत्वात्। नापि परम्परया रत्नत्रयकारणत्वेन तद्ग्रहणस्य रत्नत्रयविरोधित्वात्—निष्परिग्रहविरोधि सपरिग्रहत्वमिति सकललोकप्रसिद्धम् रूपज्ञानोत्पत्तेस्तम इव। न च रत्नत्रयहेतुशरीरस्थितिकारणत्वेन वस्त्रादिग्रहणं परम्परया मुक्तिसाधनम् तदन्तरेणापि रत्नत्रयनिमित्तशरीरस्थितिसंभवात्' इति यदुक्तम् तत् प्रदर्शितन्यायेन प्रतिक्षिप्तं द्रष्टव्यम्। आहारग्रहणेऽपि अस्य समानत्वेन प्रदर्शितत्वात् । अत एव 'साक्षात् पारम्पर्येण वा मुक्त्यनुपयोगिवस्त्रादिग्रहणं रागाद्युपचयहेतुः तत् स्वीकुर्वंस्तृष्णायुक्तत्वात् यत्याभासो गृहस्थं नातिशेते' इत्यादि अपकर्णनीयम् आगमोक्तविधिना वस्त्रादिग्रहणस्य हिंसाद्यपायरक्षणनिमित्ततया मुक्तिमार्गसम्यग्ज्ञानाद्युपबृंहकत्वात् तत्परित्यागस्य तु अर्वाक्कालीनयत्यपेक्षया तद्बाधकत्वात् । ततो विशेष्यसद्भावे 'सम्यग्ज्ञानाद्यन्वितत्वे सति' इति विशेषणमसिद्धम् सति च अस्मिन् विशेष्यमसिद्धम् इति व्यवस्थितम् । तत्र रागाद्यपचयनिमित्तता परव्यावर्णितस्वरूपस्य नैर्ग्रन्थ्यस्य सिद्धा। अत एव व्यावर्णितस्वरूपनैर्ग्रन्थ्यविपक्षभूतत्वेऽपि वस्त्रादिग्रहणस्य न रागाद्युपचयं प्रति गमकत्वम् तद्विरुद्धेन सम्यग्दर्शनाद्युपचयेन यथोक्तवस्त्रादिग्रहणस्य व्याप्तत्वेन तद्विरुद्धसाधकत्वात् । दृष्टान्तस्यापि परव्यावर्णितनैर्ग्रन्थ्यविपक्षभूतत्वासिद्धः साधनविकलता । न च यथोक्ताङ्गनासंगादिरपि उपसर्गसहिष्णोर्वैराग्यभावनावशीकृतचेतसो योगिनो रागाद्युपचयहेतुः भरतेश्वरप्रभृतिषु तस्य तत्प्रक्षयहेतुत्वेन शास्त्रे श्रवणात् "जे[5] जत्तिआ इ हेऊ भवस्स" [ ] इत्याद्यागमप्रामाण्यात् । रागाद्यपचयनिमित्तनैर्ग्रन्थ्यविपक्षभूतत्वं च

१-मार्थं दृप्यतरमां-वा० बा० ।-मार्थं वृषस्यतरमां-आ० हा० वि० ।-मार्थं वृषस्यत्तरमां-भां० मां० । २-वत्तदुः-आ० हा० वि० । ३-स्मूर्छनाश्च भां० मां० ।-स्मूर्छजाश्च वा० बा० । ४ संसक्तिर्दो-वा० बा० । ५ जे जेत्तिआ बृ० आ० हा० वि० ।

वस्त्राद्युपादानस्य असिद्धम् धर्मोपकरणत्वेन तस्य ग्रन्थत्वानुपपत्तेः । तथा च प्रयोगः—अर्हन्मार्गोक्तक्रियाव्यवस्थितानां सम्यग्दर्शनादिसंपयुक्तानां यतीनां वस्त्रादिकं न ग्रन्थः, धर्मोपकरणत्वात्, प्रमार्जनादिनिमित्तोपादीयमानपिञ्छिकादिवत्, यत् तु कर्मबन्धहेतुतया ग्रन्थत्वेन प्रसिद्धं तत् धर्मोपकरणमपि न भवति, यथा लुब्धकादेर्मृगादिबन्धनिमित्तं वागुरादिकम्। न च धर्मोपकरणत्वं वस्त्रादेरसिद्धम् वस्त्राद्यन्तरेण यतीनामुक्तलक्षणानामर्हत्प्रणीताऽब्रह्मपरित्यागादिलक्षणस्य व्रतसमूहस्य सर्वथा संरक्षणहेतुत्वानुपपत्तेः। यच्च व्रतसंरक्षणहेतुः तद् धर्मोपकरणत्वेन परस्यापि सिद्धम् यथा पिञ्छिकादि वैधर्म्येण वागुरादि । न च पिञ्छिकादेरभिष्वङ्गहेतुत्वानुपपत्तेर्धर्मोपकरणत्वं युक्तम् न वस्त्रादेः तद्विपर्ययात् इति वाच्यम् अनभिष्वङ्गनिमित्तस्यैव तस्यापि धर्मोपकरणत्वाभ्युपगमात् अभिष्वङ्गनिबन्धनस्य शरीरादेरपि अधर्मोपकरणत्वात् । न च शरीरेऽपि अप्रतिबद्धानां विदितवेद्यानां साधूनां वस्त्रादिषु 'मम इदम्' इति अभिनिवेशः । उक्तं च तत्त्वार्थसूत्रकृता वाचकमुख्येन—

"यद्वत् तुरगः सत्स्वप्याभरणविभूषणेष्वनभिषक्तः ।
तद्वद् उपग्रहवानपि न संगमुपयाति निर्ग्रन्थः" ॥ [प्रशमर० का० १४१]

अभ्युपगमनीयं चैतत् परेणापि अन्यथा शुक्लध्यानाग्निना कर्मेन्धनं भस्मसात् कुर्वतः परित्यक्ताशेषसंगस्य केनचित् तदुपसर्गकरणबुद्ध्या भक्त्या वा वस्त्राद्यावृतशरीरस्य ग्रन्थत्वात् परमयोगिनो मुक्तिसाधकत्वं न स्यात्। अथ यत् स्वयमादत्तं वस्त्रादि तद् अभिष्वङ्गनिमित्तत्वाद् न धर्मोपकरणम्, न; स्वयं गृहीतपिंछिकादिना व्यभिचारात्। अथ पिञ्छिकाद्यग्रहे अप्रमार्जितासनाद्युपवेशनादिसंभवतः सूक्ष्मसत्त्वव्यापत्तिसद्भावे प्राणातिपातविरमणादिमहाव्रतधारणानुपपत्तेः तदर्थं तद्ग्रहणम् धर्मोपकरणत्वं च पिंछिकादेः अत एव उपपन्नम् तर्हि अत एव पात्रस्यापि धर्मोपकरणत्वम् तद्ग्रहणं च उपपन्नम् तदन्तरेण एकत्रैव भुजिक्रियां हस्त एव विदधतामारम्भदोषतः कर-चरणक्षालने च जलगतासंख्येयादिसत्त्वव्यापत्तितो महाव्रतधारणानुपपत्तेः। न च प्रतिगृहम् ओदनस्य भिक्षामात्रस्य उपभोगाद् वस्त्रपूतोदकाङ्गीकरणाच्चायमदोषः तथाभूतप्रवृत्तेर्युष्मासु अनुपलम्भात् प्रवृत्तावपि प्रवचनोपघातप्रसक्तेः तस्य च अबोधिबीजत्वात्—

"छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं ।
आहार" [ ]

इत्याद्यागमप्रामाण्यात् । न च गृहस्थवाससा पूतमपि उदकं निर्जन्तुकं सर्वं संपद्यते तज्जन्तूनां सूक्ष्मत्वात् वस्त्रस्य चाघनत्वाद् गृहिणां तच्छोधने अतिशयप्रयत्नानुपपत्तेश्च। न च कर एव प्रत्युपेक्ष्यतत्सत्त्वानुपलब्धौ[1] तदुपभोगाद् न पूर्वोक्तो दोषः तथा अनिरीक्षणात् तदनुपलब्धावपि तदभावनिश्चययोगात् । न च यत्नतो निरीक्षणानुपलब्धा व्यापाद्यमाना अपि सत्त्वा न व्रतातिचारकारिणः विषचूर्णादेरनुपलब्धभुक्तस्य प्राणनाशहेतुत्वोपलब्धेः । न च चतुर्थरसादेः प्रासुकोदकस्य उपभोगाद् अयमदोषः तत्रापि सत्त्वसंसक्तिसंभवात्—करप्रक्षिप्ते तस्मिन् तन्निरीक्षणे पानोज्झनयोस्तद्व्यापत्तिदोषस्य अपरिहार्यत्वात् पात्रादिग्रहणे तु तत्प्रत्युपेक्षणस्य तद्रक्षणस्य च सुकरत्वात् न व्रतातिचारदोषापत्तिः । न च त्रिवारोद्वृत्तोष्णोदकस्यैव परिभोगात् अयमदोषः तथाभूतस्य प्रतिगृहं तत्कालोपस्थायिनः तस्य अप्राप्तेः प्राप्तावपि तस्य तृडपनोदाक्षमत्वात् तद्युक्तस्य च अनुत्तमसंहननस्य इदानींतनयतेः आर्तध्यानोपपत्तेः तस्य च दुर्गतिनिबन्धनत्वात् । न च तृडादेर्दुःखस्य तपोरूपत्वेन आश्रयणीयत्वात् अयमदोषः अनशनादेर्बाह्यतपस आन्तरतपउपचयहेतुत्वेन आश्रीयमाणत्वात् अन्याद्दग्भूतस्य च अतपस्त्वात्—

"सो य तवो कायव्वो जेण मणो मंगुलं न चिंतेइ[2]" । [पञ्चव० पृ० ३५ गा० २१४]

१-त्युपेक्षतत्सत्वा-बृ० वा० बा० भां० मां० ।-त्युपेक्षितसत्वा-आ० ।

२ "जेण न इंदिअहाणी जेण य जोगा ण हायंति" इत्युत्तरार्धम् । हरिभद्रः स्वोपज्ञेऽष्टकप्रकरणे यशोविजयः ज्ञानसारे च एनामेव गाथामनुसरतः । तथाहि—

"मनइन्द्रिययोगानामहानिश्चोदिता जिनैः । यतोऽत्र तत् कथं न्वस्य युक्ता स्याद् दुःखरूपता"? ॥ ५ ॥—तपोऽष्टकम् ।

"तदेव हि तपः कार्यं दुर्ध्यानं यत्र नो भवेत्। येन योगा न हीयन्ते क्षीयन्ते नेन्द्रियाणि वा"—अष्ट० ३१ ॥ ७ ॥

इत्याद्यागमप्रामाण्यात् । स्तुतिकृताऽपि उक्तम्—

"बाह्यं तपः परमदुश्चरमाचरं त्वमाध्यात्मिकस्य तपसः परिबृंहणार्थम्" [स्वयंभूस्तो० ८३]

इति । तन्न वस्त्र-पात्रादिविकलस्येदानींतनयतेः सर्वसावद्ययोगप्रत्याख्यानं संभवतीति कथं न तस्य धर्मोपकरणत्वम्? एवं 'यः स्वीकृतग्रन्थः' इत्यादिप्रयोगेऽपि वस्त्रादिधर्मोपकरणस्याग्रन्थत्वप्रतिपादनात् 'स्वीकृतग्रन्थश्च मोक्षाध्वनि संचरन् वस्त्राद्युपकरणवान्' इति हेतुरसिद्धः । न च तथाविधवस्त्राद्युपकरणधारिणां चौरादिभ्य उपद्रवः संभवति, तद्वस्त्रादेरशोभनत्वाऽल्पमूल्यत्वाभ्यां चौराग्राह्यत्वात् । अथ अधमचौरास्तथाभूतमपि गृह्णन्तीति तदग्राह्यत्वं तस्यासिद्धम्, नन्वेवं पुस्तकाद्यपि मोक्षाध्वसंचारिणा न ग्राह्यं स्यात् तत्रापि अस्य दोषस्य समानत्वात् । अथ तदपि भगवता प्रतिषिद्धम्, नः; तत्प्रतिषिद्धपुस्तकादिग्राहिणामिदानींतनऋषीणां तदाज्ञाविलोपकारित्वेन अयतित्वप्रसक्तेः । ज्ञानाद्युपष्टम्भहेतुत्वेन तद्ग्रहणे पात्रादावपि तत एव ग्रहणप्रसक्तिः । न च पाथेयाद्युपकरणरहितस्य अध्वगस्यापि अभीष्टस्थानप्राप्तिः संभविनी इति दृष्टान्तोऽपि असंगत एव सर्वस्य विशिष्टफलारम्भिणस्तदुपकरणरहितस्य तत्फलाऽप्रसाधकत्वात् । तथाहि—यो यत्रोपायविकलो नासौ तत् साधयति, यथा कृष्याद्युपायविकलः तत्फलम्, अशेषकर्मविगमस्वभावमुक्तिफलवस्त्रादिधर्मोपकरणोपायविकलश्च मुनिर्भवद्भिरभ्युपगम्यत इति । न च क्षायिकज्ञान-दर्शन-चारित्राण्येव तदुपाय इति वक्तव्यम्, 'वस्त्रादिधर्मोपकरणविकलस्य क्षायिकज्ञानादेरेव असंभवात्' इति उक्तत्वात् । 'यो यद्विनेयः' इत्यादिकोऽपि प्रयोगोऽनुपपन्नः, 'सर्वथा परित्यक्तवस्त्रतीर्थकृद्विनेयत्वात्' इत्यस्य हेतोरसिद्धत्वात् भगवत एव परित्यक्तवस्त्रत्वानुपपत्तेः—

"सव्वे वि एगदूसेण णिग्गया जिणवरा" [आवश्यकसू० गा० २२७]

इत्याद्यागमप्रामाण्यात् । न च अस्यान्यार्थत्वम्, आचाराद्यङ्गेषु तैस्तैः सूत्रैर्भगवत्येकवस्त्रग्रहणस्य श्रामण्यप्रतिपत्तिसमये प्रतिपादितत्वात् । न चैवं तदा सर्ववस्त्रपरित्यागावेदकस्तत्र कश्चिदागमः श्रूयते । योऽपि—

"वोसट्ठचत्तदेहो विहरइ गामाणुगामं तु" [ ]

इत्यागमः सोऽपि न श्रामण्यप्रतिपत्तिसमयभाविभगवन्नग्नत्वावेदकः किन्तु तदुत्तरकालं रागादिविप्रमुक्तत्वं भगवति आवेदयति न हि अनेन आगमेन भगवतो वस्त्रवैकल्यमावेद्यते ।

किञ्च, यदि 'यो यद्विनेयः स तल्लिङ्गधारी तदा भवतामिव भगवतोऽपि कमण्डलु-दण्डिकादिलिङ्गधारित्वप्रसक्तिः । अथ नैवं दैवचरितमाचरितुं शक्यत इति तदगृहीतदण्डिकादिग्रहः अस्माभिः तद्व्यतिरेकेण महाव्रतधारणं कर्तुमशक्तकैराश्रीयते तर्हि—

"जारिसयं गुरुलिङ्गं सीसेण वि तारिसेण होयव्वं" [ ]

इत्याद्यभिनिवेशस्त्यज्यताम् । यदपि 'न च वस्त्राद्युपकरणाग्रहवत्सु प्रव्रज्यापरिणामः संभवति' इत्याद्यभिधानम् तदपि असंगतम्; परिग्रहाग्रहवत्सु प्रव्रज्यापरिणामस्य अस्माभिरपि अनिष्टेः । न च सर्वसावद्ययोगविरतिप्रतिज्ञानिर्वाहनिमित्तवस्त्रादिधर्मोपकरणयोगिषु परिग्रहाग्रहवत्त्वम् अन्यथा शरीरयोगिष्वपि परिग्रहाग्रहवत्त्वं स्यात् । अथ तन्न परित्यक्तुं शक्यत इति, अविधानेन तत्परित्यागे अनेकभवानुबन्धितदनुषक्तिप्रसक्तिः विधानपरित्यागस्तु तस्य प्रस्तुतविधिनैव तर्हि वस्त्राद्युपकरणत्यागेऽपि अयमेव विधिः अन्यथा प्रव्रज्यापरिणामस्य प्रकृष्टफलनिर्वर्तकस्य वस्त्राद्युपादानमन्तरेण असंभवात् तत्संभवे च शरीरत्यागवद् वस्त्रादित्यागस्यापि स्वतः सिद्धत्वात् उत्तीर्णमहार्णवपुरुषायानपरित्यागस्येव प्राक् तु तत्परित्यागो महार्णवयानमध्यासीनयानपरित्यागवद् अपायहेतुरेव । तेन 'श्वेतभिक्षवो महाव्रतपरिणामवन्तो न भवन्ति' इत्यादिप्रयोगे 'परिग्रहाग्रहयोगित्वात्' इत्यस्य

१-चार (चरे) स्त्व-भां० मां० ।-चरस्त्व-बृ० वा० बा० ।

२ "चउव्वीसं । न य नाम अण्णलिंगे नो गिहिलिंगे कुलिंगे वा" ॥—आवश्यकसू० पृ० १३७ । विशेषाव० टी० पृ० १०२२, १०३२ ।

३ न देव-भां० मां० ।

४ "न हि होइ बुद्धसीसो सेयवडो नग्गखवणो वा" ॥ इत्युत्तरार्धम् ।—विशेषा व० टी० पृ० १०३२ ।

५-यानमध्यमध्यासीन-आ० हा० वि० विना ।

हेतोरसिद्धतैव । यदपि 'न च भगवद्भिर्वस्त्रग्रहणं यतीनामुपदिष्टम्' तदपि अनधीतागमस्याभिधानम्, आचाराद्यङ्गेषु वस्त्र-पात्रैषणाध्ययनादिषु तद्ग्रहणस्य यतीनां विस्तरतो भगवता प्रतिपादनात् । तथा च औधिकोपधिर्जिनकल्पिकानां द्वादशविधः स्थविरकल्पिकानां चतुर्दशविधः निर्ग्रन्थीनां पञ्चविंशतिविधो भगवद्भिरनुज्ञातः—

"जिणा बारसरूवा ओ थेरा चोद्दसरूविणो ।
अज्जाणं पणवीसं तु अओ उड्ढमुवग्गहो[3]" ॥ [पञ्चव० गा० ७७१]

इत्याद्यर्हदुक्तागमप्रामाण्यात् । यदपि 'स्थितकल्पे आचेलक्यम् परीषहेषु वा अचेलत्वं यतेरुपदिष्टम्' तदपि शुक्लाऽकृत्स्नवस्त्रग्रहणापेक्षया वस्त्राभावेऽपि अनेषणीयतद्ग्रहणापेक्षया च अन्यथा वस्त्रादिग्रहणाभिधायकस्य अनेकस्य आगमस्य एतदागमबाधितत्वेन अप्रामाण्यप्रसक्तेः यथा च भुञ्जानोऽपि एषणीयमाहारम् क्षुत्परीषहजेता यतिः अनेषणीयाहारपरित्यागात् तथा वस्त्रैषणापरिशुद्धवस्त्रा[3]ग्रहणात् शुक्लजीर्णवस्त्रवानपि मुनिः अचेलपरीषहजेता किं न स्यात्?

"णगिणस्स वा वि" [ ]

इत्याद्यपि आगमः तथाविधवस्त्रवतोऽपि नग्नत्वमाह उक्तन्यायात् दृश्यन्ते हि लोके तथाविधवस्त्रवन्तोऽपि 'नग्ना वयम्' इत्यात्मानं व्यपदिशन्तः ।

"जे भिक्खू कसिणं वत्थं पडिगाहेइ" [ ]

इत्यादेः प्रमाण-मूल्याधिकवस्त्रग्रहणप्रतिषेधविधायिनः योग्यायोग्य-तद्ग्रहण-प्रतिषेधविधायिनश्च आगमस्य

"पिण्डं सेज्जं च वत्थं च चउत्थं पायमेव य ।
अकप्पियं ण इच्छेज्जा पडिगाहेज्ज कप्पियं" ॥ [ ]

इत्यादेर्द्वादशाङ्ग्यन्तर्गतस्य अनेकस्य सद्भावान्न गौणार्थवृत्तेरुत्तमसंहननपुरुषविशेषविषयप्रतिनियतवस्थागोचरवस्त्रमोक्षप्रतिपादकतया मुख्यवृत्तेर्वा आगमलेशस्य श्रवणमात्राद् भगवत्प्रतिपादितं यतीनां वस्त्रादिग्रहणं प्रतिक्षेप्तुं युक्तम् । तत्प्रतिक्षेपकारिणो बृहस्पतिमतानुसारिण इव मिथ्यादृष्टित्वप्रसक्तेः । अतो वस्त्राद्युपकरणसमन्विताः श्वेतभिक्षवो निर्वाणफलहेतुसम्यग्दर्शन-ज्ञान-चारित्रयुक्ताः, अविकलार्हत्प्रणीतमहाव्रतसंपन्नत्वात्, गणधरादिवत् । तदेवं धर्मोपकरणयुक्तस्य महाव्रतधारिणो निर्ग्रन्थत्वाद् आर्यिकाणामपि मुक्तिप्राप्त्यविरोधः ।

[स्त्रीणां मोक्षाधिकारसमर्थनपरा चर्चा]

अथ स्त्रियो मुक्तिभाजो न भवन्ति, स्त्रीत्वात्, चतुर्दशपूर्ववेसंविद्धागिन्य इव । अत्र यदि 'सर्वाः स्त्रियो मुक्तिभाजो न भवन्ति' इति साध्येत तदा सिद्धसाध्यता अभव्यस्त्रीणां मुक्तिसद्भावानभ्युपगमात् । अथ 'भव्या अपि तास्तद्भाजो न भवन्ति' इति साध्यते तदा अत्रापि सिद्धसाध्यता भव्यानामपि सर्वासां मुक्तिसंगानिष्टेः—

"भव्वा वि ते अणंता सिद्धिपहं जे ण पावेंति" [ ]

इति वचनप्रामाण्यात् । अथ अवाप्तसम्यग्दर्शना अपि ता न तद्भाजः इति पक्षः अत्रापि सिद्धसाध्यता तदवस्थैव प्राप्तोज्झितसम्यग्दर्शनानां तासां तद्भाक्त्वानिष्टेः । अथ अपरित्यक्तसम्यग्दर्शना अपि न तास्तद्भाजः तथापि सिद्धसाध्यता अप्राप्ताऽविकलचारित्राणां सम्यग्दर्शनसद्भावेऽपि तत्प्राप्त्यनभ्युपगमात् । अथ अविकलचारित्रप्राप्तिरेव तासां न भवति, कुत एतत्? यदि स्त्रीत्वात् पुरुषस्यापि सा न स्यात् पुरुषत्वात् । अथ पुरुषे सकलसावद्ययोगनिवृत्तिरूपा चित्तपरिणतिः स्वसंवेदना-

१-मुयग्गहो वा० बा० । २ पञ्चव० पृ० १२१ । ३-वस्त्रादिग्रहणावानपि मुनिः आ० हा० वि० ।-वस्त्राग्रहणात् शुक्लजीर्णवानपि मुनिः बृ० । ४ पृ० ७४७ पं० १ । ५-शस्याश्रवमा-आ० ।

६ दिगम्बरमार्गानुयायिनः स्त्रीमोक्षं न संमन्यन्ते तन्मतं प्रमेयकमलमार्तण्डतोऽवबोद्धव्यम्—पृ० ९४ प्र० पं० १०–९६ ।

सविस्तरं स्त्रीमोक्षसमर्थनं च उत्तराध्ययनपाइअटीका–प्रज्ञापनाटीका–शास्त्रवार्तासमुच्चयटीकातोऽवगन्तव्यम्–अ० ३६ । पृ० २०–२२ । पृ० ४२४–४३० ।

७-पूर्वविद्धा-बृ० आ० हा० वि० । ८ साध्ये तदा बृ० सं० विना ।

ध्यक्षसिद्धा स्वात्मनि अन्यैरनुमानादवसीयते; ननु सा स्त्रियां तथैव किं नावसीयते येन तत्र तस्याः स्वाग्रहावेशवशादभावः प्रतिपाद्यते । अथ तासां भगवता नैर्ग्रन्थ्यस्य अनभिधानाद् न तत्प्राप्तिः, असदेतत्; तासां तस्य भगवता—

"णो कप्पइ निग्गंथस्स णिग्गंथीए वा अभिन्नतालपलंबे पडिगाहित्तए" [कप्पसु० उ० १ सू० १]

इत्याद्यागमेन बहुशः प्रतिपादनात् अयोग्यायाश्च प्रव्रज्याप्रतिपत्तिप्रतिषेधस्य—

"अट्ठारस पुरिसेसुं वीसं इत्थीसु" [ ]

इत्याद्यागमेन विधानाच्च । विशेषप्रतिषेधस्य शेषाभ्यनुज्ञापरत्वाच्च न तासां भगवत्प्रतिपादित-नैर्ग्रन्थ्यनिमित्ताऽविकलचारित्रप्राप्त्यनुपपत्तिः । अथ तथाभूतचारित्रवत्त्वेऽपि न तासां तद्भाक्त्वमिति साध्यार्थः तथापि अनुमानबाधितत्वं पक्षस्य दोषः । तथाहि—यद् अविकलकारणं तद् अवश्य-मुत्पत्तिमत् यथा अन्त्यावस्थाप्राप्तबीजादिसामग्रीकोऽङ्कुरः अविकलकारणश्च तस्यामवस्थायां सीमन्तिनीमुक्त्याविर्भावः इति कथं न पक्षस्य अनुमानबाधा? अथ स्त्रीवेदपरिक्षयाभावात् न अविकल-चारित्रप्राप्तिस्तासामिति न मुक्तिभाक्त्वम् तर्हि पुरुषस्यापि पुरुषवेदापरिक्षयात् न अविकलचारित्र-प्राप्तिरिति न मुक्तिप्राप्तिर्भवेत् । अथ तत्परिक्षये शैलेश्यवस्थाभाविचारित्रप्राप्तिमतः पुरुषस्य मुक्ति-प्राप्तिर्न प्राक् तर्हि सीमन्तिन्या अपि एवं मुक्तिप्राप्तौ न कश्चिद् दोषः संभाव्यते । अथ अस्याः स्त्रीवेदपरिक्षयसामर्थ्यानुपपत्तेर्नायं दोषः; ननु तत्परिक्षयसामर्थ्याभावस्तस्याः कुतः सिद्धः? आगमात् इति चेत्, न; तस्य तथाभूतस्य द्वादशाङ्ग्यामनुपलब्धेः । तत्परिक्षयसामर्थ्यप्रतिपादकस्यापि तस्य अनुपलब्धिरिति चेत्, न;

"सव्वत्थोवा तित्थयरिसिद्धा तित्थयरितित्थे अतित्थयरिसिद्धा असंखेज्जगुणा" [ ]

इत्यादिसिद्धप्राभृतागमस्यानेकस्य सामर्थ्यवृत्त्या सीमन्तिनीनां स्त्रीवेदपरिक्षयसामर्थ्यप्रतिपादकस्य उपलम्भात् न हि सर्वकर्मानीकनायकरूपमोहनीयकर्माङ्गभूतस्त्रीवेदपरिक्षयमन्तरेण तासां मुक्ति-प्राप्तिरिति मुक्तिसद्भावावेदकमेव वचस्तासां सामर्थ्यावेदकं सिद्धम् । अथ स्त्रीत्वादेव न तासां तत्परिक्षयसामर्थ्यम्, न; स्त्रीत्वस्य तत्परिक्षयसामर्थ्येन विरोधासिद्धेः न हि अविकलकारणस्य तत्परिक्षयसामर्थ्यस्य स्त्रीत्वसद्भावादभावः क्वचिदपि निश्चितः येन अग्नि-शीतयोरिव सहानवस्थान-विरोधस्तयोः सिद्धो भवेत् । नापि भावाभावयोरिव अनयोरन्योन्यव्यवच्छेदरूपता अवगता येन परस्परपरिहारस्थितलक्षणविरोधसिद्धिर्भवेत् । न चाविरुद्धविधिरन्यैस्याभावावेदकः अतिप्रसङ्गात् । तन्न स्त्रीत्वादपि तासां तत्परिक्षयसामर्थ्यानुपपत्तिसिद्धिः । प्रत्यक्षस्य तु इन्द्रियजस्य अतीन्द्रियपदार्थ-भावाभावविवेचने अनधिकार एवेति नातोऽपि तत्परिक्षयसामर्थ्यानुपपत्तिसिद्धिस्तासाम् । अतोऽ-नेकदोषदुष्टत्वान्न प्रकृतपक्षः साधनमर्हति । 'स्त्रीत्वात्' इति हेतुरपि यदि 'उदितस्त्रीवेदत्वात्' इति उपात्तस्तदाऽसिद्धः मुक्तिप्राप्तिप्राक्तनसमयादिषु स्त्रीवेदोदयस्य तासामसंभवात् अनिवृत्तिगुणस्थान एव तस्य परिक्षयात् । 'परिक्षीणस्त्रीवेदत्वात्' इति च हेतुर्विपर्ययव्याप्तत्वाद् विरुद्धः । न च 'स्त्रीत्वात्' इत्यस्य 'परिक्षीणस्त्रीवेदत्वात्' इत्ययमर्थः अत्रार्थे प्रकृतशब्दस्य अरूढत्वात् । अथ 'रूयाकारयोगि-त्वात् स्त्रीत्वात्' इति हेत्वर्थस्तदा विपर्यये बाधकप्रमाणाभावात् संदिग्धविपक्षव्यावृत्तिकत्वाद् अनैकान्तिको हेतुः । चतुर्दशपूर्वसंवित्संबन्धित्वाभावोऽपि तासां कुतः सिद्धः येन साध्यविकलो दृष्टान्तो न स्यात्? सर्वज्ञप्रणीतागमात् इति चेत्, तत एव मुक्तिभाक्त्वस्यापि तासां सिद्धिरस्तु न हि एकवाक्यतया व्यवस्थितः दृष्टेष्टादिषु बाधामननुभवन् आप्तागमः क्वचित् प्रमाणं क्वचिन्नेति अभ्युपगन्तुं प्रेक्षापूर्वकारिणा शक्यः । अथ विवादगोचरापन्नाऽबला अशेषकर्मक्षयनिबन्धनाध्यव-सायविकला, अविद्यमानाऽधःसप्तमनरकप्राप्त्यविकलकारणकर्मबीजभूताध्यवसानत्वात्, यस्तु अशेष-

१ स्त्रिया त-वा० बा० भां० मां० ।

२ "णो कप्पइ निग्गंथाण वा निग्गंथीण वा आमे तालपलंबे अभिन्ने पडिगाहेत्तए—कप्पसु० पृ० १ पं० १ ।

३ वीसुं इ-बृ० सं विना । ४-रित्यप्रा-वा० बा० भां० मां० । ५-कस्या सा-आ० । ६-विरुद्ध-विरुद्धवि-वा० बा० आ० ह्या० वि० । ७-न्यस्य भा-भां० मां० । ८-णधर्म-भां० मां० ।

कर्मपरिक्षयनिबन्धनाध्यवसायविकलो न भवति नासौ अविद्यमानाधःसप्तमनरकप्राप्त्यविकलकारण-कर्मबीजभूताध्यवसानः, यथोभयसंप्रतिपत्तिविषयः पुरुष इति वैधर्म्यदृष्टान्तः । असदेतत्, यतोऽत्रापि प्रयोगे साध्य-साधनयोः प्रतिबन्धाभावान्नातो हेतोर्विवक्षितसाध्यसिद्धिः । तथाहि—यथोक्ताध्यवसानं निवर्तमानमबलातः अशेषकर्मक्षयाध्यवसायनिवर्तकं कारणं वा भवद् भवेत् व्यापकं वा? अन्यस्य निवृत्तावपि अपरनिवृत्तेरवश्यभावाभावात् अन्यथा अश्वनिवृत्तावपि गवादे-र्नियमेन निवृत्तिप्रसक्तेः । आह च न्यायवादी—

"तस्मात् तन्मात्रसंबन्धः स्वभावो भावमेव वा ।
निवर्तयेत् कारणं वा कार्यमव्यभिचारतः" ॥ [ ] इति ।

तत्र न तावत् कारणं यथोक्ताध्यवसानमशेषकर्मक्षयाध्यवसानस्य येन तन्निवृत्त्या तस्यापि निवृत्तिः स्यात् । कारणत्वे वा यत्र अशेषकर्मक्षयाध्यवसानं योगिनि संभवति तत्र अधःसप्तमनरकपृथिवीप्राप्त्यव-न्ध्यकारणस्य बीजभूताध्यवसानसद्भावात् कार्यस्य कारणाव्यभिचारित्वात् तस्य नरकप्राप्तिसद्भाव इति अनिष्टापत्तिः । न च योगिनि अशेषकर्मक्षयनिबन्धनमध्यवसानं जनयदपि नरकप्राप्तिनिबन्धनकर्मबी-जभूतमध्यवसानं नरकप्राप्तिलक्षणं स्वकार्यं न जनयतीति वाच्यम्, अविकलकारणस्य अवश्यंतया स्वकार्यनिवर्तकत्वात् अन्यथा अविकलकारणत्वायोगात् । न च यदेव तथाभूतकर्मनिवर्तनसमर्थं तदेव तत्क्षयहेत्वध्यवसायनिबन्धनं भवति, भावाभावयोरेकस्मिन्नेकदा विरोधात् तन्निवर्तकस्य हेतोः स्वभावान्तरमप्राप्नुवतस्तन्निर्व(न्निवर्त)र्तकत्वविरोधात् न हि यदेव यदैवाङ्कुलिद्रव्यस्य ऋजुत्वोत्पादकम् तदेव तदैव तस्य विनाशकं संभवति एकनिमित्तयोरेकदा भावाभावयोर्विरोधात् । नापि तत् तस्य व्यापकम् येन ततस्तन्निवर्तमानं तदपि आदाय निवर्तेत, व्यापकत्वे वा यत्र अशेषकर्मक्षयनिबन्धना-ध्यवसायसद्भावस्तत्र व्यापकस्य अवश्यभावित्वात् अन्यथा तस्य तद्व्यापकत्वायोगात् योगिनस्तदध्य-वसायवतोऽधःसप्तमनरकप्राप्तिप्रसङ्गोऽनिष्टस्तदवस्थ एव स्यात् । न च यत्र क्लिष्टतराध्यवसायसद्भा-वस्तत्र अतिशुभतराध्यवसायेन भाव्यमिति प्रतिबन्धसंभवः तन्दुलमत्स्येन व्यभिचारात् । न च मनुष्यजातियोगित्वे सति अव्यभिचारः उत्तमसंहननेन चारित्रप्राप्तिकालार्वाक्समयभाविना सर्व-पर्याप्तिसंपन्नेन तथाविधक्लिष्टपरिणामवता पुरुषेण व्यभिचारात् । न च यत्र अतिशुभतरः परिणाम-स्तत्रापि अशुभतरपरिणामेन भाव्यमित्यत्रापि प्रतिबन्धः तथाविधयोगिना व्यभिचारात् ।

किञ्च, स्त्रीणां सप्तमनरकपृथ्वीप्राप्तिनिबन्धनकर्मबीजाध्यवसायाभावः कुतः प्रतिपन्नः? आप्ता-गमात् इति चेत् अशेषकर्मशैलवज्राशनिभूतशुभाध्यवसायसद्भावोऽपि तत एव अभ्युपगन्तव्यः । न हि अतीन्द्रिये एवंविधेऽर्थे अस्मदादेरवोद्दशः आप्तागमाद् ऋते अन्यत् प्रमाणमस्ति । न च दृष्टेष्टाविरो-ध्याप्तवचनमसक्तकानुसारिजातविकल्पबोधामनुभवतां तेषां प्राप्ताऽप्राप्तव्यापादकमतंगजविकल्पवद् अवस्तुसंस्पर्शित्वात् । उक्त च भर्तृहरिणा—

"अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते" ॥ [ ]

न च अत्र वस्तुनि आगमनिरपेक्षमनुमानं प्रवर्तितुमुत्सहते, पक्षधर्मादेर्लिङ्गरूपस्य प्रमाणान्तरतः प्रति-पत्तुमशक्तेः प्रतिपत्तौ वा साध्यस्यापि प्रतिबन्धग्राहिणा प्रमाणेन प्रतिपत्तेरेकान्ततोऽतीन्द्रियता भवेत् । आगमानुसार चानुमानं प्रकृते वस्तुनि संवादकृदेव न बाधकमिति प्रदर्शितम् । न च आप्तवचनं स्त्रीनिर्वाणप्रतिपादकमप्रमाणम् सप्तमनरकप्राप्तिप्रतिषेधकं प्रमाणमिति वक्तव्यम् उभयत्र आप्तप्रणीत-त्वादेः प्रामाण्यनिबन्धनस्य अविशेषात् । न च एकमाप्तप्रणीतमेव न भवति, इतरत्रापि अस्य समान-त्वात् पूर्वापरोपनिबद्धाशेषदृष्टादृष्टप्रयोजनार्थप्रतिपादकाऽवान्तरवाक्यसमूहात्मकैकमहावाक्यरूप-तया अर्हदागमस्य एकत्वात् तथा चान्तरवाक्यानां केषांचिद् अप्रामाण्ये सर्वस्यापि आगमस्य अप्रामाण्यप्रसक्तेः अङ्गदुष्टत्वे तदात्मकाङ्गिनोऽपि दुष्टत्वापत्तेः । न च प्रदर्शितवाक्यात्मकः सर्वज्ञप्रणी-तागमत्वेन अस्मान् प्रति असिद्ध इति वक्तव्यम् नास्तिक-मीमांसकान् प्रति पुरुषनिर्वाणावेदकस्यापि तत्प्रणीतत्वेन असिद्धेः । या च तान् प्रति तस्य तत्प्रणीतत्वावेदिका युक्तिः सा इतरत्रापि समाना

पूर्वापरैकवाक्यत्व-दृष्टादृष्टाबाधितार्थत्वादेरविशेषात् । अथ स्त्रीणां घातिकर्मक्षयनिमित्ताद्यशुक्लध्यानद्वयस्यासंभवाद् न निर्वाणप्राप्तिः संभविनी; ननु कुतस्तद्भवस्य तत्राभावगतिः ? पूर्वधरस्यैव तयोः सद्भावात् "आद्ये पूर्वविदः" [तत्त्वार्थ० ९-३९] इति वचनप्रामाण्यात् । न च पूर्वधरत्वं तासां तदनधिकारित्वादिति चेत् तर्हि प्राक्तनभवानधीतपूर्वाणां वर्तमानतीर्थाधिपत्यादीनामपि न तद् भवेत् तदध्ययनासंभवात् आद्यशुक्लध्यानद्वयासंभवतः तन्निमित्तघातिकर्मक्षयसमुद्भूताशेषतत्त्वावबोधस्वभावकेवलज्ञानाभावे न मुक्तिश्रीसंगतिः स्यादिति अनिष्टापत्तिः । अथ शास्त्रयोगागम्यसामर्थ्ययोगावसेयभावेषु अतिसूक्ष्मेष्वपि तेषां विशिष्टक्षयोपशम-वीर्यविशेषप्रभवप्रभावयोगात् पूर्वधरस्येव बोधातिरेकसद्भावाद् आद्यशुक्लध्यानद्वयप्राप्तेः कैवल्यावाप्तिक्रमेण मुक्त्यवाप्तिरिति न दोषः तदध्ययनमन्तरेणापि विशिष्टक्षयोपशमसमुद्भूतज्ञानात् पूर्ववित्त्वसंभवात् तर्हि निर्ग्रन्थीनामपि एवं द्वितीयसंभवे न कश्चिद् दोषमुत्पश्यामः अभ्युपगमनीयं चैतत् अन्यथा मरुदेवीस्वामिनीप्रभृतीनां जन्मान्तरेऽपि अनधीतपूर्वाणां न मुक्तिप्राप्तिर्भवेत् । न चासौ तेषामसिद्धा सिद्धप्राभृतादिग्रन्थेषु गृहिलिङ्गसिद्धानां प्रतिपादनात् । न च ते अप्रमाणम् सर्वज्ञप्रणीतत्वेन तेषां प्रामाण्यस्य साधितत्वात् । अथ मायागारवादिभूयस्त्वाद् अबलानां न मुक्तिप्राप्तिः, न; तदा तासां तद्भूयस्त्वासंभवात् प्राक् तु पुरुषाणामपि तत्संभवोऽविरुद्धः । अथ अल्पसत्त्वाः क्रूराध्यवसायाश्च ताः इति न मुक्तिभाजः, न; सत्त्वस्य कायैकगम्यत्वात् तस्य च तासु दर्शनात् अल्पसत्त्वत्वासिद्धिः । दृश्यन्ते हि असदभियोगादौ तृणवत् ताः प्राणपरित्यागं कुर्वाणाः परीषहोपसर्गाभिभवं चाङ्गीकृतमहाव्रता विदधानाः क्रूराध्यवसायत्वं दृढप्रहारिप्रभृतीनां प्रागवस्थायां तद्भवे विद्यमानमपि न मुक्तिप्राप्तिप्रतिबन्धकम् तदवस्थायां तु तस्य तास्वपि अभाव एव ।

अथ लोकवद् लोकोत्तरेऽपि धर्मे पुरुषस्य उत्तमत्वात् मुक्तिप्राप्तिः न स्त्रीणाम् अनुत्तमत्वात्, न; अन्यगुणापेक्षाऽनुत्तमत्वस्य मुक्तिप्राप्त्यप्रतिबन्धकत्वात् अन्यथा तीर्थकृद्गुणापेक्षया गणधरादेरपि अनुत्तमत्वात् मुक्तिप्राप्त्यभावो भवेत् । अथ अशेषकर्मक्षयनिबन्धनस्य अध्यवसायस्य गणधरादिषु तीर्थकृदपेक्षया तुल्यत्वात् अयमदोषः, समानमेतद् अबलास्वपि तथाविधयोग्यतामापन्नासु । अथ महाव्रतस्थपुरुषावन्द्यत्वात् न तासां मुक्त्यवाप्तिस्तर्हि गणधरादेरपि अर्हदवन्द्यत्वात् न मुक्त्यवाप्तिः स्यात् । अथ

"तित्थपणामं काउं" [आवश्यकनि० समवस० गा० ४५]

इत्याद्यागमप्रामाण्यात् प्रथमगणधरस्य 'तीर्थ'शब्दाभिधेयत्वात् तद्वन्द्यत्वं तस्यासिद्धं तर्हि चातुर्वर्ण्यश्रमणसंघस्यापि 'तीर्थ'शब्दवाच्यत्वात् तत्र तु तासामन्तर्भावात् महाव्रतस्थपुरुषावन्द्यत्वं तासामपि असिद्धम् । तन्न युक्त्यागमाभ्यां तासां मुक्तिप्राप्त्यभावः प्रतिपत्तुं शक्यः । तत्सद्भावस्तु प्रदर्शितागमात् युक्तितश्च प्रतीयत एव । तथाहि—विमत्यधिकरणभावापन्नाः स्त्रियो मुक्तिभाजः, अवाप्ताशेषकर्मक्षयनिबन्धनाध्यवसायत्वात्, उभयाभिमतगणधरादिपुरुषवत् इत्याद्यागम-युक्तिगर्भमनुमानं निर्दोषं युक्तिशब्दवाच्यं समस्त्येव ।

[प्रतिमाभूषाया आगमविहितत्वसमर्थनम्]

यदपि 'भगवत्प्रतिमाया न भूषा आभरणादिभिर्विधेया' इति स्वाग्रहावष्टब्धचेतोभिर्दिगम्बरैरुच्यते तदपि अर्हत्प्रणीतागमापरिज्ञानस्य विजृम्भितमुपलक्ष्यते तत्करणस्य शुभभावनिमित्ततया कर्मक्षयाऽवन्ध्यकारणत्वात् । तथाहि—भगवत्प्रतिमाया भूषणाद्यारोपणं कर्मक्षयकारणम्, कर्तुर्मनःप्रसादजनकत्वात्, कुङ्कुमाद्यालेपनवत् । न च व्रतावस्थायां भगवता भूषणादेरनङ्गीकृतत्वात् न तत्प्रतिकृतौ तद् विधेयम् संमज्जनाङ्गरागपुष्पादिधारणस्यापि तदवस्थायां भगवताऽनाश्रितत्वात् न तत्

१ पूर्णं सूत्रं तु "शुक्ले चाद्यं पूर्वविदः" इत्येव । २ द्वितीय–भां० मां० ।
३ "कहेइ साहारणेण सद्देण । सव्वेसिं संनीणं जोअणनीहारिणा भयवं" ॥–आवश्यकनि० पृ० १०६ ।
४ तत्कार–भां० ।

तत्र विधेयं स्यात् । अथ मेरुमस्तकादिषु तदभिषेकादौ इन्द्रादिभिस्तस्य विहितत्वात् अस्मदादिभिरपि कृतानुकरणादिभिः प्रयोजनैस्तत् तत्र विधीयते तर्हि तत एव आभरणादिभिर्विभूषादिकमपि विधेयम् कृतानुकरणादेः समानत्वात् । एवमन्यदपि आगमबाह्यं स्वमनीषिकया परपरिकल्पितमागम-युक्तिप्रदर्शनेन प्रतिषेद्धव्यम् न्यायदिशः प्रदर्शितत्वात् । तदेवम् अनधीताऽश्रुतयथावद्परिभावितागमतात्पर्या दिग्वासस इव आत्माज्ञां विगोपयन्तीति व्यवस्थितम् ॥ ६५ ॥

[बहुश्रुतत्वादिदर्पात् तात्पर्यापरिज्ञानाच्चानिश्चितशास्त्रार्थस्य सिद्धान्तप्रत्यनीकत्वकथनम्]

यत एवं ततः—

जह जह बहुस्सुओ संमओ य सिस्सगणसंपरिवुडो य ।
अविणिच्छिओ य समए तह तह सिद्धंतपडिणीओ ॥ ६६ ॥

यथा यथा बहुश्रुतः सम्यगपरिभावितार्थानेकशास्त्रश्रवणमात्रतः तथाविधाऽपराऽविदितशास्त्राभिप्रायजनसंमतश्च शास्त्रज्ञत्वेन अत एव श्रुतविशेषानभिज्ञैः **शिष्यगणैः समंतात् परिवृतश्च अविनिश्चितश्च समये** तथाविधपरिवारदर्पात् समयपर्यालोचनेऽनादृतत्वात् **तथा तथा सिद्धान्तप्रत्यनीकः** यथावस्थितवस्तुस्वरूपप्रकाशकार्हदागमप्रतिपक्षः निस्सारप्ररूपणया अन्यागमेभ्योऽपि भगवदागममधः करोतीति यावत् ॥ ६६ ॥

[क्रियाप्रधानानां ज्ञानयोगमसाधयतां क्रियाफलानुभवाभावकथनम्]

तस्मात् शास्त्रमधीत्य तदर्थावधारणं विधेयम् अवधृतश्च तदर्थो नय-प्रमाणाभिप्रायतो यथावत् परिभावनीयः अन्यथा तत्फलपरिज्ञानविकलताप्रसक्तिरित्याह—

चरण-करणप्पहाणा ससमय-परसमयमुक्कवावारा ।
चरण-करणस्स सारं णिच्छयसुद्धं ण याणंति ॥ ६७ ॥

चरणं श्रमणधर्मः—

"वय-समणधम्म-संजम-वेयावच्चं च बंभगुत्तीओ ।
णाणाइतियं तव-कोहणिग्गहाई चरणमेयं ॥ [ओघनि० गा० २]

इति वचनात् । व्रतानि हिंसाविरमणादीनि पञ्च, श्रमणधर्मः क्षान्त्यादिर्दशधा, संयमः पञ्चास्रवविरमणादिः सप्तदशभेदः, वैयावृत्त्यं दशधा आचार्याराधनादि, ब्रह्मगुप्तयो नव वसत्यादयः, ज्ञानादित्रितयं ज्ञान-दर्शन-चारित्राणि, तपो द्वादशधा अनशनादि, क्रोधादिकषायषोडशकस्य निग्रहश्च इति अष्टधा चरणम् । **करणं** पिण्डविशुद्ध्यादिः—

"पिंडविसोही समिई भावण-पडिमाइ-इंदियनिरोहो ।
पडिलेहण-गुत्तीओ अभिग्गहा चेव करणं तु" ॥ [ओघनि० गा० ३]

इति वचनात् । तत्र पिण्डविशुद्धिः त्रिकोटिपरिशुद्धिराहारस्य—

"संसट्ठमसंसट्ठा उद्धड तह अप्पलेविया चेव ।
उग्गहिया पग्गहिया उज्झियधम्माय सत्तमिया" ॥ इति

सप्तधा वा, समितिः ईर्यासमित्यादिः पञ्चधा, भावना अनित्यत्वादिका द्वादश, प्रतिमा मासादिका द्वादश भिक्षूणाम् दर्शनादिका एकादश उपासकानाम्, इन्द्रियनिरोधः चक्षुरादिकरणपञ्चकसंयमः प्रतिलेखनं मुखवस्त्रिकाद्युपकरणप्रत्युपेक्षणमनेकविधम्, गुप्तिः मनो-वाक्-कायसंवरणलक्षणा त्रिधा, अभिग्रहा वसतिप्रमार्जनादयोऽनेकविधाः—एतयोश्चरण-करणयोः **प्रधानास्तदनुष्ठान**तत्पराः **स्वसमय–परसमयमुक्तव्यापाराः** अयं स्वसमयः अनेकान्तात्मकवस्तुप्ररूपणात् अयं च परसमयः केवलनयाभिप्रायप्रतिपादनात् इत्येतस्मिन् परिज्ञानेऽनादृता अनेकान्तात्मकवस्तुतत्त्वं यथावत् अनवबुध्यमानाः तदितरव्यवच्छेदेन इति यावत् । **चरणकरणयोः सारं** फलम् **निश्च-**

१-म्यक्प-भां० मां० । २ ओघनि० पृ० ५ । ३ ओघनि० पृ० ६ । ४ उव्वड आ० हा० वि० ।
५ पञ्चाशकटी० पृ० २७९ द्वि० पं० ४ । ६ भिक्षूणां द्वादशानामपि प्रतिमानां स्वरूपनिरूपणं पञ्चाशकमूलतोऽवगन्तव्यम्–पृ० २७७—२९१ गा० १—५० ।

यशुद्धं निश्चयश्च तत् शुद्धं च ज्ञान-दर्शनोपयोगात्मकं निष्कलङ्कम् न जानन्ति न अनुभवन्ति ज्ञान-दर्शन-चारित्रात्मककारणप्रभवत्वात् तस्य कारणाभावे च कार्यस्य असंभवात् अन्यथा तस्य निर्हेतुकत्वापत्तेः चरण-करणयोश्च चारित्रात्मकत्वात् द्रव्य-पर्यायात्मकजीवादितत्त्वावगमस्वभाव-रुच्यभावेऽभावात्।

५ अथवा चरण-करणयोः सारं निश्चयेन शुद्धं सम्यग्दर्शनं ते न जानन्ति न हि यथावस्थितव-स्तुतत्त्वावबोधमन्तरेण तद्रुचिः न च स्वसमय-परसमयतात्पर्यार्थानवगमे तदवबोधः बोटिकादेरिव संभवी। अथ जीवादिद्रव्यार्थ-पर्यायार्थापरिज्ञानेऽपि यद् अर्हद्भिरुक्तं तदेव एकं सत्यमित्येतावतैव सम्यग्दर्शनसद्भावः—

"मण्णइ तमेव सच्चं णिस्संकं जं जिणेहिं पन्नत्तं" [ ]

१० इत्याद्यागमप्रामाण्यात्, न; स्वसमयपरसमयपरमार्थानभिज्ञैर्निरावरणज्ञान-दर्शनात्मकजिनस्वरूपाऽ-ज्ञानवद्भिस्तदभिहितभावानां सामान्यरूपतयाऽपि अन्यव्यवच्छेदेन सत्यस्वरूपत्वेन ज्ञातुमशक्य-त्वात्; नन्वेवमागमविरोधः सामायिकमात्रपदविदो माष-तुषादेर्यथोक्तचारित्रिणस्तत्र मुक्तिप्रति-पादनात् सकलशास्त्रार्थज्ञताविकलव्रतस्य व्रताद्याचरणनैरर्थक्यापत्तिश्च तत्साध्यफलानवाप्तेः। न च यथोपवर्णितचरण-करणसम्यग्दर्शनवैफल्ये भवतः ज्ञानादित्रितयस्यापि तत्र पाठात्। न, ये यथोदि-

१५ तचरण-करणप्ररूपणासेवनद्वारेण प्रधानात् आचार्यात् स्वसमयपरसमयमुक्तव्यापारा न भवन्तीति-नञोऽत्र संबन्धात्-ते चरण-करणस्य सारं निश्चयशुद्धं जानन्त्येव गुर्वाज्ञया प्रवृत्तेः चरणगुणस्थितस्य साधोः सर्वनयविशुद्धतया अभ्युपगमात्—

"तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू" [आवश्यकनि० सामाइअनि० गा० १०२]

इत्याद्यागमप्रामाण्यात् अगीतार्थस्य तु स्वतन्त्रचरण-करणप्रवृत्तेः व्रताद्यनुष्ठानस्य वैफल्यमभ्युप-

२० गम्यत एव—

"गीयत्थो य विहारो बीओ गीयत्थमीसओ भणिओ।" [ ]

इत्याद्यागमप्रामाण्यात्॥ ६७॥

[ज्ञानक्रिययोरन्यतरवैकल्ये मोक्षफलवन्ध्यत्वकथनम्]

अत्र च सम्यग्दर्शनस्य सम्यग्ज्ञानादभेदाज्ञा(दाद् ज्ञा)न-क्रिययोरन्यतरविकलयोर्नाशेषकर्मक्ष-

२५ यलक्षणफलनिर्वर्तकत्वं संभवतीति प्रतिपादयन्नाह—

णाणं किरियारहियं किरियामेत्तं च दो वि एगंता।
असमत्था दाएउं जम्म-मरणदुक्ख मा भाइं॥ ६८॥

ज्ञायते यथावद् जीवाजीवादितत्त्वमनेनेति ज्ञानम् क्रियत इति क्रिया यथोक्तानुष्ठानम् तया रहितम् 'जन्म-मरण-दुःखेभ्यो मा भैषीः' इति दर्शयितुं दातुं वा असमर्थम् न हि

३० ज्ञानमात्रेणैव पुरुषो भयेभ्यो मुच्यते क्रियारहितत्वात् दृष्टप्रदीपनकपलायनमार्गपङ्गुवत्। क्रिया-मात्रं वा ज्ञानरहितम् न 'तेभ्यो मा भैषीः' इति दर्शयितुम् दातुं वा समर्थम्-न हि क्रियामात्रात् पुरुषो भयेभ्यो मुच्यते सँज्ज्ञानविकलत्वात् प्रदीपनकभयप्रपलायमानान्धवत्। तथा चागमः—

"हयं णाणं कियाहीणं हया अण्णाणओ किया।
पासंतो पंगुलो डड्ढो धावमाणो य अंधओ"॥

३५ [आवश्यकनि० पढमाव० गा० २२]

---

१ स्वसमयपरमा-वा० बा० भां० मां० आ०। २-रणे नै-मां०। ३-नवैकल्ये भां० मां०। नवि-कल्पे भ-वा० बा०। ४ "सव्वेसिं पि नयाणं बहुविहवत्तव्वयं निसामित्ता"। इति पूर्वार्धम्।—आवश्यकनि० पृ० १९७। ५ "एत्तो तइयविहारो णाणुण्णाओ जिणवरेहिं" इत्युत्तरार्धं हरिभद्रीयानुयोगद्वारवृत्तौ पृ० १२६।

६ असदीयायां मूलप्रतौ इतोऽनन्तरमेका गाथा अधिका विद्यते। सा चेयम्—

जेण विणा लोगस्सवि ववहारो सव्वहा न निव्वडइ।
तस्स भुवणेक्कगुरुणो नमो अणेगंतवायस्स॥

इयं च-गाथा टीकाप्रतिषु न क्वापि उपलभ्यते।

७ सज्ञान-बृ० सं० विना। ८ आवश्यकनि० पृ० १५।

उभयसद्भावस्तु 'तेभ्यो मा भैषीः' इति दर्शयितुं समर्थः। तथाहि—सम्यग्ज्ञान-क्रियावान् भयेभ्यो मुच्यते उभयसंयोगवत्त्वात् प्रदीपनकभयान्धस्कन्धारूढपङ्गुवत्। उक्तं च—

"संजोगसिद्धीए फलं वयंति" [आवश्यकनि० पढमाव० गा० २३] इत्यादि।

तस्मात् सम्यग्ज्ञानादित्रितयनयसमूहाद् मुक्तिः नयसमूहविषयं च सम्यग्ज्ञानम् श्रद्धानं च तद्विषयं सम्यग्दर्शनम् तत्पूर्वं च अशेषपापक्रियानिवृत्तिलक्षणं चारित्रम्—प्रधानोपसर्जनभावेन मुख्यवृत्त्या ५ वा-तत् त्रितयप्रदर्शकं च वाक्यमागमः नान्यः एकान्तप्रतिपादकस्य असदर्थत्वेन विसंवादकतया तस्य प्राधान्यानुपपत्तेः जिनवचनस्य तु तद्विपर्ययेण दृष्टवद् अदृष्टार्थेऽपि प्रामाण्यसंगतेः॥ ६८॥

[अनेकान्तमयत्वेन जिनवचनस्य स्तवनं पार्यन्तिकमङ्गलविधानं च]

तस्य तथाभूतस्य स्तुतिप्रतिपादनाय मङ्गलार्थत्वात् प्रकरणपरिसमाप्तौ गाथासूत्रमाह—

भद्दं मिच्छादंसणसमूहमइयस्स अमयसारस्स। १०
जिणवयणस्स भगवओ संविग्गसुहाहिगम्मस्स॥ ६९॥

भद्रं कल्याणम् जिनवचनस्य अस्तु इति संबन्धः मिथ्यादर्शनसमूहमयस्य; ननु यद् मिथ्यादर्शनसमूहमयं तत् कथं सम्यग्रूपतामासादयति? न हि विषकणिकासमूहमयस्य अमृतरूप-तापत्तिः प्रसिद्धा, न; परस्परनिरपेक्षसंग्रहादिनयरूपापन्नसांख्यादिमिथ्यादर्शनानां परस्परसव्यपेक्ष-तासमासादितानेकान्तरूपाणां विषकणिकासमूहविशेषमयस्य अमृतसंदोहस्येव सम्यक्त्वापत्तेः। १५ दृश्यन्ते हि विषादयोऽपि भावाः परस्परसंयोगविशेषसमासादितपरिणत्यन्तरा अगदरूपतामात्मसा-त्कुर्वाणाः मध्वाज्यप्रभृतयस्तु विशिष्टसंयोगावाप्तद्रव्यान्तरस्वभावा मृतिप्राप्तिनिमित्तविषयरूपतामा-सादयन्तः। न च अध्यक्षप्रसिद्धार्थस्य पर्यनुयोगविषयता अन्यथा अग्न्यादेरपि दाह्यदहनशक्त्यादिपर्य-नुयोगोपपत्तेः। अत एव निरपेक्षा नैगमादयो दुर्नयाः सापेक्षास्तु सुनया उच्यन्ते। अभिहितार्थसं-वादि चेदं वादिवृषभस्तुतिकृत्सिद्धसेनाचार्यवचनम्—

"नयास्तव स्यात्पदलाञ्छना इमे रसोपविद्धा इव लोहधातवः।
भवन्त्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितैषिणः"॥ [ ] इति।

अथवा सांख्याद्येकान्तवादिदर्शनसमूहमयैकस्य चूर्णनस्वभावस्य मिथ्यादृष्टिपुरुषसमूहविघटन-समर्थस्य वा यद्वा मिथ्यादर्शनसमूहा नैगमादयः—एकैकस्य नैगमादेर्नयस्य शतविधत्वात्—

"एक्केक्को वि सयविहो" [आवश्यकनि० उवग्घायनि० गा० ३६] २५

इत्याद्यागमप्रामाण्यात्—अवयवा यस्य तद् मिथ्यादर्शनसमूहमयम् जिनवचनस्य नैगमादयः सापेक्षाः सप्त अवयवाः तेषामपि एकैकः शतधा व्यवस्थितः इत्यभिप्रायः।

[सप्तभङ्ग्यादिप्रदर्शनेनानेकान्तसमर्थनम्]

समूहरूपसप्तनयावयवोदाहरणापेक्षया च सप्तभङ्गीप्रदर्शनमार्गमज्ञा विदधति सामान्यविशेषा-त्मकत्वाद् वस्तुतत्त्वस्य— ३०

---

१ "न हु एगचक्केण रहो पयाइ। अंधो अ पंगू अ वणे समिच्चा ते संपउत्ता नगरं पविट्ठा॥" इति संपूर्णा गाथा आवश्यकनि० पृ० १५।

२ सिद्धसेनीयत्वेन प्रसिद्धायां लभ्यायां च क्वापि स्तुतौ नेदं पद्यमुपलभ्यते।
समन्तभद्रकृतित्वेन प्रसिद्धे स्वयंभूस्तोत्रे पञ्चषष्टितमत्वेन इदं पद्यं 'नयास्तव स्यात्पदसत्यलाञ्छिता' इति 'भवन्त्यभिप्रेतगुणा यतस्ततो' इति च पाठान्तरेण सहितं दृश्यते।
हरिभद्रेण अनुयोगद्वारवृत्तौ "तदुक्तं च" इति निर्दिश्य 'भवन्त्यभिप्रेतगुणा' इति पाठसहितं पद्यमिदं समुद्धृतम् पृ० ११८। आचाराङ्गटीकायां शीलाङ्काचार्येण एतादृशमेव एतत् पद्यं "स्वयूथ्यैरत्र बहु विजृम्भितम्" इति कृत्वा उद्धृतम् पृ० ८५। हेमचन्द्रेण पुनः स्वोपज्ञशब्दानुशासनबृहद्वृत्तौ "स्तुतिकारोप्याह" इत्युक्त्वा इदं पद्यं उद्धृतम् स्वकीये च न्यासे विशेष-नामग्रहणं विनैव "परोक्तेनापि द्रढयति" इत्युक्त्वा व्याख्यातम् १-१-२।

३-मयिक-वा० बा० विना। ४ "सत्त नयसया हवंति एवं तु। अन्नो वि य आएसो पञ्चसया हुंति उ नयाणं"॥—आवश्यकनि० पृ० १३६। विशेषाव० गा० २२६४।

सामान्यस्य एकत्वात् तद्विवक्षायां यदेव घटादिद्रव्यम् 'स्याद् एकम्' इति प्रथमभङ्गविषयः।

तदेव देश-काल-प्रयोजनभेदात् नानात्वं प्रतिपद्यमानं तद्विवक्षया 'स्याद् अनेकम्' इति द्वितीयभङ्गविषयः।

तदेव उभयात्मकमेकदा एकशब्देन यदा अभिधातुं न शक्यते तदा 'स्याद् अवक्तव्यम्' इति तृतीयभङ्गविषयः।

[1]यदेव चावकाशदातृत्वेन असाधारणेन एकमाकाशम् [2]तदेव अवगाह्यावगाहकावगाहनक्रियाभेदाद् अनेकं भवति तद्रूपैर्विना तस्य अवस्तुत्वापत्तेः प्रदेशभेदापेक्षयाऽपि च तद् अनेकम् अन्यथा हिमवत्-विन्ध्ययोरपि एकदेशताप्राप्तेः तस्य च तथाविवक्षायाम् 'स्याद् एकं च अनेकं च' इति चतुर्थभङ्गविषयता।

यदेव चैकमाकाशं भवतः प्रसिद्धं तद् एकस्मिन् अवयवे [3]विवक्षिते एकम् अवयवस्य अवयवान्तराद् भिन्नत्वात् भिन्नानां च अवयवानां वाचकस्य शब्दस्य अभावात् अवक्तव्यं चेति तथाविवक्षायाम् 'स्याद् एकम् अवक्तव्यं च' इति पञ्चमभङ्गविषयस्तत्।

यदेव एकमाकाशं प्रसिद्धं भवतः तत् अवगाह्याऽवगाहकाऽवगाहनक्रियाभेदाद् अनेकम् एकानेकत्वप्रतिपादकशब्दाभावात् अवक्तव्यं च अतः 'स्याद् अनेकम् अवक्तव्यं च' इति षष्ठभङ्गविषयः।

यदेव एकमाकाशात्मकतया आकाशं भवतः प्रसिद्धं तदेव तथैकम् अवगाह्याऽवगाहकाऽवगाहनक्रियापेक्षया अनेकं च युगपत्प्रतिपादनापेक्षया अवक्तव्यं चेति 'स्याद् एकम् अनेकम् अवक्तव्यं च' इति सप्तमभङ्गविषयः।

एवं 'स्यात् सर्वगतः' 'स्याद् असर्वगतो घटादिः' इत्यादिकाऽपि सप्तभङ्गी वक्तव्या। यतः य एव पार्थिवाः परमाणवो घटः त एव विस्रसादिपरिणतिवशात् जलानिलानलवन्यादिरूपतामात्मसात्कुर्वाणाः 'स्यात् सर्वगतो घटः' इत्यादिसप्तभङ्गविषयतां यथोक्तन्यायात् कथं नासादयन्ति? न च घटपरमाणूनां पुद्गलरूपतापरित्यागे पूर्वपर्यायापरित्यागे च घटपर्यायापत्तिः क्षणिकाक्षणिकैकान्तयोरर्थक्रियानुपपत्तेरसत्त्वापत्तेः परिणामिन एव सुवर्णात्मना व्यवस्थितस्य केयूरात्मना विनाशमनुभवतः कटकाद्यात्मना उत्पद्यमानस्य वस्तुनः सत्त्वात् अन्यथा क्वचित् कस्यचित् कदाचित् अनुपलब्धेः। न च अध्यक्षाद् अन्यद् गरिष्ठं प्रमाणान्तरमस्ति यतस्तद्विपरीतभावाभ्युपगमः क्रियते अन्तर्बहिश्च हर्षविषादाद्यनेकाकारविवर्तात्म(विवर्तात्म)कैक चैतन्य-स्थास-कोश-कुशूलाद्यनेकाकारस्वीकृतैकमृत्पिण्डादेः स्वसंवेदनाक्षजाध्यक्षतः प्रतिपत्तेः। सर्वथोपलभ्यमध्यरूपं पूर्वापरकोट्योरसत् इति वदतः सर्वप्रमाणविरोधात् कुण्डलाऽङ्गदादिषु पर्यायेषु तादृग्भूतसुवर्णद्रव्योपलब्धेः कार्योत्पत्तौ कारणस्य सर्वथा निवृत्त्यनुपलब्धेः। न च सादृश्यविप्रलम्भात् तदध्यवसायकल्पनेति वक्तव्यम् तदेकान्तभेदसाधकप्रमाणस्यापास्तत्वात्। न च कथंचित् स्वभावभेदेऽपि तादात्म्यक्षि(क्ष)तिः ग्राह्यग्राहकाकारसंविद्वत् विविक्तपरमाणुषु स्थूलैकघटादिप्रतिभासवद्वा ग्राह्यग्राहकाकारविविक्तसंवित्प्रकल्पने अध्यक्षधियोऽपि विवक्षिताकारविवेकानुपलब्धेरध्यक्षेतरस्वभावाभ्यां विरोधस्वरूपासिद्धौ अन्यत्राऽपि कः प्रद्वेषः? तथाहि—शक्यमन्यत्रापि एवमभिधातुम्—एकमेव पार्थिवद्रव्यं लोचनादिसामग्रीविशेषात् वर्णादिप्रतिपत्तिभेदेऽपि भिन्नमिव प्रतिभाति प्रत्यासन्नेतररूपताव्यवस्थितैकविषयवत्। न हि स्पष्टास्पष्टनिर्भासभेदेऽपि तदेकत्वं[4]क्षितिस्तत्र तद्वद् इहापि रूपादिप्रतिभासभेदेऽपि एकत्वं किं न स्यात् प्रतीतेरविशेषात्। एवं च स्याद्वादिनः अग्नेरपि अनुष्णत्वप्रसक्तिरिति असंगतमभिधानम् यतस्तत्रापि स्यात् 'उष्णोऽग्निः' इति स्पर्शविशेषेण उष्णस्य भास्वराकारेण पुनरनुष्णस्य तस्यैकस्य नानास्वभावशक्तेरबाधितप्रमाणविषयस्यैवं वचने दोषासंगासंभवात्। तस्मात् एकस्यैव सामग्रीभेदवशात् तथाप्रतिभासाविरोधः। कारणस्य च कार्यात्मनोत्पत्तौ न किञ्चिद् अपेक्षणीयमस्ति यतस्तथोत्पित्सुस्वभावता न भवेत्। अत एव मृदादिभावो घटस्वभावेन नश्वरः कपालस्वरूपेण चोत्पत्तौ तिष्ठतीति स्वभावत एव नश्वरः उत्पित्सुः स्थास्नुश्च अन्यतमापाये पदार्थस्यैव असंभवात्[5] त्रितयभावं प्रत्यनपेक्षत्वाच्च न हि उत्पन्नः पदार्थः किञ्चित् स्थितिं प्रत्यपेक्षते स्थित्यात्मकत्वात् उत्पादस्य, न च अवस्थित उत्पत्तौ

१ यदैव बृ० आ० हा० वि०। २ तदैव बृ० आ० हा० वि०। ३ विवक्षितं। ऐ-बृ०। ४-त्वमिति क्षत्र भां० मां०। ५-स्तद्वद् वा० बा० आ० हा० वि०। ६-त् तृतीय-बृ० आ० हा० वि०।

किञ्चिद् अपेक्षते उत्पत्तिस्वभावत्वात् स्थितेः, न च विनष्ट उत्पत्तिं प्रति हेत्वन्तरापेक्षः विनाशस्य उत्पत्त्यात्मकत्वात् ततः पूर्वापरस्वभावपरित्यागावाप्तिलक्षणं परिणाममासादयन् भावो व्यवतिष्ठते इति प्रत्यक्षादिप्रमाणगोचरमेतत्। अतः शब्द-विद्युत्-प्रदीपादेरपि निरन्वयविनाशकल्पना असंगतैव तेषामादौ स्थितिदर्शनात् अन्तेऽपि तत्स्वभावानतिक्रमात् न हि भावः स्वं स्वभावं परित्यजति प्रागपि तत्स्वभावपरित्यागप्रसक्तेः अन्ते च क्षयदर्शनात् प्रागपि नश्वरस्वभाववत् आदौ उत्पत्तिसमये स्थितिदर्शनात् अन्ते स्थितिः किं नाभ्युपेयते? न च विद्युत्-प्रदीपादेस्तैजसरूपपरित्यागात् तामसरूपस्वीकरणे किञ्चिद् विरुद्धं भवेत्। न च स्वभावभेदस्तदेकत्वविघातकृत् ग्राह्यग्राहकाकारसंवेदनवत् वेद्यवेदकाकारविवेकपरोक्षापरोक्षसंवित्तिवद्वा। यथा च ध्वंसहेतोस्तदतदकरणविरोधात् अकिञ्चित्करत्वम् तथा स्थित्युत्पादहेत्वोर्विशरारुधर्मणः स्था[1]स्नुताकरणाभावात् स्वत एव स्थितिस्वभावस्य स्थितिहेतोरानर्थक्यात्। अथ स्थितिहेतुः अपातं करोतीत्युच्यते तर्हि पातं न करोतीति प्रसक्तम् एवं च अकिञ्चित्करत्वमेव तस्य। यदि वा अर्थान्तरं ततोऽपातः तर्हि तस्य करणे विनश्वरस्वभावः किं न विनश्येत्? अथासौ स्थास्नुस्तथापि स्थितिहेतोरानर्थक्यम् स्वत एव तस्य स्थितेः। तथा उत्पत्तिहेतुरपि यदि भावं करोति तदा तस्य अकिञ्चित्करत्वमेव भावस्य स्वयमेव भावरूपत्वात्। अथ अभावं भावरूपतां नयति तर्हि नाशहेतुरपि भावमभावीकरोतीति कथमकिञ्चित्करः स्यात्? न हि अभावस्य भावीकरणे भावस्य वा अभावीकरणे कश्चिद् विशेषः संभवी अत एव तेषामन्यतमस्य सहेतुकत्वमहेतुकत्वं वा अभ्युपगच्छन् सर्वेषां तद् अभ्युपगन्तुमर्हति अविशेषात्। न च भिन्नयोगक्षेमत्वात् कार्य-कारणयोरेकत्वमनुपपन्नम् स्वभावभेदेऽपि एकत्वप्रतिपत्तेः सर्वसंवित्क्षणानामेकदोत्पत्तिविनाशवतामभिन्नयोगक्षेमत्वेऽपि च परस्परतः पृथग्भावसिद्धेः। अथ अत्र अभिन्नयोगक्षेमपक्षेऽपि प्रतिभासभेदाद् भेदस्तर्हि यत्र प्रतिभासाभेदस्तत्र भिन्नयोगक्षेमत्वेऽपि अभेदः प्रतिभासभेदाभेदयोर्वस्तुभेदाभेदव्यवस्थापकत्वात् समुदायस्य च देश-कालभेदाभावात् सकृदेव संवित्त्यात्मनोत्पत्तेरेकत्वं च प्रसज्येत। यदि च स्वभावभेदो वस्तुभेदलक्षणम् तदा संतानान्तरयोरिव विषयविषयिरूपायाः संवित्तेरेकत्वेऽपि प्रत्यक्षेतरयोर्वा असौ विद्यत इति नानात्वं भवेत्। यदि पुनः स्वभावभेदाविशेषेऽपि विवक्षितज्ञानक्षणाकारयोरेव तादात्म्यम् न पुनः संतानान्तरसंवित्तीनामिति प्रत्यासत्तेः कुतश्चिद् व्यवस्थाप्यते तर्हि परस्यापि विवक्षितैकार्थोपादानोपादेयभूतयोरेव अवस्थयोस्तादात्म्यं कथंचिद् वदतो न कश्चिद् दोषः प्रसक्तिमान्। निराकृतश्च अनेकश एकान्तवादः तत्प्रसाधकहेतूनां सर्वेषामनेकान्तव्याप्ततया विरुद्धताप्रदर्शनात् तत्प्रदर्शनं च एकान्तवादिनिग्रहस्थानमनेकान्तवादिविजयस्यैवेतरपराजयाधिकरणप्राप्तिलक्षणत्वात्—

"विरुद्धं हेतुमुद्भाव्य वादिनं जयतीतरः" [ ]

इत्यस्य वचसो न्यायानुगतत्वात्।

[प्रासङ्गिकी निग्रहस्थानस्वरूपपर्यालोचना]

यदि पुनः असाधनाङ्गवचनं वादिनः पराजयाधिकरणमभ्युपगम्येत तदा वादाभ्युपगमं विधाय तूष्णींभावमात्रेण असाधनाङ्गस्य अवचनात् वादिनो विजयः किं न स्यात्? प्रतिवादिनोऽपि स्वपक्षसिद्धिमकुर्वतः कथं न विजयस्तत एव भवेत्। अथ साधनाङ्गावचनमपि निग्रहस्थानं तर्हि वादिप्रतिवादिनोर्यौगपद्येन निग्रहाधिकरणता भवेत् तूष्णींभावाविशेषात्। तूष्णींभावोपलम्भेन इतरो विजयवानिति चेत्; नन्वेवमितरजयस्य अन्यतरपराजयाधिकरणतैव प्राप्ता। न च स्वपक्षसिद्धिम कुर्वत इतरोपलम्भमात्रेण जयप्राप्तिः तदप्राप्तौ च कथं तदितरस्य पराजयः? यदपि 'इष्टस्यार्थस्य सिद्धि(द्धिः) साधनं तस्याङ्गं स्वभाव-कार्याऽनुपलम्भलक्षणं हेतुत्रयं पक्षधर्मत्वादि वा त्रैरूप्यं तस्य अवचनं निग्रहस्थानं वादिनः' इत्युक्तम्, तदपि अचारु; प्रतिवादिनोऽपि पक्षधर्मत्वादेरन्यतमस्य अनुक्तौ असमर्थने वा विजयाप्राप्तेः तदप्राप्तौ च वादिनो निग्रहस्थानानुपपत्तेः इतरजयनान्तरीयकत्वात् इतरपराजयस्य। एवं हेत्वाभासादेरसाधनाङ्गस्य वचनं वादिनो निग्रहस्थानमिति प्रतिक्षिप्तमुक्तन्यायाद् द्रष्टव्यम्। अथ ततः साध्यसिद्धेरभावात्। तस्य निग्रहस्थानमेव न भ्रूविक्षेपादेर-

१ स्थाणुता-भां० मां० विना। २-यस्येवे-वा० बा० आ०। ३ विजयप्रा-बृ०।

साधनाङ्गकरणस्य तत एव तत्प्राप्तेः। ततो वादिनमसाधनाङ्गमभिदधानम् कुर्वाणं वा स्वपक्षसिद्धिं विदधदेव प्रतिवादी तत्पक्षप्रतिक्षेपेण निगृह्णाति इत्येतदेव न्यायोपेतमुत्पश्यामः। एवं प्रतिवादिनो दोषमनुद्भावयतो न निग्रहस्थानम् तावता स्वपक्षसिद्धिमकुर्वाणस्य वादिनो विजयप्राप्त्ययोगात् तत्साधनस्य सदोषत्वसंभवात् तस्य सदोषत्वेऽपि तदुद्भावनासमर्थत्वात् प्रतिवादिनो निग्रहस्थानं तदिति चेत्, न; दोषवत्साधनाभिधानाद् वादिनोऽपि पराजयाधिकरणत्वात् द्वयोरपि युगपत् पराजयप्राप्तेः अत एव प्रतिवादिनो दोषस्यानुद्भावनमपि न निग्रहस्थानम्। यच्च वादिपक्षसिद्धेरप्रतिबन्धकं पक्षादिवचनाधिक्योद्भावनं प्रतिवादिपक्षसिद्धौ असाधकतमम् तत् सर्वं न वादिनः पराजयाधिकरणम् अन्यथा तत्पादप्रसारिकाद्युद्भावनमपि तस्य पराजयाधिकरणं स्यात्। अथ पक्षादिवचनस्य असाधनाङ्गत्वात् तदुद्भावने वादिनस्तदपरिज्ञाननिबन्धनपराजयाधिकरणता तर्हि 'यत् सत् तत् सर्वं क्षणिकम्' इति व्याप्तिवचनादेव शब्दस्यापि क्षणिकत्वसिद्धौ 'संश्च शब्दः' इत्यभिधानं तत एव तस्य पराजयाधिकरणं भवेत्। न च शब्दे शब्दविप्रतिपत्तिर्येन तन्निरासाय सत्त्वाभिधानं तत्र अपुनरुक्तं भवेत् तद्विप्रतिपत्तौ वा तत्साधकहेतु(तो)रसिद्धत्वादिदोषत्रयानतिवृत्तेर्भवतैव अभ्युपगमात् तत्साध्यत्वानुपपत्तिः। यदि च संक्षिप्तवचनात् साध्यसिद्धौ तद्विस्ताराभिधानं निग्रहस्थानं तर्हि सत्त्वात् क्षणक्षयसिद्धौ कृतकत्वप्रयत्नानन्तरीयकत्वाद्यभिधानं कथं न निग्रहस्थानं स्यात्? कथं वा 'कृतक'-'प्रयत्नानन्तरीयक'आदिषु स्वार्थिकस्य तस्योपादानं तत्र स्यात्? 'यत् सत् तत् सर्वं क्षणिकम्' इत्यादिसाधनवाक्यमभिधाय पक्षादिवचनवत् तत्समर्थनमपि निग्रहस्थानं प्रसक्तम् असमर्थितमपि स्वत एव तत्त्वेनोक्तमेव स्वसाध्याविनाभूतस्य हेतोः प्रदर्शनमात्रात् साध्यसिद्धेः सद्भावात् स्वभावकार्याऽनुपलम्भप्रकल्पनया तद्वचनं निग्रहस्थानं परस्य प्रसक्तम् अनुपलब्धौ 'उपलब्धिलक्षणप्राप्तस्य' इति विशेषणोपादानं निग्रहस्थानम् अदृश्यानामपि व्याधि-भूत-ग्रहादीनां कुतश्चिद् व्यावृत्तिसिद्धेः। यदि तु उपलभ्यानुपलब्धेरेव अभावसिद्धिः तदा 'नेदं निरात्मकं जीवच्छरीरम् प्राणादिमत्त्वात्' इत्यत्र घटादेरात्मनोऽक्षणिकस्यादृश्यानुपलम्भात् अभावासिद्धेः 'यत् सत् तत् सर्वं क्षणिकम्' इति सामस्त्येन व्याप्तिसिद्धितः क्षणक्षयानुमानं नानवद्यं स्यात्।

किञ्च, देश-काल-स्वभाव-विप्रकृष्टभावानुपलब्धेरभावासिद्धौ 'सर्वत्र सर्वदा सर्वो धूमोऽग्निमन्तरेण अनुपपत्तिमान्' इति व्याप्तेरसिद्धेर्न ततस्तत्सिद्धिः स्यात्। न च अध्यक्षाऽनुपलम्भौ तत्कार्यकारणभावप्रसाधकौ अभ्युपगम्यमानौ सन्निहितविषयबलोत्पत्तेरविचारकत्वाच्च इयतो व्यापारान् विधातुं क्षमौ तत्पृष्ठभाविविकल्पस्य तन्निवर्तनसामर्थ्याभ्युपगमे सविकल्पकस्यानिष्टं प्रामाण्यं प्रसज्येत अनधिगतार्थाधिगन्तृत्वात् अविसंवादित्वाच्च तस्य अविकल्पकस्य तु हिंसाविरति-दानचेतसां स्वर्गादिफलनिव(निर्वै)र्तनसामर्थ्यस्वभावसंवेदनेऽप्येव सर्वात्मना वस्तुसंवेदनेऽपि निर्णयवशादेव प्रामाण्योपपत्तेः अन्यथा 'अनुमानस्य अप्रामाण्यप्रसक्तेः तद्गृहीतग्राहितया' इत्युक्तं प्राक्। अदृश्यानामनुपलम्भात् अभावासिद्धौ अर्थक्रियया सत्ता भावानां व्याप्तेत्येतद् अपि परस्य निग्रहस्थानमेव ततः स्वपक्षसिद्धिः इतरस्य पराजयाधिकरणम् सा च परोपन्यस्तहेतोर्विरुद्धताप्रदर्शनेन स्वतन्त्रनिर्दोषहेतुसमर्थनेन वा परोपन्यस्तहेत्वसिद्धतादिदोषप्रतिपादनपुरस्सरा कर्तव्या अन्यथा परपराजयनिबन्धनस्वविजयायोगात्। यदा च विजिगीषुणा स्वपक्षस्थापनेन परपक्षनिराकरणेन च सभाप्रत्यायनं विधेयम् अन्यथा जयपराजयानुपपत्तेः तदा असिद्धाऽनैकान्तिकत्वसाधनदोषोद्भावनेऽपि न वादिप्रतिवादिनोर्जय-पराजयौ प्रकृतार्थापरिसमाप्तेः। अथ स्वपक्षसिद्धेरभावात् हेत्वाभासात् असाधनाङ्गवचनं वादिनो निग्रहस्थानम्, न; इतरत्रापि तत्प्रसङ्गात्। अथ वादिनः साधनत्वेन अभिमतस्य असाधनत्वप्रदर्शनेन प्रतिवादिकृतेन पराजयः प्रतिवादिनस्तु सद्भूतदोषोद्भावनाद् जयः, न; यदि स्वपक्षसिद्धिमकुर्वता प्रतिवादिना स्व-परोत्कर्षापकर्षप्रत्यायनमात्रेण वादी

१-सिद्धिः य-भां० मां० विना। २ तन्निवर्तन-भां० मां० विना। ३-नस्यैव वा० बा०। ४-माण्याप्र-बृ० आ० हा० वि०। ५-भावसि-बृ० आ० हा० वि०। ६ व्याप्ते तदपि आ० हा० वि०। व्याप्तेरित्येतदपि भां० मां०। ७-प्रवादि-बृ० भां० मां०। ८-भावात् हेत्वाभावादसाध-बृ० आ० हा० वि०। भावात् हेत्वाभावात् हेत्वाभासादसाध-वा० बा०। ९ सद्भूतासद्भूतदो-बृ० आ० हा० वि०। १०-त्कर्षापक-बृ० हा०।

निगृह्यते इत्यभ्युपगमस्तर्हि असद्भूतदोषोद्भावनेनापि निरुत्तरीकरणात् आत्मोत्कर्षसंभवात् प्रतिवादिनो विजयप्राप्तेः वादिनो निर्दोषसाधनाभिधायिनोऽपि पराजयप्रसक्तिः। अथ समर्थस्यापि साधनस्य असमर्थनेन स्वपक्षसिद्धेरभावात् वादिनोऽपराजयो न्यायप्राप्त एव, न; उभयत्र पराजयप्रसक्तेः। न हि अभूतदोषपक्षोपनयनिगमनाद्युद्भावनमात्रेण प्रतिवादिना प्रकृतं वस्तुतत्त्वं प्रसाधयन् स्वपक्षसाधनसामर्थ्यविकलेन वादी निगृह्यते इति न्यायोपपन्नम्। अथ प्रतिवादी अपि असाधनाङ्गस्य साधनाङ्गत्वेन उपादानात् स्वपक्षसिद्धिमकुर्वन् मिथ्याभिनिवेशी निगृह्यते इति चेत्, न; उभयोर्निग्रहप्राप्तेरित्युक्तत्वात्। तस्माद्—

"असाधनाङ्गवचनमदोषोद्भावनं द्वयोः। निग्रहस्थानमन्यद्धि न युक्तमिति नेष्यते" ॥ [ ]

इत्यादिवादन्यायलक्षणमेकान्तवादिनां सर्वमसंगतमुक्तन्यायात् सर्वस्य चैकान्तसाधनाङ्गत्वात् तस्य असत्त्वेन साधयितुमशक्यत्वात् अनेकान्तस्य च निर्दोषत्वेन तत्र दोषोद्भावनस्य अदोषोद्भावनरूपत्वात् दोषानुद्भावनस्य च निर्दोषे पराजयानधिकरणत्वात् तदुद्भावनस्यैव तत्र निग्रहार्हत्वात् इत्यलं पिष्टपेषणेन इति व्यवस्थितम् **मिथ्यादर्शनसमूहमयत्वं** मयिकत्वं वा। **न विद्यते मृतं** मरणं यस्मिन् असौ अमृतो मोक्षः तं सारयति गमयति प्रापयतीति वा तस्य अवन्ध्यमोक्षकारणत्वात् मोक्षप्रतिपादकत्वाच्च। **'अमयसायस्स'** वा इति पाठे अमृतवत् स्वाद्यते इति अमृतस्वादम् अमृततुल्यमिति यावत्। तथा रागाद्यशेषशत्रुजेतृपुरुषविशेषैरुच्यत इति **जिनवचनम्** तस्य अनेन विशिष्टपुरुषप्रणीतत्वनिबन्धनं प्रामाण्यं निगमयति। क्षीराश्रवाद्यनेकलब्ध्याद्यैश्वर्यादिमतो **भगवत** इत्यनेनापि विशेषणेन तस्य ऐहिकसंपद्विशेषजनकत्वमाह। संविग्नैः संसारभयोद्वेगाविर्भूतमोक्षाभिलाषैःअपकृष्यमाणराग-द्वेषाऽहंकारकालुष्यैः 'इदमेव जिनवचनं तत्त्वम्' इत्येवं सुखेन अवगम्यते यत् तत् संविग्नसुखाभिगम्यम्। एतेनापि विशिष्टबुद्ध्यतिशयसंवित्समन्वितयतिवृषनिषेव्यत्वमस्य प्रतिपादयति। एवंविधगुणाध्यासितस्य जिनवचनस्य सामायिकादिबिन्दुसारपर्यन्तश्रुताम्भोधेः कल्याणमस्तु इति प्रकरणसमाप्तौ अन्यमङ्गलसंपादनार्थं विशिष्टां स्तुतिमाह।

॥ इति तत्त्वबोधविधायिन्यां सन्मतिटीकायां तृतीयं काण्डं समाप्तम् ॥

इति कतिपयसूत्रव्याख्यया यद् मयाऽऽप्तं कुशलमतुलमस्मात् सन्मतेर्भव्यसार्थैः।
भवभयमभिभूय प्राप्यतां ज्ञानगर्भं विमलमभयदेवस्थानमानन्दसारम् ॥

पुष्यद्वाग्दानवादिद्विरदघनघटाकुण्ठधीकुम्भपीठ-
प्रध्वंसोद्भूतमुक्ताफलविशदयशोराशिभिर्यस्य तूर्णम्।
गन्तुं दिग्दन्तिदन्तच्छलनिहितपदं व्योमपर्यन्तभागान्
स्वल्पब्रह्माण्डभाण्डोदरनिबिडभरोत्पिण्डितैः संप्रतस्थे ॥

प्रद्युम्नसूरेः शिष्येण तत्त्वबोधविधायिनी। तस्यैषाऽभयदेवेन सन्मतेर्विवृतिः कृता ॥
अङ्कतो ग्रन्थप्रमाणं २५०००।

प्रावादिमदमर्दनप्रकटसन्मतिव्याजतो निवेशितजगत्त्रयस्फुरितसान्द्रकीर्तिद्रुमः।
समस्तजगतीतले गुणवतां शिरःशेखरो जयत्यतुलवाग(?)भयदेवसूरिः प्रभुः ॥

१-न्यद्धि यु-बृ० आ० हा० वि०। २-कान्ते सा-बृ० हा०। ३-षोद्भव-बृ० हा०। ४-निर्दोष प-बृ०। ५-णीततत्त्व-बृ० वा० बा०।-णीततत्वतत्व-भां० मां०। ६ इत्येव सु-बृ० सं०। ७-गम्यं तेना-आ० हा० वि०। ८ प्रतिक्रमण-वा० वा०। ९ सम्मत्ति-वा० बा०। सम्मति-भां० मां० आ० हा० वि०। १०-तीयका-बृ० भां० मां०। ११ सम्मते-भां० मां०। १२-मतिभू-बृ०। १३ सम्म-भां० मां० आ०। १४ इदं पद्यं आ० हा० वि० प्रतिषु नास्ति।

परिशिष्टानि

सन्मतिमूलगाथानामकाराद्यनुक्रमः ।

गाथा	गाथांक
अणु दुअणुएहिं दव्वे	३-३९
अण्णायं पासंतो	२-१३
अण्णोण्णाणुगयाणं	१-४७
अत्थि अविणासधम्मी	३-५५
अत्थि त्ति णिच्चियप्पं	१-३३
अत्थंतरभूएहि य	१-३५
अदिट्ठं अण्णायं च	२-१२
अह देसो सब्भावे	१-३७
अह पुण पुव्वपयुत्तो	२-३९
आइट्ठोऽसब्भावे	१-३९
इहरा समूहसिद्धो	१-२७
उप्पज्जमाणकालं	३-३७
उप(प्प)ज्जंति वियंति य	१-११
उप्पाओ दुवियप्पो	३-३२
एए पुण सङ्गहओ	१-१३
एगदवियम्मि जे अत्थ-	१-३१
एगसमयम्मि एगदवियस्स	३-४१
एगंतणिच्चिसेसं	३-२
एयंतपक्खवाओ	३-१६
एयंताऽसब्भूयं	३-५९
एवं एगे आया	१-४९
एवं जिणपण्णत्ते	२-३२
एवं जीवद्दव्वं	२-४१
एवं सत्तवियप्पो	१-४१
एवं सेसिंदियदंसणम्मि	२-२४
कम्मं जोगनिमित्तं	१-१९
काय-मण-वयणकिरिया-	३-४२
कालो सहाव णियई	३-५३
कुंभो ण जीवदवियं	३-३१
केई भणंति जइया	२-४
केवलणाणमणंतं	२-१४
केवलणाणावरणक्खय-	२-५
केवलणाणं साई	२-३४
कोवं उप्पायंतो	३-७
गइपरिगयं गई चेव	३-२९
गुणणिव्वत्तियसण्णा	३-३०

गाथा	गाथांक
गुणसद्दमंतरेणावि	३-१४
चक्खुअचक्खुअवहि-	२-२०
चरण-करणप्पहाणा	३-६७
जइ ओग्गहमेत्तं	२-२३
जइ सव्वं सायारं	२-१०
जह एए तह अण्णे	१-१५
जह कोइ सट्ठिवरिसो	२-४०
जह जह बहुस्सुओ संमओ य	३-६६
जहऽणेयलक्खणगुणा	१-२२
जह दवियमप्पियं तं	१-४२
जह दससु दसगुणम्मि य	३-१५
जह पुण ते चेव मणी	१-२४
जह संबन्धविसिट्ठो	३-१८
जाइ-कुल-रूव-लक्खण-	१-४५
जावइया वयणवहा	३-४७
जीवो अणाइणिहणो केवल-	२-३७
जीवो अणाइणिहणो जीव-	२-४२
जुज्जइ संबन्धवसा	३-२१
जेण मणोविसयगयाण	२-१९
जेण विणा लोगस्स (पाठान्तर)	पृ० ७५६
जे वयणिज्जवियप्पा	१-५३
जे संतवाय दोसे	३-५०
जे संघयणाईया	२-३५
जो आउंचणकालो	३-३६
जो हेउवायपक्खम्मि	३-४५
जं अप्पुट्ठा भावा	२-२९
जं अप्पुट्ठे भावे	२-३०
जं काविलं दरिसणं	३-४८
जं च पुण अरिहया	३-११
जं पच्चक्खग्गहणं	२-२८
जंपन्ति अत्थि समये	३-१३
जं सामण्णग्गहणं	२-१
णत्थि ण णिच्चो ण कुणइ	३-५४
ण य तइओ अत्थि णओ	१-१४
ण य दव्वट्ठियपक्खे	१-१७
ण य बाहिरओ भावो	१-५०

गाथा	गाथांक
ण य होइ जोव्वणत्थो	१-४४
ण वि अत्थि अण्णवादो	३-२५
ण हु सासणभत्तीमेत्तएण	३-६३
णाणं अपुट्ठे अविसये	२-२५
णाणं किरियारहियं	३-६८
णियमेण सद्दहंतो	३-२८
णिययवयणिज्जसच्चा	१-२८
तम्हा अण्णो जीवो	२-३८
तम्हा अहिगयसुत्तेण	३-६५
तम्हा चउव्विभागो	२-१७
तम्हा सव्वे वि णया	१-२१
तह णिययवायसुविणिच्छिया	१-२३
तह सव्वे णयवाया	१-२५
तिण्णि वि उप्पायाई	३-३५
तित्थयरवयणसंगह-	१-३
ते उ भयणोवणीया	३-५१
तेहिं अतीताणागय-	१-४६
दव्वट्ठिओ त्ति तम्हा	१-९
दव्वट्ठिओ वि होऊण	२-२
दव्वट्ठियनयपयडी	१-४
दव्वट्ठियवत्तव्वं अवत्थु	१-१०
दव्वट्ठियवत्तव्वं सव्वं	१-२९
दव्वट्ठियवत्तव्वं सामण्णं	३-५७
दव्वट्ठियस्स आया	१-५१
दव्वट्ठियस्स जो चेव कुणइ	१-५२
दव्वत्थंतरभूया	३-२४
दव्वंतरसंजोगाहि	३-३८
दव्वस्स ठिई जम्म-विगमा	३-२३
दव्वं खित्तं कालं	३-६०
दव्वं जहा परिणयं	३-४
दव्वं पज्जवविउयं	१-१२
दुविहो धम्मावाओ	३-४३
दूरे ता अण्णत्तं	३-९
दो उण णया भगवया	३-१०
दोहि वि णएहि णीअं	३-४९
दंसणणाणावरणक्खए	३-९

गाथा	गाथांक
दंसणपुव्वं णाणं	२-२२
दंसणमोग्गहमेत्तं	२-२१
नत्थि पुढवीविसिट्ठो	३-५२
नामं ठवणा दविए ति	१-६
पच्चुप्पण्णम्मि वि पज्जयम्मि	३-६
पच्चुप्पन्नं भावं	३-३
पज्जवणयवोक्कंतं	१-८
पज्जवणिस्सामण्णं	१-७
पडिपुण्णजोव्वणगुणो	१-४३
पण्णवणिज्जा भावा	२-१६
परपज्जवेहिं असरिसगमेहिं	३-५
परवत्तव्वयपक्खा	२-१८
परिगमणं पज्जाओ	३-१२
परिसुद्धो नयवाओ	३-४६
परिसुद्धं सायारं	२-११
पाडेक्कनयपहगयं	३-६१
पिउ-पुत्त-णत्तु-भव्वय-	३-१७
पुरिसज्जायं तु पडुच्च	१-५४
पुरिसम्मि पुरिससद्दो	१-३२
बहुयाण एगसद्दे	३-४०
बंधम्मि अपूरन्ते	१-२०
भण्णइ खीणावरणे	३-६
भण्णइ जह चउणाणी	२-१५
भण्णइ विसमपरिणयं	३-२२
भण्णइ संबंधवसा	३-२०
भद्दं मिच्छद्दंसणसमूह-	३-६९
भयणा वि हु भइयव्वा	३-२७
भविओ सम्मद्दंसण-	३-४४
मइसुयणाणणिमित्तो	२-२७
मणपज्जवणाणंतो	२-३
मणपज्जवणाणं दंसणं	२-२६
मूलणिमेणं पज्जव-	१-५
रूआइपज्जवा जे देहे	१-४८
रूव-रस-गंध-फासा	३-८
लोइयपरिच्छयसुहो	१-२६
वंजणपज्जायस्स उ	१-३४
विगमस्स वि एस विही	३-३४
सब्भावाऽसब्भावे	१-४०
सब्भावे आइट्ठो	१-३८
समयपरमत्थवित्थर-	१-२
सम्मण्णाणे णियमेण	२-३३
सम्मद्दंसणमिणमो	३-६२
सवियप्प-णिव्वियप्पं	१-३५
सव्वणयसमूहम्मि वि	१-१६
साई अपज्जवसियं	२-३१
साभाविओ वि समुदयकओ	३-३३
सामण्णम्मि विसेसो	३-१
साहम्मउ व्व अत्थं	३-५६
सिद्धत्तणेण य पुणो	२-३६
सिद्धं सिद्धत्थाणं	१-१
सीसमईविप्फारण-	३-२५
सुत्तं अत्थनिमेणं	३-६४
सुत्तम्मि चेव साई	२-७
सुह-दुक्खसम्पओगो	१-१८
सो उण समासओ त्रिय	१-३०
संखेज्जमसंखेज्जं	२-४३
संतम्मि केवले दंसणम्मि	२-८
हेउविसओवणीअं	३-५८
होज्जाहि दुगुणमहुरं	३-१९

श्वेताम्बर-दिगम्बरजैनाचार्यैः स्वे स्वे ग्रन्थे समुद्धृतानां यथोपलब्धानां च सन्मतिगाथानां सूचिः ।

जिनभद्रगणी क्षमाश्रमण

सन्मतिप्रकरण	विशेषावश्यक
१,११	गाथा २५४८
१,१९	१९३५
१,६	२९४०
२,१५	१४१
२,४३	७७४
३,४७	२२६५
३,५२	२१०४
३,४९	२१९५

सिंहक्षमाश्रमण

सन्मति०	नयचक्रटीका (लिखित प्रेसकोपी)
१,३१	पृ० २
१,४७	८
१,२८	५०
३,६९	१२३ अने १०३२
१,३	३५९
३,५८	६६०
१,४७	७४८
१,६	७६०
१,५	९२८
१,५ अने ३,४५	९०१

सिद्धसेनगणी (गन्धहस्ती)

सन्मति०	तत्त्वार्थभाष्यवृत्ति
१,२८ अने १,२०	अ० १ सू० ७ पृ०५३

हरिभद्र

सन्मति०	पञ्चवस्तु
३,५३	गाथा १०४९
	उपदेशपद
३,५३	पृ० १४०
	दशवै० टीका
३,५२	पृ० ३२
१,१८	३८

शीलाङ्क

सन्मति०	आचाराङ्गटीका
१,२१	पृ० ८०
१,१२	८५
३,४५	१४७
१,३१	१७१
	सूत्रकृताङ्गटीका
३,५३	पृ० २११
१,२२	,,
१,२३	,,
१,२४	,,
१,२५	,,

वादिवेताल शान्तिसूरि

सन्मति	उत्तराध्ययनपाइअटीका
१,३ अने १,६	पृ० २१
३,४७	६७

हेमचन्द्र

सन्मति०	प्रमाणमीमांसा
३,४९	पृ० ४०

मलधारी हेमचन्द्र

सन्मति०	विशेषाव० टीका
३,५२	पृ० ३३
१,४७	,,
१,३	१३४६

मल्लिषेण

सन्मति	स्याद्वादमञ्जरी
३,४७	पृ० २११

विद्यानन्दी

सन्मति०	तत्त्वार्थश्लोकवार्त्तिक
३,४५	पृ० ३

अनन्तवीर्य

सन्मति०	सिद्धिविनिश्चयटीका (लिखित)
३,५०	पृ० ३२४

अमृतचन्द्र

सन्मति०	पञ्चास्तिकायटीका
३,६७	पृ० २५०

यशोविजयोपाध्यायैः स्वरचिता अनेके ग्रन्थाः सन्मतिप्रकरणमाश्रित्यैव कृता इति सूचनाय तत्तद्ग्रन्थोद्धृतानां सन्मतिगाथानां सूचिः ।

सन्मति०	शास्त्रवार्तास० टीका	३,५७	२५६ प्र०	१,३५	५१
१,३५	पृ० २५२ द्वि०	३,३८	३६ प्र०	१,८	५४
१,४७	११५ प्र०	३,९	२६१ द्वि०	१,९	,,
१,३७	२५३ प्र०	३,१०	,,	१,१०	५५
१,३९	,,	३,३९	२७४ प्र०	१,११	,,
१,११	२३१ द्वि०	३,३	२५ प्र०	१,१२	,,
१,४९	११५ द्वि०	३,१२	२६१ द्वि०	१,१३	,,
१,५३	११६ प्र०	३,४०	२३५ प्र०	१,१४	,,
१,५०	११५ द्वि०	३,२७	२२३ द्वि०	१,१५	,,
१,४४	२५८ प्र०	३,४४	५८ प्र०	१,१६	,,
१,६	२४२ प्र०	३,८	२६१ प्र०	१,२१	५६
१,२८	२३० द्वि०	३,३४	२२१ द्वि०	१,२२	५७
	२४३ ,,	३,३३	२२० द्वि०	१,२३	,,
१,२१	२३० प्र०	३,५६	२५६ प्र०	१,२४	,,
१,५२	११६ प्र०	सन्मति०	नयोपदेश	१,२५	,,
१,१०	२३१ द्वि०	१,१३	पृ० ३५ द्वि०	१,२६	५८
१,५१	११६ प्र०	१,३१	३ द्वि०	१,२७	,,
१,९	२३१ प्र०	१,४१	१३ द्वि०	१,२८	५९
१,१२	२२४ प्र०	१,१५	३६ द्वि०	१,५	१०२
१,४३	२५८ प्र०	१,५३	८८ प्र०	१,४१	१०८
१,५४	११६ प्र०	१,१४	३५ द्वि०	१,५३-५४	१२३
१,४८	११५ प्र०	१,२८	२८ द्वि०	१,३६	१३०
१,४०	१५३ द्वि०	१,३	२९ प्र०	१,३७-३८	१३२
१,४८	,, द्वि०	१,१०	३१ प्र०	१,३९	१३३
२,३५	३४२ प्र०	१,९	३० द्वि०	१,४०	१३४
३,३६	,, द्वि०	१,१२	३५ द्वि०	१,४१	१३५
३,३९	३६ प्र०	१,८	३० द्वि०	३,४९	७
३,३२	२१९ द्वि०	१,५४	१५ द्वि०	३,५-६	१३९
३,५३	७९ द्वि०	१,३४	१२ प्र०	३,७	१४०
३,३१	२६० प्र०	१,३५	,,	३,८-१५	१४१-१४३
३,२९	२५९ द्वि०	१,१६	३६ प्र०	३,३९	१५३
३,३०	,,	३,३७	४३ द्वि०	३,३३	१५३
३,१४	२६१ द्वि०	३,५३	९२ द्वि०	३,१२	,,
३,१५	२६१ द्वि०	३,४७	८९ प्र०	३,१९-२०	१५४
३,४७	२७४ प्र०	३,५४	८९ द्वि०	३,२१	,,
३,५०	२४ द्वि०	३,२८	९६ द्वि०	३,२२-२३	१५५
३,४८	२७४ प्र०	३,६	१९ द्वि०	३,२४-२५-२६	१५६
३,११	२६१ द्वि०	३,२५	१५ द्वि०	३,२७	१५७
३,१३	,,	सन्मति०	अनेकान्तव्यवस्था	३,२८-२९	१५८
३,२८	२५९ प्र०		(लिखित प्रेसकोपी)	३,३०-३१	१६०
३,३५	३५ प्र०	१,४	पृ० २०	३,६७	,,

सन्मति०	ज्ञानबिन्दु	२,११		१५८ प्र०	३,१३	२	१२		
१,८	पृ० १५२ द्वि०	२,१५		१५९ प्र०	३,३८	९	२१		
१,३५	,,	२,२७		१६२ प्र०	३,१०	२	१२		
२,१२	१५८ द्वि०	२,३		१५४ द्वि०	३,४९	५	६		
२,१३	,,	२,२६		१६२ प्र०	३,१२	२	११		
२,३२	१६३ द्वि०	२,३३		१६३ द्वि०	३,३४	९	२६		
२,२४	१६१ द्वि०	२,३१		,,	३,३३	९	२०-२३		
२,४	१५५ प्र०	२,७		१५६ द्वि०	सन्मति०		महावीरस्तव		
२,१४	१५९ प्र०	२,८		१५७ प्र०	१,२८		पृ० ५४ प्र०		
२,५	१५६ प्र०	सन्मति०	द्रव्यगुणपर्यायनो रास		१,८		४२ द्वि०		
२,२०	१६० द्वि०	१,४७	ढा० १३	गा० १०	३,२९		१६ द्वि०		
२,२३	१६१ द्वि०	१,४१	४	१३	३,६		५६ प्र०		
२,१०	१५८ प्र०	२,३५	९	१४-१५	३,२५		५४ द्वि०		
२,१९	१६२ द्वि०	२,३६	९	१४-१५	सन्मति०		धर्मपरीक्षा		
२,२८	१६२ द्वि०	३,३९	९	२१	१,३		पृ० ८९		
२,३०	,,	,,	१४	१६	३,४९		८८		
२,२९	१६२ प्र०	३,३७	९	१२	३,४८		,,		
२,२५	१६१ द्वि०	३,३२	९	१९	३,२७		२४०		
२,९	१५७ प्र०	३,१४	२	१२	सन्मति०		गुरुतत्त्वविनिश्चय		
२,२२	१६१ प्र०	३,६७	१	२	१,२८		पृ० १२ द्वि०		
२,२१	१६० द्वि०	३,१५	२	१२	३,५४		१८० प्र०		
२,१६	१५९ प्र०	३,११	२	१२	३,२७		१७ द्वि०		
२,१८	१६० प्र०								

सन्मतिमूलगाथागताः शब्दाः ।

शब्द	काण्ड	गाथा	व्या. पृ.
	अ		
अंतरेण	३	१४	६३५
अकुसला	३	३८	६४५
अक्खयं	२	१७	६१६
अगई	३	२९	६४०
अग्गहणं	३	२४	६३८
अचक्खु	२	२०	
अजुत्तं	१	१८,४७	४१७,४५२
अणण्णो	३	५२	
अणत्थंतरं	३	३५	६३५
अणंत	२	४३	६२५
	३	६,१९	६३०
अणंतकप्पं	२	४३	६२५
अणंतकप्पा	३	६	६३०
अणंतगुणकालयं	३	१९	६३७
अणंतगुणो	३	१३	
अणंतं	२	१४,१७,३७	६१६,६२३
अणाइ	२	३७,४१,४२	
अणाइणिहण	२	४१	६२४
अणाइणिहणो	२	३७	६२३
अणाइनिहणो	२	४२	६२४
अणागयाईयविसयेसु	२	२५	६१९
अणागय	१	३१,४३,४४,४६	४४९,४५०
अणागयवयगुणपसाहणं	१	४४	४५०
अणागयसुहुवहाणत्थं	१	४३	४४९
अणागारं	२	१४	२१०
अणायारं	२	११	
अणावरणं	२	१७	६१६
अणिच्छियं	३	५९	७२६
अणियमा	३	३३	६४१
अणु	३	३९	६४६,४८
अणुगया	१	४८	
	३	८	
अणुगयाणं	१	४७	
अणुत्तरं	३	५१	७०९
अणुप्पन्नं	१	११	४०९
अणुमयं	३	२०	६३७
अणू	३	३९	६४८
अणेग	३	१२	
अणेगकरणं	३	१२	६३५
अणेगन्ते	१	१४	४१६
अणेय	१	२२	४२१
अणेयलक्खणगुणा	१	२२	४२१
अणोवम	१	१	
अणोवमसुहं	१	१	१३३,१५०,१६६
अण्णं	३	१	६२७
अण्णत्तं	२	२२	६१८
	३	९	६३४
अण्णयरं	१	५४	४५६
अण्णवादो	३	२६	६३८
अण्णा	१	५३	४५५
	२	२०	६१७
अण्णायं	२	१२,१३	६०९
अण्णे	१	१५	४१६
	२	३६,४३	६२३,६२५
अण्णो	१,३	४४,५२	४५०,४५५
	२	३८	६२३
	३	५२	७१०
अण्णोण्णं	३	५६	७२५
अण्णोण्ण	१	२,३,२१,२३,४७,४८	
	२	१६	
	३	३१,४९	६४०
अण्णोण्णणिस्सिआ	१	२१	४१९
अण्णोण्णनिरवेक्खा	३	४९	७०४
अण्णोण्णपक्खणिरवेक्खा	१	२३	४२१
अण्णोण्णविलक्खणा	२	१६	६१५
अण्णोण्णविसेसिया	३	३१	६४०
अण्णोण्णाणुगया	१	४८	४५३
अण्णोण्णाणुगयाणं	१	४७	४५२
अतीत	१	४६	
अतीताणागयदोसगुणो-दुगुंछगऽब्भुवगमेहि	१	४६	४५०
अत्तुक्कोस	३	६२	७३२
अत्तुक्कोसविणट्ठा	३	६२	७३२

शब्द	काण्ड	गाथा	व्या. पृ.
अत्थ	१	३०,३१,३४,४१	
,,	२	१,२७,३६	६२३,६३०,७४६
	३	५,६४,६५	६३०,७४६
अत्थउवलंभो	२	२७	६१९
अत्थं	१	२	१७३
अत्थओ	२	३३	६२२
अत्थगई	३	६४	७४६
अत्थगईअ	२	१८	६१६
अत्थगओ	१	३०	४३०
अत्थणिअओ	१	३०	४३०
अत्थंतर	१	३६	
	३	३४	
अत्थंतरं	३	३५	६३६
अत्थंतरभावगमणं	३	३४	६४३
अत्थंतरभूएहि	१	३६	४४१,४४२,४४६
अत्थनिमेणं	३	६४	७४५
अत्थपज्जया	१	३१	४३०
अत्थपज्जाए	१	४१	४४८
	३	५	६३०
अत्थपज्जाओ	१	३४	४४०
	२	३६	४५७,६२३
अत्थपडिवत्ती	३	६४	७४६
	३	५६	७१९
अत्थम्मि	२	२५	६१८
अत्थसंपायणम्मि	३	६५	७४६
अत्था	२	२८	६१९
अत्थि	१	७,१४,३३	४०७,४१६
		३७,३८,४०	४४०,४४६
		४२,५०	४४७,४४९,४५३
	३	४,५,१३,२२,२६,५५	६३०,६३५,६३७,६३८,७१८,७१९
अत्थो	१	२७	४२३
	२	३९	६२३
अदवियं	३	३१	६४०
अदव्वं	३	३०	६४०
अदिट्ठं	२	१२,१३	६०९
अन्नहा	३	२९	६४०
अन्तो	२	३	५९६
अन्नो	३	४५	६५१
अपच्छिम	१	८	
अपच्छिमवियप्पनिव्वयणो	१	८	४०८
अपज्जवसियं	२	७,३१,३४	६०७,६२१,६२२
अपज्जवेसु	३	२८	६४०
अपरिणअ	१	१९	४१८
अपरिणउच्छिण्णेसु	१	१९	४१८
अपरिसुद्धो	३	३२	६४१
अपुट्ठे	२	२५	६१८
अपूरन्ते	१	२०	
अप्पियं	१	४२	४४९
अप्पुट्ठा	२	२९	६२०
अप्पुट्ठे	२	३०	६२०
अब्भंतर	१	५०	
अब्भंतरओ	१	५०	४५३
अब्भंतरविसेसो	१	५०	४५३
अब्भुवगमेहिं	१	४६	
अभविया	३	४३	
अभिणिबोहे	२	३२	६२१
अभिण्णकाला	३	३५	६४३
अभिण्णं	३	३५	६४३
अभिण्णो	१	३०	४३०
अभीरू	२	४	६०५
अमयसारस्स	३	६९	
अमुत्ता	३	२४	६३८
अमुत्तेसु	३	२४	६३८
अयं	३	२५	६३८
अरहा	२	१३,१५	६१०
अरिहया	३	११	६३५
अलक्खणं	१	१३	४१५
अलिए	१	२८	
अवत्तव्वं	१	३८,३९	४४७
अवत्तव्वयं	१	३६,४०	४४२,४४७
अवत्थुं	१	१०	४०९
अवमण्णंता	३	२६	६३८
अवलंबमाणा	२	४	६०५
अवसेसो	१	७	४०७
अवहि	२	२०	
अवि	३	५,१४	६३०,६३५
अविकोविय	३	६१	७३२
अविकोवियसामत्था	३	६१	७३२
अविणट्ठं	१	११	४०९
अविणास	३	५५	७१८

शब्द	काण्ड	गाथा	व्या. पृ.
अविणासधम्मी	३	५५	७१८
अविणिच्छओ	३	६६	
अविभत्ता	३	२८	६४०
अवियत्तं	२	११	६०९
अवियप्पं	१	२९,३५	४२९,४४१
अवियप्पो	१	३४	४४०
अविरुद्धा	१	४९	४५३
अविरोहेण	३	२७	६३९
अविसए	२	५५	६१८
अविसिट्ठा	२	१८	६१६
अविसेसओ	२	३०	६२०
अविसेसियं	२	४१	६२४
असंखेज्जं	२	४३	६२५
असब्भाव	१	३७	
असब्भावपज्जवे	१	३७	४४६
असब्भावे	१	३९,४०	४४७
असब्भूयं	३	५९	७२६
असमत्था	३	६८	
असमाण	३	८	६३३
असमाणग्गहणलक्खणा	३	८	६३३
असरिस	३	५	
असरिसगमेहिं	३	५	६३०
असव्वाए	३	५०	७०५
असव्वाया	३	५६	७२५
अह	१	२६,३७	४२२,४४६
	२	२४,३९	६१८
	३	१६	६३६
अहवा	२	१०	६०८
अहिगम्मस्स	३	६९	
अहिगय	३	६५	७४६
अहियम्मि	३	१५	६३६
अहिगयसुत्तेण	३	६५	७४६
अहिगयस्स	१	४५	४५०
अहेउवाओ	३	४३	६५०

आ

आइ	२	३६	
आइट्ठो	१	३८,३९	४४६,४४७
आईणं	३	११	६३५
आईया	३	६	६३०
आईहिं	१	३६	
आउंचण	३	३६	
आउंचणकालो	३	३६	६४४
आउय	२	४२	६२४

शब्द	काण्ड	गाथा	व्या. पृ.
आएस	१	३७	
आएसविसेसियं	१	३७	४४६
आगम	१	२	१७३
आगममेत्तत्थ	३	४६	६५५
आगममेत्तत्थसाहओ	३	४६	६५५
आगमिओ	३	४५	६५१
आगमे	३	४५	६५१
आगासाईआणं	३	३१	६४१
आणं	१	१६	
आयरिय	३	६५	७४६
आयरियधीरहत्था	३	६५	७४६
आया	१	४९,५१	४५३,४५५
आरद्धे	३	३९	६४६
आरद्धो	१	२९	४२९
आवरण	२	५,९	६०६
आसायणा	१	५३	४५५
	२	४,७	
आसि	३	५२	७१०

इ

इअ	२	३७	६२३
इच्छंति	२	३४,३६	६२२,६२३
	३	८,२९,३८	६३३,६४०
			६४६
इणं	२	३९	६२३
इणमो	३	६२	७३२
इन्ति	२	२८	६१९
इंदिय	३	१८	६३६
इंदियगयं	३	१८	६३६
इमं	१	४७	४५२
	२	३३	६२२
इय	१	३५	
इह	२	२६	६१९
इहरा	१	२७	४२२
	३	२५	६३८

उ

उ	१	५,६,९,१६, ३२,३४	३४९,३७९, ४०८,४१६, ४४०
	२	२,१६,१७, १८,३३,४१	६१६,६२२,
	३	२३,३२,३४, ४३,४८,५१	६३८,६४३ ६४०,६५६
उआहरणमित्तं	३	१६	६३६

शब्द	काण्ड	गाथा	व्या. पृ.
उच्छिण्णेसु	१	१९	४१८
उच्छेअ	१	१७	
उच्छेअवाईआ	१	१७	
उजुसुय	१	५	३१७,३१८, ३४९,३६६, ३७८
उजुसुयवयणविच्छेदो	१	५	३१७
उड्ढ	३	२९	६४०
उड्ढगईयं	३	२९	६४०
उण	१	२१,२८,३०, ४१	४१९,४२९, ४३०
	३	१०,१६,२१, ६४	६३४,६३६, ६३७,७४६
उत्तूणा	२	३४	६२२
उन्नेसुं	१	२	१७३
उप्पज्जंति	१	११	४०९
उप्पज्जमाण	३	३७	६४५
उप्पज्जमाणकालं	३	३७	६४५
उप्पण्णं	३	३७	६४५
उप्पण्णो	२	३६	६२३
उप्पाओ	२	९,३१	६०८,६२१
	३	३२,४०,४२	६४१,६४९ ६५०
उप्पाय	१	१२	
उप्पायट्ठिइभंगा	१	१२	४१०,४१५
उप्पायत्था	३	३८	
उप्पायत्थाकुसला	३	३८	६४६
उप्पायंतो	३	७	६३१
उप्पायं	३	३८	६४६
उप्पायसमा	३	४१	६४९
उप्पाया	३	४१	६४९
उप्पायाई	३	३५	६४३
उभय	१	१६	
उभयत्थ	२	४०	६२४
उभयवायपण्णवओ	१	१६	४१६
उभयहा	१	३८,३९,४०	४४६,४४७
उयाहरणं	२	३९	६२३
उल्लूएण	३	४९	६५६
उल्लूया	३	५०	
उवउत्तो	२	२९	६२०
उवएसम्मि	३	२६	६३८
उवओगा	२	९	६०८
उवओगो	१	८	

शब्द	काण्ड	गाथा	व्या. पृ.
उवगयाणं	१	१	१३३,१५० १६६
उवणीओ	१	२६	
उवणीयं	३	२२,५८	६३७,७२६
उवणीया	३	५१	७०९
उवलंभो	२	२७	
उववण्णं	२	३३	६२२
उवसमियाई	२	३६	६२३
उवसमियाईभावं	२	२	५९६
उवसमियाईलक्खणवि-सेसओ	२	३६	६२३
उवाओ	३	५५	
उस्सग्गओ	३	४१	६४९

ए

एए	१	१३,१५	४१५,४१६
	३	५५,५७	७२५
एएसु	१	५३	४५५
एक्कसमएण	२	१०	६०८
एग	१	३१	४३०
	२	१२,३१	६०८,६२१
	३	१७,४०,४१	६३६,६४९
एगगुण	३	६	६३०
एगगुणाईया	३	६	६३०
एगगुणो	३	१३	६३५
एगदवियम्मि	१	३१	४३०
एगदवियस्स	३	४१	६४९
एगंत	२	३९	
	३	२	६२७
एगंतणिव्विसेसं	३	२	६२७
एगंतपक्खपडिसेहे	२	३९	६२३
एगंता	१	१४	४१६
	३	५३	७१०
	३	६८	
एगंतिओ (एगन्तिओ)	३	३३	६४१
एगंतुच्छेयम्मि	१	१८	४१७
एगंतो	३	२२	६३१
एगपुरिससंबंधो	३	१७	६३५
एगयरम्मि	२	२७	६१९
एगविभागम्मि	३	४०	६४९
एगसद्दे	३	४०	६४९
एगसमयंतरुप्पाओ	२	३१	६२१
एगसमयम्मि	२	१२	६०९
	३	४१	६४९

शब्द	काण्ड	गाथा	व्या. पृ.
एगस्स	३	१७	६३६
एगे	१	४९	४५३
एत्तं	२	२४	६१८
एत्तियं	२	२१	६१७
एत्तो	३	१०	६३४
एत्थ	२	२१	६१७
	३	२२	६३७
एयंत	३	२,१६	६३५
	३	५९	७२६
एयंतपक्खवाओ	३	१६	६३६
एयंतविसेसियं	३	२	६२८
एयंतासब्भूयं	३	५९	७२६
एयं	१	१२	४१०
	२	१,१५	४५७,६१०
	३	३,१५,१६, २१,२२ ४८	६२८,६३६ ६३७,६५६
एव	१	१०,२४,३५	४०९,४२१ ४४१
	२	१२,२३	६०९,६१८
	३	७	६३१
एवं	१	४१,४९	४४८,४५३
	२	१०,२३,२४ ३१,३२,४१	६०८,६१८ ६२१,६२४
	३	२३,२५,२७ ३०	६३८,६३९ ६४०
एस	१	६	३७९
	२	३६	६२३
	३	३४	६४२
एसो	२	१	४५७

ओ

ओग्गहमेत्तं	२	२१,२३	६१७,६१८
ओघ	१	२०	
ओहि	२	१६	६१५
ओहिण्णाणस्स	२	२९	६२०
ओहिण्णाणे	२	२९	६२०
ओहिमणपज्जवाण	२	१६	६१५

क

कओ	३	२५	६३८
कडो	३	४४	६५१
कत्तो	२	२७	६१९
कप्पं	२	४३	६२५
कप्पा	३	६	६३०
कम्मं	१	१९,५१	४१८,४५५
कयं	३	५४	७१८
करण	१	४९	
करणं	३	१२	
करणविसेसेण	१	४९	४५३
करेइ	१	५२	४५५
	३	५५	७१८
कसायवसा	१	१९	४१८
कस्स	२	९	६०८
कह	२	१३,३७	६०९,६२३
	३	२२	६३७
कहा	३	२५	६३८
कहामुहं	३	२५	६३८
काय	३	४२	६५०
कायमणवयणकिरियारू-वाइगईविसेसओ	३	४२	६५०
कारओ	३	७	६३१
कारण	३	५३	७१०
कारणं	१	१९	
कारणेगंता	३	५३	७१०
काल	१	३२	
कालंतरं	३	३६	६४४
कालं	३	३७,६०	७४५,७२७
कालम्मि	१	३३	
कालयं	३	१९	
काला	३	३५	६४३
कालो	३	३६,५३	७११,७१७
काविलं	३	४८	६५६
किं	२	१३	६०९
	३	९	६३४
किरिआ	३	६८	
किरिआमित्तं	३	६८	
किरिआरहिअं	३	६८	
किरिया	१	४९	४५३,६५०
	३	४२	६५०
कुणइ	१	४३,५२	४४९,४५५
	२	१८	६१६
कुंभ	३	५४	७१८
कुंभदवियं	३	३१	६४०
कुंभो	३	३१	६४०
कुल	१	४५	४५०
कुसमय	१	१	६५

शब्द	काण्ड	गाथा	व्या. पृ.
कुसमयविसासणं	१	१	६५,६६,६७ ६८,६९,७७
केइ	२	३४,३६	६२२,६२३
	३	८,२९	६३३,६४०
केई	२	४	६०५
केचि	३	३८	६४६
केण	३	५८	७२६
केवलणाण	२	५	
केवलणाणदंसणा	२	२०	६१७
केवलणाणं	२	३,१४,३४	५९६,६२२
		३७	६२३
केवलणाणम्मि	२	८	६४७
केवलणाणावरणक्खय	२	५	६०६
केवलणाणावरणक्खयजायं	२	५	६०६
केवलभावं	२	३६	६२३
केवलं	२	५,७,१७,३६	६०७,६१६
		३७	६२३
केवलाण	२	२०,२१	६१७
केवलि	२	३५१	६२२
केवलिणो	३	२३	६३८
केवलिपज्जाओ	२	४१	६२४
केवली	२	१२,३०	६०९,६२०
केवले	२	८	६०७
कोई	१	९,११	४०८,४५५
	२	४०	६२४
कोवं	३	७	६३१
क्खए	२	९	
क्खय	२	५	

ख

खित्तं	३	६	७२७
खीणावरणिजे	२	६,११	६०७,६०९
खीणावरणे	२	५	६०७

ग

गइं	३	६,२९	६३०
गइपरिगयं	३	२९	६४०
गई	३	२९,४२,६४	६४०,६५० ७४६
गईयं	३	२९	६४०
गओ	१	३०	
गण	३	६६	
गंध	३	८	
गमविसेसा	३	६	६३०
गमेहिं	३	५	
गयं	३	१८,६१	६३६
गहेणं	३	६४	७४६
गुण	१	२४,४३, ४४,४६	४४९
	३	६,८,९	६३३,६३४
		१०,१२,१३	६३५,६३८
		१६,१९,२३ ३०	६४०
गुणट्ठिय	३	१०	६३४
गुणट्ठियओ	३	१०	६३४
गुणणिव्वत्तियसण्णा	३	३०	६४०
गुणपणिहाणं	१	४३	४४९
गुणलक्खणं	३	२३	६३८
गुणविसेसभागपडिबद्धा	१	२४	४२१
गुणविसेसे	३	१०	६३४
गुणविसेसो	३	१३	६३५
गुणसण्णा	३	९	६३४
गुणसद्दं	३	१४	६३५
गुणसद्दे	३	९,१५	६३४,६३६
गुणा	१	२२	४२१
	३	२४	६३८
गुणो	१	४३	
गोयम	३	११	६३५
गोयमाईणं	३	११	६३५
ग्गहण	२	१	४५७
	३	८	६३१
ग्गहणाहि	२	१४	६०९

घ

घडादओ	२	२४	६१९
घडो	२	२१	६१७
	३	५२	७१०
घेप्पइ	२	२४	६१८

च

च	१	२४,२७,३८ ३९,५१	४४७,४५५
	२	७,१२,१३, ३०,३१,३३, ४३	६०९,६२०, ६२२
	३	१,२,३,११ ३४,३५,५९ ६०,६८	६२७,६२९ ६३५,७२६ ७२७
चउणाणि	२	१५	६१०
चउव्विभागो	२	१७	६१६

शब्द	काण्ड	गाथा	व्या. पृ.
चक्खु	२	२०	६१७
चक्खुअचक्खुअवहिके-वलाण	२	२०	६१७
चक्खुम्मि	२	२४	६१८
चरणकरण	३	६७	७५५
चरणकरणप्पहाणा	३	६७	७५५
चरणकरणस्स	३	६७	७५५
चरिएण	१	४३	
चेव	१	२४,२७,५२	४२८,४५५
	२	७,२१	६१७
	३	९,१५,२५,२६	६३४,६३६
		२९,३२,३६	६३८,६४०
		४६,४७	६४४,६५५
चेवा(व)	३	५३	
च्चिय	१	३०	
		छ	
छ	३	५४,५५	७१८
छउमत्थे	२	२७	६१९
छक्काए	३	२८	६३९
		ज	
जइ	२	१०,२३,	६०८,६१८,
	३	२०,२४,४०,	६३७,६३८,
		५८,	६४९,७२६,
जइयव्वं	३	६५	७४६
जइया	२	४	६०५
जं	२	१,२५,२८,	६१९,६२०
		२९,३०,४२,	६२४
	३	३,६,११,१९,	६२८,६२९,
		३०,४८,४९,	६३०,६३५,
		५१,५२,	६४०,६५६,
			७०४,७१०,
जंपन्ति	३	१३	६३५
जण	१	२,३२,	१७३,६४१
जणिओ	३	३२	६४१
जणियम्मि	३	३४	६४३
जम्म	३	२३,६८,	६३८
जम्ममरणदुक्खं	३	६८	
जम्माई	१	३२	४३१
जम्हा	१	१७,३७	४४६
	२	१७,२६,४१,	६१६,६१९,
			६२४,
	३	८,१२	६३३,६३५
जस्स	१	३८,३९,४०,	४४६,४४७,

शब्द	काण्ड	गाथा	व्या. पृ.
जह	१	२,१५,२२,	१७३,४१६,
		२४,४२,४३,	४२१,४४९,
		४५,४७,	४५०,४५२
	२	६,१५,२१,	६०७,६१०,
		४०,	६१७,६२४,
	३	१५,१८,२७,	६३६,६३८,
		५८,६६,	७२६,
जहंति	१	२४	४२१,
	२	५	६०६
जहा	३	४,३०,६१	६३७,६४०,
			७३२
जहागमविभत्तपडिवत्ती	३	६१	७३२
जहाणुरूव	१	२५	
जहाणुरूवविणिउत्तव-त्तव्वा	१	२५	४२१
जहिं	१	२७	४२३
जहेव	२	१४,१५	६१०
जाइ	१	४५	४५०
	३	१६	
जाइकुलरूवलक्खणसण्णा-संबंधओ	१	४५,	४५०
जाओ	२	४०	६२४
	३	३९	६४८
जाणइ	२	४,१०,१३,	६०५,६०८,
		३०	६०९,६२०
जाणओ	१	५४	४५६
	२	१८	६१३
	३	६३	
जाणणा	३	४२	३५०
जाय	२	४०	
जायं	१	५४	
	२	५	६०६
	३	३८	
जायसद्धो	२	४०	६२४
जाव	१	८	४०८
जावइया	३	४७	६५५
जावंत	१	४७	४५२
जिण	३	२६,६९	६३८
जिणपण्णत्ते	२	३२	६२१
जिणवयणस्से	३	६९	
जिणाणं	१	१	८,५,२६,
			२९,४३,
			६८,६९

शब्द	काण्ड	गाथा	व्या. पृ.
	२	१७	६१६
जिणे	२	६	६०७
जिणो	२	४	६०५
जिणोवएसम्मि	३	२६	६३८
जिव्वंतो	३	५८	७२६
जीव	१	४८	
	२	४१,४२,४३	६२४
	३	३१	६४०
जीवदवियं	३	३१	६४०
जीवदवियम्मि	१	४८	४५३
जीवद्व्वं	२	४१	६२४
जीवपज्जाया	२	४३	६२५
जीवस्स	१	४६	४५०
	३	७	६३१
जीविय	२	४२	६२४
जीवो	२	३७,४२	६२३,६२४
	३	३१	६४०
जुज्जइ	१	४४	४५०
	२	५,१०,११,	६०६,६०८,
		१५,१७	६०९,६१०,
			६१६
	३	२१,२३,४०,	६३७,६३८,
		५२	६४९
जुज्जए	१	१८	४१७
जुज्जंतो	३	१०	६३४
जुत्तं	२	२४,२६	६१८,६१९
जुत्तो	२	३२	६२१
	३	३६	६४४
जे	१	३१,४८,५३	४५३,४५५
	२	३५	६२२
	३	५०	७०४
जेण	१	१४	४१६
	२	१९	६१७
जो	१	२७,३३,३५,	४२३,४४०
		५२	४४१,४५५
	३	१६,३६,४५	६३६,६४४
			६५१
जोग	१	१९	
जोगनिमित्तं	१	१९	४१८
जोगसिद्धी	१	४९	
जोया	१	३२	
जोव्वण	१	४३	
जोव्वणत्थो	१	४४	४५०

शब्द	काण्ड	गाथा	व्या. पृ.
		ट	
ट्ठिइ	१	१२,१९	४१८
ट्ठिई	१	१९	४१८
		ठ	
ठवणा	१	६	३७९,३८७
ठाणं	१	१	१३३,१५०,
			१६६
ठाणाइं	३	५४,५५	७१८
ठिई	३	२३	६३८
ठिईउ	३	४१	६४९
ठिई जम्मविगमा	३	२३	६३८
		ड	
डहरओ	३	१९	६३७
		ण	
ण	१	९,१४,१७	४०८,४१६
		१८,२३,२५	४१७,४२१
		२७,२८,३५	४२८,४२९
		४२,४४,५०	४४१,४४९
		५१	४५०,४५३
			४५५
	२	४,६,१०,११	६०५,६०७
		१५,१७,२४	६०८,६०९
		२६,२७,२८	६१०,६१६
		३४,३५,४२	६१८,६१९
			६२२,६२४
	३	५,१०,१७	६३०,६३६
		१९,२१,२२	६३७,६३८
		२६,३१,३६	६४०,६४४
		३८,५२,५४	६४६,७१०
		६३	७१८,७३२
णएहि	३	४९	६५६
णओ	१	३,९,१४,१६	४०८,४१६
	३	१०	६३४
णणु	३	२०,४०	६३७,६४९
णत्तु	३	१७	
णत्थि	१	१२,१६,१९	४१०,४१६
		२०,३७,३९	४१९,४४६
		४०	४४७
	२	८,९,१९,२२	६०७,६०८
			६१७
	३	२४,२५,३६	६२५,६३८,
		५४	६४४,७१८

शब्द	काण्ड	गाथा	व्या. पृ.
णय	१	८,१६,२५	
		४२	
	३	४७	६५५
णययाइ	३	२१	६३७
णययाइविसेसगओ	३	२१	६३७
णयवाय	३	६४	७४६
णयवायगहणलीणा	३	६४	७४६
णयवाया	१	२५	४२१
	३	४७	६५५
णयस्स	१	५,१०,११	
		१७,४२,५२	
णया	१	१३,१५,२१	४१९,४२१
		२३	
	३	१०	६३४
णयाण	१	१६	
	२	१	४५७
णयाणं	१	१५	
णराहिवो	२	४०	६२४
णवरं	३	१४	६३५
णाण	२	९,१६,१७	६१५,६१६
		२२,२७	६१७
		३६	
णाणणिमित्तं	२	२२	६१७
णाणदंसण	२	१७	६१६
णाणदंसणजिणाणं	२	१७	६१६
णाणं	२	१,३,५,१९	४५७,४५८
		२१,२२	थी५९५,५९६
		२३,२४,२५	६०६,६१७
		२६,३०	६१८,६१९
			६२०
णाणस्स	२	३,८	५९६,६०७
णाणाइपज्जवा	२	३६	६२३
णाणाण	२	२२	६१८
णाणे	२	२	५९६
णाम	१	९	४०८
णामं	३	६३	७३२
णायव्वा	३	३५	६३५
णिअओ	१	३०	
णिच्च	१	१८	
णिच्चं	१	२९,३४	४२९,४४०
	३	५	६३०
णिच्चवाय	१	१८	
णिच्चवायपक्खम्मि	१	१८	४१७

शब्द	काण्ड	गाथा	व्या. पृ.
णिच्चो	३	५४	७१८
णिच्छएण	१	३५	४४१
णिच्छिओ	३	६३	७३२
णिद्दिट्ठं	२	१९	६१७
णिद्दोसं	३	६३	७३२
णिमित्तं	१	५४	
	२	२२	६१७
	३	२२	६३७
णिमित्तो	२	२७	
णिमेणं	१	५	३१७
णिय	२	५	६०६
णियआवरणक्खय	२	५	६०६
णियआवरणक्खयस्संते	२	५	६०६
णियईं	३	५३	७१०
णियएहि	१	३६	४४२
णियओ	१	३७	४४६
णियत्तेइ	३	२	६२८
णियम	२	१०	२१०
णियमओ	२	४२	६२४
णियमपरित्तं	२	१४	२१०
णियमा	१	५२,	
	२	१५,१९,३०	६१०,६१७, ६२०,
	३	४१,४४,६३	६४९,६५१, ७३२,
णियमेइ	३	१	६२७
णियमेण	१	१०	४०९,
	२	३३	६२२,
	३	५,२८,२९	६३०,६३९, ६४०
णियमो	३	२७	१३९
णिययं	१	२३,२८	४२१
णिययवयणिज्ज	१	२८	४२९
णिययवयणिज्जसच्चा	१	२८	४२९
णिययवायसुविणिच्छिया	१	२३	४२१
णिययां	३	११	६३५
णिरयिसओ	३	१८	६३६
णिरवेक्खा	१	२३	
णिव्वण्णणा	२	२१	६१७
णिव्वत्तिय	३	३०	६४०
णिव्वाणं	३	५४,५५	७१८
णिव्वियप्पं	१	३३,३५	४४०
णिव्वियप्पो	१	४१	४४८

शब्द	काण्ड	गाथा	व्या. पृ.
णिव्विसेसं	३	२	६२७
णिस्सामण्णं	१	७	४०७
णिस्सिआ	१	२१	
णिस्सियं	३	३	६२९
णिहणं	२	४१	
णिहणो	२	३७	
णीअं	३	४९	६५६
णेव	१	१७	
णो	३	२३	६३८
णोइंदियं	१	५०	४५३
णोइंदियम्मि	२	२६	६१९
	त		
तइओ	१	१४	४१६,
तइगुणो	३	१४	६३५,
तइआ	२	४	६०५
तओ	२	३५	६२२,
	३	५२	७१०
तत्तो	३	७,३९,	६३१,६४७,
तत्थ	२	२४	६१८,
	३	३२,४३	६५०
तं	१	२,२७,३१,	१७३,४२८,
		३७,३८,	४४६,४४७,
		३९,४०,	४४९,४५२,
		४२,४७,	
	२	७,३०	६२०,
	३	१४,२२,२३,	६३७,६३८,
		२६,२९,५८	६४०,७२६
तम्मि	३	४	६३०
तम्हा	१	९,१३,२१	४०८,४१५,
			४१९
	२	८,१७,२८,	६०७,६१६,
		२९,३०,३८	६१९,६२०,
			६२०,६२३
	३	८,१३,३१,	६३३,६३५,
		६५	६४०,७४६
तयं	३	१	६२७
तव्वाओ	३	२६	६३८
तस्स	१	४,५,३२,४५	३४९,४३१,
			४४०,४५०,
	२	३६,४१	६२३,६२४
तह	१	१०,१५,२३,	४१६,४२१,
		२५,४६	४५०
	२	५,६,१४,	६०६,६०७,
		३९,४३	६२३,६२५
	३	१८,४६९,६६	६३६,६५७,
तहा	२	१५	६१०
	३	२९,३०,५८	६४०,७२६
तहेय	३	१५	६३६
तहेव	१	४२	४४९
	२	१५,२४	६१०,६१८
	३	४	६३०
ता	३	९	६३४
ताव	३	९	६३४
तावइयं	१	३१	४३०
	३	४७	६५५
ति	२	३,७,२३,	५९६,६०७,
		२६,३१,	६१८,६२१,
		३३,३४,३९	६२२
	३	२३,३१,	६४०,६४५,
		३७,३९	६४६
तिअणुयं	३	३९	६४६
तिकाल	३	३७	
तिकालविसयं	३	३७	६४५
तिण्णि	३	३५	६४३
तिण्हं	३	३१	६४१
तित्थयर	१	३,५३	२७१,४५५
	२	४	
तित्थयरवयणसंगहविसे-सपत्थारमूलवागरणी	१	२	२७१
तित्थयरासायणा	१	५३	४५५
	२	४	६०५
तित्थयरासायणाभीरू	२	४	६०५
तित्थिय	२	३१	६२१
तिविह	१	४९	
तिविहजोगसिद्धी	१	४९	४५३
तीय	१	३१	
तीयाणागयभूया	१	३१	४३०
तीसइ	२	४०	
तीसइवरिसो	२	४०	६२४
तु	१	५४	
	२	१९,२२,३६	६१७,६२३
		३७	
	३	१४,१६,	६४०
		१९,३०	
तुल्लं	१	३३	४४०
ते	१	१५,२४,२७,	४१६,४२१,
		२८,४८	४२३,४२९,
			४५३

शब्द	काण्ड	गाथा	व्या. पृ.
	२	२०,३१,३५	६१७,६२१, ६२२
	३	८,२०,२४, ५०,५१,५३	६३७,६३८, ७०४,७०९ ७१०
तेण	१	२६,४४	४५०
	२	२०,२२,२६	६१७,६१९
	३	११,५२	६३५,७१०
तेत्तियमित्त	२	३४	६२२
तेत्तियमित्तोत्तूणा	२	३४	६२२
तेसिं	२	१८,२७	६१६,६१९
	३	३६,५०	६४४,७०४
तेसु	१	१४	४१६
	२	१८	६१६
	३	११	६३५
तेहिं	१	४६	४५०,४५२
तो	२	१९	६१७
त्ति	१	६,७,९,२४, २६,२७,३३, ३४,४२,४७	३७९,४०७, ४०८,४२१, ४२८,४४०, ४४९,४५१
	२	४,१३,२१, ४२	६०५,६१७, ६२४
	३	४,८,१२,१४ १७,२२,३९, ४४,५२	६३३,६३५, ६३६,६३७, ६४८,६५१
त्थंतरभूया	३	२४	

थ

थोरम्मि	२	३७	६२३

द

दंसण	२	९,१७,२०, २२,२८,३२	६१६,६१८, ६१९,६२१
दंसणणाणाण	२	२२	६१७
दंसणणाणावरणक्खए	२	९	६०८
दंसणपुव्वं	२	२२	६१७
दंसणं	१	२	४१९
	२	१,३,५,६, ११,१४,१९, २१,२२,२३, २५,२६,२७, ३०,३३	४५७,५९६, ६०६,६०७, ६०९,६१७, ६१८,६१९, ६२०,६२२,
दंसणम्मि	२	८	६०७
दंसणविअप्पा	२	२०	६१७
दंसणसद्दो	२	२८,२९,३२	६१९,६२०, ६२१
दंसणस्स	२	८	६०७
दंसणा	२	१६	६१५
दंसणे	२	२,३३	५९६,६२२
दट्ठव्वं	३	१५	६३६
दट्ठव्वयं	२	७	६०७
दट्ठव्वा	३	३०	६४०
दंडे	१	४९	४५३
दरिसणं	३	४८	६५६
दरिसणस्स	२	३	५९६
दविअ	१	८	
दविअं	१	३८	४४७
दविए	१	६	३८७,४०६
दविओवओगो	१	८	४०८
दविय	१	१२	
दवियं	१	३७,३९,४०, ४२	४४६,४४७, ४४९
	३	२,२९,३१, ३७	६२८,६४०, ६४५
दवियम्मि	१	३१,४८	४३०
दवियलक्खणं	१	१२	४१५
दवियस्स	३	२३,३८,४१, ४२	६३८,६४६
दवियाहि	३	३५	६३५
दव्व	१	१२	
	३	१,८,१६,२४	
दव्वगुणजाइभेयम्मि	३	१६	६३६
दव्वजायाण	२	१९	६१७
दव्वट्ठिओ	१	३,९	२७१,२७२, २८५,४०८
	२	२	५९६
दव्वट्ठिय	१	१०,१७,२९	४०९,४२९
	३	१०,५७	६३४,७२५
दव्वट्ठियनय	१	४	३१५
दव्वट्ठियनयपयडी	१	४	३१५
दव्वट्ठियनयस्स	१	१०	४०९
दव्वट्ठियपक्खे	१	१७	४१७
दव्वट्ठियपज्जवट्ठिया	३	१०	६३४
दव्वट्ठियवत्तव्वं	१	१०,२९	४०९,४२९
	३	५७	७२५
दव्वट्ठियस्स	१	६,७,८,११, ५१,५२	३७९,३८६, ३८७,४०७, ४०८,४०९, ४५५
दव्वत्थंतरभूया	३	४८	६५६
दव्वत्थंतरभूया	३	२४	६३८
दव्वं	१	१२,३१,३६	४१०,४३०, ४४२
	३	४,६,१८, १९,३०,६०	६३०,६३६, ६४०,७२७
°दव्वंतर	३	३,३८	६४६
दव्वंतरणिस्सियं	३	३	६२९
दव्वंतरसंजोगाहि	३	३८	६४६
दव्वपरिणामं	३	१	६२७
दव्वविउत्ता	१	१२	४१०
दव्वस्स	३	२,२३	६२७,६३८
दव्वाइं	३	२७	
दव्वाणुगया	३	८	६३३
दव्वे	३	३९	६४६
दसगुणम्मि	३	१५	६३६
दसगुणो	३	१३	
दसत्तणं	३	१५	६३६
दससु	३	१५	६३६
दहणादओ	३	३०	६४०
दाइंतो	३	५८	७२६
दाइयं	२	३४,३६	६२२,६२३
दाएइ	३	१	६२७
दाएही	१	५४	४५६
°दिट्ठ	१	२८,४५	४२९,४५०
दिट्ठसमओ	१	२८	४२९
दिट्ठी	१	१३,२१	
दुअणुएहिं	३	३९	६४६
दुए	२	९	६०८
°दुक्ख	१	१८,४६	४१७
	३	५१	७१०
°दुक्खंत	३	४४	६५१
दुक्खंतकडो	३	४४	६५१
दुक्खं	३	६८	
°दुगुंछण	१	४६	
°दुगुण	३	१९	६३७
दुगुणमहुरं	३	१९	६३७
दुण्णया	१	१५	४१६
दुण्णिगिण्णो	३	४६	६५५
°दुद्ध	१	४७	
दुद्धपाणियाणं	१	४७	४५२
दुरभिगम्मा	३	६४	७४६
दुवियप्पो	३	३२,३४	६४१,६४२
दुविहो	३	४३	६५०
दुवे	१	१४	४१६
दुवेण्हं	१	१३	४१५
दूरे	३	९	६३४
°देवाउय	२	४२	६२४
देवाउयजीवियविसिट्ठो	२	४२	६२४
°देस	३	६०	७२७
देसणा	३	१२	६३५
देसो	१	३७,३८,३९ ४०	४४६,४४७
देहे	१	४८	४५३
°दो	१	१३	४१५
	२	३१	६२१
	३	१०,३१,५१ ६८	६३४,६४० ७१०
दोण्णवि	३	५६	७२५
दोण्णि	३	४६	६५५
दोण्ह	२	१	४५७
°दोस	१	४६	
	२	४३	
दोसे	३	५०	७०४
दोहि	१	३६	४४२
	३	४९	६५६
°द्दव्वं	२	४१	

ध

°धम्म	३	४३	६५०
धम्मावाओ	३	४३	६५०
धम्मी	३	५५	७१८
धम्मो	३	१४	
धीरहत्था	३	६५	७४६

न

न	१	२२,३३	४२१,४४०
	२	१२	६०९
	३	२८,५१,६४ ६७	६३९,७१० ७४६
नत्थि	१	९	४०८
	२	६	६०७
	३	५,५२	६३०,७१०
°नय	१	४	
°नयपह	३	६१	
नयवाओ	३	४६	६५५
नयस्स	१	१०	

शब्द	काण्ड	गाथा	व्या. पृ.
नया	१	२८	४२९
नाणं	३	६८	
नामं	१	६	४०६
निक्खेवो	१	६	३७९,३८६
			३९७
निच्छओ	१	४	
°निच्छय	१	२६	
	३	६७	
निच्छयवयणपडिवत्ति-मग्गो	१	२६	
निच्छयसुद्धं	३	६७	
निच्छिओ	१	३५	४४१
निप्फण्णं	२	२३	
निमित्तं	१	१९	
नियत्तेइ	३	५८	७२६
°नियम	१	९	४०८
नियमेण	१	११,२७	४०९,४२९
	२	२४	६१८
नियया	३	१०	६३४
निरवेक्खा	३	४९	
निव्वयणो	१	८	
निहणो	२	४२	

प

°पओग	३	३२	६४१
पओगजणिओ	३	३२	६४१
°पक्ख	१	२३	
	२	३९	
पक्खम्मि	१	१८	
	३	४५	
°पक्खवाओ	३	१६	६३६
°पक्खा	२	१८	६१६
°पक्खे	१	१७	
	३	१,४६	६५५
पच्चओ	३	३३	६४१
पच्चक्खग्गहणं	२	२८	६१९
पच्चक्खा	२	२९	६२०
पच्चुप्पण्णम्मि	३	६	६३०
पच्चुपन्नं	३	३	६२८
पजएहि	३	४	६३०
°पजन्तो	१	३२	
पजयम्मि	३	६	६३०
°पजया	१	३१	
°पजव	१	७,१२,२९,	४०७,४२९
		३२,४२	

शब्द	काण्ड	गाथा	व्या. पृ.
	३	११,१४,४८	
पजवजोया	१	३२	४३१,४४०
पजवट्ठिअस्स	१	६	३७९
पजवट्ठिओ	१	९	४०८
	२	२	५९५
°पज्जवट्ठिया	३	१०	६३४
पजवणओ	१	३	२७१,२८५,
			३१०
°पज्जवणय	१	८	४०८
	३	१२	६३५
पजवणयदेसणा	३	१२	६३५
पज्जवणयमेत्तपडिपुण्णा	१	४२	४४९
पज्जवणयवोक्कंतं	१	८	४०८
पज्जवणयस्स	१	५,१०,११	३१७,३४९
		१७,४२,५२	४०९,४१७
			४४९,४५५
पजवणिस्सामण्णं	१	७	४०७
पजवभयणा	१	७	४०७
पजववत्तव्वमग्गो	१	२९	४२९
पजववत्थु	१	१०	४०९
पजवविअप्पो	३	४८	६५६
पज्जवविउयं	१	१२	४१०
पजवविसेससंखाणं	३	१४	६३५
पजवसण्णा	३	११	६३५
पजवस्स	३	५७	७२५
°पजवा	१	१२,४८	४१०,४५३
	२	३६	
पजवाहिं	३	२	६२८
पजवाहिओ	३	९	६३४
°पजवे	१	३७	
	३	२,९	६२७,६३४
°पजवेहिं	३	५	
°पजा	३	६०	७२७
°पजाए	१	४१	
	३	५	६३०
°पजाओ	१	३४	
	२	३६	६२३
	३	१२	६३५
°पजाय	३	६०	७२७
°पजायस्स	१	३४	४४०
°पजाया	१	४७	
	२	३५,४३	६२२

शब्द	काण्ड	गाथा	व्या. पृ.
	३	११	६३५
°पज्जुवासण	१	२	१७३
पंचणाणी	२	१५	६१०
पडइ	१	३६	
	३	६,५९	६३०,७२६
पडिकुट्ठा	३	५६	७२५
°पडिकुट्ठो	३	१६	६३६
°पडिजोअणं	२	३९	६२३
°पडिणीओ	३	६६	
°पडिपुण्ण	१	४३	
पडिपुण्णं	१	१४	४१६
पडिपुण्णजोव्वणगुणो	१	४३	४४९
°पडिपुण्णा	१	४२	४४९
°पडिबद्धा	१	२१,२४	४२१
पडिरूवे	१	४	३१६
°पडिवत्ति	१	२६	
	३	४४	
°पडिवत्ती	३	३६,४६,६१	७४६,७२२
पडिवत्तीविगमे	३	३६	६४४
पडिसिद्धं	३	३०	६४०
°पडिसेहे	२	३९	
पडुच्च	१	५०,५४	४५३,४५६,
	२	२,३५,	५९६,६२३,
	३	३,५०,	७२७
पडुच्चवयणं	३	३	६२८,६२९,
°पणिहाणं	१	४३	४४९
पण्णत्तं	२	१४	
°पण्णवओ	१	१६	
	३	४५	६५१
°पण्णवण	३	६०	७२७
पण्णवणपज्जा	३	६०	७२७
°पण्णवणा	१	२६,५३,	४५५
	३	६३	७३२
पण्णवणाणिच्छिओ	३	६३	७३२
पण्णवणाविसउ	१	२६	
पण्णवणिज्जा	१	४८	४५३
	२	१६	६१५
पण्णवणे	१	१५	
पण्णवयंतो	३	३७	६४५
पण्णवेज्ज	१	५४	४५६
पत्तेय	१	१६	
पत्तेयं	१	१३,१५	४१५,४१६
°पत्थणा	१	२०,४६	

शब्द	काण्ड	गाथा	व्या. पृ.
°पत्थार	१	३	२७१
°पन्नवणा	१	४२	४४९
°पयडी	१	४	३१५
°पयुत्तो	२	३९	६२३
°पर	२	१८,३१,	६१६,६२१,
	३	५,२२,३३,४७,	६३७,६४१,
			६५५
परणिमित्तं	३	२२	६३७
परतित्थियवत्तव्वं	२	३१	६२१
परपच्चओ	३	३३	६४१
परपज्जवेहिं	३	५	६३०
°परमत्थ	१	२	
परमत्थो	१	६	३७९
परमाणु	३	२४	६३८
परम्मि	३	७	६३१
परवत्तव्वयपक्खा-अविसिट्ठा	२	१८	६१६
परवियालणे	१	२८	४२९
°परसमय	३	६७	
परसमया	३	४७	६५५
°परिकम्मणा	१	५४	
परिकम्मणाणि-मित्तं	१	५४	४५६
परिगमणं	३	१२	६३५
°परिगयं	३	२९	
°परिच्छय	१	२६	
°परिच्छयाणं	३	५९	७२६
°परिणयं	३	४,२२	६३०,६३७
°परिणाम	१	२७	
°परिणामं	३	१	६२७
परिणामकओ	१	२७	४२२,४२३
°परिणामो	३	१३,२१	
°परित्तं	२	१४	२१०
परिपढिया	२	२०	६१७
परिभुंजइ	१	५२	४५५
परिसुद्धं	२	११	
परिसुद्धो	३	४५,४८	६५५,६५६
°परूवणा	१	४,६	३१५,३७९
परो	३	५६,५८	७१९,७२६
पसारियस्स	३	३६	६४४
°पसाहणं	१	४४	४५०
°पसाहा	१	५	
°पहे	३	१५९	

शब्द	काण्ड	गाथा	व्या. पृ.
°पहो	१	४१	
°पाडिक्क	१	२४	
पाडिक्कं	१	१३	४१५
	३	५१	७१०
पाडिक्कसण्णाउ	१	२४	४२१
°पाडेक्क	३	६१	
पाडेक्कं	२	१	४५७
पाडेक्कनयपहगयं	३	६१	७३१
°पाणियाणं	१	४७	
पारिच्छं	३	९	६३४
पावेज्जा	१	३३	४४०
पावेंति	१	२३	४२१
पासइ	१	३४	४४०
	२	४,१३,३०,	६०५,६०९ ६२०
पासंतो	२	१३	६०९
पि	१	१३,५४	४५६
	२	५,१४,१५	६०६,६१०
	३	५,१५,२९	६३०,६३६, ६४०
पिउ	३	१७०	
पिउपुत्तणत्तुभव्वय- भाउणं	३	१७	६३६
°पिय	३	१७	६३६
पिया	३	१७	६३६
°पुढवी	३	५२	७१०
पुढवीविसिट्ठो	३	५२	७१०
पुण	१	४,१३,२४, ३४,५०	३१६,४२१ ४४०
	२	३,३९	५९३
	३	५,११,३५, ३९,५२	६३०,६३५ ६४४
पुणो	२	३६	६२३
°पुत्त	३	१७	
पुरिल्लो	३	५८	७२६
°पुरिस	१	३२,३३,५४,	
	२	४२	६२४
	३	१७,५३,	६३६,७१० ७१५
पुरिसं	१	३३,३५	४४०,४४१
पुरिसकालम्मि	१	३३	४४०
पुरिसज्जायं	१	५४	४५६
°पुरिसभाव	३	१८	६३६
पुरिसभावणिरइसओ	३	१८	६३६

शब्द	काण्ड	गाथा	व्या. पृ.
पुरिसम्मि	१	३२	४३१
पुरिससद्दो	१	३२	४३१,४४०
पुरिसस्स	२	३२	६२१
पुरिसाउयजीवो	२	४२	६२४
पुरिसो	१	३४	४४०
	३	७,१८,१९,	६३१,६३६ ६३७
°पुव्व	२	३९	६२३
	३	१६	६३५
पुव्वअरं	२	९	६०८
पुव्वं	३	५२	७१०
पुव्वकयं	३	५३	७१०,७१४
पुव्वपडिकुट्ठो	३	१६	६३६
पुव्वपयुत्तो	२	३९	६२३
पूरेंति	३	५१	७१०
°प्पहाणत्तणेण	३	४९	
°प्पहाणा	३	६७	

फ

फलं	१	५१	४५५
°फासा	३	८	

ब

बज्झइ	१	१९	४१८
°बंध	१	१९,४६	४१८
बंधइ	१	५१	४५५
बंधट्ठिइकारणं	१	१९	४१८
बन्धट्ठिई	१	१९	४१८
बन्धं	१	२०	४१९
बन्धमोक्खसुहदुक्ख- पत्थणा	१	४६	४५०,४५१
बंधम्मि	१	२०	४१९
°बहु	१	३२	
°बहुयाण	३	४०	६४९
बहुया	३	४१	६४९
बहुवियप्पा	१	३२	४३१,४४०
बहुस्सुओ	३	६६	
°बालभाव	१	४३	
बालभावचरिएण	१	४३	४४९
°बालाइ	१	३३,३४	
°बालाइभाव	१	४५	४५०
बालाइभावदिट्ठविगयस्स	१	४५	४५०
बालाइवियप्पं	१	३३,३४	४४०
बालाईया	१	३२	४३१,४४०
बालो	१	४४	४५०

शब्द	काण्ड	गाथा	व्या. पृ.
°बाहिरओ	१	५	४५३
बिंति	१	१६	
बीयस्स	१	५१	४५५
बेंति	३	३८	६४६

भ

°भअ	१	२०	
भइयव्वा	३	२७	६३८
भइयव्वो	१	३०	४३०
	३	७	६३१
°भओघ	१	२०	४१९
भगवओ	३	६९	
भगवया	३	१०	६३४
°भंगा	१	१२	
भणइ	१	३३	४४०
भण्णइ	१	२४	४२१
	२	६,१५,२६	६०७,६१०, ६१९
	३	१२,१३,२०, २२	६३५,६३७
भणंति	२	४	६०५
	३	५०	७०४
भणेज्ज	१	३५	४४१
भत्तीमेत्तएण	३	६३	७३२
भद्दं	३	६९	
भयइ	३	२७	६३८
भयणा	१	७	४०१
	३	४,६,२७,५१	६३०,६३८, ७०९
भयणागइं	३	६	६३०
भयणाय	१	९	४०८
भयणिज्जं	२	३३	६२२
भयणोवणीया	३	५१	७०९
°भव	१	१	६९
	३	५१	७१०
भवजिणाणं	१	१	६९,१०२
°भवत्थ	२	३५	६२२
भवत्थकेवलिविसेस- पज्जाया	२	३५	६२२
भवत्थम्मि	१	४८	४५३
भवदुक्खविमोक्खं	३	५१	७१०
भविओ	३	४४	६५१
°भविय	३	४३	
भवियाभवियादओ	३	४३	६५०

शब्द	काण्ड	गाथा	व्या. पृ.
°भविस्सेहिं	३	३,४	
°भव्वय	३	१७	
भाइ	३	६८	
°भाऊणं	३	१७	
°भाग	१	२४	
°भाव	१	४५	
भावओ	२	३२	६२१
	३	२८	६३९,
°भावगमणं	३	१३४	
भावं	३	३,६०	६२८,७२७
भावमेत्तं	१	५१	४५५
भावा	१	११	४०९
	२	१६,२९	६१५,६२०
	३	४३	६५०
भावाणं	३	६०	७२७
भावे	२	३०,३२	६२०,६२१
भावो	१	५०	३७९,४०६, ४५३
भासइ	२	१२	६०९
°भिण्ण	३	३५	
भिण्णकाला	३	३५	६३५
°भीरूहि	२	७	
°भूएहि	१	३५	
°भूया	१	३१	
भेयं	३	६०	७२७
°भेयओ	३	४२	
°भेयम्मि	३	१६	
°भेया	१	५	

म

°मइ	२	२७	
मइणाणं	२	६,२३	६०७,६१८
मइसुयणाणणिमित्तो	२	२७	६१९
°मई	३	२५	
°मग्गो	१	२६,२९	४२९
°मण	३	४२	६५०
°मणपज्जव	२	१९	६१७
मणपज्जवणाणं	२	३,१९,२६	५९६,६१७ ६१९
मणपज्जवणाणंतो	२	३	५९६
°मणपज्जवाण	२	१६	६१५
मणी	१	२२,२४	४२१
°मणो	२	१९	६१७
मणोविसयगयाण	२	१९	६१७

शब्द	काण्ड	गाथा	व्या. पृ.
मण्णंता	३	२६	६३८
मण्णसि	२	२३	६१८
°मरण	१	३२	
	३	६८	
मरणकालपज्जन्तो	१	३२	४३१
°मलार	१	२	१७३
°महग्घ	१	२२	
महग्घमुल्ला	१	२२	४२१
महल्लो	३	१९	६३७
महाणं	३	६५	७४६
°महुरं	३	१९	६३७
मा	३	६८	
°मिच्छ	१	१३	
मिच्छत्तं	१	२७	४२९
	३	४९,५३	६५७,७१०
मिच्छदिट्ठी	१	१३	४१५
°मिच्छा	१	२१	
मिच्छादिट्ठी	१	२१	४१९
°मिच्छद्दंसण	३	६९१	
मिच्छद्दंसणसमूहमइअस्स	३	६९	
मिच्छत्तस्स	३	५४,५५	७१८
°मुक्कवावारा	३	६७	
मुत्ता	३	२४	६३८
°मुल्ला	१	२२	
°मुहं	३	२५	
°मूल	१	३,५,१३ १५,१६	३१७
मूलणया	१	१३	४१५
मूलणयाण	१	१६	४१६
मूलणयाणं	१	१५	४१६
मूलणिमेणं	१	५	३१७
°मूलवागरणी	१	३	२७१,२७२
°मेत्तं	१	४२	
°मेत्तत्थो	३	२५	
°मोक्ख	१	२०,४६	
	३	५५	
मोक्खपुहपत्थणा	१	२०	४१९
मोक्खो	१	२०	४१९
मोक्खोवाओ	३	५४,५५	७१८
मोज्झं	१	२०	४१९
मोत्तूण	२	२५	६१८
मोहा	१	२८	४२९
	२	४३	

शब्द	काण्ड	गाथा	व्या. पृ.
य			
य	१	३,९,११, १२,१४,१७, १८,१९,२०, २५,२९,३०, ३५,३७,३८, ३९,४०,४१, ४२,४३,४४, ४९,५०,५१	४०८,४१०, ४१६,४१७, ४१८,४१९, ४२९,४३०, ४४६,४४९, ४५०,४५५
	२	३,८,११, १४,२४,२५, २६,३०,३६, ४२,४३	५९५,६०९ २१०,६१८, ६१९,६२०, ६२५
	३	१,१०,१५, १७,२३,२४, २६,२९,३२, ३५,३९,४२, ४३,४५,५०, ५४,५५,५७	६२७,६३४, ६३६,६३८, ६४३,६५१, ७१८,७२५
याणंति	३	२५,२७	६३८
याणाइ	२	१०	६०८
र			
°रयणावलि	१	२२,२४	४२१
रयणावलिववएसं	१	२२	४२१
°रस	३	८	
°रहिअं	३	६८	
°राग	२	४३	
°रागदोसमोहा	२	४३	६२५
रायसरिसो	२	४१	६२४
°रूआइ	१	४८	४५३
रूआइपज्जवा	१	४८	४५३
°रूव	१	४५	४५०
	३	८	
रूवरसगंधफासा	३	८	५३३
°रूवाइ	३	१८,२१,४२	६३६,६३७, ६५०
रूवाइविसेसणं	३	१८	६३६
रूवाइविसेसणपरिणामो	३	२१	६३७
रूवाई	३	१३	६३५
ल			
°लक्खण	१	२२,४५	४२१,४५०
°लक्खणं	१	१२	
	३	२३,४४	६३८,६५१

शब्द	काण्ड	गाथा	व्या. पृ.
°लक्खणविसेसओ	२	३६	६२३
°लक्खणा	३	८	
लज्जइ	१	४३,४४	४४९,४५०
लहइ	१	३३	४४०
	३	१८	६३६
लहंति	१	२२,२५	४२१
लिंगओ	२	२५	६१८
°लीण	३	६४	७४६
लोइय	१	२६	
	३	५९	७२६
लोइयपरिच्छयसुहो	१	२६	४२२
लोइयपरिच्छियाणं	३	५९	७२६
व			
व	१	२०,२७,२८, ३३,४७	४२८,४४०, ४५२
	३	२२	६३७
°वंजण	१	३०,३४,४१	४४०
वंजणओ	३	५	६३०
वंजणणिअओ	१	४३	४३०
वंजणपज्जाए	१	४१	४४८
वंजणपज्जायस्स	१	३४	४४०
वंजणवियप्पो	१	३०	४३०
°वत्तव्व	१	२९	४२९
°वत्तव्वं	१	१०,२९	४२९
	२	३१	६२१
	३	२३,४८,५७	६५६,७२५
°वत्तव्वय	२	१८	६१६
°वत्तव्वा	१	२५	
वत्तव्वो	२	४२	६२४
वत्थुं	१	८	४०८
°वय	१	४४	
°वयण	१	३,५,७,२६, ३१,३६,४१	२७१,३१७
	३	१०,४२,४७	६२७,६५०, ६५५
°वयणं	१	७	४०७
	३	३	
वयणत्थनिच्छओ	१	४	३१६
वयणपज्जया	१	३१	४३०
वयणपहो	१	४१	४४८
वयणवहा	३	४७	६५५
वयणविणिवेसो	३	१	६२७
वयणवियप्पो	२	१२	६०९

शब्द	काण्ड	गाथा	व्या. पृ.
वयणविसेसाईयं	१	३६	
वयणविही	१	७	४०७
°वयणस्स	३	६९	
°वयणिज्ज	१	२८,५३	
	३	५९,६२	७३२
वयणिज्जपहे	३	५९	७२६
वयणिज्जं	१	८	४०८
	३	५८	७२६
वयणिज्जवियप्पा	१	५३	४५५
वयमाणो	३	२,५९	६२७,६२८, ७२६
°वरिस	२	४०	
वरिसविभागं	२	४०	६२४
°वरिसो	२	४०	
°ववएसं	१	२२	
ववएसो	३	४९	४४६
ववहारो	१	४	३१६
°वसा	१	३८,३९,४०	
	३	२०,२१	६३७
°वहा	३	४७	६५५
वा	१	२८,३१,३५	४३०,४४१
	२	१३	६०९
	३	४,१९,५६	६३०,६३७, ७१९
°वाइआ	१	१७	
वाएउं	३	६८	
°वाओ	३	४३	६५०
°वागरणी	१	३	
वागरिया	३	११	६३५
वादी	३	५९	७२६
°वाय	१	१६,१८,२३	४२१
°वायस्स	३	४४	
°वाया	१	२५	
	३	४७	६५५
°वायी	१	१७	
°वायो	३	३२	
वावडा	१	१५	४१६
वावि	३	४२	
वि	१	१३,१५,१६ २१,२२,२३	४१५,४१६ ४१९
	३	३१,४४,४९	४२१,४५० ४५३

शब्द	काण्ड	गाथा	व्या. पृ.
	२	१,२,२१,२४	४५७,५९६
		२७,२८,२९	६१७,६१८
		३१,३९,४३	६१९,६२०
			६२१,६२३
			६२५
	३	६,१०,१५	६३०,६३४
		२६,२७,२८	६३६,६३८
		३०,३१,३३	६४०,६४१
		३४,३५,३६	६४३,६४९
		४०,४१,४६	६५५,६५६
		४९,५०,५१	७०४,७१०
		५६,६३,६८	७१९,७३२
°विअप्पा	२	२०	
°विअप्पो	३	४८	
°विउत्ता	१	१२	
°विउयं	१	१२	
विगच्छंतं	३	२७	६४५
विगमस्स	३	३४	६४३
विगमा	३	२३,४१	६३८,६४९
°विगमे	३	३६	
°विगय	३	३,४	
°विगयं	२	३५	६२२
	३	३७	६४५
विगयभविस्सेहि	३	३,४	६२८,६३०
°विगयस्स	१	४५	४५०
°विच्छेदो	१	५	३१७
विजाणओ	३	५३	७३२
विणट्ठा	३	६२	७३२
विणा	१	२०	४१९
विणासेति	३	६२	७३२
°विणिउत्त	१	२५	
विणिवेसो	३	१	६२७
°वित्थर	१	२	१७३
विधम्मेइ	३	४६	६५५
°विप्फारण	३	२५	
विभएयव्वो	३	७	६३१
विभज्जमाणा	१	१४	४१६
विभज्जवायं	३	५७	७२५
°विभत्त	३	६१	७३२
विभत्ते	१	४४	४५०
विभत्तो	३	३९	६४८
विभयइ	१	२८	४२९
विभयणं	१	४७	४५२

शब्द	काण्ड	गाथा	व्या. पृ.
विभयणा	३	४	६३०
°विभाग	३	३८	६४६
°विभागं	२	४०	
विभागजायं	३	३८	६४६
°विभागमेत्तं	३	३४	६४३
विभागम्मि	३	४०	६४९
विभागो	१	२९	४२९
°विमोक्खं	३	५१	७१०
वियंजणं	२	१८	६१६
°वियत्ति	१	१७	४१७
वियंति	१	११	४०९
°वियप्प	१	८,३८,३९, ४०	
°वियप्पं	१	३३,३४	
वियप्पणं	१	१८	४१७
वियप्पवसा	१	३८,३९,४०	४४७
°वियप्पा	१	३,३२,५३	२७२,४५५
°वियप्पो	१	३०,४१	
वियाणंतो	२	१३	६०९
°विराहओ	३	४५	
विलंबेन्ति	३	६५	७४६
विवरीयं	२	२	५९६
°विसउ	१	२६	
°विसओ	१	४	३१५
	२	१५,१६	६१५
विसंजुत्ता	१	२२	४२१
°विसम	३	२२	६३७
विसमपरिणयं	३	२२	६३७
°विसयं	३	३७	
°विसयगयाण	२	१९	६१७
°विसासणं	१	१	
°विसिट्ठो	२	४२	६२४
	३	१८,५२	६३६,७१०
°विसेस	१	३,२४,२५, ४७	
	३	१०,१४,२१	
°विसेसओ	२	६	६०७
	३	४२	६५०
विसेसं	१	५४	४५६
	२	३४	६२२
°विसेसगओ	३	२१	६३७
विसेसणं	२	२१	६१७
	३	१८	६३६

शब्द	काण्ड	गाथा	व्या. पृ.
°विसेसणं	३	२०,२१	
विसेसपक्खे	३	१	६२७
विसेसपज्जाया	१	४७	४५२
°विसेसपरिणामो	३	२१	६३७
विसेससण्णाओ	१	२५	४२१
°विसेसा	३	६	
°विसेसाईयं	१	३६	
विसेसिअं	२	२३	६१८
°विसेसियं	१	१६,३७	
	२	१	४५७,४५८, ५९५
	३	२	
°विसेसिया	३	३१	६४०
°विसेसे	२	३७	६२३
	३	१०,२०	६३४,६३७
विसेसेइ	२	४०	६२४
	३	३७	६४५
विसेसेण	१	४९	
विसेसेंति	३	५७	७२५
°विसेसो	१	९,५०	४०८
	२	३	५९६
	३	१,१३,५७	६२७,७२५
विहम्मओ	३	५६	७१९
°विहाड	१	२०	१७३
°विही	१	७	
	३	३४	६४३
वीसत्थं	१	२६	
वीससा	३	३२	
वुत्तं	२	७	
वेएइ	१	५१	४५५
	३	५४	७१८
वेयए	१	५२	४५५
वेरुलियाई	१	२२	४२१
°वोक्कंतं	१	८	४०८
वोच्छं	२	३९	६२३
व्व	१	२७	४२२
	३	३३,५६	६४१,७१९
स			
स	१	३५,४२	४४१,४४९
सइ	२	२३	६१८
	३	२३	६३८
संखा	३	५०	७०४
°संखाण	३	१४	
संखाणं	३	१४,५०	७०४
संखाणसत्थधम्मो	३	१४	६३५
संखेज्जं	२	४३	६२५
°संगह	१	३,४	३१५
संगहओ	१	१३	४१५
संगहपरूवणाविसओ	१	४	३१५
°संगहविसेस	१	३	२७१
संघयणाईआ	२	३५	६२२
संजुज्जंतेसु	१	५३	४५५
°संजोगाहि	३	३८,४०	६४६,६४९
°संजोगे	३	६	७२७
°संजोय	३	४२	
संजोयभेयओ	३	४२	६५०
संतम्मि	२	८	६०७
°संतवाय	३	५०	७०४
संतवायदोसे	३	५०	७०४
°संतुट्ठा	३	६१	७३२
संपओगो	१	१८	४१७
°संपन्नो	३	४४	
°संपरिवुडो	३	६६	
°संपायणम्मि	३	६५	
°संबंध	३	१८,२०,२१	६३६,६३७
°संबंधओ	१	४५	४५०
	३	१९	६३७
संबंधवसा	३	२०	६३७
संबंधविसिट्ठो	३	१८	६३६
संबंधविसेसे	३	२०	६३७
°संबंधि	३	२०,२१	
संबंधित्तणं	३	२०	६३७
संबंधिविसेसणं	३	२०,२१	६३७
°संबंधो	१	४५	४५०
	३	१७	६३६
संभवइ	२	६,१२	६०७,६०९
संभवो	२	८	६०७
सम्मओ	३	६६	
सम्मण्णाणं	२	३३	६२२
सम्मण्णाणे	२	३३	६२२
°सम्मत्त	१	२१	
सम्मत्तं	१	१४	४१६
	३	५३	७१०,७१७
सम्मत्तसब्भावा	१	२१	४१९
सम्मत्तस्स	३	५५	७१८(पं. ३९)
(पाठान्तर अभयदेव)			

शब्द	काण्ड	गाथा	व्या. पृ.
°सम्मद्दंसण	१	२५	
°सम्मद्दंसणं	१	२३	
	३	५१,६२	७०९,७३२
°समद्दंसणणाणचरित्त	३	४४	
सम्मद्दंसणणाणचरित्तपडि-वत्तिसंपन्नो	३	४४	६५१
सम्मद्दंसणसद्दं	१	२३,२५	४२१
°सम्मिया	२	२८	६१९
°संविग्ग	३	६९	
संविग्गसुहाहिगम्मस्स	३	६९	
°संसार	१	२०	४१८
संसारभओघदन्सणं	१	२०	४१९
संसारो	१	१७	४१७
°सक्क	३	५०	
सक्कोल्लया	३	५०	७०४
°सच्चा	१	२८	४२९
	३	५०	७०४
सच्चे	१	२८	४२९
°सट्ठि	२	४०	
सट्ठिवरिसो	२	४०	६२४
सणिहणाइ	२	८	६०७
°सण्णा	१	४५	४५०
	३	९,११,३०	६४०
°सण्णाओ	१	२४,२५	
°सत्त	१	४१	
सत्तवियप्पो	१	४१	४४८
°सत्थ	३	१४	
सत्थं	३	४९	६५६
°सद्द	३	३६	७३२
°सद्दं	१	२३,२५	
सद्दहइ	३	२८	६३९
सद्दहंतो	३	२८	६३९
सद्दहणा	३	२८	६४०
सद्दहमाणस्स	२	३२	६२१
सद्दाइआ	१	५	३४९,३७८
°सद्दे	३	९	
°सद्दो	१	३२	
	२	३२,४०	६१८,६२१
°सपक्ख	१	२१	
°सपक्खपडिबद्धा	१	२१	४१९
सपडिवक्खो	१	७	४०७
°सब्भाव	१	४०	४४७
°सब्भावा	१	२१	४१९
सब्भावासब्भावे	१	४०	४४७
सब्भावे	१	३७,३८	४४६
सब्भूयं	३	५९	७२६
समए	१	३५	४४१
	३	६६	
°समओ	१	२८	४२९
समं	२	९	६०८
	३	१५	६३६
समणेइ	३	३	६२८
°समत्त	२	१६	६१५
	३	६२	७३२
°समत्तसुयणाण	२	१६	६१५
समत्तसुयणाणदंसणावि-सओ	२	१६	६१५
°समय	१	२,४२	४४९
	३	२७	६३९
समयं	१	३६	
°समयंतर	२	३१	६२१
समयपन्नवणा	१	४२	४४९
°समयपरमत्थ	१	२	१७३
समयपरमत्थविंथरविहा-डजणपज्जुवासणसयन्नो	१	२	१६९,१७२ १७३,२७०
समयमाईहिं	१	३६	
°समयम्मि	१	५०	
	२	१२,२०	६०९,६१७
	३	४०,४१	६३०,६४९
°समया	३	४७	६५५
समयाविरोहेण	३	२७	६३९
समये	२	३५	६२२
	३	१३	६३५
समा	३	६०	७२७
समाणं	२	३	५९६
समाणम्मि	२	९	६०८
समासओ	१	३०	४३०
	३	५३	७१०
°समुदय	३	३२,३३,३४	६४३
समुदयकओ	३	३३	६४१
समुदयजणियम्मि	३	३४	६४३
समुदयवाओ	३	३२	६४१
समुदयविभागमेत्तं	३	३४	६४३
समुल्लावो	३	२५	६३८
°समूह	१	२७	४२२
°समूहमइअस्स	३	६९	

शब्द	काण्ड	गाथा	व्या. पृ.
°समूहम्मि	१	१६	
समूहसिद्धो	१	२७	४२२,४२३
समोवणीआ	३	७	७२५
सयं	३	७	६३१
°सयञ्चो	१	२	१७३
°सयल	३	६२	७३२
सयले	२	२८	६१९
सयलं	२	१७	६१६
सयलसमत्तवयणिज्जणिद्दोसं	३	६२	७३२
सया	१	११	४०९
सयावि	२	१०,१२	६०८,६०९
सरिसेहिं	३	५	६३०
सलाहमाणा	३	६२	७३२
°सवियप्प	१	३५	
सवियप्पं	१	३५	४४१
सवियप्पणिच्चियप्पं	१	३५	४४१
सवियप्पो	१	४१	४४८
°सविसअ	३	४९	
सविसअप्पहाणत्तणेण	३	४९	७०४
सविसेसो	२	४१	६२४
°सव्व	१	१६	
	३	२७	
सव्वं	१	११,२९	४०९,४२९
	२	१०	६०८
सव्वणयसमूहम्मि	१	१६	४१६
°सव्वण्णु	२	१३	६०९
सव्वण्णू	२	१०	६०८
सव्वदव्वाइं	३	२७	६३८
सव्वनया	१	२८	४२९
सव्वे	१	१५,२१,२३ २५	४१९,४२१
	३	५०	७०४
सव्वेण	१	२९	४२९
°ससमय	१	५३	४५५
	३	४५,६७	६५१
ससमयम्मि	३	२५	६३८
ससमयओ	२	३१	६२१
ससमयपण्णवणा	१	५३	४५५
ससमयपरसमयमुक्कवावारा	३	६७	
°सहाव	३	५३	७१०,७११
सा	१	५३	४५५
साइयं	२	३७	६२३
साई	२	७,३१,३४	६०७,६२१, ६२२
°सागार	२	१४	
सागारग्गहणाहिं	२	१४	६१०
साभाविओ	३	३३	६४१
°सामण्ण	२	१	४५७
सामण्णग्गहणं	२	१	४५७,४५९, ५९५
सामण्णं	३	५७	७२५
सामण्णम्मि	३	१	६२७
°सामत्था	३	६१	७३२
सायारं	२	१०,११	६०८
सारं	३	६३,६७	
सासणं	१	१	१,८,२९,४,३ ६८,१०२, (पं० ३०)
सासणभत्तीमेत्तएण	३	६३	७३२
°सासय	१	१७	
सासयवियत्तिवायी	१	१७	४१७
°साहओ	३	४६	६५५
°साह	१	५	
साहपसाहा	१	५	३४९,३७८
साहम्मउ	३	५६	७१९
साहेज्ज	३	५६	७१९
सिं	१	३	२७२
सिज्झइ	३	१४	६३५
°सिज्झमाण	२	३५	६२२
सिज्झमाणसमये	२	३५	६२२
सिद्धं	१	१	१ (पं० ३०) ८,४३
	२	३०	६२०
	३	२०	
°सिद्धंत	३	४५,६३,६६	७३२
सिद्धंतजाणओ	३	६३	७३२
सिद्धंतपडिणीओ	३	६६	
सिद्धंतविराहओ	३	४५	६५१
सिद्धत्तणेण	२	३६	६२३
सिद्धत्थाणं	१	१	६८
°सिद्धी	१	४९	
°सिद्धो	१	२७	४२२
°सीस	३	२५,६६	
सीसगणसंपरिवुडो	३	६६	
सीसमईविप्फारणमेत्तत्थो	३	२५	६३८
°सुत्त	२	७	
सुत्तं	२	४	६०५
	३	६१,६४	७३१,७४६
सुत्तमेत्तेण	३	६४	७४६
सुत्तम्मि	२	७	६०७

शब्द	काण्ड	गाथा	व्या. पृ.
°सुत्तहर	३	६१	७३२
सुत्तहरसद्दसंतुट्ठा	३	६१	७३२
सुत्तासायणभीरूहि	२	७	६०७
सुत्तासायणा	२	७०	
सुत्ते	२	३४,३६	६२२,६२३
°सुत्तेण	३	६५	७०६
सुत्तेसु	२	१८	६१६
	३	११	६३५
°सुद्धं	३	६७	
सुद्धम्मि	१	४८	४५३
सुद्धजाइओ	१	९	४०८
सुद्धा	१	४	३१५
सुद्धोअणतणअस्स	३	४८	६५६
°सुय	२	१६,२७	२१५
°सुयणाण	२	२८	६१९
सुयणाणसम्मिया	२	२८	६१९
सुयणाणे	२	२८	६१९
°सुविणिच्छिया	१	२३	४२१
सुविणिच्छियामो	२	२२	६१८
सुवियत्तं	२	११	६०९
°सुह	१	१८,२०,४६	४१७
	३	६९	
°सुहं	१	१	
सुहदुक्खवियप्पणं	१	१८	४१७
सुहदुक्खसम्पओगो	१	१८	४१७
°सुहुम	१	५	
सुहुमभेया	१	५	३४९,३७८
सुहो	१	२६	
सुहोवहाणत्थं	१	४३	४४९
से	१	३४	४४०
सेसयाणं	३	१७	६३६
सेसा	१	३	२७३
(संग्रह-नैगमौ)			३१०
(व्यवहारः)			३१०,३११
(ऋजुसूत्रं)			३११,३१२
(शब्दनयः)			३१२
(समभिरूढं)			३१३
(एवंभूतं)			३१४
सेसिंदियदंसणम्मि	२	२४	६१८
सो	१	३०,३३,५२	४३०,४४०
		५४	४५५,४५६
	३	१८,३४,३६	६३६,६४३
		४५,४६	६४४,६५१
			६५५
°स्संते	२	५	६०६

शब्द	काण्ड	गाथा	व्या. पृ.
ह			
हंदि	१	१२,१५	४१०,४१६
	२	९	६०८
	३	६५	७४६
हंदी	२	१२	
	३	२८	
हवइ	१	३१	४३०
	२	२१,३१,३२	६१७,६२१
हवंति	१	२१	४१९
°हियओ	१	२	
हु	१	१५	४१६
	३	२७,६३	७३२
°हेउ	२	३९	६२३
	३	४४	
हेउओ	३	४५	६५१
हेउपडिओअपं	२	३९	६२३
हेउ ाओ	३	४६	६५०
°हेउवाय	३	४५	६५१
हेउवायपक्खम्मि	३	४५	६५१
हेउवायस्स	३	४४	६५१
हेउविसओवणीयं	३	५८	७२६
°हेउविसय	३	५८	७२६
होइ	१	२,३८,३९	१७३,४४७
		४१,४४,४६	४४८,४५०
		४९,५०	४५३
	२	२,७,१३	५९६,६०७
		२३,२४,२५	६०९,६१८
		२६,२७,२८	६१९,६२२
		३३,३५,३७	६२३
	३	७,१७,१९	६३१,६३६
		२२,२७,२८	६३७,६३९
		३०,३१,३९	६४०,६४८
		४०,४६,६३	६४९,६५५
			७३२
होऊण	२	२	५९६
होज	२	९	६०८
	३	९,२४	६३४,६३८
होज्जाहि	३	१९,३१	६३७,६४१
होंति	१	५३	४५५
	२	२९,३५	६२०,६२२
	३	३१,४१,४७	६४०,६४९
		५१,५३	६५५,७०९
			७१०
होहिइ	३	२२	६३७

५

सन्मतिटीकागतान्यवतरणानि ।

अ

अगृहीतविशेषणा च विशेष्ये बुद्धिर्नोपजायते ।
[ ] पृ. ४७९ (४)*

अगृहीताच्च चाभावात् प्रमेयाभावनिर्णयः ।
तद्ग्रहोऽप्यन्यतो भावादनवस्था दुरुत्तरा ॥
[ ] पृ. ५८७

अगोतो विनिवृत्तश्च गौर्विलक्षण इष्यते ।
भाव एव ततो नायं गौरगौर्मे प्रसज्यते ॥
[तत्त्वसं० का० १०८५] पृ. २१५ (७,८)

अगोनिवृत्तिः सामान्यं वाच्यं यैः परिकल्पितम् ।
गोलं वस्त्वेव तैरुक्तमगोपोढगिरा स्फुटम् ॥
[श्लो० वा० अपो० श्लो० १] पृ. १८७ (११,१२)

अग्निस्वभावः शक्तस्य मूर्द्धा यद्यग्निरेव सः ।
अथानग्निस्वभावोऽसौ धूमस्तत्र कथं भवेत् ॥
[ ] पृ. ५०

अग्निहोत्रं जुहुयात् । [ ] पृ. १९

अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यक्पवनम्,
अणुमनसोश्चाद्यं कर्मादृष्टकारितम् ।
[वैशेषिकद० अ० ५-२-१३] पृ. १०५

अचेतनः कथं भावस्तदिच्छामनुवर्त्तते ।
[ ] पृ. ९६,१२१

अज्ञातस्यापि चाक्षस्य प्रमाहेतोः प्रमाणता ।
प्रमाभावस्त्वसामर्थ्यान्नाज्ञातोऽभाववेदकः ॥
[ ] पृ. ५८७

अज्ञेयं कल्पितं कृत्वा तद्व्यवच्छेदेन ज्ञेयेऽनुमानम् ।
[हेतु०] पृ. १९९ (७), २२८ (२०,२१)

अट्ठारस पुरिसेसुं वीसं इत्थीसु ।
[ओघनि० गा० ४४३] पृ. ७५२ (३)

अणंते केवलणाणे अणंते केवलदंसणे ।
[ ] पृ. ६१० (१)

'अत इदम्' इति यतस्तद् दिशो लिङ्गम् ।
[वैशेषिकद० २-२-१०] पृ. ६६९ (३)

अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात् ।
सामान्यविषयं प्रोक्तं लिङ्गं भेदाप्रतिष्ठितेः ॥
[ ] पृ. २११ (६,७,८)

अतीतानागताकारकालसंस्पर्शवर्जितम् ।
वर्तमानतया सर्वमृजुसूत्रेण सूत्र्यते ॥
[ ] पृ. ३१२

अतीतानागतौ कालौ वेदकारविवर्जितौ ।
कालत्वात् तद्यथा कालो वर्त्तमानः समीक्ष्यते ॥
[ ] पृ. ३१

अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।
ये भावान् वचनं तेषां नानुमानेन बाध्यते ॥
[ ] पृ. ७५३

अत्यन्तासम्भविनो न विरोधगतिः । [ ] पृ. ५५८

अत्र द्वौ वस्तुसाधनौ [न्यायबिन्दु० परि० २ सू० १९]
पृ. ३५२ (२)

अथान्यथा विशेष्येऽपि स्याद् विशेषणकल्पना ।
तथासति हि यत् किञ्चित् प्रसज्येत विशेषणम् ॥
[श्लो० वा० अपो० श्लो० ९०] पृ. १९३.

अथान्यदप्रयत्नेन सम्यगन्वेषणे कृते ।
मूलाभावान्न विज्ञानं भवेद् बाधकबाधनम् ॥
[तत्त्वसं० का० २८६९] पृ. १९

अथासत्यपि सारूप्ये स्यादपोढस्य कल्पना ।
गवाश्वयोरयं कस्मादगोपोहो न कल्प्यते ॥
[श्लो० वा० अपो० श्लो० ७६] पृ. १९० (८)

अथास्त्यतिशयः कश्चिद् येन भेदेन वर्तते ।
स एव दधि सोऽन्यत्र नास्तीत्यनुभयं परम् ॥
[ ] पृ. २४२ (३४)

अदृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते, एकद्रव्यत्वे सति क्रियाहेतुगुणत्वात्, यो य एकद्रव्यत्वे सति क्रियाहेतुगुणः स स स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते, यथा वेगः तथा चादृष्टम्, तस्मात् तदपि स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म आरभते इति । न चासिद्धं क्रियाहेतुगुणत्वम्, 'अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यक्पवनम्, अणु-मनसोश्चाद्यं कर्म देवदत्तविशेषगुणकारितम्, कार्यत्वे सति देवदत्तस्योपकारकत्वात्, पाण्यादिपरिस्पन्दवत्, एकद्रव्यत्वं चैकस्यात्मनस्तदाश्रयत्वात्, एकद्रव्यमदृष्टम्, विशेषगुणत्वात्, शब्दवत्' ।

'एकद्रव्यत्वात्' इत्युच्यमाने रूपादिभिर्व्यभिचारस्तन्निवृत्त्यर्थम् 'क्रियाहेतुगुणत्वात्' इत्युक्तम् । 'क्रियाहेतुगुणत्वात्' इत्युच्यमाने मुशलहस्तसंयोगेन स्वाश्रयाऽसंयुक्तस्तम्भादिचलनहेतुना व्यभिचारः, तन्निवृत्त्यर्थम् 'एकद्रव्यत्वे सति' इति विशेषणम् । 'एकद्रव्यत्वे सति क्रियाहेतुत्वात्' इत्युच्यमाने स्वाश्रयासंयुक्तलोहादिक्रियाहेतुनाऽयस्कान्तेन व्यभिचारः । तन्निवृत्त्यर्थम् 'गुणत्वात्' इत्यभिधानम् । [ ] पृ. १४२ (२)

* परिशिष्टेऽस्मिन् कोष्ठकान्तर्गता अङ्कास्तत्तत्पृष्ठगतटिप्पण्यङ्कसूचकाः ॥

अदृष्टमेवायस्कान्तेनाकृष्यमाणलोहदर्शने
सुखवत्पुंसो निःशल्यत्वेन तत्क्रियाहेतुः ।
[ ] पृ. १४४

अदृष्टेरन्यशब्दार्थे स्वार्थस्यांशेऽपि दर्शनात् ।
श्रुतेः सम्बन्धसौकर्य न चास्ति व्यभिचारिता ॥
[ ] पृ. १९६ (४,५,६)

अदृष्टेऽर्थेऽर्थविकल्पनमात्रम् । [ ] पृ. ३८८ (१५)

अधिकारोऽनुपायत्वात् न वादे शून्यवादिनः ।
[श्लो० वा० निरालम्ब० श्लो० १२९]
पृ. ३७७ (४)

अनधिगतार्थपरिच्छित्तिः प्रमाणम् । [ ] पृ. ५५४

अनर्थः खल्वपि कल्पनासमारोपितो न लिङ्गम्,
तथा पक्ष एवायं पक्षसपक्षयोरन्यतरः । [ ] पृ. ७२१

अनलार्थ्यनलं पश्यन्नपि न तिष्ठेत् नापि प्रतिष्ठेत ।
[ ] पृ. २८५

अनष्टाजायते कार्यं हेतुश्चान्येपि तत्क्षणम् ।
क्षणिकत्वात् स्वभावेन तेन नास्ति सहस्थितिः ॥
[ ] पृ. ३३२ (१९,२०)

अनादित्वात् मायायाः जीवविभागस्य च बीजाङ्कुरसन्तानयोरिव नेतरेतराश्रयदोषप्रसक्तिरत्र । तथा चाहुः—"अनादिरप्रयोजनाऽविद्या अनादित्वादितरेतराश्रयदोषपरिहारः, निष्प्रयोजनत्वेन भेदप्रपञ्चसंसर्गप्रयोजनपर्यनुयोगावकाशः ।
[ ] पृ. २७८ (२,३,४)

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥
[वाक्यप० श्लो० १ प्रथमका०] पृ. ३७९ (१२)

अनिर्दिष्टफलं सर्वं न प्रेक्षापूर्वकारिभिः ।
शास्त्रमाद्रियते तेन वाच्यमग्रे प्रयोजनम् ॥
[ ] पृ.१६९ (९)

अनुत्पन्नाश्च महामते सर्वधर्माः(र्मा)सदसतोरनुत्पन्नत्वात् ।
[ ] ३०३ (२,३)

अनुपलब्धिरसत्ता । [ ] पृ. २८८

अनुपलब्धिः स्वभावः कार्यं च । [ध. न्या. सू. ११–१२.] पृ.३.

अनुमातुरयमपराधो नानुमानस्य । [२–१–३८ वात्स्या० भा०]
पृ. ५६३ (५)

अनुमानं विवक्षायाः शब्दादन्यन्न विद्यते । [ ]
पृ. १८५ (२,३)

अनुमानमप्रमाणम् । [ ] पृ. ७०

अनेकगुणजात्यादिविकारार्थानुरञ्जिता ।
[श्लो० वा० वाक्याधि० श्लो०३३१]
पृ. ७४२

अनेकपरमाणूपादानमनेकं चेद् विज्ञानं सन्तानान्तरवदेकपरामर्शाभावः । [ ] पृ. १४९

अनेकान्तभावनातो विशिष्टप्रदेशे क्षयशरीरादिलाभो निःश्रेयसम् । [ ] पृ. १५५

अनेकान्तात्मकत्वाभावेऽपि केवलिनि सत्त्वात् यत् सत् तत् सर्वमनेकान्तात्मकमिति प्रतिपादकस्य शासनस्याव्यापकत्वात् कुसमयविशासित्वं तस्यासिद्धम् । [ ] पृ. ६२५

अन्तरङ्ग-बहिरङ्गयोरन्तरङ्गस्यैव बलीयस्त्वात् ।
[ ] पृ. ४७९ (५)

अन्यतरकर्मजः उभयकर्मजः संभोगजश्च संयोगः ।
[वैशेषिकद० ७–२–९] ७०४ (३)

अन्यत्र दृष्टो धर्मः क्वचिद्धर्मिणि विधीयते निषिध्यते च ।
[ ] पृ. १०९

अन्यत्र हिंसा अपायहेतुः । [ ] पृ. ७३१

अन्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम् ।
नान्यथाऽनुपपन्नत्वं यत्र तत्र त्रयेण किम् ? ॥
[ ] पृ. ६९,५६९ (७)

अन्यथैकेन शब्देन व्याप्त एकत्र वस्तुनि ।
बुद्ध्या वा नान्यविषय इति पर्यायता भवेत् ॥
[ ] पृ. २२० (७,८,९)

अन्यथैवाग्निसम्बन्धाद् दाहं दग्धोऽभिमन्यते ।
अन्यथा दाहशब्देन दाहार्थः सम्प्रतीयते ॥
[वाक्य० प० द्वि० का० श्लो० ४२५]
पृ. १७७ (४), २६० (१०)

अन्यदेव हि सामान्यमभिन्नज्ञानकारणम् ।
विशेषोऽप्यन्य एवेति मन्यते निगमो जयः ॥
[ ] पृ. ३११ (३)

अन्यदेवेन्द्रियग्राह्यं अन्यच्छब्दस्य गोचरः ।
शब्दात् प्रत्येति भिन्नाक्षो न तु प्रत्यक्षमीक्षते ॥
[ ] पृ. २६० (८,९)

अन्यान्यत्वेन ये भावा हेतुना करणेन वा ।
विशिष्टा भिन्नजातीयैरसङ्कीर्णा विनिश्चिताः ॥
[तत्त्वसं० का० १०६९] पृ. २१२ (२३)

अन्ये त्वाहुः—क्षेत्रज्ञानां नियतार्थविषयग्रहणं सर्वविदधिष्ठितानाम् । यथाप्रतिनियतशब्दादिविषयग्राहकाणामिन्द्रियाणामनियतविषयसर्वविदधिष्ठितानां जीवच्छरीरे । तथा च इन्द्रियवृत्त्युच्छेदलक्षणं केचिद् मरणमाहुश्चेतनानधिष्ठितानाम् । अस्ति च क्षेत्रज्ञानां प्रतिनियतविषयग्रहणम् तेनाप्यनियतविषयसर्वविदधिष्ठितेन भाव्यम् । योऽसौ क्षेत्रज्ञाधिष्ठायकोऽनियतविषयः स सर्वविदीश्वरः । नन्वेवं तस्यैव सकलक्षेत्रेष्वधिष्ठायकत्वात् किमन्तर्गडुस्थानीयैः क्षेत्रज्ञैः कृत्यम् ? न किञ्चित् प्रमाणसिद्धतां मुक्त्वा । नन्वेवमनिष्ठा—यथेन्द्रियाधिष्ठायकः क्षेत्रज्ञस्तदधिष्ठायकश्चेश्वरः एवमन्योऽपि तदधिष्ठायकोऽस्तु, भवत्तनिष्ठा यदि तत्साधकं प्रमाणं किञ्चिदस्ति; न त्वनिष्ठासाधकं किञ्चित् प्रमाणमुत्पश्यामः तावत एवानुमानसिद्धत्वात् । आगमोऽप्यस्मिन् वस्तुनि विद्यते–तथा च भगवान् व्यासः—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
[भग० गी० अ० १५ श्लो० १६]

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
[भग० गी० अ० १५ श्लो० १७]

तथा श्रुतिश्च तत्प्रतिपादिका उपलभ्यते—
विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एक आस्ते ॥
[श्वेताश्वत० उ० अ० ३,३]

न च स्वरूपप्रतिपादकानामप्रामाण्यम्, प्रमाणजनकत्वस्य सद्भावात् । तथाहि—प्रमाजनकत्वेन प्रमाणस्य प्रामाण्यं न प्रवृत्तिजनकत्वेन तच्चेहास्त्येव । प्रवृत्ति-निवृत्ती तु पुरुषस्य सुख-दुःखसाधनत्वाध्यवसाये समर्थस्यार्थित्वाद् भवत इति । अथ विधावङ्गत्वादमीषां प्रामाण्यं न स्वरूपार्थत्वादिति चेत्, तदसत्; स्वार्थप्रतिपादकत्वेन विध्यङ्गत्वात् । तथाहि—स्तुतेः स्वार्थप्रतिपादकत्वेन प्रवर्त्तकत्वम्, निन्दायास्तु निवर्त्तकत्वमिति । अन्यथा हि तदर्थापरिज्ञाने विहित-प्रतिषिद्धेष्वविशेषेण प्रवृत्तिर्निवृत्तिर्वा स्यात् । तथा विधिवाक्यस्यापि स्वार्थप्रतिपादनद्वारेणैव पुरुषप्रेरकत्वं दृष्टम्, एवं स्वरूपपरेष्वपि वाक्येषु स्यात्, वाक्यस्वरूपताया अविशेषात् विशेषहेतोश्चाभावादिति । तथा स्वरूपार्थानामप्रामाण्ये "मेध्या आपः, दर्भाः पवित्रम्, अमेध्यमशुचि" इत्येवंस्वरूपापरिज्ञाने विध्यङ्गतायामप्यविशेषेण प्रवृत्ति-निवृत्तिप्रसङ्गः, न चैतदस्ति; मेध्येष्वेव प्रवर्त्तते अमेध्येषु च निवर्त्तत इत्युपलम्भात् । तदेवं स्वरूपार्थेभ्यो वाक्येभ्योऽर्थस्वरूपावबोधे सति इष्टे प्रवृत्तिदर्शनात् अनिष्टे च निवृत्तेरिति ज्ञायते–स्वरूपार्थानां प्रमाजनकत्वेन प्रवृत्तौ निवृत्तौ वा विधिसहकारित्वमिति, अपरिज्ञानात्तु प्रवृत्तावतिप्रसङ्गः । अथ स्वरूपार्थानां प्रामाण्ये "प्रावाणः प्लवन्ते" इत्येवमादीनामपि यथार्थता स्यात्, न; मुख्ये बाधकोपपत्तेः । यत्र हि मुख्ये बाधकं प्रमाणमस्ति तत्रोपचारकल्पना, तदभावे तु प्रामाण्यमेव । न चेश्वरसद्भावप्रतिपादनेषु किञ्चिदस्ति बाधकमिति स्वरूपे प्रामाण्यमभ्युपगन्तव्यमित्यागमादपि सिद्धप्रामाण्यात् तदवगमः । ईश्वरस्य च सत्तामात्रेण स्वविषयग्रहणप्रवृत्तानां क्षेत्रज्ञानामधिष्ठायकता यथा स्फटिकादीनामुपधानाकारग्रहणप्रवृत्तानां सवितृप्रकाशः । यथा तेषां सावित्रं प्रकाशं विना नोपधानाकारग्रहणसामर्थ्यं तथेश्वरं विना क्षेत्रविदां न स्वविषयग्रहणसामर्थ्यमित्यस्ति भगवानीश्वरः सर्ववित् ।
[ ] पृ. ९८–९९ (१,२)

अन्वयेन विना तस्माद्व्यतिरेकः कथं भवेत् ।
[ ] पृ. ५७५

अन्वयो न च शब्दस्य प्रमेयेण निरूप्यते ।
व्यापारेण हि सर्वेषामन्वेतृत्वं प्रतीयते ॥
[श्लो० वा० शब्दप० ८५] पृ. ५७५ (३)

अपक्षधर्मस्यापि हेतोर्गमकत्वे चाक्षुषत्वमपि शब्दे नित्यत्वस्य गमकं स्यात् । [ ] पृ. ५९३ (६)

अपरस्मिन् परं युगपद् अयुगपत् चिरं क्षिप्रमिति काललिङ्गानि ।
[वैशेषिकद० २–२–६] पृ. ६६९ (१)

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति विश्वं नहि तस्य वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥
[श्वेताश्वत० ३–१९] पृ. ४६

अपि चैकत्व-नित्यत्व-प्रत्येकसमवायिन्याः(ताः) ।
निरूपाख्येष्वपोहेषु कुर्वतोऽमूत्रकः पटः ॥
[श्लो० वा० अपो० श्लो० १६३] पृ. २०१ (१०,११)

अपोद्धारादस्यायं वाक्यादर्थो विवेचितः ।
वाक्यार्थः प्रतिभाख्योऽयं तेनादावुपजन्यते ॥
[ ] पृ. १८८ (६)

अपोहः शब्दार्थ इत्ययुक्तम् अव्यापकत्वात् । यत्र द्वैराश्यं भवति तत्रेतरप्रतिषेधादितरः प्रतीयते, यथा–'गौः' इति पदाद् गौः प्रतीयमानः अगौर्निषिध्यमानः; न पुनः सर्वपद एतदस्ति, न ह्यसर्वं नाम किञ्चिदस्ति यत् सर्वशब्देन निवर्तेत । अथ मन्यसे एकादि असर्वं तत् सर्वशब्देन निवर्त्तत इति, तन्न; स्वार्थापवाददोषप्रसङ्गात् । एवं द्व्येकादिव्युदासेन प्रवर्त्तमानः सर्वशब्दोऽङ्गप्रतिषेधादङ्गव्यतिरिक्तस्याङ्गिनोऽनभ्युपगमादनर्थकः स्यात् । अङ्गशब्देन ह्येकदेश उच्यते; एवं सति सर्वे समुदायशब्दा एकदेशप्रतिषेधरूपेण प्रवर्त्तमानाः समुदायिव्यतिरिक्तस्यान्यस्य समुदायस्यानभ्युपगमादनर्थकाः प्रामुवन्ति । आद्यादिशब्दानां तु समुच्चयविषयत्वादेकादिप्रतिषेधे प्रतिषिध्यमानार्थानामसमुच्चयत्वादनर्थकत्वं स्यात् । [अ० २ आ० २ सू० ६७ न्यायवा० पृ० ३२९ पं० १२–२३] पृ. २०० (१,२,३,४,५)

अपोह्यभेदाद् भिन्नार्था स्वार्थभेदगतौ जडा ।
एकत्वाभिन्नकार्यत्वाद् विशेषणविशेष्यता ॥
[ ] पृ. १९६ (९,१०,११)

अपोह्यैः स बहिःसंस्थितैर्भिद्यते ।
[ ] पृ. १९४

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति ।
[ ] पृ ८१

अप्रामाण्यकारित्वे चक्षुषो दूरव्यवस्थितस्यापि ग्रहणप्रसङ्गः ।
[ ] पृ. १४३ (३)

अप्सु गन्धो रसश्चाग्नौ वायौ रूपेण तौ सह ।
व्योम्नि सस्पर्शता ते च न चेदस्य प्रमाणता ॥
[श्लो० वा० अभाव० श्लो० ६] पृ० ५८१ (३,४,५)

अभावगम्यरूपे च न विशेष्येऽस्ति वस्तुता ।
विशेषितमपोहेन वस्तु वाच्यं न तेऽस्त्यतः ॥
[श्लो० वा० अपो० श्लो० ९१] पृ. १९३

अभावोऽपि प्रमाणाभावः 'नास्ति' इत्यर्थस्यासन्निकृष्टस्य ।
[१–१–५ शाबरभा०] पृ. ५८०

अभिघाताग्निसंयोगनाशप्रत्ययसन्निधिम् ।
विना संसर्गितां याति न विनाशो घटादिभिः ॥
[ ] पृ. ३२० (२२,२३,२४)

अभिधानप्रसिद्ध्यर्थमर्थापत्त्यावबोधितात् ।
शब्दे वाचकसामर्थ्यात् तन्नित्यत्वप्रमेयता ॥
[श्लो० वा० अर्थाप० श्लो० ५] पृ. ५७९

अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नरः ।
केवलं काम्ये निषिद्धे च प्रवृत्तिप्रतिषेधतः ॥
[ ] पृ. १५१ (१)

अभ्यासात् प्रतिभाहेतुः शब्दः न तु बाह्यार्थप्रत्यायकः" ।
[ ] पृ. १८२ (४)

अयं चापोहः प्रतिवस्त्वेकः, अनेको वेति वक्तव्यम् । यद्येकस्तदाऽनेकगोद्रव्यसम्बन्धी गोत्वमेवासौ भवेत् । अथानेकस्ततः पिण्डवदानन्त्यादाख्यानानुपपत्तेरवाच्य एव स्यात् ।
[न्यायवा० पृ० ३३० पं० १५-१७] पृ. २०१ (५)

अयमेव भेदो भेदहेतुर्वा, यदुत विरुद्धधर्माध्यासः कारणभेदश्च, स चेन्न भेदको विश्वमेकं स्यात् ॥ [ ] पृ. ३

अयमेव हि भेदो भेदे हेतुर्वा विरुद्धधर्माध्यासः कारणभेदश्च ।
[ ] पृ. ३२७.

अयमेवेति यो ह्येष भावे भवति निर्णयः ।
नैष वस्त्वन्तराभावसंवित्त्यनुगमादृते ॥ [श्लो० वा० अभाव० श्लो० १५] पृ. ३४९ (२५), ५५८

अर्थक्रियाधिगतिलक्षणफलविशेषहेतुर्ज्ञानं प्रमाणम् ।
[ ] पृ. १५

अर्थजात्यभिधानेऽपि सर्वे जातिविधायिनः ।
व्यापारलक्षणा यस्मात् पदार्थाः समवस्थिताः ॥
[वाक्यप० तृ० का० श्लो० ११] पृ. २२२ (७,८)

अर्थवत् प्रमाणम् । [वात्स्या० भा० अ० १ आ० १ सू० १]
पृ. १०९,१२६,१६१,५४१,५४२,५५०

अर्थविवक्षां शब्दोऽनुमापयति ।
[ ] पृ. १८५ (१)

अथ शब्दोऽर्थवत्त्वेन पक्षः कस्मान्न कल्प्यते ॥
[श्लो० वा० शब्दप० ६२] पृ. ५७५

अर्थस्यासन्निकृष्टस्य प्रसिद्ध्यर्थं प्रमान्तरम् ।
प्रमाभावमभावाख्यं वर्णयन्ति तथाऽपरे ॥
[ ] पृ. ५७९ (५)

अर्थस्यासम्भवेऽभावात् प्रत्यक्षेऽपि प्रमाणता ।
प्रतिबद्धस्वभावस्य तद्धेतुत्वे समं द्वयम् ॥
[ ] पृ. १७ (२), ७३, ५५५ (१,२)

अर्थः सहकारी यस्य विशिष्टप्रमितौ प्रमातृप्रमेयाभ्यामर्थान्तरं तदर्थवत् प्रमाणम् । [ ] पृ. ५४१

अर्थानर्थविवेचनस्यानुमानायत्तत्वात् [ ] पृ. ४६९.

अर्थान्तरनिवृत्त्या कश्चिदेव वस्तुनो भागो गम्यते ।
[ ] पृ. २१३

अर्थान्तरनिवृत्त्याह विशिष्टानिति यत्पुनः ।
प्रोक्तं लक्षणकारेण तत्रार्थोऽयं विवक्षितः ॥
[तत्त्वसं० का० १०६८] पृ. २१२ (२२)

अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यत इत्यदृष्टार्थकल्पना । [१-१-५ शाबरभा०] पृ. ५७८ (११)

अर्थाभिधानप्रत्ययास्तुल्यनामधेयाः । [ ] पृ. ४०७

अर्थेन घटयत्येनां नहि मुक्तार्थरूपताम् ।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता ॥
[ ] पृ. ३१२ (२) ५१०

अर्थोपयोगेऽपि पुनः स्मार्त्तं शब्दानुयोजनम् ।
अक्षधीर्यद्यपेक्षेत सोऽर्थो व्यवहितो भवेत् ॥
[ ] पृ. ५२५ (१)

अवधीनामनिष्पत्तेर्निर्यतास्ते न शक्तयः ।
सत्त्वे च नियमस्तासां (युक्तः) सावधिको ननु ॥
[तत्त्वसं० का० २] पृ. ३०२ (१)

'अवयवी अवयवेषु वर्तते' इति समवायरूपा प्राप्तिरुच्यते ।
[ ] पृ. ६६६

अवयवेषु क्रिया, क्रियातो विभागः, ततः संयोगविनाशः, ततोऽपि द्रव्यविनाशः । [ ] पृ. १४९

अवश्यं भावनियमः कः परस्यान्यथा परैः ।
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत् ॥
[ ] ७६ (४,५) पृ. ५५९ (१)

अवश्यं भाविनं नाशं विद्धि सम्प्रत्युपस्थितम् ।
अयमेव हि ते कालः पूर्वमासीदनागतः ॥
[ ] पृ. ५३९

अवस्तुत्वादपोहानां नैव भेदः । [ ] पृ. १९४

अवस्तुविषयेऽप्यस्ति चेतोमात्रविनिर्मिता ।
विचित्रकल्पनाभेदरचितेष्विव वासना ॥
[तत्त्वसं० का० १०८६] पृ. २१५ (१४)

अवस्था-देश-कालानाम् । [वाक्यप० प्र० का० श्लो० ३२]
पृ. ७० (५)

अवाचकत्वे शब्दानां प्रतिज्ञाहेतोर्व्याघातः ।
[अ० २ आ० २ सू० ६७ न्यायवा० पृ. ३२७ पं. ६-७]
पृ. १७५ (१)

अविनाभावसम्बन्धस्य ग्रहीतुमशक्यत्वात् । [ ] पृ. ७०

अविनाभाविता चात्र तदैष परिगृह्यते ।
न प्रागवगतेत्येवं सत्यप्येषा न कारणम् ॥
[श्लो० वा० सू० ५ अर्थापत्ति० श्लो० ३] पृ. ४७

अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥
[ ] पृ. ४१४ (६)

अविभुनि द्रव्ये समानेन्द्रियग्राह्याणां विशेषगुणानामसम्भवात् ।
[ ] पृ. ७०८

अवेतविषयस्मृतिहेतुस्तदनन्तरं धारणा ।
[ ] पृ. ५५३ (६)

अव्यभिचारादिविशेषणविशिष्टार्थोपलब्धिजनिका सामग्री प्रमाणम् । [ ] पृ. ४७१

अशक्यसमयो ह्यात्मा नामादीनामनन्यभाक् ।
तेषामतो न चान्यत्वं कथञ्चिदुपपद्यते ॥
[ ] पृ. १८५ (११,१२)

अशब्दे वापि वाक्यार्थे न पदार्थेष्वशब्दता ।
वाक्यार्थस्येव नैतेषां निमित्तान्तरसम्भवः ॥
[श्लो० वा० वाक्याधि० श्लो० २३०] पृ. ७३८

अशेषशक्तिप्रचितात् प्रधानादेव केवलात् ।
कार्यभेदाः प्रवर्तन्ते तद्रूपा एव भावतः ॥
[तत्त्वसं० का० ७] पृ. २८० (१२)

अश्रावणं यथा रूपं विद्युद्वाऽयत्नजा यथा ।
[तत्त्वसं० का० १०४२] पृ. २०८ (२६)

अश्वं विकल्पयतो गोदर्शनात् न तदा गोशब्दसंयोजना तस्यास्तदाननुभवात्, युगपद्विकल्पद्वयानुत्पत्तेश्च निर्विकल्पकगोदर्शनसद्भावस्तदा । [ ] पृ. ५०४ (५,६,७)

असंस्कार्यतया पुम्भिः सर्वथा स्यान्निरर्थता ।
संस्कारोपगमं व्यक्तं गजस्नानमिदं भवेत् ॥
[ ] पृ. ११

असतः सत्त्वेन प्रतिभासनमस्य ।
[ ] पृ. ४८६ (१३,१४)

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥
[साङ्ख्यका० ९] पृ. २८२

असम्भवो विधिः । [हेतु०] पृ. २१७ (८)

असाधनाङ्गवचनमदोषोद्भावनं द्वयोः ।
निग्रहस्थानमन्यद्धि न युक्तमिति नेष्यते ॥
[ ] पृ. ७६१ (१)

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम् ।
अपूर्वदेवताशब्दैः समप्रा(मा)हुर्गवादिषु ॥
[वाक्यप० द्वि० का० श्लो० १२१] पृ. ३१५ (१७)

आकृतिर्जातिलिङ्गाख्या । [न्यायद० अ० २ आ० २ सू० ६७]
पृ. १७८

आचेलक्क(क्य)देसिय ।
[जीतकल्पभाष्य गाथा १९७२] पृ. ७४६ (४,५)

आत्मलाभे हि भावानां कारणापेक्षिता भवेत् ।
लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु ॥
[श्लो० वा० सू० २ श्लो० ४८] पृ. ४

आत्मा रे श्रोतव्यो ज्ञातव्यो मन्तव्यो निदिध्यासितव्यः ।
[बृहदा० उ० २-४-५] पृ. ७३१

आत्मैकत्वज्ञानात् परमात्मनि लयः सम्पद्यते इति ब्रुवते । तथाहि-आत्मैव परमार्थसन्, ततोऽन्येषां भेदे प्रमाणाभावात्; प्रत्यक्षं हि पदार्थानां सद्भावग्राहकमेव न भेदस्य इत्यविद्यासमारोपित एवायं भेदः । [ ] पृ. १५५

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत् तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥
[गौडपा० का० ६ पृ० ७० वैतथ्याख्यप्र०]
पृ. २७३ (१)

आद्ये परोक्षम् । [तत्त्वार्थ० १-११] पृ. ५९५ (४)

आद्ये पूर्वविदः । [तत्त्वार्थ० ९-३९] पृ. ७५४ (१)

आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते ।
[ ] पृ. १५१

आप्ताभिहितत्वासिद्धेरविसंवादकत्वायोगादप्रमाणत्वाभावनिश्चयनिमित्ताभावादप्रवर्त्तकत्वं प्रयोजनवाक्यस्य प्रेक्षापूर्वकारिणः प्रति । [ ] पृ. १७२ (१२)

आम्नायस्य क्रियार्थत्वाद् आनर्थक्यमतदर्थानाम् ।
[जैमि० १-२-१] पृ. ९२, ७४४

आशङ्कते हि यो मोहादजातमपि बाधकम् ।
स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत् ॥
[तत्त्वसं० का० २८७२] पृ. ८

आ सर्गप्रलयादेका बुद्धिः । [ ] पृ. ३०० (९)

आस्रवनिरोधः संवरः । [तत्त्वार्थ० ९-१] पृ. ७३५

आहुर्विधातृ प्रत्यक्षं न निषेद्धृ विपश्चितः ।
नैकत्वे आगमस्तेन प्रत्यक्षेण विरुध्यते ॥
[ ] पृ. २७३ (१३)

इ

इतरेतरभेदोऽस्य बीजं चेत् पक्ष एष नः ॥
[तत्त्वसं० का० ९०५] पृ. १८१ (१९,२०)

इतश्चायुक्तोऽपोहः विकल्पानुपपत्तेः । तथाहि—योऽयमगोरपोहो गवि स किं गोव्यतिरिक्तः आहोस्विदव्यतिरिक्तः ? । यदि व्यतिरिक्तः स किमाश्रितः अथानाश्रितः ? । यद्याश्रितस्तदाऽऽश्रितत्वाद् गुणः प्राप्तः; ततश्च गोशब्देन गुणोऽभिधीयते 'न गौः' इति-'गौस्तिष्ठति' 'गौर्गच्छति' इति न सामानाधिकरण्यं प्राप्नोतीति । अथानाश्रितस्तदा केनार्थेन 'गोरगोपोहः' इति षष्ठी स्यात् । 'अथाव्यतिरिक्तस्तदा गौरेवासाविति न किञ्चित् कृतं भवति' । पृ. २०१ (१,२,३,४)
[न्यायवा० पृ. ३३, पं० ८-१४]

इत्यादिना प्रभेदेन विभिन्नार्थनिबन्धनाः ।
व्यावृत्तयः प्रकल्प्यन्ते तन्निष्टाः (ष्ठाः) श्रुतयस्तथा ॥
[तत्त्वसं० का० १०४३] पृ. २०८ (२७), २०९ (१)

'इदं तावत् प्रष्टव्यो भवति भवान्-किमपोहो वाच्यः अथावाच्य इति । वाच्यत्वे विधिरूपेण वाच्यः स्यात् अन्यव्यावृत्त्या वा । तत्र यदि विधिरूपेण तदा नैकान्तिकः शब्दार्थः 'अन्यापोहः शब्दार्थः' इति । अथान्यव्यावृत्तेयेति पक्षस्तदा तस्याप्यन्यव्यवच्छेदस्यापरेणान्यव्यवच्छेदरूपेणाभिधानम् तस्याप्यपरेणेत्यव्यवस्था स्यात् । अथावाच्यस्तदा 'अन्यशब्दार्थापोहं शब्दः करोति' इति व्याहन्येत ।
[न्यायवा० पृ० ३३० पं० १८-२२] पृ. २०१ (७)

इदानींतनमस्तित्वं नहि पूर्वधिया गतम् ।
[श्लो० वा० सू. ४ श्लो० २३४] पृ. ५६,३१९

इन्द्रियाणां ससम्प्रयोगे बुद्धिजन्म प्रत्यक्षम् ।
[जैमि० अ० १-१-४] पृ. ७

इन्द्रियाणि अतीन्द्रियाणि स्वविषयग्रहणलक्षणानि ।
[ ] पृ. ५२८

इन्द्रियार्थसन्निकर्षोत्पन्नम् [न्यायद० १-१-४] पृ. ५५०
इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानम् । [न्यायद० १-१-४]
पृ. ७०४

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् । [न्यायद० १-१-४] पृ. ११९,५१८
इन्द्रो मायाभिः पर(पुरु)रूप ईयते [ऋग्वे० मण्ड० ५ सू० ४७ ऋ० १८] पृ. २७३ (५)
इयती च सामग्री प्रमाणोत्पादिका । [ ] पृ. ३
इष्टानिष्टार्थसाधनयोग्यतालक्षणौ धर्माधर्मौ ।
[ ] पृ. ५०५ (८)
इहरा समूहसिद्ध–[प्र० का० गा० २७] पृ. ६२८ (३)

उ

उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनमिति कर्माणि । [वैशेषिकद० १-१-७] पृ. ६८६
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
[भग० गी० अ० १५ श्लो० १७] पृ. ९८
उत्तरकालभाविनः संवादप्रत्ययान्न जन्म प्रतिपद्यते शक्तिलक्षणं प्रामाण्यमिति स्वत उच्यते न पुनर्विज्ञानकारणान्नोपजायते । [ ] पृ. १०
उत्पाद-व्यय-ध्रौव्ययुक्तं सत् ।
[तत्त्वार्थ० अ० ५ सू० २९] पृ. ५९, ३२३, ४१२
उदधाविव सर्वसिन्धवः समुदीर्णास्त्वयि नाथ दृष्टयः ।
न च तासु भवान् प्रदृश्यते, प्रविभक्तासु सरित्स्विवोदधिः ॥
[चतुर्थद्वात्रिंशिकायां श्लो० १५] पृ. २९
उपमानमपि सादृश्यादसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति यथा गवयदर्शनं गोस्मरणस्य [१-१-५ शाबरभा०] पृ. ५७६ (१)
उपयुक्तोपमानस्तु तुल्यार्थग्रहणे सति ।
विशिष्टविषयत्वेन सम्बन्धं प्रतिपद्यते ॥
[ ] पृ. ५८४ (८)
उपलब्धिः सत्ता । [ ] पृ. २९३
उपलब्धिः सत्ता सा चोपलभ्यमानवस्तुयोग्यता तदाश्रया वा ज्ञानवृत्तिः । [ ] पृ. २९१
उपलम्भः सत्ता । [ ] पृ. ७१०
उपोद्घातेण—। [ध्व० लो० उ० १ पृ० ३५] पृ. १३३
उप्पाय-ट्ठिइ-भंगा हंदि दवियलक्खणं एयं ।
[प्र० का० गा० १२] पृ. ६२३, ६२८ (४)
उभयम् । [पाणिनि०] पृ. १७९ (४)

ऊ

ऊर्णनाभ इवांऽशूनां चन्द्रकान्त इवाऽम्भसाम् ।
प्ररोहाणामिव प्लक्षः स हेतुः सर्वजन्मिनाम् ॥
[ ] पृ. ७१५ (३)
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥
[गीता अ० १५ श्लो० १] पृ. ३१०

ऋ

ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।
[वाक्यप० प्र० का० श्लो० ३०] पृ. ५३८ (८)

ए

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
[अमृतबिन्दु उपनि० प० १२ पृ० १५] पृ. ३७
एकद्रव्यम् अगुणम् संयोग-विभागेष्वनपेक्षम् कारणम् इति कर्मलक्षणम् । [वैशेषिकद० १-१-१७] पृ. ६७२
एकधर्मान्वयासत्त्वेऽप्यपोह्यापोहगोचराः ।
वैलक्षण्येन गम्यन्तेऽभिन्नप्रत्यवमर्शकाः ॥
[तत्त्वसं० का० १०५०] पृ. २१०
एकप्रत्यवमर्शे हि केचिदेवोपयोगिनः ।
प्रकृत्या भेदवन्तोऽपि नान्य इत्युपपादितम् ॥
[तत्त्वसं० का० १०५१] पृ. २१० (१०,११)
एकमेवाद्वितीयम् । [छान्दो० उ० अ० ६ खं० २ म० १]
पृ. २७३ (९)
एकोहेऽहं संविद्रूपं हर्ष-विषादायनेकाकारविवर्तं समुत्पश्यामः तत्र यथेष्टं संज्ञाः क्रियन्ताम् । [ ] पृ. २७
एकयोनयश्च पाकजाः । [४-१-५ वात्स्या० भा०]
पृ. ५२१ (१)
एकश्रोत्रप्रवेशे च नान्येषां च पुनः श्रुतिः ।
न चावान्तरवर्णानां नानात्वस्यास्ति कारणम् ॥
[श्लो० वा० सू० ६ श्लो० ११२] पृ. ३८
एकसामग्र्यधीनत्वाद् रूपादेः रसतो गतिः ।
हेतुधर्मानुमानेन धूमेन्धनविकारवत् ॥
[ ] पृ. ५५९ (५)
एकस्मिन्नपि दृष्टेऽर्थे द्वितीयं पश्यतो वने ।
सादृश्येन सहैकस्मिंस्तदैवोत्पद्यते मतिः ॥
[श्लो० वा० उपमान० श्लो० ४६] पृ. ५७७ (५,६)
एकस्मिन्नवयविनि कृत्स्नैकदेशशब्दप्रवृत्त्यसम्भवात् अयुक्तोऽयं प्रश्नः—'किमेकदेशेन वर्तते, अथ कृत्स्नो वर्तते' इति । 'कृत्स्नम्' इति हि खल्वेकस्य अशेषाभिधानम् । 'एकदेशः' इति च अनेकत्वे सति कस्यचिदभिधानम्, ताविमौ कृत्स्नैकदेशशब्दौ एकस्मिन्नवयविनि अनुपपन्नौ ।
[२-१-३२ न्यायवा०] पृ. ६६८
एकस्मिन् भेदाभावात् सर्वशब्दप्रयोगानुपपत्तिः ।
[ ] पृ. ६६३
एकस्यापि ध्वनेर्वाच्यं सदा तन्नोपपद्यते ।
क्रियाभेदेन भिन्नत्वादेवम्भूतोऽभिमन्यते ॥
[ ] पृ. ३१४ (५)
एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोऽन्यो न दृष्टो भागः स्यात् यः प्रमाणैः परीक्ष्यते ॥
[ ] पृ. ५०७ (६)
एकादश जिने । [तत्त्वार्थ० अ० ९ सू० ११] पृ. ६१५

एकादिव्यवहारहेतुः सङ्ख्या ।
[प्रशस्त० भा० पृ० १११ पं० ३] पृ. ५१९
एकेन तु प्रमाणेन सर्वज्ञो येन कल्प्यते ।
नूनं स चक्षुषा सर्वत्रसादीन् (सर्वान् रसादीन्) प्रतिपद्यते ॥
[श्लो० वा० सू० २ श्लो० ११२] पृ. ४३
एको भावस्तत्त्वतो येन दृष्टः सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा एको भावस्तत्त्वतस्तेन दृष्टः ॥
[ ] पृ. ६३ (७)
एकेक्को वि सयविहो ।
[आवश्यकनि० उवग्घायनि० गा० ३६] पृ. ७५७ (४)
एकगुणकालए दुगुणकालए–।
[भगवतीसू० शत० ५ उ० ७ सू० २१७] पृ. ६३५ (४)
एगदवियम्मि—। [प्र० का० गा० ३१] पृ. ६२८ (२)
एगमेगेणं जीवस्स पएसे अणंतेहिं णाणावरणिज्जपोग्गलेहिं आवेढियपरिवेढिए । [ ] पृ. ४५५–४५६ (२)
एगे आया । [स्थाना० प्रथमस्था० सू० १]
पृ. ९३,४५३ (२)
एगे भवं दुवे भवं । [भगवतीसूत्र शतक १८ उ० १०]
पृ. ६२५ (१)
एते च त्रयो भङ्गा गुण-प्रधानभावेन सकलधर्मात्मकैकवस्तुप्रतिपादकाः स्वयं तथाभूताः सन्तो निरवयवप्रतिपत्तिद्वारेण सकलादेशाः, वक्ष्यमाणास्तु चत्वारः सावयवप्रतिपत्तिद्वारेणाशेषधर्माक्रान्तं वस्तु प्रतिपादयन्तोऽपि विकलादेशाः ।
[ ] पृ. ४४५ (११,१२)
एवं त्रिचतुरज्ञानजन्मनो नाधिका मतिः ।
प्रार्थ्यते तावतैवैकं स्वतः प्रामाण्यमश्नुते ॥
[श्लो० वा० सू० २ श्लो० ६१] पृ. ८
एवं धर्मैर्विना धर्मिणमुद्देशः कृतः ।
[प्रशस्तपादभा० पृ० २६ पं० १] पृ. ६६१ (३)
एवं परीक्षकज्ञानत्रितयं नातिवर्तते ।
ततश्चाजातबाधेन नाशङ्क्यं बाधकं पुनः ॥
[तत्त्वसं० का० २८७१] पृ. १९
एवं परोक्तसम्बन्धप्रत्याख्याने कृते सति ।
नियमो नाम सम्बन्धः स्वमतेनोच्यतेऽधुना ॥
[ ] पृ. २०
एवं यत् पक्षधर्मत्वं ज्येष्ठं हेलङ्गमिष्यते ।
तत् पूर्वोक्तान्यधर्मत्वदर्शनाद् व्यभिचार्यते ॥
[ ] पृ. ५७०
एष प्रत्यक्षधर्मश्च वर्तमानार्थतैव या ॥
[श्लो० वा० निरा० श्लो० ११४] पृ. ५३७ (१०)
एषामैन्द्रियकत्वेऽपि न तादृप्येण धर्मता ।
[श्लो० वा० सू० २ श्लो० १३] पृ. ५०५ (१०)

औ

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः ।
[मीमां० १-१-५ पृ० ५] पृ. ३८६

क

कइविहे णं भंते ! आया पण्णत्ते ?
गोयमा ! अट्ठविहे । तं जहा–दविए आया ।
[भगवतीसू० शत० १२ उ० १०] पृ. ६३१ (१)
कतमत् संवृतिसत्त्वं यावल्लोकव्यवहारः ।
[ ] पृ. ३७८
कम्मं जोगनिमित्तं । [प्र० का० गा० १९] पृ. ७३३ (८)
कर्तुः कार्योपादानोपकरणप्रयोजनसम्प्रदानपरिज्ञानात् ।
[ ] पृ. १०१
कर्तुः प्रियहितमोक्षहेतुर्धर्मः, अधर्मस्तु अप्रियप्रत्यवायहेतुः ।
[प्रशस्तपा० भा० पृ० २७२ पं० ८ तथा पृ० २८० पं० ४]
पृ. ६८५
कर्तृफलदायी आत्मगुण आत्म-मनःसंयोगजः स्वकार्यविरोधी धर्माधर्मरूपतया भेदवान् अदृष्टाख्यो गुणः ।
[ ] पृ. ६८५ (६)
कल्पनापोढमभ्रान्तं प्रत्यक्षम् । [न्यायबिं० १–४] पृ. ५०८ (१)
कल्पनीयास्तु सर्वज्ञा भवेयुर्बहवस्तव ।
य एव स्यादसर्वज्ञः स सर्वज्ञं न बुध्यते ॥
[श्लो० वा० सू० २ श्लो० १३५] पृ. ५३
कस्मात् साक्षादिमत्स्वेवं गोत्वं यस्मात् तदात्मकम् ।
तादात्म्यमस्य कस्मात् चेत् स्वभावादिति गम्यताम् ॥
[श्लो० वा० आकृ० श्लो० ४७] पृ. २४० (६)
कस्यचित्तु यदीष्येत स्वत एव प्रमाणता ।
प्रथमस्य तथाभावे प्रद्वेषः केन हेतुना ॥
[श्लो० वा० सू० २ श्लो० ७६] पृ. ६
कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां वा ।
स्वभावतः सर्वमिदं प्रवृत्तं न कामचारोऽस्ति कुतः प्रयत्नः ॥
[ ] पृ. ७१२ (१)
कः शोभेत वदन्नेवं यदि न स्यादहीकता ।
अज्ञा(ज्ञ)ता वा यतः सर्वं क्षणिकेष्वपि तत्समम् ॥
[हे० बिं० पृ० १२९] पृ. ३२९ (१७)
कारणमस्त्यव्यक्तम् । [साङ्ख्यका० १६] पृ. २८४
कारणसंयोगिना कार्यमवश्यं संयुज्यते ।
[ ] पृ. १४९
कारुण्याद् भगवतः प्रवृत्तिः । नन्वेवं केवलः सुखरूपः प्राणिसर्गोऽस्तु, नैवम्; निरपेक्षस्य कर्तृत्वेऽयं दोषः सापेक्षत्वे तु कथमेकरूपः सर्गः ? यस्य यथाविधः कर्माशयः पुण्यरूपोऽपुण्यरूपो वा तस्य तथाविधफलोपभोगाय तत्साधनान् शरीरादींस्तथाविधांस्तत्सापेक्षः सृजति । [ ] पृ. ९९
कार्यं धूमो हुतभुजः कार्ये धर्मानुवृत्तितः ।
[ ] पृ. ५७ (४) ५८
कार्यं धूमो हुतभुजः, कार्यधर्मानुवृत्तितः ।
स तदभावेऽपि भवन् कार्यमेव न स्यात् ॥
[ ] पृ. २०

कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितः ।
सम्भवंस्तदभावेऽपि हेतुमत्तां विलङ्घयेत् ॥
[ ] पृ. ३२२ (१,२,३), ५६९ (३)
कार्यकारणभावादिसम्बन्धानां द्वयी गतिः ।
नियमानियमाभ्यां स्यादनियमादतद्गता ॥
[ ] पृ. २१
कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥
[ ] पृ. ७६, ५५८ (१४)
कार्यलान्यलक्लेशेन यत् साध्यासिद्धिदर्शनं तत् कार्यसमम् ।
[ ] पृ. ११५ (६)
कार्यस्यैवमयोगाच्च किं कुर्वत् कारणं भवेत् ।
ततः कारणभावोऽपि बीजादेर्नावकल्पते ॥
[तत्त्वसं० का० १३] पृ. २८३ (१४)
कालः पचति भूतानि कालः संहरति प्रजाः ।
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ॥
[महाभा० आदिप० अ० १ श्लो० २७३,२७५]
पृ ७११ (४,५)
कालाध्वनोरत्यन्तसंयोगे । [पा० २-३-५] पृ. ६०५ (२)
कालो य होइ सुहुमो । [ ] पृ. ६५५
किं स्यात् सा चित्रतैकस्यां न स्यात् तस्यां मतावपि ।
[ ] पृ. २४१ (१४)
किन्तु गौर्गवयो हस्ती वृक्ष इत्यादिशब्दतः ।
विधिरूपावसायेन मतिः शाब्दी प्रवर्त्तते ॥
[तत्त्वसं० का० ९११] पृ. १८६ (१)
किन्तु विध्यवसाध्यस्माद् विकल्पो जायते ध्वनेः ।
पश्चादपोहशब्दार्थनिषेधे जायते मतिः ॥
[तत्त्वसं० का० ११६४] पृ. २२७ (४)
किल सामग्री करणं तच्च कर्तृकर्मापेक्षम् सामग्रीजनकत्वेन तयोर्व्यावृतेरर्थान्तरभूतयोरभावात् किमपेक्ष्य साधकतमत्वमासादयेत् । [ ] पृ. ४७२ (९,१०)
केचिदेव निरात्मानो बाह्या इष्टा घटादयः ।
गमनं कस्यचिच्चैव भ्रान्तैस्तद्विनिवर्त्यते ॥
[तत्त्वसं० का० ११८७] पृ. २२९ (१७-१८)
केवल एव धर्मो धर्मिणि साध्यस्तथेष्टसमुदायस्य सिद्धिः कृता भवति । [ ] पृ. ५५४
केवलणाणुवउत्ता जाणंति ।
[प्रज्ञाप० द्वितीं० प० सू० ५४ गा० १६१]
पृ. ६०८ (६,७)
केवलनाणे केवलदंसणे । [ ] पृ. ६१७
केवलणाणे णं भंते ! । [ ] पृ. ६०७ (२)
केवली णं भंते ! इमं रयणप्पभं पुढविं आयारेहिं पमाणेहिं हेऊहिं संठाणेहिं परिवारेहिं जं समयं जाणइ नो तं समयं पासइ ? हंता गोयमा ! केवली णं । [ ] पृ ६०५

को हि भावधर्मं हेतुमिच्छन् भावं नेच्छेत् ।
[ ] पृ. ४८० (४)
क्रमेण युगपच्चैव यतस्तेऽर्थक्रियाकृतः ।
न भवन्ति ततस्तेषां व्यर्थः क्षणिकताश्रमः ॥
[ ] पृ. ३२९
क्रियारूपत्वादपोहस्य विषयो वक्तव्यः । तत्र 'अगौर्न भवति' इत्ययमपोहः किं गोविषयः अथागोविषयः ? यदि गोविषयः कथं गोर्गव्येवाभावः ? अथागोविषयः कथमन्यविषयादपोहः अन्यत्र प्रतिपत्तिः, नहि खदिरे छिद्यमाने पलाशे छिदा भवति । अथागोर्गवि प्रतिषेधो 'गौरगौर्न भवति' इति, केनागोत्वं प्रसक्तं यत् प्रतिषिध्यत इति । [न्यायवा० पृ० ३२९ पं० २४-पृ० ३३० पं० ४] पृ. २०० (११,१२)
क्रियावद् गुणवत् समवायिकारणं द्रव्यम् ।
[वैशेषिकद० १-१-१५] पृ. ६३३ (३)
क्रीडा हि रतिमविन्दताम्, न च रत्यर्थां भगवान् दुःखाभावात् । [न्यायवा० पृ० ४६२] पृ. ९९
क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।
[योगद० पा० १ सू० २४] पृ. ६९,१३३.
क्लेशेन पक्षधर्मत्वं यस्तत्रापि प्रकल्पयेत् ।
न सङ्गच्छेत तस्यैतल्लक्ष्येण सह लक्षणम् ॥
[ ] पृ. ५७०
क्वचित् तदपरिज्ञानं सदृशापरसम्भवात् ।
भ्रान्तेरपश्यत (?) भेदं मायागोलकभेदवत् ॥
[ ] पृ. ३१८ (३)
क्व वा श्रुतिः । [तत्त्वसं० का० ९०७] पृ. १८५
क्षणिकाः सर्वसंस्काराः । [ ] पृ. ७०६
क्षणिकाः सर्वसंस्काराः विज्ञानमात्रमेवेदं भो जिनपुत्राः ! यद् इदं त्रैधातुकम् । [ ] पृ. ७३१
क्षणिका हि सा न कालान्तरमवतिष्ठते ।
[ ] पृ. २५
क्षणिका हि सा न कालान्तरमास्ते । [ ] पृ. ५४ (१)
क्षीरे दधि भवेदेव दध्नि क्षीरं घटे पटः ।
शशे शृङ्गं पृथिव्यादौ चैतन्यं मूर्तिरात्मनि ॥
[श्लो० वा० अभावप० श्लो० ५] पृ. ५८१ (२)
क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते ॥
[श्लो० वा० अभावप० श्लो० २] पृ. १८६ (११) ५८१ (१)

ग

गतोदके कः खलु सेतुबन्धः । [ ] पृ. ३७७
गत्वा गत्वा च तान् देशान् यद्यर्थो नोपलभ्यते ।
तदान्यकारणाभावादसन्नित्यवगम्यते ॥
[श्लो० वा० अर्था० श्लो० ३८] पृ. २३,३२१
गम्भीरध्वानवत्त्वे सति । [१-१-५ न्यायवा० पृ० ४७]
पृ. ५६३

गवयश्चाप्यसम्बन्धान्न गोलिङ्गत्वमृच्छति ।
सादृश्यं न च पूर्वेण पूर्वं दृष्टं तदन्वयि ॥
[श्लो० वा० उपमान० श्लो० ४५] पृ. ५७७ (४)
गवये गृह्यमाणं च न गवार्थानुमापकम् ।
प्रतिज्ञार्थैकदेशत्वाद् गोगतस्य न लिङ्गता ॥
[श्लो० वा० उपमान० श्लो० ४४] पृ. ५७७ (२,३)
गवयोपमिताया गोस्तज्ज्ञानग्राह्यशक्तिता ॥
[श्लो० वा० अर्थाप० श्लो० ४] पृ. ५७९ (३)
गवाश्वप्रभृतीनि च । [पाणि० २-४-११] पृ. १९० (९)
गव्यसिद्धे ह्यगौर्नास्ति तदभावेऽपि गौः कुतः ।
[श्लो० वा० अपो० श्लो० ८५] पृ. १९१ (१२,१३)
गामहं ज्ञातवान् पूर्वमश्वं जानाम्यहं पुनः ।
[श्लो० वा० सू० ५ आत्म० श्लो० १२२] पृ. ८८
गीयत्थो य विहारो बीओ गीयत्थमीसओ भणिओ ।
[ओघनिर्युक्ति गा० १२१] पृ. ७५६ (५)
गुणपर्यायवद् द्रव्यम् । [तत्त्वार्थ० अ० ५ सू० ३७]
पृ. ६३६
गुणविशेषाणां रूप-रस-गन्ध-स्पर्शानाम् गुरुत्व-द्रवत्व-घनत्व-संस्काराणाम् अव्यापिनश्च परिमाणविशेषस्याश्रयो यथासम्भवं तद् द्रव्यं मूर्तिं (मूर्तिः) मूर्च्छितावयवत्वात् ।
[न्यायद० वात्स्या० भा० पृ० २२४] पृ. १७८
गुणाः सन्ति न सन्तीति पौरुषेयेषु चिन्त्यते ।
वेदे कर्तुरभावात्तु गुणाशङ्कैव नास्ति नः ॥
[ ] पृ. ११
गुणे भावाद् गुणत्वमुक्तम् ।
[वैशेषिकद० अ० १ आ० २ सू० १३] पृ. १४०
गुणेभ्यो दोषाणामभावस्तदभावाद् अप्रामाण्यद्वयासक्त्वेनोत्सर्गोऽनपोदित एवास्ते । [ ] पृ. १० (३)
गूढसिर संधि-पव्वं समभंगमहीरगं च छिण्णरुहं ।
साहारणं सरीरं तव्विवरीयं च पत्तेयं ॥
[जीवविचा० गा० १२] पृ. ६५४
गृहीतमपि गोत्वादि स्मृतिस्पृष्टं च यद्यपि ।
तथापि व्यतिरेकेण पूर्वबोधात् प्रतीयते ॥
[श्लो० वा० प्रत्यक्ष० श्लो० २३२] पृ. ३१९ (५)
गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
[श्लो० वा० अभावप० श्लो० २७] पृ. ३६९
गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम् ।
मानसं नास्तिताज्ञानं जायतेऽक्षानपेक्षया ॥
[श्लो० वा० सू० ५ अभावप० श्लो० २७] पृ. २३,२७६,
गोत्वसम्बन्धात् प्राग् न गौः नाप्यगौः, गोत्वयोगाद् गौः ।
[न्यायवा० पृ० ३१८ पं० २१] पृ. १०६
गोमानित्येव मत्वेन भाव्यमश्ववताऽपि किम् ।
[ ] पृ. ७०
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥
[ ] पृ. ४०१ (२)

ग्राह्यग्राहकोभयशून्यं तत्त्वम् । [ ] पृ. ७३१

घ

घटादिषु (?) यथा हेतवो ध्वंसकारिणः ।
नैवं नाशस्य सो हेतुस्तस्य सञ्जायते कथम् ॥
[ ] पृ. ३४६ (८,९,१०)
घटादीनां न वाकारात् (न्) प्रत्यापयति वाचकः ।
वस्तुमात्रनिवेशित्वात् तद्गतिर्नान्तरीयकैः ॥
[वाक्यप० द्वि० का० श्लो० १२५] पृ. ३१६ (१,२)

च

चक्षुः प्रतीत्य रूपादि चोत्पद्यते चक्षुर्विज्ञानम् ।
[ ] पृ. ३०९ (५)
चक्षुःश्रवसो भुजङ्गाः । [ ] पृ. ५७
चक्षुः-श्रोत्र-मनसामप्राप्तार्थकारित्वम् ।
[ ] पृ. ५४५
चक्षुषो घटेन संयोग एव युतसिद्धत्वात् द्रव्यसमवेतानां गुणादीनां संयुक्तसमवाय एव । [ ] पृ. ५४५
चतसृषु भेदविधासु तत्त्वं परिसमाप्यते-यदुत प्रमाता प्रमेयम् प्रमाणम् प्रमितिः । [ ] पृ. २९५ (४)
चतुरश्छयतौ आद्यक्षरलोपश्च ।
[पाणि० अ० ५ पा० २ सू० ५१ वार्ति०] पृ. २२५ (२४)
चित्रप्रतिभासाऽप्येकैव बुद्धिः, बाह्यचित्रविलक्षणत्वात् ।
[ ] पृ. २४१
चित्रया यजेत पशुकामः । [ ] पृ. ७३० (३)
चैतन्यं पुरुषस्य स्वरूपम् ।
[ ] पृ. ३०७ (८), ५८८ (२)
चैत्रस्य व्रणरोहणे । [ ] पृ. ९५
चोदनाजनिता बुद्धिः प्रमाणं दोषवर्जितैः ।
कारणैर्जन्यमानत्वाल्लिङ्गाऽऽप्तोक्ताक्षबुद्धिवत् ॥
[श्लो० वा० सू० २ श्लो० १८४] पृ. ८
चोदनालक्षणोऽर्थो धर्मः । [मीमांसाद० १-१-२] पृ. ७३१
छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं ।
आहारे— [ओघनिर्युक्ति गा० ४४१] पृ. ७४९

ज

जंकयमुकयं । [ ] पृ. ६०६
जं कावियं दरिसणं एयं दव्वट्ठियस्स वत्तव्वं ।
[तृ० का० गा० ४८] पृ. २८५
जं समयं च णं समणे भगवं महावीरे ।
[ ] पृ. ६०५
जं समयं पासइ णो तं समयं जाणइ ।
[ ] पृ. ६१६
जं समयं पासइ नो तं समयं जाणइ ।
[ ] पृ. ६१६
जाणइ बज्झेऽणुमाणाओ । [विशेषा० भा० गा० ८१४]
पृ. ६१९ (४)

जातिभेदश्च तेनैव संस्कारो व्यवतिष्ठते ।
अन्यार्थप्रेरितो वायुर्यथाऽन्यं न करोति वः ॥
[श्लो० वा० सू० ६ श्लो० ८] पृ. ३६ (१)
जातिः पदार्थः । [वाजध्यायनः] पृ. १७९ (१,२)
जातेऽपि यदि विज्ञाने तावन्नार्थोऽवधार्यते ।
[ ] पृ. १३ (२)
जातेऽपि यदि विज्ञाने तावन्नार्थोऽवधार्यते ।
यावत् कारणशुद्धत्वं न प्रमाणान्तराद्गतम् ॥
[श्लो० वा० सू० २ श्लो० ४९] पृ. ५
जारिसयं गुरुलिंगं सीसेण वि तारिसेण होयव्वं ।
[धर्मसङ्ग्रहणी गा० ११०८,१११९] पृ. ७५० (४)
जाव अणेगभूयभावभविए भवं ।
[भगवतीसूत्र श० १८ उ० १०] पृ. ६२५
जिज्ञासितविशेषो धर्मी पक्षः । [न्यायबिं० २,८] ५९२ (१)
जिणा बारसरूवा उ थेरा चोद्दसरूविणो ।
अज्जाणं पण्णवीसं तु अओ उड्ढमुवग्गहो ॥
[ओघनिर्युक्ति गा० ६७१]
[पञ्चव० गा० ७७१] पृ. ७५१ (१,२)
जीवाजीवाश्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ।
[तत्त्वार्थसू० १-४] पृ. ६५१

जीवानामविद्यासम्बन्धः न परात्मनः असौ सदा प्रबुद्धो नित्यप्रकाशो नागन्तुकार्थः अन्यथा मुक्त्यवस्थायामपि नाविद्यानिवृत्तिः । यतोऽस्मिन् दर्शने ब्रह्मैव संसरति मुच्यते च । अत्रैकमुक्तौ सर्वमुक्तिप्रसङ्ग अभेदात् परमात्मनः, यतस्तस्य भेददर्शनेन संसारः अभेददर्शनेन च मुक्तिः अत एकस्यैव परमात्मनः परमस्वास्थ्यमापतितम् तस्मान्न ब्रह्मणः संसारः । जीवात्मान एवाऽनाद्यविद्यायोगिनः संसारिणः कथञ्चिद् विद्योदये विमुच्यन्ते तेषां स्वाभाविकाविद्याकलुषीकृतानां विलक्षणप्रत्ययविद्योदये नाविद्यानिवृत्तेरनुपपत्तिः यतो न तेषु स्वाभाविकी विद्या अविद्यावत् अतस्तया निवृत्तिः स्वाभाविक्या अप्यविद्यायाः । [ ] पृ. २७८ (२१,२२,२३)
जीवो अणाइणिहणो । [धर्मसङ्ग्रहणी गा० ३५] पृ. ७४६
जुगवं दो णत्थि उवओगा । [आवश्यकनि० गा० ९७९]
पृ. ४७८ (२)
जे एगं जाणई ।
[आचा० प्र० श्रु० अध्य० ३ उ० ४ सू० १२२] पृ. ६३
जे जत्तिआ इ हेऊ भवस्स ।
[ ] पृ. ७४८ (५)
जे भिक्खू कसिणं वत्थं पडिगाहेइ ।
[ ] पृ. ७५१
ज्ञातसम्बन्धस्यैकदेशदर्शनादसन्निकृष्टेऽर्थे बुद्धिः ।
[ ] पृ. २० (३,४,५)
ज्ञातसम्बन्धस्यैकदेशदर्शनादसन्निकृष्टेऽर्थे बुद्धिरनुमानम् ।
[१-१-५ शाबरभा०] पृ. ५७२ (४)
ज्ञान-चिकीर्षा-प्रयत्नानां समवायः कर्तृता ।
[ ] पृ. ९८

ज्ञानमप्रतिघं यस्य ऐश्वर्यं च जगत्पतेः ।
वैराग्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ॥
[ ] पृ. ५९
ज्ञानमात्रार्थकरणेऽप्ययोग्यं ब्रह्म चामृतम् ।
तदयोग्यतयाऽरूपं तद्वा वस्तुषु (?) लक्षणम् ॥
[ ] पृ. ३८४ (८,९,१०)
ज्ञानवान् मृग्यते कश्चित् तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥
[ ] पृ. १२८
ज्ञानादव्यतिरिक्तं च कथमर्थान्तरं व्रजेत् ।
[ ] पृ. १८४ (९)
ज्ञे(अज्ञे)यं कल्पितं कृत्वा तद्व्यवच्छेदेन ज्ञेयेऽनुमानम् ।
[हेतु०] पृ. २२८ (२०,२१)
ज्ञो ज्ञेये कथमज्ञः स्याद् असति प्रतिबन्धरि ।
सत्येव दाह्ये नह्यग्निः क्वचिद् दृष्टो न दाहकः ॥
[ ] पृ. ६३

ण

णगिणस्स वा वि । [दशवैकालिक गा० २७३] पृ. ३५१
णगिणस्स वा वि मुण्डस्स ।
[दशवैकालिक गा० २७३] पृ. ७४७
णत्थि णएण विहूणं सुत्तं अत्थो य जिणमये किंचि ।
आसज्ज उ सोआरं णए णयविसारओ बूआ ॥
[आवश्यकनि० उवग्घायनि० गा० ३८] पृ. ७४६ (१)
णीया लोवमभूया आणीया दो वि बिंदु-दुब्भावा ।
अत्थं वहंति तं चिय जो चिय सिं पुव्वनिद्दिट्ठो ॥
[ ] पृ. ६०६ (२)
णो कप्पइ निग्गंथस्स णिग्गंथीए वा अभिन्ने तालपलंबे पडिगाहित्तए । [कप्पसू० उ० १ सू० १] पृ. ७५२ (२)

त

तं सव्वणयविसुद्धं जं चरणगुणट्ठिओ साहू ।
[आवश्यकनि० सामाइअनि० गा० १०२] पृ. ७५६ (४)
ततश्च वासनाभेदाद् भेदः सद्रूपतापि वा ।
प्रकल्प्यतेऽप्यपोहानां कल्पनारचितेष्विव ॥
[तत्त्वसं० का० १०८७] पृ. २१५ (१५,१६)
ततः परं पुनर्वस्तुधर्मैः ।
[श्लो० वा० सू० ४ श्लो० १२०] पृ. ७४
ततो निरपवादत्वात् तेनैवाद्यं बलीयसा ।
बाध्यते तेन तस्यैव प्रमाणत्वमपोद्यते ॥
[तत्त्वसं० का० २८७०] पृ. १९
ततोऽपि विकल्पात् तदध्यवसायेन वस्तुन्येव प्रवृत्तेः प्रवृत्तौ च प्रत्यक्षेणाभिन्नयोगक्षेमत्वात् ।
[ ] पृ. ४६८ (७,८)
ततो भवत्प्रयुक्तेऽस्मिन् साधने यावदुच्यते ।
सर्वत्रोत्पद्यते बुद्धिरिति दूषणता भवेत् ॥
[श्लो० वा० निरा० श्लो० १७२] पृ. ५६४

तत्त्वदर्शनं प्रत्यक्षतोऽनुमानतो वा ।
[ ] पृ. ९४ (७)
तत् परिच्छिनत्ति अन्यद् व्यवच्छिनत्ति प्रकारान्तराभावं च सूचयति । [ ] पृ. २८५ (११)
तत्पूर्वकमनुमानम् । [ ] पृ. ५६०
तत्पूर्वकं त्रिविधमनुमानम् । [ ] पृ. ५६०
तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं च ।
[न्यायद० १-१-५] पृ. ५५९ (१०)
तत् प्रमाणे । [तत्त्वार्थ० १,१०] पृ. ५९५
तत्र ज्ञानान्तरोत्पादः प्रतीक्ष्यः कारणान्तरात् ।
यावद्धि न परिच्छिन्ना शुद्धिस्तावदसत्समा ॥
[श्लो० वा० सू० २ श्लो० ५०] पृ. ५
तत्र प्रत्यक्षतो ज्ञातात् दाहाद्दहनशक्तिता ।
वह्नेरनुमितात् सूर्ये यानात् तच्छक्तियोगिता ॥
[श्लो० वा० अर्थाप० श्लो० ३] पृ. ५७९ (२)

तत्र महद् द्विविधम्-नित्यम् अनित्यं च । नित्यम् आकाश-काल-दिगात्मसु परममहत्त्वम्, अनित्यम् त्र्यणुकादिषु द्रव्येषु । अणु अपि नित्यानित्यभेदात् द्विविधम्-परमाणु-मनस्सु पारिमाण्डल्यलक्षणं नित्यम्, अनित्यम् द्व्यणुक एव । कुवलाऽऽमलक-बिल्वादिषु तु महत्स्वपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोऽणुत्वव्यवहारः । तथाहि-यादृशं बिल्वे महत् परिमाणम् तादृशं न आमलके यादृशं च तत् तत्र न तादृशं कुवल इति ।

ननु महद्-दीर्घयोरुत्र्यणुकादिषु वर्तमानयोः द्व्यणुके च अणुत्व-ह्रस्वत्वयोः को विशेषः । महत्सु 'दीर्घमानीयताम्' दीर्घेषु 'महद् आनीयताम्' इति व्यवहारभेदप्रतीतेरस्ति तयोः परस्परतो भेदः । अणुत्वह्रस्वत्वयोस्तु विशेषो योगिनां तद्दर्शिनामध्यक्ष एव । [ ] पृ. ६७५ (३)
तत्रर्जुसूत्रनीतिः स्यात् शुद्धपर्यायसंश्रिताः (ता) ।
नश्वरस्यैव भावस्य भावा(वात्)स्थितिवियोगतः ॥
[ ] पृ. ३११ (७,८,९)
तत्र शब्दान्तरापोहे सामान्ये परिकल्पिते ।
तथैवावस्तुरूपत्वाच्छब्दभेदो न कल्प्यते ॥
[श्लो० वा० अपो० श्लो० १०४] पृ. १९५ (१६)
तत्रात्मनि सुखादीनां यथा वित्तिः फलान्तरम् ।
तथा सर्वत्र संयोज्या मानमेयफलस्थितिः ॥
[ ] पृ. ३६५ (२२,२३)
तत्रापवादनिर्मुक्तिर्वैक्यभावाच्छधीयसी ।
वेदे तेनाप्रमाणत्वं नाशङ्कामपि गच्छति ॥
[श्लो० वा० सू० २ श्लो० ६८] पृ. १९ (५)
तत्रापि त्वपवादस्य स्यादपेक्षा क्वचित् पुनः ।
जाताशङ्कस्य पूर्वेण साऽप्यन्येन निवर्तते ॥
[तत्त्वसं० का० २८६७] पृ. १९ (१)
तत्रापूर्वार्थविज्ञानं निश्चितं बाधवर्जितम् ।
अदुष्टकारणारब्धं प्रमाणं लोकसम्मतम् ॥
[ ] पृ. १३,३१८ (१८), ३९४

तथा ध्वन्यन्तराक्षेपो न ध्वन्यन्तरसारिभिः ।
तस्मादुत्पत्त्यभिव्यक्त्योः कार्यार्थापत्तितः समः ॥
[श्लो० वा० सू० ६ श्लो० ८२] पृ. ३६
तथाऽन्यवर्णसंस्कारशक्तो नान्यं करिष्यति ।
अन्यैस्तालवादिसंयोगैर्नान्यो वर्णो यथैव हि ॥
[श्लो० वा० सू० ६ श्लो० ८१] पृ. ३६
तथाविधस्य तस्यापि वस्तुनः क्षणवृत्तिनः ।
ब्रूते समभिरूढस्तु संज्ञाभेदेन भिन्नताम् ॥
[ ] पृ. ३१३ (१५)
तथाहि-पचतीत्युक्ते नोदासीनोऽवतिष्ठते ।
भुङ्क्ते दीव्यति वा नेति गम्यतेऽन्यनिवर्तनम् ॥
[तत्त्वसं० का० ११४६] पृ. २२४ (१४,१५,१६)
तदनन्तरं तदीहितविशेषनिर्णयोऽवायः ।
[ ] पृ. ५५३ (५)
तदा प्रवर्तने चक्षुषो न दोषः ।
[ ] पृ. ४९६
तद् इन्द्रियानिन्द्रियनिमित्तम् ।
[तत्त्वार्थ० अ० १ सू० १४] पृ. ८०
तदेवममृतं (तथेदममलं) ब्रह्म निर्विकारमविद्यया ।
कलुषत्वमिवापन्नं भेदरूपं विवर्त्तते ॥
[ ] पृ. ३८३ (१०,११,१२)
तद्गुणैरपकृष्टानां शब्दे संक्रान्त्यसम्भवात् ।
यद्वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः ॥
[श्लो० वा० सू० २ श्लो० ६३] पृ. १९
तद्दृष्टावेव दृष्टेषु संवित्सामर्थ्यभाविनः ।
स्मरणादभिलाषेण व्यवहारः प्रवर्तते ॥
[ ] पृ. १५ (११) ४९८ (६)
तद्रूपारोपमन्यान्यव्यावृत्त्याऽधिगतैः पुनः ।
शब्दार्थोऽर्थः स एवेति वचनेन विरुध्यते ॥
[ ] पृ. १८१ (११)
तद्वतो न वाचकः शब्दः, अस्वतन्त्रत्वात् ।
[ ] पृ. १९७ (१२)
तन्मात्राकाङ्क्षणाद् भेदः स्वसामान्येन नोज्झितः ।
नोपात्तः संशयोत्पत्तेः सैव चैकार्थता तयोः ॥
[ ] पृ. १९६ (१२,१३,१४,१५,१६)
तपसा निर्जरा च । [तत्त्वार्थ० ९-३] पृ. ७३५,७३७
तमोनिरोधे वीक्षन्ते तमसाऽनावृत्तं(वृतं) परम् ।
घटादिकम्-। [ ] पृ. ५४४ (१)
तल्लिङ्ग-लिङ्गिपूर्वकम् । [साङ्ख्यका० ५] पृ. ५७२ (३)
तस्मात् तद् द्वयमेष्टव्यं प्रतिबिम्बादि सांवृतम् ।
तेषु तद् व्यभिचारित्वं दुर्निवारमतः स्थितम् ॥
[तत्त्वसं० का० १०९४] पृ. २१६ (२२)
तस्मात् तन्मात्रसम्बन्धः स्वभावो भावमेव वा ।
निवर्तयेत् कारणं वा कार्यमव्यभिचारतः ॥
[ ] पृ. ५५९ (७)

तस्मात् सर्वेषु यद्रूपं प्रत्येकं परिनिष्ठितम् ।
गोबुद्धिस्तन्निमित्ता स्याद् गोत्वादन्यच्च नास्ति तत् ॥
[श्लो० वा० अपो० श्लो० १०] पृ. १८७ (१९)
तस्मात् स्वतः प्रमाणत्वं सर्वत्रौत्सर्गिकं स्थितम् ।
बाधकारणदुष्टत्वज्ञानाभ्यां तदपोद्यते ॥
[तत्त्वसं० का० २८६२] पृ. १८
तस्मादनुमानत्वं शाब्दे प्रत्यक्षवद् भवेत् ।
त्रैरूप्यरहितत्वेन तादग्विषयवर्जनात् ॥
[श्लो० वा० शब्दप० श्लो० १८] पृ. ५७४ (७)
तस्माद् यतो यतोऽर्थानां व्यावृत्तिस्तन्निबन्धनाः ।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥
[ ] पृ. २४३ (२३,२४)
तस्माद् यत् स्मर्यते तत् स्यात् सादृश्येन विशेषितम् ।
प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम् ॥
[श्लो० वा० सू० ६ उपमान० श्लो० ३७] पृ. ४६,५७६ (५)
तस्माद्यस्यैव संस्कारं नियमेनानुवर्तते ।
तन्नान्तरीयकं चित्तमतश्चित्तसमाश्रितम् ॥
[ ] पृ. ७७,१५९ (४)
तस्माद् यस्यैव संस्कारं नियमेनानुवर्त्तते ।
शरीरं पूर्वदेहस्य तत् तदन्वयि युक्तिमत् ॥
[ ] पृ. ९२
तस्माद् येष्वेव शब्देषु नञ्योगस्तेषु केवलम् ।
भवेदन्यनिवृत्त्यंशः स्वात्मैवान्यत्र गम्यते ॥
[श्लो० वा० अपो० श्लो० १६४] पृ. २०१ (१२)
तस्माद् व्याख्याङ्गमिच्छद्भिः सहेतुः सप्रयोजनः ।
शास्त्रावतारसम्बन्धो वाच्यो नान्यस्तु निष्फलः ॥
[श्लो० वा० सू० १ श्लो० २५] पृ. १६९ (११)
तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्सस्य कस्तां क्षपयितुं क्षमः ॥
[ ] पृ. ४८२ (६), ६८४ (७)
तस्यापि कारणाशुद्धेर्न ज्ञानस्य प्रमाणता ।
तस्याप्येवमितीत्थं तु न क्वचिद्व्यवतिष्ठते ॥
[श्लो० वा० सू० २ श्लो० ५१] पृ. ५
तस्यैव चैतानि निःश्वसितानि ।
[बृह० उ० अ० २ ब्रा० ४ सू० १०] पृ. ३२
तस्यैव व्यभिचारादौ शब्देऽप्यन्यभिचारिणि ।
दोषवत् साधनं ज्ञेयं वस्तुनो वस्तुसिद्धितः ॥
[ ] पृ. ३०९
तस्योपकारकत्वेन वर्ततेंऽशस्तदेतरः ।
उभयोरपि संवित्त्योरुभयानुगमोऽस्ति तु ॥
[श्लो० वा० अभावप० श्लो० १४१] पृ. ५८१ (७)
तादात्म्यं चेद् मतं जातेर्व्यक्तिजन्मन्यजातता ।
नाशेऽनाशश्च केनेष्टस्तद्वत्त्वा न त्वयो न किम् (?) ॥
[ ] पृ. २४० (१०)

तादृक् प्रत्यवमर्शश्च यत्र नैवास्ति वस्तुनि ।
अगोशब्दाभिधेयत्वं विस्पष्टं तत्र गम्यते ॥
[तत्त्वसं० का० १०६३] पृ. २१२
तादृक् प्रत्यवमर्शश्च विद्यते यत्र वस्तुनि ।
तत्राभावेऽपि गोजातेरगोपोहः प्रवर्तते ॥
[तत्त्वसं० का० १०६०] पृ. २११ (१५)
तामभावोत्थितामन्यामर्थापत्तिमुदाहरेत् ।
[श्लो० वा० अर्थाप० श्लो० ९] पृ. ५७९
ताश्च व्यावृत्तयोऽर्थानां कल्पनाशिल्पिनिर्मिताः ।
नापोह्याधारभेदेन भिद्यन्ते परमार्थतः ॥
[तत्त्वसं० का० १०४६] पृ. २०९
तासां हि बाह्यरूपत्वं कल्पितं न तु वास्तवम् ।
भेदाभेदौ च तत्त्वेन वस्तुन्येव व्यवस्थितौ ॥
[तत्त्वसं० का० १०४७] पृ. २०९
ता हि तेन विनोत्पन्ना मिथ्याः स्युर्विषयादते ।
न ह्यन्येन विना वृत्तिः सामान्यस्येह दुष्यति ॥
[श्लो० वा० आकृ० श्लो० ३८] पृ. २४०
तित्थपणामं काउं ।
[अ.वश्यकनि० समवस० गा० ४५] पृ. ७५४ (३)
तुर्ये तु तद्विविक्तोऽसौ पचतीत्यवसीयते ।
तेनात्र विधिवाक्येन सममन्यनिवर्तनम् ॥
[तत्त्वसं० का० ११५८] पृ. २२५ (२३)
तेन जन्मैव विषये बुद्धेर्व्यापार उच्यते ।
तदेव च प्रमारूपं तद्वती करणं च धीः ॥
[श्लो० वा० सू० ४ श्लो० ५६] पृ. १०
तेन यत्राप्युभौ धर्मौ ।
[श्लो० वा० अनु० श्लो० ४] पृ. ९४
तेन सम्बन्धवेलायां सम्बन्ध्यन्यतरो ध्रुवम् ।
अर्थापत्त्यैव मन्तव्यः पश्चादस्त्वनुमानता ॥
[श्लो० वा० सू० ५ अर्थापत्ति० श्लो० ३३] पृ. ४७ (२)
तेन सर्वत्र दृष्टत्वाद्व्यतिरेकस्य चागतेः ।
सर्वशब्दैरशेषार्थप्रतिपत्तिः प्रसज्यते ॥
[श्लो० वा० शब्दप० श्लो० ८८] पृ. ५७५
तेनायमपि शब्दस्य स्वार्थं इत्युपचर्यते ।
न च साक्षादयं शब्दै द्वि(ब्दैर्द्वि)विधोऽपोह उच्यते ॥
[तत्त्वसं० का० १०१५] पृ. २०३ (२७,२८)
तेषामदृश्यमानानां कथं च रचनाक्रमः ।
कीदृशाद् रचनाभेदाद् वर्णभेदश्च जायताम् ॥
[श्लो० वा० सू० ६ श्लो० १०९१] पृ. ३८
तेषामेवानेन रूपेण व्यवस्थितत्वात् तदव्यतिरिक्तं विकारमात्रं कार्यं त एव । [ ] पृ. ४२२
तैरेव गृह्यते शब्दो न दूरस्थैः कथञ्चन ।
[श्लो० वा० सू० ६ श्लो० ८६] पृ. ३५
तौ सत् । [पा० सू० ३-२-१२७ ।] पृ. ४४३

त्रिगुणमविवेकिविषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥
[साङ्ख्यका० ११] पृ. २८१
त्रिधैव सः । [ ] पृ. ५५८,५५९,
त्रिरूपाणि च त्रीण्येव लिङ्गानि । [ध० न्या० सू० ११] पृ. ३
त्रिरूपाल्लिङ्गादर्थदृग् । [ ] पृ. ४८०
त्रिरूपाल्लिङ्गाल्लिङ्गिनि ज्ञानमनुमानम् ।
[ ] पृ. ५७२ (६)
त्रिरूपाल्लिङ्गाल्लिङ्गिविज्ञानमनुमानम् ।
[ ] पृ. ३
त्रैगुण्यस्याविशेषेऽपि न सर्वं सर्वकारकम् ।
[तत्त्वसं० का० २८] पृ. ३०१ (११)

द

दर्शनेन क्षणिकाक्षणिकलसाधारणस्यार्थस्य विषयीकरणात् कुतश्चिद् भ्रमनिमित्तादक्षणिकत्वारोपेऽपि न दर्शनमक्षणिकत्वे प्रमाणम् किन्तु प्रत्युताप्रमाणम् विपरीतावसायाक्रान्तत्वात् क्षणिकत्वेऽपि न तत् प्रमाणं अनुरूपाध्यवसायाजननात् नीलरूपे तु तथाविधनिश्चयकरणात् प्रमाणम् ।
[ ] पृ. ४७१
दव्वट्ठयाए सासया, पज्जवट्ठयाए असासया ।
[ ] पृ. ६३९
दिग्देशाद्यविभागेन सर्वान् प्रति भवन्नपि ।
तथैव यत्समीपस्थैर्नादैः स्याद् यस्य संस्कृतिः ॥
[श्लो० वा० सू० ६ श्लो० ८६] पृ. ३५
दुःखरूपत्वान्नानुकम्पया प्रवृत्तिः अवाप्तकामत्वान्न क्रीडार्था इत्येतदपि परिहृतमविद्यात्वेन, यतो नासौ प्रयोजनमपेक्ष्य प्रवर्तते, नहि गन्धर्वनगरादिविभ्रमाः समुद्दिष्टप्रयोजनानां प्रादुर्भवन्ति । [ ] पृ. २७८ (५)
दुःखे विपर्यासमतिस्तृष्णा वाऽवन्ध्यकारणम् ।
जन्मिनो यस्य ते न स्तो न स जन्माधिगच्छति ॥
[ ] पृ. १४८
दृश्यमानव्यपेक्षं चेद् दृष्टज्ञानं प्रमान्तरम् ।
तत्पूर्वमस्मादित्यादि प्रमाणान्तरमिष्यताम् ॥
[ ] पृ. ५८३
दृश्यमानाद् यदन्यत्र विज्ञानमुपजायते ।
सादृश्योपाधितत्त्वज्ञैरुपमानमिति स्मृतम् ॥
[ ] पृ. ५७५
दृश्यात् परोक्षे सादृश्यधीः प्रमाणान्तरं यदि ।
वैधर्म्यमतिरप्येवं प्रमाणं किं न सप्तमम् ॥
[ ] पृ. ५८३
दृष्टः पञ्चभिरप्यस्माद् भेदेनोक्ता श्रुतोद्भवा ।
प्रमाणग्राहिणीत्वेन यस्मात् पूर्वविलक्षणा ॥
[श्लो० वा० अर्थाप० श्लो० २] पृ. ५७८
दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते ।
[मीमांसाद० अ० १ पा० १ सू० ५ शाबरभा०] पृ. ७१
१०३ सं० प०

दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यदृष्टार्थकल्पनाऽर्थापत्तिः । [मीमां० शाबर० सू० ५ पृ० ८ पं० १७] पृ. ४६
देवदत्तोपकरणभूतानि मणिमुक्ताफलादीनि द्वीपान्तरसम्भूतानि देवदत्तगुणकृतानि, कार्यत्वे सति देवदत्तोपकारकत्वात्, शकटादिवत् । न च तद्देशेऽसन्निहिता एव तद्गुणास्तान् व्युत्पादयितुं समर्थाः, नहि पटदेशेऽसन्निधानवन्तस्तन्तु-तुरि-कुविन्दादयः पटमुत्पादयितुं क्षमाः । आत्मगुणानां च तद्देशसन्निधानं न तद्गुणसन्निधिमन्तरेण सम्भवि अगुणत्वप्राप्तेः ततस्तस्यापि तद्देशत्वम् । [ ] पृ. १४६
देशकालस्वभावनियमो न स्यात् ।
[ ] पृ. ८
देशकालादिभेदेन तदाऽस्त्यवसरो मितेः ।
[श्लो० वा० सू० ४ श्लो० २३३] पृ. ५६ (४)
देश-कालादिभेदेन तत्रास्त्यवसरो मितेः ।
यः पूर्वमवगतो नाशः (नांशः) स च नाम प्रतीयते ॥
[श्लो० वा० प्रत्यक्ष० श्लो० २३३] पृ. ३१९ (६,७,८)
दैवरक्ता हि किंशुकाः । [ ] पृ. १२ (५)
दोषाः सन्ति न सन्तीति पौरुषेयेषु चिन्त्यते ।
वेदे कर्तुरभावात्तु दोषाशङ्कैव नास्ति नः ॥
[तत्त्वसं० का० २८९५] पृ. ११ (२)
द्रवत्वेन विना चैषां संश्लेषः कल्प्यतां कथम् ।
आगच्छतां च विश्लेषो न भवेद् वायुना कथम् ॥
[श्लो० वा० सू० ६ श्लो० ११०] पृ. ३८
द्रव्यत्वादिभिरनिर्धारितरूपैर्यैः सम्बन्धो द्रव्यादीनां स शब्दार्थः; स च सम्बन्धिनां शब्दार्थत्वेनासत्यत्वादसत्य इत्युच्यते । यद्वा तपः श्रुतादीनां मेचकवर्णवदैक्येन भासनादेषामेव परस्परमसत्यः संसर्गः । [ ] पृ. १८० (६)
द्रव्यम् । [व्याडिः] पृ. १७९ (३)
द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्षः ।
[वैशेषिकद० १-२-२६] पृ. ६३३,६७२
द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
[भग० गी० अ० १५ श्लो० १५] पृ. ९८
द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात् ।
[ ] पृ. २ (७), २६५
द्विष्ठसम्बन्धसंवित्तिर्नैकरूपप्रवेदनात् ।
द्वयस्वरूपग्रहणे सति सम्बन्धवेदनम् ॥
[ ] पृ. ४८३ (११)
द्वीन्द्रियग्राह्याग्राह्यं विमत्यधिकरणभावापन्नं बुद्धिमत्कारणपूर्वकम्, स्वारम्भकावयवसन्निवेशविशिष्टत्वात्, घटादिवत् वैधर्म्येण परमाणवः ।
[ ] पृ. १०० (४,५)
द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः ।
[ ] पृ. १०९

ध

धर्मैयोर्भेद इष्टो हि धर्म्यभेदेऽपि नः स्थिते ।
उद्भवाभिभवात्मत्वाद् ग्रहणं चावतिष्ठते ॥
[श्लो० वा० अभावप० १-२०] पृ. ५८१ (१२,१३)
धर्मैस्याव्यभिचारस्तु धर्मेणान्यत्र दर्श्यते ।
तत्र प्रसिद्धं तद्युक्तं धर्मिणं गमयिष्यति ॥
[ ] पृ. ५५४ (८)
धर्माधर्मक्षयंकरी दीक्षा । [ ] पृ. ७३२
धर्मी धर्मविशिष्टश्च लिङ्गीत्येतच्च साधितम् ।
न तावदनुमानं हि यावत्तद्विषयं न तत् ॥
[श्लो० वा० शब्दप० ५६] पृ. ५७५ (१)

न

न कार्यं कारणे विद्यते इति तेभ्यस्तत् पृथग्भूतम् नहि कारणमेव कार्यरूपेण व्यवतिष्ठते परिणमते वा ।
[ ] पृ. ४२२
नक्षत्र-ग्रहपञ्जरमहर्निशं लोककर्मविक्षिप्तम् ।
भ्रमति शुभाशुभमखिलं प्रकाशयत् पूर्वजन्मकृतम् ॥
[ ] पृ. ६६
न च कार्यम् कारणं वास्ति द्रव्यमात्रमेव तत्त्वम् ॥
[ ] पृ. ४२२
न च स्मरणतः पश्चादिन्द्रियस्य प्रवर्तनम् ॥
[श्लो० वा० प्रत्यक्ष० श्लो० २३५] पृ. ४९६
न च स्याद् व्यवहारोऽयं कारणादिविभागतः ।
प्रागभावादिभेदेन नाभावो यदि भिद्यते ॥
[श्लो० वा० अभावप० श्लो० ७] पृ. ५८० (६,७)
न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधकः ।
न च मन्त्रार्थवादानां तात्पर्यमवकल्पते ॥
[श्लो० वा० सू० २ श्लो० ११८] पृ. ४५
न चागमेन सर्वज्ञस्तदीयेऽन्योन्यसंश्रयात् ।
नरान्तरप्रणीतस्य प्रामाण्यं गम्यते कथम् ॥
[श्लो० वा० सू० २ श्लो० ११९] पृ. ४५
न चान्नान्यतरा भ्रान्तिरुपचारेण वेष्यते ।
दृढत्वात् सर्वथा बुद्धेर्भ्रान्तिस्तद् भ्रान्तिवादिनाम् ॥
[श्लो० वा० आकृ० श्लो० ७] पृ. २३३ (७)
न चान्यरूपमन्यादृक् कुर्याज्ज्ञानं विशेषणम् ।
कथं चान्यादृशे ज्ञाने तदुच्येत विशेषणम् ॥
[श्लो० वा० अपो० श्लो० ८९] पृ. १९२ (१५)
न चान्वयविनिर्मुक्ता प्रवृत्तिः शब्द-लिङ्गयोः ।
[ ] पृ. १९०
न चापि लिङ्गतः पश्चादिन्द्रियस्य प्रवर्तनम् ।
वा ते केनचिन्नापि तदिदानीं प्रदुष्यति ॥
[ ] पृ. ४९६
न चाप्यश्वादिशब्देभ्यो जायतेऽपोहबोधनम् ।
विशेष्यबुद्धिरिष्टेह न चाज्ञातविशेषणा ॥
[श्लो० वा० अपो० श्लो० ८८] पृ. १९२
न चावस्तुन एते स्युर्भेदास्तेनाऽस्य वस्तुनि (वस्तुना)
[श्लो० वा० अभा० परि० श्लो० ८] पृ. १८६
न चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता ।
कार्यादीनामभावः को भावो यः कारणादि न ॥
[श्लो० वा० अभावप० श्लो० ८] पृ. ५८० (८)
न चासाधारणं वस्तु गम्यतेऽपोहवत्तया ।
कथं वा परिकल्प्येत सम्बन्धो वस्त्ववस्तुनोः ॥
[श्लो० वा० अपो० श्लो० ८६] पृ. १९२ (१३,१४)
न चेश्वरत्वव्याघातः सापेक्षत्वेऽपि, यथा सवितृप्रकाशस्य स्फटिकाद्यपेक्षस्य, यथा वा करणाधिष्ठायकस्य क्षेत्रज्ञस्य, सापेक्षत्वेऽपि तेषु तस्येश्वरता द्वदत्रापि (तद्वदत्रापि) नेश्वरता-विषं(विसं) घातः । [ ]
पृ. ९९ (३,४)
न चैकस्यैव सर्वासु गमनं दिक्षु युज्यते ।
[श्लो० वा० सू० ६ श्लो० ११३] पृ. ३८
न चैतस्यानुमानत्वं पक्षधर्मांद्यसम्भवात् ।
प्राक् प्रमेयस्य सादृश्यं न धर्मत्वेन गृह्यते ॥
[श्लो० वा० उपमान० श्लो० ४३] पृ. ५७७ (१)
न जातिशब्दो भेदानां वाचकः आनन्त्यात् ।
[ ] पृ. १७५ (६)
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥
[महाभा० आदिप० अ० ७८ श्लो० १२] पृ. १५३
न तदात्मा परात्मेति सम्बन्धे सति वस्तुभिः ।
व्यावृत्तवस्त्वधिगमोऽप्यर्थादेव भवत्यतः ॥
[तत्त्वसं० का० १०१४] पृ. २०३ (२५,२६)
न तावदिन्द्रियेणैषा नास्तीत्युत्पद्यते मतिः ।
भावांशेनैव संयोगे योग्यत्वादिन्द्रियस्य हि ॥
[श्लो० वा० अभावप० श्लो० १८] पृ. ३५१,५८० (५)
न तावद्यत्र देशेऽसौ न तत्कालेऽवगम्यते ।
भवेन्नित्यविभुत्वाच्चेत् सर्वार्थेष्वपि तत्समम् ॥
[श्लो० वा० शब्दप० ८७] पृ. ५७५ (४)
न त्वेकात्मन्युपेयानां हेतुरस्ति विलक्षणः ॥
[श्लो० वा० सू० ५ श्लो० ८६] पृ. २७८
नदीपूरोऽप्यधोदेशे दृष्टः सन्नुपरिस्थिताम् ।
नियम्यो गमयत्येव वृत्तां वृष्टिं नियामिकाम् ॥
[ ] पृ. ५७० (३)
ननु गुणव्यतिरिक्तो गुणी उपलभ्यत एव तद्रूपादिगुणाग्रहणेऽपि तस्य ग्रहणात् । तथाहि मन्दमन्दप्रकाशे तद्गतसितादिरूपानुपलम्भेऽपि उपलभ्यते बलाकादिः, खगतशुक्लगुणाग्रहणेऽपि च सन्निहितोपधानावस्थायां गृह्यते स्फटिकोपलः, तथाऽऽप्रपतीनकञ्चुकावच्छन्नशरीरः पुमांस्तद्गतश्यामादिरूपाप्रतिभासेऽपि 'पुमान्' इति प्रत्ययोत्पत्तेः प्रतिभात्येव, कुङ्कुमादिरक्तं च वस्त्रं तद्रूपस्य संसर्गिरूपेणाऽभिभूतस्य अप्रकाशेऽपि

प्रकाशत एव 'वस्त्रम्' इति प्रत्ययोत्पत्तेः अध्यक्षत एव गुण-गुणिनोर्भेदः सिद्धः । तथा, अनुमानतोऽपि तयोर्भेदः । तथाहि—यद् यद्व्यवच्छेद्यत्वेन प्रतीयते तत् ततो भिन्नम्, यथा देवदत्ताद् अश्वः, गुणिव्यवच्छेद्यत्वेन प्रतीयन्ते च नीलोत्पलस्य रूपादय इति । तथा, पृथिव्यप्-तेजो-वायवो द्रव्याणि रूप-रस-गन्ध-स्पर्शेभ्यो भिन्नानि, एकवचन-बहुवचनविषयत्वात्, यथा 'चन्द्रः' 'नक्षत्राणि' इति, तथा च 'पृथिवी' इति एकवचनम् 'रूप-रस-गन्ध-स्पर्शाः' बहुवचनमुपलभ्यते इति तयोर्भेदः । अवयवाऽवयविनोरप्यनुमानतः सिद्धो भेदः । तथाहि—विवादाधिकरणेभ्यस्तन्तुभ्यो भिन्नः पटः भिन्नकर्तृकत्वात् घटादिवत्, भिन्नशक्तिकत्वाद् वा विषागदवत्, पूर्वोत्तरकालभावित्वाद् वा पितापुत्रवत्, विभिन्नपरिमाणत्वाद् वा कुवल-बिल्ववत् इति । विरुद्धधर्माध्यासनिबन्धनो ह्यन्यत्रापि भावानां भेदः, स च अप्यस्ति इति कथं न भेदः ? यदि चावयवी अवयवेभ्यो भिन्नो न भवेत् स्थूलप्रतिभासो न स्यात्, परमाणूनां सूक्ष्मत्वात् । न च अन्यादृग्भूतः प्रतिभासः अन्यादृगर्थव्यवस्थापकः अतिप्रसङ्गात् । न च स्थूलाभावे 'परमाणुः' इति व्यपदेशोऽपि सम्भवी, स्थूलापेक्षित्वाद् अणुत्वस्य । [ ]
पृ. ६५८(९), ६५९ (१,२,३,४,५,६,७,८.)
ननु ज्ञानफलाः शब्दाः । [ ]
पृ. २०४ (१८)
ननु ज्ञानफलाः शब्दा न चैकस्य फलद्वयम् ।
अपवाद-विधिज्ञानं फलमेकस्य वः कथम् ॥
[भामहालं० परि० ६ श्लो० १८] पृ. १८६ (४,५)
ननु भावादभिन्नत्वात् सम्प्रयोगोऽस्ति तेन च ।
न ह्यत्यन्तमभेदोस्ति रूपादिवदिहापि नः ॥
[श्लो० वा० अभावप० १९] पृ. ५८१ (११)
न नैवमिति निर्देशे निषेधस्य निषेधनम् ।
एवमित्यनिषेध्यं तु स्वरूपेणैव तिष्ठति ॥
[ ] पृ. १९९
नन्वन्यापोहकृच्छब्दो युष्मत्पक्षेनुवर्णितः ।
निषेधमात्रं नैवेह प्रतिभासैव (सेऽत्र) गम्यते ॥
[तत्त्वसं० का० १०] पृ. १८५ (१४,१५,१६)
न प्रत्यक्षपराक्षाभ्यां मेयस्यान्यस्य सम्भवः ।
तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते ॥
[ ] पृ. ५७४
न प्रत्यात्मवेदनीयस्य सुखस्य प्रतीतेः प्रत्याख्यानम् ।
[ ] पृ. १५३
न याति न च तत्रासीदस्ति पश्चान्न वांशवत् ।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः ॥
[ ] पृ. ६९१ (२)
नयास्तव स्यात्पदलाञ्छना इमे रसोपविद्धा इव लोहधातवः ।
भवन्त्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितैषिणः ॥
[बृहत्स्वयम्भूस्तोत्रम् ६५] पृ. ७५७

न रेखादयः कादित्वेन कादीनां गमकाः, एवं रेखागवयादयोऽपि न गवयत्वेन सत्यगवयादीनाम्; अपि तु सारूप्यात् एवंरूपा गवयादयः सत्याः, वर्णप्रतिपत्त्युपाया अपि रेखादयः पुरुषसमयात् वर्णानां स्मारकाः न तु तेषां वर्णत्वेन वर्णप्रतिपादकत्वम्, रेखादिरूपेण च सत्त्वाद् गृहीतसमयानां पुनरुपलभ्यमानाः समयं स्मारयन्ति समयग्रहणाद् यथैव व्युत्पन्नानां बालादिषु प्रवृत्तिः । [ ]
पृ. २७९ (१८,१९,२०)
नर्ते तदागमात् सिध्येद् न च तेनागमो विना ।
[श्लोक० वा० सू० २ श्लो० १४२] पृ. ५१
न वाच्यं वाचकं चास्ति परमार्थेन किञ्चन ।
क्षणभङ्गिषु भावेषु व्यापकत्वयोगतः ॥
[तत्त्वसं० का० १०९०] पृ. २१६ (९,१०)
न विकल्पानुबद्धस्य स्पष्टार्थप्रतिभासिता ।
स्वप्नेऽपि स्मर्यते स्मार्त्तं न च तत् तादृगर्थदृग् ॥
[ ] पृ. ५०२ (१४)
न वै किञ्चिदेकं जनकम् । [ ]
पृ. ४०० (१०), ५२७ (४)
न वै हिंस्रो भवेत् । [ ]
पृ. ७३१ (२)
न व्यक्तशक्तिरीशोऽयं क्रमेणाप्युपपद्यते ।
व्यक्तशक्तिरतोऽन्यश्चेत् भावो ह्येकः कथं भवेत् ॥
[ ] पृ. ७१७ (१)
न शाबलेयाद् गोबुद्धिः ततोऽन्यालम्बनापि वा ।
तदभावेऽपि सद्भावाद् घटे पार्थिवबुद्धिवत् ॥
[श्लो० वा० वन० श्लो० ४] पृ. ६९५
न स त्रिविधाद्धेतोरन्यत्रास्तीत्यत्रैव नियत उच्यते ।
[ ] पृ. ५५८ (९)
न सदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥
[सां० का० ९] पृ. २७ (११)
न सर्वलोकसाक्षिकं सुखं प्रत्याख्यातुं शक्यम् ।
[ ] पृ. १५३ (४)
न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वशब्देन भासते ॥
[वाक्यप० श्लो० १२४ प्रथमका०] पृ. ३८० (९,१०)
न हि तत् केवलं नीलं न च केवलमुत्पलम् ।
समुदायाभिधेयत्वात् । [ ]
पृ. १९६ (२१)
नहि तत् क्षणमप्यास्ते जायते वा प्रमात्मकम् ।
येनार्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत् ॥
[श्लो० वा० सू० ४ श्लो० ५५] पृ. १०
नहि दृष्टेऽनुपपन्नम् । [ ]
पृ. ७५

नहि भिन्नावभासित्वेऽप्यर्थान्तरमेव रूपं नीलस्यानुभवात् ।
[ ] पृ. ३६४
न हि स्मरणतो यत् प्राक् तत् प्रत्यक्षमितीदृशम् ॥
[श्लो० वा० प्रत्यक्ष० श्लो० २३४] पृ. ३१९
न हेतुरस्तीति वदन् सहेतुकं ननु प्रतिज्ञां स्वयमेव बाधते ।
अथापि हेतुप्रणयालसो भवेत् प्रतिज्ञया केवलयाऽस्य किं भवेत् ॥
[ ] पृ. ७१३-१४
नह्यप्रत्यक्षे कार्ये कारणभावगतिः ।
[ ] पृ. १४
नह्यवश्यं कारणानि फलवन्ति । [ ] पृ. ३४६
न ह्यस्य द्रष्टुर्यदेतद् मम गौरं रूपं सोऽहमिति भवति प्रत्ययः, केवलं मतुब्लोपं कृत्वैवं निर्दिशति ।
[न्यायवा० पृ० ३४१ पं० २३] पृ. ८०
नह्याभ्यामर्थं परिच्छिद्य प्रवर्त्तमानोऽर्थक्रियायां विसंवाद्यते ।
[ ] पृ. ४६८
न ह्येकं किञ्चिज्जनकम्, सामग्री वै जनिका ।
[ ] पृ. १२
नाकारणं विषयः । [ ] पृ. ६५८
नाक्रमात् क्रमिणो भावः ।
[ ] पृ. १८४ (१५)
नाक्रमात् क्रमिणो भावो नाप्यपेक्षा विशेषिणः ।
क्रमाद्भवन्ती धीर्ह्रीयात् क्रमं तस्यापि सेत्स्यति ॥
[ ] पृ. ३३६ (२२,२३)
नागृहीतविशेषणा विशेष्ये बुद्धिः ।
[ ] पृ. ८४,५७४ (७), ६१६,७२४,
नातीन्द्रियार्थप्रतिषेधो विशेषस्य कस्यचित् साधनेन निराकरणेन वा कार्यः-तदभावे विशेषसाधनस्य तन्निराकरणहेतोर्वाऽऽश्रयासिद्धत्वात्-किन्त्वतीन्द्रियमर्थमभ्युपगच्छंस्तत्सिद्धौ प्रमाणं प्रष्टव्यः । स चेत् तत्सिद्धौ प्रयोजकं हेतुं दर्शयति 'ओम्' इति कृत्वाऽसौ प्रतिपत्तव्यः । अथ न दर्शयति प्रमाणाभावादेवासौ नास्ति, नतु विशेषाभावात् ।
[ ] पृ. ९८
नातोऽसतोऽपि भावत्वमिति क्लेशो न कश्चन ।
[तत्त्वसं० का० १०८४] पृ. २१४ (२४)
नादेनाऽऽहितबीजायामन्त्येन ध्वनिना सह ।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवभासते ॥
[वाक्यप० प्र० का० श्लो० ८५] पृ. ४३५ (२)
नाधाराधेयवृत्त्यादिसम्बन्धश्चाप्यभावयोः ॥
[श्लो० वा० अपो० श्लो० ८५] पृ. १९१ (१६)
नाननुकृतान्वयव्यतिरेकं कारणं नाका(नाक)रणं विषयः ।
[ ] पृ. ३१२,५१० (१) ५७३ (६) ७२८
नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥
[ ] पृ. ४८३ (७,८,९)

नापोह्यत्वमभावानामभावाभाववर्जनात् ।
व्यक्तोऽपोहान्तरेऽपोहस्तस्मात् सामान्यवस्तुनः ॥
[श्लो० वा० अपो० श्लो० ९५] पृ. १९४
नाभावोऽपोह्यते ह्येवं नाभावो भाव इत्ययम् ।
भावस्तु न तदात्मेति तस्येष्टैवमपोह्यता ॥
[तत्त्वसं० का० १०८१] पृ. २१४
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।
[ ] पृ. १५०
नामूर्त्तं मूर्त्ततामेति मूर्त्तं नायात्यमूर्त्तताम् ।
द्रव्यं कालत्रयेऽपीत्थं च्यवते नात्मरूपतः ॥
[ ] पृ. ४५६ (१)
नार्थशब्दविशेषस्य वाच्यवाचकतेष्यते ।
तस्य पूर्वमदृष्टत्वात् सामान्यं तूपदेक्ष्यते ॥
[ ] पृ. १९५ (१३,१४)
नावश्यं कारणानि तद्वन्ति भवन्ति ।
[ ] पृ. ५६२
नासिद्धे भावधर्मोऽस्ति ।
[ ] पृ. ४८० (३), ५६२ (९)
नासौ न पचतीत्युक्ते गम्यते पचतीति हि ।
औदासीन्यादियोगश्च तृतीये नञि गम्यते ॥
[तत्त्वसं० का० ११५७] पृ. २२५
नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम् ।
गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते ॥
[श्लो० वा० अभाव० श्लो० ३] १८६ (१२), ५८१
नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
अपेक्षातो हि भावानां कादाचित्कत्वसम्भवः ॥
[ ] पृ. ६९, ७४
नित्य-नैमित्तिके कुर्यात् प्रत्यवायजिहासया ।
मोक्षार्थी न प्रवर्त्तेत तत्र काम्य-निषिद्धयोः ॥
[ ] पृ. १५१
नित्य-नैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।
ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत् ॥
[ ] पृ. १५०
नित्यमेकमण्डव्यापि निष्क्रियम् ।
[ ] पृ. ७३१
नित्यानुमेयत्वात् समवायस्यानुमानगोचरता, तेनायमदोष इति । तच्चानुमानम्—'इह तन्तुषु पटः' इति बुद्धिस्तन्तु-पटव्यतिरिक्तसम्बन्धपूर्विका 'इह इति बुद्धित्वात्' इह कंसपात्र्यां जलबुद्धिवत् । [ ] पृ. १०७
'निरंशं वस्तु सर्वात्मना विषयीकृतं नांशेन' इत्येवं विकल्पो नावतरति, सर्वशब्दस्यानेकार्थविषयत्वात् एकशब्दस्य चावयववृत्तित्वात् । [ ] पृ. २२०
निरन्वयविनश्वरं वस्तु प्रतिक्षणमवेक्षमाणोऽपि नावधारयति ।
[ ] पृ. ७२८

निराकारमेव ज्ञानमर्थोन्मुखमुपलभ्यमानं प्रतिनियमेन कथं सर्वसाधारणमिति सिद्धः प्रतिकर्मप्रत्ययः ।
[ ] पृ. ४६३
निराकारा नो बुद्धिः । [ ] पृ. ४६२
निराकारो बोधोऽर्थसहभाव्येकसामग्र्यधीनस्तत्रार्थे प्रमाणम् ।
[ ] पृ. ४१९
निर्गुणा गुणाः । [ ] पृ. ६७६ (४)
निर्विशेषं हि सामान्यं भवेच्छशविषाणवत् ॥
[श्लो० वा० आकृति० श्लो० १०] पृ. ४०७
यन्न निश्चीयते रूपं तत् तेषां विषयः कथम् ॥
[ ] पृ. ३८२ (२)
निश्चीयमानानिश्चीयमानयोर्भेदान्निश्चायकं वाध्यक्षं परपक्षे ।
[ ] पृ. ३८६ (२,३)
निषेधमात्रं नैवेह शाब्दे ज्ञानेऽवभासते ।
[तत्त्वसं० का० १०१३] पृ. २०३ (१३)
निष्पत्तेरपराधीनमपि कार्यं स्वहेतुना ।
सम्बध्यते कल्पनया किमकार्यं कथञ्चन ॥
[ ] पृ. ६३
निःसामान्यानि सामान्यानि ।
[ ] पृ. २२२ (६), ५६६
नीलोत्पलादिशब्दा अर्थान्तरनिवृत्तिविशिष्टानर्थानाहुः ।
[ ] पृ. १९१, २१२ (२०,२१)
नेदं प्रत्यक्षलक्षणविधानं किन्तु लोकप्रसिद्धप्रत्यक्षानुवादेन प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वविधानम् ।
[ ] पृ. ५३५ (३)
नेष्टोऽसाधारणस्तावद् विशेषो निर्विकल्पनात् ।
तथा च शाबलेयादिरसामान्यप्रसङ्गतः ॥
[श्लो० वा० अपो० श्लो० ३] पृ. १८७ (१५,१६,१७,१८)
नेह नानास्ति किञ्चन ।
[बृहदा० उ० अ० ४ ब्रा० ४ मं० १९] पृ. २७३ (७)
नैकदेशत्रासंसादृश्येभ्योऽर्थान्तरभावात् ।
[न्यायद० २-१-३८] पृ. ५६३
नैकरूपा मतिर्गोत्वे मिथ्या वक्तुं च शक्यते ।
नात्र कारणदोषोऽस्ति बाधकः प्रत्ययोऽपि वा ॥
[श्लो० वा० वन० श्लो० ४९] पृ. ६९६
नैकात्मतां प्रपद्यन्ते न भिद्यन्ते च खण्डशः ।
स्वलक्षणात्मका अर्था विकल्पः क्रियते त्वसौ ॥
[तत्त्वसं० का० १०४९] पृ. २०९ (१६,१७)
नैगम-सङ्ग्रह-व्यवहारर्जुसूत्र-शब्द--समभिरूढैवम्भूता नयाः ।
[तत्त्वार्थ० १-३३] पृ. ६५५,६५६
नैव दानादिचित्तात् स्वर्गः यदि ततो भवेत् तदनन्तरमेवासौ भवेत् अन्यथा मृताच्छिखिनः केकायितं भवेत् तस्मात् ततो धर्मस्तस्माच्च स्वर्गः ।
[ ] पृ. ५०५ (७)

नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् ।
शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात् ॥
[ ] पृ. ५०७
नोभयमनर्थकम् । [ ] पृ. १५२ (२)

प

पक्षधर्मतानिश्चयः प्रत्यक्षतः क्वचित् ।
[ ] पृ. ५१२ (१२)
पक्षधर्मतानिश्चयः प्रत्यक्षतोऽनुमानतो वा ।
[ ] पृ. ७६
पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः ।
अविनाभावनियमाद्धेत्वाभासास्ततोऽपरे ॥
[ ] पृ. ५५६ (२)
पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।
शिखी मुण्डी जटी वाऽपि मुच्यते नात्र संशयः ॥
[ ] पृ. २८१ (८)
पदमप्यधिकाभावात् स्मारकान्न विशिष्यते ।
[श्लो० वा० शब्दप० श्लो० १०७] पृ. ७४२
पदं लभ्यधिकाभावात् स्मारकान्न विशिष्यते ।
अथाधिक्यं भवेत् किञ्चित् स पदस्य न गोचरः ॥
[श्लो० वा० शब्दप० श्लो० १०७] पृ. ४३९ (८,९,१०)
पदार्थपूर्वकत्वात्साद् वाक्यार्थोऽयमवस्थितः ।
[श्लो० वा० वाक्याधि० श्लो० ३३६] पृ. ७४३
पदार्थानां तु मूलत्वमिष्टं तद्भावभावतः ।
[श्लो० वा० वाक्याधि० श्लो० १११] पृ. ७४३
परमाणूत्पादकामिमतं कारणं सद्धर्मोपेतं न भवति, सत्त्वप्रतिपादकप्रमाणाविषयत्वात्, शशशृङ्गवत् ।
[ ] पृ. ६५८
परमात्माऽविभागोऽप्यविद्याविप्लुतमानसैः ।
सुख-दुःखादिभिर्भागैर्भेदवानिव लक्ष्यते ॥
[ ] पृ. ४१४
परलोकिनोऽभावात् परलोकाभावः ।
[ ] पृ. ७३१ (५)
पराधीनेऽपि चैतस्मिन्नानवस्था प्रसज्यते ।
प्रमाणाधीनमेतद्धि स्वतस्तच्च प्रतिष्ठितम् ॥
[तत्त्वसं० का० २८५३] पृ. १८
परानुग्रहार्थमीश्वरः प्रवर्तते यथा कश्चित् कृतार्थो मुनिरात्महिताऽहितप्राप्ति-परिहारार्थासम्भवेऽपि परहितार्थमुपदेशादिकं करोति, तथा ईश्वरोऽपि आत्मीयामैश्वर्यविभूतिं विख्याप्य प्राणिनोऽनुग्रहीष्यन् प्रवर्तत इति अथवा शक्तिस्वाभाव्यात् यथा कालस्य वसन्तादीनां पर्यायेण अभिव्यक्तौ स्थावर-जङ्गमविकारोत्पत्तिः स्वभावतः तथैव ईश्वरस्यापि आविर्भावाऽनुग्रहसंहारशक्तीनां पर्यायेण अभिव्यक्तौ प्राणिनामुत्पत्ति-स्थिति-प्रलयहेतुत्वम् । [ ] पृ. ७१६ (७,८)
परार्थाश्चक्षुरादयः । [ ] पृ. ३०९

परार्थं प्रयुज्यमानाः शब्दा वतिमन्तरेणापि तमर्थं गमयन्ति।
[ ] पृ. १३३
परिणामवर्तैना-विधिपराऽपरत्वे ।
[प्रशमर० प्र० श्लो० २१८] पृ. ६४ (५,६)
परिमाणव्यवहारकारणं परिमाणं महद्, अणु, दीर्घम्, ह्रस्वमिति चतुर्विधम् । [ ] पृ. ६७५ (२)
परोऽप्येवं ततश्चास्य सम्बन्धवदनादिता ।
तेनेयं व्यवहारात् स्यादकूटस्थेऽपि नित्यता ॥
[श्लो० वा० सू० ६ श्लो० २८९] पृ. ३९
पलालं न दहत्यग्निर्दह्यते न गिरिः क्वचित् ।
नासंयतः प्रव्रजति भव्यजीवो न सिद्धयति ॥
[ ] पृ. ३१७ (११,१२)
पश्चादुपलभ्यते बुद्धिः [ ] पृ. ३६३ (६)
पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः ।
पदविक्षेपशब्दं च श्वेताश्वो धावतीति धीः ॥
[श्लो० वा० वाक्याधि० श्लो० ३५८] पृ. ७४१ (३)
पश्यन्नपि न पश्यति । [ ] पृ. २४५,५०६
पिण्डं सेज्जं च वत्थं च चउत्थं पायमेव य ।
अकप्पियं ण इच्छेज्जा पडिगाहेज्ज कप्पियं ॥
[दशवै० अ० ६ गा० ४७] पृ. ७५१
पिंडविसोही समिई भावण-पडिमाइ इंदियनिरोहो ।
पडिलेहण-गुत्तीओ अभिग्गहा चेव करणं तु ॥
[ओघनि० गा० ३] पृ. ७५५ (३)
पिण्डभेदेषु गोबुद्धिरेकगोत्वनिबन्धना ।
गवाभासैकरूपाभ्यामेकगोपिण्डबुद्धिवत् ॥
[श्लो० वा० वन० श्लो० ४४] पृ. ६९५ (३,४)
पित्रोश्च ब्राह्मणत्वेन पुत्रब्राह्मणतानुमा ।
सर्वलोकप्रसिद्धा न पक्षधर्ममपेक्षते ॥
[ ] पृ. ५५, ५७० (४)
पीनो दिवा न भुङ्क्ते इत्येवमादिवचःश्रुतौ ।
रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते ॥
[श्लो० वा० अर्थाप० श्लो० ५१] पृ. ५७९
पुनरवगृहीतविषयाकाङ्क्षणमीहा ।
[ ] पृ. ५५३ (४)
पुरुष एवेदं सर्वम् ।
[श्वेताश्वत० उ० अ० ३, १५] पृ. ३१०
पुरुष एवेदं सर्वं यद् भूतम् ।
[ऋक्सं० मण्ड० १० सू० ९० ऋ० २] पृ. २७३ (१०)
पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
[ऋ० वे० म० १० सू० ९०] पृ. ७१५ (४)
पुरुष एवैकः सकललोकस्थिति-सर्ग-प्रलयहेतुः प्रलयेऽपि अलुप्तज्ञानातिशयशक्तिः ।
[ ] पृ. ७१५ (२)
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरभिसंयोगात् तत्कृतः सर्गः ॥
[साङ्ख्यका० २१] पृ. ३०७ (१६)
पुरुषो जन्मिनां हेतुर्नोत्पत्तिविकलत्वतः ।
गगनाम्भोजवत् सर्वमन्यथा युगपद् भवेत् ॥
[ ] पृ. ७१५ (७)
पुव्विं दुच्चिण्णाणं दुप्पडिकंताणं कडाणं कम्माणं ।
[ ] पृ. ९३ (३)
पूर्वरूपसाधर्म्यात् तत् तथाप्रसाधितं नानुमेयतामतिपतति ।
[ ] पृ. ७५ (२)
पूर्वापरीभूतं भावमाख्यातमाचष्टे ।
[नि० अ० १ ख० १] पृ. ७३९
पृथिव्यादिगुणा रूपादयस्तदर्थाः ।
[ ] पृ. ५१९ (१६)
दिव्यादिग्रहणेन त्रिविधं द्रव्यमुपलब्धिलक्षणप्राप्तं गृह्यते गुणग्रहणेन सर्वो गुणोऽस्मदाद्युपलब्धिलक्षणप्राप्त आश्रितत्वविशेषणलाभ्याम् । [ ] पृ. ५१९
प्रकृतीशादिजन्यत्वं न हि वस्तु प्रसिद्धयति ।
[तत्त्वसं० का० १०८३] पृ. २१४ (२३)
प्रकृतेर्महान् महतोऽहंकारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥
[सांख्यका० का० २२] पृ. २८१ (१) ७३३ (४)
प्रतिज्ञार्थैकदेशो हि हेतुस्तत्र प्रसज्यते ।
पक्षे धूमविशेषे हि सामान्यं हेतुरिष्यते ॥
[श्लो० वा० शब्दप० ६३] पृ. ५७५
प्रतिपिपादयिषितविशेषो धर्मी ।
[ ] पृ. ५९२
प्रतिभासतोऽध्यक्षतः । [ ] पृ. ३७१ (६)
प्रतिभासोपमाः सर्वे धर्माः ।
[ ] पृ. ३७१ (८)
प्रतिसूर्यश्च काल्पनिकः प्रकाशक्रियां कुर्वन् दृष्ट एव ।
[ ] पृ. २८० (८)
प्रत्यक्षं कल्पनापोढमभ्रान्तम् ।
[ ] पृ. ५१८ (१५)
प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति ॥
[ ] पृ० ५०३
प्रत्यक्षतोऽनुमानतो वा । [ ] पृ. ३१८
प्रत्यक्षनिराकृतो न पक्षः । [ ] पृ. ३५१ (६)
प्रत्यक्षमन्यत् । [तत्त्वार्थ० १-१२] पृ. ५९५
प्रत्यक्षमेवैकं प्रमाणम् । [ ] पृ. ७३,५५६

प्रत्यक्षस्याभावविषयत्वविरोधान्न ततः प्रमाणान्तराभावोऽवसातुं शक्यः नापि कार्यस्वभावलक्षणादनुमानात् कार्यस्वभावयोर्विधिसाधकत्वेनाभावसाधने व्यापारानभ्युपगमात् कारणव्यापकानुपलब्ध्योस्तु अत्यन्तासत्त्वयोपगते प्रमाणान्तरेऽभावसाधकत्वेन व्यापार एव न सङ्गच्छते अत्यन्तासतस्तस्य कार्यत्वेन व्याप्यत्वेन वा कस्यचिदसिद्धेः । तयोश्च कार्यकारणव्याप्यव्यापकभावसिद्धावेव व्यापाराद् विरुद्धविधिरप्यत्रासम्भवी सहानवस्थानलक्षणस्य विरोधस्यात्यन्तासत्यसिद्धेः ।
[ ] पृ. ५७३ (४)
प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते ।
सात्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि ॥
[श्लो० वा० अभावप० श्लो० ११] पृ. २२,५८० (३)
प्रत्यक्षाद्यवतारश्च भावांशो गृह्यते यदा ।
व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षित ॥
[श्लो० वा० अभावप० श्लो० १७] पृ. ५८१ (८,९,१०)
प्रत्यक्षाऽनुपलम्भसाधनं कार्यकारणभावम् ।
[ ] पृ. ९५
प्रत्यक्षेणावबुद्धेऽपि सादृश्ये गवि च स्मृते ।
विशिष्टस्यान्यतोऽसिद्धेरुपमानप्रमाणता ॥
[श्लो० वा० उपमान० श्लो० ३८] पृ. ५७६
प्रत्यक्षेऽपि यथा देशे स्मर्यमाणे च पावके ।
विशिष्टविषयत्वेन नानुमानाप्रमाणता ॥
[श्लो० वा० उपमान० श्लो० ३९] पृ. ५७६
प्रत्येकसमवेताऽपि जातिरेकैव बुद्धितः ।
'नञ्'युक्तेष्विव वाक्येषु ब्राह्मणादिनिवर्तनम् ॥
[श्लो० वा० वन० श्लो० ४७] पृ. ६९६
प्रत्येकसमवेतार्थविषयैवाथ गोमतिः ।
प्रत्येकं कृत्स्नरूपत्वात् प्रत्येकव्यक्तिबुद्धिवत् ॥
[श्लो० वा० वन० श्लो० ४६] पृ. ६९५ (५)
प्रमाणं हि प्रमाणेन यथा नान्येन साध्यते ।
न सिध्यत्यप्रमाणत्वमप्रमाणात् तथैव हि ॥
[तत्त्वसं० का० २८६४] पृ. १८
प्रमाणतर्कसाधनोपालम्भः-[न्यायद० १,२,१] पृ. ५६० (२)
प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् ।
[वात्स्या० भा० अ० १ सू० १] पृ. १२०, ५०९
प्रमाण-नयैरधिगमः । [तत्त्वार्थ० अ० १ सू० ६] पृ. ४२०
प्रमाणनिबन्धना प्रमेयव्यवस्थितिः ।
[तत्त्वोपप्लव] पृ. ७३-७४
प्रमाणपञ्चकं यत्र ।
[श्लो० वा० सू० ५ अभाव० श्लो० १] पृ. ४१
प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥
[श्लो० वा० सू० ५ अभावप० श्लो० १] पृ. २३,५८०
प्रमाणमविसंवादि । [ ] पृ. ४६५ (६)
प्रमाणमविसंवादि ज्ञानम् । [ ] पृ. १४,१५
प्रमाणमविसंवादि ज्ञानम् अर्थक्रियास्थितिरविसंवादनम् ।
[ ] पृ. १५,५१३ (५)
प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवेत् ।
अदृष्टं कल्पयत्यन्यं साऽर्थापत्तिरुदाहृता ॥
[श्लो० वा० अर्थाप० श्लो० १] पृ. ५७८ (१२,१३,१४)
प्रमाणस्य प्रमाणेन न बाधा नाप्यनुग्रहः ।
बाधायामप्रमाणत्वमानर्थक्यमनुग्रहः ॥
[ ] पृ. ४५९ (११,१२)
प्रमाणस्य सतोऽत्रैवान्तर्भावाद् द्वे एव प्रमाणे ।
[ ] पृ. ५९०
प्रमाणस्यागौणत्वादनुमानादर्थनिश्चयो दुर्लभः ।
[ ] पृ. ७० (२)
प्रमाणाधीना हि प्रमेयव्यवस्था । पृ. ३८४ (१)
प्रमाणाभावनिर्णीतचैत्राभावविशेषितात् ।
गेहाच्चैत्रबहिर्भावसिद्धिर्या स्त्रिह दर्शिता ॥
[श्लो० वा० अर्थाप० श्लो० ८] पृ. ५७९
प्रमातृ-प्रमेयाभ्यामर्थान्तरमव्यपदेश्याव्यभिचारिव्यवसायात्मकज्ञाने कर्त्तव्येऽर्थः सहकारी विद्यते यस्य तद् अर्थवत् प्रमाणम् । [ ] पृ० १०९
प्रमेया च तुलाप्रामाण्यवत् । [न्यायद० २,१,१५] पृ. ५२२,५२८ (३)
प्रयोगनियम एव एकलक्षणो हेतुः ।
[ ] पृ. ७२६
प्रसज्यप्रतिषेधस्तु गौरगौर्न भवत्ययम् ।
इति विसृष्ट एवायमन्यापोहोऽवगम्यते ॥
[तत्त्वसं० का० १०१०] पृ. २०२ (१७,१८)
प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ।
[न्यायद० १,१,६] पृ. ५७७ (८)
प्रहाणे नित्यसुखरागस्याप्रतिकूलत्वम् । नास्य नित्यसुखाभावः (नित्यसुखभावः) प्रतिकूल इत्यर्थः । यद्येवं मुक्तस्य नित्यं सुखं भवति, अथापि न भवति नास्योभयोः पक्षयोर्मोक्षाधिगमाभावः ।
[वात्स्या० भा० अ० १ आ० १ सूत्र २२] पृ. १४४,१५४ (७)
प्राक् शब्दयोजनात् मतिज्ञानमेतत् शेषमनेकप्रभेद (दं) शब्दयोजनादुपजायमानमविशदं ज्ञानं श्रुतम् ।
[ ] पृ. ५५३
प्रागगौरिति विज्ञानं गोशब्दश्राविणो भवेत् ।
येनागोः प्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः ॥
[भामहालं० परि० ६ श्लो० १९] पृ. १८६ (६,७)

प्रापणशक्तिः प्रामाण्यम् तदेव च प्रापकत्वम् अन्यथा ज्ञानान्तरस्वभावत्वेन व्यवस्थितायाः प्राप्तेः कथं प्रवर्त्तकज्ञानशक्तिस्वभावता ? तत्र यद्यपि प्रत्यक्षं वस्तुक्षणग्राहि तद्ग्राहकत्वं च तस्य प्रदर्शकत्वं तथापि क्षणिकत्वेन तस्याप्राप्तेः तत्सन्तान एव प्राप्यत इति सन्तानाध्यवसायोऽध्यक्षस्य प्रदर्शकव्यापारो द्रष्टव्यः, अनुमानस्य तु वस्त्वग्राहकत्वात् तत्प्रापकत्वं यद्यपि न सम्भवति तथापि स्वाकारस्य बाह्यवस्त्वध्यवसायेन पुरुषप्रवृत्तौ निमित्तभावोऽस्तीति तस्य तत्प्रापकमुच्यते ।

[ ] पृ. ४६८ (२,३,४,५)

प्राप्तव्यो नियतिबलाश्रयेण योर्थः
सोऽवश्यं भवति नृणां शुभोऽशुभो वा ।
भूतानां महति कृतेऽपि हि प्रयत्ने
नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥

[ ] पृ. ७१४ (७)

प्रामाण्यं व्यवहारेण । [ ]

[ ] पृ. १११,४९७ (१२)

प्रामाण्यं व्यवहारेण शास्त्रं मोहनिवर्तनम् ।

पृ. ५०८ (३)

प्रामाण्यं व्यवहारेणार्थक्रियालक्षणेन ।

[ ] पृ. १५

प्रामाण्यग्रहणात् पूर्वं स्वरूपेणैव संस्थितम् ।
निरपेक्षं स्वकार्ये च । [श्लो०वा० सू० २ श्लो० ८३]

पृ. ७ (७,८)

प्रेरणाजनिता बुद्धिर्न प्रमाणं न चाप्रमा ।
गुण-दोषविनिर्मुक्तकारणेभ्यः समुद्भवात् ॥

[ ] पृ. ११

प्रेरणाजनिता बुद्धिरप्रमा गुणवर्जितैः ।
कारणैर्जन्यमानत्वादलिङ्गाऽऽप्तोक्तबुद्धिवत् ॥

[ ] पृ. ११

प्रेरणाजनिता बुद्धिः प्रमाणं दोषवर्जितैः ।
कारणैर्जन्यमानत्वाल्लिङ्गाऽऽप्तोक्ताक्षबुद्धिवत् ॥

[श्लो० वा० सू० २ श्लो० १८४] पृ. ११

प्रेरणैव धर्मे प्रमाणम् । [ ] पृ. ४१

ब

बन्धवियोगो मोक्षः । [ ] पृ. ७३६ (१)

बहुवयणेण दुवयणं । [ ] पृ. २७२ (८)

बह्वल्पविषयत्वेन तत्सङ्केतानुसारतः ।
सामान्य-भेदवाच्यत्वमप्येषां न विरुध्यते ॥

[तत्त्वसं० का० १०४५] पृ. २०९

बह्वारम्भपरिग्रहत्वं च नारकस्य ।

[तत्त्वा० अ० ६ सू० १६] पृ. ९३ (२)

बाधकप्रत्ययस्तावदर्थान्यत्वावधारणम् ।
सोऽनपेक्षप्रमाणत्वात् पूर्वज्ञानमपोहते ॥

[तत्त्वसं० का० २८६६] पृ. १९

बाधकान्तरमुत्पन्नं यद्यस्यान्विच्छतोऽपरम् ।
ततो मध्यमबाधेन पूर्वस्यैव प्रमाणता ॥

[तत्त्वसं० का० २८६८] पृ. १९

बाधाज्ञाने त्वनुत्पन्ने का शङ्का निष्प्रमाणका ।

[ ] पृ. ३४१ (९)

बाह्यं तपः परमदुश्चरमाचरंस्त्वमाध्यात्मिकस्य तपसः परिबृंहणार्थम् । [स्वयंभूस्तो० ८३] पृ. ७५० (१)

बुद्धिमत्कारणाधिष्ठितं महाभूतादिकं व्यक्तं सुख-दुःखनिमित्तं भवति, अचेतनत्वात्, कार्यत्वात्, विनाशित्वात्, रूपादिमत्त्वात्, वास्यादिवत् ।

[न्यायवा० पृ० ४५९] पृ. १०१

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ।

[न्यायद० १-१-१५] पृ. ४६२,६८३ (२)

बुद्धौ येऽर्था विवर्तन्ते तानाह जननादयम् ।
निवृत्त्या च विशिष्टत्वमुक्तमेषामनन्तरम् ॥

[तत्त्वसं० का० १०७१] पृ. २१२ (२५)

बुद्ध्यादीनां नवानां विशेषगुणानामात्यन्तिकः क्षय आत्मनो मुक्तिः । [ ] पृ. १३३

बुद्ध्यारूढमेवाकारं बाह्यवस्तुविषयं बाह्यवस्तुतया गृहीतं बुद्धिरूपत्वेनाविभावितं शब्दार्थम् ।

[ ] पृ. १८१ (२,३)

ब्रह्म-जीवात्मनामभेदेऽपि बिम्ब-प्रतिबिम्बवत् विद्याऽविद्याव्यवस्थां वर्णयन्ति । कथं पुनः संसारिषु विद्याया आगन्तुकयाः सम्भवः श्रवण-मनन-ध्यानाभ्यास-तत्साधनयम-नियम-ब्रह्मचर्यादिसाधनत्वात्, तस्य पूर्वमसत्त्वादविद्यावत् । स च श्रवण-मनन-पूर्वकध्यानाभ्यासोऽखिलभेदप्रतियोगी सुव्यक्तमेव वेदे दर्शितः-'स एष नेति न' [बृहदा० उ० अ० ३ ब्रा० ९ म० २६] इत्यादिना सप्रतियोगित्वाद् भेदप्रपञ्चं निवर्तयताऽऽत्मनापि प्रलीयते, यतः श्रोतव्यादीनामभावे न श्रवणादीनामुपपत्तिः, स तु तथाभूतोऽभ्यस्यमानः स्वविषयं प्रविलापयन्नात्मोपघाताय कल्पते तदभ्यासस्य परिशुद्धात्मप्रकाशफलत्वात् यथा रजःसम्पर्ककलुषे उदके द्रव्यविशेषचूर्णरजः प्रक्षिप्तं रजोऽन्तराणि संहरत् स्वयमपि संहियमाणं स्वस्यां स्वरूपावस्थामुपनयति एवं श्रवणादिभिर्भेदतिरस्कारविशेषात् स्वगतेऽपि भेदे समुच्छिन्ने स्वरूपे संसार्यवतिष्ठते यतोऽविद्ययैव परमात्मनः संसार्यात्मा भिद्यते तच्चिवृत्तौ कथं न परमात्मस्वरूपता यथा घटादिभेदे व्योम्नः परमाकाशतैव भवत्यवच्छेदकव्यावृत्तौ ? तत्रैतत् स्यात्-श्रवणादिभेदविषयत्वादविद्यास्वभावः कथं वा अविद्यैव अविद्यां निवर्त्तयति ? उक्तमत्र यथा रजसा रजसः प्रशमः एवं भेदातीतब्रह्मश्रवणमनन-ध्यानाऽभ्यासानां भेददर्शनविरोधित्वादविद्याया अप्यविद्यानिवर्त्तकत्वम् । तथा च तत्त्वविद्धिरत्रार्थे निदर्शनान्युक्तानि-यथा पयः पयो जरयति स्वयं च जीर्यति, यथा विषं विषान्तरं

शमयति स्वयं च शाम्यति [ ] एवं श्रवणादिषु द्रष्टव्यम् । [ ]

पृ.२७८,२७९ (१,२,३,४,५,६,७,८,९,१०,११,१२)

ब्राह्मणादिशब्दैस्त्वपो-जाति-श्रुतादिसमुदायो विना विकल्पसमुच्चयाभ्यामभिधीयते, यथा वनादिशब्दैर्धवादयः ।

पृ. १८० (२,३)

ब्राह्मणो न हन्तव्यः । [ ]

पृ. ७३१ (१)

भ

भद्दं मिच्छद्दंसणसमूहमइयस्स अमयसारस्स ।
जिणवयणस्स भगवओ संविग्गसुहाहिगम्मस्स ॥

[स० त० का० ३ गा० ६९] पृ. २९

भवतु सांव्यवहारिकं विशदमध्यक्षम् अनुमानादिकं तूपचरितरूपत्वाद्विषयाभावाच्च प्रमाणमनुपपन्नमिति कथं शब्दसंयोजनात् श्रुतं स्मृत्याद्युपपत्तिमत् ? तदुक्तम्—प्रमाणस्यागौणत्वादनुमानादर्थनिर्णयो दुर्लभः ।

[चार्वाकाः] पृ. ५५४ (१,२)

भविष्यंश्चैषोऽर्थो न ज्ञानकालेऽस्तीति न प्रतिभाति ।

[ ] पृ. ४९६ (५)

भविष्यति न दृष्टं च, प्रत्यक्षस्य मनागपि । सामर्थ्यम् ॥

[श्लो० वा० सू० २ श्लो० ११५] पृ. ३१ (२)

भव्वा वि ते अणंता सिद्धिपहं जे ण पावेंति ।

[ ] पृ. ७५१

भारतेऽपि भवेदेवं कर्तृस्मृत्या तु बाध्यते ।
वेदे तु तत्स्मृतिर्या तु साऽर्थवादनिबन्धना ॥

[श्लो० वा० सू० ७ श्लो० ३६७] पृ. ४०

भावतस्तु न पर्याया नापर्यायाश्च वाचकाः ।
न ह्येकं वाच्यमेतेषामनेकं चेति वर्णितम् ॥

[तत्त्वसं० का० १०३३] पृ. २०७ (७,८,९,१०)

भावनैव हि वाक्यार्थः सर्वत्राख्यातवत्तया ॥

[श्लो० वा० वाक्यार्थाधि० श्लो० ३३०] पृ. ७४२

भावान्तरविनिर्मुक्तो भावोऽत्रानुपलम्भवत् ।
अभावः सम्मतस्तस्य हेतोः किं न समुद्भवः ॥

[ ] पृ. १० (४), ३२० (१६)

भावान्तरात्मकोऽभावो येन सर्वो व्यवस्थितः ।
तत्राश्वादिनिवृत्त्यात्माऽभावः क इति कथ्यताम् ॥

[श्लो० वा० अपो० श्लो० २] पृ. १८७ (१३,१४)

भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्मादेकमनेकं वा रूपं तेषां न विद्यते ॥

[ ] पृ. ३७६ (१५)

भावे ह्येष विकल्पः स्याद् विधेर्वस्त्वनुरोधतः ।

[ ] पृ. ३३३ (११)

भाव्यनिष्ठो भावकव्यापारो भावना ।

[ ] पृ. ७४१

भुवनहेतवः प्रधान-परमाण्वदृष्टाः स्वकार्योत्पत्तावतिशयबुद्धिमन्तमधिष्ठातारमपेक्षन्ते; स्थित्वा प्रवृत्तेः, तन्तु-तुर्यादिवत् ।

[न्यायवा० पृ० ४५७] पृ. १०१

भूतिर्येषां क्रिया सैव कारकं सैव वोच्यते ।

[ ] पृ. ४५५ (१)

भूतेभ्यः । [न्यायद० १-१-१२] पृ. ५३१

भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद् वैश्वरूपस्य ॥

[साङ्ख्यका० १५] पृ. २८४ (१)

भेदे हि कारणं किञ्चिद् वस्तुधर्मतया भवेत् ।
अभेदे तु विरुध्येते तस्यैकस्य क्रियाऽक्रिये ॥

[ ] पृ. ३०१ (१४)

भोगाभ्यासमनुवर्धन्ते रागाः, कौशलानि चेन्द्रियाणाम् ।

[पात० यो० पा० २ सू० १५ व्यासभा०] पृ. १५३

भ्रान्तिरपि सम्बन्धतः प्रमा ।

[ ] पृ. ४८१ (५), ५०८ (१८)

भ्रान्तिसंवृतिसंज्ञानमनुमानानुमानिकम् ।
स्मार्ताभिलाषिकं चेति प्रत्यक्षाभं सतैमिरम् ॥

[ ] पृ. ५२७

म

मण्णइ तमेव सच्चं णिस्संकं जं जिणेहिं पन्नत्तं ।

[धर्मसं० ८१२] पृ. ७५६

मति-श्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु ।

[तत्त्वार्थ० अ० १ सू० २७] पृ. २६१ (१), ७३२

मति-श्रुताऽवधि-मनःपर्याय-केवलानि ज्ञानम् ।

[तत्त्वार्थ० १,९] पृ. ५९५

मतिस्मृतिसंज्ञाचिन्ताऽभिनिबोध इत्यनर्थान्तरम् ।

[तत्त्वार्थ० १-१३] पृ. ५५३ (८)

ममैवं प्रतिभासो यो न संस्थानवर्जितः (?)।
एवमन्यत्र दृष्टत्वादनुमानं तथा सति ॥

[ ] पृ. २५९ (१८)

महत्त्वनेकद्रव्यवत्त्वाद् रूपाच्चोपलब्धिः ।

[वैशेषिकद० अ० ४-१-६] पृ. १००,१०३,६५८

महाभूतादिव्यक्तं चेतनाधिष्ठितं प्राणिनां सुख-दुःखनिमित्तम्, रूपादिमत्त्वात्, तुर्यादिवत् । तथा पृथिव्यादीनि महाभूतानि बुद्धिमत्कारणाधिष्ठितानि स्वासु धारणाद्यासु क्रियासु प्रवर्तन्ते, अनित्यत्वात् वास्यादिवत् ।

[न्यायवा० पृ० ४६७] पृ. १००

मायोपमाः सर्वे धर्माः ।

[ ] पृ. ३७७, ४८८ (८)

मालादौ च महत्त्वादिरिष्टो यश्चौपचारिकः ।
मुख्याऽविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः ॥

[ ] पृ. ६७६

मिथ्याऽध्यारोपहानार्थं यत्नोऽसत्यपि मोक्तरि ।
[ ] पृ. १६२,४१८
मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत् तापवर्जिताः ।
[ ] पृ. १३३
मुख्यसंव्यवहारेण संवादि विशदं मतम् ।
ज्ञानमध्यक्षमन्यद्धि परोक्षमिति सङ्ग्रहः ॥
[ ] पृ. ५९५
मूर्च्छा परिग्रहः । [तत्त्वार्थ ७-१२] पृ. ७४७
मूर्ति-स्पर्शादिमत्त्वं च तेषामभिभवः सताम् ।
लगग्राह्यत्वमन्ये च सूक्ष्मा भागाः प्रकल्पिताः ॥
[श्लो० वा० सू० ६ श्लो० १०८] पृ. ३८
मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति-विकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥
[साङ्ख्यका० ३] पृ. २६
मूलप्रकृतेः कारणत्वमेव, भूतेन्द्रियलक्षणस्य षोडशकगणस्य कार्यत्वमेव, महदहङ्कारतन्मात्राणां च पूर्वोत्तरापेक्षया कार्यत्व-कारणत्वे च । [ ] पृ. २९६ (५)
मृत्पिण्ड-दण्ड-चक्रादि घटो जन्मन्यपेक्षते ।
उदकाहरणे तस्य तदपेक्षा न विद्यते ॥
[तत्त्वसं० का० २८५१] पृ. ४ (६)
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।
[बृहदा० उ० अ० ४ ब्रा० ४ मं० १९] पृ. २७३ (८)
मेयादिना सवितृप्रकाशः सविता वा स्वप्रकाश एवाच्छाद्यते ।
[ ] पृ. १५३
मेयाभावात् प्रमाभावनिर्णयेऽन्योन्यसंश्रयः ।
मेयाभावात् प्रमाणस्य तस्मात् तस्य विनिर्णयात् ॥
[ ] पृ. ५८७
मोक्षे भवे च सर्वत्र निःस्पृहो मुनिरुत्तमः ।
[ ] पृ. १६३

य

"य एव पर्यायः स एव गुणः" [ ] पृ. ६३५
य एव लौकिकाः शब्दास्त एव वैदिकाः ।
[ ] पृ. ३९
य एव व्यावृत्तः सैव व्यावृत्तिः । [ ] पृ. २३६
य एव श्रेयस्करः स एव धर्मशब्देनोच्यते ।
[मीमांसाद० १-१-२ शाव० पृ० ४ पं० १५] पृ ५०५
यच्छरीरसमीपस्थैर्नादैः स्याद् यस्य संस्कृतिः ।
तैर्यथा श्रूयते शब्दस्तथा दूरगतैर्न किम् ॥
[ ] पृ. ३५
यज्जातीयैः प्रमाणैस्तु यज्जातीयार्थदर्शनम् ।
दृष्टं सम्प्रति लोकस्य तथा कालान्तरेऽप्यभूत् ॥
[श्लो० वा० सू० २ श्लो० ११३] पृ. ४६,४९
यत् क्वचिद् दृष्टान्तस्य (दृष्टं तस्य) यत्र प्रतिबिम्बः तद्विदः तस्य तद् गमकं तत्रेति वस्तुगतिः ।
[ ] पृ. ३२२ (३१)

यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता ।
[श्लो० वा० सू० ६ श्लो० २९०] पृ. ३९
यत् पुनरनुमानं प्रत्यक्षाऽऽगमविरुद्धं न्यायाभासः स इति ।
[वात्स्यायनभा० पृ० ४ पं० ५] पृ. ७२१
यत्र खल्वाप्तैः 'इदं कर्तव्यम्' इति पुरुषाः प्रतीततदाप्तभावा नियुज्यन्ते तत्रावधीरिततत्प्रेरणाऽतथाभावविषयविचारास्तदभिहितं वाक्यमेव बहु मन्यमाना अनादृतप्रयोजनपरिप्रश्ना एव प्रवर्त्तन्ते, विनिश्चिततदाप्तभावानां प्रत्यवस्थानासम्भवात् ।
[ ] पृ. १७२ (७)
यत्र धूमोऽस्ति तत्राग्निरस्तित्वेनान्वयः स्फुटः ।
न त्वेवं यत्र शब्दोऽस्ति तत्रार्थोऽस्तीति निश्चयः ॥
[श्लो० वा० शब्द प० ८६] पृ. ५७५
यत्र विशेषक्रिया नैव श्रूयते तत्रास्तिर्भवन्तीपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्तीति गम्यते ।
[ ] पृ. ३१६ (३)
यत्राप्यतिशयो दृष्टः । [ ] पृ. ५३७ (१)
यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूर-सूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितः ॥
[श्लो० वा० सू० २ श्लो० ११४] पृ. ४९ (१)
यत्रासौ वर्तते भावस्तेन सम्बध्यते न च ।
तद्देशिनं च व्याप्नोति किमप्येतद् महाद्भुतम् ॥
[ ] पृ. ६९१
यत्रैव जनयेदेनां तत्रैवास्य प्रमाणता ।
[ ] पृ. ५१२ (७)
यत्सन्निधाने यो दृष्टस्तद्दृष्टेस्तद्बुद्धौ स्मृतिः ।
[ ] पृ. ५२३ (४,५)
यथा तुल्येऽपि भिन्नत्वे केषुचिद् वृत्त्यवृत्तिता ।
गोत्वादेरनिमित्ताऽपि तथा बुद्धेर्भविष्यति ॥
[श्लो० वा० आकृ० श्लो० ३६] पृ. २४० (१७,१८,१९)
यथादर्शनमेव इयं मानमेयव्यवस्थितिः न पुनर्यथातत्त्वम् ।
[ ] पृ. ७२८ (२)
यथा पयः पयो जरयति स्वयं च जीर्यति, यथा विषं विषान्तरं शमयति स्वयं च शाम्यति एवं श्रवणादिषु द्रष्टव्यम् ।
[ ] पृ. २७१ (११,१२)
यथा प्रभुः सेवाभेदानुरोधेन फलभेदप्रदो नाप्रभुस्तथेश्वरोऽपि कर्माशयापेक्षः फलं जनयतीति 'अनीश्वरः' इति न युज्यते वक्तुम् । [ ] पृ. ९९
यथा बुद्धिमत्तायामीश्वरस्य प्रमाणसम्भवः, नैवं धर्मादिनिःस्वले प्रमाणमस्ति ।
[न्यायवा० पृ० ४६४ पं० १४] पृ. १३२
यथा महानसे वेह विद्यतेऽधूमभेदि तत् ।
तस्मादनग्नितो भिन्नं विद्यतेऽत्र स्वलक्षणम् ॥
[तत्त्वसं० का० १०५४] पृ. २१० (१८,१९)

यथा यथा पूर्वकृतस्य कर्मणः फलं निधानस्थमिवावतिष्ठते ।
तथा तथा तत्प्रतिपादनोद्यता प्रदीपहस्तेव मतिः प्रवर्तते ॥
[ ] पृ. ७१४ (८)
यथा लोकप्रसिद्धं च लक्षणेरनुगम्यते ।
लक्ष्यं हि लक्षणेनैतदपूर्वं न प्रसाध्यते ॥
[ ] पृ. ५७०
यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः ।
सङ्कीर्णमिव मात्राभिश्चित्राभिरभिमन्यते ॥
[ ] पृ. ३८३ (९)
यथा श्वमांसाशुच्यादीनां स्वत एव अशुचित्वम् अन्येषां च भावानां तद्योगात् तत् तथेहापि तादात्म्यात् विशेषेषु स्वत एव व्यावृत्तप्रत्ययहेतुत्वम् परमाण्वादिषु तु तद्योगात् । किञ्च, अतदात्मकेष्वपि अन्यनिमित्तः प्रत्ययो भवत्येव यथा प्रदीपात् पटादिषु न पुनः पटादिभ्यः प्रदीपे एवं विशेषेभ्य एव अण्वादौ विशिष्टप्रत्ययः न अण्वादिभ्य इत्यादिकम् ।
[ ] पृ. ६९९ (३)
यथासङ्केतमेवातोऽसङ्कीर्णार्थाभिधायिनः ।
शब्दा विवेकतो वृत्ताः पर्याया न भवन्ति नः ॥
[तत्त्वसं० का० १०४४] पृ. २०९ (२,३,४)
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुते क्षणात् ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥
[भग० गी० अ० ४ श्लो० ३७] पृ. १५०
यथैव प्रथमं ज्ञानं तत्संवादमपेक्षते ।
संवादेनापि संवादः पुनर्मृग्यस्तथैव हि ॥
[तत्त्वसं० का० २८५४] पृ. ६ (५)
यथैवोत्पद्यमानोऽयं न सर्वैरवगम्यते ॥
[श्लो० वा० सू० ६ श्लो० ८४] पृ. ३५
यदसत्योपधि सत्यं स शब्दार्थः ।
[ ] पृ. १८० (८,९)
यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलम् ।
[१-१-३ वात्स्या० भा०] पृ. ५३०
यदाऽपि पूर्वं दुःखं नास्ति तदाप्यभिलाषस्य दुःखस्वभावत्वात् तन्निबर्हणस्वभावं सुखम् ।
[ ] पृ. १५३ (२)
यदा वा शब्दवाच्यत्वान्न व्यक्तीनामपोह्यता ।
तदाऽपोह्येत सामान्यं तस्यापोहाच्च वस्तुता ॥
[श्लो० वा० अपो० श्लो० ९५] पृ. १९४ (१)
यदा स्वतः प्रमाणत्वं तदाऽन्यत्रैव मृग्यते ।
निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः ॥
[श्लो० वा० सू० २ श्लो० ५२] पृ. १८
यदि गौरित्ययं शब्दः समर्थोऽन्यनिवर्तने ।
जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनिः ॥
[भामहालं० परि० ६ श्लो० १७] पृ. १८६ (२३)

यदि चाविद्यमानोऽपि भेदो बुद्धिप्रकल्पितः ।
साध्यसाधनधर्मादेर्व्यवहाराय कल्पते ॥
[श्लो० वा० निरा० श्लो० १७१] पृ. ५६४ (१०)
यदि प्रतीतिरन्यथा न स्यात् सर्वं शोभेत, दृष्टा च पक्षधर्मसम्बन्धवचनमात्रात् प्रतिज्ञावचनमन्तरेणापि प्रतीतिरिति कस्तस्योपयोगः । [धर्मकीर्तिः] पृ. ६७
यदि विरुद्धधर्माध्यासः पदार्थानां भेदको न स्यात् तदाऽन्यस्य तद्भेदकस्याभावाद् विश्वमेकं स्यात् ।
[ ] पृ. १०२
यदि शब्दस्यापोहोऽभिधेयोऽर्थस्तदाऽभिधेयार्थव्यतिरेकेणास्य स्वार्थो वक्तव्यः, अथ स एव स्वार्थस्तथापि व्याहतमेतत् अन्यशब्दार्थापोहं हि स्वार्थे कुर्वती श्रुतिरभिधत्त इत्युच्यते इति, अस्य हि वाक्यस्यायमर्थस्तदानीं भवत्यभिदधानाभिधत्त इति । [न्यायवा० अ० २ आ० २ सू० ६७ पृ० ३३० पं० २२-पृ० ३३१ पं० ३] पृ. २०४ (१,२)
यदि शब्दान् पक्षयसि तदा 'आनन्त्यात्' इत्यस्य वस्तुधर्मत्वाद् व्यधिकरणो हेतुः, अथ भेदा एव पक्षीक्रियन्ते तदा नान्वयी न व्यतिरेकी दृष्टान्तोऽस्तीत्यहेतुरानन्त्यम् ।
[न्या० वा० अ० २ आ० २ सू० ६७ पृ० ३३३ पं० १६] पृ. १७५ (८,९)
यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः ।
[श्लो० वा० सू० २ श्लो० १११] पृ. ५७
यदि षड्भिः प्रमाणैः स्यात् सर्वज्ञः केन वार्यते ।
[श्लो० वा० सू० २ श्लो० १११] पृ. ४९
यदि संयोगो नार्थान्तरं भवेत् तदा क्षेत्रबीजोदकादयो निर्विशिष्टत्वात् सर्वदैवाङ्कुरादिकार्यं कुर्युः, न चैवम्, तस्मात् सर्वदा कार्यानारम्भात् क्षेत्राद्यन्यङ्करोत्पत्तौ कारणान्तरसापेक्षाणि, यथा मृत्पिण्डादिसामग्री घटादिकरणे कुलालादिसापेक्षा; योऽसौ क्षेत्रादिभिरपेक्ष्यः स संयोग इति सिद्धम् । किञ्च, असौ संयोगो द्रव्ययोर्विशेषणभावेन प्रतीयमानत्वात् ततोऽर्थान्तरत्वेन प्रत्यक्षसिद्ध एव । तथाहि-कश्चित् केनचित् 'संयुक्ते द्रव्ये आहर' इत्युक्तो ययोरेव द्रव्ययोः संयोगमुपलभते ते एवाहरति न द्रव्यमात्रम् । किञ्च, दूरतरवर्त्तिनः पुंसः सान्तरेऽपि वने निरन्तररूपावसायिनी बुद्धिरुदयमासादयति, सेयं मिथ्याबुद्धिः मुख्यपदार्थानुभवमन्तरेण न क्वचिदुपजायते । न ह्यननुभूतगोदर्शनस्य गवये 'गौः' इति विभ्रमो भवति । तस्मादवश्यं संयोगो मुख्योऽभ्युपगन्तव्यः । तथा, 'न चैत्रः कुण्डली' इत्यनेन प्रतिषेधवाक्येन न कुण्डलं प्रतिषिध्यते, नापि चैत्रः, तयोरन्यत्र देशादौ सत्त्वात् । तस्माच्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते । तथा, 'चैत्रः कुण्डली' इत्यनेनापि विधिवाक्येन न चैत्रकुण्डलयोरन्यतरविधानम्, तयोः सिद्धत्वात्, पारिशेष्यात् संयोगविधानम् । तस्मादस्त्येव संयोगः ।
[न्यायवा० पृ० २१९] पृ. ११४

यदेव दधि तत् क्षीरं यत् क्षीरं तद् दधीति च ।
वदता विन्ध्यवासित्वं ख्यापितं विन्ध्यवासिना ॥
[ ] पृ. २९६ (८)

यद् यथैवाविसंवादि प्रमाणं तत् तथा मतम् ।
विसंवाद्यप्रमाणं च तदध्यक्ष-परोक्षयोः ॥
[ ] पृ. ५९५ (१,२)

यद् यदा कार्यमुत्पित्सु तत् तदोत्पादनात्मकम् ।
कारणं शक्तिभेदेऽपि न भिन्नं क्षणिकं यथा ॥
[ ] पृ. २५७

यद्यपि नित्यमीश्वराख्यं कारणमविकलं भावानां सन्निहितं तथापि न युगपदुत्पत्तिः ईश्वरस्य बुद्धिपूर्वकारित्वात् । यदि हीश्वरः सत्तामात्रेणैवाऽबुद्धिपूर्वं भावानामुत्पादकः स्यात् तदा स्यादेतच्चोद्यम् यदा तु बुद्धिपूर्वं करोति तदा न दोषः तस्य स्वेच्छया कार्येषु प्रवृत्तेः अतोऽनैकान्तिकतैव हेतोः ।
[ ] पृ. १२७

यद्यप्यव्यतिरिक्तोऽयमाकारो बुद्धिरूपतः ।
तथापि बाह्यरूपत्वं भ्रान्तैस्तस्यावसीयते ॥
[तत्त्वसं० का० १०२६] पृ. २०६

यद् यस्यैव गुण-दोषान् नियमेनानुवर्तते ।
तज्ज्ञान्तरीयकं तत् स्यादतो ज्ञानोद्भवं वचः ॥
[ ] पृ. ५८

यद्वत् तुरगः सत्स्वप्याभरणविभूषणेष्वनभिषक्तः ।
तद्वदुपग्रहवानपि न सङ्गमुपयाति निर्ग्रन्थः ॥
[प्रशमर० का० १४१] पृ. ७४९

यद्वाऽनुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्तयम् ।
तस्माद् गवादिवद् वस्तु प्रमेयत्वाच्च गृह्यताम् ॥
[श्लो० वा० अभावप० श्लो० ९] पृ. ५८० (९)

यया जातिर्जातिलिङ्गानि च व्याख्यायन्ते तामाकृतिं विद्यात् सा च सत्त्वावयवानाम् । तदवयवानां च नियतो व्यूहः ।
[वात्स्या० भा० पृ० २२५] पृ. १७८

यश्चायमगोऽपोहोऽगौर्न भवतीति गोशब्दस्यार्थः स किञ्चिद् भावः, अथाभावः? भावोऽपि सन् किं गौः, अथागौरिति । यदि गौरिति नास्ति विवादः । अथागौः, गोशब्दस्यागौरर्थ इत्यतिशब्दार्थकौशलम् । अथाभावः, तन्न युक्तम्, प्रैष-सम्प्रतिपत्त्योरविषयत्वात्; नहि शब्दश्रवणादभावे प्रैषः-प्रतिपादकेन श्रोतुरर्थे विनियोगः-प्रतिपादकधर्म्मः, सम्प्रतिपत्त(त्ति)श्च श्रोतृधर्म्मो-भवेत् । अपि च, शब्दार्थः प्रतीत्या प्रतीयते, न च गोशब्दादभावं कश्चित् प्रतिपद्यते ।
[न्यायवा० पृ० ३२९ पं० ५-११]
पृ. २०० (६,७,८,९,१०)

यः प्रागजनको बुद्धेरुपयोगाविशेषतः ।
स पश्चादपि तेन स्यादर्थापायेऽपि नेत्रधीः ॥
[ ] पृ. ५२५ (२)

यस्मात् प्रकरणचिन्ता । [न्यायद० १-२-७] पृ. ७२०

यस्मात् प्रकरणचिन्ता स प्रकरणसमः ।
[न्यायद० १-२-७] पृ० ७१९ (१)

यस्माद् उच्चरितात् ककुदादिमदर्थप्रतिपत्तिः स शब्दः ।
[ ] पृ. ४३१ (६)

यस्मिन्नधूमतो भिन्नं विद्यते हि स्वलक्षणम् ।
तस्मिन्ननग्नितोऽप्यस्ति परावृत्तं स्वलक्षणम् ॥
[तत्त्वसं० का० १०५३] पृ. २१०

यस्य ज्ञाने प्रतिभासस्तस्य तत्र तत्कारणत्वं निमित्तमभिधीयते न त्वप्रतिभासमानस्य समवायादेस्तन्निमित्तः प्रतिभासो भवतु इत्यासञ्जयितुं युक्तम् । [ ] पृ. ५०९

यस्य तत्र यदोद्भूतिर्जिघृक्षा चोपजायते ।
चेत्यतेऽनुभवस्तस्य तेन च व्यपदिश्यते ॥
[श्लो० वा० अभावप० श्लो० १३] पृ. ५८१

यस्य निर्विशेषणा भेदाः शब्दैरभिधीयन्ते तस्याऽयं दोषः अस्माकं तु सत्ताविशेषणानि द्रव्य-गुण-कर्म्माण्यभिधीयन्ते । तथाहि-यत्र यत्र सत्तादिकं सामान्यं पश्यति तत्र तत्र सदादि-शब्दं प्रयुङ्क्ते, एकमेव च सत्तादिकं सामान्यम्, अतः सामान्योपलक्षितेषु भेदेषु समयक्रियासम्भवादकारणमानन्त्यम् ।
[न्या० वा० अ० २ आ० २ सू० ६७ पृ० ३२३ पं० ११] पृ० १७५

यस्य यावती मात्रा । [ ] पृ. ९०

याज्ञवल्क्य इति होवाच ।
[बृह० उ० अ० २ ब्रा० ४ सू० १] पृ. ३२

यादृशोऽर्थान्तरापोहः प्रतिबिम्बात्मको वाच्योऽयं प्रतिपादितः ।
शब्दान्तरव्यपोहोऽपि तादृगेव प्रतिबिम्बात्मक एवावगम्यते ॥
[तत्त्वसं० का० १०८८] पृ. २१५ (२६) २१६ (१,२)

यावज्जीवेत् सुखं जीव । [ ] पृ. ५०५ (६)

यावत् प्रयोजनेनास्य सम्बन्धो नाभिधीयते ।
असम्बद्धप्रलापित्वाद् भवेत् तावदसङ्गतिः ॥
[श्लो० वा० सू० १ श्लो० २०] पृ. १६९

यावदर्था वै नामधेयशब्दाः । [१-१-४ वात्स्या० भा०]
पृ. ५२२ (२)

यावन्तो यादृशा ये च यदर्थप्रतिपादकाः ।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः ॥
[श्लो० वा० स्फोटवा० श्लो० ६९] पृ. ४३५ (४)

युगपद् ज्ञानानुत्पत्तिः [न्या० सू० १-१-१५] पृ. ६१६

युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ।
[न्यायद० १-१-१६] पृ. ४७७,५३१, ६६९ (६), ७०४

येन येन हि नाम्ना वै यो यो धर्म्मोऽभिलप्यते ।
न स संविद्यते तत्र धर्म्माणां सा हि धर्मता ॥
[ ] पृ. १७४ (५,६,७,८)

येऽपि सातिशया दृष्टाः प्रज्ञामेधादिभिर्नराः ।
[ ] पृ. ५३७ (२)

येऽपि सातिशया दृष्टाः प्रज्ञा-मेधादिभिर्नराः ।
स्तोकस्तोकान्तरत्वेन न त्वतीन्द्रियदर्शनात् ॥
[ ] पृ. ४९

येषामप्यनवगतोत्पत्तीनां भावानां रूपमुपलभ्यते तेषां तन्तु-व्यतिषङ्गजनितं रूपं दृष्ट्वा तद्व्यतिषङ्गविमोचनात् तद्विनाशाद् वा विनङ्क्ष्यतीत्यनुमीयते ।
[ ] पृ. ९४ (६)

योगिप्रत्यक्षं सम्बन्धग्राहकमाहुः व्याप्तेः सकलाक्षेपेणावगमात् ।
[ ] पृ. ७५-७६

यो ज्ञानप्रतिभासमन्वयव्यतिरेकावनुकारयति ।
[ ] पृ. ५२४

यो नाम न यदात्मा हि स तस्यापोह्य उच्यते ।
न भावोऽभावरूपश्च तदपोहे न वस्तुता ॥
[तत्त्वसं० का० १०२] पृ. २१४ (१७,१८)

यो ह्यन्यरूपसंवेद्यः संवेद्यतान्यथाऽपि वा ।
स भ्रान्तो न तु तेनैव यो नित्यमुपलभ्यते ॥
[ ] पृ. ३७

र

रजतं गृह्यमाणं हि चिरस्थायीति गृह्यते ।
[ ] पृ. ५३९ (२)

रत्नादिकारणेष्वावल्यादिकार्यं सदेव ।
[सांख्यः] पृ. ४२२

रयणप्पभा सिआ सासया सियाऽसासया ।
[जीवाजीवाभि० प्रतिप० ३ उ० १ सू० ७८] पृ. ६३९(१)

रूप-रस-गन्ध स्पर्शाः संख्याः परिमाणानि पृथक्त्वम् संयोग-विभागौ परत्वाऽपरत्वे बुद्धयः सुख-दु:खे इच्छा-द्वैषौ प्रयत्नश्च गुणाः । [वैशेषिकद० १-१-६] पृ. ६७२ (५)

रूपासंस्काराभावाद् वायावनुपलब्धिः ।
[वैशेषिकद० अ० ४-१-७] पृ. १००

रूपादिस्वलक्षणविषयमिन्द्रियज्ञानम् आर्यसत्यचतुष्टयगोचरं योगिज्ञानम् । [ ] पृ. ४९९

रूपभावेऽपि चैकत्वं कल्पनानिर्मितं यथा ।
विभेदोऽपि तथैवेति कुतः पर्यायता ततः ॥
[तत्त्वसं० का० १०३२] पृ. २०७ (५)

रूवं पुण पासइ अपुट्ठं तु ।
[आवश्यकनि० गा० ५] पृ. ५४५ (५)

ल

लक्षणयुक्ते बाधासम्भवे तल्लक्षणमेव दूषितं स्यात् ।
[ ] पृ. ३७५ (६)

लघवोऽवयवा ह्येते निबद्धा न च केनचित् ।
वृक्षाद्यभिहतानां तु विश्लेषो लोष्टवद् भवेत् ॥
[श्लो० वा० सू० ६ श्लो० १११] पृ. ३८

लब्धात्मनां स्वकार्येषु प्रवृत्तिः स्वयमेव तु ।
[ ] पृ. १०

लिखितं साक्षिणो मुक्तिः प्रमाणं त्रिविधं स्मृतम् ।
[ ] पृ. ४५९ (२,३) ४७५

लिङ्ग-लिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात् तदाभासशून्ययोरप्यबन्धनम् ॥
[ ] पृ. ३०५ (१)

व

वक्ता नहि क्रमं कश्चित् स्वातन्त्र्येण प्रपद्यते ।
[श्लो० वा० शब्दनित्य० श्लो० २८८] पृ. ४३५ (७)

वक्ता नहि क्रमं कश्चित् स्वातन्त्र्येण प्रपद्यते ।
यथैवास्य परैरुक्तः तथैवैनं विवक्षति ॥
[श्लो० वा० सू० ६ श्लो० २८८] पृ. ३९

वचनं राजकीयं वा लौकिकं नापि विद्यते ।
न चाऽपि स्मरणात् पश्चादिन्द्रियस्य प्रवर्त्तनम् ॥
[श्लो० वा० प्रत्यक्ष० श्लो० २३५] पृ. ३१९ (३)

वण्णपज्जवेहिं गंधपज्जवेहिं । [भगवतीसू० शत० १४ उ० ४ सू० ५१३] पृ. ६३५ (१,२)

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥
[साङ्ख्यका० ५७] पृ. ३०९

वय-समणधम्म-संजम-वेयावच्चं च बंभगुत्तीओ ।
णाणाइतियं तव-कोहणिग्गहाई चरणमेयं ॥
[ओघनि० गा० २] ७५५ (२)

वर्णाकृत्यक्षराकारशून्यं गोत्वं हि गीयते ।
[ ] पृ. २४३ (२)

वर्तमानावभासि सर्वं प्रत्यक्षम् । [ ] पृ. ५९३

वस्तुत्वाद् द्विविधस्यात्र सम्भवो दुष्टकारणात् ।
[श्लो० वा० सू० २ श्लो० ६४] पृ. ८ (७-८)

वस्तुत्वे सत्येष दोषः स्यात् नासिद्धं वस्तु वस्त्वन्तरसिद्धये सामर्थ्यमासादयतीति, मायामात्रे तु नेतरेतराश्रयदोषप्रसङ्गः । नहि मायायाः कथञ्चिदनुपपत्तिः-अनुपपद्यमानार्थैव हि माया लोके प्रसिद्धा उपपद्यमानार्थत्वे तु यथार्थभावान्न माया ।
[ ] पृ. २७७ (२३) २७८(१)

वस्तुभेदप्रसिद्धस्य शब्दसाम्यादभेदिनः ।
[ ] पृ. ४३

वस्तुभेदे प्रसिद्धस्य । [ ] पृ. ४८४

'वस्त्रस्य रागः' कुङ्कुमादिद्रव्येण संयोग उच्यते, स च अव्याप्यवृत्तिः तत एकत्र रक्ते न सर्वस्य रागः न च शरीरादेरेकदेशावरणे सर्वस्य आवरणं युक्तम् । [ ] पृ. ६६४

वस्त्वसङ्करसिद्धिश्च तत्प्रामाण्यसमाश्रया ॥
[श्लो० वा० सू० ५ अभावप० श्लो० २] पृ. २४

वस्त्वसङ्करसिद्धिश्च तत्प्रामाण्यसमाश्रिता ।
[ ] पृ. १६५

वाक्यार्थे तु पदार्थेभ्यः सम्बन्धानुगमाद् ऋते ।
बुद्धिरुत्पद्यते तस्माद् भिन्ना साऽप्यक्षबुद्धिवत् ॥
[श्लो० वा० शब्दप० श्लो० १०९] पृ. ७३८

वाक्येष्वदृष्टेष्वपि सार्थकेषु पदार्थचिन्मात्रतया प्रतीतिम् ।
दृष्ट्वानुमानव्यतिरेकभीताः क्लिष्टाः पदाभेदविचारणायाम् ॥
[श्लो० वा० शब्दप० श्लो० १११] पृ० ७३८

वाग्रूपता चेद् व्युत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥
[वाक्यप० प्र० का० श्लो० १२५] पृ. ३८० (१३), ४८९ (३)

वार्यते केनचिन्नापि तदिदानीं प्रदुष्यति ।
[श्लो० वा० प्रत्यक्ष० श्लो० २३६] पृ. ४९६ (६)

वार्यते केनचिन्नापि तत् तदानीं प्रदुष्यति ।
तेनेन्द्रियार्थसम्बन्धात् प्रागूर्ध्वं वापि यत् स्मृतेः ॥
[श्लो० वा० प्रत्यक्ष० श्लो० २३६] पृ. ३१९ (४)

विकल्पप्रतिबिम्बमेव सर्वशब्दानामर्थः, तदेव चाभिधीयते व्यवच्छिद्यत इति च ।
[ ] पृ. १९९ (११,१२)

विकल्पोऽवस्तुनिर्भासाद् विसंवादादुपप्लवः ।
[ ] पृ. ५०० (८), ५११ (१०)

विग्गहगइमावण्णा । [ ] पृ. ६१३ (१)

विज्ञप्तिमात्रमेव नार्थव्यवस्था । [ ] पृ. ४६१

विज्ञानं जायते सर्वं प्रत्यक्षमिति गम्यताम् ।
[श्लो० वा० प्रत्यक्ष० श्लो० २३७] पृ. ३१९

विज्ञानमानन्दं ब्रह्म । [बृहदा० उ० अ० ३ ब्रा० ९ मं० २८] पृ. १५१

विधावनाश्रिते साध्यः पुरुषार्थो न लभ्यते ।
श्रुतः स्वर्गादिवाक्येन धात्वर्थः साध्यतां व्रजेत् ॥
[श्लो० वा० औत्पत्तिकसू० श्लो० १४] पृ. ७४० (१)

विधिरूपश्च शब्दार्थो येन नाभ्युपगम्यते ।
न भवेद् व्यतिरेकोऽपि तस्य तत्पूर्वको ह्यसौ ॥
[श्लो० वा० अपो० श्लो० ११०] पृ. १९६ (७,८)

विनाशकाले न तस्य किञ्चिद् भवति, न भवत्येव केवलम्, अन्यथा कस्यचिद् विधाने न भावो निवर्तितः स्यात् ।
[ ] पृ. ३४६–३४७ (१,२)

विभागोऽपि अन्यतरोभयकर्म–विभागजः ।
[ ] पृ. ७०४ (४)

विभाषाग्रहः । [पा० सू० ३।१।१४३ सिद्धान्तकौ० अं० २९०५] पृ. ४०६

विरुद्धं हेतुमुद्भाव्य वादिनं जयतीतरः ।
[ ] पृ. ७५

विरोधिलिङ्ग–सङ्ख्यादिभेदाद् भिन्नस्वभावताम् ।
तस्यैव मन्यमानोऽयं शब्दः प्रत्यवतिष्ठते ॥
[ ] पृ. ३१३

विलक्षणोपपाते हि नश्येत् स्वाभाविकं क्वचित् ।
[ ] पृ. २७८

विवक्षातः कारकाणि भवन्ति । [ ] पृ. ४७१ (१०)

विशिष्टरूपानुभवान्नान्यतोऽपि निराक्रिया ।
[ ] पृ. २७४ (६,७)

विशिष्यत इति विशेषः गुणेभ्यो विशेषो गुणविशेषः कर्म्माभिधीयते, द्वितीयश्चात्र गुणविशेषशब्द एकशेषं कृत्वा निर्दिष्टः तेन गुणपदार्थो गृह्यते—गुणाश्च ते विशेषाश्च गुणविशेषाः—विशेषग्रहणमाकृतिनिरासार्थम् । तथाहि–आकृतिः संयोगविशेषस्वभावा, संयोगश्च गुणपदार्थान्तर्गतः ततश्चासति विशेषग्रहणे आकृतेरपि ग्रहणं स्यात्, न च तस्या व्यक्तावन्तर्भाव इष्यते पृथक् स्वशब्देन तस्या उपादानात् । आश्रयशब्देन द्रव्यमभिधीयते—तेषां गुणविशेषाणामाश्रयस्तदाश्रयो द्रव्यमित्यर्थः । सूत्रे 'तत्'शब्दलोपं कृत्वा निर्देशः कृतः, एवं च विग्रहः कर्त्तव्यः—गुणविशेषाश्च गुणविशेषाश्चेति गुणविशेषाः तदाश्रयश्चेति गुणविशेषाश्रयः, समाहारद्वन्द्वश्चायम् लोकाश्रयत्वात् लिङ्गस्य [अ० २ पा० २ सू० २९ महाभाष्ये पृ० ४७१ पं० ८] इति नपुंसकलिङ्गाऽनिर्देशः । तेनायमर्थो भवति—योऽयं गुणविशेषाश्रयः सा व्यक्तिश्चोच्यते मूर्तिश्चेति । तत्र यदा द्रव्ये मूर्त्तिशब्दस्तदाऽधिकरणसाधनो द्रष्टव्यः—मूर्च्छन्त्यस्मिन्नवयवा इति मूर्तिः, यदा तु रूपादिषु तदा कर्तृसाधनः—मूर्च्छन्ति द्रव्ये समवयन्तीति रूपादयो मूर्तिः । व्यक्तिशब्दस्तु द्रव्ये कर्म्मसाधनः रूपादिषु करणसाधनः ।
[न्या० वा० अ० २ आ० २ सू० ६८ पृ० ३३२ पं० ३–२४] पृ. १७७ (९,१०,११)–१७८ (१,२)

विशेषणं विशेष्यं च सम्बन्धं लौकिकीं स्थितिम् ।
गृहीत्वा सङ्कलय्यैतत् तथा प्रत्येति नान्यथा ॥
[ ] पृ. ५१५ (१), ५२५ (४)

विशेषहेतवस्तेषां प्रत्यया न कथञ्चन ।
नित्यानामिव युज्यन्ते क्षणानामविवेकता ॥
[ ] पृ. ३२९ (१८)

विशेषेऽनुगमाभावः सामान्ये सिद्धसाधनम् ।
[ ] पृ. ५५४

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एक आस्ते ॥
[श्वेताश्वत० उ० अ० ३,३] पृ. ९८

विषयविषयिसन्निपातानन्तरमाद्यं ग्रहणमवग्रहः ।
[ ] पृ. ५५२ (७)

विषयेण हि बुद्धीनां विना नोत्पत्तिरिष्यते ।
विशेषादन्यदिच्छन्ति सामान्यं तेन तद् ध्रुवम् ॥
[श्लो० वा० आकृ० श्लो० ३७] पृ. २४०

वृक्षादिना हतान् ध्यानस्तद्भावाध्यवसायिनः ।
ज्ञानस्योत्पादनादेतज्जात्यादेः प्रतिषेधनम् ॥
[तत्त्वसं० का० १०७०] पृ. २१२ (२४)

वेदाध्ययनं सर्वं तदध्ययनपूर्वकम् ।
वेदाध्ययनवाच्यत्वादधुनाऽध्ययनं यथा ॥
[श्लो० वा० अ० ७ श्लो० ३५५] पृ. १३७

वेदाध्ययनमखिलं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनवाच्यत्वादधुनाऽध्ययनं यथा ॥
[श्लो० वा० सू० ७ श्लो० ३६६] पृ. ४०

वोसट्ठचत्तदेहो विहरइ गामाणुगामं तु ।
[आव० नि० गा० ३१६] पृ. ७५०

व्यक्तिजन्मन्यजाता चेदागता नाश्रयान्तरात् ।
प्रागासीद् न च तद्देशे सा तया सङ्गता कथम् ॥
[ ] पृ. २४० (११)

व्यक्तिनाशेन चेन्नष्टा गता व्यक्त्यन्तरं न च ।
तत् शून्ये न स्थिता देशे सा जातिः क्वेति कथ्यताम् ॥
[ ] पृ. २४० (१२)

व्यक्तिरूपावसायेन यदि वाऽपोह उच्यते ।
तल्लिङ्गाद्यभिसम्बन्धो व्यक्तिद्वारोऽस्य विद्यते ॥
[तत्त्वसं० का० ११४३] पृ. २२४

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ।
[न्यायप० अ० २ आ० २ सू० ६६] पृ. १७७

व्यक्तेर्जात्यादियोगेऽपि यदि जातेः स नेष्यते ।
तादात्म्यं कथमिष्टं स्यादनुपप्लुतचेतसाम् ॥
[ ] पृ. २४० (१३,१४)

व्यक्त्याकृतिजातयस्तु पदार्थः ।
[न्यायद० अ० २ आ० २ सू० ६५] पृ. १७७

व्यञ्जकानां हि वायूनां भिन्नावयवदेशता ॥
[श्लो० वा० सू० ६ श्लो० ७९–८] पृ. ३६

व्यवहारस्तु तामेव प्रतिवस्तुव्यवस्थिताम् ।
तथैव दृश्यमानत्वाद् व्यवहारयति देहिनः ॥
[ ] पृ. ३११ (५,६)

व्यापकत्वं च तस्येदमिष्टमाध्यवसायिकम् ।
मिथ्यावभासिनो ह्येते प्रत्ययाः शब्दनिर्मिताः ॥
[तत्त्वसं० का० १२१२] पृ. २३२ (२१,२२)

व्यावहारिकस्य चैतत् प्रमाणस्य लक्षणमुक्तम् ।
[ ] पृ. ४९७

श

शक्तयः सर्वभावानां कार्यार्थापत्तिगोचराः ।
[श्लो० वा० सू० ५ शून्य० श्लो० २५४] पृ. ५४

शब्द एवाभिजल्पत्वमागतः शब्दार्थः ।
[ ] पृ. १८० (११)

शब्दज्ञानादसन्निकृष्टेऽर्थे बुद्धिः शाब्दम् ।
[१–१–५ शाबरभा०] पृ. ५७४ (३)

शब्दत्वं गमकं नात्र गोशब्दत्वं निषेत्स्यते ।
व्यक्तिरेव विशेष्याऽतो हेतुश्चैका प्रसज्यते ॥
[श्लो० वा० शब्दप० ६४] पृ. ५७५

शब्दस्य वृत्तेः सर्वत्र पञ्चानामपि न क्वचित् ।
प्रमाणानामभावोऽतो नार्थाभावविनिश्चयः ॥
[ ] पृ. ५८७

शब्दस्यागमनं तावददृष्टं परिकल्प्यते ॥
[श्लो० वा० सू० ६ श्लो० १०७] पृ. ३८

शब्दादुदेति यद् ज्ञानमप्रत्यक्षेऽपि वस्तुनि ।
शाब्दं तदिति मन्यन्ते प्रमाणान्तरवादिनः ॥
[ ] पृ. ५७४ (४)

शब्दे दोषोद्भवस्तावद् वक्त्रधीन इति स्थितम् ।
तदभावः क्वचित् तावद् गुणवद्वक्तृकत्वतः ॥
[श्लो० वा० सू० २ श्लो० ६२] पृ. १९

शब्दे नागम्यमानं च विशेष्यमिति साहसम् ।
तेन सामान्यमेष्टव्यं विषयो बुद्धि–शब्दयोः ॥
[श्लो० वा० अपो० श्लो० ९४] पृ. १९३ (६)

शब्देनाव्यापृताक्षस्य बुद्धावप्रतिभासनात् ।
अर्थस्य दृष्टाविव तदनिर्देशस्य वेदकम् ॥
[ ] पृ. २५० (११,१२) ५२५ (७)

शरीरान्तरेऽपि तदङ्गनासम्बन्धिनि तद्गुणा उपलभ्यन्ते इत्यभिदधति । तथाहि–'देवदत्ताङ्गनाङ्गं देवदत्तगुणपूर्वकम्, कार्यत्वे सति तदुपकारकत्वात्, प्रासादिवत् । कार्यदेशे च सन्निहितं कारणं तज्जनने व्याप्रियतेऽन्यथाऽतिप्रसङ्गादिति तदङ्गनाङ्गप्रादुर्भावदेशे तत्कारणतद्गुणसिद्धिः । तथा तदन्तराले च प्रतीयन्ते तथाहि–अग्नेरूर्ध्वज्वलनम्, वायोस्तिर्यक् पवनं तद्गुणपूर्वकम्, कार्यत्वे सति तदुपकारकत्वात्, वस्त्रादिवत् । यत्र च तद्गुणास्तत्र तद्गुण्यप्यनुमीयत इति 'स्वदेह एव देवदत्तात्मा' इति प्रतिज्ञा अनुमानबाधिता । ततोऽनुमानबाधितकर्मनिर्देशानन्तरप्रयुक्तत्वेन कालात्ययापदिष्टो हेतुः ।
[ ] पृ. १४६–१४७ (१)

शाबलेयाच्च भिन्नत्वं बाहुलेयाश्वयोः समम् ।
सामान्यं नान्यदिष्टं चेत् क्वागोऽपोहः प्रवर्त्तताम् ॥
[श्लो० वा० अपो० श्लो० ७७] पृ. १९० (१०)

शास्त्रस्य तु फले दृष्टे तत्प्राप्त्याशावशीकृताः ।
प्रेक्षावन्तः प्रवर्त्तन्ते तेन वाच्यं प्रयोजनम् ॥
[ ] पृ. १६९ (१०)

शास्त्रार्थप्रतिज्ञाप्रतिपादनपर आदिवाक्योपन्यासः ।
[ ] पृ. १७२ (१)

शिरसोऽवयवा निम्ना वृद्धि–काठिन्यवर्जिताः ।
शशशृङ्गादिरूपेण सोऽत्यन्ताभाव उच्यते ॥
[श्लो० वा० अभा० परि० श्लो० ४] पृ. १८६,५८१

शिष्टाः क्वचिदभीष्टे वस्तुनि प्रवर्तमाना अभीष्टदेवताविशेषस्तवविधानपुरस्सरं प्रवर्तन्ते । [ ] पृ. १

शुद्धं द्रव्यं समाश्रित्य सङ्कल्पस्तदशुद्धितः ।
नैगमव्यवहारौ स्तां शेषाः पर्यायमाश्रिताः ॥
[ ] पृ. ३११ (२)

शेषाणामाश्रयव्यापित्वम् ।
[प्रशस्त० क० पृ० १०३ पं० ८] पृ. ७०८ (१)

श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते ।
ताद्रूप्येण च धर्मित्वं तस्मान्नेन्द्रियगोचरः ॥
[श्लो० वा० सू० २ श्लो० १४] पृ. ५०५

श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः ।
चोदनालक्षणैः साध्या तस्मादेष्वेव धर्मता ॥
[श्लो० वा० सू० २ श्लो० १९१] पृ. ५०५

श्रोत्रधीरप्रमाणं स्यादितराभिरसङ्गतेः ।
[श्लो० सू० २ श्लो० ७७] पृ. १६

श्रोत्रादिवृत्तिरविकल्पिका ।
[ ] पृ. ५३३ (१)

ष

षट्केन युगपद्योगात् परमाणोः षडंशता ।
[ ] पृ. १०५, ३७६ (९)

षडेव धर्मिणः प्रोक्ताः । [ ] पृ. ६६१ (७)

स

स एवाविनाभावो दृष्टान्ताभ्यां दर्श्यते ।
[ ] पृ. ३९४

संजोगसिद्धीए फलं वयंति ।
[आवश्यकनि० पढमाव० गा० २३] पृ. ७५७ (१)

संयोगस्य द्रव्ययोर्विशेषणत्वेन अध्यक्षतः प्रतीयमानत्वात् । तथाहि–कश्चित् केनचित् 'संयुक्ते द्रव्ये आहर' इत्युक्तो ययोरेव द्रव्ययोः संयोगमुपलभ्य(भ)ते, ते एव आहरति न द्रव्यमात्रम् अन्यथा हि यत् किञ्चिद् आहरेत् । एतद् विभागसाधनेऽपि विपर्ययेण सर्वं समानम् । किञ्च, यदि अर्थान्तरभूतौ संयोग–विभागौ वस्तुनो न स्याताम् तदा वस्तुमात्रनिबन्धनौ 'सान्तरमिदम्' 'निरन्तरम्' इति च प्रत्ययौ नोत्पद्येयाताम् न हि विशेषप्रत्ययौ वस्तुविशेषमन्तरेण सम्भविनौ सर्वदा सर्वत्र भावप्रसङ्गात् । अपि च दूरदेशवर्तिनः प्रमातुः सान्तरावस्थितेऽपि धव–खदिरादौ निरन्तरावसायिनी बुद्धिर्योत्पद्यते या च शाखिशिखरावसक्ते बलाकादौ सान्तरत्वाध्यवसायिनी समुपजायते; द्विविधाऽपि इयम् 'अतस्मिंस्तत्' इति प्रवृत्तेर्मिथ्याबुद्धिः । न च असौ मुख्यपदार्थानुभवमन्तरेण क्वचिद् उपजायमाना संलक्ष्यते न हि अननुभूतरजतस्य शुक्तिकायाम् 'रजतम्' इति विभ्रमः इति कश्चित् मुख्यो भावो विभ्रमधियो निमित्तमभ्युपगन्तव्यः; तदभ्युपगमे च संयोग–विभागसिद्धिः तद्व्यतिरेकेण अन्यस्य एतद्बुद्धेर्निबन्धनस्य असम्भवात् । तथा 'कुण्डली देवदत्तः' इति मतिः किंनिबन्धना उपजायते इति वक्तव्यम् । न पुरुष–कुण्डलमात्रनिबन्धना, सर्वदा तयोस्तस्या उत्पत्तिप्रसङ्गात् । अपि च यदेव क्वचित् केनचित् उपलब्धं सत्त्वेन; तस्यैव अन्यत्र विधिः प्रतिषेधो वा दृष्टः । यदि च संयोगो न कदाचिद् उपलब्धः कथं विभागेन अस्य 'चैत्रोऽकुण्डलः कुण्डली वा' इत्येवं प्रतिषेधः विधिश्च भवेत्? यतः 'अकुण्डलश्चैत्रः' इति न कुण्डलं प्रतिषिध्यते तस्य अन्यदेशादौ विद्यमानस्य प्रतिषेद्धुमशक्यत्वात्, अत एव न चैत्रः ततश्चैत्रस्य कुण्डलसंयोगः प्रतिषिध्यते । एवं 'कुण्डली चैत्रः' इत्यत्रापि चैत्र–कुण्डलयोर्नान्यतरस्य विधिः तयोः सिद्धत्वात् । ततः पारिशेष्याद् अप्रतीतस्य तत्-संयोगस्यैव विधिरिति संयोगादिर्वास्तवः समस्त्येव यद्वशाद् विभक्तविधि–प्रतिषेधप्रवृत्तिः 'चैत्रः कुण्डली' इत्यादिप्रयोगेषु । किञ्च, यदि संयोगः अर्थान्तरं न भवेत् तदा बीजादयः–अविशिष्टत्वात्–सर्वदैव स्वकार्यमङ्कुरादिकं विदध्युः न चैवम् सर्वदा तेषां कार्यानारम्भात्; अतो बीजादयः स्वकार्यनिर्वर्तने कारणान्तरसव्यपेक्षाः मृत्पिण्ड–दण्ड–चक्र–सूत्रादय इव घटादिकरणे; योऽसौ अपेक्ष्यः स संयोगः ।
[ ] पृ. ६७७(४,५)–६७८(१,२,३,४)–६७९(१,२)

संयोग्यादिषु येष्वस्ति प्रतिबन्धो न तादृशः ।
न ते हेतव इत्युक्तं व्यभिचारस्य सम्भवात् ॥
[ ] पृ. ५५९

संवादस्याथ पूर्वेण संवादित्वात् प्रमाणता ।
अन्योऽन्याश्रयभावेन न प्रामाण्यं प्रकल्पते ॥
[ ] पृ. ६

संवित्तिः संवित्तितयैव संवेद्या न संवेद्यतया ।
[ ] पृ. ७९

संवित्त्याख्यं फलं ज्ञातृव्यापारसद्भावे सामान्यतो दृष्टं लिङ्गम् ।
[ ] पृ. २७

संसट्ठमसंसट्ठा उद्धड तह अप्पलेविया चेव ।
उग्गहिया पग्गहिया उज्झियहम्मा य सत्तमिया ॥
[ ] पृ. ७५५ (४,५)

संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ।
[साङ्ख्यका० ४०] पृ. ४१७ (८)

संसर्गमोहितधियो विविक्तं धातुगोचरात् ।
भावात्मानं न पश्यन्ति ये तेभ्यः स विविच्यते ॥
[ ] पृ. ७३९

संसृजेत् शुभमेवैकमनुकम्माप्रयोजितः ।
[श्लो० वा० सू० ५ सम्बन्धा श्लो० ५२] पृ. १००

संसृज्यन्ते न भिद्यन्ते स्वतोऽर्थाः पारमार्थिकाः ।
रूपमेकमनेकं वा तेषु बुद्धेरुपप्लवः ॥
[ ] पृ. २१० (१,२,३,४)

संस्थान–प्रसव–स्थितिषु यथाक्रमं स्त्री–पुं–नपुंसकव्यवस्थाति (स्था । इति) [ ] पृ. २२१ (११)

संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना ।
स्थितोऽपि चक्षुषा रूपं वीक्षते साक्षजा मतिः ॥
[ ] ५०३ (८)

सङ्केतस्मरणोपायं दृष्टसङ्कलनात्मकम् ।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथम्? ॥
[ ] पृ.५१५ (३) ५२५ (५)

सङ्ख्या–परिमाणानि पृथक्त्वम् संयोग–विभागौ परत्वाऽपरत्वे कर्म च रूपि(द्रव्य)समवायाच्चाक्षुषाणि ।
[वैशेषिकद० ४–१–११] पृ. ११३,६७३ (३) ६८६ (३)

स चेदगोनिवृत्त्यात्मा भवेदन्योन्यसंश्रयः ।
सिद्धश्चेद् गौरपोहार्थं वृथापोहप्रकल्पनम् ॥
[श्लो० वा० अपो० श्लो० ८४] पृ. १९१ (११)

सत्ता–द्रव्यत्वसम्बन्धात् सद्द्रव्यं वस्तु ।
[ ] पृ. ७३१

सत्ता–स्वकारणाऽऽश्लेषकरणात् कारणं किल ।
सा सत्ता स च सम्बन्धो नित्यौ कार्यमथेह किम् ॥
[ ] पृ. ३०३ (७)

स त्वसम्पादकस्तादृग्वस्तुसम्बन्धहानितः ।
न शब्दाः प्रत्ययाः सर्वे भूतार्थाध्यवसायिनः ॥
[तत्त्वसं० का० ११६५] पृ. २२७ (६)

सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् ।
[जैमि० सू० १–१–४] पृ. ४८,८०,५३४(८)

सत्सम्प्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षमनिमित्तम्, विद्यमानोपलम्भनत्वात् ।
[जैमिनीयसू० १–१–४] पृ. ३१

सदकारणवन्नित्यम् ।
[वैशेषिकद० ४–१–१] पृ. ६४७,६५६,७३१

सदुपलम्भकप्रमाणगम्यत्वं षण्णामस्तित्वमधीयते, तच्च षट्पदार्थविषयं ज्ञानम् तस्मिन् सति 'सत्' इति व्यवहारप्रवृत्तेः । एवं 'ज्ञानजनितं ज्ञानज्ञेयत्वम्' 'अभिधानजनितम् अभिधेयत्वम्' इत्येवं व्यतिरेकनिबन्धना षष्ठी सिद्धा, न चाऽनवस्था, न च षट्पदार्थव्यतिरिक्तपदार्थान्तरप्रसक्तिः ज्ञानस्य गुणपदार्थेऽन्तर्भावात् । [ ] पृ. ६६१ (१०)

सदेव न जन्यते । [ ] पृ. ५७

सद्गुणद्रव्यरूपेण रूपादेरेकतेष्यते ।
स्वरूपापेक्षया चैषां परस्परं विभिन्नता ॥
[श्लो० वा० अभावप० श्लो० २४] पृ. ५८८ (१३)

सद्रूपतानतिक्रान्तस्वस्वभावमिदं जगत् ।
सत्तारूपतया सर्वं संगृह्णन् संग्रहो मतः ॥
[ ] पृ. ३११ (४)

स द्विविधोऽष्टचतुर्भेदः ।
[तत्त्वार्थ० अ० २ सू० ९] पृ. ६१८

सन्तानविषयत्वेन वस्तुविषयत्वं द्वयोरुक्तम् ।
[ ] पृ. ४६८ (९)

सन्ति पञ्च महाभूता ।
[सूत्रकृ० प्र० श्रु० प्र० अ० प्र० उ० गा० ७] पृ. ५९

सन्निकर्षविशेषात् तद्ग्रहणम् ।
[ ] पृ. ५२८

सन्निकृष्टार्थवृत्तित्वं न तु ज्ञानान्तरेष्वयम् ।
[श्लो० वा० निरा० श्लो० ११५] पृ. ५३७ (११,१२)

सन् बोधगोचरप्राप्तस्तद्भावेनोपलभ्यते ।
नश्यन् भावः कथं तस्य न नाशः कार्यतामियात् ॥
[ ] पृ. ३२१ (५,६)

सप्त भुवनान्येकबुद्धिनिर्मितानि, एकवस्त्वन्तर्गतत्वात्, एकावसथान्तर्गतानेकापवरकवत्; यथैकावसथान्तर्गतानामपवरकाणां सूत्रधारैकबुद्धिनिर्मितत्वं दृष्टं तथैकस्मिन्नेव भुवनेऽन्तर्गतानि सप्त भुवनानि, तस्मात् तेषामप्येकबुद्धिनिर्मितत्वं निश्चीयते; यद्बुद्धिनिर्मितानि चैतानि स भगवान् महेश्वरः सकलभुवनैकसूत्रधारः । [ ] पृ. १३२

स बहिर्देशसम्बन्धो विसृष्टमुपलभ्यते ।
[ ] पृ. १९९

समवायिनः श्वैत्यात् श्वैत्यबुद्धेः श्वेते बुद्धिः ।
[वैशेषिकद० ८–१–९] पृ. ६९३ (२)

समानप्रत्ययप्रसवात्मिका जातिः ।
[न्यायद० अ० २ आ० २ सू० ६८] पृ. १७८ (७)

समाना इति तद्भावात् ।
[ ] पृ. २४२ (२०)

समुच्चयादिर्यश्चार्थः कश्चिच्चादेरभीप्सितः ।
तदन्यस्य विकल्पादेर्भवेत् तेन व्यपोहनम् ॥
[तत्त्वसं० का० ११५९] पृ. २२६ (५)

सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना ।
[श्लो० वा० प्रत्यक्ष० श्लो० ८४] पृ. ५६,५३७ (९)

सम्बद्धबुद्धिजननं तेषां सम्बन्ध एव च ।
[ ] पृ. १०७ (५,६)

सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः ।
[श्लो० वा० सू० ४ प्रत्यक्ष० श्लो० ३८] पृ. ५३५ (१)

सम्यग्दर्शन–ज्ञान–चारित्राणि मोक्षमार्गः ।
[तत्त्वार्थसू० १–१] पृ. ६५१

सर्ग–स्थित्युपसंहारान् युगपद् व्यक्तशक्तितः ।
युगपच्च जगत् कुर्यात् नो चेत् सोऽव्यक्तशक्तिकः ॥
[ ] पृ. ७१६ (९,१०)

सर्गादौ पुरुषाणां व्यवहारोऽन्योपदेशपूर्वकः, उत्तरकालं प्रबुद्धानां प्रत्यर्थनियतत्वात्, अप्रसिद्धवाग्व्यवहाराणां कुमाराणां गवादिषु प्रत्यर्थनियतो वाग्व्यवहारो यथा मात्राद्युपदेशपूर्वकः ।
[ ] पृ. १०१ (३)

सर्वं एवायमनुमानानुमेयव्यवहारः सांवृतः ।
[ ] पृ. ३७७

सर्वं एवायमनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिभेदेन ।
[ ] पृ. ५६४ (९)

सर्वचित्त–चैत्तानामात्मसंवेदनं प्रत्यक्षम् ।
[न्या० बि० १–१०] पृ. ५०१ (३) ५०८ (१६)

सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमविकल्पम् ।
[ ] पृ. ५०६, (१,२)

सर्वज्ञो दृश्यते तावन्नेदानीम्—।
[श्लो० वा० सू० २ श्लो० ११७] पृ. ५५
सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत ॥
[श्लो० वा० सू० २ श्लो० ११७] पृ. ४५
सर्वज्ञो नावबुद्धश्चेद् येनैव स्यान्न तं प्रति ।
तद्वाक्यानां प्रमाणत्वं मूलाज्ञानेन वाक्यवत् ॥
[श्लो० वा० सू० २ श्लो० १३५] पृ. ५३ (२)
सर्वज्ञोऽयमिति ह्येतत् तत्कालेऽपि बुभुत्सुभिः ।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥
[श्लो० वा० सू० २ श्लो० १३४] पृ. ५३
सर्वत्र पर्यनुयोगपराण्येव सूत्राणि बृहस्पतेः ।
[ ] पृ. ६९,७४

सर्वत्राभेदाश्रयस्यानुच्छेदात् कृत्स्नार्थपरिसमाप्तेश्च यथाक्रमं जातिधर्म्मो एकत्व-नित्यत्व-प्रत्येकपरिसमाप्तिलक्षणा अपोह एवावतिष्ठन्ते; तस्माद् गुणोत्कर्षादर्थान्तरापोह एव शब्दार्थः साधुः । [ ] पृ. २०१ (८)
सर्वदा सदुपायानां वादमार्गः प्रवर्तते ॥
[श्लो० वा० निरालम्ब० श्लो० १२८] पृ. ३७७
सर्वभावाः स्वभावेन स्वस्वभावव्यवस्थितेः ।
स्वभाव-परभावाभ्यां यस्माद् व्यावृत्तिभागिनः ॥
[ ] पृ. २४३ (२०,२१,२२)
सर्वमालम्बने भ्रान्तम् ।
[ ] पृ. ५१२ (२)
सर्वमेकं सल्लक्षणं चं ब्रह्म ।
[ ] पृ. २७३ (३)
सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका ।
जायते द्व्यात्मकत्वेन विना सा च न युज्यते ॥
[श्लो० वा० आकृ० श्लो० ५] पृ. २३३
सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ॥
[श्लो० वा० सू० १ श्लो० १२] पृ. १६९ (७,८)
सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ।
चोदितो दधि खादेति किमुष्ट्रं नाभिधावति ॥
[ ] पृ. २४२ (३३)
सर्वे धर्मा निरात्मानः सर्वे वा पुरुषा गताः ।
सामस्त्यं गम्यते तत्र कश्चिदंशस्त्वपोह्यते ॥
[तत्त्वसं० का० ११८६] पृ. २२९
सर्वेऽप्यनियमा ह्येते नानुमोत्पत्तिकारणम् ।
नियमात् केवलादेव न किञ्चिन्नानुमीयते ॥
[ ] पृ. २१
सवियप्प-णिव्वियप्पं । [प्र० का० गा० ३५]
पृ. ६२८ (५)
सव्यापारप्रतीतत्वात् प्रमाणं फलमेव सत् ।
[ ] पृ. ५२९ (११)
सव्यापारमिवाभाति व्यापारेण स्वकर्मणि ।
[ ] पृ. ४५९ (७) ५२९
सव्वत्थोवा तित्थयरिसिद्धा तित्थयरितित्थे अतित्थयरिसिद्धा असंखेज्जगुणा । [ ] पृ. ७५२
सव्वाओ लद्धीओ । [विशेषाव० भा० गा० ३०८९]
पृ. ६०८ (८)
सव्वे वि एगदूसेण णिग्गया जिणवरा ।
[आवश्यकसू० गा० २२७] पृ. ७५० (२)
स सर्वो (सर्वो) मिथ्यावभासोऽयमर्थ इतीष्यत एव यथोक्तेष्वेका (मर्थेष्वेका)त्मकग्रहः । इतरेतरभेदोऽस्य बीजं संज्ञा यदर्थिका ॥ [ ] पृ. १८१ (१६,१७,१८)
सहभाविनो गुणाः क्रमभाविनः पर्यायाः ।
[ ] ४७८ (५)
सहवर्तिनो गुणाः । [ ] पृ. १४७
सह सुपा । [अ० २ पा० १ सू० ४ पाणि० व्या० पृ० १६० अं० ६४९] पृ. २७१
सहस्रवर्त्मा सामवेदः । [ ] पृ. ७३१ (३)
सांव्यवहारिकस्य च प्रमाणस्यैतल्लक्षणम् ।
[ ] पृ. ४७०
साकारे से णाणे अणागारे दंसणे ।
[ ] पृ. ६०५
साक्षादपि च एकस्मिन्नेवं च प्रतिपादिते ।
प्रसज्यप्रतिषेधोऽपि सामर्थ्येन प्रतीयते ॥
[तत्त्वसं० का० १०१३] पृ. २०३ (१६,१७,१८,१९)
सागारमणागारं लक्खणमेयं तु सिद्धाणं ।
[प्रज्ञाप० द्विती० प० सू० ५४ गा० १६०]
पृ. ६०८ (५)
सादृश्यस्य च वस्तुत्वं न शक्यमवबाधितुम् ।
भूयोऽवयवसामान्ययोगो जात्यन्तरस्य तत् ॥
[श्लो० वा० उपमान० श्लो० १८] पृ. ५७६
साधने पुरुषार्थस्य सङ्गिरन्ते त्रयीविदः ।
बोधविधौ समायत्तम्—॥ [ ] पृ. ७४१
'साध्यसद्भावे एव सर्वत्र साधनसद्भावः' इत्येवं भूतान्वयाऽप्रसिद्धौ 'साध्याभावे सर्वत्र साधनस्य अभावः' इति सकलाक्षेपेण व्यतिरेकस्यासम्भवात् । [ ] पृ० ६७१
साध्यसाधनम् । [न्यायद० १-१-६] पृ. ५७८ (९)
सामर्थ्यभेदः सर्वत्र स्यात् प्रयत्नविवक्षयोः ।
[श्लो० वा० सू० ६ श्लो० ८३] पृ. ३६
सामान्यं नान्यदिष्टं चेत् तस्य वृत्तेर्नियामकम् ।
गोत्वेनापि विना कस्माद् गोबुद्धिर्न नियम्यते ॥
[श्लो० वा० आकृ० श्लो० ३५] पृ २४० (१५,१६)

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात् ।
[साङ्ख्यका० ६] पृ. ५६६
सामान्यप्रत्यक्षात् विशेषाप्रत्यक्षात् विशेषस्मृतेश्च संशयः ।
[वैशेषिकद० २,२, १७] पृ. ४५२ (१)
सामान्यमपि नीलत्वादि नीलाद्याकारमेव अन्यथा 'नीलम्' 'नीलम्' इति अनुवृत्तिप्रत्ययो न स्यात् इति हेतोरसिद्धत्वात् नानुमानबाधा । [ ] पृ. ६९३
सामान्यविषयत्वं हि पदस्य स्थापयिष्यते ॥
[श्लो० वा० शब्दप० ५५] पृ. ५७५
सिद्धश्चागौरपोह्येत गोनिषेधात्मकश्च सः ।
तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते ॥
[श्लो० वा० अपो० श्लो० ८३] पृ. १९१ (१०)
सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ।
[न्यायद० अ० १ आ० २ सू० ६] पृ. ९७
सुखमाह्लादनाकारं विज्ञानं मेयबोधनम् ।
शक्तिः क्रियानुमेया स्यात् यूनः कान्तासमागमे ॥
[ ] ४७८ (६)
सुविवेचितं कार्यं कारणं न व्यभिचरति ।
[ ] पृ. ११८,२६६,५६३,
सुविवेचितं कार्यं कारणं न व्यभिचरति अतस्तदवधारणे यत्नो विधेयः । [ ] पृ. ९०

सोमिला! एगे वि अहं जाव अणेगभूयभावभविए य अहं। से केणट्ठेणं भंते! एवं वुच्चइ? एगे वि अहं ।
[भग० श० १८ उ० १० सू० ६४७] पृ. ६२५
सोमिला! दव्वट्ठयाए एगे अहं, णाणदंसणट्ठयाए दुवे अहं ।
[भगवती० श० १८ उ० १० सू० ६४७] पृ. ६२५
सोऽयं प्रमाणार्थोऽपरिसङ्ख्येयः ।
[वात्स्या० भा० पृ० १ पं० १२] पृ. ५२४
सो य तवो कायव्वो जेण मणो मंगुलं न चिंतेइ ।
[पञ्चव० पृ. ३५ गा० २१४] पृ. ७४९ (२)
स्त्रीत्वादयो गोत्वादय इव सामान्यविशेषाः ।
[ ] पृ. २२२ (३)
स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्च मनसो लिङ्गानि । [१-१-१६ वात्स्या० भा०]
पृ. ५६२
स्वकर्मणा युक्त एव सर्वो ह्युत्पद्यते नरः।
स तथाऽऽकृष्यते तेन न यथा स्वयमिच्छति ॥
[ ] पृ. ७१५

स्वकारणसम्बन्धकालः प्रथमः ततः स्वसामान्याभिव्यक्तिकालः ततः अवयवकर्मकालः ततः अवयवविभागकालः ततः स्वारम्भकावयवसंयोगविनाशकालः ततः द्रव्यविनाशकालः ।
[ ] पृ. ६८७
स्वकीयरूपानुभावान्नान्यतोऽन्यनिराक्रिया ।
[ ] पृ. १६६ (१)
स्वगृहान्निर्गतो भूयो न तदाऽऽगन्तुमर्हति ।
[ ] पृ. ७५
स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम् ।
नहि स्वतोऽसती शक्तिः कर्तुमन्येन पार्यते ॥
[श्लो० वा० सू० २ श्लो० ४७] पृ. ४
स्वबीजानेकविश्लिष्टवस्तुसङ्केतशक्तितः ।
विकल्पास्तु विभिद्यन्ते तद्रूपाध्यवसायिनः ॥
[तत्त्वसं० का० १०४८] पृ. २०९ (१४,१५)
स्वभावेऽध्यक्षतः सिद्धे यदि पर्यनुयुज्यते ।
तत्रोत्तरमिदं युक्तं न दृष्टेऽनुपपन्नता ॥
[ ] पृ. २६
स्वभावेऽप्यविनाभावो भावमात्रानुरोधिनि ।
तदभावे स्वयं भावस्याभावः स्यादभेदतः ॥
[ ] पृ. ३२१ (२९) ५६९ (४)
स्वभावोऽपि स तस्येत्थं येनापेक्ष (?) निवर्तते ।
(?) विरोधिनं यथाऽन्येषां प्रवाहा मुद्गरादिकम् ॥
[ ] पृ. ३४८
स्वयमेव भावो न भवेत् । [ ] पृ. ४२५
स्वरूप-पररूपाभ्यां नित्यं सदसदात्मके ।
वस्तुनि ज्ञायते किञ्चिद् रूपं कैश्चित् कदाचन ॥
[श्लो० वा० अभाव प० श्लो० १२] पृ. ५८१ (६)
स्वरूपसत्त्वमात्रेण न स्यात् किञ्चिद् विशेषणम् ।
स्वबुद्ध्या रज्यते येन विशेष्यं तद् विशेषणम् ॥
[श्लो० वा० अपो० श्लो० ८७] पृ. १९२
स्वरूपस्य स्वतो गतिः । [ ] पृ. १५,४६५,४८३, ५१३
स्वरूपेणैव निर्देश्यः । [ ] ५९२
स्वसंवेद्यमनिर्देश्यं रूपमिन्द्रियगोचरः ।
[ ] पृ. १८७ (५)
स्वाभाविकीमविद्यां तु नोच्छेत्तुं कश्चिदर्हति ।
[श्लो० वार्तिक० सू० ५] पृ. २७८
स्वाश्रयेन्द्रियसन्निकर्षापेक्षप्रतिपत्तिकं सामान्यम् ।
[ ] पृ. ६९४
हयं णाणं कियाहीणं हया अण्णाणओ किया ।
पासंतो पंगुलो डड्ढो धावमाणो य अंधओ ॥
[आवश्यकनि० पढमाव० गा० २२] पृ. ७५६ (८)
हिताहितप्राप्ति-परिहारयोः । [ ] पृ. ४६९
सर्वज्ञः—। [ ] पृ. ४६
हिरण्यगर्भः समवर्तताग्रे । [ऋग्वेद अष्ट० ८ मं० १० सू० १२१] पृ. ३२,४०, ४२
हेतुना यः समग्रेण कार्योत्पादोऽनुमीयते ।
अर्थान्तरानपेक्षत्वात् स स्वभावोऽनुवर्णितः ॥
[ ] पृ. ५६३
हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥
[साङ्ख्यका० १०] पृ. २८१ (१८)
हेत्वाद्यर्थे टच् । [ ] पृ. २७१ (४)

६

*सन्मतिटीकानिर्दिष्टा ग्रन्था ग्रन्थकृतश्च ।

अ

अक्षपाद ५३९–२९
अक्षपादकणभुग्मतानुसारिन् ४७५–१७,७१८–३२
अङ्ग ६१४–१६
अत्राहुः ९३–३२,९५–२४
अध्ययन ३३२–१५,४७१–२८,५०९–३२,५६७-१७, ६९९–१३ (२)
अन्य ९७–२२,९८,९९,१०९,१५५,१८०–२२ (८,११), १८१ (२), १८२ (४), १८५ (१), २२२–४ (३), २७८,३५३,५६२ (५), ७१५ (२), ७४०–६
अपर १६–२८,१४६,१८० (२०), २३२,२३३,२७८, ३१०,३४०,४२२,४२८,५२३,५३१,५६०,५६२–१० (२), ५६५–२६,५६६–३२,६९८–१४ (२)
अभयदेव ७६१–२४
अर्हत् १–२०,४४,६३४–१७
अर्हत्प्रणीतशासन ४५३–३०
अर्हत्–सर्वज्ञशासन ६८–२६
अर्हदागम ६५१–३,७५३–३८
अर्हद्वचन ६२१–२५,६५१–१
अर्हन्मतानुसारिन् ४४१–२१
अविद्धकर्ण १००–३३,३३२–१५,६५८–३ (४), ६७४–१९
अष्टकादि ४०–३३,४२–५

आ

आगम ९३–२,२७३–४,२९५–१०,६१३–३४,६१९–११, ७४६–९,७५१–१३,७५६–३२
आगमविद् ७३२–२७
आचाराद्यंग ७५०–१९,७५१–२
आचार्य २७–२८,६८–१९,२८४–३३,३१६–११
आचार्य (विज्ञप्तिमात्रतासिद्धिकार) ३७६–३०
आचार्य (दिग्नाग) २०४–१०,२१२–१९ (१९), २१३–१०,२१७–१२,२२८–२०,२३१–८,३६५–२२,३७७-१९, ३८८–२२
आचार्य (सिद्धसेन दिवाकर) १–१६,२९–२५,४३–२१, ६७–३९,६८–१८,६९–३,१३३–२८,३७९–७,४४८–२८, ४५५–१९,४५७,६१२–१५,६४२–१२,६५०,७०४–२०
आचार्यीय (दिग्नागीय) २०४–८
आम्नाय २७३–१४
आयुर्वेद ७३१–१३
आर्हत २९–२४

इ

इन्द्रियसूत्र (न्या. सू.) ५३१–५

ई

ईश्वरकृष्ण २८०–३४,२८२–१९,२२६–१६,५६६–२६

उ

उद्योतकर (जुओ वार्तिककार अने वार्तिककृत्) १०१–१६,१०६–२३,११४–५,१३२–१९,१२७–१३,१७४–२८, १७५–१५,२००–२ (१), २०४–२,२२०–४,२२९–१४, ३३२–१५,४७१,५१९–३,६५९–१३,६६३–२३ (३), ६६८–४ (३), ६१९–८,६६६–११
उद्योतकरादि २०१–२१,६५९–१३
उद्योतकराध्ययनप्रभृति ४७१–२८
उलूक ६५६–१७ (३), ७०४–२८

ए

एक ९६–२३,३४०–३१,५६०–२ (१)

औ

औलुक्य १४०–४

क

कणभुग्मत ६५६–१३
कणभुग्मतानुसारिन् ३९०–१३
कणभुज् (जुओ वैशेषिकशास्त्रप्रणेतृ) ४४१–२१,४७५, ७१८–३३
कपिलमतानुसारिन् ७१८–३१
कपिलादि १३३–११
कपिलादिप्रणीतसिद्धान्त ६९–५
काणाद ६७६–२१,७२४–२७
कादम्बर्यादि ४०–३०,४२–६,५३६–२८
कापिल २८०–२७,२८२–२६,२९६–९,३००–२३,६५६–७
कालिदासकृतत्व ४०–३१
कीर्ति (धर्मकीर्ति) ५०६–३
कुमारसम्भवादि ४०–३१
कुमारिल १८७–१२,१९०–९,२०४–१९,२२३–१,२२९–११,२४०–२५,५६४–१४,५७०–१४,५७८–३३,६९५–२२ (२)
कुमारिलवचन २०४–१९ (१९)
केचित् ७१–४०,९१–६,९७–२१,१०९–२४,१४६–४१,१६८-२६,२७८–३१,३२४–१८,४०५–१०,४४०-२९, ४४५–३१,५२२–१८,५३१,५३८–४,५५३–१४ (९), ६११–२,६४०–९,७१४–११ (५)
कैश्चित् ३६–१४,७९–३५,१४२–१५,३१०–१९,३४१–१५,४५६–५
केषांचित् ५६६–३१,५९७–२ (१)

ग

गणधरादि ७५१–२४,७५४–२३
गन्धहस्तिप्रभृति ५९५–२४,६५१–२१
गोगाचार्य ५६४–३४ (१७)
गोयम ६०५–३
गौतम (इन्द्रभूति) ६०५–१०
गौतमादि (इन्द्रभूति आदि) ६३५–२

च

चतुर्थाध्याय (वा. भा.) ५२१–२
चतुर्दशपूर्व ७५२–३३
चतुर्दशपूर्वविपद् १७३–६
चतुर्दशपूर्वसंविद्भागिनी ७५१–२७
चार्वाक ४३–२६,६९–३९,७३–५,९३–३९,९४–२६, ९५–३२,११७–८,११८–१६,१३२–४१,१४९–१३,५०५-६,५३९–२८,५४६–१,५५४–१
चार्वाकमत ९४–३७,५५६–२,१६३–१६
चार्वाकमीमांसकदृष्टि ९४–२६
चार्वाकादि ५०५–५
चिकित्साशास्त्र ६१–३७,१७०–२३

ज

जिन ८–२६,२९–२०,४३–२२,६८–३०,६९–८,१३३–१२
जिनपुत्र (बौद्ध) ७३१–३३
जिनप्रणीत ४३–२२
जिनप्रणीतत्व १६९–५
जिनभद्रगणिक्षमाश्रमणपूज्य ६०८–२१
जिनमतानुसारिन् ८०–२५
जिनवचन ७५७–७,७६१–१५
जिनवचनमहोदधि १–१४
जिनशासन ६९–८
जिनोपदेश ६३८–२६
जैन ५८–४३,६९–३३,९०–४,१०७–८,२६५–२०,४६५-२५,४७४–७,४७८–१४,४८५–१५
जैनपक्ष ६४८–१२
जैनमत ४७८–१३,५२४–२१,५५१–८
जैमिनि ४८–१५,५६–२,६५–१३,५३४–१९,७१८
जैमिनीय ८०–२३,९४–३६,१३२–४१,४६६–९,४६७–१८ (९,१०), ५५२–२३
जैमिनीयम् ५३९–२८

त

तत्त्वचिन्तक ५६८–२२
तत्त्वबोधविधायिनी ७६१–२९
तत्त्वविद् २७२–२६,२७९–१०,२८०–१
तत्त्वार्थसूत्रकृत् (उमास्वाति) २६१,७४९–१०
तद्वादिन् (अनेकव्यक्तिव्यापिसामान्यवादिन्) ११२–२०
तान्त्रिकलक्षण ७३–१५,७५–२२,७६–४
तार्किक ७६–३,८९–३०
तीर्थकर २७१–१२,४५५–३१,६०५–२४
तीर्थकृत् १–२३,६३५–१२,७४६–२५
तीर्थकृद्वचन ४५६–१
तीर्थकृन्मत ४५६–५
तीर्थान्तरीय ७३६–३४
तृतीयसूत्र (न्या. सू.) ५६७–१५
तृतीयाङ्गैकस्थान (स्थानाङ्गसूत्र) ४५३–१७
त्रयी ४४–८
त्रयीविद् ७४१–२९

द

दिगम्बर ७४७–१९,७५४–३३
दिग्नाग (जुओ आचार्य) १७५–१३,१९१–२०,२०१–१३, २०४–२
दिग्वासस् ७४६–२४,७५५–५
दृष्टिवाद ६५१–१९
द्वात्रिंशिका २९–३१
द्वादशाङ्ग १–३०,६८–३०,६९–७,२७१–१०,६१५–२९, ६३८–२६
द्वादशाङ्गवाक्य ६१५–२९
द्वादशाङ्गी ७५१–२०,७५२–१६
द्वादशाङ्गैकश्रुतस्कन्ध ६१६–३३

ध

धर्मकीर्ति (जुओ कीर्ति) ६७–३०,६९–२९,७६–३३,१४९–१५,२४२–३१,२४५–१५,४६५–११
धर्मोत्तर ४७१–१५

न

नास्तिक–मीमांसक ७५३–४०
नास्तिक–याज्ञिक ७१८–३३
निर्ग्रन्थी ७५१–२५,७५४–१०

* परिशिष्टेऽस्मिन् स्थूला अङ्काः पृष्ठाङ्कसूचकाः, सूक्ष्मा अङ्काः पङ्क्त्यङ्कावेदकाः, कोष्ठकान्तर्गताश्चाङ्काष्टिप्पण्यङ्कनिवेदका ज्ञेया इति ॥

नैयायिक ८४-३३,९३-१३,१०९-२,१२६-३०,१३८-२,१५९-२०,१६१-४१,१६२-३९,१७७-१९,४७१-१८ (७),४७५-२३,५०९-१९,५१८-३२,५२२-२२,५२५-२६,५२९-३३,५३६-१३,५३८-२२,५३९-१२,५५२-१३,५५९-२६,५६५-३४,५८४-१,५८९-२९,६७१-२९,७२१-२८
नैयायिकत्व १५९
नैयायिकदृष्टि ५६५-३४
नैयायिकादि ७५-२७,४७५-२२,४८४-३३,४८५-८,५०५-८
न्यायभाष्यकृत् ७२१-२५
न्यायवादिन् ७५३-६
न्यायविद् ९४-३३,११६-१७,२७०-७,२७१,३९५-४

प

पतञ्जलि ६९-१३,१५३-१८
पदार्थप्रवेशकग्रन्थ ६६१-१ (२)
पर ३०८-२९,३२५-२९,३३६-११,४५५-२०
पाणिनि १७९-२ (४)
पाणिन्यादिकम् ४३-१३
पाणिन्यादिकप्रणीतव्याकरण ४३-११
पाशुपत ७४७-१८
पूरण ७१८-३१
पूर्वाचार्य (जैन) ६३-१७,६८-३८
प्रकरणकार (जुओ आचार्य अने सिद्धसेन दिवाकर) ६०७-३१,६०८-२५
प्रकृतिकारणिक २९६-१३
प्रज्ञाकर २६५-२६
प्रज्ञाकरमतानुसारिन् २६५-२६
प्रज्ञाकराभिप्राय ५००-१८,५०१-१०,५१२-१२
प्रत्यक्षसूत्र ५३१-११,५६७-२०
प्रथमसूत्रव्याख्यान (न्या. सू.) ५६७-१७
प्रद्युम्नसूरि ७६१-२९
प्रमाणवार्तिक ५७१-२१
प्रशस्तमति १०१-१९,१३२-५,७१६-१८
प्रशस्तमतिप्रभृति १०१-२९,१३२-२८
प्राभाकर २९-१३

ब

बाण ४०-३१
बुद्ध ४४-१६,६८-२१
बुद्धादिशासन ६८-२६,६९-४
बुद्धादिसर्वज्ञपूर्वकत्व ६८-२१
बृहस्पति ७४-११,५५५-१४
बृहस्पतिमतानुसारिन् ६९-३२,७३-३९,७७-१७,७१८-१७५१-२३
बृहस्पतिसूत्र ७०-१८
बोटिकादि ७५६-६
बौद्ध १५,५४,७६,७७-९,८४,८६,९३,११५,११७,१६१,१७३,३०८-१०,३०९,३६३,४७०,४७५-२२,४८६,५०१,५२९,५४६-२,६७४-६,७०६,७०७,७०९,७१८-२,७२७
बौद्धदृष्टि ८४-८
बौद्धमतानुसारिन् ८६-२२
ब्रह्मभाषित ६४१-३३
ब्राह्मण (बृहदारण्यक) २७३-६

भ

भगवत् (जैनतीर्थंकर) ६११,६१६-३०,६३४,६३५,६३९,७५१-४,७५२,७५४,७६१-१६
भगवत् (बुद्ध) ३७७-१,३७८-२
भट्ट (कुमारिल) १८-२८,१९१-२०,२०१-२१,५०५-११
भट्टोद्योतकरादि २०१-२१
भर्तृहरि ३७९-२३,७५३-२९
भर्तृहरिवचस् ४३५-८
भारत ५६-१०,५३६-२८ (७)
भारतादि ४०-३३,४१-२,४२-१३
भाष्य (वा. भा.) १०९-३,१२०-२,५०९-१८
भाष्यकार (वात्स्यायन) (जुओ न्यायभाष्यकृत् अने भाष्यकृत्) ९९-४०,७८-५
भाष्यकार (शबर) (जुओ भाष्यकृत्) ३५८-१८
भाष्यकारमत (वा. भा.) १७८-५
भाष्यकृत् (वात्स्यायन) १५३-२६,५२२-१५,५२४-८
भाष्यकृत् (शबर) ९४-२८
भाष्यकृत् प्रभृति (जिनभद्रगणिक्षमाश्रमणप्रभृति) ६५३-४(३)
भाष्यवचन (शाबरभाष्य) ५७८-३३
भाष्यवाक्य (वात्स्यायनभाष्य) १५४-२०
भाष्यविरोध (वा० भा०) ५६३-१०
भिक्षु ७४६-३१
भुवनगुरु (तीर्थंकर) १-२२

म

मण्डलिन् ७१८-७
मन्त्रब्राह्मणरूप २९५-१०
मन्त्रार्थवाद ४०-३६,४२-२५
मल्लवादिन् ४४७-२३,६०८-२१
माध्यमिक ३७८-९
माध्यमिकदर्शनावलम्बिन् ३६६-१३
माहेश्वर ११९-२६
मीमांसक २-२,१३-३७,४२,४८,५०-४१,६८-३६,७४,११७,२१५,२६७,३८६-१३,४३५,५०५-९,५५२,५७४,७३८-८,७४१
मीमांसकमत २९-१४,३५२-१४,५१३-५
मीमांसकादिप्रसिद्ध ७४-४०
मीमांसकाभिप्राय ७४१-२८

य

यदप्यत्राहुः ७९-४
यदाह १४-२१,१८५-६
यः ७८-१०,१०७-२०
याज्ञिक ७१८-६
ये १०-८,९६-२८,१५३,१९९-१३ (१२,१३,१६),२७९-२१
यैः २४०-६,५३५-४ (३)
योगाचार ३७८-८,४६३-१९

र

रक्तपट ७४६-३०
रामायण ५६-१०
रामायणादि ५३६-२८ (६)

ल

लक्षणकार २१७-९
लोकायतशास्त्र ३९-२३

व

वर्धमानार्क १-८
वाचकमुख्य (उमास्वाति) ८०-२७,९३-४,५९५-१९,७४९-११
वाचकमुख्यसूत्र (उ० स्वा० कृत त० सू०) ६३६-३
वाजध्यायन (जुओ अध्ययन) १७२-२ (२)
वादिवृषभस्तुतिकृत् ७५७-२० (२)
वार्तिक (श्लोकवार्तिक) ३१-१६
वार्तिककार (न्या० वा० उद्द्योतकर) १००-२९,५३४-२० (९)
वार्तिककारप्रभृति (न्या० वा० उद्द्योतकर) ५३४-२० (९)
वार्तिककारमत (न्या० वा० उ०) १७७-२२
वार्तिककारीय (श्लो० वा० कारीयकुमारिल) ९९-४०
वार्तिककारीयदूषण (श्लो० वा०) १३०-३१
वार्तिककृत् (कुमारिल ?) ८-१३,४९-२,५७-१०
वार्तिककृत् (न्या० वा० उ०) ८०-१०,९९-२९,१३०-१५,५६३-२१
विन्ध्यवासिन् २९६-२२,५३३-३
विश्वामित्र ६९७-२५
वेद ३०,३२-९,३९-२६,४०-८,४१,४२-३,४३,११७,३८०-४,७३१-६
वेदवचस् ३२-२
वेदार्थज्ञ ६५-१३
वैदिक ३९-२३
वैदिकी ४२-३८,९४-४०,९५-१

वैभाषिक १८५-१६,३७८-६,३९७-३२,४५८-१४,४५९-१२
वैयाकरण १०९-२१,२२२-९,३८०-१९,४३१-१५,४८९-२,५६६-६
वैशेषिक १२९,१३३,१३८,३२१-४,४३२-३०,४३९,४७२,५२९,५५२,५७१,६२९,६८५ (६), ७०७-३८,७०८,७०९,७२७-३७
वैशेषिकमत ५१९-१०
वैशेषिकशास्त्रप्रणेतृ (कणाद) ६५६-१७
वैशेषिकसिद्धान्त २२२-८
वैशेषिकादि ३०३-५,४००-६,५५२-२३,४२२-१६,६१६-२८,६३३-२ (१), ७१९-२५
वैशेषिकाभिप्रायतः ६२९-१४
व्याकरणप्रणेतृ ४३-१२
व्याख्याप्रज्ञप्त्याद्यङ्ग ६१४-१६
व्याडि १७९-३ (३)
व्यास ९८-३०,६९७-२५

श

शङ्करस्वामिन् ६६४-१५ (७), ६९३-५ (१)
शबरस्वामिन् (जुओ भाष्यकार अने भाष्यकृत्) ५०५-११
शाक्य ८९-१७,९४-१६,१००-२७
शाक्यदृष्टि ९४-२४,५३३-३
शाक्यौलूक्य ७०४-२८
शाबर (जुओ भाष्यवचन) ५०५-९
शास्त्र ६५७-६,७०९-३५
शास्त्रकृत् ३६४-१३
शास्त्रान्तर ४५९-२
शौद्धोदनि ६५६-८
श्रुति ९८-३६
श्वेतभिक्षु ७४६-३२,७५०-३७,७५१-२३
श्वेतवासस् ७४६-२७
श्वेताम्बर ७४७-४

स

सकलशास्त्रव्याख्यातृ ५८-१२
सन्मति ७६१-२३ (११)
सन्मतिटीका ७६१-२२ (९)
सम्बन्धवादिन् २६४-२२
सन्मतिटीका १-९
सन्मतिवृत्ति १-८
सन्मत्याख्यप्रकरण १-१७
सहस्रवर्त्मन् (सामवेद) ७३१-६
सांख्य १०१-७,२८०-२१,२९७-२९,३०८-३३,३०९,४२२,४८६,५१२-१७,५४६,५७२,६५६,७०४-२९,७०५-२,७१८-२

साङ्ख्यज्ञान ६०६-५
साङ्ख्यदर्शन १११-४०,१३५-२७,२८०-२३,३१०-६, ५३४-१
साङ्ख्यबौद्धकणभुज् ४४१-२१
साङ्ख्यमत ४१७-३०,५००-३,५०७-२८,६५६-७
साङ्ख्यमतप्रतिक्षेपक २९६-९
साङ्ख्यमतानुसारिन् ५३४-१६
साङ्ख्यविशेष ४२२-१४
साङ्ख्यसौगतमत ६५६-१३
साङ्ख्याद्येकान्तवादिदर्शनसमूहमय ७५७-२३
सामवेद ७३१-७
सितपट ७४६-२९
सिद्धसेनदिवाकर (जुओ आचार्य प्रकरणकार, अने सूरि) १-१७
सिद्धसेनाचार्यवचन ७५७-२० (२)
सिद्धान्त (जैन) ६३५-१७
सुगत ५०२-२६
सुगतज्ञान ६०६-७
सुगतसुत ११८-३८,१३२-३८
सुगतसुताभ्युपगम ३३३-२१
सुरगुरुमतानुप्रवेश २८०-८
सूत्र (मीमांसासूत्र) ३१-१३,४८-१५,१०६-१
सूत्र ६१३-३४
सूत्र (आयारंगादिसुत्त) ७३२-५
सूत्र (न्या० सू०) ९७-७,१७८-१०,५२८-१९,५३०-१४,५६०-२ (१), ६६९-२०
सूत्र (पन्नवणासुत्त) ६०५-१ (१)
सूत्र (पाणिनिसूत्र) ४०६-७
सूत्र (बृहस्पतिसूत्र) ५५५-१४ (९)
सूत्र (भगवतीसूत्र) ६२५-१०
सूत्र (वैशे० सू०) ६६९-७,६७२-१५,६७३-१७,६८५-२६,६८६-१४
सूत्रकार (न्या० सू० अक्षपाद) ५२८-३,५६३-२०,५७८-२६,७२०-३६
सूत्रकृत् (न्या० सू० अक्षपाद) ५२८-१३,६२१-८
सूत्रधर ७३२-१४
सूत्रनिर्देश (जैनसूत्र) ६१७-४
सूत्रपद्धक (न्या० सू०) ५३१-१७
सूत्रयुक्तिविरोध (जै० सू०) ६१७-२०
सूत्रविरोध (तत्त्वार्थसूत्र) ६१८-१७
सूत्रसमूह (आगमनां सूत्र) ६१४-१५
सूत्रसमूह (तत्त्वार्थसूत्र) ५९५-२४
सूत्रसमूह (न्या० सू०) ५३१-१३
सूत्रसंदर्भ ६१३-२ (१)
सूरयः ९७-३६
सूरि (सिद्धसेन दिवाकर) ६५-२५,६८-२३,१३३-११, १६९-५,३१५-४,५९६-२२,६०९,६१५,६२१-२५
सेश्वरसाङ्ख्य २८०-२८
सैद्धान्तिक ५५३-१४ (१०), ६५१-२६
सौगत ३-१,४२-११,८१-१३,९०-४,१३८-३८,१४५-३,१४८-१२,१४९,२०२,२६८-१६,३१८,३२०,३४९-२०,३८४-९,३८७-२१,३८८-२२,३८९-१६,३९९-३२, ४००-४,४३९-४,४६७-२०,४८०-३,४८३-२२,४८४-७,४८६-२३,४८८-२१,५१८-२७,५४५-२२,५५२-२१ ५५४-१४,५६३-१,५६५-३४,५६६-२,५६७-२९,५७२-३६,५९१-३१,६२९-९,६८२-८,७३८-८,७४१-२९
सौगतदर्शन २७०-११
सौगतपक्ष ५११-१२
सौगतप्रसिद्ध १३८-४१
सौगतमत ४७८-१२,५१०-२,५४३-६
सौत्रान्तिकमत ४०१-८
सौत्रान्तिकयोगाचार ४६३-१९
सौत्रान्तिकवैभाषिक ३७८-६
सौत्रान्तिकवैभाषिकमत ४००-३६
स्फटिकसूत्र (न्या० ६) ५२७-१३ (५)
स्तुतिकृत् ७५०-१
स्वयूथ्य (जैन) ६३३-२ (२), ७३२-५

ह

हेतुमुख १९९-८,२१७-९
हेतुलक्षणप्रणेतृ ६८-३८

७

*सन्मतिटीकागता वादिनो वादाश्च ।

अ

अकृतसम्बन्धवादिन् ३८६
अक्रमोपयोगवादिन् ६०८
अक्षणिकवादमत ४२८
अक्षणिकवादिन् २५३
अद्वैत ७४,२७६
अद्वैतपक्ष २८०
अद्वैतप्रतिपादक २७३
अद्वैतवाद ४१९
[अद्वैतवाद] ४२८
अद्वैतवादावतार २९५
अद्वैतवादिन् ३७,२७६
अद्वैतैकान्त ६१६
अनर्थान्तरभूतपरिणामवाद ४२३
अनुमानवादिन् ७२,७३
अनेकधर्मात्मकैकवस्तुवादिन् २६५
अनेकान्त ६४०
अनेकान्तपक्ष ४४५
अनेकान्त(वाद) १०७,२६२,४१४, ४४५,६०९,६३८,६३९,७२५, ७३०
अनेकान्तवादव्याघात ६४३
अनेकान्तवादापत्ति ४७३,७०५
अनेकान्तवादाभ्युपगम ४७१
अनेकान्तवादिन् २६१,४१३,४२४, ४७४,६३७
अन्यापोहवादिन् २६३
अपोह (वाद) १७३,१७४,१८५, २००,२०२
अपोहवादिन् १८१,१९४,१९६
अप्रामाण्यवादिन् ४३
अभाववादिन् ५०
अभिजल्पपक्ष १८४ (१)
[अभिजल्पपदार्थवाद] १८०,१८४
अभेदपक्ष ६०८
अभेदवादिन् २७९,२९४
अभेदाद्वैत ६१७
(अभेदैकान्तवाद) ६३७
अभेदैकान्तवादिन् ६३६,६३७
अभ्युपगमवाद ४९,९१,२६०,३०१
अभ्युपगमवादिन् ७०७
अर्थवादिन् ३७७,४६६
अव्यभिचारवादिन् ५४७
अशुद्धद्रव्यास्तिकप्रकृतिव्यवहारमतावलम्बिन् ३८६
असत्कार्यवाद २९७,३०२,७०६(३), ७०७
असत्कार्यवादिन् २९७,३०१
[असत्यसम्बन्धपदार्थवाद] १८०, १८३
[असत्योपाधिसत्यपदार्थवाद] १८०, १८३
[असद्वाद] ७०५
असमानजातीयगुणानारम्भवादिन् ७०८
असम्बन्धवादिन् २५३
असर्वगतात्मवादिन् १४५
[अस्तित्वादिवादषट्क] ७१८-१९
अस्त्यर्थपदार्थवाद १७९,१८३
अस्वसंविदितविज्ञानाभ्युपगमवादिन्५६८
[अहेतुवाद] ६५०,६५१
अहेतुहेतुवाद ६५०

आ

आगमप्रमाणवादिन् २९५
आगमप्रामाण्यवादिन् ९२
[आत्मपरिमाणवाद] १३३-१४९
आत्मप्रत्यक्षवादिन् ५२८

इ

इन्द्रियार्थसन्निकर्षवादिन् २४४

ई

ईश्वरकृतजगद्वादिन् ६९
ईश्वरवादिन् ७१६
ईश्वरसिद्धि १०५,१२९
[ईश्वरस्वरूपवाद] ६९-१३३

उ

उत्पत्तिवादिन् ३५
[उपयोगवाद] ५९६-६१०

ए

एकसम्बन्धानभ्युपगमवादिन् २६४
एकज्ञानिन् ६१०
एकत्ववादिन् ३७१-६१०
एकनयवादिन् ७३२
एकलक्षणहेतुवादिन् ७२६
एकात्मवादिन् २७८
एकान्तनित्यवाद ४७४
एकान्तवाद ४४४,५१५,५९२,७१८, ७२५
एकान्तवादिन् २६२,४१८,४२२,५०९, ५२४,५५२,५९२,७१९,७२५, ७२६,७२७,७३३,७३५,७३९, ७४५,७६१
एकान्तवादिवाक्य ७३७
एकान्तसत्कार्यवाद ७०७

क

कथात्रय ५६२
कमण्डलुटट्टिकादिलिङ्गधारिन् ७५०
कर्मवादिन् ७१४
[कर्मैककारणवाद] ७१४-१५
कर्मैकान्तवाद ७१५
[कवलाहारवाद] ६१०-६१५
कारकहेतुप्रतिक्षेपवादिन् ७१४
कारणभिन्नं कार्यं तत्रासद्वाद ४२४
कारणात्मकपरिणामवाद ४२३
[कार्योत्पत्तिवाद] ४२४
कालवादिन् ७११
कालाद्येकान्तवाद ७१०

---

* परिशिष्टेऽस्मिन् सर्वेऽप्यङ्काः पृष्ठाङ्कं सूचयन्ति, ( ) एतच्चिह्नान्तर्गता अङ्काष्टिप्पण्यङ्कं सूचयन्ति, [ ] एतच्चिह्नान्तर्गताः शब्दाः ग्रन्थाभिप्रायं समीक्ष्य सम्पादकैर्योजिताः ॥

कालाभ्युपगमवादिन् ३२४
कृतकसम्बन्धवादिन् ३८६
क्रमवादिदर्शन ६१०
[क्रमोपयोगद्वयवाद] ६०७
क्रमोपयोगवादिन् ६०७,६०८
[क्षणभङ्गवाद] ३१८–३४९,३८७
क्षणभङ्गवादिन् ३४४
क्षणिकभावाभ्युपगमवादिन् ७०६
क्षणिकवाद ४७०
क्षणिकवादहानिप्रसक्ति ४७०
क्षणिकवादिन् २५५,४२७,६६२
क्षणिकैकान्तवाद ७०६,७२७
क्षणिकैकान्तवादिन् ७२८

ग

गणितशास्त्र ६३५

च

चार्वाकमत ९४
चार्वाकमतप्रसक्ति १६३
चार्वाकमीमांसकदृष्टि ९४
चार्वाकाभिमतैकशरीरव्यपदेशभागनेकपरमाणूपादानानेकविज्ञानभाव १४९

ज

ज्ञानप्रमाणवादिन् ५२९
ज्ञानप्रामाण्यवादिन् ५२८
ज्ञानमात्रवादिन् २७७
ज्ञानवाद ३६५
ज्ञानाद्वैतवाद २९४
[ज्ञानानेकान्तवाद] ४०८
ज्ञानान्तरप्रत्यक्षवादिन् १६१,२५५

त

[तत्त्वाद्वैत] ४२८
तिर्यक्सामान्यवादिन् ५८
त्रिलक्षणहेतुप्रदर्शनवादिन् ७२६
त्रैवर्णिकप्रवाद ६९८

द

दूषणवादिन् ७२५,७२६
दृष्टिवाद ६५१
द्वैतप्रसङ्ग २७७
द्वैतवाद ४२८
द्वैतापत्ति २७८
द्वैतिन् २८०
द्रव्यगुणान्यत्ववादिन् ६३५
द्रव्यवाद १०५
[द्रव्याद्वैत] ४२८
द्रव्याद्वैतवादिन् ६३७
द्रव्यार्थान्तरभूतगुणवादिन् ६३८
द्रव्यार्थिकपर्यायार्थिकनयद्वयावलम्बिन् ६५६
द्रव्यार्थिकमतावलम्बिन् ३७९

न

[नयवाद] २७१–३१४,३१५–३१६
नयवाद ४२१,६५५,७४६
[नास्तित्वादिवादषट्क] ७२७–७२८
[निग्रहस्थानचर्चा] ७५९
नित्यवादिन् ७२०
नित्यसम्बन्धवादिन् ४३६
नित्यसुखाभ्युपगम १५३
निन्दार्थवाद २७३
नियति ७१४
नियत्येककारणवाद ७१४
निराकारज्ञानवादिन् ४६०
[निराकारविज्ञानवाद] ४५८–४६३
निर्णयात्मकानुभववादिन् ५०६
निर्विकल्पकप्रत्यक्षवादिन् २६५
निश्चयात्मकाध्यक्षवादिन् ५०७
[निषेधमात्रान्यापोहवाद] १८५,२०३

प

पञ्चलक्षणयोग्यविनाभावपरिसमाप्तिवादिन् ७२३
पञ्चलक्षणहेतुवादिन् ७१९
पञ्चविंशतितत्त्वज्ञ २८१
परतःप्रामाण्यवादिन् २,१५
परतीर्थिक ७४७
परलोकवादिन् ७५
परस्परनिरपेक्षैकनयावलम्बिन् ६५६
परोक्षज्ञानवादिन् १२ (४)
पर्यायास्तिकमतानुसारिन् २९५
पाषण्डिन् ७१८
पुरुषवादिन् ७१५,७१७
पुरुषाद्वैतवाद ३८५
पुरुषाद्वैतसिद्धि ३७
[पुरुषैककारणवाद] ७१५–७१७
पूर्वपक्षवादिन् ७२६
प्रकृतीश्वरकालादिकृतत्व २१५
प्रतिभापक्ष १८४ (१०)
[प्रतिभापदार्थवाद] १८२,१८४
प्रतिभासाद्वैतवाद ५१३
[प्रतिमावाद] ७५४
प्रतिवादिन् ३०,१५६,७५९,७६१
प्रत्यक्षानुमानप्रमाणद्वयवादिन् ५५४
प्रत्यक्षैकप्रमाणवादिन् ७३
[प्रधानाद्वैत] ४२८
प्रधानाद्वैतवाद ४२८
प्रमाणव्यवहारिन् २६७
प्रमाणषट्कवाद ४७
प्रमाणसप्तवादिन् ८४
[प्रामाण्यवाद] २–२९
प्रेरणाप्रामाण्यवादिन् ४३

ब

बहिरर्थवादिन् ४८५
बाह्यार्थवाद ३६५,४०१
बाह्यार्थवादिन् २७७,३०४,३९७,४६३,६६३
बुद्धिक्षणिकत्ववादिन् १३९
बुध्याकारवादिन् १८१,१८२
[बुध्यबुध्यारूढाकारपदार्थवाद] १८१,१८४
बौद्धदृष्टि १४७
बौद्धपक्ष ५२९
बौद्धयुक्ति २९
बौद्धाभिमतसंवेदनाद्वैत ७४
बौद्धाभ्युपगम ४०१
ब्रह्मवादिन् २७७
ब्रह्माद्वैतवाद ७७,४२८

भ

भावविक्षेपवादिन् ३८६
भेदवादिन् २७६,२८६,२९३,२९६
भेदाभेदवाद ६३६
[भेदैकान्तवाद] ६३७
भेदैकान्तवादिन् ६३७

म

मिथ्यावाद ४२९,६३६
मिथ्यावादिन् ६३८
[मुक्तिस्वरूपवाद] १५०–१६६

य

यथाप्रदर्शितवस्त्वभ्युपगमवादिन् २६६
युगपदुपयोगवादिन ६०८
युगपदुपयोगद्वयवादिन् ६१०

र

रूपादिक्षणिकविज्ञानमात्रशून्यवाद ७३०

ल

लोकप्रवाद ५७
लौकिक ३९,१५३,२३६,३१९,४५८,४६८
लौकिकी ६२९

व

वाद ३७७,६५०
वादमार्गप्रवृत्ति ३७७
वादिन् ३०,८९,४८४,४८७,६४६,७२६,७५९,७६०
वादिप्रतिवादिन् १४२,५३७,५५५,७६०
वादिप्रतिवादिप्राश्निक २९५,३७७
[विकल्पप्रतिबिम्बपदार्थवाद] १९९
[विज्ञप्तिमात्रवाद] ३४९–३६६
विज्ञानवाद ३६५,३७२,३७६,४६३
विज्ञानवादप्रसक्ति ६६३
विज्ञानवादिन् ४०० (११), ४६१, ५५३ ?
विज्ञानशून्यतावाद ४८८
विज्ञानशून्यवाद १०५
विज्ञानशून्यवादानुकूलता २९४
विज्ञानाद्वैत ५१४
[विधिवाद] १७४–१७५ ई.
विधिवादिन् १७३
विपक्षवादिन् २६८
विभज्यवाद ७२५
विभागजोत्पादानभ्युपगमवादिन् ६४६
विवक्षा (वाद) १८५ (१)
[विवक्षापदार्थवाद] १८५
विशेषगुणोच्छेदविशिष्टात्मस्वरूपमुक्तयभ्युपगम १५१
विशेषणविशेष्यालम्बनभिन्नज्ञानवादिन् ५२९
वेदान्तवादिन् ३२१
[वेदापौरुषेयत्ववाद] २९–४३
वैदिकहिंसा ७३०
[वैभाषिकमत] १८५
वैभाषिकमत ४०१
वैयाकरणन्याय १०९
वैशेषिकप्रक्रिया २२३
व्यावृत्तवस्तुवादिन् २५४

श

[शब्दब्रह्मवाद] ३७९
शब्दब्रह्मवादिन् ३७९
[शब्दब्रह्माद्वैतवाद] ४२८
शब्दसमयवेदिन् ३१६
शब्दाद्वैत ४२८
[शब्दार्थतत्सम्बन्धवाद] १७३–२७०
शाक्यदृष्टि ९४
शून्यतावाद ४२८
शून्यवाद २७,२८,३३५
[शून्यवाद] ३६६–३७८
शून्यवादिन् ३७२,३७७

ष

[षट्पदार्थचर्चा] ६५६–७०४

स

[संविद्वपुरन्यापोहपदार्थवाद] २३३, २६५
संवृतिपक्ष २२४
संसारमोचक ७३१
[संकेतविधि-तद्विषयवाद] ३७९
सत्कार्यवाद २९७,२९८,२९९,३००, ३०१,४२३,५३४,७०६(४), ७०७,७२५
[सत्कार्यवाद] ४२३
सत्कार्यवादप्रसक्ति ७०६
सत्कार्यवादाभ्युपगम ३०१
सत्यवादस्वरूप ७२५
[सद्वाद] ७०७
सद्वादिन् ७२६
[समुदायपदार्थवाद] १८०,१८३
समुदायवाद ६४१
समुदायाभिधानपक्ष १८३
सम्बन्धाभाववादिन् २६४
सम्यग्वाद ४२९
सामयिकशब्दार्थचिद् ६१३
[सर्वज्ञवाद] ४३–६९
सर्वज्ञप्रतिक्षेपवादिन् ६८
सर्वज्ञवादिन् ४८,५०
सर्वज्ञापवादिन् १३२
सर्वप्रवादिन् २७७
सविकल्पप्रत्यक्षवादिन् २६५
[सहोपयोगद्वयवाद] ६०७
साकारज्ञानप्रमाणवाद ४६६
[साकारज्ञानवाद] ४५८–४६३
साकारज्ञानवादिन् ४६०,४६५
[सामग्रीप्रामाण्यवाद] ४७१–७२
सामान्यज्ञानापकारकसामान्यवादिन् २५९
सामान्यवादप्रसक्ति २६३
[सामान्यविशेषात्मकशब्दार्थवाद] २३७
साश्रवचित्तसन्ताननिरोधलक्षणमुक्तिवादिन् १६१
सिद्धान्तवादिन् ६३५,६३७
सुगतविनेय ७४६
(चीवरादिलिंगधारिन्)
स्थिरग्रहणवादिन् ५३९
स्याद्वाद ७३२,७३५
स्याद्वादप्ररूपणा ७४५
स्याद्वादरूपा ७२७
स्याद्वादिन् ७५८
स्वभावकालयदृच्छादिवाद ३१०
स्वभावैकान्तवाद ७१४
[स्वभावैककारणवाद] ७११–७१४
स्वरूपविशेषणवादिन् ५६२
स्वलक्षण (वाद) १०७
स्वसंवित्तिमात्रवाद ८२
स्वसंविदितज्ञानवाद ४७९
स्वसंविदितविज्ञानवादिन् ९०

ह

[हेतुवाद] ६५०–६५१
हेतुवाद ६५०,६५१
[हेत्वाभाससंख्यावाद] ७१९

८

*सन्मतिटीकागता दार्शनिकाः पारिभाषिकाश्च शब्दाः ।

अ

अकारणा-कार्योत्पत्ति ४२४
अक्ष-प्रभव-उपयोग ६५०
अक्षर ३७९
अगीतार्थ ७५६
अचेतन ३८७
अचेतनपदार्थाधिष्ठात्री १२७
अचेतन-सत्त्व १४१
अचेतनाधिष्ठायकत्व १२८
अचेलपरिषह ७४७
अचेलपरीषहजेतृ ७५१
अजीव ६५४,७३२,७३३
अजीवद्रव्य ६४०,६४१
अजीवविचय ७३४
अणु ६४६,६४८
अतात्त्विकानाद्यविद्योच्छेदार्थमुमुक्षु-यत्न २७६
अतीतानागतपर्यायाधार ४०५
अत्यन्ताभाव ५८१
अदृष्ट-कारण ७१५
अदृष्ट-कारणत्व ९५
अदृष्टपरिकल्पनावैफल्यापत्ति ४७६ (९)
अदृष्टप्रेरित ४७६
अदृष्ट-सत्त्व ११९
अदृष्टाख्य-गुण ६८५
अदृष्टाध्यारोप १९९
अद्वैत ३७१,४२८ (६)
अद्वैतमात्र-तत्त्व ४२८
अद्वैतापत्ति ३७१,३७४
अधर्म-अधर्मनिमित्तविपर्यास १३०, ६४१,६५४,७३२,७३४
अधःसप्तमनरकप्राप्ति-प्रसङ्ग ७१३
अधिकरण ४२५
अधिष्ठातृ १०१
अध्यक्ष ५०९
अध्यक्ष-ग्रहणव्यवस्था ३४०
अध्यक्षप्रमाण ५५२
अध्यक्षमति ५३३ (१,२)
अध्यवसाय २६१
अध्यवसायवश ३४०
अध्यारोप ३६१
अध्येषणादि ७४१
अध्येषणाभाव ७४०
अनधिगतार्थाधिगन्तृता ५७६
अनधिगतार्थाधिगन्तृत्व ४६६,४६७
अनन्तधर्माध्यासित-वस्तुस्वरूप १६६
अनन्तपरमाणूपचितमनोवर्गणापरिणतिप्रतिलभ्य-मनउत्पाद ६५०
अनन्तपर्याय-वस्तु ४१४
अनन्तपर्यायात्मक-द्रव्य ६४९
अनन्तवीर्य ६११
अनन्तवीर्यत्व ६१५
अनन्तसुखस्वभाव १३३
अनभिहितप्रयोजन-शास्त्र १६९
अनवस्था २,६,१३,१५,१८,५०,५४, ५८,११४,१२२,१२९,१३२,१३८, १४३,१६५
अनशनादि ७५५
अनाकार ६१०
अनाकार-दर्शन ४५८
अनादिकाला-भ्रान्ति ३४४
अनादिवासनासमुत्थ ३७६
अनिकायत्व ६३९
अनित्य ३४१
अनित्यत्वादिक ७५५
अनिर्वचनीया २७७
अनुत्तमसंहनन ७४७
अनुपदेशपूर्वकत्वविशेषणासिद्धि ६६
अनुपलब्धिप्रसूत ३५२
अनुपलब्धिलिङ्गप्रभव २.
अनुपलब्धि-हेतु ३३३
अनुपलम्भ २१
अनुभूयमानता २६
अनुमान २,१७,४३,३३४,३५२,३८४, ५५४,५५५,५६१,५६७,५६९, ५७०,५७२, (६), ५९०,५९२
अनुमानतः ३४८,३४९
अनुमानपूर्विका-अर्थापत्ति ५७९
अनुमानप्रवृत्ति २६८
अनुमानबुद्धि ४
अनुमानलक्षण ५६०,५६७,५७२ (३)
अनुसंधानप्रत्यय ३२०
अनुसंधानप्रत्ययलक्षणहेतु ८७
अनुसंधानप्रत्ययलिङ्ग ९०
अनुस्मरण ४६२
अनेकात्मकसत् ४४५
अनेकान्त १०७,१६६,४१६,७६१
अनेकान्तज्ञान १५५
अनेकान्ततत्त्वव्यवस्थापक ७२९
अनेकान्तपक्ष १६४
अनेकान्तभावभावन ४०८
अनेकान्तमतानुप्रवेश ७४५
अनेकान्तरूपता ६३१
अनेकान्तरूपवस्तुराद्धाव ७२२
अनेकान्तवाद ६२४,६३८,७२५
अनेकान्तवादप्रसक्ति २६२
अनेकान्तवादव्याघात ६४३
अनेकान्तवादसिद्धि ७०९
अनेकान्तवादापत्ति ४२५,४६४,४७३
अनेकान्तवादाभ्युपगम ४७१
अनेकान्तवादिमतानुप्रवेश ४७४
अनेकान्तसिद्धि २५५,४१४,४२४
अनेकान्तात्मक ५९,६०,६८
अनेकान्तात्मकता ६३१
अनेकान्तात्मकत्व ४५५,६२८
अनेकान्तात्मकवस्तु २६१,५२४,६५५, ७१९,७२६,७३०,७३२

* मध्ये—एतच्चिह्नभाजः शब्दा ग्रन्थाभिप्रायानुसारेण निदर्शिताः । ( ) एतच्चिह्नान्तर्गता अङ्काः टिप्पण्यङ्कं सूचयन्ति ॥

अनेकान्तात्मकवस्तुग्राहिनय ४२०
अनेकान्तात्मक-वस्तुतत्त्व ४२८
अनेकान्तात्मक सत् ४१४
अनेकान्तात्मकार्थप्रतिपादकत्व ७४६
अनैकान्तिक ७२०
अनैकान्तिक-हेतु ७२२,७२३
अनैकान्तिकहेत्वाभास ५५८
अन्तर्जल्पावसानप्रबोध १७४
अन्य ५८०
अन्यत्व ६३४
अन्यापोह १९९ (२),२३१,२३६, २३७,२६१
अन्यापोहप्रतिपत्ति १९८
अन्यापोह-रूपपदार्थ १६६
अन्यापोह-शब्दार्थ १७३
अन्यावृत्ति २१३ (२१)
अन्योन्यनिश्रित ४२०
अन्योन्यविशेषित ६४०
अन्योन्यव्यतिरिक्तकालोत्पाद-विगम-ध्रौव्याव्यतिरिक्त-एकस्वरूप-द्रव्य ६४३
अन्योन्याभाव १८७
अन्योन्याश्रय ६,१३८
अन्वयव्यतिरेकनिबन्धन-कार्यकारणभाव २९६
अन्वयव्यतिरेकानुविधान-कार्यकारणभाव-व्यवस्थानिबन्धन १२४
अन्वितक्रिया ७४३
अन्विताभिधान ७४३,७४४
अन्वितार्थाभिधायकत्व ७३४
अपक्षधर्म-हेतु ५९३
अपक्षेपण ६८५,६८६
अपरत्व ६८१ (२)
अपरसमवायनिमित्त ७०३
अपरिशुद्धनयवाद ६५५
अपरीतता ६१०
अपरोक्षप्रकाशस्वभावता ३६६
अपवर्ग १३३
अपायविचय ७३४
अपोह १८५,१८६,१८८, (८),१८९, १९०,१९२,१९३,१९४, (२)१९५, १९६,१९७,१९८,२००,२०१, २०२ (१) २०३,२०४, (१), २०९,२१०,२११,२१२,२१४, २१५,२२४,२२५ (३) २३०, २३१,२३२
अपोहकल्पना १८९
अपोहत्व २६१
अपोह-शब्दार्थ १७३,२२७
अपौरुषेय ६६
अपौरुषेयत्व ८,११,२९,३२,४०,४१, ७३१
अपौरुषेयविधिवाक्यप्रभवा ४
अपौरुषेयशब्दार्थ-सम्बन्ध २६७
अप्रत्यक्षार्थविषयप्रमाण ५७३
अप्रशस्त-आत्मपरिणाम ७३४
अबोधिबीजत्व ७४९
अभाव २८८,५८०,५८१
अभावज्ञान ३०
अभावपूर्विका-अर्थापत्ति ५७९
अभावसिद्धि ३५२
अभावाकार ३६९
अभावाख्यप्रमाण २२,२४,३६९,५८०, ५८७ (५)
अभिग्रह ७५५
अभिजल्प १८० (११), १८१
अभिजल्पपक्ष १८४ (१)
अभिधानोपलब्धि ३८६
अभिधेयप्रयोजनप्रतिपादकत्व १७२
अभिनवकर्मोत्पत्ति ७३७
अभिमान ५२९,५५२
अभिमानमात्र २३७
अभिलाप ३८४
अभिव्यक्ति ३४,३००
अभिसमयसंवृति ३७८
अभिहितान्वय ७४३,७४४
अभेद ३६३
अभेद-तात्त्विकत्व २७९
अभेदपक्ष २८०
अभेदाध्यवसायि-शाब्दप्रत्यय १७४
अभ्यास १८२ (४), २६४
अभ्यासावस्था १७
अमरपर्याय ९३
अमूर्त ६३८
अयतित्व ७४८
अयोगिकेवलिन् ७३६
अर्थ ३६५
अर्थक्रिया १६,२३४,२७२,३३५, ३५०,३६७,३९९,४००,४०३, ४२७,४९८
अर्थक्रियाकारिन् ३२५
अर्थक्रियाज्ञान ६,७,१४
अर्थक्रियाज्ञानसंवाद ४
अर्थक्रियादि ४५४
अर्थक्रियानिबन्धन-भावसत्त्व ३५०
अर्थक्रियाकारिलक्षणसत्त्व ३९९
अर्थक्रियार्था ७
अर्थक्रियार्थिन् ४
अर्थक्रियालक्षण-सत्त्व ४०२, (१४), ७२८,७२९
अर्थक्रियालक्षणसत्त्व-विशिष्टकृतकत्व २५५,२५८
अर्थक्रियाविरोध १५८,४१३
अर्थ-संविद्-सहोपलम्भ ३५२
अर्थक्रियासाधन ४६८
अर्थक्रियासामर्थ्य ३२३,३२७
अर्थक्रियास्थिति ५१३
अर्थचिह्नरूप १८५
अर्थतथात्वपरिच्छेदरूप ४
अर्थतथात्वप्रकाशक २,८
अर्थनय ३१२,४४८
अर्थनियत ४३०
अर्थपर्याय ४३०,४४०,४५७
अर्थप्रकटता १४
अर्थप्रकटतालक्षणहेतु २२
अर्थप्रकाशता २६
अर्थराशि ७४६
अर्थवादकल्पना ३६५
अर्थवादादिवाक्य ७४४
अर्थविवक्षा १८५ (१)
अर्थव्यञ्जनपर्याय ४३१
अर्थव्यतिरिक्तज्ञानाकार-अनुपपत्ति ४६५
अर्थव्यवस्था ४६६
अर्थशून्याभिजल्प २३१
अर्थशून्याभिजल्पवासना-प्रबोध २३२
अर्थसंवेदन १४
अर्थसत्ता २९१,३६८
अर्थसाक्षात्करण ४९० (१०)
अर्थानपेक्ष २०६
अर्थान्तर्भूत ४४२ (२)
अर्थान्तरानर्थान्तररूप ६४४
अर्थापत्ति २७,४६२,५७८,५७९,५८६
अर्थापत्तिपूर्विका-अर्थापत्ति ५७९
अर्थाभिधानरूपज्ञेय-द्वयात्मकत्व ४५७

अर्थोपलम्भ ६१९
अर्थोपलब्धि ३८६
अलिङ्गपूर्वकत्व ६६
अवक्तव्य ४४५
अवक्तव्यभङ्ग ४४२
अवक्तव्यस्वभाव ४४६
अवग्रह ५५२ (७),५५३,६१७, ६१८,६१९,६२१
अवग्रहादि ६२०
अवग्रहादिमतिज्ञान ६२०
अवधि ६१५,६५०
अवधिज्ञान ६२०
अवधिज्ञानावरणकर्म-क्षयोपशम ६२०
अवभासशून्यता ३७१
अवयव १०५,६७१,७३३
अवयवसन्निवेश ११३
अवयवावयवि-समानदेशत्व १०३
अवयवि-द्रव्य १५८ (८)
अवयविन् १०५
अवाच्य ४४४
अवान्तरसामान्य ११०
अवाप्तकामत्व-ईश्वरत्व १३०
अवाय ५५२,५५३ (५)
अविकलचारित्रप्राप्ति ७११,७५२
अविद्या १५४,२७६,२७७,२७८,२७९, २९५,३८५,४१९
अविद्यानुबद्ध २७९
अविद्यासंसर्ग १५१
अविद्यास्वभाव ४१४
अविनाभाव ५५८,५५९,५९ २
अविनाभावपरिसमाप्ति ५६९
अविनाभाववैकल्य ५५८
अविनाभावसम्बन्ध ५६१
अविनाभावसम्बन्ध-स्मृतिविभाग ५६३ (१०)
अविनाभावानन्यापेक्षलिङ्ग ४
अविनाशधर्मिन् ७१८
अविभक्त-ब्रह्मात्मक-तत्त्व ३८३ (६)
अविरति ७४७
अविवेकिन् २८१ (११)
अविसंवादकत्व ४६९
अविसंवादन ५१३ (५)
अविसंवादित्व ६६,७२
अवीत ५९४
अव्याप्ति ५३१ (९)
अव्याप्ति-लक्षणदोष ४५९
अशुद्धद्रव्यार्थिक २८०,४०७
अशुद्धद्रव्यास्तिकप्रकृति ३८६
अशुद्धद्रव्यास्तिकसांख्यमतप्रतिक्षेपक-पर्यायास्तिक २९६,३१०
अशुभास्रव ७३५
अशेषकर्मक्षय ६११
अशेषकर्मक्षयनिबन्धनाध्यवसाय ७५२
अशेषकर्मक्षयलक्षणफल ७५६
अशेषकर्मक्षयाध्यवसायनिवर्तक ७५३
अशेषकर्मनिर्जरणरूप १६०
अशेषकर्मपरिक्षयसामर्थ्य-उपपत्ति ७३६
अशेषकर्मविगमस्वरूपसिद्धत्व ६२३
अशेषकर्मवियोगलक्षण-मोक्ष ७३७
अष्टधाचरण ७५५
अष्टविधकर्मात्मककार्मणशरीर ७३६
अष्टविध-पारमार्थिक-कर्मप्रवाहरूपानाद्य-विद्यात्यन्तिकनिवृत्ति १६०
अष्टविध-बन्ध ७३३
असत्कारण-कारण ७०५
असत्कार्यवाद २८३
असत्ख्याति ३७३
असत्यसम्बन्ध १८३ (१८)
असत्यसंसर्ग १८० (७)
असत्योपधिसत्य १८३ (१९)
असत्योपाधि-शब्दप्रवृत्ति-निमित्त १८० (८)
असदकरण २८२ (११)
असमानग्रहणलक्षण-गुण ६३३
असिद्धविरुद्धानैकान्तिकहेत्वाभास ७१९
असिद्ध-हेत्वाभास ५५८
अस्ति ४४१
अस्ति च अवक्तव्य ४४७
अस्ति च नास्ति च अवक्तव्य ४४७
अस्मर्यमाणकर्तृकत्व ४१,४२,४३
अहङ्कार ८०,२८१,(४),२८२
अहंप्रत्यय ८६,२७४
अहमितिप्रत्यय ८०
अहमिति प्रत्ययानपह्नव ८०
अहेतुवाद ६५०
अहेतुवादत्व ६५१

आ

आकार २२९
आकारभेद २७३,२७४ (१३)
आकारलक्षणत्व ३४३
आकाश ६५४,७३२,७३४
आकाशादि ६५६
आकुञ्चन ६८५,६८६
आकृति १७७,१७८
आख्यात ७३९
आगम ५७८
आगमपूर्विकाप्रसिद्धि ५७८
आगमप्रतिपाद्य ६५५
आगमसर्वज्ञपरम्परा ६०
आगामिगतिविशेष-उत्पत्ति ६५०
आचार्याराधनादि ७५५
आचेलक्य ७५१
आचेलक्यपद ७४६
आज्ञाविचय ७३५
आतिवाहिकादि ७३६
आत्म-अन्तःकरणसम्बन्ध ५२०
आत्मकर्मन् ४५२
आत्मगुण-बुद्धि १३५
आत्मचैतन्यलक्षण-भाव ४१८
आत्मद्रव्य ६६९
आत्मद्रव्यपर्याय ६३१
आत्मन् ७१,८५,११३,१३३,१३५, १४४,१५०,२७८,३१०,३४२, ६२०,६२३,६२५,६३१,७१७, ७१८,७३१,७३३
आत्मपर्याय ६३१
आत्म-पुद्गल ४५३,६२२
आत्मप्रच्युतिलक्षणधर्म ३९३
आत्म-विभुत्व १३३
आत्मविभुत्वप्रसाधक १४५
आत्मविभुत्वसिद्धि १४२,१४६,
आत्मविशेषगुण-सन्तान १५०
आत्मसिद्धि ९१
आत्मस्वरूपवत् १५३
आत्मानन्द-रूपता १६१
आत्मैकज्ञानत्व १५५
आदिवाक्य १६९,१७२
आदिवाक्योपन्यास १७०,१७२
आद्यशुक्लध्यानद्वय ७१४
आधाराधेयप्रतिनियम ७०२
आध्यात्मिक-धर्मध्यान ७३४
आध्यात्मिकभाव ७१२

आध्यात्मिक-रूप ३७७
आध्यात्मिकशुक्लध्यान ७३५
आनन्दरूपात्मस्वरूप १६०
आभिनिबोधिकज्ञान ६२१
आयुष्ककर्मन् ६१२
आर्तध्यान ७३४
आर्तध्यानोपगत ७४८
आर्यसत्य ७३३
आर्यसत्यचतुष्टय ४९९
आर्ष ७३१
आलम्बन ५१२ (२)
आवरण ३००
आवरणविनाश ४२३
आवरणापगम ६७८
आवारक ३५,३८,५१
आवारकत्व ५१,६०,१६१
आवृति १५३
आस्रव ७३२ (३),७३३,७३६,७३७
आस्रवादि-प्रतिपत्ति ७३७
आहारविरह ६१४
आहारव्यवस्थिति ६१३

इ

इच्छातः ७४१
इतरेतराभाव ५८१
इतरेतराश्रय २,५,३१,३२,४४,४६, ५०,५२,५४,७०,११८,१२३, १२९,१४१,१६४,७३३
इदानीन्तनयति ७५०
इन्द्रियज्ञान ४९९
इन्द्रियवृत्ति १२२
इन्द्रियव्यापार ५३९
इन्द्रियार्थसन्निकर्ष ५२३
इहजन्ममरणचित्त ८९
इहबुद्ध्यावसेयसमवाय १५६

ई

ईर्यासमित्यादि ७५५
ईश्वर ३१,६९,९५,९६,९९,१२२, १२५,१२६,१२७,१२८,१३१, १३२,४७६,५०६,७१५,७१६, ७१७
ईश्वरकल्पनावैयर्थ्य १२९
ईश्वरज्ञान १२५,४७९
ईश्वरज्ञानत्वासिद्धि ४७९ (१)
ईश्वरज्ञानादिहेतुक-जगत् १२६
ईश्वर-निमित्तकारण ११९
ईश्वरपरिकल्पनावैयर्थ्यप्रसक्ति ४७६
ईश्वरप्रेरित ४७६
ईश्वरबुद्धि १२७
ईश्वरसाधक ११७
ईश्वरसाधक-प्रमाणाभाव १३३
ईश्वरसिद्धि ९५,१०५,१२९
ईश्वराख्य-कारण १२७
ईश्वराख्य-सर्वज्ञ १३३
ईश्वरादि ४७९
ईश्वरादिप्रेरणा ७१६
ईश्वरादिविकल्प ५००
ईश्वराद्यनुमान ४८६
ईश्वरानेकत्वप्रसङ्ग १००
ईश्वरावगम ९३
ईश्वरावगम-प्रमाणाभाव १२४
ईश्वरोपदेष्टृत्व १३२
ईहा ५५२,५५३ (४)
ईहादिक ६२१

उ

उत्क्षेपण ६८५ (१), ६८६ (२)
उत्तमसंहनन ७५३
उत्तरपर्यायोत्पादात्मक-पूर्वपर्यायविनाश ४२६
उत्पत्ति ४८१
उत्पत्तिविनाशस्थितिस्वभाव ६४४
उत्पत्तिसत्तासम्बन्ध ६४८
उत्पत्ति-स्थिति-निरोध ४५१
उत्पत्तिस्थितिप्रलयात्मक-विचित्र-क्रीडोपाय ७१६
उत्पत्तौ परतःप्रामाण्य ११
उत्पत्तौ स्वतःप्रामाण्य ९
उत्पत्त्यभिव्यक्तिपक्ष ३६
उत्पन्नप्रतीतिप्रामाण्य ७६
उत्पन्नादिकालत्रय ६४५ (३)
उत्पाद ६०८,६४१,६४९
उत्पादविगमध्रौव्य ६२३
उत्पाद-विनाश ६२३
उत्पादविनाशस्थित्यात्मकत्व ६४२
उत्पादविनाशस्थित्यात्मकभाव ६५०
उत्पाद-विनाशस्वभावभाव ४०९
उत्पादव्ययध्रौव्य ३२३,३६७,४१२, ४२८,४२९,४५१
उत्पादव्ययध्रौव्य-लक्षण ९२
उत्पादव्ययध्रौव्यात्मकोपयोग ६१६
उत्पादव्ययस्थिति ६४५
उत्पाद-स्थिति-भङ्ग ४१०,४१५
उदयव्ययवती-अर्थमात्रा ३८१
उदयवतीस्मृति ३४३
उपप्लव ५११ (१०)
उपयोग ४५७
उपयोग-अनाकारता-साकारता ४५८
उपमान ५७५ (६), ५७६,५७८, ५८२
उपमानपूर्विका-अर्थापत्ति ५७९
उपमानलक्षण ५७७
उपलब्धि २९१,२९३,३६२,
उपलब्धिलक्षणप्राप्तस्वभाव ३२५
उपलब्ध्याख्य ३
उपलम्भे २८७
उपशमकक्षपकगुणस्थानभूमि ७३५
उपशमनवाञ्छा ६११
उपादानकारण ८८
उपादानग्रहण २८२ (१५)
उपादानत्व ८८,८९
उपादान-सहकारित्वलक्षणशक्ति ४०१
उपादानादि १०१
उपादानाद्यधिष्ठान ९६
उपाधि-तद्वत् २६४
उपाधिविशिष्ट-उपाधिमत् २६५
उपायविचय ७३४
उभय १७९
उभयवाक्यप्ररूपक-नयाभाव ४१६
उभयात्मकवस्तु ४१६,४१७

ऊ

ऊर्ध्वगतिपरिणामस्वाभाव्य ७३६
ऊह ५९४ (४)
ऊहाख्यप्रमाण ७७,३९७

ऋ

ऋजुसूत्र२८५,३१०,३११,३१२,३१४, ३६६,३७८
ऋजुसूत्रनय ४०७,४३०,४४०,४४८
ऋजुसूत्रवचनविच्छेद ३४९

ए

एक आत्मन् ४५३
एककार्यकारित्व २५५
एक-क्रिया ४५३
एकज्ञानिन् ६१०

एकत्वग्राहिन् ३४१
एकत्वप्रतिपत्ति ३४२
एकत्ववितर्कावीचार ७३५
एकत्वव्यवहारभ्रान्तता ४०४
एकत्वसिद्धि ८७
एकदण्ड ४५३
एकरूपोपलम्भ ३६३
एकविज्ञानजनक-क्षण २६३
एकसन्तान ३६७
एकसन्तानसमाश्रय २४७
एक-समवाय ६५७
एकसामग्र्यधीनत्व १२२
एकसूत्रधारनियमित-अनेकस्थपत्यादिनिर्वर्त्य १३१
एकाकारप्रत्ययगोचर ३४१
एकाकारसंविद् ३०५
एकादश-इन्द्रिय २८०,२८२
एकान्तनिर्गतविशेष ६२७
एकान्तविशेष ६२८
एकान्तोच्छेद ४१७
एवम्भूत २८५,३१०,३१४,३४९,३७८
एषणीय ७५१

ऐ

ऐकत्विकउत्पाद ६४१,६४२
ऐकमत्य १००,१३१
ऐश्वर्य ९

ओ

औधिकोपाधि ७५१
औत्पत्तिक ३८६
औदारिकव्यपदेश ६११
औदारिकशरीरत्व ६१२
औदारिकाद्यशेषशरीर ७३६
औपचारिक ८०,२६१
औपशमिकभाव ५९६

क

कथञ्चित्प्रतिपक्षसङ्ग्रह ७१८
कथञ्चित्सादृश्य २५५
कथा ४०५
कथात्रय ५६२
करण ७५५
करणत्व ४७३
करुणा १००
करुणाप्रवृत्त १३०
कर्तृ ९७,१०१,७१८
कर्तृता ९८,११२,४७३
कर्तृ-भोक्तृ-स्वभाव ७१८
कर्म-उपभोग १५९
कर्मकर्तृक्रियाव्यवस्था ३५५
कर्मकर्तृरूपत्वासिद्धि ४६१
कर्मक्षय १००,१३३
कर्मक्षयकारण ७५४
कर्मक्षयार्थ ६१५
कर्मत्व ४७३ (४)
कर्मन् १०२,१३०,१५०,४१८,६८६ (१),७१४,७१५,७३३
कर्मपरतन्त्र १३०
कर्मप्रकृति ७३५
कर्म-प्रक्षय १५९
कर्मफल ३०७
कर्मबन्ध ७३७
कर्मबन्धहेतुता ७४९
कर्मयोग्यपुद्गलात्मकप्रदेश ७३६
कर्मलक्षण १५०
कर्मवर्गणापुद्गल ७३३
कर्मविनाश १५०
कर्मादि-सामग्र्यभाव १३१
कर्माशय ९९,१००
कर्मेन्धन ७४९
कर्मैकान्तवाद ७१५
कर्मोत्पत्ति ११४
कल्पना २७०
कल्पनाविरचितलिङ्गप्रभवत्व ५६४
कवलाहार ६११,६१३
कवलाहारपरिकल्पना ६१५
कवलाहारित्व ६११
कषाय ७४७
काकतालीयन्याय ५७
कादाचित्कता ४०५
कायक्रियोत्पत्ति ६५०
काय-विज्ञानवैलक्षण्य ९०
कायोत्पत्ति ६५०
कारक २५
कारकव्यापारसाफल्य ४२३
कारकसाकल्य ४७२,४७३
कारण ११८,२५४,२८१,७१४
कारणकलाप ४७१
कारणकार्यविभाग २८४ (८)
कारणजातिभेद ४७४
कारणत्रयाभाव १२६
कारणत्व ५४
कारणनिवृत्ति ४२४
कारणभेद ३,७७
कारणव्यापार ४२३
कारणसमवाय १०८
कारणसामग्री ४१४,५३०
कारणस्वरूप-प्रागभाव ३४५
कारणात्मिकाशक्ति ३८५
कारणानुपलम्भ २१
कारणायत्त-कार्यस्वभाव ४०१
कारुण्यप्रेरित ९९
कार्मणशरीर ९२,७३६
कार्य ३,२८१
कार्यकारण ८९
कार्यकारणभाव ४९,५७,८७,९२,२६८, ३३२,३३३,७२७
कार्यकारणव्यवस्था १२४
कार्यकारणव्यवस्थानिबन्धन १२४
कार्यक्रमाभ्युपगम ४००
कार्यक्रिया-अयोग ४२६
कार्यगम्य-नियतत्व २७०
कार्यता ४८१
कार्यभेद ४७४
कार्यलक्षण-हेतु १२४
कार्यलिङ्गप्रभव ३५२
कार्यशून्यता ७०५
कार्यहेतुसमुत्थ २,३
कार्यात्मा-ध्वंसाभाव ३४५
कार्याभिव्यक्त ४२३ (६)
कार्यासत्त्व २८३
कार्योत्पादन ४२३
कार्योत्पादानुमान ५६२
काल २५७,५७१,६५४,६५५ (१), ६६८ (६) ७११,७१४,७१६, ७१७,७३२,७३४
कालकृतपरत्वापरत्व ६८१
कालत्रयप्रदर्शिप्रत्यक्ष ३३८
कालत्रयशून्य ७३९
कालभेद २७३,२७४,२८७,२९४
कालव्यतिरेक २५८
कालस्वभाव-नियति-पूर्वकृत-पुरुषकारणरूप ७१० (५)
कालात्ययापदिष्टत्व ७२३

कालात्ययापदिष्टत्वादिदोष ७१९
कालात्ययापदिष्टहेत्वाभास ७२१
कालाद्येकान्त ७१७
कालाभेद २९४
कालाभ्युपगम ४००
काल्पनिक १४५
कृतसमयध्वनि २५०
कृपापरतन्त्रता ७१६
केवलकेवलिन् ६१६
केवलज्ञान ५९५,६०७,६१७,६२१, ६२२
केवलज्ञानदर्शन ६०७
केवलज्ञानसम्पद् १,१३३
केवलज्ञानाख्य-अर्थपर्याय ६२३
केवलज्ञानावरणक्षय ६०६
केवलज्ञानोत्पत्ति १६०
केवलज्ञानोपयोगकाल ६१२
केवलदर्शन ६०७,६१२,६१७,६२१
केवलव्यतिरेकिन् ७२४
केवलान्वयिन् ७२४
केवलावबोध ६१७,६२१
केवलिलपर्याय ६२४
केवलिन् ६१३,६२०,७३६
केवलिभुक्ति ६१४
केवलिभुक्तिसिद्धि ६११,६१४
केवलोपयोग ६०६,६५०
कोपपरिणति ६३१
क्रम ३२४,३३६
क्रमभाविन् ६३५
क्रमयोग ३२९
क्रम-यौगपद्य १५८,२९६,३९८,४००, ४१२,४१३
क्रमवत् ३३१
क्रमवत् ज्ञानदर्शनोपयोग ६१०
क्रमवर्त्युपयोगपक्ष ६०९
क्रमसंवेदन ३३६
क्रमाक्रमविभाग ६१६
क्रमाक्रमोपयोगद्वयाभ्युपगम ६०९
क्रमोत्पाद ६०७
क्रमोपयोग ६०७,६१२
क्रमोपयोगद्वयात्मक ६१६
क्रमोपयोगप्रवृत्त ६१०
क्रिया २५
क्रियानुमेय-शक्ति १४७
क्रियामात्र ७५६
क्रियारहितज्ञान ७५६
क्रीडा ७१६
क्रीडार्थ-भगवत्प्रवृत्ति ७१७ (२)
क्रीडार्थप्रवृत्ति २७८
क्रोधादिकषायषोडशकनिग्रह ७५५
क्लिष्टकर्मन् १
क्लिष्टकर्मसम्बन्धहेतुता ७३१
क्लिष्टकर्मान्तराय १६९
क्लिष्टपरिणामवत्पुरुष ७५३
क्लेश १५२
क्षण २५७
क्षणक्षयसिद्धि ३९८
क्षणक्षयाधिगम ३४९
क्षणक्षयावभास ३९८
क्षणक्षयित्व ३८८
क्षणपरम्परा २९२
क्षणभङ्गप्रसङ्ग ३३२
क्षणभङ्गभङ्ग ५२७
क्षणमात्रवृत्ति-वस्तु ३४९
क्षणविशरारुता ३२१
क्षणविशरारुत्व ५६६
क्षणस्थिति ४११
क्षणिक ९१,७३१
क्षणिकता ३२९,३९२
क्षणिकताव्याप्त ३९९
क्षणिकत्व ४०३,७१८
क्षणिकत्वव्यवस्थिति ३४९
क्षणिकविज्ञप्तिमात्रावलम्बिन् ३६६
क्षणिकाभिव्यक्ति ३१९
क्षयोपशम ५९,५१७,७४५
क्षयोपशमकार्य ६१२
क्षयोपशमनिबन्धनक्रम ६१८
क्षयोपशमलक्षण-अभ्यास ६३
क्षयोपशमविशेषाविर्भूतज्ञान २६८
क्षयोपशमविशेषाविर्भूतप्राक्प्रदर्शितव्याप्ति-ग्रहणस्वरूपज्ञान- २५०
क्षयोपशमिकभाव ६२३
क्षायिक ६१५
क्षायिक-ज्ञानदर्शन ५९६
क्षायिकज्ञानदर्शनचारित्र ७५०
क्षायिकज्ञानदर्शनचारित्रवीर्यातिशयसम्पत्समन्वित ७३६
क्षायिकत्व ६१२
क्षायिकभाव ५९६,६२३
क्षायोपशमिक ६१५
क्षायोपशमिकभाव ५९६
क्षायोपशमिकभूमि ७३५
क्षीणावरणआत्मन् ६२१
क्षीणावरणत्व ६०६
क्षुदादिपरिषहैकादशक ६१५
क्षेत्रज्ञ ९८

ख

ख्याति ३६१

ग

गच्छत्तृणस्पर्शज्ञानतुल्य १६३
गतिक्रियापरिणतजीवद्रव्य ६४०
गतिक्रियापरिणामवद्द्रव्य ६४०
गमन ६८६
गुण ६३१ (४), ६३३,६३५,६७२ (५) ६७६ (३,४)
गुणरूपता ६८३
गुणशब्द ६३४
गुणार्थिकनय ६३४ (४), ६३५
गुणास्तिकनय ६३४,६३५
गुप्ति ७३५
गुरुत्व ६८३ (४,५)
गृहीतसम्बन्धलिङ्गप्रभव २
ग्रहणव्यवस्था ३४०
ग्राह्यग्राहकभावव्यवस्था ४६१

घ

घातिकर्मक्षय ७५४
घातिकर्मक्षयप्रभवसर्वज्ञतादि ६१३
घातिकर्मचतुष्टय ६२२

च

चक्रक ४,५,६,१३,१६,४१,५५,१३८, १४०
चक्षुरादिकरणपञ्चकसंयमप्रतिलेखन ७५५
चतुर्ज्ञानिन् ६१०
चतुर्थभङ्ग ४४६,७५८
चतुर्दशभक्तनिषेध ६१४ (२)
चतुर्लक्षणलिङ्ग ५५५
चतुर्विधकार्यद्रव्याभ्युपगम ६४८
चतुर्विधमतिज्ञान ५५३
चतुःसंख्य-परमाण्वात्मक-नित्यद्रव्य ६५८
चरण ७५५
चरणकरण ७५६
चरण-करणप्रधान ७५५
चातुर्वर्ण्यश्रमणसङ्घ ७५४
चारित्र ७५७

चित्तचैत्त-नानात्व २६२
चित्तपरिणति ७५१
चित्तसन्तति १६२
चित्ताचैत्त-स्वसंविद्रूपता ३६४
चित्स्वभावता १५१,१६०
चिन्ता ५५३
चिन्मात्रपरिज्ञान ११९
चेतन ३८७
चेतनत्व ११९
चेतन-वनस्पति ६५२ (१)
चेतन-सत्त्व १४१
चेतनाचेतन-द्रव्य ६३०
चेतनाधिष्ठातृत्वव्यतिरेक १२६
चेतना-लक्षण ७३२
चेतनालक्षण आत्मन् ४५४
चेलग्रहणप्रतिषेध ७४६
चैतन्य १५१,२९६,२९८,३०७
चैतन्यपरिणति ७३७
चैतन्यप्रतिपत्ति ६५२
चैतन्यमात्र ६५४
चैतन्यलक्षण ६५१
चैतन्यलक्षणआत्मन् ७१८
चैतन्योच्छेद १६०
चोदना ४१,४३,६२,५३९,७३१,७४०, ८४२,७४३
चोदनाप्रभव १९
चोदनावत् ५१
चोदनासदृशवाक्य ३२

छ

छद्मस्थ ६१०,६१२ (१), ६१९
छद्मस्थावस्था ६१६,६१८,६२०
छद्मस्थावस्थाभाविन् ६२५
छल ७७१,७३३
छाद्मस्थिकज्ञान ५२ (४) ६४
छाद्मस्थिकोपयोग ६२०

ज

जगत् ८९
जगत्-अदृश्यताप्रसक्ति ६४७
जगत्-एकत्व २७६
जगत् कारण ७११
जगत् कारणत्व ७१७
जगत्कर्तृत्वानुपपत्ति ११९
जगत्कर्तृत्वाभ्युपगम १२०
जगद्विधातृत्व १२८
जगद्वैचित्र्य ९५,११८
जडस्वरूप ७१८
जन्मान्तरशरीरसञ्चार ७१
जय-पराजय ७६०
जल्प ६७१,७३३
जाति १११,११२,११३,१७४,१७८, १७९ (१) २०७,२२३,२३३,२३४, २३८,६७१,७३३
जातिमत् १७४
जातिरूप ११३
जातिव्यक्ति १११
जातिव्यवस्था २२२
जिन १३३,६१६
जिनकल्पिक ७५१
जीव ६२०,६२४,६३१,७३२,७३३
जीव-कर्मन् ४५३
जीवकर्मप्रदेश ४५२
जीवद्रव्य ४५१,४५३,६४०,६४१
जीवत्व ६५१
जीव-पुद्गलप्रदेश ६३९
जीव-बन्धमोक्ष १६२
जीवविचय ७३४
जीवाजीवपदार्थद्वय ७३७
जीवात्मन् २७८
जीवादितत्त्व ६५१
जीवादितत्त्वप्रकाशक ७४५
जीवादिद्रव्य ४३०
जैनमतानुप्रवेश ५५१
ज्ञप्ति ७
ज्ञातृव्यापार २,८,२०,२१,२२,२५
ज्ञातृव्यापारलक्षणप्रमाणसिद्धि २५
ज्ञान ३४३,४५७,४८०,६०६,६१८
ज्ञानग्रहण ५२० (६)
ज्ञानचिकीर्षाधारता ४७३
ज्ञानचिकीर्षाप्रयत्नसमवाय ९८,१२५
ज्ञान-दर्शन ६२३
ज्ञानदर्शनएकत्व ६०९,६१०
ज्ञानदर्शनचारित्र ७५५
ज्ञानदर्शचारित्रत्रितय ६५१
ज्ञानदर्शनचारित्रात्मक ७५६
ज्ञान-दर्शन-चारित्रात्मकमुक्तिमार्ग ७२१
ज्ञानदर्शनोपयोगद्वयात्मक ६२१
ज्ञानपरमाणु १०५,२६९,४२७
ज्ञानप्रकर्षतारतम्य ५८
ज्ञानप्रयत्नचिकीर्षासमवाय ११९,१२२
ज्ञानरूप १४
ज्ञानरूपता ४८०
ज्ञानवाद ४६६
ज्ञानसन्तति ८९
ज्ञानाकार २३२,३५१,४६०,४६१,
ज्ञानाकारनिबन्धना-वस्तुप्रज्ञप्ति ३८०
ज्ञानादि-उत्पत्ति-समवायिकारण, असमवायिकारण-निमित्तकारण १२६
ज्ञानादित्रितय ७५५
ज्ञानाद्यावारकघातिकर्मचतुष्टय ६२
ज्ञानाद्युपष्टम्भनिमित्तशरीरस्थित्यादिहेतुता ७४७
ज्ञानावरणादि ७३६
ज्ञानावरणीयादि ७३३
ज्ञानावरणीयादिकर्मन् ७३७
ज्ञानोपयोग ६२०

त

तत्त्व ३४२,७३२,७३३
तत्त्वचिन्तक ५६८
तत्त्वव्यवस्था २६६
तत्त्वसंवृति ३७७
तथाख्याति ३८५
तदुत्पत्ति २०,५९४
तदुत्पत्ति-तादात्म्यलक्षणसम्बन्ध २६६
तद्योग (जातियोग) १७४
तन्त्रयुक्ति ५३१
तमश्छायादि ६७१ (७)
तमस् ५४३
तर्क ६७१,७३३
तात्पर्यार्थज्ञातृ ७४५
तात्त्विक ८०
तात्त्विकत्व २१६
तात्त्विकविनाश ३३३ (६)
तादात्म्य २०,२४१,२६८,५६४,५९४
तादात्म्य-तदुत्पत्ति ५५८
तादात्म्यतदुत्पत्तिलक्षणप्रतिबन्ध ३२१, ५६८
तादात्म्य-तदुत्पत्तिव्यवस्थापकप्रमाण ५६९
तार्किक ८९
तिर्यक्-पर्याय ९३
तिर्यक्सामान्य २६७
तीर्थ २७१,७५४

तीर्थकृदासादना ४५७
तीर्थप्रवर्तन ६११
तुच्छरूप-अर्थसत्त्व ३६८
तुलाप्रामाण्य ५२२ (३)
तृतीयनयाभाव ४१६
तृतीयभङ्ग ४४२,७५८
तैमिरिकज्ञान ५०९
त्रिंशद्धिकशतपरिमाणभङ्ग ४४७
त्रिकालता ६४५
त्रिकालशून्यविधि ७४०
त्रिगुणात्मक १४
त्रिगुणात्मकपुरुष ३०५
त्रिगुणात्मकवस्तु ३०४
त्रितय ३५४
त्रिधागुप्ति ७५५
त्रिधाहेतु ५५६ (२), ५५७
त्रिप्रकारपक्षधर्म ५५९
त्रिप्रकारलिङ्गालम्बन ५६७
त्रि-भङ्ग ४४५
त्रिरूपवत् ७२४
त्रिलक्षणलिङ्ग ५५५
त्रिलक्षणहेतु ५६९
त्रिविधअनुमान ५५९,५६०,५६२
त्रिविधयोगसिद्धि ४५३
त्रिविधसंस्कार ६८४ (१)
त्रिविधहेतु ५५८
त्रैगुण्य २८१,२८२
त्रैधातुक ७३१
त्रैरूप्य ४३७, (७), ७२०,७२४,७५९
त्रैरूप्य-अविनाभावपरिसमाप्ति ७१९
त्रैरूप्यसद्भाव ७२१
त्रैरूप्याभ्युपगम ७२३
त्रैलक्षण्य ५९१
त्रैलक्षण्यसद्भाव ७१९
त्र्यणुक ६४६
त्र्यणुकादि ६४९
त्र्यात्मक ६४४ (३)

द

दर्शनस्मरणरूपा-सामग्री २७६
देशकालाकारवस्तु ४६९
दर्शन २९३,४५७,५५३,६१८
दर्शनज्ञानस्वरूपद्रव्य-पर्याय ५९६
दर्शन-ज्ञानात्मन् ६२७
दर्शनज्ञानोपयोग ५९६
दर्शनपर्याय ४५२
दर्शनस्मरणएकाधिकरणता ३४२
दर्शनावरणक्षय ६०६
दर्शनावस्था ३४३
दर्शनोपयोग ६२०
दशधाक्षान्त्यादि ७५५
दशधावैयावृत्य ७५५
दानहिंसाविरतचेतस् ३८८
दिक्कालसाधन ६७० (३)
दिक्कृत-परत्वापरत्व ६८१
दिश् ६६९ (२)
दीक्षा ७३०,७३१,७३२
दुःख ७३३
दुर्नय ४१६,४४६,७५७
दृश्यानुपलम्भ २१
दृष्टसाहचर्यव्यभिचार ७०
दृष्टान्त ६७१,७३३
दृष्टान्त-दार्ष्टान्तिकसाम्य ४२२
दृष्टापलाप १९९
देवायुष्कजीव ६२४
देश-कालाभेद २७४
देशकालसन्तानाकार २७६
देशकालाकारभेद २८६,४७०
देशकालावस्थाभेद ७०
देशनैरन्तर्य-सादृश्य २६३
देशभेद २७३
देशव्यतिरेक २५८
देहमात्रव्यापक १३५
दोषाभाव १०
द्रवत्व ६८३ (४)
द्रव्य १३६,१७९,२८४,३८७,४०५, ४०६,४०९,४१०,४४७,४४९, ४५६,५१९,६२७,६२८,६३०, ६३१,६३६,६३८,६४३,६५६,
द्रव्यक्षेत्रकालभाव ४४६,६३७,
द्रव्य-क्षेत्र-काल-भाव-पर्याय-देश-संयोग-भेद ७२७
द्रव्य-गुण-कर्मन् ७०१
द्रव्यगुणकर्मवृत्ति-सत्तासामान्य ६७२
द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाख्यषट्पदार्थ ६५७
द्रव्यगुणकर्मस्वरूप १५६
द्रव्यगुणकर्मात्मकपदार्थत्रय ६८७
द्रव्य-त्रैकाल्य ६४५
द्रव्यत्व ६४४
द्रव्यनय ४४९
द्रव्यपरमाणु ७३५
द्रव्यपरिणति ६२७
द्रव्य-पर्याय २७१,६२३
द्रव्यपर्यायरूप ३८६
द्रव्यपर्यायात्म-अर्थ ५५३
द्रव्यपर्यायात्मकानन्तार्थग्रहण ६१६
द्रव्यपर्यायात्मकैकवस्तुतत्त्व ७१०
द्रव्यप्रतिपादकनयप्रत्ययराशिमूलव्याकरणिन् २८५
द्रव्यभावेन्द्रिय ६२०
द्रव्यमनस् ६१५
द्रव्यरूपता ६२३
द्रव्यलक्षण ४१०,४१५
द्रव्यवस्तु ४०५
द्रव्यसम्यक्त्व ७३२
द्रव्यस्वरूप ६४५
द्रव्यादि ११०,१७३,६१५
द्रव्यादिषट्पदार्थव्यवस्था ७२९
द्रव्याद्वैत ४२८
द्रव्यान्तर ६२९
द्रव्याभाव ६७२ (२)
द्रव्यार्थपर्यायार्थलक्षणनयवाद ७४६
द्रव्यार्थिक २८४, (१५) ३७९,४०६, ४०७,४०८,४०९,४१०,४१५, ४१७,४४८,४४९,४५७
द्रव्यार्थिकनय ६३४,६५६
द्रव्यार्थिकनिक्षेप ३८७,४०५,४०६
द्रव्यार्थिक-पर्यायार्थिक २७२
द्रव्याविरहि-पर्याय ४०७
द्रव्यास्तिक २७२,२८५,३४९,४०७, ४०८,४०९,४१५,४१७,४५५, ४५७,५९५
द्रव्यास्तिकनय ३१०,३११,३१५,६५६, ७०४,७०९,७२५
द्रव्यास्तिकपर्यायनय २७२
द्रव्यास्तिकप्रकृति ३१६
द्रव्येन्द्रिय ५५३ (१)
द्रव्योपयोग ४०८
द्वयसंवेदन २७५
द्वादशधा-तपस् ७५५
द्वादशभावना ७५५
द्वादशायतन ३२३
द्वितीयभङ्ग ४४३,७५८

द्विप्रमाण ५९५
द्विरूप ६२५
द्विविध-उपयोग ६५०
द्विविधसामान्य ६५७,६८८ (१)
द्विष्ठत्व ५९
द्विष्ठ-भेद २७५
द्वैराश्य २००,२५५
द्वैराश्यव्यवस्थापन ३२६ (४)
द्वैराश्यव्यवस्थिति ३२२
द्व्यणुक ६४६
द्व्यणुकादि ६४९,६५६
धर्म ४१,५०५,६६१, (१),७३१,७४० ७४२,७४३,७५४
धर्मकल्पद्रुम १
धर्मध्यान ७३४,७३५
धर्मानुप्रेक्षा ७३५
धर्मायतन ३२३
धर्मास्तिकाय ६४१,६५४,६५५, (३), ७३२,७३४
धर्मिन् ५९२
धात्वर्थमात्र ७४०
धारणा ५५२,५५३ (६)
ध्रौव्य ४१०
ध्वंस ३८९

न

नग्नत्व ७५१
नय २७२,३१०,४२०,४२९,४५७
नयद्वय ४०९
नयप्रमाणाभिप्राय ७५५
नयराशि २७१
नयवाद ४२१,६५५,७४६
नय-शतविधत्व ७५७
नयसमूहविषयसम्यग्ज्ञान ७५७
नयस्वरूप ४०८
नवद्रव्य ६७२
नवपुराणाद्यनेककक्रमभाविपर्यायाक्रान्त-घट २६०
नव-ब्रह्मगुप्ति ७५५
नानाभूत-एकत्वग्राहिप्रमाण ३९६
नाम-स्थापना-द्रव्य-भाव ३७९,४४३ (६)
नामाख्य १८५
नारकपर्याय ९३
नास्ति ४४२
नास्ति च अवक्तव्य ४४७
निक्षेप ३७९
निग्रहस्थान ६७१,७३३, (३)
नित्यद्रव्यवृत्ति ६९८, (१),६९९, (१)
नित्यसुखसंवित्ति १५४
नियति ७१४
निरंशक्षणिकैकान्त ७२८
निरंशक्षणिकैकपरमाणुसंवेदन ५१५
निराकार ८४
निराकार-ज्ञान ४०५,४६१,४६२,४६४
निराकारबोध ४५९
निराकारविज्ञान ४६०
निराकारा अर्थबुद्धि ४६२
निरोध ७३३
निर्जरा ७३२,७३५,७३७
निर्णय ६७१,७३३
निर्वाण ७१८
निर्वाणप्राप्ति ७५४
निर्वाणफलहेतुसम्यग्दर्शनचारित्र ७५१
निर्विकल्प ४३१
निर्विकल्पकस्वसंवेदनवादिन् २५०
निर्विकल्पज्ञान ३४१
निश्चितप्रामाण्य १
निषेध १९८
नील-तद्धी ३६२,३६३,३६४
नैगम ३१०,३११,३८६
नैगमनय २८५
नैगम-सङ्ग्रह-व्यवहारर्जुसूत्र-शब्द-समभिरूढैवम्भूतनय ६५५
नैगमादि २७२,७५७
नैयायिकाभ्युपगतपदार्थ ६७१ (६)
नैरात्म्य ११०
नैरात्म्यनिषेध १०९
नैरात्म्यप्रतिपादन ३६६
नैर्ग्रन्थ्य ७४७,७४८
नैर्ग्रन्थ्याभाव ७४६
नोइन्द्रिय ६१९

प

पक्ष ३५१, (६),५९२
पक्षधर्म ५५६ (२)
पक्षधर्मता ५७०
पक्षधर्मतानिश्चयहेत्वङ्ग ५७१
पक्षधर्मत्वादित्रिलक्षणयोगिन् ५९० (३)
पक्षधर्मान्वयव्यतिरेकलक्षण ५६२
पक्ष-सपक्ष ७२१
पक्ष-सपक्ष-विपक्ष-व्यवहार ७२०
पञ्चकर्मन् ६५७,६८५, (१)
पञ्चज्ञानिन् ६१०
पञ्च-तन्मात्र २८०,२८२
पञ्चधा-समिति ७५५
पञ्चपदार्थवृत्तिरूपसमवाय ६७२ (४)
पञ्चमभङ्ग ४४६,७५८
पञ्चलक्षणलिङ्गप्राप्ति ५६२
पञ्चविंशति-तत्त्व २८१
पञ्चव्रत २८०,७५५
पञ्चास्रवविरमणादिसंयम ७५५
पदार्थ १७४, (१५),१७७,२०६,३२५, ५२२,७४३
पदार्थकादाचित्कत्व ७४
पदार्थपञ्चक ७०२
पदार्थप्रवेशकग्रन्थ ६६१ (२)
पदार्थभेदक ७७
पदार्थव्यवस्था ६५७
पदार्थषट्क ६५७
पदार्थसङ्करप्रसङ्ग ७०२
पद्मलेश्या ७३५
परतन्त्र २८२
परतः-अप्रामाण्य ८,१०,११
परतःप्रामाण्य १७,१९,२८,७३
परतःप्रामाण्यनिश्चय ७,१८
परपक्ष ७६०
परपर्याय ६३०
परप्रकर्षप्राप्ति ६१
परभवप्रादुर्भाव ६३१
परमशुक्लध्यान ७३५
परमाणु १०५,१३५,१४५,२५२,२८७, ४११,६४६,६४७,६५६,६९८, ७३६
परमाणुपर्यन्तत्व ६४८ (३)
परमाणुपर्यन्तविनाश ६४९
परमाणुपारिमाण्डल्यादि २७०
परमाणुप्रभवत्व ३१०
परमाणुरूपादि १३५
परमाणुषड्कसम्बन्ध २५२
परमाणुसमूहात्मक १४
परमाणुस्वलक्षण ३८८
परमाण्वादि १२४
परमाण्वादिस्वभावव्यवस्थिति ६९८
परमानन्दस्वभावता १५१

परमार्थ ४०६
परमार्थसत् ३६७,४१४
परमाह्लादरूपानुभव १६१
परलोक ७१,७५
परलोकव्यवस्था ७४
परलोकसद्भाव ६९
परलोक-सिद्धि ७७
परस्परपरिहारस्थितिलक्षण २४१
परस्परस्वरूपोपादान ४१५
परामर्शज्ञान २३८,५६३, (१२),५७८
परामर्शप्रत्यय २०८
परिच्छित्ति ५२२
परिणति २९६,३९३,४५१,५३४
परिणाम २९७,३८३,७५९
परिणामकृत-अर्थ ४२३
परिणामकृतसमूह ४२२,४२३
परिणामप्रसाधकप्रमाण २९७
परिणामसामान्य १६४
परिणामिकारणता ७४१
परिमण्डलादि ६०५
परिभाषा ५२५
परिशेष ५६६ (१०),५७१
परीषह ७४७,७५१
परीषहोपसर्गाभिभव ७५४
परोक्ष ५९५
परोक्षा ३५८
परोक्षोपयोग ६५०
पर्यनुयोग ७०,७२,७३
पर्यनुयोगमात्र ६९
पर्यवनय २७१
पर्याय ३१२,४०९,४१०,४४०,४५३, ४५६,६२४,६२७,६२८,६३०, ६३५ (३),६४०,६४१
पर्यायनय ३१७,३४९,४०७,४०८, ४०९,४४८,४५५
पर्यायनयभेद २८८,३१०,३११,३१७,
पर्यायनयोग ४३१,४४०
पर्यायवक्तव्यमार्ग ४२९
पर्यायविशेष ६५६
पर्यायसंज्ञा ६३५
पर्यायाक्रान्तवस्तु ४०८
पर्यायाभिमत ४१०
पर्यायार्थिक ३७९,४०६,४०८,४१५, ४१७,४३०,४४८,४४९,४५५, ४५७
पर्यायार्थिकनय ६३४,६५६
पर्यायाशून्य-द्रव्य ४०७
पर्यायास्तिक २८५,३१४,३४९,३८०, ४५७,५९६
पर्यायास्तिकनय ३८६,४०७,४०९, ४१५,४५५,६५६,७०९,७२५
पर्यायास्तिकाभिमतपूर्वापरक्षणविविक्तमध्यक्षणमात्रवस्तु ४०५
पर्युदास २९,४२८
पर्युदासरूपनिषेध्य २२४
पर्युदासलक्षणअपोह २०२, (१)
पर्युदासवृत्ति १०
पश्यन्तीवाच् ४९३
पापध्यान ७३४
पारतन्त्र्य १०
पारमार्थिक १४५
पारमार्थिक-प्रमाणलक्षण ४६५
पारमार्थिक-ब्रह्मस्वरूप-साधन ३८४
पारमार्थिकत्व १
पारमार्थिकाद्वैतसिद्धि २९५
पारमार्थिकानेकाकार-ज्ञानाभ्युपगम २६२
पारिणामिकादि ६२३
पारिभाषिक १०३,५२५
पारिमाण्डल्य ४११
पारिमाण्डल्यलक्षण-नित्यत्व ६७५
पारिशेष्य २४६,२५६,४०५,४१२, ५१९,५२२,५४१,६७९ (१)
पिण्डविशुद्ध्यादि ७५५
पीतलेश्या ७३५
पुण्यापुण्यबन्धहेतुता ७३३
पुद्गल ३७८,४५४,४५५,६१५,६४०, ६५४,७३२,७३४
पुद्गलता ६३९
पुद्गलद्रव्य ४३०,६३१
पुद्गलद्रव्यात्मकत्व ६७२, (१)
पुद्गलधर्मत्व ८६
पुद्गलपरिणति ६११
पुद्गलपरिणामत्व ७८
पुद्गलरूप-कर्मन् ७३६
पुद्गललक्षणविलक्षणता ७१८
पुद्गलविकारत्व ९०
पुद्गलात्मककर्मन् ७३४
पुद्गलास्तिकाय ६५४,६५५, (२)
पुरुष ११२,२८२, (१६),३०६,३१०, ६३१,७१५
पुरुषजीव ६२४
पुरुषविशेष-ईश्वर १३३
पुरुषवेदापरिक्षय ७५२
पुरुषाद्वैतसिद्धि ३७
पुरुषायुष्कजीव ६२४
पुरुषेच्छा ३९
पुरुषेच्छानिबन्धनत्व ४७१
पूर्वजन्मसिद्धि ९२
पूर्वधर ७५४
पूर्ववत् ५५९,५६०,५६४,५६७,५९४
पूर्ववित् ७३६
पूर्वापरदर्शनावसेय-वस्तु ३७३
पूर्वापरैकत्वग्राहिदर्शन ३४०
पृथक्त्ववितर्कवीचार ७३५
पृथग्उपलम्भ ३६३
पृथिव्यादि-मनःपर्यन्त-द्रव्यनवक ६७१
पृथिव्यादि-मनुष्यपर्यन्त-षड्विधजीवनिकाय ६५१
पृथिव्यादिस्थावर ६५२
पौद्गलिक ६०
पौद्गलिकत्व ३८,३९
पौद्गलिकत्वविचारणा १०८
प्रकरण ७१९
प्रकरणसम ७२०
प्रकरणसमता ७२१
प्रकरणादि २३६
प्रकाशता ४६३,४६४,४८०
प्रकाशतानुप्रविष्टता ४६६
प्रकाशाख्याभेदोल्लेख ३६५
प्रकृति ३०७
प्रकृति-ईश्वर-कालादि-कृतत्व २१५ (१)
प्रकृतिविकारभेद २८२ (४)
प्रक्रिया ३८० (१)
प्रचय ६४७
प्रच्युति ३८९,३९१,३९२
प्रच्युतिमात्र-प्रध्वंसाभाव ३२१
प्रज्ञामेधा ७१,७४,७७,७८
प्रणवस्वरूप ३८०
प्रतिक्षणभावित्व ३८९
प्रतिक्षणविशरारु ८७,८९,३३१,७१८
प्रतिनियतदेशकालहेतुता ७१३
प्रतिपक्षव्युदास ७१८

प्रतिपत्ति ४८९
प्रतिपत्तिप्रमोषकल्पना ३७२
प्रतिपत्ति-प्रवृत्ति-प्राप्ति-लक्षणव्यवहार २६७
प्रतिपत्ति-विगम ६४४
प्रतिबिम्बक २०९,२१७,२३०
प्रतिबिम्बात्मक-अपोह २०६, (१६)
प्रतिबिम्बात्मन् २०३ (११)
प्रतिबिम्बोदयन्याय ३०८
प्रतिभा १८२ (४),३५०
प्रतिभाख्य-अपोह २०६
प्रतिभातः ५४७
प्रतिभापक्ष १८४ (१०)
प्रतिभास ३७१,३७६
प्रतिभासन २७४
प्रतिभासभेद ८३,३६४
प्रतिभासमानता २९१
प्रतिभासवपुस् ३७१
प्रतिभासंवेदन ३८७ (१३,१४)
प्रतिभासाद्वैत ४८७
प्रतिभासोपमत्व ३७१,४८८
प्रतिभासोपलब्धि ३८८
प्रतिमा ७५५
प्रतियोगिगुणात्मक १०
प्रतिरूप ३१६
प्रतिषेध ७४१
प्रतीति १११
प्रतीत्यवचन ६२८,६२९,६४१
प्रत्यक्ष १३,११९,२४५,२८७,३३४, ३४३,५०८ (१),५१८,५२०, ५२४,५३१,५९५,६२०
प्रत्यक्षतः ३४९
प्रत्यक्षनिराकृत ३५१ (६)
प्रत्यक्षपूर्विकार्थापत्ति ५७९
प्रत्यक्षप्रतीति ११३
प्रत्यक्षप्रामाण्यलक्षण ७२,५३४ (९) ५३९
प्रत्यक्षानुमानप्रतीतिभेद ५६६
प्रत्यक्षानुमानभेद ५१८
प्रत्यक्षानुमानलक्षणद्विप्रमाण ५७३
प्रत्यक्षानुमानादि भेद २८५
प्रत्यक्षोपयोग ६५०
प्रत्यभिज्ञा ३३,३४,३७,१०४,११२, २८६,२८९,२९०,२९१,३१८, ३१९,३४४,३९४
प्रत्यभिज्ञादि ६४१
प्रत्यभिज्ञान ७८,८६,९२,१३६,२८६, ३३५,३४३,३७३,३९४,३९६, ४३५,५३८
प्रत्यभिज्ञाप्रत्यक्ष ५६,३३७
प्रत्यभिज्ञाप्रमाण ३३४
प्रत्यय ३१९,३८०,६१८
प्रत्ययत्व ८९
प्रत्ययहेतुत्व १५६
प्रत्युत्पन्नभाव ६२८
प्रथमभङ्ग ४४२,४४३,७५८
प्रधान २८०,२८१,२८४, (३),२९६, ३०६
प्रधानकारणिक-जगत् ३१०
प्रधान-पुरुष २८२
प्रधानाद्वैत ४२८
प्रध्वंस ३८९
प्रध्वंसाभाव ५८१
प्रमा ४६६,४८१, (५) ५०८ (१८)
प्रमाण २,५,८,१२,१५,२०,३९,४१, १२०,२८५,३३९,४२१,४५८, ४६५, (६) ४६६ (७),४६७ (११) ४७१,४७२,४७५,४८८,५०९, ५१३,५३७,५५४,५५५,५८४, ६७१,७३३, (२)
प्रमाणता ५५३
प्रमाणत्रयसम्पाद्य-सङ्गत्यवगम ३२
प्रमाणद्वयनिबन्धन ३१८
प्रमाण-नय ४२०
प्रमाणनयप्रमाणद्वार ७४५
प्रमाणनयस्वरूपावधारण ७४६
प्रमाणनिबन्धनत्व ७१०
प्रमाणनिबन्धना ७३,७४
प्रमाणपञ्चक २३,४१
प्रमाणलक्षण १४,४६७ (११) ४६९, ४७१
प्रमाणशब्द ४५९
प्रमाणसामान्यलक्षणप्रस्ताव ५५१ (१०)
प्रमाणादिव्यवस्था ३६५
प्रमाणाधीन ३८४
प्रमाणाधीनत्व ७०९
प्रमाद ७४७
प्रमितिक्रिया ३६५
प्रमेय ६७१,७३३
प्रमेयव्यवस्था ३८४,७०९
प्रमेयव्यवस्थिति ७३,७४,७१०
प्रयोगजनितविगम ६४३
प्रयोजन १७१,६७१,७३३
प्रलयकाल १३२
प्रवाहरूपसन्तानत्व १५७
प्रव्यक्तचेतनत्रसनिकाय ६५१
प्रव्रज्यापरिणाम ७५०
प्रसज्यप्रतिषेध २९,२०३,४२८
प्रसज्यप्रतिषेधलक्षण अपोह २०२ (१६)
प्रसज्यप्रतिषेधवृत्ति ५८
प्रसज्यरूप-प्रतिषेध्य १९९ (१७)
प्रसज्यलक्षण १८७
प्रसवधर्मिन् २८१
प्रसज्यप्रतिषेधलक्षण-अपोह २०२ (२)
प्रसारण ६८५,६८६
प्राक्तनाशेषकर्म-संयोगाभाव ७३७
प्रागभाव ३८९,५८१,७०५
प्राणातिपातविरमणादिमहाव्रत ७४९
प्रातिभ ५३७ (४),५३८ (१३),५५२
प्रापकत्व ४६९
प्राप्तार्थप्रकाशकत्व ५४५
प्रामाण्य २,४,९,१४,४६६,४६८,४७१, ५७६
प्रामाण्यप्रज्ञप्ति ५
प्रेक्षापूर्वकारित्व १५२
प्रेरकत्वानुपपत्ति ७३९
प्रेरणा ११,१९,४१,७४०
प्रेरणाजनितज्ञान ६०
प्रेरणाजनिता बुद्धि ८
प्रेरणाबुद्धि ४,१९
प्रेरणावाक्य ११

फ

फल १३,२५,५३१,५६७
फलता ५५३
फलवत्-कारण ३४६
फलविशेषणपक्ष ५३०(४,६)

ब

बद्धमुक्तव्यवस्था २८०
बन्ध ४१८,४१९,७३२ (३), ७३३
बन्धमोक्षलक्षणवस्तुतत्त्व ७४५
बन्धमोक्षव्यवस्थिति ३८५
बन्धमोक्षसुखदुःखप्रार्थना ४५१
बन्धहेतुत्व १५२
बहिरर्थसंस्पर्शरहित ३६६

बाधकप्रत्यय १८
बाध्यबाधकभाव ४८८
बाह्य-अर्थ २१३
बाह्यधर्मध्यान ७३४
बाह्य-रूप ३७७
बाह्यशुक्लध्यान ७३५
बाह्याभाव ३५१
बाह्यार्थव्यवस्था ३७७
बाह्यार्थावभासिन् ३६२
बिम्बप्रतिबिम्बवत्-विद्या-अविद्याव्यवस्था २७८
बुद्धि ८,८४,२३७,२८०,२८१(३) २८२,३५८,३५९,४६२
बुद्धि-चैतन्याभेद ३०९
बुद्धिदर्पणसंक्रान्त ३०८(२)
बुद्धिपूर्विका-ईश्वरप्रवृत्ति १३०
बुद्धिप्रतिबिम्बक २१३
बुद्धिमत्कारणाधिष्ठितपृथिव्यादिमहाभूत १३१.
बुद्धिमात्र १०८
बुद्धि-षट्क्षणस्थायित्व १३९
बुद्ध्यधिकरण-द्रव्य १३२
बुद्ध्याकार १७४,१८१,१८२,२०५
बुद्ध्याकारालम्बनाबुद्धि १८८
बुद्ध्यादिसन्तान १५९
बुद्ध्यारूढ-अर्थ २१३
बुद्ध्यारूढाकार १८१ (२)
बोध ८१,८२,८३,८४,८८,१९३, ३५५,३६४,३८०,४६२
बोधमात्र ४५८,४५९
बोधरूपता ४९३ (१)
बोधात्मकता ३५८
बोधात्मन् २७५
ब्रह्मन् २७७,२७८,२७९,३८०,३८२ (७),३८३,३८५,४१९
ब्रह्मादिस्वरूप २३८
ब्रह्माद्वैत ४२८

भ

भजन ६३९
भजना ४०८
भजनाप्रकार ६४०
भयौघ ४१९
भव ७२,९३,६३१
भवगुणप्रत्ययावधिज्ञानावरणकर्मक्षयोपशम ६२०
भवजिन १३३
भवविचय ७३५
भवस्थकेवलिन् ६१२
भवोपग्राहिकर्मन् १६०,७३६
भवोपग्राहिन् १३३
भव्य ६५१
भव्याभव्यस्वरूप ६५०
भाव ८९,३७९,४०६,६२१
भाव-क्षणक्षय ३४९
भावना ४०७,६८४,७४१
भावनाप्रकर्षपर्यन्त ५१
भावनिक्षेपप्रतिपादकपर्यायास्तिकाभिप्राय ३८६
भावनोपनेयजन्मसुखादि ४६३
भावपरमाणु ७३५
भावप्रसक्ति ३६८
भावरूप-पदार्थ १६५
भावसम्यक्त्व ७३२
भाविजन्मचित्तोपादानत्व ८९
भाविपरलोकसिद्धि ९२
भावेन्द्रिय ५५३
भाषावर्गणारूपपरिणतपुद्गल-परिणाम ३८
भिन्नरूपसंवेदन ३५४
भिन्नसन्तान ८९
भिन्नाभिन्नकाल ६४४
भिन्नोपयोगपक्षि ६१६
भिन्नोपयोगरूप ६१५
भुक्तिप्रकल्पना ६१२
भुजिक्रियाकल्पना ६१०
भुवनहेतु-प्रधानपरमाण्वदृष्ट १०१
भूतभाविपर्यायकारणत्व ३८७
भेद ३,१०२,१८९
भेदपरिमाण २८४ (४)
भेदप्रपञ्च २७९
भेदवेदनाख्यकार्य २७६
भेदव्यवस्था ३१०
भेदसिद्धि २८३
भेदहेतु ३
भेदान्वयदर्शन २८४ (५)
भेदाभेदरूपवस्तु ४४०
भेदाभेदव्यवहारव्यवस्था २४२
भेदाभेदशून्य ३७१
भेदासत्यता २७९
भोक्तृ ३०७,७१८
भोक्तृत्व २८०,३०८
भोग्यत्व २८१
भ्रान्त ५१२ (२)
भ्रान्ति २६३,४८१,(५), ५०८

म

मति ५५३,६१५
मतिज्ञान ५५३,५९५,६१७, (२), ६१८,६२१
मतिज्ञानावरणकर्मक्षयोपशमादिसामग्री-प्रभव ६२०
मतिभेद-प्रत्यक्षता ५९५
मतिरूप ६५०
मतिरूपबोध ६१७
मति-श्रुत ६१५
मतिश्रुतज्ञाननिमित्त ६१९
मत्यावरणादि ७३३
मनस् २८१ (६)
मनस्कार २५४,२६३,४०१,४०२
मनस्कारक्षण ४०१,४०२
मनःपर्याय ६५०
मनःपर्यायज्ञान ५९५,५९६,६१५,६१७, ६१९,६२०
मनःपर्यायज्ञानावरणकर्मक्षयोपशम ६२०
मनोद्रव्य ६६९ (५)
मनोधर्मायतन ३२३
मनोवर्गणाख्य ६१९
मनो-वाक्-कायद्रव्य ४५३
मनोवाक्कायसंवरण ७५५
मनोवागूबादरकाययोग ७३६
मनोव्यापारज-प्रत्यक्ष १४
महत् २८१ (२)
महत्त्व ६४७
महदादि २८०
महदादिरूप २९६
महदादि-लिङ्ग ३०७ (१४)
महाव्रतपरिणामवत् ७५०
महाव्रतसम्पन्नत्व ७५१
महासंवरसामर्थ्य ७३५
महेश ११८,१३१
महेशज्ञान १२६
महेशबुद्धि १३१
महेश्वर १२०,१२१,१३०,१३१,१३२
महेश्वरवपुस् ११९

मानस् ६१९
मानसप्रत्यक्ष १३८,५६९
मानसी अक्षणिकत्वभ्रान्ति २४५
माया २७८
मायागारवादिभूयस्त्व ७५४
मायोपम ४८८
मायोपम–धर्म ३७७(१)
मार्ग ७३३
मिथ्यात्व ४१६
मिथ्यात्व-अविरति–प्रमाद-कषायादिपरिणति ६५०
मिथ्यात्वादिप्रवृत्ताष्टविध–कर्मसम्बन्ध ७४७
मिथ्यादृष्टि नय ४१९
मिथ्याप्रतिपत्ति ८
मिथ्यार्थज्ञान ३७६
मिथ्यावाद ४२४,४२९
मिथ्यास्थान ७१८
मुक्तमनस् ६९८
मुक्तात्मन् १०७,११९,६९८
मुक्ति १५५,१६२,७३१,७५७
मुक्तिप्राप्ति ७५२
मुक्तिभाक्त्व ७५२
मुक्तिभाक् स्त्री ७५१
मुक्त्यवस्था १६१
मुखवस्त्रिकाद्युपकरणप्रत्युपेक्षण ७५५
मुमुक्षु १२८,१५२,१६०,७३४
मुमुक्षुप्रवृत्ति १५२
मुमुक्षुबन्ध–प्रसङ्ग १५४
मुमुक्षुत्व १५१
मूर्त ६३८
मूर्तत्व ७३६
मूर्तत्वप्रसङ्ग १४५
मूर्ति १४५,१७८
मूलनय ४१५, ४१६
मूलप्रकृत्यवस्था ३०६
मूलव्याकरणिन् २७१,२७२,३१७,३७९
मृषानन्द ७३४
मोक्ष १५४,१६०,४१९,७३२,७३६, ७३७
मोक्षकारण ७३६
मोक्षमार्ग ६५१
मोक्षाध्वन् ७५०
मोक्षावस्था १५१,१६०
मोक्षावाप्ति १५२
मोक्षोपाय ७१८
मोह ४२९
मोहनीय ७३५

य

यति ७४७,७४९,७५१
यथानुरूपविनिर्युक्तवक्तव्यनयवाद ४२१
यथार्थत्वलक्षण ३
यावत्–नयवाद, तावत्–परसमय ६५५
युगपज्ज्ञानदर्शनोपयोगद्वयात्मकैकोपयोग ६२१
युगपदयुगपद्भावविपर्याय ६३६
योग ७३५
योग–कषाय ४१९
योगज–ज्ञान ३८४
योगनिमित्त ४१८
योगिज्ञान ४९९,५०९
योगिन् ३८४,४७६,६९८,७५३
योगिप्रतिपत्ति ३७८
योगिप्रत्यक्ष ७५,५३६,५६८
योगिप्रभवविशेषप्रत्ययबल ६९८
योग्यता २४६,५३९
योग्यतानुमान ५६३
यौगपद्य ३२४,३२९

र

रचना ११३
रत्नत्रय ७४८
रसादिविशेषपरिणाम ६३७
रागादि ५१
रागादिसंवेदन ५२
रागाद्यावरण ९९
राशिद्वय ४६९ (६)
रूपादिभावग्रामपरिणाम ३८०
रूपादि–विंशति–गुण ६५७
रूपादिविषयग्रहणपरिणति ६२०
रूपालोकमनस्कार २६३
रूपालोकमनस्कारसाकल्य १२१
रौद्रध्यान ७३४

ल

लय १५५
लिङ्ग २९,२८२,३३३,४८१,५६२, ५६३,५६५,५६८,
लिङ्गप्रभव–उपयोग ६५०
लिङ्गिन् ५६५
लिट्प्रत्यय ७४०
लिङादियुक्तवाक्यजनितविज्ञान ७३९
लोकप्रतीति ४३४,४६७,४७६
लोकप्रतीतिबाधा ५५५
लोकप्रसिद्धव्यवहारानुसरण ८९
लोकव्यवहारसमाश्रय ९
लोकसंवृति ३७७
लौकिक १०३,१५३,४६८
लौकिक–परीक्षक १४७,७१९
लौकिकपरीक्षकादि ११५
लौकिकवाक्य ४३६
लौकिक–वैदिकीरचना ११८
लौकिकशब्द ३९

व

वचनपर्याय ४३०
वचनविनिवेश ६२७
वचनविधि ४०७
वचनार्थनिश्चय ३१६
वनस्पतिपर्यन्त ६५२
वर्ण ३५,३६,४३१,४३२
वर्णक्रमापौरुषेयत्व ३९
वर्तमानपरिणाम ६३०
वर्तमानविज्ञप्तिक्षण २५३
वसतिप्रमार्जनादि ७५५
वसत्यादि ७५५
वस्तु ४०५,५५२
वस्तुत्वहानि ६२३
वस्तुरूपाबुद्धि २०६
वस्तुव्यवस्थिति ४५२
वस्तुस्वरूप–वाच्य १७३
वस्त्रादिग्रहण ७४६
वाक्यनय ४३०,४४८
वाक्यार्थ २२६
वाग्मूपता ४८९
वाचकत्व २६८
वाचिकाशक्ति ३२
वाच्यवाचकभाव २३७
वाद ६७१,७३३
वादकथा ६७
वादमार्गप्रवृत्ति ३७७
वादिनिग्रहस्थान ७६०
वादिप्रतिवादिप्राश्निक २९५
वासना १९५,३८५
वासनाप्रतिबद्धत्व ३७६

वासनारूप ४३३
वासीचन्दनकल्प १६१
वास्तव ५२५,५२६
विकलादेशभङ्ग ४४६
विकल्प ४८९,४९४,५०३,५११,५२५
विकल्पज्ञान ४९३
विकल्पत्व ५२५
विकल्पप्रतिबिम्ब १९९
विकल्पप्रतिबिम्बकमात्र २६१
विकल्पमात्र ५७३
विकल्पस्वरूप ५०३
विगम ६४२
विजिगीषु ७६०
विज्ञप्ति ८४,४६२
विज्ञप्तिपरमाणुपक्ष ४२७
विज्ञप्तिमात्र ३४९,३५४,३७२,४६१
विज्ञप्तिमात्रक ३६६
विज्ञप्तिमात्रता ३६२,३६५
विज्ञप्तिमात्रसिद्धि ३५२,३५४
विज्ञान १५२,३६४,३६६,३६७,४०१, ५११ (१)
विज्ञानमात्र ३५२,३७८,४१३,७३०, ७३१
विज्ञानाद्वैत ५१४
वितण्डा ७३३
विद्याखभाव २७६
विद्याखभावत्व २७८
विधि १८८,१९१,१९८,१९९,२१७, २३०,७३९,७४०,७४१
विधिप्रतिषेधरूपविरुद्धधर्मसंसर्ग ४०२
विधिरूप १८८
विधिरूप–शब्दार्थ २१७,२२७
विधिवाक्य ३२,९९,७४४
विनाश ६४३,६४९
विपरीतख्याति २७,२८,६४,११३, ३६०,३६१, ३७२,३७३
विपरीतख्यातिता ३७४
विपरीतख्यातित्व ३६१
विपर्यय ५२३
विपर्ययज्ञान ५२८
विपर्यासकारण–रागादि १३०
विपाकविचय ७३४
विभजन ४५२
विभज्यवाद ७२५
विभु १३३,१३६
विभुत्व १३५
विभुत्वसाधन १४२
विभुत्वादिधर्म ६६९
विरुद्धधर्माध्यास ३,७७,६२३
विरुद्धधर्माध्यासव्यापक १०२
विरुद्धविधि २१
विरुद्धहेत्वाभास ५५८
विवक्षा १८५
विवर्त ३७९,३८०,३८३
विशिष्टकर्मोदयादिसामग्री ६१२
विशिष्टक्षयोपशमवीर्यविशेषप्रभवप्रभावयोग ७५४
विशिष्टधर्माधर्माद्युपदेशविधायीश्वर–सर्वज्ञ–उपासना १२८
विशिष्टपुद्गलपरिणतिरूप–अर्थ ५५३
विशेष ६२७,६५७,६९८,६९९,७२५
विशेषणविशेष्यभाव १९६,१९७,२६५
विशेषपक्ष ६२७
विशेषपर्याय ४५२
विशेषप्रस्तार ३१७
विशेषविरहिणी सत्ता ४०८
विषयाकारपरिणति ५३४
विसंवाद ४१३
विसदृशगम ६३०
विसदृशपरिणतिलक्षणविशेष २४१
विस्रसाजनित उत्पाद ६४१
विहितपर्यङ्कासन ७३४
वीचार ७३५
वीत ५९४
वीतप्रयोग २८४ (२)
वीतावीत ५९४ (३)
वीर्य १४७,६१५
वृक्षायुर्वेद ६५३ (१)
वृत्तिलक्षण–परिणाम ४२३
वृद्धव्यवहार ४३६
वेग ६८४ (१)
वेगाख्यसंस्कार ४३३
वेदनीयकर्मप्रभवअसातानुभव ६१५
वेदनोपशमादि ७४७
वैखरी ४९१ (३)
वैदिकशब्द ३९
वैदिकहिंसा ७३०
वैदिकानुपूर्वी ४३५
वैधर्म्य ७१९
वैराग्यविचय ७३५
वैश्वरूप्याविभाग २८४ (११)
व्यक्त २८१,२८२
व्यक्ति ३८,३९,७६,१७७,१७८,२२३, २३३,२३५,२३९,२५९
व्यक्तिखभाव २४०
व्यङ्ग्यव्यञ्जकशक्तिप्रतिनियम ७०२
व्यञ्जक ३५,३६,३७
व्यञ्जन ७३५
व्यञ्जनतः ६३०
व्यञ्जननियत ४३०
व्यञ्जनपर्याय ४४०,४४५,४४८,
व्यञ्जनविकल्प ४३०
व्यभिचार ५२४
व्यभिचारिन् ५२३
व्यवहार २८६,३१०,४९८ (५),५६५
व्यवहारकाल २३३,२३६
व्यवहारनय २८४,२८५,३१०,३११, ३१५,३१६,४३०,४४८
व्यवहारनयमतार्थावलम्बिन् २८०
व्यवहारमात्रक ३७६
व्यवहारविलोप ३६५
व्यापकानुपलम्भ २१
व्यापार १२२
व्याप्ति ७,५५९
व्याप्तिग्रहण ५६९
व्याप्तिव्यवस्थापकप्रमाण ५६९
व्यावहारिकप्रमाणलक्षण ४६५
व्यावृत्तबुद्धिहेतुत्व ६९८
व्युपरतक्रियानिर्वर्तिन् ७३५ (२)
व्रतसमूह ७४९
व्रताद्याचरणनैरर्थक्यापत्ति ७५६

श

शक्ति ९,३४,३५,५४,२८३,२८४, ३०१,३४८,५२७
शक्तितः प्रवृत्ति २८४ (५)
शक्तिमत् ३४८
शक्ति–व्यक्तिरूप ४३१
शब्द ३२,३९,४४,३८६,३८७,४३७ (६)६६८ (५)
शब्दनय २८५,३१०,३१२,३१७,३७८, ४३०
शब्दनित्यत्व ३३

शब्दपरिकर्मणा ६१५
शब्दपरिणामरूपत्व ३८०
शब्दपर्याय ४४०
शब्दप्रवृत्ति ७५
शब्दबुद्धि १७७
शब्दब्रह्मन् ३८१,३८२,३८४,५२२ (५)
शब्दमयत्व ३८१
शब्दमयब्रह्मन् ३८० (३)
शब्दसंकेत १७६
शब्दात्मता ३८२
शब्दादिनय ३१७,३४९
शब्दाद्वैत ४२८
शब्दाद्वैतज्ञान १५५
शब्दार्थ १८२,२०१,२०६ (२),२३६
शब्दार्थ–तादात्म्य ३८६
शब्दार्थत्व १७४, (१४),१७८
शब्दार्थप्रतिभासित्व ५२४
शब्दार्थवास्तवसंबन्ध १७३
शब्दार्थव्यवस्था १९८, (२०),२१९
शब्दार्थसंबन्ध ३८६,४३६
शमसुखरसावस्था ७१८
शरीरपरिणाम–आत्मन् शरीरप्रायोग्यपुद्गलग्रहण ६१३
शरीरव्यपदेशभागनेक–परमाणूपादानानेकविज्ञानभाव १४९
शरीरसंबद्ध–ईश्वर–कार्यकर्तृत्व १२५
शरीरसंयुक्त–आत्मप्रदेश १४५
शरीरान्तर्गतसंवेदन ९१
शरीरारम्भकपरमाणु १४४
शाब्द ५७४ (३), ५८२
शाब्दप्रतिभास २७०
शाब्दप्रत्यय १७३
शाब्दप्रमाणान्तर ४३७,५७५, (५)
शाब्दिक ७४३
शाब्दीप्रतीति ३७९
शाब्दीबुद्धि २१२
शासन १
शासनप्रामाण्यप्रतिपादन ६५
शासनभक्तिमात्र ७३२
शासनार्थाभिव्यक्ति १
शास्त्र १७०,१७१
शास्त्रपरमहृदय–नयद्वय ४०७
शास्त्रप्रयोजन १७१
शास्त्रविरचन ३८८
शुक्लतरलेश्या ७३५
शुक्लध्यान ७३४,७३५,७३६
शुक्लध्यानाग्नि ७४९
शुद्धतरपर्यायास्तिक ४०५
शुद्धतरपर्यायास्तिकमतावलम्बिन् ३७८
शुद्धद्रव्यास्तिकमत–प्रतिक्षेपिपर्यायास्तिकाभिप्राय २९६
शुद्धद्रव्यास्तिकाभिमतनाम–निक्षेप ३८६
शुद्धपर्यायास्तिकभेद ३६६
शुद्धबोध–अप्रतिभासन २७४
शुद्धात्मन् १३३
शून्यता २६७,३७१,३७७,३७८,४१२ ४८८
शून्यताप्रसक्ति ४२६
शून्यत्व ३७१,३७६
शून्यप्रतिभास २७७
शून्यरूप ३६६
शेषवत् ५५९,५६०,५६५,५६६,५६७ ५९४
शैलेश्यवस्था १३३,१६०,७५२
श्रद्धान ७५७
श्रमण ७५५
श्रुत ५५३, (१३),५५४,६१५
श्रुतज्ञान ५९५,६१९,७३५
श्रुतज्ञानावरणकर्मक्षयोपशम ६२०
श्रुतरूप ६५०
श्रुताद्यावरणक्षयोपशम ६०६
श्रुतार्थापत्ति ५७९
श्रुतावधिमनःपर्यायकेवलिन् ६०६
श्रुतोपयोग ६५०
श्रोतृसन्तान २६६

ष

षट्काय ६३९
षट्क्षणावस्थायित्वलक्षण ४३९
षड्जीवनिकाय ६३९
षट्पक्ष ७१९
षट्पदार्थाभ्युपगम ६६० (१३)
षट्प्रकारा–अर्थापत्ति ५७९,५८५
षट्प्रमाणवादाभ्युपगम २७
षड्भावविकार ६५३ (२)
षड्विधजीवनिकाय ७४७
षड्विंशत्यधिकचतुर्दशशतपरिमाणभङ्ग ४४७
षदस्थानकप्रतिपत्ति ४३० (३)
षष्ठभङ्गक ४४७,७५८

स

संयोग ११४,६७७(५),७०३,७०४
संयोगविभाग–उत्पत्ति ६५०
संरक्षणानन्द ७३४
संवर ७३६
संवरनिर्जरा ७३७
संवरनिर्जरालक्षणपदार्थद्वय ७३७
संवररूप ७३५
संवाद ४,५,१३,३७०,७२३
संवादक ६
संवादकत्व ४७१
संवादप्रत्यय १०,१४
संवित्ति २४१,३००,३०४,४१४
संवित्त्याख्यलिङ्ग २७
संविद् ३१२
संविदाकार ४१५
संविद्रूप २७
संविद्वपुरन्यापोह २३३
संविद्वैचित्र्य ८२
संवेदन २४१,३६४
संवेदनभेद ३६४
संवेदनाख्यलिङ्ग १४
संवृतत्व ४०१
संवृति २९५,३७६,४७० (२)
संवृतिपक्ष २२४
संवृतिरूप १४,४१४
संवृतिसत् ४०१
संशय १७०,४५२,६७१,७३३
संशयज्ञान ५२४
संशीति ६११
संसार २७८,४१७,४१९
संसारकाल २८२
संसारानुच्छेद १५०
संसारापवर्ग ३८५
संसारावस्था १५१,१६१
संसारित्व १०७
संसारिन् २७८,२७९
संस्कारस्कन्ध ३२३
संस्थानवत्त्व ९४
संस्थानविचय ७३५
सकलजगत्कर्तृत्वसिद्धि ११८
सकलज्ञ ६०

सकलदेशभङ्ग ४४६
सकलधर्मात्मकैकवस्तुप्रतिपादक ४४५
सकलनयसमूह ४१९
सकलभुवनैकसूत्रधार १३२
सकललोकस्थितिसर्गप्रलयहेतुता ७१५
सकलशास्त्रार्थज्ञताविकलत्रत ७५६
सकलशून्यताप्रसक्ति ४८३
सकलसन्तानशून्य ८९
संकल्प ७३४
संकल्पवृत्ति-मनस् २८१
सकषाय ७३३
संकीर्णसत्ता ३१६
संकेत १९१,२६१,२६७,३७९,३८६, ३८७
संकेतकाल २३२
संकेतवैकल्य २३२
संकेताभिव्यक्तसंबन्ध ४३६
संकेतासम्भव १९०
संख्या ६७३ (४)
संगत्यवगम ३२
संग्रह ४१६,४२९,४३०,४४८
संग्रहतः ४१५
संग्रहनय २७२,३११,३१०,३१५, ३१६
संग्रह–विशेष २७१
संग्रह–व्यवहार २७१
संघ २७१
संघातरूप ३०७
संचितकर्मक्षय १५९
संज्ञा ५५३,६४०
संज्ञा–संख्या–स्वलक्षण–अर्थक्रियाभेद ६३६
संज्ञासंज्ञिसम्बन्धज्ञान ५७८
सत्ता ११०,१११,२८७,२९१,२९३ ३८९,३९९,४०३
सत्ता–क्षणिकत्व–अविनाभावसिद्धि ३९७
सत्ताख्यपरसामान्य ६८८
सत्तामात्र १२९
सत्ताविकलविशेष ४०८
सत्ता–समवाय ११३
सत्यता ३७०
सत्यवाद ७२५
सत्यस्वप्नज्ञान ५४३,५५२
सत्त्व ९२,३६२,३९८,३९९,४१२, ४२८
सत्त्वक्षणिकत्वतादात्म्य ५५५
सत्त्व–रजस्–तमस् २८०,२८२, (६) २९६
सत्त्व–रजस्–तमोलक्षणगुण ३०६ (८)
सत्त्वलक्षण–स्वभावहेतु ३२९
सदसत्य ४४१,४४२
सदसदनेकाकारानुगत ७०९
सदसदात्मकवस्तु ५८१
सदसदात्मकवस्तुप्रतिभास १६६
सदसद्रूपत्व ७०७
सदसद्विशेषात्मकत्व ४२९
सदृशपरिणामलक्षणसामान्य ३८,१४१ २४१,२४२,२४३
सन्ततिविच्छित्ति ४१२
सन्तान ८७,३६७,४७०,५१०
सन्तानकल्पना ४०४
सन्तानत्व १५२,१५६
सन्ताननिवृत्ति ८८
सन्तानभेद ८३
सन्तानशब्दोक्तआत्मन् १६२
सन्तानादि ६८२
सन्तानादिकल्पना ७२७
सन्तानाध्यवसाय ४६८
सन्तानापेक्ष–कार्यकारणभाव ७०६
सन्तानोच्छित्तिरूपनिःश्रेयस १५५
सन्निकर्ष ४७५,५२९,५४०
सप्तदशभेद–श्रमणधर्म ७५५
सप्तभङ्ग ४४६,४४७
सप्तभङ्गी ४४७,४४८,७५७,७५८
सप्तविकल्पवचनपथ ४४८
सप्तविकल्पोत्थाननिमित्त ४४१
सप्तविध ४४७
सप्रतिघाकारता ४६२
समग्रहेतु ५६२
समनन्तरप्रत्ययत्व ८८
समभिरूढ २८५,३१०,३१३,३१७, ३४९,३७८,४३०
समय १७५,१७६,१७७,१७९,१९० २५०,४२९
समयनिबन्धना–आकाशादिसंज्ञा ६४२
समयपर्यालोचन ७५५
समवाय १०६,१०७,११०,१५६,७०० (१),७०१, (६)७०२,७०३,७०४ ७२९,७३३
समवायबुद्धि १५७
समवायलक्षणवृत्ति ६९१
समवायिताद्रूप्यसमवाय १६४
समवायिन् १०६
समस्तसंस्कारप्रभवास्मृति ४३२
समानपरिणतिरूपता २६१
समानासमानाकारपरिणतात्मकवस्तु३७९
समानासमानपरिणामात्मकघट २६०
समानासमानपरिणामात्मकैकवस्तुप्रतिपादकत्व ७४५
समासषङ्ग ४४३ (१)
समिति ७३५
समुच्चय १८०
समुच्चयात्मक–प्रत्यय १६४
समुदय ७३३ (५)
समुदयकृत उत्पाद ६४१
समुदायाभिधानपक्ष १८३ (१७)
समूहकृत–अर्थ ४२३
समूह–संतानादि ६८२ (४)
सम्प्रयोग १३
सम्बन्ध ५९,१५६,१९२
सम्बन्धवेदन २३६
सम्मूर्छनज–जन्तु ७४८
सम्यक्त्व ४१६,४१९,४२०,७१०, ७१७,७१९
सम्यग्ज्ञान ६२२
सम्यग्ज्ञान–क्रियावत् ७५७
सम्यग्ज्ञानदर्शनचारित्रात्मक–परमरत्नत्रय १
सम्यग्ज्ञान–दर्शन–चारित्रात्मकहेतु १६०
सम्यग्ज्ञानवत् ६२१
सम्यग्ज्ञानवैराग्य ६१,६२
सम्यग्ज्ञानादि ७३७
सम्यग्ज्ञानादित्रितयनयसमूह ७५७
सम्यग्दर्शन ६२१,६२२,७३२
सम्यग्दर्शनज्ञानचारित्रप्रतिपत्ति ६५१
सम्यग्दर्शनशब्द ४२१,६२०
सम्यग्वाद ४२९
सर्गवैचित्र्य २८२
सर्वकर्मनिर्जरावत्७३७
सर्वगत–आत्मन् २८०
सर्वजगत्कर्तृ ३१
सर्वजगज्ज्ञातृ ३१
सर्वज्ञ ४५,४६,५२,५३,५५,६२,६५ ९७,१००

सर्वज्ञताप्रतिबन्धिघातिकर्म–चतुष्टयक्षय १३३
सर्वज्ञत्व ४५,६२,१२८,६०९
सर्वज्ञप्रणीतत्व ४३
सर्वज्ञप्रणीतशासन ६९
सर्वज्ञ–वीतराग ५०
सर्वज्ञत्वसिद्धि ४५,६५
सर्वज्ञमात्रसिद्धि ६८
सर्वज्ञवचन ६२८
सर्वज्ञसत्ता ४४
सर्वज्ञसत्त्वप्रतिपादक–हेतु ६५
सर्वज्ञसिद्धि ४४,५३९ (३), ५५२
सर्वधर्मविरह ३७८
सर्वनयवाद ४०६
सर्वबन्धास्रवनिरोध ७३६
सर्वभाव–प्रतिभासोपमत्व २६७
सर्वलोकसाक्षिक ८०
सर्वविद् ९९
सर्वविद्विज्ञान ६५
सर्वसंस्कार ७३१
सर्वसमयसमूहात्मक २९
सर्वसावद्ययोगप्रत्याख्यान ७५०
सर्वानुपलब्धिप्रसक्ति ६४८
सर्वार्थक्षणिकता ३१८ (४)
सर्वोपसंहार ५६९
सर्वोपाख्याविरहलक्षण–दुःखाभाव १५३
सर्वोपाधिनिरपेक्षवस्तुस्वरूप ३०२
सल्लक्षण–एक–ब्रह्मन् २७६ (१३)
सविकल्प ४३१
सविकल्प–प्रमाण ३४१
सहकारिकारण ८८
सहभाविचित्तचैत्त २६२
सहभाविन् ६३५
सहानवस्थानलक्षणविरोध २४१
सहोपलम्भ ३५३,३६३
सहोपलम्भनियम ३६२,३६४
सांवृत ८९,१७४,२१६,२१७,२२०, २९५,३७७
सांवृतत्व ९०,२१६
सांव्यवहारिक १५
सांव्यवहारिक–अध्यक्ष ५५४
सांव्यवहारिक–प्रमाण ४७०
सांव्यवहार्यविनाश ३३३ (६)
साकल्य ४७४
साकार ६०८
साकारग्रहण ६१०
साकार–ज्ञान ४५८, ४६१
साकारज्ञानवादिन् २६२
साकारज्ञानाभ्युपगम ४६५
साकारबोध ४५८, ४५९
साकारविज्ञान ४६०,४६३
साङ्केतिक ३०
सातजनक १६०
सातवेदनीय ६१५
सादृश्य २६३,२७३,४१३
सादृश्यज्ञान ५७६
साद्यपर्यवसान ६०७
साद्यपर्यवसित ६२२
साधन २९९ (३)
साधर्म्य २५४,७१९
साधारणानैकान्तिक ७२०
सान्वया चित्तसंतति १६१,१६२
सामग्री १२,११३,४००,४७२,४७४, ४७५ (१), ५२३
सामग्रीतः ४२७
सामग्रीवश ३५१
सामग्रीविशेषणपक्ष ५३० (२)
सामर्थ्य २५६,२५८
सामर्थ्यभेद ३६
सामानाधिकरण्य १९६,१९७,२२०
सामान्य ११२,२०५,२२२,२३७,२४२, २५८,२५९,२८१,२८४,४१५, ५५४,६२७,६५६,६८७ (७), ७२५,७३०,७३३
सामान्यग्रहण ४५७
सामान्यतोदृष्ट ७०,५५९,५६०,५६२, ५६७,५६८,५९४
सामान्य–अनुमान ५६६
सामान्यविशेषज्ञेयसंस्पर्शिन् ६०९
सामान्यविशेषरूपता ४५७
सामान्यविशेषशब्द–वाच्य–संग्रह–विशेष २७१
सामान्यविशेषात्मक ५९६,६०५
सामान्यविशेषात्मक–वस्तु २६५,७२९
सामान्यविशेषात्मकवस्तुग्राहिन् ५०७
सामान्यविशेषात्मकवस्तुतत्त्व ४०८, ७५७
सामान्यविशेषैकान्त ७२५
सामान्यविशेषोपयोगैक्यरूपत्व ६१७
सामान्याकार २४३
सामान्यालम्बिदर्शन ६०५
सामायिकमात्रपदविद् ७५६
साम्यावस्था २८०
सारूप्यज्ञान ५२८
सावयव २८२
साश्रवचित्तसन्तान–निरोधलक्षण १६२
सिद्ध १
सिद्ध–समूह ४२२,४२३
सिद्धान्त ६७१,७३३
सिद्धान्तज्ञातृ ७३२,७४५
सुख १५३,५२३
सुखदुःखमोहावेदकत्व २८१ (१४),
सुखदुःखसम्प्रयोग ४१७
सुखदुःखोपलम्भव्यवस्था २८०
सुखादिवेदन ४६३
सुनय ७५७
सुनय–दुर्नय–प्रमाणरूपता ४४१
सुविवेचितकार्य ११८,५६३
सुषुप्ताद्यवस्था १६३
सुषुप्तावस्था १५५,५०९,५२९,६१६
सूक्ष्मक्रियाप्रतिपातिन् ७३५
सेनाप्रत्यय ६७४
सेश्वरनिरीश्वरभेद ३१०
स्कन्ध ६०५
स्कन्धत्रय ३२३
स्कन्धसन्तानादि ४९७
स्तेयानन्द ७३४
स्त्रीत्व ७५१,७५२
स्त्रीनिर्वाणप्रतिपादक ७५३
स्त्रीवेदपरिक्षय ७५२
स्त्रीवेदपरिक्षयाभाव ७५२
स्त्रीवेदोदय ७५२
स्थविरकल्पिक ७५१
स्थाणु (जुओ ईश्वर) ६९
स्थापना ३७९,३८७
स्थावरजङ्गमविकारोत्पत्ति ७१६
स्थिति ४१८
स्थितिस्थापक ६८४
स्थित्युत्पत्तिनिरोध ६२५
स्नेह ६८३ (४)
स्फोट ४३१,४३२,४३३,४३४,४३५, ४३६

स्फोटपरिकल्पना ४३३
स्फोटप्रतिभासबुद्धि ४३५
स्फोटसंस्कार ४३४
स्फोटाख्यशब्द ४३२
स्फोटात्मा शब्द ४३२,४३५
स्फोटाभिव्यक्ति ४३३
स्मरण २८७
स्मरणसम्वायिनी ११२
स्मर्तृरूप ११३
स्मृति ११३,२७४,२८८,२८९,२९०, २९४,३२२,३४३,३७२,४२३, ४९४,४९५,५२०,५२३,५५३ (७)
स्मृति–प्रत्यभिज्ञावासना–सन्तानादिव्यवहार ४१४
स्मृतिप्रमोष १४,२८,२९,३७२
स्मृतिरूपता ३७२
स्मृतिरूपत्व ५८६
स्मृतिसंवेदन ७५
स्मृतिसमवायिन् ११३
स्मृत्यादि ५६२
स्यात्कारपदलाञ्छित ४४१,४४६
स्यात्कारलाञ्छन ६३९
स्यात्पदप्रयोग ७२५
स्यात्शब्दयोजन ७२६
स्याद्वादप्ररूपकागम ७३५
स्याद्वादप्ररूपणा ७४५
स्याद्वादरूपाप्रज्ञापना ७२७
स्याद्वादविद् ४५६
स्याद्वादाभिगम ७३२
स्याद्वादाभिज्ञ ४५६
स्याद्वादिन् ७५८
स्याद्वादोपग्रह ७१७
स्वकारणगुण ५
स्वकृतकर्मसापेक्षत्वअनपेक्षत्व ३१०
स्वचित्त ३६३
स्वतन्त्रचरणकरणप्रवृत्ति ७५६
स्वतन्त्रेच्छाविरचितसंकेतमात्रभावित्व २२०
स्वतः (उत्पत्तौ, स्वकार्ये, ज्ञातेः) २,५
स्वतःप्रामाण्य ८
स्वतःप्रामाण्यनिरास २९
स्वतःप्रामाण्यव्याहति ७
स्वपक्षस्थापन ७६०
स्वपरभावाभावोभयात्मकभावावभासकाध्यक्षादिप्रमाण ७१९
स्वप्न १४०,४६२
स्वप्नजाग्रद्दृशाभाविज्ञान ३७०
स्वप्नावस्था ५०३
स्वप्नोपलब्धि ४८८ (२)
स्वप्रकाशसुखसंवित्ति १५३
स्वभाव ७११,७१४
स्वभावकारण ७११
स्वभावकार्यानुपलम्भाख्यपक्षधर्म ५५९
स्वभावभेद २७४
स्वभावहेतु ३,१७४,१८८
स्वभावहेतुप्रभावित २
स्वभावहेतुसमुत्थ ३५२
स्वभावानुपलम्भ २१
स्वरूपप्रतिभास–प्रत्यय ३६२
स्वरूपविशेषणपक्ष ५३० (१)
स्वर्ग ५०५
स्वर्गप्रापणशक्ति ३८८
स्वलक्षण १०७,१६४,१७४,१७५,१७६, १७७,१७८,१८३,१९४,१९५, १९७,२०४ (४), २०७,२१०, २११, (१७), २१२,२१६,२३४, २६२,२६३,२६४,२६५,४१४
स्वलक्षण–संकेत २५०
स्वलक्षणादि १९० (१२)
स्वसन्तति ८९
स्वसमयपरसमयमुक्तव्यापार ७५५
स्वसमयप्रज्ञापना ४५७
स्वसंवित्प्रतिभासमानविज्ञप्तिस्वरूप ३५०
स्वसंवेदनप्रत्यक्षसिद्धत्व १३५
स्वसंवेदनमात्रपरमार्थसत्त्व २३७
स्वातन्त्र्य ११,३०९,४७३,
स्वाभाविकउत्पाद ६४१
स्वाभाविकविगम ६४३
स्वाभाविकसंबन्ध ४३६
स्वारम्भकावयवसन्निवेश १०१
स्वोत्पत्तिहेतु–पदार्थध्वंस ३८९ (१०)

ह

हर्षविषादाद्यनेकविवर्तात्मकआत्मन् १३१
हर्षविषादाद्यनेकविवर्तात्मकचैतन्य २६०
हर्ष–शोक–भय–करुणौदासीन्याद्यनेकाकारविवर्तात्मकैकचेतनास्वरूप ४१७
हिंसाविधायक ७३१
हिंसाविरति–दानचेतस् ७६०
हिंसाविरमणादि ७५५
हेतु ५५९,५६८,५९०
हेतुत्रय ७५९
हेतु–त्रैलक्षण्य ५९२
हेतुधर्मानुमान ५९३
हेतुवाद ६५०
हेतुविचय ७३५
हेत्वाभास ५५८,६७१,७३३
हेत्वाभासत्व ७२४

९

*सन्मतिटीकागताः केचिद् विशिष्टाः शब्दाः ।

अङ्गुल्यग्र ५३-२०
अञ्जनादि-रूपाकर्षण १४४-२७
अयःशलाका २५२-२०
अरघट्टघटीयन्त्र ७३५-२
अरणितः ५०-१५
अष्टापदनग ६१४-१
आढकप्राहिन् २८४-६
आदर्श ३७-२३
आमलकीफल ११२-११
आम्रबकुलादि ४९७-२
आम्ररस ४८९-१९
आर्य २३६-१०
आलदान ६०५-२५
ऊर्णनाभ ७१५-२३,७१७-९
एक-चित्रपटज्ञान ७०७-३७
एकाभिप्रायनियमितस्थपत्यादि-ऐकमत्य १३१-१४
कंसपात्री १०७-२१
कमण्डलुटट्टिकादिलिङ्गधारिन् ७५०-२५
करियूथादि ५३-२०
कर्क ४४-३२ (३),
कलिमार्यादि २३६-१० (९)
कल्पनारचित २१६-१५
कल्पनाशिल्पिविरचितत्व ४२८-११
काकतालीयन्याय ५७-३९
काकदन्तपरीक्षा १६९-११,१७०-२४,१७१-५
काकभक्षित १३५-२८
काचकूपिकान्तर्गत ५४१-५
कामलादि-दोष ३-२१,१७-२१,५४५-१५
किंशुक १२-३५
कुवलामलकबिल्वादि ६७५-८ (३)
कृत्तिकोदय ५१०-६
कृत्योत्थापन १३-१६
केशोण्डुक १२-२१,१११-७,११२-२,३६१-२८
केशोन्दुक४८५-३५,५१०-१५,५४८-९,५४९-२८,५७३-२२,५८९-१
कोद्रवबीज २८२-२९,२८३-१,३३४-२४
कोद्रवाङ्कुर २३९-८
खण्डमुण्डादि ५१४-१५
खलबिलाद्यन्तर्गतबीजादि ७१३-१८ (१०)
चक्षुःश्रवस् भुजङ्ग ५७-४
गजस्नान ११-३४
गडूची २३८-७,४९७-१० (५) ६८९,१२
गीतादिविषया १६-२
गीर्वाणनाथ ६३६-२५
गृध्रराज ५६-१०,५३६-२७
गोत्रामन्त्रण ६०५-११
गोपालघटिका ५०-१५,५८-३५,१२०-१३
चक्रवर्तिन् २५९-२७
चतुर्थरसादि ७४९-३०
चन्द्रग्रहण ५०७-२९,५०८-२
चन्द्रापीड ६९४-२
चातुर्वर्ण्यश्रमणसंघ ७५४-२७
चित्रगतरूपबुद्धि १६-३
चित्रज्ञान २४१-१४
जाति ११२-१७
जीर्णकूपप्रासादादि ३१-२३
जीर्णप्रासादादि १२५-४
ज्वरादिशमन ४२७-११
तन्दुलमत्स्य ७५३-२१
त्रैवर्णिक ४२-३९,४३,९
दीर्घशष्कुली २४७-१८
दैवरक्त-किंशुक १२-३५
द्रविड २३६-१०
धूपघटिका ११६-१८
नड्वलोदक ४७५-९ (४)
नराधिप ६२४-५
नालिकेरद्वीपवासिन् ७२-१२,४३९-१२,५६१-९
निम्बादि ६१-३४,६४-१४
नीलकाच ३७-२३
परयोषित् ५२४-१
पादप्रसारिका ५६८-२३, (१२)
पादरोग ४७५-९ (४)
पाशारज्जु ७४८-१९
पिञ्छिकादि ७४९-७
पिण्डखर्जूर ७१२-१९
प्रजापति ७१७-१४ (६)
प्राकृतशैली २७२-५
प्रासुकोदक ७४९-३०
बकुलोत्पल २१८-२१
ब्रह्मन् ६९७-२५
भरण्युदय ५१०-९
भरतेश्वरप्रभृति ७४८-३७
भित्तिचित्र ३-३३
मण्यादि ५०-१५
मतङ्ग ६९७-२५
मन्त्राविष्टकुमारिका ६४-१
मरुजङ्गलादि ५२३-१५
मरुदेवीस्वामिनी ७५४-११
मलयगिरिशिखर ३२०-१५
महाप्रासादादिकरण १००-२१,१३१-१४
महाश्वेता २१६-१५
महासम्मत ६९४-३ (३)
मातृविवाहोचितपारशीकदेश ७१२-१९
मूषिकालर्कविषविकार १४७-२७
मेरुमस्तक ७५५-१
यवाङ्कुर ३५-८
रथ्यापुरुष ४५-३४,४६-१०,४८,४
राजकीय ३१९-५
राजन् २५९-२७
रोहिण्युदय ५१०-६
लतात्मक-आम्र २६६-२२
वज्रऋषभनाराचसंहनन ६२२-२४
वलातैल ३६-२८
वाहीक ३७-१०,६६४-१२,६७४-७,
विट ५२-१०
विन्ध्य २३-४,६९४-१३,६९५,१९
विशिष्टमन्त्रसंस्कृतचक्षुस् ६५-१
विशिष्टौषधोपयोगावाप्तअक्षिनैर्मल्य ९-१३
विषचूर्णादि ७४९-३०
वीणा १६-९
वीरणादि ४३७-३
वेदव्याख्यान ३९-२७
वैद्योपदेश १५०-३१
व्राल्य ६९७-२१
शकटोदय ५१०-१०
शक्रेन्द्रादि ६३६-२५
शङ्ख २५९-२७
शङ्खचक्रवर्तिन् ६९४-३(४)
शालिबीज ३५-८,२३९-८,२८२-२८,२८३-१,३०१,३१,३३४-२२
शिंशपा ३-४
शिल्पकलादि ५१-९
श्रीहर्ष २५९-२७
षण्णगरी २२२-२३
समुद्रोदकपलपरिमाण २२-३२
सम्पाल्यादि ५३६-२७
सरित्तटपर्यस्तगुडशकट १७२-१३
सहा २३-४
सार्वभौमनरपति १३२-३३
सिद्धान्तानभिज्ञ ६३३-२
सुवर्णकार १४९-३४
सूत्रधारैकबुद्धिनिर्मितत्व १३२-१६
सेतुबन्ध ३७७-१९
सोमिल ६२५-१०
स्थपति १००-२१,१३१-१४,५३९-३(१)
हिमवत् ६९४-८,६९५-२०
हिमवद्विन्ध्य ११४-२५,२४२-९,६२९-२०,६४२-१६ ६८१-७
हिमाचलादि १७६-७,२५०-१९
हिरण्यगर्भ ४०-३३,४२-५,४६-२३
होढदान ६०५-१७(१),६०६-८

*परिशिष्टेऽस्मिन् स्थूला अङ्काः पृष्ठाङ्कं सूचयन्ति, सूक्ष्मा अङ्काः पङ्क्त्यङ्कं सूचयन्ति, कोष्ठकान्तर्गता अङ्काश्च टिप्पण्यङ्कं सूचयन्ति ॥

टीकायामनिर्दिष्टस्थलानामवतरणानां सम्पादकैः संशोधितानि स्थलानि ।

अमृतबिन्दु-उपनिषद् ३७
आचाराङ्गसूत्र ६३
आवश्यकसूत्र ७५०
आवश्यकसूत्रनिर्युक्ति ४७८,५४५,७४६,७५४,७५६,७५७
ऋग्वेद ३२,२७३
ओघनिर्युक्ति ७५५
कप्पसुत्त ७५२
गौडपादकारिका २७३
चतुर्थद्वात्रिंशिका २९
जीवविचार ६५४
जीवाजीवाभिगमसूत्र ६३९
जैमिनीयमीमांसासूत्र ४८,७९,८०,९२,७३१,७४४.
*तत्त्वसंग्रहकारिका ६,११,१८,१९
तत्त्वसंग्रहकारिका १८१,१८५,१८६,२०२,२०३,२०६,२०७ २०८,२०९,२१०,२११,२१२,२१४,२१५,२१६,२२४, २२५,२२६,२२७,२२९,२३२,२८०,२८३,३०१,३०२
तत्त्वार्थाधिगमसूत्र ५९,८०,९३,४१२,५५२,५५३,५९५, ६३६,६५१,६५६,७३२,७३५,७३७,७४७
*ध्वन्यालोक १३३
न्यायदर्शनसूत्र ९७,११९,१७७,१७८,४७७,५१८,५२२, ५३१,५६०,५७८,६६९,६८३,७०४,७२०
न्यायबिन्दु ३,३५२,५०८,५९२
न्यायवार्तिक ८०,९९,१००,१०१,१०६,११४,१३२,१७८, २००,२०१,२०४,६६८
पञ्चवस्तु ७४९,७५१
पाणिनीयसूत्र १९०,२२५,४०६,४२१
पातञ्जलसूत्र ६९,१३३
प्रज्ञापनासूत्र ६०८
प्रशमरतिप्रकरण ६४,७४९
प्रशस्तपादभाष्य ६६१,६८५
प्रशस्तपादभाष्यकन्दली ७००,७०८
बृहदारण्यक उपनिषद् ३२,२७३,२७९,७३१
भगवतीसूत्र ६२५,६३१,६३५
भगवद्गीता ९८,१५०,३१०
भामहालंकार १८६
महाभारत-आदिपर्वन् १५३,७११
*याज्ञवल्क्यस्मृति ४५९,४७५
वाक्यपदीय ७०,१७७,२२२,३१५,३१६,३७९,३८०,४३५, ४८९,५३८
वात्स्यायनन्यायभाष्य १२०,१२६,१६१,१७८,५२१,५२२, ५४१,५६२,५६३,७२१
*विज्ञप्तिमात्रतासिद्धि १०५,३७६
विशेषावश्यकभाष्य ६०८
वैशेषिकदर्शनसूत्र १००,१०३,१०५,११३,१४०,४५२,६३३, ६४७,६५६,६५८,६६९,६७२,६८६,७०४,७३१
व्याकरणमहाभाष्य १७७
शाबरभाष्य ७१,५०५,५७४,५८०
श्लोकवार्तिक ४,५,६,७,८,१०,१६,१८,१९,२२,२३,२४, ३१,३५,३६,३८,३९,४०,४१,४५,४६,४७,४९,५११,५३, ५४,५५,५६,६०,८८,९४,१००,१३७,१६९,१८६,१८७ १९०,१९१,१९३,१९४,१९५,१९६,२०१,२२३,२४०, २७६,२७८,३१९,३२१,३४९,३५१,३६९,३७७,४०७, ४३५,४३९,४९६,५०५,५३५,५३७,५६४,५७४,५७५, ५७६,५७७,५७८,५७९,५८०,५८१,५८८,६९६,७३८, ७४०,७४१,७४२,७४३
श्वेताश्वतर-उपनिषद् ४६,९८,३१०
सन्मतितर्क २९,२८५,६२८
सांख्यकारिका २८१,२८२,२८४,२९६,३०७,३०९,४१७, ५७२,७३३
स्थानाङ्गसूत्र ९३,४५३
स्वयम्भूस्तोत्र ७५०
*हेतुबिन्दु (हस्तलिखित) ३२९
हेतुमुख (अनुपलब्ध) २१७,२२८

[परिशिष्टेऽस्मिन् *एतच्चिह्नाङ्कितानि स्थलानि परिशिष्टसमये लब्धानि ॥]

सन्मत्यादर्शगतानि सम्पादकीयानि च टिप्पणानि ।

आ

आ० टिप्पण २-३,४,५;३-१२

ग

गु० टि० २-२;३-८;४-४;९-२१;१०-४,५;१२-४,५; १५-६;१७-१,२;१९-५;२०-४,८;२१-६;२२-६; २४-१;२८-४;३१-७;३३-१,७;३७-२;४२-६;४८-६.

ब

बृ० टि० ३९४-८,९,१५;३९५-८,१०,१५,१८,२०,२३; ३९६-१,३,६,७,८,१६;३९७-४,५,७,११;३९८-१; ४००-५,७,११;४०१-२;४०२-७,१०,१५;४०३-४, ८,१०;४०४-६,७,१६;४०५-५,९;४०६-५;४१०-८, ११;४१२-६;४१४-२;४१५-३;४१९-८;४२०-१२; ४२१-४,६,७;४२२-१,३;४२३-१,५,१०,१६,१७; ४२५-१,२,६,८,९,१५,१६,१७,१८;४२६-२,४,१४, १५;४२७-६;४३०-७,८;४३१-१;४३२-५,८,१०, ११,१३;४३३-२,४,८,९;४३४-६,८,११,१२;४३५-६;४३६-४,७,११,१३,१४;४३७-५;४३८-१,३; ४३९-१,३,१३,१५,१६,१७;४४०-७,८,९,११;४४१-६;४४५-२;४४७-१,२,४;४४८-१,४६६-२,६;४६७-५,६;४६८-१,४,६,८;४७१-६,८;४७२-२,४,६,११; ४७४-२,५;४७६-३;४७७-२,१०,११,१३;४७९-१; ४८०-८;४८१-१;४८२-१,२,३;४८३-१,२,३,४,१२; ४८४-१,३,५,८,१०,११;४८५-१,२,७,८,९,१०; ४८६-३,४,५,८,९,१३,१४,१५;४८७-१,२,३,४; ४८८-२,५;४९०-३,५;४९३-२,८,१०,१२,१३; ४९४-५;४९६-१,२,३,७,८;४९७-२,७,९,१३;४९८-१,३,४,५;५००-७,९;५०१-१,२,४,५,८;५०२-५,६, ७,९,१२;५०३-२,३,७;५०४-१,२,१३;-५०५-३,४, ५,१०;५०६-४,५,६,७,८;५०७-१,२,३,५,७,१०,११; ५०८-२,७,९,१०,११,१२,१३,१४,१५,१९;५०९-२,३,४,७,८,१०,११;५१०-४;५११-२,३,४,५,६; ५१२-४,५,६,८,१०,१३,१४,१७,१८,२०;५१३-१,६, ८,९,११,१३,१५;५१४-१,३,९,१०,११,१७;५१५-२, ७,११,५१६-७;५१७-३,७,११,१४,१५;५१८-२,३; ५१९-६,९,१०,११,१२,१३;५२०-२,५;५२१-२,३; ५२२-१,३,४,८,९;५२३-१,२,३,४,५,९,१०,११; ५२४-३,६,७,१०;५२५-३;५२६-१,७,९;५२७-२, ९,१२,१३,१४;५२८-१,२,३,४,७,१०;५२९-३,८,९, १०,१२,१४;५३१-६;५३४-३;५३७-७,१२;५३८-१,५,७,९,१०;५३९-१,७,८,१२,१३;५४०-१,२; ५४१-४,५,७,८;५४२-२,४,५,६,१०,११,१२,१३, १४;५४३-१,२,५,६,७,९,१०,१४,१५,१६;५४४-१, ५,९,१०,१२;५४५-६,७,८,९,१०,११,१३;५४६-२, १२,१३;५४७-१,३,४,७,९,१२,१५,१६,१७;५४८-१, २,४,५,८,९;५४९-४,५,७,९,१०,११,१२,१४;५५०-३,४,७,९,५५३-१,७,१२;५५४-८;५५५-१,४,१०, १३;५५८-६,७,९,११,१३;५५९-२,३;५६०-५; ५६१-३,९;५६२-६,७;५६३-३,४,१०,१२,१४,१५; ५६४-१,२,५;५६५-१,२,३,८,१०,११,१२,१४,१७, १८,२०;५६६-५,६,७;५६७-१,३,५,८,१२,१६; ५६९-२,६;५७०-१;५७१-३;५७३-३,७;५७४-८, १३;५७७-६;५७८-१,१२,१४;५८०-२,५;५८१-३, ५,९,११,१३;५८२-४,६;५८३-३,९;५८४-१०,११; ५८५-२,३,४,७;५८७-२,९;५८८-६,१५,१७;५९०-४,५,६,७;५९१-२,३,११,१२,१३;५९२-६,१०; ५९३-२,४,७,८,१०,११,१३;५९४-३;५९५-४; ५९६-२;६०५-५,६,७;६०६-१,३;६०९-५;६१०-८, १४;६११-३;६१२-४,९;६१४-१४,१५;६१५-३,४, ६,७;६२९-३,४,५;६४०-३;६४३-१,२,३,५,७; ७२७-१.

भ

भां० टिप्पण २-२;७,९;३-२,१०;७-५;८-२,७,८;३३-७; ४२-६;४८-६,१०;६४-५;७२-६;९८-३;३९४-८; ३९५-८,१३,१८;३९७-४,१४;४०१-२;४२२-३; ४२३-१९.

म

मां० टिप्पण १८-१०;४८-५;६४-५;७०-५;७२-६; ९८-३,४;१०२-४,५;३९४-१५;३९५-८,९,१०, १८,२०,२३;३९६-१,६,१६;३९७-४,५,७,१४,१५; ४००-११;४०१-२;४०२-१०,११,१५;४०३-४,८, १०;४०४-५,६,८,११;४०५-५,९;४०६-५;४१०-८, ११;४१२-६;४१४-८,१२;४१५-३,४,५;४१७-८; ४१९-८,१२;४२०-२,६,७,१२,१३,१५;४२१-४,६, ७;४२२-१,३;४२३-१,२,३,५,७,९,१०,११,१२,१३,

१४,१६,१७,१९;४२४-५,८,१४;४२५-६,८,९,१५,
१६,१७,१८;४२६-२,४;४२७-१६;४२८-९;४२९-२;
४३०-७,८;४३१-१,२,३;४३२-५,८,१०,११,१३;
४३३-२,४,८,९;४३४-८,११,१२.

ल

ल० टि० ४०६-५;४१०-८,११;४१२-६;४१४-२;४१५-
३;४१९-८;४२०-१२,१३;४२१-४,६,७;४२२-१,
३;४२३-१,५,१०,१६;४२४-१३;४२५-६,८,९,१५,
१६,१७,१८;४२६-२,४,१४,१५;४२७-६;४३०-७;
४३१-१;४३२-५,८,१०,११;४३४-३,६,८,११,१२;
४३५-६;४३७-५;४३८-१,३;४३९-१,३,१३,१५,
१६,१७;४४०-७,८,९;४४१-६;४४५-२;४४७-१,२,
४;४४८-१;४६६-२,६;४६७-५,६,९;४६८-१,४,६;
४७१-६,८;४७२-२,४,६,११,१२;४७४-२,५;४७६-
३,९;४७७-२,१०,११,१३;४७९-१;४८१-१,३;
४८२-१,२,३;४८३-१,२,३,४,१२;४८४-१,३,५,८,
१०,११;४८५-१,२,७,८,९,१०;४८६-३,४,५,८,९,
१३,१४,१५;४८७-१,२,३,४;४८८-२,५;४८९-५;
५००-७,९;५०१-१,२,४,५;५०२-५,६,७,९,१२;
५०३-२,३,७;५०४-१,२;५०५-३,४,५,१०;५०६-४,
५,६,७,८;५०७-१,३,७,१०,११;५०८-७,९,१०,११,
१२,१३,१५,१९; ५०९-२,३,४,७,८,१०,११;५१०-
४;५११-२,६;५१२-४,५,६,१०,१३,१४,१७,१८,२०;
५१३-१,६,८,९,११,१३,१५;५१४-१,३,९,१०,११,
१७;५१५-२,७,११;५१६-७;५१७-३,७,११,१४,१५;
५१८-२,३;५१९-६,९,१०,११,१२,१३;५२१-२;
५२२-१,३,४,८,९;५२३-१,२,३,४,५,१०,११;
५२४-३;५२५-३;५२६-१,७,९;५२७-२,९,१२,१३,
१४;५२८-१,२,३,४,७,१०;५२९-३,८,९,१०,१२,
१४;५३१-६;५३४-३;५३७-७;१२;५३८-१,५,७,९,
१०;५३९-१,७,८,१२,१३;५४०-१,२,४;५४१-४,
५,७,८;५४२-२,४,५,६,१०,११,१२,१३,१४;५४३-
१,२,५,६,७,९,१०,११,१२,१५,१६;५४४-१,५,१०,
१२;५४५-६,७,८,९,१०,११,१४;५४६-२,१२,१३;
५४७-१,३,४,७,९,१२,१७;५४८-२,४,५,८,९,१०;
५४९-४,५,७,९,१०,११,१२,१४;५५०-३,४,९;
५५३-१,७,१२;५५८-६,७,९,१३;५६०-५;५६१-३,
९;५६२-६,७;५६६-५,६;५६७-१,२;५६९-२,६;
५७०-१;५७३-३;५७८-१,१२;५८०-५;५८१-३,५,
९,११;५८३-९;५८८-१५,१७;५९१-२,३,१३;
५९४-२;५९७-१;६०५-४,५;६१४-१४,१५;६१५-
३,४,६,७.

व

वि० टिप्पण ९५-५;९७-३;१०६-२,६;१०७-४;१७८-
३.

स

संपादक टिप्पण ७-१०;९-१२;१२-६;१६-९;१९-३,४;
२०-३;२२-४;२४-४,५;२८-३;२९-५;३०-५,११,
१४;३१-२,३,४,५,८;३२-३,५,९;३३-४;३९-९;
४१-१;४४-३;४६-१;५२-७;७०-५;८७-१;११०-
७;११४-२;११८-४;११९-९;१२०-१;१४२-२;
१४३-७,९;१६९-३;१७७-११;१७९-२;२०७-३,४;
२२१-७;२४८-१;२५१-३;२७६-१४;२८०-६;
३३८-१५,१९;३४२-२१;३४३-७;३४५-५;३४९-१;
३५७-३८;३७०-२१;३९६-४;४००-९;४१६-१,२;
४२१-३;४२३-६;४३२-४,९;४३३-३;४९८-६;
५०२-१;५१९-१४;५२९-१३;५४५-५;५५९-२;
५६१-१७;५७२-३;५७३-४;५८८-७;५९१-४,७,८;
५९२-३,६;५९३-१४,१५;६०६-१,३;६०८-७;
६११-५;६३४-५;७०५-२;७०७-४;७१९-१;
७२९-२;७३२-३;७३३-७,९;७३६-३;७५४-१;
७५६-६;७६१-१४.

१२

सन्मतितिप्पणीनिर्दिष्टा ग्रन्थकृतो ग्रन्थाश्च ।

अ

अकलङ्क ५९५-१;६३१-३२-४;६३४-४.
अकलङ्कीय ६३१-३३-४.
अक्षपाद ७३३-२.
अध्ययन ३३२-२१.
अनन्तवीर्य ५६९-७.
अनीश्वरवादिन् ५९७-२.
अनुत्तरौपपातिकदशाङ्ग २७१-५.
अनुयोगद्वारवृत्ति ७५७-२.
अनुयोगद्वारसूत्र ४०६-१;४४१-४२-१०;५५९-६०-१०.
अनेकान्तजयपताका १७७-४;२४२-३३;२४८-१९;२६०-९,१०;३८०-१०,१३;४३१-६;५०३-७;५६४-९.
अनेकान्तजयपताकाटीका (लिखिता) २४३-२०,२१;२४६-२६;२४८-१९;२६०-९,१०;५०३-७;५१०-१.
अन्तकृद्दशाङ्ग २७१-५.
अन्नंभट्टमिताक्षरा २७१-४.
अपोहसिद्धि २४३-२
अपोहसिद्धिप्रकरण २६०-११,१२.
अभयदेवसूरि ५९७-६०४-२;६२७-१.
अभिधानचिन्तामणि ५३६-९;५३३-३४-२.
अभिधानप्रदीपिका ३५३-११.
अमरकोश २२६-९;५३६-९.
अमृतचन्द्र ६३१-३२-४.
अमृतचन्द्रीयव्याख्या ६३१-३२-४.
अर्हतप्रवचनहृदय ६३४-४.
अविद्धकर्ण १००-४;३३२-२१;५८४-५;६८२-४.
अष्टकप्रकरण ७४९-२.
अष्टशती २६६-१०;३३३-११;३४७-१;४६५-११;
४२७-१;४८७-५;५९५-१;५९७-६०४-२;६४४-३.
अष्टसहस्री २११-६;२४३-२०;२५७-२७;२६६-१०;
३३२-२२;३३३-११;३४७-१;३५३-१;३७६-१५;
३८३-९,१०,११,१२;३८८-९;४०१-२;४१४-६;
४१७-१;४२७-१;४२८-५,६;४६०-७;४६५-११;
४७०-२;४७८-६;४८०-३,४;४८५-१२;४८७-५;
५१५-१;५२५-१,२;५५२-४;५९५-१;५२७-
६०४-२;६४४-३;६४५-३;
७३८-१.
अष्टसहस्रीटीका (यशोविजयीया लिखिता) २११-६.

आ

आचाराङ्गसूत्र २७१-५;२७३-१;६५२-१.
आचाराङ्गटीका ७५७-२.
आदिपर्वन् ७११-२.
आप्तपरीक्षा ५६९-७०-७.
आप्तमीमांसा ३३३-११;३४७-१;४१७-१;४२८-५,६;
४४२-२;४६५-११;४७०-१;५९५-१;६४४-३;
७०५-४;७०६-४;७१५-१.
आर्यसमितीय ४५८-६.
आवश्यकनिर्युक्ति ४७८-२;५४०-३;६०८-७;७५४-३;
७५६-४;७५७-१,३.
आवश्यकसूत्र ७३४-१;७५०-२
आवश्यकहारिभद्रीटीका २७२-८;४७८-२
आश्वमेधिकपर्वन् ४९१-३.

ई

ईश्वरकृष्ण ५३३-१;५५९-१०.
ईश्वरवादिन् ५९७-२.

उ

उत्तराध्ययनसूत्र ६३१-४;६७१-७;
उत्तराध्ययनपाइअटीका ७४७-१;७५१-६.
उद्द्योत ६५२-१.
उद्द्योतकर ३३२-२१;६५९-८;६६४-१;६६८-४;
७१६-८;७१७-२.
उपवर्ष ४३१-७.
उपाध्याययशोविजय २६०-९;२६१-१.
उपासकदशाङ्ग २७१-५.
उमास्वाति ६३१-४.
उलूकमहर्षि ६५६-३.

ओ

ओघनिर्युक्ति ७५५-२,३.

औ

औपनिषद् ५९७-२.
औपपातिकसूत्र ६०८-७.

क

कठोपनिषद् २७३-७.
कणाद ६५६-३;७३३-१.
कन्दली ४६९-६;५३८-१३;५५९-१०.
(जुओ प्र. पा. भा. कन्दली)

कप्पसुत्त ७५२–२.
कमलशील २०४–१९;५३३–२;५६९–७;६६१–२.
कातन्त्रव्याकरण २७१–४.
कापिल ६४४–३.
काशिका १७२–२;२२६–९;४०६–३.
कीर्ति ४८७–५;५५८–१४;५६९–३;
(जुओ धर्मकीर्ति)
कुन्दकुन्द ६३१–४.
कुमारसम्भव ४९१–३.
कुमारिल १८५–१४;१९९–१९;२०४–१९;५३३–२;
५५९–१०;५८०–१.
कुमारिलभट्ट ६–५;५७४–२;
केवलज्ञानकेवलदर्शनोपयोगचर्चा ५९७ थी ६०४–२.
कैयट ६५२–१.
कौमारिल ५७८–१४.

ग

गणरत्नमहोदधि १७२–२.
गुणरत्नसूरि ५०५–६;७१०–५.
गोगाचार्य ५६५–३.
गोशालकचरित ७१४–४.
गौडपादकारिका २७३–१,५,८;२७९–३,५;३८३–९.
गौतम ६५९–८.
ग्रन्थकार (सि. दि.) ४२२–१.

च

चन्द्रकान्तमत ६९३–२.
चन्द्रगोमिन् ६५२–१.
चरकसंहिता ५५९–१०.
चरकाचार्य ५५९–१०.
चान्द्रव्याकरण १७९–२;२७१–४;६५२–१.
चार्वाक ५९७–२.
चार्वाकमत ५५४–१.
चित्सुखी ५५८–१४.

ज

जम्बूद्वीपप्रज्ञप्ति ६३५–१.
जयन्तभट्ट ५२१–४;५७४–१;५७८–१४;६५९–८;
७०६–५.
जिनभद्रगणिक्षमाश्रमण ५९७ थी ६०४–२;६५३–३.
जीवाजीवाभिगमसूत्र ६३५–१;६३९–१.
जैन ५४०–३;५४३–१३;५९७–२;६४४–३.
जैनतर्कपरिभाषा ४८०–३.
जैनतार्किक ५५९–१०.
जैनबौद्धस्मृत्यादिशास्त्रान्तर ३०–१.
जैनशास्त्र ३०–१२.
जैनागम ५५९–१०.
जैनाचार्य ५५९–१०.
जैनेन्द्रव्याकरण ४६१–२;६५२–१.
जैमिनि ५३४–९.
जैमिनीय ५४०–३;५९७–२.
ज्ञातधर्मकथाङ्गसूत्र ९३–३;२७१–५.
ज्ञानबिन्दु ५५३–१३;–५९७ थी ६०४–२;६०९–१,६;
६१०–९,११;६१७–२;६१८–६;६१९–१.
ज्ञानसार ७४९–२.
ज्ञानेन्द्रसरस्वती ६५२–१.

ट

टीकाकृत् ३१५–२.

त

तत्त्वबोधिनी ६५२–१.
तत्त्वसंग्रहकारिका १००–४;१७३–९;१७४–१,८,१४;
१७५–३,४;१७६–५,६,८,९;१७७–२,५;१७८–८,९,
१०;१७९–५,८;१८०–२,६,८,११;१८१–२;१८२–४;
१८३–३,८,१०,१७,१८,१९;१८४–१,१०,१२;
१८५–४,७,८,१५,१६;१८६–१,२,३,४,५,६,९,१०,
११,१२;१८७–३,६,९,१२,१४,१५,१८,१९,२१,२२;
१८८–४,७,९,१२,१५,१८;१८९–१,३,५,१२,१६,१८;
१९०–२,३,८,१०,१३,१५,१८;१९१–१,३,४,१०,११,
१३,१६;१९२–१,३,५,७,१०,१२,१४;१९३–१,४,५,
७,१०;१९४–१,२,५,८;१९५–१०,१६,१८,२३;
१९६–१,८,१७;१९७–२,७,८,१४;१९८–२,४,५,७,
१५;१९९–१,८,१३,१६;२००–१,१२;२०१–१,५,६,
११,१२;२०२–१,५,९,१८;२०३–१,७,१६,२७;२०४–
४,८,९,१४,२०;२०५–१,४,५,१०,१७;२०६–३,१६,
२४,३०,३२;२०७–७,८,१३,१८,२६;२०८–८,९,१५,
२४,२६;२१०–१०,१२,१३,१६,१८,२०;२११–३,१०,
१४,१७;२१२–८,१६,१८,२२,२५;२१३–११,२०;
२१४–७,१३,१७,२३,२४;२१५–७,१५;२१६–२,६,
१४,१७;२१७–३,९,१२,१५;२१८–४,१०,१३,१६;
२१९–१,१४,१५;२२०–२,४,६,१२,१३,१८;२२१–
१,८,१२,१५,१९;२२२–३,५,१४,१७;२२३–१,५,८,
१३,१८;२२४–१,१०,११,१६,२०;२२५–३,५,११,
१७,२२;२२६–१२,१४;२२७–१,१२,१६,२३;२२८–
३,७,११,१८;२२९–३,११,१५,२०;२३०–१,८,१६,
२०;२३१–६,९,१२,१३,१६,१८,२०;२३२–२,१०;
२३६–९;२३९–१४,१५,१७,१९,२०;२४३–२;२८२–
१२,१६;२८३–२,८,९,१६;२९६–२,४;२९७–१३;
२९८–१,६,१७,१९;२९९–१,३,६,८;३००–५;३०१–
११;३०२–२,६;३०३–४,९,११,१४,१७;३०४–६,८,
१०;३०५–१४;३०६–२,५,७,९;३२३–१२;३२६–४;
३३२–२१;३३३–६;३३७–२९,३१,३२;३५८–२३;
३७९–११;३८१–२,३,४,९,११;३८२–६,९,१०,१२,
१३,१५;३८३–५,६;३८४–१,२,६,११,१४;३८५–
१७;४३५–१,२;४३७–७;४८८–९;४२७–५;५३३–
२;५३७–१,२;५५९–१०;५६९–७;५७४–६,७;
५७५–१,३,४;५७६–१,४,५,६,७,८;५७७–१,३,८;
५७८–१४;५७९–२,३,५;'१८०–३,७,८,९;'१८१–
६,८,९,१०;५८२–३,७,८,१०,११;५८३–२,४,६,
७;५८४–२,४,५,८;५८५–११;'५८६–१०,१३,१५;
५८७–१,५;'५९०–२;६४४–३;६५७–४,५;६५८–
५,६,७,८,९;६५९–२,६,७,१०,११;६६०–१,३,४,६,
७,१०,१३;६६१–१,४,५,६;६६२–२,४,१०;६६३–
१,३,४,५,६,७;६६४–२,३,६,७,८;६६५–४,५,६;
६६६–१,२,४,५;६६७–२,४;६६८–२,५,६;६६९–
२,५;६७०–१,२,५;६७१–२,३;६७२–२,४;६७३–१,
३,६,७;६७४–५,६,७,८,९;६७५–२,४;६७६–१;
६७७–१,२,३,४;६७८–१,२,४;६७९–२,४,६,८;
६८०–१,४,८,९;६८१–१,२,५;६८२–२,४,५,६;६८४–
१,२,३;६८५–१,३,४,७;६८६–४,७;६८७–१,२,३,४,
६,७;६८८–१,२,३,४;६९३–१,३,४;६९४–२,६,८;
६९५–१,२;६९७–१;६९८–१,३,४;६९९–२,४;
७००–१,३,५,६,७,८;७०१–४,६,७;७०२–१,३,४,६,
७,८,९;७०३–३,४,५,७,८;७०४–२;७११–६,८;
७१२–२,३,६;७१३–१,३,४,५,८,९,११;७१४–१,२,
३;७१५–२,६,८;७१६–१,२,३,५,६;७१७–२,३,४,५,६.
तत्त्वसंग्रहपञ्जिका १७१–१;१७३–५;१७४–२,५,१२,१५,
१७;१७५–६;१७६–२;१७७–८,१०;१७८–७;१७९–
२,९;१८०–४,५,१०;१८१–३,१०,११,१२,१६,१७;
१८२–६,८;१८४–२,५,९,११,१५;१८५–१,२,११,
१२;१८६–२,११;१८७–४,५,८;१८८–१,३,६,८,१०,
१३;१८९–७,१४;१९०–१४;१९१–५,६,७,९,१४;
१९२–२,८;१९३–२,५;१९४–३,४,१०,१६;१९५–
१३,१४;१९६–२,६,११,१६,१९,२०,२१;१९७–१,
११,१२,१३;१९८–३,६,८,१०,१२,१६,१८,२०;
१९९–३,१२,१९;२००–१,२,३,७,९,११;२०१–७,९;
२०२–४,६,७,१०,१३;२०३–४,५,११,१४,२१;२०४–
१६;२०५–७;२०६–११,१९,२२;२०७–१,१४;२०८–
३,१२,२५;२०९–६,१९;२१०–४,१७;२११–५,६;
२१२–९;२१३–७,८,२१,२२,२७;२१४–२०;२१५–६,
१८,२०;२१६–१२,१८;२१७–१,४,६,८,१०,१३,१५;
२१८–१४,१५,२०,२१;२१९–३,४,८,१३,१६,१७,
१९;२२०–२,९;२२१–३,१०,११,१६;२२२–४,९;
२२४–३,१०,१२;२२५–८,९,१०,१२,१८;२२६–६,
९,१०,१३;२२७–५;२२८–५,१२,१५;२२९–११;
२३०–४,८,१२,१७,२२;२३१–१;२३२–४,१५,१९;
२३६–९;२८०–१३,१४,१५;२८१–७,८,१०,११,१२,
१३,१६,१७,१८;२८२–१,३,४,५,६,१३;२८३–५;
२८४–४,६,११;२९६–७,८,९,११;२९७–२,३,६,११,
१२;२९८–२,४,५,२३;२९९–४,९;३००–१,७,८,१०,
११,१४,१५,१६,१७;३०१–२,४,५,१२,१३,१४;३०२–
९,१२,१३,२१;३०३–३,५,६,७,८,१३;३०४–४,५,७,
९;३०५–२,३,११,१५,१६;३०६–८;३०७–२,३,४;
३२४–२;३२६–४;३३२–२१;३५८–२३;३७९–११,
१२;३८०–१,२,३,४,६,१०;३८१–५,११,१३,१४,१५,
१७,१८;३८२–२,४,७,१६;३८३–१,५,८;३८४–३,
१०,११;३८५–४,५,७,८,९,१०,१५;४००–१०;४२७–
९;४३५–२;४६५–६;४८०–३;४८२–६;'१०५–९;
५३३–२;५३८–१३;५५५–२;५५८–१४;५५९–५,
१०;५७४–३;५७६–१;५७७–८;५७८–११;५८०–१,
२;५८१–२,४,९,१०;६५७–३,६,८,९;६५८–१,४;
६५९–१,३;६६०–५,८,९;६६१–३,७,९;६६२–३,५,
६,७,८;६६३–२;६६४–१,४,५,९;६६५–१,२;६६७–
१,३;६६८–४,७;६६९–१,३,६;६७०–३,७;६७१–१;
६७२–३,५,६;६७३–२,४,५,६;६७४–३;६७५–१,३;
६७६–२,३,५,६,७,८;६७७–५;६७८–३;६७९–१,५,
७;६८०–५,१०;६८१–३,४;६८२–१,३,७,८;६८३–१,
२,३,४;६८४–१;६८५–५,६,८;६८६–२,६;६८७–५
६८८–४;६९३–१,५;६९४–४,६;६९५–२;६९६–१;
६९९–१,३,५;७००–४;७०१–१,२,५,८;७०२–२;
७०३–६;७०४–३;७११–७;७१२–४,५;७१३–१,१२;
७१५–३,५;७१६–४,७,९;७१७–१.
तत्त्वार्थभाष्य २६१–१;४४२–३;५५२–७;६३१–४;
७३५–२.
तत्त्वार्थटीका ३१७–११.
तत्त्वार्थभाष्यवृत्ति / तत्त्वार्थभाष्यव्याख्या } २६१–१;५४०–३;५४३–१३;
५९७–२;६३१ थी ३३–४.
तत्त्वार्थराजवार्तिक ४४२–२;४४३–६;६३१–
६३४–४.
तत्त्वार्थश्लोकवार्तिक १७१–१;२६१–१;३०५–१;३१८–१८;
४४२–२;४८३–११;४९०–१०;४९१–३;५०३–
८;५०८–३;५३३–१;५३४–९;५४०–३;५५३–९;
५६९–७;६३१–४;६३४–४;७३५–२.
तत्त्वार्थश्लोकवार्तिकालङ्कार ४९१–३.
तत्त्वार्थसार ६३१–४.
तत्त्वार्थसूत्र ६४–५;२६१–१;४५४–४,५;६३१–४;६५४–
३,३;६५५–१,२,३;६७६–४;७३४–४;७३५–२;
७३६–१.
तत्त्वोपप्लव (लि) ३२६–८,४६५–६;५२५–१,२;५३४–९;
५४७–६;५४८–३;५४९–९;५५०–१.

तन्त्रवार्तिक ३१५-१७.
तायिन् १७४-५.
त्रिंशिकाविज्ञप्ति ५९७-२.

द

दार्शनिकग्रंथ ४६९-६.
दिग्नाग १७५-६;१९९-७;५३१-९.
दिवाकर ६५६-४.
दृष्टिवादाङ्ग २७१-५.
देवनन्दिन् ६५२-१.
देशीनाममाला १७३-१;३१७-२;६२२-३;६३६-२.
द्रव्यगुणपर्यायरास (लि) ६३३-२.
द्वादशारनयचक्र (लि) १९५-१३;३७९-१२.

ध

धर्मकीर्ति (जुओ कीर्ति)१५-१२;२११-६;२४३-२१;४६५-६;४६७-११;४८८-९;५०६-२,३;५०८-१;५५४-४.
धर्मकीर्तिकृतन्यायबिन्दुटीकाटिप्पणी ४६९-६.
धर्मकीर्तिवार्तिक ५०३-७.
धर्मकीर्तिसूरि ३३३-११.
धर्मसंग्रहणी ४९८-६;५००-८;५१०-१;५९७ थी ६०३-२;६२७-१;७१२-२.
धर्मसंग्रहणीवृत्ति २७२-८.
धर्मोत्तरीया ४६७-११.
ध्यानशतक ७३४-१.

न

नन्दिसूत्रचूर्णी (लिखित) ५९७ थी ६०४-२.
नन्दिसूत्रटीका ४७८-२.
नन्दिसूत्रलघुवृत्ति (लिखित) ५९७ थी ६०३-२.
नयचक्र (हस्तलिखित)६३-७;२७१-९;४४१-१०; ४४१-१०.
नयनप्रसादिनी ५५८-१४.
नयोपदेश २७३-१;३१७-१२;३१८-१७;३१९-१३,१५; ४४२-३;६४५-४.
नयोपदेशवृत्ति ३७९-१२;३८०-१,१३;३८३-९,१०, ११.
नागेश ६५२-१.
निर्ग्रंथ ६४४-३.
निर्युक्तिकार (भद्रबाहु) ४२२-१.
नैयायिक ९८-३;५४०-३;५४३-१३;५७७-७;५९७-२.
नैषधीय महाकाव्य ६९७-१.
न्याय १८३-२१.
न्यायकर्णिका ३६६-२.
न्यायकन्दली ७०६-५.
न्यायकुमुदचन्द्रोदय (लिखित) १७४-११;२६०-९,१०; ४७१-७;५३७-९;५४०-३;६५७-३,७;६६९-१,३.
न्यायदर्शन ९९-५;११५-६;१५०-४;१७८-७;३४६-३०; ४५२-१;४८७-५;५१८-१६;५२७-५;५३०-१; ५४०-३;५५१-६;५९७-२;६५९-८;६७१-६; ७३३-३.
न्यायदर्शनवात्स्यायनभाष्य ४२२-१.
न्यायप्रवेश ३१८-४;३५१-६;४८८-९.
न्यायप्रवेशकार ४८८-९.
न्यायबिन्दुसूत्र ३१८-४,६,१३,१४;३५१-६;३५२-१; ४८८-९;५०१-३;५०६-२;५७२-६;५९२-१.
न्यायबिन्दुटीका ४६५-६.
न्यायबिन्दुवृत्ति ४६७-११.
न्यायबिन्दुटीकाटिप्पणी (लिखित) ४६९-६;४८९-३; ४९८-६;५०६-२.
न्यायमकरन्द ३६६-२.
न्यायमञ्जरी ४६५-६;४६६-५,७;४६९-६;४७१-७; ४८०-३;४८३-९;४८७-५;४८९-३;५०५-६;५०७-६;५०८-१;५१९-९;५२०-६;५२१-४;५२२-८; ५२३-११;५२४-४;५२५-१,२,४,५,६;५२९-११; ५३०-१,२,४,६;५३१-७;५३३-१;५३४-९;५३५-१,४;५३६-४,९;५३७-१,२,४;५३८-२,८;५३९-२; ५४०-३;५५४-२,३;५६०-१,३;५६१-१२;५६२-२,५;५६३-५,९;५६५-५;५७४-१;५७५-५;५७७-७,८;५७८-१४;५७२-५;५८७-५;५९७-२;६५९-८;६६८-३;७०६-५.
न्यायवार्तिक १२७-१;१४३-२;१५३-४;१७५-६;१७८-२,७;२००-७;२०४-१,२;३३२-२२;३४६-३०; ३७६-९;४२२-१;४७१-११;५१९-४,९;५२०-६; ५२१-१,४;५२२-३,८;५२४-४;५२८-५;५३०-६; ५३१-७,९;५३३-१;५३४-९;५४०-३;५५९-१०; ५६०-३,५;५६१-१२;५६२-२,५;५६३-६;५६६-१०;५७७-७;५९७-२;६५९-८;६६४-१;६६६-३, ५;६६८-३;६६९-६;६७७-५;६८९-६;६९२-१; ७१६-८;७१७-२.
न्यायवार्तिकतात्पर्यटीका ३४६-३०;३६६-२;३७६-९; ४२२-१;४६९-६;४७१-११;४९९-१;५०३-७; ५१९-२,४,५,९;५२०-६;५२१-१,४;५२२-२,५,८; ५२४-४;५२५-१,२,४;५२८-५;५३०-६;५३१-७,९; ५३३-१;५३४-९;५४०-३;५४३-१३;५५४-८; ५५८-१४;५५९-५,१०;५६०-५;५६१-१२;५६२-२,५;५६६-३,१०;५७७-७;५९७-२;६५९-८;६६९-६.
न्यायवादिन् २४३-२१;५०३-७.
न्यायसिद्धान्तमुक्तावली ५०९-१२;६७६-४.
न्यायसूत्र १७८-७;५६०-२.
न्यायसूत्रभाष्यकार ४६९-६.
न्यायागमानुसारिणीटीका ४४१-१०.
न्यायावतार ३५१-६;४२२-१;५९२-२,५.
न्यायावतारटिप्पण २८१-८;३०८-२;३११-३,४,५,७,९; ३१४-५.
न्यायावतारटीका ४६५-६.
न्यास ७५७-२.

प

पञ्चाध्यायी ६३१-४.
पञ्चाशक ७४६-५;७५५-६.
पञ्चाशकटीका ७५५-५.
पञ्चास्तिकाय ४४२-३;६३१-४;६३६-१.
पण्डितरत्नकीर्ति २६०-११.
पतञ्जलि ६५२-१.
पदार्थधर्मसंग्रह ६६१-२.
पदार्थप्रवेशक ६६१-२,३.
पराशरमाधव ६९७-१.
पल्लव ४७१-७.
पाइअलच्छीनाममाला १७३-१.
पाणिनि १७९-४;२२६-९;२७२-८;५६६-४.
पाणिनिव्याकरण २७१-४,११;३१३-१,४,६.
पाणिनिसूत्र ६५२-१.
पातञ्जल ५९७-२.
पातञ्जलदर्शन / पातञ्जलयोगदर्शन } ३१६-३;६४४-३.
पात्रकेसरिन् ५६९-७.
पात्रस्वामिन् ५६९-७.
पार्थसारथिमिश्र १५-१२;१७५-६;४६५-६;७४२-१.
पुण्यराजटीका १८२-४,६.
पूज्यपाद ६३१-४.
पूर्वमीमांसक ५७७-८.
प्रकरणपञ्जिका ३६६-२.
प्रज्ञाकरगुप्त ४६५-६.
प्रज्ञापनाटीका / प्रज्ञापनावृत्ति } ५९७-२.७५१-६.
प्रज्ञापनासूत्र ५४०-३;६०५-१;६०७-२;६०८-५;६५४-१;७३५-१.
प्रदीप ६५२-१.
प्रमाणनयतत्त्वालोकालङ्कार ४४२-३;४७८-५;५५२-७.
प्रमाणपरीक्षा ३१८-१८;५५२-४;५५४-४;५५५-९.
प्रमाणमीमांसा ४६५-६;४६९-६;४८०-३;४८७-५; ५१०-८;५३३-१;५३५-१,९;५५२-७;५५४-४; ५५५-२;५६९-३;५७०-४.
प्रमेयकमलमार्तण्ड २९-१;३१-१०;३९-८;४४-१;५२-३;५६-६,७;१०१-२;१०६-७;१२६-१;१४३-६;१४९-४;१५४-१०,११;१५९-७;१६०-१;१६२-३;१६४-१;१६९-१०,११;१७३-१०,१२;१७६-२;१७७-४, ७;१८१-१०;१८५-१४,१६;१८९-४,७;१९१-७,१२, १४,१९;१९२-१३;१९३-८;१९४-३;१९५-६,१३; १९६-२;१९९-२,४;२०२-७;२३७-१९,२२,२३, २६;२३८-४,५,६,१२;२३९-६,७,१०,१४;२४०-३, १०,१३;२४३-२०;२५१-१४;२५२-२४,२५;२५३-१०;२६१-८,१३,१७,१९,२०,२२,२४;२७३-१३,१४; २७४-१,१३,१५;२७६-१३,१६;२७७-९;२८५-३; ३१८-१८;३१९-१;३२१-२९;३२२-१,२;३२७-१९,२६;३२८-१,३,५,६,९,१०,१३,१७,१८;३२९-३;३३०-१०;३३२-२२;३४९-२३,२५,२७;३५१-६, ७;३५२-१,४,८,९,१५;३५३-११;३६९-४;३७९-१२;३८०-१,९;३८१-११;३८२-५,१४,१६;३८३-२, ८,९,१०,१२;३८६-७,१३,१४;३८७-९,१३,१४,१५; ३८८-९,११,१४,१८,१९;३८९-८,९,१०,११,१४; ३९०-१,१०;३९१-२०,२२,२९;३९२-१०,११,२९; ३९३-१,११;३९५-६;३९८-१,१२;४०२-१४; ४०३-३;४३१-७,८;४३३-१;४३५-२;४५१-७; ४५४-२;४५८-९;४५९-३;४६०-५,७;४६५-११; ४६६-५;४६७-८;४६९-१;४७१-७;४७३-३,४, ८;४७६-१,९;४७७-६,७;४८०-२,४;४८३-६,९,१०; ४८४-१३;४८५-४;४८९-१;४९१-३;४९३-१; ४९६-६;४९९-१;५००-३,८,१४;५०३-७,८;५१०-२,८;५१२-७,११;५१३-७;५३३-१;५३४-२;५३५-२;५४०-३;५४३-१३;५४४-८;५५४-१,४;५७०-३; ५७४-४;५७५-६;५७७-४;५७८-१४;५७९-५; ५८३-१२;५८५-४;५८७-४,५;५९०-३;५९४-४; ६१२-१;६१३-१;६४१-४;६४२-२,४;६४७-२; ६५७-३,७;६६१-३;६६९-१,३;६७६-२,३;६७७-५;६९७-१;७४६-२;७५१-६.
प्रमेयकमलमार्तण्डटिप्पण ५६-७;२४०-१०,१३;२४३-२३;२६१-२४;३१८-१८;३८६-७,१३,१४;३८८-९; ३९१-२२;३९२-११;४५९-३;४७७-६;४८३-९.
प्रमेयरत्नकोश ३०९-१;४४२-२;४४३-६.
प्रवचनसार ४४२-३;६३१-४;६४५-३.
प्रवचनसारटीका ४४२-३.
प्रवचनसारोद्धार ६३०-३.
प्रशमरतिप्रकरण ६४-५.
प्रशस्तदेव ६६१-२.
प्रशस्तपाद ६६१-२.
प्रशस्तपादभाष्य १४९-७;५३८-१३;५५९-१०; ५९७-२;६६१-२.
प्रशस्तपादभाष्यकन्दली ४३१-८;४३३-१,६;४३५-४;

४६९-६;५००-८;५०७-६;५०९-१२;५१९-९;
५३८-९;५४०-३;५४३-१३;५४४-१४;५५१-६;
५५८-१४;५७७-८;५७८-१४;५७९-५;५९७-३;
६३३-१.६४६-४;६४८-३;६५९-८;६६१-२,८;
६६६-५;६६९-६;६७२-२,६;६७५-२,३;६७६-४;
६८३-३,५;६८४-१;६८६-१;६९८-१,२;६९९-२;
७००-२;७०४-३,४;७०८-१;७०९-१.
प्रशस्तमति ६९९-२;७०१-६.
प्रश्नव्याकरणाङ्ग २७१-५.
प्राकृतपिङ्गल २७१-२३.
प्राकृतप्रकाश २७२-७,८.
प्राकृतमञ्जरी २७२-८.
प्राकृतरूपावतार २७२-८.

ब

बङ्गीयविश्वकोश १७९-२;२२६-९.
बृहत्संहिता ६५३-१.
बृहदारण्यउपनिषद् २७९-३;२७३-५,७;३८३-९,१०,
१२;७१५-३.
बृहद्द्रव्यसंग्रह ४५७-३;४७८-२.
बृहस्पति ५०५-६;६९७-१.
बोधिचर्यावतार ३६६-२;३७६-९;५१०-१.
बोधिचर्यावतारपञ्जिका ३७७-८;४५५-१;७१२-२.
बौद्ध १९४-१६;५४०-३;५९७-२.
ब्रह्मसूत्र ४६१-२;५९७-२.
ब्रह्मसूत्रशाङ्करभाष्य २७९-१४;२८०-१;६४६-४.
ब्रह्मसूत्रशाङ्करभाष्यभामती २७८-६;४५५-२.
ब्रह्मसूत्रशाङ्करभाष्यआनन्दगिरीयटीका ४७२-५.

भ

भगवतीसूत्र (जुओ व्याख्याप्रज्ञप्ति) २७१-५;४४१-१०;
४५५-२;५५९-१०;६१०-१ ६१३ १५;६२५-१;
६३१-१,४;६३५-२,४,५; ६७१-७;७१४-४;
७३४-१.
भगवतीसूत्रटीका ३१७-११.
भट्ट (जुओ कुमारिल) ६-५;४६६-५;५७०-३.
भट्टजयन्त ४७१-७.
भद्रबाहुस्वामिन् ४२३-१;४७८-२.
भरद्वाज ६५२-१.
भर्तृहरि ४६१-२;५४३-१३.
भामतीकृत् ४६१-२.
भामह १८६-२;२०४-१९.
भामहालङ्कार १८६-२,४,५,६,७;२०४-१९.
भारतीयदर्शन ५९७-२.
भाष्यकार ५२२-५;५३५-३.
भाष्यकृत् ६५३-१.
भाष्यटीकाकृत् ६५३-३.
भिक्षु १७५-६.
भृगु ६५२-१.

म

मज्झिमनिकाय ३५३-११.
मध्यमकवृत्ति ३०९-५;३६६-२;३७७-८;४५५-१.
मनुस्मृति ६५२-१;७३१-१.
मलधारिहेमचन्द्रसूरि ६२०-१.
मलयगिरीयनन्दिसूत्रवृत्ति ५९७ थी ६०४-२.
मलयगिरीया ६३५-३.
मल्लवादिन् ४४१-१०;५९७ थी ६०४-२.
मल्लिषेण ३०८-२.
मस्करीगोशालक ७१४-४.
महाभारत ४९१-३;५३६-७;६५२-१;७११-२;७३१-३.
महाभाष्य १७९-१,३,४;२२६-९;३१६-३;४३१-६;
४७५-४;६५२-१;६५३-२.
महायानसूत्रालंकार ३७१-८;३७७-१.
माठर ७१०-५.
माठरवृत्ति २८१-१,२,४,५,८,९,११,१३,१४,१८,१९;
२८२-३,११,१५;२८३-१;२८४-३,४,५,७,८,१०,
११,१२,१३;२९६-५;३०५-८;३०७-९,१४;३०९-
४;५३३-१;७११-५;७१२-१;७३३-९.
माध्यमिक ४५८-६.
मीमांसक ५४३-१३;५५९-१०;६४४-३.
मीमांसादर्शन ४३१-७;४६०-४;४७९-४;५५९-१०.
मीमांसाशाबरभाष्य ४३-४.
मीमांसासूत्र ५९७-२.
मुक्तावली ५४०-३.
मूलकल्पसूत्र ६१४-२.

य

यशोविजय १८५-१४;२११-६;२६०-९,१०;२६१-१;
३०८-२;४८०-३;५०७-६;६३१-४;६३३-२;
७४९-२.
यशोविजयतत्त्वार्थभाष्यव्याख्या २६१-१.
यादवप्रकाश ५३३-२.
यापनीयसंघाग्रगामिन् ६१२-१.
यास्कनिरुक्त ६५३-२.
योगदर्शन ३०७-८;५९७-२.
यौगाचार ४५८-६.

र

रत्नप्रभसूरि ५७०-४.
रत्नाकरावतारिका १७०-४;३२०-२६;३७६-९;४४२-२;
४५४-२;४५५-१;४७८-५;४८३-११;४८८-७;
५४०-३;५४३-१३;५७०-४.
रविभद्र ५६९-७.
राजमल्ल ६३१-४.
राजवार्तिक २६१-१;५४०-३;५४३-१३;५५२-७;७३५-२.
राजशेखर ३०८-२.
रुद्रिल २९६-८.

ल

लङ्कावतारसूत्र ३०३-३;३७७-१.
लघीयस्त्रय ५५२-४;५५३-८,९.
लघीयस्त्रयवृहद्वृत्ति ५५२-७;५५३-४,५,९.
ललितविस्तरावृत्ति २७२-८.
लौकिकन्यायाञ्जलि ३६६-२;४७५-४;४७९-४,५;५६८-
१२;५९२-९.

व

वराहमिहिराचार्य ६५३-१.
वाक्यपदीय १७९-१,३,८;१८०-१,२,६,८,११;१८१-२;
१८२-४,६;२२२-६,७,१५;२३६-११;३१६-१,२;
४३५-२;४६१-२;४९१-३;५३८-८;५४३-१३;
६५३-२.
वाक्यपदीयटीका ३१६-२;४९१-३.
वाचकउमास्वाति ७३५-४.
वाचस्पतिमिश्र ४७१-११;५०३-७;५२२-५;५५९-१०;
६५९-८.
वाचस्पतिमिश्रटीका ३१६-३.
वाचस्पत्यकोष ६३६-४.
वाजध्यायन १७९-१,२.
वार्तिक ६५२-१.
वार्तिककार ४६९-६;४९८-६.
वात्स्यायन ६५९-८.
वात्स्यायनन्यायभाष्य ९९-५;१५३-४;१५४-७;२९५-४;
४२२-१;४६९-६;५२१-४;५२२-२,८;५२४-४;
५२८-५;५३०-६;५३१-९;५५९-१०;५६३-१,५;
५६६-३,१०;५१७७-७;५९७-२;६५९-८;६६९-६.
वादमहार्णव ३०८-२.
वादिदेवसूरि ५६९-७;५७०-३.
वायुपुराण ६५६-३.
वार्षगण्य ५३३-१,
विज्ञप्तिमात्रतासिद्धिवृत्ति ५९७-२.
विद्यानन्दिन् ६३१-३२-४;६३४-४.
विद्यानन्दिस्वामिन् ४९१-३; ५६९-७.
विनिश्चय ३२२-३१.
विन्ध्यवासिन् ५३३-२; ५३४-२.
विप्र ६४४-३.
विपाकश्रुताङ्ग २७१-५.
विपाकसूत्र ९३-३.
विशेषणवती ५९७-२.
विशेषावश्यकबृहद्वृत्ति ४०६-१.
विशेषावश्यकभाष्य ४४२-२; ४७८-२; ५४०-३; ५५३-
९,१०,१३; ५९७ थी ६०४-२; ६१९-४; ६५३-३;
७४६-१; ७४७-१; ७५७-३.
विशेषावश्यकभाष्यटीका / विशेषावश्यकभाष्यवृत्ति ६०८-७; ६२०-१; ७५०-२,४.
वैद्यकसिन्धु ७१३-१०.
वैभाषिक ४५८-६.
वैशेषिक ५४०-३; ५४३-१३; ५५९-१०; ५७४-२;
५९७-२; ६३१-४; ६३३-१; ६५७-३.
वैशेषिकदर्शन ५५१-६; ६३३-३; ६५६-४; ६७६-४;
६८६-३; ७०४-४.
वैशेषिकद्वात्रिंशिका ६५६-४.
व्याख्याप्रज्ञप्ति भगवतीअङ्ग (जुओ भगवती) २७१-५.
व्याख्याप्रज्ञप्तिसूत्र ६१४-१३.
व्याडि १७९-३.
वृद्धसांख्य ५३३-१.
वृद्धाचार्य ५९७ थी ६०४-२.

श

शङ्करस्वामिन् ६६७-२; ६९३-१.
शङ्कराचार्य ४६१-२.
शबरस्वामिन् ५७४-३; ५७७-८.
शब्दानुशासन ४८-५.
शाकटायन ६१२-१; ६३५-३.
शाकटायनव्याकरण २७१-४.
शाक्य ५७४-२.
शाङ्करभाष्य ५९७-२.
शान्तरक्षित ४८८-९; ५३३-२; ५७४-६; ५७६-१;
५७८-१४; ६४४-३.
शान्तिपर्वन् ६५२-१.
शाबरभाष्य २०-५; ५४-१; ५४०-३; ५५९-१०;
५७२-४; ५७४-३; ५७६-१; ५९७-२; ७३०-३.
शाबरवचन ७४२-१.
शाश्वतकोश २२६-९.
शास्त्रदीपिका ५०५-९; ५३४-८; ५४०-३; ५५४-३.
शास्त्रदीपिकायुक्तिस्नेहप्रपूरणी ५०५-९; ५३५-३; ७४२-१.
शास्त्रदीपिकायुक्तिस्नेहप्रपूरणीसिद्धान्तचन्द्रिकाव्याख्या ३६१-
३१; ७४२-१.
शास्त्रवार्तासमुच्चय १७७-४; २६०-९,१०; ३३१-११;
३७७-२; ३८३-९,१०,११,१२; ४५६-१; ५३३-
२; ६३१ थी ३३-४; ६४४-३; ७१०-५; ७११-५.
शास्त्रवार्तासमुच्चयटीका (लिखित) ४४३-६; ५०७-६;
७४७-१; ७५१-६.

शास्त्रवार्तासमुच्चयव्याख्या २६१-१.
शास्त्रवार्तासमुच्चयस्याद्वादकल्पलता १७५-६; १७२-५,८; १८०-२,४,८,११; १८१-२,१९; १८२-४,६; १८४-११; १८५-१,२,१४; १९०-१२; १९१-१२,१४,१९; १९२-१३; १९६-२१; १९८-१०,१२,१८,१९;१९९-२,४,५; २०२-२,७,१६; २०३-२६; २०७-१०;२०९ ८,१७; २१०-४;२११-४; २१२-२०,२३; २१४-१८, २३; २१५-१,७,१५,१६,१८; २१६-१०,१५,२२; २१८-४,१०,१४; २२०-२,४,९,१८; २२१-११,१२, १६; २२२-३,८,२१; २२४-१५; २२५-२३; २२६-५,१३,१४; २२७-९,१०; २२८-५,९,१३; २६०-१५, १९; २८१-८; ३०८-२; ३३२-२१; ३३३-६,११; ३७१-८; ३७६-१५; ३७७-२,४,६,८;३७९-१, २,१२; ३८०-१,१०; ४०१-२; ४४३-१;४४४-२,४; ४४५-१,४,१०; ४४९-५; ४५०-१; ४७८-२; ४८२-६; ४९१-३; ४९७-३; ४९९-१,२; ५०२-१४; ५०३-४,७,८; ५०४-३;५०६-३; ५०८-३,८; ५१०-१,७; ५११-१; ५१२-७,११,१५; ५३३-२; ६३१ थी ३३-४; ६३९-२; ७१२-१; ७१४-७,८.
शिक्षासमुच्चय ३६६-२.
शीलाङ्क ६१३-१; ७१०-५.
शीलाङ्काचार्य ७५७-२.
श्रीधर ५७७-८; ५७८-१४; ६५९-८; ७०६-५.
श्रीधरीयकन्दली ४६९-६.
श्रीभाष्य ३६६-२; ५९७-२.
श्वेताश्वतरोपनिषद् ७१०-५; ७१५-३.
श्लोकवार्तिक ६-५; ७-८; १०-३; ११-२; १८६-९,१०,१२; १८७-३,६,९,१३,१६,१७,२१,२२; १८८-४,७,९,१२; १५,१८; १८९-१,३,५,१२,१६,१८; १९०-२,३,१०, १३,१५,१८; १९१-१,३,४; १९२-१,३,५,७,१०,१२; १९३-१,४,७,१०; १९४-२,५,८; १९५-५,१०,१८, २३; १९६-१,१७; १९७-२,७,८,१४; १९८-२,४,५ ७,८,१५; १९९-१,८,१३,१४,१६; २०४-१९; २११-१३; २२३-१; २४०-१७,१८; ३१९-३,६,८; ३५१-५; ३५८-२३; ४३३-७; ४९९-१; ५३३-२; ५३४-८; ५३५-१; ५३७-९,१०,११; ५४०-३; ५५९-१०; ५६४-१०; ५७०-३; ५७४-२; ५७५-३; ५७६ ४; ५७७-४,५; ५७८-१३,१४, ५७९-२,३,५; ५८०-३,४,७,८; ५८१-४,७,९; ५९७-२; ६४४-३; ६८८-७; ६९५-३,४,५; ७४०-१.
श्लोकवार्तिकटीका ४-६; १५-१२; ४६५-६.
श्लोकवार्तिकपार्थसारथिमिश्रव्याख्या १९६-१६; १९७-१२; १९८-८; १९९-७,१७; २०१-८,९; २४३-२०,२३; ३१९-८; ३६६-२; ४०१-२; ४१४-६; ४३१-७; ४३७-६,७; ४८३-९; ५०५-९; ५३५-३; ५७७-४,५; ७४२-१.

ष

षड्भाषाचन्द्रिका २७२-८.
षड्दर्शनसमुच्चयबृहद्वृटीका ४५८-६; ४५९-३; ४६७-११; ४७५-७; ४८१-५; ४८३-९; ५०५-६,८; ५१०-१; ७१०-५; ७११-५;७१२-१; ७३३-५.

स

संयुत्तनिकाय ३०९-५.
संक्षेपशारीरक २७३-५.
सप्तभङ्गीतरङ्गिणी ४४२-२; ४५१-७.
समन्तभद्र ५१९-१०; ५९५-१; ६२०-१; ७५७-२.
समवायाङ्ग २७१-५.
सन्मति ३३२-२१.
सन्मतिटीकाकार १८५-१४; ४७८-२.
सर्वदर्शनसंग्रह १७२-१,३,४; ३७६-९; ४०१-२; ४१४-६; ४३५-२,४; ४५८-६; ४८३-९; ५०५-६.
सर्वार्थसिद्धि २६१-१; ३६६-२; ५५२-७; ६३१-४; ७३५-२.
सांख्य ४-४; १८३-२०; ५४०-३; ५४३-१३; ५९७-२; ६४४-३.
सांख्यकारिका २८१-३,५,६; ५३३-१; ५५९-१०; ७३३-४,९.
सांख्यकारिकावृत्ति ७११-५.
सांख्यकौमुदी २८४-२; ३०७-९,१६; ५३३-१.
सांख्यतत्त्वकौमुदी ५५९-१०; ५६६-१०.
सांख्यतत्त्वविवेचन ५३३-१.
सांख्यदर्शन ३०९-४; ५३३-१; ५४०-३.
सांख्यप्रवचनभाष्य २७७-१६; ५३३-१.
सांख्यवेदान्तप्रक्रिया ५४०-३.
सांख्यसंग्रह २८१-८.
सांख्यसप्तति ४२३-१९.
सांख्याचार्य ५५९-१०.
सायणमाधव ५०५-६.
सारस्वतव्याकरण २७१-४.
सिद्धसेनसूरि २६१-१; ५५९-१०; ६२०-१; ६३१-४; ७५७-२.
सिद्धसेनदिवाकर ५९७ थी ६०४-२; ६३१-४.
सिद्धसेनदिवाकरीय ६३१ थी ३३-४.
सिद्धसेनीयद्वात्रिंशिका ६२०-१.
सिद्धान्तकौमुदी १७९-२; ३१३-१,६; ३८१-१; ३८७-२;४०६-३; ४४१-५; ६५२-१.
सिद्धान्तमुक्तावली ५४६-४.
सिद्धिविनिश्चयटीका (लिखित) ३२६-८; ४६५-६; ४७८-५,६; ४७९-४; ४८०-२; ४८१-५; ४८२-६; ४८३-११; ४८८-९; ४९८-६; ५००-८; ५०३-७,८; ५०६-२; ५१०-८; ५१२-२,७; ५२५-१,२,४; ५३७-९; ५५३-८; ५६९-७; ७२८-२.
सिंहसूरिवादिगणिक्षमाश्रमण ४४१-१०.
सीमन्धर ५६९-७.
सुत्तनिपात ३५३-११.
सुमङ्गलविलासिनी ३६६-२.
सूत्रकृताङ्ग २७१-५; ६१३-१५.
सूत्रकृताङ्गटीका ३३२-२२; ७१०-५.
सूत्रकृताङ्गटीकाकृत् ६१३-१.
सूर्यसिद्धान्त ७११-१.
सौगत ५७४-१.
सौत्रान्तिक ४५८-६.
स्तुतिकार ६२०-१; ७५७-२.
स्थानाङ्गसूत्र २७१-५; ४५३-१; ७३४-१.
स्फुटार्थाभिधानकोश ५४०-३.
स्फोटसिद्धि ४३१-८,९,१०; ४३२-२; ४३५-३.
स्याद्वादकारिका (अन्ययोगव्यवच्छेदद्वात्रिंशिका) ४८३-११; ४८८-७; ५४३-१३.
स्याद्वादमञ्जरी ३०८-२; ४४२-२; ४५१-७; ४५४-२; ४५५-१.
स्याद्वादरत्नाकर ६-५; ७०-२; १६९-१०; १७०-४,७; १७१-१,२,३,१२; १७२-१; १७७-४,७; २०२-४, १०,१६; २०३-४,९; २४८-१९; ३२०-२६; ३७६-१५; ३७९-१२; ३८०-१,५,१०,११,१३; ३८१-११; ३८३-८,९,१०,१२; ४०१-२; ४१४-६; ४३१-७; ४३५-२,३; ४३७-७; ४६५-६; ४६६-५; ४६७-८; ४६९-६; ४७१-७; ४८३-९; ४८८-७; ४९१-३; ४९९-१; ५००-३,८,१४; ५०३-७,८;५१०-१,८; ५१२-११; ५३३-१; ५३४-२; ५३५-१,९; ५४०-३; ५४५-१२; ५६२-२; ५६९-३,७; ५७०-३; ५८७-४,५; ५९४-४; ६१०-१३; ६११-१; ६१३-१; ६६१-३; ६९१-२; ६९७-१.
स्वयंभूस्तोत्र ६३९-२; ७५७-२.
हरिभद्र २६०-९; ५३३-१; ६२७-१; ६३१ थी ३३-४; ७१०-५; ७४९-२; ७५७-२.
हरिभद्रीयनन्दिसूत्रवृत्ति ५९७ थी ६०४
हरिभद्रियानुयोगद्वारवृत्ति ७५६-५.
हर्ष ६९७-१.
हेतुबिन्दु ६९१-१.
हेतुबिन्दुतर्कटीका (लिखित) १६९-७; १७१-१; ३१८-१७; ३२०-२४,२६; ३२१-५,२९; ३२२-३१; ५६८-८;५५६-२.
हेतुमुख १९९-६.
हेमचन्द्र ३१३-६; ४६१-२;४८७-५; ५३३-२; ५७०-४; ६५२-१; ७५७-२.
हेलाराजटीका (वाक्यपदीय) १७९-१,३.
हैमअनेकार्थकोश २२६-९; ५२३-६; ६८८-८.
हैमच्छन्दोनुशासन २७१-१३.
हैमतत्त्वप्रकाशिकाबृहन्न्यास २२६-९.
हैमधातुपाठ ३१६-३.
हैमधातुपारायण १७३-३.
हैमप्राकृतव्याकरण २७२-७,८.
हैमशब्दानुशासन ४८-५; १७३-२; १७९-२; १९०-९; २२५-२४; ३१३-१,४,६; ३१६-३; ३८१-२; ३८७-२; ४२१-५; ४४१-५; ५६६-४; ६०५-२; ६५२-१; ६५३-२.
हैमशब्दानुशासनबृहद्वृत्ति ४६१-२; ४७१-१०; ४७९-५.

१३

सन्मतिसम्पादने उपयुक्तानां ग्रन्थानां सूचिः।

अनुयोगद्वारसूत्र (सुरत-आगमोदय समिति)
अनुयोगद्वारवृत्ति हरिभद्रीय (रतलाम आवृत्ति)
अनेकान्तजयपताका (अमदावाद)
अनेकान्तजयपताकाटीका (काशी यशोविजय ग्रंथमाला)
अनेकान्तजयपताकाटीका (लिखिता)
अन्नंभटमिताक्षरा (काशी-विद्याविलास प्रेस)
अपोहसिद्धिप्रकरण (सिक्स बुद्धिस्ट न्याय टेक्स्ट बिब्लिओथेका इंडिका नं. १२२६ सं. हरप्रसादशास्त्री)
अभिधानचिन्तामणिकोश (काशी-यशोविजय ग्रंथमाला)
अभिधानप्पदीपिका (अमदावाद गूजरात पुरातत्त्व मंदिर)
अमरकोश (मुंबई राजकीय ग्रंथमाला निर्णयसागर प्रेस)
अष्टशती (मुंबई निर्णयसागर प्रेस)
अष्टसहस्री (मुंबई निर्णयसागर प्रेस)
अष्टसहस्रीटीका (लिखिता पूना भांडारकर प्राच्य विद्यासंशोधनमंदिर)
आचाराङ्गसूत्र (सुरत आगमोदय समिति)
आचाराङ्गसूत्रटीका (सुरत आगमोदयसमिति)
आप्तपरीक्षा (काशी-सनातन जैनग्रंथमाला)
आप्तमीमांसा (काशी-सनातन जैनग्रंथमाला)
आवश्यकनिर्युक्ति (काशी-यशोविजय ग्रंथमाला अपूर्ण)
आवश्यक हरिभद्रीय (सुरत आगमोदयसमिति)
उत्तराध्ययनसूत्र (सुरत देवचंद लालभाइ)
ऋग्वेद
ऋक्संहिता
ओघनिर्युक्ति (सुरत आगमोदयसमिति)
कठोपनिषद् (ईशाद्यष्टोत्तरशतोपनिषद् मुंबई निर्णयसागर प्रेस)
कल्पसूत्र मूल (सुरत देवचंद लालभाई)
कातन्त्रव्याकरण (बिब्लिओथेका इंडिका नं. ८१)
काशिकावृत्ति (काशी-विद्याविलास प्रेस)
कुमारसंभव (मुंबई निर्णयसागर प्रेस)
केवलीभुक्तिप्रकरण (अमदावाद जैन साहित्यसंशोधक)
गणरत्नमहोदधि (प्रयाग सरस्वती प्रेस संपादक भीमनाथ शर्मा)
गोमटसार (मुंबई निर्णयसागर प्रेस)
गौडपादकारिका (पूना आनंदाश्रम ग्रंथमाला)
गङ्गानाथ झा अनुवादित श्लोकवार्तिक (बिब्लिओथेका इंडिका नं. ९८६)
चरकसंहिता (कलकत्ता सं० योगेंद्रनाथ सेन)
चान्द्रव्याकरण (लिप्जीक १९०२ संपा० ई. विन्डीश)
जीवविचारप्रकरण (मेसाणा)
जीवाजीवाभिगमसूत्र (सुरत आगमोदयसमिति)
जैनतर्कपरिभाषा (भावनगर जैनधर्मप्रसारक सभा)
जैनेन्द्रव्याकरण (काशी-सं. विन्ध्येश्वरीप्रसाद)
जैमिनिसूत्र (काशी-विद्याविलास प्रेस)
जम्बूद्वीपप्रज्ञप्ति (सुरत आगमोदयसमिति)
ज्ञानबिन्दु (भावनगर जैनधर्मप्रसारक सभा)
तत्त्वार्थव्याख्या (अमदावाद पोथी आकार)
तत्त्वार्थटीका (सुरत देवचंद लालभाई पुस्तकाकार)
तत्त्वार्थभाष्य (पूना आर्हतमत प्रभाकर, कलकत्ता रॉयल एशियाटिक सोसायटी बेंगाल)
तत्त्वार्थराजवार्तिक (काशी-सनातनजैनग्रंथमाला)
तत्त्वार्थश्लोकवार्तिक (मुंबई निर्णयसागर आवृत्ति)
तत्त्वार्थश्लोकवार्तिकालङ्कार (मुंबई निर्णयसागर आवृत्ति)
तत्त्वार्थसूत्र (मेसाणा)
तत्त्वसंग्रहकारिका (वडोदरा गायकवाड ग्रंथमाला)
तत्त्वसंग्रह पञ्जिका (वडोदरा गायकवाड ग्रंथमाला)
तत्त्वोपप्लव (लिखित गूजरात पुरातत्त्व मंदिर)
तन्त्रवार्तिक (काशी)
त्रिंशिकाविज्ञप्ति (सं. प्रॉ० सिल्वन् लेवी पेरिस)
त्रिंशिकाविज्ञप्तिभाष्य (सं. प्रॉ० सिल्वन् लेवी पेरिस)
दशवैकालिकसूत्र (सुरत देवचंद लालभाई)
दशवैकालिकसूत्रनिर्युक्ति (सुरत देवचंद लालभाई)
देशीनाममाला (मुंबई राजकीय ग्रंथमाला)
द्रव्यगुणपर्यायरास (लिखित)
द्वादशारनयचक्र (लिखित)
धर्मसंग्रह (बौद्ध) (ऑक्स्फर्ड युनिवर्सिटि प्रेस १८८५)
धर्मसंग्रहणी (सुरत देवचंद लालभाई)
धर्मसंग्रहणीवृत्ति (सुरत देवचंद लालभाई)
नयनप्रसादिनी चित्सुखी (मुंबई निर्णयसागर प्रेस)
नयोपदेशवृत्ति (भावनगर आत्मानंदसभा)
नवतत्त्व
नियमसार (मुंबई जैन ग्रंथरत्नाकर कार्यालय)
नैषधकाव्य (मुंबई निर्णयसागर प्रेस)
नन्दिसूत्रचूर्णिः (रतलामनी आवृत्ति)
नन्दिसूत्र मलयगिरिटीका (सुरत देवचंद लालभाई)
नन्दिसूत्रलघुटीका (लिखित)
न्यायकुमुदचन्द्रोदय (लिखित)
न्यायदर्शन (काशी-विद्याविलास प्रेस)

न्यायदर्शनवात्स्यायनभाष्य (काशी-विद्याविलास प्रेस)
न्यायप्रवेशसूत्र (वडोदरा गायकवाड ग्रंथमाला)
न्यायप्रवेशसूत्रवृत्ति (वडोदरा गायकवाड ग्रंथमाला)
न्यायबिन्दुप्रकरण (बिब्लिओथेका बुद्धिका नं. ७,१९१८)
न्यायबिन्दुप्रकरणटीका (बिब्लिओथेका बुद्धिका नं. ७,१९१८)
न्यायमञ्जरी (सं० गंगाधरशास्त्री विजयनगर ग्रंथमाला)
न्यायवार्तिक (काशी-विद्याविलास प्रेस)
न्यायवार्तिकतात्पर्यटीका (काशी-विद्याविलासप्रेस)
न्यायसिद्धान्तमुक्तावली (मुंबई निर्णयसागरप्रेस)
न्यायावतार (पाटण हेमचंद्राचार्य ग्रंथमाला)
न्यायावतारटिप्पण (पाटण हेमचंद्राचार्य ग्रंथमाला)
पद्माध्यायी (सुरत जैनविजयप्रेस)
पञ्चाशकटीका (भावनगर जैनधर्मप्रसारक सभा)
पञ्चास्तिकाय (मुंबई रायचंद जैन ग्रंथमाला)
पराशरमाधव (बिब्लिओथेका इन्डिका प्रथमभाग)
परीक्षामुख (सं० घनश्यामदास जैन)
पाइअलच्छीनाममाला (भावनगर सं० बेचरदास जीवराज दोसी)
पाणिनीयव्याकरण (मुंबई निर्णयसागरप्रेस)
पाणिनीयमहाभाष्य (मुंबई निर्णयसागरप्रेस)
पाणिनीयव्याकरणवार्तिक (मुंबई निर्णयसागरप्रेस)
पातञ्जलयोगदर्शनवाचस्पतिमिश्रटीका (काशी-विद्याविलासप्रेस)
प्रमाणनयतत्त्वालोकालङ्कारसूत्र (काशी-यशोविजय ग्रंथमाला)
प्रमाणपरीक्षा (काशी-सनातन जैनग्रंथमाला)
प्रमाणमीमांसा (पूना आर्हतमत प्रभाकर पुस्तकाकार, अमदावाद पोथीआकार)
प्रमेयकमलमार्तण्ड (मुंबई निर्णयसागरप्रेस)
प्रमेयकमलमार्तण्डटिप्पण (मुंबई निर्णयसागरप्रेस)
प्रमेयरत्नकोश (भावनगर जैन धर्मप्रसारक सभा)
प्रवचनसार (मुंबई रायचंद जैन शास्त्रमाला)
प्रवचनसारोद्धार (सुरत देवचंद लालभाई)
प्रशमरतिप्रकरण (कलकत्ता रॉयल एशियाटिक सोसायटी बेंगाल तत्त्वार्थभाष्यपुस्तकान्तः)
प्रशस्तकन्दली (विजयनगर ग्रंथमाला सं० विंध्येश्वरीप्रसाद द्विवेदी)
प्रज्ञापनासूत्र (सुरत देवचंद लालभाई)
प्राकृतपिङ्गल (कलकत्ता सं० चंद्रमोहन घोष)
प्राकृतप्रकाश (काशी-विद्याविलास प्रेस)
प्राकृतमञ्जरी (मुंबई निर्णयसागर प्रेस)
प्राकृतरूपावतार (सं. ई. हुल्श-रॉयल एशियाटिक सोसायटी)
बृहदारण्यकोपनिषत् (पूना आनंदाश्रम संस्कृत ग्रंथमाला)
बृहदारण्यकोपनिषद्भाष्य (पूना आनंदाश्रम संस्कृत ग्रंथमाला)
बृहदारण्यकोपनिषद्भाष्यवार्तिक (पूना आनंदाश्रम संस्कृत ग्रंथमाला)
बृहद्द्रव्यसंग्रह (मुंबई रायचंद जैन शास्त्रमाला)
बृहत्संहिता (काशी-पं. सुधाकर द्विवेदी संपादित)
बोधिचर्यावतार प्रज्ञापारमितापञ्जिका (बिब्लिओथेका इंडिका १५०)
बङ्गीयविश्वकोश (कलकत्ता आवृत्ति)
ब्रह्मसूत्रशाङ्करभाष्य (मुंबई निर्णयसागरप्रेस)
ब्रह्मसूत्रशाङ्करभाष्यभामतीटीका (मुंबई निर्णयसागरप्रेस)
भगवद्गीता (मुंबई निर्णयसागर प्रेस)
भगवतीसूत्र (रायचंद जिनागमसंग्रह)
भगवतीसूत्रटीका (सुरत आगमोदयसमिति)
भामहालङ्कार (मुंबई राजकीय ग्रंथमाला)
मज्झिमनिकाय (सी. वि. राजवाडे संपादित)
मध्यमकवृत्ति (बिब्लिओथेका बुद्धिका नं. ४)
मनुस्मृति (मुंबई निर्णयसागरप्रेस)
महाभारत आदिपर्व (मुंबई निर्णयसागरप्रेस)
महाभारत वनपर्व (मुंबई निर्णयसागरप्रेस)
महाभारत शान्तिपर्व (मुंबई निर्णयसागरप्रेस)
महायानसूत्रालङ्कार (पेरिस १९०७ सं० सिल्वन् लेवी)
महाव्युत्पत्ति (बिब्लिओथेका बुद्धिका नं. १३)
माठरवृत्ति (साङ्ख्यकारिका) (काशी-चोखंबा ग्रंथमाला)
मीमांसादर्शन (काशी-विद्याविलासप्रेस)
यास्कनिरुक्त (मुंबई राजकीय ग्रंथमाला)
योगदर्शन (काशी-विद्याविलासप्रेस)
पातञ्जलदर्शन (काशी-विद्याविलासप्रेस)
रत्नाकरावतारिका (काशी-यशोविजय ग्रंथमाला)
रामायणअरण्यकाण्ड (मुंबई निर्णयसागरप्रेस)
लघीयस्त्रय (मुंबई माणेकचंद दिगंबर जैनग्रंथमाला)
लघीयस्त्रय खोपज्ञ बृहद्वृत्ति (लिखित)
ललितविस्तरा (सुरत देवचंद लालभाई)
लौकिकन्यायाञ्जलि (मुंबई निर्णयसागरप्रेस)
लङ्कावतारसूत्र (कलकत्ता सं. शरच्चंद्रदास अने विद्याभूषण)
वाक्यपदीयमूल (काशी-चोखंबा ग्रंथमाला)
वाक्यपदीयटीका हेलाराजकृता (काशी-चोखंबा ग्रंथमाला)
वाक्यपदीयटीका पुण्यराजकृता (काशी-चोखंबा ग्रंथमाला)
वाचस्पत्यकोश (कलकत्ता)
वात्स्यायनभाष्य (काशी विद्याविलासप्रेस)
व्यासभाष्य (पूना आनंदाश्रमग्रंथमाला)
वायुपुराण (बिब्लिओथेका इंडिका नं. ८५)
विशेषणवती (लिखित)
विशेषावश्यकबृहद्वृत्ति (काशी-यशोविजय ग्रंथमाला)
विशेषावश्यकभाष्य (काशी-यशोविजय ग्रंथमाला)
विज्ञप्तिमात्रतासिद्धि (सं. प्रॉ. सिल्वन् लेवी पेरिस)
वैजयन्तीकोश (मद्रास सहकारीप्रेस)
वैद्यकसिन्धु (कविरत्न उमेशचंद्र गुप्त कलकत्ता)
वैशेषिकदर्शन (मुंबई गूजरातीप्रेस, काशी-विद्याविलासप्रेस)

वैशेषिकद्वात्रिंशिका (भावनगर जैनधर्मप्रसारक सभा)
शाकटायनव्याकरण (मद्रास १८९३ नी आवृत्ति)
शाबरभाष्य (काशी–विद्याविलासप्रेस)
शाश्वतकोश (पूना सं. कृष्णाजी गोविंद ओक)
शास्त्रदीपिका युक्तिस्नेहप्रपूरणीसिद्धान्तचन्द्रिकाव्याख्यायुता (मुंबई निर्णयसागरप्रेस)
शास्त्रवार्तासमुच्चय (सुरत देवचंदलालभाई)
शास्त्रवार्तासमुच्चयस्याद्वादकल्पलताटीका (सुरत देवचंदलालभाई)
शिक्षासमुच्चय (बिब्लिओथेका बुद्धिका नं. १. १९०२ नी आवृत्ति
श्रीभाष्य (मुंबई राजकीय ग्रंथमाला)
श्वेताश्वतरोपनिषत् (मुंबई निर्णयसागरप्रेस)
श्लोकवार्तिक (काशी–चोखंबा ग्रंथमाला)
श्लोकवार्तिकपार्थसारथिमिश्रव्याख्या (काशी–चोखंबा ग्रंथमाला)
षड्दर्शनसमुच्चय (भावनगर आत्मानंद सभा)
षड्दर्शनसमुच्चयबृहद्वृत्ति (बिब्लिओथेका इंडिका नं. १६७)
षड्भाषाचन्द्रिका (सं. कमलाशंकर प्राणशंकर त्रिवेदी) (मुंबई राजकीय ग्रंथमाला)
सनातन जैनग्रन्थमाला प्रथमगुच्छक
सन्मतितर्कप्रकरण (अमदावाद गूजरातपुरातत्त्वमंदिर)
सप्तभङ्गीतरङ्गिणी (मुंबई रायचंद जैनग्रंथमाला)
सर्वदर्शनसंग्रह (पूना भांडारकर प्राच्यविद्यासंशोधनमंदिर)
सर्वार्थसिद्धि (कोल्हापुर जैनेंद्र मुद्रणालय)
सारस्वतव्याकरण (मुंबई निर्णयसागरप्रेस)
सिद्धिविनिश्चय (लिखित)
सुत्तनिपात (पूना–पि. वि. बापट)
सूत्रकृताङ्गसूत्र (सुरत आगमोदयसमिति)
सूत्रकृताङ्गटीका (,,)
सुमङ्गलविलासिनी (पालिटेक्स्ट सोसायटी १८८६)
सूर्यसिद्धान्त (उदयनारायणसिंह आर्यनो हिंदी अनुवाद)
संक्षेपशारीरक (काशी–विद्याविलास प्रेस)
संयुत्तनिकाय (पालिटेक्स्ट सोसायटी १८९८)
साङ्ख्यकारिका (काशी–विद्याविलास प्रेस)
साङ्ख्यतत्त्वकौमुदी (काशी–विद्याविलास प्रेस)
साङ्ख्यदर्शन (काशी–विद्याविलास प्रेस)
साङ्ख्यप्रवचनभाष्य (काशी–विद्याविलास प्रेस)
साङ्ख्यसंग्रह (काशी–विद्याविलास प्रेस)
स्थानाङ्गसूत्र (सुरत आगमोदयसमिति)
स्थानाङ्गटीका (सुरत आगमोदयसमिति)
स्फुटार्थअभिधर्मकोशव्याख्या (बिब्लिओथेका बुद्धिका नं २१)
स्फोटसिद्धिन्यायविचार (त्रिवेन्द्रं–संस्कृतग्रंथमाला)
स्याद्वादमञ्जरी (पूना–आर्हतमतप्रभाकर)
स्याद्वादरत्नाकर (पूना–आर्हतमतप्रभाकर पुस्तकाकार, अमदावाद पोथी आकार)
स्वयंभूस्तोत्र (श्रीधर प्रेस सोलापुर)
हेतुमुख
हेतुबिन्दुतर्कटीका (अमदावाद गूजरातपुरातत्त्वमंदिर लिखित)
हैमअनेकार्थकोश (सं. थीयोडोर जचेरी एज्युकेशन सोसायटी प्रेस)
हैमच्छन्दोऽनुशासन (मुंबई निर्णयसागर आवृत्ति)
हैमतत्त्वप्रकाशिका बृहन्न्यास (हेमचंद्राचार्य ग्रंथमाला पाटण)
हैमधातुपारायण (मुंबई सं. जोह० किर्स्ट एज्युकेशन सोसायटी प्रेस)
हैमप्राकृतव्याकरण (मुंबई राजकीय आवृत्ति)
हैमव्याकरणबृहद्वृत्ति (अमदावाद आवृत्ति)
हैमव्याकरण (अमदावाद आवृत्ति)

गूजरात विद्यापीठ द्वारा प्रकाशित

पुरातत्त्व मंदिर ग्रन्थावली

आर्यविद्यापाठावली

१७ **वैदिक पाठावली**—सं० श्री० रसिकलाल छोटालाल परीख. किं० ३–८–०
५ **उपनिषत्पाठावली**—सं० श्री० दत्तात्रेय बाळकृष्ण कालेलकर. किं० ०–१२–०
१ **पालीपाठावली**—सं० श्री० जिनविजयजी. किं० ०–१४–०
२ **प्राकृतकथासंग्रह**— ,, ,, किं० ०–१२–०

मूळ पालीग्रन्थ

६ **अभिधम्मत्थसंगहो**—(बौद्ध तत्त्वज्ञाननो प्राथमिक ग्रंथ)
सं० अ० धर्मानंद कोसम्बी. किं० २– ०–०
९ **अभिधानप्पदीपिका**—(पाली भाषानो शब्दकोष)
सं० श्री० जिनविजयजी किं० ५– ०–०

गूजराती भाषामां बौद्ध ग्रन्थो

१२ **धम्मपद**—सं० अ० धर्मानंद कोसम्बी. किं० १– ०–०
१३ **समाधिमार्ग**—,, ,, किं० ०–८–०
१४ **बौद्धसंघनो परिचय**—,, ,, किं० २– ०–०
७ **बुद्धलीलासारसंग्रह**—ले० ,, किं० २–८–०

जैन तत्त्वज्ञानना ग्रन्थो

१० **सन्मतितर्क भाग १**—सं० पं० सुखलालजी तथा पं० बेचरदास दोशी किं० १०–०–०
१६ ,, ,, २— ,, ,, ,, ,, ,, ,, ,,
१८ ,, ,, ३— ,, ,, ,, ,, ,, ,, ,,
१९ ,, ,, ४— ,, ,, ,, ,, ,, ,, ,,
२० **तत्त्वार्थसूत्र** (गूजराती) वि० पं० सुखलालजी ,, २–४–०
२१ **सन्मतितर्क भाग ५**—सं० पं० सुखलालजी तथा पं० बेचरदास दोशी ,, १०–०–०

व्याकरणग्रन्थ

१५ **प्राकृत व्याकरण**—(गूजराती भाषामां प्राकृतभाषानुं व्याकरण)
ले० पं० बे० जी० दोशी किं० ४– ०–०

अलंकारग्रन्थ

११ **काव्यप्रकाश**—अनु० श्री० रामनारायण विश्वनाथ पाठक अने श्री० र. छो. परीख. किं० १–८–०

गूजराती साहित्यने दीपावनारा ग्रन्थो

३ आर्यविद्याव्याख्यानमाळा—छींटनी पट्टी. किं० २—०—०

चामडानी पट्टी. किं० २—८—०

४ प्राचीन साहित्य—(श्रीरवीन्द्रनाथ टागोरना पुस्तकनो अनुवाद) किं० ०—७—०

८ आर्योना तहेवारोनो इतिहास—ले० ऋग्वेदी. किं० ३—८—०

प्राचीन गूजरातीगद्यसंदर्भ—सं० श्री० जिनविजयजी. किं० ३—०—०

गूजरात विद्यापीठ द्वारा प्रकाशित

श्रीरायचन्द्र जिनागमसंग्रह

भगवतीसूत्र भाग १—(मूल अने टीकाना गूजराती अनुवाद सहित)

अनु० पं० बे. जी. दोशी किं० ९—०—०

,, ,, २— ,, ,, ,, ,, ,, ,,

,, ,, ३— अनु० पं० भगवानदास दोशी. ,, १०—०—०

,, ,, ४— ,, ,,

श्रीपूजाभाई जैन ग्रंथमाला

१ सुत्तनिपात (बौद्ध ग्रंथ)

गूजरातीमां अनुवादकः—अध्यापक धर्मानन्द कोसम्बी

२ भगवान महावीरनी धर्मकथाओ (नायाधम्मकहाओनो अनुवाद)

अनुवादकः—पंडित बेचरदास दोशी

छपाता ग्रंथो

३ मज्झिमनिकाय (बौद्ध ग्रंथ)

गूजरातीमां अनुवादकः—अध्यापक धर्मानंद कोसम्बी

४ भगवान महावीरना दश श्रावको (उपासकदशानो अनुवाद)

अनुवादकः—पंडित बेचरदास दोशी

५ सन्मति प्रकरण (गूजराती व्याख्या विवेचन अने विस्तृत प्रस्तावना सहित) वि० पं० सुखलालजी तथा पं० बेचरदास दोशी

पुरातत्त्व प्रकाशित भाग १—२—३—४—५.

पुरातत्त्व त्रैमासिकना आज सुधीमां प्रकट थइ चुकेलां १,२,३,४ अने ५ पुस्तकोनी बांधेली थोडी नकलो तैयार छे. ए दरेक पुस्तकमां जैन, बौद्ध अने हिंदु साहित्यने लगता अनेक प्रकारना अने उच्च कोटिना अनेक लेखोनो उत्तम संग्रह थयेलो छे. प्रत्येक पुस्तकभंडारमां अने विद्वान् अभ्यासिओए गृहसंग्रहमां ए पुस्तको अवश्य संग्रहवा योग्य छे.

मूल्य दरेक पुस्तकनुं रू० ५—१२—० टपाल खर्च जुदो.

प्राप्तिस्थान—

मंत्री—गूजरात पुरातत्त्वमंदिर,

अमदावाद

Rinsen Buddhist Text Series VI-2
サンマティタルカ

Siddhasena Divākara : Sammatitarka Prakaraṇam, with Abhayadevasūri's Commentary : Tattvabodhavidhāyinī
Volume II

1984年9月1日 複製第1刷発行 全二冊 定価16,000円

発行者 片岡英三
印刷 明文堂印刷所
製本 新生製本株式会社

発行所 株式会社 臨川書店
京都市左京区今出川通川端東入
(〒606) 郵便振替 京都7-800番
電話 (075) 721-7111

RINSEN BOOK CO.
P.O.BOX: SAKYO 8/IMADEGAWA
KAWABATA, SAKYO-KU,
KYOTO 606, JAPAN